CC-0. In Public Domain. Digitization by eGangotri

Almira 2
Shelf 4
9

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

४०५२

॥ श्रीकाशीजीमेमहल्लाघुघुरानासामाकीगली श्रीयुतबाबूहरखचंदजीकेबाडेमेदुर्गाप्र॥
॥ सादकदारेकेगणेशयंत्रालयमेसिद्धांतकौमुदीतत्वबोधिनीटीकासंयुक्तछापीगईलिखाम॥
॥ हसपांडेनेछापनेवालागोपालजिसेलेनाहोयसोचांदनीचौकमेकुंजगलीकेपच्छिमफाटक॥
॥ केपासदुर्गाप्रसादपोथीवालेकीदुकानमेमिलेगी ॥

CC-0. In Public Domain. Digitization by eGangotri

सु.प.
सि.कौ.
टी.त.
१

॥श्रीगणेशाय नमः॥ श्रीगुरुभ्यो नमः॥ नत्वा गजाननं देवं शारदां च गुरून्निजान्। बालानां बोधकर्त्रीयं लिख्यते तत्त्वबोधिनी ॥१॥ नत्वा विश्वेश्वरं सांबं कृत्वा च गुरुवंदनं। सिद्धांतकौमुदीव्याख्या क्रियते तत्त्वबोधिनी ॥२॥ विघ्नविघाताय कृतं मंगलं शिष्यशिक्षायै निबध्नन्चिकीर्षितं प्रतिजानीते॥ मुनित्रयमित्यादिना। त्रयोऽवयवा यस्य तत्त्रयं संख्याया अवयवे तयप् द्वित्रिभ्यां तयस्यायज्वा। मंतारो वेदशास्त्रार्थतत्त्वावगंतारो मुनयः मनेरुच्चेत्यौणादिकसूत्रेण मनेरत उकारो मनेः परश्च इन्प्रत्ययश्च गुणस्तु नेह भवति। किदित्यनुवर्तनात्तत्परकारणाद्वा। तेषां पाणिनिकात्यायनपतंजलीनां त्रयं मुनित्रयं॥ ननु स्वयंभुवे नमस्कृत्येत्यत्रेवात्रापि नमःस्वस्तीत्यादिना चतुर्थी स्यादिति चेन्मैवम्। उपपदविभक्तेः कारकविभक्तिर्बलीयसीति वक्ष्यमाणत्वान्नमस्करोति देवानितिवद्द्वितीयाया एव प्रवृत्त्वात्। किंच जहत्स्वार्था वृत्तिरिति पक्षे नमःशब्दस्यात्र निरर्थकत्वान्न योगे चतुर्थी न भवति अर्थवद्ग्रहणपरिभाषायाः प्रवृत्तेः। स्वयंभुवे नमस्कृत्येत्यत्र तु स्वयंभुवमनुकूलयितुमित्यर्थे विवक्षायां क्रियार्थोपपदस्येत्यादिना चतुर्थीति मूले एव स्फुटीभविष्यति न चैवं नमःस्वस्तीति सूत्रेण नमःपदस्य व्यर्थमिति वाच्यं हरये नम इत्यत्र तु हरिमनुकूलयितुमित्यर्थे विवक्षिते संबंधसामान्ये षष्ठ्यां प्राप्तायां तदपवादतया तस्यावश्यकत्वात्। न तु सूक्तिरिति। तेषां पाणि-

॥श्रीगणेशाय नमः॥ पाणिनये नमः॥ मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च। वैयाकरणसिद्धान्तकौमुदीयं विरच्यते ॥ १॥

न्यादीनां मुनीनामुक्तीः सूत्रवार्तिकभाष्याणीत्यर्थः तस्य मुनित्रयस्योक्तीरिति व्याख्यानेपि मुनिसमुदायेन सूत्रं वार्तिकं भाष्यं वा नोक्तमिति समुदायिनां मुनीनामेवोक्तीरिति पर्यवस्यति॥ परिभाव्येति पर्यालोच्येत्यर्थः। न च परिपूर्वस्य भवतेस्तिरस्कारार्थत्वात्कथमत्र ज्ञानार्थतेति शंक्यं परीत्यस्य भावीति चुरादिणिजंतेन योगात्। केचित्तु भवतिना योगमभ्युपेत्याहुः परौ भुवोऽवज्ञान इति विशेषणान्न तिरस्कारार्थत्वनियमः। मनसा परिभाव्य किंचिदित्यादिश्रीहर्षप्रयोगाच्च। अत एव वाचाप्रयुक्तत्वदोषशंकापि नास्तीति। अन्ये तु अनादरः परिभवः परिभावस्तिरस्क्रियेति कोशात्परिपूर्वकाद्भवतेर्घञंतादेव तिरस्कारप्रतीतिर्नान्यस्मादित्याशंकैवात्र नास्ती त्याहुस्तन्मंदम्। परिभूय परिभवतीत्यत्रापि तिरस्कारप्रतीतेः। वैयाकरणेति। व्याकरणमधीयते विदंति वा वैयाकरणाः तत्सिद्धांतानां कौमुदी प्रकाशिकेत्यर्थः। निर्दुष्टसकलजनाल्हादकत्वसाम्येन कौमुदीशब्दप्रयोगः। करिष्यमाणया अपि कौमुद्याः बुद्ध्या संनिधापितत्वादियमित्यंगुल्या निर्देशः। विरच्यत इति मयेति शेषः रच प्रतियत्ने प्रतियत्नो गुणाधानं विपूर्वादस्माद्वर्तमानसामीप्ये भविष्यदर्थे वर्तमानप्रत्ययः॥ ॥

सूत्रे परौ भुव इत्यस्यावज्ञान इति ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अइउण्। णानुबंधोऽणसंज्ञार्थः। याया संज्ञा सा साफलवती॥ ऋऌक्। ककारस्त्वक् इक् उक् संज्ञार्थः। एओङ्। इति ङकारएङ् संज्ञार्थः। ऐऔजिति चकारस्त्वच् इच् एच् ऐच् संज्ञार्थः वर्णानामसंदिग्धत्वेन बोधनाय संहितायाअविवक्षणादेतेष्वसंधिः। स्वराणां चादिषु पाठाच्चादयोसत्व इति निपातसंज्ञायां निपातएकाजनाङिति प्रगृह्यत्वे प्रकृतिभावान्न संधिरित्यन्ये। स्यादेतत्। अकाराद्युपदेशे नयथा तत्सवर्णानामाकारादीनां लाभान्न पृथगाकारादयो नोपदिष्टास्तथा ऋऌवर्णयोरपि सावर्ण्ये रकारोपदेशेनैव भयसिद्धेः। किं पृथगुपदेशेन। नच जातिपक्षे ऋऌवर्णयोः पृथगुपदेश आवश्यकस्तयोर्भिन्नजातित्वादिति वाच्यं। सावर्ण्यादेवैकजात्युपदेशे जात्यंतरस्यापि लाभात्। ऋऌवर्णयोः प्रत्येकं त्रिंशतः संज्ञासिद्धयेऽपुदित्स वर्णस्येति सूत्रेऽणग्रहणस्य जातिपक्षेऽप्यावश्यकत्वादिति चेदत्राहुः। ऋऌवर्णयोः सावर्ण्यस्यानित्यतां ज्ञापयितुं उभयोर्निर्देशः तत्फलं तु कृताशिखायस्येति क्लृप्तशिखस्य स्यदूरात्संबोधने क्लृप्तशिखेति प्लुतः। ऋऌवर्णयोः सावर्ण्यस्यानित्यत्वे तु अनृत इति पर्युदासादकारस्येव लकारस्यापि प्लुतो न स्यादिति समाधानांतरमप्योगुणाद्यत्र द्रष्टव्यं।

अइउण्। ऋऌक्। एओङ्। ऐऔच्। हयवरट्। लण्। ञमङणनम्। झभञ्। घढधष्। जबगडदश्। खफछठथचटतव्। कपय्। शषसर्। हल्। इति माहेश्वराणि सूत्राणि। अणादिसंज्ञार्थानि। एषामन्त्या इतः। लण् सूत्रेऽकारश्च। हकारादिष्वकार उच्चारणार्थः। हलन्त्यम्। १।३।३। हलिति सूत्रेऽन्त्यमित्स्यात्। आदिरन्त्येन सहेता। १।१।७१। अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात्। इति हल्संज्ञायां॥ ११ व्याख्या हयवरट्। टानुबंधोऽट्संज्ञार्थः। हकारोपदेशस्त्वट् अश् हश् इण् यण् हलां षु हकारग्रहणार्थः। अर्हेणा अड्व्यवाय इति णत्वं देवा हसंति मोभगो इति रोर्यत्वं देवो हसति हाशि चेत्युत्वं। लिलिहि ढ्वे लिलिहिध्वे। विभाषेट इति वाढत्वं। लण्। णकारानुबंधोऽण् इण् यण् संज्ञार्थः। नन्वणिति पूर्वणकारेण कचिद्गृह्यते कचित्तु परणकारेण। इणिति तु परणकारेणैव। तथा च निःसंदेहाय अनुबंधांतरमेव कर्तुमुचितं। सत्यमाव्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणमिति परिभाषाज्ञापनाय पुनर्णकारानुबंध इति स्थितमाकरे। ञमङणनम् मकारस्त्वम् अम् यम् ङम् मसंज्ञार्थः। झभञ्। ञकारो यञ् संज्ञार्थः। घढधषिति षकारस्तु झष् भष् संज्ञार्थः। जबगडदशिति शानुबंधोऽश् हश् वश् झश् जश् बश् संज्ञार्थः॥ खफछठथचटतव् इति सूत्रे वकारस्तु छव् संज्ञार्थः॥ कपयिति यकारो यय् मय् झय् खय् चय् संज्ञार्थः॥ शषसरिति रेफस्तु यर् झर् खर् चर् शर् संज्ञार्थः। हलिति लकारस्तु अल् हल् वल् रल् झल् शल् संज्ञार्थः। पुनर्हकारोपदेशस्तु वल् रल् झल् शल् हकारग्रहणार्थः। रुदिहि। स्वपिहि। रुदादिभ्यः सार्वधातुके इति वलादिलक्षण इट्। स्निहित्वा। स्नेहित्वा। नन्वा

सेडितिनिषेधं बाधित्वा रलो व्युपधादिति वा कित्त्वं। अदाग्धाम्। ध त्वस्यासिद्धत्वेऽपि हकारस्य झल्त्वात् झलो झलीति सलोपः। अलि सत्त्वात्। शल इति क्तः। ननु पुनर्हकारस्यावश्यकत्वेऽपि
वर्णमध्ये हकारं पठित्वा। अलोऽन्त्यस्य हलोनंतराः संयोगः। झलो झलि शल इगुपधेत्यादिसूत्राणि यावंति तानुबंधानि तानि अलोऽन्त्यस्य हलोनंतरा इत्येवं रूपेणारेफानुबंधान्येव च क्रि
त्वा हलिति पृथक्सूत्रं त्यज्यतां मैवं। तथा हि सति हरिर्हसति हरिर्हरिरित्यादिर्न सिध्येत्। तत्र खरवसानयोर्विसर्जनीयो वा शरीत्यादिप्रसंगात् इतो हलिति सूत्रमावश्यकमेव एवं च हलि
तिसूत्रेऽन्त्यमिति वक्ष्यमाणग्रंथोऽपि स्वरसतः संगच्छते। अणादिसंज्ञार्थानीति। अणादिसंज्ञार्थः प्रयोजनं येषां तानि इति विग्रहः। अणादिसंज्ञाभ्य इमानीत्यस्य पदविग्रहो वा। अर्थेन नित्यस
मासो विशेष्यलिंगता चेति वक्ष्यमाणत्वात्। एषामंत्या इत इति एषां सूत्राणामंत्याः णादयो हलंत्यमित्यनुपदं वक्ष्यमाणेनेत्संज्ञका इत्यर्थः। लणसूत्रेऽकारश्चेति। अनंत्यत्वात् पृथगु
क्तिः। वचनविपरिणामेन इदिति संबध्यते इत्संज्ञा चास्योपदेशेऽजनुनासिक इदित्यनेन। एवं च णादिभिरिड्भिराद्विरंत्येनेति वक्ष्यमाणेन प्रत्याहारग्रहणे णादिसंज्ञार्थानीति य
दुक्तं तत्संगच्छत इति भावः। अकार उच्चा रणार्थ इति। ननु लणसूत्रस्याकार इव प्रयोजनार्थ इत्यर्थः। हलंत्यं। अंते वसाने भवमंत्यम् दिगादित्वाद्यत्। उपदेशेऽजनुनासिक
इदित्यत उपदेशे इदिति चात्रानुवर्तते। आदिरंत्येनेति सूत्रे णसहान्योऽन्याश्रयमाशंक्य आहत्या तं परिहरति। हलिति सूत्रेऽन्त्यमिति हलि अंत्यमिति योगविभागात् सुप्सुपेति वास
मास इति भावः। यद्वा षष्ठीतत्पुरुषोऽयं। हलिति सूत्रस्यान्त्यमित्यादि इति व्याख्यानसंभवात्। आदिरंत्येन सहेता। अंत्येनेति किं। सुडिति प्रत्याहार तृतीयैकवचनावयवेन माभूदिति काशि
कायां तात्पर्यं यद्यपि टकारांतं संघप्लट कारोऽप्यंतो भवति तथाप्यंतेनेति ग्रहणसामर्थ्यादंत्यत्वप्रयुक्ता यस्येत्संज्ञा तेनैव प्रत्याहारः। न हि ठाठकारे हलंत्यमितीत्संज्ञा प्रवर्तते नचैवं प्रत्याहा
रासिद्धिः। लणसूत्रस्यावर्णस्यानुनासिकत्वप्रतिज्ञासामर्थ्यादनंत्येनापि इत्ता प्रत्याहारात्त्सिध्यतीति काशिकाकाराशयः निष्कर्षस्त्विह स्वौजसमौडिति सूत्रे दर्शयिष्यते विस्तरस्तु
शब्दकौस्तुभेऽनुसंधेयः। इतेति किं। रप्रत्याहारो यथा स्यात्। सत्यनुनासिकत्वप्रतिज्ञासामर्थ्यादनंत्येनापि गृह्यत इत्युक्तं। न चैतदिते त्यस्य विरहे लभ्यत इति शब्दकौस्तुभे स्थितं। अ
द्यंताभ्यामवयवाभ्यामवयवी समुदाय आक्षिप्यते। तस्य च युगपत्त्वप्रयोगाभावात् दवयवेष्ववतरंती संज्ञा मध्यगेषु विश्राम्य तिनत्वाद्यंतयोः संज्ञा स्वरूपांतर्भावेन तयोः पारार्थ्य
निर्णयादित्याशयेनाह। मध्यगानामिति स्वस्य चेति स्वरूपमित्यनुवर्तत इति भावः। स्वं रूपं चादेरेव गृह्यते नांत्यस्य। अंत्येनेत्यप्रधाने तृतीया निर्देशात्। सर्वनाम्नः उत्सर्गतः प्रधानपरा
मर्शित्वात्। ननु स्वमित्यस्यानुवृत्तौ कः संज्ञीत्याकांक्षायाः शांतत्वादवयव्याक्षेपो न स्यात्। तत्र पाचको यणचीत्यादाविकारस्यस्याने यकारः स्यादकारे परे इत्येवमर्थः स्यात् मैवं। आदेरेव संज्ञित्वे
तु आदिरंत्येनेति संज्ञाकरणस्यैव वैयर्थ्यापत्तेः किं च। अण् अक् अच् अम् अशादीनां पृथक्निर्देशोऽपि व्यर्थः स्यात् सर्वत्र अकारस्यैव संज्ञित्वादिति दिक्। शब्दकौस्तुभे तु आद्यंतावयवद्वारा समुदा

विग्रहे सप्तमीति ६

2

CC-0. In Public Domain. Digitization by eGangotri

उपदेशेऽन्त्यं हलिति उपदेशे किम् अग्निचित् सोमसुत् इति काशिका अत्रेत्संज्ञायां लोपः स्यात् न च तुको वैयर्थ्यं आगत्येत्यादौ चरितार्थत्वात् न च क्विपः पित्त्वस्य वैयर्थ्यं अग्निचि
ता वित्यादौ चरितार्थत्वादिति हरदत्तः अंत्यं किं मनिनो मकारस्य माभूत् सत्यां हीत्संज्ञायामंत्यादचः परः स्यात् वेश्म सद्म सर्वधातुभ्यो मनिन् हलिति किं भूसत्तायां भविता नच प्रयो
जनाभावान्नेत्वमिति वाच्यं सत्यामित्संज्ञायामुदित इति इड्विकल्पापत्तेः अन्त्ये तु विरिणोति जिरिणोतीत्यत्र धातोरंत्यस्य माभूत् सत्यामित्संज्ञायामिदित इति नुम् स्यादित्याहुः आद्यो
च्चारणमिति आद्योच्चारणविषयीभूतो यः शब्दस्तस्यांत्यं हलित्स्यादिति फलितार्थः उपदेशेऽजनु उपदेशनमुपदेशो भावे घञ् उपदेशे किं अत्रआंअपः सप्तम्यर्थे द्योतको त्राङ्
आङोऽनुनासिकश्छन्दसीत्याकारोऽनुनासिकः यद्यप्यत्र उञ् ऊँ इत्यत्रैवानुनासिकविधानसामर्थ्यान्नेत्वमिति सुवचं तथाप्युत्तरार्थमवश्यं कर्तव्यमुपदेशग्रहणस्य प्रतिप
त्तये इहैव वक्तं अक्किम् मनिनो मकारस्य माभूत् नच हलन्त्यमित्यन्त्यग्रहणसामर्थ्यादनंत्यस्य मकारस्य न भवेदिति वाच्यं आलचू इत्यत्रालचप्रत्ययादावतिप्रसंगवारणे
न तस्य चरितार्थत्वात् अनुनासिक इति किं ईक्षदर्शने ईक्षितः सत्यां हीत्संज्ञायां श्वीदितो निष्ठायामितीण् न स्यात् यदप्यत्रोपजीव्यत्वादनुनासिकसंज्ञा प्रथमं वक्तुमुचिता

हलन्त्यम्॥ उपदेशेऽन्त्यं हलित्स्यात्॥ उपदेश आद्योच्चारणं ततोऽण् अच् इत्यादिसंज्ञासिद्धौ॥ उपदेशेऽजनुनासिक इत्॥१।३।२॥ उपदे
शेऽनुनासिकोऽजित्संज्ञः स्यात् प्रतिज्ञानुनासिक्याः पाणिनीयाः लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा प्रत्याहारेष्वि

तथापि नासिकामनुगत इति योगाश्रयणेनैव गतार्थत्वादनुनासिकसंज्ञासूत्रं मंदप्रयोजनमिति ध्वनयितुं नेहोपन्यस्तं नचैवं यरोऽनुनासिक इत्यत्र यरः तां न ग्रहणं
पदांतस्यानुनासिकशब्दे परे अनुनासिकशब्दः स्यादित्यर्थः प्रसज्येत स्वं रूपमिति परिभाषोपस्थानात् संज्ञाकरणे तु अशब्दसंज्ञेति निषेधान्नायं दोष इति वाच्यं उक्तपरिभाषाया
भाष्ये प्रत्याख्यानात् उपान्मंत्रकरणे पुकु भांड चीवराणि ङ ङ् सुस्थित्यमित्यादिनिर्देशेन स्वंरूपमिति परिभाषाया अनुपस्थितिकल्पनात् सूत्रमतेपि दोषाभावात् नन्वुक्तनिर्दे
शाश्रयणेन प्रतिपत्तिगौरवमिति चेत् अत एव निष्प्रयोजनमित्यनुक्त्वा मंदप्रयोजनमित्युक्तं प्रतिज्ञायत इति प्रतिज्ञा आतश्चोपसर्ग इति कर्मण्यङ् अनुनासिकस्य भाव आ
नुनासिक्यं गुणवचनब्राह्मणादिभ्य इति ष्यञ् प्रतिज्ञा आनुनासिक्यं येषामिति विग्रहः केचित्तु प्रतिज्ञानं प्रतिज्ञा सा अस्यास्तीति प्रतिज्ञं अर्शआद्यच् प्रतिज्ञमानुनासिक्यमेषा
मिति विग्रहंति यद्यपि सूत्रकारकृतोऽनुनासिकपाठ इदानीं परिभ्रष्टस्तथापि वृत्तिकारादिव्यवहारबलेन यथाकार्यं प्राक् स्थितं इत्यनुमीयत इति भावः पाणिनीया इति पाणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु·मु·
सि·कौ·
टी·त·
३

निनाप्रोक्तंपाणिनीयं वृद्धाच्छः तदधीयते तद्विदंतिवापाणिनीयाः तदधीतेइत्यण् प्रोक्ताल्लुगिति लुक् नलुग्लयोरितिनूनं ङकारस्यापिमध्यगत्वादनआह प्रत्याहारेष्विति॥ःः॥
अनुनासिकइत्यादीति आदिशब्देनपाणाणिकेकुत्सितेश्वेङःपदान्तादतिइत्यादिग्रहणं प्रत्याहारशब्देनेति प्रत्याक्रियन्तेसंक्षिप्यन्तेवर्णायत्रेतिप्रत्याहारःकरणाधिकरणयोश्चेति
ल्युटिप्राप्तेकृत्यल्युटोबहुलमितिबहुलग्रहणादधिकरणेघञ् यद्यपियोगमात्रमकारादिसंज्ञास्वतिप्रसक्तंतथापियोगरूढिरितिभावः ऊकालोच् ह्रस्वदीर्घप्लुतइतिसमा।
हारद्वंद्वेसौत्रंपुंस्त्वं अज्झीतित्रयाणांप्रश्लेषेणनिर्देशइत्याह उश्चऊश्चऊ३श्चेति वः वामितित्रयाणांसवर्णदीर्घेकृतेजसिपरतोयणिवः आमितुवांकालइवकालोयस्येतिफलितार्थ
कथनमिदं विग्रहस्तुवःकालोयस्येतिबोध्यः उशब्देनस्वोच्चारणकालोलक्ष्यते अच्किम् संयोगस्यमाभूत् प्रतक्ष्य प्ररक्ष्य कषयोरेकमात्रत्वेनह्रस्वसंज्ञायांह्रस्वस्यपितिकृतीतिनु

अनुनासिकइत्यादिनिर्देशात् नह्यत्रककारेपरेऽच्कार्यंदृश्यते आदिरन्त्येनेत्येतत्सूत्रेणकृताःसंज्ञाःप्रत्याहारशब्देनव्यवह्रियन्ते॥ऊका।
लोज्झ्रस्वदीर्घप्लुतः।१।२।२७।उश्चऊश्चऊ३श्चवः वांकालइवकालोयस्यसोच् क्रमात् ह्रस्वदीर्घप्लुतसंज्ञस्स्यात् सप्रत्येकमुदात्तादिभेदेन
त्रिधा।उच्चैरुदात्तः१।२९ ।ताल्वादिषुसभागेषुस्थानेषूर्ध्वभागेनिष्पन्नोऽजुदात्तसंज्ञःस्यात् आयेनी चैरनुदात्तः।१।२।३०।स्यष्ट।अर्वाङ्‌ समाहा
रः स्वरितः।१।२।३१ ।उदात्तानुदात्तत्वेवर्णधर्मौसमाह्रियेतेयस्मिन् सोऽच् स्वरितसंज्ञः स्यात्॥६॥ कृस्यात् आयेइति निपातआद्युदात्तःइ।
त्याकारउदात्तःयच्च च्चस्फिषइत्यंतोदात्तः ततःपरस्यजसःसुप्त्वादनुदात्तत्वं त्यदाद्यत्वेपररूपत्वेशीभावेआद्गुणेचसति एकादेशउदात्तेनेत्येकारउदात्तः अर्वाङितिअर्वं
तमंचतीतिअर्वाङ् ।ऋत्विगादिनाअंचतेःसुप्युपपदेक्विन् अर्गनावित्यस्मात्स्नामदिपद्यर्तीत्यादिनावनिपिगुणेचनिष्पन्नोर्वन्शब्दोधातुस्वरेणाद्युदात्तःवनिपःपित्वेनानु राम
दात्तत्वात् अंचतेरकारोपिधातुस्वरेणपित्स्वरेणवाउदात्तःउपपदमतिङितिसमासेकृतेसमासस्येतिस्वरेणतदपवादभूतेनगतिकारकोपपदात्कृदितिकृदुत्तरपदप्रकृतिस्व ३
रेणवाअंचतेरेकारउदात्तः वनोनलोपेसवर्णदीर्घेचकृतेएकादेशउदात्तेनेत्याकारउदात्तइतिअनुदात्तंपदमेकवर्जमितिशेषनिघातादाद्याकारोत्रानुदात्तःएतच्चसंभवाभिप्रा।
॥येणोक्तं वेदभाष्ये अर्वाङ् अभिमुखइतिस्थितं अतंत्रमिति अविवक्षितमित्यर्थः॥६॥

3

CC-0. In Public Domain. Digitization by eGangotri

तस्य चोदात्तस्वरितपरत्व इति उदात्तस्वरितौ परौ यस्मात्तदुदात्तस्वरितपरं तस्य भावस्तत्त्वं तस्मिन् संति उदात्तो वा स्वरितो वा परश्चेत्पूर्वस्य स्वरितस्य यदुत्तरार्द्धं अनुदात्तं तस्य श्रवणं स्प
ष्टमित्यर्थः अन्यत्रेति उदात्तस्वरितपरत्वाभावे क्वेति किमोत् नित्स्वरितं वइति अनुदात्तं सर्वमपादादावित्यधिकारादनुदात्तः अग्न्याइति अग्नेः कनिनित्स्वरेणाद्युदात्तं संहिता
यां त्वेकादेश उदात्तेनोदात्तइत्योकार उदात्तः उदात्तपरत्वे ह्रस्वस्वरितस्योदाहरणमुक्त्वा दीर्घस्वरितोदाहरणमाह रथानांनयेऽराइति ये अराइति पदद्वयमपि फिट्स्वरेणांतोदात्तत्वमेकादे
शास्तु पक्षे स्वरितः स्वरितो वानुदात्ते पदादावित्युक्तेः स्वरितपरत्वे उदाहरणमाह शतचक्रमिति यइति फिट्स्वरेणांतोदात्तः ततः परस्य सकारस्य रुत्वे उत्वे कृते आद्गुणे च उदात्तेन।

तस्यादित उदात्तमर्द्धह्रस्वं १।३२ ह्रस्वग्रहणमतंत्रं स्वरितस्यादितोर्द्धं उदात्तं बोध्यं उत्तरार्द्धं तु परिशेषादनुदात्तं तस्य चोदात्तस्वरित
परत्वे श्रवणं स्पष्टं अन्यत्र तूदात्तश्रुतिः प्रातिशाख्ये प्रसिद्धः क वोश्वाः रथानांनयेराः शतचक्रंयोत्स्य इत्यादिष्वनुदात्तः अ
ग्निमीले पुरोहितमित्यादावुदात्तः श्रुतिः सनवविधोपि प्रत्येकमनुनासिकाननुनासिकत्वाभ्यां द्विधा॥ मुखनासिकावचनोनुनासि
कः।१।१।८। मुखसहितनासिकयोच्चार्यमाणो वर्णो ——— नुनासिकः संज्ञः स्यात्॥ तदित्थं अइउऋ एषां प्रत्येकमष्टादशभे
दाः ऌवर्णस्य द्वादश तस्य दीर्घाभावात् एचामपि द्वादश तेषां ह्रस्वाभावात्॥ १कादेशादोकार उदात्तः अत्स्यइति स्वरितांतत्वादकारस्य
शेषनिघातत्वे ओकारेणासह एकादेशे च कृते स्वरितो वानुदात्ते पदादावित्योकारः स्वरितः कथमत्स्यस्य स्वरितांतत्वमिति चेत् अत्राहुः अहव्याशाविति स्मात्कर्मणि यत्
त तित्स्वरितं वृद्ध्यभावस्तु संज्ञापूर्वकविधेरनित्यत्वादिति अग्निमीलइति ईकारस्वरितः लेइति तु प्रचयापरपर्याया एकश्रुतिरिति च स्वरप्रक्रियायां मूल एव स्फुटीभ
विष्यति मुखनासिका मुखं च नासिका चेति विग्रहे प्राण्यंगत्वादेकवद्भावे मुखनासिकमिति स्यादत आह मुखसहितेति नासिकयोच्चार्येति फलितार्थकथनमिदं उच्चा
र्यतेनेति वचनं मुखनासिकावचनमस्येति विग्रहः तुल्यास्य आस्ये भवमास्यं शरीरावयवाद्यदित्यभिप्रेत्याह ताल्वादीति आभ्यंतरेति एतच्च प्रशब्दबलाल्लभ्यते ओष्ठात्प्रभृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तुल्यास्यं किं नश्नी अत्र षकारस्य नकारे परे जरोजरीति लोपो मा भूत् प्रयत्नग्रहणं किं वाक्श्च्योतति इति शस्य लोपो न ञमङणनानामिति नासिका चेति चकारेण स्वस्ववर्गी
नुकूलं तालवादि समुच्चीयते एदैतोरित्यादौ तपरत्वमसंदेहार्थं न तत्कालग्रहणार्थं तेन प्लुतस्यापि संग्रहः चतुर्द्धेति निष्कर्षपक्षे तु पंचधा ऊष्मणामीषद्विवृतप्रयत्नाभ्युपगमा
त् स्पृष्टेषत्स्पृष्टेति एतेषामाभ्यंतरत्वं वर्णोत्पत्तिप्राग्भावित्वात् तथाहि नाभिप्रदेशात्प्रयत्नप्रेरितो वायुः प्राणो नाम ऊर्ध्वमाक्रामन् उरःप्रभृतीनि स्थानान्याहंति ततो वर्णस्य तदभि
व्यंजकध्वनेर्वा उत्पत्तिः तत्रोत्पत्तेः प्राग्यदा जिह्वाग्रोपाग्रमध्यमूलानि तत्तद्वर्णोत्पत्तिस्थानं तालवादि सम्यक् स्पृशंति तदा स्पृष्टता ईषद्यदा स्पृशंति तदा ईषत्स्पृष्टता समीपावस्थानमा

तुल्यास्यप्रयत्नं सवर्णं ।१।१।९। ताल्वादिस्थानमाभ्यंतरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णं स्यात् अकुहविसर्जनीयानां कंठः इ
चुयशानां तालु ऋटुरषाणां मूर्द्धा लृतुलसानां दंताः उपूपध्मानीयानामोष्ठौ ञमङणनानां नासिका च एदैतोः कंठतालु ओदौतोः।
कंठोष्ठं वकारस्य दंतोष्ठं जिह्वामूलीयस्य जिह्वामूलं नासिकानुस्वारस्येति स्थानानि ॥ यत्नो द्विधा आभ्यंतरो बाह्यश्च आद्यश्चतु-
र्द्धा स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात् तत्र स्पृष्टं प्रयत्नं स्पर्शानां ईषत्स्पृष्टमंतस्थानां विवृतमूष्मणां स्वराणां च ह्रस्वस्यावर्णस्य प्रयोगे
संवृतं प्रक्रियादशायां तु विवृतमेव एतच्च सूत्रकारेण ज्ञापितं तथाहि अ अ ।८।४।६८। विवृतमनूद्य संवृतोऽनेन विधीय
ते अस्य चाष्टाध्यायीं संपूर्णां प्रत्यसिद्धत्वाच्छास्त्रदृष्ट्या विवृतत्वमस्त्येव तथा च सूत्रं ॥ ९ ॥ ९ तेसंवृतता दूरत्वे विवृतता अत एव इचुयशा

नां तालव्यताविशेषे पि तालुस्थानेन सह जिह्वादीनां च वर्णोच्चारणे कर्तव्ये सम्यक् स्पर्शः यकारे ईषत्स्पर्शः शकारेकारयोस्तु दूर एव स्थितिरित्याद्यनुभवं शिक्षाकारोक्तिं
चानुसृत्य विवेचनीयं विवारः संवारादयस्तु वर्णोत्पत्तेः पश्चान्मूर्द्धप्रतिहते निवृत्ते प्राणाख्ये वायौ उत्पद्यंत इति बाह्या इत्युच्यंते गलबिलस्य संकोचात्संवारः।
तस्यैव विकासाद्विवारः एतौ च संवृतविवृतरूपाभ्यामाभ्यंतराभ्यां भिन्नावेव तयोः समीपदूरावस्थानात्मकत्वादित्यवधेयं अ अ सुपामिति विभक्त्योर्लुक् आद्यो विवृतः
॥ द्वितीयस्तु संवृतस्तदाह विवृतमनूद्येति विवृतस्य स्थान इत्यर्थः विवृतत्वमस्त्येवेति तेन दंडानयनमित्यादौ सवर्णदीर्घः सिद्ध्यतीति भावः॥



4

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पूर्वत्रासिद्धं यद्ययं स्वतन्त्रो विधिः स्यात्तर्हि त्रिपादी पूर्वं प्रत्यसिद्धेत्येव लभ्येत न त्रैपादिकं तु पूर्वं प्रति परं नासिद्धं स्यात् तथा च प्रशानित्यत्र मो नो धातोरिति नत्वस्यासिद्धत्वान्नलो-
पः स्यात् नत्वविधेः संबुद्धौ चरितार्थत्वात् तथाऽनड्वान् इत्यत्र संयोगान्तलोपस्यासिद्धत्वान्नलोपः स्यात् नुम्विधेस्तु संबुद्धौ चरितार्थत्वात् अत आह अधिकारोऽयमिति त्रिप-
द्यां विहितं कार्यमिति कार्यासिद्धिपक्षे तु अमू अमुमित्यादि न सिद्ध्येदिति भावः यथा चैतन्न सिध्यति तथाऽदःशब्दव्याख्यावसरेऽस्माभिरुपपादयिष्यते एकादशधेति य-
द्यपि भाष्ये ष्टावुक्ता उदात्तादयस्तु नोक्तास्तथापि कैयटोक्तिमनुसृत्यैकादशोक्ता इति बोध्यं खयां यमा इति बालबोधनाय बाह्यप्रयत्नाः कैश्चित्सुगमोपायेनोपनिबद्धाः तद्यथा

पूर्वत्रासिद्धं ।८।२।१। अधिकारोयं तेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं बाह्यप्रयत्नस्त्वेकादश
धा विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोनुदात्तः स्वरितश्चेति खयां यमाः खयः ᳲकᳲपौ विसर्गः शर एव च स
ते श्वासानुप्रदाना अघोषाश्च विवृण्वते । कंठमन्ये तु घोषाः स्युः संवृता नादभागिनः । अयुग्मा वर्गयमगा यणश्चाल्पासवः स्मृताः । वर्गेष्वाद्या
नां चतुर्णां पञ्चमे परे मध्ये यमो नाम पूर्वसदृशो वर्णः प्रातिशाख्ये प्रसिद्धः पलिक्नीः चख्नतुः अग्निः घ्नन्तीत्यत्र क्रमेण कखगघेभ्यः परेण
तत्सदृशा एव यमाः तत्र वर्गाणां प्रथमद्वितीयाः खयः तथा तेषामेव यमाः जिह्वामूलीयोपध्मानीयौ विसर्गः शषसाश्चेत्येतेषां विवारः श्वासोऽघोषश्च अ
न्येषां तु संवारो नादो घोषश्च वर्गाणां प्रथमतृतीयपंचमाः प्रथमतृतीययमौ यवलाश्चाल्पप्राणाः अन्ये महाप्राणा इत्यर्थः बाह्यप्रयत्नाश्च यद्य
पि सवर्णसंज्ञायामनुपयुक्तास्तथाप्यान्तरतम्यपरीक्षायामुपयोक्ष्यन्त इति बोध्यं ॥११॥ खरो विवाराः श्वासा अघोषाश्च हशः संवारा नादा घोषाश्च व

र्गाणां प्रथमतृतीयपंचमा यणश्चाल्पप्राणाः वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणा इति एते श्वासानुप्रदाना इति श्वासप्रयत्नका इत्यर्थः विवृण्वते कंठमिति ।
विवारमेषां प्रयत्न इति भावः अन्ये त्विति हशो हशां यमा अनुस्वारश्च नादेति नादभागिनो नादप्रयत्नवन्त इत्यर्थः अयुग्मा इति प्रथमतृतीयपंचमा वर्गेष्वयुग्माः वर्गयमगा इति वर्ग-
गा यमगाश्चेत्यर्थः अल्पेति अल्पासवोऽल्पप्राणाः पुंसि भूम्न्यसवः प्राणा इत्य मरः अनुपयुक्ता इति अन्यथा कखगघादीनां परस्परं सावर्ण्यं न स्यादिति भावः आन्तरतम्यपरीक्षा

CC-0. In Public Domain. Digitization by eGangotri

मु॰ प॰ सि॰ कौ॰ टी॰ त॰ ५

यामिति परीक्षावअघोषस्यमहाप्राणस्यसस्यनादृशएवथकारः घोषवतोनादवतोमहाप्राणस्यसस्यनादृशोवर्गचतुर्थइत्यादिमूलेएवस्फुटीभविष्यति।~।कादयइति लोकप्रसि
द्धपाठापेक्षमिदं चतुर्दशसूत्र्यांमावसानत्वायोगात् कपाभ्यांप्रागिति एतच्चोपलक्षणं खफाभ्यांप्रागित्यपिबोध्यं अर्द्धविसर्गेति‾ सादृश्यमुच्चारणेलेखनेचबोध्यं ऋलवर्ण
योरिति ऋत्यकइतिप्रकृतिभावः विग्रहस्तुऋचलृवर्णश्चऋलृवर्णौतयोरित्येके मनोरमायांतुऋचऋचरलोतौचतौवर्णौचेत्यादिस्थितं नाज्झलौ आकारसहितइतिका
लसमयवेलास्वित्यादिनिर्देशाः आकारप्रश्लेषलिंगंयणादिकमिति शीतलशब्देसवर्णदीर्घआदिशब्दार्थः इहअसेधदित्यादौहोढइतिढत्वंनेत्यपिमुवचं इणाइतिसस्यषत्व

कादयोमावसानाःस्पर्शाः यरलवाअंतस्थाःशषसहाऊष्माणः अचःस्वराः ꣸कः꣸पइतिकपाभ्यांप्रागर्द्धविसर्गसदृशोजिह्वामूलीयोपध्मा
नीयौ अंअः इत्यचःपरावनुस्वारविसर्गौइतिप्रयत्नविवेकः"ऋलृवर्णयोर्मिथःसावर्ण्यंवाच्यम् अकारहकारयोरिकारशकारयोःऋकारष
कारयोर्लृकारसकारयोश्चमिथः सावर्ण्येप्राप्ते"नाज्झलौ ।१।१।१०।आकारसहितोऽच् आच्सचहल्चेत्येतौमिथःसवर्णौनस्तः तेनदधी
त्यस्यहरतिशीतलंषष्ठंसांद्रमित्येतेषुपरेषुयणादिकंन अन्यथादीर्घादीनामिवहकारादीनामपिग्रहणकशास्त्रवलादच्त्वंस्यात् तथाहि आ
णुदित्सवर्णस्यचाप्रत्ययः।१।१।६९।प्रतीयतेविधीयतेइतिप्रत्ययः"अविधीयमानोऽण् उदिच्चसवर्णस्यसंज्ञास्यात् अत्राणपरेणणकारेण तदे
वमइत्यष्टादशानांसंज्ञातथेकारोकारौऋकारस्त्रिंशतः एवंलृकारोपि एचोद्वादशानां एदैतोरोदौतोश्चनमिथःसावर्ण्यं ऐऔजितिसूत्रारंभसा
मर्थ्यात् तेनैचश्चतुर्विंशतेःसंज्ञास्युरितिनापादनीयं ॥꣸॥ मपिंनेतितुनसुवचं ढत्वंप्रतितस्या‾ सिद्धत्वादितिदिक् अत्र्याथेति नाज्झलावित्यस्यानारंभे
ग्रहणकशास्त्रवलादिति अयंभावः दीर्घादीनामिवहकारादीनामप्यकारादिवाच्यत्वेस्युपगमेस्यच्त्वंस्यात् प्रत्याहारेषुतद्वाच्यवाच्येनि꣸ढलक्षणाभ्युपगमादिति अवि राम
धीय‾मानोऽणीतितेनइक्षमइग्राइतइत्यत्रत्रिमात्रइकारोनभवति उदिच्चेति इहाविधीयमानइतिनसंवध्यते उदित्करणसामर्थ्यात्तेनविधीयमानोप्युदित्सवर्णान्गृह्णात्येव ५
कुहोश्चुःजगादजगदे परेणणकारेणेति व्याख्यानतोविशेषप्रतिपत्तेःउपसर्गादृतिऋनउदित्यादौतपरकरणलिंगाच्च यदिपूर्वेणस्यात्तर्हितपरत्वमित्यनर्थकंस्यात् ऋकार

5

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्थानएात्वेनसवर्णग्राहकत्वात् एवंचतपरत्वाद्दीर्घेन उपऋदकारीयतीत्यादिवक्ष्यमाणग्रंथोपिसंगच्छते एवंलृकारोपि इतित्रिंशतः संज्ञेत्यनुषज्यते एतच्चन्यायसाम्यादुक्तं व
स्तुतोलृकारस्यऋकारग्राहकत्वंनकुत्राप्युपलभ्यते सूत्रारंभसामर्थ्यादिति सतितुसावर्ण्येएकारेणऐकारग्रहणादोकारेणचौकारग्रहणादेऔजितिसूत्रारंभोवृथास्यादितिभावः
नापादनीयमिति तेनश्लावंग्लावइत्यत्रऔतोम्शसोरितिनप्रवर्त्ततइतिमूलएवंस्फुटीभविष्यति॥ यद्यपीति ग्रहणकशास्त्रस्याद्याप्यनिष्पत्तेरितिभावः एतच्चाकसवर्णोदीर्घइत्यत्र।
व्युत्पादयिष्यामः आसेति आक्षराणांसमाम्नायउपदेशसूत्राणितत्रभवाआक्षरसमाम्नायिकाः वह्वचोंतोदात्तादितिठञ् होढइतिनभवतीति यद्यप्याकारप्रश्लेषाभावेसंयो।
गांतलोपएवप्राप्नोतिनतुढत्वंतस्यासिद्धत्वादतोत्रसंयोगांतलोपोनभवतीतिवक्तुमुचितम् तथापिकार्यकालंसंज्ञापरिभाषमितिपक्षेत्रैपादिकेंऽतरंगेवहिरंगपरिभाषायाःप्रवृत्तेरं
तरंगेढत्वेकर्त्तव्येबहिरंगःसंयोगांतलोपोऽसिद्धइतिमत्वेदमुक्तमित्येके अन्येतुसंज्ञापूर्वकोविधिरनित्यइतिलोपस्यवारणंकथंचित्कर्त्तुंशक्यमित्याशयेनढत्वंनेत्युक्तमित्याहुः विश्वपा
नाज्झलाविति निषेधोयद्यप्याक्षरसमाम्नायिकानामेवतथापिहकारस्याकारोनसवर्णः तत्राप्याकारस्यप्रश्लिष्टत्वात् तेनविश्वपाभिरित्यत्रहो
ढइतिढत्वंनभवति अनुनासिकाननुनासिकभेदेनयवलाद्विधा तेनानुनासिकास्तेद्वयोर्द्वयोः संज्ञा तपरस्तत्कालस्य।१।१।७०।तः परोयस्मात्स
चतात्परश्चोच्चार्यमाणसमकालस्यैवसंज्ञास्यात् तेनअतइत्उतइत्यादयः षण्णांषण्णांसंज्ञा आतइतिद्वादशानां वृद्धिरादैच्।१।१।१।आदैच्चवृद्धिसंज्ञःस्या
त् अदेङ्गुणः।१।१।२ अदेङ्चगुणसंज्ञःस्यात्॥ ९भिरित्यत्रेत्युपलक्षणं विश्वपाःविश्वपाभ्यामित्यादावपिनभवति होढइत्युपलक्षणं पृथगाशुरित्यादौझयोहइत्या
कारस्यघकारोनेतिदिक् यदितुविवृतम्ऊष्मणामित्यत्रईषत्स्पृष्टमित्यतईषदित्यनुवर्त्यस्वराणांचेत्यत्रनिवर्त्यईषद्विवृतमूष्मणाविवृतंस्वराणांइतिप्रयत्नभेदोव्याख्यायतेतदानाज्झ।
लावितिसूत्रंत्यक्तुंशक्यमित्याकरेस्थितं अननुनासिकास्तेइति येत्वाक्षरसमाम्नायिकाअणस्तएवसवर्णानांसंज्ञाभवंतीतिभावः एवंचरेफोहकारश्चअणप्रत्याहारांतर्गतोपिनकस्यचि
त्संज्ञातत्सवर्णस्यान्यस्याभावादित्यवगंतव्यम् सचतात्परश्चेति तत्रादिनाउभयंविवक्षितमितिभावः वृद्धिरादैच् आच्चऐच्चेतिइतरेतरयोगद्वंद्वः सुपांसुलुगितिङेःसुर्लुग्वा यद्वासमा।
हारद्वंद्वः नचैवंद्वंद्वाच्चुदषहांतात्समाहारइतिटच्स्यादितिवाच्यं समासांतविधेरनित्यत्वात् तत्रचप्रमाणंसमासेषुवक्ष्यामः अथवाआदित्यसमस्तमेवास्तु वृद्धिशब्दः तंत्रेणावृत्यावाप्र
जनीयः अयसयादित्वेनभत्वाचोःकुर्न ऐजिहद्विमात्रएवतात्परत्वात् तेनहृस्वैकारमित्यत्रत्रिमात्रोन वृद्धिप्रदेशावृद्धिरेचीत्यादयः अदेङ्गुणः तपरकरणमिहसरूपार्थंतेनगंगोदकमि

सु॰ धु॰ सि॰ कौ॰ टी॰ त॰ ६

न्यत्र त्रिमात्रेण न स्तीत्यत्र त्वकार एवेति न तु कदाचिदाकारः न च प्रमाणान्तरान्तर्येण नियमसिद्धिः एरत्वे कृते एकस्याध्यर्द्धमात्रत्वात् अपरस्यार्द्धतृतीयमात्रत्वात् गुणापदेशात्तु आद्गुणः अतो
गुणो इत्यादयः ॥ ~ ॥ भूवादय इति भूश्च वाश्च भूवाविति द्वन्द्वः आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः आदिश्च आदिश्च आदी भूवौ आदी येषामिति विग्रहः भूप्रभृतयो वासदृशाश्चा
दृश्यं च क्रियावाचकत्वेनेत्यभिप्रेत्याह क्रियावाचिन इति क्रियावाचिन इति किं याः पश्यन्तीत्यादौ धातुत्वमाभूत् सति हि तस्मिन्नातो धातोरित्याकारलोपस्स्यादिति स्थितं मनोरमायां भ्वादयः किं
हिरुक् पृथक् इत्याद्यव्ययानां शिष्येइति भावार्थतिङ् नस्य माभूत् सं भ्वादीनां उदित्करणेन सौत्राणां धातुत्वं ज्ञाप्यते चुलुम्पादीनां बहुलमेतन्निदर्शनमिति गणसूत्रेणासंग्रहः" प्राग्रीश्वरा
त् रेफविशिष्ट ग्रहणं किं ईश्वरे तोसुन्कसुनावित्यस्य व्याप्तिन्यायेनावधित्वं माभूदिति यदि तु प्रत्यासत्त्येवावधिरीश्वर इत्यस्य पूर्वावधित्वसिद्धिरित्युच्यते तर्हि स्पष्टप्रतिपत्त्यर्थमेवास्तु चा
दयः" अद्रव्यार्थाः किं पशुः लिङ्गसंख्यान्वितं द्रव्यं इह तु स्यादेव लोधं नयन्ति पशुं मन्यमानाः पशु इति सम्यगर्थे गतिश्च उपसर्गसंज्ञायां समावेशार्थश्चकारः अन्यथा आकडारादिति

भूवादयो धातवः १।३।१ क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः ॥ प्राग्रीश्वरान्निपाताः १।४।५६ इत्यधिकृत्य" चादयोऽसत्त्वे १।४।५७ अद्रव्यार्था
श्चादयो निपातसंज्ञाः स्युः" प्रादयः १।४।५८ अद्रव्यार्थाः प्रादयस्तथा" उपसर्गाः क्रियायोगे १।४।५९ गतिश्च १।४।६० प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्यु
र्गतिसंज्ञाश्च" प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उद् अभि प्रति परि उप एते प्रादयः नवेति विभाषा १।१।४४
निषेधविकल्पयोर्विभाषासंज्ञा स्यात् ((एयर्थपथ्यः स्यात् फलं तु प्रणायमित्यादावुपसर्गाद्समासे इति णत्वं गतिकारकेति कृदुत्तरपदप्रकृतिस्वरसिद्धिश्चेति दिक् निस् निर्

दुस् दुर् इति उपसर्गस्यायतौ इति निर्दुरोर्लत्वं निलयते दुलयते निसो दुसश्च रुत्वस्यासिद्धत्वाल्लत्वाभावः निरयते दुरयते नवेति विभाषा नेति प्रतिषेधो वेति विकल्पस्तदाह निषे
धविकल्पयोरिति विभाषाश्वेरित्यादिषु प्रतिषेधविकल्पावुपतिष्ठेते तत्र प्रतिषेधेन समीकृते विषये पश्चाद्विकल्पः प्रवर्त्तते शुशाव शिश्वाय इत्यत्राप्राप्तो विकल्पः। शुशुवतुः। शिश्वि
यतुरित्यादौ तु वचिस्वपीति नित्यप्राप्ताविति विवेकः अत्रेदं बोध्यं इतिशब्दः काकाक्षिन्यायेनोभाभ्यां संबध्यते स च पदार्थविपर्यासकृत् तेन निषेधो विकल्पश्च न वा शब्दार्थः संज्ञि
विभाषाशब्दार्थो विकल्पः संज्ञा उभयत्र विभाषार्थे चेदं सूत्रं प्राप्तविभाषायामप्राप्तविभाषायां च नास्योपयोगः प्राप्तविभाषायां भावांशस्य सिद्धत्वेन विभाषाश्चस्य पक्षे भवति भावां
शमनूद्य पक्षे न भवतीत्यभावांशमात्रकरणात् अप्राप्तविभाषायां तु अभावांशस्य सिद्धत्वेन पक्षे न भवतीत्यभावांशमनूद्य पक्षे भवती भावांशमात्रकरणात् — विभाषाश्वेरित्यु

राम ६

6

CC-0. In Public Domain. Digitization by eGangotri

स्तुभयत्र विभाषायां तु यदि विधिमुखेन प्रवृत्तिस्तर्हि पित्त्वे च संप्रसारणविकल्पः स्यात् किंतु यजादित्वाद् वचिस्वपीति नित्यमेव स्यात् अथ प्रतिषेधमुखेन प्रवृत्तिस्तर्हि कित्त्वे च प्रवृत्तिः स्यात्
न तु पित्सु न च पित्सु विधिमुखेन किंतु निषेधमुखेनेत्युभयथापि प्रवृत्तिरस्त्विति वाच्यम् वैरूप्यलक्षणवाक्यभेदप्रसंगात् संज्ञाकरणे तु आनन्तर्यानुरोधेन नेति प्रतिषेधः प्रथमं किंतु प्रवर्त्तेत
ततः किदकिद्रूपे सर्वस्मिन् लिटि एकरूपे प्रापिते सति पक्षे भवतीत्येकरूपेण विधिमुखेनैव प्रवर्त्तेत इतीति   किं घुसंज्ञावत्तु स्वं रूपमिति वचनं शब्दस्य संज्ञा मा भूत् तथा हि सति विभाषाश्वे
रित्यस्य न वा शब्दः श्वयतेर्देश इत्यर्थः स्यात् इति शब्दे तु सति श्वार्थः संज्ञीति लभ्यते तथा हि लोके ह्यर्थप्रधानः शब्दः गौरित्ययमाहेत्यादौ तु शब्द   रूपपरः संपद्यते व्याकरणे तु स्वं रूपमिति परि
भाषणात्स्वरूपपरत्वमौत्सर्गिकं इति शब्दसमभिव्याहारे त्वर्थपरत्वेति विशेषः इदमेवेति शब्दस्य पदार्थविपर्यासकत्वं नाम संज्ञात्वर्थस्यैव न तु विभाषाशब्दस्येति व्याख्यानस्य हृक्रोरन्यतरस्यां
ण्यादौ वैरूप्योद्धारः फलं उभयत्र विभाषा हितत्सूत्रं अभ्यवपूर्वस्य हरतेर्भक्षणार्थत्वाद्विकारार्थस्य करोतेरकर्मकत्वाच्च गतिबुद्धीत्यादिना अणौ कर्तुर्णौ कर्मत्वे प्राप्ते अर्थान्तरे चाप्राप्ते तदारंभात् उ
दाहृतं च भाष्ये प्राप्ते तावत् अभ्यवहारयति सैंधवान् अभ्यवहारयति सैंधवैः विकारयति सैंधवान् विकारयति सैन्धवैः अप्राप्ते तु हरति भारं देवदत्तः हारयति भारं देवदत्तं हारयति भारं देवदत्तेन करोति कटं दे

**स्वं रूपं शब्दस्याशब्दसंज्ञा १।१।६८ शब्दस्य स्वं रूपं संज्ञि शब्दशास्त्रे या संज्ञा तां विना येन विधिस्तदन्तस्य १।१।७२ विशेषणं तदन्तस्य संज्ञा स्यात् स्व**
**स्य च रूपस्य समासप्रत्ययविधौ प्रतिषेधः** ॥९ वदत्तः कारयति कटं देवदत्तं कारयति कटं देवदत्तेनेति दिक् ॥ ः ॥ स्वं रूपं शब्दस्य अग्नेर्ढक् आग्नेयं आङ्गेयम् अहनः आय
क्ते आहते इह अग्नि आङ् यम अहन् एत एव संज्ञिनः नन्वग्न्यादिवाच्याद् अंगारादेर्ढगादिप्रत्ययो न संभवतीति स्वरूपादेव स्यात् प्रातिपदिकादित्याद्यधिकाराच्च किमनेन सूत्रेणेति चेत् सत्यं
अग्न्यादिशब्दपर्यायेभ्यो वह्न्यादिभ्यो मा भूदिति सूत्रस्यारंभः नन्वत्र रूपग्रहणं विनापि स्वशब्देन रूपमेव ग्रहीष्यते प्रतीतावुपदेशानपेक्षत्वादसाधारणत्वादन्तरंगत्वान्नियतोपस्थितिक
त्वाच्च अर्थो हि प्रतीतौ संबंधग्रहणमपेक्षते पर्यायैरपि प्रत्यायनात्साधारणः पदज्ञानजन्यबोधविषयत्वाद्बहिरंगः अनुकरणदशायामप्रतीतेरनियतोपस्थितिकश्चेति किमनेन रूपग्र
हणेन उच्यते इह शास्त्रे अर्थोऽपि विवक्षितो रूपवदिति ज्ञापनार्थं रूपग्रहणं तेनार्थवद्ग्रहणे नानर्थकस्येत्युपपन्नं भवति तत्रोक्तज्ञापकादर्थोऽग्रात्स्वः स्वमिति वचनाद्रूपं   चेति सामर्थ्या
दर्थवतो ह्रस्वस्य ग्रहणं तेन काशेकुशे इत्यत्र शे इत्ययं प्रगृह्यसंज्ञो न भवति प्रादूढोढ इत्यत्र तु ऊढग्रहणेन क्तान्तमेव गृह्यते न तु क्तवत्वन्तस्यैकदेश इत्यन्यत्र विस्तरः अशब्दसंज्ञेति किं उपस
र्गे घोः किः दाधाभ्यो यथा स्यात् घुधातोः शब्दार्थकान्मा भूत् न च दाधाघ्विति संज्ञाकरणसामर्थ्याद्देवदाधाभ्यः किः स्यादिति वाच्यं घुमास्थेत्यादिना आत ईत्व   विधौ संज्ञाकरणस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वश्यकतया सामर्थ्योपक्षयात् इह शब्दस्य संज्ञाशब्दसंज्ञेति न षष्ठीसमासः कर्मकरणमित्यादिष्वर्थसंज्ञासु स्वरूपग्रहणापत्तेः किंतु शब्दशास्त्रं तत्र संज्ञा शब्दसंज्ञेति सप्तमीसमासः तदाह शब्दशास्त्रे या संज्ञेति येन विधिः विधिरित्यत्र उपसर्गे घोः किरिति कर्मणि किः प्रत्ययः येनेति करणे तृतीया न तु कर्तरि तस्यां कृद्योगषष्ठ्या बाधात् न चोभयप्राप्तौ कर्मणीति नियमेन निर्वाहः कर्मणाऽनुक्तत्वेनोभयप्राप्त्यभावात् तथा चात्र करणे तृतीयैव करणं च परतंत्रं कर्त्रधिष्ठितस्यैव करणत्वात् एवं चेह तृतीयया पारतंत्र्यं लक्ष्यते न च एरजित्यादेः कारादीनां पारतंत्र्यं धात्वादीनां च स्वातंत्र्यं वाक्यादीनामिव तक्षादीनामिव संभवति किंतु वैवक्षिकं तेन विशेषणमप्रधानं तच्चात्मा तस्य संज्ञेति फलितं तदेतदाह विशेषणांतं तस्येति स्वस्य चेति स्वं रूपमित्यनुवृत्तेरेतल्लभ्यते एरच् इकारांतादिकारूपाच्च धातोरच् । चयः । अयः । समासप्रत्ययविधाविति कष्टंश्रितः कष्टश्रितः द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः द्वितीयां तश्रितादिप्रकृतिकैः सुबंतैः सह समस्यते नैवात्र तत्पुरुषः नेह कष्टमुपाश्रितः नडादिभ्यः फक् नडस्य गोत्रापत्यं नाडायनः नेह सूत्रनडस्यापत्यं सौत्रनाडिः अनुपनिकादित्वादुभयपदवृद्धिः ॥२॥ उगिद्वर्णेति उगिद्वर्णग्रहणं वर्जयित्वा उगिद्वर्णग्रहणवर्जे द्वितीयायां चेति णमुल् महांतमतिक्रांता अतिमहा

उगिद्वर्णग्रहणवर्जं विरामोऽवसानं १४।११ वर्णानामभावोऽवसानसंज्ञः स्यात् परः सन्निकर्षः संहिता ११।१९ वर्णानामतिशयितः सन्निधिः संहितासंज्ञा स्यात् सुप्तिङंतं पदं १४।१४ सुबंतं तिङंतं च पदसंज्ञं स्यात् ॥८॥

तीमहच्छब्दस्य गौरादित्वेप्युपसर्जनेषिङ्गौरेति ङीषोऽप्रवृत्तेः उगितश्चेत्युगिदंतान्ङीप् अतः अनुवृत्तिः न चेह सामर्थ्यात्तदंतविधिः अस्यापत्यमिः कामइत्यत्र चरितार्थत्वात् न चैवमिञोऽजित्वं व्यर्थमिति वाच्यं बह्वादिभ्यश्चेत्यत्र यथायथं स्वराभ्यां चरितार्थत्वात् नन्वेवमपि औपगविरित्यादावेव अतः इञ् स्यात् न तु वृद्धिरित्यादौ अकारस्येह नर्थकत्वादिति चेन्न वर्णग्रहणे अर्थवद्ग्रहणपरिभाषाया अप्रवृत्तेः विरामोऽवसानं विरमणं विरामः भावे घञ् शब्दानुशासनप्रस्तावादाह वर्णानामिति संज्ञाप्रदेशा वावसाने इत्यादयः अभावस्यापि बुद्धिकृतं पौर्वापर्यमस्त्येव यथोच्चरितप्रध्वंसिनां नित्यविभूनां वा वर्णानां यदा विरम्यते अनेनेति विरामः बाहुलकात्करणे घञ् यदुच्चारणोत्तरं वर्णांतरं नोच्चार्यते सोंत्यवर्णः अवसानसंज्ञ इत्यर्थः अस्मिंस्तु पक्षे खरवसानयोरित्येकापि सप्तमी विषयभेदाद्भिद्यते खरि परे रेफस्य विसर्गः अवसाने च रेफस्यानिनीति सुप्तिङंतं पदं अन्तग्रहणं अन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदंतग्रहणं नास्तीति ज्ञापनार्थं तेन ईदूदेद्द्विवचनं प्रगृह्यमिति न द्विवचनांतस्य प्रगृह्यत्वं अन्यथा कुमार्य्योरगारं कुमार्य्यगारमित्यत्र प्रकृतिभावः स्यात् कथं तर्हि प्रातिपदिकसंज्ञायां कृत्तद्धिताभ्यां न तदंतग्रहणमिति चेत् अत्राहुः कृत्तद्धितेति सूत्रे अर्थवद्ग्रहणमनुवर्तते

CC-0. In Public Domain. Digitization by eGangotri

हलोनंतराः संयोगः लघ्वर्थमेकाक्षरायां संज्ञायां कर्त्तव्यायां संयोग इति महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञापनार्थं संयुज्यंते ऽस्मिन्समुदाये वर्णा इति तेनेनात्र समुदाये वाक्यपरिसमाप्तिर्नतु
गुणवृद्ध्यादिसंज्ञावत्प्रत्येकं तथाहि सति दृषद्विभत्तीं त्यत्र बकारसन्निधौ दकारस्य संयोगत्वात्संयोगान्त लोपः स्यात् निर्यायादित्यत्र यकारः संयोग इति वान्यस्य संयोगादेरित्येत्वं
स्यात् सिद्धांते तु चोरहाभ्यामिति द्वित्वे सत्यपि तस्यासिद्धत्वादेत्वमत्र न भवति हल इति जातौ बहुवचनं जात्याख्यायामेकस्मिन् बहुवचनमिति वचनात् तेन द्वयोरपि संयोगसंज्ञा
भवतीति शिक्षेत्यादौ गुरोश्च हल इत्यप्रत्ययः सिद्ध्यति यत्र बहवो हलः संश्लिष्टास्तत्र द्वयोर्बहूनां चाविशेषेण संज्ञेति स्थितमाकारे यदि तु बहूनामेव स्यात्तर्हि गोमान् करोतीत्य
त्र मतुपस्तकारस्य संयोगांतलोपो न स्यादिति दिक् हलः किं तितउभ्यां अत्र तनोतेर्डउः सन्वच्चेति डउप्रत्ययः सनवद्भावाद्द्वित्वं सन्यत इतीत्वं च व्यक्तोच्चारणसामर्थ्याद्गुणा
भावः यदि त्वचोरप्यनंतरयोः संयोगसंज्ञा स्यात्तर्हि इह संयोगांतस्येत्युकारलोपः स्यात् अनंतरा इति किं पनसं यदीह सकारमकारयोः संयोगसंज्ञा स्यात्तर्हि स्कोरिति सलो

हलोनंतराः संयोगः १।१।७ अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः ह्रस्वं लघु १।४।१० संयोगे गुरु १।४।११ संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात्
दीर्घं च १।४।१२ इति संज्ञाप्रकरणम् इको गुणवृद्धी १।१।३ गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र इक इति षष्ठ्यंतं पदमुपतिष्ठते।
अचश्च १।२।२५ ह्रस्वदीर्घप्लुतशब्दैर्यत्राज्विधीयते तत्राच इति षष्ठ्यंतं पदमुपतिष्ठते ॥ पः स्यात्॥ इति संज्ञाप्रकरणं इको गुणवृद्धी यत्र साक्षा॥

त्स्थानी न निर्दिष्टः सार्वधातुकार्द्धधातुकयोः सिचि वृद्धिरित्यादौ तत्रैवेयं परिभाषा प्रवर्त्तते नचाचो ञ्णितीत्यादौ स्थानिनिर्देशात् गुणवृद्धिशब्दाभ्यामिति एतच्च पूर्वसूत्रा
भ्यां गुणवृद्धिपदे अनुवर्त्य गुणो वृद्धिरिति ये गुणवृद्धी इति योजनया लभ्यते तेनेह न त्यदादीनामः इमं दिव औत् द्यौः विधीयत इति यत्र त्वनुवादः पूर्वं वृद्धिर्यस्याचामादिरित्या
दौ तत्रेक इति नोपतिष्ठते अनुवादे परिभाषाणामनुपस्थितेरिति भावः अनुवादे परिभाषाणामित्यस्यानूद्यमानविशेषणेष्वित्यर्थः अनुपस्थितौ लिंगं फलं चोदीचामातः स्था
न इत्यत्र स्फुटीकरिष्यते षष्ठ्यंतमिति सूत्रे पष्ठ्यंतस्यानुकरणात् शब्दस्वरूपपरतया नपुंसकत्वात्स्वमोर्लुकि अत्वसंतस्येति दीर्घो नेति भावः पदमिति नच संभवति सामानाधि
करण्ये इगंतस्यांगस्येत्यादिक्रमेण संबध्यते मिदेर्गुणः मृजेर्वृद्धिरित्यादौ तु सामानाधिकरण्यासंभवात् मिदिमृज्योरवयवस्येक इति संबध्यते अचश्च ह्रस्वदीर्घेत्यादि एतच्च ऊ
कालोज्झ्रस्वदीर्घप्लुत इति सूत्राद्ध्रस्वदीर्घप्लुत इत्यनुवर्त्य ह्रस्वो दीर्घः प्लुत इति योजनया लभ्यते ह्रस्वेत्यादि किं दिव उत् द्युभ्यां अष्टन आ विभक्तौ अष्टौ अष्टाभ्य औशित्यत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सु॰ प॰
सि॰ कौ॰
टी॰ त॰
८

कृतात्वनिर्देशाज्ज्ञापकाज्जश्शसोर्विषये प्रवर्त्तमानस्याष्टन इत्यात्वस्याचः स्थानिकत्वे सति नैतत्सिध्येदिति दिक् षष्ठ्यंतं पदमिति तच्च सति संभवे सामानाधिकरण्येनैव सं-
बध्यते नैवैयधिकरण्येन तेन ह्रस्वो नपुंसके इत्यजंतप्रातिपदिकस्यैव ह्रस्वः श्रीपं नेह सुवाक् ब्राह्मणकुलं । शमामष्टानां दीर्घ इत्यत्र तु सामानाधिकरण्यासंभवात् शमादी-
नाम च इति संबध्यते तेन शाम्यतीत्यादि सिद्धम् वाक्यस्यैः प्लुत इत्यत्र सामानाधिकरण्यसंभवेऽपि टेर्ग्रहणसामर्थ्याद्देरवयवस्याचः प्लुत इति व्याख्यायते अन्यथाऽलो-
न्त्यस्याचश्चेति परिभाषाभ्यामेहि कृष्णेत्यादिवाक्यांत्यस्याचः प्लुतसिद्धौ किमनेन टेर्ग्रहणेन तेन आयुष्मानेधि इन्द्रवर्म३न् इत्यादि सिध्यति इति दिक् ॥ ॥ आद्यंतौ टकितौ
भविता आर्द्धधातुकस्येट् पाययति शाच्छासाह्वेत्यादिना युक् पुरस्तादपवादन्यायेन स्थानेयोगत्वस्यायमपवादः प्रत्ययः परश्चेत्यनेन तु परत्वादयं बाध्यते तेन चरेष्टः ग-
योष्टक् इत्यादयः परा एव भवंति मिदचोंऽत्यात्परः स्थानेयोगत्वस्य परश्चेति परत्वस्य चायमपवादः यशांसि वनानि नपुंसकस्य झलचः इति नुम् रुणद्धि रुधादिभ्यः श्नम् ननु
पूर्वयोर्द्वयमपि पुरस्तादपवादन्यायेन स्थानेयोगमात्रस्यापवादोस्त्विति चेन्न बाध्यसामान्यचिंतामाश्रित्य स्वविषये प्राप्तं सर्वं बाध्यत इति ह्यभ्युपगमात् अन्यथाऽश्नमोमित्कर-

आद्यंतौ टकितौ १।१।४६ टित्कितौ यस्योक्तौ तस्य क्रमादाद्यंतावयवौ स्तः मिदचोंऽत्यात्परः १।१।४७ । अचः इति निर्द्धारणे षष्ठी अचां मध्ये
योंत्यस्तस्मात्परस्तस्यैवांतावयवो मित्स्यात् षष्ठी स्थानेयोगा १।१।४९ अनिर्द्धारितसंबंधविशेषा षष्ठी स्थानेयोगा बोध्या स्थानं च प्रसंगः।

णां व्यर्थं स्यात् न च श्रवणार्थ एव मकारः स्यादिति वाच्यं तृणह इमिति निर्देशात् अचांमध्ये इति सूत्रे जात्यभिप्रायेणाच इत्येकवचनमिति भावः अचां मध्य इति किं मुंचति
लुंपति अंत्यादचः परो मित्स्यात् इति प्राचो व्याख्यायां नेनत्सिध्येत् शेमुचादीनामित्यत्रांत्यस्याचोऽसंभवेन मित्परिभाषाया अनुपस्थितिप्रसंगात् अन्ये तु अचोऽन्त्यात्परो मि-
त्स्यादिति व्यत्यासेन योजयित्वा प्राचो व्याख्यानमपि कथंचित्समर्थयंते पूर्वसूत्रादंत— इत्यनुवर्त्तते एकदेशे स्वरितत्वप्रतिज्ञानादतो व्याचष्ट अंतावयव इति तेन वारीणि।
त्वाद्वावङ्रूपस्य नांतत्वेन दीर्घः सिद्धः परादित्वे मन सिद्ध्येत् अभक्तत्वे तु वहंलिह इत्यत्र वहाभ्रे लिह इति खशि अरुर्द्विषदिति मुम् मोनुस्वारो न स्यादपदांतत्वादिति भावः यत्तु रम
केश्चिदुक्तं अभक्तत्वे वारीणीति दीर्घो न स्यादिति तन्न दाधिग्रहणप्रत्ययादिनुमर्थमिति अंगसंज्ञासूत्रस्थवार्त्तिकेनैव दूषितप्रायं षष्ठी स्थानेयोगा स्थानेन योगोऽस्या अस्तीति विग्रहः ८
निपातनादेत्वं षष्ठ्याः संबंधमात्रवाचित्वेऽपीदं शास्त्रीया षष्ठी सा स्थानेयोगा बोध्या किमविशेषणेनेत्याह अनिर्द्धारितसंबंधविशेषेति अनिर्द्धारितेति किं ऊदुपधा यागो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हः श्रासरद्दड्। हलोरित्यारा वुपधासंनिधानेनावयववष्ठी त्वेनिर्णीतेगोहः श्णसइत्यादैभाभूत्। सतिहितत्रापिस्थानेयोगत्वेगोहिश्रासिस्थानेधातुमात्रस्योपधाया श्चस्था
नेउँदित्तौस्यात्ामितितिद्विकास्थानं चप्रसंगः इति। नचास्यप्रसंगार्थकत्वेविवदितव्यं। दर्भाणांस्थानेग्रारैः। प्रसारितव्यमित्युक्तेदर्भाणामिति प्रसंगइतिप्रतीतेः एवंचइकोयण
चीत्यादौविगुचारणप्रसक्तौयणुचारणीयइत्याद्यर्थः संपद्यते॥ स्थानेसदृशतमइति॥ अर्थान्प्राप्यमाणानां तुमध्यएव। अतएवगंगोदकमित्यत्रत्रिमात्रओकारो
नादहस्थानेइत्यनुवर्तमानेपुनः स्थानग्रहणादन्योपि वाक्यार्थः संमतः तात्वादिरूपेस्थानेयोतरतमसत्त्वयुक्तांतर्यवानितियावत्। सुप्राप्यमाणानांमध्येस्यादि
तितदेतदाह। यत्रानेकविधमिति। स्थानार्थगुणप्रमाणतश्चतुर्विधमित्यर्थः। स्थानतोयथा। दध्यत्र। तालुस्थानस्येकारस्यतालुस्थानोयकारः। अर्थतोयथा। वा
तंड्यपुवतिः। वतंडशब्दाद्दजंतड्ाञ्चेतिगोत्रापत्येयञ्। तस्यलुक्स्त्रियामितिलुक्। शार्ङ्गरवादित्वातङीन्। वतंडीचासौयुवतिश्चेतिविग्रहेपोटायुवतीत्यादिनासमासः
पुंवत्कर्मधारयेत्यतिदिश्यमानः पुंशब्दोवतंडापत्यवाचिनोवतंडीशब्दस्यतदपत्यवाचीवातंड्यशब्दोभवति। नतुवतंडादिः॥ गुणतोयथा। वाग्घरिः। घोषवतोम

स्थानेंतरतमः ११५०। प्रसंगेसतिसदृशतमआदेशःस्यात्। यत्रानेकविधमान्तर्यन्तत्रस्थानतः आन्तर्यम्बलीयः। तस्मिन्निति निर्दिष्टे
पूर्वस्य १।१।६६। सप्तमीनिर्देशेनविधीयमानङ्कार्यम्वर्णान्तरेणाऽव्यवहितस्यपूर्वस्यबोध्यम्॥

दीर्घस्य अव्यवहिते
१ हाप्राणस्यतादृशएवघकारः। प्रमाणतोयथा। अमुं अमून्। अदसोसेरित्यनेनह्रस्वस्यह्रस्वोदीर्घउकारः। तमपग्रहणंकिं। वाग्घरिरित्यत्रक्षयोहोन्यतरस्यामितिपूर्वसवर्णोक्रियमाणेमहाप्राणत्वसाम्येनद्वितीयोना
वदत्वसाम्येनतृतीयश्चमाभूत्। किंतुनादवानमहाप्राणचतुर्थोघएवयथास्यादितितेनचेत्। सोतेत्यत्रप्रमाणतआंतर्यवानकारोनेतिभावः। तस्मिन्निति। सप्तम्यंता
नुकरणमिदम्॥ निःशब्दोनैरंतर्यपरः। दिशिरुच्चारणक्रियः। अचियणित्युक्तेव्यवहितेचसतिप्राप्तमव्यवहितएवेतिपूर्वस्यपरस्यचप्राप्तंपूर्वस्यैवेतिनियम्यते। अ
व्यवहितस्येतितुफलितार्थकथनम्। पूर्वस्यैवेतिकिं। दध्युदकम्। अत्रो' कारस्यमाभूत्। अव्यवहितस्यैवेतिकिं। अग्निचिदत्र। सोमसुदत्र। व्यवधानंचात्रवर्णकृ
तमेवनिषिध्यतेनतुकालकृतम्। संहितेत्यधिकारज्ञापकात्। अन्यथानिर्दिष्टग्रहणादेवा संहितायांयणाद्यप्रसंगात्किंतेनसंहिताधिकारेणेतिव्याचष्टे। वर्णा
तरेणेति एवंचसंहिताधिकारबहिर्भूतविधयः। कालव्यवायेपिसंभवंतीति। तेनाग्नाविष्णूइत्यादावनेयहेष्यानङ्। ऋतोद्वंद्वेदेवताद्वंद्वेचेत्यादिनाआरप देव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तस्मादिति॥ उत्तरस्येति किं तिङ् तिङ इति निघात उत्तरस्यैव यथा स्यात्। अग्निमीडे। नेह ईडे अग्निम्। अव्यवहितस्येति। एतच्च निर्दिष्टग्रहणानुवृत्त्या लभ्यते। उत्तरस्य स्थाने उत्सर्गे भवतीत्यादौ उदस्थेति पूर्वसवर्णो न भवति ते अलोऽन्त्यस्य। स्थानषष्ठीनिर्दिष्टस्य य उच्यते सोऽन्त्यस्याल स्थाने स्यादित्यर्थः। त्यदादीनामः। सः यः स्थानषष्ठीति किं आर्धधातुकस्येट् तृचश्च कारात्पूर्वो माभूत्॥ इदं च षष्ठी स्थानेत्यनुवृत्त्या लभ्यते। अल इति किं। पदस्येत्यधिकृत्य विधीयमानं वसुस्रंस्विति दत्वं परमानडुद्भ्यामित्यादावन्त्यस्य पदस्य माभूत्॥ ङिच्च॥ अयमपीति अवङ् स्फोटायनस्य॥ गवाग्रम्। अनङ् सौ सखा। परस्य यदिति। तस्मादित्युत्तर—स्य आदेरिति न सूत्रितम्। आदेरित्यंशस्य सर्वादेशः बाधकत्वापत्तेः सिद्धान्ते तु परत्वात्सर्वादेशत्वं बाधकमित्यनुपदमेव वक्ष्यति। आदेर्बोध्यमिति। आदेरलो बोध्यमित्यर्थः। अल इति त्वनुवर्तते। अनेकाल्। अस्तेर्भूः। बभूवान् अनुनिर्दिश्यमानस्यादेशा भवन्त्यनेकालादेशस्य सर्वादेशत्वं सिध्यति। तत्किमनेनानेकाल्ग्रहणेन न चालोऽन्त्यस्येत्यं लस्यस्यादिति शंक्यं। ङिच्चेत्यस्य नियमार्थ

तस्मादित्युत्तरस्य १।१।६७। पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाऽव्यवहितस्य परस्य ज्ञेयम्। अलोऽन्त्यस्य १।१।५२। षष्ठीनिर्दिष्टाऽन्त्यस्यादेशः स्यात्॥ ङिच्च। १।१।५३। अयमप्यन्त्यस्यैव स्यात्। सर्वस्येत्यस्यापवादः। आदेः परस्य १।१।५४। परस्य यद्विहितं कार्यं तत्तस्यादेर्बोध्यं। अलोऽन्त्यस्येत्यस्यापवादः। अनेकाल्शित्सर्वस्य। १।१।५५। अलोऽन्त्यसूत्रापवादः। अष्टाभ्य औशित्यादावादेः परस्येत्येतदपि परत्वादनेन बाध्यते॥

त्वाभ्युपगमात्। उच्यते॥ अनेकाल्ग्रहणाभावे रामैरित्यादावैसादेशः। आदेः परस्येति भिंकारस्यैव स्थाने स्यात् न तु सर्वस्य स्यात् ने इति दिक्। शित उदाहरणं इदम इश्। इत इत्यादाविति आदिशब्देन अतो भिस ऐस्। इत्यादि गृह्यते॥ परत्वादिति। अत एव आदेः परस्येति पृथक् क्रियत इत्युक्तं न त्वनेकाल्शित्सर्वस्येत्यतः प्रागेव तस्मादिति उत्तरस्यादेरिति पठ्यतां किमनेन पृथक् सूत्रकरणेन॥ न चैवं तस्मिन्निति निर्दिष्ट इत्यतो निर्दिष्टग्रहणं नात्रानुवर्त्तेत इति वाच्यं॥ तस्यापि सूत्रस्य प्राक् पठने बाधकाभावेन निर्दिष्टग्रहणानुवृत्तिसिद्धेः। मैवं। ब्राह्मणाः अष्टौ इत्यत्र अष्टाभ्यः पूर्वयोरपि जश्भावो सौरौ प्रसंगात्। यथा श्रुतसूत्राभ्युपगमे तूत्तरस्येत्यंशः प्रवर्तते एवेति नायं दोषः प्रसज्यत इति। अत्र केचिन्निष्कर्षमाहुः। अनेकाल्शित्सूत्रात्प्रागेव वर्णलाघवाय तस्मादित्युत्तरस्यादेरिति सूत्रिते परत्वात्सर्वादेशेन आदेरित्यंशस्य बाध विशेषादुत्तरस्येत्यंशस्यापि बाधितत्वात् वाक्यसंस्कारपक्षे ब्राह्मण अस् अष्टन् अस् इति स्थिते अष्टाभ्य औ

शिष्टस्यदित्ययोगेपंचमीत्वा  व्याप्तिन्यायेन अष्टनोंऽगात्पूर्वयोरपि जश्शसोरौशस्यात्। व्याप्तिन्यायस्तु प्राग्रीश्वरान्निपाता इति पठितेपि प्रत्यासत्तिन्यायेनाधिरीश्वर इति सू-
त्रावधिकत्वं स्यात् यथा सिद्धावीश्वरे तोसुन्कसुनाविति सूत्रावधिकत्वनिराकरणाय रेफविशिष्टग्रहणं कुर्वता सूत्रकृता ज्ञापितः तत्रश्च सर्वादेशेनोत्तरस्यैत्य-
स्याबाधनार्थं निर्दिष्टग्रहणानुवृत्त्यर्थं च तस्मिन्निति सूत्रात्परत्र कृते तु आदेरित्यस्य सर्वादेशबाधकत्वं स्यात् यथा चानोभिसरौस इत्यादेश आदेरेवस्यात्। अनेकाल
सूत्रस्यास्तेर्भूरित्यादौ चरितार्थत्वात्।। यथान्यासे नूत्तरस्येत्यंशः प्रवर्तते एवेत्यष्टाभ्यः परयोरेव जश्शसोरौशस्यान्नतु पूर्वयोः। तस्मादित्युत्तरस्यादेरिति न सूत्रित-
मित्यादिमनोरमाग्रंथस्यापि अयमेवाशयः इति। अन्येतु यथाश्रुतसूत्रनिराकरणपरतयैव मनोरमां योजयंति। तद्यथा।। न सूत्रितमित्यस्यानेकाल्शित्सूत्रात्प्राङ्-
न सूत्रितं नार्थः। आदेरित्यंशस्य सर्वादेशबाधकत्वापत्तेरित्याद्युक्तिमग्रंथविरोधात्। किंतु तद्यथानुकूल्याय स्वरूपमिति सूत्रात्प्राक्सूत्रितमित्यर्थोभ्युपेयः एवं चानेका-
लसूत्रात्प्राक्सूत्रितेतु नास्ति विरोध इति मनोरमाग्रंथाशयः। एवं स्थिते निर्दिष्टग्रहणानुवृत्तिलाभाय तस्मिन्निति निर्दिष्टसूत्रात्तस्मादित्युत्तरस्यादेः परस्येत्यस्मात्प्रा-

तमिति२

स्वरितेनाधिकारः।१।३।११। स्वरितत्वयुक्तं शब्दस्वरूपमधिकृतं बोध्यं।। ❀ ।।

गेव पठनीयः अष्टनोंगात्पूर्वयोरप्यौशस्यादित्युक्तदोषस्तु इत्थं परिहरणीयः। तस्मादित्युत्तरस्यादेरित्यत्रादेरिति पृथग्वाक्यं तत्रोत्तरस्येत्यनुवर्तते। सा च स्थानषष्ठी
षष्ठी स्थानेयोगेत्यस्य प्राप्तेः। तत्र चायमर्थः। पंचमीनिर्देशेन यत्कार्यं तदुत्तरसंबंधी उत्तरस्य स्थाने यद्विधीयते तदादेर्भवतीति इत्थं वाक्यभेदेन व्याख्यानाश्रयणादनं-
तरस्येति न्यायेनादेरित्यंशएव सर्वादेशेन बाध्यते न तूत्तरस्येत्यंशोपि इति नास्त्येव पूर्वोक्तदोषः। वाक्यभेदेन व्याख्यानेतूत्तरस्यादेरित्यसमस्तन्यासकरणेन ज्ञाप्य-
ते। अन्यथा उत्तरादेरिति न सूत्रितमिति वदेत्। किंच। अष्टाभ्य औशित्यस्य दिग्योगपंचमीत्वेन पूर्वपरसाधारणतया अष्टनोंऽगा  जश्शसोरित्युक्तेपि अष्टनोंऽगसंज्ञा
निमित्तभूतौ यौ जश्शसौ तावेव षष्ठीप्रोपस्थितिकावित्यष्टन्शब्दादुत्तरयोरेव औश्स्यान्नतु पूर्वयोरिति दिक्।। ❀ स्वरितेनाधिकारः अत्रेत्थंभूतलक्षणे तृतीया। अधि-
कारो विनियोगः। कियद्दूरमधिकार इत्यत्र तु व्याख्यानमेव शरणं। यथा आ सप्तमाध्याय  परिसमाप्तेरंगाधिकारः न तु प्रागभ्यासविकारेभ्य एवेत्यादि। यद्वा स्वरित इति स-
प्तम्यंतं स्वरिते दृष्टे अधिकारो निवर्तत इत्यर्थः। कः स्वरितोधिकारार्थः। कश्च तन्निवृत्त्यर्थ इत्यत्र तु व्याख्यानमेव शरणं। नन्वेवं व्याख्यानादेवानुवृत्त्यननुवृत्ती स्तः किमनेन

सु·
सि·कौ·
टी·त·
१०

सूत्रेणेति चेदत्राहुः॥ अर्थांतरसंग्रहायेदं सूत्रं कृतं तथाहि   अधिकः कारो अधिकारः॥ अधिकं कार्यं गौणेपि प्राप्तस्य प्रवृत्तिरित्यर्थः। तथा च गौणमुख्यन्यायो यत्र नेष्यते॥ अपादानाधिकरणादौ तत्र स्वरितः पाठ्यः। किंच। अधिकः कारः कृतिरिति यं यत्पूर्वः सन् परं बाधते। तथा च नुमचिरतृज्वद्भावेभ्यो नुडित्यादि वक्ष्यमाणपूर्वविप्रतिषेधाः सर्वे संगृहीता भवंति। तत्र स्वरितपाठेनैव गतार्थत्वादित्यादि॥   परनित्येति। परं नित्यं यथा। तुदादिभ्यः शः। तुदति। रुधादिभ्यः श्नम्। रुणद्धि। परमपि लघूपधगुणं बाधित्वा नित्यत्वात् प्राप्तः श्नम्। तथा। घिनकवा। घिनवाम। परमपि लोपश्चास्यान्यतरस्यां म्वोरित्युकारलोपं बाधित्वा नित्यत्वादाडुत्तमस्येत्याट्। परादंतरंगं यथा उभये देवमनुष्याः। इह प्रथमचरमेति परमपि विकल्पं बाधित्वा सर्वादीनीति सर्वनामसंज्ञा विभक्तिनिमित्तत्वेनांतरंगत्वात्। तथा श्वयतेर्णौ श्वीति चङि ह्रस्वं उपधागुणादंतरंगत्वादुवङ्। अशुश्रवत्। अपवादो यथा। परमप्यनेकाल्शित्सर्वस्येति सर्वादेशं बाधित्वा ङिच्चेत्यंतादेशः। दध्ना दध्ने॥ अस्थिदधि   त्यनङ्। नित्यादंतरंगं यथा ग्रामणिनीकुले। नित्यमपीको ह्रस्वोऽचीति नुमं बाधित्वा ह्रस्वो नपुंसक इति ह्रस्वः। कृते तु नुमि अनजंतत्वाद्ध्रस्वो न स्यात्। अंतरंगादपवादो यथा॥ दैत्यारिः। श्रीशः। परम

परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः। असिद्धं बहिरङ्गमन्तरङ्गे। अंतरंगे कार्ये कर्तव्ये बहिरङ्गमसिद्धं स्यात्। अकृतव्यूहाः पाणिनीयाः। निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कुर्वन्तीत्यर्थः॥ इति परिभाषाप्रकरणम्॥ संहितायाम् इत्यधिकृत्य॥ ॥ ॥

पि सवर्णदीर्घं बाधित्वा अंतरंगत्वाद्गुणे पणि च प्राप्तेऽपवादत्वात्सवर्णदीर्घः तथा उन्न्यौ। उन्न्यः। सुल्वौ। सुल्वः। इत्यत्रांतरंगत्वादियङुवङ् च प्राप्तेऽपवादत्वादेरनेकाच इत्योः सुपीति यणायद्यपवादः स्यात्तत्र चरितार्थः। तर्हि परांतरंगाभ्यां बाध्यत एव तथाहि ङिच्चेत्यलः इत्यस्यार्थे ङकारयुक्तेऽनङादेशे चरितार्थत्वात्। तत ङिन प्रवर्तते किंतु परेणानेकाल्शिदित्यनेन बाध्यते। जीवतात्। भवतात्। अयजे इंद्रम्। ग्राम इह। सर्व इत्थम्।   अत्र अयज इ इंद्रम्। ग्राम इ इह सर्व इ इथमिति स्थिते अंतरंगेण गुणेन सवर्णदीर्घो न बाध्यते। तस्य समानाश्रये दैत्यारिः। श्रीशः इत्यादौ चरितार्थत्वात्। असिद्धमिति। तेन पचावेदमित्यादौ एत्वे इत्येत्वं न। अकृतव्यू १०
हा इति। अकृतकार्या इत्यर्थः। एवं तर्हि सर्वस्य शास्त्रस्य वैयर्थ्यं स्यात्। अत आह। निमित्तं विनाशोन्मुखं दृष्ट्वेति। लोके सिद्धार्थकथनमेतत्। यद्वा। असत्यार्थेनाप्येतत्कथनं। उत्सर्गेणेतकर्त्ते इत्यूहः। कार्यविशेषो व्यूहो विनाशोन्मुखनिमित्तकं कार्यं। अकृतो व्यूहो यैस्ते अकृतव्यूहा इति। यद्यपि कृतमपि शास्त्रं निवर्तयंतीति

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

परिभाषांतरं प्रकल्प्य तत्फलं च तुल्यं तथापि अकृतव्यूहा इत्येव लघु। प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरमिति न्यायादिति भावः। न कुर्वन्तीति यथा निमेदुषीमित्यादौ क्वसोरिट्मंत
रंगत्वात्प्राप्तमपि भाविना संप्रसारणेन वलादित्वं नेच्छन्तीत्यर्थः॥ इति परिभाषाप्रकरणं॥ इको यणचि॥ प्रत्याहारग्रहणेषु तद्वाच्यवाच्ये निरूढलक्षणा॥ पूर्त्स्यात्स्यो
त्वादिष्य इति च निर्देशात्॥ तेन इक्शब्देन न इक् प्रतिगृह्यते। यण्शब्देन च त्वारः॥ भाव्यमानस्याणः सवर्णाग्राहकत्वादेवं चेह यणि तद्वाच्यवाच्ये लक्षणा तु न शंक्यैव।
भाव्यमानस्याणः सवर्णकत्वाभावेन यण्वाच्ययकारादिवाच्यानामभावादतो नास्ति यथासंख्यं। न च लृस्यार्थवो धात्पूर्वभाविनं शक्यार्थज्ञानमाश्रयय यथासंख्यमा
स्त्विति वाच्यं। एवमपि तृतीयचतुर्थाभ्यां ऋकारलृकाराभ्यां प्रत्येकं त्रिप्रादुपस्थितौ लृवर्णेनां रेफादेशस्य ऋवर्णेनां लादेशस्य च प्रसंगात्। तस्मादिह स्थाने तर ःत
मइक्ष्मि सूत्रेणैव हसहेरित्याभिप्रेत्यानुपदं वक्ष्यति स्थानत आंतर्यादिति। अचीति। कस्मादचि परइत्याकांक्षायां अर्थादिक इति संवध्यते। संहितायां विषय इति। दध्य
त्रेत्यादौ कार्यिनिमित्तयोर्यदा। अतिशयितसंनिधिर्विवक्ष्यते तदैव यण् भवतीति भावः। अनचि च। यरोनुनासिक इति सूत्राद्यरो वेति चानुवर्तते॥ अचो रहाभ्यामिति

इको यणचि। ६।१।७७। इकः स्थाने यण् स्यादचि संहितायां विषये। सुधी उपास्य इति स्थिते। स्थानत आन्तर्यादीकारस्य यकारः। सुध्य्
उपास्य इति स्थिते। अनचि च। ८।४।४७। अचः परस्य यरो वा द्वे स्तो न त्वचि। इति धकारस्य द्वित्वं। स्थानिवदादेशोऽनल्विधौ। १।१।५६। आदेशः
स्थानिवत्स्यान्न तु स्थान्यलाश्रयविधौ। अनेनेह यकारस्य स्थानिवद्भावेनाऽचूत्वमाश्रित्याऽनचि चेति द्वित्वनिषेधो नाऽशङ्क्योऽनल्विधाविति तन्नि

सूत्रादचो द्वे इति च तदाह। अचः परस्येत्यादि। एवं चात्र वाग्रहणं तु हन्येवेष्टसिद्धेस्त्रिप्रभृतिषु शाकटायनस्य सर्वत्र शाकल्यस्य दीर्घादाचार्याणामिति च सूत्रत्र (।षेधात्॥
यं नारंभणीयमिति भावः। अच इति किं। नाद त्यमित्यादौ मस्य द्वित्वं माभूत्। अनचीति यदि पर्युदासः स्यात्तदा नञिवयुक्तमन्यसदृशे तथा ह्यर्थगतिरिति न्यायादजभिन्ने
ऽजसदृशे वर्णे हलीत्यर्थः स्यात्। ततो लाघवात् हलीत्येव वदेत्॥ तस्मात्प्रसज्यप्रतिषेध इति ब्रवीति न त्वचीति। एवं चावसानेपि द्वित्वं भवति। वाक् वाक्क्। स्थानिवदादे
शः। आदेशोक्ते स्वरूपभेदात् स्थानिप्रयुक्तकार्याणामप्रवृत्तावतिदेश आरभ्यते। अस्तेर्भूः। आर्धधातुके विवक्षिते। धात्वादेशो धातुवत्। तेनाचो यदित्यादि धातुप्रत्ययाः
भव्यं बभूव। किमंकः। अंगादेशोऽपवत्। तेन इना देशदीर्घसभावाः केनाकाभ्यां। केः। आदेशग्रहणं किमर्थं। स्थानिवदित्येतावतैव संबंधिशब्दमहिम्ना तल्लाभात्

सु-
सि-कौ-
टी-तु
११

थापीत्नवरधीत्नेरस्युक्तेपुत्रइतिगम्यगतेइतिचेदत्राहुः। द्विविध आदेशः प्रत्यक्ष आनुमानिकश्चेति। अस्तेर्भूः इत्यादिः प्रत्यक्षः। तेऽनुरित्यादिस्त्वानुमानिकः। एकरिय
नहि इकारे लोकारांतस्थानी अनुमीयते। उकारेणचोकारांत आदेशः। तथाच तेऽस्थाने फलितोऽर्थस्तत्रासत्यादेशग्रहणे प्रत्यक्षस्यैव ग्रहणं। नत्वनुमानिकस्य स्यात्। आ
देशग्रहणसामर्थ्यात्तूभयपरिग्रहः। नपचतिस्यादेलिङ तत्वात् पदसंज्ञा सिध्यति। न चैवं हरित्यादिय यथाश्रुतमेवास्तु एकदेशविकृतस्यानन्यत्वात्पदं भविष्यतीति चेन्न।
अर्थवत्येवस्थान्यादेशभावविश्रांतेर्वाच्यत्वात्तस्यैव प्रसंगसंभवात्। तथाहि। षष्ठीस्थानेयोगेत्युक्तं स्थानं च प्रसंगः। स चार्थवतः अर्थप्रत्यायार्थं शब्दप्रयोगात्। यद्यपि
त्वेः सिजादावसंभवी तत्रापि सति संभवे अर्थप्रयुक्त एव प्रसंगो ग्राह्य इत्यनेनैवादेशग्रहणेन ज्ञाप्यते। उक्तं च। सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः एकदेशवि
कारे हि नित्यत्वं नोपपद्यते इति परमिहार्थवत्। पद्यतेऽनेनेति व्युत्पत्तेः यद्यपि सर्वविकारे सुतरां नित्यत्वानुपपत्तिस्तथापीह विकार एव नास्तीति तात्पर्यमेतच्च शब्दकौस्तुभे

अचः परस्मिन्पूर्वविधौ। १।१।५७। अल्विध्यर्थमिदम्। परनिमित्तोऽजादेशः स्थानिवत्स्यात् स्थानीभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये इति
स्थानिवद्भावे प्राप्ते। न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु। १।१।५८। पदस्य चरमावयवे द्विर्वचनादौ च कर्तव्ये परनि ।।
निमित्तोऽजादेशो न स्थानिवत् इति स्थानिवद्भावनिषेधः। झलां जश् झशि। ८।४।५३। इति धकारस्य दकारः॥ ११ सप्तमा। अनल्विधाविति किं। यथा

लविधिः यश्चालः परस्य विधिः यश्चाल्विधिस्तत्र माभूत्। तत्रालाविधौ यथा व्यूढोरस्केन। अत्र सकारस्य स्थानिवत्त्वेन विसर्गवद्रुत्वमाश्रित्याऽव्यवाय इति णत्वं प्राप्तं
अलः परस्य यथा। द्यौः पंथाः सः इहहल्ङ्यादिलोपो न। अलो विधौ सुकामः। लोपो व्योर्वलीति लोपो न न चात्व विधिसामर्थ्याल्लोपो न भवेदिति शंक्यं। द्युयानमित्यादौ तस्य सावका
शत्वात्। अल्विधौ यजेः क्तं कइष्टः। हवि चेत्युत्वं न। नचैहस्थानिवद्भावेन जातेष्वुत्वे आदगुणे वादेशे च कृते हलि सर्वेषामिति नित्यं लोपेन कइष्ट इति रूपं सिध्यत्येवेति वाच्यं
यिष्ट इति रूपांतरासिद्धिप्रसंगात्। सिद्धांते तु कइष्टः भोभगोअघोपूर्वस्येति यत्वे लोपविकल्पः। कयिष्ट इति च रूपद्वयमभ्युपगम्यते। अल्त्विह स्थान्यवयवत्वं तद्विधौहियत्रा ११
दित्वमाश्रितं। यत्र चादेशावयवो न तु स्थान्यवयवस्तथाहः दिनामित्यादौ रुदादिभ्य इति वलादिलक्षण इट् च सिध्यति। तदेतदाह। न तु स्थान्यलाश्रय इति। आश्रयणं चेह य
थाकथंचित्न तु प्राधान्येनैवेत्याह ग्रहणेन प्रयत्नेत्यत्र वलादिलक्षण इडेन॥ अचः परस्मिन्पूर्वविधौ॥ अचः किं। आगत्य। वाल्पपीत्यनुनासिकलोपस्तुकिं कर्त
एवं गृह्यते तेन रामायेत्यादौ सुपि चेति दीर्घः सिध्यति तदेतदाह ३

CC-0. In Public Domain. Digitization by eGangotri

नउरदत्वस्यस्थानिवत्वेनसंप्रसारणं प्

चङ्कारस्य०

व्येनस्थानिवत्। परस्मिन् किं। आदीध्यानित्यत्वादिट् एत्वं नच न परनिमित्तेन यीवर्णयोरिति लोपे कर्तव्ये तन्न स्थानिवत् पूर्वविधौ इति किं नैधेयः। निपूर्वाद्धाञः उपसर्गे घोः
किः आतो लोपः इच इत्यत्र आनियत्र इति ढक्। आकारस्य स्थानिवत्त्वे तु अचत्वव्यपदेशेन ह्यचत्वं विरुद्धत्वाद्धयेनानहि त्रिपुत्रो हि पुत्रव्यपदेशं ल भते। नन्वेवम्
पि विधिग्रहणं व्यर्थं पूर्वस्येति षष्ठ्या कार्ये कर्तव्ये इत्यर्थस्य लाभे तु शक्यत्वादिति चेन्न। पूर्वस्य विधिः। पूर्वस्माद्विधिः। इति समासद्वयलाभार्थं विधिग्रहणात्। यद्यप्यत्र
पंचमीसमासपक्षो मूलेनोक्तस्तथापि पूर्वस्मादपि विधौ स्थानिवद्भावपक्षे तु अड्व्यवाय इत्येवात्र णत्वमिति पद्मनाभघट्टकेस्वीकृत एव सः। अल्विध्यर्थमिदं इति नि
नवव्रश्चेत्यत्र वस्य संप्रसारणं तया न संप्रसारणे इति निषेधात्। न चोरदत्वं परनिमित्तमिति वाच्यं। अंगाक्षिप्ते प्रत्यये परे तद्विधानात् पूर्वस्माद्विधिः पूर्वविधिरिति पंच
मीसमासपक्षे तु प्रयोजनं। नन्वेति। नन्वेतौ इह यणादेशस्य स्थानिवद्भावान्नेटौ अत्र हि तन्नित्यं गनिमित्तेन चस्थानिभूतादुकारात्पूर्वमिति। नन्विदं न प्रयोजनं व
हिरंगस्य यणोऽसिद्धत्वादिडागमस्यात्राप्रसक्तेः। न च नाजानंतर्ये इति निषेधः। यत्रांतरंगे बहिरंगे वा चोरानंतर्यमिति हरदत्तादिमतेन निषेधप्रवृत्तावपि उत्तरकार्यय
त्रा च आनंतर्यमाश्रितं तत्र बहिष्प्रकृतिर्नेति कैय्यटमतेन तदभावात्। न चैवमपीपचन्निति प्रयोजनं भवत्येव इह हि अंतरेकारस्य चातो गुण इति पररूपत्वेन तस्य चप
रादिवद्भावाच्छिग्रहणे न ग्रहणे सति सिजभ्यस्तविदिभ्यश्चेति जुसभावो नित्यमिति लोपस्य एकादेशस्य वा स्थानिवद्भावान्न भवतीति वाच्यं विनहि लङ्येवानंतरोऽझिः संभवतीति तत्सा
हचर्यादस्य लापि लङः एव झेर्जुस् विधानात्। न च सिचा साहचर्यात् लुङ एव ग्रहणमस्त्विति शंक्यं विप्रतिषेधे परमिति परसाहचर्यस्य बलीयस्त्वान्न चैवमप्यदस्य
त्यादिस्थादेशस्य स्थानिवा      णाय पंचमीसमासपक्ष आवश्यकमिति वाच्यं चङ्कारस्यांतरकारस्य चातो गुण इति पररूपे कृते तस्याभावादस्यादेशाप्रसक्तेः अत्र त्वेकादेश
स्य परादिवद्भावाज्झग्रहणे न ग्रहणं न भवति। अल्विधौ अंतादिवद्भावाप्रवृत्तेः। अन्यथा अयजे इं इन्द्रमित्यादौ सवर्णदीर्घो दुर्वार एव स्यात्। अस्तु वा परादिवद्भावस्तथा
पि नकारस्याऽस्यादित्यदादेशे कर्तव्येऽत्ता देशेन स्थानिवद्भावविधित्वात्। तस्मादपंचमीसमासपक्षो निरर्थक एव चेदत्राहुः। पंचमीसमासप्रयोजनं तथा अपीपच
न्नित्युदाहरतो भगवतस्सुनेः साहचर्यं नियामकतया संमतम्। द्विस्त्रिश्चतुरिति सूत्रे कृत्वोऽर्थग्रहणं ज्ञापकात् साहचर्येन सर्वत्राश्रीयते एवं च प्रवृत्तेर्यङ्लुकि अभ्य
स्ताश्रयस्य जुसः प्रवृत्त्या अबोभवुरिति रूपं सिध्यति आत इति नियमस्य सिचः परत्वमाश्रित्य योजुस्तस्मात्प्रस्तन्मात्रपरतया माधवादिभिर्व्याख्यातत्वात्। अत एवाभ्यस्ताश्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु. सि. कौ. टी. न. १२

तानां द्वंद्वः ततो विधिशब्दे १०

योऽनुसनित्यत्वात्तुक्। अबोभूवुरिति मूले यङ्लुङं नेष्टक्रमात्। तथा चापीपच न्नित्येन तासिद्धये पंचमीसमासपक्ष आश्रयणीय इति अन्ये त्वाहुः। पंचमीसमासपक्षप्रयोग
न तयाभाव्ये वेभिदिता माथितिक इत्यस्याप्युदाहृतत्वान्न तस्य वैयर्थ्यशंका कार्या। यद्यपि यङोऽकारस्य लोपस्य स्थानिवद्भावं विनापि एकाच उपदेशेऽनुदात्तादित्या
दिविहितनिषेधस्य णाश्रयणादेव इडिनिषेधात्प्रवृत्तौ भिदेर्यङ् नानुचिवेभिदितेति रूपं ससाध तथापि माथितिक इत्यादिसिध्यर्थं स पक्षोऽभ्युपगंतव्यः न च मथितं
पण्यमस्य माथितिक इत्यत्रापि न दृष्यपण्यमिति ठकि इकारे यत्न क्वते यस्येति चेति लोपादिसुसुक्तांतादिति इकस्थाने प्रसज्यमानो यः कादेशः सोऽयलोपस्य स्थानिव
द्भावं विनैव सुपरिहरः ठस्य क इत्यत्र स्थान्यादेशयोरकार उच्चारणार्थ इत्यभ्युपगमे अल्विधित्वेन स्थानिवद्भावाप्रवृत्त्या ठस्थानिक इकादेशः प्राप्तो न भवतीति कादे
शाप्रसक्तेर्माथितिक इति रूपासिद्धेः किमनेन पंचमीसमासपक्षाश्रयणेनेति वाच्यं मथितयतेः क्विपि टिलोपणिलोपयोर्वेरपृक्तलोपे च मथित्। तेन चरति मथि
तिक इत्यत्र चरतीति ठकि तस्येकादेशसिद्धये तत्पक्षस्यावश्यकत्वात्। न त्वत्र स्थानिवद्भावं विनापि इकादेशापवादः कादेशः सुपरिहरः॥ नायेनादेशकल्पनायां
मानाभावः शंक्यो माथितिक इति भाष्योदाहरणस्यैव मानत्वादिति स्यादेतत् पूर्वत्वस्य सावधित्वेन सन्निहितस्यैवावधित्वमुचितं। संनिहितं चेह त्र्यं स्थानी आदेश
निमित्तं च। तत्र तावत् स्थानिन अवधिः। तस्यादेशेनापहारात्। नाप्यादेशनिमित्ते। वैय्याकरण इत्यत्र एकारस्यायादेशापत्तेरित्याशंक्याह। अचः पूर्वत्वेन हेतुनेति पू
र्वत्वमुपलक्षणं न तु विशेषणमिति भावः॥ न पदांत॥ पदांतादीनां चद्वंद्वेन कर्मषष्ठ्यंतस्य समासः। विधिशब्दश्च भावसाधनो विधानं विधिरिति स च द्वंद्वांते श्रूयमा
णत्वात्प्रत्येकं संबध्यते। परस्य चरमावयव इति द्व्यक्षं वेनीति द्व्यक्षवीः। द्व्यक्षं वानीति द्व्यक्षवाः। तमाचष्टे द्व्यक्षवयति ततो क्विप् द्व्यक्षव् इह लोपो व्योर्वलीति वलोपो न टि
लोपस्य णिलोपस्य पदानवयवत्वात्। पदांतस्य स्थाने विधौ नेति व्याख्याने तु न पदांतेति स्थानिवत्त्वनिषेधाद् लोपः स्यादेव। यादिमनोरमायां स्थितं। द्विर्वचनादे
चेति पलोपादय आदिशब्दार्थः। वरे इति तु वरे योजादेशः स न स्थानिवदिति व्याख्येयं सहविवक्षाभावेपि निपातनात् द्वंद्वः सप्तम्यलुक् च। अथोदाहरणानि पदांते
कानि संति कौ स्तः इह यणावादेशयोः कर्तव्ययोः श्नसोरल्लोपो न स्थानिवत्॥ न चेकारौकारयोः स्थानिभूतादचः पूर्वत्वविरहादेवाल्लोपो न स्थानिवदिति वाच्यं। वाक्या
द्योत्सृत्य पदानि संक्षिप्यंते इति पक्षे स्थानिभूतादचः पूर्वत्वस्य सत्वात् यद्वा गौ चः गौचेत्यादावोकारस्यावङ् कर्तव्ये च इत्यल्लोपो न स्थानिवदित्युदाहार्य
वा स्थानिवत्वान्न च सुवंतास्पिजिदिति हरदत्तादिमते अंतर्वर्तिसपापवादत्वान्न पदांतेति निषेधः शंक्यः विधेयस्य लोपस्य ४ 12 १२

CC-0. In Public Domain. Digitization by eGangotri

अत्र हिलोपस्यान्यकारात्पूर्वत्वेन दृष्टत्वात् ओकारस्य द्विर्वचने। सुद्ध्युपास्यः। नाज्जानन्तर्ये इति निषेधात् बहिरंगपरिभाषात्र न प्रवर्तते। स्थानिवद्भावनिषेधसामर्थ्या
च्च। एवं क्वचिदन्यत्राप्यूह्यं वैरयायावरः। यतेर्यङ् तादृशश्च यङ्। इति वरच्। अतो लोप इति च आतो लोपः इटि चेत्यालोपे कर्तव्ये न स्थानिवत् यलोपे यातिः यातेर्यङं नास्ति च अ
तो लोपः यलोपः। अल्लोपस्य स्थानिवत्त्वात् अतो लोपः यलोपः न च पुनरालोपः शंक्यः। चिणो लुङ्न्यायेनालोपस्यासिद्धत्वात् स्थानिवद्भावाच्च। ननु यदि लोपविधिं प्र
ति स्थानिवत्त्वनिषेधस्तर्हि कथं वाय्वोरिति उच्यते। असिद्धं बहिरंगमिति यणोऽसिद्धत्वात् वलोपः। न च नाजानन्तर्ये इति निषेधः उत्तरकार्ये अचामानन्तर्ये यत्र तत्रैव
तदभ्युपगमात्। किं चात्र स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवदिति वार्तिकमस्ति। तेनान्यः स्थानिवदिति भवतीति न दोषः। स्वरे। चिकीर्षकः ईकारस्य
लितीत्युदात्तत्वे कर्तव्ये सत्याऽतो लोपो न स्थानिवत्। न च लितीत्यारंभसामर्थ्यं कारक इत्यादौ सावकाशत्वात्। सवर्णानुस्वारयोः शिण्ढि ढिन्नसोरल्लोपो न स्थानि
वत्। यद्यप्यनुस्वारे न स्थानिभूतादचः पूर्व इति तस्य परसवर्णे कर्तव्ये ल्लोपस्य स्थानिप्रसंग एव नास्ति तथापि स्थानिद्वारानुस्वारेऽपि दृष्टत्वस्य सत्त्वात् प्रसंग इत्या
हुः। ननु सवर्ण ग्रहणमात्रेणानुस्वारोऽप्याक्षेप्तुं शक्य इति किमनेन पृथगनुस्वारग्रहणेन सत्यं पृथग्ग्रहणाभावे यत्र परसवर्णस्तत्रैवेति संभाव्येत। तथा च य
त्र न परसवर्णप्रसंगः शिंषंतीत्यादौ तत्र यलोपस्य स्थानिवद्भावनिषेधं वरग्रहणं तत्पृथग्यलोपग्रहणमिति ज्ञेयम्। दीर्घे प्रतिदीव्ना। हलि चेति दीर्घे कर्तव्ये अल्लोपो
न स्थानिवत्। यणादेशस्तु स्थानिवद्भवत्येव। लोपाजादेश एव न स्थानिवदिति उक्तत्वात्। तेन हलि च उपधायां चेति दीर्घो भवत्येव कियोः गियोः दिव्यतुरित्यादि
सिद्धं न धिसान्धिश्च भा। अदनं धिः तत्र अदेः क्तिनि बहुलं छंदसीति घसादेशः घसिभसोर्हलीत्युपधालोपः झलो झलीति सलोपः। झषस्तथोर्धोऽध इति धत्वं घस्य झलां जश् झशि
इति जश्त्वे कर्तव्ये उपधालोपो न स्थानिवत्। समानस्य छंदस्यमूर्धप्रभृत्युदर्केष्विति सः समाना अन्धिः सग्धिः। न चात्र सलोपे धत्वे च कर्तव्ये पूर्वस्मादपि इति स्था
निवद्भावात् सग्धिरिति रूपं न स्यादिति शंक्यं पंचमीसमासपक्षस्यानित्यत्वात् तत्र निष्ठायां सेटीति लिंगात्। तथा हि तत्र सेटीति पदं न तावदनिड्व्यावृत्त्यर्थं लि
जन्तादसंभवात्। ननु संज्ञपितः पशुरित्यत्र यस्य विभाषेति इण्निषेधे संभवत्येवानिट्त्वं सनि वेति विकल्पितेट्त्वादिति चेन्न। यस्य विभाषेत्यत्र एकाच इ
त्यनुवृत्तेः। अन्यथा दरिद्रित इति इण्न स्यात् तत्र न नियतिरहरिद्रातिभ्य इति वार्तिकेन सनो विकल्पितेट्त्वात्। तस्मात्कालावधारणार्थं सेड्ग्रहणं। इटि कृते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

णिलोपो न तु नतः प्रागिति। अन्यथा कारितमित्यादौ णिलोपे कृते एकाच उपदेशे इति इण्निषेधः॥ तर्हि णिचा व्यवधानान्निषेधप्राप्तिरेव नास्तीति सेटीत्यनर्थकं
सत्तस्यानित्यतां ज्ञापयतीति स्थितं। ननु जश्त्वविधौ यदि स्थानिवत्त्वनिषेधस्तर्हि पठ्यतीत्यत्रान्तर्वर्तिनीं विभक्तिमाश्रि
त्य पदत्वाज्जश्त्वं स्यान्नैवं। इष्टवदित्यतिदिष्टया भसंज्ञया पदसंज्ञाया बाधाज्जश्त्वाप्रवृत्तेः। चरि। जक्षतुः। जक्षुः। घसेर्लिटि अतुस् उस् च गमहनेत्युपधालोपः
खरि चेति चर्त्वं प्रति न स्थानिवत्। भाष्ये तु पूर्वत्रासिद्धे न स्थानिवदित्यवष्टभ्य द्विर्वचनसवर्णानुस्वारदीर्घजश्चरः प्रत्याख्याताः। तद्ध्वीन्यानुसलोपे धत्वे च कार्ये
ऽस्य स्थानिवद्भावशंकैव नास्तीति बोध्यम्॥ अदर्शनं लोपः। अत्र दृशिर्ज्ञानसामान्यवचनो। दर्शनं ज्ञानं न त्विह शब्दानुशासनप्रस्तावाच्छ्रवविषयकं सत् श्र
वणं संपद्यते। न च श्रोतृव्यापारस्तन्निषेधोऽश्रवणं। नन्वेवं लोपो व्योर्वलीत्यादौ वकारयकारौ न श्रोतव्याविति श्रोतृव्यापार एव निषिध्येत प्रयोक्तृव्यापार

अदर्शनं लोपः। १।१।६०। प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात्॥ संयोगान्तस्य लोपः। ८।२।२३। संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात्। इति यलो
पे प्राप्ते। यणः प्रतिषेधो वाच्यः॥ यणो मयो द्वे वाच्ये॥ मय इति पञ्चमी यण इति षष्ठीति पक्षे यकारस्यापि द्वित्वं। तदिह धकारयकारयोर्द्वित्वविक
ल्पाच्चत्वारि रूपाणि। एकधमेकयं द्विधं द्वियं द्विधमेकयं एकधं द्वियं सुद्ध्युपास्यः मध्वरिः धात्रंशः लाकृतिः उच्चारणमनिषिद्धं स्यात्। अत्राहुः॥ अस

ति श्रवणे उच्चारणमनर्थकमेवेति सामर्थ्याच्छ्रवणनिषेधे तद्धेतुभूतमुच्चारणमपि निषिद्धं भवतीति। प्रसक्तस्येति। इह स्थाने इत्यनुवर्तनादेतल्लभ्यते। प्रसक्तस्ये
ति किं। दधि। मध्वित्यादौ नुगागमो मा भूत्। अस्ति हि तत्र क्विपो दर्शनं तच्च लोप इति प्रसक्तविशेषणाभावे प्रत्ययलक्षणेन नुक् स्यादेवेति। हिक्क। संयोगान्त
स्येति। तदन्तस्येति। अलोऽन्त्यस्येति परिभाषयेति भावः। यद्यपि विशेषणेन तदन्तविधिर्लभ्यते संयोगस्येत्येव सूत्रयितुमुचितं तथापि प्रत्येकं संयोग इति पक्षे
दृषत्करोतीत्यादौ लोपं वारयितुं संयोगावन्तौ यस्येति द्विवचनान्तेन समासलाभा र्थमन्तग्रहणमिति मनोरमायां स्थितं। संयोग इति महासंज्ञाकरणसाम १३
र्थ्यादेकस्य संयोगसंज्ञा न भविष्यतीति अन्तग्रहणमित्यन्ये। वाक्यं यणः प्रतिषेध इति वा चनिकमिदं। यद्वा साध्यो व्याख्येयः। व्याख्या च द्विधा झलो झलीत्यतो
झल्ग्रहणमपकृष्य झल एव लोपो विधीयत इति। अन्तरङ्गे लोपे कर्तव्ये बहिरङ्गस्य यणोऽसिद्धत्वमिति वा। न च षाष्ठी परिभाषा त्रैपादिकमन्तरङ्गं लोपं न पश्यती

13

CC-0. In Public Domain. Digitization by eGangotri

तिवाच्यं। कार्यकालपक्षाभ्युपगमात्। न च नाजानन्तर्य इति निषेधः उत्तरकालप्रवृत्ते लोपे आजानन्तर्याभावात्। न ह्युक्तं। संयोगान्तलोपे यणः प्रतिषेधः न वा झ
लो लोपाद्बहिरंगलक्षणा हेति। चत्वारि रूपाणीति। इह धकारस्य द्वित्वे जश्त्वे च कृते पूर्वत्रासिद्धीयमद्वित्व इति जश्त्वस्य सिद्धत्वाभावेन लक्ष्यभेदात्पुनर्धका
रद्वित्वप्रसक्तौ रूपाधिक्यमस्ति। अत्र केचिदाहुः। उकारात्परस्य यरो द्वित्वे कृते पुनः स्तूकारात्परस्य यरो द्वित्वं न भवति निमित्तभेदाभावादित्याशयेनेदमुक्तमि
ति। तिर्यां तु तादृग्गणो व व्रश्चेत्यत्र उरदत्वस्याचः परस्मिन्निति स्थानिवद्भावान्न संप्रसारणमिति वक्ष्यतेऽनेन निःसमाधानग्रंथो मूलस्थो विरुध्येत। तन्निमित्तस्य
लिटो भेदाभावादिति दिक्। अन्ये तु धकारस्य जश्त्वे कृते पूर्वत्रासिद्धीयमद्वित्वे इति जश्त्वस्यासिद्धत्वाभावाद्धकारे पुनर्द्वित्वं भवत्येव व्यक्तिभेदात्। अत एव संय्यं
तेन्याशे परसवर्णद्वित्वं भाष्यकृता उदाहृतं। वट्संतत् इत्यत्र सकारद्वित्वसिद्धये पूर्वत्रासिद्धीयमद्वित्वे इति मनोरमायामप्युक्तं। एवं यकारेपि द्वित्वस्य पुनः प्रवृत्तौ
ऽसम्भवः। आष्टमिकद्विर्वचनस्य स्थाने द्विर्वचनत्वात् स्थान्यादेशयोस्तयोरभेदात्। यत्तूक्तं मनोरमायामेकस्यां व्यक्तौ एकं लक्षणं सकृदेव प्रवर्तते न द्वयेकः पू
र्वपरयोरिति सूत्रभाष्ये सिद्धान्तितत्वात्। यत्तु पुनर्द्वित्वप्रवृत्तिरन्यथा द्वित्वानन्त्यापत्तेरित्यादि तद्वधाननिबंधनं तत्राधानादिशास्त्रदृष्टान्तेन क्वचिदेवैकस्मिन्प्रयोगे गु
णादिशास्त्रस्यानुष्ठापकत्वं स्यान्न प्रयोगान्तरे इत्याशंक्य ज्योतिष्टोमादिशास्त्रदृष्टान्तेन प्रयोगान्तरेपि गुणादिशास्त्रप्रवृत्तेः एवं सिद्धान्तितत्वात्। ननु सकृच्छास्त्रप
वृत्तेः। आनन्त्यापत्तिरपि प्रकृते न दोषः। सा हि अनन्तकार्यसहितप्रयोगस्याशक्यत्वात् सकृच्छास्त्रकर्तव्यस्य परिनिष्ठितप्रयोगस्याभावात् सकृच्छास्त्रस्यानुष्ठापकत्वाप
त्यादोषः। प्रकृते तु नास्ति द्वित्वस्य वैकल्पिकत्वेन यथावच्छक्ति द्वित्वप्रयोगसहितस्य परिनिष्ठितत्वेन तेनैव शास्त्रस्य कृतार्थत्वात्॥ लिटि धातोरिति। द्वित्वस्यनु
नित्यत्वादानन्त्यापत्तेः क्वचिद्विश्रान्तौ कल्पनीयायां लाघवात्प्रथमप्रवृत्तावेव विश्रान्तिविकल्पनार्थमभ्यासग्रहणमित्याख्यातं। अत एव सर्वस्य द्वे इत्यस्यापि पुनः पु
नः प्रवृत्तिरित्याहुः। नन्वत्रैकोऽसवर्ण इति शाकल्ये न रूपान्तरमस्तीति चेन्नैवं समासे तन्निषेधात्। न च नित्यसमास एव तन्निषेध इति वाच्यं। सन्नित्यसमासयोः
शाकलप्रतिषेध इति वार्तिकस्य नित्यग्रहणस्य भाष्ये प्रत्याख्यातत्वात्। मनोरमायां तु जश्त्वेन दकारे कृते तेन सह द्वित्वं नेत्याशयेन सकारद्वित्वेनाष्टौ विसर्ग
द्वित्वेन षोडशेत्युक्तं। द्विधमिति। यद्यपि धस्य जश्त्वेन दकारे धद्वयं नास्ति तथापि भूतपूर्वगतिमाश्रित्यैवमुक्तं। सुद्युपास्य इति। कर्तृकरणे कृता बहुलं इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·कौ· तृतीयासमासः। नन्विह यणोवदुर्लभः सुधीशब्दस्य ध्यायतेः संप्रसारणेन निष्पन्नत्वेन संप्रसारणाच्चेति पूर्वरूपापत्तेरितिचेन्मैवं। संप्रसारणपूर्वत्वे समानाङ्गग्रह
टी·त· णमितिवार्त्तिकोक्तेः। नचैवमपि नभूसुधियोरितियण्निषेधः शंक्यः आङ्गत्वेन प्रत्ययेपरत एव तन्निषेधस्य प्रवृत्तेः। सुपीत्यनुवर्त्य सुपिपरत एव यण्निषेधाच्च॥
१७ धात्वंशइति। अत्र रेफस्य द्वित्वं न द्वित्वप्रकरणेरहाभ्यामितिसाक्षाच्छ्रुतेन निमित्तभावेन रेफस्य कार्यित्वबाधनात्। सुद्ध्युपास्य इत्यादौ तु स्थानित्वेन निमित्तत्वमि
कोनबाध्यते। तस्मादित्युत्तरस्य वाप्रकृत्युपित्र्युपस इत्यादिनिर्देशात् ज्ञापकात्। नकारस्य तु द्वित्वं भवत्येव। तच्चवेत्यतो रूपद्वयं नादिनी। स्त्री घ्याक्रोशः प्राये
णप्रवर्ततइतिस्त्रीलिंगमुदाहरति पुत्रादिनीति। इहसुप्यजातौ विनिर्णिनिः। तत्परे चेति। आदिनियः पुत्रशब्दस्तस्मिपरेपिपुत्रशब्दस्य नद्वेस्तइत्यर्थः
नादिन्याक्रोशेपुत्रस्य ८।४।४८। पुत्रशब्दस्य नद्वेस आदिनिशब्दे परे आक्रोशे गम्यमाने। पुत्रादिनीत्वमसिपापे आक्रोशे किं। तत्वकथने हि
र्वचनम्भवत्येव। तत्परे च। पुत्रपुत्रादिनीत्वमसिपापे। वाहतजग्धयोः। पुत्रहती। पुत्त्रहती। पुत्रजग्धी। पुत्त्रजग्धी। त्रिप्रभृतिषु शाकटायनस्य
८।४।५०। त्र्यादिषु वर्णेषु संयुक्तेषु वा द्वित्वं। इन्द्रः। इन्द्रः। राष्ट्रं। राष्ट्रं। सर्वत्रशाकल्यस्य ८।४।५१। द्वित्वन्न। अर्कः। ब्रह्मा। दीर्घादाचार्याणां। ८।
४।५२। द्वित्वन्न। दात्रं। पात्रं। अचोरहाभ्यांद्वे ८।४।४६। अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः। हर्य्यनुभवः। नह्यस्ति। हलोयमांयमि
लोपः ८।४।६४। हलः परस्य यमो लोपस्स्याद्वा यमि। इतिलोपपक्षे द्वित्वाभावपक्षे चैकयं रूपन्तुल्यं लोपारम्भफलन्तु आदित्यो देवताऽस्येति आ
दित्यं हविः। यमां यमीति यथासंख्यविज्ञानान्नेह। माहात्म्यं। एचोयवायावः ६।१।७८॥ ९ वाहतेति। द्वित्वस्य वैकल्पिकत्ववार्त्तिकमिदं नारंभणी
यमित्येके। अन्ये तु हतजग्धयोः परतः पुत्रशब्दस्यैवानचि चेति द्वित्वं नान्येषामित्यादिनियमसंभवात् तदर्थमारंभणीयमेवेदमित्याहुः। पुत्रहतीति। पुत्रो हतो
ययासा। अस्वांगपूर्वपदाद्वेति ङीष्। एवं पुत्रोजग्धो ययासापुत्रजग्धी। अचोरहाभ्यां। अचः किं। ह्नुते इत्यादौ नकारस्याभूत्। हलोयमांयमि। हलः किं। न्याय्यं इह १७
यकारादीनां यकारादौ परे यथासंभवमुदाहरणान्युच्यन्ते सुद्ध्युपास्यः। मध्वरिः। अत्र यणोमयइति मस्य वः परस्य यस्य वस्य च द्वित्वे कृते अनेन लोपः। दुर्लभः ड
ङुङ्वो। कुर्मः। अत्र तु अचोरहाभ्यामिति लस्य तस्य —— मस्य च द्वित्वे कृते लोपः। प्रत्यङ्ङात्मा। सुगण्णीशः। सन्नच्युतः। अत्रापि वचि चेति ङमो द्वित्वे सत्यनेन ङ

कारणे कारनकाराणां लोपः। लोपः स्याद्धूति। ध्वयोर्ह इति सूत्रादन्यतरस्यामित्यनुवर्त्तत इति भावः। लोपारंभफलं त्विति आदित्योरेवता आदित्य शब्दाद्दित्यदित्येति एयप्रत्य
ये यस्येति चेत्यकारलोपे अनेन च यलोपे आदित्यमित्येकयकारकं रूपं सिध्यति नान्यथा इति भावः। न चापत्यस्य च तद्धिते नातीत्यनेन यलोपेऽकृते एकयकारकं सिध्यतीति
वाच्यं। अदितौ जात आदित्य इत्यादिविवक्षायां तस्याप्रवृत्तेः। यथासंख्यविज्ञानादिति। उकारोदाहरणे तु लोपारंभफलाभावादेकपस्येरेकेपरतउदाहरणाभावाच्च य
थासंख्यसूत्रमिह नोपन्यस्तं। माहात्म्यमिति। अत्र मलोपो नेत्यर्थः। हलो यमां यमि लोप इति तु न सूत्रितं मूर्द्धः श्रार्ङ्गमित्यादौ रेफात्परस्य लोपापत्तेः॥ एचः क
मादिति। ननु त्रैव यथासंख्यसूत्रे वक्तुमुचितं। प्रत्याहारग्रहणे पुनस्तद्वाच्यवाच्येनिरूढलक्षणाभ्युपगमेनैतिलिङ्गस्यार्थे वो धोत्पूर्वभाविज्ञक्यार्थज्ञानमादाय यथासं
ख्यत्वस्यावश्यं वक्तव्यत्वात्। अन्यथा एचां क्रमेणायवाय्यावो न सिद्ध्येरन्। मैवं। अंतरतमत्वेनापि तत्सिद्धेः। तथाहि। एचः संध्यक्षराणि। तत्र च संवृताकारतालव्य

एचः क्रमादय् अव् आय् आव् एते स्युरचि॥ तस्य लोपः। ५।३।८९। तस्येतो लोपः स्यात्। इति यवयोर्लोपो न। उच्चारणसामर्थ्यात्। एवमन्ये
ऽपीह न भवति। हरये। विष्णवे। नायकः। पावकः। वान्तो यि प्रत्यये। ६।१।७९। यकारादौ प्रत्यये परे ओरौतोरव् आव् एतौ स्तः। गो
विकारो गव्यं। गोपयसोर्यत्। नावा तार्यं नाव्यं। नौवयोधर्मेत्यादिना यत्। गोर्यूतौ छन्दस्युपसंख्यानं॥

अध्वपरिमाणे च॥ गव्यूतिः। ऊतियूतीत्यादिना यूतिशब्दो निपातितः। वान्त इत्यत्र वकारात्पूर्वभागे लोपो
व्योरिति लोपेन वकारः प्रश्लिष्यते। तेन श्रूयमाणवकारान्त आदेशः स्यात्। वकारो न लुप्यत इति यावत्॥ . स्यएकारस्य संवृताकारतालव्योऽय्

संवृताकारौष्ठ्यस्य नादः। एवमवू ऐचो आन्तरभूयस्त्वादैकारेदकारः। अद्ध्यर्द्धमात्रः। अकारस्त्वर्द्धमात्र एवा एवमौकारे प्युकारः अध्यर्द्धमात्रः। अकारस्त्वर्द्धमात्रः
एवं च विवृताकारतालव्यस्यऐकारस्य विवृताकारतालव्य आय्। विवृताकारौष्ठ्यस्य विवृताकारौष्ठ्य आव्। वान्तो यि प्रत्यये। यीति किं। गोभ्यां। नौभ्यां। प्रत्यये किं। गो
यानं। यकारादाविति। येन विधिरिति सूत्रस्यापवादभूतेन यस्मिन्विधिस्तदादावल्ग्रहण इति वार्तिकेनायमर्थो लभ्यते। ओदौतोरिति पूर्वसूत्रेण योरेव वान्तो प्रतिस्था
निवत्वेन निर्णीतत्वादिति भावः। अध्वेति। भावार्थमिदं। गोर्यूतौ लोकेऽपि वान्तादेशः स्यात्समुदायेन अध्वनः परिमाणं गम्यते चेदित्यर्थः। गव्यूतिः स्त्री क्रोशयुगमि

CC-0. In Public Domain. Digitization by eGangotri



निपातित इति। क्लिन्नं नत्वेनेत्यर्थः। ननु गव्यं नाव्यमित्यत्र भत्वेनापदत्वाद्धलोपाभावेऽपि गव्यूतिरित्यत्र हलि सर्वेषामिति लोपः शाकल्यस्येति वा लोपः स्यादत आह। वां
त इत्यत्रेति। वकारो न लुप्यत इति। एवं च हलि सर्वेषामिति सूत्रे व्योरित्यनुवृत्तावपि वकारं परित्यज्य यस्य लोपः स्यादिति व्याख्यास्यमानं संगच्छते। एतच्च तत्रैव स्फु
टीकरिष्यते॥ ※ ॥ धातोस्तन्निमित्तस्यैव। पूर्वेणैव सिद्धे नियमार्थमिदं। अत्र च पूर्वसूत्रमनुवर्त्तते। एच इति च। तच्छब्देन यादिप्रत्ययः परामृश्यते योग्यत्वान्न तु संनि
हितोऽपि धातुः। न हि स्वस्यैचः स्वयं निमित्तं भवति। एवकारस्त्विष्टतोऽवधारणार्थः। अन्यथा हि तन्निमित्तस्यैचो यदि भवति तर्हि धातोरेवेति विपरीतनियमः संभाव्येत। तन्न

धातोस्तन्निमित्तस्यैव ६।१।८०। यादौ प्रत्यये परे धातोरेचश्चेद्वान्तादेशस्तर्हि तन्निमित्तस्यैव नान्यस्य। लव्यं। अवश्यलाव्यं। तन्निमित्तस्यैवे
ति किं। ओयते। औयत। क्षय्यजय्यौ शक्यार्थे ६।१।८१। यान्तादेशनिपातनार्थमिदं। क्षेतुं शक्यं क्षय्यं। जेतुं शक्यं जय्यं। शक्यार्थे किं। क्षेतु
जेतुं योग्यं क्षेयं पापं जेयं मनः। क्रय्यस्तदर्थे ६।१।८२। तस्मै प्रकृत्यर्थायेदं तदर्थं। क्रेतारः क्रीणीयुरिति बुद्ध्या आपणे प्रसारितं क्रय्यं। क्रेय
मन्यत्। क्रयणार्हमित्यर्थः॥ लोपः शाकल्यस्य ८।३।१९। अवर्णपूर्वयोः पदान्तयोर्यवयोर्वा लोपोऽशि परे। पूर्वत्रासिद्धमिति लोपशास्त्रस्या
सिद्धत्वान्न स्वरसन्धिः। हर एहि। हरयेहि। विष्ण इह। विष्णविह। श्रिया उद्यतः। श्रियायुद्यतः। गुरा उत्कः। गुरावुत्कः। कानि सन्ति कौ स्त इत्यत्रा
लेरल्लोपस्य स्थानिवत्त्वेन यणावादेशौ प्राप्तौ न पदान्तेति सूत्रेण पदान्तविधौ तन्निषेधान्नतः। एकः पूर्वपरयोः ६।१।८४। इत्यधिकृत्य॥ आ
द्गुणः ६।१।८७। अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात् संहितायां। उपेन्द्रः। रमेशः। गङ्गोदकं। उरण्रपरः। ऋ इति त्रिंशतः संज्ञे
त्युक्तं तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्त्तते। तत्रान्तरतम्यात् कृष्णर्द्धिरित्यत्रार्। तवल्कार इत्यत्राल्। अचो रहाभ्यामिति पक्षे द्वित्वं।

श्च वान्तव्य इत्यत्र न स्यात्। धातोस्त्व। तन्निमित्तस्यापि स्यादोयत इत्यादौ न रेतत्सकलमभिप्रेत्याह। यादौ प्रत्यये परे धातोरेचश्चेद्वान्तादेश इत्यादि। लव्यमिति। लु
नातेरचो यत्। सार्वधातुकार्द्धधातुकयोरिति गुणः। अवश्यलाव्यमिति। ओरावश्यक इति ण्यत्। मयूरव्यंसकादयश्चेति समासः। लुम्पेदवश्यमः कृत्ये इति म १५
कारलोपः। लव्यमित्यादिः पूर्वसूत्रेणैव सिद्धे नियमसूत्रमिदं व्यर्थमित्याक्षिपति। तन्निमित्तस्यैवेति किमिति। एकदेशाक्षेपेऽपि सूत्रस्यैवायमाक्षेपः पर्यवसन्नः।

15

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ओयतइति आङ्पूर्वाद्वेञः कर्मणि लिङ् आय गात्मनेपदेयजादित्वात्संप्रसारणं पूर्वरूपं। अकृदिति दीर्घः। आङुणस्य परादिवद्भावेन धातोरेकत्वेनापियादिप्रत्ययनि
मित्तकत्वं नास्तीति भावः। ओयतइति। वेञ एव कर्मणि लिङ् यगादिप्राप्त्वात्। आडजादीनामाटश्चेति वृद्धिः। ह्वेयमिति। शकि लिङ् चेति। चान्तात्याः। ह्वेयमिति।
अर्हे कृत्यतृचश्चेति यत्। प्रकृत्यर्थो यत्र। प्रकृत्यर्थो द्रव्यविनिमयः। लोपः शाकल्यस्य। अवर्णपूर्वयोः किं। ट्धत्र। मधत्र। अशिपरइति। एतच्च भोभगो इति सूत्रे
इनुवर्तते। अशिकिं। हसत्र करोति। अत्र लोपो मा भूत्। न चात्र टिलोपस्य स्थानिवद्भावेन निर्वाहः। पूर्वत्रासिद्धे न स्थानिवदित्यभ्युपगमात्। न चैवमपि हलि सर्वे
षामिति नित्यं लोपः स्यादिति शक्यं तत्राशीत्यनुवृत्त्या यहलो विशेषणात्। लोपोव्योर्वलीति। लोपःसुन शंकनीय एव। स्थानिवत्त्वान्नेति नपदान्तेति सूत्र एवोक्त
त्वात्। हरएहीति। ओमाङोश्चेति पररूपं प्राप्तं तन्निषेधादिति। न च स्थानिवत्त्वनिषेधे व्यसिद्धं वहिरंगमन्तरंगमित्यल्लोपस्यासिद्धत्वाद्गुणो वादेशो स एवेनिवा

झरो झरि सवर्णे। ७।४।६५। हलः परस्य झरो लोपो वा स्यात्सवर्णे झरि। द्वित्वाभावे लोपे सत्येकधं। असति लोपे द्वित्वलोपयोर्वा द्विधं। सति
द्वित्वे लोपे चासति त्रिधं। कृष्णर्धिः। कृष्णर्द्धिः। कृष्णर्द्द्धिः। पण इति पञ्चमी मय इति षष्ठीति पक्षे ककारस्य द्वित्वे। लस्यत्वनचीचेति तेन न
वल्कार इत्यत्र रूपचतुष्टयं द्वित्वं लस्यैव कस्यैव नोभयोरुभयोरपि। तवल्कारादिषु वृद्धेर्वार्ध्यरूपचतुष्टयं॥ ९ च्या परद्वया श्रयत्वेन तयोरेव

वहिरंगत्वान्नाजानंतर्येति निषेधाच्च। उरण्रपरः। अनुवादे षष्ठी स्थाने योगेति परिभाषाया अनुपस्थिता वपि स्थाने प्रहणं ततोनुवर्तत इति आशयेनाह। तनू स्था
नेयोणिति। स्थानेंतरतम इत्यतो पि स्थाने ग्रहणमिहानुवर्तते। तेन प्रसंगावस्थायामेवाण् रपरो भवति। नरेतद्याचष्टे। रपरः सन्नेव प्रवर्तत इति। उः किं। ईघनि
गेयं देयं। अण् किं। रीङ्दीर्घोर परत्वं माभूत्। रीङ् तः। मात्रीयतिरीङ् क्रियते। आंतरतम्यादिति। रेफशिरस्कस्य अरित्यस्य रेफद्वारा ऋकारे णस्थानसाम्यादित्यर्थः।
पक्षे द्वित्वमपि। ऋधेर्धस्येति भावः॥ ॐ॥ ह्लो ह्लि॥ हलोयमामित्यतो हल इत्यनुवर्तनेन ताह। हलः परस्येति। हलः किं। प्रत्तं। झर इति किं। शार्ङ्गं। झरि किं। विध
पम्वा। अल्लोपोत्र पूर्वत्रासिद्धे स्थानिवन्न भवतीति चकारस्य तकारे परे लोपः स्यात्। सवर्ण इति किं तप्तं। सवर्णग्रहणसामर्थ्याद्यथासंख्यमत्र न भवति। तेन शीरा
ढीत्यत्र इस्य विकल्पेन लोपः सिद्ध्यतीति दिक्। लोपो वेति। झयो ह इति सूत्रादन्यतरस्यामित्यनुवृत्तं। असति लोप इति। द्वित्वाभाव इत्यनुवर्ज्यं ते द्वित्वलोपयोरस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



त्रिधमिति। यलोमयलक्षणांतरे ए पुनर्द्वित्वे चतुर्धमिति बोध्यं॥ ❀॥ वृद्धिरेचि। पूर्वसूत्रादादित्यनुवर्तते। न त्वाद्। आरेचीति। कृष्णैकत्वमिति। कृष्णेति संबोधने ए
थक्पदं। एवं देवेत्यपि। इत्थं चात्र षष्ठीसमासत्वमभ्युपेत्य पूर्वण गुणेति निषेधमाशंक्य संज्ञाप्रमाणत्वादित्यादिनिर्देशेन गुणेन निषेधो नित्य इति केषांचित्
व्याख्यानं नात्यंतावश्यकमिति बोध्यं। एत्येधत्यूठ्सु। अत्र एचीत्यनुवर्तते। न त्वेणि एत्येधत्योर्विशेषणं न तूठः। असंभवात्। आद्गुण इत्यत आदित्यनुवर्तते। एवा
तो व्याचष्टे। अवर्णादिजाद्योरिति। प्रष्ठोह इति। प्रष्ठं वहतीति प्रष्ठवाट्। वहश्चेति ण्विः। ततः शसि वाह ऊठ्। गुणापवादतया अनेन वृद्धिः। प्रैदिधदिति। प्रपूर्वा

वृद्धिरेचि ६।१।८८। आदेचि परे वृद्धिरेकादेशः स्यात्। गुणापवादः। कृष्णैकत्वं। गंगौघः। देवैश्वर्यं। कृष्णौत्कंठ्यं। एत्येधत्यूठ्सु ६।१।८९। अ
वर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात्। पररूपगुणापवादः। उपैति। उपैधते। प्रष्ठौहः। एजाद्योः किं। उपेतः। मा भवान् प्रेदिध
त्। पुरस्तादपवादन्यायेनेयं वृद्धिरेङि पररूपमित्यस्यैव बाधिका न तु ओमाङोश्चेत्यस्य। तेनावैहीति वृद्धिरसाधुरेव। अक्षादूहिन्यामुपसंख्यानं॥ अ
क्षौहिणी सेना। स्वादीरेरिणोः। स्वैरं। स्वेनेरितुं शीलमस्येति स्वैरी। स्वैरिणी। प्रादूहोढोढ्येषैष्येषु। प्रौहः। प्रौढः। अर्थवद्ग्रहणे नानर्थकस्य ग्रहण
म्नश्चेति सूत्रे राजेः पृथक् भ्राजिग्रहणान्नेन ऊढग्रहणे क्तान्तमेव गृह्यते न तु क्तवत्वन्तस्यैकदेशः। प्रौढवान्। प्रौढिः। इषइच्छायां तुदादिः। इष
गतौ दिवादिः। इष आभीक्ष्ण्ये क्र्यादिः। एषां घञि ण्यति च एषः एष्य इति रूपे। तत्र पररूपे प्राप्तेऽनेन वृद्धिः। प्रैषः। प्रैष्यः। यस्तु ईष उञ्छे। यश्च
ईष गतिहिंसादर्शनेषु। तयोर्दीर्घोपधत्वात्। ईषः। ईष्यः। तत्राद्गुणे प्रेषः प्रेष्यः। ऋते च तृतीयासमासे। सुखेन ऋतः सुखार्तः। तृतीयेति किं।
परमर्तः। प्रवत्सतरकम्बलवसनार्णदशानामृणे॥ प्रार्णं। वत्सतरार्णमित्यादि। ऋणस्यापनयनाय यदन्यदृणं क्रियते तदृणार्णं। दशा
र्णो देशः। नदी च दशार्णा। ऋणशब्दो दुर्गभूमौ जले च॥ ९ प्रेधतेर्ण्यन्तस्य लुङि रूपं। न माङ्योग इत्याडागमाभावः। पुरस्तादिति। पुरस्तादपवादा अ १६
नंतरान्विधीन्बाधंते नोत्तरानिति न्यायेनेत्यर्थः॥ अक्षादिति। आदित्यनुवर्तते। अचीति च। तेन पूर्वपरयोर्वर्णयोरेव भवति। एवमन्यत्राप्यूह्यं। अक्षौहिणीति। ऊ
हः समूहः सोऽस्त्यस्याः सा ऊहिनी। अक्षाणामूहिनीति विग्रहः। परिमाणविशेषविशिष्टा सेना अक्षौहिणी। पूर्वपदात्संज्ञायामिति णत्वं। अक्षाणामित्यत्र ऊहिनी
शब्देन समासे तत्र इनौ तु अक्षौहिणीत्येव भवति। न तु तत्र वृद्धिः। अंतरंगेण गुणेन बाधात्। अपवादभूतायाअपि वृद्धेरूहिनी शब्देन समासे चरितार्थत्वा

16

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पथोक्तं प्राक्। यद्यपवादोन्यत्र चरितार्थस्तर्हि परांतरंगाभ्यां वाध्यत इति। स्वादीरेरिणोः ईरेरिण्योः रिति क्वाचित्कः पाठः। स्वैरिणीति। णिन्यं तस्याः स्त्रियां रूढ्य
भावप्रसंगात्। ईरिन्ग्रहणस्य फलमाह। स्वेन ईरितुमिति। यदा त्वीर इति घञन्ते न स्वशब्दस्य समासस्तदा स्वैर इति वृद्धौ कृतायां मत्वर्थीय इनिः। यदा वा मत्व
र्थीयेनि प्रत्ययान्तेन ईरिन्शब्देन स्वशब्दस्य समासः। तदा चिन्त्यैकदेशः ईरशब्दोस्त्येवेति। पृथगीरिन्ग्रहणं व्यर्थं स्यादिति भावः। स्वैरीति। सुप्यजातौ णिनि
णिनिरुपपदसमासः। स्वैरिणीति। ङीप्। अग्भागमीरिन्शब्दमादाय वृद्धिः। केचित्तु लिंगविशिष्टपरिभाषयात्र वृद्धिरित्याहुस्तन्निष्फलमिति भावः। नान
र्थकस्येति। उपस्थितस्यार्थस्य शब्दं प्रति विशेषणत्वसंभवेत्यागायोगादिति भावः। प्रैष्य इति। एषसाहचर्यादिष्योप्यनव्ययं गृह्यते तेन एष्यंनादिवैः प्रोत्स्यपिप
ररूपमेव न तु वृद्धिः। प्रेष्यगतः। लघूपधगुणमाशंक्याह। तयोर्दीर्घोपधत्वादिति। प्रवत्सतरेति। इह केचिद्वत्सशब्दं वत्सरशब्दं च प्रक्षिपंति तद्व्याख्यादावदृष्ट
त्वादुपेक्ष्यं। वत्सतरार्णमिति। नकारमकारयोर्द्वित्वविकल्पाच्चत्वारि रूपाणि। रेफात्परस्य तु अचो रहाभ्यामिति द्वित्वे यणो मय इति वचनात्तरेण पुनर्द्वित्व

उपसर्गादृति धातौ ६।१।९१। अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात्। उपार्छति।

एकणं द्विणं त्रिणमिति जिह्वादशारवयः शार इति सकारद्वित्वे चतुर्विंशतिः। न चेह शरोचीति द्वित्वनिषेधः शंक्यः। तस्य सौत्रद्वित्वमात्रविषयत्वात्। अत एव खयः
शर इति वार्तिकस्य वत्सर अप्सरा इत्युदाहरणं भाष्ये दत्तं। न च वर्देस्सर प्रत्यये परतश्चर्त्वे कृते तस्यासिद्धत्वात्तस्य खयः परत्वं नेति शंक्यं पूर्वत्रासिद्धी
यमद्वित्वे इत्युक्तेः। अत एव मनोरमायां वत्संतरस्येत्यत्र टकारात्परस्य सस्य द्वित्वं स्वीकृतमिति दिक्॥ ॥ उपसर्गादृति। उपसर्गात्किं। खट्वर्छति। ऋति
किं। उपेतः। तपरकरणमुत्तरार्थं। इह दीर्घॠकारादौ धातोरसंभवेन व्यावर्त्यालाभात्। धातौ किं। उपर्कारः। तत्र उपेत्युपसर्ग एव न भवति। क्रियायो
ग एवोपसर्गत्वात्। उपगत ऋकार इति विग्रहे त्वक्रियायोगात्संपादनेपि यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा इति ऋकारं प्रति अनुपस
र्ग एव। तथा चाहुः तेपि धातुग्रहणे ऋकारादि धात्ववेव वृद्धिर्भविष्यत्युपसर्गाद्धातो राक्षेपात्तत्रेति चेत्सत्यं। अत एव योगविभागेन पुनर्विधानार्थमित्य
नुपदं वक्ष्यतीति न तत्काप्यनुपपत्तिः॥

CC-0. In Public Domain. Digitization by eGangotri



अनादिवच्चा। इह एकः पूर्वपरयोरित्यनुवर्ततेय थासंख्यं चाश्रीयत इत्यभिप्रेत्याह। पूर्वस्यां तवदिति। स्थानिवत्सूत्रेणैव गतार्थमिदं। न चाल्विध्यर्थमिदं
मस्त्विति शंक्यं। अस्याप्यल्विधावनिष्टत्वात्। अन्यथा अयजे इन्द्रमित्यत्र सवर्णदीर्घापत्तेः। नविसर्ग इति। एतच्च सुखार्थम् इत्यादावपि बोध्यं। सुध्यातावि
ति। सर्वत्रावयवके इत्यर्थः। सुबन्तस्य धातोरसंभवात्। यद्यपि क्रुङ्गम्यादिषु तिन्व्यादौ नांकिपि धातुत्वं सुबन्तत्वं च संभवति। तथापि नात्र इष्टतपरत्व।
आवर्णत्वं प्रसिद्धं। नामधातुष्वेव तत्संभवतीति न एवेहगृह्यत इति भावः। मार्षभीयतीति। प्राचो नित्यसमासेन वृद्धित्वनिषेधः। एङि पररूपं। एङ्
येङि त्येव सिद्धे पर ग्रहणमुत्तरार्थं। रूपग्रहणं तु स्पष्टार्थं। अभिपूर्वे वदेङि पर इत्येव सिद्धेः। प्रेजत इति। एजृ दीप्तौ कंपनार्थस्तु परस्मैपदी। प्रेजति। नि

अनादिवच्चा। ६। १। ८५। योयमेकादेशः स पूर्वस्यां तवत्परस्यादिवत्स्यादिति रेफस्य पदान्तत्वे। खरवसानयोर्विसर्जनीयः ८। ३। १५। खरि अ
वसाने च रेफस्य विसर्जनीयः स्यात्पदान्ते। इति विसर्गे प्राप्ते। अनवक्लृप्ते च न पदान्तस्य न विसर्गः। उभयथर्क्षु कर्तरि चर्षिदेवतयोरित्यादि
निर्देशात्। उपसर्गेणैव धातोराक्षेपे सिद्धे धातावितियोगविभागेन पुनर्वृद्धिविधानार्थः। तेन ऋत्यक इति पाक्षिकोपि प्रकृतिभावोऽत्र न
भवति। वा सुप्यापिशलेः। ६। १। ९२। अवर्णान्तादुपसर्गादृकारादौ सुब्धातौ वृद्धिर्वा स्यात्। आपिशलिग्रहणं पूजार्थं प्रार्षभीयति। प्र र्षभी
यति। सावर्ण्यादृवर्णस्य ग्रहणं। प्राल्कारीयति। प्र ल्कारीयति। तपरत्वाद्दीर्घे न। उपॠकारीयति। उपर्कारीयति। एङि पररूपं ६। १। ९४।
आदुपसर्गादेङादौ धातौ पररूपमेकादेशः स्यात्। प्रेजते। उपोषति। इह वा सुपीत्यनुवर्त्य वाक्यभेदेन व्याख्येयं तेन एङादौ सुब्धातौ वा। उ
पेडकीयति। उपैडकीयति। एवे चानियोगे। नियोगोऽवधारणं। क्वेव भोक्ष्यसे। अनवक्लृप्तावेवशब्दः। अनियोगे किं तवैव॥

योगोऽवधारणमिति। निर्धारणमित्यर्थः। न तु क्रां। नावक्लृप्तौ यदा दृष्टः पररूपस्य गोचरः। एवस्तु विषयो वृद्धेर्नियमे यं पदाभवेदिति। अस्यार्थः। अनवक्लृप्तो अनिश्च
ययदा एवकारो दृष्टः सः पररूपस्य विषयः। यस्तु नियमे निर्धारणे यदा दृष्टः स वृद्धिविषय इति। यत्तु नियोगे तवैव गच्छेति प्राचां ग्रंथे स्थितस्य प्रत्युदाहरणस्यानुगुणत
यो नियोजनं नियोगो व्यापार इति व्याचक्षते तेषां यदेव पूर्वं ज्वलनं शरीरं ममैव जन्मान्तरपातकानामिति लौकिकप्रयोगाः। तपस्तपः कर्मकस्यैवलङः शाकटायनस्यैव।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्यादिसौत्रप्रयोगाश्च न सिध्येत् ॥ उदाहृतश्रुतिश्लोकविरोधश्च स्यात्। अवधारणमिति व्याकुर्वतां तु सर्वेष्टसिद्धिः॥ ॥ अचोऽन्त्यादि टि। अच इति निर्धारणे षष्ठी। जा
तावेकवचनं तदाह। अचां मध्य इति। शकंध्वादिषु इति। शकंध्वादिविषये तत्सिद्ध्यनुगुणं पररूपं वाच्यमित्यर्थः। अत एवाह। तच्च टेरिति। यदि तु आदित्यधिकारा
दकारस्यैवेष्येत तर्हि मनीषापतंजलिरिति न सिध्येत् ॥ केचित्तु मनःपतञ्जल्योः एषोदरादित्वादन्त्यलोपे अकारस्यैव पररूपमाहुः शकानां देशविशेषाणामंधुः
कूपः शकंधुः। कर्कोणां राजविशेषाणामंधुः कर्कंधुः। अटतीत्यटा पचाद्यचि टाप्। कुलस्य अटा कुलटा। यदि तु कुलमटतीति विगृह्येत तदा कर्मण्यणि ङीपि कु

अचोऽन्त्यादि टि। १।१।६४। अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात्। शकन्ध्वादिषु पररूपं वाच्यम्। तच्च टेः। शकन्धुः। कर्कन्धुः। कुलटा।
सीमन्तः केशवेशे। सीमान्तोऽन्यः। मनीषा। हलीषा। लाङ्गलीषा। पतञ्जलिः। सारङ्गः पशुपक्षिणोः। साराङ्गोऽन्यः। आकृतिगणोऽयम्। मार्तण्डः। ओत्वो
ष्ठयोः समासे वा। स्थूलोतुः। स्थूलौतुः। बिम्बोष्ठः। बिम्बौष्ठः। समासे किम्। तवौष्ठः। ओमाङोश्च ६।१।९५। ओमि आङि चात्परे पररूपमेकादेशः स्यात्।
शिवायोन्नमः। शिव एहि। शिवेहि। अव्यक्तानुकरणस्यात इतौ ६।१।९८। ध्वनेरनुकरणस्य योऽच्छब्दस्तस्मादितौ परे पररूपमे
कादेशः स्यात्। पटत् इति। पटिति। एकाचो न॥ श्रदिति। नाम्रेडितस्यान्त्यस्य तु वा ६।१।९९। आम्रेडितस्य प्रागुक्तं न स्यात्। अन्त्यस्य
तु तकारमात्रस्य वा स्यात्। डाचि बहुलं द्वे भवत इति बहुलवचनाद्द्वित्वं। तस्य परमाम्रेडितम् ८।१।२। द्विरुक्तस्य परं रूपमाम्रेडितसं
ज्ञं स्यात्। पटत्पटेति। झलाञ्जशोऽन्ते ८।२।३९। पदान्ते झलाञ्जशः स्युः। पटत्पटदिति॥ ९ लाटीति स्यात्। ईष उञ्छे। ईष गत्यादिषु। आभ्यां गुरोश्च ह
लः इत्यप्रत्यये ईषा। मनस ईषा मनीषा। हलस्य ईषा हलीषा। हलीषा लांगलदंडः। पतंतः अंजलयो अस्मिन् पतंजलिः। मार्तंड इति। पररूपेण नेन मृतंड इति सिद्धे
तत अण्यादिवृद्धिः। पर मार्त्तण्ड मास्यत पुनर्मार्त्ताण्ड माभर इत्यादिषु तु दीर्घश्छान्दस इति माधवः। केचिदत्र सवर्णदीर्घमाहुः पूर्वोक्तवैदिकप्रयोगास्तेषामनु
कूलाः। ओत्वोष्ठयोः समासे वा। अकारस्य ओत्वोष्ठयोश्च एकत्र समासे स्थितौ सत्यामिदं प्रवर्त्तते। नेह। तृषलमुतोष्ठ्व्रणल इति। शिवेहीति। ननु शिव आ इहि अत्र सव
र्णदीर्घे कृते पश्चादाद्गुणे च सिद्धमिष्टं तत्किमाङ्ग्रहणेन। सत्यं। पूर्वं धातुरुपसर्गेण युज्यते इति दर्शने धातूपसर्गयोः कार्यमंतरंगमिति पूर्वं गुणे कृते वृद्धिः।

CC-0. In Public Domain. Digitization by eGangotri

सु·
सि·कौ· स्यात्। तन्माभूदित्याङ्‌ग्रहणं। अव्यक्तानुकरणस्यात इतौ। यद्यप्यतोगुण इति पूर्वसूत्रादत इत्यनुवर्त्य नितोग्रहणमिहत्यक्तुं शक्यं। तथापि पूर्वसूत्रे अत इति तपरकरण
टी·त· ह्रस्वाकारस्य ग्रहणमिह तु प्राक्चाधिकार पक्षाश्रयणात्‌ अच्छब्दस्य ग्रहणमिति व्याख्यानेऽकः प्तः स्यादिति पुनरत्तो ग्रहणं कृतं। अव्यक्तेत्यादि व्याचष्टे। ध्वने
१८ रिति। अनुकरणस्येति। परिस्फुटाकारादिवर्णस्येति भावः। तस्य चानुकरणत्वं किंचित्साम्येन बोध्यं परस्याप्यस्य नित्यत्वेपि संहितायामविवक्षितायां तरभावा
दाह। पटत्‌ इतीति। नाज्झलाविन्यादि। अयंभावः। विधेयमभेदे वाक्यभेदात्संभवंत्यामेक वाक्यतायां तरयोगात्‌ तुल्यास्य प्रयत्नमित्यस्य नाज्झलाविन्यस्य चैए
कवाक्यत्वलाभायाज्झलमिन्नं तुल्यास्य प्रयत्नं सवर्णमित्यर्थोभ्युपेयते। अज्झलमिन्नेत्यत्र परस्पर निरूपित तुल्यत्वविशिष्टास्य प्रयत्नकौ यावज्झलौ न इभयमि

अकः सवर्णे दीर्घः। ६।१।१०१। अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात्‌। दैत्यारिः। श्रीशः। विष्णूदयः। अचि किं। कुमारी शेते। नाज्झलाविति सा
वर्ण्यनिषेधस्तु न दीर्घशकारयोः। ग्रहणकशास्त्रस्य सावर्ण्यविधिनिषेधाभ्यां प्रागनिष्पत्तेः। अकः किं। हरये। अको कि दीर्घ इत्येव सुवचं।
ऋति सवर्णे ऋ वा। होतृकारः। होतृकारः। लृति सवर्णे लृ वा। होतॄकारः। होतृकारः। पक्षे ऋकारः सावर्ण्यात्‌। ऋति ऋ वा लृति लृ वेत्युभय
त्रापि विधेयं वर्णद्वयं द्विमात्रं। आद्यस्य मध्ये द्वौ रेफौ तयोरेकामात्रा अभितोऽज्भक्तेरपरा। द्वितीयस्य तु मध्ये द्वौ लकारौ। शेषं प्राग्वत्‌। इहोभय
त्रापि ऋत्यक इति पाक्षिकः प्रकृतिभावो वक्ष्यते॥ ॥ १८ नत्वं विवक्षितं। तथाच योर्ह्रस्वदीर्घात्मको वर्णो येन वर्णेन ताद्रूप्येन तुल्यास्य प्रय
त्नस्तदुभयं मिथः सवर्णं भवति। तथा येन हला तुल्यास्य प्रयत्नकं यद्धल्‌ तन्मिथः सवर्णं स्यात्‌ यं चस्वदीर्घप्लुतात्मको वर्णो येन हला तुल्यास्य प्रयत्नस्तदुभयमपि मि
थः सवर्णमित्यर्थः फलितः। तत्र श्चानेन सूत्रद्वयेन सवर्णसंज्ञायां सिद्धायामणुदित्सवर्णस्येति ग्राहकशास्त्रं प्रवर्तते न तु ततः प्राक्‌ अतो नाज्झलाविस्येनेनअ
क्षरसमाम्नायिकानामेव सावर्ण्यं व्युदस्यते न तु सर्वेषां तेनात्र दीर्घशकारयोः सावर्ण्यमस्त्येवेति तद्वारणाय अकः सवर्णे इत्यत्राचीत्यनुवर्तनं युक्तमि तिय १८
दा तु ग्रहणमीषद्विवृतत्वं परिकल्प्य नाज्झलाविति सूत्रं प्रत्याख्यायते तदेह सवर्णसूत्रे अचीति नानुवर्तनीयं। हेयि पासो इत्यादौ गुरोरनृत इत्याकारस्य प्लुते कृते
ततः परस्य सस्य इणः परत्वेन षत्वं स्यात्‌। नाज्झलाविति चाकार प्रश्लेषेण दीर्घहकारयोः सावर्ण्याभावेपि प्लुताकारस्य हकारसवर्णत्वेन इण्त्वादित्याशंक्यन

18

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्समाधानार्थमाश्च आश्चेति ह्रंह्रं कृत्वा सवर्णदीर्घेण दीर्घान्परत्र प्लुतोपि प्रश्लिष्यत इति क्लिष्टव्याख्यानमपि नाश्रयणीयं। विश्वपाभिरित्यादौ ढत्वादेरप्यप्रसक्तेः। स्वरा
णामूष्मणां च प्रयत्नभेदेन सावर्ण्याभावादिति सुगमोयं पंथाः। अकोकीत्येवेति। अकोकि दीर्घ इत्येवेत्यर्थः। सुवचमिति। यथासंख्यसंबंधेन दध्यत्रेत्यादावनि
प्रसंगाबाधात्। ऋ इति त्रिंशतः संज्ञेत्युक्तत्वान्न होतॢकार इत्यत्र ऋकारस्य ऌकारपरत्वमस्त्येवेत्यप्रसंगाभावा दीकारऋकारयोः सावर्ण्ये सत्यप्यचीत्यनुवर्तनेनैवि
नेव समाहितरूपसिद्धेश्चेति भावः। ऋति ऋ वा ऌति ऌ वेति वार्तिकं सूत्रस्थेन सवर्णपदेन योजयित्वा पठति ऋति सवर्ण इत्यादिना नन्वेवमकः सवर्ण इति सवर्णपदाकरणे वा
र्तिकयोः सवर्णग्रहणं कर्तव्यं सूत्रे ऌको की ति कर्तव्यमिति विपरीतगौरवात्कथमको कीत्येव सुवचमित्युक्तमिति चेदत्राहुः। भाष्यकारैरेतद्वार्तिकद्वयस्य प्रत्या
ख्यानान्न्यास्यैव गौरवमिति। प्रत्याख्यानेनैवपत्तिः ऌकारांतेषु विचारयिष्यते। वर्णद्वयं द्विमात्रमिति एतेन दीर्घप्राप्ते ह्रस्वऋकारो ह्रस्वऌकारश्च विधीयत इति प्राचो
व्याख्यानमाकरविरुद्धमिति ध्वनितं॥ ॥ एङः पदान्तात्। अयवोरपवादः। ङसिङसोश्चेत्यस्यारंभादस्य पदान्तविषयत्वे लब्धे उत्तरार्थं पदान्तादिति स्पष्टा

एङः पदान्तादति। ६।१।१०९। पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात्। हरेऽव। विष्णोऽव। सर्वत्र विभाषा गोः। ६।१।१२२। लोके वेदे
चैङन्तस्य गोरति वा प्रकृतिभावः स्यात्पदान्ते। गोअग्रम्। गोऽग्रम्। एङन्तस्य किं। चित्रग्वग्रम्। पदान्ते किं। गोः॥ ॥ ॥

प्रतिपत्तये इहैवक्तमिति मनोरमायां स्थितं। केचित्तु पदांतादित्येतदिहाप्यावश्यकमेवान्यथाऽपदांतादपि स्यात्। ङसिङसोश्चेति सूत्रं तु सुप्संबंधिन्यति परतः पूर्व
रूपं चेन्ङसिङसोरेवाति पर इति नियमार्थं स्यात् तत्फलं तु हरयः गुरवः। इदमूतोयेतेसम्मतय इत्यादौ पूर्वरूपाप्रवृत्तिरित्याहुः। एङः किं। दध्यत्र। पदांतात्किं। चयनं लव
नं। अचिनव। अतिकिं। हरयिह। विष्णविह। तपरः किं। वायवायाहि। सर्वत्र विभाषा। यद्यपीह छंदसि इति न प्रकृतं तथापि यजुष्युर इत्यादिप्रक्रमात् छंदस्ये
व संभाव्येत अतः सर्वत्रेत्युक्तं। तद्व्याचष्टे लोके वेदे चेति। इह एङ इत्यनुवर्त्य एङंतस्य गोरिति व्याख्येयं। प्रकृतिभाव इति। एतच्च प्रकृत्यांतःपादमिति सूत्रात् प्रकृत्येत्यनुवृत्त्या
लभ्यते। नांतःपादमिति पाठे तु सर्वत्र विभाषेति सूत्रेण पूर्वरूपमेव विभाषा निषिध्यते इत्यवधेयं। निषेधविकल्पे विधिविकल्पः फलित इत्याशयेन पूर्वरूप
॥ ॥ ॥ मेव विकल्प्यत इति मनोरमायां स्थितं॥ ॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अवङ् स्फोटायनस्य स्फोटोयनं परायणं यस्य सः स्फोटप्रतिपादनपरो वैयाकरणः। तस्य स्फोटायनस्य। अत्रापि एङः तस्य गोरिति व्याख्येयं। अगित्येव सूत्रयितुमुचितं विभाषानुवृत्तेः स्फोटायनग्रहणं पूजार्थं। अतीति निवृत्तमिति। अन्यथा गवेशः। गवोद्धः। इत्यादि न सिध्येदिति भावः। अचिपर इति। अत्राचीत्यनुवर्त्तते। अतीति तु निवृत्तमित्यत्र व्याख्यानमेव शरणं। गवाग्रं इति। गवां किरणानां अग्री वेति विग्रहः। अग्रणी दर्शनादित्यत्र समासान्तः। वातायने रूढोयं। पुंस्त्वं लोकात्। इन्द्रे च। आरंभसामर्थ्यान्नित्यमिदं। इदं च सूत्रं त्यक्तुं शक्यं। अन्यार्थत्वी कृतेन व्यवस्थितविभाषाश्रयणेनेव इष्टसिद्धेरित्याहुः। प्लुतप्रगृह्या इति सूत्रात् व्यवहितं पूर्वोपप्रकृतिभाव इति पाठो मूलपुस्तकेषु प्रायेण दृश्यते स चापपाठ एव सर्वत्र विभाषा गोरिति प्रकृतिभावस्य प्रागेवारब्धत्वादित्येके। अन्ये तु अवङ् स्फोटायनस्य इन्द्रे चेति सूत्रद्वयं प्रकृतिभावप्रकरणपठितमपि तद्बहिर्भूतमित्येवं व्याख्येयं कर्त्तव्यं। ताभ्यां तद्विधानात्। न च अवङ् सूत्रस्य प्रकृतिभावापवादत्वेनोत्सर्गापवा

अवङ् स्फोटायनस्य। ६।१।१२३। अतीति निवृत्तम्। अचि परे पदान्ते गोरवङ् वा स्यात्। गवाग्रं। पदान्ते किं। गवि। व्यवस्थितविभाषया गवाक्षः। इन्द्रे च ६।१।१२४। गोरवङ् स्यादिन्द्रे। गवेन्द्रः। अथ प्रकृतिभावः। प्लुतप्रगृह्या अचि नित्यं ६।१।१२५। प्लुताः प्रगृह्याश्च वक्ष्यन्ते तेऽचि नित्यम्प्रकृत्या स्युः। एहि कृष्ण ३ अत्र गौश्चरति। हरी एतौ। नित्यमिति किं। हरी एतावित्यादावयमेव प्रकृतिभावो यथा स्यात्। इकोऽसवर्णे इति ह्रस्वसमुच्चयो मा भूत्। इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च। ६।१।१२७। पदान्ता इकोऽसवर्णेऽचि परे प्रकृत्या स्युः ह्रस्वश्च वा। अत्र ह्रस्वविधिसामर्थ्यादेव प्रकृतिभावे सिद्धे तदनुकर्षणार्थश्चकारो न कर्त्तव्य इति भाष्ये स्थितं। चक्रि अत्र। चक्र्यत्र। पदान्ता इति किं गौर्यौ। न समासे॥ वाप्यश्वः। सितिच। पार्श्वे॥ ११ इरूपत्वात् तत्प्रकरणस्थत्वं सूपपादमित्यवङादेशानुवृत्त्यर्थं तदनन्तरं पठितस्येन्द्रे चेति सूत्रस्यापीति वाच्यं। पूर्वोक्तापवादत्वस्य अवङ् सूत्रस्य सुवचत्वात्। एतत्प्रकरणपाठस्य गोशब्दानुवृत्त्यर्थं तथा चरितार्थत्वात्। एवं च सर्वत्र प्रकृतिभावप्रकरणद्वहिस्तत् सूत्रद्वयं लिखितं तदनुकूलत्वेन सर्वत्र विभाषेति सूत्रमपि तत्रैवेति स्थितस्य गतिर्बोध्येत्याहुः। प्लुतप्रगृह्या। प्रकृतिभावे प्रतिप्लुतो नासिद्धः प्लुतमनूद्य प्रकृतिभावविधानसामर्थ्यात्। अचि किं। जानु उ अस्य। जानू अस्य। उञः प्रगृह्यत्वेपी ह सवर्णदीर्घः। अचीत्यनुवर्तमाने पुनरचिग्रहणमादेशनिमित्ते एवाचि प्रकृतिभावस्तेन ह्रस्वैकादेशः स्यादेव। जानु उ अस्य रुजति जानू अस्य रुजति। इह मय उञ इति पाक्षिके वकारे तु जानुवस्य रुजति। एहि कृष्ण ३ नीति। दूराद्ध

१९

नेवेति। प्लुतःप्राचातुदात्तएहीति उदात्तं न स्यात्। वाक्यस्य टेरित्यधिकारात्। ह्रस्वसमुच्चितो मा भूदिति। अयं भावः। हरी ईशा विन्याचोऽप्लुतप्रगृह्यत्वेन तस्मात्। काशं। चक्रि अत्रेत्यत्रलि को सवर्णे इति। तत्त श्च हरी एता वित्यत्र परत्वात् ह्रस्वसमुच्चितएव स्यात्। नित्यग्रहणे तु कृतेन तत्सामर्थ्यात् परमपि बाधत इति। चक्र्यत्रेति। इहस्कोरितिकलोपो न। यणः कार्यकालपक्षे वहिरंगपरिभाषया असिद्धत्वात्। स्थानिवद्भावाच्च। पूर्वत्रासिद्धे न स्थानिवदिति तु नास्ति। तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति वक्ष्यमाणत्वात्। पार्श्वमिति। पर्शूनां समूहः। पर्श्वा णस्वकेव्य इति णस्। ओर्गुण इत्यनेन सिति चेति पदत्वस्य भत्वापवादत्वात्॥ ॥
ऋत्यकः। ब्रह्म ऋषिरिति ननु ऋत्यकस्येत्येव सूत्रमस्तु। रथिऋच्छतीत्यादाविकोसवर्णे इत्यनेनैव प्रकृतिभावसिद्धेः मैवं। होतृ ऋकार इत्यत्र प्रकृतिभावार्थम

ऋत्यकः। ६।१।१२८। ऋति परे अकः प्राग्वत्। ब्रह्म ऋषिः ब्रह्मर्षिः। पक्षे। इत्येव आर्च्छत्। समासेऽप्ययं प्रकृतिभावः। सप्तऋषीणां सप्तर्षीणां। वाक्यस्य टेः प्लुत उदात्तः। ८।२।८२। इत्यधिकृत्य। प्रत्यभिवादेऽशूद्रे ८।२।८३। अशूद्रविषये प्रत्यभिवादे यद्वाक्यं तस्य टेः प्लुतः स्यात्। अभिवादये देवदत्तोऽहं। भो आयुष्मानेधि देवदत्त ३। स्त्रियां न। अभिवादये गार्ग्यहं। भो आयुष्मती भव गार्गि। नाम गोत्रं वा यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्रैव प्लुत इष्यते। नेह आयुष्मानेधि भो। राजन्यविशां वेति वाच्यं। आयुष्मानेधि भो। आयुष्मानेधीन्द्रवर्मन्। आयुष्मानेधीन्द्रपालित ३। दूराद्धूते च। ८।२।८४। दूरात्सम्बोधने यद्वाक्यं तस्य टेः प्लुतः स्यात्। सक्तून् पिब देवदत्त ३। हैहेप्रयोगे हैहयोः। ८।२।८५। एतयोः प्रयोगे दूराद्धूतेयद्वाक्यं तत्र हैहयोरेव प्लुतः स्यात्। है३ राम। राम है३॥ ऋत्यकः ह ल स्यावश्यकत्वात्। एतेनाकोसवर्णे इत्येकमेव सूत्रमस्त्विति शंकायानिरवकाश एव। उक्तदोषानतिरक्तेः। सप्तऋषीणामित्यत्र न समास इति निषेधापत्तेश्च। न समास इति निषेधवार्त्तिकं हि इकोसवर्णे इति सूत्र एव न तु ऋत्यक इत्यत्रेति सिद्धान्तः। अत एवाह समासेप्ययमिति। एवं च ऋलृवर्णयोरिति पूर्वोक्तो निर्देशः संगच्छते। प्रत्यभिवादे इह प्रत्यभिवादशब्देन आशीर्वचनमुच्यते। अशूद्र किं। अभिवादये तुषजकोहं। भो आयुष्मानेधि तुषजक। आयुष्मानेधीति। अस्तेः सेर्हिः ध्वसोरेद्धावभ्यासलोपश्च हेर्धिः श्नसोरल्लोपः। नाम गोत्रं वेति। गोत्रस्योदाहरणं। अभिवादये गार्ग्योहं। भो आयुष्मानेधि गार्ग्य ३ इत्यूह्यं। दूराद्धूते च। हूतमाह्वानं। न च संबोधनमात्रोपलक्षणमित्याह दूरात्

सि·कौ· त्संबोधन इति। उपलक्षणतया व्याख्यानस्य फलमुदाहरति सक्तून् पिबेत्यादि॥ ❁ ॥ गुरोरनृतः। अनंत्यस्यापीति। अत्र वदंति। यद्यप्यनंत्यस्य गुरोः प्लुतार्थोपि
टी·त· शब्द इति व्याख्यायते तर्हि गुरुरस्मानिकप्लुता नामैव पर्यायतास्यात्तथा च दूराद्धूत इति लक्षणं तरेणालघोष्ठेः स्थाने विहितेन प्लुतेन सह युगपत्प्रयोगः प्रसज्ये
२० त। तस्मादपि शब्दो गुरोरगुरोश्च टेः प्लुतार्थ इत्येव व्याख्यातव्यः। टेरिति प्रकृतत्वादिति। देवदत्तेति। वाक्यलसंपत्तये अस्यादिरहोतिशब्दो बोध्यः। एवमग्रेपि सर्वः
प्लुतो विकल्प्यत इति। एतेन द्वैपायनो विरहकातर आजुहाव पुत्रेति भागवतं व्याख्यातं प्लुतस्य वैकल्पिकत्वात्। आर्षप्रयोग इति श्रीधराचार्योक्तिस्तु नादर्तव्या
विलरस्तत्र मनोरमायामनुसंधेयः। यणादिकं करोतीति। अत्र नव्याः यद्येवमग्नी३ इति विष्णू३ इति इत्यत्र प्रगृह्याश्रयप्रकृतिभावं बाधित्वा परत्वादनेन।

गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्। ८।२।८६। दूराद्धूते यद्वाक्यं तस्य ऋद्भिन्नस्याऽनन्त्यस्यापि गुरोर्वा प्लुतः स्यात्। दे३वदत्त। देवद३त्त।
देवदत्त३। गुरोः किम्। वकारात्परस्याकारस्य मा भूत्। अनृतः किम्। कृ३ष्ण। एकैकग्रहणं पर्यायार्थम्। इह प्राचामिति योगो विभज्यते। तेन
सर्वः प्लुतो विकल्प्यते। अप्लुतवदुपस्थिते। ६।१।१२९। उपस्थितोऽनार्ष इति शब्दस्तस्मिन्परे प्लुतोऽप्लुतवद्भवति। अप्लुतकार्यं यणादिकं कु
रोति। सुश्लोका३ इति। सुश्लोकेति। वत्किम्। अप्लुत इत्युक्ते प्लुत एव निषिध्येत। तथा च प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणं न स्यात्। अग्नी३ इ 20
ति। ईचाक्रवर्मणस्य। ६।१।१३०। ईप्लुतोऽचि परे प्लुतवद्वा स्यात्। चिनुहीति चिनुहि३ इति। चिनुही३ इदं चिनुहीदं। उभयत्र विभाषेयम्॥

यणादिकार्यं स्यात्तत्र श्रवत्वकरणप्रयोजनं यणादिकमेव स्यात्तस्मात् प्लुतकार्यं प्रकृतिभावं न करोतीत्यर्थः। इति प्राचां व्याख्यैव ज्यायसी। एवं चेकोयणचीत्य
त्र इक्ग्रहणस्य वैयर्थ्यशंकापि नास्ति। तथाहि। तत्रेक्ग्रहणाभावेपि ह्रस्वस्यपि त्कृति तुक् दीर्घादिन्यतो ह्रस्वदीर्घपदानुवृत्त्या तयोर्यण्विधानाद्व्यंजन
स्य भविष्यति। प्लुतस्य तु प्रकृतिभावेनैव भवितव्यमेवं त्वयारयोपवादः हरयइत्यादौ॥ उपेंद्रः कृष्णौकत्वमित्यादौ त्वाद्गुणः वृद्धिरेचीति बाधके भविष्यतः यथा २०
सत्यपि इक्ग्रहणे श्रीश इत्यादौ सवर्णदीर्घत्वं बाधकमतो नार्थ इक्ग्रहणेन। तथापि एहि कर भो रू इति। सतनू इति। चिनु ही अत्रेत्यादावप्लुतवदुपस्थिते ईचा
क्रवर्मणस्येति प्रकृतिभावनिषेधेपि आभ्यां यणादिकार्योऽविधानात् प्लुतस्यास्य यण्न स्यात् ह्रस्वदीर्घपदानुवृत्तौ तु व्यंजनस्य स्यात्। तस्मादिक्ग्रह

CC-0. In Public Domain. Digitization by eGangotri

णंव्यर्थमितिनशक्यतेशंकितुमित्याहुः। अन्येत्विकग्रहणस्यप्रयोजनांतरमप्याहुः इकोयणचिक्वचिद्यथास्यात् यदयंतत्राप्नोतितन्माभूत् किंच अन्यत्प्राप्नोति। इकोसवर्णे इतिशाकल्यं। एवंचयदुक्तंनसमासेसितिचेतितदनेनसंगृहीतंभवतीति। चिन्तुहीति। चिन्विति लोडंतं। हीत्यव्ययं। अनंतस्यापिप्रश्नाख्यानयोरित्यनेनप्लुतः उभयत्र विभाषेयमिति। इति शब्दे परतः पूर्वेणप्राप्ते अन्यत्राप्राप्ते चारंभादितिभावः॥ ॥ ईदूदेद्वचनमिति। अत्रविशेषणेनतदंतविध्याश्रयणंकिंपचेते इमावित्यप्या स्यात्। हरीविष्णू इत्यादिष्वेकादेशस्यपरादिवद्भावाश्रयेणइकारादीनांद्विवचनत्वादीदूदेद्रूपंद्विवचनमित्युक्तेपिप्रगृह्यत्वंसिध्यतीतिबोध्यं। द्विवचनमिति। संज्ञाविधौप्रत्ययग्रहणेतदंतग्रहणंनास्तिसुप्तिङंतमित्यंतग्रहणात् ज्ञापकात्तेनकुमार्योर्वध्वोश्चागारंकुमार्यगारंवध्वगारमितिसिद्धंद्विवचनांतंप्रगृह्यंस्यादितिव्या

ईदूदेद्द्विवचनंप्रगृह्यं १।१।११। ईदूदेदंतंद्विवचनंप्रगृह्यसंज्ञंस्यात्। हरीएतौ। विष्णूइमौ। गंगेअमू। पचेतेइमौ। मणीवोष्ट्रस्येतितुइवार्थेवशब्दोवाशब्दो वाबोध्यः। अदसोमात्। १।१।१२। अस्मात्परावीदूतौप्रगृह्यौस्तः। अमीईशाः। रामकृष्णावमूआसाते। मात्किं। अमुकेऽत्र। असतिमाद्ग्रहणेएकारोप्यनुवर्त्तेत। शे। १।१।१३। अयंप्रगृह्यःस्यात्। अस्मेइन्द्राबृहस्पती। निपातएकाजनाङ्। १।१।१४। एकोऽज्निपातआङ्वर्जः प्रगृह्यःस्यात्। इ विस्मये। इइन्द्रः। उउमेशः। अनाङित्युक्तेरङिदाकारः प्रगृह्यएव। आएवन्नुमन्यसे। आएवङ्किलतत्। ङित्तुनप्रगृह्यः। ईषदुष्णं। ओष्णं। वाक्यस्मरणयोरङित्। अन्यत्रङि

कुर्वंतःमाचलुनेदंसिद्धेः त्। हरीएताविति। इहहृस्व ९ ९ दितिविवेकः

समुच्चितप्रकृतिभावोना। प्लुतप्रगृह्याइत्यत्रनित्यग्रहणादित्युक्तं ।अत्रवृत्तिकारेणमणीवादीनांप्रतिषेधोवक्तव्यइतिपठित्वामणीवरोदसीजंपतीवेत्युदाहृतं। तच्चमुनित्रयानुक्तत्वादप्रमाणमितिकैयटादयः। एवंस्थितेमणीवोष्ट्रस्यलंबेतेप्रियौवत्सतरौममेतिभारतप्रयोगंसमर्थयतेइवार्थेइ्नवशब्दइत्यादि। वंप्रचेतसिजानीयादिवार्थेचतदव्ययमितिमेदिनी। ववायथातथैवैवंसाम्येइत्यमरः। कारंतखंडितदलानिवपंकजानीत्यादिप्रयोगदर्शनाच्चेतिभावः। अदसोमात्। इह एकारोनानुवर्त्ततेअसंभवादित्यभिप्रेत्याह। ईदूताविति। अदसःकिं। शम्यत्रवाम्यत्र। ननूकारानुवृत्तिर्व्यर्था स्त्रियोफलेवाअमूआसातेइत्यत्रपूर्वेणैवसिद्धेः मुत्वस्यासिद्धत्वेप्येकारांतत्वादत आह रामकृष्णाविति। पुंसिपूर्वेणनसिध्यत्यौकारांतत्वादितिभावः अदसोमादितिसूत्रंप्रतिमूलंमीलंचनासिद्धं आरंभसामर्थ्यात्॥०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु
सि·कौ· अमुकेत्रेति। स्त्रीलिंगद्विवचनस्य तु पूर्वसूत्रेण प्रगृह्यत्वे प्रकृतिभाव एव अमुके अत्र। एकारोप्यनुवर्त्ततेति। तथा च एकारानुवृत्तिं तात्पर्यग्राहकफलकं माद्ग्रहणमिति
टी·त· भावः। प्रो। छांदसमपीदं संदर्भशुद्ध्यर्थमुक्तमित्याहुः। अस्मे इति। अस्मभ्यमित्यर्थः। सुपां सुलुगिति भ्यसः शे आदेशः। शेषे लोपः। निपात एका। निपातः किं। अनते
२९ ई। अः। हे अ आगच्छ। हे। आगच्छ। अत्र प्रगृह्यसंज्ञा माभूत्। एकग्रहणाभावे येन विधिरिति सूत्रान्तरं तल्लाभे प्रे इदमित्यत्र स्यादत उक्तमेकेति। एकाजिति तु न बहुव्री
हिकृतातिप्रसंगतादवस्थ्यादतः पूर्वकाले केति कर्मधारय एव। ननु निपातोऽनाङिन्युक्ते हलं तस्य सत्यपि प्रगृह्यत्वे प्रयोजनाभावादजन्ते प्राप्तेऽज्ग्रहणसामर्थ्या
दजन्तरूपस्यैव निपातस्य प्रगृह्यत्वसिद्धेः किमेकग्रहणेन। न च पुरोस्तीत्यादौ हलन्तस्य संज्ञायां सत्यां प्रकृतिभावादतो रोरिति रुत्वं न स्यादतोऽज्ग्रहणसामर्थ्यमुपक्षीण
मित्येकग्रहणमावश्यकमिति वाच्यं। प्रगृह्यसंज्ञां प्रति रुत्वस्यासिद्धतया रेफान्तस्यैव तस्य प्रगृह्यसंज्ञाभावेन दोषाप्रसक्तेः। न च संतस्य कृताप्रगृह्यसंज्ञा एकदेशविकृ
तन्यायेन रेफान्तस्यापि स्यादेवेति प्रकृतिभावादुत्वाभावप्रसंगस्तदवस्थ इति वाच्यं। प्रगृह्यतां प्रति तो वप्रकृतिभावं प्रत्यपि रुत्वस्यासिद्धत्वान् प्रकृतिभावाप्रवृत्तेः सका
रान्तस्य तु न किंचिदपि सिद्धकांडस्थं प्रयोजनं पश्यामोतिय प्रकृतिभावेन व्यावर्त्येत। न चाज्ग्रहणसामर्थ्यादजन्तस्यैव प्रपरा अपेत्यादि निपातस्य प्रगृह्यसंज्ञास्या
न्न तु हलन्तरूपनिपातस्येति वैपरीत्यशंकानिवारणार्थमेकग्रहणमिति वाच्यं। अनाङ्ग्रहणस्य वैयर्थ्यापत्तेर्व्याहरति मृग इत्यादिनिर्देशविरोधाच्चोक्तशंकाया अप्रवृत्तेः। किंच
निपातो अनाङित्युक्तेप्यनाङिति प्रतिषेधसामर्थ्यान्निपातस्य विशेषणत्वाभ्युपगमे तदंतविधिप्रवृत्त्या निपातरूपो यो अच् प्रगृह्य इत्यर्थलाभादजन्तरूपस्यैव निपातस्य प्र
गृह्यत्वं सिद्धमिति नास्त्येव प्रयोजनमेकग्रहणस्य। नन्वेवमपि समुदायनिर स्यार्थमेकग्रहणमावश्यकमेवान्यथा अइउ अपेहीत्यत्रैकाच्। द्विर्वचनन्यायेन समुदा
यस्यैव संज्ञा स्यान्नावयवानामिति चरमस्यैव प्रकृतिभावः स्यान्न तु पूर्वयोरिति चेन्न। अजित्येकत्वस्याविवक्षयैव समुदायनिरासंभवात्समुदायसंज्ञया अवयवाना
मननुग्रहेणैकाज्द्विर्वचनन्यायस्याप्यप्रवृत्तेरेकस्मिन्निपाते संज्ञाविधानसंभवेन निपातसमुदायस्य निपातग्रहणेनाग्रहणाच्च। अत्राहुर्भाष्यकाराः। अच्समुदा २९
यग्रहणशंकानिरासार्थमेकग्रहणं कुर्वता ज्ञापयति वर्णग्रहणेषु व्यक्तिसंख्या न विवक्ष्यते किंतु जातिरेव निर्दिश्यत इति तेन हलन्ताच्चेति सनः कित्त्वात् दंभ इत्वे।
धिप्सतीत्यादि सिद्धं। हल्ग्रहणस्य व्यक्तिपरत्वे तु यत्रैकः समीपे हल् न कारो नन्तः परः सन् यस्माच्च परः सन् न भकारान्नासाविक् समीप इति कित्त्वं न स्यात् ततश्चानतो

२१

नस्यात्। वस्तुतस्तु अप्रक्तसंज्ञायामेकग्रहणमुक्तार्थज्ञापकमित्याश्रित्यप्रकृतसूत्रे एकाज्ग्रहणं त्यक्तुं शक्यमत एव मनोरमायामनाङिति पर्युदासाद्वा स्त्रूपनिपातेल्येति
पातग्रहणमुत्तरार्थस्पष्टप्रतिपत्त्यर्थमिहैवं कृतमिति निपातग्रहणस्यैव प्रयोजनमुक्तं नत्वेकाज्ग्रहणस्य। अत्र नव्याः। यदुक्तं मनोरमायामनाङिति पर्युदासादित्यादि तच्चिं
त्यं ओ सूत्रे भाष्यकारैः प्रसज्यप्रतिषेधस्यैवाङ्गीकृतत्वात्। न च लक्षणभेदाभावात्प्रौढिवादमात्रं भाष्यमिति वाच्यं। अस्मादेव भाष्यवचनाल्लक्ष्यभेदोप्यस्तीति सुवचत्वा
त्। तथाहि। अततेऽई: अ अकारो वा सुरेकः स्यादिति वचनाद्वृद्धिप्राप्तौ वा। अनेन अप्राप्ते नसहाङ् मर्यादाभिविध्योरिति आङोऽव्ययीभावे सवर्णदीर्घे अव्ययीभावश्चेति नपुंस
कत्वाद्ध्रस्वत्वे सोरम्यमिपूर्वे च कृते अमिति रूपं भाष्यकृत्संमतं। तथा इणो निष्ठायामितः वेञस्तु निष्ठायां संप्रसारणे उतः अं इतः एतः अंउतः। ओतः इत्यासमुद्रक्षितिवत्समा
से रूपं च तत्संमतं। तत्र पर्युदासपक्षे अमिपूर्वो गुणश्च न सिध्यति अप्राप्तस्याङ्भिन्नत्वात्स्यानिरवकाशत्वेन निपातत्वाच्च प्रगृह्यत्वात्। प्रसज्यप्रतिषेधाश्रये तु सिध्यति तस्या
ङ्त्वेन प्रगृह्यत्वनिषेधात्। न चैतादृशप्रयोगाः प्रामाणिक इति वक्तुं युक्तं। प्रकृतभाष्यस्यैव प्रमाणत्वात्। अन्यथा हि भाष्यकारेङ्गितमात्रावलंबनेन तत्र प्राचां ग्रंथा

ओत्। १।१।१५। ओदन्तो निपातः प्रगृह्यः स्यात्। अहो ईशाः। सम्बुद्धौ शाकल्यस्येतावनार्षे। १।१।१६। सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवै
दिके इतौ परे। विष्णो इति। विष्ण इति विष्णविति। अनार्ष इति किं। ब्रह्मबन्धविन्यब्रवीत्॥ ९९ नामधिक्षिपायम वर्ताप्रवृत्तनयोव्याहन्येरन्निस्याद्याहुः॥

आङ्वर्ज इति। प्रतिषेधपक्षे तु प्रगृह्यः स्यादित्येतदुत्तरमिदं द्रष्टव्यं। वर्ज्यत इति वर्जः। वृजेर्ण्यन्तात्कर्मणि घञ्। वर्जनीय इत्यर्थः। आङो न भवतीति यावत्। आ एवमिति पू
र्वप्रक्रांतवाक्यार्थस्य अन्यथात्वद्योतकोयमाकारः पूर्वमित्थं नामंस्थाः इदानीं त्वेवं मन्यस इत्यर्थः। आ एवं किलेति। स्मरणद्योतकोयमाकारः। वाक्यस्मरणयोरित्यादि
अत्रायमाशयः ईषदर्थे क्रियायोगे इति भाष्यस्याङित्त्वलक्षण एव तात्पर्यं लाघवात्। अन्यस्याङित्त्वं त्वर्थसिद्धं ईषदर्थ इत्यादिस्त्वेकदेशानुवादः। एवं च अभ्रे आँ अपः इत्य
त्र समभ्यर्थे वृत्तेरप्याकारस्याङित्त्वादाङोऽनुनासिकश्छन्दसीति प्रवर्तत इति॥ ॰॰ ॥ ओत्। निपात इति किं। देवोसिवायवायाहि। संबुद्धौ। ऋषिर्वेदस्तदुक्तमृषिणेत्या
दौ तथा दर्शनादित्यभिप्रेत्याह। अवैदिक इति। संबुद्धौ किं। अहो इति। अत्र परत्वाद्विकल्पो माभूत्। न च ओदिति सूत्रस्य निरवकाशत्वं शंक्यं। अहो ईशा इत्या
दौ तस्य सावकाशत्वात्। इतावितिकिं। पटो त्र। अनार्षे किं। ब्रह्मबंधविन्यब्रवीत्॥

CC-0. In Public Domain. Digitization by eGangotri

सु॰ सि॰ कौ॰ टी॰ त॰ २२

उञः। निपात एकाजिति नित्यं प्राप्ते विभाषेयम्। शाकल्यस्येतौ प्रगृह्यमिति चात्रानुवर्त्तते तदाह इतौ वा प्रागुक्तमिति। इह उञ ऊँ इत्येकमेव सूत्रं योगविभागेन व्याख्या
तमेकसूत्रत्वे तु उञ इतौ ऊँ शाकल्यस्येत्यर्थात्। उँ इतीत्येव रूपं शाकल्यमते सिध्यति अन्येषां तु मते नित्यं प्रगृह्य इति उ इतीत्येव रूपं सिध्यति विती इति रूपं तु न सिध्यत्येवेति ज्ञेयं
ञ्। अनुनासिक इति। तेनास्मिन् पक्षे यरोऽनुनासिक इति विकल्पः। यद्यत्तनूँ इतिप ठसि परे त ईं इति वा न दीर्घमित्यादि। एतदर्थमेवात्रानुनासिकग्रहणम्। अन्यथा यरोऽन
म्यनुनासिको वेत्येवावक्ष्यत्। यरो ग्रमित्रं मेत्यवावक्ष्यदित्युक्तौ तु यथासंख्यप्रवृत्त्या अम्मयंत नेत्यादि सिद्धावपि चिन्मयं एतन्मुरारिरिति न सिध्येत्। कृत्स्नेऽनंतः। ङमुण्नि
त्यमित्यादिनिर्देशात्। प्रयत्नतु प्रतिपत्तिगौरवं। वस्तुतस्तु यरोऽनुनासिकेऽम्वेत्येव सूत्रयितुमुचितमित्याहुः। प्रगृह्यमित्यनुवर्त्तनादाह। प्रगृह्यश्चेति। ननु दीर्घोच्चारणसामर्थ्या
देव प्रकृतिभावसिद्धौ किमनेन प्रगृह्यत्वेनेति चेदत्राहुः। प्रगृह्याप्रगृह्ययोर्द्वयोरप्यु     प्राप्तौ प्रगृह्यादेशे प्रकृतिभावादिदृष्टसिद्धावपि अप्रगृह्यादेशस्यानुनासि

ऊँ। १।१।१८। उञ इतौ दीर्घोऽनुनासिकः प्रगृह्यश्च ऊँ इत्ययमादेशो वा स्यात्। ऊँ इति। मय उञो वो वा। ८।३।३३। मयः परस्य उञो वो वा स्याद् चि। किमु उ
क्तं। किम्वुक्तम्। वस्यासिद्धत्वान्ना     नुस्वारः॥ ईदूतौ च सप्तम्यर्थे। १।१।१९। सप्तम्यर्थे पर्यवसन्नमीदूदन्तं प्रगृह्यं स्यात्। सोमो गौरी अधि
श्रितः। मामकी तनू इति। सुपां सुलुगिति सप्तम्या लुक्। अर्थग्रहणं किं। वृत्तावर्थान्तरोपसंक्रान्ते माभूत्। वाप्यामश्वो वाप्यश्वः॥ 22

को वकारः स्यात् तदा रूपत्रयप्रगृह्यत्वाश्रयणमिति। आदेशस्यास्यानित्यत्वेनोक्तत्वादुञ इति प्रगृह्यत्वविकल्पे पक्षे नित्यार्थं तदाश्रयणमित्यन्ये। यदि तु प्रगृह्यमित्यस्या
स्यानि विशेषणत्वं स्वीकृत्य प्रगृह्यस्योञः ऊँ इत्ययमादेश इति व्याख्यायते तदा दीर्घानुनासिकोक्तिवत् प्रगृह्यश्चेत्युक्तिरपि स्वरूपकथनमेवेति बोध्यं। ऊँ। अत्र यदि शाक
ल्यस्येति नापेक्ष्यते तेन तदा प्रगृह्यस्योञो नित्यमादेशः स्यात्तत्र च विति ऊँ इत्येतद्रूपे स्यातां। तस्माच्छाकल्यग्रहणानुवृत्त्या आदेशविकल्पे सिद्धे त्रीणि रूपाणि सिध्यन्तीति।
कैयटस्तदाह अयमादेशो वा स्यादिति। वस्यासिद्धत्वादिति। अत एव वत्वं त्रिपाद्यां विधीयते प्रकृतिभावमात्रबाधनार्थत्वे हि इकोयणचीत्यनंतरं मय उञो वेत्येवावक्ष्य
त् यत्वं चान्ववर्त्तयिष्यत्॥ ईदूतौ च॥ ईदन्ता विति किं॥ प्रियः सूर्ये प्रिया अग्नावभवाति। अग्निशब्दात्परस्याः सप्तम्याः सुपां सुलुगित्यादिना डा     देशः। परकारेः प्रगृह्य २२
त्वम् इति शब्दप्रयोगस्यानियमितत्वेन इहापि परकाले इति शब्दप्रयोगप्रसंगः स चानिष्ट इति बोध्यं। सप्तमीग्रहणं किं। धीतौ। मती। सुष्टुती। धीत्यां मत्यां सुष्टुत्या इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शसेतृतीयैकवचनस्यपूर्वसवर्णेईकारः। ननोकः सवर्णेदीर्घइत्येकादेशः। नविहसुपांसुलुगितिलुक्। ह्रस्वश्च वर्णापत्तेः। सोमोगौरीइति। वातप्रमीअत्रयथीआस।
क्तइत्याद्युदाहरणेसत्यप्युकारांतस्यलौकिकोदाहरणाभावात्। उभयोरपिवेदएवोदाहरणमुक्तं। मामकीतनूइति। यद्यप्यत्रसंहितायांप्रगृह्यत्वप्रयोजनंनास्ति
तथापिमामकीइतितनूइतीतिपदकालेतदस्त्येव। स्वाध्यायेतनूक्तत्वेनाधमानामित्यत्रसंहिताकालेप्यस्तिनथापिकृत्स्नकइतिपाक्षिकप्रकृतिभावेनाप्येतत्सिद्धं
छंदसिसुपांनरसादापादयितुमशक्यत्वादितिबोध्यं। सप्तम्यालुगिति। यदिधीसाताविवविभक्तेः पूर्वसवर्णेकृतेसवर्णदीर्घएकारेशइतिव्याख्यायतेतदाएका
देशेवाधित्वापरत्वादांगत्वाच्चआदानद्याइत्याटडेरामच्छादितिभावः। अर्थग्रहणंकिमिति। वाप्यश्वइत्यादावपिसप्तम्यर्थोस्त्येवेतिनार्थोर्थग्रहणेनेतिप्रश्नः
अर्थांतरोपसंक्रांतइति। वाप्यश्वइत्यत्रयोवापीशब्दःसतुवाप्यधिकरणकद्रव्येउपसंक्रांतः सोमागौरी इत्यत्रगौरीशब्दस्तुसप्तम्यर्थमात्रेपर्यवसन्नःनतुतद
धिकरणकद्रव्येइत्यस्याभावादितिभेदः॥ ॥ अणोप्रगृह्यस्य। अणइतिकिं। कर्तृहर्तृ। अच्चांधिरिति। कुत्वंश्चुत्वंचात्रनकृतंस्पष्टप्रतिपत्त्यर्थं। अतएवानुस्वा

अणोप्रगृह्यस्यानुनासिकः। ८।४।५७। अप्रगृह्यस्याणोवसानेनुनासिकोवास्यात्। दधिं। दधि। अप्रगृह्यस्यकिं। अग्नी॥ इत्यच्संधिः
स्तोःश्चुनाश्चुः। ८।४।४०। सकारतवर्गयोःशकारचवर्गाभ्यांयोगेशकारचवर्गौस्तः। हरिश्शेते। रामश्चिनोति। सच्चित्। शार्ङ्गिञ्जयः। शात्॥
।८।४।४४। शात्परस्यतवर्गस्यचुत्वंनस्यात्। विश्नः। प्रश्नः॥ ९ इत्याद्युदाहृत्यादित्यादिनिर्देशोप्युपपन्नः। इत्यच्संधिः। स्तोःश्चुनाश्चुः। स्तोरितिसमाहारद्वंद्वः

सोत्रपुंस्त्वं। एवंश्चुःप्रत्यपिबोध्यं। श्चुनेति। सहयुक्तेतिसूत्रेविनापितद्योगेतृतीयेतिवक्ष्यमाणत्वात्तृतीया। योगइति। एतदध्याहारलभ्यं। अतस्थान्यादेशयोर्यथा
संख्यं। निमित्तकार्यिणोर्न। शादितिज्ञापकात्। यथासंख्यसूत्रमिहनोपन्यस्तं स्थानेन्तरतमइत्यनेनापिइष्टसिद्धेर्नातिनावश्यकत्वात्। हरिश्शेतइति। वाशरीतिपा
क्षिकत्वाद्विसर्जनीयस्यसत्वस्यशेनयोगेशः। चवर्गयोगेरामश्चिनोति। तवर्गस्यतुचवर्गयोगेसच्चिदित्यादि। शेनयोगेतुतच्शिवइत्याद्युदाहरिष्यति॥ शात्। नेति।
तोरितिचानुवर्ततेतदाहतवर्गस्येत्यादि। जश्त्वमित्यादिव्याख्यात्निर्देशोक्तिः संदिग्धत्वेनबोधनाययथात्रश्चेतिप्रत्वंजश्त्वंचनकृतंतथाश्चुत्वमपिनकृतमितिपरि
हारसंभवाद्वर्णान्यमेवोदाहरति। विश्नः प्रश्न इति। विच्छगतौ प्रच्छज्ञीप्सायां यजयाचेत्यादिनानङ्। च्छ्वोः शूडिति। छस्यशत्वं। नझेडि। त्वादुणाभावः। प्रछेसंप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ञ्चेचासन्नेतिनिर्देशात्संप्रसारणाभावः। ननु ञमङणनानां नासिकास्थानाधिक्याद्वर्गाद्यैश्चतुर्भिः सह तुल्यस्थानत्वाभावेन सावर्ण्याभावात् स्तोश्चुनेति तु शब्देन
नकारेण न गृह्यते किंतु स्ववर्गाद्याश्चत्वार एवेति विश्रः। भष्म इत्यत्र श्चुत्वप्रसक्तेः किमनेन निषेधेनेति चेत्स्वाहुः। शादिति निषेधाल्लिङ्गादेव तुल्यास्यप्रयत्नमित्य
त्रास्यग्रहणेन नासिकास्थानभिन्नताल्वादिस्थानं गृह्यते। न तत्स्थानं तु तुल्यमेवेति तु शब्देन पंचमस्यापि ग्रहणात् श्चुत्वप्रसक्तौ निषेधोयमावश्यकः एवं च तो र्लीति तु
शब्देन नकारस्यापि ग्रहणात् हि द्वांल्लिखति इत्यादि सिध्यति तानचनिमित्तकार्यित्वे यथासंख्यनिरासज्ञापकमित्युक्तत्वात् नैव चार्थवले कथमुक्तार्थे ज्ञापकं भवेदिति
वाच्यं तु शब्देन नकारग्रहणे सिद्धे हि यथासंख्यनिवृत्तिरनेन ज्ञापनीयेत्युभयज्ञापने बाधकाभावात्। नापि तुल्यास्यमित्यत्र यत्किंचित्स्थानतुल्यत्वविवक्षायां
वर्गेषु पंचापि वर्णाः परस्परं सवर्णा भवेयुरित्युक्तोदाहरणे श्चुत्वप्रसक्तौ शादित्यारंभ आवश्यक इत्यनेन तज्ज्ञापकाश्रयणं किमर्थमिति वाच्यं। तथा हि सति ञ
मङणनानां परस्परसावर्ण्यापत्त्या लंनयसीत्यादौ अनुस्वारस्य ययि परसवर्णः वा पदान्तस्येत्यनुस्वारस्य ञादयोपि स्युः। ताल्वादिस्थानसाम्याभावेपि नासिकारूप
स्य यत्किंचित्स्थानस्य तुल्यत्वात्। नापि तुल्यास्यत्वमन्यूनास्यत्वमिति व्याख्यायां ञादीनां परस्परसावर्ण्यं न भवेत्तेषां नासिकास्थानसाम्येपि ताल्वादिस्थानसाम्या
भावेन न्यूनस्थानकत्वात् ननश्चत्वं नपसीत्यादिषु नातिप्रसंगः। स्ववर्गाद्यैः सह तु ञादीनां सावर्ण्यं स्यादेव। नासिकास्थानाधिक्येपि तदन्यूनस्थानकत्वात्तेषामिति।
विद्वान्लिखतीत्यादिरूपं सिध्यति वर्गाद्यानां तु नासिकास्थानाभावेन न्यूनस्थानकत्वात्स्यं चमेन सावर्ण्याभावेपि न क्षतिरिति ज्ञापकाश्रयणं विनैवेष्टसिद्धिरिति वाच्यं।
हे गौरि एहीत्यादौ सवर्णदीर्घापत्तेरिकोसवर्ण इति प्रकृतिभावानापत्तेश्च। इकारान्यूनस्थानकत्वेन तत्सवर्णकत्वादेकारस्य। स्वराणामूष्मणां चैव विवृतं क
रणं स्मृतं तेभ्योपि विवृतावेङौ ताभ्यामैचौ ततोपि चेति वचनात्प्रयत्नभेदेन सावर्ण्याभावमभ्युपगम्योक्तानिष्टवारणेपि तदृत्वतवृत्तमित्यत्र तो र्लीति परसवर्णवि
धिना ऌकारस्य वकारापत्तेः। वकारस्य ओष्ठस्थानाधिक्येपि दंतस्थानसाम्येन लकारान्यूनस्थानकत्वात्। यदि तु वकारस्य दंतोष्ठमिति समाहारनिर्देशात् ओष्ठस्थान २३
दंतस्थानभिन्नमेव दंतोष्ठस्थानमिति वकारस्य लकारसावर्ण्याभावान्न ह्ल्लिख्यादौ नातिप्रसंग इति ब्रूयात्तर्हि लुग्वा दुहेत्यादिना दंत्येतङि विधीयमानो यः क्स
स्य लुक् अदुहूहीत्यत्र न स्यात्। किंतु अदुग्धेत्यादावेव स्यात्। तथापि पूर्तेः पिपुरतीत्यादौ विधीयमानमुदोष्ठ्यपूर्वस्येत्युत्वं मुमूर्षतीत्यादौ न स्याद्दुक्करीत्या

23

CC-0. In Public Domain. Digitization by eGangotri

वकारस्यौष्ठ्यत्वाभावात्। न च वस्यौष्ठ्यत्वे दंत्यत्वे च सति सेकृस्पृपिति षोपरे शल् हलोः स्विदादीनां पृथक्ग्रहणं व्यर्थं स्यात् तेषामपि दंत्यांनसादित्वादिति भ्रमितव्यं। दे
त्यः केवलदंत्यो न तु दंतोष्ठ्यजो पीन्यादेर्मूलत्वेव वस्यमालत्वात्। ये तु पाणिनिशिक्षायां यमानुस्वारयोरेव नासिकास्थानत्वकथनादन्येषां स्थानं नासि-
कानभवतीति किंत्वनुनासिकत्वगुण एव। नासिकाव्यापारेणोच्चार्यमाणत्वमात्रेण नासिकास्थानत्वकथने त्वकारादीनामप्युक्तरीत्या नासिकास्थानमिति स्थान
निरूपणे तेषां न दकथनान्यूनतेत्यादि वदन्ति। तेषामत्रोक्तव्यापकाश्रयणं विनैव प्रसिद्धिः अन्यत्वे कारादीनां नासिकया सर्वदानुच्चारणादनुनासिकत्वगुणः
सत्वेनिविघ्नातेऽपैनीन्यादिलक्ष्यणलक्षितत्वात्। ञमङणनानां त्वनुनासिकत्वनापेतिसर्वदैव तथोच्चारणादिति। न गुणः किंतु यमानुस्वारयोरिव स्थानमे

ष्टुना ष्टुः। ८।४।४१। स्तोः ष्टुना योगे ष्टुः स्यात्। रामष्षष्ठः। रामष्टीकते। पेष्टा। तट्टीका। चक्रिण्ढौकसे। न पदान्ताट्टोरनाम्। ८।४।४२। अनामिति लुप्त
षष्ठीकम्पदं। पदान्ताट्टवर्गात्परस्यानामः स्तोः ष्टुर्न स्यात्। षट्सन्तः। षट्ते। पदान्तात्किं। ईट्टे। टोः किं। सर्पिष्टमं। अनाम्नवतिनगरीणामिति वाच्
यं॥ षण्णां। षण्णवतिः। षण्णगर्यः। तोः षि। ८।४।४३। तवर्गस्य षकारे परे न ष्टुत्वं। सन्षष्ठः। झलां जशोऽन्ते। ८।२।३९। वागीशः। चिद्रूपं। यरोऽनुना
सिकेऽनुनासिको वा। ८।४।४५। यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात्। एतन्मुरारिः। एतद्मुरारिः। स्थानप्रयत्नाभ्यामन्तरतमे स्प
र्शे चरितार्थो विधिरयं रेफे न प्रवर्त्तते। चतुर्मुखः। प्रत्यये भाषायां नित्यम्। तन्मात्रं। कथन्तर्हि मदोदग्राः ककुद्मन्त इति यवादिगणे दकार
निपातनात्। तोर्लि। ८।४।६०। तवर्गस्य लकारे परे परसवर्णः स्यात्। तल्लयः। विद्वाँल्लिखति। नकारस्यानुनासिको लकारः॥ ॥

वनासिकेति स्थाननिरूपणे ञमङणनानां नासिका चेत्युक्तं न लकारादीनां नासिका चेति। यत्तूक्तं तुल्यास्यत्वमन्यूनास्यत्वमिति व्याख्यायां तद्दूषित्वान्यासे तोर्लीति
दकारस्य वकारप्रसंग इति तदुपायतः तोर्लीत्यत्र लकारद्वयनिर्देश इति स्वीकृत्य लकारद्वये लकारे परे परसवर्ण इति व्याख्यायामुक्तदोषाप्रसक्तेरित्याहुः॥
॥ ष्टुना ष्टुः॥ इहापि कार्यिनिमित्तयोर्यथासंख्यं न भोवीति ज्ञापकात्। सर्पिष्टममिति। ह्रस्वात्तादौ तद्धिते इति षत्वं॥ यरो। पदांतस्येति किं। वेद्मि। सम्भानितास्प
र्शे चरितार्थ इति। प्रसिद्धप्रयोगाभिप्रायेणेदमुक्तं। कमलं मुरारिः इत्यत्र वैनेताद्भ्यादौ लकारवकारयोरनुनासिकप्रवृत्तौ बाधकाभावात्। स्पर्शस्यैवेष्यत इति भा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु·
सि·कौ· चाग्रंथानुरोधेनस्पर्शभिन्नेषु अनुनासिकविधिर्नप्रवर्त्तते। अनभिधानादितिवायोज्यं। रेफेनप्रवर्त्तत इति। यद्यपिव्यक्तिःपदार्थ इतिपक्षेलक्ष्यभेदेलक्षणभेदात्। अस्मा
टी·त· व्यक्तौलक्षलक्ष्याचरितार्थत्वात्रेफेपिप्रवृत्तिर्दुर्वारेवतथापिलक्ष्यानुरोधेनजातिपक्षमाश्रित्येदमुक्तं। रकारनिपातनादिति। ननुयवादिगणेककुदित्येवपठ्य
·२४ तेननुककुद्मतइतिमतुब्विशिष्ट। तथाचयरोनुनासिकोदुर्वारः। नचयरोनुनासिकप्रवृत्तौझयंतत्वाभावेनझय इतिमतुपोमकारस्यवत्वाप्रसक्त्यायवादिगणे
ककुदितिपाठोनिरर्थकःस्यादितिवाच्यं। अनुनासिकविधेरसिद्धत्वेनझयंतत्वानपायात्‌गणेतत्पाठस्यसार्थक्यादितिचेदत्राहुः। यद्यत्रककुद्‌कारस्यन।

उदःस्थास्तम्भोःपूर्वस्य। ८।४।६१ उदःपरयोस्थास्तम्भोःपूर्वसवर्णःस्यात्। आदेःपरस्य। उत्थानं। उत्तम्भनं। अत्राघोषस्यमहाप्राणस्यस
स्यतादृशएवथकारः। तस्यझरोझरीतिपाक्षिकोलोपः। लोपाभावपक्षेतुथकारस्यैवश्रवणंन्तुखरिचेतिचर्त्वेनतत्प्रतिथकारस्याऽसिद्धत्वात्।
उत्थानं। उत्तम्भनम्। झयोहोन्यतरस्यां। ८।४।६२ झयःपरस्यहस्यपूर्वसवर्णोवास्यात्। घोषवतोनादवतोमहाप्राणस्यसम्वृतकण्ठस्यहस्य
तादृशोवर्गचतुर्थएवादेशः। वाग्घरिः। वागहरिः॥ शश्छोटि। ८।४।६३ झयःपरस्यशस्यछोवास्यादटि। दस्यचुत्वेनजकारेकृते। खरिच। ८।४।५५
खरिझलांचरःस्युः इतिजकारस्यचकारः। तच्छिवः। तच्शिवः। छत्वममीतिवाच्यं॥ तच्छ्लोकेन। तच्श्लोकेन। अमिकिं। वाक्‌श्च्योतति। मोनुस्वा
रः। ८।३।२३। मान्तस्यपदस्यानुस्वारस्याद्धलि। अलोन्त्यस्य। हरिंवन्दे। पदस्येतिकिं। गम्यते। नश्चापदान्तस्यझलि। ८।३।२४। नस्यमस्यचापदान्त
स्यझल्यनुस्वारः। यशांसि। आक्रंस्यते। झलिकिं। मन्यसे। अनुस्वारस्ययथिपरसवर्णः। ८।४।५८। स्पष्टम्। अङ्कितः। अञ्चितः। कुण्ठितः। शान्तः। गु
म्फितः। कुर्वन्तीत्यत्रणत्वेप्राप्ते तस्यासिद्धत्वादनुस्वारेपरसवर्णेतस्यासिद्धत्वान्नणत्वं॥ ९। कारइष्टःस्यान्नहिगणेककुन्नित्येवपठेन्ननुककुदितिम

तुपःप्रकृतिभूतककुद्‌शब्दस्यनांतत्वनिपातनेपिअन्यत्ररकारांतप्रयोगस्यनिर्वाधत्वात्तस्माद्यरोनुनासिकोत्रनप्रवर्त्ततेइति। अन्येत्वाहुः। यचिभंतसोमत्वर्थइति २४
संहितयापाठेतसाविति नाम्पूर्वंरकारंप्रश्लिष्यभत्वेनाप्येतत्समाधातुंशक्यं। तसाविति द्विर्वचननिर्देशात्‌रुतयोःसमाहारद्वंद्वंकृत्वाइतरेतरयोगद्वंद्वेकृतेसमुप
पद्यतइति॥ ॥ उदःस्था॥ अनुस्वारस्ययथीत्यत्रसमस्तमपिसवर्णग्रहणमिहनिष्कृष्यसंबध्यते। एकदेशेस्वरितत्वप्रतिज्ञानादित्यभिप्रेत्याह। पूर्वस

24

वर्णः स्यादिति॥ शश्छोटि। इह पदान्तादित्यनुवर्त्य पदान्तान्झय इति व्याख्येयं तेन हन मध्वश्चोतन्त्यभितो विरप्शा विपूर्वाद्रपेरौणादिकः शः। छत्वममीति। शश्छोटीति सूत्रं शश्छो मीति पठनीयमित्यर्थः। तच्छ्लोकेनेति। तच्छ्लोकेनेत्यादावप्युदाहर्तव्यं। मोनु। हलि सर्वेषामित्यतो हलीत्यनुवर्त्तते पदस्येति च तदाह मान्तस्येत्यादि। हलि किं। त्वमत्र। किमत्र। नश्चापदान्तस्य। अपदान्तस्य किं। राजन्पाहि। आक्रंस्यत इति। आङ्उद्गमन इति तङ्। स्नुक्रमोरिति नेट्। अनुस्वारस्य। अत्र ययीति स्पष्टार्थं अचिपरे अनुस्वाराभावात्। झलि तु परसवर्णोनुस्वारान्तरतमो न संभवतीति कुंडं रथेनेत्यत्रेव दंशनमित्यादावपि परसवर्णविध्यप्रवृत्तेः। अत्र वदंति। ईषद्विवृतमूष्मणां विवृतं स्वराणामिति भाष्यमते ययीत्यस्यापार्थकत्वं। सूत्रकारमते तदावश्यकमेवान्यथा दंशनमित्यादावनुस्वारान्तरतमः परसवर्णोनुनासिक ईकारः स्यात्। ईकारशकारयोस्तन्मते सावर्ण्यस्य सत्त्वात्। तथा कुंडं शेते इत्यादावनुस्वारस्य वा पदान्तस्येति स्यादिति। अंकित इति अंक पदे लक्षणे चेति चुरादिर्ण्यन्तात् क्तः। निष्ठायां

वा पदान्तस्य ८।४।५९। पदान्तस्यानुस्वारस्य ययि परे परसवर्णो वा स्यात्। त्वङ्करोषि त्वंकरोषि। संय्यन्ता संयन्ता। सम्वत्सरः संवत्सरः। यल्लोकम्। यंलोकम्। अत्रानुस्वारस्य पक्षे नुनासिका यवलाः। मोराजिसमः क्वौ ८।३।२५। क्विबन्ते राजतौ परे समो मस्य म एव स्यात्। सम्राट्। हेमपरे वा ८।३।२६। मपरे हकारे मस्य म एव स्याद्वा। हुल ह्मल संचलने। किम्ह्मलयति। किं ह्मलयति। यवलपरे यवला वेति वक्तव्यम्। यथासंख्यमनुदेशः समानाम् १।३।१०। समसम्बन्धी यो विधिर्यथासंख्यं स्यात्। किं ह्यः। किय्ँ ह्यः। किं ह्वलयति। किव्ँ ह्वलयति। किं ह्लादयति। किल्ँ ह्लादयति॥ ॥

सेटीति णिलोपः परसवर्णेन ङः। अकि लक्षणे इत्यस्माद्धा क्तः नुमोनुस्वारे परसवर्णेन ङः। अञ्चित इति। अंचेः पूजायामिति निष्ठायां इट्। नांचेरिति नलोपनिषेधः। कुंठित इति। कुठि प्रतिघाते क्तः नुमोनुस्वारे परसवर्णेन णः। शान्त इति। शमु उपशमे क्तः॥ ःः ॥ वा दान्तशान्तेति निपातनादिडभावः। अनुनासिकस्य क्वीति दीर्घः। मस्य अनुस्वारे परसवर्णेन नकारः। गुंफित इति। गुंफ ग्रंथे क्तः। मस्यानुस्वारे परसवर्णेन मः। मोराजिसमः क्वौ। राजीति किं। संयत्। सम इति किं। इदं राट्। क्वाविति किं। संराजितुं। संराजितव्यं। मकारस्य मकारवचनमनुस्वारनिवृत्त्यर्थं तदाह। म एव स्यादिति। सम्राडिति। राजृ दीप्तौ। संपूर्वादस्मात् सत्सूद्विषेत्यादिना क्विप्। व्रश्चादिना षत्वं। जश्त्वचर्त्वे। हेमपरे वा। मपर इति बहुव्रीहिः। यवलेति। यवलाः परा यस्माद्यवलपरस्तस्मिन् हकारे परे मस्य यवला भवंतीत्यर्थः। यथासंख्यमनुदेशः। अनुदिश्यत इति अनुदेशः पश्चादुच्चार्यत इत्यर्थः। समानामिति संबंधे षष्ठी तदाह। समसंबंधी विधिरिति। समकर्मकं विधानमिति तु नोक्तं। तथाहि सति यत्रोद्देशेषु समे

CC-0. In Public Domain. Digitization by eGangotri

सु·

सि·कौ· घुसमानां विधानं पाघ्रादिषु पिबादीनां प्रियस्थिरादिषु च प्रस्थादीनां तत्रैव यथाक्रमं प्रवृत्तिः स्यात्। इष्यते तु अनुवाद्ययोरपि यथासंख्यत्वं। समूलाकृतजीवेषु हन्कृञ्ग्रह
टी·त· इत्यत्र यथा। समानामिति किं। लक्षणेत्थंभूतेत्यत्र लक्षणादयश्चत्वारोऽर्थाः प्रत्यादयस्त्रयः तत्र सर्वेषां सर्वत्र कर्मप्रवचनीयसंज्ञा यथा स्यात्॥ ❀॥ नपरे। अ
२५ यमपि बहुव्रीहिरेवा। हे इति तु अनुवर्तते न दाहा। नपरे हकारे इति। ङ्णोः॥। चयो द्वितीया इति। एतच्च नादिन्याक्रोशे इति सूत्रे भाष्ये स्थितं। अत एव मनोरमायां
ङः सीति सूत्रे तु डित्युच्यमाने चयो द्वितीया इति पक्षे थकारापत्तिरुक्ता। यदि तु ङ्णोरिति सूत्रस्थं स्यात्तर्हि तुडित्येव सुवचं स्यात्। तुटोः सिद्धत्वेन चयो द्वितीया इत्यस्या
प्रवृत्तेः। पौष्करसादेरिति। पुष्करे तीर्थविशेषे सीदतीति पुष्करसित्। तस्यापत्यं पौष्करसादिराचार्यः बाह्वादित्वादिञ् अनुशतिकादित्वादुभयपदवृद्धिः। ङः सि धुट्। उभयनि
र्देशे पंचमीनिर्देशो बलीयान् परत्वादित्यभिप्रेत्याह। सस्येति। सीति सप्तमीनिर्देशस्तु लाघवार्थः। षट्सन्त इति। धुटश्चर्त्वेन तकारः चयो द्वितीया इति तस्य थो न चर्त्वस्यासि

नपरे नः। ८।३।२७। नपरे हकारे मस्य नः स्याद्वा। किंह्नुते। किन्ह्नुते। ङ्णोः कुक्टुक् शरि। ८।३।२८। ङकारणकारयोः कुक्टुकावागमौ वा स्तः शरि।
कुक्टुकोरसिद्धत्वाज्जश्त्वं न। चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्॥ प्राङ्क्षष्ठः प्राङ्ख्षष्ठः प्राङ्षष्ठः। सुगण्ट्षष्ठः। सुगण्ठ्षष्ठः।
सुगण्षष्ठः। ङः सि धुट्। ८।३।२९। डान्तात्परस्य सस्य धुड्वा स्यात्। षट्सन्तः। षट्त्सन्तः। नश्च। ८।३।३०। नकारान्तात्सस्य धुड्वा। सन्त्सः। सन्सः। 25
शि तुक्। ८।३।३१। नस्य पदान्तस्य शे परे तुग्वा स्यात्। शश्छोऽटीति छत्वविकल्पः। पक्षे झरो झरि इति चलोपः। सञ्छम्भुः। सञ्च्छम्भुः। सञ्चशम्भुः।
सञ्शम्भुः। ञ्छौ ञ्चछा ञ्चशा ञ्शाविति चतुष्टयं रूपाणामिह तु कच्छत्वचलोपानां विकल्पनात्॥ ९९ टुत्वात्। अत एव धुडभावे षट्सन्त इत्यत्र टस्य
ठो न भवति। न चैवमपि ङः सीति धुगिति धुग्विधीयतां ङकारस्य सकारे परे धुगिति व्याख्यानसंभवात्। किमनेन धुटः परादित्वाऽभ्युपगमेनेति वाच्यं। पूर्वान्तत्वे तु नपदान्ता
द्टोरनामिति निषेधाप्रवृत्त्या धकारस्य ष्टुत्वप्रसंगात्। अत एव वक्ष्यमाणस्तुगिहैव न कृतः। डस्य तु कि ष्टुत्वे तस्यासिद्धत्वेन चयो द्वितीया इत्यस्यापि प्रसंगाच्च। इह धु २५
ड्विकल्पेन रूपद्वयं सनिटकारनकारविसर्गाणां द्वित्वविकल्पात् षोडश रूपाणि। खयः शर इति द्वित्वे द्वात्रिंशत्। शरोऽचीति निषेधोऽत्र न प्रवर्तते। तस्य सौत्रद्वित्वमात्रविष
यत्वस्योक्तत्वात्। न च चर्त्वस्यासिद्धत्वात् खयः परत्वमेव नास्तीति शंक्यं। पूर्वत्रासिद्धीयमद्वित्व इत्युक्तेः। शि तुक्। शीति सप्तमी पूर्वत्र कृतार्थायाः न इति पंचम्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ठीं कल्पयतीत्याह। नस्येति। चलोपइति। झरो झरीत्यत्र सवर्णग्रहणसामर्थ्यान्न यथासंख्यं न प्रवर्त्तत इति भावः। सञ्छंभुरिति। इह श्चुत्वं तु कोऽसिद्धत्वमाश्रित्य न श्चु
वीति रुत्वं नाशंक्यं। छत्वस्यासिद्धत्वात्। चतुष्टयमिति। अत्र तु कः श्चुत्वे च यो द्वितीया इति पक्षे चयस्य छत्वे शस्यापि छत्वविकल्पात्। सञ्छ्छंभुः। सञ्च्छंभुरिति
रूपद्वयं द्विर्बोध्यं। न च शस्य छत्वपक्षे शर्परत्वाभावाज्झयो द्वितीया इति पक्षे चयस्य छो नेति शंक्यं। शश्छोटीति छत्वस्यासिद्धत्वादित्याहुः॥ ॥ ङमो ह्रस्वात्॥
ङम्प्रत्याहारः संज्ञायां च ङ्णनं टित्वं सामर्थ्यात् त्रिभिः संबध्यते। तेन यथासंख्यं ङुट् णुट् नुटः प्रवर्त्तते नित्यग्रहणं विस्पष्टार्थं। हेमपर इति मय उञो व इति च विकल्प
द्वयस्य मध्ये पाठादेव नित्यत्वलाभात्। ननु इह नित्यग्रहणाभावे हेमपरे वेति वाग्रहणमुत्तरसूत्रेष्वपि चस्याप्यनुवर्त्तते वा न वेति शंका स्यादिति चेत्सत्यं। अत एव वि
स्पष्टार्थमित्युक्तं। न तु व्यर्थमिति। तस्मात्परस्याचइति। न तु ङमः इत्यस्य षष्ठ्यन्ततामाश्रित्याचि परे पूर्वस्यैव विधीयतां को दोष इति चेत्। मैवं। तथा हि सति ङमन्त
स्य पदस्य पूर्वावयवः स्यादित्यनिष्टं प्रसज्येत। परस्य यो ङम् तन्तस्येति वैयधिकरण्येन व्याख्यायामपि कुर्वन्नास्ते इत्यत्र णत्वं प्रसज्येत। परं तस्येति निवेधस्या

ङमो ह्रस्वादचि ङमुण्नित्यम्। ८।३।३२। ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो नित्यं ङमुडागमः स्यात्। प्रत्यङ्ङात्मा। सुगण्णीशः। सन्नच्युतः।
समः सुटि। ८।३।५। समो रुः स्यात् सुटि। अलोऽन्त्यस्य। अत्रानुनासिकः पूर्वस्य तु वा। ८।३।२। अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात्।
अनुनासिकात्परोऽनुस्वारः। ८।३।४। अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः स्यात्। खरवसानयोर्विसर्जनीयः॥ ॥

प्रवृत्तेः यद्यपि बहिरङ्गपरिभाषया ङमुड्विधेरसिद्धत्वादिष्टं सिध्यति तथापि यथोद्देशपक्षे त्रैपादिकेऽन्तरङ्गे बहिरङ्गपरिभाषाया अप्रवृत्तेः। प्रसज्यत एव णत्व
मिति यथोक्तं व्याख्यानमेव साधिष्ठमिति दिक्। सुगण्णीश इति। ण्य इति लोपो न स्थानिवत्। पूर्वत्रासिद्धे तन्निषेधात्। ननु परमदण्डिनाविन्यादौ अंतर्वर्त्तिविभक्त्या पद
त्वान्ङुट् स्यादिति चेन्न। उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणप्रतिषेधात्। अत एव परमवाचोपरमगोदुहोपरमलिहाविन्यादौ कुत्वघत्वढत्वादीनि न प्र
वान्तु ङमि च परइत्यतः पदे इत्यनुवर्त्य अजादेः परस्येति व्याख्यानान्न मुण्णेत्युक्तं। तदनेन प्रत्युक्तं। इहैव नलोपं बाधितुं ङमुडुक्तइति तेरेव तेनाप्यनुसर्त्तव्यत्वात्। समः सु
टि। यद्यपि मोऽनुस्वारेण सिद्धं तथापि अनुनासिकत्रिसकारसिद्ध्यर्थमिदं। अत्रानुनासिकः। अयमधिकारो विधिर्वेति पक्षद्वयं। आद्ये अत्र ग्रहणमनर्थकं। अधि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु
सि·कौ· कारादेवरुत्वप्रकरणलाभात्। तुशब्दस्तु अधिकारपक्षे परस्मात्कार्यिणः पूर्वकार्यस्य विशेषद्योतनार्थः। परस्य नित्यं रुत्वं पूर्वस्य तु वाऽनुनासिक इति विधिपक्षे त्वर्थः। वा
टी·त· ग्रहणस्य स्पष्टार्थं। अनुनासिकात्पर इति ज्ञापकादेव सिद्धेः। नहि विकल्पं विना अनुनासिकं विहायेत्यनुनासिकाभावपक्षः संभवति। इदमेव ध्वनयितुं वृत्तौ तु वेति
२८ शब्दावनुक्त्वा रोः पूर्वस्यानुनासिकः स्यात् इत्येवोक्तं। रोः पूर्वस्येति। उपलक्षणमेतल्लोपस्यापि अत्र रुत्वप्रकरणे यो विधिस्ततः पूर्वस्येति निष्कृष्टार्थः। एवं रोः पूर्वस्मात्प
र इत्यस्यापि रुत्वप्रकरणे यो विधिस्ततः पूर्वस्मात्पर इत्यर्थो बोध्यः। अनुनासिकात्। ल्यब्लोपे पंचमीत्याह। अनुनासिकं विहायेति। अनुनासिकाभावपक्ष इत्यर्थः। पूर्वस्ये
ति षष्ठ्यन्तस्य तु विभक्तिविपरिणामेन पंचम्यन्ततेत्यभिप्रेत्याह। रोः पूर्वस्मादिति। संसर्गवद्विप्रयोगस्यापि विशेषावगतिहेतुत्वादवत्साधेनुरानीयतामित्यत्रेव सं

विसर्जनीयस्य सः। ८।३।३४। खरि विसर्जनीयस्य सः स्यात्। एतदपवादेन वा शरीति पाक्षिके विसर्गे प्राप्ते। सम्पुङ्कानां सो वक्तव्यः। संस्कर्त्ता।
संस्कर्त्ता। समो वा लोपमेक इति भाष्यं। लोपस्यापि रुत्वप्रकरणस्थत्वादनुस्वारानुनासिकाभ्यामेकसकारं। रूपद्वयं द्विसकारं तूक्तमेव। न
त्रानचि चेति सकारस्य द्वित्वपक्षे त्रिसकारमपि रूपद्वयम्। अनुस्वारविसर्गजिह्वामूलीयोपध्मानीययमानामकारोपरि शर्षु च पाठस्योपसंख्या
तत्वेनानुस्वारस्याप्यच्त्वात्। अनुनासिकवतां त्रयाणां शरः खय इति कद्वित्वे षट्। अनुस्वारवतामनुस्वारस्यापि द्वित्वे द्वादश। एषामष्टाद
शानां नकारस्य द्वित्वे वचनान्तरेण पुनर्द्वित्वे तु एकतन्द्वितन्त्रितमिति चतुष्पञ्चाशत्। अणोऽनुनासिकत्वे शतोत्तरशतम्॥ ॥

भाविनानुनासिकत्वगुणेनैवोपस्थितत्वादाकांक्षितत्वाच्चावधित्वेन संबध्यते इत्यभिप्रेत्याह। रोः पूर्वस्मादिति तु मनोरमायामवतारितं। तनु पूर्वस्येत्यनुवर्त्त
नं विभक्तिविपरिणामं चानपेक्ष्य लौकिकन्यायेनैवेष्टं सिध्यतीत्याशयेनोक्तमित्याहुः। अनुस्वारागम इति। आगमत्वं च परशब्देनैव लभ्यते। यथा पूर्वौ तु नाभ्या
मेजित्यत्र पूर्वशब्देनैव चोरागमत्वमिति भावः॥ ॥ विसर्जनीयः। खरीति। एतच्च खरवसानयोरिति सूत्रान्मण्डूकप्लुत्यानुवर्त्तते। संस्कर्त्तेति। संपरिभ्यामिति २८
करोतेः सुट्। ननु अनुस्वारस्यानच्त्वात्ततः परस्य द्वित्वं न स्यादेवेति अनुस्वारपक्षे त्रिसकारकं रूपं कथं स्यादित्याशंक्याह। अनुस्वारविसर्गेत्यादि। अकारोपरीति। यदि
त्विकारोपरि पठ्येरन् तर्हि वयः सुयशाः सु इत्यादौ इणः परस्येति षत्वं स्यादिति भावः। अच्त्वादिति। नचैवं हरिः कर्त्ता। हरिं स्मरेत्। रामः पानीयादौ यणादिप्रसंगः।

26

त्रिपादीस्थत्वेन विसर्गादीनामसिद्धत्वात्। अनुस्वारस्यापि द्वित्वमिति। अपिशब्दाल्लकारस्य। वचनान्तरेणेति। अचो रहाभ्यामिति कृतेपि यल्लोमयइति भवत्येवेति भावः॥ ॥ पुमः खयि॥ पुंसः संयोगान्तलोपे ऽवशिष्टभागस्येदमनुकरणं। अम्परइति बहुव्रीहिः। पर्युदासादिति। इदुदुपधस्येति षत्वविधायके सूत्रे इति भावः ख्यात्रादेशेनेति। चक्षिङः ख्याञ् इत्यत्र खशादिरयमादेशः। असिद्धकाण्डेपाठात्तु नान्तरं शास्त्रयोर्वेति स्थितमिति वक्ष्यते। एवं च यत्वस्यासिद्धतया अम्परत्वाभावात् पुमः खयीति रुत्वं नेत्यर्थः। पुंख्यानमिति। चक्षिङो ल्युट् चेति ल्युटि ख्याञादेशः। ननु आदेशइहदुर्लभः। वर्जने प्रतिषेधः असनयोश्चेति वार्त्तिकादिति चेत्सत्यं। बहुलं तण्य न्नवधकगात्रविचक्षणाजिराद्यर्थमिति वार्त्तिके बहुलग्रहणात्समाधेयं। विस्तरस्त्विह मनोरमायामनुसंधेयः। चापस्तेति। त्रैङ्

पुमः खय्यम्परे।८।३।६। अम्परे खयि पुम्शब्दस्य रुः स्यात्। व्युत्पत्तिपक्षे प्रत्ययस्येति षत्वपर्युदासात् ᳵकᳶपयोः प्राप्तौ। अव्युत्पत्तिपक्षे तु षत्वप्राप्तौ। संपुङ्कानामिति सः। पुंस्कोकिलः। पुंस्कोकिलः। पुंस्पुत्रः। पुंस्पुत्रः। अम्परे किं। पुंक्षीरं। खयि किं। पुंदासः। ख्याञादेशे न। पुंख्यानं। नश्छव्यप्रशान्।८।३।७। अम्परे छवि नकारान्तस्य पदस्य रुः स्यात्। न तु प्रशान्शब्दस्य। विसर्गः। सत्वं। श्चुत्वं। शार्ङ्गिंश्छिन्धि। शार्ङ्गिँश्छिन्धि। चक्रिंस्त्रायस्व। चक्रिँस्त्रायस्व। पदस्य किं। हन्ति। अम्परे किं। सन्त्सरुः। खड्गमुष्टिः। अप्रशान् किं। प्रशान्तनोति। नॄन्पे।८।३।१०। नॄनित्यस्य रुः स्याद्वा पकारे परे। कुप्वोः ᳵकᳶपौ च।८।३।३७। कवर्गे पवर्गे च परे विसर्जनीयस्य ᳵक ᳶप इति जिह्वामूलीयोपध्मानीयौ स्तः। चाद्विसर्गः। येन नाप्राप्तिन्यायेन विसर्जनीयस्य सः इत्यस्यापवादोयं। ननु शर्परे विसर्जनीय इत्यस्य। तेन वासः क्षौममित्यादौ विसर्ग एव। नॄंᳶपाहि। नॄंᳶपाहि।

पालने। लोटि शप्यापादेशः। प्रशानिति। प्रपूर्वात् शाम्यतेः क्विप्। अनुनासिकस्येति दीर्घः। मो नो धातोरिति नः। न ॥९९ नॄंᳶपाहि। नॄंᳶपाहि। नॄन्पाहि स्यासिद्धत्वान्नलोपो न। नॄन्पे। पकारो परि अकार उच्चारणार्थः। तेन नॄंᳶपुनातीत्यादि सिद्धं। उभयथर्क्ष्विन्यत उभयथेति अनुवृत्तेर्विकल्पः फलितः इत्याशयेनाह। रुः स्याद्वेति। कुप्वोः ᳵकः। अत्र कुप्वोरिति रेफस्य विसर्गः। जिह्वामूलीयस्य खत्वान्न। खर्परे शरीति विसर्गस्यास्य लोपः। जिह्वामूलीयस्य शर्त्वान्न। वा शरीति विसर्ग एव वा। आदेशयोः कपावुच्चारणार्थौ। चाद्विसर्ग इति। प्राचा तु चाद्विकल्प इत्युक्तं तदसत्। ᳵकᳶपाभ्यां मुक्ते विसर्जनीयस्य सत्वप्र

सु॰
सि॰ कौ॰
टी॰ त॰
२७

कान आम्रेडिते। कान्कानीति वाच्ये आम्रेडितग्रहणं यत्र द्विरुक्तिस्तत्रैव यथा स्यात्। इह मा भूत्। कान् कान् पश्यसीति। अत्र एकः किम्शब्दः प्रश्ने। द्वितीयः क्षेपे। कान् कुत्सितान् पश्यसीत्यर्थः। वार्त्तिके कान्ग्रहणाभावेऽपि सत्वं सिध्यतीत्याशयेनाह। पदैरिति। संपुमोस्तु वार्त्तिकेनैव सत्वं। कस्कादिषु संस्कर्त्ता। संस्करिष्यति। पुंस्कोकिलः। पुंस्काम इत्यादिवहूनां पाठे गौरवात्। कस्कादिषु संपुम्कानिति पठित्वा सर्वमपि वार्त्तिकं त्यक्तुं शक्यं। पुंस्कोकिल इत्यादाविणः परत्वेन विसर्गस्य षत्वप्रसंगात्। किंतु कान्ग्रहणमिव संपुम्ग्रहणं वार्त्तिके त्यक्तुं शक्यमित्यन्ये। कस्कादिषु च। अत्र सोपदादाविति सः इति इणः ष इति सूत्रं चानुवर्त्तते तदाह। इणु इण उत्तरस्येत्यादि। कौतस्कुत इति। कुतः कुत आगत इत्यर्थे अव्ययात्त्यपि प्राप्ते गणपाठसामर्थ्यात् अणित्याहुः। अव्ययानां भमात्रे टिलोप इति वक्ष्यमाणेना

कानाम्रेडिते ८।३।१२। कान्नकारस्य सत्स्यादाम्रेडिते परे। संपुंकानामिति सः। पक्षे। कस्कादिषु च ८।३।४८। एष्विण उत्तरस्य विसर्गस्य षः स्यात् अन्यत्र तु सः। ×कः×पयोरपवाद इति सः। कांस्कान्। कांस्कान्। कस्कः। कौतस्कुतः। सर्पिष्कुण्डिका। धनुष्कपालं। आकृतिगणोयं॥ संहितायां ६।१।७२। इत्यधिकृत्य। छे च ६।१।७३। ह्रस्वस्य छे परे तुगागमः स्यात् संहितायाम्। चुत्वस्यासिद्धत्वाज्झश्त्वेन दः। ततः श्चुत्वस्यासिद्धत्वात्पूर्वं श्चुत्वेन जः। तस्य चर्त्वेन चः। चुत्वस्यासिद्धत्वाच्चोः कुरिति कुत्वं न। शिवच्छाया। स्वच्छाया। आङ्माङोश्च ६।१।७४। एतयोश्छे परे तुक्स्यात्। पदान्ताद्वेति विकल्पापवादः। आच्छादयति। माच्छिदत्। दीर्घात् ६।१।७५। दीर्घाच्छे परे तुक्स्यात्। दीर्घस्यायं तुक् न तु छस्य। सेनासुराच्छायेति ज्ञापकात्। चेच्छिद्यते। पदान्ताद्वा ६।१।७६। दीर्घात्पदान्ताच्छे परे तुग्वा स्यात्। लक्ष्मीछाया। लक्ष्मीच्छाया।

त्र टिलोपः। सर्पिष्कुण्डिकेति। नित्यं समासे इत्येव सिद्धे इह पाठस्य प्रयोजनमसमासेऽपि व्यपेक्षाविरहेऽपि षत्वार्थमित्यादि वक्ष्यति। संहितायामित्यधिकृत्येति। एतच्च इको यणचीत्यत्रैव वक्तव्यमपि सूत्रक्रमानुरोधेनात्रोक्तं। छे च। छकारोपरि अकार उच्चारणार्थः। विदभिदच्छिदेरिति निर्देशान्नेन विच्छिन्नमित्यादि सिद्धं। ह्रस्वस्येति। एतच्च ह्रस्वस्य पिति कृति तुगित्यतोनुवर्त्तते तुक्च। सेनासुरेति। यदि हि छस्य तुक् स्यात्तर्हि छस्य चर्त्वे सति च द्वयं स्यात्॥ सन्निपातपरिभाषया चर्त्वं प्रवृत्तौ तु छकारोपरि चकारः श्रूयेतेति भावः॥ पदान्ताद्वा। प्रकृतेन दीर्घेण पदं विशेष्यते न तदन्तविधिस्तेनाभेने प्रसिद्धावप्यन्तग्रह

लंपदांतस्यैव तु यथा स्यात्। नदस्समाभूदित्येतदर्थं। अन्यथा पदविधित्वात्समर्थपरिभाषोपस्थितौ समर्थ एव तुल स्मी च्छायादिष्वेव स्यान्नि तु कुमारी छ
त्रेह रदेवदत्तेत्यत्र न स्यादसामर्थ्यादेवं न पदांताट्टोरिति सूत्रे पदांताट्टोरिति वक्तव्ये तत्प्रहणं टुष्टाः षट् संतत्र यदुत्पत्त्यापि पुत्वनिषेधार्थमित्याहुः ॥
इति हलसंधिः ॥ ॐ ॥ विष्णुस्त्रातेति। प्रातिपदिकात्स्वौजसमौडिति सुप्रत्यये तस्य रुत्वे खरवसानयोरिति विसर्गे च कृते विसर्जनीयस्येति सः
अस्य च रुत्वं नाशंक्यम्। रुत्वं प्रति विसर्जनीयसत्वस्यासिद्धत्वात्। शर्परे विसर्जनीयः। शर्परे इति बहुव्रीहिरनुवर्तमानश्च खर् अ न्यपदार्थः। सत्वादेरयम
पवादः। यदि तु शर्परे नेत्येवोच्येत। तर्हि प्रकृते सत्वे निषिद्धे पि कुप्वोः ≍क≍पौ स्याताम्॥ वासः क्षौमम् अद्भिः प्सातमित्यादौ विसर्जनीयवचनात्तु विकारमात्रं बाध्यते रुत्वाश

विसर्जनीयस्य सः। विष्णुस्त्राता। शर्परे विसर्जनीयः। ८।३।३५। शर्परे खरि विसर्जनीयस्य विसर्जनीयो न त्वन्यत्। कः त्सरुः। घनाघनः क्षो
भणः। इह यथायथं सत्वजिह्वामूलीयश्च न। वा शरि। ८।३।३६। शरि परे विसर्जनीयस्य विसर्जनीय एव वा स्यात्। हरिः शेते। हरिश्शेते। ख
परे शरि वा विसर्गलोपो वक्तव्यः॥ राम स्थाता। रामः स्थाता। हरि स्फुरति। हरिः स्फुरति। पक्षे विसर्गसत्वे च त्रैरूप्यम्। कुप्वोः ≍क≍पौ च। ≍कः
करोति। कः करोति। क≍खनति। कः खनति। कः पचति। कः पचति। सोऽपदादौ। ८।३।३८। विसर्जनीयस्य सः स्यादपदाद्योः कुप्वोः परयोः। पाश
कल्पककाम्येष्विति वाच्यम्॥ पयस्पाशम्। यशस्कल्पम्। यशस्कम्। यशस्काम्यति। अनव्ययस्येति वाच्यम्॥ प्रातः कल्पम्। काम्ये रोरेवेति वाच्य
म्॥ नेह। गीः काम्यति॥ ११ येनाह। न त्वन्यदिति। नरेव स्फुटयति। इहेति। सोऽपदादौ। अपदाद्योरिति। सूत्रे व्यत्ययेनैकवचनम्। यदि तु विसर्जनीयस्य सः शर्प

रे विसर्जनीय इत्यत्र मंडूकप्लुत्यानुवर्तितो यः खर् स इहाप्यनुवर्त्य विशेष्यते अपदादौ खरीति यथाश्रुतं साधु। परं तु पुनर्मंडूकप्लुत्यानुवर्तने क्लेश इति भावः। अन्ये
त्वाहुः। पुनर्मंडूकप्लुतिं विनाप्यनुवर्तितुं शक्यः। वा शरीत्यत्र शरा खरं विशेष्य शरः परे खरीति व्याख्याने कुप्वोरिति सूत्रे कुप्वोः खरीति व्याख्याने च सत्यभावादिति। पय
स्पाशमिति। याप्ये पाशप्। ईषदसमाप्तौ कल्पप्। अज्ञाते कुत्सिते इति कः। काम्यच्चेति काम्यच्। पाशकल्पककाम्येष्विति चैतैः संभवप्रदर्शनमेतत्। नतु परिगणनमन्य
स्यासंभवात्। प्रातःकल्पमिति। अधिकरणशक्तिप्रधानस्यापि प्रातः शब्दस्येह वृत्तिविषये शक्तिमत्परत्वात् दोषाभूतमहः दिवाभूता रात्रिरितिवत्॥ गीः काम्यतीति

CC-0. In Public Domain. Digitization by eGangotri



नचसत्वनिषेधेपीहइणः षइतिषत्वंस्या दितिवाच्यं। तत्रापिकाम्येरोरेवेत्यस्यानुक्तेः। यदितु इणःषइत्यत्रैवेदंपठ्येत तर्हिषत्वमात्रप्रतिषेधेपिपूर्वेणसत्वंस्यात॥
॥ ॥ इणःषः। सोपदादावित्यस्यापवादः। पुरःप्रष्टव्याइति। पूःपालनपूरणयोः॥ ॥भ्राजभासेत्यादिनाक्विपानरुंतान्जस्। जसंनतांस्फुटीकर्तुं पूःपुरावित्युपन्यस्तं
इदुदुपधस्य। इदुदितिकिं। गीःकरोति। पूःकरोति। इहइदुतोरुपधेयस्यसमुदायस्यतस्यावयवोयोविसर्ग इतिवैयधिकरण्येनसंबंधः। अप्रत्ययस्येतितु अप्रत्य
योयोविसर्गइतिसंबध्यते। संभवतिसामानाधिकरण्येवैयधिकरण्यस्यान्याय्यत्वात्। नचविसर्गस्यप्रत्ययत्वमप्रसिद्धमितिवाच्यं। अग्निःकरोतीत्यादौस्थानिव
द्भावेनतत्प्रसिद्धेः। नचातिदेशंप्रतित्रिपाद्याअसिद्धत्वंशंक्यं। अप्रत्ययस्येतिनिषेधेनैवसिद्धत्वज्ञापनात्। अतएवअग्निरित्यादौरोर्विसर्गःसिध्यति। अन्यथा

इणःषः ८।३।३९। इणः परस्यविसर्गस्यषकारस्स्यात्पूर्वविषये। सर्पिष्पाशं। सर्पिष्कल्पम्। सर्पिष्कं। सर्पिष्काम्यति। नमस्पुरसोर्गत्योः।
८।३।४०। गतिसंज्ञयोरनयोर्विसर्गस्यसःस्यात्कुप्वोःपरयोः। नमस्करोति साक्षात्प्रभृतित्वात्कृञोयोगेविभाषागतिसंज्ञा। तदभावेनमःकरोति
पुरोऽव्ययमितिनित्यङ्गतिसंज्ञा। पुरस्करोति। अगतित्वान्नेह। पूः। पुरौ। पुरःप्रष्टव्याः। इदुदुपधस्यचाऽप्रत्ययस्य ८।३।४१। इकारोका
रोपधस्याऽप्रत्ययस्यविसर्गस्यषःस्यात्कुप्वोः। निष्प्रत्यूहं। आविष्कृतम्। दुष्कृतम्। अप्रत्ययस्यकिं। अग्निःकरोति। वायुःकरोति। एकादे
शशास्त्रनिमित्तकस्यनषत्वम्। कस्कादिषुभ्रातुष्पुत्रशब्दस्यपाठात्। तेनेहन। मातुःकृपा। मुहुसःप्रतिषेधः। मुहुःकामा। तिरसोऽन्यतर
स्यां। ८।३।४२। तिरसःसोवास्यात्कुप्वोः। तिरस्कर्ता। तिरःकर्ता॥ ९ ९ अपदान्तत्वान्नस्यात्। विसर्गविधिस्तुपुनरित्यादौचरितार्थः। ज्ञापकंचवि

षयापेक्षं। तेनाचःपरस्मिन्नितित्रिपाद्यांनप्रवर्त्तते। एवंचपूर्वत्रासिद्धेनस्थानिवदितिसिद्धान्तःउक्तयुक्तिमूलकोनतुवा चनिकइतिमनोरमायांस्थितं। अत्र
वदन्ति अप्रत्ययस्येत्यत्रप्रत्ययस्ययोविसर्जनीयोनभवतीत्याद्यर्थएवआकरेस्थितइति। अप्रत्ययोयोविसर्गइतिसामानाधिकरण्येनान्वयोनयुक्तः। सर्पिष्क
रोतीत्यत्रइसुसोस्सामर्थ्येइतिवैकल्पिकषत्वप्रवृत्तावपितिष्ठतुसर्पिःपिबत्वमुदकमित्यत्रइदुदुपधस्येत्यनेननित्यंषत्वप्रसंगात्। नचाकरमतेप्युणादीनाम २८
व्युत्पत्त्याश्रयणेतथास्वीकारादिष्टापत्तिरितिवाच्यं। व्युत्पत्त्याश्रयणेदोषतादवस्थ्यात्। इसुसोरित्यत्रसर्पिष्करोतीत्युदाहरणेनव्युत्पत्तिपक्षस्येववार्त्तिक

28

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारणस्वीकृतत्वानुमानात्। अन्यथा इदुदुपधस्येत्यनेनैव व्युत्पत्त्यव्युत्पत्तिपक्षभेदेन षत्वविकल्पसिद्धेरुदाहरणस्यासंगतिप्रसंगात्। किंचातिष्ठिपत्सर्पिरित्या
दाविदुदुपधस्येति षत्वस्येष्टत्वे कस्कादिषु सर्पिष्कुण्डिकाशब्दो असमासेऽप्यपेक्षाविरहेऽपि षत्वार्थं इति स्वमूलग्रन्थविरोधश्चेति। अत्र केचित्। इदुद्भ्यामप्रत्ययस्ये
ति वक्तव्ये इदुदुपधस्येति ग्रहणं नित्यार्थं। इदुदुपधस्यैव विसर्गस्य षत्वं यथा स्यात्। कविभिः कृतमित्यादौ मा भूदित्येवमर्थं भिसो विसर्गस्य हि नित्यमिदुदुपध
त्वं नास्ति रामैरित्यादौ तदभावात्। इति तन्न। अग्निः करोतीति निषेधोदाहरणस्यासंगत्यापत्तेः। देव इत्यादौ अकारोपधत्वात् प्रियचत्वा इत्यादौ वकारोपधत्वेन।
चतुष्कपाल इत्यादौ षत्वानापत्तेश्चेति यत्किंचिदेतत्। अन्ये तु प्रत्ययस्य यो विसर्जनीयो न भवति इत्यादिव्याख्याने नृकृतोदाहरणे षत्वस्याप्रवृत्तेः प्रत्ययस्येत्यनन्
त्यजमित्याहुः। स्यादेतत्। अप्रत्ययग्रहणमेव स्थानिवत्सूत्रं प्रति त्रिपादी सिद्धेत्यत्र ज्ञापकमित्युक्तं। तदिदं वैयधिकरण्येनान्वयमभ्युपगच्छतां न सिद्ध्य द
त्राहुः। न मुने नत्यत्र नेति योगं विभज्य स्थानिवत्सूत्रं प्रति त्रिपादीनासिद्धेति व्याख्यायते प्रत्ययः परश्चेत्यादिनिर्देशाश्चेहानुकूलाः। योगविभागस्येष्टसिद्ध्यर्थ
त्वादचः परस्मिन्निति सूत्रं प्रति त्वसिद्धैव। ननु नत्वपूर्वत्रासिद्धेन स्थानिवदिति सिद्धान्तो युक्तिमूलक इत्यादि सर्वं संगच्छत इति। अप्रत्यययोर्विसर्ग इति सामाना
धिकरण्यपक्षे मातुः कृपेत्यादाविदुदुपधस्येति षत्वमाशंक्याह। एकादेशशास्त्रनिमित्तकस्येति। मातुरित्यत्र हि ऋत उदिति एकादेशशास्त्रं विसर्गं प्रति परंपरया प्रयो
जकं। आकरे तु एकादेशनिमित्तादिति प्रचुरः पाठः। तत्र एकादेशशास्त्रं तन्निमित्तं यस्य उकारस्य तस्मादित्यर्थः। नन्वेवमप्रत्ययस्येत्यत्र सामानाधिकरण्यपक्षोप्याक
रसंमत इति चेदत्राहुः। प्रत्येकं संयोगसंज्ञेति पक्ष आकरसंमतोऽपि यथा निष्प्रयोजनत्वात्तथायमपि। वैयधिकरण्यपक्षस्यावश्यकत्वादन्यथा निष्ठुतसर्पिः पिबत्वमु
दकमित्याद्यसिद्ध्यापत्तेरिति। भ्रातुष्पुत्रपाठादिति। ननु षत्वं तु कोः असिद्धत्वेकादेशशास्त्रस्यासिद्धत्वात् षत्वाप्राप्तौ विध्यर्थ एव तत्र पाठेन ज्ञापनार्थ इति वाच्यं षत्वे
तु किं च कर्तव्ये पदान्तपदाद्योः सत्तोरेवैकादेशोऽसिद्धः इति सिद्धान्तात्। अन्यथा शकहूषिन्त्यत्रापि षत्वं न स्यात्। शकान्हूयंतीत्यत्रादेच उपदेश इत्यात्वे कृतेपि सं
प्रसारणे कृते संप्रसारणाच्चेति पूर्वैकादेशे च हल इति दीर्घः। भवति हि कोसिचत् सोसिचत् इत्यादौ पदान्तपदाद्योरादेशस्तेन तत्र षत्वनिषेधः सिद्ध्यति। ननु शक
हूषिन्त्यत्र। एवं च भ्रातुष्पुत्र इत्यत्रापि षत्वं तु कोरित्येकादेशशास्त्रमसिद्धं न भवतीत्युक्तज्ञापकं सुस्थमेव। ननूक्तज्ञापकात् शकहूषिन्त्यत्रापि मातुः कृपेत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रेवषत्वं न स्यात्। मैवं। तुल्यजातीयस्य ज्ञापकत्वात्। कश्च तुल्यजातीयः। कुप्वोरिति ङित्॥ ❀॥ द्विस्त्रिश्चतुरिति। इह द्वित्रिभ्यां सुजन्ताभ्यां साहचर्याच्चतुःशब्दो
पि सुजन्त एव गृह्यते। कृत्वोर्थग्रहणं तु साहचर्येण सर्वत्र व्यवस्थापकमित्यत्र ज्ञापकं। तेन दीधीवेवीटामित्यत्र धातुसाहचर्येप्यागमस्यैदोग्रहणं। चतुष्क
पाल इति। चतुर्षु कपालेषु संस्कृत इत्यर्थे संस्कृतं भक्षा इत्यणः द्विगोर्लुगनपत्ये इति लुक्। अत्र मनोरमायामिदुदुपधस्येति नित्यं षत्वमुक्तं। एवं च द्वित्रिता
मिति चतुःपंचाशदिति स्वमूलग्रंथप्रयोगश्चिंत्यः। चतुष्कपालवत्तत्रापि नित्यतया षत्वप्रवृत्तेरतः षत्वनिवारणाय प्रत्ययस्येत्यत्र प्रत्ययस्य यो विस

द्विस्त्रिश्चतुरिति कृत्वोर्थे। ८।३।४३। कृत्वोर्थे वर्त्तमानानामेषां विसर्गस्य षकारो वा स्यात् कुप्वोः। द्विष्करोति। द्विः करोति इत्यादि। कृत्वोर्थे
किम्। चतुष्कपालः॥ इसुसोः सामर्थ्ये। ८।३।४४। एतयोर्विसर्गस्य षः स्याद्वा कुप्वोः। सर्पिष्करोति। सर्पिः करोति। धनुष्करोति। धनुः करोति।
सामर्थ्यमिह व्यपेक्षा। सामर्थ्ये किं। तिष्ठतु सर्पिः पिब त्वमुदकम्। नित्यं समासेऽनुत्तरपदस्थस्य। ८।३।४५। इसुसोर्विसर्गस्यानुत्तरपदस्थस्य स
मासे नित्यं षः स्यात् कुप्वोः परयोः। सर्पिष्कुण्डिका। अनुत्तरपदस्थस्य किं। परमसर्पिःकुण्डिका। कस्कादिषु सर्पिष्कुण्डिकाशब्दोऽसमासे व्य
पेक्षाविरहेपि षत्वार्थः। व्यपेक्षायां नित्यार्थश्च। अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य। ८।३।४६। अकारादुत्तरस्यानव्यय
स्य विसर्गस्य समासे नित्यं सकारादेशः स्यात् करोत्यादिषु परेषु न तूत्तरपदस्थस्य। अयस्कारः। अयस्कामः। अयस्कंसः। अयस्कुम्भः। अयस्पात्रं। अ
यस्सहिता कुशा अयस्कुशा। अयस्कर्णी। अतः किं। गीःकारः। अनव्ययस्य किं। स्वःकामः। समासे किं। यशः करोति। अनुत्तरपदस्थस्य किं। परमयशः
कारः। अधःशिरसी पदे। ८।३।४७। एतयोर्विसर्गस्य सादेशः स्यात् पदशब्दे परे। अधस्पदं। शिरस्पदं। समास इत्येव। अधः पदं। शिरः पदं। अनुत्तरपदस्थस्ये
त्येव। परमशिरःपदं। कस्कादिषु च। भास्करः॥ इति विसर्गसंधिः॥ ❀॥ र्जनीयो न भवतीत्यर्थ एव स्वीकर्तव्यः। चतुष्कपाल इत्यत्रापि तु कस्कादेराकृतिगणत्वात् षत्वप्रवृ
त्तिरित्याहुः। व्यपेक्षाविरहेपीति। तिष्ठतु सर्पिष्कुण्डिकामानयेत्यादावित्यर्थः। व्यपेक्षायामिति। इदं सर्पिष्कुण्डिकाया इत्यत्रेत्यर्थः। अत्र सर्पिरित्यसमस्तं पदमिति बो
ध्यं। समासे तु नित्यं समास इत्यनेन न सिद्धेः समासाभावमेव ज्ञापयितुमिदमिति सर्पिर्विशेषणमुक्तं। नित्यार्थश्चेति। अयं भावः। असमासे व्यपेक्षाविरहे अत्यंता

CC-0. In Public Domain. Digitization by eGangotri

प्राप्तो नित्यतया षत्वार्थः पाठः। व्यपेक्षायां त्वसमासे इसुसोरिति विकल्पेन प्राप्तो नित्यार्थ इति। अयः सहितेति। न त्वयसो विकारः जानपदेति ङीष्प्रसंगात्। अयस्क
र्णीति। अयइव कर्णौ यस्याः नासिकोदरेति ङीष्। अधः शिरसी। एतयोरिति। सूत्रे तु षष्ठ्याः स्थाने प्रथमा बोध्या। अधस्पदमिति। पदस्याध इति विग्रहः। म
यूरव्यंसकादित्वात्समासः। शिरस्पदमिति। षष्ठीसमासः॥ इति विसर्गसंधिः ॥ ॐ ॥ शिव इत्यस्यावसाने विसर्गस्तस्याऽर्च्य इत्यनेन समभिव्याहारे सत्या
भावाद्रुत्वं कथं स्यादित्याशंकायामाह। स्वौजसमौडित्यादिनेति। एवं चात्र मूलभूत एव सुरक्षोनिरुत्वादिकं स्यादेव। विसर्गस्त्विह न भवति खरवसानाभावात्॥
भाविन्यवसानभंगे अकृतव्यूहपरिभाषया अर्च्यपरसमभिव्याहारात्पूर्वमपि न भवतीति बोध्यं॥ ससजुषो रुः। पदस्येत्यनुवृत्तं ससजूभ्यां विशेष्यते विशेषणे
न तदंतविधिः। न च सजूःशब्दो शेग्रहणवत्प्रातिपदिके न तदंतविधिर्नेति निषेधः शंक्यः। तस्य प्रत्ययविधिविषयकत्वात्। सांतं सजुषशब्दांतं च यत्पदं
तस्य रुः स्यात् स चालोंत्यस्य। एवं स्थिते फलितमाह। पदांतस्य सस्येति। सजुषशब्दस्येति। तदंतस्य पदस्येत्यर्थः। तेन सजुषौ सजुष इत्यत्रापि नातिव्याप्तिः। न च

स्वौजसमौडिति सुप्रत्यये शिव स् अर्च्य इति स्थिते। ससजुषो रुः। ८।२।६६। पदांतस्य सस्य सजुषशब्दस्य च रुः स्यात्। जश्त्वापवादः। अतो रोरप्लु
तादप्लुते। ६।१।११३। अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति। भोभगोअघो इति प्राप्तस्य यत्वस्याऽपवादः। उत्वम्प्राति रुत्वस्याऽसिद्धत्वात्तु न भव
ति। रुत्वमनूद्य उत्वविधेः सामर्थ्यात्॥ ९ सजूरित्यत्राव्याप्तिः व्यपदेशिवद्भावोऽप्रातिपदिकेनेति निषेधादिति वाच्यं। तस्यापि प्रत्ययविधिविष
यकत्वात्। अत एव व्यपदेशिवद्भावोऽप्रातिपदिकेनेति ग्रहणवतेति च परिभाषाद्वयमपि प्रत्ययविधिविषयकमिति दिव उत्सूत्रे हरदत्तेनोक्तं। कैयटहर
दत्ताभ्यामिति तु मनोरमायां स्थितं। तत्र कैयटेनानुक्तत्वात्कैयटग्रहणं प्रमादपतितमिति नव्याः। केचित्तु दिव उत्सूत्रं यस्मिन्निति बहुव्रीहिरयं सूत्रसमुदा
यश्चान्यपदार्थः। तथा च दिव उत्सूत्रशब्देन इदुद्धे चेति सूत्रस्यापि क्रोडीकरणात्तत्र कैयटेनोक्तत्वान्नोक्तदोष इति कुकविकृतिवत् क्लेशेन मनोरमां योजयंति। य
त्वस्यासिद्धत्वादुत्वे कृतेऽपि तस्य स्थानिवत्त्वेन रुत्वाद्यत्वं स्यादित्याशंकायामाह। यत्वस्यापवाद इति। उत्वविधेः सामर्थ्यादिति। न चातोरोरप्लुतादिति सूत्रं परि
त्यज्य रोः सुपीति सूत्रानंतरं अत उरतीत्येव लाघवादुच्यतां। किमनेन सामर्थ्याश्रयणप्रयासेनेति वाच्यं। तथा हि सति उत्वस्यासिद्धतया शिवोऽर्च्य इत्यादावाद्गु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रथमयोः। अत्र प्रथमाशब्दः प्रथमाद्वितीययोः समुदाये गौणः। द्विवचनं तु समुदाय्यपेक्षया। इकोयणचीत्यतो अचीत्यकः सवर्णे दीर्घ इत्यतोऽको दीर्घ इत्यकः
पूर्वपरयोरिति सूत्रं चानुवर्तत इत्याशयेन व्याचष्टे। अकः प्रथमाद्वितीययोरचीत्यादिना। अचि किं। रामः। अकः किं। गावौ। नावौ। प्रथमयोः किं। वृक्षाः। प्लक्षाः।
यद्यपीदं नादिचीत्यनेनैव सिध्यति तथापि हरी इत्यत्रेव हर्योरित्यत्रापि पूर्वसवर्णदीर्घः स्यात् तद्वारणाय प्रथमयोरित्युक्तमिति दिक्। पूर्वग्रहणं किं।
अग्नी इत्यत्र परसवर्णो माभूत्। दीर्घग्रहणं किं। त्रिमात्रे स्थानिनि त्रिमात्रो माभूत्। आद्गुण इति। अपवादे निषिद्धे पुनरुत्सर्गस्य स्थितिरिति न्यायादिति भावः।

प्रथमयोः पूर्वसवर्णः। ६।१।१०२। अकः प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घ एकादेशः स्यात् इति प्राप्ते। नादिचि। ६।१।१०४। अवर्णादिचि
परे न पूर्वसवर्णदीर्घः। आद्गुणः। एङः पदान्तादति। शिवोऽर्च्यः। अत इति तपरः किम्। देवा अत्र। अतीति तपरः किं। श्व आगन्ता। अप्लुतात्किम्
एहि सुश्रोत अत्र स्नाहि। प्लुतस्यासिद्धत्वादतः परोयम्। अप्लुतादिति विशेषणं तु तत्सामर्थ्यान्नासिद्धत्वम्। तपरकरणस्य तु न सामर्थ्यं न्दी
र्घनिवृत्त्या चरितार्थत्वात्। अप्लुत इति किम्। तिष्ठतु पय आग्निदत्त। गुरोरनृत इति प्लुतः। हशि च। ६।१।११४। अप्लुतादतः परस्य रोरुः स्याद्धशि।
शिवो वन्द्यः। रोरित्युकारानुबन्धग्रहणान्नेह। प्रातरत्र। ध्रातर्गच्छ। देवास इह इति स्थिते। रुत्वम्। भोभगोअघोअ पूर्वस्य योऽशि। ८।
३।१७। एतत्पूर्वस्य रोर्यादेशः स्यादशि परे। असन्धिः सौत्रः। लोपः शाकल्यस्य। देवा इह। देवायिह। अशि किम्। देवास्सन्ति। यद्यपीह यत्व
स्यासिद्धत्वाद्विसर्गो लभ्यते। तथापि विसर्गस्य स्थानिवद्भावेन रुत्वाद्यत्वं स्यात्। नह्ययमल्विधिः। रोरिति समुदायरूपाश्रयणात्। भोस् भ
गोस्। अघोस्। इति सकारान्ता निपाताः। तेषां रोर्यत्वे कृते॥ ११ ११ अत्र भिद्यादिष्वोनेदनोसरिन्यादि लिंगा। नद्यादिचा निपूर्वसवर्णदीर्घे निषिद्धे पुनरु
त्सर्गस्य वृद्धेः प्रवृत्त्यैव सिध्यति नान्यथेति। नन्वेवं नातः पादमव्यपर इति पाठे सुजाते अश्वसूनृते। उपप्रयन्तो अध्वरमित्यादावेङः पदान्तादतीति पूर्वरूपमेव हि तेन नि
षिध्यते। तस्मिंश्च निषिद्धे एचोयवायाव इत्युत्सर्गोपि प्रवर्तेत। मैवं। बाधकेन निषिद्धे बाध्यमपि क्वचिन्न तिष्ठतीत्याकारान्तत्सिद्धेः। भोभगो। असंधिः सौत्र इति। सूत्रकृतः सौ
त्रः कृतः लब्धेत्यर्थः। भगो अघो वयोरोकारस्याकारस्य च पूर्वरूपं सौत्रत्वान्नेत्यर्थः। यद्वा भोस भगोस अघोस इति सान्तरा। नेवानुकृत्य भो इत्यादीनां त्रयाणां अलोन्त्यस्य ३०

यः स्यात् अपूर्वस्वरो श्चेति व्याख्यायते तर्हि अंसंधिर्न्याय्य एवेति बोध्यं। ननु रो रुकारस्यानुबंधत्वाद्रेफमात्रं विसर्गस्थानि। तथा च अनल्विधाविति स्थानिवद्भावो न।
स्यादिस्याशंक्याह। नस्त्वयमिति। यथा अग्रहीदित्यत्र ग्रहोलिटि दीर्घस्य स्थानिवद्भावेनइट्त्वात् इट ईटीति प्रवर्तते एवमिहापि विसर्गस्य रुत्वाद्यत्वं प्रवर्तेतेति
भावः। यद्यपि रोरीत्यतो र इत्यनुवर्त्य रोर्यो रेफः तस्य यादेशः इति व्याख्याने अयमल्विधिरेव तथापि उत्तरार्थं कर्तव्यमप्लुग्रहणं र इत्यस्यानुवृत्तिक्लेशवारणा।
र्थमिहैव कर्तुं। निपाता इति। भोभगो इति सूत्रे निर्दिष्टाश्चादेराकृतिगणत्वात्तत्र बोध्याः। यदि तु विभाषा भवद्भगवदघवतामोच्चावस्येति वार्तिकेनएवं रूः
स्यात्। अवस्यौकारो वा संबुद्धावित्यर्थकेन निष्पन्नाः एवं भोः शब्दादयो गृह्येरन् तदा पुल्लिंगैकवचनमात्रे भो हरे इत्यादिसिद्धावपि भो हरिहरौ भो गंगे इत्या
दि न सिद्ध्येत् तस्माद्विभाषा भवदिति वार्तिकं नावश्यमाश्रयणीयमिति भावः॥ मनोरमायां तु भाष्यस्वरसरीत्या तु विभाषेति वार्तिकमारब्धव्यमेवेत्युक्तं। तथाहि
हे भगवन् इतिवत् हे भो इति प्रयोगस्यापीष्टत्वात्तस्य च वार्तिकारंभ एव सिद्धेः। सुः पाद्व्याङ्गहे हे भोरित्यमरोक्तानां तु संबोधनार्थानां निपातानां सह प्रयो
गायोगात्॥ किंच॥ अत्रभवान् हरिः तत्रभवान्। ततो भवानितिवत् तत्रभो इत्याद्यपि वार्तिके सत्येव सिध्यति इतराभ्योपि दृश्यंत इति सर्वविभक्त्यंतात्तस
र्भवदादियोग एवेष्टत्वात्। किंच। आमंत्रितत्वे पदात्परस्याष्टमिकनिघातः। आमंत्रितं पूर्वमविद्यमानवदिति भावश्चेत्यादि सिध्यति नान्यथा। भो हरिहराविदित्यादि
सिद्धये भो इति निपातोप्यवश्याभ्युपगंतव्यः। यदि तु भगो अघो इति प्रामाणिकौ तर्हि सत्यां नाम वार्तिकं तूक्तप्रयोजनाय स्वीकर्तव्यमेवेति दिक्। स्यादेतत्। निपाता
नामभ्युपगमे यत्वविधौ तत एव गृह्येरन् प्रतिपदोक्तत्वान्न तु संबुद्ध्यंताः लाक्षणिकत्वादिति चेन्मैवं। स्वरितेनाधिकार इत्यत्राधिकः कारोधिकार इति व्याख्यानमा
श्रित्य पलक्ष्यानुरोधेन स्वरितत्वमाश्रित्योभयग्रहणात्। लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्वाच्च अनित्यत्वे लिंगं भुवश्च महाव्याहृतेरिति सूत्रे महाव्याहृ
तिग्रहणं यावत्पुरेति सूत्रे निपातग्रहणं च। न चैवं लाक्षणिकानामपि ग्रहणे विभोरिदं सुप्रभा गौर्यस्य स सुप्रभगुः तस्य सुप्रभगोरिदं अघोरिदं इत्यत्रापि यत्वाप
त्तिरिति वाच्यं। परस्परसाहचर्येण निपातानां वार्तिकोक्तानां च ग्रहणेप्यन्येषामग्रहणात्साहचर्यं त्वेषां संबोधनार्थ इति बोध्यं। भो इत्यादीनां त्रयाणामलोन्त्यस्य यः
स्यादिति व्याख्याने तु अर्थवद्ग्रहणपरिभाषया नातिप्रसंगः। न चाजहत्स्वार्थावृत्तिरिति पक्षे विभोरिदं प्रभोरिदमित्यत्र भोः इत्येकदेशस्य अर्थोस्तीति शंक्यं अज

विद्यमानवदित्य॰

सु·
सि·कौ· योलुघ्वा वकारयकारयोरिति। भोभगोअघोअपूर्वयोरित्यर्थः। लघुप्रयत्नतरः लघूच्चारणतरः। स चान्तरतम्याद्वस्य वः यस्य यः इत्याह। वयाविति। विधानसामर्थ्यात् लघुप्रयत
टी·त· तरस्य न भवतीत्याशयेनाह। अलघुप्रयत्नस्येति। भोयच्युतेति। एवं भगोयच्युत। अघोयच्युत। वकारस्योदाहरणं तु असावादित्यः। एतच्च काशिकायां स्पष्टं। अन
३१ न्तरार्थपरग्रहणमिति। वस्तुतस्तु तत्रापि नोपयुज्यते पदस्येत्यनुवृत्त्यैव निर्वाहात्। उञि च पदे इत्यतः पदे इत्यनुवर्त्य अजादेः परस्येति व्याख्यानात् परमदंडिनावि
त्यादौ ङमुडिति प्राचो व्याख्यानस्य ङमो ह्रस्वादचीति सूत्रे मनोरमायां निरस्तत्वाच्च। ननु हलि सर्वेषामित्यत्र पदेग्रहणानुवृत्तौ हलादौ पदे इति व्याख्यान
लाभात्। वृक्षवृभ्यां वृक्षवृभिरित्यत्र वस्य नित्यलोपो न भवति। किंतु लोपः शाकल्यस्येति वैकल्पिक एव लोप इत्यस्ति पदेग्रहणस्य प्रयोजनमिति चेन्मैवं। ह

व्योर्लघुप्रयत्नतरः शाकटायनस्य। ८।३।१८। पदान्तयोर्वकारयकारयोर्लघूच्चारणौ वयौ वा स्तोऽशि परे। यस्योच्चारणे जिह्वाग्रोपाग्रमध्य
मूलानां शैथिल्यं स लघूच्चारणः। ओतो गार्ग्यस्य। ८।३।२०। ओकारात्परस्य पदान्तस्याऽलघुप्रयत्नस्य यकारस्य नित्यं लोपः स्यात्। गार्ग्यग्रहणं पूजा
र्थम्। भो अच्युत। लघुप्रयत्नपक्षे भोयच्युत। पदान्तस्य किम्। तोयम्। उञि च पदे। ८।३।२१। अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोप उञि परे।
स उ एकाग्निः। पदे किम्। तन्त्रयुतम्। वेञस्संप्रसारणे रूपं। यदि तु प्रतिपदोक्तो निपात उञिति गृह्यते तर्हि उत्तरार्थम्पदग्रहणम्। हलि सर्वेषाम्।
८।३।२२। भोभगोअघोअपूर्वस्य लघ्वलघूच्चारणस्य यकारस्य लोपः स्याद्धलि सर्वेषां मतेन। भो देवाः। भो लक्ष्मि। भो विद्वद्वृन्द। भगो नमस्ते। अ 31
घो याहि। देवा नम्याः। देवा यान्ति। हलि किम्। देवा यिह॥

लि सर्वेषामित्यत्र वस्यानुवर्तितत्वात्। किं च माभ्यां माभिरित्यत्र भ्यामादौ परतो य
स्य विकल्पेनैव प्रवर्तमाने लोपः स्यात्तत्र हलि सर्वेषामित्यस्य प्रवृत्ते नवेत्यापत्तिः भाष्यकारैर्दंडिनेत्यत्र ङमुड्वारणाय ङमो ह्रस्वादचीत्यत्रानुवृत्त्यर्थं पदग्रहणमित्यु
क्तत्वात्। न च तदेव प्रयोजनमस्त्विति वाच्यं। ह्रस्वात्परो यो ङम् तदंतं यत्पदं तस्मात्परस्याचो नित्यं ङमुडिति व्याख्यानेन दंडिनेत्यत्र ङमुटः प्रसक्त्यभावात्। ह
लि सर्वेषां। यकारस्येति। वकारस्तु नानुवर्तते। भोभगोअघोअपूर्वस्यासंभवात्। अपूर्वस्तु यद्यपि संभवति वृक्षवकरोतीति तथापि तत्र लोपाप्रसंगः। अश्नीत्य
नुवर्त्याश्रितहलो विशेषणात्। वृक्षवहसतीत्यादि त्वनभिधानादसाधुरित्याहुः। गव्यमित्यत्र तु पदांतत्वं नास्ति गव्यूतिरित्यत्र वकारप्रश्लेषान्न वलोप इत्युक्तं

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रेवानम्यारनि। अत्रलोपोव्यो र्वलीतिनप्रवर्ततेतंप्रतियत्वस्यासिद्धत्वात्॥ हलिकिं। रेवायिहेति। उत्तरार्थमावश्यकं हलीतिग्रहणमिहैवकृतं। तेनलोपःशाक
ल्यस्येत्यस्यास्य चविषयविभागोत्रसिद्ध्यतीतिभावः॥ ॐ॥ रोसुपि। असुपीतियदिपर्युदासःस्यात्ततःसुप्सदृशेप्रत्ययएवस्यादहर्पतीत्यादौनलहर्भ्यामित्या
दावपि। तस्मात्प्रसज्यप्रतिषेधएवेतिव्याचष्टेनतुसुपीति। अहरहरिति। नित्यवीप्सयोरितिद्वित्वं। नचात्ररेफादेशस्यासिद्धत्वात्पूर्वेणलोपेअकारस्यैवरेफ
स्यादितिवाच्यं। अहन्नित्यावर्त्यएकेनलोपाभावनिपात्यद्वितीयेनरुर्विधेयइत्यहन्नितिसूत्रेवक्ष्यमाणत्वयारुत्वापवादस्यापिरेफादेशस्यनकारस्थानिक
त्वलाभात्। अहोरात्रइति। अहःसर्वैकदेशेत्यादिनासमासांतोवक्ष्यते। रात्राह्नाहाःपुंसीतिपुंस्त्वं। अहोरथंतरमिति। रथंतरंसाम। तेनाह्नःसमाहारहहःपृथ

रोऽसुपि। ८।२।६९॥ अह्नोरेफादेशस्यादसुपि। रोरपवादः। अहरहः। अहर्गणः। असुपिकिम्। अहोभ्याम्। अत्राहन्नितिरुत्वम्। रूपरात्रिरथन्त
रेषुरुत्वंवाच्यम्॥ अहोरूपं। गतमहोरात्रिरेषा। एकदेशविकृतस्यानन्यत्वात्। अहोरात्रः। अहोरथन्तरम्। अहरादीनाम्पत्यादिषुवारेफः
विसर्गापवादः। अहर्पतिः। गीर्पतिः। धूर्पतिः। पक्षेविसर्गोपध्मानीयौ॥ रोरि। ८।३।१४। रेफस्यरेफेपरेलोपःस्यात्। ढ्रलोपेपूर्वस्यदीर्घो
ऽणः। ६।३।१११। ढरेफौलोपयतीतितथातस्मिन्वर्णेअर्थाड्ढकाररेफात्मकेपरेपूर्वस्याणोदीर्घःस्यात्। पुनारमते। हरीरम्यः। शम्भूराजते। अणः
किम्। तृढः। वृढः। तृहूहिंसायाम्। वृहूउद्यमने। पूर्वग्रहणमनुत्तरपदेपिपूर्वमात्रस्यदीर्घार्थम्। अजर्घाः। लीढः। मनसरथइत्यत्ररुत्वेकृ
तेहशिचेत्युत्वेरोरीतिलोपेचप्राप्ते॥ १ कृपदत्वंवा। अहरादीनामिति। उभयत्राप्यादिशब्दःप्रकारे। तेनस्वर्वेशारथिनःकर्किकाव्येनास्वर्चनारा

त्यादिप्रयोगेविसर्गापवादइति। मोराजिवद्रेफस्यरेफोविधीयतेविकारनिवृत्त्यर्थमितिभावः॥ ढ्रलोपे। तित्यकारउच्चारणार्थः। ढश्चरश्चढ्रौ। तौलोपयतीतिढ्रलो
पः। णिजंताल्कर्मण्यणि। उपपदसमासः। तृढोवृढइतिउदित्वेनवेट्कत्वाद्यस्यविभाषेतिनिष्ठायांनेट्। ढत्वधत्वष्टुत्वढलोपाः। प्राचाहदढइतिप्रयुदात्ततंतदसत् द्वि
तत्रढलोपस्यैवाभावात्। दृढस्थूलबलयोरितिसूत्रेणहिंदृंहेर्नकारहकारयोर्लोपःतकारस्यढत्वंचनिपात्यतेनत्वसिद्धःकांडस्यढलस्यइहप्रवृत्तिःदारेधीतो
रितिघत्वेनवाधात्। नचेड्भावोढत्वंनलोपश्चनिपात्यतांघत्वष्टुत्वढलोपास्तुभविष्यन्त्येवेतिवाच्यं। तथासतिपरिदृढय्येत्यत्रल्यपिलघुपूर्वादितिणेरयादेशोन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु·
सि·कौ·
टी·त·
३२

पारिवृढीकन्येत्यत्र ङ्तो मनुष्यजातेरिति ङीषं बाधित्वा अणिञोरिति ष्यङ् स्यात् ढलोपस्यासिद्धत्वेन गुरूपोत्तमत्वादित्याकरे स्थितं। ननु परिवृढप्येत्यत्रत्या
वारेषाः कथं भवेत् यावता परिवृढमाचष्ट इति णिचि कृते क्त्वाप्रत्यये चन्द्रांत एव परे तन्न भोवा त्समासाभावः। इति चेन्न। अत्र कैयटः संग्रामयतेरेव सोपस
र्गात्प्रत्ययोत्पत्तिर्नान्यस्मादिति नियमात्परिशब्दं पृथक्कृत्य दृढशब्दादेव णिचि कृते णिजंतस्य धातुत्वात्क्त्वाप्रत्यये कृते परेः क्त्वा तेन कृदंतेन समासः इ
ति सिद्धो ल्यबादेशः॥ णाविष्ठवद्भावाद्भाव इति। ननु पूर्वस्येति व्यर्थं सप्तमीनिर्देशादेव तल्लाभादत आह। पूर्वग्रहणमित्यादि। ढ्रलोपे पूर्वस्येति। सूत्रस्यो
त्तरपदाधिकारस्थत्वादुत्तरपदस्थयोरेव ढरेफयोः परतो दीर्घः स्यान्न तु लीढः अजर्घा इत्यत्रेति भावः। यद्यप्यसंभवादेवानुत्तरपदस्थढकारे दीर्घो भवेत्तथा

विप्रतिषेधे परं कार्यम्। १।४।२। तुल्यबलविरोधे परं कार्यं स्यात्। इति लोपे प्राप्ते पूर्वत्रासिद्धमिति रोरीत्यस्याऽसिद्धत्वादुत्वमेव। मनोरथः। एत
त्तदोः सुलोपोऽकोरनञ्समासे हलि। ६।१।१३२। अककारयोरेतत्तदोर्यः सुस्तस्य लोपः स्याद्धलि न तु नञ्समासे। एष विष्णुः। स शम्भुः। अकोः
किम्। एषको रुद्रः। अनञ्समासे किम्। असः शिवः। हलि किम्। एषोऽत्र। सोऽचि लोपे चेत्पादपूरणम्। ६।१।१३४। स इत्येतस्य सोर्लोपः स्या
दचि पादश्चेल्लोपे सत्येव पूर्येत। सेमामविड्ढि प्रभृतिम्। इह ऋक्पाद एव गृह्यत इति वामनः। अविशेषाच्छ्लोकपादोऽपीत्यपरे। सैष दाशरथी
रामः। लोपे चेदिति किम्। स इत्क्षेति। स एवमुक्त्वा। सत्येवेत्यवधारणात्तु स्यश्छन्दसि बहुलमिति पूर्वसूत्राद्बहुलग्रहणानुवृत्त्या लभ्यते। तेनेह
न। सोऽहमाजन्मशुद्धानाम्॥ इति स्वादिसन्धिः॥ १ प्यजर्घा इत्यत्र दीर्घो न स्यादिति ज्ञेयं। वस्तुतस्तु उत्तरपदस्य समासचरमावयवे रूढत्वात्पुना

रप्रत इत्यादावपि न स्यात्। किं तु नीरक्तं दूरक्तं इत्यादावेव स्यादिति तत्त्वं। लीढ इति। लिह आस्वादने क्तः ढत्वधत्वष्टुत्वढलोपाः इह ढलोपं प्रति ष्टुत्वं नासिद्धं ढका
रे परतो लोपविधिसामर्थ्यादत एव ढो ढे लोप इत्यस्य पदाधिकारस्थत्वेप्यपदांतस्य ढलोपो भवति। अजर्घा इति। गृधु अभिकांक्षायां। यङ्लुकि द्वित्वे अभ्यासस्य रु
क्। लङः सिपि शब्लुकि सिपर्डभावपक्षे लघूपधगुणे रपरः। इतश्चेति इकारलोपे हल्ङ्यादिलोपः भष्भावः। जश्त्वं। रश्चेति रुत्वपक्षे अजर्घ इति। स्थिते रोरि
ति रेफलोपे अनेन दीर्घः। अत्रेयं सुगमव्याख्या। ढ्रलोपे पूर्वस्य दीर्घोऽणः। लीढः। नीरक्तं। दूरक्तं। अणः किं। तृढः। वृढः। पूर्वग्रहणमनुत्तरपदेपि पूर्वमात्रस्य दीर्घार्थं। अजर्घाः।

नारमते। हरीरम्यः शंभू राजन इति॥ ॥ विप्रतिषेधे। विप्रतिपूर्वात् षिधू शास्त्रे मांगल्ये च षिध गत्यामित्यस्मा

CC-0. In Public Domain. Digitization by eGangotri

हृधातोर्घञ्। उपसर्गास्तु नोक्ता इति निष्कृष्टं। उपसर्गवशाच्च विरोधार्थकत्वं कार्यमिति। अर्हे कृत्यतृचश्चेत्यर्हार्थे कृत्यप्रत्ययः तेन तुल्यबलविरोध इति पर्यवसानात् इ
तुल्यबलेषूत्सर्गापवादनित्यांतरंगबहिरंगविधिषु नेदं प्रवर्त्तते। नह्यपवादादीनां सन्निधावुत्सर्गादीनां कृत्यर्हत्वं तैर्बाधितत्वात् तत्र नित्यमावश्यकत्वाद्बाधकमंत
रंगं तु लाघवादपवादस्तु वचनप्रामाण्यात्तद्भिन्नस्तु प्रकृतसूत्रस्य विषयः। अत एव परनित्यांतरंगापवादानामुत्तरोत्तरं बलीय इत्युक्तं। यद्यत्तुल्यबलेष्वपि परमेव स्यात्त
न्नोपपद्येत। तो व्याचष्टे। तुल्यबलविरोध इति। जातौ पदार्थे विध्यर्थमिदं सूत्रं। वृक्षेषु वृक्षाभ्यामित्यत्र हि लब्धावकाशयोरेत्वदीर्घत्वशास्त्रयोर्वृक्षेभ्य इत्यत्र युगप
त्प्रसंगे विनिगमकाभावादप्रतिपत्तिरेव स्यात्। तदुक्तं अप्रतिपत्तिर्वा उभयोस्तुल्यबलत्वादिति तन्नास्माद्वचनात्परस्मिन्कृते यदि पूर्वस्यापि निमित्तमस्ति तर्हि तद
पि भवति यथाभिंधकीत्यत्र परत्वाद्द्विर्भावे कृतेप्यकच्। तदुच्यते पुनः प्रसंगविज्ञानात्सिद्धमिति। व्यक्तौ तु पदार्थे तत्तद्व्यक्तिविषयकयोर्लक्षणयोरन्यत्र चरि
तार्थत्वासंभवात्तव्यत्तव्यानीयरामिव पर्यायेण प्रवृत्तौ नियमार्थमिदं सूत्रं विप्रतिषेधे परमेव स्यान्न तु पूर्वमिति। एतल्लक्षणारंभाच्च तत्र तत्र पूर्वस्यानारंभोऽनुमी
यते। तथा च जुहुतात्त्वमित्यत्र परत्वात्तातङि कृते स्थानिवद्भावेन हुझल्भ्य इति धित्वं न भवति तदुच्यते। सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति। लक्ष्या
नुरोधाद्व्यवस्थाप्यमेतत् द्वयमपि तत्र विधिपक्षे तूलोपे फलोपे च प्राप्ते इति पाठ्यं। नियमार्थमिति पक्षे परमेव कार्यं स्यादित्येवकारोऽध्याहर्तव्यो वृत्तौ। उत्वमेवेति। सि
द्धासिद्धयोरतुल्यबलत्वेन विप्रतिषेधे परमित्यस्याप्रवृत्तौ निष्प्रतिपक्षत्वादुत्वमेव भवतीत्यर्थः। तदुक्तं। पूर्वत्रासिद्धेनास्ति विप्रतिषेधोऽभावादुत्तरस्येति। एते
न विभक्तिकार्यं प्राक्पश्चादुत्वमत्व इति वक्ष्यमाणग्रंथो व्याख्यातः। एतत्तदोः। अत्र त्यदाद्यत्वमेकशेषश्च न कृतः सौत्रत्वात्। प्रकृतिवदनुकरणमिति वैकल्पि
कातिदेशाद्वा। एवं च वृत्तावप्येतत्तदोरिति प्रयोगः साधुः। हल्ङ्याब्भ्य इत्यस्यानंतरमेवेदं लाघवाय न कृतं संहिताधिकारोपजीवनादित्याहुः। सूत्रे सु इति पृथ
क्पदं लुप्तषष्ठीकमित्याह। एतत्तदोर्यस्सुरिति। एतत्तदर्थगतसंख्याभिधायीयः सुस्तस्येत्यर्थः। एतत्तदोर्विहित इति व्याख्याने तु परमस ददाति परमेष द
दातीत्यादौ सुलोपो न स्यात्। एतत्तदोः पर इति व्याख्यानं तु न संभवति। एतत्क्रामितिवं चम्यभावात्। एतत्तदोरवयव इति तु न संभवत्येव सोः प्रत्ययत्वात्तस्माद
र्थद्वारकसंबंध एवाश्रितः तदाश्रयणेऽलिंगं तु अनञ्समास इति बोध्यं। एतत्तदोः किं। यो ददाति। अकोः किमिति। साकच्कयोः शब्दांतरत्वादप्रसंग इति प्रश्नः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु·
सि· कौ· एवकइति। अकोरितिप्रतिषेधएवतन्मध्यपतितस्तद्ग्रहणेनगृह्यत इतिपरिभाषां ज्ञापयतीतिभावः। सोचिलो। अचीतिविस्पष्टार्थमिति इचोस्थितं। ससइतितच्छ
टी· त· ब्दस्य प्रथमैकवचनांतस्यानुकरणं लुप्तषष्ठीकमित्याह सइत्यस्येति। बहुलग्रहणेति। अतएवलोपं विनापादपूरणेपि क्वचिद्भवति। सास्मा अरमिति। अत्र वदंति
३३ येतु साहमाजन्मशुद्धानामित्यादिसिध्यर्थं पादश्चेल्लोपसत्येवपूर्यतेतिसावधारणंव्याचख्युस्तेषांसास्मान् अरमित्यादौ सुलोपानापत्तिः। अत्र हि सः अस्मे इतिच्छे
दः। बहुलग्रहणानुवृत्या तदुपपादनेतु साहमाजन्मेत्यादावप्यतथोपपाद्यतां किमवधारणेनेति॥ इतिस्वादिसंधिः॥ अर्थवदधातु। अप्रत्ययः अप्रत्ययांतश्चेति
सूत्रेतंत्रादिनोभयं विवक्षितमितिभावः। अर्थवदिति नपुंसकनिर्देशस्यानुगुणं विशेष्यमध्याहरति शब्दस्वरूपमिति अधातुरप्रत्ययइतिपुल्लिंगनिर्देशस्तुपर
वल्लिंगं द्वंद्वतत्पुरुषयोरितिपुनरलिंगवत्वाद्वाध्यइत्याहुः। यदितु धातुभिन्नमित्यर्थं परित्यज्यारोपितोधातुरधातुरितिव्याख्यायते तदा नपुंसकत्वमाक्षिशंकैवना
स्तीतिज्ञेयं। अर्थवदितिकिं। धनंवनमित्यादौ प्रतिवर्णंसंज्ञामाभूत्। तस्यांचसत्यांस्वादयः स्युः। ननुसंख्याकर्मादिरभावान्नभविष्यंतीतिचेन्न। एकवचनमुत्स 33

अर्थवदधातुरप्रत्ययः प्रातिपदिकम्।१।२।४५। धातुम्प्रत्ययंप्रत्ययान्तञ्चवर्जयित्वाऽर्थवच्छब्दरूपम्प्रातिपदिकसंज्ञंस्यात्॥ ❀ ॥

र्गतः करिष्यत इतिसिद्धांतात्। हुंफडादिभ्य इवसोर्दुर्वारत्वात्। नचार्थवद्ग्रहणपरिभाषया अनर्थकेनस्यादितिवाच्यं। तस्याः विशिष्टरूपोपादानविषयत्वा
त्। प्राद्दहोढइत्यत्र तु ऊठ इतिविशिष्टरूपमुपात्तमितिक्तवतेनैकदेशस्यानर्थकस्योढशब्दस्य ग्रहणं नेत्युक्तं। नत्वत्र तथाविशेषरूपस्योपादानमस्ति। यद
प्यधातुरित्यादिपर्युदासेनार्थवत्वंलभ्यते तथाप्युत्तरार्थमर्थवद्ग्रहणं स्पष्टप्रतिपत्तये इहैवकृतं। नचैकाजुद्विर्वचनन्यायेनसमुदायस्यैवसंज्ञास्यात्। नावयवा
नामित्यर्थवद्ग्रहणंव्यर्थमितिशंक्यं। समुदायेहिरूढा अवयवा अपिहिरूढाभवंति। वृक्षः प्रचलन् सहावयवैः प्रचलतीतिन्यायात्। इहतुसमुदायेप्रवृत्तेनतथा
प्रातिपदिकसंज्ञयानावयवानां तत्कार्यसिद्धिरितिवैषम्यात्। अतएव यत्र बहवो हलः संश्लिष्टास्तत्र द्वयोर्बहूनां चाविशेषेण संयोगसंज्ञेतिसिद्धांतः संगच्छते। ३३
अन्यथात्वदुपन्यस्तन्यायेनसमुदायएवसंयोगसंज्ञाप्रवर्तेत। अत्र केचित्। धनंवनमित्यादौ प्रतिवर्णंसत्यामपिसंज्ञायांसत्वपिस्वादिषु नक्षतिः। हलङ्यादि
ना सुलोपात्। नचनलोपोधस्य जश्त्वं चस्यादितिशंक्यं। धातुपाठे धनवनेत्युच्चारणसामर्थ्यात्तदप्रवृत्तेरित्याहुस्तदसत्। अकारान्तोरुत्पन्नोरुत्वप्रसक्तः। यद

पिसमुदितप्रातिपदिकस्यावयवत्वेन सुपो लुकि रुत्वं न भवेत्तथापि चिकीर्षति विद्वन्नित्यादौ रेफषकारयोः पदांतत्वे सति खरवसानयोरिति विसर्गः स्यात् रोनुनासिके नु
नासिकस्य च प्रसंगादित्यादि दिक्॥ अधातुः किं। अहन्॥ धातोः प्रातिपदिकसंज्ञायां सत्यां निज्ञस्वादपवादत्वात् अहन्नित्यत्र हंतेर्लङि सिपि वा कृते र्त इति इकारलोपे हल्
ङ्यादिलोपे च प्राक्कृते प्रातिपदिकसंज्ञानापगमेन तिनलोपः प्रातिपदिकांतस्येति नलोपः स्यात्तन्माभूत्। अहन्निति रुत्वं रोः सुपीति रत्वं चेह न शंक्यं लाक्षणिक
त्वात्। न च कार्यकालपक्षे प्रत्ययांतत्वेन पर्युदासात्। प्रातिपदिकसंज्ञाभावेन नलोपो न भवेदिति वाच्यं। प्रत्ययलक्षणेन उक्तपर्युदासप्रवृत्तेर्न ङिसंबुद्ध्योरि
ति निषेधेन ज्ञापितत्वात्॥ कथमन्यथा राजेत्यादौ नलोपः स्यात्। यद्यपि व्युत्पत्तिपक्षे राजन्शब्दस्य कनिन्प्रत्ययांतत्वात् तद्धितेति प्रातिपदिकसंज्ञायां राजेत्या
दौ नलोपः स्यात्। तथा च न ङिसंबुद्ध्योरिति निषेधो न ज्ञापक इति कार्यकालपक्षेऽधातुग्रहणं व्यर्थं तथाप्यव्युत्पत्तिपक्षे ज्ञापक एवेति कार्यकालेपि तत्स्वी
कर्तव्यो। न च सुपो धात्विति सूत्रे प्रातिपदिकात्पृथग्धातुग्रहणाद्धातोर्न यं संज्ञेति वाच्यं। पुत्रीयतीत्यादौ प्रत्ययांते धातुग्रहणस्य चरितार्थत्वात्। अप्रत्ययः किं
हरिषु। करोषि। अत्र सुपः सिपो मा भूत्। अप्रत्ययांतः किं। तन्नैव विभक्तिविशिष्टयोर्माभूत्। न चांतवद्भावेन कांडे कुड्ये इत्यादौ प्रातिपदिकत्वं स्यादेव तथा च
ह्रस्वो नपुंसक इति ह्रस्वः सोरुत्पत्तिश्च स्यादिति वाच्यं। सप्तम्यधिकरणे चेत्यादिनिर्देशेन विभक्त्येकादेशस्यांतवद्भावानभ्युपगमादित्यादि दिक्। ननु प्रत्ययपर्युदा
सो न कर्तव्यः। प्रत्ययांतपर्युदासेनैव गतार्थत्वात्। व्यपदेशिवद्भावेन तस्यापि प्रत्ययांतत्वात्। इति चेन्मैवं। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेर्ग्रहणं न केवल
स्य चातथात्वात्॥ अन्यथा सुप्तिङोरपि तदंतत्वान्नपदत्वं स्यात्। तथा च हरिषु करोषीत्यादौ षत्वं न स्यात्। सात्पदाद्योरिति निषेधात्। न च षत्वविधेर्निरवकाशता
सर्पिष एष इत्यादौ चरितार्थत्वात्। अन्ये तु व्याचक्षते कृत्तद्धितेत्यत्र हितदंतविधिर्वक्ष्यते तान्यथा चेत्तद्धितग्रहणस्य तद्धितांतानामेव न त्वन्यप्रत्ययांतानां संज्ञेति नि
यमार्थतामाश्रित्य प्रत्ययांतपर्युदासोऽत्र न कर्तव्यः। अथवा सात्पदाद्योरिति सूत्रे सातिग्रहणात्प्रत्ययो न प्रातिपदिकमिति सिद्धे प्रत्ययग्रहणं सामर्थ्यात्तदंतपरं। उ
त्तरसूत्रे तद्धितग्रहणं विध्यर्थमेवास्तु। यद्वा सातिग्रहणात्प्रत्ययस्य प्रातिपदिकत्वाभावे तद्धितग्रहणस्योक्तरीत्या नियमार्थत्वे चार्थवदधातुः प्रातिपदिकमि
त्येव सुवचमिति तेषामिकोयणचीति सूत्रं व्यर्थं स्यात्तस्मादित्युत्तरस्य वास्तु पित्र्युषस इत्यादिनिर्देशात् ज्ञापकादिष्टसिद्धेः। नाम्नलाविति अत्राकारसहितो च

सु·
सि·कौ· आजितिमूलस्थग्रंथोयमपिविरुध्येत। कालसमयवेलास्वित्यादिज्ञापकादेवतल्लाभावसिद्धेः। यदिज्ञापकेनप्रत्याख्यानमयुक्तमितियदिवाऽऽकारप्रश्लेषएव
टी·त· नह्लिंगमित्यादिदृढत्वाभ्युपगमेसूत्रासरेरेवेष्टसिध्यतिइत्युच्येततर्हिअप्रत्ययेत्येनरभ्युपगम्यप्रत्ययपर्युदासेसातिग्रहणंलिंगं. प्रत्ययांतपर्युदासेतुतद्धितग्रहणमि
३४ त्यप्रत्ययग्रहणमेवावर्त्यव्याख्यायतां। किमनयाकुसृष्ट्येतिदिक्। अधातुप्रत्ययावितिसिद्धेनञ्द्वयोपादानमप्रत्ययइत्यस्यावृत्तिसौकर्यार्थं। महासंज्ञाकरणंप्र
त्यनुरोधात्। तथाचान्वर्थबलेपलभ्यते। कोधातुः किंप्रातिपदिकंकः प्रत्यय इतिडित्थादीन्यव्युत्पन्नानीहोदाहरणं। अव्युत्पत्तिपक्षस्यचेदमेवज्ञापकमितिप्राचः। व
युक्तंतुव्युत्पत्तिपक्षेवहुपटवइत्याद्यर्थंसूत्रमितिनव्याः। नचैवंवहुच्पूर्वः प्रातिपदिकमित्येवसूत्र्यतामितिवाच्यं। मूलकेनोपदंशमित्यादौकृदंतत्वेनातिप्रसंग
नगतिकारकपूर्वस्यापिकृदंतत्वात्। नचसमासग्रहणंनियमार्थमितिनिस्तारः। अर्थवत्सूत्रारंभंविनासमासग्रहणस्यनियमार्थत्वायोगात्॥ ॥ कृत्तद्धितस
मासाश्च। अर्थवदित्यनुवर्त्ततेतत्सामर्थ्यात्तदंतविधिः। ननुयद्यर्थवत्पारमार्थिकीविवक्ष्यतेसापदस्यवाक्यस्यवाअस्तिनतुकृत्तद्धितांतस्ययदितुप्रक्रिया 34

कृत्तद्धितसमासाश्च १।२।४६। कृत्तद्धितांतौसमासश्चप्रातिपदिकसंज्ञास्युः। पूर्वसूत्रेणसिद्धेसमासग्रहणंनियमार्थम्। यत्रसङ्घातेपूर्वोभागः
पदंतस्यचेद्भवतितर्हिसमासस्यैवेति। तेनवाक्यस्यन॥ प्रत्ययः ३।१।१। आपञ्चमपरिसमाप्तेरधिकारोयम्। परश्च। ३।१।२। अयमपितथा॥

दशायांप्रकल्पितासाविवक्ष्यते तर्हिकृत्तद्धितयोरपिसाअस्तीतिकथमर्थवद्ग्रहणानुवृत्त्यातदंतग्रहणमितिचेदत्राहुः। अतएवार्थवद्ग्रहणसामर्थ्यमुक्तं
प्रत्ययांतेनह्यो कार्यीभूतेनप्रतीयमानोर्थइहगृह्यते। तस्यलौकिकार्थंप्रतिप्रत्यासन्नतरत्वात्प्रत्ययःप्राशस्त्यपरतयातस्यैवग्रहणादतएवतदुपादाने
सार्थकंपूर्वसूत्रेअधातुरितिपर्युदासबलेनापितल्लाभसंभवादिति। तदेतत्सकलमभिप्रेत्याह। कृत्तद्धितांतावितिलिट्। धुकु इत्यादावधातुरितिकर्त्ती
औपगवइत्यादौअप्रत्ययांतमितिपर्युदासेप्राप्तेकृत्तद्धितेत्यारंभःनियमार्थमिति। नचप्रत्ययांतत्वेनपर्युदासप्राप्तेर्विध्यर्थमस्त्वितिशंक्यं। वाक्यस्याप्रत्ययां
तत्वात्। प्रत्ययग्रहणेयस्मात्सविहितस्तदादेरेवग्रहणात्। नचैवमपिअनुपसर्जनस्त्रीप्रत्ययेतदादिनियमाभावाद्राजकुमारीत्यादौङीवंतेविध्यर्थमस्त्विति २४
वाच्यं। अंतरंगानपिविधीन्वहिरंगोलुग्वाधतेइतिलुग्विषयेहलङ्यादिलोपाप्रवृत्त्याश्रूयमाणएवसुपिसमासप्रवृत्तेः। तत्रचकुमारीशब्दस्यसुवंतत्वेपि।

CC-0. In Public Domain. Digitization by eGangotri

राजकुमारीशब्दस्यानव्याप्तत्वात्प्रत्ययान्तत्वेन प्रवृत्तायाः संज्ञाया एकदेशविकृतन्यायेन विभक्तिलुक्यपि सुलभत्वात्। अत एव गोमत्प्रियइत्यादौ नुमादयो न लुकः प्रागन्तरङ्गस्य हल्ङ्यादिलोपस्य प्रवृत्तौ तु सुरेवेति दिक्। नियमशरीरमाह। यत्र संघात इति

।नियमश्चात्र सजातीयापेक्ष इत्याह। पूर्वोभागः परमिति। षड्विधेपि समासे पूर्वभागस्य परत्वाव्यभिचाराद्भवत्ययं सजातीयः पूर्वोभाग इत्युपलक्षणं उत्तरस्तु प्रत्ययो नेत्यपि बोध्यं। अन्यथा जन्मवानित्यादौ संज्ञा न स्यात् स्वादिष्विति अनेन पूर्वभागस्य पदत्वात्। न च तद्धितग्रहणसामर्थ्यात्तत्र स्यादेवेति वाच्यं। तद्धितग्रहणस्य भानव इत्यादौ कृतार्थत्वात्तत्र हि पूर्वभागस्य भत्वं न तु पदत्वं। न चैवमयमियानित्यादिसमुदायस्य प्रातिपदिकत्वं स्यादेव पूर्वभागस्य पदत्वेप्युत्तरस्य प्रत्ययत्वादनेन नियमेन वारयितुमशक्यत्वादिति वाच्यं। उत्तरस्तु प्रत्ययो नेत्यत्र तद्धितभिन्नप्रत्ययो नेति व्याख्यानात्। पूर्वोभागः पदमिति किं। बहुज्विशिष्टस्य प्रातिपदिकसंज्ञा यथा स्यात्। तेन बहुपटव इत्यत्र उपोत्तमोदात्तत्वं सिध्यति। प्रथमजसो लुकि चितः सप्रकृतेर्बहुकजर्थमिति चित्स्वरे कृते पुनर्जस उत्पत्तेः प्रातिपदिकसंज्ञायामसत्यां तु जसेवोदात्तः स्यात्। यद्वा। प्रकृतिप्रत्ययभावानापन्नसंघातस्य चेद्भवति तर्हि समासस्यैवेति नियमार्थं समासग्रहणं तेन गवित्ययमाहेत्यादौ नातिप्रसंग इति दिक्। नियमफलमाह। तेन वाक्यस्य नेति। गामभ्याजशुक्लामित्यादिवाक्यस्य न भवतीत्यर्थः। सत्यां हि संज्ञायां सुब्लुक्स्यात्। न चैवमपि मूलकेनोपदंशं भुङ्क्ते इत्यादिवाक्यस्य संज्ञा दुर्वारा कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणादिति चेन्मैवं। समासग्रहणकृतनियमेन परत्वाद्बाधात्। एवं च कृत्तद्धितेति सूत्रे कृद्ग्रहणपरिभाषा निष्फलत्वान्नोपतिष्ठते तेनास्याश्च परिभाषायाः व्यावक्रोशी व्यावहासीत्यत्रावकाशः तत्र हि कर्मव्यतिहारे णच्स्त्रियामिति धातोर्णचि कृते गतिपूर्वस्य णजन्तत्वात् णचः स्त्रियामित्यञि सत्युपसर्गाकारस्यादिवृद्धिस्वरौ भवतः। कृद्ग्रहणे कारकपूर्वस्याप्युदाहरणमवतनस्तेन कुलस्थितमित्यादि स्फुटीभविष्यति। चकारोऽनुक्तसमुच्चयार्थः। तेन निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्येति वार्तिकं गतार्थं। येषां द्योत्योप्यर्थो नास्ति न त्वयमिदं अवघजि। अनुकरणं तु अनुकार्येण सहाभेदविवक्षायामर्थवत्त्वाभावादेव न प्रातिपदिकत्वं। भूसत्तायामिति यथा। भेदविवक्षायां तु संज्ञा स्यादेव भुवो वुगिति यथा। अधिकारोयमिति। प्रत्ययशब्दः संज्ञात्वेनाधिक्रिय



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सु.

सि.कौ. ङ्याप्प्रातिपदिकात्॥ समाहारद्वन्द्वादेकवचनं। ङीतिङीप्ङीष्ङीनां सामान्यग्रहणं आबिति चटाप्डाप्चापां। आर्यं च मसमासेरिति। ननु एकालत्तनेषिति ज्ञापका-
टी.त. कात्सुवंतात्तद्धितोत्पत्तिरित्यभ्युपगते किमर्थं तद्धितेषु प्रातिपदिकाधिकार इति चेदत्राहुः। असति ह्यधिकारे अनइत्यत्रा तदन्तत्वेन तत्सुवंतस्यैव विशेषणं स्या-
३५ त्। ततश्च दक्षस्यापत्यमित्यत्रैव इञ् स्यात्। न तु दक्षयोर्दक्षाणामित्यत्र। किंच। दृषदुत्पन्न     दृषद्भिरित्यत्र तत्सुवंत विशेषणं मा भूत्। अन्यथा जानंतीति ज्ञाः इ-
गुपधेति कः। ज्ञानामयमित्यत्र सुवंतस्य द्वंद्वत्वान्न अण् स्यात्। प्रातिपदिकाधिकारे तु द्वंद्वं यत्प्रातिपदिकं तत्प्रकृतिकात्सुवंतात्तु इत्यर्थलाभादिह प्रातिपदि-
कस्य द्वंद्वत्वाच्छो न भवति। किंतु अणेव भवति। शब्दकौस्तुभे तु अस्मिन्नधिकारे वाक्यादपि कप्रत्ययादयः स्युः। ततो विशिष्टस्य प्रातिपदिकत्वया सक-
लसुब्लोपे रूपमेवानिष्टमिति स्थितं। लिंगविशिष्टस्येति। लिंगबोधकप्रत्ययविशिष्टस्यापीत्यर्थः। परिभाषायाः प्रयोजनं च शूः। प्रत्ययांतत्वेन प्रातिपदिक-

ङ्याप्प्रातिपदिकात्।४।१।१। ङ्यन्तादाबन्तात्प्रातिपदिकाच्चेत्या पञ्चमपरिसमाप्तेरधिकारः। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि
ग्रहणमित्येव सिद्धे ङ्याप्ग्रहणं ङ्याबन्तात्तद्धितोत्पत्तिर्यथा स्यात्। ङ्याब्भ्यां प्रागभूदित्येवमर्थम्॥ स्वौजसमौट्छष्टाभ्याम्भिस्-
ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसोसाम्ङ्योस्सुप्।४।१।२। ङ्यन्तादाबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः। सुङस्योरुकारेकारौ जश्च र-

लोपे इह स्वादयः। न च श्वशुरः श्वश्र्वा इति निर्देशादेव स्वादिसिद्धिरिति वाच्यं। निर्देशस्य शब्दपरत्वात्। विपराभ्यां जेः ङ्-र्यइतिवत्। किंच कुमारीमाचष्टे 35
कुमारयतीति णिचि इष्ठवदिति टिलोपः। एवं यामिन्य इवाचरंति यामिनयंतीत्यत्र आचारे क्विप्यपि फलं। ङ्याब्भ्यां प्रागिति। तेन एनिका आर्यका च सिध्यति। तथा
हि। नसामिवचन इति ज्ञापयिष्यमाणोऽत्यंतः स्वार्थिकः कन्। एतार्यशब्दाभ्यां ङ्यापौ बाधेत। ततश्च एतिका आर्यिकेत्येव रूपं स्यात्। ङ्याप्ग्रहणसामर्थ्यात्तु ङी-
वंतात्कनि एनिकेत्यपि सिध्यति। वर्णो वर्णादनुदात्तादित्यस्य वैकल्पिकत्वात्। आवंतात्कनि उदीचामातः स्थाने इतीत्वविकल्पाद् आर्यका आर्यिकेति रूपद्वयं सिध्यति। ३५
वस्तुतस्तु ङ्यापोर्ग्रहणं मास्तु एकाल्तत्वेनेत्यस्तु ज्ञविधानसामर्थ्यात्सुवंतात्तद्धितोत्पत्तिरिति हि निष्कर्षः। तथा च सुपः प्रागेव ङ्यापौ प्रवर्तेते। स्वार्थद्रव्यलिंगसं-
ख्याकारकप्रयुक्तकार्याणां क्रमिकत्वस्वीकारादित्यवधेयं॥ स्वौजसमौट्। समाहारे द्वंद्वः। सुङस्योरिति। सोरुकारो ङ्वेर्णस्तु साविन्यत्र विशेषणार्थः। अस्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्युक्ते हि असकारादावित्यर्थः स्यात्। तथा च वाजसनेयं नित्विति न सिध्येत्। ङसेरिकारः प्राङ् सिद्धः सांङ् सिद्धौ स्मात्स्मिनावित्येतत्र्यर्थः। जशशसोर्जकारशकारौ जसः शी
तस्माच्छसो न इत्यनयोर्विषयविभागार्थौ। अन्यतरस्य निरनुबन्धकत्वमेवास्त्विति चेन्न। जसो जकाराभावे औ इत्यस्य आवृस्यात्। तत्र च प्रत्ययस्य वकारान्तता संभाव्येत
एवं शसः शकाराभावे औटोडित्त्वं संभाव्येत। तथा च तेजसी इत्यादौ टिलोपः स्यात्। अथवा लिहाविन्यादौ डित्वसामर्थ्यादभस्यापि टेर्लोपः संभाव्येत। औटष्टकारः सुडिति
प्रत्याहारार्थः। टाटकारस्तु टाङ् सिङ् साङ्हितीया दोस्वेन इति विशेषणार्थः। एतेन आदिरन्त्येनेति सूत्रे काशिकाकारेणायमुक्तमन्त्येनेति किं सुडितिं तृतीयैकवचना
वयवेन माभूदिति तत्परास्तं। औटष्टकारस्यानन्यार्थतया तेनैव संभवात् प्रत्यासत्तेश्च। अत एव शब्दकौस्तुभे तत्रान्यदेव प्रयोजनमुक्तं मध्यमेन तासहितं आ
दिस्तदुत्तरे वा मपिग्राहकौ माभूदित्यन्त्येनेति ग्रहणं। अन्त्येनेतासहितो मध्यमः पूर्वो वा मपि माभूदित्यादिग्रहणमिति। अमुमेवार्थं मनसि निधाय आद्यन्ताभ्या

विभक्तिश्च। १।४।१०४। सुप्तिङौ विभक्तिसंज्ञौ स्तः। तत्र सु औ जस् इत्यादीनां सप्तानां त्रिकाणां प्रथमादयः सप्तम्यन्ताः प्राचां संज्ञास्ताभिरिहापि
व्यवहारः। सुपः। १।४।१०३। सुपस्त्रीणि त्रीणि वचनानि॰ कशः एकवचनद्विवचनबहुवचनसंज्ञानि स्युः। द्व्येकयोर्द्विवचनैकवचने। १।४।
२२। द्वित्वैकत्वयोरेते स्तः॥

१ सवयवाभ्यां अवयवी समुदाय आक्षिप्यते इति निष्कृष्टमुक्तं प्राक्। प्रकृतमनुसरामः। ङे प्रभृतीनां ङकारो घेर्ङितीति ङि
रामिति विशेषणार्थः। सुपः पकारस्तु प्रत्याहारार्थः॥ ॐ॥ विभक्तिश्चाति ङ स्त्रीणि त्रीणीत्यतस्तिङ् ग्रहणं व्यवहितमपि स्वरितत्वबलादनुवर्तते। सुप इति च
संनिहितमित्यभिप्रेत्याह। सुप्तिङाविति। तिङां विभक्तिसंज्ञायाः प्रयोजनं न विभक्तौ तुस्माः इति। सुपां तु सदाद्युत्वादिकमपि। चकारः पुरुषवचनसंज्ञाभ्यां समा
वेशार्थः। अन्यथा एकसंज्ञाधिकारादेकवचनादिसंज्ञाभिः सह वचनद्वय प्रामाण्यात्पर्यायः स्यात्। ततश्च रामेभ्यः नमाम इत्यादौ बहुवचनसंज्ञाप्रसे विभक्ति
त्वाभावात्तस्येत्संज्ञा स्यात्। इहापीति। अस्मिन्नपि तन्त्रे प्रातिपदिकार्थलिंगपरिमाणेत्यादौ इत्यर्थः। सुपः। अत्र तिङ् स्त्रीणि त्रीणीति सूत्रात् त्रीणि त्रीणीति पदं
तान्येकवचनेति सूत्रं च तानीति पदं विहायानुवर्तत इति व्याचष्टे सुपस्त्रीणि त्रीणीत्यादिना। एकश इति। एकैकमित्यर्थः। संख्यैकवचनाच्चेति वीप्सायां प्रथ
मान्ताच्छस्॥ द्व्येकयोः॥ इह द्व्येकशब्दौ संख्यापरावित्यभिप्रेत्याह। द्वित्वैकत्वयोरिति। संख्येयपरत्वे तु बहुवचनं स्यादिति भावः॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



बहुषु। अयमपि संख्यापर एवेत्याह। बहुत्व इति। बहुवचनं त्वाश्रयद्रव्यगतं बहुत्वं धर्मे आरोप्य कृतं। तत्फलं तु बहुः पर्वत इति वैपुल्यवाचिनो नेह ग्रहणमिति सूचनमेव। वस्तुतो व्यर्थं तत्परत्वादेकवचनसंभवादिति शब्दकौस्तुभादौ स्थितं। रुत्वविसर्गाविति। ननु रुत्वस्यासिद्धत्वादुकारस्येत्संज्ञालोपयोरभावात् स्थानिवदादेश इत्यस्यापि त्रिपाद्यामप्रवृत्त्या रेफांतस्य सुप्तिङंतमिति पदसंज्ञाभावेन च विसर्गोत्र दुर्लभः। विधेयस्तु पुनरित्यादौ चरितार्थत्वादिति चेन्नैवं। न मु ने इति सूत्रे नेति योगं विभज्य असिद्धं नेति व्याख्यायामिष्टसिद्धिरित्युक्तत्वात्। राम इति। संज्ञाशब्दोयमव्युत्पन्न इति पक्षे अर्थवत्सूत्रेण प्रातिपदिकसंज्ञा। करणाधिकरणयोश्चेत्यधिकारे घापवादेन हलश्चेति घञ् आरमंते तस्मिन्निति व्युत्पादने तु कृत्तद्धितेति सूत्रेणेति विवेकः॥ अत्र केचित्परिष्कुर्वंति। गंधर्वः शरभो रामः समरो गवयः शशाः। इत्यादयो मृगेंद्राद्या गवाद्याः पशुजातय इत्यमरोक्त्या यदि पशुविशेषे प्रयुज्यते तदा रूढोयं रामशब्द इत्यर्थवत्सूत्रेण संज्ञा। यदा तु रामचंद्रे भगवति प्रयुज्यते तदा रमंते योगिनो यस्मिन्निति व्युत्पत्त्याश्रयणात् कृत्तद्धितेति सूत्रेण संज्ञेति। सरूपाणामेकशेषः। इतरनिवृत्तिपूर्वकमवस्थानं शेषशब्दार्थः। न

बहुषु बहुवचनम्। १।४।२१। बहुत्वे एतत्स्यात्। रुत्वविसर्गौ। रामः। सरूपाणामेकशेष एकविभक्तौ। १।२।६४। एकविभक्तौ यानि
सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते॥ प्रथमयोः पूर्वसवर्णः॥ नादिचि। वृद्धिरेचि। रामौ॥ 36

॥ न च विरूपेष्वेकशेषाप्रवृत्त्या घटकलशाविति द्वंद्वः प्रवृत्तिरिति शंक्यं विरूपाणामिति वार्तिकस्य वक्ष्यमाणत्वात्। वस्तुतस्तु सूत्राक्षरैरेव वार्तिकार्थो लभ्यते। रूप्यते बोध्यते इति रूपमर्थः। समानं रूपं येषामिति सरूपाः ज्योतिर्जनपदेत्यादिना समानस्य सभावः तथा समानं रूपं स्वरूपं येषां ते सरूपाः सरूपाश्च सरूपाश्च सरूपाश्च सरूपाः तेषामित्येकशेषेण व्याख्यानात्। न च स्वांशे स्वव्यापारायोगः वाक्यापरिसमाप्तिन्यायादिति वाच्यं। उद्देश्यतावच्छेदकरूपाक्रांततया स्वस्मिन्नपि प्रवृत्तेः। अन्यथा तुल्यास्यप्रयत्नमित्यादौ सवर्णदीर्घो न स्यात्। तथा अर्थवत्सूत्रांतर्गतानां प्रातिपदिकत्वं। प्रत्ययः परश्चेत्यत्र सुप्रत्ययः। ससजुषो रित्यत्र रुः। खरवसानयोरिति सूत्रे विसर्गश्च न स्यादिति सर्वोपप्लवः स्यात्। स्वाध्यायोध्येतव्य इत्यस्य नेह नानेत्यादिश्रुतेश्च स्वस्मिन्नपि यथा प्रवृत्तिस्तथा दीर्घादीनामपीति चेत्तुल्यमेकशेषेपि। एतेन अ इ उ ण् इत्यादावा ३६
द्गुण इत्यादिसंधिकार्यं कुतो नेत्याशंकायां वर्णोपदेशकालेऽजादिसंज्ञानामनिष्पादात् संधिर्नेति केषांचित्समाधानं परास्तं। वर्णोपदेश इत्संज्ञायामच्प्रत्याहारे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चनिष्पन्ने प्रवर्त्तमानानां गुणादीनामुपेंद्र इत्यादौ न टस्थेद्रवउद्देश्यतावच्छेदकरूपाक्रांते वर्णोपदेशादावपि प्रवृत्तेरावश्यकत्वात्। स्यादेतत्। सरूपाणामेकए
कविभक्तौ इत्येव सूत्रमस्तु किमनेन शेषग्रहणेन। अत्राहुः। तथाहि सन्ति सरूपाणां स्थाने एकोंऽतरतम आदेशो भवतीत्यर्थः स्यात्तथा चाश्वश्चाश्वश्चेत्यत्रोदा
त्तहयवतः स्थाने उदात्तहयवानादेशः। तथा अनुदात्तहयवतः स्थाने अनुदात्तहयवानादेशः प्रसज्येतेति। एकविभक्तौ यानीति। विभक्तिः सारूप्ये उपलक्ष
णं नत्वेकशेषनिमित्तं। एवं चानैमित्तिकत्वेनांतरंगोयमेकशेषः सुबुत्पत्तेः प्रागेव प्रवर्त्तते। यद्येतन्नारभ्येत तर्हि प्रत्येकं विभक्तिः स्यात् द्वंद्वश्च प्रवर्तेत। आर
ब्धे त्वेकशेषे नेकसुबंतविरहान्न द्वंद्वप्राप्तिरेव नास्तीति भावः। ननु सुबुत्पत्तेः प्रागेकशेषप्रवृत्तौ शिष्यमाणं यन्नातिपदिकं तदेकमेवार्थं बोधयतीति द्विव
चनाद्यनुत्पत्तौ रामौ रामा इत्यादि न सिध्येत्। नैष दोषः। शिष्यमाणस्य लुप्यमानार्थाभिधायित्वात्। अतएव कृत्तद्धितसमासैकशेषसेकशेषो वृत्तिषु गण्य
ते। परार्थाभिधानं हि वृत्तिः। अतएव चलुप्तेपि प्रत्यये लिट् धुक् इत्यादौ कर्त्तोप्रनीयत इति दिक्। सरूपाण्येवेति। एतच्च उत्तरसूत्रस्थस्यैवकारस्य इहानु
कर्षणाल्लभ्यते। अत्र च एकस्यामपि विभक्तौ परतः विरूपाणि न दृष्टानीति पर्यवसन्नोर्थः तेन मातृशब्दयोर्जननीवाचिपरिच्छेतृवाचिनोर्नैकशेषः मातृभ्यां
मातृभिरित्यादौ सारूप्येपि औजसादिषु वैरूप्यात्।
नन्वेवं पयः पयो न यतीदं वरेवे
त्यादावतिप्रसंगः स्यादेवेति चेदुच्यते। सहविवक्षायामेव एकशेषः प्रवर्त्तते। इतरेतरयोग द्वंद्वस्य विषय इति यावत्। यत्र त्वनेकस्यार्थस्य मिलितस्य इतरान्वयः सः
याभूत्तो विषयः। इदं च इदितो नुम् धातोरिति लिंगाल्लभ्यते न्यायाच्च। तथाहि। यदि शिष्यते स लुप्यमानार्थाभिधायीति इति स्थिते श्रूयमाणे कशब्दोपस्थि
र्वमविशेषादेकरूप्येणो वान्वेतुमर्हति। यद्वा। तिष्यपुनर्वस्वोरिति सूत्रात् द्वंद्व इत्यनुवर्त्य द्वंद्वे प्रसक्ते सतीति व्याख्येयं। ननु द्वंद्वे कृ तेसतीति। पंथानौ पंथान इत्या
दौ ऋक्पूर्ब्धूरित्यादिना समासांतापत्तेः। करौ करा इत्यादौ द्वंद्वश्च प्राणितूर्यस्यादिना एकवद्भावापत्तेश्चेति दिक्। सूत्रे शेषग्राहः कर्मसाधन इत्याह। एक एवशि
ष्यत इति। असत्येकग्रहणे द्विबहोरपि शेषः स्यात् इत्येकग्रहणं। नचैवमप्येकविभक्तावित्यत्र एकग्रहणं व्यर्थमिति शंक्यं। एकस्यामपि विभक्तौ परतः वि
रूपाणि न दृष्टानीत्यर्थलाभायतस्यावश्यकत्वात्। किंच। खसा च खसारौ चेत्यादौ विभक्तौ परतः पूर्वभागयोर्वैरूप्यदर्शनात्स्वसार इत्येकशेषसत्रन स्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

७
सि·कौ· तथा सम्राट्च सम्राजौ इत्यत्र वैरूप्यदर्शनात्स्वसृस्थितिर्न स्यात्। किंतु कमलौ कमलः इत्यादिष्वेव स्यात्। कृते त्वेकग्रहणे नायं दोषः प्रसज्यते। एकविभक्तौ पर
टी·त· तः पूर्वत्र वैरूप्यादर्शनात्। यदा तु विभक्तावित्यत्रैकत्वं विवक्षितत्वान्नास्ति तत्र एकग्रहणमित्युच्यते तर्हि स्पष्टप्रतिपत्त्यर्थमेवास्त्विति केचित्। अन्ये त्वाहुः
३७ एकग्रहणमेकैकविभक्तावितिअर्थलाभार्थं। तथा च सकलविभक्तावित्यर्थलाभादेवकारापकर्षणं विनैव सिद्धमिष्टमिति दिक्। एकश्च एकश्च द्वौ च द्वौ चेत्या
दावेकशेषो न भवत्यनभिधानात्। द्वन्द्वोप्यत्रानभिधानेनैव वारणीयः उत्सर्गतः संख्याशब्देष्वेवमेवाविंशत्या द्वौ त्वेकशेष इष्ट एवेति बोध्यं॥ ॐ॥ चुटू॥
आदिर्ञिटुडव इत्यत आदिः षः प्रत्ययस्येत्यतः प्रत्ययस्येति चानुवर्तते तदाह। प्रत्ययाद्याविति। प्रत्ययाद्याविति किं। चाचाटः। तेन वित्तश्चुंचुप्चणपा

चुटू।१।३।७। प्रत्ययाद्यौ चुटू इतौ स्तः। इति जस्य इत्संज्ञा॥ न विभक्तौ तुस्माः।१।३।४। विभक्तिस्थास्तवर्गसकारमकारा इतो न स्युः। इति सका
रस्य नेत्त्वं। अतो गुणे।६।१।९७। अपदान्तादकाराद्गुणे परतः पररूपमेकादेशः स्यात्। इति प्राप्ते परत्वात्पूर्वसवर्णदीर्घः। अतो गुणे इति
हि पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरानिति न्यायेनाकः सवर्णे दीर्घ इत्यस्यैवापवादो न तु प्रथमयोरित्यस्यापि॥ रामाः॥ एक ३७
वचनं सम्बुद्धिः।२।३।४९। सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसंज्ञं स्यात्॥ ॥ ९ विसत्वप्रत्ययादीयकारो लुप्तनिर्दिष्टस्तेन चस्य।

नेत्संज्ञेति वक्ष्यति॥ न विभक्तौ॥ हलन्त्यमितीत्संज्ञाप्राप्तौ निषेधारंभः। तु इत्यस्योदाहरणं। रामान्। पचेरन्। मकारस्य तु रामम्। अद्भ्यां। विभक्तौ किं। अ
चायत्। ऊर्णायाः युस्। हृधाविभ्यः श्रम्। एतेषां त्वस्येत्संज्ञा यथा स्यात्। इदमस्थमुरित्यत्र मकारपरित्राणार्थं मुकारानुबन्धासंजनादनित्योयमिति
ज्ञापयते अन्यथा प्राग्दिशो विभक्तिरिति प्रथमाविभक्तित्वाद्दानीमो मकारस्यैवानेनैव सूत्रेण त्वनिषेधसिद्धेः किं तेनेति। तेन किमोत्केति सिद्धं। एकवचनं
सुः संबुद्धिरित्येव सुवचं। न च सप्तमीबहुवचनेति प्रसंगः। संबोधने प्रथमेत्यधिकारादेव तत्प्रसंगाभावादिति नव्याः। अत्र व्याचख्युः। सुः संबुद्धिरिति वा ३९
च्य एकवचनग्रहणमेकार्थं उच्यते येन तावन्मात्रस्य प्रत्ययस्य संज्ञार्था। अन्यथा सामंत्रितमिति पूर्वसूत्रेत दंतस्यामंत्रितसंज्ञाकृतेति प्रक्रमाभेदा
दयमपि संज्ञा तदंतस्यैव स्यादिति॥ ॐ॥

एङ्ह्रस्वात्संबुद्धेः। यद्यत्र हल्ङ्याब्भ्य इत्यतो हलमननुवर्त्य एङन्ताद्ध्रस्वान्ताच्चाङ्गात्परस्याः संबुद्धेर्लोप इति व्याख्यायेत। हलनुवृत्तावपि अङ्गात्परा या संबुद्धिः तस्याः यद्धल् इति वा। उभयथापि हे ज्ञाने इति न सिद्ध्येत्। लोपात्परत्वात्सारतो मिपूर्वत्वे च कृते एकादेशस्य परादिवद्भावे ह्रस्वान्तात्परत्वाभावात्पूर्वान्तवद्भावे अम एवाभावादुभयत आश्रयणे तु नान्तादिवदिति निषेधारम्भो व्याचष्टे। एङन्तादित्यादिना चेदित्यन्तेन। संबुद्ध्याक्षिप्तस्येति। तदन्तस्येव। संज्ञाऽभ्युपगमे तु संबुद्ध्या अङ्गमाक्षेप्तुं न शक्यते इति बोध्यम्॥ ह्रस्वात्परत्वं नास्तीति। तथा च सूत्रे एङ्ग्रहणमावश्यकमिति भावः। किंच। इमां किमाचामयसे न च स्कूवी इति श्रीहर्षप्रयोगे स इति पृथक्पदं सलक्ष्मीके हे रमयन्तीत्यर्थ इति निगरणं च लनो र्थेभ्यश्चेति सूत्रे मनोरमायां व्युत्पादितं न तच्च तत्रापि संबुद्धिलोपार्थं एङ्ग्रहणमावश्यकमेव॥ स्यादेतत्। एङ्ग्रहणस्य से इत्यत्र सावकाशत्वात् तया हे हरे इत्यादौ संबुद्धिलोपो न स्यात्। सन्निपातपरिभाषा

एङ्ह्रस्वात्सम्बुद्धेः ६।१।६९। एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते सम्बुद्धेश्चेत्। सम्बुद्ध्याक्षिप्तस्याङ्गस्यैङ्ह्रस्वाभ्यां विशेषणान्नेह। हे कतरत्कुलेति। हे राम। हे रामौ। हे रामाः। एङ्ग्रहणं किम्। हे हरे। हे विष्णो। अत्र हि परत्वान्नित्यत्वाच्च सम्बुद्धिगुणे कृते ह्रस्वात्परत्वं नास्ति॥

अमि पूर्वः ६।१।१०७॥ अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्। रामम्। रामौ॥ ॥ ९ विरोधात्। तथा ह्रस्वग्रहणस्यापि हे रामे

त्यत्र सावकाशत्वात् हे गौरि इत्यादौ परत्वाद्धल्ङ्यादिलोपं बाधित्वा अम्बार्थनद्योरिति ह्रस्वे कृते संबुद्धिलोपो न स्यात्। लक्ष्मीशब्दे तु हल्ङ्यादिलोपस्याप्यभावात् हे लक्ष्मि इत्यत्र सुतरां संबुद्धिलोपो न स्यात्। सत्यं गुणात्संबुद्धेरिति वक्तव्ये एङ्ह्रस्वग्रहणसामर्थ्यात्सन्निपातपरिभाषां बाधित्वापि संबुद्धिलोपः प्रवर्तत इति दिक्। अमि पूर्वः। प्रथमयोरिति पूर्वसवर्णदीर्घप्राप्तेयमारम्भः। इकोयणचीत्यतो अचीत्यनुवर्तते तदाह। अम्यचीति। अमि योऽच् तस्मिन् अमोऽवयवे अचीति यावत्। तेन मकारसहितस्य पूर्वरूपं नेति स्थितं मनोरमायाम्। एवमक्षा इहि त्यामित्यादावपि। उहित्यां योऽच् तस्मिन् इत्यादि बोध्यं। परा खेरिवा स्यत्यादि निर्देशाश्च अस्मिन्व्याख्याने लिंगमित्यपि स्थितम्। कथं तर्हि काशिकादावमिपरत इत्येवोक्तं न त्वम्यचीति चेदत्राहुः। तस्मादित्युत्तरस्यादेः परस्येत्यादेरेवादेश इति निर्णीते एकः पूर्वपरयोरित्यादेशः पूर्वपरयोर्वर्णयोरेव भविष्यतीत्याशयेन नोक्तमिति॥ ॥

सु· सि·कौ· टी·त· ३८

लशक्व। आदिर्ञिटुडव इत्यत आदिरनुवर्तते। षः प्रत्ययस्येत्यतः प्रत्ययस्येति। अतद्धित इति पर्युदासाद्धालभ्यत इत्याह। प्रत्ययाद्या इति। लश्च शश्च कुश्चे ति समाहारद्वंद्वे लशक्विति नपुंसकं। नेतरेतरयोगद्वंद्वे नविद्वल्लेति। लशकवर्गा इति। अतद्धित इति किं। शालिस्यादात इति लच्। चूडालः लोमादिभ्यः श। लोमशः। अत्र प्रयोजनाभावादेव नेत्संज्ञेति नेदं प्रत्युदाहरणमिति नव्याः। कर्णललाटेति भवार्थे कन्। कर्णिका। सन्धौ हीत्संज्ञायां कितिचेति वृद्धिः स्यात्। प्रत्ययाद्या इति किं। नलमिदेत्सितिवृङः षाकन्। वराकः। अत्र कितिचेति गुणो न स्यात्॥ तस्माच्छसो। तच्छब्देन सन्निहितः पूर्वसवर्णदीर्घः परामृश्यते। दीर्घमात्र परामर्शे तु एना नगाः पश्येत्यत्रापि नत्वप्रसंगात्। शस इत्यवयवषष्ठी स चावयवः परत्वेन विशेष्यते पूर्वसवर्णदीर्घात्परस्य शसोऽवयवस्येति। तदेतदाह परो यः शसः सकार इति परो यः शसि इति न व्याख्यातं। कृते पूर्वसवर्णदीर्घे ततः परस्य शसोऽसंभवात्। अट्कुप्वाङ्। रषाभ्यामिति पंचमीनिर्देशाव्द्य

लशक्वतद्धिते। १।३।८। तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः। इति शसः सस्येत्संज्ञा। तस्माच्छसो नः पुंसि। ६।१।१०३। पूर्वसवर्णदी दीर्घात्परो यः शसः सस्य कारस्तस्य नः स्यात्पुंसि॥ अट्कुप्वाङ्नुम्व्यवायेपि ८।४।२। अट्कवर्गपवर्गा आङ् नुम् एतैर्व्यस्तैर्यथासम्भवं मिलितैश्च व्यवधानेपि रषाभ्यां परस्य नस्य णः स्यात्समानपदे। पदव्यवायेपीति निषेधं बाधितुं माङ्ग्रहणम्। नुम्ग्रहणमनुस्वारो पलक्षणार्थम्। तच्चाकर्तुं शक्यम्। अयोगवाहानामट्सूपदेशस्योक्तत्वात्॥ इति णत्वे प्राप्ते। पदान्तस्य ८।४।३७। पदान्तस्य नस्य णत्वं न

वहितस्यापाठेऽवचनमिदं। तत्र सर्वैर्व्यवायोऽसंभवी। एकैकमात्रव्यवाय इत्यपि नार्थः। क्षुभ्नादिषु क्षुभ्नपाठसामर्थ्यात् तृप्णोमित्यादिनिर्देशाच्चे ति अभिप्रेत्याह। व्यस्तैर्यथासंभवं मिलितैश्चेति। नन्वेवं कृत्स्नं कार्त्स्न्यमित्यादावड्व्यवधानाभावाण्णत्वाभावेप्यादर्शनेत्यादावड्व्यवधानादिति प्रसंगः। न च अडादिभिरेव व्यवधान इति नियमः। अप्राप्ते विधिरयमित्युक्तत्वात्। सत्यं। योगविभागोऽत्र बोध्यः। व्यवायेपीत्येको योगो विध्यर्थः। अट् कुप्वाङ्नुमित्यन्यो नियमार्थः। छांदसो भिसो लुक्। अत्र योगविभागं विनापि निर्वाहः सुकर इति नव्याः। तथाहि। अट्कुप्वाङिति सूत्रे रषाभ्यामित्य नुवर्तते पंचमीश्रुत्या तस्मादित्युत्तरस्येति परिभाषोपतिष्ठते। उपस्थितापि सा वचनप्रामाण्यादड्व्यवायेन प्रवर्तते। तदन्यव्यवाये तु प्रवर्तत एव॥ ३८

38

अत एव येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात् इकवर्णव्यवहितस्येव इको गुणो न तु भिनत्तीत्यादावनेकव्यवहितस्येक इति पुगन्तलघूपधस्येति
सूत्रे वक्ष्यति। एवं च यत्राडादिभिर्व्यवधानं रामेणेत्यादौ तत्र भवत्येव णत्वं। यत्र तु डादिभिन्नेन व्यवधानं मा इर्ष्णेनेत्यादौ तत्र न भवति तस्मादिति परि
भाषया जागरूकत्वात्। निषेधं बाधितुमिति। तेन पर्याणद्धमित्यत्र उपसर्गादसमासेपीति णत्वं सिध्यतीति भावः। उपलक्षणार्थमिति। नुमस्थानि
कस्य स्वाभाविकस्य वानुस्वारमात्रस्योपलक्षणार्थं नुमग्रहणमित्यर्थः। तेन बृंहि बृंहौ इत्यादौ नुमस्तस्यानुस्वारः। तृंहू हिंसायां स्वाभाविकोत्रानुस्वारः
तृंहणं तृंहणं। उभयत्रापि णत्वं सिद्धं। अयोगवाहानामिति। अविद्यमानो योगः प्रत्याहारेषु संबंधो येषां ते अयोगाः अनुपदिष्टत्वादुपदिष्टैर्गृहीतत्वा
च्च प्रत्याहारसंबंधशून्या इत्यर्थः। वाहयंति निर्वाहयंति प्रयोगमिति वाहाः। अयोगाश्च ते वाहाश्च अयोगवाहाः। अनुपदिष्टत्वे उपदिष्टैर्गृहीतत्वे च सति शू
यमाणा इत्यर्थः। अट्स्विति। निष्कर्षस्त्वकारोपरीति तेन पयःस्वित्यादाविणः परस्येति षत्वं न भवति। अत एवोक्तं प्राक् अनुस्वारविसर्गजिह्वामूलीयोपध्मा

यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्। १।४।१३। यः प्रत्ययो यस्मात् क्रियते तदादि शब्दस्वरूपं तस्मिन्प्रत्यये परेऽङ्गसंज्ञं स्यात्। भवामि भवि
ष्यामीत्यादौ विकरणविशिष्टस्याङ्गसंज्ञार्थं तदादिग्रहणम्। विधिरिति किम्। स्त्री इयती। प्रत्यये किम्। प्रत्ययविशिष्टस्य तनोत्यधिक।

नीयमाना मकारोपरीति णत्वं न स्यादिति। न भाभूपूकमिगमीत्यत्रो नेत्यनुवर्तत इति भावः॥ ॥ यस्मात्॥ ११ स्य वा मा भूत्॥ अङ्गस्य।६।४।१। इत्यधिकृत्य
तदादीति। तत्र कृतिरूपमादिर्यस्य शब्दस्वरूपस्येति बहुव्रीहिः। ननु यस्मात्प्रत्ययविधिस्तदंगमित्येवास्तु किमादिग्रहणेनेत्यत आह। भवामीत्यादि। प्रकृतिमात्रस्य
तु व्यपदेशिवद्भावेन तदादित्वादंगत्वे तेन कर्तृकारक इत्यादावपि सिद्ध्यतीति भावः। अंगसंज्ञार्थमिति। अन्यथा अतो दीर्घो यञीति दीर्घो न स्यादिति भावः। न चा
रंभसामर्थ्याद्दीर्घः स्यादिति वाच्यं। पयगतो। वयगतो। आम्यां यङ्लुकि यायामि। पापावः। वावामि। वावामः। इत्यादौ चरितार्थत्वात्। स्त्री इयतीति। इदम्
परिमाणे वतुप्। किमिदंभ्यां वो घ इति घत्वस्य इयादेशः। इदंकिमोरीश्की इति ईशः। यस्येति चेति ईशो लोपः। उगितश्चेति ङीप्। सत्यां हि संज्ञायां स्त्रीशब्दस्य यस्येति
चेति लोपः स्यात्। न च शलोपस्यासिद्धत्वादत्राभादित्यसिद्धत्वान्नातिप्रसंग इति वाच्यं। प्राग्भादसिद्धत्वमिति पक्षाभ्युपगमादनित्यत्वाद्वेति व्याख्यातारः॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि॰ कौ॰ टी॰ तृ॰ २६

न चाकुस्त्री अंपश्यतीत्यत्र स्त्री शब्दस्य स्त्रियामितीयङ् स्यात्। अकारादिमकृते अमि पूर्वरूपे कारे एकस्य परादिवद्भावेन प्रत्ययत्वात्। अत एवेई प्रत्यये ति लो-
पे च सत्यकारस्य सत एव प्रत्ययत्वाच्च। विधिग्रहणे कृते तु नायं दोषः प्रसज्यते। अम्प्रत्ययस्य अकारादेः प्रत्ययस्य चानन्तरं विहितत्वेपि स्त्रीशब्दादविधानात्
स्यादेतत्। वत्तुपोः म प्रत्ययस्य च स्त्रीशब्दादविधानेपि सोविधिरस्त्येवेति तद्दोषतादवस्थ्यमिति चेन्मैवं। सन्निधानबलेन यस्मात् यः प्रत्ययो विहितः तस्मिन्
तदंगमिति व्याख्यानात्। प्रत्यये किमिति। तदादिरूपं किं यदि त्वपेक्षायां यस्मात् प्रत्यय इति प्रत्ययस्य श्रुतत्वात् प्रत्ययपर्यन्तमेवांगं भविष्यतीति मत्वा प्रश्नः। प्र-
त्ययस्य श्रुतत्वेपि प्रत्ययविशिष्टस्येनादित्वतोप्यधिकं वा निरवधिकमंगं स्यात्तदादिरित्यस्यार्थनिर्णये प्रत्ययश्रवणस्योप   लयादित्याशयेन व्याचष्टे। प्रत्ययविशि-
ष्टस्येत्यादिना। प्रत्ययविशिष्टस्येति किं। वव्रश्च। अत्र विशिष्टस्यांगसंज्ञायामुरदित्यत्रादेशस्य परनिमित्तत्वाभावात् अचः परस्मिन्निति स्थानिवत्त्वाप्रवृत्त्या न संप्र-
सारणं द्युतिनिषेधाभावादभ्यासस्य पुनरपि संप्रसारणं प्रवर्तेत।   तथा भवर्थेऽर्थमित्यत्रापि श्नुधातुभ्रुवामिति इयङ् वङौ स्यातामुकारात्पा अचोऽत्यन्तेनाजा-
दौ प्रत्यये त्यलाभात्। ततोऽधिकस्यांगसंज्ञायां तु देवदत्त ओदनमपाक्षीत् इत्यत्र देवशब्दात्प्राग् अडागमः स्यादेव दत्तशब्दात्सुप्रत्ययस्य विहितत्वेन लुङः

टाङसिङसामिनात्स्याः। ७।१।१२। अकारान्तादङ्गाट्टादीनां क्रमादिनादय आदेशाः स्युः। रामेण। सुपि च ७।३।१०२। यञादौ सु-
पि परे अतोऽङ्गस्य दीर्घः स्यात्। रामाभ्याम्। अतो भिस ऐस्। ७।१।९। अकारान्तादङ्गाद्भिस ऐस् स्यात्। अनेकाल्त्वात्सर्वादेशः॥ ॥

प्राग्वर्ति समुदायस्यांगत्वात्। द्वितीयप्रत्ययग्रहणे कृते तु न कोपि दोषः प्रसज्यते। अन्ये तु यस्मात् लुङादिविधिः प्रत्यासत्त्या तस्यैवांगस्याडागमः स्यादिति ततोप्य-
धिकस्येत्येतद्व्याख्यायां कं किंतु एतस्यापि विशिष्टस्यांगत्वे यद्दूषणं तद्देवेत्याहुः॥ ❀ ॥ टाङसि। अतो भिस ऐस् इत्यस्मादनुवृत्तेन अत इत्यनेन सामानाधि-
करण्येन विशेषणादंगस्येत्यधिकृतं षष्ठ्यन्तमपि पंचम्या विपरिणम्यते विशेषणेन तदन्तविधिरित्याह। अकारान्तादंगादिति। सुपि च। यञीत्यनुवर्तते। अल्-
ग्रहणेन तदादिविधिरित्याह। यञादौ सुपीति। यञि किं। रामः। अत इति किं। अग्निभ्यां। अतो भिस ऐस्। ननु ऐस् इत्येवास्तु। नवा तो गुणे इति पररूपापत्तिः। एकारोच्चा-
रणवैयर्थ्यापत्तेः। अन्यथा ऐसमेव विदध्यात् इति चेत्सत्यं। एरेतो हि मात्रत्वाविशेषेण गौरवाभावात्। बहुलं छंदसीत्यत्र अनतोपि भवति। नद्यैरिति काशिको-
दाहृतप्रयोगस्य ऐस्करणं विना अनिर्वाहाच्च। केचित्तु ऐस्करणं निर्जरसैरित्येकारश्रवणार्थमिति व्याचख्युः। तच्चिंत्यं। सन्निपातपरिभाषया जरसादेशाप्रवृत्ते-

39

ङेर्यः। ङेरिति चतुर्थ्येकवचनस्य ग्रहणं। न सप्तम्येकवचनस्य व्याख्यानात्। अत एव ङे रामित्यत्रास्याग्रहणं। समानाधिकरणे स्त्रियां इत्यादिनिर्देशाच्च
स्थानिवद्भावेनेति। आदेशालाश्रयविधौ स्थानिवत्त्वनिषेधाभावादिति भावः। सुपि चेति दीर्घ इति। न च परत्वादकृत्सार्वधातुकयोरिति दीर्घोस्त्विति शंक्यं।
तत्राप्यङ्यिङ्कितीत्यतः ङ्कितीत्यनुवर्त्तनात्। अन्यथा उरुयेत्यत्रापि दीर्घः स्यात्। उरुशब्दात्परस्य टाइत्यस्य सुपां सुलुगिति यादेशः एतच्च काशिकायां स्पष्टं य
द्यपि ङेयादेशस्य ङित्त्वमस्ति न ल्यपीति ज्ञापकेन अनुबंधकार्येष्वल्विधावपि स्थानिवत्वाभ्युपगमात्तथापि शानचः शित्वेन लिंगेन क्वचिदनुबंधकार्ये
षु स्थानिवत्त्वानभ्युपगमादादेशे ङित्त्वेनेत्यभ्युपेत्यैव विरोधाभावात्परत्वमत्राकिंचित्करमित्यनादरेण वा अकृत्सार्वधातुके तिदीर्घो नोक्त इति स्थितस्यग
तिमाहुः। ननु ज्यादादीयस इति ज्यशब्दात्परस्य ईयस आकारविधानमंगवृत्तपरिभाषाया लिंगं। अन्यथा बहोर्लोप इत्यतोनुवर्त्यलोपमेव विदध्यात्। आ

ङेर्यः।७।१।१३। अतोङ्गात्परस्य ङेरित्यस्य यादेशः स्यात्। रामाय। इह स्थानिवद्भावेन यादेशस्य सुप्त्वात्सुपि चेति दीर्घः। सन्निपातलक्ष-
णो विधिरनिमित्तं तद्विघातस्येति परिभाषा त्विह न प्रवर्त्तते। कष्टाय क्रमणे इति निर्देशेन तस्या अनित्यत्वज्ञापनात्। रामाभ्यां। बहुवचने झ
ल्येत्।७।३।१०३। झलादौ बहुवचने सुपि परे अतोङ्गस्य एकारः स्यात्। रामेभ्यः। बहुवचने किं। रामः रामस्य। झलि किं। रामाणां। सुपि किं। पचध्वं।

कारं तु न विदध्यात्। अकृत्सार्वधातुकयोरिति दीर्घेण ज्यायानिति रूपसिद्धेरिति भाष्ये स्थितं। तदिदानीं विरुध्येत। ङ्कितीत्यनुवृत्तौ तु ज्यायानित्यत्राकृत्सार्वेति
दीर्घाप्रवृत्तेः। तथा चाकृदिति सूत्रे ङ्कितीति नानुवर्त्तनीयं। उरुया धृष्णुयेत्यत्र दीर्घाभावः छान्दस इत्येवाभ्युपेय इति चेत्। अत्राहुः। ज्ञाजनोर्जेत्याकारग्र
हणमुक्तपरिभाषालिंगं। अन्यथा जेमेव विदध्यात्। अतो दीर्घो यञीति जायते जानातीत्यादौ दीर्घसिद्धेरित्यपि भाष्ये स्थितं। तच्च ज्ञापकमकृदित्यत्र ङ्कि
तीत्यनुवृत्तावपि संगच्छते। एवं च सति ज्यादादित्याकारग्रहणं लिंगमिति तु भाष्यप्रौढिवादमात्रमस्तु। सन्निपातेति। सन्निपातः संश्लेषः लक्षणं निमित्तं
यस्य स सन्निपातलक्षणः। तं सन्निपातं विहंतीति तद्विघातः कर्मण्यण्। कुलतत्वा। उपजीव्यविघातकविधेर्निमित्तं न भवतीत्यर्थः॥ रामः रामस्येत्यत्र स
न्निपातपरिभाषयाप्येत्वं सुपरिहरं तथाप्यदः सर्वेषामिति निर्देशादेत्वविधौ सन्निपातपरिभाषा न प्रवर्त्तत इत्याशयेनोक्तं इति स्थितस्य गतिः समर्थनीया

CC-0. In Public Domain. Digitization by eGangotri



वावसानइति। अत्राहुः। जश्त्वे कृते अवसाने चर्त्वमिति न मंतव्यं किंतु येन नाप्राप्तिन्यायेन अवसाने चर्त्वस्य जश्त्वापवादत्वाज्जश्त्वाभावपक्षे जश्त्वमिति यो ज्यं द्वित्व इति। अनचि चेत्यने
न अनचीति प्रसज्यप्रतिषेध इति प्रागेवोक्तं। पर्युदासाभ्युपगमे तु इह द्वित्वं न स्यात्। तादेश आरभ्यत इति। वत्स्यतीत्यादौ चर्त्वेन तकारो न लभ्यत इति सस्यार्धधातुक इत्य
नेन सकारस्य तकारो विधीयत इत्यर्थः। ह्रस्वनद्यापो। अंगस्येत्यनुवर्तते। तच्च पंचम्यंतेन। सामानाधिकरण्यात्। अंगादिति विपरिणम्य ह्रस्वादिभिर्विशेष्यते विशेषणेन
तदंतविधिरित्याशयेनाह। ह्रस्वांतादिति। एतेन ह्रस्वनद्याप इति पंचमी न तु षष्ठीति स्फोटितं। ज्ञापकं त्वत्र नामीति। नहि प्रकृत्यागमत्वे अंगसंज्ञाविमित्तं नाम संभवति। एवं
चानया पंचम्याः नन्वार्थतया तस्मादित्युत्तरस्येति परिभाषोपस्थित्या आमि सर्वनाम्नः सुडित्यतो नुडित्यनुवृत्तं नामीति सप्तम्यंतं षष्ठ्या विपरिणम्यते आमीति सप्तम्या
स्त्रिंस्त्रयइत्यत्र चरितार्थत्वादित्यभिप्रेत्याह। आमो नुडागमः स्यादिति। अत्र नव्याः। नुडिति योगं विभज्यांगात्परस्यामो नुडित्युत्सर्गविधिं कृत्वा नद्याप

वावसाने। ८।४।५६। अवसाने झलां चरो वा स्युः। रामात्। रामाद्। द्वित्वे रूपचतुष्टयं। रामाभ्यां। रामेभ्यः। रामस्य। सस्य द्वित्वपक्षे खरि चे
ति चर्त्वे प्राप्ते तरतम्यात्सस्य स एव। न तु तकारः। अल्पप्राणतया प्रयत्नभेदात्। अत एव सः सीति तादेश आरभ्यते। ओसि च। ७।३।१०४। ओ
सि परे अतोङ्गस्य एकारः स्यात्। रामयोः। ह्रस्वनद्यापो नुट्। ७।१।५४। ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्॥ 40

इत्यंशेन दीर्घात्परस्यामो नुट् चेद्भवति तर्हि नद्याप एवेति नियमविधिं व्याख्याय ह्रस्वग्रहणं प्रत्याख्येयं। न चैवं लिहां दुहामित्यादौ अतिप्रसंग इ
ति वाच्यं। हलं ताच्चेद्भवति तर्हि षट्चतुर्भ्य एवेति नियमाभ्युपगमात्। ध्वंसनड्हां कतिपयचतुरं युजिक्रुंचां झलामित्यादिनिर्देशाच्च। तस्मान्ह्र
स्वग्रहणप्रत्याख्यानेन को पि दोष इत्याहुः। अत्र वदंति। नुडिति पृथक्योगे कृते सति ङे रामि कृते परमप्याटं बाधित्वा अंतरंगत्वाद्रामो नुट् स्यात्।
तथा च परत्वादाटा नुट् बाध्यत इति वक्ष्यमाणग्रंथेन आटि कृते सकृद्गतिन्यायात् नुट् नेति भाष्यग्रंथेन च। विरोधः स्यात्। यद्यपि नियमसूत्राणां वि
धिमुखेन प्रवृत्तिरिति पक्षे ङेरामि कृते तस्य नद्याप इत्यनेनैव नुडागमे प्रसज्यमाने आण्नद्या इत्यनेन स बाध्यत इति परत्वाद्दाटा नुट् बाध्यत इत्यादि ग्रं ४०
थः संगच्छते तथापि नियमसूत्राणां निषेधमुखेन प्रवृत्तिरिति पक्षे परमपि आटं बाधित्वा अंतरंगत्वान्नुट् स्यादेव। किंच। नद्याप इत्यत्र नद्यापः पर।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यामो नुडेवस्यान्नान्यदित्यर्थः स्यात्तथा च गोर्यो रमायां सर्वासां सर्वस्यामिति न सिद्ध्येत्। सुडागमस्य पुंसि आट्याट्स्याडागमानां नुडि दन्तरे चरितार्थत्वात्
अपि च। गौर्यामित्यादौ ङेः आमि कृते नुटं बाधित्वा याडागमो टं बाधितुं नदीग्रहणं। एवं रमायां सर्वासां सर्वस्यामित्यादौ याड्याट्सुटं च बाधितुं आप्ग्रहण
मिति। न द्यापएतद्विध्यर्थमेवस्यान्न नियमार्थो। तत्तश्च विश्वपां वातप्रम्यामित्यादौ नुट्टुर्वा रएवा न द्यामतुपभाषायां सदवसः श्रुवः। सर्वासां प्रायदर्शन
तरस्यां ग्रहणमित्यादि निर्देशात् ग्रहणो कृत्य विध्यर्थतापादनसनुडेवेति प्रागुक्त नियमस्य निवारणे तु प्रतिपत्तिगौरवं। अपि च। आकारान्तादीकारां
ताद्दकारान्ताच्चेद्भवति नर्हि न द्यापएवेति नियमस्यापि संभवात्। विश्वपां वातप्रम्यां खलप्वामित्यादौ नुडागमाभावेपि गवामित्यादौ नुट्स्यात्। न च ह्रस्वन्द्र।
सि गोः परां तरत्यारंभात् लोके गोशब्दात्परस्यामो नुएनभवेदिति वाच्यं। परान्ते गोशब्दात्परस्यामो नुट् चेत् छन्दस्येवेति नियमे न लोके पदान्ते गोनामिति प्र
योगस्याभावेप्यपादान्ते तस्यानिवार्यत्वापत्तेः। रायां ग्लावां नावामित्यादौ दुर्निवारत्वाच्च। यदि तु दीर्घात्परस्य आमो नुट् चेदित्यादि नियमे गोः पादान्त

नामि। ६।४।३। नामि परेऽजन्ताङ्गस्य दीर्घस्यात्। रामाणां। सुपि चेति दीर्घो यद्यपि परत्वात्तथापीह न प्रवर्तते। सन्निपातपरिभाषाविरोधात्
नामीत्यनेन त्वारम्भसामर्थ्यात्परिभाषा बाध्यते। रामे। रामयोः॥ सुपि एत्वे कृते॥ अपदान्तस्य मूर्द्धन्यः। ८। ३। ५५। आपादपरिसमाप्तेरधि

ति सूत्रं विध्यर्थं भवेत्। आकारान्तादिभ्यः परस्यामो नुट् चेदित्यादि नियमे तु नियमार्थं स्यात्तत्र विधिनियमयोर्विधिरेव ज्यायानिति न्यायानुसं(१) कारोयं
धानेन दीर्घात्परस्यामो नुट् चेदित्यादि नियमएव स्वीक्रियत इत्युच्यते तथापि पुनः प्रतिपत्तिगौरवमस्त्येव न स्यात् ह्रस्वग्रहणग्रन्थास्थानस्याति क्लेशसा
ध्यत्वाद्यथाश्रुतमेव रमणीयमिति॥ ॥ नामिं ङलोपइत्यतो दीर्घ इत्यनुवर्तते। दीर्घश्रुत्योपस्थिते नाचइत्यनेनागस्येति विशेष्यते। विशेषणेन च तदं
त विधिः। तदेतदाह। अजन्ताङ्गस्येत्यादि। अर्थवद्ग्रहणपरिभाषया नामिति नुट् सहितएवामग्रहणं तेन पामनां मंगनामित्यादौ न भवति। तत्र हि पामादि
लक्षणेन प्रत्ययेनापि द्वितीयैकवचने च कृते त्र्याणमपि प्रत्ययानां प्रत्येकमर्थवत्त्वेपि नामिति समुदायस्यानर्थकत्वात्। यद्यपि नलोपस्यासिद्धत्वात् अ
नेन पामनामित्यत्र दीर्घः सुपरिहरस्तथापि नोपधाया इत्यनेन तु स्यादेवेति बोध्यं। नुट्टीति नु न सूचितं। भृगः। किन्तु दृचेत्योण्णादिक गनग्रत्ययान्ते भृंगश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ऽदेमाभूदिति। स्यादेतत्। नुडागमस्याम् भक्तत्वात् आमग्रहणेन सनकारो व्याप्तम् नु गृहीष्यत इति। आमीत्येव सूत्रमस्तु। न चामीति दीर्घस्य कृताकृतप्रसंगित्वे
न नित्यत्वात्परमपि नुटं बाधित्वा अग्नीनामिं दूनामित्यत्र दीर्घे कृते हूस्वाश्रयो नुट् न भवेदिति वाच्यं। हूस्वान्नान्नुडिति वचनसामर्थ्यात् कृतेपि दीर्घे भूतपूर्वगत्या
श्रयेणैतत्प्रवृत्तेः। नापि न तिसृचतसृ इति निषेधात्तिसृणामित्यत्र हूस्वान्नान्नुडिति वचनस्य प्रयोजनमस्तीति वाच्यं। चतसृणामित्यत्र षट्चतुर्भ्यश्चेत्यनेनैव
नुट्सिद्धेः। हूस्वनद्याप इति सूत्रे त्रेस्त्रय इत्यतः त्रेरित्यनुवर्त्य त्रिशब्दात्परस्यामो नुडिति व्याख्यानात्तिसृणामित्यत्रापि तत्सिद्धेः। यद्यपि नृणामित्यत्र प्रयोजन
मस्ति तथापि नैकमुदाहरणं हूस्वग्रहणं प्रयोजयति। अन्यथा नृनद्यापः इत्येव वदेत्। तस्मादामीत्युक्तौ न किंचिद्बाधकमस्तीत्यामः सनकारस्य ग्रहणमनर्थक
मिति चेदत्रोच्यते। उत्तरार्थं सनकारग्रहणं कर्तव्यं नोपधाया इति दीर्घो नामि यथा स्यात्। चर्मणां वर्मणामित्यत्र माभूदिति॥ तदुक्तं वार्त्तिककृता। नामि दीर्घ आमि
चेत्स्यात्कृते दीर्घे न नुड्भवेत्। वचनाद्यत्र तन्नास्ति नोपधायाश्च चर्मणामिति। अत्र वदंति। वचनाद्भूतपूर्वगत्याश्रयेणैतत्प्रवृत्तिरित्येतच्चिंत्यं। गौणत्वेन षट्चतु
र्भ्यश्चेति नुटो प्रवृत्त्यापि यचतसृणामित्यत्र नुडर्थं हूस्ववचनस्य चरितार्थत्वेन सामर्थ्योपक्षयात्। तत्र हि नुमचिर इति रादेशात्पूर्वं विप्रतिषेधे न नुडिष्यत इति
नदयुक्तं। ऋन्नद्याप इति सूत्रितेपि ऋदंतान्नुट्सिद्ध्यत्येवेति हूस्वग्रहणस्य सामर्थ्यानुपक्षीणत्वादिति दिक्। परिभाषाविरोधादिति। कृताकृतप्रसंगित्वेन नामी
ति दीर्घस्य नित्यत्वात्परोपि सुपि चेति दीर्घो न प्रवर्तत इति नोक्तं। शब्दांतरस्य प्राप्नुवन्विधिरनित्यो भवतीति नामीति दीर्घस्याप्यनित्यत्वात्॥ आरंभसामर्थ्या
दिति। सुपि चेत्यस्य तु न सामर्थ्यं। रामाभ्यामित्यादौ सावकाशत्वादिति भावः। ननु कर्तॄणामित्यत्र परत्वात्षट्चतुर्भ्यश्चेति नुटि नामीति दीर्घः सन्निपातपरि
भाषामबाधित्वैव प्रवर्त्तत इत्यारंभसामर्थ्यस्योपक्षयान्नामीति सूत्रमपि रामाणामित्यत्र सन्निपातपरिभाषया न प्रवर्त्तेत तथा च आचार्याणामिति निर्देशो
नोक्तपरिभाषाया अनित्यत्वमाश्रित्य सुपि चेति दीर्घ एव परत्वात्प्रवर्त्तेत नामिति चेत्। अत्र केचित्समाधयंति। चतुर्ग्रहणसाहचर्यात् हलंतषट्संज्ञकादेव ८१
परस्यामः षट्संज्ञाश्रयो नुड्भवति न तु कर्तिशब्दात्परस्यामः तथा च कर्तॄणामित्यत्र हूस्वाश्रय एव नुडित्यारंभसामर्थ्येनोपक्षीणीयमिति तदपरे न क्ष
मंते रेफो यथा हल्संज्ञकस्तथा अम्संज्ञकोपि भवतीत्यमंतषट्संज्ञकादेव परस्यामः षट्संज्ञाश्रयो नुड्भवति न तु षकारांतात्परस्येति वक्तुं शक्यते तथा षण्णामि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यत्र नुड्भावप्रसंगान्न तस्मादिह साहचर्येण ग्रास्यमेव। अन्ये तु षट्चतुर्भ्य इति बहुवचननिर्देशाद् दीर्घपरोऽयं निर्देशः तथा चार्थप्राधान्यं यत्र तत्रैव षट्संज्ञाश्रयो नुड्
भवति न तु प्रियपंचां प्रियषषां इत्यादाविति सिद्धान्तान्तात्। बहिरंगः षट्संज्ञाश्रयो नुट्। तथा चांतरंगत्वात् कृतीनामित्यत्र ह्रस्वाश्रय एव नुडिति नामीति दीर्घः संनिपात
परिभाषां बाधित्वैव प्रवर्त्तते ऽलंतत्वारंभसामर्थ्यादिति मूलोक्तग्रंथस्य न काप्यनुपपत्तिरिति समादधुः। इतरे तु आरंभसामर्थ्यादित्यस्यायमर्थः। न तिसृ चतसृ इति निषेधा
रंभसामर्थ्यादिति। तिसृणामित्यत्र ह्रस्वांतलक्षणे नुटि कृते नामीति दीर्घः प्रवृत्तो हि न तिसृचतसृ इति निषेध आरभ्यते। सन्निपातपरिभाषया दीर्घाप्रवृत्तौ तु किमनेन निषेधे-
नातो ज्ञायते नामीति दीर्घः संनिपातपरिभाषां बाधत इति। येन तु ह्रस्वनद्यापः इत्यत्र ह्रस्वग्रहणं प्रत्याख्यायते तैस्तु नामीति दीर्घे आरंभसामर्थ्येनाश्रयणीयमेव। अपरं
तस्य षष्ठ्यन्तस्यैव सिद्धे मूर्धन्यग्रहणमिणः षीध्वमिति ढत्वार्थं। चकृढ्वे। अकृढ्वं ॥ ❖ ॥ इण्कोः॥ समाहारद्वंद्वे सौत्रं पुंस्त्वं। कोः किं। गवाक्षु। गवाङ्क्षु। आदेशप्र-

इण्कोः। ८।३।५७। इत्यधिकृत्य। आदेशप्रत्यययोः। ८।३।५९। सहेः साडः सः इति सूत्रात्स इति षष्ठ्यन्तमनुवर्त्तते। इण्कवर्गाभ्यां पर-
स्याऽपदान्तस्यादेशस्य प्रत्ययावयवस्य च यः सकारस्तस्य मूर्द्धन्यादेशः स्यात्। विवृताघोषस्य सस्य तादृश एव षः। रामेषु। इण्कोः किं।
रामस्य। आदेशप्रत्यययोः किं। सुपीः। सुपिसौ। सुपिसः। अपदान्तस्य किं। हरिस्तत्र। एवं कृष्णमुकुन्दादयः॥ ॥

त्यययोः। प्रत्ययशब्दः प्रत्ययावयवे लाक्षणिकः। हलि सर्वेषामिति निर्देशान्मासदा घोरित्यत्र सातिग्रहणाच्च लिंगादित्याशयेन व्याचष्टे। आदेशः प्रत्यया-
वयवश्चेति। यदि तु आदेशावयवो गृह्येत तर्हि तिसृणामित्यादौ दोषः। यद्यपि सकारोच्चारणसामर्थ्यात्तत्र षत्वं न स्यात्तथापि बिसं बिसं मुसलं मुसलमित्यादौ षत्वं
दुर्वारं स्यात्। आष्टमिकद्विर्वचनस्यादेशरूपत्वात्। यदि तु प्रत्यये यः सकार इति गृह्येत तर्हि रामेषु करिष्यतीत्यादौ न स्यात्। किंतु इंद्रो मा वक्षदित्यादावेव स्यात्। इ-
ह मनोरमायामेकापि षष्ठी विषयभेदात् भिद्यते इत्युक्त्वा सह विवक्षाभावपि सौत्रत्वात् द्वंद्व इत्युक्तं। ननु प्रत्ययशब्देन लक्षणामनंगीकृत्य यथाश्रुताभिप्रायेण उ-
क्तमिति बोध्यं। विवृताघोषस्येति विवृतस्य सस्य तादृश एवेत्युक्ते ककारो ऽतिप्रसंगस्तद्वारणायाघोषस्येति। अघोषस्येत्येतावदुच्यमाने ठकार इति प्रसंगः तद्वार-
णायोभयमुपात्तं। तादृश एव ष इति। तादृश एव बाह्यप्रयत्नो भवति नान्य इत्यर्थः। ननु दधिसे चौ दधिसे च इत्यादौ प्राक् सुबुत्पत्तेः समासे षत्वं वारयितुं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु

सि.कौ. पत्तदर्थादिति पंचमीसमासो भाष्ये उक्तः तत्र इहापि साप्यदार्थोरिति निषेधः करिष्यतीत्यादेशस्त्वविधेः सावकाशत्वादिति चेन्मैवं। स्वादिष्विति यापदसंज्ञातामा
टी.त. श्रित्य उक्तनिषेधो न प्रवर्त्तते इति सातिग्रहणेन ज्ञापितत्वात्॥ रामस्येति॥ टाङसिङसामिनात्स्याः इति वक्तव्ये सकारोच्चारणसामर्थ्यात् षत्वं न भवेन्न ङारिषु
४२ अमुष्येति निपातनान्नतः फगादौ अमुष्यायण इत्यादि वार्त्तिकनिर्देशाच्च अमुष्येत्यत्र षत्वं भवेत्। तर्हि विश्वपाभिस्त्यादिषु सुदाहर्त्तव्यं। न च तत्रापि सुविति व
क्तव्ये सुविति सकारोच्चारणसामर्थ्यादेव न भवेदिति शंक्यं। लिङ्क्षु प्रशास्तु इत्यत्र ङः सि धुट् न श्चेति धुटः प्रवृत्तये सकारोच्चारणस्यावश्यस्वीकर्त्तव्यत्वादिति दि
क्॥ ॐ ॥ सर्वादीनि इति॥ तद्गुणसंविज्ञानो बहुव्रीहिरयं अदः सर्वेषामिति लिंगात् आदिशब्दोऽत्रावयववाची सर्व आदिरवयवो येषां तानीति विग्रहः। उद्भूताव
यवभेदः समुदायः समासार्थ इति बहुवचनं। तस्य समुदायस्य युगपद्ग्रहस्य प्रयोगाभावादानर्थक्यात् तदंगेष्विति न्यायेन तदवयवेषु प्रवर्त्तमाना सर्वनामसंज्ञा अ
विशेषात्सर्वशब्देऽपि प्रवर्त्तत इति युक्तं। तद्गुणसंविज्ञानत्वं तस्यान्यपदार्थस्य गुणाः वर्त्तिपदार्थरूपाणि विशेषणानि तेषां कार्यान्वयितया संविज्ञानं यत्र स

सर्वादीनि सर्वनामानि।१।१।२७ सर्वादीनि शब्दरूपाणि सर्वनामसंज्ञानि स्युः। तदन्तस्यापीयं संज्ञा। द्वन्द्वे चेति ज्ञापकात्। तेन परम
सर्वत्रेति त्रल्॥ परमभवकानित्यत्राकच्च सिद्ध्यति॥

॥ १ तद्गुणसंविज्ञान इत्यस्यार्थः। लोकवेदयोरपि संयोगसमवायान्यतरसंबंधे लो
हितोष्णीषाः ऋत्विजः प्रचरंति लंबकर्णमानयेत्यादौ तद्गुणसंविज्ञानत्वमेव। स्वस्वामिभावसंबंधे त्वतद्गुणसंविज्ञानत्वं चित्रगुमानयेत्यादौ। ननु सर्वनामा
नीत्यत्र पूर्वपदात्संज्ञायामिति णत्वं कस्मान्न भवति। सौत्रत्वान्नेति चेल्लोके सर्वणामशब्दस्यासाधुत्वापत्त्या सर्वनामसंज्ञानि स्युरिति ग्रन्थस्याप्यसाधुत्वापत्तेरिति
चेन्मैवं। निपातनात् णत्वं नेति। भाष्योक्त्या ख्याञ् यणादिषु सिद्धेः। अत्र भाष्यानुसाराद्बाधकान्येव निपातनानि भवंतीति पक्ष आश्रितः। अबाधकान्यपि निपा
तनानि भवंतीति पक्षस्तु विभाषा फाल्गुनीति सूत्रे श्रवणशब्दे निपातितेऽपि श्राविणीति प्रयोगोऽपि साधुरित्येवमर्थं आश्रयिष्यते। विशेषणानुगुणं विशेष्यमध्या ४२
हरति। शब्दरूपाणीति॥ द्वंद्वे चेति। स हि निषेधः समुदायस्यैव न त्ववयवानामिति वक्ष्यति। न च तदंतविधिं विना समुदाये संज्ञाप्रसक्तिरस्तीति भावः। नन्वंगाधि
कारे तदंतविधिनैव परमसर्वस्मा इत्यादौ स्मायादिसिद्धेस्तदंतसंज्ञायाः किं फलमित्यत आह। तेनेति। न चेहापि प्रातिपदिकादित्यनुवृत्तेः। सर्वनाम्नां तद्वि॥

42

र्शीतिकयोर्वैषम्यमितिभावः अवर्णान्तादिति अवर्णान्तादङ्गात्परस्येत्यर्थस्तेन ३त्र।।

शेषणेन दंतविधिर्भविष्यतीति वाच्यं। समासप्रत्ययविधौ प्रतिषेध इत्युक्तत्वादिति भावः। अकच्चेति। चकारात्परमसर्वन इत्यत्र तसिल्।। ❀ ।।जसः शी।। दीर्घोच्चा
रणमुत्तरार्थं। वारिणी। मधुनी। अनेकाल्त्वादिति। ननु शित्वादिति भावः। इत्संज्ञाया एवाभावादिति। नृ इत्यत्रोपदेशकाले एव ऋकारस्येत्संज्ञा शीभावस्य तु सर्वा
देशत्वानंतरं स्थानिवत्वेन प्रत्यय लेलच्चेल शकतद्धित इति प्रत्ययादेशस्येत्संज्ञेति दृष्टान्तं नरोएषां तेषामित्यादौ नाव्याप्तिः। सर्वनाम्नो विहितस्येति। सर्वनाम्नः
परस्येति तु नोक्तं। वर्णाश्रमेतराणामित्यत्र सुट्प्रसंगात्। इह चेत्यनेन समुदायस्य सर्वनामसंज्ञानिषेधेप्यवयवस्यानिषेधात्। विहितविशेषणत्वाश्रयणे प्र

जसः शी। ७।१।१७। अदन्तात्सर्वनाम्नः परस्य जसः शी स्यात्। अनेकाल्त्वात्सर्वादेशः। न चाऽर्वणस्तृ इत्यादाविव नाऽनुबन्धकृतमनेकाल्
त्वमिति वाच्यं। सर्वादेशत्वात्प्रागित्संज्ञाया एवाऽभावात्। सर्वे। सर्वनाम्नः स्मै। ७।१।१४। अतः सर्वनाम्नो ङे इत्यस्य स्मै स्यात्। सर्वस्मै। ङसिङ्योः
स्मात्स्मिनौ। ७।१।१५। अतः सर्वनाम्नो ङसिङ्योरेतौ स्तः। सर्वस्मात्। आमि सर्वनाम्नः सुट्। ७।१।५२। अवर्णान्तात्सर्वनाम्नो विहितस्यामः सु
डागमः स्यात्। एत्वषत्वे। सर्वेषां। सर्वस्मिन्। शेषं रामवत्। एवं विश्वादयोप्यदन्ताः। सर्वादिश्च पंचत्रिंशत्। सर्व विश्व उभ उभय डतर डतम अ
न्य अन्यतर इतर त्वत् त्व नेम सम सिम। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां। स्वमज्ञातिधनाख्यायां। अन्तरं बहिर्योगोपसं
व्यानयोः त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् इति। उभशब्दो द्वित्वविशिष्टस्य वाचकः। अत एव नित्यं द्विवचनान्तः
तस्येह पाठस्तु उभकाविति अकजर्थः। न च कप्रत्ययेनेष्टसिद्धिः। द्विवचनपरत्वाभावेनोभयत उभयत्रेत्यादाविवायच्प्रसङ्गात्। नतूक्तं। उभयो
न्यत्रेति। अन्यत्रेति द्विवचनपरत्वाभावे। उभयशब्दस्य द्विवचनं नास्तीति कैयटः। अस्तीति हरदत्तः। तस्माज्जसः यजादेशस्य स्थानिवद्भा
वेन तयपप्रत्ययान्ततया प्रथमचरमेति विकल्पे प्राप्ते विभक्तिनिरपेक्षत्वेनाऽन्तरंगत्वान्नित्यमेव संज्ञा भवति। उभये।। ((मात्रं तु दक्षिणोत्तरपूर्वाणा
मिति भाष्यकारप्रयोगात् एवं। आम इति सर्वनाम्न इति पंचम्या निरवकाशतया आमीति सप्तम्याः स्वस्य इत्युत्तरसूत्रे कृतार्थो षष्ठी प्रकल्प्यत इति भावः। पंचत्रिंश
दिति। पंचचत्वारिंशच्चेति वृद्धः। पंचाधिका त्रिंशदिति तत्पुरुषो वा न च संख्यायाः तत्पुरुषस्येति वक्ष्यमाणवार्तिकेन समासांतो डच् स्यादिति वाच्यं। तत्रैव वार्तिके

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सु.
सि.कौ.
टी.त.
८३

न्यत्राधिकलोपादिप्रयुक्तत्वात्। ननु सर्वेषां नाम सर्वनामेत्यन्वर्थत्वात्संज्ञायाः सर्वविश्वादय एव संज्ञिनो भविष्यन्ति नान्ये इति किमनेन पंचत्रिंशदिति परिग
णनेन सर्वादीनि इति सूत्रे एवमेव वा परिगणनाभावे कृत्स्नसमस्तादिष्वतिप्रसंगात्। एवं च पंचत्रिंशत्संख्याकानि सर्वादीन्येव सर्वनामसंज्ञकानि नान्यानी
ति नियमाय सर्वादीनि इति सूत्रमत्यावश्यकं। न त्वनुनासिकसंज्ञासूत्रमिव मंदप्रयोजनमिति बोध्यं। पूर्वपरा। व्यवस्थायामसंज्ञायां यानि पूर्वापरावरदक्षिणो
त्तरापराधराणि तानि सर्वादिगणे पठितानि शिष्टानि नान्यानीत्यर्थः सर्वनामसंज्ञा तु सर्वादीनि सर्वनामानीत्यनेनैव सिध्यति। एवमुत्तरसूत्रद्वयेऽपि बोध्यं। अत एवेति। द्वयोर्हि वचन
स्यैव युक्तत्वादिति भावः। नित्यं द्विवचनान्त इति। सर्वदा द्विवचनान्त इत्यर्थः। नचैवं उभाद्युदात्तो नित्यं उभस्य सर्वनामत्वे कोऽर्थ इति सूत्रकारभाष्यकारप्रयोगो विरु
ध्यत इति शंक्यं। अर्थपरस्यैव नित्यं द्विवचनान्तत्वात् न तु स्वरूपानुकरणपरस्येत्यभ्युपगमात्। अयं सर्वादिषु उभशब्दपाठो व्यर्थः। सर्वनामकार्याणां स्मायादीनां द्वि
वचनेऽभावात्। न च सर्वनाम्नस्तृतीया चेति सूत्रे णोभाभ्यां हेतुभ्यां उभयोर्हेत्वोरिति षष्ठीतृतीयासिद्धिस्तत्फलमिति वाच्यं। निमित्तकारणहेतुषु सर्वासां प्रायदर्श
नमिति वार्त्तिकेनैव गतार्थत्वात्। न च वृत्तिकृता सर्वनाम्नस्तृतीया चेति सूत्रे पठितत्वादिदमपि वार्त्तिकं सर्वनाम्न एव सर्वविभक्तिप्रापकं नान्यस्येति वाच्यं। भा
ष्ये हेतौ इति सूत्रे तद्वार्त्तिकस्य पठितत्वात् इत एवानेन कारणेन वसति अन्नस्य कारणेनान्नस्य हेतोर्वसतीत्याशंक्याह। तस्येह पाठस्त्विति। ननु कप्रत्य
येनापीष्टसिद्धेः किमनेन अकजर्थपाठेन। न च काकचोः स्वरे विशेषोऽस्तीति वाच्यं। प्रत्ययस्वरेण चित्स्वरेण वान्तोदात्तत्वे विशेषाभावादित्याशंक्याह। नचेति
उभशब्दस्य द्विवचनपरत्वं अकच्प्रत्ययेन विहन्यते। प्राक् जायमानत्वात्तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणात्। कप्रत्ययस्तु विहन्त्येव प्रातिपदिकात्परत्र
जायमानत्वादित्याशयेनाह। द्विवचनपरत्वाभावेनेति। अयच्प्रसंगादिति। उभशब्दात्त्रतसोः परतः स्वार्थे यथा अयच् भवति तथा कप्रत्यये सति स्यादिति भा
वः। यद्यपि स्वार्थे अयच् दृष्टान्तेऽपि दुर्लभस्तथाप्युभाद्युदात्त इति सूत्रे नित्यमिति योगविभागात्सुलभ एव। तथाहि। उभाद्युदात्तः। द्वित्रिभ्यामिति सूत्राद्वेति नानुवर्तते ८३
अस्वरितत्वात्। अवयववृत्तेः संख्यावाचिन उभशब्दात् अवयविन्यर्थे अयच् स्यात्। उभयो मणिः। उभयः पाशः। ततो नित्यं। उभशब्दात् वृत्तिविषये नित्यमयच् स्या
त् स्वार्थे। तेन उभयतः उभयत्र उभयपक्षविनीतनिद्रः स्या—दिति सिद्धं। नन्वेवमकचि कृतेऽप्ययच् दुर्वारः। वृत्तिविषये स्वार्थे नित्यमयजिति त्वयैवोक्तत्वादिति

43

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेदेवं नर्हि योगविभागस्येष्टसिध्यर्थं तथा उभौ साभ्यासस्येति निर्देशेन च यत्र द्विवचनं न श्रूयते तत्रैवायमिति व्याख्यायते न तु द्वन्द्वविषय इति न दोषः। तदुक्तमि
ति वार्त्तिककृतेति शेषः। उभयो न्यत्रेति। उभयेतियः स्वार्थिको यजंतः सः अन्यत्र प्रयुज्यते न तु द्विवचने परत इत्यर्थः। न च उभाविप्यारोद्विवचनपरत्वं दुरुपपादं उभ
यतः आश्रयत्वेऽन्तादिवद्भावविरहादिति वाच्यं। उभशब्दाद् उत्पन्नं द्विवचनं लुकानापहृतं यत्र तत्रोऽन्यत्राय जिति विवक्षितोऽर्थ इति मनोरमायामुक्तत्वात्। एवं च सर्वा
दिषु भशब्दपाठोऽकजर्थ इति स्थितं। भाष्ये तु कप्रत्ययस्य स्वार्थिकत्वेन स्वार्थाभिधानसमर्थत्वादुभशब्दात्परस्य द्विवचनपरत्वमस्त्येवेत्युभशब्दपाठः स
र्वादिगणे प्रत्याख्यातः। मनोरमायां तु भाष्यप्रत्याख्यानं प्रौढिवादमात्रं कृत्रिमस्यैव द्विवचनस्येह गृहीतुमुचितत्वादन्यथात्र नसिलादावतिप्रसंगत्वादित्यादि स्थि
उतरडतमौ प्रत्ययौ। प्रत्ययसंज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति। सुप्तिङन्तमिति ज्ञापकात्। तथापीह तदन्तग्रहणं। केवलयोः संज्ञायाः प्र
योजनाभावात्। अन्यतरोऽन्यतमशब्दाववुत्पन्नौ। स्वभावाद्द्विबहुविषये निर्द्धारणे वर्त्तेते। तत्रान्यतमशब्दस्य गणे पाठाभावान्न संज्ञा। त्वत्वदिति द्वाव
प्यन्यवाचिनावन्यपर्यायौ। एक उदात्तोऽपरोऽनुदात्त इत्येके। एकस्तान्त इत्यपरे। नेम इत्यर्द्धे। सम सर्वपर्यायः। तुल्यपर्यायस्तु नेह गृह्यते। यथासंख्यम
नुदेशः समानामिति ज्ञापकात्। अन्तरं बहिर्योगेति गणसूत्रे पुरीति वक्तव्यं। अन्तरायां पुरि। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामस
ञ्ज्ञायां। १।१।३४। एतेषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणपाठात्सर्वत्र या प्राप्ता सा जसि वा स्यात्। पूर्वे पूर्वाः। स्वाभिधेयापेक्षोऽवधिनिय
मो व्यवस्था। व्यवस्थायां किं। दक्षिणा गाथकाः कुशला इत्यर्थः। असंज्ञायां किं। उत्तराः कुरवः॥ ९ तं। उभयशब्दस्येति। उभौ अवयवौ यस्य उभयः
उभादुदात्तो नित्यमिति तयपोऽयजादेशः। अनभिधानादिति भावः। तथा चोभयशब्दस्य द्विवचनानुत्पादादसर्वविभक्तित्वेन अव्ययत्वे प्राप्ते तद्धितश्चासर्व
विभक्तिरिति सूत्रे तद्धितामां ग्रहणं च पाठे इति भाष्यकैयटेनावतारितं। असीतिप वर्तिकल्पाप चतिरूपमित्यादिवारणेन पाठस्योपक्षीणत्वादनभिधाने
प्रमाणं नास्तीति भावः। जसादिति। उभयशब्दादित्यर्थः। तयपूप्रत्ययान्त तयेति। उभयशब्दस्येति शेषः। यदि तूभयशब्दादयच् स्यात्तदा नतु तयप आदेश इति नि
ष्कर्षः। स्वीक्रियते तदात्र प्रथमचरमतयेति वैकल्पिकप्राप्तिर्नास्त्येवेति बोध्यं। नित्यैवेति। उभये अमित्रा इति तु छान्दसत्वाद्बोध्यं॥ ॥ डतरडतमाविति। किं यन्नदोर्निर्द्धा

॥१६५२ [illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु·
सि·कौ·
टी·त·
५४

एकाच्प्राचामिति विहितौ। अव्युत्पन्नावेति। एतच्च पक्षद्वयं कैयटे स्पष्टं। एके इति काशिकाकाराः। एतं त्वं मन्ये इत्युदात्तस्य उतत्वः पक्षं नित्यनुदात्तस्य च दर्शना
दिति भावः। एक इति। प्रथम इत्यर्थः। संहितया पाठे नांतत्वस्यास्फुटत्वेपि नांतः श्रुतव्यः। अन्यथा एकोश्न्यासक्तदेव पठेत्। न च तांते विप्रतिपत्तव्यं। त्वंत्वसमसि
मेत्यनुच्चानीति फिट्सूत्रात्। तथा च ऋङ्मंत्रः। त्वरीरुत्व रभवतिसूत उत्वदिति। जयदेवोपि प्रायुंक्त। त्वदधरमधुरमधूनि पिवंतमिति। त्वत्तोऽन्यस्याधर इति वि
ग्रहो न तु त्वाधर इति। पंचस्विति। त्वशि त्वशि रहसि भवं तमिति पूर्ववाक्येन सहान्वयापत्तेः। सम इति। तथा च श्रूयते। मानो वृकाय वृक्ये समस्मै। उतो समस्मि
न्नित्यादि। सिमः कृत्स्ने वृत्तौ च सामान्य मर्यादावचनयोः। गणसूत्र इति। यद्यपि भाष्ये ऽष्टाध्यायीस्थसूत्रे पुरोतिवक्तव्यमिति वार्तिकं पठितं तथापि तद्गणसूत्रस्यैव
प्रपंचो न तु जसि विभाषाविधायकस्य। अत इत्यधिकृत्य जसः शी विधानादावं नान्याप्यभावात्। अंतरायामिति। प्राकाराद्यायां तद्देतर्वर्जिन्यां वेत्यर्थः। लिंगविशिष्ट
परिभाषया एकादेशस्य पूर्वातत्वेन ग्रहणाद्वा सर्वनामतायाः प्राप्तिर्वोध्या। न्यदृत इत्येतौ उक्तपरामर्शकौ। तत्राद्यस्पष्टं दर्श इति गणसूत्रे त्वकारोक्तिर्नादर्तव्या। स्पष्टं
दक्षिणवत्वमिति सूत्रेष्टुंदो ग्रहणे वैयर्थ्यापत्तेः। एक इति एकोन्यार्थे प्रधाने च प्रथमे केवले तथा। साधारणे समानेऽल्पे संख्यायां च प्रयुज्यते। इत्थं सर्वादिगणं व्याख्याये
दानीं तदंतर्गतत्रिसूत्रीं समानाकारामष्टाध्यायीस्थां त्रिसूत्रीं व्याचष्टे पूर्वपरेत्यादिना। स्वाभिधेयेति। स्वस्य पूर्वादिशब्दस्याभिधेयेनापेक्ष्यमाणस्यावधेर्निय
म इत्यर्थः। अपेक्षत इत्यपेक्षः कर्मणि घञ्। कथं तर्हि दिशः सपत्नी भव दक्षिणस्या इति। अत्राहुः। अल्पे वात्रापि व्यवस्था। प्रसिद्धत्वान्नावधिवाची शब्दः प्रयुज्यते। न
च संज्ञायान्निषेधः। आधुनिकसंकेतो हि संज्ञा न च दिक्षु सास्तीति। दिक्षु चिरंतनः कुरुष्वत्वाधुनिकः संकेत इत्यत्र तु व्याख्यानं वचनमेव प्रमाणं। एतेन विश्वेषां देवानामि
ति व्याख्यातं। वेदे प्रसिद्धत्वाद्देवगणविशेषे विश्वशब्दस्याधुनिकसंकेताभावात्। दक्षिणगाथका इति। गस्थकन्निति शिल्पिनि थकन्। इहामुकस्मात्कुशला इत्य
वध्यन्वयसंभवेपि तन्नियमो नास्तीति भावः। एवमधरेणावूलरागः। उत्तरे प्रत्युत्तरे च शाकद्वत्यपि प्रत्युदाहर्तव्यं। उत्तराः कुरव इति। सुमेरुमवधिमपेक्ष्य कुरुषु उत्त ५४
रशब्दो वर्तत इत्यस्तीह व्यवस्था। किं त्वाधुनिकसंकेतोयमित्याहुः॥ ॥

५५

स्वमज्ञेति। आत्माऽऽत्मीयज्ञातिधनवाची स्वशब्दस्तत्र ज्ञातिधनयोः पर्युदासादात्माऽऽत्मीयौ परिशिष्टावित्याशयेन व्याचष्टे। आत्मीया इत्यर्थः। आत्मान इति वा। यत्त्वाहुः।
आत्मनि स्वशब्दो नपुंसकस्तेन स्वे स्वा इत्युदाहरणं न त्वायुक्तमिति तद्भ्रसान्। स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वो स्त्रियां धन इत्यमरसिंहोक्तेरात्मन्यपि स्वशब्दस्य
पुंस्त्वात्। न च स्वो ज्ञाताविति अमरकोशे आत्मनीत्यस्य स्वमित्युत्तरेणान्वयादात्मवाची स्वशब्दो नपुंसक एवेति वाच्यं। स्वः स्यात्पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीये स्त्रियां धने इति
मेदिनीकोशविरोधेनात्मनीति पूर्वान्वयित्वं तु अनन्वयि इति व्याख्यातुमुचितत्वात्। किंच। विभाषा जसीति प्रकरणे स्वमात्मीये इत्येव वक्तव्ये गुरुनिर्देशं कुर्वन् सू

स्वमज्ञातिधनाख्यायां। १।१।३५। ज्ञातिधनान्यवाचिनः स्वशब्दस्य या प्राप्ता संज्ञा सा जसि वा स्यात्। स्वे। स्वाः। आत्मीया इत्यर्थः। आत्मान इति वा।
ज्ञातिधनवाचिनस्तु स्वाः ज्ञातयोऽर्था वा। अन्तरं बहिर्योगोपसंव्यानयोः। १।१।३६। बाह्ये परिधानीये चार्थेऽन्तरशब्दस्य या प्राप्ता संज्ञा सा ज-
सि वा स्यात्। अन्तरे। अन्तरा वा गृहाः बाह्या इत्यर्थः। अन्तरे अन्तरा वा शाटकाः परिधानीया इत्यर्थः। पूर्वादिभ्यो नवभ्यो वा। ७।१।१६। एभ्यो
ङसिङ्योः स्मात्स्मिनौ वा स्तः। पूर्वस्मात्। पूर्वात्। पूर्वस्मिन्। पूर्वे। एवम्परादीनामपि। शेषं सर्ववत्। एकशब्दः संख्यायां नित्यैकवचनान्तः।
न बहुव्रीहौ। १।१।२९। बहुव्रीहौ चिकीर्षिते सर्वनामसंज्ञा न स्यात्। त्वकम्पिता यस्य स त्वत्कपितृकः। अहकम्पिता यस्य स मत्कपितृकः। इह
समासात्प्रागेवाऽलौकिके प्रक्रियावाक्ये सर्वनामसंज्ञा निषिध्यते। अन्यथा लौकिके विग्रहवाक्य इव तत्राप्यकच् प्रवर्तेत। स च समासेऽपि श्रू-
येत। अतिक्रान्तो भवकन्तमतिभवकानिति वत्। भाष्यकारस्तु त्वकत्पितृको मकत्पितृक इति रूपे इष्टापत्तिं कृत्वैतत्सूत्रं प्रत्याचख्यौ। यथो-
त्तरं मुनीनां प्रामाण्यं। संज्ञोपसर्जनीभूतास्तु न सर्वादयः। महासंज्ञाकरणेन तदनुगुणानामेव गणे सन्निवेशात्। अतः संज्ञाकार्यमन्तर्गण-
कार्यं च तेषां न भवति। सर्वो नाम कश्चित्तस्मै सर्वाय देहि। अतिक्रान्तः सर्वमतिसर्वस्तस्मै अतिसर्वाय। अतिकतरं कुलं। अतितत्॥

त्रकारेऽप्यात्मवाचिस्वशब्दस्य पुंस्त्वे प्रमाणं। तस्मात् स्वे स्वा इत्यस्य आत्मान इति विवरणं सम्यगेवेति स्थितं। ज्ञातिधनवाचिनस्त्विति। नाच्छीत्वेन गणे निनाज्ञा
तिधनयोरप्यात्मीयत्वं पुरस्कृत्य प्रवृत्तौ सर्वनामता स्यादेवेति ध्वनयति। एतदर्थमेव बहिःसूत्रे आख्याग्रहणं कृतं। स्वमात्मीयाख्यायामिति वक्तव्ये ज्ञातिधनयोः पर्यु

CC-0. In Public Domain. Digitization by eGangotri

सु॰

सि॰ कौ॰ दासाः। अथलं मात्रालाघवाय। न च स्वमात्मीयपर्यायोरुच्यमाने आख्याग्रहणं नापेक्षितमिति वाच्यं वस्तुतः आत्मीयस्यापि ज्ञातित्वेन धनत्वेन विवक्षायां सर्वनामता

टी॰ त॰ मा भूदिति तस्यावश्यकत्वात्। अंतरं बहिर्योगोपसंव्यानयोरिति। बहिरित्यनावृतो देशो बाह्यं चोच्यते। तत्राद्यमर्थं गृहीत्वाह। बाह्य इत्यर्थ इति। द्वितीये त्वा

७५ भ्यंतर इत्यर्थो बोध्यः। बाह्येनाभ्यंतरस्य योगोऽस्ति। अर्थद्वयमप्याकरे स्थितं। इदमेवार्थद्वयं मनसि निधाय अन्तरायां पुरीत्यत्र प्राकाराद्बाह्यायामनावृतदेशवर्तिन्यां

चेति व्याख्यातं। उपसंव्यानशब्दोऽपि करणव्युत्पत्त्या उत्तरीयपरः। कर्मव्युत्पत्त्या त्वन्तरीयपरः। एकशब्दस्याप्यावर्त्या उक्तास्तत्र विशेषमाह। संख्यायामिति। अन्ये

ष्वनुसमस्तस्वर्थेष्वेकवचनांतरमपि स्यादेव। एके एकेषामिति यथेति भावः। न बहुव्रीहौ। कृते बहुव्रीहौ निषेधोऽयमर्थः। उपसर्जनीभूतानां सर्वादेः स्यादिति वक्ष्यमाण

त्वात् अत आह। चिकीर्षित इति। बहुव्रीहावित्यत्र विषयसप्तम्याश्रयणादयमर्थो लभ्यते। त्वकमिति। अज्ञाते कुत्सिते वाऽव्ययसर्वनाम्नामित्यकच्। एवमहक

मित्यत्रापि। प्रक्रियावाक्ये इति। अलौकिकविग्रहवाक्ये इत्यर्थः। तत्र युष्मद् सु पितृ सु इत्याद्याकारकं। ननु तत्राकच् प्रवर्ततां को दोष इत्यत आह। स चेति॥

न च निमित्तस्यानुपसर्जनत्वस्य विनाशोन्मुखत्वात् कृतव्यूहपरिभाषया समासात्प्रागपि सर्वनामसंज्ञा न भविष्यतीति वाच्यं। तस्या अनित्यत्वात्। तत्र चैतत्सूत्रस्यै 45

व ज्ञापकत्वात्। अतिभवकानिति। इदमेव ज्ञापनफलमिति भावः। अन्यादयः क्तांताद्यर्थे द्वितीयेति श्रितादिति समासः। मन्याचख्या वेति। कोः कृ इति सनुक्ग्रहणं

प्रकृतिप्रत्यापत्तिवचनं वा अनित्यत्वे ज्ञापकं। लक्ष्यानुरोधाच्च व्यवस्थेति भावः। यथोत्तरमिति। तथा च संमतिभाष्यकारो कैयटव्यवस्थेति भावः। गणे सन्निवेशादिति

एतेन पूर्वापरेति गणसूत्रे संज्ञायामिति ग्रहणं मंदप्रयोजनमिति ध्वनितं। संज्ञायां यानि पूर्वादीनि तेषां गणे संनिवेशाभावात्। एवमष्टाध्यायीस्थे पूर्वपरावरेति सू

त्रेऽप्यसंज्ञायामित्येतत्पृथक्कं। न च तद्भावे जसि परतः संज्ञायामुत्तराः। कुरव इत्यत्राप्राप्तविकल्पः स्यादिति वाच्यं। सर्वनामसंज्ञाया अन्वर्थत्वेन संज्ञायामप्राप्त ७५

विधेरसंभवात् संज्ञायामेव पूर्वेण प्राप्तासंज्ञा जसि वा स्यादिति वक्तुमुचितत्वात्॥ संज्ञाकार्यमिति। सर्वनामसंज्ञाप्रयुक्तं स्मायादिकमित्यर्थः। अंतर्गणकार्यमि

ति। अड्डतरादिभ्यः। त्यदादीनामः। तदोः सः सावित्यादिकमित्यर्थः। अतिकतरमिति। अत्र द्डादेशेन। अतितरमित्यत्र तु त्यदाद्यत्वं तदोः सः साविति सत्वं च नेति भा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयासमासे। अत्र विभाषादिक्समासे इत्यतः समास इत्यनुवर्त्तमाने पुनः समासग्रहणं गौणार्थस्यापि संग्रहार्थमित्यभिप्रेत्याह। तृतीयासमासार्थेति। इह पूर्वसदृशेति विहितः समासो गृह्यते प्रतिपदोक्तत्वात्। ननु कर्तृकरणेति समासः। तेन लूयकाकृतमित्यत्र निषेधो न भवति। ओकारसकारभकारादौ सुपीति व्यवस्थापयिष्यमाणत्वादिह सुपष्टेः प्रागकच्। समुदायस्येति। तत्रैव द्वंद्वस्य मुख्यत्वात्। न च द्वंद्वे यानि सर्वादीनीति संबंधः। कारकाणां क्रिययैवान्वयात्। न च द्वंद्वे विद्यमानानि यानीति संबंधः। विद्यतिक्रियाध्याहारे गौरवात्। निषेध्यायाः भवतिक्रियाया एव प्राधान्येन तदन्वयस्यैव न्याय्यत्वाच्चेति भावः। सुट्प्रसंग इति। न च द्वंद्वे चेति निषेधसामर्थ्याद्वर्णाश्रमेतराणामित्यादौ सुडेव न प्रसज्यत इति वाच्यं। अनांगस्यात्र तत्सिलादेर्व्यावृत्त्या तत्सामर्थ्यस्योपक्षीणत्वात्। जसाधारमिति। शीभावेन जस्य

तृतीयासमासे। १।१।३०। अत्र सर्वनामता न स्यात्। मासपूर्वाय। तृतीयासमासार्थवाक्येपि न। मासेन पूर्वाय। द्वन्द्वे च। १।१।३१। द्वन्द्वे उक्ता संज्ञा न। वर्णाश्रमेतराणां। समुदायस्यायं निषेधो न त्ववयवानां।
नचैवं तदन्तविधिना सुट्प्रसङ्गः। सर्वनाम्नो विहितस्यामः सुडिति व्याख्यानत्वात्। विभाषा जसि। १।१।३२। जसाधारं यत्कार्यं शीभावाख्यं तत्र कर्त्तव्ये द्वन्द्वे उक्ता संज्ञा वा स्यात्। वर्णाश्रमेतरे। वर्णाश्रमेतराः। शीभावमात्रं त्वेवं विभाषेत्युक्तं। अतो नाकच्। किंतु कप्रत्यय एव। वर्णाश्रमेतरकाः। प्रथमचरमतयाल्पार्द्धकतिपयनेमाश्च। १।१।३३। एते जसः कार्यं प्रत्युक्तसंज्ञा वा स्युः। प्रथमे। प्रथमाः। इत्यादि शेषं रामवत्। तयप्प्रत्ययस्तदन्ता ग्राह्याः। द्वितये। द्वितयाः। नेमे। नेमाः। शेषं सर्ववत्। विभाषाप्रकरणे तीयस्य ङित्सूपसंख्यानं। द्वितीयस्मै। द्वितीयायेत्यादि। एवं तृतीयः। अर्थवद्ग्रहणान्नेह। पटुजातीयाय॥

९ पहृत्त्यौपचारिकमाधारत्वमत्र बोध्यं॥ यद्वा। जसइर्जसिः तस्मिन्सौत्रः सप्तम्या लुक् इत्यर्थं तो व्याचष्टे। जसाधारमिति। अन्यथा सत्यकचि जसः शीत्वस्याप्रवृत्तेर्वर्णाश्रमेतरके इत्यपि रूपं स्यादिति भावः। यदा अज्ञातः कुत्सितो वा इतरः इतरकः इत्यकचं कृत्वा वर्णश्च आश्रमश्च इतरकश्चेति द्वंद्वः क्रियते तदा रूपद्वयं स्यादेवा परं तु इतरशब्देन द्वंद्वं कृत्वा अज्ञाना वर्णाश्रमेतरा इत्यज्ञानाद्यर्थयोगोपसर्जनीयतेतरा वर्णाश्रमेतरका इत्येकमेव रूपं साध्विति बोध्यं ननु द्वंद्वावयवस्येतरशब्दस्यापि अकच दुर्वारः। अवयवस्य सर्वनामतानपायात्। द्वंद्वे चेत्यनेन हि समुदायस्य निषेधो न त्ववयवानामित्युक्तमिति चेत् आत्राहुः। सिद्धांते हि जहत्स्वार्था वृत्तिपक्षो मुख्यस्तस्मिंश्च पक्षे अवयवानां निरर्थकत्वादज्ञाताद्यर्थयोगाभावेनाक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चः प्राप्तिरेव नास्ति। येषुहंहे चेति चकारेणावयवेष्वपि संज्ञा निषिध्यत इत्युच्यते तेषां अजहत्स्वार्थवृत्तिपक्षाभ्युपगमेपि न दोष इति। प्रथमचरम ॥ नेमशब्दस्य नित्यं प्राप्ते अन्येषामप्राप्ते चायमारंभः। तयः प्रत्यय इति। संख्याया अवयवे तयबिति विहितः। तीयस्येति। द्वेस्तीयः। त्रेः संप्रसारणं चेति विहितस्य। पटुजातीयायेति। प्रकारवचने जातीयर्॥ ॥जराया जर। अष्टन आ विभक्ताविति तो विभक्ताविति अनुवर्त्य अचि र ऋत इत्यतो नु इ वृत्तेनान्वीत्य नेन विशेष्यते विशेषणेनेह तदादिविधिः यस्मिन् विधिस्तदादावल्ग्रहणे इत्यस्य तु दंतविधेरपवादत्वादित्याशयेनाह। अजादौ विभक्ताविति। अजादौ किं। जराभ्यां। जराभिः। विभक्ताविति किं। जराया इदं जारं। न च जराया असुङ् वास्त्विति वाच्यं। जराशब्दान्तत्करोतीति णिचि णाविष्ठवदिति टिलोपे ततः क्विपि णिलोपे चैकदेशविकृतस्यानन्यतया जरित्यस्य जराशब्दत्वादसुङि ङे चेत्यस्य प्रवृत्त्या जसौ जस इति रूपापत्तेः। इष्यते त्वत्रापि जरसौ जरस इति। न च णिलोपस्य

जराया जरसऽन्यतरस्यां। ७।२।१०१। जराशब्दस्य जरस् वा स्यादजादौ विभक्तौ। पदाङ्गाधिकारे तस्य तदन्तस्य च। अनेकाल्त्वात्सर्वादेशः। प्रसेनिर्दिश्यमानस्यादेशा भवन्ति। एकदेशविकृतस्यानन्यत्वात् जरशब्दस्य जरस्। निर्जरसौ। निर्जरसः। इनादीन् बाधित्वा परत्वाज्जरसानि। निर्जरसा। निर्जरसे। निर्जरसः। पक्षे हलादौ च रामवत्। वृत्तिकृता तु पूर्वविप्रतिषेधेन इनातोः कृतयोः सन्निपातपरिभाषया अनित्यत्वमाश्रित्य जरसि कृते निर्जरसिन निर्जरसादिति रूपं न तु निर्जरसा निर्जरस इति केचिदित्युक्तं। तथा भिसि निर्जरसैरिति रूपान्तरमुक्तं। तदनुसारिभि

स्यानिवद्भावाद्विभक्तिपरत्वाभावेन जरसावित्यादि न सिध्यतीति शंक्यं। कौलुष्मं नस्थानिवदिति ॥ अथ षष्ठ्येकवचने निर्जरस्येत्येव रूपमिति स्त्री कृतमेतच्च भा
निषेधात्। यद्यपि कौलुष्मं नस्थानिवदिति क्वाचित्कं तथापीह तदाश्रयणे जरसमिति गुर्वादेशाकरणमेवमानमित्यवधेयं। पदांगाधिकार इति। परिभाषेयं येन विधिरित्यस्य प्रपंचभूता। अत एव मनोरमायां पदसंगं च विशेष्यं विशेषणे न च तदंतविधिरित्युक्तं। विशेष्यमिति तु प्रायेणेति बोध्यं तेनाल्लोपोन इति सूत्रे अंगावयवो योऽन् इति वक्ष्यमाणग्रंथः संगच्छते। अत्र नव्याः नन्वाकरे तस्य तदंतस्य परस्य चेति प्रचुरः पाठः। तदंतस्येति पाठे तु बहुच्पूर्वकेष्वपि पदांगाधिकारकार्याणि प्रवर्त्तेरन्निन्याशंक्य समादधुः। अनभिधानात्पदांगाधिकारकार्याणि बहुच्पूर्वकेषु न प्रवर्त्तन्त इत्याशयेन फलितार्थकथनपरं तद्

CC-0. In Public Domain. Digitization by eGangotri

यातदुत्तरपदस्य चेति पठितं न लिटमपूर्वं वचनमिति। सोपसर्गस्य सर्वस्य स्थाने जरसादेशमाशंक्याह। निर्दिश्यते। ननु तदं न विधिनापि जराशब्दांतं यदं
गंतत्रैव निर्दिश्यमानजराशब्दे जरसादेशेन भवितव्यं न लत्रेत्यत आह। एकदेशविकृतस्येति। पदाधिकारेपि तदंतविधावुदाहरणं तदंतस्यापि हलरले
दीर्घो हो निदाघ इत्यादि वक्ष्यति। अलुगुत्तरपद इत्ययमुत्तरपदाधिकारो पि पदाधिकार ग्रहणेन गृह्यते। तत्फलं तु तत्रैव स्फुटी करिष्यते। पद्ये इति
जरसादेशाभावे। तदनुसारिभिरिति। यत्तु निर्जरसिनेत्यादि व्याचक्षते तन्मतानुसारिभिरित्यर्थः। निर्जरस्येत्यवेति। पूर्वविप्रतिषेधेन स्या
देशे कृते जरसादेशो न प्रवर्त्तत इत्येकमेव रूपमिति ते वामाशयः। अत एव वीतजन्म जरसः परं शुचिः ब्रह्मणः परमितिभारविप्रयोगमसमंजसं मता
वीतजन्म रजस इति पठनीयमिति तैरुक्तं। एतच्चेति भाष्यकृतां हि टाङसीति सूत्रे इनाऽऽत्तौ प्रत्याख्यायनादेशमदादेशं च विधायनादेशे परे एत्वं आङि

पद्दन्नोमासहृन्निशः सन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छसप्रभृतिषु ६।१।६३। पाद दन्त नासिका मास हृदय निशा असृज् यूष दोषन्
कृत् शकृत् उदक आस्य एषां पदादय आदेशाः स्युः शसादौ वा। यत्तु आसनशब्दस्य आसन्नादेश इति काशिकायामुक्तं तन्माधारिकं॥ पा
दः। पादौ। पादाः। पादं। पादौ। पदः। पादान्। पादेन। पद्भ्यामित्यादि॥ ९ चापरत्वान्ङि चेति योगं विभज्य साधितं। तथा च निर्जरसिनेति
जरसादित्ये तद्भाष्यविरुद्धमिति स्पष्टमेव। न च नादेशे कृते हलि लोप प्रवृत्त्या अनेनेत्येतन्न सिध्यतीति शंक्यं। न शब्दे परतो विशिष्य नादेश विधानात्। तथाहि। अनाप्य
क इत्यत्र अन् नापीति पदच्छेदः। नपुंसकत्वात्सोर्लुकि न लोपः। नापीति समाहारद्वंद्वात्सप्तम्येकवचनं। न च ङसेरदादेशे कृते पररूपस्यादित्यपि शंक्यं। अकारोच्चारण
सामर्थ्याद्दीर्घसंभवात्। तथा जराया जरसन्यतरस्यामित्यस्मिन्नेव सूत्रे भाष्य उक्तमतिजरैरिति भवितव्यं। सन्निपातपरिभाषयेति। ननु चनिर्जरसैरित्यपि भाष्यविरुद्धमेवा
एतेनातो भिस ऐसिति सूत्रे ऐसिति वक्तव्ये ऐस्करणं निर्जरसैरितिरूपार्थमिति केषांचिद्व्याख्यानं आमादिकमिति स्पष्टमेव॥ ॥ पद्दन्नो। शसादौ वेति अनुदात्तस्य च
र्दुपधस्येत्यत अन्यतरस्यामित्यनुवर्त्तत इति भावः। अत्र शस प्रभृतयो निमित्ततयोपात्तास्ते च पदाद्यादेशानुरूपान् प्रकृतिविशेषान् आक्षिपंतीत्याह। पाददंतेति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सु
सि·कौ·
टी·त·
९७

यद्यपि शीर्षं छंदसीत्यतः छंदसीति अनुवर्त्तते तथापि भाषायामपि क्वचित्पदादयो भवंति मासश्छंदसीति वार्तिके छंदोग्रहणसामर्थ्यादिति वक्ष्यति॥ आमाह्निक
मिति। तथाहि। आस्नो वृकस्य वर्त्तिकामिति मंत्रे मुखादित्यर्थः औचित्यात्। वृकस्य चित् वर्त्तिकामंतरास्यादिति मंत्रांतरासंवादाच्च। तथाहि व्याजृम्भाननमानीति
ति मंत्रे मुखे इत्यर्थः। एवमासन्यं प्राणमूचुरित्यादि बोध्यं॥ ॥ सुडनपुंसकस्य। सुट् स्त्रीपुंसयोरिति वक्तव्ये अनपुंसकस्येति वचनं ज्ञापयति प्रसज्यप्रतिषेधे
ऽपि न ञ्समासोस्तीति कैयटः। तेन असूर्यंपश्यानि मुखानीत्यादि सिद्धं। स्वादिष्वसर्वनामसु इत्यत्र सप्तमी बहुवचनमिति न शंक्यं किंत्वसर्वनामस्थान इति पर्युदासा
त्प्रथमैकवचनमेव। सुपीत्येव सिद्धे आदिग्रहणमधिकपरिग्रहार्थमित्याशयेनाह। कप्प्रत्ययावधिष्विति। नन्वेवं राजेत्यत्र नलोपो न स्यात्प्रत्ययलक्षणेन स
र्वनामस्थानपरतया न पदत्वाभावात् नैष दोषः सोपरतः। स्वादिष्वित्यनेन पदत्वासंभवेपि सुप्विशिष्टस्य सुप्तिङंतमिति पदसंज्ञायां हल्ङ्यादिना सुलोपे एकदेश

सुडनपुंसकस्य। १।१।४३। सुडिति प्रत्याहारः। स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य। स्वादिष्वसर्वनामस्थाने। १।४।
१७। कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्। यचि भं। १।४।१८। यकारादिष्वजादिषु च कप्प्रत्ययावधिषु
स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात्॥ आकडारादेका संज्ञा। १।४।१। इत ऊर्ध्वं कडाराः कर्मधारय इत्यतः प्रागेकस्यैकैव संज्ञा ज्ञेया
या पराऽनवकाशा च। तेन शसादावचि भसंज्ञैव न पदत्वम्। अतो जश्त्वन्न। दतः। दता। जश्त्वं दद्भ्यामित्यादि। मासः। माभ्यामित्यत्र रुत्वे यत्वे

विहितन्यायेन नकारांतस्य पदत्वात्। यदि तु स्वादिष्विति योगेन स्वादिषु परेषु पूर्वं पदं भवतीति पूर्वस्य पदसं॰ यलोपः। माभ्यां। माभिरित्यादि॥
ज्ञां विधाय यचि भमित्यत्र यचीति छित्वा यजादौ सर्वनामस्थाने परतः पूर्वं पदं नेति निषिध्यते तदा औजसादिषु पदसंज्ञाभावेपि सोपरतः पदत्वसंभवात् रा
जेत्यादौ नलोपे कार्ये न काप्यनुपपत्तिः। यचि भं। यचीत्यत्र ग्रहणेन समर्थानिर्देशात्तदादिविधिरित्याह। यकारादिष्वित्यादि। यकारादिषु किं। गार्ग्यः। वात्स्यः
गर्गादिभ्यो यञिति यस्येति चेति त्यकारलोपो यथा स्यात्। असर्वनामस्थानेषु किं। सुपादौ। सुपादः। विद्वांसौ। विद्वांसः। इत्यत्र वाहौ इत्यत्र वाहः। इत्यादौ पादः पन्व
सोः संप्रसारणं वाह ऊठ् इत्यादयो माभूवन्निति। आकडारा। इह प्राक्कडारात्समास इत्यस्य नावधित्वं व्याप्तिन्यायात्। तत्पुरुषो द्विगोश्चेति लिंगाच्च संज्ञाद्वय

47

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समावेशार्थं तत्र चकारस्तदाह। कडाराः कर्मधारय इत्यत इति। एकस्यैकैव संज्ञेति। उभयोः सावकाशत्वे विप्रतिषेधे परमिति परैव गृह्यते निरवकाशत्वे सैवा त
त्र परस्या उदाहरणं धनुषा विध्यतीति। अत्र शराणामपायं प्रत्यवधिभूतस्यैव धनुषो व्यधनं प्रतिसाधकतममित्युभयप्रसंगे परत्वात्करणसंज्ञा अपादानसं
ज्ञां बाधते निरवकाशायाः पूर्वस्यास्तूदाहरणं भवतश्च कच्छौ भवदीय इति। अत्र हि सिति चेति पदसंज्ञापरामपि भसंज्ञां बाधते निरवकाशत्वात्तेन त
कारस्य जश्त्वं भवति। प्रकृते तु परा अनवकाशा भसंज्ञा पदसंज्ञां बाधत इति शसादावचि सैव गृहीतुमुचितेत्याशयेनाह। यापरेत्यादि। यलोप इति। हलि
सर्वेषामित्यनेन लोपो व्योर्वलीति तु न प्रवर्त्तते। यलस्यासिद्धत्वात्॥ ❁ ॥ अल्लोपोनः॥ भस्येत्यनेनाक्षिप्तः प्रत्ययविशेषः। अंगं चेति द्वयमनो
विशेषणं अन् तु अकारस्येत्यभिप्रेत्य व्याचष्टे॥ अंगावयव इत्यादि। अन्नंतस्य भस्यांगस्याकारस्य लोपः स्यादिति प्राचां व्याख्यानेन तक्ष्णेत्यादौ तकाराकार
स्यापि लोपः स्यात्। भस्यांगस्यानोकारस्येति व्याख्याने तु अनसा मनसेत्यादौ स्यान्नान्तत्वाऽवृत्त्यादिना अन्नंतस्य भस्यांगस्यानो अकारस्येति व्याख्यानेपि अ

अल्लोपोऽनः। ६।४।१३४। अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपः स्यात्॥ ॥ ॥

नस्तद्धिते इत्यादावतिव्याप्तिरेवेति भावः। सूत्रे तपरकरणं नञ्समासभ्रमनिवारणाय कृतमित्येके॥ ननु प्राणितीति प्राण्ततः प्रासादिप्रत्यये प्राणः प्राणेत्यादा
वनितेरिति णत्वस्यासिद्धतया अतिप्रसंगः स्यादिति। न द्वारणायैव तपरकरणमस्त्विति चेन्नैवं। सवर्णदीर्घे कृते अन एव न त्रासत्वात्। न च वार्णादांगं ब
लीय इति सवर्णदीर्घात्प्रागेव लोपः प्रवर्त्तत इति। अस्त्येवानरूपमिति वाच्यं। तथा हि सति व्यावर्त्यालाभेन तपरकरणवैयर्थ्यस्य तदवस्थत्वात्। वस्तुतो वा
र्णपरिभाषेह न प्रवर्त्तते युगपत्प्रवृत्तावेव वार्णादांगस्य बलीयस्त्वात्। किं त्वनुनासिकस्येति दीर्घे सवर्णदीर्घात्प्रागपि अनो अभावाच्च। तस्मात् भ्रमनि
रासार्थमेव तपरकरणं न तु प्राण इत्यादावनोकारलोपवारणार्थमिति तेषामाशयः॥ वस्तुतस्तु। एकदेशविकृतन्यायेन भवत्येव तत्रातिप्रसंग इति त
॥ ॥ ॥ परकरणमत्रावश्यकमेवेति नव्याः॥ ॥ ॥
॥ ॥ ॥ ॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु°
सि·कौ· टी·त· ४८

रषाभ्यांनोणः॥ अत्रापदांतस्य मूर्द्धन्य इत्यनुवर्त्य णग्रहणं पदांतस्येति सूत्रं च भाष्ये प्रत्याख्यातं। समानपदे इति। निमित्तनिमित्तिनोरपदस्थत्वासंभवात्। पदे इत्यौ पत्ते वसामर्थ्यादेकपदत्वे लब्धे समानग्रहणं यत्समानमेव पदं निमित्तवत् पदभिन्नपदत्वाभाववदिति यावत्। तत्र यथा स्यादित्येतन्न दर्घो। तेन समासे रामनामगं धर्वगानमित्यादौ न भवति। तत्र हि नकारस्यैव पदवृत्तित्वेपि निमित्तवत्पदभिन्नपदस्थत्वात्। भवति हि वृत्रघ्न इत्यादौ णत्वं। निमित्तवत्पदभिन्नपदत्वाभाववद्वृत्तित्वान्नकारस्य मातृभोगीण इत्यादावपि नस्य णत्वं भवत्येव। प्रत्ययवृत्तित्वेपि निमित्तवत्पदभिन्नपदवृत्तित्वाभावात्। एतेन समानग्रहणमखंडपदत्वाभावार्थमिति व्याख्याय रामनामेत्यादावतिप्रसंगे निवारितेपि मातृभोगीण इत्यादाव व्याप्तिः स्यादेवेति केषांचिदुक्तिः परास्ता। उक्तरीत्या लव्याप्तिशंकाया निरस्तत्वात्। वृत्रघ्न इति वृत्रो मंडः। मुद्गामलकयूषस्तु भेदी दीपनपाचन इति दर्शनात्॥ पूर्वत्रासिद्धेन स्थानिवदिति। एतच्च न्यायसिद्धं। त्रिपाद्या असिद्धत्वेन तत्रत्यकार्ये अचः परस्मिन्नित्यतिदेशस्याप्रवृत्तेः। नस्येति। नस्य पूर्वत्रासिद्धेनेत्यस्य तथा च स्थलत्रये स्थानिवद्भावो वक्तव्य इत्यर्थः। संयोगादिलोप॥

रषाभ्यान्नो णः समानपदे। ८।४।१। एकपदस्थाभ्यां रेफषकाराभ्यां परस्य नस्य णः स्यात्। वृत्रघ्नः। वृत्रघ्ना। पूर्वस्मादपि विधौ स्थानिवद्भाव इति पक्षे तु अड्व्यवायइत्येवात्र णत्वं। पूर्वत्रासिद्धे न स्थानिवदिति तु इह नास्ति तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति निषेधात्

त्वक्रुपत्रा इहाचः परस्मिन्निति यणादेशस्य स्थानिवत्वात्स्कोरिति कलोपो न। लत्वे। निगाल्यते। अत्र णिलोपस्य स्थानिवत्वादचिविभाषेति लत्वं। णत्वे। माषवपनी। इह यस्येति चेत्यल्लोपस्य स्थानिवत्वेन नकारस्य प्रातिपदिकांतत्वाभावात् तेन ननु गर्गभगिनीत्यत्रैव माषवपनीत्यत्रापि णत्वप्राप्तिर्नास्त्येवा उत्तरपदं यत्प्रातिपदिकं तदंतं नस्येति वक्ष्यमाणत्वात्। अत्राहुः। साधनं कृतेति ल्युडंतेन समासे पश्चात् ङीपि यस्येति चेति अल्लोपे कृते नकारस्योत्तरपदांतत्वात् णत्वप्राप्तिरस्त्येवेति। स्यादेतत्। वृत्रघ्न इत्यादौ रषाभ्यामित्यस्य नोपयोगः। ऋत्वेनैव रूपसिद्धेः। अत एव षग्रहणमुत्तरार्थमित्याकरे स्थितं इति चेन्न उच्यते। उत्तरार्थं तथापीह षग्रहणं स्थितं तेन तेक्ष्यवृष्णः पुष्णातीत्यादौ रषाभ्यामिति णत्वस्य प्रवृत्तिः केन वार्यतां ऋत्वेनेति चेन्न। तस्यासिद्धत्वात्। न च वचनप्रामाण्यात्सिद्धत्वं ग्राह्यं पुष्टः। पुष्टिः। षष्ठ इत्यादौ चरितार्थत्वात्। नस्य षयोगे णत्वं इत्यंशोऽचरितार्थ इति चेन्न। तस्य पृथगनुक्तेः। इह वाक्यस्यानुक्तिरचरितार्थत्वस्यापि तुल्यत्वाच्च। एवमुत्तरार्थं षग्रहणमित्याकरो विरु ४८

48

CC-0. In Public Domain. Digitization by eGangotri

ध्यतइति चेन्न। आकरे ही हषग्रहणं विना पुष्पणती त्यादि लक्ष्यस्यासिद्धिर्नोक्ता त्येतात्। वरभि अनं न तु पुष्पणती त्यादौ स्वाभ्यामित्यस्याप्रवृत्तिरिति॥ ॰ः ॥ नलोपः प्रातिप
दिकान्तस्य। लुप्तषष्ठीके इति। सौत्रत्वात्। ननु षष्ठीतत्पुरुषयोः पूर्वपदे सापेक्षत्वे समासासंभवात् प्रातिपदिकस्य पदविशेषणत्वाच्चेति भावः। तदन्तस्येति। षष्ठी
तत्पुरुषोयं। तस्य प्रातिपदिकसंज्ञकपदस्य अन्तो नकारस्तस्येत्यर्थः। यदि तु प्रातिपदिके नेव नेत्य नेनापि पदं विशेष्यते तदा विशेषणेन तदन्तविधौ सौत्रमन्तग्रह
णं शक्यमकर्तुमिति मनोरमायां स्थितं। प्रातिपदिकेति किं। अहन्। परमिति किं। राजानौ। राजानः। विभाषा ङिश्योः। श्री तिनपुंसकाच्चेति विहितो गृह्यते नतु
जश्शसोः शिः। तस्मिन् भत्वात्। भस्येत्यनेनासर्वनामस्थानस्येवयजादेराक्षेपात्। तदेतदाह। असर्वनामस्थाने त्यादि। ककुद्दोषणी इति। ककुद्दोषणी इति

नलोपः प्रातिपदिकान्तस्य। ८।२।७। नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्। नलोप
स्यासिद्धत्वाद्दीर्घत्व मेत्वमैस्त्वं च न। पूषभ्यां। पूषभिः। पूषभ्यः। इत्यादि। विभाषा ङिश्योः। ६।४।१३६। अङ्गावयवो ऽसर्वनामस्थानं परो यो ऽन् त
स्या ऽकारस्य लोपो वा स्यात् ङिश्योः परयोः। पूष्णि। पूषणि। पषोरामवत्। पद्दन्निति सूत्रे प्रभृतिग्रहणं प्रकारार्थं। तथा च। औङः श्यामपि दोष
न्नादेशो भाष्ये ककुद्दोषणी नुदाहृतः। तेन पदङ्घ्रिश्चरणो ऽस्त्रियां स्वान्ते न्म्नो न सप्मन इति सङ्गच्छते। आसन्यं प्राणमूचुरिति च। आस्यभवः ॥ःँ॥
आसन्यः। दोषशब्दस्य नपुंसकत्वमेतएव भाष्यात्। तेन दक्षिणं दोर्निशाचर इति संगच्छते। भुजबाहू प्रवेष्टो दोरिति साहचर्यात् पुंस्त्वमपि। दोषन् ककुद्दो
ः। एकपदत्वे त्वनुपपत्तिरनुपदमेव वक्ष्यते। आसन्यमिति। यच्चाभावकर्मणोरिति प्रकृतिभावान्नस्तद्धित इति टि। ((स्यतत्याविधस्यभजतइति। ह्वयोर्ह्रोर्भव
लोपो न। अतएवेति। ककुद्दोषणी इति भाष्यप्रयोगादेवेति अर्थः। यद्यपि ककुच्च दोश्च तयोः समाहारः ककुद्दोः ककुद्दोश्च ककुद्दोश्च ककुद्दोषणी त्येकशेषे कृते भा
ष्यं सु यो ऽन्यमिति दोः शब्दस्य नपुंसकत्वे नेदं प्रमाणं तथापि ककुदित्यस्य पृथक् पदत्वमेव न्याय्यं। अन्यथा ह्यावाह्योर्द्वित्वे लब्धेपि ककुद एकत्वं न लभ्यत इति भावः। तमु
पाद्रवद्द्युम्यदक्षिणं दोर्निशाचर इति रघुस्तत्र दक्षिणं दोरुद्यम्यतमुपाद्रवदित्यन्वयः। दोषन्तस्येति। अयं च श्रीहर्षप्रयोगः। दोषं हस्तं दूषणं च भजतः। चापस्ये
तिसंबंधः। ह्वयोरह्नोर्भवइति। तद्धितार्थेति समासः। राजाहः सखिभ्य इति टच्। अह्नोह्न एतेभ्य इति अह्नादेशः। कालाट्ठञो द्विगोर्लुगनपत्ये इति लुक्। अह्नः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कु
सि·कौ· संख्याविसायेति ज्ञापकादेकदेशिसमासः॥ इत्यहंनाः॥ विश्वपा इति। विश्वंपातिरक्षतीति विग्रहे पा रक्षणे इत्यस्माद्धातोरनुपसर्गे क इति कं बाधित्वा आतो मनिन्क्वनि
टी·त· ब्वनिपश्चेति चकाराद्विजिति व्याख्यातारः। इहलंदस्यातो मनिन्निति विच्लोके त्वन्येभ्योपि दृश्यंत इति अनेनेति विवेकः। दीर्घाज्जसि च। चकारादिचीत्यनुकृष्यतेनेति
४८ च वर्तनेन त्वाह। दीर्घाज्जसि इति चेति। सूत्रे च काराभावे ह्रस्वाकारादिचि दीर्घकारान्नुजसीति व्यवस्था संभाव्येतेति भावः। इत्याद्यर्थमिति। ननु पूर्वमास्योत्वादि

संख्याविसायपूर्वस्याह्नस्याऽहनः न्यतरस्यां ङौ। ६।३।११०॥ संख्यादिपूर्वस्याह्नस्याऽहनादेशो वा स्यात् ङौ। द्व्यह्नि। द्व्यहनि। द्व्यह्ने। विगतमहः। व्यह्नः
व्यह्नि। व्यहनि। व्यह्ने। अन्हः सायः। सायाह्नः। सायाह्नि। सायाहनि। सायाह्ने। इत्यदन्ताः। विश्वपाः। दीर्घाज्जसि च। ६।१।१०५ दीर्घाज्जसि इचि च
परे प्रथमयोः पूर्वसवर्णदीर्घो न स्यात्। वृद्धिः। विश्वपौ। सवर्णदीर्घः। विश्वपाः। यद्यपीह ओङि नादिचीत्येव सिद्धं जसि तु सत्यपि पूर्वसवर्णदी
र्घे क्षतिर्नास्ति। तथापि गौर्यौ गौर्य इत्याद्यर्थं सूत्रमिहापि न्याय्यत्वादुपन्यस्तं। आतो धातोः। ६।४।१४०। आकारान्तो यो धातुस्तदन्तस्य भस्याऽङ्गस्य लो
पः स्यात्। अलोन्त्यस्य। विश्वपः। विश्वपा। विश्वपाभ्यामित्यादि। एवं शङ्खध्मादयः। धातोः किं। हाहान्। टा। सवर्णदीर्घः। हाहा। ङे। वृद्धिः। हाहै। ङसिङसो
र्दीर्घः। हाहाः। ४ ओसि वृद्धिः। हाहौः। ङौ। आद्गुणः। हाहे। शेषं विश्वपावत्। आत इति योगविभागादधातोरप्याऽकारलोपः क्वचित्। क्त्वः श्नः। इ
त्यादन्ताः। हरिः। प्रथमयोः पूर्वसवर्णः। हरी। जसि च। ७।३।१०९ ह्रस्वान्तस्याऽङ्गस्य गुणः स्याज्जसि परे। हरयः। ह्रस्वस्य गुणः। ७।३।१०८। ह्रस्वस्य
गुणः स्यात्सम्बुद्धौ। एङ्ह्रस्वादिति सम्बुद्धिलोपः। हे हरे। हरिं। हरी। हरीन्। शेषो घ्यसखि। १।४।७। अनदीसंज्ञौ ह्रस्वौ याविवर्णोवर्णौ तदन्तं
सखिवर्जं घिसंज्ञं स्यात्। शेषः किं। मत्यै। एकसंज्ञाधिकारात्सिद्धे शेषग्रहणं स्पष्टार्थं। ह्रस्वौ किं। वातप्रम्यै। यू किं। मात्रे॥ ॥

भ्य इति निर्देशादिकप्रत्याहार अच्प्रत्याहारयोरेव निरूढलक्षणेति व्याख्यायतां तथा च दीर्घस्याच्त्वाभावाज्जोर्या वित्यादौ पूर्वसवर्णदीर्घो न प्राप्नोतीति किमनेन।
न निषेधेनेति चेन्मैवं। अस्मादेव निषेधात् ज्ञापकादिग्ग्रहणेन घपिप्रत्याहारे वुलक्षणस्वीक्रियते। अन्यथा गौरीरित्यादौ शसि परतः पूर्वसवर्णदीर्घो न स्यात्
किंच। उपार्छतीत्यादौ उरण्रपरः नैषादकर्बुकः इत्यादौ विसृमुगिति हस्यकादेशः। अमीषामित्यादौ इणः परस्य सस्य षत्वं च न सिद्ध्यतीति दिक्। प्रथमयोरि 49

CC-0. In Public Domain. Digitization by eGangotri

तिसूत्रानंतरं दीर्घाच्छसीत्येवसुवचं दीर्घाच्छस्येव पूर्वसवर्णदीर्घ इति तस्यार्थः। एवं च चकारो न कर्तव्यो नेति च नानुवर्तनीयमिति महल्लाघवमित्येके। इसि दीर्घादेवे
ति विपरीतनियमवारणायन्नन्त्येकानाम्रेडितइतिनिर्देशाश्रयणेऽप्रामाणिकोगौरवं स्यात् इति यथान्यासमेव श्रेय इत्यन्ये। हाहानिति। गंधर्वविशेषवाचकमव्युत्प
न्नं प्रातिपदिकमिदं। हाहाहूहूश्चैवमाद्या गंधर्वा इत्यमरः। केचित्तु अकारो वासुदेवस्तेन सह वर्तंत इति साहास्तान् सानिति प्रत्युदाहरंति। ल्कः श्नः। यद्यपि क्त्वो ल्यप्
श्नः श्नान ज्ञौ क्रमश्च क्तीति निर्देशादेतत्सूत्रे धातोर्लोपः सिध्यति तथापि क्त्वो ल्यप् भवति श्नः श्नान् भवतीति व्याख्यानवाक्येष्वसाधुत्वसंख्यावारणायेदमुक्तं। इत्या
दंताः। सूत्रे शेषपदस्य प्रयोजनमाह। अनदीसंज्ञाविति। यूस्त्र्याख्याविति यतः यूङिति ह्रस्वश्चेति अतः ह्रस्व इत्यनुवर्तनेन तदाह। ह्रस्वौ यावित्यादिमन्ये इति। नदीसं

आङो नाऽस्त्रियां। ७।३।१२०। घेः परस्याङो ना स्यादस्त्रियां। आङिति टासंज्ञा प्राचां। हरिणा। अस्त्रियां किं। मत्या। घेर्ङिति। ७।३।१११। घिसंज्ञस्य ङिति
सुपि गुणः स्यात्। हरये। घेः किं। सख्ये। ङिति किं। हरिभ्यां। सुपि किं। पट्वी। घेर्ङितीति गुणे कृते। ङसिङसोश्च। ६।१।११०। एङो ङसिङसोरति परे पूर्व
रूपमेकादेशः स्यात्। हरेः। हर्योः। हरीणां। अच्च घेः। ७।३।११९। इदुद्भ्यामुत्तरस्य ङेरौत्स्याद्घेरन्तादेशश्चाऽकारः। हरौ। हर्योः। हरिषु। एवं

तापक्षे घिसंज्ञायां सत्यामाङ्नद्या इत्याडागमे घेर्ङितीति गुणे अयादेशे च मत्यै इति स्यादिति भावः। आङो नापुंसीति तु नोक्तं॥ श्रीपत्यग्निरविकव्यादयः
अमुना कुलेनेत्यत्र यथान्यासं न च नुमा रूपसिद्धिः। मुलस्यासिद्धत्वादिको चीति नुमोऽप्रवृत्तेः। नाभ्यासे तु नासिद्धत्वं। न मुने इति निषेधात्। न च न मु ने इति निषेधो नुम्ये
व किं न स्यात्। नत्यकारस्याविवक्षितत्वादिति वाच्यं। अमुना घटेनेत्यादावसिद्ध्यापत्तेः। अमुष्मै कुलायेत्यादौ नुम्प्रसंगाच्च। न च तत्र स्मायादेशे सति नुमोऽप्रवृत्तिरिति
शंक्यं। स्मायादेशं बाधित्वा परत्वान्नुमः प्रवृत्तेः। प्राचामिति आचार्याणामिति शेषः। ङसिङसोश्च। इह ङसिङसौ द्वौ एकवत्वपि तयोर्यथासंख्यं न। असरितत्वात्। अ
ल्पाच्तरस्य पूर्वनिपाताकरणात् लिंगाच्च। घेरुपसर्गे घोः किरिति निर्देशाच्च। अच्च घेः। अत्र इदुद्भ्यामौदिति ङेराम् इत्यतो ङेरिति च पदत्रयमनुवर्तत इत्याश
येनाह। इदुद्भ्यां परस्य ङेरौत्स्यादिति। घेरुत्तरपदस्येति प्राचा व्याख्यातमिह तु नोक्तं। सूत्रे घेरित्यस्य षष्ठ्यंतत्वात्तत्रान्यादेशे च प्रमाणाभावात्। औदिति पूर्वसू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रेदुन्धामुत्तरस्य ङेरिति ङ्कृतसंबंधस्य न्यायायोगाच्च। यत्तु व्याचख्युः। अदिति न परत्वं बुद्धा ~ वित्यादावत्वे कृते स्त्रियां टाप् मा भूदित्येतदर्थं इति तच्चिंत्यं। लपर ग्रहणाद्धि टापास्त हृदीर्घो मा भूत् टाप् तु स्यादेव। लक्षणद्वयबाधे मानाभावात्। अत एव कृन्मेजंत इति सूत्रे भाष्ये दोस न्निपातपरिभाषया पद्धताविन्यत्र टाप् नेत्युक्तं। टापो व्यवधाने त्वानंतर्यविघातः स्यादिति। तपरकरणादृ वभावे तु सन्निपातपरिभाषोपन्यासस्तत्र विरुध्येत। यद्यपि व्याचख्युः। औतस्तकारस्त्वरितार्थ इति तदपि न। लौ र्लें वार्हिषि सम्मिधाने अग्नाविन्यादौ स्वरितत्वादर्शनात्। न विभक्तौ विति सूत्रे ङेरोतस्तु तकार उच्चारणार्थो नित्ततस्तु क इति स्वयमेवोक्तत्वाच्च। तस्मादुभयत्र तपरकरणमुच्चारणार्थमेवेति मनोरमायां स्थितं॥ ॐ॥ अनङ् सौ। नकारादकार उच्चारणार्थः। असंबुद्धाविति पर्युदासात्। साविति प्रथमैकवचनं गृह्यते न तु सप्तमीबहुवचनं। सोऽनन्त्यवसिद्धेऽनङ् विधानमन्यतोपि स्यादिति ज्ञापनार्थं। तेन उशनसः संबुद्धावनङ् सिद्ध इति प्रांचः। यद्यपि सोऽनन्त्युक्ते ऋदुशनेत्युत्तरसूत्रेणापि ङा स्यात्। तन्न स्त्रु उशनेत्यत्र सर्वनामस्थाने चासंबुद्धाविति दीर्घः स्यात्। पुरुदंसेत्यत्र तु सांतमहत इति स्यात्। तथापि संज्ञापूर्वकविधेरनित्यत्वात्। अंगवृत्तप

अनङ् सौ। ७।१।९३। सख्युरङ्गस्याः नङाः स्यादसंबुद्धौ सौ परे। ङिच्चेत्यन्तादेशः। अलोन्त्यात्पूर्व उपधा। १।१।६५। अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः स्यात्। सर्वनामस्थाने चासंबुद्धौ। ६।४।८। नान्तस्योपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे॥ ॐ ॥

रिभाषया वा तत्समाधेयमिति तेषामाशयः। अलोन्त्यात्पूर्व। अल इति पंचमी अंत्यादित्यनेन विशेष्यत इत्याह। अंत्यादल इति। अलः किं। शिष्टः शिष्टवानित्यादौ अन्त्यात्संघातात्पूर्वस्य शकारस्य मा भूत्। सत्यां हि संज्ञायां शास इदङ् हलोरिति शस्येत्वं स्यात्। नन्वेवमप्यंत्यादलः पूर्वस्य संघातस्योपधासंज्ञायां शिष्ट इत्यादौ शकारविशिष्टस्याकारस्येत्वं स्यादित्यतिप्रसंगदोषस्तदवस्थ एवेति चेदुच्यते। न तथा हि। लोके अमीषां ब्राह्मणानामंत्यात्पूर्व आनीयतामित्युक्ते यथाजातीयकोन्त्यात्पूर्व आनीयते तथा अत्राप्यंत्योऽलात्मक इति तत्पूर्वोप्यल्लेव गृह्यते नेतर इत्याह। पूर्ववर्ण इति। अत्र अचोन्त्यादि टीत्यत्रेव अल इति निर्धारणे षष्ठीत्यपि सुवचमिति केचिदाहुः अलां मध्ये योन्त्यस्तस्मात्पूर्वो वर्ण उपधासंज्ञः स्यादिति व्याख्याया अपि संभवदुक्तिकत्वात्। सर्वनामस्थाने। नोपधाया इति सूत्रं ढ्रलोपसूत्राद्दीर्घग्रहणं चानुवर्तनेत्याशयेनाह। नांतस्येत्यादि ५०

CC-0. In Public Domain. Digitization by eGangotri

अपृक्त एकाल्। असहायवाच्येकशब्दः संख्यावाची वा। न च संख्यावाचित्वे अभैत्सीदित्यत्र हलन्तात्परस्य सिचोऽपृक्तत्वाल्लोपः स्यादिति वाच्यं। विभक्तिसाहचर्याद्वि-
भक्तेरेव लोप इति व्याख्यानात्। एकालिति किं। जागृविः। वेरपृक्तस्येति लोपो न। इदमेवैकग्रहणं वर्णग्रहणे जातिग्रहणं ज्ञापयतीत्यभ्युपगम्य निपात एका-
जनाङित्यत्र एकाज्ग्रहणं त्यक्तमवोचाम। हल्ङ्याब्भ्यो दीर्घादित्येतत्तु ङ्याप्पोरेव विशेषणं न तु हलोऽसंभवादित्याह। दीर्घो याविति। परमिति। न त्विदं विहित-
विशेषणं प्रमाणाभावात्। यासाका इत्यादावव्याप्तेश्च। न च तत्र हलन्ताद्विहितत्वेन निर्वाहः। यः सह इत्यादावतिव्याप्तेः। कर्त्री सखेत्यादावव्याप्तेश्च। यद्यपि त्यदा-
द्यत्वविधौ विभक्तावित्यस्य विषयसप्तमीत्वस्वीकृतेन यासेत्यादौ नोक्तदोषः। सुविभक्तेरेवं ताद्दृग्विहितत्वस्य संभवात्। तथा अनङ्विधौ सावित्यस्य विषयस-
प्तमीत्वे कर्त्री सखेत्यादावपि न दोषः। हलन्ताद्विहितत्वस्य सोः संभवात्। तथापि बहुश्रेयसीत्यत्राव्याप्तिप्रसंग इति भावः। हलिति। तस्य सुतिसीत्येवं रूपत्वे

अपृक्त एकाल्प्रत्ययः। १।२।४१। एकाल्प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात्। हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्। ६।१।६८। हलन्तात्पर-
न्दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल्लुप्यते। हल्ङ्याब्भ्यः किं। ग्रामणीः। दीर्घात्किं। निष्कौशाम्बिः। अतिखट्वः। सुतिसी-
ति किं। अभैत्सीत्। तिपा सहचरितस्य ग्रहणात्सिचो ग्रहणं नास्ति। अपृक्तमिति किं। बिभर्त्ति। हल्किं। बिभेद। प्रथमहल्किं। राजा। नलो-
पो न स्यात्। संयोगान्तलोपस्याऽसिद्धत्वात्। सखा। हे सखे॥ ९ एकदेशविकृतन्यायेन बोध्यं। लुप्यत इति। यद्यपीह लोपो व्योर्वलीत्यतो लो-

प इत्यनुवर्तनेनैव तत्र भावसाधनं तथापीह कर्मसाधनं हल्लिति प्रथमान्तेन सामानाधिकरण्यादिति भावः। निष्कौशाम्बिरिति। खट्व इति। प्रादिसमासे गोस्त्रियो-
रिति ह्रस्वः। ननु इह समस्तस्य ङ्यावन्तत्वं नास्ति। न च स्त्रीप्रत्ययेन तदादिनियमो नास्तीति वाच्यं। अनुपसर्जने हि तथा। इह तूपसर्जनत्वान्न तदादिनियमोऽस्त्येव। अन्य-
था अतिकारीषगन्ध्यपुत्र इत्यत्र ष्यङः पूर्वपदस्य संप्रसारणप्रसंगात्। सत्यं। तथाप्युत्तरपदस्य ङ्यावन्तत्वेन सोस्ततः परत्वानपायाद्दीर्घग्रहणाभावे सुलोपः
स्यादेव। न हीदं ङ्याब्ग्रहणं विहितविशेषणमित्यधुनैवोक्तत्वात्। स्यादेतत्। गंगामात्मन इच्छति गंगीयति ततः क्विप्। अल्लोपे यलोपे च गंगीः। इह ईकारस्य
स्थानिवद्भावेनाप्त्वाद्दीर्घत्वाच्चातिव्याप्तिः। न चाल्लोपस्य स्थानिवत्त्वात्सोरपः परत्वं नेति शंक्यं। क्वौ लुप्तं न स्थानिवदिति निषेधादिति चेन्मैवं। ङी ई आ आप् इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु.
सि.कौ. प्रश्लिष्टदीर्घग्रहणस्य प्रत्याख्यानत्वेन प्रकृते आकाररूपस्य आपोऽभावादुक्तातिप्रसंगाभावात्। निष्कौशाम्बीयतेः क्विपि तु निष्कौशाम्बी इति भवत्येव। ईकाररू
टी.त. पई वं तत्वेन सुलोपप्रवृत्तेः। अपृक्तं किं। बिभर्त्तीति। इदं च प्रत्युदाहरणं चिंत्यं विशिष्टस्याहल्त्वात्। सुतिसीनां हलि ति क्लिष्टं व्याख्याय अतिप्रसंगापादनस्या
५२ नुचितत्वात्। यत्तु व्याचख्युः। सुरां सुनोतीति सुरासुत्तमाचष्टे सुरासयति ततः क्विप्। सुराः। सुरासौ। सुरासः। इह सुनोतेरवयवस्य सस्य लोपं व्यावर्त्तयितुमपृक्त
ग्रहणं इति तदपि चिंत्यं। परस्परसाहचर्येण सुतिसीनां विभक्तीनामेव ग्रहणात्। अन्यथा सिचो लोपापत्तेरुक्तत्वात्। प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणाच्च।
यत्तु तिन् स्वरितमिति सूत्रे कैयटेनोक्तं न क्वचिदियं परिभाषा भाष्यवार्त्तिककाराभ्यामाश्रितेति तद्भ्रमसात्। अंगस्येति सूत्रे भाष्यादौ तस्याः पठितत्वात् स्वयम
पि तत्र व्याख्यातत्वाच्च। संयोगांतलोपस्यासिद्धत्वात् इति। ननु संयोगांतलोपो नासिद्धः। नङि संबुद्ध्योरिति सूत्रे संबुद्धिग्रहणात् ज्ञापकात्। न चैवं गोमानि
त्यादावपि नलोपापत्तिः। ज्ञापकस्य विशेषविषयत्वात्। यत्र हि नकारविभक्त्योरानंतर्यं तत्रैव सिद्धं। व्याख्यानात्। यत्त्वाहुः। हे त्रपुञ्जन्निति नपुंसकार्थत्वान्नैत
ज्ज्ञापकमिति तन्न लुका लुप्ते प्रत्ययलक्षणाभावात् संबुद्धौ नपुंसकानामित्यस्यावश्यकत्वाच्च। संबुद्धिग्रहणस्य नपुंसकविषयत्वासंभवेनोक्तज्ञापकस्य सु
स्थत्वात्। तस्मान्न लोपो न प्रयोजनमिति चेदिह नहि अभितो अत्रेत्यत्रोरुत्वं न स्यात्। सिपि दश्चेति रुत्वे विभक्तिसकारस्य संयोगांतलोपे तस्यासिद्धत्वात्त
था अविभर्भवान्। अजागर्भवानित्यत्र तिलोपो न स्यात्। रात्सस्येति नियमात्। तदुक्तं। संयोगांतस्य लोपे हि नलोपादिर्न सिध्यति। रात्तु तेनैव लोपः स्याद्धु
लस्तस्माद्विधीयत इति। नलोपादिरित्यादिशब्देनोत्वं संगृह्यते। अत्रेदमवधेयं। ङ्यापग्रहणं सौरेव विशेषणं न तु तिस्योः। व्याख्यानात्। तेन माले वाचरत्
अमालात् गंगे वाचरत् अगंगात्। इत्यत्र नातिप्रसंगः तथा च हलंतात्परं सुतिसीत्येतदपृक्तं हल् लुप्यते दीर्घाद्यो ङ्यापोऽतदंतात्परं सुतिसीत्येतदपृक्तं हल् लु
प्यते इति व्याख्यानोऽर्थः पर्यवसन्नः। यत्तु व्याचख्युः। ङ्याप्भ्यां तिस्योरसंभव एवेति। तत्र ङ्यंतादसंभव इति सत्यं। आबंतात्तु आचारक्विबंतात् लङस्तिप्सिपो
लएवा अगंगात्। अगंगा इति यथा। न च शपाव्यवधानं। एकादेशस्य पूर्वांतत्वेन ग्रहणात्। न च स्थानिवद्भावः। अपूर्वविधित्वात्। अन्ये त्वाहुः। ङ्याप्ग्रहणमअ ५२
संभवादेव तिस्योर्विशेषणं न भवतीति यदुक्तं तत्सम्यगेव। न च अगंगात् गंगा इत्यत्र संभवोऽस्तीत्युक्तमिति वाच्यं। तत्र स्थानिभूतस्य शपः पूर्वस्मान्निमित्तभू।

नादपपरयोरिति स्या लोपे कर्तव्ये स्थानिवद्भावेन प्राप्तव्यवधानान्निसोर्लोपस्याप्रसक्तेः। न च फलाभावात्पंचमीसमासपक्षो न स्वीक्रियते। इत्यपि वाच्यं नञ्
योजनस्य प्रागेव प्रदर्शितत्वादिति। सखेति। समानं ख्यायते जनैरिति सखा। ङिच्च यलोप इति चानुवर्तमाने समाने ख्यः स चोदात्त इति ख्या इत्यस्मादिण्। स
मानशब्दस्योदात्तः सभावश्च। न चेह सुविभक्तिसंनियोगेन सखिशब्दस्यानङि कृते सन्निपातपरिभाषया हलङ्यादिना सुलोपो न भवतीति शंक्यं। स्वतंत्रैः
कर्त्तन्यादिनिर्देशेनानङो नकारमात्रस्य सुलोपे कर्तव्ये न तत्परिभाषाया अप्रवृत्तेः॥ ॥ सख्युरसंबुद्धौ॥ इह इतोऽत्सर्वनामस्थाने इत्यतः सर्वनामस्थाने इत्यनु
वर्तते तदसंबुद्धावित्यनेन विशेष्यते। गोतो णिदिति सूत्राण्णिदित्यनुवृत्तं तत्सामानाधिकरण्येन सप्तम्याः प्रथमा कल्प्यत इत्याह। संबुद्धिवर्जं सर्वनामस्था
नमिति। सख्युरसंबुद्धिरित्येव सूत्रयितुं युक्तं इति मनोरमायां स्थितं। ननु सखेत्यत्रोपधादीर्घं बाधित्वा परत्वादत उपधाया इति वृद्ध्या भाव्यं सोर्णित्वादिति चे

सख्युरसम्बुद्धौ ७।१।९२॥ सख्युरङ्गात्परं सम्बुद्धिवर्जं सर्वनामस्थानं णिद्वत्स्यात्। अचो ञ्णिति ७।२।११५। ञिति णिति च परेऽजन्ताङ्ग-
स्य वृद्धिः स्यात्। सखायौ। सखायः। सखायं। सखायौ। घिसंज्ञाऽभावान्न नत्वं। सख्या। सख्ये। ख्यत्यात्परस्य ६।१।११२। खितिशब्दा
भ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उः स्यात्। सख्युः। सख्युः॥

न्न अत्राहुः। कृताकृतप्रसंगित्वमात्रेणापि नित्यत्व
स्वीकारात्। अंतरंगत्वाच्च सखेत्यत्र वृद्धिं बाधित्वा सर्वनामस्थाने चासंबुद्धाविति उपधा दीर्घत्वेव भवितव्यं। सख्युरसंबुद्धाविति णिद्भावमुपजीव्यात्र प्रवर्त
मानस्यात उपधाया इत्यस्य बहिरंगत्वादिति। अचो ञ्णितीति। मृजेर्वृद्धिरित्यतो वृद्धिरित्यनुवर्तते अंगस्येति चानुवृत्तं अचा विशिष्यते विशेषणेन तदंतविधिरि
त्याशयेन व्याचष्टे अजंताङ्गस्येति। ख्यत्यात्। पंचमीनिर्देशादेव परस्येति लब्धे पर इत्यतिग्रहणं एकः पूर्वपरयोरिति निवृत्तमिह नाधिक्रियत इति ध्वननार्थं। ख्य च त्य श्चेति
समाहारद्वंद्वे ख्यत्यं तत्र खितीशब्दयोः कृतयणादेशयोः अनुकरणं ख्यत्यात्। एवं तितीशब्दयोरपीति उभयत्राप्यकार उच्चारणार्थो न तु मुख्यापत्यादिशब्दैकदे
शानुकरणमिदं। सख्युर्यः पत्युर्नः। संख्यायाः संवत्सरसंख्यस्य च आत्यस्य चेत्यादिनिर्देशादित्यभिप्रेत्याह। खितिशब्दाभ्यामिति। एवं च यत्र यणप्रवृत्तिः तत्रैवो
त्वं न त्वतिसखेरित्यादौ। न चैवं यणा निर्देशस्याकृतप्रयोजनत्वात् ह्रस्वांतयोरेव ग्रहणं स्यान्न तु दीर्घान्तयोरिति शंक्यं। निर्देशस्य ह्रस्वदीर्घसाधारणत्वाच्छास्त्रस्य बहु

CC-0. In Public Domain. Digitization by eGangotri

सु.
से. कौ. औत्। एतच्च सूत्रं नदीसंज्ञकेषु इदुद्भ्यामिति पूर्वसूत्रेण वाध्यते। घिसंज्ञकेषु च घेरिति उत्तरसूत्रेण तस्मात्संज्ञाद्वयशून्योऽस्य विषयः। न च तादृश उकारोऽस्ती
टी. त. त्यत आह। उकारानुवृत्तिरिति। प्राचा तु घिनदीसंज्ञकाभ्यामिदुद्भ्यां परस्येत्युक्तं न तु रसनां तादृशस्योकारस्याप्रसिद्धेः। सुसखेति। प्रादिसमासे राजाहःसखिभ्य
५२ इति टचो न पूजनादिति निषेधः। शोभनः सखीत्यत्रासखीति नायं प्रसज्यप्रतिषेधः। असमर्थसमासादिदोषापत्तेः। किंतु पर्युदास एवेति सुसखौ त्यस्य सखि
शब्दभिन्नत्वान्न घिसंज्ञा स्यादेवा न च समुदायस्य सखिशब्दभिन्नत्वेपि सखिशब्दानभिन्नत्वं नेति कथमसखीति निषेधाप्रवृत्तिरिति शंक्यं। विशेष्यासं
निधानादसखीत्यत्र येन विधिस्तदन्तस्येत्यस्य प्रवृत्तेस्तदेतत्सकलमभिप्रेत्याह। समुदायस्येत्यादि। एवमतिसखेत्यत्रापि समासान्तनिषेधादिकं बोध्यं। गौण

औत्। ७।१।११९। इदुद्भ्यामपरस्य ङे रौत्स्यात्। उकारोऽनुवृत्तिरुत्तरार्था। सख्यौ। शेषं हरिवत्। शोभनः सखा सुसखा। सुसखायौ। सुसखायः। अन
ङि इति हृद्भावयोराङ्गत्वान्न दन्तेऽपि प्रवृत्तिः। समुदायस्य सखिरूपत्वाऽभावादसखीति निषेधाऽप्रवृत्तेर्घिसंज्ञा। सुसखिना। सुसखये। ङसिङसो 52
र्गुणे कृते कृतयणोदशत्वाऽभावान्नख्यत्यादित्युत्वं न। सुसखेः। सुसखौ। इत्यादि। एवमतिशयितः सखा। अतिसखा। परमः सखा यस्येति विग्र
हे। परमसखा। परमसखायावित्यादि। गौणत्वेऽप्यनङ्णित्वे प्रवर्तेते सखीमतिक्रान्तोऽतिसखिः। लिङ्गविशिष्टपरिभाषया अनित्यत्वान्नट
चाहरिवत्। रूहाऽनङ्णित्वे न भवतः। गोस्त्रियोरिति ह्रस्वत्वेन सखिशब्दस्य लाक्षणिकत्वात्। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्।

त्वपीति। अतिदिष्टत्वादावस्थ्याद्यनङादिनिभावः। तथा च येन विधिरिति सूत्रे परमसखायावित्ति · बहुव्रीहिस्तत्पुरुषे हि टचा भाव्यमिति कैयटः। तथा हि तौ
याश्रितेति सूत्रे सोमसखेति प्रतीकमुपादाय बहुव्रीहित्वान्न समासान्त इति स एवाह। अनुष्टुप्स्वावहरण इंद्रसखा। आग्नेयाहि मरुत्सखा। तीव्रं सोमं पिवति गो *५२*
सखायमित्यादिप्रयोगाश्चैवमेव संगच्छते। तत्र बहुव्रीहिप्रसक्तस्य पूर्वपदप्रकृतिस्वरस्य दर्शनेन गौणत्वात्। एतेन घिसंज्ञासूत्रे शोभनः सखा अस्य सुसखि
रित्युदाहरंतो हरदत्तन्यासकारौ तदनुगामिनश्चान्ये उपेक्ष्याः। अनित्यत्वादिति। शक्तिलांगलांकुशेति वार्त्तिके घटघटीग्रहणमत्र लिंगं॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पतिः समास एव। एवकार इष्टतोऽवधारणार्थः। अन्यथा हि समासे पतिरेवेति नियमः संभाव्येत न तु तत्र महाकविनेत्यादिप्रयोगो न सिध्येत्। अनल्विधौ धात्वादेरि
त्यादिज्ञापकानुसारेण तु अतिपतिगौरवं स्यादिति भावः। पत्येत्यादि। नन्वेवं शेषो घ्यसखि पत्तीत्येवोच्यतां किमनेन पतिः समास एवेति सूत्रेणेति चेन्न। समुदायस्य पति
रूपत्वाभावेन बहुच्पूर्वकपतिशब्दस्यापि घिसंज्ञा स्यात् तत्र च सुसखिनेत्यादिवद्बहुपतिनेत्यादि प्रसज्येत इष्यते तु बहुपत्येत्यादि। नापि सखिपती समास एवेत्येव
सूत्र्यतामिति शंक्यं। बहुपत्येत्यादिवद्बहुसख्येत्याद्यापत्तेः इष्यते तु बहुसखिनेत्यादि। अथ कथं सीतायाः पतये नमः इति नष्टे मृते प्रव्रजिते क्लीवे च पतिते पतावि
ति पराशरश्च। अत्राहुः। पतिरित्याख्यातः पतिः तत्करोति तदाचष्टे इति णिचि टिलोपे अच इः इत्यौणादिकप्रत्यये णेरनिटीति णिलोपे च निष्पन्नोऽयं पतिशब्दः
पतिः समास एवेत्यत्र न गृह्यते लाक्षणिकत्वात् इति। एतेन कृष्णस्य सखिरर्जुन इति भारतं सखिना वानरेन्द्रेणेति रामायणं च व्याख्यातं। कतिशब्द इति। का
संख्या येषां ते कति। किमः संख्यापरिमाणे डति चेति डतौ डित्वाट्टिलोपः। बहुगणवतु। बहुगणौ प्रातिपदिके संख्यावाचके गृह्येते न तु संघवैपुल्यवाचा।

पतिः समास एव। १।४।८। पतिशब्दः समास एव घिसंज्ञः। पत्या। पत्ये। पत्युः २। पत्यौ। शेषं हरिवत्। समासे तु। भूपतिना। भूपतये। कति
शब्दो नित्यं बहुवचनान्तः। बहुगणवतुडति संख्या। १।१।२३। एते संख्यासंज्ञाः स्युः॥ डति च १।१।२५। डत्यन्ता संख्या षट्संज्ञा स्यात्। प्रत्यय
११॥ स्य लुक्श्लुलुपः। १।१।६१। लुक्श्लुलुप् एते शब्दाः। कृतं प्रत्ययादर्श

के अपि संख्यायते अनयेत्यन्वर्थसंज्ञाविज्ञानात्। अत एव डतिरपि किमः संख्याप
रिमाणे डति चेति विहितस्तद्धित एव गृह्यते वतुसाहचर्याच्च। ननु पातेर्डतिः यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति तथापीह वतुडत्योः केवलयोः
संज्ञाविधौ फलाभावादन्वर्थताबलाच्च तदन्तयोरेव संज्ञा प्रवर्तते सानुबन्धनिर्देशस्तु बाहुलकबहुसातिरित्यादावतिप्रसंगशंकां निराकर्तुमित्याहुः। न चैवं संख्या
कार्येषु कृत्वसुजादिषु कृत्रिमसंख्याया एव ग्रहणं स्यात् न त्वकृत्रिमाया इति पञ्चकृत्व इत्यादि न सिध्येत्। कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययात् इति
वाच्यं संख्यायाः अतिशदन्तायाः कन् इत्यत्र तिशदन्तपर्युदासबलेन संख्याकार्येषु कृत्रिमाकृत्रिमन्यायाप्रवृत्तेः। नन्वेवं भूरिशब्दात्कृत्वसुच्प्रत्ययः इति चेन्न
अत्राहुः। अनियतसंख्यावाचिनां चेत् संख्याकार्यं स्यात्तर्हि बहुगणयोरेवेत्येवंभूतनियमफलकसंख्याविज्ञानान्नातिप्रसंग इति डति च वर्णानावडित्यतः षडित्य

सु·
सि·कौ· नुवर्त्तते। संख्येति च प्रकृतं डतीत्यनेन विशेष्यते तदाह। डत्यन्ता संख्येति। संख्येति किं। पतयः। प्रत्ययस्य लुक्श्लुलुपः। अदर्शनं लोप इत्यतो नुवृत्तस्यादर्शन
टी·त· स्यानेकसंज्ञाकरणसामर्थ्यात्तत्राश्रित्य तद्भावित संज्ञा इह विज्ञायंते तेन संज्ञासंकरो त्र न भवतीति देत दाह। लुक्श्लुलुपशब्दैरित्यादि। सति तु संज्ञासंक
५२ रे हंतीत्यत्र श्लुवल्लुकि श्नाविति द्वित्वं स्यात्। जुहोतीत्यत्र श्लौ सति उतो वृद्धिर्लुकि हलि इति वृद्धिः स्यात्। न च तत्र अभ्यस्तस्य नेत्यनुवृत्तेर्योयोतिनोनोतीत्या
दाविव वृद्धिर्न भविष्यतीति वाच्यं। संज्ञासंकरपक्षे तदनुवृत्त्यसंभवात् अन्यथा सूत्रस्य निर्विषयत्वापत्तेः। न च योतीत्यादिरवकाशः। संज्ञासंकरे तत्रापि
द्वित्वस्य दुर्वारत्वादिति भावः। फ्तेलुक्। जुहोत्यादिभ्यः श्लुः। जनपदे लुवित्यादि विधिप्रदेशेषु सूत्रस्थाष्टकवद्भाविसंज्ञा विज्ञानान्नान्योन्याश्रयः॥ ॐ॥
षड्भ्यो लुक्। सर्वनाम्नः स्मै इतिवत् षड्भ्यो लुगिति वक्तव्ये बहुवचननिर्देशो अत्रार्थप्राधान्यसूचनार्थः। कृत्रिमाकृत्रिमन्यायेन स्वरूपनिरासः सिद्धस्तेन
षडर्थगतसंख्याभिधायिनो रेव जश्शसोर्लुगित्यर्थपर्यवसानात् प्रियपंचान इत्यादौ नातिप्रसंगः। जश्शसोः शिरित्यतो अनुवर्त्तनादाह। जश्शसोर्लुक्।

षड्भ्यो लुक्। ७।१।२२। स्वाषड्भ्यः परयोर्जश्शसोर्लुक् स्यात्। प्रत्ययलोपे प्रत्ययलक्षणं १।१।६२। प्रत्यये लुप्ते पि तदाश्रितं कार्य्यं स्या 53
त्। इति जसि चेति गुणे प्राप्ते॥ ९ स्यादिति। प्रत्ययलोपे विशेषविहिता अपि लुगादिसंज्ञा लोपसंज्ञां न बाधंते। एकसंज्ञाधिकारादन्य
त्र संज्ञानां बाध्यबाधकभावानंगीकारादिति भावः। स्थानिवत्सूत्रेण सिद्धे नियमार्थमिदं सूत्रं। प्रत्ययस्यासाधारणं रूपं यत्र प्रयोजकं तदेव कार्यं प्रत्ययलोपे स
ति भवति न तु प्रत्ययाप्रत्ययसाधारणमिति। तेन शोभना दृषदो यस्य सुदृषत् प्रासाद इत्यत्र न त्सुम्व्यामित्यंतो दात्तत्वं बाधित्वा सोर्मनसी अलोमोषसी इत्युत्त
रपदाद्युदात्तत्वमत्वसंतस्येति दीर्घश्च न भवति। यद्वा यत्र प्रत्ययः प्राधान्येनाश्रीयते तत्रालिवधावपि विध्यर्थमिदं। तेन अतृणेडित्यत्र हलादौ पिति सार्वधा ५३
तुके विहित इम् लुप्ते पि तस्मिन् भवति। वर्णाश्रयेनास्ति प्रत्ययलक्षणमिति तु वर्णप्राधान्यविषयकं तेन गवे हितं गोहितमित्यत्र अवादेशो न। यद्यपीदं पक्षद्व
आकरारूढं तथापि नियमपक्ष एव प्रबल इति यङ्लुगंते मनोरमायां स्थितं। स्यादेतत्। सूत्रस्यावश्यकत्वे पि प्रत्ययलोपे तल्लक्षणमित्येव सूत्र्यतां किमनेन
न द्वितीयप्रत्ययग्रहणेन। अत्राहुः। प्रत्ययस्यासधारणं रूपं यत्रेत्यादिलाभाय द्वितीयप्रत्ययग्रहणमिति॥ ॥ ॥

न लुमतांगस्य। लुमतेति किं। कार्यते हार्यते। अत्र णेरनिटीति णिलोपे णिजपेक्षा वृद्धिर्भवत्येव। अंगस्येति किं। पचसप्तकतीत्यादौ प्रत्ययान्तकार्यं सुप्तिङन्त।
मिति पदसंज्ञा यथा स्यात्। अस्मदिति। प्राचा त्वव्ययास्मदिति पठितं तत्र अव्ययेत्युपेक्षितं। सदृशं त्रिषु इति श्रुतेर्लिंगत्रयाद्यपरत्वेन अव्ययानाम लिंगत्वा

न लुमताऽङ्गस्य।१।१।६३। लुक्श्लुलुप एते लुमन्तः। लुमता शब्देन लुप्ते तन्निमित्तमङ्गकार्यं न स्यात्। कति २ कतिभिः। कतिभ्यः २ कती
नां। कतिषु। युष्मदस्मद् इ षट्संज्ञास्त्रिषु सरूपाः। त्रिशब्दो नित्यं बहुवचनान्तः। त्रयः। त्रीन्। त्रिभिः। त्रिभ्यः। त्रेस्त्रयः।७।१।५३। त्रिशब्दस्य त्र
यादेशः स्यादामि। त्रयाणां। परमत्रयाणां। गौणत्वे तु नेति केचित्। प्रियत्रीणां। वस्तुतस्तु प्रियत्रयाणां। त्रिषु। द्विशब्दो नित्यं द्विवचनान्तः। त्यदा
दीनामः।७।२।१०२। एषामकारोन्तादेशः स्याद्विभक्तौ। द्विपर्यन्तानामेवेष्टिः। द्वौ २ द्वाभ्यां ३ द्वयोः २ द्विपर्यन्तानामिति किं। भवान्। भव
न्तौ। भवन्तः। संज्ञायामुपसर्जनत्वे च नात्वम्। सर्वाद्यन्तर्गणकार्यत्वात्। द्वि नाम कश्चित्। द्विः। द्वौ। द्वयः। द्वावतिक्रान्तोऽतिद्विः। हरिवत्। प्रा
धान्ये तु परमद्वौ। इत्यादि। औडुलोमिः। औडुलोमी। उडुलोमाः। लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः॥ बाह्वादीञोऽपवादः। औडुलोमिं। औडु
लोमी। उडुलोमान्। इतोऽत्रन्ताः। वातप्रमीरिति उणादिसूत्रेण माङ ई प्रत्ययः कित्। वातम्प्रमिमीते इति वातप्रमीः। दीर्घाज्जसि च। वातप्रम्यौ
वातप्रम्यः। हे वातप्रमीः। अमि पूर्वः। वातप्रमीम्। वातप्रमीन्। वातप्रम्या। वातप्रमीभ्यां ३ वातप्रम्ये। वातप्रम्यः २ वातप्रम्योः २ वातप्र
म्यां। दीर्घत्वान्न नुट्। ङौ तु सवर्णदीर्घः। वातप्रमी। वातप्रमीषु। एवं ययीपप्यादयः। यात्यनेनेति ययीर्मार्गः। पाति लोकमिति पपीः सूर्यः॥
यापोः किद्द्वे चेति ई प्रत्ययः। क्विबन्तवातप्रमीशब्दस्य तु अमि शसि ङौ च विशेषः। वातप्रम्यं। वातप्रम्यः। वातप्रम्यि। एरनेकाच इति वक्ष्यमा
णो यण्। प्रधीवत्। चेद्बहुश्रेयस्यायस्यास बहुश्रेयसी॥ दीर्घङ्यान्तत्वाद्धल्ङ्याब्भ्य इति सुलोपः॥

११ त्। अव्ययीभावस्य तु वचनात् क्लीबत्वेऽपि लिं
गांतराभावाच्च। त्रिशब्द इति। त्रयेति ई न् ङित्वाट्टिलोपः। त्रेस्त्रयः। त्रेरिति षष्ठी न तु पंचमी। त्रय इत्यदंतं न तु सांतं निजं त्रयाणामिति निर्देशादित्यभिप्रेत्याह। त्रिश
ब्दस्य त्रयादेश इति। ननु निजं त्रयाणामिति निपातनादेव त्रयादेशो सिद्धे किमनेन सूत्रेणेति चेन्मैवं। अवाधकान्यपि निपातनानि भवंतीत्यनेन ज्ञापनात्॥

सु·
सि·कौ· तेन पुरातनमिति सिद्ध्यति। अन्यथा पुराणप्रोक्तेष्वपि निपातनानाद् एतद्धा ध्येत। त्रेरयङ् इत्येव न सूत्रितं। तत् करोति आचष्टे वेत्यर्थे तत्करोतीत्यादिना णिचि ततः क्विपि प्र
टी·त· कृत्यै काच् इति प्रकृतिभावादिलोपाभावे हूसस्यापि तीति तु किं त्रित्तनो वहुत्वविवक्षायामामि कृते त्रेरयङि त्रयाणामिति रूपासिद्धेः। न च वाणीदीर्घं वलीय इति तु कः प्र
५४ ग वायं स्यादिति शंकां। युगपत्प्रवृत्तावेवांगस्य वलीयस्त्वात्। केचित्त्विति। त्रेः संवन्धिन्यामीति विज्ञानान्नैव लोत्रयादेशो न भवतीति तेषामाशयः। वस्तुतस्त्विति। अर्थप्राधान्य
वोधकस्य वहुवचनस्याभावान्नैत्रेलपि त्रयादेशो न्याय्यः। प्रियास्त्रेन्त्याद्यावस्थ्या घनङ्दितिभावः। त्यदादीनामः। अष्टन आ विभक्तावित्यतोनुवर्तनादाह। विभक्तावि
ति। विभक्तावितिकिम्। तदूयद्दूसोर्लुकालुमत्वात्प्रत्ययलक्षणं नास्ति। द्वियर्षंतानां किमिति। युष्मदस्मच्छब्दयोरिष्टप्रभावेपि दोषो नास्ति। आत्वयत्वलोपैर्विशेषविहितैरा
त्वस्य वाधनात्तत्पा किम्। शब्देपि न दोषः। किमः कादेशस्य विशिष्य विधानादिति प्रश्नः। भवानिति। भवतु सु इति स्थिते तकारस्थाने अत्वे कृते अतो गुणे इति पररूपे उगि 54
दचामिति नुमि सति सर्वनामस्थान इत्यनेन दीर्घे सुलोपे नलोपे च सति भवा इति रूपं स्यादिति भावः। भवंतावितिपूर्ववत्तकारस्याले पररूपे नुमि दीर्घे भवानिति रूपं स्यादि
ति भावः। उडुनि वस्त्रो माति यस्य तस्यापत्यं औडुलोमिः। इञोपवाद इति। तथा च वहुत्वे अकारांतोयं उडुलोमशब्दः स औडुलोमिशब्दादन्य एव तस्य च इकारांतेषु
व्युत्पादनं प्रासंगिकमिति वोध्यं॥ इति हलंताः॥ ॥ क्विविति। तेन आतो लोप इटि चेत्यालोप इति भावः। क्विवंतं वातप्रमी इति। माङ् धानोः क्विपि ईत्वमवका ५५
रादावितिनिषेधाद्दीत्वं नेति शंकायां मीनातेरवक्विप् वोध्यः॥ यहू॥ ईप्रत्ययांत वातप्रमी शब्दादाचारक्विवंतात्कर्तरि क्विप् वोध्यः। वहुश्रेयस्य इति। प्रशस्यस्य श्र इतीय
सुनि श्रादेशः। उगितश्चेति ङीप्। वहुश्रेयसीति। स्त्रियाः पुंवदिति पुंवद्भावः। ईयसश्चेति न कप्। नाप्युपसर्जनह्रस्वः। ईयसो वहुव्रीहेर्नेति निषेधात्॥

यूस्त्र्याख्यौ॥ ईश्च ऊश्च यू स्त्र्याख्यौ नदीदीर्घयोरेव ग्रहणं। अविभक्तिकोयं निर्देश इत्येके। दीर्घाज्जसि चेति निषेधस्य वाच्छन्दसीति पाक्षिकत्वात् प्रथमयोः पूर्वसवर्णदीर्घ इत्यन्ये। इह प्रत्ययस्यैव ग्रहणमिति परिभाषा नोपतिष्ठते। नेयङुवङ्स्थानावस्त्रीति निषेधाल्लिंगात्। तेन प्रध्ये प्रध्या इत्यादौ नदीकार्यं स्यादेव। स्त्रियं आचक्षाते स्त्र्याख्यौ। मूलविभुजादित्वात्कः। चक्षिङः ख्याञ्। आतो लोप इटि चेत्यालोपः। ईदूदन्ताविति। इह वर्णयोरेव संज्ञेत्यपि पक्षोस्ति। आच्छीनद्योरिति सूत्रस्वारस्यात्। तयोः स्त्र्याख्यत्वं तु श्र्यादिषु स्वतः तंत्रीर्लक्ष्मीरित्यादौ तु स्त्रीवाचकवर्णसमुदायघटकत्वेन प्रवेशात्। तेन नद्यंतादिव्यवहारो न विरुध्यते। एवं शेषो घ्यसखीत्यत्रापि इवर्णोवर्णयोरेव घिसंज्ञेति पक्षोप्यस्तीति बोध्यं। तेन घ्यंताज्जाद्यंतयोर्घ्यंतपरमिति व्यवहारः संगच्छते। वर्णसंज्ञापक्षे असखीत्यस्य सखिभिन्नस्यावयव इत्यर्थो न तु सखिशब्दावयवं वर्जयित्वेति। तेन समुदायस्य सखिशब्दभिन्नत्वादतिसखिनेत्यादि निर्बाधमित्यवधेयं। स्त्रियामित्येव वक्तव्ये आख्याग्रहणं नित्यस्त्रीत्वलाभार्थं इत्याशयेना

यूस्त्र्याख्यौ नदी। १।४।३। ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः। प्रथमलिङ्गग्रहणं च॥ पूर्वस्त्र्याख्यस्योपसर्जनत्वेपि नदीत्वं वक्तव्यमित्यर्थः। अम्बार्थनद्योर्ह्रस्वः। ७।३।१०७। अम्बार्थानां नद्यन्तानां च ह्रस्वः सम्बुद्धौ। हे बहुश्रेयसि। शसि बहुश्रेयसीन्॥ आण्नद्याः। नद्यन्तात्परेषां ङितामाडागमः स्यात्। आटश्च। ६।१।९०। आटोऽचि परे वृद्धिरेकादेशः स्यात्। बहुश्रेयस्यै। बहुश्रेयस्याः। नद्यन्तात्परत्वान्नुट्। बहुश्रेय

हा नित्यस्त्रीलिंगाविति। यू किं। मात्रे। स्त्र्याख्याविति किं। ग्रामण्ये। पूर्वमिति। इतः प्रागित्यर्थः। संज्ञायाः यथोद्देशं प्रवृत्तौ न्यायसिद्धमिदं। कार्यकालपक्षे तु वाचनिकमित्याहुः। वर्णसंज्ञापक्षाश्रयेणाह। नद्यन्तानामिति। हे बहुश्रेयसीति। अत्र ह्रस्वविधानसामर्थ्याद्गुणो न प्रवर्तते। अन्यथा अंबार्थनद्योर्गुण इत्येव ब्रूयात्। न च लाघवाभावः शंक्यः। ह्रस्वग्रहणे मात्राधिक्यात्। ह्रस्वस्य गुण इत्युत्तरसूत्रे गुणग्रहणत्यागेन सुतरां लाघवसंभवाच्च। अन्ये तु कृतेपि ह्रस्वे यदि गुण इष्टः स्यात्तर्हि अंबार्थानां ह्रस्व इत्युक्त्वा नदीह्रस्वयोर्गुण इत्येव ब्रूयादित्याहुः। न त्वत्र पदलाघवाभावेपि प्रक्रियालाघवमस्ति परं तु जसि चेत्यत्र ह्रस्वस्येत्येकदेशानुवृत्तौ क्लेशोस्तीति बोध्यं॥ आण्नद्याः। अण्नद्या इत्येव सुवचं। विधानसामर्थ्यादतो गुण इत्यस्याप्रवृत्तौ यथायथं वृद्धिसवर्णदीर्घाभ्यां बहुश्रेयस्यै बहुश्रेयस्या इत्यादिसिद्धेः। ननु परत्वादाटा नुड्बाध्यत इत्युत्तरग्रंथपर्यालोचनया ङेरामिकृतेन तस्य नुडागमनिवारणार्थमङ्विधानावश्यकत्वात्सामर्थ्यमुपक्षीणमिति चेन्न। एवं तर्हि ह्रस्वनद्याप इत्यनंतरं

उ.नौ

सु॰
सि॰कौ॰
टी॰त॰
५५

स्येवसूच्यतां॥ आमीत्यनुवृत्त्याङेराम्नो नुट्नेत्यर्थलाभात्। तस्मादण्नद्याइति विधानसामर्थ्यादितो गुणइतिनप्रवर्त्ततइतिदिक्। आट्श्चायद्यपि इहङे्यि वृद्धिरेचीत्येव
सिद्धं ङसिङसोर्ईरामि चसवर्णदीर्घेणन्याय्यैंदरित्याद्यथसूत्रमिहापित्याप्यत्वादुपन्यस्तं अजादीनामटा सिद्धमाडजादीनामितिसूत्रमास्थितिवदतो वार्त्ति
ककारस्यमतेनतु अट्श्चेत्येवसूत्रमितिबोध्यं॥ ःःः॥ ङेराम्नाङे इतिसप्तम्येकवचनस्यग्रहणंसमानाधिकरणेस्त्रियामित्यादिनिर्देशात्॥ आटानुट्वाध्य।
तइति। आटिकृतेतुपुनर्नप्रवर्त्तते। सकृद्गतावितिन्यायाश्रयणादितिभावः। नसुलोपइति। लक्ष्मेर्मुट्चेत्यौणादिकईप्रत्ययांतोलक्ष्मीशब्दः इत्युपसर्जनह्रस्वो
पिनेतिबोध्यं। कुमारीति। यद्यपिक्विवर्थप्रतिङ्यं तस्योपसर्जनत्वाद्ध्रस्वत्वंप्राप्तं तथापिगोस्त्रियोरित्यत्र कृत्रिमोपसर्जनत्वंगृह्यतेनत्वप्रधानरूपमितिनात्रह्रस्वःप्र
वर्त्तते। अतएवहरीतक्याःफलानिहरीतकाः इत्यत्रापिह्रस्वोनभवति। लुक्तद्धितलुकीत्यत्रत्वप्रधानरूपमुपसर्जनमेवगृह्यतेनतुकृत्रिमोपसर्जनसंभवादितिबोध्यं।
ङेराम्नद्याम्नीभ्यः। ७।३।११६। नद्यन्तादावन्तान्नीशब्दाच्चङेराम्स्यात्। इहपरत्वादाटानुट्वाध्यते। बहुश्रेयस्यां। शेषमीप्रत्ययान्तवात्प्र
मीवत्। अङ्यन्तत्वान्नसुलोपः। अतिलक्ष्मीः। शेषंबहुश्रेयसीवत्। कुमारीमिच्छतुन कुमारीवाचर[illegible]ह्मणः कुमारी। क्यजन्तादाचारक्वि
वन्ताद्वा कर्त्तरिक्विप्। हल्ङ्याब्भ्योदीर्घात्सुतिस्यपृक्तंहल् इतिसुलोपः। अचिश्नुधातुभ्रुवांय्वोरियङुवङौ। ६।४।७७। श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तधातोर्भ्रूइत्यस्यच
ऽङ्। स्यियङुवङौस्तोऽजादौप्रत्ययेपरे। ङिच्चेत्यन्तादेशः। आन्तरतम्यादेरियङ्ओरुवङ्। इतीयङिप्राप्ते॥ ८ मः अचिश्नु। भ्रमेश्चडूरितिडुप्रत्ययां
तत्वाद्भ्रूशब्दस्यधातोःपृथग्ग्रहणं। अन्येत्वाहुः। गमःक्वावित्यत्रऊङ्चगमादीनामितिवक्तव्यमितिवार्त्तिकादनुनासिकलोपेऊडादेशेचतेनिष्पन्नोयंभ्रूशब्दः। न
त्वाचधातुग्रहणेनेवसिद्धेभ्रूग्रहणंनिरर्थकमिति। इणइतिवक्तव्येय्वोरितिगुरुनिर्देशइणप्रत्याहारः। परेणैवणकारेणगृह्यतइतिज्ञापनार्थः। इहय्वोरितिधातो
रेवविशेषणंनतुश्नुभ्रुवोरव्यभिचारादित्याह। इवर्णोवर्णान्तधातोरिति। श्नुधातुभ्रुवामिवर्णोवर्णयोरितिव्याख्यानेतुइयङुवङोर्ङित्वंव्यर्थंस्यात् हिस्याधिकरण्ये
चप्रसज्येतेतिभावः। ननुसामानाधिकरण्यपक्षेपिङित्वंव्यर्थंनिर्दिश्यमानस्यादेशाभवंतीतिइवर्णोवर्णं तधातोःसर्वादेशत्वनिवृत्तिसंभवादितिचेन्न। श्नुभ्रुवो
रपिनिर्दिश्यमानत्वेनसर्वादेशत्वप्रसंगात्। इउइत्यष्टादशानांसंज्ञेत्युक्तत्वान्नयथासंख्यमिहनप्रवर्ततेइत्याह। आंतरतम्यादिति। स्थानतइतिभावः। य्वोःकिं।

५५

55

एरनेकाचः इणोयणित्यतोयण् इति वर्त्तते। अचिश्नुधातुइति सूत्रादिह धातुरेव अनुवर्त्तते न तु श्नुभ्रुवौ तयोरिवर्णासंभवात्। धातुग्रहणं चात्रत्योभयोर्विशेषणं संयोग
स्यांगस्य चेति व्याचष्टे। धात्ववयवसंयोगेत्यादि। तत्र धातुना संयोगस्य विशेषणादिह यण्। उन्न्यौ। उन्न्यः। हरिं। हरीन् इत्यादिसिध्यर्थं तु धातुना अंगं विशेष्यते। अन्यथा
प्रध्यं प्रध्य इत्यादावपि पूर्वरूपं पूर्वसवर्णदीर्घं च बाधित्वा यण् स्यात्। धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदंतं यदंगं तस्य प्रधीरिति। प्रध्यायतीति प्रधीः। ध्या
यतेः संप्रसारणं चेति क्विपि संप्रसारणे पूर्वरूपे च हलः इति दीर्घः। यदा तु प्रकृष्टा धीर्बुद्धिर्यस्येति विगृह्यते तदा धीशब्दस्य नित्यस्त्रीत्वात्प्रथमलिंगग्रहणं चेति नित्य

एरनेकाचोऽसंयोगपूर्वस्य। ६।४।८२। धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्याऽनेकाचोऽङ्गस्य यण् स्यादजादौ प्रत्यये प
रे। इति यण्। कुमार्य्यौ। कुमार्य्यः। हे कुमारि। अमि शसि च। कुमार्य्यौ। कुमार्य्यः। कुमार्य्या। कुमार्य्यै। कुमार्य्याः। कुमारीणां। कुमार्य्यां। कुमार्य्योः ९
प्रधीः। प्रध्यौ। प्रध्यः। प्रध्यं। प्रध्यः। उन्नयतीत्युन्नीः। धातुना संयोगस्य विशेषणादिह स्यादेव यण्। उन्न्यौ। उन्न्यः। हे उन्नीः। उन्न्यम्। ङेराम्। उन्न्यां।
एवं ग्रामणीः। अनेकाचः किं। नीः। नियौ। नियः। अमि शसि च परत्वादियङ्। नियं। नियः। ङेराम्। नियां। असंयोगपूर्वस्य किं। सुश्रियौ। यवक्रि
यौ। गतिकारकेतरपूर्वपदस्य यण् नेष्यते॥ शुद्धधियौ। परमधियौ। कथं तर्हि दुर्धियौ वृश्चिकभियेत्यादि। उच्यते। दुःस्थिता धीर्येषामि
ति विग्रहे दुरित्यस्य धीशब्दं प्रति गतित्वमेव नास्ति। यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा। वृश्चिकशब्दस्य बुद्धिकृतमपादानत्व
न्नेह विवक्षितं। वृश्चिकसम्बन्धिनी भीः वृश्चिकभीरित्युत्तरपदलोपो वा॥ ९ स्त्रीलिंगानिर्देशे यथासंभवं नदीकार्यं बोध्यं। प्रथमलिंगग्रहणं चेति

वार्त्तिकस्य प्रथमलिंगं गृहीत्वा प्रवृत्त्याख्याविति अनेन नदीत्वं वक्तव्यमित्यर्थात्। एरनेकाच इति यण्विषयत्वेन नेयङुवङिति निषेधस्याप्रवृत्तेरित्येके। अन्ये त्वाहुः एवं त
र्हि यथोद्देशपक्षे न्यायसिद्धमिदमिति मनोरमाग्रंथो विरुध्येत। यथोद्देशपक्षेपि प्रधीशब्दाद्यर्थतया वचनस्यावश्यकत्वात्। मूले हि उपसर्जनत्वेपि नदीत्वं वक्तव्य
मित्युक्तं। न तु नित्यस्त्रीत्वमिति। तस्मात्प्रथमलिंगग्रहणमित्यनेन लिंगं प्रयुक्तं यन्नदीत्वं तन्नैः प्राक् स्थितं तदिहातिदिश्यते। धीशब्दे तु नेयङुवङिति निषेधेन न
दीत्वाभावान्नास्त्येव प्रधीशब्दे नदीत्वातिदेश इति। ङिति ह्रस्वश्चेति वैकल्पिकनदीत्वमपीह नातिदिश्यते। प्रथमलिंगेति वचनं यथोद्देशे न्यायसिद्धमिति ग्रंथानु

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु
सि·कौ
टी·त·
५६

तेधेनवृत्तेः प्रागवस्थायांअवयववत्वेनाभिमतेविद्यमानायाएवनदीसंज्ञायाःसमुदायेअभ्युपेयत्वात्। नचग्रन्थकृष्टाधीर्यस्यतस्मैप्रधेप्रध्य इत्यादौ प्रथमांतधीश
ब्दस्यङितिपरेप्रवर्तमानानदीसंज्ञाअस्तीतिदिक्। उन्नीरिति। सत्सूद्विषेत्यादिनाक्विप्। ङेराम्मिति। आं गत्वान्नीशब्दांतादपिङेःराम्भवतीतिभावः। ग्रामंन
यतीतिग्रामणीः। अग्रग्रामाभ्यांनयतेरितिणत्वं। नेरितिनयतीतिनीः क्विप्। गतिकारकेतरेति। गतिकारकपूर्वस्येवयणिष्यतेइतितुनोक्तं। कुमारीमिच्छन्
ब्राह्मणः कुमारीकुमार्य्यौकुमार्यइत्यत्रयणभावप्रसंगात्॥ ॥ शुद्धधियाविति॥ यदातुशुद्धंब्रह्मध्यायतीतिविगृह्यतेतदाभवत्येवयण्। शुद्ध्यौ। शुद्ध्यः। एव

नभूसुधियोः। ६।४।८५। एतयोर्य्यणनस्यात्अचिसुपि। सुधियौ। सुधियइत्यादि। सखायमिच्छतिसखीयति। ततःक्विप्। अल्लोपयलोपौ। अल्लो
पस्यस्थानिवत्वाद्घुणिप्राप्ते। क्वौलुप्तमतस्थानिवत्। एकदेशविकृतस्यानन्यतयाऽनङ् णिल्वे। सखायौ। सखायः। हेसखीः। अमिपूर्वरूपात्प
त्वाद्घुणिप्राप्ते। ततोऽपिपरत्वात्सख्युरसम्बुद्धावितिप्रवर्त्तते। सखायं। सखायौ। शसियण्। सख्यः। सहखेनवर्ततइतिसखः। तमिच्छतीति। सखीः
सुखमिच्छतीति। सुखीः। सुतमिच्छतीति। सुतीः। सख्यौ। सुख्यौ। सुत्यौ। ख्यत्यादितिदीर्घस्याऽपिग्रहणादुकारः। सख्युः। सुख्युः। सुत्युः। लूनमि
च्छतीतिलूनीः। क्षाममिच्छतीतिक्षामीः। प्रस्तीममिच्छतीतिप्रस्तीमीः। एषांङसिङसोर्यण्। नत्वमत्वयोरसिद्धत्वात्ख्यत्यादित्युत्वं। लून्युः।
क्षाम्युः। प्रस्तीम्युः। शुष्कीयते। शुष्कीः। पक्वीः। इयङ्। शुष्कियौ। शुष्कियः। ङसिङसोः शुष्कियइत्यादि। इतिईदन्ताः। शम्भुर्हरिवत्। एवंभि
क्षुवायुभान्वादयः॥ ॥ ११ मग्रेपि। कथंतर्हीति। गतिकारकेतरपूर्वपदत्वंइहनास्तीतियणेवभाव्यमितिप्रश्नः। दुर्धियइत्यत्रप्रादिभ्योधा
तुजस्येतिवार्तिकेनउत्तरपदलोपोवोध्य इत्याशयेनाह दुस्थितधीर्यस्यामिति। वृश्चिकशब्दस्येति। भाष्यकृताहिवुद्धिपरिकल्पितमपायमाश्रित्यभीत्रार्था
नामितिसूत्रंप्रत्याख्यातं। ततश्चसंबंधमात्रविवक्षायांषष्ठ्येवेतिनात्यत्रकारकपूर्वत्वमितिभावः। वृश्चिकसंबंधिनीभीरिति। एवंचभययोगाभावाद्वृश्चिकस्य ५६
नायादानकारकत्वमितिसूत्रमतेपिनदोषइतिभावः। ओः सुपीत्यतः सुपीत्यनुवर्तनादाह। अचिसुपीति। सुपिकिं। सुध्युपास्यः। वस्तुतस्तुसुपीत्यननुवर्तनेपि
न क्षतिः। अनंतरस्येतिन्यायेनएरनेकाच इतिओः सुपीतिचसूत्रद्वयेनप्रापितस्यवयणोनभूसुधियोरितिनिषेधाभ्युपगमात्। स्थानिवत्वाद्घुणिप्राप्तइति॥

56

एरनेकाचइत्यनेनानचांतर्वर्तिनीं विभक्तिमाश्रित्य सर्वो शब्दस्य पदत्वान्नपदांतेति निषेधेन अल्लोपो न स्थानिवदिति वाच्यो नः कथं इति नियमेन कथं चिनांतस्यै
वपदत्वादत आह। कौलुतमिति। नपुंसके भावे क्तः। कौलोपदस्यार्थः। इदं सर्वं कुमारीमिच्छन् कुमारीयत्यत्रापि बोध्यं। कौलुतमित्यत्र न त्काचित्कां कौ विधिं प्रति न
स्थानिवदित्यभ्युपगमात्। अन्यथा वेभिदित्रास्तलकुलानीति हलं तं नपुंसके वक्ष्यमाणं न संगच्छेत। वेभिद्यतेः क्विपि अल्लोपे यलोपे च कौलुतत्वेनाल्लो
पस्य स्थानिवत्त्वाभावेन लनेन लस्त्वमनुमप्रसंगात्। कौ विधिं प्रति न स्थानिवदित्यस्योदाहरणं लवमाचक्षाणो लौः। अत्र णिचि यच्छिलोपः य श्च कौ णिलो
पः तदुभयं ह्यौः शूङिति वकारस्य क्विनिमित्ते ऊठि कर्तव्ये न स्थानिवत्। एवं धत्यूठस्त्रिवृद्धिः। अत्रेदमवधेयं। न पदांतेति सूत्रे क्वि — लुगुपधात्वचङ्प
रनिर्ह्रासकुत्वेषूपसंख्यानमिति वार्तिकमस्ति तदेकदेशानुवादोयं। कौलुतमित्यादीति। लुका लुप्तं न स्थानिवदित्यादीनां प्युदाहरणान्यत्रोच्यंते। तेनापंचभिः
पट्वीभिः क्रीतः पंचपटुः। आहार्दिति ठक् तस्याध्यर्धपूर्वेति लुक्। लुकि कृते तद्धितलुकीति ङीषो लुक्। तस्य लुका लुप्तत्वेन स्थानिवत्त्वाभावात्। अत्र यणादेशो न भ
वति। न च ङीषो लुकः परनिमित्तकत्वाभावात् स्थानिवत्त्वं न भवेदिति शंक्यं ङीषो लुकं प्रति स्थानिहारात्तद्धितलुकः परत्वसीकारात्।। यद्वा।। वृद्धिपरिकं
ल्पितं पौर्वापर्यमभावेप्यस्तीति नात्रानुपपत्तिः। न च अद्ठेतद्धिते विवक्षिते भस्याढे तद्धित इति पुंवद्भावादुक्तनिषेधं विनैवेष्टसिद्धिरित्यपि शंक्यं। यत्र भावि
भत्वं तत्रैव पुंवद्भावः। इह तु लुकि भत्वाभावात्। कुतः पुंवद्भाव इति कैयटेनोक्तत्वात्। तथा पंचेंद्राण्यो देवता अस्य पंचेंद्रः। सास्य देवतेत्यण्। द्विगोर्लुगनप
त्य इति लुक्। ततो ङीषो लुकि तस्य स्थानिवत्त्वाभावात् ङीषा सन्नियुक्त आनुङ् न श्रूयते। पुंवद्भावस्यात्र शंकापि नास्ति। इंद्रे इंद्रत्वमिंद्राण्यामिंद्रस्त्री
त्वमिति प्रवृत्तिनिमित्तभेदे भाषितपुंस्कत्वस्यानभ्युपगमात्। येन तु न पदांतेति सूत्रे वरे इति ईकारप्रश्लेषं कुर्वंति तेषामिह लुग्ग्रहणं न कार्यं। उपधात्वे कर्तव्ये न स्थानि
क्तोन परिखाय व्राच्चातुरर्थिके अणि कृते तद्धाटके कांते त्यादिना पारिखशब्दात् खेपधत्वक्ष्मले छ प्रत्यये पारिखीयः सिध्यति। अन्यथा उपधासंज्ञायाः पूर्व
विधित्वेन तस्यां कर्तव्यायां आलोपः स्थानिवत्स्यात्। नन्वेवं पटयतीत्यादौ वृद्धिः स्यादिति चेन्न। यत्रोपधासंज्ञामुपजीव्य प्रत्ययो विहितस्तत्रैवायं निषेध इति
भाष्ये स्थितत्वात्। तत्र चङ्परनिर्ह्रासग्रहणमेव ज्ञापकं। चङि परे यो ह्रस्वः स चङ्परनिर्ह्रासस्तत्र न स्थानिवत्। वादितवंतं प्रयोजितवान् अवीवदत् वीणां परि

CC-0. In Public Domain. Digitization by eGangotri



वाह्केन। अत्र प्रथममल्लोपस्य स्थानिवत्त्वाद् दाकारो नुपधेति तेनो चङ्युपधाह्रस्वो न प्राप्नोतीति। णिसामान्यग्रहणेन त्सिद्धमिति चेन्न ल्लबन्यदुदाहर्त्तव्यं वारि आत्वा
दृष्टी वरतान चाग्लोपीति निषेधः शङ्क्यः परत्वाद्वृद्धौ सत्यां टिलोप इत्यभ्युपगमेनाग्लोपित्वाभावात्। अत एवमुं डमिश्रेति सूत्रे हलि कल्योर्हलकलेत्यदन्तनिपातनं
सार्थकं। कृते न स्थानिवत्। अर्चयतेरर्कः कदाधारार्चिकलिभ्य इति कः। पाचयतेः पाकिः इह चोः कुरिति कुत्वे णिलोपो न स्थानिवत् वार्त्तिके स्मिन्नूक्ति च ङ्परनिह्रासो
पधानां ग्रहणमावश्यकं तु करीकारप्रश्लेषेण गतार्थत्वात् कुत्वस्य पूर्वत्रासिद्धीयत्वाच्चेत्यवधेयं। चजोरिति कुत्वे चाउदाहरणमन्वेषणीयाः सखइति। तेनस
खेति वहुव्रीहौ चोपसर्जनस्येति स भावः। सखीरित्यादि। सुप आत्मनः क्यच्। क्यचि चेतीत्वं। दीर्घस्यापीति। एतदर्थं कृतं यणादेश इति भावः। ननु अनिसखेभूय
तेरिति गुणविषयं व्यावर्त्तयितुं यणा निर्द्देश इति चेन्न। अस्त्वेवं तथापि दीर्घप्रवृत्तिः केन वार्यतां। न हि ह्रस्वेषु यणभाव्यं न दीर्घेष्वित्यत्र प्रमाणमस्ति। सोऽस्य
विकृतनिर्द्देशस्याव्याप्त्यतिव्याप्त्युभय वारकत्वे सारवत्त्वलाभेन तथैवौचित्याद्वाव्याहृढत्वाच्चालूनमिति। ल्वादिभ्य इति निष्ठानत्वं। क्षाममिति। क्षायोमइति

तृज्वत्क्रोष्टुः ७।१।९५। क्रोष्टुरनुजन्तेन तुल्यं वर्त्तते। असम्बुद्धौ सर्वनामस्थाने परे क्रोष्टुशब्दस्थाने क्रोष्टृप्रयोक्तव्य इत्यर्थः॥

मः। क्षाममिति। प्रस्त्योन्यतरस्यामिति मः। स्त्यः प्रपूर्वस्येति संप्रसारणं। शुष्कोरिति। शुषः क इति निष्ठातस्य कः। पक्वरिति। पचो व इति वः। इयङिति संयो 57
गपूर्वत्वादिवर्णस्य यणनेति भावः॥ इतिईदन्ताः। हरिवदिति। तद्धत्साध्य इत्यर्थः। तृज्वत्क्रोष्टुः। क्रुश आह्वाने रोदने च। अस्मात्सितनिगमिमसिसच्यविधा
ञ्क्रुशिभ्यस्तुन् इति तुन्प्रत्यये क्रोष्टुशब्दः सिद्धः। तृचि तु क्रोष्टृशब्दः। द्वावपि शृगालवचनौ तत्राविशेषेण द्वयोः प्रयोगे प्राप्ते सर्वनामस्थाने स्त्रियां च तृजेतएव तृ
तीयादिष्वचि भयमन्यत्र तुन्नन्तएवेति नियमार्थं त्रिसूत्री आरभ्यते। क्रोष्टुरिति तुन्नन्तात् प्रथमा। तृज्वदिति तृतीयान्ता द्वतिः। निमित्तव्यपदेशात्तादात्म्यशास्त्रका
र्यरूपविषयत्वेनातिदेशस्यानेकविधत्वेपि प्राधान्यादिह रूपमेवातिदिश्यते। न तु व्यपदेशादेर्यस्य कस्यचित्। किं तु क्रोष्टरेव उपस्थितत्वात्। अर्थात् आनर्यं चे
त्यभिप्रेत्य फलितमाह। क्रोष्टुशब्दस्थाने क्रोष्टृशब्द इति निमित्तातिदेशो यथा। चिकीर्ष ति। चिकीर्षते। अत्र सन्नन्तस्य पूर्ववत्सनः इत्यनेन नञ्जित्वातिदेशः कर्त्रभि ५७
प्राये आत्मनेपदं सिध्यति। ननु कार्यातिदेशेनाप्येतद्गतार्थमिति चेन्न। अत्राहुः। निमित्तप्रतिसंधानपूर्वकत्वात्तस्येति निमित्तातिदेशः पृथगुक्त इति। व्यपदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ण्यातिदेशो यथा। आद्यंतवदेकस्मिन्नित्यनेन कर्तव्यमित्यादेशो सावकाशप्रत्ययाद्युदात्तत्वफलक आदित्वव्यपदेश औपगवादावतिदिश्यते। तादात्म्याति
देशो यथा। सुवामंत्रिते पराङ्गवत्स्वरे इत्यनेन द्रुवत्पाणी शुभस्पती इत्यत्र शुभशब्दस्यांगत्वे सति षाष्ठिकेनामंत्रितस्येत्यनेन शकारोकारस्याद्यु
दात्तत्वं सिध्यति। शास्त्रातिदेशो यथा। कालेभ्यो भववत् इत्यनेन कालवाचिभ्यस्तत्रभव इत्यधिकारस्य तत् शास्त्रं तत्सास्य देवतेत्यर्थे अतिदिश्यते।
तेन मासिकं प्रावृषेण्यमित्यत्र यथाविहितं कालाट्ठञ्। प्रावृष एण्य इति सिध्यति। कार्यातिदेशे तु इह प्रकृतिप्रत्ययादीनां सांकर्यं स्यात्। कार्याति
देशो यथा। गोतो णित्। गौः। गावौ। गावः। अत्र णित्कार्यं वृद्धिरतिदिश्यते। प्राधान्यात्। केचित्तु निमित्तातिदेशो गोतो णिदित्युदाहरंति तन्मते कार्यातिदेशस्य क
र्मवत्कर्मणा स्थानिवदादेश इत्याद्युदाहर्तव्यं। रूपातिदेशो यथा। वतंडी चासौ वृंदारिका च वातंड्यवृंदारिका। अत्र वतंडीशब्दे पुंवत् कर्मधारये

ऋतो ङिसर्वनामस्थानयोः।७।३।११०। ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यात्। इति प्राप्ते। ऋदुशनस्पुरुदंसोऽनेहसां
च।७।१।९४। ऋदन्तानामुशनसादीनां चानङ् स्यादसम्बुद्धौ सौ परे। अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणां।६।४।
११। अबादीनामुपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे। नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थं। तेन पितृभ्रातृप्रभृतीनां न॥ उ
द्गातृशब्दस्य भवत्येव। समर्थसूत्रे उद्गातार इति भाष्यप्रयोगात्। क्रोष्टा। क्रोष्टारौ। क्रोष्टारः। क्रोष्टारं। क्रोष्टारौ। क्रोष्टून्। विभाषा तृतीया
दिष्वचि।७।१।९७। अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत्। क्रोष्ट्रा। क्रोष्टु॥ ॥ २९ त्यनेन पुंवाचकः वातंड्यशब्दरूपमतिदिश्यते। इह
मनोरमायामतिदेशस्य षड्विधत्वमुक्तं अन्ये तु कार्यरूपनिमित्तार्थशास्त्रतादात्म्यशब्दिताः। व्यपदेशश्च सप्तैते नतिदेशान्प्रचक्षते इति सप्तविधत्वमाहुः
अर्थातिदेशस्योदाहरणं तु गार्गी च गार्ग्यायणौ च गर्गाः। अत्र स्त्रीपुंवच्चेत्यनेन गोत्रप्रत्ययान्तस्त्रीवाचकस्य वृद्धयूनेत्येकशेषे सति स्त्र्यर्थस्य पुमर्थोऽति
दिश्यते। तेन स्त्रियामपत्यकृते च हुत्वे यञञोश्चेति लुक् सिध्यति॥ ॐ॥ ऋतो ङि। ऋतृ एतयोरनुकरणे ऋकारान्ते गुणनिवारणाय तपरकरणमिति बो
ध्यं। अप्तृन्नादिषु शिष्टेषु तृ इति वक्तव्ये इत्येव सिद्धे तृन्तृचोर्भेदेनोपादानं क्वचित्सामान्योक्तावपि विशेष एव गृह्यते इति ज्ञापनार्थं। तेन न कोपधाद्

सु·
सि·कौ· ऋसामान्योक्त्वा वयकत्तद्धितयोरेव को गृह्यते। न कमात्रं। तेन यदग्रे वक्ष्यति कोपधप्रतिषेधे तद्धितवुग्ग्रहणमिति तदुपपन्नं भवतीत्येके। अन्ये त्वाहुः। अ
टी·त· पत् इत्येव वक्तव्ये तृन्तृजिति भेदेनोपादानमर्थवत्त्वाद्व्यावृत्तये। यद्यप्यर्थवत्परिभाषया तन्निवृत्तिः सिध्यति तथापि तस्याः परिभाषाया अनित्यत्व
५८ ज्ञापनाय तयोः पृथगुपादानं। तेन अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्तीति सिद्धमिति। व्युत्पत्तिपक्षे तृन्नन्तत्वान्नन्तत्वा
द्दीर्घसिद्धे नप्त्रादिग्रहणं व्यर्थमित्यत आह। नियमार्थमिति। औणादिकानामन्येषां संज्ञाशब्दानां मा भूदित्येतदर्थमित्यर्थः। धातृशब्दस्त्वौणादिकशब्दो
न भवतीति। तत्र दीर्घो भवत्येव। धातारौ। धातारः। अव्युत्पत्तिपक्षे तु नप्त्रादिग्रहणं विध्यर्थमिति। पितृभ्रातृप्रभृतीनां दीर्घशंकैव नास्तीति वाच्यं। तेनेति। पि
तरौ। पितरः। भ्रातरौ। भ्रातरः। इत्यादौ दीर्घो नेत्यर्थः। क्रोष्टेति। अनङ् हल्ङ्यादिलोपान्परत्वादुपधादीर्घः। सर्वनामस्थाने चेत्यनेन नयद्यपि लभ्यते तथापि परत्वादृत्वम्

ऋत उत्। ६।१।१११। ऋदन्तात् ङसिङसोरति परे उकार एकादेशः स्यात्। रपरत्वं। रात्सस्य। ८।२।२४। रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य
रेफस्य विसर्गः। क्रोष्टुः। आमि परत्वात्तृज्वद्भावे प्राप्ते। नुमचिरतृज्वद्भावेभ्यो नुट्पूर्वविप्रतिषेधेन। क्रोष्टूनां। क्रोष्टरि। क्रोष्टौ। पक्षे हलादौ च श
म्भुवत्। इत्युदन्ताः। हूहूः। हूह्वौ। हूह्वः। हूहूं। हूहौ। हूहूनित्यादि। अतिचमूशब्दे तु नदीकार्यं विशेषः। शेषं तु क्विबन्तवातप्रमीवत्। हे
अतिचमु। अतिचम्वौ। अतिचम्वः। अतिचमूनां। अतिचम्वां। खलपूः॥

नित्ये वस्याप्यः। कृतेप्यनङि एकादेशविकृतस्यानन्यत्वेन तत्त्वात्। अन्य
था गुणे कृतेपि क्रोष्टारावित्यादौ दीर्घो न स्यादिति भावः। विभाषा तृ। यस्मिन्विधिस्तदादाविति तदादिविधिरित्याह। अजादाविति। ऋत उत्। ऋकाराकारयोरेकदे
शे सति ह्रस्व एव उकारः स्यान्न तु दीर्घ इत्येतदर्थकेन तपरकरणेन भाव्यमानोऽण् क्वचित्सवर्णान्गृह्णातीति ज्ञाप्यते तेन यवलपरे हकारे मस्य विधीयमाना यवला
अनुनासिका भवन्ति। रात्सस्य। संयोगान्तस्य लोप इत्यनेनैव सिद्धे नियमार्थमिदमित्याह। सस्यैवेति। नान्यस्येति। ऊर्क्। परिमाः। ईड् इत्यादौ रेफात्संयोगान्तस्य लोपो नेत्यर्थः।
रादेव सस्येति विपरीतनियमोऽत्र न भवति। उरः प्रभृतिषु कृतसंयोगान्तलोपस्य पुमान्नित्यस्य दर्शनात्। परत्वादिति। न च नुट् नित्य इति वाच्यं। तृज्वद्भावे कृते सन्नि
पातपरिभाषया नुटो दुर्लभत्वात् इति भावः। नुमचिरेति। वारीणां तिसृणां क्रोष्टूनामिति क्रमेणोदाहरणानि। ननु रेण स्वविषये प्राप्तं सर्वं बाध्यं बाध्यसामान्यचिं 58

CC-0. In Public Domain. Digitization by eGangotri

नाश्रयणं तु। अत एव गुणदीर्घोत्वानामपवाद इति वक्ष्यति। तथा चाविशेषान्नुडुच्यमाने न बाध्यत इति कथमिह विप्रतिषेधः। उत्सर्गापवादयोस्तद्योगादिति चेन्न। अ
त्राहुः अत एव तदंशे विप्रतिषेधं दूषयित्वा न तिसृचतसृ इति ज्ञापकान्नुडिति भाष्यकृतोक्तं। एवं च नुमतृज्वद्भावाभ्यामित्येव सुवचमिति। इत्युदंताः॥ हूहूरिति
गंधर्वविशेषवाचकमव्युत्पन्नं प्रातिपदिकमिदं। हूहाविति। दीर्घाज्जसि चेति पूर्वसवर्णदीर्घनिषेधसत्त्वे कः इति यण्। अतिचमूशब्दे त्विति। प्रथमलिंगग्रह
णं चेत्युक्तेः। तथा चैवमतिचम्वा इत्यादि इति प्राचोक्तं नादर्त्तव्यमिति भावः। खलपूरिति। खलं पुनातीति पूञः क्विप्॥ ❀ ॥ ओः सुपि॥ इणो यणित्यतो यण्। एरनेकाच

ओः सुपि। ६।४।८३। धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ सुपि। गतिकारकेत
रपूर्वपदस्य यण्नेष्यते। खलप्वौ। खलप्वः इत्यादि। एवं सुल्वादयः। अनेकाचः किं। लूः। लुवौ। लुवः। धात्ववयवेति किं। उल्लूः। उल्लुवौ। उल
ल्वः। असंयोगपूर्वस्य किं। कटप्रुवौ। कटप्रुवः। गतीत्यादि किं। परमलुवौ। सुपि किं। लुलुवतुः। स्वभूः। न भूसुधियोः। स्वभुवौ। स्वभुवः। व
र्षाभ्वश्च। ६।४।८४। अस्योवर्णस्य यण् स्यादचि सुपि। वर्षाभ्वौ। वर्षाभ्वः। दृंभवतीति दृम्भूः। अत्र दृम्भूजम्बूकफेलूकर्कन्धूदिधिषूरिति उणादिसू
त्रेण व्युत्पादितः। दृंभ्वौ। दृंभ्वः। दृंभ्वं। दृंभ्वौ। दृंभून्। शेषं हूहूवत्। दृन्निति नान्तं हिंसार्थेऽव्ययं भुवः क्विप्। दृन्भूः। दृनकरपुनः पूर्वस्य भुवो यण् व
क्तव्यः। दृन्भ्वौ। दृन्भ्व इत्यादि। खलपूवत्। करभ्वौ। करभ्वः। दीर्घपाठे तु करए वकारः। स्वार्थिकः प्रज्ञाद्यण्। कारभ्वौ। कारभ्वः। पुनर्भूर्योगिकः पुंसि
पुनर्भ्वावित्यादि। दृग्भूकाराभूशब्दौ स्वयंभूवत्। इत्यूदन्ताः। धाता। हे धातः। धातारौ। धातारः। ऋवर्णान्नस्य णत्वं वाच्यं॥ धातॄणां। इत्यादि। एवं न
प्त्रादयः। उद्गातारौ। पिता। व्युत्पत्तिपक्षे पितृ नप्त्रादिग्रहणस्य नियमार्थत्वान्न दीर्घः। पितरौ। पितरः। पितरम्। पितरौ। शेषं धातृवत्। एवं जामातृभ्रात्रादयः।

इति सूत्रं च सर्वमनुवर्तते। इवर्णवर्जं। ओरित्युकारस्य कार्यित्वेन निर्देशात्। अचि श्नु धात्विति सूत्राद्धातुः एरनेकाच इत्यत्रैव संबध्यते इत्याशयेन व्याचष्टे। धात्ववयवसंयो
गेत्यादि। वर्षाभ्वौ वर्षाभ्व इति। अत्र इको यणचीति यणं बाधित्वा प्रथमयोरिति पूर्वसवर्णदीर्घः प्राप्तः तस्य दीर्घाज्जसि चेति निषेधे पुनरपि यणादेशप्रसक्तौ अचि श्नु
धातुभ्रुवामित्युवङ् तं च बाधित्वा ओः सुपीति यण् प्राप्तः तस्य न भूसुधियोरिति निषेधे पुनरुवङादेशप्रसक्तौ वर्षाभ्वश्चेति यणिति बोध्यं। एवमन्यत्राप्युत्सर्गापवादवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सु॰ सि॰कौ॰ टी॰त ५९

घयउल्यौः। भेके मंडूकवर्षाभूशालूरप्लवदर्दुरा इत्यमरः। भेक्यां पुनर्नवायां स्त्री वर्षाभूर्दर्दुरे पुमानिति यादवः। दृंभतीति। दृभी ग्रंथे तुदादिः। दृंभूर्ग्रंथकर्त्ता। कथकइ
त्यन्ये। व्युत्पादित इति। उ प्रत्ययो नुमागमश्चात्र निपात्यते इत्यर्थः। दृशापादीदृन्तौ तु दर्भणं दृंभूः नुमागमोऽ नुस्वारश्च नि
पात्यत इत्युक्तम्। अयमूकारो न धातोरिति उवङोऽप्रसंगादिको यणश्चीति यणसवामि पूर्वं इत्यनेन वा ध्वनत इत्याशयेनाह। दृंभूमिति। शसि दीर्घाज्जसि चे
ति निषेधाप्रवृत्त्या पूर्वसवर्णदीर्घेणाविवाध्यत इत्याह। दृंभूनिति। दृन्नितीति। इदं च श्रीपतिमतं। माधवेन तु अंदूदृंभू इत्यादि सूत्रेण दृढशब्दे उपपदे भुवः कूप्रत्य
यः उपपदस्य दृन्नादेशश्च निपात्यत इत्युक्तं। दृन्भूरिति। नरुसर्पजातिभेद इत्येकेकवाचिरित्यन्ये। वक्ष्यत इति। वर्षाभ्वश्चेति चकारस्यानुक्तसमुच्चयार्थत्वादिति भावः। एवं
च ओः सुपीति प्राप्तस्य यणो न भूसुधियोरिति निषेधे वर्षादृन्कर पुनः पूर्वस्य भुव इत्येन हि ध्वर्थमिति स्थितं। अत्र नव्याः। वर्षादृन्करेत्यस्य नियमार्थतां स्वीकृत्य न भूसुधि
योरित्यत्र भूग्रहणं त्यक्तुं शक्यमिति। दीर्घपाठ इति। दृन्कारेति पाठे इत्यर्थः। एवं च ह्रस्वपाठे कारपूर्वस्यो वङेव दीर्घपाठे तु करपूर्वस्योवङिति विवेकः। पुनर्भूर्दिधिषूरूढा 59
द्विरित्यमरोक्तेः पुनर्भूशब्दो नित्यस्त्रीलिंगस्तथा च स्त्रीलिंगप्रकरण एव वक्तुमुचितो न त्वत्रेत्याशंकायामाह। यौगिकः पुंसीति। पुनर्भवतीति पुनर्भूरिति क्रियाशब्दः पुंल्लिंगेप्यस्तीत्यर्थः
स्वयंभूवदिति। प्राचा तु दृग्भूकाराभूशब्दो वर्षाभूवदुदाहृतो न तु उपेक्ष्यमिति भावः। इत्यूदंताः॥ धानेति। दधातीति धाता अज्ञयोनिः। डुधाञ्स्तृच्तृन्वा अनङ् दीर्घ
सुलोप नलोपाः। व्युत्पत्तिपक्ष इति। अव्युत्पत्तिपक्षे दीर्घशंकैव नास्ति। अवादिष्वपठनादिति भावः। नेति। नयते र्डिच्चेति ऋप्रत्ययान्तो नृशब्दः। अनङादिप्राग्वत्॰॥ ५९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नृ च।६।४।६। छन्दस्युभयथेति सूत्रादुभयथेत्यनुवर्तत इत्यभिप्रेत्याह। वा दीर्घः स्यादिति। केचित्त्विह छन्दसीत्यप्यनुवर्तयन्ति तेषां हि चिन्ता जर्जरचेन सांवतनृणां काना
मश्राते: कथा। नृणामेको गम्यस्त्वमसीत्यादिप्रयोगा न संगच्छेरन्। किं च। छन्दस्युभयथेति पूर्वसूत्रेणैव नृणां नृणामिति सिद्धे नृ चेति सूत्रस्य वैयर्थ्यं स्यात्। यद्यपि पूर्वसू
त्रे तिसृचतसृ इत्यनुवर्तयन्ति तद्यप्ययुक्तम्। अविशेषेण विकल्पदर्शनात्। तथा च धाता धातॄणामिति मन्त्रे नैत्तिरीये ह्रस्वः पठ्यते बह्वृचैस्तु दीर्घ इति दिक्॥ ॥
इत्पृदन्ताः। प्रकृतिवदनुकरणमित्यादि। यत्तदेतेभ्यः परिमाणे इति निर्देशोऽत्र लिंगं। भवति हि तत्र त्यदाद्यत्वकरणादनुकरणस्य प्रकृतिवत्त्वमेकशेषाभावदर्श
नाच्च वैकल्पिकं नेति इत्वरपरत्वमिति। ऋत इद्धातोरिति सूत्रे उरण्रपर इति रपरत्वं कीरिति कृधातुरित्यर्थः। एवं तीरिति। तृधातुः इत्यादीति। ऋत उदिति तपरकरणान्नङसि
ङसोरत उदाहरणे नक दीर्घान्तत्वादामो ननुट्। कामाङोऽनुक्ति इत्यादि। इत्पृदन्ताः। अनङिति। ऋऌवर्णयोः सावर्ण्यादृदुशनेति सूत्रप्रवृत्तेः। गुणविषय इति। ऋतो ङीति
नृ चा६।४।६। नृ इत्येतस्य नामि वा दीर्घस्यात्। नृणां। नृणां। इति ऋदन्ताः। कृतृ अनयोरनुकरणे प्रकृतिवदनुकरणमिति वैकल्पिकाऽतिदेशादि
त्वरपरत्वं कीः। किरौ। किरः। तीः। तिरौ। तिरः। इत्यादि गीर्वत्। इत्वाभावपक्षे तु ऋदुशन इति ऋतो ङीति च तपरकरणादनङ् लोना कृः। क्रौ। क्रः। क्रां क्रौ
कृन्। क्रा। क्रे। इत्यादि। इति ॠदन्ताः। गम्लृ शक्लृ अनयोरनुकरणेऽनङ्। गमा। शका। गुणविषये तु लपरत्वं। गमलौ। गमलः। गमलम्। गमलौ। गमॄ
न्। गम्ला। गमले। ङसिङसोस्तु। ऋत उदित्युत्वे लपरत्वे संयोगान्तस्य लोपः। गमुल्। शकुल्। इत्यादि। इति ऌदन्ताः। सेः। सयौ। सयः। स्मृतेः। स्मृतयोः। स्मृत
गुणविषये। गमॄन् इति। ऌवर्णस्य दीर्घाभावान्न प्रथमयोरिति यः पूर्वसवर्णदीर्घः स ऌकाराकारयोः स्थाने ऋकार एव भवति। नन्वत्र ऌकार ((यः। इत्येदन्ताः।
द्वयगर्भो ऌकारदीर्घोऽस्त्विति चेत्॥ अत्राहुः प्रथमयोः पूर्वसवर्ण इत्यस्याकः प्रथमाद्वितीययोरचि पूर्वस्य सवर्णो यो दीर्घः स पूर्वपरयोः स्थाने भवतीत्यर्थात् ऋऌवर्णयोर्व
चनेन सावर्ण्यसंज्ञाविधानात् ऋकार एव ऌकाराऽकारयोः स्थाने भवति न तु ऌकारद्वयगर्भो दीर्घस्तस्य ईषत्स्पृष्टप्रयत्नत्वात्प्रयत्नभेदेन ऌकारसावर्ण्याभावादिति। एवं
च होतृ नित्यादौ रेफद्वयगर्भो दीर्घः ऋकाराकारयोः स्थाने न भवत्येवेति बोध्यं। इत्यादीति। गम्लृभ्यां। गम्लृभिः। गम्लृभ्यः। आमि तु गमॄणामिति केचित्। वस्तुतस्तु
ऌकारस्थाने ऌकारद्वयगर्भेणैव दीर्घेण भवितव्यं स्थानत आन्तर्यस्य बलीयस्त्वात्। होतॄणामित्यत्र तु ऋकार एव भवति स्थानप्रयत्नोभयसाम्यात्। स्यादेतत्।

बु॰
सि॰ कौ॰
टी॰ त॰
६०

रेफद्वययुक्तस्य लकारद्वययुक्तस्य चैव न्स्पृष्टप्रयत्नत्वात् प्रयत्नभेदेन ऋलृवर्णाभ्यां सावर्ण्याभावेनाच्त्वाभावादूकालोजित्यादिना दीर्घसंज्ञा नालौकिकयमत्र लकारद्व
यगर्भत्वं भवितव्यं। ऋति ऋ वा लृति लृ वेति वार्त्तिकप्रत्याख्यानं चाकथं संगच्छताम्। अकः सवर्णे इत्यनेनेष्टरूपाणामसिद्धेः। अत्राहुः। उभयोरप्यच्त्वसिद्धये वर्णस
माम्नाये ऋलृक्सूत्रोत्तरं पाठः कर्त्तव्यस्तेन सर्वेष्टसिद्धिः। न च दीर्घत्वसिद्धावपि विवृतप्रयत्नसाम्यान्होतृ ऋकार इत्यत्र ऋकारो दीर्घ एव स्यान्न तु रेफद्वययुक्तो दीर्घ इति
प्रं वाच्यं। ऋकारद्वयस्यान्ते रेफद्वयवत्तसाम्येन कदाचित्तस्यापि प्रवृत्तेः। होतृलकार इत्यत्र लृकारेणान्तर्यात् कदाचिल्लकारद्वययुक्तः कदाचिदृकारेणान्तर्याद्ऋ
कारश्च भवति परं तु वार्त्तिकमते होतॄकार इत्यत्र रेफद्वयगर्भ एव भवति। प्रत्याख्यानपक्षे तु कदाचिद्भवतीति वैषम्यमस्ति तच्चेष्टापत्तिर्वा प्रत्याख्यानस्य प्रौढिवाद
तावाऽभ्युपगन्तव्येति। अत्रेदं बोध्यं। अकः सवर्णे इति सूत्रस्य भाष्ये ऋति ऋ वा लृति लृ वेत्येतन्न प्रत्याख्यातं तुल्यास्यमिति सूत्रस्य भाष्ये तु तस्य प्रत्याख्यानेऽपि फलभेदेन द्वयोरा।
स्वीकृतेन तु तस्मिन्न कोकीत्येव सुवचमिति ग्रन्थोऽनुपपन्न एव। यदि तु ऋति ऋ वेति वार्त्तिकं ऋति ऋ वेति पठ्येत तदा वार्त्तिकयोः सवर्णे इति पदानुवृत्त्यनपेक्षणान्सु
वचमेवाऽकोकीति। प्रकृतमनुसरामः। ङेतु ऋतो ङीति गुणो लपरः। गमलि। गम्लोः। गम्लृषु। एवं शक्लृ शक्ल्वे प्लुतां। इति लृदन्ताः। सेरिति। अस्यापत्यमिः कामः। अस्य
स्त्री ईः लक्ष्मीः तेन सह वर्त्तत इति विग्रहे तेन सहेति तुल्ययोग इति बहुव्रीहौ वोपसर्जनस्येति सहस्य सभावे आद्गुणः। सय इति। ननु से इत्येकारस्य अन्तवद्भावे
न पदान्तत्वात् स्यादेशं बाधित्वा जसि परतः एङः पदान्तादिति पूर्वरूपमेकादेशः स्यात्। तथा च सेरित्येव रूपं स्यान्न तु सय इति चेत्। अत्र केचित्। एवं तर्हि यासः से ई
शः से इति विहितादेशस्यानुकरणशब्दोऽयमस्तु तत्र हि जसि परतोऽयादेशस्य निर्बाधत्वादिति। स्मृतेरिति। इः कामः। स्मृतो येन सः ईः लक्ष्मीः स्मृता येनेति वा विग्रहः।
निष्ठेति स्मृतशब्दस्य पूर्वनिपातः। स्मृतय इति। नन्वत्र पूर्वोक्तरीत्या एङः पदान्तादतीति पूर्वरूपेणाभाव्यं न त्वयादेशेन न त्वत्रानुकरणशब्दत्वकल्पनमौचित्यं लभ
ते इति चेत्। अत्र नव्याः। उत्तरपदत्वे चापदादिविधौ प्रतिषेध इति प्रत्ययलक्षणप्रतिषेधादेङः पदान्तादतीत्यस्याप्रवृत्तिः। किं च। स्वादिष्वसर्वनामस्थाने यचि भमित्यत्र
ह्रित्वानन्तं चक्रिययासंबध्ययजादौ सर्वनामस्थाने परतः पूर्वपदसंज्ञं न भवतीति व्याख्याततेन श्वानेन सुप्तिङन्तमिति स्वादिषिति च हि विधावपि पदसंज्ञा निषिध्य
त इति पूर्वान्तत्वप्रयुक्तापदान्तत्वेह दुर्लभमिति स्मृतय इति रूपं निर्बाधमेव तथा सय इत्यत्र इना सहेत्यादिव्युत्पत्तिपक्षेऽपि नानुपपत्तिः। न चैकादेशस्य पूर्वान्तत्वेनाप्य

60

CC-0. In Public Domain. Digitization by eGangotri

यत्वात्सुपो लुक्स्यादिति शंक्यं। अव्ययसंज्ञाया अन्वर्थत्वेनोपसर्जनेतरभावात्। न चैवमपि सह इ इति स्थिते अंतरंगत्वाद्गुणे कृते सहेशब्दस्य सादेशे एवं नस्या
देकादेशस्य परादिवद्भावे सहशब्दाभावात्पूर्वान्तत्वेनोत्तरपदत्वाभावात् उभयत आश्रयणे अंतादिवद्भावनिषेधाच्च अस्तु वा सहेशब्दस्य सभावस्तथापि सइत्यस्य दंतमे
वरूपं स्यान्न तु से इत्यस्य दंतमिति शंक्यं। नेंद्रस्य परस्येत्युत्तरपदवृद्धिप्रतिषेधेन पूर्वोत्तरपदयोः प्रथमं कार्यं भवति न त्वेकादेश इति सामान्यज्ञापनादित्याहुः॥ ॥
गोतोणित्। इतोत्सर्वनामस्थाने इत्यतोऽनुवृत्तं सप्तम्यंतं सर्वनामस्थानग्रहणं प्रथमया विपरिणम्यते णिदित्यनेन सामानाधिकरण्यात् तदाह। सर्वनामस्थानमि
ति। णित्कार्यं कृत्स्यादिति। णितिपरे पूर्वस्य यत्कार्यं तत्करोतीत्यर्थः। गोरित्यादि। चित्रगुरित्यत्र तु न भवति। ओत इति वक्ष्यमाणत्वात्। तद्धितो यः शस्स ओकारां

गोतोणित्। ७।१।९०। गोशब्दात्परं सर्वनामस्थानं णिद्वत्। गौः। गावौ। गावः। औतोऽम्शसोः। ६।१।९३। आ ओत इति छेदः। ओकारादम् शसोरचि परे
आकार एकादेशः स्यात्। शसा साहचर्यात्सुपेवाम् गृह्यते नेह। अचिनवम्। असुनवम्। गाम्। गावौ। गाः। गवा। गवे। गोः। इत्यादि। ओतोणिदिति
वाच्यं। विहितविशेषणं च। तेन। सुद्यौः। सुद्यावौ। सुद्यावः। औकारान्ताद्विहितं सर्वनामस्थानमिति व्याख्यानान्नेह। हे भानो। भानवः। उः शम्भुः स्मृतो येन सः
स्मृतोः। स्मृतावौ। स्मृतावः। स्मृताम्। स्मृतावौ। स्मृताः। इत्यादि। इत्योदन्ताः। रायो हलि। ७।२।८५। रैशब्दस्याऽऽकारोऽन्तादेशः स्याद्धलि विभक्तौ। अ
चि आयादेशः। राः। रायौ। रायः। रायम्। रायौ। रायः। राया। राभ्यामित्यादि। इत्यैदन्ताः। ग्लौः। ग्लावौ। ग्लावः। ग्लावम्। ग्लावौ। ग्लावः। इत्यादि। ओतो
ऽम्शसोरितीह न प्रवर्त्तते। ऐऔच्सूत्रेण ओदौतोः सावर्ण्याभावज्ञापनात्। इत्यजन्ताः पुंल्लिङ्गाः॥ तान्न संभवतीत्याशयेनाह। शसा साहचर्यादिति। सुपीत्यनुवर्त्तना

च्चेत्यपि काशिकायामुक्तं। कैयटस्तु तद्धितोपि शस् सन्नोनि कथमिह साहचर्यादमः सुप्त्वमित्याशंक्य अचीत्यधिकारादजादिः शस् सुप्येव संभवति न तु तद्धित इत्याह। अचिन
वमिति। चिनोतेर्लङादेशस्य मिपस्तस्थस्थमिपामित्यम्। ओतो णिदिति वाच्यं। गोत इत्यपहाय ओत इति वाच्यमित्यर्थः। एवं च गामित्यत्र परत्वाद्वृद्धिः स्यादिति शंकायां
अनवकाशः। निरवकाशतया आत्वेन वृद्धेर्बाधनात्। इत्योदन्ताः। रायो हलि। अष्टन आ विभक्तौ। विभक्तावित्यत्र आ इति विभक्ताविति च वर्तते तदाह। आकारोंतादेश इति
अर्थे रै विभवा अपीत्यमरः। रायिश्छांदस इति भाष्यं तच्च कथं जनस्य रे शब्दस्य छांदसत्वपरं न तु केवलस्यापीति वांतो यि सूत्रे कैयटः। स एव केवलोपि छांदस इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु·
सि·कौ·
टी·त·
६१

पक्षांतरमप्याह। इत्येकेनाः। ग्लौरिति। ग्लौर्मृगांकः कलानिधिरित्यमरः। एवं जनानवतीति जनौः। ज्वरत्वरेत्यूठ्। एत्येधत्यूठ्स्विति वृद्धिः। अच्याचारे ग्लाः जना
वौ जनावइत्यादि। न प्रवर्तत इति। हे ग्लौरित्यत्र संबुद्धिलोपः ग्लावइत्यत्र ङसिङसो श्चेति पूर्वरूपं च न प्रवर्तेत इत्यपि बोध्यं। सावर्ण्याभावज्ञापनादिति स
ति सावर्ण्ये एच श्चतुर्विंशतेः संज्ञा भवंतीति वृद्धिरादैजित्येत्र द्धिरादैङितिपठितुं शक्यत्वादैऔजिति सूत्रं व्यर्थं सत्सावर्ण्याभावं ज्ञापयति। अत एव एदैतोरै
दौतोश्च न मिथः सावर्ण्ये ऐऔजिति सूत्रारंभसामर्थ्यादित्याद्यणुदित्सवर्णस्येति सूत्र एवोक्तमिति भावः। नन्वैऔजिति सूत्राभावेन प्याभ्यामिति सूत्रेणाभ्यामैजि
ति प्रत्याहारोऽयं न सिध्येत्। पूर्वैस्तु ताभ्यामैङित्युक्ते तु विधीयमानस्य सवर्णाग्राहकतया वैय्याकरणः सौवश्वइत्यादावैदौतावेवागमौ स्तो न त्वैदौतौ तत्र श्चैवय्यर्थ्या
भावादैऔजिति सूत्रं सावर्ण्याभावं न ज्ञापयतीति चेन्मैवं। पूर्वैस्तु ताभ्यामैओ इति पठनेनापीष्टसिद्धेस्त्सूत्रवैयर्थ्यस्य तदवस्थत्वात्। स्थितस्य गतिश्चिंतनी
नमिति न्यायेन तत्र एओ ङिति सूत्रारंभसामर्थ्यादित्युक्ते तु ताभ्यामैजिति अत्रानुपपत्तिर्नास्त्येव। न च एओङिति सूत्राभावे अदेङ्गुणः एङि पररूपं एङः पदांतादतीत्या
दावेङ्प्रत्याहारः कथं सिध्येदिति वाच्यं। सति तु सावर्ण्ये अदेङ्गुणः एचि पररूपं एचः पदांतादतीति पठितुं शक्यत्वादतिप्रसंगस्य एङ्ग्रहणेपि तुल्यत्वात्। न
चैवमप्येचां चतुर्णां क्रमादर्धद्यादेशा सिध्यर्थं एओङ् ऐऔजिति सूत्रद्वयमप्यावश्यकमिति वाच्यं। स्थानेंतरतम इत्यनेनैव एचां क्रमादयादयः सिध्यंतीति प्रा
गेवास्माभिः उपपादितत्वात्। यदा हि स्वराणामूष्मणां चैवेत्यादिप्रागुक्तशिक्षावचनानुरोधादेदैतोर्विवृततरत्वे चौ विवृततमावित्यभ्युपगम्यते तदा त्वेदैतोरो
दौतोश्च मिथः सावर्ण्यप्रसक्तिरेव नास्तीति ऐऔजिति एओङिति वा सूत्रं नोक्तज्ञापकमिति ज्ञेयं। केचित्तु विवृततरयोरेदोर्विवृततमत्वाभावेपि विवृततरे विवृततमे च विवृ
तत्वस्य सत्त्वात्तादात्म्यतुल्यप्रयत्नत्वमेदैरैचौश्चास्तीति सावर्ण्यप्रसक्तावुक्तज्ञापकाश्रयणं सम्यगेवेत्याहुस्तदपरे न क्षमंते। तथा हि सति इको गुणवृद्धी इति सूत्रस्थशब्दे
कौस्तुभग्रंथेन सह विरोधप्रसंगात्। तत्र हि स्वराणामूष्मणां चेत्यादिशिक्षानुरोधाच्चेतानेनेत्यादौ गुणप्रवृत्तिः स्याद्धि वृततरत्वरूपवैलक्षण्यस्य सत्त्वादिति न शं
क्यं विधेर्विषयत्वापत्तेः। जयः करणं धान्यानां भवन इत्यादिनिर्देशेरिकारादिषु गुणप्रवृत्त्यनुमानाच्चेति प्रकारांतरेण समाहितं त्वदुक्तरीत्या तुल्यप्रयत्नत्वे
तु चेतानेनेत्यादौ गुणप्रवृत्तिशंका निरालंबनैव स्यात्तस्मादीषद्विवृत भेदेन स्वराणामूष्मणामिव विवृततरविवृततमभेदेन सावर्ण्याभावोऽत्र सु ६१

61

रमेति। रमते इति रमा। रमु क्रीडायामित्यस्मात् पचाद्यचि टाप्। लिङ्गविशिष्टपरिभाषया स्वादयः। हल्ङ्यादिलोपः। न चात्राबन्तत्वादेव स्वाद्युत्पत्तिरस्तु प्रत्ययान्तस्य प्रातिपदिकत्वेपि ङ्याप्प्रोः पृथग्ग्रहणादिति वाच्यं। ङ्याप्ग्रहणस्यान्यार्थतया प्रागेवोक्तत्वात्। प्रत्याख्यातत्वाच्च तद्ग्रहणस्य। शी स्यादिति। जसः शी इत्यतः शी इत्यनुवर्त्तत इति भावः। संबुद्धौ च। बहुवचने झल्येत् आङि चापः इत्यतः एदापः इत्यनुवर्त्तते तदाह। आप एकारः स्यादिति। एङ्ह्रस्वादिति। न चात्र हल्ङ्यादिनैव सुलोपोस्तु। प्रत्ययलक्षणन्यायेन संबुद्धौ चेत्येत्वस्यापि प्रवृत्तिसंभवादिति शंक्यं। परत्वान्नित्यत्वाच्च एत्वे कृते हल्ङ्यादिलोपस्याप्राप्तेः। स्थानिवद्भावादप्येत्वे व्याकाररूपत्वाभावात्। आ आवित्याकारं प्रश्लिष्य दीर्घग्रहणस्य प्रत्याख्यानात्। एङ्ह्रस्वादिति लोपस्यैव परत्वेन न्याय्यत्वाच्चेति भावः। आङि चकारेण ओसि चेति प्रकृतं परामृश्यत इत्याह। ओसि च परे इति। रमाभिरिति। नन्विह एकादेशस्य पूर्वान्तत्वेन ग्रहणादतो भिस ऐस् इत्यैस् प्राप्नोति। न च परत्वसामर्थ्यान्नै

रमा। औङ आपः ७।१।१८। आबन्तादङ्गात्परस्यौङः शी स्यात्। औङित्यौकारविभक्तेः संज्ञा प्राचाम्। रमे। रमाः। सम्बुद्धौ च ७।३।१०६। आप एकारः स्यात्सम्बुद्धौ। एङ्ह्रस्वादिति सम्बुद्धिलोपः। हे रमे। हे रमाः। रमां। रमे। रमाः। स्त्रीत्वान्नत्वाभावः। आङि चापः ७।३।१०५। आङि ओसि च परे आबन्तस्याङ्गस्यैकारः स्यात्। रमया। रमाभ्यां। रमाभिः। याडापः ७।३।११३। आपः परस्य ङिद्वचनस्य याडागमः स्यात्। वृद्धिरेचि। रमायै। सवर्णदीर्घः। रमायाः। रमयोः। रमाणां। रमायां। रमयोः। रमासु। एवं दुर्गादयः॥ ॥

ऽऽ वमिति शंक्यं। अकृते काद्येशे विश्वपाभिरित्यादौ कृतार्थत्वादिति चेन्मैवं। अल्विधावेनादिवच्चेत्यस्याप्रवृत्तेः। याडापः। घेर्ङितीत्यतो ङितीति सप्तम्यन्तमापः इति पंचम्यनुरोधेन विपरिणम्यत इत्याह। ङिद्वचनस्येति। अत्र सुपि चेत्यतः सुपीत्यनुवर्त्तमानं सुप एव यादृतेन अपित्सार्वधातुकस्य ङित्वेपि मालेव आचरतो मालात इत्यादौ तस्यादेर्न भवति। एतच्च अचः परस्मिन् इत्यत्र पूर्वस्य विधिः पूर्वविधिः इति षष्ठीसमासपक्षाभ्युपगमेनोक्तं पंचमीसमासपक्षाभ्युपगमे तु शपः स्थानिवत्त्वेन व्यवधानात्। मालात इत्यादौ याटः प्रसंग एव नास्तीत्याहुः। यड्ङित्येव वक्तव्ये दीर्घोच्चारणं स्पष्टप्रतिपत्त्यर्थं। न च अतो गुणे इति पररूपापत्तिः। अकारोच्चारणसामर्थ्यादेव तद्बाधात्। वृद्धिरेचीति प्राचा तु आट् श्चेत्युपन्यस्तं तदुपेक्षितं। याट्स्याटोष्टकारस्य समुदायानुबंधत्वेनेह आटोऽभावात्॥ ः॰ः ॥ ॥ ॥ ॥

सु॰
सि॰कौ॰
टी॰त॰
६२

सर्वनाम्नः स्याड्ढ्रस्वश्चेति दीर्घोच्चारणं प्राग्वत् । स्पष्टप्रतिपत्त्यर्थं । आवन्तस्य सर्वादिगणे पाठाभावात् सर्वनामत्वं नेत्याशंक्याह । एकादेशस्य पूर्वान्तत्वेनेति । विभाषा दिक्‌समासे । गोणत्वादप्राप्ते विभाषेयं ननु न बहुव्रीहाविति निषेधप्राप्तेरिति भ्रमितव्यं तस्य अलौकिकप्रक्रियावाक्यान्तर्गतसर्वादिविषयत्वात् दस्य च समासविषयत्वात् स्पष्टार्थमिति । प्रतिपदोक्तदिक्‌समासविधायके दिङ्नामान्यन्तराले इति सूत्रे शेषो बहुव्रीहिरित्यतो बहुव्रीहिरित्यधिकारादिति भावः । त्यकं शक्यमिति न चावन्तस्य द्वितीयादिश
ब्दस्य तीयप्रत्ययान्तत्वाभावाद्विभाषा ——— द्वितीयेति सूत्रमावश्यकमिति शंक्यं । एकादेशस्य पूर्वान्तत्वेन ग्रहणादावन्तस्यापि तीयप्रत्ययान्तत्वात् । तीयस्येति

सर्वनाम्नस्स्याड्ढ्रस्वश्च ॥ ७ । ३ । ११४ ॥ आवन्तात्सर्वनाम्नः परस्य ङितः स्याट् स्यादाप श्च ह्रस्वः । यादेरपवादः । सर्वस्यै । सर्वस्याः २ । एकादेशस्य पूर्वान्त
त्वेन ग्रहणादाभि सर्वनाम्न इति सुट् । सर्वासां । सर्वस्यां । सर्वयोः । सर्वासु । एवम्विश्वादय आवन्ताः ॥ विभाषा दिक्‌समासे बहुव्रीहौ ॥ १ । १ । २८ ॥ अत्र सर्व
नामता वा स्यात् । उत्तरपूर्वस्यै उत्तरपूर्वायै । दिङ्नामान्यन्तराले इति प्रतिपदोक्तस्य दिक्‌समासस्य ग्रहणान्नेह । योत्तरा सा पूर्वा यस्या उन्मुग्धायाः
तस्यै उत्तरपूर्वायै बहुव्रीहिग्रहणं स्पष्टार्थं । अन्तरस्यै शालायै । बाह्यायेत्यर्थः अपुरीत्युक्तेर्नेह । अन्तरायै नगर्यै । विभाषा द्वितीयातृतीया
भ्यां ॥ ७ । ३ । ११५ ॥ आभ्यां ङितस्स्याड्वा स्याच्च ह्रस्वः । इदं सूत्रं त्यक्तुं शक्यम् । तीयस्य ङित्सूपसंख्यानात् । द्वितीयस्यै । द्वितीयायै । द्वितीयस्याः २ द्वि
तीयायाः २ द्वितीयस्यां । द्वितीयायां । शेषं रमावत् । एवन्तृतीया । अम्बार्थनद्योर्ह्रस्वः । हे अम्ब । हे अक्क । हे अल्ल । असंयुक्ता ये डलकास्तद्वतां न ह्र
स्वः । हे अम्बाले । हे अम्बाडे । हे अम्बिके । जरा । जरसौ । शीभावात्परत्वाज्जरसा । आमि नुटः परत्वाज्जरसां । जरसामित्यादि । पक्षे हलादौ च रमावत् । इह पूर्वविप्रति
षेधेन शीभावं कृत्वा सन्निपातपरिभाषाया अनित्यतामाश्रित्य जरसी इति केचिदाहुस्तन्निर्मूलम् । यद्यपि जरसादेशस्य स्थानिवद्भावेनावन्तता माश्रि

त्य पुन्त्वपुंसकार्थमवश्यं वक्तव्येनानेनैव सिद्धो विभाषा द्वितीये— तिसूत्रं न कर्तव्यमिति भावः । अंबार्थनद्योर्ह्रस्वः अत्र एत्यओङ् आपः । आङि चापः । याडापः
अंबार्थत्वस्य स्वरूपरीति वचनात् स्वक्कस्यैवाम्बार्थस्य ह्रस्वो भवति नान्येषामित्याशयेन फलितमाह । असंयुक्ता ये डलका इत्यादि ॥ जरेति । जॄष् वयोहानाविति सामान्यवि
हिता दिभ्य इत्यङि ऋदृशोऽङि इति गुणे कृते टाप् । शीभावात्परत्वाज्जरसित्यादि । ननु ओङ् आपः ह्रस्वनद्यापो नुडित्यपेक्षया जरायाः इति सूत्रस्य परत्वाद्‌दस्त्वेवं । परत्वा

62 ६२

ङाममिनिविधयोजरसादेशं वाधित्वापरत्वात्स्युरिति चेन्न। अत्राहुः। आङि चापइत्येकारादेशे कृतेप्येकदेशविकृतन्यायेन जरायाइति जरसादेशप्रसक्त्यानित्य
त्वादेकारादेशं वाधित्वाजरसादेशएवभवति नचैकारादेशोपिनित्यएवजरसादेशे कृतेपिस्थानिवत्वेनावंतत्वादाङि चापइति प्रवृत्तेरितिवाच्यं। आकाररूपस्यै
वापः सर्वत्रग्रहणात् इत्यनुपदमेववक्ष्यमाणत्वान्नदप्रवृत्तेः। याडापइतियाडागमंतुजरसादेशोंतरंगत्वाद्वाधते॥ आकाररूपापः परस्यङितः सुपोविहित।

ङाम इतिपञ्चाऽविविधयः प्राप्ताः एवंनसनिश्चष्टस्तु तथाऽप्यनल्विधावित्युक्तेर्नभवन्ति। आआवितिप्रश्लिष्य आकाररूपस्यैवाऽऽपः सर्वत्रग्रह
णात्। एवंहलङ्याब्भ्यादिसूत्रेऽपि आ आप् ङी ई इति प्रश्लेषादतिखट्वः निष्कौशाम्बिरित्यादिसिद्धे दीर्घग्रहणं प्रत्याख्येयं। नचैवमप्यतिखट्वायेत्य
त्राश्रयमाकारत्वं स्थानिवद्भावेनाप्तत्वाश्रित्य याडस्यादितिवाच्यं। आवर्तनंयदङ्गं ततः परस्य याड्विधानात्। उपसर्जनस्त्री प्रत्ययेन तदादि
नियमात्। पद्दन्नित्यादिना सिकायानस्। नसः नसा। नोभ्यामित्यादि। पक्षेसुटिचरमावत्। निशायाः निशो निशः। निशा। व्रश्चभ्रस्जसृजमृजय
जराजभ्राजच्छशांषः ८।२।३६। व्रश्चादीनां सप्तानां छशान्तयोश्च षकारोऽन्तादेशस्याज्झलि पदान्ते च। षस्यजश्त्वेन डकारः। निड्भ्यां। निड्भिः।
सुपि डःसीतिपक्षे धुट् चर्त्वं। चर्त्वस्याऽसिद्धत्वाच्चयोर्द्वितीया इति टनयोर्ष्ट्यौना। नपदान्ताट्टोरिति नुष्टुत्वं। निट्त्सु। निट्सु। षढोः कः सि ८।२।४१। ष
स्यढस्यचकः स्यात्सकारेपरे। इति तु न भवति। जश्त्वस्यासिद्धत्वात्। केचित्तु व्रश्चादिसूत्रे राजेर्धातोरिति सूत्राद्धातोरित्यनुवर्तयन्ति। तन्मतेज
श्त्वेन जकारः। निज्भ्यां। निज्भिः। जश्त्वं श्चुत्वं चर्त्वं। निच्शु। चोः कुरिति कुत्वं न भवति। जश्त्वस्याऽसिद्धत्वात्। मांसपृतनासानूनां मांसपृन्स्नवो वाच्याः॥ अ
सादौ वा। पृतः। पृता। पृद्भ्यां। पक्षेसुटिचरमावत्। गोपाविश्वपावत्। मतिः प्रायेण हरिवत्। स्त्रीत्वान्नत्वाऽभावः। मतीः। नात्वन्नामस्या॥ ॥

स्यपाटोवह्याश्रयत्वेनवहिरंगत्वात्। ङाममपिजरसादेशोनित्यत्वाद्वाधते। नचाकाररूपावंतात्परस्यङामि कृतेसन्निपातपरिभाषयाजरसादेशस्या
प्रवृत्तौनतस्यनित्यतेतिवाच्यं। रूपमालायांजरसीत्युक्तत्वादिष्टानुरोधादुक्तपरिभाषाया अनित्यत्वाभ्युगमेवाधकाभावादिति स्वाश्रयमिति। यत्रादिः
सुवाश्रयंतन्निमित्तकमित्यर्थः यत्रादिसुपएवयाडागमापादनात्स्वशब्दे नतत्परामृश्यते। स्थानिवद्भावेनेति। नचैवंलाक्षणिकत्वात्कथमिहयाडस्यादितिवा

CC-0. In Public Domain. Digitization by eGangotri



अतिरेकविषयेलक्षणप्रतिपदोक्तपरिभाषायाः प्रवृत्तौ अतिरेकस्यैवेयर्थ्यापत्तेः अतोव्याचष्टे आवंतंयदंगमिति। यस्मात्प्रत्ययविधिस्तदादेस्तदंतस्यग्रहण
मितिनियमादितिखट्वेति। यदंगंतदावंतंनभवति यच्चावंतंखट्वेतितदंगंनभवति इतिनात्रयाडागमप्रसक्तिरितिभावः। अत्रनव्याः प्रत्ययग्रहणेतदंतग्रह
णमित्यपिग्रहणेनावंतंगृह्यते। आवंतस्यांगविशेषणेत्वावंतांतग्रहणं इतिखट्वायेत्यत्रोक्तदोषतादवस्थ्यमितियद्युच्यतेतर्ह्यंगेनावंतंविशेष्यतां। अंगसं
वंतकंयदावंतमिति। तथाचनोक्तातिप्रसंगशंकालेशइत्याहुः। स्त्रीप्रत्ययेतदादिनियमोनेत्याशंक्याह। उपसर्जनेति। अयंभावः। स्त्रीप्रत्ययेचा नुपसर्ज
नेनेत्यनुपसर्जनस्त्रीप्रत्ययेतदादिनियमप्रतिषेधोवक्ष्यतेनानुपसर्जनेपि। अतएवपरमकारीषगंधीपुत्रवदतिकारीषगंध्यपुत्रइत्यत्रष्यङः संप्रसारणं
पुत्रपत्योस्तत्पुरुषेइतिसंप्रसारणंनभवति। अतिकारीषगंध्यस्यहिष्यङंतत्वाभावात्। नचबहुश्रेयसीत्यत्रश्रेयसीत्युत्तरभागस्यङ्यंतत्वाद्घ्याहल्।

ङितिह्रस्वश्च।१।४।६। इयङुवङ्स्थानौस्त्रीशब्दभिन्नौनित्यस्त्रीलिंगावीदूतौह्रस्वौचइवर्णोवर्णौस्त्रियांवानदीसंज्ञौस्तोङितिपरे। आ
एनद्याः। मत्यै। मतये। मत्याः। मतेः। नदीत्वपक्षेऔदितिङेराम्प्राप्तो इदुद्भ्याम्।७।३।११७। नदीसंज्ञकाभ्यामिदुद्भ्यांपरस्यङेरामस्यात्। पक्षे
अच्चघेः। मत्यां। मतौ। एवंश्रुतिस्मृतिबुद्ध्यादयः॥ ॥ ङ्यादिलोपः प्रवर्ततेतथातत्राप्युत्तरभागस्यष्यङंतत्वात्संप्रसारणंस्यादेवेति

शंक्यं। पूर्वपदस्यष्यङंतस्यपुत्रपत्योरुत्तरपदयोः संप्रसारणमितिष्यङः संप्रसारणमित्यत्रैववक्ष्यमाणत्वात्। टत्तयोः ठयोनेति। घुडभावेटस्यठोनघुट्
पक्षेतुतस्यघोनेतिविवेकः। नभवतीति। जश्त्वात्प्राक्षस्यकत्वंनभवतीत्यर्थः। केचित्त्विति। परिशिष्टकारादयः। निबृंघु इति। अत्रघश्चोदीतिपक्षेक्षु।
त्वंवोध्यं। मांसपृतनेति। पृतनासेना। नात्वंनेति। अस्त्रियामितिपर्युदासादितिभावः॥ ❀ ॥ ङितिह्रस्वश्च। वामीतिसूत्रात् वेत्यनुवर्तते। अप्राप्तविभाषे
यं। ह्रस्वयोरप्राप्तावितरयोस्तुनेयङुवङ्स्थानावितिनिषेधप्राप्तावारंभात्। इहेयङुवङ्स्थानौस्त्रीशब्दभिन्नौनित्यस्त्रीलिंगावितिस्त्रीलिंगईदूतोर्विशेष।
णानिह्रस्वयोस्तुस्त्रियामित्येवविशेषणंनतुनित्यस्त्रीत्वपर्यंतं। अन्यथाइष्वशनिप्रभृतीनामुभयलिंगानांपट्वमृदुप्रभृतीनांसर्वलिंगानांचस्त्रीत्वेपिनस्यात्। ॥
कैयटमतेहितेषांनित्यस्त्रीत्वाभावात्। मतांतरेपिह्रस्वांशेनित्यग्रहणव्यावर्त्यलाभाच्च। अतएवआख्याग्रहणंविहायस्त्रीशब्दमात्रंनिष्कृष्यसंबध्यतेतदेतद्

63

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्रस्वौ च इवर्णोवर्णौ स्त्रियामिति। औत्वे प्राप्त इति। ङेः आमित्यपेक्षयापरत्वादिति भावः। प्राचा तु औदिति सूत्रे इदुद्भ्यामच्च घेरिति पूर्वोक्तसूत्रद्वयबलल्लभ्यार्थमु
पादाय घिनदीसञ्ज्ञावर्जिताभ्यामिति व्याख्यानमिदुद्भ्यामिति सूत्रं च नोपन्यस्तमित्यसमञ्जसमेतत्॥ ❁ ॥ त्रिचतुरोः। अष्टन आ विभक्तावित्यतोऽनुवर्तते
नादाह। विभक्तौ परत इति। विभक्तौ किं। त्रिभार्यः चतुर्भार्यः इति केचित्तन्मन्दं। स्त्रियाः पुंवदिति पुंवद्भावेनापीष्टसिद्धेः। किं तु प्रियादौ परतः पुंवद्भावो नेति। त्रि
प्रियइत्याद्युदाहर्तव्यमिति तत्त्वं। गुणदीर्घोत्वानामिति। तिस्रः स्थितेऽत्र ऋतो ङीति गुणस्य रत्वमपवादः तिसृः पश्येत्यत्र तु प्रथमयोरिति पूर्वसवर्ण

त्रिचतुरोः स्त्रियां तिसृ चतसृ।७।२।९९। स्त्रीलिङ्गयोरेतयोरेतावादेशौ स्तो विभक्तौ परतः। अचि र ऋतः।७।२।१००। तिसृ चतसृ एतयोर्ऋकारस्य रे
फादेशः स्यादचि। गुणदीर्घोत्वानामपवादः। तिस्रः तिसृभिः। तिसृभ्यः ३। आमि नुमचिरेति नुट्॥ न तिसृ चतसृ।६।४।४। एतयोर्नामि दीर्घो न
स्यात्। तिसृणां तिसृषु। स्त्रियामिति त्रिचतुरोर्विशेषणं नेह। प्रियास्त्रयस्त्रीणि वा यस्यास्सा प्रियत्रिः। इत्यादि मुनिवत्। आमि प्रियत्रयाणामिति
विशेष्ये। प्रियास्तिस्रो यस्येति विग्रहे तु। प्रियतिसा। प्रियतिस्रौ। प्रियतिस्रः। प्रियतिस्रमित्यादि। प्रियास्तिस्रो यस्य तत्कुलं। प्रियत्रि। स्वमोर्लुका
लुप्तत्वेन प्रत्ययलक्षणाऽभावान्न तिस्रादेशः। न लुमतेति निषेधस्याऽनित्यत्वात्पक्षे प्रियतिसृ रादेशात्पूर्वविप्रतिषेधेन नुम्। प्रियतिसृणी। प्रि
यतिसृणि। तृतीयादिषु वक्ष्यमाणपुंवद्भावविकल्पात्पक्षे यणनुमोरभावो। प्रियतिस्रा। प्रियतिसृणा इत्यादि। हे रत्वे सत्यापादेङ्य ह्रस्वाभ्यां
ह्रस्वोः ५। गौरी। गौर्यौ। गौर्यः। नदीकार्यं। हे गौरि। गौर्यै। इत्यादि। एवम्वाणीनद्यादयः। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्याऽपि ग्रहणाद्
नङिणि ह्रस्वत्वे च प्राप्ते विभक्तौ लिङ्गविशिष्टाऽग्रहणं। सखी। सख्यौ। सख्य इत्यादि गौरीवत्। अङ्यन्तत्वान्न सुलोपः। लक्ष्मीः। शेषं गौरीवत्। एव

दीर्घापवादः। प्रियतिस्र आगतः। प्रियतिस्रः स्वमित्यत्र ऋत उदित्युत्वस्येति विवेकः यद्यपि मध्ये पचाद्न्यायेन दीर्घोत्वयोरेव रत्वमपवादः स्यान्न तु ऋतो ङीति गु
णस्य तथापि बाध्यसामान्यचिन्तामाश्रित्य स्वविषये प्राप्तं सर्वमेवेह बाध्यत इ भावः। त्रिचतुरोर्विशेषणादिति। श्रुतत्वाद्धि त्रिचतुरोरित्यस्यैव स्त्रियामिति
विशेषणं नाङ्गस्येति भावः। प्रियतिसेति प्रियजसत्रिजसः इति स्थिते। अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इत्युक्तत्वात् एव तिस्रादेशो सुपो लुकि कृते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



समासात्तया विभक्तिस्तस्यां परतः। नित्सत्वादेशः स्त्रियाः पुंवदिति प्रियाशब्दस्य पुंवद्भावः। अदुष्टाने त्यनङ् यद्यपि इह जहत्स्वार्था वृत्तिपक्षे त्रिशब्दस्य निरर्थ
कत्वेन स्त्रीवाचित्वं दुर्लभं तथापि भूतपूर्वगत्या स्त्रियां वृत्तिर्बोध्या। अन्यपदार्थप्रधानस्तत्पुरुष इत्यादिसिद्धांतप्रवादस्यैवमेव निर्वाह्यत्वात्। अजहत्स्वार्था
त्वपक्षे तु स्त्रीनिष्ठसंख्यासमर्थकयोस्त्रि च सुरारि इति विवक्षितोऽर्थस्तेन प्रियास्त्रयः स्त्रीणां वा यस्याः सा प्रियत्रिरित्यत्र प्रियत्रिशब्दस्य स्त्रियां वृत्तित्वेपि न तिसृ आदेशप्रसंगः
प्रत्ययोत्तरपदयोश्चेत्येतत्सूत्रगतभाष्यग्रंथसंदर्भश्चोक्तव्याख्याने प्रमाणं। अनित्यत्वादिति। इकोचीत्यस्य ज्ञापकमिहलिंगं। तथाहि। भ्यांभिसादिषु सत्स्वपि नुमि न लो
पः प्रातिपदिकांतस्येति नलोपसंभवादचीति व्यर्थं। न च नङि संबुध्योरिति निषेधात् संबुद्धौ लोपो न संभवतीति तत्र निष्टवारणाय अचीत्यावश्यकमिति वाच्यं। संबु
द्धिश्च लुकालुमतेति नुमः प्राप्तेरेव तत्र दुर्लभत्वात्। न लुमतेति निषेधस्यानित्यतां विना तत्र प्रत्ययलक्षणप्रवृत्तेः। नाप्युत्तरार्थं तदिति वाच्यं। उत्तरत्रैव कर्त्तव्यत्वात्र
चीति करणस्य वैयर्थ्यात्। न लुमतेति निषेधस्यानित्यत्वे तु संबुद्धौ प्रत्ययलक्षणेन प्राप्तं नुमं वारयितुं तदिति भवत्येवाज्ञापकलिंगं। न चेदमनित्यत्वं संबुद्धिगुणमा
त्रविषयकमित्यभिनिवेष्टव्यं। लघ्व्यानुरोधेनान्यत्रापि क्वचित्तदभ्युपगमे वाधकाभावात्। अत एव प्रियतिसृ प्रियत्रीति रूपद्वयमपि कैयटेन स्वीकृतं। इत्यादीति
प्रियतिसृ प्रियतिसृणि। प्रियतिसृणः प्रियतिसृणः। आमि रादेशं वाधित्वा पूर्वविप्रतिषेधेन नुमं तं च वाधित्वा। पूर्वविप्रतिषेधेन नुट्। प्रियतिसृणां। इरत्वे सत्यावि
ति। विभक्तिसन्निपातकृतमपि त्यदाद्यत्वटापो निमित्तं न यासयोरिति निर्देशेन सन्निपातपरिभाषाया अनित्यत्वादिति भावः। अङ्यंतत्वादिति। केचिदिह कृ
दिकारादिति पाक्षिकं ङीषमिच्छंति तन्मते तु सुलोपः पक्षे स्यादेव। अत एव वातप्रमी श्रीलक्ष्मीति पक्षे ङ्यंताः सुसाधव इति रक्षितः। लक्ष्मीर्लक्ष्मी हरिप्रिये ६४
ति द्विरूपकोशश्च। स्त्री इति। स्यायनोः स्यां ग्रुक्रे शोणिते इति॥ ॥

64

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्री। स्त्यायतेर्ड्रट्। लोपो व्योरिति यलोपः। टित्वान्ङीप्। ङ्यन्तत्वात्सुलोपः। परत्वादिति। स्त्रियाः इति इयङ्‌पेक्षया। इयादेशोऽचिनान्यत्रेति। अजादौ यस्या इयङ्
विहितः स उपसर्जनत्वे पुंसि विद्यमानस्य स्त्रीशब्दस्य ओसादिषु चतुर्ष्वेव न त्वन्यत्र गुणनाभावादिभिः पूर्वोक्तैः बाधितत्वादित्यर्थः। इयङ्‌वङ्‌स्थानाविन्य-
स्यैवेति। पूर्वस्मात्स्त्र्याख्यावित्यनुवर्तनादियङ्‌वङ्‌स्थानाविति ईदूतोर्विशेषणं। तेन इयङ्‌वङ्‌स्थानाविदूतावेवास्त्रीति पर्युदासो न तु ह्रस्वाविति भावः। श्रीरिति।

स्त्रियाः। ६।४।७९। स्त्रीशब्दस्येयङ् स्यादजादौ प्रत्यये परे। स्त्रियौ। स्त्रियः। वामशसोः। ६।४।८०। अमि शसि च स्त्रिया इयङ् वा स्यात्। स्त्रीं। स्त्रियं। स्त्रियौ।
स्त्रियः। स्त्रीः। स्त्रिया। स्त्रियै। स्त्रियाः २। स्त्रियोः। परत्वान्नुट्। स्त्रीणां। स्त्रियां। स्त्रियोः। स्त्रीषु। स्त्रियमतिक्रान्तः अतिस्त्रिः। अतिस्त्रियौ। गुणनाभावोत्वनुङ्-
परत्वात्पुंसि बाध्यते। क्लीबे नुमा च स्त्रीशब्दस्येयङ् इत्यवधार्यतां १ जसि च। अतिस्त्रयः। हे अतिस्त्रे। अतिस्त्रियौ। अतिस्त्रयः। वामशसोः। अति-
स्त्रिं। अतिस्त्रियं। अतिस्त्रियौ। अतिस्त्रियः। अतिस्त्रीन्। अतिस्त्रिणा। घेर्ङितीति। अतिस्त्रये। अतिस्त्रेः २। अतिस्त्रियोः २। अतिस्त्रीणां। अच्च घेः।
अतिस्त्रौ। आम्यौकारे च नित्यं स्यादम्शसोस्तु विभाषया। इयादेशोऽचिनाऽन्यत्र स्त्रियाः पुंस्युपसर्जने। क्लीबे तु नुम्। अतिस्त्रि। अतिस्त्रिणी। अ-
तिस्त्रीणि। अतिस्त्रिणा। अतिस्त्रिणे। ङेप्रभृतावजादौ वक्ष्यमाणपुंवद्भावात्पक्षे प्राग्वद्रूपं। अतिस्त्रये। अतिस्त्रिणो अतिस्त्रेः २ अतिस्त्रिणः। अ-
तिस्त्रियोरित्यादि। स्त्रियान्तु प्रायेण पुंवत्। शसि। अतिस्त्रीः। अतिस्त्रिया। ङिति ह्रस्वश्चेति ह्रस्वान्तत्वप्रयुक्तो विकल्पः। अस्त्रीति तु इयङ्‌वङ्‌स्थाना-
वित्यस्यैव पर्युदासः। तत्सम्बन्धस्यैव चानुवृत्तेः तस्माद्दीर्घस्यैवायं निषेधो न तु ह्रस्वस्य अतिस्त्रियै। अतिस्त्रये। अतिस्त्रियाः २ अतिस्त्रीणां। अतिस्त्रियां।
अतिस्त्रौ। श्रीः। श्रियौ। श्रियः। नेयङ्‌वङ्‌स्थानावस्त्री। १।४।४। इयङ्‌वङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न तु स्त्री। हे श्रीः। श्रियौ। श्रियै। श्रिये। श्रियाः। श्रियः।

॥ ९ क्विब्वचिप्रच्छीत्यादिना क्विब्दीर्घौ। ङ्यन्तत्वाभावान्न सुलोपः। नेयङ्‌वङ्‌स्थानावस्त्री। निषुनोययोरिति
स्थानौ। अधिकरणे ल्युट्। इयङ्‌वङोः स्थानाविति षष्ठीसमासः। तथा च फलितार्थमाह। इयङ्‌वङोः स्थितिर्ययोरिति। स्थानग्रहणं किं। प्रकृष्टा धीः प्रधीः। हे प्रधि। अत्र
एरनेकाच इति यणा इयङो बाधनान्नेयङ्‌वङ्‌स्थानाविति निषेधो न प्रवर्तते। अत्रेयङ्‌वङौ निष्पद्येते तत्रैव नदीसंज्ञाया निषेधः। यत्र त्वपवादेन बाध्यते न तत्र नि-
षेध इत्येतदर्थं हि स्थानग्रहणं कृतं। अन्यथा नेयङ्‌वङोरित्येव ब्रूयात् इयङ्‌वङोर्निमित्तभूतौ यू नदीसंज्ञकौ नेत्यर्थलाभात्। अस्त्रीति किं। हे स्त्रि॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु·
सि·कौ· वामि। यूस्त्र्याख्यौ नदी नेयङुवङ्स्थानावस्त्री इत्यनु वर्त्तनादाह। इयङुवङोः स्थानावित्यादि। यद्यपि नेति प्रकृतो निषेधो अनेन विकल्प्यते तथापि
टी·त· निषेधविकल्पे विधिविकल्प एव फलतीति स एव सूत्रार्थ उचित इत्याशयेनाह। वा नदीसंज्ञौ स्त इति। ङिति ह्रस्वश्चेति सूत्रेप्येवमेव। प्रधीशब्दस्य त्विति। एतेनेका
६५ च इति यण्णि इयङो बाधनान्नेयङुवङ्स्थानाविति निषेधोऽत्र न प्रवर्त्तते। यत्र त्वपवादेनेयङुवङौ बाध्येते तत्र न निषेध इत्याशयेन व्याचष्टे। लक्ष्मीवद्रूपमिति
अमि शसि च विशेष इत्यनुपदमेव वक्ष्यति। पुंवद्रूपमिति। अयं च मतभेदः प्रकृष्टा धीर्यस्याः प्रकर्षेण ध्यायतीति वा विग्रहे बोध्यः। लक्ष्मीवदिति। मतद्व
येपीति शेषः। सुष्ठु धीर्यस्या इति। ननु अस्मिन् विग्रहे कैयटमते सुधीशब्दस्य नित्यस्त्रीत्वाभावेपि धीशब्दस्य नित्यस्त्रीत्वात् प्रथमलिंगग्रहणं चेति सुधीश

वामि। १।४।५। इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तो न तु स्त्री। श्रीणां श्रियां। श्रियि। श्रियां। प्रधीशब्दस्य तु वृत्तिकारादीनां मते ल
क्ष्मीवद्रूपं। पदान्तरं विनापि स्त्रियां वर्त्तमानत्वेन नित्यस्त्रीत्वमिति स्वीकारात्। लिङ्गान्तरानभिधायकत्वं नादिति कैयटमते पुंवद्रूपं। प्रकृष्टा धीरिति
विग्रहे तु लक्ष्मीवत्। अमि शसि च प्रध्यम् प्रध्यः इति विशेषः। सुष्ठु धीर्यस्याः सुष्ठु ध्यायतीति वेति विग्रहे वृत्तिकारमते सुधीः श्रीवत्। मतान्तरे पु 65
म्वत्। सुष्ठु धीरिति विग्रहे तु श्रीवदेव। ग्रामणीः पुंवत्। ग्रामनयस्यौत्सर्गतः पुंधर्म्मतया पदान्तरम्विनापि स्त्रियामप्रवृत्तेः। एवं खलपादेरपि
पुंधर्म्मत्वमौत्सर्गिकं बोध्यं। धेनुर्म्मतिवत्। स्त्रियाश्च। ७।१।९६। स्त्रीवाचीक्रोष्टुशब्दस्तृजन्तवद्रूपं लभते॥ ऐ स्त्रः श्रीवदेव भवति ननु पुंवदे

व इति चेत्। अत्राहुः नेयङुवङ्स्थानावस्त्री इति धीशब्देन नदीसंज्ञानिषेधान्न सुधीशब्दात् प्रथमलिंगग्रहणं चेत्यस्याप्रवृत्तिस्तथा च वृत्तिमते इति ग्रन्थः।
स्वरसतः संगच्छते इति। मतान्तर इति। लिंगान्तरानभिधायकत्वं नादिति कैयटमते इत्यर्थः। श्रीवदेवेति। वृद्धिवाचकधीशब्दस्य नित्यस्त्रीत्वान्मतद्वयेपि श्रीव
देवेत्यर्थः। स्त्रियां वा। असर्वनामस्थानार्थमयमारंभः। तृज्वत्क्रोष्टुरिति वर्त्तते तद्देवात्रापि रूपातिदेशः। स्त्रियामित्यर्थग्रहणं तदाह। स्त्रीवाचीक्रोष्टुशब्द इत्या
दि। एवं च पंचभिः क्रोष्ट्रीभिः क्रीतैः रथैः पंचक्रोष्टृभीरथैरित्यत्रापि तृज्वद्भावः सिध्यति। ननु स्त्रियामिति स्त्रीप्रत्यये इति व्याचक्षते ङीष र्थे च क्रोष्टृशब्दं ल ६५
गौरादिषु पठंति तेषामिह तृज्वद्भावो न सिध्येत्। तेन क्रीतमिति ठकोऽध्यर्द्धपूर्वेति लुका लुप्तत्वात् लुक्तद्धितलुकीति ङीषो लुकि स्त्रीप्रत्ययपरत्वाभा

ऋन्नेभ्यः। ऋतश्च ऋकारः। नो नकारः। प्रयोगापेक्षं बहुत्वं प्रातिपदिकविशेषणत्वात्तदन्तविधिः। स्त्रियामिति चाधिक्रियते तेनेदमाह। ऋदन्तेभ्य इत्यादि। क्रोष्ट्रीति।
स्त्रियां चेत्येतस्यां गत्वा तदन्तेन प्रत्ययस्य स्थपाद्विप्रकोपरत एवेह तृज्वद्भावस्तेनो ङीविति बोध्यं। भ्रूरिति। भ्रमतीति भ्रूः। भ्रमेश्च डूरिति भ्रमतेर्डू प्रत्ययः डित्वाट्टिलोपः। हे सु
भ्रूरिति। डूप्रत्ययस्य स्त्रीप्रत्ययत्वाद्भ्रूस्त्रियोरिति ह्रस्वो न भवति। नेयङुवङ्स्थानाविति नदीसंज्ञानिषेधात्संबुद्धिह्रस्वोऽपि नेति भावः। ह्रस्वोऽत्रानुपपन्न इत्याक्षिपति। क
थं तर्हीति। विमानना सुभ्रु पितुर्गृहे कुत इति कालिदासप्रयोगोऽप्यनुपपन्न इति बोध्यं। बहव इति। केचित्तु नेयङिति सूत्रे वामीत्यतो वाग्रहणमपकृष्य व्यवस्थित

ऋन्नेभ्यो ङीप् ४।१।५। ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप् स्यात्। क्रोष्ट्री। क्रोष्ट्र्यौ। क्रोष्ट्र्यः। वधूर्गौरीवत्। भ्रूः श्रीवत्। हे सुभ्रूः। कथं तर्हि हा
पितः क्वासि हे सुभ्रु इति भट्टिः। प्रमाद एवायमिति बहवः। खलपूः पुम्वत्। पुनर्भूः दृन्करेति यण्। उवङो बाधनान्नेयङुवङिति निषेधो नास्ति। हे पु
नर्भु। पुनर्भ्वौ। पुनर्भ्वः॥ एकाजुत्तरपदे णः ८।४।१२। एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्त
नुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्यात्। आरम्भसामर्थ्यान्नित्यत्वे सिद्धे पुनर्णग्रहणं स्पष्टार्थं। यणम्बाधित्वा परत्वान्नुट्। पुनर्भूणां। वर्षा
भूः भेकजातौ नित्यस्त्रीत्वाऽभावात्। हे वर्षाभूः। कैयटमते। मतान्तरे तु हे वर्षाभु। पुनर्नवायां तु हे वर्षाभु। भेक्यां पुनर्नवायां स्त्री वर्षाभू
र्दर्दुरे पुमानिति यादवः। वर्षाभ्वश्च। वर्षाभ्वौ। वर्षाभ्वः। स्वयम्भूः पुम्वत्। न षट्स्वस्रादिभ्यः ४।१।१०। षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च ङीप्टापौ न
स्तः। स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा। याता मातेति सप्तैते स्वस्रादय उदाहृताः॥१॥ अप्तृन्निति दीर्घः। स्वसा। स्वसारौ। स्वसारः।
॥ माता पितृवत्। शसि मातॄः। द्यौर्गोवत्। राः पुम्वत्

विभाषां चाश्रित्य समादधिरे। तदसत्। तथा सति ह्रस्वग्रहणं वामीत्युत्तरसूत्रं च व्यर्थं स्यात्। नेयङुवङ्स्था
नाविति एव वक्तुं शक्यत्वात्। अन्ये तु सामान्ये नपुंसकमिति कथंचित्समादधुः। एकाचा। एकोऽच् यस्मिन्न तदेकाच् तादृशमुत्तरपदं यस्य स एकाजुत्तरपद इति बहुव्रीहिगर्भो बहुव्री
हिः। उत्तरपदशब्दः समासावयवे रूढस्तेनाक्षिप्तस्समासोऽनेन विशेष्यत इत्याह। तस्मिन्समास इति। रषाभ्यां नो णः इत्यतो णः इत्यनुवर्तमानेऽपि णग्रहणमिह नित्यार्थ
मावश्यकमित्याशंक्याह। आरंभसामर्थ्यादिति। प्रातिपदिकान्तनुम्विभक्तिषु चेति विकल्पेन सिद्धत्वेन तदारंभसामर्थ्यादित्यर्थः। स्वयंभूः पुंवदिति। मत इयपि नदी

CC-0. In Public Domain. Digitization by eGangotri

सु·

सि·कौ संज्ञाया अभावात् ङितीति ह्रस्वश्चेत्यादि न प्रवर्तत इति भावः। नषट्स्वस्रादिभ्यः। स्त्रियां यदुक्तं तन्न भवतीति व्याख्यानादनन्तरो ङीविवक्षावहितष्टाबपि निषिध्यत इ।
टी·त· त्याशयेनाह। ङीपूर्वापौ नेति। स्वस्रादीनां ङीप्प्रसङ्गः। षट्संज्ञकानां तु भौ। स्वसातिस्र इति। नतिसृचतसृ इति नामि दीर्घत्वप्रतिषेधात् ज्ञापकादेव ङीवभावे सि
६६ द्धे स्वस्रादिषु तिसृचतसृशब्दपाठो न कर्तव्य इति कृन्मेजन्त इति सूत्रे कैयटः। स्वसेति। सावसंबुद्धौ नाऋदुशनेत्यनङ्। ननान्दा तु स्वसा पत्युः भार्यास्तु भ्रातृवर्गस्य।
यातरस्युः परस्परं। द्योगौवदिति। गमेर्डो। बाहुलकात् द्युतेरपि। डित्वाट्टिलोपः। ओतो णिदिति णित्त्वाद्वा वृद्धिः। राः पुंवदिति। यद्यपि पुल्लिंग एवायमर्थे रैर्विभवा अ
पीत्यमरोक्तेर्भिन्नलिंगानां न द्वंद्व इति तेन न परिभाषितत्वात्तथापि रास्लेनराः स्त्रीत्येके। इति क्षीरस्वामिना स्त्रीलिंगताया अभ्युपगमादेवमुक्तं। नौग्लौवदिति। ग्लानु
दिभ्यां डौः। डित्वाट्टिलोपः। स्त्रियां नौस्तरणिः स्तरिरित्यमरः। इत्यजन्ताः स्त्रीलिंगाः॥ ॥ अनाम्॥ अत इत्येतदधिकृतस्यांगस्य विशेषणं स्वमोर्नपुंसकादि
ति चानुवर्तत इत्याशयेनाह। अतो गादित्यादि। अदन्तादंगादित्यर्थः। स्वमोरिति। अमोऽम्विधानं स्वमोर्नपुंसकादिति प्राप्तस्य लुको बाधनार्थं। अमस्यादिति

अतोऽम्। ७।१।२४। अतोऽङ्गात्क्लीबात्स्वमोरम्स्यात्। अमि पूर्वः। ज्ञानं। एङ्ह्रस्वादिति हल्मात्रलोपः। हे ज्ञान। नपुंसकाच्च। ७।१।१९। क्लीबात्पर
पक्षापि मिस्येव छित्वा सोर्मे कृते संनिपातपरिभाषया सुपि चेति दीर्घत्वाप्रसक्त्या ज्ञानमिति रूपं सिध्यति। द्वितीयैक स्यौङः शी स्यात्। भसंज्ञायां।
वचनेत्वादेः परस्येत्यकारस्य मकारे कृते अन्त्यस्य मस्य संयोगान्तलोपे सिद्धमिष्टं तथापि संयोगान्तलोपो झल इत्यभिप्रायेणेदं व्याख्यानं। पक्षाहुः। अमिति परच्छे
दाकरणे अतिजरसमिति न सिध्येदिति तद्भसात्। सोरमि कृते संनिपातपरिभाषया जरसादेशस्याप्रवृत्त्या अतिजरमिति रूपस्यैवेष्यमाणत्वात्। द्वितीयैकव
चने त्वतोमिति बाधित्वा परत्वाज्जरसि कृते संनिपातपरिभाषया लुको अप्रवृत्त्या अतिजरसमिति रूपसिद्धश्चेति दिक्। ज्ञानमिति। ज्ञप्तिर्ज्ञानं। ल्युडन्तः। युवो
रनाकौ कृते नद्धितेति प्रातिपदिकत्वात्स्वाद्युत्पत्तिः। हल्मात्रेति। हे ज्ञान सु इति स्थिते संबुद्धिलोपात्परत्वादमादेशे कृते अमि पूर्वत्वे च तस्यांतवद्भावात् ह्रस्वा ६६
न्तमंगं भवतीति तु तः परस्य संबुद्धिसंबंधिनो मकारस्य लोप इत्यर्थः। नपुंसकाच्च। जसः शी औङ आप इत्यतः शी औङ इति चानुवर्तत इत्यभिप्रेत्याह। क्लीबा
त्परस्येत्यादि। भसंज्ञायामिति। सुडनपुंसकस्येति पर्युदासेन असर्वनामस्थानत्वादौङि यचि भमिति प्रवर्तत इति भावः।

66

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यस्येति। इश्च अश्च यं तस्य न इत्याह। इवर्णावर्णयोरिति। ईति चेति। चकारेण न लद्धित इत्यनतद्धितेऽनुकृष्यते तदाह। ईकारे तद्धिते चेति। औङः श्यामिति। विभ
क्त्यपेक्षया स्त्रीलिंगनिर्देशः नेदं वचनं कर्तव्यं। विभाषा ङिश्योरित्यतः श्यामिति प्रकृतं न संयोगादिरित्यतो नेति च तत्राभिसंबंधमात्रं कर्तव्यं यस्येकारे त
द्धिते च लोपो भवति श्यां नेत्याकरः। जश्शसोः शिः। जसा साहचर्यादिह सुवेव शसगृह्यते। तेनेह न। कुंडशो ददाति। शि सर्वनामस्थानं। महासंज्ञाकरणं पूर्वाचा
र्यानुरोधेन। नपुंसकाद् इदितो नुम्धातो इत्यतो नुमनुवर्तते उगिदचामित्यतः सर्वनामस्थानं च अंगस्येति चाधिकृतं। तथा च झलजन्यां नपुंसकमंगविशेष्य

यस्येति चा ६।४।१४८। भस्येवर्णावर्णयोर्लोपस्यादीकारे तद्धिते च परे। इत्यकारलोपे प्राप्ते। औङः श्याम्प्रतिषेधो वक्तव्यः। ज्ञाने। जश्शसोः शिः॥
७।१।२०। क्लीबादनयोः शिः स्यात्। शि सर्वनामस्थानं। १।१।४२। शि इत्येतदुक्तसंज्ञं स्यात्। नपुंसकस्य झलचः। ७।१।७२। झलन्तस्याजन्त
स्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे। उपधादीर्घः। ज्ञानानि। पुनस्तद्वत्। शेषं रामवत्। एवं धनवनफलादयः। अद्ड्डतरा
दिभ्यः पञ्चभ्यः। ७।१।२५। एभ्यः क्लीबेभ्यः स्वमोरद्डादेशः स्यात्। टेः। ६।४।१४३। डिति परे भस्य टेर्लोपः स्यात्। वावसाने। कतरत्।
कतरद्। कतरे। कतराणि। भस्येति किं। पञ्चमः। टेर्लुप्तत्वात्प्रथमयोरिति पूर्वसवर्णदीर्घः एङ्ह्रस्वादिति सम्बुद्धिलोपश्च न भवति। हे कत
रत्। पुनस्तद्वत्। शेषं सर्ववत्। कतमत्। इतरत्। अन्यत्। अन्यतरत्। अन्यतमशब्दस्य तु। अन्यतममित्येव। एकतरात्प्रतिषेधो वक्तव्यः। ए
कतरं। सोरमादेशे कृते सन्निपातपरिभाषया न जरस्। अजरं। अजरसी। अजरे। परत्वाज्जरसि कृते झलन्तत्वान्नुम्॥ ९ तेविशेषणेन च तदं

न्तविधिर्भवतीत्याह। झलंतस्येत्यादि। अद्ड्डतरादिभ्यः। पंचभ्य इति किं। नेमं तिष्ठति। नेमं पश्य डतरादयो डतरडतमेतरान्यान्यतरेति सर्वादिषु पठि
ताः। अद्डादेशः स्यादिति। जिघृक्षितादेशस्वरूपप्रतिपादनाय पृथक्त्वेन कृतं। टेः। ति विंशतेरित्यतो डितीत्यनुवर्तते भस्येति चाधिकृतं तदाह। डिति परे भस्ये
ति। भस्य किं। पंचमः। अत्र डटो मडागमे भत्वाभावाट्टिलोपो न भवति॥ किंतु परत्वात्तन्लोप एव। अद्डो डित्करणस्य प्रयोजनमाह। टेर्लुप्तत्वादित्यादि। ननु पू
र्वसवर्णदीर्घाभावाय दादेश एव क्रियतां किमद्डादेशेनेत्याशंक्याह। एङ्ह्रस्वादित्यादि। दादेशे तु हे कतरेति स्यादिति भावः। अन्यतमस्य त्विति। एवं च सामा

सु.
सि.कौ.
टी.त.
६७

न्यादिषन्यतमत्तमदृत्यादिप्रयोगाः प्रामादिका एवेति भावः। अजरमिति। अविद्यमाना जरा यस्य तत्। गोस्त्रियोरुपसर्जनस्य इति ह्रस्वः। नोमःपरत्वादिति। अजर
णि इति स्थिते। यद्यपि जरसादेशात्प्रागेव नपुंसकस्य झलच इत्यजन्तलक्षणो नुमागमः स्यात्स चाङ्गभक्तो गमेव न व्यवदध्यात्। अवयवस्य तु जराशब्दस्य
व्यवधायक एवेति निर्दिश्यमानस्यादेशो विधीयमानो न प्राप्नोति तथापि यस्मादित्यादेरचः परस्यैवं नावयवो मित्यात् इति स्वमते नलवयवावयवः समुदायस्याप्यवय
व इत्यभ्युपगमेन कथंचिज्जरसादेशो जातेपि सांतत्वाभावात् सांतमहत इति दीर्घो न स्यादिति भावः॥ ।सांतमहतः। अत्र नोपधायाः सर्वनामस्थाने चा
संबुद्धावित्यनुवर्तते। सांतेति लुप्तषष्ठीकं संयोगात्तस्येति अनेन समानाधिकरणमिति व्याचष्टे। सांतसंयोगस्येत्यादि। नस्योपधाया इति। तत्पूर्वस्येत्यर्थः। अ

सान्तमहतः संयोगस्य। ६।४।१०। सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे। अजरांसि
अजराणि। अमिलुकोऽपवादमम्भावम्बाधित्वा परत्वाज्जरसा ततस्सन्निपातपरिभाषया न लुक्। अजरसं। अजरं। अजरसी। अजरे।
अजरांसि। अजराणि। शेषम्पुम्वत्। पद्दन्निति हृदयोदकास्यानां हृद् उदन् आसन् आदेशाः। हृन्दि। हृदा। हृद्भ्यामित्यादि। उदानि। उदा। उदभ्यां
मित्यादि। आसानि। आस्ना। आसभ्यामित्यादि। मांसि। मांसा। मान्भ्यामित्यादि। वस्तुतस्तु प्रभृतिग्रहणम्प्रकारार्थमित्युक्तं। अतएव भा
ष्ये मांसपचन्या उखाया इत्युदाहृतं। अयस्मयादित्वेन भत्वात्संयोगान्तलोपो न। पद्दन्नित्यत्र हि छन्दसीत्यनुवर्तितं वृत्तौ। तथाप्यपोभि
रित्यत्र मासश्छन्दसीति वार्त्तिके छन्दोग्रहणसामर्थ्याल्लोकेपि क्वचिदिति कैयटोक्तरीत्या प्रयोगमनुसृत्य पदादयः प्रयोक्तव्या इति बोध्यम्॥ ॥

मिलुकोपवादमित्यादि। एतेन स्वमोर्मादेशे कृते वा जरसिति प्राचोग्रंथः प्रत्युक्तः। मांसपचन्या इति। पच्यतेऽनयामिति पचनी करणाधिकरणयोश्चेति ल्युट्। टित्वान्ङीप्। मांसस्य
पचनी मांसपचनी अत्र ङसोर्लुक्त्वात् प्रत्ययलक्षणेनेति प्रभृतिग्रहणस्य प्रकारार्थत्वं विना मांसशब्दस्य मांसित्यादेशो न सिध्येदिति भावः। ननु पृषोदरादिसूत्रे मांसस्य पचियु
ड्घञोरिति वक्ष्यमाणत्वादंतलोपेनाप्येतद्रूपं सिद्धमिति चेन्न। अत्राहुः। पृषोदरादीनि यथोपदिष्टमित्यस्योत्तरपदाधिकारस्थत्वात् युडन्तं यदुत्तरपदं मांसपचनमित्या
दि तत्रैवांतलोपः स्यादत्र हि ङीबंतमुत्तरपदं न तु युडंतमिति नास्त्येवांतलोप इति। मासश्छन्दसीति। मासशब्दस्य नकारः स्याच्छसादौ प्रत्यये छन्दसीति वार्त्तिकार्थः। माङ्क्षि

67

ह्रस्वो नपुंसके। इह ह्रस्वश्रुत्योपस्थितेनाच इत्यनेन प्रातिपदिकविशेषणात्तदन्तविधिरित्याह। अजन्तस्येति। प्रातिपदिकस्याच इति वैयधिकरण्येन व्याख्या
यां सुश्रोतृणां कुलमित्यत्रातिप्रसंगः स्यात्। एतच्चाच श्चेति सूत्र एवास्माभिः स्पष्टीकृतं। प्रातिपदिकस्येति किं। काण्डे कुड्ये। ज्ञानवदिति। श्रीपाणीत्यादावे
काजुत्तरपदे तिलत्वं तु विशेषः। श्रीपेत्यत्रापि इनादेशेन सह आङ्गुणे कृते एकादेशस्य पूर्वान्तत्वेन ग्रहणादचः परस्मिन्निति सूत्रे पूर्वस्माद्विधिः पूर्ववि
धिरिति पंचमीसमासपक्षाश्रयेण स्थानिवत्त्वाद्धुए काजुत्तरपद इत्वमस्तीति स्यादेव णत्वं। संनिपातेति। अवर्णमाश्रित्य कृतो यादेशः कथमवर्णलोपे निमि
त्तं स्यात्। न च सुपि चेति दीर्घार्थं संनिपातपरिभाषाया अनित्यत्वाभ्युपगम आवश्यक एवेति वाच्यं। कष्टायेति निर्देशेन दीर्घविधौ अनित्यत्वाभ्युपग

ह्रस्वो नपुंसके प्रातिपदिकस्य। १।२।४७। क्लीबे प्रातिपदिकस्याजन्तस्य ह्रस्वः स्यात्। श्रीपं ज्ञानवत्। श्रीपाय। अत्र सन्निपातपरिभाष
या आतो धातोरित्याकारलोपो न। स्वमोर्नपुंसकात्। ७।१।२३। क्लीबादङ्गात्परयोः स्वमोर्लुक् स्यात्। वारि। इकोऽचि विभक्तौ। ७।१।७३। इग
न्तस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ। वारिणी। वारीणि। न लुमतेति निषेधस्यानित्यत्वात्पक्षे सम्बुद्धिनिमित्तो गुणः। हे वारे। हे वारि।
आङो ना। वारिणा। घेर्ङितीति गुणे प्राप्ते। वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन। वारिणे। वारिणः। वारिणोः। नुमचिरेति नुट्। ना
मीति दीर्घः। वारीणां। वारिणि। वारिणोः। हलादौ हरिवत्। तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य। ७।१।७४। प्रवृत्तिनिमित्तैक्ये भाषित
पुंस्कमिगन्तं क्लीबं पुंवद्वा स्याट्टादावचि। अनादयो। अनादिना। इत्यादि। शेषं वारिवत्। पीलुर्वृक्षस्तत्फलं पीलु तस्मै पीलुने। अत्र न पुंवत्।

मेऽप्यवर्णलोपे कार्ये तदनभ्युपगमात्कृतेऽपि दीर्घे ह्रस्वव्यक्त्यपायेऽप्यलजातेरनपायादिति दिक्। एतेन श्रीपशब्दान्ङे यि श्रीप्ये इति केषांचिद्व्याख्यानं परास्तं।
स्वमोर्नपुंसकात्। अयं लुक्पूर्वविप्रतिषेधेनाप्यदाद्यत्वस्य किमः कादेशस्य च बाधकः। परत्वाद्धि त्यदाद्यत्वे तदोरिति सत्वे सो रमभावे च सं कुलमित्यादि स्यादिष्यते
तु तत्कुलमिति। इकोऽचि विभक्तौ किं। मधु मद्यं नस्येदं माधवमत्र नुमि सति टिलोपः स्यात्। वृद्ध्यौत्वेति। अतिसखिनीत्यत्र सख्युरसंबुद्धाविति णिद्वद्भावाद्वृद्धिः प्राप्ता वा
रिणीत्यत्र त्वत्र घेर्ङितीति गुणः। प्रियक्रोष्टुनीत्यादौ तृज्वद्भावः प्राप्तः। ननु नुमनुटोः को विशेषस्तत्राह। नामीति दीर्घत्वमिति। नुमस्त्वंगभक्तत्वात्तस्मिन्सति दीर्घो न

सु.
सि.कौ.
टी.त.
६८

स्यादितिभावः। तृतीयादिषु। यद्यत्रभाषितः पुमानन्येनशब्देनसभाषितपुंस्कः शब्द इतिविज्ञायेत तदापीलुने इत्यादावतिप्रसंगः स्यात् अतोव्याचष्टे प्रवृत्तिनिमित्तैक्यइति
अयंभावः। भाषितः पुमान् यस्मिन् अर्थे तत् भाषितपुंस्कं। प्रवृत्तिनिमित्तं तु इत्यस्त्यस्तीति अर्शआदित्वादच् तेनैकस्मिन् प्रवृत्तिनिमित्ते भाषितपुंस्कं यच्छब्दस्वरूप
तदुच्यत इति। इकोचिविभक्तौ इत्यतोऽचीत्यनुवर्तनादाह। टादावचीति। इगंतं किं। सोमपेन कुलेन। अचि किं। ग्रामणिभ्यां कुलाभ्यां। टादौ किं। अनादिनी। अ

अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ७।१।७५। एषामनङ्स्यात् टादावचि स चोदात्तः। अल्लोपोनः। दध्ना। दध्ने। दध्नः। दध्नोः २ दध्नां। दध्नि। दधनि। शेषं वारिवत्। एवमस्थिसक्थ्यक्षि। अतिदध्ना सुधि। सुधिनी। सुधीनि। हेसुधे। हेसुधि। सुधिया। सुधिना। सुधियां। सुधीनां। प्रध्या। प्रधिना। मधु। मधुनी। मधूनि। हेमधो। हेमधु। एवमम्ब्वादयः। सानुशब्दस्य स्नुर्वा। स्नुनि। सानूनि। प्रियक्रोष्टु। प्रियक्रोष्टुनी। तृज्वद्भावात्पूर्वविप्रतिषेधेन नुम्। प्रियक्रोष्टूनि। टादौ पुंवत्पक्षे प्रियक्रोष्ट्रा। प्रियक्रोष्टुना। प्रियक्रोष्ट्रे। प्रियक्रोष्टवे। अन्यत्र तृज्वद्भावात्पूर्वविप्रतिषेधेन नुमेव। प्रियक्रोष्टुना। प्रियक्रोष्टुनो। नुमचिरेतिनुट्। प्रियक्रोष्टूनां। सुलु। सुलुनी। सुलूनि। पुनस्तद्वत्। सुलुना। सुल्वा। धातृ। धातृणी। धातॄणि। हेधातः। हेधातृ। धात्रा। धातृणा। एवं ज्ञातृकर्त्रादयः। एचइग्घ्रस्वादेशे १।१।४८। आदिश्यमानेषु ह्रस्वेषु मध्ये एच इगेव स्यात्। प्रद्यु। प्रद्युनी। प्रद्यूनि। प्रद्युनेत्यादि। इह न पुंवत्। यदिगन्तं प्रद्यु इति तस्य भाषितपुंस्कत्वाभावात्। एवमग्रेऽपि। प्ररि। प्ररिणी। प्ररीणि। प्ररिणा। एकदेशविकृतस्यानन्यत्वात् रायोहलीत्यात्वं। प्रराभ्यां। प्रराभिः। नुमचिरेतिनुट्यात्वे प्रराणमिति माधवः। वस्तुतस्तु सन्निपातलक्षणपरिभाषयानुट्यात्वं न। नामीतिदीर्घस्यारम्भसामर्थ्यात्परिभाषा बाध्यत इत्युक्तं। प्ररीणां। सुनु। सुनुनी। सुनूनि। सुनुना। सुनुने इत्य

नादीनि। तत्फलमिति। पीलोः फलं पीलु। फले लुगिति ओरञो लुक्। प्रवृत्तिनिमित्तभेदादिति। पीलुशब्दस्य हि वृक्षत्वव्याप्यजातिर्वृक्षे प्रवृत्तिनिमित्तं फले तु ६८
फलत्वव्याप्यजातिर्वृक्षविशेषप्रभवत्वं वा उभयथापि पुंनपुंसकयोर्नैकं प्रवृत्तिनिमित्तमिति भावः॥ ॥ अस्थिदधि। इकोचीति नुमि प्राप्ते विधिरयं न
कारादकार उच्चारणार्थः। ङकारस्त्वनादेशार्थः। नविषयस्यानिसंतस्येति फिट्सूत्रेणास्थ्यादय एते आद्युदात्ताः। तत्रानस्यानुदात्ते कारस्य विधीयमानोऽ

68

अनङ्स्थानेनंतरतमइत्यनुदात्तःस्यादित्युदात्तउच्यतेतच्चोदात्तत्वमस्थानि। स्यादावल्लोपाभावपक्षेस्फुटंदध्नादध्नेइत्यादावनङोऽकारलोपेअनुदात्त
स्यचयत्रोदात्तलोपइत्युदात्तनिवृत्तिस्वरेणविभक्त्युदात्तत्वंप्रयोजनमितिबोध्यं।तृतीयादिष्वित्यनुवर्तते।अचीतिचनदाह।दाहावचीति।दाशेकिं।द
धिनी।दधीनि।अचिकिं।दधिभ्यां।नदंतस्यापीति।आंगत्वादितिभावः।अतिदध्नेति।दधिअतिक्रांतेनेत्यर्थः।स्त्रियामतिदध्नेत्येव।सन्निपातपरिभाषया
वहिरंगपरिभाषयाचङीपोऽप्रवृत्तेः।प्राचातुप्रियदध्नाब्राह्मणेनेत्युक्तं।स्त्रियांतुप्रियदध्नाप्रियदध्नेइत्याद्यपिकेचिदुक्तंतदसत्।उरःप्रभृतिषुदधिश
ब्दपाठात्।बहुव्रीहौनित्यंकप्यनङःप्रसक्त्यभावात्।उक्तपरिभाषाभ्यांङीपःप्रवृत्तेर्दूरापास्तत्वाच्चेतिदिक्।सुधिनीइति।परत्वान्नुमाइयङ्बाध्यते
सुधियेति।शोभनज्ञानवत्त्वंप्रवृत्तिनिमित्तंपुंनपुंसकयोरेकमेवेतिभाषितपुंस्कत्वात्तृतीयादिष्वितिपुंवत्त्वपक्षेनुमभावान्नभूसुधियोरितियण्निषेधा
च्चेयङ्प्रवृत्त्येति।अत्रापिप्रकृष्टज्ञानवत्त्वंपुंनपुंसकयोरेकमेवेतिभाषितपुंस्कत्वात्पुंवत्त्वपक्षेयण्।नपुंसकपक्षेतुनुमितिबोध्यं।बह्व्यःश्रेयस्योयस्यतत्
बहुश्रेयसीकुलमित्यत्रनपुंसकह्रस्वत्वेन।ईयसोबहुव्रीहेर्नेतिह्रस्वमात्रस्यप्रतिषेधादित्येके।अन्येतूपसर्जनह्रस्वएवनिषिध्यते।नपुंसकह्रस्वत्वं
तुस्यादेव।बहुश्रेयसिबहुश्रेयसिनीइत्याहुः।मध्विति।मधुमद्येपुष्परसेमधुर्वसंतेचैत्रेच।इहपुंनपुंसकयोरेकंप्रवृत्तिनिमित्तंनास्तिकिंतुमद्यत्ववसं
तत्वादिरूपंभिन्नंभिन्नमेव।तथाचभाषितपुंस्कत्वाभावान्मधुनेमधुनःमधुनोरित्येवभवतिनतुमधवेमध्वोरित्यादीतिदिक्।स्नुर्वेति।मांसपृतनासानू
नामितिवार्तिककारोक्त्येतिभावः।स्नुःप्रस्थःसानुरस्त्रियामित्युभयलिंगःसानुशब्दस्तस्यनपुंसकत्वेरूपमाह।स्नुनिसानूनीति।पुंसितुस्नूनःसानूनइत्या
दि।सुल्वेति।शोभनलवनकर्तृत्वंपुंनपुंसकयोरेकमेवेतिभाषितपुंस्कत्वात्पुंवत्त्वपक्षेनुमभावादोःसुपीतियण्।सुलुनेति।यणंबाधित्वापरत्वान्नुम्।धात्रेति
धारणपोषणकर्तृत्वंपुंनपुंसकयोरेकमेवेतिपुंवत्त्वपक्षेयण्।एचः।आदिश्यतइत्यादेशः।ह्रस्वश्चासावादेशश्चह्रस्वादेशः।निर्धारणेसप्तमीजातावेकवचनं
मतोव्याचष्टे।आदिश्यमानेषुह्रस्वेषुमध्यइति।एचांपूर्वभागोऽकारसदृशः।उत्तरस्तुइवर्णोवर्णसदृशस्तत्रोभयांतरतमस्यह्रस्वस्याभावात्पर्यायेणअका
रस्यादिकारोकारौचस्याताम्।तथाचमाकदाप्यकारोभूदितिनियमार्थमेवपरिभाषेत्यभिप्रेत्याह।इगेवस्यादिति।आंतरतम्यादेकारैकारयोरिकारः।ओकारौका

CC-0. In Public Domain. Digitization by eGangotri



रियोस्तु उकारः। एकारान्तस्योदाहरणं तु रैः स्मृतो येन सस्मृतेः शोभनः स्मृतेः यस्य तत्सुस्मृतीत्यादि। एतच्च परिभाषासूत्रमपार्थकं। तथा च वार्त्तिककृतोक्तं सिद्धमे ङः सस्थानत्वादैचोश्चोत्तरभूयस्त्वादिति। अस्यार्थः। प्रत्यपरविप्रतिषेधेन एङ उत्तरभागो नरतमो ह्रस्वर्णो वेति सिद्धं। एचोश्चेति चकारो भिन्नक्रमः। उत्तरभूयस्त्वा च्चेति हेतोरनंतरं बोध्यः। अर्द्धमात्रा अवर्णस्य अर्द्धमात्रा इवर्णोवर्णयोरित्युत्तरभागाधिक्यान्मलयामादिवद्भूयसा व्यपदेशो नापि इकारोकारौ भविष्यत इति। मधुनेति। ननु प्रकृष्ट स्वर्गत्वादिकं यत्प्रवृत्तिनिमित्तं तत्पुन्नपुंसकयोः समानमिति भाषितपुंस्कत्वात् पक्षे पुंवद्भावो न स्यादेवेत्याशंकायामाह। यदि त्वेतिगं नेमि त्ति। एतच्च रादानेर इति घोतो अतिरिक्तासत्कुलमिति प्रकृष्यमाधवेन स्पष्टीकृतं। कथं तर्हि मधवा प्रगायासुना वेत्यत्युक्तं इति चेदत्राहुः। प्रकृष्ट स्वर्गत्वादि प्रवृ त्तिनिमित्तैक्यात् सुधौ शब्दो भाषितपुंस्कः स एव वृहतीनोमिगं तत्तथा च मधुशब्दोपि भाषितपुंस्क एव एकदेशविकृतस्यानन्यत्वात्तः पुंवद्भावो भवतीति दृश्यं

हो ढः। ८।२।३१। हस्य ढस्स्यात् झलि पदान्ते च। हलड्याबिति सुलोपः। पदान्तत्वाड्ढस्य ढः। जश्त्वचर्त्वे। लिट्। लिड्। लिहौ। लिहः। लिहं। लिहौ। लिहः। लिहा। लिड्भ्यां। लिट्सु। लिट्त्सु। दादेर्धातोर्घः। ८।२।३२। उपदेशे दादेर्धातोर्हस्य घः स्यात् झलि पदान्ते च। उपदेशे किं। अधोगित्यत्र यथा स्यात्। दा मलिहमात्मन इच्छति दामलिह्यति। ततः क्विप् दामलिट्। अत्र मा भूत्॥ ॥ २९ चपुंवद्भावः। एजंतेषु माघवमतेनास्ति मतांतरे त्वस्ती ति बोध्यं। प्रकृष्टा राः। यः पस्य तत् शोभना नौर्यस्य तत्सुनु॥ इत्यजंताः नपुंसकलिंगाः॥ हो ढः॥ झलो झलि। पदस्यस्कोः संयोगाद्योरंते चेत्यतो झलीति पद स्यांत इति चानुवर्त्तते। तदाह। झलीत्यादि। झलि परतः पदांते वा विद्यमानस्य हस्य ढः स्यादर्थः। लिडिति। लिह आस्वादने क्विप्। लिट् क्विति। ढस्य जश्त्वेन डः। तस्य खरि चे ति चर्त्वेन टः। तस्यासिद्धत्वात् चयो द्वितीया इति पक्षे ठस्य ठो न। सस्य झल्त्वं तु न भवति। नपदांतद्वित्यरित्यति निषेधात्। लिट्स्वित्ति। ढस्य जश्त्वेन डकारे चर्त्वस्यासिद्धत्वा त्ततः प्राग् एव डः सीति धुट्। चर्त्वेन तकारः। ततो डस्य चर्त्वेन टः। धुटश्चर्त्वस्यासिद्धत्वात् पक्षे चयो द्वितीया इति तस्य थो न। धुट्त्वं तु तकारस्य न प्रकृत्यमेवान पदांता दिति निषेधात्पाक्षिकत्वं बोध्यं। दादेर्धातोर्घः। धातोरित्यावर्त्तते। तत्रैकमतिरिच्यमानमुपदेशकालं लक्षयतीत्याशयेनाह। उपदेश इति॥ उपदेशग्रा ॥ ग्रहणस्याव्याप्तिव्यावृत्तिपरिहारः फलमित्याह। अधोगित्यादिना ऽत्र माभूदिति तेन॥ ।


69

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एकाचो बशो। झलीति निवृत्तमिति। धुग्भ्यां धुक्ष्विति। दो पदांत इत्येव भष्भावसिद्धेरिति भावः। प्राचा तु प्रातिपदिकस्य तु झलि पदांते चेति व्याख्यातं। तन्न प्रामादिकमे
वा। अधोक् अधेक् इत्याद्यसिद्ध्यापत्तेः। प्रातिपदिकग्रहणस्याप्रकृतत्वाच्च। ननु धातोरवयव इति वैय्यधिकरण्येनान्वयोक्तिर्वं तस्य दुह दोदारिति घत्वेन रूपं तत्वे
पि भष्भावो न स्यात्। दुघिति समुदायस्य यः पूर्वावयवो दु इत्येकाच् तस्य झषंतत्वाभावात्। दुघ इत्युत्तरावयवे तु च श्रुत्वाभावादित्यत आह। व्यपदेशिवद्भावेनेति। नव धा
त्ववयवो धातुरित्येव व्यपदिश्यतां तथा च गर्धं विनिसिद्ध्येदिति वाच्यं। अर्थवता हि व्यपदेशिवद्भावः। न चावयवोर्थवानिति तस्य धातुत्वव्यपदेशासंभवात्। भष्
भाव इति। क्विपः प्राक् प्रवृत्ता या धातुसंज्ञा यां निरपवादत्वेनावस्थितत्वात् दादेर्धातोरिति घत्वे कृते झषंतत्वादिति भावः। धुगिति। दुह प्रपूरणे। क्विप्। वा द्रुह। दुह

एकाचो बशो भष् झषन्तस्य स्ध्वोः। ८।२।३७। धातोरवयवो य एकाच् झषन्तस्तदवयवस्य बशः स्थाने भष् स्यात् सकारे ध्वशब्दे पदान्ते च। एका
चो धातोरिति सामानाधिकरण्येनाऽन्वये तु इह न स्यात्। गर्दभमाऽऽचष्टे गर्दभयति। ततः क्विपि णिलोपो गर्द्धप्। झलीति निवृत्तम्। स्ध्वोर्ग्र
हणसामर्थ्यात्तेनेह न। दुग्धं दोग्धा। व्यपदेशिवद्भावेन धात्ववयवत्वाद्भष्भावः जश्त्वचर्त्वे। धुक्। धुग्। दुहौ। दुहः। धत्वचर्त्वे। धुक्षु। वा
द्रुहमुहष्णुहष्णिहाम्। ८।२।३३। एषां हस्य वा घः स्याज्झलि पदान्ते च। पक्षे ढः। ध्रुक्। ध्रुग्। ध्रुट्। ध्रुड्। द्रुहौ। द्रुहः। ध्रुग्भ्यां। ध्रुड्भ्यां। ध्रुक्षु। ध्रु
ट्सु। ध्रुट्त्सु। एवं मुह् ष्णुह् ष्णिह्। इग्यणः सम्प्रसारणम्। १।१।४५। यणः स्थाने प्रयुज्यमानो य इक् स सम्प्रसारणसंज्ञः स्यात्। वाह ऊठ्। ६।४।
१३२। भस्य वाहः सम्प्रसारणमूठ् स्यात्॥ ॥ ९ जिघांसायां मुह वैचित्ये। ष्णुह उद्गिरणे। ष्णिह प्रीतौ। द्रुहेर्दादित्वान्नित्यं प्राप्ते। अन्येषामप्राप्ते उभ
यत्र विभाषेयं। ननु द्रुहादयो दिवादिष्वनेनैव क्रमेण पठ्यंते तत्र वा द्रुहादीनामित्येवास्तु दिवाद्यंतर्गणस्य पुषादेरंतर्गणो रधादिस्तदंतर्गणो द्रुहादिरस्तु रधादिगण
समाप्तये ष्णिहधातोरनंतरं वृत्करणस्य कृतत्वेनातिप्रसंगशंकाया निरवकाशत्वात्। मैवं। तथा हि सति यङ्लुकि दोधुक दोधुट् इत्यादि न सिध्येत्। निर्दिष्टं यद्गणे
न चेति निषेधात्। इग्यणः। यणः स्थाने इगिति विधिप्रदेशेषु सूत्रार्थः। इक वद्भाविसंज्ञाश्रयणान्नान्योन्याश्रयः। ननु यणः स्थानिकस्येकः संप्रसारणत्वे अदुहितरामि
त्यत्र लङो लकारस्य स्थाने उत्तमपुरुषैकवचनमिट् तस्य यण्स्थानिकत्वेन संप्रसारणसंज्ञायां सत्यां हल इति दीर्घः स्यात्। तरपं प्रति लङन्तस्यांगत्वादिति चेत्॥

सु.
सि.कौ. अत्रकैयटः। यथासंख्यसंबंधात्संप्रसारणसंज्ञाऽत्र न भवतीति। नन्वनुवादे परिभाषाणामनुपस्थानात् कथमिह यथासंख्यलाभः। नन्वेवंस्थानयोगेऽपि न ल
टी.त. भ्यतेतिवाच्यं। षष्ठीस्थानेयोगेत्यत्रएतत्सूत्रमनुवर्त्यव्याख्यायांतल्लाभात्। अत्राहुः। तत्राद्यन्तावाश्रयणेनसंप्रसारणस्येतिसूत्रेतद्भावितग्रहणाद्दुहितरामि
७० त्यत्रहलइतिसंप्रसारणस्य दीर्घो न भवति। लडुस्थानिकः स्यटः संप्रसारणशब्देनाभावितत्वात्। नन्वेवमप्यसूघुवौ असुघुवइत्यादौ ऊठः संप्रसारणसंज्ञायांसं
प्रसारणाच्चेतिपूर्वरूपंस्यादितिचेत्न। संप्रसारणपूर्वत्वेसमानांगग्रहणंकर्तव्यमितिवार्तिककृतोक्तत्वात्वाणोर्दागंबलीयस्त्वाद्धाउवङ्वस्यात्। अत्रनव्याः
व्यङः संप्रसारणमित्यादिविधिप्रदेशेष्वेवयणाइकुइतिपठित्वासंप्रसारणसंज्ञासूत्रंत्यक्तुंशक्यमित्याहुः। वाहऊठ्। एत्येधत्यूठ्स्वितिविशेषणार्थष्ठकारोहलंत्य
मितीत्संज्ञकः। अत्रभस्येत्यधिक्रियते। वसोः संप्रसारणमित्यतोनुवृत्तं संप्रसारणमूठोविशेषणंतेनालोंत्यस्येतिनभवतितरेतदाह। भस्यवाहइत्यादि। प्राचा
सम्प्रसारणाच्च। ६।१।१०८। सम्प्रसारणादचिपूर्वरूपमेकादेशःस्यात्। एत्येधत्यूठ्सु। विश्वौहः। विश्वौहेत्यादि। छन्दस्येवण्विरितिपर्युदासेन
जनाद्दिवाचतुरनडुहोराऽऽमुदात्तः। ७।१।९८। अनयोराऽऽम्स्यात्सर्वनामस्थानेपरेसचोदात्तः। सावऽनडुहः। ७।१।८२। अस्यनुम्स्यात्।
सौपूरे। आदित्यधिकाराद्वर्णान्तरोयंनुम्। अतोविशेषविहितेनाऽपिनुमाऽऽम्नबाध्यते। आमाचनुम्नबाध्यते। सोर्लोपः। नुम्विधिसा
मर्थ्याद्वसुस्रंस्विनिदलन्नासंयोगान्तलोपस्याऽसिद्धत्वान्नलोपोन। अनड्वान्। अमसम्बुद्धौ। ७।१।९९। चतुरनडुहोरम्स्यात्सम्बुद्धौ। आमोऽपवादः।
नुवाहोवाशब्दस्यसंप्रसारणंस्यादित्युक्तंतच्चफलितार्थकथनपरतयाकथंचिन्नेयमित्याहुः॥ ॥ दः। हे अनड्वन्। अनड्वाहौ। अनड्वाहः। अनडुहः। अनडु
संप्रसारणाच्च। अमिपूर्वइत्यतःपूर्वइत्यनुवर्तते। इकोयणचीत्यतोऽचीतिचएकःपूर्वपरयोरितिचाधिक्रियते। तदाह। संप्रसारणादचीत्यादि। छंदस्येवण्विरि
ति। वहश्चेतिसूत्रेभजोण्विः छंदसिसहइत्यतोण्विप्रत्ययस्यछंदसीत्यस्यचानुवृत्तेरितिभावः। स्यादेतत्। वाहइत्येवसूत्रमस्तुसंप्रसारणमेवात्रविधीयताम्। तस्य ७०
लघूपधगुणेवृद्धिरेचीतिवृद्धौसिद्धंविश्वौहइत्यादिकिमूठ्ग्रहणेन। सत्यं। एवंस्थितेक्रियमाणमूठ्ग्रहणंबहिरंगपरिभाषांज्ञापयति। तस्यांहिसत्यांजातस्यब
हिरंगस्यसंप्रसारणस्यासिद्धत्वादंतरंगोगुणोनस्यादितिभाष्येस्थितं। नन्वनकारांतोपपदेऽकारांतोपसर्गोपपदेचरूपेविशेषःस्यादितिकथमूठ्ग्रहणंज्ञाप

70

कमिति चेत्। अत्राहुः। कैयटादयः। भाष्यकारोक्तज्ञापकबलेनैव नादृशस्थलेऽपि प्रत्ययाभावोऽनुमीयते इति। एतेन भुवं वहतीति भुवाट् भूहः। भूहा। प्रौहः प्रौहेत्या
दिप्रयोगाः परास्ताः। चतुरनडुहोः। इतोऽत्सर्वनामस्थाने इत्यतोऽनुवर्तनादाह। सर्वनामस्थान इति। सा च नडुहः। आच्छीनद्योरित्यतो नुमनुवर्त्याह। नुमुस्यादिति। विशेष
विहितेन यासुटा सामान्यविहितः सीयुडिव नुमा आम् बाध्यतामित्याशंकां निराकरोति। अवर्णान्तत्वेऽयमित्यादिना। उपजीव्योपजीवकयोर्विरोधाभावेन बाध्यबाधक
भावो नेति भावः। अमा चेति। विशेषविहितेनापीत्यनुषज्यते। आमा च नुम्न बाध्यत इति केचित्पठंति। तस्यायमर्थः। बहूनडुहांहीत्यत्र परत्वादामि कृते पुनः प्रसंगविज्ञा
नान्नपुंसकस्य झलचइति नुम् प्रवर्त्त्यैव न तु बाध्यत इति। नुमो दत्वमाशंक्याह। नुम्विधिसामर्थ्यादित्यादि। विधानसामर्थ्यात्सर्वत्राविकृतेन नुमा भवितव्यमिति

वसुस्रंसुध्वंस्वनडुहां दः ८।२।७२। सान्तवस्वन्तस्य स्रंसादेश्च दः स्यात्पदान्ते। अनडुद्भ्यामित्यादि। सान्तेति किं विद्वान्। पदान्तेति किं। स्रस्तं
ध्वस्तं। सहेः साडः सः ८।३।५६। साड्रूपस्य सहेः सस्य मूर्द्धन्यादेशः। तुराषाट्। तुराषाड्। तुरासाहौ। तुरासाहः। तुराषाड्भ्यामित्यादि। तुरं सह
त इत्यर्थे छन्दसि सह इति ण्विः। लोके तु साहयतेः क्विप्। अन्येषामपीति पूर्वपदस्य दीर्घः। दिव औत्। ७।१।८४। दिविति प्रातिपदिकस्यौत्स्यात्सौ
परे। अल्विधित्वेन स्थानिवत्त्वाऽभावाद्धल्ङ्यादिलोपो न। सुद्यौः। सुदिवौ। सुदिवः। सुदिवं। सुदिवौ। दिव उत्। ६।१।१३१। दिवोऽन्तादेश उकारः स्या
त्पदान्ते। सुद्युभ्यां। सुद्युभिः। चत्वारः। चतुरः। चतुर्भिः। चतुर्भ्यः।३। ॥

९९ भावः। नन्वेवमनडुहां सन्त्वेत्यत्र नश्छव्यीति रुत्वमपि न स्यादिति चेत्। अ-
त्राहुर्भाष्यकाराः। यं विधिं प्रत्युपदेशोऽनर्थकस्स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यते। भवति हि दत्वं प्रति नुमो विधिरनर्थकः रुत्वं प्रति तु निमित्तमेवेति
अनड्वानिति। अनः शकटं वहतीति विग्रहे अनसि वहेः क्विप्। अनसो ड श्च। यजादित्वात्संप्रसारणं। अनडुह् सु इति स्थिते। आम् नुम् सुलोपेषु कृतेषु संयोगान्तलो
पेन हकारलोपः॥ ॥ वसुस्रंसु। वस्विति प्रत्ययस्तेन तदंतग्रहणं। ससजुषोरिति सूत्रात्सेत्यनुवर्तते तच्च वसोरेव विशेषणं। ननु स्रंसुध्वंसोरव्यभिचारात् नाप्यनडुहः
असंभवादित्यभिप्रेत्याह। सांतवस्वंतस्येति। सहेः साडः सः। सहेरिति किं। सहडेन वर्तते। सडः यस्य नाम्नि ड शब्दोऽस्ति यथा मृड इति। सडस्यापत्यं साडिः। हांताः। दि
व औत्। तकार उच्चारणार्थः। प्रातिपदिकस्येति। अव्युत्पन्नस्य दिवेर्डिविरिति न्यासो हि तत्सूत्रेण व्युत्पन्नस्य वाग्रहणं न तु दिवु क्रीडादाविति धातोर्निरनुबंधकग्रह

CC-0. In Public Domain. Digitization by eGangotri

सु
सि·कौ·
टी·त·
७१

लेन सानुबंधकस्येति परिभाषया तेनाम्बचुरित्यादौ न भवति। न च तत्रांतरंगत्वात् ऊठेव स्यान्न तु औत्वप्रसक्तिरिति वाच्यं। ऊठि कृतेप्येकदेशविकृतन्यायेन दिव औ
दित्यस्यापि प्रसक्तिसंभवादिति दिक्। दिव उत्। तपरकरणमिह द्यु भ्यामित्यादावुकारस्य संप्रसारणत्वाद् हल इति दीर्घप्राप्तेस्तन्निवारणायेत्याहुः। वांतः। चत्वा
र इति। चतेरुरन्नित्युरन्प्रत्ययांतश्चतुरशब्दस्ततो जसि चतुरनडुहोरित्याम्॥ ॐ॥ षट्चतुर्भ्यश्च। बहुवचननिर्देशादर्थस्य प्राधान्यं विवक्षितं। अर्थाच्च मःप
रत्वं शब्दद्वारकं तेन तदंतविधौ सत्यपि परमचतुर्णामित्यादावेव भवति न तु बहुव्रीहौ न देत इत्यति। गौणत्वे तु नुट् नेष्यत इत्यादिना॥ द्वित्वमिति। अचो रहाभ्यामि
त्यनेन। रोः सुपि। सुपीति न प्रत्याहारः खरीत्यनुवृत्तेः। तेन पयोभ्यामित्यादौ विध्यर्थमेतन्न भवति। खरवसानयोरित्यवसिद्धे यमारंभो नियमार्थमित्याह। रोरेवेति
रोः सुप्येव विसर्जनीय इति विपरीतनियमस्त्विह न भवति। हलोनंतराः संयोग इत्यादिनिर्देशात्। शरोचि। अचो रहाभ्यामित्यतो द्वे इति नादिन्याक्रोशे इत्यतो

षट्चतुर्भ्यश्च।७।१।५५। षट्संज्ञकेभ्यश्चतुरश्च परस्यामो नुडागमस्यात्। रषाभ्यां नो णः समानपदे इति णत्वं। द्वित्वं चतुर्णां। रोः सुपि।८।३।१६। सप्तमीबहुवचने रोरेव विस
र्जनीयो नान्यरेफस्य। षत्वं षस्य द्वित्वे प्राप्ते। शरोऽचि।८।४।४९। अचि परे शरो न द्वे स्तः। चतुर्षु। प्रियचत्वाः। हे प्रियचत्वः। प्रियचत्वारौ। गौणत्वे
तु नुण्नेष्यते। प्रियचतुरां। प्राधान्ये तु स्यादेव। परमचतुर्णां। कमलङ्कमलाम्बा आचक्षाणः कमल्। कमलौ। कमलः। कमलङ्कमलसु। मो नो धा
तोः।८।२।६४। धातोर्मस्य नस्यात्पदांते। नत्वस्याऽसिद्धत्वान्नलोपो न। प्रशाम्यतीति। प्रशान्। प्रशामौ। प्रशामः। प्रशान्भ्यामित्यादि॥

नेति चानुवर्तत इत्याह। न द्विल इति। नन्वस्तु द्वित्वमेकस्य झरो झरि सवर्णे इति लोपसिद्धमिष्टं। मैवं। लोपस्य वैकल्पिकत्वेन पक्षे द्वयोः श्रवणप्रसंगात्। प्रियाश्चत्वारश्च
त्वारि यस्य स प्रियचत्वाः। आंगत्वात्परं तस्यापि चतुरनडुहोरित्याम्। हे प्रियचत्व इत्यत्र तु अम्संबुद्धाविति अम्। रांतः। कमलामिति। कमला श्रीर्हरिप्रियेत्यमरः। क
मलमिति। तत्करोति तदाचष्टे इति णिचि इष्टवद्भावाट्टिलोपः। णिजंतात्क्विपि णेरनिटीति णिलोपः। एवं सलिलमाचक्षाणः सलिल् सलिलौ सलिल इत्यादि बो
ध्यं। नन्वेवं तोयमाचक्षाणस्तोय् तोयौ तोय इति यांता अपि सुसाधाः। न च वेरपृक्तलोपात् हलि लोपः पूर्वविप्रतिषेधेनेति यलोपः शंक्यः। लोपो व्योर्वलीति लोपे कर्त ७१
व्ये णिलोपस्य टिलोपस्य वा स्थानिवद्भावेन यकारस्य वलपरत्वाभावादिति चेन्नैवं। न पदांतेति सूत्रेण यलोपे स्थानिवद्भावनिषेधात्। तस्मात्तोयो व्योर्वलीति

71

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यलोपः स्यात् एवेति यांतानोक्ताः। लांताः पदान्त इति। प्राचां तु झलीत्यप्युक्तं। तन्निष्फलत्वादुपेक्ष्यं। प्रशानिति। शाम उपशमे। क्विप्। अनुनासिकस्य क्वीति दीर्घः॥ ःः॥
किमः कः। कायतेर्डिमिरिति डिमिप्रत्ययेन निष्पन्नः किम्शब्दः॥ विभक्ताविति। अष्टन आ विभक्ताविस्यतोऽनुवर्तत इति भावः। नन्वत्र इम इत्येव सूत्र्यतां तेन तिमष्टिमा
दीनां क्विबन्तानाम् अतिप्रसंगवारणाय त्यदादीनामित्यनुवर्त्य त्यदादीनामिमः अः स्यादिति व्याख्यास्यते न दादिशब्दान् प्राक् किम्शब्दस्य पाठः कर्तव्यः। नानर्थकेऽ
ति निषेधादलोन्त्यविधिर्न भविष्यति तत् किं काद्ग्रहणेनेत्यत आह। अकच्सहितस्यापीति। इमोकारविधौ तु साकच्कस्य ककार इति रूपं स्यादिति भावः॥ नन्वेवं गण
कार्यत्वाभावादुपसर्जनेऽपि स्यात्। मैवं। त्यदादीनामित्यनुवर्त्य त्यदादीनां किमः इति व्याख्यानात्। इदमो मः। इदं इः कमिर्न लोपश्च। इदम्। तदोः सः सावित्यनो

किमः कः। ७।२।१०३। किमः कः स्याद्विभक्तौ। अकच्सहितस्याप्ययमादेशः। कः। कौ। के। कं। कौ। कान्। इत्यादि। सर्ववत्। इदमो मः। ७।२।
१०८। इदमो मस्य मः स्यात्सौ परे। त्यदाद्यत्वापवादः। इदोऽय् पुंसि। ७।२।१११। इदम इदः स्थाने अय् स्यात्सौ पुंसि। सोर्लोपः। अयं। त्यदाद्यत्वम्प
ररूपत्वञ्च। दश्च। ७।२।१०९। इदमो दस्य मः स्याद्विभक्तौ। इमौ। इमे। त्यदादेः सम्बोधनं नास्तीत्युत्सर्गः। अनाप्यकः। ७।२।११२। अकका
रस्येदम इदोऽन् स्यादापि विभक्तौ। आबिति टा इत्यारभ्य सुपः पकारेण प्रत्याहारः। अनेन। हलि लोपः। ७।२।११३। अककारस्येदम इदो लोप
स्यादापि हलादौ। नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे। आद्यन्तवदेकस्मिन्। १।१।२१। एकस्मिन् क्रियमाणं कार्यमादाविवान्त इव स्यात्।

नुवर्तनादाह। सौ पर इति। इदोय् पुंसीति किं। इयं स्त्री। त्यदादेः सम्बोधनं नास्तीति। प्रचुरप्रयोगादर्शनमेवात्र मूलं। उत्सर्ग इति। तेन तदोः सः सावितिसूत्रे अनन्त्ययो
रिति किं। हे स इति भाष्यं। भो अच्युत भवन्नच्युतेत्यादेश्प्रयोगाश्च न विरुध्यन्त इति भावः। अनाप्यकः। आबिति प्रत्याहारो न तु टाप् विभक्ताविति विशेषणादतो व्याच
ष्टे टा इत्यारभ्य सुपः पकारेणेति। नानर्थकेऽलोन्त्यविधिरिति। नन्वेवं बिभर्त्ति पिपर्त्ति इत्यादौ भृञामित्। अर्त्तिपिपर्त्त्योश्चेतीत्त्वं सर्वस्याभ्यासस्य स्यात्। इत्वाभावे केवल
स्यार्थत्वेपि हित्वे सति समुदायस्यैवार्थवत्त्वादित्याशंकायामाह। अनभ्यासविकार इति। आद्यन्तवत्। सत्यन्यस्मिन्यस्य पूर्वो नास्ति स आदिः। सत्यन्यस्मिन्यस्य परो नास्ति सोन्त
इति लोके प्रसिद्धं तदुभयमेकस्मिन्नसहायेन संभवतीति तत्राद्यन्तव्यपदिष्टानि कार्याणि न स्युरतोयमतिदेश आरभ्यते। न च परत्वात्सुपि चेति दीर्घः पश्चाद्धलि लोपः स

CC-0. In Public Domain. Digitization by eGangotri



न्याभ्यामित्यादि सिध्यतीति किमत्राद्यंतवत्सूत्रोपन्यासेनेति शंक्यं। नित्यत्वाद्धलिलोपं इत्यस्य दीर्घात्पूर्वमेव प्रवृत्तेः। एकस्मिन्निन्युपमेये सप्तमीदर्शनात्सप्तम्यर्थ एव वतिरित्यभि
प्रेत्याह। आद्याविवांतइवेति। आद्यवत् किं। औपगवः। अत्राण आद्युदात्तत्वं यथा स्यात्। भाष्ये त्वाद्यंतवदित्यपनीय व्यपदेशिवदेकस्मिन्निति सूत्रमूहितं। विशिष्टो
अपदेशो व्यपदेशः। मुख्यो व्यवहारः सोस्यास्तीति व्यपदेशी मुख्य इति यावत्। तेन तुल्यमेकस्मिन्नसहायेपि कार्यं स्यादित्यर्थः। तेन इयाय। आरत्यां दावेकाच इति द्वित्वं

नेदमदसोरकोः ७।१।११। अककारयोरिदमदसोर्भिस ऐस् न स्यात्। एत्वं। एभिः। अत्वं नित्यत्वात् ङे स्मै पश्चाद्धलि लोपः। अस्मै। आभ्यां। एभ्यः। अ-
स्मात्। आभ्यां। एभ्यः। अस्य। अनयोः। एषां। अस्मिन्। अनयोः। एषु। ककारयोगे तु अयकं। इमकौ। इमके। इमकं। इमकौ। इमकान्। इमकेन। इ-
मकाभ्यां। इमकैः। इदमोन्वादेशेऽशनुदात्तस्तृतीयादौ। २।४।३२। अन्वादेशविषयस्य इदमोऽनुदात्तोऽश् आदेशः स्यात् तृतीयादौ। अशवचनं
साकच्कार्थं। द्वितीयाटौस्स्वेनः। २।४।३४। द्वितीयायां टौसोश्च परत इदमेतदोरेनादेशः स्यादन्वादेशे। किंचित्कार्यं विधातुमुपात्तस्य कार्यांत-
रं विधातुं पुनरुपादानमन्वादेशः। यथा। अनेन व्याकरणमधीतं। एनं छन्दोऽध्यापयेति। अनयोः पवित्रं कुलं एनयोः प्रभूतं स्वमिति। एनं। एनौ।
एनान्। एनेन। एनयोः। । गणयतेर्विच्। सुगण्। सुगणौ। सुगणः। सुगण्ड्सु। सुगण्त्सु। क्विपि। अनुनासिकस्य क्विझलोरिति दीर्घः। सुगाण्। सुगाणौ।
सुगाणः। सुगाण्सु सुगाण्ट्सु। परत्वादुपधादीर्घः हल्ङ्यादिलोपः। ततो नलोपः। राजा। न ङिसंबुद्ध्योः ८।२।८। नस्य लोपो न स्यात् ङौ संबुद्धौ च। हे राजन्।
ङौ तु छन्दस्युदाहरणं। सुपां सुलुगिति ङेर्लुक्। निषेधसामर्थ्यात्प्रत्ययलक्षणं। परमे व्योमन्। ङावुत्तरपदे प्रतिषेधो वक्तव्यः। चर्मणि तिला अस्य
चर्मतिलः। ब्रह्मनिष्ठः। राजानौ। राजानः। राजानं। राजानौ। अल्लोपोऽनः। श्चुत्वं। न चाल्लोपः स्थानिवत्। पूर्वत्रासिद्धे तन्निषेधात्। नापि बहिरंगतयाऽसिद्धः
यथोद्देशपक्षे षाष्ठीम्परिभाषाम्प्रति श्चुत्वस्यासिद्धतयांऽन्तरंगाभावे परिभाषाया अप्रवृत्तेः। जञोर्ज्ञः। राज्ञः। राज्ञा॥

सिध्यति। अन्यथा आद्यंतापदिष्टत्वाभावात् द्वित्वं न स्यादिति दिक्॥ ॥ नेदमदसो। भाष्ये तु इदमदसोः कात् नियमार्थमिदं। इदमदसोः कादेव भिस ऐस् नान्यत इति
स्थितं। न त्वाक्तु। इदमदसोः कादिति सूत्रिते तु काद्भिस ऐस् इदमदसोरेवेति विपरीतनियमोपि संभाव्येत। तथा च पाचकैरित्यादि न सिध्येत्। किंतु नेदमदसोः का

72

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ङ्सि ऐस अत इत्येव सूत्रद्वयं सुवचमित्याहुः। स्मायादेशात्परत्वाद्दनादेशः स्यादित्याशंकायामाह। नित्यत्वान्ङेः स्मे इति। इदमोन्वादेशे। नन्विदमोनुदात्तमात्रवि
धावपि हलि लोपेन आभ्यामित्यादि समीहितरूपं सिध्यति एनेन एनयोरित्यत्र तु विशिष्येनादेशो विहितः किमनेनांशग्रहणेनेत्यत आह। साकच्कार्थमिति य
द्यपीह शित्करणं व्यर्थं अकारस्याकारविधानसामर्थ्यादेव सर्वादेशसिद्धेस्तथानुदात्तत्वार्थमेवाकारविधानमित्याशंकास्यात्तन्निवारणाय शित्करणमित्या
हुः। अअ इति प्रश्लिष्यनिर्देशे तु अनेकाल्त्वादेव सर्वादेशसिद्धेः शिद्ग्रहणं त्यक्तुं शक्यमित्याकरः। द्वितीयाटौस्सु। इदमोन्वादेश इत्यतः इदम इत्यनुवर्तते।
। अन्वादेश इति च एतदस्त्रतसोरित्यत एतद इत्यपि तदाह। इदमेतदोरेनादेश इत्यादि। अनुदात्त इत्यनुवर्तनादेनादेशोनुदात्त इति
ज्ञेयः। कार्यं विधातुमिति। अपूर्वं बोधयितुमित्यर्थः। ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः। एतमातं ङितं विद्यादित्यत्र तु ईषदर्थादयो न विधीयंते किं त्वनू
द्यंते इति न तत्रैनादेशः। एतेन न नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापयेत्यपि व्याख्यातं। भीरुत्वस्यानुवाद्यत्वेन विवक्षितत्वात्। मांतानः सुगालिति। क्विपानव
अनुनासिकस्य क्वौ निदीर्घे कर्तव्ये अल्लोपटिलोपयोः स्थानिवद्भावः शंक्यः। दीर्घविधौ तन्निषेधात्। क्वौ विधिं प्रति निषेधाच्च॥ णांताः॥ निषेधसामर्थ्यादि
ति। यदा तु नङि संबुद्ध्योरित्यत्र षष्ठ्यंतनामाश्रित्य ङ्यंतस्य संबुद्ध्यंतस्य च पदस्य लोपो नेति व्याख्यायते तेन दाप्रत्ययलक्षणं सुलभमिति तदर्थं निषेधसामर्थ्या
नुसरणक्लेशो न कर्तव्य इत्याहुः। पूर्वस्मादपि विधौ स्थानिवत्त्वमाशंक्याह॥ न चेति॥ वाष्ठीयपरिभाषामिति। वाह ऊठित्यत्र ज्ञापितत्वेन तद्देशस्थत्वादिति भावः ॥

सु॰
सि॰कौ॰ नलोपः सुप्स्वर। पूर्वत्रासिद्धमित्यनेनैव सिद्धे नियमार्थमारंभ इत्याह। नान्यत्रेत्यादि। तेन राजाश्व इत्यादौ सवर्णदीर्घे कर्तव्ये नलोपोऽसिद्धो न भवतीति भावः। सुब्विधिमुदाह
टी॰न॰ रति। आत्वमित्यादिना। सुबाश्रितो विधिः सुब्विधिः। स्वरविधौ पंचार्मा। दिकर्मस्येसंज्ञायामिति समासेन लोपे कृते अवर्णान्तं पूर्वपदं जातमिति। अर्मे चावर्णान्त्य चर्म्यच इ
७३ तिपूर्वपदाद्युदात्तत्वं प्राप्तं न लोपस्यासिद्धत्वान्न भवति। संज्ञाविधौ पंचेत्यत्र नलोपे कृते पीत्यादिना स्त्रीप्रत्ययेषु वक्ष्यति। अन्ये तु दंडिगृहे गृहदंडिना वित्यप्युदाहरणं
अत्र नलोपस्यासिद्धत्वात् घिसंज्ञा नास्तीति द्वंद्वे घीति पूर्वनिपातनियमो न भवतीत्याहुः। कृति तुग्विधौ तु वृत्रहभ्यां वृत्रहभ्य इति विहितं क्विपमाश्रित्य ह्रस्वस्येति तुक्
कृति तुग्विधाविति किं। वृत्रहच्छत्रं इह ह्रस्यादेव छे चेति तुक्। यद्यपि वृत्रहभ्यामित्यत्रासिद्धं बहिरंगमंतरंग इत्यनेनैव लोपस्यासिद्धत्वं सिध्यति। तथापि। अस्याः

नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति। ८।२।२। सुब्विधौ स्वरविधौ संज्ञाविधौ कृति तुग्विधौ च नलोपोऽसिद्धो नान्यत्र। राजाश्व इत्यादौ। इत्यसि
द्धत्वादात्वमेत्वमैस्त्वं च न। राजभ्यां। राजभिः। राज्ञा। राजभ्यां। राजभ्यः। राज्ञः। राज्ञोः। राज्ञि। राजनि। प्रतिदीव्यतीति प्रतिदिवा। प्रतिदिवानौ। प्रतिदिवानः। अस्य
भविषयेऽल्लोपे कृते। हलि चा ८।२।७७। रेफवकारान्तस्य धातोरुपधाया इको दीर्घः स्याद्धलि। न चाल्लोपस्य स्थानिवत्वं दीर्घविधौ तन्निषेधात्। ब
हिरङ्गपरिभाषा तु नेह प्रवर्तते। प्रतिदीव्नः। प्रतिदीव्नेत्यादि। यज्वा। यज्वानौ। यज्वानः। न संयोगाद्वमन्तात्। ६।४।१३७। वकारमकारा 73
न्तसंयोगात्परस्याऽनोऽकारस्य लोपो न स्यात्। यज्वनः। यज्वना। यज्वभ्यामित्यादि। ब्रह्मणः। ब्रह्मणा। ब्रह्मभ्यामित्यादि॥ ॥

परिभाषाया अनित्यत्वज्ञापनार्थं कृति तुक्ग्रहणं। तेन पथास इत्यादि सिध्यति। अन्यथा विभक्त्या श्रयस्यात्वस्य बहिरंगत्वेनासिद्धत्वाट्टापन्नस्यात्। एतच्च नाजानंतर्ये बहिष्ट्व
प्रक्लृप्तिरित्यत्र यत्रांतरंगे बहिरंगे वा अचोरानंतर्यमिति हरदत्तादिमते न कैश्चिदुक्तं। उत्तरकार्ये अच आनंतर्यमिति केयटमते तु नात्र बहिरंगपरिभाषा प्रवर्तते। यासे
त्यत्र टाप् तु संनिपातपरिभाषामपि बाधित्वानया सयोरिति निर्देशादेव सिध्यतीति ज्ञेयं। प्रतिदिवेति। कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिव इति कनिन्। हलि च॥
र्वोरुपधाया दीर्घ इक इत्यनुवर्तते सिपिधातोरित्यतो धातोरिति च तच्च धातुग्रहणं र्वोरित्यनेन विशेष्यते विशेषणेन तदंतविधिरित्याह। रेफवांतस्य धातोरित्यादि। रेफां ७३
तस्य तु गीर्यति पूर्यति गीर्णं पूर्णमित्याद्युदाहरणं। धातोः किं। रफांतस्य पदस्य मा भूत्। अग्निः करोति। वायुः करोति। न च स्वधातोरनुवर्तनं पर तु र्वोरित्यनेन धातुर्न विशेष्यते रेफ

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वांतस्य धातोरिति किंतु इग्विशेष्यं तेन रेफवांतस्य इको दीर्घः स्यात् तौ च रेफवकारौ धातोः स्वेताम्। अंतशब्दोऽत्र समीपवाची तथा चोपधायां चेति सूत्रं त्यक्तुं शक्यमनेनैव मूर्छितहूर्छिते
त्यादिरूपसिद्धेरिति चेन्मैवं। कुर्कुरीयतीत्यत्रातिप्रसंगः स्यात् तस्मात् र्वोरित्यनेन धातुरेव विशेष्यः। एतच्चाकरे स्पष्टं। यत्तूपधायां चेति केचिदुपन्यस्तं तन्न। दिवेर्वकारस्यो
नुपधात्वात्। उक्तन्यायेनेति। यथोद्देशपक्षे षष्ठीपरिभाषां प्रति दीर्घस्यासिद्धत्वेनायमर्थः। प्रतिदीव्न इति। नभकुर्छुरामित्यत्र र्वोरित्यनुवर्तनाद्रेफवांतस्यैव भस्य निषेध इति
न दीर्घनिषेधोऽत्र शंक्यः। नांतस्येह भत्वात्। यज्वेति। इष्टवान् यज्वा। सुयजोर्ङ्वनिप् । ब्रह्मलल इति। सर्वधातुभ्यो मनिन्निति प्रकृत्य बृंहेर्नोच्चेति नस्यात्वविधानाद् ब्रह्मन्श
ब्दोऽयं निष्पन्नः॥ ॐ॥ इन्हन्॥ सर्वनामस्थाने चासंबुद्धौ इत्यनेनैव सिद्धे नियमार्थमिदं न दाह। शावेवो पधाया इति। उपधादीर्घस्यैव नियमः। तेन वृत्रहायते इत्यत्राकृत्
सार्वधातुकयोरिति दीर्घो भवत्येव। वृत्रहलीत्यत्रानुनासिकस्य क्विझलोरिति दीर्घः सोऽपि नियमेन व्यावर्त्यते। उपधादीर्घमात्रापेक्षया नियमविज्ञानादिति तु मनोरमायां।

इन्हन्पूषार्यम्णां शौ। ६।४।१२। एषां शावेवोपधाया दीर्घो नान्यत्र। इति निषेधे प्राप्ते। सौ च। ६।४।१३। इन्नादीनामुपधाया दीर्घः स्यादसम्बुद्धौ सौ परे। वृत्रहा। हे वृत्रहन्। एकाजुत्तरपदे णः। इति णत्वं। वृत्रहणौ। वृत्रहणः। वृत्रहणं। वृत्रहणौ। हो हन्तेर्ञ्णिन्नेषु। ७।३।५४। ञिति णिति प्रत्यये नकारे च परे हन्तेर्हकारस्य कुत्वं स्यात्। हन्तेः। ८।४।२२। उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णत्वं स्यात्। प्रहण्यात्। अत्पूर्वस्य। ८।४।२२। हन्तेरत्पूर्वस्यैव नस्य णत्वं नान्यस्य। प्रघ्नन्ति। योगविभागसामर्थ्यादनन्तरस्य विधिर्वा प्रतिषेधो वेति न्यायमबाधित्वा एकाजुत्तरपदे इति णत्वमपि निवर्तते। नकारे परे कुत्वविधिसामर्थ्यादल्लोपो न स्थानिवत्। वृत्रघ्नः। वृत्रघ्ना। इत्यादि। यत्तु वृत्रघ्न इत्यादौ वैकल्पिकं णत्वं माधवेनोक्तं। तद्भाष्यवार्तिकविरुद्धं। एवं शार्ङ्गिन्यशस्विन्नर्यमन्पूषन्। यशस्विन्निति विन्प्रत्यये इनोऽनर्थकत्वेऽपि इन्हन्नित्यत्र ग्रहणम्भवत्येव। अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तद
दन्तविधिम्प्रयोजयन्तीति वचनात्। अर्य्यम्णि। अर्य्यमणि। पूष्णि। पूषणि॥

॥ ९ ॥ स्थितं। शावेवेति नियमाद्दीर्घस्याप्राप्तौ वाह। सौ चेति। शिक्षोरिति वक्त
व्ये योगविभाग उत्तरार्थः। वृत्रहेति। वृत्रं हतवान्। ब्रह्मभ्रूणवृत्रेषु क्विप्। हन्तेर्हस्येति ञ्णि ञिति णितीत्येतद्धन्तेर्विशेषणं। नकारे इति तु हस्येति यथासंभवं बोध्यं। यद्वा ञ्णिन्नाः
सर्वेऽपि हस्यैव विशेषणं ञितीति णितीत्यंशे येन नाव्यवधानन्यायेन ह्राभ्यां व्यवधानं स्वीक्रियते तेन घातः घातक इत्यत्र कुत्वं भवति। इह तु न भवति। हननमात्मन इच्छ

CC-0. In Public Domain. Digitization by eGangotri



नि हननीयति हननीयते ण्वुल् हननीयकः इति। एतच्च भाष्यकैयटादौ स्पष्टं। हंतेरत्पूर्वस्येति सूत्रं योगविभागेन व्याचष्टे। हंतेरिति। प्रसंगादस्योदाहरणमाह। प्रहण्यादि
ति। प्रकृतोपयुक्तमंशमाह। अत्पूर्वस्येति। एकाजुत्तरेति। न चाल्लोपे कृते एकाच्त्वं नास्तीति वाच्यं। पूर्वस्मादपि विधौ स्थानिवद्भावात्। न च पूर्वत्रासिद्धे न स्थानिव
दिति वाच्यं। तस्य दोषः संयोगादिलोपलत्वणत्वेष्वित्युक्तेः। निवर्त्यत इति। क्षुमतिचेति णत्वमपि निवर्त्यत एवेति बोध्यं। भाष्ये तु कुव्यवाये हादेशेषु प्रतिषेधो वक्त
व्यः। किं प्रयोजनं। वृत्रघ्नः सुघ्नः प्रघाणि हंतेरत्पूर्वस्येत्यत्पूर्वग्रहणं न कर्तव्यं भवतीत्युक्तं। एतच्च वार्तिकार्थवर्णनमात्रं न तु वस्तुस्थितिः। वार्तिके न सूत्रावयवप्र
त्याख्यानापेक्षया योगविभागमाश्रित्य वार्तिकार्थोपसंग्रहस्यैव न्याय्यत्वादिति तु मनोरमायां स्थितं। न च तत्पूर्वस्येत्यत्र तपरो विवक्षितो न वा। यदि विवक्षितस्तर्हि वृ
त्रहाणीति सिध्येत्। यद्यविवक्षितस्तदा प्रघाणीति चिंत्यं तेपि णत्वस्यात्। तेन च कुव्यवाये हादेशेषु प्रतिषेध इति वचनं स्वीकर्तव्यमेवेति किमनेन योगविभागेन॥
अत्राहुः। तपरोत्र विवक्षित एव। न च बहुवृत्रहाणीत्यत्र णत्वासिद्धिः। णत्वस्यांतरंगत्वेन तत् कार्यं प्रति दीर्घस्यासिद्धत्वात्। न च त्रैपादिकेंतरंगे षाष्ठी परिभाषा न प्र
वर्तत इति वाच्यं। कार्यकालपक्षाभ्युपगमात्। न चैवमंतरंगणत्वं प्रघाणीत्यत्रापि स्यादिति वाच्यं। पूर्वं धातुः साधनेन युज्यत इति पक्षेण त्वस्य बहिरंगत्वात्। इष्टानुरोधे
न पूर्वं धातुरुपसर्गेणेति पक्षस्यानभ्युपगमात् इति। अन्ये तु हंतेरत्पूर्वस्येत्यत्र उपसर्गादित्यस्यानुवृत्तिस्वीकारात् योगविभागेन सामर्थ्येन भ्रूणघ्न इत्यत्र एका
जुत्तरेत्यादिना णत्वाभावेपि वृत्रघ्नः सुघ्न इत्यत्र णत्वं दुर्वारमिति कुव्यवाय इति वार्तिकं स्वीकर्तव्यमेव। योगविभागस्यानंतरस्येति न्यायबाधेनापि चरितार्थत्वादुप
सर्गसंबंधस्यापि बाधे सामर्थ्याभावात्। न च ब्रह्मादिषु कर्मसूपपदेषु विधीयमानः क्विप्प्रत्ययः केवलं धातोरेव स्यान्न तु सोपसर्गादिति ब्रह्मप्रहा भ्रूणप्रहेत्यादि
रूपमेव दुर्लभमिति वाच्यं। आतोनुपसर्गे क इत्यत्रानुपसर्गे इति सामान्यापेक्षज्ञापकात् सोपसर्गाद्धंतेरपि ब्रह्मभ्रूणेति क्विप्संभवात्। अनुपसर्गग्रहणस्य सामान्यापेक्ष
ज्ञापकत्वे तूक्तवार्तिकमेव प्रमाणं। तस्माद्धंतेरिति योगविभागोत्र निरर्थक एवेत्याहुः॥ माधवेनोक्तमिति। इत्यहिनदीयाग्रंथः। भसंज्ञायामल्लोपे उत्तरपदमनकं स्यानि ७४
वद्भावश्चाल्विधित्वान्नेत्ये काजुत्तरपदत्वाभावात् नातिपदिकांतनुम्विभक्तिषु चेति विकल्पो भवति॥ वृत्रघ्नो वृत्रघ्नः इति। तद्भाष्येति। किं च अल्विधित्वान्नेत्यसंगतं
अल्विध्यर्थमेवाचः परस्मिन्नित्यस्यारंभात्। तस्याप्रवृत्तौ युक्तं तरस्यैव वाच्यत्वात्। एकाजुत्तरेत्यस्याप्रवृत्तावपि क्षुमतिचेति सूत्रस्य दुर्वारत्वान्नवैकल्पिकत्वं णत्वस्यासंगत

74

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नचत्रिपाद्यामपिपूर्वंप्रत्युन्नरघ्रासस्यासिद्धत्वादिकोजुनुरपदेऽणः कुमतिचेत्यस्याप्रवृत्त्याप्रातिपदिकांतेतिवैकल्पिकमेवणत्वंभवतीतिवाच्यं।नहियोगेयोगोऽसिद्धः॥
प्रकरणेप्रकरणंतिभाष्याद्दोसद्भावादितिदिक्।अनिन स्मन्ग्रहणानीति।अन् राज्ञेत्यर्थवतासाम्नाइत्यनर्थकेन।इन्।दंडीत्यर्थवता।वाग्मीत्यनर्थकेन।असासुय।
शाईत्यर्थवता।सुस्त्रोताइत्यनर्थकेन।इहसुरीभ्यांतुड्वेत्यसुनस्तुट्।मन्।सुशर्मेत्यर्थवता।सुप्रथिमाइत्यनर्थकेन।एतच्चइणःषीध्वमितिसूत्रेअंगग्रहणेनअर्थवद्ग्र
हणपरिभाषायाअनित्यत्वज्ञापनात्सिद्धं विविषीध्वमित्यत्रषीध्वंशब्दस्यग्रहणंमाभूदितिहितत्रांगग्रहणंकृतं।तच्चार्थकमनर्थकत्वादेवतद्ग्रहणासिद्धेरतोज्ञा
पत्तेअर्थवद्ग्रहणपरिभाषाअनित्येति॥ ःः ॥मघवाबहुलं।अर्वणस्त्रसाविन्नञइत्यनुवर्ततेतदपेक्षाचमघवेतिषष्ठ्यर्थेप्रथमा।तदाह।मघवन्शब्दस्येति।अधातो

मघवाबहुलं। ६।४।१२८।मघवन्शब्दस्यवातृइत्यन्तादेशःस्यात्।ऋ इत्।उगिदचांसर्वनामस्थानेऽधातोः ७।१।७०।अधातोरुगितोनलोपिनोऽञ्च
तेश्चनुमागमस्यात्सर्वनामस्थानेपरे।उपधादीर्घः।मघवान्।इहदीर्घेकर्तव्येसंयोगान्तलोपस्याऽसिद्धत्वन्नभवति।बहुलग्रहणात्।तथाचाश्व
न्नुक्षन्निितिनिपातनान्मघशब्दान्मतुपाचभाषायामपिशब्दद्वयसिद्धिमाश्रित्येतत्सूत्रमप्रत्याख्यातमाकरे।हविर्जक्षितिनिःशङ्कोमखेषुमघ
वानसावितिभट्टिः।मघवन्तौ।मघवन्तः।हेमघवन्।मघवन्तं।मघवन्तौ।मघवतः।मघवता।मघवद्भ्यामित्यादि।तृत्वाऽभावे।मघवा।छन्दसी
वनिपौचेतिवनिबन्तममध्योदात्तंछन्दस्येव।अन्तोदात्तन्तुलोकेपीतिविशेषः।मघवानौ।मघवानः।सुटिराजवत्॥ ॥ ॥

रिति।अधातुभूतपूर्वस्यापीत्यर्थः।अंचतिग्रहणंहिनियमार्थं।उगितोधातोश्चेद्भवतितर्ह्यंचतेरेवेति।एवंच गोमानिवाचरतिगोमान्इत्यादौसंप्रतिधातुत्वेपि
विध्यर्थमधातुग्रहणं।एतच्चमूलएवस्फुटीभविष्यति।नन्वंचतिग्रहणमौपदेशिकधातोश्चेदुगित्कार्यंतर्ह्यंचतेरेवेतिव्याख्यायअधातुग्रहणंत्यज्यतामिति
चेत्।अत्रनव्याः।नुम्मात्रविषयकोनायंनियमोधातोश्चेदुगित्कार्यंतर्ह्यंचतेरेवेतिनियम्यतेतेनेहन।उखास्रत्।इति।उगितश्चेतिसूत्रेवक्ष्यमाणत्वात्।ततश्च
यद्यौपदेशिकधातोश्चेदुगित्कार्यमितिव्याख्यायेततर्हिपूर्वोक्तेगोमानित्यादौस्त्रियामुगितश्चेतिङीप्प्रसज्येत।आचारक्विबंतस्यौपदेशिकधातुत्वाभावात्॥
नचेष्टापत्तिः।अधातोर्ग्रहणंदेवसूत्रकृतातत्रनुमनेष्यतइत्यनुमानादितिदिक्।ननुनलोपिनोंचतेरेवनुमागमःस्यान्नतुपूजार्थस्यनकारवतोंऽचतेरित्ये

६।५

वमर्थमचामिति ग्रहणस्य सार्थकत्वात्कथमेतस्य सामान्यनियमार्थतेति चेत्। उच्यते। अचामित्यत्र नलोपोऽविवक्षितः। तथा च पूर्वोक्तनियमार्थता भाष्यकैयटाद्युक्ता संगच्छत एव। पूजार्थस्यांचतेर्नुमि सत्यपि नश्चापदान्तस्येति सूत्रे जातिपक्षमाश्रित्य नलजातेरनुस्वारविधाने समीहितरूपसिद्धेः। व्यक्तिपक्षे त्वनुस्वारस्य शर्षु पठितत्वात् अनुस्वारे परे नुमोऽनुस्वारे सति अनुस्वारवद्रूपमिष्यते। अनचि चेति द्वित्वेन तद्रूपस्य तत्त्वापि मते दुर्वारत्वात्। न च भवन्मते द्वित्वेनानुस्वारत्रयं स्यादिति शंक्यं। झरो झरीति लोपेन निवारयितुं शक्यत्वात्। लोपाभावपक्षे त्रयाणां श्रवणं स्यादिति चेत्। भाष्यकैयटाद्युक्तनियमानुरोधे न तत्स्वीकारे बाधकाभावात्। इष्टानुरोधेन जातिपक्षस्त्वत्राश्रयणीयः। नुमागमः स्यादिति। इदितो नुम् धातोरित्यतो नुमनुवर्तत इति भावः। ननु कुर्वन्नित्यादाविव संयोगान्तलोपस्यासिद्धत्वेन नान्तत्वाभावाद्दीर्घत्वं न स्यादित्याशंक्याह। इह दीर्घे कर्तव्य इति। बहुलग्रहणादिति। क्वचिदन्यदेवेत्यर्थकादित्यर्थः बहूनर्थान् लातीति बहुलं॥ आतोऽनुपसर्गे इति कमेव्युपपदे कः॥ श्वन्नुक्षन्निति। श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्द्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्नित्युणादिसूत्रे तेऽन्त्यर्थः। निपातनादिति। महेर्हकारस्य घकारः अवुगागमः। कनिन्प्रत्ययश्चेत्यस्य त्रितयस्य निपातनादित्यर्थः॥ प्रत्याख्यानमाकर इति॥ एवं च फलभेदे त्वादेशस्य प्रत्याख्यानासंभवात् आदेशपक्षेपि दीर्घो भाष्यादिसंमत एवेति बहुलग्रहणात्संयोगान्तलोपस्य नासिद्धत्वमित्युक्तं॥ यत्त्वाहुः॥ मतुप्पक्षेपि छांदसत्वान्न दीर्घ इत्येव भाष्याशय इति॥ तन्न॥ मतुवंतस्य छांदसत्वे मानाभावात्॥ उदाहृतमहाकविप्रयोगविरोधाच्चेति दिक्॥ छंदसीवनिपौ चेति। मत्वर्थे ईवनिपौ स्तः छंदसीति वार्त्तिकार्थः। सुमंगलीरियं वधूः मघवानमीमहे इत्युदाहरिष्यति वैदिकप्रक्रियायां। अन्तोदात्तत्वादिति। यद्यपि श्वन्नुक्षन्नित्यत्र कनिन्नन्ता एते इत्युज्ज्वलदत्तादिग्रंथपर्यालोचनया आद्युदात्तत्वं लभ्यते। तथापि उक्षा समुद्रो अरुणः सुपर्णः पूषा त्वेतो न ७५
यतु अग्निर्मूर्द्धा दिव इत्यादौ तत्सूत्रोपात्तानामुक्षादीनामन्तोदात्तस्य निर्विवादतया कनिन्प्रत्यय एवोचित इति भावः॥ ॥

श्वयुवा अल्लोपोन इत्यनोऽन इत्य पञ्चष्यव्याचष्टे। अन्नंतानामिति। अन्नंतानां किं। मघवत इति। यद्यपि नस्य तादेशोप्येकदेशविकृतस्यानन्यत्वादन्नंतता त्रास्त्येव
तथापि विशेषणसामर्थ्यात् श्रूयमाणनकारांतस्यैव संप्रसारणं न त्वत्रेत्याहुः। वार्तिककृतां तु श्वादीनां संप्रसारणे नकारांतग्रहणमनकारांतप्रतिषेधा
र्थमुक्तं। नन्वेवमल्लोपोन इत्यल्लोपो दुर्वार इति चेन्नैवं। भाष्यकृता पूर्वोक्तवार्तिकमत्रानुवर्त्य अल्लोपोनः नकारांतस्येति व्याख्यातत्वात्। एतच्च अल्लकु
इति सूत्रे भाष्ये स्पष्टं। एतेन बहुधीवरीराजकीयमित्यत्राप्यल्लोपाभावः सिद्धः। वनोरचेत्यादेशे कृते नकारांतत्वाभावात्। स्त्रियां मघवती। मघवत्यौ
मघवत्य इत्यत्र लिंगविशिष्टपरिभाषया उगिदचामिति नुमन्न शंक्यः। विभक्तौ लिंगविशिष्टाग्रहणात् इत्याहुः। न संप्रसारणे। ह्वः संप्रसारणमित्यतः संप्र

श्वयुवमघोनामतद्धिते। ६।४।१३३। अन्नन्तानाम्भसंज्ञकानामेषामतद्धिते परे सम्प्रसारणं स्यात्। सम्प्रसारणाच्च। आद्गुणः। मघोनः। अन्न
न्तानां किं। मघवतः। मघवता। स्त्रियां मघवती। अतद्धिते किं। माघवनं। मघोना। मघवभ्यामित्यादि। शुनः। शुना। श्वभ्यामित्यादि। युवन्
शब्दे वस्योत्वे कृते। न सम्प्रसारणे सम्प्रसारणं। ६।१।३७। सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न स्यात्। इति यकारस्य नेत्वं। अत
एव ज्ञापकादन्त्यस्य यणः पूर्वं सम्प्रसारणं। यूनः। यूना। युवभ्यामित्यादि। अर्वा। हे अर्वन्। अर्वणस्त्रसावनञः। ६।४।१२७। नञा रहितस्या
ऽर्वन्नन्तस्याङ्गस्य तृ इत्यन्तादेशः स्यान्न तु सौ। उगित्वान्नुम्। अर्वन्तौ। अर्वन्तः। अर्वन्तं। अर्वन्तो। अर्वतः। अर्वता। अर्वद्भ्यामित्यादि। अनञः

सारणमित्यनुवर्तमानेपि पुनः संप्रसारणग्रहणात् प्रदेशांतरस्थं श्वयुवमघोनामित्यपि संप्रसारणं निषिध्यते। न तु ह। इति यकारस्यनेत्वमि ११ किं अनर्वा यज्वन्
ति। यून इति। ननु उकारेण व्यवधानात्कथमत्र निषेधः। विव्याध विव्यधेत्यादावव्यवधानेपि निषेधस्य चरितार्थत्वात्। न च सवर्णदीर्घे कृते नास्ति व्यवधानमिति वा
च्यं। अचः परस्मिन्निति स्थानिवत्वात्। अत्राहुः। विदेशस्थनिषेधार्थात्पुनः संप्रसारणग्रहणादेव व्यवधानेप्यत्र निषेधो भविष्यतीत्यदोषः। न च व्ययो लिटी
ति विदेशस्थेन यकारस्य संप्रसारणे कृते वकारस्य तदभावाय न संप्रसारण इति। सूत्रं प्रवर्त्यं पुनः संप्रसारणग्रहणं चरितार्थमिति व्यवधाने निषेधो न भविष्यतीति
शंक्यं। व्ययो लिटीत्येतद्धलादिशेषापवाद इत्याकरे स्पष्टत्वात्। उत्सर्गसदेशश्चापवाद इति परस्यैव संप्रसारणं भवति। न पूर्वस्येति कैयटेन व्याख्यातत्वाच्चेति। ॥

CC-0. In Public Domain. Digitization by eGangotri



अर्वणस्त्रा अंगस्येति वर्तते तच्चार्वणेति विशेष्यते अनञ इत्यनेनापि तदाहा नञा रहितस्येत्यादि। असाविति पर्युदासे विभक्तौ परत एव स्यात्। ततश्चार्वन्तौ त्यादौ न स्यादि
त्याशयेनाह। नतु सावितिा नचैवमर्वाणिय इत्यादावतिप्रसंगः। अंगेनस्वनिमित्तस्य प्रत्ययस्याक्षेपाल्लुका लुप्तत्वेनात्र प्रत्ययलक्षणाभावात्। एतेन वाहेर लुप्यतस
हस्त्र इगर्वगर्व — इति श्रीहर्षप्रयोगो व्याख्यातः नन्वेवं स्यानिवदादेश इति सूत्रे धात्वंगकृत्तद्धिताव्ययसुप्तिङ्पदादेशाः स्थानिवत्स्युरिति प्राचां ग्रंथमनूद्य तत्
किं परिगणनमुदाहरणमात्रं वेति विकल्प्य नांत्यः। अव्ययस्यांगपदाभ्यां पृथग्ग्रहणवैयर्थ्यादिति मनोरमायां यदुक्तं तत्कथं संगच्छते। अव्ययस्योक्तरीत्या
नंगत्वात्। न च न लुमतेत्यनेनांगकार्यनिषेधेप्यंगसंज्ञाया अनिषेधान्नोक्तदोष इति वाच्यं। प्रत्यये परतं पूर्वस्य यत् कार्यं मांगमनांगं वा तत्सर्वं न लुमतेत्य
नेन निषिध्यते इति यचि भं चेति सूत्रस्थमनोरमाग्रंथपर्यालोचनया लुमता शब्देन लुप्ते अंगसंज्ञाया अप्यस्वीकार्यत्वात्। तस्या अपि प्रत्यये परतः पूर्वस्य
कार्यत्वात्। यदि लुका लुप्तेप्यंगत्वं स्वीक्रियते तदा अयं ग्रंथो यचिभं वृषण्वस्वश्वयोरित्यत्र वृषण्वसुकं घनं यस्य वृषण्वसुः वृषा अश्वो यस्य वृषणश्व इत्युदा
हृत्य भत्वादिह नलोपो न भवति अह्लोपस्तु अनंगत्वान्नेति मूले वैदिकप्रक्रियायां वक्ष्यमाणग्रंथेन सह विरुध्येत। न चाह्लोपो न इत्यत्रांगावयवो ऽसर्वनामस्था
नयजादिस्वादिपरो यो न् इति व्याख्यानात् अह्लोपस्य तत्र प्राप्त्यभावादनंगत्वादिति समाधानं व्यर्थमिति भ्रमितव्यं। भसंज्ञैव यजादिस्वादिपरो यो न् इति व्याख्या
नवत् वृषण्वस्वश्वयोः परतो यो न् इति व्याख्यानेस्यापि लाभात्। तस्मात्पदात्पृथगिष्टं वक्तव्ये अंगपदाभ्यामित्यंगग्रहणं भसंज्ञकमेवेति चेत्। अत्राहुः। न लुमते
ति सूत्रे लुमता लुप्ते तन्निमित्तमंगस्यांगसंज्ञकस्य कार्यं न स्यादिति व्याख्यायते तदा ऽवर्णाद्यंगकार्याप्रवृत्तावप्यंगसंज्ञाया निर्बाधत्वादंगग्रहणं तत्रत्यं स
म्यगेव। यदा त्वांगमनांगं वेत्यादि मनोरमाग्रंथस्यानंगत्वादिति मूलग्रंथस्य च स्वारस्यपर्यालोचनया लाघवाद्व्ययस्यांगत्वे फलाभावाच्च प्रत्यये परतः पूर्वस्य का
र्यं निषिध्यत इति मनोरमाग्रंथ स्वरसतः संगच्छत इति। ननु ऋधातोर्विचि गुणे च अरिति रूपं तस्मान्मतुपि अर्वन्नावित्यादि सिध्यति। ईदृसी वनिपाविनिव
निपि वेदे अर्वन्निति सिध्यति ऋधातोरेवस्नामदिपद्यर्ती त्यादिना वनिपि तु लोकेप्यर्वन्निति सिध्यति। रूढिशब्दश्चायं वाजिवाहार्वगंधर्वहयसैंधवसप्तयः इत्यमरको
शान्नतश्चार्थोपि न भिद्यते इति किमनेन सूत्रेणेति चेत्। अत्राहुः। नांतनांतयोः सर्वत्र प्रयोगे प्राप्ते सौ परे नञुपपदे च नांतस्य प्रयोगो न भवत्यन्यत्र तु नांतस्य प्रयोगो न भवति
इत्यादावविशेषेण अङ्गसंज्ञाया अपि निषेधादङ्गग्रहणं तत्र भसंज्ञकमेव न च न लुमतेत्यनेन अङ्गसंज्ञानिषेधे पुंवोरनाकाविति सूत्रस्थभाष्यकैयटाभ्यां विरोधः स्यादिति वाच्यं मतयोस्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यवस्यार्थमिदं तृज्वत्क्रोष्टुरिति त्रिसूत्रीं वदन्ति। यत्तु कैश्चिदुक्तं। अर्वन्मघवन्शब्दयोर्द्वयोरपि भाषायामसाधुत्वमेव अर्वणस्तृमघोनश्च न शिष्यं छान्दसं हि तत्। मतुब्
वन्योर्विधानाच्च छन्दस्युभयदर्शनादिति वार्तिकादिति तदापाततः वार्तिकस्य वनिवन्तमध्योदात्तपरत्वात् छन्दस्येव वनिविधानात्। तथा च श्रीहर्षः। वाहैरलङ्घ्यतसहस्र
दृगर्वगर्व इति प्रायुङ्क्त। अर्वन्तौ। अर्वन्तः इति। व्यपदेशिवद्भावेनार्वन्नन्तत्वान्नात्र दोषः। न च व्यपदेशिवद्भावोऽप्रातिपदिकेनेति वाच्यं तस्य प्रत्ययविधिविषयत्वात्। प
थिमथि। गमेरिनिरित्यत इनिरिति वर्तमाने मन्थ इत्यनेन निष्पन्नो मथिन्शब्दः। पतस्थ च पादिनिः। पथिन्। ऋभुक्षः स्वर्गवज्रयोः। ततो
मत्वर्थीयेनिना ऋभुक्षिन्निति बोध्यं। ननु अस्थिदधीति सूत्रे उदात्तग्रहणं तया पठितेष्वनङोऽपि सिद्धावनङ उदात्त इत्युदात्तग्रहणं गुणा अभेदका इति ज्ञापयतीति निर्वि

पथिमथ्यृभुक्षामात्। ७।१।८५। एषामाकारोऽन्तादेशः स्यात्सौ परे। आ आदिति प्रश्लेषेण शुद्धाया एव व्यक्तेर्विधानान्नानुनासिकः। इतोऽत्सर्वनामस्था
ने। ७।१।८६। पथ्यादेरिकारस्याऽकारः स्यात्सर्वनामस्थाने परे। थो न्थः। ७।१।८७। पथिमथोस्थस्य न्थादेशः स्यात्सर्वनामस्थाने परे। पन्थाः। पन्थानौ। प
न्थानः। पन्थानं। पन्थानौ। भस्य टेर्लोपः। ७।१।८८। भसंज्ञस्य पथ्यादेष्टेर्लोपः स्यात्। पथः। पथा। पथिभ्यामित्यादि। एवं मन्थाः। ऋभुक्षाः। स्त्रिया
न्नान्तलक्षणो ङीप्विभक्त्यादिलोपः। सुपथी नगरी। अनृभुक्षी सेना। आत्वं नपुंसके न भवति। न लुमतेति प्रत्ययलक्षणनिषेधात्। सुपथि वनं। सम्बुद्धौ
नपुंसकानां नलोपो वा वाच्यः। हे सुपथिन्। हे सुपथि। नलोपस्सुप्स्वरेति नलोपस्यासिद्धत्वाद्ध्रस्वस्य गुणो न। द्विवचने भत्वाट्टिलोपः। सुपथी
शौ सर्वनामस्थानत्वात्। सुपन्थानि। पुनरपि सुपथि। सुपथी। सुपन्थानि। सुपथा। सुपथे। सुपथिभ्यामित्यादि॥ ॥ ९। वादान्तथा च तस्मिन्पक्षसूत्रे

ननुनासिकोच्चारणेऽप्यान्तरतम्यादनुनासिकाकारः स्यादत आह। आ आदिति। इतोऽत्सर्वनाम आदिति वर्तमाने पुनरद्ग्रहणं किमर्थं कृतेऽप्यद्ग्रहणे पन्था इत्यत्र सवर्णदीर्घेणाभा
व्यमन्यत्र तूपधाया दीर्घेणेति चेन्मैवं। ऋभुक्षणमिन्द्रमित्यत्र वा षपूर्वस्य निगम इति दीर्घविकल्पे सति पक्षे ह्रस्वश्रवणार्थमद्ग्रहणस्यावश्यकत्वात्। थो न्थः। स्थान्या
देशौ द्वावप्यनन्तौ। थो न्थ इत्येव सिद्धे इतोऽत्सर्वनामस्थान इत्येन ऋभुक्षिन्नर्थं त्वयाणमनुवृत्तावपि ऋभुक्षस्थो न संभवतीत्याशयेनाह। पथिमथोरिति। प्रसंगादाह॥
स्त्रियामिति। नान्तलक्षण इति। न पूजनादिति निषेधाद् ऋक्पूरब्धूरित्यप्रत्ययो नेति भावः। सुपथीति। इनः स्त्रियामिति कप्तु न कृतः समासान्तविधेरनित्यत्वात्। सुवोरना।

CC-0. In Public Domain. Digitization by eGangotri



कावितिसूत्रेसुपथीतिभाष्याच्च नखूजनारिनिनिषेधस्तुनायंविषयः।वचः माथीनेष्वेवसइतिवक्ष्यमाणत्वात्।पथिमथीत्यातयोन्यश्चलिंगविशिष्टपरिभाष
याप्राप्तंविभक्तौलिंगविशिष्टाग्रहणान्नभवति।अनेदंबोध्यं।पंथानमात्म नइच्छतिपथीयतिश्नतःक्विप्।अल्लोपयलोपौ।एकदेशविकृतस्यानन्यत्वात्पथिम
थीत्यात्वं। न्थः।पंथाः।इतोत्सर्वनामस्थानइत्यत्वंनभवति।इतइतितपरकरणात्।एरनेकाचइतियणंबाधित्वापरत्वान्नित्यत्वाच्चथोन्थः।संयोगपूर्वकत्वान्न
यण्।पंथियौ।पंथियः।पंथियंपंथियौ।भस्यटेर्लोपः।पथः।पथा।पथीभ्यां।पथिभिरित्यादि।एवंमथीयतेःक्विपितुमंथाः।मंथियौ।मंथियः।ऋभुक्षाः।ऋभुक्षियौ
ऋभुक्षियः इत्यादि।एतेन इतोत्सर्वनामस्थान इत्यत्रस्थानिन्यादेशेचतपरकरणंसुखमुखार्थमितिहरदत्तः प्रत्युक्तः।आदेशेतपरकरणस्यानावश्यकत्वेपिस्थानि
नितुपंथियौइत्यादिसिद्धयेतस्यावश्यकत्वात्।ननुनलोपस्यासिद्धत्वात्पथिमथ्यृभुक्षामितिनस्यात्वेपंथ्याःमंथ्याःऋभुक्ष्या इत्येवभवितव्यं।ननुपंथाइत्यादिरिति वे

ष्णान्ताषट्।१।१।२४।ष्णान्ता नान्ता च संख्या षट्संज्ञा स्यात्।षड्भ्यो लुक्।पञ्चशसंख्या किं।विप्रुषः।पामानः।शतानिसहस्राणीत्यत्रसंन्निपा
तपरिभाषयानलुक्।सर्वनामस्थानसंन्निपातेनकृतस्यनुमस्तद्विघातकत्वात्।पञ्चभिः।पञ्चभ्यः।षट्चतुर्भ्यश्चेतिनुट्।नोपधायाः।६।४।
७।नान्तस्योपधायादीर्घःस्यान्नामिपरे।नलोपः।पञ्चानां।पञ्चसुपरमपञ्चपरमपञ्चानांगौणत्वेतुनलुक्तुदौप्रियपञ्चा।प्रियपञ्चानौ।प्रियपञ्चानः।प्रियप

त।अत्राहुः।नलोपस्यांतर्वर्तिसुब्नि— मित्तं आलस्यतु बहिर्वर्तिसुप्।प्रत्यासत्त्या हि यत्र एक एव सुप् निमित्तभूतः तत्रैव न ११ ष्णा।एवंसप्तननवन्दशन्। ०॥
लोपः सुप्स्वरेतिनलोपस्यासिद्धत्वेनान्यत्रेतिनात्रनकारस्यात्वं किंत्वौकारस्येति॥ ॥ष्णान्ताषट्।स्त्रीलिंगनिर्देशः संख्यांविशेषयितुं तत्सामर्थ्याच्चपूर्वत्रसंज्ञापरमपिसंख्या
ग्रहणमिहसंज्ञिपरंसंपद्यते इत्याशयेनाह।संख्येति।प्राचानूपदेशकालेष्णान्तानान्ताचेत्युक्तंतत्पंचेत्यत्रनलोपेकृतेपीत्यादिवक्ष्यमाणस्वग्रंथविरुद्धं।संप्रत्यनांतत्वेपिउपदेशेन
न्तत्वमासीदितिकिमसिद्धत्वे नेतिदिक्।संन्निपातेति।तथाउपदेशकालइतिव्याख्यानंनिष्फलमपीतिभावः।यत्त्वाहुः।परिभाषाया अनित्यत्वाल्लुक्स्यादिति।तत्साहस ७७
मात्रं।इष्टस्यलेप्यग्रहणेनोपरिभाषाया अकिंचित्करत्वापत्तेः। परव्याहुः।उपदेशग्रहणमिहकृतःसमागतमित्याशंक्य यणांतेत्यंतग्रहणसामर्थ्याद्दोपदेशिकत्वंल
भ्यतइति।तदपिन।संख्येत्यस्याकर्णेनसंज्ञिपरत्वसंपादनेनचसामर्थ्योपक्षयात्।नोपधायाः नेतिलुप्तषष्ठीकमंगस्यविशेषणं।नलोपस्यासिद्धत्वान्नामीतिदी

77

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धीनप्रवर्तितद्रूपमारंभः। गौणत्वेति। बहुवचननिर्देशस्यार्थप्राधान्यार्थत्वादिति भावः। प्रियपञ्चामिति। नकारद्वयमध्ये चकारः॥ ॥ अष्टन आ विभक्तौ॥ सोत्रत्वादिह लोपो न कृतः। कनिन्युवृषितक्षीत्यतः कनिनित्यनुवर्तमाने सप्यशूभ्यां तुट् चेत्यनेन सप्तन् अष्टन् शब्दौ निष्पन्नौ। रायो हलीत्यतो हलीत्यपकृष्यते। तच्च विभक्तेर्विशेषणमित्यभिप्रेत्याचष्टे। हलादाविति। हलीत्यस्याऽनपकर्षे तु अष्टानामिति न सिध्येत्। परत्वान्नित्यत्वाच्च नुटः प्रागात्वे कृते अनान्तत्वेन षट्संज्ञाभावान्नुडेव प्रवर्तेत। न च यथोद्देशपक्षे अन्तरंगत्वात्प्रागेव कृते नावट्संज्ञा एकदेशविकृतन्यायेन कृतात्वेऽपि सुलभेति वाच्यं। अल्लिधौ उक्तन्यायायोगात्। किं च प्रियाष्टानो प्रियाष्टानः प्रियाष्टः। प्रियाष्टन्याद्यपि न सिध्येत्। उक्तरीत्या तत्राप्यात्वप्रवृत्तेरिति बोध्यं। अष्टाभ्य औश्। शित्त्वात्सर्वादेशः। ननु अनेकाल्शित् सर्वस्येति सूत्रे शित् ग्रहणं प्रत्याख्या

अष्टन आ विभक्तौ। ७।२।८४। अष्टन आत्वं स्याद्धलादौ विभक्तौ। अष्टाभ्य औश्। ७।१।२१। कृताकारादष्टनः परयोर्जश्शसोरौश् स्यात्। अष्टभ्य इति वक्तव्ये कृतात्वनिर्देशो जश्शसोर्विषये आत्वं ज्ञापयति। वैकल्पिकं चेदमष्टन आत्वं अष्टनो दीर्घादिति सूत्रे दीर्घग्रहणाज्ज्ञापकात्। अष्टौ २। परमाष्टौ। अष्टाभिः। अष्टाभ्यः २। अष्टानां। अष्टासु। आत्वाऽभावे। अष्ट। इत्यादि पञ्चवत्। गौणत्वे त्वात्वाऽभावे राजवत्। आत्वे प्रियाष्टाः। इह पूर्वस्मादपि विधावल्लोपस्य स्थानिवद्भावान्न पुत्वम्। कार्यकालपक्षे बहिरङ्गस्याऽल्लोपस्याऽसिद्धत्वाद्वा। प्रियाष्टौ। इत्यादि। जश्शसोरनुमीयमानमात्वं प्राधान्य एव न तु गौणतायां। तेन प्रियाष्टनो हलादावेव वैकल्पिकमात्वं। प्रियाष्टाभ्यां। प्रियाष्टाभिः। प्रियाष्टाभ्यः २। प्रियाष्टासु। प्रियाष्टो राजवत्सर्वं हाहावच्चापरं हलि। भष्भावः जश्त्वचर्त्वे। भुत्। भुद्। बुधौ। बुधः। बुधा। भुद्भ्यां। भुत्सु॥ ॥ ॥ यअनेकाल्त्वादेव सर्वादेश इति सुवचं न

च प्रास्येत्संज्ञायां अनेकाल्त्वं नास्तीति वाच्यं। ऋकारस्योगित्कार्यार्थत्वेन तत्र सामर्थ्योपक्षयात्। न चैवमौङ्श्यादौ शकारः श्रवणार्थ एवास्त्विति शंक्यं। अनुप्रतिकादिषु एव लौकिकमिति निर्देशेन शकारस्येत्संज्ञाभ्युपगमादिति दिक्। कृताकारादिति। ननु हलीत्यपकृष्यत इत्युक्तं तत्कथं कृताकारत्वमित्याह। अष्टभ्य इति अष्टाभ्य इति कृतात्वस्येदमनुकरणं न तु लक्षणवशसम्पन्नमात्वं तथा हि सति वक्ष्यमाणज्ञापकेन तस्य वैकल्पिकतया लाघवार्थमष्टभ्य औशित्येव ब्रूयादिति भावः। इदमिति श्रुतमनुमितं चेत्यर्थः। अष्टनो दीर्घादिति। दीर्घान्तादष्टनः परा असर्वनामस्थानविभक्तिरुदात्ता स्यात्। अष्टाभिः। दीर्घात्किं। अष्टभिः। मध्योदात्तमिदं। षट्त्रिचतुर्भ्यो हला

शकारोच्चारणसामर्थ्यादत्र भूतपूर्वगत्याश्रयणान्न चैवमर्वणस्त्रसावित्रिधादेशस्यापि सर्वादेशता स्यादिति वाच्यं ४ऋः॥

CC-0. In Public Domain. Digitization by eGangotri

सु
सि·कौ·
टी·त·
७८

दिरिति बाधित्वा झल्युपोत्तममित्यस्य प्रवृत्तेः। षट्त्रिचतुर्भ्यो यो झलादिर्विभक्तिस्तदंते पदे उपोत्तममुदात्तं तस्मादिति तदर्थः। ननु प्रियाष्टः प्रियाष्टन्त्यादौ विभक्तेरुदात्त-
त्वनिवारणाय दीर्घग्रहणमिहावश्यकमिति कथमस्यात्वविकल्पज्ञापकतेति चेन्न। अत्राहुः। अष्टनो दीर्घादित्यत्रांतोदात्तादित्यनुवर्त्यांतोदात्तादष्टनः परेत्यादिर्या-
स्यान्नादष्टाभिरित्यादौ विभक्तेरुदात्तत्वं सिध्यति। घृतादित्वेनाष्टनोंतोदात्तत्वान्न प्रियाष्टन्त्यादि बहुव्रीहौ तु पूर्वपदप्रकृतिस्वरापवादमेन अष्टनोंतोदात्तत्वाभा-
वाद्विभक्त्युदात्तत्वं न प्रवर्तत इति दीर्घग्रहणं व्यर्थं सत् उक्तार्थे ज्ञापकमेवेति। अष्टानामिति। नुटः पश्चादेव संनिपातपरिभाषया अनित्यत्वादात्वं न तु ततः प्रागिति
तु मनोरमायां स्थितं। अत्र नव्याः। संनिपातपरिभाषया आत्वाभावेप्यत्र न क्षतिः नोपधाया इति दीर्घे नलोपे पंचानां सप्तानामितिवद्रूपसिद्धेः। न चाष्टनो दी-
र्घादिति विभक्त्युदात्तत्वमात्वविधेः प्रयोजनमिति वाच्यं। षट्त्रिचतुर्भ्यो हलादिरित्यनेनैव तत्सिद्धेरिति। पूर्वस्मादपीति। न चात्र पूर्वत्रासिद्धीयेन स्यान्निवृत्तिरिति निषेधः
शंक्यः। तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति उक्तत्वादिति दिक्। प्राधान्यएवेति। ओ स्वं हि तुग्नुदाविव प्राधान्य एव भवति। ननु गौणत्वे। अष्टाभ्य इति बहुवचन

ऋत्विग्दधृक्स्रग्दिगुष्णिगंचुयुजिक्रुंचां च। ३।२।५९। एभ्यः क्विन् स्यात्। अलाक्षणिकमपि किंचित्कार्यं निपातनाल्लभ्यते निरुपपदाद्युजेः क्वि-
न्। कनाविति। कृदतिङ्। ३।१।९३। सन्निहिते धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः स्यात्। वेरपृक्तस्य। ६।१।६७। अपृक्तस्य वस्य लोपः।

निर्देशात्। अन्यथा हि कृतात्वानुकरणेपि एकवचनेनैव निर्दिशेत्। अष्टा ओभिति अष्ट इति वा। एनच्च व्यलंग्न स्यात्। कृत्तद्धितेति प्रातिपदिकत्वात्स्वाद-
यडिति सूत्रे भाष्यकैयटयोः स्पष्टं। तथा चौत्त्वविधौ कृतात्वनिर्देशबलेनानुमीयमानमात्वं प्राधान्य एवोचितमिति भावः। प्रियाष्टा इति प्रथमैकवचनं। उक्तार्थं सं-
गृह्णाति। प्रियाष्टौ राजवदिति। नांताः। भुदिति। बुध्यतेः क्विप्। धांताः॥ ॥ ऋत्विग्दधृक्। किंचिदिति। ऋतावुपपदे यजेः क्विन्। धृष्णोतेर्द्वित्वमंतोदात्तत्वं च।
सृजेः कर्मणि क्विन्। अमागमश्चादिशेः कर्मणि क्विन्। उत्पूर्वात्स्निहेः क्विन्। उपसर्गान्तलोपः षत्वं च। अंचेः सुप्युपपदे क्विन्। इत्यर्थः। निरुपपदाद्युजेरिति। क्रुंचेरा- ७८
प्येवं नलोपाभावस्त्वधिकः। कनाविताविति। इकार उच्चारणार्थ इति भावः। सन्निहित इति। प्राचा तु तृतीये धात्वधिकारे इत्युक्तं तदसत्। धातोः कर्मण इति सा-
न्निध्यो धातुग्रहणस्योत्तरत्रानुवृत्तेरभावेनाधिकारत्वाभावात्॥ ॥

78

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युजेरसमासे। उगिदचामित्यतः सर्वनामस्थान इत्यनुवर्त्तते। इदितो नुम् धातोरित्यमो नुमचेत्याशयेनाह। सर्वनामस्थाने नुम् स्यादिति। क्विन्प्रत्ययस्य। क्विनः कुरित्युक्तेः।
विप्रत्ययग्रहणेन तदन्तग्रहणात् क्विन्नन्तस्य सिद्धे प्रत्ययग्रहणं बहुव्रीहिविज्ञानार्थमित्याशयेनव्याचष्टे। क्विन् प्रत्ययो यस्मादिति। बहुव्रीह्याश्रयणफलं तु स्पृक्स्रगित्यादि स्फुटीभ
विष्यति। सुयुगिति। सुष्टु युनक्तीति विग्रहे सत्सूद्विषेति क्विप्। तेनेह नेति। नुम्नेत्यर्थः। क्विन्प्रत्ययस्तु स्यादेव ऋत्विगित्यादिसूत्रे युजेरिति इकानिर्देशात्। खन्निति। खं

युजेरसमासे। ७।१।७१ युजेः सर्वनामस्थाने नुम् स्यादसमासे। सुलोपः। संयोगान्तस्य लोपः। क्विन्प्रत्ययस्य कुः। ८।२।६२। क्विन्प्रत्ययो यस्मात्तस्य कवर्गो
ऽन्तादेशः स्यात्पदान्ते। नस्य कुत्वेनानुनासिको ङकारः। युङ्। नश्चापदान्तस्येति नुमो ऽनुस्वारः परसवर्णः। तस्याऽसिद्धत्वाच्चोः कुरिति कुत्वं न। युञ्जौ
युञ्जः। युञ्जम्। युञ्जौ। युजः। युजा। इत्यादि। असमासे किं। चोः कुः। ८।२।३०। चवर्गस्य कवर्गः स्याज्झलि पदान्ते च। इति कुत्वं। क्विन्प्रत्ययस्येति कुत्वस्याऽ
सिद्धत्वात्। सुयुक्। सुयुग्। सुयुजौ। सुयुजः। युजेरिति धातुपाठपठितेकारविशिष्टस्याऽनुकरणं न तिका निर्देशः। तेनेह न युज्यते समाधत्ते इति युक्
युजसमाधौ दैवादिक आत्मनेपदी संयोगान्तलोपः खन्। खञ्जौ। खञ्जः। इत्यादि। व्रश्चेति षत्वं। जश्त्वचर्त्वे। राट्। राड्। राजौ। राजः। राट्सु। राट्त्सु। ए
वम्विभ्राट्। देवेट्। देवेजौ। विश्वसट्। इह यजिसृज्योः कुत्वं नेति क्वौ विवक्ष्यते। परिमृट्। षत्वविधौ राजिसाहचर्य्यात् टुभ्राजृ दीप्तावितिफणादि
र्गृह्यते। यस्तु एजृभ्राजृ दीप्ताविति तस्य कुत्वमेव। विभ्राक्। विभ्राग्भ्यामित्यादि। परौ व्रजेः षः पदान्ते॥ परावुपपदे व्रजेः क्विप्स्याद्दीर्घश्च पदान्ते वि
षये षत्वञ्च। परित्यज्य सर्वं व्रजतीति परिव्राट्। परिव्राजौ। परिव्राजः॥ ॥ ११ जतीति खन्। खजि गतिवैकल्ये। एवं विभ्राडिति। फणादित्वं

विशेषेणभ्राजते। इति विभ्राट्। देवान्यजतीति देवेट्। क्विपि यजादित्वात् संप्रसारणे। आद्गुणः। विश्वं सृजतीति विश्वसट्। क्विवन्तः। क्विन् प्रत्ययो यस्मात् इति बहुव्रीह्याश्र
यणात्। कुत्वं कस्मान्न भवतीत्याशंक्याह नेति क्वौ विवक्ष्यते इति। रज्जुसृड्भ्यामिति भाष्यकारप्रयोगात्। व्रश्चादिसूत्रे सृजियज्योः पदान्ते षत्वं कुत्वापवाद इति वक्ष्य
त इत्यर्थः। परिमार्ष्टीति परिमृट्। परौव्रजेः। क्विब्वचिप्रच्छिश्रीस्रुद्रुप्रुज्वां दीर्घोऽसंप्रसारणं चेत्यौणादिकात्पूर्वसूत्रादिह क्विप्दीर्घौ वानुवर्त्तेते नेत्याह। क्विप्स्याद्दीर्घश्चेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु॰
सि॰कौ॰ विश्वस्यवसु। द्रूलोपरत्यतो नुवर्तनादाहा। विश्वशब्दस्य दीर्घः स्यादिति। स्कोः पदस्येत्यनुवर्तते झलो झलीत्यतो झलीति च। संयोगेति लुप्तषष्ठीकं झलंताभ्यां विशेष्यतेत
टी॰त॰ देतदाह। पदांते झलि च परे इति। झलि किं। भ्रष्टा। भृज्जतीति भृट्। क्विपा ग्रहिज्येति संप्रसारणं। व्रश्चेति षत्वं। ऊर्गिति। ऊर्ज बलप्राणनयोः। अस्माच्चुरादिण्यंताद्भ्रा
७८ जभासेत्यादिना क्विपि णिलोपः स च चोः कुत्वेन स्थानिवत् परांतविधित्वान्न पूर्वत्रासिद्धत्वाच्च। इह जातेषु अवयाः। अवयाजौ। अवयाजः इति। नोदात्तं। मंत्रे श्वेत
वहोक्थेति प्रकृत्य अवेयज इति विहितस्य ण्विनस्तदपवादस्य पदांते उसश्छं दस त्वेन वैदिकप्रक्रियायामेव वक्तुमुचितत्वात्। तदोः सः सावनंत्ययोः। त्यदादी
नामः इत्यतोऽनुवर्तनादाह त्यदादीनामिति त्यदादीनामिति किं आतपः। तारकः। तदोरिति किं। यः। अनंत्ययोः किं। हे स ॥ अत्र परत्वात्त्यदाद्यत्वं बाधित्वा दस्य सकारे स स इति
विश्वस्य वसुराटोः ६। ३। १२८। विश्वशब्दस्य दीर्घः स्याद्वसौ राट् शब्दे च परे। विश्वं वसु यस्य विश्वावसुः। राडिति पदांतोपलक्षणार्थं। चर्त्वम
विवक्षितं। विश्वाराट्। विश्वराजौ। विश्वराजः। विश्वाराड्भ्यामित्यादि॥ स्कोः संयोगाद्योरंते च। ८। २। २९। पदांते झलि च परे यः संयोगस्तदाद्योः स
कारककारयोर्लोपः स्यात्। भृट्। भृड्। सस्य श्चुत्वेन शः। तस्य जश्त्वेन जः। भृज्जौ। भृज्जः। ऋत्विगित्यादिना ऋतावुपपदे यजेः क्विन्। क्विन्नन्तत्वात्कु
त्वं। ऋत्विक्। ऋत्विग्। ऋत्विजौ। ऋत्विजः। रात्सस्येति नियमान्न संयोगांतस्य लोपः। चोः कुः। ऊर्क्। ऊर्ग्। ऊर्जौ। ऊर्जः। त्यदाद्यत्वं पररूपत्वं ।तदोः सः
सावनंत्ययोः। ७। २। १०६। त्यदादीनां तकारदकारयोरनंत्ययोः सः स्यात्सौ। स्यः। त्यौ। त्ये। त्यं। त्यौ। त्यान्। सः। तौ। ते। परमसः। परमतौ। परमते॥
द्विपर्यंतानामित्येवा नेह। त्वं। न च तकारोच्चारणसामर्थ्यान्नेति वाच्यं। अतित्वमिति गौणे चरितार्थत्वात्। संज्ञायां गौणत्वे चात्वसत्वे न। त्यदः। त्यदौ
त्यदः। अतित्यद्। अतित्यदौ। अतित्यदः। यः। यौ। ये। एषः। एतौ। एते। अन्वादेशे तु एनं। एनौ। एनान्। एनेन। एनयोः॥ १९ हलङ्यादिना सुलोपे रुत्ववि
सर्गौ स्यातां। तथा च हे सः इति रूपं स्यात्। किं च स्त्रियां सेति रूपं न स्यात्। यदा तु अंत्यस्य सकारे जातेपि पुनः प्रसंगविज्ञानात्त्यदाद्यत्वं सकारस्य स्वीक्रियते तेन तदा न किं
चिदनिष्टमित्यनंत्ययोरिति त्यक्तुं शक्यं। यदि तु तदोः सः सावित्यस्यानंतरं अदस औ सुलोपश्चेत्यत्र अदस इति योगं विभज्यादस एवदकारस्य सत्वं नान्यस्येत्ये ७८
तिनियमः क्रियते तदा सकृद्गताविति न्यायेनाप्यनंत्ययोरिति त्यक्तुं शक्यं। न चैवं द्वाभ्यामनर्डुहा इति द्वियति तत्र तनः क्विपि स्व इति रूपं न स्यात्। किं तु द्व इति रूपं स्यादिति फले
79

भवान्नियमपक्षे न संभवतीति वाच्यं। गोणे अत्वसत्वयोरसंभवेन द्वौ इत्यस्येव रूपस्य न्याय्यत्वादिति मनोरमायामुक्तत्वात्। सौ किं। तौ। ते। तं। तान्। ननु तोस्सः सावित्येव
सूत्रमस्तु किमनेन तदोरिति ए थग्ग्रहणेनेति। मैवं। अनेष इत्यत्र नकारस्य सत्वप्रसंगात्। नलोपो नञस्तस्मान्नुडचीत्यजादावुत्तरपदे स एव इत्यस्य नुड्विधानेन नस्य
दादितवर्गत्वान्नकारस्य। न च सत्वे सति नुड्विधानं व्यर्थमिति वाच्यं। अनश्व इत्यादौ सावकाशत्वात्। तथा च तदोरित्येव सूत्रं युक्तं। ननु तस्मान्नुडचीति सूत्रे तस्मा
दिति पदं परित्यज्य लाघवान्नुगचीत्येवोच्यतां। तथा च अजादावुत्तरपदे परे नञः एव नुगागम इत्यनेष इत्यत्र नोक्तदोष इति चेत्। एवं तर्हि नलोपः प्रातिपदिकान्तस्येति न
लोपः स्यात्। विधानसामर्थ्यान्न भवतीति चेदेवमपि ङमो ह्रस्वादचीति ङमुट् दुर्वार एव। तत्र च तस्मान्नुडचीति सूत्रे पंचम्यंतमावश्यकमेव। टिदनुबंधश्चेति तदो

ङे प्रथमयोरम्। ७।१।२८। युष्मदस्मद्भ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीययोश्चामादेशः स्यात्। मपर्यन्तस्य। ७।२।९१। इत्यधिकृत्य। त्वाहौ सौ। ७।२।
९४। युष्मदस्मदोर्मपर्यन्तस्य त्व अह इत्येतावादेशौ स्तः सौ परे। शेषे लोपः। ७।२।९०। आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लो
पः स्यात्। अतो गुणे। अमि पूर्वः। त्वं। अहं। ननु त्वं स्त्री अहं स्त्री इत्यत्र त्व अम् अह अम् इति स्थिते। अमि पूर्वरूपत्वं परत्वादिबाधित्वाऽन्तरङ्गत्वाद्वा
प्राप्नोति। सत्यं। अलिङ्गे युष्मदस्मदी तेन स्त्रीत्वाऽभावान्न टाप्। यद्वा शेष इति सप्तमी स्थानिनोऽधिकरणत्वविवक्षया तेन मपर्यन्तात् शेषस्य अद इ
त्यस्य लोपः स्यात्। स च पराऽप्यन्तरङ्गे अतो गुणे कृते न प्रवर्त्तते। अदन्तत्वाऽभावान्न टाप्। परमत्वं। परमाहं। अतित्वं। अत्यहं॥ ॥

रिति सूत्रे तोरिति वक्तुमशक्यं। अनेष इत्यत्रोक्तदोषात्। अत्र केचित्। तोरित्युक्तेऽप्यनेष इत्यत्र सत्वं न भवेत्। नुडागमस्य पदद्वयाश्रितत्वेन बहिरंगत्वादंतरंगस
त्वदृष्ट्या असिद्धत्वादिति। तन्न। उत्तरपदाधिकारस्थकार्ये बहिरंगपरिभाषाभावस्य इचएकाचो मित्यत्र भाष्ये उक्तत्वात्। इयं केयटश्चिन्त्यः। गोणे च रितार्यत्वादिति। गोणे हि
अंतरंगे कार्यत्वात्सत्वं न प्रवर्त्तते। त्वाहौ सौ। सावित्युक्ते तु अतित्वमिति स्यादिति भावः। अत्वसत्वे नेति तयोः सर्वादेशं नर्गणकार्यत्वादिति भावः। अनित्यादिति। त्यमतिक्रांतो अति
त्यद्॥ ❀ ॥ ङे प्रथमयोरम्। युष्मदस्मद्भ्यां ङसोऽशित्यतो युष्मदस्मद्भ्यामित्यनुवर्त्तते। ङे इति पृथक्पदं लुप्तषष्ठीकं। प्रथमयोरिति। द्विवचनबलेन प्रथमाद्वि
त्वाः प्रथमाद्वितीययोरर्थकं इत्याशयेन व्याचष्टे। युष्मदस्मद्भ्यां परस्य ङे इत्यस्येत्यादिना। ङेरुपेति सुवचं। त्वाहौ सौ। यद्यपि युष्मदस्त्व मावेकवचने इत्येव त्वादे

CC-0. In Public Domain. Digitization by eGangotri

सु॰
सि॰ कौ॰ शस्तथापि अस्मदो अहादेशार्थमिदं । किं च त्वमावितिसूत्रेण युवां युष्मान् वा ऽतिक्रान्तो ऽतित्वमिति न सिध्यति । एकार्थवाचित्वाभावाद्युष्मद इति भावः । युष्मदस्मदोरिति । एत
टी॰ न॰ च युष्मदस्मदोरनादेश इत्यतो लभ्यते । शेषे । उक्तादन्यः शेषः आत्वयत्वं च प्रागुक्तं तद्विषयादन्यविभक्तिरिह शेषशब्दार्थस्तदेतद्व्याचष्टे । आत्वयत्वनिमित्तेतरेति । अंत्यस्येति ॥ अ
८० लोऽन्त्यपरिभाषयेति भावः । अतो गुण इति । न त्वाम् । त्वाहौ सावित्यत्र त्वाहादेशयोरंत्याकार उच्चारणार्थ एवास्तु किमनेन पररूपकरणप्रयासेनेत्याहुः । त्वं अहमिति । ननु युष्मान्
तिक्रान्तः अतित्वमित्यादौ त्वाहौ सावित्यस्यावकाशोऽस्ति त्वामतिक्रान्ते नातित्वयेत्यादौ त्वमावेकवचने इत्यस्यावकाशः । त्वमहमित्यत्र तूभयोः प्रसंगे त्वमावेकवचन इत्यनेन प
रत्वाद्भाव्यं । नैष दोषः । त्वमावपि प्रबाधेते पूर्वविप्रतिषेधतः इति वक्ष्यमाणत्वात् । अधिकरणत्वविवक्षयेति । यदि तु शेष इति विभक्तिविशेषणं स्यात्तर्हि व्यर्थमेतत् । आत्व

युवावौ द्विवचने ७।२।९२ । द्वयोरुक्तौ युष्मदस्मदोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ । प्रथमायाश्च द्विवचने भाषायां ७।२।८८ । इह युष्मदस्मदोराकारो ऽन्ता
देशः स्यात् । औङीत्येव सुवचं भाषायां किं । युवम्वस्त्राणि । युवां । आवां । मपर्यन्तस्य किं । साकच्कस्य माभूत् । युवकां । आवकां । त्वयामयेत्यत्र चत्वाम्य
तिमाभूत् । युवकाभ्यामावकाभ्यामिति च न सिद्ध्येत् । यूयवयौ जसि ७।२।९३ । स्पष्टं । यूयं । वयं । परमयूयं । परमवयं । अतियूयं । अतिवयं । इह शेषे लोपो ऽ
न्त्यलोप इति पक्षे जसः शी प्राप्तः । अङ्गकार्ये कृते पुनर्नाङ्गकार्यमिति न भवति । ङे प्रथमयोरित्यत्र मकारान्तरं प्रश्लिष्य अमूमान्त एवावशिष्यते । न

यत्वाभ्यां विशेषविहिताभ्यां स्वविषये लोपस्य बाधसंभवात् । न चैवमन्त्यलोप इति पक्षस्य निरालंबनतापत्त्या युष्मदस्मदोरन्त्यलो ९ गुविक्रियत इति व्याख्यानाद्व
पः स्यादिति ग्रंथोऽयुक्त इति वाच्यं । साम आकमिति ससुट्कनिर्देशेन तस्यापि पक्षस्य ज्ञापितत्वादिति भावः । अतो गुणे कृते नेप्रवर्तत इति । वार्णादाङ्गं बलीय इति तु स
मानाश्रय एव भवति । ननु व्याश्रये इह तु शेषे लोपस्य विभक्तिनिमित्तं पररूपस्य त्वकार इति व्याश्रयत्वमिति भावः । समानाश्रये उदाहरणं तु कारक इत्यादि बोध्यं
तत्र हि यण्वृद्ध्योः प्राप्तयो वृद्धिरेव भवति । आंगत्वान्तरंगत्वविधिरित्याह परमत्वमित्यादि ॥ ❖ ॥ युवावौ द्विवचने । उक्तिर्वचनं द्वयोर्वचनं द्विवचनं तदेतदाह ८०
द्वयोरुक्ताविति । न चात्र कृत्रिमन्यायविरोधः शंक्यः । वचनग्रहणसामर्थ्यादेव तद्बाधात् । अन्यथा द्वित्व इत्येव ब्रूयात् । अष्टन आ विभक्तावित्यतो विभक्तावित्य
धिकारात् । द्वित्वे या विभक्तिस्तस्यां परत इति व्याख्यानसंभवात् । युवं वस्त्राणीति । शेषे लोपः । मपर्यन्तस्य किमिति अधिकारसूत्रं किमर्थमिति प्रश्नः । युवकां आव

80

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कामिति। ननु युवावयोः समुदायादेशत्वेपि युवकामित्यादि सिध्यति। ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच्। अन्यत्र तु सुबन्तस्य टेः प्रागिति युष्मदस्मद्वि षये व्यवस्थायास्तु यकामयकेत्यादि सिद्ध्यैव स्यमाणत्वात् किमनेन मपर्यन्तस्येत्यधिकारेणेत्यपरितोषादाह। त्वयामयेत्यत्रेति। न त्वमादेशयोरपि समुदाया देशत्वे त्वयेत्यादि साधयितुं शक्यत एव। योचीति सूत्रं परित्यज्य अचो इति सूत्रे कृते अजादौ विभक्तौ परतो ऽन्त्यस्य एकारादेशे सत्त्वया॥ देशप्रवृत्तेरिति। पुनरप रितोषादाह। युवकाभ्यामित्यादि। अंगकार्यमिति। एतेन अंगवृत्तेपुनर्वृत्तावविधिरिति परिभाषा अर्थत उपनिबद्धा। अंगे अंगाधिकारे वृत्तं वर्तनं यस्य तदंग वृत्तं शास्त्रं तस्मिन्प्रवृत्ते सति पुनर न्यस्यांगवृत्तशास्त्रस्य प्रवृत्तौ प्राप्तायां अविधिरिति तत्परिभाषाया अर्थः। एषा च परिभाषा ज्ञाजनोर्जे त्यनेन ज्ञापिता। उप पत्तिस्तु मनोरमातो वगंतव्या। न चैवं द्वाभ्यामित्यत्र त्यदाद्यत्वे कृते सुपि चेति दीर्घो न स्यादिति वाच्यं। हृयोरेकस्येत्यादि निर्देशेन उक्तपरिभाषाया अनित्यत्वज्ञापन

~~त्वमावेकवचने। ७।२।९७। एक~~ स्योक्तौ युष्मदस्मदोर्मपर्य्यन्तस्य त्वमौ स्तो विभक्तौ। द्वितीयायां च। ७।२।८७। युष्मदस्मदोराकारस्यात् त्वां

मां। युवां। आवां। शसोन। ७।१।२९। नित्य विभक्तिकं पदं युष्मदस्मद्भ्यां परस्य शसो नकारस्यादमोऽपवादः। आदेः परस्य। संयोगान्तस्य लोपः। युष्मान्॥

अस्मान्॥ योऽचि। ७।२।८९। अनयोर्य्यकारादेशस्स्यादनादेशेऽजादौ परतः। त्वया। मया॥ ॥ ११ हितिदिक्॥ मकारांतत्वमित्युपलक्षणं जसः

शीत्य च जसः स इति सकारं प्रश्लिष्य सांतस्य जस इति व्याख्यानादतो मिति सूत्रादम ग्रहणमनुवर्त्य अम् अमेवेति व्याख्यानाद्वेति वोध्यं। एकस्योक्ताविति त्वमावेकत्वे इति वक्तव्ये वचनग्रहणादयमर्थो लभ्यत इति भावः। अविभक्तिकमिति। तथा ङे प्रथमयोरिति पूर्वसूत्रेण प्राप्त स्यामः शतिबेधोयमिति भाष्ये शंकितं। न च तथैव किं न स्यात् द्वितीयायां चेत्यात्वे पूर्वसवर्णदीर्घे तस्माच्छसः इति नत्वे चेष्टसिद्धेरिति वाच्यं। स्त्रीनपुंसकयोर्नत्वाप्राप्त्या युष्मान् ब्राह्मणीः युष्मान्कुलानीत्यसिद्धिप्रसंगात्। अलिंगत्वपक्षे तु युष्मान् ब्राह्मणानित्यादेरप्यसिद्धिप्रसंगाच्च। योचि। अचि किं। युवाभ्यां। यदि तु युष्मदस्मदोरनादेश इत्यत्र रायो हलीत्यतो हलीत्यनुवर्त्तेत तदेहाचीति मास्तु परि प्रो

CC-0. In Public Domain. Digitization by eGangotri

सु॰ सि॰कौ॰ टी॰त॰ ८९

युष्मदस्मदोरनादेशे॥ अनादेशे किं। युष्मभ्यं न चाभ्यम् पक्षे आदेशो हलादिर्नित्य नादेशग्रहणं त्यक्तुं शक्यमिति वाच्यं। योचीत्यत्रानुवृत्त्यर्थं तस्यावश्यकत्वात्। हला
दौ पपाठ इति। योचीत्यजग्रहणात्परिशेषसिद्धमिदं। रायो हलीत्यतोनुवृत्त्या लब्धं वा पक्षद्वयेपि साधुरिति। नन्वेवं नलोपपक्षे पररूपं बाधित्वा सवर्णदीर्घः स्यादकारोच्चा

युष्मदस्मदोरनादेशे। ७।२।८६। अनयोराकारस्स्यादनादेशे हलादौ विभक्तौ। युवाभ्यां। आवाभ्यां। युष्माभिः। अस्माभिः। तुभ्यमह्योर्ङयि। ७।२।९५। अन
योर्मपर्यन्तस्य तुभ्यमह्यौ स्तो ङयि। अमादेशः। शेषे लोपः। तुभ्यं। मह्यं। परमतुभ्यं। परममह्यं। अतितुभ्यं। अतिमह्यं। युवाभ्यां। आवाभ्यां। भ्यसोभ्यम्
७।१।३०। भ्यसोभ्यम् अभ्यम् वा आदेशस्स्यात्। आद्ये शेषे लोपस्याऽन्त्यलोप एव। तत्राऽङ्गवृत्तपरिभाषया एत्वं न। अभ्यम् तु पक्षद्वयेपि साधुः। युष्मभ्यं
अस्मभ्यं। एकवचनस्य च। ७।१।३२। आभ्यां पञ्चम्येकवचनस्य अत् स्यात्। त्वत्। मत्। ङसेश्चेति सुवचं। युवाभ्यां। आवाभ्यां। पञ्चम्या अत्। ७।१।३१। आ
भ्यां पञ्चम्या भ्यसोऽत् स्यात्। युष्मत्। अस्मत्। तवममौ ङसि। ७।२।९६। अनयोर्मपर्यन्तस्य तवममौ स्तो ङसि। युष्मदस्मद्भ्यां ङसोऽश्। ७।१।२७। तव मम
युवयोः। आवयोः। साम आकम्। ७।१।३३। आभ्याम्परस्य साम आकम् स्यात्। भाविनस्सुटो निवृत्त्यर्थं ससुट्कनिर्देशः। युष्माकं। अस्माकं। त्वयि। मयि
युवयोः। आवयोः। युष्मासु। अस्मासु। समस्यमाने द्व्येकत्ववाचिनी युष्मदस्मदी। समासार्थोऽन्यसंख्यश्चेत्स्तो युवावौ त्वमावपि॥१॥ सुजस्ङेङस्सु प
रतः आदेशास्स्युस्सदैव ते। त्वाहौ यूयवयौ तुभ्यमह्यौ तवममावपि॥२॥ एते परत्वाद्बाधन्ते युवावौ विषये स्वके। त्वमावपि प्रबाधन्ते पूर्वविप्रतिषेधतः ३॥
द्व्येकसंख्यस्समासार्थो बह्वर्थे युष्मदस्मदी। तयोरद्व्येकतार्थत्वान्न युवावौ त्वमौ न च ४॥ त्वाम् माम् वा अतिक्रान्त इति विग्रहे। अतित्वं। अत्यहं। अतित्वां। अ
तिमां। अतियूयं। अतिवयं। अतित्वां २। अतिमां २। अतित्वान्। अतिमान्। अतित्वया। अतिमया। अतित्वाभ्यां ३। अतिमाभ्यां ३। अतित्वाभिः। अतिमाभिः
अतितुभ्यं। अतिमह्यं। अतित्वाभ्यां। अतिमाभ्यां। अतित्वभ्यं। अतिमभ्यं। ङसिभ्यसोः। अतित्वत् २। अतिमत् २। भ्यामि प्राग्वत्। अतितव। अतिमम। अतित्वयोः ८९
अतिमयोः। अतित्वाकं। अतिमाकं। अतित्वयि। अतिमयि। अतित्वयोः। अतिमयोः। अतित्वासु। अतिमासु। युवां आवां वा अतिक्रान्त इति विग्रहे॥

रणसामर्थ्यादिति चेत्। अत्राहुः। बहुवचने रूपेऽदित्येत्वं निवृत्त्याऽकारोच्चारणस्य चरितार्थत्वादिति। यद्यप्यंगवृत्तपरिभाषया एत्वं सुपरिहरं तथापि तस्यानित्यत्वे इदम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पकारोच्चारणं ज्ञापकमिति न त्वं। युष्मदस्मद्भ्यां ङसो ऽश् इत्यशित्त्वं सर्वादेशार्थं। अन्यथा त्यदादेः परस्येति स्यात्। न चाकारस्य अकारविधाने वैयर्थ्यं आदेशव्यपदेशेन यत्व
निवृत्त्यर्थत्वात्। न चावयवस्यादेशस्यापि विभक्तेरनादेशतास्येवेति वाच्यं। सर्वे सर्वपदादेशा इति सिद्धांतात्। इदमेव शित्त्वं ज्ञापयति सर्वे सर्वपदादेशा इति। अर्थ
वत्त्येव स्थान्यादेशभावविश्रांतिरित्यर्थः। सिच्च ङाद्यसुवचनसामर्थ्यादनर्थकस्यापि भवंतीति मनोरमायां स्थितं। तदेव मनसि। ननु अत्रांत्यलोपपक्षे अशः स्यादे
शः स्यात् यत्वनिवृत्त्यर्थतया अशुवचनस्य चरितार्थत्वात्। न च स्यादेशस्यापवादो ऽश् इति वाच्यं। अशादेशप्रवृत्तिकाले शेषे लोपाभावेन स्यादेशस्याप्रवृत्तेः। अ
त्राहुः। अंगवृत्तपरिभाषया स्यादेशो वारणीयः। यदि तु अंगस्य यत्कार्यं तद्विषयिण्येव सा परिभाषा न त्वंगाधिकारपरेति दुराग्रहस्तर्हि शित्त्वान्नातो गुण इति पर
रूपेण अकारं त्वंगस्थितं च अकाररूपमेवाश् भवति न तु विक्रियत इति व्याख्येयमिति। नन्वाकमादेशात्पूर्वमनादेशत्वाच्चो चीति यत्वेन भाव्यं तत्र च शेषे लोपाभा
वात्सवर्णात्तादिति विधीयमानस्य सुडागमस्याप्रसक्त्या साम इति ससुट्कनिर्देशो व्यर्थ इत्यत आह। भाविन इति। कृते हि शेषे लोपे अकारांतत्वात् प्राप्तः सुट् ससुट्
कस्य स्थानित्वेन निर्देशसामर्थ्यान्निवर्त्तत इति भावः। शेषे लोपः टिलोप इति पक्षे तु सुड्ग्रहणं व्यर्थमेव। आकमिति दीर्घोच्चारणं सवर्णदीर्घार्थं अन्यथा पररूपं
स्यात्। न चाकारोच्चारणसामर्थ्यं एत्वनिवृत्त्याऽप्यस्य चरितार्थत्वात्। इह युवावौ द्विवचने त्वमावेकवचने इति सूत्रद्वयेपि द्विवचनैकवचनशब्दावर्थपरौ न
तु प्रत्ययपराविति व्याख्यानं। तत्फलं दर्शयति। समस्यमान इत्यादिना द्व्येकत्ववाचिनी इति। पंचकं प्रातिपदिकार्थ इति पक्षाभिप्रायेणेदमुक्तं। असिंस्तु पक्षे सं
ख्याया अपि प्रातिपदिकार्थत्वात्त्रिकपक्षे तु द्व्येकार्थवाचिनी इति पाठ्यं। संख्याया विभक्त्यर्थत्वेपि संख्येयस्य प्रातिपदिकार्थत्वानपायात्। अन्यसंख्यश्चेदिति
युष्मदस्मदर्थगतसंख्येतरसंख्यायुक्तश्चेदित्यर्थः। त्वदिति। अर्थपरत्वाश्रयणसामर्थ्याद् द्वेवभूतगतेरपि स्त्रीकाराद्युवावौ त्वमावपि तु प्रत्ययपरत्वे तु नस्या
तामित्यव्याप्तिः स्यादिति भावः। एवं चतुर्थश्लोकेपि न युवावौ त्वमौ न चेत् तु क्त्या प्रत्ययपरत्वेऽतिव्याप्तिर्ध्वनिता। एवं चाव्याप्त्यतिव्याप्तिपरिहारायार्थपरत्वमा
श्रितमिति फलितं। नन्वेवं सुजसङेङ स्वपि युष्मदस्मदोर्द्व्येकार्थत्वे युवावौ सा नामेकार्थत्वे तु त्वमावित्याशंकायामाह॥ ॥ ॥

सुजस्ङे·ङ·स्सुपरत इति। केते आदेशा इत्यत आह। त्वाहौ यूयवयावित्यादि। अस्त्वेवं त्वाहादिभिर्युवावयोर्बाधस्त्वमौ तु तेभ्यः परौ कथं तैर्बाध्येतामित्यत आह॥ त्व
मावयीति विप्रतिषेधे परमित्यत्र परशब्दस्येष्टवाचित्वादिति भावः। अतित्वा मिति त्वांमां वा अतिक्रांता विति विग्रहः। अतियूयं। अतिवयमिति। त्वांमां वा अति
क्रांता इति विग्रहः। एवमग्रेप्यूह्यं। अतित्वाकमतिमाकमिति। अत्रांत्यलोपपक्षे अंगवृत्तपरिभाषयानुडागमो निवार्यः। ह्रस्वनद्यापइत्यत्र ह्रस्वांताद्विहितस्यामो
नुडिति व्याख्यानाद्वा। नन्वेवं भिन्नविषयतया सुटो नुडपवादत्वाभावेनावर्णांत सर्वनामभ्यो विहितस्यामो नुडेव परत्वात्स्यात् न तु सुडागमस्तस्य येषां केषा
मित्यादौ सावकाशत्वादिति चेत्। अत्राहुः। त्यदादेरामि सुडिति वक्तव्ये आमि सर्वनाम्नः इति सर्वनामग्रहणसामर्थ्याद्धलि सर्वेषामित्यादिनिर्देशाच्च अवर्णांतस

सुजस्ङे·ङ·स्सुप्राग्वत्। औअम्औट्सु अतियुवां २ अत्यावां २ अतियुवान्। अत्यावान्। अतियुवया। अत्यावया। अतियुवाभ्यां। अत्यावाभ्यां
३। अतियुवाभिः। अत्यावाभिः। भ्यसि अतियुवभ्यं। अत्यावभ्यं। ङ·सिभ्यसोः। अतियुवत् २। अत्यावत् २। ओसि। अतियुवयोः। अत्यावयोः २। अ
तियुवाकं। अत्यावाकं। अतियुवयि। अत्यावयि। अतियुवासु। अत्यावासु। युष्मानस्मान्वा अतिक्रांत इति विग्रहे। सुजस्ङे·ङ·स्सुप्राग्वत्। औ
अमौट्सु। अतियुष्मां ३। अत्यस्मां ३। अतियुष्मान्। अत्यस्मान्। अतियुष्मया। अत्यस्मया। अतियुष्माभ्यां ३। अत्यस्माभ्यां ३। अतियुष्माभिः। अ
त्यस्माभिः। भ्यसि। अतियुष्मभ्यं। अत्यस्मभ्यं। ङ·सिभ्यसोः। अतियुष्मत्। अत्यस्मत्। ओसि। अतियुष्मयोः २। अत्यस्मयोः २। अतियुष्माकं। अत्यस्माकं
अतियुष्मयि। अत्यस्मयि। अतियुष्मासु। अत्यस्मासु॥ ॥ ८९ र्वनामभ्योप्या मः सुडेव भवति न तु नुट्। शास्त्रभृति ष्विति च विषयसप्तमी तेन प
दादिष्वप्यामि ननुडिति। एवं च साम इति ससुट्कनिर्देशेन युष्माकमस्माकमित्यत्र सुडागमाभावेपि नुडागमो दुर्वार इत्याशंकाया अपि निरवकाश एवेति बोध्याय
तु वदंति। साम आकमित्यत्र यद्यपि सुट्ग्रहणं न स्थानि विशेषणं बाधात्। तथापि उपलक्षणं तु भवति। तेन यस्यामः सुडग्रेभावी तस्यैवामः आकमा भवित ८२
व्यं न चैतन्नैरण्त्वे संभवतीत्याकन्न प्रवर्तते। तथा च अतित्वयां अतिमयामित्येवरूपं न त्वतित्वाकमतिमाकमिति। तदसत्। आकमापत्तस्यामः सुडन्वयाभा
वात्। आकमः सुड्भावी चेत्तर्हि तमेवोपलक्षयेत्। आदेशाद्वारके णपरं परासंबंधेन स्थानि नमुपलक्ष्य यतिचेदेवं तर्हि युष्माकमित्यादौ सुट् श्रूयेत। साम इति।

CC-0. In Public Domain. Digitization by eGangotri

निर्देशसामर्थ्यान्न श्रूयेतेति चेन्न। निर्देशस्य गौण्या वृत्त्या चरितार्थत्वेन सामर्थ्याभावादित्यन्यत्र विस्तरः। गुणीभूतयोर्युष्मदस्मदोरेकार्थत्वे उदाहरणमुक्त्वा संप्रति द्व्यर्थवाचित्वे उदाहरति। युवामावां वा अतिक्रान्त इत्यादिना। बह्वर्थे योस्तु उदाहरति। युष्मानस्मान् चेति॥ ॐ ॥ पदस्य। अपदान्तस्य मूर्धन्य इति विरोधनिर्देशात् प्राक् पदस्येत्ययमधिकारः तेन राजा राजभ्यामित्यादौ नलोपः प्रातिपदिकान्तस्येति नलोपः सिध्यति। ननु राजा राजानौ राजान इत्यत्र। तथा गोमान् यवमानित्यादौ संयोगान्तलोपो न तु गोमन्तौ यवमन्तावित्यादौ तथा मो नो धातोरिति नत्वं प्रशान्भ्यामित्यादौ भवति न तु प्रशामौ प्रशाम इत्यत्र। तथा हरिं वन्दे इत्यादौ मोनुस्वारः प्रवर्तते। ननु गम्यत इत्यादौ न च उञि च पदे इत्यतः पदे इत्यधिकारात् पदे परतो मस्यानुस्वारः स्यात् न तु गम्यत इत्यत्रेति किमिह पदस्येत्यधिकारेणेति वाच्यं पुंस्विति रूपासिद्धिप्रसंगात्। तस्मान्मोनुस्वार इत्यत्र पदस्येत्यनुवर्तनीयमेव पदे इत्यस्यान्तरसूत्रेषूपयोगो नास्तीत्युञि च पदे इत्यत्रावोचाम। इह पदस्येति संबंधसामान्ये षष्ठी सा सूत्रान्तरेषु यथायोगं संबंधविशेषे अवतिष्ठते क्वचित् स्थाने षष्ठी क्वचित्

पदस्य। ८।१।१६॥ पदात्। ८।१।१७॥ अनुदात्तं सर्वमपादादौ। ८।१।१८॥ इत्यधिकृत्य। युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ। ८।१।२०॥ पदात्परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वान्नावित्यादेशौ स्तस्तौ चानुदात्तौ। बहुवचनस्य वस्नसौ। ८।१।२१॥ उक्तविधयोरनयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः। वान्नावोरपवादः। तेमयावेकवचनस्य। ८।१।२२॥ उक्तविधयोरनयोः षष्ठीचतुर्थ्येकवचनान्तयोस्तेमे एतौ स्तः। त्वामौ द्वितीयायाः। ८।१।२३॥ द्वितीयैकवचनान्तयोस्त्वामा एतौ स्तः॥ ॥

१९ अवयवषष्ठीति। तत्र संयोगान्तस्य लोपः। मो नो धातोः। मोनुस्वारः। इत्यादौ पदस्येति स्थानषष्ठी अवयवषष्ठ्यां तूक्तातिप्रसंगात्। आद्गुपधाया इत्यादौ त्ववयवषष्ठी। अन्यथा ह्रस्वान्नित्यत्रैवमनुयोमस्य बलं स्यान्न तु ह्रस्वं नो ह्रस्वं त इत्यत्र। एतच्चानुपदमेवोपपादयिष्यते। यद्यपि षष्ठी स्थानेयोगेति परिभाषया पदस्येत्यत्र स्थानषष्ठ्येव लभ्यते न त्ववयवषष्ठी। तथापि नलोपसूत्रे अन्तस्येतिग्रहणात् ज्ञापकादवयवषष्ठ्यपि लभ्यते। यदि पदस्येति स्थानषष्ठ्येव स्यात्तर्हि नान्तस्य पदस्य लोपो भवन्न लोन्यस्य स्यादिति अन्तग्रहणमनर्थकं स्यात्। अवयवषष्ठ्यंगीकारे तु अन्तस्येतिग्रहणं सार्थकं। तथा नलोपसूत्रे प्रातिपदिकान्तस्येत्यसमासनिर्देशः प्रातिपदिकसंज्ञकस्य पदस्य अन्तावयवो यो नकारस्तस्य लोप इति सूत्रार्थ इति। नन्वेवमन्तस्येतिग्रहणमवयवषष्ठीज्ञापनार्थमिति स्वीकारात् पदस्येत्यत्र कथं नाम स्थानषष्ठीलाभः संबंधविशेषस्य निर्धारितत्वेन स्थानषष्ठीपरिभाषाया अनुपस्थितेः। अत्राहुः प्रयोगमूलत्वाद्व्याकरणस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु
सि·कौ· नेर्लस्यानुरोधेन स्थानषष्ठ्यपि स्वीक्रियते ज्ञापकसिद्धा अवयवषष्ठी तु न सर्वत्र स्वीक्रियते इति न लोपसूत्रे मनोरमायां तद्ग्रहणं त्यक्तुं शक्यमित्युक्तं। भाष्यादौ तु पदस्ये
टी·त· त्यधिकृतस्यावयवषष्ठ्यंतत्वमप्यभ्युपगम्यते न तु स्थानषष्ठ्यंतत्वमेवेति ज्ञापनार्थं तद्ग्रहणं तेन ह्रस्वं तौ ह्रस्वं त इत्यत्र मादुपधाया इति वत्वं सिध्यति। पदावयव
८३ स्य मतुपसत्वात्। अन्यथा पदस्येत्यस्य विशेष्यत्वे मतुपा तदंतविधौ मत्वंतं यत्पदं तदवयवस्य मतुपो मादुपधायाः परस्य मस्य वत्वं भवतीत्यर्थः स्यात्॥ तथा च ह्रस्व
वानित्यत्रैव स्यात् न तु ह्रस्वं तौ ह्रस्वं त इत्यत्रेति स्थितं। पदात्। कुत्सने च सुप्यगोत्रादाविन्यतः प्रागयमधिकारः। यदि तु कुत्सने च सुपीत्यत्रापि पदादित्यनुवर्तेत न दा

श्रीशस्त्वावतु मापीह दत्तात्ते मेपि शर्म सः। स्वामी ते मेपि स हरिः पातु वामपि नौ विभुः॥ १॥ सुखं वां नौ ददात्वीशः पतिर्वामपि नो हरिः। सोव्याद्वो नः
शिवं वो नो ददात्सेव्योत्र वः स नः २ पदात्परयोः किं। वाक्यादौ मा भूत्। त्वां पातु मां पातु। अपादादौ किं। वेदैः शेषैः सम्वेद्योऽस्मान् कृष्णः सर्वदा
वतु। स्थग्रहणं श्रूयमाणविभक्तिकयोरेव। नेह। इति युष्मत्पुत्रो ब्रवीति। इत्यस्मत्पुत्रो ब्रवीति। समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः
एकतिङ् वाक्यं। तेनेह न। ओदनं पच तव भविष्यति। इह तु स्यादेव। शालीनां ते ओदनं दास्यामीति। एते वांनावादय आदेशा अनन्वादेशे वा वक्तव्याः।
अन्वादेशे तु नित्यं स्युः। धाता ते भक्तोस्ति। धाता तव भक्तोस्तीति वा। तस्मै ते नम इत्येव। न चवाहाहैवयुक्ते ८।१।२४॥ चादिपञ्चकयोगे नैते आदेशा
स्युः। हरिस्त्वां मां च रक्षतु। कथं त्वां मां वा न रक्षेदित्यादि। युक्तग्रहणात् साक्षाद्योगे एवं निषेधः। परम्परासम्बन्धे तु आदेशः स्यादेव। हरो हरिश्च मे 83

देवदत्तः पचति पूतीत्यत्रैव निघातः स्यान्न तु पचति पूतीत्यत्र। अनुदात्तं सर्वमपादादौ इदं पदत्रयमापादपरिसमाप्तेरधिक्रियते। षष्ठी चतुर्थीति। अल्पाच्तरमिति षष्ठ्या
स्य पूर्वनिपातः। [illegible]रिति। ननु युष्मदस्मदोरित्युक्तत्वात्तयोरेव वांनावादय आदेशाः स्युः। न च पदस्येत्यधिकाराद्विभक्त्यंतस्यैव पदत्वात्षष्ठ्यादिविशिष्टयोरेव
स्युरिति वाच्यं। उक्तरीत्या वस्नसादेरादेशाभावेपि स्याम आदेः परत्वो युष्मदस्मदोः पदत्वात् केवलयोर्वांनावादेशप्रसंगस्य दुर्वारत्वात्। तथा च सुखं वां नौ ददात्वीश इति प्रयोगो न सं
गच्छेत्। नापि द्वितीयास्थयोरिति स्थग्रहणसामर्थ्याद्विभक्तिविशिष्टयोरेव आदेशा भवेयुरिति वाच्यं। स्थग्रहणं श्रूयमाणविभक्तिकयोरेवेति वक्ष्यमाणतया तत्सामर्थ्यस्योपक्ष
यात्। मैवं। अनुदात्तं सर्वमिति सर्वग्रहणमधिकारात्सर्वस्यैव विभक्तिविशिष्टस्य आदेशा भवंतीति आकरस्पष्टत्वात्। यदि तु सर्वस्य द्वे इत्यतः सर्वस्येति पदमनुवर्तेत तदा सर्वग्रहण
मिह त्यक्तुं शक्यमित्याहुः। उक्तानादेशान्वचनक्रमेणोदाहरति॥ ॐ॥ श्रीश इत्यादिना॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वामी ते मेपीति। स्वामीश्वराधिपतीति षष्ठीसप्तम्योर्विधानादिह षष्ठी। द्विवचनान्तयोरुदाहरणमाह। पातु वामित्यादिना। बहुवचनान्तयोस्तु सोऽव्याद्वो न इत्यादि। सेव्योऽत्र वः स
न इति। अर्हे कृत्यतृचश्चेति ण्यत्। कृत्यानां कर्तरि वेति षष्ठी वेदैरशेषैरिति। युष्मानस्मांस्तु मो विंद इति प्रांचः पाठस्तूपेक्षितः। युष्मानित्यस्य पदात्परत्वाभावादेवाप्राप्तेः। अस्मानि
त्यस्य तु पदात्परत्वेपि समानवाक्यस्थपदात्परत्वाभावात्। ननु युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयानामिति सूत्रस्थं विशेषणेनानन्तरं न विधेयो षष्ठ्याद्यन्तयोर्युष्मदस्मदोः पर्यव
स्यति। न च स्थग्रहणाभावे युष्मदस्मदोः संबंधिनीनां षष्ठीचतुर्थीद्वितीयानां विभक्त्यर्थः स्यादिति वाच्यं। सर्वस्य पदस्येत्यनुवर्तनादतो व्याचष्टां स्थग्रहणमिति। तिष्ठतिरि
हाहानौ वर्तते। यथा समये तिष्ठ सुग्रीवेति समयं माहासीरिति गम्यते। तेन षष्ठ्यादीनविजहतोरेव युष्मदस्मदोरादेशा इत्यर्थः। इति युष्मत्पुत्र इति। युवयोः पुत्रो युष्माकं
पुत्र इति वा विग्रहः। न तु त्वत्पुत्र इति। तथा हि सति त्वत्पुत्र इत्येव स्यात्। एवमस्मत्पुत्र इत्यत्राप्यूह्यं। पदात्परत्वं संपादयितुमिति प्राञ्चः। ननु राज्ञोः पुरुषो राज्ञां पुरुष इति वि
ग्रहे राजपुरुष इति नेष्यत इति सिद्धान्तविरोधो युष्मत्पुत्रोऽस्मत्पुत्र इत्यत्र युवयोर्युष्माकमित्यादिविग्रहो न संभवतीति चेन्न। अत्राहुः। यत्र वृत्तौ संख्याविशेषबोधकं
प्रमाणं नास्ति तत्रैवैकत्वं व्याश्रीयते यथा राजपुरुष इति न हि राजपुरुष इत्यत्र विभक्तौ निवृत्तायां राजपदार्थे द्वित्वादिप्रत्यायकं किंचिदस्ति यत्र पुनः संख्याभेदप्रा
मकमर्थप्रकरणादि वृत्तिर्भवति तत्र द्विवचनबहुवचनयोरपि प्रवृत्तिः। प्रवृत्ते त्वेकवचनान्तेन विग्रहे प्रत्ययोत्तरपदयोश्चेति त्वमादेशप्रसंगो दर्था द्विवचनबहुवचनान्ते
नेति विग्रहे त्वन्निर्भविष्यतीति। अर्थः सामर्थ्यं। अर्थाद्यथा मुद्गैः क्रीतो मौद्गिकः। न त्वेकेन मुद्गेन द्वाभ्यां वा मुद्गाभ्यां क्रयणं संभवति। प्रकरणाद्यथा भवद्भिरामेव सरस्वदानाय वचां
सि नः भवतो गिरामिति तत्रत्यार्थः। समानवाक्य इति। देवदत्त अस्य पदंडो देवदत्त हरेनेनेत्यत्र दंड इत्यत्र तत्पूर्ववाक्यस्थमिति समानवाक्यस्थत्वाभावादामन्त्रितनिघातो न भवति। एकं
तिङ्तिङ इति। एकं तिङ् तिङं त्यत्रेति बहुव्रीहिः। ननु ओदनस्य पचन्त्यस्तव भविष्यतीत्यत्रातिप्रसंगः वक्तव्यो लीत्यध्याहारेण भिन्नवाक्यता समर्थेनेपि पश्य मृगो धावति इत्यादावे
कवाक्यत्वव्यवहारो न स्यात्। सत्यं। प्रकृतोपयोगित्वेनेदमुक्तं। पश्य मृग इत्यादौ त्वर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्यात्॥

CC-0. In Public Domain. Digitization by eGangotri



रिति शास्त्रांतरप्रसिद्धत्वमेवेत्येके। अन्ये तु आख्यातं सविशेषणं वाक्यमिति वार्तिककारवचनपर्यालोचनया एकतिङित्यत्र तिङ् न विशेष्यसमर्पकं विवक्षितं। तत्र पश्य
मृगो धावतीत्यत्र तिङं तद्व्येसत्यपि पश्येत्यस्यैव विशेष्यसमर्पकत्वान्नोक्तदोष इत्याहुः। एकशब्दः समानवचनो न तु संख्यावाची। बहुव्रीहिश्चायं तेन ब्रूहि ब्रूहि देवदत्ते
त्यत्र वाक्यत्वादामंत्रितनिघातः सिध्यतीति समर्थसूत्रे कैयटः। युष्मदस्मदोर्विभाषा अनन्वादेशे इति वार्तिकमर्थतः पठंति। एते वांनावादयः इति। यद्यपि सपूर्वायाः प्रथ
मायाविभाषेत्यनेनैतत्तु भाव्येयत्न्वतृत्प्राप्यविशेषणे विकल्पोऽयं विधीयत इत्याशयेन सपूर्वत्वाभावेऽपि विकल्पमुदाहरंति। धाता ते भक्तः इति। अन्वादेशे तु नित्यमुदाहर
ति। तस्मै ते नम इत्येवेति। तुल्यार्थैरित्यादि वन्नचवाहाहैवैरिति तृतीयानिर्देशेनापि युक्तार्थलाभे युक्तग्रहणमनर्थकमित्यत आह। युक्तग्रहणादिति। यत्र यु
ष्मदस्मदर्थगतानां समुच्चयादीनां चादयो द्योतयंति तत्र चादिभिस्सहार्थद्वारा युष्मदस्मदोः साक्षाद्योगस्तत्रायं निषेध इत्यर्थः। हरौ हरिश्चेति अत्र चशब्दो हरह

पश्यार्थैश्चानालोचने। ८।१।२५॥ अचाक्षुषज्ञानार्थैर्दृशिभिर्योगे एते आदेशा न स्युः। चेतसा त्वां समीक्षते। परम्परासम्बन्धेऽप्ययं निषेधः।
भक्तस्तव रूपं ध्यायति। आलोचने तु भक्तस्त्वा पश्यति चक्षुषा। सपूर्वायाः प्रथमाया विभाषा। ८।१।२६॥ विद्यमानपूर्वात्प्रथमान्तात्पर
योरनयोरन्वादेशेऽप्येते आदेशा वा स्युः। भक्तस्त्वमप्यहं तेन। हरिस्त्वा त्रायते स मात्वामेति वा॥

रिगतसमुच्चयमाह। हरिं हराभ्यां त्वस्मदः सं
बंधो न तु समुच्चयेनेति न साक्षाद्योगः किं तु परंपरायोग इति न निषेध इति भावः॥ ॐ॥ पश्यार्थैश्चाना। अत एव निपातनाज्ञाशेयाघ्राध्माधेडिति शः। दृशेर्पश्यः तच्च हज्ञानमात्रं अदर्शनं लोप इत्य
नयधा न तु चाक्षुषज्ञानमेव अनालोचन इति निषेधात् तद्दर्शनाह। अचाक्षुषज्ञानार्थैरिति। परंपरासंबंधेऽपीति। पूर्वसूत्रस्थयुक्तग्रहणेन ज्ञापितमेतद्वदन्यत्र परंपरासंबंधेऽपि निषेध इति। स
पूर्वायाः। सहशब्दोऽत्र सलोमक इत्यत्रेव विद्यमानवचनस्तेन सहेतीत्यत्र तुल्ययोगवचनं प्रायिकमिति वक्ष्यमाणत्वाद्विद्यमानवचनस्यापि सहस्य समासः। वोपसर्जनस्येति सभावः। प्रथ
माया इति च प्रत्ययग्रहणे तदंतविधिरित्यालोच्याऽऽह। विद्यमानपूर्वादित्यादि। एते वान्नावादय आदेशा इत्यविशेषोक्तैव विभाषया सिद्धेः किमर्थमिदं वचनमित्याशंकां परिहरन्नाह।
अन्वादेशेऽपीति। भक्तस्त्वमित्यादि। त्वं भक्तोऽहमपि तेन हरिस्त्वां मां वा त्रायत इति संबंधः। एवं च प्रक्रांतत्वान्नयच्छद्वापेक्षायेन कारणेन हरेस्त्वं भक्तस्तेनैव कारणेनाहमपीति व्याच
क्षाणानां तु यच्छब्दाध्याहारक्लेश इति बोध्यं। अत्र तेनेति पूर्वं विद्यमानं पदं

84

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

५ मू ४ विभाषितं विशेषवचने। ८।१।७४। अत्र भाष्यम्। बहुवचनमिति वक्ष्यामीति। बहुवचनान्तं विशेष्यं समानाधिकरणे आमन्त्रिते विशेषणे परे अविद्यमानवत्स्याद्वा। यूयं प्रभवः देवाः शरण्याः युष्मान्भजे।

तत्रो हरिरिति प्रथमान्तं ततः परस्य युष्मच्छब्दस्यादेशः। तथा त्रायते इत्यस्मात्परस्य इति प्रथमान्तं ततः परस्यास्मच्छब्दस्यादेशः। ॥ सामन्त्रितं। संबोधने च यत् अतः संबोधने
इत्यनुवर्तते। ... इत्यनेन प्रथमा निर्दिश्यते। महासंज्ञाकरणसामर्थ्यात्संज्ञाविधावपि तदन्तग्रहणं। आमंत्रणमामंत्रितमुपचारात्तत्साधने वृत्तिः। विभक्त्यंतेन चामंत्र्य
तेन तु केवलस्य विधेयत्वे चेत्याद्ययेनाहान्तरं तमिति। इहेति। अग्ने तव देवास्मानित्यत्र युष्मदस्मदोर्न भवत्यादेशः। अग्ने नयेत्यत्र तिङ्ङतिङ इति न तिङ्निघातः। अग्न
इन्द्र वरुणेत्यत्र त्वामंत्रितस्य चेत्यामंत्रितनिघातो नेति विवेकः। सर्वेषां निघात इति। अयं च निघातः। परकाले श्रूयते न तु संहिताकाले। स्वरितात्संहितायामनुदात्ताना
मिति संहितायामेकश्रुतिविधानात्। अग्ने तेजस्विन्निति। इह पदात्परत्वात्तेजस्विन्नित्यस्यामंत्रितस्य चेत्याष्टमिकनिघातः सर्वानुदात्तः। सुपादिति। शोभनौ पादौ य

सामन्त्रितं। २।३।४८। सम्बोधने या प्रथमा तदन्तमामन्त्रितसंज्ञं स्यात्। आमन्त्रितं पूर्वमविद्यमानवत्। ८।१।७२। स्पष्टं। अग्ने तव देवास्मान्पा
हि। अग्ने नय। अग्न इन्द्र वरुण। इह युष्मदस्मदोरादेशास्तिङ्ङतिङ निघात आमन्त्रितनिघातश्च न। सर्वदा रक्ष देव नः इत्यत्र तु देवेत्यस्याविद्यमा
नवत्त्वेपि ततः प्राचीनं रक्षेत्ये तदाश्रित्यादेशः। एवं इमं मे गङ्गे यमुने इति मन्त्रे यमुने इत्यादिभ्यः प्राचीनामन्त्रिताविद्यमानवत्त्वेपि मेश
ब्दमेवाश्रित्य सर्वेषां निघातः॥ नामन्त्रिते समानाधिकरणे सामान्यवचनं। ८।१।७३। विशेष्यं समानाधिकरणे विशेषणे आमन्त्रिते परे नाऽ
विद्यमानवत्स्यात्। हरे दयालो नः पाहि। अग्ने तेजस्विन्। सुपात्। सुपादौ। सुपादः। सुपादं। सुपादौ। पादः पत्। ६।४।१३०। पाच्छब्दान्तं य
दङ्गं भं तदवयवस्य पाच्छब्दस्य पदादेशः स्यात्। सुपदः। सुपदा। सुपाद्भ्यामित्यादि। अग्निमन्थतीत्यग्निमत्। अग्निमद्। अग्निमथौ। अग्नि
मथः। अग्निमद्भ्यामित्यादि। ऋत्विगादिसूत्रेण क्वेः सुप्युपपदे क्विन्॥ ॥ ९ स्यात्तिबहुव्रीहिः। संख्यासुपूर्वस्येति पादस्यान्तलोपः। पादः पत्। तदव
यवस्येति। एतच्च निर्दिश्यमानस्यादेशा भवन्तीति परिभाषया लभ्यते। इयं च परिभाषा षष्ठीस्थानेयोगेत्यनेन ज्ञापिता। तथा हि। अस्तेर्भूरित्यादौ यणचीत्यादौ सामीप्यादिसंबंध
प्रसंगेपि लक्ष्यानुरोधेन व्याख्यानान्तरं तरं गत्वात् स्थानिवदादेश इति ज्ञापकात्स्थानेयोगत्वसिद्धेः प्रारभ्यमाणेन षष्ठीस्थानेयोगेत्यनेन षष्ठ्यन्तमुच्चार्यमाणमेव स्थाने
न युज्यते न तु प्रतीयमानमित्यर्थो लभ्यते। तथा च निर्दिश्यमानस्यादेशा भवंतीति सिद्धं। अलोन्त्यस्यादेः परस्येति योगे तु आरंभसामर्थ्यान्निर्दिश्यमानपरिभाषाया बाध

देवाः शरण्या युष्मान्भजे। इहाचादेशोपि वैकल्पिका देवाः।४

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु· सि·कौ· टी·त· ८५

कौतेनपुमःस्वव्ययम परेउरःस्यात्संभोरित्यादौनदोषइतिदिक्॥ सनाः॥ अग्निमदिति। मथ्नातेर्मथ्यतेऽचक्किपिएतद्रेवरूपं। इदितनुनलोपाभावादग्निमत्। अग्निमंथौ॥ अग्निमंथः॥ थांताः॥ ॐ॥ अनिदितां। इहहृस्वेकारइत्संज्ञकोयेषांतानि इदितं। नइदितिअनिदितितेषांमनिदितां। एतच्च अंगस्यविशेषणं हलइत्यपितदाहाह लंतानामनिदितामिति। उपधायानस्येति। श्नान्नलोप इतिसूत्रान्नेतिलुप्तषष्ठीकंपरमनुवर्ततेतच्चोपधायहणेनविशेष्यतइतिभावः। अनिदितामितिकिं। नंद्यते। हलः किं। नीयते। उपधायाःकिं। हन्यते। अचः। अल्लोपोनइत्यतोल्लोपइत्यनुवर्तते। भस्येतिच। तदाह। भस्याकारस्यलोपःस्यादिति। अत्रनव्याः। यद्यत्रांचतेर्भस्येतिसामानाधिकरण्येनान्वयःस्वीक्रियतेतर्हि प्रतीचः प्रतीचेत्यादिनसिध्येत्। उपसर्गसहितस्यैवभत्वेनकेवलस्यांचतेर्भत्वाभावात्। भस्यावयवस्यां चतेरितिवैय्यधिकरण्येना

अनिदितांहलउपधायाःक्ङिति। ६।४।२४। हलन्तानामनिदितामङ्गानामुपधायानस्यलोपस्यात्किति ङिति च। उगिदचामितिनुम्। संयोगान्तस्यलोपः। नुमोनकारस्यक्विन्प्रत्ययस्यकुरितिकुत्वेनङकारः प्राङ्। अनुस्वारपरसवर्णौ। प्राञ्चौ। प्राञ्चः प्राञ्चं। प्राञ्चौ। अचः। ६।४।१३८। लुप्तनकारस्याञ्चतेर्भस्याकारस्यलोपस्स्यात्॥ चौ। ६।३।१३८॥ लुप्ताऽकारनकारेऽञ्चतौपरेपूर्वस्याऽणोदीर्घस्स्यात्। प्राचः। प्राचा। प्राग्भ्यामित्यादि। प्रत्यङ्। प्रत्यञ्चौ। प्रत्यञ्चः। प्रत्यञ्चं। प्रत्यञ्चौ। अचइतिलोपस्यविषयेऽन्तरङ्गोऽपियण्नप्रवर्त्तते। अकृत· व्यूहाइतिपरिभाषया। प्रतीचः। प्रतीचा। अमुमञ्चतीतिविग्रहे। अदसअञ्चइतिस्थिते॥

(( न्वेपेनुप्रत्ययगात्मनेत्यादावंचतेरकारस्यलोपःस्यात्। अंचत्यंतस्यभस्याकारस्यलोपइतिव्याख्यायांप्राचः। प्राचेतिप्रशब्दाकारस्यापिलोपःस्यात्। तत्राहृत्यादिनाअंचत्यंतस्यभस्यांचतेरकारस्येतिव्याख्यानेपिप्रत्यञ्चमंचतिप्रत्यगङ्। ततःशसादिषुप्रत्यङ्चःप्रत्यङ्चेत्यादावतिप्रसंगएव। तस्मादल्लोपेनइत्यत्रेवात्रापिअंगावयवोऽसर्वनामस्थानयजादिस्वादिपरोयोंचतिस्तस्याकारस्यलोपःस्यादितिव्याख्येयं। युष्मागपागुदक्प्रतीचइति। निर्देशश्चेहव्याख्यानेलिंगमित्याहुः॥ चौ॥ नेत्रोरितिनिर्देशाच्चवर्गग्रहणंनभवतिइत्याह। लुप्ताकारनकारेंचताविति। अत्राकारलोपेननकारलोपस्यासिद्धत्वान्तलोपनैव्य ८५
र्थमेवकिंतुलुप्ताकारचनाविन्येवसुवचमित्याहुः। ढ्रलोपइतिसूत्रादणोदीर्घइत्यस्यचानुवर्तनादाह। अणोदीर्घःस्यादिति। प्राचः। प्राचेति। प्रतीचइत्यादावर्थमवश्यंस्वीकार्येऽतोलोपेकृतेऽनेनदीर्घोविधीयतइतिभावः। प्राग्भ्यामिति। चोःकुरितिकुत्वंनतुक्विन्प्रत्ययस्येत्यनेनन स्यासिद्धत्वात्॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

विष्वग्देवयोश्च। चकारेण सर्वनाम्नः इत्यतः सर्वनाम्न इति लभ्यते इत्याह। अनयोः सर्वनाम्नश्चेति। अप्रत्ययांते ऽञ्चताविति। अविद्यमानः प्रत्ययो ऽप्रत्ययः क्विन्क्विबादिः अं
चतौ वप्रत्यय इति पाठे तु वप्रत्ययांते च ताविति व्याख्येयं। विष्वग्देवयोरुदाहरणं। विष्वगंचतीति विष्वद्र्य
ङ्। देवानंचतीति देवद्र्यङ्। इति बोध्यं। अदसोऽसे
असेरिति। इकार उच्चारणार्थस्तदाह॥ अदसोऽसांतस्येति। असांतस्येति किं। अमुमात्मन इच्छति अदस्यति। दान्तपरस्य किं अमुणा अमुयोरित्यत्रांत्यय कारस्य मा
भूत्। ह्रस्वव्यंजनयोरिति। व्यंजनस्य हि ह्रस्व ईषत्सदृशो दीर्घस्तु विसदृश इति भावः। प्रांचस्तु ह्रस्वदीर्घयोः समाहार इति द्वंद्वः समाहारत्वे वविधीयमानोऽप्यण् क्वचिन्न स

विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये। ६।३।९२॥ अनयोः सर्वनाम्नश्च टेरद्र्यादेशः स्यादप्रत्ययान्तेऽञ्चतौ परे। अदद्रि अच् इति स्थिते यण्॥
अदसोऽसेर्दादु दो मः। ८।२।८०॥ अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च। उ इति ह्रस्वदीर्घयोः समाहारद्वंद्वः। आन्तरतम्याद्ध्रस्वव्यञ्ज
नयोर्ह्रस्वो दीर्घस्य च दीर्घः। अमुमुयङ्। अमुमुयञ्चौ। अमुमुयञ्चः। अमुमुयञ्चं। अमुमुयञ्चौ। अमुमुईचः। अमुमुईचा। अमुमुयग्भ्यामित्या
दि मुत्वस्यासिद्धत्वान्न यण्। अन्त्यबाधेऽन्त्यसदेशस्येति परिभाषामाश्रित्य परस्यैव मुत्वमित्यन्ये तन्मते। अदमुयङ्। असेः सकारस्यस्थाने यस्य
सः। असेरिति व्याख्यानात्। सदाद्यत्वविषयत्वमुत्वा नान्यत्रेति पक्षे अदद्र्यङ्। उक्तं च। अदसोऽद्रेः पृथङ्मुत्वं केचिदिच्छन्ति लत्ववत्। केचि
दन्त्यसदेशस्य नेत्येके ऽसेर्हि दृश्यत इति। विष्वग्देवयोः किं। अश्वाची। अञ्चतौ किं। विष्वग्युक्॥ अप्रत्यये किं विष्वगञ्चनं। अप्रत्ययग्रहणं ज्ञा
पयति। अन्यत्र धातुग्रहणे तदादिविधिरिति। तेनाऽयस्कारः। अतः कृकमीति सः। उदङ्। उदञ्चौ। उदञ्चः। शसादावचि॥ ॥

वर्णान्न गृह्णातीति सौत्रत्वं आंतरतम्यात् ह्रस्वव्यंजनयोर्ह्रस्वः दीर्घस्य दीर्घः इति व्याचख्युस्तेऽन्यं वा धरति। सूत्रे अदस इति नावयवषष्ठी किंतु स्थानेषष्ठी एवं हि अलोंऽत्यपरिभा
षोपतिष्ठते। तथा च अदसो योंऽत्यः सदात्परो न भवति दात्परो यः स अदसोंऽत्यो न भवतीत्येवमंत्यबाधेऽन्त्यसमीपस्य भवतीति तेषामाशयः। उक्तं चेति। वार्तिककृतेति शे
षः। एवं च अमुद्र्यङ् इति केषांचिदुदाहरणं भाष्याननुक्तत्वादुपेक्ष्यमिति भावः। लत्ववदिति। चलीक्लृप्यत इत्यत्र कृपो रो ल इत्युभयोर्यथा लत्वं तथेत्यर्थः। ननु प्रत्यय
ग्रहणाभावेऽप्युत्तरपदाधिकारस्थत्वाद्विष्वग्द्र्यङ् देवद्र्यङ् इत्यञ्चत्युत्तरपदे एवाद्र्यादेशः स्यान्न तु विष्वगंचनमित्यत्रातो व्याचष्टे। अप्रत्ययग्रहणं ज्ञापयतीति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



अन्यत्रेति। अतः कृकमीत्यादौ तेनेति। अन्वयानित्यसमास इत्यतोऽनुवृत्तेन समासग्रहणेनोत्तरपदस्याक्षेपादतः कृकमीति कृधातुग्रहणे कृधातूत्तरपदकएवायस्कारादित्या
दौ सत्वं स्यान्नत्वलंकृनोत्तरपदकेऽयस्कार इत्यत्रेति भावः॥ ॥ उद ईत्॥ अचइत्यस्यापवादः। इह अच इत्यनुवर्त्तते भस्येति च तदाह। उच्छब्दात्परस्य लुप्तनकारस्ये
त्यादि। भस्येति किं। उदंचौ। उदंचः। उदग्भ्यां॥ लुप्तनकारस्येति किं। पूजायां उदंचः। उदंचेति। यथा स्यादिति। समः समि। समीत्यविभक्तिको निर्देशः। एवं तिरसस्तिरीत्यपि
संगतमंचतीति सम्यक्। समीच इति॥ अल्लोपे चावितिदीर्घः। सह अंचतीति सध्र्यङ्। भविनये अल्लोपदीर्घौ सध्रीच इत्यादि तिरसः न विद्यते लोपो यस्य सः अलो

उद ईत्। ६।४।१३९। उच्छब्दात्परस्य लुप्तनकारस्याऽञ्चतेर्भस्याऽकारस्य ईः स्यात्। उदीचः। उदीचा। उदग्भ्यामित्यादि। समः समि। ६।३।
९३। अप्रत्ययान्तेऽञ्चतौ परे। सम्यङ्। सम्यञ्चौ। सम्यञ्चः। समीचः। समीचा। सहस्य सध्रिः। ६।३।९५। अप्रत्ययान्तेऽञ्चतौ परे। सध्र्यङ्। तिरस
स्तिर्य्यलोपे। ६।३।९४॥ अलुप्ताऽकारेऽञ्चतावप्रत्ययान्ते परे तिरसस्तिर्यादेशः स्यात्। तिर्यङ्। तिर्यञ्चौ। तिर्यञ्चः। तिर्यञ्चं। तिर्यञ्चौ। तिरश्चः।
तिरश्चा। तिर्यग्भ्यामित्यादि। नाञ्चेः पूजायां। ६।४।३०। पूजार्थस्याऽञ्चतेरुपधाया नस्य लोपो न स्यात्। अलुप्तनकारत्वान्नुम्। प्राङ्। प्राञ्चौ।
प्राञ्चः। नलोपाऽभावादकारलोपो न। प्राञ्चः। प्राञ्चा। प्राङ्भ्यां। प्राङ्क्षु। प्राङ्षु। एवम्पूजार्थे प्रत्यङ्ङादयः। कुञ्चकौटिल्याल्पीभावयोः। अ
स्यक्विन्नादिना नलोपाभावोऽपि निपात्यते। क्रुङ्। क्रुञ्चौ। क्रुञ्चः। क्रुङ्भ्यामित्यादि। चोः कुः। पयोमुक्। पयोमुग्। पयोमुचौ। पयोमुचः। व्रश्चे
ति षत्वं। स्कोरिति सलोपः। जश्त्वचर्त्वे। सुवृट्। सुवृड्। सुवृश्चौ। सुवृश्चः। सुवृट्त्सु। सुवृट्सु। महपूजायां। वर्त्तमाने पृषन्महद्बृहज्जगच्छतृव
च्च॥ एते निपात्यन्ते शतृवच्चैषां कार्यं स्यात्। उगित्वान्नुम्। सान्तमहत इति दीर्घः। महान्तेपूज्यन्ते। महान्। महान्तौ। महान्तः। हे महन्। महत्। महतः। म

पः इति बहुव्रीहिः। अंचतावित्यनुवर्तमानमन्यपदार्थः। अवयवद्वारकश्चलोपः समुदाये उपचर्यत इत्यभिप्रेत्याह। अलुप्ता ॥ हता। महद्भ्यामित्यादि॥ ८६
कार इत्यादि। अकारलोपे सतीति नोक्तव्याख्यानात्। वप्रत्ययान्ते किं। तिरोंचनमित्यादौ मा भूत्। तिर श्च इति। लुप्ताकारत्वात्तिर्यादेशाभावे सस्य श्चुत्वेन शः। न चा
लोपस्य स्थानिवत्वात् श्चुत्वं न स्यादिति वाच्यं। पूर्वत्रासिद्धे तदभावात्पदांतविधित्वाच्च॥ नाञ्चेः। नुमेव सिद्धे प्राचः प्राचेत्यादौ नुमोऽभावे पि नकारः श्रवणार्थः। प्रङ्क्ति

86

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रकर्षेणाञ्चतीति पूजयतीति पूजार्थादंचेः क्विन्। प्राङ्ङिति। ङः कुक्टुगिति वा कुक्। चयोर्द्वितीया इति पक्षे खकारो बोध्यः। एवमिति। शसादिषु प्रत्यंचः। प्रत्यङ्भ्यां अमुमुयङ्ङः अमुमुयङ्भ्यां। उदंचः उदङ्भ्यामित्यादि। ह्नेयें कुंचतीति क्रुङ्। सलोप इति। श्चुत्वस्यासिद्धत्वादिति भावः। सुष्टु वृश्चतीति सुवृट्। क्विपि ग्रहिज्येति संप्रसारणं। सुवृट् स्विति। चत्वस्यासिद्धत्वात्पूर्वं डः सीति वा धुट्। ततश्चर्त्वं। चांताः निपात्यंत इति। ष्णुसेचने। वृहद्बृहे। अत्र गुणाभावः। महेः कर्मणि प्रत्ययः। अत एव महत्त्वेन पूज्यते समहानिति व्याचष्टे। गमेस्तु जगादेशः। चत्वारोप्यन्ति प्रत्ययांताः। एतच्च उणादिषु स्फुटीकरिष्यते॥ ॥ अत्वसंतस्य चाधातोः॥ दूलोप इति सूत्राद् दीर्घस्येति उपधाया इत्युपधाग्रहणस्य चानुवर्तनादाह। उपधाया दीर्घः स्यादिति। इह अधातोरिति योगो विभज्यते। तत्सामर्थ्यादनंतरस्यासंतस्यैव प्रतिषेधं नात्वंतस्येति कैयटादयस्तदेतद्दूषयंति। धातुभिन्नासंतस्येति। धात्ववयवभिन्नयोः स्तदंतस्येत्यर्थः। तेन उखास्रत्पर्णध्वत् इत्यादि सिद्धं। धातुभिन्नयोः संतस्येति व्याख्यायां उखास्रत्पर्ण

अत्वसन्तस्य चाधातोः ६।४।१४। अत्वन्तस्योपधाया दीर्घः स्याद्धातुभिन्नासन्तस्य चासम्बुद्धौ सौ परे। परं नित्यं च नुमं बाधित्वा वचनसामर्थ्यादादौ दीर्घः। ततो नुम्। धीमान्। धीमन्तौ। धीमन्तः। हे धीमन्। शसादौ महद्वत्। धातोरप्यत्वन्तस्य दीर्घः। गोमन्तमिच्छति गोमानिवाचरति वा क्यच् ततः कर्तरि क्विप्। उगिदचामिति सूत्रेऽञ्ग्रहणं नियमार्थं। धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेवेति। तेनेह न स्रत् ध्वत् इत्यादौ न। अधातोरिति तु अधातुभूतपूर्वस्यापि नुमर्थं। गोमान्। गोमन्तौ। गोमन्तः। इत्यादि। भातेर्डवतुः। भवान्। भवन्तौ। भवन्तः। शत्रन्तस्य त्वत्वन्तत्वाभावान्न दीर्घः। भवतीति भवन्। उभे अभ्यस्तम् ६।१।५। षाष्ठद्वित्वप्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्तसंज्ञे स्तः॥

ध इत्यत्र सिद्धं न दीर्घाभावेप्यत्र तु सांदर्वतिरिक्ता। अत्र सर्वनामस्थाने चेति सूत्रादसंबुद्धावित्यनुवर्तते सौ चेत्यतः सावितिच तदाह। असंबुद्धौ सौ परे इति। अत्वंतत्वाभावादिति। अतु इत्युकारानुबंधस्यानुकरणाच्छत्रंतस्य न भवतीत्यर्थः। उभे शब्दरूपापेक्षया नपुंसकनिर्देशः। षाष्ठद्वित्वेति। अनंतरस्य विधिर्वा भवति प्रतिषेधो वेति न्यायादिति भावः। इह त्वनुवृत्त्यैव सिद्धे उभग्रहणं समुदायप्रतिपत्त्यर्थमिति व्याचष्टे। उभे समुदिते इति। अन्यथा नेनिजतीत्यत्र अभ्यस्तानामादिरित्यादि उदात्तत्वं प्रत्येकं पर्यायेण स्यात्॥ ॥

CC-0. In Public Domain. Digitization by eGangotri



नाभ्यस्ताच्छतुः। व्यवहितेऽपि नुमेवात्र निषिध्यते। अन्येषामप्रसक्तेरित्यभिप्रेत्याह। नुम्नस्यादिति। ददति। ददतीति ददत्। दाञो लटः शत्रादेशः शपः श्लुः श्लाविति द्वित्वे
अभ्यासस्य ह्रस्वः श्नाभ्यस्तयोरात इत्याल्लोपः। जक्षित्यादयः षट्। जक्षितिपृथक्पदं इति शब्देन जक्षिरेव परामृश्यते। इति आदर्येषामित्यतद्गुणसंविज्ञानबहुव्रीहिस्तदेत
दाहा षट् धातवोऽन्ये इति। तांताः। गोपायतीति गुपूधूपिविच्छिपणिपनिभ्य आय आयादय आर्द्धधातुके वेति वैकल्पिकत्वादिहायप्रत्ययाभावः। आयप्रत्ययपक्षे लत्तो लोपे यलो
पे च गोपाय इति रूपं बोध्यं। पांताः। त्यदादिषु कञ्चेत्यस्यानूदाहरणं तादृशी यादृश इत्यादि। तच्चात्र नोक्तं हलंतेष्वनुपयोगात्। अनालोचने किं। तं पश्यतीति त

नाभ्यस्ताच्छतुः। ७।१।७८। अभ्यस्तात्परस्य शतुर्नुम् न स्यात्। ददत्। ददद्। ददतौ। ददतः। जक्षित्यादयः षट्। ६।१।६। षड्धातवोऽन्ये ज
क्षितिश्च सप्तम एते ऽभ्यस्तसंज्ञाः स्युः। जक्षत्। जक्षद्। जक्षतौ। जक्षतः। एवं जाग्रत्। दरिद्रत्। शासत्। चकासत्। दीधीवेव्योर्ङित्वेऽपि
छान्दसत्वाद्धातुत्वेन परस्मैपदं। दीध्यत्। वेव्यत्। गुप्। गुब्। गुपौ। गुपः। गुब्भ्यामित्यादि। त्यदादिषु दृशोऽनालोचने कञ्च। ३।२।६०। त्यदा
दिषूपपदेष्वज्ञानार्थाद्दृशेर्धातोः कञ् स्याच्चात् क्विन्। आ सर्वनाम्नः। ६।३।९१। सर्वनाम्न आकारोऽन्तादेशः स्याद् दृग्दृशवतुषु। कुत्वस्याऽसि
द्धत्वा क्विन्निषः। तस्य जश्त्वेन ङस्तस्य कुत्वेन गः। तस्य चर्त्वेन पक्षे कः। तादृक्। तादृग्। तादृशौ। तादृशः। षत्वापवादत्वात् कुत्वेन खकार इति।
कैयट हरदत्तादिमते तु चर्त्वाऽभावपक्षे ख एव श्रूयते। न तु गः। जश्त्वं प्रति कुत्वस्याऽसिद्धत्वाद् दिगादिभ्यो यदिति निर्देशान्नाऽसिद्धत्वमिति वा
बोध्यं। व्रश्चेति षत्वं। जश्त्वचर्त्वे। विट्। विड्। विशौ। विशः। विड्भ्यां। नशेर्वा। ८।२।६३। नशः कवर्गोऽन्तादेशो वा स्यात् पदान्ते। नक्। नग्। नट्। नड्।
नशौ। नशः। नग्भ्यां नड्भ्यामित्यादि॥ ॥ ९९ दृशः। कर्मण्यण्। तादृशादयस्तु रूढिशब्दत्वादसत्यप्यवयवार्थेन स्युस्साध्यन्ते। अतएव अज्ञा
नार्थाद्दृशेरिति विनिसंगच्छते। भाष्ये तु कर्मकर्तरि व्युत्पत्तिर्दर्शिता। तमिवेमं पश्यंति जनाः स इवायं पश्यति ज्ञानविषयो भवतीत्यर्थो रज्ञानार्थादि·तितु संगच्छते। ८७
तत्र दृशेर्ज्ञानविषयत्वापत्तिमात्रवृत्तित्वेऽपि विषयीकरणवृत्तित्वात्। अकारांतादेश इति। अकारादेशे सति त्वतो गुणः स्यात्। न चाकारोच्चा
रणसामर्थ्याद्दीर्घस्यादेवेति वाच्यं। अकारस्याविधौ हलएवश्च वत्प्रसंगात्। विडिति। विशप्रवेशने इत्यस्मात् क्विप्। नशेर्वा। केचिदिह झलीत्यनुवर्त्य झलि

87

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पदान्ते चेति व्याचक्षते। तन्न नष्टमित्यादावतिप्रसंगात्। नगिति। षडगकाः प्राग्वत्॥ ॐ॥ स्पृशोऽनुदके क्विन्। ककारो गुणाभावार्थः। नकारस्तु क्विन्प्र त्ययस्य कुरिति विशेषणार्थः। वस्तुतस्तु व्यर्थ एव सः। क्विन्प्रत्ययस्य कुरित्युक्तेऽपि तदनुबन्धपरिभाषया क्विबन्तस्य कुत्वाप्रसक्तेः। न चाद्युदात्तत्वं प्रयोजनं क्विनः प्रकृतीनामेकाच्त्वादुत्तस्वरेणापि तत्सिद्धेः। दधृगित्यत्र त्वन्तोदात्तत्वनिपातनादाद्युदात्तत्वं नापेक्षितमेवेति दिक्। अत्र सुपीत्यनुवर्त्तते न कर्मणीति तु निवृत्तमित्याशयेनाह। अनुदके सुप्युपपदे इति। घृतस्पृगिति। घृतं घृतेन वा स्पृशतीति विग्रहः। अनुदके किं। उदकं स्पृशतीति उदकस्पर्शः। निषे

स्पृशोऽनुदके क्विन्। ३।२।५८॥ अनुदके सुप्युपपदे स्पृशेः क्विन् स्यात्। घृतस्पृक्। घृतस्पृग्। घृतस्पृशौ। घृतस्पृशः। क्विन्प्रत्ययो यस्माद्बहुव्रीह्याश्रयणात्। क्विप्यपि कुत्वं। स्पृक्। षडगकाः प्राग्वत्। ञिधृषा प्रागल्भ्ये। अस्मादृत्विगादिना क्विन्। द्वित्वमन्तोदात्तत्वञ्च निपात्यते। कुत्वात्पूर्वं झल्त्वेन डः गः कः। धृष्णोतीति। दधृक्। दधृग्। दधृषौ। दधृषः। दधृग्भ्यामित्यादि। रत्नानि मुष्णातीति रत्नमुट्। रत्नमुड्। रत्नमुषौ। रत्नमुषः। षड्भ्यो लुक्। षट्। षड्। षड्भिः। षड्भ्यः २। षट्चतुर्भ्यश्चेति नुट्। अनामिति पर्युदासान्न ष्टुत्वनिषेधः॥ यरोऽनुनासिक इति विकल्पम्बाधित्वा प्रत्यये नित्यमिति नित्यवचनान्नित्यमनुनासिकः। षण्णां। षट्सु। षट्त्सु। तदन्तविधिः। परमषट्। परमषण्णां। गौणत्वे तु प्रियषषः। प्रियषषां। रुत्वम्प्रति षत्वस्यासिद्धत्वात्ससजुषो रुरिति रुत्वं॥ र्वोरुपधाया दीर्घ इकः। ८।२।७६। रेफवान्तस्य धातोरुपधाया इको दीर्घः स्यात्। पिपठीः। पिपठिषौ। पिपठिषः। पिपठीर्भ्यां। वाशरीति वा विसर्जनीयः॥ ॥

धसामर्थ्यादिह क्विबपि न भवति। तस्मिन् हि सति क्विन्प्रत्ययो यस्मादिति बहुव्रीह्याश्रयणेन कुत्वस्यावर्जनीयतया अनुदक इति निषेधस्य फलाभावा त्। केचित्तु उदकस्पृडिति प्रत्युदाहरन्ति। निषेधसामर्थ्यात्कुत्वं मास्तु क्विप्तु स्यादेवेति तेषामाशयः। षण्णाः। गौणत्वे त्विति। षड्भ्यो लुक् षट्चतुर्भ्यश्चेति च बहु वचननिर्देशात् षडर्थप्राधान्य एव लुङ्नुटौ भवत इति भावः। पिपठिषतेः क्विप्यतो लोपइदन्तत्वान्नस्याद्युपन्तौ पिपठिष्सु इति स्थिते सो हल्ङ्यादिलोपप्र त्ययलक्षणेन पदान्तत्वात्सस्य रुर्भवति। न च रुत्वे कर्त्तव्ये अल्लोपस्य स्थानिवत्त्वं शङ्क्यं। पूर्वत्रासिद्धे तन्निषेधात्॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

सु.
सि.कौ. नुम्विसर्जनीयाः इण्कोरिति पंचमी निर्दिश्यव्यवहितस्याप्राप्तौ वचनं। ष्टुत्वेन पूर्वस्येति। सनः सस्य रुत्वविसर्गयोः कृतयो र्वाशरीति विकल्पात् तत्पक्षे सकारस्तेन शर्व्य
टी.त. वायेसुपः सस्य षत्वं पूर्वस्य ष्टुत्वं। नलादेशप्रत्यययोरिति षः। अपदान्तस्येति निषेधादिति भावः। एवं स्थिते शर्ग्रहणेन न प्रयोजनं किं तु नुम्विसर्जनीयसव्यवा ॥
८८ नुम्विसर्ज्जनीयशर्व्यवायेऽपि। ८।३।५८॥ एतैः प्रत्येकं व्यवधानेऽपि इण्कुभ्यां परस्य सस्य मूर्द्धन्यादेशः स्यात्। ष्टुत्वेन पूर्वस्य षत्वमपि
पिपठीः। पिपठीष्षु प्रत्येकमिति व्याख्यानाद् नेकव्यवधाने षत्वं न। निंस्स्व। निंस्से। नुम्ग्रहणं नुमस्थानिकाऽनुस्वारोपलक्षणार्थमिति व्या
ख्यानान्नेह। सुहिन्सु। पुंसु। अत एव नशाऽरग्रहणेन गतार्थता। रात्सस्येति सलोपे विसर्गः। चिकीः। चिकीर्षौ। चिकीर्षः। रोः सुपीति निय
मान्न विसर्गः। चिकीर्षु। दमेर्डोसिः डित्वसामर्थ्याद्दिलोपः। षत्वस्याऽसिद्धत्वाद्रुत्वविसर्गौ। दोः। दोषौ। दोषः। पद्दन्निति वा दोषन्। दोषः। दोस्सः। दोष्णा
दोषा। विशप्रवेशने। सन्नन्तात् क्विप्। षत्वस्याऽसिद्धत्वात् संयोगान्तलोपः। व्रश्चेति षः। जश्त्वचर्त्वे। विविट्। विविड्। विविषौ। विविषः
स्कोरिति कलोपः। तट्। तड्। तक्षौ। तक्षः। गोरट्। गोरड्। गोरक्षौ। गोरक्षः। तक्षिरक्षिभ्यां ण्यन्ताभ्यां क्विपि तु स्कोरिति न प्रवर्त्तते। णिलोपस्य
स्थानिवद्भावात्। पूर्वत्रासिद्धे न स्थानिवदिति तु इह नास्ति। तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति निषिद्धं॥ तस्मात्संयोगान्तलोप एव
तक्। तग्। गोरक्। गोरग्। स्कोरिति कलोपं प्रति कुत्वस्याऽसिद्धत्वात्। संयोगान्तलोपः। पिपक्। पिपग्। एवं विवक्। दिधक्। पिसगतौ। सुष्टु पे
सतीति सुपीः। सुपिसौ। सुपिसः। सुपिसा। सुपीर्भ्यां। सुपीष्षु। सुपीःषु। एवं सुतूः। तसखण्डने। विद्वान्। विद्वांसौ। विद्वांसः। हे विद्वन्। विद्वांसं। विद्वां
सौ। वसोः सम्प्रसारणं। ६।४।१३१॥ वस्वन्तस्य भस्य सम्प्रसारणं स्यात्। पूर्वरूपत्वं षत्वम्। विदुषः। विदुषा। वसुस्रंस्विति दत्वम्। विद्वद्भ्यामि
त्यादि। सेदिवान्। सेदिवांसौ। सेदिवांसः। सेदिवांसं। अन्तरङ्गोऽपीडागमः सम्प्रसारणविषये न प्रवर्त्तते। अकृतव्यूहा इति परिभाषया। सेदुषः। सेदु
षा। सेदिवद्भ्यामित्यादि। सान्तमहत इत्यत्र सान्तसंयोगोऽपि प्रातिपदिकस्यैव गृह्यते न तु धातोः। महच्छब्दसाहचर्यात्। सुष्टु हिनस्तीति। सुहिन्। सुहिंसौ ८८
सुहिंसः। सुहिन्भ्यां। सुहिन्सु। सुहिन्त्सु। ध्वत्। ध्वद्। ध्वसौ। ध्वसः। ध्वद्भ्यां। एवं स्रत्॥ एषपीत्येव सूत्रं युक्तमित्येके नुम्शर्व्यवायेपीत्येव न्युक्तं सूत्रयितुं शर्ग्रहणेन
विसर्जनीयस्य लाभादित्यन्ये निस्स्वेति। आद्यसकारस्य प्रत्येकं व्यवधानेपि आदे॥ ❁ ॥

88

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षःप्रत्ययावयवत्वाभावान्षत्वंनभवति। नचानादेशप्रत्यययोरित्यनुवृत्त्यभावान्नुम्‌विसर्जनीयेत्यनेनधातुसकारस्यषत्वंस्यादितिवाच्यं। तस्यस्वातंत्र्येणविधायक
त्वानंगीकारात्। अपरांतस्यमूर्द्धन्यः इणकोरितिवत् नुम्‌विसर्जनीय इत्यस्याप्यधिकारसूत्रत्वात्। कर्त्तुमिच्छतिचिकीर्षतिचिकीर्षतेः क्विप्प्रत्ययः। चिकीः। ए
कोचउपदेशइतिसनिग्रहगुहोश्चेतिवासनइडभावेइकोझलितिकित्वाद्गुणाभावेअज्झनगमांसनीतिदीर्घेऋतइतीत्वेरपरत्वेततोद्वित्वेहलादिःशेषःकुहो
श्चुः अल्लोपः सोर्हल्ङ्यादिलोपेपदांतत्वात् र्वोरुपधायाइतिदीर्घः। दोरिति। दाम्यतीतिदोः। संयोगांतलोपइति। नचास्मिन्कर्त्तव्येवहिरंगत्वेनातोलोपस्यासि
द्धत्वंशंक्यं। वहिर्निमित्तापेक्षपदसंज्ञासापेक्षत्वेनसंयोगांतलोपस्यैववहिरंगत्वादितिदिक्। विविडिति। विशेःसनएकाचइतीण्निषेधेहलंताच्चेतिकित्वान्नगुण
भावः। द्वित्वाभ्यासकार्यांतडिति। तक्षूत्वक्षूतनूकरणेइत्यस्मात्क्विप्। गोरक्षतीतिगोरक्। कर्मण्युपपदेवासरूपन्यायेनक्विप्। ऊत्वस्यासिद्धत्वादिति। इतरथा
स्कोरितिकलोपःस्यादितिभावः। पिपगिति। पक्तुमिच्छतिपिपक्। वक्तुमिच्छतिविवक्। दादेरितिघः। एकाचोवशइतिभष्भावः। देग्धुमिच्छतिदिधक्॥ णो
ताः सुतूरिति। सुष्टुनौसतीतिसुतूः। वेत्तीतिविद्वान्। विदेःशतुर्वसुः। अदादित्वाच्छपोलुक्। सार्वधातुकमपिदितिङित्वान्नोपधागुणः। उगित्वान्नुम्। सांतमहत
इतिदीर्घः। संयोगांतलोपस्यासिद्धत्वान्नलोपोनं। वसोः प्रत्ययग्रहणेतदंतग्रहणमित्याह। वस्वंतस्येति। सेदिवानिति। भाषायांसदवसश्रुवइतिलिटः क्वसुः
लिटिधातोरितिद्वित्वं। हलादिः शेषः। अतएकहल्मध्येइत्येत्वाभ्यासलोपौ। वस्वेकाजाद्घसामितीट्। नुम्। सांतेतिदीर्घः। सेदुषइति। ननुतदनुबंधकग्रहणेनातदनु
वंधकस्येति परिभाषयाविदेः शतुर्वसुरित्यस्यैववसोः संप्रसारणंयुक्तं न तु क्वसोः। सत्यं। वसोरुकारानुबंधकरणंक्वसोः सामान्यग्रहणार्थं। उगित्वस्यस्थानि
वद्भावेनापिसिद्धेः। इहगमिप्रभृतिभ्यः क्वसुर्नोदाहृतः। छांदसत्वात्। अतएववैदिकप्रक्रियायांतस्थिवान्जग्मिवान् इत्याद्युदाहर्त्तव्यंनात्रेत्याहुः। कवयस्तुप्रयुं
जते। श्रेयांसिसर्वाण्यधिजग्मुषस्ते। तंतस्थिवांसंनगरोपकंठे इत्यादि। अत्रवदंति। छांदसाअप्येतेपदवारस्यइवक्वचित्भाषायांभवंति। मासश्छंदसीत्यस्यसामान्या
पेक्षज्ञापकत्वाश्रयणात्कथंचित्समाधेयमिति। सुहिन्निति। संयोगांतलोपस्यासिद्धत्वान्नोपधादीर्घः। सुहिन्स्विति। नश्चेतिसस्यवाधुट्। ध्वंसतइतिध्वत्। स्रंसतइति
स्रत्। स्रंसुध्वंसुअवस्रंसने। ध्वंसुगतौचेत्याभ्यांक्विप्। अनिदितामितिनलोपः। वसुस्रंस्वितिदत्वं॥ ॥ छ ॥ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पुंसोऽसुङ्। इतोऽत्सर्वनामस्थान इत्यनुवर्तनादाह। सर्वनामस्थान इति। विवक्षित इति। तेन परमपुमानित्यत्र परत्वादसुङि कृते समासांतो टाजन्तत्वं भवदसुङ एव अकारस्य भवति। परसप्तम्यां तु नैतत्सिध्येत्। सर्वनामस्थानोत्पत्तेः प्रागेव पुम्शब्दोकारस्योदात्तत्वे कृते संनसन धर्मलोह लः स्थाने तद्धर्मलोनुदात्तस्यैवादेशस्य प्रसंगात्। नचोकारस्य कृतोपि स्वरोनंत्यत्वान्निवर्तयिष्यते असुङश्चांत्यत्वात्करिष्यत इति वाच्यं। अंतरंगे स्वरे कर्तव्ये बहिरंगस्यासुङोऽसिद्धत्वादिति भावः। वस्तुतस्तु अकृतव्यूहपरिभाषया अंतरंगपरिभाषापवादत्वात्पर सप्तमीपक्षोपि सूपपादः। एतच्च मनोरमायां स्पष्टं पूर्वं इति। यद्यपुल्लादिवुपाते तुम सुन्निति वक्ष्यति। तथापिपा

पुंसोऽसुङ्। ७।१।८९॥ सर्वनामस्थाने विवक्षिते सुङ् स्यात्। उकार उच्चारणार्थः। बहुपुंसी इत्यत्र उगितश्चेति ङीबर्थं कृतेन पूर्वोङ्म सुन्निति प्रत्ययस्योगित्त्वेनैव नुमसिद्धेः। पुमान्। हे पुमन्। पुमांसौ। पुमांसः। पुंसः। पुंसा। पुम्भ्यां। पुम्भिः। पुंसु। ऋदुशनस्येनङ्। उशना। उशनसौ। उशनसः। अस्य सम्बुद्धौ वा नङ् नलोपश्च वा वाच्यः॥ हे उशनन्। हे उशन। हे उशनः। उशनोभ्यामित्यादि। अनेहा। अनेहसौ। अनेहसः। हे अनेहः। अनेहोभ्यामित्यादि। वेधाः। वेधसौ। वेधसः। हे वेधः। वेधोभ्यामित्यादि। अधातोरित्युक्तेर्न दीर्घः। सुष्ठु वस्ते सुवः। सुवसौ। सुवसः। पिण्डं ग्रसते। पिण्डग्रः॥ पिण्डग्लः। ग्रसु ग्लसु अदने। अदस औ सुलोपश्च। ७।२।१०७॥ अदस औकारोऽन्तादेशः स्यात् सौ परे सुलोपश्च। तदोस्सस्सावितिदस्य सः। असौ। औत्वप्रतिषेधस्साकच्कस्य वा वक्तव्यस्सादुत्वञ्च॥ प्रतिषेधसन्नियोगशिष्टमुत्वन्तदभावेन प्रवर्तते॥ असुकौ। असुकः। त्यदाद्यत्वम्पररू पम्वृद्धिः। अदसौ सेरिति मत्वोत्वे। अमू। जसश्शी आदुत्वं॥ ॥ ॥ ८ टांतरमनुसत्यात्रोक्तमिति बोध्यं। हे पुमन्निति। असंबुद्धाविति तु नोक्तः सांतेति न

दीर्घः। पुंसिति। संयोगांतलोपे मोनुस्वारः। नुमस्थानिकस्यैवानुस्वारस्यापल्लक्षणं नुमविसर्जनीयेति नत्वं। उशनेति। वशेः कनसिः ग्रहिज्येति संप्रसारणं। अस्य संबुद्धाविति। एतच्च वाचनिकं। हरदत्तादयस्त्वाहुः। सोर्डेति वाच्ये अनङ् साविति वचनेन क्वचिदनङ एव श्रवणस्य ज्ञापितत्वादेतत्सिद्धमिति। यद्यपि सोर्डे कृते डित्वसामर्थ्याट्टिलोपे सर्वनामस्थाने चासंबुद्धाविति दीर्घे उशनेत्यनिष्टरूपं प्रसज्यते तथाप्यंगवृत्तपरिभाषया दीर्घो नेति कृत्वा ज्ञापकत्वं संगच्छत इति नैयायिकाशयः। अनेहा वेधा इति। असुन्प्रकरणे नञि हन एह च विधाञो वेध चेति व्युत्पादनादसंतत्वेन दीर्घः। अनेहा कालः। वेधा विश्वसृट्। अदस औ सुलोपश्च अदस इति षष्ठी। तदोः सः सा।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वित्यतः सावित्यनुवर्तनेन तदाह। औकारान्तादेशः स्यात्सौ परे इति। नन्वदस इति यं च मस्यैवास्तु ततः परस्य सोरौकारो विधीयतां त्यदाद्यत्वेन असाविति रूपं सिध्यति। किं सुलो
पविधानेनान्त्यस्वरे भेदः। उदात्तेन सह एकादेशे औकारस्योदात्तत्वात्। मैवम्। असकौ स्त्री इत्यत्रापि प्रत्ययस्थादिति लप्रसंगात्। असुक इति। औत्वाभावे त्यदाद्यत्वं सादु
त्वं। स्त्रियां तु असुका अमुका इत्यमुकी इति च प्रयोगः साधुरेव। एवममुकशर्मेत्यादिरपि। अदकः शर्मेत्यादेरेवन्याय्यत्वात्॥ ॐ॥ एत ईद्बहुवचने॥ पारिभाषिकस्य
बहुवचनस्य ग्रहणे अमीभिरित्यादि सिद्ध्यत्वपि जसि अमी इति न सिध्येत्। न त्वत्र एकारस्य बहुवचनपरता जसि अनोव्याचष्टे॥ बह्वर्थोक्ताविति। विभक्तिकार्ये
प्रागिति। त्यदादीनाम इत्यादिसपादसप्ताध्यायी प्रत्यदसो सेरिति त्रैपादिकशास्त्रस्यासिद्धत्वादिति। कृते तु विभक्तिकार्ये सांतत्वात् उत्वमत्वयोरप्रवृत्तेश्चेति भावः॥
पदितु पूर्वत्रासिद्धमित्यत्र कार्यासिद्धत्वमिष्येत तर्हि। अमू अमुमित्यादि न सिध्येत्। त्यदाद्यत्वपररूपात्प्रागेव उत्वमत्वयोः कृतयोः पश्चान्मुत्वकार्यस्यासिद्धत्व

एत ईद्बहुवचने। ८।२।८१॥ अदसो दात्परस्यैत ईत्स्याद्दस्य च मो बह्वर्थोक्तौ। अमी। पूर्वत्रासिद्धमिति विभक्तिकार्यं प्राक् पश्चादुत्व
मत्वे। अमुम्। अमू। अमून्। मुत्वे कृते घिसंज्ञायां नाभावः। न मु ने। ८।२।३। नाभावे कर्तव्ये कृते च मुभावो नासिद्धः स्यात्। अमुना। अ
मूभ्यां ३। अमीभिः। अमुष्मै। अमीभ्यः। अमुष्मात्। अमुष्य। अमुयोः २। अमीषाम्। अमुष्मिन्। अमीषु॥ इति हलन्ताः पुंलिङ्गाः॥

या अतो गुण इति पररूपे अमो इत्यादिरूपसिद्धिप्रसंगात्। किंच। चर्मवसे चर्मवः। सुपुर्वसु वः। अत्र परत्वात् स्को रितिसलोपे तस्यासिद्धत्वात् हलङ्यादिलोपे उ
कृते रूपं न सिध्यतीति कार्यासिद्धिपक्षो हेय एव। अत्र वदन्ति। सपादसप्ताध्याय्यां विहितं कार्यं प्रति त्रिपाद्यां विहितमसिद्धमिति प्रक्रियाग्रन्थोक्तकार्यासिद्धिपक्षे
मनोरथः अमुमित्यादि न सिध्येदिति केचित्। तन्न। प्रक्रियाग्रन्थोक्ते हि कार्यं प्रति कार्ये कर्तव्ये असिद्धं पूर्वमेव न जातमित्यर्थः। पूर्वत्रासिद्धत्वेऽप्ययमेव फलितो
र्थः। तदुक्तं कैयटेन। यच्छास्त्रमुच्चारितं तस्यासिद्धत्वमशक्यं कर्तुमिति सिद्धवचनातिदेश आश्रीयत इति। तथा चातिदेशेन कार्याप्रवर्तकत्वरूपो सिद्धधर्म
प्राप्तेऽतिदिश्यमानः कार्यासिद्धत्व एव फलति। एवं च मनोरथ इत्यत्र उत्वे कर्तव्ये रेफलोपस्य पूर्वमेवाप्रवृत्तौ रोरुत्वस्याप्रतीघातात् मनोरथसिद्धिरप्रत्युहा। तथा अमु
मित्यादिसिद्धिरिति कार्यासिद्धिपक्षेन काप्यनुपपत्तिरिति। न मु ने इति विषयसप्तमीत्याह नाभावे कर्तव्य इति। अन्यथा घेः परत्वाभावान्नाभावो न स्यादिति भावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु·
सि·कौ·
टी·त·

नन्वेवमपि कृते नाभावे सुपि चेति दीर्घः स्यात् दीर्घप्रतिमुत्वस्यासिद्धत्वात् अत आह। कृते चेति। एतच्च नेरित्यस्य वृत्त्या लभ्यते। एकत्र विषयसप्तमी परत्र तु सत्सप्तमीत्याश्र
यणात्। एवं च न लुम् कृते चेति व्याख्यानं व्यर्थं सन्निपातपरिभाषया सुपि चेति दीर्घस्य समाधेयत्वात्। नन्वधुना नेर्विवरमुनेत्येव वाच्यतां किमनेनासिद्धत्वनिषेधेनेति चे
त्राहुः। नमुने इत्युक्तिर्नेति योगविभागार्था तेन रामः रामेभ्य इत्यादि सिध्यति अन्यथा हि रोरसिद्धतया उकारस्येत्संज्ञा लोपो कथं स्या॥ ॥ ॥
८० त्। न चानुनासिकनिर्देशसामर्थ्यात् इत्संज्ञालोपो प्रतिकृत्वं नासिद्धमिति वाच्यं। नरमूलं रेवरुहीत्यादौ हषि चेत्यस्य व्यावृत्तये अनोरोरित्यत्रानुनासिकस्यैव नि
र्देशेन तत्रैव चरितार्थत्वात्। एवं च स्थानिवत्सूत्रस्यापि प्रवृत्तौ पदत्वाद्धि सर्गो लभ्यते। प्रत्ययः परश्चेत्यादिनिर्देशाच्च हलिंगमिति दिक्॥ इति हलन्ताः पुल्लिङ्गाः
॥ ॥ नहोधः॥ इद्रस्येव तु नोक्तं तथा हि सति नद्धमित्यत्र रदाभ्यामिति नत्वं स्यात्। झषस्तथोरिति च न स्यात्। नहो हस्येति। हाढ इत्यतोऽनुवृत्तेर्लोन्त्यस्येत्यने
न वा हस्यैवादेश इति भावः। झलो झलि परस्य स्कोः संयोगाद्योरन्ते चेत्यतो झलपदान्तग्रहणान्यनुवर्तन्ते नदाहा झलीत्यादि। झलिपरतः पदान्ते वा विद्यमानस्येत्यर्थः। उपानदि

नहो धः।८।२।३४॥ नहो हस्य धः स्याज्झलि पदान्ते च। उपानत्। उपानद्। उपानहौ। उपानहः। उपानड्भ्याम्। उपानत्सु। उत्पूर्वात् स्निह प्री
तावित्यस्मात् ऋत्विगादिना क्विन्निपातनान्नलोपषत्वे। क्विन्नन्तत्वात् कुत्वेन हस्य घः। जश्त्वचर्त्वे। उष्णिक्। उष्णिग्। उष्णिहौ। उष्णिहः। उष्णि
ग्भ्याम्। उष्णिक्षु। द्यौः। दिवौ। दिवः। द्युभ्याम्। गीः। गिरौ। गिरः। एवं पूः। चतुरश्चतस्रादेशः। चतस्रः। चतसृणाम्। किमः कादेशे टाप्। का। के। काः। सर्वा

त्। उपपूर्वान्नहेः संपदादित्वात् क्विप्। नहिवृतीति पूर्वपदस्य दीर्घः। सोर्हल्ङ्यादिलोपे धत्वं जश्त्वचर्त्वे अत्रेदं बोध्यं। सुष्टु अनड्वाहो यस्यामिति बहुव्रीहौ स्वनड्वानिति
पुंवदेव रूपं। केचित्तु गौरादिङीषन्तत्वात् स्वनड्वाही इत्युदाजह्नुः। तदसत्। अनुपसर्जनाधिकारविरोधात्। गीरिति। गॄ निगरणे गृशब्दे इत्यस्माद् क्विप्। ऋत इद्धा
तोरितीत्वे रपरत्वं। वोरुपधाया दीर्घ इति दीर्घः। पूरिति। पॄ पालनपूरणयोः। उदोष्ठ्यपूर्वस्येत्युत्वं। चतस्र इति। इह चतुरनडुहोरित्याम् न भवति। परत्वात् आमं बाधि ८०
त्वा चतस्रादेशे कृते सकृद्गतिन्यायेन पुनस्तस्याप्रवृत्तेः। चतसृणामिति। न तिसृचतसृ इति न दीर्घः। सर्ववदिति। तेन तुल्यमिति वतिः सर्वनाम्नो वृत्तिमात्रे इति।

॥ पुंवद्भावः॥

90

यः सौ। यत्वमिदं स्त्रियामेव परिशेषात्। इदो यः पुंसीति। पुंस्यय् वचनात्। क्लीबे सोर्लुका लुप्तत्वाच्च। एवमिति। सा। ते। ताः। या। ये। याः। एषा। एते। एताः। इत्यादीन्य
र्थः। वागिति। वचेः क्विब् वच्यादिना क्विप्। दीर्घोऽसंप्रसारणं च। चोः कुः। अप्शब्द इति। आप्। ते ईत्वं श्चेति ह्रस्वश्चकारात् क्विप्। अच उपसर्गात्त इत्यतो नुवर्त
नात् हातकारः स्यादिति। दिगिति। क्विन्नन्तत्वात् कुत्वं। षडगकाः प्राग्वदूह्याः॥ अन्यत्रापीति। त्यदाद्युपपदत्वाभावेपीत्यर्थः। त्विडिति। त्विषदीप्तावित्यस्मात् क्वि

यः सौ। ७।२।११०॥ इदमो दस्य यः स्यात् सौ। इदमो मः। इयं। त्यदाद्यत्वं टाप्। दश्चेति मः। इमे। इमाः। इमां। इमे। इमाः। अनया। हलि लो
पः। आभ्याम् ३। आभिः। अस्यै। अस्याः। अनयोः २। आसां। अस्यां। आसु। अन्वादेशे तु। एनां। एने। एनाः। एनया। एनयोः २। ऋत्वि
गादिना स्रजेः क्विन्। अमागमश्च निपातितः। स्रक्। स्रग्। स्रजौ। स्रजः। स्रग्भ्यां। स्रक्षु। त्यदाद्यत्वं टाप्। स्या। त्ये। त्याः। एवं तद् यद् एत
द्। वाक्। वाग्। वाचौ। वाचः। वाग्भ्याम्। वाक्षु। अप्शब्दो नित्यं बहुवचनान्तः। अप्तृन्निति दीर्घः। आपः। अपः। अपोभि। ७।४।४८॥
अपस्तकारस्स्याद्भादौ प्रत्यये परे। अद्भिः। अद्भ्यः २। अपां। अप्सु। दिक्। दिग्। दिशौ। दिशः। दिग्भ्याम्। दिक्षु। त्यदादिष्विति दृशेः क्विन्वि
धानादन्यत्रापि कुत्वं। दृक्। दृग्। दृशौ। दृशः। त्विट्। त्विड्। त्विषौ। त्विषः। त्विड्भ्यां। त्विट्सु। त्विट्त्सु। सह जुषते इति सजूः। सजुषौ। सजु
षः। सजूर्भ्यां। सजूःषु। सजूःषु। षत्वस्यासिद्धत्वाद्रुत्वं। आशीः। आशिषौ। आशिषः। आशीर्भ्याम्। असौ। त्यदाद्यत्वं टाप्। औङः शी। उत्व
मत्वे। अमू। अमूः। अमूम्। अमू। अमूः। अमुया। अमूभ्यां। अमूभिः। अमुष्यै। अमूभ्यां। अमूभ्यः। अमुष्याः २। अमुयोः २। अमूषां। अमुष्यां

पः। अश्च चर्त्वे। सजूरिति। जुषी प्रीतिसेवनयोरित्यस्मात् क्विप्। ससजुषो रुरिति षस्य रुत्वं। र्वोरिति दीर्घः। आशिषाविति॥ ११ अमूषु॥ इति हलन्ताः स्त्रीलिङ्गाः
आशासः क्वावुपसंख्यानमित्युपधाया इत्वं। शासिवसीति षत्वं। असाविति अदसः त्यदाद्यत्वं परत्वात् टाप्। एकादेशस्य पूर्वान्तत्वेन ग्रहणात्। अदस औ सुलोप
॥ श्चा तदोरिति सत्वमित्येके। अन्ये तु परत्वाद्विशेषविधेश्च पूर्वं मोत्वं ततो त्वं नाल्वनयावित्याहुः॥ इति हलन्ताः स्त्रीलिङ्गाः॥ ॥

CC-0. In Public Domain. Digitization by eGangotri



इत्वमिति। वसुस्रंस्विनिरत्वमनडुच्छब्दांते पिप्रवर्तते। पदाधिकारस्थत्वादितिभावः। पूर्वपदस्येवेति। अन्यथाराजपूरुषो वागाशीरित्यादौनलोपकुत्वादिकंया।

स्वमोर्लुक्। इदंस्वनडुत्। स्वनडुही। स्वनड्वांहि। पुनस्तद्वत्। शेषंपुंवत्। दिवउत्। विमलद्युअहः। अ
न्तर्वर्तिनीविभक्तिमाश्रित्यपूर्वपदस्यवोत्तरखण्डे स्यादिपरे संज्ञायामप्राप्तायां। उत्तरपदत्वेचापदादिविधौप्रतिषेधइतिप्रत्ययलक्षण
न्न। विमलदिवी। विमलदिवि। अपदादिविधौकिं। दधिसेचौ। इहषत्वनिषेधेकर्त्तव्येपदत्वमस्त्येव। चकारस्यकुत्वेतु न। वाः वारी। अहल्त्त
त्वान्ननुम्। वारि। चत्वारि। नलुमतेतिकादेशेन। किं। के। कानि। इदं। इमे। इमानि। अन्वादेशेनपुंसकेएनद्वक्तव्यः॥ एनत्। एने। एनानि। एने
न। एनयोः॥ ब्रह्म। सम्बुद्धौनपुंसकानान्नलोपोवावाच्यः॥ हेब्रह्मन्। हेब्रह्म। हेब्रह्मणी। हेब्रह्माणि। रोऽसुपि। अहर्भाति। विभाषाङिश्योः। अह्नी
अहनी। अहानि। अहन्। ८।२।६८॥ अहन्नित्यस्यरुस्यात्पदान्ते। अहोभ्यां। अहोभिः। इहअहः अहोभ्यामित्यादौ। रुत्वरुत्वयोरसिद्धत्वान्न
लोपेप्राप्ते। अहन्नित्यावर्त्यनलोपाभावन्निपात्यद्वितीयेनरुर्विधेयः। ततरुस्याऽपिरुत्वरुत्वेदीर्घाण्यहानियस्मिन्दीर्घोहानिदाघः। इहहल्ङ्या
दिलोपेप्रत्ययलक्षणेनाऽसुपीतिनिषेधाद्रुत्वाभावेरुस्तस्याऽसिद्धत्वान्नान्तलक्षणउपधादीर्घः। सम्बुद्धौतुहेदीर्घाहोनिदाघ। दीर्घाह्णौ॥ दी
र्घाहाणः। दीर्घाह्णा। दीर्घाहोभ्याम्। दण्डि। दण्डिनी। दण्डीनि। स्रग्वि। स्रग्विणी। स्रग्वीणि। वाग्मि। वाग्मिनी। वाग्मीनि। वहुवृत्रहा। वहुवृत्रघ्नी
वहुवृत्रहाणि। वहुपूषाणि। वह्वर्यमाणि। असृजःपदान्तेकुत्वंसृजेःक्विनोविधानात्। विश्वसृडादौन। सृजिदृशोरितिसूत्रेरज्जुसृड्भ्यामितिभा
ष्यप्रयोगात्। यद्वा। व्रश्चादिसूत्रेसृजियज्योःपदान्तेषत्वंकृत्वाऽपवादः। स्रगृत्विक्शब्दयोस्तुनिपातनादेवकुत्वं असृक्शब्दस्तुअस्यतेरौ
णादिकेऋजप्रत्ययेबोध्यः। असृक्। असृग्। असृजी। असृञ्जि। पद्दन्नितिवा असन्। असानि। असृजा। अस्ना। असृग्भ्याम्। असभ्यामि

थासंभवंनस्यादितिभावः। उत्तरपदत्वेचेति। उत्तरशब्देनोत्तरपदमुच्यते। उत्तरपदस्यपदत्वेपदव्यपदेशो कर्तव्यप्रत्ययलक्षणंनभवतीत्यर्थः॥०॥ ९१ ८१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मृ०॥ ऊर्क्। ऊर्ग्। ऊर्जौ। ऊर्ञ्जि। नरजानां संयोगः बहूर्ञ्जि नुम्प्रतिषेधः॥ अन्त्यात्पूर्वो वा नुम्॥ बहूर्ञ्जि। बहुर्ञ्जि वा। कुलानि। त्यत्। त्यद्। त्ये। त्यानि। तत्।
तद्। ते। तानि। यत्। यद्। ये। यानि। एतत्। एतद्। एते। एतानि। अन्वादेशे तु एनत्। बेभिद्यतेः क्विप्। बेभित्। बेभिद्। बेभिदी। धात्वल्लोपस्य स्थानिवत्वाद्
झलन्तत्वान्नुम्। अजन्तलक्षणस्तु नुम् न स्वविधौ स्थानिवत्वाऽभावात्। बेभिदि। ब्राह्मणकुलानि चेच्छिदि। गवाक्शब्दस्य रूपाणि क्लीबेऽर्चागतिभेद
तः। असंध्यवङ्पूर्वरूपैर्नवाऽधिकशतं मतं १ स्वमसुप्सु नव षट्भादौ षट्के स्युस्त्रीणि जश्शसोः। चत्वारि शेषे दशके रूपाणीति विभावय १ तत्राहि
गामञ्चतीति विग्रहे। ऋत्विगादिना क्विन्। गतौ नलोपः। अवङ् स्फोटायनस्येत्यवङ्। गवाक्। गवाग्। सर्वत्र विभाषेति प्रकृतिभावे। गोअक्। गोअग्। पू
र्वरूपे। गोक्। गोग्। पूजायां नस्य कुत्वेन ङः। गवाङ्। गोअङ्। गोङ्। अम्यपि एतान्येव नव। औङः शी भत्वादचइत्यलोपः। गोची। पूजायां तु। गवाञ्ची॥ गो
अञ्ची। गोञ्ची। जश्शसोः शिः शेः सर्वनामस्थानत्वान्नुम्। गवाञ्चि। गोअञ्चि। गोञ्चि। गतिपूजनयोस्त्रीण्येव। गोचा। गवाञ्चा। गोञ्चा। गोअञ्चा। गवा
ग्भ्याम्। गोअग्भ्याम्। गोग्भ्याम्। गवाङ्भ्याम्। गोअङ्भ्याम्। गोङ्भ्याम्। इत्यादि। सुपि तु अञ्चानां पक्षे ङ्णोः कुगिति कुक्। गवाङ्क्षु। गोअङ्क्षु
गोङ्क्षु। गवाङ्षु। गोअङ्षु। गोङ्षु। गवाक्षु। गोअक्षु। गोक्षु। न चेह चयो द्वितीया इति पक्षे। ककारस्य खकारेण वक्ष्यमाधिकं शङ्क्यं। चर्त्वस्या
ऽसिद्धत्वात्। कुक्पक्षे तु। तस्याऽसिद्धत्वाज्जश्त्वाऽभावः। पक्षे चयो द्वितीया इत्यशास्त्रीणि रूपाणि वर्द्धन्त एव। ऊह्यमेषां द्विर्वचनानुनासिकविक
ल्पनात्। रूपाण्यश्वाऽसिभूतानि ५२७॥ भवन्तीति मनीषिभिः १ तिर्यक्। तिरश्ची। तिर्यञ्चि। पूजायां तु। तिर्यङ्। तिर्यञ्ची। तिर्यञ्चि। यकृत्।
यकृती। यकृन्ति। पद्दन्निति वा यकृन्। यकानि। यक्ना। यकृता। शकृत्। शकृती। शकृन्ति। शकानि। शक्ना। शकृता। ददत्। ददती। वा नपुंसकस्य
।७।१।७९॥ अभ्यस्तात्परो यः शता तदन्तस्य क्लीबस्य नुम् वा स्यात्सर्वनामस्थाने। ददन्ति। ददति। तुदत्॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

सु. सि. कौ. टी. त. ८२

एतेन सुधियौ सुधिय इत्यत्रांतर्वर्तिसुपा पदत्वात्यस्ते शाकलप्रसंग इत्याशंकापरास्ता। उक्तरीत्या प्रत्ययलक्षणप्रतिषेधात्। उत्तरपदत्वे किं। राजपुरुष इत्यादौ नलोपो
यथा स्यात्। पक्ष्यति दधीत्यादावपि दधिशब्दस्य पदत्वे प्रत्ययलक्षणं भवत्येव। उत्तरपदस्य समासावयवे रूढत्वात्। दधिसेचाविति। सिंचत इति सेचौ। अन्येप्य
पि दृश्यंत इति विचादधः सेचाविति षष्ठीसमासः। उपपदसमासे तु प्राक्सुबुत्पत्तेः समासविधानात्सेच्शब्दस्य पदसंज्ञा नास्तीति पदादित्वे सकारस्य न स्या
त्। नन्वेवमुपपदसमासे षत्वं दुर्वारमिति चेन्न। अत्राहुः कैयटः। अनभिधानात्सोपपदाद्विजभावः। दधिसेचाविति प्रयोगाभावात्। वस्तुतस्तु पदादा
दिः पदादिरिति पक्षे तु उपपदसमासेपि षत्वं सुपरिहरं। अन्वादेश इति। अस्येवेदं विधीयते न त्वोट्शसादिषु फलाभावात्। स्वमोर्नपुंसकादित्यमो लु
का लुप्ते पि प्रत्ययलक्षणमिह प्रवर्तते वचनसामर्थ्यादित्याहुः। वस्तुतस्तु द्वितीयाटौस्स्विति सूत्र एव एनद्वक्तव्यः। एनं। एनौ। एनानित्यादि तु त्यदा
द्यत्वेन सिद्धं। क्लीबे अमि लुका लुप्तेपि तकारोच्चारणसामर्थ्यादेनदादेशः। नचैवमेतद्धितमित्यत्रापि एनदादेशापत्तिः। द्वितीयाश्रितेति समासे कृते सुपो लुकि
द्वितीयादिविभक्तिपरत्वाभावात्तत्र न तकारोच्चारणसामर्थ्यादेनदादेश इत्युक्तमिति वाच्यं। एकपदाश्रयत्वेनांतरंगे स्वमोर्लुकि चरितार्थत्वेन बहिरंगे सामासिके लुकि तदप्रवृत्तिरि
ति मनोरमायां स्थितं। ब्रह्महणौ इति। इह विभाषाङिश्योरित्यल्लोपो नानसंयोगाद्वमंतादिति निषेधात्। रोसुपि। अहर्भातीति। अहन्निति रुत्वे कृते तु हशि चेत्युत्वप्रसक्त्या।
अहोभातीति स्यादिति भावः। नलोपाभावं निपातयेति। अहन्नित्यत्र नकारांतरं प्रश्लिष्यतां तस्य अहन्शब्दस्य रुरिति व्याख्ययापि रुत्वरत्वयोर्नकारस्यानिकत्वं सेत्स्यतीति
बोध्यं। तदंतस्यापीति। पदाधिकारत्वादिति भावः। नचात्र प्रत्ययलक्षणन्यायेनांतर्वर्तिनीं विभक्तिमाश्रित्य समासैकदेशस्याप्यहन्शब्दस्य पदत्वादुत्वं स्यादेव किमनेन तदंत
विध्याश्रयणेनेति शंक्यं। उत्तरपदत्वे चापदादिविधाविति प्रतिषेधेन प्रत्ययलक्षणाप्रवृत्तेः। सृजिदृशोरिति सूत्र इति। एतच्चोपलक्षणं। मृजेर्वृद्धिरिति सूत्रेपि तत्प्रयोगात्। 92
रज्जुसृड्भ्यामिति। ननु भ्यां प्रत्ययो झलादिरकिन्भवतीति सृजिदृशोरित्यमागमः स्यात्। मैवं। धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्। नचैवमपि अनुदात्तस्य चर्दुपध ८२
स्येति वैकल्पिकः प्राप्नोति तद्विधौ धातोः स्वरूपेणानुपादानादिति शंक्यं। धातोरुच्यमानं कार्यं तत्प्रत्यय एवेति परिष्कारात्। एवं च प्रसृड्भ्यां। प्रसृड्भिरित्यादौ नायं दोषः प्र
सज्यते। एतच्च मृजेर्वृद्धिरिति सूत्रे भाष्ये स्पष्टं। ननु धातोरुच्यमानं कार्यं तत्प्रत्यय एवेति चेत् धियौ धियः। भुवौ। भुव इत्यादावियङुवङौ न स्यातां किंतु क्षिपिपतुः लुलुवतुरित्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दावेवस्यानां। सत्यां वस्तुगन्त्या धातोरेवोच्यच्यमानं कार्यमियङादिकं न भवति। किंतु अंगस्योच्यमानमिति वैषम्यात्। कुत्वापवाद इति। यत्वसूत्रे सजमृजयजेति विशिष्यग्र
हणादिति भावः। असकृच्छब्दस्त्विति। एतच्च क्षीरस्वामिग्रंथे स्पष्टं। ऋजप्रत्यये बोध्य इति। यद्यप्यस्मिन्पक्षे स्वरो भिद्यते तथापि लोके स्वरस्यानादरात् हेतुवा हलकादि
ष्टस्वरः सिध्यतीति भावः। बहूर्जीति। इंदं अंत्यादिति च वाचनिकं। तथा च वार्तिकं। बहूर्जि प्रतिषेधः अंत्यात्पूर्वं नुममेके इति। भाष्ये तु अचः परो यो झल तदंतस्य
नुमित्याश्रित्य प्रथमवार्तिकं प्रत्याख्यातं। एवं च ऊर्जि इत्यत्र नुम् दुर्लभः। किंच। उर्दमाने क्रीडायां च। गर्हे गर्हायामित्यादीनां किंवतानां भाष्यमते नुमानभा
व समेवेति बोध्यं। अल्लोपस्य स्थानिवत्वादिति। कौलुपं न स्थानिवदिति तु नेहाश्रीयते। तस्य काचित्कत्वात्। क्कौ विधिं प्रति न स्थानि
वदित्यस्यैव सार्वत्रिकत्वादिति भावः। जायंते न व सौ तथा ऽमि च न व भ्यांभिसभ्यसां संगमे बहुसंख्यानि न वै वसुप्यपजसि त्रीण्येव तह्रुच्छसि। चत्वार्थेन्यवच
सु कस्य विबुधाः शब्दस्य रूपाणि तज्ज्ञानं तु प्रतिभासि चेन्निगदितुं षाण्मासिकोऽत्रावधिरिति नरपतिसभायां क्वचित् केनचित् प्राचीनेन कृतस्याक्षेपस्य प्रा
चीनैरेव पंडितैः कैश्चिद्गवाक्शब्दस्यार्दिविभाव ये त्यंतेन श्लोकद्वयेन समाधानमुक्तं। तदेव श्लोकद्वयं प्रकृतोपयोगादाह। गवाक्शब्दस्य रूपाणीति। अंच
तेर्गतौ नलोपः पूजायां तु नेत्याशयेनाह। अर्चागतिभेदत इति। आद्यादित्वात्तसिः। पूजार्थगत्यर्थभेदेन असंध्यवङादिभिर्नवाधिकशतं रूपाणि बोध्यानीत्यर्थः।
उक्तसंख्यामेवं व्यवस्थापयति। सुप्सुप्सु नवेति। प्रत्येकमिति शेषः। एवमग्रेपि षट्। त्रीणि चत्वारीत्यत्रापि बोध्यं। रूपाणीति। संकलनया नवाधिकशतंरू
पाणीत्यर्थः। इह चयोर्द्वितीया इति वार्तिकमनाश्रित्य नवाधिकशतमित्युक्तमिति बोध्यं। तदाश्रयणे तु त्रीणि रूपाणि वर्द्धंत इत्यनुपदमेव वक्ष्यमाणत्वा
त्। इत्यादीति। आदिशब्देनान्यान्यपि ज्ञेयानि। तद्यथा। गवाग्भिः। गोअग्भिः। गोग्भिः। गवाङ्भिः गोअङ्भिः गोङ्भिः ङयि। गोचा गवांचे गोअंचे। गोंचे भ्यामि प्राग्वत्
भ्यसि गवाग्भ्यः। गोअग्भ्यः। गोग्भ्यः। गवाङ्भ्यः गोअङ्भ्यः गोङ्भ्यः ङसौ गोचः गवांचः। गोअंचः। गोंचः। भ्यामि भ्यसि च प्राग्वत्। ङसि पंचम्येकवचनवत्। ओसि। गोचो
गवांचोः। गोअंचोः। गोंचोः। आमि। गोचां। गवांचां। गोअंचां। गोंचां। ङौ तु गोचि। गवांचि। गोअंचि। गोंचि। ओसि प्राग्वत्। सुपि तु गवाङ्क्षु। गवाङ्षु। गोअङ्
क्षु। गोअङ्षु। गोङ्क्षु। गोङ्षु। गवाक्षु। गोअक्षु। गोक्षु। ननु भ्यामत्रयेभ्यसद्वये ङसि ङसोरोसद्वये च समानरूपत्वात् कथमिह नवाधिकशतमित्युक्तमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु· सि· कौ· टी· त·

अर्थभेदेनरूपभेदमाश्रित्यतयोक्तमिति। षट्समाधिकंयंपंचयमिति। नवसुमध्येककारस्यत्वैयाप्तिकखकारप्रवृत्त्यारूपषट्काधिकंनष्टंकामित्यर्थः। चर्त्वस्या

सिद्धत्वादितितथाचशास्त्रदृष्ट्या ककारोनास्त्येवकिंतुगकारएवास्तीतिभावः तस्यासिद्धत्वादिति। कुकोअसिद्धत्वादित्यर्थः। वर्द्धतएवेति। एवंचत्रयाणांमा

९३ धिकंसंभवात्सुपिद्वादशरूपाणिभवंतीतिसंकलनयाद्वादशाधिकशतंमतं। ननुनवाधिकशतमितिभावः। अश्चाप्तिभूतानीति। सप्तविंशत्यधिकापंचशती

त्यर्थः। सोनवानामंस्यस्यद्वित्वेअष्टादश। औङिचतुर्णांमध्येपूजार्थानांत्रयाणांत्रद्वित्वेसप्त। अत्वेप्रगृह्यइत्यनुनासिकत्वंनास्तिप्रगृह्यत्वात्। तस्मिन्द्वित्व

स्यानुनासिकस्यचविकल्पात्द्वादश। संकलनयासप्तत्रिंशत्। एवंद्वितीयायामपिविभक्तौसप्तत्रिंशत्। तथाचसंकलनयाचतुःसप्ततिः। टायांचतुर्णांमध्ये

पूजार्थानांत्रयाणांत्रद्वित्वेसप्त तेषांचसप्तानामनुनासिकविकल्पेचतुर्दश संकलनयाअष्टाशीतिं भ्यामिषट्सुरूपेषुभान्पूर्वस्यद्वित्वेद्वादशतेषांद्वा

दशानामपियलोमयट्तियद्वित्वेचतुर्विंश तिं तेषामपिमकारस्यद्वित्वेऽष्टचत्वारिंशत्। संकलनयाषट्त्रिंशदधिकंशतं। भिसिचतुर्विंशतिःभात्

पूर्वस्यविसर्गस्यचद्वित्वात्। संकलनयाषष्ठ्युत्तरशतं। ङयिचतुर्णांमध्येपूजार्थानांत्रयाणांत्रद्वित्वेसप्त अनुनासिकत्वंनास्ति। एकारस्यानणुत्वात्। संकलन

यासप्तोत्तरषष्ठ्यधिकंशतं। भ्यामिप्राग्वदेवाष्टचत्वारिंशत्। तथैवभ्यसिभात्पूर्वस्यचविसर्गयोश्चद्वित्वात्। संकलनयात्रिषष्ठ्यधिकंशतद्वयं। ङसौच

तुर्णांमध्येत्रद्वित्वेसप्त। तेषांतुसप्तानांविसर्गद्वित्वेचतुर्दश॥ संकलनयासप्तोत्तरसप्तत्यधिकंशतद्वयं। भ्यांभ्यसोः प्राग्वदेवप्रत्येकमष्टचत्वारिंशत्। संक

लनयात्रिसप्तत्यधिकंशतत्रयं। ङसाविवङस्ओसआम्ङिओसइत्यत्रापिप्रत्येकंचतुर्दश। चतुर्षुरूपेषुमध्येत्रद्वित्वेसप्तानामप्यंत्यस्यद्वित्वात्। ङौ

तुसप्तानामप्यंत्यस्यालोपप्रगृह्यत्वस्येतिवैकल्पिकानुनासिकप्रवृत्तेः। संकलनयात्रिचत्वारिंशदधिकंशतचतुष्टयं। सुपिशत्यर्थेत्रयाणांकद्वित्वेषट्। तेषांतुखयःशा

९३ रइतिषद्वित्वेद्वादश। उकारस्यानुनासिकेचतुर्विंशतिः संकलनयासप्तोत्तरषष्ठ्यधिकंशतचतुष्टयं। पूजायांतुकुगभावेत्रयाणांङकारद्वित्वेऽनुनासिकेचद्वादश

कुकपक्षेतुचयोद्वितीयादेशेषट्। षट्संङषयोर्द्वित्वेऽनुनासिकेच अष्टचत्वारिंशत्। संकलनयासप्तविंशत्यधिकापंचशतीत्यर्थः। तिरश्चीइति। भत्वादचइत्य

ल्लोपः। अलोपेइतिवचनान्निर्यादेशाभावः। ददिति। पुंल्लिंगेप्ययंभुत्पादितः॥ शतेति॥ ऋदुशनेत्यनङ्॥ शतृप्रत्ययइत्यर्थः॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

आच्छीनद्योः॥ नुमग्रहणमिह चिंत्यं प्रयोजनं नास्त्यस्मात् च्छतुर्वा नपुंसकस्येत्यत्र इदितो नुम्धातोरित्यतो नुवृत्तेरावश्यकत्वया नद्नुनस्त्रापि तत एवानुवर्तते वा ध्रकाभा
वात्। शतुरवयव इति। तुदादेः शस्यांतरं गत्वा च्छत्रादेशकारेण सह एकादेशे कृते अवर्णान्तात्परस्य शतुरिति न भवति। उभयत आश्रयणे नांतादिवदिति
वक्ष्यमाणत्वादिति भावः। भादिति। भादीप्तौ लटः शत्रादेशे कृत्वा च्छपो लुक्। शप्श्यनोर्नित्यं। आरंभसामर्थ्यान्नित्यत्वे सिद्धेऽपि नित्यग्रहणमिहवेत्यधिकारनि
वृत्त्यर्थमन्यथा हि आरंभसामर्थ्यादिह नित्यमुत्तरत्र विकल्प इत्याशंकेत। पचंतीति। कर्तरि शपि। नित्यं नुम्। दीव्यंतीति। दिवादिभ्यः श्यनि नित्यं नुम्। पचंतीदी
व्यंतीति। बहुवचने तु नपुंसकस्य झलच इति नुम् बोध्यः। स्वविति। शोभना आपो यस्मिन् सरसीति बहुव्रीहिः। ऋक्पूरवि तिसमासांते प्राप्ते न पूजनादिति निषे

आच्छीनद्योर्नुम्।७।१।८०॥ अवर्णान्तादङ्गात्परो यः शतुरवयवस्तदन्तस्याङ्गस्य नुम्वा स्याच्छीनद्योः परतः। तुदन्ती। तुदती। तुदन्ति। भान्ती। भा
ती। भान्ति। पचन्। शप्श्यनोर्नित्यं।७।१।८१॥ शप्श्यनोरात्परो यः शतुरवयवस्तदन्तस्य नुम्स्याच्छीनद्योः परतः। पचन्ती। पचन्ति। दी
व्यत्। दीव्यन्ती। दीव्यन्ति। स्ववाः। स्वप्। स्वपी। नित्यात्परादपि नुमः स्नाक्। अप्नृन्निति दीर्घः प्रतिपदोक्तत्वान्न। स्वाम्पि। निरवकाशत्वं प्रतिपदोक्तत्व
मिति पक्षे तु प्रकृते तद्विरहान्नुमेव। स्वाम्पि। स्वपा। अपोभि। स्वद्भ्यां। स्वद्भिः। अर्त्तीत्यादिना धनेरुस्प्रत्ययः धनुः। धनुषी। सान्तेति दीर्घः। नुम्विसर्ज
नीयेति षत्वं। धनूंषि। धनुषा। धनुर्भ्यां। एवं चक्षुर्हविरादयः। पिपठिषतेः क्विप् र्वोरिति दीर्घः। पिपठीः। पिपठिषी। अल्लोपस्य स्थानिवत्त्वा
ज्झलन्तलक्षणो नुम् न स्वविधौ स्थानिवत्त्वाभावादजन्तलक्षणोऽपि नुम्न। पिपठिषि। पिपठीर्भ्यामित्यादि। पयः। पयसी। पयांसि। पयसा
पयोभ्यामित्यादि। सुपुम्। सुपुंसी। सुपुमांसि। अदः। विभक्तिकार्यं। उत्वमत्वे। अमू। अमूनि। शेषं पुंवत्॥ इति हलन्ता नपुंसकलिङ्गाः॥

धः। इत्थं तरूपसर्गेभ्य इति इन्न भवति। तत्राप इति कृतसमासांतस्यानुकरणमिति वक्ष्यमाणत्वात्। निरवकाशत्वं प्रतिपदोक्तत्वमिति। अयमेव पक्षः प्रबल इ
ति। ह्वरिरुपधिवसेर्हन्न इति सूत्रे मनोरमायां स्थितं। धनेरुसिति जनेरुसिरित्यतो रुसिरित्यनुवर्तमाने अर्तिपृवपि यजितनिधनितपिभ्यो नित्यो णादिकेनेत्यर्थः।
धनुर्भ्यामिति। इह वीरुपधाया इत्यादिना दीर्घो न शंक्यः। रेफांतस्य धातुत्वान्न। एवमिति। चक्षेः शिच्च। चाक्षुसिः। चक्षुः। अर्चिशुचिहुसृपी इत्यादिना जुहोतेरिसिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु·
सि·कौ·
टी·त·
८४

आदिशब्देन सर्पिरर्चिरादयो ग्राह्याः। सुपुमांसीति। पुंसोऽसुङिति सूत्रे सुटी तिव्याचक्षाणस्याशयो मते तेजसी धृसि द्वावपि शसि नेतन्सिध्येत्। औङि चातिप्रसंगः। इतो
त्सर्वनामस्थाने इत्यतो नुवृत्तिं पर्यालोच्य सर्वनामस्थाने इति यथाश्रुतं ब्रुवतां तु सर्वेष्टसिद्धिः॥ इति हलन्ताः नपुंसकलिंगाः॥ ॥ ॥ स्वरादिनिपातम
व्ययं। स्वरादयश्च निपाताश्चेति समाहारद्वंद्वः। ननु चादिष्वेव स्वरादीन् पठित्वा प्रकृतं सूत्रं परित्यज्य तद्धितश्चासर्वेत्यादिसूत्रचतुष्टयमपि चादयोऽसत्त्व
इत्यस्मात् ऊर्ध्वं कृतोऽव्ययप्रदेशेषु निपातशब्देनैव व्यवह्रियतामिति चेन्न। स्वस्ति वाचयति स्वः पश्यति स्वः पतति इत्यादौ कर्मादिकारकयोगेन सत्त्ववाचकत्वा

स्वरादिनिपातमव्ययं।१।१।३७। स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः। स्वर्। अन्तर्। प्रातर्। पुनर्। सनुतर्। उच्चैस्। नीचैस्। शनैस्। ऋधक्। ऋते। युगपत्॥
आरात्। पृथक्। ह्यस्। श्वस्। दिवा। रात्रौ। सायं। चिरं। मनाक्। ईषत्। जोषं। तूष्णीं। बहिस्। अवस्। समया। निकषा। स्वयं। वृथा। नक्तं। नञ्। हेतौ। इद्धा। अद्धा। सा
मिवत्। ब्राह्मणवत्। क्षत्रियवत्। सना। उपधा। सनत्। स। नाते। तिरस्। अन्तरा। अन्तरेण। ज्योक्। कं। शं। सहसा। विना। नाना। स्वस्ति। स्वधा। अलं। वषट्। श्रौ
षट्। वौषट्। अन्यत्। अस्ति। उपांशु। क्षमा। विहायसा। दोषा। मृषा। मिथ्या। मुधा। पुरा। मिथो। मिथस्। प्रायस्। मुहुस्। प्रवाहुकं। प्रवाहिका। आर्यहलं। अभीक्ष्णं।
साकं। सार्द्धं। नमस्। हिरुक्। धिक्। अथ। अम्। आम्। प्रताम्। प्रशान्। प्रतान्। मा। माङ्। आकृतिगणोऽयं। च। वा। ह। अह। एव। एवं। नूनं। शश्वत्। युगपत्। भू
यस्। कूपत्। कुवित्। सूपत्। नेत्। चेत्। चण्। कच्चित्। यत्र। तत्र। नह। हन्त। माकिं। माकीं। नकिं। नकीं। आकीं। माङ्। नञ्। यावत्। तावत्। त्वै। द्वै। रै। श्रौषट्। वौ
षट्। स्वाहा। स्वधा। वषट्। तुम। तथाहि। खलु। किल। अथ। सुष्ठु। स्म। आदह। उपसर्गस्वरविभक्तिप्रतिरूपकाश्च। अवदत्तं। अहंयुः। अस्तिक्षीरा।
अ। आ। इ। ई। उ। ऊ। ए। ऐ। ओ। औ। पशु। शुकम्। यथाकथाच। पाट्। प्याट्। अङ्ग। है। हे। भोः। अये। द्य। विषु। एकपदे। युत्। आतः। चादिरप्याकृतिगणः॥

न तेषां निपातसंज्ञा नापत्तेः। चादीनां ह्यसत्त्ववाचिनामेव निपातसंज्ञा न तु सत्त्ववाचिनां। स्वरादीनां तु सत्त्ववाचिनामसत्त्ववाचिनां चाव्ययसंज्ञेष्यत इति व्यवस्थाना
पत्तेश्च। अथ प्राग्रीश्वरान्निपाताः स्वरादीनि। चादयोऽसत्त्वे इति सूत्र्यतां। तथा हि सति स्वरादीनां सत्त्ववचनानामपि निपातसंज्ञा सेत्स्यतीति चेन्न। एवं हि ति
निपात एकाजनाङिति प्रगृह्यसंज्ञा स्वरादीनां मध्ये काचां प्रसज्येत। सो हि स्वरादिषु किमोत्र इत्यणि दानिमद्वावेकाचोतं द्धितो केन्प्रभृतय एकाचः। कृत्प्रत्य

९४

८४

CC-0. In Public Domain. Digitization by eGangotri



याश्चसंति।नसिलादिस्तद्धितएधाच्चैर्थेत इतिसूत्रस्य कृन्मकारसंध्यक्षरांत इतिसूत्रस्यचस्वरादिगणपठितत्वात्।यद्यप्यत्रमूलेस्वरादिषुगणसूत्रद्वय
मिदंनपठितंतथापि प्राचांपाठेत्वलीत्यनुपदमेवस्फुटीकरिष्यते॥स्वरादीनुदाहरति।स्वरिति।स्वरित्यादिना।स्वरितिस्वर्गेपरलोकेच।अंतरित्तिमध्ये।प्रातरिति
प्रत्युषे।पुनरित्यप्रथमेविशेषेच।सनुतरित्यंतर्द्धाने।स्वराद्याःपंचरेफांताः।तेनस्वर्यातिप्रातरत्रेत्यादावुत्वंनभवति।सांतत्वेहिस्यादेवदोषः।उच्चैस्‌मह
ति।नीचैस्‌अल्पे।शनैस्‌क्रियामांद्ये।ऋधक्‌सत्येपि।वियोगशीघ्रसामीप्यलाघवेष्वित्यन्ये ऋतेवर्जने।युगपदित्येककाले।आरात्‌दूरसमीपयोः।पृथक्‌
भिन्ने।ह्यस्‌अतीतेऽन्हि।श्वोऽनागतेऽन्हि।दिवादिवसे॥रात्राविति निशि।सायमितिनिशामुखे।चिरमितिवहुकाले।मनाक्‌ईषत्‌इमावल्पे।जोषंसुखेमौ।
नेच।तूष्णीमितिमौने।वहिस्‌अवसद्‌इमौवाह्ये।समयेतिसमीपेमध्येच।निकषेत्यंतिके।स्वयमित्यात्मने त्यर्थं।वृथेतिव्यर्थे।नक्तमितिरात्रौ।नञ्‌इतिनि
षेधे।हेताविति निमित्ते।इद्धेतिप्राकाश्ये।अद्धेतिस्फुटावधारणयोः।तत्रातिप्रायययोरित्यन्ये।सामीत्यर्द्धजुगुप्सितयोः। वत्।तेनतुल्यंक्रियादिभिर्वि।
हितोयोवतिप्रत्ययःसइहगृह्यते।तदाह।ब्राह्मणवत्।क्षत्रियवत्।इति।प्रत्ययमात्रस्यसंज्ञाप्रयोजनाभावात्प्रत्ययांतमुदाहृतं।यस्तुउपसर्गाच्छं
च्छंदसिधात्वर्थेविहितःसइहनगृह्यते।यदुद्वतोनिवतोयासीत्यत्रसत्वधर्मस्यलिंगसंख्यान्वयस्यदर्शनात्।अत्रवदंति।तद्धितश्चासर्वविभक्तिरित्यत्रतसि
वतीइतिवतिप्रत्ययोपिपरिगण्यते।तच्चनकर्तव्यं।स्वरादिपाठेनैवगतार्थत्वात्।स्वरादिषुवावदितिनपठनीयमिति।सनासनत्‌सनात्‌एतेनित्येउपधेतिभेदाति
रस्‌अंतर्द्धौ।तिर्यक्‌— र्थेपरिभवेच।अंतरेतिमध्येविनार्थेच॥अंतरेणेतिवर्जने।ज्योगितिकालभूयस्त्वप्रश्नशीघ्रार्थेसमर्थेच।कमितिवारिमूर्द्धनिंदा
सुखेषु ।शमितिसुखे।सहसेत्याकस्मिकाविमर्शयोः।विनेतिवर्जने।नानेत्यनेकविनार्थयोः।स्वस्तीतिमंगले।स्वधापितृदाने।अलंभूषणपर्याप्तिश।
क्तिवारणनिषेधेषु।वषट्‌वौषट्‌श्रौषट्‌एतेहविर्दानेअन्यदित्यन्यार्थे।अस्तीतिसत्तायां।उपांश्वित्यप्रकाशोच्चारणरहस्ययोः।क्षमेतिक्षांतौ।विहायसेतिवियदर्थे।दोषेतिरात्रौ।मृषा
मिथ्येत्येतौवितथे।मुधेतिव्यर्थे।इतउर्ध्वक्त्वातोसुन्कसुनः।कृन्मकारसंध्यक्षरांतः।अव्ययीभावश्चेति।गणसूत्रत्रयंअष्टाध्याय्यास्त्रिसूत्र्यासमानार्थकमिहनपठितंचे
दपिप्राचीनगणपाठेतदस्तीतिवोध्यं।वैयर्थ्यंतुपरिहरिष्यते।पुरेत्यविरतेचिरातीतेभविष्यदासन्नेच।मिथोमिथस्‌एतौरहःसहार्थयोः।प्रायसितिवाहुल्ये।मुहुसितिपु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रवाहुकमितिसमानकाले। ऊर्ध्वार्थे च। प्रवाहिकेति पाठांतरं। आर्यहलमिति बलात्कारे। शाकटायनस्तु। आर्येति प्रति बंधे। हलमिति प्रतिषेधविवादयोरित्या
ह। आभीक्ष्णमिति पौनःपुन्ये। साकं सार्द्धमेतौ सहार्थौ। नमस्नतौ। हिरुक् वर्जने। धिग्निंदाभर्त्सनयोः। इत ऊर्ध्वं तसिलादयस्तद्धितएधाचूपर्यंतः। शस्तसी
कृत्वसुचूसुच् आस्थालौ च्व्यर्थाश्चेति। प्राचीनगणपाठे तसीति बोध्यं। तसिलादीत्यादेरयमर्थः। पंचम्यास्तसिलित्यारभ्य एधाच्चेत्येतदंतैः सूत्रैरुक्ता ये तद्धितास्त
दंताः स्वरादिषु बोद्धव्याः। तथा बह्वल्पार्थाच्छस्। प्रतियोगे पंचम्यास्तसिः। तेनैकदिक्। तसिश्चेत्ययमपि तसिः। क्रियाभ्यावृत्तिगणने कृत्वसुच्। द्वित्रिचतुर्भ्यः सु
च्। इण आसिरित्युणादिसूत्रेण विहित आसिः। प्रत्नपूर्वविश्वेमात्थाल् छंदसि संपद्यकर्तरि च्विः। विभाषा साति कार्त्स्न्ये इत्येवमादिनाचेत्येतदंता अपि ग्राह्या इति। अ
स्यैव ध्येयं त्वेच। आम् अंगीकारे। अम् च्छंदसि। किमेत्तिङव्ययेति कास् प्रत्ययादि भिश्च विहिता अपि अ मामो गृह्यंते इत्येके। प्रतन्नयप्रतरां यथा चत संकार
यामास। प्रताम् ग्लानौ। प्रशान् समानार्थे। प्रतान विस्तारे। मा माङ् एतौ निषेधार्थकयोः। आकृतिगणोऽयं इति। तेनान्येपि ज्ञेयाः। तथाहि। कामं स्वाच्छंद्ये प्रकाममित्यपि
प्रायो भूय इति पुनरर्थे। सांप्रतमिति न्याय्ये। परमिति किंत्वर्थे। साक्षात् प्रत्यक्षे। साचि तिर्यगर्थे। सत्यमित्यर्द्धांगीकारे। मंक्षु आशु एतौ शैघ्र्ये। संवत् वर्षे॥ अ
वश्यं निश्चये। उषेति रात्रौ। ओमित्यंगीकारे ब्रह्मणि च। भूरिति पृथिव्यां। भुव इत्यंतरिक्षे। झटिति झगिति तरसा एते शैघ्र्ये। सुष्ठु प्रशंसायां। दुष्ठु निकृष्टे। सु पूजा
यां। कु इति कुत्सिते ईषदर्थ योः। अंजसेति तत्त्वशीघ्रार्थयोः। मिथु इति द्वावित्यर्थे। अस्तमिति विनाशे। स्थाने इति युक्ते। वरमिति ईषदुत्कर्षे। सु दिष्टु क्लृप्तपक्षे ९५
वदिकृष्णपक्षे इत्यादि। चादीनुदाहरति। चेत्यादिना। चेति समुच्चयान्वाचयेतरेतरयोगसमाहारेषु वास्याद्विकल्पोपमयोरिवार्थेपि समुच्चये हेति प्रसिद्धौ॥
अहेति पूजायां। एवेत्यवधारणे। अनवक्लृप्तौ च। एवमित्युक्तपरामर्शे। नूनमिति निश्चये तर्के च। शश्वदिति पौनःपुन्ये नित्ये सहार्थे च। युगपदित्येककाले। भू
यस् पुनरर्थे। आधिक्ये च। कूपदिति प्रश्ने प्रशंसायां च। कुविदिति भूयर्थे प्रशंसायां च। नेदिति शंकायां प्रतिषेधविचारसमुच्चयेषु च। चेदिति यद्यर्थे। चण् अ
यं चेदर्थे णानुबंधस्तु निपातैर्यद्यदिहंतकुविन्नेच्चेच्चणिति विशेषणार्थः। समुच्चयादौ त्वननुबंधकः। कच्चिदिति इष्टप्रश्ने। यत्रेति अनवक्लृप्त्यमर्षगर्हाश्चर्ये ९५
ष्वनावकल्पयामि न मर्षये गर्हे आश्चर्यं वा यत्र भवान् वृषलं याजयेत्। नहेति प्रत्यारंभे। हंतेति हर्षे विषादे अनुकंपायां वाक्यारंभे च। माकिः माकीं नकिरिति त्र

यो ऽपि वर्जने। माङ्। नञ्। औ स्वरादिषूक्तौ। इह पाठस्तु निपातत्वार्थस्तेनाद्युदात्तत्वं फलं सिध्यतीति केचित्। तदसत्। फिट्स्वरेणापीष्टसिद्धेः। अन्ये त्वाहुः सत्त्ववचना
नामप्यव्ययसंज्ञार्थः स्वरादिपाठ इति। तदप्यसत्। लक्ष्मीवाचकस्यापि माशब्दस्याव्ययत्वापत्तेः। तस्मा दुभयत्र पाठश्चिंत्यप्रयोजनः। यावत्तावदेतौ साक
ल्यावधिमानावधारणेषु। साकल्ये। यावत् कार्यं तावत् कृतं अवधौ। यावद्गन्तव्यं तावन्निष्ठा। माने। यावद्दत्तं तावद्भुक्तं। अवधारणे। यावदमत्रं तावद्ब्राह्मणानामंत्रयस्व।
त्वे विशेषवितर्कयोः। ह्वे वितर्के। न्वे इति पाठांतरं। रै दाने अनादरे च। रै करोति दद्यातीत्यर्थः। त्वं रे किं करिष्यसि। श्रौषट् वौषट् वषट् एते हविर्दाने। स्वाहा देवताभ्यो
दाने। स्वधेति पितृभ्यः। श्रौषडादीनामनेकाचामुभयत्र पाठः स्वरभेदार्थः। तुमिति तुंकारे। ग्रहं तु कृत्य हुंकृत्य। तथा हीति निदर्शने। खलु इति निषेधवाक्यालंका
रनिश्चयेषु। किलेति वार्तायामलीके च। अथेति मंगलानंतरारंभप्रश्नकार्त्स्न्याधिकारप्रतिज्ञासमुच्चयेषु। अयं स्वरादावपि। तेन मंगलवाचकस्य सत्त्वार्थत्वेऽप्यव्य
यत्वं सिध्यति। अत एव श्रीहर्षः उदस्य कुंभीरथ शातकुंभजाश्चतुष्कचारुत्विषि वेदिकोदरे। यथाकुलाचारमथावनींद्रजां पुरंध्रिवर्गः स्नपयांबभूव तां।
मिति। अत्र हि अथ स्नपयांबभूवेत्यत्र मंगलं स्नपनं च कारेत्यर्थः। निपातस्तु स्वरूपेणैव मंगलं मृदंगध्वनिवत्। सुष्ठु स्वरभेदार्थं पाठः। स्मेत्यतीतेऽपादपूरणे च। आ
दहेत्युपक्रमहिंसाकुत्सनेषु। आदह स्वधामन्नित्यत्र तु परकाराः आदिति पृथक् पदं पठंति। अ वंदनमिति। इह अवस्यानुपसर्ग
त्वाद् च उपसर्गात् इति न भवति। अहमिति सुबंतप्रतिरूपकमहंकारे। एवं गेयेके नविनीतौ वामिति युवामित्यर्थे। सुबंतप्रतिरूपकमव्ययं। अस्तीति तु
तिङंतप्रतिरूपकं। एवं त्वामस्मि वच्मीत्यत्रास्मीत्यहमर्थे तिङंतप्रतिरूपकं। आहेसुवाचेत्यर्थे। आसेति बभूवेत्यर्थे इत्यादि बोध्यं। अहंयुसिति। अहंशु
भमोर्युस्। यदि तु त्वाहौ साविति मपर्यंतस्याहादेशे शेषे लोपे च कृते निष्पन्नो योऽहंशब्दस्तस्माद्युस्प्रत्ययः क्रियेत तर्हि सुपो लुकि अस्मद्युसिति स्यात्। मदीय इत्यत्रे
व मपर्यंतस्य मादेशे सति मद्युरिति स्यादिति भावः। अस्तिक्षीरेति तिङंतत्वे तु बहुव्रीहिसमासोऽयं नोपपद्यत इति भावः। अ इति संबोधने अधिक्षेपे निषेधे च। आ
इति वाक्यस्मरणयोः। इ संबोधनजुगुप्साविस्मयेषु। ई उ ऊ ए ऐ ओ औ संबोधने। पशु सम्यगर्थे। पशु मन्यमानाः। शुकं शोध्यं। यथाकथाचेत्यनादरे। पाट्
प्रभृतयः सप्त संबोधने। चेति हिंसाप्रातिलोम्यपादपूरणेषु विषु नानार्थौ एकपदे इत्यकस्मादित्यर्थौ। युत् कुत्सायां। आत इति इतोपीत्यर्थे। आकृतिगण इति।

नद्यथायत्नरिति हेतौ। आहोस्विद्विकल्पे। सीमसर्वतोभावे। सुकं अतिशये। अनुकंपितकें। शंवदअंतःकरणेआभिमुख्ये च। वपादपूरणेस्वार्थेच। दिष्ट्ये
त्यानंदे। चटुचाटुप्रियेवाक्ये। कुमितिभर्त्सने। इवेतिसादृश्ये। अद्यत्वेइतिइदानीमित्यर्थे। इत्यादि। अत्रस्वरादिचादीराकृतिगणत्वाविशेषविषयेवांनिपातस्वरइष्ट
त्वेचादिषु। अन्येतुस्वरादिषुस्वरद्वयभाजसूक्ष्मयत्रवोध्याः॥ ॐ ॥तद्धितश्चासर्वविभक्तिः॥ सर्वेति। वचनत्रयात्मिकेत्यर्थः॥ नोत्पद्यतइति। किंत्वेकवचनमेवोत्प
द्यतइतिभावः। तद्धितःकिं। एकः। द्वौ। त्रयः। असर्वेत्यादिकिं। औपगवः। ननुपंचालाः गौरीवरणा इत्यादावतिप्रसंगः। नचलुप्योगाप्रख्यानादितिवदत्तांनेषांत
द्धितांतत्वमंगीकृतमितिनातिप्रसंगइतिवाच्यं। एवमपिपचतिकल्पंपचतिरूपमित्यादावतिव्याप्तेर्दुर्वारत्वादित्याशंक्याह। परिगणनंकर्तव्यमिति। तसिलादय
इति। पंचम्यास्तसिलितिविहितोयस्तसिलतदादयोयाप्येपाशवितिविहितपाशप्प्रत्ययपर्यंताइत्यर्थः। शसप्रभृतयइति। बहुल्पार्थाच्छसिति विहितोयःश

तद्धितश्चाऽसर्वविभक्तिः। १।१।३८॥ यस्मात्सर्वाविभक्तिर्नोत्पद्यतेसतद्धितान्तोऽव्ययंस्यात्। परिगणनंकर्त्तव्यं। तसिलादयःप्राक्पाशपः॥
शसप्रभृतयःप्राक्समासान्तेभ्यः। अम्। आम्। कृत्वोर्थाः॥ तसिवती। नानाञाविति। तेनेह न। पचतिकल्पम्पचतिरूपं। कृन्मेजन्तः। १।१।
३९। कृद्योमान्तएजन्तश्चतदन्तमव्ययंस्यात्। स्मारं। स्मारं। जीवसे। पिबध्यै। क्त्वातोसुन्कसुनः। १।१।४०॥ एतदन्तमव्ययंस्यात्। कृत्वा। उ

सनदादयः समासांता इतिसूत्रपर्यंताः। कृत्वोर्था इति। संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुजिति विहिताः। कृत्व सुजादयस्त्रयः॥ ॥ देतोः। विसृपः॥ 36
तसिवती। इति। नचतसेःपरिगणनंव्यर्थंशसप्रभृतित्वादेवप्रतियोगेपंचम्यास्तसिरित्यस्यलाभादितिवाच्यं। तेनेकदिक्तसिश्चेत्येतदर्थंनयातस्यावश्यकत्वात्तेनतुल्यं
मितिवतिः। नानाञाविति। विनञ्भ्यांनानाञौनसहेतिविहितोपचतिकल्पमिति। अव्ययसंज्ञायांहिसत्यांसुपोलुक्स्यादितिभावः। कृन्मेजंतः। अत्रमेजंतइत्येतत्कृ
त्वात्कृतएवविशेषणं। नतुकृदंतस्याश्रुतत्वा। अन्यथाप्रताम्यौप्रतामः। लवमाचष्टेलौर्णिपिणिलोपेवस्योठिवृद्धौलौंअत्रापिप्रसज्येतेतिभावः। भवतित्वेतत्प्रत्य ८६।
यलक्षणेनकृदंतमेजंतंचश्रूयतेइतितदाह। कृद्योमांतएजंतइति। स्मारंस्मारमिति। स्मरतेराभीक्ष्ण्येणमुल्चेतिणमुल्। वृद्धिः। रपरत्वंनित्यवीप्सयोरितिद्वि ९८
त्वं। जीवसेइति। तुमर्थेसेसेनित्यसेप्रत्ययः। पिबध्यैइति। तुमर्थइत्यनेनैवशध्यैप्रत्ययः पाघ्रेतिपिबादेशः। येनविधिस्तदंतस्येत्यनेनैवसिद्धेसूत्रेअंतग्रहणमौ

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परेशिक प्रतिपत्यर्थां तेनेह न। आधये। चिकीर्षवे। लक्षणप्रतिपदोक्तसंन्निपातपरिभाषाभ्यां सिद्धे तयोरनित्यत्वज्ञापनायेदमिति मनोरमायां स्थितं। एतच्च अव्ययादाप्सुपः
त्यत्र अव्ययात्परस्य सुपो लुगिति यथा श्रुतव्याख्यामभिप्रेत्योक्तं। अव्ययाद्विहितस्येति व्याख्याने त्वाधये इत्यादौ अव्ययसंज्ञायामनिष्टांतरमूह्यं। क्त्वातोसुन्कसुनः। कृत्वेति
समानकर्तृकयोरित्यादिना क्त्वा। उदेतोरिति। उत्पूर्वादिणो भावलक्षणेस्थेणि त्यादिना तोसुन्। विसृप इति। सृपितृदोः कसुन्॥ ॐ ॥ अव्ययीभावश्च। अव्यय
संज्ञः स्यात्। इह लुकि मुखस्वरोपचारयोर्निवृत्तौ चेति परिगणनं कर्तव्यं लुक्युदाहरणं। उपाग्नि। अव्ययादिति सुपो लुक्। मुखस्वरनिवृत्तौ उदाहरणं। उपाग्निमुखः। प्रत्य
ग्निमुखः। मुखं स्वांगमित्युत्तरपदांतोदात्तत्वे प्राप्ते नाव्ययदिक्शब्देत्यादिना प्रतिषेधः। तथा च बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वर एव भवति। पूर्वपदं च समास

अव्ययीभावश्च।१।१।४१। अधिहरि। अव्ययादाप्सुपः।२।४।८२। अव्ययाद्विहितस्यापस्सुपश्च लुक् स्यात्। तत्र शालायां। अथ। विहितविशेष
णान्नेह। अत्युच्चैसौ। अव्ययसंज्ञायां यद्यपि तदंतविधिरस्ति। तथापि। न गोणी। आव्ग्रहणं व्यर्थमलिङ्गत्वात्। सदृशं त्रिषु लिङ्गेषु सर्वासु च विभ
क्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययमिति श्रुतिः। लिङ्गकारकसंख्याभावपरा। वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः। आपश्चैव हलन्
तानां यथा वाचा निशा दिशा १ वगाहः। अवगाहः। पिधानं। अपिधानं॥ इत्यव्ययानि॥ स्त्रियां।४।१।३। अधिकारोऽयं समर्थानामिति यावत्

स्वरेणांतोदात्तं। विसर्गस्थानिकस्य सकारस्य उपचार इति प्राचां संज्ञा तन्निवृत्तावुदाहरणं। उपपयःकारः। उपपयःकामः। इह अतः कृकमीति प्राप्तं सत्वं अनव्ययस्येति
पर्युदस्यते। परिगणनं किं उपाग्न्यधीयान। इह सुवामंत्रित इति परांगवद्भावे न षाष्ठमामंत्रितस्य चेत्याद्युदात्तत्वं यथा स्यात्। परांगवद्भावे हि। अव्ययानां प्रतिषेध
उपसंख्यानः। उपाग्न्यधीयानेत्यादौ मा भूदिति। तथा उपाग्निकमित्यादावव्ययसर्वनाम्नामकच्च न। उपकुंभमन्यः। खित्यनव्ययस्येति वर्तमाने अरुर्द्विषदजंतस्ये
ति विहितो यो मुमंतस्येह प्रतिषेधो न उपकुंभीभूतः। इह अस्य च्वाविति ईत्वस्य प्रतिषेधो न॥ ईत्वविधौ हि अव्ययस्य च्वावित्वं नेति प्रतिषेध उच्यते। दोषाभूतमहः। दिवा
भूता रात्रिः। इत्यत्र मा भूदिति। स्यादेतत्। स्वरादित्वेनैव सिद्धत्वात्तद्धितश्चेत्यादि चतुःसूत्री व्यर्था। तत्र हि तसिलादिस्तद्धित एधाच्पर्यंत इत्यादिना च्व्यर्थाश्च येते
न आसि प्रत्यय मौलादिकं वर्जयित्वा तद्धितश्चासर्वविभक्तिरित्यस्यार्थः संगृह्यते। कृन्मकारसंध्यक्षरांत इत्यनेन कृन्मेजंत इत्यस्यार्थः। संगृह्यते। क्त्वातोसुन्कसु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु॰ सि॰ कौ॰ टी॰ न॰ ८७

नोव्ययीभावश्चेति सूत्रद्वयं तु स्वरूपेणैव पठ्यत इति। अत्राहुः पुनर्वचनमनित्यत्वज्ञापनार्थं। तेन माङ्युक्तलुङ्-मुखस्वरोपचारा इति परिगणनं लभ्यते। पुरा सूर्य-
स्योदेवनोराधेयः। पुराक्रूरस्य विसृपो विरप्शिन्नित्यादिसिद्धये न लोकाव्ययेत्यत्राव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेध इति वक्ष्यते तेन द्व्यनेनैव लभ्यत इति॥ अ
व्ययादाप्सुपः। एष सन्त्रियार्थेति सूत्राल्लुगित्यनुवर्तत इत्याह। लुक्स्यादिति। अव्ययमिति महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थं। नव्येति विविधं विकारं न
गच्छति सत्व धर्मान्लिंगसंख्यादीन्न गृह्णातीति यावत्। तेनाप्युच्चैसो। अप्युच्चैस इत्यादि सिद्धं। अतिक्रान्तप्रधानत्वेन सत्वधर्मपरिग्रहादव्ययसंज्ञाया अत्रा-
भावात्। नन्वेवमप्युच्चैः शब्दस्याव्ययत्वानपायात् सुपो लुक् दुर्वार इत्यत आह। विहितविशेषणादिति। अत्युच्चैसावित्ति। नन्वत्यादयः क्रान्ताद्यर्थे द्वितीयान्ते
न समस्यते। उच्चैःशब्दस्त्वधिकरणशक्तिप्रधान इति कर्मत्वायोगान्न तस्य द्वितीयान्तता। सत्यं। शक्तिप्रधानान्यपि कानिचिदव्ययानि। वृत्तिविषये शक्तिमत्प्र-
धानानि क्वचित् भवन्ति। यथा दोषामन्यमहः। दिवामन्या रात्रिरिति। ततश्च प्रक्रियादशायामुच्चैः शब्दस्य द्वितीयान्तत्वं संभवतीति दिक्। ननु स्व
रादिषु उच्चैः शब्दः पठ्यते तत्र कथं तदन्तस्य प्रसंग इति चेन्न। अन्वर्थसंज्ञयैव तदन्तविधेरपि ज्ञापनात्। अन्यथा उपसर्जने प्रसंगाभावेन तन्निवृत्त्यर्था अन्व
र्थसंज्ञा वैयर्थ्यापत्तेः। तेन परमस्वः परमोच्चैरित्यादौ सत्वधर्मापरिग्रहादव्ययत्वं सिद्धं तदेतदाह अव्ययसंज्ञायां यद्यपीत्यादि। अव्ययादाप्सुपो लुग्वचनान
र्थकं लिंगाभावादिति वार्तिकं मनसि निधायाह। आ वृग्रहणं व्यर्थमिति। सूत्रस्योक्ति संभवस्तु स्त्रियामिति सूत्रे स्त्री समानाधिकरणादिति पक्षं गृहीत्वेति बोध्यः। स
च नस्थितः। भूतमियं ब्राह्मणीत्यादावतिव्याप्तेः। यदि तु आम इति सूत्रानंतरं सुपो धातुप्रातिपदिकयोः अव्ययादिति सूत्र्यते तदा सुवृग्रहणमपि व्यर्थं सुप इत्यनुवृ
त्तिसंभवादिति नव्याः। अलिंगत्वे आथर्वणप्रणवविद्यागतश्रुतिविरोधमाशंक्याह। सदृशमिति। एतेषु यन्न व्येति किं तु सदृशं एकप्रकारं तदव्ययमिति योजना
। यद्वा। यस्मान्न व्येन्ति तदव्ययं। लिंगकारकेति। विभक्तिवचनशब्दो संख्याकारकपरौ विनिभावः। यद्यप्यव्ययीभावस्य लिंगसंख्याकारकयोगोस्ति तथापि वचनादव्य ८७
यत्वं। अव्ययविशेषकार्यांतरमाह। वष्टीति। भागुरिराचार्यः। आपं चैवेति। वष्टीत्यनुषज्यते। यथा वाचेति। परिगणनमिदमित्येके। अन्ये तूदाहरणमात्रमित्याहुः
॥ ॥ वगाह इति। अपिनासाहचर्यादादेरवाकारो लुप्यते नान्त्य इति भावः॥ इत्यव्ययानि॥ ॥

97

CC-0. In Public Domain. Digitization by eGangotri

अजाद्यतः। अजशब्दः आदिर्यस्येति बहुव्रीहिः। अत च आदिर्यस्येति तु नार्थः। ऋचीति निर्देशात्। गणपाठसामर्थ्याच्च। अदिति न स्वरूपग्रहणं। संख्याया इति लिंगात्
अजादिभिः पृथक्पाठसामर्थ्याच्च। इह ङ्याप्प्रातिपदिकादित्यधिकारेपि ङ्यापो न संबध्येते। इहैव तयोर्विधेयत्वात्। अपि तु प्रातिपदिकमेव। तच्चाकारेण वि
शिष्यते विशेषणत्वेन च तदंतत्वलाभः। तदाह। अजादीनामकारांतस्य चेति। सूत्रे अत इति षष्ठी तदर्थश्च वाच्यवाचकभावः। स्त्रियामिति तु धर्मप्रधानो निर्देश इत्याश
येनाह। वाच्यं यत्स्त्रीत्वमिति। एतच्च लिंगात्प्रातिपदिकार्थ इति पक्षाभिप्रायेणोक्तं। कस्माद्भवतीत्याकांक्षायां सन्निधानादजादिभ्योऽकारांताच्चेति बोध्यं। इकोय
ण्चीत्यत्र कस्मादचि पर इत्याकांक्षायामिक इति यथा। टापः पकारः स्वरार्थः। औङ आपः। आङि चापः। याडापः। इत्यादौ सामान्यग्रहणार्थश्च तदविघातार्थष्टकारः। अवि

अजाद्यतष्टाप् ४।१।४ अजादीनामकारान्तस्य च वाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्। अजाद्युक्तिर्ङीषो ङीपश्च बाधनाय। अजा। अतः खट्वा। अजा
दिभिः स्त्रीत्वस्य विशेषणान्नेह। पञ्चाजी। अत्र हि समासार्थसमाहारनिष्ठं स्त्रीत्वं। अजा। एडका। अश्वा। चटका। मूषिका। एषु जातिलक्षणो॰
ङीष्प्राप्तः। बाला। वत्सा। होडा। मन्दा। विलाता। एषु वयसि प्रथम इति ङीप्प्राप्तः। सम्भस्त्राजिनशणपिण्डेभ्यः फलात्॥ सम्फला। भस्त्रफला। ङ्या
पोरिति ह्रस्वः। सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात्॥ सत्पुष्पा। प्राक्पुष्पा। प्रत्यक्पुष्पा। शूद्रा चाऽमहत्पूर्वा जातिः। पुंयोगे तु शूद्री। अमहत्पूर्वा
किं। महाशूद्री। क्रुञ्चा। उष्णिहा। देवविशा। ज्येष्ठा। कनिष्ठा। मध्यमेति पुंयोगेऽपि। कोकिला जातावपि। मूलान्नञः। अमूला। ऋन्नेभ्यो ङीप्। कर्त्री॥

सूक्ते हि तदनुबंधपरिभाषया औङ आप इत्यादावपि गृह्येत ङाप् चापोऽनुग्रहणं न स्यात्। ननु च तत इत्येव सिद्धे अजादिग्रहणं व्यर्थं। न च क्रुंचा उष्णिहेत्यादिषु हलंतत्वाद
प्राप्ते विध्यर्थं तदिति वाच्यं। तथा सति क्रुंचेत्यादिरेव गृह्येत न त्वजादिरतो व्याचष्टे। अजाद्युक्तिर्ङीषो ङीपश्चेति। खट्वेति। खट्टाकांक्षायां। अशूप्रुषिलटिखटिकणिविशिभ्यः
क्वन्। न चाचेतनानां खट्वादिशब्दानां कथं लिंगव्यवस्थेति चेत्। उच्यते। लोकप्रसिद्धं स्तनाद्यवयवसंस्थानविशेषात्मकं लिंगं न व्याकरणे आश्रीयते दारानित्यादौ नत्व
भावप्रसंगात्। तटस्तटी तटमित्यादौ यथायथं लिंगत्रितयनिबंधनकार्याणामसिद्धिप्रसंगाच्च। किंतु स्वाभाविकमेव लिंगत्रयं। न च केवलान्वयि। अयमर्थ इयं व्यक्तिरिदं व
स्त्विति शब्दानां सर्वत्र प्रतिवद्धप्रस रत्वात्। तत्र कश्चिच्छब्द एकस्मिँल्लिंगे शक्तः कश्चिन्द्वयोः कश्चित्त्रिष्विति लिंगानुशासनकारादिभ्यो निर्णेयं। कुमारप्रासणादिशा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्वास्तु लौकिकपुंस्त्वविशिष्टे शास्त्रीये पुंस्त्वे शक्ताः। लौकिकस्त्रीत्वविशिष्टे च शास्त्रीयस्त्रीत्वे। कथमन्यथा कुमारी कुमार इत्यादयः प्रयोगा व्यवतिष्ठेरन्। करेणुरिभ्यां स्त्री
नेभे इत्यमरस्याप्ययमेवार्थः। नन्वेवं पशुनेति पुंस्त्वं विवक्षितमिति मीमांसकोद्घोषः कथं योज्यः। पारिभाषिकस्याव्यावर्तकतया न हि विवक्षायाः किंचित्करत्वात्। लौकिकस्य तु
लिंगस्य पशुशब्दात्प्रतीतेरिति चेत्। अत्राहुः। छागो वा मंत्रवर्णादिति षष्ठांत्याधिकरणन्यायेन पुंस्त्वस्य नियमो बोध्यः छागशब्दस्य लौकिकपुंस्त्वविशिष्टे पारिभाषिके
शक्तत्वादिति तच्च जातिरस्मिन्नित्येके। उक्तं च हरिणापि स्तोजातयऽप्येवैताः। केषांचित्समवस्थिताः। अविरुद्धा विरुद्धाभिर्गोमनुष्यादिजातिभिः। भाष्ये तु प्रकारांतरमुक्तं। सं
स्त्यानप्रसवौ लिंगमास्थेयौ स्वकृतांततः। संस्त्यानेः स्त्यायतेर्ड्रट् स्त्री सूतेः सप् प्रसवे पुमान्। उभयोरंतरं यच्च तदभावे नपुंसकमिति। अस्यायमर्थः। संस्त्यानं स्त्री सत्वरजस्तमो
लक्षणानां गुणानामपचयः प्रसवो गुणानामुपचयः। सप् पुमान्। सूतेर्द्धातोः सप् सकारस्य पकारादेश इत्यर्थः। औणादिको मस्तुन्प्रत्ययो ह्रस्वश्च बाहुलकादिति
कैयटः। सुङोङ्मसुन्निति माधवः। तयोरुपचयापचययोरभावे सति यदुभयोरंतरं सदृशं तन्नपुंसकं। नभ्राण्नपादिति निपातनादिति भावः। तथा च स्थितिमात्रं नपुं
सकं। अत एवाविर्भावतिरोभावयोरपि स्थितिसामान्यविवक्षासंभवान्नपुंसकं लिंगं सर्वनाम्नेति सिद्धांतः। स्त्री पुमान्नपुंसकमिति शब्दाश्च शुक्लादिशब्दवद्धर्मे धर्मि
णि च वर्तंते। स्वकृतांततः इति वैयाकरणसिद्धांत इत्यर्थः। कृतांतो यमसिद्धांतदैवत्वकर्मसु इत्यमरः। पंचाजीति। पंचानामजानां समाहार इति तद्धितार्थेत्यादिना द्विगुः। अकारांतो
त्तरपद इति स्त्रीत्वे द्विगोरिति ङीप्। न चात्र प्रत्ययविधौ तदंतविधिविरहाद् द्विगुटापो प्रवृत्तौ ङीवेव स्यादिति वाच्यं। अमहत्पूर्वग्रहणेन अनुपसर्जनाधिकारेण च स्त्रीप्र
त्ययेषु तदंतविधिज्ञापनात् टाप्प्राप्तेः सत्वात्। समासार्थसमाहारनिष्ठमिति। नन्वजहत्स्वार्थायां वृत्तौ समाहारोप्यजाद्यर्थ एवेति चेत्। मैवं। तथापि तस्य पदांतरसमभिव्याहा
रापेक्षया बहिरंगत्वात्। टाब्विधेस्त्वंतरंगे चरितार्थत्वात्। कथं तर्हि परमाजेति चेत्। प्रागुत्पन्नस्यैव टापस्तत्र श्रवणात्। अत्यजानिरजेत्यत्र तु अदंतं प्रत्युक्तष्टाविति चे हि न
च पंचाजीत्यत्रापि तथास्त्विति वाच्यं। द्विगोरिति ङीपा बाधितत्वात्। चटकेति। न चात्र क्यस्यादिती कारः शंक्यः। चटकाया ऐरगिति लिंगादिहैव निपातनात्। द्वात्तर प्रवृत्तेः ॥ ९८
एवं च क्षिपकादिषु चटकेति पठनं नावश्यकमिति न्यासः। मूषिकेति। वृश्चिकृषोः किकन्नित्यधिकारे मुषेर्दीर्घश्चेति किकन्। इकारमध्यो मूषिकशब्दः। यस्तु मूषस्ते
य इति दीर्घोपधास्तस्त्रायां कुनि मूषकशब्दो माधवेनोक्तस्तेनोप्ययं टाप्। प्रत्ययस्थादिती त्वं तु विशेषः। केचित्तु कुन्नंतो सौ अजादिगणे पाठं न प्रयुंक्ते गणेन न पाठस्य जाति

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्षणङीषूबाधनार्थत्वात्संज्ञायाश्च जातित्वात्। तथा चादन्तत्वादेव कुन्तला दृष्टापुसिध्यतीत्याहुस्तच्चिन्त्यं। व्याघ्रीत्यादिवत्संज्ञात्वेपि जातित्वानपायात्। भस्त्रफलेति। भस्त्रेव फलानि यस्या इति विग्रहः। ङ्याप्योरिति। एतच्च फलनिष्पन्नादिनिधानतो माधवग्रंथे स्थितं। पाककर्णेत्यत्र भाष्ये तु दीर्घ एव दृश्यते। सदच्कांडेति सत्काण्डेति पाठो नादर्तव्य इति ध्वनयन्नुदाहरति। प्रत्यक्पुष्पेति। अत्र नव्याः संभस्त्रेत्यादिवचनद्वयं मूलान्नञ इति वक्ष्यमाणं च पाककर्णेत्यनेन प्राप्तस्य ङीषो निषेधार्थं। तत्रैव सूत्रे भाष्ये पठितमपि फले विशेषाभावादिहैव ग्रंथकारैः पठितं। न चैतावता ऽजाद्यन्तर्गणसूत्राणीति भ्रमः कार्यस्तथात्वे मानाभावात् किंतु वार्त्तिकान्येवमानीत्याहुः। शूद्रा चेति। शूद्रशब्दष्टापमुत्पादयति जातिश्चेत्। महत्पूर्वस्तु न जातिश्चेदित्तीहापि संबध्यते। तेनेमहत्ती शूद्रा महाशूद्रेति भवत्येव पुंयोगे त्विति। पुंयोगश्च दांपत्यरूप एवेति न नियमः। किंतु जन्यजनकभावोपि गृह्यते। तथा च स्मृतिः। वैश्यात्शूद्र्यां तु राजन्यान्माहिष्यो ग्रौ सुतौ स्मृताविति। महाशूद्रीति। आभीरी तु महाशूद्री जातिपुंयोगयोः समेत्यमरः। इह महत्पूर्वेतिव्यर्थं। म

उगितश्च। ४। १। ६। उगिदन्तात्प्रातिपदिकात्स्त्रियां ङीप्स्यात्। भवन्ती। पचन्ती। शप्श्यनोर्नित्यमिति नुम्। उगिदचामिति सूत्रेऽचग्रहणेन धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेवेति नियम्यते। तेनेह न। उखास्रत्। ह्लिप्। अनिदितामिति नलोपः। पर्णध्वत्। अञ्चतेस्तु स्यादेव। प्राची। प्रतीची।

हाशूद्रशब्दो हि समुदित एवाभीरत्वजातौ वर्तते। तत्रावयवस्यानर्थकतया शूद्रशब्दार्थसमवेतस्त्रीत्वाभावेन टापः प्रसक्त्यभावात्। न च तदन्तविधिज्ञापनाय तदिति वाच्यं। अनुपसर्जनाधिकारेणैव तदन्तविधिज्ञापनादिति दिक्। अत्र नव्याः शूद्रा चेत्यादिवचनमजाद्यत इति सूत्रस्थं वार्त्तिकमेव न त्विदं गणसूत्रमित्याहुः। क्रुंचेत्यादिस्त्रयोमीहलंता इत्येके। भाष्ये तु कुंचा नाऽलभेत। उष्णिहककुभाविन्यादिप्रयोगमुदाहृत्याऽदंता अपि स्त्रीकृताः। पचाद्यचाऽगुपधलक्षणेन कप्रत्ययेन यथासंभवमदंतत्वात्। पुंयोगेपीति। यदा ज्येष्ठादयः प्रथमजाता दौ वर्तंते तदा अदंतत्वादेव टापूसिद्धः। यदा तु ज्येष्ठस्य स्त्रीत्यादिविवक्षा न तदा पुंयोगलक्षणो ङीष् प्राप्तः सोप्यनेन बाध्यत इति सूचयितुमपिशब्दः। मूलान्नञः। नञः किं। शतमूली। अमूलेति ओषधिजातिरियं॥ ॥ उगितश्च। उगिच्छब्देन प्रातिपदिकं विशेष्यते विशेषणेन तदंतविधिः॥ न च प्रत्ययविधौ प्रतिषेधः शंक्यः। अनुपसर्जनादित्यनेन स्त्रीप्रत्ययेषु तदंतविधिरस्तीति ज्ञापनात् उगिदूर्णग्रहणवर्जमिति येन विधिरिति सूत्र एवोक्तत्वाच्चेत्याशयना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· उगिदंतादिति। तत्रोगिन्प्रातिपदिकं प्रत्ययश्चेति द्विविधं संभवति। आद्ये उगिदंतो भवंतं महांतं चातिक्रांता अतिभवती अतिमहती इत्युदाहरणं। सर्वादिगणे भवतु इति पाठाद्भ
टी·त· वच्छब्दस्योगित्वव्यपदेशः। महच्छब्दस्य तु शतृवद्भावात्। न चैवं व्यपदेशिवद्भावोऽप्रातिपदिकेनेति निषेधात्केवलाभ्यां भवन्महच्छब्दाभ्यां ङीप् न स्यादिति वाच्यं। प्रा
९९ तिपदिकाप्रातिपदिकसाधारणेन शब्दमात्रमुगित्पदाभिधेयमिति उक्तनिषेधाप्रवृत्तेरित्याशयेनोदाहरति। भवंती इति। द्वितीयमुगिदंतमुदाहरति। पचंती इ
ति पचेर्लटः शतरि कर्तरि शपा। यदि तु सर्वादिगणे भवतु इति उगिन्न पठितः सभाने ईडवतुरिति व्युत्पाद्यते तदा भवतीति द्वितीयोगिदंतस्याप्युदाहरणं भवत्येव। शत्रं
तात्तु भवतेर्ङीपि शप्श्यनोर्नित्यमिति नुमा भवंती। उखास्रदित्यादि ।उखायाः स्रंसते पर्णेभ्यो ध्वंसते। स्रंसु ध्वंसु अवस्रंसने। वसुस्रंस्विति दत्वं॥ ः ॥ वनोरच।

वनोरच।४।१।७। वन्नंतात्तदंताच्च प्रातिपदिकात्स्त्रियां ङीप् स्यात् रश्चांतादेशः। वनिति ङ्वनिप्क्वनिब्वनिपां सामान्यग्रहणं। प्रत्ययग्रहणे यस्मा
त्स विहितस्तदादेस्तदंतस्य ग्रहणं। तेन प्रातिपदिकविशेषणात्तदंतात्तदंतमपि लभ्यते। सुत्वानमतिक्रांता अतिसुत्वरी। अतिधीवरी। शर्वरी। वनो न ह
श इति वक्तव्यं॥ हशंताद्धातोर्विहितो यो वन् तदंतात्तदंतान्ताच्च प्रातिपदिकान्ङीप्रश्च नेत्यर्थः। ओणृ अपनयने वनिप्। विड्वनोरित्यात्वं। अवावा ब्राह्मणी।
राजयुध्वा। बहुव्रीहौ वा॥ बहुधीवरी। बहुधीवा। पक्षे डाब्वक्ष्यते। पादोऽन्यतरस्यां।४।१।८। पाच्छब्दः कृतसमासांतस्तदंतात्प्रातिपदिकात्ङी
ब्वा स्यात्। द्विपदी। द्विपात्॥ ॥ (( वन्निति प्रत्ययेन तदंतं प्रातिपदिकं गृह्यते। वन्नंतेन लधिकृतप्रातिपदिकविशेषणात्तदंतविधिरित्याशये
नाह। वन्नंतात्तदंताच्चेति। येन विधिस्तदंतस्येत्यत्र स्वं रूपमिति सूत्रात्स्वमिति अनुवर्त्य स्वस्य चेति व्याख्यानादुभयं लभ्यत इति भावः। यदि तु वन्नंतमेव व्यपदेशिवद्
भावेन वन्नंतांतमिति उच्यते तर्हि येन विधिरित्यत्र स्वमित्यनुवर्त्य स्वस्य चेति न व्याख्येयं। न चात्र व्यपदेशिवद्भावोऽप्रातिपदिकेनेति निषेधः शंक्यः। तस्य प्रत्ययमात्र
विधिविषयत्वात्। वन्नंतस्य वस्तुतः प्रातिपदिकत्वेपि सूत्रे गृहीतस्य वन इत्यस्य प्रातिपदिकत्वाभावाच्चेत्याहुः। सामान्यग्रहणमिति। सूत्रे वन इत्यनुबंधरहितस्य ग्रह ९९
णा तदनुबंधपरिभाषा नोपतिष्ठत इति भावः। वन्ग्रहणे वन्नंते तवन्नंतांतं च कथं लभ्यत इत्याशंकायामाह। प्रत्ययग्रहणे इत्यादि। तेनेति। व
न्नंतेनेत्यर्थः। तदंतांतमपि लभ्यत इति। स्त्रियामित्यधिकारे ग्रहणवता प्रातिपदिकेनेति निषेधो न प्रवर्तते। अमहत्पूर्वेत्यादिज्ञापकादिति भावः॥ अन्ये त्वाहुः ॥

99

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूत्रेगृहीतस्यैवनञ्त्वस्यप्रातिपदिकत्वेनाश्रितत्वात् ग्रहणं वर्ततेतिनिषेधशंकैवनास्तीतिसुत्वानमिति। सुयजोर्ङ्वनिप्। अत्वादयः क्रांताद्यर्थे इति समासः। अतिधी
वरीति इंधातेरन्येभ्योपिदृश्यते इति क्वनिप्। धुमास्थेतीत्वं। भाष्ये तु ध्यायतेः क्वनिपि संप्रसारणमिति स्थितं। नस्वरेफारेशो कृतेप्येकदेशविकृतस्यानन्यत्वाल्लोपो न इति
प्राप्नोति। अनो नकारांतविशेषणत्वात्तु न भवतीति श्वयुवमघोनामित्यत्रैव व्युत्पादितं। शर्वरीति। शृधातोरन्येभ्योपीत्यनेनैव वनिप् गुणे कृते रपरत्वे हशंतात् परत्वेपि हशंता
द्विहितत्वाभावान्ङीब्रयोरत्र निषेधो ना। वनो न हश इति अबहुव्रीहावित्यर्थोयमारंभः। बहुयज्वेत्यादौ त्वनो बहुव्रीहेरिति ङीपि निषिद्धे रेफस्याप्यप्रवृत्तेः राजयुध्वेति
राजानं योधितवतीराजनि युधि कृञ्ज इति। ङ्वनिप्। बहुव्रीहौ वेति। अन्यतरस्यामिति योगविभागादिदं लभ्यते न त्वपूर्ववचनमिति वक्ष्यते। बहुधीवरीति। बहवो
धीवानो यस्यां नगर्यामिति विग्रहः। पक्षे डाविति। डाबुभाभ्यामिति सूत्रेण। तथा च द्विवचने बहुधीवर्यौ। बहुधीवानौ। बहुधीवे इति रूपत्रयं भवतीति भावः। द्विपा
दिति। द्वौ पादौ यस्या इति बहुव्रीहौ संख्यासुपूर्वस्येति पादशब्दस्यांत्यलोपः। ङीपि भत्वात् पादः पत्॥ ॐ ॥ टाबृचि। पूर्वेण प्राप्तस्य ङीपोपवादः॥ यद्यपि पदंव्यवसि

टाबृचि। ४।१।९॥ ऋचि वाच्यायां पादन्तात् टाप् स्यात्। द्विपदा ऋक्। एकपदा। न षट्स्वस्रादिभ्यः। ४।१।१०॥ पञ्च। चतस्रः। पञ्चेत्यत्र नलोपे कृतेऽपि ष्णा
न्ता षडिति षट्संज्ञा प्रतिनलोपः सुप्स्वरेति नलोपस्याऽसिद्धत्वान्न षट्स्वस्रादिभ्य इति न टाप्॥ मनः। ४।१।११॥ मन्नन्तान्न ङीप्। सीमा। सीमानौ

अनो बहुव्रीहेः। ४।१।१२॥ अन्नन्ताद्बहुव्रीहेर्न ङीप्। बहुयज्वा। बहुयज्वानौ॥

तत्रणस्यानलक्ष्मांघ्रिवसुवितिकोशात् पादसमानार्थ कः।/पदशब्दोस्तीति तेनैव द्विपदा एकपदेति रूपं सिध्यति। तथापि ऋचि वाच्यायां द्विपदी हि पादिति प्रयोगनिवृत्तये सू
त्रारंभोयमावश्यकः। असिद्धत्वादिति। एतच्चासिद्धत्वोपवर्णनं कार्यकालपक्षएवोपयुज्यते न तु यथोद्देशपक्षे सकृत् कृतायाः संज्ञायाः सर्वार्थत्वेन तस्याः पुनरपेक्षाभावात्
न च पंचन्शब्दं तस्य कृतायामपि संज्ञायां पंचेत्यत्र तस्य न कृतेति शंक्यं। एकदेशविकृतस्यानन्यत्वादित्याहुः। तदसत्। एकदेशविकृतस्योपसंख्यानं हि स्थानिवदादेशो
नल्विधाविति प्रत्याख्यातं तच्चाल्विधौ न प्रवर्तत एवेति ।यथोद्देशपक्षेप्यसिद्धत्ववर्णनस्य युक्तत्वात्। न ङीविति। पूर्वसूत्रान्नेत्यनुवर्तत इति भावः॥ ॐ ॥ अनो
बहुव्रीहेः। ननु राजयुध्वेत्यादिसिद्धये अवश्यवक्तव्येन वनो न हश इत्यनेनैवेष्टसिद्धेः। किमनेन सूत्रेण। मैवं। अन्नंताद्बहुव्रीहे र्डाबुभाभ्यामिति डाब्विधानार्थमे तत्सूत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्यावश्यारब्धव्यत्वात्।तथाचानेनङीपि निषिद्धेतत्संनियोगेनप्राप्तो वनोर चेतियोरेफः सोपिदुर्लभएवेतिवनोनहश्चइतिवार्तिकमवहुव्रीत्यर्थमितिफलितं
वहुयज्वानाविति।नसंयोगादितिनिषेधान्नायमुपधालोपी।तेनात्रअनउपधालोपिनइतिवक्ष्यमाणोविकल्पोनप्रवर्तते॥ ॥डाबुभाभ्या।उभाभ्यांग्रहणंव्यर्थ
मंनंतानंतयोरनुवृत्त्यैवतत्फलसिद्धेरित्येके।उभयोरप्यनुवृत्तिसूचनायतद्ग्रहणमावश्यकमन्यथासंनिहितस्यान्नंतस्यैवानुवृत्तिरितिशंकास्यादित्यन्येऽन
नुनिषेधडापोर्वचनसामर्थ्यात्पर्यायःसिध्यतिननु कि मन्यतरस्यांग्रहणेन।सत्यंअन्यतरस्यामितियोगोविभज्यते।तत्रमनइतिनिवृत्तं।अनोवहुव्रीहे ङीब्वा
स्यात्।पूर्वेणैवडापिसिद्धेपुनर्विधानमिदंऋन्नेभ्यइतिङीपासहविकल्पार्थंअनउपधालोपिनइतिसूत्रंतुनियमार्थं।अनोयासोविकल्पःसउपधालोपिनएवेति।एवं
चवहुधीवर्यौवहुधीवानौवहुधीवेत्युक्तरूपत्रयंसिद्धमितिवहुव्रीहौवेत्येतन्नापूर्वंवचनमितिवोध्यं।उपधालोपिनएवेतिनियमात्तुसुपर्वाचारुपर्वाइत्यादाव

डाबुभाभ्यामन्यतरस्यां।४।१।१३॥सूत्रद्वयोपात्ताभ्यामड्डाब्वास्यात्। सीमा।सीमे।सीमानौ। दामा। दामानौ। दामे। नपुंसिदामेत्यमरः।वहुयज्वा।व
हुयज्वानौ।वहुयज्वे। अनउपधालोपिनोऽन्यतरस्यां।४।१।२८॥अन्नन्ताद्बहुव्रीहेरुपधालोपिनोवाङीप्स्यात्॥ पक्षेडाप्ङीन्निषेधौ।वहुराज्ञी।
वहुराज्ञ्यौ।वहुराजे।वहुराजानौ॥ ॥ न्नुपधालोपिनिङीप्नभवतिकिंतुडाप्निषेधावेवभवतः।अयंचयोगविभागोऽवश्यमभ्युपेयः।
अन्यथावहुधीवरीत्यत्रप्रकरणांतरस्थेनअनउपधालोपिनइतिवक्ष्यमाणेनपाक्षिकेङीपिकृतेपिऋन्नेभ्यइतिप्राप्तंङीपमनूद्यतत्संनियोगेनहिविधीयमानोयोवनोरचेति
रेफःसनसिध्येतानतुवनोरचेतिसूत्रमेवङीप्रौविधत्तामितिचेन्नउभयविधौगौरवात्।किंच।उभयविधायकत्वेप्यनोवहुव्रीहेरित्यनेनाङीपिनिषिद्धेसोपिदुर्लभःस 100
न्नियोगशिष्टत्वात्।भाष्येतुअनोवहुव्रीहेरित्यस्यानंतरंउपधालोपिनोवेतिसूत्रमस्तुअनउपधेत्यादिग्रदेशांतरस्थंसूत्रंडाप्सूत्रेअन्यतरस्यांग्रहणंचमास्त्वित्युक्तं
अनउपधा।वहुव्रीहेरूधसोङीषित्यतोवहुव्रीहिग्रहणंसंख्याव्ययादेर्ङीवित्यतोङीप्चानुवर्ततइत्याशयेनाह।अन्नंतादित्यादि।नियमार्थमिदमित्युक्तं।न १००
चैवंपूर्वेणैवविकल्पसिद्धाविहान्यतरस्यांग्रहणंव्यर्थमिति वाच्यं।असतिह्यन्यतरस्यांग्रहणेनित्यार्थोविधिरेवायं स्यान्नतुनियमइति ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रत्ययस्थात्कात्पूर्वस्या कादित्यकार उच्चारणार्थः व्यंजनमात्रं विवक्षितं। अन्यथा एतिकाश्चरं तीत्यादावकचि। इत्वं न स्यात्। तत्र हि अकारविशिष्टककारस्य प्रत्ययस्थत्वा
भावात्। न चाकच्यपि अकारांतककार एव प्रत्ययस्थोऽभवतु। अतो गुण इति पररूपे सत्येति काइत्यादिरूपसिद्धेरिति वाच्यं। पचतकीत्यादिवत्स्यमाणरूपासिद्धिप्रसंगादि
त्याशयेनाह। ककारादिति। वर्णनिर्देशेकारप्रत्ययो विहितः। क्वचित्समुदायात्प्रयोगस्तु उद्धेस्तरां वा वषट्कार इत्यादिनिर्देश रूपत्नसाध्य इति भावः। आपि पर इति
एतच्चाकारविशेषणं। तत्सामर्थ्यात्क काराकाराभ्यां व्यवायेऽपि भवति। ननु पुत्रकाम्यारथ कल्यत्यादौ त्रिचतुरादिव्यवाये। अत एव सर्विकेत्यादावाद्याकारस्य

प्रत्ययस्थात्कात्पूर्वस्यात इदाऽप्यसुपः।७।३।४४॥ प्रत्ययस्थात्ककारात्पूर्वस्याऽकारस्येकारस्स्यादापि परे स आप् सुपः परो न चेत्। सर्विका।
कारिका। अतः किं नौका। प्रत्ययस्थात्किं। शक्नोतीति शका। असुपः किं। बहुपरिव्राजका नगरी। कात्किं। नन्दना। पूर्वस्य किं। परस्य माभूत्। कटु
का। तपरः किं। राका। आपि किं। कारकः। मामकनरकयोरुपसंख्यानं॥ मामिका। नरान्कायतीति नरिका। त्यकन्यपोश्च। दाक्षिणात्यिका। इह
त्यिका। न यासयोः।७।३।४५॥ यत्तदोरस्येन्न स्यात्। यका। सका। यकां तकां। त्यकन्श्च निषेधः॥ अधित्यका। उपत्यका। आशिषि वुनश्च न॥ जी
वका। भवका। उत्तरपदलोपेन॥ देवदत्तिका। देवका। क्षिपकादीनां च॥ क्षिपका। ध्रुवका। कन्यका। चटका। तारका ज्योतिषि॥ अन्यत्र तारि
का। वर्णका तान्तवे। अन्यत्र वर्णिका। वर्त्तका शकुनौ प्राचां॥ उदीचां तु वर्त्तिका। अष्टका पितृदैवत्ये॥ अष्टिकान्या। सूतका पुत्रिका वृन्दारिका
णामेति वक्तव्यं॥ इह वा अ इति छेदः। कात्पूर्वस्य वाऽकारादेश इत्यर्थः। तेन पुत्रिकाशब्दे ङीन इवर्णस्य पक्षेऽकारः। अन्यत्रेत्वबाधनार्थमकार
स्यैव पक्षेऽकारः। सूतिका। सूतकेत्यादि॥ ॥ ९ नभवतितदेनतुक्तमकारस्येकारः स्यादापि परत इति। यदि तु आपीति ककारविशेषणं स्यात्त
र्हि रथकव्येत्यादावतिप्रसंगः। व्यवहितस्यापि परत्वानपायात्। न च निर्दिष्टपरिभाषया निस्तारः। अनुवादे परिभाषाणामनुपस्थितेः। न चापीत्यस्याकारविशेषण
त्वेऽपि तद्दोषतादवस्थ्यमिति वाच्यं। अनुवादे परिभाषाणामित्यस्यानूद्यमानविशेषणेष्वित्यर्थाभ्युपगमात्। कात्पूर्वस्यात इदित्यत्र हि अत इत्यनूद्यत्वविधाना
दनुवाद्यत्वमेवात इत्यस्य न तु अनूद्यमानविशेषणत्वं। कादित्यस्य त्वनूद्यमानविशेषणत्वं स्पष्टमेवेति न तत्र निर्दिष्टपरिभाषोपतिष्ठते इति वैषम्यात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अनूद्यमानविशेषणलोपरिभाषानोपतिष्ठत इत्येतदुदीचामात इति सूत्रस्थस्थानेग्रहणेन ज्ञापयिष्यते। यद्यसुप इति पर्युदासः स्यात्। तर्हि बहुपरिव्राजकेत्यत्रापिस्या
देव। उत्तरपदस्य सुबंतत्वेपि समुदायस्यासुबंतत्वात् ततः परत्वाविति। तेनात्र प्रसज्य प्रतिषेध इत्याह। स आप सुपः परो न चेदिति। सुबंतात्परो न चेदित्यर्थः। सर्विकेति
अव्ययसर्वनाम्नामित्यज्ञातार्थे अकच्। कारिकेति। करोतेर्ण्वुल्। णित्वात् वृद्धिः। नौकेति। नौशब्दात् स्वार्थे कः। न तष्टाप्। शकेति। शक्नोतीति विग्रहः। पचाद्यच्। तत
ष्टाप्। बहुपरिव्राजकेति। परिपूर्वात् व्रजेर्ण्वुल्। बहवः परिव्राजका यस्यामिति बहुव्रीहौ तदवयवस्य सुपो लुकि कृतेपि प्रत्ययलक्षणेनोत्तरपदस्य सुबंतत्वाद्
पः सुबंता न परत्वमस्तीति इत्वमत्र न भवति। नंदनेति। नंदिग्रहेति ल्युः। वस्तुतस्तु सूत्रे प्रत्ययस्थेति सप्तमीनिर्देशमेव कृत्वा पूर्वस्येति ग्रहणं सुत्यजमित्याहुः।
पूर्वस्य किमिति। अर्थादिदं लभ्यते। टाबेकादेशे कृते परत्र ह्रस्वाकाराभावादिति प्रश्नः। इतरो निर्दिष्टपरिभाषया कात्पूर्वस्येति न लभ्यते किंतु टाबेकादेशं वा॥

उदीचामातः स्थाने यकपूर्वायाः।७।३।४६॥ यकपूर्वस्य स्त्रीप्रत्ययाकारस्य स्थाने योऽकारस्तस्य कात्पूर्वस्येद्वा स्यादापि परे। केण इति ह्र
स्वः। आर्यका। आर्यिका। चटकका। चटकिका। आतः किं। साङ्काश्ये भवा। साङ्काश्यिका। यकेति किं। अश्विका। स्त्रीप्रत्ययेति किं ॥
शुभं यातीति शुभंयाः। अज्ञाता शुभंयाः॥ शुभंयिका॥ धात्वंतयकोस्तु नित्यं॥ सुनायिका॥ सुपाकिका॥ ॥

घित्वात्कात्परस्यैवाकारस्य स्यादित्याशयेनाह। परस्येत्यादि। कटुकेति। कटुरेव कटुः स्वार्थे कः इति। अज्ञाता दोकः। राकेति। कृदाधारार्चिकलिभ्यः कः। बाहुलकादिसं
ज्ञाभावः। संज्ञापूर्वकविधेरनित्यत्वात् केण इति ह्रस्वो न। मामकनरकयोरिति। ककारस्य प्रत्ययस्थत्वाभावादप्राप्तेर्वचनं। मामिकेति। ममेयं मामिका। युष्मदस्मदोर
न्यतरस्यां खञ्चेत्यण्। तवकममकावेकवचन इति ममकादेशः। आदिवृद्धिः। केवलमामकेत्यादिना संज्ञाछन्दसोर्वेति नियमान्ङीप्। नरिकेति। कृ शब्दे। आरे
च उपदेश इत्यात्वं। आतोनुपसर्गे कः॥ आतो लोप इटि चेत्यालोपः। टाप् इत्वं। त्यकन्यपो श्च। उपसंख्यानमित्यनुवर्ज्यते॥ ॥उदीचामातः॥ इति विकल्पापवादः।
दाक्षिणात्यिकेति। दक्षिणस्याम दूरे दक्षिणा। दक्षिणादाच्। दक्षिणा भवेति विग्रहे दक्षिणापश्चात्पुरसस्त्यक्। किति चेत्यादि वृद्धिः। टाप्। ततो अज्ञातार्थे कः। केण इति

CC-0. In Public Domain. Digitization by eGangotri

साहचर्यादाजंतस्यैव दक्षिणाशब्दस्य ग्रहणात् अन्यथा सर्वनाम्नो वृत्तिमात्रे पुंवद्भावापत्ते रश्वेति द्र ह्रस्वत्यिकेति अव्ययात्त्यप॥ २ त्रू०॥
ह्रस्वः दापा प्राचात्तु दक्षिणास्या दिक्षिभवेति विगृहीतं तच्चमनोरमायां दूषितं। त्यब्विधौ अव्ययात्॥ नयासयोः प्रत्ययस्यादित्याप्तेनिषे — धोय। यासेतियत्त दोरुपलक्षणं
मित्याशयेनाह। यत्तदोरिति। यकासकेति। यत्तदोरकचा। त्यदाद्यत्वे टाप्। स्वरूपस्याविवक्षायां फलमाह। यकांतकाभिति। यद्यपिनयत्त — दोरित्येवसूत्रयितुमुचितं तत्।
थापिसंनिपातपरिभाषाया अनित्यत्वज्ञापनार्थं नयासयोरित्युक्तमित्याहुः। वस्तुतस्तुनयत्तदोरित्युक्तेप्यनित्यत्वं सिध्यत्येव॥ अन्यथा अनयोरकारस्याप्यरत्वंदुर्ल
भमिति किमनेन निषेधेनेति। त्यकनश्चनिषेध इति। ननुमृदस्तिकन्नितिवत्प्रक्रियालाघवाय त्यिकन्नितिवक्तव्ये त्यकनित्यकारनिर्देशसामर्थ्यादित्वाभावे सिद्धे किमनेन
निषेधवचनेन। मैवं। पंचभिरुपत्यकाभिः क्रीतः पंचोपत्यक इत्यादौ तद्धितलुकि स्त्रीप्रत्ययस्यापि लुकि अकारस्य श्रवणार्थत्वात्तस्य त्यि — कन्नित्युक्तेहि पंचोपत्यिक इ
निस्यात्। इष्यते तु पंचोपत्यक इति। तस्मादावश्यकमेवनिषेधवचनं। मृदस्तिकन्नित्यत्रापि इकारोच्चारणं तद्धितलुकि श्रवणार्थं। नतु प्रक्रियालाघवार्थं। अन्यथा पं
चभिः मृत्तिकाभिः क्रीत इत्यार्हादिति ठको अध्यर्द्धेति लुकि कृते लुक् तद्धितलुकीति टापोलुकि निमित्ताभावात् प्रत्ययस्थादित्वे नस्यात् पंचमृत्तिक इत्यत्रान
चलुकः प्रागेव अंतरंगत्वात् प्रत्ययस्थादित्वं सिध्यत्येवेति वाच्यं। अंतरंगानपि विधीन् बहिरंगोलुग्बाधत इति अभ्युपगमात्। अतएव सनीस्रंसत इ
त्यादौ नलोपाभावः सिध्यति। पंचभिः खट्वाभिः क्रीतः पंचखट्व इत्यादौ टापा सह एकादेशेपि न भवति। अन्यथा एकादेशस्यादिवद्भावात् टापग्रहणेन ग्रहणा
ल्लुक् तद्धितलुकीत्यनुपसर्जनस्त्रीप्रत्ययस्य लुकि कृते अकारस्य श्रवणं न स्यात्। एतच्च भाष्यकैयटयोः स्पष्टं। उपत्यकेति। उपाधिभ्यां त्यकन्नासन्नारूढयोः
आशिषीति। आशीरर्थे विहितस्य वुन् प्रत्ययस्यात इत्वं न भवतीति वक्तव्यमित्यर्थः। जीवकाभवकेति। जीवतात् भवतादित्यर्थे जीवति भवतिभ्यामाशिषि वुन् तस्या
कादेशे कृते टाप्। देवकेति। देवदत्तशब्दात्स्वार्थिकः कः। अनजादौ विभाषालोपो वक्तव्य इति प्रागिवीयेषु वक्ष्यमाणत्वात् द्वितीयाद्युर्ध्वस्य दत्तशब्दस्य लोपः।
देवदत्तिकाशब्दस्योपन्यासस्तु दत्तलोपमभिव्यक्तुं तदभावे इत्वनिषेधाभावं च दर्शयितुं। क्षिपकादीनां चेति। नेत्यनुषज्यते। क्षिपकेत्यादि। क्षिपेरिगुपध
लक्षणः कः। एवं ध्रुवस्थैर्ये इत्यस्मादपि कः। यद्वा ध्रुगतिस्थैर्ययोः पचाद्यच्। कुटादित्वात् ङित्वेन गुणाभावे उवङ्। चटक्षे ऐरे। पचाद्यच्। ततष्टाप्। अन्तान्ता
दौकः। कैणा इति ह्रस्वः। पुनष्टाप्। तरते रवुल् अकादेशः। नक्षत्रं नेत्रकनीनिका च ज्योतिः। वर्णकेति। प्रावारविशेषः। वर्णवर्णक्रियाविस्तारगुणवचनेषु इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



चौरादिकात्तण्डुलात्तंतूनां विकारः स्तानवा। अन्यत्र वर्णिवोति। ग्रंथविशेषस्य व्याख्यासोत्र कर्त्री च। वर्तकेति। वर्तयतीति वर्तका। शकुनावेव वा च्येऽयं विकल्पः अन्यत्र तु
नित्यमेवेत्वमिति बोध्यं। अष्टकेति पितरश्चनाः देवता श्च पितृदेवताः तदर्थं कर्म पितृदेवत्यं देवतांतात्तादर्थ्ये यत् अश्नंति त्रासणा यस्यां सा अष्टका। ईष्य शिभ्यां तकन्।
अष्टिकान्येति। अष्टौ परिमाणमस्याः संख्याया अतिशदंतायाः कन्। सूतकेति। सूतशब्दात् स्वार्थे कन्। वृंदमस्यास्तीति मत्वर्थे। शृंगवृंदाभ्यामारकन्। देवतावाचि
वृंदारकशब्दस्य पुल्लिंगत्वेपि रूपिमुख्यवाचिनः स्त्रीलिंगत्वं संभवत्येव। अत एव त्रिपूजते इत्युपक्रम्य वृंदारकौ रूपिमुख्या वित्यमरेणोक्तं। उदीचां। यकोपूर्वी य
स्याः सा। अर्थगते स्त्रीत्वमाकारे आरोप्य यकपूर्वा या इति स्त्रीलिंगनिर्देशस्तेन स्त्रीप्रत्ययो लभ्यत इत्याह। स्त्रीप्रत्ययाकारस्येति। अत्र तया सयोरित्यनोनेतिवर्त
ते। यकपूर्वस्य स्त्रीप्रत्ययाकारस्य स्थाने यो कारस्तस्य कात्पूर्वस्यादीचामतेरुत्वे नेत्यस्यार्थः। एवं स्थिते फलितमाह। इद्वास्यादिति। एवमग्रेप्यूह्यं। षष्ठीस्थाने यो
गेत्यनेनैव लब्धे सूत्रे स्थानग्रहणमनूद्यमानविशेषणेषु परिभाषा नोपतिष्ठत इ ति ज्ञापनार्थं फलं तु वृद्धसंज्ञायामिकपरिभाषानुपस्थाना च्छालीयादि सिद्धिः य ।
दि तु तत्रेक्परिभाषोपतिष्ठेत तदा ओपगवीय इत्यादावेव वृद्धाच्छः स्यात्तन्न तु शालीयो मालीय इत्यादौ। तत्रत्याकारवृद्धेरिक्स्थानिकत्वाभावात्। तथा अतो गुण
इत्यत्रेक्परिभाषोपस्थितौ एधे पचे यजे इत्यादावेव पररूपं स्यान्नादिति आत्मनेपदानामिति टेरेत्वे कृते इक्स्थानिकत्वादेकारगुणस्याभवं तिपचंती त्यादौ तु
तस्यान्न तत्रेकस्थानिकत्वाभावादकारगुणस्येत्यपि बोध्यं। तन्न्यायास्तु वृद्धाच्छ वा घित्वाः एटगयनादिभ्य इत्यण्प्रत्यये यथा स्यादित्येतदर्थं मृगयनादिगणे व्याकरणशब्दः
पठ्यते। यद्यनूद्यमानविशेषणेषु परिभाषा उपतिष्ठेरन्। नहि तत्र पाठे नैरर्थ्यं स्यात्। आकारवृद्धेरिक्स्थानिकत्वाभावेन वृद्धसंज्ञाया अभावात् छस्याप्रवृत्तेः। तथा च तस्मा
द्गणपाठादुक्तार्थज्ञापनसंभवे स्थानेग्रहणमिह स्पष्टार्थमित्याहुः। सो काप्रियकेति संकाशेन निर्वृत्तं नगरं सांकाश्यं वुञ् छण् इति सूत्रेण संकाशादिभ्यो ण्यः। ततो भवार्थे
धन्वयोपधाद्वुञ्। अकादेशः सच सांकाश्यभवं स्त्रियमाहेति। तरकारस्यापि वैकल्पिकमित्वं स्यात् तस्मादात इत्युक्तं। अत्र वदंति। यथा यम कारो नाकारस्थानिकः एवं स्त्रीप्रत्य
यस्थानिकोपि नेति द्वांगविकल्पमेतत्। अकेति समुदायस्य स्त्रीवाचकवुन् स्थानिकत्वेप्यकारमात्रस्य तथात्वात् तस्मादात इति स्पष्टार्थमेवेति। शुभंयाइति। अन्येभ्योपि
पिदृश्यत इति विच्। शुभमिति मांतो निपातः। सुनयिकेति। सुष्टु नयो यस्याः सुनया ततः कः। केणइति ह्रस्वः। एवं सुष्टुपाकोयं।

102

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्यादेवङीविति वक्ष्यति। अन्ये तु ढादय एव प्रत्ययाः टिदिति तु प्रत्ययाप्रत्ययसाधारणं। तेन टित्यत् प्रातिपदिकं ढाद्यंतं च यत् प्रातिपदिकमित्यर्थः। टित्त्वं तु प्रातिपदिकस्य
क्वचित्प्रत्ययकृतं क्वचित् स्वतः क्वचित् प्रकृतिकृतं भवत्यवयवधर्मस्य समुदाये उपचारात्। तत्र आद्यस्योदाहरणं कुरुचरीति। द्वितीयस्योदाहरणं नदडिति। पचादि
ष्विपुटितोऽस्य पाठात् स्वत एव टित्त्वं तृतीयं तु घेटष्टित्वात् स्तनंधयीति कृदंते उदाहरीष्यतीत्याहुः। कुरुचरीति। कुरुषु चरतीत्यधिकरणोपपदे चरेष्ट इति कर्तरि टः। उ
पसर्जनत्वान्ने हेति। बहवः कुरुचराः यस्यां सा बहुकुरुचरेति बहुव्रीहिरन्यपदार्थप्रधानस्तथा च टिदन्तस्योपसर्जनत्वान्ङीन्नेत्यर्थः। वक्ष्यमाणेति। नृनो लट्टिल
टः सहेति शानच्। ञुवो वचिरिति वच्यादेशः। वचपरिभाषणे इत्यस्मात् कर्मणि वा लट् शानच्। स्यतासीति स्यः। कुत्वषत्वे आने मुगिति मुगागमः टित्वात् उगित्वाच्चेति। स्था
निवद्भावेनेत्यर्थः। न चाल्विधित्वात् कथमिह स्थानिवद्भाव इति शंक्यं। नल्यपीत्ति ज्ञापकादनुबंधकार्येष्वनल्विधाविति निषेधस्याप्रवृत्तेः। अत एव रमायामित्यादौ
परत्वात् ङेराम् कृते स्थानिवत्भावेनामो ङित्वाद्याडापि इति याडागमः सिध्यति। ज्ञापकान्नभवतीति। लिङ्गादेशापरस्मैपदानां स्थानिवद्भावेनैव ङित्वलाभात्तदागम
स्य यासुटो ङित्त्वं व्यर्थं सज्ज्ञाश्रया नुबंधकार्यमादेशानां नेति सामान्यतो ज्ञापयतीति भावः। पिच्च ङिन्नेत्यदादिगणे वक्ष्यमाणत्वात्तिबादिष्वेवोपदेशिकेन पित्त्वेना
निर्दिष्टकं ङित्त्वं बाध्यत इति यासुटो ङित्त्वस्य वैयर्थ्याभावान्न तज्ज्ञापयतीति शंक्यं मानं प्रत्याह। श्नः शानचः शित्त्वेनेत्यादि। सौपर्णेयीति। कद्रूश्च वै सुपर्णी चेति श्रुतिः सुप
र्णीशब्दादपत्येर्थे स्त्रीभ्यो ढक्। आयनेयीत्येयादेशः। नन्वत्र निरनुबंधपरिभाषया शि लायाढः यश्च तत्र साधुरित्यधिकारे सभायायः ढश्छंदसीति विहितस्तयोरेव ढयोर्ग्र
हणेन भवितव्यं न तु ढकः सत्यं शिला। याढस्य स्वभावान्नपुंसक एव प्रवृत्तेः स्त्रियामसंभवात्। सभाया ढस्य च समेयीति स्त्रियां छंदसि प्रयोगदर्शनादन्यस्य हि निरनुबंधस्या
संभवादगत्या सानुबंधको गृह्यते। ऐंद्रीति। इंद्रो देवता अस्याः साऽस्य देवतेत्यण्। इंद्रस्येयमिति वा विग्रहस्तस्येदमित्यण्। अत्र व्याचक्षते। कृत्ग्रहणे गतिकारकपूर्वस्यापीत्यस्य
प्रवृत्त्यभावेपि अस्त्वंतस्य प्रातिपदिकविशेषणत्वात्तदंतांतमपि गृह्यत इति कुंभकारशब्दात् ङीप् स्यादेव। असु वा कारशब्दादेव ङीप्। तथापि कुंभकारीति रूपं सिध्यत्येव। न च का
रशब्दान्ङीपि तदंतात् स्त्रीभ्यो ढगिति ढक्प्रत्यये कौंभकारेयो न सिध्येदिति वाच्यं अनुपसर्जनस्त्रीप्रत्ययेतद्वादिनियमाभावात्तत्सिद्धेः। नापि नियमाभावे कारीशब्दात्कदाचित्तद्ध
कि कुंभकारेय इति रूपं स्यादिति शंक्यं।। समर्थः पदविधिरिति वक्ष्यमाणत्वेनासमर्थात्तद्धितानुत्पत्तेरिति। मनोरमायां तु इह सूत्रे अनेकं वाक्यं तत्र अनुपसर्जनमण्यो।

105

१०५

CC-0. In Public Domain. Digitization by eGangotri

सु

सि॰कौ॰ मत्वेषेति वैकल्पिकमित्वमिति केषांचिद्व्याख्यानं नादर्त्तव्यमिति भावः। वस्तुतो हंसंतनाविति श्लोके स्विकायामिति प्रयोगो असाधुरेव। आत्मीयायां स्वशब्दस्य सर्वनामत्वात्
टी॰त॰ स्याडागम प्रवृत्तेरिति नद्याः प्रत्युदाहरणमिदमुक्तानि उदाहरणान्याह। निर्भस्त्रिकेत्यादि। निष्क्रान्ता भस्त्राया निर्भस्त्रा निरादयः क्रान्ताद्यर्थे पंचम्येति समासः। उपसर्जन
९२ नह्रस्व प्राप्। ततो अज्ञानादीकः। केण इति ह्रस्वः पुनष्टाप्। सूत्रे एवेति विकृतनिर्देशो विवक्षिततविषयो न तु यासयोरिति, इत्युपलक्षणमित्यभिप्रेत्याह। कृतवत्वनिर्देश
दिति। इह अजादेति स्त्रीलिंगनिर्देशादजादयः स्त्रीलिंगा एव गृह्यंते तेनेह विकल्पो न। शुभ्रोऽजो यस्याः शुभ्राजिका। जानातीति ज्ञः। इगुपधेति कः। प्रियो ज्ञो यस्याः सा

भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि।७।३।४७। स्वेत्यनंतुग षष्ठीकम्पदं। एषामत इद्वास्यात्। तदन्तविधिनैव सिद्धे नञ्पूर्वाणामपीति स्पष्टा
र्थं। भस्त्राग्रहणमुपसर्ज्जनार्थं। अन्यस्य तूत्तरसूत्रेण सिद्धं। एषाद्वा एतयोस्तत्पूर्वयोर्न्नेत्वं। अन्तर्वर्त्तिनीं विभक्तिमाश्रित्याऽसुप इति निषे
धात्। अनेषका। परमेषका। अद्वके। परमद्वके। स्वशब्दग्रहणं संज्ञोपसर्ज्जनार्थं॥ इह हि। आतः स्थाने इत्यनुवृत्तेः। स्वशब्दस्यातो विशेषणं
न तु द्वेषयोरसम्भवात्। नाप्यन्येषामव्यभिचारात्। स्वशब्दस्त्वनुपसर्ज्जनमात्मीयवाची अकजर्हः। अर्थान्तरे तु न स्त्री। संज्ञोपसर्ज्जनीभूत
स्तु कप्रत्ययान्तत्वाद्भवत्युदाहरणं। एवञ्चात्मीयायां। स्विका। परमस्विकेति नित्यमेवेत्वं। निर्भस्त्रिका। निर्भस्त्रका। एषका। एषिका। कृतवत्
त्वनिर्द्देशान्नेह विकल्पः। एतिके। एतिकाः। अजका। अजिका। ज्ञका। ज्ञिका। द्विके। द्वके। निःस्विका। निःस्वका॥ अभाषितपुंस्काच्च।७।३।४८॥ एतस्माद्वि
हितस्यातः स्थानेऽत इद्वास्यात्। गङ्गका। गङ्गिका। बहुव्रीहेर्भाषितपुंस्कत्वात्ततो विहितस्य नित्यं। अज्ञाता अखट्वा। अखट्विका। शेषिके कपि तु विकल्प
एव॥ आदाचार्याणां।७।३।४९॥ पूर्वसूत्रविषये आद्वास्यात्। गङ्गाका। उक्तपुंस्कात्तु। शुभ्रिका। अनुपसर्ज्जनात्।४।१।१४॥ अधिकारोऽयं। यूनस्ति
रित्यभिव्याप्य॥ अयमेव स्त्री प्रत्ययेषु तदन्तविधिं ज्ञापयति॥ ॥ ऐ प्रियत्रिके ति। निःस्वकेति। स्वस्याः निष्क्रान्तेति विग्रहो नत्विह स्विकस्याः
निष्क्रान्तेति नद्याल्वेत्युपसर्जनेपि निःस्विकेत्यकमेव रूपं स्यात्। आतः स्थाने काकारस्य दुर्लभत्वेन प्रकृतसूत्राविषयत्वात्। अभाषित। एतस्मादिति। नित्यस्त्रीलिंगादि ९२
त्यर्थः। विहितविशेषणं तथा व्याख्यानस्य फलमाह। बहुव्रीहेरिति। ततो विहितस्य नित्यमिति। अविद्यमाना खट्वा यस्याः सा अखट्वा अत्र शेषाद्विभाषेति समासांतस्य

103

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कपोवकलुपिकत्वात्कवभावपक्षे गोस्त्रियोरित्युपसर्जनह्रस्वे कृते पुनरखट्वाशब्दाद्भावितपुंस्कात्टापि सत्यतातात्सेकप्रत्ययेकेणइति ह्रस्वेऽस्यविकल्पस्याप्रवृत्तेः प्रत्ययस्थादित्युत्सर्ग एव प्रवर्त्तते। पर विशेषणत्वेत्वयं विकल्पः स्यादेवेति भावः। बहुव्रीहेरित्युपसर्जनोपलक्षणं तेन अतिखट्विकेत्यादावपि नित्यमेव। विकल्प एवेति। अखट्वेतिबहुव्रीहौ न खट्वा स इति स्थिते सुपो धात्विति सोर्लुक्युपसर्जनह्रस्वत्वं वाधित्वा शेषाद्विभाषेति समासान्ते कपि परत्वात्कृते स्त्रीप्रत्ययान्तत्वाभावादुपसर्जनह्रस्वो न प्रवर्त्तते किन्तु केण इति ह्रस्वस्य न कपि आपोन्यतरस्यामिति वैकल्पिकनिषेधात्पाक्षिकह्रस्वे सत्यभावितपुंस्काच्चेति कल्पः प्रवर्त्तते तत्र हि खट्वाशब्दस्यान्तरङ्गत्वाट्टापोऽभावितपुंस्काद्विहितत्वादिति भावः॥ ह्रस्वाभावपक्षे त्वखट्वाके त्ये तद्रूपान्तरं। अधिकारोयमिति॥ स्वरितत्वप्रतिज्ञानादिति भावः। अभिव्याप्यान्ते

टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ४।१।१५॥ अनुपसर्ज्जनं यट्टिदादित दन्तं यददन्तम्प्रातिपदिकन्ततः स्त्रियां ङीप् स्यात्। कुरुचरी। उपसर्ज्जनत्वान्नेह। बहुकुरुचरा। नदट्। नदी। वक्ष्यमाणेऽत्र टित्वादुगित्वाच्च ङीप् प्राप्तः। यासुटो ङित्त्वेन लाघवम नुवन्धकार्य्यन्नादेशानामिति ज्ञापनान्न भवति। अपृक्तमचप्रिणत्वेन कश्चिदनुवन्धकार्य्येष्यनल्विधाविति निषेधज्ञापनाद्वा। सौपर्णेयी ऐन्द्री। औत्सी। ऊरुद्वयसी। ऊरुदघ्नी। ऊरुमात्री। पञ्चतयी। आक्षिकी। लावणिकी। यादृशी। इत्वरी। नाञ्ठोलिकेलोऽपि। चौरी। नञ्स्नञी कक्ख्युंस्तरुणतलुनानामुपसंख्यानं॥ स्त्रैणी। पौंस्नी। शाक्तीकी। आढ्यङ्करणी। तरुणी। तलुनी॥ ॥

अत एव बहुधीवरी पालेत्यत्र यूनस्तिरिति न प्रवर्त्तते इति प्राञ्चः। नचात्र नलोपस्यासिद्धत्वान्नान्तलक्षणो ङीप् स्यात् इति शंक्यं नलोपः सुप्स्वरेति नियमेन ङीप्यप्रत्यसिद्धत्वाभावादित्येके। अन्ये तु नकारपदत्वे चापराद्विधेः प्रतिषेध इति प्रत्ययलक्षणनिषेधेन अन्तर्वर्त्तिनीं विभक्तिमाश्रित्य पदत्वाभावान्नलोपस्याप्रसक्त्या ङीप् स्यादेव परन्त्वनो बहुव्रीहेरिति निषेधान्ङीवभावे डाप्निषेधाविह भवत इत्याहुः। अयमेवेति। अनुपसर्जनाधिकार एवेत्यर्थः॥ ॥ टिड्ढाणञ्। टिड्डादयः प्रत्ययास्तेषां तदन्तं गृह्यते तेन चानुवर्त्तमानस्य प्रातिपदिकस्य विशेषणं। अजाद्यत इति सूत्रादनुवर्त्तमानमप्यत इत्येतत् प्रातिपदिकविशेषणं अताचप्र त्ययविधिरितो व्याचष्टे यट्टिदादि तदन्तं यददन्तं प्रातिपदिकमिति। नदट् देवट् इत्यादेः प्रत्ययस्यैव टित्वमिति टिदन्तं प्रातिपदिकमिति व्याख्यानं संगच्छत एव। स्तनन्धयीत्यत्र तु प्रत्ययस्य टित्वाभावेऽपि धातोष्टित्वस्य चरितार्थत्वात्समुदाया

CC-0. In Public Domain. Digitization by eGangotri

सु॰
सि॰ कौ॰
टी॰ त॰
१०८

स्यादेवङीविति वक्ष्यति। अन्येतुढाद्यएवप्रत्ययाः टिदितितुप्रत्ययाप्रत्ययसाधारणं। तेनटित्यत्प्रातिपदिकंढाद्यंतंचयत्प्रातिपदिकमित्यर्थः। टित्वंतुप्रातिपदिकस्य
क्वचित्प्रत्ययकृतंक्वचित्स्वतः क्वचित्प्रकृतिकृतंभवत्यवयवधर्मस्यसमुदायेउपचारात्। तत्रआद्यस्योदाहरणंकुरुचरीति। द्वितीयस्योदाहरणंनदडिति। पचादि
ष्विति टितोऽस्यपाठात्स्वतएवटित्वं। तृतीयंतुघेटष्टित्वात्स्तनंधयीतिकृदंते उदाहरिष्यतीत्याहुः। कुरुचरीति। कुरुषुचरतीत्यधिकरणोपपदेचरेष्ट इतिकर्तरि टः। उ
पसर्जनत्वान्ने हेति। बहवः कुरुचराः यस्यांसाबहुकुरुचरेति बहुव्रीहिरन्यपदार्थप्रधानस्तथाचटिदन्तस्योपसर्जनत्वान्ङीन्नेत्यर्थः। वक्ष्यमाणेति। नृनोल्टिल
टः सहेति शानच्। त्रुवोवचिरितिवच्यादेशः। वचपरिभाषणेइत्यस्मात्कर्मणिवालट् शानच्। स्यतासीतिस्यः। कुत्वषत्वेआनेमुगितिमुक्। टित्वाद्गित्वाच्चेति। स्था
निवद्भावेनेत्यर्थः। नचाल्विधित्वात्कथमिहस्थानिवद्भावइतिशंक्यं। नत्त्वपीति ज्ञापकादनुबंधकार्येष्वनल्विधाविति निषेधस्याप्रवृत्तेः। अतएवरमायामित्यादौ
परत्वात्ङेरामिकृतेस्थानिवत्त्वभावेनामोङित्वाद्याडापइतियाडागमःसिध्यति। ज्ञापकान्नभवतीति। लिङादेशापरस्मैपदानांस्थानिवद्भावेनैवङित्वलाभात्तदागम
स्ययासुटोङित्वंव्यर्थंसज्ज्ञाश्रया नुबंधकार्यमादेशानांनेतिसामान्यतोज्ञापयतीतिभावः। पिच्चङिन्नेत्यदादिगणेवक्ष्यमाणत्वान्निवादिष्वोपदेशिकेनपित्वेना
तिदेशिकंङित्वंबाध्यतइतियासुटोङित्वस्यवैयर्थ्याभावान्नतज्ज्ञापयतीतिशंकमानंप्रत्याह। श्नः शानचः शित्वेनेत्यादि। सौपर्णेयीति। कद्रूश्चवैसुपर्णी चेतिश्रुतिः। सुप
र्णीशब्दादपत्येर्थेस्त्रीभ्योढक्। आयनेयीत्येयादेशः। नन्वत्रनिरनुबंधपरिभाषयाशि लायाढः यश्चतत्रसाधुरित्यधिकारेसभायायः ढश्छंदसीतिविहितस्तयोरेवढयोर्ग्र 104
हणेनभवितव्यंनतुढकः सत्यंशिला याढस्वभावान्नपुंसकएवप्रवृत्तेःस्त्रियामसंभवात्। सभायाढस्यचसभेयीतिस्त्रियांछंदसिप्रयोगदर्शनादन्यस्यहिनिरनुबंधस्या
संभवाद्गत्यासानुबंधकोगृह्यतेऐंद्रीति। इंद्रोदेवताअस्याः साऽस्यदेवतेत्यण्। इंद्रस्येयमितिवाविग्रहस्तस्येदमित्यण्। अत्रव्याचक्षते। कृत्ग्रहणेगतिकारकपूर्वस्यापस्य
प्रवृत्यभावेपिअसंतस्यप्रातिपदिकविशेषणात्तदंतांतमपिगृह्यतइतिकुंभकारशब्दात्ङीप्स्यादेव। अस्तुवाकारशब्दादेवङीप्। तथापिकुंभकारीतिरूपंसिध्यत्येव। नचका १०८
रशब्दान्ङीपितदंतात्स्त्रीभ्योढगितिढक्प्रत्ययेकौंभकारेयोनसिध्येदितिवाच्यअनुपसर्जनस्त्रीप्रत्ययस्तदादिनियमाभावात्तत्सिद्धेः। नापिनियमाभावेकारीशब्दात्कदाचित्ढ
किकुंभकारेयइतिरूपंस्यादितिशंक्यं॥ समर्थः पदविधिरितिवक्ष्यमाणेनासमर्थात्तद्धितानुत्पत्तेरिति मनोरमायांतुइहसूत्रेअनेकंवाक्यंतत्रअनुपसर्जनमण्यो।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारस्तदंतादिति व्याख्यानान्नेह। आपिशलमधीते आपिशला ब्राह्मणीति। अत्र हि प्रोक्तार्थे योऽण् श्रूयमाणस्स उपसर्जनं। यस्तु प्रधानो अध्ये त्रण् प्रोक्ताल्लुगिति
स लुप्तः वर्णप्राधान्यान्न प्रत्ययलक्षणमतष्टाबेव भवतीति स्थितं। नन्वेवमापिशलेति रूपसिध्यर्थं अनुपसर्जनग्रहणस्यावश्यकत्वेन सामर्थ्योपक्षयात्कथमेतेन।
स्य तदंतविधिज्ञापकतेति चेदत्राहुः। स्वरितत्वप्रतिज्ञया अधिकारोयमित्यधिकारत्वाश्रयणादनुपसर्जनग्रहणस्य ज्ञापकत्वं संभवत्येवेति। औत्सीति। उत्सेभवा
उत्सादिभ्योऽञ्। नन्वेनैव सिद्धे शार्ङ्गरवाद्यञ इत्यत्राञ्ग्रहणं व्यर्थं। अञ्ञे तस्याद्युदात्तत्वेन ङीपङीनोः स्वरविशेषाभावात्। मैवं। उत्स स्यापत्यं स्त्री औत्सीत्य
त्र अञंतलक्षणं ङीपं बाधित्वा परत्वाज्जातिलक्षणो ङीष् प्राप्नोति तद्बाधनार्थं तस्यावश्यकत्वात्। न चैवं शार्ङ्गरवाद्यञ इति ङीना सिद्धमिदं रूपमित्यञ्ग्रहणमिह
न कर्तव्यमिति वाच्यं। तत्र जातेरित्यनुवृत्तेः। अन्यथा शार्ङ्गरवस्यस्त्री शार्ङ्गरवी औत्सस्यस्त्री औत्सीत्यादौ पुंयोगेपि परत्वान्ङीन्स्यान्न तु ङीष्। इष्यते तु पुंयोगे ङीषेवात
स्मात्प्रभवाद्यर्थस्य जातित्वेनापरिभाषणात्तद्बाधार्थं ङीषेवार्थमिहाप्यञ्ग्रहणमावश्यकमेवेति दिक्। ऊरुद्वयसीत्यादि। ऊरु प्रमाणमस्याः सा। प्रमाणे द्वयसज्दघ्नञ्मा
त्रचः। यद्यत्र न लोकेति सूत्रेण न्निति वहूयसजि तिमात्रच् चकारेण प्रत्याहारो गृह्यते तदा दघ्नञ्मात्रञ्ग्रहणमिह कर्तुं शक्यं। पंचतयीति। पंच अवयवा अस्याः सं
ख्याया अवयवे तयप्। आक्षिकीति। तेन दीव्यतीति ठक्। लावणिकीति। लवणं पण्यमस्याः। लवणाट्ठञ्। ठक्ठञोर्भेदेनोपादानं ठन्निवृत्त्यर्थं तेनेह न दंडोऽस्त्यस्याः दं
डिका। अतइनीतिठन्। अतएवत्रि ठणेपि न ङीप्। काशिषुभवा काशिका। काश्यादिभ्यष्ठञ्ञिठौ। यादृशीति। त्यदादिषु दृश इति कञ्। आसर्वनाम्न इत्याकारः। इत्वरी
ति। एति तच्छीला। इण्नशजिसर्तिभ्यः क्वरप्। ह्रस्वस्यपिति कृति तुक्। क्वरपोन्यतरानुबंधोपादानं स्पष्टार्थं। एकेनैव वरचो व्यावृत्तिसिद्धेः। विन्यस्तमंगलमहौषधिरीश्व
रापा इति भारविः। तत्र स्थेशभासेति वरच्। ईश्वरीति। तत्र धातुयोगलक्षणो ङीप्यंतोदात्तमेकं। ईश्चोपधाया इत्यनुवृत्तौ अश्नोतेराशुकर्मणि वरड्डित्योणादिके वरटि टित्वा
न्ङीपि मध्योदात्तमपरं। ईश्वः क्वनिपि वनिपि वा ङीब्रयोराद्युदात्तमन्यतात्। ताच्छीलिकेति। अयंभावः। शीलं छत्रादिभ्यो ण इति योणस्तस्मिन्नण्कार्यं भवति कार्मस्ताच्छील्य
इति ज्ञापकात्। तत्र हि अन्नित्यणि विहितं प्रकृतिभावं बाधितुं टिलोपो निपात्यते यदि तु णप्रत्यये अण्कार्यं न स्यात्। तर्हि किं तेन। ताच्छीलिके एव अण्कार्यं ज्ञापना
न्नेह दंडः प्रहरणमस्यां क्रीडायां दांडा। तदस्यां प्रहरणमिति णः। छत्रादिभ्योऽणित्येव सूत्रमस्तु किमनया कुसृष्ट्येति तु वह्वः। चौरीति। चुराशीलमस्याः। नत्रस्तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·कौ·
टी·त·
९५

वृत्तिकृता त्वत्रत्यं ख्युनग्रहणं सूत्रे प्रक्षिप्य करणे ख्युनामिति पठितं। तच्च भाष्यविरुद्धमित्युत्तरत्र स्फुटीभविष्यति। स्त्रैणी। पौंस्नीति। स्त्रीपुंसाभ्यामिति नञ्स्नञौ। शाक्तीकीति। शक्तिः प्रहरणमस्याः शक्तियष्ट्योरीकक्। आढ्यंकरणीति। अनाढ्यः आढ्यः क्रियतेऽनयेत्यर्थे आढ्यसुभगेत्यादिना करणे ख्युन्। युवोरित्यनादेशः। अरुर्द्विषदिति मुम्। तरुणीतलुनीति। तरुणतलुनयोर्गौरादिषु पाठात् ङीष्। ङीपङीषोः पर्यायो बोध्यः। स्वरे विशेषः कृदृदारिभ्यत्वं नृत्रोरश्लोवेति। तरुणतलुनयोरुदन्तप्रत्ययान्तत्वेन नित्या दाद्युदात्तता। सेवङीपि ङीषि वित्संतो दात्ततेति॥ ०॥ यञश्च। योगविभाग उत्तरार्थः। प्राचां ष्फ तद्धित इत्यत्र एवानुवृत्तिर्यथा स्यात्। हलस्तद्धितस्य। हल उत्तिपंचमी। यस्येति चेति सूत्रात् ईतीत्यनुवर्त्तते। तद्धित इत्यत्र तद्धित इति नानुवर्त्तते आपत्यस्य च तद्धितेऽनातीत्युत्तरसूत्रे पुनस्तद्धितग्रहणात्। तदाह। हल उत्तरस्येत्यादि। तद्धित इत्यनुवृत्तौ तु इहापि स्यात्। सांकाश्यकः। कांपिल्यकः। संकाशादिभ्यो ण्यः। ततो धन्वयोपधाद्वुञ्। उपधाभूतस्येति। सूर्यतिष्येत्यत उपधाया इत्यनुवर्त्तत इ

यञश्च।४।१।१६। यञन्तात्स्त्रियां ङीप्स्यात्। अकारलोपे कृते। हलस्तद्धितस्य।६।४।१५०। हल उत्तरस्य तद्धितयकारस्योपधाभूतस्य लोपस्स्यादीति परे। गार्गी। अनपत्याधिकारस्थान्नङीप्। द्वीपेभवा द्वैप्या। अधिकारग्रहणान्नेह। देवस्यापत्यं दैव्या। देवाद्यञञावि ति हि यञ् प्राग्दीव्यतीयो न त्वपत्याधिकारपठितः॥ प्राचां ष्फ तद्धितः।४।१।१७। यञन्तात् ष्फो वा स्यात् स्त्रियां स च तद्धितः॥ ॥

त्तिभावः। ननु यस्येति च नियत्नो अकारलोपे कृते यकारस्य ईकारपरत्वमस्त्येव किमुपधाग्रहणानुवृत्त्या। न च अल्लोपस्य स्थानिवद्भावः। यलोपे तन्निषेधात्। अत्राहुः। यलोपे कर्त्तव्ये अल्लोपस्याभीयत्वेनासिद्धत्वादुपधाग्रहणानुवृत्तिरभ्युपगन्तव्येति। अन्ये त्वाहुः। सूत्रारंभसामर्थ्यादल्लोपस्यासिद्धत्वं न भवति। तथा चोपधाग्रहणं विनापि नात्र क्षतिः। एवंच सूर्यतिष्येति सूत्रेऽप्युपधाग्रहणं त्यक्तुं शक्यं मुक्त्युक्तेरिति। गार्गीति। गोत्रप्रत्ययान्तस्य जातित्वेपि यो - पधत्वादजातेरिति ङीष् न भवति। तथा च आद्युदात्तमेवेदं पदं अनपत्याधिकारेति। यद्यपि। अपत्यग्रहणं कर्त्तव्यमित्येव वार्तिकं तथापि अपत्याधिकारविहितपरं तत्। नाद्रशश्च गर्गादियञेव न तु देवाद्यञ्। तस्य अपत्याधिकारात्॥ ९५
प्रागेव पाठात्। अत एव भाष्यकृता यञश्चेत्यत्र कञ्नुकारपोऽनञ श्चेति गर्गादिभ्यो यञित्यत्राप्य ञ इति च अकारः प्रश्लिष्टः। एवं यञञोश्चेति सूत्रेपि यस्कादिभ्यो गोत्रे अयञोश्च इत्यकारः प्रश्लिष्टः। एतच्च मनोरमायां ग्रन्थानुरोधेनोक्तं। न्यासे तु अधिकारग्रहणमिहानर्थकं यथाश्रुतवार्त्तिकेनैव द्वीपेभवाद्वैप्येति रूपसिद्धेः। न चैवं दैवस्यापत्यं स्त्रीति॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu
105

CC-0. In Public Domain. Digitization by eGangotri

ध्येति रूपासिद्धिः शंक्या। अयञश्चेति भाष्यकारीयनिष्कर्षात्तद्धितः। नहि देवाद्यञञाविस्यञायञेत्यकारः प्रश्लिष्टुं शक्यते। किंच अधिकाकारग्रहणे अभिजितोऽपत्यं स्त्रीयञं तान्स्वार्थी अभिजिद्विदभृदित्यादिना यञि आभिजितीति रूपं न सिध्येत् अमद्रणायञित्यकारप्रश्लेषेण भाष्यकारीत्या पाठ ङीपः संभवादित्याहुः। स्यादेतत्। अकारं प्रश्लिष्य गर्गादिभ्यो य ञि कृते गार्ग्येति रूपं न सिध्येत्मैवं। वार्तिकप्रत्याख्यानाय भाष्यकृता अकारप्रश्लेषे कृते पि तस्येत्संज्ञाकत्वेन लुप्तत्वादिष्टसिद्धेः। एवं च ष्करप्रत्युनामिति पाठः ष्करणाऽय ञश्चेति भाष्यविरुद्ध इति स्पष्टमेव। प्राचां ष्फ तद्धितः। तद्धितग्रहणं ष्फप्रत्ययांतस्य प्रातिपदिकसंज्ञार्थं तेन षिद्गौरेति ङीष् सिध्यति। ननु प्रातिपदिकसंज्ञां विनापि षित्करणसामर्थ्यादेव ङीष् भविष्यति किमनेन तद्धितग्रहणेन। न च यञ्ञेयस्येति चेति लोपार्थं तदिति वाच्यं। सवर्णदीर्घेणापि रूपसिद्धेर्लोपस्यानावश्यकत्वात्। एवं त

षः प्रत्ययस्य। १।३।६॥ प्रत्ययस्यादिः ष इत्स्यात्। आयनेयीनीयियः फढखछघां प्रत्ययादीनां। ७।१।२। प्रत्ययादिभूतानां फादीनां क्रमादायन् इय आदेशास्स्युः तद्धितान्तत्वात्प्रातिपदिकत्वं॥ षित्वसामर्थ्यात्ष्फेणोक्तेऽपि स्त्रीत्वे षिद्गौरेति वक्ष्यमाणो ङीष्। गार्ग्यायणी। सर्वत्रलोहितादिकतन्ते भ्यः। ४।१।१८। लोहितादिभ्यः कतशब्दान्तेभ्यो यञन्तेभ्यो नित्यं ष्फः स्यात्। लौहित्यायनी। कात्यायनी। कौरव्यमाण्डूकाभ्यां च। ४।१।१९। आभ्यां ष्फः स्यात्। क्रमेण टाप्ङीषोरपवादः। कुर्वादिभ्यो ण्यः। कौरव्यायणी। ढक् च मण्डूकादित्यण्। माण्डुकायनी। आसुरेरुपसंख्यानं॥ आसुरायणी॰ ॥

र्हि तद्धितग्रहणं इञन्तादपि क्वचित्ष्फो भवतीति ज्ञापनार्थं तेन आसुरेरुपसंख्यानमिति वक्ष्यमाणं सिध्यति॥ ❁ ॥ षः प्रत्ययस्य। आदिर्ञिटुडव इत्यत आदिरित्यनुवर्तत इत्यभिप्रेत्याह। प्रत्ययस्यादिरिति। प्रत्ययस्य किं। षोडश षषउत्वमित्यत्र उपदेशे ष्ठो यं षकारः एतच्च कौस्तुभे स्थितं। आदिः किं। अविषः। महिषः। अविमह्योष्टिषच्। ननु त प्रयोजनाभावादेव षकारस्येत्संज्ञा न भविष्यति टित्वादेव अविषी महिषीति रूपसिद्धेः। न च पक्षे ङीष्यन्तोदात्तः प्रयोजनमिति वाच्यं। अनुदात्तस्य च यत्रोदात्तलोप इत्युदात्तनिवृत्तिस्वरेण चितः परस्य ङीपोऽप्युदात्तत्वात्। अत्राहुः। विनिगमनाभावेन पक्षे टकारस्यापि श्रवणं स्यात्। तथा च षित्वान्ङीष्यविटीत्यादिरूपसिद्धिः स्यात्। अतः षकारस्यैव श्रवणं भवतु मा कदाचित् टकारस्य श्रवणं भूदित्येतदर्थमादिग्रहणमनुवृत्तिरिति। आयने। आयनीनोर्नकारस्य नेत्वं। फिनो नित्करणसामर्थ्यात्। फकारादिघकार उच्चारणार्थः। तेन ढक्फिञादीनामादेशः सिध्यति। आदिग्रहणं किं। ऊरुदघ्नमित्यादौ माभूत् प्रत्ययेति किं। धातोरादीनां माभूत्। फक्कति। ढौकते। खनति। छादयति। घूर्णते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु
सि·कौ· घञादिषु तु चजोः कुघिण्यतोरित्यादिनिर्देशेन ज्ञापकाभावमित्याशयेनाभावः। श्रमेर्ढः। शंढ इत्येवमादीनामेते आदेशा न भवंति। उणादयो बहुलमिति बहुलवचनादिति दिक्। क्र
टी·त· मादिति। फ। आयन्। ढ। एय्। ख। ईन्। छ। ईय्। घ। इय्। इत्यर्थः। स्त्रियामेव ष्फप्रत्ययविधानादत्र ङीष् न स्यादित्याशंक्याह। षित्सामर्थ्यादिति। एकमेव स्त्रीत्वमुभाभ्यां उच्यत
१०६ इति भावः। सर्वत्रग्रहणमुत्तरसूत्रादिहापकृष्यते बाधकबाधनार्थं तेनाल्या ञ्ञेति वक्ष्यमाणं परमपि चापं बाधित्वा प्राचांमते आवट्यशब्दादपि ष्फ एव भवति। चाविधे
सूत्रे चांमते सावकाशत्वात्। आवट्यायनी एवं चाद्यत्र च्चाविषयेपि प्राचां ष्फ एव शार्कराक्ष्यायणीति यथा। सर्वत्र सर्वेषांमत इत्यर्थस्तदेतत्फलितमाह। नित्यं ष्फः स्यादिति। न
न्वारंभसामर्थ्यान्नित्यत्वे सिद्धे सर्वत्रग्रहणं व्यर्थमिति चेदत्राहुः। पूर्वसूत्रे बाधकबाधनोपयुक्तस्य तस्येह स्पष्टार्थमभ्युपगमान्न वैयर्थ्यमिति यञ इत्यनुवर्तनादाह। यञंते
भ्य इति। लोहितादिर्गर्गाद्यंतर्गणं इति भावः। लौहित्यायनीति। सा क्षित्यायनी। बाभ्रव्यायणी। इत्यादयोपि ज्ञेयाः। ननु गर्गादौ कतक एव शाकले निपठ्यते तथा च शाकल्या
यनीति रूपं न सिध्येत्। यदि तु लोहितादिकार्यार्थं कतशब्दात्प्रागेव शाकलशब्दः पठ्येत तर्हि शाकलस्य छात्राः शाकला इत्यत्र कण्वादिभ्यो गोत्र इति कण्वादिकार्यं अण्
न सिध्येत्॥ उच्यते कतक एव शाकलेति गणपाठे कण्वशब्दात् पूर्वं शाकलशब्दः पठितव्यः॥ कतंतेभ्य इत्यत्र कतस्यां ॥
तः कतंतः कतो नो येषां ते कतंताः। शाकं ध्यादित्वात्पररूपं। कतंतश्च कतंताश्चेति बहुव्रीहितत्पुरुषयोरेकशेषोभ्युपेयस्तथा कण्वादिभ्य इत्यत्रापि कण्वस्यादिः कण्
एवादिः। कण्व आदिर्येषामिति बहुव्रीहितत्पुरुषयोरेकशेषस्तथा च सर्वेष्टसिद्धिरिति। कौरव्य। टाप्ङीषोरिति। योपधत्वेन जातेरिति ङीषः प्राप्त्यभावात्कौरव्यशब्दा
ट्टाप् मांडूकात्तु ङीषिति भावः। यद्यपीह टाप्ङीपोरिति पाठः प्रायेण दृश्यते। तथापि तत्र ङीविति लेखकप्रमाद एव। पारिभाषिकस्य पौत्रप्रभृतिगोत्रस्यैव जातित्वान्ङी 106
षः प्राप्तिर्नेति मतांतराभिप्रायेण वा तथोक्तमिति बोध्यं। कौरव्यसाहचर्यान्मांडूकशब्दोप्यपत्यप्रत्ययांत एवेह गृह्यते। न तु तस्येदमित्यणंतस्तेन यद्यसौ कूपमांडूकि त १०६
वेति मद्दिप्रयोगः सिद्धः। तत्र हि मंडूकस्येयं भार्येति विवक्षया तस्येदमित्यण्॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

वयसि। कालकृतशरीरावस्था वयः यस्त्वर्थप्रकरणादिकमनपेक्ष्य श्रवणमात्रेण वयः प्रतिपादयति स वयोवाची गृह्यते। अंतरंगत्वात्तेनेह न। उत्तानशया। लोहितपादा।
ह्यप्रकरणादिना वयसः प्रतीतावपि द्वारद्वारवृत्तेः। अबालापि हि व्याध्यादिवशादुत्तानाशेते अलक्तकेन च रक्तचरणा भवति। प्रथमेति किं। वृद्धा। कुमारीति। प्रथमवयोवच
नेणवायं शब्दो न त्वनूढत्वप्रयुक्तः। पुंस्यपि कुमार इति प्रयोगात्। वृद्धकुमारीति गौणः प्रयोगः। वयस्यचरम इति। यौवनं न प्रथमवयः किंतु द्वितीयं इति वार्तिकारंभः। उपचया
ऽपचयलक्षणे द्वे एव वयसी इति पक्षे यौवनस्यापि प्राथम्यात्सूत्रेणैव सिध्यतीति बोध्यं। वयांसि चत्वारीत्येके यदाहुः आद्ये वयसि नाधीतं द्वितीये नार्जितं धनं। तृतीये

वयसि प्रथमे। ४।१।२०॥ प्रथमवयोवाचिनोऽदन्तात्स्त्रियां ङीप् स्यात्। कुमारी। वयस्यचरम इति वाच्यं॥ वधूटी। चिरण्टी। वधूटचिरण्टशब्दौ यौ
वनवाचिनौ। अतः किं। शिशुः कन्याया न। कन्यायाः कनीन चेति निर्देशात्। द्विगोः। ४।१।२१॥ अदन्ताद्द्विगोर्ङीप् स्यात्। त्रिलोकी। अजादित्वात्त्रिफ
ला। त्र्यनीका। सेना। अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि। ४।१।२२॥ अपरिमाणान्ताद्बिस्ताद्यन्ताच्च द्विगोर्ङीप् न स्यात्तद्धितलुकि सति। प
ञ्चभिरश्वैः क्रीता पञ्चाश्वा। आर्हीयष्ठक्। अध्यर्धेति लुक्। द्वौ बिस्तौ पचति द्विबिस्ता। द्व्याचिता। द्विकम्बल्या। परिमाणात्तु। द्व्याढकी। तद्धितलु
कि किं। समाहारे पञ्चाश्वी। काण्डान्तात्क्षेत्रे। ४।१।२३॥ क्षेत्रे यः काण्डान्तो द्विगुस्ततो न ङीप् तद्धितलुकि। द्वे काण्डे प्रमाणमस्याः द्विकाण्डा क्षेत्रभ
क्तिः। प्रमाणे द्वयसजिति विहितस्य मात्रचः प्रमाणे लो द्विगोर्नित्यमिति लुक्। क्षेत्रे किं। द्विकाण्डी रज्जुः। पुरुषात्प्रमाणेऽन्यतरस्याम्। ४।१।२४॥ प्रमा
णे यः पुरुषस्तदन्ताद्द्विगोर्ङीब्वा स्यात्तद्धितलुकि। द्वौ पुरुषौ प्रमाणमस्याः सा द्विपुरुषी द्विपुरुषा वा परिखा॥ ऽऽ न तपस्तप्तं चतुर्थे किं करिष्यसी

ति १ त्रीणीत्यन्ये। यदाहुः। पिता रक्षति कौमारे भर्ता रक्षति यौवने। पुत्रस्तु स्थाविरे भावे न स्त्री स्वातंत्र्यमर्हतीति १ त्रिलोकीति। त्रयाणां लोकानां समाहारे तद्धितार्थेति द्वि
गुः। अकारान्तोत्तरपदो द्विगुरिति स्त्रीत्वात् त्रिफलेति। अत्र द्विगोरिति ङीप् प्राप्नोति। न तु पाककर्णेति ङीष्। नत्रजातेरित्यनुवृत्तेः। त्र्यनीकेति। अनीकमग्रता। त्रयाणाम
नीकानां समाहारः। अजादेरा कृतिगणत्वाट्टाबिति त्र्यनीकाधिकरणमीमांसकाः। पंचाश्वेति। नन्वत्र द्विगोरिति ङीप् मा भूत्। ठगंतत्वात्तु स्यादेव। न चापरिमा
णेति निषेधस्य निरवकाशत्वेति वाच्यं। पंचानामजानां निमित्तं धनपति संयुक्तिः पंचाजा पचोष्ट्र्यादौ सावकाशत्वात्। तत्र हि गोद्व्यचोऽसंख्येति यत्तु संख्यस्या।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु. सि.कौ. टी.त. १०७

ध्यर्द्धपूर्वेत्यादिना लुगिति चेत्। अत्राहुः। उकोर्योकार इति व्याख्यानात् ठगं तलस्य लोऽङीन्नेति। द्विविस्तेति। सुवर्णविस्तो हेम्नो स इत्यमरः। आचितो दशभाराः स्युः। द्विकंब
लेति। द्वाभ्यां कंबलाभ्यां क्रीता। कंबल्यमूर्णपलशतं कंबलाच्च संज्ञायामिति यत्। ततः क्रीतार्थस्य ठञो लुक्। व्याढकीति। द्वावाढकौ पचतीति विग्रहे आढकाचितपा
त्रात् खोऽन्यतरस्यां द्विगोष्ठंश्चेति खठनौ विहितौ ताभ्यां मुक्ते प्राग्वतीयष्ठञ्। तस्य अध्यर्द्धेति लुक्। एतेन व्याचिता। व्याख्याता। स्यादेतत्। कांडांतादित्युत्तरसूत्रे परि
तः सर्वतो येन मीयते तन्न परिमाणमाढककुडवादि। न तु परिच्छेदकमात्रमिति मनोरमायां स्थितं। तथा चापरिमाणत्वाद्बिस्तादिग्रहणमिह व्यर्थं स्यात्।
अत्राहुः। उन्मानस्य निषेधे विस्तादीनामेवेति नियमार्थं तद्ग्रहणं तेन द्विकार्षापणी व्यह्नीत्यादि सिध्यतीति। कांडांतात्। षोडशहस्तप्रमाणो दंडः कांडः। यद्यपि
विशेषणेन तदंतविधिसिद्धस्तथाप्यसत्यं तद्ग्रहणे क्षेत्रे इत्येतन्न श्रुतत्वात् कांडस्यैव विशेषणं स्यान्न तु कांडांतस्य। ततश्च द्वाभ्यां कांडाभ्यां कांडप्रमिताभ्यां क्षेत्रा
भ्यां क्रीता द्विकांडी वडवेत्यत्र निषेधः स्यात्। इह तु निषेधो न स्यात्। द्विकांडा क्षेत्रभक्तिरिति। अत्र हि कांडप्रमाणे वर्तते कांडांतमपि क्षेत्रे अतो तद्ग्रहणं कृतं। इ
ह द्विगोरित्यनुवर्तते न तु तद्धितलुकीति च तदाह द्विगुसंज्ञान ङीबित्यादि॥ मात्रच् इति। द्वयसचो लुगिति प्राचोक्तं नादर्तव्यं। प्रथमश्च द्वितीयश्च ऊर्ध्वमाने
मतौ मम मतिसिद्धांतादिति भावः। द्विकांडी रज्जुरिति॥ द्वे कांडे प्रमाणमस्याः पूर्ववत्तद्धितलुक्। द्विगोरिति ङीप्। नन्विह परिमाणांतादिति पूर्वेण निषेधः स्यात्॥
कांडशब्दस्यायामपरतया अपरिमाणार्थत्वात्। परितः सर्वतः। आरोहतः परिणाहतश्च येन मीयते तद्धि परिमाणं आढककुडवादि। न तु यथा कथंचित्प
रिच्छेदकमात्रं। यदाहुः। ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः। आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वत इति। अत एव द्विहस्ता द्विभित्तिरित्यत्र ङीप्
न भवतीति चेत्। अत्राहुः। नियमार्थमिदं क्षेत्र एव निषेधो यथा स्यादिति। तथा च द्विकांडी रज्जुरित्यत्र ङीबेव सूत्रारंभफलमिति। पुरुषात्प्रमाणेऽपरिमाणं
तत्वान्निषेधे प्राप्ते विकल्पार्थं वचनं। पुरुषशब्दो यद्यपि लोके जातिवचनस्तथापि द्वौ पुरुषौ प्रमाणमस्या इति वाक्ये प्रमाणशब्दसामानाधिकरण्यात् प्रमाणे १०७
वर्तत एवावृत्तौ तु शब्दशक्तिस्वाभाव्यादेव। तथा च शुल्वसूत्रे पंचारत्निः पुरुष इति। द्विपुरुषीति। अत्र प्रमाणे लो द्विगोर्नित्यमिति द्वयसचो लुगिति न्यासकारः। न
न्विह तद्धितलुग्दुर्लभः। पुरुषशब्दस्य प्रमाणवाचित्वाभावेन प्रमाणे ल इति श्लोकवार्तिकस्याप्रवृत्तेः। यो हि रामादिवत् प्रमाणत्वेन प्रसिद्धस्तत्रैव तत्प्रवर्तते

107

CC-0. In Public Domain. Digitization by eGangotri

समाहारे पंचपुल्यौ नन्विह पुरुषशब्दः प्रमाणेन वर्तते नैव लुग्विकल्पेन तु इति चेदत्राहुः प्रमाणार्थे इतीनामैव पुरुषात्प्रमाणमत्र वक्ष्यते।।

ननु पुरुषशब्देपि। अन्यथा पुरुषद्वय समित्यत्रापि लुक् स्यात्। न चैवं द्वयसच् दघ्नच् अपि न स्यातामिति वाच्यं। ऊर्ध्वमाने मतोममेति वचनात्। एवं पुरुषात्प्र माणे इति वैकल्पिकस्यापि ङीपः सामर्थ्यादेव प्रवृत्तिः। किंतु तद्धितलुगेव दुर्लभ इति चेदत्राहुः। अस्ति ह प्रमाणे ल इत्यस्य प्रवृत्तिस्तथापि सुलभ एव लुक्। पुरु षात् प्रमाण इति सूत्रे द्विगोस्तद्धितलुकीत्यनुवर्तते तत्सामर्थ्याल्लुग्व्याक्षिप्यत इति सुवचत्वादिति। प्रमाणे किं। द्वाभ्यां पुरुषाभ्यां क्रीता द्विपुरुषा। गोः तद्धितलु कीत्येव। समाहारान्न लुग्विकल्पे तात। तत्र तद्धितलुकीत्यनुवृत्तौ पंचपुरुषशब्दाद्विकल्पः स्या दित्यतो द्विगोरिति नित्यं ङीबिति।। ॐ ।। ऊधसो नङ्। नादेशेन वसिद्धेः नङ्करणं धनुषश्चेत्युत्तरार्थं। अन्यथा ग्रामं धन्वेति न सिध्येत् इत्याहुः। वस्तुतस्तु इहार्थमप्याव श्यकमेव अन्यथा नोपधालक्षणिकत्वेन अल्लोपो प्रसंगादि

ऊधसोऽनङ्।५।४।१३१। ऊधोन्तस्य बहुव्रीहेरनङादेशः स्यात् स्त्रियां।। इत्यनङि कृते डाप्ङीप्निषेधेषु प्राप्तेषु।। बहुव्रीहेरूधसो ङीष्।४।१। २५।। ऊधोन्ताद्बहुव्रीहेर्ङीष् स्यात् स्त्रियां। कुण्डोध्नी। स्त्रियां किं। कुण्डोधो धेनुकं।। इहाऽनङपि न। तद्धि स्त्रियामित्युपसंख्यानात्।। संख्याऽ व्ययादेर्ङीप्।४।१।२६।। ङीषोऽपवादः। द्व्यूध्नी। अत्यूध्नी। बहुव्रीहेरित्येव। ऊधोऽतिक्रान्ता अत्यूधाः।। दामहायनान्ताच्च।४।१।२७।। संख्यादेर्बहुव्री हेर्दामान्ताद्धायनान्ताच्च ङीप् स्यात्। दामान्ते डाप्प्रतिषेधयोः प्राप्तयोः हायनान्ते त्वप्राप्ते वचनं। द्विदाम्नी। अव्ययग्रहणाऽननुवृत्तेरुद्दा मा वडवेत्यत्र डाप्निषेधावपि पक्षे स्तः। द्विहायनी बाला। त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यं।। वयोवाचकस्यैव हायनस्य ङीप्णत्वं चेष्यते। त्रिहायणी। चतुर्हायणी। वयसोऽन्यत्र। द्विहायना। त्रिहायना।। चतुर्हायना शाला।।

८ त्यन्ये। इह बहुव्रीहौ सक्थ्यक्ष्णोरित्यतो बहुव्रीहा वित्यनुवर्तते इत्याह। ऊधोन्तस्य बहुव्रीहेरिति। समासान्तप्रकरणस्थत्वेप्यनङो न प्रत्ययत्वं। अन्यथा ङित्त्ववैयर्थ्यापत्तेरिति प्राचः। वस्तुतस्तु प्यङ् इव प्रत्ययत्वे प्यादेशत्वम विरुद्धं। कुंडोध्नीत्यत्र ङीषि कृते स्वरे विशेषाभावादिति बोध्यं। स्त्रियामिति। उपसंख्यानाल्लब्धमेतत्। डाप्ङीब्निषेधेष्विति। डाबुभाभ्यामिति वैकल्पिको डाप्। अन उपधालोपिनोन्यतरस्यामिति विकल्पेन ङीप्। अनो बहुव्रीहेरित्यनेन न्नन्तेभ्य इति प्राप्तस्य ङीपो निषेध इति विवेकः। ङीष् स्यादिति। प्रकृतौ ङीबेव तु न वि हितः स्वरे विशेषात्। कुंडोध्नीति। कुंडमिव ऊधो यस्याः सा बहुव्रीहेः किं। प्राप्ता ऊधः प्राप्तोधाः। प्राप्तापन्ने चेति समासः। धैनुकमिति अचित्तहस्तीति समूहार्थे ठक्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



इ सुसुत्वांनात्कः स्त्रियामित्युपसंख्यानादिति। नन्विहै वलाद्युवार्थे बहुव्रीहेरूधसोऽङीष् न चेति सूच्यतां। अनङ् चेति वा। समासांतेषु ऊधसो नङिति च त्यक्तायनुबंधो नङित्येव व
त्यतां। मैवं। कवभावे सावकाशस्यास्य पक्षे कपा बाधापत्तेः। सिद्धांते तु अनङः समासांतत्वाभावाच्छेषत्वमेवेह नास्तीति न कपा। संख्याव्ययादिग्रहणान्यत्रांतरस्य व्यवधाने
पि स्यादेवाह्यिहि विघोघ्नी। समा बहुव्रीहिविशेषणत्वात्स्वेव सिद्धे अंतग्रहणं स्पष्टप्रतिपत्त्यर्थं। संख्यादेरिति। समासनिर्देशोपि सूत्रे तल्लवलादेकदेशः एवानुवर्तते इति भावः।
अननुवृत्तेरिति। भाष्यकृता नानुवर्तितत्वादिति भावः। एवं चोद्दामेत्यत्र दामहायनांताच्चेत्यस्य प्रवृत्त्यापूर्वान्तेषु डाप्ङीप्प्रतिषेधेषु प्राप्तेषु बहुराज्ञीवद्रूपत्रयं।

नित्यं संज्ञाछन्दसोः। ४।१।२९। अन्नन्ताद्बहुव्रीहेरुपधालोपिनो ङीप्। सुराज्ञी नाम नगरी। अन्यत्र पूर्वेण विकल्प एव। वेदे शतमूर्ध्नी। केवलमा
मकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च। ४।१।३०। एभ्यो नवभ्यो नित्यं ङीप् स्यात् संज्ञाछन्दसोः। अथो त इन्द्रः केवलीर्विशः। भा
गधेयी। पापी। अपरी। समानी। आर्यकृती। सुमङ्गली। भेषजी। अन्यत्र केवला इत्यादि। मामकग्रहणं नियमार्थं। अणन्तत्वादेव सिद्धे । तेन लो
के संज्ञायां मामिका। अन्तर्वत्पतिवतोर्नुक्। ४।१।३२। एतयोः स्त्रियां नुक् स्यात्। ऋन्नेभ्यो ङीप्। गर्भिण्यां जीवद्भर्तृकायां च प्रकृतिभागौ नि
पात्यते। तत्राऽन्तरस्त्यस्यां गर्भ इति विग्रहे अन्तश्शब्दस्याऽधिकरणशक्तिप्रधानतयाऽस्तिसामानाधिकरण्याऽभावादप्राप्तो मतुप् निपात्यते। पति
वत्नीत्यत्र तु वत्वं निपात्यते। अन्तर्वत्नी। पतिवत्नी। मतुबुदाहरणं तु अन्तरस्त्यस्यां शालायां घटः। पतिमती पृथिवी। पत्युर्नो यज्ञसंयोगे। ४।१।३३। प
तिशब्दस्य नकारादेशः स्याद्यज्ञेन सम्बन्धे। वसिष्ठस्य पत्नी तत्कर्तृकयज्ञस्य फलभोक्त्रीत्यर्थः। दम्पत्योस्सहाऽधिकारात्॥ .१।सि५। ॥

भवत्यनेत्याचष्टे। डाप्निषेधावपीति॥ ॥ नित्यं संज्ञादि। अन्नउपधालोपिन इति विकल्पस्यापवादः। आरंभसामर्थ्यात्सिद्धेपि नित्यग्रहणमुत्तरत्र विकल्पा।
ननुवृत्तिसूचनाय कृतं भिन्नाकुः। शतमूर्ध्नीति। इह पंचदाम्नीति क्वचित्पाठः॥ स चायुक्तः। दामहायनान्ताच्चेत्यनेनैव सिद्धत्वात्। केवल। छंदसि। मामकीतनू। मित्राव १०
रुणयोर्भागधेयी। तत्व संनु पापीः। उतोपरीभ्यः। समानीव आकूतिः। आर्यकृती। सुमंगली। सुमंगलीरियं वधूरित्यत्र तु छंदसि वनिपाविति मत्वर्थे ईप्रत्ययो वो
ध्यः। शिवा रुद्रस्य भेषजी। अन्यत्र केवलेत्यादीति। मामकनरकयोरुपसंख्यानादि त्वं मामिका। भागशब्दान्नपुंसकलिंगात् स्वार्थे धेयप्रत्ययः स्वार्थिकाः क्वचित्प्रकृति

108

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तो लिंगवचनान्यतिवर्तन्त इति स्त्रीत्वं। भागधेया। अभेदोपचारात्तद्वृत्तिवर्तमानः पापशब्दो विशेष्यनिघ्नः। पापा अपरा। समाना। आर्येण कृतेति शाकुसुवुत्पत्तेः। कृदन्ते
न समासः। टाप्। आर्यकृता भिषजइत्यमित्यत्र आदिवृद्धिः रूपवादेः स्मारेव निपातनादेकारः। संज्ञाछन्दसोरिति नियमादन्यत्र भेषजा। प्रत्युदाहरणं त्विति। अंतर्वत्नी
पतीवत्नीति शाचोक्तं प्रत्युदाहरणमयुक्तमिति भावः। आद्ये अस्तिसामानाधिकरण्याभावान्मतुपोऽसंभवात्। द्वितीये तु वत्वासंभवादिति भावः।

विभाषा सपूर्वस्य। ४।१।३४॥ पतिशब्दान्तस्य सपूर्वस्य प्रातिपदिकस्य नो वा स्यात्। गृहस्य पतिः। गृहपतिः। गृहपत्नी। अनुपसर्जनस्येत्तीहोन्नरार्थ
मनुवृत्तमपि नस्युर्विशेषणं। किन्तु तदन्तस्य। तेन बहुव्रीहावपि। दृढपत्नी। दृढपतिः। वृषलपत्नी। वृषलपतिः। अथ वृषलस्य पत्नीति व्यस्ते
कथमिति चेत्। पत्नीव पत्नीत्युपचारात्। यद्वा। आचारक्विबन्तात् कर्तरि क्विप्। अस्मिन्पक्षे। पत्नियौ। पत्नियः॥ इतीयङ्विषये विशेषः। सपू
र्वस्य किं। गवाम्पतिः स्त्री। नित्यं सपत्न्यादिषु। ४।१।३५॥ पूर्वविकल्पाऽपवादः। समानस्य सभावोऽपि निपात्यते समानः पतिर्यस्याः सा सपत्नी।
एकपत्नी। वीरपत्नी। पूतक्रतोरै च। ४।१।३६॥ अस्य स्त्रियामैआदेशो ङीप् च इयन्त्रिसूत्री पुंयोग एवेष्यते। पूतक्रतोः स्त्री। पूतक्रतायी। यया
तु क्रतवः पूताः क्रतुरेव सा। वृषाकप्यग्निकुसितकुसिदानामुदात्तः। ४।१।३७॥ एषामुदात्त ऐआदेशः स्यात् ङीप् च। वृषाकपेः स्त्री वृषाकपा
यी। हरविष्णू वृषाकपी इत्यमरः। वृषाकपायी श्रीगौर्य्योरिति च॥ अग्नायी। कुसितायी। कुसिदायी। कुसिदशब्दो ह्रस्वमध्यो न तु दीर्घमध्यः
मनोरौ वा। ४।१।३८॥ मनुशब्दस्यौकारादेशः स्यादुदात्तैकारश्च वा। ताभ्यां सन्नियोगशिष्टो ङीप् च। मनोः स्त्री मनावी। मनायी। मनुः॥ ०॥

॥ ❁ ॥ विभाषा सपूर्वस्य। अप्राप्तविभाषेयं। अयन्त्वसंयोगत्वात्। पूर्वेण सहितः सपूर्वस्तस्य। यस्य समुदायस्य पूर्वावयवो विद्यते नस्येत्यर्थः
स च समुदायः पतिशब्दो न भवतीति पतिशब्देन तदन्तविधिरित्याह। पतिशब्दान्तस्येति ननु पत्युरिति प्रातिपदिकविशेषणेन तदन्तलाभात्सपूर्वस्य त्येवास्तु किमनेन स
पूर्वग्रहणेन। अत्राहुः। केवलपतिशब्दस्यापि व्यपदेशिवद्भावेन पत्यन्तत्वात् इति प्रसंगः स्यात्तन्निवारणाय सपूर्वग्रहणमिति। अत्र पूर्वशब्दः पूर्वावयवपर इति ध्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नयन्ननुसहरति। गवांपतिः स्त्रीति। पातीतिपतिरितिक्रियाशब्दस्यत्रिलिंगत्वादिहस्त्रीत्वं। तथाचवृत्तेत्तिरीयेनपुंसकेपिप्रयुज्यते। अग्नेःसाम्राज्यानामधिपतितन्मावलितिव्यत्येकथ
मिति। ग्राचात्तुसमसेष्युपचारादुक्तुक्तंतद्वथेवेतिभावः। नित्यंसपत्न्यादिषु। आरंभसामर्थ्यादेवसिद्धेनित्यग्रहणंस्पष्टार्थं। निपात्यतइति। इहगणेसमानाएक — वीरभा
तृपुत्रेतिसमानादयएवपठ्यंतेतेनतत्रसमानादिष्वितिवक्तव्येसपत्न्यादिष्वित्युक्तिसभावनिपातनार्थेतिभावः। सपत्न्यादिषुवहुव्रीहिराश्रीयत — इत्याशयेनाह।
समानःपतिर्यस्याः सेति। पूर्वनालोरेचाऐकारआदेशानतुप्रत्ययः। उत्तरसूत्रेउदात्तग्रहणात्तन्नलिंतिअन्यथालघावंतइतिमध्योदात्तोवृषाकपिशब्दउदात्तत्वंप्रयोजय
ति। अग्न्यादिषुत्रिषुस्थानेतरतमइत्येवसिद्धमितिहृन्यादिग्रंथाविरुध्येरन्निति भावः। उदात्तैकारइति। भृत्सुखि हीत्यादिनामनेरुप्रत्ययविधौधान्येतिदित्यधि

वर्णादनुदात्तात्तोपधात्तोनः। ४।१।३९॥ वर्णवाचीयोनुदात्तान्तस्तोपधस्तदन्तादनुपसर्जनात्प्रातिपदिकाद्वाङीप्स्यात्तकारस्यनकारादेशश्च।
एनी। एता। रोहिता। रोहिणी। वर्णानांतणतिनितान्तानामितिफिट्सूत्रेणाद्युदात्तः। त्रेण्या प्राललेतिगृह्या। त्रीण्येतान्यस्याइतिवहुव्रीहिः॥
अनुदात्तात्किं। श्वेता। घृतादीनाञ्चेत्यन्तोदात्तोयं। अतइत्येव। शितिः स्त्री। पिशङ्गाडुपसंख्यानं। पिशङ्गी। पिशङ्गा। असितपलितयोर्न। असिता। पलिता।
छन्दसिक्नमेके॥ असिक्नी। पलिक्नी। अवदातशब्दस्तुनवर्णवाचीकिन्तुविशुद्धवाची। तेनअवदातेत्येव। अन्यतोङीष्। ४।१।४०॥ तोपधभि
न्नाद्वर्णवाचिनोनुदात्तान्तात्प्रातिपदिकात्स्त्रियांङीष्स्यात्। कल्माषी। सारङ्गी। लघावन्तेद्वयोश्चवह्वषोगुरुरितिमध्योदात्तावेतो। अनुदात्तात्किं

कार्त्स्नशब्दआद्युदात्तः। समासनिर्देशेनएतद्दर्शयति। उदात्तइत्यनुवर्तमानंसंवधानुवृत्तेरैकारेणैवसंवध्यतेनत्वौकारेणापीति। ततश्चैकारौकारावुदात्तोस्तइतिप्राचोक्तं
वृत्तिपदसंजयोर्दिविरोधादुपेक्ष्यमितिभावः। मनायीति। मध्योदात्तमिदं। इतरत्पदद्वयमाद्युदात्तं। एताकर्बुरा॥ ॐ॥ वर्णानामिति। एतः। श्येनः। शितिः। पृश्निः। पृषदितिक्रमे
णोदाहर — णानि। आद्युदात्तइति। अनुदात्तंपदमेकवर्जमितिशेषनिघातेनानुदात्तांतएतशब्दइतिभावः। त्र्येण्येति। अत्रएतशब्दस्योपसर्जनत्वेपितदंतसमासस्यानु
पसर्जनत्वमितिभावः। पूर्वपदात्संज्ञायामितिणत्वं। गृह्यामिति। गृहूग्रहणेऋदुपधाच्चाक्लृपिचृतेरितिक्यप्। त्रीण्येतान्यस्याइति। ननुचित्रकिर्मीरकल्माषशवलैताश्चक ११०
र्वुरइतिचित्रपर्यायएतशब्दः तथाचशलल्यांचित्रत्रयाभावाद्यासंगतिरित्याशंक्यकेचिदिहव्याचक्षते। एतशब्दोत्रएता वयवपरइति। नास्त्यत्रार्थासंगतिः। नचैव

109

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मपि गुणविषये नपुंसकप्रयोगो न संगच्छते। गुणे शुक्लादयः पुंसि इत्युक्तेरिति वाच्यं। एतानि एतावयवाधिकरणानीति व्याख्यया गुणिलिंगपरत्वादेतच्छब्दस्य नपुंसकत्वम-
प्युपपद्यते इति पिशंगादिति। लघावंत इति पिशंगशब्दस्य मध्योदात्तत्वादन्यतो ङीषिति ङीषि प्राप्ते ङीबुपसंख्यायते। स्वरे विशेषः। क्नमेक इति। असितपलितयोस्तकारस्य
वर्णादनुदात्तादिति नकारे प्राप्ते तं बाधित्वा तकारस्यानेन क्नमादेशं तत्संनियोगेन ङीपं चेच्छंत्येके आचार्या इत्यर्थः। अत्र छंदस्येके इत्यन्वयात् भाषायां क्नो भवत्येव। छंदस्ये-
वेके इ छंत्यन्ये तु भाषायामपीत्यर्थपर्यवसानात्। अन्यथा एकग्रहणं भाष्यकारो न कुर्यान्न हि छंदसि पलिक्नी रिशु वतय इत्यादिप्रयोगेषु कश्चिद्धि प्रतिपद्यते। एवं
च गतो गणस्तूर्णमसिक्निकानामिति प्रयोगो नानुपपन्नः विश्व तूवाचीति। दैपशोधन इत्युक्तेः। अमरेण तु विशुद्धत्वसाधर्म्यादवदातः सितो गौर इत्युक्तमिति भावः
लघावंत इति। अंते नाम एकस्मिन् लघौ द्वयोश्च लघ्वोः परतः बव्हषो बव्हच् कस्य गुरुरुदात्तः स्यात्। अषित्यचः प्राचां संज्ञा। कृष्णेत्यादि। कृषेश्चेति न प्रत्यये क-
पेश्चेति सौत्राद्धातोरौणादिके इलचि च कृष्णकपिलावंतोदात्तौ॥ ॐ ॥ षिद्गौरादि। नर्तकीति। नृतू धातोः शिल्पिनि ष्वुन्। पुनः षित्वमवयवे चरितार्थत्वात्तदंत-

षिद्गौरादिभ्यश्च।४।१।४१॥ षिद्भ्यो गौरादिभ्यश्च ङीष् स्यात्। नर्तकी। गौरी। अनडुही। अनड्वाही। पिप्पल्यादयश्च॥ आकृतिगणोयं॥

स्य प्रातिपदिकस्य विशेषकं। त्रपुकः षित्वस्याङि घो चरितार्थत्वात् त्रपेत्यत्र तु न ङीष् मजेः षित्वमनार्षं भिदादौ मृजेति पाठादित्याहुः मजेः षित्वाद्वाङ् भिदादौ मृजेति पाठस्त्वनार्षे
वर्णवाचित्वेपि प्रातिपदिकस्वरेणांतोदात्तत्वादन्यतो ङीषिति ङीषु न प्राप्नोतीति। इह गणे पाठः। अनड्वाही अनडुहीति अनकारांतत्वाज्जातिलक्षणस्य पुंयोगल-
क्षणस्य चाङीषोऽप्राप्तत्वाद्गणेस्मिन्पठ्यते। प्रत्ययसहितपाठस्तु ङीषि परे आम्विकल्पार्थः। गौर मत्स्य मनुष्य शृंग। गवय। हय। मुकय गोतम। अनड्वाही अनडुही तरुण
तलुन। श्वन्। पिप्पल्यादयश्च। पिप्पली। हरीतकी। कोशातकी। पृथिवी। मातामहीत्यादि। यत्तु प्राचा अत्रान्येभ्यो ङीवित्यत्र शुनी त्युदाहृतं तन्न तु गौरादिगणे श्वन् शब्दपा-
ठादर्शनप्रयुक्तमित्याहुः॥ अत्र केचित् नित्यस्त्रीत्वाज्जातेरस्त्रीविषयादित्यप्राप्ते ङीषि पिप्पल्यादयो गौरादिषु पठ्यंते ङीषंतपाठस्तु चिंत्यप्रयोजनः। न च पिप्प-
लीभार्या यस्य स पिप्पलीभार्य इत्यादौ पुंवद्भावं बाधित्वा ङीषः श्रवणं यथा स्यादित्येतदर्थः स इति वाच्यं। भाषितपुंस्कत्वाभावादेव पुंवद्भावनिषेधसिद्धेः। किंचा अ-
वांतरगणत्वाभ्युपगमोपि पिप्पल्यादेर्व्यर्थ एव। न चैवं जात्यधिकारे चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानमित्यत्र पिप्पल्यादेराकृतिगणत्वात्पुनर्ङीषिति वक्ष्यमाण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु
सि·कौ सूर्यतिष्य। अत्रभस्येत्यनुवर्तमानमपिनसंवध्यते। विषयपरिगणनेनैवातिप्रसंगनिवारणात्। मत्स्यस्य ङ्यामिति। नेह मत्स्यस्येदंमात्स्यं। ह्रेचङ्यांचेति। सूरीयः। सू
टी·त· री। आगस्तीयः। आगस्ती। नेह। सौर्यंचरुं। आगस्त्यं। नक्षत्राणीति। नक्षत्रसंवंधीयोण् नक्षत्रेणयुक्तः कालइतिसंधिवेलाद्युतु नक्षत्रेभ्योणिति चविहितस्तस्मिन्नि
११० त्यर्थः। तत्रतिष्यस्ययलोपोनियम्यते। पुष्यस्यतुअप्राप्तोविधीयते। तिष्येनयुक्तः कालस्तैषः। पुष्येणयुक्तः पौषः। नघातिष्येभवस्तैषः। पुष्येभवः पौषः। नेह। तिष्यस्या

सूर्यतिष्यागस्त्यमत्स्यानांयउपधायाः ६।४।१४९॥ अङ्गस्योपधायायस्यलोपस्यात्सचेद्यः सूर्य्याद्यवयवः। मत्स्यङ्यां। सूर्य्यागस्त्ययोश्छेचङ्यांच्च।
तिष्यपुष्ययोर्नक्षत्राणियलोप इतिवाच्यं॥ मत्सी। मातरिषिच्चेतिषित्वादेवसिद्धे गौरादिषुमातामहीशब्दपाठ इनित्यः षितांङीषः। दंष्ट्रा। जानपद
कुण्डगोणस्थलभाजनागकालनीलकुशकामुककवरा द्वृत्यमत्रावपनाकृत्रिमा श्राणास्थौल्यवर्णानाच्छादनाऽयोविकारमैथुनेच्छाके
शवेशेषु ४।१।४२॥ एकादशभ्यः प्राजिपदिकेभ्यः क्रमाद्वृत्यादिष्वर्थेषुङीष्स्यात्॥ जानपदीवृत्तिश्चेत्। अन्यातुजानपदी। उत्सादित्वादत्रजातेवे
नदिड्ढेतिङीप्याद्युदात्तः। कुण्डी अमत्रंच्चेत्। कुण्डान्या। कुडिदाहे। गुरोश्चहलइत्यप्रत्ययः। यत्तुअमृतेजारजः कुण्डइतिमनुष्यजातिवाचन
स्ततोजातिलक्षणेङीषुभवत्येव। अमत्रेहिस्त्रीविषयत्वाभावादप्राप्तोङीष्विधीयते। नतुनियम्यते। गोणीआवपनंच्चेत्। गोणाऽन्या। स्थली अकृत्रि
माचेत्। स्थलाऽन्या। भाजीश्राणाचेत्। भाजाऽन्या। नागीस्थूलाचेत्। नागाऽन्या। गजवाचीनागशब्दः स्थौल्यगुणयोगादन्यत्रप्रयुक्तउदाहरणं। सर्प
वाचीतुदैर्घ्यगुणयोगादन्यत्रप्रयुक्तः प्रत्युदाहरणं। कालीवर्णश्चेत्। कालाऽन्या। नीलीअनाच्छादनंच्चेत्। नीलाऽन्या। नील्यारक्ताशाटीत्यर्थः।
नीलाअन्वक्तव्य इत्यत्। अनाच्छादनेपिसर्वत्रनाकिन्तु। नीलारोषधौ॥ निली। प्राणिनिच॥ नीलीगौः। संज्ञायांवा॥ नीली। नीला। कुशीअयोवि
कारश्चेत्। कुशाऽन्या। कामुकीमैथुनेच्छाचेत्। कामुकाऽन्या। कवरीकेशानांसन्निवेशविशेषः। कवराऽन्याचित्रेत्यर्थः॥ ॥ ११
यंतैष्यः। मत्सीति। योपधत्वाज्जातेरस्त्रीविषयादित्यप्राप्तेगौरादिपाठान्ङीष्। मातरिषिच्चेति। पितृव्यमातुलमातामहेतिसूत्रस्थमिदंवचनंतच्चपितामहीति
रूपसिध्यर्थमवश्यंवक्तव्यमितिनवार्तिकस्यवैयर्थ्यं यत्तुपितामहशब्दमपिगौरादिषुपठंतितन्मतेवचनमिदंस्वरसतोनसंगच्छते। यत्तुअनित्यत्वज्ञापन 110

CC-0. In Public Domain. Digitization by eGangotri

क्रीतात्। इह प्रकरणे अत इत्यनुवर्त्तते प्रातिपदिकादिति च तदाह। अदंतादिति। प्रातिपदिकादिति शेषः। वस्त्रक्रीतेति। वस्त्रभिस्क्रीत इति स्थिते प्राक् सुबुत्पत्तेः कर्तृ
करणेति समासे अदंतत्वान्ङीष्। क्वचिन्नेति। कर्तृकरणे कृता बहुलमिति बहुलग्रहणात् गतिकारकोपपदेति वक्ष्यमाणस्य क्वचिदप्रवृत्तौ सुबंतेन समासः। तत्र सु
पः प्रागेवांतरंगत्वाद्दाप्। ततोऽदंतत्वाभावान्न ङीषिति भावः। करणपूर्वादिति किं। गवा क्रीता। अश्वेन क्रीता इत्यादिविग्रहे मा भूत्। पूर्वशब्दो ह्यवयववचनः। सम
स्तप्रातिपदिकं चान्यपदार्थः। करणं पूर्वं यस्मिन् प्रातिपदिके तदिदं करणपूर्वं तस्मादित्यर्थः। क्तादल्पाख्यायां। अत्र व्याचख्युः। अल्पाख्यायामिति समुदायोपा
धिः। अल्पैरभ्रैर्लिप्ता अभ्रलिप्ती। क्तान्तग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति समुदायस्यापि क्तांतत्वान्ङीष्। यद्यपि पूर्वपदार्थस्य अभ्राणामेव अल्पत्वं गम्यते।

क्रीतात्करणपूर्वात्। ४।१।५०॥ क्रीतान्तादद्न्तात्करणादेः स्त्रियां ङीष् स्यात्। वस्त्रक्रीती। क्वचिन्न। धनक्रीता। क्तादल्पाख्यायां। ४।१।५१। क
रणादेः क्तान्तादद्न्तात् स्त्रियां ङीष् स्यादल्पत्वे द्योत्ये। अभ्रलिप्ती द्यौः॥ बहुव्रीहेश्चान्तोदात्तात्। ४।१।५२। बहुव्रीहेः क्तान्तादन्तोदात्तादद्न्ता
त् स्त्रियां ङीष् स्यात्। जातिपूर्वादिति वक्तव्यं॥ तेन बहुनञ्सुकालसुखादिपूर्वान्न। ऊरुभिन्नी। नेह बहुकृता। जातान्ता। दन्तजाता। पाणि
गृहीती भार्यायां॥ पाणिगृहीताऽन्या॥ अस्वाङ्गपूर्वपदाद्वा। ४।१।५३॥ पूर्वेण नित्ये प्राप्ते विकल्पोऽयं। सुरापीती सुरापीता। अन्तोदात्तात्किं।
वस्त्रच्छन्ना। अनाच्छादनादित्युदात्तनिषेधः। अत एव पूर्वेणाऽपि न ङीष्। स्वाङ्गाच्चोपसर्ज्जनादसंयोगोपधात्। ४।१।५४॥ असंयोगोपधमुप
सर्ज्जनं यत्स्वाङ्गं तदन्तादद्न्तात्प्रातिपदिकाद्वा ङीष्। केशानतिक्रान्ता। अतिकेशी। अतिकेशा। चन्द्रमुखी। चन्द्रमुखा। संयोगोपधात्तु सु
गुल्फा। उपसर्ज्जनात्किं। शिखा। शोभना शिखा। सुशिखा॥ ॥

१९ तथापि तदल्पत्वे सति तद्विलेपनस्याप्यल्पत्वमवश्यं भवतीति समुदायोपा
धित्वमल्पत्वस्य संगच्छत इति। तेन बहुहीति। अयं भावः। बहोर्नञ्वदुत्तरपदभूम्नि। नञ्सुभ्यां। जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्ना इति त्वंतोदा
त्तविधायकानि। तत्र जातिपूर्वादित्युक्ते बह्वादिपूर्वकस्यार्थाद्व्युदास इति। सुखादिपूर्वान्नेति। सुखादिभ्यः कर्तृवेदनायामित्यत्र ये पठिताः। सुखदुःखकृच्छ्रदय
लित्र गृह्यंते। सुखया तादुःखयन्ता सुखं दुःखं वा प्राप्तमनयेति विग्रहः। अस्वांगपूर्वपदाद्वेति विकल्पस्य वक्ष्यमाणत्वादिह स्वांगपूर्वपदमेवोदाहरणमाह। ऊरुभिन्नी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



भिन्नौकृष्यस्या इति बहुव्रीहौ भिन्नशब्दस्य निष्ठेति पूर्वनिपाते प्राप्ते जातिकालसुखादिभ्यः परा निष्ठा वाच्येति परनिपातः। बहुकृतेति। बहूनि कृतानि यया सा।
जाता तान्नेति। वर्णादनुदात्तादिति वत् बहुव्रीहेरुदात्तादित्येव सिद्धे अंतग्रहणं नित्यत्वप्रतिपत्त्यर्थं। वाजात इति तु वैकल्पिक उदात्तो न तु नित्य इति भावः। पाणि
गृहीतीति। यस्याः पाणिरग्निसाक्षिकं गृह्यते तस्यां वाच्यायां पाणिगृहीतशब्दान्ङीब्वक्तव्य इत्यर्थः। अन्येति। कौतुकादिना पाणिर्गृहीतो यस्याः दास्यादेः सा पा
णिगृहीता। पूर्वेणानित्ये प्राप्त इति। एतेन विकल्पोऽप्ययं जातिपूर्वादेवेति ध्वनितं। कथं तर्हि पुत्रहतीत्यत्र अस्वांगपूर्वपदादिति वा ङीषिति कैयटः। पुत्रशब्द
स्य जातिवाचकत्वादन्यथा पुत्रादिनी त्वच सुप्यजाता विति णिनिर्न स्यात्। यदि त्वदनमादेः सोऽस्यास्तीति आदिनी पुत्राणामादिनीति विगृह्य कथंचित् साधि
ते पि जातिकालसुखादिभ्य इत्यंतोदात्तविधायकसूत्रे जातेः किं पुत्रजात इति वक्ष्यमाणमूलग्रंथो विरुध्यत एवेति चेदुच्यते। प्रादुर्भावविनाशाभ्यां सत्वस्य
युगपद्गुणैः। असर्वलिंगां बह्वर्थां तां जातिं कवयो विदुः १ इति भाष्ये लक्षणांतरमुक्तं। सत्वस्य द्रव्यस्य प्रादुर्भावविनाशाभ्यामाविर्भावतिरोभावौ या प्राप्नोति या
च द्रव्यभाविनीत्यर्थः। गुणैर्गुण पद द्रव्येण संबध्यते। बह्वर्थां सर्वव्यक्तिव्यापिनीमित्यर्थः। तां जातिमित्यादि कैयटेन व्याख्यातं। एवं च पुत्रत्वस्य यावद्द्रव्यभा
वित्वेनोक्तलक्षणलक्षितत्वात्। जातिवाचक एव पुत्रशब्द इत्यस्वांगेति वा ङीषिति ग्रंथस्तत्र न विरुध्यते। आकृतिग्रहणा जातिरित्यादिमुख्यपक्षाश्रयणे तु पुत्र
त्वस्य अजातित्वाज्जातेः किं पुत्रजात इति ग्रंथोपि संगच्छत इति दिक्। केचिदर्वाचीनास्तु पुत्रहतीपुत्रजग्धीत्यत्र क्ताल्पाख्यायामित्यनेन ङीषमाहुः। सुरापी
तीति। पीता सुरा यया सा। जातिकालेति सूत्रवार्तिकाभ्यां निष्ठाया अंतोदात्तत्वपरनिपातौ। वस्त्रच्छन्नेति। बहुव्रीहि स्वरेणापूर्वपदप्रकृतिस्वरे शेषनिघाते
च कृते अनुदात्तान्तोयं स्वांगाच्चेति। इह बहुव्रीहिरिति नानुवर्तते इति ध्वनयन्नुदाहरति। अतिकेशीति। शिखेति। शीङः खो ह्रस्वश्चेति ह्रस्वत्वं तदंतात्टाप्। अ
न्यथा टापं बाधित्वा ङीष्स्यादिति भावः। केचित्तु सुशिखेत्यपि प्रत्युदाहरंति। तच्चिंत्यं। एवं तेन समासे अनदंतत्वेन ङीषः प्राप्त्यभावात्। न च टापः प्रागेव कृतं दंतेनै
व समासादनदंतत्वमसिद्धीति वाच्यं। तथा हि सति शोभना शिखा सुशिखेत्यर्थे स्याल्लाभादिति न व्याः। यद्यत्र स्वमंगं गृह्येत वर्हिशुभ्रस्वाङ्गलेन्यत्रापि स्यात्। मु
खस्य शालां गता सुकेशीरथ्येत्यत्र न स्यात्। केशानां रथ्यां गताभावात्। अतोऽव्याप्त्यतिव्याप्तिपरिहारार्थमाह॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मेवव चनस्य फलमिति ब्रूषे तर्हि षिद्गौरेति सूत्रे एवानित्यं विन इति वक्तव्यं किमनेन वक्रमार्गेणेति दिक्। दृश्यतेऽनेनेति दंष्ट्रा। दाम्नीशसेत्यादिना करणे
ष्ट्रन्। जानपदीति। जानपदे भवा। वृत्तिश्चेदिति। वर्ततेऽनयेति वृत्तिर्जीविका। कुण्डीति। अस्त्री कमण्डलुः कुण्डी त्यमरः। कुण्डाऽन्येति। क्रियाशब्दोऽयं। अत एवाहा कुं
डिदाह इत्यादि। यत्तु घटपर्यायः कुण्डशब्दः स न प्रत्युदाहरणं पिठरस्थाल्युखा कुण्डमिति। तस्य नपुंसकत्वात्। अग्न्यालयादिपर्यायोपि कुण्डशब्दो नपुंसकलिं
गो नियत। कुण्डमग्न्यालये मानभेदे देवजलाशये इति मेदिनीकोशात्। आवपने चेदिति। आङ्पूर्वाद्वपेरधिकरणे ल्युट्। ओप्यते निक्षिप्यते धान्यं यस्मिन्ना गो
णान्येति। यस्यां यां दृष्टिकं नाम। अकृत्रिमेति। यथासौ स्थूली यत्र विचित्रता तामिति। स्थूलान्येति। कृत्रिमा पुरुषेण संस्कृता। श्रीलापका। अयोविकार इति॥ फा
ल इति प्रसिद्धः। कुशान्येति। छन्दोगाः स्तोत्रीयाः गणनार्था नौदुंबरान् शकून् कुशा इति व्यवहरंति। अतः कृकमीति सूत्रे प्रसिद्ध एवायं। कामुकान्येति। मैथुना

शोणात्प्राचां। ४।१।४३॥ शोणी। शोणा। वोतो गुणवचनात्। ४।१।४४॥ उदन्ताद्गुणवाचिनो वा ङीष् स्यात्। मृद्वी। मृदुः। उतः किं। शुचिः। गुणे
ति किं। आखुः। खरुसंयोगोपधान्न॥ खरुः पतिंवरा कन्या। पाण्डुः॥ बह्वादिभ्यश्च। ४।१।४५॥ एभ्यो वा ङीष् स्यात्। बह्वी। बहुः॥ कृदिकारादक्तिनः॥
रात्रिः रात्री॥ सर्वतोऽक्तिन्नर्थादित्येके॥ शकटी। शकटिः। अक्तिन्नर्थात्किं। अजननिः। क्तिन्नन्तत्वादत्रापि विध्यर्थमध इति शब्दो गणे पठ्यते॥
हिमकाषिहतिषु चेति पद्भावः॥ ॥

रे दस्यन्धनादिकं कामयितुं यस्याः शीलं सेत्यर्थः। लषपतेत्युकञ्॥ ॥ शोणात्। शोणः कोकनदच्छविरि
ति कोशाच्छोणशब्दस्य वर्णवाचित्वात्। वर्णानां तणेत्याद्युदात्तत्वात् तयाऽन्यतो ङीषिति सिद्धेपि प्राचामेव ङीषू नान्येषामिति नियमार्थमिदं। वोतो गुणवचनात्। गुणो नाम ने
हाऽदेङ्गुणः। उत इति विशेषणाद्वचनग्रहणाच्च नापि विशेषणमात्रमिदं आखुर्द्रव्यमित्यादावतिप्रसंगादिति चेत्। अत्राहुः संज्ञाजातिक्रियाशब्दान्हित्वा अन्ये गु
णवाचिनः। चतुष्टयी शब्दानां प्रवृत्तिरित्याकरग्रंथनिष्कर्षादेव निर्णय इति॥ भाष्ये तु सत्वे निविशतेऽपैति पृथग्जातिषु दृश्यते। आधेयश्चाक्रियाजश्च सोऽसत्वप्रकृतिर्गु
ण इति स्थितं। सत्वं द्रव्यं। सत्व एव निविशत इति सावधारणं व्याख्येयं। एतेन सत्ता व्यावर्त्यते। सा हि न केवलं द्रव्ये वर्तते किं तु द्रव्यगुणकर्मसु। ननु द्रव्य एव द्रव्यत्वं वर्तत
इति। तत्राव्याप्तिमिरत आह। अपैतीति। अपगच्छतीत्यर्थः। अर्थात्सत्वादेव। यथा पीततायां जातायां फलादेर्नीलता। अपैति। नैवं द्रव्यत्वं द्रव्यादपैति। एवमपि गोत्वं गोषु

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वर्ततेअश्वादेश्चापैनि तत्रातिव्याप्तिरत आह। पृथग्जातिषु दृश्यत इति। गोत्वं हि द्रव्यत्वावांतरनानाजातिषु न दृश्यते। गुणस्तु दृश्यते। यथा अश्वे दृष्टा नीलता तृणादिष्वपि
दृश्यते। एतेन पूर्वार्द्धे न सकलजातेर्व्यवच्छेदः। एवं तर्हि कर्म द्रव्ये वर्तते तत्रो ऽपैति पृथग्जातिषु दृश्यते चेति तत्रातिव्याप्तिरत आह। आधेयश्चाक्रियाजश्चेति
उत्पाद्यो ऽनुत्पाद्यश्चेत्यर्थः। उत्पाद्यो यथा। घटादेः पाकजो रूपादिः। अक्रियाज अनुत्पाद्यः स यथा आकाशादेर्महत्त्वादिः। क्रिया तु सर्वाप्युत्पाद्यैवेन नित्येति तस्या
द्वैविध्याभावाद्गुणत्वाभावः। एवमपि द्रव्यस्य गुणत्वं प्राप्नोति। अवयविद्रव्यं हि अवयवद्रव्येषु निविशते। असमवायिकारणसंयोगानिवृत्तौ विनाशात्तत्रो ऽपैतिभि
न्नजातीयेषु च हस्तपादादिषु दृश्यते द्विविधं च भवति। नित्यानित्यभेदेन निरवयवस्य ऽमपरमाण्वादेर्नित्यत्वात् अवयविद्रव्यस्य तु घटादेरनित्यत्वात् अत आह॥ अ
सत्वप्रकृतिरिति। अद्रव्यस्वभाव इत्यर्थः॥ पति वरेति। एवं च पाणिग्रहणं। कंठाभिधायित्वाद्गुणवचनो ऽयमिति भावः। बह्वादिभ्यश्च। बहुशब्दस्य गुणवाचि
त्वात् पूर्वेण सिद्धेप्युत्तरार्थं ग्रहणं नित्यं छंदसी त्युत्तरसूत्रेण बहुशब्दादपि छंदसि नित्यं यथा स्यादि ति। वस्तुतस्तु बहुशब्दो नित्यं छंदसीति सूत्रे चव्यर्थमेव
सर्वविकल्पानां छंदसि व्यवस्थितत्वात्। गणसूत्रमाह। कृदिकारादिति। सर्वतो ऽक्तिन्नर्थादित्यपि गणसूत्रमेव व्यवस्थितविभाषात्वादिह न। सुगंधिः। प्रियक
तिर्वेश्या। अजननिरिति। आक्रोशे नञ्यनिरिति जनेरनिप्रत्ययः। इह अन्यान्यपि गणसूत्राणि संति। शक्तिः शस्त्रे। शक्तिः। शक्ती शस्त्रे किं शक्तिः सामर्थ्ये। शक्तिश
स्त्रीति पाठे तु शब्दद्वयं। शस्त्रिः शस्त्री। इतः प्राण्यंगात्। धमनिः। धमनी। चंद्रभागान्नद्यां। चंद्रभागी। चंद्रभागा। अहन् शब्दो ऽत्र पठ्यते। सामर्थ्यात्तदंतो बहुव्रीहि
रुदाहार्यः। अनुपसर्जनाधिकारबाधश्च। दीर्घाह्नी प्रावृट्। पक्षे डाप् ङीप् निषेधाः। बहुः। पद्धतिः। यष्टिः। विकटा। विशाला। कल्याणे पुराणे चंडा। कृपाणा। अहन्॥ १११ 112

॥ इत्यादि॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुंयोगादाख्यायां। इहपुमिति लुप्तषष्ठीकं पृथक्पदं। तच्चावर्तते। पुंयोगादिति हेतौ पंचमी। आख्यायामिति तु पंचम्यर्थे सप्तमीत्याशयेनाह। या पुमाख्येत्यादि। पुमाख्या पुंवाचकः शब्दः। पुंयोगात् स्त्रियां वर्तते इत्यनेन गौणीवृत्तिरुक्ता। यदा तु मुख्यार्थान्नस्येदमित्यण् तदा गोपीत्येव भवति। योगः संबंधः। स चेह दंपतिभाव एवेति नाग्रहः। किं तु जन्यजनकभावोपि गृह्यते तेन कौ चेमानाभावात् तेन कौसल्यया सा विसुखेन रामः प्राक्केकयी तो भरतस्ततोभूदिति भट्टिप्रयोगः संगच्छते। केकयस्य दुहिता केकयी। जनपदशब्दात् क्षत्रियादञिति अपत्यप्रत्यये तु कैकयीति स्यात्। नन्वेह अतश्चेति तद्राजाकारस्य लुक् शंक्यः। नप्राच्यभर्गादी

पुंयोगादाख्यायां।४।१।४८। या पुमाख्या पुंयोगात् स्त्रियां वर्त्तते ततो ङीष् स्यात्। गोपस्य स्त्री गोपी। पालकान्तान्न॥ गोपालिका। अश्वपालिका। सूर्याद्देवतायां चाब्वाच्यः। सूर्यस्य स्त्री देवता। सूर्या। देवतायां किं। सूरी। कुन्ती। मानुषीयं। इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्।४।१।४९। एषामानुगागमस्स्यात् ङीष् च। इन्द्रादीनामुक्तान्मातुलाचार्ययोश्च पुंयोग एवेष्यते। तत्र ङीषि सिद्धे आनुगागममात्रं विधीयते। इतरेषां त्वनुक्तमुभयं। इन्द्राणी। हिमारण्ययोर्महत्त्वे॥ महद्धिमं। हिमानी। अरण्यानी। यवाद्दोषे॥ दुष्टो यवो यवानी। यवनाल्लिप्यां॥ यवनानां लिपिर्यवनानी। मातुलोपाध्याययोरानुग्वा॥ मातुलानी। मातुली। उपाध्यायानी। उपाध्यायी। या तु स्वयमेवाध्यापिका। तत्र वा ङीष् वाच्यः। उपाध्यायी। उपाध्याया। आचार्यादणत्वं च। आचार्यस्य स्त्री आचार्यानी। पुंयोग इत्येव आचार्या स्वयं व्याख्यात्री। अर्यक्षत्रियाभ्यां वा स्वार्थे। अर्याणी। अर्या। स्वामिनी वैश्या वेत्यर्थः। क्षत्रियाणी। क्षत्रिया। पुंयोगे तु। अर्यी। क्षत्रियी। कथं ब्रह्माणीति। ब्रह्माणमानयति जीवयतीति कर्मण्यण्॥ ॥

१ तिप्रतिषेधात्। तथा च कालिदासः। केकेयिकामाः फलितास्तवेति। एतेन रेवकीव्याख्याता। पुंयोगात् किं। देवदत्ता। अयं हि संज्ञाशब्दः स्वभावात् स्त्रियमाह न तु पुंवाचकशब्द — योगात्। आख्यायां किं। प्रसूता। अयं हि जातप्रसवामाह स च प्रसवो गर्भधारणद्वारा पुंयोगनिमित्तक इत्यस्ति हि पुंयोगः किं तु नायं पुंसो वाचक इति न ङीष्। सूर्याद्देवतायामिति। ङीषोपवादः। सूरीति। सूर्यतिष्येति यलोपः। आनुगिति। ननु ह्रस्वादिरेव लाघवादन्वक्तव्यः किमनेन दीर्घोच्चारणेन। अत्राहुः। अनुकि कृते अतो गुण इति पररूपं स्यात्। न चाकारोच्चारणसामर्थ्याद्दी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



घीभविष्यति। अन्यथा हि नुकमेव कुर्यादिति वाच्यं। अल्लोपोन इत्यस्य बाधेन चारितार्थत्वात्। पत्युर्न इतिवदादेशे कर्तव्ये आगमलिंगककारोच्चारणसामर्थ्या
द्व अल्लोपो न भविष्यतीति चेन्न। सर्वशब्दैककारस्य चारितार्थ्यात्। न हि तत्र लोपोस्ति। न संयोगादिति निषेधात्। तस्मात् ककाराकारयोः सामर्थ्यविरहे प
ररूपबाधनार्थं दीर्घोच्चारणमावश्यकमिति। केचित्तु नुकि कृते लाक्षणिकत्वादल्लोपोन इत्यस्याप्रवृत्त्या सवर्णदीर्घ एव अनुकि कृते भविष्यत्यकारोच्चारण
सामर्थ्यात्। एवं सत्यानुगिति दीर्घोच्चारणसामर्थ्यात्। आ अनुगिति पदं विभज्यते। तत्रेंद्रादीनामनुकैव सिद्धे आकारादेशविधानसामर्थ्यात्क्वचिदन्यतोपि वि
धानमनुमीयते तेन ब्राह्मणं स्त्री ब्रह्माणीति सिध्यतीत्याहुः। अत्र नव्याः। अस्तु उक्तरीत्या दीर्घोच्चारणमन्यतो विधानार्थमेव परंतु आ अनुगिति पदं विभज्यनका
रस्याकारादेशे कृते दीर्घग्रहणसामर्थ्यादिन्द्रस्याप्यनुकि ब्रह्माणीति सिध्यतीति न व्याख्येयं। उभयविधौ वाक्यभेदापत्तेः। किंतु इंद्रमाचक्षाणः इंद्रः त
त्करोति तदाचष्टे इति णिच्यन्तात्क्विप्। तस्य इंद्रः स्त्री इंद्राणीति सिध्यतीत्येव व्याख्येयं॥ दीर्घोच्चारणसामर्थ्यादित इत्यधिकारोऽनुपसर्जनाधिकारश्च बाध्यत इति।
सुवचत्वात्। न चोभयबाधाभ्युपगमापेक्षयात इत्यधिकारबाधमात्राभ्युपगमेन ब्रह्मणः स्त्री ब्रह्माणीति रूपसिद्धये आकारादेशोनुक् च भवतीत्येव व्याख्यायतामिति वाच्यं।
वाक्यभेदापेक्षया उभयबाधने गौरवस्य सुसहत्वात्। एवं च ब्रह्माणमानयति जीवयतीत्यादि वक्ष्यमाणग्रंथोपि स्वरसतः संगच्छत इत्याहुः। हिमानीति॥ मह
त्त्वयोगे हिमारण्ययोः स्त्रीत्वं। दुष्टो यवो यवानीति। जात्यंतरमेवानेनाभिधीयते। अयमेव चास्य दोषो यस्माद्विपवलजातेरभावेपि तदाकारानुकृतिः। यवनानीति। त
स्येदमित्यणो बाधको ङीष्वा वा ङीष्वाच्य इति। इदं च इङ्श्चेति यञ्विधायकसूत्रस्थं वार्तिकं। वक्ष्यति च तत्र अपादाने स्त्रियामुपसंख्यानं तदंताच्च वा ङीषिति। उपाध्या
यी उपाध्यायेति। उपेत्य अस्या अधीयत इति विग्रहः। स्वार्थ इति। यदि तु पुंयोग एवायं विधिः स्यात्तु शूद्रापि क्षत्रियस्य भार्या क्षत्रियाणी स्यात्। ब्राह्मणभार्या च क्षत्रिया
क्षत्रियाणी न स्यादिति भावः। वैश्यायां वेत्यर्थ इति। अर्यः स्वामिवैश्ययोरित्यर्थद्वये निपातनादिति भावः। अत्रामरस्य संग्रहः। आर्याणी स्वयमर्या स्यात् क्षत्रिया क्षत्रि ११३
याण्यपि। उपाध्यायाप्युपाध्यायी स्यादाचार्यापि च स्वतः। आचार्यानी तु पुंयोगे स्यादर्यी क्षत्रियी तथा। उपाध्यायान्युपाध्यायीति। कथमिति। सूत्रे ब्रह्मन्शब्दस्या
ग्रहणादनुगनुपपन्न एव इति प्रश्नः। उत्तरं तु ब्रह्माणमानयती त्यादि। एवं तदनप्राणन इत्यस्मात्कर्मण्यणि णेरनिटीति णिलोपे टिड्ढाणिति ङीपि पूर्वपदात्सं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वाङ्गं त्रिधेति। मूर्तिमदिति। स्पर्शवत् द्रव्यपरिमाणं मूर्तिः। प्राणीति। मुखनासिकासंचारी वायुः प्राणः। सुमुखा शालेति। एवं च फलमुखी कारणमुखी चान व।

स्वाङ्गं त्रिधा। अद्रवं मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजं। सुस्वेदा। द्रवत्वात्। सुज्ञाना। अमूर्तत्वात्। सुमुखा शाला। अप्राणिस्थत्वात्। सुशो
फा। विकारजत्वात्। अतत्स्थं तत्र दृष्टं च। सुकेशी। सुकेशा वा रथ्या। अप्राणिस्थस्याऽपि प्राणिनि दृष्टत्वात्। तेन चेत्तत्तथा युतं। सुस्तनी। सुस्तना वा
प्रतिमा। प्राणिवत्प्राणिसदृशे स्थितत्वात्। नासिकोदरोष्ठजङ्घादन्तकर्णशृङ्गाच्च। ४।१।५५। एभ्यो वा ङीष् स्यात्। आद्ययोर्वह्वज्लक्षणो निषेधो वा
ध्यते पुरस्तादपवादन्यायात्। ओष्ठादीनां पञ्चानामनु असंयोगोपधादिति पर्युदासे प्राप्ते वचनं मध्येपवादन्यायात्। सहनञ्लक्षणस्तु प्रतिषेधः
परत्वादस्य बाधकः। तुङ्गनासिकी। तुङ्गनासिका। इत्यादि। नेह। सहनासिका। अनासिका। अनन्टतिः। अङ्गगात्रकण्ठेभ्यो वक्तव्यं। स्वङ्गी। स्वङ्गे-
त्यादि। एतच्चानुक्तसमुच्चयार्थेन चकारेण संग्राह्यमिति केचित्। भाष्याद्यनुक्तत्वादप्रमाणमिति प्रामाणिकाः। अन्नवार्त्तिकानि। पुच्छाच्च। सुपुच्छी
सुपुच्छा। कबरमणिविषशरेभ्यो नित्यं॥ कबरं चित्रं पुच्छं यस्याः सा कबरपुच्छी मयूरी इत्यादि। उपमानात्पक्षाच्च पुच्छाच्च॥ नित्यमित्येव। उलूकपक्षी
शाला। उलूकपुच्छी सेना। न क्रोडादिबह्वचः। ४।१।५६॥ क्रोडादेर्बह्वचश्च स्वाङ्गान्न ङीष्। कल्याणक्रोडा। अश्वानामुरः क्रोडा। आकृतिगणोऽयं। सुजघ
ना। सहनञ्विद्यमानपूर्वाच्च। ४।१।५७॥ सहेत्यादित्रिकपूर्वान्न ङीष्। सकेशा। अकेशा। विद्यमाननासिका। नखमुखात्संज्ञायां। ४।१।५८। ङीष् न
स्यात्। शूर्पणखा। गौरमुखा। संज्ञायां किं। ताम्रनखी। कन्या। दिक्पूर्वपदान्ङीप्। ४।१।६०॥ दिक्पूर्वपदात्स्वाङ्गान्तात्प्रातिपदिकात्परस्य ङीषो ङीब्वा
देशः स्यात्। प्राङ्मुखी। आद्युदात्तमध्यदं। वाहः। ४।१।६१॥ वाहन्तात्प्रातिपदिकात् ङीष् स्यात्। ङीषेवाऽनुवर्त्तते न ङीप्। दित्यवाट् च मे। दित्यौही च मे
सख्यशिश्वीति भाषायां। ४।१।६२॥ इति प्राद्वः प्रकारे भाषायामित्यस्याऽनन्तरं द्रष्टव्यः छन्दस्यपि क्वचित्। सखी। अशिश्वी। आधेनवो धुनयन्तामशि

श्वीत्यादिप्रयोगाः प्रामादिका इति भावः। मतिमद्दिगतत्स्तनस्य प्राणिन्यदृष्टत्वात्स्वाङ्गत्वं न प्राप्नोतीति तृतीयलक्षणमाह। तेन चेदिति। येनाङ्गेन प्राणिरूपं वस्तु यथायुतं

घीभविष्यति। अन्यथा हि नुकमेव कुर्यादिति वाच्यं। अल्लोपो नइत्यस्य वाधेन चरितार्थत्वात्। पत्युर्नेशतिवदादेशे कर्तव्ये आगमलिंगककारोच्चारणसामर्थ्या
द्वि अल्लोपो न भविष्यतीति चेन्न। सर्वशब्देककारस्य चारितार्थ्यात्। न हि तत्रलोपोस्ति। न संयोगादिति निषेधात्। तस्मात् ककाराकारयोः सामर्थ्यविरहेप
ररूपवाधनार्थं दीर्घोच्चारणमावश्यकमिति। केचित्तु नुकि कृते लाक्षणिकत्वादल्लोपो नइत्यस्याप्रवृत्त्या सवर्णदीर्घ एव। अनुकि कृते भविष्यत्यकारोच्चारण
सामर्थ्यात्। एवं सत्यानुगितिदीर्घोच्चारणसामर्थ्यात्। आ अनुगिति पदं विभज्यते। तत्रेंद्रादीनामनुकेव सिद्धे आकारादेशविधानसामर्थ्यात्क्वचिदन्यतोपि वि
धानमनुमीयते तेन नब्राह्मणं स्त्री ब्रह्माणीति सिध्यतीत्याहुः। अत्र नव्याः। अस्तुउक्तरीत्या दीर्घोच्चारणमन्यतो विधानार्थमेव परंतु आ अनुगिति पदं विभज्य नका
रस्याकारादेशे कृते दीर्घग्रहणसामर्थ्यादनदंतस्याप्यनुकि ब्रह्माणीति सिध्यतीति न व्याख्येयं। उभयविधौ वाक्यभेदापत्तेः। किंतु इंद्रमाचष्टे इंद्रःत
त्करोति तदाचष्टे इति णिच्यनान्णिपात स्य इंद्रः स्त्री इंद्राणीति सिध्यतीत्येव व्याख्येयं। दीर्घोच्चारणसामर्थ्यादत इत्यधिकारो नुपसर्जनाधिकारश्च वाध्यत इति।
सुवचत्वात्। न चोभयवाधाभ्युपगमावेक्षयातइत्यधिकारवाधमात्राभ्युपगमेन ब्रह्मणः स्त्री ब्रह्माणीति रूपसिद्धये आकारादेशोनुकूचमवनीत्येव व्याख्यायतामिति वाच्यं।
वाक्यभेदापेक्षया उभयवाधने गौरवस्य सुसहत्वात्। एवं च ब्रह्माणमानयति जीवयतीत्यादिवक्ष्यमाणग्रंथो विस्वरस ततः संगच्छत इत्याहुः। हिमानीति॥ मह
त्वमिगे हिमारण्ययोः स्त्रीत्वं। दुष्टोयवो यवानीति। जात्यंतरमेवानेनाभिधीयते। अयमेव चास्य दोषो यस्माद्द्विपवल जातेरभावे पि न दोकारानुकृतिः। यवनानीतात
स्येदमित्यणो वाधको ङीषा वाङ्गेयाच्य इति। इदं च इंद्र श्वेति घञ्विधायकसूत्रस्थं वार्तिकं। वक्ष्यति च तत्र अपादाने स्त्रियामुपसंख्यानं तदंताच्च वा ङीषिति। उपाध्या
यी उपाध्यायेति। उपेत्य अस्या अधीयत इति विग्रहः। स्वार्थ इति। यदि तु पुंयोग एवायं विधिः स्यात्तर्हि क्षत्रियस्य भार्या क्षत्रियाणी स्यात्। ब्राह्मणभार्या च क्षत्रिया
क्षत्रियाणी न स्यादिति भावः। वैश्या वैश्यर्थ इति। अर्यः स्वामिवैश्ययोरित्यर्थ शब्दयेनिपातनादिति भावः। अत्रामरस्य संग्रहः। आर्याणी स्वयमर्या स्यात् क्षत्रिया क्षत्रि
याण्यपि। उपाध्यायाप्युपाध्यायी स्यादाचार्यापि च स्वतः। आचार्यानी तु पुंयोगे स्यादर्यी क्षत्रियी तथा। उपाध्यायान्युपाध्यायीति। कथमिति। सूत्रे ब्रह्मन् शब्दस्या ११३
ग्रहणादनुगनुपपन्न एव इति प्रश्नः। उत्तरं तु ब्रह्माणमानयती त्यादि। एयंतादनप्राणन इत्यस्मात्कर्मण्यणि णेरनिटीति णिलोपे टिड्ढाणिति ङीपि पूर्वपदात्सं

112

स्वाङ्गं त्रिधेति। मूर्तिमदिति। स्पर्शवत् द्रव्यपरिमाणं मूर्तिः। प्राणीति। मुखनासिकासंचारी वायुः प्राणः। सुमुखा शालेति। एवं च फलमुखी कारणमुखी चान व।

स्वाङ्गं त्रिधा। अद्रवं मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजं। सुस्वेदा। द्रवत्वात्। सुज्ञाना। अमूर्तत्वात्। सुमुखा शाला। अप्राणिस्थत्वात्। सुशो-
फा। विकारजत्वात्। अतत्स्थं तत्र दृष्टं च। सुकेशी। सुकेशा वा रथ्या। अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात्। तेन चेत्तत्तथायुतं। सुस्तनी। सुस्तना वा
प्रतिमा। प्राणिवत्प्राणिसदृशे स्थितत्वात्। नासिकोदरोष्ठजङ्घादन्तकर्णशृङ्गाच्च। ४।१।५५। एभ्यो वा ङीष् स्यात्। आद्ययोर्बह्वज्लक्षणो निषेधो बा-
ध्यते पुरस्तादपवादन्यायात्। ओष्ठादीनां पञ्चानां तु असंयोगोपधादिति पर्युदासे प्राप्ते वचनं मध्येऽपवादन्यायात्। सहनञ्लक्षणस्तु प्रतिषेधः
परत्वादस्य बाधकः। तुङ्गनासिकी। तुङ्गनासिका। इत्यादि। नेह। सहनासिका। अनासिका। अनच्टलिः। अङ्गगात्रकण्ठेभ्यो वक्तव्यं। स्वङ्गी। स्वङ्गे-
त्यादि। एतच्चानुक्तसमुच्चयार्थेन चकारेण संग्राह्यमिति केचित्। भाष्याद्यनुक्तत्वादप्रमाणमिति प्रामाणिकाः। अत्र वार्त्तिकानि। पुच्छाच्च। सुपुच्छी
सुपुच्छा। कबरमणिविषशरेभ्यो नित्यं। कबरं चित्रं पुच्छं यस्याः सा कबरपुच्छी मयूरी इत्यादि। उपमानात्पक्षाच्च पुच्छाच्च। नित्यमित्येव। उलूकपक्षी
शाला। उलूकपुच्छी सेना। न क्रोडादिबह्वचः। ४।१।५६। क्रोडादेर्बह्वचश्च स्वाङ्गान्न ङीष्। कल्याणक्रोडा। अश्वानामुरः क्रोडा। आकृतिगणोऽयं। सुजघ-
ना। सहनञ्विद्यमानपूर्वाच्च। ४।१।५७। सहेत्यादित्रिकपूर्वान्न ङीष्। सकेशा। अकेशा। विद्यमाननासिका। नखमुखात्संज्ञायां। ४।१।५८। ङीष् न
स्यात्। शूर्पणखा। गौरमुखा। संज्ञायां किं। ताम्रनखी। कन्या। दिक्पूर्वपदान्ङीप्। ४।१।६०। दिक्पूर्वपदात्स्वाङ्गान्तात्प्रातिपदिकात्परस्य ङीषो ङीवा-
देशः स्यात्। प्राङ्मुखी। आद्युदात्तमपदं। वाहः। ४।१।६१। वाहन्तात्प्रातिपदिकात् ङीष् स्यात्। ङीषेवानुवर्त्तते न ङीप्। दित्यवाट् च मे। दित्यौही च मे
सख्यशिश्वीति भाषायां। ४।१।६२। इतिशब्दः प्रकारे। भाषायामित्यस्यानन्तरं द्रष्टव्यः। छन्दस्यपि क्वचित्। सखी। अशिश्वी। आधेनवो धुनयन्तामशि-

श्वीत्यादिप्रयोगाः प्रामादिका इति भावः। प्रतिमादिगतस्तनस्य प्राणिन्यदृष्टत्वात्स्वाङ्गत्वं न प्राप्नोतीति तृतीयलक्षणमाह। तेन चेदिति। येनाङ्गेन प्राणिरूपं वस्तु यथायुतं

CC-0. In Public Domain. Digitization by eGangotri



तेनतत्सदृशोनांगेनतत्‌। अथाणिरूपंवस्तुतथाणिवद्युतंयुक्तंचेनतद्रव्यप्राणिनिदृष्टंस्वांगमित्यर्थः। मध्येऽयवारेतिमध्येऽपवादाः पूर्वान्विधीन्बाधंतेनोत्तरानितिन्या
यादित्यर्थः। अः क्रोडेति। स्त्रीलिंगोयमितिहरदत्तादयः। तत्रोपसर्जनह्रस्वत्वेकृतेअदंतत्वान्ङीषःप्राप्तिः। अमरस्तु। नना क्रोडंभुजांतरमित्याह। रत्नपतिस्तुपुंल्लिं
गतामाह। गलेचक्रोडेतिप्रातिपदिकमात्रंपठ्यतेनतुटावंतमितिगणरत्नमहोदधिकारः। एवंचाऽविशेषाल्लिंगत्रयेप्युदाहरणंबोध्यं। माधवस्तुतुदादिगणेक्रुडनि
मज्जनइतिधातावाहक्रोडः। घञ्। क्रोडाअश्वानामुरः। टावंतोयंस्वभावतोविशेषविषयः। क्रोडादिषुटावंतमात्रस्यपाठात्‌। भुजांतरमात्रवचनस्यक्रोडशब्दस्यबहु
व्रीहौस्वांगलक्षणो ङीष्विकल्पोभवत्येव। कल्याणक्रोडा कल्याणक्रोडीमयूरीतिकेशैः सहवर्ततइतिसकेशा। अविद्यमानाः केशाः यस्याः साअकेशा। शूर्पणखेति। पूर्व

जातेरस्त्रीविषयादयोपधात्‌। ४।१।६३॥ जातिवाचियन्नचस्त्रियांनियतमयोपधन्ततःस्त्रियांङीष्स्यात्‌। आकृतिग्रहणाजातिः। अनुगतसंस्था
नव्यंग्येत्यर्थः तटी। लिङ्गानाञ्चनसर्वभाक्‌। सकृदाख्यातनिर्ग्राह्या। असर्वलिङ्गत्वेसत्येकस्यांव्यक्तौकथनाद्व्यक्त्यन्तरेकथनम्विनापिसुग्रहा।
जातिरितिलक्षणान्तरं। वृषली। सत्यन्तङ्किं। शुक्ला। सकृदित्यादिकिं। देवदत्ता। गोत्रञ्चचरणैस्सह॥ अपत्यप्रत्ययान्तः शाखाध्येतृवाचीच
शब्दोजातिकार्य्यंलभतइत्यर्थः। औपगवी। कठी। वह्वृची। ब्राह्मणीत्यत्रतुशार्ङ्गरवादिपाठान्ङीष्बाध्यते। जातेःकिं। मुण्डा। अस्त्रीविषया
त्किं। वलाका। अयोपधात्किं। क्षत्रिया। योपधप्रतिषेधेहयगवयमुकयमनुष्यमत्स्यानामप्रतिषेधः। हयी। गवयी। मुकयी। हलस्तद्धितस्येतिय
लोपः। मनुषी। मत्स्यस्यङ्यां॥ मत्सी॥ ॥ ९ पदान्तंज्ञायामितिणत्वं। यदातुशूर्पवन्नखानियस्याइतियोगमात्रंविवक्ष्यतेनतुसंज्ञातदाऽसंज्ञा
त्वान्नङीष्निषेधोनवाणत्वं तेनराक्षस्यपियोगवृत्त्याशूर्पनखीतिभवतीत्याहुः। ङीषोङीबादेशइति। अन्यतोङीषित्यतोङीषित्यनुवर्त्तते। दिक्पूर्वपदादित्तिपंच
म्याङीषितिप्रथमायाःषष्ठीकल्प्यतेइतिभावः यदितुस्वतंत्रोङीप्स्यात्तर्हि प्राग्गुक्ताप्राक्क्रोडेत्यत्रापिप्रसज्येत। पूर्वोक्तासंयोगोपधादित्यस्यनिषेधानांचानुवृत्तोप्र
तिपत्तिगौरवमितिभावः। वाहः। ण्विप्रत्ययांतस्यवहेरनुकरणमिदं। वहश्चेत्यनेनकर्मण्युपपदएववहेर्ण्विप्रत्ययविधानात्केवलस्यसंभवोनास्तीतिसामर्थ्यात्तदंतवि
धिरित्यभिप्रेत्याह। वाहंतादिति। नङीषितिअस्वरितत्वादितिभावः। दित्यौहीति। ङीषि संज्ञायांवाहऊठ्संप्रसारणञ्चेतिपूर्वरूपं। एत्येधत्यूठ्स्विति वृद्धिः सत्यशिश्वीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्यते। अर्थे कार्यासंभवात्। स्वरूपं तु न गृह्यते। अस्त्रीविषयत्वादित्यादेर्वैयर्थ्यापत्तेरित्याशयेनाह। जातिवाचियदिति। आकृतिग्रहणेति। ग्रहणमिति करणे
ल्युट्। सामान्ये नपुंसकं। आकृतिर्ग्रहणं यस्या इति बहुव्रीहिस्तदेतत्फलितमाह। अनुगतसंस्थानेत्यादि। वृषले ब्राह्मणादिव्यावृत्तसंस्थानाभावादव्याप्तिरिति
लक्षणांतरमाह। लिंगानां चेत्यादि। चकारो भिन्नक्रमः निर्ग्राह्येत्यस्यानंतरं बोध्यः। लिंगानामिति कर्मणि षष्ठी। न सर्वभाक् सर्वाणि लिंगानि न भजतीत्यर्थः। सर्व
शब्दस्य लिंगापेक्षत्वेपि गमकत्वान्नञोपि वः समासश्च भवत्येवेति नात्र सामर्थ्याभावः शंक्यः वृषलीति। एकस्यां हि व्यक्तौ वृषलत्वे कथिते तदपत्यन्तरसहोदर रा।
दौ कथनं विनापि तस्य सुग्रहत्वादिति भावः। देवदत्तेति न त्वत्र परिमाणभेदेन द्रव्यभेदाभ्युपगमे स्यादेवातिप्रसंगः। एकस्यां व्यक्तौ देवदत्तत्वे कथिते व्यक्त्यंतरे कथनं।
विनापि तस्य सुग्रहत्वात्। मैवं। परिमाणभेदेन द्रव्यभेदस्य प्रामाणिकैरनभ्युपगमात्। अभ्युपगमे वा समानकालतया व्यक्त्यंतरस्य विशेषणात्। तथा च यस्यां व्य
क्तौ देवदत्तत्वं कथ्यते तत्समकालमन्या देवदत्तव्यक्तिरप्रसिद्धेति न देवदत्तत्वं जातिः। वृषलत्वादिस्तु भवत्येव तदीयपितृभ्रात्रादिषु तस्य सुग्रहत्वादिति दिक्। उ
क्तलक्षणद्वयाऽनाक्रांतत्वात्तृतीयं लक्षणमाह। गोत्रं च चरणैः सहेति। अपत्याधिकारादन्यच्च लौकिकं गोत्रं। चरणः शाखाध्येता। तदेतत् फलितमाह। अपत्य
प्रत्ययांत इत्यादि। अत्र व्याचख्युः। नाडायनं बह्वृ चमिदमिति नपुंसकप्रयोगदर्शनात् सर्वलिंगो गोत्रचरणोऽतः पृथक् लक्षणं कृतं। तेनात्र लिंगानां च न सर्वभागि
ति द्वितीयलक्षणेन गतार्थतां न शंक्येति। औपगवीति। अणंतलक्षणं ङीपं परत्वादयं बाधते। एवं चापत्याधिकारे औपगवीति प्रतीकमुपादाय टिड्ढाणञित्यादिना ङी।
बिति व्याचक्षाणा उपेक्ष्या इति भावः। केचित्तु अपत्याधिकारादन्यत्रैव लौकिकगोत्रे गोत्रशब्देन गृह्यते नान्यत्र पारिभाषिकगोत्रप्रत्ययांत एव जातिकार्यं लभते
न त्वपत्यप्रत्ययांतः। गोत्रं च चरणैः सहेति वचनस्यापत्याधिकारात्पूर्वभावि त्वात्। तथा चापत्यार्थे औपगवीति ङीवंत इति प्राचामुक्तिः सम्यगेवेत्याहुः।
कठीति। कठेन प्रोक्तमधीयाना वा कलापिवैशंपायनांतेवासिभ्यश्चेति वैशंपायनांतेवासित्वाण्णिनिस्तस्य कठचरकाल्लुगिति लुक्। अध्येत्रणस्तु प्रोक्ताल्लुगित्य
नेन। बह्वृ चीति। बह्व्यः ऋचोऽध्येतव्या यया सेति बहुव्रीहिः। अनृचबह्वृ चावध्येतर्येवेति वचनादृक्पूरब्धूरिति अप्रत्ययः समासांतः। यद्यपि स्त्रीणामध्य

CC-0. In Public Domain. Digitization by eGangotri



पनं प्रतिविद्धं तथापि पुराकल्पे स्वेतदासीन्न तदा ह यमः। पुराकल्पेषु नारीणां मौंजीबंधनमिष्यते। अध्यापनं च वेदानां सावित्रीवचनं तथेति १ यद्यमानामाधिगोष्टत्वं दृष्यलान्ना च्छद्रं भविष्यतीति यथाऽनधीयानेपि माणवको ब्राह्मणोऽस्य त्रेति। एवं च ग्राचोऽङ्गेषु दाहरणं ग्रामादिकमिति भावः। मुंडेति। मुंडगुणयोगान्मुंडा। वलाकाविसकंटिका। क्षत्रियेति। क्षत्राद्घ इत्यपत्ये विधानाद्गोत्रलक्षणा लिंगानां च न सर्वेत्यादिलक्षणं वा जातिः। योपधप्रतिषेध इत्यादि। गौरादिषु गवयादय इदानीं तन्नैः प्रक्षिप्ता इत्यस्मादेव वार्तिकाद्विज्ञायत इति कैयटादयः॥ ❁ ॥ पाककर्ण। जातेरित्यनुवृत्तेर्नेह। बहुपुष्पा। बहुफला शाखा। एवं हि पूर्वेणैव सिद्धे किमनेन सूत्रेण। त्याशंक्याह। स्त्रीविषयादपीति। इतो मनुष्य। इतः किं। विट्। दरद्। विट्शब्दात् जनपदशब्दात् क्षत्रियादञित्यञ्। दरच्छब्दात् व्यञ्मगधेत्यण्। तयोरतश्चेति लुक्। यत्तु वैश्यपर्या

पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च। ४।१।६४॥ पाकाद्युत्तरपदाज्जातिवाचिनः स्त्रीविषयादपि ङीष् स्यात्। ओदनपाकी। शङ्कुकर्णी। शालपर्णी। शङ्खपुष्पी। दासीफली। दर्भमूली। गोवाली। ओषधिविशेषे रूढा एते। इतो मनुष्यजातेः। ४।१।६५॥ ङीष् स्यात्। दाक्षी। योपधादपि॥ उदमेयस्याऽपत्यं॥ औदमेयी। मनुष्येति किं। तित्तिरिः। ऊङुतः। ४।१।६६॥ उकारान्ताद्योपधान्मनुष्यजातिवाचिनः स्त्रियामूङ् स्यात्। कुरूः॥ कुर्वादिभ्यो ण्यः। तस्य स्त्रियामवन्तीत्यादिना लुक्। अयोपधात्किं। अध्वर्युः। अप्राणिजातेश्चारज्ज्वादीनामुपसंख्यानं॥ रज्ज्वादिपर्युदासादुवर्णान्तेभ्य एव। अलाबूः। कर्कन्धूः। अनयोर्दीर्घान्तत्वेऽपि नोङ्धात्वोरिति विभक्त्युदात्तत्वप्रतिषेध ऊङः फलं। प्राणिजातेस्तु। कृकवाकुः। रज्ज्वादेस्तु। रज्जुः। हनुः। बाह्वन्तात्संज्ञायां। ४।१।६७॥ स्त्रियामूङ् स्यात्। भद्रबाहूः। संज्ञायां किं। वृत्तबाहुः॥

यो विट्शब्दः सोपि प्रत्युदाहरणमित्याहुः। दासीति। अत इञ्। गोत्रलक्षणा जातिः। अदंतत्वाभावाट्टाप्प्राप्तो ङीष् विधीयते। योपधादपीति। जातेरित्यनुवर्तमाने पुनर्जातिग्रहणादिति भावः। उदमेयस्येति। उदकमेयं यस्य उदमेयः। उदकस्योदः संज्ञायामित्युदादेशः। इञ उपसंख्यानं। अजाद्यर्थं। सोऽतंगमी। निर्देशाद्यर्थे उत्तरत्र लक्षणादिसूत्रेण तु न्तं गमादिभ्य इञ्। न चायमिनन्तो जातिः। ऊङुतः। ङकारो नोङ्धात्वोरिति विशेषणार्थः। अन्यथा यवाग्वा यवाग्वे इत्यत्रापि स निषेधः स्यात्। दीर्घोच्चारणं तु भ्रूशब्दार्थम। न्यत्र सवर्णदीर्घेणापि सिद्धेः। कुरूरिति। लिंगविशिष्टपरिभाषया स्वादयः। अत्र व्याचक्षते। यद्येकादेशस्य पूर्वान्तत्वेन ग्रहणात्स्वादयः इति व्याख्यायेत तर्हि काङकुरो

114

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इत्यादावपि एकवचनमुत्सर्गतइति सुः प्रवर्तेत न त्वाद्रणाय अप्रत्यय इति प्रसज्यप्रतिषेधाभ्युपगमे तु प्रकृते दोषः। श्वश्रूरित्यत्र एकादेशाभावाल्लिङ्गविशिष्टपरिभाषाया आवश्यकत्वाच्च। अत एव रमाइत्यत्र एकादेशस्य पूर्वान्तत्वेन ग्रहणात्त्वादय इति मनोरमादौ न व्याख्यातमिति। अध्वर्युरिति। अध्वर्युशाखाध्येत्री अध्वर्युशाखाध्यायि वंशोद्भवेति वार्थः। चरणलक्षणोयं जातिः। अध्वरं यातीति विग्रहे मृगय्वादयश्चेत्यौणादिके न अध्वरशब्दस्यान्तलोपः। या धातोः (कुप्रत्ययश्च) पर्युदासादिति। यदि सूत्रादुत इति गृह्यते तर्हि अलाब्वादावूङः संभवो नेति भावः। अलाबु त्यादि। प्रथमान्तं द्वितीयान्तं वा नोरादुतः तावस्यमाणप्रयोजनस्य तत्रासंभवात्॥ नोङ्धात्वोरिति। ऊङ्धात्वोर्यणः परे शसादयः उदात्ताः न स्युरिति सूत्रार्थः॥ ❀ ॥ पङ्गोश्च। अजात्यर्थमिदं पङ्गुशब्दो हि गुणवाची। श्वशुरस्येति। पुंयोगलक्ष

पङ्गोश्च ४।१।६८॥ पङ्गूः। श्वशुरस्योकाराकारलोपश्च॥ चादूङ्॥ पुंयोगलक्षणस्य ङीषोऽपवादः। लिङ्गविशिष्टपरिभाषयास्वादयः। श्वश्रूः। ऊरूत्तरपदादौपम्ये ४।१।६९॥ उपमानवाचिपूर्वपदमूरूत्तरपदं यत्प्रातिपदिकं तस्मादूङ् स्यात्। करभोरूः॥ संहितशफलक्षणवामादेश्च ४।१।७०॥ अनौपम्यार्थं सूत्रं। संहितोरूः। सेवशफोरूः। शफौ खुरौ ताविव संश्लिष्टत्वादुपचारात्। लक्षणशब्दादर्श आद्यच्। लक्षणोरूः। वामोरूः। सहितसहाभ्यां चेति वक्तव्यं॥ हितेन सह सहितौ ऊरू यस्याः सा सहितोरूः॥ सह ईहते इति सहौ ऊरू यस्याः सा सहोरूः। यद्वा विद्यमानवचनस्य सहशब्दस्य उर्वन्तिशयप्रतिपादनाय प्रयोगः। संज्ञायां ४।१।७२॥ कद्रुकमण्डल्वोः संज्ञायां स्त्रियामूङ् स्यात्। कद्रूः कमण्डलूः। संज्ञायां किं। कद्रुः कमण्डलुः। अच्छन्दोर्थम्वचनं॥ ॥ ९

णेति विप्राप्ते ऊङ् तत्सन्नियोगेन च विधीयमानो लोपः संनिहितत्वात् अंतस्यैवाकारस्य नवादेः एतच्च वचनं श्वशुरः श्वश्रूरिति निर्देशसिद्धार्थकथनपरं। अतोपि प्रथमाकारस्य लोपो न शङ्क्यः। ऊरूत्तरपदात्। उपमीयतेऽनयेत्युपमा तस्याः भावः औपम्यं। उत्तरपदेन पूर्वपदमिहाक्षिप्यते तदेतत्फलितमाह। उपमानवाचिपूर्वपदमिति। करभोरूरिति। मणिबंधादाकनिष्ठं करस्य करभो बहिस्तद्वदूरू यस्याः सा। धात्री करभ्यां करभोपमोरूरित्यत्र तु ऊङ् न। करभशब्दस्योपमानवाचित्वेपि पूर्वपदत्वाभावात्। औपम्ये किं। वृत्तोरूः। उर्वन्तादिति वक्तव्ये उत्तरपदग्रहणं हस्तिसाम्यूरूरित्यत्र माभूदित्येवमर्थं। अत्र हि हस्तिन इव साम्यूरू अस्या इति विग्रहः। तथा चोर्वन्तत्वेपि ऊरूत्तरपदत्वमिह नास्ति। साम्यूरूशब्दस्यैवोत्तरपदत्वात्। सं हिते

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु॰
सि॰कौ॰
टी॰त॰
११६

संहितादिपूर्वपदमूरूत्तरपदं यत्प्रातिपदिकं तस्मादूङ् स्यात्। शफाविति। यद्यप्यमरेण शफं क्लीबे खुरः पुमानिति नपुंसकतोक्ता तथापि शफशब्दस्य पुंस्त्वमपि प्रामाणि
कमेव। शफाविव जम्भराले तिश्रुतेः। शफः खुरे गवादीनां मूले विटपिनामपीति हेमचन्द्रकोशाच्च। वामोरूरिति। वामौ सुन्दरौ ऊरू यस्याः इति विग्रहः। कथं तर्हि पीवरोरु
पिवती व वर्हिणमिति कुमारः। ऊङभावे हि पीवरोरुरिति स्यात्। ऊङश्चेह विधायकं नास्ति। अत्राहुः। संज्ञापूर्वकविधेरनित्यतया संबुद्धिगुणाभावादिति स्थितस्य ग
तिरुन्नेयेति। हितेन सह इति। समो वा हिततयोरिति मुम्पादितः सहितशब्दस्तु नेह गृह्यते एकदेशविकृतनतया सन्निहितग्रहणादेव तत्सिद्धेरिति भावः। कमण्डलुरि
ति। चतुष्पाज्जातिवाचकोयं। अत एव चतुष्पाद्भ्यो ढञिति त्यत्र कामण्डलेय इत्युदाहरिष्यति। पात्रपर्यायस्तु न प्रत्युदाहरणं तस्य स्त्रीलिंगाभावात्। अच्छंदोर्थमिति। वेदे तु
कद्रुकमण्डल्वोः छंदसीत्यनेन संज्ञायामसंज्ञायां च ऊङ् सिध्यतीति भावः। अञोऽकार इति। अत्रा अकारविशेषणं किं। शूरसेनी। जनपदशब्दादित्सत्रः अतश्चे
ति लुकि जातिलक्षणोत्र न ङीष्॥ ❈ ॥ शार्ङ्गरवीति। शृङ्गरुशब्दादपत्येऽण्। आदिवृद्धिरोर्गुणः। टिड्ढाणञिति ङीपं बाधित्वा परत्वाज्जातेरिति ङीषि प्राप्ते ङीन्वि

शार्ङ्गरवाद्यञो ङीन्॥४।१।७३॥ शार्ङ्गरवादेरञोऽकारान्ताच्च जातिवाचिनो ङीन् स्यात्। शार्ङ्गरवी। वैदी। जातेरित्यनुवृत्तेः पुंयोगे ङीषेव।
नृनरयोर्वृद्धिश्चेति गणसूत्रं। नारी। यङश्चाप्॥४।१।७४॥ यङन्तात्स्त्रियां चाप् स्यात्। यङ्ष्यङोः सामान्यग्रहणं। आम्बष्ठ्या। कारीषगंध्या। बा
ह्वनश्चाप् वाच्यः॥ पौतिमाष्या॥ ॥ ऐ धीयते॥ शार्ङ्गरव कापटव। ब्राह्मण। गौगुल्गुलवा। गोतमेत्यादि। शृंगरुकपटुब्रह्मन्गुग्गुलुशब्देभ्यः 115
प्राग्दीव्यतोऽण्। गोतमशब्दस्त्वृष्यण्णन्तः। अयं गौरादिष्वपि पठित इति पक्षे अत्र ङीषपि भवति। ङीषेवेति। जातेरित्यननुवृत्तौ तु शार्ङ्गरवस्य स्त्री वैदस्य स्त्रीति पुंयो
गविवक्षायामपि परत्वान्ङीनेव स्यादिति भावः। नृनरयोरिति। नृशब्दात्ऋन्नेभ्य इति ङीपि नरशब्दाज्जातिलक्षणे ङीषि प्राप्ते वचनं। वृद्धिविधानार्थं चानेन नरशब्दे
अन्त्योऽन्त्यस्य वृद्धिः स्यात्। अत्राहुः। वार्णादांगं बलीय इत्यकारस्य यस्येति चेति लोपेनापहारात्। अनन्त्यस्यापि अकारस्य वृद्धिर्भवतीति। यद्वा। नरस्य अः नरः। अ १९
नेन तत्परं रूपं। ना च नरश्च तयोर्नृनरयोः। परस्य च प्रथम एवाकारो गृह्यते न तु द्वितीयः प्रश्लेषसामर्थ्यादिति। इह नरस्येत्यर्थवतो ग्रहणाद्धि नरशब्देनातिप्र
संग इति बोध्यं। यद्यप्यन्यतरोपादानेनापि नारीति रूपं सिध्यति तथाप्यन्यतरस्यानिष्टरूपनिवृत्त्यर्थं द्वयोरुपादानं। कथं तर्हि किंनरीणां नरीणामित्यादिप्रयोगाः

अत्राहुः। नरस्य स्त्री नरी पुंयोगलक्षणो ङीष्। केचित्तु अनिर्दिष्टस्थानिकत्वादिकुः परिभाषोपस्थितौ नृशब्दस्यैव वृद्धेर्नारीति भवति। नरशब्दस्य ग्रहणं तु ङी
नर्थमेव तत्रानिको वृद्ध्यभावान्नरीत्येव भवितव्यमित्याहुः तदपरे न क्षमंते। यदि ङीनर्थमेव नरशब्दग्रहणं स्यात्तर्हि शार्ङ्गरवादिगण एव पृथगेव पठेत्। वृद्धि
विधायके तद्गणसूत्रे तत्पाठस्य वैयर्थ्यापत्तेरिति। पुत्रशब्दोऽत्र गणे पठ्यते ततः। स्त्रियां ङीन्। पुत्री। न च पुत्रशब्दः कन्यायां नास्तीति शंक्यं। आत्मजस्तन
यः सूनुः सुतः पुत्रः स्त्रियां त्वमी। आहुर्दुहितरं सर्वे इत्यमरोक्तेः। तेन पुत्रीव हर्षं तद्दयेतनोति। कुर्वंत दुर्वीपतिं पुत्रि सर्वमित्यादिप्रयोगा निर्बाधा एव। यत्त्वत्र हर
दत्तेनोक्तं। केवलः पुत्रशब्दः स्त्रियां नास्तीति। तदुपेक्ष्यं। उदाहृतकोशविरोधात्। सूतिकापुत्रिकेत्यत्र स्वयमेव विरोधाच्च। एवं च सूत्रे [illegible] भोजकुलमेरुभ्यो दु
हितुः पुत्रड्वेतिकारे सन्या गदस्येति सूत्रस्थवार्त्तिकं व्यर्थमिति मनोरमायां स्थितं। यङश्चाप्। पकारोऽत्र हलङ्यादिति सामान्यग्रहण[illegible]कारस्तद्विघातेन चारि
तार्थत्वेऽपि परत्वाच्चित्स्वरः पित्स्वरं बाधते॥ ॥ आंवष्ठ्येति। आंवष्ठस्यापत्यं स्त्री वृद्धेत्कोसलेति ञ्यङ्। कारीषगंध्येति। करीषस्येव गंधोऽस्य करीषगंधिः। उ

आवट्याच्च।४।१।७५। अस्माच्चाप् स्यात्। यञश्चेति ङीषोऽपवादः। अवटशब्दो गर्गादिः। आवट्या। तद्धिताः।४।१।७६। आपञ्चमसमाप्तेर

पमानाच्चेति गंधस्येदुत्वादेशः। तस्य गोत्रापत्यं स्त्री अण्। अणिञोरनार्षयोरिति ष्यङादेशः स च यद्यपि स्त्रियामेव विहितस्तथापि ङित्करणं ((धिकारोऽयं॥
सामर्थ्यात्तदंताद्प्यश्चाप्। वाद्यत्रइति। एतच्च आवट्याच्चेति चकारस्यानुक्तसमुच्चयार्थत्वाल्लभ्यत इत्याहुः। पौतिमाष्येति। पूतिमाषशब्दो गर्गादिः। तद्धिताः। बहु
वचनमनुक्तानामुपसंख्येयानां संग्रहार्थं। महासंज्ञाकरणं तु तेभ्यः प्रयोगेभ्यो हितास्तद्धिताः इत्यन्वर्थलाभाय। तेन यथाप्रयोगमेव स्युः। ननु टापः प्रागेवायं
धिकारोऽस्तु ष्फविधौ तद्धितग्रहणं यस्येति लोपे इद्ग्रहणं च मास्त्विति चेन्मैवं। पद्वी मृद्वीत्यादावोर्गुणप्रसंगात्। यदि तु यस्येति चेत्यत्र ईद्ग्रहणमेव ङीषि तद्धितस्या
र्याभावे ज्ञापयतीति स्वीक्रियेत तर्हि टापः प्राक् तद्धिताधिकारेऽपि न कश्चिद्दोष इति केचित्तच्चिंत्यं। कुरूणित्यादौ ओर्गुण इति प्रसंगादिति न व्याः॥ ॥

सु॰
सि॰ कौ॰
टी॰ त॰
११७

यूनस्तिः। ऋन्नेभ्य इति ङीपोपवादः। युवतिरिति। स्वादिष्विति पदत्वान्नलोपः। कथं तर्हि युवतीकरनिर्मथितं मिथ्या। तमिति प्रयोगः। अत्र केचित्। सर्वतो क्तिन्न्यर्थादिति वह्वादिगणसूत्राद्‌ कल्पिकोङीष्। न च तिप्रत्ययेनैव स्त्रीत्वस्योक्तत्वान्ङीष् न भविष्यतीति शंक्यं। उक्तेपि भवत्येव इति भाष्यात्। एवं चैवमपि युवतीनां समूहो यौवतमिति न सिध्येत्। किं तु तस्य समूह इत्यणि भस्याढे तद्धिते इति पुंवद्भावेन यौवनमित्येव स्यादिति वाच्यं। बाहुलकाद्यौतेरौणादिके कतिप्रत्यये। सति युवतिशब्दमादाय तत्सिद्धेरिति। इमं शेषं परिहरन्नाह। शत्रन्तादिति। यौतिमिश्रीकरोति पत्येति विग्रहे लटः शतृशानचाविति शतरि उगितश्चेति ङीप

यूनस्तिः। ४।१।७७॥ युवन्शब्दात्तिप्रत्ययः स्यात्स च तद्धितः। लिङ्गविशिष्टपरिभाषया सिद्धे तद्धिताऽधिकार उत्तरार्थः। युवतिः। अनुपसर्जनादित्येव। बहवो युवानो यस्यां सा। बहुयुवा। युवतीति तु यौतेः शत्रन्तान्ङीपि बोध्यं॥ इति स्त्रीप्रत्ययाः॥ प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा। २।३।४६॥ नियतोपस्थितिकः प्रातिपदिकार्थः। मात्रशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये परिमाणमात्रे संख्यामात्रे च प्रथमा स्यात्। उच्चैः। नीचैः। कृष्णः। श्रीः। ज्ञानं। अलिङ्गा नियतलिङ्गाश्च प्रातिपदिकार्थमात्र इत्यस्योदाहरणं। अनियतलिङ्गास्तु लिङ्गमात्राद्याधिक्यस्य। तटः। तटी। तटं। परिमाणमात्रे द्रोणो व्रीहिः। द्रोणरूपं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरित्यर्थः। प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणं। प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणमिति विवेकः। वचनं संख्या। एकः। द्वौ बहवः। इहोक्तार्थत्वाद्विभक्तेरप्राप्तौ वचनं॥ सम्बोधने च। २।३।४७॥ इह प्रथमा स्यात्। हे राम। कारके। १।४।

एवं हि यौवतमिति प्रयोगोपि सुलभः। त्यंतादणि तु पुंवद्भावाद्यौवनमित्येव॥ भिक्षादिपाठसामर्थ्यान्न पुंवदिति वृत्तिकारोक्तिरयुक्तेति भिक्षादिभ्योऽणित्यत्रैवोपपादयिष्यामः॥ इति स्त्रीप्रत्ययाः॥ स्वौजसमौडित्यादिना तावत् स्वादयोऽन्याः प्रातिपदिकाद्दर्शिताः। तेषामर्थविशेषव्यवस्थां दर्शयितुमारभते। प्रातिपदिकार्थेत्यादिना। प्रथमादयः सप्तम्यंताः प्राचां संज्ञाः ताभिरिहापि व्यवहारः इति स्वौजसमौडिति सूत्रे मूलकृतोक्तं। कौस्तुभे तु इह प्रथमादयः शब्दाः सुपां त्रिकेषु वर्तंते समंस्यादश्रुतत्वादिति न्यायादित्युक्तं। तथा चान्यायसिद्धत्वादस्मिन् शास्त्रे प्रथमादिसंज्ञानामकरणेपि न क्षतिरिति ज्ञेयं। एवं हि पंचकं प्रातिपदिकार्थ इति गृह्येत ततो लिंगवचनग्रह

116

त्रिकपक्षे पि लिंगग्रहणमनर्थकमेवेत्याशंक्य विवक्षितं दर्शयति। नियतोपस्थितिक इति। यस्मिन्प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेनोपस्थितिः स प्राति
पदिकार्थ इत्यर्थः। शुक्ल इति यावत्। नन्वेवं सिंहो माणवक इत्यादौ प्रथमा न स्यात्। अत्राहुः। शक्यार्थमादाय प्रथमाविभक्तेरुत्पन्नौ सत्यां पश्चात्तत्पदांतरसमभि-
व्याहारेण लक्ष्यार्थबोधेपि सत्त्वभावादिति। मात्रग्रहणस्येति। तस्य चात्रावधारणमर्थः। मात्रं कार्त्स्न्येऽवधारणे इत्यमरः। प्रातिपदिकार्थलिंगपरिमाणवचना
न्येव प्रातिपदिकार्थलिंगपरिमाणवचनमात्रमित्येवकारेणास्वपदविग्रहः। समासस्तु मयूरव्यंसकादित्वाद्बोध्यः। प्रत्येकमिति। द्वंद्वांते श्रूयमाणत्वादिति भा
वः। ननु वीरः पुरुष इत्यादौ अभेदसंसर्गस्याधिक्यस्य भानात्प्रथमा न स्यात्। न च पूर्वापरेत्यादिना वीरशब्दस्य समासविधानं प्रथमोत्पत्तौ लिंगमिति वाच्यं। द्वि
तीयांतानामपि वीरं पुरुषमानयेत्यादौ तद्विधानस्य चरितार्थत्वादिति चेन्न। संसर्गस्य वाक्यार्थत्वेन बहिरंगत्वात् प्रथमं प्रवृत्तसंस्कारबाधानुपपत्तेः पदसंस्का
रपक्षस्यैवेहाभ्युपगमात्। मात्रपदेन कर्माद्याधिक्ये प्रथमा न भवेदपि लिंगपरिमाणग्रहणं लिंगाधिके परिमाणाधिके च भवेदेवेत्याह लिंगमात्राद्याधिक्य इति। यद्यपि लिंग
मात्रे परिमाणमात्रे इत्येवाक्षरार्थस्तथापि प्रातिपदिकार्थं विना लिंगादिप्रतीतेरसंभवादि[illegible]धिक्य इत्युक्तं। उच्चैरिति। पदत्वादिह रुत्वविसर्गौ भवतः। किं च।
अस्य प्रथमांतत्वात् ग्राम उच्चैस्तत्वं ग्राम उच्चैस्तत्वमिति सपूर्वाया इति सूत्रेणान्वादेशयोर्विकल्पसिद्धिरपि फलं। कृष्ण इति। यद्यपि नीलद्रव्येऽयमनियतलिंगस्तथापि वासु
देवे भगवति नियतपुल्लिंग इति भावः। ज्ञानमिति। भावे ल्युट्। तटस्तटीति। द्विकपक्षे नियतलिंगं न प्रकृत्यर्थस्त्रिकपक्षे तु यद्यपि प्रकृत्यर्थस्तथापि तन्न लिंग
स्यापाक्षिकोपस्थितिकत्वान्न प्रातिपदिकार्थत्वमनेन गतार्थता। द्रोण इति। न चेह प्रातिपदिकार्थमात्र इत्येव प्रथमास्त्विति वाच्यं। तथा सति परिच्छेद्यपरिच्छेदकभा
वस्य संसर्गविधया भानायोगात्। नामार्थयोरभेदसंसर्गस्य व्युत्पन्नत्वात्। व्रीहिरिति। जातावेकवचनं। व्यक्तिविवक्षायां तु द्रोणो व्रीहय इति भवत्येव। अभेदेने
ति। न च प्रकृतिप्रत्ययार्थयोरभेदान्वयो दुर्लभः पचति पाचकः। औपगव इत्यादौ सर्वत्र भेदान्वयस्यैव दृष्टत्वादिति वाच्यं। देवतार्थकतद्धितादावभेदान्वयस्य दृ
ष्टत्वात्। ऐंद्रं हविरित्यत्र हि इंद्रदेवताकं हवि[illegible]रिति बोधः सर्वैरेवाभ्युपगम्यत इति नाशंकावसर इति भावः। वचनं संख्येति। वाच्यवाचकयोरभेदाध्यवसा
येन तथैव पूर्वाचार्याणां व्यवहारादिति भावः। अप्राप्तौ वचनमिति। सूत्रे वचनग्रहणमित्यर्थः। वस्तुतस्तु सूत्रे मात्रग्रहणं व्यर्थं। विशेषविहितैः कर्मणि द्वितीये

× तिमटा८

सु॰ सि॰ कौ॰ टी॰ त॰ ११८

न्यादिभिर्बोधितत्वेनकर्मादौप्रथमायाअप्रवृत्तेःकर्मणिद्वितीयेत्यादिनाकर्मणिद्वितीयैवकर्तृकरणयोस्तृतीयैवनान्याविभक्तिरित्येवमर्थनियमाभ्युपगमात्।नचकर्मण्येवद्वितीया
कर्तृकरणयोरेवतृतीयानान्यत्रेतिप्रत्ययनियमपक्षेप्रथमायाअपिकर्मादौप्रवृत्तिसंभवान्मात्रग्रहणमावश्यकमेवेतिवाच्यं।प्रत्ययनियमपक्षेहिप्रातिपदिका
र्थएवप्रथमानान्यत्रेत्यर्थपर्यवसानात्कर्मादौप्रथमायाअप्रवृत्तेः।वचनग्रहणमपिव्यर्थं।नकेवलाप्रकृतिःप्रयोक्तव्येतिनिषेधादेवप्रथमोत्पत्तिसिद्धेः।नचै
वंद्विशब्दात्बहुशब्दाच्चैकवचनंएकशब्दाद्विवचनमित्येवमव्यवस्थास्यादितिवाच्यं।अनन्वितार्थकविभक्तिप्रयोगापेक्षयाअनुवादकविभक्तिप्रयोगस्य।
न्याय्यत्वात्।गोर्वाहीकइतिवत्द्रोणशब्दस्यतत्परिमितेउपचारात्द्रोणोव्रीहिरित्यपिसिद्धमितिमनोरमायांपरिमाणग्रहणमपिप्रत्याख्यातं।नन्वस्मिन्प
क्षेद्रोणपरिच्छिन्नाभिन्नोव्रीहिरित्यभेदान्वयः।नामार्थयोरभेदान्वयात्।परिमाणंप्रत्ययार्थइतिपक्षेतुद्रोणरूपंयत्परिमाणंतत्परिच्छिन्नोव्रीहिरितिप्रत्य।
यार्थनामार्थयोरभेदान्वयस्तथाचफलभेदेकथंप्रत्याख्यानमितिचेत्।अत्राहुः।शाब्दबोधप्रयुक्तंवैलक्षण्यमिहानादृत्यपरिमाणग्रहणंप्रत्याख्यातं।अत
एवऔपगवादौतस्येदमित्यनेनैवाणप्रत्ययसिद्धेस्तस्यापत्यमितिसूत्रंकिमर्थमित्याक्षेपोमत्वर्थीयेनिनैवसिद्धेपरिवृतोरथइत्यधिकारेपांडुकंबलादिनिरि
तोनिप्रत्ययविधानंकिमर्थमित्याक्षेपश्चवक्ष्यमाणःसंगच्छते।यदितुसर्वत्रैवशाब्दबोधप्रयुक्तंवैलक्षण्यंस्वीक्रियतेतर्हिबाधनार्थंकृतंभवेदितिसमाधान
स्याणोबाधनार्थमिनिप्रत्ययविधानमितिसमाधानस्यचवैयर्थ्यापत्तेरिति।ननुक्वचित्पंचकंप्रातिपदिकार्थःक्वचित्त्रिकंक्वचिद्द्विकंप्रातिपदिकार्थइत्यादिव्यव
ह्रियतेते।एतेपक्षाःकेषामभिमताःकथंवाऽमीषामुपपत्तिरितिचेत्।अत्रव्याचख्युः।स्वार्थद्रव्यलिंगसंख्याकारकात्मकःपंचकंप्रातिपदिकार्थः।दधिमध्वि
त्यादौविनापिविभक्तिंप्रातिपदिकादेवतावतामर्थानांप्रतीतेः।वृक्षौवृक्षाः।।वृक्षंवृक्षेणेत्यादौयद्यपिविभक्त्यन्वयेपिप्रतीयंतेनइयताप्रकृत्यर्थत्वहानिर्द्योतकत्वे
नैवोपयोगादितिभाष्यकारोमन्यते।आदितश्चतुष्कमितिकैयटः।तत्रोपपदंसप्तमीस्थमित्यत्रचतुष्कपक्षेपंचकपक्षेवाप्रातिपदिकार्थेइत्यभिधानात्। १८
आदितस्त्रिकमितिवृत्तिकारः।अन्वयव्यतिरेकाभ्यांसंख्याकारकादेर्विभक्त्यर्थत्वनिश्चयात्।यद्यपिदधिमध्वित्यादौविनापिविभक्तिंसंख्याकारकंचप्रती
यते।नेयतावृक्षौवृक्षाइत्यादावपिविभक्त्यर्थत्वंहीयते।नहिगर्गाइत्यादौविनापियत्रअपत्यंगम्यतइतितदपिप्रकृत्यर्थः।नचाऽविभरित्यादौअंतरेणापिप्र

117

त्ययं कर्ता प्रणीयत इति भेदेनोत्पादावपि कर्तृप्रकृत्यर्थ एवेति युक्तमेवोक्तं । अनतिरिक्तमेव प्रातिपदिकार्थः संख्या कर्मादयस्तु विभक्त्यर्था इति लिंगं दावादिवाच्यमिति पक्षे आदितो
द्विकमेवेत्यन्ये । तत्र स्वार्थो विशेषणं । द्रव्यं विशेष्यं । लिंगं स्त्रीत्वादिः संख्या एकत्वादिः कारकं कर्मादि । संबोधने च ॥ मात्रग्रहणात्तत्प्रत्याख्यानपक्षेपि प्रातिपदिकार्थ एव
प्रथमेति नियमाद्धा संबोधनाधिक्ये प्राप्तावस्यारंभः । इह संबोधनं प्रकृत्यर्थे प्रतिविशेष्यं क्रियां प्रति विशेषणं । तथा च ब्रजानि देवदत्तेत्यादावेकतिङ् वाक्यमिति वाक्य
त्वे सिद्धे आमंत्रितस्य चेति निघातो भवति । क्रियाप्रत्यविशेषणत्वे तु भिन्नवाक्यत्वान्नैतत्सिध्येत् । समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या इति वार्तिकात् । त
था चोक्तं । संबोधनपदं यच्च तत्क्रियाया विशेषणं । ब्रजानि देवदत्तेति निघातोत्र तथा सति इति । एवं च राम मां पाहीति वाक्यस्य रामसंबंधिसंबोधनविषयो मत्कर्मकं र
क्षणमर्थः । ब्रजानि देवदत्तेत्यत्र तु देवदत्तसंबंधिसंबोधनविषयो मत्कर्तृकं गमनमर्थः ॥ इति प्रथमा ॥ ❀ ॥ कर्तुरीप्सिततमं कर्म । कर्तुरिति क्तस्य च वर्तमान
इति कर्तरि षष्ठी आप्नोतेः सन् । हित्वा आप्ज्ञप्यृधामीत् । अत्र लोपोभ्यासस्येत्यभ्यासलोपः । मतिबुद्धिपूजार्थेभ्यश्चेति वर्तमाने क्तः । मतिरिहेच्छा न तु बुद्धिः । पुन

कर्तुरीप्सिततमङ्कर्म्म । १।४।४९ ॥ कर्तुः क्रियया आप्तुमिष्टतमङ्कारकङ्कर्म्मसंज्ञं स्यात् । कर्तुः किं । माषेष्वश्वम्बध्नाति । कर्म्मण ईप्सिता माषा न
तु कर्तुः । तमब्ग्रहणं किं । पयसा ओदनम्भुङ्क्ते । कर्म्मेत्यनुवृत्तौ कर्म्मग्रहणमाधारनिवृत्त्यर्थम् । अन्यथा गेहं प्रविशतीत्यत्रैव स्यात् ॥

र्बुद्धिग्रहणे तु । ततोऽतिशायने तमविष्ठनावित्यतिशये तमप् । एवं च कर्त्राऽऽप्तुमिष्यमाणतमं कर्मेत्यर्थः । कर्ता च धातूपात्तव्यापाराश्रयः । स च केनाप्तुमिच्छतीति
इति करणाकांक्षायां विशेषणीभूतेन व्यापारेणेत्यर्थाल्लभ्यते तदेतदाह । क्रिययेति । क्तप्रत्ययेनोपस्थितं वर्तमानत्वं चेह न विवक्षितं तेन कटं कृतवान् करिष्यती
त्यादि सिद्धं । कारकमिति । एतच्च कारके इत्यधिकाराल्लभ्यते तत्र हि व्यत्ययेन प्रथमार्थे सप्तमी । प्रतिसूत्रं वाक्यं भित्त्वा कारकसंज्ञाऽनेन विधीयते । तथा च । अपा
ये ध्रुवं कारकसंज्ञं स्यात् । ततोऽपादानं । उक्तं कारकमपादानं स्यात् । पुनः कारकशब्दानुवृत्तिसामर्थ्याद्विशेषसंज्ञाभिः सह समावेशसिद्धिः । तेन संवेरम इत्यत्राधि
करणत्वात्सप्तमी । कारकत्वाद्गतिकारकोपपदात्कृदिति कृदुत्तरपदप्रकृतिस्वरश्च सिध्यति । अन्यथा तत्पुरुषे तुल्यार्थेत्यादिना पूर्वपदप्रकृतिस्वरः स्यात् । न
चात्रोपपदस्वरेणान्यथासिद्धिः घं क्यास्लेवकर्णयोरिति निर्देशात्प्रातिपदिकस्योपपदत्वेपि सप्तम्यंतस्यातथात्वात् । यद्यपि इह थाथादिस्वरेणैवान्तोदात्तत्वं सिध्यति

CC-0. In Public Domain. Digitization by eGangotri

सु·
सि·कौ· तथाप्यप्रत्ययसाहचर्येण लरचएवतत्रोपादानान्नास्तियाथादिस्वरेणतत्सिद्धिरित्याहुः। अन्वर्थाचेयंसंज्ञा करोतीतिकारकमिति। तेनब्राह्मणस्यपुत्रंपन्थानंपृच्छतीत्यत्रक्रि
टी·त· याअनन्वयिनोनभवति। ब्राह्मणोह्यत्रपुत्रविशेषणंनतुक्रियान्वयीति। पयसेति। भुजिक्रियांप्रतिपयसःप्रकृष्टोपकारकत्वेपिओदनएवात्रईप्सिततमः पयस्तुसंस्कार
११८ कत्वात्करणंनह्यसौकेवलपयसःपानेनसंतुष्यति। किंतुतत्संस्कृतेनौदनेन। यस्तुपयएवईप्सिततममस्यभवतितदाकर्मत्वंभवत्येवपयःपिवतीति। कर्मे
त्यनुवृत्ताविति। अधिशीङ्स्थासांकर्मेतिसूत्रात्॥ ॥ अनभिहितेति। ननुबहुपटुरित्यादौबहुच्प्रत्ययेनोक्तार्थत्वात्कल्पवाद्योयथानप्रवर्त्तन्तेतथाक्रि
व५ यतेकटइत्यादौ वपितिङादिभिरुक्तार्थत्वाद्द्वितीयानभवति। किंचकटंकरोतीत्यादौसावकाशाद्द्वितीयाक्तः कटइत्यादौनिरवकाशयाप्रथमयावाधिष्यते। नच
वृक्षः प्लक्षइत्यादिप्रथमायाअवकाशः। तत्रापिप्रतीयमानामस्तिक्रियांप्रतिकर्तृत्वेनतृतीयाप्रसंगात्। अथोच्यते। नीलमिदंनतुरक्तमित्यादौविशेषणांन

अनभिहिते। २।३।१। इत्यधिकृत्य। कर्म्मणिद्वितीया। २।३।२। अनुक्तेकर्म्मणिद्वितीयास्यात्। हरिम्भजति। अभिहितेतुकर्म्मणिप्रातिपदि
कार्थमात्रइतिप्रथमैव। अभिधानन्तुप्रायेणतिङ्कृत्तद्धितसमासैः। तिङ्। हरिःसेव्यते। कृत्। लक्ष्म्यासेवितः। तद्धितः। शतेनक्रीतःशत्यः।
समासः। प्राप्तआनन्दोयंसप्राप्तानन्दः। क्वचिन्निपातेनाभिधानं। यथाविषवृक्षोऽपिसम्वर्द्ध्यस्वयंछेत्तुमसाम्प्रतं। साम्प्रतमित्यस्यहियुज्य
तइत्यर्थः। तथायुक्तंचानीप्सितं। १।४।५०। ईप्सिततमवत्क्रिययायुक्तमनीप्सितमपिकारकङ्कर्मसंज्ञंस्यात्। ग्राममङ्गच्छन्तृणंस्पृशति। ओद

रनिवृत्तितात्पर्यकेअस्तिक्रियायाअनावश्यकत्वात्प्रथमायाअस्त्येवावकाशइति। तर्हिउभयोःसावकाशत्वेपरत्वात्प्रथमैवस्यात्।न नम्भुञ्जानोविषम्भुङ्क्ते॥
ध्याच अनभिहिताधिकारोवृथैवेतिचेदत्राहुः। संख्याविभक्त्यर्थइतिपक्षेसूत्रारंभआवश्यकः। तथाहिसूत्रारंभेकर्मणिद्वितीयेत्यस्यानभिहितेकर्मणियदेकत्वं 118
तत्रद्वितीयैकवचनंअम्इत्यर्थः। सूत्रानारंभेचकर्मणियदेकत्वंतत्रद्वितीयैकवचनममितिहिवाक्यार्थः। तथाचसतिकृतःकटइत्यादौक्तेनकर्ममात्रोक्ताव १२०
पितदेकत्वस्यानुक्ततयाअमडुर्वारःस्यात्। नचपरत्वात्प्रथमैवस्यादितिवाच्यं। कर्तव्यःकटइत्यादौततोपिपरत्वेनकृद्योगलक्षणषष्ठीप्रसंगात्। कारकंविभ
क्त्यर्थइतिपक्षेतुकारकस्यक्तप्रत्ययादिनैवोक्तत्वात्प्रातिपदिकार्थप्रवृत्तायाःप्रथमायाएकत्वादिवोधनसंभवाद्वामादिविभक्तेरप्रवृत्तावनभिहितइति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत एव याचको व्रजतीति वक्ष्यति व्रजतीति निमित्तं वाच्यं पाककर्तृकर्तृकं गमनं हि पाचको व्रजतीत्यस्यार्थः ४॥

सूत्रं भव्याख्यानमाकरे इति। कारकं प्रातिपदिकार्थ इति पक्षे त्वनभिहित इत्यस्य द्योत्य इत्यर्थः। तथा च तत्प्रत्ययादिभिरद्योत्ये कर्मणि द्वितीयेत्यादि वाक्यार्थः। तत्रापि एके
न द्योतिते द्योतकान्तरं न प्रवर्तत इत्यभ्युपगमे त्वनभिहिताधिकारो नातीवोपयुज्यत इति दिक्। हरिं भजतीति। भजनक्रियया हरौ प्रीतेरुत्पादनात् प्रीतिविशिष्टतया
क्रियाव्याप्यत्वेन हरिः कर्म तद्विशिष्टं भजनं वाक्यार्थः। हरिनिष्ठप्रीत्यनुकूल एकदेवदत्तादिनिष्ठो वर्तमानो व्यापार इति निष्कृष्टोऽर्थः। हरिः सेव्यत इत्यत्राप्येवमे
व क्रियाप्रधानमाख्यातमिति सिद्धान्तात्। धातूपस्थितक्रियायास्तिङर्थं प्रति विशेष्यानुक्त इत्यर्थं प्रतीतविविशेषणत्वमिति तिहितस्यार्थः। एककर्तृकापचिक्रियाएककर्तृका
गमिक्रियेति पचति व्रजत्योः पृथग्वाक्यार्थः। एवं च प्रथमान्तविशेष्यको बोध इति नैयायिकोद्घोषो भाष्याद्यनुसारिभिर्नादर्तव्यः। तन्मते हि पाककर्ता व्रजनानुकूलकृति
मानिति याचको व्रजतीत्यस्यार्थः। पचति व्रजत्योस्तु पाकानुकूलकृति व्रज त्यर्थ एवं रूपेण वाक्यार्थपर्यवसानान्न तस्य च भाष्यादिग्रन्थविरोधात्। किं च हरिं
भजति देवदत्तः हरिः सेव्यते देवदत्तेनेत्यत्र चैकरूप एव शाब्दबोध इत्युक्तं नैयायिकानां मते तु भिद्यत एव हरिनिष्ठप्रीत्यनुकूलकृत्याश्रयो देवदत्तः देवद
त्तनिष्ठकृतिजन्यप्रीत्याश्रयो हरिरित्युभयत्र भेदेन वाक्यार्थपर्यवसानात्। तस्मात्प्रथमान्तविशेष्यकबोधो भाष्याद्यनुसारिभिर्नादर्तव्य एव। यास्कोऽप्याह॥
भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानीति। पश्य मृगो धावतीत्यादौ तु मृगकर्तृकं गमनं दृशिक्रियायां कर्म प्रधानं तु दृशिक्रियैव। उक्तं च। सुबन्तं हि यथा
ऽनेकं तिङन्तस्य विशेषणम्॥ तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणमिति। न च लौकिकप्रयोगेषु तिङन्तस्य तिङन्तविशेषणत्वं दुर्लभमिति मन्तव्यं। पुरीमवस्कन्द
लुनीहि नन्दनं इति मा च म्लेच्छ कस्य पुर्यवस्कन्दनं नन्दनलवनादिरूपा अस्वास्थ्यक्रियेत्यर्थ इति समुच्चयेऽन्यतरस्यामिति सूत्रे मूले स्फुटीभविष्यमाणत्वात्। एवं पचति भवती
त्यत्र पचिक्रियाभवतीत्यर्थो भव्यमते बोध्य इति दिक्। अभिहिते त्विति। नन्वेवं पक्वमोदनं भुङ्क्त इत्यत्रापि द्वितीया न स्यादिति चेन्नैवं। इह हि पचिभुजिनिरूपिते द्वे कर्मत्व
शक्ती तत्र प्रधानीभूतभुजिक्रियानिरूपितामनभिहितां शक्तिमादाय द्वितीयोत्पत्तेः। अत एव आसने आस्त इत्यत्र सप्तमी सङ्गच्छते। ल्युटाऽधिकरणस्योक्तत्वेऽपि ति
ङ्तोपस्थाप्यक्रियानिरूपिताधिकरणत्वस्यानुक्तत्वात्। प्राप्य इति। शताद्यव्ययनाय व्रजते इति यत्। भाषानन्द इति। इह गत्यर्थाकर्मकेति कर्तरि क्तः। आनन्दकर्तृकप्रा
प्तिकर्मीभूत इत्यर्थः। यदुक्तं प्रायेणेति तस्य फलमाह। क्वचिन्निपातेनेति। विषवृक्ष इति संवर्ध्येत्यत्र छेत्तुमित्यत्र चार्थाद्विषवृक्षमिति गम्यत इति ध्येयं। युज्यत इत्यर्थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु·
सि·कौ· एतेननिपातानांद्योतकत्वमेवेतिनियमोनास्तीतिध्वनितंनयायुक्तं।तथेत्युक्तेकथंयुक्तमितिजिज्ञासायामाह।ईप्सिततमवदिति।सूत्रेचशब्दोऽपिशब्दार्थेवर्ततइतिम
टी·त· ध्वनयन्नाह।अनीप्सितमपीति।ईप्सितादन्यदनीप्सितमितिपर्युदासोयातेनयदुपेक्ष्यंयच्चद्वेष्यंतदुभयमपीहगृह्यतइत्याशयेनाद्यमुदाहरति।ग्रामंगच्छंस्तृणंस्पृश
१२० तीति।यथास्पृश्यमानस्यगंगादेरीप्सितस्यक्रियायोगस्तज्जन्यसंयोगादिफलाधारत्वात्।तथैवानीप्सितस्यतृणादेरपीतिभावः।इहहिग्रामंगच्छतस्तृणस्पर्शनंनांत
रीयकंतृणस्यानीप्सितत्वात्।यदातृणमपीप्सिततमंभवतितदापूर्वेणैवसिद्धं।उपेक्ष्यंचनोपस्थाबुद्धिविषयः।नदीकूलंकषतीत्यचेतनेनेतदसंभवात्।किंतुयत्रेच्छाद्वे
षयोरभावस्तदुपेक्ष्यमितिविवक्षितं।विषमिति।अत्रविषंद्वेष्यमप्योदनवद्भुजिनासंबंधात्कर्म।ननुयएवपुरुषोव्याध्यादिनापीड्यमानोमरणमेवश्रेयोमन्य
तेतस्यविषमपीप्सिततमेव।योपिभ्रांत्याभुंक्तेतस्यापिगुडादिबुद्ध्याव्यवसीयमानंविषमीप्सितमेव।कथमन्यथाप्रवर्तेत।तस्मादुदाहरणमयुक्तमेवेतिचेदत्राहु
यदाकश्चिन्मरणकातरोपिवैरिणानिगृह्यमाणोविषंभुंक्तेतदेदमुदाहरणमिति।अनीप्सितग्रहणंस्पष्टप्रतिपत्त्यर्थंतथायुक्तमित्यन्या।रंभादेवेष्टसिद्धेःस्या
दितत्।धातूपस्थाप्यफलाश्रयःकर्मेत्येवास्तुकिमनेनकर्तुरीप्सिततमित्यादिसूत्रद्वयकथनेनेतिचेत्।अत्राहुः।अग्नेर्माणवकंवारयतीत्यत्रवारणार्थानामीप्सितइ
तिसूत्रेणमाणवकस्यापादानत्वंप्राप्तंतद्बाधायकर्तुरीप्सिततममितिव्यक्तव्यमेव।एवंचद्वेष्योदासीनयोःसंग्रहार्थंतथायुक्तमित्यपिआवश्यकमेवेति॥

119

मूल-९ देवदत्तं शतं मुष्णाति ग्राममजां नयति हरति कर्षति वहति वार्थनिबंधनेयं संज्ञा बलिं भिक्षते वसुधाम्॥

अकथितं च। केनाकथितमित्याकांक्षायामाह। अपादानादिविशेषैरिति। अपादानं संप्रदानमधिकरणं कर्म करणं कर्त्ता हेतुरित्येतैर्विशेषैरित्यर्थः। अविवक्षितमि
ति। अपादानादिविशेषविवक्षायां तु गोर्दोग्धि पयः बलेर्याचते वसुधाम्। व्रजेऽवरुणद्धि गामित्येवं पंचम्याद्य एव भवन्तीति भावः। एतेन पाणिना कांस्यपात्र्यां दोग्धी
त्यत्र करणाधिकरणयोरतिप्रसंगः। तयोस्तु दंडेन करोति कटे तिष्ठत्यादिरवकाशो दुहादिपरिगणनादित्याक्षेपो निरस्तः। करणाधिकरणसंज्ञयोरिह विवक्षि
तत्वात्। यदि तु सूत्रेऽकथितशब्दोऽप्रधानपर्यायो न त्वनुक्तपर्याय इत्यभ्युपगम्येत तदा स्यादेवायमाक्षेपो न त्वन्यथा। कारकमिति। ततश्च ब्राह्मणस्य पुत्रं

अकथितञ्च। १।४।५१। अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्। दुह्याच्पच्दण्डरुधिप्रच्छिचिब्रूशासुजिमन्थमुषाम्।
कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम्॥ १ दुहादीनां द्वादशानान्तथा नीप्रभृतीनाञ्चतुर्णाङ्कर्मणा यद्युज्यते तदेवाऽकथितङ्कर्मेति परि
गणनङ्कर्त्तव्यमित्यर्थः॥ गान्दोग्धि पयः। बलिं याचते वसुधाम्। अविनीतं विनयं याचते। तण्डुलानोदनम्पचति। गर्गान् शतन्दण्डयति। व्रजम
वरुणद्धि गाम्। माणवकम्पन्थानम्पृच्छति। वृक्षमवचिनोति फलानि। माणवकन्धर्मं ब्रूते शास्ति वा। शतञ्जयति देवदत्तम्। सुधां क्षीरनिधिम्मथ्नाति
माणवकन्धर्मम्भाषते। अभिधत्ते वक्तीत्यादि। कारकङ्किम्। माणवकस्य पितरम्पन्थानम्पृच्छति। अकर्मकधातुभिर्योगे देशः कालो भावो गन्त
व्योऽध्वा च कर्मसंज्ञक इति वाच्यम्॥ कुरून् स्वपिति। मासमास्ते। गोदोहमास्ते। क्रोशमास्ते॥ ॥११ पृच्छतीत्यत्र नातिप्रसंगः। दुह्याजिति। दं

डदंडनिपातने चुरादिः। इह तु दंडिग्रहणार्थो न तु निग्रहार्थः। प्रच्छीत्यागं तु केनेकारेण निर्देशो न त्विका ग्रहिज्येति संप्रसारणप्रसंगात्। कर्मयुगिति। कर्मणा युज्यते क
र्मयुक्। सत्सूद्विषेत्यादिना क्विप्। कर्मणा युज्यत इति। मुख्यकर्मणा सह क्रियया संबध्यमानं कारकमेवापादानादिविशेषैरकथितं सत् कर्मसंज्ञकं भवतीत्यर्थः। एतेन
दुहादीनां द्विकर्मकत्वं स्फोरितम्। अन्ये त्वाहुः। कर्मयुगित्यत्र कर्मशब्देन क्रियोच्यत इति। तेन क्रियान्वयीत्यर्थः। परिगणनमिति। तेन नटस्य शृणोति गाथामित्यादौ नातिप्र
संग इति भावः। इह हि गाथाकर्मकं नटसंबंधि श्रवणं वाक्यार्थः। तेन क्रियान्वयित्वान्नटस्य कारकत्वमस्त्येव। गां दोग्धीति। पयःकर्मकं गोसंबंधि दोहनमर्थः। पयोऽत्र
मुख्यं कर्म कर्तुरीप्सिततमत्वात्। गौस्तु पयसो निमित्तमात्रेण पातान्न तु वस्तुसत्तया वधिभावेनेत्यपादानसंज्ञाया अप्रवृत्तेरनेन कर्मसंज्ञिका भवति। तदुक्तं हर

सु.

सि. कौ. दत्तेन यद्यपि गोरवधिभावो विद्यते तथाप्यविवक्षिते तस्मिन्निमित्तमात्रविवक्षायामुदाहरणोपपत्तिरिति एतेनावधिविवक्षायां गोरिति पंचम्येवेति स्पष्टम् यदा तु गोरित्येतन्न्यपसार्यं
टी. त. वध्यते तदा गोश्शब्दात्षष्ठ्येव भवतीत्यपि बोध्यम् यत्तु माचा दुह्याद्यर्थरुधिप्रच्छिचिञ्ब्रूशासुजिकर्मयुक्तानीह कथ्यं अथ वहदंडग्रहमुष्याचिकर्मभागिति पठितं तत्र ग्रहेः पाठोऽप्रामाणिकः
१२१ दृतेरेणां तु द्विकर्मकत्वं यद्यप्यप्रामाणिकं तथापि संदर्भशुद्धिः तथा हि दुह्याद्रीन्यादीश्च हेराश्येन पठित्वा भावकर्मप्रक्रियाशेषे लक्ष्यकस्वलर्थाः किं द्विकर्मकेभ्यो मुख्ये कर्मणि लस्तु
गौणे वेत्याशंकायां स्वयमेव पठितं न्यादयो ण्यं तनिष्कर्मगत्यर्थो मुख्यकर्मणि प्रत्ययं यान्ति दुह्यादिर्गौणेऽन्ये तु यथारुचि इति एवं च दंडिमंथिभ्यामपि मुख्ये स्यात् न चेष्टापत्तिः गर्गाः
शतं दंड्यंतामिति भाष्यविरोधात् शतं त्वत्र प्रधानं न तु गर्गाः अर्थिनश्च राजानो हिरण्येन भवंतीति वाक्यशेषात् दंडिरत्र ग्रहणार्थं न तु निग्रहार्थ इत्युक्तम् अत एवात्र समुदाये वाक्यप
रिसमाप्तिः गुणानुरोधेन प्रधानावृत्तेरसंभवात् तथा मंथेरपि प्रधाने स्याद्दिव्यते तु गौणे तथा च भारविः येनापविद्धसलिलस्फुटनागसद्मा देवासुरैरमृतमंबुनिधिर्ममंथे इति अत्रामृतं
मुख्यं उद्देश्यत्वात् अंबुनिधिस्तु गौणः वलिर्याचत इति अत्र प्रार्थनार्थस्य याचेर्वसुधा मुख्यं कर्म तेन युक्तो वलिर्वसुत्तोवधिरपि तद्विवक्षायामनेन कर्म भवति अवनीतमिति
अनुनयार्थस्य याचेरविनीतो मुख्यं कर्म अविनीतं विनयाय याचनुनयतीत्यर्थः विनयस्य तादर्थ्याविवक्षायामकथितं चेति कर्मसंज्ञा तंडुलानीति निर्वर्तनार्थस्य पचेरोदनो मुख्यं कर्म ओ
दनं निर्वर्तयतीत्यर्थः तंडुलास्तु करणत्वाविवक्षायामकथितं कर्म अन्ये त्वाहुः द्व्यर्थः पचिरिति भाष्यपर्यालोचनया तंडुलानोदनं पचतीत्यस्य तंडुलान्विक्लेदयन्नोदनं निर्वर्तय
तीत्यर्थः इत्यादिपुपचेः परिगणनमप्रामाणिकं भाष्यकैयटयोरनुक्तत्वादिति गर्गानिति ग्रहणार्थस्य दंडेः शतं मुख्यं कर्म गर्गास्त्वपादानत्वाविवक्षायामकथितं कर्म व्र
जमिति अत्र गौर्मुख्यं कर्म व्रजं त्वधिकरणत्वाविवक्षायामकथितं चेति कर्म भवति [illegible]मग्रेप्यूह्यम् अर्थनिबंधनेति ननु स्वरूपाश्रया अहमहमपीदमचोद्यम् चोद्य इति न 120
दा सूत्रभाष्ये पृच्छिपर्यायस्य चुदेरपि द्विकर्मकत्वदर्शनादिति भावः अत एव स्थाणुं रणेऽस्मरमुखो जगाद मरीमुचैर्वचनं महार्थमिति भट्टिः प्रायुंक्त एवं च नाथस्यादयो वह
वो द्विकर्मका ज्ञेयाः स्यादेतत् यद्यर्थनिबंधना संज्ञा तर्हि नीवह्योरन्यतरो न पठनीयः उभयोरप्येकार्थत्वादिति चेत् सत्यं भारं वहति भारं नयतीत्यत्र यदि विलक्षणोऽर्थोऽनुभूयते
तदा द्वयमपठनीयमेव यदि तु नानुभूयते तर्ह्यन्यतरो न पठनीयः उभयथापि लक्ष्यस्य निर्बाधत्वात् अत्र वदंते जयाहद्युतरुशक्रमित्युदाहरणमप्ययुक्तमिति मनोरमोक्तम
चिंत्यमेव संज्ञाया अर्थनिबंधनत्वाद् दंडेर्ग्रहणार्थत्वाच्चेति वलिं भिक्षत इति भिक्षा भिक्षायामलाभे लाभे च भिक्षते याचत इत्यर्थः देवा इति कुरूपं चालारिरे वहगृह्यते तेनाधिशीङ्स्था

सां कर्मत्वस्य न वैयर्थ्यं अधिपूर्वाणामेषामाधारः कर्मेति नियमार्थत्वाभ्युपगमेपि वैकुंठे वर्त्तते इत्यादिष्वतिप्रसंगः स्यादेवेत्याशयेन तथैवोदाहरति कुरूनिति गोदोहमिति न चै
ह कालत्वासिद्धिः लोके कालत्वेन प्रसिद्धस्य मासादेरेव कालशब्देन ग्रहणात् तेन घटमास्ते इत्यादि न भवति जन्यमात्रं कालोपाधिरिति घटादेरपि कालत्वात् यत्तु प्राचा अकर्म
कधातुभिर्योगे देशकालाध्वभावेष्वाद्वितीयेति केचिदित्युक्त्वा नदीमास्त इत्युदाहृतं तन्न दसंगतम ग्रामसमूहः कुर्वादिरेव देशो गृह्यते न तु प्रदेशमात्रं तेन ग्रामं स्वपितीति न भवतीत्याक
रात् अध्वेति च न्यूनं अध्वानं स्वपितीत्यपि संगतात् अत एव आकरेऽध्वा गंतव्यत्वेन विशेषितः गंतव्यत्वेन प्रसिद्धो नियतपरिमाणः क्रोशादिरिति च व्याख्यातः द्वितीयेत्यस्य संगतं क

गतिबुद्धिप्रत्यवसानार्थशब्दकर्माऽकर्मकाणामणिकर्त्ता स णौ। १।४।५२। गत्याद्यर्थानां शब्दकर्मकाणामकर्मकाणाञ्चाणौ यः कर्त्ता स णौ कर्म
संज्ञस्यात्। शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत्। आशयच्चामृतं देवान्वेदमध्यापयद्विधिं॥ १॥ आसयत्सलिले पृथ्वीं यः स मे श्री हरिर्गतिः॥ २॥ ग
तीत्यादि किं। पाचयत्योदनं देवदत्तेन। अण्यन्तानां किं। गमयति देवदत्तो यज्ञदत्तं तमपरः प्रयुङ्क्ते गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः। नीवह्योर्न
नाययति। वाहयति वा भारं भृत्येन। नियन्तृकर्त्तृकस्य वहेरनिषेधः। वाहयति रथं वाहान् सूतः। आदिखाद्योर्न। आदयति खादयति वाऽन्नं बटुना।
भक्षेरहिंसार्थस्य न। भक्षयत्यन्नं बटुना। अहिंसार्थस्य किं। भक्षयति बलीवर्द्दान् सस्यं। जल्पतिप्रभृतीनामुपसंख्यानं। जल्पयति भाषयति पुत्रं
देवदत्तः। दृशेश्च। दर्शयति हरिं भक्तान्। सूत्रे ज्ञानसामान्यार्थानामेव ग्रहणं न तु तद्विशेषार्थानामित्यनेन ज्ञाप्यते। तेन स्मरति जिघ्रतीत्यादीनां
न। स्मारयति घ्रापयति देवदत्तेन। शब्दाययतेर्न। शब्दाययति देवदत्तेन। धात्वर्थसंगृहीतकर्मत्वेनाऽकर्मकत्वात्प्राप्तिः। येषां देशकालादिभिन्न
ङ्कर्म्म न सम्भवति तेऽत्राऽकर्म्मकाः। न त्वविवक्षितकर्म्माणोऽपि। तेन मासमासयति देवदत्तमित्यादौ कर्म्मत्वम्भवति। देवदत्तेन पाचयतीत्यादौ तु न

र्मसंज्ञाया अविहितत्वात्कर्मणि लादयो न स्युरित्यास्यते मास इत्यादिप्रयोगाभावप्रसंगात् केचिदित्युक्तिस्तन्मतदौर्बल्यसूचनायेति कथंचिद्व्याख्याय पूर्वोक्तपरिहारेपि नदीमास्ते
इत्युदाहरणे स्वासांगत्यदोषस्तदवस्थ एवेति ध्येयम्॥ ॥ गतिबुद्धिप्रत्यवसानं भक्षणं शब्दकर्मकाणामिति शब्दः कर्मकारकं येषां ते वा भिन्नपर्यायः कर्मशब्दोऽत्र कार
कपरः ननु कर्त्तरि कर्मव्यतिहारे इत्यत्रेव क्रियापरः कृत्रिमेकार्यसंप्रत्ययात् कर्मग्रहणसामर्थ्याच्च अन्यथा हि गतिबुद्धिप्रत्यवसानशब्दार्थाकर्मकाणामि ॥

CC-0. In Public Domain. Digitization by eGangotri



न्येव ब्रूयात्। अलोपः कर्त्रेति। अनुत्पन्ने णिचि शुद्धधातुवाच्यां क्रियां प्रति यः कर्ता स ण्यन्तधातुवाच्यां क्रियां प्रति कर्मसंज्ञः स्यादित्यर्थः। नियमार्थमेतत्सूत्रमिति प्राञ्चः। णिजर्थे
नाप्यमानस्य यदि भवति तर्हि गत्यर्थादीनामेव कर्तुरिति। तेन पाचयति देवदत्तो यज्ञदत्तेनेत्यत्र प्रयोज्ये कर्तरि प्रकृत्यर्थं प्रति कर्तृत्वस्यैव निरपवादत्वेनावस्थानात्तृतीया सिध्य
ति। उक्तं च। गुणक्रियायां स्वातन्त्र्यात्प्रेषणे कर्मतां गतः। नियमात्कर्मसंज्ञायाः स्वधर्मेणाभिधीयत इति। कर्तुः स्वधर्मेण तृतीययेत्यर्थः। ननु णिजर्थं प्रति कर्मत्वं बाधि
त्वा प्रकृत्यर्थं प्रति कर्तृत्वं परत्वादेव सिद्धं। अंतरंगत्वाच्च स्वकारकविशिष्टा हि क्रिया णिजर्थेन संबध्यते हेतुमति णिज्विधानात्। कर्तृप्रयोजकस्य हेतुत्वात्। अत एव
उपजीव्यापि कर्तृसंज्ञा। एवं च परत्वादंतरंगत्वादुपजीव्यत्वाच्च प्रयोज्यस्यानुकर्तृत्वं गत्यादेर्विधिनोचितानायद्यापि विधिपक्षेपि लभ्यं निर्बाधमेव तथापि नियमसूत्रमि
दमिति प्राचां ग्रंथाः विरुध्यंत इति चेत्। अत्राहुः। णिजर्थस्य प्राधान्यं पुरस्कृत्य प्रधानानुरोधिन्याः कर्मसंज्ञायाः प्राबल्यात् विप्रतिषेध एव नास्तीति परत्वात्कर्तृत्वसि
द्धिरित्येतन्न संगच्छते। अंतरंगत्वोपजीव्यत्वेऽपि प्रधानं प्रति निप्राबल्यं प्रयोजयतः। ततश्च नियमार्थत्वोक्तिः प्राचां निर्बाधैवेति। गत्यादिण्यंतानां क्रमेणोदाहरति।
शत्रूनिति। शत्रवः स्वर्गमगच्छन् तान् श्रीहरिः स्वर्गमगमयदिति। गमेरण्यंतावस्थायां शत्रवः कर्तारस्ते ण्यंतावस्थायां कर्म अभवन्। स्वर्गकर्मकं शत्रुनिष्ठं यद्गमनं तदनु
कूलोऽन्निष्ठो व्यापारः स श्रीहरिः मगतिरिति वाक्यार्थः एवमग्रेपि बोध्यं। वेदार्थमिति। स्वे स्वकीयाः वेदार्थमविदुस्तान् श्रीहरिर्वेदार्थमवेदयत्। तथा देवा अमृतं आश्नन्
तानाशयत्। विधिः वेदमध्येत तं ब्रह्मा तं वेदमध्यापयत् अपाठयत्। सलिले पृथ्वी आस्त। तां यो हरिरासयत् स्थापयति स्म स हरिर्मे गतिरित्यन्वयः। ननु शत्रूणां गमनेन
कर्मत्वे कृते कर्मण ईप्सिततमो स्वर्गो न तु कर्तुरिति कर्तुरीप्सिततमत्वाभावात् स्वर्गस्य कर्मत्वं न स्यात्। अत्र केचित्। गतिबुद्धीति कर्मत्वस्य बहिरंगत्वेन ततः पूर्वमेव धा 121
त्वर्थव्यापारप्रयुक्तं कर्मत्वं स्वर्गस्य निर्बाधमित्यदोष इति। अन्ये तु कर्तुरीप्सिततममित्यत्र कर्तृग्रहणं स्वतंत्रस्योपलक्षणं स्वातंत्र्यं च धातूपात्तव्यापाराश्रयत्वमेवा त
च्च प्रयोजकसंनिधानेपि प्रयोज्यस्यास्त्येवेति न काप्यनुपपत्तिः। न च स्वतंत्रसंकेतितस्य कर्तृपदस्य तंत्रे बलक्षणा न संगच्छते। एकस्यैकस्मिन्नेवार्थे शक्तिलक्ष १२२
णे भयाभ्युपगमस्य शास्त्रकारासंमतत्वादिति वाच्यं। संज्ञांतरानुपहितस्वतंत्रसंकेतितस्य संज्ञांतरोपहिताऽनुपहितसाधारणे स्वतंत्रे लक्षणाभ्युपगमे बाधकाभा
वात्। अत एव जिधातोर्जयेप्युक्तिः। प्रकृष्टजये लक्षणाप्युक्ता इत्येन रूपेण ज्ञाते भवति लक्षणेति। तेन प्रजयतीत्यत्र प्रशब्दो द्योतकः प्रकृष्टजयस्य जिधातोर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वअर्थइतिनैय्यायिकोक्तिः संगच्छते। नापिकर्तृपदस्यस्वतंत्रलक्षणायांप्रमाणाभावः। पूर्वोक्तः। प्रधानकर्मण्याख्येयेलादीनाहुर्द्विकर्मणां अप्रधानेदुहादी
नामित्युक्त्वा ण्यंतेकर्तुश्चकर्मणइतिवदतोभाष्यकारस्यैवप्रमाणत्वात्। नहिलक्षणांविनाणिजंतानांहिकर्मकर्तालभ्यतेयेन ण्यंतेकर्तुरितिवचनंसाव
काशंस्यात्। त्याहुः। नीवह्योरिति॥ यद्यप्यनयोः प्रापणमर्थोनगतिस्तथापिगतिरपिविशेषणीभूयप्रापणमध्येप्रविष्टेत्येतावन्मात्रेणप्राप्तिंमत्वाप्रतिषेधउक्तः।
नियंत्रिति। नियंतापशुप्रेरकः। ननुसारथिरेवेतितेनवाहयतिबलीवर्दान्सूयवानितिसिध्यति। अस्मादेवभाष्योदाहरणात् रूढिर्योगमपहरतीतिन्यायोत्रन।
स्वीक्रियते। अनिषेधइति। प्रयोज्यः कर्मेतिवक्तव्यमितिफलितोर्थः। येस्तुप्रापणंगतिशब्देनगृह्यते। येर्वानगृह्यतेउभयेषामपीदंवचनंआवश्यकं। नी
वह्योर्नेतिवचनंतुयैः प्रापणंगतिशब्देननगृह्यतेतेषामनावश्यकमितिबोध्यं। सूतइतिनियंताप्राजितायंतासूतः। क्षत्ताचसारथिरित्यमरः। प्रत्यवसानार्थत्वात्कर्मत्वे
प्राप्तेनिषेधमाह। आदिखाद्योरिति। अदभक्षणे। खादभक्षणे। प्राचातुआदीतिपठ्यतेतत्रण्यंतानुकरणमितिबोध्यं। आदयतीति। इहनिगरणचल
नार्थेभ्यश्चेतिपरस्मैपदनियमोनप्रवर्तते। अत्तेः प्रतिषेधइतिनस्यनिषिद्धत्वात्। तेनाकर्त्रभिप्रायेक्रियाफलेशेषात्कर्तरीतिपरस्मैपदं। कर्त्रभिप्रायेतु
णिचश्चेत्यात्मनेपदंभवत्येवेतिबोध्यं। भक्षेरिति। ननुगतिबुद्धीतिसूत्रेणाणौकर्तुर्णौ कर्मत्वंविधीयतेनतुणौकर्तुरितिप्राप्तेरेवाभावान्निषेधोयंव्यर्थइतिचे
त्। अत्राहुः। हेतुमतिणिजंतेविधिरितिनिषेधोप्यणावित्यसंन्निधानाद्धेतुमण्णिज्विषयएवतेनचुरादिणिजंतेपिभक्षयतोप्राप्तिमत्वान्निषेधउपसंख्यान
इति। भक्षयतीति। बलीवर्दाः सस्यंभक्षयंतितान्भक्षयतीत्यर्थः। क्षेत्रस्थानांयवानांभक्ष्यमाणानांहिंसान्वयात्तस्यामवस्थायांतेषांचेतनत्वात्। जल्पतिप्रभृतीनामिति।
जपजल्पव्यक्तायांवाचि। पुत्रोधर्मंजल्पतितंदेवदत्तोजल्पयतीत्यण्यंतावस्थायांपुत्रः कर्ता। ण्यंतावस्थायांकर्मअभवत्। तथापुत्रोधर्मंभाषतेतंभाषयतिदे
वदत्तः। नचजल्पतिभाषत्योः शब्दक्रियत्वेनगतिबुद्धीतिसूत्रेणैवसिद्धेरुपसंख्यानमिदंव्यर्थमितिभ्रमितव्यं। शब्दकर्मणामित्यस्यशब्दंकर्मकारकंयेषा
मित्यर्थात्। अन्यथावेदमध्यापयद्विधिमित्यादेरसिद्धिप्रसंगात्। एवंपुत्रोयत्किंचिद्विलपतितंविलापयतीत्याद्यप्यूह्यं। स्मारयतीति। आध्यानार्थकस्यैवस्मरतेर्घटादयोमितइ
तिमित्वंनचिंतार्थकस्येतिभावः। देवदत्तेनेति। स्मरयत्येनंवनगुल्मइत्यत्रतुलोरणावितिसूत्रेभाष्यप्रयोगादेवकर्मत्वंबोध्यं। शब्दाययतीति। शब्दंकरोतीत्यर्थेशब्दवैरेत्यादि

सु

सि॰ कौ॰

टी॰ त॰

१२३

नाकर्त्तृकं। ततो हेतुमण्णिच्। धात्वर्थसंगृहीतेति। एतेन प्रत्याययति सैनिकेरिपून्निति कर्म प्रयुंजानाः परास्ताः। न त्वविवक्षितकर्मणो लोपीति। यथाहुः कर्मणि चेति सूत्रे अ
विवक्षितकर्मणोऽप्यकर्मकाइति गृह्यते तेनेथैवेहापि यदि गृह्येरन् तदा ओदनादिकर्मणो विवक्षायां पाचयति देवदत्तमिति स्यान्न तु देवदत्तेन पाचयतीति। एवं गत्य
र्थाकर्मकेति सूत्रेप्यविवक्षितकर्मणोऽकर्मकाइति न गृह्यंते। दत्तवान् पक्ववान् नत्यर्थे दत्तः पक्वः इत्यापत्तेः। यत्तु प्राचा अयमर्थः शब्दायन्देवोनेत्युक्तं तदयुक्तं। अ
यतेर्निषेधस्य निर्मूलत्वेन अणौ कर्तुर्णौ कर्मत्वस्य तत्रेष्टत्वात्। किं च देवदत्तो सुशब्दक्रियत्वेपि शब्दः कर्मकारकं नेति प्राप्तेरेवाभावाच्चेति स्थितं मनोरमायां। यदपि श्रु
ग्रहहणमिति कर्मत्वमुक्तं तत्र दृशिग्रहणं प्रामाणिकमेव। शृणोतेः सुशब्दकर्मकत्वात्सिद्धं। ग्राहेर्द्विकर्मकत्वं यद्यप्यजिग्रहत्तं जनको धनुस्तदिति भट्टिप्रयोगस्य अयाचि
तारं नहि देवदेवमद्रिः सुतां ग्राहयितुं प्रशशाकेति कालिदासप्रयोगस्य चानुगुणं तथापि बहूनामसंमतमेव। अत एव तं धनुरजिग्रहत् बोधितवान्। सुतां ग्राहयितु
मुद्वाहयितुं बोधयितुमित्येवमुक्तप्रयोगं समर्थयां चक्रिरे। न च बुध्यर्थत्वं विनापि यथाश्रुतार्थ एव ग्राहेर्द्विकर्मकत्वमस्त्विति वाच्यं। तथाहि सति जाया प्रतिग्राहि
ता गंधमाल्यमित्यत्र क्तप्रत्ययेनाभिधानं प्रयोज्यकर्मीभूतधेनोः स्यात्। न तु गंधमाल्यकर्मणः। एयं ते कर्तृश्च कर्मणे इत्युक्तेः। जायाप्रेरिता हि धेनुर्गंधमाल्यं प्रतिगृ
ह्णातीति भवत्येव। धेनुः प्रयोज्यकर्म ततश्च जायया गंधमाल्यं प्रतिग्राहितामिति स्यात्। प्रत्ययानभिहितत्वेन गंधमाल्यकर्मणि द्वितीयायाः प्रवृत्तेः। सिद्धांते तु जा
यया प्रतिग्राहिते गंधमाल्ये ययेति विग्रहः। द्विकर्मकत्वाभावेन गंधमाल्यस्यैव क्तप्रत्ययेनाभिहितत्वात्। ययेति तृतीया तु णिजर्थप्रतिजायायाः कर्तृत्वेपि णिच्प्र
कृत्यर्थप्रतिग्रहं प्रति धेनोः कर्तृत्वादुपपद्यते। एवं चेह जायानिष्ठप्रेरणाविषयीभूतं गंधमाल्यकर्मकं यत्प्रतिग्रहणं तत्कर्त्रीमिति द्वन्यर्थः। यद्यपि धेनुकर्तृ
कं जायानिष्ठप्रेरणाविषयीभूतं यत्प्रतिग्रहणं तत्कर्मीभूतं गंधमाल्यमिति विग्रहार्थस्तथाप्यन्यपदार्थान्तर्भावेण विशेषणविशेष्यभाववैपरीत्येन एकार्थीभावः क १२३
ल्प्यत इति नास्य तत्रानुपपत्तिरिति दिक्॥

122

त्क्तो। हाचकाचह्कारोनयोरिति विग्रहः। हृः स्वकृ स्वत्कोरिति वा प्रथमां तेन परिनिष्ठितविभक्त्या वा विग्रह इति सिद्धांतात्। गतिबुद्धीत्यादी हनानुवर्त्तते। तेन उभयत्र
विभाषेयं। अभ्यवपूर्वस्य हरतेर्भक्षणार्थत्वात् विकारार्थस्य करोतेश्चाकर्मकत्वात्। गतिबुद्धीत्यादिना अप्राप्ते अणौ कर्तुर्णौ कर्मत्वे प्राप्ते अर्थान्तरे चानयोः सकर्मकत्वा
द्प्राप्ते अस्यारंभात्॥ अप्राप्तावेवाहरणमाह। हारयतीति। हरति करोति वा कटं भृत्य इत्यण्यंतावस्थायां भृत्यः कर्त्तासएवण्येतावस्थायां कर्माऽभूत्।
प्राप्ते तूदाहरणं तृणमभ्यवहारयति सैंधवान् तृणम् भ्यवहारयति सैंधवैर्विकारयति सैंधवं वा विकारयति सैंधवैरिति बोध्यं। ननु यदि गतिबुद्धीत्यादिरिहानु
वर्त्तेत तर्हि तद्वत्स्यात्। तत्रैवमानं न पश्याम इति चेन्मैवं। नवेति विभाषेति सूत्रे उभयत्र विभाषा सु भाष्यकृताऽस्यापि सूत्रस्य गणितत्वेनोक्तशंकाया अनव
हृक्रोरन्यतरस्यां। १।४।५३॥ हृक्रोरणौ यः कर्त्ता स णौ वा कर्म्मसंज्ञः स्यात्। हारयति कारयति वा भृत्यं भृत्येन वा कटं अभिवादिदृशोरात्मनेपदे वेति वा
च्यं। अभिवादयते। दर्शयते। देवं भक्तं भक्तेन वा। अधिशीङ्स्थासां कर्म्म। १।४।४६। अधिपूर्वाणामेषामाधारः कर्म्म स्यात्। अधिशेते। अधिति
ष्ठति। अध्यास्ते वा वैकुण्ठं हरिः॥ अभिनिविशश्च। १।४।४७। अभिनीत्येतत्संघातपूर्वस्य विशतेराधारः कर्म्म स्यात्। अभिनिविशते सन्मार्गं। परिक्र
यणे सम्प्रदानमिति सूत्रादिह मण्डूकप्लुत्याऽन्यतरस्यां ग्रहणमनुवर्त्य व्यवस्थितविभाषाश्रयणात् क्वचिन्न। पापेऽभिनिवेशः। उपान्वध्या
ङ्वसः। १।४।४८॥ उपादिपूर्वस्य वसतेराधारः कर्म्म स्यात्। उपवसति। अनुवसति। अधिवसति। आवसति वा वैकुण्ठं हरिः। अभुक्त्यर्थस्य न॥
तारात् अभिवादीति वदसंदेशवचने चुरादिराधृषीयः अभिपूर्वत्वान्नमस्कारार्थता अभिवादयतेः प्राप्तो दृशेस्तु प्राप्ताप्राप्तविकल्पः अभिवदति देवं भक्तः संप्रेरयन्नन्यः अभिवादयते। णिच
श्चेत्यात्मनेपदं परस्मैपदे तु अभिवादयति देवं भक्तेनेत्येव। तथा पश्यति देवं भक्तः दर्शयते देवं भक्त इत्यादि। अभिनि [illegible] स्याचतरत्वेन पूर्वनिपाते कर्त्तव्ये विप
रीतोच्चारणमीदृशसंघातविवक्षार्थमित्याह। संघातपूर्वस्येति। तेनेह न। निविशते यदि शूकशिखापद इति। क्वचिन्न। एवं चाभिनिविष्टानामिति समर्थसू
त्रस्थ भाष्यप्रयोगोऽत्र मानमिति भावः। उपान्वा। लुग्विकरणो दलुग्विकरणो वा ग्राह्य इति। वसनिवास इति भौवादिक एव गृह्यते न तु वस आच्छादन इत्यादादिक इति अ
भिप्रेत्य शपा निर्द्दिशमाह। उपादिपूर्वस्य वसतेरिति। वसेरभुक्त्यर्थस्य प्रतिषेध इति वार्तिकमर्थतो व्याचष्टे। अभुक्त्यर्थस्य नेति। वार्तिके अर्थशब्दो निवृत्तिवचनः। भोज

सु·
सि·कौ· वनेउपवसतीति। कथंतर्हि गत्यर्थाकर्मकेति सूत्रे हरिदिनमुपोषित इत्युदाहरणं संगच्छत इति चेदत्राहुः। वसेरत्र स्थितिरर्थः भोजननिवृत्तिस्त्वार्थिकीति न दोष
टी·त· इति। उपपदविभक्तिमाह। उभसर्वतसोरित्यादिना। उभसर्वयोस्तसौ उभसर्वतसौ तदंतयोर्योगे द्वितीया कार्येत्यर्थः। प्रकृतिद्वित्वेन तसोरिति द्वित्वनिर्देशः। अत्र उभ शब्दा
१२५ दयचू न कृतः। अनुकरणशब्दत्वेन असंख्यावाचित्वात्। तथा च उभशब्देन उभयशब्दो लभ्यते केवलात्परत्र तसिलोऽसंभवादित्येके। वस्तुतस्तु वृत्तिविषये अयच्प्रवृ
त्तावपि उभशब्दाद्द्विहितो यस्तसस्तदंतमस्त्येवेति यथाश्रुतं साधु इति तुमनोरमायां स्थितं। धिगिति। धिक्शब्दयोगेपि द्वितीया कार्येत्यर्थः। अत्र भाष्ये चः॥ धिगित्यविभक्ति
को निर्देशो गवि त्ययमाहेति वत् इत्याहुस्तन्न। तथा सत्यपदांतेनयादृष्टांते लोपः शाकल्यस्येव दार्ष्टांतिके जश्त्वस्याप्यप्रवृत्तिप्रसंगात्। न चायं गकारांत एवास्त्वि
ति शंक्यं। कस्य च द इति सूत्रे धकिदित्युदाहरणस्यासंगतिप्रसंगात्। कस्य च द इत्य—नेन हि कांताव्ययस्य अकच्संनियोगेन दत्वं विधीयते। तस्माद्धिगिति विभक्त्यंतमे

वनेउपवसति। उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु॥ द्वितीयाम्रेडितांतेषु ततोऽन्यत्रापि दृश्यते १ उभयतः कृष्णं गोपाः। सर्वतः कृष्णं। धिक्
कृष्णाऽभक्तं। उपर्युपरि लोकं हरिः। अध्यधिलोकं। अधोऽधोलोकं। अभितः परितः समया निकषा हा प्रतियोगेऽपि। अभितः कृष्णं। परितः कृष्णं। ग्रा
मं समया। निकषा। हा कृष्णाऽभक्तं। तस्य शोच्यत इत्यर्थः। बुभुक्षितं न प्रतिभाति किंचित्। अन्तराऽन्तरेण युक्ते। २।३।४॥ आभ्यां योगे द्वितीया स्यात्।
अन्तरा त्वां मां हरिः। अन्तरेण हरिं न सुखं॥ ॥ १९ व परं तु प्रकृतिवदनुकरणमित्यतिदेशेनाव्ययत्वात्सुपो लुक् यदि तु धिगित्यविभक्तिको निर्दे

श इत्येतावानेव प्राचां ग्रंथस्तदा सम्यगेव। अव्ययत्वात्सुपो लुकि अविभक्तिको निर्देश इति वक्तुं शक्यत्वात्। उभयतः कृष्णमिति। कृष्णस्य पार्श्वद्वयेपीत्यर्थः। आद्यादि 123
त्वात्तसिः षष्ठ्यर्थे द्वितीया। एवमुपपदविभक्तौ सर्वत्र बोध्यं। अत्र व्याचक्षते। उभसर्वतसोरित्यत्र उभसर्वयोर्गणपरस्परसाहचर्यात्तसिलेव गृह्यते नत्वाद्यादिभ्यस्तसि
स्तथा चोभयत इत्यादौ तसेश्श्रै त्यनेन तसिलादेशोऽवगंतव्यस्तेन यत्र संज्ञायां तसेस्तसिलादेशाभावस्तत्र न द्वितीया किं तु षष्ठ्येव तसिल भावस्तु तसेश्चेत्यत्र किंसर्वना १२५
मबहुभ्य इत्यनुवर्तनादिति। धिक् कृष्णाभक्तमिति। तस्य निंद्यत इत्यर्थः। षष्ठ्यर्थे द्वितीया। स निंद्य इत्यर्थः। प्रथमार्थे द्वितीयेत्येके। कथं धिक् मूर्खेति। संबोधनपदस्य
क्रियान्वय इति प्रागेवोक्ततया धिक्शब्दयोगाभावात् द्वितीया न प्रवर्तत इति संबोधने च तिप्रथमैव भवतीति। क्रियापदं च क्वचिच्छ्रुतं क्वचिदाक्षिप्तं तथा च धिक् मू

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वे निषिद्धाचरणमित्यत्र दिह कल्प्यं। मूर्खस्य संबोध्यक निषिद्धाचरणस्य निंद्यत इति तु वाक्यार्थः। प्रथमार्थे धिग्योगे द्वितीये निवादिनां तु मूर्खस्य संबोध्यकं निषिद्धाचरणं निंद्यमिति
वाक्यार्थः। यत्तु उपपदविभक्तेः कारकविभक्तिर्बलीयसीति संबोधने प्रथमैव भवति संबोधनपदस्य कर्तृकारकवाचित्वादित्याहुः। तच्चिंत्यं। संबोधनस्य कर्तृकारकत्वे उक्तिसंभ
वाभावात् तत्र देवप्रसीदेत्यादौ वस्तुगत्या देवएवं कर्तेत्यस्त्येव उक्तिसंभव इति वाच्यं। वास्तवकर्तृत्वेपि कारकविभक्तित्वस्य अलाभात्। किं च देवत्वां भजे त्वां भजतिमन्नारत्वा
दौ संबोध्यस्य देवस्य वास्तवमपि कर्तृत्वं नास्तीति आस्तां तावत्। उपर्युपरीति। कथं तर्हि उपर्युपरि बुद्धीनां चरंतीश्वरबुद्धय इति। अत्राहुः। उपरि बुद्धीनां उन्नानबुद्धीनां उप
रि चरंतीत्यर्थः। तेनाऽम्रेडितत्वाभावान्न द्वितीया। यद्वा प्रतिपदोक्तस्योपर्यध्यधसः सामीप्य इति कृतद्वित्वस्य वार्तिके ग्रहणादिह चवीप्सा द्विर्वचनत्वान्नास्ति द्वितीया
प्रसक्तिरिति। अभितः परित इति। एतच्चान्यत्रापि दृश्यत इति पूर्वोक्तस्यैव प्रपंचभूतमिति व्याचख्युः। अभितः कृष्णमिति। पर्यभिभ्यां चेति तसिल्। समयानिकषाशब्दौ
सामीप्यवचनावव्ययौ। विलंघ्य लंकां निकषा हनिष्यति इति माघः। हेति खेदे। तद्देतराहतस्य शोच्यते इति। बुभुक्षितं नमिति। बुभुक्षितस्यैत्यर्थः। एवं प्रतिशब्दः क्रियाविशेषक
त्वादुपसर्गः। न तु कर्मप्रवचनीयः। तेनात्र कर्मप्रवचनीययुक्ते इत्यनेन गतार्थता न। शंक्या। अंतरां अंतरेण। प्रतिपदोक्तत्वान्निपातयोरेव ग्रहणं न तु डावंततृतीयांतयोः पर
स्परसाहचर्याच्चात एव गुरुभार्गवाविन्युक्तौ ग्रहयोरेव प्रतीतिर्निर्नत्वाचार्यपरशुरामयोः। तेन किमनयोरंतरेण गतेनेति सिद्धं। किमनयोर्विशेषेण ज्ञानेनेत्यर्थः। अंतरांतं
मामिति। तव मम च मध्ये इत्यर्थः। हरिशब्दात्तु द्वितीया न भवति। अंतरंगतया प्रथमायाए वोत्पत्तेः। अंतरेण हरिमिति। हरिं विनेत्यर्थः। मध्ये इत्यर्थेप्यंतरेणशब्दो वर्तनाम्
णालसूत्रामलमंतरेण स्थितश्चलच्चामरयोर्द्वयं स इति। चलच्चामरयोर्द्वयस्य मध्ये इत्यर्थः। युक्तग्रहणान्नेह। अंतरात्वां मां कृष्णस्य मूर्तिः। इह कृष्णान्न द्वितीया। अंतरे
णशब्दप्रयोगेपि अंतरेत्यनेनानन्वयात्।

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· कर्मप्रवचनीया इत्यधिकृत्येति। ईश्वरान्मागिनिवोध्यं। गुरुसंज्ञाकरणं अन्वर्थत्वाय। कर्मक्रियां प्रोक्तवंतः कर्मप्रवचनीयाः। वाहुलकात् भूते कर्तर्यनीयरतेन संप्रतिक्रि

ती·न· यां न द्योतयंतीति लभ्यते। तथा च हरिः क्रियाया द्योतको नायं संबंधस्य न वाचकः। नापि क्रियापदाक्षेपी संबंधस्य तु भेदक इति। तथा हि। जपमनुप्रावर्षत् इत्यत्र

१२५ अनुना न क्रियाविशेषो द्योत्यते। अनुभूयते सुखमित्यादौ यथा। नापि षष्ठ्येव संबंध उच्यते द्वितीययैव तस्योक्तत्वात् नापि प्रादेशं विपरिलिखति विभाय परिलिखतीत्यत्र विशब्देन।

मानक्रियेव क्रियांतरमाक्षिप्यते। कारकविभक्तिप्रसंगात्। किंतु जपसंबंधि वर्षणमिति द्वितीययावगतः संबंधो लक्ष्यलक्षणभावरूपेति अवगमात्। संबंधस्य

वानुना विशेषेव स्थाप्यते। कचित्तु क्रियागत विशेषद्योतकेपि इयं संज्ञा वचनात् प्रवर्तते। सुः पूजायां। अतिरतिक्रमणे चेति यथा। उक्तसंज्ञ इति। कर्मप्रवचनीय

इत्यर्थः। गत्युपसर्गसंज्ञापवाद इति। ननु जपमनुप्रावर्षदित्यत्र वृष्टिं प्रत्यनोर्योगाभावेन क्रियायोगाभावात् तयोः संज्ञयोः प्राप्त्यभावात् कथं तदपवादत्वं अस्याः

कर्म्मप्रवचनीयाः।१।४।८३॥ इत्यधिकृत्य। अनुर्लक्षणे।१।४।८४॥ लक्षणे द्योत्येऽनुरुक्तसंज्ञस्स्यात्। गत्युपसर्गसंज्ञाऽपवादः। कर्म्मप्रवचनीय

युक्ते द्वितीया।२।३।८॥ एतेन योगे द्वितीया स्यात्। जपमनुप्रावर्षत्। हेतुभूतजपोपलक्षितं वर्षणमित्यर्थः। परापि हेतौ तृतीयाऽनेन बाध्यते। ल

क्षणेत्यम्भूतेत्यादिना सिद्धे पुनस्संज्ञाविधानसामर्थ्यात्। तृतीयार्थे।१।४।८५॥ अस्मिन्द्योत्येऽनुरुक्तसंज्ञस्स्यात्। नदीमन्ववसिता सेना। नद्या स

संज्ञाया इति चेत् अत्राहुः। गम्यमाननिष्पन्नक्रियामपेक्ष्य तयोः प्राप्तिरस्तीति संभावनामात्रेण मूलस्य निर्मितत्वात्। ((हसम्बद्धेत्यर्थः॥ पित्रवन्धने क्तः ॥

क्त हेतुत्वाख्यसंबंधविवक्षायां कर्मत्वाभावेन तृतीयायां प्राप्तायां तदारंभात्। न चैवमपि जपमनुनिशम्य देवः प्रावर्षत् इत्यर्थावगमात् ल्यब्लोपे पंचम्यपवादार्थे

वेयं संज्ञास्त्विति वाच्यं। ल्यब्लोपे हि कर्मणि अधिकरणे च पंचमी जपस्य तु कर्मत्वादिना विवक्षाभावादिति। परापि हेतौ तृतीयेत्यादि। अयं भावः। लक्षणे क

र्मप्रवचनीयसंज्ञाया अवकाशः यो न हेतुः वृक्षमनु विद्योतते विद्युदिति। हेतुतृतीयाया अवकाशो धनेन कुलमित्यादि। जपमनुप्रावर्षदित्यत्र तु हेतुभूते ल

क्षणे परत्वात् तृतीयास्यात्तां बाधित्वा अनुर्लक्षणे इति पुनः संज्ञाविधानसामर्थ्यात् द्वितीयैव भवतीति। न च तृतीयार्थे इति सूत्रेण हगतार्थता शंक्या तस्य पुरस्तादपवा

दन्यायेन सहयुक्तेऽप्रधान इत्येतावन्मात्रबाधकत्वात्। सामर्थ्यादिति। अत एव हेतुत्वपर्यंतमपि प्राक्वोधे विषय इति स्वीक्रियतेऽरिति भावः। नदीमन्वेति। द्वितीया

बाधत्वात् न चैव कर्मत्वाद्वैव द्वितीयासिद्धौ किमनया संज्ञयेति वाच्यं जपस्यनिश्र ६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हीने। उत्कृष्टादेव द्वितीया न त्वपकृष्टाच्छक्तिस्वभावादित्याशयेनोदाहरति। अनु हरिमिति। उपोऽधिके च। चकारेण हीने इत्यनुकृष्यते तदाह। अधिके हीने चेति। अधिके संज्ञाविधानं न द्वितीयार्थमित्याह। सप्तमी वक्ष्यत इति। यस्मादधिकमित्यनेनेति भावः। तस्मिन्नपि सूत्रे कर्मप्रवचनीययुक्त इत्यनुवृत्तेरधिके संज्ञाविधानमावश्यकमेवेति ज्ञेयं। उपहरिमिति। पूर्ववदुत्कृष्टादेव द्वितीया। लक्षणेत्थं। वृक्षं प्रतीति। वृक्षसंबंधिद्योतनसमर्थः। संबंधश्च लक्ष्यलक्षणभाव इति प्रत्यादयो द्योतयंति। भक्तो विष्णुं प्रतीति। विष्णोर्भक्तेश्च विषयविषयिभावः प्रत्यादिद्योत्यः। भक्तः कंचित्प्रकारं प्राप्त इत्यर्थः। लक्ष्मीर्हरिं प्रतीति। लक्ष्मीरूपस्य भागस्य हरिणा सह स्वस्वामिभावः। वृक्षं वृक्षमिति। इह वीप्सा द्विर्वचने

हीने। १।४।८६॥ हीने द्योत्येऽनुः प्राग्वत्। अनु हरिं सुराः। हरेर्हीना इत्यर्थः॥ उपोऽधिके च। १।४।८७॥ अधिके हीने च द्योत्ये उपेत्यव्ययं प्राक्संज्ञं स्यात्। अधिके सप्तमी वक्ष्यते। हीने उप हरिं सुराः॥ लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः। १।४।९०॥ एष्वर्थेषु विषयभूतेषु प्रत्यादय उक्तसंज्ञाः स्युः। लक्षणे। वृक्षं प्रति पर्यनु वा विद्योतते विद्युत्। इत्थंभूताख्याने। भक्तो विष्णुं प्रति पर्यनु वा। भागे। लक्ष्मीर्हरिं प्रति पर्यनु वा। हरेर्भाग इत्यर्थः। वीप्सायां। वृक्षं वृक्षं प्रति पर्यनु वा सिंचति। अत्रोपसर्गत्वाऽभावान्न षत्वम्। एषु किं। परिषिंचति॥ अभिरभागे। १।४।९१॥ भागवर्जे लक्षणादावभिरुक्तसंज्ञः स्यात्। हरिमभि वर्त्तते। भक्तो हरिमभि। देवं देवमभि सिंचति। अभागे किं। यदत्र ममाभिष्यात्तद्दीयतां॥ अधिपरी अनर्थकौ। १।४।९३॥ उक्तसंज्ञौ स्तः। कुतोऽध्यागच्छति। कुतः पर्यागच्छति। गतिसंज्ञाबाधाद्गतिर्गताविति निघातो न॥ सुः पूजायां। १।४।९४॥ सुसिक्तं। सुस्तुतं। अनुपसर्गत्वान्न षः॥ पूजायां किं। सुसिक्तं किं तवाऽत्र। क्षेपोऽयं॥

॥ १९ नैव द्योत्यते। प्रत्यादिशब्दस्तु क्रियया संबध्यते। कर्मण्येव द्वितीया कर्मप्रवचनीयसंज्ञया उपसर्गसंज्ञाया बाधात् षत्वं न। एतदर्थमेव लक्षणादयो विषयतयोपात्ता इति व्याख्यातमाकरे। पंचम्यपाङ्परिभिरिति तु न भवति। वर्जनार्थेनापेत्यनेन साहचर्यात्। परिषिंचतीति। सर्वतः सिंचतीत्यर्थः। उपसर्गात्सुनोतीति षत्वं। ममाभिष्यादिति। मम भागः स्यादित्यर्थः। प्रांचस्तु मामभिष्यादिति प्रत्युदाहरंति तत्र मां प्राप्नुयादित्यर्थः। उपसर्गवशेनास्तेः सकर्मकत्वान्मामिति द्वितीया अत्र च मम भाग इत्यर्थतः पर्यवसानादभागे इति कर्मप्रवचनीयत्वे निषिद्धे उपसर्गप्रादुर्भ्यामिति षत्वं। कुतोऽध्यागच्छतीति। इह भजयति पराभवति वृक्षं प्रति विद्योतत इत्यत्र प्रादेर्विशेषद्योतकत्ववदधिपर्योरिह विशेषद्योतकत्वाभावादानर्थक्यं धात्वर्थमात्रद्योतकत्वेन त्वर्थवत्त्वमस्त्येव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



॥ ९. अवयवावयवीभाव इति सर्पिरवयवी बिंदुरवयवः इयमेवेति बिंदुरौर्लभ्यप्रयुक्तदौर्लभ्यद्योतकत्वेनैवेत्यर्थः॥
गतिर्गतावित्यत्र वदा इत्यधिक्रियत इति परात्परत्वसंपत्तयेकृत इति युक्तं॥ ॥ अतिरतिक्रमणे चा चकारेण पूजायामित्यनुकृष्यत इत्याह। पूजायां चेति। अतिक्रमण
मुचितात् अधिकस्यानुष्ठानं। अर्थद्वयेप्येकमेवोदाहरति। अति देवान् कृष्ण इति। अन्ये तूदाहरंति। अतिसिक्तमतिस्तुतमिति बहुतरं सम्यग्वीनं वा सिक्तं स्तुतं चेत्यर्थः। बहुतरा
र्थ अतिक्रमणस्य मीचीनेपूजेति विवेकः। अपिः पदार्थो सर्पिषोपि स्यादिति। सर्पिर्बिंदुः स्यादित्यर्थः। अपेः कर्मप्रवचनीयत्वे फलमाह। अनुपसर्गत्वान्न षइति। अप्रसर्ग
संज्ञाभावादुपसर्गात्सुनोतीति त्वमिति न हनप्रवर्तत इति भावः संभावनायामिति। संभाव्यत इति संभावना। संभावनायामपि युद्धे भवनक्रिया संभावनायां भवनस्य विषय
त्वादाह। तस्या एवेति। संभावनाया एवेत्यर्थः। कर्तृदौर्लभ्येत्यादि। कर्तृदौर्लभ्याद्भवनक्रियाया दौर्लभ्यं तद्दौर्लभ्यं द्योतयन्नपिशब्दो भवनक्रियावाचिनास्यादित्यने

अतिरतिक्रमणे च। १।४।९५॥ अतिक्रमणे पूजायां चातिः कर्मप्रवचनीयसंज्ञः स्यात्। अति देवान् कृष्णः। अपिः पदार्थसम्भावनान्ववसर्गग
र्हासमुच्चयेषु। १।४।९६॥ एषु द्योत्येष्वपिरुक्तसंज्ञः स्यात्। सर्पिषोऽपि स्यात्। अनुपसर्गत्वान्न षः। सम्भावनायां लिङ्। तस्या एव विषयभूते भवने क
र्तृदौर्लभ्यप्रयुक्तं दौर्लभ्यं द्योतयन्नपिशब्दः स्यादित्यनेन सम्बध्यते। सर्पिष इति षष्ठी तु अपिशब्दबलेन गम्यमानस्य बिन्दोरवयवावयविभावसम्बन्धे
इयमेव ह्यपिशब्दस्य पदार्थद्योतकता नाम। द्वितीया तु न ह प्रवर्तते। सर्पिषो बिन्दुना योगो न त्वपिनेत्युक्तत्वात्। अपि स्तुयाद्धरिम्। सम्भावनं शक्यु
त्कर्षमाविष्कर्तुमत्युक्तिः। अपि स्तुहि। अन्ववसर्गः कामचारानुज्ञा। धिग्देवदत्तमपि स्तुयाद्वृषलं। गर्हा। अपि सिञ्च अपि स्तुहि समुच्चये॥ ॥
न संबध्यत इत्यर्थः। द्वितीयेति। कर्मप्रवचनीययुक्ते इत्यनेन न विहिता। न त्वपिनेति। न च बिंदुना योगे तद्द्योतकापिशब्देनापि योगो जात एवार्थद्वारा शब्दानां योगस्याभ्युपगमा
दिति वाच्यं। अपिशब्दस्य बिंदुद्योतकत्वाभावात्। कथं तर्हि बिंदुप्रतीतिरिति चेत्। शृणु। अपिना द्योत्यं भवनदौर्लभ्यमेव कर्तृदौर्लभ्यमाक्षिपति कर्ता चेह बिंदुरेवेति स
प्रतीयते। अत एवापिशब्दबलेन गम्यमानस्येत्युक्तं न त्वपिना गम्यमानस्येति। उक्तत्वादिति। उक्तप्रायत्वादित्यर्थः। अपिशब्दः स्यादित्यनेन संबध्यत इत्युक्तत्वादि
त्यस्यापि नायोगो न तु सर्पिष इत्यस्येत्यर्थपर्यवसानात्। अपि स्तुयादिति। अवाङ्मनसगोचरं विष्णुमपि स्तुयादिति अधिकोक्तिः। एतादृशस्यान्यदीयस्तवने सामर्थ्यमस्तीत्यत्र किं वक्तव्यमिति भावः। इह संभावनाद्योतकोपिशब्दः पूर्वत्र तु संभावनाविषयदौर्लभ्यद्योतक इति महान्भेदः। उपसर्गात्सुनोतीत्यादिना षत्वं न भवति

125

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कर्मप्रवचनीयसंज्ञया उपसर्गसंज्ञाया बाधात्। एवमुत्तरत्रापि बोध्यं। अपि सिंच अपि स्तुहि इति। सिंच स्तुहि चेत्यर्थः॥ ॥ कालाध्वनोः। अंतं विराममतिक्रांतोऽत्यंतः स चासौ सं
योगश्चात्यंतसंयोगः निरंतरसन्निकर्ष इत्यर्थः। केनेत्याकांक्षायां गुणक्रियाद्रव्यैरित्यौचित्यात् बोध्यं। द्वितीया स्यादिति। अनत्वात् कालाध्वशब्दाभ्यामेव स्वरूपग्रहणं त्वि
ह न भवति। कालाः अत्यंतसंयोगे चेति समासविधायके कालाः इति बहुवचननिर्देशेन द्वितीयाविधौ स्वरूपविधिर्नेति ज्ञापनात्। अत एव मासप्रमितः मुहूर्त्तसुखमिति
द्वितीयासमासविधावुदाहरिष्यति। मासं कल्याणीत्यादि। अकर्मकधातुभिर्योग एव देशकालादीनां कर्मसंज्ञाविधानात्। नेह कर्मणि द्वितीयेति द्वितीयाप्राप्तौ नीति भा

कालाध्वनोरत्यन्तसंयोगे। २।३।५॥ इह द्वितीया स्यात्। मासङ्कल्याणी। मासमधीते। मासं गुडधानाः। क्रोशं कुटिला नदी। क्रोशमधीते। क्रोशं गिरिः।
अत्यन्तसंयोगे किं। मासस्य द्विरधीते। क्रोशस्यैकदेशे पर्वतः॥ स्वतन्त्रः कर्त्ता। १।४।५४॥ क्रियायां स्वातंत्र्येण विवक्षितोऽर्थः कर्त्ता स्यात्। साधकतमङ्कर
णं। १।४।४२॥ क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्। तमप्ग्रहणं किं। गङ्गायां घोषः। कर्तृकरणयोस्तृतीया। २।३।१८॥ अनभिहिते कर्त्तरि कर
णे च तृतीया स्यात्। रामेण बाणेन हतो वाली। प्रकृत्यादिभ्य उपसंख्यानं॥ प्रकृत्या चारुः। प्रायेण याज्ञिकः। गोत्रेण गार्ग्यः। समेनैति विषमेणैति। द्विद्रोणे
न धान्यं क्रीणाति। सुखेन दुःखेन वा यातीत्यादि। दिवः कर्म्म च। १।४।४३॥ दिवः साधकतमं कर्म्मसंज्ञं स्यात् चात् करणसंज्ञं। अक्षैरक्षान्वा दीव्यति॥ अपव
र्गे तृतीया। २।३।६॥ अपवर्गः फलप्राप्तिस्तस्यां द्योत्यायाङ्कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात्। अह्ना क्रोशेन वाऽनुवाकोऽधीतः। फलप्राप्तिः किं।
॥ मासमधीतो नायातः॥

वः मासस्य द्विरिति। कृत्वोर्थप्रयोगे कालेऽधिकरणे इत्यनेन षष्ठीति भावः। तत्र शेषग्रहणानुवृत्त्या द्विरह्नो भोजनमिति कृदंतेन सह समासः
न्नेरेव फलत्वात्। तस्मादिह षष्ठी शेष इति सूत्रेणैव षष्ठी भवत्यंतरंगत्वादित्याहुः। अन्यार्थे मार्थस्यापि कृत्वोर्थप्रयोग इति सूत्रस्य द्विरह्नो भुंक्त इत्यत्र विशेषविहि
तत्वात्प्रवृत्तौ बाधकं नास्तीति केचित्। इति द्वितीया॥ ० ॥ स्वतंत्रः कर्त्ता। प्रधानीभूतधात्वर्थाश्रयत्वं स्वातंत्र्यं। आह च। धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्य
त इति। स्थाल्यादीनां वस्तुतः स्वातंत्र्याभावेपि स्थाली पचति काष्ठानि पचंतीत्यादिप्रयोगोपि साधुरेवेति ध्वनयति। विवक्षितोर्थ इति। साधकतमं करणं। प्रकृष्टेति। य
द्व्यापारानंतरं फलनिष्पत्तिस्तत्प्रकृष्टं। उक्तं च। क्रियायाः फलनिष्पत्तिर्यद्व्यापारादनंतरं। विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतं। विवक्ष्यत इत्यनेन स्थाल्यादीनां

CC-0. In Public Domain. Digitization by eGangotri



मपि करणत्वमस्तीति सूचितं। आहुश्चावस्तुतस्तदनिर्देश्यं न हि वस्तुव्यवस्थिता स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यत इति। अयंभावः। कारकत्वे तद्व्याप्यकर्तृ
त्वादिषट्कं च वस्तुविशेषे विशेषणं विप्रोव्यभाववन्नियतं। किंतु वैवक्षिकं नहि गौः सर्वं प्रति गौरेव न तु कंचित्प्रत्यगौरिति वाहिर्विशेषणं सर्वं प्रति विशेषणमेवेति व
क्तुं शक्यं। तथा च कया धातुव्यक्त्या उपस्थापितेऽर्थे किं कर्त्रादिकमिति प्रश्ने सति तद्धातुव्यक्त्युपात्तव्यापाराश्रयतया विवक्षितः कर्ता व्यापारव्यधिकरणफलाश्र
यः कर्म। कर्तृकर्मद्वारकसंबंधेन व्यापारस्य फलस्य वा आश्रयोधिकरणमिति स्थितं। पचधर्यो व्यापारश्चानेकधा। एवं च पचेरधिश्रयणतंडुलावयवचलनाधःकर्षण
दितात्पर्यकत्वेन तदाश्रयो देवदत्तः कर्ता। ज्वलनतात्पर्यकत्वेनैधाः कर्तारः। तडुलधारणादिपरत्वे स्थाली कर्त्री। अवयवविभागादिपरत्वे तंडुलाः कर्तारः। स्थाल्या पच
तीत्यत्र तृतीयोपात्तव्यापाराश्रयोपि स्थाली करणमेव न तु कर्त्री देवदत्तादिव्यापारस्यैव तत्र शब्दोपात्तत्वात्। तथा आदिखादिभ्यामुपात्तेर्थे प्रयोज्यः कर्ता तस्मिन्
एवार्थे भक्षयतिनोपात्ते प्रयोज्यः कर्म। अधिपूर्वैः शीङादिभिरुपात्तेर्थे आधारः कर्म। केवलैरुपात्ते अधिकरणमित्यादि ज्ञेयं। एतेन ज्ञानस्य सकर्मकत्वे कर्तृकर्म
विरोध इति केषांचिदुक्तिः परास्ता। यद्धातूपात्तक्रियायां यदाश्रयत्वं विवक्ष्यते तेन तदा न तत्क्रियायां सकर्ता यदुपात्तया कर्तुः क्रियया यदा आप्तुमिष्टतमत्वेन यद्विवक्ष्यते तेन
दा न तत्कारकं तत्क्रियायां कर्मेत्येवं शब्दविशेषोपाधिकस्य कर्तृत्वादेः प्रत्यक्षे उक्तिसंभवाभावात्। यत्तु केचित्परसमवेतक्रियाजन्यफलशालित्वं कर्मत्वं चेत्तर्हि स्वात्मानं पतती
त्यादौ स्वसमवेतक्रियाजन्यविभागादिफलशालिनि कर्तर्यतिव्याप्त्यभावेप्यपादानेऽतिव्याप्तिः स्यादेव तत्तद्धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमित्यवाभ्यु
पगंतव्यं। एवं च सति ग्रामं गच्छतीत्यादि सकर्मके गमनजन्यसंयोगादाविष्टानुरोधेन धात्वर्थतावच्छेदकत्वमभ्युपगतमपि वृक्षात्पर्णं पततीत्याद्यकर्मके पतनादिजन्य
विभागादौ तदवच्छेदकत्वाकल्पनान्नापादानेतिव्याप्तिर्नवा ग्रामं गच्छतीत्यादौ कर्तर्यतिव्याप्तिः संयोगादिफलजनकीभूतधात्वर्थस्य परसमवेतत्वविशेषणात्कर्मत्वे
नाभिमतं यत्तद्भिन्नस्य परशब्देनात्र विवक्षितत्वादित्याहुस्तदप्येतेन प्रत्युक्तं। ग्रामं गमयति देवदत्तमित्यादौ गंतर्यव्याप्तेः। णिजर्थप्रेरणजन्यप्रयोज्यव्यापारे गम
नादौ धात्वर्थतावच्छेदकत्वाभावात्। तदभ्युपगमे तु देवदत्तेन पाचयतीत्यादौ प्रयोज्यकर्तर्यतिव्याप्तेः। गतिबुद्धीत्यादिशास्त्राभ्युपगमं विना क्वचित् प्रयोज्यक
र्तरि कर्मत्वं क्वचित्तु कर्तृत्वमिति निर्द्धारयितुमशक्यत्वात्। हृक्रोरन्यतरस्यामिति शास्त्रमंतरेण हारयति कारयति वा कटं भृत्येन भृत्यमित्यत्र वैकल्पिककर्मत्वस्य दुरु



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतादृशेषु वैयाकरणोक्तेष्वेव निर्वाह इति चेन्न तर्हि आकडारादेका संज्ञा या परानवकाशा चेत्युक्तत्वान्निरवकाशया अपादानसंज्ञया सावकाशायाः कर्मसंज्ञाया बाधा
न्नोक्तातिव्याप्तिरिति किमनेन धात्वर्थतावच्छेदकेत्यादिपरिश्रमेण। स्यादेतत्। आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मनेत्यादिप्रयोगः कथं संगच्छते एकस्यैव वस्तुना
युगपदेकक्रियानिरूपितकर्तृत्वकर्मत्वादेरसंभवात् परया कर्तृसंज्ञया कर्मकरणादिसंज्ञाया बाधान्नैष दोषः। अहंकाराद्युपाधिभेदेनात्मनोपि भेदमाश्रित्यात्मा
नमात्मा हन्तीत्यादिप्रयोगस्याकरे समर्थितत्वात्। ननु साधकं करणमित्येवास्तु कारकाधिकारसद्दिह कारकमिति वर्तते साधकं कारकं हि पर्यायस्तथा चोभयोपादा
नेन प्रकर्षो लभ्यत इत्याशयेन पृच्छति। तमप्ग्रहणं किमिति। इतरथा तु कारकप्रकरणे गौणमुख्यन्याय एतत्सूत्रादन्यत्र न प्रवर्तेत इति ज्ञापनाय तमप्ग्रहणमि।
त्याशयेन ज्ञापनफलमुदाहरति। गंगायां घोष इति। उक्तज्ञापनानंगीकारे त्विहाधिकरणसंज्ञा न स्यात्। तिलेषु तैलं दधिनि सर्पिरित्यादौ मुख्याधारे तस्याश्च रि
तार्थत्वादिति भावः। अत्र व्याचख्युः यदा च तीरधर्म आधारत्वं सामीप्यात् प्रवाहे उपचर्यते तदेदं प्रयोजनं यदा तु गंगाशब्द एव तीरे वर्तते तदा तु न प्रयोजनं ती
रस्य मुख्याधारत्वात् तत्राद्यपक्षे विभक्तिर्लाक्षणिकी द्वितीये तु प्रकृतिर्लाक्षणिकीत्यादि रामेणेति। यद्यपि विभक्त्युपस्थितानां कारकाणां क्रियां प्रति विशेषणत्वे
व तथापि कृदुपस्थितानां विशेष्यत्वेव। सत्वप्रधानानि नामानीत्युक्तेः। धातूपस्थाप्ययोः फलव्यापारयोर्हन्यत इत्यादि कर्माख्यातसमभिव्याहारे विशेषणविशेष्य
भावव्यत्यासाभावेपि हत इत्यादि कर्मकृत्समभिव्याहारे व्यत्यासोस्त्येव। तथा च रामनिष्ठो यो व्यापारो धनुराकर्षणादिस्तद्विषयीभूतो यो बाणव्यापारः शरीरभेदा
नादिस्तज्जन्यप्राणवियोगाश्रयो वालीति वाक्यार्थः। वालिनं हन्ति वाली हन्यत इत्यादौ तु वालिनिष्ठः प्राणवियोगानुकूलो यः शरीरभेदनादिर्बाणव्यापारस्तद्वि
षयको रामनिष्ठधनुराकर्षणादिव्यापारस्तज्जन्यो बोध्यः। अत्रेदमवधेयं। फलव्यापारयोर्धातुराश्रये तु तिङः स्मृतः। फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणं। इह।
धातुः स्मृत इत्यन्वयः। वाचकत्वेनेति शेषः। आश्रये तु तिङ इति विभक्तिविपरिणामेन स्मृता इति संबध्यते। वाचकत्वेनेति पूर्ववत्। तिङ इत्युपलक्षणं द्वितीया
तृतीयादीनामपि आश्रयमात्रार्थकत्वात्। नन्वेवमाधारार्थकत्वे द्वितीयातृतीयासप्तमीनां साङ्कर्यं स्यात्। मैवं। निरूपकभेदेनाधारभेदात्। फलनिरूपितआ।
धारभेदो द्वितीयार्थः। व्यापारनिरूपितस्तु तृतीयार्थः। स्वाश्रयद्वारा व्यापारनिरूपितः फलनिरूपितश्च सप्तम्यर्थ इति त्वभ्युपगम्यते। फले प्रधानमिति। एतच्चापि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कर्मकृत्समभिव्याहारे तु व्यत्यासोऽस्त्येवेत्युक्तत्वात्। हरिं भजति देवदत्त इत्यादौ तु व्यापारस्य प्राधान्यमस्त्येव। प्रकृतिप्रत्ययार्थयोर्हर्याधारयोर्देवदत्तनिष्ठव्या
धारयोश्चाभेद इह संसर्गः। तथा च हर्याधारिकाया प्रीतिस्तदनुकूल एकदेवदत्ताधारको वर्तमानो यो व्यापार इति वाक्यार्थः। न चाधारत्वेन वाच्येति मंतव्यं।
तन्निष्ठधर्मत्वस्याधारत्वस्य वाच्यतावच्छेदकत्वापत्त्या गौरवात्। कर्मणि द्वितीयेत्यादिसूत्रस्वरभंगापत्तेश्च। अत एव भाष्यकारोप्याह। सुपां कर्मादयो
प्यर्थाः संख्या चैव तथा तिङामिति। अनभिहिते किं। हरिः करोति। पाचकः। कर्तरि ण्वुल् ण्शाहिकः। शब्दर्दुरं करोतीति ठक्। कृतं विश्वं येन कृतविश्वः॥
विश्वकर्मकृत्याश्रय इत्यर्थः। जीवंत्यनेन जीवनः करणे ल्युट्। प्रकृत्यादिभ्य इति। आकृतिगणोयं। तेन वाम्नासुतीक्ष्णश्चरितेन दांत इत्यादि सिद्धं। चारु
रिति। अभिरूप इत्यर्थः। क्रियाया अश्रवणात्। कर्तृकरणयोरभावात् षष्ठी ह प्राप्ता। एतच्च गम्यमानकरोतिक्रियाकरणत्वात्सिद्धं। करणत्वं तस्य दासायहि प्र
कृते रेवं करणत्वं विवक्षितं। स्वभावेनायमभिरूपः कृतो न त्वलंकारादिनेत्यर्थात्॥ प्रायेण याज्ञिक इति। एतदपि गम्यमानज्ञानक्रियां प्रतिकरणत्वा
त्सिद्धं। आधारादिवाहुल्येन याज्ञिकोयमिति जनैर्ज्ञायत इत्यर्थात्। गोत्रेण गार्ग्य इति। गार्ग्योऽस्य गोत्रमित्यर्थः। प्रथमात्र प्राप्ता गोत्रेणाहं ज्ञाय इत्यर्था
त् इहापि तृतीया सिद्धा। समेनेत्यादि। सममेतीत्याद्यर्थे सम विषमाभ्यां कर्मणि द्वितीया प्राप्ता। इहापि तृतीया सिद्धा। पथोपि गमने करणत्वाभ्युपगमान्नहि
द्रोणेनेति। द्वयो द्रोणयोः समाहारो द्विद्रोणं। पात्रादित्वान्न स्त्रीत्वाभावः। द्रोणद्वयसंबंधि धान्यमित्यर्थः। इह षष्ठी प्राप्ता। द्विद्रोणपरिमितधान्यार्थं मूल्यं हि द्विद्रो
णशब्दस्य च क्रयं प्रति करणत्वमितीहापि तृतीया सिद्धेति दिक्। वा दिति। करणशब्दानुवृत्त्या परिक्रयणे संप्रदानमन्यतरस्यामित्युत्तरसूत्रस्थान्यतरस्यां
ग्रहणापकर्षणेन वा संज्ञयोः पर्यायत्वे लब्धे च ग्रहणं समुच्चयार्थं। तेन मनसा दीव्यतीति मनसादेव इत्यत्र कर्मण्यण् करणे तृतीया चोभयं युगपत्सिध्यति।
मनसः संज्ञायामित्यलुक्। किंच। अक्षैर्देवयते देवदत्तो यज्ञदत्तेनेत्यत्र सकर्मकत्वात् अणिकर्तुर्णौ गतिबुद्धीत्यनेन कर्मत्वं न। अणिचकर्म कादिति परस्मै
पदमपि न भवति। ननु कर्मकरणसंज्ञासमावेशोस्य मनसादेव इत्यत्र कृतार्थत्वात् दिवान्दीव्यतीत्यत्र परत्वात्तृतीयैवस्यान्नतु द्वितीयेति चेदत्राहुः। कार्यकाल
पक्षे कर्मणि द्वितीयेत्यत्र परस्योपस्थानं तस्यानवकाशत्वान्न द्वितीयेति। स्यादेतत्। दीव्यंते अक्षा इत्यत्राभिहितेपि कर्मणि करणत्वस्यानभिधानात्तृतीया स्यात्

127

CC-0. In Public Domain. Digitization by eGangotri

तथादेवनाअक्षाद्रत्यत्र सुटाकारणत्वस्याभिधानेपि कर्मत्वानभिधानान्नद्वितीयास्यात्॥मेवं॥ एकैवत्वत्र शक्तिः संज्ञाद्वययोगिना तथाचैकस्यांशक्तावुभिहिता या
मन्यस्या अप्यभिधानादुभयत्राप्यभिधानमेव नत्वनभिहितत्वं॥ ॐ ॥सहयुक्तेति। सहेनाप्रधानइत्यववाच्येयुक्तग्रहणादर्थग्रहणमित्याह। सहार्थेनेति। स
हार्थकशब्देनसहसाकंसार्धमित्यादिनेत्यर्थः। पुत्रेणेति। पितुरेवागमनक्रियासंबंधः शब्दः पुत्रस्यत्वार्थइत्येनावगतेव तस्याप्राधान्यमुच्यते। अप्रधानग्रहणंन्य
कुंशक्यं। नचैवंपितुरपितृतीयापत्तिः तत्र प्रातिपदिकार्थमात्रे अंतरंगत्वात्प्रथमोपपत्तेः। नचयत्रप्रथमानप्राप्नोतिपुत्रेणसहपितुरागमनमित्यादौतत्रप्रधाना

सहयुक्तेऽप्रधाने।२।३।१९। तृतीयास्यात्। पुत्रेणसहागतः पिता। एवंसाकंसार्द्धंसमंयोगेऽपि। विनाऽपितद्योगात्तृतीया। वृद्धोयूनेत्यादिनिर्देशनात्त
येनाङ्गविकारः।२।३।२०। येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततस्तृतीयास्यात्। अक्ष्णा काणः। अक्षिसम्बन्धिकाणत्वविशिष्ट इत्यर्थः। अ
ङ्गविकारः किं। अक्षि काणमस्य। इत्थम्भूतलक्षणे।२।३।२१। कञ्चित्प्रकारं प्राप्तस्य लक्षणे तृतीयास्यात्। जटाभिस्तापसः। जटाज्ञाप्यतापस
त्वविशिष्ट इत्यर्थः। संज्ञोऽन्यतरस्यां कर्मणि।२।३।२२। सम्पूर्वस्य जानातेः कर्मणि तृतीया वा स्यात्। पित्रा पितरं वा संजानीते। हेतौ।२।३।२३
हेत्वर्थे तृतीयास्यात्। द्रव्यादिसाधारणं निर्व्यापारसाधारणं च हेतुत्वं। करणत्वं तु क्रियामात्रविषयं व्यापारनियतं च। दण्डेन घटः। पुण्येन दृष्टो हरिः
फलमपीह हेतुः अध्ययनेन वसति। गम्यमानाऽपि क्रिया विभक्तौ प्रयोजिका॥ अलं श्रमेण। श्रमेण साध्यं नास्तीत्यर्थः। इह साधनक्रियां प्रति श्रमः
करणम्। शतेन शतेन वत्सान्पाययति पयः। शतेन परिच्छिद्येत्यर्थः। अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया। दास्या संयच्छते कामुकः। धर्म्ये
तु भार्यायै संयच्छति।

२२ नपितुरपितृतीयास्यात्अनलह्व

रणाय अप्रधानग्रहणमावश्यकमिति वाच्यं। कारकविभक्तेर्बलीयस्त्वात्तु कर्तृकर्मणोः कृतीति षष्ठ्या एव तत्र प्रवृत्तेरिति दिक्। येनांग। येनेति सर्वनाम्ना प्रकृत्यर्थभूतो
वयव एव गृह्यते संनिधानात्। स चार्थाद्विकृत एव। न त्वविकृतेनावयवेन शरीरस्य विकारः संभवतीति इत्याह॥ येनांगेन विकृतेनेति। अंगिन इति। सूत्रे अंगशब्दोऽत्रआ
द्यजंत इति भावः। जटानामित्थंभूतलक्षणत्वमुपपादयति। जटाज्ञाप्येति। जटाभिर्ज्ञाप्यं यत्तापसत्वं तद्विशिष्ट इत्यर्थः। संज्ञो। ज्ञा अवबोधने इत्ययमेव गृह्यते न तु जनी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु·

सि·कौ प्रादुर्भाव इति तस्याकर्मकत्वात्। ङसः आम्भाग स्य इत्यस्य लोपेन इत्यलोपेन निष्पन्नतया लाक्षणिकत्वाच्चेत्याशयेनाह। जानातेरिति। संजानीत इति। संप्रतिभ्यामनाध्याने इ

टी·त· ति तङ्। कृद्योगे परत्वात् कर्तृकर्मणोरिति षष्ठ्येव पितुः संजाना। आध्याने तु पित्रा पितरं वा संजानाति। हरस्मरत्वाह। आध्याने परत्वादधीगर्थेति षष्ठी। मातुः संजानातीति। लन्न

१२९ नत्र शेषाधिकारात् द्वितीया मनोरमायां स्थितं। हेतौ। हेतुरिह लौकिकः फलसाधनीभूतो गृह्यते। न तु तत्प्रयोजको हेतुश्चेति कृत्रिमः। तस्य च कारणे कर्तृसंज्ञाविधानात् कर्तृ

त्वादेव तृतीयासिद्धेरत आह। हेत्वर्थ इत्यादि। ननु लौकिकहेतोरपि करणत्वादेव तृतीयासिद्धेः किमनेनेत्याशङ्क्य हेतुत्वकरणत्वयोर्भेदमाह। द्रव्यादीति। आदिशब्देन गु

णक्रिययोर्ग्रहः। द्रव्यगुणक्रियानिरूपितं निर्व्यापारसव्यापारवृत्ति च यत्तद्धेतुत्वमित्यर्थः। करणत्वं त्विति। क्रियामात्रनिरूपितं व्यापारवद्वृत्ति च यत्तत्करणत्वमित्यर्थः। एवं च

हेतुकरणयोर्भेदादन्यतरेणान्यस्यान्यथासिद्धिर्न शङ्क्येति भावः। उक्तं च। द्रव्यादिविषयो हेतुः कारकं नियतक्रियं। अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यत इति। द्रव्यविषये हेतु

त्वमुदाहरति। दण्डेन घट इति। दण्डहेतुको घट इत्यर्थः। अत्र हि व्यापारोऽस्तु वा मास्तु साक्षात्क्रियान्वयित्वाभावात् करणत्वं नास्तीति भावः। क्रियाविषये उदाहरणमाह।

पुण्येन दृष्ट इति। पुण्यशब्देनेह परमापूर्वमुच्यते। तस्य च हरिदर्शनरूपक्रियान्वयित्वसंभवेऽपि व्यापारवत्ताभावान्न करणत्वमिति भावः। यदा यागादिकमेव पुण्य

शब्देन विवक्ष्यते तदा तस्य व्यापारवत्त्वमस्त्येवेति कर्तृकरणयोरित्यनेनैव तृतीयासिद्धा। गुणविषये तु पृथक्त्वेन गोरवर्ण इत्याद्युदाहार्यं। जनाभिलापस इत्यादौ तु लक्ष्य

लक्षणभावविवक्षायां हेतुत्वाविवक्षणादनेनाप्राप्ता तृतीयेत्थंभूतलक्षण इत्यारब्धमित्याहुः। अत्र केचिदुत्प्रेक्षन्ते। द्रव्यादिसाधारणत्वाद्धेतुत्वस्य हेता

वित्यनेनैव बाणेन हत इत्यादिप्रयोगसिद्धेः कर्तृकरणयोरिति सूत्रे करणग्रहणं त्यक्तुं शक्यं। करणसंज्ञा तु आवश्यकी करणाधिकरणयोश्चेत्याद्यर्थमिति। अ

न्ये तु। क्रियासाधकतमं यत्र व्यापारवत्त्वेन विवक्षितं चेत्करणं नो चेद्धेतुः। द्रव्यसाधकतमस्य दण्डादेस्तु व्यापारवत्त्वेऽपि हेतुत्वमेव। एवं च रामेण बाणेन हत इत्यादौ

हनने बाणादिर्निमित्तमित्येतावदेव यदा विवक्ष्यते तदा हेतावित्यनेनैव तृतीया। बाणव्यापारसाध्यप्राणवियोगाश्रय इत्येवं व्यापाराविष्टत्वेन विवक्षायां तु हेतु

त्वाविवक्षणात् कर्तृकरणयोरिति करणे तृतीया आरब्धेत्याहुः। फलमपीति। एतच्च प्रत्यय इति सूत्रे कैयटे स्पष्टं। अध्ययनेनेति। तादर्थ्यविवक्षायां तु चतुर्थ्यपि

भवतीति चतुर्थ्या सहेयं तृतीया विकल्प्यते। अध्ययनाय वसति। अत्र केचित् परिष्कुर्वन्ति। अध्ययनेन वसतीत्यत्र दण्डहेतुको घट इतिवदध्ययनहेतुको निवास 128

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यर्थस्वीकारेप्ययं विशेषः। अध्ययनस्य फलेन सहाभेदः संसर्गः उपकारकत्वेन सह निरूपकता। तत्र च फलाभिन्नाध्ययननिरूपितोपकारकत्वाश्रयनिवसनानुकूलो व्यापार इत्यर्थः। दंडेन घट इत्यत्र तु दंडनिष्ठोपकारकत्वनिरूपितोपकार्यत्वाश्रयो घट इत्यर्थः। उपकार्ये हि साध्यं फलमपि तदेवेति। गम्यमानापीति। अपिशब्देन श्रूयमाणक्रिया समुच्चीयते। तेन केवलं श्रूयमाणैव क्रिया विभक्तौ प्रयोजिका किंतु गम्यमानापीति भावः। साधनेति। साध्यमित्यत्र प्रकृतिभूतो यो धातुस्तदर्थप्रतीतिः॥ भावः। अभिप्रेतेति। एतच्च दाणश्च सा चेच्चतुर्थ्यर्थे इत्यनेन ज्ञाप्यत इति मनोरमायां स्थितं। केचित्तु इह परिष्कुर्वंति। अशिष्टव्यवहार इत्ययमंशो वाचनिक एव। अन्यांशस्तु ज्ञापकसिद्ध इति। दास्या संयच्छते इति। दाणश्च सा चेदिति तङ्। पाघ्राध्मेति यच्छादेशः। कामुक इति। लषपतपदेत्यादिना कमेरुकञ्। इति तृतीया॥ ❀ ॥ कर्मणा। महासंज्ञाकरणमन्वर्थसंज्ञाविधानार्थं। सम्यक् प्रदीयते यस्मै तत्संप्रदानमिति। अत एवाह। दानस्येति। दानक्रियाकर्मणा कर्ता यमभिप्रैति संबध्नाति इच्छति वा तत्कारकं सं

कर्मणा यमभिप्रैति स सम्प्रदानं। १।४।३२॥ दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञं स्यात्॥ चतुर्थी सम्प्रदाने। २।३।१३॥ विप्राय गां ददाति। अनभिहित इत्येव। दानीयो विप्रः। क्रियया यमभिप्रैति सोऽपि सम्प्रदानं। पत्ये शेते। कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा पशुना रुद्रं यजते। पशुं रुद्राय ददातीत्यर्थः॥ रुच्यर्थानां प्रीयमाणः। १।४।३३॥ रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः सम्प्रदानं स्यात्। हरये रोचते भक्तिः। अन्यकर्तृकोऽभिलाषो रुचिः॥ हरिनिष्ठप्रीतेर्भक्तिः कर्त्री। प्रीयमाणः किं। देवदत्ताय रोचते मोदकः पथि॥ ॥

प्रदानसंज्ञकमित्यर्थः। तेन अजां नयति ग्रामं। हस्तेन निदधाति वृक्षे इत्यादौ नातिप्रसंगः। दानं चापुनर्ग्रहणाय स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनं। अत एव रजकस्य वस्त्रं ददातीत्यादौ न भवति। तत्र हि ददातिर्भाक्तः। एतच्च वृत्तिमतं। भाष्यमते तु नान्वर्थतायामाग्रहः। खंडिकोपाध्यायः शिष्याय चपेटां ददाति इत्यादिप्रयोगात्। रजकस्य ददातीति प्रयोगस्तु शेषत्वविवक्षायां भविष्यति। नचैवमजां नयति ग्राममित्यादावतिप्रसंगः शंक्यः। अजां प्रति ग्रामस्य शेषित्वाभावात्। यमभिप्रैतीत्युक्त्या हि यमिति निर्दिष्टस्य शेषित्वं कर्मणश्च शेषत्वं लभ्यते। गां प्रति तु विप्रस्य शेषित्वमस्तीति भवति तस्य संप्रदानसंज्ञा। अत्र अभिप्रैतीत्यत्र त्वयं न समासः। उदात्तवता गतिमता च तिङा गतेः समासो वक्तव्य इति वार्तिकस्य छंदोविषयत्वादिति हरदत्तः। भाषाविषयत्वे तु यत्प्रकुरुते इत्यादौ समासत्वात्सोरुत्पत्तिः स्यात्। लिंगसर्वनामनपुं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·कौ·
टी·त·
१३०

७ दानस्य तदर्थत्वात्तादर्थ्ये चतुर्थी सिद्धेर्वक्तिमनया संप्रदानसंज्ञया मैवं ७॥

सकतामप्युपेत्यस्वमोर्नपुंसकादिति लुकि कृतेपि ह्रस्वो नपुंसक इति ह्रस्वः स्यान्न। यत्प्रकुर्वीरन्नित्यत्र तु न लोपः स्यात्तस्मादुक्तवार्त्तिकस्पष्टार्थविषयत्वं युक्तमेव। दानीय
इति। बाहुलकात्संप्रदाने अनीयर्। क्रिययेति। क्रियायाः कृत्रिमकर्मत्वाभावान्न तया अभिप्रेयमाणस्य सूत्रेण संज्ञा न प्राप्नोतीति वचनं। एतच्च क्रियार्थोपपदस्य च
कर्मणि स्थानिन इत्यनेन न सिद्धं। पत्ये शेते इत्यादौ पतिमनुकूलयितुं शेते इत्याद्यर्थाभ्युपगमे बाधकाभावात्। भाष्यकारमते तु कर्मणा यमभिप्रैतीति सूत्रेणैव सिद्धं। संद
र्शनप्रार्थनाध्यवसायैराप्यमानत्वात् क्रियापि कृत्रिमं कर्मेति तेन कृत्वात्। न चैवं यं ददातीति कर्मत्वान्न क्रियेयायमभिप्रैतीत्येतद्वचनं कर्तव्यमेवेति वाच्यं। भाष्ये अ
न्वर्थसंज्ञात्वास्वीकारात्। नन्वेवं कटं करोति ओदनं पचतीत्यादावपि संप्रदानत्वप्रसंगस्तथा च वचनद्वयबलात् कर्मसंप्रदानयोः पर्यायत्वे कटाय करोतीत्याद्यनिष्टप्रयो
गोपि स्यादिति चेदत्राहुः॥ पत्ये शेते इत्यकर्मकस्थले सावकाशायाः संप्रदानसंज्ञायाः निरवकाशया कर्मसंज्ञया बाधितत्वान्नैवानिष्टप्रसक्तिः। नचैवं गत्यर्थकर्मणि
द्वितीयाचतुर्थ्याविति सूत्रमावश्यकमेवेति तन्न प्रत्याख्यानं भाष्यस्थं न संगच्छत इति वाच्यं। भाष्ये तत्प्रत्याख्यानस्य प्रौढिवादमात्रत्वादिति स्पष्टैव तत्। दानक्रिया

श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः। १।४।३४॥ एषां प्रयोगे बोधयितुमिष्टस्संप्रदानं स्यात्। गोपी स्मरात्कृष्णाय श्लाघते। ह्नुते। तिष्ठते। शपते वा। ज्ञी

र्थे हि संप्रदानेन तु दानक्रिया तदर्था। कारकाणां क्रियार्थत्वात्। कर्मणः करणसंज्ञेत्यादिलिङ्गं दसमेतत्। अत एव ॥ प्स्यमानः किं। देवदत्ताय श्लाघते पथि॥
वसुवृत्त्यत्ययेन सिद्धत्वादिति प्रत्याख्यायते। रुच्यर्थानां रुचिरर्थो येषां ते रुच्यर्थास्तेषां। प्रीयमाण इति। प्रीञ् तर्पणे अस्मात्कर्मणि लट्। हरये रोचते भक्तिः। हरिं प्री
णयतीत्यर्थः। कर्मसंज्ञायां प्राप्तायां वचनं। यद्यपि रुचिर्दीप्तौ तथापि तत्र तेन धातुनेह दीप्तिर्नविवक्षितेत्याह। अन्यकर्तृकोऽभिलाष इति। अत एवादित्यो रोचत इत्यत्र
न्यत्र दीप्त्यर्थसत्त्वान्न भवति। हरिरिति प्रीतेरिति एतेन अन्यकर्तृकत्वमिह प्रीत्याश्रयान्यकर्तृकत्वमित्युक्तं भवति। मोदकः पथीति। देवदत्तस्येव प्रीयमाणत्वं न तु पथ इति न तस्य संप्रदानत्वं॥
प्रीयमाणपदाभावे तु पथोपि स्यादिति भावः॥ ॥ श्लाघह्नुङ्। श्लाघृ कत्थने। ह्नुङ् अपनयने। ष्ठा गतिनिवृत्तौ। शप उपालंभे। कृष्णाय श्लाघत इति। कृष्णं स्तौतीत्यर्थः
कर्मत्वे प्राप्ते वचनमिदं। अन्ये त्वाहुः कृष्णाय आत्मानं परं वा श्लाघ्यं ज्ञापयतीत्यर्थ इति। अस्मिन्पक्षे शेषषष्ठ्यां प्राप्तायां वचनं। ह्नुत इति। सपत्नीप्सुः कृष्णं ह्नुवाना तमे
वार्थे कृष्णं बोधयतीत्यर्थः। यस्य कस्यचित्स्तुतिं बोधयतीति वा। तिष्ठत इति। स्थित्या स्वाभिप्रायं कृष्णं बोधयतीत्यर्थः। प्रकाशनस्थेयाख्ययोश्चेति तङ्। शपत इति। उपाल

129

धारेरुत्तमर्णः। धृङ् अवस्थाने। हेतुमण्यंतः। उत्तमर्णो धनस्वामी। अर्त्तेः क्तः। ऋणं। ऋणमाधमर्ण्ये इत्यत्र व्यवहारविशेषोपलक्षणार्थमाधमर्ण्यग्रहणमिति व्याख्यानादुत्तमर्णे
पि निष्ठानत्वं भवति। अस्मादेव निपातनादत्र बहुव्रीहौ निष्ठांतस्य परनिपातो बोध्यः। भक्तायेत्यादि। इह भक्त उत्तमर्णो हरिरधमर्णः। धृङो कर्मकत्वादणौ कर्त्तुर्मोक्षस्यणौ
कर्मत्वाच्छतं धारयति ग्राम इति। परत्वादिहाधिकरणसंज्ञा भविष्यतीति चेदुत्तमर्णोपि तर्हि हेतुसंज्ञा स्यादिति हरदत्तः। ननु चोत्तमर्णग्रहणाभावे हेतुसंज्ञाया इवाधिकरणसं
ज्ञाया अप्ययमपवादः स्यात् नेह्वारण्याय उत्तमर्णग्रहणमिति भावः। एवं च क्तेष्वुत्तमर्णग्रहणे न तत्प्रयोजको हेतुश्चेति हेतुसंज्ञायां प्राप्तायां न ह्युधनार्थमिदं संप्रदा
नसंज्ञावचनमिति निष्कर्षमाहुः। मनोरमायां तु षष्ठ्यां प्राप्तायामिदं वचनमिति स्थितं स्पृहेरीप्सितः। स्पृह ईप्सायां चुरादावदंतः सोनस्पृहयतीत्यत्र लघूपधगुणो नाप

धारेरुत्तमर्णः। १।४।३५॥ धारयतेः प्रयोगे उत्तमर्ण उक्तसंज्ञः स्यात्। भक्ताय धारयति मोक्षं हरिः॥ उत्तमर्णः किं। देवदत्ताय शतं धारयति ग्रा
मे। स्पृहेरीप्सितः। १।४।३६। स्पृहयतेः प्रयोगे इष्टः सम्प्रदानं स्यात्। पुष्पेभ्यः स्पृहयति। ईप्सितः किं। पुष्पेभ्यो वने स्पृहयति। ईप्सितमात्रे
इयं संज्ञा। प्रकर्षविवक्षायां तु परत्वात्कर्मसंज्ञा। पुष्पाणि स्पृहयति॥ क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः। १।४।३७॥ क्रुधाद्यर्थानां प्र
योगे यं प्रति कोपः स उक्तसंज्ञः स्यात्। हरये क्रुध्यति। द्रुह्यति। ईर्ष्यति। असूयति। यं प्रति कोपः किं। भार्यामीर्ष्यति। मैनामन्योऽद्राक्षीदिति। क्रो
धोऽमर्षः। द्रोहोऽपकारः। ईर्ष्याऽक्षमा। असूया गुणेषु दोषाविष्करणं। द्रुहादयोऽपि कोपप्रभवा एव गृह्यन्तेऽतो विशेषणं सामान्येन यं प्रति कोप इति

त्वादिति। तेन परस्परेण स्पृहणीयशोभं। स्पृहणीयगुणैर्महात्मभिः इत्यादौ कर्मण्यनीयर् सिध्यति। शेषत्वविवक्षायां तु कुमार्य इव कांतस्य त्रस्यंति स्पृहयंति चेत्यत्र षष्ठ्यपि सि
ध्यतीति हरदत्तादयः। वाक्यपदीयहेलाराजीयग्रंथयोस्तु स्पृहयतियोगे कर्मसंज्ञायाः शेषषष्ठ्याश्च बाधिकेयं संप्रदानसंज्ञेति स्थितं। युक्तं चैतत्। क्रियया यमभिप्रैतीत्यनेनै
वेष्टसिद्धेः। स्पृहेरीप्सित इत्येतत्सूत्रस्य हरदत्तादिमते वैयर्थ्यप्रसंगात्। तस्माद्वाक्यपदीयादिग्रंथानुरोधेन परस्परेण स्पृहणीयशोभमित्यादौ दानीयो विप्र इतिवत्बा
हुलकात्संप्रदाने अनीयर् इति व्याख्येयं। कुमार्य इव कांतस्येत्यत्र तु त्रस्यंतीत्येतदर्थतया कृत्तार्थस्य कांतस्येति षष्ठ्यंतस्य विभक्तिविपरिणामेन कांताय स्पृहयंतीति व्या
ख्येयमिति केचित्॥

सु
सि·कौ· टी·त· १३९

क्रुधद्रुह। क्रुध क्रोधे। द्रुह जिघांसायां। ईर्ष्य ईर्ष्यायां। असूयतिः कण्ड्वादियगन्तः। एषामर्थ इवार्थो येषां तेषां धातूनामित्यर्थः। द्रोहोऽपकार इति। दुह द्रोहे इति पाठाभिप्रायेणोक्तं जिघांसा द्रोह एवेत्यर्थे नोऽनुभावलंबा। असहनमिति। परसंपत्त्यसहनमित्यर्थः। क्रुधद्रुहोरकर्मकत्वात्तद्योगे षष्ठी प्राप्ता। अन्ययोस्तु सकर्मकत्वाद्द्वितीया प्राप्ता। ननु चित्तदोषार्थानामित्येवास्तु किं क्रोधादीनां विशिष्योपादानेनेति चेत्। अत्राहुः। द्वेषादावतिप्रसंगवारणाय विशिष्योपादानं तेन योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्यत्र चतुर्थी न भवति। तत्र त्वनभिनंदनं द्विषेरर्थः। अत एवाचेतनेष्वपि द्विष धातुः प्रयुज्यते। औषधं द्वेष्टीति। कोपप्रभवा एवेति। कथं तर्हि कुप्यसि कस्मै चित्त इ

क्रुधद्रुहोरुपसृष्टयोः कर्म्म। १।४।३८॥ सोपसर्गयोरनयोर्यम्प्रति कोपस्तत्कारकं कर्म्मसंज्ञं स्यात्। क्रूरमभिक्रुध्यति अभिद्रुह्यति। राधीक्ष्योर्यस्य विप्रश्नः। १।४।३९॥ एतयोः कारकं सम्प्रदानं स्यात्। यदीयो विविधः प्रश्नः क्रियते। कृष्णाय राध्यति ईक्षते वा। पृष्टो गर्गः शुभाऽशुभं पर्य्यालोचयतीत्यर्थः। प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता। १।४।४०। आभ्यां परस्य शृणोतेर्योगे पूर्वस्य प्रवर्त्तनरूपव्यापारस्य कर्त्ता सम्प्रदानं स्यात्। विप्राय गां प्रतिशृणोति। आशृणोति वा। विप्रेण मह्यं देहीति प्रवर्त्तितस्तस्मै प्रतिजानीत इत्यर्थः। अनुप्रतिगृणश्च। १।४।४१॥ आभ्यां गृणातेः कारकं पूर्वव्यापारस्य कर्त्तृभूतमुक्तसंज्ञं स्यात्। होत्रेऽनुगृणाति प्रतिगृणाति। होता प्रथमं शंसति तमध्वर्युः प्रोत्साहयतीत्यर्थः। परिक्रयणे सम्प्रदानमन्यतरस्याम्। १।४।४४॥ नियतकालम्भृत्या स्वीकरणम्परिक्रयणं तस्मिन्साधकतमं कारकं सम्प्रदानसंज्ञं वा स्यात्। शतेन शताय वा परिक्रीतः। तादर्थ्ये चतुर्थी वाच्या। मुक्तये हरिम्भजति। क्लृपि सम्पद्यमाने च। भक्तिर्ज्ञानाय कल्पते सम्पद्यते जायते। इत्यादि। उत्पातेन ज्ञापिते च। वाताय कपिला विद्युत्। हितयोगे च। ब्राह्मणाय हितं॥ ॥

९ ति। नहि कोपः कोपप्रभवः। अत्र व्याचख्युः। कुपिरत्र द्रोहार्थ इति पक्षे शेते इतिवन्निष्क्रियपायमित्येव सिद्धे क्रुधद्रुहोर्ग्रहणं चिन्त्यप्रयोजनमित्याहुः। राधीक्ष्योः। राध संसिद्धौ। ईक्ष दर्शने। अनयोस्त्विह शुभाशुभपर्यालोचनमर्थस्तच्च प्रश्नपूर्वकमित्याशयेन विवृणोति। पृष्टो गर्ग इति। शुभाशुभरूपयोः कर्मणोः धात्वर्थेनोपसंग्रहादकर्मकावेतौ। अत एव राध्यतीति श्यन् राधोऽकर्मकाद्वृद्धावेवेति दिवादि सुवश्यमाणेन गणसूत्रेण कर्मकादेव न हि धानात्। कृष्णस्य[illegible]शुभाशुभमित्यर्थोऽस्तु पगमान्षष्ठ्यां प्राप्तायां वचनमिदं। अनुप्रतिगृण इति। शंसं तस्यानुकरणं शब्दात्वष्ठी। प्रत्याङ्

130

CC-0. In Public Domain. Digitization by eGangotri

ष्यामिति पूर्वसूत्रे द्विवचननिर्देशात् प्रत्येकमेव धातुसंबंध इति निर्द्धारिते तत्साहचर्यादिहापि प्रत्येकमेव धातुसंबंध इति सूचयन्नाह। आभ्यां गृणाति ईरितेति। होते इति। कर्म
त्वेन प्राप्ते वचनं। परिक्रयणे। द्रव्यदानेनात्यंतस्वीकारः क्रयः। तत्समीपं परिशब्द आचष्टे अनियतकालात् क्रयणात् परिक्रयणस्य न्यूनकालत्वादित्याशयेनाह। नियते
ति। भृत्यावेतनादिना। तादर्थ्ये इति। तस्मै कार्याय इदं तदर्थं कारणं तस्य भावस्तादर्थ्यं। ब्राह्मणादित्वात् ष्यञ्। कृत्तद्धितसमासेभ्यः संबंधाभिधानं भावप्रत्ययेनेति सिद्धां
तात् ष्यञा संबंधोऽभिधीयते स च संबंधोऽनेकविधो न तु कार्यकारणभाव एव तेन ब्राह्मणाय दधीत्याद्यपि सिद्धं। ब्राह्मणस्य दध्यजन्यत्वेपि तत्संस्कार्यत्वात्। नचैवं
दधिशब्दादपि चतुर्थी स्यादिति वाच्यं संबंधस्य हि नित्यत्वेपि षष्ठी विशेषणादेव भवतीत्याकरे अभ्युपगमात्। एवं यूपाय दारु इत्यत्र दारुशब्दादपि न भवति।
हेताविति तृतीयापि षष्ठीविषय एव भवतीति सापीह न भवति। किंतु। प्रातिपदिकार्थे प्रथमैव। नचैतद्वार्तिकस्यावश्यकत्वे चतुर्थी संप्रदाने इति सूत्रं व्यर्थमिति भ्र
मितव्यं। हरये रोचते इत्याद्यर्थं तस्यावश्यकत्वात्। विप्राय गामित्यत्रापि तादर्थ्ये चतुर्थ्याः प्राप्तिर्नास्तीति प्रागेवोक्तत्वाच्चेति दिक्। क्लृपीति। संपदादित्वाद्भावे
क्विपि तदंतात् सप्तमी संपत्तिरिहाभूतप्रादुर्भावः क्लृप्यर्थकधातुप्रयोगे यः संपद्यते तत्र चतुर्थी विकारवाचकाच्चतुर्थीत्यर्थः। स हि संपद्यते प्रादुर्भवति तदु
दाहरति। भक्तिर्ज्ञानायेति। ज्ञानात्मना परिणमत इत्यर्थः। प्रकृतिविकृत्योर्भेदविवक्षायां विकृतिवाचकाच्चतुर्थी। अभेदविवक्षायां तु परत्वात् प्रथमैव भ
क्तिः ज्ञानं कल्पत इति। यत्तु जनिकर्तुरिति भक्तेरपादानत्वं विवक्ष्यते तदापि ज्ञानस्याभिहितकर्तृत्वात् प्रथमैव भक्तेर्ज्ञानं कल्पते। क्लृप्यन्यर्थग्रहणमि
त्याशयेनाह। संपद्यत इत्यादि॥ यद्यपि तादर्थ्ये चतुर्थ्येव भक्तिर्ज्ञानायेत्यादिप्रयोगाः सिध्यंति तथापि परिणामत्वप्रकारकबोधार्थमिदं वचनमित्याहुः।
प्राणिनां शुभाशुभसूचको भूतविकार उत्पातः तेन ज्ञापितेर्थे वर्तमानाच्चतुर्थी वाच्येत्यर्थः। वातायेति। वातस्य ज्ञापिकेत्यर्थः। हितेति। चतुर्थीसमासविधा
॥ नात् ज्ञापकादेतल्लभ्यमिति भावः। एवं सुखयोगेपि चतुर्थी बोध्या॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



क्रियार्थोपपदात्‌ क्रिया अर्थः प्रयोजनं यस्याः सा क्रियार्था सा क्रियार्था क्रिया उपपदं यस्य। यद्यपि क्रियाया उपपदत्वं न संभवति तथापीह स्ववाचकशब्दद्वारा तत्
द्बोध्या। क्रियाफलकक्रियावाचकमित्यर्थः। क्रियावाचकस्यापि धातोरूपोच्चारितपदरूपो पपदत्वं यद्यपि न संभवति सुप्तिङं तस्यैव पदत्वात्‌ तथापीह क्रियावा
चकप्रकृतिकमित्यर्थो विवक्षितः। तादृशमुपपदं यस्य तुमुन्नं तस्य तस्य कर्मणि चतुर्थी भवतीति निष्कृष्टोर्थः। तुमुन्ण्वुलौ क्रियायां क्रियार्थायामिति सूत्र

क्रियार्थोपपदस्य च कर्मणि स्थानिनः। २।३।१४॥ क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः। कर्मणि चतुर्थी
स्यात्‌। फलेभ्यो याति। फलान्याहर्तुं यातीत्यर्थः। नमस्कुर्मो नृसिंहाय। नृसिंहमनुकूलयितुमित्यर्थः। एवं स्वयम्भुवे नमस्कृत्येत्यादावपि। तु
मर्थाच्च भाववचनात्‌। २।३।१५॥ भाववचनाश्चेति सूत्रेण यो विहितस्तदन्ताच्चतुर्थी स्यात्‌। यागाय याति। यष्टुं यातीत्यर्थः। नमःस्वस्तिस्वा
हास्वधाऽलम्वषड्योगाच्च। २।३।१६॥ एभिर्योगे चतुर्थी स्यात्‌। हरये नमः। उपपदविभक्तेः कारकविभक्तिर्बलीयसी। नमस्करोति देवान्प्र
जाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा। अलमिति पर्य्याप्त्यर्थग्रहणं। तेन दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्त इत्यादि। प्रभ्वादियोगे
षष्ठ्यपि साधुः। तस्मै प्रभवति। स एषां ग्रामणीरिति निर्देशात्‌। तेन प्रभुर्बुभूषुर्भुवनत्रयस्येति सिद्धं। वषडिन्द्राय। चकारः पुनर्विधाना
र्थः। तेनाशीर्विवक्षायां परामपि। चतुर्थी चाशिष्येति षष्ठीं बाधित्वा चतुर्थ्येव भवति। स्वस्ति गोभ्यो भूयात्‌। मन्यकर्मण्यनादरे विभाषाऽ
प्राणिषु। २।३।१७॥ प्राणिवर्ज्जे मन्यतेः कर्मणि चतुर्थी वा स्यात्तिरस्कारे। न त्वा तृणं मन्ये तृणाय वा। श्यना निर्देशात्तानादिकयोगे न। न त्वा
तृणं मन्वे। अप्राणिष्वित्यपनीय नौकाकान्नशुकशृगालवर्ज्जेष्विति वाच्यं। तेन न त्वां नावं अन्नं मन्ये इत्यत्र प्राणित्वेऽपि चतुर्थी न। न त्वां
शुने श्वानं वा मन्ये इत्यत्र प्राणित्वेऽपि भवत्येव॥ ॥९ महिम्ना क्रियार्थकमुपपदं क्रियावाच्येव फलतीत्याशयेनाह। क्रियार्थाक्रियेति। स्था
निन इत्यस्यैवार्थकथनमप्रयुज्यमानस्येति। तुमुन इति। ण्वुलोप्युपलक्षणं। फलेभ्यो यातीत्यस्य फलान्याहारक इति विवरणे बाधकाभावात्‌। कर्मणीति। त १३२
था च द्वितीयापवादोयमिति भावः। यत्तु प्रसादकृता व्याख्यातं। अप्रयुज्यमानस्यैव कर्मणि यथा स्यात्‌। प्रयुज्यमा नस्य कर्मणि माभूदिति नियमार्थं सूत्रमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तदसत्। अप्राप्तस्य नियमायोगात्। न चेह तादर्थ्ये इति प्राप्तिः शंक्या। यानक्रियायाः फलार्थत्वाभावात्। आहरणार्था हि यानक्रिया आहरणं तु फलकर्मकमित्यन्य
देतत्। क्रियार्थोपपदस्य किं। प्रविश पिंडीं। गृहप्रवेशनं यद्यपि भक्षणार्थं तथापि भक्षिं प्रति क्रियोपपदत्वं नास्ति। न च तुमुनः कर्मणीत्युक्तत्वात् भक्षिकर्मणि
चतुर्थ्याः प्रसक्तिरेव नास्तीति प्रत्युदाहरणमिदं न संगच्छत इति वाच्यं। सति तत्क्रियार्थोपपदे तत्र तुमुन्ण्वुलौ क्रियायामित्येतद्विषयकमेवेदं सूत्र
मिति तुमुन् इति लभ्यते नान्यथेति प्रत्युदाहरणस्यासंगतत्वाभावात्। तुमर्थात्। अव्ययकृतो भावे इति तुमुनो भाव एव विधानात् तदर्थस्य भाववचनत्वे सिद्धे पुनर्भाववचनग्रहणं
सूत्रविशेषपरिग्रहार्थमित्याह। भाववचनाश्चेतीति। न च तादर्थ्य इत्येव गतार्थतेति शंक्यं क्रियार्थक्रियोपपदके भाववचनाश्चेति घञा तुमुनेव तादर्थ्यस्य द्योतितत्वात्प्रातिपदि
कार्थमात्रे प्रथमाप्राप्तावेतत्सूत्रारंभात्। यत्तु प्रसादकृतोक्तं। भाववचनादेव यथा स्यात्। पाचको व्रजतीति ण्वुलंतान्मा भूदिति नियमार्थमिदं सूत्रमिति। तन्न। ण्वुलः कर्तृवाच
कतया तुमर्थकत्वाभावेन नियमार्थत्वायोगात् ण्वुलंते कर्तुः प्राधान्यात् कर्तारं प्रति च तादर्थ्याभावात्। गुणीभूततया कं प्रति तादर्थ्यसंभवेपि पाकवाचकधातोश्चतुर्थ्य
योगाच्च। तुमर्थात् किं। पचनं वर्तते। भाववचनात् किं। पाकः। त्यागः। अत्र वदंति। क्रियार्थोपपदस्येत्यनुवर्त्य पंचम्या विपरिणमय्य व्याख्यानेबाधकाभावात् भाववचनादिति न्य
क्तुं शक्यं। न चैवं तुमर्थादित्येव न्यक्तव्यमिति वाच्यं। वर्णलाघवसंभवे गौरवाश्रयणायोगादिति। बलीयसीति। हरये नम इत्यत्र तूद्देशनक्रियाद्वारा हरिनमस्कारयोः संबंध
हर्युद्देश्यको नमस्कार इति। एवं चोद्देशनक्रियावगतौ विलंब इति कारकविभक्तेर्बलीयस्त्वमित्येके। अन्ये तूपपदविभक्त्या संबंधसामान्यमवगम्यते तद्विशेषावगमस्त्व
र्थप्रकरणादिपर्यालोचनाधीनः। कारकविभक्त्या तु कर्मत्वादिसंबंधविशेषो झटित्येवावगम्यते इति तस्या बलीयस्त्वमित्याहुः। षष्ठ्यपीति। ननु प्रभ्वादियोगे षष्ठ्येवास्तु
अलंशब्दस्तु पर्याप्ती तरार्थक एव गृह्यतामित्याशंक्याह। तस्मै प्रभवतीति। न त्वां तृणमित्यादि। ननु तृणादिवत् युष्मच्छब्दादपि पक्षे चतुर्थ्या भाव्यमेवं। अनादर इत्यस्य क
र्मविशेषणत्वेन अनादरद्योतकं यत्कर्म तत्र चतुर्थीति व्याख्यानात्। तृणं त्वत्रा नादरद्योतकं न तु युष्मदर्थः स्यादेतत्। त्वां तृणं मन्ये तृणाय वेत्युदाह्रियतां किमनेन
नञः प्रयोगेण। अत्राहुः प्रकृष्टकुत्सितग्रहणं कर्तव्यमिति वार्तिकमस्ति तेन यद्वाचिनश्चतुर्थी विधीयते ततो निकृष्टत्वेन यदि कुत्सा प्रतिपाद्यते तदा चतुर्थी भवति।
न तु साम्यविवक्षायां। तादृशी च कुत्साप्रतीतिर्नञः प्रयोगमिदित्येव भवतीति न त्वामित्युक्तमिति। श्यनानिर्देशादिति। न च मन्य इति यकानिर्देशः किं न स्यादिति वाच्यं

CC-0. In Public Domain. Digitization by eGangotri



अनभिहित इत्यधिकारात्। नहियुक्तायोगे अनभिहितं कर्म संभवति। ण्यन्तपि दैवादिकधातूपलक्षणमात्रं न तु स्वयं विवक्षितः। तेन नृत्यमत्वार् घुनंदनोपि वालेनरक्षः
प्रधनान्निरस्यदिति भट्टिप्रयोगः संगच्छते। नौकाकान्नेति। व्यवस्थितविभाषाविज्ञातव्येति भावः॥ ॐ॥ गत्यर्थकर्मणि। गत्यर्थेति किं। ओदनं पचति। कर्मणीति किं।
अश्वेन व्रजति। अनध्वनीत्यत्रा ध्वनीति न स्वरूपग्रहणं न याहि सत्यन ध्वन इत्येवावक्ष्यत्। किं त्वर्थग्रहणं सप्तमीनिर्देशात् कर्मणीत्यनेन सामानाधिकरण्यात्। अ
र्थस्यैव हि कर्मत्वं संभवति न शब्दस्वरूपस्य तेनाध्ववाचिनां सर्वेषामेव निषेधः तथा च वार्तिकमध्वन्यर्थग्रहणमिति। गंत्राधिष्ठितएवेति। आस्थितप्रतिषेधो व
क्तव्य इति वार्तिकादिति भावः। आस्थितः संप्राप्तः अध्वानं गच्छतीत्यत्र हि पंथाः प्राप्तएवेति न पक्षे चतुर्थी। यदा त्वप्राप्तत्वेन विवक्षा तदा पक्षे भवत्येव सा। इह अनध्व

गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि। २।३।१२। अध्वभिन्ने गत्यर्थानां कर्मणि एते स्तश्चेष्टायां। ग्रामं ग्रामाय वा गच्छति। चेष्टायां
किं। मनसा हरिं व्रजति। अनध्वनीति किं। पन्थानं गच्छति। गन्त्राधिष्ठिते अध्वन्येवायं निषेधः यदा तूत्पथात्पन्थानमेवाक्रमितुमिष्यते तदा च
तुर्थी भवत्येव। उत्पथेन पथे गच्छति॥ ध्रुवमपायेऽपादानं। १।४।२४। अपायो विश्लेषस्तस्मिन्साध्ये यद्ध्रुवमवधिभूतं कारकं तदपादानं स्यात्
अपादाने पञ्चमी। २।३।२८। ग्रामादायाति। धावतोऽश्वात्पतति। कारकं किं। वृक्षस्य पर्णं पतति। जुगुप्साविरामप्रमादार्थानामुपसंख्यानं
पापाज्जुगुप्सते विरमति। धर्मात्प्रमाद्यति। भीत्रार्थानां भयहेतुः। १।४।२५। भयार्थानां त्राणार्थानां च प्रयोगे भयहेतुरपादानं स्यात्। चोरा
द्बिभेति। चोरात्त्रायते। भयहेतुः किं। अरण्ये बिभेति त्रायते वा॥ ॥ ९९ नीत्यपनीयासंप्राप्त इति पूर्वेण तेन स्त्रियं गच्छतीत्यत्र स्त्रीप्राप्तेवेति न चतुर्थी॥ 132

अत्र व्याचक्षते। अजां नयति ग्राममित्यत्र तु भवत्येव चतुर्थी। अगत्यर्थत्वात्। आक्षेपादिना त्वत्र प्रतीयते गतिर्न त्वसौ नयतेरर्थः। प्रापणं वाचित्वादिति। गत्यर्थकर्मणि च
तुर्थीवेति वक्तव्ये द्वितीयाग्रहणं प्रपवादविषयेपि द्वितीया यथा स्यादित्येतदर्थं। तेन ग्रामं गंतेत्यत्र कृद्योगलक्षणा षष्ठी न भवतीति वृत्तिकारोक्तं॥ इति चतुर्थी। ध्रुवमपा
ये। ध्रुगतिस्थैर्ययोः। अस्मात् पचाद्यच् कुटादित्वात् ङित्वेउवङ्। ध्रुवस्थैर्ये इति केचित्पठंति। तत्रेगुपधेति कः। ध्रुवं स्थिरं। अपायशब्देन विवक्षितमाह। विश्ले १३३
षइति। एवं च प्रकृतधात्वर्थानाश्रयत्वे सति तज्जन्यविभागाश्रयो ध्रुवमिति फलितं। तच्चार्थादवधिरेवेत्याह। अवधिभूतमिति। धावत इति। इह धावनक्रिया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशिष्टस्याप्यश्वस्यग्रहणं तत् धातूपात्तक्रियायांप्रत्यवधित्वंनविरुध्यतेपरस्परस्मान्मेषावपसरत इत्यत्रतुसृधातुनागतिद्वयस्याप्युपादानादेकनिष्ठांगतिंप्रति
द्वितरस्याप्यपादानत्वंनविरुध्यते। उक्तंचहरिणा। अपायेयदुदासीनंचलंवायदिवाऽचलं। ध्रुवमेवातदावेशात्तदपादानमुच्यते १ पततोध्रुवएवाश्वोयस्मा
दश्वात्पतत्यसौ। तस्याप्यश्वस्यपतनेकुड्यादिध्रुवमिष्यते २ मेषांतरक्रियापेक्षमवधित्वंपृथक्पृथक्। मेषयोःस्वक्रियापेक्षंकर्तृत्वंचपृथक्पृथक् ३ इति
३। पर्वतात्पततोऽश्वात्पततोऽत्यत्रतुपर्वता वधिकपतनाश्रयोयोऽश्वस्तदवधिकंदेवदत्तादिनिष्ठंपतनमर्थः। पंचम्यर्थअवधोअभेदेनसंसर्गेणप्रकृत्यर्थःप
र्वतादिविशेषणं। प्रत्ययार्थस्तुपतनक्रियायां। सचावधिरूपोधर्मोनतुधर्ममात्रं। उद्धृतौदनास्थालीत्यत्रौदनकर्मकोद्धरणवधिभूतास्थालीतिसामानाधिकरण्य
दर्शनादेतच्चमनोरमायांस्थितं। नन्विहध्रुवग्रहणंकिमर्थंनचग्रामादागच्छतिशकटेनेत्यत्रशकटेतिव्याप्तिवारणायतदितिवाच्यंपरत्वात्तत्रकरणसं
ज्ञाप्रवृत्तेः। नचसंज्ञिनिर्देशार्थंध्रुवग्रहणंकारकाधिकारात्कारकमितिलभ्यतइतिध्रुवग्रहणंचिंत्यप्रयोजनमितिचेन्न। अत्रवदंतिकारकत्वरूपव्या
पकधर्ममात्रविवक्षायांसाधकतमत्वेनविवक्षाभावदशायांकरणसंज्ञाऽप्रसंगेनशकटस्यापादानत्वंस्यात्तन्माभूदित्येतदर्थंध्रुवग्रहणमिति। जुगुप्से
ति। जुगुप्सानिंदाविरामोविरतिःप्रमादोऽनवधानता एतदर्थकानांधातूनांकारकमपादानसंज्ञंस्यादित्यर्थः। संयोगपूर्वकोविश्लेषोविभागःसचेहनास्तिबु
द्धिकृतस्तुगौणत्वान्नेह। गृह्यतेइतिसूत्रेणप्राप्तौवार्तिकारंभः। भाष्यकारस्तुकारकप्रकरणेगौणमुख्यन्यायोनाश्रीयतइतितमपूपग्रहणेनज्ञापितत्वात्। जु
गुप्सादीनांतत्पूर्वकनिवृत्तिर्वाचित्वमाश्रित्येदंवार्तिकंभीत्रार्थानामित्यादिचसूत्राणिप्रत्याचख्यौ। पूर्वंहिबुद्ध्यापायंसंप्राप्यततोदोषदर्शनान्निवर्ततइ
त्यस्त्येवात्रबुद्धिकृतोपायः। भीत्रा॥ कस्यबिभ्यतिदेवाःजातरोषस्यसंयुगेइति। रामायणेतुकस्येत्यस्यसंयुगेनान्वयान्नास्तिभयहेतुत्वमितिषष्ठीप्रयो
गःसंगच्छतएवानचैवंसंयुगस्यापादानत्वापत्तिरितिवाच्यंपरयाअधिकरणसंज्ञयाअपादानसंज्ञाबाधात्। अधिकरणत्वाविवक्षायांतुइष्टापत्तेः। भीत्रार्थेति
किं। व्याघ्रंपश्यति। नचकर्मत्वेनबाधःशंक्यः। कर्मत्वाविवक्षायांशेषषष्ठीबाधित्वापंचमीप्रसंगादित्याहुः। भयहेतुग्रहणंचिंत्यप्रयोजनंअरण्येबिभेतीत्यत्रपरत्वादधि
करणसंज्ञाप्रवृत्तेरितिचेन्न। अत्रवदंति। भयहेतुग्रहणाभावेकारकशेषविवक्षायामतिप्रसंगःस्यात्तथाचअरण्यस्यचोरान्बिभेतीतिप्रयोगोनस्यादितिष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु·
सि·कौ·
टी·न·
१३४

पराजेः। अध्ययनादिति। अध्ययनसंबंधिनी ग्लानिरित्यर्थः। कारकशेषत्वेन षष्ठ्यां प्राप्तायामिदं। पराजयत इति। विपराभ्यां जेरिति तङ्। असोढ इति। क्तार्थो भूतकालो न विव
क्षितस्तेनाध्ययनात्पराजेष्यत इत्यादि सिद्धं। न च सोढग्रहणं व्यर्थं। शत्रून्पराजयत इत्यत्र परत्वात् कर्मसंज्ञा सिद्धेः। अत्रापि वदंति। कर्मत्वाविवक्षायां शेषषष्ठीं बाधि
त्वा पंचमी स्यात् सा मा भूदिति कर्तव्यमेवासोढग्रहणं। वारणार्थानां। यवेभ्य इति। यवसंयोगात्प्रागेव गां निवारयतीति ध्रुवमपाय इत्यनेनासिद्धावयमारंभः। बुद्धिपरिक
ल्पितापायमंगीकुर्वतो भाष्यकारस्य मते तु वैयर्थ्यमेतस्य स्फुटमेव। गां वारयतीति। वृत्र् वरणे चुरादिः। गामित्यत्र ईप्सितत्वप्रयुक्तापादानसंज्ञा न भवति। ईप्सितत
मत्वविवक्षायां परत्वात्कर्मसंज्ञाप्रवृत्तेः। नन्वेवमीप्सितग्रहणमेव व्यर्थं। क्षेत्रे वारयतीत्यत्र परत्वादधिकरणसंज्ञाप्रवृत्तेः। सत्यं। अधिकरणस्य शेषत्वविवक्षायामिदं

पराजेरसोढः। १।४।२६॥ पराजेः प्रयोगेऽसह्योऽर्थोऽपादानं स्यात्। अध्ययनात्पराजयते। ग्लायतीत्यर्थः। असोढः किं। शत्रून्पराजयते। अभिभव
तीत्यर्थः। वारणार्थानामीप्सितः। १।४।२७॥ प्रवृत्तिविघातो वारणम्। वारणार्थानां प्रयोगे ईप्सितोऽर्थोऽपादानं स्यात्। यवेभ्यो गां वारयति। ईप्सितः।
किं। यवेभ्यो गां वारयति क्षेत्रे। अन्तर्धौ येनादर्शनमिच्छति। १।४।२८॥ व्यवधाने सति यत्कर्तृकस्यात्मनो दर्शनस्याभावमिच्छति तदपादा
नं स्यात्। मातुर्निलीयते कृष्णः। अन्तर्धौ किं। चौरान्न दिदृक्षते। इच्छतिग्रहणं किं। अदर्शनेच्छायां सत्यां सत्यपि दर्शने यथा स्यात्। आख्या
तोपयोगे। १।४।२९॥ नियमपूर्वकविद्यास्वीकारे वक्ता प्राक्संज्ञः स्यात्। उपाध्यायादधीते॥ उपयोगे किं॥ नटस्य गाथां शृणोति॥

प्रत्युदाहरणमिति पूर्वोक्तरीत्या परप्रयोजनस्येहापि कल्पितुं शक्यत्वात्। अंतर्धौ। येनेति कर्तरि तृतीया। न च कृद्योगषष्ठीप्रसंगः। उभयप्राप्तौ कर्मण्येवेति नियमात्
अत्रत्यात्मन इति गम्यमानत्वादनयोरुभयोः प्राप्तिः। निलीयत इति। लीङ् श्लेषणे दैवादिकः। नन्वेतदन्तर्धाविति। व्यर्थं। न दिदृक्षते चौरानित्यत्र परत्वात्कर्मसंज्ञासिद्धेः। अ
त्राहुः। चौराः आत्मानं मा द्राक्षुरिति बुध्या चौरान्न दिदृक्षत इत्ययमर्थोऽत्र विवक्षितस्तत्र कर्मणः शेषत्वविवक्षायामिदं पूर्ववत्प्रत्युदाहरणमिति। शब्दकौस्तुभे तं
न्तर्धाविन्येतच्चिन्त्यप्रयोजनमिति स्थितं। आख्यातोप। नियमपूर्वकेति। नत्वेवोपयोगशब्दो रूढ इति भावः। आख्याते त्येन तन्नं नमित्याह। वक्तेति। उपाध्यायादिति
उपेत्य अस्मादधीयत इति उपाध्यायः। इङ् श्चेति घञ्। अध्ययनं तु गुरूच्चारणानूच्चारणं नियमपूर्वकं। नटस्येति। गाथाकर्मकं नटसंबंधि श्रवणमित्यर्थः। नट

133

जनिकर्तुः। जननं जनिरुत्पत्तिः। इण्जादिभ्य इति जनेर्भावे इण्। जनिवध्योश्चेति वृद्धिप्रतिषेधः। तस्याः कर्तेति शेषषष्ठ्या समासो न तु कारकषष्ठ्या। तृजकाभ्यामिति निषे-
धात्। एवं चोत्पत्त्याश्रयस्य यो हेतुस्तदपादानमित्यर्थो लब्धः। तद्योगेऽप्यपादानत्वं भवत्येव। अङ्गादङ्गात्संभवसीति यथा। तदेतदाह। जायमानस्येति। एतेन इक्श्तिपौ
धातुनिर्देशे इति इका निर्देशोऽयं जनिरित्याश्रित्य गमहनेत्युपधालोपमर्थासंगतिं। समासानुपपत्तिं चोद्भाव्य व्याकरणाधिकरणे गर्जयंतो मीमांसकाः समाहिता इ-
ति भावः। इह प्रकृतिग्रहणं हेतुमात्रपरमिति वृत्तिकृन्मतं। पुत्रात्प्रमोदो जायते इत्युदाहरणात्। उपादानमात्रपरमिति तु भाष्यकैयटमतं तदुभयसाधारणमु-
दाहरणमाह। ब्रह्मण इति। ब्रह्मा हिरण्यगर्भः। स च हेतुरेव न तूपादानं। किंच। मायोपहितं चैतन्यं ब्रह्म तद्धि सर्वकार्योपादानमिति वेदान्तसिद्धान्तः॥ भुवः॥ भवनं भू-
रिति। संपदादित्वाद्भावे क्विप्। पूर्वसूत्रे समासनिर्दिष्टमपि कर्तृग्रहणमनुवर्तते स्वरितत्वादित्याह। भूकर्तुरिति। प्रभवत्यस्मादिति प्रभवः। अकर्तरि च कारके इत्य-

जनिकर्तुः प्रकृतिः।१।४।३०॥ जायमानस्य हेतुरपादानं स्यात्। ब्रह्मणः प्रजाः प्रजायन्ते॥ भुवः प्रभवः।१।४।३१॥ भवनं भूः। भूकर्तुः प्रभव-
स्तथा। हिमवतो गङ्गा प्रभवति। तत्र प्रकाशत इत्यर्थः॥ ल्यब्लोपे कर्मण्यधिकरणे च। प्रासादात्प्रेक्षते। आसनात्प्रेक्षते। प्रासादमारुह्य आस-
ने उपविश्य प्रेक्षत इत्यर्थः। श्वशुराज्जिह्रेति। श्वशुरं वीक्ष्येत्यर्थः। गम्यमानाऽपि क्रिया कारकविभक्तौ निमित्तमित्युक्तं। कस्मात्त्वं नद्याः। यत-
श्चाध्वकालनिर्म्माणं तत्र पञ्चमी। तद्युक्तादध्वनः प्रथमासप्तम्यौ कालात्सप्तमी च वक्तव्या। वनाद्ग्रामो योजनं योजने वा। कार्त्तिक्या आग्रहायणी

धिकारादपादानार्थेऽमं दोरपा। जनिकर्तुरित्येव सिद्धे निरर्थकमिदमित्याशंकां परिहरन्नाह। तत्र प्रकाशत इति। प्रथमं दृश्यत इत्यर्थः। एवं चार्थो धातूनामनेकार्थ-
त्वाल्लभ्यते। तथा चाभूतप्रादुर्भावो जनिः। अन्यतः सिद्धस्य प्रथममुपलंभः प्रभव इत्यर्थभेदोऽस्तीति भावः। भीत्रार्थानामित्यारभ्य येयं ससूत्री भाष्ये प्रत्याख्याता। तत्रेत्थमुप-
पत्तिसंभवः। चौरेभ्यो बिभेति भयान्निवर्तत इत्यर्थः। त्रायते रक्षणेन चौरेभ्यो निवर्तयतीत्यर्थः। पराजयते ग्लान्या निवर्तत इत्यर्थः। वारयति। प्रवृत्तिं प्रतिबध्नन् निवर्त-
यतीत्यर्थः। निलीयते निलयनेन निवर्तत इत्यर्थः। अधीते। उपाध्यायान्निःसरन्तं शब्दं गृह्णातीत्यर्थः। ब्रह्मणः प्रपंचो जायत इत्यत्रापि ततोपक्रामति निर्गच्छतीत्य-
र्थः। प्रभवतीत्यत्रापि भवनपूर्वकं निःसरणमर्थस्तथा च ध्रुवमपाय इत्यनेनैवेष्टरूपसिद्धिरिति। वस्तुतस्तु निवृत्तिनिस्सरणादि धात्वन्तरार्थे विशिष्टे स्वार्थे वृत्तिमाश्रि-

सु॰
सि॰ कौ॰
टी॰ त॰
१३५

स्यथा कथंचिदुक्तप्रयोगाणां समर्थनेपि मुख्यार्थपुरस्कारेण षष्ठीप्रयोगो दुर्वारः। न दृश्य शृणोतीतिवत्। नत्वुपाध्यायनटयोः क्रियानुकूलव्यापारांशे विशेषो वक्तुं शक्यः
अनभिधानं त्वशास्त्रमाश्रित्य प्रत्याख्यानं तु नातीव मनोरमं। एवं जुगुप्साविरामेत्यादिवार्तिकमवश्यारंभणीयं। तथा च सूत्रवार्तिकमतमेवेह प्रबलं। तथा ध्रुवं
भयहेतुरसोढ इत्यादिसंज्ञिनिर्देशोपि सार्थकः। परत्वान्नन्तसंज्ञाप्राप्तावपि ध्रौव्यत्वविवक्षायां न माषाणामश्नीयादित्यादाविव षष्ठ्या इष्टत्वात्तत्रापादानसं
ज्ञाया वारणीयत्वात्। एतच्च प्रौढमनोरमायां स्पष्टं। ल्यब्लोप इति। ल्यबन्तस्य गम्यमानार्थत्वादप्रयोग इत्यर्थः। ल्यब्ग्रहणमिह ल्यबर्थपरं तेन क्त्वोपि लोपे सिध्य
ति। आसने स्थित्वा प्रेक्षते। आसनात्प्रेक्षत इति। यतश्चेति। यदवधित्वेनाश्रित्याध्वनः कालस्य वा निर्माणं परिच्छेदः प्रतिपाद्यते ततः पंचमीत्यर्थः। तेन पंचम्यं

अन्याराद्दितरर्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते। २।३।२९॥ एतैर्योगे पञ्चमी स्यात्। अन्य इत्यर्थग्रहणं। इतरग्रहणं प्रपञ्चार्थं। अन्यो भिन्न इ
तरो वा कृष्णात्। आराद्वनात्। ऋते कृष्णात्। पूर्वो ग्रामात्। दिशि दृष्टः शब्दो दिक्छब्दः। तेन सम्प्रति देशकालवृत्तिना योगेऽपि भवति। चैत्रात्पूर्वः
फाल्गुनः। अवयववाचियोगे तु न। तस्य परमाम्रेडितमिति निर्देशात्। पूर्वं कायस्य। अञ्चूत्तरपदस्य तु दिक्छब्दत्वेऽपि षष्ठ्यतसर्थेति षष्ठीं बा
धितुं पृथग्ग्रहणं। प्राक् प्रत्यग्वा ग्रामात्। आच् दक्षिणा ग्रामात्। आहि दक्षिणाहि ग्रामात्। अपादाने पञ्चमीति सूत्रे कार्तिक्याः प्रभृतीति भा
ष्यप्रयोगात्। प्रभृतियोगे पञ्चमी॥ भवात्प्रभृति आरभ्य वा सेव्यो हरिः॥ अपपरिबहिरिति समासविधानाज्ज्ञापकाद्बहिर्योगे पञ्चमी। ग्रामाद्बहिः

नार्थेनार्थद्वारा युक्तान्निर्मीयमाणाध्ववाचिनः प्रथमासप्तम्यौ स्तः। कालादिति। इहापि तद्युक्तादित्यपेक्षते। आग्रहायणीति। अग्रे हायनमस्याः सा प्रज्ञादेराकृतिगणत्वात्स्वा
र्थिकोण्। पूर्वपदात्संज्ञायामिति णत्वं। अन्यारा। अर्थग्रहणमिति। व्याख्यानादिति भावः। प्रपंचार्थमिति। न च इतरत्वं न्यूनोच्चयोरित्यमरोक्तनीचार्थस्येदं ग्रहणमस्त्वि
ति वाच्यं। अस्मान्नीचो मंदो वेति वक्तव्ये पंचमीविभक्ते इत्यनेनैव सिद्धत्वात्। अन्यो भिन्न इतरो वेति। न चैवं घटः पटो नेत्यत्रातिप्रसंगः। नञोपि भेदशक्तत्वादिति वाच्यं। निपातानां द्योत
कत्वमेव न तु वाचकत्वमित्यभ्युपगमात्। आराद्वनादिति। इह दूरांतिकार्थैः षष्ठ्यन्यतरस्यामिति प्राप्ता। ऋते कृष्णादिति। कथं तर्हि फलति पुरुषाराधनमृते इति प्रयोग इति 134
चेत्। प्रमादोयमिति हरदत्तः। अन्ये तु ततोन्यत्रापि दृश्यत इति दृशिग्रहणाच्चैत्रं यावच्छीतमित्यादाविव क्तेयोगे द्वितीयापि साधुरित्याहुः। अस्मिन्व्याख्याने ऋते द्विती

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाचेति चाङ्सूत्रमनुकूलं। दिशि दृष्ट इति। रूढेति शेषः। तेनैन्द्र्या इत्यो नात्र गृह्यते। नन्वेवं ककुभादिग्रहणप्रसंग इति चेन्न। अत्राहुः। अन्येन साहचर्यान्न व्याख्यानाद्धि ग्भिन्नेऽर्थे योन दृष्टः सोऽत्र गृह्यत इति। दिक्शब्दलेपीति। यद्यपि दिक्शब्दोऽयं चूत्तर पदमस्ति सध्यङित्यादि तथापि दिक्शब्दसाहचर्याद् उत्तरपदेन योगित्यादिदिक्शब्द एव गृह्यते। तेन सध्यङ् देवदत्तेनेत्यत्र नातिप्रसंग इति भावः। दक्षिणाग्रामादिति। दिक्शब्दत्वेनैव सिद्धे अजादिग्रहणं चिन्त्यप्रयोजनमित्याहुः। प्रभृतियोगे ति प्रभृत्यर्थैर्योग इत्यर्थः। तथा च कार्तिकाः प्रभृतीति भाष्यं विवृण्वता कैयटेन तत आरभ्य इत्यर्थ इति प्रयुक्तं। ग्रामाद्बहिरिति। ज्ञापकसिद्धं न सर्वत्रेतेन कारस्करभो वहिरिति सिद्धं॥ ॐ ॥ अपपरीति। वर्जने किं। परिषिंचति सर्वत इत्यर्थः। अत्रोपसर्गत्वात् षत्वं। वचनग्रहणादिति। विनानेनेति मर्यादा सह तेनेत्यभिविधिरित्यत्रयउ

अपपरी वर्ज्जने। १।४।८८। एतौ वर्ज्जने कर्म्मप्रवचनीयौ स्तः। आङ् मर्य्यादावचने। १।४।८९। आङ् मर्य्यादायामुक्तसंज्ञः स्यात्। वचनग्रहणादभिविधावपि। पञ्चम्यपाङ्परिभिः। एतैः कर्म्मप्रवचनीयैर्योगे पञ्चमी स्यात्। अप हरेः। परि हरेः। संसारः। परिरत्र वर्ज्जने। लक्षणादौ तु हरिम्परि। आमुक्तेः संसारः। आसकलाद्ब्रह्म। प्रतिः प्रतिनिधिप्रतिदानयोः। १।४।९२। एतयोरर्थयोः प्रतिरुक्तसंज्ञः स्यात्। प्रतिनिधिप्रतिदाने च यस्मात्। २।३।११। अत्र कर्म्मप्रवचनीयैर्योगे पञ्चमी स्यात्। प्रद्युम्नः कृष्णात्प्रति। तिलेभ्यः प्रतियच्छति माषान्। अकर्त्तर्य्यृणे पञ्चमी। २।३।२४। कर्त्तृवर्ज्जितं यद् ऋणं हेतुभूतं ततः पञ्चमी स्यात्। शताद्बद्धः। अकर्त्तरीति किं। शतेन बन्धितः। विभाषा गुणेऽस्त्रियां। २।३।२५। गुणे हेतावस्त्रीलिङ्गे पञ्चमी वा स्यात्। जाड्याज्जाड्येन वा बद्धः। गुण इति किं। धनेन कुलं। अस्त्रियामिति किं। बुद्ध्या मुक्तः। विभाषेति योगविभागादगुणे स्त्रियां च क्वचित्। धूमादग्निमान्। नास्ति घटोऽनुपलब्धेः॥ ॥

११ पाञ्चो विप्रो वा विप्रोपलक्षणं प्राह्रूपः सोऽत्र न गृह्यते वचनग्रहणसामर्थ्यान्न किंतु अवधिमात्रं विवक्ष्यत इत्यर्थ इत्य संग्रहः॥ यत्र मर्यादाशब्दो यस्मिन्नुच्यते न तु मर्यादावचनं। तद्धि आङ् मर्यादाभिविध्योरिति सूत्रं न त्वय आङ् दृष्टः स उक्तसंज्ञ इत्यर्थः। परिहरेरिति। हरिं वर्जयित्वेत्यर्थः। परेर्वर्जने वा वचनमिति वार्तिकात् पक्षे द्विर्वचनाभावः। परिरत्रेति। अत्र पंचमी विधौ वर्जनार्थेनापेन साहचर्यादिति भावः। आमुक्तेरिति। मुक्तिं मर्यादीकृत्येत्यर्थः। आसकलादिति। सकलमभिव्याप्येत्यर्थः। प्रतिनिधिप्रतिदाने। अस्मादेव निर्देशाल्लिंगादाभ्यां योगे पंचमी। ज्ञापकसिद्धं न सर्वत्रेति कृष्णस्य प्रतिनिधिरित्यपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सु॰
सि॰कौ॰
टी॰त॰
१३६

मुख्यस्याभावे सति तत्सदृशः उपादीयते स प्रतिनिधिः। दत्तस्य प्रतिनिर्यातनं प्रतिदानं। अकर्तरि। हेतुभूतमिति। हेताविन्यनुवर्तत इति भावः। [illegible]॥ तृतीयापवादोऽयं। ज्ञानेनेति। ज्ञानमिह उत्तमर्णाय धार्यमाणत्वादृणं तत्प्रयोजको हेतुश्चेति चकारात् कर्तृसंज्ञं च। बंधितइति। एवं ते प्रयोजककर्तुः ज्ञातस्य हेतुसंज्ञाप्यस्तीति पंचम्यत्रस्यादेवातो नाकर्तरीत्युक्तमिति भावः। योगविभागादिति। एतच्च हेतुमनुष्येभ्य इति सूत्रे पदमंजर्यां स्पष्टं। स्त्रियां चेति। बाहुलकं प्रकृतेस्तु दृष्टेरिति वार्तिकनिर्देशो पीह ज्ञापकः॥ ※ ॥ पृथग्विनाननु तृतीयाभावपक्षे एनपा द्वितीयेति प्रकृता द्वितीयैव स्यात्। यदि तु द्वितीयाविकल्पेन भवेत् तदा पंचम्यपि स्यात्। सा तु नित्यैव तस्माद्विभक्तित्रयसमावेशो दुरुपपाद इत्यत आह। अन्यतरस्यां ग्रहणं समुच्चयार्थमिति। निपातानामनेकार्थत्वादिति भावः। पंचमीति। तत्र मंडूकप्लुत्या पंचमी द्वितीया तु संनिहितैव। इह पृथगर्थैरिति सूत्रयितव्ये पर्यायत्रयोपादानं पर्यायांतरनिवृत्त्यर्थं तेन हिरुग्देवदत्तस्येत्यत्र नेत्याहुः। पृथङ्नानाभिस्तृतीयान्यतरस्यामिति सुवचं। नानाञिति प्रत्ययग्रहणे तदंतयोर्विनानानाप्रत्ययोर्लाभात्। नानेति। हिरुग्नाना च वर्जने इत्यमरः। नाना नारीर्निष्फला लोकयात्रेति प्रयोगः। करणे च। अन्यतरस्यामिति वर्तते पंचमीति च तेन करणे तृतीयायां प्राप्तायां पक्षे पंचमी विधीयते तया मुक्ते करणत्वादेव तृतीया सिद्धेत्याशयेनाह। तृतीयापंचम्योस्त इति। स्तोकेनेति। अनायासेन मुक्त इत्यर्थः। दूरं दूराद्दूरेणवेति। इह सत्त्वमप्यपि वक्ष्यते। किंच दूरांतिकार्थेभ्य इति सूत्रस्य सप्तम्यधिकरणे चेत्युत्तरसूत्रेप्यनुवर्तनादधिकरणेप्येभ्यो विभक्तिचतुष्टयं बोध्यं। तथा च प्रयुज्यते। दूरादावसथान्मूत्रं दूरात्पादावसेचनमिति। आवसथस्य दूरे इत्यर्थः। असत्त्ववचनस्येति। सत्त्ववचनत्वमिह सत्त्वविशेषकत्वं। एवं च सामानाधिकरण्येन प्रातिपदिकार्थविशेषकं व्युदस्यते तदाह। दूरः पंथा इति। एतेन

पृथग्विनानानाभिस्तृतीयाऽन्यतरस्यां। २।३।३२॥ एभिर्योगे तृतीया स्यात्पंचमी द्वितीये च। अन्यतरस्यां ग्रहणं समुच्चयार्थं पंचमीद्वितीये च। अनुवर्तेते। पृथक् रामेण। रामात्। रामं वा। एवं विना नाना॥ करणे च स्तोकाल्पकृच्छ्रकतिपयस्याऽसत्त्ववचनस्य। २।३।३३॥ एभ्योऽद्रव्यवचनेभ्यः करणे तृतीयापंचम्यौ स्तः। स्तोकेन स्तोकाद्वा मुक्तः। द्रव्ये तु स्तोकेन विषेण हतः॥ दूरान्तिकार्थेभ्यो द्वितीया च। २।३।३५॥ एभ्यो द्वितीया स्याच्चात्पंचमी तृतीये स्तः। प्रातिपदिकार्थमात्रे विधिरयं। ग्रामस्य दूरं दूरात् दूरेण वा॥ अन्तिकं। अन्तिकात्। अन्तिकेन वा। असत्त्ववचनस्येत्यनुवृत्तेर्नेह। दूरः

सुं

135

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

करणेचस्तोकेतिसूत्रेकरणेकिं। क्रियाविशेषणत्वेकर्मणिमाभूत्। स्तोकंपचति। क्रियानद्रव्यमितिप्राचांग्रंथोपिव्याख्यातः। नचक्रियायाविशेष्यत्वेन द्रव्यत्वावश्य
भावात्। नैनत्प्रत्युदाहरणंयुक्तमितिवाच्यं। धातुवाच्यायाःक्रियायाः असत्वरूपत्वस्याकरेप्रसिद्धत्वात्। नचविशेष्यत्वेनदनुपपत्तिः। कर्तृकर्मेतरकारका
लिंगानन्वयित्वमात्रेणासत्वरूपत्वोपपत्तेः। उक्तंच। क्रियानयुज्यतेलिंगक्रियानाधारकारकैः। असत्वरूपतातस्याइयमेवावधार्यतामिति। फलंव्यापारश्च
क्रिया। फलाधारकारकंकर्म। व्यापाराधारकारकंकर्त्रेतिविवेकः॥ इतिपंचमी ॥ ❀ ॥ षष्ठीशेषे। उपयुक्तादन्यःशेषःकर्मादयश्चप्रातिपदिकार्थपर्य
न्ता उपयुक्तास्तत्रद्वितीयादीनांविधानादत्तोव्याचष्टे। कारकप्रातिपदिकार्थव्यतिरिक्त इति। राज्ञःपुरुष इति। प्रत्ययार्थस्यप्रकृत्यर्थंप्रतिप्राधान्यादप्र

षष्ठीशेषे। २।३।५०॥ कारकप्रातिपदिकार्थव्यतिरिक्तःस्वस्वामिभावादिसम्बन्धश्शेषस्तत्रषष्ठीस्यात्। राज्ञःपुरुषः। कर्म्मादीनामपिसम्बन्ध
मात्रविवक्षायांषष्ठ्येव। सतांगतं। सर्पिषोजानीते। मातुःस्मरति। एधोदकस्योपस्कुरुते। भजेशम्भोश्चरणयोः। फलानान्तृप्तः। षष्ठीहेतुप्रयो
गे। २।३।२६॥ हेतुशब्दप्रयोगेहेतौद्योत्येषष्ठीस्यात्। अन्नस्यहेतोर्वसति। सर्वनाम्नस्तृतीयाच। २।३।२७। सर्वनाम्नोहेतुशब्दप्रयोगेहेतौद्यो
त्येतृतीयास्यात्षष्ठीच। केनहेतुनावसति। कस्यहेतोः। निमित्तपर्य्यायप्रयोगेसर्वासाम्प्रायोदर्शनं॥ किन्निमित्तंवसति। केननिमित्तेन। कस्मैनि
मित्तायेत्यादि। एवङ्किङ्कारणं। कोहेतुः। किम्प्रयोजनमित्यादि। प्रायग्रहणादसर्वनाम्नःप्रथमाद्वितीयेनस्तः। ज्ञानेननिमित्तेनहरिस्सेव्यः ॥ज्ञानाय निमित्तायेत्यादि॥

धानादेवषष्ठी। प्रत्ययार्थोस्तिहपुरुषविशेषणंराजनिरूपितसेवकत्वसंबंधवान्पुरुषइत्यर्थविवक्षायांप्रधानात्पुरुषशब्दान्न
षष्ठी। उक्तन्यायविरोधात्। शेषत्वाभावाच्च। राज्ञःपुरुषस्तिष्ठतीत्यादौपुरुषशब्दोहिप्रातिपदिकार्थमात्रवृत्तिः। राज्ञःपुरुषेणकृतमित्यादौकारकार्थकः। यदातु
पुरुषनिरूपितसेव्यत्वसंबंधवान्राजेत्यर्थविवक्षातदापुरुषशब्दादपिषष्ठीभवत्येवपुरुषस्यराजेति। यत्तु अप्रधानंशेषइतिकेश्चिदुक्तंतन्न। प्रातिपदि
कार्थमात्रेशुक्लःपटः कृष्णोघटइत्यादौविशेषणेषष्ठीप्रसंगात्। नचप्रथमयावाधःतस्याःप्रधानेचरितार्थत्वात्। कर्मादीनामपीति। यथाविशेषाविवक्षायां
रूपवानितिप्रयुज्यतेविशेषविवक्षायांतुनीलःपीतइत्यादितथाइदमपिन्यायसिद्धमितिभावः। सतांगतमिति। सत्पुरुषसंबंधिगमनमित्यर्थः। संतोग

CC-0. In Public Domain. Digitization by eGangotri



च्छंतीत्यत्र त्वाख्यातेन कर्तृत्वसंबंधस्योक्तत्वात्। संबंधमात्रविवक्षा कर्तुं न शक्यत इति षष्ठी ह न भवति। किंतु प्रातिपदिकार्थमात्रे प्रथमैवेत्याहुः। सर्पिषो जा
नीते इति। वस्तुतः करणस्य संबंधमात्रविवक्षया षष्ठी। सर्पिः संबंधिप्रवर्तननिमित्यर्थः। अकर्मकाच्चेत्यनुपसर्गादित्य नेन वा जानातेस्तङ्। अन्ये तु व्याचख्युः
कर्मणः शेषत्वविवक्षया षष्ठी। सर्पिः संबंधि ज्ञानमित्यर्थ इति। एधोदकस्येति। एधाश्च उदकं च तेषां समाहारः एधोदकं। जातिरप्राणिनामित्येकवद्भावः
यद्वा। एधांसि च उदकं चेति विग्रहे पूर्ववदेकवद्भावः। उदकपर्यायोदकशब्दोऽप्यस्ति। तथा च। हलायुधः। भुवनममृतं जीवनीयं दकं चेति। उपस्कुरुते इ
ति। गंधनादिसूत्रेणात्मनेपदं उपात्प्रतियत्नेति सुट्। न चैवं ज्ञोविदर्थस्य करणे। अधीगर्थदयेशां कर्मणि। कृञः प्रतियत्ने। रुजार्थानां भाववचनानामज्व
रेः आशिषि नाथः। जासिनिप्रहणनाटक्राथपिषां हिंसायां। व्यवहृपणोः समर्थयोः। कृत्वोऽर्थप्रयोगे कालेऽधिकरणे इति शेषषष्ठीविधानार्थेयं मष्टसूत्री
निष्फला स्यादिति वाच्यं। सर्पिषो ज्ञानमित्यादौ तस्याः समासनिवृत्तिफलकत्वात्। तथा हि। ज्ञोविदर्थस्येत्यादौ शेष इत्यनुवर्तते। शेषत्वे विवक्षिते तु करणा
दौ षष्ठी सिद्धैव। तदयमर्थः। इह षष्ठ्येव न तु न लुक्। तथा च लुकः प्रयोजकीभूतस्समास एव न भवतीति। न चाष्टसूत्र्या लुक्मात्रनिवृत्तिफलकत्वमेवा
स्तु समासस्तु स्त्रीक्रियतामिति वाच्यं। इष्टानुरोधेन समास एव न भवतीति व्याख्यानस्योचितत्वात्। तथा च वार्त्तिकं प्रतिपदविधाना षष्ठी न समस्यत इति। हरि।
श्चाह। कारके व्यपदिष्टे च श्रूयमाणे क्रिये पुनः। शेषेति प्रतिपदं षष्ठीसमासस्य निवृत्तये इति। एवं च शेषत्वविवक्षायां सर्पिषो ज्ञानं मातुः स्मरणमित्यादीन्यसमस्ता
न्येव साधूनि। हरिस्मरणमित्यादीनि तु शेषत्वाविवक्षायां कृद्योगषष्ठ्या समासे बोध्यानि तत्र च कारकपूर्वकत्वात् गतिकारकेत्यादिना कृदुत्तरपदप्रकृतिस्वरेण मध्यो
दात्तत्वं भवति। शेषषष्ठ्या समासे तु अंतोदात्तत्वं स्यात्तच्चानिष्टं। तथा च स्वरार्थेयमष्टसूत्रीति निष्कर्षः। किंच मातुः स्मृतमित्यादौ समासाभावोऽपि फलं। न हि तत्र कारकष
ष्ठी लभ्यते तेन लोकेति निषेधात्। आह च। निष्ठायां कर्मविषयायां षष्ठी च प्रतिषिध्यते। शेषलक्षणया षष्ठ्या समासस्तत्र नेष्यत इति। एतच्च मनोरमायां स्थितं। षष्ठी हेतु
अत्र हेताविव्यनुवर्तते तदाह। हेतौ द्योत्य इति। अन्नस्येति। हेताविति तृतीयायां प्राप्तायामनेन षष्ठी। हेतुप्रयोगे किं। अन्नेन वसति। हेतौ द्योत्ये किं। अन्नशब्दात् षष्ठी 136
यथा स्यादिति एके। अन्नस्य हेतोस्तुभ्यं नम इत्यत्र युष्मच्छब्दान्मा भूदित्यन्ये। सर्वनाम्नस्तृतीया च। इह सर्वनाम्न इति प्रयोगापेक्षया षष्ठी। पंचम्यां तु हेतुशब्दात् षष्ठी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयेन स्यात्नामित्याशयेनाह। सर्वनाम्नो हेतुशब्दस्य चेति। कस्मान्न भवतीत्यपेक्षायां अर्थात् सर्वनाम हेतुभ्यामिति संबध्यते। अत्र व्याचख्युः। यद्यपि सर्वनाम्न
इति पदस्य पंचम्यंतत्वेपि हेतुशब्दस्य विशेषणत्वे सामानाधिकरण्याद्युपपद्यत इति न सन्ति लक्ष्यापि विशेष्यत्वे त्वयं विधिर्न स्यादिति बोध्यमिति। निमित्तपर्या
येति। पर्यायग्रहणस्य फलमाह। एवमित्यादिना। एतद्वार्त्तिकेन षष्ठी हेतुप्रयोगे सर्वनाम्नस्तृतीया चेति सूत्रद्वयं गतार्थमिति बोध्यं॥ ॥ षष्ठ्यतसा। दक्षि
णोत्तराभ्यामतसुजिति अस्य योऽर्थो दिग्देशकालरूपः सोऽर्थो यस्य प्रत्ययस्य सो तसर्थप्रत्ययः अस्तातिप्रभृतिर्यं चतरं तेन योगे इत्यर्थः। अतसुचोऽस्तात्यनंतरत्वेपि
लाघवानुरोधेन अस्तात्यर्थेति नोक्तमित्याहुः। पंचम्या अपवाद इति। ततः पश्चात् स्रंस्यते ध्वंस्यते चेति भाष्यप्रयोगात् पश्चाच्छब्दयोगे तु पंचम्यपि साधु। अस्मा

षष्ठ्यतसर्थप्रत्ययेन। २।३।३०॥ एतद्योगे षष्ठी स्यात्। दिक्छब्देति पञ्चम्याऽपवादः। ग्रामस्य दक्षिणतः। पुरः पुरस्तात्। उपरि उपरिष्टात्। एन
पा द्वितीया। २।३।३१। एनबन्तेन योगे द्वितीया स्यात्। एनपेति योगविभागात् षष्ठ्यपि। दक्षिणेन ग्रामं ग्रामस्य वा। एवमुत्तरेण। दूरान्तिकार्थैः
षष्ठ्यन्यतरस्यां। २।३।३४॥ एतैर्योगे षष्ठी स्यात् पञ्चमी च। दूरं निकटं ग्रामस्य ग्रामाद्वा। ज्ञोऽविदर्थस्य करणे। २।३।५१॥ जानातेरज्ञानार्थस्य कर
णे शेषत्वेन विवक्षिते षष्ठी स्यात्। सर्पिषो ज्ञानं॥ अधीगर्थदयेशां कर्मणि। २।३।५२। एषां कर्मणि शेषे षष्ठी स्यात्। मातुः स्मरणं। सर्पिषो द
यनं ईशनं वा॥ कृञः प्रतियत्ने। २।३।५३॥ कृञः कर्मणि शेषे षष्ठी गुणाधाने। एधोदकस्योपस्करणं॥ ॥ ऽऽ देवभाष्यप्रयोगात्पश्चाच्छब्देना

व्ययीभावो न भवतीति वक्ष्यते। प्रत्ययग्रहणं किं। इह मा भूत् प्राक् ग्रामात् प्रत्यग्ग्रामात्। कृतेपि प्रत्ययग्रहणे कुतो नेति चेत् अत्राहुः। केप्यदादयः प्रत्ययग्रहणं अ
धिकं क्रियमाणं श्रूयमाणप्रत्ययग्रहणार्थं विज्ञास्यत इति लुप्ते अस्ताति षष्ठ्यभावः। अन्यारादीत्यत्राञ्चूत्तरपदस्यापीदं प्रयोजनमुक्तं। तत्रान्यतरच्छक्यमवक्तु
मेकप्रयोजनत्वादिति। प्रत्ययग्रहणं चिंत्यप्रयोजनमिति तु मनोरमायां स्थितं। पुर इति। पूर्वाधरावराणामित्यस्मिप्रत्यये पुरादेशः। पुरस्तादिति। दिक्छब्देभ्य इत्यादि।
ना अस्तातिः। अस्ताति चेति पूर्वस्य पुरादेशः। एनपा। कथं तर्हि तत्रागारं धनपतिगृहानुत्तरेणास्मदीयमिति। उत्तरेणास्मात् दूराद्धर्म्यं सुरपतिधनुश्चारुणा तोरणे
नेति तोरणसमानाधिकरणे तृतीयांतं न त्वेनबंतमित्याहुः। धनपतिगृहानुत्तरेणेति केचित्पठन्ति तदा तु सम्यगेवा। दक्षिणेनेति। दक्षिणस्यामदूर इत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



एनवं ऽन्यतरस्यामित्यादिनाएनप्। दूरान्तिकार्थैः। षष्ठ्यां प्राप्तायां पक्षे पंचम्यर्थं वचनं द्वितीयान्यतरस्यांग्रहणं समुच्चयार्थं। तेन विप्रकृष्टापि पंचमी समुच्चीयते व्याख्यानात्। न तु सं
न्निहिते अपि द्वितीयातृतीये। तदेतदाह। पंचमी चेति। सर्पिषो ज्ञानमिति। वस्तुतः करणीभूतं यत्सर्पिः तत्संबंधिनी प्रवृत्तिरित्यर्थः। ज्ञानपूर्विकायां प्रवृत्तौ जानातेर्लक्षणा। अ
धीगर्थ। अधिशब्दोच्चारणमिङिकाव्ध्युपसर्गनिव्यभिचरतइति ज्ञापनार्थं अन्यथास्मृत्यर्थदयेशामित्येव ब्रूयात् इगर्थेति वा इङः। ष्ठोने दं ज्ञापकमिति चेत्तर्हि तदंशेलोरध्या
यने वृत्तं इत्यत्राधिशब्दोच्चारणं ज्ञापकमस्तु। अत्र व्याचख्युः कर्मणीति किं। करणे शेषत्वविवक्षायां मा भूत्। मातुर्गुणैस्मरणं अत्र मातात् कर्म गुणाः करणं। उभयत्र शे

रुजार्थानां भाववचनानामज्वरेः। २।३।५४। भावकर्तृकाणां ज्वरिवर्जितानां रुजार्थानां कर्मणि शेषे षष्ठी स्यात्। चौरस्य रोगस्य रुजा। अज्वरिसन्ता
प्योरिति वाच्यं। रोगस्य चौरज्वरः। चौरसन्तापो वा। रोगकर्तृक चौरसम्बन्धिज्वरादिकमित्यर्थः। आशिषि नाथः। २।३।५५। आशिरर्थस्य नाथते
शेषे कर्मणि षष्ठी स्यात्। सर्पिषो नाथनं। आशिषीति किं। माणवकनाथनं। तत्सम्बन्धिनी याच्ञेत्यर्थः। जासिनिप्रहणनाटक्राथपिषां
हिंसायां। २।३।५६। हिंसार्थानामेषां शेषे कर्मणि षष्ठी स्यात्। चौरस्योज्जासनं। निप्रौ संहतौ विपर्यस्तौ व्यस्तौ वा। चौरस्य निप्रहणनं। प्रणि
हननं। निहननं। प्रहणनं वा। नट अवस्यन्दने चुरादिः। चौरस्योन्नाटनं चौरस्य क्राथनं वृषलस्य पेषणं। हिंसायां किं। धानापेषणं। व्यव
हृपणोः समर्थयोः। २।३।५७। शेषे कर्मणि षष्ठी स्यात्। द्यूते क्रयविक्रयव्यवहारे चानयोस्तुल्यार्थता। शतस्य व्यवहरणं। पणनं वा। सम
॥ र्थयोः किं। शलाकाव्यवहारः। गणनेत्यर्थः। ब्राह्मणपणनं

षत्वविवक्षायामपि मातृशब्दादेवानेन सूत्रेण षष्ठी गुणशब्दात्तु षष्ठी शेष इत्यनेनातेन गुणस्म
रणमिति समासो भवतीति॥ ॐ ॥ रुजार्थानां। रुजो भंगे। भिदादिपाठादन एव निपातनाद्वा अङ्टाप्। रुजा व्याधिरर्थो येषां तेषां रुजार्थानां धातूनां भाववा
चकत्वाव्यभिचारात् भावशब्देनात्र घञादिवाच्यः सिद्धरूपो भाव उच्यते। वक्तीति वचनः बाहुलकात्कर्तरि ल्युट्। प्रकृत्यर्थस्तु न विवक्षितः। नहि भावो वक्ता
संभवति तस्मात् प्रत्ययस्य साधुत्वनिर्वाहायैव वचिरिति बोध्यं तथा चायमर्थः। भावो वचनः कर्ता येषां तेषां भाववचनानामिति तदेतद्व्याचष्टे। भावकर्तृका
णामिति। रुजार्थानां भावकर्तृकाणामित्येव सूत्रयितुं युक्तं। चौरस्येति। चुराशीलमस्य चौरः। अत्र ˇ ˇयां अनेन षष्ठी। रोगस्येति। परुजे

कर्मणि शेषत्वविवक्षा १

137

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तिघञारोगोभावोभिधीयतेसचरुजायांकर्त्ता। कर्तृकर्मणोरितिरोगशब्दात्षष्ठी। भावकर्तृकाणांकिं। श्लेष्मणश्चौररुजा। मायुःपित्तंकफःश्लेष्मेत्यमरः। चौरज्वरइति। इ
हचौरशब्दात्रुजार्थानामितिषष्ठ्याअप्रवृत्तौषष्ठीशेषइत्यनेनषष्ठीषष्ठीतिसमासोभवत्येवेतिभावः। सर्पिषोनाथनमिति। सर्पिर्मेभूयादित्याऽऽशासनमित्य।
र्थः। माणवकनाथनमिति। यद्यपिकर्मत्वविवक्षायांकर्तृकर्मणोरितियदाषष्ठीतदाआशिष्यपिसमासोस्त्येवतथापितत्रगतिकारकोपपदात्कृदितिकृदु।
त्तरपदप्रकृतिस्वरःसमासांतोदात्तत्वंतुयाथा। दावेवनत्वाधिवीतिनिष्कर्षइतिकौमुभस्थितं। जासि। जसुताडनेजसुहिंसायामितिचचुरादिस्सस्येदंग्रहणंन
नुदैवादिकस्यजसुमोक्षणइत्यस्यजासीतिनिर्देशाद्धिंसायामितिवचनाच्चानिग्रहणेनमिति। हंतेरनपूर्वस्येतिणत्वं। प्रणीति। नेर्गदेतिणत्वं। चुरादिरिति। नटनृ
त्तावितित्तुनगृत्वान्तेदीर्घनिर्देशादितिभावः। क्राथनमिति। क्रथहिंसायामितिघटादौपठ्यतेतस्यमित्वेपिरहनिपातनाद्वृद्धिः। मित्वफलंतुनिपातनाऽपरत्वाच्चि।
दिवस्तदर्थस्य। २।३।५८॥ द्यूतार्थक्रयविक्रयरूपव्यवहारार्थस्यचदिवःकर्म्मणिषष्ठीस्यात्। शतस्यदीव्यति। तदर्थस्यकिं। ब्राह्मणंदी
व्यतिस्तोतीत्यर्थः। विभाषोपसर्गे। २।३।५९॥ पूर्वयोगापवादः। शतस्यशतंवाप्रतिदीव्यति। प्रेष्यब्रुवोर्हविषोदेवतासम्प्रदाने। २।३।६१।
देवतासम्प्रदानकेर्थेवर्त्तमानयोःप्रेष्यब्रुवोःकर्म्मणोहविर्विशेषस्यवाचकाच्छब्दात्षष्ठीस्यात्। अग्नयेछागस्यहविषोवपायामेदसःप्रे
एणमुलोरितिदीर्घेचरितार्थमितिघटादौवक्ष्यति॥ यत्तुहरदत्तेनोक्तं। घटादिपाठःघटादयःषितइत्यातिदेशकत्वेअङ्यथास्यात्॥९ ष्यअनुब्रूहिवा
दित्येतदर्थइति। तन्मतं। घटादयःषितइतिहिमध्येसूत्रितंतेनपूर्वेषांत्वरत्वंतानामेवषित्वंनतुज्वरादीनांपरेषामिति। अतएवत्वरत्वंतानास्त्रयोदशानुदा
त्ताःषितश्चेतिघटादौवक्ष्यति। पणनमिति। स्तुतावेवेतिवक्ष्यमाणत्वादायस्याभावः। ब्राह्मणपणनमिति। आयादयआर्द्धधातुकेवेत्यायस्यविकल्पः दिवः
॥ ⁘ ॥ दिवस्तदर्थस्य॥ तच्छब्देन। व्यवहृपणोःपरामृश्यतेतौचद्यूतेक्रयविक्रयव्यवहारेचतुल्यार्थौपूर्वसूत्रेगृहीतावित्याशयेनाह। द्यूतेति। पूर्वसूत्रएव[illegible]पाठेतदर्थ
स्येतिनकर्तव्यमितियद्यपिलाघवंतथापियोगविभागउत्तरार्थः। कर्मणीति। इहशेषइतिनसंबध्यतेउत्तरसूत्रेविकल्पारंभसामर्थ्यात्। अन्यथाषष्ठ्यांविक
ल्पितायांतयामुक्तेशेषेविभक्त्यंतरस्याप्राप्त्यावृथैवविकल्पारंभःस्यादितिभावः। अन्येत्वाहुः। लाघवात्पूर्वसूत्रएवदिवोग्रहणेकर्तव्येएषयोगकरणं।

CC-0. In Public Domain. Digitization by eGangotri



सामर्थ्यादत्र शेष इति न संबध्यते। न चोत्तरार्थत्वात्पृथग्योगस्य नोक्तार्थज्ञापकत्वमिति वाच्यं। संकोचे मानाभावेन फलद्वयस्यापि सुवचत्वात्। इति शेष इत्यस्यासंबंधादिह त्रि
सूत्र्यां तिङं तमुदाहरति। ग्रामस्य दीव्यतीति। प्रेष्यब्रुवोः। इष्यतेर्दैवादिकस्य लोटो मध्यमपुरुषैकवचनं। प्रेष्येति। तत्साहचर्यात्तु विरचितया भूत एव गृह्यते। अत
एवेह शेषग्रहणं न संबध्यते तिङन्तेन सह समासस्याप्रसक्तत्वात्। प्रेष्यब्रुवोः किं। अग्नये छागस्य हविर्वपां मेदो जुहुधि। हविषः किं। अग्नये गोमयानि प्रेष्य
देवतासंप्रदाने किं। माणवकाय पुरोडाशान् प्रेष्य। हविषः। प्रस्थितत्वेन विशेषणे प्रतिषेधो वक्तव्यः। इन्द्राग्निभ्यां छागस्य हविर्वपां मेदः प्रस्थितं प्रेष्य।
॥ ❀ ॥ कृत्वोर्थ। कृत्वसुचोर्थ इवार्थो येषां प्रत्ययानां ते कृत्वोर्थाः। शेष इति। इहहि वेत्सरदर्थेत्यादिसूत्रषट्के विच्छिन्नमपि शेषग्रहणमनुवर्तते व्याख्याना

कृत्वोर्थप्रयोगे कालेऽधिकरणे। २।३।६४। कृत्वोर्थानां प्रयोगे कालवाचिन्यधिकरणे शेषे षष्ठी स्यात्। पञ्चकृत्वोह्नो भोजनं। द्विरह्नो भोजनं
शेषे किं। द्विरहन्यध्ययनं। कर्तृकर्मणोः कृति। २।३।६५। कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात्। कृष्णस्य कृतिः। जगतः कर्ता कृष्णः। गुणकर्म
णि वेष्यते॥ नेताश्वस्य स्रुघ्नं स्रुघ्नस्य वा। कृति किं। तद्धिते मा भूत्। कृतपूर्वी कटं। उभयप्राप्तौ कर्मणि। २।३।६६। उभयोः प्राप्तिर्यस्मिन्कृति
तत्र कर्मण्येव षष्ठी स्यात्। आश्चर्यो गवां दोहोऽगोपेन। स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः। भेदिका बिभित्सा वा रुद्रस्य जगतः। शेषे विभा
षा। स्त्रीप्रत्यय इत्येके। विचित्रा जगतः कृतिर्हरेर्हरिणा वा। केचिदविशेषेण विभाषामिच्छन्ति। शब्दानामनुशासनमाचार्येणाचार्यस्य वा
क्तस्य च वर्त्तमाने। २।३।६७। वर्त्तमानार्थस्य क्तस्य योगे षष्ठी स्यात्। न लोकेत्यति निषेधस्यापवादः॥ राज्ञां मतो बुद्धः पूजितो वा॥ ॥

त्वपंचकृत्व इति। संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्। द्वित्रिचतुर्भ्यः सुच्। कर्तृकर्मणोः कृति। शेष इति निवृत्तं कर्तरि च कृती जिसूत्रे कृते चकारेण अधीगर्थेति
सूत्राच्चतुर्थ्यर्थे बहुलं छन्दसीति पर्यन्तमनुवर्तमानस्य कर्मणीत्यस्यानुकर्षणसंभवेपि पुनरत्र कर्मग्रहणादित्याहुः तन्मंदं संनिहितस्याधिकरणस्यानुकर्षणप्रसंगेन तन्नि 138
वृत्तये कर्मग्रहणसंभवात् तस्मात् व्याख्यानमेवात्र शरणमित्यपरे। कर्तृकर्मणोः किं। शास्त्रेण भेत्ता। कृतिरिति। करणं कृतिः स्त्रियां क्तिन् कृष्णोऽत्र कर्ता। कर्मण्युदाहरति
जगत इति। कृष्णस्य तु चाभिहितत्वात्ततः षष्ठी न भवति। कृतिकिमिति। नन्विह कर्तृकर्मभ्यां क्रिया आक्षिप्यते तद्वाचीतु धातुरेव। धातोश्च द्वये प्रत्ययाः कृतस्तिङश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र तिङ्प्रयोगे कटं करोतीत्यादौ न लोकेति प्रतिषेधेन भाव्यं ततश्च परिशेषात् कृद्योगे एव षष्ठी भविष्यति तस्मात्किं कृद्ग्रहणेनेति प्रश्नः। कृतपूर्वी कटमिति। अत्र क
रोतिक्रियापेक्षमनभिहितं कर्मत्वं कटस्यास्त्येवेति षष्ठी स्यात्तद्धिताधिक्ये तु सामाभूदित्येतदर्थं कृद्ग्रहणमिति भावः। ननु कृतः कटः पूर्वमनेनेत्यस्मिन्विग्रहे क्त
स्य कर्मणि विधानात्तेनैवाभिहितं कर्मेति नैव द्वितीया प्राप्नोति नापि तदपवादभूता षष्ठी इहाप्यनभिहिताधिकारात्। किंच। कृतशब्दस्य कटसापेक्षतया समासो दु
र्लभ एव तद्धितोऽपीति चेदत्राहुः। पूर्वं कृतमनेनेति विग्रहे अविवक्षितकर्मतया भावे क्तप्रत्यये कृते कृतशब्दस्य कटसापेक्षत्वाभावात्। समासतद्धितौ भवत एव तथा च
कृतपूर्वीत्यस्यायं पूर्वं कृतवान् इत्यनेन समासार्थः। संपद्यते गुणभूतयापि क्रियया कारकाणां संबंधस्य कटं कृतवानित्यादौ दर्शनादत्रापि करोतिक्रियापेक्षं कर्मत्वं
कटस्याभ्युपगम्यते। तच्च कर्मत्वं न केनाप्यभिहितं। भावे क्तस्य कर्तरि इनिप्रत्ययस्य च विधानात्। अतोऽसति कृद्ग्रहणे षष्ठी स्यादेवेति। एवं च ओदनस्य पाच
कतम इत्यत्र षष्ठ्या असाधुत्वे इष्टापत्तिरेव शरणं। कृतपूर्वीत्यत्र समासतद्धितौ भवत एवेत्युक्तं। तत्र समासः सुप्सुपेति बोध्यः। तद्धितस्तु पूर्वादिनिः सपूर्वाच्चेति कर्तरि
इनिः तद्विधौ चाद्य मनेनेति सूत्रा -------- दनेनेत्यनुवृत्तेः। स्यादेतत्। अभिदर्णयंतात् पर्यायार्हणोऽन्यत्तिषु बधितिस्तु विभेदिकायज्ञदत्तस्य देवदत्तस्य काष्ठानामित्युभा
भ्यामप्यनेन कृद्योगषष्ठी जायते। तत्र मुख्यामुख्यसन्निधौ मुख्यस्यैव कार्यसंप्रत्ययात् प्रयोजककर्तृवाचकाद्देवस्यादन्यथा पाचयत्योदनं देवदत्तेन यज्ञदत्त इ
त्यत्र प्रयोज्यप्रयोजकयोरुभयोरपि लकारवाच्यत्वे उभाभ्यामपि कर्तृवाचकाभ्यां प्रथमा स्यात्तामेवं। प्रयोज्यप्रयोजकवाचकाभ्यां भेदेन षष्ठी जायते न त्वेकैवेति नेह मुख्या
मुख्यन्यायप्रवृत्तिः। तत्र तु लकारस्यैकत्वात् कर्तृसद्भाव्यत्वकल्पनायामुक्तन्यायं प्रवर्तत इति वैषम्यात्। एवं च ओदनः पाच्यते देवदत्तेन यज्ञदत्तेनेत्यादावुभाभ्यामपि
तृतीया स्यादिति देवेति बोध्यं अव व्याचक्षते। तदर्हमिति निर्देशात् कर्तृकर्मणोः कृतीत्येतदनित्यं तथा च धर्ये यरामोदमुत्तममिति मद्दृष्टप्रयोगः संगच्छत इति। उभयप्राप्तौ
कृतीत्यनुवर्तते। तेनान्यपदार्थलाभाद्बहुव्रीहिरित्याह। उभयोः प्राप्तिर्यस्मिन्निति। उभयशब्देन कर्तृकर्मणी परामृश्येते। तेनैकस्मिन् कृति कर्तृकर्मणोः
प्राप्तिरिति लाभादाश्चर्यमिदमोदनस्य पाको ब्राह्मणानां च प्रादुर्भाव इत्यत्र नायं नियमः प्रवर्तते तत्पुरुषे तु स्यादेवातिप्रसंग इति भावः। पूर्वसूत्रेणैव सिद्धे
नियमार्थमिदमिति ध्वनयति। कर्मण्येवेति। एवं च कर्तरि षष्ठीप्रतिषेधोऽस्य सूत्रस्य फलं न तु कर्मणि षष्ठीविधानमिति स्थितं। स्त्रीप्रत्यययोरिति। स्त्रियां क्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु·
सि·कौ·
टी·त·
१४०

नित्यधिकारे विहितयोरित्यर्थः। नायं नियम इति। अकाःकारयोः प्रयोगे कर्मण्येव षष्ठी न तु कर्तरीति यो नियम उक्तः स न प्रवर्तते किंतु कर्तर्यपि षष्ठी प्रवर्तत इति फ
लितोर्थः। कथं तर्हि सुदूतिष्योरिति सूत्रे सुदासीयुटो बाधो नेति वृत्तिः। अत्राहुः। कर्तुः करणत्वविवक्षायां तृतीया बोध्येति। भेदिकेति। भिदनं भेदिका। पर्यायार्हणो
त्पत्तिषु ण्वुच् धात्वर्थनिर्देशे ण्वुल् वक्तव्य इत्यनेन ण्वुलित्येके। युवोरनाकाविति। स्त्रियां टापि प्रत्ययस्थादिति इत्वं। विभित्सेति। भेत्तुमिच्छा। भिदेस्सनि हलन्ताच्चेति कित्वा
द्गुणाभावः। अप्रत्ययादित्यकारप्रत्यये टाप्। शेषे इति। अकाऽकाराभ्यामन्यस्मिन् क्तिनादावित्यर्थः। कर्तरि षष्ठी निषेधफलकस्योभयप्राप्ताविति सूत्रस्य तत्रै
व कर्तरि षष्ठी संपादनफलकस्य स्त्रीप्रत्यययोरकाकारयोरिति वचनस्य च प्राक् स्थितत्वात् कर्तर्येव विभाषा अनेन शेषवचनेन क्रियते न तु कर्मणीत्याशय

अधिकरणवाचिनश्च। २।३।६८। क्तस्य योगे षष्ठी स्यात्। इदमेषां मासितं॥ न लोकाव्ययनिष्ठाखलर्थतृनां। २।३।६९॥ एषां प्रयोगे षष्ठी न स्या
त्। लादेशाः। कुर्वन् कुर्वाणः सृष्टिं हरिः। उ। हरिं दिदृक्षुः अलङ्करिष्णुर्वा। उक। दैत्यान् घातुको हरिः। कमेरनिषेधः। लक्ष्म्याः कामुको हरिः। अ
व्ययं। जगत् सृष्ट्वा। सुखं कर्तुं। निष्ठा। विष्णुना हता दैत्याः। दैत्यान् हतवान् विष्णुः। खलर्थः। ईषत्करः प्रपञ्चो हरिणा। तृन्निति प्रत्याहारः। शतृशानचा
विति तृशब्दादारभ्य तृनो नकारात्। शानन्। सोमं पवमानः। चानश्। आत्मानं मण्डयमानः। शतृ। वेदमधीयन्। तृन्। कर्ता लोकान्। द्विषश्शतु
र्वा॥ मुरस्य मुरं वा द्विषन्॥ सर्वोऽयं कारकषष्ठ्याः प्रतिषेधः। शेषे षष्ठी तु स्यादेव। ब्राह्मणस्य कुर्वन्। नरकस्य जिष्णुः॥ ॥ ॥

णादाहरति। जगतः कृतिर्हरेर्हरिणा वेति। अविशेषेणेति। अकाकारभिन्ने कृन्मात्र इत्यर्थः। अनुशासनमिति। अनुशिष्यन्तेऽसाधुशब्देभ्यः प्रविभज्य बोध्यं १३९
ते येनेति करणे ल्युट्। सतां मत इत्यादि। मतिबुद्धिपूजार्थेभ्यश्चेति वर्तमाने क्तः। पूजितो यः सुरासुरैरित्यादौ तु भूते क्तो न तु वर्तमाने तेन तृतीया तत्रोपपद्यते। न च
मतिबुद्धीति सूत्रेण बाधः शङ्क्यः तेनेत्यधिकारे उपज्ञात इति लिङ्गेनाबाधज्ञापनात्॥ ॥ अधिकरण। अयमपि निषेधापवादः। आसितमिति। आस्यतेऽस्मि
न्नित्यासितं क्तोऽधिकरणे चेत्यधिकरणे क्तः। इदमेषामिति। कर्तरि षष्ठीयं। सकर्मकेभ्यस्त्वधिकरणे क्ते कर्तृकर्मणोर्द्वयोरपि षष्ठी अनभिहितत्वाविशेषात्। इ
दमेषां भुक्तमोदनस्य। उभयप्राप्तौ कर्मणीत्ययं नियमस्तु नेह। प्रवर्तते कर्तृकर्मणोः कृतीत्यनन्तरस्य एदषष्ठ्याः तन्नियमाभ्युपगमात्। एतच्च कौस्तुभे स्पष्टं। न लोक

CC-0. In Public Domain. Digitization by eGangotri

जिघृक्षितत्वस्य विनाऽप्रसंगान्नूनामित्यत्र णत्वं न कृतं। उश्च उकश्च उकौ लश्च उकौ चेति विग्रहः। लइति खडादीनां सामान्यग्रहणं तेषां च साहचर्यात्प्रयोगे न संभवतीति
तदादेशा गृह्यंत इत्याह। लादेशा इति। उदाहृतं तद्विशेषः कटंकारयां चकारेत्यत्र कृत्संज्ञकलिडं तस्मिंस्तेन योगेऽपि कटस्य कर्तृकर्मणोः कृतीति षष्ठी न भवति आमइ
तिलुकोऽपि लादेशत्वादित्याहुः। नन्वेवमपि बभ्रिर्वज्रं पपिः सोमं ददिर्गा इत्यत्र न लोकेति निषेधाप्रवृत्तेः षष्ठी दुर्वारैवा नहि किकिनौ लकारो नापि तदादेशौ नैषदो
षः किकिनौ लिट् चेत्यनेन लिट्कार्यातिदेशः क्रियते न तु लिट्संज्ञा तथा च विशेषातिदेशे च सामान्य मप्यतिदिश्यत इति नानुपपत्तिः। ददिः सुरिति। सनाशं
सभिक्षुः। उकारेण कृतो विशेषणं तदन्तमपि लभ्यत इत्याशयेनाह। अलंकरिष्णुरिति। अलंकृञ्निराकृञ् इत्यादिना इष्णुच्। घातुक इति। लषपतेत्यादिना
उकञ्। ईषत्कर इति। ईषद्दुःसुष्विति खल्। अर्थग्रहणादीषत्पानः सोमो भवतेत्यप्युदाहार्यं। अव्याप्तिपरिहर्तुमाह। प्रत्याहार इति। वचमान इति

अकेनोर्भविष्यदाधमर्ण्ययोः। २।३।७०॥ भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थेनश्चयोगे षष्ठी न स्यात्। सतः पालकोऽवतरति। व्रजङ्गामी
शतं दायी। कृत्यानां कर्तरि वा। २।३।७१॥ षष्ठी वा स्यात्। मया मम वा सेव्यो हरिः। कर्तरीति किं। गेयो माणवकः साम्नां। भव्यगेयेति कर्तरि
यद्विधानादनभिहितं कर्म। अत्र योगो विभज्यते। कृत्यानां उभयप्राप्तौ विति नेति चानुवर्तते। नेतव्या व्रजं गावः कृष्णेन। ततः कर्तृ

पूङ्यजोः शानन्। मंड्यमान इति। मडि भूषायामिदित्वान्नुम्। ताच्छील्यवयोवचनेति चानश्। अधीयन्निति। इङ्धार्योरिति। शत्। नाशा॥ शिवा उक्तोर्थः
ननोदिष्कुलव इत्यनन्तुहृत्या लादेशा इत्यसिद्धेः प्रत्याहारग्रहणमाश्रीयत इति भावः। तृन्निति। न च्छीलादिषु तृन्निति विहितस्तृन्प्रत्ययः। तृन्निति प्रत्याहारग्रहण
णान्नित्यनिषेधे प्राप्ते विकल्पमाह। द्विष इति। द्विषअप्रीतावित्यस्मात् द्विषोऽमित्र इति विहितो यः शतृप्रत्ययः स तत्प्रयोगे वा षष्ठीनिषेध इत्यर्थः। सर्वोपमि
ति। अनन्तरस्येति न्यायादिति शेषः। शेषषष्ठी त्विति शाब्दबोधे वैलक्षण्यमस्तीति भावः एवं चाश्वयोगवाहोऽगोपेनेत्यत्र शेषत्वविवक्षायां कर्तर्येव षष्ठी
भवत्येवेति बोध्यं॥ ॥ अकेनोः। आधमर्ण्ये अकस्यासंभवादाह। भविष्यत्यकस्येति। इनस्तु उभयोः संभवादाह। भविष्यदाधमर्ण्यार्थेनश्चयोग इति।
यथासंख्यं तु न भवति। भाष्ये अकस्य भविष्यति इन आधमर्ण्ये चेति योगं विभज्य व्याख्यानात्। इह भविष्यदिति स्वर्यते तेन भविष्यति गम्यादय इत्यधिकारे विहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



न तुमुन्ण्वुलाविति ण्वुले वगृह्यत इत्याशयेनोदाहरति सतः पालक इति। सत इति शतृन्तं। यस्तु कालसामान्ये ण्वुल् तृचाविति ण्वुलुक्तस्तत्र न निषेधः। ओदनस्य पाचकः पुत्रपौत्राणां दर्शक इतीति भावः। व्रजं गामीति। आवश्यकाधमर्ण्ययोर्णिनिरित्यावश्यके णिनिः। यद्यप्ययं कालसामान्ये विहितस्तथापि भविष्यति गम्यादय इत्युक्तेर्भविष्यदर्थकः। गम्यादयः केचिदुणादयः केचिदष्टाध्यायीगता इति हरदत्तः। ननु गत्यर्थकर्मणि चतुर्थीविधेर्वा सिद्धे द्वितीयाग्रहणमपवादविषयेपि द्वितीया प्रवृत्त्यर्थमिति व्रजं गमीति सिध्यत्येवेति चेदत्राहुः। इहैव सूत्रे ग्रामं गामीति भाष्योदाहरणान्न सूत्रं नांगीक्रियते। तेन ग्रामस्य गंतेति षष्ठ्येव साध्वी। ननु ग्रामं गंतेति द्वितीयेति प्रतं दायीति। आवश्यके त्याधमर्ण्ये णिनिः। भविष्यदाधमर्ण्यार्थेन श्चयोग इत्युक्तत्वान्नेह निषेधः। अवश्यं करोत्यवश्यंकारी कटस्य। गम्यादित्वाभावाद्वर्तमानेप्ययं। कृत्यानौ। कर्तृकर्मणोरिति नित्यप्राप्ते विभाषेयं। सेव्य इति। षेवृ सेवायां। ऋहलोर्ण्यत्। कर्मणि ण्यत्। योगो विभज्यत इति। भाष्यकारैरिति शेषः। उभयप्राप्ताविष्यनेन कर्तरि निषे

तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्॥२।३।७२॥ तुल्यार्थैर्योगे तृतीया वा स्यात्पक्षे षष्ठी। तुल्यः सदृशः समो वा कृष्णस्य। कृष्णेन वा। अतुलोपमाभ्यां किं। तुला उपमा वा कृष्णस्य नास्ति। चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः॥२।३।७३॥ एतदर्थैर्योगे चतुर्थी वा स्यात्पक्षे षष्ठी आशिषि। आयुष्यं चिरंजीवितं कृष्णाय। कृष्णस्य वा भूयात्। एवं मद्रं भद्रं कुशलं निरामयं सुखं शं अर्थः प्रयोजनं हितं पथ्यं वा भूयात्। आशिषि किं। देवदत्तस्यायुष्यमस्ति। व्याख्यानात्सर्वत्रार्थग्रहणं। मद्रभद्रयोः पर्यायत्वादन्यतरो न पठनीयः॥ ॥

ऐ घेसिद्धे कर्मणि निषेधार्थमिदं गुणकर्मणि वेष्यत इति तूभयप्राप्तिरहितस्थले नेताश्वस्येत्यादौ चरितार्थमिति दिक्॥ ॥ तुल्यार्थैः। शेषषष्ठ्यां प्राप्तायां विकल्पेन तृतीयाऽनेन विधीयते तया मुक्ते षष्ठ्येव भवेत्तदाह। पक्षे षष्ठीति। बहुवचननिर्देशादेव पर्यायग्रहणे सिद्धे तुल्यार्थैरित्यर्थग्रहणं पदान्तरनैरपेक्ष्येण ये तुल्यार्थास्तेषां ग्रहणार्थं तेन गोरिव गवय इत्यादौ नेत्याहुः। कथं तर्हि तुलां यदारोहति दंतवाससेति कालिदासः। स्फुटोपमं भूतिसितेन शंभुनेति माघश्च। उच्यते। सहयुक्तेऽप्रधान इति तृतीयानुवृत्त्या सहशब्दयोगो — नेति शं कं विनापि तद्योगं तृतीयेत्यभ्युपगमात्। वेति वर्तमाने अन्यतरस्यांग्रहणमुत्तरसूत्रे चकारेण स्वस्यानुकर्षणार्थं। अन्यथा हि। तृतीयैवानुकृष्येत सन्निहितत्वात्। तुल्य इति। तुलया संमितस्तुल्यः। नौवयोधर्म इत्यादिना यत्। तुला उपमा वेति। तोलनं तुला। अस्मिन्नेव सूत्रे तोलुगडो निपातनात्साधुरिति माधवः। उपमिति 140

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपमा। आतश्चोपसर्गे इत्यङ्। हितमिति। हितयोगे चेत्सनाशिषि चरितार्थमित्याशिष्ययं विकल्प इति भावः। व्याख्यानादिति। सूत्रे अर्थशब्दोऽपृथङ्निमित्तं तथा च द्वंद्व एवायं न त्वर्थशब्देन बहुव्रीहिरिति भावः। इति षष्ठी॥ ❀ ॥ आधारः। आध्रियतेऽस्मिन्नित्याधारः। अध्यायन्यायेति सूत्रे अवहाराधारेत्युपसंख्यानादधिकरणे घञ्। स चाधारः कस्येत्याकांक्षायां कारकाधिकारात्क्रियाया इति लभ्यते। इयं च संज्ञा साक्षात्क्रियाधारयोर्न संभवति पराभ्यां कर्तृकर्मसंज्ञाभ्यां बाधितत्वात् अतो व्याचष्टे कर्तृकर्मद्वारेति। एवं च भूतले घट इत्यादौ अस्तीति क्रियाध्याहारो बोध्यः। त्रिधेति। एतच्च संहितायामिति सूत्रे भाष्ये स्पष्टं नद्यामास्ते इत्याद्यर्थं सामीपिकमधिकरणं चतुर्थमपि केचिदिच्छन्ति। कटे आस्त इति। कर्तृद्वारा क्रियाधारस्योदाहरणमिदं। कर्मद्वारा क्रियाधारस्य तु स्थाल्यां पचतीति। वैषयिकाधारमुदाहरति। मोक्ष इति। अभि

आधारोऽधिकरणं। १।४।४५॥ कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञं स्यात्। सप्तम्यधिकरणे च। २।३।३६। अधिकरणे सप्तमी स्यात्। चकाराद्दूरान्तिकार्थेभ्यः। औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा। कटे आस्ते। स्थाल्यां पचति। मोक्षे इच्छास्ति। सर्वस्मिन्नात्मास्ति। वनस्य दूरेऽन्तिके वा। दूरान्तिकार्थेभ्य उक्तविभक्तित्रयेण सह चतस्रोऽत्र विभक्तयः फलिताः। क्तस्येन्विषयस्य कर्मण्युपसंख्यानं। अधीती व्याकरणे। अधीतमनेनेति विग्रहे। इष्टादिभ्यश्चेति कर्तरीनिः। साध्वसाधुप्रयोगे च। साधुः कृष्णो मातरि। असाधुर्मातुले। निमित्तात्कर्मयोगे। निमित्तमिह फलं योगः संयोगसमवायात्मकः। चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरं। केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः १ हेतौ तृतीयाऽत्र प्राप्ता तन्निवारणार्थं। सीमाऽण्डकोशः। पुष्कलको गन्धमृगः। योगविशेषे किं। वेतनेन धान्यं लुनाति॥ ॥

व्यापकस्य तु। सर्वस्मिन्निति तिलेषु तैलमित्याद्यप्यभिव्यापकस्योदाहरणमाहुः। चतस्र इति। प्रातिपदिकार्थमात्रे इत्यर्थः। दूरान्तिकार्थेभ्य इत्यस्येहानुवर्तनादधिकरणेऽपि ते बोध्याः। क्तस्येन्विषयस्येति। इन् इन्नन्तः शब्दो विषयो वर्तनभूमिर्यस्य क्तान्तस्य तस्येत्यर्थः। अन्ये त्वाहुः। इनो विषय इति षष्ठीसमासः विषयशब्देनेह प्रकृतिरुच्यते क्तान्तस्येनः प्रकृतत्वादिति। अधीती व्याकरणे इति। भावे क्तप्रत्यये ततः इष्टादिभ्यश्चेति कर्तरीनो कृते पश्चाद्गुणभूतक्रियया संबध्यमानं व्याकरणमनभिहितकर्मेति कृतपूर्वी कटमितिवद्द्वितीया प्राप्ता सा मा भूदधीती व्याकरणे इत्यादौ त्वकर्मकर्तुर्योगनिमित्तकस्य कालकर्मणो वहिरंगत्वादिहाग्रहणमिति सप्तम्यभावः। न चैवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सु
सि·कौ·
टी·त·
१५२

तत्र द्वितीयापि न स्यादिति वाच्यं । तस्यानुरोधेन द्वितीयाविधाने व्यक्तिपक्षाश्रयणात् । साध्वसाधुप्रयोगे च । यत्रार्चा न विवक्षिता किंतु तत्वकथनमात्रं तत्रापि स
म्यर्थे वार्तिके स्मिन् साधुग्रहणं । साधुर्भृत्यो राज्ञीत्यादि यथा साधुनिपुणाभ्यामिति सूत्रे साधुग्रहणं त्वर्चायां विवक्षितायां प्रतियोगे सप्तमीनिवृत्त्यर्थमिति विवेकः
निमित्तमिह फलमिति । यदि तु कारणमित्युच्येत तर्हि जाड्येन बद्ध इत्यादावतिप्रसंगः स्यादिति भावः । चर्मणीति । चर्मद्वीप्यादीनां समवायः संबंधः । हेतुतृतीये
तिनादर्थ्ये चतुर्थ्यपि बोध्या । सीमाण्डकोश इति । तथा च मेदिनीकारः । सीमाघाटस्थितिक्षेत्रेष्वण्डकोशे च स्त्रियामिति । अथ पुष्कलको गंधमृगे क्षपणकीलयो
रिति च । हरदत्तस्तु पुष्कलकः शंकुः । सीम्नि सीमज्ञानार्थं हतो निहतः निखात इत्याह । अस्मिंस्तु पक्षे सीमपुष्कलकयोः संयोगसंबंधः ॥ ❀ ॥ यस्य चानिर्ज्ञातका
लाहि क्रिया अनिर्ज्ञातकालायाः क्रियायाः कालपरिच्छेदकत्वाल्लक्षणं तत्र प्रसिद्धक्रियाश्रययोः कर्तृकर्मणोर्वा चकारात् ब्राह्मणादिशब्दाल्लक्ष्यलक्षणभाव

यस्य च भावेन भावलक्षणं । २।३।३७ ॥ यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्यात् । गोषु दुह्यमानासु गतः । अर्हाणां कर्तृत्वे ऽनर्हाणाम =
कर्तृत्वे तद्वैपरीत्ये च ॥ सत्सु तरत्सु असन्त आसते । असत्सु तिष्ठत्सु सन्तस्तरन्ति । सत्सु तिष्ठत्सु असन्तस्तरन्ति । असत्सु तरत्सु सन्तस्तिष्ठन्ति । षष्ठी
चानादरे । २।३।३८ ॥ अनादराधिके भावलक्षणे षष्ठीसप्तम्यौ स्तः ॥ रुदति रुदतो वा प्राव्राजीत् ॥ रुदन्तं पुत्रादिकमनादृत्य संन्यस्तवानित्य

संबंधे षष्ठ्यां प्राप्तायामियं सप्तमी । लक्षकत्वं क्रियायाः साक्षादाश्रयस्य तु ब्राह्मणादेः क्रियाद्वारेणेति बोध्यं । ब्राह्मणेष्वधीयानेषु गत इति कर्त्रुदाहरणं । कर्मण्याह ।
गोष्विति । अर्हाणामित्यादि । यस्यां क्रियायां ये उचितास्ते अर्हाः । तेषां कर्तृत्वे विवक्षिते सति तत्र सप्तमी वाच्या । तथा यस्यां क्रियायां येषां कर्तृत्वमनुचितं तेषामकर्तृ
त्वे विवक्षिते च सप्तमी वाच्या । तथा तद्वैपरीत्ये येषां कर्तृत्वमुचितं तेषामकर्तृत्वे येषां तु नोचितं तेषां कर्तृत्वे च सप्तमी वाच्येत्यर्थः । आद्यमुदाहरति । सत्सु तरत्सु इति
सन्तो हि तरणक्रियार्हाः कर्तारश्च । द्वितीयमुदाहरति । असत्सु तिष्ठत्सु इति । अत्र तरणक्रियायां असतामनर्हत्वमकर्तृत्वं च तिष्ठत्स्वित्यनेन प्रतीयते । तद्वैपरी
त्ये प्रथममुदाहरति । सत्सु तिष्ठत्स्विति । सतां हि तरणमुचितं तेषां चाकर्तृत्वं तिष्ठत्स्वित्यनेन बोध्यते । द्वितीयमुदाहरति । असत्सु तरत्स्विति असतां हि तरणमनुचितं
तेषां कर्तृत्वं तरत्सु इत्यनेन गम्यते । यद्यपीदं यस्य च भावेनेत्येव सिद्धं तथापि लक्ष्यलक्षणभावाविवक्षायां सप्तम्यर्थमिदमिति कैयटादयः । तत्वतस्तु व्यर्थमेवे

145

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दमित्यन्ये। षष्ठी चानादरे। अनादर इति। यस्य च भावेनेत्यनेन सप्तमी। अनादरे सति यो भावं लक्षयतीति तदेतत्फलितमाह। अनादराधिक्ये इति। केवलभावलक्षणे स
प्तम्येव अनादराधिक्ये तु षष्ठीसप्तम्याविति निष्कर्षः॥ ॥ स्वामीश्वर। स्वाम्यर्थैरिति वक्तव्ये स्वाम्यादित्रयग्रहणं पर्यायान्तरनिवृत्त्यर्थं। विरूपाणामपि समानार्थानामित्येक
शेषोऽत्र न भवति स्वरूपपरत्वेन समानार्थकत्वाभावात्। दायमादत्ते इति दायादः। सोपसर्गादप्यादंतात्। अत एव निपातनात्कः। गवां गोषु वा दायाद इत्यत्र यद्यपि
गवामित्येतत्समुदायस्य विशेषणं तथापि दीयतेऽसौ दाय इति व्युत्पत्त्या अवयवार्थभूतमंशं स्पृशत्येव तथा चात्र गवात्मकस्यांशस्य आदातेति फलितोऽर्थः

स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च। २।३।३९। एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः। षष्ठ्यामेव प्राप्तायां पाक्षिकसप्तम्यर्थं वच
नं। गवां गोषु वा स्वामी। गवां गोषु वा प्रसूतः। गा एवानुभवितुं जात इत्यर्थः॥ आयुक्तकुशलाभ्यां चासेवायां। २।३।४०॥ आभ्यां योगे षष्ठी
सप्तम्यौ स्तस्तात्पर्येऽर्थे। आयुक्तो व्यापारितः। आयुक्तः कुशलो वा हरिपूजने हरिपूजनस्य वा। आसेवायां किं। आयुक्तो गौः शकटे ईषद्यु
क्त इत्यर्थः। यतश्च निर्धारणं। २।३।४१। जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं यतस्ततः षष्ठीसप्तम्यौ स्तः। नृणां नृषु वा
ब्राह्मणः श्रेष्ठः। गवां गोषु वा कृष्णा बहुक्षीरा। गच्छतां गच्छत्सु वा धावन् शीघ्रः। छात्राणां छात्रेषु वा मैत्रः पटुः॥ पञ्चमी विभक्ते। २।३।४२।
विभागो विभक्तं निर्धार्यमाणस्य यत्र भेद एव तत्र पञ्चमी स्यात्। माथुराः पाटलिपुत्रकेभ्य आढ्यतराः। साधुनिपुणाभ्यामर्चायां सप्तम्य
प्रतेः। २।३।४३। आभ्यां योगे सप्तमी स्यादर्चायां न तु प्रतेः प्रयोगे। मातरि साधुर्निपुणो वा। अर्चायां किं। निपुणो राज्ञो भृत्यः। इह तत्त्वकथने ता
त्पर्यं। अप्रत्यादिभिरिति वक्तव्यं॥ साधुर्निपुणो वा मातरं प्रति पर्यनु वा॥

९ पंचमी विभक्ते। भेद एवेति। ननु शब्दोन्तरोपात्तसामान्याक्रान्ततेति भ
वः तत्र पंचमी स्यादिति। नन्वेवं माथुरा इत्यत्रापि पंचमी स्यात्। मैवं। पूर्वसूत्रमिहानुवर्तते तेन यतो निर्धार्यते तत एवेत्यर्थात् निर्धारणावधेरेव पंचमी प्रवृ
त्तेः अनभिहिताधिकारान्माथुरा इत्यत्र नातिप्रसंग इत्यन्ये। माथुरा इति। न ह्यत्र निर्धारणावधेर्निर्धार्यमाणस्य च गवां कृष्णेत्यादाविव सामान्यविशे
षभावोऽस्ति। किंतु शब्दोपात्तयोर्धर्मयोर्विरोध एव। इदं च सूत्रं बुद्धिपरिकल्पितापायमाश्रित्यापादानप्रकरणे भाष्ये प्रत्याख्यातं। साधुनिपुणाभ्यामर्चायां॥

CC-0. In Public Domain. Digitization by eGangotri



निपुणे
पुणकर्मणि। शुभे असमन्निपूर्वाण्टिपुण धलक्षणः कः। अर्च पूजायामस्मात् ण्वुल् वार्तिकान्। गुरोश्च हल इत्यप्रत्यये टाप्। चौरादिकान् ण्यासश्रन्थ इति युच् अर्चने निस्यात्। निपुणे
पुणकर्मणि। शुभे असमान्निपूर्वाण्टिपुणधलक्षणः कः। अर्च पूजायामस्मान्नौ वार्तिकान्। अप्रत्यादिभिरिति। लक्षणे स्यमिति सूत्रोपात्ताः प्रत्यादयः॥ ꣼ ॥ प्रसितोत्सु
कावत्र इति। साधुशब्दप्रयोगे त्वर्थो विनासप्तमीभवत्येवसाध्व साधुप्रयोगे चेति वार्तिकात्। अप्रत्यादिभिरिति। लक्षणे स्यमिति सूत्रोपात्ताः प्रत्यादयः॥
रान्न इति। साधुशब्दप्रयोगे त्वर्थो विना सप्तमी भवत्येव साध्व साधुप्रयोगे चेति वार्तिकात्। अप्रत्यादिभिरिति।

अर्थो का तत्पर इति। प्रसितासक्तावित्यमरः। उत्सुकसाहचर्यात् प्रसितोपि तत्परएवेह गृह्यते रूढ्या चानेन प्रकर्षेण सितः शुक्ल इत्यर्थो न भवति। नक्षत्रे च लुपि। लुपग्रहणेनात्रार्थ
का तत्पर इति। प्रसितासक्तावित्यमरः। उत्सुकसाहचर्यात् प्रसितोपि तत्पर एवेह गृह्यते रूढ्या चानेन प्रकर्षेण सितः शुक्ल इत्यर्थो न भवति। नक्षत्रे च लुपि। लुपग्रहणे त्रार्थ
विशेषे लाक्षणिक इत्याशयेनाह। योलुप्संज्ञयेत्यादि। अधिकरण इति। एतच्च सप्तम्यधिकरणे चेत्यतो मंडूकप्लुत्यानुवर्तत इति भावः। अधिकरणे किं। मूलेनानीयते।

प्रसितोत्सुकाभ्यां तृतीया च। २।३।४४॥ आभ्यां योगे तृतीयास्यात् चात्सप्तमी। प्रसित उत्सुको वा हरिणा हरौ वा। नक्षत्रे च लुपि। २।३।४५॥
नक्षत्रे प्रकृत्यर्थे यो लुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थस्तत्र वर्तमानात् तृतीयासप्तम्यौ स्तोऽधिकरणे। मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्।
नक्षत्रे प्रकृत्यर्थे यो लुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थस्तत्र वर्तमानात् तृतीयासप्तम्यौ स्तोऽधिकरणे। मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्। सप्तमीपञ्चम्यौ कारकमध्ये। २।३।७॥ शक्तिद्वयमध्ये यौ कालाध्वानौ ताभ्यामेते स्तः। अद्य भुक्त्वायं द्व्य
हे द्व्यहाद्वा भोक्ता। कर्तृशक्त्योर्मध्येऽयं कालः। इहस्थोयमिष्वासः क्रोशे लक्ष्यं विध्येत्। कर्तृकर्मशक्त्योर्मध्येऽयं देशः। अधिकशब्देन योगे सप्त
मीपञ्चम्याविष्येते। तदस्मिन्नधिकमिति यस्मादधिकमिति च सूत्रनिर्देशात्। लोके लोकाद्वाऽधिको हरिः॥ अधिरीश्वरे। १।४।९७॥ स्वस्वामिस
म्बन्धेऽधिः कर्मप्रवचनीयसंज्ञः स्यात्। यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी। २।३।९॥ अत्र कर्मप्रवचनीययुक्ते सप्तमी स्यात्। उप परा
र्द्धे हरेर्गुणाः। परार्द्धादधिका इत्यर्थः। ऐश्वर्ये तु स्वस्वामिभ्यां पर्यायेण सप्तमी। अधि भुवि रामः। अधि रामे भूः। सप्तमी शौण्डैरिति समासप

तत्पुरुषसंज्ञा इत्यत आह। मूलेनेति। नक्षत्रेण युक्तः काल इत्यणो लुबविशेषे इति लुप्। नक्षत्र इति किं। पंचालेषु तिष्ठति इह जनपदे लुबिति लुप्। सप्तमीपंचम्यौ। कालाध्वनोर
मूलायस्त्र हयति। मूलेनेति। नक्षत्रेण युक्तः काल इत्यणो लुबविशेषे इति लुप्। नक्षत्र इति किं। पंचालेषु तिष्ठति इह जनपदे लुबिति लुप्। सप्तमीपंचम्यौ। कालाध्वनोर
त्यंतसंयोग इत्यतः कालाध्वनोरित्यनुवर्तते तच्च पंचम्या विपरिणम्यते तदाह। यौ कालाध्वानौ ताभ्यामिति। इह कालाध्वभ्यां विभक्त्योर्यथासंख्यं न भवत्यस्वरितत्वा
त्। अद्य भुक्त्वायमिति। नन्वत्र कर्ता एक एव तत्कथं कारकयोर्मध्ये कालः। सत्यं। नात्र शक्त्या श्रयं द्रव्यं कारकमिति व्यवह्रियते किंतु शक्तिरेव। सा च कालभेदात् भि
न्ना। अद्य भुक्त्वायमिति। नन्वत्र कर्ता एक एव तत्कथं कारकयोर्मध्ये कालः। सत्यं। नात्र शक्त्याश्रयं द्रव्यं कारकमिति व्यवह्रियते किंतु शक्तिरेव सा च कालभेदात् भि
द्यत एवा एकाहि अद्य भुंजेः साधनं अपरा द्व्यहेतीते भुजेरन्येतव्या च षष्टिक र्तृशक्त्योर्मध्येऽयं काल इति। यस्मादधिकं। उप परार्द्धे इति। उपोधिके चेत्यनेन उपेत्यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कर्मप्रवचनीयसंज्ञा। यच्चेश्वरवचनमित्यस्य तंत्रादिना अर्थद्वयं विवक्षितं। तथाहि। यस्येत्यनेन स्वं निर्दिश्यते यस्य स्वस्य संबंधी ईश्वर उच्यते ततः सप्तमीति व्या-
ख्यानेन स्ववाचकात् सप्तमीत्येकोऽर्थः। ईश्वरशब्दो भावप्रधानः। यन्निष्ठमीश्वरत्वमुच्यते ततः सप्तमीति व्याख्यानेन स्वामिवाचकात् सप्तमीत्यपरः। एवं स्थिते फलि-
तमाह। स्वस्वामिभ्यां पर्यायेणेति। अन्यतरस्मादुत्पन्नयैव सप्तम्या इतरनिष्ठसंबंधस्याप्युक्तत्वाद्युगपदुभाभ्यां न सप्तमी स्यादिति भावः।—

रामाधीना। अषडक्षेत्यादिना खः॥ विभाषा कृञि।१।४।९८॥ अधिः करोतौ प्राक्संज्ञो वा स्यादीश्वरार्थे। यदत्र मामधिकरिष्यति
विनियोक्ष्यत इत्यर्थः। इह विनियोक्तुरीश्वरत्वं गम्यते। अगतित्वात् तिङि चोदात्तवतीति निघातो न॥ इति विभक्त्यर्थाः ॥

त्यर्थः। अव्ययीभावे त्वधिरामं यस्त्रेति। यो मामधिकरिष्यति विनियोक्ष्यते तस्य महि नियोक्तुरीश्वरत्वं गम्यते इत्यर्थः॥ तिङि चोदात्तेति। उदात्तवति तिङि परे ग-
तिर्निहन्यत इति सूत्रार्थः॥ अत्र करिष्यतीति तिङ् तउदात्तवान्। तिङ् तिङ इति निघातस्य निपातैर्यद्यदिहीत्यादिना निषेधान्न निघातो नेति। मामिति द्वितीयातु क-
॥ र्मणि द्वितीयेत्यनेनैव सिध्यतीति भावः॥ इति सप्तमी ॥ ॥ ॥ ॥

 

वः परस्परसंबंधः साव्यपेक्षासे वबा केरा ज्ञः पुरुष इत्यादौ नत्वत्वेवेक्षायां सत्यां योयः संनिहितो योग्यश्चतेन तेन सं वं धोपपयत्ते पृथा राज्ञः पुरुषोऽश्व इत्यादौ·

समर्थः पदविधिः॥ सामर्थ्यं च द्विविधं व्यपेक्षालक्षणमेकार्थीभावलक्षणं चेति। तत्र स्वार्थपर्यवसायिनां पदानामाकांक्षादिवशात् यः परस्परसंबंधः राज्ञो देवदत्तस्य च पुरुष इति

एकार्थीभावस्तु राजपुरुष इत्यादिवृत्तावेव। स च प्रक्रियादशायां पृथगर्थानां प्रथमगृहीतस्य विशिष्टैकार्थत्वरूपः। अत एव राजपुरुष इत्यत्र राज्ञि ऋद्धस्येति विशेषणं

नान्वेति परार्थैकदेशत्वात्। न चैवं देवदत्तस्य गुरुकुलमित्यादावनन्वयापत्तिः। तत्रापि देवदत्तो नरः षष्ठ्यर्थस्य गुरुणाऽन्वयादिति वाच्यं। देवदत्तस्य प्रधानभूतकु

लेनैवान्वयात्। संबंधशब्दस्य तत्र गुरुद्वारक एव षष्ठ्यर्थो न तु तदितरः। उक्तं च। समुदायेन संबंधो येषां गुरुकुलादिना। संस्पृष्टावयवास्ते तु युज्यन्ते तद्वता सह

इति। यद्वा ससंबंधिकपदार्थस्यैकदेशत्वेपि भवत्येव विशेषणान्वयः उक्तं चासंबंधि प्राद्वः सापेक्षो नित्यं सर्वः समस्यते। वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयते इति। नन्वेवं राज्ञोपि नित्यसापेक्षत्वादि करेशत्वेपि [illegible] इत्येति विशेषणेनान्वयोस्तु। मैवं। राजत्वविशिष्टत्वं प्रति साकांक्षत्वेपि ऋद्धं प्रत्यनाकांक्षत्वात्। ननु वाक्ये

समर्थः पदविधिः।२।१।१। पदसम्बन्धी यो विधिः स समर्थाश्रितो बोध्यः। प्राक्कडारात्समासः।२।१।३। कडाराः कर्मधारये इत्यतः प्राक्स

मास इत्यधिक्रियते। सह सुपा।२।१।४। सहेति योगो विभज्यते। सुबन्तं समर्थेन सह समस्यते। योगविभागस्येष्टसिद्ध्यर्थत्वात् क्तिपयति

ङन्तोत्तरपदोयं समासः। सच्छन्दस्येवा। पर्यभूषयत्। अनुव्यचलत्। सुपा।२।१।४। सुप्सुपा सह समस्यते। समासत्वात्प्रातिपदिकत्वं। सुपो

धातुप्रातिपदिकयोः।२।४।७१। एतयोरवयवस्य सुपो लुक् स्यात्। भूतपूर्वे चरडिति निर्देशात्पूर्वनिपातः। पूर्वं भूतः। भूतपूर्वः। इवेन समा

सः विभक्त्यलोपश्च। जीमूतस्येव। अव्ययीभावः।२।१।५।

साधनेस्यान्महत्त्वे तस्मादेकार्थीभाव एवआस्थितः चकारादिनिषेधो बहुव्युत्पत्तिभंजनं कर्तव्यं तेन्यायसिद्धं तस्मात्कंतद्दिति स्थितं तथाहि। धवखदिरावितिद्व

न्द्वैवक्रोडीकृतार्थत्वाच्चकारो न प्रयुज्यते तथा चित्रगवादौ च परं। त्वयातु वचनं कर्तव्यं निरूढलक्षणतु प्राक्तितो नानीवमिदं वने। किंच प्राप्तमुदकं यमितिव्यस्तसमी

चीनमुदकमिति विशेषणवत्समस्तेपि उदकविशेषणप्रयोगः प्राप्तः स च वृत्तस्य विशेषणयोगो नेति वचनेनैव वारणीयः नामार्थयोरभेदान्वयः प्रत्ययार्थः प्र

धानमिति व्युत्पत्तित्यागश्चाप्राप्तोदक इत्यादौ उदककर्तृकप्राप्तिकर्मन्यायधर्थाभ्युपगमात्। एकार्थीभावे तु लाघवमिति दिक्। पदग्रहणं किं। वर्णविधौ समर्थप

[illegible]

143

रिभाषामाभूत्। तिष्ठतु दध्यानयतक्रं इहस्या देववत्। विधिग्रहणं तु परस्य विधिः पदयोर्विधिः पदानां विधिरित्यनेकविभक्त्यन्तसमासलाभार्थं। परस्येत्युक्तौ तु उपपदमतिङित्यादावेवा-
स्योपस्थितिः स्यादित्याहुः। सूत्रे समर्थशब्दोत्ता सणिक इति ध्वनयन्नाह। समर्थाश्रित इत्ति समर्थेतिकिं। पश्यति कृष्णं श्रितो देवदत्तमित्यादौ कृष्णश्रित इत्यादिसमासो माभूत्। तथा
वस्त्रमुपगोरपत्यं चैत्रस्येत्यत्र तस्यापत्यमित्युपगुशब्दादण्माभूदिति। क्वचित्तु सापेक्षत्वेपि भाष्यप्रामाण्याद्वृत्तिरंगीक्रियते। तद्यथा किमोदनं शालीनां। केषां शालीनामोदनमित्यर्थः
सक्तुढकमापणीयानां। आपणीयानां सक्तुनामाढकमित्यर्थः। कुतोभवान्पाटलिपुत्रकः हेपाटलिपुत्रे। तत्र कस्मात्पाटलिपुत्राद्भवानागत इत्यर्थः। रोपधेतोः प्राचामिति वुञ्। प्राक्क
डारात्समासः। प्राग्ग्रहणमावर्तते तेन पूर्वं समाससंज्ञा ततः संज्ञान्तरमपीति लभ्यते। तेनाव्ययीभावादिभिस्समावेशः सिध्यत्यन्यथा पर्यायः स्यात्। समसनं समासः। भावे घञ्। अनेकस्यप
दस्य एकपदीभवनमित्यर्थ इत्येके। वस्तुतस्तु अकर्त्तरि च कारक इति कर्मणि घञ्। अन्यथा सुबन्तं समस्यत इत्युत्तरग्रंथो न संगच्छेत। नन्वन्वर्थत्वात्समाससंज्ञायाः प्रत्येकमप्रसंगात्स
हग्रहणं व्यर्थमित्याशंक्याह। योगो विभज्यत इति। सुबामंत्रित इत्यतः सुबित्यनुवर्त्तते तदाह। सुबन्तमिति। समस्यत इति। संपूर्वादस्यतेः कर्मणि लट्। आचार्येणेति शेषः। सम
र्थेनेति तु सहयोगे तृतीया समसनक्रियां प्रति सुबन्तं कर्म न तु कर्तृ यद्यपि सुबन्तस्य कर्तृत्वाभ्युपगमेप्युपसर्गादस्यत्यूह्योरिति वार्तिके न समस्यत इत्यत्रात्मनेपदं लभ्यते तथापि
समास इति व्याख्येयग्रंथे कर्तरि घञ् दुर्लभः बाहुलकं तु अगतिकगतिरिति कर्मत्वाभ्युपगम एव ज्यायान्। स चेति। एतदपि योगविभागस्येष्टसिद्ध्यर्थत्वादेव लभ्यते। छंदस्येवेति। य
दि लोकेपि स्यात्तर्हि यत्त्मकुरुते इत्यादौ साधुत्पत्तिः स्यात्। लिंगसर्वनामतामभ्युपेत्य स्वमोर्नपुंसकादिति लुकि कृतेपि ह्रस्वो नपुंसक इति ह्रस्वः स्यादित्यादिदूषणं कर्मणायम
भिप्रैतीति सूत्रेऽस्माभिरुद्भावितं। अनुव्यचलदिति सुबित्येकत्वस्याविवक्षितत्वाद्यथायोग्यं समासो बोध्यः समासान्तोदात्तत्वशेषनिघात इति कुगतीति सूत्रे कैयटः। सुपो धातु
सुप इति प्रत्याहारस्य ग्रहणं पंचम्याः स्तोकादिभ्य इत्याद्यलुक्समासविधानात्। ज्ञापकात्। निर्देशादिति। अन्यथा हि प्रथमानिर्दिष्टत्वाविशेषेपि उपसर्जनसंज्ञाया अन्वर्थ
त्वेन पूर्वंशब्दस्यैव पूर्वनिपातः स्यादिति भावः। इवेनेति। अयमपि समासः पूर्ववत् क्वाचित्क एव तेन जीमूतस्येवेत्यादौ नैतिरीयाणां पृथक्पदत्वेन पाठः। उद्बाहुरिव वामन इत्यादौ।
व्यस्तप्रयोगश्च संगच्छत इति मनोरमायां स्थितं विभक्त्यलोपश्चेति। समासावयवस्य सुपोऽलोपविधानेपि समासादुत्पन्नस्य सोरव्ययादिति लुक् भवत्येवानुपसर्जनेन तदंतस्याव्य

CC-0. In Public Domain. Digitization by eGangotri



पु·
सि·कौ· अव्ययंविभक्ति। विभक्तिरिह कारकशक्तिः विभज्यते। अनया प्रातिपदिकार्थ इति व्युत्पत्तेः अत एव वक्ष्यति विभक्त्यर्थादिषु विद्यमानमव्ययमिति। प्रथमानिर्दिष्टं अत्र समास
टी·त· पदं तद्विधायकेत्वात्तल्लिके अन्यथा चिकीर्षितेसमासे यत्प्रथमांतमिति याख्यानप्रसक्त्या कष्टंश्रित इत्यादौ श्रितादिष्विति प्रसंग इत्याशयेनाह। समासशास्त्र इति। विग्रह
१४५ इति। अनुवर्तमानेन समासग्रहणेन विग्रहो लक्ष्यत इति भावः। ननु तस्येति। अनंतरस्येति न्यायात्पूर्वसूत्रेण विहितस्य पूर्वनिपातत्वं न निषिद्धं तेन कुमारीश्रित इत्या
दौ न दोषः। गोस्त्रियोः उपसर्जनस्येति गोस्त्रियोर्विशेषणमेकवचनं तु प्रत्येकाभिप्रायेण गोस्त्रीभ्यां तु प्रातिपदिकं विशेष्यते। विशेषणेन तदंतविधिरित्याशयेनाह उपस

अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु। २। १। ६॥
अव्ययमिति योगो विभज्यते। अव्ययं समर्थेन सह समस्यते सोऽव्ययीभावः। प्रथमानिर्दिष्टं समास उपसर्जनं। १। २। ४३॥ समासशास्त्रे प्रथमानि
र्दिष्टं उपसर्जनसंज्ञं स्यात्। उपसर्जनं पूर्वं। २। २। ३०॥ समासे उपसर्जनं प्राक्प्रयोज्यं। एकविभक्ति चाऽपूर्वनिपाते। १। २। ४४॥ विग्रहे यन्नियत
विभक्तिकं तदुपसर्जनसंज्ञं स्यात्। न तु तस्य पूर्वनिपातः। गोस्त्रियोरुपसर्जनस्य। १। २। ४८॥ उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य
प्रातिपदिकस्य ह्रस्वः स्यात्। अव्ययीभावश्चेत्यव्ययत्वं। नाव्ययीभावादतोऽम्त्वपञ्चम्याः। २। ४। ८३॥ अदन्तादव्ययीभावात्सुपो न लुक् तस्य
तु पञ्चमीं विनाऽमादेशः। दिशयोर्मध्यमपदिशं। क्लीबाव्ययं त्वपदिशं दिशोर्मध्यं विदिक्स्त्रियामित्यमरः। तृतीयासप्तम्योर्बहुलं। २। ४। ८४॥ अद
न्तादव्ययीभावात्तृतीयासप्तम्योर्बहुलमम्भावः स्यात्॥ ॥ १९ सर्जनं परइति उपसर्जनमिह शास्त्रीयं गृह्यते न त्वप्रधानलक्षणं। तेन कुमारी वा चर
न्त्याह्मणः कुमारीत्यत्र न दोष इत्युक्तं। स्त्रीप्रत्ययांतमिति। स्व्यधिकारोक्तटावाद्यंतमित्यर्थस्तेनातिलक्ष्मीरित्यादौ नातिप्रसंगः। नन्वेवमपि राजकुमारीपुत्र इत्यादावति
प्रसंग इति चेदत्राहुः। उपसर्जनस्य ससंबंधिकतया यस्य प्रातिपदिकस्यांतह्रस्वो विधीयते तं दर्शयति यत्तु तत्परपदभूतयोर्गोस्त्रियोर्गुणीभावस्तदेव ह्रस्वत्वमिति भाष्या
दावुक्तत्वान्न दोषः। भाष्यादावपि तत्तत्परपदभूतयोरित्यर्थलाभस्तु तद्धितेत्यतः समासपदानुवर्तनादेव्यमिति। नाव्ययी। अत्रापंचम्या इति प्रतिषेधः। ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घोऽनंतरत्वादप्र एव न तु व्यवहितस्यानुकोऽपि। अमुमेवार्थं द्योतयितुं सूत्रे तुशब्दः। तस्य पंचमीं विनेति। एवं चाऽदन्तादव्ययीभावात्परस्य पंचमीभिन्नसुपो लुङ् न पंचम्यास्तु लुगमा देशावुभावपि न भवत इति स्थितं। अतः किं अधिहरि दिशयोरिति। अधिदिशोरिति हलंते न विग्रहेऽपि एतदेव रूपं। दिशाशब्दस्य शरदादिषु पाठात् टच्॥ अपदिशमिति। पंचमीव्यतिरिक्तविभक्तीनामुदाहरणमिदं। पंचम्यास्तु अपदिशादित्युदाहार्यं। वीभक्तौ नावदिति नावच्छब्दः क्रमार्थः। लौकिकविग्रहवाक्यं प्रदर्शयति। हराविति। प्राचा तु हरौ अधिकृत्येति विगृहीतं तदसत्। अधिहरीत्यत्र अधिकृत्येत्यर्थस्याप्रतीतेः। हरिङीति। अलौकिके ङिशब्दस्यैव प्रवेशोचितः। अंतरंगानपीति न्यायात्। अन्यथाऽङेरौत्वे कृते अधिहरौ इति समासे हरिशब्देकारो दुर्लभः स्यादिति भावः। इह हरावधीति स्थिते इति प्राचोक्तमुपेक्षितं। नित्यसमासेषु अस्वपदविग्रहस्यैवोचितत्वात्। अभिहितेऽपीत्यर्थः।

अपदिशं। अपदिशेन। अपदिशाद्बहुलग्रहणात्सुमद्रमुन्मत्तगङ्गमित्यादौ सप्तम्या नित्यमम्भावः। विभक्त्यादेरयमर्थः। विभक्त्यर्थादिषु वर्तमानमव्ययं सुबन्तेन सह समस्यते सोऽव्ययीभावः। विभक्तौ तावत्। हरौ इत्यधिहरि। सप्तम्यर्थस्यैवात्र द्योतकोऽधिः। हरि ङि अधि इत्यलौकिकं विग्रहवाक्यं। अत्र निपातेनाभिहितेऽप्यधिकरणे वचनसामर्थ्यात्सप्तमी। अव्ययीभावश्च। अयं नपुंसकं स्यात्। ह्रस्वो नपुंसके प्रातिपदिकस्य। गोपायतीति गाः पातीति वा गोपाः। तस्मिन्नित्यधिगोपं। समीपे। कृष्णस्य समीपमुपकृष्णं। समया ग्रामं। निकषा लङ्कां। आराद्वनादित्यत्र तु नाऽव्ययीभावः। अभितः परितः अन्यारादिति द्वितीयापञ्चम्योर्विधानसामर्थ्यात्। मद्राणां समृद्धिः॥

॥ ९ वचनसामर्थ्यादिति। सुपेत्यनुवर्त्य सुबंतेन समासविधानसामर्थ्यात्सप्तमी स्यादेवेति भावः। नन्वभिहितेऽधिकरणे प्रातिपदिकार्थमात्र इति प्रथमैव स्यान्न तु सप्तमीति चेदत्राहुः। अधीत्यस्य सुबंतेन समासस्यावश्यकत्वेऽधिशब्दद्योत्याधिकरणार्थवाचकविभक्तेरेवेह स्वीकर्तुमुचितत्वादिति। यत्तु प्रसादकृता व्याख्यातं तिङ्कृत्तद्धितसमासैरिति परिगणनादधिनाभिहितेऽपि सप्तमी स्यादेवेति। तत्र परिगणनस्याकरे प्रत्याख्यातत्वात्। कर्मणि द्वितीयेति सूत्रे स्वयमपि तथैवोक्तत्वात्। क्रमादमुं नारद इत्यबोधि स इति प्रयोगविरोधाच्च। अत्र व्याचक्षते वचनग्रहणं विभक्त्यादिभिः प्रत्येकं संबध्यते साकल्ये ते[घि]त्येव वक्तव्ये वचनग्रहणात्। एवं च तत्सामर्थ्याद्विभक्त्यर्थमात्रवृत्तेरव्ययस्य ग्रहणं तेन दृसस्योपरि दृस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सु·
सि· कौ·
टी· ३·
१४६

४ अपणात्समीपरूपाव्ययार्थप्राधान्यएवायंसमासः समीपमीपवर्तिप्राधान्येतुसंख्ययाव्ययासन्नेतिबहुव्रीहिंवक्ष्यत्युपदशाइति ४॥
स्यपुरइत्यत्रसमासोनभवति। उपर्यादयोहिदिग्देशकालेष्वपिवर्तन्तेनतुविभक्त्यर्थमात्रे अतएवकुमारदंसुनारदइत्यवोधिसइत्यादौनातिप्रसंगइतिशब्दस्यसर्वनामवन्महत्तपरामर्शकत्वे
नकर्मत्वमात्राभिधायकत्वात्। एवंचविभक्तिशब्दः सप्तम्यांपर्यवस्यति। अतएवपरिशिष्टेअधिकरणेइत्येवसूत्रितं। पाणिनिस्तुमात्रालाघवमभिप्रेत्यविभक्तिशब्दंप्रायुंक्तेति। अन्येतुला
घवात्ङिसमीपसमृद्धीतिवक्तव्येविभक्तिग्रहणाद्विभक्तिशब्दोनसप्तम्यांपर्यवस्यतितेनत्वकर्मत्वमात्रद्योतकतार्थामितिनारदमितिसमासोभवत्येवेत्याहुः। नपुंसकंस्यादितिएतच्चस
नपुंसकमित्यतोलभ्यते। समीपइति। अव्ययीभावइत्यन्वर्थसंज्ञेयथाविधानसामर्थ्यादिति। ननुसमयाग्राममित्यादौद्वितीयाविधानसामर्थ्यान्मास्त्वव्ययीभावः। आराद्वनादित्यत्र
तुभवेदेव। अन्यारादितिपंचमीविधानस्यदूरार्थकाराच्छब्दयोगेसावकाशत्वादितिचेदत्रकेचिदुत्प्रेक्षयंति। दूरांतिकार्थैःषष्ठ्यन्यतरस्यामितिषष्ठीपंचम्योःप्राप्तयोस्तदपवादतयापंच
म्येवतेनविधीयते। तथाचांतिकार्थकाराच्छब्दयोगेषष्ठ्यपवादतयापंचमीविधानंनिरवकाशमेवेतितत्सामर्थ्यादव्ययीभावोनेत्युक्तिःसम्यगेवेति। तदपरेनक्षमंते। अंतिकार्थाराच्छ

सुमद्रं यवनानां व्यृद्धिः दुर्यवनं। विगतार्द्धिः व्यृद्धिः। मक्षिकाणामभावो निर्मक्षिकं। हिमस्यात्ययोऽतिहिमं। अत्ययो ध्वंसः। निद्रा सम्प्रति न युज्यते।
इत्यतिनिद्रं। हरिशब्दस्य प्रकाश इति हरि। विष्णोः पश्चादनुविष्णु। पश्चाच्छब्दस्य तु नायं समासः ततः पश्चात्स्रंस्यत इति भाष्यप्रयोगात्। योग्यतावी
प्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः। अनुरूपं। रूपस्य योग्यमित्यर्थः। अर्थमर्थं प्रति प्रत्यर्थं। प्रतिशब्दस्य वीप्सायां कर्मप्रवचनीयसंज्ञाविधा
नसामर्थ्यात्तद्योगे द्वितीयागर्भवाक्यमपि। शक्तिमनतिक्रम्य यथाशक्ति। हरेः सादृश्यं सहरि। वक्ष्यमाणेन सहस्य सः। ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठं॥
चक्रेण युगपदिति विग्रहे। अव्ययीभावे चाकाले। ६।३।८१। सहस्य सः स्यादव्ययीभावे न तु काले। सचक्रं। कालेतु॥ ब्दयोगेविशिष्यपंचमीविधाना

भावादन्यारादितिसूत्रस्यत्वन्यत्रकृतार्थत्वाच्चसामीप्येआराद्वनमित्यव्ययीभावोदुर्वारएवेतिएवंहिव्याकुर्वतांपरस्यत्वयकर्षाभावेमृग्यार्थसावकाशोयथङ्पोनःपुन्येपरेणद्विर्व
चनेनवाध्येतेतिनित्यवीप्सयोरितिसूत्रस्थमनोरमाग्रंथोनुकूलइतिदिक्॥ ॥ सुमद्रमिति। उत्तरपदार्थप्राधान्येतुकुगतीतितत्पुरुषः॥ समृद्धामद्राःसुमद्राः
दुर्यवनमिति। नचार्थाभावेनेहसिद्धिःयेनसमस्यतेतदीयार्थाभावेऽत्रसमासस्वीकारात्नचेहयवनानामभावोयेनार्थाभावेसमासःस्यात्। किंतुतदीयायाऋद्धेरभावइति॥
निर्मक्षिकमिति। संसर्गाभावेअयंसमासोनत्वन्योन्याभावेपिअर्थग्रहणसामर्थ्येनसमस्यमानपदजन्यप्रतीतिविशेष्यविरोधिन॥ ॥ ॥

145

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वाभावस्यग्रहणं तु। अन्योन्याभावस्यतुप्रतियोगितावच्छेदकेनैवविरोधात्तस्यचप्रकारत्वेप्यविशेष्यत्वात्। येनुवर्इतिघटःपटोनेत्यत्रापिपटत्वात्यंताभावएवार्थोआहार्य
धिकरणन्यायेनजातेःपदार्थत्वादितितेषामपिमतेअर्थग्रहणसामर्थ्यादेवाक्षिप्तधर्म्मभावेअयंसमासोननुधर्मोभावइतिनदोषः। अत्ययइति। स्पष्टार्थमेतत्। अर्थाभा
वेनगतार्थत्वात्। अर्थाभावेनसंसर्गाभावोविवक्षितत्वन्योन्याभावः घटःपटोनेत्यत्रातिप्रसंगादितितिष्कर्षात्। संप्रतिनेति। संप्रतीत्यव्ययमिदानीमित्यर्थो। एतर्हिसंप्र
तीदानीमित्यमरोक्तेः नचाधिकरणशक्तिप्रधानत्वात्क्रियापदेनैवान्वयार्हानिषेधोपिक्रियायाएवोचितः। तदेतदाह। युज्यतइति। असंप्रतीतिसोत्रप्रयोगेतुयुजिक्रियांत
र्भावेण नञ्समासइतिबोध्यं। यत्तुप्रसादकृतोक्तं असंप्रतिसंप्रत्यभावइत्यर्थः। अनेनउपभोग्यवस्तुनोयोवर्त्तमानकालःसनिषिध्यतइति। तन्न आधिकरणशक्तिप्रधा
नस्यक्रियययैवान्वयार्हस्यनिषेधं प्रतिप्रतियोगित्वेनान्वयस्यायुक्तत्वात्। नहिभूतलेघटोनास्तीत्यनेनभूतलंनिषिध्यतइतिकश्चिदभ्युपगच्छति॥ ॥

॥ सहपूर्वाह्णौ सदृशस्तथा समस्तवि। यथार्थत्वेनैवसिद्धे पुनस्सादृश्यग्रहणं गुणभूतेपिसादृश्येयथास्यादित्येवमर्थं। साकल्यं
। सम्पत्तिःसमृत्वं। ऋद्धेराधिक्यं। समृद्धिः। अनुरूप आत्मभावस्सम्पत्तिरितिभेदः। तृणमप्यपरित्यज्यसतृणमत्तिसाकल्येनेत्यर्थः। अ
न्ते अग्निग्रन्थपर्यन्तमधीतेसाग्नि। यथाऽसादृश्ये। २।१।७। असादृश्ये वयथाशब्दस्समस्यते। तेनेहना यथाहरिस्तथाहरः। हरेरुपमा
नत्वेयथाशब्दोद्योतयति। तेनसादृश्येइतिवाययार्थइतिवाप्राप्तन्निषिध्यते। यावदवधारणे। २।१।८। यावन्तःश्लोकास्तावन्तोऽच्युतप्रणा
मेति। येनात्रवर्तमानकालनिषेधोयुक्तार्हःस्यात्। इतिहरेति। सहरूपपरेण वक्ष्यं तेन हरिशब्देनसहप्रकाशार्थस्येतिशब्दस्यसमासः। ततःपश्चादिति। सतिचात्राव्य
यीभावेपश्चाच्छब्दस्यपूर्वनिपातःस्यादितिभावः भाष्यप्रयोगादिति। अनेकमन्यपदार्थइतिसूत्रेसर्वपश्चादितिभाष्य प्रयोगाच्चेत्यपिबोध्यं प्रत्यर्थमिति। द
न्द्वौवीप्सांतर्भावान्नहिवचनं। प्रतिशब्दस्येति। पत्वाहुः। ग्रामस्यद्वस्वद्दक्षप्रतीत्यत्रषा। येक्षत्वेनसमासाभावेहिनायाविधानंसावकाशमिति। तन्न। नित्यसमासेषुस
विशेषणानांवृत्तिर्नेत्यस्याप्रवृत्तेः। आनुपूर्व्येणेति। अनुपूर्वस्यभावः। आनुपूर्व्यं ब्राह्मणादित्वात्ष्यञ्चक्रेणयुगपदिति। अत्र केचित्। युगपच्चक्रमितिस
मासेनैवभवितव्यं। युगपच्छब्दस्याव्ययत्वात्। किंतुचक्रेणैककालेइत्यादिविग्रहीतुमुचितमित्याहुः॥ ॥ सहपूर्वाह्णमिति। साकल्येव्ययीभावः। गुणभूते
पीति। यदिसादृश्यइतिनोच्येत तर्हियत्रसादृश्यंप्रधानमवगम्यते॥

CC-0. In Public Domain. Digitization by eGangotri



तत्रैवस्यादव्ययार्थप्राधान्यस्याव्ययीभावे औत्सर्गिकत्वादितिभावः। अंतइति। इदानीमेतावानग्रे दृश्योऽध्येतव्य इतियावतोग्रंथप्रदेशस्यपरिग्रहः कृतस्तदपेक्षासमाप्तिरिहांतशब्देन विवक्षितासाचासकलेप्यध्ययने भवतीति साकल्यात्पृथगुच्यते। साग्नीति। अग्निशब्दस्तन्नामकग्रंथेवर्तते। सचतृतीयांतोनित्यंसमस्यते। नत्वेवमग्निनासहेति प्रयोगोदुर्लभइतिवाच्यं। साहित्यमात्रविवक्षायांतत्प्रयोगस्योपपत्तेः। अंतत्वविवक्षायांतुसमासस्यनित्यत्वादग्निग्रंथपर्यंतमित्यस्वपदविग्रहोदर्शितः। यत्तु केचिदग्निरंतोसौतिप्रथमांतेनअग्नेरंतत्वमितिषष्ठ्यंतेनवाविग्रहः समासोपि प्रथमांतेनषष्ठ्यंतेनवेत्याहुस्तन्न सहशब्दस्यांतवाचकत्वाभावादंतत्वस्यानुक्ततरामलाभात्। सहयुक्तेतृतीयापात्याप्यत्वाच्चासत्त्वमनीत्यत्रसाकल्यस्यैवसाग्नीत्यत्रांतत्वस्यापिसाहित्यद्योत्यतयातत्रतृतीयांतेनसमासंख्ये हान्यदिहतत्स्वरित्यागस्यनिष्प्रमाणत्वाच्च। अत्रेदंबोध्यं। तदधीत इत्यध्येतृप्रत्ययस्य वैकल्पिकत्वात्साग्नीत्यत्राणनोक्तः हृतेप्यध्येत्रलिसर्वादेस्सादेश्चलुग्वक्तव्य इतिवक्ष्यमाणत्वात्साग्नीत्येवरूपमिति। यथासांनिः संदेहायसाद्दृश्यपथेत्येवववक्तव्येविपरीतोच्चारणंनञःश्लेषलाभार्थमितिव्याचष्टे असाद्दृश्यइतियावंतइति। यत्परिमाणमेषांते। यत्तदेतेभ्यइतिवतुप्। यावत्श्लोकमिति। यावदित्यव्ययंसमस्यते। विग्रहस्तुतद्धितांतेन

सुप्प्रतिनामात्रार्थे। २।१।९॥ शाकस्यलेशः शाकप्रति। मात्रार्थे किं। वृक्षंप्रतिविद्योततेविद्युत्। अक्षशलाकासंख्याः परिणा। २।१।१०॥ द्यूतव्यवहारेपराजयएवायंसमासः। अक्षेणविपरीतंवृत्तं अक्षपरि। शलाकापरि। एकपरि॥ ॥ ॥ ॥ ॥

नेत्यस्वपदविग्रहत्वमस्त्येव। अवधारणेकिं। यावद्दत्तंतावद्भुक्तं। कियद्भुक्तं वानावधारयतीत्यर्थः॥ ॥ सुप्प्रतिना। सुबित्यनुवर्त्तमानेपुनः सुब्ग्रहणमव्ययनिवृत्त्यर्थमितिध्वनयन्नुदाहरति। शाकप्रतीति। नन्वारंभसामर्थ्यादव्ययभिन्नमेवसुप्समस्यतइतिचेदत्राहुः। पुनः सुब्ग्रहणाभावेदोषामन्यमहर्दिवामन्यारात्रिरितिवृत्तिविषयेसत्वप्रधानतादर्शनात्ताद्रूप्यव्यथान्येवमात्रार्थेप्रतिनासमस्येरन्। तथाचदिवसस्यलेशः दिवाप्रतिदोषाप्रतीत्यादीनामेवोदाहरणत्वंसंभाव्येतेतिदृष्टप्रतीतिना। ननुलक्षणादौप्रतेः कर्मप्रवचनीयसंज्ञाविधानसामर्थ्याद्द्वितीयागर्भवाक्यमेवस्यात्ननुसमासस्तस्यलेशार्थेसावकाशत्वादितिचेन्नैवं। वृक्षंप्रतिसिंचतीत्यादौषत्वनिवारकत्वेनकर्मप्रवचनीयसंज्ञाविधानस्यचरितार्थत्वान्मात्रार्थग्रहणाभावेलक्षणादावप्यनेनसमासप्रसंगात्। वीप्सायामव्ययीभावेतुप्रत्यादेः पूर्वनिपातत्वेप्रत्यर्थंसिंचतीत्यादौषत्वाप्रसक्त्या कर्मप्रवचनीयविधानस्याचरितार्थतयातत्सामर्थ्याद्द्वितीयागर्भवाक्यमपीत्युक्तं मूलकृतांव्ययंविभक्तीतिसूत्रे। अत्रनव्याः। प्रत्यर्थमित्यव्ययीभावेवीप्सायाद्योतकत्वेनवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्यमानमव्ययं समस्यते। वीप्साद्योतकस्य यद्विकर्मप्रवचनीयसंज्ञाविधिः सा क्रियते तदापि प्रतिसलवनं प्रतिस्थानमित्यादौ षत्वनिवारणाय प्रतीत्यस्य कर्मप्रवचनीयसंज्ञा चरितार्थैव वस्तुतस्तु वीप्सायां विषयभूतायां प्रत्यादेः कर्मप्रवचनीयसंज्ञा न तु वीप्साद्योतकस्यैव। अन्यथा वृक्षं वृक्षं प्रति सिंचतीत्यत्र द्विर्वचनेनैव वीप्सा द्योत्यते प्रतिशब्देन तु क्रियया संबध्यते। कर्मणि द्वितीया। कर्मप्रवचनीयसंज्ञया उपसर्गसंज्ञाया वाधनात् षत्वं नेत्यादि मनोरमायां ग्रन्थस्य लक्षणेत्थंभूतेति सूत्रस्थस्य दत्तजलांजलिः स्यात्। न तस्य संज्ञाविधानसामर्थ्यस्योपक्षीणत्वात् अर्थमर्थं प्रतीत्यादिभाष्यप्रयोगाद्वा द्वितीयागर्भवाक्यमपि भवतीत्येवं व्याख्येयमित्याहुः। पराजयं द्योतयितुमाह। विपरीतवृत्तमिति। पूर्वजयेन यथा वृत्तं तथा न वृत्तमित्यर्थः। एकपरीति। एकेन विपरीतं वृत्तमित्यर्थः। एवं द्विपरीत्यादि। विभाषापपरिबहिरिति योगं विभज्य व्याचष्टे॥ ॥ विभाषेति। इतः प्राचीनानां समासानां द्विगुमादिसंज्ञानामिव वाग्रहणाभावान्नित्यत्वं न्यायत एव सिद्धं तच्चल्लिंगेनापि द्रढयति। एतदिति। नन्वेवं सुप्सुपेत्यपि नित्यं स्यादिष्टा

विभाषा। २।१।११। अधिकारोऽयं। एतत्सामर्थ्यादेव प्राचीनानां नित्यसमासत्वं। सुप्सुपेति तु न नित्यसमासः। अव्ययमित्यादिसमासविधानात् ज्ञापकात्। अपपरिबहिरंचवः पंचम्या। २।१।१२। अपविष्णु संसारः। अपविष्णोः। परिविष्णु। परिविष्णोः। वहिर्वनं। वहिर्वनात्। प्राग्वनं। प्राग्वनात्। आङ् मर्यादाऽभिविध्योः। २।१।१३। एतयोराङ् पंचम्यन्तेन वा समस्यते सोऽव्ययीभावः। आमुक्ति संसारः आमुक्तेः। आबालं हरिभक्तिः। आबालेभ्यः।

पत्तौ तु पूर्वं भूतो भूतपूर्वः सुप्सुपेति समास इति वृत्तिग्रन्थो विरुध्येत तथा शाकलसूत्रे सिन्नित्यसमासयोः शाकलप्रतिषेध इत्यत्र नित्यग्रहणेन नार्थः। इदमपि सिद्धं भवति वाप्यामश्वो वाप्यश्व इति भाष्यं कैयटो व्याख्यत्। वाप्यश्व इति सुप्सुपेति समासः संज्ञायामिति सप्तमीसमासस्य तु नित्यत्वात् सिद्धः प्रतिषेध इति। सोपि ग्रन्थो विरुध्येतेत्याशंकायामाह। सुप्सुपेतित्विति। नन्वत्र किं प्रमाणमित्यत आह। अव्ययमित्यादीति। सुप्सुपेत्यनेनैव सिद्धे समासे अव्ययमित्यादिसूत्रैः पुनः समासविधानं प्राचीनस्य क्वाचित्कतां ज्ञापयतीत्यर्थः। एवं च इवेन समासस्यापि क्वाचित्कत्वात् इदृहुरिव वामन इत्यादि सिद्धं। इवेनेति वार्त्तिकं तु यद्यपि कुगतीत्यत्र पठ्यते तथापि सुप्सुपेत्यत्रान्यमेव नित्याधिकारे स्मारितमिति कैयटः। एवं स्थिते इव वामन इत्यादिलोकप्रयोगसिद्धये इवेन समासस्य छन्दोविषयत्वं कल्पयन्तः प्रत्युक्ताः। छन्दस्यपि तत्समासस्य नित्यत्वानभ्युपगमात्। जीमूतस्येवेत्यत्र हि बह्वृचैः समासाभ्युपगमेपि नैत्तिरीयैर्व्यस्तस्यैव पाठात्। एतच्च मनोरमायां स्थितं। अपपरिबहिः। अपपरियोगे पंचम्यपाङ्परिभिरिति

CC-0. In Public Domain. Digitization by eGangotri

सु॰
सि॰कौ॰
टी॰त॰
१४८

पंचमीविहिता अंचूत्तरपदयोगेप्यन्यारादित्यादिना विहितैव तेनात्र पंचम्येति ग्रहणं वहिर्योगे पंचमी भवतीति ज्ञापनार्थं। ज्ञापकमिदं न सर्वत्रेति करस्यकरयोर्वहिरित्यपि सिद्धं
आबालमिति। आपरमात्तोराच भूगोलकमिति किरणावलीप्रयोगस्तु प्रामादिकः। समासमध्ये च शास्त्रप्रयोगासंभवात्। आ च भूगोलकादिति पाठः सूचितः॥ ॐ॥ लक्षणेन। चिह्नं
लक्ष्म च लक्षणमित्यमरः। उदाहरति चिह्नवाचिनेति। इहाभिप्रती लक्ष्यलक्षणभावं आभिमुख्यं चेत्युभयं द्योतयत इति फलितं। अग्निमभि अग्निं प्रतीति। अभिरभागे। लक्षणेत्थंभू
तेत्यनेन च अभिप्रत्योः कर्मप्रवचनीयत्वाद्द्वितीया। लक्षणेनेति किं। स्रुघ्नं प्रतिगतः। स्रुघ्नादागतस्तमेव प्रतिनिवृत्त इत्यर्थः। अत्र हि स्रुघ्नः कर्मेति न तु लक्षणं। अभिप्रती किं। येना
ग्निस्तेन गतः। येन यया अग्निर्गतस्तेन गत इति प्रतीतेर्भवति गमनस्याग्निर्लक्षणं आभिमुख्यमप्यस्तीति येन तेन प्रादयोरग्निशब्देन समासः स्यात्। आभिमुख्ये किं। अभ्या
कागावः। प्रत्यंकाः। अभिनवः प्रतिनवश्चाक आसामिति बहुव्रीहिः। अंको ह्यत्र भवति गवां लक्षणमाभिमुख्यं तु नास्ति। ननूत्सर्गत अव्ययार्थप्राधान्येऽव्ययीभावस्वी
कारात्कथमिह प्रसंगः। अत्राहुः। इह प्रकरणे बहुव्रीहिविषयेऽव्ययीभावो भवतीति ज्ञापनार्थमिदं। तेन संख्यावंश्येन हि मुनि व्याकरणमित्यादि सिद्धमिति। अनुर्य

लक्षणेनाभिप्रती आभिमुख्ये।२।१।१४॥ आभिमुख्यद्योतकावभिप्रती चिन्हवाचिना सह प्राग्वत्। अभ्यग्नि शलभाः पतन्ति। अग्निमभि प्रत्यग्नि। अ
ग्निं प्रति। अनुर्यत्समया।२।१।१५॥ यमपदार्थं समया द्योत्यते तेन लक्षणभूतेनानुः समस्यते सोऽव्ययीभावः। अनुवनमशनिर्गतः। वनस्य स।

तः। यदिति समयायोगे द्वितीयेति ध्वनयति। यं पदार्थमिति। यस्य पदार्थस्य समीपमित्यर्थः। लक्षणेनेत्यनुवर्तत इत्याह। लक्षणभूतेनेति। चिन्ह (( मीपङ्गत इत्यर्थः
वाचिनेत्यर्थः। अव्ययं विभक्तीत्यनेन सिद्धे विभाषार्थं सूत्रं तेन पक्षे वनस्यानु इत्युदाहार्यमिति मनोरमायां स्थितं। अत्र वदंति। वनस्येति षष्ठी हदुर्लभा कर्मप्रवचनीययुक्ते द्विती
यायाद्दुर्वारत्वात्। तत्सामर्थ्यात्समयालंकामिति वत्समासबाधे प्रसक्ते अस्य विध्यर्थत्वात्। न चायमनुः सामीप्यमात्रद्योतको न लक्ष्यलक्षणभावस्येति वाच्यं। लक्षणेनेत्यनु
वृत्तिवैयर्थ्यात्। चैवमपि लक्षणमात्रद्योतकत्वं नास्तीति वाच्यं। लक्षणेत्थमित्यत्र मात्रपदाभावात्। अग्निमभि अग्निं प्रतीति पूर्वसूत्रस्योदाहरणप्रत्यविरोधाच्च। तेनात्र पक्षे वनम
नु इत्युदाहार्यं। वनस्य समीपं गत इति मूलस्थं विवरणवाक्यं तु लक्षणभूतस्य वनस्य समीपं गत इति व्याख्येयमिति। अन्विति किं। यंमं समया। यत्समयेति किं। वृक्षमनुवि
द्योतते विद्युत्। लक्षणेन किं। अनुवनं। उपकृष्णमितिवत्र नित्यमव्ययीभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यस्य चा। इहानुरित्यनुवर्त्तमानत्वात् तृतीयान्तत्वेन विपरिणमय्य व्याचष्टे। अनुनेति। लक्षणभूतेनेति लक्षणेनेत्यनुवर्त्तत इति भावः अनुगंगमिति इहायामो लक्षणं तच्चानुना द्योत्य
ते लक्ष्यं तु समासार्थः अत एव वाराणस्या सामानाधिकरण्यं। एवं स्थिते फलितमाह। गंगादैर्घ्येति। वाराणसीति वरं च तत् इनश्च वरानः श्रेष्ठो इनः। अनः स्त्रीवं जले
शाके मातृसंदनयोः इयोरिति रूढमसौ। तस्या दूरे भवा। अदूरभव श्चेत्यण्। आदिवृद्धिः। पूर्वपदात्संज्ञायामिति णत्वं। गंगाया अन्विति। समासाभावपक्षे प्रागुक्त
रीत्या गंगामन्विन्युदाहार्यमित्याहुः। तिष्ठद्गुप्रभृतीनि च। चकार एवकारार्थः तेनैषां वृत्त्यन्तरं न भवति। परमतिष्ठद्गु इत्यादि न भवतीत्यर्थः। तिष्ठद्गु इति। गोस्त्रियोरि
ति ह्रस्वः। प्रथमासमानाधिकरणे शत्रादेः प्राप्त्यसंभवादाह। इह शत्रादेश इति। इत्यादीनि। आदिशब्देन खलेयवं खलेबुसं सप्तम्या अलुक्। लूनयवं लूयमान
यवमित्यादि ग्राह्यं। पारे मध्ये। निपात्यत इति। यत्र सप्तम्यर्थो न संभवति तदर्थमेकारान्तत्वनिपातनं। सप्तम्यर्थसंभवे तु तत्पुरुषेणैति बहुलमिति बहुलग्रहणा

यस्य चायामः। २।१।१६। यस्य दैर्घ्यमनुना द्योत्यते तेन लक्षणभूतेनानुः समस्यते। अनुगङ्गं वाराणसी। गङ्गाया अनु। गङ्गादैर्घ्यसदृशदैर्घ्यो
पलक्षितेत्यर्थः। तिष्ठद्गुप्रभृतीनि च। २।१।१७। एतानि निपात्यन्ते। तिष्ठन्ति गावो यस्मिन्काले सति तिष्ठद्गु दोहनकालः। आयतीगवं। इह शत्रा
देशः पुंवद्भावविरहः समासान्तश्च निपात्यते। पारे मध्ये षष्ठ्या वा। २।१।१८। पारमध्यशब्दौ षष्ठ्यन्तेन सह वा समस्येते। एदन्तत्वं चानयो
र्निपात्यते। पक्षे षष्ठीतत्पुरुषः। पारेगङ्गादानय। गङ्गापारात्। मध्येगङ्गात्। गङ्गामध्यात्। महाविकल्पेन वाक्यमपि। गङ्गायाः पारात्। गङ्गाया

इत्युक्तापि सिद्धे इह तोत्र सप्तम्यर्थाभावसूचनाय पंचम्यंतमुदाहरति। पारेगंगादिति। महाविभाषयेति। ननु वा देरव्ययीभावे महाविभाषया विकल्पिते पक्षे तु इत्स
गः षष्ठीतत्पुरुषः प्रवर्तते तस्यापि विभाषाधिकारस्थत्वेन वैकल्पिकत्वात् पक्षे वाक्यमपि सिध्यतीति सूत्रे वाग्रहणं व्यर्थमेवेति चेत्। अत्राहुः महाविभाषया एकार्थीभावस्य
पाक्षिकत्वे विवक्षिते तदा एकार्थीभावस्तदा षष्ठीसमासं बाधित्वा नित्यमव्ययीभावे प्राप्ते पक्षे षष्ठीसमासः समावेशार्थमिह वाग्रहणं। व्यपेक्षासामर्थ्यमेके इति पक्षे तु इत्त्वापि
व्यपेक्षा लक्षणमेव सामर्थ्यमिति वाक्यस्य नित्यं बाधप्रसक्तौ तया इत्त्वे निर्विकल्प्यते। तथा चाव्ययीभावे विकल्पिते पूर्वोक्तरीत्या पक्षे तत्पुरुषस्तस्यापि वैकल्पिकत्वाद्वाक्यमपि सिध्यत्येव
तथापि यत्रोत्सर्गापवादौ महाविभाषया विकल्प्येते तत्रापवादेन मुक्ते पुनरुत्सर्गो न प्रवर्त्तत इति ज्ञापनाय इदं। तेन पूर्वकायस्येत्येकदेशिसमासेन मुक्ते षष्ठीसमासो न भवति।

CC-0. In Public Domain. Digitization by eGangotri



संख्यावंश्येन। वंशः संतानस्तत्रभवो वंश्यः। इत्यादिर्त्वा द्यत्। द्विमुनीति। पाणिनिकात्यायनौ। त्रिमुनीति। तौ द्वौ पतंजलिश्चेति त्रयो वंश्याः। व्याकरणस्येति संबंधे षष्ठी। स्वपदार्थप्रा
धान्य एवायं समासः। यदा त्वन्यपदार्थप्राधान्यविवक्षा त्रयो मुनयो वंश्या यस्येति तदा बहुव्रीहिरेवेत्याहुः। त्रिमुनिव्याकरणमिति। यद्यप्येतद्बहुव्रीहिणा प्युपपन्नं तथापि वि
भक्त्यंतरे इह पि विशेषो ऽस्त्येवेति भावः। वस्तुतस्तु लक्षणेनाभिप्रती इति सूत्रे आभिमुख्यग्रहणाद्बहुव्रीहिविषये ऽव्ययीभावो भवतीति द्विमुनिव्याकरणमित्यादि सिद्धमित्य
वोचाम। जन्मनोदाहरति। एकविंशतिभारद्वाजमिति। एकविंशतिर्भारद्वाजवंश्या इति विग्रहः। ननु भरद्वाजाद्विदादिभ्योपत्त्ये चेति लुक्प्राप्नोति। न च वर्त्तिपदानां स्वार्थो
पसर्जनेकत्वविशिष्टार्थांतरोपसंक्रमाल्लुगभाव इति कैयटोक्तमादर्त्तव्यं वृत्तिप्रवेशात्प्रागेव प्रवृत्तत्वांतरंगस्य लुको दुर्वारत्वात्। अन्यथा गर्गाणां कुलं गर्गकुलमित्यपि न
स्यात्। अत्राहुः। भाष्यकारप्रयोगादेव लुगभावो ऽत्रबोध्य इति। एतच्च तत्तीयाः सप्तम्यो रिति सूत्रे शब्दकौस्तुभे स्पष्टं। नदीभिश्च। स्वरूपस्य संज्ञां न द्या श्चेनेहग्रहणं बहुवचननि

संख्या वंश्येन। २।१।१९॥ वंशो द्विधा विद्यया जन्मना च तत्र भवो वंश्यः तद्वाचिना सह संख्या वा समस्यते। द्वौ मुनी वंश्यौ द्विमुनि। व्याकरणस्य॥
त्रिमुनि। विद्यातद्वतामभेदविवक्षया। त्रिमुनिव्याकरणं। एकविंशतिभारद्वाजं। नदीभिश्च। २।१।२०॥ नदीभिः संख्या प्राग्वत्। समाहारे चा
यमिष्यते। सप्तगङ्गं। द्वियमुनं। अन्यपदार्थे च संज्ञायां। २।१।२१॥ अन्यपदार्थे विद्यमानं सुबन्तं नदीभिः सह नित्यं समस्यते संज्ञायां। विभा
षा ऽधिकारे ऽपि वाक्येन संज्ञा ऽनवगमादिह नित्यसमासः। उन्मत्तगङ्गं नाम देशः। लोहितगङ्गं। समासान्ताः। ५।४।६८॥ इत्यधिकृत्य॥

ईशात्। किं त्वर्थस्य। न च तस्य समासः संभवति अतस्तद्वाचिनाम यं समासस्तेन च न केवलं विशेष शब्दा एव किं तु सामान्यशब्दोपि तेन पंचनदं सप्तगोदावरमिति सि
द्धं। गोदावर्याश्च नद्याश्चेति वक्ष्यमाणेन समासांतो ऽच्। चकारेण संख्येत्यनुकृष्यत इत्याह। संख्येति। स्यादेतत्। पुरस्तादपवादन्यायेन पूर्वकालैकेत्यस्यैवेदं बाधकं स्या
त्तत्श्चैकनदीत्यत्राव्ययीभावे तन्निबंधनस्य नदीपौर्णमास्येति टचः प्रसंगः समाहारे तु परत्वाद्द्विगुरेव स्यादित्यत आह। समाहारे चायमिति। एवकारार्थश्चकारः
एवं च द्विगोरपवादो ऽयमव्ययीभाव इति फलितं। अन्यपदार्थे चा संख्येति निवृत्तं नदीग्रहणमनुवर्त्तते तदाह। सुबंतं नदीभिः सहेति। अन्यपदार्थ इति किं॥
कृष्णवेणी। संज्ञा ऽनवगमादिति। सम्यक् ज्ञायते इति संज्ञा। आतश्चोपसर्ग इति कर्मण्यङ्। संज्ञिनो देशविशेषस्यानवगमादित्यर्थः। अन्यपदार्थानवगमादि

148

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यस्येत्यादिपदांतरसमभिव्याहारे लोन्यपदार्थप्रतीतेः। अत एव बहुव्रीहिर्न नित्यसमास इति भावः। संज्ञायां किं। शीघ्रगंगो देशः। अथाव्ययीभावे साधारणान् समा-
सांतानाह॥ ॥ अव्ययी॥ शरदादिभ्य इति वक्ष्ये पर्याये पुलाघवविंतानादृियत इति प्रभृतिग्रहणं कृतं। टच्स्यादिति। राजाहःसखिभ्य इत्यतष्टजनुवर्त्तत इति भावः
समासांत इति। समासस्य समासार्थोत्तरपदस्य वा चरमावयव इत्यर्थः। तेनोपशरदमित्यत्र नाव्ययीभावादित्यमसिद्ध्या व्ययीभावस्यादंतत्वात् द्विगुरीत्यादौ तु त्र-
कपूरब्धूरित्यप्रत्यय उत्तरपदस्यावयव इत्यकारांतोत्तरपदो द्विगुः स्त्रियामिति स्त्रीत्वे द्विगोरिति ङीप्सिध्यतीति बोध्यं। प्रतिविपाशमिति। लक्षणेनाभिप्रतीति
समासः। विपाशत्तु विपाट् स्त्रियामित्यमरः। गणे पठति शरदित्यादिना। अत्र झयंतास्ते याकप इति विकल्पे प्राप्ते नित्यार्थं पाठः। इह जराया जरस् प्रतिपरोति

अव्ययीभावे शरत्प्रभृतिभ्यः।५।४।१०७॥ शरदादिभ्यष्टच्स्यात्समासान्तोऽव्ययीभावे। शरदस्समीपमुपशरदं। प्रतिविपाशं। शरद्। विपाश्। अनस्। मनस्। उपानह्। दिव्। हिमवत्। अनडुह्। दिश्। दृश्। विश्। चेतस्। चतुर्। त्यद्। तद्। यद्। कियत्। जराया जरस् च। उपजरसं। प्रतिपरसमनुभ्योऽक्ष्णः। यस्येति च। प्रत्यक्षं। अक्ष्णः परमिति विग्रहे। समासान्तविधानसामर्थ्यादव्ययीभावः। परोक्षे लिडिति निपातनात्परस्योकारादेशः। परोक्षं। परोक्षा क्रियेत्यादि तु अर्शआद्यचि। समक्षं। अन्वक्षं। अनश्च।५।४।१०८॥ अन्नन्तादव्ययीभावाट्टच् स्यात्। नस्तद्धिते।६।४।१४४॥ नान्तस्य भस्य टेर्लोपस्यात्तद्धिते। उपराजं। अध्यात्मं॥

॥ ९ चहयं गणसूत्रं। उपजरसमिति। जरायास्समीप-
मित्यर्थः। यस्येति चेति। टचस्तद्धितत्वात्तस्मिन्परे इकारलोप इति भावः। प्रत्यक्षमिति। वीप्सायां यथार्थत्वेन समासः। अक्ष्णोरभिमुख्यमित्यर्थे लक्षणेनाभिप्रती-
ति वा समासः। अक्ष्णः परमिति। अविषय इत्यर्थः। वृत्तिविषये अक्षिशब्द इंद्रियमात्रपरः। अव्ययाघटितसमुदायस्य कथमिहाव्ययीभावो विधायकसूत्राभा-
वादित्याशंक्याह विधानसामर्थ्यादिति। समक्षमिति। अक्ष्णोर्योग्यं। अन्वक्षमिति। अक्ष्णः पश्चादित्यर्थे अव्ययीभावः। न तद्धिते। नइत्यनेन नस्येत्यधिकृतं वि-
शेष्यते। विशेषणेन तदंतविधिरत आह। नान्तस्य भस्येति। ननूपराजमित्यादौ न तद्धित इति व्यर्थो अव्ययानां भमात्र इति टिलोपेनैव सिद्धेः। न चाव्ययत्वं टजि-
शिष्टे पर्यायमिति वाच्यं। अव्ययीभावसंज्ञाया उपजीव्यत्वेन टचः पूर्वभागस्याप्यव्ययत्वानपायात्। अत्राहुः। भाष्ये लुङ्मुखस्वरोपचारे इत्रिषु कार्येषु॥
नः

CC-0. In Public Domain. Digitization by eGangotri



अव्ययीभावस्याव्ययसंज्ञाविधानान्न दोष इति। युक्तं चैतत्। अन्यथा उपशरदमित्यादौ टिलोपः प्रसज्येत। अध्यात्ममिति। आत्मनि अध्यात्मं विभक्त्यर्थेऽव्ययीभावः॥
नपुंसकादन्यान्नपुंसकग्रहणमन्नंतस्य विशेषणं नाव्ययीभावस्य अव्यभिचारादित्याह अन्नंतं यत्क्लीबमिति। अन्नंतेनचाव्ययीभावविशेषणेन तदंतविधिरित्या
हतदंतादिति। उपचर्ममिति। टचि लोपोऽन्नंतत्वादभावश्चान्नदीपौर्ण। इह स्वरूपस्यैव ग्रहणं न संज्ञायाः। पौर्णमास्याग्रहायण्योः पृथग्ग्रहणात्। उपनदीति। टज
भावे नपुंसकह्रस्वः। अत्र व्याचक्षते। वृत्तिग्रंथमनुरुध्येदं विकल्पकथनं परमार्थतस्तु नेहान्यतरस्यामित्यनुवर्त्तते व्यवहृगणेति सूत्रस्थभाष्यविरोधात्। तत्र हि नदी
शब्देन नदीविशेषाणां गंगायमुनादीनां ग्रहणमाशंक्य शरत्प्रभृतिषु विपाट्शब्दपाठान्नेति समाहितं। न चेदं भाष्यं नदीपौर्णमासीत्यत्र टचः पाक्षिकत्वे संगच्छते नित्यार्थत

नपुंसकादन्यतरस्यां। ५।४।१०९॥ अन्नंतं यत्क्लीबं तदंतादव्ययीभावाट्टज्वा स्यात्। उपचर्मं। उपचर्म। नदीपौर्णमास्याग्रहायणीभ्यः
५।४।११०। वा टच् स्यात्। उपनदं। उपनदि। उपपौर्णमासं। उपपौर्णमासि। उपाग्रहायणं। उपाग्रहायणि। झयः। ५।४।१११। झयंतादव्य
यीभावाट्टज्वा स्यात्। उपसमिधं। उपसमित्। गिरेश्च सेनकस्य। ५।४।११२। गिर्यंतादव्ययीभावाट्टज्वा स्यात्। सेनकग्रहणं पूजार्थं। उपगिरं। उ
पगिरि॥ इत्यव्ययीभावः। तत्पुरुषः। २।१।२२। अधिकारोऽयं प्राग्बहुव्रीहेः। द्विगुश्च। २।१।२३। द्विगुरपि तत्पुरुषसंज्ञः स्यात्। इदं सूत्रं त्यक्तुं श
क्यं। संख्यापूर्वो द्विगुश्चेति पठित्वा चकारबलेन संज्ञाद्वयसमावेशस्य सुवचत्वात् समासांतः प्रयोजनं। पंचराजं॥

११ पाठमात्रस्योपपत्तेः। अत एव सेनक
ग्रहणमुत्तरत्रार्थवत्। कैयटस्तु व्यवस्थितविभाषामाश्रित्य वृत्तिग्रंथं कथंचित्समर्थितवानिति। पूजार्थमिति। अन्यतरस्यामित्यनुवृत्त्या विकल्पसिद्धेरिति भावः। इत्यव्ययी
भावः। चकारबलेन संज्ञाद्वयसमावेशस्येति। न चैवं द्विगुतत्पुरुषयोः पर्यायता स्यादिति शंक्यं योगं विभज्य संख्यापूर्वस्य तत्पुरुषसंज्ञां विधाय पश्चाद्द्विगुसंज्ञाविधाने न चका
रपठनमंतरेणापि पर्यायत्वसिद्धेः। नापि द्वौ अन्यो यस्य द्व्यन्य इत्यत्रातिप्रसंगः शंक्यः। तद्धितार्थोत्तरपद इति सूत्रमनुवर्त्य तद्धितार्थेत्यत्र उक्तस्त्रिविधः संख्यापूर्व इति व्याख्या
नात्। द्विगोस्तत्पुरुषत्वे फलमाह। समासांत इति। टजचावित्यर्थः। अचि तु द्वाहरणं तत्पुरुषस्यांगुलेरित्यच् द्व्यंगुलमिति बोध्यं। पंचराजमिति। समाहारद्विगो राजाहस्स।
खिभ्य इति टच् समासस्यैवावयवस्तावयव इति उत्तरपदस्यानकारांतत्वात् स्त्रीत्वाभावः। समासार्थोत्तरपदांताः समासांता इति पक्षे तु अकारांतोत्तरपदत्वेपि पात्रादित्वा

149

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्नेति बोध्यं। काशिकायां तु पंचराजीत्युदाहृतं। स क्वाचित्कोपपाठ इति हरदत्तः। अत्र केचित्। पात्रादित्वकल्पने मानाभावात् पंचराजीति काशिकोक्तोदाहरणमपि सम्यगेवे-
त्याहुः॥ ॐ ॥ द्वितीया श्रितातीत। श्र्यादीनां गतिविशेषवाचित्वाद्धात्वर्थाकर्मकेति कर्तरि क्तः। प्रत्ययग्रहणे तदन्तग्रहणमित्याशयेनाह। द्वितीयान्तमिति। श्रितादिप्रकृति-
कैरि ति। यद्यपि संबोधने सुबन्तत्वं संभवति तथा न्यत्रापि समासस्येष्टत्वात् श्रितादयस्तद्धितसमुदाये लाक्षणिका इह गृह्यन्त इति भावः। एवं खट्वाक्षेपे गर्गादिभ्यो यञि-
त्यादावप्यूह्यं। नहि खट्वेत्यस्य द्वितीयान्तत्वं गर्गादीनां षष्ठ्यन्तत्वं वा संभवति। स्यादेतत्। द्वितीयान्तस्य श्रितप्रकृतिकसुबन्तेन समासे काष्ठश्रितेयो न सिध्येत्। श्रितशब्दाट्टापि त-
तः सुपि काष्ठश्रिता काष्टश्रितेति समासे श्रिताशब्दस्यैव टाबन्तत्वात् ततः स्त्रीभ्यो ढगिति ढकि काष्ठश्रैतेय इति स्यात्। गतिकारकोपपदानामिति सुबुत्पत्तेः प्रागेव तेन समा-
से तु श्रितान्तस्य टाबन्तत्वादिष्टं सिध्यतीति चेन्मैवं। प्रधानस्त्रीप्रत्यये तदादिनियमाभावेन काष्ठश्रितेयस्य निर्बाधत्वात्। न च कदाचित् श्रिताशब्दादपि ढक्स्यादिति

द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः।२।१।२४॥ द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह समस्यते वा तत्पुरुषः। कृष्णं श्रितः। कृष्णश्रि-
तः। दुःखमतीतः। दुःखातीतः। गम्यादीनामुपसंख्यानं। ग्रामं गमी। ग्रामगमी। अन्नं बुभुक्षुः। अन्नबुभुक्षुः। स्वयं क्तेन।२।१।२५। द्वितीयेति न सम्ब-
ध्यते ऽयोग्यत्वात्। स्वयं कृतस्यापत्यं। स्वायंकृतिः। खट्वा क्षेपे।२।१।२६॥ खट्वाप्रकृतिकं द्वितीयान्तं क्तान्तप्रकृतिकेन सुबन्तेन समस्यते निन्दायां
खट्वारूढो जाल्मः। नित्यसमासोऽयं। नहि वाक्येन निन्दा गम्यते॥ सामि।२।१।२७॥ सामिकृतं॥ ॥ ऽऽ वाच्यं। जहत्स्वार्थायां वृत्तौ श्रिताशब्दस्या-
नर्थकत्वेनापत्ययोगासंभवात्। अजहत्स्वार्थायामपि न दोषः। समुदायावयवसंनिधौ समुदायस्यैव कार्यप्रयोजकत्वात्। अन्यथा सुंदरदुहितुरपत्यं सुंदरदौहित्र इ-
त्यापत्तेरिति दिक्। कृष्णं श्रित इति। न लोकेति षष्ठीनिषेधः। कृष्णश्रित इति। प्रथमानिर्दिष्टमिति द्वितीयान्तस्य पूर्वनिपातः। यद्यपीह श्रितशब्दोऽपि प्रथमानिर्दिष्टस्तथा-
पि समासविधायके प्रथमानिर्दिष्टमुपसर्जनमित्युक्तमिति नास्ति प्रसंगः। नन्वेवमव्ययादीनामुपसर्जनसंज्ञार्थमव्ययं विभक्तीत्यादिना समासविधानस्यावश्य-
कत्वात् सुप्सुपेति समासस्यानित्यत्वे प्रागुक्तं ज्ञापकं न संभवत्येव तथा चाव्ययीभावतत्पुरुषादिसमासाभावपक्षे सुप्सुपेति समासप्रवृत्त्या अपविष्णोः परिविष्णोः
कृष्णं श्रितः राज्ञः पुरुष इत्यादि विग्रहवाक्यानि न सिद्ध्येरन्निति चेदत्राहुः। पुनः समासविधानं न केवलमुपसर्जनसंज्ञार्थं तस्याः प्रकारान्तरेणापि सिद्धेः। तथा

CC-0. In Public Domain. Digitization by eGangotri

सु·

सि·कौ· प्राक्कडारात्समासइत्यनंतरंप्रथमानिर्दिष्टमुपसर्जनमेकविभक्तिचापूर्वनिपातइतिपठित्वासमासाधिकारेप्रथमानिर्दिष्टमितिव्याख्यायामुपसर्जनसंज्ञासिध्यत्येव
टी·त· विभक्त्यर्थादिषुविद्यमानमव्ययंसुबंतेनचेत्समस्यतेससमासोव्ययीभावःस्याद्द्वितीयांतंचेत्ससमासस्तत्पुरुषइत्येवंव्याख्यानादव्ययीभावतत्पुरुषादिसंज्ञापिसिध्यतीति
१५२ पुनःसमासविधानंव्यर्थंसत्तज्ज्ञापयतिनन्वव्ययंविभक्त्यादीनांसमासविधायकत्वेसिद्धेभवदुक्तमेतत्स्यात्।तत्रैवमानंनपश्यामइतिचेदत्रकेचित्।उक्तरीत्ये
वोपसर्जनसंज्ञायांसिद्धायांप्रथमानिर्दिष्टमितिसूत्रेसमासग्रहणंव्यर्थंसत्समासविधायकेप्रथमानिर्दिष्टमित्यर्थलाभार्थंतेनामीषांसमासविधायकत्वंसिध्य
तीति।अथवासुप्सुपेतिसमासस्यानित्यत्वेआकरग्रंथएवप्रमाणं।अन्यथासिन्नित्यसमासयोरितिवार्त्तिकेनित्यग्रहणेननार्थः।इदमपिसिद्धंभवतिवाप्याम
श्वोवाप्यश्वइत्यादिप्रागुक्तभाष्यकैयटग्रंथस्यासामंजस्यापत्तेरितिदिक्।ननुकृष्णश्रितइत्यस्यकृष्णकर्मकश्रयणकर्त्तेत्यर्थः।सचकृष्णःश्रितोयेनेतिकर्मणिक्तां
तेनबहुव्रीहिणापिसुलभइतिकिमनेनसमासारंभेणमैवं।बहुव्रीहौश्रितकृष्णइतिनिष्ठांतस्यपूर्वनिपातप्रसंगात्।शेषाद्विभाषेतिसमासांतःकप्प्रसज्येतेतिदि
क्।दुःखातीतइति।अतिपूर्वकादिणःकर्त्तरिक्तः।अवशिष्टान्यप्युदाहरणान्यूह्यानि।कूपपतितः।यद्यपितनियतिदरिद्रातिभ्यइतिविकल्पितेट्त्वात्यस्यविभाषेतिइण्नि
षेधेनभाव्यं।तथाप्यतएवनिपातनादिडित्याहुः।वस्तुतस्तुचुरादावदंतेषुपठितस्यपतगतौचेत्यस्याश्रयणेनपतितःसिध्यतियस्यविभाषेत्यत्रैकाचइत्यनुवृत्ते
स्सर्वसंमतत्वात्।ग्रामगतः।तुहिनात्यस्तः।अत्यासोव्यतिक्रमस्सोपिगतिविशेषएवेतिकर्त्तरिक्तः।आदिकर्मणिक्तोवात्राभ्युपेयः।सुखप्राप्तः।दुःखापन्नः।गम्यादी
नामिति।गम्यादयश्चप्रयोगतोज्ञेयाः।ग्रामंगमीति।गमेरिनिरित्यौणादिकइनिः।सचभविष्यतिगम्यादयइतिभविष्यत्काले।अकेनोरितिषष्ठीनिषेधात्कर्मणिद्वितीया।अयोग्यप्र
त्वादितिस्वयमित्यस्यात्मनेत्यर्थ कस्य कर्त्रर्थेतयाद्वितीयांतत्वानुपपत्तिरितिभावः।सायंकृतेरिति।असतिसमासेकार्त्तिरितिस्यादितिभावः।खट्वारूढइति।जाल्मोसमी
क्ष्यकारीत्यादित्यमरः।वेदंव्रतानिचसमाप्यसमावृत्तेनहिखट्वारोढव्या।ब्रह्मचर्यएवभूमिशयनार्होपियःखट्वामारोहतिसजाल्मः।रूढश्चायं तेनखट्वामारोहणमात्रानि
षिद्धानुष्ठानपरःसर्वोपिखट्वारूढइत्युच्यते।अतएवाहानित्येति।सामि।सामीत्येतदव्ययमर्धशब्दपर्यायः॥ ॥ ॥ ॥

150

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालाः। बहुवचननिर्देशः स्वरूपनिरासार्थः। कालवाचिनो द्वितीयान्ताः क्तान्तेन सह वा समस्यन्त इति सूत्रार्थः। ननु कालाः अत्यन्तसंयोगे इत्येवास्तु क्तेनेति निवृत्तं नार्थो यो
गविभागेनेत्यत आह अनत्यन्तेति। मासप्रमित इति। माङ् माने। आदिकर्मणि क्तः कर्तरि। इह प्रतिपच्चन्द्रेण मासस्यात्यन्तसंयोगः। मुहूर्तमिति। मुहूर्तव्यापीत्यर्थः। कालाध्व
नोरत्यन्तसंयोग इति द्वितीया। तृतीया तत्कृता लुप्तेति। सौत्रत्वादिति भावः। तच्छब्देन तृतीयान्तपरामर्शो नान्तरीयार्थो लभ्यते। तदर्थकृतत्वं च गुणवाचकस्यार्थद्वारा वि
शेषणं। तृतीयान्तार्थकृतो यो गुणस्तद्वचनेनेति। तदेतद्व्याचष्टे तृतीयान्तार्थेत्यादिना अर्थशब्देन चेति। सोपि स्वतन्त्रं निमित्तमिति भावः। नन्वर्थेन समासासंभ
वात्तद्वाची शब्दो गृह्यते किमत्र वचनग्रहणेन। अत्राहुः। गुणमुक्तवान् गुणवचनः। कृत्यल्युटो बहुलमिति भूते कर्तरि ल्युट्। गुणमुक्त्वा यो द्रव्यमुक्तवान्

कालाः। २।१।२८॥ क्तेनेत्येव। अनत्यन्तसंयोगार्थमिदं वचनं॥ मासप्रमितः प्रतिपच्चन्द्रः। मासम्परिच्छेत्तुमारब्धवानित्यर्थः॥ अत्यन्तसंयोगे च। २।
१।२९॥ कालाइत्येव। अक्तान्तार्थं वचनं। मुहूर्तं सुखं मुहूर्तसुखं॥ तृतीया तत्कृतार्थेन गुणवचनेन। २।१।३०॥ तत्कृतेति लुप्ततृतीयाकं तृती-
यान्ततृतीयान्तार्थकृतगुणवचनेनार्थशब्देन च सह प्राग्वत्। शंकुलया खण्डः। शंकुलाखण्डः। धान्येनार्थो धान्यार्थः। तत्कृतेति किं। अक्ष्णा काणः॥
पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः॥ २।१।३१॥ तृतीयान्तमेतैः प्राग्वत्। मासपूर्वः। मातृसदृशः। पितृसमः। ऊनार्थे। माषोनं। माषवि
कलं। वाक्कलहः। आचारनिपुणः। गुडमिश्रः। आचारश्लक्ष्णः। मिश्रग्रहणे सोपसर्गस्यापि ग्रहणं। मिश्रत्वानुपसर्गमसं
ध्यावित्यत्रानुपसर्गग्रहणात्। गुडसंमिश्रा धानाः। अवरस्योपसंख्यानं॥ मासेनावरो मासावरः॥

ऽऽ सगुणवचनस्तेन घृतेन पाटवमिति गु
णमात्रनिष्ठेन समासो न भवति गुणश्चात्र सत्त्वे निविशते पैतीत्यादिलक्षणलक्षितो गृह्यते न तु प्रवृत्तिनिमित्तं घटत्वादि सत्कृतत्वासंभवादिति। शंकुलया खण्डइ
ति। करणे तृतीया। खडि भेदने इत्यस्मात् भावे घञि व्युत्पादितः खण्डशब्दः क्रियारूपा पन्नेर्गुणो वर्णितः तत्पश्चान्मत्वर्थलक्षणया तद्वति द्रव्ये वर्तत इति गुणव
चनो भवति। धान्येनेति। करणे तृतीया। अर्थ्यते इत्यर्थः प्रयोजनं। कर्मणि घञ्। अर्थेन मर्थः। अभिलाषो वा भावे घञ्। अर्थशब्दस्य रूढत्वेन तु धान्येनेति हेतौ
तृतीया कर्तृकरणे कृतेत्यनेन गतार्थत्वशंकैवात्र नेति रूढत्वाभ्युपगमपक्ष एव श्रेयान्। तत्कृतेति किमिति। कर्तृकरणे कृतेति सिद्धमिति प्रश्नः। इतरो गुणव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



चनेन चेत्तत्कृतेनैवेति नियमार्थमिदमित्याशयेन प्रत्युदाहरति। असत्येति। न ह्यक्ष्णः काणत्वं कृतं किंतु कर्मादिनैवेति भावः। तृतीयालिङ्गयेनाङ्गविकार इत्यनेन। का-
णइति। काणनिमीलन इत्यस्माद्धञ्। गुणवचनत्वं तु तृतीयाखंडशब्दस्येवास्यापि बोध्यं। गुणवचनेनेति किं। गोभिर्वपावान्। गोसंबंधिदध्यादिभोजनेन देवदत्तस्य
वपावत्वमित्यस्ति तत्कृतत्वं न तु सो गुणवचनः। पूर्वसदृश। इह समसदृशाभ्यां योगे तुल्यार्थैरिति तृतीया। अन्यैर्योगे त्वनेन एव वचनाद्भवतीति वा तृतीया। इह
सदृशग्रहणं व्यर्थं षष्ठीसमासेन गतार्थत्वात्। न च तत्पुरुषे तुल्यार्थतृतीयेति पूर्वपदप्रकृतिस्वरार्थमिदमिति वाच्यं। सदृशप्रतिरूपयोः सादृश्य इति सूत्रेणैव तत्सि-
द्धेरिति मनोरमायां स्थितं। विद्यया सदृशो विद्यासदृश इत्यादौ हेतुत्वप्रकारकबोधार्थं तृतीयासमासोऽप्यावश्यक इति त्वन्ये। पूर्वसूत्रेणैव तत्कृतत्वात्तृतीयासमासो-
ऽपि सिध्यतीत्यपरे। ऊनार्थेति। पूर्वसूत्रेऽर्थशब्देन समासस्योक्तत्वादिहार्थग्रहणमभिधेयपरं। न त्वोनशब्देनैव संबध्यते। न तु पूर्वादिभिः समसदृशयोः पृथगुपादानादिति

कर्तृकरणे कृता बहुलं। २।१।३२। कर्तरि करणे च तृतीया कृदन्तेन बहुलम्प्राग्वत्। हरिणा त्रातो हरित्रातः। नखैर्भिन्नो नखभिन्नः। कृद्ग्रहणे
गतिकारकपूर्वस्यापि ग्रहणं। नखनिर्भिन्नः। कर्तृकरणेति किं। भिक्षाभिरुषितः। हेतावेषा तृतीया। बहुलग्रहणं सर्वोपाधिव्यभिचारार्थं
तेन दात्रेण लूनवानित्यादौ न। कृता किं। काष्ठैः पचतितरां॥ ॥ १९ भावः। मिश्रं चेति। पणबंधेनैकार्थ्ये संधिस्तत्राप्रयुज्यमानो मिश्रशब्द

उपसर्गरहितोऽन्तोदात्त इति सूत्रार्थः। अवरस्येति। अत्र व्याचक्षते। ऊनार्थेत्येव सिद्धत्वादिदं सुत्यजमेव। न चावरशब्दस्योनार्थकत्वमप्रसिद्धमिति वाच्यं। समसदृश
वराः सत्रमासीरन्निति श्रुतौ अव्यक्तानुकरणाद्व्यजवरार्धादिति सूत्रे च तत्प्रसिद्धेरिति। कर्तृकरणे। समाहारद्वंद्वात्सप्तमीत्याशयेनाह कर्तरि करणे चेति। अत्र केचित्। क-
र्तृकरणे इति प्रथमाद्विवचनं तृतीयया विशेष्यते। विशेषणेन च तदंतविधिः। तेन तृतीयांते कर्तृकरणे कृदंतेन समस्येते इति व्याख्यांतरमित्याहुः। सर्वोपाधीति। कर्तरि करणे च या तृ-
तीया तदंतमपि बहुलग्रहणात् क्वचिन्न समस्यते क्वचित्तु विभक्त्यंतरमपि समस्यते बहुलग्रहणादेवेत्यर्थः। समासाभावं प्रदर्शयति। दात्रेण लूनवानित्यादाविति। आदिशब्देन दा-
त्रेणच्छिन्नवान् हस्तेन कुर्वन्नित्यादिग्राह्यं। विभक्त्यंतरमपि समस्यत इत्यस्योदाहरणं तु पादहारकः। गलेचोपकः। ह्रियत इति हारकः। बाहुलकात्कर्मणि ण्वुल्। पादाभ्यामित्यपादा-
नपंचम्यंतस्य समासः। चुप मंदायां गतौ। हेतुमण्णिजंतात्कर्मणि ण्वुल्। अमूर्धमस्तकादित्यलुक्। कर्तृत्वकरणत्वयोः क्रियानिरूपितत्वेन क्रियासमर्पककृदंतेनैव भवेत्समासः।

152

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सुपेत्यधिकारान्तिङं तेन तु नातिप्रसंग इत्याशयेन पृच्छति। कृतेति किमिति। इतरस्तु तिङंतप्रकृतिकतद्धितांतप्रकृतिकसुवंतेनासमासस्तत्फलमित्याशयेन प्रत्युदाहरति काष्ठैरिति॥ः॥
कृत्यैरधि। पूर्वसूत्रस्यैव प्रपंचोयं न तु नियमार्थमित्याहुः। काकपेयेति। शकिलिङ्चेति शक्यार्थकृत्यः पूर्णतोयत्वात्तटस्थैः काकैरपि पातुं शक्येति स्तुतिः। अल्पतोयत्वेन निंदा वा। वा
तच्छेद्यमिति। पूर्ववत्कृत्यः। कोमलत्वाद्वातेनापि छेत्तुं शक्यत इति स्तुतिः। वातेनापि छेत्तुं शक्यते निर्बलत्वान्निंदा वा। अन्नेन। भिस्सा स्त्री भक्तमंधोन्नमोदनोस्त्रीत्यमरः। व्याख्याना
न्नेह स्वरूपग्रहणं तत्साहसंस्कारकेत्यादि। भक्ष्येण। खरविशदमभ्यवहार्यं भक्ष्यं। खरं कठिनं विशदं विविक्तावयवं खाद्यं भक्ष्यमित्यर्थः। यत्प्रत्ययांतस्य एरजंतस्य च भक्ष्यतेस्तत्रैव
प्रयोगात्। अन्नस्य इत्यादिप्रयोगस्तु भाक्तः। गुडधाना इति। ननु धानानां प्रत्येकं विभक्तावयवत्वाभावात्कथमेतदुदाहरणं संगच्छत इति चेन्मैवं। भृष्टयवसमुदायस्य धानात्वात्स

कृत्यैरधिकार्थवचने। २।१।३३॥ स्तुतिनिन्दाफलकमर्थवादवचनमधिकार्थवचनन्तत्र कर्तृकरणे च तृतीया कृत्यैस्सह प्राग्वत्। वातच्छेद्यन्तृणं॥
काकपेया नदी। अन्नेन व्यञ्जनं। २।१।३४॥ संस्कारकद्रव्यवाचकन्तृतीयान्तमन्नेन प्राग्वत्। दध्ना ओदनो दध्योदनः। इहान्तर्भूतोपसेकक्रियाद्वारा सामर्थ्यं
भक्ष्येण मिश्रीकरणं। २।१।३५॥ गुडेन धानाः। गुडधानाः। मिश्रणक्रियाद्वारा सामर्थ्यं। चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः। २।१।३६॥ चतुर्थ्यन्तार्था
ययत्तद्वाचिनाऽर्थादिभिश्च चतुर्थ्यन्तम्वा प्राग्वत्। तदर्थेन प्रकृतिविकृतिभावएवेवलिरक्षितग्रहणाज्ज्ञापकात्। यूपाय दारु। यूपदारु। नेह रन्धनाय
स्थाली। अश्वघासादयस्तु षष्ठीसमासाः। अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यं॥ द्विजायायं द्विजार्थः सूपः। द्विजार्था यवागूः॥ द्विजार्थम्प
यः। भूतबलिः। गोहितं। गोसुखं। गोरक्षितं॥ ॥ २२ मुदायं प्रति समुदायिनामवयवत्वाच्च तदुपपत्तेः। चतुर्थी तदर्थ॥ तच्छब्देन प्रकृता चतुर्थी परा

मृश्यते प्रत्ययग्रहणात्तदंतग्रहणं। चतुर्थ्यन्तेन सामर्थ्यात्तदर्थो लक्ष्यत इत्याशयेनाह। चतुर्थ्यन्तार्थायेत्यादिना। चतुर्थ्यन्तवाच्याय यदुपादेयं तद्वाचिना चतुर्थ्यन्तं समस्य
त इत्यर्थः। बलिरक्षितग्रहणादिति हितसुखग्रहणं तु न ज्ञापकं तद्योगे चतुर्थी चाशिषीति अतादर्थ्येपि चतुर्थीसंभवादिति भावः। ननु चतुर्थी चाशिषीति विहिताया चतुर्थ्यन्त
दन्तस्य समासो न भवति। समासादाशिषोऽनवगमादिति केचिदाहुः इति कैयटेनोक्तं। ततश्च तत्पक्षे हितसुखग्रहणमपि बलिरक्षितग्रहणवत्ज्ञापकमेवेति चेदत्र नव्याः। ब्राह्म
णाय हितं ब्राह्मणे हितम्। गोहितं। गोसुखमित्यतादर्थ्ये चतुर्थ्यन्तेनापि समासः स्वीक्रीयते। सा चातादर्थ्ये चतुर्थी हितयोगे चेति वार्त्तिकाच्चतुर्थी तदर्थ त्यादिना हितसुखश्र

CC-0. In Public Domain. Digitization by eGangotri

सु.
सि.कौ.
टी.त.
१५३

व्याभ्यांसमासविधानात् ज्ञापनाद्वा संभवतीति हि तत्सुखग्रहणं न ज्ञापकमिति तु सम्यगेवेत्याहुः। पुपायेतिना दर्थ्ये चतुर्थी। एवमग्रेपि यथासंभवमूह्यं। अश्वघासादयश्चेति। एतच्च
भाष्यकृतोक्तं। नन्वेवं रंधनाय स्थालीत्यत्रापि षष्ठीसमासः स्यादेवेति प्रकृतिविकृतिभावएवेति नियमो निष्फल एव न च स्वरे विशेषः। चतुर्थीति दर्थेइतिपूर्वपदप्रकृतिस्वरस्यापि प्रकृ
तिभाव एवेष्यमाणत्वात्। अत्राहुः। संबंधत्वतादर्थ्यत्वकृतवैलक्षण्येनोक्तनियमसाफल्यान्न दोषः। अत एव च मानमेतदेव भाष्यं नमाषाणामश्रीयात् दासार्थाय मैथिदीत्यादि
प्रयोगा अपि दर्थ्यमेव विवक्षाभेदेन निर्वाह्याः। एवं च पूर्वसदृशेतिसूत्रे सदृशग्रहणं व्यर्थमिति कैयटहरदत्तादीनामुक्तिः प्रामादिकीत्यवधेयं। शब्दबोधकृत वैलक्षण्यस्यतत्रा
पिसत्वादिति। अर्थेन नित्येति। अन्यथा विभाषाधिकारात् पक्षे द्विजायार्थ इति प्रयोगः स्यादिति भावः। विशेष्यलिंगताचेति वचनाभावेत्वर्थशब्दस्य नित्यपुंस्त्वात् परवल्लिंगमिति
सर्वत्र पुल्लिंगप्रयोग एव स्यादिति भावः॥ ॥ पंचमी भयेन। भयेति स्वरूपग्रहणं नार्थस्य प्रमाणाभावाद्भयभीतेतिवार्त्तिकारंभाच्च। तेन वृकात्त्रास इत्यादौ समासो न। कथं तर्हि

पंचमी भयेन।२।१।३७। चौराद्भयं। चौरभयं। भयभीतभीतिभीभिरिति वाच्यं। वृकभीतः॥ अपेतापोढमुक्तपतितापत्रस्तैरल्पशः।२।१।३८। एतैस्स
हाऽल्पम्पञ्चम्यन्तं समस्यते स तत्पुरुषः। सुखापेतः। कल्पनापोढः। चक्रमुक्तः। स्वर्गपतितः। तरङ्गापत्रस्तः। अल्पशः किं। प्रासादात्पतितः॥ स्तो
कान्तिकदूरार्थकृच्छ्राणि क्तेन।२।१।३९। स्तोकान्मुक्तः। अल्पान्मुक्तः। अन्तिकादागतः। अभ्यासादागतः। दूरादागतः। कृच्छ्रादागतः॥ पञ्चम्याः
स्तोकादिभ्यः इत्यलुक्॥ षष्ठी।२।२।८। राज्ञः पुरुषः॥ राजपुरुषः॥ ॥ १९ भोगापरतो ग्रामनिर्गत इत्यादि प्रयोगाः। अत्राहुः। बहुलग्रहणात्क्वचिद्विभ

क्त्यंतरमपि क्तान्तासमस्यत इति प्रागेवोक्तत्वात् सुप्सुपेत्यनेन वा तदुपपत्तिरिति। अपेतापोढ। पंचमीति वर्त्तते अल्पग्रहणात्त्वंतग्रहणं। अल्पश इत्यत्र बहल्पार्थाच्छस्कारकादिति शस
यद्यपि बह्वल्पार्थान्मंगलामंगलवचनमिति वक्ष्यति तथाप्यत एव निपातनाच्छसिति बोध्यं। कारकत्वं तु समस्तक्रियांप्रति पंचम्यंतस्य कर्मत्वात्तदभिधायित्वाच्चाल्पशब्दस्य तदे
तराह। अल्पं पंचम्यंतमिति। स्तोकान्मुक्त इत्यादि। करणे च स्तोकाल्पेति पंचमी॥ दूरादागत इत्यादौ तु दूरांतिकार्थेभ्य इत्यनेन॥ राजपुरुष इति राजन् अस् पुरुष सु इत्यलौ
किकविग्रहे समासे कृते सुपोलुकं तद्वर्त्तिनी विभक्तिमाश्रित्य पदत्वान्नलोपः॥ ॥ ॥ ॥ ॥ राम ॥ कृष्ण ॥ ॥

152

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

याजकादिभिश्च। याजक। पूजक। परिचारक। परिषेचक। स्नातक। अध्यापक। उत्सादक। होतृ। पोतृ। भर्तृ। रथगणक। पत्तिगणक। इत्यगुणान्तरेणेति। एतच्च वार्त्तिकं सर्वगुणकार्त्स्न्ये इ
त्यत्र पठितं। कृद्योगा च षष्ठीति। कर्तृकर्म्मणोः कृतीति कृत्संनियोगेन कृतेत्यर्थः। यद्यपि प्रतिपदविधानेत्यादिनिषेधवचनमारभ्यते तर्हि इदं तद्बाधनायारब्धव्यं तस्यैवानारभ्यत्वमनु
पदं वक्ष्यामः। इध्मप्रव्रश्चन इति। वृश्च्यते छिद्यतेऽनेनेति व्रश्चनः कुठारादिः करणे ल्युट्। इध्मानामिति कर्मषष्ठ्यं तस्यानेन समासः। नृणामिति। यतश्च निर्धारणमिति षष्ठी। द्विज
शब्देनात्र समासप्रसंगस्तदेव हि षष्ठी। श्रेष्ठत्वं हि द्विजेतरमनुष्येभ्यः। तेषां सामान्यशब्देनोपस्थितत्वयानात्विहायानुपस्थितकल्पनाया अन्याय्यत्वात्। अथ कथं पुरुषो
त्तम इति। यस्मान्निर्धार्यते यश्चैकदेशो निर्धार्यते यश्च निर्धारणहेतुः एतत्त्रितयसन्निधाने सत्येवायं निषेध इति हि वचनविभज्येति सूत्रे कैयटः। अन्ये तु पुरुषेषूत्तम इति
निर्धारणे सप्तम्याः संज्ञायामिति समास न चैवं न निर्धारण इति व्यर्थ्यं। स्वरे भेदात्। सप्तमीसमासे हि तत्पुरुषे तुल्यार्थेत्यादिना पूर्वपदप्रकृतिस्वरः

याजकादिभिश्च २।२।९॥ एभिः षष्ठ्यन्तं समस्यते। तृजकाभ्यां कर्तरीत्यस्य प्रतिप्रसवोऽयं। ब्राह्मणयाजकः। देवपूजकः। गुणान्तरेण तरब्लोपश्चेति
वक्तव्यं। तरबन्तं यद्गुणवाचि तेन सह समासस्तरब्लोपश्च। न निर्धारणे इति पूरणगुणेति च निषेधस्य प्रतिप्रसवोऽयं। सर्वेषां श्वेततरः। सर्वश्वेतः। सर्वेषा
म्महत्तरः। सर्वमहान्। कृद्योगा च षष्ठी समस्यत इति वाच्यं॥ इध्मस्य व्रश्चनः। इध्मव्रश्चनः। न निर्धारणे। २।२।१०॥ निर्धारणे या षष्ठी सा न समस्यते॥
नृणां द्विजः श्रेष्ठः। प्रतिपदविधाना षष्ठी न समस्यत इति वाच्यं॥ सर्पिषो ज्ञानं॥ ९९ षष्ठीसमासे तु समासस्येत्वं नोदात्तत्वं स्यात्तच्चानिष्टमित्याहुस्तन्मंदं॥

संज्ञायामिति समासस्य नित्यत्वेन स्वपदविग्रहासंगतिप्रसंगात्तस्मात्कैयटोक्तसमाधानमेव समीचीनमिति नव्याः। प्रतिपदविधानेति पदंपदं प्रति विहिता प्रतिपदविधा
ना। षष्ठी शेष इति विहायान्येन ज्ञोऽविदर्थस्येत्यादिना विहिता सर्वैव षष्ठीत्यर्थः। धातुकारकविशेषं गृहीत्वैव ज्ञोऽविदर्थस्येत्यादिना षष्ठी विधीयत इति भवति तस्याः प्रतिपदवि
धानत्वं। नन्वनेनैव गतार्थत्वात् न निर्धारण इति व्यर्थमिति चेदत्राहुः। यतश्च निर्धारणमिति सूत्रेण न षष्ठी विधत्ते किन्तु सप्तमीमेव षष्ठी तु तया मा बाधीति प्रतिप्रसूयत इत्यप्र
दितत्। एवं स्वामीश्वराधिपतीत्यादिष्वपि। तेन गृहस्वामी सर्वेश्वरः। निषादाधिपतिमित्यादि सिद्धमिति। वस्तुतस्तु ज्ञोऽविदर्थस्येत्यादिचतुर्दशसूत्रीमध्ये दिवस्तदर्थस्य
स्येत्यादिषट्सूत्रीं विहायावशिष्टायामष्टसूत्र्यां शेष इति वर्त्तते। तथा च न मातृणामश्रीयादित्यादाविव षष्ठी शेष इत्येव सिद्धे नियमार्थं प्रकरणमिह षष्ठ्येव न तु तद्ध

सु.

सि.कौ. तथा च लुकः प्रयोजकीभूतः समास एव नेति फलितोऽर्थस्तत्श्च प्रतिपदविधाना नेति वचनं न कर्त्तव्यं। एवं स्थिते कृद्योगा षष्ठीति वचनमपि मास्तु। कर्तृकर्मणोः कृतीत्यत्र हि
टी.त. प्रेण इति निवृत्तं तथा चाप्राप्तषष्ठीविधानार्थमेवतदिति समासनिवृत्तिप्रसंगाभावात् षष्ठीत्यनेनैव समाससिद्धेः। सर्पिषो ज्ञानमिति। वस्तुतः कारणस्य संबंधमात्रविवक्षया ज्ञो विद
१५४ र्थस्येति षष्ठी। सर्पिःसंबंधिप्रवर्त्तनमित्यर्थः। पूरणगुण अर्थशब्दस्य त्रिभिः संबंधादाह पूरणाद्यर्थैरिति। अत्राप्राचोक्तं एतदर्थैः षष्ठी न समस्यत इति। नन्वपूर्णता याहि सति सुहितानां
नामेव ग्रहणं स्यात्तावतामेवार्थशब्देन समस्तत्वादिति ध्वनयन्नाह। सदादिभिश्चेति। षष्ठ इति। षण्णां पूरणः षष्ठः। तस्य पूरणे डट्। षट्कतिकतिपयचतुरां थुक्। कथं तर्हि तान्युक्ष

पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन। २।२।११। पूरणाद्यर्थैः सदादिभिश्च षष्ठी न समस्यते। पूरणे सतां षष्ठः। गुणे काकस्य कार्ष्ण्यं ब्रा
ह्मणस्य शुक्लाः। यदा प्रकरणादिना रूपान्तरे इति विशेष्यं ज्ञातं तदेदमुदाहरणं। अनित्योऽयं गुणेन निषेधः। तदशिष्यं संज्ञाप्रमाणत्वादित्यादिनिर्द
शात्। तेनार्थगौरवं बुद्धिमांद्यमित्यादि सिद्धं। सुहितार्थास्तृप्त्यर्थाः। फलानां सुहितः। तृतीयासमासस्तु स्यादेव स्वरविशेषः। सतो द्विजस्य कुर्वन्॥
कुर्वाणो वा किङ्कर इत्यर्थः। अव्ययं। ब्राह्मणस्य कृत्वा। पूर्वोत्तरसाहचर्यात् कृदव्ययमेव गृह्यते। तेन तदुपरीत्यादि सिद्धमिति रक्षितः। तव्य। ब्रा॰
ह्मणस्य कर्त्तव्यं। तव्यता तु भवत्येव। स्वकर्त्तव्यं स्वरे भेदः। समानाधिकरणे। तक्षकस्य सर्पस्य। विशेषणसमासस्त्विह बहुलग्रहणान्न गोर्घ
नोरित्यादिषु पोटायुवतीत्यादीनां विभक्त्यन्तरे चरितार्थानामपरत्वाद्बाधकः षष्ठीसमासः प्राप्तः सोऽप्यनेन वार्यते। क्तेन च पूजायां। २।२।१२। म
तिबुद्धीति सूत्रेण विहितो यः क्तस्तदन्तेन षष्ठी न समस्यते। राज्ञां मतो बुद्धः पूजितो वा। राजपूजित इत्यादौ तु भूते क्तान्तेन सह तृतीयान्तस्य स 553
मासः। अधिकरणवाचिना च। २।२।१३। क्तेन षष्ठी न समस्यते। इदमेषामासितं गतम्भुक्तम्वा॥ ॥ षष्ठांकितनसेकताननि। प्रमादएवायमित्येके।
उञ्छेषु पृष्ठः उंछात्मकः षष्ठ इति वाव्याख्येयमिति मनोरमायां स्थितं। गुणेति। सत्वे निविशतेऽपैतीत्यादिलक्षणलक्षितो गुणोऽत्र गृह्यते। न त्वदेङ्॰ क्षणः। अर्थग्रहण
तु नापि संख्या। क्रोशश्शतयोजनशतयोरिति वार्त्तिके निर्देशात्। काकस्य कार्ष्ण्यं ब्राह्मणस्य शुक्ला इति। व्याप्तिन्यायात्केवलगुणवाची गुणोपसर्जनद्रव्यवाची च गु
णशब्देन गृह्यत इति भावः। ननु ब्राह्मणस्य शुक्ला इत्यत्र समासप्रसंग एव नास्ति ब्राह्मणशब्दस्येतरेतरेवान्वयात् ब्राह्मणस्य पदं तासां शुक्ला इत्यर्था रेत आह यदे

शुक्लशब्द एवेह विशेष्यसमर्पक इति भावः। चंदनगंधः घटरूपमित्यादावनेन निषेधे प्राप्ते तत्स्थैश्च गुणैस्समासो वक्तव्य इति वार्त्तिकेन समासः प्रतिप्रसूयते। गंधत्वे-
न प्रतीयमानो गंधो न कदापि गुणिसमानाधिकरणः किं तु स्वप्रधानः। इदमेव हि तात्स्थ्यं नाम। ननु पिनष्टि गंधानिति प्रयोगदर्शनात् शुक्लशब्दादितुल्य एव गंधशब्दो न तत्त-
त्स्थगुणवचन इति चेन्न। पिनष्टीति प्रयोगे हि गंधानिति न गुणशब्दः मालतीकुसुमादिषु गंधशब्दप्रयोगादर्शनात्। किं तु चंदनत्वादिजातिनिमित्तकोऽन्य एव सः। न समा-
चंदनगंध इत्यादौ तत्स्थत्वं सुस्थमेव। एवं घटरूपमित्यादावपि। नन्वेवमपि बलाकायाः शौक्ल्यं केशस्य नैल्यमित्यादावतिप्रसंग इति चेदत्राहुः। गुणिवचनादुत्पन्न-
स्य शुक्लादिगुणस्यैवाभिधानात्तद्वाचकपदानां गुणिसामानाधिकरण्यसत्त्वान्न दोषः। तथा च प्राधान्येनाप्राधान्येन वा द्रव्याप्रतिपादकत्वे सति गुणप्रतिपादकत्वं
तत्स्थगुणवाचित्वमित्यर्थ इति। फलानामिति। करणस्य शेषत्वविवक्षायां षष्ठी। स्वरे विशेष इति। तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृतिस्वरं बाधित्वा थाथादिसूत्रे-
णांतोदात्तत्वे प्राप्ते तदपवादेन तृतीया कर्मणीत्यनेन पूर्वपदप्रकृतिस्वरे सत्याद्युदात्त इष्टः षष्ठीसमासे तु अंतोदात्तत्वं स्यात्तच्चानेष्यत इति भावः। तृपिश्च सकर्मकोऽप्य-
स्ति। पितॄनतार्प्सीत्सममंस्त बंधूनिति भट्टिप्रयोगात्तेनास्मात्कर्मणि क्तो नास्तीति न शंकनीयं। द्विजस्य कुर्वन् कुर्वाण इति। नेयं घटाद्यपेक्षया षष्ठी द्विजस्य घटं कु-
र्वन्निति। तथा हि सत्यसामर्थ्यादेव समासाप्रसक्तौ निषेधोऽयं व्यर्थः स्यादतो व्याचष्टे किंकर इत्यर्थ इति। ब्राह्मणस्य कृत्वेति। तादर्थ्यरूपसंबं-
धस्य सामान्यरूपेण विवक्षायां षष्ठी। ब्राह्मणसंबंधिनी या क्रिया तदनंतरमित्यर्थः। कृदव्ययमेवेति। अनेकमन्यपदार्थ इति सूत्रे सर्वपश्चादिति भाष्यप्रयोगादिति
भावः इत्यादीति। तथा च भट्टिः प्राभुंक्त। यत्कृतेऽरीन्निगृह्णीमः। आद्रियाः किं कृते भोगाः कुंभकर्ण त्वया विनेति रक्षसि तरतीति कैयटहरदत्तौ तु अव्ययप्रतिषेधे तूसस्यो
परिस्नुदाहरंतौ अकृदव्ययेनापि निषेधं मन्येते तौ च प्रागुक्तभाष्यप्रयोगविरोधादुपेक्ष्यावि  तिभावः। तव्यता तु भवत्येवेति। सूत्रे निरनुबंधग्रहणादिति भावः।
स्वकर्त्तव्यमिति। कर्त्तृषष्ठ्या समासः स्वरे भेद इति। कृदुत्तरपदप्रकृतिस्वरेणेति त्वरस्यावस्थानादंतस्वरित इष्टः तव्येन तु समासे मध्योदात्तत्वं स्यात्तच्चानेष्य-
त इति भावः। सोप्यनेनेति। षष्ठीसमासेन पोटायुवतीति समासो बाधितः। सोपि षष्ठीसमासः पूरणगुणेत्यनेन वार्यत इत्यर्थः। क्तेन च पूजायां। सूत्रोपलक्षणं
पूजाग्रहणं। व्याख्यानादित्याहुः। मतिबुद्धीति। राज्ञामिति। क्तस्य च वर्त्तमान इति कर्त्तरि षष्ठी। भूत इति। न च तक्रकौडिन्यन्यायेन मत्यादिभ्यः क्तस्य वर्त्तमानकालो

CC-0. In Public Domain. Digitization by eGangotri



भूतकालतां वाधत इति वाच्यं। तेनैकदिगित्यतः तेनेत्यधिकारे उपज्ञात इति निर्द्देशेन भूतकालस्याबाधज्ञापनात्। उपज्ञात इत्यत्र हि भूते क्तो न तु वर्त्तमाने। अन्यथा क्तस्य
च वर्त्तमाने इति षष्ठीविधानादुपज्ञातशब्दस्य तेनेति तृतीयायोगो न स्यात्। न चैवमपि ज्ञानार्थ एव ज्ञापकमस्त्विति वाच्यं। पूजितो यस्सुरासुरैरिति प्रयोगानुरोधे
न सामान्यविषयकज्ञापकत्वस्यैव न्याय्यत्वात्। अन्ये तु कारकषष्ठ्याएव समासनिषेधोयं शेषषष्ठ्या तु समासः स्यादेवेत्याहुः। एतेन कलहंसराममहितः कृतवा
निति भट्टिप्रयोगो व्याख्यातः। राममहितः सः कलहं कृतवानित्यन्वयः। अधिकरणवाचिना च। वाचिग्रहणं चिंत्यप्रयोजनमिति हरदत्तादयः। इदमेषामिति। क्तो
ऽधिकरणे चेति क्तः। अधिकरणवाचिनश्चेति कर्त्तरि षष्ठी। अधिकरणे चेत्येव सिद्धे सूत्र इह येपि वाचिग्रहणं स्पष्टार्थमित्याहुः। ननु किंहनं पदन्तमित्यत्र न कर्मणि क्तः
वृत्तेरकर्मकत्वात्। तथा चाधिकरणे क्तो तेन कथमिह समास इति चेन्मैवं। नायमधिकरणे क्तः किन्तु गत्यर्थाकर्मकेति कर्त्तरि। किमाहतन्निष्पन्नमित्यर्थः ॥
कर्मणि च क्तेनेति नानुवर्त्तते। क्तेन च पूजायामिति निषेधवैयर्थ्यप्रसंगात्। षष्ठीत्वनुवर्त्तते। किन्तु सापि या काचित्कर्मणि षष्ठी न गृह्यते। अपांस्रष्टेत्यादाव

कर्म्मणि च। २।२।१४॥ उभयप्राप्तौ कर्म्मणीति या षष्ठी सा न समस्यते। आश्चर्य्यो गवान्दोहोऽगोपेन॥ ॥ ॥ ७ ॥ ॥

तेनैव सिद्धे तृजकाभ्यां कर्त्तरीति निषेधवैयर्थ्यापत्तेः। किंच इध्मप्रश्चन इत्यादौ समाससिद्धये वचनं कर्त्तव्यं स्यात्। न च कृद्योगलक्षणा षष्ठी समस्यत इति वार्त्तिकम
स्त्येवेति वाच्यं। तस्य सिद्धान्ते प्रत्याख्यानात्। तन्त्रश्च निपातानामनेकार्थत्वादितीत्यर्थे चशब्दोयं। तदाह कर्मणीति या षष्ठीति। समस्यैकवचनान्तपदमुच्चार्य या षष्ठी
विहिता परिशेषिता वान्यथा। नियमसूत्राणां विधिरूपेण निषेधरूपेण वा द्विधा प्रवृत्तेः स्वीकृतत्वात्। गवां दोह इति। अगोपेनेत्युपन्यासस्त्विह उभयप्राप्तिप्रदर्श
नार्थः॥ अथ कथं शब्दानुशासनमिति। अत्र व्याचख्युः शब्दानामितीयं षष्ठी कर्तृकर्मणोरिति विहिता न तूभयप्राप्ताविति अनेन। आचार्यस्य कर्तुः वस्तुतस्तत्वेपि इहानुपा
दानात्। कृत्वोर्थप्रयोग इत्यतः प्रयोग इत्यनुवर्त्तनात् कर्तृकर्मणोरुभयोरुपादाने एवायं नियम इति स्वीकारात्। आश्चर्यो गवां दोह इत्यत्र हि आश्चर्यं प्रतिपाद्यं तच्चय
दि विवक्षितो दोग्धा दुदोह गा वत्सदोग्धृव्यासक्तदैव निर्वहति न त्वन्यथा। अतः कर्तृकर्मणोर्विवक्षित्वोपादानादिह उभयप्राप्तिः। इह तु शब्दानामिदमनुशासनं न त्वर्थो
नामित्यर्थप्रतिपत्तिपरं वाक्यं न तु कर्तृविशेषनिवृत्तिपरमतो नास्त्युभयप्राप्तिः।

154

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्तु वा यथाकथंचिदुभयप्राप्तिस्तथापि न क्षतिः। उभयप्राप्ताविति सूत्रेऽविशेषेणाविभाषेति पक्षस्यापि विद्यमा-
नतया नियमाप्रवृत्तिपक्षेऽस्याचार्यस्य शब्दानुशासनमिति प्रयोगसंभवात्। यद्वा शेषलक्षणेयं षष्ठीति व्याख्यायते तदा तु समासनिषेधशंकैवात्र नास्तीति॥ ॥
तृजकाभ्यां। इह कर्तृषष्ठ्या तृजकाभ्यामिति वृत्तिकारव्याख्यानमयुक्तमिति ध्वनयन्नाह कर्त्रर्थे तृजकाभ्यामिति। कर्तृग्रहणं तृजकयोर्विशेषणमिति युक्तं तयोः श्रुत-
त्वात् न तु षष्ठ्या इति भावः। यद्यपि कर्तरीति तृचो न विशेषणमव्यभिचारात् तथाप्यकस्य विशेषणत्वेन तदावश्यकमित्याह इक्षुभक्षिकेति। पर्यायार्हर्णेति
भावे ण्वुच् कर्मणि षष्ठ्याः समासः। ननु वज्रस्य भर्तेत्युदाहरणमयुक्तं। भर्तृशब्दस्य याजकादित्वेन समासावश्यंभावादित्याशंक्याह। पत्यर्थभर्तृशब्दस्येति। यद्य-
पि याजकादिष्वर्थविशेषविशिष्टतया भर्तृशब्दो न पठितस्तथापि रूढेर्बलीयस्त्वात्पतिपर्यायस्यैव तत्र ग्रहणं न तु यौगिकस्येति भावः। शेषषष्ठ्येति। न्यासकार-

तृजकाभ्यां कर्तरि॥२।२।१५॥ कर्त्रर्थे तृजकाभ्यां षष्ठ्या न समासः। अपां स्रष्टा। वज्रस्य भर्ता। ओदनस्य पाचकः। कर्तरि किं। इक्षूणां भ-
क्षणमिक्षुभक्षिका। पत्यर्थभर्तृशब्दस्य याजकादित्वात्समासः। भूभर्ता। कथं तर्हि घटानां निर्मातुस्त्रिभुवनविधातुश्च कलह इति। शेषष-
ष्ठ्या समास इति कैयटः। कर्तरि च॥२।२।१६॥ कर्तृषष्ठ्या अकेन न समासः। भवतः शायिका। नेह तृजनुवर्तते। तद्योगे कर्तुरभिहितत्वेन कर्तृष-
ष्ठ्या अभावात्। नित्यं क्रीडाजीविकयोः॥२।२।१७॥ एतयोरर्थयोरकेन नित्यं षष्ठी समस्यते। उद्दालकपुष्पभञ्जिका। क्रीडाविशेषस्य संज्ञा। सं-
ज्ञायामिति भावे ण्वुल्। जीविकायां दन्तलेखकः। तत्र क्रीडायां विकल्पे जीविकायां तृजकाभ्यां कर्तरीति निषेधे प्राप्ते वचनं॥ ॥

स्तु नन्वेवमेतत्। न लोकेति निषेधस्त्वनित्यः। त्रकाभ्यामिति वक्तव्ये तृचः सानुबंधग्रहणात् ज्ञापकादित्याहु। केचित्तु जनिकर्तुस्तत्प्रयोजको हेतुश्चेति निर्देशादनित्योऽयं।
समासनिषेध इत्याहुस्तन्मंदं। शेषषष्ठीसमासेनोक्तानि दर्शोपपत्तेः। नेह तृजिति। न चोत्तरार्थत्वं शंक्यं। तृचः क्रीडाजीविकयोर्नास्तीति जयादित्येनोक्तत्वादिति भावः। वाम-
नस्तु अके जीविकार्थ इत्यत्राक इति किं। रमणीयकर्तेति प्रत्युदाहरन् जीविकायां तृचमिच्छति। भावे ण्वुलिति। भंजनं भंजिका। पुष्पाणामिति कर्मणि षष्ठी। भाव इत्युप-
लक्षणं अधिकरणे ण्वुल्यपि बाधकाभावादिति मत्वा संज्ञायामिति सूत्रे हरदत्तेन मनोरमायां मुक्तं। उद्दालकः श्लेष्मातकस्तस्य पुष्पाणि भज्यन्ते यस्यां क्रीडायां सा उद्दाल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु·
सि·कौ· पूर्वापरा॥ एकदेशशब्दोऽवयवे रूढः अत एव तस्य कर्मधारयत्वेपि तन्तो मत्वर्थीयः। कृष्णसर्पवन्नित्यत्वेन कर्मधारयान्मत्वर्थीय इति निषेधस्य रूढेष्वप्रवृत्तेः। यद्यपीह एक
टी·त· गो पूर्वाह्णे दितिठन्प्राप्तस्तथाप्यत एव निर्देशाद्दिनिस्तदेतत्सह अवयविनेति। नन्विदं सूत्रं व्यर्थं। पूर्वकाय इत्यादिप्रयोगाणां कर्मधारयेणैव सिद्धेः ऊर्ध्वकाय इतिवत्स
१५६ मुदाये हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्तन्त इति न्यायादत आह। षष्ठीसमासापवादोऽयमिति। तथा च कायपूर्व इत्याद्यनिष्टप्रयोगनिवृत्तये सूत्रमिति भावः। पूर्वं कायस्येति। य

पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे। २।२।१। अवयविना सह पूर्वादयः समस्यन्ते एकत्वसंख्याविशिष्टश्चेदवयवी। षष्ठीसमासापवादः। पूर्वं कायस्य पूर्वकायः। अपरकायः। एकदेशिना किं। पूर्वं नाभेः कायस्य। एकाधिकरणे किं। पूर्वं छात्राणां। सर्वोप्येकदेशोऽह्ना समस्यते संख्याविसायेति ज्ञापकात्। मध्याह्नः। सायाह्नः। केचित्तु सर्व एकदेशः कालेन समस्यते न त्वह्नैव ज्ञापकस्य सामान्यापेक्षत्वात्। तेन मध्यरात्रः उपरतः पश्चिमरात्रगोचरादित्यादि सिद्धमित्याहुः॥ अर्धं नपुंसकं। २।२।२। समांशवाच्यर्धशब्दो नित्यं क्लीबे स प्राग्वत्। एकविभक्तावषष्ठ्यन्तवचनं॥ एकदेशिसमासविषयकोयमुपसर्जनसंज्ञानिषेधः। तेन पञ्चखट्वी इत्यादि सिध्यति। अर्धं पिप्पल्याः अर्धपिप्पली। क्लीबे किं। ग्रामार्धः॥ द्रव्यैकत्व एव। अर्धं पिप्पलीनां॥ द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्यां। २।२।३। एतान्येकदेशिना सह प्राग्वद्वा। द्वितीयं भिक्षाया द्वितीयभिक्षा। एकदेशिना किं। द्वितीयं भिक्षाया भिक्षुकस्य। अन्यतरस्यांग्रहणसामर्थ्यात्पूरणगुणेति निषेधं बाधित्वा पक्षे षष्ठीसमासः। भिक्षाद्वितीयं। प्राप्तापन्ने च द्वितीयया। २।२।४। पक्षे द्वितीया श्रितेति समासः। प्राप्तो जीविकां प्राप्तजीविकः। जीविकाम्प्राप्तः। जीविकाप्राप्तः। आपन्नजीविकः। जीविकापन्नः। इह सूत्रे द्वितीयया अ इति छित्वा अकारोऽपि विधीयते। तेन जीविकाम्प्राप्ता स्त्री प्राप्तजीविका। आपन्नजीविका॥

यप्यन्यारादिति सूत्रे दिक्शब्द इष्टः शब्दो दिक्छब्द इति व्याख्यानेन न संप्रत्यदिग्वृत्तिनापि योगे पंचमीस्त्री कृतेति षष्ठी ह दुर्लभा तथापि तस्य परमाम्रेडितमिति लिंगाद्द्रव्यवाचिदिक्शब्दयोगे पंचमी नेत्युक्तत्वात्षष्ठ्येव भवतीति भावः। पूर्वं नाभेरिति। नाभेः पूर्वो भागः स कायस्यावयव इत्यर्थः। नाभेरिति दिग्योगलक्षणा पंचमी तेनात्र पूर्वस्य भागस्य नाभिरवधिर्न त्वेकदेशिनीति नाभ्या समासो नेत्यर्थः। कायेन तु स्यादेव पूर्वकायो नाभेरिति। पूर्वशब्दस्य नित्यसापेक्षत्वात्प्रधानत्वाच्च। पूर्वं छा

155

चाणामिति। नासौ निर्द्धारणे षष्ठी किंतु समुदायसमुदायिसंबंधे बहुवचनं तूद्भूतावयवभेदसमुदायविवक्षया तत्रच्छात्राणामेकदेशित्वेसत्यप्येकत्ववैशिष्ट्याभावान्न समा
सः। सर्वोपीति। पूर्वादिभिन्नो योन्यर्थः। ज्ञापकादिति। अन्यथा अन्हस्यसार्यं पूर्वत्वं न स्यादिति भावः। मध्यान्ह इति। राजाहस्सखिभ्य इति टच्। अन्होन्ह इत्यन्हादेशः। अ
पंचादेशः मध्यान्हशब्दयोरूर्ध्वकायवत्कर्मधारयेण निर्वहति। तस्यैकदेशिसमासप्रयुक्तत्वादत्तोत्र ज्ञापकाश्रयणं युक्तमेवेति बोध्यं। इत्याहुरिति। नचैवं दिनमध्यो
रात्रिमध्य इत्यादि न सिद्ध्येदिति वाच्यं। ज्ञापकसिद्धस्यासार्वत्रिकत्वात्। अर्द्धं नपुंसकं। खंडवाच्यर्धशब्दो न नित्यनपुंसकः। ग्रामार्धे नगरार्धे इति यथा। समांशवा
ची तु नित्यनपुंसकस्स एवेह गृह्यते। पूर्वापरेति पूर्वसूत्र एवार्धशब्दे पठनीये अर्धमिति योगविभागेन निर्देशान्नपुंसकत्वे लब्धे पुनर्नपुंसकग्रहणादित्याश
यनव्याचष्टे नित्यं क्लीबे स इति। यो नित्यनपुंसकलिंगस्स इत्यर्थः। प्राप्तमिति एकत्वविशिष्टेनावयविना समस्यत इत्यर्थः। अन्ये तु व्याचख्युरर्धमिति निर्देशादेव न
पुंसकत्वे सिद्धे नपुंसकग्रहणं सूत्रे पुल्लिंगनिर्देशो न विवक्षित इति ज्ञापयितुं तेन तत्खेदमित्यादि लिंगत्रयेपि भवतीति। अर्धं पिप्पली त्यत्र एकविभक्ति चापूर्वनि
पातत्र्यस्योपसर्जनसंज्ञायां गोस्त्रियोरिति ह्रस्वः स्यादित्याशंक्य समाधत्ते। अषष्ठ्यंतवचनमिति। तेन पिप्पलीशब्दस्यानुपसर्जनत्वान्न दोष इति भावः। नन्वेवं पंचा
नां खट्वानां समाहारः पंचखट्वीति न सिद्ध्येदुपसर्जनसंज्ञानिषेधेन खट्वेत्याकारे ह्रस्वाप्रवृत्तेरदंतत्वाभावे द्विगोरिति ङीपोप्रवृत्तेरत आह। एकदेशिसमासावि
षयकोयमिति पंचखट्वी इति भाष्योदाहरणमेव अषष्ठ्यंतेत्यस्य संकोचे लिंगमिति भावः। अर्धपिप्पलीति। परवल्लिंगत्वात्स्त्रीत्वं। अर्धं पिप्पलीनामिति।। स
मासे अर्द्धपिप्पलीत्येव स्यात् विशेष्येक्यात्। परवल्लिंगमिति। लिंगातिदेशोपि वचनातिदेशाभावाच्चेति भावः। अर्धपिप्पल्य इति प्रयोगस्तु अर्धानि पिप्पलीना
मिति विग्रहे असाधुश्चेदपि खंडसमुच्चये साधुरेव अर्धपिप्पल्यः। अर्धपिप्पली। अर्धपिप्पली च अर्धपिप्पली चेत्यादि विग्रहात्। एकदेशिना किं। अर्द्धं पशोर्देवदत्त
स्य। अत्र देवदत्तः स्वामी न त्ववयवी तेन तेन समासः। इदं सूत्रं परवल्लिंगमित्यत्र भाष्ये प्रत्याख्यातं तद्यथा। अर्धपिप्पलीति हि कर्मधारयेण सिद्धं। समुदायेषु दृष्टाः श
ब्दाः अवयवेष्वपि वर्तंत इति न्यायात्। समप्रविभागादन्यत्र तु वाप्यैषैव गतिः। अर्धो हारः अर्धोक्तमर्धविलोकितमित्यादि प्रयोगदर्शनात्। न च समप्रविभागे षष्ठीसमा
संबाधितुमिदं सूत्रमिति वाच्यं। षष्ठीसमासस्यापीष्टत्वात् अत एव कालिदासः प्रयुंक्ते। प्रेम्णा शरीरार्धहरां हरस्येति। द्वितीयतृतीयषष्ठीसमासापवादोयं योग इति हरि

सु

सि·कौ· हृतोऽक्रमयुक्तमिति ध्वनयन्नाह निषेधं वाचिनेति। मासजीविक इति। गोस्त्रियोरित्युपसर्जनह्रस्वः। द्विगुप्राप्तापन्नेति वक्ष्यमाणेन परवल्लिंगनिषेधः। न चैवं बहुव्रीहि
टी·त· लाभनार्थमिति वाच्यं। स्वरे विशेषात्। मासप्रसुख इत्यादौ निष्ठां नत्यजातिकालसुखादिभ्य इति परनिपातापत्ते श्च प्राप्तापन्ने चेति चकारेणाविधेयसमुच्चयार्थेनाकारप्रश्लेषा
१५७ नुमानानुप्राप्तापन्ने समस्यते अच अत्वं च तयोः स्यादिति भाष्ये स्थितं तत्र चकारात्पूर्वमेवाकारं छित्वा सोऽत्रत्वात्प्रकृतिभावो नेति भावः। इमं क्लेशं परिहरन्नाह द्विती
ययाअ इति। मासात्मीति। एकादेशस्य पूर्वान्तत्वेन ग्रहणाल्लिंगविशिष्टपरिभाषया वा द्वावेतयोरपि प्राप्तापन्नयोः समासः॥ ❀ ॥ कालाः परिमाणिना। परिमीयते परि
च्छिद्यते येन तत्परिमाणं परिच्छेदकं तद्वान्परिमाणी तेनाह। परिच्छेद्यवाचिनेति। कालाः इति। कालविशेषवाचका इत्यर्थः। सूत्रे बहुवचननिर्देशात्कालसामान्यस्याप
रिच्छेदकत्वाच्च। मासो जातस्येति। षष्ठीसमासे प्राप्ते वचनं। ननु जातः पुरुषस्तस्य तु हस्तवितस्त्यादिकं परिच्छेदकं न तु कालस्तस्य क्रियामात्रपरिच्छेदकत्वादिति चेत्

कालाः परिमाणिना। २।२।५॥ परिच्छेद्यवाचिना सुबन्तेन सह कालाः समस्यन्ते। मासो जातस्य यस्य स मासजातः। द्व्यहजातः। द्वयोरह्नोः समाहा
रो द्व्यहः। द्व्यहो जातस्येति विग्रहे। उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पुरुषस्योपसंख्यानम्। द्वे अहनी जातस्य यस्य द्व्यह्नजातः
अह्नोऽह्न इति वक्ष्यमाणो ह्नादेशः। पूर्वत्र तु न संख्यादेः समाहारे इति तन्निषेधः॥ ॥

११ ननु। साक्षात्क्रियां परिच्छिन्दन्नपि कालस्तद्द्वारा देवदत्तं प
रिच्छिनत्ति। यस्य हि जननादूर्ध्वं मासो गतः स मासजात इति व्यवह्रियते। तत्र व्यवहारे कालजननक्षणयोरन्तरालभावी मासो जननद्वारा जातमपि परिच्छिनत्त्येवेति। इ
ह विग्रहे षष्ठीनिर्दिष्टस्यापि तत्प्राधान्यं द्योतयितुं यस्य स इत्युक्तं। अलौकिके तु प्रक्रियावाक्ये नास्य प्रवेशः। एवं बहुव्रीहावपीति बोध्यं। ननु जातस्य मास इति विग्रहे तत्पौ
मासशब्दस्य पूर्वनिपातार्थमेतत्सूत्रारंभस्यावश्यकत्वेपि मासविशेष्यकबोध एवात्रोचित इति किमनेन जातस्य यस्य स इति कथनेनेति चेदत्राहुः। मासजातो मृत इत्यादि
प्रयोगानुरोधेन विग्रहे यस्य स इति स्वीक्रियत इति। मासजातस्येति। यद्यपि मासो जातो यस्येति बहुव्रीहिणापीदं सिध्यति जातिकालसुखादिभ्यः परा निष्ठा वाच्येति वच
नात्। न च स्वरे विशेषः। वा जाते इत्यन्तोदात्तत्वस्यापि सिद्धत्वात्तथापि षष्ठीसमासापवादार्थमिदमारंभणीयमेव। किं च मासो जातवतो यस्य स मासजातवानित्यत्र तदर्थम
पीदमवश्यारंभणीयमिति दिक्। उत्तरपदेनेति। परिमाणोत्तरपदहेतुकद्विगुसिद्धये त्रिपदतत्पुरुषो वक्तव्य इत्यर्थः। सुप्सुपेत्येकत्वस्याविवक्षितत्वाद्बहूनां वचनं। 156

CC-0. In Public Domain. Digitization by eGangotri

अस्मादेव वार्त्तिकारंभात्सुप्सुपेत्येकत्वं विवक्षितमिति ज्ञायते। अन्हादेशाद्गिति। त्रिपदतत्पुरुषे सत्युत्तरपदे परतस्तद्धितार्थेत्यत्रांतरङ्गत्वाद्द्विगौ सति निमावः। पूर्वत्रेति। ह्यहजात इ
त्यत्रेत्यर्थः॥ ⊛ ॥ सप्तमीशौण्डैः। बहुवचननिर्देशाद्गणपाठसामर्थ्याच्च आद्यर्थावगतिरित्यभिप्रेत्याह शौण्डादिभिरिति। अक्षशौण्ड इति। शौण्डः प्रवीणः इह आसक्ति
रूपा क्रियाऽध्याहृता वंतर्भवतीति तद्द्वारकं च सामर्थ्यं यथा दध्योदनगुडधानादौ उपसेचनमिश्रीकरणादिद्वारा सामर्थ्यं। तेन कारकाणां क्रिययैव संबंध इति नियमस्य न व्यभिचा
र। अधिशब्द इति। आधेयप्रधान इति शेषः। अधिकरणप्रधानस्त्वव्ययीभाव एव । अधिहरीति यथा। स्वइति। तिष्ठमिति शेषः। विभाषांचेरिति विभाषाग्रहणसा

सप्तमीशौण्डैः॥२।१।४०॥ सप्तम्यन्तं शौण्डादिभिः प्राग्वत्। अक्षेषु शौण्डः। अक्षशौण्डः। अधिशब्दोऽत्र पठ्यते। अध्युत्तरपदादिति खः। ईश्व
राधीनः॥ सिद्धशुष्कपक्वबन्धैश्च॥२।१।४१॥ एतैः सप्तम्यन्तं प्राग्वत्। साङ्काश्यसिद्धः। आतपशुष्कः। स्थालीपक्वः। चक्रबन्धः॥ ध्वांक्षेण क्षेपे॥२।१।४२॥
ध्वांक्षवाचिना सह सप्तम्यन्तं समस्यते निन्दायां। तीर्थे ध्वांक्ष इव। तीर्थध्वाङ्क्षः॥ तीर्थकाकः । कृत्यैर्ऋणे॥२।१।४३॥ सप्तम्यन्तं कृत्यप्रत्यया
न्तैः सह प्राग्वत् आवश्यके। मासेदेयमृणं। ऋणग्रहणं नियोगोपलक्षणार्थं। पूर्वाह्णेगेयं साम। संज्ञायां॥२।१।४४॥ सप्तम्यन्तं सुपा प्राग्वत्संज्ञायां। वा
क्येन संज्ञानवगमान्नित्यसमासोऽयं। अरण्येतिलकाः। वनेकसेरुकाः। हलदन्तात्सप्तम्याः इत्यलुक्॥ क्तेनाहोरात्रावयवाः॥२।१।४५॥ अन्होरात्रेश्चा
वयवाः सप्तम्यन्ताः क्तान्तेन सह प्राग्वत्। पूर्वाह्णकृतं। अपररात्रकृतं। अवयवग्रहणं किं। अन्हि दृष्टं॥ तत्र॥२।१।४६॥ तत्रेत्येतत्सप्तम्यन्तं क्तान्ते
न सह प्राग्वत्। तत्रभुक्तं। क्षेपे॥२।१।४७॥ सप्तम्यन्तं क्तान्तेन प्राग्वन्निन्दायां। अवतप्तेनकुलस्थितं तएतत्॥ ९ मध्योदितिवक्ष्यमाणत्वात्। अंत

यशब्दोऽत्र पठ्यते स चाधिकरणप्रधानः। मध्ये इत्यर्थाद्वा तद्योगे अवयविनः आधारत्वविवक्षायां सप्तमी यथा वृक्षे शाखेति। वने अंतः वनान्तः वसति। यस्त्वधिकरणत्व
मात्रवृत्तिरंतःशब्दस्तस्य तु विभक्त्यर्थे इति नित्यमव्ययीभावः। प्रतिरंतः शरे तिलत्वं वने इति अनर्थकं। यत्तु तत्पुरुषस्य वैकल्पिकत्वात्पक्षे अव्ययीभाव इति हरदत्तेनोक्तं तच्चि
न्त्यं। तत्पुरुषस्य वैकल्पिकत्वेपि अव्ययीभावस्य नित्यत्वाद्वने अंतरिति तदुक्तस्य पदविग्रहस्यायोगात्। किंच विभक्त्यर्थमात्रवृत्तेरव्ययीभावः वचनग्रहणसामर्थ्याद
न्यथा वृक्षस्योपरीत्यादावतिप्रसंगात्तत्र च मध्यवाचिनः प्रसंग एव नास्तीति दिक्। शौण्ड। धूर्त। कितव। व्याड। प्रवीण। संवीत। अंतर। अधि पटु। पंडित। कुशल।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



बक्षनिपुणः इत्यादेः यत्तत्स्यपंतेनैव समासस्त्वन्ते। अल्पशइत्यनुवृत्तेः। बहुवचनं तु प्रकृतिभेदाभिप्रायं। तथैवोदाहरति मासेदेयमिति। तत्पुरुषे कृतीत्यलुक्। नेह मासे दातव्यं
नियोगोपलक्षणार्थमिति। नियोगो निर्द्धारणं। आवश्यकोपलक्षणार्थमित्यर्थः। नित्यसमासोयमिति। अत एव पूरुषेषूत्तम इति स्वपदविग्रहः। संगतइत्येवोदाम। अवतप्तेन
इति। नकुलेन स्थितं नकुलस्थितं। कर्तृकरणे कृतेति समासः। कृद्ग्रहणपरिभाषया नकुलस्थितशब्दोपि क्तान्त इति तेन सह समस्यंते तस्य समासस्तत्पुरुषे कृतीति सप्त
म्या अलुक्। अव्यवस्थितत्वप्रतिपत्त्यात्र निंदावगम्यते॥ ⁂ ॥ पात्रेसमितादयश्च। संपूर्वादिणः क्तः। गेहेनर्दीति। नर्दशब्द इत्यस्मात्सुप्यजातावितिणिनिः घट।
कतया प्रवेशनेति। परमाः पात्रेसमिता इति वाक्यमेव भवति। न तु सन्महदित्यादिना समासांतरमिति भावः। एतच्च शब्दकौस्तुभे स्थितं। अन्ये तु केवलाः पात्रेस।

पात्रेसमितादयश्च। २।१।४८॥ एते निपात्यन्ते क्षेपे। पात्रेसमिताः भोजनसमये एव सङ्गताः। न तु कार्ये। गेहेशूरः। गेहेनर्दी। आकृतिगणोऽ
यं। चकारोऽवधारणार्थः। तेनैषां समासान्तरे घटकतया प्रवेशो न। परमाः पात्रेसमिताः। पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधि
करणेन। २।१।४९। विशेषणं विशेष्येणेति सिद्धे पूर्वनिपातनियमार्थं सूत्रं। एकशब्दस्य दिक्संख्ये संज्ञायामिति नियमबाधनार्थश्च।
पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः। एकनाथः। सर्वयाज्ञिकाः। जरन्नैयायिकाः। पुराणमीमांसकाः। नवपाठकाः। केवलवैयाकरणाः

मिता इति वाक्यमेव न तु पूर्वकालैकेत्यादिना समासांतरमित्याहुः॥ पूर्वकाले। पूर्वकाल इत्यर्थनिर्देशः। इतरेषां तु पाठस्य स्वरूपग्रहणं। पूर्वत्वस्य संबंधिकत्वात्पूर्वकालो
परकालेन समस्यते। तथैवोदाहरति। स्नातानुलिप्त इति। अन्नक्रियाशब्दत्वात्पाचकपाठकवत्पर्यायः प्राप्तः। याज्ञिका इत्यादि। यज्ञमधीयते विदंति वा याज्ञिकाः क्रतूक्थादि
दीतिठक्। एवं नैयायिकाः। जीर्यतेरतृन्निति भूतेऽर्थेऽतृन्। जरंतश्च ते नैयायिकाश्च। जीर्णनैयायिका इत्यर्थः। मीमांसां मीमांसकाः। क्रमादिभ्यो वुन्। नवपाठका इति। प
ठंतीति पाठकाः। ण्वुल्तृचाविति ण्वुल्। संख्यावाची नवशब्दोऽत्र न गृह्यते। दिक्संख्ये संज्ञायामिति नियमान्। समानाधिकरणेनेति किं। एकस्याः क्षीरं। षष्ठीसमा
सोपि इह न भवति। पूरणगुणेति निषेधात्॥ ॥

157

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



दिक्संख्ये संज्ञायां। नियमार्थमिति। तत्पुरुषे संज्ञायामेव दिक्संख्ये समस्येते इति नियमशरीरं। तेन पंचगुरिन्यादि सिध्यति। कथं तर्हि त्रिलोकनाथः पितसद्मगोचर इति कालिदासः। त्रिलोकशब्दस्यासंज्ञात्वात्। न च समाहारे द्विगुर्द्विगोरिति ङीप्प्रसंगात् न च पात्राद्यन्तत्वं कल्प्यं यदि त्रिलोकी गणनापरा स्यादित्यादिप्रयोगाणामसंगत्यापत्तेः। न च उत्तरपदे इति समासः त्रिपदतत्पुरुषस्य इह दुर्लभत्वात्। अत्राहुः। लोकशब्दोत्र लोकसमुदायपरः। अवयवो लोकस्त्रिलोकः। शाकपार्थिवादित्वादुत्तरपदलोप इति। पंचब्राह्मणा इति। यद्यप्यत्र कृतेपि समासे स्वरे विशेषो नास्ति तथापि विभक्त्यंतरे पंचभिर्ब्राह्मणैरित्यादौ विशेषो बोध्यः। तद्धितार्थो। असंज्ञार्थं वचनं। एकापि सप्तमी विषयभेदाद्भिद्यत इत्याशयेनाह तद्धितार्थविषये इत्यादि। यदि तु तद्धितार्थे वाच्ये इति व्याख्यायेत तर्हि पौर्वशाल इत्यादौ तद्धितो न स्यात्। तदर्थस्य समासेनैवोक्तत्वात्। द्विगोर्लुगनप।

दिक्संख्ये संज्ञायां। २।१।५०। समानाधिकरणेनेत्या पादपरिसमाप्तेरधिकारः। संज्ञायामेवेति नियमार्थं सूत्रं। पूर्वेषुकामशमी। सप्तर्षयः। नेह। उत्तरा वृक्षाः। पञ्च ब्राह्मणाः। तद्धितार्थोत्तरपदसमाहारे च। २।१।५१। तद्धितार्थविषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्वत्। पूर्वस्यां शालायां भवः पौर्वशालः। समासे कृते दिक्पूर्वपदादसंज्ञायां ञ इति ञः। सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः। आपरशालः। पूर्वा शाला प्रिया यस्येति त्रिपदे बहुव्रीहौ कृते प्रियाशब्दे उत्तरपदे पूर्वयोस्तत्पुरुषः। तेन शालाशब्दे आकार उदात्तः। पूर्वशालाप्रियः। दिक्समाहारो नास्त्यनभिधानात्। संख्यायास्तद्धितार्थे। षण्णां मातृणामपत्यं षाण्मातुरः। पञ्चगावो धनं यस्येति त्रिपदे बहुव्रीहाववान्तरतत्पुरुषस्य विकल्पे प्राप्ते द्वन्द्वतत्पुरुषयो

त्य इति ज्ञापकादुक्तेपि तद्धितार्थे तद्धितो भवतीति कल्पनायां प्रतिपत्तिगौरवमिति भावः। तद्धिते परे इति तु न व्याख्येयमेव। तद्धिते ((उत्तरपदे नित्यसमासवचनं।। परतः समासः समासे कृते दिक्पूर्वपदादित्यादिना तद्धित इत्यन्योन्याश्रयप्रसंगात्। समाहारे वाच्ये इति। तेन पंचगवमित्यादौ समासेनैव समाहारस्योक्तत्वात्समूहार्थप्रत्ययो नोत्पद्यते। अन्यथा अत्र गोरतद्धितलुकीति टज्न स्यात्। सामूहिकप्रत्ययस्य द्विगोर्लुगनपत्ये इति लुक्प्रवृत्तेरिति भावः। सर्वनाम्न इति। एतच्च पूर्वापरोदाहरणान्वयि यद्यपि स्त्रियाः पुंवदित्यनेनापि प्रकृतरूपसिद्धिस्तथाप्युत्तरपूर्वेत्याद्यर्थं सर्वनाम्न इति वचनमावश्यकं। प्रतिपदोक्तत्वादिहापि तदुपन्यासो न्याय्य इति भावः। वृत्तिमात्रे इति। तद्धितवृत्तौ समासवृत्तौ चेति कैयटः। आकार उदात्त इति। असति त्ववांतरे तत्पुरुषे पूर्वपदप्रकृतिस्वरेण पूर्वशब्दस्याद्युदात्तत्वमेव स्यादिति भावः। षाण्मातुर इति। मातुरुत्संख्यासंभद्रपूर्वाया इत्युदा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· टी·त· १५८

गितिलुङ्न। विकल्पे प्राप्त इति। महाविभाषयेति शेषः। ननु चात्र तत्पुरुषप्रयुक्तटजभावे पंचगोधन इत्यपि स्यादिति भाष्यकारा मनोरमायां तु विकल्पे प्राप्ते नित्यसमासार्थं द्वंद्वतत्पु
रुषयोरित्येतद्वचनमिति प्राचां ग्रंथमनुसृत्योक्तं वस्तुतस्तु त्रयाणां समासे हि तेऽन्यपदार्थोपसंक्रमेण परस्परसंबंधाभावात् द्वंद्वतत्पुरुषयोरप्राप्तौ सत्यां वचनमिदमित्याहुरिति। द्व
द्व्योदाहरणं तु वाक्ये द्वयपञ्चप्रियेऽस्य वाग्द्वयहृत्प्रियः। द्व्योपानहप्रियः इह त्रिपदे बहुव्रीहौ हि ते पूर्वयोर्नित्यं द्वंद्वत्वे न द्वंद्वाच्चुदषहान्तादिति समासान्तष्टजपि नित्यस्त्व॥ ॥गोर
तद्धित तत्पुरुषस्येत्यनुवर्त्तते टच्च। तस्य गोनाद्यादि। ननु ग्रहणवता प्रातिपदिकेन तदन्तविधेरभावात्तत्पुरुषस्यावयवो यो गोशब्दस्तस्मात् टजित्यर्थः स्यात्तथा च गोसूत्रमित्यादाव
तिप्रसंगः स्यादत आह। समासान्त इति। अयं भावः। समासान्ता इत्यधिकाराद्वा चासमासान्तेन भवितव्यं गोरिति पंचमीश्रवणात्ततः परे लोपि। नचैतत्तदंतविधिमंतरेणोपपद्यत इति साम
र्थ्यात्तदन्तविधिर्लभ्यते तत्र च तत्पुरुषस्य निवृत्त्यंतं पंचम्यंतेन विपरिणम्यत इति। ननु तद्धितलुकीति। लुग्विषय इत्यर्थो न तु तद्धितलुकि सत्यामिति समासान्तानामंतरंगत्वात्। अतद्धित
लुकीति किं। पंचभिर्गोभिः क्रीतः पंचगुः। अत्र तद्धितस्य ठको अध्यर्धपूर्वेति लुक्। संख्यापूर्वो द्विगुः। अनोनात इति। अयं भावः। पूर्वसूत्रविषय एवेयं संज्ञा अनन्तरस्यैवेति न्या

गोरतद्धितलुकि। ५।४।९२। गोन्तात्तत्पुरुषाट्टच् स्यात् समासान्तो न तु तद्धितलुकि। पञ्चगवधनः। पञ्चानां गवां समाहारः। संख्यापूर्वो द्विगुः। २।१।५२।
तद्धितार्थेत्यत्रोक्तः संख्यापूर्वो द्विगुः स्यात्। द्विगुरेकवचनं। २।४।१। द्विग्वर्थः समाहार एकवत्स्यात्। स नपुंसकमिति नपुंसकत्वं। पञ्चगवम्॥

यात्। तदर्थमेव हि सूत्रद्वयं कृतमन्यथादिक्संख्ये संज्ञा तद्धितार्थोत्तरपदसमाहारे चेत्येव ब्रूयात्तेन सप्तर्षय इत्यत्रेगंतकपालेत्यादिना पूर्वपदप्रकृतिस्वरो न भवति किंतु स 158
मासांतोदात्तत्वमेवान्यथा चलत्वस्य सप्तऋषयस्समसेयेनिषेदुः सप्तऋषीणां सुकृतां यत्र लोक इत्यादि। त्रिविधः संख्यापूर्व इति। तद्धितार्थविषये उत्तरपदे च परतः समाहारे वाच्ये संख्या
पूर्वोपस्समासः स इत्यर्थः। तद्धितार्थे यथा। पंचकपालः संस्कृतं भक्षा इत्यणः द्विगोर्लुगनपत्ये इति लुक्। उत्तरपदे यथा। पंचनावप्रियः नावो द्विगोरिति समासान्तष्टच् समाहारे पंचमूली द्वि
गोरिति ङीप्। द्विगुरेकवचनं। बाहुलकात्क्वचिन्न लुक्। समान्यनपुंसकं। द्विगुस्समास एकार्थप्रतिपादको भवतीत्यर्थः। न च वस्तुतोऽनेकार्थस्यैकार्थ्यं कथंचिदुपपद्यत इति। १५८
सामर्थ्यादतिदेशः संपद्यत इत्याह। एकवत्स्यादिति। समाहार इति तूपसंख्यानाल्लभ्यते समाहारे यो द्विगुस्तदर्थ एकवदित्यन्वयः। समाहारे किं। तद्धितार्थे माभूत्। पंचसु
कपालेषु संस्कृताः पंचकपालाः पंचभिर्गोभिः क्रीताः पंचगवः पटाः पंचगवे पंचगावाणीत्यत्र तु प्रथमं द्विग्वर्थस्यैकवद्भावे कृते यो यमेकशेषे कृते द्विगव॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्थसमुदायस्यापि द्विवर्षत्वाद्बहिरंगत्वाच्चैकवद्भावो न भवतीति स्थितमाकारे। यदा तद्धितार्थेति सूत्रे समाहार इति कर्मसाधनस्तदा समाहृतप्रधानो द्विगुरिति बहुत्वे प्राप्ते अने
न एकवद्भावः क्रियते। यदा तु भावसाधन एव समाहारस्तदा समूहप्रधानत्वाद्द्विगोः समूहस्य चैकत्वात्सिद्धमेकत्वमिति नास्य प्रयोजनं। न च स नपुंसकमिति नपुंसकत्वार्थमे
कत्वविधानमिति वाच्यं। समुदायवाचके तु सामान्येन नपुंसकमित्यभ्युपगमे बाधकाभावादित्याहुः। वस्तुतस्तु तद्धितार्थेति सूत्रे समाहार इति भावे घञ् न तु कर्मणि। पंचगवमि
त्यत्र पंच गावः समाहृता इत्यर्थाभ्युपगमे समाह्रियमाणानां बहुत्वेन एकवचनानुपपत्तेः। न च द्विगुरेकवचनमिति सूत्रान्नैवमिति वाच्यं। पंचखट्वीत्यसिद्धेः। तत्र हि पंच खट्वाः
समाहृताः पंचसु खट्वासु समाहृता वा स्त्रियामेवं विग्रहसंभवेन नियतविभक्तित्वाभावादेकविभक्ति चापूर्वनिपात इत्यप्रवृत्तेरनुपसर्जनत्वाद्गोस्त्रियोरिति ह्रस्वो न स्यात्। ततश्चावं

कुत्सितानि कुत्सनैः। २।१।५३॥ कुत्स्यमानानि कुत्सनैः सह प्राग्वत्। वैयाकरणखसूचिः। मीमांसकदुर्दुरूढः। पापाणके कुत्सितैः। २।१।५४॥ पू
र्वसूत्रापवादः। पापनापितः। अणककुलालः। उपमानानि सामान्यवचनैः। २।१।५५॥ घन इव श्यामः घनश्यामः। इह पूर्वपदं तत्सदृशे ला
क्षणिकमिति सूचयितुं लौकिकविग्रहे इवशब्दः प्रयुज्यते। पूर्वनिपातनियमार्थं सूत्रं। उपमितं व्याघ्रादिभिः सामान्याप्रयोगे। २।१।५६॥ उ
पमेयं व्याघ्रादिभिः सह प्राग्वत् साधारणधर्मस्याप्रयोगे सति। विशेष्यस्य पूर्वनिपातार्थं सूत्रं। पुरुषव्याघ्रः। नृसोमः। व्याघ्रादिराकृति
गणः। सामान्याप्रयोगे किं। पुरुषो व्याघ्र इव शूरः॥ ॥ (१) नो वेति स्त्रीत्वपक्षे द्विगोरित्यदंतलक्षणो ङीप् न स्यात्। भावसाधनत्वे कविभक्तित्वादुपस
र्जनत्वमव्याहतमेव समाहारापेक्षया नियमेन वर्त्तिपदानां षष्ठ्यंतत्वात् तथा च पंचखट्वीत्यादिरूपं निर्बाधमेवेति दिक्। स नपुंसकमिति। एतस्यार्थो मूल एव स्फुटीभ
विष्यति॥ ॥ कुत्सितानि कुत्सनैः। अवक्षेपणे कर्मणि क्तः। तच्च मतिबुद्धीति सूत्रे चकारस्यानुक्तसमुच्चयार्थत्वाद्वर्त्तमाने विहित इत्याशयेनाह कुत्स्यमानानीति। कुत्सनप्र
दकानीत्यर्थः। उभयत्र बहुवचननिर्देशः स्वरूपविधिनिरासार्थः। वैयाकरणखसूचिरिति। सूचयतेरच् इन्। यः पृष्टः सन् प्रश्नं विस्मारयितुं खं सूचयत्यभ्यासवैयर्थ्या
त्स एवमुच्यते न तु वस्तुतो व्याकरणं तदध्ययनं वा कुत्सितं। वेदांगत्वेन तस्य प्रशस्तत्वात्। नथापि। प्रतिभानाभावेन निष्फलत्वात्कुत्स्यते। दुर्दुरूढ इति। दुल उत्क्षेपे दुर्दूः

CC-0. In Public Domain. Digitization by eGangotri

मु·
सि·कौ· औणादिकः कृठप्रत्ययः बहुलमन्यत्रापीति णोर्लुक्। रलयोरेकत्वस्मरणाल्लस्य रः। विशेष्यस्य पूर्वनिपातनियमार्थं सूत्रं शब्दप्रवृत्तिनिमित्तकुत्सायामेवायं संनिधानात्ते
टी·त· नेह न नैयायिको दुराचारः। पापाणके। एतौ कुत्सनाभिधायिनौ। कूपूयकुत्सितावद्यखेटगर्ह्याणकाः समा इत्यमरः। तत्र चानयोः पूर्वसूत्रेण समासे परनिपातः स्यान्न
१६०· स्यात्पूर्वनिपातननियमार्थमिदं सूत्रमित्याशयेनाह पूर्वसूत्रापवाद इति। उपमानानि। उपमीयतेयेन तदुपमानं। उपपूर्वान्माङः करणे ल्युट्। प्रादिसमासः। उपपूर्वको
माङ्सादृश्यहेतुके परिच्छेदे रूढः येन वस्त्वन्तरं सादृश्येन परिच्छिद्यते तदुपमानमित्यर्थः यथा गौरिव गवयः। इह हि गोः करणं सादृश्यं हेतुः पुरुषः। परिच्छेत्ता सहि
गोसादृश्येन गवयं परिच्छिनत्ति। सामान्यवचनैरिति। समानो धर्मः सामान्यं चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्। उपमानोपमेययसाधारणो यो धर्मस्तद्विशिष्टवचनैरित्यर्थः
न तु साधारणधर्ममात्रवचनैरिति। एतच्च वचनग्रहणाल्लभ्यते। सामान्यमुक्तवंतस्सामान्यवचनाः बाहुलकात्कर्त्तरि भूते ल्युट्। ये पूर्वं सामान्यमुक्त्वा तद्वति द्रव्ये
पर्यवस्यंति ते तथोक्ताः तच्च सामान्यविशिष्टं उपमानशब्दस्य संबंधिशब्दत्वादाक्षिप्तमुपमेयमेव विज्ञायते। लाक्षणिकामिति। अत एव सामानाधिकरण्यान्मृगीवच
पला मृगचपले त्यादौ पुंवद्भावः। उत्तरपदोपस्थितश्यामत्वचपलत्वादिद्वारकमेवेह सादृश्यं गृह्यते संनिधानात्। कथं तर्हि उपमानपरतेति चेत्। भूतपूर्वगत्याश
क्यार्थमादायतत्परतेत्यवेहि। पूर्वनिपातेति। अन्यथाऽनियमः स्यात् खंजकुब्जवदिति भावः। किंच तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययेतिसूत्रे प्रातिपदोक्तस्या
स्यैवोपमानग्रहणेन ग्रहणार्थमपीदं सूत्रं अत एव मयूरव्यंसकादित्वात्समासे उपमानस्वरो न प्रवर्त्तत इति सिद्धान्तः। उपमितं। उपमेयमुपमितं। भूतकालोत्र न वि 159
वक्षितः तच्च संबंधिशब्दत्वादुपमानमाक्षिपति। तथा चोपमानभूतैर्व्याघ्रादिभिरित्यर्थः। पुरुषो व्याघ्र इव शूर इति। तत्र हि शूरसापेक्षस्यापि पुरुषस्य प्रधानत्वाद्रा
जपुरुषः सुंदर इतिवदत्रापि समासः स्यात्तन्मा भूदिति सामान्याप्रयोग इत्युक्तमिति भावः। कथं तर्हि भाष्याब्धिः क्वातिगंभीर इति कैयटः। सामान्यप्रयोगसत्त्वेनास्याप्र १६०
प्तेः अत्र केचित् प्रमाद एवायमित्याहुः। इह गांभीर्येण सादृश्यं न विवक्षितं किंतु विततदुरवगाहत्वादिना। तस्य हि विततत्वादेरप्रयोगोऽस्त्येवेति निर्बाधः समास
इति मनोरमायां स्थितं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेषणं विशिष्यते येन तद्विशेषणं कर्त्तुः करणत्वविवक्षायां ल्युट् तदाह भेदकमिति। व्यावर्त्तकमित्यर्थः। विशेषणविशेष्ययोस्संबंधिकतया अन्यतरोपादानमात्रेणेतराक्षे
पसंभवे उभयोपादानं स्पष्टार्थमिति कैयटः। एतच्च कुत्सितानि कुत्सनैरित्यत्रापि तुल्यं। हरदत्तस्त्वाह समस्यमानपदद्वयजन्यबोधप्रकारयोर्विशेषणविशेष्यधर्मयोर्यत्र परस्पर
व्यभिचारस्तत्रैव समासो यथा स्यात् नान्यत्रेत्येतदर्थमुभयोपादानं। तथा च नीलोत्पलादौ समासो भवति न तु तक्षकः सर्प इत्यादौ। नहि तक्षकत्वं सर्पत्वं व्यभिचरतीति तन्मंदं
कैलासाद्रिर्मंदराद्रिः भावपदार्थस्तर्कविद्या व्याकरणशास्त्रं भोजराज इत्यादिप्रयोगाणामसांगत्यापत्तेः। ननु विशेषणविशेष्यभावे कामचारात्पाचकपाठकादाविव नीलोत्प
लादावप्यव्यवस्थितः पूर्वनिपातः स्यादिति चेदत्राहुः। जातिशब्दस्य गुणक्रियाशब्दसमभिव्याहारे विशेष्यसमर्पकतैव। तेन नीलोत्पलं पाचकब्राह्मण इति व्यव॥

विशेषणम्विशेष्येणबहुलं।२।१।५७॥ भेदकं समानाधिकरणेन भेद्येन बहुलम्प्राग्वत्। नीलमुत्पलं। नीलोत्पलं। बहुलग्रहणात् क्वचिन्नि
त्यं। कृष्णसर्पः। क्वचिन्न। रामो जामदग्न्यः। पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च।२।१।५८॥ पूर्वनिपातनियमार्थमिदं। पूर्व
वैयाकरणः। अपराऽध्यापकः। अपरस्याऽर्द्धे पश्चभावो वक्तव्यः। अपरश्चासावर्द्धश्च पश्चार्द्धः। कथमेकवीर इति। पूर्वकालैकेतिवाधित्वा
त्परत्वादनेन समासे वीरैक इति हि स्यात् बहुलग्रहणाद्भविष्यति। श्रेण्यादयः कृतादिभिः।२।१।५९॥ श्रेण्यादिषु च्व्यर्थवचनं कर्त्तव्यं। अश्रे
णयः श्रेणयः कृताः। श्रेणिकृताः। क्तेन नञ्विशिष्टेनानञ्।२।१।६०॥ नञ्विशिष्टेन क्तान्तेनानञ् क्तान्तं समस्यते। कृतञ्च तदकृतञ्च कृता
कृतं। शाकपार्थिवादीनांसिद्धये उत्तरपदलोपस्योपसंख्यानं। शाकप्रियः पार्थिवः। शाकपार्थिवः। देवब्राह्मणः॥ ‌ ‌ ‌ ९९ स्थित एव प्रयोगः। गुण

शब्दयोः क्रियाशब्दयोः गुणक्रियाशब्दयोश्चानियम एव खंज कुब्जखंजः। पाचकपाठकः। पाठकपाचकः खंजपाचकः पाचकखंज इति। अत्र मूलमुपसर्जनमिति
महासंज्ञा। अप्रधानन्तूपसर्जनं। गुणक्रिययोश्च द्रव्यं प्रत्यप्राधान्यं स्पष्टमेवेति। अपरस्यार्द्धेत्यादि। एतच्च पश्चादिति सूत्रे भाष्ये स्थितं बाहुलकादिति। एके मुख्ये
पुवीरपते पराक्रमते इति वा बोध्यं। श्रेण्या। आद्य आदिशब्दो व्यवस्थावाची द्वितीयस्तु प्रकारवाची। श्रेण्यादयः पठ्यन्ते कृतादिराकृतिगण इति भाष्यात् एका पूगकुं
दा राशि। विशिखा निचय। निधना दिः श्रेण्यादिः कृत मित ता भूता दिः। कृतादिः परा तु सिद्धा एव श्रेणयः सम्यक् कृता इत्यादौ समासो नेष्यत इत्याशयेनाह अश्रेणयः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सु·
सि·कौ·
टी·त·
१६१

नित्यसमासः परत्वात् श्रेणीकृतं रूढत्वे चौ चेति दीर्घः कृतेन विशिष्टशब्दो अवधारणार्थः नन्मात्राधिकेन नञ्रहितं समस्यत इति॥ ३८९॥
श्रेण्यय इति। एकेन शिल्पेन पण्येन वा ये जीवन्ति तेषां समूहः श्रेणिः। च्व्यन्तानां तु कुगतीति सूत्रार्थे सनेहना। सिद्धं चायुक्तं च। तुडिडधिकेनापीति भाष्यं। अशितं चानशितं च अशि
तानशितं। क्लिष्टाक्लिष्टं। क्लिश इत्वो निष्ठयोरिति वेट्। कृताकृतमिति। एकदेशकरणात् कृतं। एकदेशान्तरस्याकरणात् तदेवाकृतं। शाकपार्थिव इति। पृथिव्या ईश्वरः पार्थिव

सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः। २।१।६१॥ सद्वैद्यः। वक्ष्यमाणेन महत आकारः। महावैयाकरणः। पूज्यमानैः किं। उत्कृष्टो गौः। पङ्कादुद्धृत
इत्यर्थः। वृन्दारकनागकुञ्जरैः पूज्यमानम्। २।१।६२॥ गोवृन्दारकः। व्याघ्रादेराकृतिगणत्वादेव सिद्धे सामान्यप्रयोगार्थमिदं वचनं। कतरकतमौ
जातिपरिप्रश्ने। २।१।६३॥ कतरकठः। कतमकलापः। गोत्रं च चरणैः सहेति जातित्वं। किं क्षेपे। २।१।६४॥ कुत्सितो राजा किंराजा यो न रक्षति
पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः। २।१।६५॥ तत्पुरुषः समानाधिकरणः कर्म्म
धारयः। १।२।४२॥ पुंवत्कर्म्मधारयजातीयदेशीयेषु। ६।३।४२॥ कर्म्मधारये जातीयदेशीययोश्च परतो भाषितपुंस्कात् परमूङभावो यस्मिन्
स्याभूतमपूर्वं पुंवत्। पूरणीप्रियादिष्वप्राप्तः पुंवद्भावो विधीयते। महानवमी। कृष्णचतुर्दशी। महाप्रिया। तथा कोपधादेः प्रतिषिद्धः पुंव
द्भावः। कर्म्मधारयादौ प्रतिप्रसूयते। पाचकस्त्री। दत्तभार्य्या। पञ्चमभार्य्या। स्नौघ्नभार्य्या। सुकेशभार्य्या। ब्राह्मणभार्य्या। एवम्पाचकजातीया
पाचकदेशीयेत्यादि। इभपोटा। पोटा स्त्रीपुंसलक्षणा। इभयुवतिः। अग्निस्तोकः। उदश्वित्कतिपयं। गृष्टिः सकृत्प्रसूता। गोगृष्टिः। धेनुर्नवप्र
सूतिका। गोधेनुः। वशा वन्ध्या। गोवशा। वेहद्गर्भघातिनी। गोवेहत्। बष्कयणी तरुणवत्सा॥ गोबष्कयणी। कठप्रवक्ता। कठश्रोत्रियः। क
॥ठाऽध्यापकः। कठधूर्तः। ॥

णस्येश्वर इत्यण् शाकप्रिय इति बहुव्रीहिः तस्य पार्थिवशब्देन समासे कृते पूर्वसमासे यदुत्तरपदं प्रिय इति तस्य
लोपः। तथा देवब्राह्मण इत्यत्र देवस्य पूजको देवपूजक इति पूर्वस्मिन् षष्ठीसमासे यदुत्तरपदं पूजक इति तस्य लोपोऽयं॥ ॐ ॥सन्महत॥ गुणक्रियाशब्दैः सह समासे स
दादीनां पूर्वनिपाते नियमार्थं सूत्रं। कतरकतमौ। जातिपरिप्रश्ने चेति। कतरो देवदत्तः। या बहूनां जातिपरिप्रश्ने डतमजिति व्युत्पादितं कतमशब्दसाहचर्यात् द्वाद शास्ये

160

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वकतरघटस्यापिग्रहणे सिद्धे जातिपरिप्रश्नग्रहणं ज्ञापयति कतमस्त्रैर्योनरेऽपि साधुरिति। नन्वेवमप्युदाहृतं प्राचीनवृत्तिषु कतरो भवतोर्देवदत्तः कतमो भवतां देवदत्त इति। किंस
पा। किंराजेति। किमः क्षेप इति समासांतनिषेधः। सेऽपि किं। को राजा पाटलिपुत्रे। एवं किं सखा योद्धुस्त्विति किंगोः यो न वहति त्यप्युदाहरणं बोध्यं तत्पुरुषः। समानाधिकरणग्रहणं उ
र्थं आद्यजंतः। समानाधिकरणपरकं स्पष्टार्थं। भाषितपुंस्कादित्यादि। एतच्च स्त्रियाः पुंवदिति सूत्रे स्फुटीकरिष्यते। ननु तेनैव कर्मधारयेऽपि सिद्धं जातीयदेशीययोस्तु त।
सि लादिष्विति सिद्धं तत्किमनेन सूत्रेणेत्यत आह। पूरणीप्रियादिष्विति। तथेति च। महानवमीति। नवानां पूरणी तस्य पूरणे डट्। नांतादसंख्यादेर्मट्। टित्वान्ङीप्। म
हती चासौ नवमी चेति विग्रहः। पुंवद्भावे कृते नेत्यमानेन महत आकारः। कोपधादेरिति। न कोपधायाः। संज्ञापूरण्योश्च। वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे स्वांगा
च्चेतः। जातेश्चेति पंचसूत्र्या प्रतिषिद्धं स्पष्टार्थः। क्रमेणोदाहरति पाचकस्त्रीति। जातीय —— देशीययोरपि प्रतिप्रसवमुदाहरति एवमिति। पाचिकाप्रकारवती पाचकजा
तीया प्रकारवचने जातीयर्। पाचकदेशीयेति। ईषदसमाप्तौ विति देशीयर्। उभयत्र तसिलादिष्विति पुंवद्भावस्य न कोपधाया इति निषेधः। पाम्नः। पटुजातीया पटुदेशी

प्रशंसावचनैश्च। २।१।६६॥ एतैः सह जातिः प्राग्वत्। गोमतल्लिका। गोमचर्चिका। गोप्रकाण्डं। गवोद्घः। गोतल्लजः। प्रशस्ता गौरित्यर्थः॥
मतल्लिकादयो नियतलिङ्गा न तु विशेष्यनिघ्नाः। जातिः किं। कुमारीमतल्लिका॥ १९ येत्यादौ न स्वचरितार्थत्वात्। इत्यादीति। आदिपदात् दत्तजातीया।

पंचमजातीया स्त्रौघ्नजातीया। सुकेशजातीया ब्राह्मणजातीया। एवं दत्तदेशीयेत्याद्युदाहार्यं। स्त्रीपुंसलक्षणेति। स्तनश्मश्र्वादियुक्तावित्यर्थः। उदश्विदिति। तक्रं खुदश्वि
न्मथितं पादांबु द्व्यर्द्धं तु निर्जलमिति अमरः। कठधूर्त इति। नात्र कठत्वं कुत्स्यते। अतः कुत्सितानि —— कुत्सनैरिति गतार्थतानाशंक्या प्रवृत्तिनिमित्तकुत्सायामेव तस्य प्र
वृत्तेः। जनपतिकुमुदभ्रांतिं धूर्तवकोबालमत्स्यानामित्यत्र धूर्तवक इत्यसाधुरेव॥ ःः॥ प्रशंसावचनैश्च। वचनग्रहणं रूढिशब्दपरिग्रहार्थं तेन ये यौगिकाः प्रशस्त
शोभनरमणीयादयः ये च विशेषवचनाः शुचिमृद्वादयः। ये तु गौण्या वृत्त्या प्रशंसां गमयंति सिंहो माणवक इत्यादयस्ते सर्वे व्युदस्यंते। गवोद्घ इति। अवङ् स्फोटायनस्येत्यवङ्।
आद्गुणः। मतल्लिका मचर्चिका प्रकांड मुद्घ तल्लजौ प्रशस्तवाचकान्यमूनीत्यमरः। प्रशंसावचनपोटायुवतीत्येकयोगसंभवे पृथग्योगकरणं चिंत्यपरं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



युवाखलतीनि। कृदिकारादक्तिन इति ङीष्। पुंवत्कर्मधारयेति युवतिशब्दस्य पुंवद्भावः। जरतीति। जीर्यतेरतृन् उगितश्चेति ङीप्। एवं युवपलितः युववलिनः। तुल्याख्यार्या। वलिनशब्दः पामादि। कृत्यतुल्याख्या। तुल्यमहान् सदृशमहान् इत्यादौ तु परत्वादनेन सन्महदिति वाध्यते। नन्वसन्नाव्य शालिनः इति भट्टिप्रयोगे तु सन्नं कृत्यं सत्कृत्यमिति षष्ठी समासो बोध्यः एवं परमपूज्य इत्यादि। वर्णो वर्णेन। समानाधिकरणेन वर्णवाचिना वर्णवाचि समस्यत इत्यर्थः। विशेषणं विशेष्येणेत्यनेनैव सिद्धे पृथग्विधानं वर्णो वर्णेष्वनेत इति पूर्वपदप्रकृतिस्वरे विधीयमाने प्रतिपदोक्तत्वादेतत्समासपूर्वपदस्यैव मवतु नान्यस्येत्येवदर्थं कृष्णसारंग इति। सारंगश्चित्रपर्यायस्स च गुणोपसर्जनद्रव्यपरः कृष्णशब्दोपि कृष्णावयवके भाक्तः। एवं च गौणे सामानाधिकरण्ये विशेष्यत्वं विशेष्येणेत्यप्रवृत्तौ समासार्थमपीदमारब्धव्यमित्याहुः। न तु तृतीया तत्कृतेत्यनेनैवाय

युवाखलतिपलितवलिनजरतीभिः। २।१।६७॥ पूर्वनिपातनियमार्थं सूत्रं। लिङ्गविशिष्टपरिभाषया युवतिशब्दोऽपि समस्यते। युवाखलतिः युवखलतिः युवतिः खलती युवखलती। युवजरती। युवत्यामेव जरतीधर्मोपलम्भेन तद्रूपारोपात्सामानाधिकरण्यं। कृत्यतुल्याख्या अजात्या। २।१।६८॥ भोज्योष्णं तुल्यश्वेतः। सदृशश्वेतः। अजात्या किं। भोज्य ओदनः। प्रतिषेधसामर्थ्याद्धि विशेषणसमासोऽपि न। वर्णो वर्णेन। २।१।६९॥ समानाधिकरणेन सह प्राग्वत्। कृष्णसारङ्गः॥ कडाराः कर्मधारये। २।२।३८॥ कडारादयश्शब्दाः कर्मधारये वा पूर्वं प्रयोज्याः। कडारजैमिनिः जैमिनिकडारः॥ कुमारश्श्रमणादिभिः। २।१।७०॥ कुमारी श्रमणा। कुमारश्रमणा। इह गणे श्रमणा प्रव्रजिता गर्भिणीत्यादयः स्त्रीलिङ्गाः पठ्यन्ते। लिङ्गविशिष्टपरिभाषाया एतदेव ज्ञापकं बोध्यं॥ चतुष्पादो गर्भिण्या। २।१।७१॥ चतुष्पाज्जातिवाचिनो गर्भिणीशब्देन सह प्राग्वत्। गोगर्भिणी। (चतुष्पाज्जातिरिति वक्तव्यम्। नेह। स्वस्तिमती गर्भिणी॥) (१. समासः सिध्यति। सारंगत्वस्य कृष्णादिकृतत्वात्। नापि स्वरे भेदः। ननु रुषे तुल्यार्थतृतीयेत्यनेनैव पूर्वपदप्रकृतिस्वरसिद्धेरिति चेन्नाहुः। कृष्णशुक्लो हरितशुक्ल इत्याद्यर्थं समासो नेनावश्यं विधेयः। नहीहतत्कृतत्वमस्ति। यद्यपीह विशेषणं विशेष्येणेत्यनेन समासः सिद्ध्यति तथापीष्टः स्वरो न सिध्यति। न च प्रतिपदोक्तसमासो अकिंचित्करः व्यावर्त्याभावादिति वाच्यं। कृष्णशुक्लौ इत्यादेर्व्यावर्त्यसंभवादिति। कडाराः इति। बहुवचननिर्देशादिति भावः। आदिशब्देन गडुलखंडिलः खंडिलगडुल इत्यादि। एतच्च भाष्ये ॥ सि ॥

161

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

४ द्विसमासांतरं न भवति धूर्तइति एवंच गुणवचनत्वात्पूर्वनिपाते प्राप्ते इदं वचनमारब्धमिति भावः अन्येतु मयूरइव व्यंसको मयूरव्यंसक इत्याहुः॥ कृ ५॥
एतदेवेति॥ एवकारः स्फुटसिद्धत्वद्योतनार्थो न त्ववधारणार्थः। युवा खलतीति सूत्रे जरतीग्रहणस्यापि ज्ञापकत्वसंभवात्। नहि युवन्शब्दस्य पुंस्त्वे जरतीसामानाधि-
करण्यं संगच्छते। चतुष्पादिति। मंडूकप्लुत्या अत्र जातिरित्यनुवर्त्तत इत्याह जातिवाचीति। जातिः किं। कालाक्षी गर्भिणी। चतुष्पात्किं। ब्राह्मणी गर्भिणी। प्रत्युदा-
हरणे विशेषणमिति समासः स्यादेव गर्भिकालाक्षीत्यादि। पूर्वनिपाते विशेषः॥ ※ मयूरच्च कारोत्राऽवधारणार्थस्तेन परममयूरव्यंसको मयूरव्यंसक इ-
त्यादौ तु उपमानानि सामान्यवचनैरिति समासस्यापवादो हेयः॥ तेन समासस्यैत्यंनीदात्तत्वमिह सिध्यति तत्पुरुषे तुल्यार्थ इत्युपमानपूर्वपदप्रकृतिस्वरः स्ये।
पमानसंशब्दनेन विहिते प्रतिपदोक्तसमासे चरितार्थत्वादित्याहुः॥ अश्नीतपिबतेति। इहक्रियारूपस्यान्यपदार्थस्य प्राधान्यान्नास्त्रीत्वादृष्टाप्। एवमग्रेपि
मयूरव्यंसकादयश्च॥२।१।७२॥ एते निपात्यन्ते। मयूरो व्यंसकः। मयूरव्यंसकः। व्यंसको धूर्त्तः। उदक्चाऽवाक्च। उच्चावचं। निश्चितं च प्र-
चितं च। निश्चप्रचं। नास्ति किंचन यस्य सः। अकिंचनः। नास्ति कुतोभयं यस्य। अकुतोभयः। अन्यो राजा। राजान्तरं। चिदेव चिन्मात्रं॥ आ-
ख्यातमाख्यातेन क्रियासातत्ये॥ ※॥ अश्नीतपिबतेत्येवं सततं यत्राभिधीयते सा। अश्नीतपिबता। पचतभृज्जता। खादतमोदता। एही-
डादयोऽन्यपदार्थे॥ ※ ॥ एहीडइति यस्मिन् कर्म्मणि तदेहीडं। एहियवं। उद्धरकोष्ठादुत्सृज देहीति यस्यां क्रियायां सा उद्धरोत्सृ-
जा। उद्धमविधमा। असातत्यार्थमिह पाठः॥ जहि कर्म्मणा बहुलमाभीक्ष्ण्ये कर्त्तारं चाभिदधाति। जहीत्येतत्कर्म्मणा बहुलं समस्यते आ-
भीक्ष्ण्ये गम्ये समासेन चेत्कर्त्ताऽभिधीयत इत्यर्थः। जहिजोडः। जहिस्तम्बः। ईषदकृता॥२।२।७॥ ईषत्पिङ्गलः। ईषद्गुणवचनेनेति वाच्यं। ईषद्र-
क्तं। अन्तरमिति। अंतरशब्दोत्र भिन्नवाची। चिन्मात्रमिति। मात्रं कार्त्स्न्येवधारणे इत्यमरः। अंतरमात्रशब्दाभ्यां सह नित्यसमास इत्युभयत्र अस्वपदविग्रहो दर्शि-
तः। नित्यसमासत्वं तु अवधारणार्थकचकारेण लब्धमित्याहुः। उद्धरकोष्ठादित्यादि। उद्धर उत्सृज इत्येतावानेव विग्रहः। उत्सृजेत्यस्य विवरणं देहीति। कोष्ठादि-
ति तु इदं त्वस्याकांक्षापूरणार्थमुक्तं। समासेन चेत्कर्त्तेति। जहिजोडमिति आभीक्ष्ण्ये नयआहसः जहिजोडः। एवंजहिस्तंबमिति यआह स जहिस्तंबः ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नञ्। इह नलोपो नञ इत्यत्र विशेषणार्थो ञकारः तत्फलं च नैकधेत्यत्रालोपः। अव्ययेन ञकुनिपातानामित्यव्ययपूर्वपदप्रकृतिस्वरार्थो ञकारोच्चारणमित्यन्ये। तुल्या समस्यत इति। उत्तरपदार्थप्रधानोयं समासः। तथा हि। आरोपितत्वं नञा द्योत्यते। तथा च अब्राह्मणशब्दादारोपितो ब्राह्मण इति बोधे अर्थात् ब्राह्मणभिन्न इति पर्यवस्यति। अत एवानुपसर्जनत्वादस्मिन् अस इत्यादौ सर्वनामकार्यं सिध्यति। नञ्तत्पुरुषस्योत्सर्गिकमुत्तरपदार्थप्राधान्यमप्येवं सति निर्बाधं। एतत्तदोरिति सूत्रे अनञ्समासग्रहणं चेह लिंगमित्यादि मनोरमायामनुसंधेयं। नलोपो नञः। नञो ग्रितिवक्तव्ये नलोपवचनं साकच्कार्थं तेन नञो कचि अकब्राह्मणः। अकनश्व इत्यादि सिद्धमित्याहुः। उत्तरपदे किं। अलुगुत्तरपद इत्यधिकारादिति भावः। अनरपसे किं। घटो नास्ति पटो नास्ति। नन्वेवमपि स्त्रैणार्थ इत्यत्र नलोपः स्यादिति चेदत्राहुः। उत्तरपदाक्षिप्तपूर्वपदेन नञ्विशेष्यपूर्वपदभूतस्य नञ इति व्याख्यानान्न भवति स्त्रीपुंसाभ्यामिति विहितस्य नञ्प्रत्ययस्या

नञ्। २।२।६॥ नञ् सुपा सह समस्यते। नलोपो नञः। ६।३।७३॥ नञो नस्य लोपः स्यादुत्तरपदे। न ब्राह्मणः। अब्राह्मणः। तस्मान्नुडचि। ६।३।७४॥ लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुडागमः स्यात्। अनश्वः। अर्थाभावेऽव्ययीभावेन सहायं विकल्पते। रक्षोहागमलघ्वसंदेहाः प्रयोजनमिति। अदुत्तायामसंहितमिति च भाष्यवार्त्तिकप्रयोगात्। तेनाऽनुपलब्धिरविवादोऽविघ्नमित्यादि सिद्धं। नञो नलोपस्तिङि क्षेपे॥ अपचसि त्वं जाल्म। नैकधेत्यादौ तु नशब्देन सह सुप्सुपेति समासः॥

११ पूर्वपदत्वात्। अत एव चात्र प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणमिति परिभाषा नोपतिष्ठते। नञ्प्रत्ययग्रहणे तदंतग्रहणान्नञ्प्रत्ययांतस्य पूर्वपदत्वं संभवत्येवेति प्रत्ययाप्रत्यययोरित्येतदुपतिष्ठत एवेति वाच्यं। हृद्यस्य हृल्लेखेति सूत्रे अण्ग्रहणात् पृथक्लेखग्रहणेनोत्तरपदाधिकारे प्रत्ययग्रहणे तदंतग्रहणं नास्तीति ज्ञापनात्। यद्वा। अपूर्वमसत्वात्। विभक्तौ च प्रथमायां इत्यादिज्ञापकान्नलोपो नञ इत्यत्राव्ययमेव नञ् गृह्यते न तु प्रत्यय इति। तस्मान्नुडचि। डः सि धुडित्यत्रेवाचीति सप्तम्याः षष्ठीप्रकल्पनमित्याह अजादेरिति। अचोत्तरपदविशेषणात् तद्यस्मिन्विधिरिति तदादिविधिर्लभ्यत इति भावः। अनश्व इति। नुटः परादित्वेन अपदांतत्वान्ङमो ह्रस्वादिति ङमुण्न भवति। ननु विघ्नानामभावोऽविघ्नमित्यत्रापि परत्वात्तत्पुरुषः स्यादव्ययीभावस्य निर्मक्षिकादौ सावकाशत्वात् अन्यथा अनुपलब्धिरविवाद इति न सिध्येदित्याशंक्याह अर्थाभावेऽव्ययीभावेन सहायमिति। अविघ्नमिति। यद्यप्यविद्यमाना विघ्ना यस्मिन्निति बहुव्रीहिणा अविघ्नं कर्मेत्यादिप्रयोगः सिध्यति



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुवर्त्तनाद्दाहक्रियायोगइति ४ ५ ज्ञानेनेह नऊरीयत्कामाधवादिग्रंथेनु आविःप्रादुःशब्दौ मुक्त्वा अन्येषांकरोतिनैवयोगेगतिसं ५

तथापुनरेकर्मण्यविघ्नमस्त्वित्यादिप्रयोगाअव्ययीभावंविनास्वरस्तोनसिध्यंतीतिभावः। नञोनलोपइति। तिङंतेनसमासाभावादप्राप्तेवचनं। अपचसीति। कुत्सितंपच सीत्यर्थः। नञ्शब्देनेति। नञासमासेत्वनेकधेवेत्येवस्यादितिभावः॥ ॐ ॥ नभ्राड्। सत्सुसाधवःसत्याः। तत्रसाधुरितियत्। नसत्याः। असत्याः। नअसत्या नासत्याः इह बहुवचनमविवक्षितंतेननासत्यावश्विनौदस्त्राविति सिद्धं॥ नमुचिरिति। सर्वधातुभ्यइन्। इगुपधात्किदितिकित्वान्नगुणः। क्षरतेः। क्षीयतेर्वेति। क्षरसंचलने भ्वादिः क्षिनिवासगत्योःतुदादिः। नगमिति। कुशब्दोत्राव्ययंगृह्यतेनतुपृथिवीवाचकः। गत्यादिसाहचर्यात्। ऊर्यादिच्विडाचउपसर्गाःक्रियायोगइत्यतोनुवर्त्तनाद्दाहक्रियायो गइत्यनोच्विडाचोरभ्वस्तियोगेविहितोत्साहचर्यादूर्यादीनामपितत्रैवगतिसंज्ञेतिस्थितं। तथैवोदाहरति ऊरीकृत्येति। एतच्चमनोरमानुसारेणोक्तं। वस्तुतस्तु ऊरीभूयेति

नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषुप्रकृत्या। ६। ३। ७५॥ पादितिशत्रन्तः। वेदाइत्यसुन्नन्तः। नसत्याअस त्या। नअसत्या। नासत्या। नमुञ्चतीतिनमुचिः। नकुलमस्य। नखमस्य। नस्त्रीपुमान्। स्त्रीपुंसयोःपुंसकभावोनिपातनात्। नक्षरतीतिनक्षत्रम् क्षीयतेःक्षरतेर्वाक्षत्रमितिनिपात्यते। नक्रामतीति। नक्रः। क्रमेर्डः। नअकमस्मिन्नितिनाकः। नगोप्राण्यन्यतरस्यां। ६। ३। ७७॥ नगइत्यत्रन प्रकृत्यावा। नगाः। अगाः। पर्वताः। अप्राणिष्वितिकिं। अगोवृषलःशीतेन। नित्यंक्रीडेत्यतोनित्यमित्यनुवर्त्तमाने॥ कुगतिप्रादयः। २। २। १८॥ एतेसमर्थेननित्यंसमस्यन्ते। कुत्सितःपुरुषः। कुपुरुषः। गतिश्चेत्यनुवर्त्तमाने ऊर्यादिच्वि, भाष्योदाहरणेदिङ्मात्रमुदाहरति। ऊरीकृत्येन्यवनारितंयुक्तं

संज्ञाफलंसमासस्तत्फलंचल्यबितिवाच्यं। ऊरीउररीएतावंगीकारे। आविःशब्दस्यतुसाक्षात्प्रभृतिषुपाठात्कृञोयोगेगतिसंज्ञाविकल्पःभ्वस्तियोगेत्वनेननित्यमितिवाच्यं कथंतर्हिवारुणीमदविशंकमयाचिश्वस्तुघोभवदसाविवरागइतिमाघइतिचेत्स्मार्तुः। तेप्राग्धातोरितिसूत्रस्यप्रयोगनियमार्थत्वंप्रकृतेअनुपपन्नाचपिसंज्ञानियमा र्थत्वपक्षेदोषलेशोपिनास्तीति। शुक्लीति कृभ्वस्तियोगेसंपद्यकर्त्तरिच्विः अस्यच्चाविनीकारः। पटपटाकृत्येति। डाचिबहुलंद्वेभवतइतिपटच्छब्दस्यद्वित्वं। अव्य क्तानुकरणात्द्व्यजवरार्धादितिडाचिटिलोपः। नित्यमाम्रेडितेडाचीतितकारपकारयोःपकारएकादेशः। निपातसंज्ञायाः समावेशार्थस्सूत्रेचकारः। तेनऊरीकृ तमित्यत्रगतिरनंतरइतिपूर्वपदप्रकृतिस्वरेक्रियमाणेनिपातप्रयुक्तमाद्युदात्तत्वंभवति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सु·
सि·कौ·
टी·त·
१६७

॥

कारिकेति। भावे पर्यायार्हर्णेति ण्वुच्। तत्र हक्रियेति। क्रियायोग इत्यनेन कारिकाशब्दस्य विशेषणात् श्लोकवाची कारिकाशब्दोऽत्र न गृह्यत इति भावः। क्रियाशब्दस्यात्र मर्यादास्थितिरर्थः। यत्न इत्यन्ये। अनुकरणं चेति। आग्घातोरित्यस्य संज्ञानियमपक्षेऽनिनीति व्यर्थमिति मत्वा पृच्छत्यनितिपरं किमिति। इतरथा तु प्रयोगनियमपक्षे खाडित्यनुकरणस्येति शब्दपरे गतिसंज्ञाया निवारणायानितिपरमित्यावश्यकमिति प्रत्युदाहरति खाडिति कृत्वेति। सत्यां संज्ञायामेष प्रयोगो नैव स्यात्किंतु इतिस्वाट्कृत्येत्येव स्यादिति भावः। न चेति खाट्कृत्येति न भवतीतिः परस्यानुकरणस्य गतिसंज्ञानिषेधादिति वाच्यम्। अनितिपरमित्यत्र इतिः परो यस्मादिति परं न इतिपरमनितिपरमिति बहु

कारिकाशब्दस्योपसंख्यानम्। कारिकाक्रिया। कारिकाकृत्य। अनुकरणं चानितिपरं। १।४।६२॥ खाट्कृत्य। अनितिपरं किं। खाडिति कृत्वा निरष्ठीवत्। आदरानादरयोस्सदसती। १।४।६३॥ सत्कृत्य। असत्कृत्य। भूषणेऽलं। १।४।६४॥ अलंकृत्य। भूषणे किं। अलं कृत्वौदनङ्गतः। पर्याप्तमित्यर्थः। अनुकरणमित्यादित्रिसूत्री स्वभावात्कृञ्विषया। अन्तरपरिग्रहे। १।४।६५॥ अन्तर्हत्य। मध्ये हत्वेत्यर्थः। अपरिग्रहे किं। अन्तर्हत्वा गतः। हतं परिगृह्य गत इत्यर्थः। कणेमनसी श्रद्धाप्रतीघाते। १।४।६६॥ कणेहत्य पयः पिबति। मनोहत्य। कणेशब्दस्सप्तमीप्रतिरूपको निपातोऽभिलाषातिशये वर्त्तते। मनश्शब्दोप्यत्रैव। पुरोऽव्ययं। १।४।६७॥ पुरस्कृत्य। अस्तं च। १।४।६८॥ अस्तमिति मान्तमव्ययं गतिसंज्ञं स्यात्। अस्तङ्गत्य। अच्छ गत्यर्थवदेषु। १।४।६९॥ अव्ययमित्येव। अच्छगत्य। अच्छोद्य। अभिमुखं गत्वा उक्त्वा चेत्यर्थः। अव्ययं किं। जलमच्छं गच्छति। अदोऽनुपदेशे। १।४।७०॥ अदः कृत्य। अदः कृतं। परप्रत्युपदेशे प्रत्युदाहरणं। अदः कृत्वा॥ तिरोऽन्तर्द्धौ। १।४।७१॥ तिरोभूय·॥ ॥

व्रीहिः घटितनञ् तत्पुरुषाश्रयणान्। स्यादेतत्। अनुकरणस्येति शब्दपरत्वे क्रियायोगाभावात् गतिसंज्ञानाप्तौ निरखाडिति कृत्वेति रूपं निर्बाधं किमनेनानितिपरग्रहणेनेति चेत्स्वाहुः। इति कृत्वेति। समुदाय एवं कृत्वेत्यर्थे वर्त्तते। तथा चेतिशब्दः क्रियाविशेषक इति तद्घटितसमुदायस्य क्रियावाचकत्वादस्त्येव क्रियायोग इति। हतं परिगृह्येति। हत्वा गमनं द्विधा हतं त्यक्त्वा परिगृह्य चेति। आद्यमुदाहरणं द्वितीयं तु प्रत्युदाहरणं। अपरिग्रहे इति च प्रयोगोपाधिर्न तु वाच्यकोटिनिविष्टमिति भावः। कणेहत्येति अत्यंतमभिलष्यतन्निवृत्तिपर्यंतं पिबतीत्यर्थः। तथा च श्रद्धाया अपगमात्तत्प्रतिघातो गम्यते। प्रत्युदाहरणं तु कणेह

163

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वयमेवपर्यालोचयन्तिनरैरमुदाहरणंअ ३

त्वागतः। सूक्ष्मस्तंडुलावयवः कणस्तस्मिन् हत्वेत्यर्थः। पुरस्कृत्येति। पूर्वाधरावराणामित्यसिप्रत्ययांतोयमव्ययं। नमस्पुरसोर्गत्योरिति विसर्गस्य सः। अमुं पुरः पश्यसीत्यत्र तु स्थि तमित्यध्याहारेण द्विष्ठं प्रत्यगतित्वात्सत्वाभावः। अव्ययं किं। पुरं पुरौ पुरः कृत्वा गतः। अस्तं च। अव्ययमिति किं। अस्तं कृत्वा कांडं गतः। क्षिप्तमित्यर्थः। अच्छमिति। सत्यां हि गतिसंज्ञायां निपातसंज्ञाबलेनाव्ययत्वात्सुब्लुक्स्यादिति भावः। अदः कृत्येति। परोक्षः कृतमिति। गतिरनंतर इति पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वं। प्रत्युदाहरणमिति। अदः कृत्वा अदः कुर्वित्यादीन्यर्थः। तिरोंतर्द्धौ। अंतर्द्धौ किं। तिरोभूत्वा स्थितः पार्श्वतो भूत्वेत्यर्थः॥ ❁ ॥ विभाषा कृञि। तिरः कृत्वेति। गतित्वाभावपक्षे तिरसो न्यतरस्यामिति सत्वमपि न भवति। तद्धि योगतिग्रहणानुवृत्तेः। माघवस्तु पराभवेति तिरस्को इति प्रयोगदर्शनात्सत्वविधौ गतिग्रहणानुवृत्तिं केचिन्नेच्छंतीत्याह।

विभाषा कृञि। १।४।७२॥ तिरः कृत्य। तिरस्कृत्य। तिरः कृत्वा। उपाजेऽन्वाजे। १।४।७३॥ एतौ कृञि वा गतिसंज्ञौ स्तः। उपाजेकृत्य। उपाजे कृत्वा। अन्वाजेकृत्य। अन्वाजे कृत्वा। दुर्बलस्य बलमाधायेत्यर्थः॥ साक्षात्प्रभृतीनि च। १।४।७४॥ कृञि वा गतिसंज्ञानि स्युः। च्व्यर्थ इति वाच्यं। साक्षात्कृत्य॥ साक्षात् कृत्वा। लवणंकृत्य। लवणं कृत्वा। मान्तत्वं निपातनात्॥ अनत्याधान उरसिमनसी। १।४।७५। उरसिकृत्य। उरसि कृत्वा। अभ्युपगम्येत्यर्थः। मनसिकृत्य। मनसि कृत्वा। निश्चित्येत्यर्थः। अत्याधानमुपश्लेषणं तत्र न। उरसि कृत्वा पाणिं शेते। मध्येपदेनिवचने च। १।४।७६॥ एते कृञि वा गतिसंज्ञाः स्युरनत्याधाने। मध्येकृत्य। मध्ये कृत्वा। पदेकृत्य। पदे कृत्वा। निवचनेकृत्य। निवचने कृत्वा। वाचं नियम्येत्यर्थः॥

उपाजेन्वाजे। एतौ विभक्तिप्रतिरूपकौ निपातौ दुर्बलस्य सामर्थ्याधाने वर्त्तेते। तदाह दुर्बलस्येति। साक्षात्प्रभृ। साक्षात्। मिथ्या। आमा। अद्धा। लवणम्। उष्णम्। शीतम्। उदकम्। आर्द्रम्। गतिसंज्ञासन्नियोगेन लवणादीनां पंचानां मकारांतत्वं निपात्यते। प्रादुस्। नमस्। आविस्। इत्यादि। आकृतिगणोयं। साक्षात्कृत्येति। असाक्षात्साक्षाद्भूतं यथा साक्षाद्भवति तथा कृत्वेत्यर्थः। च्व्यंतेषु तु पूर्वविप्रतिषेधात् ऊर्यादिच्विडाचश्चेति नित्यैव संज्ञा। तेन लवणीकृत्येत्यत्र मांतत्वं न भवति तद्धि पाक्षिकगतिसंज्ञासन्नियोगे न इह गणे निपातनात्। भाष्यकृता लवणशब्दस्य लवणीशब्दस्य वा विकल्पेन लवणंशब्द आदिश्यते तस्य च संज्ञाविकल्प इत्युक्तं। उभयथापि त्रैरूप्यं निर्बाधं अनत्या। उरसिमनसी विभक्तिप्रतिरूपकौ। मध्येपदे। विभाषा कृञीति वर्त्तते चकारादनत्याधान इति च। एषामनत्याधानरूपार्थविशेषेणदंतत्वमविशेषेण

निपात्यतेनतुगतिसंज्ञासंनियोगेन। अनत्याधानेकिं। पदेकृत्वाशिरोनमति। वाचंनियम्येति। निवचनंवचनाभावः। अर्थाभावेव्ययीभावः॥ ॥ नित्यंहस्ते। उपयमनरू
पार्थएवैतयोरेदंतत्वमोदंतत्वंचनिपात्यतेहस्तेकृत्यपरिणीयेत्यर्थः। उपयमनेकिं। हस्तेकृत्वाकार्षापणंगतः। स्वीकारमात्रमितिपक्षेतुनालमितिबुध्यापराहृत्यदानार्थ
गतइतियोज्यं। एवंत्वावद्गतिसमासानुदाहृत्यप्रादिसमासानुक्तुमारभतेप्रादिग्रहणमिति। सुपुरुषइतिक्रियायोगाभावाद्गतित्वाभावः। अव्यवस्थयासमासप्र
सक्तौव्यवस्थार्थंवचनानिपठ्यंते। प्रादयइति। आदिशब्दउभयत्रप्रकारे। तेनदुराचारःपुरुषोदुष्पुरुषइत्यादिसिद्धं। प्रगतआचार्यइति। अनेनगतार्थेवृत्तिंअ
स्वपदविग्रहेणनित्यसमासत्वंचदर्शयति। एवंप्रगतःपितामहः प्रपितामहः। प्रमातामहइत्यादि। अत्यादयइति। आदिपदाद्अभिगतोमुखमभिमुखः। उद्गतोवे

नित्यंहस्तेपाणावुपयमने। १।४।७७॥ कृञि। उपयमनम्विवाहः। स्वीकारमात्रमित्यन्ये। हस्तेकृत्य। पाणौकृत्य। प्राध्वम्बन्धने। १।४।७८॥ प्रा
ध्वंकृत्य। बन्धनेनानुकूलं कृत्वेत्यर्थः। प्रार्थनादिनात्वानुकूल्यकरणे। प्राध्वंकृत्वा। जीविकोपनिषदावौपम्ये। १।४।७९॥ जीविकामिवकृ
त्वा। जीविकाकृत्य। उपनिषदमिवकृत्वा। उपनिषत्कृत्य। औपम्येकिं। जीविकांकृत्वा॥ प्रादिग्रहणमगत्यर्थं। सुपुरुषः। अत्रवार्त्तिका
नि। प्रादयोगताद्यर्थेप्रथमया॥ प्रगतआचार्य्यः। प्राचार्य्यः। अत्यादयःक्रान्ताद्यर्थेद्वितीयया। अतिक्रान्तोमालामतिमालः। अवादयः
क्रुष्टाद्यर्थेतृतीयया॥ अवक्रुष्टःकोकिलया। अवकोकिलः। पर्य्यादयोग्लानाद्यर्थेचतुर्थ्या॥ परिग्लानोऽध्ययनायपर्य्यध्ययनः।
निरादयःक्रान्ताद्यर्थेपञ्चम्या॥ निष्क्रान्तःकौशाम्ब्या। निष्कौशाम्बिः। कर्म्मप्रवचनीयानांप्रतिषेधः॥ वृक्षम्प्रति॥ ॥ १६५

लामुद्वेलः। प्रतिगतोक्षंप्रत्यक्षइत्यादिसिद्धं। अतिमालइति। गोस्त्रियोरितिह्रस्वः। अवादयइति। आदिपदात्परिणद्धोवीरुधापरिवीरुत्। सन्नद्धोवर्मणासं
वर्मेति। पर्यादयइति। आदिपदादुद्युक्तःसंग्रामायउत्संग्रामः। अध्ययनायेति। तादर्थ्येचतुर्थी। गुरुकुलवासादिनापरिग्लानोध्ययनार्थमित्यर्थः। निरा
दयइति। आदिपदादुत्क्रांताकुलादुत्कुलः। निर्गतमंगुलिभ्योनिरंगुलं। प्रतिषेधइति। कुगतिप्रादयइतिप्रसक्तसमासस्यवक्तव्यःप्रतिषेधस्सचसुराजा अति
सखेतिभाष्यादिप्रयोगात्स्वनिभिन्नानामेवकर्मप्रवचनीयानामित्यर्थः। वृक्षंप्रतीति। लक्षणेत्थंभूतेतिकर्मप्रवचनीयत्वविधिसामर्थ्यादिहसमासोनेति

चेत्तर्हि अपिसुतमित्युदाहार्यं अपिस्तुयाद्धिक्षुमित्यादावपि· पदार्थसंभवानेत्यस्य सावकाशत्वात्स्वरे विशेषसत्वाच्चेत्याहुः॥ ❀ ॥ तत्रोपपदं॥ सप्तमीस्थमित्येतद्व्या
चष्टे सप्तम्यन्तइत्यादिना॥ तद्वाचकंपदमिति॥ एतच्चोपपदमित्यन्वर्थसंज्ञाबलाल्लभ्यते॥ अतएवसंज्ञाविधावपि सप्तमीग्रहणेन सप्तम्यन्तं गृह्यते॥ धातोरितिप्रागधिका
रबलात्सन्निहितेधात्वधिकारइतिलभ्यते॥ तेनक्विलुङीत्यस्य लुङिते अभूदित्यादावुपपदे धातोःक्विरित्यर्थोन भवति॥ तत्रग्रहणं व्याचष्टे तस्मिन्सत्येवेति॥ उपपदेस
त्येवेत्यर्थः॥ तत्रग्रहणाभावे तु घः कर्मणिष्टनित्यादाविव कर्मण्यणित्यादावपि कर्मण्यभिधेये अणित्याद्यर्थः स्यात्॥ तथाच कर्तर्यण्॥ प्रत्ययोनस्यात्॥ किंच सप्तम्यन्तनि
र्दिष्टस्योपपदसंज्ञार्थंतया चरितार्थत्वात्केवलादपि धातोः कर्त्तर्यण्प्रत्ययः संभाव्येत कृतेतु तत्रग्रहणे कुंभाद्युपपदस्य प्रत्ययोत्पत्तौ निमित्तत्वप्रतीत्या केवलादण्प्रत्य

तत्रोपपदं सप्तमीस्थं॥ ३।१।९२॥ सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं कुम्भादि तद्वाचकं पदमुपपदसंज्ञं स्यात्॥ तस्मिंश्च सत्येव
वक्ष्यमाणः प्रत्ययः स्यात्॥ उपपदमतिङ्॥ २।२।१९॥ उपपदं सुबन्तं समर्थेन नित्यं समस्यते॥ अतिङन्तश्चायं समासः॥ कुम्भं करोती
ति कुम्भकारः॥ इह कुम्भ अस् कार इत्यलौकिकं प्रक्रियावाक्यं॥ अतिङ् किं॥ माभवान् भूत्॥ माङि लुङि इति सप्तमीनिर्देशान्माङुपपदं॥
अतिङ्ग्रहणं ज्ञापयति॥ सुपेत्येतन्नेहा ऽनुवर्त्तत इति पूर्वसूत्रे ऽपि गतिग्रहणं पृथक्कृत्या ऽतिङ्ग्रहणान्त ज्ञापकं ष्यते सुपेति च निवृत्तं॥ तथा
च गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति सिद्धं॥ व्याघ्री॥ अश्वक्रीती॥ कच्छपी॥ अमैवा ऽव्ययेन॥ २।२।२०॥ अमैव तुल्यविधा
नं यदुपपदं तदेवा ऽव्ययेन सह समस्यते॥ स्वादुङ्कारं॥ नेह कालसमयवेलासु तुमुन्॥ कालस्समयो वेला वा भोक्तुं॥ अमैवेति किं॥ अग्रेभोजं॥ अग्रेभु

यथं केचनाशि॥ एवं स्थिते घः कर्मणीत्यादौ केचिदर्थग्रहणं व्याख्यानादित्याहुः॥ अन्ये तु तत्रो\ क्त्वा॥ विभाषाग्रेप्रथमपूर्वेष्विति क्त्वाणमुलौ॥ अमा चान्येन च तुल्य
पपदमित्यस्य कर्मण्यणित्यादेश्चैकवाक्यतया प्रवृत्तावुपपदसंज्ञाया निर्विषयत्वापत्तेस्तत्रग्रहणं विनापीष्टं सिद्ध्यत्येवेत्याहुः॥ समर्थेनेति॥ तेन महान्तं कुंभं करोतीत्या
दौ नातिप्रसंगः॥ अतिङन्तश्चेति॥ सुबिति तु अनुवर्त्तत एवेति॥ अतिङन्तमिति नोक्तमिति भावः॥ कुंभ अस् इति॥ अमिति तु नोक्तं कृद्योगषष्ठीविधानात्॥ अतिङ् किमि
ति॥ सुपेत्यधिकारात्किमनेनेति प्रश्नः॥ इतरो वक्ष्यमाणं ज्ञापकं मनसि निधाय प्रत्युदाहरति माभवानिति॥ समासाभावसूचनाय भवानिति मध्ये प्रयुक्तं॥ पूर्वसूत्र

CC-0. In Public Domain. Digitization by eGangotri



इति। कुप्रादयः। गतिः। इति योगं विभज्य कुप्रादयः सुबन्तास्सुबन्तेन समस्यन्ते गतिस्तु सुबन्तोऽतिङन्तेन समस्यत इति व्याख्येयमित्यर्थः। तथा चेति। यद्यप्युक्तरीत्या गत्यु
पपदयोरेव लाभस्तथापि त्रिनयविषयिणी प्राचां परिभाषा एकदेशानुमतिद्वारा इहापि ज्ञाप्यत इति भावः। कारकांशे तु कर्तृकरणे कृता चेति सूत्रस्थ बहुलग्रहणमुक्तार्थसाधक।
मित्यपि मनोरमायां स्थितं। प्रागिति। कृदन्ताच्चरमपश्चात्सुबुत्पत्तेः पूर्वं समास इत्यर्थः। प्रथमान्तसुबुग्रहणं त्विहानुवर्त्तत एव। तेन राजदर्शीत्यादौ पूर्वपदेन लोपादिकार्यं सिध्यति
परिभाषाफलं दर्शयन् गतिमुदाहरति व्याघ्रीति। ।जिघ्रतीति व्याघ्री आतश्चोपसर्ग इति कः। पाघ्राध्माधेडिति शस्तु संज्ञायां न भवति व्याघ्रादिभिरिति निर्देशादिति वक्ष्यते। व्या
ङाघ्रशब्देन गतिसमासः। स यदि घ्राशब्दस्य सुबन्ततामपेक्षेत तर्हि सुबुत्पत्त्यपेक्षसंख्याद्यपेक्ष्यतेतनः प्रागेव लिंगयोग इति लिंगनिमित्तप्रत्ययेन टापा भाव्यं न तु ङीषा घ्राशब्दमात्रस्य
जातिवाचित्वाभावात्। ततो घ्राशब्देन समास इत्यदन्तत्वाभावाज्जातिलक्षणो ङीष् न स्यादिति भावः। यद्यप्युपपदत्वेनाप्येतत्सिद्धं तथापि गतिग्रहणमाङो घ्राशब्देन समासेऽप
श्वादाघ्राशब्देन विशब्दस्य समासार्थमावश्यकमेव। आङ्पूर्वाद्घ्रातेः कप्रत्ययविधानादाङ्युपपदसंज्ञाभ्युपगमेऽपि विशब्दे तदनभ्युपगमादिति बोध्यं। कारकमुदाहरति। अ
श्वक्रीतीति। अश्वेन क्रीता कर्तृकरणे कृता चेति समासः। क्रीतात्करणपूर्वादिति ङीष्। सुबन्तेन समासे तु टापा भाव्यमि त्यदन्तत्वाभावात् क्रीतात्करण इत्ययं ङीष् न स्यादिति ज्ञेयं। उप
पदमुदाहरति। कच्छपीति। कच्छेन पिबतीति कच्छपी। सुपीति योगविभागात्कः। इहापि समासस्य सुबन्ततापेक्षायां टाबेव स्यान्न ङीषित्यादि व्याघ्रीत्यत्रेव बोध्यं। प्राचां तू
पपदमतिङन्तं समस्यत इत्युक्तं। तदसत्। तथा सति प्रथमान्तसुबुग्रहणनिवृत्त्यापत्त्या राजदर्शी चर्मकार इत्यादौ न लोपो न स्यादपदान्तत्वात्। प्रादित्वेत्यादावनो गुण इति
पररूपं च स्यात्। न स्यादेतत्। कच्छेन साधनेन पिबतीत्यर्थाभ्युपगमे कच्छस्य कारकत्वेन कच्छपीति रूपसिद्धावपि नेदमुपपदस्यासाधारणोदाहरणमिति चेदेवं तर्हि मद्रवापि
णीत्युदाहर्त्तव्यं। सुप्यजाताविति णिनौ कृते मृवोपपदस्य कृदन्तेन समासे प्रातिपदिकान्तेत्यादिना पूर्वपदस्थान्निमित्तात्परस्य समासप्रातिपदिकान्तनकारस्य णत्वं सिध्यति
सुबन्तेन समासे त्वन्तरंगत्वाल्लाक्षणिके ङीपि पश्चाद्वापिनीशब्देन समासे गर्गभगिनीत्यत्रेव णत्वं न स्यादित्येके। अन्ये तु कच्छेन हेतुना पिबतीत्यर्थविवक्षायां कच्छ।
स्याकारकत्वात्कच्छपीत्युपपदस्योदाहरणं सम्यगेवेत्याहुः। अमैवाव्ययेन। पूर्वेण सिद्धे नियमार्थमिदं। तुल्यविधानमिति। एतच्चाध्याहारेण लभ्यं। तदेवेति। यस्मिन्नुपप
देऽयं वाक्येन अमैव विहितस्तदेवोपपदमव्ययेन समस्यते नान्यदित्यर्थः। नियमवललभ्योऽप्यमेवकारो न तु सूत्रस्थः। स्वादुंकारमिति। स्वादुमि णमुल्। अव्ययेनेति किं॥

165

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुंभकारः। असति त्वव्ययग्रहणे अमैव यत्तुल्यविधानं तदेव केनचित्समर्थेन समस्येत। तथा सति स्वादुंकारमित्यत्रैव समासः स्यान्न तु कुंभकार इत्यत्र। अथ पूर्वसूत्रे वैयर्थ्यभीत्या
अव्ययविषयकनियम इति चेत्तर्हि अमं तद्विषयक एव किं न स्यात् इमं तेन यः समासः सोमैव तुल्यविधानस्येति। तथा चाग्रेभोजमित्यत्र समासो मा भूत् अग्रे भुक्त्वा कालो भोक्तु
मित्यत्र तु स्यादेवेति भावः। तदेवेति किं। कालो भोक्तुं। समयो भोक्तुं। अमैवेत्येवकारेण मा चान्येन तुल्यविधानस्योपपदस्य समासनिवारणेपि तुमुना तुल्यविधानस्यस्या

तृतीयाप्रभृतीन्यन्यतरस्यां। २।२।२१॥ उपदंशस्तृतीयायामित्यादीन्युपपदान्यमन्तेनाऽव्ययेन सह वा समस्यन्ते। मूलकेनोपदंशम्भुङ्क्ते। मूलकोपदंशं। क्त्वा
च। २।२।२२॥ तृतीयाप्रभृतीन्युपपदानि क्त्वान्तेन सह वा समस्यन्ते। उच्चैःकृत्य। उच्चैः कृत्वा। अव्ययेयथाभिप्रेतेति क्त्वा। तृतीयाप्रभृतीनीति किं। अ
लं कृत्वा। खलु कृत्वा। तत्पुरुषस्याऽङ्गुलेः संख्याव्ययादेः। ५।४।८६॥ संख्याव्ययादेरङ्गुल्यन्तस्य तत्पुरुषस्य समासान्तोऽच् स्यात्। द्वे अङ्गुली प्रमाणम
स्य द्व्यङ्गुलं दारु। निर्गतमङ्गुलिभ्यो निरङ्गुलम्। अहस्सर्वैकदेशसंख्यातपुण्याच्च रात्रेः। ५।४।८७॥ एभ्यो रात्रेरच् स्याच्चात्संख्याव्ययादेः। अहर्ग्रह
णं द्वन्द्वार्थं। अहश्च रात्रिश्चाऽहोरात्रः। सर्वा रात्रिः सर्वरात्रः। पूर्वं रात्रेः पूर्वरात्रः। संख्यातरात्रः। पुण्यरात्रः। द्वयो रात्र्योः समाहारो द्विरात्रम्। अति
क्रान्तो रात्रिं। अतिरात्रः। राजाहस्सखिभ्यष्टच्। ५।४।९१॥ एतदन्तात्तत्पुरुषाट्टच् स्यात्। परमराजः। अतिराजी। कृष्णसखः। अन्हष्टखोरेव। ६।
४।१४५॥ टिलोपः स्यान्नान्यत्र। उत्तमाहः। द्वे अहनी भृतो द्व्यहीनः क्रतुः। तद्धितार्थे द्विगुः तमधीष्ट इत्यधिकारे द्विगोर्वेत्यनुवृत्तौ। रात्र्यहःस
म्वत्सराच्चेति खः। लिङ्गविशिष्टपरिभाषाया अनित्यत्वान्नेह। मद्राणां राज्ञी। मद्रराज्ञी॥ ॥ १ देवानत्वन्निवारणाय नदेवेत्युक्तं॥ ❁ ॥ तृतीया

प्रभृतीन्यन्यतरस्यां। उभयत्र विभाषेयं। अमैव तुल्यविधानस्य प्राप्तेः मा चान्येन च तुल्यविधानस्याप्राप्ते चारम्भात्। प्राप्ते यथा। उपदंशस्तृतीयायां मूलकेनोपदंशं मूलकोप
दंशं। अप्राप्ते यथा। अव्यये यथाभिप्रेताख्याने इति क्त्वाणमुलौ। उच्चैःकारं इह समासपक्षे कृदुत्तरपदप्रकृतिस्वरः। आदिर्णमुल्यन्यतरस्यामित्याद्युदात्तत्वं। असमासे तु उ
च्चैरित्यन्तोदात्तत्वं उदिच्चेडेस्विरितिस्वरुत्पत्तिपक्षे प्रत्ययस्वरस्याद्युत्पत्तिपक्षे तु फिष इत्यस्य च प्रवृत्तेरित्याहुः मनोरमायां तु उच्चैरित्यन्तोदात्तं स्वरादिषु तथा पाठादिति स्थितं अमेत्यनु
वर्त्तत इत्याह। अमन्तेनेति किं नेह। पर्याप्तो भोक्तुं। पर्याप्तिवचनेष्विति तुमुन्। क्त्वा चान्केति तृतीयान्तानां आन इति योगविभागात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु
सि·कौ· राल्लोपः क्विस्कंदिस्यंदोरिति वदिति हरदत्तः नत्र सवर्णदीर्घेणापि तृतीयां तत्त्वोपपत्तेः। अलंकृत्वेति। अलंखल्वोः प्रतिषेधयोरिति सूत्रस्योपदं प्राकृतीयायामित्य स्मात्पूर्व
टी·त· त्वान्नेह समासः तत्पुरुषे असाधारणेन समासांतानाह। तत्पुरुषस्येति। अलोंत्यविधिं बाधित्वा प्रत्ययः परश्चेति परत्वात्तत्पुरुषात्पर एवाच्प्रत्ययो भवति। यथा गोपोष्टकः किं त्वपि गा
१६७ पाभ्यां पर एव टच् भवति न त्वंतावयवः अ मस्तु अनुबंधकरणसामर्थ्यात्परविधिर्बाध्यते। एवं च लाघवात्तत्पुरुषादंगुलेरिति वक्तव्ये तत्पुरुषस्यांगुलेरिति तु समासांतापे
क्षया अवयवषष्ठीत्याहुः। द्व्यंगुलमिति। तद्धितार्थेति समासः। द्विगोर्नित्यमिति मात्रचो लोप इति वृत्तिकृत्। मनोरमायां तु द्वयसचो लुगिति स्थितं। द्वंद्वार्थमिति। अन्होरात्रिरि
तिषष्ठीतत्पुरुषस्यासंभवादिति भावः। ननु अहः शब्दस्याह्स्तुल्यतायां रा—— त्रितुल्यतायां गौणत्वसंभवादह्श्चासौ रात्रिश्चेति कर्मधारयोस्त्विति चेन्न मुख्य
संभवे गौणग्रहणायोगात्। हेमंतशिशिरावहोरात्रे चेत्यत्र द्वंद्वे समासांतदर्शनाच्च।
—— अहोरात्र इति। जातिरप्राणिनामित्येकवद्भावः। स नपुंसकमित्येतद्बाधित्वा परत्वाद्रात्राह्नाहाः इति पुंस्त्वं। एतेनैकवद्भावात्
क्लीबतेति प्राचो ग्रंथः परास्तः। मासेन स्यादहोरात्र इत्यादिग्रंथ विरोधाच्च। सर्वरात्र इति। पूर्वकालैकेति समासः पूर्वरात्र इति पूर्वापराधरोत्तरमित्येकदेशिसमासः। परत्वात्तु रात्रि
प्राब्दस्यैकदेशे लक्षणलक्षणां स्वीकृत्य कर्मधारयाभ्युपगम्यते तदा पूर्वरात्रिरित्येव भवति। द्विरात्रमिति। संख्यापूर्वं रात्रं क्लीबमिति वक्ष्यति। अन्हष्टखोरेवान तद्धित इत्येव सिद्धे नियमा
र्थमिदं एवकारस्त्वन्ह एव टखयो रिति विपरीतनियमशंकानिरासार्थः। आन्माध्मानीख इति प्रकृतिभावविधानेन तन्निरासे प्रतिपत्तिगौरवं स्यादिति भावः। टखोरेवेति किं। अ
न्हानिर्वृत्तमाह्निकं। कालादित्यधिकारे तेन निर्वृत्तमिति ठञ्। टिलोपाभावादह्लोपोऽनन इत्युक्तो लोपः। उत्तमाह इति। सर्वैकदेशसंख्यातेत्यत्र उत्तमशब्दस्यापाठादन्हादेशो न।
द्व्यहीन इति। समासांतविधेरनित्यत्वान्न टच्। सति तु तस्मिन्नन्हादेशं प्रसज्येत। न च नांतत्वस्य खे परे टिलोपविधिसामर्थ्यान्न टजिति वाच्यं। अहीन इत्यत्र तस्य सावकाशत्वा 166
त्। अनित्यत्वादिति। अत्र च लिंगं शक्तिलांगलांकुशेत्यत्र घटीग्रहणं मद्रराज्ञीति। यद्यत्र टच् स्यात्तदा भस्याढ इति पुंवद्भावे टिलोपे च मद्रराजीत्यनिष्टरूपं स्यादिति भावः॥ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिङ्गानिर्देशोऽत्र प्रमाणं प्राकृतलिङ्गानुशासनात् लुप्तप्रत्यये पुनर्नोन्नरितु पर्यायतः अतएव बलवत् सूपः लवणायवागू २३॥

अह्नोऽह्न एतेभ्यः। एतच्छब्देनाहः सर्वैकदेशेति सूत्रस्थाः परामृश्यन्ते। सूत्रे तु तस्मिन्नहरादयो निर्दिष्टाश्च कारेण च संख्याव्यये अनुकृष्टतन्त्रसर्वेषां बुद्धिस्थत्वाद्विशेषप्यहः।
शब्दे इहन गृह्यते। संभवादित्याशयेनाह सर्वादिभ्य इति। समासान्ते परे इति। एतच्च प्रकरणलभ्यं। भाष्ये तु अह्नादेशः प्रत्याख्यातः अह्न एभ्यः अच स्याद्वा वोपवाद इति व्याख्या
यामह्न ष्टखोरेवेति नियमादिल्लोपाभावे अल्लोपोऽनःइत्यकारलोपात् सर्वान्ह इत्यादिरूपसिद्धेः रेफादिति। यदि तु ल हे अहस्सु भवत्यादिवृत्त्यालशाह्न इत्यपि प्रयोगोस्तितर्हि
हिंसादिश्यपिवोध्ये रवाभ्यामित्यधिकारात्। टचो लुगिति। अरलो लुगिति वृत्तिकाराद्युक्तमयुक्तमितिभावः। प्रसंगादाह स्त्रियामिति। नन्विह स्त्रीत्वं दुर्लभं रात्राह्नाहाः पुंसीति वचनादिति

अह्नोऽह्न एतेभ्यः। ५।४।८८। सर्वादिभ्यः परस्याऽहन् शब्दस्याह्नादेशः स्यात्समासान्ते परे। अह्नोऽदन्तात्। ८।४।७। अदन्तपूर्वपदस्थाद्रेफात्
रस्याऽह्नादेशस्य नस्य णः स्यात्। सर्वाह्णः। पूर्वाह्णः। संख्याताह्नः। द्वयोरह्नोर्भवः। कालाट्ठञ्। द्विगोर्लुगनपत्ये इति ठञो लुक्। द्व्यह्नः। स्त्रियामदन्त
त्वाट्टाप्। द्व्यह्ना। द्व्यह्नप्रियः अत्यह्नः। क्षुभ्नादिषु चा। ८।४।३९। एषु णत्वं न स्यात्। दीर्घाह्नो प्रावृट्। एवञ्चैतदर्थमह्न इत्यदन्तानुकरणक्ले
शो न कर्तव्यः। प्रातिपदिकान्तेति णत्ववारणाय क्षुभ्नादिपाठस्यावश्यकत्वात्। अदन्तादिति तपरकरणान्नेह। परागतमहः परान्हः। नसंख्यादेः
समाहारे। ५।४।८९। समाहारे वर्तमानस्य संख्यादेरह्नादेशो न स्यात्। संख्यादेरिति स्पष्टार्थं। द्वयोरह्नोः समाहारः। द्व्यहः। त्र्यहः। उत्तमैकाभ्यां च
। ५।४।९०। आभ्यामह्नादेशो न। उत्तमशब्दोऽन्त्यार्थः पुण्यशब्दमाह। पुण्यैकाभ्यामित्येव सूत्रयितुमुचितं। पुण्याहं। सुदिनाहं। सुदिनशब्दः प्रशस्तवा
चो। एकाहः। उत्तमग्रहणमुपान्त्यस्याऽपि संग्रहार्थमित्येके। संख्याताहः॥ ॥ १९ चेन्नमेवं। सर्वमहः सर्वाह्ण इत्यादावुपसीणस्य तद्वचनस्य लुप्ततद्धि
तायामप्रवृत्तेः। लुपियुक्तवदिति त्रिरित्यादौ नक्लीवत्वं किंच द्विगुप्राप्तापन्नेत्यादिना परवल्लिंगत्वे प्रतिषिद्धे तदपवादस्य रात्राह्नाहाः स्याप्राप्तिरेवेति द्व्यह्नशब्दोयं विशेष्यनिघ्न ए
व न तु नियतपुल्लिंगः। एवं चात्र भवार्थकतद्धिते लुप्तेपि यः श्रिष्यते स लुप्यमानार्थाभिधायीतिन्यायेन भवार्थवन्निष्ठस्त्रीत्वाभिधानमपि न्याय्यमेवेति दिक्। टाबिति। नचे
ह वत्तत्वात् ङीप्स्यादिति शंक्यं। टचो लुप्तत्वात्। न च प्रत्ययलक्षणं। वर्णाश्रयत्वात्। टचोयोऽकारस्तदन्तान्ङीबिति तत्र व्याख्यातत्वात्। अतएव वृत्तिकाराद्युक्तलोपुक्त
क्षेपि न ङीबल्लोकार इति तत्र व्याख्यातत्वात्। न चैवमपि टजन्तत्वान्ङीप्स्यादेवेति वाच्यं। टचः समासान्तत्वात्तदन्तस्य तद्धितार्थे प्रत्युपसर्जनत्वात्। अतएव हि आ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु॰
सि॰कौ॰ पिप्पलिनाप्रोक्तमधीयाना याज्ञवल्की आपिशलेयुरात्तत्तं भाष्ये। द्विगोरिति ङीपुनःशंकायएव। अपरिमाणेति निषेधात्। अत एव चात्र युक्तस्तथैवोदाहरति द्व्यह्नेति। अह्नोऽह्न इ-
टी॰त॰ ति सूत्रे अह्नादेशं प्रत्याख्याय अप्रत्यन्वेवेत्यतोऽचमनुवर्त्य टजपवादोऽजित्याचक्षाणस्य भाष्यकारस्य मते तु निर्विवाद एवात्र टाप्। कथं तर्हि कालनिर्णयदीपिकायां द्व्य-
१६८ ह्नीति प्रयोग इति चेदत्राहुः द्वे हनी यस्यां तिथाविति बहुव्रीहौ नान्तलक्षणो ङीप् बोध्यः। द्वयोरह्नोर्भव इति व्याख्यानं ग्रन्थस्य फलितार्थकथनपरतया नेयमिति। संख्यादि
भिन्नस्य तत्पुरुषस्य समाहारे टजसम्भवादाहा। स्वप्नार्थमिति। पुण्याहमिति। पुण्यसुदिनाभ्यामिति क्लीबत्वं वक्ष्यति। उपान्त्यस्यापीति। यथा प्रथमयोरिति प्रथमाद्विनी

अग्राख्यायामुरसः ५।४।९३॥ टच् स्यात्। अश्वानामुर इव अश्वोरसं। मुख्योऽश्व इत्यर्थः। अनोऽश्मायस्सरसां जातिसंज्ञयोः ५।४।९४॥ ट-
च् स्याज्जातौ संज्ञायां च। उपानसं। अमृताश्मः। कालायसं। मण्डूकसरसमिति जातिः। महानसं। पिण्डाश्मः। लोहितायसं। जलसरसमिति
संज्ञा। ग्रामकौटाभ्यां च तक्ष्णः ५।४।९५॥ ग्रामस्य तक्षा। ग्रामतक्षः। साधारण इत्यर्थः। कुट्यां भवः कौटः। स्वतन्त्रः। स चासौ तक्षा च। कौटत-
क्षः। अतेः शुनः ५।४।९६॥ अतिश्वो वराहः। अतिश्वी सेवा। उपमानादप्राणिषु ५।४।९७॥ अप्राणिविषयकोपमानवाचिनः शुनष्टच् स्यात्। आ-
कर्षः श्वेव आकर्षश्वः। अप्राणिषु किं। वानरः श्वेव वानरश्वा। उत्तरमृगपूर्वाच्च सक्थ्नः ५।४।९८॥ चादुपमानात्। उत्तरसक्थं मृगसक्थं पू-
र्वसक्थं। फलकमिव सक्थि। फलकसक्थं। नावो द्विगोः ५।४।९९॥ नौशब्दान्ताद् द्विगोष्टच् स्यान्न तु तद्धितलुकि। द्वाभ्यां नौभ्यामागतः। द्विनाव-
रूप्यः। द्विगोर्लुगनपत्ये इत्यत्र अचीत्यस्यापकर्षणाद्धलादेर्न लुक्। पञ्चनावप्रियः। द्विनावं। त्रिनावं। अतद्धितलुकीति किं। पञ्चभिर्नौभिः क्री-
तः पञ्चनौः। अर्द्धाच्च ५।४।१००॥ अर्द्धान्नावष्टच् स्यात्। नावोऽर्द्धं अर्द्धनावं। क्लीबत्वं लोकात्। खार्याः प्राचाम् ५।४।१०१॥ द्विगोरर्द्धाच्च खार्या
ष्टज्वा स्यात्। द्विखारं। द्विखारि। अर्द्धखारं॥ ॥ १६७

९९ यथोर्ग्रहणं द्विर्वचननिर्द्देशात्तथेहापि उत्तमग्रहणसामर्थ्यादन्त्ययोर्द्वयोर्ग्रहणं। उत्तमौ चैक-
श्चेति विग्रहे सौत्रं द्विवचनमिति तेषामाशयः। अग्राख्यायां। पञ्चम्यर्थे सप्तमी। अग्रं प्रधानं। अग्रवाचिन उरःशब्दस्य तत्पुरुषाट्टच् स्यात्। अग्राख्यायां किं। देवद-
त्तस्योरो देवदत्तोरः। ग्रामकौटा। जातिसंज्ञयोरिति नानुवर्त्तते। ग्रामेति किं। राज्ञस्तक्षा राजतक्षा। अतिश्व इति। श्वानमतिक्रान्तो जवेनेत्यर्थः। अतिश्वीति। नीचेत्यर्थः। आ-
कर्षः श्वेति। उपमितं व्याघ्रादिभिरिति समासः। आकृष्यते अनेन खलादिगतं धान्यमित्याकर्षः काष्ठविशेषः। उपमानात्किं। निष्क्रान्तः शुनो निःश्वा। फलकसक्थमिति। अत एव

CC-0. In Public Domain. Digitization by eGangotri

ल्लोपकारद्सोमान्यवचनेनाप्युपमानस्यसमास इति माधवः । द्विनावरूप्य इति । हेतुमनुष्येभ्य इति रूप्यः । पंचनौरिति । आर्हीयष्ठक् । अध्यर्धपूर्वेतिलुक् । खार्याः । द्विगो
रिति । खारीशब्दांताद्विगोरि त्यर्थः ॥ ❀ ॥ अर्द्धखारीति ॥ परवल्लिंगमितिस्त्रीत्वं । अर्धखारमिति । अर्धनावमिवक्लीबत्वं लोकात् । ठञ्वास्याद्विगावितिद्विगावितिकिं ।
अर्द्धखारि । द्वित्रिभ्यामञ्जलेः । ५।४।१०२ । टज्वास्याद्विगो । द्व्यञ्जलं द्व्यञ्जलि । अतद्धितलुकीत्येव । द्वाभ्यामञ्जलिभ्यां क्रीतः । द्व्यञ्जलिः । ब्रह्मणो
जानपदाख्यायां । ५।४।१०४ । ब्रह्मान्तात्तत्पुरुषाट्टच्स्यात्समासेनजानपदत्वमाख्यायते चेत् । सुराष्ट्रे ब्रह्मा । सुराष्ट्रब्रह्मः । कुमहद्भ्यामन्यतर
स्यां । ५।४।१०५ । आभ्यां ब्रह्मणोवाटच्स्यात्तत्पुरुषे । कुत्सितो ब्रह्मा । कुब्रह्मः । कुब्रह्मा । आन्महतः समानाधिकरणजातीययोः । ६।३।४६ । म
हत आकारोऽन्तादेशः स्यात्समानाधिकरणे उत्तरपदे जातीये च परे । महाब्रह्मः । महाब्रह्मा । महादेवः । महाजातीयः । समानाधिकरणे किं ।
महतः सेवा । महत्सेवा । लाक्षणिकं विहाय प्रतिपदोक्तस्य महदितिसमासस्य ग्रहीष्यत इति चेत् । महाबाहुर्नस्यात् । तस्माल्लक्षणप्रति
पदोक्तयोः प्रतिपदोक्तस्येति परिभाषा नेह प्रवर्त्तते समानाधिकरणग्रहणसामर्थ्यात् । आदिति योगविभागादात्वं प्रागेकादशभ्य इति
निर्द्देशाद्वा । एकादश । महतीशब्दस्य पुंवत्कर्मधारयेति पुंवद्भावे कृते आत्वं । महाजातीया । महदात्वे घासकरविशिष्टेषूपसंख्यानं पु
म्वद्भावश्च । असामानाधिकरण्यार्थमिदं । महतो महत्या वा घासः । महाघासः । महाकरः । महाविशिष्टः । अष्टनः कपाले हविषि । अष्टा
कपालः । गवि च युक्ते । गोशब्दे परे युक्त इत्यर्थे गम्येऽष्टन आत्वं स्यात् । अष्टागवं शकटं । अचूप्रत्यन्ववेत्यत्राऽजितियोगविभागाद्बहुव्री
हावप्यच् । अष्टानाङ्गवां समाहारः । अष्टगवं । तद्युक्तत्वाच्छकटमप्यष्टागवमिति वा । द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः । ६।३।४७ । आ
त्स्यात् । द्वौ च दश च द्वादश । द्व्यधिका दशेति वा । द्वाविंशतिः । अष्टादश । अष्टाविंशतिः । अबहुव्रीह्यशीत्योः किं । द्वित्राः । द्व्यशीतिः । प्राक्श
तादित्युक्तेर्नेह । द्विशतं । द्विसहस्रं । त्रेस्त्रयः । ६।३।४८ । त्रिशब्दस्य त्रयस् स्यात्पूर्वविषये । त्रयोदश । त्रयोविंशतिः । बहुव्रीहौ तु । त्रिदशा । त्रिदशः
द्वयोरंजल्योः । द्व्यंजलिः । द्व्यंजलमिति । समाहारे द्विगुः । अतद्धितलुकीत्येवेति । एतच्च पूर्वसूत्रेऽपि बोध्यं । अंजलिभ्यां क्रीत इति । नात्रांजलिः पाणिद्वयं तस्य मूल्यत्वासंभवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु·
सि·कौ· त्किं तुअंजलिपरिमितो व्रीह्यादिर्विवक्षितस्तत्र अपरिमाणत्वात्द्व्यंजलिरित्यत्रठञ्। तस्यत्वध्यर्धपूर्वेतिलुक्। ब्रह्मणोजनपदे अवोजान
टी·त· पदः ह्योकयोरितिवद्भावप्रधानोनिर्देशस्तस्यास्व्याया मन्यासव्यासमासेनैषैतल्लभ्यतेनराहसमासेनजानपदत्वमिति। कस्येन्याकांक्षायांसन्निधानाद्ब्रह्मण
९६ इतिलभ्यते। सुराष्ट्रेब्रह्मइति। सप्तमीतियोगविभागात्समासः। जानपदेतिकिं। देवब्रह्मानारदः। कुब्रह्मइति। ब्राह्मणपर्यायोब्रह्मन्शब्दः। आन्महतः। अन
कारउच्चारणार्थोनतुसवर्णदेशार्थइत्याह आकारोंतादेशस्यादितिइहोत्तरपदाधिकारे पूर्वपदमाक्षिप्यतेतच्चमहताविशेषितमितितदंतविधिर्लभ्यतेग्रहणवतेतिनि
षेधस्तुप्रत्ययविधिविषयइत्युक्तत्वात्तेनमहाबाहवदतिमहाबाहुरितिप्रयोगोभवति। परममहत्परिमाण
मित्यत्रतुपरममहतोद्रव्यस्यपरिमाणमितिषष्ठीतत्पुरुषोभ्युपगम्यतइतिनतत्रात्वप्रसक्तिरितिवृद्धाः। यत्तुवर्द्धमानेनोक्तंइष्टकेषीकामालानामित्यत्रतदंत
विध्युपसंख्यानसामर्थ्यादुत्तरपदाधिकारेतदंतविधिर्नास्तितेनपरममहत आत्वंनेतितद्भाष्यकैयटविरुद्धं। तथाहि। येनविधिरितिसूत्रेपदाधिकारे प्रयोज
नमिष्टकचितंपक्वेष्टकचितमितिभाष्ये उदाहृतंकैयटेनचपरशब्देनउत्तरपदंगृह्यतइतिव्याख्यातं। एतदेवार्थतः काशिकायामुपनिबद्धं नतुइष्टकेषीत्यत्र
कात्यायनोक्तमुपसंख्यानमस्ति। ननुप्रतिपदोक्तसमासेयदुत्तरपदंतस्मिन्नेवपरे आत्वंस्यान्नान्यत्रेतिकिमनेनसमानाधिकरणग्रहणेनेत्यत आह महाबाहुरि
ति। बहुव्रीहिरयंसचसामान्यशास्त्रनिर्वर्त्यत्वाल्लाक्षणिक इतिभावः। अष्टनः कपालइति। कपालेउत्तरपदेहविषिवाच्येअष्टनआत्वंवक्तव्यमित्यर्थः। अष्टा
कपालइति। संस्कृतंभक्षाइत्यणः द्विगोर्लुगनपत्यइतिलुक्। अध्यर्धपूर्वेत्यणोलुगितिकेषांचिद्व्याख्यानंतुप्रामादिकंसंस्कृतमित्यणोऽनार्हीयत्वात् त्रेस्त्र
॥ ॥ यः। संधिवेलादिष्वृतुनक्षत्रयोरणीतिपाठात्सांनोयमादेशइतिघ्नपक्षाहात्रयस्त्रादिति॥

168

सुजर्थे बहुव्रीहिरिति। संख्ययाव्ययेत्यादिनेति शेषः। एकादिरिति। अट्ठुगिति छेदः। परत्वं लकारोच्चारणसामर्थ्यान्न भवति। धासु वेति। संख्याया विधार्थे इत्यादिना
विहितस्य धाप्रत्ययस्यैवेह ग्रहणं। प्रत्ययाप्रत्यययोरिति परिभाषया। तेनेह न। षट् दधातीति षड्धा। आतोनुपसर्गे कः। टाप्। षोडन्निति षड्दन्ता अस्य षोडन्। वय

सुजर्थे बहुव्रीहिः। अशीतौ तु त्र्यशीतिः। प्राक्शतादित्येव। त्रिशतं। त्रिसहस्रं। विभाषा ——— चत्वारिंशत्प्रभृतौ सर्वेषाम्। ६।३।४९। द्व्यष्टनोस्त्रे
श्च प्रागुक्तमात्वं स्याच्चत्वारिंशदादौ परे। द्विचत्वारिंशत्। द्वाचत्वारिंशत्। अष्टचत्वारिंशत्। अष्टाचत्वारिंशत्। त्रिचत्वारिंशत्। त्रयश्चत्वारिं
शत्। एवमग्रेऽपि। षष्टिसप्ततिनवतिषु। एकादिश्चैकस्य चादुक्। ६।३।७६। एकादिर्नञ् प्रकृत्या स्यादेकस्य चादुगागमश्च। नञो विं
शत्या समासे कृते एकशब्देन सह तृतीयेति योगविभागात्समासः। अनुनासिकविकल्पः। एकेन न विंशतिः। एकान्नविंशतिः। एकादूनविं
शतिः। एकोनविंशतिरित्यर्थः। षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वं च धासु वेति वाच्यं॥ षोडन्। षोडश। षोढा। षड्धा। परवल्लिङ्गं द्वन्द्व
तत्पुरुषयोः। २।४।२६। एतयोः परपदस्येव लिङ्गं स्यात्। कुक्कुटमयूर्याविमे। मयूरीकुक्कुटाविमौ। अर्धपिप्पली। द्विगुप्राप्तापन्नाल
म्पूर्वगतिसमासेषु प्रतिषेधो वाच्यः। पञ्चसु कपालेषु संस्कृतः। पञ्चकपालः पुरोडाशः। प्राप्तो जीविकां। प्राप्तजीविकः। आपन्नजीविकः
अलंकुमार्यै। अलंकुमारिः। अत एव ज्ञापकात्समासः। निष्कौशाम्बिः। पूर्ववदश्ववडवौ। २।४।२७। द्विवचनमतन्त्रम्। अश्ववडवौ। अश्वव
डवान्। अश्ववडवैः। अहोरात्राहाः पुंसि। २।४।२९। एतदन्तौ द्वन्द्वतत्पुरुषौ पुंस्येव। अनन्तरत्वात्परवल्लिङ्गतापवादोऽप्ययं परत्वात्समाहार
नपुंसकतां बाधते। अहोरात्रः। रात्रेः पूर्वभागः पूर्वरात्रः। पूर्वाह्णः। द्व्यहः। संख्यापूर्वं रात्रं क्लीबं। द्विरात्रं। त्रिरात्रं। गणरात्रं॥ ——— ॥

सिद्धं तस्येति तत्रादेशः। परवल्लिङ्गं। इतरेतरयोगे द्वन्द्वोऽत्र गृह्यते तेन समाहारे द्वन्द्वः। स नपुंसकमित्यपवादस्य वक्ष्यमाणत्वात्सूत्रे तत्पुरुषयोरिति न सप्तमी द्वि
वचनं। तथा त्वे द्वन्द्वे तत्पुरुषे च यत्परपदं तद्वल्लिङ्गं पूर्वपदस्येति दिश्येत। परपदस्य संबन्धिशब्दत्वेन पूर्वपदाक्षेपकत्वात्। ततश्च मयूरीकुक्कुटावित्यत्र पूर्व

सु॰
सि॰कौ॰
टी॰त॰
१७०

पदेऽकारनिवृत्तिप्रसंगः। कुक्कुटमयूर्यौ अर्द्धपिप्पलीत्यादौ तु पूर्वपदे स्त्रीप्रत्यय उत्पद्येत किंतु षष्ठीद्विवचनमित्याशयेनाह। एतयोरिति। द्वंद्वतत्पुरुषार्थयोरित्यर्थः। एवं चानुप्रयोगेपि तद्वल्लिंगं सिद्धं। उपमेयेषष्ठ्यभ्युपगमाद्धृतिरपि षष्ठ्यंतादेवेत्याशयेनाह परपदस्येवेति। भाष्ये तु लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्येति प्रत्याख्यातमिदं सूत्रं। अस्मिंश्च प्रत्याख्याते तत्तुल्यन्यायत्वाल्लिंगानुशासनं सर्वमेव प्रत्याख्यातं तथापि तस्मौढिवादमात्रं अन्यथा व्याकरणस्यैव वैयर्थ्यप्रसंगात्। गतिसमासेष्विति। गतिग्रहणं प्रादीनामुपलक्षणं मुख्यस्य गतेरसंभवादित्याशयेनोदाहरति निष्कौशांबिरिति। अतंत्रमिति। अत्र च लिंगं पूर्ववद्ग्रहणं अन्यथा निपातनादेव सिद्धे किं तेनेति भावः। इह समासार्थस्य वा पूर्ववल्लिंगातिदेशः। उत्तरपदार्थस्य वा। उभयथाप्यश्ववडवौ शोभनाविन्यनुप्रयोगेपि पुंस्त्वं सिध्यति। ननु समासार्थस्य पुंस्त्वेपि स्वाश्रयस्त्रीत्वस्य निवर्त्तनाट्टापः श्रवणप्रसंगः। न चातिदेशवैयर्थ्यं। शासिनत्वप्रवृत्त्या अनुप्रयोगे पुल्लिंगत्वलाभेन च तत्साथक्या दितिचेदत्राहुः। इहैव निपातनादश्ववडवपूर्वापराधरोत्तराणामित्यत्र निपातनाद्वा टापो निवृत्तिरिति। अहोरात्र इति। प्राचा तु अहोरात्रमित्युदाहृ।

अपथन्नपुंसकं ॥२।४।३०॥ तत्पुरुष इत्येव। अन्यत्र तु। अपथो देशः। कृतसमासान्तनिर्देशान्नेह। अपन्थाः॥

नन्वेति। प्रागेवोक्तं। अत्र वदंति। रात्राह्नेत्यनेन रात्रादीनामेव पुंस्त्वं विधीयते तदंतस्य तु परवल्लिंगमित्येव सिध्यति। अत एव भिन्नविषयत्वाद्धि प्रतिषेधे परं कार्यमिति न प्रवर्त्तते। एवं च रात्राह्नेति पुंस्त्वाप्रवृत्त्या समाहारे स नपुंसकमित्येव भवति परवल्लिंगापवादत्वादिति। तन्न। उक्तरीत्या द्व्यह त्र्य हादावपि नपुंसकत्वप्रसंगात। न चेष्टापत्तिः। द्व्यहस्त्र्यह इति प्राचाप्युदाहृतत्वेन स्वमूलग्रंथेन सह विरोधापत्तेः। तेतु त्रिंशदहोरात्र इत्यादिकोशविरोधाच्च। तस्माद्रात्राद्यंतस्यैवायं पुंस्त्वविधिर्द्वंद्वतत्पुरुषयोरिति प्रक्रमणात्तथा च भिन्नविषयत्वाभावाद्रात्राह्नेति पुंस्त्वं समाहारे नपुंसकतां परत्वेन बाधत एव। संख्यापूर्वमिति। अत्र चापथपुण्याहे नपुंसकौ संख्यापूर्वा रात्रिरिति लिंगानुशासनसूत्रं मूलं। संख्याग्रहणं तु कृत्रिमाकृत्रिमन्यायो न प्रवर्त्तते इत्याशयेनोदाहरति। द्विरात्रं गणरात्रमिति। गणानां बहूनां रात्रीणां समाहार इति विग्रहः॥ ❀ ॥ अपथं नपुंसा तत्पुरुष इत्येवेति। द्वंद्वग्रहणं तु नानुवर्त्तते अयोग्यत्वादिति भावः। अपंथा इति। पथो विभाषेति समासांतविकल्पः। इदं सूत्रं शक्यमवक्तुं। पथः संख्याव्ययादेरिति वक्ष्यमाणेवाल्लिंके न गतार्थत्वात्। प्रसंगादह

अर्धर्चा इति। इह केषांचिदर्थभेदेन व्यवस्थेष्यते। सा च ---- व्यवस्था मघमकरंदमाक्षिकाणां वाची मधुशब्दो द्विलिंगः चैत्रादिवाची तु पुल्लिंगः। भूतः पिशाचे द्विलिंगः क्रि
याव चनस्तु विशेष्यलिंग इत्येवं यथायथं ज्ञेया॥ ॐ॥ अर्धर्चाः पुंसि च स नपुंसकमित्यनयोर्मध्ये जात्याख्यायामिति चतुःसूत्र्याः संगतिरिह चिंत्या। बहूनां वचनं भति

अर्द्धर्चाः पुंसि च। २।४।३१॥ अर्द्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः। अर्द्धर्चः। अर्द्धर्चं। ध्वजः। ध्वजं। एवं तीर्थ शरीर मण्ड पीयूष देह अङ्कुश कलश इ
त्यादि। जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यां। १।२।५८॥ एकोऽप्यर्थो वा बहुवद्भवति। ब्राह्मणाः पूज्याः। ब्राह्मणः पूज्यः। अस्मदो द्वयोश्च
१।२।५९॥ एकत्वे द्वित्वे च विवक्षिते ऽस्मदो बहुवचनं वा स्यात्। वयं ब्रूमः। पक्षे ऽहं ब्रवीमि। आवां ब्रूव इति वा। सविशेषणस्य प्रतिषेधः। पटुरहं
ब्रवीमि। फल्गुनीप्रोष्ठपदानां च नक्षत्रे। १।२।६०॥ द्वित्वे बहुत्वप्रयुक्तं कार्यं वा स्यात्। पूर्वे फल्गुन्यौ। पूर्वाः फल्गुन्यः। पूर्वे प्रोष्ठपदे। पूर्वाः प्रोष्ठप
दाः। नक्षत्रे किं। पूर्वे फल्गुन्यौ माणविके। तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वे बहुवचनस्य द्विवचनं नित्यं। १।२।६३॥ बहुत्वं द्वित्ववद्भवति। तिष्यश्च पुनर्व
सू च। तिष्यपुनर्वसू। तिष्येति किं। विशाखाऽनुराधाः। नक्षत्रे किं। तिष्यपुनर्वसवो माणवकाः। स नपुंसकं॥ २।४।१७॥ समाहारे द्विगुर्द्वंद्वश्च न
पुंसकं स्यात्। परवल्लिंगाऽपवादः। पञ्चगवं। दन्तोष्ठं। अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः। पञ्चमूली। आवन्तो वा। पञ्चखट्वी। पञ्चखट्वं। अ
नो नलोपश्च वा द्विगुः स्त्रियाम्॥ पञ्चतक्षी। पञ्चतक्षं। पात्राद्यन्तस्य न। पञ्चपात्रम्। त्रिभुवनं। चतुर्युगं। पुण्यसुदिनाभ्यामह्नः क्लीबतेष्टा
पुण्याहं। सुदिनाहं। पथः संख्याव्ययादेः॥ संख्याव्ययादेः परः कृतसमासान्तः पथशब्दः क्लीबमित्यर्थः। त्रयाणां पन्थास्त्रिपथं। विरूपः प
न्थाः विपथं। कृतसमासान्तनिर्देशान्नेह। सुपन्थाः। अतिपन्थाः। सामान्ये नपुंसकम्॥ मृदु पचति। प्रातः कमनीयं॥

पादनमिति व्याख्यानात्फलितोऽत्रातिदेश इत्याशयेनाह एकोऽप्यर्थो वा बहुवदिति। एवं च विशेषणद्वयमपि सिद्धमिति ध्वनयन्नुदाहरति ब्राह्मणाः पूज्या इति जात्या
ख्यायां किं। देवदत्तो यज्ञदत्तः। एकस्मिन्किं। व्रीहियवौ। अस्मदो द्वयोश्च। चादेकस्मिन्बहुवचनमन्यतरस्यामिति च वर्तते तदेतदाह एकत्वे द्वित्वे च विवक्षित इ

हि

CC-0. In Public Domain. Digitization by eGangotri

सु॰

सि॰कौ॰ फल्गुनीप्रोष्ठपदानां च वकारेण द्वयोरनुकर्षणमाह। द्विल इति फल्गुन्यौ मालविके इति। फल्गुनीशब्दान्नक्षत्रेण युक्तः काल इत्य णोनस्य लुबविशेष इति लुप्। ततो जाता
त॰टी॰ र्थे फल्गुन्यषाढाभ्यां टानाविति टः टित्वान्ङीप्। न चायं गौणः यौगिकत्वात् तथा च गौणमुख्यन्यायाप्रवृत्त्या नक्षत्रग्रहणमावश्यकमिति भावः। तिष्यपुनर्वस्वोः। विशाखा
१७९ नुराधा इति। विशाखे चानुराधाश्चेति विग्रहः। तिष्यपुनर्वसव इति। तिष्यपुनर्वसुशब्दाभ्यां पूर्ववन्नक्षत्रेण युक्तः काल इ त्यण्। लुबविशेष इति च लुप्। ततो जा
तार्थे संधिवेलादिसूत्रेण अण् तस्य तु श्रविष्ठाफल्गुन्यनुराधेत्यादिना लुक्। नक्षत्र इत्यनुवर्त्तमाने पुनर्नक्षत्रग्रहणं पर्यायाणामपि यथा स्यादित्येवमर्थमित्या
करः। एवं च सिध्यपुनर्वसू इत्यपि सिध्यतीति दिक्। बहुवचनस्य किं। इदं तिष्यपुनर्वसु। चार्थे द्वंद्व इति समाहारद्वंद्वोयं स नपुंसकं। अनंतरस्येति न्यायोत्र
नाश्रीयते तथात्वे द्विगुसंग्रहो न स्यादित्याशयेनाह। द्विगुर्द्वंद्वश्चेति अत्र व्याचक्षते। प्रकरणे देवानुवाद्य लाभे संग्रहणमेतत्प्रकरणानुपात्तस्यापि समाहारद्वंद्वस्य
संग्रहार्थं तेन संज्ञापरिभाषमिति सिद्धमिति। पंचगवमिति। तद्धितार्थेत्यादिना समाहारे द्विगुः। इदं त्वोष्ठमिति। द्वंद्वश्च प्राणीत्यादिना समाहारे द्वंद्वः पंचखट्वमिति। नपुंस
कह्रस्वः। पंचखट्वीति। उपसर्जनह्रस्वत्वे सत्यदंतात् द्विगोरिति स्त्रीत्वपक्षे ङीप्। आनो नल्लोपश्चेति। उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणप्रतिषेधादप्राप्तो न
लोप इति भावः। इह वाशब्दः स्त्रियामित्यनेन न संबध्यते न तु पूर्वेणेते न नित्यो नलोप इत्याह। पंचतक्षमित्यादि। पात्राद्यंतस्येति। स्त्रीत्वमिति शेषः। आकृतिगणोयं
सुदिनाहमिति। प्रशस्तपर्यायः सुदिनशब्दः सुदिनासु समासु कार्यमेतन्मतिं चिन्त्वीत विशेषतः स्वयं चेत्यादिप्रयोगात्। पथः संख्याव्ययेति। संख्याव्ययरूपोय
आदिरस्मादित्यर्थः। त्रिपथं विपथमिति। ऋक्पूरब्धूरित्यप्रत्ययः सुपंथा अतिपंथा इति। नपूजनादिति समासांतनिषेधः। कथं तर्हि व्यध्वो दुरध्वो विपथः। कदध्वा
कापथस्समा इत्यमर इति चेत्समाद एवायमिति बहवः। मनोरमायां तु पथे गतावित्यस्मात् पचाद्यचि पथति याति गच्छतीति व्युत्पादितः पथशब्दोस्ति। तथा च त्रिकांडशेषः
वाटः पथश्च मार्गः स्यादिति तेन पथशब्दे न समासे पुंस्त्वमुपपन्नं न चैवं विपथसिद्धावपि कापथो न स्यात्कादेशस्य दुर्लभत्वादिति वाच्यं। ईषदर्थे चेति तत्संभवा
त्कुत्सायामर्थतः पर्यवसानादिति स्थितं। केचित्तु पथः संख्येति वार्त्तिके कृतसमासांतस्यैव ग्रहणं न तु पचाद्यजंतस्येत्यत्र बीजाभावाद्विपथः कापथ इति प्रयोगो
दुरुपपाद एवेत्याहुः। अत्र माधवः परवल्लिंगापवादत्वात्तत्पुरुष एवेदं प्रवर्त्तते नान्यत्र विपथा नगरी बहुव्रीहिरयं पंथानमतिक्रांता अतिपथा इहापि न द्विगु

170

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शमेत्यादिनापरवल्लिंगताया: प्रतिषेधादिति। सामान्ये नपुंसकमिति। अनियतलिंगविषयकमिदं तेनादिपचति ग्रामतरादिरिति पुंस्त्वमेव। मृदु पचतीति। क्रियाविशेषण
त्वाद्द्वितीयान्तं। धातूपात्तभावनां प्रति हि फलांशं कर्मीभूतः। तथा च फलसामानाधिकरण्ये द्वितीया। अत एव सक्तुस्त्वाविन्यादौ कारकपूर्वकत्वाद्यण्। यत्र तु भावनां प्रति

तत्पुरुषोऽनञ्कर्मधारयः। २।४।१९॥ अधिकारोऽयं। संज्ञायां कन्थोशीनरेषु। २।४।२०॥ कन्थान्तस्तत्पुरुषः क्लीबं स्यात्सा चेदुशीनरदेशोत्पन्नायाः कन्था
याः संज्ञा। सुशमस्यापत्यानि सौशमयः। तेषां कन्था सौशमिकन्थं। संज्ञायां किं। वीरणकन्था। उशीनरेषु किं। दाक्षिकन्था। उपज्ञोपक्रमं तदाद्या
चिख्यासायां। २।४।२१॥ उपज्ञान्त उपक्रमान्तश्च तत्पुरुषो नपुंसकं स्यात् तयोरुपज्ञायमानोपक्रम्यमाणयोरादिः प्राथम्यं चेदाख्यातुमिष्यते। पाणि
नेरुपज्ञा। पाणिन्युपज्ञं ग्रन्थः। नन्दोपक्रमं द्रोणः। छाया बाहुल्ये। २।४।२२॥ छायान्तस्तत्पुरुषो नपुंसकं स्यात्पूर्वपदार्थबाहुल्ये। इक्षूणां छाया
इक्षुच्छायं। विभाषा सेनेति विकल्पस्यायमपवादः। इक्षुच्छायानिषादिन्य इति तु आसमन्तान्निषादिन्य इत्याङ्प्रश्लेषो बोध्यः। सभा राजाऽमनुष्य
पूर्वा। २।४।२३॥ राजपर्यायपूर्वोऽमनुष्यपूर्वश्च सभान्तस्तत्पुरुषो नपुंसकं स्यात्। इनसभं। ईश्वरसभं। पर्यायस्यैवेष्यते नेह राजसभा। चन्द्रगु
प्तसभा। अमनुष्यशब्दो रूढ्या रक्षःपिशाचादीनाह। रक्षःसभं। पिशाचसभं। अशाला च। २।४।२४॥ संघातार्था या सभा तदन्तस्तत्पुरुषः क्लीबं
स्यात्। स्त्रीसभं। स्त्रीसङ्घात इत्यर्थः। अशाला किं। धर्मसभा। धर्मशालेत्यर्थः॥ विभाषा सेनासुराच्छायाशालानिशानां। २।४।२५॥ एतदन्त
स्तत्पुरुषः क्लीबं वा स्यात्॥ ब्राह्मणसेनं। ब्राह्मणसेना। यवसुरं॥ यवसुरा। कुड्यच्छायं। कुड्यच्छाया। गोशालं॥ गोशाला। श्वनिशं। श्वनिशा। तत्पु
रुषोऽनञ्कर्मधारय इत्यनुवृत्तेर्नेह। दृढसेनो राजा। असेना। परमसेना॥ इति तत्पुरुषः॥ ९ करणतया धात्वर्थविशेषोऽन्वेति तत्र तद्विशेषणानां तृती

यान्ततैव ज्योतिष्टोमेन यजेतेति यथा। एतच्च करणे यज इति सूत्रे इति पदमञ्जर्यां स्पष्टं॥ ॐ ॥ नञ्समासकर्मधारयभिन्नस्तत्पुरुषो वक्ष्यमाणकार्यभाग्भवतीति सूत्रार्थः। उप
ज्ञौ। उपज्ञायत इत्युपज्ञा। आतश्चोपसर्ग इति कर्मण्यङ्। उपक्रम्यत इत्युपक्रमः। कर्मणि घञ्। नोदात्तोपदेशस्येति वृद्धिप्रतिषेधः। उपज्ञा च उपक्रमश्चेति समाहारद्वंद्वः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सचानुवर्त्तमानस्यतत्पुरुषस्यविशेषणं।तदन्तेनउपज्ञोपक्रमौपरामृश्येतेतदेतत्सकलमभिप्रेत्याहउपज्ञान्तइत्यादि।आख्यातुमिच्छाआचिख्यासेतीच्छासनादिहवि
वक्षेवशब्दप्रवृत्तौनियामिकानतुवस्तुस्थितिरितिज्ञाप्यते।तेनतदुपक्रमसौजन्यमित्याद्यपिसिध्यति।पाणिनेरिति।कर्त्तरिषष्ठीनंदस्योपक्रममिति।नंदस्योपक्र
ममितिविग्रहः।छायाबाहुल्ये।बाहुल्येसतियाछायातद्वाचीयश्छायांतस्तत्पुरुषइत्यर्थः।इहकस्यबाहुल्यइत्यपेक्षायामावरकद्रव्यनिमित्तत्वाच्छायायास्तद्बाहुल्यमिति
गम्यतेतच्चावरकंपूर्वपदार्थभूतमेवेत्याशयेनाहपूर्वपदार्थबाहुल्यइति।बाहुल्येकिं।कुड्यस्यच्छायाकुड्यच्छाया।प्रश्लेषोवाध्यइति।केचित्तुइक्षुच्छायनिषादिन्य
इत्येवपठंति।सभा।इनसभमित्यादि।इनशब्दोत्रराजपर्यायःईश्वरशब्दश्च।ननुस्वंरूपमितिवचनाद्राजशब्दस्यैवग्रहणंयुक्तंनपर्यायस्येत्यतआहपर्यायस्यैवे
ष्यतइति।एवकारेणस्वरूपस्यविशेषाणांचनिरासः।कथंतर्हिनृपतिसभामगमन्नवेपमानइतिकीचकवधे।अत्रकेचिन्नास्तिपतिर्यस्यांसभायामितिबहुव्रीहौ
कृतेपश्चात्कर्मधारयः।अनन्कर्मधारयइत्युक्तेर्नक्लीबत्वमित्याहुः।रक्षितस्त्वाह।गजपतिवन्नृपतिरपिराजविशेषणत्वेनात्रनानुपपत्तिरिति।अशालाच।
शालावाचीसंघातवाचीचसभाशब्दस्तत्राजामनुष्यपूर्वत्वेशालावाचिनःक्लीबत्वमुक्तमनेनतुसंघातवाचिनोविधीयतइत्याहसंघातार्थेति।विभाषासे
ना।प्रथमार्थेषष्ठीतिसेनादिभिस्तत्पुरुषोविशेष्यते।विशेषणेनतदंतविधिस्तदाह।एतदंतइति।श्वनिशमिति।कृष्णचतुर्दश्योतस्यांकिलकेचिच्छ्वान
उपवसंति।एतच्चशाबरभाष्येतिर्यगधिकरणेस्पष्टं।तत्पुरुषइत्याद्यधिकारसूत्रस्यात्रैवप्रयोजनं।ननुसंज्ञायांकंथोशीनरेष्वित्यादिपंचसूत्र्यामतत्पुरु १७२
षस्यनञ्समासस्यकर्मधारयस्यचनत्वासंभवादित्याकरेस्थितंतथैवप्रत्युदाहरतिदृढसेनइत्यादि।ननुबहुव्रीहौविशेष्यनिघ्नतान्याय्येवेतिकिमनेनतत्पुरु
षग्रहणेनामैवंन्यायापेक्षयावचनस्यबलीयस्त्वात्।किंचासतितद्ग्रहणेद्वंद्वेनपुंसकत्वंस्यात्परवल्लिंगापवादत्वादस्यप्रकरणस्येतिदिक्॥इतितत्पुरुषः॥ 171

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शेषो बहुव्रीहिः। क्षिप असर्वोपयोगे कर्मणि घञ्। अत्र वृत्तिकृत् यत्रान्य समासो नोक्तः स शेष इत्याह। एषां पदानां यस्मिन्नर्थेऽव्ययीभावादिसंज्ञकः समासो
न विहितः स शेष इत्यर्थः। इति हरदत्तो व्याख्यत्। एतच्च प्राक्कडारात्परं कार्यमिति पाठाभिप्रायेण बोध्यं। अस्मिंस्तु पक्षे शेषग्रहणाभावे उन्मत्तगंगमित्यत्र परत्वा
द्बहुव्रीहिः स्यान्निरवकाशत्वाच्चाव्ययीभाव इत्युन्मत्तगंगमित्याद्यनिष्टं प्रसज्येत आकडारादेकेति पाठाभ्युपगमपक्षे त्वेकसंज्ञाधिकारेणैवोन्मत्तगंगमि
त्यादिसिद्धेः शेषग्रहणं व्यर्थं निरवकाशयाऽव्ययीभावसंज्ञया बहुव्रीहिसंज्ञाया बाधात् तत्रापि प्रयोजनमाह। द्वितीयाश्रितेत्यादिनेति। शेषाधिकारस्य ब
हुव्रीहेरवशेषाद्विभाषेति कप्रत्ययो नान्यस्माद्बहुव्रीहेरित्येतल्लाभार्थमपि शेषग्रहणमावश्यकमिति बोध्यं। यस्य त्रिकस्येति। यद्यपि प्रादयोगताद्यर्थे प्र

शेषो बहुव्रीहिः। २।२।२३। अधिकारोऽयं। द्वितीयाश्रितेत्यादिना यस्य त्रिकस्य विशिष्य समासो नोक्तः स शेषः प्रथमान्त इत्यर्थः॥ अनेक
मन्यपदार्थे। २।२।२४॥ अनेकं प्रथमान्तमन्यपदार्थे वर्त्तमानं वा समस्यते स बहुव्रीहिः। अप्रथमाविभक्त्यर्थे बहुव्रीहिरिति समानाधिकर
णानामिति च फलितं॥ प्राप्तमुदकं यं ग्रामं॥ प्राप्तोदको ग्रामः। ऊढरथोऽनड्वान्। उपहृतपशू रुद्रः। उद्धृतौदना स्थाली। पीताम्बरो हरिः। वी
रपुरुषो ग्रामः। प्रथमार्थे तु न। वृष्टे देवे गतः॥ व्यधिकरणानामपि न॥ पञ्चभिर्भुक्तमस्य॥ प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः॥
प्रपतितपर्णः। प्रपर्णः॥ नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः॥ अविद्यमानः पुत्रः अपुत्रः। अस्तीति विभक्तिप्रतिरूपकमव्ययं। अ

थमयेत्युक्तं तथापि द्वितीयाश्रितादिभिरिति वत्प्रथमाके न चित्सह समस्यत इति नोक्तमित्यर्थः। वार्त्तिककृता प्रथमयेत्युक्तावपि सूत्रकृता नोक्तमिति वा। प्रथमां
तमिति। कंठेकाल इत्यादि बहुव्रीहिस्तु ज्ञापकसाध्य इति भावः। अन्यस्य पदस्यार्थ इति। समस्यमानपदातिरिक्तस्य पदस्यार्थ इत्यर्थः। परेन हि प्रकृत्यर्थोपस
र्जनकः कर्मकर्त्रादिरभिधीयते प्रथमान्ते न तु प्रातिपदिकार्थमात्रं। यद्यपि त्रिकपक्षे संख्या प्रत्ययार्थस्तथापि तस्याः प्रकृत्यर्थं प्रति विशेषणत्वान्न प्रकृत्य
र्थोपसर्जनकः प्रत्ययार्थः प्रथमान्तस्यास्ति। एवं च द्वितीयान्ताद्यर्थ इति फलितं। तदाह। अप्रथमाविभक्त्यर्थ इति समानेति। एतच्च शेषग्रहणाल्लभ्यं। अनेकं
किं बहूनामपि यथा स्यादेतच्च मूल एव स्फुटीभविष्यति अनिञ्चिधौ केवलग्रहणं ज्ञापकीकृत्यानेकग्रहणमिह सुत्यजमित्याहुः। अन्यग्रहणं किं। बहुव्री।

सु·
सि·कौ· हितत्पुरुषयोर्विषयविभागो यथा विज्ञायेत स्वपदार्थे हि सावकाशं तत्पुरुषं परत्वादन्यपदार्थे बहुव्रीहिर्बाधते असति त्वन्यग्रहणे कण्ठेकाल इत्यादौ व्यधिकरणपदे बहूनां
टी·त समुदाये च सावकाशं बहुव्रीहिं स्वपदार्थ इवान्यपदार्थेऽपि नीलोत्पलं सर इत्यादौ समानाधिकरणे तत्पुरुषो बाधेत परग्रहणं किं वा कार्ये माभूत् ग्राहवतीनदीह मास्त्वासीरि
१७३ तिवा कार्यो गम्यते अर्थग्रहणं किं यावता पदेऽपदान्तरस्य वृत्त्यसंभवादेव पदार्थे भविष्यति अत्राहुः प्रकृत्यर्थविशिष्टप्रत्ययार्थाभिधानं यथा स्यात् अन्यथा प्राधान्यात्प्रत्ययार्थ-
मात्रं गृह्येत इष्टापत्तौ तु चित्रगुरित्येतत् षष्ठ्यर्थसंबंधमात्रपरं स्यात् तथा च देवदत्तादिसामानाधिकरण्यं न स्यादिति अत्रेदमवधेयं सुपेत्येतन्नानुवर्तते तेनात्रानेकं प्रथ-
मान्तं मिथः समस्यत इति पर्यवसन्नोऽर्थः एवं च द्विपदबहुव्रीहिरबाध एव ये तु सुप्सुपेत्यनुवर्त्य अनेकं सुबन्तं सुपा सहेति व्याचक्षते तेषां तु द्विपदबहुव्रीहिर्दुर्लभ एवेति द्विती-
यादिविभक्त्यर्थे क्रमेणोदाहरति प्राप्तमित्यादि ग्रामकर्मक प्राप्तिकर्तृ उदकं विग्रहार्थः उदककर्तृक प्राप्तिकर्मेति समासार्थः विग्रहवाक्ये स इति प्रयोगे तु तस्याप्ययमेवा-
र्थः अनडुत्कर्तृको ऊहनकर्मीभूतो रथः रथकर्मको ऊहनकर्ता तु समासार्थः रुद्रसंप्रदानको उपहरणकर्म पशुः पशुकर्मको उपहरणसंप्रदानं तु समासार्थः स्थाल्यवधिको
उद्धरणकर्म ओदनः ओदनकर्मकोद्धरणावधिः स्थाली समासार्थ इत्यादि इह कर्मादीनां समासेनाभिहितत्वात्प्रथमा ननु वाक्ये धात्वर्थं प्रति क्तप्रत्ययार्थस्य कर्तुः कर्मणो
वा विशेष्यत्वाद्वृत्तावपि तथैवोचितेति प्राप्तोदको रथादौ उदककर्तृक प्राप्तीत्यादि वर्णनं तु युज्यते इति चेदुच्यते एकार्थीभावादिभिर्वृत्तौ विशिष्टार्थविषयक शा-
क्त्यन्तरमेव स्वीक्रियते न त्ववयवशक्तिः इति नानुपपत्तिः व्यपेक्षावादिभिस्त्वगत्याभिन्नैव व्युत्पत्तिः स्वीकार्या किं च कर्तृविशिष्टप्राप्तेः पदार्थत्वे तस्यैनामार्थत्वादुदक-
स्य तद्भेदो वाच्यः स च बाधितः नहि कर्तृविशिष्टा प्राप्तिरुदकमिति संभवति अत एव बहूनां वृत्तिधर्माणां वचनैरेव साधने स्यान्महद्गौरवमित्यादिना समर्थसूत्रे एकार्थी- 172
भावपक्ष एव प्रबल इत्यवोचाम प्रथमार्थे तु नेति शेषपदेन वा अन्यपदार्थ इत्यनेन वा अतिप्रसंगवारणाद प्रथमाविभक्त्यर्थ इति वचनं न कर्तव्यमिति भावः यत्रा-
न्यसमासेनोक्तः स शेष इति वृत्तिकारादीनां मते तु प्रथमान्तानामेव बहुव्रीहिरित्यलाभात्कर्तव्यमेवेदं वचनमिति बोध्यं प्रादिभ्य इति प्रादिभ्यः परं यद्धातुजं तदन्तं स्वपदान्तरेण
बहुव्रीहिर्व्याख्येय इति सूत्रसिद्धानुवादः वा वेति ॥

दृढंतु वाचनिकं पूर्वपदांतर्गतस्योत्तरपदस्य धातुजस्य लोपो वाच्य इत्यर्थः एतच्च प्रादीनामेव वृत्तौ विशिष्टार्थे वृत्तिमाश्रित्य सूत्यजं नञोऽस्त्यर्थानामिति नञः परेषामस्त्यर्थ
वाचिनां पदांतरेण वहुव्रीहिर्व्याख्येयः अस्त्यर्थवाचिनां तु वा लोप इत्यर्थः अस्त्यर्थानां किं अनुपनीतपुत्रकः नञः किं निर्विद्यमानपुत्रः नन्विह सुपेत्यनुवृत्तावपि सुविन्येतद

स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु। [illegible]॥ भाषितपुंस्कादनूङ् ऊङोऽभावोऽस्यामिति वहुव्रीहिर्निपातना
त्पञ्चम्या अलुक् षष्ठ्याश्च लुक्। तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुंस्कं तस्मात्पर ऊङोऽभावो यत्र तथाभूतस्य स्त्रीवाचकस्य शब्दस्य पुंवाचकस्येव रूपं स्या
त्समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे न तु पूरण्यां प्रियादौ च परतः। गोस्त्रियोरिति ह्रस्वः। चित्रा गावो यस्येति लौकिकविग्रहे। चित्रा अस् गो अस् इ
त्यलौकिकविग्रहे। चित्रगुः। रूपवद्भार्य्यः। चित्रा जरती गौर्य्यस्येति विग्रहे। अनेकोक्तेर्वहूनामपि वहुव्रीहिः। अत्र केचित्। चित्राजरतीगुः। जरती
चित्रागुर्वा। एवं दीर्घातन्वीजङ्घः। तन्वीदीर्घाजङ्घः। त्रिपदे वहुव्रीहौ प्रथमस्य न पुंवत्। उत्तरपदस्य मध्यमेन व्यवधानात्। द्वितीयमपि न पुंवत्
पूर्वपदत्वाऽभावात्। उत्तरपदशब्दो हि समासस्य चरमाऽवयवे रूढः। पूर्वपदशब्दस्तु प्रथमावयव इति वदन्ति। वस्तुतस्तु नेह पूर्वपदमाक्षिप्यते। आन
ङ् ऋत इत्यत्र यथा। तेनोपान्त्यस्य पुंवदेव। चित्राजरद्गुरित्यादि। अत एव चित्रा जरत्यो गावो यस्येति द्वंद्वगर्भेऽपि चित्राजरद्गुरिति भाष्यं। कर्मधारयपूर्व
पदे तु द्वयोरपि पुंवत्। जरच्चित्रगुः। कर्मधारयोत्तरपदे तु चित्रजरद्गवीकः। स्त्रियाः किं। ग्रामणि कुलं दृष्टिरस्य। ग्रामणिदृष्टिः। भाषितपुंस्कात्किं
गङ्गाभार्य्यः। अनूङ् किं। वामोरूभार्य्यः। समानाधिकरणे किं। कल्याण्याः माता। कल्याणीमाता। स्त्रियां किं। कल्याणी प्रधानं यस्य स कल्याणीप्रधानः। पूर
ण्यां तु। अप्पूरणीप्रमाण्योः। ५।४।११६। पूरणार्थप्रत्ययान्तं यत्स्त्रीलिङ्गं तदन्तात्प्रमाण्यन्ताच्च वहुव्रीहेरप् स्यात्। कल्याणी पञ्चमी यासां
रात्रीणां ताः कल्याणीपञ्चमा रात्रयः। स्त्री प्रमाणी यस्य स्त्रीप्रमाणः। पुंवद्भावप्रतिषेधोऽप्प्रत्ययश्च प्रधानपूरण्यामेव। रात्रिः पूरणीवाच्या चेत्युक्तो

तुवर्त्ततेतथा चास्ति स्त्रीरेति प्रयोगो दुर्लभ इत्याशंक्य तं साधयति विभक्तिप्रतिरूपकमिति॥ ꣸ ॥ स्त्रियाः पुंवत् निपातनादिति एतच्च पूर्वत्रापि योज्यं॥

सु॰
सि॰कौ॰
टी॰त॰
१७४

मन्यथाव्यधिकरणेनांबहुव्रीहिःस्वरसत्तोनसिध्येत्।। लुगिति। अनूङितिप्रथमांतं। षष्ठ्यर्थेप्रथमेतिहरदत्तः। एवंचसूत्रेकेषांचिदनूङ्ःसमानाधिकरणइतिवक्ष्यं
तपाठःसांप्रदायिकइतिभावः। तुल्येइत्यादि। भाषितःपुमानन्यस्मिन्नित्यादिव्याख्यानादयमर्थोलभ्यतेइतितृतीयादिषुभाषितपुंस्कमित्यत्रोपपादितं। यद्यत्र।
भाषितःपुमान्येनतद्भाषितंपुंस्कमित्युच्येत तर्हिकुटीभार्यःद्रोणीभार्यइत्यादावतिप्रसंगःस्याद्भवतिहिकुटशब्दोघटेपुल्लिंगोगेहेतुस्त्रीलिंगः। द्रोणशब्दश्चपरि
माणविशेषेपुल्लिंगोगवाद्यांतुस्त्रीलिंगइति। ऊङभावोपत्रेति। यदितुऊङोन्योनूङितिपर्युदासःस्यात्तर्हियवागूतमेवगृह्येतननः। किमितिचेत् दरदोपत्यंदारदः
द्व्यञ्मगधेत्यण्तस्यस्त्रियामतश्चेतिलुक्दरद्साचासौवृंदारिकाचदारदवृंदारिकेत्यादिनसिध्येत्। नत्वत्रदर्शनीयाभार्यायस्यदर्शनीयभार्यइत्यादावि
वस्त्रीप्रत्ययःकश्चिद्दृश्योतिभावः। ननुनकोपधायाऊङश्चेत्येवसूत्र्यतामितिचेन्न। बाधकबाधनार्थेनपुंवत्कर्मधारयइत्यनेनवामोरूभार्येतिकर्मधारयेपुं
वद्भावापत्तेः। प्रतिषेधसामर्थ्यात्सिद्धांतेतुनदोषः। स्त्रियाइत्यस्यस्त्रीप्रत्ययपरतांवारयतिस्त्रीवाचकस्येति। स्त्रीप्रत्ययस्यपुंवद्भावइत्युक्तेतुस्त्रीप्रत्ययलोपइ
त्येवार्थःपर्यवस्यतीतिदारदवृंदारिकेतिनसिध्येत्। किंचपटुभार्यइत्यत्रउत्तरपदनिमित्तायाङीषोनिवृत्तेरचःपरस्मिन्नितिस्थानिवद्भावाद्यण्स्यात्। अपि
चावतंडस्यापत्यंस्त्रीआवतंडीआवतंड्याश्चेतियञ्। लुक्स्त्रियामितितस्यलुक्। शार्ङ्गरवादित्वान्ङीन्। आवतंडीचासौवृंदारिकाचआवतंड्य वृंदारिका। अत्रपुंवद्भावेनङी
नोनिवृत्तावपिअर्थगतस्यस्त्रीत्वस्यानिवृत्तत्वाल्लुक्स्त्रियामितियञोलुक्प्रसज्येतेतिभावः। ह्रस्वइति। अनेकमितिप्रथमानिर्दिष्टत्वात्। प्रथमानिर्दिष्टमित्येकवि।
भक्तिचेतिवागोशब्दस्योपसर्जनत्वादितिभावः। चित्राअसिति। अंतरंगानपीतिन्यायादिहपूर्वसवर्णदीर्घोनप्रवर्त्ततेअन्यथाएकादेशस्यपरादित्वेनसुपोलुकि
चित्रगुरित्यत्रअकारोनलभ्यतेतिभावः। नेहेति। अत्रैवसूत्रेपट्वीमृद्वीभार्येअस्येतिद्वंद्वगर्भबहुव्रीहौपट्वीमृदुभार्यइतिभाष्योदाहरणादितिभावः।। आनङिति।
तथाचसमर्थसूत्रेभाष्येहोतृपोतनेष्टोद्गातारइत्यत्रचतुर्णांद्वंद्वेतृतीयस्यानङ्उदात्तत्वतः। पूर्वपदाक्षेपेतुसनसिध्येत्नत्वत्रनेष्टापूर्वपदंहोतुरेवपूर्वपदत्वादि
तिभावः। अतएवेति। पूर्वपदानाक्षेपादेवेत्यर्थः। चित्राजरदिति। द्वंद्वांतर्गतजरच्छब्दस्योत्तरपदत्वेपिसामानाधिकरण्यात्तदायोनिवृत्तिः। नचैवमपिद्वंद्वात्म
कस्यपूर्वपदस्यसमानाधिकरणोत्तरपदपरत्वात्पुंवद्भावेटाप्निवृत्तिर्दुर्वारेतिवाच्यं। द्वंद्वांतर्गतचित्राजरच्छब्दयोः स्त्रीप्रत्ययप्रकृत्योःप्रत्येकंभाषितपुंस्कत्वेपिद्वं

173

CC-0. In Public Domain. Digitization by eGangotri

द्वात्मकस्य पूर्वपदस्यानन्तरत्वान्नाद्यु योरपीति। पूर्वपदान्तर्गतमुत्तरपदमाश्रित्य प्रथमस्यापि पुंवद्भाव इति भावः। जरच्चित्रेति। पूर्वकाले केति समासः। लिंगविशिष्ट परिभाषया जरद्गुग्रहणेन जरतीशब्दस्यापि ग्रहणान्न। चित्रजरद्गवीक इति। जरती चासौ गौश्च जरद्गवी गोरतद्धितेति टच् टित्त्वान्ङीप्। चित्रा जरद्गवी यस्येति बहुव्रीहौ नद्यृतश्चेति वक्ष्यमाणः कप्। वामोरुभार्य इति। संहितशफलक्षणवामादेश्चेत्यूङ्। प्रधानमिति। भावे ल्युडन्तं नित्यनपुंसकं। पंचमीति। तस्य पूरण इति डट्। नान्तादसंख्यादेरिति डटो मडागम। टित्त्वान्ङीप्। प्रमाणीति। करणे ल्युट्। तद्धितस्य विशेष्यनिघ्नत्वात् स्त्रियां ङीप्। कथं तर्हि प्रमाणायां स्मृताविति शावरभाष्यमिति चेत्। अत्र भट्टाः प्रमाणमय

नद्यृतश्च। ५।४।१५३। नद्युत्तरपदादृदन्तोत्तरपदाच्च बहुव्रीहेः कप्स्यात्। पुंवद्भावः। केऽणः। ७।४।१३। के परेऽणो ह्रस्वः स्यात्। इति प्राप्ते। न कपि। ७।४।१४। कपि परे ह्रस्वो न स्यात्। कल्याणपञ्चमीकः पक्षः। अत्र तिरोहितावयवभेदस्य पक्षस्याऽन्यपदार्थत्वात् रात्रिः प्रधानं। बहुकर्तृकः। अप्रियादिषु किं। कल्याणीप्रियः। प्रिया। मनोज्ञा। कल्याणी। सुभगा। दुर्भगा। भक्तिः। सचिवा। स्वसा। कान्ता। क्षान्ता। समा। चपला। दुहिता। वामा। अबला। तनया। सामान्येन पुंसकं। दृढभक्तिर्यस्य। स दृढभक्तिः। स्त्रीत्वविवक्षायां तु दृढाभक्तिः। तसिलादिष्वाकृत्वसुचः। ६।३।३५। तसिलादिषु कृत्वसुजन्तेषु परेषु स्त्रियाः पुंवत्स्यात्। परिगणनं कर्तव्यं। अव्याप्त्यतिव्याप्तिपरिहाराय। त्रतसौ। तरप्तमपौ। चरट्जातीयरौ। कल्पप्देशीयरौ। रूपप्पाशपौ। थाल्। तिल्थ्यनौ। बह्वीषु बहुत्र। बहुतः। दर्शनीयतरा। दर्शनीयतमा। घरूपेति वक्ष्यमाणो ह्रस्वः परत्वात् पुंवद्भावम्बाधते। पट्वितरा। पट्वितमा। पटुचरी। पटुजातीया। दर्शनीयकल्पा। दर्शनीयदेशीया। दर्शनीयरूपा। दर्शनीयपाशा॥ ॥ ९९

नेयादिमूलभूतां श्रुतिं पतः क्विवं नादयते तत्स्वात्प्रमाण। स्मृतिरुच्यत इत्याहुः। तत्रापत्ते कपि ह्रस्वस्यापि नित्यत्वान्नीतिं तु कितापु दुर्लभः। तथाप्यागमशास्त्रस्यानित्यत्वान्नुद्धेति वोध्यं। क्विविवाचरतीति क्विप् विजिघ्यर्थ इति वा व्याख्येयं। अन्ये तु प्रमाणं वेदस्तद्वदाचरतीत्याचारः क्विवंतात्प्रमाणशब्दात्स्वार्थे घञ्चि टाविन्याहुः। प्रधानपूरणग्रामेवेति। प्रधाने कार्यसंप्रत्ययान्न्यायसिद्धमिदं॥ ॥ नद्यृतः। तत्परत्वस्पष्टार्थं। नद्युत्तरपदादिति। नद्यन्तादिति नोक्तं कप्प्रत्ययेन सह समासे कृते बहुव्रीहिरनद्यन्तत्वात्। उत्तरपदं तु नद्यन्तं भवत्येव समासे अन्तस्य समासान्त इति पक्षाश्रयणादिति वोध्यं। दृढमिति। अदार्ढ्यनिवृत्तिमात्रपर त्वेनात्र दृढशब्दप्रयोगान्न लिंगविशेषविवक्षेति भावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नसिलादिकृत्तसुज्यर्थं तेपुतिलघ्यन्ग्रलोपाठाभावात्प्रद्वीरेश्याप्रुभारूप्यरत्यत्राति व्याप्तिः २१

सु
सि·कौ· लिंगविशेषविवक्षायांतुद्दतभक्तिरित्यादिसिद्धयेश्रियादिषुभक्तिशब्दपाठः। तसिलादिषुकृत्वसुजंतेष्विति। पंचम्यास्तसिलित्यारभ्यसंख्यायाः क्रियाभ्यावृत्तिगणनेकृत्वसुजि
टी·त· त्येतत्पर्यंतेष्वित्यर्थः। अव्याप्त्यतिव्याप्तिवारणायेति। वृकतिरजथ्यावहुशरत्यत्राव्याप्तिः ईश्वरसमाप्तावितिरूप्यस्यपष्ठ्यारूप्यस्येचेतिरूपस्यचतत्रपाठादतस्तन्निवारणे
९५ यपरिगणनमित्यर्थः। परिगणितानान्तत्तसारीन्क्रमेणोदाहरतिवक्ष्येति। यद्यपिवह्वादिषुङीषोवैकल्पिकत्वात्तदभावेवहुत्रेत्यादिसिध्यतितथापिपक्षेवह्वीत्रेत्या

वहुथा। प्रशस्ता। वृकी। वृकतिः। अजाभ्योहिता। अजथ्या। थासिवत्कृत्वार्थस्यपुम्वद्भावोवक्तव्यः। वह्वीभ्योदेहि। वहुशः। अल्पाभ्योदेहिअल्पशः। त्व
तलोर्गुणवचनस्य। शुक्लायाभावः शुक्लत्वं। शुक्लतागुणवचनस्यकिकथ्याभाककर्त्रीत्वं। शरदः कृतार्थेत्यादौतुसामान्येनपुंसकं। भस्याऽढेतद्धिते। हस्तिनी
नांसमूहोहास्तिकं। अढेकिं। रोहिण्येयः। स्त्रीभ्योढगितिढोऽत्रगृह्यते। अग्नेर्ढगितिढकिंतुपुम्वदेव। अग्नायीदेवतास्यस्थालीपाकस्याग्नेयः। सपत्नी
शब्दस्त्रिधा। शत्रुपर्यायात्सपत्नशब्दाच्छार्ङ्गरवादित्वान्ङीषेकः। समानःपतिर्यस्याइतिविग्रहेविवाहनिवन्धनम्पतिशब्दमाश्रित्यनित्यस्त्रीलिङ्गोद्वि।
तीयः। स्वामिपर्यायपतिशब्देनभाषितपुंस्कस्तृतीयः। आद्ययोः। शिवाद्यण्। सपत्न्याऽअपत्यंसापत्नः। तृतीयात्तुलिङ्गविशिष्टपरिभाषयापत्युत्तरप
दलक्षणोण्यण्एवनत्वण्। शिवादौरूढयोरेवग्रहणात्सापत्न्यः। ठक्छसोश्च। भवत्याछात्राभावत्काः। भवदीयाः। एतद्वार्त्तिकमेकतद्धितेचेतिसूत्रञ्च
नकर्त्तव्यांसर्वनाम्नोवृत्तिमात्रेइतिभाष्यकारेष्टयागतार्थत्वात्। सर्वमयः। सर्वकाम्यति। सर्विकाभार्य्यायस्यासर्वकभार्य्यः। सर्वप्रियइत्यादिपूर्वस्ये
वेदंभस्त्रेषाद्वितिलिङ्गात्तेनेनाक्वचिएकशेषद्वन्द्वौचन। सर्विकासर्वाः। कुक्कुट्यादीनामण्डादिषु। कुक्कुट्या अण्डं। कुक्कुटाण्डं। मृग्याःपदं। मृगपदं। मृग

घनिष्टवारणापेदंनतत्वत्रेतिभाचोक्तमुदाहरणमत्रोपेक्षितं। सर्वनाम्नोवृत्तिमात्रइत्यनेनतायेलादितिमनोरमायांस्थितं। पट्विनरेति। भाचात्पटत्वरेत्युदाहृतंतन्मामारिक
मितिभावः। पटुचरीति। भूतपूर्वेचरट्। पटुजातीयेति। प्रकारवचनेजातीयर्। दर्शनीयरूपेत्यादि। प्रशंसायांरूपप्। याप्येपाशप्। ॥ वहुधाति। प्रकारवचनेथाल्तत्रहिकिं
सर्वनामवहुभ्यइत्यधिकृतं। वृकतिरिति। वृकज्येष्ठाभ्यांतिल्तातिलौचछंदसीतितिल्। अजथ्येति। अजाविभ्यांथ्यन्। थासीति। वह्वल्पार्थादितिपंशस्त्समासिलां।

174

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिषु ज्ञातव्य इत्यर्थः। ततसादिषु परिगणनं कर्तव्यमिति यावत्। त्वतलोर्गुणवचनस्य गुणस्येति ———— वक्तव्ये वचनग्रहणं प्रसिद्धगुणपरिग्रहार्थं अत एव स्थैर्यं वोदाहरति शुक्लत्वं शुक्लतेति। नन्विह जातिसंज्ञाव्यतिरिक्तां धर्ममात्रं गुण इति यत्प्राचीनैरुक्तं तत्स्वीकार्य मन्यथा निरीक्ष्यमेनेशार इः कृतार्थता। साम्प्रमोचरति दुःखशीलतामित्यादिषु पुंवद्भावप्रकृत्यादीर्घश्रवणं स्यादित्यत आह। सामान्ये नपुंसकमिति। एवं च नेहं पुरोहत्यत्वमासीदित्यादिप्रयोगो निर्बाध इति भावः हास्तिकमिति। अचित्तहस्तिधेनोरिति ठक्। न चात्रयस्येति लोपेन निर्वाहस्तस्या सिद्धवदत्रेत्यसिद्धत्वादचः परस्मिन्निति स्थानिवद्भावाच्च न स्तद्धित इति टिलोपानापत्तेः न च ठक्छसोश्चेत्यनेनैवात्र पुंवद्भावसिद्धिः शंक्या। छसासाहचर्याद्भवतष्ठक्छसाविव्यस्यैव ठकस्तत्र ग्रहणात्। नापि जातेश्चेति पुंवद्भावनिषेधः शंक्यः। अस्मादेव भाव्योदाहरणात्सौत्रस्यैव निषेधो न त्वौपसंख्यानिकस्येति ज्ञापनात्। रौहिणेय इति। रोहितशब्दाद्वर्णादनुदात्तादिति ङीन्नकारौ। सति तु पुंवद्भावे तयोर्निवृत्तौ रौहितेय इति स्यादिति भावः। गृह्यत इति। व्याख्यानादिति शेषः। अग्नायीति। अग्निशब्दात् वृषाकप्यग्नीति। स्त्रियां ङीवैकारादेशौ। आग्नेय इति। पुंवद्भावाभावे तु। अग्नायेय इति स्यादिति भावः। शत्रुपर्यायादिति। अत्र च व्यन्सपत्ने इति निर्देशो लिंगम्। रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः इत्यमरः। विवाहनिबंधनमिति। तज्जन्यसंस्कारविशेषविशिष्टत्वमित्यर्थः। सापत्न इति। अभाषितपुंस्कत्वान्न द्वितीयस्य पुंवद्भावो न भवति। सति च पुंवद्भावे नकारादेशाभावात्सापत इति स्यात्। आद्यस्य तु पुंवद्भावेऽपि सापत्न इत्येव भवतीति भावः। रूढयोरेवेति। आद्यश्शब्दो रूढः द्वितीयस्तु योगरूढस्तेन समानः पतिर्यस्या इति विग्रहो न विरुध्यत इति दिक्। ठक्छसोश्च। अमत्वार्थ आरंभः। भावत्का इति भवतष्ठक्छसौ। ठावस्यायामेव पुंवद्भावे कृते ठस्येक इति इकादेशं बाधित्वानां तलक्षणः कादेशः। नन्विकादेशे भत्वात् भस्याढ इति पुंवद्भावे सति कादेशप्रवृत्त्या रूपसिद्धौ किमत्र ठग्रहणेन। मैवम्। मथितं पण्यमस्य माथितिक इत्यत्रेवाल्विधित्वेन स्थानिवद्भावायोगात्सन्निपातपरिभाषया वाकादेशप्रवृत्तेर्दुर्लभत्वादतष्ठक्छसोरिति ठग्रहणं कर्तव्यमेव। भवदीया इति। छसः सित्करणात्सिति चेति पदसंज्ञा। तेनात्र जश्त्वं भवति। एवं च पदसंज्ञया भसंज्ञाया बाधाद्भस्याढ इत्यस्याप्राप्त्या वार्तिके छसग्रहणं कृतं भाष्यकारेणेति। अनेन सूत्रवार्तिकयोरुक्तिसंभवो ध्वनितः। उत्तरं दृष्ट्वा पूर्वस्याप्रवृत्तत्वात् निष्कर्षे तु व्यर्थमेवे त्याह। गतार्थत्वादिति इष्टेरुदाहरणान्याह। सर्वमय इत्यादिना। तत आगत इत्यर्थे मयड्वेति मयट्। तसिलादिषु मयडादेरपरिगणितत्वात्तेनेदं न सिध्यतीति भावः। सर्वैकभार्य इति। न चास्त्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·कौ· पुंवदितिसूत्रेण गतार्थत्वान्नकोपधाया इति निषेधात् । न चास्यापि तेन निषेधः शंक्यः । स्त्रियाः पुंवदित्यादिप्रकरणोक्तस्यैव तेन निषेधात् । अस्या इहैव तु तस्मिन्प्रकरणे असमा-
टी· त· विष्टत्वात् । न च वृत्त्यंतर्गतस्य सर्वनामत्वाभावात्पुंवद्भावो न भवेदिति वाच्यं । वचनारंभसामर्थ्यात्तन्मात्रग्रहणात् । क्वचित्सर्वनामत्वेन दृष्टानां संप्रति संज्ञाभावेपि पुंवद्भावाभ्युपग-
७६ मात् । अत एवोत्तरपूर्वायै इत्यत्र संज्ञाभावेपि पुंवद्भावः । सर्वा नाम काचित्तस्याः पुत्रः सर्वापुत्र इत्यत्र तु नातिप्रसंगः । संज्ञोपसर्जनयोः सर्वादिगणबहिर्भूतत्वेन वृत्तेः पूर्वमप्यसर्वनाम-
त्वात् । सर्वप्रिय इति । स्त्रियाः पुंवदित्यत्र प्रियादिपर्युदासो रूपवतीप्रिय इत्यादावुपयुज्यत इति भावः । तदितरात इत्येत्यादावुत्तरपदेति प्रसंगमाशंक्याह । पूर्वस्यैवेति । वृत्तिघ-
टकानेकभागमध्ये किंचिदपेक्षया पूर्वस्येत्यर्थः । लिंगादिति । अन्यथा एवाह्वा एतयोः कात्पूर्वस्य आपि विधीयमानमित्त्वं निर्विषयं स्यादिति भावः । दक्षिणपूर्वादिगिति भा-
ष्योदाहरणमपीह लिंगमिति बोध्यं । यत्तु प्राचा सर्वनाम्नः समासे पूर्वं पुंवदित्युक्तं । यच्च व्याचख्युः वार्त्तिकार्थमनुवदति सर्वनाम्न इत्यादिनेति तत्प्रामादिकं वृत्तिमात्रे इति पा-

क्यङ्मानिनोश्च । ६ । ३ । ३६ । एतयोः परतः पुंवत् । एनीवाचरति एतायते । श्येनीवाचरति श्येनायते । स्वभिन्नां कांचिद्दर्शनीयां मन्यते दर्शनीयमानि-
नी । दर्शनीयं स्त्रियं मन्यते दर्शनीयमानी चैत्रः ॥ न कोपधायाः । ६ । ३ । ३७ । कोपधायाः स्त्रियाः न पुंवत् । पाचिकाभार्यः । रसिकाभार्यः ॥ ॥

ठस्यैव भाष्यारूढत्वात्सर्वमयः सर्वकाम्यतीत्युक्तोदाहरणासिद्धिप्रसंगाच्च वार्त्तिकार्थमित्याद्यपि प्रामादिकमेव । वार्त्तिकग्रंथे एतदभावात् । न च सर्वनाम्नो वृत्तिमात्र इत्येतद्वार्त्ति-
कमेव न तु भाष्यकारेष्टिरिति शंक्यं । ठक्छसोश्चेति वार्त्तिकस्य निरालंबनतापत्तेः । भाष्यकारेष्टित्वे तु वार्त्तिकस्योक्तिसंभव उक्त एव प्राक् ॥ ॥ क्यङ्मा एतायत इत्यादि क-
र्तुः क्यङ् सलोपश्चेति क्यङि पुंवद्भावे कृते एतस्य तयोरकृत्सार्वेति दीर्घः । मानिन्ग्रहणमसमानाधिकरणार्थमस्वार्थं चेत्याशयेन यथाक्रममुदाहरति स्वभिन्नामित्यादिना
दर्शनीयमानिनीति । मन इति णिनिः । नांतत्वान्ङीप् । आत्मानमेव दर्शनीयां मन्यते तत्र स्त्रियाः पुंवदित्येव सिद्धं । एकस्या अपि ईप्सिततमत्वव्यापाराश्रयत्वविवक्षाभेदेन
कर्मत्वकर्तृत्वयोः सत्त्वेपि वा स्ववाभेदेन सामानाधिकरण्याविघातादिति भावः । पाचिकाभार्य इति । पचतीति पाचिका ण्वुल् । युवोरित्यकादेशे टापि प्रत्ययस्थादितीत्वं । रसिका-
भार्य इति । रसोस्त्यस्या इति रसिका अत इनिठनाविति ठन् ॥

CC-0. In Public Domain. Digitization by eGangotri

मद्रिकायत इति। कप्ड्यानिनोश्चेति पुंवत्वप्राप्तिः। मद्रेषु भवा मद्रिका। मद्रवृज्योः कन्। सति तु पुंवद्भावे इत्वं न श्रूयेतेति भावः। तद्धितवुग्रहणमिति। वुंद्धांते श्रूयमाणः प्रत्येकं सं-
बध्यते। तद्धितग्रहणं वुग्रहणं चेत्यर्थः। पाका भार्येति। अर्भकपृथुकपाका वयसीति कप्रत्ययांतोयमुणादिषु निपातितः न चायं तद्धितस्य ककारो नापि वोः। वयसि प्रथम इति
ङीपं वाधित्वा अजादित्वाट्टाप्। संज्ञापूरण्योश्च। यत्तु दत्तायत इति क्यङ् तमपि दत्त्यादिषु सूत्रस्थं तं न तु विशेषाभावादिहोपेक्षितं। पंचमी पाश इति याप्ये पाशप्। तसिलादिषि-
ति प्राप्तिः। वृद्धिनिमित्तस्य। स्रौघ्नीति। स्रुघ्ने भवा। तत्र भव इत्यण्। टिड्ढेति ङीप्। माथुरीयत इति। मथुरायां भवा माथुरी। सेवाचरतीत्यर्थे कर्तुः क्यङ्। तिक्यङ्। मध्यमेति
मध्ये भवा मध्यमा। मध्यान्म इति मः। काण्डलावेति। काण्डं लुनातीति काण्डलावी कर्मण्यण् आहरस्यं तावदिति। तत्परिमाणमस्याः तावती। यत्तदेतेभ्य इति वतुप्। सर्वनाम्न

मद्रिकायते। मद्रिकामानिनी। कोपधप्रतिषेधे तद्धितवुग्रहणं। नेह पाकाभार्य्या यस्य स पाकभार्य्यः। संज्ञापूरण्योश्च। ६।३।३८। अनयोर्न पुंवत्। द-
त्ताभार्य्यः। दत्तामानिनी। दानक्रियानिमित्तः स्त्रियां पुंसि च संज्ञाभूतोयमिति भावितपुंस्कत्वमस्ति। पञ्चमीभार्य्यः। पञ्चमीपाशा। वृद्धिनिमित्तस्य च
तद्धितस्याऽरक्तविकारे। ६।३।३९। वृद्धिशब्देन विहिता या वृद्धिस्तद्धेतुर्यस्तद्धितोऽरक्तविकारार्थस्तदन्ता स्त्री न पुंवत्। स्रौघ्नीभार्य्यः। माथुरीयते। माथु-
रीमानिनी। वृद्धिनिमित्तस्य किं। मध्यमभार्य्यः। तद्धितस्य किं। काण्डलावभार्य्यः। वृद्धिशब्देन किं। तावद्भार्य्यः। रक्ते तु काषायीकन्या यस्य स काषायक-
न्यः। विकारे तु हैमी मुद्रिका यस्येति हैममुद्रिकः। वृद्धिशब्देन वृद्धिं प्रतिफलोपधानाभावादिह पुंवत्त्वा वैयाकरणभार्य्यः। सौवश्वभार्य्यः। स्वाङ्गाच्चेतः। ६।३।
४०। स्वाङ्गाद्य ईकारस्तदन्ता स्त्री न पुंवत्। सुकेशीभार्य्यः। स्वाङ्गात्किं पटुभार्य्यः। ईतः किं। अकेशभार्य्यः। अमानिनीति वक्तव्यं। सुकेशमा-
निनी॥

इप्याकारो न वृद्धिशब्देन विहित इति भावः। काषायीति। कषायेण रक्तेत्यर्थे तेन रक्तं रागादित्यण् टिड्ढेति ङीप्। हैमीति। हेम्नो विकार इत्यर्थे अनुदात्तादेश्चेत्यञ्। फलोपधानेति। नि-
मित्तशब्दः फलोपहितपरः। स्वरूपयोग्यपरत्वे तु वैयाकरणभार्य इत्यत्र पुंवद्भावो न सिद्ध्येदिति भावः। व्याकरणमधीते वेत्ति वा वैयाकरणी। तदधीते तद्वेदेत्यण्। स्वश्वस्यापत्यं
स्त्री सौवश्वी तस्यापत्यमित्यण्। उभयत्रापि न्यासात् आदिवृद्धिर्न वाभ्यामित्यनेन प्रतिषिध्यत इति नायं वृद्धिं प्रतिफलोपहितः किंतु स्वरूपयोग्यः। यद्यप्यैजागमनिमित्त-
त्वाद्वृद्धिं प्रतिफलोपहितो विभवत्यय तद्धितस्यापि वृद्धिशब्देन विहितां वृद्धिं प्रति न भवतीति भावः अत एवास्मिन्सूत्रे निमित्तशब्दः फलोपहितपरः अन्यथा निमित्तग्रहणमनर्थकं स्यात् वृद्धेर्लक्षतद्धितस्य तु ते-
पि निमित्तत्वमेव संबधः इति वृद्धिनिमित्तं यस्तद्धित इत्यर्थलाभात् तेन वृद्धिशब्देन विहितवृद्धिविषयमर्थो लभ्यते। अन्यथा फलोपहितपरत्वलाभो निष्फलः स्यादुक्तदोषतादवस्थ्या॥

क्षेति। सुकेशीति। स्वांगाच्चोपसर्जनादिति ङीष्। अके-
शेति। सह नञ्विद्यमानेति निषेधान्ङीषभावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



जातेश्च। यद्यत्र जातेरित्येव विहितः इति व्याख्याये तन्नर्हि हास्तिकमित्युदाहरणो औपसंख्यानिकस्यनायं निषेध इति भाष्योक्तिर्न संगच्छेत। हस्तिन् शब्दाज्जातेरिति ङीन्न विहि
तः। अदन्तत्वाभावात्। किंतु ऋन्नेभ्य इति ङीब्विहित इति पुंवद्भाव निषेधस्याप्रसक्तेरत आह जातेः परइति। एवं च हस्तिनी भार्यः शुनी भार्य इत्यादावपि निषेधः सिध्यतीति
भावः। यः प्रत्यय इति। टावादिः प्राचां तु ङीषेवोपात्तस्तद्युक्तमिति ध्वनयन्नुदाहरति शूद्राभार्य इति। ब्राह्मणीति। शार्ङ्गरवादित्वान्ङीन्। प्राचां तु ङीष्प्रपुंवदिति व्याख्याय ब्रा
ह्मणीभार्य इत्युदाहृतं तन्न इभसात्। सौत्रस्यैवेति। व्याख्यानादिति भावः। नकोपधाया इति निषेधस्तु भस्याढइति प्राप्तस्यापि भवत्येव। तेन विलेपिकायाः धर्म्यं वैलेपिकमिति
सिद्धं यघ एम हिष्यादिभ्य इत्यणि पुंवद्भावः स्यादिकारोत्र न श्रूयेत। एतच्च नकोपधाया इति सूत्रे भाष्ये स्पष्टं। प्रासंगिकं समाप्य प्रकृतमनुसरति संख्ययेति। सामानाधिकर

जातेश्च। ६।३।४१। जातेः परो यः स्त्रीप्रत्ययस्तदन्तं न पुम्वत्। शूद्राभार्य्यः। ब्राह्मणीभार्य्यः। सौत्रस्यैवायन्निषेधः। तेन हस्तिनीनां समूहो हास्तिकमित्यत्र भ
स्याढ इति तु भवत्येव। संख्यया ऽव्ययासन्नादूराधिकसंख्याः संख्येये। २।२।२५। संख्येयार्थया संख्यया ऽव्ययादयः समस्यन्ते स बहुव्रीहिः। दशानां समी
पे ये सन्ति ते उपदशाः। नव एकादश वेत्यर्थः। बहुव्रीहौ संख्येये डजबहुगणात्। ५।४।७३। इति डच्। ति विंशतेर्डिति। ६।४।१४२। विंशतेर्भस्य तिशब्दस्य लोपः स्याड्डि
ति। आसन्नविंशाः। विंशतेरासन्ना इत्यर्थः। अदूरत्रिंशाः। अधिकचत्वारिंशाः। द्वौ वा त्रयो वा द्वित्राः। द्विरावृत्ता दश द्विदशाः। विंशतिरित्यर्थः। दिङ्ना
मान्यन्तराले। २।२।२६। दिशो नामान्यन्तराले वाच्ये प्राग्वत्। दक्षिणस्याः पूर्वस्याश्च दिशो ऽन्तरालं दक्षिणपूर्वा। नामग्रहणाद्यौगिकानां नेह। ऐ

न्द्र्याश्च कौबेर्याश्चान्तरालं
ण्यस्यान्यपदार्थवृत्तेश्च विरहान्पूर्वेणाप्राप्तौ वचनं। दशानामिति। उपगता दश येषामिति न विगृहीतं पूर्वेणैव सिद्धेः। उपदश
इति। उपशब्दः समीपे समीपिनि चेवर्त्तते। आद्ये अव्ययीभावः द्वितीये तु बहुव्रीहिरिति विवेकः। नव एकादश वेत्यर्थ इति।
। संख्या द्वारकसंबंधस्यान्तरंगत्वादिति भावः। नेन दशानां वृक्षादीनां समीपे ये संति गवादयस्ते उपदशा इति न प्रयुज्यंते।
सूत्रेनोति लुप्तषष्ठीकमित्याशयेनाह तिशब्दस्येति। विंशा इति। इह तिलोपोत्तरमतो गुण इति पररूपमेव न तु टिलोपः तिलोपस्याभीयत्वेनासिद्धत्वात्। न चात्र पररूपमपि न स्व
त्तिलोपस्य स्थानिवत्त्वादिति शंक्यं। अज्झलादेशो ऽजादेशो न भवतीत्सचः परस्मिन्नित्यस्याप्रवृत्तेः। स्थानिवदादेश इति तु न प्रवर्त्तत एव शास्त्रीये कार्ये हि कर्त्तव्ये तत्प्रवृत्तिर्न तु

176

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विधानार्थमिति सिद्धांतानां विंशतेरिति। इहापि आसन्ना विंशतिर्येषामिति न विगृहीतमुक्तयुक्तेः। अदूरेत्यादि। अदूरास्त्रिंशतः। अधिकाश्चत्वारिंशत इति विग्रहो बोध्यो
द्वित्रा इति। वार्थेयं बहुव्रीहिः। स च वार्थो न विकल्पः। पक्षे द्विवचनस्याप्यापत्तेः। किं तु संशयः। स चानियतसंख्यावमर्शी। तत्र च त्रयोपि सर्वदा भासंत इति तदपेक्षं बहुव
चनमेव। आनय नात्रिक्रियान्वयस्तु द्वयोस्त्रयाणां वेत्यनियतरूपेणाहृतः द्वित्रा इति। सुजर्थे बहुव्रीहिरित्यर्थः। द्वित्रौ तु सुजर्थो नभावेनैकार्थीभावाश्रयणात्सुचो
प्रयोगः। संख्ययेति किं। चत्वारो ब्राह्मणाः। अव्ययेत्यादि किं। ब्राह्मणाः पंच संख्येयेति किं। अधिका विंशतिर्गवां। संख्यार्थे यत्संख्येति न समासः। आदशतः संख्याः सं

तत्र तेनेदमिति सरूपे। २।२।२७॥ सप्तम्यन्ते ग्रहणविषये सरूपे पदे तृतीयान्ते च प्रहरणविषये इदं युद्धं प्रवृत्तमित्यर्थे समस्येते कर्मव्यतिहारे द्यो
त्ये स बहुव्रीहिः इति शब्दादयं विषयविशेषो लभ्यते। अन्येषामपि दृश्यते॥ दीर्घ इत्यनुवर्त्तते। इच् कर्मव्यतिहारे बहुव्रीहौ पूर्वपदान्तस्य दी
र्घः। इच् समासान्तो वक्ष्यते। तिष्ठद्गुप्रभृतिषु इच्प्रत्ययस्य पाठादव्ययीभावत्वमव्ययत्वं च। केशेषु केशेषु गृहीत्वेदं युद्धं प्रवृत्तं केशाकेशि। दण्डै
श्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तं दण्डादण्डि। मुष्टीमुष्टि। ओर्गुणः। ६।४।१४६॥ उवर्णान्तस्य भस्य गुणस्तद्धिते। अवादेशः। बाहूबाहवि। ओ
रोदिति वक्तव्ये गुण इति संज्ञापूर्वको विधिरनित्य इति ज्ञापयितुम्। तेन स्वायम्भुवमित्यादि सिद्धम्। सरूपेति किं। हलेन मुसलेन। तेन सहेति तुल्ययोगे। २।
२।२८॥ तुल्ययोगे वर्त्तमानं सह इत्येतत्तृतीयान्तेन प्राग्वत्। वोपसर्जनस्य। ६।३।८२॥ बहुव्रीह्यवयवस्य सहस्य सः स्याद्वा। पुत्रेण सह आगतः सपुत्रः सह
पुत्रो वा आगतः। तुल्ययोगवचनं प्रायिकं। सकर्मकः। सलोमकः। प्रकृत्याऽऽशिषि। ६।३।८३॥ सहशब्दः प्रकृत्या स्यादाशिषि। स्वस्ति राज्ञे सहपु
त्राय सहामात्याय। अगोवत्सहलेष्विति वाच्यं। सगवे। सवत्साय। सहलाय॥ ॥ ९८ संख्येये वर्त्तते न तु संख्यायां। विंशत्याद्यास्संख्यास्तु संख्येयसंख्य

योर्वर्त्तते। यदा तु संख्येये विंशतिशब्दस्तदा भवत्येव समासः। अधिकविंशा इति तत्र तेनेदं ग्रहणविषय इति गृह्यते इति ग्रहणं केशादि। तद्विषयो वाच्योपयोगे सरूपे प्र
ह्रियते अनेनेति प्रहरणं दंडादि। तद्विषयो वाच्योपयोरिति प्राग्वत्। कर्मव्यतिहारः परस्परग्रहणं परस्परप्रहरणं च। ननु ग्रहणविषये सप्तम्यंते समस्येते प्रहरणविषये तृतीयां
ते चेत्यादि विषयविशेषः सूत्राक्षरैः कथं लभ्यते इत्यत आह इति शब्दादिति। स हि लौकिकीं विवक्षां दर्शयति। लोके केशाकेशीत्यादिप्रयोगे यावानर्थः प्रतीयते तावा

त्यर्थे बहुव्रीहिर्भवतीत्यर्थः। अन्येषामपि दृश्यते। अत्र भाष्ये चादृश्यग्रहणात्कर्मव्यतिहारे बहुव्रीहौ पूर्वपदस्य दीर्घत्वमात्वं वा न चेत्युक्तं तत्र आत्वं वेत्यपाणिनीयमत एव मुष्टामुष्टीत्युदाहरणमप्यभाष्यमात्रिकमेव एतच्च मनोरमायां स्पष्टं ओर्गुणः। तद्धिते किं। पट्वी। वा घो। गुणोक्तिरिति। यद्यप्योरोदिति सूत्रितेपि भस्य तद्धित इत्येवं रूपं संज्ञापूर्वकत्वमस्य वा तथापि विधेयसमर्पकं पदं यत्र संज्ञारूपं स एव संज्ञापूर्वको विधिरिति भावः। यद्यपि ओरोदिति तपरस्तत्कालस्य संज्ञैव तथापि इह तकार उच्चारणार्थस्तपरत्वे फलाभावात्। ओरोदित्येव वास्तु। स्वरूपं शब्दस्येति तु भ्रमः स्यादिति भावः। स्यादेतत्। तपरस्तत्कालस्य संज्ञा भवतीति गुरोरनृत इति प्लुतनिषेधस्यापि संज्ञापूर्वकत्वेनानित्यत्वात् ऌ॰ लशिखेत्यत्र प्लुतसिद्धेः ऋलृक्सूत्रे ऋकारात्पृथक् ऌकारोपदेशो व्यर्थः। सावर्ण्ये सत्यप्युक्तरीत्या ऌकारस्य प्लुतसिद्धेः अनित्यत्वज्ञापनस्य निष्फलत्वान्नचैवमपि ऋदितां ऌदित्कार्यं ऌदितामृदित्कार्यं च वारयितुमनित्यत्वज्ञापनमावश्यकमिति वाच्यं। राजृभ्राजृग्लृशक्लृ इति पृथगनुबंधकरणसामर्थ्यान्नाग्लोपिशास्वृदितां ऌदितः परस्मैपदेष्विति पृथगनुवादसामर्थ्याच्च तत्कार्याणामसांकर्यसिद्धेरिति चेदत्राहुः। गुरोरनृत इत्यनेन नत्राद्धि नस्य गुरोः प्लुतविधानादनृत इत्येतदनूद्यमानगुरुविशेषणत्वेनानुवादरूपमेव न तु विधेयसमर्पकसंज्ञारूपं पदमिति ऋकारस्यानिकप्लुतनिषेधस्यानित्यत्वासिद्धावॢ३शिखेत्यत्र प्लुतो न सिध्यति। अतस्तत्सिध्यर्थमुक्तज्ञापनायोभयोपदेश आवश्यक इति। अन्ये तु ऋकारात्पृथक् ऌकार उपदेष्टव्य एव। ऋकारोपदेशेन ऌकारस्यालाभात्। न च ऋॢवर्णयोर्मिथः सावर्ण्यमिति वचनात्तल्लाभः शंक्यः। वार्त्तिकं दृष्ट्वा सूत्रकृतो प्रवृत्तेरित्याहुः। तेन सहेति तुल्ययोगे। तुल्ययोगे किं। सहैव दशभिः पुत्रैर्भारं वहति गर्दभी। इह सहशब्दो न तुल्ययोगवचनः। भारकर्मकवहनक्रियायां तु पुत्राणामनन्वयात्। किं तु विद्यमानवचनः। दशसु पुत्रेषु विद्यमानेष्वित्यर्थः। एतच्च सहशब्दस्य विद्यमानार्थत्वमप्यस्तीति वक्तुमुक्तं प्रत्युदाहरणं शरीरं तु सह पुत्रैरित्येवेति बोध्यं। तृतीया तु सहयुक्त इत्यनेनैव। वोपसर्जनस्य। ———— उपसर्जनस्येति न सहस्य विशेषणं। अव्यभिचारात्। किं तूत्तरपदेन सन्निधापितस्य समासस्य। तच्चावयवद्वारकं। उपसर्जनसर्वावयव ——— कस्य समासस्येत्यर्थः। तदेतत्फलितमाह। बहुव्रीहेरिति। तेनेह न सहयुध्वा सहकृत्वा। राजनि युधिकृञः सहे तिचेति क्वनिपि उपपदसमासाविमौ। सहस्य सः संज्ञायामित्यतोनुवर्त्तनादाह सहस्य सः स्यादिति। प्रापि कामिति। विभाषा सपूर्वस्येत्यादिनिर्देशादिति भावः। सकर्मक इति। विद्यमानकर्मक इत्यर्थः। प्रकृत्याशिषि। कथं तर्हि यजमानस्य सपुत्रस्य सभ्रातृकस्य सपरिवारस्य।

177

CC-0. In Public Domain. Digitization by eGangotri

पुरारेप्यैश्वर्याभिवृद्धिरस्त्वित्यादिप्रयोगाः संगच्छंते इति चेदुच्यते। ऐश्वर्याभिवृद्धिरस्त्विति भवंतो नुगृह्णंत्विति तस्यार्थना वाक्यं न त्वाशीर्वचनं। यत्राशीर्वचनं तथास्त्विति तत्र
हि सपुत्रकेत्यादि न प्रयुज्यत एवेति न काप्यनुपपत्तिः॥ ॐ॥ बहुव्रीहौ संख्येये। व्यत्ययेन पंचम्यर्थे सप्तमीत्याह यो बहुव्रीहिस्तस्मादिति। उपगणा इत्यत्र डचि सत्यस
ति च रूपे विशेषो नास्तीत्यत आह स्वरे विशेष इति। डचि सति चित इत्यंतोदात्तत्वं स्यात् असति तु पूर्वपदप्रकृतिस्वर इत्यर्थः। न च सत्यपि डचि परत्वात् पूर्वपदप्रकृतिस्व
र एव स्यादिति शंक्यं। चित इति स्वरस्य सतिशिष्टत्वात्। डचश्च शिष्टकरणस्य वैयर्थ्यापत्तेश्च। संख्यायाः इति। संख्यायां तत्पुरुषस्य चरमावयवो डज्वक्तव्य इत्यर्थः। एकवि
शतिरित्यादौ तु न भवति अन्यत्राधिकलोपादिति वार्तिककारोक्तेः। व्यत्ययेन षष्ठीति। एतच्चोपलक्षणं सप्तम्यपि व्यत्ययेनैवातदाह स्वांगवाचीत्यादि। अद्रवं मूर्तिमदि

बहुव्रीहौ संख्येये डजबहुगणात्॥५।४।७३॥ संख्येये यो बहुव्रीहिस्तस्माड्डच् स्यात्। अपदशाः। उपदशाः अबहुगणात् किं। उपबहवः। उपगणाः। अत्र
स्वरे विशेषः। संख्यायास्तत्पुरुषस्य वाच्यः॥ निर्गतानि त्रिंशतो निस्त्रिंशानि वर्षाणि चैत्रस्य। निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः। बहुव्रीहौ स
क्थ्यक्ष्णोः स्वाङ्गात् षच्॥५।४।११३॥ व्यत्ययेन षष्ठी। स्वाङ्गवाचिसक्थ्यक्ष्यन्ताद् बहुव्रीहेः षच् स्यात्। दीर्घसक्थिनी यस्य स दीर्घसक्थः। जलजा
क्षी। स्वाङ्गात् किं। दीर्घसक्थि शकटं। स्थूलाक्षा वेणुयष्टिः। अक्ष्णोऽदर्शनादित्यच्। अङ्गुलेर्दारुणि॥५।४।११४॥ अङ्गुल्यन्ताद् बहुव्रीहेः षच् स्याद्दा
र्वर्थे। पञ्चाङ्गुलयो यस्य तत् पञ्चाङ्गुलं दारु। अङ्गुलिसदृशावयवं धान्यादिविक्षेपणकाष्ठमुच्यते। बहुव्रीहेः किं। द्वे अङ्गुली प्रमाणमस्या द्व्यङ्गुला
यष्टिः। तद्धितार्थे तत्पुरुषः। तत्पुरुषस्याङ्गुलेरित्यच्। दारुणि किं। पञ्चाङ्गुलिर्हस्तः। द्वित्रिभ्यां षमूर्ध्नः॥५।४।११५॥ आभ्यां मूर्ध्नः षः स्याद् बहुव्रीहौ॥
द्विमूर्धः। त्रिमूर्धः। नेतुर्नक्षत्रे अब्वक्तव्यः॥ मृगो नेता यासां ताः॥ ॥ ११ त्यादिलक्षणलक्षितं स्वांगं गृह्यते। तेन शोभना सा प्रतिमेत्यादिप्रयोगो नि
र्बाध एवेत्याहुः। षच् स्यादिति। षोडीषर्थः। चस्तु चित इत्यंतोदात्तार्थः। तेनात्र पूर्वपदप्रकृतिस्वरो न भवति। स्थूलाक्षेति। स्थूलानि अक्षीणि पर्वाकृतीनि यस्याः सा। प्राचा
तु स्थूलाक्षिरिक्षुरिति प्रत्युदाहृतं तन्न। अक्ष्णोऽदर्शनादित्यचो दुर्वारत्वात्। यदपि समासांतविधेरनित्यत्वात्तन्न कृतमिति केश्चिद्व्याख्यातं तन्न सारं। एवं हि पिजपितथैव न
भविष्यतीति प्रत्युदाहरणस्यासंगतिप्रसंगात्। द्व्यंगुलेति। मात्रचो द्विगोर्नित्यमिति लुक्। नेतुरिति। नेता नायकः। नक्षत्रे यो नेतृशब्दस्तदंताद्बहुव्रीहेरित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु
सि·कौ·
टी·त·
९६

मृगनेत्रा इति। मृगो मृगशीर्षनक्षत्रं। चंद्रो नेता यस्य मृगनक्षत्रस्य चंद्रनेता मृग इत्यत्र तु न भवति। इह हि नेतृशब्दांतो बहुव्रीहिर्नक्षत्रे वर्त्तते न तु नेतृशब्द इति। खुरखरा॰
भ्यामिति। नासिकाया इति वर्त्तते। केवलादेशवचनं प्रत्ययनिवृत्त्यर्थं। खुरणा इति। अत्वसंतस्येति दीर्घः। उपसर्गाच्च। उपसर्गग्रहणं प्रादीनामुपलक्षणं नासिका

मृगनेत्रा रात्रयः। पुष्यनेत्राः। अन्तर्बहिर्भ्यां च लोम्नः। ५।४।११७। आभ्यां लोम्नोऽप् स्याद्बहुव्रीहौ। अन्तर्लोमः। बहिर्लोमः। अञ् नासिकायाः सं॰
ज्ञायां नसं चास्थूलात्। ५।४।११८॥ नासिकान्ताद्बहुव्रीहेरच् स्यात् नासिकाशब्दश्च नसम्प्राप्नोति न तु स्थूलपूर्वात्। पूर्वपदात्संज्ञायामगः। ८।
४।३। पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात् संज्ञायां न तु गकारव्यवधाने। द्रुरिव नासिकाऽस्य द्रुणसः। खरणसः। अगः किम्। ऋचामयनं। ऋग
यनं। अणृगयनादिभ्य इति निपातनात् णत्वाभावमाश्रित्य अग इति प्रत्याख्यातं भाष्ये। अस्थूलात् किं। स्थूलनासिकः। खुरखराभ्यां वा नस्॥ खुरणाः
खरणाः। पक्षे अजपीष्यते। खुरणसः। खरणसः। उपसर्गाच्च। ५।४।११९॥ प्रादेर्यो नासिकाशब्दस्तदन्ताद्बहुव्रीहेरच् नासिकाया नसादेशश्च।
असंज्ञार्थमिदं वचनं। उन्नता नासिका यस्य स उन्नसः। उपसर्गादनोत्पर इति सूत्रं न दृष्ट्वा भाष्यकार आह। उपसर्गाद्बहुलं। ८।४।२८॥ उपसर्ग
स्थान्निमित्तात्परस्य नसो नस्य णः स्याद्बहुलं। प्रणसः। वेर्ग्रो वक्तव्यः। विगता नासिकाऽस्य विग्रः। ख्यश्च॥ विख्यः। कथं तर्हि विनसा हतबान्धवेति भट्टिः
विगतया नासिकयोपलक्षितेति व्याख्येयं। सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः। ५।४।१२०॥ एते बहुव्रीहयोऽच्प्रत्ययान्ता
निपात्यन्ते। शोभनं प्रातरस्य सुप्रातः। शोभनं श्वोऽस्य सुश्वः। शोभनं दिवाऽस्य सुदिवः। शारेरिव कुक्षिरस्य शारिकुक्षः। चतस्रोऽश्रयोऽस्य च
तुरश्रः। एण्या इव पादावस्य एणीपदः। अजपदः। प्रोष्ठो गौः। तस्येव पादावस्य प्रोष्ठपदः॥ ॥ ११ शब्दस्य क्रियार्थत्वेन तं प्रत्युपसर्गत्वायोगात् न च

क्रियायोगाभावेप्युपसर्गत्वमस्त्विति शक्यं सावके अधिसावकमित्यव्ययीभावे उपसर्गात्सुनोतीति षत्वप्रसंगात्तदाह। प्रादेरिति। उपसर्गादनोत्परः। अनोत्परः
किं। प्रनोमुंचतमित्यत्र णत्वमाभूत्। तद्दृष्ट्वेति। अनोत्पर इत्यपनीय बहुलग्रहणं च कृतमित्यर्थः। अन्यथा प्रणो नयेत्यादावव्याप्तिः। प्रनः पूषेत्यादावतिव्याप्तिः प्रसज्ये

॥श्रीरामः॥

178

CC-0. In Public Domain. Digitization by eGangotri

प्रणस इति। अगता नासिका अस्येति विग्रहः। कथं नर्हीति। ग्रस्ययोरन्यतरेणाभाव्यमिति प्रश्नः। नासिकयेति। तथा च विनसेति न प्रथमान्तं किंतु पदद्वन्न इति नसादेशेन तृतीयान्तमिति भावः। शोभनं प्रातरस्येति। अधिकरणशक्तिप्रधानस्य सामानाधिकरण्यासंभवात्प्रातःशब्देन प्रातस्तनं कर्म लक्ष्यत इत्याहुः। प्रातःकल्पमित्यत्रेव प्रातःशब्दो वृत्तिविषये शक्तिमत्पर इति न सामानाधिकरण्यानुपपत्तिरित्यन्ये। एणीपदादिषु निपातनात्पद्भावः॥ ःःः॥ नञ्दुःसुभ्यो नन्वत्र हलिग्रहणं व्यर्थं हलशब्दमादायाहल इति प्रयोगसंभवात्। न च महद्धलं हलिस्तद्रहितोऽहलिस्तत्रैवार्थेऽहल इति प्रयोगार्थं तद्ग्रहणमिति वाच्यं। अहल इत्यत्र महद्धलरहित इत्यर्थाप्रतीतेः। न चैवमप्यन्तोदात्तार्थमच्प्रत्ययविधानमावश्यकमन्यथाऽहल इत्यत्र पूर्वपदप्रकृतिस्वरः स्यादिति शंक्यं। नञ्सुभ्यामित्यनेनान्तोदात्तत्वविधानादित्याहुः

नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्यां।५।४।१२१॥ अच् स्यात्। अहलः। अहलिः। असक्थः। असक्थिः। एवं सुदुर्भ्यां। शक्त्योरिति पाठान्तरं। अशक्तः। अशक्तिः। नित्यमसिच्प्रजामेधयोः।५।४।१२२॥ नञ्दुःसुभ्य इत्येव। अप्रजाः। दुष्प्रजाः। सुप्रजाः। अमेधाः। दुर्मेधाः। सुमेधाः। धर्मादनिच् केवलात्।५।४।१२४॥ केवलात्पूर्वपदात्परो यो धर्मशब्दस्तदन्ताद्वहुव्रीहेरनिच् स्यात्। कल्याणधर्मा। केवलात्किं। परमः स्वो धर्मो यस्येति त्रिपदे वहुव्रीहौ मा भूत्। स्वशब्दो हीह न केवलं पूर्वपदं। किंतु मध्यमत्वादपेक्षिकं। संदिग्धसाध्यधर्मेत्यादौ तु कर्मधारयपूर्वपदो वहुव्रीहिः। एवं तु परमस्वधर्मेत्यपि साध्वेव। निवृत्तिधर्मा। अनुच्छित्तिधर्मेत्यादिवत्। पूर्वपदं तु वहुव्रीहिणाक्षिप्यते। जम्भा सुहरिततृणसोमेभ्यः।५।४।१२५॥ जम्भेति कृतसमासान्तं निपात्यते। जम्भो भक्ष्ये दन्ते च। शोभनो जम्भोऽस्य सुजम्भा। हरितजम्भा। तृणं भक्ष्यं यस्य तृणमिव दन्ता यस्येति वा॥ तृणजम्भा। सोमजम्भा। स्वादिभ्यः किं। पतितजम्भः॥ ॥ १२

शेषिकस्य कपो निवृत्त्यर्थं हल इत्यत्रान्तोदात्तत्वार्थं च नदिति। शक्त्योरिति। आचार्येण केचिच्छात्रा हलि। शक्त्योरिति पाठितात्पर्यमिति भावः। नित्यमसिच्। अकारोच्चारणं भत्वसंपादनार्थं तेन सुप्रजसावित्यादौ यस्येति चेत्याकारलोपः सिध्यति। अस्वरितत्वादेवान्यतरस्यांग्रहणं ननु वृत्तिसिद्धो नित्यग्रहणमन्यतो विधानार्थं तेनाल्पमेधस इति सिध्यतीति वृत्तिकारादयः। धर्मादनिच्। अनिचोऽकारश्चिन्त्यप्रयोजन इत्येके। अन्ये तु धर्मकरोम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



चष्टेवा तत्करोतीति एयं तात तक्षिपि धर्मपरमो धर्मयस्य सः परमधर्मा। एकदेशविकृतस्यानन्यत्वाद्धर्मशब्दो यमित्यकारोच्चारणमिह सप्रयोजनमेवेत्याहुः। बहुव्रीहिलक्षणंत्र पूर्वपदस्मा
क्षिप्यत इत्यनुपदमेव वक्ष्यति। तेनच केवलादित्यनेन न विशेष्यत इत्याहुः। केवलात्पूर्वपदादिति। प्राचा तु नन्तरपदमपि विशेषितं प्रसादकृता पि केवलादिति धर्मशब्दस्य पूर्वपद
स्य च विशेषणमिति व्याख्यातं। तदुभयमपि चिंत्यं। आवृत्तौ मानाभावात्। धर्मपदविशेषणे प्रयोजनाभावाच्च। न च धर्मशब्दांतं यत्रोत्तरपदं तद्या वृत्तिः फलमिति वाच्यं। तत्रब
हुव्रीस्वयवयवीभूतपूर्वपदात्परत्वस्य धर्मपदे असंभवादेवादोषत्वात्। मध्यमत्वादिति। न च सर्वनामसंख्ययोरिति स्वशब्दस्य पूर्वनिपातः शंक्यः। आहिताग्न्यादेराकृतिगणत्वा
दिति हरदत्तादिभिः समाहितत्वात्। अपेक्षिकमिति। ननु तएव केवलग्रहणं व्यर्थं पूर्वपदशब्दस्य समासप्रथमावयवे रूढत्वेनैव मध्यमपरव्यावृत्तिसंभवादिति चे
दत्राहुः। पूर्वपदासपेतान्यपेक्षाहकत्वेन केवलपदस्य सार्थकत्वादिति। कर्मधारयपूर्वपद इति। ननु त्र अनिचू दुर्लभः। केवलादित्यस्य समासान्तकादित्यर्था
दिति चेन्नैव। केवलग्रहणस्य समासान्तकपूर्वपदपरत्वे मानाभावात् निवृत्ति धर्मा हि स्यान्नो भवतीत्यादिप्रयोगविरोधाच्च। अस्मदुक्तार्थसुधत्र धारण इति धा

दक्षिणेर्मा लुब्धयोगे। ५।४।१२६॥ दक्षिणे ईर्म व्रणं यस्य। दक्षिणेर्मा मृगः। व्याधेन कृतव्रण इत्यर्थः। इच्कर्मव्यतिहारे। ५।४।१२७॥ कर्मव्य
तिहारे यो बहुव्रीहिस्तस्मादिच् स्यात्समासान्तः। केशाकेशि। मुशलामुशलि॥ ९ नोमा धव ग्रंथेस्मष्टः। एतेन साध्योधर्मः स्येति साध्यधर्मा संदिग्ध
श्चासौ साध्यधर्मा चेति विग्रहः। संच संदेहः साध्यधर्मद्वारक एव पर्यवस्यतीति केषांचिद्व्याख्यानं परास्तं। उक्तरीत्यैव साध्यस्य सान्ने संदिग्धत्वलाभे तत्समर्थनप्रया
सस्य व्यर्थत्वात्। साध्वेवेति। परमश्चासौ स्वश्च परमस्वः स धर्मो यस्येति यदा विगृह्यते। तदेत्यर्थः॥ ॐ ॥ दक्षिणेर्मा॥ लुब्धो व्याधः। तद्योगादेवेर्मनि व्यग्नाविदंनि
पातनं नान्यदित्यर्थः। स्तदेतदाह। व्याधेनेति। वाली हेमाब्जमाली गुणनिधिरिपुणा निर्मितो दक्षिणेर्मेति प्रयोगस्त्वौपचारिक इति कथंचिन्नेयः। केशाकेशीति। तत्रतेने
दमिति कर्मव्यतिहारे बहुव्रीहिः। इच्प्रत्ययस्य तिष्ठद्गुप्रभृतिषु पाठादव्ययीभावत्वेऽव्ययत्वं। नन्वेवमिच्छब्दिलकरणं व्यर्थमव्ययीभावसंज्ञया बहुव्रीहिसंज्ञाया बाधा
त्समासस्वरेणांतोदात्तत्वसिद्धेः। अत्राहुः। विशेषणार्थं तदावश्यकमेव। तिष्ठद्गुप्रभृतिषु इकारमात्रपाठे हि संगधिरित्यादावतिव्याप्तिप्रसंगात्। किं चात्राव्ययी
भावसंज्ञया बहुव्रीहिसंज्ञा न बाध्यते किं तु द्वयोः समावेश एव। उपजीव्यविरोधस्यान्याय्यत्वादेवं च स्वरार्थमपि चित्वं कर्तव्यमेवेति॥ ॥ ॥

179

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्विदंडीति। समुदायनिपातनमस्यविषयविशेषपरिग्रहार्थं तेन द्विदंडाशालेत्यत्र त्विच् न भवतीति। उभाहस्तीत्यादि। इह निपातनादेवायचः पाक्षिकत्वं। प्रसंभ्यां जानु शब्दस्यैकत्वेप्युपपदनिबंधनं द्वित्वमाश्रित्य जानुनोरिति द्विवचननिर्देशः तत्फलं तु स्थानषष्ठीत्वस्फुटीकरणं। जानुन इत्युक्ते तु किमियं पंचमी प्रत्ययाधिकारान्नतु र पिप्रत्ययद्वयेत्येवं संदेहः स्यात् तदेतद्ध्वनयन्नाह। जानुशब्दयोर्ज्ञुरादेश इति। शार्ङ्गधन्वेति। कथं तर्हि खलावण्याशासाधन्तेधनुषमन्हाय तूलवदिति पुष्पदंतप्रयोग इति चेदत्राहुः समासान्तविधेरनित्यत्वान्नात्रानुपपत्तिरनित्यत्वे प्रमाणं तु श्वादिगणे राजन्शब्दपाठः। सहि प्रतेरश्वादयस्तत्पुरुष इत्यंतो राजार्थः। राजाहः

द्विदण्ड्यादिभ्यश्च।५।४।१२८। तादर्थ्ये चतुर्थ्येषा। एषां सिद्ध्यर्थमिच्प्रत्ययः स्यात्। द्वौ दण्डौ यस्मिन् प्रहरणे तत्। द्विदण्डि प्रहरणं। द्विमुसलि। उभाहस्ति। उभयाहस्ति॥ प्रसंभ्यां जानुनोर्ज्ञुः।५।४।१२९॥ आभ्यां परयोर्जानुशब्दयोर्ज्ञुरादेशः स्याद्बहुव्रीहौ। प्रगते जानुनी यस्य। प्रज्ञुः। संज्ञुः। ऊर्ध्वाद्विभाषा।५।४।१३०॥ ऊर्ध्वज्ञुः। ऊर्ध्वजानुः। धनुषश्च।५।४।१३२॥ धनुरन्तस्य बहुव्रीहेरनङादेशः स्यात्। शार्ङ्गधन्वा। वासंज्ञायां।५।४।१३३॥ शतधन्वा। शतधनुः। जायाया निङ्।५।४।१३४। जायान्तस्य बहुव्रीहेर्निङादेशः स्यात्॥ लोपो व्योर्वलि।६।१।६६॥ वलि यकारवकारयोर्लोपः स्यात्। हलि पुम्वद्भावः। युवतिर्जायाऽस्य युवजानिः। गन्धस्येदुत्पूतिसुसुरभिभ्यः।५।४।१३५॥ एभ्यो गन्धस्य इकारोऽन्तादेशः स्यात्। उद्गन्धिः। पूतिगन्धिः। सुगन्धिः। सुरभिगन्धिः। गन्धस्येत्वे तदेकान्तग्रहणं। एकान्तमेकदेश इव अविभागेन लक्ष्यमाणं इत्यर्थः। सुगन्धि पुष्पं। सलिलं च। सुगन्धिर्वायुः। नेह शोभना गन्धाः द्रव्याण्यस्य। सुगन्ध आपणिकः॥ ॥

९ सखीति टचो नित्यत्वे तु किं तेनेति। लोपो व्योर्वलि। व्योर्लोप इति वक्तव्ये वरे पृक्तलोप इलि लोपः। पूर्वविप्रतिषेधेनेति ज्ञापयितुमादौ विधेयनिर्देशः कृतः तेन सुखीयतेः क्विपि सुखीरिति सिद्धं। गंधस्येत्। तकार उच्चारणार्थ इत्याशयेनाह। इकारोंतादेश इति आदेः परस्येति नेह न भवति समासान्ता इत्यधिकारात्। अत्र केचिदाहुः इकारस्य प्रत्ययत्वेपि न क्षतिर्यस्येति चेति लोपेनोद्गंधिरित्यादिरूपसिद्धेः। न चेदित्स्वरितमित्यंतस्वरितत्वापत्तिर्नेष्टं कान्तकारस्योच्चारणार्थत्वाश्रुयमाणत्। नापि षष्ठीनिर्देशादादेशत्वमेव न प्रत्ययत्वमिति वाच्यं। गोपोष्टगित्यादि प्रत्ययविधिष्वपि षष्ठीदर्शनादिति। अविभागेनेति। एवं च गुणवाचिन एव ग्रहणं न तु द्रव्यवाचिन इति फलितोर्थः। द्रव्याणीति। अस्मिंश्च गंधशब्दो द्रव्यवचनः वहति जलमियं पिनष्टि गंधानिति

CC-0. In Public Domain. Digitization by eGangotri



गंधस्तु सौरभे नृत्ये गंधके गर्वलेशयोः। स एव द्रव्यवचनः वहुत्वे पुंसि च स्मृत इति कोशाच्च। केचित्तु गंधस्येत्वं इति वार्त्तिके तदेकांत शब्देन स्वाभाविकत्वं विवक्षितं तेनायमनुकस्य नेत्याहुः तथा च भट्टिः। आघ्रायि वानुगंधवहः सुगंध इति। व्याख्यातं च जयमंगलायां। गंधस्येत्यादिना इकारः समासांतो न गंधस्येत्वे तदेकांतग्रहणमिति वचनात्सुगंधआपणिक इति यथेति। अत एव भगव्वाल सहकार सुगंधाविन्यादीनां प्रामादिकत्वं दुर्घटवृत्तिकृतोक्तं॥ ः॥ अल्पाख्यायां। अल्पवाचिनो गंधस्येकारांतादेशः स्यात् वहुव्रीहौ। सूपस्य गंध इति। अत एव ज्ञापकाद्व्यधिकरणपदो वहुव्रीहिः। यद्वा फलितार्थकथनमेतत् सूपो गंधो यस्मिन्नित्येव विग्रहः। गं अल्पाख्यायां।५।४।१३६॥ सूपस्य गन्धो लेशो यस्मिन् तत्। सूपगन्धि भोजनं। घृतगन्धि। गन्धो गन्धक आमोदे लेशे सम्वन्धगर्वयोरिति विश्वः। उपमानाच्च।५।४।१३७॥ पद्मस्येव गन्धोऽस्य। पद्मगन्धिः। पादस्य लोपोऽहस्त्यादिभ्यः।५।४।१३८॥ हस्त्यादिवर्ज्जितादुपमानात्परस्य पादशब्दस्य लोपः स्याद् वहुव्रीहौ। स्थानिद्वारेणाऽयं समासान्तः। व्याघ्रस्येव पादावस्य। व्याघ्रपात्। अहस्त्यादिभ्यः किं। हस्तिपादः। कुसूलपादः। कुम्भपदीषु च।५।४।१३९॥ कुम्भपद्यादिषु पादस्य लोपो ङीप् च निपात्यते स्त्रियां। पादः पत्। कुम्भपदी। स्त्रियां किं। कुम्भपादः। संख्यासुपूर्वस्य।५।४।१४०॥ पादस्य लोपः स्यात्समासान्तो वहुव्रीहौ। द्विपात्। सुपात्। वयसि दन्तस्य दतृ।५।४।१४१॥ संख्यासुपूर्वस्य दन्तस्य दतृ इत्यादेशः स्याद्वयसि। द्विदन्। चतुर्दन्। षड्दन्। अस्य षोडन्। सुदन्। सुदती। वयसि किं। द्विदन्तः करी। सुदन्तो नटः। स्त्रियां संज्ञायां।५।४।१४३॥ दन्तस्य दतृ स्यात्समासान्तो वहुव्रीहौ। अयोदती। फालदती। संज्ञायां किं समदन्ती। विभाषा श्यावारोकाभ्याम्।५।४।१४४॥ दन्तस्य दतृ वहुव्रीहौ। श्यावदन्। श्यावदन्तः। अरोकदन्। अरोकदन्तः॥ ॥ ९ धशब्दस्य विशेषणत्वेष्वस्मादेव ज्ञापकात्परनिपातः। पादस्यं पद्यं लोपः समासांतो न स्यादादेः परस्येत्यादेः स्यानुवृत्तिषिकः कष्ट्रप्रसज्येत। शेषाद्विभाषेत्यत्र समासांतापेक्षस्य शेषस्याश्रयणं इत आह समासा तइति कथं पुनरभावो भावस्यावयवः स्यानत्राह स्थानिद्वारेणेति वचनवलादौपचारिकमवयवत्वं गृह्यत इति भावः। कुंभपदीषु च। वहुवचननिर्देशाद्गणपाठ सामर्थ्याच्चाद्यर्थावगतिरित्यभिप्रेत्याह कुंभपद्यादिष्विति। इह गणे कुंभपदी एकपदी जानपदीत्येवं समुदायाए

180

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वचनं तेन स्वचप्रयोजनं विषयविशेषपरिग्रह इत्याशयेनाह स्त्रियामिति। यच्चेहोपमानपूर्वं संख्यापूर्वं चपत्वं तेन तस्य सिद्धे लोपे नित्यं ङीवर्थं वचनं तेन नपुंसकेऽन्यतर
स्यामिति विकल्पो न भवति। द्विदन्निति। द्वौ दन्तावस्य जातौ। त्रिशुन्नवस्यात्लि हगम्यते। उगिदचामिति नुम् संयोगान्तलोपस्यासिद्धत्वान्नलोपो न। षोडन्निति। षषउत्वे
दतृदशोत्पनेनोत्वष्टुत्वे। सुदतीति। उगितश्चेति ङीप्। समदतीति। नासिकोदरेत्यादिना ङीष्। श्यावदन्निति। श्यावः स्यात्कपिश इत्यमरः। अरोकदन्निति। अ
रोका अच्छिद्रा दन्ता अस्य सः॥ ॥ अग्रान्त। इहानुक्तसमुच्चयार्थश्चकारस्तेन मूषिकदन्निति सिध्यतीत्याहुः। अजातेति। अजातककुदमस्येति विग्रहः। इह

अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च। ५।४।१४५॥ एभ्यो दन्तस्य दतृ वा। कुड्मलाग्रदन्। कुड्मलाग्रदन्तः। ककुदस्यावस्थायां लोपः। ५।४।१४६
अजातककुत्। पूर्णककुत्। त्रिककुत्पर्वते। ५।४।१४७॥ त्रीणि ककुदान्यस्य। त्रिककुत्। संज्ञैषा पर्वतविशेषस्य। त्रिककुदोऽन्यः। उद्विभ्यां का
कुदस्य। ५।४।१४८॥ लोपः स्यात्। उत्काकुत्। विकाकुत्। काकुदं तालु। पूर्णाद्विभाषा। ५।४।१४९॥ पूर्णकाकुत्। पूर्णकाकुदः। सुहृद्दुर्हृदौ
मित्रामित्रयोः। ५।४।१५०॥ सुदुर्भ्यां हृदयस्य हृद्भावो निपात्यते। सुहृन्मित्रं। दुर्हृदमित्रः। अन्यत्र सुहृदयः। दुर्हृदयः। उरःप्रभृतिभ्यः कप्।
५।४।१५१॥ व्यूढोरस्कः। प्रियसर्पिष्कः। इह पुमान्। अनड्वान्। पयः। नौः। लक्ष्मीरिति एकवचनान्तानि पठ्यन्ते। द्विवचनबहुवचनान्तेभ्यस्तु
शेषाद्विभाषेति विकल्पेन कप्। द्विपुमान्। द्विपुंस्कः। अर्थान्नञः। अनर्थकं। नञः किं। अपार्थं। अपार्थकः। इनः स्त्रियाम्। ५।४।१५२॥ बहुदण्डि
का नगरी। अनिनस्मिन्ग्रहणान्यर्थवता चानर्थकेनापि तदन्तविधिं प्रयोजयन्ति। बहुवाग्मिका स्त्रियां किं। बहुदण्डी। बहुदण्डिको ग्रामः

हि बाल्यावस्था गम्यते। उरःप्रभृतिभ्यः कप्। उरःप्रभृत्यन्ताद्बहुव्रीहेः कप् स्यात्। समासार्थोत्तरपदान्ताः समासान्ता इति पक्षे तु बहुव्रीहेश्चरमावयवेभ्यः उरःप्रभृतिभ्यः क
विति व्याख्येयं तद्धितत्वान्न स्यने त्वाव्यूढोरस्क इति। व्यूढं विशालमुरो यस्य सः। सोपदादाविति विसर्जनीयस्य सः। प्रियसर्पिष्क इति। इणः ष इति विसर्गस्य षत्वं। ए
कवचनान्तानीति। नद्यृतश्चेति सिद्धे लक्ष्मीशब्दपाठस्त्विह एकवचनान्तलक्ष्मीशब्दावयवकबहुव्रीहेरेव नित्यं कबन्यत्र शेषादिति विकल्प एवेति नियमा
र्थस्तेनाकृशमकृशलक्ष्मीश्चेतसां शंसितं स इति भारविप्रयोगः सिद्धः। अकृशा लक्ष्मीर्यस्येति विग्रहः। यत्तु प्राचोक्तं नद्यृतश्चेति कप् एव बहुलक्ष्मीक इति तन्न

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



इत्युक्तं। संख्यावाचिबहुशब्दस्यैकवचनान्तत्वाभावात्प्रकृतेनियमेन वारितत्वात्। बह्वी अधिका लक्ष्मीर्यस्येति विग्रहे वैपुल्यवाचिन एकवचनान्तत्वसंभवेपि विशेषविधेर्बलीयस्त्वेन उरःप्रभृतिभ्यः कबिधेरेव वक्तुमुचितत्वात्। यदा तु नियमशास्त्रारम्भं निषेधमुखेन प्रवृत्तिरित्याश्रीयते तदा शास्त्रोक्तमपि सम्यगेवेति ज्ञेयं। अर्थान्नञः। गणसूत्रमिदं। अनर्थकेनापीति। कथं तर्हि सुपथी नगरीति हलन्तेषूक्तं कपोत्र दुर्वारत्वात्। न च नपूजनादित्यनेन ऋक्पूरब्धूरित्यप्रत्ययस्येव कपोपि निषेधः शंक्यः। पचः प्राचीनानामेव स निषेध इति वक्ष्यमाणत्वात् नकस्य प्रत्ययस्य च उत्तरत्वात्। सत्यं समासान्तविधेरनित्यत्वात् त्वाधुरिति समाधेयं। तु वारनाकाविति सूत्रे सुपथीति भाष्याच्चेत्युक्तं। बहुवाग्मिकेति। वाचोग्मिनिः॥ ॥ शेषाद्विभाषा। अनुक्तसमासान्तात् कप्समासान्तो वा। शेषः स्यात्। तर्हि व्याघ्रपात् सुगंधिरित्यादावपि स्यादतः समासान्तोयं शेषः इह गृह्यत इत्याह। अनुक्तसमासान्तादिति। व्याघ्रपादिति। स्यानिद्वरालोपोपि समासान्त इत्युक्तं। सुगंधीति। गंधस्येत्यादिना इत् समासान्तः। प्रियपथ इति। ऋक्पूरिति अप्रत्यय

शेषाद्विभाषा। ५।४।१५४। अनुक्तसमासान्ताद्बहुव्रीहेः कप्वा स्यात्। महायशस्कः। महायशाः। अनुक्तेत्यादि किं। व्याघ्रपात्। सुगन्धिः। प्रियपथः। शेषाधिकारस्यात्किं। उपबहवः। उत्तरपूर्वा। सपुत्रः। नन्द्यादिना शेषबहुव्रीहौऽर्थ ह्यपरः। आपोऽन्यतरस्यां। ७।४।१५। कप्यावन्तस्य ह्रस्वो वा स्यात्। बहुमालाकः। बहुमालकः। कबभावे बहुमालः। न संज्ञायां। ५।४।१५५। शेषादिति प्राप्तः कप् न स्यात्संज्ञायां। विश्वे देवा अस्य। विश्वदेवः॥ ॥

१९ ससमासान्तः उपबहव इति। संख्ययाव्ययेत्यादिना समासः। उत्तरपूर्वेति। दिङ्नामान्यन्तराल इत्यादिना समासः। सपुत्र इति। तेन सहेतित्यादिना समासः। अयं भावः। शेषो बहुव्रीहिरित्यतः शेषपदमनेकमन्यपदार्थ इत्येतस्मिन्नेव सूत्रे नुवर्त्तते। संख्ययाव्ययासन्नेत्यादिषु च न निवर्त्तते। तथा च शेषाधिकारस्थत्वाभावादुपबहव इत्यादिषु कप्प्रत्ययो नेति। एवं चानेकमन्यपदार्थ इति सूत्रात्पृथक् संख्ययाव्ययासन्नेत्यादीनामारम्भः कवभावार्थमप्यावश्यक इति स्थितं। ननु सन्तु इत्यादि तच्छेषशब्दस्यानुक्तसमासान्तपरत्वे शेषाधिकारस्थपरत्वं च कथमित्यत आह तन्त्रादिनेति। अर्थभेदेन शब्दभेदः समस्यार्थभेदे शब्दस्याभेद इति मतद्वयं। आद्ये आवृत्तिः। द्वितीये तन्त्रमिति विवेकः। यत्तु व इति प्रतिपदोक्ताः समासान्ताः। स्वविषये बाधका भवन्तीति तत्किमनुक्तसमासान्तपरेण शेषग्रहणेनेति। तन्न। ऋक्पूरित्यादीनां समासान्तरे चरितार्थतया प्रियपथादावपि परत्वात्कपा बाधापत्तेः॥ १८१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईयसश्च निमित्तविकल्पिकश्च कप्सर्वोपि निषिध्यते। बहुश्रेयानिति। अतिशयेन प्रशस्यः श्रेयान्। द्विवचनविभज्येतीयसुन्। प्रशस्यस्य श्रः। श्रेषाद्दिभाषेति कप्प्राप्तः। बहु
श्रेयसीति नद्यृतश्चेति नित्यं प्राप्तः कप्लिंगविशिष्टपरिभाषया ईयसश्चेति प्रतिषिध्यते। बहुनाडिरिति। उपसर्जनह्रस्वः। स्त्रीप्रत्ययान्तत्वाभावादिति। अविहस्तं तन्त्रि
म्प इति प्रत्ययस्य स्त्रियामित्यधिकारे अविहितत्वादिति भावः। सप्तमीविशेषणे यदा कण्ठे किंचिदस्तीति ज्ञाते तस्य विशेषणं काल इति तदेदं सप्तमीग्रहणमन्य
दानुत्तेन विनापि विशेषणत्वादेव सिद्धं चित्रगुरिति। न चोपसर्जनं पूर्वमित्येवेदं सिध्यतीति वाच्यं। बहुव्रीहौ सप्तमीत्युक्त तत्र कौडिन्यन्यायेनोपसर्जनपूर्वत्वस्य

ईयसश्च।५।४।१५६॥ ईयसन्तोत्तरपदान्न कप्। बहवः श्रेयांसोऽस्य बहुश्रेयान्। गोस्त्रियोरिति ह्रस्वत्वे प्राप्ते। ईयसो बहुव्रीहेर्नेति वाच्यं
बह्व्यः श्रेयस्योऽस्य बहुश्रेयसी। बहुव्रीहेः किं। अतिश्रेयसिः। वन्दिते भ्रातुः।५।४।१५७॥ पूजितेर्थे यो भ्रातृशब्दस्तदन्तान्न कप् स्यात्। प्र
शस्तो भ्राता यस्य। प्रशस्तभ्राता। नद्यृतश्चेति निषेधस्तु बहुव्रीहौ सक्थ्यक्ष्णोरित्यतः प्रागेवेति वक्ष्यते। वन्दिते किं। मूर्खभ्रातृकः। नाडी ८३
तन्त्र्योः स्वाङ्गे।५।४।१५८॥ स्वाङ्गे यौ नाडीतन्त्रीशब्दौ तदन्तात्कप् न स्यात्। बहुनाडिः कायः। बहुतन्त्रीर्ग्रीवा। बहुतन्त्रीर्धमनी। स्त्रीप्रत्यया
न्तत्वाभावान्न ह्रस्वः। स्वाङ्गे किं। बहुनाडीकः स्तम्भः। बहुतन्त्रीका वीणा। निष्प्रवाणिश्च।५।४।१६०॥ कबभावोत्र निपात्यते। प्रपूर्वाद्वयतेर्ल्युट्।
प्रवाणी तन्तुवायशलाका। निर्गता प्रवाण्यस्य। निष्प्रवाणिः पटः। समाप्तवान्। नव इत्यर्थः। सप्तमीविशेषणे बहुव्रीहौ।२।२।३५॥ सप्तम्य
न्तं विशेषणं च बहुव्रीहौ पूर्वं प्रयोज्यं। कण्ठेकालः। अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः। चित्रगुः। सर्वनामसंख्ययोरुपसंख्यानं।

बाधापत्तेरत्तो विशेषणग्रहणं कृतं। सर्वनाम्नेति। कथं तर्हि तः परो यस्मात्स तपर इति। कथं च जहत्स्वार्था वृत्तिरिति। इह हि जह ॥ सर्वश्वेतः। द्विशुक्लः॥
त्स्वपदं पंसजहत्स्वः सोर्थो यस्यामिति बहुव्रीहिगर्भो बहुव्रीहिस्तथा च स्वपरशब्दयोः सर्वनामत्वात्पूर्वनिपातेन भाव्यमिति चेदत्राहुः सूत्रभाष्यप्रयोगात्स्वपरशब्दयो
र्न पूर्वनिपातः राजदन्तादित्वाद्वा सिद्धमिति। द्विशुक्ल इति। यद्यपि सर्वनामत्वेनैव द्विशब्दस्य पूर्वनिपातत्वं सिध्यति तथापि त्रिशुक्ल इत्यादिसिद्धये वार्त्तिके
संख्याग्रहणं कृतं। ननु संख्याया अल्पाच्तरत्वेन संख्यासर्वनाम्नोरिति वाच्ये विपरीतोच्चारणमयुक्तमित्याशंक्याह॥ रामचन्द्राय नमः ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सु

सि·कौ·

टी·त·

१८३

॥अल्पार्थवाचिकायाद्व्यर्थः गङ्गादेरान्ते आदिशब्दः प्रकारवाची तेन पद्मनाभीयस्य पद्मनाभः ऊर्णनाभीयस्य ऊर्णनाभ इत्यादि १॥
मिथोनयोरिति। विपरीतोच्चारणमेवात्रलिंगमितिभावः। अल्पीयस्याइतीदूहस्वः उर्णनाभ इतिसिध्यतीत्याहुः। जातिकालेति। एतच्च जातिकालसुखादिभ्यो नाच्छादना
दित्यनेनज्ञापितमितिभावः। सारंगोजग्धोयया सा। अस्वांगपूर्वपदाद्वेतिङीष्। कथंतर्हि चारुस्मितः श्चारुहसितइत्यादि ऽत्राहुः नपुंसके भावे क्तस्यनपूर्वनिपातः
निष्ठाशब्देनविहितस्यैवेहग्रहणादिति। क्वचिन्नेति। आहिताग्न्यादित्वकल्पनाद्दनभिधानाद्वेतिभावः॥ इतिबहुव्रीहिः॥ चार्थेद्वन्द्वः॥ अनेकमन्यपदार्थ इत्यतो
ऽनेकमित्यनुवर्ततेसुवामंत्रित इत्यस्मात्सुवपि। समास इतिविभाषेतिचाधिक्रियतएवतदाह। अनेकं सुबन्तमित्यादि। चार्थाइति। चशब्दद्योत्या इत्यर्थः। एक

मिथोनयोस्समासेसंख्यापूर्वंशब्दपरं विप्रतिषेधात्॥ द्वयन्यः। संख्याया अल्पीयस्याः। द्वित्राः द्वेद्वेऽपिद्वादशा। वा प्रियस्य। गुडप्रियः। प्रियगुडः
गड्वादेः ऽपरासप्तमी॥ गडुकण्ठः। क्वचिन्नावहेगडुः॥ निष्ठा। २। २। ३६॥ निष्ठान्तम्बहुव्रीहौ पूर्वंस्यात्। कृतकृत्यः। जातिकालसुखादिभ्यः ऽप
रानिष्ठा वाच्या॥ सारङ्गजग्धी। मासजाता। सुखजाता। प्रायिकञ्चैतत्। कृतकटः। पीतोदकः। वाहिताग्न्यादिषु। २। २। ३७॥ आहिताग्निः। अग्न्या
हितः। आकृतिगणोयं। प्रहरणार्थेभ्यः ऽपरेनिष्ठासप्तम्यौ। अस्युद्यतः। दण्डपाणिः। क्वचिन्नविवृतासिः॥ इतिबहुव्रीहिः॥ चार्थेद्वन्द्वः॥ २। २
। २९॥ अनेकंसुबन्तञ्चार्थेवर्तमानम्वासमस्यतेसद्वन्द्वः। समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः। परस्परनिरपेक्षस्याऽनेकस्यएकस्मिन्
न्वयः समुच्चयः। अन्यतरस्याऽनुषङ्गिकत्वेऽन्वाचयः। मिलितानामन्वय इतरेतरयोगः। समूहः समाहारः। तत्रेश्वरंगुरुञ्चभजस्वेतिसमुच्च
येभिक्षामटगाञ्चानयेत्यन्वाचयेचनसमासोऽसामर्थ्यात्। धवखदिरौ। संज्ञापरिभाषं। अनेकोक्तेः। होतृपोतृनेष्टोद्गातारः। द्वयोर्द्वयोर्द्व
न्द्वंकृत्वापुनर्द्वन्द्वेतु। होतापोतानेष्टोद्गातारः॥ ॥ १९ स्मिन्निति॥ भजनादावित्यर्थः। ईश्वरंगुरुंचभजस्वेति। क्रियायांद्रव्ययोःसमुच्चयोयं। तथा
राज्ञोभजश्वाञ्चश्चेतिद्रव्येद्रव्ययोः समुच्चयः पटः शुक्लोरक्तश्चेतिद्रव्येगुणयोः। रक्तः पटकुंडलं चेतिगुणद्रव्ययोरित्यूह्यं। भिक्षामटगांचानयेति। अत्रस्वरूप
नाक्षमनानस्पन्नपि भिक्षामटत्येवानडुहमभिक्षानगामानयति। तथाअठन्नपि नान्विष्यगामानयत्येनोभिक्षाटनस्यैवप्राधान्यंगवानयनस्यत्वानुषंगिकता। अ
सामर्थ्यादिति। एकार्थीभावाभावादित्यर्थः। तथाहिबहुव्रीहिघटकपदानांकर्मार्थ्यंतर्भावेऽपिवद्वन्द्वघटकपदानांचार्थान्तर्भावेणएकार्थीभा 182

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वआवश्यकः समर्थः पदविधिरिति परिभाषितत्वात्‌ चार्थे द्वंद्व इत्युक्तेश्च। न चेतरान्वयपरस्परनिरपेक्षाणामेकार्थीभावः संभवति। येन समुच्चयान्वाच-
यावेकार्थीभावांतर्भूतौ स्यातां। ततश्चेतरेतरयोगे समाहारे च परस्परसाहित्यसत्त्वात्समासो भवति न तु समुच्चयान्वाचययोः। परं त्वितरेतरयोगे साहित्यं विशेषणं द्रव्यं तु विशेष्यं स-
माहारे तु साहित्यं प्रधानं द्रव्यं विशेषणमिति विवेक्तव्यं। ननु नीलोत्पलमित्यादौ चशब्दं तर्भावेण विग्रहदर्शनादेकार्थीभावसत्त्वाच्च द्वंद्वो दुर्वारः स्यान्मैवं विशेषणं विशेष्ये-
णेति सामानाधिकरण्ये विहितया तत्पुरुषसंज्ञया द्वंद्वसंज्ञाया बाधात्‌ अस्यास्त्वसामानाधिकरण्ये सावकाशत्वात्। सामानाधिकरण्याभावविवक्षायां तु प्रमाणप्रमेये त्यादा-
विव नीलोत्पलादावपि द्वंद्व इष्टापत्तिरेव। होतृपोत्रिति। उत्तरपदपरत्वाभावादनयोरानङ्॥ ❀ ॥ राजदंतादिषु। इह द्वंद्वतत्पुरुषयोः पाठे प्यर्थधर्मादिविग्राह्यभिप्रायेण।

राजदन्तादिषु परं। २।२।३१। एषु पूर्वप्रयोगार्हं परं स्यात्। दन्तानां राजा। राजदन्तः। धर्मादिष्वनियमः। अर्थधर्मौ। धर्मार्थौ। दम्पती। जम्प-
ती। जायापती। जायाशब्दस्य जम्भावो दम्भावश्च वा निपात्यते। आकृतिगणोऽयं। द्वन्द्वे घि। २।२।३२। द्वन्द्वे घिसंज्ञं पूर्वं स्यात्। हरिश्च हरश्च। हरि-
हरौ। अनेकप्राप्तावेकत्र नियमोऽनियमः शेषे। हरिगुरुहराः। हरिहरगुरवः। अजाद्यदन्तं। २।२।३३। इदद्वन्द्वे पूर्वं स्यात्। ईशकृष्णौ। बहुष्वनिय-
मः। अश्वरथेन्द्राः। इन्द्राश्वरथाः। घ्यन्तादजाद्यदन्तं विप्रतिषेधेन। इन्द्राग्नी। अल्पाच्तरं। २।२।३४। शिवकेशवौ। ऋतुनक्षत्राणां समाक्षरा-
णामानुपूर्व्येण॥ हेमन्तशिशिरवसन्ताः। कृत्तिकारोहिण्यौ। समाक्षराणां किं। ग्रीष्मवसन्तौ। लघ्वक्षरं पूर्वम्। कुशकाशं। अभ्यर्हितं च॥ ताप-
सपर्वतौ। वर्णानामानुपूर्व्येण॥ ब्राह्मणक्षत्रियविट्शूद्राः। भ्रातुर्ज्यायसः॥ युधिष्ठिरार्जुनौ॥

॥ ९९ स्य द्वंद्वेघिसूत्रन्यासः। द्वंद्वे घि। अनेकमिति सर्वे-
षामेव प्रथमानिर्दिष्टत्वेनोपसर्जनत्वाविशेषादनियमप्राप्तावयमारंभः पञ्चत्वनेकथ्यं तंतत्र द्वयोरपि पूर्वनिपातनियमः स्यादत आह। अनेकप्राप्तावेकत्रेति। अ-
न्याचख्युः। आकृतौ पदार्थे समुदाये सकृल्लक्षणं प्रवर्तते न प्रतिव्यक्त्या वृत्त्या। तत्रैकस्य पूर्वनिपाते सति जातौ लक्षणं प्रवृत्तमेवेति न पुनः प्रवर्तते व्यक्तिपक्षे त्विह नाश्री-
यते लक्ष्यानुरोधादिति। हरिहरगुरव इति। हरगुरुशब्दयोर्नैनियमः प्रवर्तत इति भावः। अजाद्यदंतं। समुद्राभ्राद्धः लक्षणहेतोः क्रियाया इत्यादिनिर्देशादनित्यमिदं प्रक-
रणं। तेन ससौष्ठवौदार्यविशेषशालिनीमिति भारविप्रयोगः संगच्छते। अल्पाच्तरं। अत एव निपातनात्स्वार्थे तरप् कुत्वचुत्वयोरभावश्च। यदि तु प्रकर्षे तरप् स्यात्तदा द्वं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु
सि॰कौ॰
टी॰त॰
१८४

योरेव नियमः स्याद्द्विवचनान्तोपपदत्वविषय एव तरपो विधानात्। तत्र धवखदिरपलाशा इत्यादौ बहुषु नियमो न स्यात्। ऋतुनक्षत्राणामिति। ऋतूनामानुपूर्व्यं प्रादुर्भावकृ
तं नक्षत्राणां तूदयकृतं। अभ्यर्हितं चा वासुदेवार्जुनाभ्यां वुन्निति निर्देशेन द्रष्टव्यं। इति चतुर्थं भाष्यं। अल्पाच्तरमजाद्यदन्तमिति सूत्राभ्यामर्जुनस्य पूर्वनिपाते प्राप्ते तमकृत्व
न ज्ञापयति सर्वत्रोभ्यर्हितं पूर्वमिति। तत्रैव सूत्रेव क्ष्यते। युधिष्ठिरार्जुनाविति। इंद्रपुत्रत्वाद्धि लोके शतक्रतुत्वाद्वा अभ्यर्हितत्वमर्जुनेप्यस्तीति न तेन नियमः सिध्यतीति भावः
॥ ॐ ॥ द्वंद्वश्च प्राणि। प्राणितूर्यसेनानामंगानीति बहुवचनान्तेनांगशब्देन षष्ठीसमासः। अंगशब्दश्च प्रत्येकमन्वेति। तेन प्राण्यंगानां प्राण्यंगैरेव तूर्यांगानां तूर्यांगैरेव सेना
गानां सेनांगैरेव द्वंद्वस्स एकवद्भवति न तु व्यतिकरेणेति नेह। मार्दंगिकाश्वारोहौ। अत्र प्राणिसेनयोरंगं नामावयवः तूर्यस्य त्वंगं नामोपकारकं बोध्यं। एषां द्वंद्व

द्वंद्वश्च प्राणितूर्यसेनाङ्गानाम्। २।४।२। एषां द्वंद्व एकवत्स्यात्। पाणिपादं। मार्दङ्गिकपाणविकं। रथिकाऽश्वारोहं। समाहारस्यैकत्वादेकत्वे सि
द्धे नियमार्थमिदं प्रकरणं। प्राण्यङ्गादीनां समाहार एव यथा स्यात्। अनुवादे चरणानाम्। २।४।३। चरणानां द्वंद्व एकवत्स्यात्सिद्धस्योपन्यासे। स्थे
णोर्लुङीति वक्तव्यं॥ उदगात्कठकालापं। प्रत्यष्ठात्कठकौथुमं। अध्वर्युक्रतुरनपुंसकम्। २।४।४। यजुर्वेदे विहितो यः क्रतुस्तद्वाचिनामनपुं
सकलिङ्गानां द्वंद्व एकवत्स्यात्। अर्काऽश्वमेधं। अध्वर्युक्रतुः किं। इषुवज्रौ। सामवेदे विहितौ। अनपुंसकं किं। राजसूयवाजपेयौ। अर्द्धर्चादी
अध्ययनतोऽविप्रकृष्टाख्यानाम्। २।४।५। अध्ययनेन प्रत्यासन्ना आख्या येषां तेषां द्वंद्व एकवत्। पदकक्रमकं॥ ॥ ॥ ॥

ति। प्राण्यंगानां द्वंद्व स्तूर्यांगानां द्वंद्वः सेनांगानां द्वंद्व इत्यर्थः। द्विगुरेकवचनमित्यत एकवचनं वर्त्तते। तत्रैकं वक्तीति व्युत्पत्त्या एकत्वविशिष्टः समाहाररूपोर्थस्तत्प्रतिपाद
कः स्यादित्यर्थमन्वानः फलितमाह। एकवत्स्यादिति। पाणिपादमिति। यद्यप्यत्र जातिरप्राणिनामित्येव सिद्धं तथापि द्रव्यप्राधान्येपि भवत्विति प्राणिग्रहणमित्येके। पाणि
पणवावितिव्यतिकरे माभूदिति नियमार्थवचनमित्यन्ये। मार्दंगिकेति। मृदंगवादनं शिल्पमस्येत्यर्थे शिल्पमिति ठक्। एवं पाणविकइत्यपि। रथिकाश्वारोहमिति। रथि
न चरंतीति रथिकाः पर्पादिभ्यः ष्ठन्निति ष्ठन्। ते चाश्वारोहाश्च तेषां समाहारः। ननु चार्थे द्वंद्व इत्यनेन समाहारद्वंद्वसिद्धस्तस्य चैकत्वादेकवचनमपि सिद्धमिति किमने
नेत्याशंक्याह नियमार्थमिति। समाहार एवेति। समाहारे प्राण्यंगादीनामेवेति विपरीतनियमोत्र न भवति। तिष्यपुनर्वस्वोरिति सूत्रे बहुवचनग्रहणात्तद्धि समाहा

१८३

CC-0. In Public Domain. Digitization by eGangotri

रेकवचनस्य द्विवचनं मा भूदिति कृतमन्यथा तिष्यपुनर्वस्वितिन स्यादिति। एवं च द्वंद्वस्याप्राणिनूर्येति प्रकरणे बहिर्भूतानामपि समाहारद्वंद्वो भवत्येव तेन सर्वो द्वंद्वो विभाषैक
वद्भवतीति प्रथमानं नापूर्ववचनमिति ज्ञेयं। चरणानामिति। शाखाध्येतृवाचिनामित्यर्थः। स्थेणोरिति। ष्ठागतिनिवृत्तौ। इण्गतौ। स्थाप्रकृतिक इण्प्रकृतिक लुङन्ते उपप
दे सतीत्यर्थः। स्थेणोः किं। अभूवन्कठकालापाः। लुङि किं। तिष्ठंतु कठकालापाः। उदगादिति। इह यदा कठेषु कालापेषु च प्रतिष्ठितेषूदितेषु चावाभ्यां तत्र गंतव्यमिति
संकेतयित्वा तत्संकेतं विस्मृत्यासीनं प्रतीदमुच्यते। कठेन प्रोक्तमधीयते कठाः। वैशंपायनांतेवासित्वात्सिण्लिनस्य कठचरकादिति लुक्। अध्येत्रणस्तु प्रोक्ताल्लुगिति

जातिरप्राणिनाम्। २।४।६॥ प्राणिवर्ज्जजातिवाचिनां द्वंद्व एकवत्। धानाशष्कुलि। प्राणिनां तु। विट्शूद्राः। द्रव्यजातीनामेव नेह। रूपरसौ। गम
नाकुञ्चने। जातिप्राधान्य एवायमेकवद्भावः। द्रव्यविशेषविवक्षायां तु। बदरामलकानि॥ विशिष्टलिङ्गो नदीदेशोऽग्रामाः। २।४।७॥ ग्रामवर्ज
नदीदेशवाचिनां भिन्नलिङ्गानां समाहारे द्वन्द्वः स्यात्। उद्ध्यश्च इरावती च। उद्ध्येरावति। गङ्गा च शोणश्च। गङ्गाशोणं। कुरवश्च कुरुक्षेत्रं च। कुरुकुरु
क्षेत्रं। भिन्नलिङ्गानां किं। गङ्गायमुने। मद्रकेकयाः। अग्रामाः किं। जाम्बवं नगरं। शालूकिनी ग्रामः। जाम्बवशालूकिन्यौ। क्षुद्रजन्तवः। २।४।८।
एषां समाहारे द्वंद्वः स्यात्। यूकालिक्षं। आनकुलात्क्षुद्रजन्तवः॥ येषां च विरोधः शाश्वतिकः। २।४।९॥ एषां प्राग्वत्। अहिनकुलं। गोव्याघ्रं
। काकोलूकमित्यादौ परत्वाद्विभाषा वृक्षमृगेति प्राप्तं चकारेण बाध्यते॥ शूद्राणामनिरवसितानाम्। २।४।१०॥ अबहिष्कृतानां शूद्राणां
प्राग्वत्। तक्षायस्कारं। पात्राद्बहिः कृतानां तु। चाण्डालमृतपाः॥ ॥ ९ लुक्। कलापिनोण्। सब्रह्मचारीत्याद्युपसंख्यानाट्टिलोपः। यजुरि

ति। सूत्रे अध्वर्युशब्दो यजुर्वेदलक्षक इति भावः। पदकेति। पदान्यधीते पदकः। क्रमादिभ्यो वुन्। एवं क्रमकोऽपि। पदान्यधीत्य क्रमोऽध्येतव्य इति स्पष्टा प्रत्यासत्तिः।
अध्ययनतः किं। पिता पुत्रौ। अविप्रकृष्टेति किं। याज्ञिकनैयायिकौ॥ ः॥ जातिर। जातिवाच्यवयवक द्वंद्वोऽपि जातिरित्युपचर्यत इत्याशयेनाह। जातिवाचिनामि
ति। विट्शूद्रा इति। जातिप्राधान्येऽपि बहुवचनमुपपद्यते। जात्याख्यायामेकस्मिन्निति विधानात्तेनात्र द्व्यंगविकलं नेति भावः। द्रव्यजातीनामेवेति। अप्राणिनामि
ति पर्युदासान्नञिवयुक्तन्यायेन द्रव्यजातीयानामेकवद्भावो न तु गुणक्रियाजातीयानामिति भावः। जातिः किं। नंदकपांचजन्यौ। संज्ञाशब्दावेतौ। जातिप्राधान्य एवेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



एतच्च जातिग्रहणं लक्ष्यमन्यथा पर्युदासेनैव जात्युपसर्जनद्रव्यवाचिनोऽपि ग्रहणोपपत्तौ किं तेनेति भावः। द्रव्यविशेषेति। नन्वेवं रंजिनानुविविधासहशैलाइति
भारविप्रयोगस्संगच्छत एवेति किमिति तरुसहिताः शैला इति मनोरमायां समर्थितमिति चेदत्राहुः। संकलतरुशैलरंजनं तत्र विवक्षितं न तु केषांचित्तरुशै
लविशेषाणामिति जातिप्राधान्यादेकवद्भावमाशंक्य तथोक्तमिति। वदरामलकानीति। फले लुगिति लुक् कलुक्तद्धितलुकीति स्त्रीप्रत्ययस्यापि लुकि फलत्व
जात्युपसर्जनद्रव्यवचनत्वेनो विभाषा वृक्षमृगेति सूत्रे वदराणि चामलकानि च वदरामलकं जातिरप्राणिनामित्येकवद्भाव इति वक्ष्यति न तु नानेन ग्र
थेन विरुध्यते। फलत्वजातिवाचिनां बहुवचनान्तानामेव द्वंद्व एकवद्भवति न त्वेकवचनान्तानां द्वंद्व इति फलसेनावनस्पतीति वार्त्तिकोक्तनियममुपे
त्यतन्मप्रवृत्तेः। विशिष्टलिंगो। सूत्रे चत्वारोऽपि शब्दा अवयवधर्मेणावयविनि द्वंद्वे वर्त्तन्त इत्याशयेनाह। ग्रामेत्यादि। इह न दीवाचिनां द्वंद्वः देशवाचिनां
द्वंद्व इति वाक्यभेदेन व्याख्येयं तेन गंगाकुरुक्षेत्रे इत्यत्र न भवति। देशशब्देनात्र प्रसिद्ध एव जनपदो गृह्यते। नद्याः पृथग्ग्रहणात्तेन पर्वतानां न। कैला
सश्च गंधमादनं च कैलासगंधमादने। नदीदेशेति किं। कुक्कुटमयूर्यौ। विशिष्टपदस्यार्थमाह भिन्नलिंगानामिति। विपूर्वो हि शिषिर्भेदार्थः। अत एव विशेषणं वि
शेष्येणेति सूत्रे भेदकं भेद्येनेति व्याख्यातं। समाहारे द्वंद्वः स्यादिति। निष्कर्षाभिप्रायेणेयमुक्तिः। यथाश्रुताभिप्रायेण तु द्वंद्व एकवत्स्यादिति केषुचित्सूत्रेषु व्याख्या
यत इति ज्ञेयं। उध्यैरावत्तीति। उध्यो नदः। सोऽपि नदीविशेषत्वान्नदीशब्देन गृहीतः। एवं शोणोऽपि। अग्रामा इत्यत्र नगरप्रतिषेधो वक्तव्यस्तेन मथुरापाटलिपुत्रे
इत्यत्र निषेधो न भवति। उभयोरपि नगरत्वात्। क्षुद्रा अपचितयोः परिमाणे त्वक्षुद्रत्वं। तच्चापेक्षिकत्वादनवस्थितं। यच्चसर्पयंता क्षुद्रजंतुरनस्थिः स्यादथवा क्षुद्र
एव यः शतं वा प्रसृतौ येषां केचिदानकुलादपीति। तत्र सर्वपक्षसाधारण्येनोदाहरति। यूकालिक्षमिति। आनकुलादिति। नकुलपर्यंता इत्यर्थः। येषां च विरोधः
विरोधो वैरं न तु सहानवस्थानं। तेनेह न। छायातपौ। शाश्वदित्यव्ययं त्रैकाल्ये वर्त्तते तत्र भवः शाश्वतिकः। कालाट्ठञ्। अत एव निपातनादिसुसुक्तां नादिति
कादेशो अव्ययानां भमात्रे इति टिलोपश्च न। शाश्वतिकः किं। देवासुरैरमृतमंबुनिधिर्ममंथे ते पांत्वमृतादि ———— प्रयु
क्तः कादाचित्को विरोधो न तु नित्यः। मंथनप्रवृत्तिकाले तद्विरहात्। परत्वादिति। पशुशकुनिद्वंद्वस्यावकाशो गोमहिषं गोमहिषाः हंसचक्रवाकं हंसचक्र

184

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वाकाः। येषां चेत्यस्यावकाशः मार्जारमूषकं। श्रमणब्राह्मणमित्यादौ ज्ञेयः चकारेण बाध्यत इति। चकारः पुनर्विधायक इति भावः। शूद्राणां त्रैवर्णिकेतरमनुष्यपरः शू
द्रशब्दो न तु शूद्रत्वजातिपरः। अनिरवसितानामितिनिषेधानुपपत्त्यादिति। यैर्भुक्ते भस्मना शुध्यते कांस्यमित्यादिस्मृत्युक्तसंस्कारेणापि पात्रं न शुध्यति तेषामित्यर्थः॥
॥ ःः ॥ गवाश्व। यथोच्चारितानीति। गणपाठे पाणिनिना यथा पठितानि तथैव साधूनीत्यर्थस्तेनावङः पाक्षिकत्वाद्यदा नावङ् तदा उत्तरसूत्रेण विकल्पेन भवति गो
अश्वं। अपशवो वा अन्ये गोऽश्वेभ्यः पशवो गोअश्वाः गवाश्वमिति। इह पशुद्वंद्वविभाषा या मा। दासीदासमिति। अत्र पुमान्स्त्रियेत्येकशेषो बाध्यते। विभाषा वि

गवाऽश्वप्रभृतीनि च। २।४। ११। यथोच्चारितानि साधूनि स्युः। गवाश्वं। दासीदासमित्यादि। विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्व
वडवपूर्वापराऽधरोत्तराणाम्। २।४। १२। वृक्षादीनां सप्तानां द्वन्द्वः। अश्ववडवेत्यादि द्वन्द्वत्रयं च प्राग्वद्वा। वृक्षादौ विशेषाणामेव ग्रहणं। प्ल
क्षन्यग्रोधं। प्लक्षन्यग्रोधाः। रुरुपृषतं। रुरुपृषताः। कुशकाशं। कुशकाशाः। व्रीहियवं। व्रीहियवाः। दधिघृतं। दधिघृते। गोमहिषं। गोमहिषाः। शु
कबकं। शुकबकाः। अश्ववडवं। अश्ववडवौ। पूर्वाऽपरं। पूर्वाऽपरे। अधरोत्तरं। अधरोत्तरे॥ फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृ
णानां बहुप्रकृतिरेव द्वंद्व एकवदिति वाच्यं। बदराणि चाऽऽमलकानि च। बदरामलकं। जातिरप्राणिनामित्येकवद्भावो नेह। बदरामलके॥ र
थिकाश्वारोहौ। प्लक्षन्यग्रोधौ। इत्यादि। विभाषा वृक्षेति सूत्रेऽप्राणिनस्तेषां ग्रहणम्। जातिरप्राणिनामिति नित्यप्राप्ते विकल्पार्थं। पशुग्र
हणं हस्त्यश्वादिषु सेनाङ्गत्वान्नित्ये प्राप्ते। मृगाणां मृगैरेव शकुनीनां नैरेवोभयत्र द्वन्द्वः। अन्यैस्तु सहेतरेतरयोग एवेति नियमार्थं मृगशकुनि
ग्रहणं। एवमपूर्वापरमधरोत्तरमित्यपि। अश्ववडवग्रहणं तु पक्षे नपुंसकत्वार्थं। अन्यथा परत्वात्पूर्ववदश्ववडवाविति स्यात्॥ ॥

शेषाणामेवेति। अयंभावः। वृक्षादिशब्दैः प्रत्येकं द्वंद्वो विधीयते न चैको वृक्षशब्दो द्वंद्वः। न च द्वयोः सहप्रयोगः। सरूपाणामित्येकशेषात्। नापि पर्यायाणां विरूपा
णामपि समानार्थानामित्येकशेषात्। नापि वृक्षधवश्चेत्यादि सामान्यविशेषयोः अनभिधानात्तत्र द्वंद्वस्यैवाभावादिति। सर्वप्रकरणशेषतया नियममाह। फलसेने
त्यादि फलसेनादीनां द्वंद्वो विभाषा वृक्षमृगेत्यनेन लक्षणान्तरेण वा कवद्भवन् बहुप्रकृतिरेव एकवद्भवतीत्यर्थः। बहवो वर्त्तिपदार्थाः बहुवचनान्ता वा प्रकृतिः कारणं

सु॰
सि॰ कौ॰
टी॰ त॰
१९६

यस्य स बहुप्रकृतिः बदराणि चामलकानि चेति। आत्याख्यायामेकस्मिन्निति वैकल्पिकं बहुवचनं। बदरामलके इति। जातिप्राधान्येप्येकवचनं। तयोर्द्वंद्व इति नास्त्येकवद्भा
व इति भावः। पशुग्रहणमिति। विकल्पार्थमित्यनुवर्त्यते। चार्थे द्वंद्व इत्यनेनैव सिद्धे मृगशकुनिग्रहणं प्रतिपदविधानार्थं। तेनाश्ववडवमित्येकवद्भावपक्षे पूर्ववदश्ववडवा
वित्येतद्बाधित्वा सनपुंसकमित्येतदेव भवति। स इति तच्छब्देन स्त्रैकवद्भावभाजं परामृश्य विधीयमानं नपुंसकत्वं एकवद्भाववदेव प्रतिपदविहितं भवति तथा च प्रतिपदो
क्तस्य बलीयस्त्वान्नपुंसकत्वं सिध्यतीति॥ ॐ ॥ विप्रतिषिद्धं॥ अधिकरणमिह द्रव्यं। चकारो विभाषानुकर्षणार्थस्तदेतद्व्याचष्टे विरुद्धार्थानामित्यादि उदाहरणं
तु शीतोष्णं शीतोष्णे सुखदुःखं सुखदुःखे इत्यादि विरोधोत्र सहानवस्थानलक्षणः। भवत्येवेति। विप्रतिषिद्धग्रहणाभावे तु स न स्यात्। अद्रव्यवाचिनामेवेति नियमादिति भा

विप्रतिषिद्धं चानधिकरणवाचि। २।४।१३॥ विरुद्धार्थानामद्रव्यवाचिनां द्वंद्व एकवद्वा स्यात्। शीतोष्णं। शीतोष्णे। वैकल्पिकस्समाहार
द्वंद्वश्चार्थ इति सूत्रेण प्राप्तः। स विरुद्धार्थानां यदि भवति तर्हि अद्रव्यवाचिनामेवेति नियमार्थमिदं। तेन द्रव्यवाचिनामितरेतरयोग एव
शीतोष्णे उदके स्तः। विप्रतिषिद्धं किं। नन्दकपाञ्चजन्यं नन्दकपाञ्चजन्यौ इह पाक्षिकः समाहारद्वंद्वो भवत्येव। न दधिपय आदीनि। २।४।१४॥ एतानि नैकव
त्स्युः। दधिपयसी। इध्माबर्हिषी। निपातनाद्दीर्घः। ऋक्सामे। वाङ्मनसे। अधिकरणैतावत्त्वे च। २।४।१५॥ द्रव्यसंख्यावगमे एकवदेवेति नि
यमो न स्यात्। दश दन्तोष्ठाः। विभाषा समीपे। २।४।१६॥ अधिकरणैतावत्त्वस्य सामीप्येन परिच्छेदे समाहार एवेत्येवंरूपो नियमो वा स्यात्। उपदशं

वः। अनधिकरणवाचीति किं। शीतोष्णे उदके स्तः इह पाक्षिकः समाहारद्वंद्वोपि स्यादिति दिक्। न दधिपय। दधीपयसी इति। व्यंजन॥ ॥ दन्तोष्ठं। उपदशाः दन्तोष्ठाः।
त्वादिति कल्प्यः प्राप्तः। एवं मधुसर्पिषी। सर्पिर्मधुनी इत्यत्रापि बोध्यः इह ब्रह्मप्रजापती शिववैश्रवणावित्यादौ समाहारद्वंद्वनिषेधमुखेनेतरेतरयोगद्वंद्वोनेन व्यव
स्थाप्यते तत्सामर्थ्याद्दधिपयसी इत्यादावपि तथैव। तेन तत्र व्यंजनत्वप्रयुक्तविकल्पनिषिद्धोपि जातिलक्षणो नित्यमेकवद्भावोस्त्विति न शंकनीयं। किं च नेह लक्षण
विशेषे आग्रहः। एतानि नैकवत्स्युरित्येकवद्भावमात्रस्य निषेधात्। यथा न षट्स्वस्रादिभ्य इत्यत्र ङीप्टापोरुभयोरपि निषेधः सिद्धये स्त्रियां यदुक्तं तन्नेति सामान्यतो नि
षिध्यत इति दिक्। ऋक्सामे वाङ्मनसे इति। अचतुरेत्यादिनात्र समासान्तो निपात्यते॥ अधिकरणे। समासार्थस्याश्रयोधिकरणं वर्त्तिपदार्थस्तस्यैतावत्त्वं परिमा 185

णा नियमस्तस्मिन्नाप्यमाने इति व्याचष्टे। द्रव्यसंख्यावगमे इत्तिनियमो न स्यादिति न चेह प्राण्यंगत्वात्प्राप्तस्यैकवद्भावेति नियमस्य प्रतिषेधेपि चार्थे द्वंद्व इति समाहारे द्वंद्वः स्यादि
ति वाच्यं। सविशेषणानां वृत्तिर्नेत्यभ्युपगमेन समाहारद्वंद्वस्य प्राप्त्यभावात्। न चोक्तन्यायेनेतरेतरयोगद्वंद्वोपि न स्यादिति वाच्यं। सामान्याप्रयोग इति लिंगात् प्रधानस्य सापे
क्षत्वेपि तदभ्युपगमात्। तदुक्तं हि भाष्ये। भवति वै प्रधानस्य सापेक्षस्यापि वृत्तिरिति। स्यादेतत्। समाहारद्वंद्वस्यात्र प्राप्त्यभावे द्वंद्वश्च प्राणितूर्येति नियमाप्रवृत्त्या इतरेत
रयोगद्वंद्वो निर्बाध एवेति सूत्रमिदमकिंचित्करमिति चेदत्राहुः। नियमसूत्राणां निषेधमुखेन प्रवृत्तिरिति पक्षे द्वंद्वश्च प्राणितूर्येति सूत्रं केवलमितरेतरयोगद्वंद्वनि
षेधपरं। तथा चेतरेतरयोगनिषेधस्य निषेधद्वारा इतरेतरयोगद्वंद्वप्रापणार्थमिदमिति। एवं च निषेधमुखप्रवृत्तिपक्षस्य ज्ञापनापेदमिति फलितमिति दिक्॥ विभाषा समीपे।
यद्यपीह समाहारद्वंद्वो वेति व्याख्यानेपि न क्षतिस्तथापि पूर्वसूत्रे नियमनिषेधस्योक्तत्वात्तदनुरोधेनाह। नियमो वा स्यादिति। उपदशं दंतोष्ठमिति। एकवद्भावपक्षे अव्ययीभाव
स्यैवानुप्रयोगः। यदि तु बहुव्रीहेस्तदा उपदशस्य दंतोष्ठस्येति षष्ठी स्यादुपदशं दंतोष्ठस्येत्येवं व्यतहृत्याकरः। दंतोष्ठस्य दर्शनन्नित्यभिप्रायेण षष्ठ्यां कृतायामपि उपदशश

॥ आनङृतो द्वंद्वे ६।३।२५॥ विद्यायोनिसम्बन्धवाचिनामृदन्तानां द्वंद्वे आनङ् स्यादुत्तरपदे परे। होतापोतारौ। होतृपोतृनेष्टोद्गाता
((रः। मातापितरौ। पुत्रेऽन्यतरस्यामित्यतो मण्डूकप्लुत्या पुत्र इत्यनुवृत्तेः।

द्वे षष्ठी नेष्यते अतो बहुव्रीहेर्नानुप्रयोगः किं त्वव्ययीभावस्यैवेति तदाशयः॥ ❀ ॥
आनङ् ऋत इति षष्ठ्यंतं जातावेकवचनं। इतो विद्यायोनिसंबंधेभ्य इति त्वनुवर्त्तते न चात्र षष्ठ्या विपरिणम्यते तदाह विद्यायोनिसंबंधवाचिनामिति। ननु ऋत इत्य
नुवर्त्तनादेव सिद्धे किमनेन ऋतो ग्रहणेन। अत्राहुः। ऋत इति श्रूयमाणं द्वंद्वविशेषणं। अनुवृत्तं तूत्तरपदे परतो यत्पूर्वं तस्य विशेषणं पुत्रशब्दे परे आनङ् विधास्यतेन
त्र कार्यिनिर्देशार्थमन्यथा तत्पुत्रावित्यत्रापि स्यादिति। उत्तरपदे इति। एतच्चालुगुत्तरपदे इत्यधिकाराल्लभ्यते। उत्तरपदे परतः पूर्वपददंतं तस्यानङित्यर्थः। होतापोता
राविति। आनङो ङित्वात्पूर्वान्त्यस्य ऋकारस्यादेशो सति नलोपः। न चाकारमात्रमेव विधीयतामिति वाच्यं। उरण्रपर इति रपरप्रसंगात्। नन्विहोत्तरपदेन पूर्वपदं नाक्षि
प्यते। अन्यथा होतृपोतृनेष्टोद्गातार इत्यत्र मध्यमस्यानङ् स्यात्ततश्च विशेष्यासन्निधानात् ऋत एव स्थाने आदेशेन भवितव्यं न तु ऋदंतपदस्य स्थाने इति किमनेनानङो
ङित्करणेन सत्यङित्करणाभावे मित्रावरुणावित्यादौ देवताद्वंद्वे चेत्युत्तरपदे परे विधीयमानोयमादेशः पूर्वस्याक्षरस्य पदस्य वा स्यात् पूर्वस्याल एवेत्यत्र नियामा

CC-0. In Public Domain. Digitization by eGangotri

श्री
सि॰कौ॰
टी॰त॰
१८७

मकाभावात्। एतेन क्तर इति कार्यिनिर्देशार्थमित्युक्तत्वान्निर्दिश्यमानस्य ऋकारस्यैवादेशः स्यादिति ङित्करणं व्यर्थमित्याशंकापि परास्ता नेष्टोद्गातार इति। नह्यत्र नेष्टा पूर्वपदं आ
स्ववयवस्यैव पूर्वपदत्वात्। मातापितराविति। पुत्रोत्पादने अनयोर्योनिकृतसंबंधः। पूर्वत्र तु होत्रादिरूपविद्याकृतः संबंध एकस्मिन्पक्षे आर्त्विज्यरूप इति चेत्कः मंडूका
प्लुत्येति। तेन विभाषास्वसृपत्योरित्यत्र न संबध्यते इति भावः॥ ❀ ॥ पितापुत्राविति। अनयोरपि योनिकृतसंबंधो जन्यजनकभावलक्षणः। देवता अनृकारान्ता
र्थमविद्यायोनिसंबंधार्थं च वचनं। ईदग्ने आनङोपवादोयं। देवताद्वंद्व इत्येवेति। इदं च वृत्तिग्रंथे स्थितं ज्योतिर्लतयोर देवताद्वंद्वे प्यग्नीषोमौ प्रणेष्यामीत्याश्वलाप

पितापुत्रौ। देवताद्वन्द्वे च। ६।३।२६॥ इहोत्तरपदे परे आनङ्। मित्रावरुणौ। वायुशब्दप्रयोगे प्रतिषेधः। अग्निवायू। वाय्वग्नी। पुनर्द्वंद्वग्रहणं
प्रसिद्धसाहचर्यस्य परिग्रहार्थं। तेन ब्रह्मप्रजापती इत्यादौ नानङ्। एतद्धि नैकहविर्भागित्वेन श्रुतं नापि लोके प्रसिद्धसाहचर्यं॥ ईदग्नेः सोमव
रुणयोः। ६।३।२७॥ देवताद्वंद्व इत्येव। अग्नेस्स्तुत्स्तोमसोमाः। ८।३।८२॥ अग्नेः परेषामेषां सस्य षः स्यात्समासे। अग्निष्टुत्। अग्निष्टोमः। अग्नी
षोमौ। अग्नीवरुणौ। इद्वृद्धौ। ६।३।२८॥ वृद्धिमत्युत्तरपदे अग्नेरिदादेशः स्याद्देवताद्वंद्वे। अग्नामरुतौ देवते अस्य आग्निमारुतं कर्म। अग्नीवरु
णौ देवते अस्य। आग्निवारुणं। देवताद्वंद्वे चेत्युभयपदवृद्धिः। अलौकिकवाक्ये आनङीत्वञ्च बाधित्वात्र वृद्धौ किं। आग्नेन्द्रः। नेन्द्रस्य परस्ये
त्युत्तरपदवृद्धिर्निषेधः। विधौ न। अग्नावैष्णवं। दिवो द्यावा। ६।३।२९॥ देवताद्वंद्वे उत्तरपदे। द्यावाभूमी। द्यावाक्षामे। दिवसश्च पृथिव्यां। ६।
३।३०॥ दिव इत्येव चात् द्यावा। आदेशे अकारोच्चारणं सकारस्य रुत्वं माभूदित्येतदर्थं। द्यौश्च पृथिवी च। दिवस्पृथिव्यौ। द्यावापृथिव्यौ। छन्दसि
दृष्टानुविधिः। द्यावा चिदस्मै पृथिवी। दिवस्पृथिव्यौ। ररतिरित्यत्र पदकारा विसर्गम्पठन्ति। उषासोषसः। ६।३।३१॥ उषस्शब्दस्योषासादेशो देवताद्व

न प्रयोगस्त्वार्षत्वात्साधुः। यद्वा मास्तु तद्धितवृत्तिः। अग्निसोमौ माणवकावित्यत्राभिव्यक्तपदार्था ये स्वतंत्रा लोके विभक्ता इति न्यायेनादोषत्वात्। अग्नेः सात्पदाद्योरिति निषे
धः प्रयमारंभः। अग्निष्टुदिति। अग्निः स्तूयतेऽस्मिन्सः। क्रतुविशेषः। संपदादित्वादधिकरणे क्विप्। अग्निष्टोम इति। अग्नीनां स्तोमोऽग्निष्टोमः सोमयागस्य संस्था सोयास
स्या उच्यते। इद्वृद्धौ। तकार उच्चारणार्थः। इकारस्येकारविधानं तु बाधकबाधनार्थं। वृद्धिशब्देनात्र वृद्धिमद्गृह्यते। वृद्धिमात्रस्योत्तरपदस्यासंभवादतो व्याचष्टे।

186

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृद्धिमत्पुत्रस्य इति। आनङ्‌मीत्वं च बाधित्वेति। यद्यपि वृद्धेः प्रागेव आनङीत्वयोरन्तरङ्गत्वात्प्रवृत्तिरस्ति तथापि परित्यज्य वार्त्तिकविषयमुत्सर्गोऽयमिति विज्ञातइतिन्यायात् नङीत्वे न भवत इति भावः। अग्नावैष्णवमिति। इत्वाभावादानङेव भवति। इत्वंमाभूदिति। अकारे सति सकारस्य षत्वं भवति तेन प्रयोगे विकाराभावोऽनुमीयत इति भावः। नङीत्वे न भवत इति भावः। अग्नावैष्णवमिति। इत्वाभावादानङेव भवति। इत्वं मा भूदिति। अकारे सति सकारस्य षत्वं भवति तेन प्रयोगे विकाराभावोऽनुमीयत इति भावः। उषासासूर्यमिति। उषाश्च सूर्यश्च तयोः समाहारः॥ ॥ मातरपितरौ। मातृशब्दस्यानङ् रेफादेशं विसर्गमिति। तथा च क्वचिद्विकारो नेत्येवानुमेयं लक्ष्यानुरोधादिति भावः। द्वन्द्वात्। अन्तग्रहणं विस्पष्टार्थं चुरिति वर्गग्रहणस्य प्रयोजनं ध्वनयति। त्वक्स्रजमिति। बहूनां द्वन्द्वे तु वाक्त्वक्स्रजं। द्वन्द्वग्रहणं द्वन्द्वे तु वाक्त्वचस्रजा इति। गोनिपात्यते द्वन्द्वात्। अन्तग्रहणं विस्पष्टार्थं चुरिति वर्गग्रहणस्य प्रयोजनं ध्वनयति। द्वन्द्वः। द्वन्द्वापवादत्वेनाह अथैकशेष इति। विरूपाणामिति। इष्यते वा ध्यत इति व्युत्पत्त्या सोत्र स्वरूपशब्दस्यार्थे परतयापि व्याख्यानात्सूत्राक्षरैरेव लब्धुं शक्यत इति भा॥

मातरपितरावुदीचाम्॥ ६।३।३२॥ मातरपितरौ। उदीचां किं। मातापितरौ॥ द्वन्द्वाच्चुदषहान्तात्समाहारे॥ ५।४।१०६॥ चवर्गान्ताद्दषहान्ताच्च द्वन्द्वात् समाहारे। वाक्त्वचं। वाक्त्वचं। त्वक्स्रजं। शमीदृषदं। वाक्त्विषं। छत्रोपानहं। समाहारे किं। प्रावृट्शरदौ॥ इति द्वन्द्वः॥ अथैकशेषः। सरूपाणामेकशेष एकविभक्तौ॥ १।२।६४॥ रामौ। रामाः। विरूपाणामपि समानार्थानां॥ वक्रदण्डश्च कुटिलदण्डश्च। वक्रदण्डौ। कुटिलदण्डौ। वृद्धो यूना तल्लक्षणश्चेदेव विशेषः॥ १।२।६५॥ यूना सहोक्तो गोत्रं शिष्यते गोत्रयुवप्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यं स्यात्। गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ। वृद्धः किं। गर्गो गार्ग्यायणः। यूना किं। गर्गगार्ग्यौ। तल्लक्षणः किं। भागवित्तिभागवित्तिकौ। कृत्स्नं किं। गार्ग्यवात्स्यायनौ। स्त्री पुंवच्च॥ १।२।६६॥ यूना सहोक्तौ वृद्धा स्त्री शिष्यते तदर्थश्च पुंवत्। गार्गी च गार्ग्यायणश्च गार्ग्यौ। अस्त्रियामित्यनुवर्त्तमाने यञञोश्चेति लुक्। दाक्षी च दाक्षायणश्च।

गोत्रं व्याख्यातं। वृद्धो यूना। अपत्यमन्तर्हितं वृद्धमिति पूर्वाचार्यैः परिभाषितस्य पारिभाषिकगोत्रापरपर्यायस्येह ग्रहणं कृत्रिमत्वाद् यूना सहचर्याच्चेत्याह। गोत्रं शिष्यत इति। गोत्रं पूर्वेष्वेव तु न सूत्रितं। अपत्याधिकारादन्यत्र लौकिकं गोत्रग्रहणमिति सिद्धान्तेन औपगवश्चानन्तरः औपगविश्च युवेत्यत्रैकशेषः। भागवित्तीति। भागवित्तस्य गोत्रापत्यं भागवित्तिरित्यस्माद्युनि वृद्धाट्ठक् सौवीरेषु बहुलमिति कुत्सायां ठक्। इह कुत्सा सौवीरत्वं चाधिकमपेक्ष्यते। न तु युवत्वमात्रकृतं वैरूप्यं। गार्ग्यवात्स्यायनाविति। इह प्रकृत्यंशे वैरूप्यं न गोत्रादिकृतं। स्त्री पुंवच्च। वृद्धा स्त्रीति। गोत्रप्रत्ययान्ता स्त्रीवाचकमित्यर्थः। पुंवद्भावकृतं वैलक्षण्यं स्फुटीकर्त्तुं द्विवचनान्तेन विग्रहमाह। गार्ग्यायणाविति। अनुवर्त्तमान इति। तद्राजस्य बहुषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुंवदित्यर्थातिदेशस्य फलमनेन दर्शितमन्यथा स्त्रीत्वस्यानिवर्त्तनाल्लुङ् स्यात् गार्ग्यौ इत्यत्र न त्वं च सिद्धं। रूपातिदेशे तु नैतत्सिध्येत् सामान्यातिदेशो विशेषानतिदेशादित्याहुः। वृद्धो यूनेत्यादावनुवर्त्तनान्नेह। गार्गी च वात्स्यायनी च॥ ॐ॥ पुमान् स्त्रिया। वृद्धो यूनेति निवृत्तं। सरूपाणामिति त्वनुवर्त्तते। भ्रातृपुत्रावित्युत्तरसूत्रारंभात्। तेन हंसश्च वरटा चेत्यत्र न भवत्यन्यथा स्यादेवातिप्रसंगः। हंसत्वजातिसाम्येन शब्दवैलक्षण्यस्य स्त्रीत्वपुंस्त्वमात्रप्रयुक्तत्वात्। स्यादेतत्। गौरियं गौश्चायं तयोस्सहोक्तौ एतौ गावाविति नियमतो न स्यात् तल्लक्षणविशेषाभावात् किंतु स्त्रीवाचकस्य पुंवाचकस्य वा सरूपाणामित्येकशेषः नियमेन स्यात्। अत्राहुः तदितरकृतविशेषाभावेनान्यर्थान्न दोष इति। इंद्रद्रुहणावित्या दौ त्वेकशेषो भवति। स्त्रीत्वपुंस्त्वेतरप्रयोगकृतविशेषस्य सद्भावात्। स्यादेतत्। एतौ गावाविति नियमतो न स्यादिति मनोरमायामुक्तं तल्कथं संगच्छतां। त्यदादितः शेषे पुन्नपुंसकत इति नियमप्रवृत्त्या स्त्रीवाचि गोशब्दस्य शेषेपि एतौ गावाविति नियमतः प्रयोगः सिद्ध्यत्येवेति चेदत्र केचित्। दिङ्मात्रप्रदर्शनमात्रमिदं। नीलो गावौ सुंदरौ गावाविति नियम

पुमान् स्त्रिया। १।२।६७। स्त्रिया सहोक्तौ पुमान् शिष्यते तल्लक्षण एव विशेषश्चेत्। हंसी च हंसश्च हंसौ। भ्रातृपुत्रौ स्वसृदुहितृभ्याम्। १।२।६८। भ्राता च स्वसा च। भ्रातरौ। पुत्रश्च दुहिता च। पुत्रौ। नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्। १।२।६९। अक्लीबेन सहोक्तौ क्लीबं शिष्यते तच्च वा एकवत्स्यात्तल्लक्षण एव विशेषश्चेत्। शुक्लः पटः। शुक्ला पटी। शुक्लं वस्त्रं। तदिदं शुक्लं। तानीमानि शुक्लानि॥ ॥ १९ नोन स्यादित्युदाहर्त्तव्यमथवा एत

च्छब्दो श्वा दृंतः कर्बुरवाची। एता श्व एता च एतौ गावौ कर्बुरौ गावौ सरूपाणामित्यनेन स्त्रीलिंगशेषे तु एते गावावित्यपि स्यादिति यथाश्रुतमेव समर्थनीयमित्याहुः। तदपरे न सहंते। त्यदादितः शेष इति नियमाऽप्रवृत्तावपि पुमान् स्त्रियेति नियमप्रवृत्त्या नीलो गावावेतौ गावाविति नियमतः सिध्यत्येवेति। अत्र वदंति। अद्वंद्वतत्पुरुषविशेषणानामित्येतन्न्यायसिद्धमेव वचनं विशेष्यवल्लिंगं तदेव विशेषणेष्वपीति सर्वसंमतत्वात्। एवं च द्वंद्वतत्पुरुषविशेषणेष्विव एकशेषविशेषणेष्वेतावित्यत्र त्यदादितः शेष इत्यादिनियमाऽप्रवृत्त्या विशेष्यगतमेव लिंगं भवतीति स्त्रीवाचीगोशब्दस्य शेषे एते इति स्यादेवेत्येतौ गावाविति नियमतो न स्यादित्याक्षेपः संगच्छत एवेति दिक्। नपुंसकमन। अन्यतरस्यांग्रहणमेकवच्चेत्यनेनैवानंतर्यात्संबध्यते न त्वेकशेषेणेत्याशयेनाह। क्लीबं शिष्यते तच्च वा एकवदिति। अनपुंसकेनेति किं। शुक्लं च शुक्लं च शुक्ले। अत्रैकवच्चेति न भवति। अग्रहणमस्यैवैकशेषस्य एकवद्भावो यथा विज्ञायेतेत्येवमर्थमन्यथा उत्तरत्राप्येकवदित्यस्यानुवृत्तिः शंक्येत। शुक्लः पट इत्यादि। शुक्लः शुक्ला शुक्लमित्येव विग्रहः पटः पटी

पितामात्रा। श्वशुरः श्वश्र्वा। नन्वेतत्सूत्रद्वयं व्यर्थं पितृशब्देन मातापित्रोः श्वशुरशब्देन तु श्वश्रूश्वशुरयोर्लक्षणया बोधसंभवात्। न च सरूपाणामित्यादि
सूत्रसमूहवदिदमपि सूत्रद्वयं द्वन्द्वनिवृत्त्यर्थमावश्यकमिति वाच्यं। पक्षे तस्यापि इष्टत्वादिति चेदत्राहुः। पितृश्वशुरशब्दयोरिव मातृश्वश्रूशब्दयोः केवलयोरुक्तविष
येप्रयोगवार पितुमारंभणीयमेव सूत्रद्वयमनभिधानमाश्रित्य प्रत्याख्यानस्यानुचितत्वादिति। मातापितराविति। पितुर्दशगुणं माता गौरवेणातिरिच्यत इति स्मृतेर्मा
तुरभ्यर्हितत्वात्पूर्वनिपातः। आनङृतो द्वन्द्व इत्यानङ्। श्वश्रूश्वशुराविति। श्वश्रूः पूर्वजपत्नी च मातृतुल्या प्रकीर्तितेति स्मृतेः श्वश्र्वा अभ्यर्हितत्वात्पूर्वनिपातः। त्यदादी
नि सर्वैः। सर्वैः किं। त्यदादिभिन्नैरपि सहोक्तौ यथा स्यात्। अन्यथा सत्यां त्यदादिभिरेव सहोक्ताविति अर्थो मा भूत्। यत्परमिति। शब्दपरविप्रतिषेधादिति भावः। त्यदादितर
पिता मात्रा। १।२।७०। मात्रा सहोक्तौ पिता वा शिष्यते। माता च पिता च। पितरौ। मातापितरौ वा। श्वशुरः श्वश्र्वा। १।२।७१। श्वश्र्वा सहोक्तौ श्वशुरो वा शि
ष्यते। श्वशुरौ। श्वश्रूश्वशुरौ। त्यदादीनि सर्वैर्नित्यम्। १।२।७२। सर्वैस्सहोक्तौ त्यदादीनि नित्यं शिष्यन्ते। स च देवदत्त
श्च। तौ। त्यदादीनां मिथस्सहोक्तौ यत्परं तच्छिष्यते। स च यश्च। यौ। क्वचित्पूर्वशेषोपि दृश्यत इति भाष्यात्। स च यश्च। तौ। त्यदादितः शेषे पुन्नपुंसकतो
लिङ्गवचनानि॥ सा च देवदत्तश्च। तौ। तच्च देवदत्ता च यज्ञदत्ता च। तानि। पुन्नपुंसकयोस्तु परत्वान्नपुंसकं शिष्यते। तच्च देवदत्तश्च। ते। अद्वन्द्वतत्पु
रुषविशेषणानामिति वक्तव्यं॥ कुक्कुटमयूर्याविमे। मयूरीकुक्कुटाविमौ। तच्च सा च अर्द्धपिप्पल्यौ ते॥ ॥ [illegible] ति। आद्यादित्वात्तसिः। त्यदादीनां शे
षे सहविवक्षितेषु यः पुमान् यच्च नपुंसकं तद्वशेन लिंगप्रतिपादकानि भवन्तीति वाच्यमित्यर्थः। कानीत्याकांक्षायामर्थात्त्यदादीन्येव। अस्यापवादमाह अद्वन्द्वेति। द्वन्द्वादिवि
शेषणानां पूर्वोक्तं न। किं तु विशेष्यनिघ्नमेवेत्यर्थः। नन्वेवं कुक्कुटमयूर्याविमेत्यत्र द्वन्द्वस्य उभयपदार्थप्रधानत्वेन उभययोरपि विशेष्यत्वात् विशेष्यनिघ्नतायामपि कुक्कुटमयूर्या
विमे इति नियमतो न स्यादिति चेदत्र नव्याः। परवल्लिंगमित्यनेन द्वन्द्वतत्पुरुषयोरुत्तरपदलिंगवत्त्वादुत्तरपदलिंगस्यैव द्वन्द्वतत्पुरुषप्रतिपादकत्वेन तल्लिंगाधीनत्वेनानुप्रयो
गस्येति न कदाचिदनुपपत्तिरिति। मयूरीकुक्कुटाविमाविति। प्रकृतानुपयुक्तमप्येतत्प्रसंगादुक्तं। तच्चेति। पिप्पल्यर्द्धं। साचेति अर्द्धपिप्पली तत्पुरुषविशेषणमुदाहर
ति अर्द्धपिप्पल्यौ ते इति। यद्यपि स्त्रीनपुंसकसाधारणास्ते इति प्रयोगस्थापि तत्र च सा च अर्द्धपिप्पल्यस्ता इत्युदा हरणमूह्यं॥

मु·
सि·कौ·
टी·त·
९८८

ग्राम्या ग्रामे भवा ग्राम्याः। ग्रामाद्यखञौ चेति यः। लिंगद्वयेपि गाव इति रूपस्य समानत्वात् स्त्रीलिंगशेषस्य फलमाह। इमा इति। एवं च इमे च इमाश्च इमा इति स्त्रीलिंगशेष एव भवति न त्वन्त्यदादितः शेषे पुंनपुंसकतो लिंगवचनानीति पुल्लिंगशेषः। गाव इमा इति भाष्योदाहरणादिति केचिदन्ये तु। ग्राम्यपशुसंघविषयत्वाद्विप्रो याज्ञा व इति वत्॥ इम

ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री। १।२।७३। एषु सहविवक्षायां स्त्री शिष्यते। पुमान् स्त्रियेत्यस्यापवादः। गाव इमाः। ग्राम्येति किं। रुरव इमे। पशुग्रहणं किं। ब्राह्मणा इमे। सङ्घेषु किं। एतौ गावौ। अतरुणेषु किं। वत्सा इमे। अनेकशफेष्विति वाच्यं। अश्वा इमे। इह सर्वत्र एकशेषे कृते नेकसुबन्ताभावाद्द्वन्द्वो नानेन शिरसी शिरांसीत्यादौ समासस्येत्यन्तोदात्तः। प्राग्वदेकवद्भावश्च न। पन्थानौ। पन्थान इत्यादौ समासान्तो न॥ इत्येकशेषः॥ कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः। परार्थाभिधानं वृत्तिः। वृत्त्यर्थावबोधकं वाक्यं विग्रहः। स द्विधा। लौकिकोऽलौकिकश्च। परिनिष्ठितत्वात्साधुर्लौकिकः। प्रयोगानर्होऽसाधुरलौकिकः। यथा। राज्ञः पुरुषः। राजन् अस् पुरुष सु इत्यविग्रहो नित्यसमासः। अस्वपदविग्रहो वा। समासश्चतुर्विध इति प्रायोवादः। अव्ययीभावतत्पुरुषबहुव्रीहिद्वन्द्वाधिकारबहिर्भूतानामपि सह सुपेति विधानात्। पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः। अन्यपदार्थप्रधानो बहुव्रीहिः। उभयपदार्थप्रधानो द्वन्द्वः। इत्यपि प्रायोभिप्रायः। सूपप्रति। उन्मत्तगङ्गमित्याद्यव्ययीभावे। अतिमालादौ तत्पुरुषे। द्वित्रा इत्यादिबहुव्रीहौ। दन्तोष्ठमित्यादिद्वन्द्वे चाभावात्। तत्पुरुषविशेषः कर्म्मधारयः। तद्विशेषो द्विगुः। अनेकपदत्वं द्वन्द्वबहुव्रीह्योरेव तत्पुरुषस्य क्वचिदेवेत्युक्तं। किञ्च। सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा। सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः॥ १॥

सुपा। राजपुरुषः। तिङा। पर्य्यभूषयत्। नाम्ना। कुम्भकारः॥ धातुना। कटप्रूः। अजस्रं। तिङां तिङा। पिबतखादता। खादतमोदता। तिङां सुपा। कृन्तविचक्षणेति यस्यां क्रियायां सा कृन्तविचक्षणा॥ एहीडादयोन्यपदार्थे इति मयूरव्यंसकादौ पाठात्समासः॥ ॥ इति सर्व्वसमासशेषः॥ ॥

इति च स्त्रीलिंगशेष एव स्यादिति। नात्रिपुंकावकाश इत्याहुः। एतौ गावाविति। एकशेषस्यानेकविषयत्वादेवानेकपरिग्रहे सिद्धे संघग्रहणसामर्थ्याद्द्वन्द्वानां समुदायोऽत्र गृह्यत इति भावः। एकशेषे कृते इति। विभक्त्युत्पत्त्यनपेक्षत्वेनांतरंगत्वादिति भावः। नन्वेवं विषयभेदात् द्वन्द्वापवाद एकशेष इत्युद्घोषः कथं प्रवर्त्तत इति चेदत्राहुः॥ 188

CC-0. In Public Domain. Digitization by eGangotri

यद्येकशेषो न स्यात्तर्हि विभक्तावुच्चार्यमाणायां द्वन्द्वः स्यात्क्ते त्वेकशेषे स न भवतीति तात्किं की भ्रान्तिमात्रायापवारो द्वन्द्वोपवर इति। द्वन्द्वो नेति। एतेन कृतद्वन्द्वानामेकशेष इति भ्रमो निर-
स्तः। न च तथैवास्तु फले विशेषाभावादिति वाच्यमित्याह तेनेति। तेनेति पंचम्यां नाविति। न चात्रेतोऽसर्वनामस्थान इति लिंगात्समासांतस्य परिहरः इतो दित्युक्तेऽपि सावित्यनुवृत्त्या पं-
ष्या इत्तिसिद्धेरिति वाच्यं पथो विभाषेति समासांताभावे अपंथा नाविन्याद्दितो दित्तिसूत्रस्य सावकाशत्वात् इत्येकशेषः। प्रसंगादाह। कृत्तद्धितेत्यादि। पंच वृत्तय इति। पंचानां
वृत्तिरिति पूर्वाचार्यसंज्ञा इत्याह्या श्रीपत इति भावः। तल्लक्षणमाह। परार्थेति। अन्यथा यो न प्रोवितं परपदार्थान्तर्भावेन वा पोविशिष्टोर्थस्तस्य परार्थस्य चाभिधीयते येन तत्परा-
र्थाभिधानं। अत एव तिङं तं वृत्तिर्न भवति। तत्रैकार्थीभावानभ्युपगमात् यथा भूदुपचतीत्यादौ फले भूदुत्वान्वयो न स्यात्सविशेषणानां वृत्तिर्न भवति वृत्तस्य च विशेषणायो-
गेनेत्यभ्युपगमादित्येके। समर्थसूत्रे कैयटस्त्वाह परस्परशब्दस्य योऽर्थस्तस्याभिधानं शब्दांतरेण यत्र सा वृत्तिरित्यर्थः यथा राजपुरुष इत्यत्र राजशब्देन वाक्यावस्थायां
अनुक्तः पुरुषार्थोऽभिधीयत इति। अविग्रह इति। लौकिकविग्रहरहित इत्यर्थः। अस्वपदेति। समस्यमानपदावत्यपदाघटित इत्यर्थः। द्वंद्वं तु च्वी त्योर वेति। अनेकग्रहणं

ऋक्पूरब्धूःपथामानक्षे। ५।४।७४। अ अनक्षे इतिच्छेदः। ऋगाद्यन्तस्य समासस्य अप्रत्ययो ऽन्तावयवः स्यात्। अक्षे या धूः तदन्तस्य तु नो-

त रन्तु वृत्तिभ्यां तद्विधानात् बहुपदसमासत्वं तयोरेव संभवतीति भावः। कुचिदेवेति। द्वन्द्वजात इत्यादौ। नाम्नेति। आतिथादिकेनेत्यर्थः। कुंभकार इति। अत्र हि सुब्रुक्तेः
प्रागेवोपपदसमासः कटप्रूरजस्वमिति। क्विब्वचि प्रच्छीति वार्त्तिकेन मिकं योतिसूत्रे चकच प्रुअजस इति निपातनात् तु न समासः। पिवतखादतेति आख्यातमाख्या-
तेनेति मयूरव्यंसकादेः पाठात्समासः॥ इति सर्वसमासशेषः॥ ॥ ऋक्पूर अ इति लुप्तप्रथमैकवचनांतं। समासांता इति लघिक्रियते तदाह। समासस्यावयवोन्तावयव इति
अनक्ष इत्येतत्सामान्यतः श्रुतमपि धुरैव संबध्यते सामर्थ्यान्नान्यैरित्याशयेनव्याचष्टे। अक्षे या धूरिति। तदंतस्य तु नेति। सूत्रे संबंधिनोधिकरणत्वविवक्षया सप्तमी। तेनाक्षसंबंधि-
नीया धूस्तदंतस्य नेत्यर्थः। यद्यत्राक्षे पूर्वपदे नेति व्याख्यायेत तर्हि दृढधूरक्षः इत्यत्र निषेधो न स्यात्। यदि त्वक्षसमासार्थेनेति व्याख्यायेत तदा अक्षधूरित्यत्र न स्यात्तस्मादुभयसं-
ग्रहार्थमुक्तं व्याख्यानमेव ज्यायः। अर्धर्चं इति। अर्धं नपुंसकमिति समासः। अर्द्धर्चाः पुंसि चेति पुंस्त्वं॥ अनृगित्यादि। अनुक्तसमासांतत्वाच्छेषाद्विभाषेति कप्प्रत्यये न क्वचवृक्तमित्यपि बो-

अर्द्धर्च. अनृच बह्वृ वा व ध्यतस्ध्यवने ह अन् कसाम। बह्वृकसूक्तं। वि श्लोः पूः। त्रू. मू.॥ ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि.कौ.
टी.त.
१६०

विष्णुपुरमिति। यद्यपि पुरशब्देन समासे ऽप्येतन्सिध्यति तथापि विष्णुपूरित्यनिष्टवारणाय सूत्रे पू ग्रहणं। कृतसमासांतस्येति। येन विधिरिति सूत्रे आपस्तिष्ठंति स्वापस्तिष्ठंतीति भा
ष्यादिति भावः। अंतरीपमित्यादि अंतर्गताः प्रतिकूलाः संगताश्चापो ऽस्मिन्निति विग्रहः। उपसर्गग्रहणं प्रादेरुपलक्षणार्थं समाप इति। अनुपसर्गत्वान्नेत्वमिति भावः।
भाष्ये तु समापईत्वप्रतिषेधो वक्तव्य इत्युक्तं स च देवयजनरूपविशेषार्थपरः समीपसमृद्धीति निर्देशात्समीपमिति भाष्योदाहरणाच्चेति ज्ञेयं देवयजनमि
ति द्वि वा इत्यं ते ऽस्मिन्निति स्रुत्यन्न्यायत्तभूमिः। स्वविति। न पूजनादिति समासांता भावः। अवर्णान्ताद्वेति। ह्यंतरिति सूत्रे ईत्वमनवर्णादिति वक्तव्यं इह मा भूत्। प्राप्
परा पमिति भाष्योक्तेः। गतिश्चेति सूत्रे प्रेपंपरेपमिति भाष्योक्तेश्चेति भावः। उदनोः। दीर्घोच्चारणं कचिछाखायामवग्रहार्थं। वद्धाचास्तु अनूपे गोमान् गोभिरित्यत्रानूपशब्दं

विष्णुपुरं। क्लीबत्वं लोकात्। विमलापं सरः। द्व्यन्तरुपसर्गेभ्यो ऽप ईत्। ६।३।९७। अप इति कृत समासान्तस्यानुकरणं। षष्ठ्यर्थे प्रथमा एभ्यो ऽपस्य
ईत्स्यात्। द्विर्गता आपो यस्मिन्निति। द्वीपं। अन्तरीपं। प्रतीपं। समीपं। समापो देवयजनमिति तु। समा आपो यस्मिन्निति बोध्यं। कृतसमासान्तग्रह
णान्नेह। स्वप्स्वपी। अवर्णान्ताद्वा। प्रेपं। परेपं। प्रापं। परापं। ऊदनोर्देशे। ६।३।९८। अनोः परस्यापस्य ऊत्स्याद्देशे। अनूपो देशः। राजधुरा। अ
क्षे तु। अक्षधूः। दृढधूरक्षः। सखिपथो रम्यपथो देशः। अच् प्रत्यन्ववपूर्वात्सामलोम्नः। ५।४।७५। एतत्पूर्वात्सामलोमान्तात्समासादच् स्यात्। प्र
तिसामं। अनुसामं। अवसामं। प्रतिलोमं। अनुलोमं। कृष्णोदक्पाण्डुसंख्यापूर्वाया भूमेरजिष्यते॥ कृष्णभूमः। उदग्भूमः। पाण्डुभूमः। द्विभूमः प्रा
सादः। संख्याया नदीगोदावरीभ्यां च॥ पञ्चनदं। सप्तगोदावरं। अजिति योगविभागादन्यत्रापि। पद्मनाभः॥ ९ नावगृह्णंति। अनूप इति। अनु

गता आपो ऽस्मिन्नित्यनूपो देशः। जलप्रायमनूपं स्यादित्यमरः। प्रतिसाममिति। अव्ययीभावः प्रादिसमासो वहुव्रीहिर्वा। एवमनुसमादावप्यूह्यं। कृष्णोदगिति। अजि
तियोगविभागेन गतार्थमिदं। एवमुत्तरवार्तिकमपि कृष्णभूम इत्यादयो वहुव्रीहयः। पद्मनाभ इति। पद्मं नाभावस्येति विग्रहः। गङ्गादित्वा त्सप्तम्यंतस्य परनिपातः
पद्माकारा नाभिरस्येति वा। एवमूर्णनाभो ऽपि ज्ञेयः। तत्र तु ऊर्णायोः संज्ञाछंदसोरिति ह्रस्वो विशेषः॥ ॥ ॥

189

अक्ष्णो। दृश्यतेऽनेनेति दर्शनं चक्षुस्तद्वाचिनोऽक्षिशब्दस्य पर्युदासात् मुख्यस्य ग्रहणमित्याशयेनाह अचक्षुःपर्यायादिति गवाक्ष इति गावः किरणाः अक्षिशब्दोऽरंध्रवाची षष्ठी
समासः अचतुरनिपात्यन्त इति निपातनफलं तु समासविशेषनियमः टिलोपादिकं च तदाह आद्या इति बहुव्रीहय इति बहुव्रीहय एवेत्यर्थः तेन तत्पुरुषे अचत्वारो वि

अक्ष्णोऽदर्शनात्। ५।४।७६॥ अचक्षुःपर्यायादक्ष्णोऽच् स्यात्समासान्तः। गवामक्षीव। गवाक्षः। अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सा
मवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धो
क्षोपशुनगोष्ठश्वाः। ५।४।७७॥ एते पञ्चविंशतिरजन्ता निपात्यन्ते। आद्यास्त्रयो बहुव्रीहयः। अविद्यमानानि चत्वार्यस्य। अचतुरः। विचतुरः। सुच
तुरः। त्र्युपाभ्यां चतुरोऽजिष्यते। त्रिचतुराः। चतुर्णां समीपे। उपचतुराः। ततएकादश द्वन्द्वाः। स्त्रीपुंसौ। धेन्वनडुहौ। ऋक्सामे। वाङ्मनसे। अक्षिणी
चभ्रुवौ च। अक्षिभ्रुवं। दाराश्च गावश्च। दारगवं। ऊरू च अष्ठीवन्तौ च। ऊर्वष्ठीवं। निपातनाट्टिलोपः। पदष्ठीवं। निपातनात्पादशब्दस्य पद्भावः। नक्तं
च दिवा च। नक्तंदिवं। रात्रौ च दिवा च। रात्रिंदिवं। रात्रेर्मान्तत्वं निपात्यते। अहनि च दिवा च। अहर्दिवं। वीप्सायां द्वन्द्वो निपात्यते। अहन्यहनीत्यर्थः
सरजसमिति साकल्येऽव्ययीभावः। बहुव्रीहौ तु। सरजः पङ्कजं। निश्चितं श्रेयः। निःश्रेयसं। तत्पुरुष एवेनेह। निःश्रेयान् पुरुषः। पुरुषस्यायुः। पुरुषायुषं
तत्तो द्विगूः। द्व्यायुषं। त्र्यायुषं। ततो द्वन्द्वः। ऋग्यजुषं। ततस्त्रयः कर्मधारयाः। जातोक्षः। महोक्षः। वृद्धोक्षः। शुनः समीपं। उपशुनं। टिलोपाभावः सा
म्प्रसारणं च निपात्यते। गोष्ठे श्वा। गोष्ठश्वः। ब्रह्महस्तिभ्यां वर्चसः। ५।४।७८॥ अच् स्यात्। ब्रह्मवर्चसं। हस्तिवर्चसं। पल्यराजभ्यां चेति वक्तव्यं
पल्यवर्चसं। राजवर्चसं। अवसमन्धेभ्यस्तमसः। ५।४।७९॥ अवतमसं। सन्तमसं। अन्धयतीत्यन्धं। पचाद्यच्। अन्धं तमः। अन्धतमसं॥

चत्वार इत्येवं भवतीति भावः एवमुत्तरत्राप्यवधारणमूह्यं त्रिचतुरा इति त्रयश्चत्वारो वेति विग्रहः संख्ययाऽव्ययेति बहुव्रीहिः बहुव्रीहौ संख्येय इति डचोऽपवादोऽच् अक्षिभ्रुव
मिति प्राण्यङ्गत्वादेकवत् ऊरू चाष्ठीवन्तौ चेति सक्थि क्लीबे पुमानूरुरित्यमरः जानूरुपर्वाष्ठीवदस्त्रियामिति च ऊर्वष्ठीवपदष्ठीवमिति प्राण्यङ्गत्वादेकवद्भावः द्वन्द्वे निपात

श्री
सि·कौ·
टी·त·
१९१

विरूपाणामपीत्येकशेषं वाधित्वेति शेषः सरजसमिति अव्ययीभावे चाकाले इति सहस्य सभावः सरजः पंकजमिति सरजसमकरं इति निर्भराल्लिनि माघप्रयोगस्तु चिंत्य इति भावः निः
श्रेयानिति निश्चितं श्रेयो येनेति विग्रहः निःश्रेयस इति केषांचिन्नमुदाहरणमशुद्धं ईयस श्चेति कपो निषेधात् गोष्ठे श्वेति एतेन समासमीत त्पुरुषएवेति नियमो दर्शितस्तेन षष्ठी

श्वसो वसीय श्रेयसः।५।४।८०॥ वसुशब्दः प्रशस्तवाची। ततः ईयसुनि वसीयः। श्वस्शब्द उत्तरपदार्थ प्रशंसामाशीर्विषयतामाह। मयूरव्यंसकादित्वा
त्समासः। श्वोवसीयसं। श्वः श्रेयसं ते भूयात्। अन्ववतप्ताद्रहसः।५।४।८१॥ अनुरहसं। अवरहसं। तप्तरहसं। प्रतेरुरसः सप्तमीस्थात्।५।४।८२॥ उर
सि प्रति। प्रत्युरसं। विभक्त्यर्थेऽव्ययीभावः। अनुगवमायामे।५।४।८३॥ एतन्निपात्यते दीर्घत्वे। अनुगवं यानं। यस्य चायाम इति समासः। द्विस्तावा त्रिस्तावा
वेदिः।५।४।८४॥ अच्प्रत्यये टिलोपः समासश्च निपात्यते। यावती प्रकृतौ वेदिः ततो द्विगुणा त्रिगुणा वाऽश्वमेधादौ तत्रेदं निपातनं। वेदिरिति किं॥
द्विस्तावती। त्रिस्तावती रज्जुः। उपसर्गादध्वनः।५।४।८५॥ प्रगतोऽध्वानं। प्राध्वो रथः। न पूजनात्।५।४।६९॥ पूजनार्थात्परेभ्यः समासान्ता न स्युः। सुराजा
अतिराजा। स्वतिभ्यामेव॥ नेह। परमराजः। पूजनात्किं। गामतिक्रान्तोऽतिगवः। बहुव्रीहौ सक्थ्यक्ष्णोरित्यतः प्रागेवायं निषेधः। नेह। सुसक्थः। स्व
क्षः। किमः क्षेपे।५।४।७०॥ क्षेपे यः किम्शब्दस्ततः परं यत्तदन्तात्समासान्ता न स्युः। कुत्सितो राजा। किंराजा। किंसखा। किंगौः। क्षेपे किं। किंराजः। किंस
खः। किंगवः। नञस्तत्पुरुषात्।५।४।७२॥ समासान्तो न। अराजा। असखा। तत्पुरुषात्किं। अधुरं शकटं। पथो विभाषा।५।४।७२॥ नञ्पूर्वात्पथो वा
समासान्तः। अपथम्। अपन्थाः। तत्पुरुषादित्येव। अपथो देशः। अपथं वर्त्तते॥ इति समासान्ताः॥ ॥ ९ तत्पुरुषे गोष्ठश्वेत्येव ब्रह्मवर्चसमिति ष
ष्ठीतत्पुरुषः एवं हस्तिवर्चसमपि पल्येति पलं मांसमर्हतीति पल्यो मांसभोजी तदीयं वर्चः पल्यवर्चसं अवतमसमित्यादि अवहीनं संततं चतम इति विग्रहः अंधयतीति
अंधः इत्युपघाते चुरादिः अंधमिति गाढमित्यर्थः॥ ःःः॥ श्वसो वसुशब्दान्प्रशस्तवचना दीयसुनि त्याकरविरुद्धं व्याचक्षाणा उपेक्ष्या इति ध्वनयति वसुशब्द इति॥
वसीय इति यः कामयेत वसीयान् स्यामिति श्रौत प्रयोगोप्यत्र अनुकूल इति भावः श्वस्शब्द इति कालवाच्यप्ययं प्रकृते त्वर्थविशेषपरः शक्तिस्वभावात्तमेवाह॥ १९०

उत्तरपदार्थप्रशंसामिति उत्तरपदार्थभूतां प्रशंसामित्यर्थः आशीर्विषयमिति षष्ठीसमासः विषयशब्दस्याजहल्लिंगत्वान्पुंल्लिंगनिर्देशः उत्तरपदार्थप्रशंसाया आशीर्वि
षयतामाहेति पाठांतरं क्वचिदस्ति उभयथापि विषयता याद्योतकोयमिति फलितोर्थः अन्ववरहं रहं इत्यत्र काश्म उच्यते अनुगतमवहीनं चरहं इति प्रादिसमासः अनुग
तं रहोस्मिन्नित्यादि बहुव्रीहिर्वा तप्तरहसमिति तप्तं च तद्रहश्चेति विग्रहः परेणानधिगम्यमित्यर्थः इत्यतः प्रागिति प्राग्बहुव्रीहिग्रहणं कर्त्तव्यमिति वार्त्तिकोक्तेरिति
भावः किमः क्षेपे क्षेपग्रहणमिह शक्यमवक्तुं प्रत्ययोक्तपरिभाषया किं क्षेपे इति विहितसमासस्यैव ग्रहणात् किंराजइत्यादि किमत्र प्रश्ने षष्ठीसमासः कर्मधारयो
वा नञ्तत्पुरुषात् नञ इति षष्ठी नञः संबंधी यस्तत्पुरुषः नञवयवकस्तस्मादित्यर्थः अपथमिति नस्तद्धित इति टिलोपः अपथं नपुंसकमिति क्लीवत्वं अपथं वर्त्त
त इति अर्थाभावेऽव्ययीभावः॥ इति सकलसमाससाधारणाः समासांताः ॥ अलुक्स्यादिति प्रसज्यप्रतिषेधोयं सुपो धात्वित्यादिना प्राप्तो लुङ् भवतीत्यर्थः सो

अलुगुत्तरपदे ६।३।१ अलुगधिकारः। प्राग् आनङः उत्तरपदाधिकारस्त्वापादसमाप्तेः। पञ्चम्याः स्तोकादिभ्यः ६।३।२ एभ्यः पञ्चम्या अलुक् स्यादुत्तरप
दे। स्तोकान्मुक्तः एवमल्पान्तिक दूरार्थ कृच्छ्रेभ्यः। उत्तरपदे किं निःस्तोकः। स्तोकान्निःस्तोकः। ब्राह्मणाच्छंसिन उपसंख्यानम्। ब्राह्मणे विहितानि शा
स्त्राणि उपचारात्। ब्राह्मणानि तानि शंसतीति। ब्राह्मणाच्छंसी ऋत्विग्विशेषः। द्वितीयार्थे पञ्चम्युपसंख्यानादेव॥ ९ कान्मुक्त इति समासप्रयोजनमे
कपदैकस्वर्यविशेषणयोगाभावश्च किंच स्तोकान्मुक्तस्यापत्यं स्तौकान्मुक्तिः स्तोकान्मुक्ताया स्तौकान्मुक्तेय इति समुदायात्तद्धितोत्पत्तिरपि प्रयोजनं च प्राथमिकसामासि
कलुको निषेधेन चरितार्थत्वाद्यास्तद्धितनिमित्तो लुग्दुर्वार इति चेन्नैकं सुपो धात्विति शास्त्रस्यैकत्वाद्विशेषणालुग्ग्रहणस्यापि निषेधाभ्युपगमात् इह स्तोकांतिकेति समास
शास्त्रपठितान्येव स्तोकादयो गृह्यंते न तु करणे च स्तोकाल्पकृच्छ्रेति सूत्रपठिताः समासे सुपो लुकि प्रसक्ते विधीयमानेनालुक्शास्त्रेण समासशास्त्रपठितानामविलंबे
नोपस्थितेर्व्याप्तिन्यायाच्च स्तोकांतिकेत्यत्र स्वार्थग्रहणादन्यान्यपि बहूनि गृह्यंते तेनेदं तन्मनसि निधायाह एवमिति द्विवचनबहुवचनांतानां तु समासो नेष्यते अन
भिधानात्तेन स्तोकाभ्यां मुक्त इत्यादौ वाक्यमेव शास्त्राणीति प्रगीतमंत्रसाध्यगुणनिष्ठगुणाभिधानं स्तोत्रं अप्रगीतमंत्रसाध्यगुणनिष्ठगुणाभिधानं शस्त्रमिति याज्ञिकाना

CC-0. In Public Domain. Digitization by eGangotri

सु॰

सि॰कौ॰ ओजस्स ओजसा कृतमिति कर्तृकरणे कृतेति समासः कथं तर्हि सततनैशतमोवृतमन्धतरति भारविः अत्राहुः वृत्तु वर्त्तने इत्यस्माद्धन्नर्थे कविधानमिति भावे कप्रत्ययेन
टी॰त॰ इते न षष्ठीसमासाश्रयणान्न दोष इति यत्तु केवलपदाधिकार एव तदंतविधिर्न तूत्तरपदाधिकारे तथा च नैशतमसेति तृतीयाया अलुङ्न भवतीति दुर्घटवृत्त्यादावुक्तं त
९६२ त्र पदांगाधिकार इत्यत्र इष्टकचितं पक्वेष्टकचितमिति भाष्योदाहरणादुत्तरपदाधिकारेपि तदंतविधिप्रवृत्तेः जनुषेति जनुर्जननजन्मानीत्यमरः आत्मनापंचम इति
तृतीयेति योगविभागात् समासः इह प्रकृत्यादित्वात्प्रथमार्थे तृतीयेत्येके आत्मना कृतः पंचम इति करोतिक्रियापेक्षासेत्यन्ये बहुव्रीहिर्वा ध्य इति एकस्याप्योपाधिकभेदं परिक
ल्प्य वर्तिपदार्थत्वमन्यपदार्थत्वं च विवक्षणीयमिति भावः वैयाकरणोव्याकरणेभवा वैयाकरणी अण् श्रगयनादिभ्य इत्यण् सा चासावाख्या चेति कर्मधारयः आत्म

ओजस्सहोऽम्भस्तमसस्तृतीयायाः। ६।३।३। ओजसाकृतमित्यादि। अञ्जस उपसंख्यानं। अञ्जसा कृतं। आर्जवेन कृतमित्यर्थः। पुंसानुजोऽजनुषा
न्ध इति च। यस्याग्रजः पुमान्। सपुंसानुजः। जनुषान्धो जात्यन्धः। मनसस्संज्ञायाम्। ६।३।४॥ मनसागुप्ता। आज्ञायिनि च। ६।३।५। मनस इत्ये
वा मनसाज्ञातुं शीलमस्य। मनसाज्ञायी। आत्मनश्च। ६।३।६॥ आत्मनस्तृतीयाया अलुक्स्यात्। पूरण इति वक्तव्यं॥ पूरणप्रत्ययान्ते उत्तरपदे
इत्यर्थः। आत्मनापञ्चमः। जनार्दनस्त्वात्मचतुर्थ एवेति बहुव्रीहिर्वोध्यः। पूरणे किं। आत्मकृतं। वैयाकरणाख्यायाञ्चतुर्थ्याः। ६।३।७ आत्मन इ
त्येव। आत्मनेपदं। आत्मनेभाषा। तादर्थ्ये चतुर्थी। चतुर्थीति योगविभागात्समासः। परस्य च। ६।३।८। परस्मैपदं। परस्मैभाषा। हलदन्तात्सप्तम्याः संज्ञा
याम्। ६।३।९। हलंतादंतात्सप्तम्या अलुक्स्यात्संज्ञायां॥ त्वचिसारः॥ ॥ ९ नइत्येवेति इहात्मन इत्यनुवर्त्य वैयाकरणाख्यायां चतुर्थ्या अलुगि
ति व्याख्यानेतु परस्य चेत्युत्तरसूत्रं त्यक्तुं शक्यमित्याहुः आत्मनेभाषा इति यद्यपीयमाख्या अष्टाध्याय्यां नास्ति तथापि धातुपाठेऽस्तीति भावः प्रकृतिविकृतिभावविरहादिं
धनाय स्थालीतिवत्समासाभावमाशंक्याह योगविभागादिति इह लुग्विधिसामर्थ्यादपि समासस्सुवचः परस्य च परस्मैव्द स्य च यया चतुर्थीनस्याः अलुक्स्याद्वैयाकरणाख्या

193

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गवियुधिभ्यां स्थिरः । गव्यादौ यमजिरशिशिरे त्यौणादिकः किरच् अन्यथा तु न सिद्धेत् निर्णयः स्यादन्यदा द्योरिति निषेधे प्राप्ते वचनारंभः । गवीति वचनादेवेति न च लुकं बाधित्वा परत्वादंतरंगत्वाच्च षत्वादेशो हल
दंतात्सप्तम्या इत्येवालुक् सिध्यतीति वाच्यं अंतरंगानपि विधीन् बहिरंगो लुग् बाधत इति लुको बलीयस्त्वादिति भावः हृदिस्पृगिति हृदयं दिवं च स्पृशतीति विग्रहः अलुग्विधिसामर्थ्यात्कर्मणि सप्तमी

गवियुधिभ्यां स्थिरः । ६।३।९ । आभ्यां स्थिरस्य सस्य षः स्यात् । गविष्ठिरः । अत्र गवीति वचनादेवाऽलुक् । युधिष्ठिरः । अरण्येतिलकाः । अत्र संज्ञायामिति सप्तमीसमासः । इ
द्युभ्यां च । हृदिस्पृक् । दिविस्पृक् । कारनाम्नि च प्राचां हलादौ । ६।३।१० । प्राचां देशे यत्कारनाम तत्र हलादावुत्तरपदे हलदन्तात्सप्तम्या अलुक् । मुकुटेकार्षाप
णं । दृषदिमाषकः । पूर्वेण सिद्धे नियमार्थं । कारनाम्न्येव प्राचामेव हलादावेवेति । कारनाम्नि किं । अभ्याहितपशुः । कारादन्यस्मै तद्देयस्य नाम । प्राचां किं । यूथप
शुः । हलादौ किं । अविकटोरणः । हलदन्तात् किं । नद्यां दोहः नदीदोहः । मध्याद्गुरौ । ६।३।११ । मध्येगुरुः । अन्ताच्च । अन्तेगुरुः । अमूर्द्धमस्तकात्स्वाङ्गादकामे ।
६।३।१२ । कण्ठेकालः । उरसिलोमा । अमूर्द्धमस्तकात् किं । मूर्द्धशिखः । मस्तकशिखः । अकामे किं । मुखे कामोऽस्य । मुखकामः । बन्धे च विभाषा । ६।३।१३ । हल
दन्तात्सप्तम्या अलुक् । हस्तेबन्धः हस्तबन्धः । हलदन्तेति किं । गुप्तिबन्धः । तत्पुरुषे कृति बहुलम् । ६।३।१४ । स्तम्बेरमः । स्तम्बरमः । कर्णेजपः । कर्णजपः । क्व
चिन्न । कुरुचरः । प्रावृट्शरत्कालदिवां जे । ६।३।१५ । प्रावृषिजः । शरदिजः । कालेजः । दिविजः । पूर्वस्यायमपवादः । विभाषा वर्षक्षरशरवरात् । ६।३।१६ । एभ्य
सप्तम्या वा अलुक् जे । वर्षेजः । वर्षजः । क्षरेजः । क्षरजः । शरेजः । शरजः । वरेजः । वरजः । घकालतनेषु कालनाम्नः । ६।३।१७ । सप्तम्या विभाषाऽलुक् स्यात् । पूर्वा
ह्णेतरे । पूर्वाह्णतरे । पूर्वाह्णेतमे । पूर्वाह्णतमे । कालेपूर्वाह्णेकाले । पूर्वाह्णकाले । तने । पूर्वाह्णेतने । पूर्वाह्णतने । शयवासवासिष्वकालात् । ६।३।१८ । खेशयः ।
खशयः । ग्रामेवासः । ग्रामवासः । ग्रामेवासी । ग्रामवासी । हलदन्तादित्येव । नेह भूमिशयः । अपो योनियन्मतिषु । अप्सुयोनिरप्सन्निर्यस्य । सोऽप्सुयोनिः । अ

कर्मणोऽधिकरणत्वविवक्षया वा । अविकटोरण इति संघातेन कटजित्ति कृटच् अन्यथा तु उरणो मेषः बंधे च विभाषा बंध इति घञन्तः हस्तेबंधः इति बहुव्रीहिरयं तत्पुरुषे तु नेन्
सिद्धबध्नातिषु चेति वक्ष्यमाणेन निषेध एवेत्याहुः अप्सव्य इति दिगादित्वाद्यत् ओर्गुणे नां तादेशः प्राचां तु यतः स्थाने जं पठित्वा अप्सुज इत्युदाहृतं तन्नदाकरविरुद्धं जे चरेच

सु.

सि.कौ. अप्सुजः अप्सुचर इति भाष्यवचनान्तरदर्शनाच्च केचित्तु अप्सुज इत्यत्र सप्तम्या हलदन्तादित्यलुकमाहुः ॥ ॥ अप्सुमन्त्रावितिकारीर्यामश्चेत्येष विद्वान् अप्सुमेसोमो अब्रवीदित्यादौ

टी.त. भागमन्त्रौ सः तत्र स्वसुप्रब्देसतीति तद्वारा आज्यभागयोरप्सुमन्त्रशब्दाचानुमतिर्विनिपठित्वा अप्सुमतिरिप्सुदाहृतं अत्र केचित् अविन्नेनेतदनुकरणशब्दः सतसम्यंगो वा आवेसप

९८३ स्यतात्मयमायाभावेन मतुर्वेवदुर्लभः अंश्येतुलुकः प्राप्तिरेव नास्ति सप्तम्यभावात्तथा च मति विवितिप्राचोक्तः पाठ एव युक्तः न च स पाठो भाष्यादौ न दृष्ट इति वाच्यं मति विवितिपाठस्या

प्सुमतिरित्युदाहरणस्य च भाष्यवृत्त्यादिपुस्तकेषु दृश्यमानत्वेन मतुविवितिपाठस्यैव काप्यदर्शनात्स्यर्थत्वाच्च अस्य वामीयं कया शुभीयमित्यादावेवलुकि कर्तव्ये प्रकृतिवद्

अप्सुमन्त्रावाऽऽज्यभागौ तेन स्विष्टवद्भावितिपुवाद ६।३।१८। इत्र्त्तादिभ्यः सप्तम्या अलुग्मा स्थण्डिलशायी। साङ्काश्यसिद्धः। चक्रबंधः। स्थेचभाषायामाह

।६।३।२०। सप्तम्या अलुग्मा समस्यः। भाषायां किं। कृष्णोऽस्यास्वेषः। षष्ठ्या आक्रोशे ६।३।२१। चोरस्यकुलं। आक्रोशे किं। ब्राह्मणकुलं। वाग्दिक्पश्यद्भ्यो

युक्तिदण्डहरेषु। वाचोयुक्तिः। दिशोदण्डः। पश्यतोहरः। आमुष्यायणोऽऽमुष्यपुत्रिकाऽऽमुष्यकुलिकेति च। अमुष्यापत्यं। नडादित्वात्फक्।

अमुष्यपुत्रस्य भावः आमुष्यपुत्रिका। मनोज्ञादित्वाद्वुञ्। एवमामुष्यकुलिका। देवानांप्रिय इति च मूर्खे। अन्यत्र देवप्रियः। शेपपुच्छलाङ्गूलेषु शुनः। शु

नःशेपः। शुनःपुच्छः। शुनोलाङ्गूलः। दिवश्च दासे। दिवोदासः। पुत्रेऽन्यतरस्याम्। ६।३।२२। षष्ठ्याः पुत्रे परे लुग्वा निन्दायां। दास्याःपुत्रः। दासीपु

त्रः। निन्दायां किं। ब्राह्मणीपुत्रः। ऋतो विद्यायोनिसम्बन्धेभ्यः ६।३।२३। विद्यासम्बन्धयोनिसम्बन्धवाचिन ऋदन्तात्षष्ठ्या अलुक्। होतुरन्तेवासी।

पितुःपुत्रः। विद्यायोनिसम्बन्धेभ्यस्तत्पूर्वोत्तरपदग्रहणं नेह। होतृधनं। पितृगृहं। विभाषा स्वसृपत्योः ६।३।२४। ऋदन्तात्षष्ठ्या अलुग्वा स्व

नुकरणमित्यादि द्रष्टव्यं वृत्त्येवेष्टसिद्धेरित्याहुः नेनसिद्धवा चक्रबंध इति तत्पुरुषे इत्यनुवृत्तेस्तत्पुरुष एवायं निषेधः बहुव्रीहौ बंधे च विभाषेति विकल्पः

वपश्यतोहर इति पश्यन्तमनादृत्य हरतीत्यर्थः षष्ठी चानादर इति षष्ठी देवानामिति मूर्खो हि देवानां प्रीतिं जनयन्तीति देवप्रभुत्वादिति मनोरमा अयं भावः ब्रह्म

ज्ञानरहितत्वात्संसारिणो मूर्खास्ते तु यागादिकर्मण्यनुतिष्ठन्तः पुरोडाशादिप्रदानद्वारा देवानामत्यन्तं प्रीतिं जनयन्ति ब्रह्मज्ञानिनस्तु न तथा तेषां यागाद्यनुष्ठानाभा

ष्यान्तावन्न त्वान्मूर्धन्य एव दृश्यत इति । अपि पुच्छे निशुनः शेपमस्य शुनःशेपः । यद्यपि शेपशब्दः सकारान्तः गोर्लिङ्गं चिन्हं शेपः सारित्यमरप्रयोगात् तथापि शीङोऽनिं पादिता दौ णादिकेऽपप्रत्यये अकारान्तोऽप्यस्त्येव तथा च मन्त्रः यस्या मुष्कं तः प्रहराम शेपमिति चिन्हं शेफ सारि इति पाठे तु शेपशब्दस्य सकारान्तत्वशङ्कैव नास्तीति बोध्यं शुनःपुच्छ

मातुःपितुर्भ्यामन्यतरस्याम् ।८।३।८५। आभ्यां स्वसुः सस्य षो वा स्यात् समासे । मातुःष्वसा । मातुःस्वसा । पितुःष्वसा । पितुःस्वसा । लुक्यसे तु । मातृपितृभ्यां स्वसा ।८।३।८४। आभ्यां परस्य स्वसुः सस्य षः स्यात् समासे । मातृष्वसा । पितृष्वसा । असमासे तु । मातुः स्वसा । पितुः स्वसा । इत्यलुक्समासाः । घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः ।६।३।४३। भाषितपुंस्काद्यो ङीप् तदन्तस्याऽनेकाचो ह्रस्वस्स्यात् घ रूप कल्प प्रत्ययेषु चेलडादिषु चोत्तरपदेषु । ब्राह्मणितरा । ब्राह्मणितमा । ब्राह्मणिरूपा । ब्राह्मणिकल्पा । ब्राह्मणिचेली । ब्राह्मणिब्रुवा । ब्राह्मणिगोत्रेत्यादि । ब्रूञः पचाद्यच् । वच्यादेशाभावो निपात्यते । चेलडादीनि कृत्तद्धितविषये कुत्सनवाचीनि तैः कुत्सितानि कुत्सनैरिति समासः । ङ्यः किं । दत्तातरा । भाषितपुंस्कात् किं । आमलकीतरा । कुवलीतमा । नद्याः शेषस्यान्यतरस्याम् ।६।३।४४। अङ्यन्तनद्याः ङ्यन्तस्यैकाचश्च घादिषु ह्रस्वो वा स्यात् । ब्रह्मबन्धुतरा । ब्रह्मबन्धूतरा । स्त्रीतरा । स्त्रितरा । कृन्नद्या न । लक्ष्मीतरा । उगितश्च ।६।३।४५। उगितः परा या नदी तदन्तस्य घादिषु ह्रस्वो वा स्यात् । विदुषितरा । ह्रस्वाभावपक्षे तसिलादिष्विति पुंवत्त्वात् । विद्वत्तरा । घादिषु विदुषीतरेत्यप्युदाहृतं तन्निर्मूलं । हृदयस्य हृल्लेखयदण्लासेषु ।६।३।५०। हृदयं लिखतीति हृल्लेखः । हृदयस्य प्रियं हृद्यं । हृदयस्येदं हार्दं । हृल्लासः । लेखेत्यणन्तस्य ग्रहणं । घञि तु । हृदयलेखः । लेखग्रहणमेव ज्ञापकं । उत्तरपदाधिकारे तदन्तविधिर्नास्तीति । वा शोकष्यञ्रोगेषु ।६।३।५१। हृच्छो

इत्यादावपि बहुव्रीहिः त्रयोप्यमी ऋषिविशेषाणां संज्ञाः ॥ ❀ ॥ मातुःपितुर्भ्यामिति सूत्रे समासे गुल्लेखं गदृत्यत्र समासस्यानुवर्तितं तत्फलं दर्शयति असमासे त्विति वाक्ये वैकल्पिकमपि मत्वं नेत्यर्थः ॥ ॥ इत्यलुक्समासः ॥ ॥ घरूपकल्पेत्यत्र तरप्तमपौ घः प्रशंसायां रूपप् चेलड्समने चेलडिति पचादौ टित्त्वमत्त्वेन ङी वर्धयश्च यमिति लेखग्रहणेनोत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति ज्ञापयिष्यत इति भावः ॥

CC-0. In Public Domain. Digitization by eGangotri





न्नासलिनत्तरेतिजातेश्चेतिनिषेधान्नसिलादिधितिनपुंवद्भावः चेलीतिपचादेश्चेलडितिपाणिनरिङ्डीप्आमलकीति आमलकीकुवलीशब्दौ वृक्षेनित्यस्त्रीलिंगौन
द्याः उक्तादन्यःश्रेवःसचहिघेत्याह अडितेतिउपलक्षणमेतनभावितपुंस्केत्यपिनेहसंवध्यतेइत्याशयेनाहस्त्रीतरेतिउगितःपरायानदीतिईदूतोः केवलयोरपिनदीसं
ज्ञेत्यास्त्रियेरमुक्तंविदुषितरे तिउगितश्चेतिङीपिवसोस्संप्रसारणंकृत्वाद्विधितिप्रक्रियातद्व्याख्यानानिचादिशब्दग्रहणाणि अलंतग्रहणमितिअएप्रत्ययसाह
चर्यात्लेवशब्दोऽलंतएवनिर्दिष्टइतिभावः नन्वेवंलेखग्रहणमेवव्यर्थंस्यादल्ग्रहणेनैवसिद्धेरतआह ज्ञापकमिति अतएवघरूपकल्पेषुतरंतग्रहणंनेतिव्याख्या

सोहार्दं। सौहृदय्यं। हृद्रोगः। हृदयरोगः। हृदयशब्दपर्य्यायो हृच्छब्दोऽप्यस्ति तेनसिद्धेप्रपञ्चार्थमिदं। पादस्यपदाऽज्यातिगोपहतेषु॥६।३।
।पद्य एषूत्तरपदेषुपादस्यपदइत्यदेशः स्यात्। पादाभ्यामजतीति। पदाजिः। पदातिः। अज्यतिभ्याम्पादेचेतीणप्रत्ययः। अजेर्व्यभावोनिपात
नात्। पदगः। पदोपहतः। पद्यात्यऽतदर्थे॥६।३।५३॥ पादस्यपत्स्याद्तदर्थे यतिपरे। पादौविध्यन्ति। पद्याः शर्कराः। अतदर्थेकिं। पादार्थमुदकम्पाद्यं॥
पादार्घाभ्याञ्चेतियत्। इकेचरतावुपसंख्यानम्। पादाभ्याञ्चरतिपदिकः। पर्य्यादित्वात्ष्ठन्। हिमकाषिहतिषुच॥६।३।५४॥ पद्धिमं। पत्काषी। पद्धतिः॥ऋ
चश्शे॥६।३।५५॥ ऋचः पादस्यपत्स्याच्छेपरे। गायत्र्याःपच्छः शंसति। पादम्पादमित्यर्थः। ऋचः किं। पादशः कार्षापणान्ददाति। वाघोषमिश्रशब्देषु॥६।३।
।५६॥ पादस्यपत्। पद्घोषः। पादघोषः। पन्मिश्रः। पादमिश्रः। पच्छब्दः। पादशब्दः। निष्केचेतिवाच्यं। पन्निष्कः। पादनिष्कः॥ ॥ ॥

त॥ ॐ॥ सोहार्दमितिन्नासलणादित्वात्ष्यञ्हृद्भगसिंध्वंतइत्युभयपदवृद्धिः पादस्यपदउत्तरसूत्रेपद्ग्रहणान्त्यादेशप्रथमरंतः सौत्रोविभक्तिलुकतसह अदंतादेशइतितेनपद
गइत्यादिसिद्धंपद्यात्इतिविस्पत्यधनुषेतियत्पाद्यमितिपादार्घाभ्यांचेतियत्पूर्वसूत्रेआज्यात्यादिषुशब्देष्वंगस्यैवकरणात्संभवादिहापितद्वचनएवपादशब्दोगृह्य
तेनपरिमाणवचनः तेनद्वाभ्यांपादाभ्यांक्रीतंद्विपाद्यंत्रिपाद्यमित्यत्रपणपादमाषेतियतिपदादेशोनभवतिएतच्चवृत्तिहरदत्तग्रंथयोःस्पष्टंपत्काषीतिसुप्यजातावि
तिणिनिःपद्धतिरितिकर्मणिक्तिन्ऋचः शेइतिशस्प्रत्ययस्येदमनुकरणंलोमादिषुपादशब्दस्यपाठाभावान्मत्वर्थेशेनसंभवतीतिभावः पच्छइति संख्यैकवचनाच्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदपेषमिति स्नेहनेपिष   इति णमुल् उदधिरिति उदकं धीयतेऽस्मिन्निति विग्रहः कर्मण्यधिकरणे चेति किप्रत्ययः उदमंथ इति द्रवद्रव्यसंस्कृताः सक्तवो मंथः उद
केन मंथ इति विग्रहे तृतीयेति योगविभागात्समास इति हरदत्तः शुक्लीभाव इति ऊर्यादिच्विडाचश्चेति च्व्यन्तत्वान्निपातत्वेऽव्ययत्वं भ्रुकुंस इत्यादि भ्रुकुंसश्च भ्रु।
कुंसश्च भ्रूकुंसश्चेति नर्त्तक इत्यमरः तं द्रीप्रमीला भ्रकुटिर्भ्रुकुटिर्भ्रूकुटी स्त्रियामिति च एकतद्धिते एकेति लुप्तषष्ठीकं तदाह एकशब्दस्येति ह्रस्वविधानमस्य दा
उदकस्योदः संज्ञायाम्। ६।३।५७॥ उदमेघः। उत्तरपदस्य चेति वक्तव्यम्॥ क्षीरोदः। पेषंवासवाहनधिषु च। ६।३।५८॥ उदपेषम्पिनष्टि। उद
वासं। उदवाहनः। उदधिर्घटः। समुद्रे तु पूर्वेण सिद्धम्। एकहलादौ पूरयितव्येऽन्यतरस्याम्। ६।३।५९॥ उदकुम्भः। उदककुम्भः। एकेति किं। उ
दकस्थाली। पूरयितव्येति किं। उदकपर्वतः। मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च। ६।३।६०॥ उदमन्थः। उदकमन्थः। उदौदनः।
उदकौदनः। इको ह्रस्वोऽङ्यो गालवस्य। ६।३।६१॥ इगन्तस्याङ्यन्तस्य ह्रस्वो वा स्यादुत्तरपदे। ग्रामणीपुत्रः। ग्रामणिपुत्रः। इकः किं। रमापतिः। अङ्य इति किं। गौरी
पतिः। गालवग्रहणं पूजार्थम्। अन्यतरस्यामित्यनुवृत्तेः। इयङुवङ्भाविनामव्ययानां च नेति वाच्यम्। श्रीमदः। भ्रूभङ्गः। शुक्लीभावः। अभ्रुकुंसादी
नामिति वक्तव्यम्॥ भ्रुकुंसः। भ्रुकुटिः। भ्रूकुंसः। भ्रूकुटिः। अकारोऽनेन विधीयत इति व्याख्यान्तरम्। भ्रकुंसः। भ्रकुटिः। भ्रुवा कुंसो भाषणं शोभा वा य
स्य। स्त्रीवेषधारी नर्त्तकः। भ्रुवः कुटिः कौटिल्यम्। एकतद्धिते च। ६।३।६२॥ एकशब्दस्य ह्रस्वः स्यात्तद्धिते उत्तरपदे। एकस्या आगतम्। एकरूप्यं। एक
क्षीरं। ङ्यापोः संज्ञाछन्दसोर्बहुलम्। ६।३।६३॥ रेवतिपुत्रः। अजक्षीरं। त्वे च। ६।३।६४॥ त्वप्रत्यये ङ्यापोर्वा ह्रस्वः। अजत्वं। अजात्वं। रोहिणित्वं। रोहि
णीत्वं। ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे। ६।१।१३॥ ष्यङन्तस्य पूर्वपदस्य सम्प्रसारणं स्यात्पुत्रपत्योरुत्तरपदयोस्तत्पुरुषे॥ सम्प्रसारणस्य
। ६।३।१३९॥ सम्प्रसारणस्य दीर्घः स्यादुत्तरपदे॥   ॥   ए वं तत्र एवोपयुज्यते ननु केवले स्वभावत एव ह्रस्वत्वाद्दत्तोघ्याच ह्रे एकस्या आगतमि।
त्यादि ष्यङः इह तत्पुरुषपदेन पूर्वपदमुत्तरपदं चाक्षिप्यते तत्र ष्यञ्पूर्वपदस्य विशेषणं तदन्तं गृह्यत इत्याह ष्यङन्तस्येति पुत्रपत्योरुत्तरपदयोरिति पुत्रपत्यन्तयो
रिति व्याख्याने तु कारीषगंध्यापरमपुत्र इत्यादावपि प्रसंगः स्यादिति भावः सम्प्रसारणस्य उत्तरपद इत्यधिक्रियते हल इति दीर्घ इत्यनुवर्त्तनेन तदाह दीर्घः स्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



दुत्तरपदइति हलइतिदीर्घः न नम वर्तते मत्वर्थस्यलुप्तत्वेनांगसंज्ञाया अप्रवृत्तेः॥ ॥ कौमुदगंध्याया इति कुमुदगंधेरपत्यं स्त्री कौमुदगंध्या तस्यापत्यमित्यणि कृते णिञो
रितिष्यङादेशः यङश्चाप् ननु कौमुदगंधीपुत्र इत्यादावि कोह्रस्वो ङ्यापोरिति ह्रस्वेन भाव्यं दीर्घविधानं तु पक्षे सावकाशमित्यत आह व्यवस्थितविभाषयेति नेहेति संप्रसा
रणमिह नेत्यर्थः अतिकारीषेति कारीषगंध्यामतिक्रान्तोऽतिकारीषगंध्यस्तस्य पुत्रः इष्टकचितमिति कर्तृकरणे कृता बहुलमिति समासः पक्वेष्टकचितमिति पदाधिकारात्तदं
तविधिः प्रवर्तत इति भावः मालभारीति मालां बिभर्तीत्यर्थः सुप्यजातौ णिनिस्ताच्छील्ये इति णिनिः हारिषितिपाठान्तरं कारे सत्या अगदस्येत्यनुवर्तनादाह मुमुस्यादिति सत्यंकारः

कौमुदगंध्यायाः पुत्रः कौमुदगन्धीपुत्रः। कौमुदगन्धीपतिः। व्यवस्थितविभाषया ह्रस्वो न। स्त्रीप्रत्यये चानुपसर्जने नेति तदादिनियमप्रतिषे
धात्। परमकारीषगन्धीपुत्रः। उपसर्जने तु न तदादिनियमान्नेह। अतिकारीषगंध्यापुत्रः। बन्धुनि बहुव्रीहौ ६।३।८४॥ बन्धुशब्दे उत्तरपदे
ष्यङः सम्प्रसारणं स्याद् बहुव्रीहौ। कारीषगंध्या बन्धुरस्येति। कारीषगन्धीबन्धुः। बहुव्रीहाविति किं। कारीषगंध्याया बन्धुः कारीषगंध्याब
न्धुः। ङीबन्तनिर्देशात् बन्धुशब्दस्वरूपापेक्षया। मातच्मातृकमातृषु वा॥ कारीषगन्धीमातः। कारीषगंध्यामातः। कारीषगन्धीमातृकः। कारीषगं
ध्यामातृकः। कारीषगन्धीमाता। कारीषगंध्यामाता। अस्मादेव निपातनान्मातृशब्दस्य मातजादेशो न तु तश्चेति कश्चित् कल्पश्च बहुव्रीहावे
वेदम्। नेह। कारीषगंध्याया माता। कारीषगंध्यामाता॥ चित्वसामर्थ्याच्चित्स्वरो बहुव्रीहिस्वरम्बाधते। इष्टकेषीकामालानां चिततूलभा
रिषु ६।३।६५॥ इष्टकादीनामन्तस्य पूर्वपदानां चितादिषु क्रमादुत्तरपदेषु ह्रस्वः स्यात्। इष्टकचितं। पक्वेष्टकचितं। इषीकतूलं॥
मुञ्जेषीकतूलं। मालभारी। उत्पलमालभारी॥ कारे सत्यागदस्य ६।३।७०॥ सत्यङ्कारः। अगदङ्कारः। अस्तोश्चेति वक्तव्यम्॥ अस्तुङ्का
रः। धेनोर्भव्यायाम्॥ धेनुम्भव्या॥ लोकस्य पृणे॥ ॥ ९९ खापपकरणं अप्राप्यपि सत्यादम्प्राप्य इतिडाचं बाधित्वा परत्वान्मुमेव अगदं
कारो वैद्यः अस्तुंकारोऽभ्युपगमः अस्त्विति तिङन्तप्रतिरूपकमव्ययं धेनुंभव्येति भविष्यति धेनुरित्यर्थः भव्यगेयेति निपातनात्कर्तरि कृत्यः धेनुश्चासौ भव्या चेति 194
विग्रहः गोतमस्मृतौ तु अधेनुं भव्येत्यत्रार्षत्वान्मुमिति बोध्यं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकंपृणइति पृणधातुः प्रीणनार्थः पृणातिः पूरणकर्मेतितु हरदत्तः अनभ्यासमित्यइति अभ्यासंसमीपंनद्भिन्नमनभ्यासंएतिसुग्लास्तृदृज्वइतिइणः क्यप् भ्राष्ट्रमिंधइतिक र्मण्युपपदसमासः एवमग्निमिंधोपिगिलेगिलस्यगिलशब्दे उत्तरपदे अगिलस्यमुमित्यर्थः तिमिंगिलइति मत्स्यविशेषः गिरतेर्मूलविभुजादित्वात्कः अचिविभा षेतिलत्वं गिलगिलेचेति गिलंगिलतीतिगिलगिलः तिमीनांगिलःगिलइतिविग्रहे इदमारब्धं रात्रेः कृत्युत्तरपदाधिकारे प्रत्ययग्रहणेन तदंतग्रहणाभावेपिरात्रिशब्दा द्वात्परत्र कृतोसम्भवात्कृदंतउत्तरपदेअयंविधिरित्याशयेनोदाहरति रात्रिंचरइति यद्यप्याचरन्तिवंतान्नराकुलादिः संभवतितथापिविलंबितोपस्थितिकत्वा

लोकम्पृणः। पृण इति मूलविभुजादित्वात्कः। इच्चोऽनभ्यासस्य। अनभ्यासमित्यः। दूरतः परिहर्तव्य इत्यर्थः। भ्राष्ट्राग्न्योरिन्धे। भ्राष्ट्रमि-न्धः। अग्निमिन्धः। गिलेऽगिलस्य। तिमिङ्गिलः। अगिलस्य किं। गिलगिलः। गिलगिलेचो॥ तिमिङ्गिलगिलः। उष्णभद्रयोः करणे। उष्णङ्क-रणं। भद्रङ्करणं। रात्रेः कृति विभाषा। ६।३।७२। रात्रिञ्चरः। रात्रिचरः। रात्रिमटः। रात्र्यटः। अखिदर्थमिदं सूत्रं खितित्तु। अरुर्द्विषदिति नित्यमेव वक्ष्यते। रात्रिमन्यः। सहस्य सः संज्ञायाम्। ६।३।७८। उत्तरपदे। सपलाशं। संज्ञायां किं। सहयुध्वा। ग्रन्थान्ताधिके च। ६।३।७९। अनयोः परयोः सहस्य सः स्यादुत्तरपदे। समुहूर्त्तं ज्योतिषमधीते। सद्रोणा खारी। द्वितीये चानुपाख्ये। ६।३।८०। अनुमेये द्वितीये सहस्य स स्यात्। सराक्षसीका निशा। राक्षसोपलक्ष्यमाणा निशया नुमीयते। समानस्य च्छन्दस्यमूर्धप्रभृत्युदर्केषु। ६।३।८४। समानस्य सः स्यादुत्तरपदे न तु मूर्द्धादिषु। अनुभ्राता सगर्भ्यः। अनुसखा सयूथ्यः। योनः सनुत्यः। तत्र भव इत्यर्थे सगर्भसयूथसनुताद्यत्। अमूर्द्धा दिषु किं। समानमूर्द्धा। समानप्रभृतयः। समानोदर्काः। समानस्येति योगो विभज्यते। तेन सपक्षः। साधर्म्यं॥ ॥

सनगृस्युतइतिभावः नित्यमेवेति पूर्वविप्रतिषेधेनेतिभावः रात्रिंमन्यइति आत्ममानेखश्चेतिखश् सार्वधातुकत्वात्श्यन् सहयुध्वेति सहेचेतिक्वनिप क्विपामपि वनोनहश्च इतिनिषेधात् ङीब्रौन समूहूर्त्तमिति अंतवचने अव्ययीभावः अव्ययीभावेचाकाले इत्यनेनकालपर्युदासात्प्राप्ते सभावेग्रंथांतग्रहणं द्वितीये अप्रधानीयः सद्वितीयः इतिलोकप्रसिद्धं उपाख्येप्रत्यक्षंतद्भिन्नमनुमेयंतदाह अनुमेयइति सराक्षसीकेति नघृतश्चेतिकप् योगोविभज्यतइति एतदर्थमेव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सु॰ सि॰कौ॰ टी॰त॰ १९६

ह्वां दसमपि समानस्य छंदसीति सूत्रमिहोपन्यस्तमिति भावः बहुव्रीहिरिति तेन वोपसर्जनस्येति एतदर्थं सहस्य सभावः प्राप्नोतीति भावः ॥ ※ ॥ सज्योतिरिति समानं ज्यो
तिरस्येति बहुव्रीहिः यस्मिं ज्योतिषि आदित्ये नक्षत्रे वा संजातं तदहस्समय पर्यन्तमनुवर्तमानमाशौचं सज्योतिरित्युच्यते इह समानमध्यमवीराश्चेति प्रतिपदोक्तः ए
व समासो न गृह्यते सरूपाणामेकशेष इति लिंगात् किंतु बहुव्रीहिरपि इति हरदत्तः ब्रह्मचारीति व्रत इति णिनिः सब्रह्मचारीति समानो ब्रह्मचारीत्यर्थः ब्रह्मचारिण

सजातीय इत्यादि सिद्धमिति काशिका। अथवा सहशब्दस्स दृशवचनोस्ति। सदृशास्सख्या ससखीति यथा तेनायमस्वपदविग्रहो बहु
व्रीहिः। समानः पक्षो यस्येत्यादि। ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु। ६।३।८५॥ एषु दशसूत्तरपदे
षु समानस्य सस्यात्। सज्योतिः। सजनपद इत्यादि। चरणे ब्रह्मचारिणि। ६।३।८६॥ ब्रह्मचारिण्युत्तरपदे समानस्य सस्याच्चरणे समान
त्वेन गम्यमाने। चरणं शाखा ब्रह्म वेदः। तदध्ययनार्थं व्रतमपि ब्रह्म। तच्चरतीति ब्रह्मचारी। समानस्य सः। सब्रह्मचारी। तीर्थे ये। ६।३।८७॥
तीर्थ उत्तरपदे यादौ प्रत्यये विवक्षिते समानस्य सस्यात्। सतीर्थ्यः। एकगुरुकः। समानतीर्थे वासीति यत्प्रत्ययः। विभाषोदरे। ६।३।८८॥ या
दौ प्रत्यये विवक्षिते। इत्येव। समानोदर्य्यः। सोदर्य्यः। दृग्दृशवतुषु। ६।३।८९॥ सदृक्। सदृशः। दृक्षे चेति वक्तव्यम्। सदृक्षः। वतुरुत्तरार्थः। इद
ङ्किमोरीश्की। ६।३।९०॥ दृगादिषु वतुषु इदम ईश् किमः कीस्यात्। ईदृक्। ईदृशः। कीदृक्। कीदृशः। वतुर्ग्रहणं वक्ष्यते। दृक्षे चेति वक्तव्यम्। ई
दृक्षः। कीदृक्षः। आसर्वनाम्नः। दृक्षे च। तादृक्। तादृशः। तावान्। तादृक्षः। दीर्घः मत्वाले। अमूदृशः। अमूदृक्। अमूदृक्षः। समासेऽङ्गुलेस्स
ङ्गः। ८।३।८०॥ अङ्गुलिशब्दात्सङ्गस्य सस्य मूर्द्धन्यस्स्यात्समासे। अङ्गुलिषङ्गः। समासे किं। अङ्गुलेस्सङ्गः॥ ९ अथ समानत्वं ब्रह्मणः समानत्वात्

तत्श्च समाने ब्रह्मणि व्रतचारीति फलितोर्थः तीर्थे ये इत्यकारेण विवक्षितः प्रत्यय इति विशेष्यं तु व्याख्यानाल्लभ्यते तेन यस्मिन्विधिरित्यादि विधिरित्याह
यादौ प्रत्यय इति विवक्षित इति उत्तरपदमात्रनिमित्तः सभावोन्तरंगः समासप्रकृतिकसुबंतानु यत्प्रत्ययः अतस्तस्य परत्वेन संभवतीत्याशयेनेदमुक्तं सोदर्य इ
ति समानोदरे शयित इत्यर्थे प्रत्ययात्प्राक् समानस्य सभावे कृते सोदराद्य इति यः सभावाभावपक्षे तु समानोदरे शयित ओ चोदात्त इति यति समानोदर्यः सदृक् स

195

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समानान्यो श्चेतिवत्त्वमिति इ यो: किन्न कत्रौ दीर्घ इति अ ट स आ ले कृते सवर्णे दीर्घ इत्यर्थः एतच्च पूर्वेण तरोरा हरणान्वयि॥ ॐ ॥ भीरोस्थानमिति विसर्जनीयव्यवधा
नात्वलघ्या मिरस्ति ज्योतिषः स्तोम इति इदं ज्योतिस्तोमोयमिति यत्तु दाहर्तुमुचितं एतिसंज्ञायामिति सुषामादौ नर्गणसूत्रमेतत् एवं नक्षत्राद्ध्रेलपि विष्वक्सेन इति चर्त्वे

भीरोःस्थानम्।८।३।८१॥ भिरुस्थानं तस्यान स्यसस्यमूर्द्धन्यस्थान्तसमासे। भीरुष्ठानं। असमासेतु। भीरोस्थानं। ज्योतिरायुषः स्तोमः।८।३।८३।
आभ्यांस्तोमस्य सस्य मूर्द्धन्यस्समासे। ज्योतिष्टोमः। आयुष्टोमः। समासेकिं। ज्योतिषः स्तोमः। सुषामादिषु च।८।३।९८॥ सस्य मूर्द्धन्यः। शोभनं साम
यस्य। सुषामा। सुषन्धिः। एतिसंज्ञायामगात्।८।३।९९॥ सस्य मूर्द्धन्यः। हरिषेणः। एतिकिं। हरिसक्थं। संज्ञायां किं। पृथुसेनः। अगकारात् किं
विष्वक्सेनः। इणकोरित्येव। सर्वसेनः। नक्षत्राद्वा।८।३।१००॥ एति संज्ञायामगकारान्मूर्द्धन्यो वा। रोहिणीषेणः। रोहिणीसेनः। अगकारात् किं
शतभिषक्सेनः। आकृतिगणोयं। अथ षष्ठ्यन्तं तृतीयास्थस्या ऽन्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु।६।३।९९॥ अन्यशब्द
स्य दुगागमस्याद् आशीरादिषु परेषु। अन्यदाशीः। अन्यदाशा। अन्यदास्था। अन्यदास्थितः। अन्यदुत्सुकः। अन्यदूतिः। अन्यद्रागः।
अषष्ठ्यामितिकिं। अन्यस्याऽन्येनवाशीः। अन्याशीः। कारके च्छे च नायन्निषेधः। अन्यस्य कारकः। अन्यकारकः। अन्यस्यायं। अन्यदीयः। गहादेरा कृ
तिगणत्वाच्छः। अर्थे विभाषा।६।३।१००॥ अन्यदर्थः। अन्यार्थः। कोः कत्तत्पुरुषेऽचि।६।३।१०१। अजादावुत्तरपदे। कुत्सितोऽश्वः। कदश्वः। कदन्नं
तत्पुरुषे किं। कूष्ट्रो राजा। त्रौ च। कुत्सितास्त्रयः। कत्त्रयः। रथवदयोश्च।६।३।१०२॥ कद्रथः। कद्वदः। तृणे च जातौ।६।३।१०३॥ कत्तृणं। कापथ्य
क्षयोः।६।३।१०४॥ कापथः। काक्षः। असमर्थे न तत्पुरुषः। अक्षिशब्देन बहुव्रीहिर्वा॥ ॥ १९ स्यासिद्धत्वान्नकारेणव्यवधानमस्तीति भावः।

अषष्ठ्य अन्यदाशीरित्यादयः कर्मधारयाः नायंनिषेध इति एतच्च षष्ठीतृतीयास्थस्ये त्येवसिद्धे निषेधानित्यत्वज्ञापनार्थं तद्धि नत्र उपादानाल्लभ्यत इत्याहुः त्रौ च
अन जा दयर्थमिदं वार्तिकं कत्र्यादिभ्यो ढकञिति निर्देशेनैव सिद्धं कापथमिति कुत्सितः पन्थाः ऋक्पूरब्धूः इति समासान्तः पथः संख्याव्ययादेरिति नपुंसकत्वं अप्राप्त
॥ सविभाषेति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सु·

सि·कौ· ईषदर्थे इत्यस्यानुवृत्तेरिति भावः पृषोदरप्रकाराणीति आदिशब्दो हि नव्यवस्थावचनः यथोपदिष्टपदानर्थकारीति भावः शिष्टैरिति अध्याहारलभ्यमिदं यथोपदिष्ट
टी·न· मित्यत्र यथार्थेऽव्ययीभावः उपदिशिश्चोच्चारणक्रियः यानि यानि शिष्टैरुपदिष्टानीत्यर्थः एवं स्थिते फलितमाह यथोच्चारितानि तथैवेति समासपदविषयकमिदं उत्तर
९८७ पदाधिकारात् निरुक्तादिशास्त्रसिद्धानामसमासपदानामुणादयो बहुलमित्येव सिद्धेश्च यद्यपि समासविषयकमेवेति नियमो न युज्यते हंससिंहशब्दयोरपि भाष्यो
कारिकायामुदाहृतत्वात्तथापि तत्कारिकायां यथाशब्दाध्याहारेण दृष्टान्तप्रदर्शनार्थं तयोरूपन्यासः कृतो न तु प्रकृतसूत्रोदाहरणत्वेनेति नियमोक्तिः सम्यगेवे

ईषदर्थे। ६।३।१०५। ईषज्जलं। काजलं। अजादावपि परत्वात्कादेशः। कोष्णः। विभाषा पुरुषे। ६।३।१०६। कापुरुषः। कुपुरुषः। अप्राप्तविभाषेयं। ईषदर्थे हि पूर्वविप्रतिषेधान्नित्यमेव। ईषत्पुरुषः। कापुरुषः। कवं चोष्णे। उष्णशब्दे उत्तरपदे कवं चकाराद्वा स्यात्। कवोष्णं। कोष्णं। कदुष्णं। पृषोदरादीनि यथोपदिष्टम्। ६।३।१०९। पृषोदरप्रकाराणि शिष्टैर्यथोच्चारितानि तथैव साधूनि स्युः। पृषत् उदरं। पृषोदरं। तलोपः। वारिवाहको वलाहकः। पूर्वपदस्य बः उत्तरपदादेश्च लत्वम्। भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात्। गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम्॥१॥ दिक्शब्देभ्य तीरस्य तारभावो वा॥ दक्षिणतारं। दक्षिणतीरं। उत्तरतारं। उत्तरतीरं। दुरो दाशनाशदभध्येषूत्वमुत्तरपदादेः ष्टुत्वं च॥ दुःखेन दाश्यते। दूडाशः। दुःखेन नाश्यते। दूणाशः। दुःखेन दभ्यते। दूडभः। खलत्यथः। दभ्नेर्नलोपो निपात्यते। दुष्टं ध्यायतीति दूढ्यः। आतश्चेति कः। वृवन्तोऽस्यां सीदन्तीति। वृषी। वृवच्छब्दस्य वृ आदेशः। सदेरधिकरणे ड्टः। आकृतिगणोऽयं। संहितायाम्। ६।३।११४॥ ॥ ॥

त्याहुः वर्णागमादिति हंतेः पचाद्यचि सगागमः विपर्ययादिति। हंसेस्तु पचाद्यचि हकारसकारयोः स्थानव्यत्ययः दिक्शब्देभ्य इति वार्त्तिकमिदं दूरोनाशेत्यप्येवं खलति
भ्य इति दाशनाशदभेति त्रयो पि ईषद्दुःसुष्विति खल्प्रत्ययान्ताः इत्यर्थः वृसीति मुनीनामासनं वृसि आकृतिगणोयमिति तेन लुंपेदवश्यमः कृत्ये तुंकाममनसोर
पि समो वा हितततयोर्मांसस्य पचियुड्घञोरित्यपि संगृहीतं कृत्यान्ते उत्तरपदे अवश्यमः अंतं समानेन लुंपेत् अवश्यंगंतव्यः अवश्यंसेव्यः तथा तुमः काममन
सोः परतः अंतं लुंपेत् गंतुकामः गंतुमनाः समो हिततततयोः

196

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अनेवालुंपेत् सहितः संहितः संततः पुट् घञन्तस्यरोयः पचधातुः तस्मिन्परे मांसस्यांतं लुंपेत् मांसपचनी मांस्पाकः इह संयोगांतलोपोपि शिष्टोच्चारणान्नेति बोध्यं संहिता
यामिति तेन द्विगुणाकर्ण इत्यादौ अवग्रहे दीर्घो न भवतीति सूत्राशयमुत्प्रेक्षयति॥ ॥ अधिकारोयमिति तेन विश्वाहिलेत्यादौ पदकालेद्यु चोतसिङ इति दीर्घो नेत्या
दिग्रयोजनान्यूह्यानीति नहि वृत्तिर्णहबंधने रतुवर्तते वृषुसेचने व्यधताडने रुचदीप्तौ सहमर्षणे तनुविस्तारे क्विबंतेष्विति उत्तरपदेष्विति शेषः तेन दिवसेषु रुगि
त्यादौ नातिप्रसंगः उपानदिति संपदादित्वात्कर्मणि क्विप् निवर्तते इति नीवृत् प्रवर्ततीति प्रावृट् मर्माणि विध्यतीति मर्मवित् व्यधेग्रहिज्येति संप्रसारणं निरोच

अधिकारोयं। कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नछिन्नछिद्रस्रुवस्वस्तिकस्य। ६।३।११५। कर्णशब्दे परे लक्षणवाचकस्य दीर्घः। द्विगु
णाकर्णः। लक्षणस्य किं। शोभनकर्णः। अविष्टादीनां किं। विष्टकर्णः। अष्टकर्णः। पञ्चकर्णः। मणिकर्णः। भिन्नकर्णः। छिन्नकर्णः। छिद्रकर्णः।
स्रुवकर्णः। स्वस्तिककर्णः। नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ। ६।३।११६। क्विबन्तेषु परेषु पूर्वपदस्य दीर्घः। उपानत्। नीवृत्। प्रावृट्। मर्म्मावित्।
नीरुक्। अभीरुक्। ऋतीषट्। परीतत्। क्वौ किं। परिणहनं। विभाषा पुरुष इत्यतो मण्डूकप्लुत्या विभाषानुवर्तते। सा च व्यवस्थिता। तेन गतिका
रकयोरेव नेह। पटुरुक्। तिग्मरुक्। वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम्। ६।३।११७। कोटरादीनां वने परे किंशुलुकादीनां गिरौ परे दी
र्घस्स्यात्संज्ञायां। वनम्पुरगामिश्रकासिध्रकासारिकाकोटराग्रेभ्यः। ८।४।४। वनशब्दस्योत्तरपदस्य एभ्य एव णत्वं नान्येभ्यः। इह कोटरादीनां
पञ्चदीर्घविधौ कोटरादयो बोध्याः। तेषां कृतदीर्घाणां णत्वविधौ निर्देशो नियमार्थः। अग्रेशब्दस्य तु विध्यर्थः॥ ९ नहवृतिनीरुक् ऋतिं सहते।

ऋतीषट् पूर्वपदादिति षत्वमिति हरदत्तः सहेः एतन्नत्रीभ्यां चेत्यत्र सहेरिति योगविभागाच्चकारस्यानुक्तसमुच्चयार्थत्वान्ये सुषामा देशकृतिगणत्वादित्यपरे। प
रितनोतीति परीतत् गमःक्वावित्यत्र गमादीनामिति वाच्यमित्युक्तेर्नलोपः वनं पुरगा व्यत्ययेन षष्ठ्यर्थे प्रथमेत्याह वनशब्दस्येति एभ्य एवेति कृतदीर्घेभ्यः पु
रगादिभ्य एव परस्य णत्वमित्यर्थः एभ्यो वनस्यैव णत्वं नान्येषामिति विपरीतनियमशंका तु न भवति वनादन्यस्मिन्नुत्तरपदे पुरगादीनां दीर्घणत्वासंभवा
त् नियमार्थ इति अयं भावः पुरगामिश्रकेति दीर्घनिर्देशादसंज्ञायां दीर्घाभावेन संज्ञायामेव णत्वमिति फलितं एवं च पूर्वपदात्संज्ञायामित्यनेनैव वनस्य।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सु-
सि·कौ· णत्वेसिद्धेपुनरपिकृतदीर्घस्यपुरगादिर्यंचकस्यणत्वविधौनिर्देशोनियमार्थएवेतिविध्यर्थइति असंज्ञात्वेनपूर्वपदात्संज्ञायामित्यस्याप्रवृत्तेरितिभावः नचपुर।
टी·तः गाग्रहणमपिविध्यर्थमेवगकारव्यवधानेनपूर्वपदात्संज्ञायामित्यस्याप्राप्तभावादितिवाच्यं अगइत्यस्यपंचमंतत्वंस्वीकृत्यगांतात्पूर्वपदात्परस्यणत्वेनेतिव्या
१९८ पुरगावणं।मिश्रकावणं।सिध्रकावणं।सारिकावणं।कोटरावणं।एभ्यएवेतिकिं।असिपत्रवनं।वनस्याग्रे।अग्रेवणं।राजदन्तादिषुनिपात
नात्सप्तम्या अलुक्।प्रातिपदिकार्थमात्रेप्रथमा।किंशुलुकागिरिः।वले।६।३।११८।वलप्रत्ययेपरेदीर्घस्यात्संज्ञायां।कृषीवलः।मतौबह्वचो
ऽनजिरादीनाम्।६।३।११९।अमरावती।अनजिरादीनाङ्किं।अजिरवती।बह्वचःकिं।व्रीहिमती।संज्ञायामित्येव।नेहावलयवती।शरा
दीनाञ्च।६।३।१२०।शरावती।इकोवहेऽपीलोः।६।३।१२१।इगन्तस्यदीर्घस्याद्वहे।ऋषीवहं।कपीवहं।इकः किं।पिण्डवहं।अपीलोः
किं।पीलुवहं।अपील्वादीनामितिवाच्यं।दारुवहं।उपसर्गस्यघञ्यमनुष्येबहुलम्।६।३।१२२।उपसर्गस्यबहुलन्दीर्घस्याद्घञन्तेपरे
नतुमनुष्ये।परीपाकः।परिपाकः।अमनुष्येकिं।निषादः।इकःकाशे।६।३।१२३।इगन्तस्योपसर्गस्यदीर्घस्यात्काशे।वीकाशः।नीकाशः।इकःकिं।प्र
काशः।अष्टनस्संज्ञायाम्।६।३।१२५।उत्तरपदेदीर्घः।अष्टापदं।संज्ञायाङ्किं।अष्टपुत्रः।चितेःकपि।६।३।१२७।एकचितीकः।नरेसंज्ञायाम्।६।
३।१२९।विश्वानरः।मित्रेचर्षौ।६।३।१३०।विश्वामित्रः।ऋषौकिं।विश्वमित्रोमाणवकः।शुनोदन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषुदीर्घो
वाच्यः।श्वादन्तः।इत्यादि।प्रनिरन्तश्शरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि।८।४।५।एभ्योवनस्यणत्वंस्यात्।प्रवणं।का
र्ष्यवणं।इहपात्परत्वात्णत्वं।विभाषौषधिवनस्पतिभ्यः।८।४।६।एभ्योवनस्यणत्वंवास्यात्।दूर्वावणं।दूर्वावनं।शिरीषवनं।शिरीषवणं।

ख्यानात् पुरगाशब्दस्यत्वाकारान्तत्वादगइतिनिषेधस्याप्रवृत्तेः अतएवागइत्यस्याऋगयनमित्येकमेवोदाहरणमित्यणृगयनादिभ्यइतिनिर्देशाश्रयेणत
न्मत्याख्यातमाकरे पुरगावणमित्यादि नरकविशेषस्यसंज्ञा असिपत्रवनमिति एभ्योवनस्यैवेतिविपरीतनियमेतुणत्वमत्रदुर्वारमितिभावः सप्तम्यर्थस्य।

197

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रातिपदिकार्थे अन्तर्भावादाह प्रथमेति किंशुलुकादीनामुदाहरणमाह किंशुलुकागिरिरिति आदिशब्दग्राह्यास्त्वंजनागिरिरित्यादयः किंशुलुकेति किंसुह्मगिरिः
रामगिरिः कृषीवल इति रजः कृष्यासुतीत्यादिना मत्वर्थे वलच् अमरावतीति मादुपधायाश्चेति संज्ञायामिति वा मतोर्मस्य वः घञ्मात्रस्योत्तरपदत्वासंभवादाह।
घञन्त इति निवार इति पुलिंगे मनुष्यजातिः निषीदत्यस्मिन्पापमिति निषादः हलश्चेत्यधिकरणे घञ् कथं तर्हि दौवारिके प्रतीहारशब्दप्रयोग इति चेदत्राहुः प्र
तिहारो द्वारं तात्स्थ्यात्ताच्छब्द्यमिति एकचितीक इति शेषाद्विभाषेति कप् इष्टकेति वार्तिके दीर्घान्तः पठ्यते केचित्तु ह्रस्वान्तं पठित्वा स्थादेष्ट इति बहुव्रीहौ दीर्घमाहु
र्नत्र तत्पुरुषे इष्टकादिति कार्थ्येतितालव्यपाठस्त्वनार्ष इति भावः वनस्पतिभ्यो वनस्य णत्वमुदाहरति शिरीषवणमिति ननु वानस्पत्यः फलैः पुष्पात्तैरपुष्पा
द्वनस्पतिरित्यमरकोशाद्यस्य पुष्पं विनैव फलप्रादुर्भावस्स वनस्पतिस्स चौदुंबरादिः शिरीषस्तु न तथा तस्य पुष्पफलोभयसत्वादतो णत्वमिह कथमिति चेदत्रा

द्व्यच्त्र्यच्भ्यामेव॥ नेह। देवदारुवनं॥ इरिकादिभ्यः प्रतिषेधो वक्तव्यः। इरिकावनं॥ मिरिकावनं। वाहनमाहितात्।८।४।८॥ आरोप्य यदुह्यतेन
द्वाचिस्थान्निमित्तात्परस्य वाहननकारस्य णत्वं स्यात्। इक्षुवाहणं। आहितात्किं। इन्द्रवाहनं। इन्द्रस्वामिकम्वाहनमित्यर्थः। वहतेर्ल्युटि वृद्धि
रिहैव सूत्रे निपातनात्। पानं देशे।८।४।९॥ पूर्वपदस्थान्निमित्तात्परस्य पानस्य नस्य णत्वं स्याद्देशगम्ये। क्षीरम्पानं येषां ते क्षीरपाणाः उशीनराः
सुरापाणाः प्राच्याः पीयते इति पानं। कर्म्मणि ल्युट्॥ वा भावकरणयोः।८।४।१०॥ पानस्येत्येव। क्षीरपानं॥ क्षीरपाणं ॥ ॥

हः वनस्पतिशब्देनात्र वृक्षमात्रमुपलक्ष्यते अत्र च लुपियुक्तवदिति सूत्रस्थं भाष्यं लिंगं तत्र हि व्यक्तिवचने किं शिरीषाणामदूरभवो ग्रामः शिरीषास्तस्य वनं।
शिरीषवनमित्यत्र णत्वे कर्तव्ये वनस्पतित्वमप्यतिदिश्यते त्युक्तं तच्च शिरीषाणां वनस्पतित्वे संगच्छते नान्यथेति दिक्॥ ॥ द्व्यच्त्र्यच्भ्यामेवेति व्यवस्थित
विभाषाश्रयणादिति भावः ओषधित्वात्प्राप्ते प्रतिषेधमाह इरिकादिभ्य इति एतदपि व्यवस्थितविभाषाविज्ञानादेव सिद्धं उशीनरा इति इह उशीनरशब्दस्त
द्देशवासिषु भाक्तः कर्मणि ल्युडिति कृत्यल्युटो बहुलमित्यनेन वा भाव आदेशार्थं आरंभ इत्यप्राप्तविभाषा क्षीरपाणमिति तिः पाने ल्युट् चेति नपुंस
के भावे ल्युट् पीयते अनेनेति पानं करणे ल्युट् क्षीरस्य पानं क्षीरपाणं॥

सु॰ सि॰ कौ॰ टी॰ त॰ ४९९

गिरिनद्यादीनां वेति वक्तव्यमिति शेषः संज्ञायां प्राप्ते असंज्ञायामप्राप्ते उभयत्र विभाषेत्याहुः माषवापिणाविति बहुलमाभीक्ष्ण्ये इति णिनिः व्रीहिवापाणीति कर्मण्यण् उत्तरपदं यदिति इष्टानुरोधेन तथा व्याख्यायत इति भावः गर्गभगिनीति इह भगिनीशब्द उत्तरपदं न तु भगिन्शब्दः अत्र व्याख्यानेनुम्ग्रहणमेव ज्ञापकमिति प्राचां मतं आह अत एवेति नद्युक्तं ज्ञापकं विघट्टयति किंचेति परिपक्वानीति कुमतिचेति नित्यणत्वं प्राप्तं एकाजुत्तर प्राग्व्याख्यातमपि प्रकरणानुरोधेन स्मार्यते वृत्रहणाविति वृत्र हतवंतौ ब्रह्मभ्रूणेति क्विप् परिमाणीति मनेर्ण्यन्तात् क्विप् चेति क्विप् गतिकारकोपपदानामित्यादि नां सुबुत्पत्तेः प्राक्समासान्नकारांतमुत्तरपदं नांतत्वान्ङीप् क्षीरपाणीति पिबतेः कर्मण्युपपदे आतोऽनुपसर्गे इति कः आतो लोप इटि चेत्यालोपः रम्यविणेति रम्यश्चासौ विश्चेति विग्रहसत्न

गिरिनद्यादीनाम् ॥ गिरिनदी । गिरिणदी । चक्रनितम्बा । चक्रणितम्बा । प्रातिपदिकान्तनुम्विभक्तिषु च । ८।४।११ ॥ पूर्वपदस्थान्निमित्तात्परस्य एषु स्थितस्य नस्य णो वा स्यात् । प्रातिपदिकान्ते । माषवापिणौ । नुमि । व्रीहिवापाणि । विभक्तौ । माषवापेण । पक्षे माषवापिना इत्यादि । उत्तरपदं यत्प्रातिपदिकं तदन्तस्यैव णत्वं नेह । गर्ग्याणां भगिनी । गार्गीभगिनी । अत एव नुम्ग्रहणं कृतं । अङ्गस्य नुम्विधानात्तद्भक्तो हि नुम् न तूत्तरपदस्य । किंच । प्रहिण्वन्नित्यादौ हि वेर्नुमो णत्वाऽर्थमपि नुम्ग्रहणं । प्रेन्वनमित्यादौ तु क्षुभ्नादित्वान्न । युवादेर्न ॥ रम्ययूना । परिपक्वानि । एकाजुत्तरपदे णः । नित्यमित्युक्तं । वृत्रहणौ । हरिम्मानयतीति । हरिमाणौ । नुमि । क्षीरपाणि । विभक्तौ । क्षीरपेण । रम्यविणा । कुमति च ॥ ८।४।१३ ॥ कवर्गवत्युत्तरपदे प्राग्वत् । हरिकामिणौ । हरिकामाणि । हरिकामेण । पदव्यवायेपि ॥ ८।४।३८ ॥ पदेन व्यवधानेपि णत्वं न स्यात् ।

आङ्गेनास्त्रियां ननु अंतर्वर्तिनीं विभक्तिमाश्रित्य विशब्दस्य पदत्वात्पदव्यवायेपीति णत्वनिषेधः स्यान्मैवं उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणप्रतिषेधेन विशब्दस्य पदत्वाभावात् स्वादिष्वित्यनेन तु रम्यविशब्दस्यैव पदत्वं न तु विशब्दस्य यस्मात्स्वादिविधिस्तस्यैव पदत्वाभ्युपगमात् एवं च पुनर्भूणामित्यत्र णत्वं निर्बाधमेव नामि परतः भूशब्दस्य पदत्वाभावात् कुमति च अनेकाजुत्तरपदार्थ आरंभः कावित्येव तु न सूत्रितं यस्मिन्विधिरिति तदादिविधौ कवर्गादुत्तरपद एव हरिकामिणामित्यादौ वयं विधिः स्यान्न तु वस्त्रयुगेणेत्यादौ तथा च मतुबंतनिर्देश आवश्यकः इत्याह कवर्गवतीति पदेन व्यवधान इति निमित्तनि

198

CC-0. In Public Domain. Digitization by eGangotri

मिन्निनोर्मध्ये पदे सति णत्वं नेत्यर्थः माषकुंभवापेनेति माषकुंभं वपतीति कर्मण्यण् उपपदसमासः॥ ❁ ॥ चतुरंगयोगेनेति। चत्वार्यंगान्यस्य तेन योग इति मनोर
मायां विगृहीतं तद्युक्तं उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणप्रतिषेधादंगशब्दस्यापदत्वात् तस्मादंगानां योगो अंगयोगः चतुर्णामंगयोग इत्येवं विगृहीत
व्यं न च चतुरंगेन योग इति विग्रहे व्यंगशब्द उत्तरपदं नेति प्रत्ययलक्षणप्रतिषेधो न प्रवर्तेतेति शंक्यं तस्य पूर्वसमासस्योत्तरपदत्वात् उत्तरपदत्वे चेति प्रतिषेधव
चनस्याप्युत्तरस्य समासचरमावयवस्य पदत्वे कर्तव्ये पदादिविधिभिन्ने प्रत्ययलक्षणं न प्रवर्तेत इत्यर्थाभ्युपगमाच्च शाकपार्थिवादीनामुत्तरपदलोपः
प्रादिभ्यो धातुजस्येत्यादौ तूत्तरपदशब्देन समासचरमावयवमात्रं गृह्यत इति प्रत्ययलक्षणप्रवृत्त्यभावेपि न क्षतिः इह तु पदत्वलाभा

चतुरङ्गयोगेन। अतद्धित इति वाच्यम्॥ आर्द्रगोमयेण। शुष्कगोमयेण। कुस्तुम्बुरूणि जातिः। ६।१।१४३॥ अत्र सुण्निपात्यते। कुस्तुम्बुरु धा-
न्याकं। क्लीबत्वमतन्त्रं। जातिः किं। कुतुम्बुरूणि। कुत्सितानि तिन्दुकीफलानीत्यर्थः। अपरस्पराः क्रियासातत्ये ६।१।१४४॥ सुण्निपात्यते। अपरस्परा
स्सार्थं गच्छन्ति। सततमविच्छेदेन गच्छन्तीत्यर्थः। क्रियेति किम्। अपरपरा गच्छन्ति। अपरे च परे च सकृदेव गच्छन्तीत्यर्थः। गोष्पदं सेविता
सेवितप्रमाणेषु। ६।१।१४५॥ सुट् सस्य षत्वं च निपात्यते। गावः पद्यन्तेऽस्मिन्देशे। स गोभिः सेवितो गोष्पदः। असेविते। अगोष्पदान्यरण्यानि।
प्रमाणे। गोष्पदमात्रं क्षेत्रं। सेवितेत्यादि किं। गोः पदं। गोपदम्।
स्थाने सुट् निपात्यते। आस्प-
दं। प्रेति किं। आपदापदं॥

यप्रत्ययलक्षणप्रवृत्तिरपेक्षिता एवं च माषकुंभवापेनेत्य पि कुंभस्य वापः कुंभवापः कुंभशब्दः कुंभपरिमितधान्ये भाक्तः॥
माषाणां कुंभवाप इति विगृहीतव्यमिति तत्त्वाः केचित्तु अपदादिविधावित्यत्र पदांतविधावित्यर्थः परिक पदव्यवायेपीत्यस्य पदांतविधित्वाभावान्नास्यत्र
प्रत्ययलक्षणनिषेध इत्याहुः तदपरे न क्षमंते तथा हि सति लाघवात्पदांतविधावित्येव ब्रूयान्नत्वपदादिविधाविति दिक् अतद्धित इति व्यवधायकपदस्य तद्धित
श्चेत्परो न भवति तदा निषेध इत्यर्थः आर्द्रगोमयेणेति इह गोशब्दः पदं उत्तरपदत्वे चेति निषेधोत्र न शंक्यः गोमयशब्दस्योत्तरपदत्वात् गोशब्दस्य च स्वादिवि
तिपदत्वात् गोष्पदं असेविते गोष्पदशब्दस्य वृत्त्यसंभवात्तत्पूर्वकमुदाहरति अगोष्पदानीति गवां संचारो यत्र नैव संभवति तत्रापि सुडागमार्थमसेवितग्रहणं

सि॰ कौ॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु॰
सि॰कौ॰
टी॰न
२००

आत्मयापनायेति कालक्षेपाय शरीरक्षपणीयवेत्यर्थः॥ ॥ आश्चर्यमिति आङः परस्य चरेः सुट् चरेराङि चा गुरावितियत् विष्किर कॄ विक्षेपे इत्यस्मादिगुपधे।
त्यादिना कप्रत्यये सुडागम अनेन निपात्यते षत्वं तु परिनिविभ्य इत्यनेन विकिरग्रहणमिति विष्किरः शकुनौ विकिरो वेति वृत्तिग्रंथे पाठः सूत्रपाठे तु विकिरग्र

आश्चर्य्यमनित्ये। ६।१।१४७॥ अद्भुते सुट्। आश्चर्य्यं यदि स भुञ्जीत। अनित्ये किं। आचर्य्यं कर्म्म शोभनं। वर्च्चस्केऽवस्करः। ६।१।१४८॥ कुत्सितम्वर्च्चः। वर्च्चस्कमन्नमलं। तस्मिन्सुट्। अवकीर्य्यत इति। अवस्करः। वर्च्चस्के किम्। अवकरः। अपस्करो रथाङ्गम्। ६।१।१४९॥ अपकरोन्यः। विष्किरः शकुनिर्विकिरो वा॥ ६।१।१५०॥ पक्षे विकिरः। वावचनेनैव सुड्विकल्पे सिद्धे विकिरग्रहणन्तस्यापि शकुनेरन्यत्र प्रयोगो मा भूदिति वृत्तिसन्नभाष्यविरोधात्। प्रतिष्कशश्च कशेः। ६।१।१५२॥ कश गतिशासनयोरित्यस्य प्रतिपूर्वस्य पचाद्यचि सुट्निपात्यते षत्वञ्च सहायः। पुरोयायी वा प्रतिष्कश इत्युच्यते। कशेः किं। प्रतिगतः कशां। प्रतिकशोऽश्वः। यद्यपि कशेरेव कशा। तथापि कशेरिति धातोर्ग्रहणमुपसर्गस्य प्रतेर्ग्रहणार्थं। तेन धात्वन्तरोपसर्गान्न। प्रस्कण्वहरिश्चन्द्रावृषी। ६।१।१५३॥ हरिश्चन्द्रग्रहणममन्त्रार्थम्॥ ऋषी इति किं। प्रकण्वो देशः। हरिचन्द्रो माणवकः। मस्करमस्करिणौ वेणुपरिव्राजकयोः। ६।१।१५४॥ मकरशब्दोऽव्युत्पन्नः तस्य सुडिनिश्च निपात्यते। वेणौ ति किं। मकरो ग्राहः। मकरी समुद्रः॥ कास्तीराजस्तुन्दे नगरे॥ ६।१।१५५॥ ईषत्तीरमस्यास्तीति। कास्तीरं नाम नगरं। अजस्येव तुन्दमस्येति। अजस्तुन्दन्नाम नगरम्। नगरे किं। कातीरं। अजतुन्दम्। कारस्करो वृक्षः। ६।१।१५६॥ कारङ्करोतीति। कारस्करो वृक्षः अन्यत्र कारकरः। केचित्तु कस्कादिष्विदम्पठन्ति न सूत्रेषु। पारस्करप्रभृतीनि च संज्ञायाम्। ६।१।१५७॥ एतानि ससुट्कानि निपात्यन्ते नाम्नि। पारस्करः। किष्किन्धा

हणं नास्त्येवेति वाच्यं तस्यापीति विकिरशब्दस्यापीत्यर्थः कशेरेव कशेति कश धातोरेव कशाशब्दो निष्पन्न इत्यर्थः धात्वंतरेति प्रतिकश इत्यत्र प्रतिर्गमेरुपसर्गो
न तु कशेर्यक्रिया युक्ताः प्रादयस्तं प्रत्येवेति न्यायादिति भावः अमंत्रार्थ इति मंत्रे तु ह्रस्वाच्चन्द्रोत्तरपदे मंत्र इत्यनेनैव सिध्यतीति भावः मस्करः मस्करशब्दादि

१९९

सु॰
सि॰ कौ॰
टी॰ न॰
२९

निनामत्वर्थीयेनेष्टसिद्धौ मस्करिग्रहणं परिव्राजकएवायं प्रयोगोयथास्यादित्येवमर्थमित्याहुः कातीरमिति ईषदर्थ इतिकोःकादेशः पारस्कर इतिपारं करोतीतिविग्रहः कर्मोहेतुमा च्छील्यइतिटः किष्किंधेति किमपिधत्ते इतिविग्रहे आतोनुपसर्गेकः टाबन्निपातनात् किमोद्वित्वं पूर्वस्यमलोपः सुट् षत्वंच किंकिं दधातीतिविग्रह इतिमतेतुवीप्सायांद्वित्वंसिद्धं अ न्यत्रतुनिपातनादेवबस्तुतस्तुरूढिशब्दाएते कथंचिद्व्युत्पाद्यंत इत्यवयवार्थेनाग्रहः कार्यः॥ ॥ नद्वहतोरितिगणसूत्रमेतत् नादिति तलोपश्चेत्यत्रेतिशेषः प्रायस्येति गण

नद्वहतोः करपत्योश्चोरदेवतयोः सुट्तलोपश्च। तात्पूर्वं चत्वेन दकारोबोध्यः। नद्वहतोर्ईकारलका॥
रौलुप्येते। करपत्योः सुसुट्। चोरदेवतयोरितिसमुदायोपाधिः। तस्करः। बृहस्पतिः। प्रायस्यचित्तिचित्त
योः। प्रायश्चित्तिः। प्रायश्चित्तम्। वनस्पतिरित्यादि। आकृतिगणोयं॥ इतिसमासा[illegible]॥ [illegible]

सूत्रमेतदपिप्रायःपापंविजानीयाच्चित्तंतस्यविशोधनमितिस्मृतिः। आकृतिगणोयमिति तेनशतात्परालिपरश्शतानिकार्याणीत्यादिसिद्धम् इहसुप्सुपेतिवापंचमीतियोग
विभागाद्वासमासः राजदंतादित्वाच्छतशब्दस्यपरनिपातः पारस्करादित्वात्सुट्॥ इतिसमासाश्रयविधयः समाप्ताः॥

CC-0. In Public Domain. Digitization by eGangotri

200

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु॰त
सि॰कौ ॥ श्रीगणेशायनमः ॥ अपवादसंगत्यातद्धितान्विवक्षुस्तदीयमधिकारसूत्रमाह समर्थानामिति अन्यतरस्यांग्रहणानुवृत्तेः समासोपीनिवक्ष्यमाणमूलग्रंथेन समा
टि॰त सापवादत्वं सूचितं। विधेयानिर्देशादुत्तरत्र प्रकृतिविशेषाकांक्षासत्वाच नायं स्वतंत्रो विधिरित्याह अधिक्रियत इति। पदत्रयमित्यनेन प्रत्येकं स्वरितत्वप्रतिज्ञा सूचिता। तत्प्र
१ योजनं तु कस्यचि — न्निवृत्तावप्यपरस्यानिवृत्तिस्तथा च प्राग्दिश इति सूत्रे समर्थानां प्रथमादिति निवृत्तं वेतिलनुवर्त्तत एवेति वक्ष्यमाणमूलग्रंथः संगच्छते। प्राग्दिश इ
तीति॥ ननु उत्तरेषां प्रत्ययानां स्वार्थिकत्वेन प्रथमेति पदयोः प्रयोजनं नेति भावः॥ ननु समर्थः पदविधिरिति परिभाषयागतार्थत्वात्समर्थानामित्येतदपार्थं तत्र पदवि
धित्वं — एवं। घकालतनेष्विन्यलुग्विधानात्तु वंतान्तद्धितान्यतिरिति सिद्धांतस्य सकलसंमतत्वादत आह सामर्थ्यमिति। कृतसंधिकार्यत्वमिति॥ अस्य फलं तु तस्यापत्यमि
नि सूत्रे स्फुटीभविष्यति। इह समर्थानां प्रथमादिति वक्तुं युक्तं॥ महोत्सर्गो नाह प्राग्दीव्यत इत्यादिना। सूत्रे दीव्यदित्येकदेशो नर्थकोप्यवधित्वेनोपात्तः प्राग्रीश्वरादितिव

॥ श्रीगणेशायनमः ॥ समर्थानांप्रथमाद्वा। ४।१।८२। इदं पदत्रयमधिक्रियते प्राग्दिश इति यावत् सामर्थ्यं परिनिष्ठितत्वम् कृतस
न्धिकार्यत्वमितियावत् प्राग्दीव्यतोऽण्। ४।१।८३। तेन दीव्यतीत्यतः प्रागणधिक्रियते अश्वपत्यादिभ्यश्च। ४।१।८४। एभ्योऽण् स्या
त्प्राग्दीव्यतीयेष्वर्थेषु वक्ष्यमाणस्य ण्यस्यापवादः॥ 201

ए दित्यके॥ अन्ये त्वाहुर्दीव्यदिति शत्रंतं तेन देवनकर्त्ता अर्थ एवावधिरिति॥ प्राग्दी
व्यतीयेष्विति॥ दीव्यतः प्राक् प्राग्दीव्यत अपपरिबहिरंचवः पंचम्येत्यव्ययीभाव इति प्राचः। प्राग्दीव्यतमिति तूचितं॥ मय इति टच्यवृत्तेरिति केचित् तन्न। सम
मय इति टचः पाक्षिकत्वात्। अन्यथा उपसमिधमुपसमिदिति तत्सूत्रस्य मूलोदाहरणस्यासंगत्यापत्तेः। न चात्र टचो भावे अव्ययानां भमात्रे इति टिलोपे प्राग्दीव्य १
तीय इति रूपं न स्यादिति शंक्यं। अव्ययीभावस्याव्ययत्वे प्रयोजनं लुङ्मुखस्वरोपचार इति परिगणनात्। प्राग्दीव्यति भवः प्राग्दीव्यतीयः वृद्धाच्छः। त्यमु
न शंकनीय एव। अमेहक्वतसित्रेभ्य एवेति परिगणनात् लुङ्मुखस्वरेत्यादिपरिगणनया अनव्ययत्वाच्च। वक्ष्यमाणस्येति॥ पत्युत्तरपदाण्ण्य इति वक्ष्यमाणस्य

तद्धितेष्व॥ अचां मध्ये आदिरज्वेवेत्यचो ञ्णितीति सूत्रादच इत्यनुवर्त्तत इत्याशयेन व्याचष्टे अच इति। वृद्धिः स्यादिति। मृजेर्वृद्धिरित्यतोऽनुवर्त्तत इति भावः। किति च। वाहीक इत्या
द्यर्थमपीदं सुगमव्याख्यानायात्रैवोपन्यस्तं। अचामादेरिति निर्दिष्टस्थानिकत्वादिकपरिभाषात्र नोपतिष्ठत इत्याशयेनोदाहरति॥ आश्वपतमित्यादि। प्रामादिकमे
वेति॥ एतच्च हरदत्तग्रंथे स्थितं॥ यदि तु देवतार्थकाण्णा चातुर्वर्ण्यादेराकृतिगणत्वात् ष्यञिति व्याख्यायते तदा निर्दुष्ट एवायं प्रयोगः। अश्वपति गणपति। राष्ट्रपति कु
लपति गृहपति पशुपति क्षेत्रपतीत्यश्वपत्यादिर्दित्यदित्या॥ पतिशब्दस्योत्तरपदशब्देन बहुव्रीहिं कृत्वा पश्चात् द्वंद्वः कार्यो न तु द्वंद्वोत्तरं बहुव्रीहिरित्याह पत्युत्तरपदाच्चेति॥ प
त्यंतादित्युच्यमाने बहुचपूर्वादपि स्यादित्युत्तरपदग्रहणं कृतं॥ दैत्य इति॥ ननु दितेर्देवताद्यर्थे ण्यस्सावकाशः। इतश्चानिञ इत्यपत्ये ढक दौलेय इत्यादौ सावकाशस्तथा च दि

तद्धितेष्वचामादेः।७।२।११७। ञिति णिति च प्रत्यये परेऽचामादेरचो वृद्धिः स्यात्। किति च।७।२।११८। किति तद्धिते च तथा अश्वपतेरपत्यादि
आश्वपतं गाणपतम् गाणपत्यो मन्त्र इति तु प्रामादिकमेव। दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः।४।१।८५। दित्यादिभ्यः पत्युत्तरपदाच्च।
प्राग्दीव्यतीयेष्वर्थेषु ण्यः स्यादणोपवादः दैत्यः अदितेरादित्यस्य वा आदित्यः प्राजापत्यः। यमाच्चेति काशिकायां याम्यः॥ पृथिव्या ञाञौ। पा
र्थिवा। पार्थिवी। देवाद्यञञौ। दैव्यम्। दैवम्। बहिषष्टिलोपो यञ्च। बाह्यः। ईकक्च। बाहीकः। स्थाम्नोऽकारः पृषोदरादित्वात्सस्य तः अश्वत्थामः भवार्थे
लुग्वाच्यः अश्वत्थामा लोम्नोपत्येषु बहुष्वकारः बाह्वादीञोपवादः उडुलोमाः उडुलोमान् बहुषु किम् औडुलोमिः॥ एतेरपत्यमित्यत्रोभयप्रसंगे परत्वा
द्ढक् स्यान्नैवं॥ ण्यादयोर्थविशेषलक्षणादणपवादात्पूर्वविप्रतिषेधाश्रयणात्॥ अर्थविशेष इति किं॥ औष्ट्रपतं। उष्ट्रपतिर्नाम पत्रं तस्येदं। पत्राध्वर्युपरिषदश्चेत्यञ्। इह पूर्ववि
प्रतिषेधेन तस्येदमित्यर्थे ण्यो न भवति। इदमित्यस्य सामान्यार्थत्वात्॥ कथं तर्हि दैतेय इति। अत्राहुः। कृदिकारादिति ङीषंतात् स्त्रीभ्यो ढक्। ण्यस्तु न भवति। लिंगविशिष्टपरिभाषा
या अनित्यत्वात्। न चानादिवच्चेति पूर्वस्यांतवद्भावेन स्यादेव ण्य इति भ्रमितव्यं दितिशब्दात् ङीषि कृते यस्येति चेति लोपेन सवर्णदीर्घाभावादिति आदित्यशब्दात् ण्यप्रत्यये य।
स्येति लोपे हलो यमां यमि लोप इति पाक्षिको यलोपः। न चाल्लोप स्यस्थानिवत्वं यलोपे न पदांतेति तन्निषेधात् पूर्वत्रासिद्धेनस्थानिवदित्युक्तेश्च। काशिकायामिति। भाष्ये तु न दृष्टमिति भा।

सु·त·
सि·कौ·
टि·त
२

वः॥ अणांतान्स्वार्थिकेनव्यञा प्रयोगस्तूपपादः। स्त्रियांङीषून भवति। वितांडीषोऽनित्यत्वात्। आ ओः फलभेदज्ञापनाय स्त्रीलिंगमुदाहरति पार्थिवा पार्थिवीति। वहिषष्टि लोपवचनमव्ययानां भमात्रे इत्यस्यानित्यत्वं ज्ञापयितुं तेन आरातीय इति सिद्धं॥ अश्वत्थामइति॥ भाष्योदाहरणात्तदंतविधिः नचबलवाचिनः स्थामनुशब्दस्यापत्येनयोगासंभवान्वचनारंभसामर्थ्यात्तदंतविधिः स्यादिति वाच्यं। जाताद्यर्थे तत्संभवेन सामर्थ्योपक्षयात्॥ अश्वस्येवस्थामयस्येति बहुव्रीहिः। उडुलोमा इति॥ उडुनि नक्षत्राणीव लोमान्यस्येति विग्रहः। केवलस्यापत्येनयोगासंभवात्तदंतविधिस्ततोऽकारस्य लोपः॥ ॥ गोरिति। नकेवलमपत्यएवायं किंतु प्राग्दीव्यतीयेषु सर्वेष्वर्थेष्विति ज्ञेयं। गव्यमिति गविभवं गव्यं गोर्देवतायस्य गोरिदमित्यादिरर्थः॥ केचित्तु भाष्ये सर्वत्रग्रहणात्प्राग्दीव्यतीयेभ्योन्यस्मिन्नर्थे अयं यत्। तेन गवाचरति गव्य इत्याद्यपि भवतीत्याहुः॥ गोरूप्यमित्यादि। हेतुमनुष्येभ्योन्यतरस्यां रूप्यः मयट् चेति रूप्यमयटौ। उत्सादिभ्योञ्॥ अणस्तदपवादानामिञादीनां चायमपवा

॥ गोरजादिप्रसंगे यत् गव्यम् अजादिप्रसंगे किम् गोभ्यो हेतुभ्यः आगतं गोरूप्यम् गोमयम्॥ उत्सादिभ्योऽञ्। ४।१।८६।
औत्सः अग्निकलिभ्यां ठग्वक्तव्यः अग्नेरपत्यादि आग्नेयम् कालेयम्॥ इत्यपत्यादिविकारान्तार्थसाधारणाः प्रत्ययाः॥ ॥

दः। इहवष्कपासे इति गणसूत्रं॥ असे असमासे पूर्वाचार्यसंज्ञेयं वष्कस्यापत्यादि वाष्कयः। असेकिं। गोवष्कयिः। असइति निषेधाल्लिंगादिहतदंतविधिस्तेन धेनुशब्दस्येह पाठात् धेनूनां समूह आधेनवमिति सिद्धं। नन्वेवं धेनुकं गोधेनुकमित्यत्रानुप्रवर्त्तेत॥ अचित्तहस्तिधेनोरिति सूत्रे धेनुशब्दग्रहणाद्धैनुकमिति सिद्धावपि गोधेनुकं न सिध्येदिति चेन्न धेनुरनञ्इकमुत्पादयतीति विशेषवचनस्य भाष्ये स्थितत्वात्॥ इकं ठकमित्यर्थः। अग्निकलिभ्यामिति। अयंभावः। सास्यदेवते त्यधिकारे अग्नेर्ढगिति सूत्रं दृष्ट्वा सामान्याधिकारे कलेर्ढगिति वार्त्तिकं चापनीय प्राग्दीव्यतीयेष्विदमेवपठनीयं तेनाग्नेरपत्यं अग्निना दृष्टं साम अग्नेरिदम् अग्नौ भवं अग्नेरागतमाग्नेयमिति सिध्यति तथा कलेरपत्यमित्याद्यर्थे कालेयमपि सिध्यतीति। एतेन पदकालेयं तत्कालेयस्यकालेयत्वमिति श्रुतावर्थान्तरेपि ठको दर्शनात्कलेर्ढगिति सूत्रमपार्थकमिति मीमांसोक्तिः परास्ता। वार्त्तिके सूत्रत्वोक्तिरप्यवैयाकरणमीमांसकप्रतारणार्थेति दिक्॥ ॥ इत्यपत्यादिविकारांतार्थसाधारणाः प्रत्ययाः॥ ६ ॥

राम
२

202

स्त्रीपुंसाभ्यां। प्रागित्यनुवर्त्तते तदाह प्रागर्थेष्विति। पौंस्नइति। इह स्वादिष्विति पदत्वात्संयोगांतलोपेन पुंसः सस्य निवृत्तावपि प्रत्यय सकारः श्रूयत एव॥ अत एवोभाभ्यांप्रत्ययौ नञ्स्नञ्‌ विहितः पौंस्न इति रूपासिद्धिः प्रसंगात्। स्यादेतत्‌ उभाभ्यामपि प्रकृतौ ञ्स्नञेवास्तु तत्स्त्रियोगेन स्त्रीपुंसयोर्नुक्त्वेति नुगेव विधीयतां नचैवं स्त्रैणाः पौंस्ना इत्यत्र नञ्स्नञोश्चेति लुक्प्रसंगः स्त्रैणानां संघ इत्यादौ संघांकलक्षणेष्वित्यण्प्रसंगश्च स्यादिति वाच्यं। उभयत्रापि गोत्र इत्यनुवृत्तेः। प्रवराध्यायप्रसिद्धं हि तत्र गोत्रं। अन्यथापि त्रादेर्हि त्रा इत्यत्राप्यञोलुक्स्यात्। एवं च नञ्स्नञीकक्ख्युस्‌ इति वार्त्तिके नञ्स्नञ्ग्रहणं विना अञंतत्वादेव ङीप्सिध्यतीत्यपरमप्यनुकूलमिति चेद्‌ त्राहुः। नुकि नस्तद्धिते इति टिलोपः स्यात्‌ नचैवं नुगानर्थक्यं टिलोपप्रवृत्त्यैव नुकः सार्थकत्वात्। यद्यपि स्त्रीशब्देन सस्सार्थकम् जातिर्यस्येति चेत्यनेनापीकारलोपसंभवात्तथापि श्रीर्देवतास्य श्रायंह विरित्यत्रेव लोपात्परत्वाद्वृद्धिः स्यात्‌ नतु किंतु टिलोपः प्रवर्त्तत इति श्रीशब्देपि नुकः सार्थकमस्तु तस्मान्नञ्स्नञाविति यथान्यासमेव स्वीकर्त्तव्यमिति। अन्येतु स्त्रीपुंसयोर्नुक्त्वेत्यस्तु॥

स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्‌॥४।१।८७ धान्यानां भवन इत्यतः प्रागर्थेषु स्त्रीपुंसाभ्यां क्रमान्नञ्स्नञौ स्तः। स्त्रैणः। पौंस्नः। वत्यर्थेन स्त्रीपुंवच्चेति ज्ञापकात्‌ स्त्रीवत्‌ पुंवत्‌॥ द्विगोर्लुगनपत्ये॥४।१।८८ द्विगोर्निमित्तं यस्तद्धितोऽजादिरनपत्यार्थः प्राग्दीव्यतीयस्तस्य लुक्स्यात्‌ पंचसु कपालेषु संस्कृतः पुरोडाशः पंचकपालः। द्विगुनिमित्तस्येति किम्‌। पंचकपालस्येदं खंडम्‌॥ पांचकपालम्‌॥ अजादिः किम्‌॥ पंचगर्गरूप्यम्‌। अनपत्ये किम्‌॥ द्वयोर्मित्रयोरपत्यम्‌॥ द्वैमित्रिः॥ गोत्रेऽलुगचि॥४।१।८९ अजादौ प्राग्दीव्यतीये विवक्षिते गोत्रप्रत्ययस्यालुक्स्यात्‌॥ ॥ आगमेऽकारो विवक्षितस्तस्य चयस्येति चेति लोपेकृतेपि स्यानिवत्त्वाद्विलोपो न भविष्यति॥ एवं विड्‌रा पाणिनिसूत्रेणैव ङीप्सिद्धौ नञ्स्नञारुपसंख्यानं मास्त्विति महदेव लाघवमित्याहुः॥ वत्यर्थ इति॥ स्त्रीपुंसाभ्यां नञ्स्नञौ वत्यर्थे न प्रवर्त्तेते इति सामान्यापेक्षं ज्ञापकमिति भावः॥ अत एवोदाहरति स्त्रीवदिति। आच त्वादिति चकारो नञ्स्नञ्भ्यां त्वतलोः समावेशार्थ इति वक्ष्यति॥ तेन स्त्रीत्वं स्त्रीता। पुंस्त्वं पुंस्ते ति सिद्धं॥ द्विगोर्लुगनपत्ये। द्विगोरिति षष्ठीत दर्थस्य हेतुत्वं तच्च भाविनोप्युपपद्यते बुद्ध्याध्यवसायादित्याशयेनाह। द्विगोर्निमित्तमिति॥ अजादिरिति॥ एतच्चोत्तरसूत्रादचीत्यपकर्षाल्लभ्यते वाग्रहणमनुवर्त्य व्यवस्थितविभाषाश्रयणेन वा॥ प्राग्दीव्यतीयः किं। पंचभ्यः कपालेभ्यो हितं पंचकपालीयं। गोत्रेऽलुगचि। गोत्रे किं। गोत्रार्थकप्रत्ययस्यैवालुग्यथा स्यात्‌ नेह कुवलस्येदं कौवलं बदरस्येदं बादरं। कुवलीबदरीशब्दो हि गौरादिङीषंतौ। ताभ्यां फलरूपे विकारेऽनुदात्तादेश्चेत्यञ् तस्य फले लुगिति लुक्‌ ततद्दमर्थे अजादिप्राग्दीव्यतीये

CC-0. In Public Domain. Digitization by eGangotri



विवक्षिते ऽनेनालुङ्न भवति वृद्धत्वाच्छोनेति भावः विवक्षित इति ———— अचीति विषयसप्तमी। परसप्तमीत्वे तु अवृद्धत्वाच्छस्याप्राप्तौ अणेव स्यादिति भावः॥ ॥ गर्गाणामिति। अपत्यवृद्धत्वविवक्षायां यञञोश्चेति लुक्॥ स चाजादिप्रत्यये चिकीर्षिते अनेन प्रतिषिद्ध इति गार्ग्यशब्दाच्छे कृते तस्य ईयादेशः। यस्येति चेत्यकारलोपे यलोपार्थमाह। आपत्यस्य चेति। ढे लोपे कद्र्वा इत्यतो लोप इत्यनुवर्त्तते सूर्यतिष्येत्यतो य इति हलस्तद्धितस्येत्यतो हल इति च तदाह हलः परस्येत्यादि। आभीयत्वेप्यस्य लोपो नासिद्धः आरंभसामर्थ्यादत एवोपधाया इति नानुवर्त्तितमिति व्याचष्टे यकारस्येति। आपत्यस्येति किं सांकाश्यकः कांपिल्यकः। संकाशादिभ्यो ण्यस्ततो धन्वयोपधादिति वुञ् तद्धित इति किं गार्ग्यौ गार्ग्ययोः अनातीति किं गार्ग्यायणाः गर्गीयमिति। तस्मै हितमिति छः। यूनि लुक्। प्राग्दीव्यतीय इति वर्त्तते अचीति च प्रत्ययाधिकाराच्च प्रत्यय इति लभ्यते तदाह प्राग्दीव्यतीये ऽजादौ प्रत्यय इ

गर्गाणां छात्राः॥ वृद्धाच्छः ———— आपत्यस्य च तद्धितेनाति ६।४।१५१ हलः परस्यापत्ययकारस्य लोपः स्यात् तद्धिते नत्वाकारे। गार्गीयाः प्राग्दीव्यतीये किम् गर्गेभ्यो हितं गर्गीयम्। अचि किं गर्गेभ्य आगतं। गर्गरूप्यम्। यूनि लुक् ४।१।९० प्राग्दीव्यतीये ऽजादौ प्रत्यये विवक्षिते युवप्रत्ययस्य लुक् स्यात्। ग्लुचुकस्य गोत्रापत्यं ग्लुचुकायनिः वक्ष्यमाणः फिन् ततो यून्यण्। ग्लौचुकायनः तस्य छात्रोपि। ग्लौचुकायनः। अणो लुकि वृद्धत्वाभावाच्छो न। पैलादिभ्यश्च। २।४।५९ एभ्यो युवप्रत्ययस्य लुक् पीलाया वेत्यण् तस्मादणो द्व्यच इति फिञ् तस्य लुक्॥ ५

मनोरमायां ३।

ति प्रत्ययस्य लुगिति संज्ञाकरणाद्धेयो यः प्रत्ययः स यूनीत्यनेन विशिष्यते तथा च यूनि यः प्रत्ययस्तस्य लुगित्यर्थस्तदाह युवप्रत्ययस्येति। वक्ष्यमाण इति प्राचामवृद्धात् फिन्बहुलमिति वक्ष्यमाणः। अजादौ किं ग्लौचुकायनरूप्यं प्राग्दीव्यतीये किं। ग्लौचुकायनीयं तस्मै हितमिति छः। इह हि गोत्रे लुगनपत्ये चि यूनि गोत्रे नेत्येव सूत्रयितव्यं तथा च लुग्ग्रहणं शक्यमकर्तुमिति स्थितं। तत्र फक्फिञोरिति सूत्रे यूनीत्यस्य मंडूकप्लुतिराश्रयणीयेति क्लेशोयं लाघवानुरोधेन सोढव्य इति भावः। पैलादिभ्यश्च। ण्यक्षत्रियार्षेत्यतो यूनि लुगिति वर्त्तते तदाह युवप्रत्ययस्य लुगिति। पीलाया वेत्यादि। अपत्येप्यणि विहिते गोत्रापत्ये प्यणेव॥ एको गोत्र इति वक्ष्यमाणत्वात्॥ ततो ऽयं तात्पैलशब्दादपत्ये पि विधीयमानः फिञ् युवापत्ये पर्यवस्यति। तस्य च फिञो ऽनेन लुगित्यर्थः। एवं च पीलाया अपत्ये गोत्रापत्ये युवापत्ये चाविरूप्येण पैलशब्दः प्रयुज्यत इत्याह॥ ६ ॥

२०३

राम ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पैलपितापुत्रश्चेति। पैलादिषु येइञन्ता शालंकिसात्यकिश्रौदमेयिपैगलिप्रभृतयस्तेभ्यइञः प्राचामिति लुकि सिद्धे अप्राचामर्थः इति ज्ञेयं। तद्राजाचाणः। गणसूत्रमिदं तद्राजसंज्ञकात्परस्य युवप्रत्ययस्य लुगित्यर्थः। नचेञो त्रं प्राचामिति। इह प्राचां ग्रहणं गोत्रविशेषणं न तु प्राचामवृद्धादित्यादिवद्विकल्पार्थमित्यत्र व्याख्यानं शरणं। दाक्षिः पितेत्यादि। दक्षस्यापत्यं गोत्रापत्यं च पुमान् दाक्षिः युवापत्यं तु दाक्षायण इति भावः। न तौल्वलिभ्यः बहुवचननिर्देशान्गणपाठसामर्थ्याद्वावगतिरित्यभिप्रेत्याह तौल्वल्यादिभ्य इति। देवमित्रि। देवयज्ञि। श्वाफल्कि। आसुरि। नैमिषि। पौष्करसादि। वैकर्णी इत्यादि तौल्वल्यादिः। कात्यायनस्येति। कतस्य गोत्रापत्यं कात्यः। गर्गादित्वाद्यञ्। ततो यूनि यञिञोश्चेति फ

पैलः पिता पुत्रश्च। तद्राजाचाणः। ह्यम्मगधेत्यणन्तादाङ्गशब्दादणो द्व्यचइति फिञो लुक् आङ्गः पिता पुत्रश्च। इञः प्राचाम् २।४।६०। गोत्रे य इञ् तदन्ताद्युवप्रत्ययस्य लुक् स्यात् तच्चेद्गोत्रं प्राचां भवति। पन्नागारस्यापत्यं अत इञ् यञिञोश्चेति फक् पान्नागारिः पिता पुत्रश्च। प्राचां किं दाक्षिः पिता दाक्षायणः पुत्रः। न तौल्वलिभ्यः २।४।६१। तौल्वल्यादिभ्यः परस्य युवप्रत्ययस्य लुङ् न स्यात्। पूर्वेण प्राप्तः। तुल्वलः ततइञ् फकौ तौल्वलिः पिता तौल्वलायनः पुत्रः फक्फिञोरन्यतरस्याम् ४।१।९१ यूनीत्येव यूनि लुगिति नित्ये लुकि प्राप्ते विकल्पार्थं सूत्रम् कात्यायनस्य छात्राः कातीयाः कात्यायनीयाः यस्कस्यापत्यं यास्कः शिवाद्यण् तस्यापत्यं युवा यास्कायनिः अणो द्व्यचइति फिञ् तस्य छात्राः यास्कीयाः। यास्कायनीयाः। तस्यापत्यम् ४।१।९२ षष्ठ्यन्तात्कृतसन्धेः समर्थादपत्येर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्युः। उपगोरपत्यमौपगवः। आदिवृद्धिरन्त्योपधावृद्धीबाधते। तस्येदमित्यपत्येपि बाधनार्थं कृतं भवेत्॥ ९१ का। कातीया इति॥ आ

पत्यस्य चेति यलोपः॥ तस्यापत्यं। तस्येति न स्वरूपग्रहणं किंतु षष्ठ्यंतमात्रोपलक्षणमित्याशयेनाह। षष्ठ्यंतादिति। पंचम्यर्थो ध्याहारलभ्यः॥ अनुकरणात्पंचम्यां सौत्रो लुग्वा उक्ता इति। अणादयउक्ताः। वक्ष्यमाणा इति। इञादयः। ननूपगु अ इति स्थिते ओर्गुणात्परत्वाद्वोऽन्त्या। तौ तिवृद्ध्याभाव्यं। गुणस्तु पिचव्यादौ सावकाशः। कृते च गुणे अवादेशे चात उपधाया इति वृद्ध्या भाव्यमत आह। आदिवृद्धिरिति। परत्वादिति भावः। अंत्योपधावृद्धौ रवकाशः गौः पाचकः। आदिवृद्धेस्तु सुश्रुतः सौश्रुतः त्वाष्ट्रः जागत। इत्यादौ तूभयप्रसंगे परत्वादादिवृद्धिरेव भवति। लक्ष्यानुरोधेनात्र सकृद्गतिन्यायस्यैवाश्रयणात्। अनुशतिकादिषु पुष्करसच्छब्दपाठोप्यत्र लिंगं। अन्यथा आद्युपधा

त्वाव्यभिचारादित्यतआह अपत्यत्वेनविवक्षित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सु॰त॰
सि॰कौ॰ वृद्धिस्यांपौष्करसादेः सिद्धत्वात्तेषु पाठो न यत्नः स्यात् । न च पुष्करसत्ता चरतीत्यर्थे ठकि पौष्करसादिक इत्येतदर्थमनुशतिकादिपाठ आवश्यकः । ञ्णिति णित्येव उपधावृद्धेः सौका
टि॰त॰ रान्तत्तु कितीति वाच्यं ॥ अनभिधानात् ठगत्र न भवतीत्यादिसमाधानस्य कैयटे स्थितत्वात् ॥ एतेन भिन्नविषयेवाध्यवाधकभावो नोपपद्यत इति शंका निरस्ता ॥ उ
४ त्कज्ञापकेन सत्यपि संभवे वाधनं भवतीत्यवस्या श्रयणीयत्वात् ॥ नन्वेवमपि जाग्रत इत्यादावुपधावृद्धिर्वाध्यतां ॥ औपगव इत्यत्र त्वादिवृद्धिप्रवृत्तिवेलायामु
पधावृद्धेरप्राप्त्या कथं तद्वाधः स्यादिति चेदत्राहुः जाग्रत इत्यादावुपधावृद्धेर्वाध्यत्वे निर्णीते कचित्कालान्तरप्राप्तायाअपि तस्या वाध्यत्वौचित्यादिति । स्यादेतत् । यत्रा
दिवृद्धिर्न जाता तत्रांत्योपधालक्षणा वृद्धिः कस्मान्न भवति । व्यसो भौवौवेयसववमिंगताज्वेत्यण् । व्यापदिभवं वैयापदं तत्र भव इत्यण् ॥ अत्र कैयटः तत्राप्येचौपरत्वात्तद्वा
धकाविति सर्वं सुसिद्धिरिति । शाब्दवोधे वैलक्षण्यसत्त्वेपि तदनादरेणाक्षिपति तस्येदमित्यपत्येपीति । इदमर्थे अपत्यसमूहविकारादीनामंतर्भावादपत्येपि तस्येद

उत्सर्गः शेष एवासौ वृद्धान्यस्य प्रयोजनम् भानोरपत्यं भानवः । कृतसंधेः किम् सौत्थितिः अकृतव्यूहपरिभाषयासावुत्थितिर्माभूत् समर्थ
परिभाषयानेह वस्त्रमुपगोरपत्यं चैत्रस्य प्रथमात्किं अपत्यवाचकात् षष्ठ्यर्थे माभूत् वाग्रहणाद्वाक्यमपि देवयज्ञीति सूत्रादन्यतरस्यांग्रह
णानुवृत्तेः समासोपि उपग्वपत्यम् जातित्वान्ङीष् औपगवी । आश्वपतः दैत्यः औत्सः स्त्रैणाः पौंस्नः ॥ (प्रागिति ?) इत्यण् प्रवर्त्तते इति किमनेन तस्यापत्यमिति सूत्रे

णेत्यर्थः । यद्यप्यत इञित्याद्यर्थो तस्यापत्यमित्येतदवक्तव्यं तथापि योगविभागः किमर्थ इत्याक्षेपोत्र वोध्यः । समाधत्ते वाधनार्थमिति । तस्येदमित्यस्य यद्वाधकं वृद्धाच्छस्त 204
द्वाधनार्थं पृथक्सूत्रं कृतं भवेदित्यर्थः । ननु तस्येदमित्यणस्तदपवादस्य वृद्धाच्छस्य च शैषिकत्वादपत्यार्थे प्रसक्तिरेव नास्ति अपत्यादिचतुरर्थीपर्यंतेभ्योन्योर्थः शेष
इत्यभ्युपगमादत आह ॥ ॐ ॥ उत्सर्गः शेष एवासाविति । असौ अपत्यार्थः । अयं भावः । असति योगविभागे अदंतवाह्वादिप्रकृतिसंवद्धस्यैवापत्यार्थस्योपयो राम
गादुपग्वादिप्रकृतिसंवद्धोऽपत्यार्थः शेष एव स्यात् तथा चाणो वाधित्वा भान्वादिभ्यो वृद्धाच्छः प्रसज्येत योगविभागे तु कृते प्रकृतिसामान्यसंवंधस्याप्यपत्यार्थस्यो ४
पयोगाच्छेषत्वाभावेन छस्य प्राप्तिरेव नास्तीति । ननूपग्वादेरवृद्धत्वेन छस्य प्रसक्त्यभावान्निष्फलो योगविभाग इत्यत आह वृद्धानीति । प्रातिपदिकानीति शेषः । कृतसंधेः । के
मिति । अंतरंगत्वात्संधौ कृते तयोत्तरमेव प्रत्ययो भविष्यतीत्यधिकारसूत्रस्थसमर्थपदग्रहणं किमर्थमिति प्रश्नः । अकृतेति । इयं च परिभाषा समर्थग्रहणेन ज्ञा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पितेतिहरदत्तादयः। लोकात सिद्धेत्यन्ये। सावुत्थितिर्माभूदिति। अंतरंगपरिभाषाया अपवादभूत याऽकृतेत्यनयाऽकृतसंधेरेवप्रत्ययःस्यात्तन्निवारणायसमर्थग्र
हणमधिकारसूत्रस्थमावश्यकमितिभावः। यद्यपितत्रसामर्थ्यपरिनिष्ठितत्वमित्यविशेषेणोक्तंतथापिङ्याप्प्रातिपदिकांशएवपरिनिष्ठितत्वंनतुसुब्विशिष्टइत्यवधेयं॥
तेनऔपगवःदंडिमानित्यादिसिद्धं। अन्यथाऔपगव दंडीमानित्यादिस्यात्॥ अस्त्विमानणितिनिर्देशश्चेहलिंगं। यदितुपामादिगणेविष्वगित्युत्तरपदलोपश्चेत्यत्राकृत
संधिग्रहणेनपरिनिष्ठितात्तद्धितोत्पत्तिरित्यभ्युपगम्यतेतर्हिव्यर्थमेवसमर्थग्रहणमित्याहुः॥ प्रथमात्किमिति॥ तस्यापत्यमित्यत्रनिर्दिष्टपदद्वयमध्येप्राथमिकमेवप्र
कृतिसमर्थकंनत्वपत्यंतथाचप्रकृत्याकांक्षायांतदेवग्रहीष्यतइतिकिंतेनप्रथमादित्यनेनेतिप्रश्नः॥ अपत्यवाचकादितितस्यापत्यमित्यादिना विहितःप्रत्ययोयथा
वक्ष्यतेउपगवादिशब्दादस्युपगम्यतेतथाऽपत्यवाचकदेवदत्तादिशब्दात्प्रत्ययोभवत्वितिशंकास्यात् तद्वारणार्थंप्रथमाद्ग्रहणमावश्यकमितिभावः। ननूपगोरपत्यमि
तिविग्रहवाक्येऽपत्यवाचकस्याप्राथम्येप्यपत्यमुपगोरितिवाक्ये प्राथम्यात्स्यादेवापत्यवाचकात्प्रत्ययइतिचेन्मैवंलक्षणापेक्षंप्राथम्यंनियतत्वादत्राश्रीयतेनतुविग्र

॥ अपत्यंपौत्रप्रभृतिगोत्रम् ४।१।१६२ अपत्यत्वेनविवक्षितंपौत्रादिगोत्रसंज्ञंस्यात्॥

हापेक्षमनियतं अन्यथाप्रथमादित्येतन्निरर्थकंस्यादितिव्यर्थमाभूदिति। अयमर्थः। यथाइन्द्रोदेवतास्यसहविषयेन्द्रहविरितिग्रंथमंतात्प्रत्ययोभवति तथाउपगुरपत्यमस्यदेवदत्त
स्यऔपगवोदेवदत्तः देवदत्तोपत्यमस्योपगोर्देवदत्तिरुपगुरितिमाभूदिति। एतच्चकैयटेस्पष्टं। नन्वपवादत्वात्तद्धितस्समासंनित्यंबाधेत। नचतद्धितस्यवैकल्पिकत्वात्पक्षेसोपि
भविष्यतीतिवाच्यं। यत्रोत्सर्गापवादौमहाविभाषयाविकल्प्येतेतत्रापवादेनविनिर्मुक्तेउत्सर्गोनप्रवर्त्ततइतिपारेमध्येइत्यत्रवाग्रहणेनज्ञापितत्वादित्याशंक्याह अन्यतरस्यांग्र
हणानुवृत्तेरिति। जातित्वादिति। गोत्रंचचरणैस्सहेत्यनेनेतिशेषः। प्राचात्वणंतत्वाञ्जीवित्युक्तंतद्व्याख्यात् भिश्वठिङ्गाणञित्यनेनेत्युक्तंतदुभयमपिगोत्राद्यूनस्त्रियामितिसू
त्रस्यभाष्यानुरोधेनगोत्रंचचरणैरित्यत्र कृत्रिमंगोत्रमेवगृह्यतेनत्वपत्यमात्रमित्याशयेनप्रवृत्तमितिबोध्यमित्याहुः। सूत्रस्थान्महोत्सर्गान्क्रमेणोदाहरति आश्वपतइ
त्यादि। औत्सइति। उत्सःप्रस्रवणंवारिप्रवाहोनिर्झरोझरइत्यमरः। तस्यचापत्येनयोगस्तुगांगेयोभीष्मइतिवत्॥ ॥ अपत्यंपौत्रंनन्वपत्यग्रहणंव्यर्थं पौत्रादेरपत्य
त्वाव्यभिचारादित्यतआह अपत्यत्वेनविवक्षितमिति। विवक्षितमितिकिं। वस्तुतःपौत्रप्रभृत्येवयदाशेषत्वेनविवक्ष्यतेगर्ग्यस्येदमितितदामाभूदित्याहुः अन्येतुवस्तुतःपौत्रा

स॰त॰
सि॰कौ॰ दीनामेवतत्त्वेनविवक्षायांसंज्ञामाभूत् अपत्यत्वेनविवक्षायामेवयथास्यादित्येवमर्थंतत् तेनऔपगवइत्यादावप्यणर्थस्यगोत्रसंज्ञासिध्यति।नह्यणःपौत्रत्वादिकंशक्या
दि॰त॰ तावच्छेदकंकिंत्वपत्यत्वमेवा न्यथागोत्राधिकारस्थायञाद्यर्थस्यैवगोत्रसंज्ञास्यादिति।नन्वपत्याधिकारेगोत्रयुवसंज्ञाकरणसामर्थ्यादपत्यमितिलभ्यतएवेतितेनैवो
५ क्तप्रयोजनसिद्धेःकिमनेनात्रापत्यग्रहणेनेतिचेदत्राहुः॥तेनदृष्टाज्जाइत्यत्रतच्छब्देनजनपदशब्दात्क्षत्रियादञ्इत्यादिनाविहितायेअञादयस्तएवगृह्यन्तेनतुततःप्रा
प्राक्तनप्रत्ययाःगोत्रयुवसंज्ञाकांडनविच्छिन्नत्वादितिवक्ष्यते।तथाचापत्याधिकारपठनसामर्थ्यसोपेक्षयादपत्यस्यासेवंधशकानिराकरणायपुनरपत्यग्रहणमिहकृतमि
मिति॥पौत्रप्रभृतीतिकिं।अनंतरापत्येमाभूत्।कौंजिः।गार्गिः।नचैवमप्यंगिरसःपौत्रेगर्गस्यानंतरेअतिप्रसंगइतिवाच्यंयस्यपौत्रादितंप्रत्येवगोत्रसंज्ञेतिस्वीकारात्॥
एवंचगार्गीप्रत्यनंतरापत्यत्वेनविवक्षायामपिगर्गंप्रतिगोत्रत्वंनिष्प्रत्यूहमितिस्यादेवगर्गाद्यञितिदिक्॥ ❀ ॥जीवतितुवंश्ये।पितृपितामहादिरुत्पादकप्रवंधोवंश
स्तत्रभवोवंश्यः दिगादित्वाद्यत्।पौत्रप्रभृतीत्यनुवृत्तंषष्ठ्याविपरिणम्यतेव्याख्यानात्तेनात्रापूर्वस्त्रियामितिलिंगाचेत्याह।पौत्रादेरिति॥तुशब्दोभिन्नक्रमःयुवत्यस्यान्ते

जीवतितुवंश्येयुवा।४।१।१६३ वंश्येपित्रादौजीवतिपौत्रादेर्यदपत्यंचतुर्थादितद्युवसंज्ञमेवस्यान्नगोत्रसंज्ञम्॥भ्रातरिचज्यायसि।४।१।
१६४।ज्येष्ठेभ्रातरिजीवतिकनीयान्चतुर्थादिर्युवास्यात्॥

त॰बोध्यः॥सचएवकारार्थइतिव्याचष्टेयुवसंज्ञमेवेति।तेन एकसंज्ञाधिकारबहिर्भूतयोरपिगोत्रयुव 205
संज्ञयोर्नसमावेशइतिभावः॥नन्वस्तुसंज्ञाद्वयस्यसमावेशःकोदोषइतिचेन्मैवं शालंकाःपैलीयाइत्यसिद्धिप्रसंगात्।तथाहि।शालंकोरपत्यंशालंकिः।पैलादिषुपाठादिञ्।शा
लंकादेशो।शालंकेरपत्यंशालंकेर्युवापत्यं यञिञोश्चेतिफक्तस्यपैलादिभ्यश्चेतिलुक्।ततःशालंकेयूनश्छात्राइत्यर्थेविवक्षायामिञश्चेत्यणि शालंकाइतिभवति।तथापीलायाअ
पत्यंगोत्रापत्यंवापीलायावेत्यणिपैलस्तस्यापत्यंयुवाअणोद्व्यचइतिफिञ्।तस्यपैलादिभ्यश्चेतिलुक्।ततःपैलस्यूनश्छात्राःपैलीयाइतिभवति।तत्रगोत्रत्वोस्समावेशेतुगोत्रेलु रा॰म॰
गचीतिफक्फिञोरलुक्प्रसज्येत।नचपरत्वाद्यूनिलुग्भविष्यतीतिसिद्धमिष्टमितिवाच्यं।ततोपिपरत्वात्फक्फिञोरन्यतरस्यामितिविकल्पापत्तेः।नचसिद्धान्तेपिविकल्पःशंक्यः ५
फक्फिञोरित्ययंहियूनिलुकएवापवादोनतुपैलादिभ्यश्चेत्यस्य।अनंतरस्येतिन्यायात्।यद्यपियूनिलुगपवादोपिफक्फिञोरितिविकल्पःपरत्वात्पैलादिभ्यश्चेतिलुकमपि
बाधेतेतिवक्तुंशक्यंतथापिपरादप्यंतरंगस्यवलीयस्त्वात्पैलादिभ्यश्चेतिनित्यएवलुगित्याहुः।भ्रातरिच अवंश्यार्थोयमारंभः॥भ्रातातुनवंश्यः।उत्पादकप्रवंधोवंशइ

CC-0. In Public Domain. Digitization by eGangotri

त्यस्युपगमात्। अपत्यं पौत्रप्रभृतीत्यनुवर्त्य पौत्रप्रभृतेरिति षष्ठ्या विपरिणम्य व्याख्यानात्फलितमाह। चतुर्थादीनि। अत्रायमर्थः। गार्ग्यादिषु मृतेष्वपि जी
वत्यग्रजे अनुजो युवसंज्ञक इति॥ ॐ॥ वान्यस्मिन् इहत्यं जीवति पदं तिङं तं न तु सप्तम्यंतमिति व्याचष्टे जीव देवेति यो जीवति स युवसंज्ञको मृत्त
स्तु स्थविरतरे जीवत्यपि गार्ग्य एव भवतीति न तु गार्ग्यायण इति भावः। एकमिति। इहत्यमित्यर्थः द्वितीयमिति। अनुवर्तमाने सप्तम्यंतमित्यर्थः। यदुक्त।

वान्यस्मिन् सपिंडे स्थविरतरे जीवति। ४।१।१६५। भ्रातुरन्यस्मिन्सपिंडे स्थविरतरे जीवति पौत्रप्रभृतेरपत्यं जीवदेव युवसंज्ञ
म्वा एकं जीवति ग्रहणमपत्यस्य विशेषणं द्वितीयं सपिंडस्य तदेतानि हेतु उभयोरुत्कर्षार्थैः स्थानेन वयसा चोत्कृष्टे पितृव्ये माता
महे भ्रातरि वा जीवति गार्ग्यस्यापत्यं गार्ग्यायणः गार्ग्यो वा स्थविरेति किम् स्थानवयोन्यूने गार्ग्य एव जीवति किं मृते मृतो वा गार्ग्य ए
व। वृद्धस्य च पूजायामिति वाच्यम्। गोत्रस्यैव वृद्धसंज्ञा प्राचाम् गोत्रस्य युवसंज्ञा पूजायां गम्यमानायाम्॥ तत्रभवान् गार्ग्यायणः पू
जेति किम् गार्ग्यः। यूनश्च कुत्सायां गोत्रसंज्ञेति वाच्यम् गार्ग्यो जाल्मः कुत्सेति किम् गार्ग्यायणः॥ ७॥ ७॥ ७॥ ७॥

मुभयोरिति तदेव विवृणोति स्थानेन वयसा चेति। मातामहे भ्रातरि चेति॥ सन्निहितत्वात् भ्रातरीत्यस्य मातामह भ्रातरीत्यर्थ इत्येके पितृव्यपुत्रे इत्यन्ये। क्लौगु
पितृव्ये पितामहभ्रातरि वेति पाठः। जीवति किमिति। जीवति द्वयं किमर्थमिति प्रश्नः। अत एव मृते मृते वेत्युत्तरं संगच्छते। अन्यस्मिन् किं। भ्रातरि जीवति जी
वतो विकल्पो माभूत्। पूर्वसूत्रं तु भ्रातरि जीवति मृतस्य कनीयसो युवसंज्ञार्थमिति सावकाशं। वृद्धस्य चेति। वार्तिकमिदं तथा यूनश्चेत्यग्रिममपि॥ ६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



एकोगोत्रे गोत्रइतिजात्यपेक्षयाएकवचनं। एकशब्दः संख्यावाची गोत्रेऽभिधित्सितेऽपत्यत्वबोधकप्रत्ययएकएवस्यादित्युक्तेः। गोत्रापत्ये प्रथमएवशब्दः प्रत्ययंलभतेनान्यः॥ यदित्वनंतरएवापत्यप्रत्ययास्तादपिस्यात्तर्हि गोत्रापत्येएकएवप्रत्ययोनकृतःस्यात् इत्यंचअपत्यप्रत्ययानामनिषेधोवाच्यइतिवार्तिकार्थोप्यनेनसंगृहीतइत्याशयेनव्याचष्टे गोत्रेएकएवेति। अपत्यप्रत्ययइति। एतच्चाधिकाराल्लब्धं। अन्येतुएकशब्दःप्रथमपर्यायः॥ प्रथमस्यापत्यप्रत्ययस्य तयाचप्रथमाप्रकृतिर्गोत्रेऽपत्यप्रत्ययं लभतइति। सूत्रार्थव्याचक्षतेतत्क्लिष्टं। अस्यांपंक्तौ एकमानयेत्युक्तेप्रथममानयेति प्राथम्यार्थस्याप्रतीतेः। वस्तुतस्तुप्रथमादित्यधिकारात्गोत्रेप्रथमादेवप्राति

एकोगोत्रे ४।१।९३ गोत्रेएकएवापत्यप्रत्ययः स्यात्। उपगोर्गोत्रापत्यमौपगवः गार्ग्यः। नाडायनः। गोत्रेस्वैकोनसंख्यानांप्रत्ययानांपरंपरा यद्वास्वद्व्यूनसंख्येभ्योऽनिष्टोत्पत्तिःप्रसज्यते अपत्यंपितुरेवस्यात्ततः प्राचामपीतिचमतभेदेनतद्धान्येसूत्रमेतत्तथोत्तरम् पितुरेवापत्यमितिपक्षेहि॥ उपगोस्तृतीयेवाच्ये औपगवादिञ्स्यात् चतुर्थेत्वजीवज्ज्येष्ठेमृतवंश्ये औपगवेःफक् इत्थंफगिञोःपरंपरायांमूलाच्छततमेगोत्रेएकोनशतंप्रत्ययाःस्युः पितामहादीनामपीतिमुख्यपक्षेतुतृतीयेवाच्ये उपगोरणाइष्टेसिद्धेपि अणन्तादिञपिस्यात् चतुर्थेफगितिततःफगिञोःपरंपरायांशततमे गोत्रेष्टनवतिरनिष्टप्रत्ययाःस्युः अतोनियमार्थमिदंसूत्रम् एवमुत्तरसूत्रेप्यूह्यम्॥ ॥

पदिकादपत्यप्रत्ययइतिव्याख्यायैकग्रहणमिहत्यक्तुंशक्यमित्याहुः। औपगवइति। उपगुशब्दएवप्रत्ययंलभतेनत्वौपगवशब्दइति गोत्रापत्येप्यनंतरापत्यइवाणेवभवतिनत्विञ्॥ गार्ग्यइति। गोत्रापत्येगर्गादिभ्योयञितिविशिष्यविधानादनंतरापत्यइवात्रअतइञ्नभवतिकिंतुयञेव। सचगार्ग्यस्यापत्येपिभवतिनत्वत्रयञंतात्फक् एकोगोत्रइतिनियमात्। नाडायनइति॥ नडादिभ्यःफगितिगोत्रापत्येविधानादत्राप्यतइञ्नभवतिकिंतुफगेव। सचनाडायनस्यापत्येपिभवति। नतुफगंतादिञ्। उक्तनियमात्। ननुकस्मिन्गोत्रेयुगपदनेकप्रत्ययाप्रसक्तेर्व्यर्थमिदंसूत्रमित्याशंक्यसूत्रारंभफलंमतभेदेनव्यवस्थापयतिगोत्रेस्वैकेनेति॥ स्वंगोत्रंतदपेक्षया। एकोनसंख्यानां। तृतीयेद्वयोःपरंपराचतुर्थेत्रयाणांपंचमेतुचतुर्णामित्यादिपरंपराप्रसज्यतइत्यर्थः॥ तथाहि। उपगोस्तृतीयेअणिञोःपरंपराचतुर्थेतणिञ्फ

समु ६

206

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जयजंताद्यजिति। नचैवमणिञोः परंपरायां निवर्त्तितायामप्यौपगवइत्यत्राण्प्रत्ययपरंपरास्यात् तथा गा। र्ग्यइत्यादौ यञादिपरंपरेति वाच्यं। सत्यामपि तस्यामनिष्टाभावादि
ति। तच्चिंत्यं। फगंतात्फकिनाडायनइत्यादावनिष्टप्रसंगादितिदिक्॥ ऊह्यमिति। अपत्यंपितुरेवेतिपक्षे। चतुर्थापत्यरूपेयूनिविवक्षितेगोत्राद्यूनीतिनियमसूत्रेसत्यसति
चगोत्रप्रत्ययांतादेवयुवप्रत्ययइति द्वयोः परंपरासाचेष्टत्वान्ननियमेनव्यावर्त्यते। पंचमेतुयूनिनियमाभावेत्रयाणांपरंपराप्रसज्यते। षष्ठेतुचतुर्णामित्यादि। ततःप्राचा
मपीति द्वितीयपक्षेतुगर्गाच्चतुर्थेयूनिमूलप्रकृत्यनंतराभ्यामनिष्टोत्पत्तिः प्रसज्यतेपंचमेतुमूलप्रकृत्यनंतरयुवभ्यः। तथानडाच्चतुर्थेयूनिपूर्ववद्द्वाभ्यामनिष्टोत्पत्तिः
। पंचमेतुत्रिभ्यः। उपगोश्चतुर्थेवाच्येतुमूलप्रकृतेरेकस्मादेवानिष्टोत्पत्तिः। नत्वनंतरापत्यवाचकात् ततो जातेष्यत इञिरूपानिष्टाभावादित्यादियथासंभवंतत्रोह्य
मित्यर्थः॥ ॐ ॥ गोत्राद्यूनि॥ असत्यस्मिन्सूत्रे मुख्यमते पंचमादौ यूनि विवक्षिते गोत्रप्रत्ययांतान्युवप्रत्ययोत्पत्ताविष्टसिद्धेपि मूलप्रकृत्यनंतरयुवभ्योपि।
स्यादिति पाक्षिकानिष्टप्राप्तेर्नियमार्थमिद — मित्याशयेनाह गोत्रप्रत्ययांतादेवेति॥ नतु मूलप्रकृत्यनंतरयुवभ्य इत्यर्थः। मनोरमायांतु नतु युवप्रत्ययांतादिति प्रथ

गोत्राद्यून्यस्त्रियाम्।४।१।९४। यून्यपत्ये गोत्रप्रत्ययांतादेव प्रत्ययः स्यात्स्त्रियां तु न युवसंज्ञा। गर्गस्य युवापत्यं गार्ग्यायणः। स्त्रियां गोत्रत्वाद
कएव प्रत्ययः॥

पक्षेर्थइत्यपिस्थितं। अत्र वदंति। पंचमादौ यूनि विवक्षिते तस्य यूनस्तृतीयंप्रत्यनपत्यत्वादप्राप्तौ विध्यर्थमेवेदं स्यान्नतु नियमार्थमिति। यु
वप्रत्ययांतात्प्रत्ययोर्दुर्वारः॥ तस्मादिह पितुरेवापत्यमिति पक्षो नाश्रयणीय इति। अन्ये त्वाहुराद्यपक्षे गोत्राद्यूनीत्यावर्त्य एकेनाप्राप्तप्रत्ययं विधाय द्वितीयेन नियम्य
ते यूनि गोत्रादेवेति। एवं च ततः प्राचामपीति पक्षेण सह ऐकरूप्यं न भवतीति गोत्राच्च यून्येवेति विपरीतनियमस्त्विह न कृतः। व्याप्त्यलाभात्। नच शैषिकाश्छादयो व्या
वर्त्याइति वाच्यं। गोत्रेऽलुगचीति लिंगात्। स्त्रियांत्विति। यद्यत्रास्त्रियामित्यस्यैकवाक्यतया स्त्रीभिन्ने यूनि गोत्रादेवेत्यर्थः क्रियेत तर्हि स्त्रीषु युवसंज्ञाया अनिषेधात् यु
वतिषु प्रत्ययानां परंपरा प्रसज्येत॥ नचैको गोत्र इत्यनेन निस्तारः। युवसंज्ञाया गोत्रसंज्ञायाबाधात्। अथ स्त्रियां न युवप्रत्यय इति वाक्यभेदेनार्थः क्रियेत तदा गोत्रप्र
त्ययेन युवतिर्नाभिधीयेत। किंतु वाक्यमेव स्यात्ततश्च गार्ग्यस्यापत्यं स्त्री गार्गी न स्यादतो युवसंज्ञानिषेधपरमेवेदमित्याशयेन व्याचष्टे न युवसंज्ञेति॥ अत्रायमाशयः।
अस्त्रियामिति योगो विभज्यते। यूनीति शब्दस्वरूपमनुवर्त्तते॥ परिभाषा चेयं। यत्र युवसंज्ञाविधानं तत्रास्त्रियामित्युपतिष्ठत इति सिद्धस्य गतिरियं। जीवति तु वंश्ये युवा। स्त्रिय

CC-0. In Public Domain. Digitization by eGangotri



अत इञ्॥ घकालतनेषु इति ज्ञापकात्सुबंतादेव तद्धितोत्पत्तिरित्यभ्युपगमेऽप्यधिकृतप्रातिपदिकस्य न वैयर्थ्यं किंतु प्रयोजनमस्तीति ध्वनयति। अदंतं यत्प्रातिपदिकमिति। अत इत्य
स्य सुबंतविशेषणत्वे तु इस्सयोरपत्यमित्यादिविवक्षायां दाक्षिरित्यादि न सिद्ध्येदिति भावः। तपरः किं। विश्वपः अपत्यं वैश्वपः। प्रदीयतां दाशरथाये त्यत्र तु तस्येदमित्यण्। अपत्यत्व
विवक्षायां त्विञेव। बाह्वादिभ्यश्च। बाधृलोडन इति धातौ केवलस्य बाहोरपत्ययोगासंभवात्सामर्थ्यात्तदंतविधौ सौबाहविरिति माधवोक्तं चिंत्यमिति ध्वनयन्नाह। बाहविरिति
जानंति बाहविगार्ग्यगौतम इत्याश्वलायनसूत्रप्रयोगाज्ज्ञाप्यवृत्त्युदा हरणाच्च बाहुशब्दः संज्ञारूपोऽस्तीति भावः। औडुलोमिरिति। यद्यपि गणे बाहुद्वास्युधिष्ठिर अर्जु
न प्रद्युम्नेत्यादिषु केवलो लोमन् शब्दः पठितस्तथापि सामर्थ्यात्तदंतग्रहणं। नारकाप्युडु वास्त्रियामित्यमरोक्त्या नक्षत्रवाच्युडुशब्दः। उडूनीव लोमानि यस्य तस्यापत्यमौडु
लोमिः। शरा इव लोमानि यस्य तस्यापत्यं शारलोमिः। बहुत्वे तु इञपवादोऽकारः प्रागेवाजं तेषूक्तः उडुलोमाः शारलोमाः। इह प्रतिपदविधानेषु पुराणसिद्धान्तसंज्ञाशब्दादे

अत इञ् ४।१।९५॥ अदन्तं यत्प्रातिपदिकं तत्प्रकृतिकात् षष्ठ्यन्तादिञ् स्यादपत्यार्थे॥ दाक्षिः॥ बाह्वादिभ्यश्च ४।१।९६॥ बाहविः। औडुलोमिः। आकृ
तिगणोऽयम्॥ सुधातुरकङ् च ४।१।९७॥ चादिञ्। सुधातुरपत्यं सौधातकिः॥ व्यासवरुडनिषादचंडालबिम्बानां चेति वक्तव्यम्॥ नय्वाभ्यां पदान्ताभ्यां पू
र्वौ तु ताभ्यामैच् ७।३।३॥ पदान्ताभ्यां यकारवकाराभ्यां परस्य न वृद्धिः किंतु ताभ्यां पूर्वौ क्रमादैचावागमौ स्तः। वैयासकिः। वारुडकिः। इत्यादि

वगृत्यं तेषां घोपस्थितिकत्वात्तेन इदानीं ततो यो बाहुस्तस्यापत्ये बाहव इत्यणेव। न त्विञ्। उक्तं च हरिणा॥ अभिव्यक्त ॥ गोत्रे कुञ्जादिभ्यश्च्फञ् ४।१।९८॥
पदार्था ये स्वतंत्रा लोकविश्रुताः। शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु॥ अनर्थकं संदिग्धार्थकमप्रयुक्तं च क्रमेण विशेषणत्रयं व्यावर्त्यं तदुक्तिषु जनस्य दशोधिप्य
र्थः। अत एव संज्ञा श्वशुरस्यापत्यं श्वाशुरिरित्यत्र राजश्वशुरादिति यन्न। मिमीते मातान तस्याः स्वसा मातृस्वसा इह मातृपितृभ्यां स्वसेति षत्वं न। नन्वेवं बाहवः श्वाशुरिरिति
पूर्वोक्तो न सिध्यत इति चेन्नैवं। अणिञोर्विधौ शब्दविशेषानुपादानादप्रतिसिद्धेः। पितृव्यस्य इह तेः। व्यासेति। वेदान् व्यस्तवानिति व्यासः। कर्मण्यण्। भीमो भीमसेन इतिवदे ७
कदेशग्रहणं न य्वाभ्यां। य्वाभ्यां किं। नअर्थोपसर्गनाथः तस्यापत्यं नार्थिः। पदान्ताभ्यां किं। याज्ञिकः। रोचो विषयप्रदर्शनाय नेति निषेधोक्तिः। तेनेह न। दाध्यश्विर्माध्वश्विः। न ह्य
य्वाभ्यां परस्य वृद्धिप्रसक्तिरस्ति। क्वचित्तु वृद्धिप्रसक्तिसत्वेऽपि नेष्यते। द्वैअशीति भृतो भृतो भावी वा द्व्यशीतिकः। वारुडकिरिति। वरुडादयो जातिविशेषाः। वकार।

207

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्यापरां तत्वान्नद्याभ्यामिञ्यैजनाइत्यादीनि। नैषादकिः। चांडालकिः। वैवकिः। गोत्रे कुंजादिभ्यः। प्रागेको गोत्र इत्यादिसूत्रद्वयं चेत्यनन्तेन तद्दोकग्रहणं त्यक्तुं शक्यमित्याहुः॥
च्फञो ञकार इद्वार्थः। कौंजायनाः। चकारस्तु व्रातच्फञोरित्यत्र विशेषणार्थस्तेनाश्वादिभ्यः फञ् आश्वायन इत्यत्र ञ्यो न भवति। अत्रेदमवधेयं। कौंजायन्य इत्यादा
वेकवचने द्विवचने च ञ्यस्य जित्वादाद्युदात्तत्वमेव। बहुत्वे तु तस्य लुकि च्फञश्चकारञकारयोस्तुल्यबलयोर्विरोधे सति परत्वाञ्ञित्स्वरेणाद्युदात्तत्वे प्राप्ते भाष्या
दौ तद्धितस्य कित इत्यत्र योगं विभज्य कित इत्यनुवर्त्य तद्धितस्य चितोन्तोदात्तत्वमिति व्याख्यानात्कौंजायना इत्यत्रान्तोदात्तत्वमेव भवति। न चैवं हि फगेवास्तु कि

पा३।१२३

व्रातच्फञोरस्त्रियाम्। व्रातवाचिभ्यश्च्फञन्तेभ्यश्च स्वार्थे ञ्यः स्यान्न तु स्त्रियाम्। कौंजायन्यः। बहुत्वे तद्राजत्वाल्लुग्वक्ष्यते। आधायन्यः। स्त्रियां कौंजाय
नी। गोत्रत्वेन जातित्वान्ङीष्। अनन्तरापत्ये कौंजिः। नडादिभ्यः फक् ४।१।९९। गोत्र इत्येव। नाडायनः। चारायणः। अनन्तरो नाडिः। हरितादिभ्योञः
४।१।१००। एभ्योञन्तेभ्यो युनि फक्। हारितायनः। इह गोत्राधिकारेपि सामर्थ्याद्युन्ययम्। न हि गोत्राद्गोत्रप्रत्ययः। विदाद्यन्तर्गणो हरिता
दिः। यञिञोश्च ४।१।१०१ गोत्रे यौ यञिञौ तदन्तात् फक् स्यात्। अनन्तरापत्यस्येति यलोपो न। गार्ग्यायणः। दाक्षायणः। शरद्वच्छुनकदर्भा
द्भृगुवत्साग्रायणेषु ४।१।१०२। गोत्रे फक्। अञिञोरपवादः। आद्यो विदादिः। शारद्वतायनो भार्गवश्चेत्। शारद्वतोऽन्यः। शौनकायनो वात्स्यश्चेत्
शौनकोन्यः। दार्भायणः। आग्रायणश्चेत्। दार्भिरन्यः। द्रोणपर्वतजीवन्तादन्यतरस्याम् ४।१।१०३। एभ्यो गोत्रे फग्वा। द्रौणायनः। द्रौणिः। पार्वतायनः। पार्वतिः।
जैवंतायनः। जैवंतिः। अनादिरिह द्रोणः। अश्वत्थाम्न्यनन्तरे तूपचारात्॥ ९. मनेन युक्तनिर्देशेनेति वाच्यं। तथा हि सति व्रातच्फञोरस्त्रियामिति सूत्रप्रणयनापत्त्या
ना डायनादिभ्योपि ञ्यः स्यादिति। कुंजा। ब्रध्न। शंख। शाकटेत्यादि॥ ॐ ॥ व्रातच्फञोः। पूगाञ्ञ्योग्रामणीपूर्वादित्यतोनुवर्त्तनादाह ञ्यः स्यादिति। व्रातवाचिभ्यः कापोतपाक्य इत्यु
दाहरिष्यति। अस्त्रियां किं। कपोतपाकी। तद्राजत्वादिति। ञ्यादयस्तद्राजा इति सूत्रेणेति शेषः। लुग्वक्ष्यत इति। तद्राजस्य बहुष्विन्यनेनेति शेषः। कौंजायनीति। इह
यति ञ्यप्रत्यये योपधत्वान्न। जातेरिति ङीष्भावेप्यपि रूपे स्वरे च विशेषो वा बोध्य इत्याहुः। यञिञोश्च। अधिकारप्राप्तं गोत्रग्रहणं यञिञोर्विशेषणं न तु विधेयस्य फ

CC-0. In Public Domain. Digitization by eGangotri



कः। व्याख्यानान्तरे तदाह गोत्रेपाविति। गोत्रे किं। द्वीपादनुसमुद्रं यञ्। द्वैपेभवो द्वैप्यः। सुतंगमादिभ्यश्चातुरर्थिक इञ्। सौतंगमिः। तदपत्ये फक् मा भूत्। फकव्यादिति। सा
मर्थ्यात् पूर्ववत्। शारद्वतः शुनकः। भृगुः। शरद्वतोपत्यं न भवति पूर्वभावित्वात्। एवं शुनस्यापत्यं न भवति वत्सः। अतोत्र भार्गवश्च वात्स्यश्चाग्रायणश्चेति द्वंद्वे अत्रिभृ
गुवितिपञ्जनो श्चेति च यथासंभवं लुक् बोध्यः। यद्यप्यत्र बहुत्वाभावादत्रिभृग्वित्यादिना लुग्दुर्लभस्तथापि युगपदधिकरणवचनतायां वर्तिपदानां बहूर्थ
त्वात् सौत्रत्वाद्वास्यादेव लुक्। अतो व्याचष्टे भार्गवश्चेदिति वात्स्यश्चेदिति च। अनादिरिति। अश्वत्थाम्नः पिता यो महाभारते प्रसिद्धस्तद्रूपे स्यात्। अन्य एवायं द्रो

अनृष्यानन्तर्ये विदादिभ्योऽञ्। ४।१।१०४। एभ्योऽञ् गोत्रे ये त्वत्रानृषयस्तेभ्य आनन्तर्ये सूत्रे स्वार्थेऽप्यञ्। विदस्य गोत्रं वैदः। अनन्तरो वैदिः। वा
ह्वादेराकृतिगणत्वादिञ्। पुत्रस्यापत्यं पौत्रः। दौहित्रः। गर्गादिभ्यो यञ्। ४।१।१०५। गोत्र इत्येव। गार्ग्यः। वात्स्यः। यञञोश्च २।४।६४ गोत्रे यद्य
ञन्तमञन्तं च तदवयवयोरेतयोर्लुक् स्यात् तत्कृते बहुत्वे न तु स्त्रियाम्। गर्गाः। वत्साः। विदाः। उर्वाः। तत्कृते इति किम्। प्रियगार्ग्याः। स्त्रियां तु गार्ग्यः स्त्रि
यः। गोत्रे किम्। द्वैप्याः। औत्साः। प्रवराध्याये प्रसिद्धमिह गोत्रम्। तेनेह न पौत्राः। दौहित्राः। मधुबभ्वोर्ब्राह्मणकौशिकयोः। ४।१।१०६। गोत्रे य
ञ्। माधव्यो ब्राह्मणः। माधवोऽन्यः। बाभ्रव्यः कौशिकः। बाभ्रवोऽन्यः। बभ्रुशब्दस्य गर्गादिपाठात् सिद्धे नियमार्थमिदम्। गर्गादिपाठफलन्तु
लोहितादिकार्यार्थम्। बाभ्रव्यायणी। कपिबोधादाङ्गिरसे। ४।१।१०७। गोत्रे यञ् स्यात्। काप्यः। बौध्यः। आङ्गिरसे किम्। कापेयः। बौधिः॥ ॥

ण इत्यर्थः। अश्वत्थाम्नीत्यादि। द्रोणाचार्यस्यानंतरापत्ये अश्वत्थाम्नि द्रोणायन इति प्रयोगो भाक्त इत्यर्थः॥ ॥ अनृष्या। अनृषीति पंचम्याः सौत्रो लुक्। अनृ
षिभ्य इत्यर्थः। सूत्रे इति। आनंतर्य इत्यत्रेत्यर्थः। स्वार्थ इति। चातुर्वर्ण्यादिराकृतिगणत्वादिति भावः। वैदिरित्यत्र ऋष्यणमाशंक्याह बाह्वादेरिति। विद। उर्व।
कश्यप। कुशिक। भरद्वाज। उपमन्यु। विश्वानर। परस्त्री। परशु चेत्यादि॥ गर्गादिभ्यो। गर्ग। व्याघ्रपाद। पुलस्ति। चमस। मंडु। वतंड। कपि। कत। शाकल। कण्व॥
अगस्ति। कुंडिनी। याज्ञवल्क्य। पराशर। जमदग्नीत्यादि। कथं तर्हि रामो जामदग्न्य इति। अनंतरापत्ये तस्यां सत्यां। अनंतरेपि गोत्रत्वारोपाद्बोध्यः। यञञोश्च। एयद्ब

208

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्त्रियार्थेन्यतो लुगिति तद्राजस्येति सूत्राद्ध्रुवृत्तेनैवास्त्रियामिति चानुवर्त्तते। यस्कादिभ्यो गोत्र इति चानन्तराह गोत्रे यञंतमित्यादि। प्रवराध्यायप्रसिद्ध गोत्रवाचिनो
केवलो यञ्‌जो न भवत गोत्र इत्यनेन नन्दंतविप्रविनां तद्वयवोरिति निर्दिश्यमानस्यादेशा भवतीति भावः। प्रवराध्यायेति। एतच्च स्त्रीपुंसाभ्यामिति सूत्रे लौकिकस्यगो
त्रस्य ग्रहणमिति भाष्यमुपादाय कैयटेनोक्तमिति भावः। तेनेह नेति। यद्यत्र लौकिकं गोत्रमपत्यमात्रं गृह्येत तर्हि दास्यादेर्वाजिप्रसंग इति भावः। लोहितादीति। सर्व
त्र लोहितादीत्यादिना व्यक्तः। व्येलोक्तेपि स्त्रीलेविलसामर्थ्यात् ङीबित्याशयेनाह वाभ्रव्यायणीति। गर्गादिगणे एवं वभ्रुः कौशिके इति पाठ्यं एवं हि द्विर्वभ्रुप
हणं न कर्त्तव्यं भवतीति हरदत्तादयः। कापेय इति। इतश्चानिञ इति ढक्। कपेर्गर्गादिगणे पाठो लोहितादिकार्यार्थस्तेन काप्यायनीति सिध्यति। बोधिरिति॥ अ

वतण्डाच्च ४।१।१०८। आङ्गिरस इत्येव। वातण्ड्यः। अनाङ्गिरसे तु गर्गादौ शिवादौ च पाठाद्यञणौ। वातण्ड्यः। वातण्डः। लुक् स्त्रियाम् ४।१।१०९। व
तण्डाच्चेति विहितस्य लुक् स्यात् स्त्रियाम्। शार्ङ्गरवादित्वान्ङीन्। वतण्डी। अनाङ्गिरसे तु वातण्ड्यायनी लोहितादित्वात् ष्फः। अणि तु वातण्डी॥
षित्वाद्ङीष्। यमाणः ष्यङ् न। अश्वादिभ्यः फञ् ४।१।११०। गोत्रे आश्वायनः। पुंसि जाते पुंसीति प्रकृतिविशेषणम्। जातस्य गोत्रे जातायनः
पुंसीति किम् जाताया अपत्यं जातेयः। भर्गात्त्रैगर्ते ४।१।१११। गोत्रे फञ्। भार्गायणस्त्रैगर्तः। भार्गिरन्यः॥ ९ ऋषित्वादिञ् बाह्वादित्वाद्वा॥ ॥ वतंडाच्च

यञणोः प्राप्तयोरांगिरसे यञेवेति नियमार्थं सूत्रं। लुक् स्त्रियां। विहितस्येति। परिशेषितस्य वेति बोध्यं। एतच्चांगिरस इत्यनुवृत्त्या लभ्यते। यद्यपि वतंडाल्लुक् स्त्रि
यामित्येकसूत्रकरणेप्यांगिरस इत्यनुवृत्त्या अनांगिरसे यञणोर्लुगभावान्न स्त्रियामिष्टं सिध्यति तथापि पुंस्यांगिरसे यञणोरुभयोः प्राप्तिरनिष्टेति तद्वारणाय पृथ
क्सूत्रं कृतं। ऋषित्वादिति। न चैवं ऋष्यंधकेत्यणि सिद्धे शिवादिगणे वतंडपाठो व्यर्थ इति शंक्यं गर्गादिपाठेन यञा बाधात्तन्निवृत्तये तत्पाठस्यावश्यकत्वात्। व्य
ङ् इति। अणिञोरनार्षयोरिति सूत्रेणेति भावः। अश्वादिभ्यः। गोत्र इति। इह गणे वैल्व आनडुह्य आत्रेय इति गोत्रप्रत्ययांतास्त्रयः पठ्यंते तेभ्यस्तु यून्येव। एको गोत्रे॥
गोत्राद्यूनीति वचनात्तत्र बिल्वो नाम राजर्षिस्तस्य वृद्धो वैल्वस्तस्य युवा आनडुह्यशब्दो गर्गादियञन्तः। आत्रेयशब्दो ढगन्त इति त्रयः। पुंसि जात इति। गणसूत्रमिदं। जातश

सु.त.
सि.कौ.
टि.त.
६

देपुंसि विद्यमाने फञ् इत्यर्थः॥ कस्मादित्याकांक्षायामर्थाज्ज्ञानप्राग्दीव्यत इति लभ्यते। जानाया इति लिंगविशिष्टपरिभाषया एकारेशस्य पूर्वान्तत्वेन ग्रहणं द्व्या मा
सिः॥ ❀॥ शिवादिभ्योऽण्। ननु विशेषविहिता निञादीन् बाधित्वा अण् एवारंभसामर्थ्याद्भविष्यति किमनेनाण्ग्रहणेन अत्राहुः। ऋषिषेणशब्दे त्रिगलोपश्चने
ततः प्राप्तमिञं बाधित्वा परत्वात्सेनान्तलक्षणेति प्राप्ते इह पाठसामर्थ्याच्छ्या प्राप्तमन्यपरं नैवस्यान्नलणन्तथा च तच्चाणो ग्रहणमावश्यकमित्येके। अणधिकार
इत्येव स्यान्नान्यदित्यण्ग्रहणं स्पष्टप्रतिपत्त्यर्थमित्यन्ये। शिवा। ककुत्स्था। वतंड। जरत्कारु। विपाट्। तक्षन्। विश्रवण्। रवण। ऋष्टिषेण। विरूपाक्षेत्यादि॥ गोत्र

शिवादिभ्योऽण्। ४।१।११२। गोत्र इति निवृत्तम्। शिवस्यापत्यं शैवः। गाङ्गः। पक्षे तिकादित्वात्फिञ्। गाङ्गायनिः। शुभ्रादित्वाड्ढक्। गाङ्गेयः। अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः ४।१।११३। अवृद्धेभ्यो नदीमानुषीनामभ्योऽण् स्याड्ढकोऽपवादः। यामुनः। नार्मदः। चिन्तितायाः अपत्यं चैन्तितः। अवृद्धाभ्यः किम्। वासवदत्तेयः। नदीत्यादि किम्। वैनतेयः। तन्नामिकाभ्यः किम्। शोभनाया अपत्यं शौभनेयः॥ ऋष्यन्धकवृष्णिकुरुभ्यश्च ४।१।११४। ऋषयो मन्त्रद्रष्टारः। वासिष्ठः। वैश्वामित्रः। अन्धकेभ्यः। श्वाफल्कः। वृष्णिभ्यः। वासुदेवः। आनिरुद्धः। शौरिरिति बाह्वादित्वादिञ्। कुरुभ्यः। नाकुलः। साहदेवः। इञ एवायमपवादो मध्येऽपवादन्यायात्। अत्रिशब्दात्तु परत्वाड्ढक्। आत्रेयः। मातुरुत्संख्यासंभद्रपूर्वायाः ४।१।११५। संख्यादिपूर्वस्य मातृशब्दस्य उदादेशः स्यादण् प्रत्ययश्च। द्वैमातुरः। षाण्मातुरः। सांमातुरः। भाद्रमातुरः। आदेशार्थं वचनम्। प्रत्ययस्तूत्सर्गेण सिद्धः। स्त्रीलिंगनिर्देशोऽर्थापेक्षया। तेन धान्यमातुर्न। संख्येति किम्। सौमात्रः। शुभ्रादित्वाड्ढक्। द्वैमात्रेयः॥

११ इति निवृत्तमिति। एतच्च वृत्तौ कैयटे च स्थितम्। यद्यपि गोत्रसंज्ञासूत्रपर्यन्तं गोत्राधिकार इति यूनि लुगिति सूत्रस्थभाष्यकैयटाभ्यां लभ्यते तथापि तन्मतांतरमिति भावः। एवं च ततः प्रभृत्यपत्यसामान्ये प्रत्यया भवन्तीति स्थितम्। शुभ्रादित्वान्नित्यं ढकि प्राप्ते जरत्कारुशब्दोऽत्राणर्थं पठ्यते जारत्कारवः। ढकि तु ढे लोपोऽकद्र्वा इत्युलोपः। जारत्कारेयः। कुञ्जादित्वान्नित्ये कुञ्जादिभ्य इति नियमं च्युञि प्राप्ते विपाट्छब्दोऽत्राणर्थं पठ्यते। वैपाशः। वैपाशायन्यः। सेनान्तलक्षणेति ण्यप्रत्यये उदीचामिञीति च प्राप्ते तक्षन्शब्दोऽत्राणर्थं पठ्यते ल्य

209
६

प्रत्ययेन समावेशोऽभिव्यक्तेन त्विञ्जानास्त्वण्ः तास्त्वण्ः। विश्रवणरवणशब्दावत्र प्रकृत्यन्तेतेनौ च विश्रवःशब्दस्यादेशौ विश्रवसोऽपत्यं वैश्रवणः। रावणः। अवृद्धाभ्यो। अवृद्धेभ्यो नदीमा
नुषीनामभ्य इत्येव सूत्रयितुं युक्तमित्याशयेन व्याचष्टे अवृद्धेभ्य इत्यादिना। द्वैमातुर इति॥ तद्धितार्थेत्यादिना समासः। अत्र द्वयोर्मात्रोरपत्यमिति विग्रहो न तु द्विमात्रोरप
त्यमिति। दिक्संख्ये संज्ञायामिति नियमेनासंज्ञायां समासासंभवात्। धान्यमातुर्नेति। अभिव्यक्तपदार्था इत्यनेन जननीवाचिन एव ग्रहणोऽसिद्धेऽपि तस्य स्पष्टप्रतिपत्त्य
र्थः स्त्रीलिंगनिर्देश इति भावः। अभिव्यक्तेत्यस्य नित्यताया ज्ञापनार्थ इति त्वन्ये॥ ॐ ॥कन्यायाः। ननु कन्या ह्यक्षतयोनिस्तस्या अपत्यसंभवस्तव नास्तीत्याशं

कन्यायाः कनीन च ४।१।११६। ढकोऽपवादोऽण्। तत्संनियोगेन कनीनादेशश्च कानीनो व्यासः। कर्णश्च अनूढाया एवापत्यमित्यर्थः। विकर्णशु
ङ्गछगलाद्वत्सभरद्वाजात्रिषु ४।१।११७ अपत्येऽण्। वैकर्णो वात्स्यः। वैकर्णिरन्यः। शौङ्गो भारद्वाजः। शौङ्गिरन्यः। छागलः। आत्रेयः। छागलि
रन्यः। केचित्तु शुङ्गेत्याबन्तं पठन्ति तेषां ढकमप्युदाहरणम्। शौङ्गेयः। पीलाया वा ४।१।११८। तन्नामिकाणं बाधित्वा द्व्यच इति ढकि प्रा
प्ते पक्षेऽण् विधीयते। पीलाया अपत्यं पैलः। पैलेयः। ढक्च मण्डूकात् ४।१।११९। चादण् पक्ष इञ्। माण्डूकेयः। माण्डूकः। माण्डूकिः। स्त्रीभ्यो
ढक् ४।१।१२०। स्त्रीप्रत्ययान्तेभ्यो ढक् स्यात्। वैनतेयः। बाह्वादित्वात् सौमित्रिः। शिवादित्वात् सापत्नः। द्व्यचः ४।१।१२१। द्व्यचः स्त्रीप्रत्य
यान्तादपत्ये ढक् स्यात्। तन्नामिकाणोऽपवादः। दात्तेयः। पार्थ इत्यत्र तु न स्यादमित्यण्॥ ९ क्याहा। अनूढाया इति अविवाहितायामित्यर्थः। विकर्णवा
त्स्यादीनामपत्यप्रत्ययान्तानां ग्रहणं यञञोश्च अत्रिभृगुकुत्सेति सूत्राभ्यामपत्यप्रत्ययस्य लुक्। न चात्र वत्सादीनामेव ग्रहणं त्विति शङ्क्यं मूलभूतानां तेषां विकर्णादी
नामप्रत्यय त्वाभावादतो व्याचष्टे वात्स्यश्चेत्यादि। युगपदधिकरणवचनतायां बहुत्वमस्तीति शरद्वच्छुनकसूत्र एवोक्तं प्रपञ्च इति। पूर्वसूत्राद्द्व्यग्रहणानुवृ
त्तेरिति भावः। स्त्रीभ्यो ढक्। बहुवचननिर्देशात् स्वरूपस्य ग्रहणं नाप्यर्थस्य। ढगर्थतया शुभ्रादिषु विमातृशब्दपाठात्। किं तु स्त्र्यधिकारोक्तटाबादेर्ग्रहणं। न तु वि
प्रकृतिकृत्प्रत्ययादेरित्याशयेनाह स्त्रीप्रत्ययान्तेभ्य इति। तेन दरदोऽपत्यं दारद इत्यत्र ढक् न भवति। स्त्र्यर्थग्रहणे तु स्यादेवातो ठकादरच्छब्दो हि जनपदक्षत्रियवाचीततोऽप

CC-0. In Public Domain. Digitization by eGangotri

सु.त.
सि.कौ.
टि.न.
९

सार्थिकप्रत्ययगर्भाधेत्यत्र लिनस्त्रियामनन्त्यतिलुकि द्वन्द्वसमस्तार्थवाचित्वात् ढकोऽनिवर्त्तमाने पुनरिह ढग्ग्रहणमलसंबद्धस्य ठको निवृत्त्यर्थम् यद्यपि चानुकृष्टं नोत्तरेति
परिभाषया अलिह न प्रवर्त्तेतेत्याहुस्तस्या अनित्यत्वज्ञापनाय ढग्ग्रहणमित्याहुः तस्येदमिति शिवादित्वादण् एवालित्यन्ये इतश्च इञः किम् दाक्षिः अनिञः कि
म् दाक्षायणः द्व्यचः किं उदधेरपत्यमौदधिः काशिकायां मरीचेर्मारीच इत्युदाहृतं तदसत् बाह्वादित्वेन अप्रवृत्तेः न चास्य बाह्वादित्वे विवक्षितव्यं मरीचिशब्दो बाह्वादि
षु पठितः इति मिरचोंत्वात् परः इति सूत्रे भाष्ये स्थितत्वात् आत्रेय इति परत्वादयमृष्यणं बाधते इति भावः शुभ्रादिभ्यश्च चकारस्त्वाकृतिगणत्वद्योतनार्थ इत्याहुः मृकंड
शब्दोऽत्र पठ्यते मार्कंडेयः शुभ्र मृकंड अश्व विमातृ विधवा गोधा अश्ववाहण इत्यादि आकृतिगणोऽयम् तेन पांडवेय इति सिद्धम् इहादन्तेषु इ आप्तः विधवाशब्दान्तु

इतश्चानिञः ४।१।१२२ इकारान्ताद्व्यचोऽपत्ये ढक्स्यान्न तु इञन्तात् दौलेयः। नैधेयः। शुभ्रादिभ्यश्च ४।१।१२३ ढक्स्यात्। शुभ्रस्यापत्यम्॥
शौभ्रेयः। विकर्णकुषितकात्काश्यपे ४।१।१२४। अपत्ये ढक्। वैकर्णेयः। कौषीतकेयः। अन्यो वैकर्णिः। कौषीतकिः। भ्रुवो वुक्च। ४।१।१२५। चा
त् ढक्। भ्रौवेयः। प्रवाहणस्य ढे। ७।३।२८। प्रवाहणशब्दस्योत्तरपदस्याचामादेरचो वृद्धिः पूर्वपदस्य तु वा ढे परे। प्रवाहणस्यापत्यम्
प्रावाहणेयः। प्रवाहणेयः। तत्प्रत्ययस्य च ७।३।२९। ढान्तस्य प्रवाहणशब्दस्योत्तरपदस्यादेरचो वृद्धिः पूर्वपदस्य तु वा। प्रवाहणेयस्यापत्यं प्रा
वाहणेयिः। प्रवाहणेयिः। बाह्वात्तद्धितनिमित्ता वृद्धिः द्वाश्रयेण विकल्पेन बाधितुं न शक्यत इति सूत्रारम्भः। कल्याण्यादीनामिनङ्। ४।१।१२६। ए
षामिनङादेशः स्यात् ढक् च। काल्याणिनेयः। बान्धकिनेयः॥ ॥ ९ द्व्यलक्षणो ढक् चतुष्प्याज्ञातिवाचिषु ढञ् गोधाशब्दादुगवचनात्सोऽपि भवति क्वचिदो
त्सर्गिकोऽण् प्राप्त इति बोध्यम् प्रवाहणस्य ढे उत्तरपदस्येत्यधिक्रियते अर्थात्परिमाणेत्यतः पूर्वस्य तु वेति अनुवर्त्तते तदाह उत्तरपदस्याचामादेरित्यादि नित्यमुत्तरप
दवृद्धेः फलं तु प्रवाहणेयी भार्या यस्य स प्रवाहणेयीभार्यः इत्यत्र वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधः तत्प्रत्ययस्य च प्रवाहणस्येति वर्त्तते तच्छब्देन प्रत्ययः परामृश्यते तदाह ढान्तस्ये
त्यादि बाह्वात्तद्धितनिमित्तेति ढक्प्रत्ययान्तात् बाह्वादिभूतो य इञ् तन्निमित्तेत्यर्थः कल्याण्यादीनाम् इह परस्त्रीशब्दः पठ्यते परस्य स्त्री इति षष्ठीसमासः पारस्त्रैणेयः
परभार्यायामुत्पन्न इत्यर्थः अनुशतिकादित्वा

210

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दुभयपदवृद्धिः विदारादिगणे तु परस्त्री परशु चेति पठ्यते। प्राप्नोतीति शेषः। तत्र परा चासौ स्त्री चेति कर्मधारयः। परस्त्रिया अपत्यं पारशवः। ब्राह्मणाच्छूद्रायां तेनैवोढायामुत्पन्नः सा
च जात्यंतरयोगात्परस्त्री। न च परशवादेशः स्वस्यानिवद्भावात्पारशवेप्यनुशतिकादीनां चेत्युभयपदवृद्धिः स्यादिति वाच्यं। स्थानादेशे पूर्वोत्तरपदसंभ्रमो हान्तरप्रवृत्तेः इह ग
णे स्त्रीप्रत्ययान्तानां ढकः सिद्धत्वादिनङर्थं ग्रहणं अन्येषां तूभयार्थं। कल्याणी। सुभगा। दुर्भगा। बंधकी। परस्त्रीत्यादि॥ ॐ ॥ कुलटाया वा। प्राकंध्यादित्वात्परत्वम्
तस्यैव निपातनाद्वा। सतीभिक्षुकात्रेति॥ अत्र इनङ्विधौ। तथा चोक्तममरेण। अथ बांधकिनेयः स्याद्बंधुलश्चासतीसुतः। कौलटेरः कौलटेयो भिक्षुकी तु सती यदि। तदा कौ
लटिनेयोस्यात्कौलटेयोपि चात्मज इति किंचित्तु क्षुद्राया अपि इनङ् तृतीयं रूपं कौलटिनेय इतीच्छंति। पक्षे द्रगिति। ढगपि पक्षे भवत्येवेति भावः॥ हृद्भगा। पूर्वपदस्य चे

कुलटाया वा ४।१।१२७। इनङ्मात्रं विकल्प्यते ढक्तु नित्यः पूर्वेणैव । कौलटिनेयः। कौलटेयः। सतीभिक्षुकात्र कुलटा या तु व्यभिचारार्थं कुला
न्यटति तस्याः क्षुद्राभ्यो वेति पक्षे ढ्रक्। कौलटेरः । हृद्भगसिन्ध्वन्ते पूर्वपदस्य च ७।३।१९। हृदाद्यन्ते पूर्वोत्तरपदयोरचामादेरचो वृ
द्धिर्ञिति किति च। सुहृदोपत्यं सौहार्दः। सुभगाया अपत्यं सौभागिनेयः। सक्तुप्रधानाः सिंधवः सक्तुसिंधवः तेषु भवः साक्तुसैंधवः। चटकाया ऐर
क् ४।१।१२८। चटकस्येति वाच्यम्। लिंगविशिष्टपरिभाषया स्त्रिया अपि। चटकस्य चटकाया वा अपत्यं चाटकैरः। स्त्रियामपत्ये लुगवक्त
व्यः। तयोरेवापत्यं चटका। गोधाया ढ्रक् ४।१।१२९। गोधेरः। शुभ्रादित्वात्पक्षे ढक्। गौधेयः। आरगुदीचाम् ४।१।१३०। गोधारः। रकासिद्धे आकारोच्चारण
मन्यतो विधानार्थम्॥ जडस्यापत्यं जाडारः। पण्डस्यापत्यं पाण्डारः॥ ञिति चकारेणोत्तरपदस्येत्यनुकृष्यते तदाह पूर्वोत्तरपदयोरिति। महते सौभगायेत्यत्र
उद्गात्रादित्वादञि च्छांदसत्वान्नोत्तरपदवृद्धिरित्याहुः। चटकाया इति। स्त्रीलिंगनिर्देशात्पुंसि न स्यादित्याशंक्याह चटकस्येति वाच्यमिति। एवं च चटकाद्दैरगि
त्येव सांप्रदायिकः पाठ इति न्यासकृदुक्तिर्वार्त्तिकविरोधादुपेक्ष्या तस्मादेवेति। तत्र टाप् वेत्यत्र ढिल्लुकि लुक्तद्धितलुकीति टापो लुकि जातिलक्षणङीषं बाधित्वा
अजादिलक्षणष्टाबिति भावः। गौधेर इति ढस्य एयादेशे कृते लोपो व्योरिति यलोपः। आरगुदीचाम्। वचनादेव द्रुग्ढगारकां पर्याये सिद्धे उदीचां ग्रहणं पूजार्थम आ

CC-0. In Public Domain. Digitization by eGangotri

सु·त·
सि·कौ·
टि·त·
११

इगितिन सूचितम् पश्चेति चेत्याकारलोपमेघेरइत्यनिष्टप्रसंगात् अन्यतरइति अनाकारांताल्लस्यानुरोधेन कृतमित्यर्थः पंडस्येति पंडो नपुंसकम् तस्यापत्यं तु रुग्निमादिनि॥
॥ ॐ ॥ क्षुद्राभ्यः अर्थमतं स्त्रीत्वं शब्दे आरोप्य स्त्रीलिंगनिर्देशः गृष्ट्यादिभ्यश्च गृष्टि हलि बलि कुद्रि अगस्ति मित्रयु अण् ढकोपवाद इति इहांत्ययोर्द्वयोर्ऋषित्वाद् अणः प्राप्तः अन्ये
भ्यस्तु इतश्चानिञ इति विवेकः गार्ष्टेय इति सत्कालसूत्तासर्वापि गृष्टिर्नतु गौरेव अतोत्रन चतुष्पाद्भ्य इत्यनेन ढञ् सिद्धिः केकय· केकयस्यापत्यं स्त्री कैकेयी जनपदशब्दा
त्क्षत्रियादञ् मैत्रेयिकया श्लाघ्यते मित्रयूनां भावेनेत्यर्थः गोत्रचरणाच्छ्लाघात्याकारेति वुञ् तत्र हि लौकिकं गोत्रं गृह्यते लोके च ऋषिशब्दो गोत्रमिति प्रसिद्ध इति का

क्षुद्राभ्यो वा ४।१।१३१ अङ्गहीनाः शीलहीनाश्च क्षुद्रास्ताभ्यो वा ढक् पक्षे ढश्च इति ढक्। काणेरः। काणेयः। दासेरः। दासेयः। पितृष्वसुश्छण् ४।१।
१३२। अणोपवादः पैतृष्वस्रीयः। ढकि लोपः ४।१।१३३। पितृष्वसुरन्त्यलोपः स्यात् ढकि अत एव ज्ञापकात् ढक्। पैतृष्वसेयः। मातृष्वसुश्च ४।१।
१३४ पितृष्वसुर्यदुक्तं तदस्यापि स्यात्। मातृष्वस्रीयः। मातृष्वसेयः। चतुष्पाद्भ्यो ढञ् ४।१।१३५। ढे लोपोऽकद्र्वाः ६।४।१४७। कद्रूभिन्नस्योवर्णान्तस्य
लोपः स्यात् ढे परे। कामण्डलेयः॥ कमण्डलुशब्दश्चतुष्पाज्जातिविशेषः। गृष्ट्यादिभ्यश्च ४।१।१३६। एभ्यो ढञ् स्यात् अण्ढकोरपवादः गार्ष्टेयः
मित्रयोरपत्यं ऋष्यणि प्राप्ते ढञ्॥ केकयमित्रयुप्रलयानां यादेरियः ७।३।२। एषां यकारादेरियादेशः स्यात् ञिति णिति किति च तद्धिते परे इति स्या
देशे प्राप्ते॥ दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि ६।४।१७४। एता

शिका एतच्च यदा मित्रयुशब्दः अभेदोपचारात्तदपत्यसंतानेवर्तते तदावोध्यमन्यथा मित्रयूनामिति बहुवचनांतेन विग्रहो न स्यात् प्रलयादागतम् प्रालेयम् इत्यादेशो वृ
द्धिं न बाधते अचामादेरचो वृद्धिर्यादेरियादेश इति भिन्नविषयत्वात् अंगं तूभयोर्विशेषणं न तु कार्यीति हरदत्तः आदिवृद्धेरपीदमेव सूत्रं विधायकमस्तु किमनेन नवि ११
षयभेदविचारणेत्यन्ये दांडिनायन· निपात्यंत इति दंडिन् हस्तिन् आभ्यां नडादित्वात् फक् निपातनाट्टिलोपाभावः वसंतादिष्वथर्वन्निति पठ्यते अथर्वणा प्रोक्तो ग्रंथ
उपचारादथर्वा तमधीते आथर्वणिकः सुभ्रादिषु जिह्माशिन्निति पठ्यते तस्यापत्यं जैह्माशिनेयः वाशिनोऽपत्यं वाशिनायनिः उदीचां वृद्धादिति फिञ् भ्रूणहन् धी

211

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वन् अनयोः ष्वुञितकारोन्तादेशो निपात्यते भ्रूणघ्नो भावो भ्रौणहत्यम् धैवत्यं हननक्तोः चिण्णलोरित्यनेनैव हन्तेस्त्वे सिद्धे तकारनिपातनं ज्ञापयति धातोः स्वरूपग्रहणे
तत्प्रत्यये कार्यविज्ञानमिति वार्तघ्नमित्यत्र तत्वं न नत्वेवं प्रसङ्ग्याग्निमित्यादेः अनुदात्तस्य च दुर्वारः स्यादम् विधौ धातोः स्वरूपग्रहणाभावात् अत्राहुः मृजेर्वृद्धिरिति
सूत्रस्थभाष्यपर्यालोचनया धातोः कार्यमुच्यमानं तत्प्रत्यये भवतीति ज्ञापनार्थं तकारनिपातनमिति व्याख्येयं तेन न कोपि दोषः इति सरघूद्रस्याल्लिपरे ष्यादेर्वा निपात्य
ते सरघ्वा भवं सारवमुदकं इक्ष्वाकोरपत्यं ऐक्ष्वाकः जनपदशब्दात्क्षत्रियादञ् उलोपो निपातनात् इक्ष्वाकुषु जनपदेषु भवः कोपधादण् ऐक्ष्वाकः अत्राप्युलो
पो निपातनादेव आजलं तयोर्हू योरप्येकश्रुत्या पाठात् बहुत्वे तत्र सत्र द्राजत्वात् लुक् अण सुनेति शेषः तथा च रघुः इक्ष्वाकूणां दुरापेर्थे इति मुरारिस्त्वाह ऐ

यस्कादिभ्यो गोत्रे।२।४।६३। एभ्यो ऽपत्यप्रत्ययस्य लुक् स्यात् तत्कृते बहुत्वे न तु स्त्रियाम् मित्रयवः। अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च २
।४।६५॥ एभ्यो गोत्रप्रत्ययस्य लुक् स्यात्तत्कृते बहुत्वे अत्रयः भृगवः कुत्साः वसिष्ठाः। गोतमाः। आङ्गिरसः। बह्वच इञः प्राच्यभरतेषु २।४।६६। बह्व
चः परो य इञ् प्राच्यगोत्रे भरतगोत्रे च वर्तमानस्तस्य लुक् स्यात् पन्नागाराः। युधिष्ठिराः। न गोपवनादिभ्यः।२।४।६७। एभ्यो गोत्रप्रत्ययस्य न लुक् स्यात् वि
दाद्यन्तर्गणोयम्। गौपवनाः। शैग्रवाः। तिककितवादिभ्यो द्वन्द्वे।२।४।६८। एभ्यो गोत्रप्रत्ययस्य बहुषु लुक् स्याद्द्वन्द्वे तैकायनयश्च कैतवायनश्च तिक
कादिभ्यः फिञ् तस्य लुक् तिककितवाः॥ ११ इक्ष्वाकेषु च मे ष्विलेषु फलमिति हिरण्यस्य विकारे हिरण्मयः मयटि यादेर्लोपोत्र निपात्यते॥ ॐ ॥यस्का
दिभ्यः पत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यत इत्याशयेनाह अपत्यप्रत्ययस्येति ण्यक्षत्रियार्षेत्यतो लुगित्यनुवर्तते तद्राजस्येति सूत्राद्बहुष्विति तेनैवास्त्रियामि
ति च तदाह लुक् स्यादित्यादि तत्कृते इति किम् प्रिययास्काः बहुत्वे किम् यास्कः शिवाद्यण् यस्कलत्य दुह्यक लोटक वस्लिकुद्रि मित्रयु इत्यादि अत्रिगोत्रप्रत्ययस्ये
ति अत्रिशब्दादितश्चानिञ इति ढक् इतरेभ्यस्तु यञ् ऋष्यणिति बोध्यम् भरतगोत्रे उदाहरति युधिष्ठिरा इति बहुष्वेव लुक् नेह यौधिष्ठिरिः कुरुलक्षण एण्यं वाधित्वावा
द्बाहित्वादिञ् विदाद्यन्तर्गणोयमिति यञ्ञो श्चेति लुगत्र प्राप्नोतीति भावः तिककितवादिभ्यो यद्यपि द्वन्द्वरूपाण्येव गणे पठ्यन्ते तिकादीनि पूर्वपदानि कितवादी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



न्युत्तरपदानित्यत्वापि तिकादिभ्य इत्युक्ते पूर्वपदे चैव लुगाशङ्क्येत इष्यते तूत्तरपदे ऽपि अत एव तिककितवादिभ्य इत्युक्तम् । तिककितवा इति । अन्येप्यत्रोदाहर्तव्याः औपकायनाश्च लामकायनाश्च नडादिभ्यः फक् तस्य लुक् उपकलमकाः भ्राष्टकयश्च कापिष्ठलयश्च अत इञ् तस्य लुक् भ्राष्टककपिष्ठलाः कार्ष्णाजिनयश्च कार्ष्णसुंदरयश्च अत इञ् तस्य लुक् कृष्णाजिनकृष्णसुंदरा इत्यादि ॥ ॐ ॥ उपकादिभ्यो । अद्वंद्वे ग्रहणं द्वंद्व इत्येतत्राधिक्रियत इति स्फुटीकरणार्थं उपकादीनां मध्ये त्रयो द्वंद्वास्तिककितवादिषु पठ्यन्ते उपकलमका इत्यादयस्तेषां पूर्वेणानित्यमेव लुक् अद्वंद्वेत्वनेन विकल्प इति ज्ञेयम् भाव्यं भ्राष्टकिकापिष्ठलय इत्युदाहरणं तिककितवादिषु तस्य पाठो अनार्थ इति केचित् तेनात्र द्वंद्वेपि विकल्प एवोचित इत्याशयेनोदाहरति भ्राष्टककपिष्ठला इत्यादि तिककितवादिषु पठितानामनेन द्वंद्व एव विकल्प इत्याशयेनोदाहरति लमकाः ॥

उपकादिभ्योन्यतरस्यामद्वंद्वे २।४।६९ । एभ्यो गोत्रप्रत्ययस्य बहुत्वे लुग्वा स्यात् द्वंद्वे चाद्वंद्वे च औपकायनाश्च लामकायनाश्च नडादिभ्यः फक् तस्य लुक् । उपकलमकाः । औपकायनलामकायनाः भ्राष्टककपिष्ठलाः भ्राष्टकिकापिष्ठलयः । लमकाः लामकायनाः । आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् २।४।७० । एतयोरवयवस्य गोत्रप्रत्ययस्य लोपः स्याद्बहुत्वे लुक् स्यात् अवशिष्टस्य प्रकृतिभागस्य यथासंख्यमगस्तिकुण्डिनचावेतावादेशौ स्तः अगस्तयः कुण्डिनाः ॥

॥ ९ लामकायन इति एवमन्येप्युदाहर्तव्याः उपका औपकायनाः भ्राष्टकाः भ्राष्टकायना इत्यादि अगस्त्यशब्दादृष्यण् कुंडिनशब्दात्तु गर्गादियञ् ननु कुंडिनीशब्दस्य यञि भस्याढे इति पुंवद्भावे नस्तद्धित इति टिलोपः प्राप्नोति न च संयोगादिलोपश्चेति प्रकृतिभावः शंक्यः अणीति तत्रानुवर्तनान्नैवम् अस्मादेव निपातनात् तस्य प्रवृत्तेः कौंडिन्यः सिध्यति चकारस्त्वंतोदात्तार्थः मध्योदात्तो कुंडिनीशब्दः कुंडमस्त्यस्या इति मत्वर्थीयस्येनेरुदात्तत्वादेशस्यापि कुंडिनशब्दस्यांतरतम्यान्मध्योदात्तत्वात् ॥ अवशिष्टस्य प्रकृतिभागस्येति ॥ न च प्रत्ययविशिष्टस्यादेशमात्रं विधीयतां किं लुग्विधानेनेति वाच्यं । अगस्तीयाश्छात्रा इत्यनापत्तेः लुकि हि सति गोत्रे लुगचीति लुकि प्रतिषिद्धे बहुत्वात् तद्धस्सिध्यति । प्रत्ययविशिष्टस्यादेशविधौ तु बहुत्वोपगमशेषिकोणेव स्यात् ॥ कौंडिनाश्छात्रा इति तूभयथापि सिद्धत्येव । छापवादस्य कस्य वादिभ्यो गोत्रे इत्यणप्रत्ययस्य प्रवृत्त्या तत्र विशेषाभावात् ॥ ९२

212

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

राजश्वशुराद्यत्। क्रमेणाणिञोरपवादः॥ जाताविवेति॥ प्रकृतिप्रत्ययसमुदायेन जातिश्चेद्वाच्येत्यर्थः। प्रत्ययस्त्वपत्य एव। एवं च पंकजादिवद्योगरूढ इति फलितोर्थः। टिलोपो ने
ति। न तद्धित इति प्राप्तष्टिलोपो नेत्यर्थः। ब्राह्मो जातौ। योगविभागोऽत्रेति। एकयोगत्वे त्वारंभसामर्थ्यादनपत्ये ¯ जातौ ब्राह्मीत्यत्र प्राप्तटिलोपसिद्धावपि ब्राह्मण इति न सिध्येत्॥
अन्निति प्रकृतिभावस्य नमपूर्वोपत्य इति निषेधाट्टिलोपस्य दुर्वारत्वात्। किंच जातौ ब्राह्ममित्यादि न सिध्येदन्निति प्रकृतिभावस्य दुर्वारत्वादिति भावः। ब्राह्म इति। इहापत्य इति न सं

।४।१।१३७।
राजश्वशुराद्यत्। राज्ञो जाताववेति वाच्यम्। ये चाभावकर्मणोः ६।४।१६८। यादौ तद्धिते परेऽन् प्रकृत्या स्यान्न तु भावकर्मणोः। राजन्यः। श्वशुर्यः। जातिग्रहणाच्छू
द्रादावुत्पन्नो राजनः। अन् ६।४।१६७। अणि अन् प्रकृत्या स्यादिति टिलोपो न। अभावकर्मणोः किं राज्ञः कर्म भावो वा राज्यं। संयोगादिश्च ६।४।१६६। इन् प्र
कृत्या अणि परे चक्रिणोऽपत्यं चाक्रिणः। न मपूर्वोऽपत्येऽवर्मणः ६।४।१७०। मपूर्वोऽन् प्रकृत्या न स्यादपत्येऽणि भाद्रसामः। मपूर्वः किं सौत्वनः। अपत्ये किं चा
र्मणः परिवृत्तश्चार्मणो रथः। अवर्मणः किं चक्रवर्मणोऽपत्यं चाक्रवर्मणः। वा हितनाम्न इति वाच्यम्। हितनाम्नोऽपत्यं हैतनामनः हैतनामः। ब्राह्मो जातौ ६
।४।१७१। योगविभागोऽत्र कर्त्तव्यः। ब्राह्म इति निपात्यते। नपत्येऽपि। ब्राह्मम् हविः। ततो जातौ अपत्ये जातौ अणि ब्रह्मणष्टिलोपो न स्यात्। ब्रह्मणोऽपत्यं ब्राह्मणः।
अपत्ये किम्। ब्राह्मी ओषधिः। औक्षमनपत्ये ६।४।१७३। अणि टिलोपो निपात्यते। औक्षं पदं। अनपत्ये किम्। उक्ष्णोऽपत्यमौक्ष्णः। षपूर्वहन्धृतराज्ञाम
णि ६।४।१३५। षपूर्वयोः नन्तस्य हनादेश्च भस्यातो लोपोऽणि। ताक्ष्णः। भ्रौणघ्नः। धृतराज्ञोऽपत्यं धार्तराज्ञः। पूर्वेति किम्। सामनः। अणि किम्। ताक्षण्यः। क्षत्रा
द्घः ४।१।१३८। क्षत्रियः। जाताविसेव। क्षात्रिरन्यः॥ ॥ ९ संबध्यते। अन्यथा निपातनसिद्ध्यर्थं स्यान्नमपूर्वं इति प्रकृतिभावनिषेधाट्टिलोपसिद्धेरित्याशयेनाह अ
नपत्येणीति। ब्राह्ममिति। ब्राह्मो मुहूर्त्तो ब्राह्मः स्थालीपाक इत्याद्यप्युदाहरणं। नन्वेवमपि ब्राह्मणो न सिध्यति नमपूर्वं इति प्रकृतिभावनिषेधादपत्येऽणि न तद्धित इति टिलोप
प्रसक्तेरत आह जाताविति। इह मण्डूकप्लुत्याऽनपत्य इत्यनुवर्तते नेति च तदेतदाह अपत्ये जाताविव्यादि ¯। अयमत्रार्थः। अपत्ये जातौ ब्राह्मणशब्दे टिलोपो न भवतीति। केचिदिह अ
जाताविति छित्त्वा जातौ न भवतीति व्याचक्षते तन्न स्त्रीसुत्र्याख्यानेनेति नानुवर्त्तनीयं। जातौ किं। ब्राह्मो नारदः। ताक्ष्ण इति। शिवादित्वात्तक्ष्णमिति वाऽण्। ताक्षण्य इति। कारिलक्षणे

सि·कौ· कुलात्खः। केवलात्कुलशब्दादपूर्वपदादित्यादिना विशेषविहिताभ्यामपि यड्ढकञ्भ्यां खो न बाध्यते न हि द्विधा वन्यतरस्यां ग्रहणादित्याशयेनाह कुलीन इति। लिंगादिति। अन्यथा ग्रहणवतेति

टी·त· मरंतविधिप्रतिषेधात्पूर्वपदग्रहणं व्यर्थं स्यादिति भावः। आढ्यकुलीन इति। आढ्यश्चासौ कुलीनश्चेति कुलीनविशेषणत्वे कुलस्याढ्यत्वं न प्रतीयते। किं त्वीकार उदात्त इतरे

२२

कुलात्खः। ४।१।१३९। कुलीनः। तदन्तादपि उत्तरसूत्रे अपूर्वपदादिति लिङ्गात्। आढ्यकुलीनः। अपूर्वपदादन्यतरस्यां यड्ढकञौ। ४।१।१४०। कुलादित्येव पक्षे खः। कुल्यः। कौलेयकः। कुलीनः। पदग्रहणं किम्। बहुकुल्यः। बाहुकुलेयकः। बहुकुलीनः। महाकुलादञ्खञौ। ४।१।१४१। अन्यतरस्यामित्यनुवर्तते। पक्षे खः। माहाकुलः। माहाकुलीनः। महाकुलीनः। दुष्कुलाड्ढक्। ४।१।१४२। पूर्ववत्पक्षे खः। दौष्कुलेयः। दुष्कुलीनः। स्वसुश्छः। ४।१।१४३। स्वस्रीयः। भ्रातुर्व्यच्च। ४।१।१४४। चाच्छः। अलोपकारः। भ्रातृव्यः। भ्रात्रीयः। व्यन्सपत्ने। ४।१।१४५। भ्रातुर्व्यन् स्यात्प्रत्ययप्रकृतिप्रत्ययसमुदायेन शत्रौ वाच्ये। भ्रातृव्यः। शत्रुः। पाप्मना भ्रातृव्येणेति तूपचारात्। रेवत्यादिभ्यष्ठक्। ४।१।१४६। ठस्येकः। ७।३।५०। अङ्गात्परस्य ठस्येकादेशः स्यात्। रैवतिकः। गोत्रस्त्रियाः कुत्सने ण च। ४।१।१४७। गोत्रं या स्त्री तदन्ताच्चकाराट्ठक् णठकौ स्तः सामर्थ्याद्यूनि। गार्ग्या अपत्यं गार्गो गार्गिको वा जाल्मः। पुंवद्भावाद्गार्ग्यशब्दात् ठकोऽयस्येति लोपः। आपत्यस्येति यलोपः। वृद्धाट्ठक् सौवीरेषु बहुलम्। ४।१।१४८। सुवीरदेशोद्भवाः सौवीराः। वृद्धात्सौवीरगोत्रात् यूनि बहुलं ठक् स्यात् कुत्सायाम्। भागवित्तेर्भागवित्तिकः। पक्षे फक्। भागवित्तायनः। फेश्छ च। ४।१।१४९। फिञन्तात्सौवीरगोत्रादपत्ये छः ठक् च कुत्सने गम्ये। यमुन्दस्यापत्यं यामुन्दायनिः। तिकादित्वात्फिञ्। तस्यापत्यं यामुन्दायनीयः। यामुन्दायनिकः। कुत्सने किम्। यामुन्दायनिः। औत्सर्गिकस्याणो ण्यक्षत्रियेति लुक्। सौवीरेष्वित्येव। तैकायनिः॥ ९ विशेषो लीनिभावः। बहुकु

ल्य इति विभाषा सुप इति बहुच्प्रत्ययो न पदमिति अपूर्वपदत्वात्प्रत्ययत्रयं भवत्येवेति भावः॥ व्यन्स्यादिति। भ्रातुरपत्यं यदि शत्रुस्तदा भ्रातृशब्दात् व्यन्नेव स्यान्न तु व्यच्छावित्यर्थः। समुदायेनेति। न तु प्रकृत्या प्रत्ययेन वा शत्रुरूपेऽपत्ये वाच्य इत्यर्थः। यत्तु वृत्तिकृता नोक्तमपत्यार्थोऽत्र नास्त्येवेति तदुपेक्ष्यं भाष्यविरोधादिति मनसि निधाय। पाप्मनेति। शत्रुगतभ्रातृव्यशब्दस्य गतिं वदन्नुपचारादिति। अस्त्री पंकं पुमान्पाप्मा पापं किल्बिषकल्मषमित्यमरः॥ न हि पापं भ्रातुरपत्यं भवतीत्यतो भाक्त एवायं प्रयोग इति भावः। रेवत्या। रेवती।

७ कुत्सायाम्        भस्याढे तद्धिते इति पुं॰ नू॰

293

अश्वपाली । द्वारपालीत्यादि ॥ ठस्येकः । अंगस्येत्यनुवर्त्तनादाह अंगान्तरस्येति । अंगादिति ठकारविशेषणे हठच षष्ठकारस्य न भवति कर्मठः । गोत्रस्त्रियाः । लित्वं तु ग्लुचुकायन्या
अपत्यं ग्लौचुकायनो जाल्म इत्यत्र फिञन्तान्तोदात्तत्वार्थमिति बोध्यं । सामर्थ्याद्यूनीति । गोत्रादपरो गोत्रप्रत्ययो नेत्युक्तत्वादिति भावः । गार्ग्या अपत्यमिति । पितुरसंविज्ञाने मा
त्राव्यपदेशात्कुत्सा । गोत्रेति किं । कारिकेयो जाल्मः । स्त्रियाः किं । औपगवस्यापत्यं औपगविर्जाल्मः । कुत्सनेति किं । गार्ग्यो माणवकः ॥ ❀ ॥ फांटाहृति । कुत्सन इति
निवृत्तं वृत्तिमते णित्वस्य फलमस्तीति ध्वनयन्नुदाहरति मैमतइति ॥ न च भाष्यमतेपि फांटाहृता भार्येत्यत्र वृद्धिनिमित्तस्येति पुंवद्भावनिवृत्तिर्णित्वफलमस्तीति वाच्यं अस्त्रि
यामिति युवसंज्ञानिषेधात् अत्र संज्ञासद्भावादेको गोत्र इति नियमाद्विनं फांटाहृतिशब्द इनस्यापत्यप्रत्ययस्याभावात् फांटाहृतशब्दस्यैवासत्वादिति भावः । कुर्वादिभ्यो ॥ सौवी

फाण्टाहृतिमिमताभ्यां णफिञौ ४।१।१५० । सौवीरेषु नेह यथासंख्यं अल्पाच्तरस्य परनिपातालिङ्गात् इति वृत्तिकारः भाष्ये तु यथासंख्यमेवेति स्थि
तम् फाण्टाहृतः । फाण्टाहृतायनिः मैमतः । मैमतायनिः । कुर्वादिभ्यो ण्यः ।४।१।१५१ । अपत्ये । कौरव्याः ब्राह्मणाः वावदूक्याः । सम्राजः क्षत्रिये सा
म्राज्यः । साम्राजोऽन्यः । सेनान्तलक्षणकारिभ्यश्च ।४।१।१५२ । एभ्यो ण्यः । हारिषेण्यः । लाक्षण्यः । कारिः शिल्पी तस्मात् तान्तुवाय्यः कौम्भकार्य्यः ना
पित्यः ॥ उदीचामिञ् ।४।१।१५३ । हारिषेणिः लाक्षणिः तान्तुवायिः ॥ कौम्भकारिः नापितात्तु परत्वात्फिञेव नापितायनिः ॥ तक्ष्णोऽण उपसंख्या
नम् षपूर्वेत्यनोऽकारलोपः । ताक्ष्णः । पक्षे ताक्षण्यः । तिकादिभ्यः फिञ् ४।१।१५४ तैकायनिः

रेष्वित्यपि निवृत्तं । कौरव्या ब्राह्मणा इति । यत्तु कुरुनादिभ्यो ण्य इति वक्ष्यति तस्य न
द्राजत्वादङ्गुणलुकि कुरवः । क्षत्रिया इति भवति नतु कौरव्या इति भावः । वावदूक्य इति । वदेर्यङन्तादूकप्रत्ययः स चात्रैव गणे निपातनादित्याहुः । कुरुगर्गवावदूकाः सम्राजः
क्षत्रिये । सम्राट्शब्दात् ण्य इत्यर्थः । वामरथस्य कण्वादिस्वरवर्जं यञन्तस्य कार्यं एव शब्दस्यापत्यकार्यं तत् ण्यप्रत्ययान्तस्य वामरथ्यशब्द स्या घुदात्तं विनेत्यर्थः । बहुषु
लेपञञोश्चेति लुक् । वामरथाः । छात्राः कण्वादिभ्यो गोत्र इति छापवादोऽण् । वामरथी । वामरथ्यायनी स्त्री । यञश्चेत्यप्राचांष्फ तद्धित इति ङीष् ष्फौ । वामरथानि सं
घांकलक्षणानि । संघांकलक्षणेष्विति छापवादोऽण् ॥ सत्यंकारा वलभीकारा वुद्धिकारेत्यादि ॥ हारिषेण्य इति । रातिसंज्ञायामिति षत्वस्यासिद्धत्वात्सेनान्तोयं ॥ तक्ष्ण

इतिसंज्ञायामितिसंख्यकः ७मूः

CC-0. In Public Domain. Digitization by eGangotri



इति। उदीचामिञो ऽपवादः। अस्मादुपसंख्यानाच्छिवादिषु तक्षन्शब्दपाठो नार्थ इति गम्यते। इह निकारस्तु तक्षन्शब्दं शिवादिषु पठित्वा कारिलक्षणमुदीचामिञमपवादत्वा घ्येतेरायस्य तु बाधो नेष्यत इत्याह तदनुरोधेनास्माभिरपि तत्र तथैव व्याख्यातं फलविशेषाभावात्॥ ॥ कौशल्यपरमप्रकृतेरेवायमिति॥ यदि तु वृद्धे त्कोसलेति ज्यङन्तात्को लशब्दात् कारिलक्षणण्यन्तात्कर्मारशब्दाच्चायं विधिः स्यात्तदा सूत्रे व प्रसज्येतेति भावः॥ छागेति॥ इगुशब्दस्याप्युपलक्षणमेतत्। फिञ्प्रकरणे इगुकोसलकर्मारच्छाग वाणांयुट्चादिष्टस्येति वार्त्तिकात्॥ आदिष्टस्य आयन्नादेशस्येत्यर्थः॥ अन्यथा प्रतिपदोक्ते युटि कृते प्रत्ययादित्वाभावात् कौशल्यायनिरित्यादौ फस्यायन्नादेशो न स्यात्॥ युकि कृते तु दागव्यायनिरित्यत्र ओर्गुणेऽन्यत्रावादेशश्च न स्यादिति भावः। कार्त्रायणिरिति। कर्तुरपत्यं कार्त्तस्तस्यापत्यं तु कार्त्रायणिः। अत्र व्याचक्षते कर्तृश

कौशल्यकार्मार्याभ्यां च ४।१।१५५। अपत्ये फिञ् इञोऽपवादः परमप्रकृतेरेवायमिष्यते प्रत्ययसंनियोगेन प्रकृतिरूपं निपात्यते कुशलस्यापत्यं कौश ल्यायनिः कर्मारस्यापत्यं कार्मार्यायणिः। छागवृषयोरपि। छाग्यायनिः वार्ष्यायणिः। अणो द्व्यचः ४।१।१५६। अपत्ये फिञ् इञोऽपवादः कार्त्रायणिः अण इति किम्। दाक्षायणः द्व्यच इति किम्। औपगविः त्यदादीनां वा फिञ् वाच्यः। त्यादायनिः त्यादः उदीचां वृद्धादगोत्रात् ४।१।१५७ आम्रगुप्तायनिः प्राचां तु। आम्रगुप्तिः। वृद्धात्किम्। दाक्षिः। अगोत्रात्किम्। औपगविः॥ वाकिनादीनां कुक् च ४।१।१५८। अपत्ये फिञ् वा वाकिनस्यापत्यं वाकिनकायनिः वाकि

वः कुर्वादिषु पठ्यते तथा च काश्य इत्येव वर्द्धमानेनोदाहृतं॥ तस्मादिह भर्तृहर्योर्युदाहार्यमिति। दाक्षिरिति। वा नामधेयस्येति वृद्धसंज्ञाभावपक्षे प्रत्युदाहरणमिदं। पक्षान्त रे तु फिञ् भवत्येव दाक्षायणो ऽश्विनीत्यादिताराद्यमरः। वाकिनादीनां। यदिह वृद्धमगोत्रं शब्दरूपं तत्रागमार्थमेवेदं वचनमन्येषां तूभयार्थं। उदीचामित्यनुवर्त्तनाद्विका ल्पः फलितमित्याह किञ्चास्यादिति॥ वाकिनकायनिरिति। वचनं वाकः सोऽस्यास्तीति वाकिनः। अत एव निपातनादिनन्। अगारेराधत इति गारेधः पृषोदरादित्वाट्टिलोपः शकन्ध्वादित्वात्पररूपं। गारेधकायनिः। चर्मिवर्म्माद्वौ तूभयार्थौ। चर्मवर्मशब्दाभ्यां ब्रीह्यादित्वादिनिः। चर्मि वर्म्मिणोर्नलोपश्चेति गणसूत्रं। चार्मिकायणिः। वार्मिकायणिः कुकि कृते नकारस्यानन्त्यत्वान्नलोपाप्राप्तेर्वचनं। न च कुक् परादिरस्त्विति वाच्यं। फस्यानादित्वादायनादेशाभावप्रसंगात्। वाकिनिरिति। अनङ्का फिञभावे तस्य

214

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुत्रान्तात्। उदीचां वृद्धादित्यनुवर्त्तनं तु स्पष्टार्थं येनाहं वा फिञ् सिद्ध इति॥ तेनैव सूत्रेण फिञि सिद्धे अनेन कुगेव वा विधीयत इति भावः। प्राचामवृद्धात्। प्राचांग्रहणं पूजार्थं अवृ
द्धादित्येव किं। राजदन्तिः। बहुलग्रहणान्नेह दाक्षिः। मानुषः मनुष्य इति। जातिशब्दावेतौ। अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः। नकारस्य च मूर्द्धन्यस्तेन सिध्यति माणवः
णत्वविधानार्थमिदमणः सिद्धत्वात्। अनधीतवेदत्वान्मूढत्वं विहिताननुष्ठानाच्च कुत्सितत्वं इदं च वचनं ब्राह्मणमाणवेति णत्वनिपातनाल्लभ्यमित्याहुः। जनपदा जनप
दक्षत्रियेति। जनपदवाची सन् यः क्षत्रियवाचीत्यर्थः यद्यपि पंचालादयो जनपदे बहुवचनांताः क्षत्रिये त्वेकवचनांतास्तथापि प्रातिपदिकस्योभयवाचित्वमस्त्ये
वेति बोध्यं॥ जनपदशब्दात्किं॥ द्रुह्योरपत्यं द्रौह्यवः केवलक्षत्रियवाच्ययं। क्षत्रियादिति किं॥ ब्राह्मणस्य पंचालस्यापत्यं पांचालिरिति चन्निकारादयः॥ वाह्वादिषस्य पाठादि

पुत्रान्तादन्यतरस्याम् ४।१।१५९ अस्माद्वा फिञ् सिद्धः तस्मिन्परे पुत्रान्तस्य वा कुक् विधीयते। गार्गीपुत्रकायणिः। गार्गीपुत्रायणिः। गार्गीपुत्रिः। प्राचाम
वृद्धात्फिन्बहुलम् ४।१।१६०। ॥ ग्लुचुकायनिः॥ मनोर्जातावञ्यतौ षुक् च॥ ४।१।१६१। समुदायार्थो जातिः। मानुषः मनुष्यः। ज
नपदशब्दात्क्षत्रियादञ् ४।१।१६८। जनपदक्षत्रिययोर्वाचकादञ्स्यादपत्ये॥ दाण्डिनायनेति सूत्रे निपातनाट्टिलोपः। ऐक्ष्वाकः। ऐक्ष्वाकौ॥ क्षत्रियस
मानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्। तद्राजमाचक्षाणस्तद्राज इत्यन्वर्थसंज्ञासामर्थ्यात्। पंचालानां राजा पांचालः। पूरोरण्वक्तव्यः। पौरवः। पा
ण्डोर्ड्यण्। पाण्ड्यः। साल्वेयगान्धारिभ्यां च ४।१।१६९। आभ्यामपत्येऽञ् वृद्धेदितिञ्यङोऽपवादः। साल्वेयः। गान्धारः। तस्य राजन्यप्येवम्॥ द्व्य
ञ्मगधकलिङ्गसूरमसादण् ४।१।१७० अञोऽपवादः द्व्यच् आङ्गः वाङ्गः सौह्मः मागधः। कालिङ्गः सौरमसः तस्य राजन्यप्येवम्॥ ॥

दंमनुदाहरणं चिंत्यमित्यन्ये। क्षत्रियसमानशब्दादिति॥ समानः शब्दो यस्य जनपदस्य सोऽयं समानशब्दो जनपदः। क्षत्रियेण समानशब्दः क्षत्रियसमानशब्
दस्तस्मात्तस्येति षष्ठीसमर्थाद्राजनि वाच्ये अपत्यवत्प्रत्यया भवन्तीत्यर्थः पंचालानां राजेति। इहापि वृद्धादपि बहुवचनविषयादिति प्राप्तो लुग्बाध्यते॥ पुरोरिति। पूरु
शब्देन जनपदवाचीति प्राग्दीव्यतीये अणि सिद्धे तद्राजसंज्ञार्थं वचनं। जनपदवाचित्वेऽनुद्व्यञ्मगधेत्येव सिद्धं। पाण्डोर्ड्यण्। णित्करणं तु पाण्ड्या भार्य इत्यत्र वृद्धिनि
मित्तस्येति पुंवद्भावप्रतिषेधार्थं। युधिष्ठिरपितृवाचिनो गुणवाचिनश्च पाण्डोर्नेह ग्रहणं जनपदशब्दादित्युक्तेः तदधिपतिवाचिन एवोपस्थानात्॥ ॥

सु॰त॰
सि॰कौ॰
टी॰त॰
२५

वृद्धेत्॥ नपरकरणं किं कौमारः। कुमारीशब्दो जनपदक्षत्रियवचनः। कुरुना। नकार आदिर्येषां तेनादयः। कुरुशब्दस्याप्युत्सर्गलक्षणे अणि प्राप्ते नादिभ्यस्तु ञिण्याप्ते वचनम्। उदुंब॥राश्चयइति। उदुंबरास्तिलखलामद्रकारायुगंधराः। भुलिंगः शरदंडाश्च साल्वावयवसंज्ञिका इति वृत्तिः। औदुंबरिरिति। तैलखलिः॥ माद्रकारिः॥ यौगंधरिरित्यादी न्युदाहर्तव्यानि॥ तेतद्राजाः॥ अजादयइति॥ ततः प्राचीनास्तु तच्छेदेन परामृश्यंते। गोत्रयुवसंज्ञाकांडेन विच्छेदादेतदर्थमेव हि तत्कांडमध्ये कृतमाचार्येणेत्या॥हुः। वस्तुतस्तु तद्राज इत्यधिकृत्य जनपदशब्दात्क्षत्रियादञित्यादिसूत्राणामारंभे गोत्रयुवसंज्ञाकांडस्य मध्ये पाठाभावेपि न क्षतिरित्यन्ये। तद्राजस्य तदर्थे

वृद्धेत्कोशलाजादाञ्ञ्यङ्।४।१।१७१। वृद्धात्। आम्बष्ठ्यः। सौवीर्यः। इत्। आवन्त्यः। कौशल्यः। अजादस्यापत्यमाजाद्यः। कुरुनादिभ्यो ण्यः ४।१।१७२। कौरव्यः। नैषध्यः। स नैषधस्यार्थपतेरित्यादौ तु शैषिकोऽण्। साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ्।४।१।१७३। साल्वो जनपदस्तदवयवा उदुम्बरादयस्तेभ्यः प्रत्यग्रथादिभ्यस्त्रिभ्यश्च इञ् स्यादणोऽपवादः। औदुम्बरिः। प्रात्यग्रथिः। कालकूटिः। आश्मकिः। राजन्यप्येवं ते तद्राजाः।४।१।१७४। अञादय एतत्संज्ञाः स्युः। तद्राजस्य बहुषु तेनैवास्त्रियाम्।२।४।६२। बहुष्वर्थेषु तद्राजस्य लुक् स्यात् तदर्थकृते बहुत्वे न तु स्त्रियाम्। इक्ष्वाकवः। पञ्चालाः इत्यादि। कथं तर्हि कौरव्याः पशवः तस्यामेव रघोः पाण्ड्याः इति कौरव्ये पाण्ड्ये च साधव इति समाधेयम्। रघूणामन्वयं वक्ष्ये निरुध्यमानां यदुभिः कथंचिदिति तु रघुयदुशब्दयोर्लक्षणया। कम्बोजाल्लुक्।४।१।१७५। अस्मात्तद्राजस्य लुक्। कम्बोजः। कम्बोजौ। कम्बोजादिभ्य इति वक्तव्यम्। चोलः। शकः। जूलः। लक्षणस्याणो लुक्। केरलः। यवनः। अञो लुक्। कम्बोजाः समरे इति पाठः सुगमः। दीर्घादिपाठे तु कम्बोजाभिजनो येषामित्यर्थः॥

१९ ते तद्राजप्रत्ययार्थेन कृते इत्यर्थः। तेनैवेति प्रियपंचालाः साधव इतीति तथा च तत्र साधुरिति यत्प्रत्ययस्य तद्राजत्वाभावाल्लुङ्नेतिभावः॥ रघुयदुशब्दयोर्जनपदवाचित्वाभावात्ताभ्यां परस्य तद्राजसंज्ञा नेति लुकोऽप्रवृत्त्या राघवाणां यादवैरित्येवं भवितव्यमित्याशंक्याह रघुयदुशब्दयोरिति। लक्षणयेति॥ तत्र शोकार्थत्वादपत्यप्रत्ययो नाचोत्पन्न इति भावः। कंबोजाल्लुक्। तद्राजस्य बहुषु इति प्रकरणादेव तत्तद्धितार्थवाचकस्याञो लुक् भा

215

नप्रसंगात्। यद्यपि लुगधिकारे पुनर्लुग्विधानसामर्थ्यात्तद्योकयोरप्यम—लुगप्यविषयत्वे वेति वक्तुं शक्यं। तथाप्यतद्राजस्यापि लुक्प्रसंगशंकापत्ते र्लाघवाभावाच्च तन्मकरणेन कृ
तमित्याहुः। गमचात्र अपत्ये लक्षणयैव कंबोजः कंबोजाविन्यादि रूपसिद्धेः किमनेन सूत्रेणेति शंक्यं॥ कंबोज इत्यादि या प्रिकानिष्टवारणाय सूत्रस्यावश्यकत्वात्॥ ॐ ॥
सिधुनक्षेति॥ कंबोजशब्दस्य सिंध्वादित्वादण् तस्य तु तद्राजत्वाभावाल्लुग्नेति भावः। अवन्ती कुन्तीति। वृद्धेदिति न्यङ्। ओलुकी तो मनुष्यजातेरिति ङीष्॥ कुरूरिति॥ एयस्य लुक्
उङ् नइत्यूङ्। अतश्च। इह तद्राजेन अकारो विशेष्यते॥ नत्वकारेण तद्राजः॥ विशेषणेन तदंतविधौ ञ्यङ्ण्यादीनामप्यदंतत्वात्तद्राजत्वादनेनैव लुकि सिद्धे अवंतिकुंति
कुरुभ्यो लुग्विधायकस्य स्त्रियामेवं नीति सूत्रस्य वैयर्थ्यापत्तेः॥ न चेष्टापत्तिः। कौसल्येति रूपासिद्धिप्रसंगात्। तो व्याचष्टे तद्राजस्याकारस्येति सूत्रे तपरकरणं विस्प

सिन्धुतक्षशिलादिभ्योऽणञावित्यण्। स्त्रियामवन्तिकुन्तिकुरुभ्यश्च ४।१।१७६ तद्राजस्य लुक् स्यात् अवन्ती कुन्ती कुरूः। अतश्च ४।१।१७७ ॥ त
द्राजस्याकारस्य स्त्रियां लुक् स्यात् शूरसेनी मद्री कथं माद्री सुताविति ह्रस्व एव पाठ इति हरदत्तः भर्गादित्वं वा कल्प्यम्। न प्राच्यभर्गादियौधेया
दिभ्यः। ४।१।१७८ एभ्यस्तद्राजस्य न लुक्। पाञ्चाली वैदर्भी आङ्गी वाङ्गी मागधी एते प्राच्याः। भार्गी कारूषी कैकेयी केकयी त्यत्र तु जन्यजनकभा
वलक्षणे पुंयोगे ङीष् युधाशुक्राभ्यां छश्च इति ढक् ननु स्वार्थेऽपि वाऽर्थादियौधेयादिभ्यामणञावित्यञ् शार्ङ्गरवाद्यञ इति ङीना अतश्चेति लु
किं तु ढगन्तत्वात् ङीप्युदात्तनिवृत्तिस्वरः स्यात्। यौधेयी। शौक्रेयी॥
॥ ११ ष्टार्थमिति भावः॥ शूरसेनीति॥ अञो लुकि जातेरिति ङीष्॥ न लजं तलक्षणे
ङीना। अञो योः कारलदंतादिति व्याख्यानात्। कारूषीति। करूषः करूषं वपि करूषाः। वशकां तो मूलविभुजादित्वात्कः॥ ग्रहिज्येति संप्रसारणं तस्यापत्यं राजा वा कारू
षः॥ स्त्रियां कारूषी। एतेन मूर्द्धन्योष्मोपधः पाठो निरस्तः॥ यौधेयादिभ्यो लुक्प्रतिषेधमुदाहरन्व्याह युधा शुक्रेत्यादि॥ अन्यश्चेति लुकि लितिन्या इयस्तद्राजा इति वर्तमाणत्वात्
जोऽस्य तद्राजत्वमस्तीति भावः। यौधेयत्वान्ङीषः प्राप्तिर्न त्वाशयेनाह ङीपीति। उदात्तनिवृत्तिस्वर इति। अनुदात्तस्य च यत्रोदात्तलोप इत्यनेन ङीपुदात्तः स्यादित्यर्थः॥ सिद्धं तेन
ञोलुगभावान्ङीन्याद्युदात्तत्वमिति हृदयं॥ स्यादेतत्। अतश्चेति सूत्रेण विधीयमानो लुक् चातुर्थिकानामेव तद्राजानां भवतु सन्निधानात् न तु पञ्चम्या इयस्तद्राजा इति पाञ्चमिकानां

CC-0. In Public Domain. Digitization by eGangotri



मपि नडुजानामिति। किमनेन योधेयादिग्रहणेन। सत्यं। व्याप्तिन्यायेन पांचमिकस्यापी हग्रहणमिति ज्ञापयितुं यौधेयादिग्रहणं तेन पार्श्वादिगणे स्त्रियां लुकि सिध्यति॥ तथा हि पर्शुः क्षत्रियो जनपदेन समानशब्दस्तस्यापत्यं स्त्री छ्यम्गाधेत्यण् तस्यातश्चेति लुक्। पुनः पार्श्वादिलक्षणः स्वार्थिकोण् तस्यापि लुक् ऊङ् ततः। पर्शूः एवं रक्षसः क्षत्रियस्यापत्यं स्त्री रक्षाः। पूर्ववदण् हूपस्यापि लुक्। त्वं संतस्येति दीर्घः। उक्तं च वार्त्तिककृता पर्श्वादिभ्यो लुग्वक्तव्यः। योधादिप्रतिषेधो वा ज्ञापकः पार्श्वादिलुक इति। योधेयीत्यादि। युधायाः शुभ्राया अपत्यं स्त्रीति विग्रहः॥ ❁ ॥अणिञोः॥ उत्तममिति। अव्युत्पन्नं प्रातिपदिकमिदं न तु तद्धितान्तमपि। तेन किमेतद्ङ्व्ययघादिष्यामूनशांकयः। गोत्रे याविति॥ अपत्याधिकारादन्यत्र लौकिकं गोत्रमिति नेह शास्त्रीयं गृह्यते। तथा चानार्षयोरिति पर्युदासाद्वसिष्ठगोत्रग्रहणमिह न्युक्तं शक्यं। न चात्र गोत्रग्रहणसामर्थ्यात् शास्त्रीयमेव गोत्रं गृह्यत इति वाच्यं। देवदत्ताया ज्ञदंत्येत्यादीनां तराणपत्यपी ष्यमाणत्वादेतरावानुपंदवक्ष्यति कुमुदगंधेरपत्यं स्त्री कौमुदगंध्येति। इदं च कौस्तुभा

अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे ४।१।७८ । त्रयादीनामन्त्यमुत्तमं तस्य समीपमुपोत्तमम्। गोत्रे यावणिञौ विहितौ तदन्तयोर्गुरूपोत्तमयोः प्रातिपदिकयोः स्त्रियां ष्यङादेशः स्यात्। निर्दिश्यमानस्यादेशा भवन्तीत्यणिञोरेव षङावितौ। यङश्चाप्। कुमुदगन्धेरपत्यं स्त्री कौमुदगन्ध्या वाराह्या अनार्षयोः किम्। वासिष्ठी वैश्वामित्री गुरूपोत्तमयोः किम्। औपगवी जातिलक्षणो ङीष्। गोत्रे किम्। अहिच्छत्रे जाता आहिच्छत्री॥ ॥

नुसारि व्याख्यानमत्र न्यमूलानुगुणमपि देवयज्ञि सूत्रस्थेनागोत्रार्थमिदमित्यादिमूलग्रंथेन सह विरुध्यत इति तत्रैव स्फुटीभविष्यति। यद्यपि स्त्री प्रत्ययाः प्रकृतास्तथापि पयनुर्नीय ज्ञसंयोग इति नकारस्येव ष्यङ आदेशत्वमेवोचितं॥ अणिञोरिति षष्ठी स्वरसादित्यभिप्रेत्याह ष्यङादेशः स्यादिति। ष्यङः प्रत्ययत्वेपि लक्ष्यसिद्धिः प्रत्यूहेति मनोरमायां स्थितं। नन्वेवं यङि चैत्यं तादेशं वाधित्वा परत्वात्सवदिशः स्यात्। ङिञैत्यस्यानन्यार्थं ङित्वे घनङादिषु चरितार्थत्वात्। ष्यङो नुबंधस्य यङश्चाविति विशेषणार्थतया सप्रयोजनत्वादित्याशंक्याह निर्दिश्यमानस्येति ष्यङावितावितिति॥ अनुबंधद्वयकरणं ष्यङ इव ष्यङो पि यङश्चाविति यत्र सामान्यग्रहणार्थं। न च ष्यङः संप्रसारणमित्यत्र विशेषणार्थं सरूपयोगोत्यन्यथा पाष्यापुत्रः प्राष्यामतिरित्यत्र माशादिभ्योय इति प्रत्ययेपि संप्रसारण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रसंगइतिवाच्यं यङः संप्रसारणमित्येकानुबंधेनापितद्वारणात् लोलूयापतिरित्यत्रत्वकारप्रत्ययेनव्य— वधानात्संप्र—सारणाभावः कौमुदगंधीपुत्रइत्यत्रत्वेकादेशस्य पूर्वान्तत्वेनग्रहणान्नास्तिव्यवधानमितिसंप्रसारणंसिद्ध्यतिकौमुदगंध्येतिअणः ष्यङ् वारात्स्येति इञः ष्यङ् अणिञोः किम् ऋतभागस्यापत्यमार्तभागी विदादित्वादञ् शार्ङ्गरवाद्यञइतिङीनटिड्ढेत्यादिनाङी वितितुवृत्तिकारः अणिञोरित्यत्रलौकिकंगोत्रंगृह्यते गोत्रंचचरणैरित्यत्रतुपारिभाषिकमेवगृह्यते तेनजातित्वाभावान्ङीनःप्राप्तिर्नास्तीतिस्थिते तस्य गतिमाहुः॥ ॥गोत्रावयवात् अवयवशब्दोऽप्रधानवाची अवयवश्चासौगोत्रंचेतिकर्मधारयः निपातनाद्गोत्रशब्दस्यपूर्वनिपातः गोत्राभिमताइति गोत्रमित्येवमभिमताः गोत्रवाचित्वेनदेशविशेषेप्रसिद्धाः नतुप्रवराध्यायेपठिताइत्यर्थः प्रवराध्यायेऽपाठाच्चाप्राधान्यंकुलाख्याइति कुलमाख्यायतेयैरितिकुलाख्याः पुणिकभुणिकमुखरप्रभृतयः तेर्हिकुलमाख्यायतेपुणिकावयंगोत्रेणभुणिकावयंगोत्रेणेति ततइति गो

गोत्रावयवात्।४।१।७९॥ गोत्राववयवा गोत्राभिमताः कुलाख्यास्ततोगोत्रेविहितयोरणिञोः स्त्रियांष्यङादेशःस्यादगुरूपोत्तमार्थंआरम्भः। पौणिक्या। भौणिक्या। क्रौड्यादिभ्यश्च।४।१।८०॥ स्त्रियांष्यङ् प्रत्ययस्स्यात्। अगुरूपोत्तमार्थोऽनणिञर्थश्चारम्भः। क्रौड्या। व्याड्या। सूतयुवत्यामासूत्या। भोजक्षत्रिये। भोज्या॥ दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम्।४।१।८१॥ एभ्यश्चतुर्भ्यः ष्यङ्वाऽगोत्रार्थमिदं। गोत्रेपि परत्वात्प्रवर्त्तते। पक्षेइतोमनुष्येतिङीष्। दैवयज्ञ्या। दैवयज्ञी॥ इत्यपत्याधिकारः॥ ॥ १९ त्रावयवादित्यर्थः क्रौड्यादिभ्यश्च पंचमीनिर्देशात्त्यपत्यमेवेहाश्रीयतइत्याहष्यङ् प्रत्ययइति क्रौडिव्याडिआपिशलिगोकक्ष्यइत्यादि गोकक्ष्यशब्दोगर्गादियञन्तस्तदर्थमाह अनणिञन्तार्थश्चेति सूतेति गणेसूत्रं सूतशब्दंष्यङंलभतेयुवत्यांवाच्यायामित्यर्थः सूत्येति ष्यङि यङश्चाप् अन्यत्रतुक्रियाशब्दाट्टाप् सूतजातिवाचिनस्तुङीष् सूती भोजेति इदमपिगणसूत्रंजातिलक्षणङीषोपवादः ष्यङ् क्रियाशब्दात्तुटावेव भोजयतीतिभोजा दैवयज्ञि चतुर्भ्यइति इञंतेभ्यइतिशेषः देवायज्ञायप्रक्ष्व्यायस्यसदेवयज्ञः शुचिर्वृक्षोयस्यशुचिवृक्षः सत्यमुग्रंयस्यसत्यमुग्रः निपातनाद्विशेष्यस्यपूर्वनिपातः मुमागमश्च कांडेनविद्धः काण्डेविद्धः कर्तृकरणेकृतेतिसमासः निपातनात्कांडशब्दस्यएकारः पाठांतरेकंठेविद्धमस्यकंठेवाविद्धः कंठेविद्धः अमूर्द्धमस्तकादित्यलुक् एभ्यः सर्वेभ्याअपत्येअतइञ् गोत्रेपिपरत्वादिति तथाचोभयत्रविभाषे

सि॰कौ॰

सि·कौ·
टी·त·
सु·त·
९७

अत्रेदमवधेयं अणिञोरिति सूत्रे यदि शास्त्रीयं गोत्रं गृह्यते तदा अगोत्रार्थमिदमित्यादिग्रंथः स्वरसतः संगच्छते यदि तु लौकिकं गोत्रमेव तत्र गृह्यते तदा अणिञोरिति नित्ये प्राप्ते विकल्पार्थमिदमित्येव व्याख्यातुमुचितमिति ॥ ॥ इत्यपत्याधिकारः ॥ ॥ तेन रक्तं तृतीयांतात्समर्थाद्यथाविहितं प्रत्ययाः स्युः रज्यते अनेनेति बाहुलकात्करणे घञ् रागइति रंजकद्रव्यमित्यर्थः शुक्लस्य वर्णांतरापादनमिह रंजेरर्थः लाक्षारोचनात् इति क्तनात्तु वार्त्तिकस्थौ शकलकर्दमौ सूत्रे प्रक्षिप्तौ शकलं त्वचि खण्डे च रागवस्तु निवल्कले इति विश्वः वृत्तिकार इति भाष्ये तु नैतद्दृष्टमिति भावः नील्येति नीली ओषधिविशेषः अणपवादोयं नक्षत्रेण नक्षत्रवाचकाः शब्दा वृत्तिविषये तद्युक्तं चन्द्रमसमभिदधानाः प्रत्ययं लभंते पुष्येणेति पुष्यसमीपस्थेन चन्द्रमसेत्यर्थः एवं च पौषमहरित्यादिव्यवहारः संगच्छते सर्वेषामप्यन्हां पुष्ययो

तेन रक्तं रागात् ।४।२।१। रज्यतेऽनेनेति रागः । कषायेण रक्तं वस्त्रं । काषायं । माञ्जिष्ठं । रागात्किं । देवदत्तेन रक्तं वस्त्रं ॥ लाक्षारोचनाट्ठक् ।४।२।२। लाक्षिकः । रौचनिकः । शकलकर्दमाभ्यामुपसंख्यानम् ॥ शाकलिकः । कार्दमिकः । आभ्यामणपीति वृत्तिकारः । शाकलः । कार्दमः । नील्या अन् ॥ नील्या रक्तं । नीलम् । पीतात्कन् ॥ पीतकं । हरिद्रामहारजनाभ्यामञ् ॥ हारिद्रं । माहारजनं । नक्षत्रेण युक्तः कालः ।४।२।३। पुष्येण युक्तम् । पौषमहः । पौषी रात्रिः । लुबविशेषे ।४।२।४। पूर्वेण विहितस्य लुप्स्यात् षष्टिदण्डात्मकस्य कालस्यावान्तरविशेषश्चेन्न गम्यते । अद्य पुष्यः । कथन्तर्हि पुष्ययुक्ता पौर्णमासी पौषीति । विभाषा फाल्गुनी श्रवणा कार्त्तिकी चैत्रीभ्य इति निर्देशेन पौर्णमास्यामयं लुब्नेति ज्ञापितत्वात् । श्रवणशब्दात्तु अनण्वलुप् । युक्तवद्भावाभावश्चाऽबाधकान्यपि निपातनानि । श्रावणी । संज्ञायां श्रवणाऽश्वत्थाभ्याम् ।४।२।५। विशेषार्थोयमारम्भः । श्रवणा रात्रिः । अश्वत्थो मुहूर्त्तः । संज्ञायां किं । श्रावणी । आश्वत्थी ॥ ॥

९ गमत्वेपि तत्समीपस्थचन्द्रमसा योगस्य सार्वत्रिकत्वात् नक्षत्रेणेति किम् चंद्रेण युक्ता रात्रिः कालः किं पुष्येण युक्तश्चंद्रः लुबवि पूर्वसूत्रस्यानुवर्त्तनादिह नक्षत्रेण युक्तस्य कालस्याविशेषे गम्ये इत्यर्थो लभ्यते तदाह षष्टिदण्डेति अद्य पुष्य इत्युक्ता नद्यो नक्ष इति विशेषे गम्यमानेपि अहोरात्रात्मककालस्यावांतरविशेषानवगमात् लुब्भवत्येवेति भावः अविशेष इत्यत्र प्रसज्यप्रतिषेधाश्रयणान्नोषो अहोरात्र इत्यत्र लुप्न भवति षष्टिदंडसमुदायरूपकालस्य प्रतीतावप्यवयवद्वयात्मकस्य विशेषस्य प्रतीतेरित्याशयेनाह विशेषश्चेन्नेति अद्य पुष्य

२१७

CC-0. In Public Domain. Digitization by eGangotri

॥ ःः ॥

मूलेनावाहयेद्देवीं श्रवणेनेत्युदाहरणं बोध्यम् ॥ ःः ॥ द्वन्द्वाच्छः विशेषे उदाहरणमाह तिष्येत्यादि अविशेषेणोदाहर्तव्यम् राधानुराधीयमिति न चात्र लुब्विशेष
इति अण् इव छस्यापि लुप् स्यादिति वाच्यं मध्येपवादन्यायेनात्पूर्वोपस्थितस्याण एव तन्निवृत्तेः यत्तु लुबपरत्वाद्बाधते इति हरिदत्तेनोक्तं तन्न द्वयोर्युगपत्प्राप्त्य
भावात् दृष्टं साम तृतीयान्ताद्दृष्टमित्यर्थेऽणादयः स्युर्यद्दृष्टं तच्चेत्साम अस्मिन्नर्थे इति तथा च श्लोकवार्तिकं दृष्टे सामनि जाते वा ऽप्यण् डिद्द्विर्वा विधीयते तीयादी
कक् विद्याया गोत्रादंकवदिष्यत इति जातेऽर्थे यो द्विरण् स च वा डिदित्यन्वयः शतभिषजि जातः शातभिषः शातभिषजः इह हि प्राग्दीव्यतीयेति प्राप्तोऽण् कालात्
ठञा बाधितः स च संधिवेलादिसूत्रेण प्रतिप्रसूयत इत्ययं द्विरुक्तोऽण् तीया इति तीयादीकक् स्वार्थे भवतीत्यर्थः द्वैतीयीकः तार्तीयीकः न विद्याया इति विद्या

द्वन्द्वाच्छः ॥ ४।२।६ ॥ नक्षत्रद्वन्द्वाद्युक्ते काले छः स्यात् । विशेषे सत्यसति च । तिष्यपुनर्वसवीयमहः । राधाऽनुराधीया रात्रिः । दृष्टं साम । ४।२।७ ।
तेनेत्येव । वसिष्ठेन दृष्टं । वासिष्ठं साम । अस्मिन्नर्थेऽण् डिद्वा वक्तव्यः ॥ उशनसा दृष्टं औशनसं । औशनं । कलेर्ढक् ॥ ४।२।८ ॥ कलिना दृष्टं का
लेयं साम । वामदेवाड्ड्यड्ड्यौ । ४।२।९ ॥ वामदेवेन दृष्टं साम । वामदेव्यं । सिद्धे यस्येति लोपेन किमर्थं यपतो डित्तौ । ग्रहणमातदर्थे भूद्वामदेव्यस्य
नमस्खरे ९ परिवृतो रथः । ४।२।१० ॥ वस्त्रैः परिवृतो वास्त्रो रथः । रथः किं । वस्त्रेण परिवृतः कायः । समन्ताद्वेष्टितः परिवृत उच्यते । तेनेह न । छात्रैः परि
वृतो रथः । पाण्डुकम्बलादिनिः । ४।२।११ ॥ पाण्डुकम्बलेन परिवृतः । पाण्डुकम्बली । पाण्डुकम्बलशब्दो राजास्तरणे पांडुवर्णकम्बलस्य वाचकः । मत्वर्थीये
नैव सिद्धे वचनमणो निवृत्त्यर्थम् । द्वैपवैयाघ्रादञ् । ४।२।१२ ॥ द्वीपिनो विकारः । द्वैपम् । तेन परिवृतः । द्वैपो रथः । एवं । वैयाघ्रः ॥ ॥ ॥

वाचकात्तीयान्तादीकक् भवतीत्यर्थः द्वितीया विद्या गोत्रादंकवदिति गोत्र प्रत्ययान्तादंके यः प्रत्ययः स दृष्टे सामन्यपि भवति औपगवेन दृष्टमौपगवकम् इह गोत्र
चरणाद्वुञिति वुञ् वामदेवात् ग्रहणमातदर्थमित्यादि अतदर्थे यपतोश्चातदर्थ इति विहितेन स्वरेण ज्ञापितस्वरे ड्यड्यतोर्ग्रहणमाभूदित्यर्थः यपतोश्चेति सू
त्रेण विधीयमानेन ञः परस्य पदस्य देवतास्योत्तरपदस्यान्तोदात्तत्वं वामदेव्यम् वामदेवा भूदित्यलत्ययपूर्वपदस्वर एव यथा स्यादित्येतदर्थं डित्करणमिति फलितोऽर्थः न च
कृतेऽपि डित्वे यपतोरित्यस्य प्रवृत्तिः कुतो नेति शंक्यं निरनुबन्धकग्रहणे न सानुबन्धकस्य तदनुबन्धकग्रहणे नातदनुबन्धकस्येति परिभाषयोः सत्वात् इमे च परि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·कौ· भाषेऽर्हे वडित्वेन ज्ञाप्यते तत्राद्यायाः प्रयोजनं पूरणगुणेति सूत्रे तव्यग्रहणेन तव्यत्तोऽग्रहणं द्वितीयस्यास्तु अङ्ग्रहणे चङोऽग्रहणं श्रयतेरङिपरे इति शेषः अन्यत्तु चङि परे तु न
टी·त· अशिश्रियत् परिवृतो वृतीयां तान्यरिवृत इत्यर्थः एणादयः स्युर्यः परिहृतः स चेद्रूथो भवति रथात्वस्त्रादनार्थयद्वस्त्रकम्बलादिकं तत एव सर्ववेष्टनं भवति ननुछ
सु·त· त्रादिभ्य इत्याशयेनाह समन्ताद्वेष्टित इति परितः सर्वतो भावे वर्त्तत इति भावः॥ ❀ ॥ कौमारात्तेनेति निवृत्तं अपूर्वं इति भावप्रधानो निर्देश इत्याह अपूर्वत्वे इति।
१८ अपूर्वत्वं तु स्त्रिया एवेष्यते पुरुषस्तु अपूर्वभार्यो स्तु वा मा वेत्यनाग्रहः अपूर्वपतिमिति न पूर्वपतिर्यस्या इति बहुव्रीहिः कौमारः पतिरिति द्वितीयान्तात्कुमारी
शब्दादुपयन्तरि प्रत्ययः कौमारीति इह कुमारीशब्दात्प्रथमान्तात्स्वार्थे प्रत्ययः टिड्ढाणिति ङीप् तत्रोद्धृतं सास्मिन्पौर्णमासीति सूत्रात्प्राक् तत्रेत्यधिकारः पात्रवा

कौमारापूर्ववचने।४।२।१३॥ कौमारेत्यविभक्तिको निर्देशः। अपूर्वत्वे निपातनमिदं। अपूर्वपतिं कुमारीं पतिरुपपन्नः। कौमारः पतिः। यद्वा।
अपूर्वपतिः कुमारी पतिमुपपन्ना। कौमारी भार्या। तत्रोद्धृतममत्रेभ्यः।४।२।१४॥ शरावे उद्धृतः। शाराव ओदनः। उद्धरतिरिहोद्धरणपूर्वके
निधाने वर्त्तते। तेन सप्तमी उद्धृत्य निहित इत्यर्थः। स्थण्डिलाच्छयितरि व्रते।४।२।१५॥ तत्रेत्येव समुदायेन चेद्व्रतं गम्यते। स्थण्डिले शयितुं नियमोऽस्य
स्थाण्डिलो भिक्षुः॥ संस्कृतं भक्षाः।४।२।१६॥ सप्तम्यन्तादण् स्यात्संस्कृतेऽर्थे यत्संस्कृतं भक्षाश्चेत्ते स्युः। भ्राष्ट्रे संस्कृताः। भ्राष्ट्राः। अष्टसु क
पालेषु संस्कृतः। अष्टाकपालः। पुरोडाशः। शूलोखाद्यत्।४।२।१७॥ अणोऽपवादः। शूले संस्कृतं। शूल्यं मांसं। उखा पात्रविशेषः। तस्यां सं
स्कृतं। उख्यम्। दध्नष्ठक्।४।२।१८॥ दध्नि संस्कृतं। दाधिकं। उदश्वितोऽन्यतरस्याम्।४।२।१९॥ ठक् स्यात्पक्षेऽण्॥ ॥ ॥

त्रिभ्यः सप्तम्यन्तेभ्य उद्धृतमित्यर्थे यथाविहितं प्रत्ययाः स्युः शाराव इति भुक्तोच्छिष्ट इत्यर्थ इति वृत्तिकृत् अवशिष्ट इति तदर्थः उच्छिनष्टि न सर्वं जुहोतीति क
ल्पसूत्रव्यवहारात् सप्तमीति निधानक्रियापेक्षया अधिकरणत्वादिति भावः स्थण्डिलात् व्रतं शास्त्रेण विहितो नियमः तस्मिन्समुदायेन गम्ये सप्तम्य
न्ताद्यथाविहितः प्रत्ययो भवति शयितर्यर्थे अष्टाकपाल इति द्विगोर्लुगनपत्य इत्यणो लुक् शूलोखा संस्कृतं भक्षा इत्यनुवर्त्तने कथमुख्योऽग्निरिति न त्वसौ भ
क्ष इति चेदत्राहुः दिगादित्वाद्भवार्थे यदिति दध्नष्ठक् दध्नीति संस्कारस्त्विह लवणादिना दधित्वाधिकरणमात्रं यत्तु प्राग्वहतेरित्यत्र संस्कृतमिति ठग्वक्ष्यते सा तृतीयान्ता

ष्यमेन दध्ना संस्कृतमपि दाधिकमेव॥

इसुसुक्तांतात् तादित्युक्तेप्यंगविशेषणे नैव तांतादिति लब्धे अंतग्रहणं प्रत्ययोपदेशकाले यस्तांतस्तस्मात्परस्य ठस्य कादेशो यथा स्यादित्येवमर्थं तेन माथितिक इत्यत्र ठस्य इका
देशे यस्येति लोपे च कृते तांतत्वेपि इकस्य कादेशो न भवतीति ठस्येक इति सूत्रे कैयटः सन्निपातपरिभाषयैव इकस्य कादेशो न स्यादित्यंतग्रहणं त्यक्तुं शक्यमित्यन्ये उदश्वि
दिति श्वयतेः क्विपि तुकि उदकस्योद इत्युदादेशः इहैव निपातनात्संप्रसारणाभावः सास्मिन् सति प्रथमांतादस्मिन्निति सप्तम्यंतार्थे प्रत्ययः स्यादतः प्रथमांतार्थस्स चेत्पौ

इसुसुक्तान्तात्कः ।७।३।५१॥ इस उस उक त एतदन्तादङ्गात्परस्य ठस्य कस्स्यात् । उदकेन श्वयति वर्द्धते इत्युदश्वित् । तत्र संस्कृतः । औदश्वित्कः । औद
श्वितः । इसुसोः प्रतिपदोक्तयोर्ग्रहणान्नेह । आशिषा चरति । आशिषिकः । उषा चरति । औषिकः । दोष उपसंख्यानम् ॥ दोर्भ्यां चरति । दोष्कः ॥
क्षीराड्ढञ् ।४।२।२०॥ अत्र संस्कृतमित्येव सम्बध्यते न तु भक्षा इति । तेन यवाग्वामपि भवति । क्षैरेयी । सास्मिन्पौर्णमासीति ।४।२।२१॥ इति शब्दात्सं
ज्ञायामिति लभ्यते । पौषी पौर्णमासी अस्मिन् । पौषो मासः । आग्रहायण्यश्वत्थाट्ठक् ।४।२।२२॥ अग्रे हायनमस्या इति । आग्रहायणी । प्रज्ञादे
राकृतिगणत्वादण् । पूर्वपदात्संज्ञायामिति णत्वं । आग्रहायणी पौर्णमासी अस्मिन् ॥ आग्रहायणिको मासः । अश्वत्थेन युक्ता पौर्णमासी । अश्वत्थः
निपातनात्पौर्णमास्यामपि लुप् । आश्वत्थिकः । विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः ।४।२।२३॥ एभ्यष्ठग्वा पक्षेऽण् । फाल्गुनिकः । फाल्गुनो
॥ मासः । श्रावणिकः । श्रावणः । कार्त्तिकिकः । कार्त्तिकः । चैत्रिकः । चैत्रः ॥

र्णमासी भवति इति शब्दादिति स हि लौकिकीं विवक्षामनुसारयति वृत्तिकृता तु सूत्रे॥
एवसंज्ञायामिति प्रक्षिप्तं पौर्णमासीति पूर्णमासोस्यां तिथाविति बहुव्रीहौ प्रज्ञादित्वात्स्वार्थिकोणिति हरदत्तादयः न दस्मिन्वर्त्तत इत्यधिकारे पूर्णमासादण्वक्तव्य इ ॥
॥ ॥ निवार्त्तिकं न कर्त्तव्यमिति तदाशयः ॥

CC-0. In Public Domain. Digitization by eGangotri



साऽस्येति प्रकृतं संज्ञासंबद्धमिति पुनः साग्रहणं कृतमित्याहुः इहैव सूत्रे निपातनाद्देवताशब्दात्स्वार्थे तल् मंत्रस्तुत्येति मंत्रेण स्तुत्या एति स्तु ज्ञास्यसि इत्यादिना क्यपि तुक् टाप् आ
ग्नेयो वै ब्राह्मण इति इहाप्युद्देशेन ब्राह्मणो न त्वस्य न इति कथमयं प्रयोग इति न शंक्यं इति भावः परत्वादादिवृद्धिरिति इदं च समाधानं श्रायमित्यत्रावश्यकमिति तेनैव
परिहारसंभवादित्वविधानसामर्थ्यमिह नाश्रितं उक्तरूपमिति नपादित्यस्य न मृ इति रूपमित्यर्थः शतं रुद्रा इति शतशब्दोऽनंतवचनः सोमीति हलस्तद्धितस्येति

सास्य देवता ।४।२।२४। इन्द्रो देवताऽस्येति । ऐन्द्रं हविः । पाशुपतं । बार्हस्पतं । त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता । मन्त्रस्तुत्या च । ऐन्द्रो मन्त्रः । आग्नेयो
वै ब्राह्मणो देवतयेति तु गौणिकोऽर्थः सर्वत्राग्नेति ढक् । कस्येत् ।४।२।२५। कशब्दस्य इकारादेशः स्यात्प्रत्ययसन्नियोगेन । यस्येति लोपात्परत्वादादिवृ
द्धिः । को ब्रह्मा देवताऽस्य । कायं हविः । श्रीर्देवताऽस्य । श्रायं । शुक्राद्घन् ।४।२।२६। शुक्रियं । अपोनप्त्रपान्नप्तृभ्यां घः ।४।२।२७। अपोनप्त्रियम् । अपा
न्नप्त्रियं । अपोनपात् अपान्नपाच्च देवता प्रत्ययसन्नियोगेन तूक्तं रूपं निपात्यते अत एव अपोनपाते । अपान्नपाते नु ब्रूहीति प्रैषः । छ च ।४।२।२८। योगवि
भागो यथासंख्यनिवृत्त्यर्थः । अपोनप्त्रीयं । अपान्नप्त्रीयं शतरुद्राद्घश्च चाच्छः । शतं रुद्रा देवताऽस्य शतरुद्रियं शतरुद्रीयं घछयोर्विधानसामर्थ्याद्द्विगोर्लुगनपत्ये इति
न लुक् । महेन्द्राद्घाणौ च ।४।२।२९। चाच्छः । महेन्द्रियं हविः । माहेन्द्रं । महेन्द्रीयं । सोमाट्ट्यण् ।४।२।३०। सौम्यं । टित्वान्ङीप् । सौमी ऋक् । वाय्वृतुपि
त्रुषसो यत् ।४।२।३१। वायव्यं । ऋतव्यं । रीङ् ऋतः ।७।४।२७। अकृद्यकारेऽसार्वधातुके यकारे च्वौ च परे ऋदन्ताङ्गस्य रीङादेशः स्यात् । यस्येति च । पित्र्यं
उषस्यं । द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च ।४।२।३२। चाद्यत् । द्यावापृथिवीयं । द्यावापृथिव्यं । शुनासीरीयं । शुनासी
र्यं । अग्नेर्ढक् ।४।२।३३। आग्नेयः

यलोपः । रीङ् ऋतः अंगवृत्तपरिभाषया अकृत्सार्वेति दीर्घो न प्रवर्तत इति दीर्घग्रहणमित्याहुः यस्येति चेति । पित्रीयतीत्य
त्र रीङ् विधिः सावकाश इति भावः उषस्यमिति उषसशब्दः स्त्रीलिंगो दिवो दुहितरं देवतां ब्रवीति । द्यावापृ० अण्ण्ययोरपवादः शुनासीरीयमिति शुनश्च सीरश्चेति द्वन्द्वे
देवताद्वन्द्वे चेत्यानङ् शुनो वायुः सीर आदित्य इति वृत्तिकृता । हरदत्तस्तु शुनासीरशब्द इंद्रस्य गुणवाचीत्यन्ये मन्यंत इत्याह तथा च मंत्रः इंद्रं वयं शुनासीरमस्मिन्यज्ञे ह

219

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वामह इति मरुतोस्य संतीति मरुत्वानिंद्रः मरुत्वतीयं मरुत्वत्यं अग्नीषोमीयं अग्नीषोम्यं ईदग्नेस्सोमवरुणयोः वास्तुनः पतिः वास्तोष्पतिः इहैव सूत्रे निपातनात्साधुः वेश्मभूर्वास्तुरस्त्रियां वास्तोष्पतीयं वास्तोष्पत्यं गृहमेधीयं गृहमेध्यं गृहमेधशब्दोऽकारान्तस्तथा च आश्वलायनः मरुद्भ्यो गृहमेधेभ्य इति॥ ॥ कालेभ्यो कालवाचिभ्यो ये प्रत्यया भवार्थे वक्ष्यन्ते ते सास्य देवतेत्यस्मिन्नर्थेऽनेनातिदिश्यन्ते वत्करणं सर्वसादृश्यार्थं तेन यस्माद्यो विहितस्तस्मादेव भवति नान्यः तथैवोदाहरति मासिकं प्रावृषेण्यमिति कालाट्ठञ् प्रावृषएण्यः ठामहराजिति एतच्च वृत्त्याद्यनुरोधेनोक्तं भाष्ये तु आनङारेशो महच्च प्रत्ययश्च निपात्यते तेनावग्रहः सौध्यतीयुक्तं

कालेभ्यो भववत्॥४।२।३४॥ मासिकं। प्रावृषेण्यं॥ महाराजप्रोष्ठपदाट्ठञ्॥४।२।३५॥ माहाराजिकं। प्रौष्ठपदिकं॥ देवताद्वन्द्वे च॥७।३।२१॥ उभयत्र पूर्वोत्तरपदयोराद्यचो वृद्धिः स्यात् ञिति णिति किति च परे। आग्निमारुतं। नेन्द्रस्य परस्य॥७।३।२२॥ परस्येन्द्रस्य वृद्धिर्न स्यात्। सौमेन्द्रः। परस्य किं। ऐन्द्राग्नः। दीर्घाच्च वरुणस्य॥७।३।२३॥ दीर्घात्परस्य वरुणस्य न वृद्धिः। ऐन्द्रावरुणं। दीर्घात्किं। आग्निवारुणीमनड्वाहीमालभेत। तदस्मिन्वर्तत इति। नवयज्ञादिभ्य उपसंख्यानं। नावयज्ञिकः कालः। पाकयज्ञिकः। पूर्णमासादण् वक्तव्यः। पूर्णो मासोऽस्यां वर्तते इति। पौर्णमासी तिथिः। पितृव्यमातुलमातामहपितामहाः॥४।२।३६॥ एते निपात्यन्ते। पितुर्भ्रातरि व्यत्। पितुर्भ्राता। पितृव्यः। मातुर्डुलच्॥ मातुर्भ्राता मातुलः। मातृपितृभ्यां पितरि डामहच्॥ मातुः पिता। मातामहः। पितुः पिता। पितामहः। मातरि षिच्च। मातामही। पितामही। अवेर्दुग्धे सोढदूसमरीसचो वक्तव्याः। सकारपाठसामर्थ्यान्न षः। अविसोढं। अविदूसं। अविमरीसं। तिलान्निष्फलात्पिञ्जपेजौ॥ तिलपिञ्जः। तिलपेजः। वंध्यस्तिल इत्यर्थः। पिञ्जश्छन्दसि डिच्च॥ तिल्पिञ्जः। तस्य समूहः।४।२।३७। काकानां समूहः। काकं। बाकं॥ ॥

१९ सकारपाठेति अन्यथा प्रक्रियालाघवाय षकारमेव पठेदिति भावः एतच्च मनोरमायां स्थितं अन्ये तूक्तरीत्या अविसोढमित्यत्र षत्वनिवारणेऽप्यविदूसमित्यादौ स्यादेव षत्वं तत्र हि ण्यन्तात्क्विप्यविदूरित्यादिरूपसिद्धये सकारपाठसामर्थ्यस्योपक्षीणत्वात् तस्मादविसोढमित्यादिभाष्यकृदुदाहरणेषु सकारपाठसामर्थ्यादिति व्याख्येयमित्याहुः तस्य समूहः इहाचित्ताट्ठक् मनुष्यादिरञ् गोत्रात्त्वाहुञ् केदाराद्यञ्चेत्यादिना प्रतिपदं यत्नारांश्च वक्ष्यति तथा च चिन्त्यवदाचुदात्तम गोत्रांतं प्रतिपदोक्तप्रत्ययरहितमिहोदाहरणमित्याशयेनोदाहरति काकं बाकमिति एवं च

रपदस्य।७।३।१०॥ अधिकारोऽयं हनस्तोऽचिण्णलोः इत्यतः प्राक्। अवयवादृतोः।७।३।११॥ अवयववाचिनः पूर्वपदादृतुवाचिनोऽचामादेरचो वृद्धिः स्या
त् ञिति णिति किति च तद्धिते परे। पूर्ववार्षिकः। अपरहैमनः। अवयवात्किं। पूर्वासु वर्षासु भवः पौर्ववर्षिकः॥ ॥ ॥

घादयोऽपि न च जातादिष्वेवाणादय इति नियमार्थं जाताद्यर्थनिर्देश आवश्यकः अन्यथा तत्रास्ते तत्र शेते इत्याद्यर्थेऽपि प्रत्ययः स्यादिति वाच्यं चाक्षुषमित्याद्यसिद्ध्याप
त्तेः स्रुघ्ने आस्ते स्रुघ्ने शेते इत्यादौ त्वनभिधानादेव तद्धितो न भविष्यति अंगुल्या खनति हस्तमूलादागत इत्यादौ यथा समर्थविभक्तयन्त्वाक्षेपादेव लभ्यन्ते चाक्षुषमित्यत्र
तृतीया यथा तस्मात्तत्र जात इत्याद्यर्थनिर्देशो व्यर्थ इति चेन्मैवं प्रावृषष्ठबित्याद्यपवादार्थं तदावश्यकत्वात् यत्तु निरपवादा अर्थनिर्देशाः कृतलब्धक्रीतकुशला इत्याद=
यस्ते तु व्यर्था एवेति दिक् संज्ञायां शरदः समुदायेन चेत्संज्ञा गम्यत इत्यर्थः संज्ञायां किं शारदं सस्यं संज्ञायामित्येतत्कृतलब्धेत्येतत्पर्यंतं केचिदनुवर्त्तयंतीति हृन्निक

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्ववार्षिक इत्यादि वर्षाणां पूर्वः हेमंतस्यापर इति विग्रहे पूर्वापराधरोत्तरमित्येकदेशिसमासः पूर्वौ स्त्रियेति तद्धितार्थे समासः॥ ❁ ॥ ऋतोर्वृद्धिमद्विधावविति ऋतुवाचिनः शब्दाद्वृद्धिनिमित्तकप्रत्ययविधाने तदंतविधिर्वाच्यः स चेदृतुवाचिशब्दोऽवयवेभ्यः पर इत्यर्थः पूर्वत्रेति पूर्ववार्षिकः अपरहेमन इत्यत्र तथा च वर्षाभ्यष्ठक् सर्वत्राणच तलोपश्चेत्याभ्यां क्रमेण ठञणौ भवतः वृद्धिमद्विधौ किं पूर्वप्रावृषं प्रावृषएण्य इत्यत्र तदन्तविध्यभावादिहर्त्वणेव इहापीति पौर्ववार्षिक इत्यत्र नथाचेह कालाट्ठञिति ठञेवेति भावः अवयवत्वाभावादिति अन्यथा पूर्वासु वर्षास्विति सामानाधिकरण्यं न संगच्छेतेति भावः जनपदे तदवध्योरितीति तस्मिन्ननुवर्तमाने अवृद्धादपि बहुवचनविषयादित्यनेनेत्यर्थः पौर्वमद्र इति मद्रेभ्योऽञित्यञ् पूर्वाह्णक इति विभाषा पूर्वाह्णापराह्णाभ्यामित्यस्यापवादः आर्द्रको मूलक

ऋतोर्वृद्धिमद्विधाववयवानामिति तदन्तविधिः पूर्वत्रेऽह तु नावयवत्वाभावात्। सुसर्वार्धाज्जनपदस्य। ७।३।१२॥ उत्तरपदस्य वृद्धिः। सुपाञ्चालकः। सर्वपाञ्चालकः। अर्धपाञ्चालकः। जनपदतदवध्योरिति वुञ्। सुसर्वार्धदिक्शब्देभ्यो जनपदस्येति तदन्तविधिः। दिशोऽमद्राणाम्। ७।३।१३। दिग्वाचकाज्जनपदवाचिनो वृद्धिः। पूर्वपाञ्चालकः। दिशः किं। पूर्वे पञ्चालानामयं पौर्वपञ्चालः। अमद्राणां किं। पौर्वमद्रः। योगविभाग उत्तरार्थः। प्राचां ग्रामनगराणाम्। ७।३।१४॥ दिशः परेषां ग्रामवाचिनां नगरवाचिनां चाङ्गनामवयवस्याचो वृद्धिः पूर्वेषुकामशम्यां भवः। पूर्वैषुकामशमः। नगरे। पूर्वपाटलिपुत्रकः। पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुन्। ४।३।२८॥ पूर्वाह्णकः। अपराह्णकः। आर्द्रकः। मूलकः। प्रदोषकः अवस्करकः। पथः पन्थ च। ४।३।२९॥ पथि जातः पन्थकः। अमावास्याया वा। ४।३।३०॥ अमावा

इति नक्षत्राणोपवादः प्रदोषक इति निशाप्रदोषाभ्यां चेत्यस्यापवादः अवस्करक इति औत्सर्गिकस्याणोऽपवादः ये तु संज्ञायामित्येतत्कृतलब्धेत्येतत्पर्यंतमनुवर्तयंति तन्मते असंज्ञायां यथायथं अणादयो घादयश्च बोध्याः अमावास्यायां वा संधिवेलाद्यणोऽपवादः अमावस्यदन्यतरस्यामिति सूत्रेणामापूर्वाद्वसेर्ण्यति वृद्धेऽपक्षे ह्रस्वत्वं निपात्यत इति ह्रस्वमध्यस्याप्यमावस्याशब्दस्येह ग्रहणं प्रकृतिग्रहणे विकृतेरपि ग्रहणात् अमावस्यकः अमावस्यः यत्विह सूत्रे संधिवेलादिषु च ह्रस्वोपधं पठंति तेषां तु दीर्घोपधस्य तस्याहिकृतिग्रहणेन प्रकृतेरग्रहणादिति हरदत्तादयः वस्तुतस्तु वृद्धिप्रकृतिभूतस्यानुकरणमिदमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अत्र अमावास्याशब्दाद्वुकारप्रत्ययः स्यात् अयमपि पूर्ववत्तुभाभ्यां बोध्यः अमावास्य इति ह्रस्वमध्यान्तु अमावस्यः अणञौ च यथासंख्यार्थयोगविभागः श्रविष्ठा इह
सूत्रे स्वातिशब्दो ह्रस्वान्त इति कैयटहरदत्ताद्यः माधवस्तु दीर्घान्त इत्यनसातत्यगमन इति धातोर्वाह एवं चात्र स्वातीति व्येति ङीषंतग्रहणाद्ङीषंतस्यैव न इति ऋपं
भवार्थ इव जातार्थेपि माधवमते सिद्ध्यत्येव कैयटादिमते तु जातार्थे न सिद्ध्यति लुग्विधायके सि न्ङीषंतग्रहणेपि लिंगविशिष्टपरिभाषया ङीषंतादपि अणो लु

अचा॥४।३।३१॥ अमावास्यः॥ सिंध्वपकराभ्यां कन्॥४।३।३२॥ सिन्धुकः। कच्छाद्यणि मनुष्यवुञि च प्राप्ते। अपकरकः। औत्सर्गिके प्राप्ते
अणञौ च॥४।३।३३॥ क्रमात्स्तः। सैन्धवः। आपकरः। श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक्॥४।३।३४॥
एभ्यो नक्षत्रवाचिभ्यः परस्य जातार्थप्रत्ययस्य लुक् स्यात्। लुक्तद्धितलुकि॥१।२।४९॥ तद्धितलुकि सत्युपसर्जनस्त्रीप्रत्ययस्य लुक् स्यात्।
श्रविष्ठासु जातः श्रविष्ठः। फल्गुन इत्यादि। चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम्। चित्रायां जाता चित्रा। रेवती रोहिणी आभ्यां लुक्तद्धि
तलुकीति लुकि कृते गौरादित्वान्ङीष्। फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ। स्त्रियामित्येव। फल्गुनी। अषाढा। श्रविष्ठाषाढाभ्यां
छण् वक्तव्यः॥ अस्त्रियामपि। श्राविष्ठीयः। आषाढीयः। जे प्रोष्ठपदानाम्॥७।३।१८॥ प्रोष्ठपदानामुत्तरपदस्याचामादेरचो वृद्धिः स्याज्जातार्थे
ञिति णिति किति च। प्रोष्ठपदासु जातः प्रोष्ठपादो माणवकः। जे इति किं। प्रोष्ठपदासु भवः प्रौष्ठपदः। बहुवचननिर्देशान्नान्यपर्यायोपि गृह्यते॥ 232
भद्रपादः॥ स्थानान्तगोशालखरशालाच्च॥४।३।३५॥ एभ्यो जातार्थप्रत्ययस्य लुक् स्यात्। गोस्थानः। गोशालः। खरशालः। विभाषासेनेति न
पुंसकत्वे ह्रस्वत्वम्। वत्सशालाभिजिदश्वयुक्शतभिषजो वा॥४।३।३६॥ एभ्यो जातार्थस्य लुग्वा स्यात्॥ ९ कः प्रवृत्तेः उपसर्जनेति अप्रधान ३२

मिहोपसर्जनं गृह्यते तेन शास्त्रीयमसंभवात् ननु गोस्त्रियोरिति सूत्रेप्यप्रधानलक्षणमेवोपसर्जनं गृह्यतां एकविभक्ति चेति शास्त्रीयं न गृह्यतामेवं हरीतक्याः फला
नि हरीतक्य इत्यत्र ह्रस्वप्रसंगात् उपसर्जनस्य किं अवन्तीकुन्ती कुरूः श्रविष्ठास्विति श्रविष्ठाधनिष्ठाः इत्यादीति आदिशब्दादनुराधः स्वातिः तिष्यः पुनर्वसुः हस्तः

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशाखं अषाढः वहुलः कृत्तिकावाची वहुलाशब्दष्टावन्तस्तस्य समाहारद्वंद्वेन ह्रस्वनिर्देशः सूत्रे उपसंख्यानमिति लुक् इति शेषः चित्रेति लुक्यद्धिते तिलुकि
पुनष्टाप् टानाविति विधानसामर्थ्यादेतयोर्न लुक् स्यान्नांत गोशालेत्यत्र विभाषासेनेति नपुंसकत्वे ह्रस्वत्वं तस्माहच्यर्यात्खरशालेप्येवमेव न चैवं स्त्रीत्वपक्षे
लुङ् स्यादिति शंक्यं लिंगविशिष्टपरिभाषया तत्रापि लुक् सिद्धेरित्याहुः यद्यपि टाब्वंतयोः पाठेप्येकदेशविकृतन्यायेन ङीब्वपोष्टं सिद्ध्यति तथापि लाघवा
र्थं ह्रस्वपाठः नपुंसकत्वे ह्रस्वत्वमिति सूत्रे इति शेषः॥ ॥ वत्सशालेजात इति वत्सशालायामित्यपि वोध्यं इत्यादीति आदिशब्दादभिजित् आभिजितः
अश्वयुक् आश्वयुजः प्रतिप्रसूत इति कालाट्ठञा निवर्त्तमानो य औत्सर्गिको ण् संधिवेलादिसूत्रेण पुनरभ्यनुज्ञात इत्यर्थः कृतलब्ध ननु कृतक्रीतत्वे जा
वत्सशाले जातः वत्सशालः। वात्सशालः इत्यादि। जातार्थे प्रतिप्रसूतोऽण् एवाडिह द्रष्टव्यः॥ शतभिषजः। शातभिषकः। नक्षत्रेभ्यो वहुल
म्।४।३।३७॥ जातार्थे प्रत्ययस्य वहुलं लुक् स्यात्। रोहिणः। रौहिणः। कृतलब्धक्रीतकुशलाः।४।३।३८॥ तत्रेत्येव। स्रुघ्ने कृतो लब्धः
क्रीतः कुशलो वा स्रौघ्नः। प्रायभवः।४।३।३९॥ तत्रेत्येव। स्रुघ्ने प्रायेण वाहुल्येन भवति स्रौघ्नः। उपजानूपकर्णोपनीवेष्ठक्।४।३।४०॥ औपजा
नुकः। औपकर्णिकः। औपनीविकः॥ सम्भूते।४।३।४१॥ स्रुघ्ने सम्भवति स्रौघ्नः। कोशाड्ढञ्।४।३।४२॥ कौशेयं वस्त्रं। कालात्साधुपुष्प्यत्पच्यमा
नेषु।४।३।४३॥ हेमन्ते साधुः हैमन्तः प्राकारः। वसन्ते पुष्प्यन्ति वासन्त्यः कुन्दलताः। शरदि पच्यन्ते शारदाः शालयः। उप्ते च।४।३।४४॥ हेमन्ते उ
तलब्धत्वयो र्व्याप्ये इति किमनयोर्ग्रहणेन सत्यं कृतत्वक्रीतत्वप्रकारकवोधेपि प्रत्ययार्थं तद्ग्रहणं अत एव जाते लुग्भाजामपि कृते न लुक् प्राय कादाचित्कभवनाश्रयः प्रा
यभवस्तेन तत्रभव इत्यनेन नगतार्थतेत्याहुः भाष्ये तु प्रत्याख्यातमेतत् प्रायभवग्रहणमनर्थकं तत्रभवेन कृतत्वादिति उपजानु त्रयोप्यमी सामीप्येव्ययीभावाः तेषां समाहा
रद्वंद्वे सौत्रं पुंस्त्वं संभूते इह तत्रादिना संभावना आधारपरिमाणदाधेयस्यानतिरेकश्चेति द्वयमप्याश्रीयते स्रौघ्न इति स्रुघ्ने संभाव्यते तत्परिमाणानतिरिक्तो वासेनादिरित्यर्थः
कोशात् कौशेयमिति वस्त्रविशेषे योगरूढोयं कोशे संभवत्सु सत्कार्यवादाभिप्रायेण मतांतरे तु विकारप्रकरणे एण्या ढञित्यस्यानंतरं कोशाच्चेति पठितव्यं तथा च वार्त्तिकं
विकारे कोशाड्ढञ् संभूतेत्यर्थानुपपत्तिरिति कालात् पुष्प्यदिति दैवादिकः शत्रंतस्य दाह पुष्प्यंतीति उप्ते च कालादित्येव योगविभाग उत्तरार्थः उप्यंत इति सूत्रे भूतकाले



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मयूराःकलापिनोभवंतिसउपचारात्कलापीतत्रदेयमृणंकलापकंअश्वत्थस्यफलमश्वत्थः तद्युक्तःकालोप्यश्वत्थःयस्मिन्काले॥ मू· ५॥

सि·कौ· तत्रमितिभावः आश्वयुज्यावुञ् ञकारःस्वरार्थः उत्तरत्रवृद्ध्यर्थश्च॥ ⁂ ॥ आश्वयुज्यामिति अश्विनीनक्षत्रपर्यायोऽश्वयुक् तद्युक्तापौर्णमासी आश्वयुजी तत्रेत्यर्थः

टी·त· देयमृणे ऋणेकिं मासे देयामिद्धा अश्वत्थ इति फलेलुक् इहपुल्लिंगनिर्देशोयद्यप्ययुक्तस्तथापिफलेअश्वत्थशब्दऔपचारिक इत्याशयेनपुल्लिंगप्रयोगइत्याहुः

सु·त· आश्वयुज्यावुञ्।४।३।४५। ठञोपवादः। आश्वयुज्यामुप्ताआश्वयुजकामाषाः॥ ग्रीष्मवसन्तादन्यतरस्याम्।४।३।४६॥ पक्षेऋतव्यण्।ग्रैष्म

३३ कं।ग्रैष्मं।वासन्तकं।वासन्तं॥ देयमृणे।४।३।४७॥ कालादित्येव। मासेदेयमृणंमासिकं। कलाप्यश्वत्थयववुसाद्वुन्।४।३।४८॥ यस्मिन्का

लेमयूराःफलन्तितत्रदेयमश्वत्थकं।यस्मिन्यववुसमुत्पद्यतेतत्रदेयंयववुसकं॥ ग्रीष्मावरसमाद्वुञ्।४।३।४९॥ ग्रीष्मेदेयमृणंग्रैष्मकंआव

रसमकं।संवत्सराग्रहायणीभ्यांठञ्च।४।३।५०॥ चाद्वुञ्।सांवत्सरिकं।सांवत्सरकं।आग्रहायणिकं।आग्रहायणकं। व्याहरतिमृगः।४।३।५१

कालवाचिनःसप्तम्यन्ताच्छब्दादायतइत्यर्थेऽणादयःस्युः।योव्याहरतिसमृगश्चेत्।निशायांव्याहरतिनैशोमृगः।नैशिकः। तदस्यसोढम्।४।३।

।५२। कालादित्येव।निशासहचरितमध्ययनंनिशा तत्सोढमस्यनैशिकः।नैशः।तत्रभवः।४।३।५३॥ स्रुघ्नेभवःस्रौघ्नः।राष्ट्रियः।दिगादिभ्योयत्

।४।३।५४॥दिश्यम्।वर्ग्यः। शरीरावयवाच्च।४।३।५५॥ दन्त्यं।कर्ण्यं॥ प्राचांनगरान्ते॥७।३।२४॥ प्राचांदेशेनगरान्तेऽङ्गेपूर्वपदस्योत्तरपदस्य

चामादेरचोवृद्धिः ञितिणितिकितिच। सुह्मनगरेभवःसौह्मनागरः। पौर्वनागरः। प्राचांकिं। मद्रनगरमुदक्षुतत्रभवः।माद्रनगरः॥ जङ्गलधेनुव

लजान्तस्यविभाषितमुत्तरम्।७।३।२५॥ जङ्गलाद्यन्तस्याङ्गस्यपूर्वपदस्याचामादेरचोवृद्धिरुत्तरपदस्यवा ञितिणितिकितिच। कुरुजङ्गलेभ

वंकौरुजङ्गलं।कौरुजाङ्गलं।वैश्वधेनवं।वैश्वधैनवं। सौवर्णवलजं। सौवर्णवालजं।इतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्।४।३।५६॥ दार्त्तेयं

ठञ्चेति सम्वत्सराग्रहायणीभ्यांचेत्येवसुवचंनचवेति वक्तव्येठञ्ग्रहणंसंधिवेलादिषुसंवत्सरात्फलपर्वणोरि ९ कौक्षेयंकलशिर्घटःतत्रभवंकालशेयं

तिपठ्यतेतत्रफलेऋणत्वेनविवक्षिते अणंबाधित्वाठञेवयथास्यादितिकाशिका दावुञमितिवाच्यं तस्मैहितास्तद्धिता इत्यन्वर्थसंज्ञाकरणबलेनात्रापिप्रत्य

योनभवेदितिवक्तुंशक्यत्वादितिनव्याः नैशिक इति निशाप्रदोषाभ्यांचेतिवाठञ् तत्रभवः कालादितिनिवृत्तं कालसंबद्धस्यनिवृत्तयेपुनस्तत्रग्रहणात् ॥

२३३

CC-0. In Public Domain. Digitization by eGangotri

नचपूर्वसूत्रस्थस्यतदित्यस्यव्यावृत्तयेतत्रग्रहणमस्त्विति वाच्यं तदस्येतिसूत्रस्येतउत्तरत्रापिसुपठत्वात् यद्यपिभूधातुरन्यत्रावपिवर्त्ततेतथापीहसत्तार्थएववर्तते
तत्रजातइतिपृथग्ग्रहणादितिबोध्यं दिगादिभ्योदिग्वर्गपूगपक्षरहस उखासाक्षिन् । आदि अंत मुखजघन मेघयूथ उदकात्संज्ञायांन्यायवंशकालेन्या
दिदिगादिः मुखजघनयोः पाठोत्राशरीरावयवार्थः सेनायामुखजघनेचभवंमुख्यंजघन्यं प्राचांनगरान्ते सप्तमीनिर्देशादंगस्येत्यधिकृतमपिसप्तम्यंतेनाविपरिण
म्यतेतदाह नगरांतेंगे इति इतिकुक्षिदृतिश्चर्मविकारः शरीरावयवविशेषश्च कुक्षिशब्दोधूमादिस्ततोधूमादिभ्यश्चेतिवुञ्ग्रीवात्प्रेअननढञ् कलशिमेत्यपात्रंकल
शिमुदधिगुर्वीवल्लवालोड्यंतीतिमाघः वस्तिर्नाभेरधोद्वयोरित्यमरः तत्रभवंवास्तेयं अस्तीतितिङन्तप्रतिरूपकोनिपातःसचतिङंतेनसमानार्थोभिन्नार्थश्च आद्यो
यथा अस्तिक्षीरागौः द्वितीयोयथा अस्तिमान्धनमानित्यर्थः तदिहाविशेषादुभयोरपिग्रहणमास्तेयमितिहरदत्तः अहोभवमाहेयंत्रिष्वाहेयंविषास्थ्यादीत्यमरः ॥

ग्रीवाभ्योऽण्च । ४ । ३ । ५७ ॥ चाद्ढञ् । ग्रैवेयं । ग्रैवं । गम्भीराञ्ञ्यः । ४ । ३ । ५८ ॥ गाम्भीरेभवंगाम्भीर्य्यं । अव्ययीभावाच्च । ४ । ३ । ५९ ॥ परिमुखम्भवंपा
रिमुख्यं । परिमुखादिभ्यएवेष्यतेनेह । औपकूलः । अन्तःपूर्वपदाट्ठञ् । ४ । ३ । ६० ॥ अव्ययीभावादित्येवाविभक्तिनिअन्तः । अन्तर्वेश्मिकं । तत्रभवं
॥ ७ ॥ ग्रीवाभ्योणच शरीरावयवाच्चेतियतोपवादः ग्रीवाशब्दोधमनीसंघातेवर्त्तते तत्रउद्भूतावयव संघातविवक्षया ११ आन्तर्वेश्मिकम् । आन्तर्गणिकं ॥
सूत्रेबहुवचनं तिरोहितावयवसंघातविवक्षायांत्वेकवचनान्तादप्यणढञौसएवग्रैवेयमित्यादि ग्रीवासुभवंग्रीवायामितिवाविग्रहः गंभीराञ्ञ्यः पंचजनादुपसं
ख्यानं पांचजन्यं परिमुखमिति यद्यपिपरिशब्दादिहवर्जनंगम्यते तदाअपपरिबहिरंचवः पंचम्येत्यव्ययीभावः यदिसर्वतोभावस्तदात्वसमासेवनिपातनादव्ययी
भावइत्याहुः परिमुखादिभ्यएवेति अयंभावः दिगादिगणेनंतरंपरिमुखपरिहनुपर्योष्ठपर्युलूखलेत्यादिपरिमुखादिगणःपठ्यतेतत्साम्र्थ्यादिहसूत्रेअव्ययीभावशब्दे
नपरिमुखादिरेवगृह्यते तस्यगणस्यकार्यांतराभावादिति नन्वेवंपरिमुखादेरितिसूत्रविशिष्येवक्रियतांकिमनेनप्रयासेनउत्तरत्राव्ययीभावादित्यस्यापेक्षायामपि
तत्रैवतत्करणेचित्यादितिचेदत्राहहरदत्तः परिमुखादेरित्युच्यमानेबहुव्रीहितत्पुरुषेभ्योपिस्यात् अव्ययीभावग्रहणात्तुतेभ्योनभवतीतिपरिमुखादिग
णेप्रतिशाखशब्दोपिबोध्यः तथाचशाखस्यासमीपेप्रतिशाखंभवंप्रातिशाख्यंअव्ययीभावाच्चेतिन्य इतिमाधवः अंतर्वेश्मेति नपुंसकादन्यतरस्यामिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



अध्यात्ममिति अनश्चेतिटचूकर्णललाटात्कनोपवादः अलंकारे किं कर्ण्यं ललाट्यं तस्य व्याख्यान इति च व्याख्यायते येन स व्याख्यानः करणे ल्युट् इति शब्दो वाक्यार्थं प
रामृशति तत्समीपे श्रूयमाणश्च कारस्तत्रभव इति वाक्यार्थमाक्षिपति नामप्रतिपादकं तच्च शक्त्या लक्षणया वेत्यत्र नाग्रहः तथा च वक्ष्यते ताद्व्याख्यानकरणेर्थे समन्यं

अध्यात्मादेष्ठञिष्यते॥ अध्यात्मे भवमाध्यात्मिकं। अनुशतिकादीनाञ्च। ७।३।२०॥ एषामुभयपदवृद्धिः स्यात् ञ्णिति णिति किति च। आधि
दैविकम्। आधिभौतिकं। ऐहलौकिकं। पारलौकिकं। अध्यात्मादिराकृतिगणः॥ देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्। ७।३।१॥ ए
षांपञ्चानां वृद्धिप्राप्तावादेरच आत् ञ्णिति णिति किति च। दाविकं। देविकाकूले भवा दाविकाकूलाः शालयः। शिंशपाया विकारः शांशपश्चमसः
पलाशादिभ्यो वेत्यञ्। दित्यौहः इदं दात्यौहं। दीर्घसत्रे भवं दार्घसत्रं। श्रेयसि भवं श्रायसं। ग्रामात्पर्यनुपूर्वात्। ४।३।६१॥ ठञ् स्यात्। अव्य
यीभावादित्येव। पारिग्रामिकः। आनुग्रामिकः। जिह्वामूलाङ्गुलेश्छः। ४।३।६२॥ जिह्वामूलीयं। अङ्गुलीयं। वर्गान्ताच्च। ४।३।६३॥ कवर्गी
यं। अशब्दे यत्खावन्यतरस्याम्। ४।३।६४॥ पक्षे पूर्वेण छः। मद्वर्ग्यः। मद्वर्गीणः। मद्वर्गीयः। अशब्दे किं। कवर्गीयो वर्णः। कर्णललाटात्क
न्नलंकारे। ४।३।६५॥ कर्णिका। ललाटिका। तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः। ४।३।६६॥ सुपां व्याख्यानः सौपो ग्रन्थः। तैङः। कार्त्तः।
सुप्सु भवं सौपं। बह्वचोऽन्तोदात्ताट्ठञ्। ४।३।६७॥ षत्वणत्वयोर्विधायकं शास्त्रं षत्वणत्वं। तस्य व्याख्यानस्तत्र भवो वा षात्वणत्विकः। क्रतुयज्ञे
भ्यश्च। ४।३।६८॥ सोमसाध्येषु यागेष्वेतौ प्रसिद्धौ तत्रान्यतरोपादानेन सिद्धे उभयोरुपादानसामर्थ्यात् सोमका अपीह गृह्यन्ते। अग्निष्टोमस्य
व्याख्यानस्तत्र भव आग्निष्टोमिकः। वाजपेयिकः। पाकयज्ञिकः। नावयज्ञिकः। बहुवचनं स्वरूपविधिनिरासार्थं। अनन्तोदात्तार्थ आरम्भः ॥ ३४

नात्तु भवार्थे व्याख्यातव्यस्य ग्रंथस्य प्रतिपादकात् प्रत्ययाः स्युरिति सूत्रार्थः व्याख्यातव्यनाम्नः किं पाटलीपुत्रस्य व्याख्यानी सुकोसला पाटलीपुत्रं हि तया व्याख्यायते ई
दृक्सन्निवेशविशिष्टमिति न त्विदं व्याख्यातव्यस्य नाम ग्रंथेष्वेव व्याख्येयत्वस्य सुप्रसिद्धत्वान्नामग्रहणं हि प्रसिद्ध्युपसंग्रहार्थमेव सूत्रे कृतं बह्वचो अणोपवादः

234

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वह्वृचः किं छ्य वच्‍छकं वस्यतीत्येकाच्प्रत्युदाहार्यः सोयमेतेङ्क् अंगौ दत्ताक्किंसंहितायाः संहितं गतिरनंतरस्यत्युदात्तोयं अंतग्रहणं स्पष्टप्रतिपत्त्यर्थं उदात्तादित्युक्तेपि वर्णग्रहणेन रंतग्रहणात वर्णादनुदात्तस्यत्त्वयथाक्रतुयज्ञेभ्यश्च अग्निष्टोमस्य व्याख्यानइति अग्निष्टोमाद्यर्थेषुमंत्रब्राह्मणकल्पेषुवर्तमाना अग्निष्टोमादिशब्दाः इहोदाहरणग्रथा नामवव्याख्येयतायाउक्तत्वादित्याहुः सुतिसोमः अत्रेः सोमाः सिन्निति बहुव्रीहिः पराःदिश्चपरांतश्च यंतोदात्तोयं पीयतेऽस्मिन्निति पेयः कृत्यल्युटोबहुलमित्यधिकरणेयत् वाजोनामयवागूः सदस्यपेयोवाजपेयः अयंहिकृदुत्तरपदप्रकृतिस्वरेणमध्योदात्तः पेयशब्दस्ययतोनावइत्युदात्तत्वात राज्ञासूयते क्षत्रियेण सूयतेरा जा सोमस्सूयतेऽत्रेति वा राजसूयः राजसूयेति क्यप् तत्रएवनिपातनात्समासः षष्ठीसमासोवा अयमप्युत्तरपदप्रकृतिस्वरेणमध्योदात्तएवधातुस्वरेण सूयशब्दस्याद्युदात्तत्वात् असोमकेभ्य उदाहर ति पाकेति अल्पपर्यायः पाकशब्दः पाकश्चासौयज्ञश्चेति कर्मधारयस्सच समासस्वरेणांतोदात्तः नवैश्रीहिभिर्यजनेनवयज्ञः। आग्रयणं यजयाचविच्छेतिनङ् कर्तृके

अध्यायेष्वेवर्षेः॥४।३।६९॥ ऋषिशब्देभ्योलक्षणया व्याख्येयग्रन्थवृत्तिभ्योभवेव्याख्यानेचाध्यायेठञ्स्यात् वसिष्ठेन दृष्टो मन्त्रो वसिष्ठस्तस्य व्याख्या नस्तत्रभावोवा वासिष्ठिकोध्यायः। अध्यायेष्विति किं वासिष्ठी ऋक्। पौरोडाशपुरोडाशात्ष्ठन्॥४।३।७०॥ पुरोडाशास्सहचरितो मन्त्रः पुरोडाशः सएवपौ रोडाशः तत्तष्ठन् पौरोडाशिकः। छन्दसोयदणौ॥४।३।७१॥ छन्दस्यः छान्दसः। द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक्॥४।३।७२॥ द्व्यचः ऐष्टिकः पाशुकः ऋत् चातुर्होत्रिकः ब्राह्मणिकः आर्चिकः इत्यादि अणृगयनादिभ्यः॥४।३।७३॥ ठञादेरपवादः। आर्गयनः औपनिषदः वैयाकरणः। ततआगतः॥४।३।७४॥ शुण्डिकादागतः शौण्डः॥ ॥ ११ इतिकृतिसमासः कृदुत्तरपदप्रकृतिस्वरेणांतोदात्तः अनंतोदात्तार्थइति वाजपे यराजसूयार्थं तया असिन्नास्येसत्यंतोदात्तात्वादिपिद्यग्नाभिधायिनः परत्वादनेनैवभाव्यमित्याग्निष्टोमिकइत्याद्युदाहृतमिति भावः॥ अध्यायेष्वेवर्षेः एवकारः स्पष्ट प्रतिपत्त्यर्थः वासिष्ठीतिभवार्थेण सौरोडाशाभिखा ङीबपौरोडाशिकीपुरोडाशिकीपुरोदाश्यते इतिपुरोडाशः दाशृदाने कर्मणिघञ् इहैवनिपातनाद्दस्यडत्वं छं दसोठ इष्यते व्यादुव्याख्यानयोरर्थयोर्यदणौसः छन्दसस्यरूपत्वायवादः छन्दस्यइत्यादिरिहार्थयोर्यदण्ण्योर्यथासंख्यंनभवत्यस्वरितत्वादितिवोध्यं द्व्यजृत्र लोपवादः चातुर्होतृकइति पृथिवीहोता द्यौरध्वर्युरित्यादिमंत्रस्यचतुर्होतेतिनामधेयंइत्याहेतिआदिशब्दात्साग्निकः आध्वरिकः पौरश्चरणिकः नामाख्यातग्रहणंसं

घातविगृहीतार्थमिति वार्तिकं तत्र नामशब्दाद्वा त्वादिवसि

CC-0. In Public Domain. Digitization by eGangotri



गृहीतग्रहणमाख्यातार्थमितिज्ञेयं नामिकः आख्यातिकः नामाख्यातिकः अणृगयु ऋगयनादि भ्योभवव्याख्यानयोरणस्मात् ठञादेरिति आदिशब्दादुक्थ
योः आर्गयन इति अयनशब्दोभावसाधनस्तेनसमासे अनोभावकर्मवचन इत्यंतोदात्तः अभेदोपचाराद्भाववचनोपिग्रंथे वर्त्तते इहवह्वचोंतोदात्तादितिठञाम
औपनिषद इत्यत्राप्येवं विद्यान्यायशिक्षाशब्देभ्योद्धञ् द्व्यज्लक्षणेतिठक्प्राप्तः व्याकरणशब्दात्तु वृद्धाच्छः॥ ॥ ठगायस्थानेभ्यः स्वामीस्वामिनमयमेतीतिवाऽयःस्वा
मिग्राह्योभागः सयस्मिन्नुत्पद्यतेतदायस्थानम् बहुवचननिर्देशः स्वरूपग्रहणनिरासार्थः वृद्धाच्छंपरत्वादयंबाधते आपणिकः आकरिकः छादीनांचेति का
र्कण इत्यत्र लक्षणपर्णेद्वारद्वाज इतिछः प्रत्ययः प्राप्तः तीर्थशब्दात्तु धूमादित्वाद्वुञ्प्राप्तः उदपानशब्दस्योत्सादित्वादञ्प्राप्त इत्यर्थः विद्यायोनि विद्यायोनिकृ

ठगायस्थानेभ्यः।४।३।७५॥ शुल्कशालाया आगतश्शौल्कशालिकः। शुण्डिकादिभ्योऽण्।४।३।७६॥ आयस्थानठकश्छादीनाञ्चापवादः। शु
ण्डिकादागतः शौण्डिकः। कार्कणः। तैर्थः। विद्यायोनिसम्बन्धेभ्यो वुञ्।४।३।७७॥ औपाध्यायकः। पैतामहकः। ऋतष्ठञ्।४।३।७८॥ वुञोपवा
दः। हौतृकं। भ्रातृकं। पितुर्यच्च।४।३।७९॥ चाद्ञ्। रीङृतः। यस्येतिलोपः। पित्र्यं। पैतृकं। गोत्रादङ्कवत्।४।३।८०॥ विदेभ्य आगतं वैदं। गा·र्गं।
दाक्षं। औपगवकं। नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम्।७।३।३०॥ नञः परेषां शुच्यादिषण्णां नामादेरचो वृद्धिः पूर्वपदस्य तु वा। त्रिदादोप
दे। आशौचं। अशौचं। आनैश्वर्य्यं। अनैश्वर्य्यं। आक्षेत्रज्ञं। अक्षेत्रज्ञं। आकौशलं। अकौशलं। आनैपुणं। अनैपुणं॥ ॥

तः संबंधो येषां तेभ्यो वुञ्स्यादणोपवादः छंतु परत्वाद्बाधते आचार्यकः मातामहकः मातुलकः ऋतष्ठञ् विद्यायोनिसंबंधेभ्य इति वर्त्तते तदाह वुञोपवाद इति उभ्क।
त्रितिवक्तव्येतपरकरणं ठञ्ग्रहणं चचिंत्यप्रयोजनमिति प्राचः येतृकीविद्यत्यत्र ङीवर्थं ठञ्ग्रहणमितितुतत्वं नचटिट्टेतिसूत्रेकञ्ग्रहणात् त्यदादिषु दृश इति कञोद्य
नुबंधकत्वात् तपरकरणं विहाय उ ऋत्रित्येव सुवचमित्याहुः गोत्रादंकवत् अपत्याधिकारादन्यत्र लौकिकं गोत्रमित्युक्तं अपत्यप्रत्ययांतात्तत आगत इत्यस्मिन्नर्थे।
अंकवत्प्रत्ययाः स्युः अंकेदृष्टस्य सर्वस्यायमतिदेशो नतु सांक्षाद्विहितस्यैवेत्याग्रहः तेन गोत्रचरणाद्वुञितिवुञपि लभ्यते सहितस्येदमिति सामान्येन विधीयमा
नोपि अन्यत्रिजंतादन्यत्र अंकेपि दृष्टः वैदमित्यादि संघांकेत्यादिना अंकार्थेऽण्विहित इतीहाप्यञ्यत्रिजंतादण् औपगवकमिति गोत्रचरणादितिवुञ् अंकेद
ङीप्सिद्ध्यतीतिवाच्यं यादृशी न्यायसिद्धेः नदनुबंधकग्रहणेनातदनुबंधकस्याग्रहणात् ४

ठगधिकारः

235

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेतुमनुष्येभ्यो मनुष्यग्रहणमहेत्वर्थं बहुवचनं स्वरूपविधिनिरासार्थं समरूप्यमिति विभाषा गुणेऽन्यत्र विभाषेति योगविभागाद्गुणवचनादपि पंचमी योगविभागे तु बाहुलकं प्रवृत्तेस्तनुदृष्टेरिति लिंगं मयट्च योगविभागो यथासंख्यनिरासार्थः दोऽवर्थः हैमवति हिमवतः प्रकाशते तत्र प्रथमं दृश्यत इत्यर्थः उत्पत्तिवचनस्तु प्रभवतिर्न गृह्यते तत्र जात इत्यनेनैव निर्देशात् वैदूर्य इति दंत्यमध्योऽयं शाद्वलवन्नजनड्वलवन्मूर्धन्यमध्यः नन्वत्राद्यो संगतिः वालवायपर्वतादसौ प्रभवति विदूरनगरे तु संस्क्रियते सत्यं अत एव समाहितं भाष्ये वालवायो विदूरं च प्रकृत्यंतरमेव वा न वै तत्रेति चेद्ब्रूयाज्जित्वरीवदुपाचरेदिति अस्यार्थः वालवायशब्दः प्रत्ययं लभते विदूरादेशं च सूत्रे पठितेनादेशेनानुरूपः स्यानो वालवायशब्द आक्षिप्यते यथा शिवादिषु पठिताभ्यां विश्रवणरवणादेशाभ्यामनुरूपः स्यानो विश्रवस्शब्द आक्षिप्यते यथा वा पद्न्नित्यादौ पदाद्यादेशानुरूपस्थानी पादादंतादिराक्षिप्यते न हत प्रकृत्यंतरमेवेति विदूरशब्दो नगरस्येव पर्वतस्यापि वा

हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः।४।३।८१॥ समादागतं समरूप्यं। विषमरूप्यं। पक्षे गहादित्वाच्छः समीयं। विषमीयं। देवदत्तरूप्यं। देवदत्तं मयट् च।४।३।८२॥ सममयं। विषममयं। देवदत्तमयं॥ प्रभवति।४।३।८३॥ तत इत्येव। हिमवतः प्रभवति हैमवती गङ्गा॥ विदूराञ्ञ्यः।४।३।८४॥ विदूरात्प्रभवति वैदूर्यो मणिः। तद्गच्छति पथिदूतयोः।४।३।८५॥ स्रुघ्नं गच्छति स्रौघ्नः पन्था दूतो वा। अभिनिष्क्रामति द्वारम्।४।३।८६॥ तदित्येव। स्रुघ्नमभिनिष्क्रामति स्रौघ्नं। कान्यकुब्जद्वारं॥ अधिकृत्य कृते ग्रन्थे।४।३।८७॥ तदित्येव। शारीरकमधिकृत्य कृतो ग्रन्थः शारीरकीयः। शारीरकं भाष्यमिति त्वभेदोपचारात्॥

१ चकोऽसौत्यर्थः एवं चास्मिन्पक्षे वालवायात्प्रभवतीति विग्रहे विदूरशब्दात्प्रत्यय इति व्याख्यानक्लेशो नेति भावः नवा इति वैशब्दोऽसमाधानं द्योतयति तत्र पर्वते विदूरशब्दोऽप्रसिद्ध इति चेद्ब्रूयाज्जित्वरीवद्व्यवहरेत् नियतपुरुषापेक्षो हि व्यवहारो दृश्यते यथा वणिज एव वाराणसीं जित्वरीति व्यवहरंति एवं वैयाकरणा एवाऽद्रिं विदूर इति तद्गच्छति द्वितीयांताद्गच्छतीत्यर्थे प्रत्ययः स्यात्स चेद्गंता पंथा दूतो वेत्यर्थः तत्र साध्यसिद्धिर्नतिकाष्ठा निपचंनीत्यादाविव करणस्य स्वातंत्र्यविवक्षया पंथाः कर्ता अभिनिष्क्रामति द्वितीयांतात्प्रत्ययः स्याचन्निष्क्रामति तच्चेद्द्वारमित्यर्थः स्रौघ्नं कान्यकुब्जद्वारमिति स्रुघ्नाभिमुखनिष्क्रमणे करणीभूतमिति फलितोऽर्थः पूर्ववत्करणस्य कर्तृत्वं तदित्येवेति अधिकृत्येत्यनपेक्षयात्र द्वितीया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· शारीरकीय इति कुत्सितं शरीरं शरीरकं तत्संबंधी शारीरको जीवात्मानमधिकृत्य प्रवृत्तं कृतो ग्रन्थः शारीरकीयः चतुर्लक्षणीसूत्रसंदर्भः वृद्धाच्छः अत्र वार्त्तिकं लुबाख्या
टी·त· यिकाभ्यो बहुलमिति तादर्थ्ये चैषा चतुर्थी आख्यायिकानाम गद्यरूपो ग्रन्थविशेषः अत एवाख्यानाख्यायिकयोस्तत्र तत्र भेदेनोपादानं आख्यायिकाभिधानाय यः प्रत्य
सु·त· य उत्पन्नस्तस्य बहुलं लुगित्यर्थः वासवदत्तामधिकृत्य कृता आख्यायिका वासवदत्ता सुमनोत्तरा क्वचिन्न भैमरथी अभेदोपचारेण गतार्थत्वात् तु इदं वार्त्तिकमावश्यकमि
३६ ति मूले नोक्तं ॥ ॐ ॥ शिशुक्रंद अत्र वार्त्तिकं द्वंद्वे देवासुरादिभ्यः प्रतिषेधः देवासुरं राक्षोसुरं निपातनादिति समाराजेति सूत्रे अमनुष्यशब्दो रूढ्या रक्षःपिशाचा
दीनाहे सुकृत्त्वात्तेन सूत्रेण क्लीबत्वं न सिद्ध्यतीति भावः सोस्य निवासः स इति प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितः प्रत्ययः स्यात् यः प्रथमान्तार्थः स निवासश्चेत् खु

शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः ४।३।८८ शिशूनां क्रन्दनं शिशुक्रन्दः तमधिकृत्य कृतो ग्रन्थः शिशुक्रन्दीयः यमस्य सभा यमसभं क्लीबत्व
न्निपातनात् यमसभीयः किरातार्जुनीयः इन्द्रजननादिराकृतिगणः इन्द्रजननीयं विरुद्धभोजनीयं सोऽस्य निवासः ४।३।८९ स्रुघ्नो निवासोऽस्य स्रौ
घ्नः अभिजनश्च ४।३।९० स्रुघ्नोऽभिजनोऽस्य स्रौघ्नः यत्र स्वयं वसति स निवासः यत्र पूर्वैरुषितं सोऽभिजन इति विवेकः । आयुधजीविभ्यश्छः पर्वते ४।
३।९१ पर्वतवाचिनः प्रथमान्तादभिजनशब्दादस्येत्यर्थे छः स्यात् हृद्गोलः पर्वतोऽभिजनो येषामायुधजीविनां ते हृद्गोलीयाः आयुधेति किम् ऋक्षो
दः पर्वतोऽभिजनो येषां ते आर्क्षोदाः द्विजाः । शण्डिकादिभ्यो ञ्यः ४।३।९२ शाण्डिकोऽभिजनोऽस्य शाण्डिक्यः ॥ ८९ स्रुघ्नो निवास इति निवासाधिकरणमित्यर्थः

नन्वस्येति कर्तृयोगे कर्तरि षष्ठी तथा च विशेषणविशेष्यभावव्यत्यासात् स्रुघ्नाधिकरणवासकर्ता इत्यर्थलाभात् तत्र भव इत्येव सिद्धं किमनेनेति चेदत्राहुः वा
सस्य चेतनमात्रकर्तृकतया प्रसिद्धत्वात् प्रकारकृतो भेदोस्तीति नास्ति वैयर्थ्यं वसतिर्हि येषु ग्रामीणगुणेन वस्तुनीत्यादौ नूपचारो बोध्यः अभिजनश्चेति योगविभाग उत्तरार्थः
अभिजनाः पूर्वबांधवा इति वृत्तिः अभिजायन्ते येभ्य इति व्युत्पत्तेरिति भावः पूर्वबांधवाः पित्रादयः बंधुशब्दः प्रज्ञादिः पूर्वसूत्रादिह निवास इत्यनुवर्तनं तत्सामानाधिक
रण्यादभिजनशब्दस्य तत्संबंधिनि लक्षणा एवं स्थिते फलितमाह यत्र पूर्वैरिति आयुधजीविभ्यः तादर्थ्ये एषा चतुर्थी आयुधजीविभ्यः आयुधजीव्यर्थं आयुधजी
विनोऽभिधातुं प्रत्ययः स्यादित्यर्थः सोऽस्याभिजन इत्यनुवर्तते पर्वतेन इति प्रकृतिविशेषणं तदाह पर्वतवाचिन इत्यादि पर्वत इति किं सांकाश्य ॥

236

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तापइत्यत्र तु छान्दसं ह्रस्वत्वं आग्नीध्रमिति भत्वविधानाद्धस्य जश्त्वं नेति भावः सोपीति अग्नीदपीत्यर्थः ननु पिबाग्नीध्रान्वेत्यादावाग्नीध्रशब्दं प्रयुज्यते वार्तिके तु शरणि
निपातनादयमर्थो लभ्यत इति चेदत्राहुः आग्नीध्रसाधारणादञिति वार्तिकेन विहितोयः स्वार्थेञ् तत्र श्लेषतत्राग्नीध्रान्तत्वं वाग्नीध्रमिति समिधांकर्मणि षष्ठीयं आधान
मिति करणे ल्युट् कर्मणि षष्ठ्यन्तादाधानकरणे वेत्यण् स्यात् सामिधेन्य इति यया अग्निः समिध्यते सा समित् संपदादित्वात्करणे क्विप् तस्या आधान इति वि
ग्रहः सामिधेनीति षित्वान्ङीष् हलस्तद्धितस्येति यलोपः ययर्चा समिदाधीयते सा सामिधेनीत्यर्थः प्रवो वाजा अभिद्यव इत्याद्याः आ जुहोता दुवस्यतेत्यन्ताः सा
मिधेन्य इति व्यवह्रियन्ते ॥ ❀ ॥ रथाद्यत् अणोपवादः रथाद्द्वियोगे इति वार्तिकमभिप्रेत्याह रथ्यं चक्रमिति रथसीताहलेभ्यो यद्विधाविति तदन्तविधिरुपसं

रथाद्यत् ॥४।३।१२१॥ रथ्यञ्चक्रं । पत्त्रपूर्वादञ् ॥४।३।१२२॥ पत्त्रं वाहनं । अश्वरथस्येदं । आश्वरथं । पत्त्राध्वर्युपरिषदश्च । ४।३।१२३। आश्व
त्रं । पत्त्राद्वाह्ये । अश्वस्येदम्वहनीयमाश्वं । आध्वर्यवं । पारिषदं । हलसीराट्ठक् ॥४।३।१२४॥ हालिकं । सैरिकं । द्वन्द्वाद्वुन्वैरमैथुनिकयोः
।४।३।१२५॥ काकोलूकिका । कुत्सकुशिकिका । द्वन्द्वे देवासुरादिभ्यः प्रतिषेधः ॥ दैवासुरं । गोत्रचरणाद्वुञ् ॥४।३।१२६॥ औपगवकं । चर
णाद्धर्माम्नाययोरिति वक्तव्यं । काठकं । सङ्घाङ्कलक्षणेष्वञ्यञिञामण् ॥४।३।१२७॥ घोषग्रहणमपि कर्तव्यं ॥ अत्र । बैदः सङ्घोऽङ्को घोषो वा ।
बैदं लक्षणं । यञ् । गार्गः । गार्गो । इञ् । दाक्षः । दाक्षो । परम्परासम्बन्धोऽङ्कः । साक्षात्तु लक्षणं । शाकलाद्वा ॥४।३।१२८॥ अस्मिन्नर्थे पक्षे चरणत्वाद्वु
ञ् । शाकलेन प्रोक्तमधीयते शाकलास्तेषां सङ्घोऽङ्को घोषो वा   शाकलः । शाकलकः । लक्षणे क्लीबता ॥   ११ स्थापते परमरथ्यं उत्तमरथ्यं द्वयोरथयोरं

गं द्विरथं इह द्विगोर्लुगनपत्ये इति यतो लुक् ननु यदन्तस्यैवात्र रथाङ्ग एव यदिष्यते कथं तर्हि रथस्य वोढा रथ्य इति तद्वहतीत्यनेनेति चेदेवं तर्हि अयमेव यद्रथा
गस्य वोढर्यपीष्यतां तद्वहति रथयुगप्रासंगमित्यत्र रथग्रहणं त्यज्यतामिति चेन्नैवं द्वौ रथौ वहति द्विरथ्य इत्यत्र द्विगोर्लुगनपत्य इति प्राग्दीव्यतीयस्य लुक्प्र
संगात् तद्वहतीति यत्प्रत्ययस्य तु प्राग्दीव्यतीयत्वाभावान्न लुगिति द्विरथ्य इति सिध्यति ननु द्विगोर्लुगनपत्य इत्यत्रापीत्यपकर्षणात्कथमत्र यतो लुक्प्रस
क्तिरिति चेदत्राहुः तद्वहतीत्यत्र रथग्रहणमेव ज्ञापकमेतस्य यतो हलादेरपि लुग्भवतीति अन्यथा तत्र रथग्रहणं व्यर्थमेव स्यात्तथा च द्वयो रथयोरंगमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· विग्रहे द्वैरथमिति प्रयोगः सुरथ इति पत्त्रपूर्वादञ् पूर्वस्यापवादः पत्त्रमिति यं तं नयन्नेनेति विग्रहे दाम्नीत्यादिना ष्ट्रन् रथादित्येव संबध्यत इत्याह अश्वरथ
टी·त· स्येदमिति अश्वयुक्तो रथोऽश्वरथस्तस्यांगमित्यर्थः। पत्त्राध्वर्यु अणोऽपवादः वार्त्तिकमाह पत्त्राद्वाह्य इति इह पत्त्रेत्यर्थग्रहणे इतरयोस्तु स्वरूपग्रहणे व्याख्या
सु·त· नमेव शरणं द्वंद्वाद्वुन् अणोऽपवादः द्वंद्वात्परत्वाद्बाधते काकोलूकिकेति काकोलूकस्य वैरमित्यर्थः वुन्नंतं स्त्रियां वैरमैथुनिकादिवुनिति स्त्र्यधिकारे अमरः
३९ कुत्सकुशिकिकेति कुत्सकुशिकयोर्मैथुनिका विवाहरूपः संबंध इत्यर्थः मिथुनेन दंपती तस्य कर्म क्रियानिष्पादनं मनोज्ञादित्वाद्वुञ् वुञंतं चेदं स्त्रियां स्वभावा
त् अत्रिवदिति कुत्साश्च कुशिकाश्च कुत्सकुशिकास्तेषां मैथुनिकेत्यपि विग्रहः इह कुत्सश्च कुशिकाश्चेति द्वयोरेव मैथुनिकायां वुनिति नाग्रहः कार्यः पूर्वनि
ल्गितिसूत्रे कैयटेन अत्रिभरद्वाजिकेत्यादिकं प्रसंगादुदाहृतत्वाद्बहुवचनांतद्वंद्वाद्वुनो व्याख्यातत्वादिति संघांक पूर्वस्य वुञोऽपवादः घोषग्रहणमिति

छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः। ४।३।१२९॥ छन्दोगानां धर्मो आम्नायो वा छान्दोग्यं। औक्थिक्यं। याज्ञिक्यं। बाह्वृच्यं। नाट्यं च
रणाद्धर्माम्नाययोरित्युक्तं। तत्साहचर्यान्नटशब्दादपि तयोरेव। न दण्डमाणवान्तेवासिषु। ४।३।१३०॥ दण्डप्रधाना माणवा दण्डमाणवाः शिष्याश्च
वुञ् न स्यात्। दाक्षा दण्डमाणवाः शिष्या वा। रैवतिकादिभ्यश्छः। ४।३।१३१॥ तस्येदमित्यर्थे वुञोऽपवादः। रैवतिकीयः। वैजवापीयः। कौपिञ्जल
हास्तिपदादण् वाच्यः॥ कुपिञ्जलस्यापत्यं इहैव निपातनादण्। तदन्तात् पुनरण्। कौपिञ्जलः। गोत्रवुञोऽपवादः। हस्तिपदस्यापत्यं हास्तिपद

एवं च प्रकृतप्रत्यासत्तेः प्रत्ययार्थविशेषणानि चत्वारीति वैषम्याद्यथासंख्यमपि न प्रवर्तते गार्ग इति आपत्यस्येति यलोपः यद्य (स्तस्यायं हास्तिपादः ॥
प्यकलक्षणयोः पर्यायत्वं प्रसिद्धं कलंकांको लाञ्छनं चिह्नं लक्ष्म च लक्षणमित्यमरस्तथापि पृथग्ग्रहणसामर्थ्यादिह विशेषपरतेत्याह परंपरासंबंध इति य
थागवादिनिष्ठः स्वामिना गोद्वारा संबंधः साक्षादिति यथा विदानां विद्या घोष आभीरस्थानं लिङ्गं वत्सवर्थं पुंवद्भावनिषेधार्थं च वैदी विद्या यस्य वैदो विद्यः वि
दानामसाधारणी या विद्या तद्वानित्यर्थः॥ ॥ छंदोगौक्थिक संघादयो निवृत्ताः एभ्यो ञ्यः स्यात्तस्येदमित्यर्थे चरणाद्धर्माम्नाययोरिति वुञोऽपवादः नटात्त्वौत्सर्गिकस्या
णः धर्माम्नाययोरित्युक्तेनेह छांदोगं कुलमित्यादि न दंड तस्येदमित्यनुवर्तते तेषु शिष्येषु चेति प्रत्ययार्थविशेषणं ह्विति शेषः दाक्षा इति इञश्चेत्यण्

237

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काआयुधजीविनः योपधादिति वुञ् षंडिकादिभ्योऽण्यः षंडिकः सर्वसेन शकेत्यादि॥ ॐ ॥सिंधुतक्ष। सिंधुवण्डगंधारकंबोजादयः सिंध्वादयस्तेनु प्रायेण कच्छादिष्वपि
पठ्यंते तेभ्योऽणि तत एव सिद्धे मनुष्यवुञो बाधनार्थं वचनं तक्षशिलावत्साद्वरणा वर्वरत्यादयस्तक्षशिलादयः वासुदेवार्जुनाभ्यां वुन् छाणोरपवादः अजाद्यदंत
मल्पाच्तरमिति सूत्राभ्यामर्जुनस्य पूर्वनिपाते प्राप्ते तस्याकरणं सर्वतोभ्यर्हितं पूर्वं निपततीति ज्ञापनार्थं ननु वसुदेवस्यापत्यमित्यर्थे ऋष्यंधकेत्यणि वासुदेवशब्दो
निष्पन्नस्तथा च तत्र गोत्रक्षत्रियाख्येभ्य इत्युत्तरसूत्रेण वुञेवास्तु किमनेन वुना नह्यत्र वृद्धौ विशेषः प्रागेव वृद्धत्वात् न च वृद्धिनिमित्तस्येति पुंवद्भावनिषेधो दोषः

सिन्धुतक्षशिलादिभ्योऽणञौ।४।३।९३॥ सिंध्वादिभ्योऽण् तक्षशिलादिभ्योऽञ् स्यादुक्तेर्थे। सैन्धवः। ताक्षशिला नगरी। अभिजनोऽस्य ताक्षशिलः। तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः।४।३।९४॥ तूदी अभिजनोऽस्य तौदेयः। शालातुरीयः। वार्म्मतेयः। कौचवार्य्यः। भक्तिः।४।३।९५॥ सोऽस्येत्यनुवर्त्तते। भज्यते सेव्यते इति भक्तिः। स्रुघ्नो भक्तिरस्य स्रौघ्नः। अचित्ताददेशकालाट्ठक्।४।३।९६॥ अपूपा भक्तिरस्य आपूपिकः। पायसिकः। अचित्तात् किं। दैवदत्तः। अदेशात् किं। स्रौघ्नः। अकालात् किं। ग्रैष्मः। महाराजाट्ठञ्।४।३।९७॥ माहाराजिकः। वासुदेवार्जुनाभ्यां वुन्।४।३।९८॥ वासुदेवकः। अर्ज्जुनकः। गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ्।४।३।९९॥ अणोऽपवादः। परत्वाद्वृद्धाच्छं बाधते। ग्लुचुकायनिर्भक्तिरस्य ग्लौचुकायनकः। नाकुलकः। बहुलग्रहणान्नेह। पाणिनो भक्तिरस्य पाणिनीयः॥ ॥

स्यादिति वाच्यं वुन्यपि नकोपधाया इति निषेधस्येष्यमाणत्वात् न वा स्वरे विशेषः ञिनित्यादिर्नित्यमिति तुल्यस्वरत्वात् नाप्यभ्यर्हितं पूर्वमिति ज्ञापनमेव तत्फल
मिति वाच्यं तथात्वे हि पूर्वनिपातप्रकरणे अभ्यर्हितमित्येव लाघवात् कुर्यादिति चेदत्र भाष्यं संज्ञैषा भगवत इति अयं भावः सर्वत्रासौ समस्तं च वसत्यत्रेति
वैयतः ततोऽसौ वासुदेवेति विद्वद्भिः परिगीयत इति स्मृतेः परमात्मैहवासुदेवः सर्वत्रासौ वसति सर्वमत्र वसतीति वा व्युत्पत्त्या वासुः बाहुलकादुण्। वासुश्चासौ
देवश्चेति विग्रहः तथा च नेयं गोत्राख्या नापि क्षत्रियाख्येति युक्त एव वुन्विधिः अभ्यर्हितं पूर्वमिति तु प्रसंगाज्ज्ञापितं तदप्यनित्यं श्वयुवमघोनामित्यादिलिं
गादित्यवधेयं वृद्धाच्छं बाधत इति औपगवो भक्तिरस्य औपगवकः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·कौ· जनपदिनां स्वस्वामिभावसंबंधेमत्वर्थीयं दर्शयति जनपदस्वामिवाचिनामिति प्रत्ययः प्रकृतिश्चेति अनेनसर्वशब्दस्यार्थो दर्शितः असतिसर्वग्रहणे प्राधान्यात्प्र
टी·त· त्ययस्यैवातिदेशः स्यान्नतुप्रकृतेरितिहरदत्तः अत्रवार्त्तिककारः सर्वशब्दस्यप्रयोजनमाह सर्ववचनं प्रकृतिनिर्ह्रासार्थंतच्चमद्रवृज्यर्थमिति अयंभावः वृद्धिनिमि
सु·त त्तेषुवुञादिष्वतिदिष्टेष्विप्रकृतिरूपेपुनर्वृद्ध्याभाव्यमितिविशेषस्यतत्रदुर्लभत्वान्मद्रवृज्योः कनिविशेषोवोध्यः सोप्यवहुत्वएवेति निर्ह्रासोपचयोऽल्पतातथा
३२ हिमद्राणांराजाद्व्यञ्मगधेत्यणमाद्रः वृजिशब्दाद्वृद्धेत्कोसलेतिञ्यङ् वार्ज्यः सभक्तिरस्येतिप्रकृतिनिर्ह्रासेमद्रकः वृजिकःमद्रवृज्योः कन् अन्यथामाद्रकःवा
र्ज्यकइतिस्यात् आंगकइति जनपदतदवध्योश्च अवृद्धादपीतिवुञ् अंगशब्दात्स्वामिवाचिनोवहुवचनांतादणिप्राप्तेवुञिति दिश्यते पंचालाब्राह्मणा

जनपदिनाञ्जनपदवत्सर्वंजनपदेनसमानशब्दानाम्बहुवचने। ४।३।१००॥ जनपदस्वामिवाचिनाम्बहुवचनेजनपदवाचिनासमानश्रु
तीनाञ्जनपदवत्सर्वंस्यात्प्रत्ययःप्रकृतिश्च। जनपदतदवध्योश्चेतिप्रकरणेयेप्रत्ययाउक्तास्तेऽत्रातिदिश्यन्ते। अङ्गाजनपदोभक्तिरस्या
ङ्गकः। अङ्गाःक्षत्रियाभक्तिरस्याङ्गकः। जनपदिनांकिं। पञ्चालाब्राह्मणाभक्तिरस्यपाञ्चालः। जनपदेनेतिकिं। पौरवोराजाभक्तिरस्यपौ
रवीयः। तेनप्रोक्तम्। ४।३।१०१॥ पाणिनिनाप्रोक्तम्पाणिनीयं। तित्तिरिवरतन्तुखण्डिकोखाच्छण्। ४।३।१०२॥ छन्दोब्राह्मणानीतितद्विष
यता। तित्तिरिणाप्रोक्तमधीयतेतैत्तिरीयाः॥ काश्यपकौशिकाभ्यामृषिभ्यांणिनिः। ४।३।१०३॥ काश्यपेनप्रोक्तमधीयतेकाश्यपिनः॥ ॥

इति अभेदोपचाराद्ब्राह्मणेषुपंचालशब्दस्यप्रवृत्तिः वहुवचनग्रहणंकिं एकवचनद्विवचनयोस्सत्यपिशब्दभेदे अतिदेशोयथास्यात् आंगआंगौवाभक्तिरस्य
आंगकः इहवृद्धाच्छेप्राप्तेवुञ् तेनप्रोक्तंप्रकर्षेणोक्तंप्रोक्तमित्युच्यतेनतुकृतं कृतेग्रंथेइत्यनेनगतार्थत्वात् पाणिनिनाप्रोक्तमिति स्वयमन्येनवाकृतंव्याकरण .238
मध्यापनेनार्थव्याख्यानेनवाप्रकाशितमित्यर्थः प्रोक्तमितिकिं देवदत्तेनाध्यापितं प्रख्यातस्यैवग्रंथस्याध्यापनमिति नेहानेनप्रत्ययः तित्तिरिवरतन्तु अणोपवादः तद्विषयतेति
शौनकादिभ्यश्छंदसीत्यत्रास्यानुवृत्तेस्तित्तिरिणाप्रोक्ताः श्लोकाइत्यत्रनभवतीतिभावः तैत्तिरीयाइति प्रोक्ताल्लुगित्यध्येतृप्रत्ययस्यलुक् एवमग्रेपिकाश्यप छस्या
पवादः णकारउत्तरत्रवृद्ध्यर्थः ननुवृद्धिनिमित्तस्येति पुंवद्भावनिषेधोत्रफलमस्तीतिचेदत्राहुः णिन्यन्तस्याध्येतृवेदितृविषयत्वेनस्त्रियामप्रवृत्तेः प्रवृत्तावपि

CC-0. In Public Domain. Digitization by eGangotri

जानेश्चेति सिद्धत्वाच्चरणत्वेन जातित्वादिति ऋषिभ्यामिति किं इदानींतनेन गोत्रकाश्यपेन प्रोक्तं काश्यपीयं ॥ ॐ ॥ कलापिवैशंपायन अलोपवादः छंदुपरत्वाद्ब घ्नेकलाप्यंतेवासिनश्चत्वारः हरिद्रुः छगली तुंबुरुः उलप इति वैशंपायनान्तेवासिनस्तु नव आलंबिः कलिंगः कमलः ऋचाभः आरुणिः ताड्यः श्यामायनः कठः कलापी इति हारिद्रविण इति एवं तौंबुरविणः औलपिनः छगलिनस्तु ढिनुकं वक्ष्यति आलंबिन इति एवं कालिंगिनः आर्चाभिनः आरुणिनः ताडिनः ।

कलापिवैशम्पायनान्तेवासिभ्यश्च ।४।३।१०४। कलाप्यन्तेवासिभ्यः हरिद्रुणा प्रोक्तमधीयते हारिद्रविणः । वैशम्पायनान्तेवासिभ्यः । आलम्बिनः । पुराणप्रोक्तेषु ब्राह्मणकल्पेषु ।४।३।१०५। तृतीयान्तात्प्रोक्तार्थे णिनिः स्यात् । यत्प्रोक्तं पुराणप्रोक्ताश्चेद्ब्राह्मणकल्पास्ते भवन्ति । पुराणेन चिरन्तनेन मुनिना प्रोक्ताः । भल्लुः । भाल्लविनः । शाट्यायन । शाट्यायनिनः । कल्पेषु पिङ्गेन प्रोक्तः पैङ्गी कल्पः । पुराणेति किं । याज्ञवल्क्यानि ब्राह्मणानि । आश्मरथः कल्पः । अतिः आपत्यस्येति यलोपः । कठचरकाल्लुक् ।४।३।१०७। आभ्यां प्रोक्तप्रत्ययस्य लुक् स्यात् । कठेन प्रोक्तमधीयते कठाः । चरकाः । कलापिनोऽण् ।४।३।१०८। कलापिना प्रोक्तमधीयते कालापाः । नान्तस्य टिलोपे । सब्रह्मचारिपीठसर्पिकलापिकौथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानादिति टिलोपः ॥ छगलिनो ढिनुक् ।४।३।१०९। छगलिना प्रोक्तमधीयते छागलेयिनः । पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः ।४।३।११०। पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते पाराशरिणो भिक्षवः । शैलालिनो नटाः ॥ कर्मन्दकृशाश्वादिनिः ।४।३।१११। भिक्षुनटसूत्रयोरित्येव । कर्मन्देन प्रोक्तमधीयते कर्मन्दिनो भिक्षवः । कृशाश्विनो नटाः

श्यामायनिनः कठाल्लुकं वक्ष्यति कलापिनश्चाणं याज्ञवल्क्यास्सरः ... प्रोक्तमेवादीनेन ताभ्यां यज्ञं ताभ्यां दृष्टा छन्दो न भवतीत्या प्रायेणाह अतिः आपत्यस्येतीति याज्ञवल्क्यादयोऽचिरकाला इत्याख्यानादिसुव्यवहारस्स एवानुसृतः सूत्रकृता कठचरकाल्लुक् कठशब्दस्य वैशंपायनान्तेवासित्वाण्णिनिः चरकात्त्वण् तयोर्लुक् छंदसीत्येव काठाः चारकाः श्लोकाः कलापिनोण् वैशंपायनान्तेवासित्वात्प्राप्तस्य णिनेरपवादः इनण्यनपत्य इति प्रकृतिभावे प्राप्ते आह नान्तस्य टिलोप इति कलापिन इत्युक्ते प्यौत्सर्गिकेऽणि सिद्धे पुनरण्ग्रहणमधिकविधानार्थं सहाधकबाधनार्थं भवति तेन माथुरेण प्रोक्तं माथुरी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·कौ· मौदाः पैप्पलादाः शाकला इति सिद्धं मुदपिप्पलादशाकल्येभ्यः पुराणप्रोक्तेष्विति णिनेरपवादोऽण् छगलिनो ढिनुक् कलाप्यन्तेवासित्वात्प्राप्तस्य णिनेरपवादः
टी·त· पाराशर्य मण्डूकल्युत्पाणिनिरिह संबध्यत इत्याह णिनिः स्यादिति तद्विषयता चेष्यते तदर्थं छन्दोग्रहणमनुवर्त्यं सूत्रयोश्छन्दस्त्वं तु गौण्या वृत्त्या बोध्यं भिक्षुसू
सु·त· त्रमिति चतुर्लक्षणीरूपं पाराशरिणा इति पाराशर्यो व्यासः अनन्तरापत्येऽपि गोत्रत्वेनोपचाराद्गर्गादिभ्य इति यञ् आपत्यस्य चेति यलोपः अध्येतृणा सु प्रोक्तादि
३८ निलुक् भिक्षुनटसूत्रयोः किम् पाराशरं शैलालकम् इदं इहापि छन्दोनुवृत्त्यादि प्राग्वत् भिक्षुनटसूत्रयोः किम् कार्मंदं कार्शाश्वं॥ ॥ तेनैकदिक् तृतीयान्ता

तेनैकदिक्। ४।३।११२॥ सुदाम्ना अद्रिणा एकदिक्। सौदामनी। तसिश्च। ४।३।११३॥ स्वरादिपाठादव्ययत्वं। पीलुमूलेन एकदिक् पीलुमूल
तः। उरसो यच्च। ४।३।११४॥ चात्तसिः। अणोऽपवादः। उरसा एकदिक् उरस्यः। उरस्तः। उपज्ञाते। ४।३।११५॥ तेनेत्येव। पाणिनिना उपज्ञातं पा
णिनीयम्। कृते ग्रन्थे। ४।३।११६॥ वररुचिना कृतो वाररुचो ग्रन्थः। संज्ञायाम्। ४।३।११७॥ तेनेत्येव। अग्रन्थार्थमिदं। मक्षिकाभिः कृतं माक्षि
कं मधु। कुलालादिभ्यो वुञ्। ४।३।११८॥ तेन कृते संज्ञायां। कुलालेन कृतं कौलालकं। वारुडकं। क्षुद्राभ्रमरवटरपादपादञ्। ४।३।११९॥
तेन कृते संज्ञायां। क्षुद्राभिः कृतं क्षौद्रं। भ्रामरं। वाटरं। पादपं। तस्येदम्। ४।३।१२०॥ उपगोरिदं औपगवं। वहेस्तुरणिट् च॥ संवोढुः स्वं सा
न्वहित्रं। अग्नीधः शरणे रण् भं च। अग्निमिन्धे अग्नीत्। तस्य स्थानमाग्नीध्रं। तात्स्थ्या त्सोऽपि आग्नीध्रः। समिधामाधाने षेण्यण्। सामि
धेन्यो मन्त्रः॥ सामिधेनी ऋक्॥

दिकदिगित्यर्थे अणादयः स्युः एकदिक् समानदिगित्यर्थः पुनस्तेनेत्युक्तिश्छन्दोधिकारनिवृत्त्यर्था। सौदामनीति
अन्निति प्रकृतिभावान्न टिलोपः तडित्सौदामनी विद्युदित्यमरः तसिश्च पूर्वोक्तविषये उपज्ञाते विनोपदेशं ज्ञातमुपज्ञातं कुलालादिभ्यो कुलाल वरुड चंडाल।
निषाद कुंभकार श्वपाकादयः कुलालादयः क्षुद्राभ्रमर पादपशब्दाच्छैषामे अन्येभ्यो अणि अञ्विधीयते तस्येदं अणादयः पंचमहोत्सर्गाः घादयश्च षष्ठ्यं।
तात्संबंधिनि स्युः अनंतरादिष्वनभिधानान्न देवदत्तस्यानंतरमिति वहेस्तु इदमर्थे इदमुपसंख्यानं अण तु सिद्ध एवानूद्यते तुरिति तृन्तृचोः सामान्यग्रहणं
ढत्वादीनामसिद्धत्वादलौकिके प्रक्रियावाक्ये पूर्वमिट् ततो निमित्ताभावान्न ढत्वादीत्याशयेनोदाहरति सांवहित्रमिति अग्नीदिति क्विप् ऋत्विग्विशेषोऽयं तमग्निदं

239

रेवतिकादिभ्यश्छः रैवतिकशब्दो रेवत्यादिभ्यष्ठगिति ठगन्तः रैवतिक औदमघि वैजवापीत्यादि रैवतिकादयोऽमी गोत्रप्रत्ययान्तास्ततः पूर्वेणावुञि प्राप्ते छविधा
नार्थमिदं क्षित्याह वृत्तावपवाद इति अत इञ माशंक्याह इहैव निपातनादिति हस्तिनः पाद इव पादोऽस्य हस्तिपादः पादस्य लोपो न भवति अहस्त्यादिभ्य इति वचनात्
दाह हस्तिपदस्यापि हास्तिपद इति अस्मादेव निपातनादण् पद्भावश्चापि भावः ॥ ❀ ॥ आथर्वणिकस्य अथर्वणा प्रोक्तो वेदोऽथर्वा अभेदोपचारात् तमधीते वसं
नादित्वाट्ठक् दाण्डिनायनादिसूत्रे निपातनाट्टिलोपाभावः अन्ये त्वाहुः अथर्वणा प्रोक्तमधीते आथर्वणिकः इह प्रोक्तेऽण तत अण्दो ब्राह्मणानीति तद्विषयता मा
थर्वणशब्दस्यापि वसन्तादिषु पाठादध्येतरि ठक् तस्य विधानसामर्थ्यात्प्रोक्ताल्लुङिति ॥ ॥ समाप्ताः शैषिकाः ॥ ॥ तस्य विकारः षष्ठ्यन्ताद्विकारेऽ
णादयः स्युः घादिसंबद्धस्य तस्य ग्रहणस्य निवृत्तये पुनस्तस्येत्युक्तं अणादयस्तु न निवर्तन्ते प्राग्दीव्यतः प्राग्वहतादिति विशिष्टावधिपरिच्छेदेनाधिकृतत्वात्

आथर्वणिकस्येकलोपश्च ॥४।३।१३३॥ अण् स्यात्। आथर्वणिकस्यायमाथर्वणो धर्म्म आम्नायो वा चरणत्वेऽप्यपवादः ॥ समाप्ताः शैषिकाः ॥
तस्य विकारः ।४।३।१३४॥ अश्मनो विकारे टिलोपो वक्तव्यः॥ अश्मनो विकारः। आश्मः। भस्मनः भास्मनः। मार्त्तिकः। अवयवे च प्राण्योषधिवृक्षेभ्यः।
।४।३।१३५ चाद्विकारे। मयूरस्यावयवो विकारो वा मायूरः। मौर्वं काण्डं भस्म वा। पैप्पलं॥ बिल्वादिभ्योऽण्।४।३।१३६॥ बैल्वः। कोपधाच्च।४।३।१३७॥ अण। अ
त्रापवादः। तर्कु। तार्कवं। तैत्तिडीकं॥ ॥ ९ इह प्राणिरजतादिभ्योञ् औरञ् अनुदात्तादेश्च मयड्वैतयोः नित्यं वृद्धशरादिभ्यः इति ष्ठाञ्चेत्यादिभिरपवादा

नां वक्ष्यमाणत्वात् प्राणिआद्युदात्तं अश्मन्शब्दं इति पदमवक्ष्यमाणप्रत्ययं चोदाहरणमिति पर्यालोच्य तथैवोदाहरति आश्म इत्यादि अश्मन् भस्मन् शब्दौ मनिन्प्रत्ययान्तो मृद
त्तिकात् नित्स्वरेण त्रयोऽप्याद्युदात्ताः प्राचीनस्य तस्येत्यस्य निवृत्तत्वात् तदधिकारोक्तप्रत्यया न प्रवर्तन्ते इति नेह ठक् हालः सैरः चाद्विकार इति तेन वक्ष्यमाणप्रत्ययाः प्राण्यादि
भ्यस्त्विभ्योऽर्थद्वयमवं तस्येभ्यस्तु विकार एवेति फलितं मायूर इति प्राणिरजतादिभ्य इत्यत्र अनुदात्तादेरञः सिद्धत्वादुदात्तार्थं वृद्धेश्च मयड्बाधनार्थं चावश्यकमिदं परत्वादनु
दात्तादिष्वपि प्रवर्तते ओषधिभ्य उदाहरति मौर्वमिति मूर्वाशब्दस्तृणधान्यानां च द्व्याचामित्याद्युदात्तः पिप्पलशब्दस्तु लघावन्त इत्यनेनाद्युदात्तः बिल्वादिभ्योऽण् अञ्मयटो
रपवादः बिल्व॰ व्रीहि॰ काण्ड॰ मुद्ग॰ मसूर॰ गोधूम॰ इक्षु॰ कर्पासी॰ वेण्वादयो बिल्वादयः॥

CC-0. In Public Domain. Digitization by eGangotri

सि॰कौ॰ त्रपुजतुनोः विल्वादिभ्योऽणित्यतोऽनुवर्त्तनादाह अणस्यादिति ओरञ् इत्यस्यायमपवादः अप्राण्यादित्वादञ् एवेन भवतीत्याशयेनाह विकारे इति त्रापुषमिति त्रपुणो वि
मी॰त॰ कारः एवं जतुनो विकारो जातुषं ओरञ् अनुदात्तादेरञ्यदिहोदाहरणं दैवदारवमिति देवदारुभद्रदारुशब्दौ मितद्रु यो नामित्याद्युदात्तौ दाधित्थमिति दधनि तिष्ठतीति सुपि
मु॰त॰ स्थ इति कः उपपदसमासः पृषोदरादित्वात्सकारस्य तकारः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वं एवं कपित्थेऽपि बोध्यं पलाशादिभ्यो वा उभयत्र विभाषेयं पलाशखदिरशिं
५० शपास्यन्दनानामनुदात्तादित्वान्नित्यं प्राप्ते करीरशिरीषविकंकतपूलासयवासशब्दानामप्राप्ते विधानात् पालाशमिति पलाशशब्दो घृतादित्वादन्तोदात्तः खदिरशब्दोऽ
जिरशिशिरेत्यादौ किरच् प्रत्ययान्तो निपातितः शिंशपाशब्दः अथ द्वितीयं शाङ्गीवादिति वर्त्तमाने पत्तनादिगुर्वादीनामिति मध्योदात्तः स्यन्दिकिंचिच्चलने अनुदात्तेतश्च हला
देरिति युच् कारीरमिति किरतेरीरन् नित्स्वरेण करीरशब्दोऽयमाद्युदात्तः कृतृभ्यामीषन् शृदृभ्यां किच्च पूर्ववच्छिरीषशब्दोऽप्याद्युदात्तः विकंकतपूलासयवासशब्दाः ग्राम

त्रपुजतुनोः षुक् ॥४।३।१३८॥ आभ्यामणस्याद्विकारे एतयोः षुगागमश्च। त्रापुषं। जातुषं। ओरञ् ॥४।३।१३९॥ दैवदारवं। भाद्रदारवं। अनुदात्ता
देश्च ॥४।३।१४०॥ दाधित्थं। कापित्थं। पलाशादिभ्यो वा ॥४।३।१४१॥ पालाशं। कारीरं। शम्याः ष्लञ् ॥४।३।१४२॥ शामीलं भस्म। षित्वात् ङीष्। शा
मीली स्रुक्। मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः ॥४।३।१४३॥ प्रकृतिमात्रान्मयड्वा स्याद्विकारावयवयोः। अश्ममयं। आश्मनं। अभक्ष्येत्यादि
किम्। मौद्गः सूपः। कार्पासमाच्छादनं॥ ॥

(१)दीनां चेत्याद्युदात्ताः षित्वान्ङीषिति टित्वान्ङीबिति तु माधवः मयड्वैतयोः भाषायां किं खादिरो यूप इति
वृत्तिकारः ननु मयटो वैकल्पिकत्वात्सिद्धमिदमिति चेदत्राहुः वेदे वक्तव्यः परस्य मयटो अर्थान्तरपरत्वमेवेति तात्पर्यग्रहणार्थमेवेदं द्वाचश्छन्दसीति सूत्रस्य द्वाच एवेति निय
मार्थत्वेऽप्युपादानतार्थं तथापि द्वाचश्छन्दस्येवेति विपरीतनियमशंकानिरासार्थं भाषाग्रहणं कृतमिति अधिकारादेव विकारावयवयोर्लाभे एतयोरिति वचनं ये विशेषप्र
त्ययाः प्राणिरजतादिभ्योऽञित्येवमादयस्तद्विषयेऽपि यथा स्यादित्येवमर्थं कपोतमयं लोहमयं इह विकारावयवाभ्यां सह प्रत्येकं अभक्ष्याच्छादनयोरिति संबध्यते समास
निर्देशाद्नोयथासंख्यं न आश्मनमिति विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्य इति वचनाद् अश्मभेदशब्दे भेदशब्दस्य लोपे अश्मन्निति नान्तमवशिष्यते तथा कल्माषं
घेराज्ञो भार्यायां मदयन्त्यां वसिष्ठेनोत्पादित सुतो अश्मको नाम तत्र संज्ञात्वद्योतकस्य कप्रत्ययस्याभावे अश्मन्निति नान्तमभवति तस्यावयवे आश्मनं विकारे त्वाश्मनमित्येव

रामः

240

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नचाश्मनो विकार इति टिलोपः स्यादिति वाच्यं असिद्धतरत्वेन पाषाणवाचकस्यैव तत्र ग्रहीतुमुचितत्वात् वस्तुतस्तु तस्येदमिति सामान्यविवक्षायां पाषाणवाचकस्याप्यश्म
न्शब्दस्याश्मनमिति भविष्यति पैष्टी सुरेतिवत् मौद्गः कार्पासमिति मुद्गशब्दः घृतादित्वादन्तोदात्तः कृञः पास इति पासप्रत्यये गुणे रपरे च कर्पासीशब्दो जातिलक्षणङीषन्त
त्वाभ्यामनुदात्तादेश्चेत्यञं बाधित्वा बिल्वादित्वादण्॥ ॐ॥ नित्यं वृद्ध इह भाषायामभक्ष्याच्छादनयोरित्यनुवर्तत इति वृत्तिः नन्वेवमानन्दमयाधिकरणे शंकराचार्यैर
न्योऽन्तर आत्मानन्दमय इति श्रुतौ आनन्दमय इति विकारे मयडित्युक्तं तत्कथं संगच्छतां प्राचुर्ये मयडिति तु वक्तुमुचितमिति चेदत्राहुः प्राचुर्ये मयट्यपि प्रकृत्यर्थविरोधिनो दुः
खस्य लेशतोऽनुवृत्तिलाभात्मकृते विकारार्थः पर्यवस्यतीति तेषामाशयः यद्वा नित्यं वृद्धेत्यत्र भाषाग्रहणं नानुवर्तते अनुवृत्तावपि भाषायां नित्यं अन्यत्र क्वाचित्क इत्याश्रित्य मय

नित्यं वृद्धशरादिभ्यः। ४।३।१४४॥ आम्रमयम्। शरमयम्॥ एकाचो नित्यम्। त्वङ्मयम्। वाङ्मयम्। कथन्तर्हि। आप्यमम्मयमिति। तस्येदमित्यस्य। नात्स्वार्थे ष्यञ्। गोश्च पुरीषे। ४।३।१४५॥ गोः पुरीषं गोमयं। पिष्टाच्च। ४।३।१४६॥ मयट् स्याद्विकारे पिष्टमयं भस्म। कथम्पैष्टी सुरेति सामान्यविवक्षायां तस्येदमित्यण्। संज्ञायां कन्। ४।३।१४७। पिष्टादित्येव। पिष्टस्य विकारविशेषः पिष्टकः। पूपोऽपूपः पिष्टकः स्यात्॥ व्रीहेः पुरोडाशे। ४।३।१४८ मयट् स्यात्। बिल्वाद्यणोऽपवादः। व्रीहिमयः पुरोडाशः। व्रैहमन्यत्॥ असंज्ञायां तिलयवाभ्याम्। ४।३।१३९॥ तिलमयं। यवमयं। संज्ञायान्तु तैलम्।

ट्सु साधुः अथवा हेतुमनुष्येभ्य इत्यनुवर्तमाने मयड्वेति सूत्रेण आगतार्थे मयट् विकार इति त्वार्थिकार्थकथनमेवातः शंकरभगवत्पादोक्तिरनवद्यैवेति शरमयमिति
शर दर्भ मृत् कुटी तृण सोम बिल्वज शरादिः एकाचो नित्यमिति आरंभसामर्थ्यादेमृच्छब्दपठनं विस्पष्टार्थमित्याहुः गोश्च पुरीषे पुरीषं न विकारो नाप्यवयवः तथापि त
स्येदमित्यर्थे अयं प्रत्ययः विकारावयवयोः सिद्धे नित्यं वृद्धेति नित्यग्रहणं योगविभागेनान्यत्रापि क्वचिद्विधानार्थं तेनैतल्लभ्यत इति भावः एकाच्त्वादेव सिद्धे शरादि
षु सुगोपयसोर्यतं वक्ष्यति पुरीषे किं गव्यं पयः यावक इति यवशब्दाद्विकारेऽण् ततः यावादिभ्य इति स्वार्थे कन्॥

सि॰कौ॰
टी॰त॰
सु॰त
४१

तालादिभ्योण् अञ्मयटोरिति तालश्यामाकशब्दाभ्यां वृद्धत्वान्मयट् प्राप्तः बर्हिणं विकारो बार्हिणं प्राणि रजतादिभ्योञ् ततोञितश्च तत्प्रत्ययादित्यञ् प्राप्तः शेषेभ्यस्तु नुदात्तादित्वादञ् प्राप्तः तथा हि विशिदृशिभ्यामिंद्रशब्द उपपदे मूलविभुजादित्वात्कः अन्येषामपीति दीर्घः इंद्राविशः इंद्रादृशः चापशब्दो नेपचाद्यच् चोपपिपूक्षाशब्दो लघावंत इति मध्योदात्तः फिष इत्यधिकारादाद्यः प्रागेव स्वरप्रवृत्तेः इंद्रायुधशब्दं समासस्वरेणांतोदात्तः अण्ग्रहणं बाधकबाधनार्थं यथाविहितप्रत्ययविधौ हि बार्हिणशब्दाद्वृद्धलक्षणो मयट् स्यात् ञितश्च तत्प्रत्ययादित्यञो बाधनेन वचनस्य चरितार्थत्वादित्याहुः तालाद्धनुषीति गणसूत्रमिदं हाटक इति इह वृद्धलक्षणो मयट् प्राप्तः त

तालादिभ्योऽण्।४।३।१५२॥ अञ्मयटोरपवादः। तालाद्धनुषि। तालन्धनुः। अन्यत्तालमयं। ऐन्द्रायुधं। जातरूपेभ्यः परिमाणे।४।३।१५३॥ अण् बहुवचनात्पर्य्यायग्रहणं। हाटकः। तापनीयः। सौवर्णो वा निष्कः। परिमाणे किं। हाटकमयी यष्टिः। प्राणिरजतादिभ्योऽञ्।४।३।१५४॥ शौकं। बाकं। राजतं। ञितश्च तत्प्रत्ययात् ४।३।१५५॥ ञिद्यो विकारावयवप्रत्ययस्तदन्तादञ् स्यात्तयोरेवार्थयोः। मयटोऽपवादः। शामीलस्य शामीलं। दाधित्थं। कापित्थं। ञितः किं। बैल्वमयं। क्रीतवत्परिमाणात्।४।३।१५६॥ प्राग्वतेष्ठञित्यारभ्य क्रीतार्थे ये प्रत्यया येनोपाधिना परिमाणाद्विहितास्तेन तथैव विकारेऽतिदिश्यन्ते। अणादीनामपवादः। निष्केण क्रीतं नैष्किकं। एवं निष्कस्य विकारोऽपि नैष्किकः। शतस्य विकारः शत्यः। शतिकः॥ उष्ट्राद्वुञ्।४।३।१५७॥ प्राण्यञोऽपवादः। औष्ट्रकः। उमोर्णयोर्वा।४।३।१५८॥ औमं। औमकं। और्णं। और्णकं। वुञभावे यथाक्रममणञौ। एण्या ढञ्।४।३।१५९॥ ऐणेयं। एणस्य तु ऐणं। गोपयसोर्यत्॥ गव्यं। पयस्यं। द्रोश्च।४।३।१६१॥ द्रुर्वृक्षस्तस्य विकारोऽवयवो वा द्रव्यम्॥ ॥

पनीयादेरनुदात्तादेश्चेत्यञ् प्राप्तः प्राणि अनुदात्तादेरञः सिद्धत्वात्परिशिष्टमिहोदाहरणं तदाह शौकं बाकमिति शुकबकशब्दौ प्राणिनां कुपूर्वाणामित्याद्युदात्तौ राजतमिति रजत॰सीस॰लोह॰उदुंबर॰कंटकारेत्यादयो रजतादयस्तेषु अनुदात्तादीनां पुनः पाठो मयड्बाधनाय अन्यथा हि परत्वान्मयट् स्यादेव शामीलमिति शामीलशब्दः शम्याः ष्लञिति ष्लञंतः दधित्थादनुदात्तादेश्चेत्यत्र दाधित्थस्य दाधित्थं बैल्वमयमिति बिल्वशब्दो अणंतः नैष्किकमिति तेन क्रीतमिति ठञ् शत्यः शतिक इति शताच्च ठन्यतौ अणञाविति उमाशब्दस्तृणधान्यानां चेत्याद्युदात्तः ऊर्णशब्दस्तु प्रातिपदिकस्वरेणांतोदात्त इति भावः एण्या ढञ् प्राण्यञोपवादः स्त्रीलिंगनिर्देशादाह॰ ॥

CC-0. In Public Domain. Digitization by eGangotri

एणस्यत्विति गोपयसोः यद्यपि सर्वत्र गोरजादिप्रसंगे यदुक्तं तथापि मयड्वैतयोरिति पक्षे प्राप्तं मयटं बाधितुं पुनरयं यद्विधिः द्रोश्च ओरञः एकाचो नित्यमिति मय
टश्चापवादोयं द्रव्यमिति ओर्गुणः वांतोयि प्रत्यये द्रव्यगुणकर्मेत्यादिषु प्रयुज्यमानद्रव्यशब्दस्तु गुणैर्द्रूयते आश्रीयतेद्रुति द्रु धातोरचोयदिति यत्प्रत्ययांतः॥ ॥माने
वयः यतोपवादः द्रुवयमिति द्रोर्विकारभूतं प्रस्थादिपरिमाणमित्यर्थः फले लुक् विकारावयवेति फलितस्य वृक्षस्य फलमवयवो विकारश्चतेनान्यतरस्मिन् प्रत्ययः आम
लकमिति मयटो लुक् लुक्तद्धितलुकीति ङीपो लुक् न चात्र स्थानिवद्भावेन पस्येति चेति लोपः शंक्यः लुका लुप्तेन स्थानिवदित्यभ्युपगमात् अत एव पंचभिः पट्वीभिः क्रीतः
पंचपटुरित्यत्राप्यर्द्धपूर्वेति ठञो लुकि कृते लुक् तद्धिते ति ङीपो लुका लुप्तत्वेन स्थानिवत्वाभावादुकारस्य यणादेशो न भवति प्लक्षादिभ्योण् अत्रोपवादः शिग्रु कर्कंधु शब्दा

मानेवयः।४।३।१६२॥ द्रोरित्येव। द्रुवयं। यौतवं द्रुवयं पाय्यमिति मानार्थकत्रयं। फले लुक्।४।३।१६३॥ विकारावयवप्रत्ययस्य लुक् स्यात् फले॥ आम
लक्याः फलं। आमलकं। प्लक्षादिभ्योऽण्।४।३।१६४॥ विधानसामर्थ्यान्न लुक्। प्लाक्षं। न्यग्रोधस्य च केवलस्य।७।३।५॥ अस्य न वृद्धिरैजागमश्च। नै
यग्रोधं। जंब्वा वा।४।३।१६५॥ जम्बूशब्दात् फलेऽण् वा स्यात्। जाम्बवं। पक्षे ओरञ्। तस्य लुक्। जम्बु। लुप् च।४।३।१६६॥ जंब्वाः फलप्रत्ययस्य लुप् वा स्या
त्। लुपि युक्तवत्। जंब्वाः फलं जम्बूः। फलपाकशुषामुपसंख्यानं॥ व्रीहयः। मुद्गाः। पुष्पमूलेषु बहुलम्॥ मल्लिकायाः पुष्पं मल्लिका। जात्याः पुष्पं जा
ती। विदार्य्या मूलं विदारी। बहुलग्रहणान्नेह। पाटलानि पुष्पाणि। साल्वानि मूलानि। बाहुलकात् क्वचिल्लुक्। अशोकं। करवीरं॥ ॥

भ्यामोरञित्यस्यापवादः अनुदात्तादित्वादञः प्राप्तिः प्लक्षः। न्यग्रोध अश्वत्थ इंगुदी शिग्रुक कर्कंधु बृहती तत्र प्लक्षशब्दः फिष इत्यंतोदात्तः न्यग्रोधशब्दो लघावंत इति मध्योदा
त्तः अश्वत्थशब्दस्तु थाथादित्वादंतोदात्तः इंगुदी बृहती शब्दौ गौरादिङीषंतौ आश्वत्थं वैणवं प्लाक्षं नैयग्रोधं गुदं फलमित्यमरः न्यग्रोधस्य च केवलस्येति किं न्यग्रोध
मूले भवाः न्याग्रोधमूलाः शालयः न्यक्रोहतीति न्यग्रोध इति व्युत्पत्तिपक्षे नियमार्थम् अव्युत्पत्तिपक्षे तु विध्यर्थं जंब्विति नपुंसकह्रस्वः फले जंबु वा जंबूः स्त्री जंबु जां
ब मित्यमरः फलपाकेति फलपाकेन शुष्यंतीति फलपाकशुषः व्रीहयो मुद्गा इति बिल्वाद्यण्णो लुप् मल्लिकेति अनुदात्तलक्षणस्याञो लुप् मादीनां चेति फिट्सूत्रान्मल्लि
काशब्दो द्वितीयमुदात्तं जाती विदारी शब्दौ गौरादिङीषंतौ पाटलानीति बिल्वादित्वादण् साल्वशब्दः प्रातिपदिकस्वरेणांतोदात्तः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· हरीतक्यादिभ्यश्च इह द्राक्षाप्रभृतिभ्यो नित्यं वृद्धेतिप्रातस्य मयटो लुप् अनुदात्तादि ——— भ्योऽत्रः इतरेभ्यस्त्वणः लिंगमेवेति वचनं तु विशेष्यवदेव हरीतक्यादिषु
टी·त· व्यक्तिरित्युक्तत्वादिति भावः कंसीयमिति प्राक्क्रीताच्छ इत्यधिकारे तस्मै हितमिति छः तस्यैव छस्यापवाद तया उगवादिभ्यो यत् परशव्यं दारुपारशव्यस्यानुदात्तादित्वादञ्त्रिसिद्धे
सु·त· तत्संनियोगेन यतो लुगर्थं वचनं न च यस्येति लोपे कृते हलस्तद्धितस्येति यलोपेन सिद्धमिष्टमिति भ्रमितव्यं ईतीत्यनुवृत्तेः॥ प्राग्दीव्यतीयाः समाप्ताः॥ तदाहेति
४२ तिवाक्यादयं प्रत्ययविधिः शब्दो मा कारीति यो निषेधति स माशब्दिक इत्युच्यते तथा नित्यः शब्द इति य आह स नैत्यशब्दिकः कार्यशब्दिकः इह वाक्याद्वितीयानसंभवत्यपाति

हरीतक्यादिभ्यश्च॥४।३।१६७॥ एभ्यः फलप्रत्ययस्य लुप्स्यात्। हरीतक्यादीनां लिङ्गमेव प्रकृतिवत्। हरीतक्याः फलानि हरीतक्यः॥ कंसीयपरशव्ययोर्यत्र
ञौ लुक् च॥४।३।१६८॥ कंसीयपरशव्यशब्दाभ्यां यत्रञौ स्तः छयतोश्च लुक्। कंसाय हितं कंसीयं। तस्य विकारः कांस्यम्। परशवे हितं परशव्यं। तस्य विकारः
पारशवः॥ प्राग्दीव्यतीयाः समाप्ताः॥ प्राग्वहतेष्ठक्॥४।४।१॥ तद्वहतीत्यतः प्राक् ठगधिक्रियते। तदाहेति माशब्दादिभ्य उपसंख्यानम्॥ माशब्दः कारी
इति य आह स माशब्दिकः। स्वागतादीनाञ्च।७।३।७॥ ऐच् न स्यात्। स्वागतमित्याह स्वागतिकः। स्वाध्वरिकः। स्व ङ्गस्याऽपत्यं स्वाङ्गिः। व्यङ्गस्याऽपत्यं व्याङ्गिः
व्यडस्यापत्यं व्याडिः। व्यवहारेण चरति व्यावहारिकः। स्वपतौ साधुः स्वापतेयं। आहौ प्रभूतादिभ्यः॥ प्रभूतमाह प्राभूतिकः। पार्य्याप्तिकः। पृच्छतौ सुस्नाता
दिभ्यः॥ सुस्नातं पृच्छति सौस्नातिकः। सौखशायिनिकः। अनुशतिकादीं। गच्छतौ परदारादिभ्यः॥ पारदारिकः। गौरुतल्पिकः। तेन दीव्यति खनति जयति
जितम्।४।४।२॥ अक्षैर्दीव्यति आक्षिकः। अभ्र्या खनति आभ्रिकः। अक्षैर्जयति। आक्षिकः। अक्षैर्जितमाक्षिकं॥ एकपदिकत्वात्तेन तच्छब्देन कर्ममात्रं

निर्दिश्यते तच्च वाक्यार्थरूपमित्याहुः ऐजस्यादिति नय्वाभ्यामिति प्राप्तस्यैजागमोऽनेन निषिध्यते न कर्मेत्यतो नञनुवर्त्तनादिति भावः स्वापतेयमिति पथ्यतिथिवसतिस्व
पतेर्ढञ् स्वशब्दस्य द्वारादित्वादैजागमस्य प्राप्तिः द्वारादिफलं तु स्वस्येदं सौवमिति ज्ञेयं आहाविति उपसंख्यानमित्यनुषज्यते आहेति पदे एकदेशस्य प्रकृतिभागस्यागंतुके
नेकारेण आहावित्यनुकरणं प्राभूतिक इति क्रियाविशेषणाट्ठक्प्रत्ययः तेन दीव्यति इह कालपुरुषसंख्या न विवक्षितास्तेनाक्षैरदेवीत् देविष्यति वा आक्षिक
इति भवति एवमक्षैर्देविष्यसि देविष्यामि वा आक्षिकः दीव्यंति दीव्यथ दीव्यामो वा आक्षिकाः कारकं तु विवक्षितमेव जयति जितमिति कर्तृक⁻र्मणोः पृथगुपादानात्

242

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेनाक्षे द्यूतः अक्षैः खातः इति कर्माद्यर्थे आह्निक इति न भवति अभ्रेति अभ्रिः स्त्री काष्ठकुद्दाल इत्यमरः॥ ॐ॥ संस्कृतं योगविभाग उत्तरार्थः बाहुकेति सूत्रेषकारः सांहि
तको नत्वनुबंध इति न ङीप् तथाच आकर्षात्पर्पादेरित्यादि श्लोकवार्त्तिकं षित्वविवेचनाय प्रकरणांते पठिष्यति निकषोपल इति सुवर्णपरीक्षार्थः पाठांतरमिति एतच्च भ्वा
दौ कषखषेत्यादिदंडके आकषान्ता लिखिता माधवेनोपन्यस्तं किंत्वाकर्षात्पर्पादेरिति वार्त्तिकस्याननुगुणं तत्र हि नीरेफपाठे वृत्तासंगतिप्रसंगात् पर्प इति पर्पगतो हलश्चेति
करणे घञ् इहांतर्गणसूत्रे पादः पच्चेति पादाभ्यां चरति पदिकः यत्तु वार्त्तिकं पज्ञावरके चरतावुपसंख्यानमिति सास्यैव प्रपंचः पर्प अश्व अश्वत्थ रथ जाल न्याय व्याल पा

संस्कृतम्।४।४।३॥ दध्नः संस्कृतं दाधिकं। मारिचिकं। कुलत्थकोपधादण्।४।४।४॥ ठकोपवादः। कुलत्थैः संस्कृतं कौलत्थं। तैत्तिडीकं। तरति।४।४।५॥
उडुपेन तरति। औडुपिकः। गोपुच्छाट्ठञ्।४।४।६॥ गौपुच्छिकः। नौद्व्यचष्ठन्।४।४।७॥ नाविकः। घटिकः। बाहुभ्यां तरति बाहुकास्त्री। चरति।४।४।८॥
तृतीयान्ताद्गच्छति भक्षयतीत्यर्थयोष्ठक् स्यात्। हस्तिना चरति हास्तिकः। शाकटिकः। दध्ना चरति दाधिकः। आकर्षात्ष्ठल्।४।४।९॥ आकर्षो निक
षोपलः। आकषादिति पाठान्तरं। तेन चरति आकर्षिकः। षित्वान्ङीष्। आकर्षिकी। पर्प्यादिभ्यः ष्ठन्।४।४।१०॥ पर्पेण चरति पर्पिकः। पर्पिकी। येन पी
ठेन पङ्गवश्चरन्ति स पर्पः। अश्विकः। रथिकः। श्वगणाट्ठञ्च।४।४।११॥ चात्ष्ठन्। श्वादेरिञि।७।३।८॥ ऐच् न। श्वभस्त्रस्यापत्यं श्वाभस्त्रिः। श्वादंष्ट्रिः
तदादिविधौ चेदमेव ज्ञापकं। इकारादाविति वाच्यं॥ श्वगणेन चरति। श्वागणिकः। श्वागणिकी। श्वगणिकः। श्वगणिकी। पदान्तस्यान्यतरस्याम्॥
।७।३।९॥ श्वादेरङ्गस्य पदशब्दान्तस्यैज्वा। श्वापदस्येदं श्वापदं। शौवापदं॥ वेतनादिभ्यो जीवति॥४।४।१२॥ वेतनेन जीवति वैतनिकः। धानुष्कः।
वस्नक्रयविक्रयाट्ठन्।४।४।१३॥ वस्नेन मूल्येन जीवति वस्निकः। क्रयविक्रयग्रहणं संघातविगृहीतार्थं। क्रयविक्रयिकः। क्रयिकः। विक्रयिकः॥

दः पत्। श्वगणाट्ठञ्च ठकोपवादः एतदेव ज्ञापकमिति द्वारादिगणे श्वन्शब्दः पठ्यते ननु श्वभस्त्र श्वदंष्ट्रेत्यादिस्तथा च श्वादेरिञीति निषेधसूत्रमेव व्यर्थं स द्वारादिषु तदादिवि
धिं ज्ञापयतीत्यर्थः फलं तु द्वारपालस्यायं दौवारपालः इत्यादावैजागमस्य प्रवृत्तिः इकारादाविति सूत्रे इञीत्यपनीय इकारादाविति पठनीयमित्यर्थः अन्ये तु इञीति स्थाने इ
तीति पठनीयम् तथा चांगाक्षिप्तप्रत्ययस्य विशेष्यत्वात् यस्मिन्विधिस्तदादावित्यनेन इकारादिर्लभ्यत इत्याह श्वगणिकीति ष्ठनः षित्वान्ङीष् श्वापदस्येति अन्येयामपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· दृश्यत इति दीर्घः धानुष्क इति वेतनादिगणे धनुर्दण्डे निपात्यते तच्च संघातविगृहीतार्थं तथाच धानुर्दण्डिकः दाण्डिक इत्यप्युदाहार्यं॥ ॥ आयुधाच्छ च आयुध्यन्तेऽने
टी·त· नेति आयुधं घञर्थे कविधानमिति कः हरत्युत्सङ्गादिभ्यः एभ्यस्तृतीयान्तेभ्यष्ठक् स्यादुत्पादनेन यति वेत्यर्थः उत्सङ्ग उडुप उत्पुत पिठक पिटक भस्त्रादिभ्यः ष्ठन् भस्त्रा
सु·त· चर्मविकारः शीर्षभारशब्दोऽत्र पठ्यते निपातनाच्छीर्षभारः सप्तमीसमासश्च तत्पुरुषे कृतीति वा अलुक् पक्षे शीर्षभारः एकदेशविकृतस्येति वीवधाच्चेति वक्तव्यमि
४३ ति वार्त्तिकं न्यायसिद्धार्थकथनपरमिति भावः वृत्तिकृत्तु सूत्रे वीवधशब्दं प्रक्षिप्य विभाषा विवध वीवधादिति पपाठ त्रैमासिमित्यं नित्यग्रहणं स्वातन्त्र्येण प्रयोगं वारयितुं अ

आयुधाच्छ च।४।४।१४॥ चाट्ठन्। आयुधेन जीवति। आयुधीयः। आयुधिकः। हरत्युत्सङ्गादिभ्यः।४।४।१५॥ उत्सङ्गेन हरत्यौत्सङ्गिकः॥ भस्त्रादिभ्य
ष्ठन्।४।४।१६॥ भस्त्रया हरति भस्त्रिकः। स्त्रियां षित्वान्ङीष्। भस्त्रिकी विभाषा विवधवीवधात्।४।४।१७॥ विवधेन हरति विवधिकः। पक्षे ठक्। वैवधिकः। एकदेश
विकृतस्यानन्यत्वात्। वीवधादपि ष्ठन्॥ वीवधिकः। वीवधिकी। विवध वीवधशब्दौ उभयतो बद्धशिक्ये स्कन्धवाह्ये काष्ठे वर्त्तेते। अण्कुटिलिका
याः।४।४।१८॥ कुटिलिका व्याधानां गतिविशेषः कर्म्मारोपकरणभूतं लोहञ्च। कुटिलया हरति मृगान् अङ्गारान्वा। कौटिलिको व्याधः कर्म्मारश्च
निर्वृत्तेऽक्षद्यूतादिभ्यः।४।४।१९॥ अक्षद्यूतेन निर्वृत्तं। आक्षद्यूतिकं वैरं। त्रेर्म्मम्नित्यम्।४।४।२०॥ त्रिप्रत्ययान्तप्रकृतिकात्तृतीयान्तान्निर्वृत्तेऽर्थे मप्स्यान्नि
त्यं। कृत्या निर्वृत्तं कृत्रिमं। भावप्रत्ययान्तादिमप्वक्तव्यः। पाकेन निर्वृत्तम्पाकिमं। त्यागिमं। अपमित्ययाचिताभ्यां कक्कनौ।४।४।२१॥ अपमित्येति ल्यब
न्तम्। अपमित्य निर्वृत्तं आपमित्यकम्। याचितेन निर्वृत्तं याचितकं। संसृष्टे।४।४।२२॥ दध्ना संसृष्टं दाधिकं॥ चूर्णादिनिः।४।४।२३॥ चूर्णैः संसृष्टाः चूर्णि
नोऽपूपाः। लवणाल्लुक्।४।४।२४॥ लवणेन संसृष्टो लवणः सूपः॥ लवणं शाकं। मुद्गादण्।४।४।२५॥ मौद्ग ओदनः॥ ९ तएव लौकिके विग्रहवाक्ये त्क्ति ।
त्रादीनां प्रयोगो न तु क्तैः तदाह कृत्या निर्वृत्तमिति एवमग्रे पिपाकेन निर्वृत्तमिति विग्रहो बोध्यः संख्यावाची त्रिशब्दो नेह गृह्यते प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रह 243
णात् निजां त्रयाणामिति लिङ्गाच्च ननु नित्यग्रहणेन निर्वृत्तार्थे विवक्षायां मपं विना त्रिप्रत्ययान्तस्य प्रयोगनिवारणेपि तदविवक्षायां तस्य स्वातन्त्र्येण प्रयोगो दुर्वार इ
ति चेन्न नित्यमिति योगं विभज्य तत्सामर्थ्यादर्थविशेषानादरेणैव स्वातन्त्र्यवारणात् डुमविति एवं च मप् न कर्त्तव्यः तथाहि भावप्रत्ययान्तादिमप् ततः त्रेः पूर्वेणसि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ङ्गुलिपमार्थमिदं त्रिप्रत्ययांतङ्मत्विषय एवेति नेनत्रिप्रत्ययांतस्यप्रयोगो निवर्तते ततः नित्यं अनेन निर्दिष्टार्थाविवक्षायामपि ष्यंतस्यस्वार्ते ष्यं वार्यते एवञ्च संख्यावा
चित्रिप्रत्ययग्रहणशंकैव नास्ति भावप्रत्ययांतादित्यनुवृत्तेः स्वरेपिविशेषो नास्ति उदात्तनिवृत्तिस्वरेणेरमपइकारस्योदात्तत्वात् अयमित्येतिउदीचांमाङ इति क्त्वा
प्रत्यये अपेत्यनेनसहगतिसमासः क्त्वो ल्यप् मयतेरिदन्यतरस्यामिति इत्वं ह्रस्वस्येति तुकुल्यवंतादस्मात्तृतीयांतात्प्रत्ययो न भवति किंतु वचनात्प्रथमांतादेवेति बोध्यं
॥ ॐ ॥ व्यंजनैरुप व्यज्यते अनेन ओदनादिरसइति व्यंजनं तद्वाचिभ्यः उपसिक्त इत्यर्थे ठक्स्यात् तत्प्रत्यनु वृत्तेरकर्मकत्वात्कथं तस्य द्वितीयांतेन प्रतीपमित्यादिना
संबंध इत्याशंकायामाह क्रियाविशेषणत्वादिति प्रतीपमिति प्रतिगता आपो स्मिन्निति बहुव्रीहिः ऋक्पूरित्यकारः समासांतः द्व्यंतरुपसर्गेभ्य इति ईत्वं व्युत्पत्तिमात्र

व्यंजनैरुपसिक्ते ।४।४।२६॥ ठक् । दध्ना उपसिक्तं दाधिकं ॥ ओजस्सहोऽम्भसा वर्तते ।४।४।२७॥ ओजसा वर्तते ओजसिकः शूरः । साहसिकश्चौरः
आम्भसिको मत्स्यः । तत्प्रत्यनुपूर्वमीपलोमकूलम् ।४।४।२८॥ द्वितीयांतादस्माद्वर्तत इत्यस्मिन्नर्थे ठक्स्यात् । क्रियाविशेषणत्वाद्द्वितीया । प्रतीपं व
र्तते प्रातीपिकः । आन्वीपिकः । प्रातिलोमिकः । आनुलोमिकः । प्रातिकूलिकः । परिमुखं च ।४।४।२९॥ परिमुखं वर्तते । पारिमुखिकः । चात्पारिपार्श्वि
कः । प्रयच्छति गर्ह्यम् ।४।४।३०॥ द्विगुणार्थं द्विगुणं तत्प्रयच्छति द्वैगुणिकः । त्रैगुणिकः । वृद्धेर्वृधुषिभावो वक्तव्यः ॥ वार्धुषिकः । कुसीददशैकादशा
त्ष्ठन्ष्ठचौ ।४।४।३१॥ गर्ह्यादित्यामाभ्यामेतौ स्तः प्रयच्छतीत्यर्थे । कुसीदं वृद्धिस्तदर्थं द्रव्यं कुसीदं तत्प्रयच्छतीति कुसीदिकः । कुसीदिकी । एका
दशार्थत्वादेकादश । तेच तेवस्तुतो दश चेति विग्रहे ऽकारः समासान्त इहैव सूत्रे निपात्यते । दशैकादशिकः । दशैकादशिकी । दशैकादशान्प्रयच्छति

मिदं प्रतिकूलानुकूलपर्यायाहीमे रूढिशब्दाः आन्वीपिक इति अन्वीपमित्यत्र ऊदनोर्देश इत्यूत्वं तु न भवत्यदेशत्वात् ॥ परिमु १ इत्युत्तमणीएवेहापितद्धितार्थः
खमिति अपपरी वर्जन इति कर्मप्रवचनीयसंज्ञायां पंचम्यपाङ्परिभिरिति पंचमी अपपरि वहिरंचवः पंचम्येत्यव्ययीभावः ततष्ठक् स्वामिनो मुखं वर्जयित्वा यः सेवको व
र्त्तते स पारिमुखिकः यदा तु सर्वतो भावे परिशब्दः प्रादिसमासश्च तदा यतो यतः स्वामिनो मुखं ततस्ततो यो वर्त्तते स एव मुच्यते एवं पारिपार्श्विकोप्यर्थद्वये बोध्यः प्रय
छति द्वितीयांतात्प्रयच्छत्यर्थे ठक्स्यात् यत्प्रयच्छति गर्ह्यं चेत्तत् द्विगुणार्थं द्विगुणमिति तादर्थ्याताच्छब्द्यमिति भावः बहुदृष्ट्युद्देश्यकदानकर्मतयास्य द्रव्यस्य गर्ह्यत्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वार्द्धुषिक इति स्वार्थे वृद्धिः नोपपद्यतेति विग्रहः अथ कथं वृद्ध्याजीवश्च वार्द्धुषिरित्यमरः ठक्तं नियोगेनैव वृधुषिभावस्वीकारात् अत्राहुः निरंकुशाः कवय इति गर्ह्यमिति किं हि
गुणां त्रिगुणं वा वृद्धिं प्रयच्छत्यधमर्णं इत्यर्थे द्वैगुणिक इत्यादि माभूत् निपात्यत इति अत एव व्याख्यातृप्रयोगोप्युपपद्यत इत्याशयेनोदाहरति दशैकादशानिति संख्याया अल्पीय
स्या इति पूर्वनिपातः उत्तमर्ण एवेति दशदत्त्वा एकादश गृह्णातीति तस्यैव गर्ह्यत्वादिति भावः॥ ॥ उंछतीति भूमौ पतितस्यैकैकस्योपादानमुंछः सामाजिक इति समजन्त्यस्
स्मिन्निति समाजः समूहः शब्दं करोतीति प्रकृतिप्रत्ययविभागेन व्युत्पादयतीत्यर्थः अभिधानस्वाभाव्याद्व्युत्पादनमेवायं प्रत्ययः नेह शब्दं करोति वर्वरः स्वरो वा दार्दुरिक इति कुला
लः वाद्यभांडवाची ह दर्दुरशब्दः मात्स्यिक इति मत्स्यस्य ङ्यामिति परिगणनात्सूर्यतिष्येति यलोपाभावः हारिणिक इति नन्विदं पर्यायस्योदाहरणं न भवति हरिणस्य मृगविशेषत्वा

उञ्छति।४।४।३२॥ बदराण्युञ्छति बादरिकः। रक्षति।४।४।३३॥ समाजं रक्षति सामाजिकः। शब्ददर्दुरं करोति।४।४।३४॥ शब्दं करोति शाब्दिकः। दार्दुरिकः। पक्षि
मत्स्यमृगान्हन्ति।४।४।३५॥ स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणं मत्स्यपर्याये मीनस्यैव। पक्षिणो हन्ति पाक्षिकः। शाकुनिकः। मायूरिकः। मात्स्यि
कः। मैनिकः। शाकुलिकः। मार्गिकः। हारिणिकः। सारङ्गिकः। परिपन्थं च तिष्ठति।४।४।३६॥ अस्माद्द्वितीयान्तात्तिष्ठति हन्ति चेत्यर्थे ठक् स्यात्। प
न्थानं वर्जयित्वा व्याप्य वा तिष्ठति पारिपन्थिकश्चौरः। परिपन्थं हन्ति पारिपन्थिकः। माथोत्तरपदपदव्यनुपदं धावति।४।४।३७॥ दण्डाकारो माथः प
न्थाः। दण्डमाथः। दण्डमाथं धावति दाण्डमाथिकः। पादविकः। आनुपदिकः। आक्रन्दाट्ठञ्च।४।४।३८॥ अस्माट्ठञ् स्यात् चाट्ठक् धावतीत्यर्थे
आक्रन्दः दुःखिनां रोदनस्थानं धावति। आक्रन्दिकः। पदोत्तरपदं गृह्णाति।४।४।३९॥ पूर्वपदं गृह्णाति पौर्वपदिकः औत्तरपदिकः प्रतिकण्ठार्थललामं च
त्यर्थे ठक् स्यात्। प्रतिकण्ठं गृह्णाति। प्रातिकण्ठिकः। आर्थिकः। लालामिकः॥ ९ तथा चात्र पर्यायस्योदाहरणं किमिति न प्रदर्शितमिति चे
दत्राहुः आरण्यकचतुष्पात्सु हरिणे च मृगशब्दो वर्त्तते यदा हरिणवाची मृगशब्दस्तदा मृगपर्यायस्योदाहरणं भवत्येवेति परिपंथं च परिमुखवदयमव्ययीभावस्त
त्पुरुषो वा क्रियाविशेषणत्वान्निष्ठतेरकर्मकत्वेपि परिपंथस्य कर्मत्वमस्त्येवेत्याह द्वितीयान्तादिति चकारो भिन्नक्रमः प्रत्ययार्थं समुच्चिनोतीत्याह तिष्ठति हन्ति चे
ति माथ इति मथ्यते गंतृभिरिति माथः मथ विलोडने कर्मणि घञ् पदोत्तरपदं पदशब्द उत्तरपदं यस्य तत्पदोत्तरपदं पदांतमिति तु नोक्तं बहुच्पूर्वान्माभूदिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिकंठमिति कंठंकंठं प्रतीति यथार्थेऽव्ययीभावः लक्षणेनाभिप्रती आभिमुख्ये इत्यनेन वा यस्तु प्रतिगतः कंठं प्रतिकंठ इति प्रादिसमासस्तस्येह न ग्रहणं व्याख्यानादित्याहुः ॥ ःः ॥ धर्मं चरति चरतिरिहासेवायां न त्वनुष्ठानमात्रे तेन दैववशाद्धर्मे प्रवृत्तो दुर्वृत्तो धार्मिक इति नोच्यते आसेवा हि स्वारसिकी प्रवृत्तिः एवं दैववशादधर्मे प्रवृत्तो यः सद्वृत्तः अधार्मिक इति नोच्यते प्रतिपथमिति वीप्सायामाभिमुख्ये वा अव्ययीभावः ऋक्पूरिति समासान्तः समवायान् समूहवाचिभ्यो द्वितीयान्तेभ्यष्ठक् स्यात् समवैतीत्यर्थे इह समवपूर्वस्येणोऽर्थः प्रविश्यैकदेशीभवनं तत्र गुणीभूत प्रवेशापेक्षया समवायानिति द्वितीया निर्दिष्टाः विशेष्यापेक्षया तु लोके सप्तमी प्रायेण प्रयुज्यते ।

धर्म्मं चरति । ४।४।४१॥ धार्म्मिकः । अधर्म्माच्चेति वक्तव्यम् ॥ आधर्म्मिकः । प्रतिपथमेति ठंश्च । ४।४।४२ प्रतिपथमेति प्रातिपथिकः । समवायान् समवैति । ४।४।४३॥ सामवायिकः । सामूहिकः । परिषदो ण्यः । ४।४।४४। परिषदं समवैति पारिषद्यः । सेनाया वा । ४।४।४५॥ ण्यः स्यात् पक्षे ठक् । सैन्याः सैनिकाः ॥ संज्ञायां ललाटकुक्कुट्यौ पश्यति । ४।४।४६॥ ललाटं पश्यति लालाटिकः सेवकः । कुक्कुटीशब्देन तत्पातार्हः स्वल्पदेशो लक्ष्यते । कौक्कुटिको भिक्षुः । तस्य धर्म्यम् । ४।४।४७॥ आपणस्य धर्म्यमापणिकम् । अण् महिष्यादिभ्यः । ४।४।४८॥ महिष्या धर्म्यं माहिषं । याजमानं । ऋतोऽञ् । ४।४।४९॥ यातुर्धर्म्यं यात्रं । नराच्चेति वक्तव्यं ॥ नरस्य धर्म्यो नारी । विशसितुरिड्लोपश्चाञ्च वक्तव्यः । विशसितुर्धर्म्यं वैशस्त्रं । विभाजयितुर्णिलोपश्चाञ्च वाच्यः ॥ विभाजयितुर्धर्म्यं वैभाजित्रं । अवक्रयः । ४।४।५०॥ षष्ठ्यन्तात् ठक् स्यादवक्रयेऽर्थे आपणस्यावक्रय आपणिकः । राजग्राह्यं द्रव्यमवक्रयः । तदस्य पण्यम् । ४।४।५१। अपूपाः पण्यमस्य आपूपिकः । लवणाट्ठञ् । ४।४।५२॥ लावणिकः ॥ किसरादिभ्यः ष्ठन् । ४।४।५३॥ किसरं पण्यमस्य किसरिकः । षित्वान्ङीष् । किसरिकी । किसर उशीर नलद इत्यादि किसरादयः । सर्वे सुगन्धिद्रव्यविशेषाः ।

कुरुक्षेत्रे समवेता इति यथा एत्येधतीति वृद्धिरिह न भवत्येजादित्वाभावात् सैन्याः सैनिका इति द्वितीयान्तात् ठकौ यत्तु सेनायां समवेता ये सैन्यास्ते सैनिकाश्चेति इति निघंटुसूक्तं तत्फलितार्थकथनपरं बोध्यं संज्ञायां ललाटकुक्कुटीशब्दाभ्यां द्वितीयान्ताभ्यां पश्यतीत्यर्थे ठक् स्यात् समग्रज्ञाने संज्ञाप्रसिद्धिस्तस्यां प्रसिद्धिविषयभूतेऽर्थे इत्यर्थः लालाटिक इति दूरे स्थित्वा प्रभोर्ललाटं पश्यति न तु कार्येषूपतिष्ठत इत्यर्थः लालाटिकः प्रभोर्भालदर्शी कार्याक्षमश्च यः कौक्कुटिको भिक्षुरिति संन्यासी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ह्विपाद्विक्षेपपर्यास्तदेशपर्यन्तमेव चक्षुस्संयम्य गच्छतीतिभावः धर्म्यमिति धर्मादनपेतं धर्म्यं धर्मपथ्यर्थन्यायादनपेतइतियत् अवक्रयः अवक्रीयते अनेनेति। करणेऽच्च पण्यमिति पणितव्येर्थे अवद्यपण्येतियदन्तो निपातितः शलालुक इति इसुसुक्तान्तात्कः ठकस्सेत्वादित्वात् शालालुकः मार्दङ्गिकइति मृदङ्गशब्देन मृदङ्गवादनं लक्ष्यते मुख्यार्थे तु प्रयोगो न भवत्यनभिधानादितिभावः शिल्पं कौशलं तच्च मृदङ्गवादनविषयकं तेन मृदङ्गवादनविषयके मृदङ्गशब्दस्य लक्षणेति। निष्कर्षः प्रहरणं प्रह्रियते अनेनेति प्रहरणमायुधं धानुष्क इति इसुसुक्तान्तात्कः इणः ष इति विसर्गस्य षः परश्वधात् चाद्भुतकद्भयोः कुठारः स्वधितिः परशुश्च पर

शलालुनोऽन्यतरस्याम्।४।४।५४॥ ष्ठन्स्यात् पक्षे ठक्। शलालुकः। शलालुकी। शालालुकः। शालालुकी। शलालु सुगन्धिद्रव्यविशेषः। शिल्पम्।४।४।५५ मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः॥ मड्डुकझर्झरादणन्यतरस्याम्।४।४।५६॥ मड्डुकवादनं शिल्पमस्य माड्डुकः। माड्डुकिकः। झार्झरिकः। झार्झरः। प्रहरणम्।४।४।५७॥ तदस्येत्येव। असिः प्रहरणमस्य आसिकः। धानुष्कः॥ परश्वधाट्ठञ्च।४।४।५८॥ पारश्वधिकः। शक्तियष्ट्योरीकक्।४।४।५९॥ शाक्तीकः। याष्टीकः। अस्तिनास्तिदिष्टं मतिः।४।४।६०॥ तदस्येत्येव। अस्ति परलोक इत्येवं मतिर्यस्य स आस्तिकः। नास्तीति मतिर्यस्य स नास्तिकः। दिष्टमिति मतिर्यस्य स दैष्टिकः॥ शीलम्।४।४।६१॥ अपूपभक्षणं शीलमस्य आपूपिकः। छत्रादिभ्यो णः।४।४।६२॥ गुरोर्दोषाणामावरणं छत्रं तच्छीलमस्य छात्रः॥ कार्मस्ताच्छील्ये।६।४।१७२॥ कार्म इति ताच्छील्ये णे टिलोपो निपात्यते। कर्मशीलः। कार्मः। नस्तद्धित इत्येव सिद्धे अण्कार्य्यन्ताच्छीलिके णेऽपि। तेन चौरी तापसीत्यादि सिद्धं। ताच्छील्ये किं। कार्मणः॥

रे स्वधः परलोक इति एतच्चाभिधानशक्तिस्वाभाव्याल्लभ्यते आस्तिक इति अस्तिनास्तिशब्दौ निपातौ यद्वा वचनसामर्थ्यादस्तीत्याख्याना नास्तीति निपाताख्यातसमुदायाच्च प्रत्ययः दिष्टमिति दैवं दिष्टं भागधेयमित्यमरः नालं वदेद् दैष्टिकतामिति माघः प्रमाणानुगामतिर्दिष्टेति प्राचोक्ति रूपेक्ष्या दिष्टशब्दस्य स्त्रीलेप्रमाणानुगमतिवाचकत्वे चोक्तकोशविरोधादिति दिक् छत्रादिभ्यो णः छत्रादिभ्यो णस्त्येवसुवचमिति कार्मस्ताच्छील्य इति सूत्रे कैयटः ताच्छील्ये ण इति कर्मन्शब्दस्य छत्रादित्वादितिभावः चौरीत्यादि चुराशीलमस्याः तपः शीलमस्या इति विग्रहे णप्रत्यये सति तदन्तान्ङीप् सिध्यतीत्यर्थः



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्माध्ययने तदस्येत्यनुवर्तते ठगिहाधिक्रियत एव तदाह प्रथमां तादित्यादि ऐकान्यिक इति एकमन्यदिति विगृह्य तद्धितार्थेति समासस्ततष्ठक् एवं द्वैयन्यिकः त्रैयन्यि
क इत्युदाहार्यं इह तु वृद्धिं बाधित्वा नञ्भ्यामित्यैच् हितं भक्षाः अस्मेतिप्रकृतमपीह हितयोगाच्चतुर्थ्या विपरिणम्यते तदस्मा इत्यस्यापकर्षो वेत्याशयेनाह अपूप

कर्म्मण्यध्ययने वृत्तम् ।४।४।६३। प्रथमान्तात्षष्ठ्यर्थे ठक् स्यादध्ययने वृत्ता या क्रिया सा चेत्प्रथमान्तस्यार्थः । ऐकान्यिकः । यस्याध्ययने प्रवृत्तस्य परीक्षा
काले विपरीतोच्चारणरूपं स्खलितमेकं जातं सः । बह्वच्पूर्वपदाट्ठच् ।४।४।६४। प्राग्विषये । द्वादशान्यानि कर्म्माण्यध्ययने वृत्तान्यस्य द्वादशान्यिकः
द्वादशाऽपपाठा अस्य जाता इत्यर्थः । हितम्भक्षाः ।४।४।६५। अपूपभक्षणं हितमस्मै आपूपिकः । तदस्मै दीयते नियुक्तम् ।४।४।६६। अग्रभोजनन्नि
यतन्दीयते अस्मै आग्रभोजनिकः । श्राणामांसौदनाट्टिठन् ।४।४।६७। श्राणा नियुक्तन्दीयतेऽस्मै श्राणिकः । श्राणिकी । मांसौदनग्रहणं सङ्घातविगृ
हीतार्थं । मांसौदनिकः । मांसिकः । औदनिकः । भक्तादणन्यतरस्याम् ।४।४।६८। पक्षे ठक् । भक्तमस्मै नियुक्तन्दीयते भाक्तः । भाक्तिकः । तत्र नियुक्तः
।४।४।६९। आकारे नियुक्तः । आकारिकः । अगारान्ताट्ठन् ।४।४।७०। देवागारे नियुक्तो देवागारिकः । अध्यायिन्यदेशकालात् ।४।४।७१। निषिद्ध
देशकालवाचकाट्ठक् स्यात् । अध्येतरि । श्मशानेऽधीते श्माशानिकः । चतुर्दश्यामधीते चातुर्दशिकः । कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति ।४।४।
७२। तत्रेत्येव । वंशकठिने व्यवहरति वांशकठिनिकः । वंशाः वेणवः कठिना यस्मिन्देशे स वंशकठिनः तस्मिन्देशे या क्रिया यथानुष्ठेया तान्तथैवानु
तिष्ठतीत्यर्थः । प्रास्तारिकः । सांस्थानिकः । निकटे वसति ।४।४।७३। नैकटिको भिक्षुः । आवसथात् ष्ठल् ।४।४।७४। आवसथे वसति । आव
सथिकः । षित्वान्ङीष् । आवसथिकी । आकर्षात्पर्पादेः भस्त्रादिभ्यः कुसीदसूत्राच्च । आवसथात्किसरादेः षितष्षडेते ठगधिकारे । षडिति सूत्रषट्
ट्केन विहिता इत्यर्थः । प्रत्ययास्तु सप्त ॥ ठको

भक्षणं हितमस्मा इति अपूपशब्दस्तद्भक्षणे लाक्षणिक इति भावः श्राणा यवागूः हस्तिका श्राणा विलेपी तरला च से
त्यमरः ठिठनिति इकार उच्चारणार्थः टो ङीबर्थः संघातविगृहीतार्थमिति ओदनिक इत्यत्र हि वृद्धिनिवारणाय टिठनारम्भोऽन्यथा लाघवाट्ठञमेव ब्रूयादिति भावः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ·
टी·त·
सु·त
४६

आकरिक इति खनिः स्त्रियामाकरः स्यादित्यमरः अध्यासिन्य अदेशकालात्किं कामयामधीते पूर्वाह्णे अधीते कठिनांत प्रस्तार संस्थान शब्दौ संनिवेशपर्यायाविति विहवः प्र
स्तारो यज्ञः प्रस्तीर्यते यत्र इति घञ् संस्थानं संनिवेश इत्येके नैकटिको भिक्षुरिति संन्यासी हि ग्राममस्य निकटे वसन् भिक्षार्थमेव ग्रामे प्रविशति न तु तत्र वसतीति भावः आवस
थात् लकारः स्वार्थः आवसंत्यस्मिन्नित्यावसथः उपसर्गे वसेरित्यथप्रत्ययः कुसीदसूत्रादिति कुसीद दशैकादशादिति सूत्रोपात्ताभ्यां प्रकृतिभ्यामित्यर्थः इह नो ह्य
चष्ठानित्यत्रैव येषां पकारः सांहितिक इति भाष्यते तेषामेव गणनेष्ठुल्लाद्दैः षित्वमनार्षमिति भ्रमः स्यादतः श्लोकवार्तिककारैः षित्वमस्यान्सर्वानपि पर्यजीगणत्॥ ०
ठकोवधिः समाप्तः॥ ❁ ॥ युग्य इति युगं रथांगं वहतीत्यर्थः प्रासंग इति प्रासज्यते असाविति कर्मणि घञ् धुरो धुरो ढक्चेत्येव सुवचं नम उपधाया इति उपधायां च

प्राग्घिताद्यत्॥४।४।७५॥ तस्मै हितमित्यतः प्राक् यदधिक्रियते। तद्वहति रथयुगप्रासङ्गम्॥४।४।७६॥ रथं वहति रथ्यः। युग्यः। वत्सानां दमनकाले स्कन्धे काष्ठमासज्यते स प्रासङ्गः। तं वहति प्रासंग्यः। धुरो यड्ढकौ॥४।४।७७॥ हलि चेति दीर्घे प्राप्ते॥ न भकुर्छुराम्॥८।२।७९॥ भस्य कुर्छुरोश्चोपधाया दीर्घो न स्यात्। धुर्य्यः। धौरेयः। खः सर्वधुरात्॥४।४।७८॥ सर्वधुरं वहतीति सर्वधुरीणः॥ एकधुराल्लुक्च॥४।४।७९॥ एकधुरं वहति। एकधुरीणः एकधुरः। शकटादण्॥४।४।८०॥ शकटं वहति शाकटो गौः। हलसीराट्ठक्॥४।४।८१॥ हलं वहतीति हालिकः॥ सैरिकः॥ ९ तिपूर्वसूत्रादेतल्लभ्यत

इति भावः उपधायाः किं प्रतिदीव्नः इह नांतस्य भत्वेपि कारस्यानुपधात्वान्निषेधो न प्रवर्त्तते खः सर्वधुरात् सर्वधुराया इति वक्तव्ये नपुंसकनिर्देशः शब्दस्वरूपापेक्षया वं धुनिव
द्गुर्वीहाविति वत् सर्वधुरामिति पूर्वकालैकेति समासः ऋक्पूरब्धूरिति समासांतेऽ प्रत्यये वा प् एकधुराल्लुक्च चान्खः एवं च प्राकरणिकस्य यतो लुक् खस्य तु विधानसाम
र्थ्याल्लुक्वणमिति फलितं तदाह एकधुरीण इत्यादि शाकटो गौरिति ननु तस्येदमित्यणं सिद्धं यो हि शकटं वहति शकटस्यासौ भवति अत्राहुः आरंभसामर्थ्याद्त्र तदं
तविधिस्तेन द्वैशकटं वहति द्वैशकट इत्यत्र द्विगोर्लुगनपत्य इति प्राग्दीव्यतीयो लुङ् भवति तस्येदमित्यणि तु स्यादेव लुगिति हलसीरात् ननु तस्येदमित्युपक्रमे हल
सीराट्ठगिति पठितं तथा च तेनैव शैषिकेण हालिकः सैरिक इति सिद्धौ किमनेनेति चेत् सत्यं आरंभसामर्थ्यादत्रापि तदंतविधिस्तेन द्वैहलिको द्वैसीरिक इति भवति

246

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शैषिके ठकि तु प्राग्दीव्यतीयो लुक् स्यात् जायते अस्यां गर्भ इति व्युत्पत्तिमाश्रित्याह जनीवधूरिति जनिघसिभ्यामिण् जनिवध्योश्चेति न वृद्धिः कृदिकारादिति ङीष् ततो॰
नेन सूत्रेण यति जन्या जामातुर्वयस्या सा हि विवाहादिषु वधूं जामातृसमीपं प्रापयति कालिदासस्तु वध्वासनवाहेष्वपि प्रायुंक्त यातेति जन्यानवरकुमारीरिति जनीं वहंती
ति जन्यास्तानित्यर्थः पद्या इति यद्यस्मात्तदर्थ इति पञ्चावः अधनुषा किं चोरं विध्यति संभाव्यते हि चोरस्य धनेषु धनुषः करणता यदा तु धनुषेति प्रयुज्यते तदा सापेक्षत्वाद्यन्न भवति
एवं च न चेत्तत्र धनुः करणमित्यत्र संभाव्यत इति विशेषो बोध्यः तृन्नं तमिति एवं च न लोकेत्यादिना कृद्योगषष्ठ्या निषेधाद्धननग्रहणमिति प्रयोगो निर्बाध इति भावः वशंगतः
वशनं वशः इच्छा वशिरण्योरुपसंख्यानमित्यप् मूलमस्यावर्हि प्रथमान्ताद्वर्हि इत्युपाधिकान्मूलशब्दादस्येति षष्ठ्यर्थे यत्स्यात् आवर्ह इति वृहउद्यमने दं॰

संज्ञायां जन्या।४।४।८२॥ जनीं वधूं नाम्बहति प्रापयति जन्या॥ विध्यत्यधनुषा।४।४।८३॥ द्वितीयान्ताद्विध्यतीत्यर्थे यत्स्यान्न चेत्तत्र धनुः करणं।
पादौ विध्यन्ति पद्याः शर्कराः॥ धनगणं लब्धा।४।४।८४॥ तृन्नन्तमेतत्। धनं लब्धा धन्यः गणं लब्धा गण्यः॥ अन्नाण्णः।४।४।८५॥ अन्नं लब्धा
आन्नः॥ वशं गतः।४।४।८६॥ वश्यः परेच्छानुचारी॥ पदमस्मिन्दृश्यम्।४।४।८७॥ पद्यः कर्दमः॥ नातिशुष्क इत्यर्थः॥ मूलमस्यावर्हि।४।४।
८८॥ आवर्हणमावर्हः उत्पाटनं तदस्यास्तीति आवर्हि मूलम् आवर्हि येषां ते मूल्या मुद्गाः॥ संज्ञायां धेनुष्या।४।४।८९॥ धेनुशब्दस्य षुगागमो
यप्रत्ययश्च स्वार्थे निपात्यते संज्ञायां। धेनुष्या बन्धके स्थिता। गृहपतिना संयुक्ते ञ्यः।४।४।९०॥ गृहपतिर्यजमानस्तेन संयुक्तो गार्हपत्योऽग्निः॥ नौवयो
धर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु।४।४।९१॥

९ त्योष्ट्यादिरयं न तु पवर्गादिः उद्वह रक्षः स
ह मूलमिन्द्रेत्यादिप्रयोगदर्शनात् मूल्या मुद्गा इति मूलोत्पाटनं विना संग्रहीतुमशक्याः मध्यतो लूयमानेषु कोशस्था अपि यस्यामवस्थायां पतेयुस्तामवस्थां प्राप्ताः सुष्ठु
शुष्का इति यावत् यप्रत्यय इति तेन धनुष्याशब्दो तउदात्तः यति तु तित्स्वरः स्यादिति भावः॥ ॐ॥ संज्ञायामिति ऋणप्रत्यर्पणाय या धेनुर्दोहनार्थमुत्तमर्णाय दीयते तस्याः
संज्ञेयं गार्हपत्य इति गृहपतिनेति निर्देशादेव तृतीयान्तात्प्रत्ययः संज्ञायामित्यनुवृत्तेराहवनीयादौ नातिप्रसंगः नौवयो धर्मेत्यादिभ्योऽष्टभ्यो यथासंख्यं तार्यादिष्वष्ट
स्वर्थेषु यत्स्यात् इह तार्यादियोगे यथासंभवं करणकर्त्रादिहेतौ तु स्वार्थयोगे च तृतीया भवतीति सैवेह समर्थविभक्तिरर्थाल्लभ्यते अत्र प्रथमं मूलं तानां पंचा॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नोर्द्वंद्वं कृत्वा द्वितीयमूलादिद्वंद्वेन सह समाहारद्वंद्वः मूलं नाम्नां द्वित्वाल्लणं वा मूलादीनामेव वा द्वंद्वं कृत्वा नावादिभिर्द्वंद्वस्तेन साकल्याभावादेकशेषो न भवति ॥ ःः ॥ नावा ना
य्यमिति शक्यार्थे अर्हलोर्ण्यत् करणे तृतीया वयस्य इति स्निग्धो वयस्यः सवया इत्यमरः वयसा तुल्यः शत्रुरित्यत्र तु न भवति संज्ञाधिकारात् विषेण वध्य इति विषेण वधमर्हती
त्यर्थः दंडादिभ्य इति सूत्रेण वधशब्दादर्हार्थे यद्विधानात् मूलेनानाम्यमिति मूलं नाम पटादीनामुत्पत्त्यर्थं वणिग्भिर्विनियुक्तं द्रव्यं तेन स्वस्मादतिरिक्तं लाभाख्यं द्र
व्यमात्मानं प्रति शेषीक्रियते आत्मन उपकारकं क्रियते तत् आनाम्यं आङ्पूर्वको नमिरभिभवे वर्त्तते तस्मात् पोरदुपधादिति यति प्राप्ते अत एव निपातनाण्ण्यत् त
था चानाम्यमभिभवनीयं आत्मानं प्रति शेषीकर्त्तव्यं स च लाभाख्यो भाग एव लोके तु यावता द्रव्येण पटादिकं विक्रीयते तत्रैव समुदाये मूल्यशब्दः प्रसिद्धो न तु मूला
तिरिक्तभागमात्रे एवं च लाभमात्रे व्युत्पादितस्य मूल्यशब्दस्य तद्वदिति संघाते निरूढलक्षणा बोध्या सीतेति सीता हलाग्रं संपूर्वादिणः क्तः संमितं संगतं निम्नोन्नतादि

नावास्तार्य्यं नाव्यं। वयसा तुल्यो वयस्यः। धर्म्मेण प्राप्यं धर्म्यं विषेण वध्यो विष्यः। मूलेन आनाम्यं मूल्यं। मूलेन समो मूल्यः। सीतया समितं सीत्यं क्षे
त्रं। तुलया संमितं तुल्यं। धर्म्मपथ्यर्थन्यायादनपेते। ४।४।९२॥ धर्म्मादनपेतं धर्म्यं। पथ्यं। अर्थ्यं। न्याय्यं। छन्दसो निर्म्मिते। ४।४।९३॥ छन्द
सा निर्म्मितं छन्दस्यं। इच्छया कृतमित्यर्थः। उरसोऽण् च। ४।४।९४॥ चाद्यत्। उरसा निर्म्मितः पुत्रः औरसः। उरस्यः। हृदयस्य प्रियः। ४।४।९५॥
हृद्यो देशः। हृदयस्य हृल्लेखयदण्लासेष्विति हृदादेशः॥ ॥

(( रहितं कृतमित्यर्थः समीकृतमिति यावत् रथ्यसीता हलेभ्यो य द्विधाविभिन्नदंतवि
धिः परमसीत्यं द्वाभ्यां सीताभ्यां समितमिति तद्धितार्थे समासस्तु नो यत् द्विसीत्यं तुलया संमितमिति संमितं परिच्छिन्नं रूढिशब्दोयं संज्ञायामित्यधिकारात् अत एव तु
ल्यमिति सदृशमात्रे प्रयुज्यते न तु लायामाग्रहः क्रियते पथ्यमिति संज्ञाधिकारादभिधेयनियमः तेन शास्त्रीयात्पथोऽनपेतं तमेव पथ्यं न तु मार्गादनपेतं श्चोरोपि छं
दसो छदि संवरणे इति चुरादिरिच्छायामपि वर्त्तते धातूनामनेकार्थत्वान्न तो घञिरिच्छापर्यायश्छंदः शब्दः प्रसिद्ध एवं स्वच्छंदो छलदछकछेत्यादौ असुनि तु यः सां
तस्सोत्र प्रकृतिस्तत्र निर्माणे इच्छायाः करणत्वात्सामर्थ्यात्तृतीयांतात्प्रत्ययः इच्छया कृतमिति यद्यपि वेदत्रिष्टुबादिषु च सांतश्छंदः शब्दोस्ति तथापि इह न गृह्यते
संज्ञाधिकारात्किं त्विच्छापर्याय एव स गृह्यत इति भावः पुत्र इति संज्ञाधिकारान्नेह उरसा निर्मितं सुखं हृदयस्य प्रीणातीति प्रियः इगुपधेति कः कर्मयोगात्कर्म

247

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णिषष्ठी अलौकिकेनद्विनप्रकृतिभागेनु वचनसामार्थ्यादेव एवमन्यत्रापिबोध्यं॥ ॥ ॥ बंधनेबध्यतेऽनेनेतिबंधनः करणेल्युट् वशीकरणमंत्र इति तेनहिपरहृदयंवशी
क्रियते संज्ञाधिकाराद्धलसिद्वादावृणोनायंयत् तस्यकरणमितिकर्मणिषष्ठी कृतिः करणंक्रियतेऽनेनेति वाकरणमित्याशयेनाहभावः साधनंवेति जल्पशब्दोभावसाध
नः कर्तरिषष्ठी हलस्येति कर्षणंकर्षसत्वयोगात्कर्मणिषष्ठी करणस्यकर्तृत्वविवक्षयाकर्तरिषष्ठीवा रथसीनेतितदंतविधिः द्विहल्यः त्रिहल्यः तत्रसाधुः साधुरि
हप्रवीणोयोग्योवागृह्यते नोपकर्त्तातत्रहिपरत्वात्तसेहितमित्यनेनभाव्यंसंज्ञाधिकारादुपकर्त्तानगृह्यत इत्यन्ये प्रतिजनमितिजनोजनइति प्रतिजनंवीप्सा

वन्धनेचर्षौ।४।४।९६॥ हृदयशब्दात्षष्ठ्यन्ताद्वन्धनेयत्स्याद्वेदेभिधेये। हृदयस्यवन्धनंहृद्यः। वशीकरणमन्त्रः। मतजनहलात्करणजल्प
कर्षेषु।४।४।९७॥ मतंज्ञानंतस्यकरणम्भावःसाधनम्वामत्यं। जनस्यजल्पोजन्यः। हलस्यकर्षोहल्यः। तत्रसाधुः।४।४।९८। अग्रेसाधुःअग्र्यः
सामसुसाधुःसामन्यः। येचाभावकर्मणोरितिप्रकृतिभावः। कर्मण्यः। शरण्यः। प्रतिजनादिभ्यःखञ्।४।४।९९॥ प्रतिजनंसाधुःप्रातिजनीनः
सांयुगीनः। सार्वजनीनः। भक्ताण्णः।४।४।१००॥ भक्तेसाधवोभाक्ताःशालयः। परिषदोण्यः।४।४।१०१॥ पारिषद्यः। परिषदइतियोगविभागात्ण
पारिषदः। कथादिभ्यष्ठक्।४।४।१०२॥ कथायांसाधुःकाथिकः॥ गुडादिभ्यष्ठञ्॥४।४।१०३॥ गुडेसाधुःगौडिकइक्षुः। साक्तुकोयवः। पथ्यतिथि
वसतिस्वपतेर्ढञ्।४।४।१०४॥ पथिसाधुःपाथेयं। आतिथेयं। वसनंवसतिस्तत्रसाधुः वासतेयीरात्रिः। स्वापतेयन्धनं। सभायायः।४।४।१०५॥ स
भ्यः॥ समानतीर्थेवासी।४।४।१०७॥ साधुरितिनिवृत्तं। वसतीतिवासीसमानेतीर्थेगुरौवसतीतिसतीर्थ्यः। समानोदरेशयितओचोदात्तः।४।४।१०८
समानेउदरेशयितःस्थितःसमानोदर्य्योभ्राता। सोदराद्यः।४।४।१०९॥ सोदर्य्यः। अर्थेःप्राग्वत्॥ इतिप्राग्घितीयाः॥ ॥ ॥

याम व्ययीभावः प्रतिजन इदंयुग संयुग पापकुल परस्यकुल अमुष्यकुल सर्वजन विश्वजन पंचजन परस्यामुष्येतिषष्ठ्योर्निपातनादलुक् भक्तशब्दे मिस्साहीभक्तमंधो
न्नमित्यमरः गुडादिभ्यष्ठञ् गुडकुल्माष सक्तु अपूपमाष ओदन इक्षुवेणुसंग्राम संघात प्रवास निवास ——— वृत् वसतिरिति वसेश्चेत्यतिप्रत्ययः स्वस्यपतिः स्वपतिराद्य स
स्मिन्स्वापतेयं सभायायः यतितुतित्स्वरःस्यात् कतुर्भवत्युक्थ इतिवत् नचयतोनाव इत्याद्युदात्तनाशंक्या यदुत्पतिवेलायांह्यकस्यपदंतस्यादिरुदात्त इतिवेदभाष्येस्थापित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पक्षांतरे तु नमः शब्दात् पचकेभ्याः पचेत्यादिवदाद्युदात्तः स्यात् एवं च व्याख्यानद्वयस्याप्यावश्यकत्वे लक्ष्यानुरोधेन क्वचित्किंचिद्व्याख्येयमिति तत्त्वं समानतीर्थे वासी निपातनात्सिनिर्ग्रहादेराकृतिगणत्वान्नंदिग्रहीत्यनेन वा सतीर्थ्य इति तीर्थे ये इति समानस्य सभावः तरंत्यनेनेति तीर्थं तरतेस्थक् तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमंत्रिषु योनौ जलावतारे चेति विश्वः इह तु व्यापकवाचिन एव ग्रहणं नान्यस्य संज्ञाधिकारात् शयितः स्थित इति शीधातुः स्थित्यर्थे वर्त्तते जलाशयः कुशेशयमिति प्रयोगादिति भावः समानमुदरमिति पूर्वापरप्रथमेत्यादिना तत्पुरुषः ततो यत् नित्स्वर एव बाद् ओकारस्योदात्तः सोदराद्यः ओ चो दात्त इति नानुवर्त्तते विभाषोदरे इति समानस्य सभावः तत्र तीर्थे य इत्यतोऽनुवृत्तं य इत्येतद्विषयसप्तमी तेन सोदर इत्यस्माद्यः प्रत्ययस्वरः प्राग्वदिति समानोदरे शयित इत्येवार्थ इत्यर्थः कथं तर्हि अपंथा नं तु गच्छंतं सोदरोऽपि विमुंचतीति मुरारिरिति चेत् अत्राहुः सह समानमुदरं यस्य सोदरः वोपसर्जनस्येति सहस्य सभावः तस्य वैकल्पिकत्वाद्यत्र भ्राता सहोदर इत्यपि सिद्धमिति॥ ॥ इति प्राग्घितीयाः समाप्ताश्चातुर्थिकाः॥ अथ पांचमि

प्राक्क्रीताच्छः।५।१।१। तेन क्रीतमित्यतः प्राक् छोऽधिक्रियते॥ उगवादिभ्यो यत्।५।१।२। प्राक्क्रीतादित्येव। उवर्णान्ताद्गवादिभ्यश्च यत्स्यात् छस्यापवादः शङ्कवे हितं। शङ्कव्यं। नाभि नभं च॥ नभ्योऽक्षः। नभ्यमञ्जनं। रथनाभावेवेदं। शुनः संप्रसारणं वा च दीर्घत्वम्॥ शुन्यं। शून्यं। ऊधसोऽनङ् च॥ ऊधन्यः। कम्बलाच्च संज्ञायाम्।५।१।३। यत्स्यात्। कम्बल्यमूर्णापलशतं। संज्ञायां किं। कम्बलीया ऊर्णा॥ ॥

काः प्राक्क्रीताच्छः इत्यतः प्रागिति इहार्थोऽवधित्वेन गृह्यते न तु प्रत्ययः प्रकृतिर्वा तेनार्थ एवावधिमंत इति प्राक्क्रीताद्यः पूर्वाहितादयस्तेषु सर्वेषु प्रत्ययस्यानं अवधिसजातीयो ह्यवधिमान् भवति यथा मासात्परः इति कालः प्रतीयते ग्रामात्पूर्व इति देशः अलोंऽत्यात्पूर्व इत्यत्रेव एवं च समानेऽर्थे प्रकृतिविशेषादुत्पद्यमानो यदादिः प्रकृत्यंतरे सावकाशं छं तक्रकौडिन्यन्यायेन बाधते अन्यथा छस्य यदादेश्च संनिधानाविशेषात् तव्यत्तव्यानीयरामिव पर्यायः स्यात् अतोऽर्थोऽवधित्वेन गृह्यते ननु पदादिविषये छो न भविष्यति विभाषा हविरपूपादिभ्य इति विभाषाग्रहणाल्लिंगात् तथा च प्रत्ययस्य प्रकृतेर्वा अवधित्वस्वीकारे न क्षतिः उक्तज्ञापकेनोगवादिप्रभृतिभ्यश्छस्याप्राप्तिप्रसंगनिरासादिति चेत् अत्राहुः एवं सति छ इत्येवाधिकारोऽस्तु नार्थोऽवधिनिर्देशेन प्राग्वतेष्ठञित्यादिके तु प्रकरणे नास्त्यधिकारः अधिकारांतरेणोपरुद्धत्वात् स्पष्टप्रतिपत्त्यर्थमवधिनिर्देशोऽन्यथा प्रतिपत्तिगौरवं स्यादिति चेत् तर्हि विभाषा हविरित्यादिज्ञापकाश्रयणे प्रतिपत्तिगौरवादर्थ एवावधित्वेन निर्दिष्ट उचित इति आवादिभ्यो उवर्णादेर्गशब्दादेर्वशब्दादेश्च यत्स्यादित्यर्थो न भवति गवादिगणपाठात् गवाद्यंतर्गणसूत्राण्याह नाभि नभं चेति नाभिशब्दो यतं लभते नभादेशं चेत्यर्थः नभ्योऽक्ष इति

२४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रथांगसच्छिद्रं नाभिस्तदनुप्रविष्टः काष्ठविशेषोऽक्षः सचतदनुगुणत्वात्तस्मै हितः अंजनं तैलाभ्यंगस्तदपि स्नेहनत्वान्नाभये हितं रथनाभावेवेति शरीरावयवे तु नाभ्यमित्येव परेण शरीरावयवाद्यदित्यनेनास्य बाधादिति भावः शून्यमिति चकारस्यानुक्तसमुच्चयार्थत्वान्नस्तद्धिते इति टिलोपो न भवति ये चाभावकर्मणोरिति प्रकृतिभावस्तु दुर्लभः संप्रसारणे पररूपे च कृते अन्रूपाभावात् दीर्घपक्षे तु तद्विधानसामर्थ्यादपि टिलोपाभावः सुपरिहरः नङ्चेति चाद्यत् नश्चेति सुवचमिति मनोरमा अन्ये त्वाहुः ऊधन्यशब्दान्न करोति तदाचष्ट इति णिचि णाविष्टवदिति टिलोपे णिजन्तात्कर्तरि क्विपि णिलोपयलोपयोः कृतयोरनुनासिकस्य क्वौ इति दीर्घे ततः क्विबन्तादाचारक्विपि ऊधान इत्यादावात्मनेपदार्थं ङित्करणमावश्यकमिति ऊधन्य इति ये चेति प्रकृतिभावः केवलाच्च संज्ञायां प्राक्क्रीतीयेष्वर्थेषु यत् स्यात् छस्यापवादः॥ ॐ॥ विभाषा हविरपूपादिभ्यः गवादिषु हविःशब्दस्य पाठादिह हविर्विशेषाणां ग्रहणं न च गवादिष्वेव हविर्विशेषाणां ग्रहणं किं न स्यादिति वाच्यं असंजातविरोधित्वेन तत्र स्वरूपग्रहणस्य न्याय्यत्वात् अपूप्यमिति अपूपेभ्यो हितं चूर्ण

विभाषा हविरपूपादिभ्यः। ५।१।४॥ आमिक्ष्यं दधि। आमिक्षीयं। पुरोडाश्यास्तण्डुलाः। पुरोडाशीयाः। अपूप्यं। अपूपीयं। तस्मै हितम्। ५।१।५॥ वत्सेभ्यो हितो वत्सीयो गोधुक्। शङ्कव्यं दारु। गव्यम्। हविष्यं। शरीरावयवाद्यत्। ५।१।६॥ दन्त्यं। कण्ठ्यं। नस्यं। नासिकायाः यत्तस्क्षुद्रेषु नस्। नाभ्यं। ये च तद्धिते। ६।१।६१। यादौ तद्धिते परे शिरसः शीर्षन्नादेशः स्यात्। शीर्षण्यः॥ तद्धिते किं। शिर इच्छति शिरस्यति। वा केशेषु॥ शीर्षण्याः शिरस्याः केशाः। अचि शीर्ष इति वाच्यम्॥ अजादौ तद्धिते शिरसः शीर्षादेशः। स्थूलशिरसः॥ इदं स्थौलशीर्षं॥ ॥

मित्यर्थः अपूप तंडुल पृथुक मुसल कर्णवेष्टकेत्यादपूपादिगणे अन्नविकारेभ्यश्चेति पठ्यते अन्नविकारा अन्नप्रकारा अदनीयविशेषास्तेभ्यो यद्वा स्यादिति तदर्थः ओदन्या ओदनीयास्तंडुलाः एवं चानेनैव गणसूत्रेण सिद्धे अपूपादीनां केषांचिद्गणे पाठः प्रपंचार्थः हविरपूपादिभ्यो विभाषा पाउगवादिभ्यो यत्पूर्वविप्रतिषेधेन सक्तव्याः धानाः चरव्यास्तंडुलाः चरुर्नाम हविरिति काशिकास्थाली वचनस्य च रुशब्दस्य तत्र त्यह हविषि उपचारादित्तिरिति कैयटादयः नस्यमिति नासिकायै हितं नासिकायां भवमिति विग्रहे तु शरीरावयवाच्चेति यत् नस्यं नस्तु दाहरणं नस्तः अपादाने चाहीयरुहोरिति तसिः क्षुद्रेषु नासिकया क्षुद्रो नः क्षुद्रः सुप्सुपेति समासः नाभ्यमिति नाभिनभं चेति नभादेशो रथनाभावेव प्रवर्तते तस्य गवादियत्तासंनियोगशिष्टत्वादिति भावः शीर्षंश्छन्दसीत्यतो नुवर्तनादाह शीर्षन्नादेश इति शीर्षण्य इति ये चाभावेति प्रकृतिभावः शिरस्यतीति नः क्ये इति नियमेन पदत्वाभावाद्रुत्वाभावः॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· खलयव अत्र दृषच्छब्दो ऽकारान्तो गृह्यते न तु नकारान्तः अन्यथा त्वसंदेहार्थं नलोपप्रसक्तत्वेन निर्दिशेत् आत्मन्विश्वजनेतिवत् दृषायहितं दृषद्यं नान्तात्वपि तु दृषण्यमिति स्या
टी·त· त् ब्रह्मण्यमिति ब्रह्मन्शब्दो ब्राह्मणपर्यायः प्रकृतिभाववत्त्वुपेक्ष्यनेन पूर्ववत् इह दृषन्शब्दो ब्राह्मणशब्दाच्च यतः प्राप्तिरेव नास्ति छोऽप्यनभिधानान्नेत्याकरः तेन ब्रह्मणे हितं ब्रा
सु·त ह्मणेभ्यो हितमिति वाक्यमेव चादूथ्येति गवादिषु रथशब्दो न पठितः हितार्थ एव रथ्येति यथा स्यात् अर्थान्तरे माभूदिति अजाविभ्यां अजशब्द इह पुल्लिंग उपात्तः अत एव
७९ द्वंद्वे घीत्यविशब्दस्य पूर्वनिपातं बाधित्वा अजाविदंतमिति अजशब्दस्य पूर्वनिपातः ततः प्रातिपदिकग्रहणे लिंगविशिष्टस्यापीति स्त्रीलिंगादपि थ्यन् तसिलादिष्वथ्यनः
परिगणनात् पुंवद्भावे रूपं तुल्यं अजथ्येति · अजेभ्यो अजाभ्यो वा हितेति विग्रहः ॥ कर्मधारया देवेति॥ ॥ व्याख्यानादितिभावः विश्वजनीयमिति विश्वस्य जन
सर्वसाधारणो वेश्यादिः विश्वो जनो ऽस्येति बहुव्रीहावपि स एवान्यपदार्थस्तस्मै हितमिति विग्रहः पंचजनीनमिति रथकारपंचमाश्चत्वारो वर्णाः पंचजनास्तेभ्यो हितं दि

खलयवमाषतिलवृषब्रह्मणश्च ।५।१।७॥ खलाय हितं खल्यं । यव्यं । माष्यं । तिल्यं । वृष्यं । ब्रह्मण्यं । चादूथ्या अजाविभ्यां थ्यन् ।५।१।८। अजथ्या
यूथिः । अविथ्या । आत्मन्विश्वजनभोगोत्तरपदात्खः ।५।१।९॥ आत्माध्वानौ खे । ६।४।१६९॥ एतौ खे प्रकृत्या स्तः । आत्मने हितमात्मनीनं । विश्व
जनीनं । कर्मधारयादेवेष्यते । षष्ठीतत्पुरुषाद्बहुव्रीहेश्च छ एव । विश्वजनीयं । पञ्चजनादुपसंख्यानम् । पञ्चजनीनम् । सर्वजनाट्ठञ् खश्च । सार्व
जनिकः । सर्वजनीनः । महाजनाट्ठञ् । माहाजनिकः । मातृभोगीणः ॥ पितृभोगीणः । राजभोगीनः । आचार्यादणत्वञ्च ॥ आचार्यभोगीनः ॥

कांस्ये संज्ञायामिति समासः पंचजनादित्येतत्प्रभृति वार्तिकत्रयमपि कर्मधारयविषयमेव तेन षष्ठीसमासाद्बहुव्रीहेश्च छ एव पंचजनीयः सर्वजनीन इति सर्वो जनः सर्व
जनः पूर्वकालैकेति तत्पुरुषः तस्मै हितमिति विग्रहः साध्वर्थे तु प्रतिजनादिभ्यः खञिति खञि सार्वजनीन वैश्वजनीनशब्दौ व्युत्पादितौ मातृभोगीण इति इहाखण्डपदत्वाभावेऽप्य
ट्कुप्वाङ्नुम्व्यवायेनेन यथा णत्वं भवति तथा प्रागेवोपपादितं मातुर्भोगः शरीरं तस्मै हित इति विग्रहः यद्यपि भोगस्सुखे स्त्र्यादिभृतावहेश्च फणकाययोरित्यमरेण अहेरिमुक्तं त
थापि प्रयोगबाहुल्याभिप्रायं न तु शक्तिस्तु शरीरमात्रे इत्याकरः मातृपितृशब्दाभ्यामौत्सर्गिकः छ एव मात्रीयः पित्रीयः राजाचार्याभ्यां तौ नौत्सर्गिकः छो ऽपि न भवत्यनभिधानात् किं तु राज्ञे हितं 249
माचार्याय हितमिति वाक्यमेवेत्याकरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandū

CC-0. In Public Domain. Digitization by eGangotri

सर्वपुरुषाभ्यां आभ्यां शब्दाभ्यां यथासंख्यं णढञौ स्तः तस्मै हितमित्यर्थे प्राक्क्रीतेति छस्यापवादाविति सूत्रार्थः सर्वादिति अनुकरणत्वात्सर्वनामकार्याभावः पुरुषाद्वधविकारेति योग्यता बलादिह षष्ठीसमर्थविभक्तिर्लभ्यते तेन कृते त्यत्र तु उपात्तेव तृतीया तदाह पुरुषस्य वध इति समूहेप्यणीति तस्य समूह इत्यनेन ग्रंथेऽणीति कृते ग्रंथे इत्यनेन अग्रामे इति पौरुषेयः प्रासाद इत्याद्येनकस्याप्यपवादोयं ढञिति भावः माणवचरकाभ्यां त्रिलकरणं वृद्ध्यर्थं स्वरार्थं च यद्यपि माणवे वृद्धिः स्वतः सिद्धैव तथापि माणवीनाभार्य इत्यत्र वृद्धिनिमित्तस्य चेति पुंवद्भावप्रतिषेधार्थमिति ज्ञेयं माणवायेति मनोः कुत्सितमपत्यं माणवः अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः नकारस्य च मूर्धन्यस्तेन सिध्यति माणव इत्यपत्याधि

सर्व्वपुरुषाभ्यां णढञौ ।५।१।१०॥ सर्व्वाण्णो वेति वक्तव्यम्॥ सर्व्वस्मै हितं सार्व्वः। सर्व्वीयं। पुरुषाद्वधविकारसमूहतेनकृतेषु। भाष्यकारप्रयोगान्नेत्य स्यहूदन्तस्य निवेशः। पुरुषस्य वधः पौरुषेयः। तेन दृष्टमित्यणि प्राप्ते। पुरुषस्य विकारः पौरुषेयः॥ प्राणिरजतादिभ्योऽञ्। इत्यञि प्राप्ते। समूहे च्चणि प्राप्ते। एकाकिनोपि परितः पौरुषेयवृता इव इति माघः। तेन कृते तु ग्रन्थेऽणि प्राप्ते। अग्रन्थे तु प्रासादादावप्राप्त एवेति विवेकः। माणवचरकाभ्यां खञ्।५।१।११॥ माणवाय हितं माणवीनं। चारकीणं। तदर्थं विकृतेः प्रकृतौ।५।१।१२॥ विकृतिवाचकाच्चतुर्थ्यन्तात्तदर्थायां प्रकृतौ वाच्यायां प्रत्ययः स्यात् अङ्गारेभ्य एतानि अङ्गारीयाणि काष्ठानि। प्राकारीया इष्टकाः। शङ्कव्यं दारु॥ छदिरुपधिबलेर्ढञ्।५।१।१३॥ छादिषेयाणि तृणानि। बालेयास्तण्डुलाः। उपधिशब्दात्स्वार्थे इष्यते। उपधीयत इत्युपधिः रथाङ्गं तदेव औपधेयं॥ ऋषभोपानहोर्ञ्यः॥५।१।१४॥ छस्यापवादः। आर्षभ्यो वत्सः। औपानह्यो मुञ्जः चर्म्मण्यप्ययमेव। पूर्व्वविप्रतिषेधेन। औपानह्यं चर्म्म॥ ॥

१९

कारस्य वार्त्तिकात्सत्वं तच्च वार्त्तिकमेतत्सूत्रस्य निर्देशसिद्धार्थकथनपरमित्याहुः चारकीणमिति चरतीति चरः पचाद्यच् चरिचलिपतिवदीनामिति द्विर्वचनं विकल्पितत्वादिह न भवति ततः संज्ञायां कनि चरकः तदर्थं विकृतेः तस्मै हितमित्यतस्तस्मा इत्यनुवर्त्तनेन तदाह चतुर्थ्यन्तादिति तदर्थमिति सामान्ये नपुंसकं व्यत्ययेन सप्तमीस्थाने प्रथमेत्याशयेनाह तदर्थायामिति विकृत्यर्थायामित्यर्थः तदिति सर्वनाम्ना हि विकृतिः परामृश्यते एवं च विकृतिरेव प्रथमातिर्दिष्टेति समर्थानां प्रथमादित्यधिकारोऽप्यत्र निर्बाध एव शंकव्यमिति उगवादिभ्य इति यत् छदिरुपधि समाहारद्वन्द्वे सौत्रं पुंस्त्वं छादिषेयाणीति छदतेः नेनेति छदिः अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः इस्मन्त्रन्क्विषु चेति ह्रस्वत्वं यदा तु चर्मविकारः छदिस्तदा परत्वाच्चर्मणोऽञित्यञ् प्राप्नोति पूर्वविप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·कौ· तिषेधेन तु ढञेवेष्यते छादिषेयं चर्म आह च यञ्ञ्या वञः पूर्वविप्रतिषिद्धं ढञ् चेति यत उदाहरणं स्नानं गव्यं स्नानं गुञ्चर्मविकारस्तदर्थं चर्म उगवादिभ्य इति यत् न्यसोदाहर
टी·त· णमौपानत्यमिति अनुपदं वक्ष्यति वालेया इति अरोपहारयोः पुंसि वलिः प्राण्यंगाजे स्त्रियामित्यमरः उपधिरिति उपसर्गे घोः किरिति धाञः किरातोलोप इति चन्यालो
सु·त· पः विप्रतिषेधेनेति यञ्ञ्या वञ इत्यादिवार्तिकेनेत्यर्थः ननु ढञ्चि घोछदिरित्यस्य त्यविधाउपानह्श्चविशिष्य ग्रहणेन प्रतिपदोक्तं बलीय इति सिद्धे किमनेन पूर्वविप्र
५॰ तिषेधेन अत्राहुः निरवकाशत्वे सत्येव प्रतिपदविधिर्बलीयस्त्वप्रयोजकं न तु सावकाशत्वे इत्यनेन मुनिवचनेनानुमीयते तेन स्वपितडाकानीत्येव युक्तं परत्वान्नुमप्र
वृत्तेः प्रतिपदोक्तत्वाद्दीर्घमाश्रित्य स्वापितडाकानीति मतं दुर्बलं अप्रत्निति दीर्घस्य आपस्तिष्ठंतीत्युदाहरणे सावकाशतया प्रतिपदोक्तत्वस्याबलीयस्त्वादिति ॥ ❀ ॥
चर्मणोञ् तदर्थमित्यादि पूर्वोक्तेर्थे अञ् स्यात् छस्यापवादः चर्मण इति षष्ठी न तु पंचमी पंचम्यां तु चर्मशब्दाच्चर्मपर्यायात् प्रकृतौ प्रत्ययः स्याच्चर्मणो द्वीपीत्यादौ न चेष्यते चार्मणे

चर्म्मणोऽञ् ।५।१।१५॥ चर्म्मणो या विकृतिस्तद्वाचकादञ् स्यात् । वर्ध्रं इदं । वार्ध्रं चर्म्म । वारत्रञ्चर्म्म । तदस्य तस्मिन् स्यादिति ।५।१।१६॥ प्राकार आ
सामिष्टकानां स्यात् प्राकारीया इष्टकाः । प्रासादीयं दारु । प्राकारोऽस्मिन् स्यात् प्राकारीयो देशः ॥ इति शब्दो लौकिकीं विवक्षामनुसारयति । तेनेह न ।
प्रासादो देवदत्तस्य स्यादिति । परिखाया ढञ् ।५।१।१७॥ पारिखेयी भूमिः ॥ छयतोः पूर्णोवधिः ॥ प्राग्वतेष्ठञ् ।५।१।१८॥ तेन तुल्यमिति वतिम्वक्ष्य
ति ततः प्राक् ठञधिक्रियते ॥ ॥ १९ द्वीपीति तदाह चर्मणो या विकृतिरिति वार्ध्रं इति वृधि वपिभ्यामिति रन् प्रत्यये वर्ध्रशब्द आद्युदात्तश्चर्मवाची

तस्य विकार इत्यण् टिड्ढेति ङीप् वार्ध्री रज्जुस्तस्यैव वर्धेरीणादिके ष्ट्रनिति तु वध्रीति भवति ततो ञितित्तु वाध्रं नध्री वध्री वरत्रास्यादित्यमरः चंचाःयप्रसवध्रिकाः यश्येति भाष्यं तद
स्य प्रथमासमर्थात्प्रातिपदिकात्षष्ठ्यर्थे सप्तम्यर्थे च यथाविहितं प्रत्ययाः —— स्यादिति संभावनेऽलमिति चेदित्यादिना संभावने लिङ् —— इष्टकानां व
हुत्वेन प्राकार आसां स्यादित्येतत्संभाव्यते देशस्य हि गुणेन प्राकारोऽस्मिन्स्यादिति संभाव्यते. —— देशस्य हि गु
णेन प्राकारोऽस्मिन्स्यादिति संभाव्यते इह प्रकृतिविकारभावस्तादर्थ्यं च न विवक्षितं किं तु योग्यतामात्रं तेन पूर्वस्यायमविषयः द्विसच्छब्दग्रहणं स्पष्टप्रतिपत्त्य ५
र्थं तदस्यास्त्यस्मिन् इति वत्स तत्तच्छब्दग्रहणेनैव ष्ठसिद्धेः ॥ ॥ छयतोः पूर्णोवधिः ॥ ॥ प्राग्वतेष्ठञ् ठञित्येव वक्तव्ये प्राग्वतेरिति वचनं मध्ये यो

250

अधिकारत्वात्। अपवादः सर्वभूमिपृथिवीभ्यामणञौ शीर्षच्छेदाद्यच्चेत्येवमादिस्तेन विच्छेदे पि पारायणं तुरायणे त्यादौ ठञेव यथा स्यादित्येवमर्थं न चैवं पारायणादिसूत्रे एव ठञ्
निर्दिश्यतामिति वाच्यं उत्तरसूत्रे येषां पर्युदासः क्रियते गोपुच्छादीनां तेभ्यष्ठञः प्रकृतसूत्रं विनाऽलाभात् तथा च गौपुच्छिकः सामतिक इत्यादौ ठञर्थमिदं सूत्रमत्र प्रदेशे
आरब्धमिति बोध्यं॥ ःः॥ आर्हादगोपुच्छ॰ तदर्हतीति इह तदर्हमिति सूत्रांतर्गतमच्प्रत्ययांतं नानुक्रियते किंतु तिङन्तस्यैकदेशः शवंत एव व्याख्यानादिति भावः अ
भिव्याप्येति। तेन श्वेतच्छत्रिक इत्यत्रार्हत्यर्थे ठक् भवतीति भावः ननु परिमाणान्पृथक्संख्याग्रहणं व्यर्थं परिमीयते परिच्छिद्यते येन तत्परिमाणं संख्ययापि च प

आर्हादगोपुच्छसंख्यापरिमाणाट्ठक्।५।१।१९॥ तदर्हतीत्येतदभिव्याप्य ठञधिकारमध्ये ठञोपवादः ठगधिक्रियते गोपुच्छादीन्वर्जयित्वा॥
असमासे निष्कादिभ्यः।५।१।२०॥ आर्हादित्येतत्तेन क्रीतमिति यावत्सप्तदश सूत्र्यामनुवर्त्तते निष्कादिभ्योऽसमासे ठक् स्यादार्हीयेष्वर्थेषु नै
ष्किकः समासे तु ठञ्॥ परिमाणान्तस्यासंज्ञाशाणयोः। उत्तरपदवृद्धिः स्यात् निदासो। परमनैष्किकः। असमासग्रहणं ज्ञापकमभवती तः।
प्राक्तदन्तविधिरिति तेन सुगव्यम्। यवापूप्यमित्यादि। इत उर्द्ध्वं तु संख्यापूर्वपदानां तदन्तग्रहणं प्राग्वतेरिष्यते तेन चालुकि सनि पारायणिकः
द्वैपारायणिकः। अलुकीति किं। द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पं। द्विशूर्पेण क्रीते शूर्पाद ञ् माभूत्। किंतु ठञ्। द्विशौर्पिकं। अर्द्धात्परिमाण
स्य पूर्वस्य तु वा।७।३।२६॥ अर्द्धात्परिमाणवाचकस्योत्तरपदस्यादेरचो वृद्धिः पूर्वपदस्य तु वा ञिति णिति किति च। अर्द्धद्रोणेन क्रीतं। अर्द्धद्रौणि
कं। आर्द्धद्रौणिकं। नातः परस्य।७।३।२७॥ अर्द्धात्परस्य परिमाणाकारस्य वृद्धिर्न पूर्वपदस्य तु वा ञिदादौ। अर्द्धप्रस्थिकं। आर्द्धप्रस्थिकं। अतः
किं। आर्द्धकौडविकं। तपरः किं। अर्द्धखार्य्यां भवा अर्द्धखारी। अर्द्धखारीभार्य्य इत्यत्र वृद्धिनिमित्तस्येति पुंवद्भावनिषेधो न स्यात्॥ ॥

रिच्छिद्यते इति सापि परिमाणमेवेति चेत् अत्र श्लोकवार्तिकं ऊर्द्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः आयामस्तु प्रमाणं स्यात्संख्या वाह्या तु सर्वतः अस्यार्थः तुलादा
वारोप्य येन द्रव्यांतरपरिच्छिन्नगुरुत्वेन पलादिशब्दवाच्येन पाषाणादिना सुवर्णादेर्गुरुत्वमुन्मीयते तदुन्मानं आरोह उच्छ्रायः परिणाहो विस्तारः नाभ्यामारोहपरिणा
हाभ्यां स्वगताभ्यां येन काष्ठादिनिर्मितेन व्रीह्यादि परिमीयते तत्परिमाणं प्रस्थादि पः सर्वतोभावे आयामो दैर्घ्यं स येन मीयते तत्प्रमाणं। तच्च क्वचित्तिर्यगवस्थितस्य

CC-0. In Public Domain. Digitization by eGangotri



वस्तुनो भवति यथा वस्त्रादेर्हस्तादिः कश्चिदूर्ध्वाधोभावावस्थितस्य भवति यथा हास्तिनमुदकं उरुद्वयसमुदकमिति संख्या तु उन्मानपरिमाणप्रमाणेभ्यः पलादिप्रस्था दिहस्तादिभ्यस्त्रिभ्यो बहिर्भूता एकत्वद्वित्वादिरिति इह संख्यापरिमाणयोरेव ग्रहणात् तत्त्वेऽप्युन्मानप्रमाणयोर्विवेचनं प्रसंगात् कृतमिति बोध्यं असमासे निष्कादिभ्यः निष्कपणपादमाषवाहद्रोणषष्टि इति समनिष्कादयः तत्र द्रोणशब्दः परिमाणवाची षष्टिशब्दः संख्यावाची ताभ्यां ठञि प्राप्ते वचनं इतरेषां तु पंचानामुन्मानवाचित्वे न पूर्वसूत्रेणैव ठकि सिद्धे समासप्रतिषेधार्थं वचनमित्येके अन्ये त्वाहुः पूर्वसूत्रे परिच्छेदकमात्रं संख्याभिन्नं परिमाणशब्देन गृह्यते तेन सर्वेभ्यष्ठञि प्राप्ते ठग्विधाना र्थं वचनम् न चैवं परिमाणं तु सर्वत इति भेदेन व्युत्पादनं व्यर्थमिति वाच्यं प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये इत्यादावस्योपयोगादिति यस्त्वहमप्येतत्पद· मंजर्यां स्पष्टं अथ किमर्थमसमास इत्युच्यते प्रातिपदिकग्रहणेन तदन्तग्रहणाभावादेव सिद्धेरत आह असमासग्रहणमिति सुगव्यमिति उगवादिभ्यो यत् यत्वात्पूर्व्यमिति विभाषाह

शताच्च ठन्यतावशते ।५।१।२१। शतेन क्रीतं शतिकं। शत्यं। अशते किं। शतम्परिमाणमस्य शतकः स्तोत्रं। इह प्रत्ययार्थो वस्तुतः प्रकृत्यर्थान्न भिद्यते तेन ठन्यतौ न किं तु कन्नेव। असमास इत्येव। द्विशतेन क्रीतं द्विशतकं। संख्यायाः अतिशदन्तायाः कन् ।५।१।२२। संख्यायाः कन्स्यादाहीयेऽर्थे न तु त्यन्तशदन्तायाः। पञ्चभिः क्रीतः पञ्चकः। बहुकः। त्यन्तायास्तु। साप्ततिकः। शदन्तायाः। चात्वारिंशत्कः॥ ११ विरपूपादिभ्य इति यत् अन्नविकारत्वादेव सि द्धे अपूपादीनां प्रतिपदपाठसामर्थ्यात्तदंतविधिर्नेति न्यासग्रंथस्तूपेक्ष्यः कृत्यादिग्रंथविरोधादिति भावः अत एव तत्सूत्रे अपूपादीनां केषांचित्पाठः ग्रंथप्रपंचार्थ इत्यवोचाम इत उर्ध्वमि ति ज्ञापके न तदंतविधौ लब्धेऽपि विशेषव्यवस्थार्थमिदं संख्यापूर्वपदानामिति किम् इह माभूत् परमपारायणं वर्तयति द्विशर्यमिति तद्धितार्थे द्विगुरयं एवाद्विप्रकृतिर्दुर्गंगान· भवति इति संख्यापूर्वपदादप्यस्मात्पूर्वाद्वन्यतरस्यामिति प्राप्तस्या त्रष्ठञो वा अध्यर्द्धपूर्वेति लुक् द्विशौर्पिकमिति परिमाणांतस्येत्युत्तरपदवृद्धिः ठञो द्विगुयति : निमित्ता भावाल्लुगभावः यद्दप्यध्यर्द्धेति सूत्रे द्विगोः परस्याहीयस्य लुगित्येव मूलेव्याख्यास्यते तथापि द्विगोर्निमित्तस्येति व्याख्येयमेव अन्यथा अत्रैव ठञो लुक्स्यादेतच्चाध्यर्द्धेति सूत्रे स्फुटीकरिष्यते तपरः किमिति दीर्घाकारस्य वृद्धौ कृतायामपि रूपे विशेषो नास्तीति प्रश्नः निषेधो न स्यादिति तथा च वृद्धिनिषेधाभावाय तपरकरणमावश्यकमिति भावः इदं च पुंवद्भावनिषेधाभावायादनं पूर्वपदस्य वृद्ध्यभावपक्षे क्रियते यदा तु पूर्वपदस्य पाश्चिकी वृद्धिः क्रियते तदा फलोपधानवृद्धिनिमित्तं तद्धित इत्युत्तरपदाकारस्य वृद्धिनिषे

251

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्राहस्य कनोपवादः चकारोऽसमास इत्यस्यानुकर्षणार्थः द्विशतकमिति द्वे च शतं च तेषां समाहारो द्विशतं ततः कन् प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकीत्यनया
इष्ट्या समासादपि प्राप्नोतीत्यसमास इत्येतस्यानयनमुचितमिति भावः त्यंतशदंतायाः इति त्यंतसहिताशदन्तेष्युत्तरपदलोपी समासः पंचक इति लौकिक्याः संख्याया उ
दाहरणं बहुक इति पारिभाषिक्याः साप्ततिक इति ठञोऽनित्वात् वृद्धिः ठस्येकादेशः यस्येति चेतीकारलोपः अर्थवत्तसिशब्दस्य ग्रहणान्नत्वयववस्यति शब्दस्य पर्युदा
सो न भवति कतिकः चात्वारिंशत्काः इसुसुक्तान्तात्कः॥ ❀ ॥ वतोरिड्वा वतोरितियं पंचमी सा च कनिति प्रथमायाः षष्ठी कल्प्यते इत्याह वत्वन्तात्कन इति तावतिक इति पक्षे

वतोरिड्वा ५।१।२३॥ वत्वन्तात्कन इड्वा स्यात्। तावतिकः। तावत्कः॥ विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम् ५।१।२४॥ योगविभागः कर्तव्यः। आभ्यां ड्वु
न्स्यात्। असंज्ञायान्तु ड्वुन्स्यात्कनोपवादः॥ विंशकः। त्रिंशकः। संज्ञायान्तु विंशतिकः। त्रिंशत्कः। कंसाट्टिठन् ५।१।२५॥ टिड्डीबर्थः। इकार उच्चा
रणार्थः। कंसिकः। कंसिकी। अर्धाच्चेति वक्तव्यं॥ अर्धिकः। अर्धिकी। कार्षापणाट्टिठन्वक्तव्यः। प्रतिरादेशश्च वा॥ कार्षापणिकः। कार्षापणिकी। प्र
तिकः। प्रतिकी। शूर्पादञन्यतरस्याम् ५।१।२६॥ शौर्पं। शौर्पिकं। शतमानविंशतिकसहस्रवसनादण् ५।१।२७॥ ठञ्ठकनामप
वादः। शतमानेन क्रीतं शातमानं। वैंशतिकं। साहस्रं। वासनं। अध्यर्धपूर्वाद्द्विगोर्लुगसंज्ञायाम् ५।१।२८॥ अध्यर्धपूर्वाद्द्विगोश्च परस्यार्हीयस्य
लुक्स्यात्। अध्यर्धकंसं। द्विकंसं। संज्ञायान्तु पाञ्चकलापिकं॥ विभाषा कार्षापणसहस्राभ्याम् ५।१।२९॥ लुग्वा स्यात्। अध्यर्धकार्षापणं। अध्य र्द्ध
र्द्धकार्षापणिकं। द्विकार्षापणं। द्विकार्षापणिकं। औपसंख्यानिकस्य टिठनो लुक्। पक्षे अध्यर्धप्रतिकं। द्विप्रतिकं। अध्यर्धसहस्रं। अध्यर्धसाहस्रं। द्वि
द्विसहस्रं। द्विसाहस्रं। द्वित्रिपूर्वान्निष्कात् ५।१।३०॥ लुग्वा स्यात्। द्विनिष्कं। द्विनैष्किकं। त्रिनिष्कं। त्रिनैष्किकं। बहुपूर्वाच्चेति वक्तव्यम्। बहुनिष्कं। बहुनै

नेभ्य इति वतुप् आ सर्वनाम्न इत्यात्वं। कर्तव्य इति अन्यथा त्यंतशदंतयोः पर्युदासाद्विंशतित्रिंशद्भ्यां कन् दुर्लभ इति भावः विंशक इति तिविंशतेर्डितीति तिशब्दलोपः
अर्धक इति अर्धशब्दस्य कार्षापणार्धे रूढत्वाद्भागवदपेक्षयाऽत्रासामर्थ्यं न शंक्यं प्रकरणादिवशेन भागविशेषविज्ञाने सति नास्त्यसामर्थ्यमिति वा बोध्यम् एतेनार्धशब्द
स्य सापेक्षत्वान्नदंतादेव टिठन् द्रोणार्धिकः प्रस्थार्धिक इति केषांचिदुक्तिः प्रत्युक्ता शूर्पात् शूर्पशब्दस्य परिमाणवाचित्वादत्र मासेऽनदपवादत्वेनाञ्पक्षे विधीयते।

सि·कौ· ठञ्ठकञ्कनामिति शतमानं परिमाणं ननु ठञ्प्राप्तः विंशत्या क्रीतं विंशतिकं संज्ञाशब्दोयं असंज्ञायां हि विंशतित्रिंशद्भ्यामिति वुन् स्यात् संज्ञा च यदि परिमाणस्य तदा
टी·त· ठञ् प्राप्तः अर्थान्तरस्य चेत्तर्हि ठक् प्राप्तः वस्नशब्दात्तु ठगेव सहस्रशब्दस्य संख्यावाचित्वात्तन्न संख्याया अतिशदन्ताया इति कन्प्राप्त इति विवेकः अध्यर्द्धपूर्व अध्यारू
सु·त· ढमर्द्धं यस्मिन् तदध्यर्द्धं प्रादिभ्यो धातुजस्य त्युत्तरपदलोपः अध्यर्द्धशब्दः पूर्वो यस्मिन्निति बहुव्रीहिगर्भबहुव्रीहौ कृते अध्यर्द्धपूर्वं च द्विगुश्चेति द्वन्द्वः सौत्रं पुंस्त्वं द्विगोरि
५२ ति पंचमी न तु षष्ठीत्याशयेन व्याचष्टे अध्यर्द्धपूर्वादित्यादि ॥ दि एतच्च वृत्तिकाररीत्या व्याख्यातं अत्र वार्त्तिकं द्विगोर्लुकि तन्निमित्तग्रहणं द्विगोर्निमित्तं यस्तद्धितस्त
स्य लुगिति वक्तव्यं द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पं द्विशूर्पेण क्रीतं द्विशौर्पिकमिति पूर्वोक्तोदाहरणे ठञो लुङ्मा भूदिति न चैवं द्वयोः शूर्पयोः समाहारो द्विशूर्पी तया क्रीतमिति
विग्रहे द्विशूर्पमिति रूपं न स्यात्तद्धितस्यात्र द्विगोरनिमित्ततया अध्यर्द्धेति लुकोऽप्रवृत्तेः द्विगोः परस्येति व्याख्यायां तु सिद्धमिष्टमिति चेत्सत्यमेवं अर्थविशेषासंप्रत्यये अत
न्निमित्तादपीति वचनान्तरस्य वार्त्तिककृते वोक्तत्वात् यत्र तद्धितार्थे द्विगुना सह अर्थो नाभिधीयते तत्र स तद्धितो यस्य निमित्तं न भवति तस्मादपि द्विगोः परस्य लुगिति व
क्तव्यमिति तस्यार्थः एवं च द्विशूर्पमिति तद्धितार्थे द्विगुना सह द्विशूर्प्या क्रीतमित्यस्यार्थो नाभिधीयते इति समाहाराद्द्विगोः परस्य तद्धितस्य लुग्भवत्येवेति न काप्यनुपपत्तिः
वस्तुतस्तु सूत्रे द्विगोरिति षष्ठीमाश्रित्य द्विगोर्निमित्तं यस्तद्धित इति व्याख्याप्रथमं वार्त्तिकं प्रत्याख्यातुं शक्यं द्विशूर्प्या क्रीतमिति विग्रहे तु द्विशूर्पादेव प्रत्ययो भवत्यव्य
विकल्पायान्तु द्विशूर्पीशब्दादित्याश्रित्य द्वितीयमपि प्रत्याख्यातुं शक्यं न च ध्यर्द्धशब्दः संख्यावाच्येव तथा च लोके गण्यते एकोऽध्यर्द्धो द्वाविति अत एव अध्यर्द्धकमि
ति कन् अध्यर्द्धकं समिति तद्धितार्थे द्विगुः अध्यर्द्धसांवत्सरिकमित्यादौ संख्यायाः संवत्सरसंख्यस्य चेत्युत्तरपदवृद्धिश्च भवति तत्किमध्यर्द्धपूर्वग्रहणेनेति चेत् अत्राहुः
संख्याकार्यमेतस्य किंचिन्नेति ज्ञापनार्थमिदं तेन कन्न द्विगुसमास वृत्तिभ्योऽन्यत्र भवति तद्यथा अध्यर्द्धं करोतीति नेह कृत्वसुच् यः सकृत्फलं तं क्रियामभिनि
र्वृत्य पुनस्तामेव कुर्वन्नमध्ये निवर्त्तते स एवमुच्यते इति पांचकलापिकमिति पंचकलापाः परिमाणमस्येति विग्रहे तद्धितार्थ इति समासः तदस्य परिमाणमिति ठञ् एवं पां
चलोहितिकमपि बोध्यम् पंचलोहिन्यो गुंजाः परिमाणमस्येति विग्रहे पूर्ववत्समासतद्धितौ भस्याढे तद्धित इति पुंवद्भावाल्लोहिनीशब्दस्य ककारनकारयोरभावः परिमा
णविशेषस्य नामधेये एते असंज्ञाग्रहणं प्रत्ययान्तस्य विशेषणं न तु द्विगोः एतच्च वृत्तिकृतां सूत्राशयमनुरुध्य वर्णितमिति इहापि तथैवोक्तं भाष्यवार्त्तिकयोस्तु सं

252

ज्ञाग्रहणं प्रत्याख्यातं तथाहि द्विगुविशेषणमसंज्ञाग्रहणं पंचकलापयं चलोहितशब्दौ च द्विगुरुक्ततन्न तद्धितलुकावेव संज्ञे। यत्तु नाभ्यामुत्पद्यते ठञ् स श्रूयत एव द्विगो
रनिमित्तत्वेन तस्य लुगभावादिति विभाषा टिठनो लुगिति प्रत्यादेशापक्षे तु लुङ् भवति प्रत्यादेशोस्य प्रत्ययसंनियोगशिष्टत्वादिति बोध्यं अध्यर्द्धसहस्रमिति शतमा
नविंशतिकेति विहितस्याणो लुक् तदभावपक्षे तु संख्यायाः संवत्सरसंख्यस्य चेत्युत्तरपदवृद्धिः अध्यर्द्धशब्दः संख्यावाचीत्यधुनैवोक्तत्वात् द्वित्रिपूर्वात् अध्यर्द्धग्र
हणमुत्तरार्थमनुवृत्तमपीह न संवध्यते द्विगोरिति तु संवध्यत एव षष्ठी समासंख्यावर्तेपि तु अत्र च व्याख्यानमेव शरणं द्वित्रिभ्यां निष्कादित्येव सिद्धे पूर्वग्रहणं
चिंत्यप्रयोजनमिति हरदत्तः द्विनैष्किकमिति प्राग्वतेष्ठञ् मतांतरे तु ठगिति मनोरमायां निष्कादिभ्यस्समासे ठगभावात् परिच्छेदकमात्रं गृह्यते इति मतांतरेपि ठ
ञेव भवतीत्यन्ये उन्मानस्यापि परिमाणत्वाद् गोपुच्छेत्यादिना पर्युदस्तत्वाट्ठगभावे निष्कादिभ्यष्ठञ् प्राप्ते असमासे ठग्विधानेपि समासे ठञ् एव प्राप्तत्वादित्यन्ये

विस्ताच्च ।५।१।३१। द्वित्रि पूर्वाद्बिस्तादार्हीयस्य लुग्वा स्यात् । द्विबिस्तं द्वैबिस्तिकमित्यादि । विंशतिकात्खः ।५।१।३२। अध्यर्द्धपूर्वाद्द्विगो
रित्येव । अध्यर्द्धविंशतिकीनं । द्विविंशतिकीनं । खार्या ईकन् ।५।१।३३। अध्यर्द्धखारीकं । द्विखारीकं । केवलायाश्चेति वक्तव्यं । खारीकं । पण
पादमाषशताद्यत् ।५।१।३४। अध्यर्द्धपण्यम् । द्विपण्यं । द्विपाद्यं । अध्यर्द्धपाद्यं । इह पादः पदिति न यस्येति लोपस्य स्थानिवद्भावात् पद्यत्यत
दर्थे इत्यपि न । प्राण्यङ्गार्थस्यैव तत्र ग्रहणात् । शाणाद्वा ।५।१।३५। यत्स्यात्पक्षे ठञ् । तस्य लुक् । अध्यर्द्धशाण्यं । अध्यर्द्धशाणं ॥ ॥

परिमाणांतस्येत्युत्तरपदवृद्धिः द्विगोरिति संवंधान्नेह लुक् द्वयोर्निष्कयोर्द्विनिष्कस्तेन क्रीतं द्वैनैष्किकं अध्यर्द्धपूर्वेत्यसंवंधाद् ध्यर्द्धनैष्किकमित्यत्राप्यनेन लुङ् भवति ।
॥ ॥ विस्ताच्च चकारेण द्वित्रिपूर्वादित्यनुकृष्यते तत्फलं तु चानुकृष्टं नोत्तरत्रेत्युत्तरत्रानुवृत्त्यभावः विंशतिकात्खः शतमानविंशतिकेत्यणि प्राप्ते तस्य च लुकि प्राप्ते खो
ऽत्र विधीयते खार्याः तदस्य परिमाणमिति ठञि प्राप्ते तस्य च लुकि प्राप्ते ईकन् विधीयते कन्विधौ केण इति ह्रस्वः स्यादिकन्विधावपि यस्येति चेति लोपादिष्टं न सिद्ध
तीति भावः प्राण्यंगार्थस्यैवेति अयं भावः पादस्य पदाज्यातिगोपहतेष्विति यत्र प्राण्यंगस्यैव हि पादस्य ग्रहणं तस्यैवाज्यादिषु गतिवचनैस्संवंधसंभवात् तथा च
यद्यतीत्यादावपि तस्यैवानुवृत्तिरिह तु पणमाषाभ्यां साहचर्यात्परिमाणवाचिनो ग्रहणमिति । पक्षे ठञिति । यद्यपि शाणउन्मानं तथाप्यार्हादिति सूत्रे परिमाणग्रहणेन परिमीयते परिछिद्यते अ

सि·कौ· भावेठन्निति भावः मुख्यमतेतु ठगेव बोध्यः शाणाद्वेति सूत्रे शताच्चेति वक्तव्यं पूर्वेणनित्यं प्राप्ते विकल्पार्थं एवं च पूर्वसूत्रे शतग्रहणमकृत्वा शतशाणाभ्यां वेत्येव वक्तुं युक्तमित्याहुः अ
टी·त· ध्यर्द्धशतं अध्यर्द्धशतं पंचशतं पंचशतं यद्भावे संख्याया अतिशदन्तायाः कनो लुक् शताच्च ठन्यतावितितु न प्रवर्तते तत्रासमासग्रहणस्यानुवर्त्तनात्॥ ॥ द्वित्रिपूर्वादण् च वार्त्तिकमिदं
सु·त· वृत्तिकृता सूत्रेषु प्रक्षिप्तं भाष्यादिषु मामाख्यानाच्छतग्रहणमिह संबध्यत इत्याशयेनाह शाणाद्वेत्येवेति न्यासकृता तु एवविधायके वार्त्तिके सूत्रत्वभ्रमेण व्याख्यातं शतशाणाभ्यां वे
५३ ति सूत्रयितव्ये पृथग्यत्नाद्वेति पूर्वसूत्रे शतग्रहणं क्रियते तस्येदं फलं शतशब्दः स्वरितत्वेनानुवर्तमानोऽपि शाणाद्वेत्यत्रैव संबध्यते तदुत्तरसूत्रे द्वित्रिपूर्वादित्यत्र तु न संबध्यते तेन श

द्वित्रिपूर्वादण् च।५।१।३६। शाणादित्येव। चाद्यत्। तेन त्रैरूप्यं। परिमाणान्तस्यासंज्ञाशाणयोरिति पर्युदासादादिवृद्धिरेव। द्वैशाणं। द्विशाण्यं। द्विशाणं। इह ठञादयस्त्रयोदश प्रत्ययाः प्रकृतास्तेषां समर्थविभक्तयोऽर्थाश्चाकाङ्क्षिताः ते इदानीमुच्यन्ते। तेन क्रीतम्।५।१।३७। ठञाद्यो गोपुच्छेन क्रीतं गौपुच्छिकं। साप्ततिकं। प्रास्थिकं। ठक् नैष्किकं। इङ्क्लोप्याः। १।४।५०॥ गोण्याह्रस्वात्तद्धितलुकि लुकोपवादः। पञ्चभिर्गोणीभिः क्रीतः पटः पञ्चगोणिः। तस्य निमित्तं संयोगोत्पातौ।५।१।३८। संयोगः सम्बन्धः उत्पातः शुभाशुभसूचकः। शतिकः। शत्यो धनपतिसंयोगः। शत्यं शतिकं। दक्षिणाक्षिस्पन्दनं शतस्य निमित्तमित्यर्थः। वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानं। वातस्य शमनं कोपनं वा वातिकं। पैत्तिकं। श्लैष्मिकं। सन्निपाताच्चेति वक्तव्यं॥ सान्निपातिकं। गोद्व्यचोः संख्यापरिमाणाश्वादेर्यत्।५।१।३९। गोर्निमित्तं संयोग उत्पातो वा गव्यः। द्व्यचः। धन्यः। यशस्यः। स्वर्ग्यः। गोद्व्यचः किं। विजयस्य वैजयिकः। असंख्येत्यादि किं। पञ्चानां पञ्चकं। साप्तकं। प्रास्थिकं। खारीकं। अश्वादि आश्विकं। आश्मिकं। ब्रह्मवर्चसादुपसंख्यानं॥ ब्रह्मवर्चस्यं। पुत्राच्छ च।५।१।४०। चाद्यत्। पुत्रीयः। पुत्र्यः। सर्वभूमिपृथिवीभ्यामणञौ।५।१।४१। सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः पार्थिवः। सर्वभूमिशब्दोऽनुशतिकादिषु पठ्यते॥ ॥

९ तथाव्यादण्णेति तदिदं सामर्थ्यवर्णनमविधायकं यदि सूत्रं स्यात्तदा संगच्छते नान्यथेत्याशयेनावतात्त्रैरूप्यमिति तदेतद्दर्शयति द्वैशाणमित्यादिना अ ऐयकं ठञोऽत्र किं द्वितीयं यत्तितृतीयं ठञादयस्त्रयोदशेति ननु एकादशैव प्रत्ययाः प्रकृताः सूत्रभेदेन विहितत्वाद्यत्नान्यपस्य द्विर्गणने तु द्वादशेति त्रयोदशत्वं तदुपपादमेव नच पूर्वादन्यतरस्यामित्यन्यतरस्यांग्रहणलब्धठञमादाय त्रयोदशत्वं सूपपादमिति वाच्यम् ॥

253

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुल्यन्यायेन शाणाद्वेति सूत्रलभ्ययन्ठञोर्ग्रहणेन पंचद्व्यात्वप्रसंगात् नापि सूत्रोपात्ते ह्रौ दशभिः सह द्वित्रिपूर्वादण्चेति वार्तिकोपात्ताण्प्रत्ययस्य ग्रहणेनैव निर्वाहः उक्तरी
त्या कंसाट्टिठन्निति सूत्रे अर्द्धाच्चेति वक्तव्यं कार्षापणाट्टिठन् वक्तव्य इत्यादिवार्तिकोक्तटिठन्प्रत्ययस्यापि ग्रहणप्रसंगादिति चेन्न अत्राहुः कंसाट्टिठन् इति सूत्रस्थ ए
व टिठन् अर्द्धकार्षापणशब्दाभ्यां परामृष्ट इति सन्निधीयते द्वित्रिपूर्वादण्चेति वार्तिकस्थात्तु भिद्यते शतमानविंशतिकेत्यत्रो दूरस्थत्वेन परामर्ष्टुमशक्यत्वादिति तेन क्री
तं नैनेति तृतीयान्तात्क्रीतार्थे यथाविहितं प्रत्ययाः स्युः ठञिति आर्हादिति सूत्रे अगोपुच्छेत्यादिपर्युदासाट्ठगभावे गोपुच्छसमतिप्रस्थाभ्यष्ठञ्भवतीत्यर्थः ननु देवदत्तेन क्रीतं पा
णिनां क्रीतं नैषेण क्रीतमित्यादावतिप्रसंग इति चेत् अत्राहुः करणे तृतीयैवेह समर्थविभक्तिः सापि मूल्यद्रव्यसमर्थकाच्छब्दादुत्पन्ना न त्वन्यापि अन्यत्वनभिधानान्नप्र
त्ययः एतच्च तद्धिता इति महासंज्ञाकरणाल्लभ्यते तेभ्यः प्रयोगेभ्यो हिताः तद्धिता इति व्याख्यानादिति लुकोपवाद इति लुक्तद्धितलुकीति प्राप्तस्य स्त्रीप्रत्ययस्य लुकोऽ
पवाद इत्यर्थः पंचकमिति संख्याल्लक्षणः कन् आष्किकमिति अष्कनां निमित्तमित्यर्थे ठक् न तद्धित इति टिलोपः पुत्राच्छ च गोद्यच इति नित्यं यति प्राप्ते वचनं क
थं पुत्रीयः क्रतुरिति नहि क्रतुसंयोगो नाप्युत्पात इति चेत् अत्राह हरदत्तः संयुज्यतेऽनेनेति व्युत्पत्त्या क्रतुरपि संयोग एव यागकरणे न हि पुरुषः फलेन संयुज्यते
अतो यागादिरपि संयोगो न केवलं संबंध एवेत्याग्रह इति सर्वभूमि आभ्यां यथासंख्यमणञौ स्तः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि॰कौ॰ टी॰त॰ सु॰त॰ ५४

तस्येश्वरः तस्यनिमित्तमित्यतो नुवृत्त्यैव सिद्धे पुनस्तस्येति निर्देशो निमित्तरूप प्रत्ययार्थस्य निवृत्तये अन्यथा हि संयोगोत्पातावीश्वरोपि प्रत्ययार्थस्य विशेषणत्वं संभाव्येत तत्र वि
दित इति च योगविभाग उत्तरार्थो यथासंख्यनिवृत्त्यर्थश्च तस्य वापः तस्येति वा पायेक्षया कर्मणि षष्ठीत्याह प्रस्थस्येति कर्तरि षष्ठ्यां तु देवदत्तस्य वापः क्षेत्रमित्यादौ स्यादिति भा

तस्येश्वरः।५।१।४२॥ तत्र विदित इति च।५।१।४३॥ सर्व्वभूमेरीश्वरः सर्व्वभूमौ विदितो वा सार्व्वभौमः पार्थिवः। लोकसर्व्वलोकाट्ठञ्।५।१।४४॥ तत्र
विदित इत्यर्थे। लौकिकः। अनुशतिकादित्वादुभयपदवृद्धिः। सार्व्वलौकिकः। तस्य वापः।५।१।४५॥ उप्यते अस्मिन्निति वापः क्षेत्रं। प्रस्थस्य
वापः प्रास्थिकं। द्रौणिकं। खारीकं। पात्रात्ष्ठन्।५।१।४६॥ पात्रस्य वापः क्षेत्रं पात्रिकं। पात्रिकी क्षेत्रभक्तिः। तदस्मिन्वृद्ध्यायलाभशुल्कोपदा
दीयते।५।१।४७॥ वृद्धिर्दीयत इत्यादिक्रमेण प्रत्येकं सम्बन्धादेकवचनं। पञ्चास्मिन् वृद्धिः आयो लाभः शुल्कमुपदा वा दीयते पञ्चकः। शति
कः। शत्यः। साहस्रः। उत्तमर्णेन मूलातिरिक्तं ग्राह्यं वृद्धिः। ग्रामादिषु स्वामिग्राह्यो भाग आयः। विक्रेत्रा मूल्यादधिकं ग्राह्यं लाभः। रक्षानिर्वेशो रा
जभागः शुल्कः। उत्कोच उपदा। चतुर्थ्यर्थे उपसंख्यानं॥ पञ्चास्मै वृद्ध्यादिर्दीयते पञ्चको देवदत्तः। सममब्राह्मणे दानमिति वदधिकरणवि
वक्षा वा। पूरणार्द्धाट्ठन्।५।१।४८॥ यथाक्रमं एठक् टिठनोरपवादः। द्वितीयो वृद्ध्यादिरस्मिन् दीयते द्वितीयिकः। तृतीयिकः। अर्द्धिकः। अ
र्द्धशब्दो रूपकस्यार्द्धे रूढः॥ भागाद्यच्च।५।१।४९॥ चाट्ठन्। भागशब्दोपि रूपकस्यार्द्धे रूढः। भागो वृद्ध्यादिरस्मिन् भाग्यं। भागिकं शतं। भाग्या भा
गिका विंशतिः। तद्धरति वहत्यावहति भाराद्वंशादिभ्यः।५।१।५०॥ वंशादिभ्यः परो यो भारशब्दस्तदन्तं यत्प्रातिपदिकं तस्मात् ठन् तिका द्वितीयान्ता 254
दित्यर्थः। वंशभारं हरति वहत्यावहति वा वांशभारिकः। ऐक्षुभारिकः। भाराद्वंशादिभ्य इत्यस्य व्याख्यान्तरं। भारभूतेभ्यो वंशादिभ्य इति भारभू
तान्वंशान् हरति वांशिकः। ऐक्षुकः। वस्नद्रव्याभ्यां ठन्कनौ।५।१।५१॥ यथासंख्यं स्तः। वस्नं हरति वहत्यावहति वा वस्निकः॥ द्रव्यकः॥
वः खारीकमिति खार्या ईकन् तदस्मिन् प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति शुल्कग्रहणं प्रपंचार्थं तस्याप्यायविशेषत्वात् तथा च ठगा

CC-0. In Public Domain. Digitization by eGangotri

प्रस्थान्नेभ्य इति ठञ् भवति शौल्कः शाल्किक इति हरदत्तः उपदादीयत इति जसस्तस्य फलत्वे यत्वे च यलोपः साहस्र इति शतमानेत्यादिना अण् रक्षा निर्वेश इति निर्वेशो भृतिः रक्षा निमित्तको
निर्वेशः संबंधषष्ठ्या समासः समम् इत्यादि एवं च संप्रदानस्य वाधिकरणत्वविवक्षयेष्टसिद्धौ उपसंख्यानं नादर्तव्यमिति भावः पूरणार्द्धाट्ठन् पूर्यतेऽनेनेति पूरणोऽर्थः स इदानीं इ
शब्दाच्चेठन् स्यात् आर्द्धिक इति अर्द्धाच्चेति वक्तव्यमिति टिठन् प्रासः सति च तस्मिन् स्त्रियां ङीप् स्यात् रूप्यते तत्र टाप् रूपकस्येति रूपकं कार्षापणं रूढ इति तथा च भागवद्रूप्यसापे
क्षत्वे नासामर्थ्यमिह नोद्भावनीयमिति भावः भारभूतेभ्यो वंशादिभ्य इति ननु वंशादयश्शब्दास्ते कथं भारभूता इत्यत आह भारभूतानिति भारशब्दोऽर्थद्वारा वंशादीनां विशेषणं।

सम्भवत्यवहरति पचति।५।१।५२॥ प्रस्थं सम्भवति प्रास्थिकः। कटाहः। प्रस्थं स्वस्मिन् समावेशयतीत्यर्थः। प्रास्थिकी ब्राह्मणी। प्रस्थमुपसंहरति पचति
वेत्यर्थः। तत्पचतीति द्रोणादण् च। चाट्ठञ्। द्रोणम्पचतीति द्रौणी। द्रौणिकी। आढकाचितपात्रात् खोऽन्यतरस्याम्।५।१।५३॥ पक्षे ठञ्। आढकं सम्भवति
अवहरति पचति वा आढकीना। आढकिकी। आचितीना आचितिकी। पात्रीणा। पात्रिकी। द्विगोः ष्ठंश्च।५।१।५४॥ आढकाचितपात्रादित्येव। आढका
द्यन्ताद् द्विगोः सम्भवत्यादिष्वर्थेषु ष्ठन् खौ वा स्तः। पक्षे ठञ्। तस्याध्यर्द्धेति लुक्। षित्वान् ङीष्। द्व्याढकिकी। द्व्याढकीना। द्विगोरिति ङीप्। द्व्याढकी। द्व्याचिति
की। द्व्याचितीना। अपरिमाणेति ङीप् निषेधात् द्व्याचिता। द्विपात्रिकी। द्विपात्रीणा। द्विपात्री। कुलिजाल्लुक्खौ च।५।१।५५॥ कुलिजान्ताद् द्विगोः सम्भ
वत्यादिष्वर्थेषु लुक् खौ वा स्तः। चात् ष्ठंश्च। लुगभावे ठञः श्रवणात् द्विकुलिजी। द्वैकुलिजिकी। द्विकुलिजीना। द्विकुलिजिकी। सोऽस्यांशवस्नभृतयः।५।
।१।५६॥ अंशो भागः। वस्नं मूल्यं। भृतिर्वेतनं। पञ्च अंशो वस्नो भृतिर्वाऽस्य पञ्चकः॥ ११ मिति भावः भारेभ्य इति वक्तव्ये प्रत्येकं संबंधविवक्षया सूत्रे भारा
दिति निर्देशः वस्निक इति वस्नं मूल्यं॥ ॐ ॥ संभवत्यवहरति आधारप्रमाणाद् आधेयप्रमाणस्य यदनाधिक्यं तदुपसर्जनं धारणं संभवतेरर्थस्तेन सकर्मकत्वान्नद् इति द्विती
यान्तानुवृत्तिर्न विरुध्यते तदाह प्रस्थं स्वस्मिन्निति प्रास्थिकीति ठञन्तत्वान् ङीप् अवहरतीत्यत्र व्याचष्टे उपसंहरतीति तत्पचतीति वार्तिकेऽस्मिन् पचति ग्रहणं संभव
त्यवहरतिनिवृत्त्यर्थं द्रोणपरिमिते ब्रीह्यादौ द्रोणशब्दो लाक्षणिकः पक्षे ठञिति आढकादीनां परिमाणत्वाट्ठञिति भावः द्विगोः ष्ठंश्च षनिति छेदः तदाह षित्वादिति द्व्याढ
किकीति नपुंसाभ्यामित्यैजागमो न शंक्यः वृद्धिनिषेधसन्नियोगेन तद्विधानाद् ष्ठञ्श्च प्राप्त्यभावात् अपरिमाणेति आचितस्य परिमाणत्वेपि तस्मिन् सूत्रे विशिष्य ग्रहणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· दितिभावः द्वैकुलिजिकीति असंज्ञाशाणयोरित्यत्र कुलिजशब्दोपि इष्यते तेनोत्तरपदवृद्धिर्नेत्याहुः॥ ॥ तदस्यपरिमाणं इह परिमाणशब्देन परिच्छेदकमात्रं गृह्यते तेन नु
टी·त· सर्वतोमानमेव उत्तरसूत्रे संख्यायाः परिमाणेन विशेषणात् षष्टिर्जीवितं परिमाणमस्य षाष्टिकः सोस्येति वर्तमाने पुनस्तदस्येति ग्रहणाद्द्वे षष्टी जीवितं परिमाणमस्य द्विषा
सु·त· ष्टिकस्त्रिषाष्टिक इत्यादावध्यर्द्धेति लुङ् भवति स्पष्टं चेदं काशिकादौ पूर्वसूत्रमिति तेन पंच गावः परिमाणमस्य पंचको गोसंघ इत्यादि सिध्यति यदा तु प्रकृत्यर्थस्यैव प
५५ रिच्छेदिका संख्या पंच गावोस्य संघस्येति तदा तु प्रत्ययो न भवति परिमाणस्य प्रत्ययार्थत्वाभावात् एतच्च आर्हादगोपुच्छेति सूत्रे कैयटे स्पष्टं स्वार्थे उदाहरति पंचैवेति।
स्तोमे डविधिरिति डित्करणमेकविंश इत्यत्र तिलोपार्थं त्रयस्त्रिंशादौ टिलोपार्थं च पंचदशमंत्रा इति साम्नां स्तुवीत एकं साम तृचे क्रियत इति हि श्रुतिः तत्र तृचस्य पंच

तदस्य परिमाणम्।५।१।५७॥ प्रस्थः परिमाणमस्य प्रास्थिको राशिः॥ संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु।५।१।५८॥ पूर्वसूत्रमनुवर्त्तते। तत्र संज्ञायां स्वार्थे प्रत्ययो वाच्यः। यद्वाद्व्येकयोरितिवत्संख्यामात्रवृत्तेः परिमाणिनि प्रत्ययः। पञ्चैव पञ्चकाः शकुनयः। पञ्च परिमाणमेषामिति वा सङ्घः पञ्चकः। सूत्रे अष्टकं पाणिनीयं। सङ्घशब्दस्य प्राणिसमूहे रूढत्वात् सूत्रग्रहणं। पञ्चकमध्ययनं। स्तोमे डविधिः। पञ्चदश मन्त्राः परिमाणमस्य पञ्चदशाः। सप्तदशाः। एकविंशाः। सोमयागेषु छन्दोगैः क्रियमाणपृष्ठ्यादिसंज्ञिका स्तुतिः स्तोमः। पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम्।५।१।५९॥ एते रूढिशब्दा निपात्यन्ते॥

॥ १९ कृत्व आवृत्त्या पंचदश मंत्राः सप्तदशे स्तोमे अंत्याया ऋचः सप्तकृत्व आवृत्तिः प्र
थममध्यमयोस्तु पंचकृत्व एव एकविंशे स्तोमे तु तृचस्य सप्तकृत्व आवृत्तिरिति ज्ञेयं छंदोगैरिति सामगैरित्यर्थः॥ पंक्तिविंशति तदस्य परिमाणमिति वर्त्तते पंचन्शब्दस्य
टिलोपः तिप्रत्ययश्च चोः कुरिति कुत्वं पंच पदानि परिमाणमस्य पंक्तिश्छंद इति काशिका पदशब्दोऽत्र पादपर्याय इति हरदत्तः रूढिशब्दा इति तथा चात्रावयवार्थोऽभि
निविष्टोयं पंक्तिशब्दो हि नानार्थः अतिक्रमसंनिवेशो ग्रामलक्षणपंक्तिः पिपीलिकापंक्तिरिति अस्ति च दशसंख्यायां पंक्तिरथ इति दशरथ इत्यर्थः अस्ति हि छंदोवि 255
शेषे यस्य पंचाक्षराः पंचपादाः तथा च छंदो विशेषे 'एवावयवार्थो नान्यत्रेति बोध्यं द्वयोर्दशतोर्विन्भावः शतिश्च प्रत्ययः अपदत्वं च द्वौ दशतौ परिमाणमस्य विं
शतिः अपदत्वनिपातनान्नकारस्यानुस्वारः केचित्तु विन्भावमुक्त्वा अपदत्वं चेति न पठंति त्रयाणां दशतां त्रिन्भावः शच्च प्रत्ययः मतांतरे तु त्रिंभावः त्रयो दशतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिमाणमस्य त्रिंशत् एवं चतुर्णां चत्वारिन् पंचानां पंचा आभ्यामपि शत्प्रत्ययः षण्णां दशतां षष् तिश्च प्रत्ययः अपदत्वं च षट् दशतः परिमाणमस्याः षष्टिः ततस्तिभ्योपि तिप्र
त्यय एव सप्तानां दशतां सप्त अष्टानां दशतां अशी नवानां दशतां नव दशानां दशतां शभावः तिश्च प्रत्ययः दश दशतः परिमाणमस्य शतं॥ ॥ पंचद्दशतौ इमौ डत्यंतत्वे
न निपात्येते वर्गेऽभिधेये तदस्य परिमाणमित्यनुवर्त्तत एव दशादिति दशपरिमाणमस्य पक्षे इति वाग्रहणात्संख्याया इति कन्नपि भवतीति भावः त्रिंशच्चत्वारिंशतोः व्यत्य
येन पंचम्यर्थे षष्ठी द्विवचनं चत्वारिंशताब्राह्मणे इति पाठे तु समाहारद्वंद्वात्पंचम्येकवचनं इह ब्राह्मणसंज्ञायामिति षष्ठीसमासेन निर्देष्टुमुचितं तथा हि सति ब्राह्मणस्य वे
त्संज्ञेति स्फुटी भवति अन्यथा यस्य कस्यचित्संज्ञायां ब्राह्मणस्य च प्रयोगे इत्यनिष्टोऽर्थः संभाव्येत ततश्च मंत्रे भाषायां च डण् न सिध्येदिष्यते च सः तस्मादिष्टानुरोधेन षष्ठ्य

पञ्चद्दशतौ वर्गे वा ।५।१।६०॥ पञ्च परिमाणमस्य पञ्चद्वर्गः। दशत्। पक्षे पञ्चकः। दशकः। त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण्।५।१।६२
त्रिंशदध्यायाः परिमाणमेषां ब्राह्मणानां। त्रैंशानि। चात्वारिंशानि। तदर्हति।५।१।६३॥ लब्धुं योग्यो भवतीत्यर्थे ठिञादयः स्युः। श्वेत
च्छत्रमर्हति श्वैतच्छत्रिकः। छेदादिभ्यो नित्यम्।५।१।६४॥ नित्यमाभीक्ष्ण्यम्। छेदं नित्यमर्हति छैदिको वेतसः। छिन्नप्ररूढत्वात्। विराग विरङ्गं च॥
विरागं नित्यमर्हति वैरागिकः। वैरङ्गिकः। शीर्षच्छेदाद्यच्च।५।१।६५॥ शिरश्छेदं नित्यमर्हति शीर्षच्छेद्यः। शैर्षच्छेदिकः। यद्ठकोः सन्नियोगेन शिरसः शी
र्षभावो निपात्यते॥ दण्डादिभ्य ।५।१।६६॥ एभ्यो यत्स्यात्। दण्डमर्हति दण्ड्यः। अर्घ्यः। वध्यः। पात्रात् घंश्च।५।१।६८॥ चाद्यत्। तदर्हतीत्यर्थे। पात्रियः

र्थे सप्तमीति व्याख्येयं ब्राह्मणेऽभिधेये इति तु काशिकायां व्याख्यातं ठञादय इति ठञ उदाहरणं तु प्रस्थमर्हति प्रास्थिकः द्रौणिक इत्यादृत्यं आदिशब्दग्राह्यस्य ठक उदाहरण
माह श्वैतच्छत्रिक इति एवं खारीकः प्रास्थः शतिकः साहस्र इत्यादीन्युदाहर्त्तव्यानि छेदादिभ्यो नित्यं नित्यग्रहणमिह नित्यं क्रीडाजीविकयोरित्यत्रेव महाविभाषया समस्य वाक्य
स्य निवृत्त्यर्थं न भवति आरम्भसामर्थ्यादेव तन्निवृत्तिसिद्धेः किंतु प्रत्ययार्थविशेषणमिति ध्वनयति छेदं नित्यमर्हतीति भाष्ये तु नित्यग्रहणं प्रत्याख्यातं सूत्रमेव मास्त्विति तदा
शय इति मनोरमा अयं भावः नित्यग्रहणमिह प्रत्ययार्थविशेषणं न भवति नित्यं छेदमर्हतीत्य र्थस्यासंभवात् नहि कश्चित्सदा नित्यं छेदमर्हति योपि वेतसादिरर्थी।
च्छिन्नः प्ररोहति सोपि न नित्यं छेदमर्हति कालांतर एव तस्य छेदप्रवर्तनात् न चात्र नित्यग्रहणत्यागे पि छेदमर्हतीत्यादिविग्रहवाक्यनिवृत्तये सूत्रस्यावश्यकत्वात् तत्र।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ·
टी·त·
सु·न·
९९

त्याख्यानं न युज्यत इति शंक्यं विग्रहवाक्यस्य भाष्यादिसंमतत्वादिति दिक् ॥ छेद भेद द्रोह दोहेत्यादयश्छेदादयः गणसूत्रमाह विरागेति दंडादिभ्यः पूर्वसूत्राद्यदनुवर्त्तत इत्या
हयत्स्यादिति केचित्तु दंडादिभ्यो य इति पठंति स चापपाठ एव भाष्यादिविरोधादित्याहुः तथाहि अचो यदिति सूत्रे भाष्ये उक्तं हनो वा यत् वधादेशश्च वध्यः घात्यः तद्धि
तो वा वधमर्हतीति वध्य इति यदि चेह यद्विधीयेत तदैवैतदुपपद्यते पक्षद्वयेपि यतो नावश्यत्वाद्युदात्तत्वात् यदि त्वत्र यो विधीयेत तदा स्वरो भिद्येत मनोरमायां तु क्वचिद् घो हनो वाव
घस्तद्धितो वेति भाष्यं यदि चेह यद्विधीयेत तदैवैतदुपपद्यते काष्ठाद्युदात्तत्वं प्रत्ययपि तद्धितेयतो नावश्यत्वाद्युदात्तत्वमित्यादि स्थितं ॥ ॐ ॥ कडंकरदक्षिणाच्छ च कडंगरे
ति पाठस्तूपेक्ष्य इति ध्वनयति कडंकरो नीति कडमरे कडनीनीति कडः माषमुद्गादिकाष्ठमिति अमरश्चाह कडंकरं बुसं क्लीवमिति गोरिति नीवारयवादिक डंकरीये

कडङ्करदक्षिणाच्छ च ।५।१।६९॥ चाद्यत् । कडङ्करानीतीति विग्रहे अत एव निपातनात् त्वचा । कडङ्करं माषमुद्गादिकाष्ठमर्हतीति कडङ्करीयो गौः
कडङ्कर्यः । दक्षिणामर्हतीति दक्षिणीयः । दक्षिण्यः । स्थालीबिलात् ।५।१।७०॥ स्थालीबिलमर्हन्ति स्थालीबिलीयास्तण्डुलाः । स्थालीबिल्याः । पा
कयोग्या इत्यर्थः ॥ यज्ञर्त्विग्भ्यां घखञौ ।५।१।७१॥ यथासंख्यं स्तः । यज्ञं ऋत्विजश्चार्हतीति यज्ञियः । आर्त्विजीनो यजमानः । यज्ञर्त्विग्भ्यां तत्कर्मार्ह-
तीत्युपसंख्यानम् ॥ यज्ञियो देशः । आर्त्विजीनमृत्विक्कुलम् । आर्हीयाणां ठगादीनां द्वादशानामपूर्णोऽवधिः ॥ अतः परं ठञेव ॥ पारायणतुरायणचा-
न्द्रायणं वर्तयति ।५।१।७२॥ पारायणं वर्तयति पारायणिकश्छात्रः । तुरायणं यज्ञविशेषः तं वर्तयति तौरायणिको यजमानः । चान्द्रायणिकः ॥

रिति रघुः ॥ स्थालीबिलात् छयतावनुवर्तेते । अस्माच्छयतोस्तः ठकोपवादः । पाकयोग्या इति । निष्फलीकृता इति यावत् । यज्ञं ऋत्विजं वार्हतीति । अर्थासमर्थो विद्वान् शास्त्रेण पर्युदस्त इत्यर्थः
देशस्यानेवंविधत्वादुपसंख्यानं । यज्ञियो देश इति । यज्ञानुष्ठाने योग्य इत्यर्थः । ऋत्विगिति । सत्तु ऋत्विक्कर्मार्हतीति न तु ऋत्विजमिति सूत्रेण खञोऽप्राप्तावुपसंख्यानं । आर्हीयाणां ठ
गादीनां गणो वधिः पारायणं आदित आरभ्य आंतादविच्छेदेन वेदस्याध्ययनं पारायणं तच्च गुरुणा शिष्येण वा निवर्त्यते । अन्यतरासन्निधौ अध्ययनक्रियाया अनिष्पादनात्तथापि शिष्य
एव प्रत्यय इष्यते न तु गुरौ विद्याकरे स्थितं तदाह छात्र इति । यजमान इति । यद्यपि पुरोडाशादिनिर्वर्त्तने न ऋत्विगपि यज्ञं निर्वर्त्तयति तथापि तत्र तौरायणिक इति न प्रयुज्यते । अन
भिधानादिति भावः । चांद्रायणं तपोविशेषः । विषयीभूतो र्थ इति । स्थाणुर्वा पुरुषो वेति संशयविषयीभूते स्थाण्वादावेव प्रत्यय इष्यते न तु संदेग्धरीति भावः । कथं तर्हि सांश

256

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यिकः संशयमापन्नमानस इति चेदत्राह । संशयमापन्नं मानसं यस्मिन्विषये स विषयः ॥ ❁ ॥ संशयापन्नमानस इति । ततोभिगमनमिति । अत्र पंचम्यन्तात्प्रत्ययः पंथो ॥ पथः पंथ इत्ययमादे
शः णश्च प्रत्ययः । नित्यग्रहणमिह प्रत्ययार्थविशेषणं न तु वाक्यनिवृत्त्यर्थमित्याशयेनाह नित्यं गच्छतीति । नित्यमिति किं । पथिकः । भाष्ये तु नित्यग्रहणं प्रत्याख्यातं । अयं हि भा

संशयमापन्नः ॥ ५।१।७३ ॥ संशयविषयीभूतोर्थः सांशयिकः । योजनं गच्छति ॥ ५।१।७४ ॥ योजनिकः । क्रोशशतयोजनशतयोरुपसंख्यानम् ॥ क्रोश
शतं गच्छति क्रौशशतिकः । यौजनशतिकः । ततोभिगमनमर्हतीति च वक्तव्यम् ॥ क्रोशशतादभिगमनमर्हतीति क्रौशशतिको भिक्षुः । यौजनश
तिक आचार्यः । पथः ष्कन् ॥ ५।१।७५ ॥ षोडीवर्थः । पन्थानं गच्छति पथिकः । पथिकी । पंथो ण नित्यम् ॥ ५।१।७६ ॥ पन्थानं नित्यं गच्छति
पान्थः । पान्था । उत्तरपथेनाहृतं च ॥ ५।१।७७ ॥ उत्तरपथेनाहृतं औत्तरपथिकम् । उत्तरपथेन गच्छति औत्तर
पथिकः । आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्वादुपसंख्यानम् ॥ वारिपथिकं । कालात् ॥ ५।१।७८ ॥ ग्रुष्ठादिभ्यो लिप्यतः प्रागधिक्रियते । ते
न निर्वृत्तं ॥ ५।१।७९ ॥ अह्ना निर्वृत्तमाह्निकं ॥ तमधीष्टो भृतो भूतो भावी ॥ ५।१।८० ॥ अधीष्टः सत्कृत्य व्यापारितः । भृतो वेतनेन क्रीतः । भूतः स्वसत्ता
याव्याप्तकालः । भावी तादृश एवानागतकालः । मासमधीष्टः मासिको ध्यापकः । मासम्भृतो मासिकः कर्मकरः । मासम्भूतो मासिको व्याधिः । मास
म्भावी मासिक उत्सवः । मासाद्वयसि यत्खञौ ॥ ५।१।८१ ॥ मासम्भूतो मास्यः । मासीनः । द्विगोर्यप् ॥ ५।१।८२ ॥ मासाद्वयसीत्यनुवर्तते । द्वौ मासौ भूतो
द्विमास्यः । षण्मासाण्ण्यच्च ॥ ५।१।८३ ॥ वयसीत्येव । यवप्यनुवर्तते चादुत्र । षण्मास्यः । षाण्मास्यः । षाण्मासिकः । अवयसि ठँश्च ॥ ५।१।८४ ॥ चाण्ण्य
तः । षाण्मासिको व्याधिः ॥ षाण्मास्यः । समायाः खः ॥ ५।१।८५ ॥ समामधीष्टो भृतो भूतो भावी वा समीनः ॥

११ व्याशयः । नित्यं पन्थानं गच्छतीत्यर्थो न्यथा
पि संभवति तथापि नात्रैवार्थे पांथशब्दस्य प्रयोग इष्यते । कदाचिद्गच्छत्यपि तत्प्रयोगात् । न चैवमपि विग्रहवाक्यनिवृत्त्यर्थं नित्यग्रहणमस्त्विति शंक्यम् शिष्टप्रयोगे विग्रहवा
क्यस्यादर्शनादिति । उत्तरपथेन । चकारेण गच्छतीति प्रत्ययार्थः समुच्चीयते तदाह उत्तरपथेन गच्छतीति वारिपथिकमिति । वारिपथेन गच्छति वारिपथेनाहृतमिति वावि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कालात्। स्वरूपग्रहणमिह न भवति तमधीष्टो भृतो भूतो भावीत्यस्यं तत्संयोगे द्वितीयानिर्देशात्। मासादयस्तीत्यादौ मासादीनां कालविशेषणत्वाच्च। तेन निर्वृत्तं। तृतीयान्तात्का
लवाचिनष्ठन्स्यात्। तेनेति करणे तृतीया। चतुर्थ्यन्तर्गतं तेन निर्वृत्तमित्यत्र तु कर्तरि तृतीयेति विशेषः। उभयत्राप्ययं नर्माविनस्यपर्याहृतेः कर्मणि क्तः। आह्निकमिति। अन्हष्ट
खोरेवेति नियमान्नलहितइति टिलोपो न मासाहूयसि। खञो ञित्करणं स्वरार्थं पुंवद्भावप्रतिषेधार्थं च। मासीना भार्या। अधीष्टादीनां चतुर्णामधिकारे पि सामर्थ्यानुभूतइ
त्येन स्वसंबध्यते। न हि मासमधीष्टो भृतो वेत्याद्युक्तौ काचित्कालकृतां शरीरावस्थां गम्यत इत्याशयेनाह। मासंभूतइति। एतच्च वृत्तिपदमञ्जर्योः स्पष्टं। मासीन इति। बालकः
द्विगोर्यप्। प्राप्तवतेः संख्यापूर्वपदानां तदन्तविधेरभ्युपगमात्पूर्वेण यत्खञोः प्राप्तयोर्यप् विधीयते पित्वादनुदात्तः। तेन द्विमास्य इत्यादाविगन्तकालेत्यादिना पूर्वपदप्रकृ
तिस्वरोऽवतिष्ठते। यद्युक्ते तु प्रत्ययस्योदात्तत्वादन्तोदात्तो द्विमास्यः स्यात् सतिशिष्टस्वरबलीयस्त्वादिति भावः। यवप्यनुवर्तत इति। व्याख्यानमेव प्रमाणं। समायाः खः। हायनो

द्विगोर्वा। ५।१।८६। समायाः ख इत्येव। तेन परिजय्येत्यतः प्राक् वृत्तादिषु पञ्चस्वर्थेषु प्रत्ययाः। द्विसमीनः। द्वैसमीकः। रात्र्यहःसंवत्सराच्च। ५।१।८७
द्विगोरित्येव। द्विरात्रीणः। द्वैरात्रिकः। द्व्यहीनः। द्वैयह्निकः। समासान्तविधेरनित्यत्वान्न टच्। द्विसंवत्सरीणः। संख्यायाः संवत्सरसंख्यस्य च। ७।३।
१५। संख्याया उत्तरपदस्य वृद्धिः स्यात् ञिदादौ। द्विसांवत्सरिकः। द्वेषष्टीभृतो द्विषाष्टिकः। संख्यायाः परिमाणं तस्येत्येव सिद्धे संवत्सरग्रहणं परिमा द्विगु
णग्रहणे कालपरिमाणस्याग्रहणार्थं। तेन द्वैसमीक इत्युत्तरपदवृद्धिर्न। वर्षाल्लुक्च। ५।१।८८। वर्षशब्दान्ताद्द्विगोर्वा खः। पक्षे ठञ् वा च लुक्। त्रीणि

स्त्री शरत्समा इत्यमरः। समामधीष्ट इत्यादि। अधीष्टादयश्चत्वारोऽर्था अत्राप्यनुवर्तन्त इति भावः॥ ॥ द्विगोर्वा। संख्यायाः पूर्वपदानां तदन्तग्रहणमलुकीत्यभ्युपगमात्पूर्वेण नि
त्ये प्राप्ते विकल्पः। द्वैसमक इति। खेन मुक्ते पक्षे ठञिति भावः। द्वैयह्निक इति। टखोरेवेति नियमादिह टिलोपो न। अल्लोपोऽनः न्याय्यामित्येवं न तद्धितार्थेति द्विगुसमासानन्तरं रात्र्यह
संवत्सराच्चेत्येवं बाधित्वा परत्वाट्टचा भाव्यं न च महाविभाषया टचो विकल्प इति वाच्यं। वृहती जात्यन्ताः समासान्ता इति नियमेन परिगणनादित्यत आह। समासान्तविधेरिति। यद्यपि ५७
टचि कृतेप्यह्नादेशेन द्वैयह्निक इति रूपं सिध्यति तथापि द्व्यहीन इति रूपं न सिध्यति टचि सत्यह्नादेशे तस्य स्थानिवत्वाद्राजाह इति समासान्तस्याहःशब्दान्तसमासग्रहणेन
ग्रहणाच्च रात्र्यहःसंवत्सराच्चेति खप्रत्यये कृतेपि द्व्यहीन इति रूपप्रसंगादित्याहुः। उत्तरपदवृद्धिर्नेति। एतच्चोपलक्षणं। द्विवर्षेत्यत्र द्विगोरिति ङीप्न भवति। परि

257

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माणपर्युदासेन पर्युदासाभावात्परिमाणविस्ताचितेत्तीहनिषेधप्रवृत्तेः। द्वैवर्षभृतेतमधीष्टइनिठञ्वर्षाल्लुक्चेतिलुक्। चितवतिनित्यमितिनित्यंलुकोवक्ष्यमाणत्वाद
चित्तवानिहप्रत्ययार्थइत्युदाहरन्ति॥ ॥ द्विवर्षीणोव्याधिरिति। द्विवार्षिकोमनुष्यइति। अत्रवदन्ति। मनुष्येचित्तवत्तीतिनित्यंलुक्प्रसंगान्मनुष्योमनुष्यसदृशःन

द्विवर्षीणोव्याधि. ।द्विवर्षः वर्षस्याऽभविष्यति ७।३।१६॥ उत्तरपदस्यवृद्धिस्यात्। द्विवार्षिकः। भविष्यतितुद्वैवर्षिकः अधीष्टभृतयोरभवि
ष्यतीतिप्रतिषेधोन। गम्यतेहितत्रभविष्यत्ता नतुतद्धितार्थः। द्वेवर्षेअधीष्टोभृतोवाकर्मकरिष्यतीतिद्विवार्षिकोमनुष्यः। परिमाणान्तस्याऽसंज्ञाशा
णयोः ७।३।१७॥ द्वौकुडवौपरिमाणमस्यद्विकौडविकः। द्वाभ्यांसुवर्णाभ्यांक्रीतंद्विसौवर्णिकम्। द्विनैष्किकम्। असंज्ञेतिकिम्। पञ्चकलायाः परिमा
णमस्यपाञ्चकलायिकम्। नह्यत्रतद्धितान्तःसंज्ञेया। द्वैशाणम्। कुलिजशब्दमपिकेचित्पठन्ति। द्वैकुलिजिक। चित्तवतिनित्यम् ५।१।८९॥ वर्षशब्दान्ताद्द्विगोः
प्रत्ययस्यनित्यंलुक्स्यात्। चेतनेप्रत्ययार्थे। द्विवर्षोदारकः। षष्टिकाःषष्टिरात्रेणपच्यन्ते ५।१।९०॥ बहुवचनमतन्त्रं। षष्टिकोधान्यविशेषः। तृतीयान्ता
त्कन्। रात्रशब्दलोपश्चनिपात्यते। तेनपरिजय्यलभ्यकार्य्यसुकरम् ५।१।९३॥ मासेनपरिजय्योजेतुंशक्योमासिकोव्याधिः। मासेनलभ्यङ्कार्य्यंसुक
रम्वामासिकम्। तदस्यब्रह्मचर्य्यम् ५।१।९४॥ द्वितीयान्तात्कालवाचिनोस्येत्यर्थेप्रत्ययस्स्यात्। अत्यन्तसंयोगेद्वितीया। मासंब्रह्मचर्य्यमस्य मा
सिकोब्रह्मचारी। आर्द्धमासिकः। यद्वा। प्रथमान्तादस्येत्यर्थेप्रत्ययः। मासोस्येतिमासिकंब्रह्मचर्य्यं। महानाम्न्यादिभ्यःषष्ठ्यन्तेभ्यउपसंख्यानम्॥ म
हानाम्न्योनामविद्यामघवन्नित्याद्याऋचः। तासांब्रह्मचर्य्यमस्यमाहानाम्निकः। हरदत्तस्तुभस्याढइतिपुंवद्भावान्माहानामिकइत्याह। चतुर्म्मासा
ण्ण्योयज्ञे॥ तत्रभवइत्यर्थे। चतुर्षुमासेषुभवनिचातुर्म्मास्यानियज्ञाः अणसंज्ञायां चतुर्षु र्मासेषुभवतिचातुर्म्मासी। अणन्तत्वान्ङीप्। पौर्णमासी
तिमादिरितिव्याख्यायस्थितस्यगतिः समर्थनीयेति। दारकइति। बालकः। परिजय्येत्यस्यविवरणंजेतुंशक्यइति। क्षय्यजय्यौशक्यार्थइत्ययादेशः। महानाम्न्योनामे
ति। तथाचाभाषितपुंस्कत्वात्पुंवद्भावोनेतिभावः। हरदत्तस्त्विति। योगिकोयंनतुरूढइतिमन्यते। महानामिकइति पुंवद्भावेकृतेनस्तद्धितइतिटिलोपः। चतुर्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ मासादिति। मासशब्दस्य कालवाचित्वात्कालाधिकारे वार्त्तिकारंभः। नच विशिष्टस्य कालवाचित्वाभावादिह संगतिर्दुर्निरूपेति शंक्यं। प्राग्वतस्संख्यापूर्वपदानां तदंतग्रहणमित्यभ्युपग
टी·त· मादस्त्येव संगतिरिति। अणसंज्ञायामिति। तत्रभव इत्यनेनैव सिद्धे पुनरण्विधिर्हि गोर्त्तेग न यत्य इति लुङ्मा भूदित्येतदर्थमिदमत्रारब्धं एवं चास्मिन् वार्त्तिके चतुर्मासादिन्यस्या
सु·त नुवृत्त्यैव पूर्ववार्त्तिकमत्रैवारब्धमित्यपि ज्ञेयं। चातुर्मासीति कस्य संज्ञेत्याकांक्षायामाह। आषाढीति। अषाढानक्षत्रयुक्ता पौर्णमासीत्यर्थः। तस्य दक्षिणा। यक्ष्यं तेभ्यो यज्ञाख्ये
५८ भ्यो दक्षिणेत्यस्मिन्नर्थे ठञ् स्यात्। कालाधिकारादेवेह द्वादशाहादिभ्यः सिद्धे आख्याग्रहणं व्यर्थमित्याशंकां परिहरति। आख्याग्रहणादिति। तत्र च। कालवाचिनः सप्तम्यंता

तस्य दक्षिणा यज्ञाख्येभ्यः। ५।१।९५॥ द्वादशाहस्य दक्षिणा द्वादशाहिकी। आख्याग्रहणादकालादपि। आग्निष्टोमिकी। वाजपेयिकी। तत्र च दीयते
कार्य्यं भववत्। ५।१।९६॥ प्रावृषि दीयते कार्य्यं वा प्रावृषेण्यं। शारदं॥ कालाधिकारस्य सम्पूर्णोऽवधिः॥ व्युष्टादिभ्योऽण्। ५।१।९७॥ व्युष्टे दीयते।
कार्य्यं वा वैयुष्टं। व्युष्ट तीर्थ संग्राम प्रवास इत्यादि। तेन यथाकथाच हस्ताभ्यां णयतौ। ५।१।९८॥ यथाकथाचेत्यव्यय संघातात्तृतीयान्ताद्धस्ता
च्च यथासंख्यं णयतौ स्तः। अर्थाभ्यां तु यथासंख्यं नेष्यते। यथाकथाच दीयते कार्य्यं वा याथाकथाचं। अनादरेण देयं कार्यं वेत्यर्थः। हस्तेन दीयते का
र्य्यं वा हस्त्यं। सम्पादिनि। ५।१।९९॥ तेनेत्येव॥ कर्णवेष्टकाभ्यां सम्पादि कार्णवेष्टकिकं मुखं। कर्णालङ्काराभ्यामवश्यं शोभत इत्यर्थः। कर्म्मवेषाद्य
त्। ५।१।१००॥ कर्म्मणा सम्पादि कर्म्मण्यं। शौर्य्यं। वेषेण सम्पादि वेष्यो नटः। वेषः कृत्रिम आकारः। तस्मै प्रभवति सन्तापादिभ्यः। ५।१।१०१॥ सन्तापाय
प्रभवति सान्तापिकः। सांग्रामिकः। योगाद्यच्च। ५।१।१०२॥ चाट्ठञ्। योगाय प्रभवति योग्यः। यौगिकः। कर्म्मण उकञ्। ५।१।१०३॥ कर्म्मणे प्रभवति कार्म्मुकं
समयस्तदस्य प्राप्तम्। ५।१।१०४॥ समयः प्राप्तोऽस्य सामयिकं। ऋतोरण्। ५।१।१०५॥ ऋतुः प्राप्तोऽस्य आर्त्तवं। कालाद्यत्। ५।१।१०७॥ कालः प्राप्तोऽस्य काल्यं

दीयते कार्यमित्येतयोरर्थयोर्भववत्प्रत्ययः स्यात्। प्रावृषेण्यमिति। प्रावृष एण्य इति भवार्थे विहितस्य इहाप्यतिदिश्यत इति भावः। शारदमिति। संधिवेलाद्यृतुनक्षत्रेभ्योऽण्॥
कालाधिकारस्य पूर्णोऽवधिः। व्युष्टादिभ्योऽण्। व्युष्टशब्दः कालवाची दिवसमुखे वर्त्तते। संपादिनि गुणोत्कर्षः संपत्तिः। आवश्यके णिनिरिति णिनिः कृत्। एवं वस्त्रयुगेन संपा
दि वास्त्रयुगिकं शरीरमित्यप्युदाहार्यं। वस्त्रयुगेन अवश्यं शोभत इत्यर्थः। तस्मै प्रभवति। समर्थः शक्तः प्रभवतीत्युच्यते। आर्त्तवमिति। पुष्पमित्यादि विशेष्यं बोध्यं। कालं प्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रत्यूषोहर्मुखं कल्यमित्यमरः तत्र प्रातः कालेकल्यशब्दस्य व्युत्पत्त्यन्तरं मृग्यं॥ ःः॥ प्रकृष्टे ठञ्॥ प्रकृष्यते अयमिति प्रकृष्टः कर्मणि क्तः तेन च प्रकर्षेण कालो विशेष्यते इत्याह दीर्घः
कालइति। ठञ्ग्रहणं विस्पष्टार्थं। अन्यथा अनन्तरस्य यतो नुवृत्तिराशंक्येत। इंद्रमहइति। महउत्सवः। वैशाखोमंथः। आषाढोदंडइति। वैशाखाषाढशब्दौ रूढिरूपेण मंथदंड
योर्वर्तते। तयोस्तु यथाकथंचित् व्युत्पत्तिः। क्रियतइतिहरः तः। विलोडनदंडस्यैवाधारभूतः काष्ठविशेषो मंथइत्युच्यते। अनुप्रवचनं नाम ब्रह्मोदनमुच्यते। सपूर्वपदादिति
विद्यमानपूर्वपदादित्यर्थः। ऐकागारिकट्‌ टोङीवर्थः। ऐकागारिकी। किमर्थमिदमुच्यते। यावता प्रयोजनमित्येव ठञि सिद्धं। सत्यं। चौरेनियमार्थमावश्यकमिदं सूत्रमन्य।

प्रकृष्टे ठञ्॥ पा।५।१।१०८॥ कालादित्येव तदस्येति च प्रकृष्टो दीर्घः कालोस्येति कालिकं वैरम्॥ प्रयोजनम्॥ पा।५।१।१०९॥ तदस्येत्येवा इन्द्रमहः प्रयोजनम
स्य ऐन्द्रमहिकं। प्रयोजनं फलं कारणं च॥ विशाखाषाढादण्मन्थदण्डयोः। पा।५।१।११०॥ आभ्यामण्स्यात्प्रयोजनमित्यर्थे क्रमान्मन्थदण्डयोरर्थ
योः। विशाखा प्रयोजनमस्य वैशाखो मन्थः। आषाढो दण्डः। चूडादिभ्य उपसंख्यानम्॥ चूडा। चौडं। श्रद्धा। श्राद्धम्॥ अनुप्रवचनादिभ्यश्छः॥ पा।५।
१।१११॥ अनुप्रवचनं प्रयोजनमस्य अनुप्रवचनीयं॥ समापनात्सपूर्वपदात्॥ पा।५।१।११२॥ व्याकरणसमापनं प्रयोजनमस्य व्याकरणसमापनी
यं। ऐकागारिकट्‌ चौरे॥ पा।५।१।११३॥ एकमसहायमगारं प्रयोजनमस्य मुमुषिषोः। स ऐकागारिकश्चौरः। आकालिकडाद्यन्तवचने। पा।५।१।११४॥
समानकालावाद्यन्तौ यस्येत्याकालिकः॥ समानकालस्याकाल आदेशः। आशुविनाशीत्यर्थः। पूर्वदिने मध्याह्नादावुत्पद्य दिनान्तरे तत्रैव नश्य
तीति वा। आकालाट्ठंश्च॥ आकालिका विद्युत्॥ ठञः पूर्णोवधिः। तेन तुल्यं क्रिया चेद्वतिः। पा।५।१।११५॥ ब्राह्मणेन तुल्यं ब्राह्मणवदधीते। क्रिया
चेदिति किं। गुणतुल्ये मा भूत्। पुत्रेण तुल्यः स्थूलः॥ ॥ २२

यात् एकागारं प्रयोजनं यस्मिन्निति स्तेनोरित्यत्रापि स्यात्। ननु एवमप्येकागारा चौरे इति ठञे
व नियम्यतां किमैकागारिक इति निपातनेन। टित्करणेन च प्रयोजनमिति वेदत्राहुः टकारः कार्यावधारणार्थः। ङीब्वेवमवतिनञ्स्विरइति वृद्धिस्तु निपातनाद्भवत्येवेति। आका
ल आदेशइति। निपात्यतइति शेषः। आद्यन्तौ यस्येत्यादि। अस्येत्यधिकारात्प्रत्ययार्थे इकट्प्रत्ययो निपात्यतइति भावः। आकालाट्ठंश्च। वार्त्तिकमिदं। ठञः पूर्णोवधिः। तेन तुल्यं
क्रिया चेद्वतिः॥ तुल्यमिति सामान्येन पुंसकं। तृतीयान्तात्तुल्यमित्यर्थे वतिः स्यात्। यत्तुल्यं क्रिया चेत्सा। ब्राह्मणेन तुल्यमिति। नन्वत्र ब्राह्मणे यथा वर्त्तते तथा क्षत्रियादिकर्तृ

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· काध्ययनं वर्त्तत इति वाक्यार्थो न संगत इति चेदत्राहुः॥ ब्राह्मणशब्दस्तत्कर्तृकाध्ययने लक्षणया वर्त्तते ब्राह्मणकर्तृकाध्ययनतुल्याध्ययनं वाक्यार्थ इति न कोपि दोष इति
टी·त· गुणतुल्ये इति। उपलक्षणमिदं॥ अक्रियातुल्य इत्यर्थः। एवंच ब्राह्मणेन सदृशः क्षत्रिय इत्यर्थे ब्राह्मणवत् क्षत्रिय इति प्रयोगो साधुरेव। अत एव पर्वतो वह्निमान्
सु·त· महानसवदिति वाक्ये महानससदृशः पर्वत इत्यर्थे वतेरसाधुत्वं मत्वा तस्य वतेस्साधुत्वं लक्षणार्थे पर्वतो वह्निमान् भवितुमर्हतीत्यादि क्रियापदं प्रयुंजते वृद्धाः॥ ⁂ ॥
५९ तत्र तस्येव। सप्तम्यंतात् षष्ठ्यंताच्च इवार्थे प्रत्ययः। क्रिया चेदिति नानुवर्त्तते इति द्रव्यादितुल्यमस्यो भवति। मथुरावत्स्रुघ्ने इति। मथुरायां यादृशः प्राकारः तेन तुल्यः प्राकारः स्रुघ्न इत्यर्थः
तदर्हं। अर्हतीत्यर्हं पचाद्यच्। यद्यपि कृदयोगे कर्मणि षष्ठ्या भवितव्यं तथापि अत्र सौत्रो विभक्तिव्यत्यय इत्येके। कर्तृकर्मणोरिति षष्ठ्या अनित्यत्वे ज्ञापकमिदं। तेन च धर्म्ये

तत्र तस्येव। ५।१।११६॥ मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः। चैत्रस्येव चैत्रवन्मैत्रस्य गावः॥ तदर्हम्॥ ५।१।११७॥ विधिमर्हतीति विधिवत्पूज्य
ते। क्रियाग्रहणं मण्डूकप्लुत्यानुवर्त्तते। तेनेह न। राजानमर्हति छत्रं। तस्य भावस्त्वतलौ। ५।१।११९॥ प्रकृतिजन्यबोधे प्रकारो भावः। गोर्भावः गो
त्वं। गोता। त्वान्तं क्लीबे तलन्तं स्त्रियां। आ च त्वात्। ५।१।१२०॥ ब्रह्मणस्त्व इत्यतः प्राक् त्वतलावधिक्रियेते। अपवादैस्सह समावेशार्थो। गुणवच
नादिभ्यः कर्मणि विधानार्थश्चेदं चकारेण त्वतलभ्यामपि समावेशार्थः। स्त्रिया भावः। स्त्रैणं। स्त्रीत्वं। स्त्रीता। पौंस्नं। पुंस्त्वं। पुंस्ता। न नञ्पूर्वात्तत्पुरुषादच
तुरसंगतलवणवटयुधकतरसलसेभ्यः। ५।१।१२१। इतः परं ये भावप्रत्ययास्ते नञ्तत्पुरुषान्न स्युः। चतुरादीन्वर्जयित्वा। अपतित्वं। अपटुत्वं
नञ्पूर्वात्किं। वार्हस्पत्यं। तत्पुरुषात्किं। नास्य पटवः सन्तीत्यपटुस्तस्य भावः आपटवं॥ अचतुरेति किं। आचतुर्यं। आसङ्गत्यं। आलवण्यं। आव
ट्यं। आयुध्यं। आकत्यं। आरस्यं॥ आलस्यं॥ ॥ ऽऽ रामो द्रष्टुत्तममिति भट्टिप्रयोगः संगच्छत इति तु कारके घे वा चामहितीयां तादेव प्रत्यय इति
स्फुटीकर्तुं तिङं तेन विगृह्णाति। विधिमर्हतीति। कथं तर्हि ततो यथावद्धिहिताध्वरायेति। असत्त्वार्थकस्य कर्मत्वासंभवेन द्वितीयां तत्त्वाभावादिति चेदत्राहुः। यथाशब्दो द्र
ति विषये सत्त्वार्थकसधात्वमित्यादिषु लतलादिदर्शनात्। अन्यथा षष्ठ्यपि नास्तीति लतलो न स्यातां। तथा च द्वितीयां ता घ यथाशब्दादिहार्थे वतिः। योग्यतामर्हतीति विधानमि।
त्यर्थः क्रियायोगोपि सुलभ इति। तस्य भावस्त्वतलौ। प्रकृतीति। न तु यः कश्चिद्धर्मः। घटत्वमित्यत्र द्रव्यत्वपृथिवीत्वादेरभानात्। गोर्भाव इति। इह गोशब्दोपि परः शब्दस्व 259

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रूपपरो वेति पक्षद्वयं। पदार्थपरत्वे तु धर्मविशेषः प्रत्ययार्थः। स च धर्मत्वेनैव भासते। प्रकृतिजन्यत्वादिस्तु प्रयोगोपाधिः। यदा तु शब्दपरत्वं तदा तज्जन्यबोधप्रकारः प्रत्ययार्थः। स च धर्मविशेष एव। पाचकत्वमित्यत्र तु कर्तृत्वरूपसंबंधः प्रकारः। पच्यमानत्वमित्यत्र तु कर्मत्वरूपसंबंधः। तथा औपगवत्वमित्यत्र जन्यत्वरूपसंबंधः प्रकारः। राजपुरुषत्वमित्यत्र तु स्वस्वामिभावरूपसंबंध इत्याद्यूह्यं। एवं स्थिते हरिटीकायां। यदुक्तं कृत्तद्धितसमासेभ्यः संबंधाभिधानं भावप्रत्ययेनेति तत्र नापूर्वं शक्त्यंतरं कल्प्यं। उक्तरीत्यैव तत्राप्युपपत्तेरिति संक्षेपः। अपवादैः सहेति। पृथ्वादिभ्य इमनिजित्यादिभिः। चकार इति। अन्यथा त्वतलौ स्त्रीपुंसाभ्यां नस्नानामन्य नतयोः सावकाशत्वादिति भावः। पौंस्नं पुंस्त्वमिति। संयोगांतलोपे पुमः खय्यीति रुत्वं। पाक्षिकावनुनासिकानुस्वारौ। विसर्गे कृते सत्वं। अपतित्वमिति। इह यन्मंतेति यक् न भवति। अपटुत्वमिति। इह लिंगाच्च लघुपूर्वादित्यण् न भवति। आ च त्वादित्यादि। ब्राह्मणादित्वान्न ष्यञ्॥ ॥ पृथ्वादिभ्यः। अणादीति। इगंतलघुपूर्वेषु पृथुमृदुप्रभृतिषु गणस्य समावेशः। चंडखंडादि।

पृथ्वादिभ्य इमनिज्वा। ५।१।१२२। वावचनमणादिसमावेशार्थं। र ऋतो हलादेर्लघोः ६।४।१६१। हलादेर्लघोर्ऋकारस्य रः स्यात्। इष्ठेमेयस्सु टेः॥
भस्य टेर्लोपः स्यादिष्ठेमेयस्सु। पृथोर्भावः प्रथिमा। पार्थवं। म्रदिमा। मार्दवं। वर्णदृढादिभ्यः ष्यञ्च। ५।१।१२३। चादिमनिच्। शौक्ल्यं। शुक्लिमा। दार्ढ्यं
पृथुमृदुभृशकृशदृढपरिवृढानामेव रत्वं॥ द्रढिमा॥ चोऽन्वर्थः। औचिती। याथाकामी॥ ॥

टे गुणवचनेभ्यः ष्यञः। बालवत्सादिषु वयोवचनलक्षणस्यात्र इति बोध्यं। त्वतलौ तु पूर्वसूत्रेणैव लभ्यौ। र ऋतो। हलादेः किं। ऋजिष्ठः। ऋजीयान्। लघोः किं। कृष्णिष्ठः। पृथुमृदुभृशेति परिगणनेन तु हलादेर्लघोरिति पृक्तं। शुक्लिमा। वर्णदृढादिभ्यः। गुणवचनत्वादेव सिद्धे इमनिजर्थं वचनं। पृथुमृदुभृशेति परिगणनादिह रभावो न भवति कृतमाचष्टे कृतयति णाविष्ठवद्भावः। औचितीति ब्राह्मणादेराकृतिगणत्वान्न ष्यञ्। हलस्तद्धितस्येति यलोपः। एवं याथाकामी। दृढ वृढ परिवृढ भृश कृश इत्यादि। अत्र द्वे गणसूत्रे॥ वेः पात्रलाभमतिमनःशारदानां। विशब्दादुत्तरे ये पात्रादयः पंच तदंतानां समासानां अनंतरः ष्यञ् भवतीत्यर्थः। विपात्रत्वं। विपात्रता। विपात्रिमा। वैपात्र्यं। विलाभिमा। वैलाभ्यं। विमतिमा। वैमत्यं। इगंतत्वादणपि। वैमतं। विमनिमा। वैमनस्यं। विशारदिमा। वैशारद्यं। त्वतलोः समावेशेन विलाभत्वं। विलाभतेत्यादीन्यप्यूह्यानि। समो मतिमनसोः। समः परे ये मतिमनसी तदंतयोः समासयोरनंतरः ष्यञ् भवतीत्यर्थः। संमतित्वं संमतिता। संमतिमा। सांमत्यं। इगंतत्वादणि सांमतं। संमनस्त्वं। संमनस्ता। संमनिमा। सांमनस्यं।

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· गुणवचाध्यन्ननुवर्त्तते। कर्मक्रियाकार्यंच। शरीरायासमात्रसाध्यंशौचादिक्रिया। शास्त्रेणविहितोयागादिःकार्यमितितयोर्भेदमाह। अर्हत इति। अर्हःप्रशंसायामितिशत्रन्तोअर्हन्शब्दःपूजार्थाभिधायीतिकैयटः।आह्वनिगणइति। केषांचित्पाठस्तुकार्योत्तरायातथाहि अर्हतोनुम्चेतिनुमर्थःपाठःएकभावःत्रिभावःअन्यभावःएषांपाठःस्वार्थविधानार्थः।त
टी·त· थाचप्रत्याहाराह्निकेवार्तिकेप्रयोगः।आन्यभाव्यं तु कालशब्दव्यवायादितिअन्यभावएव आन्यभाव्यंअन्यत्वमित्यर्थः।यत्तुव्याकरणाधिकरणेभद्रपादैरुक्तमान्यभाव्य

सु·त गुणवचनब्राह्मणादिभ्यःकर्म्मणिचा५।१।१२४॥ चाङ्गावे। जडस्यकर्म्मभावोवा जाड्यं।मूढस्यभावःकर्म्मवामौढ्यं।ब्राह्मण्यं॥ अर्हतोनुम्चा अर्हतोभावःकर्म्मवाआर्हन्त्यं। आर्हन्ती। ब्राह्मणादिराकृतिगणः। यथातथयथापुरयोःपर्य्यायेण।७।३।३१॥ नञःपरयोरेतयोःपूर्वोत्तरपदयोःपर्य्या
६० येणादेरचोवृद्धिर्निदादौ। अ यथातथाभावःआयथातथ्यंआयथातथ्यं। आयथापुर्य्यंअयथापुर्य्यं। आपादसमासेर्भावकर्म्माधिकारः। चतुर्वर्णादीनांस्वार्थउपसंख्यानम्। चत्वारो वर्णाःचातुर्वर्ण्यं। चातुराश्रम्यं।त्रैस्वर्य्यं।षाड्गुण्यं। सैन्यं।सान्निध्यं।सामीप्यं। औपम्यं।त्रैलोक्यमित्यादि।सर्ववेदाः सर्ववेदास्तानधीतेसर्ववेदः। सर्वादेरितिलुक्।सएवसार्ववैद्यः। चतुर्वेदस्योभयपदवृद्धिश्च॥ चतुरोवेदानधीतेचतुर्वेदः।सएवचातुर्वैद्यः।चतुर्विद्यस्येतिपाठान्तरं॥ चतुर्विद्यएवचातुर्वैद्यः॥ स्तेनाद्यन्नलोपश्च।५।१।१२५॥ नेतिसङ्घातग्रहणं। स्तेनचौर्य्येपचाद्यच्। स्तेनस्यभावःकर्म्मवास्तेयम्। स्तेनाद्दितियोगंविभज्य। स्तैन्यमितिष्यञन्तमपिकेचिदिच्छन्ति॥ सख्युर्य्यः।५।१।१२६॥ सख्युर्भावःकर्म्मवासख्यं। दूतवणिग्भ्यांच॥ दूतस्यभावःकर्म्मवादूत्यं। वणिज्यमितिकाशिका। माधवस्तुवणिज्याशब्दःस्वभावात्स्त्रीलिङ्गः। भावएवा प्रत्ययोनतुकर्म्मणीत्याह। भाष्येतुदूतमपप्रयोगइति। तत्ववैय्याकरणमीमांसकसंतोषार्थमित्यवधेयं।सर्ववेदाइति।पूर्वकालैकेतिसमासःचतुर्वेदइति [वणिग्भ्यश्चेतिनास्येवा ब्राह्मणादित्वाद्] तद्धितार्थेद्विगुः।द्विगोर्लुगनपत्यइत्यणोलुक्। चतुर्विधइति।विधालक्षणसूत्रंतादितिठक्। तस्यलुक्।संघातग्रहणमिति।वर्णग्रहणेतुयस्येतिचेत्यकारलोपेसतीष्टंनसिध्यति। अचःपरस्मिन्नित्यलोपस्यस्थानिवत्त्वाद्यादेशप्रसंगादितिभावः। ननुसंघातग्रहणेप्यलोन्त्यस्येत्यकारस्यैवलोपःस्यान्ननुसंघातस्येति चेन्मैवं। आरंभसामर्थ्यान्नानर्थकेलोन्त्यविधिरितिनिषेधाद्वानप्रसिद्धेः। ॐ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कपिज्ञात्योः इह कपिज्ञाती द्वौ भावकर्मणी अर्थावपि द्वौ तयोर्यथासंख्यं न भवत्यस्वरितत्वप्रतिज्ञानात्। एवं पत्यंतपुरोहितादिभ्य इत्युमनोज्ञादिभ्य इत्यत्रापि बोध्यं ब्राह्मणादित्वादिति। यद्यपि ब्रा
ह्मणादिषु राजन्शब्दः केवलः पठितस्तथाप्यपमेवासे इति प्रतिषेधो ज्ञापयति। अस्त्यत्र प्रकरणे राजन्शब्देन तदंतविधिरिति। एवं च ब्राह्मणादिपाठस्य समासे चरिता
र्थत्वाद् समासे विशेषविहितो यगेव भवति। अन्ये तु ब्राह्मणादेराकृतिगणत्वादेव नदंतात्कथंचित्ष्यञ्सिद्धे राजन्शब्दस्य तत्र पाठो यकासह समावेशार्थ इति। तथा
चावेष्ट्यधिकरणे शावरभाष्य उक्तं। राज्ञः कर्म राज्यं ब्राह्मणादित्वात्ष्यञिति। पुरोहित। संग्रामिक। पथिक। सारथिकेत्यादयः पुरोहितादयः। प्राणभृज्जाति। मुखना
सासंचारी वायुः प्राणः प्राणिजातीत्येव सुवचं। प्राणभृदिति किं। तृणत्वं। तृणता। जातीति किं। देवदत्तत्वं। औद्गात्रमिति॥ उद्गात्रादिषु ये ऋत्विग्वचनास्तेभ्यो होत्राभ्यः छ

कपिज्ञात्योर्ढक्। ५।१।१२७॥ कापेयं। ज्ञातेयं। पत्यंतपुरोहितादिभ्यो यक्। ५।१। १२८। सैनापत्यं। पौरोहित्यं। राजाऽसे॥ राजशब्दोऽसमासे यकं लभ
ते इत्यर्थः। राज्ञो भावः कर्म वा राज्यं। समासे तु ब्राह्मणादित्वात्ष्यञ्। आधिराज्यं। प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्। ५।१।१२९॥ प्राणभृज्जा
तिआश्वं। औष्ट्रं। वयोवचन। कौमारं। कैशोरं। औद्गात्रं। औन्नेत्रं। सौष्ठवं। दौष्ठवं। हायनान्तयुवादिभ्योऽण्। ५।१।१३०॥ द्वैहायनं। त्रैहायनं। यौव
नं। स्थाविरं। श्रोत्रियस्य यलोपश्च॥ श्रौत्रम्। कुशलचपलनिपुणपिशुनकुतूहलक्षेत्रज्ञाः। युवादिषु च ब्राह्मणादिषु च पठ्यन्ते। कौशल्यं। कौशलमि

इति छे प्राप्ते अञ् विधीयते। सुष्टु दुष्टु शब्दाभ्यां गुणलक्षणो ष्यञि प्राप्ते व घूपाद्यादिगंतलक्षणोऽणि शेषेभ्यस्त्वतलोः प्राप्तयोः। इह तु सुभगमंत्रे पठ्य ते। सुभगमित्येतच्छन्दरूपं मंत्रविष
ये प्रयोगे अञ्मुन्पादयतीत्यर्थः। महते सौभगाय सर्वे विधीनां छंदसि विकल्पितत्वादिह ह्रद्भगसिंध्वं त इत्युत्तरपदवृद्धिर्न भवति। अत एव मंत्रेऽपि क्वचिदञ् न भवति। सौ
भाग्यमस्मै दत्वाय। इह व्यञ्। हायनांता अस्मात्त्वतलोः प्राप्तयोरणिवधानं। युवस्थविरशब्दाभ्यां वयोवचनलक्षणो अञि प्राप्ते। यौवनमिति। अणि परतः अन्निति प्रकृतिभावः
मनोज्ञादिपाठाद्वुञपि। यौवनकं। प्रकृत्या के राजन्यमनुष्ययुवान इति प्रकृतिभावः। श्रोत्रियस्येति। श्रोत्रियं श्छंदोऽधीत इत्यत्र छंदसः श्रोत्रभावः। घश्च प्रत्यय इति पदाद्या
ख्यानं तदेह घलोप इति यथाश्रुतं। यदा तु वाक्यार्थे पदवचनमिति पक्षस्तदा घशब्देन इय इति रूपं लक्ष्यते। कश्चित्तु यलोपश्चेति पाठस्तत्र येति संघातग्रहणं व्या
ख्येयं। वर्णग्रहणे तिकारस्य यणादेशः स्यात्तन्न तु यस्येति चेति लोपः। अकारलोपस्य स्थानिवत्वेन इकारांतत्वाभावात्। एतच्च हरदत्तग्रंथे स्पष्टं। मूलपुस्तकेषु यलोप इत्यमु

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· इगंताच्चा लघुः पूर्वोऽवयवो यस्येति प्रातिपदिकविशेषणं। पूर्वत्वं च सन्निधानादिगवधिकमेव। तेनातिपांडुशब्दान्न भवति। लघुपूर्वेक इत्येवमुच्यमाने लघुपूर्वश्चासौ इक् च
टी·त· लघुपूर्वेक् तदन्तस्य प्रातिपदिकविशेषणात्तदंतलाभ इति नव्याः। इगंतात्किं। घटत्वं। लघुपूर्वात्किं। पांडुत्वं। कथं काव्यमिति। कुधातोः ओरावश्यक इति ण्यत्प्रसिद्धावपि कवेः क
सु·त· र्मत्यर्थे काव्यमिति स्यादिति प्रश्नः। योपधात्। गुरु उपोत्तमं यस्य प्रातिपदिकस्य तस्मादित्यर्थः। योपधात्किं। विमानत्वं। गुरूपोत्तमादिति किं। क्षत्रियत्वं। आभिधानीयकमिति
ह अत्र प्रकृतिरभेः परः अनीयर्प्रत्ययांतो दधातिः। अभिधेयस्य भावः कर्म वेत्यर्थः। साहायकेति। सूत्रेणानित्यप्राप्ते विकल्पार्थं वचनं द्वंद्वमनोज्ञादिभ्यश्च। मनोज्ञ। प्रियरूप। व
हुल। अवश्यन्यादयो मनोज्ञादिः। गोत्रचरणात्। गोत्रवाचिनश्चरणवाचिनश्च प्रातिपदिकाद्बुञ् स्याद्भावकर्मणोः। अपत्याधिकारादन्यत्र लौकिकं गोत्रं तेनापत्यप्रत्ययं

इगन्ताच्च लघुपूर्वात्। ५।१।१३१। शुचेर्भावः कर्म वा शौचं। मौनं। कथं काव्यम्। कविशब्दस्य ब्राह्मणादित्वात् ष्यञ्। योपधाद्गुरूपोत्तमाद्वुञ्। ५।१।
।१३२। रामणीयकं। आभिधानीयकं। सहायाद्वा। साहाय्यं। साहायकं। द्वन्द्वमनोज्ञादिभ्यश्च। ५।१।१३३। श्रोत्रियाध्यापिका। मानोज्ञकं। गोत्रचर
णाच्छ्लाघात्याकारतदवेतेषु। ५।१।१३४। अत्याकारोऽधिक्षेपः तदवेतः गोत्रचरणयोर्भावकर्मणोः प्राप्तः। अवगतवान्वा गार्गिकया श्लाघते गार्गिक
नविकल्पेनत इत्यर्थः। गार्गिकया त्याकुरुते। गार्गिकामवेतः। होत्राभ्यश्छः। ५।१।१३५। होत्राशब्दः ऋत्विग्वाची स्त्रीलिङ्गः। बहुवचनाद्विशेषग्रहणं। अ
च्छावाकस्य भावः कर्म वा अच्छावाकीयं। मैत्रावरुणीयं। ब्रह्मणस्त्वः। ५।१।१३६। होत्रावाचिनो ब्रह्मशब्दात्त्वः स्यात्। छस्यापवादः। ब्रह्मत्वं। नेति वाच्ये
त्ववचनं तलो बाधनार्थम्। ब्राह्मणपर्य्यायाद्ब्रह्मणशब्दात्तु त्वतलौ। ब्रह्मत्वम्। ब्रह्मता॥ ॥ नञ्स्नञोरधिकारः समाप्तः॥ ॥ ❀ ॥

तेभ्य इत्यर्थः। प्रवराध्यायपठितास्तेभ्य इत्यपरे। गोत्रं च चरणैः सहेति जातित्वात्प्राणभृज्जातीत्यादिना अञ्प्राप्ते वचनं। श्लाघेत्यादि श्लाघादिषु विषयभूतेष्वित्यर्थः। प्रा
प्त इति इणः प्राप्त्यर्थत्वात् अवपूर्वस्येणो ज्ञाने प्रसिद्धत्वादाह। अवगतवानिति गार्गिके— ति। आपत्यस्येति यलोपः। चरणाद्बुञ् उदाहरणं तु काठिकया श्लाघते इत्यादि बोध्यं। श्ला
घादिष्विति किं गार्ग्यत्वं। काठत्वं। होत्राशब्द इति। जुहोतेस्त्रन्। नेति वाच्य इति। छप्रत्ययेन निषिद्धे न स्युर्भावस्त्वतलाविति यत्नेनैव प्रत्ययः सिध्यतीति विभक्तेरनुच्चारणाल्लाघवं च भ
वतीति भावः। होत्राभ्य इत्यनुवृत्तेः फलं दर्शयति। ब्राह्मणपर्यायादिति। नञ्स्नञोरधिकारः समाप्तः॥ ❀ ॥ ॥ ॥ ॥ ❀ ॥

261

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्यां॥ धिवि प्रीणने इत्यस्मात् कृत्यल्युटो बहुलमिति कर्तरि ण्यत्। आसादेव निपातनान्नस्य लोप ईकारस्य चात्वं। धिनोतीति धान्यं। मंत्रश्च धान्यमसि धिनुहि देवानिति दृश्यते। धान्यानामिति भवनापेक्षया कर्तरि षष्ठी। सा च निर्देशादेव समर्थविभक्तिः। बहुवचनं तु स्वरूपविधिनिरासार्थं। अलौकिके प्रक्रियावाक्ये तु एकवचनानुवादेन तद्धितविधिसामर्थ्याद्वेति बोध्यं। भवतिरिहोत्पत्तिवचनः क्षेत्रग्रहणसामर्थ्यात्। सूत्रे हि सत्तावचनस्यापि भवतेर्ग्रहणं मा भूदिति क्षेत्रग्रहणं कृतं। अन्यथा धान्यानां भवनं कुसूल इत्यत्रापि स्यादिति धान्यानां किं। तृणानां भवनं क्षेत्रं। व्रीहिशाल्योः। अत्रापि निर्देशादेव षष्ठी समर्थविभक्तिः। सा च भवनापेक्षया कर्तरीत्यादि पूर्ववत्। यवयवक। अत्र अन्यथार्थसामर्थ्याल्लभ्या षष्ठी समर्थविभक्तिः। विभाषा। खञि नित्ये प्राप्ते वचनं। औमीनं भांगीनमिति। ननूमाभंगयोर्धान्यत्वाभावात्कथमिह खञ्। व्रीहयश्च मे यवाश्च मे इति चमकानु।

धान्यानां भवने क्षेत्रे खञ्॥५।२।१॥ भवन्त्यस्मिन्निति भवनम्। मुद्गानां भवनं क्षेत्रं मौद्गीनम्॥ व्रीहिशाल्योर्ढक्॥५।२।२॥ व्रैहेयं। शालेयं। यवयवकषष्टिकाद्यत्॥५।२।३॥ यवानां भवनं क्षेत्रं यव्यं। यवक्यं। षष्टिक्यं। विभाषा तिलमाषोमाभङ्गाणुभ्यः॥५।२।४॥ यद्वा स्यात्पक्षे खञ्। तिल्यं। तैलीनं। माष्यं। माषीणं। उम्यं। औमीनं। भङ्ग्यं। भाङ्गीनं। अणव्यं। आणवीनं। सर्वचर्मणः कृतः खखञौ॥५।२।५॥ असामर्थ्येऽपि निपातनात्समासः। सर्वचर्मणा कृतः सर्वचर्मीणः। सार्वचर्मीणः। यथामुखसंमुखस्य दर्शनः खः॥५।२।६॥ मुखस्य सदृशं यथामुखं प्रतिबिम्बं निपातनात्सादृश्येऽव्ययीभावः। समं सर्वं मुखं संमुखं। समशब्दस्यान्तलोपो निपात्यते। यथामुखं दर्शनः यथामुखीनः। सर्वस्य मुखस्य दर्शनः संमुखीनः।

वाके हि द्वादशैव धान्यानि पठितानि न तूमाभंगे। पठितौ इति चेन्मैवं। सप्तदशानि धान्यानीति स्मरणात् तत्र चोमाभंगयोरपि पाठाद्धान्यत्वमस्तीति भाष्यादौ स्थितत्वात्। न च चमकानुवाके धान्यपरिगणनेनार्थस्तत्र धान्यानामप्य[illegible]दीनां पाठात्। धान्यानामपि केषांचित्कोद्रवादीनामपाठात्तस्मादन्यत एव धान्यनिर्णय इति पूर्वोक्तस्मृत्या तयोर्धान्यत्वमस्तीति ज्ञेयं। सर्वचर्मणः। खश्चेत्येव तु नोक्तं। यत्नोऽप्यनुकर्षः संभाव्येतेति। अत्र तृतीया समर्थविभक्तिः। कृत इति प्रत्ययार्थे चर्मणः करणत्वस्योचितत्वात्। सर्वचर्मणेति। सर्वेण चर्मणा कृत इत्यर्थे तद्धितो नेष्यत इति भावः। यथामुखं दृश्यतेऽस्मिन् दर्शनः आदर्शादिः। अधिकरणे ल्युट्। असादृश्य इति प्रतिषेधात्सादृश्ये यथाशब्दस्य कथं समासस्तत्राह। निपातनादिति। एतच्च वृत्तिग्रन्थमनुसृत्योक्तं। भट्टिकाव्ये तु पदार्थानतिवृत्तौ यथाशब्द आश्रितः। तथा च मायामृगं प्रकृत्योक्तं। यथामुखीनः सीतायाः॥

CC-0. In Public Domain. Digitization by eGangotri



पुल्लुवे बहुलोभयन्निति। यथा मुखं दर्शनइति। अव्ययीभावस्यापि यथामुखशब्दस्यो न्मत्तगंगादिवत्सत्ववचनत्वात्कर्मशक्तियोगे सति कृद्योगलक्षणा षष्ठी तस्याः नाव्ययीभावा
दित्यमादेशः। सर्वस्यमुखस्येति। संमुखस्येति नोक्तं। प्रत्ययसंनियोगेनैव समशब्दस्यांत्यलोपनिपातनात्। संशब्दस्तु समशब्दार्थेन दृश्यते संमुखो भवेत्यत्राभिमुख इत्यर्थप्रतीतेस्तत्र च
खप्रत्ययस्यानिष्यमाणत्वात्। कथं तर्हि संयुगे संमुखीनं तमुद्दंप्रसहेतक इतिभट्टिः। अभिमुखावस्थानात्सामर्थ्याद्भविष्यतीतिहरदत्तः॥ ॥ तत्सर्वादेः॥ तदिति द्वितीयासमर्थ
विभक्तिः। व्याप्नोतीति प्रत्ययार्थः परिशिष्टं प्रकृतिविशेषणं॥ तत्र केवलानां पथ्यादीनां सर्वादित्वासंभवात्प्रातिपदिकैरपि तैस्तदंतविधिः। तदाह पथ्यादीतादिति। पथ्यंगकर्मपत्र
पात्रांतात्प्रातिपदिकादित्यर्थः। सर्वपथीन इति। पूर्वकालैकेति समासः। ऋक्पूरिति समासांतस्य पथ्यंत समासग्रहणेन ग्रहणाद्भवति खप्रत्ययः। अनुपदसर्वान्नायानयं बद्धाभ

तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति। ५। २। ७॥ सर्वादेः पथ्याद्यन्ताद्द्वितीयान्तात्खः स्यात्। सर्वान्पथो व्याप्नोति सर्वपथीनः। सर्वाङ्गीणः। सर्वकर्मी
णः। सर्वपत्रीणः। सर्वपात्रीणः। आप्रपदं प्राप्नोति। ५। २। ८॥ पादस्याग्रं प्रपदं तन्मर्यादीकृत्य आप्रपदं। आप्रपदीनः पटः। अनुपदसर्वान्नायानयं
बद्धाभक्षयतिनेयेषु। ५। २। ९॥ अनुरायामे सादृश्ये वा अनुपदं बद्धा अनुपदीना उपानत्। सर्वान्नानि भक्षयति सर्वान्नीनो भिक्षुः। अयानयः स्थलविशे
षः। तं नेयः अयानयीनः शारः। परोवरपरम्परपुत्रपौत्रमनुभवति। ५। २। १०॥ परांश्चावरांश्चानुभवतीति परोवरीणः। अवरस्योत्वं निपात्यते। परांश्च प
रतरांश्चानुभवति परम्परीणः। प्रकृतेः परम्परभावो निपात्यते। पुत्रपौत्राननुभवति पुत्रपौत्रीणः। परम्पराशब्दस्तु अव्युत्पन्नः शब्दान्तरं स्त्रीलिङ्गं तस्मा
देव स्वार्थे ष्यञि पारम्पर्यं। कथं पारोवर्य्यवदिति असाधुरेवायं खप्रत्ययसन्नियोगेनैव परोवरेति निपातनात्॥ ९ स्थयतीत्यत्र निपातनात्तिङन्तेन स

हद्वंद्वः। द्वितीयांतेभ्योऽनुपदादिभ्यो यथासंख्यं बद्धादिष्वर्थेषु खः स्यात्। अनुरायाम इत्यादि। यस्य चायाम इति यथार्थे यदव्ययमिति वा अव्ययीभाव इत्यर्थः। सर्वान्नीन इति।
प्रकारकात्स्न्ये सर्वशब्दः। यान्यन्नानि लभ्यंते उष्णानि शीतलानि सरसानि नीरसानि वा सर्वाणि भक्षयतीत्यर्थः। अयः प्रदक्षिणगमनं। अनयः प्रसव्यगमनं प्रदक्षिणप्रसव्यगा
मिनां शाराणां यस्मिन् परैरसमावेशः सोयमयानय इति काशिका। तं नेय इति। नयते र्द्विकर्मकत्वादप्रधाने कर्मणि द्वितीया। अयानयीनः शार इति। फलकशिरसि स्थित इत्य
र्थ इति काशिका। अवरस्येति। आदेरिति शेषः। उत्वकृते आद्गुणः। केचित्तु ओत्वं परशब्दस्य निपात्यते तस्मात्परस्यात एङः पदान्तादतीति पूर्वरूपादेश इति पक्षांतरमाहुः॥

262

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवारपारं गामीति। गमेरिति। आङि णिच्चेति बहुलवचनात्केवलादपि णिनिः भविष्यति गम्यादय इति भविष्यत्कालता। न्यासकारस्तु आवश्यके णिनिः सोपि भविष्यत्त्वे
वेत्याह। अवारपारमिति। अकेनोर्भविष्यदाधमर्ण्ययोरिति षष्ठी प्रतिषेधः केचित्तु गत्यर्थकर्मणीति सूत्रे द्वितीयाग्रहणमपवादविषये विधानार्थं तेन कृद्योगषष्ठी न भ
वति ग्रामं गन्तेति वदिति व्याचख्युस्तदसत्। अकेनोरिति प्रतिषेधे षष्ठीप्रसंगस्यैवाभावात्। अवारीण इत्यादि विगृहीतात् विपरीतादपीष्यत इति भावः। अत्यंतमिति क्रिया
विशेषणं। अनुकाममिति काम इच्छा तस्य सदृशमनुकामं कामानुरूपमित्यर्थः। अव्ययं विभक्तीति यथार्थेऽव्ययीभावः। समांसमां। यलोप इति। समायामित्यत्र यकार
लोप इत्यर्थः पूर्वपदे निपात्यत इति। अन्यथा तद्धिते उत्पन्ने पयोत्तरपदे सुपो लुग्भवति सुपो धातुप्रातिपदिकयोरिति। तथा पूर्वपदेपि स्यादिति भावः। समांसमीनेति

अवारपारात्यन्तानुकामङ्गामी। ५।२।११॥ अवारपारङ्गामी। अवारपारीणः। अवारीणः। पारीणः। पारावारीणः। अत्यन्तगामी। अत्यन्तीनः। भृ
शङ्गन्तेत्यर्थः। अनुकामङ्गामी। अनुकामीनः। यथेष्टङ्गन्ता। समांसमांविजायते। ५।२।१२॥ यलोपोऽवशिष्टविभक्तेरलुक्च पूर्वपदे निपात्यते। समांस
मीनागौः। समांसमीना सा या प्रतिवर्षं प्रसूयते। खप्रत्ययानुत्पत्तौ यलोपो वा वक्तव्यः॥ समांसमांविजायते। समायांसमायाम्वा॥ अद्यश्वीनावष्टब्धे
। ५।२।१३॥ अद्यश्वो वा विजायते अद्यश्वीना वडवा। आसन्नप्रसवेत्यर्थः। केचित्तु विजायत इति नानुवर्त्तयन्ति। अद्यश्वीनं मरणं आसन्नमित्य
र्थः। आगवीनः। ५।२।१४॥ आङ्पूर्वाद्गोः कर्म्मकरे खप्रत्ययो निपात्यते। गोः प्रत्यर्पणपर्य्यन्तं यः कर्म्म करोति स आगवीनः॥ ॥

वीप्सायां द्विर्वचनं। सुबन्तसमुदायः प्रकृतिः विजायते इत्येतच्चाचष्टे। प्रसूयत इति। विपूर्वको जनिर्गर्भविमोचने वर्त्तत इति भावः। गर्भविमोचने कृत्स्ना याः स
मायाव्याप्यभावादत्यन्तसंयोगे चेति द्वितीया न भवतीत्याशयेनाह। समायामित्यादि। खप्रत्ययानुत्पत्ताविति वार्त्तिकेन समांसमामिति सौत्रप्रयोगस्तूपपन्न इति भावः।
अद्यश्वीना अविभक्तिको निर्देशः। न तु स्त्रीलिंगनिर्देशोयं। अद्यश्वीनो गोसमूहः। अद्यश्वीनं गोमंडलमित्यादावपीष्टत्वात्। अद्यश्वो वेति। निपातनात्त्वार्थे समासो
यमिति भावः। अवाच्चालंबने इति सूत्रेण आविदूर्ये स्तंभेः षत्वविधानादवष्टब्धशब्द आसन्नपरः। विजायत इति हि वर्त्तते स च गर्भविमोचनार्थ इत्युदाह। आसन्नप्र
सवेत्यर्थ इति। कर्मकर इति। यस्तु प्रातः गां गृहीत्वा गच्छति गोपालस्तस्मिन्नित्यर्थः। प्रत्यर्पणपर्यंतमिति। गोशब्दलक्षणया गोः प्रतिदाने वर्तत इति भावः। आगवी

१३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



आङ्मर्यादाभिविध्योरित्यव्ययीभावे गोस्त्रियोरिति ह्रस्वे कृते खप्रत्ययः। ओर्गुणः॥ ॐ॥ अनुग्वा ख इत्यनुवर्त्तते। अनुगुशब्दादलंगामीत्यस्मिन्नर्थे खः स्यात्। गोः पश्चादिति पश्चादर्थेऽव्ययीभावः। पर्याप्तमिति क्रियाविशेषणं। अत्र हरदत्तः। अनुग्वित्यस्य क्रियाविशेषणत्वात् द्वितीयांतादिह प्रत्ययः। न चालंगामीत्यस्य सुप्यजातौ णिनिरिति प्रत्ययांततया कृद्योगलक्षणा षष्ठी स्यादिति वाच्यं। क्रियाविशेषणात्तदप्रवृत्तेः। शोभनं पाचक इत्यादौ तथा दर्शनादित्याह। अत्र केचित् धातूपात्तव्यापारजन्यफलाश्रयत्वं यत्र तन्मुख्यं कर्म यत्र तु व्यापारजन्यत्वमात्रं तदौपचारिकं। ततश्च तंडुलानां पाचक इत्यत्र मुख्ये कर्मणि कृद्योगलक्षणा षष्ठी भवति। मृदु पाचकः शोभनं पाचक इत्यत्र तु सा न भवति। फलव्यापारयोः क्रियाकर्मभावव्यवहारे सत्यपि फलस्यौपचारिककर्मत्वात् तद्विशेषणत्वाच्च मृद्वादेरिति तस्याशय इत्याहुः। अन्ये त्वेवं तर्हि तुल्यन्यायेन क्रियाविशेषणात् द्वितीयाया अप्रवृत्तिः स्यात्तस्मात्तदर्हमिति निर्देशादनित्या कृद्योगषष्ठीति क्रियाविशेषणात्सा न स्वीक्रियत इति हरदत्ताशयः कथंचिद्वर्ण्यं।

अनुग्वलङ्गामी।५।२।१५॥ अनुगु। गोः पश्चात्पर्याप्तं यथा गच्छति स अनुगवीनो गोपालः। अध्वनो यत्खौ।५।२।१६॥ अध्वानमलङ्गच्छति अध्वन्यः। अध्वनीनः। ये चाभावकर्मणोः। आत्माध्वानौ खे इति प्रकृतिभावः। अभ्यमित्राच्छ च।५।२।१७॥ चाद्यत्खौ। अभ्यमित्रीयः। अभ्यमित्र्यः। अभ्यमित्रीणः। अमित्राऽभिमुखं सुष्ठु गच्छतीत्यर्थः॥ गोष्ठात्खञ् भूतपूर्वे।५।२।१८॥ गोष्ठो भूतपूर्वः गौष्ठीनो देशः। अश्वस्यैकाहगमः।५।२।१९॥ एकाहेन गम्यत इत्येकाहगमः॥ आश्वीनोऽध्वा॥ ॥ ९ नीय इत्याहुः। वस्तुतस्तु पश्चादर्थेऽव्ययीभावोऽयमिति

निर्विवादं। पश्चादिति चास्मात्पर्यर्थे निपातितं। तच्च यद्यपि विभक्तित्रयसाधारणं तथापीह योग्यतावलात् सप्तम्यर्थवृत्तिरनुस्तस्य कर्मत्वायोगात् प्रथमांतादेवेह प्रत्यय इति वक्तुं उचितं। कृद्योगलक्षणा षष्ठी शंकाप्यत एव नेति बोध्यं। अभ्यमित्रात्। अभ्यमित्रशब्दो लक्षणेनाभिप्रती आभिमुख्ये इत्यव्ययीभावः। क्रियाविशेषणत्वाद्द्वितीया समर्थविभक्तिः। गोष्ठात्खञ्। गावस्तिष्ठंत्यस्मिन्निति गोष्ठः। घञर्थे कविधानमित्यधिकरणे कः। अंबांबगोभूमीति षत्वं। पूर्वं भूतो भूतपूर्वः सुप्सुपेति समासः। अश्वस्य। कर्तरि षष्ठीयं निर्देशादेव समर्थविभक्तिः। एकाहगम इति। कर्तृकरणे कृतेति समासः। नन्विह ग्रहवृदृनिश्चिगमश्चेत्यपं बाधित्वा परिमाणाख्यायां सर्वेभ्य इति घञ् प्राप्नोति। अस्ति चात्र परिमाणाख्या एकाहेन गम्यत इति परिच्छेदावगमात्। सत्यं। अस्मादेव निपातनादप् द्रष्टव्य इति॥ ॥ ॥ ॥

263

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शालीनकौपीने। इमौ खञन्तौ निपात्येते। रूढिशब्दावेतौ कथंचिद्व्युत्पाद्यौ इति नात्रावयवार्थेऽभिनिवेशः कार्यः। शालाप्रवेशमिति। अप्रगल्भ इत्यन्यत्र गन्तुमशक्तः शालामेव प्रवेष्टुमर्हतीत्यर्थः। कूपपतनमिति। यदकार्यं तत्प्रच्छादनीयत्वात्कूपावतरणमर्हतीत्यर्थः। तदाच्छादनमिति। वासःखण्ड इत्यर्थः। अन्ये त्वाहुः अकार्यशब्देन यः करोति सक्रियासामान्यवचनस्तेन लज्जाहेतुत्वेन अदृष्टव्यत्वात्पुरुषलिंगं कौपीनं। अस्पृश्यत्वात्तदाच्छादनमिति। शरीरायासेनेति। भारवहनादिनेत्यर्थः यद्यपि व्रातशब्दो लोके संघातवचनस्तथाप्यत्र भाष्यादिग्रन्थपर्यालोचनया अयमेवार्थ इह उचित इति भावः। साप्तपदीनं। योग्यतया समर्थविभक्तिं तृतीयेति दर्शयति सप्तभिः पदैरिति। पदमिह संभाषणं पादविक्षेपो वा। तद्धितार्थे द्विगुः। अवाप्यत इत्यर्थे खञ्। हैयंगवीनं। ह्योगोदोहस्येति। गोदोहो गोदोहः षष्ठीसमासः

शालीनकौपीने अधृष्टाकार्ययोः। ५।२।२०॥ शालाप्रवेशमर्हति शालीनः। अधृष्टः। कूपपतनमर्हति कौपीनं पापं तत्साधनत्वात्तद्देशोपस्थत्वाद्वा पुरुषलिङ्गमपि तत्सम्बन्धात्तदाच्छादनमपि। व्रातेन जीवति। ५।२।२१॥ व्रातेन शरीरायासेन जीवति न तु बुद्धिवैभवेन स व्रातीनः। साप्तपदीनं सख्यम्। ५।२।२२॥ सप्तभिः पदैरवाप्यते साप्तपदीनं। हैयंगवीनं संज्ञायाम्। ५।२।२३॥ ह्योगोदोहस्य हियंगुरादेशः विकारार्थे खञ् च निपात्यते। दुह्यत इति दोहः क्षीरं। ह्योगोदोहस्य विकारः हैयंगवीनं नवनीतं। तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ। ५।२।२४॥ पीलूनां पाकः पीलुकुणः। कर्णस्य मूलं कर्णजाहं। पक्षात्तिः। ५।२।२५॥ मूलग्रहणमात्रमनुवर्तते। पक्षस्य मूलं पक्षतिः॥ ॥

१९ ननु सहह्यस्शब्दस्य सुप्सुपेति समासः। ततो विकारे अनुदात्तलक्षणस्याञोऽपवादः खञ्। अत्र ह्यस्शब्देन कालप्रत्यासत्तिर्विवक्षिता। नवनीतमिति। यद्यपि हैयंगवीनं घृतमित्युक्तं तथैव चामरेणापि। तन्नु हैयंगवीनं यत् ह्योगोदोहोद्भवं घृतमित्युक्तं तथापि घृतशब्देन नवनीतमेव विवक्षितमिति हरदत्तग्रन्थानुरोधेनेदमुक्तं। तस्य पाक। पाकः परिणामः। मूलमुपक्रमः। तस्येदमित्यणादिषु प्राप्तेषु प्रत्ययारम्भः। जाहचो जकारस्य प्रयोजनाभावान्नेत्त्वम्। पीलु। कर्कन्धु। शमी। करीर। कुवल। बदर। अश्वत्थ। खदिर। पील्वादिः। कर्ण। अक्षि। नख। मुख। केश। पाद। गुल्फ। भ्रू। शृंग। दंत। ओष्ठ। पृष्ठ। कर्णादिः। मूलग्रहणमात्रमिति। एकदेशे स्वरितत्वप्रतिज्ञानादिति भावः। पक्षतिरिति। प्रतिपत्। पक्षिणां पक्षमूलं च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तेनवित्तं। वित्तः प्रतीतः। वित्तो भोगप्रत्यययोरिति निपातनाद् दाभ्यां निष्ठातो नत्वं न। लुप्तनिर्दिष्ट इति। चुञ्चुपः प्रत्ययस्येति वक्तव्ये पृथग्योगकरणं तु चुप् इत्येतदनित्यमिति सम
धानांतरमप्याहुः। नानाञ्चाविति। नाञो नकारो दृष्ट्यर्थः स्वरार्थश्च। नसहेति प्रकृतिविशेषणं न प्रत्ययार्थ इत्याशयेनाह। असहार्थ इत्यादि। यदि प्रत्ययार्थः स्यात्तर्हि ञ्नौ द्वौ प्रतिषेधौ प्र
कृतमर्थं गमयत इति सहार्थो गम्येत न सह अपि तु सहैवेति। तस्मात्प्रकृतिविशेषणमेतच्च व्याख्यानल्लभ्यते। यद्येवं सहेत्येव प्रत्ययार्थोस्तु विनञ्भ्यां प्रतिषेधार्थत्वादिष्टसिद्धेर्वि
गार्दभरथक इत्यादौ विशब्दस्यापि प्रतिषेध इति दृष्टेवेति। सत्यं। क्रियावाचिनो विशब्दात्सहार्थप्रत्ययो विज्ञायेत। विगतेन सह विक्तेन सहेति। तस्माद्यथोक्तमेवन्याय्यमेतच्च

तेन वित्तश्चुञ्चुप्चणपौ। ५।२।२६। पकारः प्रत्यययोरादौ लुप्तनिर्दिष्टः तेन च स्पनेत्संज्ञा। विद्यया वित्तो विद्याचुञ्चुः। विद्याचणः। विनञ्भ्यां नानाञौ न सह। ५।२।२७। असहार्थे पृथग्भावे वर्तमानाभ्यां स्वार्थे प्रत्ययौ। विना। नाना। वेः शालच्छङ्कटचौ। ५।२।२८। क्रियाविशिष्टसाधनवाचकात्स्वार्थे। विशालं। विशङ्कटं। सम्प्रोदश्च कटच्। ५।२।२९। सङ्कटं। प्रकटं। उत्कटं। विकटं।। अलाबूतिलोमाभङ्गाभ्यो रजस्युपसंख्यानं। अलाबूनां रजः। अलाबूकटं। गोष्ठजादयः स्थानादिषु पशुनामभ्यः।। गवां स्थानं गोगोष्ठं। सङ्घाते कटच्।। अवीनां सङ्घातः। अविकटः। विस्तारे पटच्। अविपटः। द्वित्वे गोयुगच्।। द्वावुष्ट्रौ। उष्ट्रगोयुगं। षड्त्वे षड्गवच्। अश्वषड्गवं। स्नेहे तैलच्। तिलतैलं। सर्षपतैलं। भवने क्षेत्रे शाकटशाकिनौ। इक्षुशाकटम्। इक्षुशाकिनं। अवात्कुटारच्च। ५।२।३०।। चात्कटच्। अवाचीनः। अवकुटारः। अवकटः। नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः। ५।२।३१। अवादित्येव। नतं नमनम्। नासिकाया नतं। अवटीटं। अवनाटं। अवभ्रटम्। तद्योगान्नासिका अवटीटा। पुरुषोऽवटीटः।। ।। ।।

हरदत्तग्रन्थे स्पष्टं। स्वार्थ इति। अनिर्दिष्टार्थत्वादिति भावः। संप्रोदश्च। क्रियाविशिष्टसाधनवाचकात्स्वार्थे प्रत्ययः। संकटं संहतं संबाध इत्यर्थः। प्रकटं प्रज्ञातं प्रकाशत
इत्यर्थः। उत्कटं उद्भूतं विकटं। विकृतं। रूढशब्दाश्चैते कथंचिद्व्युत्पाद्यंते। अलाबू तिलेत्यादि। एभ्यः पंचभ्यः रजस्यभिधेये कटच् प्रत्ययो भवति। रजसो विकारत्वाद्विकारे प्र
त्ययानामपवादोयं। अलाबूकटमिति। ओरञ्मयड्वै तयोरिति मयड्वा इह प्राप्तः। तिलकटमिति। असंज्ञायां तिलयवाभ्यामिति मयड् प्राप्तः। उमाशब्दात्तु घृतादित्वादन्तो
दात्तादनुदात्तादेश्चेत्यञ्। उमोर्णयोर्वेति वुञ्च प्राप्तः। भंगाशब्दात्तु धान्यानां भवन इत्याद्युदात्तत्वादणमयड् प्राप्त इत्येवं यथासंभवं प्रत्ययप्राप्तिरूह्या। हरदत्तस्तु तिल

264

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्दस्य घृतादित्वादंतोदात्तत्वमंगीकृत्य तत्तोनुदात्तादेश्चेत्यञ्। असंज्ञायां तिलयवाभ्यामिति मयडभाव इत्याह तत्र तिलशब्दस्य घृतादित्वकल्पने बीजं चिंत्यं। तूलधान्या
नां च द्रव्याणामिति फिट्सूत्रेणाद्युदात्तस्यैव न्याय्यत्वात्। तिलाश्च मे इत्यत्र तथैव वेदे पाठाच्च। गोष्ठजादयः इति संघाते कटजित्यादीन्यस्यैव प्रपंचः। इहोभयत्रादिशब्दः प्रकारे
पशुनामभ्यः इति। पशुनामादिभ्य इति भाष्ये प्रचुरः पाठः। गवां स्थानमिति। तस्येदमित्यत्रार्थे सर्वत्र गोरजादिप्रसंग इति यति प्राप्ते गोष्ठच्। संघात इति। अप्रसृतावयवः
समूहः संघातः। प्रसृतावयवस्तु विस्तारः कटच्पटचौ द्वावपि सामूहिकानामपवादौ। द्वित्वे इति। प्रकृत्यर्थस्य द्वित्वे द्योत्ये इत्यर्थः। उष्ट्रगोयुगमिति। इदं युगमित्यादि
वत्तद्वयवसंघातप्राधान्यादेकवचनं। एवमग्रेपि। नतमिति। नपुंसके भावे क्तः। नमनमिति। नीचैस्त्वमित्यर्थः। अवटीटमिति। नासिकासाधनके नमने वर्त्त
मानादवशब्दात्स्वार्थे प्रत्ययः कथं तर्हि नासिकायां पुरुषे चावटीटशब्दस्य प्रयोग इत्यत आह। तद्योगादिति॥ ❀ ॥ नेर्बिडच्। नते नासिकायाः संज्ञाया

नेर्बिडज्बिरीसचौ। ५।२।३२। निबिडं। निबिरीसम्। इनच्पिटच्चिकचि च। ५।२।३३। नेरित्येव। नासिकाया नतेऽभिधेये इनच्पिटचौ
प्रत्ययौ प्रकृतेश्चिकचि इत्यादेशौ च। कप्रत्यये चिकादेशो च वक्तव्यौ। चिकिनं। चिपिटं। चिक्कं। क्लिन्नस्य चिल्पिल् लश्चास्य चक्षुषी। क्लिन्ने च
क्षुषी अस्य चिल्लः। पिल्लः। चुल् च। चुल्लः। उपाधिभ्यां त्यकन्नासन्नारूढयोः। ५।२।३४। संज्ञायामित्यनुवर्तते। पर्वतस्यासन्नं स्थलमुपत्य
९ का। आरूढं स्थलमधित्यका॥

मिति वर्त्तते नि शब्दान्नासिकाया नतेऽभिधेये बिडज्बिरीसचौ स्तः। निबिडमिति। तद्योगान्निबिडा नासिका निबिरीसा। कथं
तर्हि निबिडाः केशाः निबिडं वस्त्रमिति। उपमानाद्भविष्यति। एतच्च काशिकायां स्पष्टं। केचित्तु उक्तप्रयोगानुरोधेनेह सूत्रे नते नासिकाया इति नानुवर्त्तत इति व्याचक्षते।
प्रकृतेरिति। निशब्दस्येत्यर्थः। आदेशौ चेति। प्रत्ययोस्तत्सन्नियोगेन यथासंख्यमिमावादेशौ च स्त इत्यर्थः। चिकिनमिति। इनच्प्रत्ययसन्नियोगेन चिकादेशः। चिपिट
मिति। पिटच्प्रत्ययसन्नियोगेन चिरित्यादेशः। क्लिन्नस्येति। चिल् पिल् इत्येतावादेशौ भवतः। लश्च प्रत्ययः। अस्य च क्षुषी इत्येतस्मिन्नर्थे चुल् चेति। चाल्लप्रत्ययं चुल्ल इति
क्लिन्नेस्य चक्षुषी इति पूर्वोक्त एव विग्रहः। कथं तर्हि स्युः क्लिन्नाक्षे चिल्लचुल्लपिल्लाः क्लिन्ने ह्लिन्नाप्यमीत्यमर इति चेदत्राहुः। पुरुषे व्युत्पादितानां तदवयवे लक्षणा
बोध्येति अन्ये त्वाहुः अस्य च क्षुषी इत्यत्र नष्टेति न वक्तव्यं क्लिन्ने चक्षुषी चिल्ले पिल्ले पुरुषे तु मत्वर्थे च। अर्शआदिषु स्वांगाद्धीनादिति सूत्रितत्वादिति। उपाधिभ्याम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



संज्ञाधिकाराद्रिहनियतविषयमासन्नारूढं गृह्यते इत्याशयेनाह। पर्वतस्येति। आसन्नं समीपं आरूढमुच्चस्थानं। उपत्यकेति। प्रत्ययस्थादितीत्वं तु न भवति। मकनश्च निषेध इत्युक्तत्वात्। ॥ कर्मणि घटोऽठच्॥ सप्तम्यन्तात्कर्मन्शब्दात् घटत इत्यर्थे ठच् स्यात्। कर्मठ इति। ठस्येक इतीह न भवति। अठचि ठस्याप्रत्ययत्वेनांगसंज्ञानिमित्ताभावात्। तारकितमिति। एवं पुष्पितं। फलितं पुलकितं रोमाञ्चितमित्याद्युदाहार्यं। प्रमाणे द्वयसच्। प्रमाणे विद्यमानात्प्रथमान्तादस्येति निर्दिष्टे प्रमेयेऽर्थे त्रयः प्रत्ययाः स्युः। प्रमाणमिह परिच्छेदकमात्रं तत्र मात्रच्। द्वयसच् दघ्नचौ तूर्ध्वमान एव भवतः। प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ मम इति भाष्यात्। ऊर्ध्वावस्थितेन येन मीयते तदूर्ध्वमानं ऊर्वादि तेन तिर्यग्मानादौ दण्डद्वयसं क्षेत्रमित्यादि न प्रयुज्यते। यथोत्तरं मुनीनां प्रामाण्यात्। अत एव द्विकाण्डा क्षेत्रभक्तिरित्यत्र द्वयसचो लुगिति प्राचोक्तं नादर्तव्यमित्यवोचाम। प्रमाणे ल इति। लुकः एषा पूर्वाचार्यसंज्ञा। प्रमाणत्वेन ये प्रसिद्धास्ततः परस्यैवायं लुगित्युदाहरति। शमो दिष्टिर्वितस्ति

कर्मणि घटोऽठच्।५।२।३५॥ घटत इति घटः। पचाद्यच्। कर्मणि घटते कर्मठः पुरुषः। तदस्य संजातं तारकादिभ्य इतच्।५।२।३६॥ तारकाः संजाता अस्य तारकितं नभः। आकृतिगणोऽयं। प्रमाणे द्वयसज्दघ्नञ्मात्रचः।५।२।३७॥ तदस्येत्यनुवर्तते। ऊरू प्रमाणमस्य ऊरुद्वयसम्। ऊरुदघ्नम्। ऊरुमात्रं। प्रमाणे लः। शमः। दिष्टिः। वितस्तिः। द्विगोर्नित्यम्॥ द्वौ शमौ प्रमाणमस्य द्विशमम्। प्रमाणपरिमाणाभ्यां संख्यायाश्च संशये मात्रज्वक्तव्यः॥ शममात्रम्। प्रस्थमात्रम्। पञ्चमात्राः। वत्वन्तात्स्वार्थे द्वयसज्मात्रचौ॥ तावदेव तावद्द्वयसम्। तावन्मा

रिति। शमः प्रमाणमस्येत्यादिविग्रहः। एषु मात्रचो लुक्। इतरयोरसंभवात् शमादीनामनूर्ध्वमानत्वात्। द्विगोर्नित्यमिति। द्विगोः प्रमाणे लात्तदन्तविध्यभावाच्च पूर्वेणाप्राप्ते लुग्विधीयते। ननु विकल्पस्याप्रकृतत्वान्नित्यग्रहणमिह निरर्थकमिति चेदत्राहुः। अनुपदं संशये वक्ष्यमाणो मात्रच् शममात्रमित्यादौ यथा न लुप्यते प्रमाणे ल इत्यस्य प्रमाणे द्वयसजिति यः पूर्वविधिस्तद्विषयत्वादेवं द्विगोरपि न लुप्येत। इष्यते च लुक्। द्वौ शमौ स्यातां न वा द्विशम इति। तथा चाधिकसंग्रहार्थं नित्यग्रहणमिति। अत्र केचित् द्विगोर्लुक् इत्युक्तेऽपि पुनर्लुग्ग्रहणं नित्यार्थमधिकसंग्रहार्थमिति व्याख्यातुं शक्यत इति वैचित्र्यार्थं नित्यग्रहणमित्याहुः। शममात्रमित्यादि। शमः स्यान्न वेत्यादिविग्रहः॥

265

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरुषहस्तिभ्यामण् च इत्यत्र न पर इति प्रकृतिभावः। हस्ती प्रमाणमस्य हास्तिनं। अत्र काशिकायामुक्तं द्विगोर्नित्यं लुक् द्विपुरुषमुदकमित्यादि व्याख्यानं च हरदत्तेन। यद्यपि प्रमाणे लो द्विगोर्नित्यमित्यस्यायमनुवादः पुरुषहस्तिनोः शमादिवत् प्रमाणत्वेनाप्रसिद्धत्वादत एव हि पुरुषद्वयसमित्यादौ प्रमाणे ल इति लुङ् न भवति तथाप्यपूर्वोऽयं लुग्विधीयत इति। एतच्चासंगतं द्विगोर्नित्यं लुगित्यपूर्ववचनस्य मुनित्रयानुक्तत्वात् अवश्यं तु विधीयत इत्यस्यानुमीयत इत्यर्थः। अयं भावः। द्विगो लक्षितलुकीत्यनुवर्तमाने पुरुषात्प्रमाणेऽन्यतरस्यामिति ङीब्विकल्प्यते तद्वदेवं लुकमनुमापयतीति। यत्तदेतेभ्यः॥ यावानित्यादि। आ सर्वनाम्न इत्यात्वे उगिदचामिति नुम्। अत्वसंतस्य चेति दीर्घः। हल्ङ्यादि संयोगान्तलोपौ। प्रमाण इत्यनुवर्तमाने परिमाणग्रहणं प्रमाणपरिमाणयोर्भेदात्। उक्तं। तथा च वार्तिकं। डावतावर्थवैशेष्यान्निर्देशः पृथगुच्यते। मात्राद्यप्रतिघाताय भावः सिद्धश्च डावतोरिति। अस्यार्थः॥ इह प्रागेव वतुपं विधाय तस्मिन् परे आत्वं विहितं। पूर्वाचार्यास्तु डावतुं विदधिरे तद्वी

पुरुषहस्तिभ्यामण् च। ५।२।३८॥ पुरुषप्रमाणमस्य पौरुषम्। पुरुषद्वयसम्। हास्तिनं। हास्तिद्वयसं। यत्तदेतेभ्यः परिमाणे वतुप्। ५।२।३९॥ यत्परिमाणमस्य यावान्। तावान्। एतावान्। किमिदंभ्यां वो घः। ५।२।४०॥ आभ्यां वतुप् स्याद्वस्य च घः। कियान्। इयान्। किमः संख्यापरिमाणे डति च। ५।२।४१॥ चाद्वतुप्। तस्य च वस्य घः स्यात्। का संख्या येषां ते कति। कियन्तः॥ ॥ ९९ त्यानिर्देशो यं डावतावितेि। विशेष्यत इति

विशेषस्तस्य भावो वैशेष्यं तस्मात्। अर्थभेदादित्यर्थः। अर्थभेदस्तु परिमाणं तु सर्वतः। आयामस्तु प्रमाणं स्यादिति प्रागेवोक्त इति भावः। ननु च नयोरर्थभेदे सति यावान् प्रस्थाया वतीरज्जुरित्यादि न सिध्येदत्र त्वायामप्रमानं गम्यते। यद्युपमानाद्वा विध्यतीति ब्रूषे तर्हि प्रमाणग्रहणमेवानुवर्त्यतां यावान् प्रस्थ इत्यादि प्रयोगाश्च मुख्याः संतु यत्तु परिममाणे प्रयोगाः यावान् धान्यराशिरित्यादयस्ते एवोपमानाद्भवंतु तत्राह। मात्रादीति। यत्तदेतेभ्य इति विशेषविहितो हि वतुप् सामान्यविहितान्मात्रजादीन् बाधेत तेन तन्मात्रमित्यादि न स्यात्। परिमाणग्रहणे सति तु भिन्नोपाधिकत्वात् वतुपः प्रमाणे विहितमात्रजादिभिः सह बाध्यबाधकभावो नेति भावः। नन्वेवमपि बाधः स्यादेव प्रमाणे द्वयसज्जित्यत्र प्रस्थमात्रमित्यादि सिद्धये प्रमाणग्रहणस्य परिच्छेदकमात्रपरतया व्याख्यातत्वे न वतुपो यत्तदेतेभ्यो विहितत्वेन विशेषविहितत्वात् तथा यात्तस्माद्यत्तदेतेभ्यो वतुप्। चेत्येवं सूत्र्यतां मास्तु परिमाणग्रहणमस्तु च प्रमाणे इत्यधिकारस्तेन यावती रज्जुर्यावान् धान्यराशिरित्यादि प्रयोगास्सर्वेऽप्युपचारं विनैव निर्वहंतीत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



परमनुकूलमत आह। भावः सिद्धश्चेति। डावतोरिति पंचम्यंतं। अर्थभेदे सतिवत्त्वं तन्मात्रजादीनामुत्पत्तिः। सिध्यति। तत्परिमाणमस्य तावद्धान्यं राशीकृतं तावत्प्रमाणमस्य कुड्यादेः तावन्मात्रं। यादृग्राशीकृतस्य धान्यादेर्दैर्घ्यं तादृक्कुड्यादेरपीत्यर्थः एकविषयत्वे तु वतुपैव विशिष्टस्य प्रमेयस्योक्तत्वाद्वतुर्वं तन्मात्रजादयो न स्युः। यस्य हि तावत्प्रमाणं तस्यं तदपि प्रमाणं। जानुप्रमाणकं जलादि। यस्य प्रमाणं तदपि जानुप्रमाणकमिति वक्तुं शक्यत्वात्। एवं च तावतु शब्द एव प्रयुज्येत न तु तावन्मात्रमित्यादि। अन्यथा तत्प्रमाणमस्य तन्मात्रं। तन्मात्रं प्रमाणमस्य तन्मात्रमात्रमित्येवं मात्रजादिभ्यां प्रत्ययमालाप्रसंगात्। किमिदंभ्यां। वतुप्स्यादिति। वकारस्य घविधिसामर्थ्याद्वतुपमनुवर्त्य सोप्यत्र विधीयत इति भावः। आदेः परस्येत्येव सिद्धे वइति वचनमादेशप्रतिपत्त्यर्थमितरथा घं प्रत्ययांतरं विज्ञायेत। कियानिति। इदंकिमोरीश्की। यस्येति चेति लोपः। इयानिति। ईशादेशस्य यस्येति लोपे प्रत्ययमात्रमवशिष्यते। पठंति च। उदितवति परस्मिन्प्रत्यये शास्त्रयोनौ गतवति विलयं च प्राकृतेपि प्रपंचो सपदि पदमुदीतं केवलः प्रत्ययो यत् तदियदिति मिमीते कोहदापंडितोपि वैयाकरणानामोपनिबद्धानां च प्रक्रियामाश्रित्य प्रवृत्तो ह्ययं श्लोकः। किमः संख्या। नदस्येत्य

संख्याया अवयवे तयप्। ५।२।४२। पञ्चावयवा अस्य पञ्चतयं दारु। द्वित्रिभ्यां तयस्यायज्वा। ५।२।४३। द्वयं। द्वितयं। त्रयम्। त्रितयम्॥

नुवर्त्तत एव। संख्यायाः परिमाणं परिच्छेदस्तस्मिन् कर्त्तव्ये यः प्रश्नस्तस्मिन्वर्तमानात्किमः प्रथमासमर्थादस्येति षष्ठ्यर्थे डतिः स्यात्। असंख्यापरिमाणे किं। क्षेपे माभूत् का संख्येयमेषां दशानां। अव्रतानाममंत्राणां जातिमात्रोपजीविनां। सहस्रशः समेतानां परिषत्त्वं न विद्यते इत्येवं संख्येयद्वारेणात्र संख्यायाः कुत्सा बोध्या॥ ❀॥ संख्याया अवयवे। अवयवे वर्त्तमानाया संख्यातद्वाचिनः प्रथमांतात्स्वार्थे तयप् स्यात्। यं प्रत्यवयवः सोऽवयवी प्रत्ययार्थः अस्येत्यधिकारात्। यथाद्वयसजादिषु प्रमाणे प्रकृत्यर्थे प्रमेयं प्रत्ययार्थस्तद्वत्। त्रयमिति। ननु त्रयोवयवाः तंतवो यस्य त्रयं सूत्रमिति प्रयोगे संभवत्यपि मुनित्रयमिति प्रयोगो न संगच्छते। अन्यपदार्थस्यावयविनोऽभावादिति चेदत्राहुः। अवयवीत्वत्र समुदाय एव स चातिरिक्तो वाऽनतिरिक्तो वेति विचारांतरं एवं च समुदायस्यातिरिक्तत्वपक्षेपि समुदायघटकत्वेन मुनीनां प्रत्यभिज्ञानान्मुनित्रयनमस्कारस्य विघ्नविघातकत्वमस्येवेति॥

266

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उभादुदात्तो नित्यं। इह चित्तरत्यन्ते नैवान्तोदात्तत्वं सिद्धं। सर्वोदात्तत्वं तु अनुदात्तं पदमेकवर्जमिति वचनाद्बाधितः। न च उभयेति संबुध्यते आमन्त्रिताद्युदात्तत्वं बाधितुं वचनमिति शंक्यं
पुरस्तादपवादन्यायेन चित्स्वरस्यैव बाध्यत्वात् नत्वामन्त्रिताद्युदात्तत्वस्येति सुवचत्वात्। तस्मादुदात्तवचनसामर्थ्याद्दारदेवायं प्रयुज्यते च तथा। उभयं शृणवच्च न इति। तदेत
त्सकलमभिप्रेत्याह स चेति। तदस्मिन्। पुनस्तद्ग्रहणमस्येति षष्ठ्यन्तसंबन्धतद्ग्रहणनिरासार्थं। प्रत्ययविधौ तदन्तविध्यभावादाह। दशान्तादिति। अंतग्रहणं किं। दश अधिका अस्मिन्
शते। न चेह व्यपदेशिवद्भावेन दशान्तत्वमस्तीति वाच्यं। व्यपदेशिवद्भावोऽप्रातिपदिकेनेत्यभ्युपगमात्। शदन्त। प्रत्ययग्रहणपरिभाषया तदन्तविधौ सति यस्मात्प्रत्ययविधिस्तदा
दे तदन्तस्येति परिभाषया तदादिनियमः स्यात्। तं वारयितुमंतग्रहणं। तेन एकत्रिंशं शतं एकचत्वारिंशमित्यादि सिद्धं न चैवं गोत्रिंशदधिका अस्मिन्गोशते इत्यादावतिप्र

उभादुदात्तो नित्यम्। ५।२।४४॥ उभशब्दात्तयपोऽयच् स्यात्। स चाद्युदात्तः। उभयम्॥ तदस्मिन्नधिकमिति दशान्ताड्डः। ५।२।४५॥ एकादश अधिका
दश मा। शतसहस्रयोरेवेष्यते। नेह। एकादश अधिका अस्यां विंशतौ। प्रकृतिप्रत्ययार्थयोः समानजातीयत्वमेवेष्यते। नेह। एकादश माषा अधिका
अस्मिन् सुवर्णशते॥ शदन्तविंशतेश्च। ५।२।४६॥ डः स्यादुक्तेऽर्थे। त्रिंशदधिका अस्मिन् त्रिंशं शतम्। विंशं। संख्याया गुणस्य निमाने मयट्। ५।२।४७।
भागस्य मूल्ये वर्तमानात्प्रथमान्तात्संख्यावाचिनः षष्ठ्यर्थे मयट् स्यात्। यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य द्विमयमुदश्विद्यवानां। गुणस्येति
किं। द्वौ व्रीहियवौ निमानमस्योदश्वितः। निमाने किम्। द्वौ गुणौ क्षीरस्य एक स्तैलस्य द्विगुणं क्षीरं पच्यते तैलेन॥ १९. संगः शंक्यः संख्याया अवयवे तयपित्यत

संख्याग्रहणानुवृत्तेः। अंतग्रहणमिह विंशतिशब्दानन्तरं कर्तव्यं। शदि शदन्ता चेति तेन एकविंशं शतमित्यादि सिध्यत्यन्यथा ग्रहणवतेति तदन्तविधिप्रतिषेधादिह न स्यात्। सं
ख्याया गुणस्य। गुणो भागः। निमीयते क्रीयतेऽनेनेति निमानं मूल्यं। मेङ् प्रतिदाने इत्यस्मान्निपूर्वाल्ल्युट्। तदाह भागस्य मूल्य इति षष्ठ्यर्थ इति। यद्यपि तदस्मिन्नधिकमित्यत
स्तदित्यनुवृत्तौ प्रथमान्तादित्ययमेवार्थो लभ्यते तथापि मेङ्कञ्चुत्यात तदस्य संजातमित्यतः तदस्येत्यनुवर्तनात् षष्ठ्यर्थ इत्येतदपि लभ्यत इति भावः। द्विमयमिति। द्विशब्दस्य सं
बन्धिशब्दत्वे नित्यसापेक्षत्वाद्यवानामिति पदे सत्यपि तद्धितोत्पत्तिरिहाविरुद्धेति ज्ञेयं। नन्वेवमपि प्रत्ययान्तस्योदश्विच्छब्देन सामानाधिकरण्यं दुर्लभं। यावतोदश्विद्भा
गे प्रत्ययो विहितो नोदश्विति। अत्राहुः। भागेऽपि विधीयमानः प्रत्ययः अभिधानस्वाभाव्याद्भागवन्तमाचष्टे॥ तेन सामानाधिकरण्यं भवतीति गुणनिमान इति वक्तव्ये।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि॰कौ॰
टी॰त॰
सु॰त॰
६७

व्यसोच्चारणादेकत्वं गुणस्येत्यत्र विवक्षितं। तेनेह न भवति। यवानां द्वौ भागौ निमानमेषामुदश्वितस्त्रयाणां भागानामिति। भूयसश्च वाचिकायाः संख्यायाः प्रत्यय इष्यते। इह न भवति। एको भागो निमानमस्येति। भूयस इति च प्रत्ययार्थादाधिक्यमात्रं प्रकृत्यर्थस्य विवक्षितं न तु बहुत्वं तेन न द्विशब्दादपि भवत्येव। तस्य पूरणे। तस्येति षष्ठ्यंतानुकरणमेकत्वं त्वविवक्षितं। एकस्य पूरणासंभवात्। पूर्यतेऽनेनेति पूरणः। एयं तात्करणे ल्युट्। एकादशानामिति। उद्भूतावयवभेदः समुदायः प्रकृत्यर्थः। अवयवः प्रत्ययार्थः। इह यस्मात्संख्यावाचिनः प्रत्ययविधिस्तदीयप्रवृत्तिनिमित्तस्य एकादशत्वादेः पूरणे प्रत्ययः। यथाऽनिष्पाद्यनेयाद्येत्यादिषु प्रवृत्तिनिमित्तस्यैवातिशयादिकं गृह्यते अंतरंगत्वात्तथेहापि। तेन एकादशानां घटानां पूरणो जलादिरित्यत्र नातिप्रसंगशंकालेशोपीति भावः। ननु यदि प्रवृत्तिनिमित्तस्य पूरणे प्रत्ययस्तर्ह्यत्र एकादशत्वस्य पूरणमिति विग्रहो वक्तुं युक्त इति चेदत्राहुः। वैयाकरणपाशः इत्यत्र यथा याप्यो वैयाकरण इति विग्रहः। न तु याप्यं वैयाकरणत्वमिति तथेहापि बोध्यमिति। एवं च सूत्रक्रमेणाध्यायेषु गम्यमा

तस्य पूरणे डट्। ५।२।४८॥ एकादशानां पूरण एकादशः॥ नान्तादसंख्यादेर्मट्। ५।२।४९॥ डटो मडागमः स्यात्। पञ्चानां पूरणः पञ्चमः। नान्तात्किं
विंशः। असंख्यादेः किं। एकादशः॥ षट्कतिकतिपयचतुरां थुक्। ५।२।५१॥ एषां थुगागमः स्याड्डटि। षण्णां पूरणः षष्ठः। कतिथः। कतिपयशब्दस्यासंख्यात्वेऽप्यत एव ज्ञापकाड्डट्। कतिपयथः। चतुर्थः॥ चतुरश्छयतावाद्यक्षरलोपश्च॥ तुरीयः। तुर्यः। बहुपूगगणसङ्घस्य तिथुक्। ५।२।५२॥ डटीत्येव। पूगसङ्घयोरसंख्यात्वेऽप्यत एव डट्। बहुतिथः इत्यादि। वतोरिथुक्॥ ५।२।५३॥ डटीत्येव। यावतिथः॥

११ नेषु द्विरादेर्जित्यध्यायो यदा चरमं गम्यते तेन तदा सोऽप्यष्टमो भवत्येव। नांतादसंख्यादेः। डट इति। डडिति प्रथमांतस्यानुवृत्तस्य नांतादिति पंचम्या षष्ठी कल्प्यत इति भावः। यद्यपीह मटः प्रत्ययत्वेऽपि न क्षतिस्तथाप्युत्तरत्र मट आगमत्वमेवाभ्युपगंतव्यं। अनुदात्तत्वाय यथा स्यात्। प्रत्ययत्वे त्वाद्युदात्तः स्यात्। यथा चैकरूप्येणैव संदर्भव्याख्यानमुचितं। अन्ये त्वाहुर्मटः प्रत्ययत्वे अकारसहितो मकारो विधेयः। आगमत्वे तु मकारमात्रमिति लाघवमस्तीति। विंश इति। विंशतेः पूरणः। तिविंशतेर्डितीति लोपः। षट्कति इह षष्ठीनिर्देशबलात् डटो नामागमित्वं स्पष्टमिति तदानुकूल्येनानुवृत्तो डट्सप्तम्या विपरिणम्यते तदाह। डटीति। डट एव थुट् तु न कृतः। षष्ठषकारस्य जश्त्वप्रसंगात्। चतुर्थे रेफस्य विसर्गप्रसंगाच्च। न चैवं नांतादिति सूत्रेऽपि डटि परे मुगेव विधीयतामिति वाच्यं। पंचमः सप्तम इत्यादौ नलोपाभावापत्तेः। चतुरश्छयताविति॥ विशेषविहिताभ्यामपि छयद्भ्यां डट् प्रत्ययो न बाध्यते थुग्विधानसामर्थ्यात् तेन चतुर्थ इति सिद्धं।

267

आद्यस्येति। अच्सहितं व्यंजनमक्षरशब्देनोच्यते। अच्सहितस्यादेर्व्यंजनस्येत्यर्थः। व्यंजनसहितस्यादेरच इति व्याख्याने तु द्विर्वचनन्यायेन नकारस्यापि लोपः स्यादिति ह
रदत्तः। आदेर्व्यंजनस्येति व्याख्याने प्रमाणं तु द्वितीयतृतीयेति सूत्रे तुर्यलोपेति निर्देशो बोध्यः॥ ॥ द्वेस्तीयः। डटोपवाद इति। डट आदेशस्तु न भवति डिति टेर्लोपः प्रस
क्तेया द्वितीयाश्रितेति निर्देशानुपपत्तेः। अतएव निर्देशाद् द्विशब्दस्याप्यादेशो न भवति। तृतीय इति। रेफस्य ऋकारः संप्रसारणं। हल इति दीर्घस्तु न भवति द्रलोप इति सूत्राद
ण इत्यनुवृत्तेश्चेति नोक्तं प्रत्ययो मा विज्ञायीति। विंशत्यादिभ्यः॥ इहग्रन्थसन्यापंक्त्यादिसूत्रे निपातिता विंशत्यादयो गृह्यन्ते न लोकप्रसिद्धाः विप्रकृष्टत्वादिति भाष्यमतं। वृत्ति
कृता तु विंशत्यादयो लौकिका एव संख्याशब्दा गृह्यन्ते न पंक्त्यादिसूत्रनिर्दिष्टास्तद्ग्रहणे एकविंशतिप्रभृतिभ्यो न स्यात्॥ ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधात्। एवं च स
ति षष्ट्यादेश्चासंख्यादेरिति पर्युदासो युज्यत एवेत्युक्तं। एकविंशतितम इति। यद्यपि भाष्यमतेन तदन्तविधिर्दुर्लभस्तथापि षष्ट्यादेश्चेति सूत्रे संख्यादिपर्युदासो ज्ञापयति॥

द्वेस्तीयः। ५।२।५४॥ डटोपवादः। द्वयोः पूरणो द्वितीयः। त्रेः सम्प्रसारणं च। ५।२।५५॥ तृतीयः। विंशत्यादिभ्यस्तमडन्यतरस्याम्। ५।२।५६॥ एभ्यो
डटस्तमडागमो वा स्यात्। विंशतितमः। विंशः। एकविंशतितमः। एकविंशः। नित्यं शतादिमासार्धमाससंवत्सराच्च। ५।२।५७॥ शतस्य पूरणः
शततमः। एकशततमः। मासादेरतएव डट्। मासतमः। षष्ट्यादेश्चाऽसंख्यादेः। ५।२।५८॥ षष्टितमः। संख्यादेस्तु विंशत्यादिभ्य इति विकल्प

इहप्रयोः स्पष्टं। नन्वनारंभो वा प्रातिपदिकविज्ञानाद्यथा सहस्रादिष्विति वदताकात्यायनेन पंक्त्यादिसूत्रस्य प्रत्याख्यातत्वा(( एव। एकषष्टः॥ एकषष्टितमः॥
इहप्रकरणे तदन्तानामपि ग्रहणमिति एवं च सति एकान्नविंशतेः पूरणः एकान्नविंशतितम इत्यपि सिध्यति लौकिकानां ग्रहण
मिति वृत्तिमते तु नैतत्सिध्येत् विंशतिसंख्यातः प्राग्भावित्वादस्याः संख्यायाः एतच्च कैयटहरदत्तग्रंथयोः स्पष्टं। नन्वनारंभो वा प्रातिपदिकविज्ञानाद्यथा सहस्रादिष्विति वदता
कात्यायनेन पंक्त्यादिसूत्रस्य प्रत्याख्यातत्वात्तत्सूत्रे निपातिताः विंशत्यादयो गृह्यन्त इति भाष्यमतमयुक्तमिति चेदत्राहुः। यद्यपि प्रत्याख्यानं तथापीहार्थमावश्यकं तत्। अतए
व तत्र भाष्यकृता नासुपाकर्त्तव्यायचानुगमः क्रियत इत्युक्तमतः कात्यायनोक्तप्रत्याख्यानं नादर्त्तव्यमिति। शततम इति। यद्यपीदं षष्ट्यादेश्चेत्युत्तरसूत्रेणैव सिध्यति तथापि
संख्याद्यर्थं नित्यं शतादीन्यावश्यकमिति ध्वनयन्नुदाहरति एकशततम इति। मासादेरिति। संख्यावाचित्वाभावेऽपीति भावः। षष्ट्यादेश्चेति। विंशत्यादिभ्य इति विक
ल्पप्राप्ते नित्यार्थीयमारंभः। संख्यादेस्त्विति। एतच्च प्राक्तनाद्धो ध्वनितं नित्यं शतादीत्युक्तत्वात्॥

CC-0. In Public Domain. Digitization by eGangotri



मतौछः। मत्वर्थ इति। मत्तोर्विषय इत्यर्थः। तेन तदिति प्रथमासमर्थविभक्तिरस्यास्मिन्निति प्रत्ययार्थश्चेह लभ्यते। विधानसामर्थ्यादिति। मतुप्प्रकरण एवास्मिन्सूत्रे कर्त्तव्ये यदत्रास्य लुग्विधानं तन्मात्वर्थिकं लुकमनुमापयतीति कैयटः। तत्र कुशलः। सप्तमीसमर्थात्पथिन् शब्दात्कुशल इत्यर्थे वुन् स्यात्। आकर्षादिभ्यः कन्। वुना सिद्धे कन्।

मतौ छः सूक्तसाम्नोः। ५।२।५९॥ मत्वर्थे छः स्यात्। अच्छावाकशब्दो अस्मिन्नस्ति। अच्छावाकीयं सूक्तं। वारवन्तीयं साम। अध्यायानुवाकयोर्लुक्। ५।२।६०॥ मत्वर्थस्य छस्य अत एव ज्ञापकात्तत्र छः। विधानसामर्थ्याच्च विकल्पेन लुक्। गर्दभाण्डः गर्दभाण्डीयः। विमुक्तादिभ्योऽण्। ५।२।६१॥ मत्वर्थेऽण् स्यादध्यायानुवाकयोः॥ विमुक्तशब्दोऽस्मिन्नस्ति वैमुक्तः॥ दैवासुरः॥ गोषदादिभ्यो वुन्। ५।२।६२॥ मत्वर्थेऽध्यायानुवाकयोः। गोषदकः। इषेत्वकः। तत्र कुशलः पथः। ५।२।६३॥ वुन् स्यात्। पथिकुशलः पथिकः॥ आकर्षादिभ्यः कन्। ५।२।६४॥ आकर्षे कुशल आकर्षकः आकषादिभ्य इति रेफरहितो मुख्यः पाठः। आकषो निकषः। धनहिरण्यात्कामे। ५।२।६५॥ काम इच्छा। धने कामो धनको देवदत्तस्य। हिरण्यकः॥ स्वाङ्गेभ्यः प्रसिते। ५।२।६६॥ केशेषु प्रसितः केशकः। तद्रचनायां तत्पर इत्यर्थः। उदराट्ठगाद्यूने। ५।२।६७॥ अविजिगीषौ ठक् स्यात् नोपवादः। बुभुक्षयाऽत्यन्तपीडित उदरे प्रसित औदरिकः। आद्यूने किम्। उदरकः। उदरपरिमार्जनादौ प्रसक्त इत्यर्थः। सस्येन परिजातः। ५।२।६८॥ कन् स्यात्। तेन तु ठक्। सस्यशब्दो गुणवाची न तु धान्यवाची शस्येनेति पाठान्तरं। सस्येन गुणेन परिजातः सम्बद्धः सस्यकः साधुः॥ अंशं हारी। ५।२।६९॥ हारीत्यावश्यके णिनिः। अत एव तद्योगे षष्ठीन। अंशको दायादः। तन्त्रादचिरापहृते। ५।२।७०॥ तन्त्रकः पटः। प्रत्यग्र इत्यर्थः॥ ब्राह्मणकोष्णिके संज्ञायाम्। ५।२।७१॥ आयुधजीविनो ब्राह्मणा यस्मिन्देशे स ब्राह्मणकः॥ अल्पमन्नं यस्यां सा उष्णिका यवागूः।

यहणं इद्दं तार्थं अशनिकः शाकुनिकः सरुकः मत्स्यः पाठ इति। आकषत्यस्मिन् सुवर्णादिकमित्याकषः। पुंसि सं[१८] अन्नशब्दस्य उष्णादेशो निपात्यते ॥
ज्ञायां घ इति व्याख्यायये त्वाकर्षादिभ्य इति सरेफं पठं ति तेषामाकर्ष इति घञ्रिहूपमिति हरदत्तेनोक्तत्वादिति भावः॥ धने काम इति। तत्रेत्यनुवर्त्तनात्सप्तम्यन्तात्प्रत्य

268

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उदरात्। आद्यूनशब्दार्थमाह। अविजिगीषाविति। दिवो विजिगीषायामिति तत्रैव निष्ठानत्वविधानात्। सस्येन। कर्त्तरि तृतीयेयं। परितो जातः परिजातः फलितमाह। संवृद्ध इति
अत एवेति। अकेनोरिति निषेधादिति भावः। तंत्रात्। तन्यं तेतंत वोऽस्मिन्निति व्युत्पत्त्या तंत्रं तन्तुवायसकाला अचिरः कालो अपहृतस्येत्य चिरापहृतं तस्मिन्। कालः परिमाणिने
तिसमासः प्रत्ययश्चेति। नूतन इत्यर्थः। ब्राह्मणकोष्णिके। ब्राह्मणशब्दायुधजीविलोपाधिकात्स्वयमानं तत्समभ्यर्थेकन् प्रत्ययो निपात्यते। अन्नशब्दात्तु अल्पत्वोपाधिकात्। न दाह
आयुधेत्यादि॥ ✱॥ शीतोष्णाभ्यां शीतमिव शीतं मंदमित्यर्थः। शीते सति कार्यकरणे पाटवाभावात्। उष्णमिवोष्णं शीघ्रमित्यर्थः। क्रियाविशेषणाभ्यां द्वितीयान्ताभ्यां प्रत्ययः। कृद्योग
लक्षणा षष्ठी तु क्रियाविशेषणे नेत्युक्तं। मुख्यार्थवृत्तिभ्यां तु प्रत्ययो न भवत्यनभिधानात्। अधिकं। अध्यारूढशब्दादिति। गत्यर्थाकर्मकेत्यादिना रुहेः कर्त्तरि कर्मणि वा क्तो वि
हितः आधिक्तप्रत्ययेन कर्मणोऽनभिहितत्वात् अध्यारूढशब्दयोगे द्वितीया। अध्यारूढो द्रोणः खारीमिति। ग्रामं गत इतिवत्। तथा अधिकशब्देनापि योगे द्वितीयायां प्राप्ता

शीतोष्णाभ्यां कारिणि। ५।२।७२॥ शीतं करोतीति शीतकः अलसः। उष्णं करोतीति उष्णकः शीघ्रकारी। अधिकम्। ५।२।७३॥ अध्यारूढशब्दात्कन् उत्त
रपदलोपश्च। अनुकाभिकाभीकः कमिता। ५।२।७४॥ अन्वभिभ्यां कन्। अभेः पाक्षिको दीर्घश्च। अनुकामयते। अनुकः। अभिकामयते। अभिकः।
अभीकः॥ पार्श्वेनान्विच्छति। ५।२।७५॥ अनृजुरुपायः पार्श्वं तेनान्विच्छति पार्श्वकः॥ अयःशूलदण्डाजिनाभ्यां ठक्ठञौ। ५।२।७६॥ तीक्ष्ण उपायो
ऽयःशूलं तेनान्विच्छति आयःशूलिकः साहसिकः। दण्डाजिनं दम्भः। तेनान्विच्छति दाण्डाजिनिकः॥ ॥ ॥ ॥

यां यस्मादधिकं तदस्मिन्नधिकमिति च निर्देशाद् यात् पंचमीसप्तम्यौ भवतः। अधिको द्रोणः खार्याः अधिको द्रोणः खार्यामिति। द्वितीये तु क्तेन कर्मणोऽभिहितत्वात्प्रथ
मा। अधिका खारी द्रोणेन कर्मणोऽभिहितत्वादेव पंचमीसप्तम्याविह न शंकनीये। अनुका। समाहारद्वंद्वे सौत्रं पुंस्त्वं। सूत्रत्वाल्लिंगव्यत्यय इति फलितोऽर्थः। अन्व भि
भ्यां कनिति। क्रियाविशिष्टसाधनवाचिभ्यां स्वार्थे निपात्यत इत्यर्थः॥ पार्श्वेनान्विच्छति। आकर्षादिभ्यः कन्नित्यतः कन्ननुवर्त्तते। अनृजुरिति। तिर्यगवस्थानात्पा
र्श्वमनृजु तत्साधर्म्यादुपायोऽपि इह शीतोष्णपार्श्वायःशूलदंडाजिनशब्दाः गौणा एव गृह्यंते मुख्यार्थेभ्यस्तु प्रत्ययो न भवत्यनभिधानात्॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· तावतिथं ग्रहणमिति लुग्वा। तावतां पूरणं तावतिथं। वतोरिथुक्। यथा तस्यापत्यमित्यत्र तस्येति षष्ठ्यन्तानां सामान्यनिर्देशस्तथात्र तावतिथमिति। पूरणप्रत्ययान्तानां साम
टी·त न्यनिर्देशः। अनन्तरापत्यबिठकुठञौ नानुवर्तेते अस्वरितत्वादित्यभिप्रेत्याह॥ कन्स्यादिति। पूरणप्रत्ययस्येति। ननु कनः लुग्वा ग्रहणानर्थक्यप्रसंगात्। पंचमं पंचमकमि
सु·त· त्यादिरूपं हितेन साध्यं। तच्च महाविभाषाधिकाराद्विकल्पेन कन उत्पत्त्या सिद्धमेव तस्मात्पूरणप्रत्ययस्यैव लुक् सूत्रकारस्याभिमतमिति व्याचष्टे॥ द्विकमिति। वार्तिकका
९८ रलुक् कन एव लुगिति व्याख्यामभिप्रेत्य तावतिथं ग्रहणमिति लुग्वा वचनानर्थक्यं विभाषाग्रहणादित्याह। तन्मते द्वितीयकं द्वितीय· मित्येवरूपं न तु द्विकमिति बो

तावतिथं ग्रहणमिति लुग्वा।५।२।७७॥ कन् स्यात्पूरणप्रत्ययस्य च लुग्वा। द्वितीयकम् द्विकम्वा ग्रहणं देवदत्तस्य द्वितीयेन रूपेण ग्रहणमित्यर्थः। तावतिथेन गृह्णातीति कन् वक्तव्यो नित्यञ्च लुक्॥ षष्ठेन रूपेण गृह्णाति षट्को देवदत्तः। पञ्चकः॥ स एषां ग्रामणीः।५।२।७८॥ देवदत्तो मुख्यो येषां ते देवदत्तकाः। त्वत्काः मत्काः। शृङ्खलमस्य बन्धनं करभे।५।२।७९॥ शृङ्खलकः करभः। उत्क उन्मनाः।५।२।८०॥ उद्गतमनस्कवृत्तेरुच्छब्दात्स्वार्थे कन्। उत्कः उत्कण्ठितः॥ कालप्रयोजनाद्रोगे।५।२।८१॥ कालवचनात्प्रयोजनवचनाच्च कन्स्याद्रोगे। द्वितीयेऽहनि भवो द्वितीयको ज्वरः। प्रयोजनं कारणं रोगस्य फलं वा। विषपुष्पैर्जनितो विषपुष्पकः। उष्णं कार्यमस्य उष्णकः। रोगे किम्। द्वितीयो दिवसोऽस्य॥ तदस्मिन्नन्नं प्राये संज्ञायाम्।५।२।८२॥ प्रथमान्तात्सप्तम्यर्थे कन् स्यात्। यत्प्रथमान्तमन्नं चेत्प्रायविषयं तत्। गुडापूपाः प्रायेणान्नमस्यां गुडापूपिका पौर्णमासी। वटकेभ्य इनिर्वाच्यः॥ वटकिनी। कुल्माषादञ्।५।२।८३॥ कुल्माषाः प्रायेणान्नमस्यां कौल्माषी॥ श्रोत्रियंश्छन्दोऽधीते।५।२।८४॥ श्रोत्रियः। वेत्यनुवृत्तेश्छान्दसः॥ श्राद्धमनेन भुक्तमिनिठनौ।५।२।८५॥ श्राद्धी। श्राद्धिकः॥ ॥

९९ ष्यं। तावतिथेनेति। पूरणप्रत्ययान्ताद्ग्रहणे
याधिकात्स्वार्थे विधीयमानो ग्रहीतरि न प्राप्नोतीति वचनमिति कैयटः। स एषां ग्रामणीः। ग्रामणीर्नापिते पुंसि श्रेष्ठग्रामाधिपे त्रिष्वित्यमरः। करभ इति। उष्ट्रबालकः। द्वितीयेह
नीति। यद्यपि द्वितीयशब्दः कालवाची न भवति तथाप्यर्थप्रकरणादिना वृत्तिविषये काले वर्तत इति भावः। ननु साक्षात्कालवाचिभ्यो मासादिभ्यो न भवति द्वितीयादि ९८
भ्य एव भवतीत्यत्र किं मानमिति चेदत्राहुः। उत्तरसूत्रस्य संज्ञापकर्षणाच्छन्दस्वभावाद्वा तद्बोध्यमिति। वटकेभ्य इति। कनि प्राप्ते वचनं। ननु संज्ञाग्रहणात्कन्न भविष्यती
ति चेत्किं ततः इनेरप्राप्तत्वात्तदर्थं वचनमंगीकार्यमेव। अत इनिठनाविन्येव कथंचिदिनिः सिध्यतीत्याशात्र न कार्या समर्थाच्चनतोऽस्मृतावितिवचनात्। श्रोत्रियन्॥

269

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पः छंदोधीते सः श्रोत्रियो भवति। अत्र भाष्ये छंदोधीत इत्यस्य वाक्यस्यार्थे श्रोत्रियन्निपात्येतन्यदं निपात्यत इति वाक्यार्थे पदवचनपक्षः। छंदसो वा श्रोत्रभावो निपात्यते तदधीत इ त्येतस्मिन्नर्थे घश्च प्रत्यय इति पक्षांतरं च स्थितं। व्याख्यानं च कैयटेन वाक्यार्थस्य संबंधरूपस्य क्रियारूपस्य वा असत्त्वरूपत्वात्। श्रोत्रियशब्दस्य च सत्त्वरूपार्थाभिधायित्वा द्वाक्यार्थग्रहणे न तद्वाचय च्छंदोध्यायी अभिधीयत इति। एकां शाखामधीत्य श्रोत्रियो भवतीति धर्मशास्त्रं। वेत्यनुवृत्तेरिति। नातवतिर्यं ग्रहणमिति लुग्वत्पतः। श्राद्धमने न। श्राद्धमस्मिन्नस्तीति श्राद्धं। भक्षा श्रद्धार्चाभ्यो णः। यद्यपि पित्र्यं कर्म श्राद्धशब्देनोच्यते। तथापीह तत्साधनद्रव्यमुच्यते मुख्यस्य श्राद्धस्य भोक्तुमशक्यत्वात्। श्राद्धी। श्राद्धिक इति। अद्यतन एवेष्यते अद्य भुक्ते श्वः श्राद्धिक इति माभूत्॥ ॥ पूर्वादिनिः। पूर्वमिति क्रियाविशेषणात् द्वितीयांतात्प्रत्ययः। अनेनेति कर्तृवाचकमनुवर्तते न च क्रि यामंतरेण कर्ता संभवतीति कांचित्क्रियामध्याहृत्य प्रत्ययो विधेयस्तदाह पूर्वं कृतमनेनेति। सपूर्वाच्च। अनेनेति पूर्वसूत्रमनुवर्तते। विद्यमानपूर्वं कात्पूर्वशब्दादनेनेत्य

पूर्वादिनिः। ५।२।८६॥ पूर्वं कृतमनेन पूर्वी। सपूर्वाच्च। ५।२।८७॥ कृतपूर्वी॥ इष्टादिभ्यश्च। ५।२।८८॥ इष्टमनेन इष्टी। अधीती॥ छन्दसि परि पन्थिपरिणौ पर्य्यवस्थातरि। ५।२।८९॥ लोके तु परिपन्थिशब्दो न न्याय्यः॥ अनुपद्यन्वेष्टा। ५।२।९०॥ अनुपदमन्वेष्टा। अनुपदी॥ साक्षाद्द्रष्ट रि संज्ञायाम्। ५।२।९१॥ साक्षाद्द्रष्टा साक्षी। क्षेत्रियच्परक्षेत्रे चिकित्स्यः॥ ५।२।९२॥ क्षेत्रियो व्याधिः शरीरान्तरे चिकित्स्यः॥ अप्रतीतकार्य

स्मिन्नर्थे इनिः स्यात्। पूर्वान्नाच्चेत्येतन्न फलितम्। कृतपूर्वीति। कृतपूर्वशब्दयोः सुप्सुपेति समासः। इह प्रातिपदिकाधिकारात्पूर्वादिनिरित्यनेनैव पूर्वशब्दांतप्रातिपदिकात् कृतपूर्वशब्दादिनौ सिद्धे सपूर्वाच्चेत्येतन् ग्रहणवता प्रातिपदिकेन तदंतविधिर्नेति परिभाषां ज्ञापयति। कृतपूर्वीत्येतत्सिद्धये पूर्वान्नाच्चेति स्वीकृतेन नैव व्यपदेशिव द्भावेन पूर्वीत्यपि रूपे सिद्धे पूर्वादिनिरित्येतत् व्यपदेशिवद्भावोऽप्रातिपदिकेनेति परिभाषां ज्ञापयति। छंदसि। पर्यवस्थातृशब्दोऽत्र पर्यायास्तदर्थे इनिप्रत्ययः। अ वस्थातृशब्दस्य च पंथपरणौ वादेशौ निपात्येते। अपत्यं परिपंथिनं। मात्वा परिपरी विदत्। उभयत्रापि परिशब्दे अवग्रहः। लोके त्विति। अनुपस्थितपरिपंथिभिः पार्थिवैरित्यादौ अनुपद्यन्वेष्टा॥ अन्वेष्टरि इनिप्रत्ययो निपात्यते। अनुपदमिति। पदस्य पश्चात्। पश्चादर्थेऽव्ययीभावः। अनुपदी गवामिति। पदापेक्षया षष्ठी। गो पदान्पश्चादन्वेषणं गवामेव। तेन न हिरण्यादावन्वेष्ये न भवतीति हरदत्तः। साक्षाद्द्रष्टरि। द्रष्टर्यर्थे इनिः स्यात्। साक्षाच्छब्दोऽव्ययं तेन प्रकृतिवदनुकरणमित्यनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· दिशादिहसूत्रेपंचम्यालुक् उदस्थास्तंभोःअवाच्चालंवनेत्यादौतु प्रकृतिवदित्यतिदेशस्यवैकल्पिकत्वेनाव्ययत्वाभावात्पंचम्यालुङ्नभवतीतिवोध्यं। साक्षीति। अव्यया
टी·त· नांभमात्रेइतिटिलोपः। यद्यपिसाक्षाद्द्रष्टारस्त्रयोभवंतिदातागृहीताउपद्रष्टाच। तथापीहसंज्ञाग्रहणात्साक्षिशब्देनोपद्रष्टैवोच्यतेइत्याहुः। क्षेत्रियचापरक्षेत्रशब्दा
सु·त· त्सप्तम्यंताद्घच्परशब्दस्यलोपश्चनिपात्यतइतिमनोरमा। अन्येतुपरक्षेत्रेचिकित्स्यइत्यर्थेक्षेत्रियजितिनिपात्यते वाक्यार्थेपदवचनंश्रोत्रियवदित्याहुः। एवमन्य
७० त्राप्यूह्यं। क्षेत्रियोव्याधिरिति। किंचक्षेत्रियंविषं। यत्परशरीरेसंक्रमय्यचिकित्स्यते। अपिचक्षेत्रियाणितृणानि। यानिसस्यानिसस्यार्थक्षेत्रेजातानिचिकित्स्यानि
विनाशयितव्यानि। किंचक्षेत्रियःपारदारिकः परदाराःपरक्षेत्रंतत्रचिकित्स्योनिग्रहीतव्यः। सर्वेप्येतेपक्षाआकरेस्थिताः॥ ॥ इंद्रियमिंद्र॥ इंद्रशब्दाद्घच्इंद्रेण

इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमितिवा। पा।५।२।९३॥ इन्द्रआत्मातस्यलिङ्गम्। करणेनकर्तुरनुमानात्। इतिकरणः प्रकारा
र्थः। इन्द्रेणदुर्जयमिन्द्रियम्। तदस्यास्त्यस्मिन्नितिमतुप्। पा।५।२।९४॥ गावोस्यास्मिन्वासन्तिगोमान्॥ भूमनिन्दाप्रशंसासुनित्ययोगेतिशायने॥
सम्बन्धेऽस्तिविवक्षायाम्भवन्तिमतुवादयः॥१॥ रसादिभ्यश्च। पा।५।२।९५॥ मतुप्। रसवान्। रूपवान्॥ अन्यमत्वर्थीयनिवृत्त्यर्थंवचनम्। रसरूपव
र्णगन्धस्पर्शशब्दस्नेहगुणात् एकाचः। स्ववान्। गुणग्रहणंरसादीनांविशेषणम्। तसौमत्वर्थे। १।४।१९॥ तान्तसान्तौभसंज्ञौस्तोमत्वर्थेप्रत्य
येपरे। वसोस्सम्प्रसारणम्। विदुष्मान्। गुणवचनेभ्योमतुपोलुगिष्टः। शुक्लोगुणोस्यास्तिशुक्लः पटः। कृष्णः॥ ९९ दृष्टंज्ञातंममचक्षुर्ममश्रोत्रमि

त्यादिक्रमेणसृष्टमदृष्टद्वाराजुष्टंप्रीणितंसेवितंवादत्तंयथायथंविषयेभ्यः रूढिशब्दोयंकथंचिद्व्युत्पादितः। तदस्यास्त्यस्मिन्नितिमतुप्। तदितिप्रथमासमर्थोस्त्य
यः अस्तीतिपुरुषवचनेअविवक्षितेकालस्तुविवक्षितः। धनेगतेभाविनिवाधनवानयमितिप्रतीत्यभावात्। इतिशब्दोविषयविशेषलाभार्थस्तथाहि। भूमनिंदाप्रशं
सासुनित्ययोगेतिशायने। संसर्गेस्तिविवक्षायांभवंतिमतुवादयः। अस्तिविवक्षायांयेमतुवादयोविधीयंतेतेभूमादिष्वेवविषयेषुभवंतीतिवार्तिकार्थः भूमावहुत्वंतच्चाप
क्षिकं। यस्यहियावद्वुचितंतावदेववहुत्ववोधकवहुशब्देनापिप्रतीयते। यथापंचभिरपिगोभिरीश्वरदत्तस्यवह्व्योगावइतिव्यवहारः। एवंसहस्रेगोरपिगावो ७०
ल्पाइतिव्यवहारः। गोमान्। यवमान्। यस्यखार्यादिभिः परिछिन्नायवास्संतिसएवमुच्यते। ननुसहस्रेणापियवैर्यवमानिति। कथंतर्हियवमतीभिरः।

270

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्विर्यूपंप्रोक्षतीति। अत्राहुः। जातिमात्रसंबंधस्य विवक्षितत्वान्न भूमाभावेप्यत्र मतुप्। भूमादिग्रहणं तु प्रायेण भूमादयः प्रतीयंत इत्येवंपरमिति। निंदायां ककुदा
वर्तिनी कन्या। प्रशंसायां रूपवान्। नित्ययोगे क्षीरिणो वृक्षाः। अतिशायने। उदरिणी कन्या। संसर्गे दंडी। संसर्गः संयोगः तेन संयुक्त दंड एवोच्यते। न तु गृहावस्थि
त दंडोपि। इह दंडपुरुषयोः संयोगे सत्यपि दंडी पुरुष इत्यादिवत्पुरुषी दंडः पुरुषवान् दंड इति न प्रयुज्यते। वृत्तिनियामकस्य विलक्षणसंबंधस्याभावात् संयोगे समा
नेपि प्रतीतिबलाद्वैलक्षण्यं कल्प्यत इत्याहुः। एवं च यववसंयोगमात्रेण यववमत्यः। आपो न भवंति किंतु यववमज्जलवच्च पात्रमेवेत्याशयेन कथं यववमतीभिरद्भिरित्याक्षे
पः। भूमादिग्रहणं प्रायिकमित्याद्युत्तरं चेसंगच्छत एव। अन्यमत्वर्थीयेति। कथं तर्हि रूपिणी कन्या रसिको नट इति। अत्राहुः। रसादिगणे गुणादिति पठ्यते। तेन गु

मादुपधायाश्च मतोर्वोऽयवादिभ्यः। ८।२।९॥ मवर्णावर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जितात्परस्य मतोर्मस्य वः स्यात्। किंवान्। ज्ञानवान्। वि
द्यावान्। लक्ष्मीवान्। यशस्वान्। भास्वान्। यवादेस्तु यवमान्। भूमिमान्॥ झयः। ८।२।१०॥ झयन्तान्मतोर्मस्य वः स्यात्। अपदान्तत्वान्न जश्त्वं। विद्यु
त्वान्। संज्ञायां। ८।२।११॥ मतोर्मस्य वः स्यात्। अहीवती। मुनीवती। शरादीनां चेति दीर्घः॥ आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती। ८।
२।१२॥ एते षट् संज्ञायां निपात्यन्ते। आसन्नशब्दस्यासन्दीभावः। आसन्दीवान् ग्रामः। अन्यत्रासन्नवान्। अस्थिशब्दस्याष्ठीभावः। अष्ठीवान्। अ
स्थिमानन्यत्र। चक्रशब्दस्य चक्रीभावः। चक्रीवान्नाम राजा॥ चक्रवानन्यत्र। कक्ष्यायाः सम्प्रसारणं च। कक्षीवान्नाम ऋषिः। कक्ष्यावानन्यत्र।
लवणशब्दस्य रुमणभावः। रुमण्वान्नाम पर्वतः। लवणवानन्यत्र। चर्मणो नलोपाभावो णत्वं च। चर्मण्वती नाम नदी। चर्मवत्यन्यत्र। उदन्वानुद
धौ च। ८।२।१३॥ उदकस्य उदन् भावो मतौ। उदधौ संज्ञायां च। उदन्वान् समुद्रः। ऋषिश्च। राजन्वान्सौराज्ये। ८।२।१४॥ राजन्वती भूः। राजवानन्यत्र॥

णवाचिभ्य एवान्यमत्वर्थीयस्य निषेधः। रूपिणीत्यत्र तु रूपशब्देन सौंदर्यं गृह्यते तच्च न गुणः। रसिक इत्यत्र तु रसशब्देन भावो गृह्यते न तु रसनाग्राह्यो गुण इति। गु
णवचनेभ्य इति। गुणेन हृति च प्रसिद्धा ये शुक्लादयस्त एव गृह्यंते न तु रूपादयोपि तेन रूपवत् वस्त्रमित्यादिप्रयोगो न भवति॥ ❀ ॥ मादुपधायाम् च अश्च मं समाहारे
द्वंद्वः। तेन मतुप्प्रत्ययाक्षिप्तं प्रातिपदिकं विशेष्यते न तदाहा मवर्णावर्णान्तादिति। उपधायाश्चेति वाक्यांतरं। उपधाभूतान्मात्परस्य मतोरित्यर्थः। येन नाव्यवधा

सि॰कौ॰ नन्यायेनांत्याल्व्यवहितेपिभवति। एवमक्षरार्थैस्थिते फलितमाह। मवर्णावर्णोपधादिति। इदमपि मतुवासिसस्य प्रातिपदिकस्य विशेषणं। तदाह। म्यंतादिति
टी॰त॰ विद्युत्वानिति। एतेन वन्हिमद्वानिति नैयायिकप्र    योगो निरस्तः। उक्तरीत्या ज्ञस्त्यस्याप्रवृत्तेः। मत्वंतान्मतुपो निषेधाच्च। ननु गोधुग्वान् मधुलिण्मानित्यत्र
सु॰त॰ हस्य घत्वे ढत्वे च कृते झय इति वत्वप्रवृत्त्याऽनुनासिकपरत्वाभावात् प्रत्ययेभाषायां नित्यमित्यनेन घकारढकारयोरनुनासिकाप्रवृत्तेर्गोधुग्वान् मधुलिड्वानित्यनि
७१ ष्टं प्रसज्येत। मैवं। घत्वढत्वयोरसिद्धत्वेन झय इति वत्वाप्रवृत्तेः॥ ॥ प्राणिस्थात्। शिखावान् दीप इति। अनूदाहरणदिगियं दर्शिता। शिखाशब्दस्य ग्रीवादिपाठे
न लचोप्रसंगात्। चूडावान् वृक्ष इति अत्युदाहार्यमिति हरदत्तः। न च वृक्षस्य प्राणित्वमस्तीति शंक्यं। मुखनासासंचारी वायुः प्राणस्तद्वानेव प्राणीति तत्त्वदर्पणात्। प्राण्यं
गादेवेति। एतच्चेतिकरणानुवृत्त्या लभ्यते। चूडालोसीति। असीत्यस्य तिङः तिङ इति निघातः। चूडालशब्दान्तोदात्तत्वेनस्यात्तोरोरप्लुतादि उकारे कृते हलं सेसन

प्राणिस्थादातो लजन्यतरस्याम्। ५।२।९६। चूडालः। चूडावान्। प्राणिस्थात्किं। शिखावान्दीपः। आतः किम्। हस्तवान्। प्राण्यङ्गादेव नेह। मेधा
वान्। प्रत्ययस्वरेणैव सिद्धे अन्तोदात्तत्वे चूडालोसीत्यादौ स्वरितो वानुदात्ते पदादाविति स्वरितबाधनार्थश्चकारः॥ सिध्मादिभ्यश्च। ५।२।९७। लज्वा
स्यात्। सिध्मलः। सिध्मवान्। अन्यतरस्यांग्रहणं मतुपः समुच्चयार्थं न तु प्रत्ययविकल्पार्थं। तेनाकारान्तेभ्य इनिठनौ न। वातदन्तबलललाटानामूङ् च। वातूलः।

घर्मत्वान्नत्स्यानिकावुकारोनुदात्तः। सुपस्त्यानिकस्यापि सुप्त्वादनुदात्तौ सुप्पितावित्यनुदात्त इत्यन्ये। पूर्वेण सह आद्गुण एकादेश उदात्तेनोदात्त इत्योकार उदात्तः। ए
न्तत एङः पदान्तादतीति पूर्वरूपमेकादेश उदात्तस्य स्वरितो वानुदात्ते इत्यादिना स्वरिते प्राप्ते तद्बाधनाय चकार इत्यर्थः। सिध्मादिभ्यश्च। सिध्मा। गडु। मणि। विजया। निष्पाव। पांसु। हनु
पार्ष्ण्यादयः। सिध्मादयः। समुच्चयार्थमिति। नियातानामनेकार्थत्वादिति भावः। न च इनिठनावप्यन्यतरस्यांग्रहणेन समुच्चीयेतामिति शंक्यं। तयोरप्रकृतत्वात् मतुप एवा
यस्तु समुच्चीयते। तस्य प्रकृतत्वात्। सिद्धेह लिंगं केशादिभ्य इत्यत्रान्यतरस्यांग्रहणं। न हि इनिठनोः प्राप्त्यर्थं क्रियते। प्रकृतस्यान्यतरस्यांग्रहणस्य विकल्पार्थत्वे तदनुवृ
त्यैव सिद्धे किं तेन। क्रियमाणं तु पूर्वस्यान्यतरस्यांग्रहणस्य समुच्चयार्थतां ज्ञापयत्येव। तथा च वार्तिकं लजन्यतरस्यामिति समुच्चय इति अयं भावः प्राणिस्थादिति सू 271
त्रेण लचि विकल्पिते पक्षे मतुविति चूडालश्चूडावानिति रूपद्वयं यद्यपि सिद्ध्यति तथापि सिध्मादिषु येऽदंतास्तेषु इनिठनोः प्रवृत्त्यादोषः समुच्चयार्थत्वेन ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दोषइति एवं च लज्वास्यादिति ॥ इतो वाशब्दः समुच्चये बोध्यः ॥ वा स्याद्विकल्पोपमयोरेवार्थेपि समुच्चये इत्यमरः । वातरंतेम्यादिसिध्यार्थं तर्गणस
त्रं। उङ् चेति। ङित्वादंतादेशः। ऊकारमात्रोक्तौ वनादेशत्वसिद्धावपि प्रत्ययत्वशंकानिवारणाय ङानुबंधः कृतः। नच वक्ष्यंतादिहितस्य प्रत्ययत्वं नेति शंक्यं। अहंशु
ममोर्युसे गोपपसोर्यदिज्यादौ प्रत्ययत्वाभ्युपगमात्। वातूल इति। अंतोदात्तमिदं। प्राचा तु वला दूलः वातात्त्वेति पठित्वा वातूल इत्युक्तं तदुपेक्ष्यं। प्रत्ययस्वरेण मध्योदा
त्तप्रसंगात्। गणसूत्रबलेनांतोदात्तमेवेष्यत इत्याहुः। पामादिगणे मध्यो दीर्घश्च। हृदुजं तूपतापाच्चेत्यपि गणे पठ्यते। पाम्नीलः धमनीलः। हृदुजं तु। पूकालः मसीका
लः उपतापो रोगः विपादिकालः वत्सांसाभ्यां कामवतीति। कामबलशब्दौ सूत्रे अर्शआद्यजंताविति भावः। वत्सल इति। स्नेहवानित्यर्थः। ननु वत्सांसशब्दौ वयो
विशेषणं गविशेषे च रूढौ न कामबलयोः। तत्कथं ताभ्यां लजंताभ्यां कामवान् बलवांश्चोच्यत इति चेदत्राहुः। वृत्तिविषये वत्सांसशब्दौ स्नेहबलयोर्वर्तेते इति

वत्सांसाभ्यां कामबले। ५।२।९८॥ आभ्यां लज्वा स्यात् यथासंख्यं कामवति बलवति चार्थे। वत्सलः। अंसलः। फेनादिलच्च। ५।२।९९॥ चाल्लच्॥
अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थमनुवर्तते। फेनिलः। फेनलः। फेनवान्। लोमादिपामादिपिच्छादिभ्यः शनेलचः। ५।२।१००॥ लोमादि
भ्यः शः। लोमशः। लोमवान्। रोमशः। रोमवान्। पामादिभ्यो नः। पामनः। अंगात्कल्याणे। अंगना। लक्ष्म्या अच्च। लक्ष्मणः। विष्वगित्युत्तरपद
लोपश्चाकृतसन्धेः। विषुणः। पिच्छादिभ्य इलच्। पिच्छिलः। पिच्छवान्। उरसिलः। उरस्वान्॥ ॥ ९९ अस्मिन्प्रकरणे सर्वत्र समुच्चीयमा
नोपि मतुविहन्येष्यते। मतुवनेनोक्तार्थस्याप्रतीतेः। किंत्वर्थांतरमेव तेन प्रतीयते। वत्सवती गौः। अंसवान् दुर्बल इति। लोमादि। इह नंदिग्रहिपचादिभ्य इति
वल्लोमपामपिच्छादिभ्य इति सुपठं। अंगात्कल्याण इति गणसूत्रमर्थतः पठंति। अंगादिति। शाकीपलालीदर्दूणां ह्रस्वत्वं च। चान्नप्रत्ययः। महत्त्वाकं शाकी महत्शा
किनं। महत्पलालं पलाली तद्वत्पलालिनं। दरिद्रातेर्यालोपश्चेत्युणादिसूत्रेण इकाराकारयोर्लोपश्चाद्रूप्रत्ययः। दर्दूः त्वग्रोगविशेषः। तद्वान् दर्दुणः। विष्वगि
ति समर्थानामित्यस्यापवादोयं। अकृतसंधेरकृतयणादेशस्य चतेर्लोपश्चकारान्तप्रत्यय इत्यर्थः। यदि तु कृते यणादेशे उत्तरपदलोपः स्यात्तदा वलि लोपे
सति विष्ण इति स्यात्। विषुण इति। विषु नाना अंचतीति विष्वं चिंतान्यस्य संतीति विषुणः विषुवदाख्यः कालः। तस्य हि नानागतानि दिनानि संनिदिनांतराणि नूना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



धिकभावस्यतन्मूलत्वात्। अयंभावः। विषुवतिदिनानांसमतायांजातायामग्रेन्यूनान्यधिकानिचदिनानिभवेयुरितिनानागतदिनवत्वंयद्यपिविषुवतिनास्तितथापि नानागतदिनमूलभूतदिनानांसत्वात्तथोच्यतइति। तथानानागमनवत्वान्मत्सुवर्यायुरव्यवस्थितंकिंन्नविषुणशब्देनोच्यते॥ ॥ प्रज्ञाश्रद्धा। प्राज्ञोव्याकरणमि तिगुणभूतयाक्रिययाकर्मत्वेनसंबंधःकृद्ग्रहणात्तद्धितप्रयोगेषष्ठीन। क्वतपूर्वीकटमितिवत्। ननुप्रकर्षेणजानातीतिप्रज्ञः सएवप्राज्ञावान्। तथाचप्रज्ञर वप्राज्ञइत्येतल्लिङ्गतेसिद्धमिष्टंकिमत्रप्रज्ञाग्रहणेनेत्याशंकांनिराकुर्वन्नाह प्राज्ञेति। स्त्रियांटाप्। प्रज्ञादिभ्यश्चेत्यणितुङीप्स्यादितिभावः। हस्ते श्वेति। वार्तिकमिदं कात्यायनकृतातुवृत्तिग्रन्थः सूत्रेप्रक्षिप्तः। विच्छिन्नस्यप्रतिविधानंवृत्तिः तपस्वीसहस्त्रीति। असंततत्वाद्दन्तत्वाच्चसिद्धेपुनर्वचनमणोबाधामाभूदिति। सहस्त्रात्तुठनो

प्रज्ञाश्रद्धार्चाभ्योणः। ५।२।१०१॥ प्राज्ञोव्याकरणम्। प्राज्ञा। श्राद्धः। आर्चः। वृत्तेश्च। वार्न्तः तपस्सहस्त्राभ्यांविनीनी। ५।२।१०२॥ विनीन्योरिकारोनकारप रित्राणार्थः। तपस्वी। सहस्त्री। असन्तत्वाददन्तत्वाच्चसिद्धेपुनर्वचनमणोबाधामाभूदिति। सहस्त्रात्तुठनोपिबाधनार्थम्। अण्च। ५।२।१०३॥ योगविभागउत्तरार्थः। तापसः। साहस्त्रः। ज्योत्स्नादिभ्यउपसंख्यानम्॥ ज्यौत्स्नः। तामिस्त्रः॥ सिकताशर्कराभ्यांच॥ ५।२।१०४॥ सैकतोघटः। शा र्करः॥ देशेलुबिलचौच। ५।२।१०५॥ चादण्। मतुप्च। सिकताःसन्त्यस्मिन्देशेसिकताः। सिकतिलः। सैकतः। सिकतावान्। एवंशर्करेत्यादि। दन्त उन्नतउरच्। ५।२।१०६। उन्नतादन्ताःसन्त्यस्यदन्तुरः॥ ॥ १९ पिबाधनार्थः। एतच्चसमाधानंमूलपुस्तकेषुपिक्वचिद्दृश्यते। उत्तरार्थइति। विनीन्योर्यथा संख्यप्रवृत्त्यर्थश्चेत्यपिबोध्यं ज्यौत्स्न इति। शुक्लपक्षः। तामिस्त्र इति। कृष्णपक्षः नरकविशेषश्च। तमःसमूहस्तमिस्त्रं ज्योत्स्नातमिस्रेतिनिपातनान्मत्वर्थीयोरस्तत्रत्यवयव भूतानितमांसिविद्यंतेतस्मिन्नस्तीतिविग्रहेलंतारप्। तमिस्त्रातामसीरात्रिर्ज्यौत्स्नीचंद्रिकयान्वितेत्यमरोक्तौ तुतमिस्त्रेत्यतट्टांतंनलक्षणतमितिनविरोधः। एवंचतमि स्त्राराज्योअस्मिन्संतितामिस्त्रः पक्षइत्यपिव्याख्यातुंशक्यः। सिकताशर्का। देशविशेषस्यवक्ष्यमाणत्वादाह। घटइति मतुप्चेति। अन्यतरस्यांग्रहणेनसर्वत्रम तुपःसमुच्चयादितिभावः। सिकताइति। लुपियुक्तवद्भावः। अत्रसूत्रद्वयस्योदाहरणमस्यमरःसंजग्राह। स्त्रीशर्करामार्करिलःशार्करःशर्करावति। देशएवादिमावेवमुन्नेया सिकतावतीति। दन्तउन्नत। उन्नतइतिकिं। दंतवान्॥ ॥ 

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ऊषसुषि। समाहारद्वंद्वे सौत्रं पुंस्त्वं। स्यादूषः क्षारमृत्तिका। ऊष वा नूषर इत्यमरः। सुषिश्छिद्रं। खर इति। महत्कंठविवरं खं तदस्यास्तीत्यर्थः। गर्दभे रूढोयं। मुखरो वाचाल इति।
हर इत्तः। नगरमिति। नगाः वृक्षाः पर्वताश्च। जातिशब्दोयं। तथा च नगरीत्यत्र ङीष् भवति। नगशब्दोयमश्मादिषु पठ्यते इति वुञ्छणादिसूत्रेणास्य सिद्धत्वादस्माद्रो
हर इत्तः। यं न वक्तव्य इति हर इत्तः। पांडुर इति। पाडुः शुक्लो वर्णस्तद्वान्। अव्युत्पन्न एवेति। गुणमात्रे गुणिनि च वर्तते। हरिणः पांडुरः पांडुरित्यमरः। गुणे शुक्लादयः पुंसि गु
णिलिंगास्तु तद्वतीति च। कच्छुः। कच्छूरश्च ससूरोगविशेषः। द्युद्रुभ्यां द्युम इति। द्यौरस्यास्तीति दिव उदित्युत्वं। द्रुर्वृक्षः सोस्यास्तीति जनकतयेति द्रुमोपि वृक्ष एव। पलाशी द्रु
द्रुमागमा इत्यमरः। इह सर्वत्र समुच्चीयमानोपि मतुप् रूढशब्देषु नेष्यते। तदर्थस्य मतुपा अभिधातुमशक्यत्वात्। दृश्यत इति व इत्यनुवर्तते। अणीव इति।

ऊषसुषिमुष्कमधो रः। ५।२।१०७॥ ऊषरः। सुषिरः। मुष्कोण्डः। मुष्करः। मधु माधुर्य्यम्। मधुरः। रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम्
खरः। मुखरः। कुञ्जो हस्तिहनुः। कुञ्जरः। नगपांसुपाण्डुभ्यश्च। नगरं। पांसुरः। पांडुरः। पाण्डुरशब्दस्तु अव्युत्पन्न एव। कच्छ्वा ह्रस्वत्वञ्च। कच्छुरः। द्युद्रु
भ्यां मः। ५।२।१०८॥ द्युमः। द्रुमः। केशाद्वोऽन्यतरस्याम्। ५।२।१०९॥ प्रकृतेनान्यतरस्यांग्रहणेन मतुपि सिद्धे पुनर्ग्रहणमिनिठनोः समावेशा
र्थम्। केशवः। केशी। केशिकः। केशवान्। अन्येभ्योपि दृश्यते॥ मणिवो नागविशेषः। हिरण्यवो निधिविशेषः। अर्णसो लोपश्च॥ अर्णवः। गाण्डय
जगात्संज्ञायाम्। ५।२।११०॥ ह्रस्वदीर्घयोर्यणा तन्त्रेण निर्देशः। गाण्डिवं। गाण्डीवं। अर्जुनस्य धनुः। अजगवं पिनाकः। काण्डाण्डादीरन्नी
रचौ। ५।२।१११॥ काण्डीरः। आण्डीरः॥ रजःकृष्यासुतिपरिषदो वलच्। ५।२।११२॥ रजस्वला स्त्री। कृषीवलः। वल इति दीर्घः। आसुतीवलः
शौण्डिकः। परिषद्वलः। पर्षदिति पाठान्तरम्। पर्षद्वलं। अन्येभ्योपि दृश्यते॥ ॥ ११ अर्णेरसुन्नुट्च। अर्णः जलं तद्वान्। संज्ञायामिति। तदस्यास्ती
ति सूत्रस्येति शब्दस्यैवायं प्रपंचः। यणेति। स्वन्तादिति वक्तुं तयणादेशानुकरणं न भवति। लक्ष्ये यणो भावात् किं तु सूत्रे सांहितिको यं यणिति भावः। प्रयुज्यते चोभय
था। अधिरोहति गांडिवं महेषो। गांडीवी कनकशिलानिभं भुजाभ्यामिति च। आसुतीवल इति। सुञ् अभिषवे क्तिन्। आसुतिरभिषवः। परिषद्वल इति। परितः सी
दन्तीति परिषत्। सत्सूद्विषेत्यादिना क्विप्। सदिरप्रतेरिति षत्वं। पाठांतरमिति। पृषद्भसोऽदिरित्यदिप्रत्ययो बाहुलकात् पृषेरपि भवति॥ तथा च भाष्यं॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· पार्श्वरक्षतिरेखा तत्र भवतां सर्वे वेदपार्श्वरंहीरं शास्त्रमिति च। भट्टिस्त्वाह। पर्शुहल्ला न्महात्रलैरा नैकटिकाश्रमानिति। पर्शुदेवादशावरोतिमनुः॥ ॥ भ्रातृवल इति
टी·त· वले इत्यत्राणग्रहणानुवृत्तेर्नेह दीर्घः। पुत्रवलादौ तु स्यादेव। नाह संज्ञायामित्यनुवृत्तेरिति। वनगिर्योरिति सूत्रादिति भावः। ज्योत्स्ना च द्रष्टभानत्वावयवीभूतं ज्योति
बु·त· रस्तीति मत्वर्थीयोपपत्तिः। एतेन तमस्समूहे तमिस्राशब्दो व्याख्यातः। निघण्टुषु तमःपर्यायस्तमिस्रशब्दः पठितस्तत्र समूहसमूहिनोरभेदोपचार इति हरदत्तः।
७३ स्त्रीत्वमतन्त्रमिति व्याख्यानमत्र शरणम्। ऊर्जस्विन्नोमिन्नित्यत्र नान्तत्वाभिव्यक्तये नलोपो न कृतः। अत इनिठनौ। नपरकरणं किं खट्वावान्। एकाक्षरात्कृतो जा

भ्रातृवलः। पुत्रवलः। शत्रुवलः। वल इत्यत्र संज्ञायामित्यनुवृत्तेर्नेह दीर्घः॥ दन्तशिखात्संज्ञायाम्। ५।२।११३॥ दन्तावलो हस्ती। शिखावलः केकी॥ ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः। ५।२।११४॥ मत्वर्थे निपात्यन्ते। ज्योतिष उपधालोपो नश्च प्रत्ययः। ज्योत्स्ना। तमस उपधाया इत्वं रश्च। तमिस्रा। स्त्रीत्वमतन्त्रम्। तमिस्रं। शृङ्गादिनच्। शृङ्गिणः। ऊर्जसो वलच्। तेन बाधा माभूदिति विनिरपि। ऊर्जस्वी। ऊर्जस्वलः। ऊर्जोऽसुगागम इति वृत्तिरुचिन्त्या। ऊर्जस्वतीति वरसुन्नन्तेनैवोपपत्तेः। गोशब्दान्मिनिः। गोमी। मलशब्दादिनच्। मलिनः। ईमसश्च। मलीमसः। अत इनिठनौ। ५।२।११५॥ दण्डी। दण्डिकः॥ व्रीह्यादिभ्यश्च। ५।२।११६॥ व्रीही। व्रीहिकः। न च सर्वेभ्यो व्रीह्यादिभ्य इनिठनाविष्येते किन्तु हि शिखामालासंज्ञादिभ्य इनिः। यवखदादिभ्य इकः॥ अन्येभ्य उभयम्। तुन्दादिभ्य इलच्च। ५।२।११७॥ चादिनिठनौ मतुप् च। तुन्दिलः। तुन्दी। तुन्दिकः। तुन्दवान्। उदर पिचण्ड यव व्रीहि। स्वाङ्गाद्विवृद्धौ। विवृद्ध्युपाधिकात्स्वाङ्गवाचिन इलजादयः स्युः। विवृद्धौ कर्णौ यस्य स कर्णिलः। कर्णी। कर्णिकः। कर्णवान्॥ एकगोपूर्वाट्ठञ् नित्यम्। ५।२।११८॥ एकशतमस्यास्तीत्यैकशतिकः। ऐकसहस्रिकः। गौशतिकः। गौसहस्रिकः। शतसहस्रान्ताच्च निष्कात्। ५।२।११९॥ निष्कात्परौ यौ शतसहस्रशब्दौ तदन्तात्प्रातिपदिकाट्ठञ् स्यान्मत्वर्थे। नैष्कशतिकः

तेंसतमस्यां च नतोऽस्मृतौ। खवान् कृतः कारकवान्। जातेः व्याघ्रवान् सप्तम्यां दण्डाः अस्यां सन्तीति दण्डवती शाला। तदस्यास्तीति सूत्रस्थेतिकरणो विषयनियमार्थः सर्वत्रा
पि संबध्यत इति। क्वचिन्न तोऽपि भवति कार्यी कार्यिकः क्वचित्तु जातेरपि। तण्डुली तण्डुलिकः एतच्च काशिकादौ स्पष्टम्। तुन्दादिभ्य इलच्च। अन्यतरस्यामित्यनुवर्तनादाह

273

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मतुबेति। अत्र सांगानविरुद्धाविति पञ्चते विरुद्धमुपाधि कात्स्न्यांगवाचिन इत्यादयः सुर्वि रुद्धौ कर्णावस्य कर्णिलः कर्णी कर्णिकः। कर्णवान्। एकगोपूर्वात्। एकशतिक इति। एकं च तत् शतं चेति पूर्वकालैकेत्यादिना कर्मधारयः। षष्ठीतत्पुरुषाद्बहुव्रीहेर्द्वन्द्वाच्च न भवत्यनभिधानादिति हरदत्तादयः। अत एवेह। एकविंशतिरस्यास्तीति। नित्यग्रहणं मतुपो बाधनार्थं। अन्यथा ठञा इनिठनौ बाधेत। नेष्यन्तरस्यां ग्रहणानुवृत्त्या मतुप्स्यादेवेत्याहुः। कथमेकद्रव्यवानिति। असाधुरेवायं। एकेन द्रव्यवानिति वा विग्रहीतव्यम्। कथमेकदण्डी इति। एकदेशिनैकाधिकरणे इति निर्देशो ज्ञापयति इनिरपेक्षं चिन्तनवतीति॥ ॥ रूपादाहत। आह

रूपादाहतप्रशंसयोर्यप्। ५।२।१२०॥ आहतं रूपमस्यास्तीति रूप्यः कार्षापणः। प्रशस्तं रूपमस्यास्तीति रूप्यो गौः। आहते तु किम्। रूपवान्। अन्येभ्योपि दृश्यते। हिम्याः पर्वताः। गुण्याः ब्राह्मणाः। अस्मायामेधास्रजो विनिः। ५।२।१२१॥ यशस्वी। यशस्वान्। मायावी। व्रीह्यादिपाठादिनिठनौ। मायी। मायिकः। क्विन्नन्तत्वात्कुः। स्रग्वी। आमयस्योपसंख्यानं दीर्घश्च। आमयावी। शृङ्गवृन्दाभ्यामारकन्। शृङ्गारकः। वृन्दारकः। फलबर्हाभ्यामिनच्। फलिनः। बर्हिणः। हृदयाच्चालुरन्यतरस्याम्। इनठनौ मतुप् च। हृदयालुः। हृदयी। हृदयिकः। हृदयवान्। शीतोष्णतृप्रेभ्यस्तन्न सहते॥ शीतं न सहते शीतालुः। उष्णालुः। स्फायितञ्चीति रक्। तृप्रः पुरोडाशः। तं न सहते तृप्रालुः। तृप्रं दुःखमिति माधवः। हिमाच्चेलुः॥ हिमं न सहते हिमेलुः। बलादूलः॥ बलं न सहते बलूलः। वातात्समूहे च॥ वातं न सहते वातस्य समूहो वा वातूलः। तप्पर्वमरुद्भ्याम्। पर्वतः। मरुत्तः। ऊर्णाया युस्। ५।२।१२३। सित्वात्पदत्वम्। ऊर्णायुः। अत्र छन्दसीति केचिदनुवर्तयन्ति। युक्तं चैतत्। अन्यथा हि। अहंशुभमोरित्यत्रैवोर्णाग्रहणं कुर्यात्॥ ॥

तत्प्रशंसाविशिष्टेऽर्थे वर्तमानाद्रूपशब्दान्मत्वर्थे यप्स्यात्। आहतमिति। आहननमाहतं ताडनमित्यर्थः। ततो निष्पन्नं यत्कार्षापणादि रूपं तदपि कार्ये कारणोपचारादाहतमित्युच्यते इत्याहतरूप्ययोः सामानाधिकरण्यमुपपद्यते। हिम्या इति। भूम्नि यप्। पर्वता इति। हिमवान् तत्पर्यन्तवर्तिनश्च। गुण्या इति। दृशिग्रहणादि निरूपितत्वाच्च माधवः। गुण्यगुण्य इति नव्यजीगणन्ताम्। गुणी अगुण्य इति पदच्छेदः। अस्मायामेधा। यशस्वीति। तसौ मत्वर्थ इति भत्वाद्रुत्वं न। यशस्वानिति। नित्यग्रहणानुवृत्त्या संचक्रमप्यन्यतरस्यांग्रहणं मतुप्समुच्चयार्थमिह संबध्यत एव। तसौ मत्वर्थ इति सूत्रे यशस्वी यशस्वानिति भाष्योदाहरणादिति भावः। चोः कुरित्यनेन सिद्धे त्व आरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·कौ· वत्वमाशंक्याह। किन्नंतत्वादिति। ल्हदयाच्चालुरन्यतरस्यां। अन्यतरस्यांग्रहणं इनिठनोः प्राप्त्यर्थमतुप्सर्वत्रसमुच्चीयत एव। चकारस्य चु टू इती संज्ञा। तेन ल्हदयालु
टी·त· शब्दोंतोदात्त इत्याहुः। शीतोष्णेति। इह चालुरनुवर्त्तते। पुरोडाशादिनि नतुप्राउरूव्य चसमितिमंत्रस्य भाष्ये तथा व्याख्यानत्वादिति भावः माधव इति। सुवधातु वृत्तौ स्थि
सु·त· तमिदं। हिमाच्चेलुरिति। एकारादिरयं प्रत्यय इति माधवः वत्वादिति। सिध्मादिषु वलुल वातूलशब्दौ मत्वर्थप्रकारांतरेण व्युत्पादितौ तप्पूर्वमरूढ्यां। पित्वमनुदा
७४ त्तत्वार्थं। काशिकायां तु पर्वमरुद्भ्यां तन्वक्तव्य इति स्थितं। हरदत्तेन तु तन्निति प्रतीकमुपादाय आद्युदात्तत्वार्थो नकार इत्युक्तं। तच्च मनोरमायां महत्ताप्रबंधेन दीक्षि

वाचो ग्मिनिः। ५। २। १२४॥ वाग्मी। आलजाटचौ बहुभाषिणि। ५। २। १२५॥ कुत्सित इति वक्तव्यम्॥ कुत्सितं बहु भाषते वाचालः
वाचाटः। यस्तु सम्यग्बहु भाषते स वाग्मीत्येव। स्वामिन्नैश्वर्ये। ५। २। १२६॥ ऐश्वर्यवाचकात्स्वशब्दान्मत्वर्थे आमिनच्॥ स्वामी॥

तेर्निराकृतं। तत्त एव तद्वधार्यं परत्वमिति। तेन यस्येति चेति लोपो न प्रवर्त्तत इति भावः। अनुवर्त्तयंतीति। बहुलं छंदसीत्यतः॥ ॐ॥ वाचो ग्मिनिः। इकारोन।
कारपरित्राणार्थः। चकारस्य कुत्वे जश्त्वे च वाग्मी वाग्मिना वित्यादौ ह्योर्गकारयोः श्रवणं भवति। छित्वे तु न णानिर्मिनिरित्युक्ते तु द्वित्वे सति ह्योर्गकारयोः श्रवणं द्वि
त्वाभावे त्वेकस्यैव श्रवणं स्यात्। किंच यरोनुनासिके प्रत्यये भाषायां नित्यमिति वाच्यमित्यत्रैव नित्यमनुनासिकः प्राप्नोति। तच्चानिष्टमिति ग्मिनि कृतः। स्वामि
न्नैश्वर्ये। ऐश्वर्यवाचकादिति। स्वशब्दस्यैश्वर्यवाचित्वमेतद्वृत्ति विषयकमेवेति बोध्यं। इशितादिः ईश्वरः स तु स्वामीत्युच्यते। यथा वागीश एव वाचस्पतिर्वाचः स्वा ७४
मीति। ऐश्वर्ये किं। स्ववान्॥

274

अर्शआदिभ्योऽच्। इह स्वाराद्दीनादिति गणे पठ्यते। खंजः पादोऽस्यास्तीति खंजः। काणं चक्षुरस्यास्तीति काणः। प्रथिमिनीति। पृथ्वादिभ्य इमनिचि टेरिति टिलोपः। रस्य
लङ्घितिरभावः। अनेन सम नुग्रहणं न्यर्थवता चानर्थकेन च तदन्त — विधिं प्रयोजयंतीति मन्नंतादिनो कृते न सान्निहित इति टिलोपेनांतत्वान्ङीप्। दामिनीति दाधातो

अर्शआदिभ्योऽच्। ५। २। १२७॥ अर्शांस्यस्य विद्यन्ते अर्शसः। आकृतिगणोयम्॥ द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः। ५। २। १२८॥ द्वन्द्वात्। कटकव
लयिनी। शङ्खनूपुरिणी। उपतापो रोगः। कुष्ठी। किलासी। गर्ह्यान्निंद्यम्। ककुदावर्त्ती। काकतालुकी। प्राणिस्थात्किं। पुष्पफलवान्घटः। प्राण्य
ङ्गान्न। पाणिपादवती। अत इत्येव। चित्रकललाटिकावती। सिद्धे प्रत्यये पुनर्वचनं ठनादिबाधनार्थम्॥ वातातीसाराभ्यां कुक्च। ५। २। १२९॥ चादि
निः। वातकी। अतीसारकी। रोगे चायमिष्यते। नेह। वातवती गुहा। पिशाचाच्च। पिशाचकी। वयसि पूरणात्। ५। २। १३०॥ पूरणप्रत्ययान्तान्मत्वर्थ
इनिः स्याद्वयसि द्योत्ये। मासः संवत्सरो वा पञ्चमोस्यास्तीति पञ्चमी उष्ट्रः। ठन्बाधनार्थमिदं। वयसि किम्। पञ्चमवान् ग्रामः। सुखादिभ्यश्च। ५। २।
१३१॥ इनिर्मत्वर्थे। सुखी। दुःखी। मालाक्षेपे। माली। धर्मशीलवर्णान्ताच्च। ५। २। १३२॥ धर्माद्यन्तादिनिर्मत्वर्थे। ब्राह्मणधर्मी। ब्राह्मणशी
ली। ब्राह्मणवर्णी। हस्ताज्जातौ। ५। २। १३३॥ हस्ती। जातौ किम्। हस्तवान्पुरुषः। वर्णाद्ब्रह्मचारिणि। ५। २। १३४॥ वर्णी। पुष्करादिभ्यो देशे॥
। ५। २। १३५॥ पुष्करिणी। पद्मिनी। देशे किम्। पुष्करवान्करी। बाहूरुपूर्वपदाद्बलात्॥ बाहुबली। ऊरुबली। सर्वादेश्च। सर्वधनी। सर्वबी
जी। अर्थाच्चासन्निहिते॥ अर्थी। सन्निहिते तु अर्थवान्। तदन्ताच्च। धान्यार्थी। हिरण्यार्थी। बलादिभ्यो मतुबन्यतरस्याम्। ५। २। १३६ ॥
बलवान्। बली। उत्साहवान्। उत्साही। संज्ञायां मन्माभ्याम्। ५। २। १३७॥ मन्नन्तान्मान्ताच्चेनिर्मत्वर्थे। प्रथिमिनी। दामिनी। होमिनी। सोमि

मनिन्। होमिनी। सोमिनीति। अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्निति मनिन्। होमसोमशब्दौ मन्प्रत्ययांतौ। — नी। संज्ञायां किम्। सोमवान्॥

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· कंशंभ्यां। परत्वार्थ इति। अन्यथा कँम्युः इति स्यादिति भावः। वकारयकारपरस्येति। बहुव्रीहिरयं। अनुनासिकौ वयाविति। एतेन प्रथमप्रत्ययः दंत्योष्ठ्यादिर्नँतु पवर्गीत
टी·न· ीय इति ध्वनितं। माधव इति। तुडितोडन इति धात्तौ तेनो क्तं। वृद्धानाभिस्तुंडिः। इन। तुंडिरस्यास्तीति तुंडिलः। तुंदादिभ्य इलच्चेत्यत्र संगृहीत इत्यविनिगणसूत्रेण इल
सु·न· च। तुंडिल एव तुंडिभः। तुंडिवलिवटेर्भ इति मत्वर्थीयो भ इति। वटिभ इति। वट वेष्टने इन् वटिशब्दः पामादिषु पठ्यते तेन वठिन इत्यपि भवति। अहंयुः शुभंयु
७५ रिति। पूर्ववदनुस्वारपरसवर्णौ। इति मत्वर्थीयाः। किं सर्वनाम। द्व्यादिपर्युदासात् किमः पृथग्ग्रहणं। द्व्यादिषु किम् शब्दपाठे प्रयोजनं तु त्वं च कश्च कौ। अहं च क

कंशंभ्यां बभयुस्तितुतयसः। ५।२।१३८॥ कं शमिति मान्तौ कमित्युदकसुखयोः शमिति सुखे। आभ्यां सप्त प्रत्ययाः स्युः। युसयसोः सकारः प
दत्वार्थः। कम्बः। कम्भः। कंयुः। कन्तिः। कन्तुः। कन्तः। कंयः। शम्वः। शम्भः। शंयुः। शन्तिः। शन्तुः। शन्तः। शंयः। अनुस्वारस्य वैकल्पिकः प
रसवर्णः। वकारयकारपरस्यानुनासिकौ वयौ। तुन्दिवलिवटेर्भः। ५।२।१३९॥ वृद्धा नाभिस्तुन्दिः। मूर्द्धन्योपधोयमिति माधवः। तुन्दिभः। वलि
भः। वटिभः। पामादित्वाद्वलिनोऽपि। अहंशुभमोर्युस्। ५।२।१४०॥ अहमिति मान्तमव्ययमहङ्कारे। शुभमिति शुभे। अहंयुः अहङ्कारवान्।
शुभंयुः शुभान्वितः॥ ॥ इति मत्वर्थीयाः॥ प्राग्दिशो विभक्तिः। ५।३।१॥ दिक्शब्देभ्य इत्यतः प्राग्वक्ष्यमाणाः प्रत्यया विभक्तिसं
ज्ञाः स्युः। अथ स्वार्थिकाः प्रत्ययाः। समर्थानामिति प्रथमादिति च निवृत्तम्। वेति त्वनुवर्त्तत एव। किंसर्वनामबहुभ्योऽद्व्यादिभ्यः। ५।३।
२। किमः सर्वनाम्नो बहुशब्दाच्चेति प्राग्दिशोऽधिक्रियते॥ इदम इश्। ५।३।३॥ प्राग्दिशीये परे। एतेतौ रथोः। ५।३।४॥ इदम्शब्दस्य एत इत्
इत्यादेशौ स्तो रेफादौ थकारादौ च प्राग्दिशीये परे। इशोऽपवादः। एतदोऽन्। ५।३।५॥ योगविभागः कर्त्तव्यः। एतदः। एतेतौ स्तो रथोः। अन्। एतदः इत्येव। अ
नेकाल्त्वात्सर्वादेशः। नलोपः प्रातिपदिकान्तस्य। सर्वस्य सोऽन्यतरस्यां दि। ५।३।६॥ प्राग्दिशीये दकारादौ प्रत्यये परे सर्वस्य सो वा स्यात्। पञ्चम्यास्तसि
ल्। ५।३।७॥ पञ्चम्यन्तेभ्यः किमादिभ्यस्तसिल् स्यात्॥ ॥ ११ श्चकौ इत्यत्र किमः शेषः। त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यत इत्युक्तत्वात्। एत
दोऽन्। भाष्यारूढोऽयं पाठः। वृत्तिकारस्तु एतदोऽश् इति पठित्वा शकारः सर्वादेशार्थ इत्याह। अन्निति। प्राग्दिशीये परे अन् स्यात्। अनेकाल्त्वादिति। नित्करणस्य प्रयो



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ मद्भ्यापञ्चेअस्मात्। अत इति॥ ३

एतदोऽन्नादेशः। अमुत इति। अदसो सेरिति मुत्वम्। पक्षे अमुष्मात्। वहुत इति। पक्षे वहुभ्यः। द्वाभ्यामिति। सर्वनामत्वात्प्राप्तोपि तसिल् अद्यादिभ्य इति पर्युदासान्न। तसे
रिति। प्रतियोगे पंचम्यास्तसिः। अपादाने चाहीयरुहोरिति विहितस्य तसेस्तसिलादेश इत्यर्थः। विभक्त्यर्थं चेति। अन्यथा परत्वात्तसौ कृते तस्याः प्राग्दिशीयत्वाद्विभ
क्तिहोः। तकारादिकार उच्चारणार्थः। वेत्यनुवृत्तेः फलं दर्शयति। कस्मादिति। यतस्तत इति कृतत्वात्तद्धितेति प्रातिपदिकत्वात्सुपो लुकि त्यदाद्यत्वं। पक्षे यस्मात्। तस्मात्। इत इति। इदं

कुतिहोः ७।२।१०४॥ किमः कुः स्यात्तादौ हादौ च विभक्तौ परतः। कुतः। कस्मात्। यतः। ततः। अतः। इतः। अमुतः। वहुतः। द्व्यादेस्तु द्वाभ्यां। तसेश्च ५।३।
८॥ किंसर्वनामवहुभ्यः परस्य तसेस्तसिलादेशः स्यात्। स्वरार्थं विभक्त्यर्थं च वचनं। पर्यभिभ्यां च ५।३।९॥ आभ्यां तसिल् स्यात्। सर्वोभयार्था
भ्यामेव। परितः। सर्वत इत्यर्थः। अभितः उभयत इत्यर्थः। सप्तम्यास्त्रल् ५।३।१०॥ कुत्र। यत्र। तत्र। वहुत्र। इदमो हः ५।३।११॥ त्रलोपवादः। इशादे
शः। इह। किमोऽत् ५।३।१२॥ वाग्रहणमपकृष्यते। सप्तम्यन्तात्किमोऽद्वा स्यात्पक्षे त्रल्॥ क्वाति ७।२।१०५॥ किमः क्वादेशः स्यादति। क्व। कुत्र। वा
ह च छन्दसि। कुह स्थः। कुह जग्मथुः॥ एतदस्त्र तसोस्त्रतसौ चानुदात्तौ ५।४।३३॥ अन्वादेशविषये एतदोऽश् स्यात्स चानुदात्तस्त्रतसोः परतः
तौ चानुदात्तौ। एतस्मिन् ग्रामे सुखं वसामः। अथो अत्राधीमहे। अतो न गन्तास्मः। इतराभ्योऽपि दृश्यन्ते ५।३।१४॥ पञ्चमीसप्तमीतरविभक्त्यन्तादपि
तसिलादयो दृश्यन्ते। दृशि ग्रहणाद्भवदादियोग एव। स भवान्। ततो भवान्। तत्र भवान्। तं भवन्तम्। ततो भवन्तम्। तत्र भवन्तम्। एवं दीर्घायुः।
देवानांप्रियः। आयुष्मान्। सर्वैकान्यकिंयत्तदः काले दा ५।३।१५॥ सप्तम्यन्तेभ्य एभ्यः कालार्थेभ्यः स्वार्थे दा स्यात्। सर्वस्मिन् काले सदा। सर्वदा। एकदा।
अन्यदा। कदा। तदा। काले किं। सर्वत्र देशे॥ इदमो र्हिल् ५।३।१६॥ सप्तम्यन्तात्काले इत्येव। हस्यापवादः। अस्मिन् काले एतर्हि। काले किं। इह देशे

त्तिसंज्ञाया अभावात्पदाद्य त्वाभावे यत्तोऽवगन्तीत्यादि न सिध्येदिति भावः। ननु तसेर्ग्रामत इत्यादौ चरितार्थत्वात्किमादिभ्यस्तसिलो बाध्यत्वेन तसिर्न भवेत्तस्य निर
वकाशत्वात्तथा च तसेश्चेति विधानं व्यर्थमिति वाच्यं। कुतो वहीयते कुतो वरोहतीत्यादौ तसिलस्सावकाशत्वात्। सर्वोभयार्थाभ्यामेवेति। अत्र चाभिधानस्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· भाव्यं हेतुस्तेनेह न भवति परिषिंचति। अभिषिंचति। उपर्यर्थे परिरभिस्त्वाभिमुख्ये। नन्वोदनं परिषिंचतीत्यत्र सर्वतोभावे परिरिति तसिल्भावः कथमिति चे
टी·त· न्नैवं। वावचनानुवृत्त्या तत्सिद्धेः। सप्तम्यास्त्रल्। इह त्रल्तसिलौ स्वतंत्रौ प्रत्ययौ न तु सप्तमीपंचम्योरादेशौ। तेन कुत्र वहुत्र कुतः वहुत इत्यादौ अच्च घेर्ङि
सु·त· तीत्यादिकं नेत्याहुः। किमोत्। न विभक्तौ तुस्मा इति निषेधोत्र न प्रवर्तते। थमो रुकारेण मकारपरित्राणार्थेनानित्यत्वज्ञापनात्। वाग्रहणमिति। किमो हेति सू
७६ त्रे पठित्वा ह च ह्वरसीति सूत्रयितुं युक्तं। कुत्रेति। यद्यपि भागवृत्तिकारो भाषायां त्रलं नेच्छति तथापि वहुप्रयोगदर्शनादिह स्वीकृतं। तथा च श्रीहर्षः। नान्यत्र
कुत्रापि च साभिलाषं। अमरश्चाह साहचर्याच्च कुत्रचिदिति। वा ह च छन्दसि पूर्वोक्तस्य वाग्रहणपक्षस्य स्फुटीकरणार्थमिदमुपन्यस्तं। अतेरिति। एतस्मा

अधुना। ५। ३। १७॥ इदमः सप्तम्यन्तात्कालवाचिनः स्वार्थेऽधुना प्रत्ययः स्यात्। इश्। यस्येति लोपः। अधुना। दानीं च। ५। ३। १८॥ इदानीम्।
तदो दा च। ५। ३। १९॥ तदा। तदानीं। तदो दावचनमनर्थकं विहितत्वात्। अनद्यतने र्हिलन्यतरस्याम्। ५। ३। २१॥ कर्हि। कदा। यर्हि। यदा।
तर्हि। तदा। एतस्मिन्काले एतर्हि। सद्यः परुत्परार्यैषमः परेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः। ५। ३।
२२॥ एते निपात्यन्ते। समानस्य सभावो द्यस् चाहनि॥ समानेऽहनि सद्यः। पूर्वपूर्वतरयोः परः उदारी च सम्वत्सरे। पूर्वस्मिन्वत्सरे परुत्।
पूर्वतरे वत्सरे परारि। इदम इश् समसण् प्रत्ययश्च सम्वत्सरे॥ अस्मिन्सम्वत्सरे ऐषमः। परस्मादेद्यव्यहनि॥ परस्मिन्नहनि परेद्यवि। इदमो
ऽश् द्यश्च। अस्मिन्नहनि अद्य। पूर्वादिभ्योऽष्टभ्योऽहन्येद्युस्। पूर्वस्मिन्नहनि पूर्वेद्युः। अन्यस्मिन्नहनि अन्येद्युः। उभयोरह्नोरुभयेद्युः। द्युश्चोभया

त् ग्रामादित्यर्थः। तत्रभवंतमिति। ततो भवन्तं। तत्रभवन्तं। ततो भवते। तत्रभवते इत्यादि। एवमिति। ततो दीर्घायुस्तत्र दीर्घायुः॥ । द्वक्तव्यः॥ उभयद्युः। ७६
युरित्यादृत्यमित्यर्थः। सदेति। सर्वस्य सोऽन्यतरस्यां दीति सभावः। कदेति। किमः कः। एतर्हीति। एतेतौ रथोरित्येतादेशः॥ ॥ अधुना प्रत्यय इति। निपातनात्।
न्मध्योदात्तोयं। भाष्यमतं चेदं। वृत्तिकारस्त्वाह। इदमो अश्भावः। धुना च प्रत्यय इति। तत्र ऊडिदमित्यादिना विभक्तिस्वरः स चादेः। परस्य त्वादेर्भवतीति ह
रदत्तः। दावचनमिति। तद श्चेत्येव सूत्रं पठनीयमिति भावः। एतस्मिन्काले एतर्हीति। एतद इति योगविभागाद्रेफादावेतादेशः। सद्यः परुत् निपातनाद्दिव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यविशेषो लभ्यत इत्याह। अहनीति। सप्तम्यन्तस्याहन्शब्दस्यार्थे इत्यर्थसं दर्शयति। समाने ऽन्हीति। परउदारी चेति। पर इत्यादेश उदारी प्रत्ययौ॥ ॥ प्रकारे।
वचने थाल्। सामान्यस्य भेदको विशेषः प्रकारः। यथा ब्राह्मणसामान्यस्य माठरकाठकादय इति हरदत्तः। यद्यपि प्रकारे गुणवचनस्येत्यत्र सादृश्यं प्रकार इत्युक्तं तथापि
नेह सादृश्यं गृह्यते अनभिधानात्। अव्ययं विभक्तीति सूत्रे सादृश्यमपि यथाशब्दार्थ इत्युक्तमिहतु केवलस्य थालुप्रत्ययस्य सादृश्यं नार्थः किन्तु प्रकार एवे।
त्युक्तमिति नास्ति पूर्वापरविरोध इति बोध्यम्। तेन प्रकारेण तथेति। प्रथमान्तात्तु न भवति स प्रकारस्तथेति। अनभिधानादेवेति भावः। किं सर्वनामबहुभ्यो।

प्रकारवचने थाल्। ५। ३। २३। प्रकारवृत्तिभ्यः किमादिभ्यस्थाल् स्यात् स्वार्थे॥ तेन प्रकारेण तथा। यथा। इदमस्थमुः। ५। ३। २४। थालोऽपवा
दः। एतदोऽपि वाच्यः। अनेन एतेन वा प्रकारेण इत्थम्। किमश्च। ५। ३। २५। केन प्रकारेण कथम्॥ प्राग्दिशीयानां विभक्तिसंज्ञा ..नां पूर्णोऽवधिः
दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमादिभ्यो दिग्देशकालेष्वस्तातिः। ५। ३। २७। सप्तम्याद्यन्तेभ्यो दिशि रूढेभ्यो दिग्देशकालवृत्तिभ्यः स्वा
र्थेऽस्तातिप्रत्ययः स्यात्। पूर्वाधरावराणामसिपुरधवश्चैषाम्। ५। ३। ३९। एभ्योऽस्तात्यर्थेऽसिप्रत्ययः स्यात् तद्योगे चैषां क्रमात्पुर् अध्।
अव् इत्यादेशाः स्युः। अस्ताति च। ५। ३। ४०। अस्तातौ परे पूर्वादीनां पुरादयः स्युः। पूर्वस्यां पूर्वस्याः पूर्वा वा दिक्। पुरः। पुरस्तात्। अधः। अ
धस्तात्। अवः। अवस्तात्। विभाषाऽवरस्य। ५। ३। ४१। अवरस्यास्तातौ परेऽव् स्याद्वा। अवस्तात्। अवरस्तात्। एवं देशे काले च। दिशि रूढे
भ्यः किम्। ऐन्द्र्यां वसति। सप्तम्याद्यन्तेभ्यः किम्। पूर्वं ग्रामं गतः। दिगादिवृत्तिभ्यः किम्। पूर्वस्मिन् गुरौ वसति। अस्ताति चेति ज्ञापकाद।
सिरस्तातिं न बाधते। दक्षिणोत्तराभ्यामतसुच्। ५। ३। २८॥ अस्तातेरपवादः। दक्षिणतः। उत्तरतः। विभाषा परावराभ्याम्। ५। ३। २९। परतः। अ
वरतः। परस्तात्। अवरस्तात्। अञ्चेर्लुक्। ५। ३। ३०॥ अञ्चत्यन्ताद्दिक्शब्दादस्तातेर्लुक् स्यात्। लुक् तद्धितलुकि॥ ॥ ॥

विशेषविहितेनापि थाला जातीयर् न बाध्यते। अर्थभेदात्। प्रकारे हि थाल्। जातीयर् तु प्रकारवति स्वभावात्। एवं च बहुत्वा प्रकारमात्रे थालं विधाय तद्वत्यर्थे
ति जातीयरं प्रयुंजते। तथाजातीयो यथाजातीयोऽन्यथाजातीय इति। अनेन एतेन वेति। द्वितीयान्तादपि थमुर्भवत्येव। इममेतं वा प्रकारमापन्न इत्थंभूतः॥

CC-0. In Public Domain. Digitization by eGangotri

सि कौ· टी·त· सु·त· ७७

अत्र चलत्सरोरुखं भूत्वास्थानेत्यादिसौत्रप्रयोगो लिंगं। एतेन कथंभूतोव्याख्यातः। इत्थमिति। एतेनोरथोरिति इदमः तादेशः एतदः इति योगविभागादेतदो पिरता
देश इति भावः। किंमश्च। योगविभागः। थाहेतौ चछंदसीत्युत्तरसूत्रे किमएवानुवृत्तिर्यथास्यादिदमो माभूदिति। प्राग्दिशीयानां पूर्णोवधिः॥ दिग्देशकालेष्वि
ति। यथासंख्यमत्र नेष्यते। अस्वरितत्वात्। पुरः पुरस्तादिति। कथं तर्हि पथ्यामित्यानि तत्र इत्यतः पुरतश्च पश्चादिति भवभूतिः स्यात्पुरः पुरतोग्रत इत्यमरः। पुरतः
प्रथमेवाग्रे इति विश्वश्च। समानकालीनं पूर्वकालीनमित्यादिवत्सामासिकमेवेति बहवः। केचित्तु दक्षिणोत्तराभ्यामतसुच् विधिनैवेष्टसिद्धौ अतसुजित्यका
रोच्चारणमन्यतोपि विधानार्थं तेन पुरत इति सिध्यति। पुर अग्रगमने किपि पुर्वोरिति दीर्घस्तु न भवति भत्वात्। न चानसुच्यश्चित्वेप्यकारोच्चारणपक्षे आद्यु

प्राच्यां प्राच्याः प्राची वा दिक्। प्राक्। उदक्। एवं देशे काले च। उपर्युपरिष्टात्। पा। ३। २१॥ अस्तातेर्विषये। ऊर्ध्वशब्दस्योपादेशः स्याद्रिलरिष्टा
तिलौ च प्रत्ययौ। उपरि। उपरिष्टाद्वा वसति आगतो रमणीयम्वा। पश्चात्। पा। ३। ३२॥ अपरस्य पश्चभावः आतिश्च प्रत्ययोस्तातेर्विषये। उत्त
राधरदक्षिणादातिः। पा। ३। ३४॥ उत्तरात्। अधरात्। दक्षिणात्। एनवन्यतरस्यामदूरे ऽपञ्चम्याः। पा। ३। ३५॥ उत्तरादिभ्य एनब्वास्याद्वध्यवधिमतोस्सामीप्ये
पञ्चम्यन्तान्विना। उत्तरेण। अधरेण। दक्षिणेन। अपक्षेयथास्वम्प्रत्ययाः। इह केचिदुत्तरादीननुवर्त्य दिक्शब्दस्मात्सादेनयमाहुः। पूर्वेणग्रामम्। अप
रेणग्रामम्। दक्षिणादाच्। पा। ३। ३६॥ अस्तातेर्विषये। दक्षिणवसतिअपञ्चम्यासूत्येवा दक्षिणादागतः॥ आहि च दूरे। पा। ३। ३७॥ दक्षिणादूरेआ
हिः स्याच्चादाच्। दक्षिणाहि। दक्षिणा। उत्तराच्च। पा। ३। ३८॥ उत्तराहि। उत्तरा॥ ॥ ७९ दात्तत्वार्थमितिवाच्यं। वहूनां प्रयोगानुरोधेनाय २७२

न्यतोविधानार्थमिति कल्पनस्यैवन्याय्यत्वादित्याहुः। यथासंख्यत्वानाश्रयणात्। पुरस्ताद्वसति पुरस्तादागतः पुरस्ताद्रमणीयं। अधस्ताद्वसति अधस्तादागत इत्यादि सि ७७
ध्यति॥ ॐ॥ प्राच्यां प्राच्या इति। प्राच्यां दिशि वसति प्राग्वसति। प्राच्या दिशः आगतः प्रागागत इत्यादियोज्यं। पंचम्यंतं विनेति। नेह उत्तरादागतः। अधरादागतः
उत्तरेणेत्यादि। वसतिरमणीयं वा अपक्षेयथास्वमिति। दक्षिणतः। उत्तरतः। अधः। अधस्तात्। उत्तरात्। अधरात्। दक्षिणात्॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संख्याया विधार्थे धा। विधाशब्दस्यार्थो विधार्थः। यद्यप्योदनपिण्डोऽपि विधाशब्देनोच्यते तथापीह न गृह्यते। तेन एकागो विधेयाद्देन भवति। इह द्विविधायामिति वक्तव्ये अर्थग्रहणस्य प्रयोजनं विधाशब्दो यत्रार्थे प्रसिद्धतरस्तत्रैव यथा स्यात् तत्रादृत्याऽऽर्थः प्रकार एव स च क्रियाविषयक एव गृह्यते अभिधानस्वभावात् तदाह। क्रियाप्रकारे वर्त्तमानादिति। कथं तर्हि नवधा द्रव्यं बहुधा गुण इत्यादि। अत्रापि विद्यमानतापि क्रिया प्रतीयते उपदिश्यत इति वा भवतीति वेति हरदत्तः। अधिकरणविचाले च। अधिकरणं द्रव्यं विचलनं विचालोऽन्यथाकरणं लिङ्गत्वादेरचात्रेह संख्यासन्निधानात्संख्यान्तरापादनमिति व्याचष्टे। द्रव्यस्येत्यादिना। संख्यान्तरापादनं हि एकस्यानेकीकरणम्

संख्याया विधार्थे धा। ५।३।४२॥ क्रियाप्रकारार्थे वर्त्तमानात्संख्याशब्दात्स्वार्थे धा स्यात्। चतुर्धा। पञ्चधा। अधिकरणविचाले च। ५।३।४३॥ द्रव्यस्य संख्यान्तरापादने संख्याया धा स्यात्। एकं राशिं पञ्चधा कुरु। एकाद्धो ध्यमुञन्यतरस्याम्। ५।३।४४॥ ऐकध्यम्। एकधा। द्वित्र्योश्च धमुञ्। ५।३।४५॥ आभ्यां धाप्रत्ययस्य धमुञ् स्याद्वा। द्वैधम्। द्विधा। त्रैधम्। त्रिधा। धमुञन्तात्स्वार्थे डदर्शनम्। पथि द्वैधानि तृणानि। एधाच्च। ५।३।४६॥ त्रेधा। द्वेधा। याप्ये पाशप्। ५।३।४७॥ कुत्सितो भिषक् भिषक्पाशः। पूरणाद्भागे तीयादन्। ५।३।४८॥ द्वितीयो भागो द्वितीयः। तृतीयः। स्वरे विशेषः। तीयादीकक् स्वार्थे वाच्यः। द्वैतीयीकः। द्वितीयः। तार्तीयीकः। तृतीयः। न विद्यायाः। द्वितीया। तृतीया। विद्येत्येव। प्रागेकादशभ्योऽच्छन्दसि। ५।३।४९॥ पूरणप्रत्ययान्ताद्भागेऽन्। चतुर्थः। पञ्चमः। षष्ठाष्टमाभ्यां ञ च। ५।३।५०॥ चादन्। षष्ठो भागः। षाष्ठः। षष्ठः। अष्टमः। आष्टमः। मानपश्वङ्गयोः कन्लुकौ च। ५।३।५१॥ षष्ठाष्टमशब्दाभ्यां क्रमेण कन् लुकौ स्तो मानेपश्वङ्गे च वाच्ये। षष्ठको भागः मानं चेत्। अष्टमो भागः पश्वङ्गं चेत्। अस्य अनो वा लुक्। चकाराद्यथाप्राप्तम्। षष्ठः। षाष्ठः। अष्टमः। आष्टमः। महाविभाषया सिद्धे ञ्लुग्वचनं पूर्वत्र ञानौ नित्याविति ज्ञा

अनेकस्य चैकीकरणं तत्राद्ये उदाहरणम् एकं राशिं पञ्चधेति। पञ्च राशीन् कुर्वित्यर्थः। द्वितीये तु। अनेकमेकधा कुर्विति उदाहर्त्तव्यम्। इह क्रियाविषयकप्रकारो न गम्यत इति सूत्रारम्भः। एकाद्धो। शब्दप्रधानत्वात्सर्वनामकार्याभावः। इह प्रकरणे एव सिद्धे पुनर्धाग्रहणं विधार्थे विहितस्यापि यथा स्यादनन्तरस्येति न्यायेनाधिकरणविचाले विहितस्यैव हि धाप्रतीतिरिति पदमञ्जर्यां स्थितम्। एतेन स्वतन्त्र एव प्रत्ययोऽयमित्याशंका परास्ता। ऐकध्यमिति। विधार्थे ऐकध्यं भुङ्क्ते। अधिकरणवि

सि·कौ· चाल्लेतुऐकध्यंराशिंकुर्वित्यादिज्ञेयं। एवमग्रेपिद्वैधमित्यादौयोज्यं। एधाच्च॥ द्वित्र्योः संबंधिनोधाप्रत्ययस्यएधा वा स्यात्। योगविभागोयथासंख्यनिरासार्थः। याप्ये
टी·त· पाशप्॥ कुत्सितइत्यत्रैवनायंविहितस्तिङंतादपिप्रसंगात्। पूरणाद्भागे॥ पूरणार्थात्तीयप्रत्ययः। पूरणशब्देनोक्तः। पूरणग्रहणंचोत्तरार्थंनत्वपूरणस्तीयप्
सु·त· प्रत्ययोभवति। मुखतीयः पार्श्वतीयइत्यत्रत्वनर्थकत्वान्नातिप्रसंगः। भागइतिपुंस्त्वविवक्षितंतेनसमानेप्यर्थेभक्तौविवक्षितायांचतुर्थीपंचमीत्येवभवति।
७८ भागेकादशभ्यइत्यनिसत्तितुदापिचतुर्थापंचमेतिप्रसज्येत॥ ० ॥एकादाकिनिच्चा असहायवाचिनएकशब्दादाकिनिच्स्यात्। कन्लुकौवेति। आकिनि
चः कनोवाच लुकौ। तयोरेवानेनसूत्रेणविधानात्। असहायग्रहणंसंख्याशब्दनिरासार्थं। अन्यथाप्रसिद्धत्वात्संख्याप्रकरणाच्चतस्यैवग्रहणंस्यात्। इष्टापत्तौ
तुद्वित्वेबहुत्वेचनस्यादेकाकिनौएकाकिनइति। नहिद्वयोर्बहुषुवाएकसंख्यास्ति। असहायत्वंतुपरस्परातिरिक्तसहायाभावेनद्वयोर्बहूनामपिभवति। इहअ

एकादाकिनिच्चासहाये।५।३।५२॥ चात्कन्लुकौ। एकः। एकाकी। एककः। भूतपूर्वेचरट्।५।३।५३॥ आढ्योभूतपूर्वः। आढ्यचरः। षष्ठ्या
रूप्यच।५।३।५४॥ षष्ठ्यन्ताद्भूतपूर्वेर्थेरूप्यस्याच्चरट्च। कृष्णस्यभूतपूर्वोगौः कृष्णरूप्यः। कृष्णचरः। तसिलादिषुरूप्यस्यापरिगणितत्वा
न्नपुंवत्। शुभायाभूतपूर्वः शुभारूप्यः। अतिशायनेतमबिष्ठनौ।५।३।५५॥ अतिशयविशिष्टार्थवृत्तेःस्वार्थेएतौस्तः। अयमेषामतिशये
९नाढ्यः आढ्यतमः। लघुतमोलघिष्ठः।

कितिजेवायंवक्तव्यः सवर्णदीर्घेणसिद्धमिष्टं। यस्येतिचेतिलोपश्चाकारोच्चारणसामर्थ्यान्नभवतीत्यादिहरदत्त
ग्रंथेस्थितं। भूतपूर्वे। अत्रवर्त्तमानाच्चरट्स्यात्। गोष्ठात्खञ्चित्यत्रैवनोक्तं। विशेषविहितेनखञाचरटोबाधामाभूदिति। सन्निधौहिसामान्यविशेषभावःस्फुटीभवति 278
यद्यपिदूरस्थस्यापिबाधोन्याय्यएवतथापीहगौरवखीकृत्यदूरेपाठसामर्थ्याद्बाधोनेतिभावः। षष्ठ्यारूप्यच। भूतपूर्वइत्यनुवर्त्तते। तच्चयद्यपिपूर्वत्रङ्याप्प्रातिपदिक
स्यविशेषणंतथापीहनतथा अपेक्ष्यंतार्थविशेषणत्वात्तद्धितप्रत्ययस्यसंबंधिनोगवादेःप्रधानत्वात्प्रधानेतरसन्निधौचप्रधानेकार्यसंप्रत्ययस्यन्याय्यत्वात्तदेतदाह ७८
भूतपूर्वेर्थेरूप्यःस्यादिति। अतिशायने। अतिपूर्वाच्छेतेर्ल्युट्। अतिशयनमेवातिशायनं। अस्मादेवनिपातनाद्दीर्घः। नतुसौत्रः तेनलोकेपिदीर्घःसाधुः॥ आ
बाधकान्यपितिपातनानिभवंति। तेनह्रस्वोपिसाधुः। यद्यपिकेवलः शेतिः स्वप्नेवर्त्तते तथाप्यतिपूर्वः प्रकर्षे प्रकर्षश्चात्रनाधिक्यंकिंत्वभिभवः॥ ॥

पूर्वानुमहाभागतयातिशेषे इति प्रयोगदर्शनात्। नचैवं प्रकर्षे तमबिष्ठनाविल्यवकुतो नसूत्रितमिति वाच्यं। अतिशायनमिति निपातनान्नार्थमेव तथोक्तत्वात्। अति
शयोन प्रत्ययार्थः। तथाहि सति लघोरतिशायनं लघुतममितिस्यात्। प्रत्ययार्थस्य प्राधान्यात्। नापि प्रकृत्यर्थः। तथाहि सति प्रकर्षातिशयातिशयनादिभ्य एव स्यान्नत्वा
ढ्यादिभ्यः। किंतु प्रकृत्यर्थविशेषणं प्रत्ययमुद्योतकत्वेनेदाह। अतिशयविशिष्टेत्यादि। अयमेषामितिद्व्ह्यवयवेसमुदायेयदा एकस्यातिशयो विवक्ष्यते तदा तर
बीयसुनावपवादौ वक्ष्येते। तथा च परिशेषाद्बहूनां मध्ये यदा एकदेशस्य निर्द्धारणं सोऽस्य विषय इति भावः। आख्यातमइति। सुबंतात्तमप्। सुपो धातुरिति लुक्॥ य
द्यपि ङ्याप्प्रातिपदिकादित्येवानुवर्त्तते तथापि सुबंतात्प्रत्ययेन व्याख्येयं मन्यथाहि पूर्वाह्णेतरां पूर्वाह्णेतमामित्यादौ घकालतनेषु कालनाम्न इति सप्तम्या अलु
ग्विधानं कथमुपपद्यतां॥ ॐ॥ तिङश्च। अस्मादिष्ठन्नभवत्यजादी गुणवचनादेवेति नियमादित्याशयेनाह। तमप्स्यादिति। तरप्तमपौ घः। अस्मिन्विवाति

तिङश्च॥५।३।५६॥ तिङन्तादतिशायने द्योत्ये तमप्स्यात्। तरप्तमपौ घः॥१।१।२२॥ एतौ घसंज्ञौ स्तः॥ किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे॥५।४।११॥ कि
मेदन्तात्तिङोऽव्ययाच्च यो घस्तदन्तादामुः स्यान्न तु द्रव्यप्रकर्षे। किंतमां। प्राह्णेतमां। पचतितमां। उच्चैस्तमां। द्रव्यप्रकर्षे तु। उच्चैस्तमस्तरुः। द्विवचन
विभज्योपपदे तरबीयसुनौ॥५।३।५७॥ द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः। पूर्वयोरपवादः। अयमनयोरतिशयेन लघुर्ल
घुतरः। लघीयान्। उदीच्याः प्राच्येभ्यः पटुतराः। पटीयांसः। अजादी गुणवचनादेव॥५।३।५८॥ इष्ठन्नीयसुनौ गुणवचनादेव स्तः। नेह। पाचकतरः। पा

शायनिकप्रकरणेऽजादी घः पितौ च इति वा वक्तव्ये प्रकरणं तरे गुरुसूत्रकरणमत्यंतस्वार्थिकमपि तरपं ज्ञापयति। तेन अल्पाच्तरं लोपश्चबलवत्तर इत्यादि सिद्धं। अल्पाजेव
त्यल्पाच्तरं न त्वत्र द्वयोरेकस्यातिशयविवक्षायां तरप्। अन्यथा प्रिवेकेशवाविन्यादि सिद्धवपि प्रियौ स्वदुंदुभिवीणा इत्यादिन सिद्ध्येदित्याहुः। किमेत्। आमोरुकारो यदित्यज्येत
तर्हि पचतितरामित्यादौ ह्रस्वनद्याप इति नुटि पचतितराणामितिस्यात्। यस्येति लोपस्य परेणानुदात्ताधात। सिद्धांते तु निरनुबंधग्रहणे न सानुबंधकस्येति परिभाषया नुड्विधौ
नास्य ग्रहणं। द्विवचनविभज्योपपदे। द्वयोरर्थयोर्वचनं द्विवचनं करणे ल्युट् कर्मणि षष्ठ्याः समासः। येन पदेन द्वावर्थावुच्येते तद्द्विवचनं विभक्तव्यं विभज्यं। ऋहलोर्ण्यदिति
ण्यति प्राप्ते तदपवादो यत् निपात्यते ण्यति तु चजोः कुघिण्ण्यतोरिति कुत्वे न विभाग्यमितिस्यात्। विभाज्यशब्दस्य स्मृतिषु प्रयुक्तस्य साधुत्वं चिंत्यमिति हरदत्तो निश्चिंत्यां ण्यंतात् रचोयति विभाज्यमि

CC-0. In Public Domain. Digitization by eGangotri



णाविति सूत्रे युष्मादन्तादिति दिक्। द्विवचनं च विभज्यं चेति द्वंद्वः तस्य उपपदेन कर्मधारय स्तथा च द्व्यर्थवाचके विभजनीये चोपपदे सतीत्यक्षरार्थः। द्विवचनान्ते उपपदे इति व्याख्यायां तु दन्तोष्ठस्य दन्ताः स्निग्धतरा इत्यादि न सिध्यति। न च द्वयोर्वचनं द्विवचनमिति पक्षेपि नेदं सिध्यति समाहारस्यैकत्वात्। गुणभूतवर्णिपदार्थाश्रयणात् द्वावित्यहन्ताः द्वौ वोष्ठाविति तेषां बहुत्वात्स्नुतरां न सिध्येति दिक्। केचित्तु आहुः हन्तावभेदैकत्वसंख्यामुपादाय इति वर्णिपदानि। नन्व भेदस्य परित्यागाद् भेदैकत्वसंख्या पाश्रेपादानाद् दन्तोष्ठलक्षणार्थद्वयं दन्तोष्ठशब्देनोच्यत इति नास्ति द्विवचनोपपद इति पक्षे दोष इति। विस्तरस्त्वाकरग्रंथेभ्योऽवगन्तव्यः। अन्वर्थं चोपपदं उपोच्चारितं पदमिति न तु कृत्रिमं। न हि तद्विधौ तस्यासंभवात्। न च विग्रहवाक्य एव प्रयुज्यते। वृत्तौ तु गतार्थत्वान्नावश्यकं। एवं स्थिते उपपदग्रहणं स्पष्टार्थं। इह द्वे उपपदे द्वे च सुवन्त तिङन्ते तद्रूपे प्रकृती द्वौ च प्रत्ययौ तथापि यथासंख्यं नेष्यते। द्विवचनोपपदमुदाहरति। अनयोरिति। लघीयानिति। टेरिति लोपः। उगित्वान्नुम्। सान्तमहत इति दीर्घः। हल्ड्यादिसंयोगान्तलोपौ। विभज्योपपदमुदाहरति। प्राच्येभ्य इति। पंचमी विभक्त इति पंचमी। कथं तर्हि पटुर्द्रुवान् पटुरासीत् ऐषमस्तु पटुतर इति। अ

तुश्छन्दसि। पा। ३। ५९। तृन्तृजन्तादिष्ठन्नीयसुनौ स्तः। तुरिष्ठेमेयःसु। तृशब्दस्य लोपः स्यादिष्ठ परेषु। अतिशयेन कर्ता करिष्ठः। दोहीयसी धेनुः।

त्राहुः। एकस्यापि धर्मिणः। तत्कालसम्बन्धादिरूपधर्मभेदेन भेदाध्यारोपात् तद्योग्यपेक्षः प्रकर्षस्तदाश्रयश्चेह तरप्तमप इति व्यपदिशन्ति। अन्य एवासिसंदृतः कश्चित्स एवासिधनंजयस्त्वमिति। अजादी गुणवचनादेव। इष्टतोऽवधारणार्थ एवकारस्तेन प्रत्ययनियमो यां एवकाराभावे तु गुणवचनादजादिप्रत्ययावेवेति प्रकृतिनियमोपि संभाव्येत। तथा च पटुतरः पटुतम इत्यादि न सिध्येत्। तुश्छन्दसि पूर्वेण नियमेन आवर्जितयोः प्रतिप्रसवोऽयं न त्वपूर्वो विधिस्तेन उपाधिसंकरो न॥ तुरिष्ठा टेरित्यनेनान्त्यलोपे सिद्धे प्यारंभसामर्थ्यात्सर्वस्य तृशब्दस्य लोपस्तदाह। करिष्ठ इति। दोहीयसीति। इयमनयोरतिशयेन दोग्ध्री भस्यादे न द्विते सिद्धश्च प्रत्ययविधाविति वचनात्। न द्वितेकर्तव्ये प्रागेव पुंवद्भाव इति ङीपि निवृत्ते दोग्धृशब्दात् प्रत्ययः ततस्तु चिनिवृत्तेनिमित्ताभावात् घत्वजश्त्वयोरपि निवृत्तिः। अलौकिकविग्रहवाक्ये प्रागेव तयोरप्रवृत्तिरकृतव्यूहपरिभाषयेति तु तत्त्वं। गुणस्तु प्रवर्त्तते लुप्तेपि तृचि प्रत्ययलक्षणप्राप्त्यात्। छांदसमपि तुरिति सूत्रं तुरिष्ठेमेयस्स्विति च णाविष्ठवदित्यतिदेशेन लोपेपि कर्त्तारमाचष्टे कारयतीत्यादावुपयोक्ष्यमाणत्वादिहोपन्यस्तं॥

279

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रशस्यस्य श्रः। अजादी इत्यनुवर्तनं सप्तम्या विपरिणम्यत इत्याह। अजाद्योरिति। अजाद्योः किं। प्रशस्यतरः। प्रशस्यतमः। श्रेष्ठ इति। प्रकृतिभावादिह टेरिति लोपो यस्येति लोप
श्च न भवति। ज्यायान्। ज्यादुत्तरस्येयसुन आकारादेशः स्यात्। वृद्धस्य च। स्वरूपस्येह ग्रहणं न तु वृद्धिर्यस्याचामादिरिति पारिभाषिकस्य व्याख्यानात्। अस्य प्रियस्थिरेत्या
दिना वर्षादेशोऽपि पक्षे भवति। न चैतस्येमनिच्यसावकाशता शंक्या। दृढशब्दादिमनिचोऽभावात्। यदि तु वृद्धस्य वर्षि श्चेति सूत्रमिहैव क्रियेत तदा दृढवृद्धयोर्ग्रहणं न

प्रशस्यस्य श्रः। ५।३।६०॥ अस्य श्रादेशः स्यादजाद्योः। प्रकृत्यैकाच्। ६।४।१६३॥ इष्ठादिष्वेकाच् प्रकृत्या स्यात्। श्रेष्ठः। श्रेयान्। ज्य च। ५।३।६१॥
प्रशस्यस्य ज्यादेशः स्यादिष्ठेयसोः। ज्येष्ठः। ज्यादादीयसः। ६।४।१६०॥ आदेः परस्य। ज्यायान्। वृद्धस्य च। ५।३।६२॥ ज्यादेशः स्यादजाद्योः॥
ज्येष्ठः। ज्यायान्। अन्तिकबाढयोर्नेदसाधौ। ५।३।६३॥ अजाद्योः। नेदिष्ठः। नेदीयान्। साधिष्ठः। साधीयान्। स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां
यणादिपरं पूर्वस्य च गुणः। ६।४।१५६॥ एषां यणादिपरं लुप्यते पूर्वस्य च गुणः इष्ठादिषु। स्थविष्ठः। दविष्ठः। यविष्ठः। ह्रसिष्ठः। क्षेपिष्ठः। क्षोदिष्ठः।
एवमीयसुन्। ह्रस्वक्षिप्रक्षुद्राणां पृथ्वादित्वात्। ह्रसिमा। क्षेपिमा। क्षोदिमा। प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फ
वर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः। ६।४।१५७॥ प्रियादीनां क्रमात्प्रादयः स्युरिष्ठादिषु। प्रेष्ठः। स्थेष्ठः। स्फेष्ठः। वरिष्ठः। बंहिष्ठः। गरिष्ठः। वर्षिष्ठः।
त्रपिष्ठः। द्राघिष्ठः। वृन्दिष्ठः। एवमीयसुन्। प्रेयान्। प्रियोरुबहुलगुरुदीर्घाणां पृथ्वादित्वादिमनिच्। प्रेमेत्यादि। बहोर्लोपो भू च बहोः। ६।४।
१५८॥ बहोः परयोरिमेयसोर्लोपः स्याद्बहोश्च भूरादेशः। भूमा। भूयान्। इष्ठस्य यिट् च। ६।४।१५९॥ बहोः परस्येष्ठस्य लोपः स्यात् यिडाग
मश्च। भूयिष्ठः। युवाल्पयोः कनन्यतरस्याम्। ५।३।६४॥ एतयोः कनादेशो वा स्यादिष्ठेयसोः। कनिष्ठः। कनीयान्। पक्षे यविष्ठः। अल्पिष्ठ इत्यादि॥

कर्तव्यमिति लाघवं भवतीत्याहुः। स्थूलदूर। परग्रहणं यविष्ठो ह्रसिष्ठ इत्यत्र पूर्वयणादेर्लोपो माभूदिति। पूर्वग्रहणं तु स्पष्टार्थं। परस्मिन् लुप्ते सामर्थ्यात्पूर्वस्यैव गुणला
भात्। स्थविष्ठ इति। न चात्र ओर्गुण इत्येव सिद्धे गुणग्रहणं व्यर्थमिति वाच्यं। परयणादिलोपस्याभीयत्वेनासिद्धत्वात्। क्षिप्रक्षुद्रयोरोर्गुणस्य प्राप्त्यभावात्। क्षेपिष्ठः।
क्षोदिष्ठ इत्यसिद्धिप्रसंगाच्च एवमिति। प्रेयान्। स्थेयान्। स्फेयान्। वरीयानित्यादि। इमेयसोर्लोप इति। स चादेः परस्येत्यादेरेव भवति। इष्ठस्य यिट्। पूर्वसूत्रे सेपूर्लमनु

सि·कौ·
टी·त·
सु·त·
८०

वर्त्तनेनदाहा। चहोरित्यादि। भूरादेष्ठा श्चेत्यपि ज्ञातव्यं। भूयिष्ठ इति। इष्ठस्यादिलोपे कृते यिट् शब्द आगमः। यद्वा लोपापवादो यकार आगमः इकार उच्चारणार्थः। पक्षद्वय
मपीदं भाष्यारूढं। युवाल्पयोः ।युवेति स्वरूपग्रहणं न तु युवापत्यस्य अल्पसाहचर्यात् व्याख्यानाच्च। अजादी इत्यनुवर्त्तनादजाद्योरेव परयोर्न तु तरप्तमपोरित्याशयेन
व्याचष्टे। इष्ठेयसोरिति॥ ॥ विन्मतोर्लुक्। स्रजिष्ठ इति विनो लुकि कृते भत्वात्पूर्वकार्याभावः। अस्मादेव ज्ञापकाद्गुणवचनत्वेपि विन्मतोरजादी भवतः। प्रशंसा
यां रूपप्। प्रकृत्यर्थस्य परिपूर्णतेह प्रशंसा न तु स्तुतिः। तेनेहापि भवति। चोररूपोयं यद्दृष्णोरेव जनं हरति गुप्तवस्त्वपहरणेन चौर्यं परिपूर्यते। पचतिरूपमिति। क्रि
याप्रधानमाख्यातं क्रियायाश्चासत्त्वरूपत्वेपि औत्सर्गिकमेकवचनं भवति। तेन पचतोरूपं पचन्तिरूपमित्यादि। इह प्रथममेव विभक्त्यन्तराणामप्राप्तेरिति वहवः। व

विन्मतोर्लुक्। ५।३।६५। विनो मतुपश्च लुक्स्यादिष्ठेयसोः। अतिशयेन स्रग्वी स्रजिष्ठः। स्रजीयान्। अतिशयेन त्वग्वान्। त्वचिष्ठः। त्वचीयान्।
प्रशंसायां रूपप्। ५।३।६६॥ सुबन्तात्तिङन्ताच्च। प्रशस्तः पटुः पटुरूपः। प्रशस्तं पचति। पचतिरूपं। ईषदसमाप्तौ कल्पब्देश्यदेशीयरः। ५।३।६७
ईषदूनो विद्वान्। विद्वत्कल्पः। यशस्कल्पम्। यजुष्कल्पम्। विद्वद्देश्यः। विद्वद्देशीयः। पचतिकल्पम्। विभाषा सुपो बहुच् पुरस्तात्तु। ५।३।६८॥
ईषदसमाप्तिविशिष्टेर्थे सुबन्ताद्बहुज्वा स्यात्स च प्रागेव न तु परः। ईषदूनः पटुः। बहुपटुः। पटुकल्पः। सुपः किम्। पचतिकल्पं। प्रकारवचने जा
तीयर्। ५।३।६९॥ प्रकारवति चायम्। प्रागलं तु प्रकारमात्रे। पटुप्रकारः पटुजातीयः। प्रागिवात्कः। ५।३।७०॥ इवे प्रतिकृतावित्यतः प्राक्काऽधिकारः
अव्ययसर्वनाम्नामकच् प्राक्टेः। ५।३।७१॥ तिङश्चेत्यनुवर्त्तते॥ ॥ ९९ स्तुतस्तुपश्येत्यादियोगे कर्मणि द्वितीयापि सुलभा स्त्रीवत्त्वं लोकात्।

एवं पचतिकल्पमित्यादावपि बोध्यं। विभाषा सुपः। सूत्रे सुप इति षष्ठ्यन्तं। पञ्चम्यन्त समर्थप्रत्ययेनेत्युक्तेः। सुबन्तादिति। एतच्च पञ्चम्यन्तमुक्तमेव। पुरस्ताच्छब्दपर्यायस्य प्रा
गिति शब्दस्य सूत्रे प्रयुक्तत्वात्। प्रागित्यपकृष्यत इति तु मनोरमायां स्थितं। न च सूत्रस्थपुरस्ताच्छब्दसमानार्थकप्राक्शब्दयोगेपि षष्ठ्यन्तसर्वनामषष्ठी स्यादिति वाच्यं। अ
न्यारादिति सूत्रे चूत्तरपदस्य दिक्छब्दत्वेपि षष्ठ्यन्तसमर्थप्रत्ययेनेत्येतद्बाधनार्थं पृथग्ग्रहणमिति सिद्धान्तयित्वा प्राक्प्रत्यग्वा ग्रामादित्युदाहृतत्वात्। काशिकायां तु ता
वपि पुरस्ताच्छब्दः प्रयुक्तः सुबन्तादिति च प्रयुक्तं। तदसमंजसमिति मत्वा हरदत्तेन कथंचित्समर्थितं। ल्यप्लोपे पञ्चमी। एवंभूतं प्रकृतित्वेनाश्रित्येत्यर्थ इति॥ ॥

280

CC-0. In Public Domain. Digitization by eGangotri

प्रागेवेति। सोत्र तुशब्दोवधारणे वर्त्तत इति भावः तेन च वहुजेव विकल्प्यते न तु पूर्वत्वं। तुशब्दाभावे तु प्रागुक्तं विकल्प्येत तथा च पक्षे वहुच्परः स्यात्। भाष्यकारस्य मते तु नेदं तु
शब्दस्य फलं। तथा हि। उदश्वितोन्यतरस्यामित्यादौ प्रधानत्वात्प्रत्यय एव विकल्प्येत न तु परत्वं प्रत्यय एव हि परत्वविशिष्टो विधीयत इति विशेषण गुणत्वात्। गुणानां च प
रार्थत्वादिति न्यायात् तद्धिहापि विभाषाग्रहणेन वहुजेव सम्बध्यते न पुरस्तादिति तत्। तुशब्दस्य तु अवधारणार्थस्यान्यदेव प्रयोजनं पुरस्तादेव सर्वे यथा स्यादिति न
लिंगसंख्ये अपि प्राक्प्रत्ययोत्पत्तेः प्रकृत्यवस्थायां ये दृष्टे ते एव सः वहुचः प्रयोगश्च प्राक्प्रकृतेरेव भवतीति। तेन वहुगुडो द्राक्षा लघुर्वहुतृणं नर इत्यादौ प्रकृतिवल्लिंगमेवम
वतिन्त्वभिधेयवल्लिंगं॥ ननु स्वार्थिकाः प्रकृतितो लिंगवचनानि लभन्ते इत्येवं सिद्धमिति किमनेन तुशब्दग्रहणेनेति चेदत्राहुः एतदेव ज्ञापयति ईषदसमाप्तौ ये स्वार्थिका

कस्य च दः।५।३।७२॥ कान्ताव्ययस्य दकारो न्तादेशस्यादकच्च। अज्ञाते।५।३।७३॥ कस्यायमश्वोऽश्वकः। उच्चकैः। नीचकैः। सर्वके। विश्वके। ओकार
सकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच्। युवकयोः। आवकयोः। युष्माकासु। अस्माकासु। युष्मकाभिः। अस्मकाभिः। ओकारेत्यादि किम्। त्वयका
मयका। अकच्प्रकरणे तूष्णीमः काम्वक्तव्यः। मित्वादन्त्या दचः परः। तूष्णीकामास्ते। शीले कोमलोपश्च॥ तूष्णीशीलः। तूष्णीकः। पचतकि। जल्प
तकि॥ धकित्। हिरकुत्। कुत्सिते।५।३।७४॥ कुत्सितोश्वोऽश्वकः। संज्ञायां कन्।५।३।७५॥ कुत्सिते कन् स्यात्तदन्तेन चेत्संज्ञा गम्यते॥ शूद्रकः। राधकः
स्वरार्थमवचनम्। अनुकम्पायाम्।५।३।७६॥ पुत्रकः। अनुकम्पितः पुत्र इत्यर्थः॥ ॥ ९ स्तोक्षभिधेयवदेव लिंगवचने स्त इति। तेन गुडकल्पा द्रा

क्षा प्रार्कराकल्पो गुड इत्यादि सिद्धं। प्रागिवात्कः। सुप इत्यनुवर्त्ततो तेन तिङन्तात्कोन। अव्ययसर्वनाम्नां। अनुवर्त्तत इति। मंडूकप्लुत्येति भावः। ङ्याप्प्रातिपदिकात्सुप इति चानुवृ
त्तेरेव॥ ९ ॥ कस्य च दः। कान्ताव्ययस्येति। सर्वनामग्रहणे तिङ्ग्रहणं च नेह संवध्यते तयोः कान्तत्वासंभवात्। न चाधोक् अधोगित्यादौ संभवोस्तीति वाच्यं कत्वस्यासिद्धत्वात्
यद्यपि शक्नोतेर्यङ्लुकि लङि तिपि अशाशाक् नि संभवति तथापि यङ्लुको सार्वत्रिकत्वान्नेह ग्रहणं प्रमाणमस्ति छन्दसि क्वचिद्दृष्टस्य सद्भावेपि सर्वे विधयश्छन्दसि वा विधीयन्त इति द्रव्यवि
धिने प्रवर्त्तत इति भावः। ओकारेति। अकज्विधौ सुपोप्यनुवृत्त्या सर्वनाम्ना सुपा च टेर्विशेषणे कामचारात्। अव्यवस्था प्रसंगे भाष्यकारवचनाद्व्यवस्था श्रीयते ओकारसकारादि
त्यादि संकोचश्च युष्मदस्मन्मात्रविषयकस्तथैव भाष्ये उदाहृतत्वात्। अन्येषां त्वविशेषेण प्रातिपदिकस्येव टेः प्रागकच् न तु सुवन्तस्य तेन सर्वकेण इमके न भवकं तमित्यादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·कौ· त्वयकामयकेति। नत्वत्र सुपः प्राग्कचित्कतेप्रत्ययेपरतस्त्वमादेशयोः सतोरपियोचोतियत्वं नस्याद्विभक्तिपरत्वाभावादितिचेन्मैवं। अकृतव्यूहपरिभाषया अनित्यनामात्रि

टी·त· त्याकचः पूर्वमेवयत्वविधानात्। एवंयुवकामावकामित्यत्राप्यकचः पूर्वमेवयुवावादेशाविति बोध्यं। शीलेकइति। शीलस्वभावोनियमश्चतून्लीकइतिकेणइति ह्रस्वस्तुभाष्यका

सु·त· रप्रयोगान्नकपीत्यत्र नेतियोगविभागाद्वानभवतीत्याहुः। अकचोद्वितीयअकारउच्चारणार्थइतिध्वनयन्नुदाहरति। पचतकीत्यादि। अनुकंपायां। कृपादयानुकंपास्यादित्य

८१ मरः। नीतौचतद्युक्तात्। अनुकंपायुक्तादिति यद्यपिपुत्रादिरेवसाक्षादनुकंपायुक्तो नतुधानादिस्तथापितद्द्वाराधानादीनामप्यस्त्यनुकंपासंबंधइतिभावः। धानकाइति। धा

नीतौचतद्युक्तात्। ५।३।७७॥ सामदानादिरुपायोनीतिस्तस्यांगम्यमानायामनुकम्पायुक्तात्कप्रत्ययः स्यात्। हन्ततेधानकाः। गुडकाः। एहकि। अद्धिकि

पूर्वेणानुकंप्यमानात्प्रत्ययः। अनेनतुपरम्परासम्बन्धेपीतिविशेषः॥ बह्वचोमनुष्यनाम्नष्ठज्वा। ५।३।७८॥ पूर्वसूत्रद्वयविषये॥ घनिलचौच। ५।३।

७९॥ तत्रैव। ठाजादावूर्ध्वंद्वितीयादचः। ५।३।८३॥ अस्मिन्प्रकरणेयष्ठोऽजादिप्रत्ययश्चतस्मिन्प्रत्ययेपरेप्रकृतेर्द्वितीयादचऊर्द्ध्वंसर्वंलुप्यते। अनुक

म्पितोदेवदत्तोदेविकः। देवियः। देविलः। देवदत्तकः। अनुकम्पितोवायुदत्तोवायुकः। ठग्रहणमुकोद्वितीयत्वेकविधानार्थम्॥ वायुदत्तः। वायुकः

। पितृकः। चतुर्थादचऊर्द्ध्वस्यलोपोवाच्यः॥ अनुकम्पितोबृहस्पतिदत्तोबृहस्पतिकः। अनजादौचविभाषालोपोवक्तव्यः। देवदत्तकः। देवकः। लोपः

पूर्वपदस्यच॥ दत्तिकः। दत्तियः। दत्तिलः। दत्तकः। विनापिप्रत्ययम्पूर्वोत्तरपदयोर्वालोपोवाच्यः। देवदत्तः। दत्तदेवः। सत्यभामा। भामासत्या। उवर्णाल्ल

इलस्यच। भानुदत्तः। भानुलः। ऋवर्णादपि॥ सवित्रियः। सवितृलः। चतुर्थादनजादौचलोपः पूर्वपदस्यच। अप्रत्ययेतथैवेष्टउवर्णाल्लइलस्यच १

नाशब्दः स्त्रीलिंगः। ततः कः केणइति ह्रस्वः। कप्रत्ययान्तात्टाप्। अत्र प्रत्ययस्थादितीत्वेननभाव्यं। प्रायेणतुधानकाइतिपठ्यते। नत्वलिंगातिवृत्तिर्दृष्टव्येति हरदत्तः। कर्मव्यतिहा

रेणचस्त्रियामि तिसिद्धेणचः स्त्रियामिति सूत्रेपुनः स्त्रीग्रहणेनज्ञापितं स्वार्थिकाः प्रकृतिलिंगं क्वचिदतिवर्त्तन्तइतितेनधानकाइत्यत्रपुंस्त्वमितिभावः। घनि लचौच

चकारात्यथाप्राप्तमितिकाशिका। इहपूर्वसूत्रेलेवठन्विहितः वावचनात्कोपिचकारेणतुकस्याप्यनुज्ञेतिचिंत्यं। योगविभागेफलमपिचिंत्यमिहरदत्तः। ठजादौ। समाहारद्वंद्वे

सौत्रंपुंस्त्वं आदिग्रहणं चिंत्यप्रयोजनं। यस्मिन्विधिस्तदादावित्येवसिद्धमितिहरदत्तः। अस्मिन्प्रकरणइति। अनुकंपायांनीतौचेत्यर्थद्वयस्येवप्रत्यासत्त्याबुद्धौसन्निधानादिति श्रीः

281

CC-0. In Public Domain. Digitization by eGangotri

उर्ध्वग्रहणमिह सर्वलोपार्थं अन्यथा आदेः परस्येत्यादेरेव स्यादित्यभिप्रेत्याह द्वितीयादचऊर्ध्वं सर्वमिति। अजिनांतस्येत्यतो लोप इत्यनुवर्त्तनादाह लुप्यत इति। ननु ठग्रहणं व्यर्थं इकादेशे कृते अजादावित्येव सिद्धत्वादत आह। ठको द्वितीयत्व इति। वायुक इति। वायुशब्दात्परस्य दत्तशब्दस्य ठावस्थायामेव लोपे इसुसुक्तां तादिति कः। किंच पृथक् ठग्रहणस्य प्रयोजनांतरमप्यस्ति यदा तु चित्रगुप्रभृतिभ्यष्ठच् तदा गंतत्वात् कादेशाप्राप्त्या प्रथममिकादेशस्याऽसंभवेनाजादिलक्षणो लोपो न स्यादिति तदर्थमपि ठग्रहणं तेन ठावस्थायामुत्तरपदलोपे कादेशस्यासंभवादिकादेशे चित्रक इति रूपं सिध्यतीति बोध्यं चतुर्थादनजादौ चेति वक्ष्यमाणमेव श्लोकं मत्का व्याचष्टे। चतुर्थादचऊर्ध्वस्येति। अनजादाविति। हलादावित्यर्थः। अस्मिन् प्रकरणे इत्येव। लोपः पूर्वपदस्य चेति। ठजादावनजादौ चेति बोध्यः। अप्रत्ययेऽत एवेत्येतद्व्याचष्टे। विनापि प्रत्ययमिति। लइलस्य चेति। इलस्य लः। लोप इत्यर्थः सत्यादेः परस्येति इकारलोपो बोध्यः॥ ❀ ॥ प्राचामुपादेः। बह्वचो मनुष्यनाम्न इत्यनुवर्त्तते। उपेंद्रदत्त इति। ननुक्तसं

प्राचामुपादेरडज्वुचौ च। ५।३।८०॥ उपशब्दपूर्वात्प्रातिपदिकात्पूर्वविषयेऽडच् वुच् एतौ स्तः। चाद्यथाप्राप्तम्। प्राचांग्रहणं पूजार्थम्। अनुकम्पितउपेन्द्रदत्तः। उपडः। उपकः। उपिकः। उपियः। उपिलः। उपेन्द्रदत्तकः। षडूपाणि। जातिनाम्नः कन्। ५।३।८१॥ मनुष्यनाम्न इत्येव। जातिशब्दो यो मनुष्यनामधेयस्तस्मात्कन् स्यादनुकम्पायाम् नीतौ च। सिंहकः। शरभकः। रासभकः। द्वितीयं संध्यक्षरं चेत्तदादेर्लोपो वक्तव्यः॥ कहोडः कहिकः। एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः॥ वागाशीर्दत्तः॥ ॥

१९ घेरुपेंद्रशब्दादिकादेशस्य पूर्वोत्तरतयाग्रहणं द्वयादेरिति विधीयमानौ प्रत्ययौ तां नाम लोपस्तु नकारादेरेव स्यात्तत्रश्च उपक उपड इति रूपे न स्यातां। किंतु उपयड उपयक इति रूपे स्यातामेवं च निलचूष्ठचूलपिदोषएव। तस्मादिहेव द्वितीयं संध्यक्षरं चेति वार्त्तिकं कुतो नोक्तमिति चे दत्राहुः प्रकारांतरेणनिर्वाहसंभवान्नोक्तं। तथाहि। आदुलोके कृते द्वितीयं संध्यक्षरमित्यादिना अकारस्यापि लोपप्रसक्त्या गुणात्पूर्वमेवाकृतव्यूहपरिभाषया प्रत्ययः। न च परिनिष्ठितत्वपरेणासमर्थग्रहणेन सोऽस्त्येति रित्यत्रैव परिभाषाबाधः शंक्यः। प्राग्दिश इति सूत्रे समर्थग्रहणं निवृत्तमित्युक्तत्वादकृतसंधेरिति प्रागुक्तज्ञापकवलेन समर्थग्रहणं प्रत्यासत्त्या नपक्षेऽपि ज्ञापकस्य विशेषपरत्वाश्रयणादिति। उपेंद्रः उपगुरुपकर्त्तेत्यादि पूपडादीनां पंचानां रूपाणां साम्येऽपि सैव वादित्रिविप्रकरणादिना विशेषो ध्यवसेयः। जातिनाम्नः। ये शब्दा जात्यंतरे प्रसिद्धाः मनुष्येषु नामत्वेन विनियुक्तास्त इहोदाहरणं द्वितीय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· टी·त· बु·त· ८२

मित्यादि। एचः संध्यक्षरमिति प्राचां संज्ञा। वागाशीरिति। वाचि आशीर्यस्येति विग्रहः॥ ःः ॥ वाचिक इति। यद्यत्र द्वितीयादच ऊर्ध्वस्य लोपः स्यात्तदा वाच आ इक इति स्थि
तेयस्येति चेत्याकारस्य लोपे तस्य स्थानिवत्त्वादाकारांतस्य भत्वे अंतर्वर्तिनीं विभक्तिमाश्रित्य चकारांतस्य पदत्वे न कुत्वजश्त्वयोस्सतोर्वागिक इति स्यात्। उत्तरपदलोपे तु अ
ज्झलादेशत्वेन स्थानिवत्त्वाभावात्तुल्यावधिकत्वाय यचि भमिति भसंज्ञया सुप्तिङंतमिति पदसंज्ञा एकसंज्ञाधिकारात्परत्वाद्बाध्यते। स्वादिष्विति पदसंज्ञा तु न शंकनीयैवं य
चि भमिति भसंज्ञायास्तदपवादत्वात्। कथमिति। अत्राप्युत्तरपदलोपे जाते जश्त्वं दुर्लभमिति प्रश्नः। षष इति। अत्र सौत्र एव लोप इष्यते। न लोपसंख्यानिक इत्यर्थः। शोवल
सुपरि। शोवलिक इति। बह्वचो मनुष्यनाम्न इति ठच्। घनिलचौ च। शोवलियः। शोवलिलः। शोवलादीनां तृतीयाल्लोपोऽप्युच्यते। स चाकृतसंधीनां वक्तव्यः। सुपर्याशीः सुप

वाचिकः। कथं षडङ्गुलीदत्तः षडिक इति। यद्यप्यजादि वचनात्सिद्धम्। शोवलसुपरिविशालवरुणार्यमादीनां तृतीयात्। पा।३।८४॥ एषां मनुष्यना
म्नां ठाजादौ परे तृतीयादच ऊर्ध्वं लोपः स्यात्। पूर्वस्यापवादः। अनुकम्पितः शोवलदत्तः। शोवलिकः। शोवलियः। शोवलिलः। सुपरिकः। विशालि
कः। वरुलिकः। अर्यमिकः॥ अजिनान्तस्योत्तरपदलोपश्च। पा।३।८२॥ अजिनान्तस्य मनुष्यनाम्नोऽनुकम्पायां कन् तस्य चोत्तरपदलोपः। अनु
कम्पितो व्याघ्राजिनो व्याघ्रकः। सिंहकः। अल्पे। पा।३।८५॥ अल्पं तैलं तैलकम्। ह्रस्वे। पा।३।८६॥ ह्रस्वो वृक्षो वृक्षकः॥ संज्ञायां कन्। पा।३।८७॥
ह्रस्वहेतुकाया संज्ञा तस्यां गम्यमानायां कन्। पूर्वस्यापवादः। वंशकः। वेणुकः। कुटीशमीशुण्डाभ्यो रः॥ पा।३।८८॥ ह्रस्वा कुटी कुटीरः। शमीरः।
शुण्डारः। कुत्वा डुपच्। पा।३।८९॥ ह्रस्वा कुतूः कुतुपः। कुतूः कृत्तेः स्नेहपात्रम्। ह्रस्वा सा कुतुपः पुमान्। कासूगोणीभ्यां ष्टरच्। पा।३।९०॥ आयु
धविशेषः कासूः। ह्रस्वा सा कासूतरी। गोणीतरी॥ ॥ ११ रिकः। सुपरिपः। सुपरिल इति भाष्ये स्थितम्। कैयटेन तु सुपरिक इति प्रतीकमुपाद
यसंहिताकार्यं तु कृते लोपे सति सुपरिक इति स्यादिति व्याख्यातम्। अयं भावः। संहिताकार्यप्रवृत्तिकृते तृतीयादच ऊर्ध्वं लोपे सति शोवल इत्यस्यैव लोपः स्यात्। आ
कारस्तु यस्येति चेत्यनेन स्यात्। तथा चास्य स्थानिवत्त्वाद्बलोपनिवृत्तिर्भविष्यतीति। ह्रस्वे तैलादेर्ह्रस्वदीर्घादिव्यवहाराभावात् वृक्षक इत्युदाहृतम्। यद्यप्यस्येत्यने ॥
नैवेदं रूपं सिध्यति तथापि शस्त्रत्वे घविशेषासीत्याहुः। कुटीर इति। स्वार्थिकाः प्रकृतिलिङ्गमतिवर्तन्त इति पुल्लिङ्गता नात्र संगच्छते॥

282

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वत्सोक्षाश्वा। तनुत्वं न्यूनतासा च प्रवृत्तिनिमित्तस्य प्रत्यासत्तेः काचित्तु तत्सहचरितधर्मान्तराणां तत्र वत्सः प्रथमवयाः। वयसश्च प्रथमस्य न्यूनत्वं नाम वयोन्तरप्राप्तिस्तद्
द्वितीयमिति। नहि उक्षा तारुण्यस्य च तनुत्वं तृतीयवयःप्राप्तिः। अश्वायाम श्वादुत्पन्नोऽश्वः अश्वत्वं च जातिः। तत्सहचरितस्याश्वायामश्वादुत्पन्नत्वधर्मस्य न्यूनत्वम
न्यपितृकता। तथा च गर्दभेनाश्वायामुत्पादितोऽश्वतरः। ऋषभो भारस्य वोढा तस्य तनुत्वं भारोद्वहने मन्दशक्तिता। तद्वांस्तु ऋषभतरः। किंयत्तदो। कतरो वैष्णव इति। गुणेन नि
र्द्धारणमिदं। क्रियासंज्ञाभ्यां निर्द्धारणे तु कतरो ध्यापकः। कतरो देवदत्त इत्यादि ज्ञेयं। ननु द्वयोरेकस्य निर्द्धारणे डतरच्चेद्भवति तर्हि कयोरन्यतरो देवदत्तः ययो
रन्यतरस्तयोरन्यतर इत्यत्रापि प्राप्नोति। अत्राहुः। निर्द्धार्यमाणवाचिभ्य एवायं प्रत्ययोऽभिधानस्वाभाव्यात् तेनात्र नातिप्रसंग इति। एकस्येति किं। द्वयोरिति क
र्मणि षष्ठी भावभूता। तथा हि सत्यस्मिन् सर्वे कौरवदत्तयज्ञदत्ता वित्याद्यावेव स्यातां। वा बहूनां। किंयत्तद इति वर्त्तते। जातिश्च परिप्रश्नश्चेति समाहारद्वंद्वः। अत्र

वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे।५।३।९१। वत्सतरः। द्वितीयं वयः प्राप्तः। उक्षतरः। अश्वतरः। ऋषभतरः। प्रवृत्तिनिमित्ततनुत्व एवायम्। किं
यत्तदो निर्द्धारणे द्वयोरेकस्य डतरच्।५।३।९२। अनयोः कतरो वैष्णवः। यतरः। ततरः। महाविभाषया। कः। यः। सः॥ वा बहूनां जातिप
रिप्रश्ने डतमच्।५।३।९३। बहूनां मध्ये एकस्य निर्द्धारणे डतमज्वा स्यात्। जातिपरिप्रश्न इति प्रत्याख्यातमाकरे। कतमो भवतां कठः।
यतमः। ततमः। वाग्रहणमकजर्थम्। यकः। सकः। महाविभाषया। यः। सः। किमोऽस्मिन्विषये डतरजपि। कतरः। एकाच्च प्राचाम्।५।३।
९४। डतरच् डतमच्च स्यात्। अनयोरेकतरो मैत्रः। एषामेकतमः॥ ॥ ९९ जाताविति सर्वेषां विशेषणं। षष्ठीसमासे तु गुणभूतस्य जा
तिग्रहणस्य निष्कृष्य संबंधोऽनुपपन्नः स्यात्। परिप्रश्नग्रहणं तु किम एव विशेषणं तच्च क्षेपनिवृत्त्यर्थं। तत्र जातिग्रहणं प्रायोभिप्रायं क्रियागुणसंज्ञाभिरपि नि
र्द्धारणेपि डतरच इष्टत्वात् तथा पूर्वसूत्रे द्वयोरिति प्रायोभिप्रायं बहूनां निर्द्धारणेपि डतरच इष्टत्वात्तथा च वार्त्तिकं। किमादीनां द्विबह्वर्थे प्रत्ययविधानादुपाध्यान
र्थक्यमिति। अत्र कैयटः। द्वयोरिति जातिपरिप्रश्न इति च न कर्त्तव्यमिति भाव इति तदेतदाह। प्रत्याख्यातमाकर इति। कठ इति। कतमो भवतामध्यापकः क
रो देवदत्तो वेत्यप्युदाहर्त्तव्यं। यकः सक इति। कक इति तु नोक्तं अकच्सहितस्यापि किमः क इत्ययमादेश इति व्याख्यातत्वात्। महाविभाषयेति। प्रागिव इति सूत्रे

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· समर्थप्रथमग्रहणयोर्निवृत्तत्वेपि वाग्रहणमनुवर्त्तते इत्युक्तत्वादिति भावः। किंयत्त इति सूत्रे द्व्येकयोरित्यस्य प्रत्याख्यानादाह। किमोस्मिन्निति। एकाच्च। प्राचांग्रहणं पूजा
टी·त· र्थं विकल्पोऽनुवर्त्तत एव॥ ःः ॥ अवक्षेपणे कन्। कुत्सिते तु कः। स्वरे विशेषः। येन इत्तर इति। अवक्षिप्यते येनेत्यवक्षेपणशब्दः करणे ल्युडन्त इति भावः। प्रागि
सु·त· वीयानां पूर्णोवधिः अश्वक इति। अश्वशब्दोश्व एव वर्त्तते कन् प्रत्ययस्तु प्रतिकृतिरूपे सदृशा इति न्यायं स्वार्थिक इत्येके। अन्ये तु सादृश्यनिबंधनादभेदोपचारात्क्रौ॥
८३ र्वाहीक इतिवदश्वशब्द एव प्रतिकृतौ वर्त्तते। प्रत्ययस्तु तस्यैवोपचारिकत्वस्य बोधक इत्याहुः। प्रतिकृतौ किं गौरिव यः तृणचर्मकाष्ठादि निर्मितं प्रतिमापरपर्यायं वस्तुप्र

अवक्षेपणे कन्। ५। ३। ९५। व्याकरणकेन गर्वितः। व्याकरणकः। येनेत्तरः कुत्स्यते तदिहोदाहरणम्। स्वतः कुत्सिते तु कुत्सित इत्यस्य। प्रागिवीयानां
पूर्णोवधिः। इवे प्रतिकृतौ। ५। ३। ९६। कन् स्यात्। अश्व इव प्रतिकृतिः। अश्वकः। प्रतिकृतौ किम्। गौरिव गवयः। संज्ञायां च। ५। ३। ९७। इवार्थेक
न् स्यात्समुदायश्चेत्संज्ञा। अप्रतिकृत्यर्थमारंभः। अश्वसदृशस्य संज्ञा। अश्वकः। उष्ट्रकः। लुम्मनुष्ये। ५। ३। ९८। संज्ञायां विहितस्य कनो लुप्स्या
न्मनुष्ये वाच्ये। चंचा तृणमयः पुमान्। चंचेव मनुष्यश्चंचा। वर्ध्रिका। जीविकार्थे चापण्ये। ५। ३। ९९। जीविकार्थं यद्विक्रीयमाणं तस्मिन्वाच्ये
कनो लुप्स्यात्। वासुदेवः। शिवः। स्कंदः। देवलकानां जीविकार्थासु देवप्रतिकृतिष्विदम्। अपण्ये किम्। हस्तिकान्विक्रीणीते। देवपथादिभ्यश्च।
। ५। ३। १००। कनो लुप्स्यात्। देवपथः। हंसपथः। आकृतिगणोयम्। वस्तेर्ढञ्। ५। ३। १०१। इवेत्यनुवर्त्तत एव। प्रतिकृतावितिनिवृत्तम्। वस्तिरिव
वास्तेयं। वास्तेयी। शिलाया ढः। ५। ३। १०२। शिलेव शिलेयम्। ।शिलाया इति योगविभागाड्ढञपीत्येके। शैलेयं। शाखादिभ्यो यः। ५। ३। १०३।
शाखेव शाख्यः। मुख्यः। जघनमिव जघन्यः। अग्र्यः। शरण्यः। द्रव्यं च भव्ये। ५। ३। १०४। द्रव्यमयं ब्राह्मणः। कुशाग्राच्छः। ५। ३। १०५। कुशाग्र

तिकृतिः। गवयस्तु नैवं। समुदायश्चेत इति। प्रकृतिप्रत्ययसमुदायश्चेदश्वसदृशस्य संज्ञेत्यर्थः। चंचा वध्रिके इति। लुपि युक्तवद्भावात्स्त्रीलिंगता। वासुदेवः शिव इत्या
दि याः प्रतिमाः प्रतिगृहं गृहाद्गृहं भिक्षमाणा अटंति ता एवमुच्यंते। देवलका अपि त एवभिक्षवोऽभिप्रेताः। याश्चायतनेषु प्रतिष्ठाप्यंते पूज्यंते च तासु तूत्तरसूत्रेण लुप
न दुक्तं। अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु च। इवे प्रतिकृतौ लोपः कनो देवपथादिषु इति। आर्चासु प्रतिमासु कीदृशीषु पूजनार्हासु गेहे ष्वायतनेषु वा याः पूज्यंते ता 283

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुचित्रकर्मध्वजाभ्यां तद्गताः प्र निकृतयोलक्ष्यंते आर्चासूदाहरणं शिवः विष्णुः चित्रकर्माणि अर्जुनः दुर्योधनः। ध्वजेषु कपिः। गरुडः सिंहः सुपर्णो सिंह मकराद
यः ध्वजेषु राज्ञां संति। हस्तिकानीति। ईदृशमेव विषयमभिप्रेत्य पठंति। रामसीतां लक्ष्मणं जीविकार्थे विक्रीणीते यो न त्वं लंघिक्धिक् अलिन्य घे यो पशब्दान्नवेति

समासाच्च तद्विषयात्॥५।३।१०६॥ इवार्थे विषयात् समासाच्छ स्यात्। काकतालीयो देवदत्तस्य वधः। इह काकतालसमागमसदृश
श्चोरसमागम इति समासार्थः। तेन युक्तः काकमरणसदृशस्तु प्रत्ययार्थः। अजाकृपाणीयः। अतर्कितोपनत इति फलितोऽर्थः। शर्करादिभ्योऽ
ण्॥५।३।१०७॥ प्राक्केरेव प्राक्करम्॥ अङ्गुल्यादिभ्यष्ठक्॥५।३।१०८॥ अंगुलीव। आङ्गुलिकः। भरुजेव। भारुजिकः। एकशालाया ष्ठजन्यतर
स्याम्॥५।३।१०९॥ एकशालाशब्दादिवार्थे ठज्वा स्यात् पक्षे ठक्। एकशालेव। ऐकशालिकः। एकशालिकः। कर्कलोहितादीकक्॥५।३।११०॥ कर्कः
शुक्लोऽश्वस्तद्वत् कार्कीकः। लौहितीकः स्फटिकः॥ पूगाञ्ञ्योऽग्रामणीपूर्वात्॥५।३।११२॥ इवार्थो निवृत्तः। नानाजातीया अनियतवृत्तयोऽर्थकाम
प्रधानाः सङ्घाः पूगास्तद्वाचकात्स्वार्थे ञ्यः स्यात्। लौहितध्वज्यः। व्रातच्फञोरस्त्रियाम्॥५।३।११३॥ व्रातः। कापोतपाक्यः। च्फञः। कौञ्जायन्यः। ब्राध्नाय
न्यः। आयुधजीविसङ्घाञ्ञ्यड्वाहीकेष्वब्राह्मणराजन्यात्॥५।३।११४॥ वाहीकेषु य आयुधजीविसङ्घस्तद्वाचिनः स्वार्थे ञ्यट् स्यात्। क्षौद्रक्यः। मालव्यः। टि
त्वान्ङीप्। क्षौद्रकी। आयुधेति किम्। मल्लाः। सङ्घेति किम्। सम्राट्। वाहीकेषु किम्। शबराः। अब्राह्मणेति किम्। गोपालवाः। शालङ्कायनाः। ब्राह्मणे तद्वि
शेषग्रहणम्। राजन्ये स्वरूपग्रहणम्। वृकाट्टेण्यण्॥५।३।११५॥ आयुधजीविसङ्घवाचकात्स्वार्थे। वार्केण्यः। आयुधेति किम्। जातिशब्दान्माभू
त्। दामन्यादित्रिगर्त्तषष्ठाच्छः॥५।३।११६॥ दामन्यादिभ्यस्त्रिगर्त्तषष्ठेभ्यश्चायुधजीविसङ्घवाचिभ्यः स्वार्थे छः स्यात्। त्रिगर्त्तः षष्ठो वर्गो येषामन्ते

वर्ष्यप्रतं पंडितं न च घिग्धिगिति। अयं भावः। अपण्य इत्युक्तत्वान्न पण्ये हस्तिकानीति वनरामकं सीतिकां लक्ष्मणकमिति प्रयोगा एव साधव इति। देवपथ इत्यादि। देवपथ इव प्र
तिकृतिः। हंसपथ इव प्रतिकृतिरिति विग्रहः। वस्तिरिति। वस्तिर्नाभेरधो द्वयोरित्यमरः। द्रव्यं च भव्ये इत्यादाविवार्थे यत्प्रत्ययो निपात्यते॥ ❁ ॥ समासाच्च तद्विषयात् छेन प्रकारस्था

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



छः स्यादिति। इवार्थ इति बोध्यं। पूगाञ्ञ इत्यतः प्रागिवेत्यधिकारात्। शस्त्रीश्यामेत्यादौ तु एक एवेवार्थः स च समासांतर्भूत इति छो न भवत्युक्तार्थानामप्रयोगात्। का
कतालीय इति। प्रकृतसूत्रादेव ज्ञापकादिवार्थे समासः सुप्सुपेति वा। उभयथापि विशेषसंज्ञाविनिर्मुक्तः स च छप्रत्ययविषय एव तेनेह स्वातंत्र्यं उपाध्यंतरयोगावि
ग्रहश्चेत्याकरः। इह काकतालेत्यादि॥ आगच्छतः काकस्याऽकस्मात्तालफलपतनाद्यथा वधस्तथैवाकस्मिकचोरसमागमाद्देवदत्तवधः। एवमजाया आगच्छंत्या
कृपाणपतनात् यथा वधस्तत्सदृशमरणमिति फलितोऽर्थः। अतर्कितोपनत इति। अचिंतितोपपन्नः याहच्छिक इत्यर्थः। पूगाञ्ञ्यो। स्वरूपग्रहणं तु न भवति अग्राम
णीपूर्वादिति वचनात् पूर्वशब्दोऽत्रावयववचनः। अग्रामणीपूर्वादिति किं। देवदत्तो ग्रामणीर्येषां ते देवदत्तकाः। स एवां ग्रामणीरिति कन्। अत्र समुदायः पूगवचनः। लौ
हितध्वज्य इति। लोहितः ध्वजो यस्य संघस्य सः लोहितध्वजः। स एव लौहितध्वज्यः। व्रातच्फञोः। उत्सेधजीवित्वं व्रातस्य पूगाद्विशेषः। उत्सेधः शरीरायासः। कौ

आहुस्त्रिगर्त्तषष्ठांस्तु कौण्डोपरथदाण्डकी। क्रौष्टुकिर्जालमानिश्च ब्रह्मगुप्तोऽथ जानकिः ॥१॥ दामनीयः। दामनीयौ। दामनयः। औलपिः। औ
लपीयः। त्रिगर्त्तः। कौण्डोपरथीयः। दाण्डकीयः। पार्श्वादियौधेयादिभ्यामणञौ ।५।३।११७॥ आयुधजीविसङ्घवाचिभ्य एभ्यः क्रमादणञौ स्तः
स्वार्थे। पार्शवः। पार्शवौ। पार्शवाः। यौधेयः। यौधेयौ। यौधेयाः॥ ॥

११ जायन्य इति। गोत्रेकुंजादिभ्य इति च्फञ्। दामन्यादित्रिगर्त्तषष्ठाच्छः। स
माहार हूहात्पंचमी। त्रिगर्त्तषष्ठेभ्य इति। येषामायुधजीविनां षडंतर्वर्गाः षष्ठवर्गस्तु त्रिगर्त्तस्तेभ्य इत्यर्थः। त्रिगर्त्तवर्गषष्ठकाः के इत्याकांक्षायामाह॥ ॥ आहुस्त्रिग
र्त्तषष्ठाश्चेति। अत्र जानकयस्त्रिगर्त्तवर्गः तेषु च त्रिगर्त्तः षष्ठेषु प्रथमपंचमौ कौण्डोपरथब्रह्मगुप्तशब्दौ शिवाद्यणंतौ शेषास्त्विञंताः। केचित्तु अतद्धितांतमेव पंचमं
ब्रह्मगुप्तशब्दं पठंति। कौण्डोपरथीय इति। बहुवचने तु कौण्डोपरथाः दाण्डकय इत्यादि। पार्शव इति। पर्शुरिति जनपदशब्दास्ततोऽपत्ये द्व्यच्मगधेत्यण्बहुत्वे तद्राजत्वाल्लु
क्। पुनः संघविवक्षायामनेनाण्। अस्याप्यणो बहुत्वे तद्राजत्वाल्लुक्। तदाह। पर्शव इति। ननु पर्शुरिति योजनपदशब्दस्तस्मादेवानेन यत्स्वार्थेऽण् विधीयतां नाम पत्यवा
चि पर्शुशब्दात्संघविवक्षायामप्येव गोत्रस्वार्थिकत्वं न सिध्येदिति चेदत्राहुः। केवलः पर्शुशब्द एव जनपदवाचीनत्वणंत इति जनपदवाचिनं स्वार्थेऽण्न विधीयते
किंतु द्व्यच्मगधेत्यणंतात्तज्जनस्य बहुत्वे इत्यादिना लुकि वृद्धापत्यवाचिपर्शुशब्दादेव स्वार्थे विधीयते स्वार्थश्चात्र संघ एव। न च पर्शुशब्दस्य संघवाचित्वं नेति शंक्यं ॥

284

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वद्भपत्यवाचित्वेसंघवाचित्वयोव्यादिनिनकाप्यनुपपत्तिरिति। यौधेयइति। युध्यतेसौयुधा। युधेरिगुपधलक्षणःकः। युधायाअपत्यंद्यचइतिढक्। तदंतात्संघविवक्षा
यामनेनाञ्तेनयौधेयइति आयुदात्तंभवति। किंचयौधेयस्यांकोलक्षणंवायौधेयःसंघांकलक्षणोत्यञ्तादथा। एवंयौधेयादिषुयेठगंताःशौकेयादयस्तेषुसर्वेष्वप्ययो
जनद्वयमूह्यं। यौधेयाइति। अञोलुक्। अंतोदात्तं। नचनप्राच्यभर्गेत्यादिनानिषेधःशंक्यःस्त्रियामेवतन्निषेधात्॥ ❀ ॥ आभिजित्यइति। आभिजितशब्दादणंता
यञ्। एवंविदभृत्प्रभृतिभ्योअणंतदंतेभ्योवैदभृतशालावतशैखावतादिभ्योयञ्॥ पादशतस्यसंख्यादेः। पादशतस्यकिम्। द्वौद्वौमाषौददाति। संख्यादेरिति किं। पा
दंपादंददातिवीप्सायामितिकिं। द्वौपादौददाति। अनैमित्तिकत्वार्थमिति। निमित्तेभवोनैमित्तिकः। अध्यात्मादित्वाट्ठञ्। तद्धितार्थइतिसमासइति। यद्यपिप्रकृत्युपाधिर्वी

अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणोयञ्। पा० ३। ११८॥ अभिजिदादिभ्यःअणंतेभ्यःस्वार्थेयञ्स्यात्। अभिजि
तोऽपत्यं। आभिजित्यः। वैदभृत्यः। शालावत्यः। शैखावत्यः। शामीवत्यः। और्णावत्यः। श्रौमत्यः। ञ्यादयस्तद्राजाः। पा० ३। ११९॥ पूगान्ञ्यइत्या
रभ्यउक्ताएतत्संज्ञाःस्युः। तेनास्त्रियांबहुषुलुक्। लोहितध्वजाः। कपोतपाकाः। कौञ्जायनाः। ब्राध्नायनाइत्यादि। पादशतस्यसंख्यादेर्वीप्सा
यांवुन्लोपश्च। पा० ४। १॥ लोपवचनमनैमित्तिकत्वार्थम्। अतोनस्यानिवत्। पादःपत्। तद्धितार्थइतिसमासेकृतेप्रत्ययः। वुन्नंतंस्त्रिया
मेव। द्वौद्वौपादौददाति। द्विपदिकाम्। द्विशतिकाम्। पादशतग्रहणमनर्थकमन्यत्रापिदर्शनात्। द्विमोदकिकाम्। दण्डव्यवसर्गयोश्च
॥पा० ४। २॥ वुन्स्यात्। अवीप्सार्थमिदं। द्वौपादौदण्डितः। द्विपदिकांव्यवसृजतिददातीत्यर्थः॥ ॥ ९९ श्यात्तथापिवुनोद्योत्यतितद्धितार्थोभ

वत्येवेतिभावः। ददातीति। समर्पणमात्रमिहददातेरर्थः। नतुपरस्वत्वापादनपर्यंतं। तथात्वेहि उत्तरसूत्रविषयत्वंस्यात्। केचित्तुव्यवसृजतेर्दानेःप्रयोगसत्त्वेवउत्तरसू
त्रस्यप्रवृत्तिमाहुः। अन्यत्रापिदर्शनादिति। द्वौद्वौमाषौददातीत्यादौत्वनभिधानान्नातिप्रसंगइतिभावः। दंडव्यवसर्ग। दंडनंदंडः। दंडेश्चुरादिण्यंताद्भावेघञ्। अत्राप्यु
दाहरणेतद्धितार्थइतिसमासः। स्त्रीलिंगंचतद्धितार्थः। यद्वाप्रकृत्यर्थएवतद्धितार्थःस्वार्थिकत्वाद्वुनः। द्वौपादौदंडितइति। देवदत्तेनयज्ञदत्तइतिशेषः। दंडेःप्रधानेकर्म
णिक्तः। इतियज्ञदत्तस्यत्रप्रथमा। द्वौपादावित्यत्रद्विपदिकामित्यत्रचद्वितीयाभवति। दंडिग्रहणार्थइति। द्विकर्मकेषूक्तम्। तथाचद्विपदिकाकर्मकग्रहणविषयीभूतोयज्ञदत्त

इत्यादिष्वेतिनञ्॥

CC-0. In Public Domain. Digitization by eGangotri



स्थूलादिभ्यः। प्रकारो भेदः सादृश्यं च उभयत्रापि यथासंभवं कन्। जातीयरोपवाद इति। तेनायमपि तद्देव प्रकारवति न तु प्रकारमात्र इत्युक्तं भवति। चंचद्बृहतोरिति। एता वपि स्थूलादिष्वेव पठितव्याविति भावः। चंचत्क इति चंचति श्चलनकर्मा। चंचन्नेव कश्चिच्चंचत्कः॥ एवं बृहद्विशेषो बृहत्कः। यद्वा अचंचन्नबृहन्नपि प्रभा विशेषाच्चंचन्निव बृहन्निव मणिविशेषो लक्ष्यते स चंचत्कः। बृहत्कः। सुरक इति। केण इति ह्रस्वः। चित्रकमिति। ईषच्छिन्नमित्यर्थः। क्त प्रकृति वाच्ययाक्रिययाकृप्रत्यय वाच्यस्यैषा घनस्यव्याप्तिरत्वं तगतिः सेहनास्ति। नसामिवचने। सामि अर्द्धः उच्यतेयेन तत्सामि वचनमिति व्युत्पत्त्या वचनग्रहणं पर्यायार्थमित्याह। सामिपर्याय इति। सामिकृत मिति सामीति समासः। अर्द्धकृतमिति। विशेषणसमासो बहुव्रीहिर्वा प्रकृत्ये वेति। सामिवचनेनैवेत्यर्थः। ज्ञापयतीति। अयंभावः। नसामिवचन इत्यनेनानत्यंतगताविति

स्थूलादिभ्यः प्रकारवचने कन्। ५।४।३॥ जातीयरोपवादः। स्थूलकः। अणुकः। चंचद्बृहतोरुपसंख्यानम्। चंचत्कः। बृहत्कः। सुराया अहौ॥ सुरावर्णोऽहिः सुरकः। अनत्यन्तगतौ क्तात्। ५।४।४॥ छिन्नकम्। भिन्नकं। नसामिवचने। ५।४।५॥ सामिपर्याय उपपदे क्तान्तात्कन्न। सामिकृतम्। अर्द्धकृतम्। अनत्यन्तगतेरिह प्रकृत्यैवाभिधानात्पूर्वेण कन्नप्राप्तः। इदमेव निषेधसूत्रमत्यन्तस्वार्थिकमपि कं न ज्ञापयति। बहुतरकम्। बृहत्या आच्छादने। ५।४।६॥ कन्स्यात्। द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा। आच्छादनेकिम्। बृहती छन्दः। अ षडक्षाशितंग्वलङ्कर्मालम्पुरुषाध्युत्तरपदात्खः। ५।४।७॥ स्वार्थे। अषडक्षीणो मन्त्रः। द्वाभ्यामेव कृत इत्यर्थः। अशितागावोऽस्मिन्निति आ शितङ्गवीनमरण्यम्। निपातनात्पूर्वस्य मुम्। अलंकर्मीणः। अलङ्कर्मीणः। अलम्पुरुषीणः।

तिकन्नेन निषेधः सामिकृतादिभ्यस्तस्य प्राप्त्यभावात् तेभ्यो असमासे सामिपदे नैव अनत्यंतगतेर्द्योतनात् समासे भ्य उक्तांतत्वाभावाच्च। न च कृकहणपरिभाषया समासस्य॥ ॥ क्तांतत्वमस्तीति वाच्यं सामिशब्दस्य गतिकारकत्वाभावात्। तस्मात् स्वार्थिक एव कन् निषिध्यत इति इदमेव निषेधवचनं क्वचित्स्वार्थिकं कनं ज्ञापयतीति। अषडक्षीण इति। अविद्यमानानि षडक्षीणि यस्मिन्निति बहुव्रीहिः। अक्षिशब्दोत्र श्रोत्रेन्द्रिये वर्त्तते। बहुव्रीहौ सक्थ्यक्ष्णोरिति षच्। तदंतात् स्वनेन खः। मंत्रो मंत्रणं। आशितंगवीनमिति। आङ्पूर्वादश्नातेराशितः कर्त्तेति ण्यपकाद्यक्त्तेरिक्तः। एयंतात्कर्मणि वा उभयथापि प्रभूतघव समितिफलितोर्थः। अलंकर्मीण इति अलं कर्म अलं पुरुषेति पर्याद

285

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईश्वराधीन इति। अधिशब्दः शौण्डादिरित्युक्तं। तमबादय इति। अतिशायने तमबिष्ठनावित्यादयः। प्राक्कन इति अवक्षेपणे कन्निति विहितात्। न्यादय इति। पूगाञ्ञ्योऽग्रामणी
पूर्वादित्यादयः। प्राग्वुन इति। पादशतस्य संख्यादेरिति विहितात्। अमादय इति। किमेत्तिङव्ययघादाम्वित्यादयः। प्राङ्मयट इति। तत्प्रकृतवचने मयडित्यतः प्रागि
त्यर्थः। बृहतीजात्यन्ता इति। ——— बृहतीशब्देन बृहत्या आच्छादने इति विहितः कन् उपलक्ष्यते। जात्यन्तशब्देन जात्यन्ताच्छ बन्धुनीति छः। बहुवचननिर्देशात्प्रागुक्तायोग
त्यन्ते। यो हि वैयाकरणपाशादिशब्दैरर्थः प्रतीयते नासौ प्रकृतिमात्रेण प्रतीयत इति ते पि तमबादिवन्नित्या एवेति स्थितमाकरे। कन्नछौ मुक्त्वा मूले बृहतीमात्रप्रयोगो जात्यन्तमा
त्रप्रयोगश्च कृतस्तत्तु अवाचको व्याघ्रग्रंथानुवादत्वान्न दोषाय। विभाषांचेः॥ दिक्कासौ स्त्री चेति दिक्स्त्री तत्र प्रतिषेधो न तु दिशि स्त्रियां च। स्त्रीलिंगैकवचननिर्देशात्

ईश्वराधीनः। नित्यो यद्गुः उत्तरसूत्रे विभाषाग्रहणात्। अन्येपि केचित्स्वार्थिकाः प्रत्यया नित्यमिष्यन्ते। तमबादयः प्राक्कनः। न्यादयः प्राग्वुनः। आ-
मादयः प्राङ्मयटः। बृहतीजात्यन्ताः समासान्ताश्चेति। विभाषाञ्चेरदिक्स्त्रियाम्। ५।४।८॥ अदिक्स्त्रीवृत्तेरञ्चत्यन्तात्प्रातिपदिकात्ख स्याद्वा स्वार्थे।
प्राक्। प्राचीनं। प्रत्यक्। प्रतीचीनम्। अवाक्। अवाचीनम्। निकृष्टप्रतिकृष्टार्वरेफयाप्यपापसमाधमाः। अर्वणस्त्रसावनञ इति। अर्वाक्। अर्वाचीनम्। अ-
दिक्स्त्रियां किम्। प्राची दिक्। उदीची दिक्। दिग्ग्रहणं किम्। प्राचीना ब्राह्मणी। स्त्रीग्रहणं किम्। प्राचीनं ग्रामादाम्राः। जात्यन्ताच्छ बन्धुनि। ५।४।९॥
ब्राह्मणजातीयः। बन्धुनि किम्। ब्राह्मणजातिः शोभना॥ जातेर्व्यञ्जकं द्रव्यं बन्धुः। स्थानान्ताद्विभाषा सस्थानेनेति चेत्। ५।४।१०॥ सस्थानेन तुल्ये-
नेचेत्स्थानान्तमर्थवदित्यर्थः। पितृस्थानीयः। पितृस्थानः। सस्थानेन किम्। गोस्थानम्। अनुगादिनष्ठक्। ५।४।१३॥ अनुगदतीत्यनुगादी स एव

प्राचीनमिति। अच इत्यकारलोपे कृते चाविति दीर्घः। एवमग्रे क्वचिदूह्यं। प्राचीना ब्राह्मणीति। प्रकर्षेणांचतीति प्राचीनेत्येवं क्रियानिमित्तको वा देशकालनिमित्तको वा अयं
शब्दः ब्राह्मण्यां वर्त्तते न तु दिशीति प्रतिषेधाभावः। प्राचीनमिति। प्राच्यां दिशीत्यर्थे दिक्शब्देभ्य इत्यस्तातिः अंचेर्लुगिति लुक्। लुक्तद्धितलुकीति ङीपो लुक्। तद्धितश्चासर्वविभक्ति
रित्यव्ययत्वात् स्त्रीत्वाभावः स्वेनुक्ते स्वभावान्नपुंसकत्वं। ब्राह्मणजातीय इति। द्व्येकयोरिति वद्भाव प्रधानो ब्राह्मणशब्दः तस्य जातिशब्देन सह बहुव्रीहिः ब्राह्मणत्वजात्याधारभू-
तः पिंड इत्यर्थः। ब्राह्मणजातिरिति। षष्ठीतत्पुरुषः भावप्रधानेन सह कर्मधारयो वा। जातेर्व्यंजकमिति। बध्यते जातिरस्मिन्निति बंधुः भृमृशीङ्त्सरिहोन्यादिना अधिकरणे उप्रत्ययः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· रूढोपि वंधुशब्दः आप्तपर्यायः पुल्लिंगोस्ति तथापि सनेह गृह्यते। वंधुनीति नपुंसकनिर्देशादिति भावः। सस्थाने नेत्यस्यैव व्याख्यानं तुल्येनेति पितृस्थानीय इति स्थानमत्र संवं
टी·त· घविशेषः। पदमिति पस्य प्रसिद्धिः। पितुरिव स्थानमस्य पितृस्थानः पितृतुल्य इत्यर्थः। गोस्थानमिति। तिष्ठंत्यस्मिन्निति स्थानं देशः। इतिकरणो विवक्षार्थस्तेन नतु रूपो वहु
सु·त· ब्रीहिर्वा यस्तुल्यस्थानशब्दस्तस्माच्छो न भवति अनुगादिनः। प्रकृतिस्वरूपप्रदर्शनपरं चैतत्। नत्वयं केवलः प्रयोगार्हः ठकोनित्यत्वादिति हरदत्तः। सुप्यजातावितिणिनिः॥ ः॥
८६ ॥ ःः॥ विसारिणो॥ पूर्ववदिहापिणिनिः। हरदत्तस्तु सुप्यजातावितिणिनिरुपसर्गभिन्न एव सुप्युपपदे भवतीत्याशयेन पूर्वसूत्रेस्मिंश्च अत एव निपातनात् णिनिरित्या
हात दयुक्तं। सर्वभूतोपजीविनां। अनुपायि वर्गः। नवचनीयाः प्रभवोनुजीविभिरित्यादिप्रयोगानुरोधेन उपसर्गेप्युपपदे णिनेरवश्यस्वीकर्त्तव्यतया निपातनाश्रयण

विसारिणो मत्स्ये। ५।४।१६॥ अण् स्यात्। वैसारिणः। मत्स्ये इति किम्। विसारी देवदत्तः॥ संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्। ५।४।१७॥ अभ्यावृ
त्तिर्जन्मक्रियाजन्मगणने वृत्तेः संख्याशब्दात् स्वार्थे कृत्वसुच् स्यात्। पञ्च कृत्वो भुङ्क्ते। संख्यायाः किम्। भूरिवारान् भुङ्क्ते॥ द्वित्रिचतुर्भ्यः सुच्। ५।४।१८
कृत्वसुचोपवादः॥ द्विर्भुङ्क्ते। त्रिः। रात्सस्य। चतुः। एकस्य सकृच्च। ५।४।१९॥ सकृदित्यादेशः स्यात् सुच्। सकृद्भुङ्क्ते। संयोगान्तस्येति सुचो लोपः। न तु हल
ङ्याविति। अभैत्सीदित्यत्र सिचइव सुचोपि तदयोगात्॥ विभाषा बहोर्धाऽविप्रकृष्टकाले। ५।४।२०॥ अविप्रकृष्टः आसन्नः। बहुधा। बहुकृत्वो वा दिवस
स्य भुङ्क्ते। आसन्नकाले किम्। बहुकृत्वो मासस्य भुङ्क्ते॥ तत्प्रकृतवचने मयट्। ५।४।२१॥ प्राचुर्येण प्रस्तुतं प्रकृतं तस्य वचनं प्रतिपादनम्। भावेधिक
रणे वा ल्युट्। आद्ये। प्रकृतमन्नं अन्नमयं। अपूपमयम्। यवागूमयी। द्वितीये॥ ॥ ९ स्यव्यर्थत्वात्। अणितुण इत्यतो अनुवर्त्तनादाह। अण्स्यादितिवै

सारिण इति। इनण्यनपत्ये इति प्रकृतिभावः। संख्यायाः। अभ्यावृत्तिशब्देन यदि द्वितीयादिप्रवृत्तिर्गृह्यते तदा सकृत्त्वः प्रवृत्तौ पंचकृत्व इति स्यादतो त्र विवक्षितमर्थमाह। अभ्यावृ
त्तिर्जन्मेति। भूरिवारानिति। भूरिशब्दस्य लौकिकसंख्यावाचित्वेपि नेह ग्रहणं। वहुगणेति सूत्रे वहुग्रहणस्यानियमार्थत्वात्। अनियतसंख्यावाचिनां चेद्भवति वहोरेवेति निय 286
मशरीरमिति मनोरमा। वहुगणयोरेवेति नियमशरीरमित्यन्ये॥ वारशब्दस्य क्रियोत्पत्त्याधारकालवाचित्वात् कालाध्वनोरिति द्वितीयेति हरदत्तः। वारशब्दस्य कालवाचित्वे
भूरिशब्दोपि तत्समानाधिकरणत्वात् काल एव वर्त्तत इति कथमत्र प्रसंग इति चेदत्राहुः। कालवाचित्वेपि क्रियाभ्यावृत्तेरपि गम्यमानत्वात् प्रसंग इति। अवृत्तिगणने किं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पंचपाकाः द्व्यपाकाः। इत्यत्र क्रियामात्रगणनेमाभूत्। क्रियाग्रहणं किमर्थं। यावता अभ्यावृत्तिः क्रियाया एव भवति साध्यार्थविषयत्वात्तस्याः न द्रव्यगुणयोः तयोस्तु सिद्ध
स्वभावतया शब्दाभिधानात्। पुनःपुनर्वृद्धौ पुनःपुनः स्थूल इत्यत्रापि गम्यमानाया भवतिक्रियाया एवाभ्यावृत्तिर्न तु द्रव्यगुणयोरिति चेन्नैवं। उत्तरार्थं क्रियाग्रहणस्या
वश्यकत्वात्। एकस्य सकृच्च। अभ्यावृत्तिरिति न संबध्यते। एकशब्देन त्वेकैव क्रियाव्यक्तिराख्यायते तस्यामावृत्तेरसंभवात्। क्रियाग्रहणमिहार्थमावश्यकमन्यथा आ
दृशातः संख्याः संख्येये वर्तंत इत्येको भुंक्ते इत्यत्रापि स्यादिति। इह साधु पचतीत्यादिवदेकं भुंक्ते इति प्रयोगे प्राप्ते सकृच्छब्दप्रयोगार्थमिदं सूत्रमिति कैयटः। एकः पाक इत्यत्र
तु अनभिधानान्नेति काशिका संयोगांतस्येति। हल्ङ्यादिना सुलोप इति प्राचोग्रंथोऽयुक्त इत्याह। नत्विति। सुतिसीति साहचर्याद्विभक्त्य एव तत्र गृह्यंत इत्यभिप्रेत्याह।
सिच इवेति। द्विरह्नो भुंक्ते इति शेषत्वविवक्षायां षष्ठी। कृत्वोर्थप्रयोगे कालेधिकरणे इत्यनेन षष्ठीति हरदत्तोक्तिस्तु नादर्तव्या। शेषाधिकारबलेनाप्रसूत्र्यास्स
मासनिवृत्तिफलकतया तिङंतेनोदाहरणमिति प्रागुक्तनिष्कर्षविरोधादित्याहुः। तत्प्रकृत प्राचुर्येण प्रस्तुतमिति। यद्यपि प्रकृतशब्दः प्रस्तुतमात्रे रूढः तथापि वच
नग्रहणादयं विशेषो लभ्यते वचनग्रहणं हि यादृशस्य प्रकृतस्य लोके मयटा वचनं प्रत्यायनं तत्र यथा स्यादित्येवमर्थं। आद्ये इति। प्रथमांतात्प्रकृते द्योत्ये प्रत्ययः स्वार्थिका
त्वात्प्रकृतितो लिंगं। अपूपमयमित्यपि क्वचित्पठ्यते। प्रस्तुतोऽपूपोऽपूपमयं क्वचित्स्वार्थिकाः प्रकृतितो लिंगवचनान्यतिवर्तंते। अस्मिन्पक्षे तद्ग्रहणं व्यर्थं। द्वितीये त्वाव
श्यकं प्रथमांतादेव प्रत्ययलाभार्थं। द्वितीये इति। अस्मिन्पक्षे उच्यमानता प्रकृतता च प्रकृत्यर्थविशेषणं स्फुटोक्तमधिकरणं तु मयडर्थः। अतएव विशेष्यनिघ्नतां तदाह

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· अन्नमयो यज्ञ इति। अन्नं प्रकृतमुच्यते अस्मिन्नित्यर्थः। मौदकिकं शाष्कुलिकमिति। अचित्तहस्तिधेनोष्ठक्। आवसथ इति। उपसर्गे वसेरित्यथप्रत्ययः। निपातसमुदाय
टी·त· इति। उपदेशपारंपर्ये वर्ततेवचनाद्या प्रातिपदिकादेव प्रत्ययः ऐतिह्यमिति हाय्ययमिति कोशः। भेषजमिति। भिषज्यतेः कंड्वादियगंतात्क्विप भिषजामिदं भेषजं। अ
सु·त· स्मादेव निपातनादेकारः। पितृदेवत्यमिति। पितरश्च ताः देवताश्च पितृदेवताः पितृदेवताभ्य इदमिति विग्रहः। अर्घ्यमिति। मूल्ये पूजाविधावर्घोऽस्त्रियामरः। पूर्वोक्ता इति। नपूतनप
८७ ख प्रत्यया इत्यर्थः। आग्नीध्रमिति। अग्नीध्रः शरणे रण् भं चेति सौत्रिके युवुन्यादितं तच्चां गतो हानेन ततः स्वार्थेऽनेनाञ्। आद्युदात्तत्वफलं। फलांतरमप्याह स्त्रियामिति।

अन्नमयो यज्ञः। अपूपमयं पर्व। समूहवच्च बहुषु। ५।४।२२। सामूहिकाः प्रत्यया तिदिष्यन्ते चान्नमयट्। मोदकाः प्रकृताः मौदकिकम्। मोदकमयं। शाष्कु
लिकम्। शष्कुलीमयं। द्वितीयेऽर्थे मौदकिको यज्ञः। मोदकमयः। अनन्तावसथेतिहभेषजाञ्ञ्यः। ५।४।२३। अनन्त एवानन्त्यम्। आवसथ एवावसथ्यम्।
इतिह इति निपातसमुदायः। ऐतिह्यं। भेषजमेव भैषज्यम्। देवतान्तात्तादर्थ्ये यत्। ५।४।२४। तादर्थ्य एव तादर्थ्यम्। स्वार्थे ष्यञ्। अग्निदेवतायै इदमग्निदे
वत्यम्। पितृदेवत्यम्। पादार्घाभ्यां च। ५।४।२५। पादार्थमुदकं पाद्यम्। अर्घ्यम्। नवस्य नू आदेशः त्नप्तनप्खाश्च प्रत्यया वक्तव्याः। नूत्नम्। नूतन
म्। नवीनम्। नश्च पुराणे प्रात्। पुराणार्थे वर्तमानात् प्रशब्दान्नो वक्तव्यः। चात्पूर्वोक्ताः। प्रणम्। प्रत्नम्। प्रतनं। प्रीणं। भागरूपनामभ्यो धेयः। भागधे
यः। भागधेयम्। रूपधेयम्। नामधेयम्। आग्नीध्रसाधारणादञ्। आग्नीध्रम्। साधारणम्। स्त्रियां ङीष्। आग्नीध्री। साधारणी। अतिथेर्ञ्यः। ५।४।२६।
ता दृष्टव्ये इत्येव। अतिथये इदमातिथ्यम्। देवात्तल्। ५।४।२७। देव एव देवता। अवेः कः। ५।४।२८। अविरेवाविकः। यावादिभ्यः कन्। ५।४।२९। या
व एव यावकः। मणिकः। लोहितान्मणौ। ५।४।३०। लोहित एव मणिर्लोहितको मणिः॥ ॥ ९ आग्नीध्रीति शालेति विशेष्यं। समानं धारणमस्याः

साधारणी। अनेकं प्रत्यविशिष्टसंबंधा भूम्यादिः पृषोदरादित्वात्समानस्य साभावः। विभाषाप्रकरणे इत्त्रभावे टाप्। आग्नीध्रा शाला। साधारणा भूमिः। नन्वत्र भावपक्षे समानस्य
सभावेपि साधारणा इत्येव स्यान्न तु त्रादिवृद्धिरिति चेदत्राहुः। साधारणादञ्नित्यत एव निपातनात्समानस्य सभावविधानाद्वा इष्टसिद्धिरिति दिवेनेति नलंतं स्त्रियां ॥ 287

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वर्णे चानित्ये अनित्ये किं। लोहितं रुधिरं। लोहिता लाक्षा। अनित्यत्वमिह स्वसमानाधिकरणध्वंसप्रतियोगित्वं। अत एव रक्ते इत्युत्तरसूत्रं सार्थकं। लाक्षादिना रक्ते लौहित्यस्य यावदाश्रयमवस्थानेन नित्यतया पूर्वेण सिद्धेः। लोहितक इति। कोपेन लोहितो यः पुरुषस्तस्मिन्नेव क्षणे दृष्टः कोपशान्तौ लोहितो न दृश्यते इति भवत्यत्रानित्यो वर्णः। प्रातिपदिकान्तद्धिता इति पक्षस्य प्रतिपदविधानमात्रेणापवादत्वमिति पक्षस्य चाश्रयणे वर्णादनुदात्तादित्यतः प्रागेव कनि कृते लोहितिकेति रूपं न स्यादित्याशंकायामाह॥ लिंगबाधनं चेति। लोहितादिसूपलक्षणं एनिका एनिकेत्यादेरपि संग्राह्यत्वात्। एवं नान्तद्धिता इति पक्षस्यातिनिरवकाशत्वमपवादत्वमिति पक्षस्य च मुख्यत्वात्तदाश्रयणे तु वर्णादनुदात्तादित्यस्यानंतरमेव कनः प्रवृत्तेः कन् प्रत्ययस्य पुल्लिंगे सावकाशतया निरवकाशत्वाभावाच्च वार्तिकमिदं न कर्तव्यं। अत एव ङ्याप्प्रह

वर्णे चानित्ये ५।४।३१। लोहितकः कोपेन। लोहितिका लिङ्गबाधनं वा। लोहितिका लोहिनिका। रक्ते ५।४।३२। लाक्षादिना रक्ते यो लोहितशब्दस्तस्मात्कन् स्यात्। लिङ्गबाधनं वा। लोहितिका। लोहिनिका शाटी। कालाच्च ५।४।३३। वर्णे चानित्ये रक्ते इति द्वयमनुवर्तते। कालकं मुखं वैलक्ष्येण। कालकः पटः। कालिका शाटी। विनयादिभ्यष्ठक् ५।४।३४। विनय एव वैनयिकः। सामयिकः। उपायाद्ध्रस्वत्वं च। औपयिकः॥ वाचो व्याहृतार्थायाम् ५।४।३५। सन्दिष्टार्थायां वाचि विद्यमानाद्वाक्शब्दात्स्वार्थे ठक् स्यात्। सन्देशवाग्वाचिकं स्यात्। तद्युक्तात्कर्मणोऽण् ५।४।३६। कर्मैव कार्मणम्। वाचिकं॥ श्रुत्वा क्रियमाणं कर्मेत्यर्थः। ओषधेरजातौ ५।४।३७। स्वार्थेऽण्। औषधं पिबति। अजातौ किम्। ओषधयः क्षेत्रे रूढाः। प्रज्ञादिभ्यश्च ५।४।३८
प्रज्ञ एव प्राज्ञः। प्राज्ञी स्त्री। दैवतः। बान्धवः॥ ॥ ९९ णं व्यर्थमिति स्वं पीतिरूपं प्रबलमिति च मनोरमादावुक्तमिति दिक्। उपायेति। उपायशब्दष्ठकं

लभते ह्रस्वत्वं चेत्यर्थः। अकस्माट्ठो ह्यत्र पठ्यते स तु दान्तो न तु जान्तस्तेन कादेशो न अव्ययानां भमात्रे टिलोपः। आकस्मिकं। वाचो। व्याहृता व्याहृतार्थायां किं। मधुरा वाग्देवदत्तस्य। वाचिकमिति। अतिवर्तन्ते स्वार्थिकाः क्वचिल्लिंगमिति नपुंसकत्वं। प्रज्ञ एवेति। प्रजानातीति प्रज्ञः। इगुपधेति कः। ततः स्वार्थेऽण् प्राज्ञः। प्राज्ञीति। टिड्ढेति ङीप्। प्रज्ञानं प्रज्ञा। आतश्चोपसर्गे इत्यङ्। टाप्। प्रज्ञा विद्यते यस्याः सा तु प्राज्ञा भवति। प्रज्ञाश्रद्धार्चाभ्यो ण इति णः॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मृदस्तिकन्। प्रत्ययस्यादित्त्वेवसिद्धे इकारोच्चारणं प्रक्रियालाघवार्थं टायोलुक्यपि श्रवणार्थं च यं चभिर्मृत्तिकाभिः क्रीतः पंचमृत्तिकः पटः। सस्नौ। इह प्रशंसायां रूपवि
त्यस्यानंतरं कज्येष्ठाभ्यां तिलतातिलौ चच्छदसि। मृदः सस्नौ इति कंथ्वेति वक्तुमुचितं। न चैवं सस्नौ वितिकन् प्रत्ययोपि प्रशंसायामेवेत्युचगाप्रसंगात्ति कंथ्वेत्यत्र प्रशं
सायामिति निवृत्तमिति कल्पनायां मानाभावादिति वाच्यं। मृदः सस्नौ इति कन् इति वक्तव्ये तिकनः पृथक्करणस्यैव तत्र मानत्वात्। प्रशस्ता मृदिति। मृन्मृत्तिका प्रशस्तातु मृ
त्सा मृत्स्ना च मृत्तिकेत्यमरः। नित्योयमिति। मृदित्येतावदुक्ते प्रशस्तत्वानवगमाद्धि भाष्य नानुवर्तत इति सस्नाविन्ययं विधिः चित्य एव उत्तरसूत्रस्थान्यतरस्यां ग्रहणात्तु
सुतरामिति भावः। वह्वल्पार्थात्। वहूनीति। वहुभ्यो ददाति वहुशः। अल्पेभ्य अल्पशः इत्याद्यपि वोध्यं। वह्वल्पार्थात्किं। गां ददाति। अश्वं ददाति। अर्थग्रहणात्पर्याये
भ्यो विशेषेभ्यश्च। भूरिशो ददाति त्रिशः। कारकात्किं। वहूनां स्वामी अल्पानां स्वामी। मंगलवचनमिति। वहुशो ददात्याभ्युदयिकेषु कर्मसु। अल्पशो ददात्यनिष्टे

मृदस्तिकन्।५।४।३९॥ मृदेव मृत्तिका। सस्नौ प्रशंसायाम्।५।४।४०॥ रूपपोपवादः। प्रशस्ता मृत् मृत्सा मृत्स्ना। उत्तरसूत्रेऽन्यतरस्यांग्रहणान्नि
त्योयम्। वह्वल्पार्थाच्छस्कारकादन्यतरस्याम्।५।४।४२॥ वहूनि ददाति वहुशः। अल्पानि अल्पशः। वह्वल्पार्थान्मङ्गलाऽमङ्गलवचनम्॥ नेह।
वहूनि ददात्यनिष्टेषु। अल्पं ददात्याभ्युदयिकेषु। संख्यैकवचनाच्च वीप्सायाम्।५।४।४३॥ द्वौ द्वौ ददाति द्विशः। माषं माषं माषशः। प्रस्थशः। प

रिमाणशब्दा वृत्तावेकार्था एवासंख्यैकवचनात्किम्
षु। आभ्युदयिकेषु वहुदानं अनिष्टेष्वल्पदानं च मंगलं। तद्विपरीत्येन दानं तु मंगलं न भवतीत्याशयेनाह
नेहेति। अनिष्टेष्विति। भयादिनिमित्तेषु दानेषु। आभ्युदयिकेष्विति। अभ्युदयप्रयोजनेषु ग्न्याधेयादिषु। मूलपुस्तके तु मंगलामंगलवचनमिति प्रायेण पठ्यते
तत्रामंगलग्रहणं वृथेत्याहुः प्रायिकं चैतन्मंगलवचनमन्यत्रापि हि दृश्यते अयत्नापोठमुक्तपतिनापत्रस्तेरल्पशः इति। कारकत्वं तु समसनक्रियां प्रति पंचम्याः क
र्मत्वात्तदभिधायित्वाच्चाल्पशब्दस्य तथा च व्याचख्यते अल्पापंचमी समस्यत इति आचार्येणेति शेषः। परिमाणशब्दा इति। तथा चैकवचनग्रहणेन एकोर्थः। उच्यते
येनेत्यर्थके न वृत्तावेकार्थता नियता: परिमाणशब्दा एव गृह्यंत इति भावः। माषं माषमिति। माषदानेत्युक्ते माषमात्रस्य हिरण्यादेर्दानेति प्रतीयते न तु माषाणामि
ति प्रतीतिरिति भवत्ययं वृत्तावेकार्थता नियतः। एवं प्रस्थादिरपि। घटादयस्तु नैवं। घटदानेत्युक्ते तु घटानां दानेत्यर्थस्यापि प्रतीयमानत्वा दत एव च प्रत्युदाहरति 288

CC-0. In Public Domain. Digitization by eGangotri

घटंघटमिति। घटादयो हि जातिशब्दा नैकार्था भवंति जातियोगस्यैकानेकसाधारणत्वात् किं त्वभेदैकत्वसंख्यां उपाददते। एतच्च सर्वं जयादित्यमतानुसारेणोक्तं
वामनमते तु जातिशब्देभ्योपि भवत्येव तथा च जश्शसोरिति सूत्रे तेनोक्तं जसा सहचरितस्य शसो ग्रहणादिह न भवति। कुंडशो ददाति वनशः प्रविशन्तीति। तस्याय
माशयः। जातिशब्देपि यद्यर्थप्रकरणादिना वृत्तावेकार्थो भवति तदा भवत्येव तत्रापि शसिति। अथ कथमेकैकशः पितृसंयुक्तानीति। द्विवचनशसोः सहप्रयोगाद्

घटंघटं ददाति। वीप्सायां किं। माद्वौ ददाति। कारकादित्येव। द्वयोर्द्वयोः स्वामी। प्रतियोगे पञ्चम्यास्तसिः। ५।४।४४॥ प्रतिना कर्मप्रवचनीयेन यो
गे या पञ्चमी विहिता तदन्तात्तसिः स्यात्। प्रद्युम्नः कृष्णतः प्रति। आद्यादिभ्य उपसंख्यानं। आदौ। आदितः। मध्यतः। अन्ततः। पृष्ठतः। पार्श्वतः। आ
कृतिगणोयं। स्वरेण स्वरतः। वर्णतः। अपादाने चाहीयरुहोः। ५।४।४५॥ अपादाने या पञ्चमी तदन्तात्तसिः स्यात्। ग्रामादागच्छति ग्रामतः। अ
हीयरुहोः किं। स्वर्गाद्धीयते। पर्वतादवरोहति। अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः। ५।४।४६॥ अकर्तरि तृतीयान्ताद्वा तसिः स्यात्।
अतिक्रम्य ग्रहो तिग्रहः। चारित्रेणातिगृह्यते। चारित्रतोऽतिगृह्यते। चारित्रेणान्यान् तिक्रम्य वर्तत इत्यर्थः। अव्यथनमचलनम्।
वृत्तेन न व्यथते वृत्ततो न व्यथते। वृत्तेन वृत्ततो न चलतीत्यर्थः। क्षेपो वृत्तेन क्षिप्तः। वृत्ततः क्षिप्तः। वृत्तेन निन्दित इत्यर्थः। अकर्तरीति किं। देवदत्ते
न क्षिप्तः। हीयमानपापयोगाच्च। ५।४।४७॥ हीयमानपापयुक्तादकर्तरि तृतीयान्ताद्वा तसिः। वृत्तेन हीयते वृत्ततो हीयते। वृत्तेन पापः वृत्ततः पापः। क्षे
पस्याविवक्षायामिदं। क्षेपे तु पूर्वेण सिद्धं। अकर्तरि किं। देवदत्तेन हीयते॥ षष्ठ्या व्याश्रये। ५।४।४८॥ षष्ठ्यन्ताद्वा तसिः स्यान्नाना
पक्षसमाश्रये। देवा अर्जुनतोऽभवन्। आदित्याः कर्णतोऽभवन्। अर्जुनस्य पक्षे इत्यर्थः। व्याश्रये किं। वृक्षस्य शाखा। रोगाच्चापनय
ने। ५।४।४९॥ रोगवाचिनः षष्ठ्यन्ताद्वा तसिः स्याच्चिकित्सायां। प्रवाहिकातः कुरु। प्रतीकारमस्याः कुर्वित्यर्थः। अपनयने किं। प्रवाहिका
याः प्रकोपनं करोति॥

ति चेतः छंदो वदथयः कुर्वन्तीति हरदत्तः। अत एव सुप इति सूत्रे एकैकश इति प्राचो ग्रंथः प्रामादिक इत्यवोचामेति मनोरमायामिह स्थितं। वस्तुतस्तु एकैकमेव एकैकशः
स्वार्थे शस् न तु वीप्सायां एकां कपिलामेकैकशः सहस्रं कृत्वा दत्वेति भाष्यादिति तान्येकवचने त्यादि सूत्रे वक्ष्यामः। द्वौ ददातीति। कथं तर्हि अत्र नानाममंत्राणां जातिमा
त्रोपजीविनां॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·कौ· सहस्रशः समेतानां परिमितत्वं न विद्यत इति। न त्वत्र वीप्सास्तीति नाधिकारकत्वमिति चेत्। उच्यते। सहस्रं सहस्रं ये समेतास्तेषामपि परिमितत्वं नेत्यर्थः। तथा च समवाय
टी·त· क्रियां प्रति कर्तृत्वं वीप्सा चास्त्येवेति एतेन एकशः एकवचनादिसंज्ञन्निसुरित्याख्यातं। एकशब्दार्थस्यास्ति क्रियां प्रति कर्तृत्वात्। क्रुन्नतः प्रतीति। प्रतिः प्रतिनिधि
सु·त· प्रतिदानयोरिति कर्मप्रवचनीयसंज्ञायां प्रतिनिधिप्रतिदाने च यस्मादिति पंचमी। आद्यादिभ्य इति। तस्यादित उदात्तमर्द्धह्रस्वमित्यत्रदत्तवत्‌लि ग्रामाद्ग्रामतः इति। एवम
८८ ध्ययनात्पराजयते अध्ययनतः इत्याद्यपि बोध्यम्॥ अतिग्रहव्यथन इति। अव्यातिक्रमेण लोके गृह्यत इत्यर्थः। फलितमाह। अव्यानतिक्रम्य वर्तत इति प्रवाहिका
त इति। प्रच्छर्दिकातः कुर्वित्याद्युदाहरणं। प्रवाहिका विसूचिका प्रच्छर्दिका तु वमनव्याधिः॥ ॐ॥ कृभ्वस्तियोगे। योग इति किं। अशुक्लः शुक्लो जायते। स

कृभ्वस्तियोगे संपद्यकर्तरि च्विः। ५।४।५०॥ अभूततद्भाव इति वक्तव्यम्॥ विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्त्तमानाद्विकारशब्दात्स्वार्थे च्विर्वा स्यात्करोत्यादि
भिर्योगे। अस्य च्वौ। ७।४।३२। अवर्णस्य ईत्स्यात्च्वौ। वेर्लोपः। च्व्यन्तत्वादव्ययत्वं। अकृष्णः कृष्णः संपद्यते तं करोति कृष्णीकरोति। ब्रह्मीभवति।
गङ्गीस्यात्। अव्ययस्य च्वावीत्वं नेति वाच्यम्॥ दोषाभूतमहः। दिवाभूता रात्रिः। एतच्चाव्ययीभावश्चेति सूत्रे भाष्ये उक्तम्। क्यच्व्योश्च। ६।४।१५२।
हलः परस्यापत्ययकारस्य लोपः स्यात्। क्ये च्वौ च परतः। गार्गीभवति। च्वौ च। ७।४।२६॥ च्वौ परे पूर्वस्य दीर्घः स्यात्। शुचीभवति। पटूस्यात्। अव्य
यस्य दीर्घत्वं नेति केचित्। तन्निर्मूलम्। स्वस्ति स्यादिति तु महाविभाषया च्वेरभावात्सिद्धम्। स्वस्तीस्यादित्यपि पक्षे स्यादिति चेदस्तु यदि नेष्यते
तर्ह्यनभिधानात्। च्विरेव नोत्पद्यत इत्यस्तु। रीङृतः। मात्रीकरोति। अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च। ५।४।५१। एषां लोपः स्याच्चिश्च
अरूकरोति। उन्मनीस्यात्। उच्चक्षूकरोति॥ विचेतीकरोति॥ विरहीकरोति। विरजीकरोति॥ १ पद्यकर्तरीति। संपद्यश्चासौ कर्त्ता चेति

विग्रहः। पाघ्राध्माधेट्दृशः इति विहितः शप्रत्ययोऽस्मादेव निपातनात्संपद्योऽपि भवति। दिवादित्वात् श्यन्निति हरदत्तः। वक्तव्यमिति। वृत्तिकारास्तु अभूततद्भा
व इति सूत्रमध्ये प्रक्षिप्य च्व्यन्तत्वादिति तत्स्य निपातनत्वात्स्वरादिनिपातमव्ययमित्यनेनेत्यर्थः। गार्गीभवतीति। इह यत्र तात्सुपि ततः च्विप्रत्यये कृते आपत्यस्य च तद्धिते
नातीति यलोपो न भवति ईकारोऽव्यवधानादिति बोध्यं। अरुर्मनः च्विश्चेति। पूर्वेणैव सिद्धस्यापि च्वेरयमनुवादो लोपस्तु तत्सन्नियोगशिष्टत्वार्थः॥ ॥ ॥ ॥

२९९

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विभाषासाति। विभाष्यते विकल्प्यतेऽनेनेति विभाषा गुरोश्च हलः इत्यकारप्रत्ययस्ततः टाप्। नन्विदमव्ययं द्वयोर्विभाषयोर्मध्ये पठ्यसत्तु। विभाषये त्यादौ विभक्ते र्दर्शनात्॥
कृत्स्नमिति। सर्वावयवोपेतमित्यर्थः। अग्निसाद्भवति शस्त्रमिति। जातावेकवचनं सर्वाणि शस्त्राणी त्यर्थः। वंदे रमे वेति। देवान् वंदे देवत्रा वंदे देवेषु रमे देवत्रा रमे इ

विभाषा साति कार्त्स्न्ये।५।४।५२॥ च्विविषये सातिर्वा स्यात्साकल्ये। सात्पदाद्योः।८।३।१११॥ सस्य षत्वं न स्यात्। दधि सिञ्चति। कृत्स्नं शस्त्रमग्निः सम्पद्यतेऽग्निसाद्भवति। अग्नीभवति। महाविभाषया वाक्यमपि। कार्त्स्न्ये किम्। एकदेशेन शुक्लीभवति पटः। अभिविधौ सम्पदा च।५।४।५३॥ सम्पदा कृभ्वस्तिभिश्च योगे साति र्वा स्यादभिविधौ। पक्षे कृभ्वस्तियोगे च्विः। सम्पदा तु वाक्यमेव। अग्निसात्सम्पद्यते अग्निसाद्भवति शस्त्रं। अग्नीभवति। जलसात्सम्पद्यते जलीभवति लवणम्। एकस्या व्यक्तेः सर्वावयवावच्छेदेनाऽन्यथाभावः कार्त्स्न्यम्। बहूनां व्यक्तीनां किञ्चिदवयवाऽवच्छेदेनान्यथात्वमभिविधिः। तदधीनवचने।५।४।५४॥ सातिः स्यात्कृभ्वस्तिभिस्सम्पदा च योगे। राजसात्करोति। राजसात्सम्पद्यते। राजाधीनमित्यर्थः। देये त्रा च।५।४।५५॥ तदधीने देये त्रा स्यात्सातिश्च कृञादियोगे। विप्राधीनं देयं करोति विप्रत्रा करोति। विप्रत्रा सम्पद्यते। पक्षे विप्रसात्करोति। देये किम्। राजसाद्भवति राष्ट्रम्॥ देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्।५।४।५६॥ एभ्यो द्वितीयान्तेभ्यः सप्तम्यन्तेभ्यश्च त्रा स्यात्। देवत्रा वन्दे रमे वा। बहुलोक्तेरन्यत्रापि। बहुत्रा जीवतो मनः। अव्यक्तानुकरणाद्द्व्यजवरार्धादनितौ डाच्।५।४।५७॥ द्व्यजेव अवरं न्यूनं न तु ततो न्यूनमनेकाजिति यावत्। तादृशमर्धं यस्य तस्माड्डाच् स्यात्कृभ्वस्तिभिर्योगे। डाचि विवक्षिते द्वे बहुलम्॥ नित्यमाम्रेडिते डाचीति वक्तव्यम्॥ डाच्परं यदाम्रेडितं तस्मिन्परे पूर्वपरयोर्वर्णयोः पररूपं स्यात्। इति तकारपकारयोः पकारः। पटपटा करोति। अव्यक्तानुकरणात्किम्। दृषत्करोति। द्व्यजवरार्धात्किम्। श्रत्करोति। अवरेति किम्॥ ॥

९ त्यर्थोऽत्र पर्यवसन्नः। एवं मनुष्यान् गच्छति। मनुष्यत्रा गच्छति। मनुष्येषु वसति। मनुष्यत्रा वसति। पुरुषान् गच्छति। पुरुषत्रा गच्छति। पुरुषेषु वसति। पुरुषत्रा वसति। पुरुशब्दो बहु पर्यायः। पुरून् गच्छति पुरुषु वसति वा पुरुत्रा। मर्त्यान् मर्त्येषु वा मर्त्यत्रा। डाचि विवक्षित इति। परसप्तम्यां त्वन्योन्याश्रयः स्यात् डाचि कृते द्वित्वे सति द्व्यजवरार्द्धत्वं तस्मिंश्च सति डाजिति भावः॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

सि.कौ. टी.त. सु.त. ८०

खरटखरटा करोतीति। द्वित्वपररूपादि प्राग्वत्। द्व्यजवरार्धादित्युक्तेस्त्वत्र डाच् न स्यात्। न स्यात्तार्ईद्य च किंतु स्य च। अनेकाच इत्येवेति। द्व्यजवरार्द्धादित्यपनीयेत्यर्थः।
पटितीति। अव्यक्तानुकरणस्यात इतावितिपररूपम्। नन्वत्र करोतिना योगो दुर्लभ इति शब्देन व्यवधानात्तथा चानितावितिव्यर्थमिति ——— चेदत्राहुः इतिश

खरटखरटा करोति। पटपटा करोति। अनेकाच इत्येव सूत्रयितुमुचितम्। एवं हि डाचीति परसप्तम्येव द्वित्वे सुवचेत्यवधेयम्। अनितौ किम्
पटिति करोति। कृञो द्वितीयतृतीयशम्बबीजात्कृषौ।५।४।५८॥ द्वितीयादिभ्यो डाच् स्यात् कृञ एव योगे कर्षणेऽर्थे। बहुलोक्तेरव्यक्तानुकरणादन्य
स्य डाचि न द्वित्वम्। द्वितीयं तृतीयं वा कर्षणं करोति। द्वितीया करोति। तृतीया करोति। शम्बशब्दः प्रतिलोमे। अनुलोमं कृष्टं क्षेत्रं पुनः प्रतिलोमं क
र्षति। शम्बा करोति। बीजेन सह कर्षति। बीजा करोति। संख्यायाश्च गुणान्तायाः।५।४।५९॥ कृञो योगे कर्षे डाच् स्यात्। द्विगुणा करोति क्षेत्र
म्। क्षेत्रकर्म्मकं द्विगुणं कर्षणं करोतीत्यर्थः। समयाच्च यापनायाम्।५।४।६०॥ कृञा विनिनिवृत्तम्। कृञो योगे डाच् स्यात्। समया करोति
कालं यापयतीत्यर्थः। सपत्रनिष्पत्रादतिव्यथने।५।४।६१॥ सपत्रा करोति मृगं। सपुङ्खशरप्रवेशेन सपत्रं करोतीत्यर्थः। निष्पत्रा करोति। स
पुङ्खस्य शरस्याऽपरपार्श्वे निर्गमनान्निःपत्रं करोतीत्यर्थः। अतिव्यथने किम्। सपत्रं निष्पत्रं वा करोति भूतलम्॥ निष्कुलान्निष्कोषणे।५।
४।६२॥ निष्कुला करोति दाडिमम्। निर्गतं कुलमन्तरवयवानां समूहो यस्मादिति बहुव्रीहेर्डाच्। सुखप्रियादानुलोम्ये।५।४।६३॥ सुखा
करोति। प्रिया करोति गुरुम्। अनुकूलाचरणेनानन्दयतीत्यर्थः। दुःखात्प्रातिलोम्ये।५।४।६४॥ दुःखा करोति। स्वामिनम्पीडयतीत्यर्थः।
शूलात्पाके।५।४।६५॥ शूला करोति मांसम्। शूले न पचतीत्यर्थः। सत्यादशपथे।५।४।६६॥ सत्या करोति भाण्डं वणिक्। क्रेतव्यमिति तथ्यं 2.90
करोतीत्यर्थः। शपथे तु सत्यं करोति विप्रः। मद्रात्परिवापणे।५।४।६७॥ मद्रशब्दो मङ्गलार्थः। परिवापणं मुण्डनम्। मद्रा करोति कुमारं माङ्गल्यमुण्ड
नेन संस्करोतीत्यर्थः। भद्राच्चेति वक्तव्यम्। भद्रा करोति। अर्थः प्राग्वत्। परिवापणे किम्। मद्रङ्करोति भद्रङ्करोति॥ इति तद्धितप्रक्रिया समाप्ता॥

ब्देन करोत्यर्थगतप्रकार एव परामृश्यते इत्येवं प्रकारेण करोतीति। तथा च पटशब्दस्यार्थद्वारा योगोऽस्त्येवेति। बीजेन सहेति। ननु बीजेन सह भूतलस्य कर्षणे बी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जानामपि कर्षणप्रसंगाद्विवक्षितार्थो न सिध्यतीति चेदत्राहुः वृत्तिविषये बीजशब्दो बीजावापसहिते विलेखने वर्त्तते। तथा च बीजावापसहितं विलेखनं
करोतीत्यर्थ इति। समयाच्च। कालं यापयतीत्यर्थ इति। कर्त्तव्यस्यावसरप्राप्तिस्समयस्तस्यातिक्रमणं यापने वृत्तिग्रंथमुपादाय हरदत्त आह। अद्य मे
पारवश्यं श्वः परश्वो वा अस्य समय इत्येवं बहुषु दिवसेषु य आह स एवमुच्यत इति। सपत्त्रनिष्पत्त्रात्। लक्ष्ये शरः पतत्यनेनेति पत्त्रं। पुराणपुंखगतो वर्हः
सपत्त्रं निष्पत्त्रं वा करोतीति। पत्त्राणि पर्णानि तत्सहितं तद्रहितं वेति यथासंभवमर्थः। निष्कुलात्। निष्कोषणमंतरवयवानां वहिर्निष्कासनं निष्कोषणे किं
निष्कुलं करोति शत्रुं। शूलात्पाके। पाके किं। शूलं करोति कदन्नं। शूलमुदररोगः। सत्यादशपथे। सत्सु साधु सत्यं। तत्र साधुरिति प्राग्घितीयत्वाद्यत्प्राप्ते अनृत
वन्निपातनात्यः। अंतोदात्तोयं। सत्येनोत्तमिता भूमिः। ऋतं च सत्यं चेत्यत्र तथा दर्शनात्। सत्याकरोतीति भांडं रत्नादि द्रव्यजातं क्रेतव्यमिति। मयैवैतत्क्रे
तव्यमिति बुध्या परीक्षादिना सत्यंकारद्रव्यप्रदानेन च दृढं करोतीत्यर्थः। तथ्यमिति। तथैव तथ्यं। पादार्घाभ्यां चेति चकारस्यानुक्तसमुच्चयार्थत्वात्स्वार्थे यत्।
परिवापणमिति। कर्मव्यापारमात्रवाचिनो वप्रे हेतुमण्णिच्। ल्युडिति हरदत्तः। कर्मव्यापारः फलं तस्य कर्मनिष्ठत्वात्तथा च फलमात्रवाचिन इत्यर्थः फलि
तदित्याहुः। मांगल्यमुंडनेनेति। चोलदीक्षादौ। भद्राच्चेति। भद्रादित्यर्थग्रहणमिति व्याख्यानेतु मंगलादिभ्योपिस्यादिति बोध्यं॥ इति तद्धितप्रक्रिया ॥

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ सर्वस्य द्वे ॥ सर्वशब्दस्य द्वे भवत इति विधिसूत्रं न शंक्यः । किंतु नित्यवीप्सयोरित्येवमादीनां विधेयकार्येणोऽरनिर्देशेन साकांक्षत्वात् स्वरितत्वाच्चाधिकारो
टी·न यं तदाह । इत्यधिकृत्येति । एतदर्थ्यसूत्रमधिकृत्येत्यर्थः । स्वरूपग्रहणं तु न भवति नाम्रेडितस्यान्त्यस्य तु वेति लिंगात् । स्वरूपग्रहणे हि सति द्विरुक्तसर्व
सु·त शब्दस्यैव परमाम्रेडितं स्यात् तदुद्विरुक्तस्याव्यक्तानुकरणशब्दस्य परमिति नाम्रेडितस्येति पररूपनिषेधोऽन्त्यस्य तकारस्य विकल्पविधिश्च कथं संगच्छेत्
८९ न न नित्यवीप्सयोरित्यादौ परस्येति वक्ष्यमाणमपकृष्य परस्यैव द्वित्वं विधीयते इति किमनेन सर्वस्येति ग्रहणेनेति चेदत्राहुः । स्वादिष्विति पदसंज्ञामादाय द्वि
त्वाभ्यामित्यादौ प्रकृतिभागमात्रस्य द्विर्वचनं स्यात् कृते तु सर्वस्येति ग्रहणे सर्वशब्दोऽवयवकार्त्स्न्ये वर्तते इति सर्वावयवोपेतस्य द्वित्वं न तु कश्चिदवयवो वर्ज्यत इ
त्यर्थलाभादिष्टसिद्धिरिति । इह हेरलस्य संख्येयापेक्षायां शब्दरूपे गृह्यते तेन शब्दानुशासनप्रस्तावात् । सर्वस्येति स्थानषष्ठी सोयं स्थाने द्विर्वचनपक्षः । यदि तु उ
च्चारणे संख्येयेत दास्यान्यादेशाभावेन संभवति । निवृत्तिधर्मा हि स्थानी भवति सर्वे चेत् निवृत्तं कस्योच्चारणं स्यात् ततः सर्वस्येत्यध्याहृतोच्चारणशब्दापेक्षया क

॥सर्वस्य द्वे ।८।१।१॥ इत्यधिकृत्य ॥ ॥

र्तृकर्मणोः कृतीति कर्मणि षष्ठी सर्वं द्विरुच्चार्येदिति फलितोऽर्थः सोयं द्विः प्रयोगो द्विर्वचनमिति पक्षः । ननु आद्यपक्षे स्थानिवद्भावेन समुदायस्यैव पदत्वं स्या
न्न त्ववयवयोः तत्र तथा च पदकार्याणि न स्युः न चेष्टापत्तिः । अपचन् पचन्नित्यत्र ङमुट् प्राप्नोति नित्यत्र पदान्तस्येति णत्वनिषेधः अग्नेः ऽग्ने इत्यत्र एङः पदा
न्तादिति पूर्वरूपत्वं च न सिध्येत् । किं चापदान्तत्वप्रयुक्तकार्याणि स्युः यथा पयः पय इत्यत्र सोपदादाविति सत्वं स्यात् पपीः पपीरित्यत्र रोः ष इति षत्वं स्यात् णप
प्रकरणे का व्यवस्थितिरिति चेन्न । प्रथमवस्थाद्वयेकथं चित्सत्त्व पत्वपरिहारेऽप्यग्नी ऽग्नीत्यत्र अन्तो गुण इति पररूपं स्यादिति चेदत्राहुः । यद्यप्यत्र समितावयवभेदः समु
दाय एक एवादेशः स्यात् तद्द्वे इति वचनमनुपपन्नं स्यात् तो द्वे इति वचनाद्द्वेकस्य पदस्य स्थाने द्वे पदे समुदिते युगपदादेशत्वेन विधीयेते तत्र स्थानिवद्भावेन समु 291
दायस्य पदत्वं स्वतः एव चावयवयोः प्रीति न कश्चिद्दोष इति । स्यादेतत् । द्विः प्रयोगपक्षे प्रत्येकं पदसंज्ञायां सिद्धायामपि समुदायस्य सा न सिध्यति । ततश्च देव
दत्तः पचति पचतीत्यादौ तिङ्ङः । तिङ इति सर्वस्य पदस्य निघातो न सिध्यतीति चेदत्राहुः । पचति पचतीत्यादौ हि स एव धातुः प्रत्ययश्चात्र द्विः पठ्यते ततश्च य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यस्मात्प्रत्ययो विहितस्तदादिनर्दं तमिति विधीयमाना पदसंज्ञा समुदायस्यापि प्रवर्त्तते। तेनावग्रहादिः सिध्यतीति॥ ॐ ॥ नित्यवीप्सयोः॥ नित्यमिह पौनःपुन्य
मित्याह। आभीक्ष्ण्य इति। द्योत्य इति नपुंसकमनपुंसकेनेत्येकशेषः एकवद्भावश्च बोध्यः। परस्येति तेन नित्यतायां विधीयमानं द्विर्वचनं धातुमात्रस्य न भवति। किं च क्रियासमभि
हारे धातोर्विहितो यङ् तरंगः। परस्योच्यमानं द्विर्वचनं तु बहिरंगमिति यङ् न बाधते। अन्यथा हि पौनःपुन्यं भृशार्थश्च क्रियासमभिहार इति भृशार्थे सावकाशोऽयं यङ् पौनः
पुन्ये परेण द्विर्वचनेन बाध्येत। न च परस्य द्विर्वचनाभ्युपगमे सगतिकस्य प्रपचति प्रपचतीत्यादौ द्विर्वचनं न स्यादिति वाच्यं। वार्त्तिककारवचनात्तत्सिद्धेः। अत एव दंतीति सग
तिकस्यापि द्वित्वे एकपद्यं नास्त्येव स्थानिनः पदत्वाभावेन आदेशेऽपि तस्य दोर्लभ्यात्। द्विःप्रयोगपक्षे तु प्रथमगतिं विहायावशिष्टस्य समुदायस्य पदत्वं प्राप्तं तस्मिन्सत्य

नित्यवीप्सयोः। ८।१।४॥ आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्विर्वचनं स्यात्। आभीक्ष्ण्यं तिङन्तेष्वव्ययसंज्ञककृदन्तेषु च। पचति पचति।
भुक्त्वा भुक्त्वा। वीप्सायां। वृक्षं वृक्षं सिञ्चति। ग्रामो ग्रामो रमणीयः। परेर्वर्जने। ८।१।५॥ परि परि। वङ्गेभ्यो वृष्टो देवः। वङ्गान्परिहृत्येत्यर्थः। परे
र्वर्जने वा वचनम्। परि वङ्गेभ्यो वृष्टो देवः। उपर्यध्यधसः सामीप्ये। ८।१।७॥ उपर्युपरि ग्रामम्। ग्रामस्योपरिष्टात्समीपदेशे इत्यर्थः। अध्यधि सुखम्।
सुखस्योपरिष्टात्समीपकाले दुःखमित्यर्थः। अधोऽधो लोकं। लोकस्याधस्ता मीपदेश इत्यर्थः। वाक्यादेरामन्त्रितस्याऽसूयासम्मतिकोपकुत्सन
भर्त्सनेषु। ८।१।८॥ असूयायाम्। सुन्दर सुन्दर वृथा ते सौन्दर्यम्। सम्मतौ। देव देव वंद्योऽसि। कोपे। दुर्विनीत दुर्विनीत इदानीं ज्ञास्यसि। कुत्स
ने। धानुष्क धानुष्क वृथा ते धनुः। भर्त्सने। चोर चोर घातयिष्यामि त्वाम्॥ ॥

९ पिनष्टीति। वस्तुतस्त्विह स्थाने द्विर्वचनपक्ष एव मुख्यः
स्थानिनः सुबन्तत्वेनादेशस्यापि सुबन्तत्वात्सुबन्तान्नद्धित इति पक्षे समुदायात् व्यञ्ठञोः संभवेन पौनःपुन्यं पौनःपुनिक इति रूपसिद्धेः। प्रातिपदिकान्नद्धित इ
ति पक्षाभ्युपगमेऽपि श्रूयमाणप्रत्ययान्तस्यैव प्रातिपदिकत्वनिषेधान्नुनरित्यस्यैव प्रातिपदिकत्वेनादेशस्यापि प्रातिपदिकत्वात्पौनःपुन्यमित्यादि सिध्यत्येवा द्विःप्र
योगपक्षे त्वं तरंगत्वाद्व्ययात्सुपो लुकि द्वित्वं प्रवर्त्तत इति समुदायस्य सुबन्तत्वाभावात् प्रातिपदिकत्वाभावाच्च व्यञ्ठञो न भवतः। न चार्थवदधातुरित्यादिना
समुदायस्य प्रातिपदिकत्वे सोरुत्पन्नो तस्य लुकि च सुबन्तत्वं प्रातिपदिकत्वं च संभवत्येवेति वाच्यं। पचसंघाते पूर्वो भागः परं तस्य चेद्भवति समासस्यैवेति नियमेन प्रातिपदिका

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· त्वस्यासंभवेन सुबंतत्वस्याप्यसंभवात्। नचद्विःप्रयोगपक्षे स एव धातुः प्रत्ययश्च द्विःपठ्यत इति समुदायस्यापि पदसंज्ञा भवत्त्विति इत्यधुनैवोक्तत्वात्पुनःपुनरिति स
टी·त· मुदायस्य सुबंतत्वमस्त्येवेति शंक्यं। अंतरंगत्वात्सोर्लुकि प्रकृतिभागस्य द्विर्वचने सति यस्मात्प्रत्ययो विहितस्तदादितदंतमिति विधीयमानायाः पदसंज्ञायाः समुदा
सु·त· यस्य दुर्लभत्वात्। न तत्रैकपदाभावे पुनःपुनर्जायमाना पुराणीत्यादाववग्रहोपि न सिध्येदिति। आभीक्ष्ण्यमिति। तद्धि क्रियानिष्ठधर्मः। तेन द्योतनार्थं द्वित्वं क्रि
८२ याप्रधानानामेव न्याय्यं। क्रियाप्राधान्यं चाख्यातेसिद्धाद्विशेषे च। अव्ययकृतोभावे इति वक्ष्यमाणत्वादिति भावः। केचित्तु क्रियाप्रधानानामेव द्वित्वे परिगृहीत
साधनाया एव क्रियायाः व्यवहारोपयोगित्वात्तदनभिधानाच्च धातुमात्रस्य द्वित्वं न भवति किंतु तादृशक्रियाभिधायिनः पदस्यैव स्यादिति पदस्यान्यस्यापकर्ष
णाभावेपि न क्षतिरित्याहुः। तच्चिन्त्यं। उक्तरीत्या नानाकारकविशिष्टक्रियासमर्थस्य वाक्यस्यैव द्वित्वापत्तेः। किंच भावार्थकलकारांतानामव्ययकृतां च भवदुक्तरी
त्या द्वित्वं न स्यात्। ननु तत्रातित्यनावगम्यनंतरं पदांतरैः साधनाकांक्षापरिपूर्यत इति भूयते पत्क्वेत्यादिपदानां द्वित्वं स्यादेवेति चेत्तर्हि तत्रैव धातुमात्रस्य द्वित्वं केन वार्य
तां। किंच। तद्वदेव कर्त्तृकर्मलकारस्थलेपि धातुमात्रद्वित्वं दुर्वारमिति पदस्यान्यपकर्षणमावश्यकमेवेति दिक्। वीप्सायामिति। व्याप्तुमिच्छा वीप्सा व्याप्तिप्रतिपिपादयिषे
तियावत्। सा च प्रयोक्तुर्धर्मः। आबाधवत्। गतगत इत्युक्ते प्रियस्य चिरगमनादिना पीडितो वाक्यं प्रयुक्त इति यथा प्रतीयते न तथा वृक्षं वृक्षं सिंचतीत्यादावपि व्याप्तिबुबो
धयिषोरिदं वाक्यमित्यवगमात्। शाब्दबोधविषयस्तु व्याप्तिरेव। तथा च नित्यव्याप्त्योरित्येव सूत्रयितुं शक्यं। व्याप्तिरिह कार्त्स्न्येन तच्चाधिकारिकं। सर्वे ब्राह्मणा आमंत्रि
ता इत्यादौ यथा न हि जगतीतले विद्यमाना ब्राह्मणाः सर्वेपि केनचिदामंत्रयितुं शक्यंत इति स्वग्रामस्थाः स्वजातीया ब्राह्मणपरतया तत्र संकोचो यथाभ्युपेयते तेन तथात्रापि
सकलवृक्षसेचने सामर्थ्यं कस्यापि मनुष्यस्य नास्तीति यत्र वाटिकादौ वृक्षसेचनार्थमधिकारस्तद्वाटिकास्थवृक्षाणामेव कार्त्स्न्येन वृक्षं वृक्षं सिंचतीत्यादौ गम्यते इत्य
भ्युपेयं। यत्र तु संकोचे कारणं नास्ति तत्रासंकोच इष्ट एव जातो जातो निधनमुपैतीति यथा। न चैवं वृक्षमित्यादौ बहुवचनप्रसंगः। बहूनां भानेपि बहुत्वसंख्यायास्तत्रा 292
भानात्। प्रत्येकनिष्ठमेकत्वमेव हि तत्र भासत इत्यादि मनोरमायां स्थितं। वृक्षं वृक्षमिति समुदायस्य तु प्रातिपदिकत्वाभावाद्बहुवचनस्य प्रसंग एव नास्ति। वचा
र्थवद्धातुरित्यनेन प्रातिपदिकत्वं शंक्यं। यत्र संघाते पूर्वो भागः पदं तस्य चेद्भवति समासस्यैवेति नियमात्। न चाष्टमिकं द्विर्वचनमादेशरूपमिति संघातो न भव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तौत्यपि शंकं द्वे इति वचनादेकस्य पदस्य स्थाने द्वे पदे समुदिते युगपदादेशत्वेन विधीयेते इति प्रागुक्तत्वान्नन्वेवमपि सरित्सरित् योषायोषेत्यादौ बहुवचनो
त्पत्तिर्दुर्वारैव। सरित्सरित् इत्यादिस्थानिनः प्रातिपदिकत्वसंभवेन तदादेशस्यापि सरित्सरित् इत्यादेः स्थानिवद्भावेन प्रातिपदिकत्वसंभवादिति चे दत्राहुः। अंतरंगे कसंख्यावरुद्धो
हि रुक्तार्थः संख्यांतरे निराकांक्ष एव न हि वस्तुगत्या बहुत्वमस्तीत्येतावतैव तस्य शाब्दबोधं आपादयितुं शक्यते। असत्वार्थकेष्वपि तदापत्तेः। न हि शयने बाहुल्यमभिप्रा
येणैदे वद्रूत्वेन श्रूयते इति भावेकश्चित्समयुंक्तो। तत्रायोग्यं तदिति चेत्सम्यं प्रकृतेपि। अत्र च लिंगमेकैकस्य प्राचामिति निर्देश इति। परेर्वर्जने। अत्र वार्तिक
परेर्वर्जनेऽसमासे नेह परित्रिगर्तं वृष्टो देवः चेति च वक्तव्यं। तथा चापहरेः परिहरेः संसार इति कारके पूर्वात्ततं। परिवंगेभ्य इति। अपपरी वर्जने इति कर्मप्रवचनीयसंज्ञायां
पंचम्यपाङ्परिभिरिति पंचमी। उपर्यध्य। सामीप्यं प्रत्यासत्तिः तच्च कालकृतं देशकृतं वा। अध्यधि सुखमिति। कालकृतस्योदाहरणमिदं। सामीप्य इति किं। उपरि चंद्र
माः। उपरि शिरसो घटं धारयतीत्यत्र तु वस्तुतो विद्यमानमपि सामीप्यं न विवक्षितं किं त्वौत्तराधर्यमेव केवलं विवक्षितमिति द्विर्वचनं न भवति। विवक्षा हि शब्दव्युत्पत्तेः प्रधा
नं कारणं। अत्र चोपर्युपरि क्रमं तदाधाचिख्यासायामिति सन्नंतप्रयोगो ज्ञापक इत्याहुः। वाक्यादेः सुंदर। सुंदराद्वि। स्वरितमाम्रेडिते सूयासंमतिकोपकुत्सनेषु आम्रेडि
तं भर्त्सने इति सूत्राभ्यां यथायथं प्राप्तः प्लुतः वैकल्पिकत्वान्नेह कृतः। उक्तं हि प्राक् सर्वः प्लुतो वैकल्पिक इति। नन्वत्र कोपासूयाभ्यां पृथक् कुत्सनभर्त्सनग्रहण
मपार्थकं तयोरसूयां विना कुत्स्यते न वा अकुपितो भर्त्स्यत इति चेदत्राहुः गुरवो हि हितैषित्वात्कुपिता अपि भर्त्सनं कुर्वंते विनाप्यसूयया कुत्सां कुर्वंतीति पृथगुपात्तानि
दृष्टः सूत्रकारेण कृतः। साम्रतैः पाणिभिर्घ्नंति गुरवो न विषोक्षितैः। लालनाश्रयिणो दोषास्ताडनाश्रयिणो गुणा इति ॥ ॥ ॥

सि·कौ· एकं बहुव्रीहिवत् इत्यनुवर्तते। नचानुवाद्यसमर्पकं नदाहा। द्विरुक्तइति। तेनेति। यद्यप्येतौ बहुव्रीहौ विशिष्य न विहितौ तथापि तत्र दृष्टा विभ्यतावतेनवातिदिश्येते इति भावः

टी·त· सुब्लोपपुंवद्भावाविति। पूर्वपदप्रकृतिस्वरश्च बोध्यः समुदायात्सुविति। तच्चैकवचनमेवेति अंतरंगैकसंख्यावरुद्धो द्विरुक्तार्थः संख्यांतरे निराकांक्ष इति प्रागेवोक्तत्वात्

सु·त· पूर्वभागे इति न तूत्तरभागेपि। तथाहि द्विधात्र पुंवद्भावः सर्वनाम्नो वृत्तिमात्र इति वा स्त्रियाः पुंवदिति वा। तत्राद्यः पूर्वभागस्यैव भस्त्रेति ज्ञापकादित्युक्तं। द्वितीयस्तु समानाधि

८३ करणे परे विधीयते। नचोत्तरभागस्य समानाधिकरणपरत्वमस्तीति भावः। अवग्रहे विशेष इति। एकैकयेत्येकएकयेति भवतीत्यर्थः। एकैकस्मै इति। ननु सुब्लोपपुंवद्भावा

विव बहुव्रीहौ सर्वनामसंज्ञाभावोपि दृष्टः इत्ययमपि बहुव्रीहिवद्भावेनातिदि श्यतां तथा च स्मायादेशोत्र दुर्लभ इति चेत् अत्राहुः। सुब्लोपपुंवद्भाववदेव सर्वनामसंज्ञाभावः प्र

एकम्बहुव्रीहिवत्। ८।१।९॥ द्विरुक्त एकशब्दो बहुव्रीहिवत्स्यात्। तेन सुब्लोपपुम्वद्भावौ। एकैकमक्षरम्। इह द्वयोरपि सुपोर्लुकि कृते बहुव्रीहि

वद्भावादेव प्रातिपदिका त्समुदायात्सुप्। एकैकया आहुत्या। इह पूर्वभागे पुम्वद्भावाद् अवग्रहे विशेषः। न बहुव्रीहावित्यत्र पुनर्बहुव्रीहिग्रहणं मुख्य

बहुव्रीहिलाभार्थम्। तेनातिदिष्टबहुव्रीहौ सर्वनामतास्त्येवेति प्राञ्चः। वस्तुतस्तु भाष्यमते प्रत्याख्यातमेवैतत् सूत्रम्। मतेपि बहुव्रीह्यर्थेऽलौकिके विग्रहे

निषेधकं न बहुव्रीहावितीहातिदेशशङ्कैव नास्ति। एकैकस्मै देहि। आबाधे च। ८।१।१०॥ पीडायां द्योत्यायां द्विरुक्तो बहुव्रीहिवच्च। गतगतः। विरहात्पी

ड्यमानस्येयमुक्तिः। बहुव्रीहिवद्भावात्सुब्लुक्। गतगता। इह पुम्वद्भावः॥ ॥ १९ स्लेलनदृष्टः किं तु बहुव्रीहेर्गौणत्वात्सर्ववाचकत्वं न संभवतीति

तद्भावादृष्ट इति नायमतिदिश्यते। न बहुव्रीहावितिशास्त्रं तु लौकिकवाक्ये निषेधकं न तु बहुव्रीहावित्युक्तत्वादिति। आबाधे चेति। इहेति बहुव्रीहिवद्भावादित्यनुष

ज्यते। तथा च स्त्रियाः पुंवदिति प्रवर्तते। न च द्विरुक्तस्य परमुत्तरपदं नेति वाच्यं। बहुव्रीहिवदित्यतिदेशबलेनैवोत्तरपदत्वस्यापि लाभात्। ननु बहुव्रीहिवद्भावेनोत्त

रपदत्वलाभे सति तेने त्यत्र नलोपः कस्मान्न भवति। उच्यते। नलोपो नञ इत्यत्र उत्तरपदे इति वर्तते। नञ इति च कार्यिणो निर्देशः तत्र साक्षाद्दृष्टं नकार्यित्वेन नञो निमि

त्तभावो बाध्यते। यथा मद्रह्रदो मद्रह्रद इति। अत्र रेफस्याचो रहाभ्यां इति द्वित्वप्रसंगे आकरे उक्तं नेमौ रहौ कार्यिणौ किंतु निमित्तमेतौ द्विर्वचनस्येति तच्चैवमपि धूर्धूः पं

293

CC-0. In Public Domain. Digitization by eGangotri

थाः पंथा इत्यादौ रुक्रु पूर् पधूरिति समासां। तः स्यादिति चेन्न समासाच्च न हि षप्यादित्यतः समासादित्यनुवर्त्तमाने समासांता इति पुनः समासग्रहणं हि समासा
धिकारविहितो यः समासस्तस्य परिग्रहार्थं॥ तेनातिदेशिके समासे समासांता नाम प्रवर्त्तन्ते इति दिक्॥ ❀ ॥ कर्म्मधारयवदुत्तरेषु॥ अधिकारोऽयं एवं सिद्धे वदुत्तरेष्वि
तिवचनं विस्पष्टार्थमिति वृत्तिः। प्रकारे गुणवचनस्य। यद्यपि प्रकारशब्दो भेदे सादृश्ये च वर्त्तते बहुभिः प्रकारैर्भुंक्ते बहुभिर्भेदैर्विशेषैरित्यवगमात्। ब्राह्मणप्रका
रोयं माणवकः। ब्राह्मणसदृश इत्यवगमाच्च। तथापीह विवक्षितमाह। सादृश्य इति। व्याख्यानमेवात्र शरणं पुंवद्भाव इति। पुंवत्कर्मधारयेति सूत्रात् तच्च कोपधा

कर्म्मधारयवदुत्तरेषु।८।१।११॥ इत उत्तरेषु द्विर्वचनेषु कर्म्मधारयवत्कार्य्यं। प्रयोजनं सुब्लोपपुंवद्भावान्तोदात्तत्वानि। प्रकारे गुणवचन
स्य।८।१।१२॥ सादृश्ये द्योत्ये गुणवचनस्य द्वे स्तस्तच्च कर्म्मधारयवत्कार्य्यं। कर्म्मधारयवदुत्तरेष्वित्यधिकारात्। तेन पूर्वभागस्य पुंवद्भावः। स
मासस्यान्तोदात्तत्वं च। पटुपट्वी। पटुपटुः। पटुसदृशः ईषत्पटुरिति यावत्। गुणोपसर्ज्जनद्रव्यवाचिनः केवलगुणवाचिनश्च ग्रहणं त्वनो। शु
क्लः शुक्लरूपं। शुक्लशुक्लः पटः। आनुपूर्व्ये द्वे वाच्ये॥ मूले मूले स्थूलः। संभ्रमेण प्रवर्त्तनीयथेष्टमनेकधा प्रयोगो न्यायसिद्धः॥ सर्प्पः सर्प्पः बुध्य
स्व २। सर्प्पः ३ बुध्यस्व॥ ३॥ क्रियासमभिहारे च। लुनीहि लुनीहीत्येवायं लुनाति। नित्यवीप्सयोरिति सिद्धे भृशार्थे द्वित्वार्थमिदम्। पौनः
९ पुन्येऽपि लोटो हस्मगुच्छित्येयोनकालेध्वन्या॥

दिष्वपि कालककालिके त्यादिषु प्रवर्त्तते। तेन बहुव्रीहिवद्भावे प्रहृते कर्मधारयवद्भावोक्तिर्व्यर्थेति शंका
पानिरवकाश इति बोध्यं। पटुपटुरिति। इह द्वित्वेन जातीयरो बाधा नेष्यते पटुजातीय इति वामनः। अन्यथा ब्राह्मणजातीय इत्यादाव गुणवचने गुणवचनेऽपि भेदरूपे
बाध्यकाशो जातीयर् गुणवचने तु सादृश्ये परत्वात् द्वित्वेन बाध्येतेति भावः। गुणवचनस्येति किं। अग्निर्माणवकः। सिंहो माणवकः। यद्यपीहाग्निसिंहशब्दाभ्यां गौण्या
न्या तैक्ष्ण्यक्रौर्यादिगुणो गम्यते तथापि प्रकारे वर्तमानस्यैव सिद्धे गुणवचनग्रहणं सामर्थ्यान्मुख्येन त्या गुणपरतामवेक्ष्य द्वित्वं न त्वन्येषामित्याकरः नवं नवं प्रीतिरहो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· करोतीत्यत्र वीप्सायां द्विर्वचनं अनेन तु द्विर्वचने पुल्लुक् स्यात्। नवनवा वनवायुभिरादद इत्यत्र त्वनेनैव द्विर्वचनं न तु वीप्सायामिति पुंवद्भावः। कथं भीतभीत इव शीतमयूख
टी·त· इति भारविः। इवशब्देन सादृश्यस्योक्ततया इह प्रकारे द्वित्वायोगात्। सत्यं भीतेभ्यो भीत इति कथं विद्याख्येयं तेनातिभीत इति फलितं। आधिक्ये द्वे वाच्ये इति वार्तिकेन
पु·त· भीतभीत इति द्वित्वमिति दुर्घटवृत्तिकृद्भिरुक्तं समाधानं नादर्तव्यं। तादृशस्य वार्तिकस्याप्रसिद्धत्वात्। अथ कथं खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र क्षीणः क्षीणः परिल
६४ घुपयः स्रोतसां चोपभुज्येति मेघदूतः। पदार्थभेदस्याभावेन वीप्सार्थस्यासंभवादिति चेदत्राहुः। एकस्यापि खेदावस्थासु क्षयावस्थासु च भेदं परिकल्प्य वीप्सा बोध्ये
ति। अथ कथं मंदं मंदं नुदति पवनश्चानुकूलो यथा त्वामिति मेघः। वीप्सार्थस्यासंभवादनेनैव द्विर्वचने कृते मंदमंदमुदितः प्रययौ खमितिवत्सुप्लुक् स्यात् इति चेत्स
त्यं। स्वतो मंदगामिनं त्वां पवनो मंदं नुदतीति कथं विद्याख्येयं। सिद्धस्य गतेश्चिंतनीयत्वात्। शुक्लं शुक्लमिति। केवलगुणवाचिन उदाहरणमिति ध्वनयति। रूपमिति।
आनुपूर्व्ये इति। वीप्साभावादयमारंभः। मूले मूले इति। अग्रे अग्रे सूक्ष्मा इत्यप्युदाहर्तव्यं। एकस्य वस्तुनो वेणुदंडादेरेकमेव मुख्यं मूलमग्रं च। इतरेषां भागानामापेक्षि
को अग्रमूलव्यपदेशः। स्थौल्यसौक्ष्म्ये अपि नैकरूपे किं तर्हि यथा मूलमुपचीयते स्थौल्यं यथा अग्रं सौक्ष्म्यं तथानेतरे भागा इति वीप्साया असंभवः। मूले मूले पार्थिवि
टपिनामित्यत्र तु वीप्सायां द्विर्वचनमेतच्चेह हरदत्तग्रंथे स्पष्टं। न्यायसिद्ध इति। यावद्भिः शब्दैः संबोध्योर्थमवगच्छति तावतां प्रयोक्तव्यत्वादिति भावः। पौनःपुन्य इति
पुनःपुनर्भवितरि वर्तमानात्पुनःपुनःशब्दाभावे प्रत्ययः। लोटा सह समुच्चिनोति। नन्वत्र लोटा सह समुच्चिनुयाद्यथा द्विर्वचनं भवति तथा क्रियासमभिव्याहारे यङि यङा सह 294
समुच्चित्य द्विर्वचनं स्यात्। पापच्यते पापच्यते वोभूयते वोभूयते इति। अत्राहुः। लोट् क्रियासमभिव्याहारं व्यभिचरति समुच्चयेपि जायमानत्वात्। ततश्च लोट्द्विर्वचनयोरे
व तद्द्योतकत्वं न त्वेकैकस्येति युक्तं लोडंतस्य द्विर्वचनं। यङ् तु क्रियासमभिहारं न व्यभिचरतीति द्विर्वचनं विनैव तस्य द्योत्तकत्वे तेन तदंतस्य न द्विर्वचनमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कर्मव्यतिहारद्वन्द्विति। क्रियाविनिमय इत्यर्थः॥ द्वेइति। नित्यमेवेदं द्वित्वं बाहुलकं तु समासवद्भावस्यैव। सुपः सुर्वक्तव्य इति। अत्र केचिदुक्तं द्वितीयादीनामेवेदंस्वा
देशविधानं अत एवोत्तरत्र लेपि द्वितीयाद्य एव न तु प्रथमा तत्राप्येकवचनमेव न तु वचनांतरमिति। तद्यालिनीयां भाष्यादावनुक्तत्वात्। तरेनह्वनयनन्व

कर्म्मव्यतिहारे सर्व्वनाम्नो द्वे वाच्ये। समासवच्च बहुलम्। बहुलग्रहणादन्यपरयोर्न्न समासवत्। इतरशब्दस्य तु नित्यम्। असमासवद्भावे पूर्व्वपदस्थस्य
सुपस्सुर्वक्तव्यः। अन्योऽन्यं विप्रा नमन्ति। अन्योन्यौ। अन्योन्यान्। अन्योन्येन कृतम्। अन्योऽन्यस्मै दत्तमित्यादि। अन्योन्येषां पुष्करैरामृशन्त इति माघः
एवम्परस्परम्। अत्र कस्कादित्वाद्विसर्गस्य सः। इतरेतरम्। इतरेतरेणेत्यादि। स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वा वक्तव्यः। अन्योन्यां।
अन्योन्यम्। परस्परां। परस्परं। इतरेतरां। इतरेतरम्वा। इमे ब्राह्मण्यौ कुले वा भोजयतः। अत्र केचित्। आमादेशो द्वितीयाया एव। भाष्यादौ तथैवो
दाहृतत्वात्। तेन स्त्रीनपुंसकयोरपि तृतीयादिषु पुम्वदेव रूपमित्याहुः। अन्ये तूदाहरणस्य दिङ्मात्रत्वात्सर्व्वविभक्तीनामादेशमाहुः। इलहू
येदावभावः क्लीबे चाहिरहः स्वमोः। समासे सोरलुक्चेति सिद्धम्बाहुलकात्त्रयम् १ तथाहि। अन्योन्यम्परस्परमित्यत्र इलहूयेपि दापप्राप्तः। न च
सर्व्वनाम्नो वृत्तिमात्रे इति पुम्वद्भावः। अन्यपरयोरसमासवद्भावात्। न च द्विर्वचनमेव वृत्तिः। यां याम्प्रियः प्रैक्षत कातराक्षी सा सेन्यादावतिप्रस
ङ्गात्। अन्योन्यमितरेतरमित्यत्र चाद्ड्डुतरादिभ्य इत्यद्ड्प्राप्तः। अन्योन्यसंसक्तमहस्त्रियामम्॥ अन्योन्याश्रयः॥ ॥ ॥

चनांतरमुदाहरति। अन्योन्यावन्योन्यानिति। माघ इति। स च भाष्यानुगुण एवेति भावः। एतेनार्वाचीनमतं कवयोपि नाद्रियंत इत्युक्तं भवति। भारविश्चाह। क्षितिनभस्सुर
लोकनिवासिभिः कृतनिकेतमदृष्टपरस्परैरिति। अत्रादृष्टः परस्परो यैरिति विग्रहः। यदि तु द्वितीयादीनामेवसादेशविधानं न तु प्रथमायाः तर्ह्ययं प्रयोगो न सिध्ये

सि·कौ· टी·त· सु·त· ८५

अन्योन्यमिति। नचात्र आम्भावेपि टाप्स्यादिति शंक्यं। बहुत्वग्रहणात्तु बभावइत्यनुपदमेव वक्ष्यमाणत्वात्। स्त्रीनपुंसकयोस्तु तीयादिषु पुंवदिति प्राचोग्रंथं परिष्कुर्वन्ना
ह। अत्र केचिदिति। वस्तुस्थितिमाह। अन्येत्विति। अतिप्रसंगादिति। तथा च एकशेषप्रतिबंधाद्द्विर्वचनस्यापि दुर्लभत्वमाश्रित्य तद्बलेन पुंवद्भावो न शंक्यः। लक्ष्य वि

परस्पराक्षिसादृश्यमदृष्टपरस्परैरित्यादौ सोर्लुक्चाप्राप्तः सर्वम्बाहुलकबलेन समाधेयम्। प्रकृतवार्त्तिकभाष्योदाहरणं। स्त्रियामिति सूत्रेऽ
न्योन्यसंश्रयं त्वेतदिति भाष्यञ्चात्र प्रमाणमिति। अकृच्छ्रे प्रियसुखयोरन्यतरस्याम्। ८।१।१३॥ प्रियप्रियेण ददाति। प्रियेण वा। सुखसुखे
न ददाति। सुखेन वा। द्विर्वचने कर्मधारयवद्भावात्सुप्लुकितेरववचनम्। अतिप्रियमपि वस्तु नायासेन ददातीत्यर्थः॥ यथास्वे यथाय
थम्। ८।१।१४॥ यथास्वमिति वीप्सायामव्ययीभावः। योयमात्मा यच्चात्मीयन्तद्यथास्वम्। तस्मिन्यथाशब्दस्य द्वित्वं क्लीवत्वञ्च निपात्यते। य
थायथं ज्ञाता यथास्वभावमित्यर्थः। यथात्मीयमिति वा। द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु। ८।१।१५॥ द्विश
ब्दस्य द्विर्वचनं पूर्वपदस्याम्भावोऽत्वञ्चोत्तरपदस्य नपुंसकत्वञ्च निपात्यते एष्वर्थेषु। तत्र रहस्यं द्वन्द्वशब्द वाच्यं॥ इतरे विषयभूताः। द्वन्द्वं
मन्त्रयते। रहस्यमित्यर्थः। मर्यादा स्थित्यनतिक्रमः। आचतुरं हीमे पशवो द्वन्द्वं मिथुनीयन्ति। माता पुत्रेण मिथुनं गच्छति। पौत्रेण प्रपौत्रेण
पीति मर्यादार्थः। व्युत्क्रमणं पृथगवस्थानम्। द्वन्द्वं व्युत्क्रान्ताः। द्विवर्गसम्बन्धेन पृथगवस्थिताः। द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति। द्वन्द्वं संकर्षणवासु
देवौ। अभिव्यक्तौ साहचर्येणेत्यर्थः। योगविभागादन्यत्रापि द्वन्द्वमिष्यते॥ इति द्विरुक्तप्रक्रिया॥ इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धान्तकौमु

रोधात्। कारकं चेद्विजानीयाद्यां यां मन्येत सा भवेदित्यकथितसूत्रस्थ यां यामिति भाष्यप्रयोगविरोधाच्चेति भावः। नव्यास्तु यां यां प्रियः प्रैक्षतेत्यादिमाघप्रयोगे सा सेति द्विर्व
चनमयुक्तं। द्विरुक्तार्थस्य सत्यनेनैव परामर्ष्टुं शक्यत्वादत एव भाष्ये यां यां मन्येत सा भवेदित्येवोक्तमित्याहुः॥ ॥ सोर्लुक्चाप्राप्त इति। सुपः स्थाने आदेशविधानस्यान्योन्यं

295

CC-0. In Public Domain. Digitization by eGangotri

परस्परमित्यत्र केवले चरितार्थत्वादिभावः। योयमात्मेत्यादि। आत्मात्मीययोरपि स्वशब्दवाच्यत्वात्। यथायथमिति। नलोकेत्यनेन कृद्योगषष्ठीनिषेधः। ज्ञातेत्यस्य त-
त्त्वं तत्वात्। योयमात्मेत्यर्थे विद्यमानयथायथशब्दस्यार्थमाह। यथास्वभावमिति। आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्मवर्ष्म चेत्यमरः। पूर्वपदस्येति। द्वि औ द्वि औ इति।
स्थितेकर्मधारयवद्भावात्सुपलुकि कृते पूर्वपदावयवस्येकारस्येत्यर्थः। अत्वमुत्तरपदस्येति। उत्तरपदावयवस्येकारस्येत्यर्थः नपुंसकत्वं चेति। चकारादेकवद्भाव इत्यपि बोध्यं
तेनातोमित्यमादेशे द्वंद्वमिति सिध्यति। रहस्यं द्वंद्वशब्दवाच्यमिति। द्वाभ्यां निर्वृत्ते रहस्ये योग रूढिरेवेत्यर्थः॥ द्वंद्वं मंत्रयते इति। द्वौ द्वौ भूत्वा मंत्रयेते इत्यर्थः। एवं हितत्
रहस्यं भवति। आचतुरमिति। आङ्मर्यादाभिविध्योरित्यव्ययीभावः। अव्ययीभावे शरत्प्रभृतिभ्य इति टच्। चतुः शब्दोत्र चतुर्णां पूरणे द्रष्टव्यः। आचतुर्थादित्यर्थः॥ द्वं
द्वं यज्ञपात्राणीति। स्फ्यश्च कपालानि चेत्यादीनि पात्राणि। द्वंद्वं प्रयुनक्ति। आसादयतीत्यर्थः। अभिव्यक्तौ साहचर्येणेत्यर्थ इति। अत्र द्वंद्वमित्यत्र स्वार्थे द्विर्वचनं। एक
वद्भावादिकं तु पूर्ववत्। अन्यत्रापीति। द्वंद्वं युद्धं वर्तते॥ इहवीप्सायां द्विर्वचनं द्वयोर्द्वयोर्युद्धमित्यर्थः। द्वंद्वानि सहते। शीतमुष्णमेकं द्वंद्वं सुखदुःखं चापरं क्षुत्तृष्णे चापरं
इह स्वार्थे द्विर्वचनमेकवद्भावादि पूर्ववत्। बहुत्वं त्वेकशेषवशात्॥ ॥ सिद्धांतकौमुदीव्याख्यायाकृताा तत्वबोधिनी समाप्त तत्र पूर्वार्द्धं तेन तुष्यतु शंकरः॥
इति श्री परमहंसपरिव्राजकाचार्यवामनेंद्रस्वामिचरणारविंदसेवकज्ञानेंद्रसरस्वतीकृतौ सिद्धांतव्याख्यायां तत्वबोधिन्याख्यायां पूर्वार्द्धं समाप्तम्॥ ॥
॥ मिती माघवदी ३ रवीवासरे सम्वत् १९ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



॥इतिश्रीसिद्धांतकौमुदीतत्वबोधिनीटीकासंयुक्तपूर्वार्द्धसमाप्तम्॥



296

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६ ॥ अथउत्तरार्द्धप्रारंभ्मः॥ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



श्रीगणेशायनमः॥ अज्ञाननाशनेदक्षं दीक्षितं भक्तरक्षणे। वटमूलाश्रयं त्र्यक्षं दक्षिणामूर्तिमाश्रये १ ग्रंथमध्ये विघातापहतं मंगलं शिष्यशिक्षार्थं निबध्ना
ति श्रोत्रेत्यादिना श्रोत्रियस्य भावः श्रौत्रं हायनांतयुवादिभ्योऽणिति सूत्रेण श्रोत्रियस्य यलोपश्चेति वार्त्तिकाद्यलोपे अण्प्रत्यये च यस्येति चेतीकारलोपः। अर्हतो भावः आ
र्हंती। गुणवचनब्राह्मणादिभ्य इति सूत्रेण अर्हतो नुम् चेत्युक्तेर्नुम् ष्यञ् च विधित्वात्तद्धितेष्विह लस्तद्धितस्येति यलोपः ताभ्यां वित्तैः श्रोत्रार्हंतीचणौ· तेन वित्त इति चणप्
श्रोत्रियत्वयोग्यताभ्यां प्रसिद्धैरित्यर्थः। किंच गुणैरैश्वर्यगुणावद्भिः प्रशस्तगुणयुक्तैरिति यावत्। स्यादाहत प्रशंसयोरिति सूत्रेणान्येभ्योपि दृश्यंत इत्युक्ता गुणिनः प्राल
णा इत्यस्य भाष्यादावुदाहृतत्वात्। अहर्दिवमिति अहन्यहनि प्रत्यहमित्यर्थः अचतुरेत्यादिना निपातनात्साधुः। नोनूय्यमान इति। नोनूर्यङंतात् कर्मणि शानच्।
सार्वधातुके यगिति धातोर्यक् आने मुगिति मुक्। अपिशब्देनापाततो विरोधं द्योतयति। वस्तुतस्तु न विरोधः स्तुतिप्रयोजकीभूतानामनंतकल्याणगुणानां स्तु
तिस्तुतिसिद्धत्वेपि वियदादिवद्व्यावहारिकत्वात्तदभावस्य पारमार्थिकत्वादेतच्चोत्तरमीमांसायां स्पष्टमेव विभुर्व्यापकः परमेश्वरः अतिशयेन विजयते विजयते।

॥श्रीगणेशायनमः॥ श्रोत्रार्हंतौ चरणौ गुणैर्महर्षिभिरहर्दिवम्। नोनूय्यमानोप्यगुणो विभुर्विजयतेतराम् १ पूर्वार्द्धे कथितास्तुर्ये पञ्च

तरां सर्वोत्कर्षेण वर्त्तत इति फलितोर्थः। विपराभ्यां जेरिति तङ्। तदंताद्द्विवचनविभज्येत्यादिना तरपि किमेत्तिङव्ययघादाम्विस्याम्॥ ११ माध्यायवर्तिनः
नन्विह तरप् दुर्लभ एव विजयत इत्यस्य अप्रातिपदिकत्वादतिङंतत्वाच्च न च सह सुपेत्यत्र सहेति योगविभागात्तिङंतेन विशब्दस्य समासे प्रातिपदिकत्वं स्यादेवे
ति वाच्यं। स च कं दस्यैवेति नकारस्य ग्रंथेन सह विरोधापत्तेः किंच प्रातिपदिकत्वाभ्युपगमे सोरुत्पत्तिः स्यात् लिंगसर्वनामताभ्युपगमे नपुंसकत्वात्सोर्लुक्यपि ह्रस्वो
नपुंसक इति ह्रस्वो दुर्वारः स्यात् समुदायांतर्गतस्य जय इत्यस्य तिङंतत्वेपि साकांक्षत्वेन असामर्थ्यात् ततोपि भवितुं नार्हति। समर्थः पदविधिरिति भाषितत्वात्
आमं तेन विशब्दो युज्यत इति कल्पनायां तु अंतरंगत्वात्परस्मैपदप्रवृत्तौ विजयतितरामिति स्यादिति चेदत्राहुः। समुदायांतर्गतात् जयत इत्यस्मादेव तरप्। न च।
तस्य विशब्देन सह साकांक्षत्वेनासामर्थ्यं वाक्यं तिङंतस्य प्रधानत्वेन सापेक्षत्वेपि दोषाभावादुपसर्गस्य द्योतकत्वेन प्रत्येकमर्थ एव नास्तीति साकांक्षताया वक्तु। राम·
मशक्यत्वाच्चेति। तदुक्तं कथनपूर्वकं वर्त्तिष्यमाणमाह पूर्वार्द्ध इति हलंतेष्वस्य शोनुदके किन् ऋत्विकदधृक्स्रग्दिगित्यादिना किन्नादिष्वस्यादनं प्रासंगिकमिति १

297

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावः। तुर्यश्चतुर्थः चतुरश्छयतावाद्यक्षरलोपश्चेत्युक्तत्वात्। अथेति इहापि क्तस्तुणाचः स्त्रियामञ् अणिनुणादृत्यजादिष्वुत्पादनं प्रासंगिकं बोध्यं प्राधान्येन तु तृतीयाध्यायस्यार्थ एवेह चिन्त्यत इति भावः अनुबंधभेदेन भेदमाश्रित्याह दशलकारा इति। प्रदर्श्यन्त इति यद्यपि पंचमलकारो रूपाणि अधुनान व्युत्पाद्यंते तथापि लकारः स्वरूपेण प्रदर्श्यते लः कर्मणि च भावे चाकर्मकेभ्यः लस्येत्यादि सूत्रविषयतां व्युत्पादयितुमिति भावः। पंचम इति लेडित्यर्थः। लट् लिडिति सोऽत्र क्रमो येस्यपेव लेटः पंचमत्वं न तु सूत्रोक्तक्रमेणेति बोध्यं वर्तमाने लट् इति वर्तमान इत्येतत् प्रकृत्यर्थविशेषणमित्याह यद्वर्तमानक्रियावृत्तेर्धातोरिति धातोरिति सूत्रमा तृतीयाध्यायसमाप्तेरधिक्रियत इति भावः लट् स्यादिति। तस्य वाच्यं त्वनुपदमेव स्फुटी भविष्यति वर्तमानकालस्तु न तद्वाच्यः किंतु द्योत्य एव लङादिष्वपि भूतादिकालो यथा यथं द्योत्य एवेत्यवगंतव्यं। वक्ष्यमाणवाच्यत्वाभ्युपगमोपि सुगम इति विध्यादिसूत्रेवक्ष्यामः। अटावितावितिअकार उच्चारणार्थः। इतिन्तु नोक्तं लिडादिवेलस्य

प्रत्ययाश्च कथ्यन्ते तृतीयाध्यायगोचराः। २। तत्रादौ दश लकाराः प्रदर्श्यन्ते लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लुङ् लृङ् एषु पञ्चमो लकारश्छन्दोमात्रगोचरः वर्तमाने लट्। ३।२।१२३। वर्तमानक्रियावृत्तेर्धातोर्लट् स्यात्। अटावितौ। लः कर्मणि च भावे चाकर्मकेभ्यः। ३।४।६९। लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि च॥

११. एषसंपादनात्तस्यावश्यं वक्तव्यत्वात्। लः कर्मणि चा चकारात्कर्तरि इत्यनुवृत्तेः कर्तरि इत्यनुकृष्यते। सकर्मकविषयं चेदं अकर्मकेषु कर्मणोऽसंभवादेव बाधितत्वात्। भावे चेत्युत्तरवाक्ये न तत्र विशेषविधानाच्च। तदेतदाह सकर्मकेभ्य इति। भावे चेति चकारेणाकर्तृ वानुकृष्यते न तु कर्म असंभवात्तदाह भावे कर्तरि चेति। ननु भावकर्मणोरात्मनेपदविधानाच्छेषात्कर्तरीति परस्मैपदविधानाच्च ज्ञापकाल्लकाराणां भावकर्मकर्त्रोरर्थोऽनुमातुं शक्यत इति किमनेन सूत्रेणेति चेद्ब्रवीमि। अस्त्यस्मिन् सूत्रे सकर्मकेभ्योपि घञ्। दिवङ्गावेल कारापत्तौ। घटं क्रियतेदेवदत्तेनेत्यादिप्रयोगः॥ प्रसज्येत॥ तन्माभूदित्येतदर्थमेतत्सूत्रस्यावश्यकत्वात्। नन्वेवमकर्मकेभ्यो भावे लङित्येव सूत्र्यतां भावेऽकर्मकेभ्य एवेति नियमार्थमिति वाच्यं। अकर्मकेभ्यो भाव एवेति विपरीतनियमापत्त्या कर्तरि तेभ्यो लकारानापत्तेः तन्माभूदिति चकारस्यावश्यकः। ६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नचैवं भावेचाकर्मकेभ्यइत्येवास्त्विति वाच्यं।भावे कर्तरि चाकर्मकेभ्य एवेति नियमापत्तौ सकर्मकेभ्यो भावइव कर्तर्यपि लकारानापत्तेः नन्वेवमपि लश्वभावे चाकर्मकेभ्यइत्ये
वास्तु चकारेण कर्तरीत्यनुकर्षणाल्लकाराः सकर्मकेभ्यः कर्तरि स्युरकर्मकेभ्यो भावे कर्तरि च स्युरित्यर्थे पर्यवसिते कर्मणि तु ज्ञापकाद्भविष्यंतीति किमनेन कर्मणी
त्यनेनेति चेत् मैवं उत्तरसूत्रे तयोरित्यनेन कर्मणोपि परामर्शार्थं तस्यावश्यकतया ज्ञापकानुसरणक्लेशस्यैवाभावात् तस्माद्यथान्यासमेव रमणीयं अत्र नैय्यायि
काः लकाराणां कृतावेव शक्तिर्लाघवान्न तु कर्तरि कृतिमतः कर्तृत्वेन तत्र शक्तौ गौरवात् । देवदत्तइत्यादि प्रथमांतपदेन तल्लाभाच्च देवदत्तः पचतीत्यत्र हि देवदत्तो वि
शेष्यः यत्नो विशेषणमाश्रयत्वं तु संसर्गः तथा च पाकानुकूलकृत्याश्रयो देवदत्तइत्यादिशाब्दबोधोपि सुखेनोपपद्यतइति तन्न पचतीत्युक्ते पाककर्ता क इत्याकां
क्षानुरोधेन लकाराणां कर्तरि शक्तिरित्यभ्युपगंतुमुचितत्वात् पाकानुकूला कृतिरिति शाब्दबोधाभ्युपगमे तु कस्मिन्नित्याकांक्षास्यात् । कस्येति वा नचैककर्तृका
पचिक्रियेति शाब्दबोधाभ्युपगमेपि कइत्याकांक्षानोपपद्यत एवेति शंक्यं कर्तृसामान्यबोधे सति कइति कर्तृविशेषाकांक्षायां वाधकाभावात् नापि देवदत्तक
र्तृका पचिक्रियेत्युक्तेपि कस्मिन्नस्ति कस्य वेत्याकांक्षा दुर्वारैवेति शंक्यं । विक्लित्त्यनुकूलव्यापारस्यैव पचिक्रियात्वात् तदाश्रयस्य देवदत्तस्य कर्तृत्वात् त्क्रि
याश्रयत्वे निश्चिते कस्मिन्नित्याद्याकांक्षायाअप्रवृत्तेः । किंचापचं तं देवदत्तं पश्य पचंते देवदत्ताय देहि पचमानस्य देवदत्तस्य द्रव्यमित्यादौ शतृशानजादीना
मपि तिवादिवल्लादेशत्वाविशेषेण तेभ्योपि कृतिमात्रबोधापत्तेः । नचेष्टापत्तिराश्रयत्वसंसर्गइत्युक्तत्वेन पाकानुकूलकृत्याश्रयं देवदत्तं पश्येत्याद्यर्थस्वी
कारे दोषाभावादिति वाच्यं । नामार्थयोर्भेदान्वयस्य स्वपरसिद्धांतविरुद्धत्वात् नचैवं नामार्थयोरभेदसंसर्गइत्युत्सर्गानुरोधेन शतृशानजादीनां कर्तरि शक्ति
स्तिवादीनां कृतावेवेति वैषम्यं स्वीक्रियते प्रामाणिकगौरवस्यादोषत्वादिति वाच्यं स्यान्येववाच कोलाघवान्नत्वादेशे गौरवादितिस्वसिद्धांतस्य परित्यागाप
त्तेः रामः ज्ञानं कर्तरदित्यादौ सोर्विसर्गो सोरमिसोरदङिचकृते लाघवात्सुत्वेनैव शक्तिर्न तु तत्तद्रूपेणेत्यादिभवदीयव्यवहारस्यानंगसंगत्यापत्तेश्च एवं च तिवादी
नां शत्रादीनां च स्मारकतया लिपिस्थानीयत्वं वोधकस्तु लकारएवेति स्थिते सच शत्रादयेनेकर्त्तरि शक्तइत्यभ्युपगंतव्यमितिङं ते कथंकृतिं वोधयेदन्यायश्चानेकार्थत्व
मिति न्यायात् यदि तु वैय्याकरणरीतिमाश्रित्य सर्वत्रादेशाएव वाचकाइत्याद्यभ्युपगम्यंते तर्हि घटं घटेन हरे वविष्णो वेत्यादि सुस्व ॥ १ ॥ १ ॥



298

CC-0. In Public Domain. Digitization by eGangotri

वैसत्वे पदादेशादिति न्यायेन पदस्फोटो वाक्यस्फोटश्च सिद्धोदिति भवतांतन्मदहदनिष्टं किंच कर्त्तरि क्तादितियत् कर्त्तृग्रहणं तदेवलः कर्मणीतिसूत्रे चकारेणानुकृष्यत
इति कथं ण्वुलादीनां लकारादीनां च शक्तौ वैलक्षण्यं न च नामार्थयोरभेदान्वयसंसर्गाभ्युपगम एव ण्वुलादौ कर्तुर्वाच्यत्वे बीजमिति वाच्यं पचति रूपं पचतिकल्पं दे
वदत्त इत्याद्यनुरोधेन तिङ्स्वपि कर्तुर्वाच्यतौचित्यात् ननु समुदायस्य नामत्वेपि तिङ्प्रत्ययो न नामेति चेत् साचक इत्यत्राप्यक इत्येतन्न नामेति तुल्यं अकांतं नामेति चे
त् रूपवाद्यंतमपि नामेति तुल्यं अनश्चात्र प्रशस्तपाककर्त्ता देवदत्त इत्याद्यभेदान्वयोभवद्भिरभ्युपगंतव्य इति तिङ्स्वपि कर्तुर्वाच्यतास्वीकर्त्तव्यैव किंच कर्तुर्वाच्य।
त्वानभ्युपगमे युष्मदि समानाधिकरणे म ध्यमः अस्मद्युत्तम इति सामानाधिकरण्यप्रयुक्तापुरुषव्यवस्थानभिहिते कर्त्तरि प्रथमेत्यादिकं च भवन्मते कथं संग।
च्छतां यत्तु अनभिहित इत्यस्यानभिहितसंख्याक इत्यर्थवर्णनेन देवदत्तः पचत्योदनमोदनः पच्यते देवदत्तेनेत्यादौ प्रथमाद्वितीयादिव्यवस्थापनमुक्तं। तन्न। क्त
तद्धितसमासेषु संख्याभिधानस्याप्रसिद्धत्वात्। तत्रश्च पक्वस्तंडुलः प्राप्तः शातिकोऽश्वः प्राप्तोदको ग्राम इत्यादिषु कर्मणि द्वितीयेत्यस्य प्रवृत्तौ प्रथमानस्यात्
न च तिष्ठतीत्यस्याध्याहारेण संख्याभिधानमिष्टाप्यत इति वाच्यं। स्थित इत्याद्यध्याहारतदभावात् शाब्दिकोयं देवदत्तो ननु नैयायिक इत्यादिषु नीलमिदं न तु रक्तमित्य
त्रैव क्रियापदाध्याहारस्यानावश्यकतया ख्यातेन शब्द दुर्द्धरं करोतीति ठक्प्रत्ययेन वा कर्तृसंख्याया अनुक्तत्वाद्देवदत्ते कर्त्तरि तृतीयापत्तिप्रसंगाच्च ॥ त
स्मादनभिहिते कर्त्तरि इत्यादिव्याख्यानमेवाभ्युपेतव्यं। अपिच धात्वर्थानुयायानुव्यापाराश्रयः कर्त्ता। तत्राश्रयमात्रं क्तानां लकाराणां चार्थः ॥ ननु व्यापारोपि तस्य धात्व।
टी·त· त्ततःप्रागेवस्कोरितियासुटःसकारोलुप्यतेझलिपरेयःसंयोगस्तदादित्वात्तयाचैकसकारकंरूपंतुल्यंसुडभावेयासुटःसकारस्यद्वित्वेकृ तेनसुटिस्कोरितिसलोपा
१२ त्सुटएवसकारस्यद्वित्वेचद्विसकारकमपिरूपंतुल्यमेवेतिसुटोविधानंव्यर्थमित्यपरितोषादाहस्फुटतरंत्वितिएधिषीष्टेत्यादावितिभावः॥ ॐ ॥मध्येपवादन्यायेने
तिरुदादिभ्यइतिसूत्रात्सार्वधातुकइत्यननुवृत्तावयंन्यायःप्रवर्ततइतिभावः अन्तरंगत्वादितिप्रत्ययमात्रापेक्षत्वात् अतोयेयइत्यस्यत्वांगत्वात्इतिप्रत्ययो
भयसापेक्षत्वेननहिरंगत्वादितिभावःनन्वपदान्ताकारस्यउस्सम्बन्धाश्रयणात्पररूपस्याप्युभयसापेक्षत्वमस्त्येवेतिचेन्नैवंवर्णाश्रयणेपिप्रत्ययमात्राश्रयतयाप्र

अतोयेयः।७।२।८०।अतःपरस्यसार्वधातुकावयवस्यायाइत्यस्येय्स्यात्।गुणः।यलोपः।भवेत्।सार्वधातुकेतिकिं चिकीर्ष्यात्।मध्येपवादन्यायेनातो
लोपएवबाध्यतेनभवेदित्यादौतुपरत्वाद्दीर्घःस्यात्।भवेताम्।झेर्जुस्।३।४।१०८।लिङोझेर्जुस्स्यात्।जुस्।उस्यपदान्तात्।६।१।९६।अपदान्तादव
र्णादुसिपरेपररूपमेकादेशःस्यात्।इतिप्राप्तेपरत्वान्नित्यत्वाच्चातोयेयइतिप्राप्तः यद्यप्यन्तरंगत्वात्पररूपंन्याय्यंतथापियासुट्इत्येतस्यइय्
इतिव्याख्येयम्।एवंचसलोपस्यापवादइयः।अतोयेयइत्यत्रानुसंधिरार्षः।भवेयुः भवेः भवेतं भवेत भवेयं भवेव भवेम। लिङाशिषि।३।४।११६॥
आशिषिलिङ्स्तिङार्धधातुकसंज्ञःस्यात्।किदाशिषि।३।४।१०४।आशिषिलिङोयासुट्कित्स्यात्।स्कोरितिसलोपः॥ ९९कृतेरनाश्रयणात्त्वा 310

ख्येयमिति।एतच्चविप्रतिषेधसूत्रेभाष्येस्पष्टम्।आर्धधातुकसंज्ञेतिलिङः।शाकटायनस्यैवेत्यतएवकारोनुवर्तनीयः।अन्यथाएकसंज्ञाधिकारबहिर्भूतत्वेनसार्वधातुक
संज्ञापिस्यात्ततश्चपक्षेशबादिस्यात्।किदाशिषि।ङित्त्वेनैवगुणवृद्धिप्रतिषेधेसिद्धेकिद्वचनंइज्यादित्यादौसंप्रसारणार्थंजागर्यादित्यत्रगुणार्थंच।जागर्तेर्गुणोहिङि
तिपर्युदस्यतेङित्त्वंचेहविशेषविहितेनकित्त्वेनबाध्यते।सलोपइतिझलपरसंयोगादित्वेनयासुटःसस्यलोपःटस्तुपदान्तसंयोगादित्वेनेतिभावइति मनोरमायां। राम·
स्थितं तदसंबद्धमितिमत्वात्रनिष्कर्षमाहुः भूयास्तांभूयास्तंभूयास्तेत्यत्रझलपरसंयोगादित्वेनयासुटःसस्यलोपः भूयादित्यत्रसुट इवयासुटोपिसस्यलोपःपदा १२
न्तसंयोगादित्वेनैव।अन्यथाझलपरसंयोगादिलोपस्यासिद्धत्वात्संयोगान्तलोपएवस्यात्भृष्टइत्यादौसावकाशस्यझलपरसंयोगादिलोपस्यसंयोगान्तलोपाबाधकत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शेषे विभाषा। नेर्गदनदेति सूत्रोक्तापेक्षया शेष इत्याह। गदनदादेरन्यस्मिन्निति। उपदेशे किं। प्रतिचकार। प्रनिचखादेत्यत्रापि निषेधो यथा स्यात्। अषान्त इति किं। प्रनिपि
नष्टि। उपदेशग्रहणात्। प्रनिपेक्ष्यति च स्विड्ः स्यात्। प्रनिचकशे इत्यत्रापि निषेधः। शेषग्रहणं स्पष्टार्थं। णत्वशास्त्रे संहितायामित्यधिकारात् संहितायामविव
क्षितायां णत्वाभावः संहितायां तु णत्वमिति विकल्पसिद्धेः किमनेन विभाषाग्रहणेनेत्याशंकां न कार्येत्याह। इहोपसर्गाणामित्यादि। एकपद इत्यनेनैव सिद्धे स
मासग्रहणं गोबलीवर्दन्यायेनेति बोध्यं। वाक्ये त्विति। सा संहिता विवक्षाधीना न त्वत्र नित्येत्यर्थः। उपलक्षणमिति। एतच्च सत्ताद्यर्थ निर्देशकृतं वत्तो भीमसेन।
स्यापि संमतमित्यत्र कुर्द खुर्द गुर्द क्रीडायामेवेत्येवकारो ज्ञापकः। सेधते र्गतावितिसूत्रे गतावित्येतदपि षिध गत्यामित्याद्यर्थ निर्देशस्योपलक्षणत्व एव घट

शेषे विभाषाः कखादावषान्त उपदेशे। ८।४।१९। उपदेशे कादिः खादिः षान्तश्च वर्जं गदनदादेरन्यस्मिन् धातौ परे उपसर्गस्थान्निमित्तात्परस्य
नेर्नस्य णत्वं वा स्यात्। प्रणिभवति। प्रनिभवति। इहोपसर्गाणामसमस्तत्वेपि संहिता नित्या। तदुक्तं। संहितैकपदे नित्या नित्या धातूपसर्गयोः
। नित्या समासे वाक्ये तु सा विवक्षामपेक्षते इति। सत्ताद्यर्थनिर्देशश्चोपलक्षणं। यागात्स्वर्गो भवतीत्यादावुत्पद्यत इत्याद्यर्थावगमात्। उपसर्गा
स्त्वर्थविशेषस्य द्योतकाः। प्रभवति। पराभवति। संभवति। अनुभवति। अभिभवति। उद्भवति। परिभवति। अत्र विलक्षणार्थावगतेः। उक्तं च। उ
पसर्गेण धात्वर्थो बलादन्यत्र नीयते। प्रहाराहारसंहारविहारपरिहारवदिति। एध वृद्धौ। कथ्यन्ताः षट्त्रिंशदनुदात्तेतः। टित आत्मनेपदानां
टेरे। ३।४।७९। टितो लस्यात्मनेपदानां टेरेत्वं स्यात्। एधते। सार्वधातुकमपित्। १।२।४। अपित्सार्वधातुकं ङिद्वत्स्यात्। आतो ङितः। ७।२।८१
अतः परस्य ङितामाकारस्य इय् स्यात्। एधेते। एधन्ते॥ १९ तेनान्यथेति दिक्। उत्पद्यत इत्याद्यर्थादिति। एवं च उपसर्गैर्विनाप्युक्तार्थप्रतीतेरुद्भवतीत्या

दौ प्रयुज्यमानोप्युपसर्गः द्योतक एव न तु वाचक इति भावः। उपसर्गेण धात्वर्थ इति। अत एवाऽमरेणाप्युक्तं। स्यादाभाषणमालापः प्रलापोनर्थकं वचः। अनुला
पो मुहुर्भाषा विलापः परिदेवनं। विप्रलापो विरोधोक्तिः संलापो भाषणं मिथः। सुप्रलापः सुवचनमपलापस्तु निन्हव इति। टित आत्मने। ननु शानचोपि लस्थानि
कात्मनेपदत्वात्सचमानो यजमान इत्यत्र टेरेत्वेन भवितव्यमिति चेदत्राहुः। प्रकृते स्तिवादिभिरात्मनेपदानां विशेषणान्न दोषः। एवं च टितस्तङां टेरे इत्येव वक्तुमुचित

CC-0. In Public Domain. Digitization by eGangotri



थासःसे। एकारोच्चारणं ज्ञापनार्थमिति लिटस्तझयोरित्यत्र स्फुटीभविष्यति। अतो गुणे इति। इट एत्वे कृते आद्गुणं बाधित्वा वृद्धौ प्राप्तायां अनेन पररूपमित्यर्थः।
इजादेश्च। धातोरेकाचइत्यतो धातुग्रहणं कास्प्रत्ययादित्यत आम् लिटीति चाऽनुवर्तत इत्याह। इजादिर्यो धातुरित्यादि। गुरुमान् किं। इयेष। ऋच्छेत्यानर्छ। आ
मः। लक्षणप्रतिपदोक्तपरिभाषया प्रत्ययग्रहणपरिभाषया चेनेद। आमात् आमन्तुः। परस्य लुगिति। मंत्रे घसेति सूत्राल्लेरित्यनुवर्त्य लेर्लुगिति काशिकादौ व्या
ख्यातं तदत्रोपेक्षितं व्यावर्त्याभावात्। तिङामपवादत्वात् लावस्थायामेवायं लुक्। तेन आमंतस्याऽतिङंतत्वात् देवदत्तादिपदात् परत्वेपि तिङ्ङतिङ इति न नि
घातः। आमंतात् परस्य निघातश्च तिङंतस्येत्यर्थः। नचातिङंतत्वे पदत्वाभावादामंतात् परस्य निघातो न सिध्यतीति शंक्यं। लिटः कित्वात् प्रत्ययलक्षणेन

थासस्से। ३।४।८०। टितो लस्य थासः से स्यात्। एधसे। एधेथे। एधध्वे। अतो गुणे। एधे। एधावहे। एधामहे। इजादेश्च गुरुमतोऽनृच्छः। ३।१।
३६। इजादिर्यो धातुर्गुरुमानृच्छत्यन्यस्तत आम् स्यात् लिटि। आमो मकारस्य नेत्वम् आस्कासोराम् विधानात् ज्ञापकात्। आमः। २।४।८१। आ
मः परस्य लुक् स्यात्। कृञ्चाऽनुप्रयुज्यते लिटि। ३।१।४०। आमन्ताल्लिट्परान् कृभ्वस्तयोऽनुप्रयुज्यन्ते। आम्प्रत्ययवत् कृञोऽनुप्रयोगस्येति सू
त्रे कृञ्ग्रहणसामर्थ्यादनुप्रयोगोन्यस्यापीति ज्ञायते। तेन कृभ्वस्तियोग इत्यतः कृञो द्वितीयेति त्रिकारणप्रत्याहाराश्रयणात् कृभ्वस्तिलाभः। तेषां
क्रियासामान्यवाचित्वादाम्प्रकृतीनां विशेषवाचित्वात्तदर्थयोरभेदान्वयः। संपदिस्तु प्रत्याहारेऽन्तर्भूतोऽप्यनन्वितार्थत्वान्न प्रयुज्यते। कृञ्स्तु।

११ क्रियाफले परगामिनि परस्मैपदं प्राप्ते॰ ॥

कृदंततया प्रातिपदिकत्वे सौ कृत्यत्तावामंतस्याव्ययत्वात्सुपो लुक्यपि प्रत्ययलक्षणेन सुबंततया पदत्वात्। कृ
ञ्चानुप्रयुज्यते। कथं तर्हि तं पातयां प्रथमं मास पपात पश्चात्। प्रभ्रंसयां यो नहुषं चकारेति। प्रमाद एवायं न च विपरीतप्रयोगनिवृत्तिमात्रे सूत्रस्य तात्पर्यौ स्याच्चास्य
योगो व्यवहितोपि न दुष्यतीति वाच्यं विपर्यासनिवृत्त्यर्थं व्यवहितनिवृत्त्यर्थं चेति वार्तिकविरोधात्। अन्यस्यापीति। यदि इह कृञ् शब्देन एक एव धातुर्गृह्येत तदा धात्व
न्तरस्य प्राप्त्यभावादाम् प्रत्ययवत् इति सूत्रेऽनुप्रयुज्यमानस्य कृञ इति विशेषणं व्यर्थं स्यादिति भावः। नचात्र कृञ्चेति चकारेणैवाऽनुप्रयोगोन्यस्यापीति ज्ञायत
इति शंक्यं। धातोराम् स्यात् अनुप्रयुज्यते च लिट्परः कृञ् इत्यर्थे समर्पकतया तस्योपक्षीणत्वात्। अभेदान्वय इति। सामान्यविशेषयोरभेदान्वयो लोकसिद्ध इति।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कर्त्तृकर्मभूतानद्यतनपरोक्षात्क्रियाभिन्नाक्रियेति तत्त्वबोधः । ननु करोतिः सकर्मकः भवतिस्त्वकर्मकइति कथमिह तुल्यतेति चेदत्राहुः । यदा हि करोतिरुत्पादनार्थकः
स्तात्तत्रैण प्रयुज्यते घटं चकार राज्यं चकारेति तदा नियमेन सकर्मकत्वं यदा तु क्रियां न र समानाधिकरणः करोतिः प्रयुज्यते तु हुवांचकारेत्यादौ तदा यत्समानाधिकरणः
करोतिस्तस्य सकर्मकत्वाकर्मकत्वाभ्यां त्वयमपि तथाभावं भजते । एवं भ्वस्त्योरप्याम्प्रकृतिसामानाधिकरण्येन क्वचित्सकर्मकत्वं बोध्यमत एवानुप्रयुज्यमा।
नाद्भवतेः सकर्मकत्वात्कर्मणि लिट् । तथा च माघः । तस्याः तपस्विनं विभरांबभूवेइति । श्रीहर्षश्च । तपर्तुपूर्त्तावपि मेदसां भरा विभावरीभिर्विभरांबभूविरेइति । अत्रेद
मवधेयं जुहवा । जुहवांचकार जुहुवांबभूवेत्यादौ केवले होमो गम्यते इतरत्र तु होमरूपा क्रियेति बोधः फले तु न कश्चिद्विशेषः । घटमानय द्रव्यं घटमानयेत्यत्र य

आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य । १।३।६३। आम्प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिः । आम्प्रकृत्या तुल्यमनुप्रयुज्यमानात्कृञोऽप्या
त्मनेपदं स्यात् । इह पूर्ववदित्यनुवर्त्य वाक्यभेदेन संबध्यते । पूर्ववदेवात्मनेपदं न तु तद्विपरीतमिति । तेन कर्त्तृगेऽपि क्रियाफले इन्दांचक्रे चकारेत्यादौ ।
नलङ् । लिटस्तझयोरेशिरेच् । ३।४।८१। लिडादेशयोस्तझयोरेश्इरेच् एतौ स्तः । एकारोच्चारणं ज्ञापकं तङादेशानां टेरेत्वं नेति । तेन डारौरसां नाकृ
स इति स्थितं । असंयोगाल्लिट् कित् । १।२।५। असंयोगात्परोऽपिल्लिट् कित्स्यात् । क्ङिति चेति निषेधात्सार्वधातुकार्धधातुकयोरिति गुणो न । द्वित्वात्पर
त्वाद्यणि प्राप्ते ॥

या । एवं चाम्प्रकृत्यर्थगतकारकसंख्यादिविशेषाभिव्यक्तिरनुप्रयोगस्य फलमिति । अनन्वितेति संपदार्थस्याम्प्रकृत्यर्थस्य चाभेदा
न्वयो न संभवति उभयोरपि विशेष्यरूपादिति भावः ॥ ❈ ॥ आम्प्रत्ययवत् । आम्प्रत्ययान्तस्यात्मनेपदाभावादाह अतद्गुण इति । प्रकृत्या तुल्यमनुप्रयुज्य।
मानादिति । तृतीयान्तादृत्तिः ॥ अनुप्रयोगस्यैत्यत्र कर्मणि घञिति भावः । अनुदात्तङित इत्यतोऽनुवर्त्तनादाह । आत्मनेपदं स्यादिति । एवमप्राप्तस्य विधानेऽपि प्रा
प्तस्य निवारणमनेनैव सूत्रेण न संभवतीत्यत आह । वाक्यभेदेनेति । अत्र च प्रमाणमाम् प्रत्ययवदिति वचनमेव । अन्यथा पूर्ववदित्यनुवृत्त्यैवाऽनुप्रयोगस्य क
तः आमः पूर्वेण तुल्यमित्यर्थलाभादिष्टसिद्धेः किं तेन आम्प्रत्ययवदित्यनेन । लिटस्तझयोः । एशि तिशकारकरणमकारविशिष्टतकारस्यादेशत्वाय । असंयो।

[illegible]

ति·

सि·कौ· द्विर्वचनेचि। अचामासमानाधिकरण्यलाभाय द्विर्वचनशब्दस्य तन्निमित्ते लक्षणा स्वीक्रियते। यद्वा। उच्यते इति वचनं। द्विर्वचनं यस्मिन्नचि तद् द्विर्वचनं। अथवा द्वि
टी·त· र्वचनमस्मिन्नस्तीत्यर्श आद्यच्। तदेतदाह। द्वित्वनिमित्तेऽचीति। इह अचः परस्मिन्निसतोऽचः इति स्थानिवदादेश इत्यस्मादादेश इति न पदान्तेत्यतो नेति चानुवर्त्तते।
९६ तदाह। अच आदेशो न स्यादिति यद्यपीह दत्सादावजादेशः स्थानिवत्स्यादिति रूपातिदेशपक्षः स्वीकृतः फलं चोभयत्र तुल्यं तथाप्यादेशनिषेधपक्षोपि भाष्यारूढ
इति स एवात्र स्वीकृतः किंच। आदेशमङ्गीकृत्य पुनः स्थानिरूपाश्रयणापेक्षया निषेधपरतया व्याख्यानमेव लघु। प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरमिति न्या
यात्। नपदान्तेति निषेधानन्तरं पाठोप्येवं सत्यनुगृहीत इति श्रेयानयं पक्षः। इष्टानुरोधेन द्विर्वचन इत्यावर्त्यकालावधारणपरतया व्याचष्टे द्वित्वे कर्त्तव्ये इति

द्विर्वचनेऽचि। १।१।५९। द्वित्वनिमित्तेऽचि परे अच आदेशो न स्यात्। द्वित्वे कर्त्तव्ये। उरत्। ७।४।६६। अभ्यासऋवर्णस्यात्स्यात्प्रत्यये परे।
रपरत्वं। हलादिः शेषः। प्रत्यये किं। वव्रश्च। कुहोश्चुः। ७।४।६२। अभ्यासकवर्गहकारयोश्चवर्गादेशः स्यात्। एधाञ्चक्रे। एधाञ्चक्राते। एधां
चक्रिरे। एकाच उपदेशेऽनुदात्तात्। ७।२।१०। उपदेशे यो धातुरेकाच् अनुदात्तश्च ततः परस्य वलादेरार्धधातुकस्येण्न स्यात्। उपदेश इत्युभ-
यान्वयि। एकाच इति किम्। यङ्लुग्व्यावृत्तिर्यथा स्यात्। स्मरन्ति हि। श्तिपा शपानुबन्धेन निर्दिष्टं यद्गणेन च। यत्रैकाज्ग्रहणं चैव पंचैतानि न
यङ्लुकीति। एतच्चेह एकाज्ग्रहणेन ज्ञाप्यते। अच इत्येकत्वाविवक्षया तद्वतो ग्रहणेन च सिद्धे एकग्रहणसामर्थ्यादनेकाच्कोपदेशो व्या 312
वर्त्यते। तेन वधेर्हेसुपदेशे एकाचोपि न निषेधः। आदेशोपदेशेऽनेकाच्त्वात्। अनुदात्तश्चानुपदमेव संग्रहीष्यते। एधांचकृषे। एधाञ्चक्राथे॥

कृते तु द्वित्वे यथायथमादेशः स्यादेवेति भावः। द्वित्वनिमित्ते किं। दुद्यूषतीत्यत्र द्वित्वात् परत्वात् ऊठि कृते यदि यणः पूर्वमेव द्वित्वं स्यात्तदा दिद्यूषतीत्यनिष्टं रूपं।
स्यात् तन्मा भूदिति द्वित्वनिमित्त इत्युक्तं। न तु द्वित्वनिमित्तं। अचीति किं। जेघ्रीयते। देध्मीयते। शाशय्यते इह ई घ्राध्मोरिति। ईकारः। अयङ् यि क्ङितीत्ययङादेश- तम·
श्च निषिद्धो न तन्मा भूदिति प्राञ्चः। अन्ये त्वाहुः। अचीति व्यर्थं घ्रीयु ध्मीय शाय्य इति द्वितीयाजवधिकस्यैकाचः कार्यित्वाद्यङो द्वित्वनिमित्तत्वाभावादिति। अचः किं ९६
असूषुपत्। इह स्वापेश्चङीति यत्संप्रसारणं तस्मिन्निषिद्धेऽभ्यासे उवर्णो न श्रूयेत। न च द्वित्वे कृते पुनः संप्रसारणेन स्वापेरवयवत्वाविशेषादभ्यासे तदुत्तरखंडे ॥

CC-0. In Public Domain. Digitization by eGangotri

चउकारश्चवर्णं भवेदिति वाच्यं। परस्य संप्रसारणे कृते यून इत्यत्रेव न संप्रसारणे इति पूर्वस्य यणः संप्रसारणनिषेधात्। स्यादेतत्। चक्रतुरित्यत्र अचश्चादेशस्य निषेधा।
न्नद्धस्यायण् स्यादेवाजन्तु सो द्वित्वनिमित्तत्वेपि आकारस्याऽतथात्वात्। न च द्विर्वचनेचीत्यस्य वैयर्थ्यं। चक्रे इत्यादौ सावकाशत्वात्। तथा चैकाच्त्वाभावा
च्छिरिटि धातो रितीह द्वित्वं न स्यादिति चेन्मैवं इह द्वित्वनिमित्तशब्देन साक्षात् समुदायघटकतया वा यत् द्वित्वप्रयोजकं तस्यानुरोधेन तस्य सर्वस्य ग्रहणात्। ए
तच्च ठस्येक इति सूत्रे कैयटे स्पष्टं। तथा च ऊर्णोतेः सनि। सनीवंतेतो टू। पक्षे विभाषोर्णोरिति ङित्वविरहे ऊर्णुनविषतीति सिद्धं सन्नन्तस्य द्वित्वविधाने सनो द्वित्व
प्रयोजकत्वेन तस्मिन्परे प्राप्तयोर्गुणावादेशयो र्द्वित्वे कर्तव्ये निषेधात्। अत एवाहुस्तद्भावभावितामात्रेणेह निमित्तत्वमिति। एवं च द्वित्वनिमित्तघटकतयास
नइडागमोऽप्यनुसन्ध्रकारश्च द्वित्वनिमित्तमिति स्थितं। नन्वेवं ऋधातोः सनि स्मिपूङ्रञ्ज्वशां सनीति इटि कृते इस् शब्दनिमित्तकस्य गुणस्य द्विर्वचनेऽची।
ति निषेधेः जादेर्द्वितीयस्येति द्वित्वप्रसंगादरिरिषतीति न सिध्येत् अरिस् शब्दस्य द्वित्वे तु यद्यपि सिध्यति तथापि गुणनिषेधे रिस् शब्द एव दुर्लभ इति चेत्। अत्रा
हुः। गुणे रपरे कृते रिस् शब्दस्यैव द्वित्वं द्वित्वनिमित्ते ह्यचि गुणस्य निषेधः। इस् शब्दस्तु नेह निमित्तं कार्यित्वात्। नहि कार्यो निमित्ततयाऽश्रीयते। स्थंडि
लाच्छयितरि व्रत इति ज्ञापकात्। अन्यथा शीङो ङित्वेन ङ्ङ्क्ङिति चेति गुणनिषेधाच्छयितरीति रूपस्यासिद्ध्यापत्तेः। न च क्ङिति ङिति परे गुणवृद्धी नेति व्याख्या।
यामुक्तार्थे शयितरीति न ज्ञापकमिति वाच्यं। तद्व्याख्यायां छिन्नंभिन्नमित्यत्र गुणनिषेधो न स्यादित्यादि दोषस्य क्ङिति चेति सूत्र एवोपपादितत्वात्। न चै।
वं कार्यिणो निमित्तत्वानाश्रयणे सन्नन्तस्य कार्यित्वात्सनि परतः प्राप्तयोः गुणावादेशयोर निषेधादूर्णूनविषतीत्यपि न स्यादिति वाच्यं। मत्वर्थीयेने नि
नाकार्यमनुभवत एव कार्यित्वलाभात्। ऊर्णोतेर्हि नुशब्द एव द्वित्वरूपकार्यमनुभवति न तु सन्। अरिरिषतीत्यत्र तु रिस् शब्दः कार्यभागिति। वैषम्या।
दिति। उभयान्वयीति। मध्ये पाठाद्देहलीदीपन्यायेन पूर्वोत्तराभ्यां संबध्यत इत्यर्थः। तत्रोत्तरान्वयस्य कार्त्तुं गंतुमित्यादावेव निषेधः फलं। नित्स्वरेण सं।
प्रसुदात्तत्वात्पिपक्षतीति विभत्सतीत्यादावि ण्निषेधस्तु पूर्वान्वयस्य फलं। द्वित्वे कृते अनेकाच्त्वात्। नन्वेकाच इत्युक्ते ह्युपदेश पदेनाप्यन्वयः स्वीकर्तव्य
स्तदेवमास्तु उपदेशेऽनुदात्तादित्यनेनैव इष्टसिद्धेरिति शंकाते। एकाचः किमिति पिपक्षतीत्यादावि वियङ्लुक्यपि इण्निषेधः स्यादेवेत्याशंकायामाह।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति· सि·कौ· टी·त· ९७

स्मरंतिहीति।श्लिपेत्यादिश्लितपाय था।स्पतिहंतियानिवानिद्रातीत्यादि।तेनभन्यजंघनीदित्यादोनेर्गदेति णत्वंनशपायथा।भरेति।तेनविभर्तेःसनिवर्भरिषा।
नीसत्रसनोवंतर्द्देतीड्विकल्पोनकिंतुनित्समेवेट्।एकाचइतिनिषेधाप्रवृत्तेः अनुवंधेननिर्देशोद्विधा।स्वरूपेणसंज्ञकत्वेनच।स्वरूपेणयथा।शीङःसार्व
धातुकेगुणः।दीङोयुड्चीति।शे शीतः।देदी तः।तन्निमित्तप्रत्ययेचैमेत्रमेणोदाहरणे।इत्संज्ञकत्वेनयथा।अनुदात्तङितः।तेनस्पर्द्धशीङादिभ्यः अनुदात्तङित इ
सात्मनेपदंन।पास्पर्द्धेति शेशयीति।गणेनयथा।चेभिदीतिरुध्यादिभ्यइतिश्नमन।एकाच्ग्रहणंप्रकृतसूत्रे।तेनवेभेदिता।चेच्छेदितेत्यादाविण्निषेधो।
न।एतच्चेति।नच्चश्लिपाशपादौषशेकथमिदंज्ञापकमितिशंक्यं।एकदेशानु मतिद्वारासर्वज्ञापनस्योपपद मतिङि स्यादौ दृष्टत्वात्।अतएवतत्रगतिका
रकोपपदानांकृद्भिः सहसमासवचनंप्राक्सुबुत्पत्तेरितिसिद्धमित्युक्तं। अनन्यार्थैःस्पतिहंतिभरेत्यादिभिश्लिवादिभिरेवज्ञापनंसंभवाच्च।
अपरस्पराइतिसूत्रेसातत्यग्रहणेनएकदेशानुमत्यालुंपेदवश्यमःकृत्येइत्यादिपूर्वाचार्यश्लोकोज्ञापितइतितुतत्रैवोचामः।मनोरमायांत्वेकदेशानु
मतिद्वारापूर्वाचार्यपठितपरिभाषाया ज्ञापनस्यगतिकारकोपपदानामित्यादौदृष्टत्वादित्युक्तंतदयुक्तमितिनव्याः।गतिकारकोपपदानामित्याद्येवहि।
पूर्वाचार्याणांपरिभाषानचतज्ज्ञापनंतत्रैवदृष्टमितियुज्यतेवक्तुमिति।तद्धतइति।नचमत्वर्थलक्षणायांमानाभावः।वसत्यादीनामनुदात्तपाठस्यैवतत्रमा
नत्वात्।नचेदानीमनुदात्तपाठःपरिभ्रष्टः।आधुनिकानांवसतिशक्त्यादिपाठस्तु अनार्षत्वान्नमानमितिशंक्यं।पाणिनिनापठितानामेवानुदात्तधातूनामा
धुनिकैःव्याख्यातपरंपरयासंगृहीतत्वात्।अमथाएकःअच्यस्येतिवहुव्रीहिलाभार्थमेकग्रहणेकृतेपिअनुदात्तपाठस्यपरिभ्रष्टत्वात्वसतिशक्त्यादयोऽ
नुदात्ताःनत्वौपदेशिकइतिनिर्द्धारणंनस्यात्।एकग्रहणेति।नन्वेकाचग्रहणंयङ्लुग्व्यावृत्त्यर्थमित्युक्तोपुनरेकग्रहणसामर्थ्यादित्युक्तोपरस्परव्याघातः
स्यात्इतिचेदत्राहुः।एकाचशब्देनएकाचग्रहणंयङ्लुग्व्यावृत्त्यर्थमितिनार्थःकिंतुवस्तुगत्यैवैकाज्ग्रहणंतच्चैकग्रहणंविनैवलभ्यतइत्यदोषइति।व
धरितायस्तुतव्यावृत्तयेअनिट्कारिकासु।अदंतपर्युदासउक्तोव्याघ्रभूतिनासएवप्राचाऽनुसृतः।अदूहदंतरुस्नु।स्नुणौयुनुरुक्षुविडीङ्श्रिभिः॥ ६॥

313

राम· ९७

CC-0. In Public Domain. Digitization by eGangotri

ःवृङ्वृञ्भ्यां च विनैकाचः स्वरान्ताधातवो निटइति। सचादंतपर्युदासइहोपेक्षितः। सूत्राः ननु गुणत्वात्। तथाहि। सर्वे सर्वपदादेशाइतिन्यायेन वृङ्इत्यादेःकारिकादे शस्तस्य यथास्यात्सुपदेशं गृहीत्वा कर्ताहर्तेत्यादौ निषेधः प्रवर्ततेतथैव वधादेशोपि प्रवर्त्तमानः केन वार्यतां। अदंतपर्युदाससामर्थ्यादितिचेन्न। सूत्रकारेणाऽप र्युदस्तत्वादितिभावः॥ ॥ इणःषीध्वं इणकोरित्यधिकारे पिपुनरिणग्रहणं कवर्गात्परस्य माभूदित्येतदर्थं। तेनेहनापक्षीध्वं। अंगात्परेषामिति। विहितानां किं नामित्युक्तो तुदाजोलुङि। अदिङ् मित्यत्रा व्याप्तिःस्यात्। लिहदुहनहां ढत्वघत्वधत्वेषु लिक्षीध्वं धुक्षीध्वंनत्सीध्वमित्यत्राऽतिव्याप्तिश्चस्यादितिबोध्यं। अंगात्किं निविषीध्वं। यद्यप्यर्थवतः षीध्वमित्यस्य ग्रहणान्नक्षपीडुदुमित्यादावेवमने नत्वत्रतथाप्यर्थवद्ग्रहणपरिभाषाक्वचिन्नप्रवर्ततइतिज्ञापनार्थमिदमुक्तं। तेन।

इणःषीध्वंलुङ्लिटांधोऽङ्गात्। ८।३।७८। इणन्तादङ्गात्परेषां षीध्वंलुङ्लिटांधस्यमूर्धन्यःस्यात्। एधांचकृढ्वे। एधांचकृवहे। एधांचकृमहे। एधांबभूवे इत्यादि। अनुप्रयोगसामर्थ्यादस्तेर्भूभावो न। अन्यथा ह्यस्तेः सचानुप्रयुज्यतइति कश्चित्तिवाब्रूयात्। अतआदेः। ७।४। ७७। अभ्यासस्यादेरतोदीर्घःस्यात्। परस्वापवादः। एधामास। एधामासतुरित्यादि। एधिता। एधितारौ। एधितारः। एधितासे। एधितासाथे। धि च। ८।२।२५। धादौप्रत्ययेपरेसलोपःस्यात्। एधिताध्वे। हएति। ७।४।५२। तासस्त्योःसस्यहःस्यादेतिपरे। एधिताहे। एधितास्वहे। एधितास्महे। एधिष्यते। एधिष्येते। एधिष्यन्ते। एधिष्यसे। एधिष्येथे। एधिष्यध्वे। एधिष्ये। एधिष्यावहे। एधिष्यामहे। आमेतः। ३।४। ९०। लोटएकारस्यामस्यात्। एधतां। एधेतां। एधन्तां। सवाभ्यांवामौ। ३।४।९१। सवाभ्यांपरस्यलोडेतःक्रमाद्वामौस्तः। एधस्व। एधेथां। एधध्वं। एतऐ। ३।४।९३। लोडुत्तमस्यएतऐस्यात्। आमोपवादः। एधै। एधावहै। एधामहै॥

९॥ अनिनस्मन्ग्रहणानीति सिद्धं। एधांबभूवेत्यादि। आम्प्रत्ययवदितिसूत्रेकृञ्ग्रहणात्। अनुप्रयोगान्तरेतङ्नेतिशेषात्। कर्तरीतिपरस्मैपदमेव। भावकर्मणोस्तुस्यादेव एधांबभूवेईक्षांबभूवेइति। अस्तेस्तुभावकर्मणोर्लिङि कृतेएधिइरिचइत्यपि विप्रतिपद्यंते। तथाहि। उभयत्रापिहएतीतिहादेशे कृते एधामाहे ईक्षामाहेइतिकेचित्। नासिसाहचर्यादिस्लेवहत्वंनत्वेशीत्यन्ये। तत्साहचर्यादेवसार्वधातुकएव एतिहत्वं। तथाचकर्मव्यतिहारेतङिव्यतिहेइत्यत्रैवभवतिनतूक्तद्वयेपि। तेनएधामासेईक्षामासेइत्येवरूपमित्यपरे। कश्चित्तिवाति। यद्यपिकृञ्इत्युक्तोलाघवमस्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तयापि धातुद्वयस्यैव लाभार्थं। प्रसाहा। श्रयणे क्लेश इति भावः। पररूपापवाद इति। अपवाद इत्ययं ग्रंथो नाम धातुप्रक्रियास्थस्वग्रंथेन सह विरुध्यते। तत्र हि अइ वाच रतिश्रति। प्रत्ययग्रहणमपनीय कास्यनेकाच इत्युक्ते र्नाम। औ। अत्तुः उः द्वित्वमतो गुणो। अन्त आदेरिति दीर्घः। णल औ। वृद्धिरित्युक्तत्वात्। हलादिः शेषात् प्रागे। वपरत्वादत्त आदेरिति दीर्घे कृते तु पररूपशंकापि अत्र नास्तीति विंसोयं ग्रंथ इति नव्याः॥ ॥ आडजादीनां। एतच्चाजादीनामदा सिद्धमिति वार्तिकं कृतं प्रत्याख्या तं। ननु आटि सति वृद्धिरेची सनेन ऐधत्तेत्यादि सिद्धावपि ऐंददित्यादि न सिध्येत्। किंच। अतो गुणे इमि पररूपप्रवृत्त्या ऐधत्तेत्याद्यपि न सिध्येत्। एदित्याट श्चेति सूत्रमट श्चेति क्रियेत तर्हि अस्वपो हस न इत्यत्र वृद्धिः स्यात्। रुदश्च पंचभ्यः। अड् गार्ग्यगालवयोरिति अडागमस्य सत्त्वात्तोरोरप्युत्तादिति रो रुत्वे सति अत्र च परत्वाच्चेति चेन्न

आडजादीनां। ६।४।७२। अजादीनामाट् स्यात् लुङादिषु। अटोपवादः। आटश्च। ऐधत। ऐधेतां। ऐधंत। ऐधथाः। ऐधेथां। ऐधध्वम्। ऐधे ऐधावहि। ऐधामहि। लिङः सीयुट्। ३।४।१०३। लिङात्मनेपदस्य सीयुडागमः स्यात्। सलोपः। एधेत। एधेयातां। झस्य रन्। ३।४।१०५। लिङो। झस्य रन् स्यात्। एधेरन्। एधेथाः। एधेयाथां। एधेध्वं। इटोऽत्। ३।४।१०६। लिङादेशस्य इटो ऽत् स्यात्। एधेय। एधेवहि। एधेमहि। आशीर्लिङि। आर्द्धधातुकत्वात् लिङः सलोपो न। सीयुट् सुटोः प्रत्ययावयवत्वात् षत्वं। एधिषीष्ट। एधिषीयास्तां। एधिषीरन्। एधिषीष्ठाः। एधिषीयास्थां। एधिषीध्वं। एधिषीय। एधिषीवहि। एधिषीमहि। ऐधिष्ट। ऐधिषातां॥ ९९. उपसर्गादृति धाताविसत्र धाताविसपकृष्याजादौ धाताविति व्याख्यानात्। न च अस्वपो स्तोत्यादावोकारस्यांतवद्भावेनाट्त्वात् तत्राजादिधातुसत्त्वाच्चोक्तदोषस्तदवस्थ इति वाच्यं। आदित्यनुवर्त्यं अकारस्य पाददोः चिपरे वृद्धिरिति व्याख्यानात्। एतेन अटश्चेत्युक्तावटगतादित्यस्मात् त्युटि अटनमित्यत्रातिप्रसंगः स्यादित्येतदपि निरस्तं न चैवमपि आततन्। आतीत् इत्यादि न सिध्यति। अटश्चेत्यस्य ऐंददित्यादौ सावकाशत्वात्तया परत्वादिह अतो गुणस्यैव प्रवृत्तेरिति वाच्यं। चकारो ऽत्र पुनर्वृद्धिविधानार्थ इत्यभ्युपगमादंतरंगत्वाद्वा अटश्चेत्यस्यैव प्रवृत्तेः। स्यादेतत्। आडजादीना मिति सूत्राभावे आस्तामासन् इति कथमटा सिध्यति। असोरित्यल्लोपेन अटश्चेति तत्र वृद्ध्यप्रवृत्तेः। मैवं। अंतरंगत्वात् प्रागेवाडागमे वृद्धौ च कृतायां पश्चात्



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचवार्णादांगंवलीयइतिवृद्धेः प्रागल्लोपएवस्यादितिशंक्यं। व्याश्रयत्वात्। वार्णादांगमितिपरिभाषायाअनित्यत्वाद्वा। तत्रहिअस्योरल्लोपइतितपरकरणमेवलिंगंय
द्धिवृद्धेःप्रागेवाल्लोपःस्यात्तर्हिकिंतेनतपरकरणेनेति। यद्यपिवैदिकप्रक्रियापामानर्द्‌ आवःइत्यादौछंदस्यपिदृश्यतइत्याडागमस्यवक्ष्यमाणत्वात्तदर्थमाद्यसूत्रंकर्त
व्यंतथाप्याटंविनैवअजव्यसयेनआङ्‌पूर्वकत्वेनवातत्नकथंचितव्याख्येयमितिस्थितस्यगतिमाहुः। सलोपइतिलिङः सलोपोनंसस्येत्यनेन। एधेयात्तामिति। सीयुटः
सलोपेआद्गुणः। एधिषीध्वमिति। इणःपरत्वेपिइत्वंतादंगात्परत्वाभावादिणःषीध्वमितिढत्वंनभवति॥ ॐ ॥आत्मनेति। झोंतइत्यतोझइतिअदभ्यस्तादित्यस्मा

आत्मनेपदेष्वनतः। ७। १। ५। अनकारात्परस्यात्मनेपदेषुझस्यअतइत्यादेशःस्यात्। ऐधिषत। ऐधिष्ठाः। ऐधिषाथां। इणःषीध्वंलुङ्‌लिटांधो
ऽङ्गात्। ऐधिढ्वम्। इड्भिन्नएवइणिहगृह्यतेइतिमतेतु। ऐधिध्वं। ढधयोर्द्वित्वस्यसमस्यचद्वित्वविकल्पात्षोडशरूपाणि। ऐधिषि। ऐधिष्वहि। ऐधि
ष्महि। ऐधिष्यत। ऐधिष्येतां। ऐधिष्यन्त। ऐधिष्यथाः। ऐधिष्येथां। ऐधिष्यध्वम्। ऐधिष्ये। ऐधिष्यावहि। ऐधिष्यामहि। उदात्तत्वादुदात्तादेरिडागम
सङ्ग्राहकानुदात्ताःसंगृह्यन्ते। ऊदृदन्तैर्यौतिरुक्ष्णुशीस्नुनुक्षुश्विडीङ्श्रिभिः। वृङ्‌वृञ्भ्यांचविनैकाचोऽजन्तेषुनिहताःस्मृताः १ शक्लृपचमुचू
रिचवचविचसिचप्रच्छित्यजनिजिर्भजः। भञ्जभुजभ्रस्जमस्जियजयुजरुजरञ्जविजिरस्वञ्जिसञ्जसृजः २ अद्क्षुद्खिद्छिदतुदिनुदःपद्य
भिद्विद्यतिर्विनदूशदसदीस्विद्यतिःस्कन्दिहदीक्रुधक्षुधिबुध्यती ३ वन्धिर्युधिरुधीराधिव्यधशुधःसाधिसिध्यतीमन्यहन्नापक्षिपक्षुपि
तप्तिपतृप्यतिदृप्यती ४ लिपलुपवपशपस्वप सृपियभरभलभगमनमयमोरमिः। क्रुशिर्दंशिदिशीदृशमृशरिशरुशलिशविशस्पृशःकृ
षिः। पिष्लिषतुषद्विषदुषपुष्यपिषविषशिषशुषश्लिष्यतयोघसिः। वसतिर्दहदिहदुहोनहमिहरुहलिहवहिस्तथा ६ अनुदात्ताहलन्तेषुधातवो

तत्रादितिचानुवर्तततेतदाहाझस्यात्स्यादिति। आत्मनेपदेषुकिं। अदंति। सु[illegible]वंति। अनतःकिं। एधंते। प्रवते। इड्भिन्नएवेणीति। विभाषेट्इतिइयेविशिष्यग्रहणाज्ञोवलीव
र्दन्यायेनकैश्चिदिड्भिन्नस्येवेणिहगृह्यतइतिभावः। ऊदृदंतैरिति। ऊदृदंतैर्[illegible]यौत्यादिभिर्विनाटङ्‌वृञ्भ्यांचविनाअन्येयेएकाचोऽजंताःतेनिहताःअनुदात्ताइत्यर्थः। तथा
चादाता। धाता। चेता। स्तोता। त्यादिष्विड्णनभवति। ऊदंताः। भूलूप्रभृतयः। ऋदंताःकृतृप्रभृतयः। युमिश्रणादौ। रुशब्दे। रुङ्‌गतिरेषणयोः। रिष्णुभयोर्ग्रहणं॥ ६॥ ६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति·
सि·कौ· निरनुबंधपरिभाषया लुग्विकरणः लुग्विकरणयोरिति परिभाषया च। न च साहचर्याल्लुग्विकरणस्यैव ग्रहणमिति शंक्यं। तस्या अनित्यत्वात्। ष्णुङ् तेजने। शीङ्।
टी·त· स्वप्ने। लुप्तवर्णो णु स्तुतौ। टुक्षु शब्दे। टुओश्वि गतिवृद्ध्योः। डीङ् विहायसा गतौ। श्रिञ् सेवायां। वृङ् संभक्तौ। वृञ् वरणे। नन्वेतद्भिन्नानामेकाचामेवानुदात्तत्वे ऊर्णुनः
१९ ऊर्णुत्वान्निसादिन सिध्येत्सेवं। ऊर्णोतेर्णुवद्भावो वाच्य इति वक्ष्यमाणवार्त्तिकेनेट्सिद्धेः। अत एव ऊर्णोर्नूयते इत्यत्र धातोरेकाच इति यङ्। ऊर्णुनावे सत्यनेकाच्त्वे
न प्रवृत्तस्याः मोः भावश्च सिध्यति। उक्तं च भाष्ये। वाच्य ऊर्णोर्णुवद्भावो यङ्प्रसिद्धिः प्रयोजनं। आमश्च प्रतिषेधार्थमेकाचश्चेदुपग्रहादिति। विभाषा गुणे स्त्रियामिति।
हेतावियं पंचमी इहेतु विहफलं। एतच्च कैय्यटे स्पष्टं। उपग्रहः प्रतिषेधः। इट्प्रतिषेधार्थमित्यर्थः। एवं च णुवद्भावेनैकाच्त्वात् श्र्युकः किति इति निषेधप्रवृत्तेः। ऊर्णुतः इत्या
दि सिध्यति। एकाच उपदेश इति निषेधस्तु न प्रवर्तते णुवद्भावेनैकाच्त्वेप्यनुदात्तत्वाभावात्। ऊर्णु धातोर्णुधातोश्च उदात्तत्वात्। तथा चोर्णोविता ऊर्णोवीदित्याद्य
पि सिद्धं। वसतिश्रयूल्कच घसप्स इति प्राचो ग्रंथस्थं पाठमुपेक्ष्य हलंतेषु कादिक्रमेणाह। शक्लृ इति। कांत एकः। चांतेषु पचू मुचू रिचू वचू विचू सिचः षट्। डुपचष् पाके। प्र
चिव्यक्तीकरणे। ह्वावपि पचिरित्यनेन न गृह्येते। रिचिरित्यनेन तु रिचिर् विरेके। रिच वियोजनसंपर्चनयोरिति योजादिकश्च गृह्यते। वचिरित्यनेन तु वच परिभाषणे ब्रुवो वचिरपि
वचियोजादिकोपि गृह्यते। छांतेषु प्रच्छेकः। जांतेषु त्यज निजिर् भज भंज भुज भ्रस्ज मस्ज यज युज रुज रंज विजिर् स्वंज संज सृजः पंचदश। भुजित्यनेन भुज पालना
भ्यवहारयोः। भुजो कौटिल्ये इति च गृह्यते। युजित्यनेन युजिर् योगे। युज समाधाविति च गृह्यते। केचित्तु व्याघ्रभूतिश्लोके भाष्ये च युजिरित्येतत्। युजिर्योग इत्यस्यैका
देशो न्याय्याणमित्याहुः। तन्मते युज समाधौ सेट्। सृजित्यनेन तु सृज विसर्गे दिवादिस्तुदादिश्च गृह्यते। दांतेषु। अद क्षुद् खिद् छिद् तुद् नुद् पद्य भिद् विद्यतिर्वि ३१५
नद्। शद् सद् स्विद्य स्कंद् हदः पंचदश। खिदित्यनेन खिद दैन्ये खिद्यतिः खिंदतिः खिनत्तिश्च गृह्यते। विद्यतीति विद सत्तायां। विन्दतीति विदॢ सिध्या एकादश। रुधिति रु
धिर् आवरणे। अनो रुध कामे इति दिवादिश्च गृह्यते। नांतेषु मन्य हनौ द्वौ। मन ज्ञाने दिवादिः। पांतेषु आप् क्षिप् छुप् तिप् तप् दृप् लिप् लुप् वप् शप् स्वप् सृप स्त्र
यो दश। क्षिपित्यनेन क्षिप प्रेरणे क्षिप्यति क्षिपतिश्च गृह्यते। छुप स्पर्शे। तपित्यनेन तु तप संतापे। तप ऐश्वर्ये दिवादिः। तप दाहे इत्यपि णिजभावपक्षे गृह्यते। तिप र राम·
क्षरणे। तृप्यतिदृप्यत्योर्वेट्त्वेप्यनुदात्तस्य चर्दुपधस्येति समर्थोपपाठः। भांतेषु यभ रभ लभ स्त्रयः। मांतेषु गम् नम् यम् रम् श्चत्वारः। शांतेषु क्रुश दंश दिश दृश मृश रिश रु १९
श ४॥ त्रुटि॥ विचारणे। धांतेषु क्रुध क्षुध बुध्य बंध युध रुध राध व्यध शुध साध॥ ४॥

रुशलिशविशस्पृशोदश। रिशरुश हिंसायां लिशिसनेन लिशल्क्ष्मीभावेदिवादिः लिशगतौतुदादिश्च गृह्यते। षांतेषुकृषत्विषतुषद्विषदुषपुष्पिषविष
शिषपुषश्लिष्षा एकादश। कृषितिभौवादिकतौदादिकौगृह्येते। विषिसनेन विष्लृव्याप्तौ जिषविषमिषिति दंडकस्थोपिगृह्यते। शिषिसनेन तुशिष्लृविशेष
णेकषखषशिषेति दंडकस्थश्च गृह्यते। विषितिविष्लृव्याप्तावितिजौहोत्यादिकएव गृह्यते न तु दंडस्थः। शिषिसनेनापिषिष्लृविशेषणोइति रौधादिकएवन
तुदंडकस्थइति वोपदेवादयः। सांतेषुघस्लवसनौद्वौ। घस्लृ अदनेलुङ्सनोर्घस्लृइत्यत्तेरादेशस्यतुस्थान्यनुदात्तत्वेनापिसिद्धं। हांतेषुदहदिहदुहनहरुह
लिहवहोष्टौ। दुहिसनेन दुहिरितिभौवादिकोनगृह्यते किंतुदुहप्रपूरणेइति अदादिक एवेति धांचः। इह मनोरमायांसंग्रहश्लोकउक्तः कचछजादधनपा
भमशाषसहाः क्रमात्। कचकाणणयः खंडो गघजाष्ठखजाः स्मृताइति तत्र पूर्वार्द्धेपाठायेचतुर्दशवर्णास्तदंता धातवः कादिक्रमेणायेवर्णास्तत्संख्याकावो

तुदादौमतभेदेन स्थितौयौचचुरादिषु। ७। तृपदृपीतौवारपितुश्यनानिर्देशमात्रादतः। किञ्च। स्विद्यपद्यौसिध्यबुध्यौमन्यपुष्यश्लिषः श्यना
॥ ८॥ वसिः शपालुकापोतिनिर्दिष्टोन्यनिवृत्तये। निजिर्विजिर्षाल्लृइतिसानुबन्धास्तमीतथा॥ ९॥ विन्दतिश्चानूदौगोदेरिष्टौभाष्येपि
दृश्यते। व्याघ्रभूत्यादयस्त्वेनंनेहपेठुरितिस्थितम्॥ १०॥ रञ्जिमसजौश्वदिपदीतुद्क्षुधशुषिपुषौशिषिः। भाष्यानुक्तानवेह्नोक्ताव्याघ्रभूत्या
दिसम्मतेः। ११। स्पर्द्धसङ्घर्षे। संघर्षः पराभिभवेच्छा। धात्वर्थेनोपसंग्रहादकर्मकः। स्पर्द्धते॥ ११ घ्याइत्यर्थेः। अत एवकांत एकः। चांताः षट्।

छांतएकः। जांताः पंचदशेत्यादिव्याख्यातं। कइत्येकस्य चइति षएणां णइति पंचदशानां संज्ञेत्याद्यभ्युपगमात्। षांतेषुद्वयोः॥ ॥ श्यनानिर्देशस्य फलमाह।
तुदादावितितृपदृपीमतभेदेन तुदादौ स्थितौचुरादौतुतृपिः सर्वमतेस्थितः दृपिः स्त्वेकीयमतेनेति विवेकः। अत एवचस्यति। तृपत्रंफलकेशो। द्वावपिद्वितीयांता
विस्त्येत्योः दृपदंफकतुल्केषो। प्रथमः प्रथमांतः। द्वितीयांतइत्येकेइतिचतुदादौ। चुरादौतुतृपतृप्तौ। तृपदृपसंदीपनइत्येकेइतिच। अन्यनिरन्नयेइति। निवर्त्तनीयास्तु
ञिस्विदास्नेहनमोचनयोः। पदस्थैर्ये। षिधगत्यां। षिधूशास्त्रेमांगल्येच। बुधिरबोधने। इतिभौवादिकाः। मनुअवबोधने तानादिकः। पुषपुष्टौभौवादिकः क्रैया
दिकश्च। श्लिषदाहेभौवादिकः। वसआच्छादनेआदादिकः। एतेत्वनुदात्तत्वराहित्यात्सेटः। युजबंधनेक्रैयादिकोऽयमनुदात्तइत्यनिट्। श्यनानिर्देशेनसंग्राह्यास्तुनि

कविकल्पद्रुमटीका ॥

CC-0. In Public Domain. Digitization by eGangotri



पचयतो। षिध संराद्धौ। बुध अवगमे। मन ज्ञाने। पुष पुष्टौ। श्लिष आलिंगने। वस निवासे। एते अनिटः। पुमिश्रणामिश्रणयोः। अयं सेट्। अमीतयेतिणिजि युद्धौ। ओविजी भ यचलनयोः। शाक मर्षणे। इत्येषां क्रमेण आदादिकतौदादिकदैवादिकानां व्याहत्तये सानुबंधानिर्दिष्टा इत्यर्थः। विंदतिरिति। विदिर लाभे। इष्टइति। अनिडेनेति शेषः। भाष्यानुक्ता इति। भाष्यकृताऽनुक्ताः नतु प्रत्याख्याता इति। नास्तीह तद्विरोधः। नतत्र व्याघ्रभूत्यादिग्रंथानुरोधात् गुष्क एवोक्ते न नत्रू विशिष्टे नानत्रू इत्यादिसोत्र प्रयो। गादनुं प्रतिपत्तुमित्यादिसार्वलौकिकव्यवहाराच्च उपलक्षणतयैव भाष्यं नेयमिति भावः। अकर्मक इति। अत्र केचित्। अभिभवेच्छा धात्वर्थस्तया च स्पर्द्धार्थकस्य सक।

शर्पूर्वाः खयः। ७।४।६१। अभ्यासस्य शर्पूर्वाः खयः शिष्यन्ते। हलादिशेषइत्यस्यापवादः। पस्पर्द्धे। स्पर्द्धिता। स्पर्द्धिष्यते। स्पर्द्धतां। अस्पर्द्धत। स्पर्द्धेत। स्प र्द्धिषीष्ट। अस्पर्द्धिष्ट। अस्पर्द्धिष्यत। ३। गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च। गाधते। जगाधे। ४। बाधृ लोडने। लोडनं प्रतिघातः। बाधते। ५। नाथृ नाधृ याञ्चो पतापैश्वर्याशीःषु। आशिषि नाथ इति वाच्यं। अस्याशिष्येवात्मनेपदं स्यात्। नाथते। ६। अन्यत्र नाथति। नाधते। ७। दध धारणे। दधते। अत एक हल्मध्येऽनादेशादेर्लिटि। ६।४।१२०। लिण्निमित्तादेशादिकं न भवति यदङ्गं तदवयवस्यासंयुक्तहल्मध्यस्थस्याकारस्य एकारः स्यादभ्यासलोप श्च किति लिटि थलि च सेटि। ६।४।१२१। सागुक्तं स्यात्। आदेशश्चेह वैरूप्यसम्पादक एवाश्रीयते। शसिददोः प्रतिषेधवचनात्तज्ज्ञापकात्। तेन प्रकृ तिजश्वरान्तेषु सत्स्वपि एत्वाभ्यासलोपौ स्त एव। देधे देधाते। देधिरे। अतः किम्। दिदिवतुः। तपरः किम्। ररासे। एके सादि किम्। ततसरतुः। अनादेशादेः किम्। चकणतुः लिटा आदेशविशेषणादिह स्यादेव। नेमिथ। सेहे। ८। स्कुदि आप्रवणे। आप्रवणमुत्प्लवनमुद्धरणं च। इदितो नुम् धातोः। ७।१।५८। स्कु न्दते। चुस्कुन्दे। ९। श्विदि श्वैत्ये। अकर्मकः। श्विन्दते। शिश्विन्दे। १०। वदि अभिवादनस्तुत्योः। वन्दते। ववन्दे। ११। भदि कल्याणे सुखे च। भन्दते। बभन्दे। १२

मेकतां दधपते। आहात्समेरव मराबतीयेति। उदाहरिष्यते च स्पर्द्धायामाङः इत्यत्र स्वयमेवाकृष्णा आणूरमाक्रपते स्पर्द्धत इत्यर्थ इति। श्रीहर्षोपि प्रायुंक्त। तन्नाम स्यपुगांनं वात्रेता स्पर्द्धितुमर्हतीति। अतोस्य सकर्मकत्वं न्याय्यमित्याहुः॥ ॥ शर्पूर्वाः। अतद्गुणसंविज्ञानोऽयं बहुव्रीहिः। तेन शरेन शेषः। किंतु खयामेव। इह स्पर्द्ध इत्यत्र रेफस्या पि हित्वं भवति द्वितीयस्यैकाचः संबंधिरेफस्यैव नन्द्रा इति निषेधादिति बोध्यं। गाध्रा क्कारेणाग्लोपिशास्वृदितामिति निषेधार्थः। अजगाधत्। आस्पदं स्थापना अवस्थानं

316



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ष्ठा एकत्रस्थापनं संदर्भो वा ग्रंथः। नाथृ नाधृ। उपतापो रोगः। अनुदात्तेत्त्वादेव सिद्धे नियमार्थं वार्त्तिकमित्याह। आशिष्येवेति। अत एकहल्मध्ये। एकशब्दोऽत्रासहाय
वचनः एकयोर्हलोर्मध्ये इत्यर्थः तद्व्याचष्टे। असंयुक्तेति। इष्टानुरोधेन लिटि त्पावसे आदेशविशेषणमेतत्स्वस्य निमित्तं च क्रियत इत्याह लिण्निमित्तेकिति लिटीति च यद्य
पि गमहनेति सूत्रे क्ङितीति निवर्त्तते। तथापि प्रयोजनाभावान्न ङितीत्येतन्नानुवर्त्तत इति भावः। किति किम्। ननाद। लिटि किं। पापच्यात्। चकणतुरिति। न चैवमपि वभ
णतुरित्यत्र अभ्यासे चर्त्वे च स्यासिद्धत्वादेत्वाभ्यासलोपौ स्त एवेति वाच्यं। फलभजग्रहणेन एत्वविधिं प्रति तत्सूत्रस्य सिद्धत्वज्ञापनात्। एवं वादेशश्चेद्धवेरूप्यसं
पादक एव गृह्यते इति व्याख्यानमवश्यं कर्त्तव्यमेवेति दिक्॥ ०॥ मदि स्तुति। मोदः संतोषः। मदो गर्वः। स्वप्नः आलस्यं। न शसदद। शसु हिंसायां। दत्यांतः। सूत्रेऽव

मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु। मन्दते। ममन्दे॥ १३॥ स्यदि किञ्चिच्चलने। स्यन्दते। पस्यन्दे। १४। क्लिदि परिदेवने। शोक इत्यर्थः। स
कर्म्मकः। क्लिन्दते चैत्रं। चिक्लिन्दे। १५। मुद हर्षे। मोदते। १६। दद दाने। ददते। न शसददवादिगुणानाम्। ६।४।१२६। शसेर्ददेर्वकारादीनां गुण
शब्देन भावितस्य च यो अकारस्तस्य एत्वाभ्यासलोपौ न। ददे। ददाते। ददिरे। १७। ष्वद स्वर्द आस्वादने। अयमनुभवे सकर्म्मकः। रुचाव
कर्म्मकः। धात्वादेः षः सः। ६।१।६४। धातोरादेः षस्य सः स्यात्। सात्पदाद्योरिति षत्वनिषेधः। अनुस्वदते। सस्वदे। स्वर्दते। सस्वर्दे। १९। उर्द।
१९ माने क्रीडाया

यवाऽवयविभावः षष्ठ्यर्थः। तथा च शसददवादीनां योऽकार इत्यन्वयसंभवेपि अकारस्य गुणरूपत्वाद् इदं निबंधना षष्ठी न संभवतीत्या
शंक्य तन्निर्वाहार्थं व्याचष्टे। गुणशब्देन भावितस्येति। भावितत्वं च साक्षात्परंपरासाधारणं। तथा च शशरतुः। पपरतुरित्यादौ गुणशब्देन क्रियमाणो योऽर्
तदवयवोऽकारः। लुलविथेत्यादौ तु गुणशब्देन क्रियमाणो य ओकारस्तत्स्थानिकस्य आवादेशस्यावयवोऽकार इत्यर्थः। तस्य त्रानुपपत्तिः। ददर्दे इति। शशसतुः
शशसुः। ववमतुः। ववमुरित्यादावपि निषेधो बोध्यः। ष्वद स्वर्द। अयमिति। प्रत्येकाभिप्रायेणोक्तमित्याहुः। सकर्मक इति। स्वदस्व हव्या हव्यानित्यनुभवेत्यर्थः। अकर्म
क इति। अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारेति श्रीहर्षः। न स्वदते न रोचते। इत्यर्थः। धात्वादेः। धातुग्रहणं किं। षट्कः। षड्ढ। आदेः किं। लषति॥

CC-0. In Public Domain. Digitization by eGangotri



उपधायांचास्तिपिधातोरित्यतः धातोरित्यनुवर्तते। र्वोरुपधाया इत्यतः र्वोरिक इति। हलि चेत्यतो हलीति च। तदाह। धातोरित्यादि। धातोः किं। उरुः। नः। कुरुः। कुर्वौ। कुर्वद्रस्य
त्रेको दीर्घो माभूत्। न चात्र रेफस्य प्रातिपदिकोपधात्वेपि पदोपधात्वाभावादेव दीर्घो न भवेदिति। धातोरित्यनुवर्तनमिहानावश्यकमिति वाच्यं। पदस्येत्यनुवृत्तौ तु कूर्दतेइ
साच सिद्धिप्रसंगात्। वस्तुतस्तु पूर्वत्रासिद्धे न स्थानिवदिति स्वीकारात् अचः परस्मिन्निति स्थानिवत्त्वस्य निषेधाभ्युपगमेपि कार्यकालपक्षेऽसिद्धं बहिरंगमिति परिभाषायाः
मप्रवृत्तेर्बहिरंगस्य परत्वोऽसिद्धत्वात् कुर्वौ कुर्वद्इत्यत्रोपधायां चेति दीर्घो न भवेदिति धातुग्रहणानुवर्तनस्य नास्ति तावश्यकता पदस्येत्यस्याननुवृत्त्या कुर्दते इत्यादौ तु दीर्घः सि
ध्यत्येवेत्याहुः। रेफवकारयोः किं। पुष्यविकसने पुष्यति। हल्परयोः किम्। चिरिणोति। जिरिणोति। इकः किं। अर्च्यते। नर्दति। ननु हलि चेत्यत्र रेफवकारयोर्हल्परयोरि
को दीर्घः स्यादिति व्याख्यायां कूर्दते गूर्दते इत्यादिसिद्धौ सत्येवेति सूत्रमिदं व्यर्थमिति चेत्। अत्राहुः। हलि चेत्यत्र धातुग्रहणमनुवर्तनीयमेव। अन्यथा दिवमिच्छति

उपधायाञ्च। ८।२।७८। धातोरुपधाभूतयोरेफवकारयोर्हल्परयोः परत इको दीर्घः स्यात्। ऊर्दते। ऊर्दोऽब्बके। २०। कुर्द खुर्द गुर्द गुद क्रीडायामेव। कूर्दते। चुकूर्दे। २१। खूर्दते। २२। गूर्दते। २३। गोदते। जुगुदे। २४। षूद क्षरणे। सूदते। सुषूदे। सेकृसृपृसृजस्तृस्त्यान्ये दन्त्याजन्तसादयः। एकाचः षोपदेशाः। ष्वष्क स्विद स्वद स्वञ्ज स्वप स्मिङः। दन्त्यः केवलदन्त्यः। नतु दन्तोष्ठजोपि। ष्वष्कादीनां पृथग्ग्रहणाज्ज्ञापकात्। २५। ह्लाद अव्यक्ते शब्दे। ह्लादते। जह्लादे॥ २६॥

दिव्यतीत्यादावतिप्रसंगः स्यात्। तथा चोपधायां चेति सूत्राभावे उपधाभूतयोर्वोः परतो दीर्घो न स्यात् किन्तु रेफवान्तयोरेव धा
तोर्हलि चेति सूत्रेणास्यादिति तत्सूत्रमावश्यकमेवेति। सूदते इति। स्रवतीत्यर्थः। ननु स्वर्दते इतिवत् स्वदस्वदेतिवंसादयश्च धातवः पठ्यंतां षोपदेशान्यष्ठित्वासत्त्वविधौ र-
वात्। मैवं। तथा हि सति ण्यंतान्चङि असिष्वदत् असुषुदत् इत्यादौ लिटि सुषूदे सिषेधे इत्यादौ च आदेशप्रत्यययोरिति षत्वं न स्यात्। इणः परस्य सकारमात्रस्य षत्वविधौ
तु सुपिसौ सुपिस इत्यादावपि स्यादिति धातुपाठे पाणिनिना तालव्यदंत्यादिपाठवत् षोपदेशा अपि व्यवस्थयैव पठितास्तच्च पाठ इदानीं परिभ्रष्टः। साधादिषु सादि
पाठस्यैव दृश्यमानत्वात् तोलसाणामुखेन तान्व्यवस्थापयति। सेगिलादि। दंत्यश्च अजन्तश्च दंत्याचौ तौ अव्यवहितपरो यस्य स दंत्याजन्तः। दंत्याजन्तश्चासौ सश्च दंत्याजन्त
सः। स आदिर्येषां धातूनां ते दंत्याजन्तसादयः। जन्तसादयश्चैकाचः षोपदेशा बोध्याः। तथा च साधादौ सांप्रतं पठ्यमानः सकार उपदेशे न स्थित इत्यनुमेयमिति भावः॥




Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दंतेस्यादि किं। चुस्कुंदे। एकाचः किं। सोसूच्यते। सोसूत्र्यते। सूचिसूत्री चुरादावदंतौ। उक्तलक्षणाप्याप्तिं व्याप्तिं वारयितुमाह। सेगिति। सेक्रगतौ। स्रभृगतौ। स्क्रगतौ स्तृत्र आ
च्छादने। सृजविसर्गे। स्तृञ् आच्छादने। स्त्यै शब्दसंघातयोः। एभ्योऽन्ये। पूर्वेणाकेषांचिदसंग्रहादाह। च्चकेति। च्वक्कगतौ। निच्छिदा गात्रप्रक्षरणे। स्वद आस्वादने। व्यंज
परिष्वंगे। निष्वप्शये। ष्मिङ् ईषद्धसने। एतेषोपदेशा इत्यन्वयः। स्वाद आस्वादन इत्यादावतिव्याप्तिमाशंक्याह। दंत्यः केवलदंत्य इति। तथा च आसिस्वददित्यादौ।
षत्वं नेति भावः॥ ॥ ह्लादी सुखे च। चादव्यक्ते शब्दे। ईकारः श्वीदितो निष्ठायामिति नेति। एनिषेधार्थः। प्रह्लन्नः। प्रह्लन्नवान्। इह ह्लादो निष्ठायामिति ह्रस्वः। श्लाघाया

ह्लादी सुखे च। चादव्यक्ते शब्दे। ह्लादते। २७ स्वाद आस्वादने। स्वादते। २८। पर्द कुत्सिते शब्दे। गुदरव इत्यर्थः। पर्दते। २९। यती प्रयत्ने। यतते येते॥
३०॥ युतृ जुतृ भासने। योतते। युयुते। जोतते। ३१। जुजुते। ३२। विथृ वेथृ याचने। विविथे। ३३। विवेथे। ३४। श्रथि शैथिल्ये। श्रन्थते। ३५। ग्रथि कौ
टिल्ये। ग्रन्थते। ३६। कत्थ श्लाघायाम्। कत्थते। ३७। एधादयोऽनुदात्तेतो गताः। अथाष्टत्रिंशत्तवर्गीयान्ताः परस्मैपदिनः। अत सातत्यगमने। अ
तति। अत आदेः। आत। आततुः। आतुः। लुङि आतिसईदिति स्थिते। इट ईटि। ८।२।२८। इटः परस्य सस्य लोपः स्यादीटि परे। सिज्लोप एकादेशे।
सिद्धो वाच्यः। आतीत्। आतिष्टां। आतिषुः। वदव्रजहलन्तस्याचः। ७।२।३। वदेर्व्रजेर्हलन्तस्य चाङ्गस्याचः स्थाने वृद्धिः स्यात् सिचि परस्मैपदेषु। इति

मिति। अविद्यमानगुणासंबंधज्ञापनं श्लाघाआततुरिति। हलमध्यस्थत्वाभावादेत्वं न। इट ईटि। संयोगांतस्य लोप इत्यतो लोप इति। राल्लस्येत्यतः सस्येति चानुवर्त
तेत्याह। लोपः स्यादिति। इटः किं। अहार्षीत्। ईटि किं। आतिष्टां। आतिषुः। सिज्लोप इति। अत्र वदंति। सलोप इति वक्तव्ये सिज्ग्रहणं झलो झलीत्यादि सूत्रत्रयं सि
ज्विषयकमिति व्याख्यानार्थं। तेनेह न। सोमसुत् स्तोता। द्विष्टराम्। द्विष्टमाम्। घिचेति सूत्रे तु वामनमते सिचो लोपः। भाष्यमते तु सस्येति भेदो बोध्य इति। वदव्रा
जान् अवादीत्। अव्राजीत्। अतो हलादेरिति विकल्पं बाधित्वा अनेन नित्यं वृद्धिः। हलंतस्योदाहरणमपाक्षीत्। अधाक्षीत्। तदंतविधिनैव सिद्धे अंतग्रहणं स्पष्टप्र
तिपत्त्यर्थं। हलोऽच इत्युक्ते त्वजंतांगस्य हलं स्थाने वृद्धिरिति कदाचिदाशंकेत। अच इति तु इकृपरिभाषया अनुपस्थानार्थं अन्यथा अभैत्सीदित्यत्र स्यान्न त्वपाक्षीदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नेटि॥ प्रागुक्तं नेति। हलंतत्वादेव सिद्धे वदव्रजेति विशिष्य विधानान्न निषेधः। किंतु हलंतलक्षणायाः एव वृद्धेर्निषेधः। तस्या अनिडादौ सिचि चरितार्थत्वात्। अस्तुमेवार्थं मनसि निधाय क्वचित् पुस्तकेषु हलंतलक्षणा वृद्धिर्नेत्येव पठ्यते। इरइत्संज्ञेति। इकारस्य उपदेशे अजनुनासिक इति रेफस्य तु हलंत्यमिति प्रत्येकमित्संज्ञायामिदितश्च इति नुम् स्यादिति भावः। एतस्यैव व्यर्थ्यं च श्लिङ्व्यत्क्तायां चाचोत्यत्र स्फुटीभविष्यति। श्चुश्च्योतेतिश्रपूर्वः स्वपः। यकाररहितोप्ययमिति। तथा च प्रयुज्यते मधुश्चुतं घृतमिव सुपूतमिति। मंथ। अयं क्रयादावपि पिधगत्सां। अयमुदिदिति केचित्। तन्न सिध्यति वुद्ध्यत्याः पयनानिर्देशात् सिधिंतं बुधितमिति दृत्तिग्रंथविरुद्धं। उदित्त्वे तु दि-

नेटि। ७।२।५। इडादौ सिचि प्रागुक्तं न स्यात्। माभवान् नतीत्। अतिष्टां। अतिषुः॥ १॥ चिती संज्ञाने। चेतति। चिचेत। अचेतीत्। अचेतिष्टां। अचेतिषुः। २। च्युतिर् आसेचने। सेचनमार्द्रीकरणं। आङीषदर्थे भिव्याप्तौ च। इरइत्संज्ञा वाच्या। च्योतति। चुच्योत। इरितो वा। ३।१।५७॥ इरितो धातोश्च्लेरङ् वा स्यात् परस्मैपदे परे। अच्युतत्। अच्योतीत्। ३। श्च्युतिर् क्षरणे। श्च्योतति। चुश्च्योत। अश्च्युतत्। अश्च्योतीत्। यकाररहितोप्ययं श्चोतति। ४। मन्थ विलोडने। विलोडनं प्रतीघातः। मन्थति। ममन्थ। यासुटः कित्वाद् आशिषीति किल्लादनिदितामिति नलोपः मथ्यात्॥ ५॥ कुथि पुथि लुथि मथि हिंसासंक्लेशनयोः। इदित्वान्न लोपो न। कुंथ्यात्। मंथ्यात्। ९। षिधु गत्यां। सेधति। सिषेध। असेधीत्। सात्पदाद्योरिति निषेधे प्राप्ते। उपसर्गात्सुनोति सुवति स्यति स्तौति स्तोभति स्थासेनयसेधसिचसञ्जस्वञ्जां। ८।३।६५। उपसर्गस्थान्निमित्तादेषां सस्य षः स्यात्। सदिरप्रतेः। ८।३।६६। प्रतिभिन्नादुपसर्गात् सदेः सस्य षः स्यात्॥ १९. तो वे ति स्त्कायां इड्विकल्पान्निष्ठायामिड्न स्यात्। यस्य विभाषेति निषेधात्। सिषेधेति आदेशप्रत्यययोरिति षत्वं। उपसर्गात्। सुनोति सुवतीत्यादिष्तिपा निर्देशो यङ्लुक्‌निवृत्त्यर्थः। तेन अभिसोषवीति। अभिसोषोतीत्यादौ षत्वं नेति प्राचः॥ स्यादिष्वेवाभ्यासस्य षत्वं न सुनोतीत्यादिष्विति नियमान्नेह षत्वप्राप्तिरिति व्यर्थः। प्रतिषेध इति मनोरमादौ स्थितं। सेनयेति णिजंतो नामधातुः सेनया अभियाति अभिषेणयति। सेधेति शपा निर्देशाद्गौ वादिकस्य ग्रहणं न तु सिध्यतेः। परिसिध्यति। गृहादाराद्इत्यत्रैव ता त्ष्मात्तात्व्व्य मित्याह। उपसर्गस्यादिति। निमित्तादिति। इणूरूपात्। कवर्गस्तु नेह संबध्यते। असंभवात्। नच निःषुणोति निःषेधति निः षिंचतीत्यादौ व्यवधानेन इणः परत्वाभावात्॥ ६॥ ६॥ 318



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सस्यषत्वंन स्यादिति शंकं। षत्वविधौ नुम् विसर्जनीयशर्व्यवायेपीत्यधिकारात्। इस्संतादुपसर्गादिति व्याख्याने तु स्यादेवात्राव्याप्तिः। दुरः षत्वणत्वयोरित्युपसर्गत्वप्रति
षेधादुःसुनोतिदुःसेधतीत्यादौ नुषत्वेन न भवितव्यमिति दिक्। मूर्द्धन्यादेशफलितमाह। सस्यषः स्यादिति। स्यादिषु प्राक्सितादिस्त्यत्रक्रमज्ञानस्यापेक्षितत्वात् तेनैव
क्रमेणषत्वसूत्राणि व्याचष्टे। सदिरप्रतेः। अप्रतेः किं। प्रतिसीदति। षष्ठ्यर्थे प्रथमेत्याह। सदेरिति॥ ꣸ ॥स्तन्भेः। सौत्रस्येति। स्तन्भुस्तुन्भुइतिसूत्रे निर्दिष्टस्यरोध
नार्थस्य न तु ष्टभिप्रतिबंधइत्यस्येति भावः। एवंच स्तन्भुइत्यङ् विधायकसूत्रेपि सौत्रस्यैव ग्रहणमिति बोध्यं। एतच्च लक्षणप्रतिपदोक्तपरिभाषयालभ्यते। सौत्रं
द्विधा तु नेकारोपधइति प्रतिपदोक्तः। इदित्वान्नुमिष्टभिर्लाक्षणिकस्तेन विस्तंभतेइत्यादौ षत्वं न। उदः स्थास्तंभोरिति सूत्रे मकारोपधग्रहणेन उभयोरपि ग्रहणादु
त्तंभते इति द्वयोरपि रूपं तुल्यं। मकारस्योभयत्रापि लाक्षणिकत्वात्। उत्तरार्थइति। उत्तरसूत्रे स्तन्भेरेवानुवृत्त्यर्थइति भावः। ननु सदिस्तन्भ्योरिति सूत्रितेपि एकदेशो स्व

स्तन्भेः। ८।३।६७। सौत्रस्य सस्य षः स्यात्। योगविभाग उत्तरार्थः। किञ्च। अप्रतेरिति नानुवर्त्तते। वाहुप्रतिष्टम्भविवृद्धमन्युरिति रघुवंशे। अव।
च्चाऽऽलम्बनाऽऽविदूर्य्ययोः। ८।३।६८। अवात्स्तम्भेरेतयोरर्थयोः षत्वं स्यात्। वेश्च स्वनो भोजने। ८।३।६९। व्यवाभ्यां स्वनतेः षः स्याद्भोजने। परिनि
विभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्। ८।३।७०। परिनिविभ्यः परेषामेषां सस्य षः स्यात्। निषेधति। प्राक्सितादड्व्यवायेपि। ८।३।६३
सेवसितस्सत्र सितशब्दात्प्राक्ये सुनोत्यादयस्तेषामड्व्यवायेपि षत्वं स्यात्। न्यषेधत्। न्यषेधीत्। न्यषेधिष्यत्॥ ꣸ ॥ ꣸ ॥

रितत्वप्रतिज्ञानात् कथंचिदनुवृत्तिर्भविष्यतीत्यत आह। किंचेति। नानुवर्त्तत इति। तथाच स्तन्भेरित्यत्राऽननुवृत्तये योगविभाग आवश्यक इति भावः। अवाच्चा
। चकारश्चित्त्यप्रयोजन इत्याहुः। आलंवनमाश्रयणं। यथायष्टिमवष्टभ्यास्ते। तामाश्रित्यतिष्ठतीत्यर्थः। आविदूर्यं सामीप्यं। तच्च प्रयोगोपाधिः। अवष्टब्धा गौः
। निरुद्धासतीसमीपेऽऽस्तेइत्यर्थः। एतयोः किं। अवस्तब्धो वृषलः शीतेन केचिदिह अविदूरशब्दात् स्वार्थे ष्यञ्। आविदूर्यमनतिदूरं ईषद्दूरमित्यर्थः तथाच अ
विदूरशब्दान्नञ्पूर्वात्तत्पुरुषादिति निषेधे प्राप्ते अत एव निपातनाद्वा प्रत्यय इति मनोरमाग्रंथोक्तिर्नातीवोपयुज्यत इत्याहुः। वेश्चेत्यं विष्वणति। सशब्दं भुंक्ते
इत्यर्थः। अट्कुप्वाङिति णत्वं। एवमवष्वणति। व्यष्वणत्। विषष्वाण। स्यादिष्वभ्यासेनेति षत्वं। भोजने किं। विस्वनति वीणा। परिनिविभ्यः। सेवसत्र अकार उच्चा

॥सि॰कौ॰टीका॰३६८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति·

सि·कौ·
टी·त·
२२

प्रत्ययेशपानिर्देश एवास्त्विति शंक्यं। वकारांतानामूठ् भाविनां यङ्लुक् नास्तीति वक्ष्यमाणत्वात्। षेवृ सेवायां। परिषेवते। षिञ् बंधने क्तांतः सितशब्दः एरजंतः पचाद्यजंतो वा सयशब्दः। षिषितः। विषयः। असय विशिष्टग्रहणात्किं। विसिनोति। षिबु तंतुसंताने। परिषीव्यति। षह मर्षणे। परिषहते। सुडागमः। परिष्करोति। स्तसंज्ञोरुपसर्गात्सुनोतीति सेव सिद्धे परिनिविभ्यः परयोरेतयोः सिवादीनां वाड्व्यवायेपीति विकल्पार्थं पुनर्वचनं। प्राक्सितात्। उपसर्गात्सुनोतीत्यादिना विहितं षत्वमड्व्यवाय एवेति अमनिवारणार्थमपिशब्दस्योपादानं तेषामिति पंचदशानामित्यर्थः। अभ्यषुणोदित्यादीन्युदाहर्तव्यानि॥ ❁ ॥ स्थादिषु। इह हेवाकेत्याद्यं षत्वविध्यर्थं द्वितीयं तु नियमार्थमित्याशयेनाह। व्यवायेपि षत्वमेषामेव चेति। स्थादीनां दशानामेवाभ्यासस्य षत्वमित्यर्थः। तत् फलं तु घूर्णेरणो अभिसुस्वषति। अत्रोक्तनियमादभ्यासस्य कारस्य न षत्वं द्वितीयस्य तु स्तौतिण्योरिति नियमान्न भवति। अभिसिषासति इत्यत्र तु षणोऽभावादभ्यासात्परस्य षत्वे पूर्वस्य तु उक्तनियमान्नेति बोध्यं। स्यादेतत्। निषि

स्थादिष्वभ्यासेन चाऽभ्यासस्य। ८।३।६४। प्राक्सितात् स्थादिष्वभ्यासेन व्यवायेपि षत्वं स्यात्। एषामेव चाभ्यासस्य न तु सुनोत्यादेः। नाम् निषिषेध। निषिषिधतुः। १०। सेधतेर्गतौ। ८।३।११३। गत्यर्थस्य सेधतेः षत्वं न स्यात्। गङ्गामभिसेधति। ११। षिधू शास्त्रे माङ्गल्ये च। शास्त्रं शासनम्। स्वरतिसूतिसूयतिधूञूदितो वा। ७।२।४४। स्वरत्यादेरूदितश्च परस्य वलादेरार्धधातुकस्येड् वा स्यात्। झषस्तथोर्धोऽधः। ८।२।४०। झषः परयोस्तथोर्धः स्यात् न तु दधातेः। जश्त्वं। सिषेद्ध। सिषेधिथ। सेद्धा। सेधिता। सेत्स्यति। सेधिष्यति। असेत्सीत्॥

९. षेधेः। सादेरभ्यासस्योपसर्गात्सुनोतीत्यनेन सिद्धमभ्यासात्परस्य तु आदेशप्रत्यययोरित्यनेनेति किमाद्यवाक्येन। अत्राहुः। फलत्रयार्थमाद्यवाक्यं तथाहि। अचोपदेशार्थं सेनयाभियातुमिच्छति अभिषिषेणयिषति। अवर्णांताभ्यासार्थं च। अद्यासनं गोत्रभिदोऽधितष्ठौ। षणिप्रतिप्रसवार्थं च। अभिषिषिक्षति। षिच सरणे स्तौतिण्योरेवेति नियमात् षणभूते सनि निवृत्तमपि षत्वमुपसर्गमाश्रित्य अत्र भवतीति। सेधतेर्गतौ। श्तिपा निर्देशाद्यस्यार्थादस्माद्यङ्लुकि न निषेधः। तेन उपसर्गमाश्रित्य षत्वं भवत्येव। विषेषिधीति। न च सेधेतिशपा निर्देशाद्यङ्लुकि उपसर्गात्सुनोतीति षत्वं न भवेदिति शंक्यं। देवादिकनिवृत्त्यर्थं तथा शपा निर्देशस्य चरितार्थत्वात्। अन्यथा सेधतेरिति श्तिपादिनिर्देशस्यैव पर्याप्तेरिति दिक्। षिधू शास्त्रे मांगल्यं मंगलक्रिया। स्वार्थे ष्यञ्। स्वरति सूति। सूशब्दोपतापयोः भ्वादिः। ननु स्वरतिसूतिधूञूदितो वेति सूत्र्यतां॥ १० ॥ एम·
२२

319

CC-0. In Public Domain. Digitization by eGangotri

किमनेन स्तिसूयसोः पृथक्ग्रहणेन । मैवं । तथा हि स्तितिनिरनुबंधकपरिभाषया षूङ्प्रेरणे इति तौदादिकस्यैव ग्रहणं स्यान्नत्वादादिकदैवादिकयोरेतयोः । नचैवं षूङ् इति यङ्लुगन्तमिति वाच्यं । लुग्विकरणालुग्विकरणयोरिति परिभाषया अलुग्विकरणस्य सूयतेरेव ग्रहणप्रसंगात् । अस्याश्च परिभाषायाः स्तिसूयसोः पृथक्ग्रहणमेव ज्ञापकमित्याहुः । धूञ् कंपने स्वादिः । क्र्यादिश्च सानुबंधनिर्देशो धू विधूनने इत्यस्य निवृत्त्यर्थः । इट्सन्निवेश्यतो वेति वर्तमाने पुनर्वाग्रहणं लिङ्सिचोर्विकल्पनिवृत्त्यर्थं अपवत्तयोः । अध इति किं । धत्तः । असैत्सीदिति । अस्तिसिच इति इडागमः । वदव्रजेति वृद्धिः । ततश्चैवं ॥ ॥ झलो झलीति । संयोगान्तस्य सलोप इति रासस्यैव स्यान्नतः सस्येति चानुवर्तते तेनाह । सस्य लोपः स्यादिति । पदस्येत्यधिकारात् प्रत्यासत्त्या झलो झलि सस्येति निर्दिष्टानां त्रयाणामेकपदसंबंधित्वे लोपोयं ।

झलो झलि । ८।२।२६ । झलः परस्य सस्य लोपः स्यात् झलि । असैद्धां । असैत्तुः । असैत्सीः । असैद्धं । असैद्ध । असैत्सम् । असैत्स्व । असैत्स्म । पक्षे असेधीत् । असेधिष्टामित्यादि । १२ । खाद भक्षणे । ऋकार इत् । खादति । चखाद । १३ । खद स्थैर्ये हिंसायां च । चाद्भक्षणे । स्थैर्ये अकर्मकः । खदति ॥ अत उपधायाः । ७।२।११६ । उपधाया अतो वृद्धिः स्यात् ञिति णिति च प्रत्यये परे । चखाद । णलुत्तमो वा । ७।१।९१ । उत्तमो णल्वा णित्स्यात् । चखाद । चखद । अतो हलादेर्लघोः । ७।२।७ । हलादेर्लघोरकारस्य इडादौ परस्मैपदे परे सिचि वृद्धिर्वा स्यात् । अखादीत् । अखदीत् । १४ । वद स्थैर्ये । पवर्गीयादिः । वदति । ववाद । वेदतुः । वेदिथ । ववाद । ववद । अवादीत् अवदीत् । १५ । गद व्यक्तायां वाचि । गदति । जगाद ॥

९८ । तेन सोमसुत्स्थानमित्यत्र न भवति । झलः किं । अनैष्टां । झलि किं । असैत्सीत् । असेधीदिति । नेटीति वृद्धिप्रतिषेधः । गुणाः । खाद । ऋकार इदिति । तेन नाग्लोपीति निषेधे अचखादत् । अत उपा । अतः किं । तुतोद । उपधायाः किं । गणपति । इह अतो लोपं बाधित्वा परत्वाद्वृद्धिः स्यात् । अतो हलादेः । इह सिचि वृद्धिरिति सूत्रमनुवर्तते । नेटीति सूत्रादिडिति अर्णोन्ते विभाषेत्यतो विभाषाग्रहणं च तदाह । इडादावित्यादि । अतः किं । अदेवीत् । हलादेः किं । मा भवानतीत् । अतो ह लघोः किं । अगदीत् । अरसीत् । इडादौ किं । अपाक्षीत् । परस्मैपदे किं । अयतिष्ट । अयतिषातां । अचकासीदित्यत्र चकारादकारस्य वृद्धिवारणाय येन नाव्यवधानमिति न्यायेन यद्येकवर्णव्यवधानमेवाश्रीयते तदा त्वरसीदित्यत्रापि प्रसक्त्यभावाल्लघोरिति शक्यमकर्तुमित्याहुः । तपरकरणं स्पष्टार्थं । पवर्गीयादिरिति । दंत्योष्ठ्यादित्वे तु न शसददेत्येत्वाभ्यासलोपनिषे



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति·
सि·कौ·
टी·त·
२४

नेर्गदनद। गदादीनां चतुर्णां णोपानिर्देशः। स्यसादीनामेकादशानां शिनपानिर्देशश्च यङ्लुक्निवृत्त्यर्थः। तेन प्रनिजागदीति। प्रनिनानदीति प्रनिसासनीति प्रनिजंघनीति। इत्यादौ णत्वं न। घुशब्देन घुसंज्ञकादाधादयः षट् गृह्यन्ते। डुदाञ् प्रणिददाति। दाण्। प्रणियच्छति। दो। प्रणिद्यति। देङ्। प्रणिदयते। धेट्। प्रणिधयति। डुधाञ् प्रणिदधाति

नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च। ८।४।१७। उपसर्गस्थान्निमित्तात्परस्य नेर्नस्य णः स्यात् गदादिषु परेषु। प्रणिगदति॥ १६ ॥ रद विलेखने। विलेखनं भेदनम्। रराद। रेदतुः॥ १७ ॥ णद अव्यक्ते शब्दे। णो नः। ६।१।६५। धातोरादेर्णस्य नः स्यात्। णोपदेशास्त्वनर्द्नाटिनाथ्नाधृनन्दनक्कनॄनृतः। नाटेर्दीर्घाहेरयपर्युदासाट्टयादिर्णोपदेश एव। तवर्गचतुर्थान्तनाधतेर्नर्दनद्योश्च केचिण्णोपदेशतामाहुः। उपसर्गादसमासेऽपि णोपदेशस्य। ८।४।१४। उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः स्यात् समासेऽसमासेऽपि। प्रणदति। प्रणिनदति॥ १८ ॥ अर्द गतौ याचने च। अत आदेः तस्मान्नुड् द्विहलः। ७।४।७१। द्विहलो धातोर्दीर्घीभूतादकारात्परस्य नुट् स्यात्। आनर्द। आर्दीत्॥ १९ ॥ नर्द गर्द शब्दे। णोपदेशत्वाभावान्न णः। प्रनर्दति॥ २० ॥ गर्दति। जगर्द॥ २१ ॥ तर्द हिंसायाम्। तर्दति॥ २२ ॥ कर्द कुत्सिते शब्दे। कुत्सिते कौक्षे। कर्दति॥ २३ ॥ खर्द दन्दशूके। दंशहिंसादिरूपायां दन्दशूकक्रियायामित्यर्थः। खर्दति। चखर्द॥ २४ ॥ अति अदि बन्धने। अन्तति। आनन्त॥ २५ ॥ अन्दति। आनन्द॥ २६ ॥ इदि परमैश्वर्ये। इन्दति। इन्दाञ्चकार॥ २७ ॥ बिदि अवयवे। पवर्गतृतीयादिः। बिन्दति। अवयवं करोतीत्यर्थः। भिदीति पाठान्तरम्॥ २८ ॥ गडि वदनैकदेशे। गण्डति। अनन्त्यादयः पञ्च तेन तिङ्क्ष्वया इति काश्यपः। अन्ये तु निङमपीच्छन्ति॥ २९ ॥ णिदि कुत्सायाम्। निन्दति। प्रणिन्दति॥ ३० ॥ टुनदि समृद्धौ॥ ॥

१ माशब्देन मेङ् माङोरेव ग्रहणं घुप्रकृतिमाङि ति पठित्वा भाष्यादौ तथा व्याख्यानात्। णो नः। धातोरिति। धात्वादेः षः सः इत्यतोऽनुवर्तनाद्धात्वादेरित्येव। नेह। अणति। णोपदेशान्नपर्युदासमुखेनाह। णोपदेशास्त्विति। नर्दशब्दो नट अवस्यंदने। चुरादिः। यस्तु नट नृत्तौ इति घटादिः स नेह गृह्यते। नाटीति दीर्घनिर्देशात्। नाथ्नाधृयांचादौ। टुनदि समृद्धौ॥ ६ ॥ ६ ॥

राम·
२४

320

नक्क नाशने। न्नन ये। नृती गात्रविक्षेपे। णभ्योऽष्टभ्यो भिन्ना इत्यर्थः। नवर्गेति। तेषां मते तु पंचभ्यो भिन्ना णोपदेशाः उपसर्गाद्। समासेऽङ्गुलेः संग इत्यतोऽनुवर्तनात्समास एव
वस्यादित्स समासग्रहणं कृते तु तस्मिन्न समास एव स्यादित्सपेक्षे ग्रहणं कृतं। प्रणिनदतीति। नेर्गदेति णत्वं। धातुनकारस्य तु उपसर्गादसमास इति णत्वं न भवत्यडादिभिन्ने
नव्यवधानात्। तच्छब्देन कृतदीर्घाकारः परामृश्यत इत्याह। दीर्घीभूतादिति। खर्द दंदशूकस्य सर्पत्वात्तद्वाचित्वे धातुत्वं न संगच्छत इत्यत आह। दंदशूकक्रियायां

आदिर्ञिटुडवः।१।३।५। उपदेशे धातोराद्या एते इतः स्युः। नन्दति। इदित्वान्नलोपो न। नन्द्यात्।३१। चदि आह्लादे। चचन्द।३२। त्रदि चेष्टायाम्
तत्रन्द।३३। कदि क्रदि क्लदि आह्वाने रोदने च। चकन्द।।३४।। चक्रन्द।।३५। चक्लन्द।।३६।। क्लिदि परिदेवने। चिक्लिन्द।३७। शुन्ध शुद्धौ। शु
शुन्ध। नलोपः। शुध्यात्।३८। अथ कवर्गीयान्ता अनुदात्तेतो द्विचत्वारिंशत्। शीकृ सेचने। तालव्यादिः दन्त्यादिरित्येके। शीकते। शिशी
के।१। लोकृ दर्शने। लोकते। लुलोके।।२।। श्लोकृ सङ्घाते। सङ्घातो ग्रन्थः। स चेह ग्रथ्यमानस्य व्यापारो ग्रन्थितुर्वा। आद्ये अकर्मको द्वितीये सकर्मकः
।श्लोकते।।३।। द्रेकृ ध्रेकृ शब्दोत्साहयोः। उत्साहो वृद्धिरौद्धत्यञ्च। दिद्रेके।४। दिध्रेके।५। रेकृ शङ्कायाम्। रेकते।६। सेकृ स्रेकृ स्रकि श्रकि श्लकि गतौ
त्रयो दन्त्यादयः। द्वौ तालव्यादी। अषोपदेशत्वान्न षः। सिसेके।११। शकि शङ्कायाम्। शङ्कते। शशङ्के।। १२।। अकि लक्षणे। अङ्कते। आनङ्के।१३
।वकि कौटिल्ये। वङ्कते।। १४।। मकि मण्डने। मङ्कते।। १५।। कक लौल्ये। लौल्यं गर्वश्चापल्यञ्च। ककते। चकके।१६। कुक वृक आदाने। कोकते
।चुकुके।१७। वर्कते। ववृके।१८ ऋदुपधेभ्यो लिटः कित्त्वं गुणात्पूर्वविप्रतिषेधेन। चक तृप्तौ प्रतिघाते च। चकते। चेके।। १९।। ककि वकि श्वकि
त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ तिकृ तीकृ रघि लघि गत्यर्थाः। कङ्कते। डुढौके। तुत्रौके॥ ९मिति। दंदशूककर्तृकायामित्यर्थः। आ

नेत्तीति इदित्वान्नुम् तस्मान्नुड् द्विहल इति नुड्भावदनेकदेश इति। तत्क्रियायामित्यर्थः॥ ॐ ॥ आदिर्ञिटुडवः उपदेशेऽजनुनासिक इत्यतोऽनुवर्तनादाह। उ
पदेश इति। उपदेशे किं। निकारीयति। ञिष्विप्। ञीतः क्तः। शुभः। द्वितोऽथुच्। नंदथुः। ड्वितः क्त्रिः। कृत्रिमं। क्लिदि परिदेवने। अनुदात्तेत्सु पठितस्येह पाठः परस्मैप
दार्थः। क्रियाफलस्य कर्तृगामित्वेऽपि परस्मैपदार्थं स्वरितेत्सु अयं न पठितः। शुंध शुद्धौ। अयं शोचकर्मणि युजादौ। मांगलि॥ ६ ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri



करणधतिस्तवर्गीयांत्तस्तदनुरोधेनकतिचित्तवर्गीयांताःपठिताः।इदानींलोकप्रसिद्धकादिपाठक्रमेणाह।अथेस्यादि।चुकुके इति।परमपिगुणांवाधित्वानिसत्ता
द्संयोगादितिकित्वं॥ ः ॥सुब्धालिसादि।सुब्धातेरुदाहरणानि।षट्दंत्ताव्रसवोडनतुमाचष्टेणिचिटिलोपः।षोडयतिएवंषंडंकरोत्साचष्टेवाषंडयति।षंडीया
त्तीस्यत्रतुषंडशब्दात्क्यचिईत्वंवोध्यं।एतच्चवार्तिकंभाष्येप्रसाख्यातं।तथाहि।धात्वादेरितिसूत्रेउपदेशइतिवर्तते।नचसुब्धातृनामुपदेशोऽस्ति।ष्टिवुष्वष्कतो
सुब्धातुष्ठिवुष्वष्कतीनांसत्वप्रतिषेधोवक्तव्यः॥ष्वष्कते।षष्वष्के।अत्रतृतीयन्द्न्यादिमेके।लघिभोजननिवृत्तावपि॥३५॥अघिवघिमघि
गत्याक्षेपो।आक्षेपोनिन्दा।गतोगत्यारम्भेचेत्यन्ये।अङ्घते।आनङ्घे।वङ्घते।मङ्घते।मघिकैतवेच॥३८॥राघृलाघृद्राघृसामर्थ्ये।राघते॥३९
।लाघते।४०।ध्राघृइत्यपिकेचित्।द्राघृआयामेच।आयामोदैर्घ्यं।द्राघते॥४१॥श्लाघृकत्थने।श्लाघते।४२।अथपरस्मैपदिनःपञ्चाशत्॥
५०॥फक्कनीचैर्गतौ।नीचैर्गतिर्मन्दगमनमसद्व्यवहारश्च।फक्कति।पफक्क॥१॥तकहसने।तकति॥२॥तकिकृच्छ्रजीवने।तङ्कति॥३॥
वुक्कभषणे।भषणंश्वरवः।वुक्कति॥४॥कखहसने।प्रनिकखति॥५॥ओखृराखृलाखृद्राखृध्राखृशोषणालमर्थयोः।ओखति।ओखा
ञ्चकार॥१०॥शाखृश्लाखृव्याप्तौ।शाखति॥१२॥उखउखिवखवखिमखमखिणखणखिरखरखिलखलखिइखइखिईखिवलगर।
शब्दः समीपवाची सन्निपिरिस्याद् अतः समीपाविति अतो वृद्धिः स्यादिति इह अत इत्यस्य तत्रानुवृत्त्यादिकं स्वीकर्तव्यं। अन्यथा प्रयोजनाभावादिकं परिभाषानुपस्था
नेष्फलत्वं स्य परिभाषया अंगत्वस्य स्यादिति भावः। यद्यपि अतो लरः स्येत्युक्तेपि लरांतस्यांगस्य अतः सिचि परे वृद्धिरित्यर्थे स्वीकृते येन नाव्यवधानन्यायेन इट्स्थितित
यापि अंगस्य सिचि परे अतो वृद्धिरित्यर्थोपि प्रतीयेत ततश्चाश्वत्थीदित्यत्रातिप्रसंगः स्यात् तन्निवारणाय सूत्रे अंत ग्रहणं कृतमिति। तदनुरोधेनांतशब्दस्य समीपवा
चित्वमतः इत्यस्य चानुवृत्तिः स्वीकृतेति बोध्यं। अतः समीपाविति किं। अक्षोरीत्। अमीलीत्। लांतस्यांगस्य किं। श्वल्ल आशुगमने। अश्वल्लीत्। अत्राकारसमी
पो यो लकारः स नांगस्यांतः यस्त्वंगस्यांतः स तु नाकारसमीपः। ननु लेत्यस्य लुप्तषष्ठीकत्वाभ्युपगमेप्यंतशब्दस्यावयववाचित्वं स्वीकृत्य अंगस्यांतं यत् लं तस्या
तः तत्समीपस्यातो वृद्धिरिति व्याख्यानेनैव तत् इत्यस्यानुवृत्तिर्नोपेक्षितेति चेन्न। अत्राहुः। हलंत्यमिति सूत्रे मनोरमायां सामीप्यं पक्षार्थ इति पक्षस्य निराकरणात्तदनु
रोधेनात्रातः इत्यस्यानुवृत्तिराश्रितेति। अत्र केचित्। अतो लांतस्येति लुप्तसप्तमीकं। अथ वा अतो लांत इति व्यस्तमेव सूत्रयितुं शक्यं। तथा च अंगस्यांतं यत् लं तस्मि
न्परे ऽव्यवहितस्यातो वृद्धिरिति व्याख्यानसंभवान्नांतत्रानुवृत्त्याद्याश्रयणक्लेशः न चांगस्य विशेष्यत्वेनैवान्वयो युज्यते न तु विशेषणत्वेन पदांगाधिकारे तस्य तदंत
स्येति परिभाषायाः पदमंगं च विशेष्यं भवतीत्यभिप्रायवर्णनादिति वाच्यं। अक्षोपोन इति सूत्रे ऽगावयवो ऽसर्वनामस्थाने सेवं भाष्यकारादिभिर्विशेषणतया। 333
व्याख्यानात् क्वचिद्विशेषणत्वेप्यंगस्य न क्षतिरित्याहुः। नेटीत्यादि। यद्यपि पुरस्तादपवादन्यायेन नेटीत्यस्यापवादो न तु विकल्पस्यापि तथापि वाध्यसामान्यचिं
तायां स्वविषये प्राप्तं सर्वं वा बाध्यत इति पुरस्तादपवादन्यायोत्र न प्रवर्तत इति भावः। मील संकोचे इति। नेत्रसंकोचे तु प्रचुरप्रयोगः। तिलगतौ। तिलस्नेहने इति चु
रादौ। दल विशरणे। विशरणमवयवानां विभागः। धोर्क्षं धोरितकं गत्यामंगमनविशेषः। निष्ठांतात् संज्ञायां कन्। त्सर छद्मनाकपदेन गतिः छद्मगतिः। क्मर हूर्
र्छने। हूर्छनं कौटिल्यं। ष्ठिवु निरसने। अस्य त्वु टिष्ठेवनं। ष्ठीवनाऽत्र कृशक्तन्सूत्रे तांस्य पुनर्निक्षिपेदित्यत्र एषोदरादित्वात्सस्क्षेदीर्घईकारइत्याहुः॥ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सनूलिटोर्जेः।संन्लिशिनमित्तइति।यदितुसनिलिटिचपरेयोभ्यासइतिप्राचोव्याख्यानमाद्रियेततदायेननाव्यवधानन्यायेनमकृतिव्यवधानंसोढव्यमेवापरंतुयङ्।
लुगंतात्सनिजेनपिषतीसन्नकुत्वंस्यात्।नचतन्माधवग्रंथसंमतमितिभावः।धिन्विकृण्व्योरच।अलोंत्यस्येतिवकारस्याकारादेशश्चकारेणातुउप्रत्ययोनुकृष्यते
सनूलिटोर्जेः।७।३।५७।जयतेःसनूलिटोर्निमित्तोयोऽभ्यासस्ततःपरस्यकुत्वंस्यात्।जिगाय।जिग्यतुः।जिग्युः।जिगयिथ।जिगेथ।जिगाय।जिग।
य।जिग्यिव।जिग्यिम।जेता।जीयात्।अजैषीत्।५७।जीवप्राणधारणे।जिजीव।५८।पीवमीवतीवनीवस्थौल्ये।पिपीव।मिमीव।तितीव।नि
नीव।६२।क्षीवुक्षेवुनिरसने।६४।उर्वीतुर्वीथुर्वीदुर्वीधुर्वीहिंसार्थाः।उर्वीच्चकार।उपधायांचेतिदीर्घः।तुतूर्वी।६९।गुर्वीउद्यमने।गूर्वति।।
जुगूर्व।७०।मुर्वीवन्धने।७१।पूर्वपर्वमर्वपूरणे।७४।चर्वअदने।७५।भर्वहिंसायाम्।७६।कर्वखर्वगर्वदर्पे।७८।अर्वशर्वषर्वहिंसा।
याम्।आनर्व।शर्वति।सर्वति।८१।इविव्याप्तौ।इन्वति।इन्वाञ्चकार।८३।पिविमिविणिविसेचने।नत्वणोपोमूर्द्धन्योष्मादिरिसेकः।सेवन
इतितरङ्गिण्याम्।पिन्वति।पिपिन्व।८६।हिविदिविधिविजिविप्रीणनार्थाः।हिन्वति।दिन्वति।धिन्विकृण्व्योरच।३।१।८०।अनयोरका
रोन्तादेशःस्यादुप्रत्ययश्चशब्विषये।अतोलोपः।तस्यस्थानिवद्भावाल्लघूपधगुणोन।उप्रत्ययस्यपित्तुगुणः।धिनोति।धिनुतः।धिन्वन्ति
।लोपश्चास्यान्यतरस्यांम्वोः।६।४।१०७।असंयोगपूर्वोयःप्रत्ययोकारस्तदन्तस्याङ्गस्यलोपोवास्यात्म्वोःपरयोः।धिन्वः।धिनुवः।धि
नुमः।धिन्मः।मिपित्तुपरत्वाद्गुणः।धिनोमि।उतश्चप्रत्ययादसंयोगपूर्वात्।६।४।१०६।असंयोगपूर्वोयःप्रत्ययोकारस्तदन्तादङ्गात्परस्य
हेर्लुक्स्यात्।धिनु।नित्यत्वादुकारलोपात्पूर्वमाट्।धिनवाव।धिनवाम।जिन्वति।इत्यादि।९०।रिविरविधविगत्यर्थाः।रिण्वति।रण्वति।
धन्वति।९३।कृविहिंसाकरणयोश्च।चकाराद्गतौ।कृणोति।इत्यादिधिनोतिवत्।अयंस्वादौच।९४।मवबन्धने।मवति।मेवतुः।मेवुः।अम
वोपदेवेनत्वनयोस्तनादित्वंस्वीकृतं।तन्मतेतुचकारंविनाप्युप्रत्ययलाभः।अतोलोपइति।यत्तुपिउपदेशोऽदन्तत्वंनास्तितथाप्याईधातुकोपदेशेतदस्त्येव।धि

CC-0. In Public Domain. Digitization by eGangotri



अकारादेशे कृते चानुकृष्टस्य पश्चाज्जायमानत्वादिति भावः। लोपश्च असंयोगपूर्वो यः प्रत्ययोकार इति॥ ।प्रत्ययविशेषणं तु न कृतं। अश्नुवः। अस्नुम इत्या
दावनिष्टाभावेपि अश्नुवहे इत्यादावतिप्रसंगात्। एवमुतश्चेति सूत्रेपि अस्नुहीत्यत्र दोषाभावेपि अश्नुहीत्यत्रातिप्रसंगः स्यादित्यसंयोगपूर्वेति प्रत्ययविशेषणं न कृ
तमित्याहुः। अश्नुहीति परस्मैपदं यद्यपि लोके दुर्लभं तथापि वेदाभिप्रायेण तत्प्रयोगस्य साधुत्वं बोध्यं। आप्नुहीति पाठस्तूचितः। कृवि। अयमिति। कृणोति। स्यादिरित्यर्थः
स्यादौ हि कृवीत्ययं धातुर्न पठ्यते किंतु कृञ् हिंसायामिति। तस्य च परस्मैपदेषु सार्वधातुके कृणोतीत्यादौ निरूपाणि तुल्यानीति फलितोर्थः॥ ॥ अथ रक्षणाएकोनविं

अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु। अवति। आव। मा।
भवानवीत्। १६। धावु गतिशुद्ध्योः। स्वरितेत्। धावति। धावते। दधाव। दधावे। १७। अथ घान्ता आत्मनेपदिनः। धुक्ष धिक्ष संदीपनक्लेशनजीव
नेषु। धुक्षते ——— दुधुक्षे। धिक्षते। दिधिक्षे। २। वृक्ष वरणे। वृक्षते। ववृक्षे। ३। शिक्ष विद्योपादाने। शिक्षते। ४। भिक्ष भिक्षायामलाभे लाभे च॥
भिक्षते। ५। क्लेश अव्यक्तायां वाचि। बाधन इति दुर्गः। क्लेशते। चिक्लेशे। ६। दक्ष वृद्धौ शीघ्रार्थे च। दक्षते। ददक्षे। ७। दीक्ष मौण्ड्येज्योपनयननियम
व्रतादेशेषु। दीक्षते। दिदीक्षे। ८। ईक्ष दर्शने। ईक्षाञ्चक्रे। ९। ईष गतिहिंसादर्शनेषु। ईषाञ्चक्रे। १०। भाष व्यक्तायां वाचि। भाषते। ११। वर्ष स्नेहने
दन्तोष्ठ्यादिः। ववर्षे। १२। गेषृ अन्विच्छायाम्। ग्लेषृ इत्येके। अन्विच्छा अन्वेषणं। जिगेषे। १३। पेषृ प्रयत्ने। पेषते। १४। जेषृ णेषृ एषृ प्रेषृ गतौ। जेष
ते। नेषते। एषाञ्चक्रे। पिप्रेषे। १८। रेषृ हेषृ ह्रेषृ अव्यक्ते शब्दे। आद्यो वृकशब्दे। ततो द्वौ अश्वशब्दे। रेषते। हेषते। ह्रेषते। २१। कासृ शब्दकुत्सायाम्॥ ॥

शक्तिरर्थाः। कान्तिः शोभा दीप्तिस्तेज इत्याहुः। तृप्तिरिच्छानाशः। स्वाम्यर्थः स्वामित्वं। हिंसा हननं। आदानं ग्रहणं। न चात्र दानमेवार्थोस्त्विति वाच्यं। भागे वृद्धौ ग्रहे वधे इत्येव
मर्थानां विशिष्योपदेशेन गणितत्वात्। भिक्षाया अलाभे लाभे लयोर्याः। स्वामी तु क्लेश अव्यक्तायां वाचि चेति पठित्वा इमावपि भिक्षधातोरर्थौ इति मन्यते। क्लिश उ
पतापे इति दिवादौ क्लिश विबाधने इति क्र्यादौ। दीक्ष पंचार्थाः। ईष गतौ। गुरोश्च हल इत्य प्रत्यये टाप्। ईषा। मनस ईषा मनीषा। शकंध्वादिः। मनीषामभिनिविष्टं। मनीषितं॥
प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्चेति णिचि तदंतात्क्तः। ईष उंछे इति तु परस्मैपदिषु। इत्यादयस्त्रयः। इष गतौ दिवादिः। इषु इच्छायां तुदादिः। इष आभीक्ष्ण्ये क्र्यादिः



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कासांचक्रे इति। कास् प्रत्यये साम्। भासृ दीप्तौ। अस्य ऋदित्त्वं। भाजने विन्तङ् मात्रफलकम्। भाजभासेत्यादिनोपधाह्रस्वस्य विकल्पितत्वात्। णस कौटिल्ये। लिङि निमित्ता। देशादित्वाभावादेत्वं। नेसे। आङः शासि शंसुस्तुताविति नुपरस्मैपदिषु वक्ष्यते। ग्रसु ग्लसु उदित्त्वेति क्त्वायां वेट्। ग्रसित्वा। ग्रस्त्वा। यस्य विभाषेति नेट्। ग्रस्तः। वेहृ जे हृ। आद्य इति वेहतेरति प्रत्यये वेहत् शब्दो निपातितः। पोटायुवतीति सूत्रे इति भावः। वेहत् गर्भोपघातिनी। अंस इति। बाहुशब्दस्य भुजपर्यायस्यास्तु व्यसांन ध्वानेति नि पातितस्य वाढशब्दस्य च निर्विवादत्वादिति भावः। दंत्योष्ठ्यादी इति। उभावपीत्यनुषज्यते अनुदात्तेत्त्वकृतमात्मनेपदमनित्यं। तेन वर्वाहस्कं पुरुषा सनो जाताः सहस्रश

कासाञ्चक्रे। २२। भासृ दीप्तौ। बभासे। २३। णासृ रासृ शब्दे। नासते। प्रणासते। २५। णस कौटिल्ये। नसते। २६। भ्यस भये। भ्यसते। बभ्यसे। २७। आङः शसि इच्छायाम्। आशंसते। आशशंसे। २८। ग्रसु ग्लसु अदने। जग्रसे। जग्लसे। ३०। ईह चेष्टायाम्। ईहाञ्चक्रे। ३१। बहि महि वृद्धौ। बंहते। बबंहे। मंहते। ३३। अहि गतौ। अंहते। आनंहे। ३४। गर्ह गल्ह कुत्सायाम्। जगर्हे। जगल्हे। ३६। बर्ह बल्ह प्राधान्ये। ओष्ठ्यादी। ३८। बर्ह बल्ह परिभाषणहिंसाच्छादनेषु। दन्त्योष्ठ्यादी। केचित्तु पूर्वयोर्दन्त्योष्ठ्यादिताम् अनयोरोष्ठ्यादितां चाहुः। ४०। प्लिह गतौ। पिप्लिहे। ४१। वेहृ जेहृ बाहृ प्रयत्ने। आद्यो दन्त्योष्ठ्यादिः। अन्त्यः केवलोष्ठ्यादिः। उभावप्योष्ठ्यादी इत्येके। दन्त्योष्ठ्यादी इत्यपरे। जेहतिर्गत्यर्थोऽपि। बबाहे। ४४। द्राहृ निद्राक्षये। निक्षेप इत्येके। ४५। काशृ दीप्तौ। चकाशे। ४६। ऊह वितर्के। ऊहाञ्चक्रे। ४७। गाहू विलोडने। गाहते। जगाहे। जगाहिषे। जघाक्षे। जगाहिढ्वे। जगाहिध्वे। जगाढ्वे। गाहिता। ढो ढे लोपः। ८।३।१३। ढस्य लोपः स्याड्ढे परे। गाहिता। गाढा। गाहिष्यते। घाक्ष्यते। गाहिषीष्ट। घाक्षीष्ट। अगाहिष्ट। अगाढ। अघाक्षाताम्। अघाक्षत। अगाढाः। अघाढ्वम्। अघाक्षि। ४८। गृहू ग्रहणे। गर्हते॥ ११ इति सिद्धं। न चात्रार्थासंगतिः। धातू

नामनेकार्थत्वात्स्मरणार्थकत्वे बाधकाभावादित्याहुः। ऊह। कथं तर्हि अनुक्रमप्यूहन्ति पण्डितो जन इति। अत्राहुः। अनुदात्तेत्त्वलक्षणस्तङोऽनित्यत्वान्न दोष इति। गाहू। ऊदित्त्वादिड्वा। इडभावे ढत्वं एकाच इति भष्भावः। षढोः कः सीति कः। कास्वरस्य षत्वं। जघाक्षे। विभाषेट इति वा मूर्द्धन्यः। जगाहिढ्वे। जगाहिध्वे। इडभावे तु भष्भावः। ढो ढे लोपः। जघाढ्वे। ढे किं। ऊढः। इह पूर्वं ढलोपो माभूत्। ढत्वे तु ढग्रहणे पुनः पुरिसस्याश्रयात् सिद्धत्वं भवतीति सिद्धमिष्टमित्याहुः। अगाढेति। झलो झलि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नि·
सि·कौ· सपिनभवतिसकारपरत्वाभावात्।नचकृतेपिसलोपेप्रत्ययलक्षणेनसिच्परत्वाद्गुणाभावोदुर्वारइतिवाच्यं।वर्णाश्रयेप्रत्ययलक्षणाभावात्।अन्यथागवेहितंगोहितमित्यत्रा
दी·न· जगृहे।ऋदुपधेभ्योलिटःकित्त्वंगुणात्पूर्वविप्रतिषेधेन।जगृहिषे।जघृक्षे।जघृढ्वे।गर्हिता।गर्ढा।गर्हिष्यते।घर्क्ष्यते।गर्हिषीष्ट।घृक्षीष्ट।लुङि।
३९ अगर्हिष्ट।इडभावेशलइगुपधादनिटःक्सः।३।१।४५।इगुपधोयःशलन्तस्तस्मादनिटश्च्लेःक्सादेशःस्यात्।अघृक्षत।क्सस्याचि।७।३।७२।
अजादौतङिक्सस्यलोपःस्यात्।अलोन्त्यस्य।अघृक्षातां।अघृक्षन्त।४९।ग्लहच।ग्लहते५०।घुषिकान्तिकरणे।घुंषते।जुघुंषे।केचिद्दवे
त्यदुपधंपठन्ति।५१।अथार्हत्यन्ताःपरस्मैपदिनः।घुषिर्अविशब्दने।विशब्दनंप्रतिज्ञानंतस्मिन्नर्थेइत्येके।शब्दइत्यन्येपेठुः।घोषति
जुघोष।घोषिता।इरित्वादङ्वा।अघुषत्।अघोषीत्।१।अक्षूव्याप्तौ।अक्षोऽन्यतरस्याम्।३।१।७५।अक्षोवाश्नुप्रत्ययःस्यात्कर्त्रर्थेसार्वधातु-
केपरे।पक्षेशप्।अक्ष्णोति।अक्ष्णुतः।अक्ष्णुवन्ति।अक्षति।अक्षतः।अक्षन्ति।आनक्ष।आनक्षिथ।आनष्ठ।अक्षिता।अष्टा।अक्षिष्यति।।
स्कोरितिकलोपः।षढोःकःसि।अक्ष्यति।अक्ष्णोतु।अक्ष्णुहि।अक्ष्णवानि।आक्ष्णोत्।आक्ष्णवं।अक्ष्णुयात्।अक्ष्यात्।उदित्वादिड्वा।नेटिमाभ-
वानक्षीत्।अक्षिष्टां।अक्षिषुः।इडभावेतुमाभवानाक्षीत्।आष्टां।आक्षुः।२।तक्षूत्वक्षूतनूकरणे।तनूकरणेतक्षः।३।१।७६।श्नुःस्याद्वाशविष-
ये।तक्ष्णोति।तक्षतिकाष्ठं।ततक्षिथ।ततष्ठ।अतक्षीत्।अतक्षिष्टां।अताक्षीत्।अताष्टां।तनूकरणेकिं।वाग्भिःसन्तक्षति।भर्त्सयतीत्यर्थः। 335
४।उक्षसेचने।उक्षाञ्चकार।५।रक्षपालने।६।णिक्षचुम्बने।प्रणिक्षति।७।तृक्षस्तृक्षणक्षगतौ।तृक्षति।स्तृक्षति।नक्षति।१०।वक्षरोषे।सङ्घा
तइत्येके।११।मृक्षसङ्घाते।म्रक्षइत्येके।१३।तक्षत्वचने।त्वचनंसंवरणं।त्वचोग्रहणञ्चपक्षपरिग्रहइत्येके।१४।सूर्क्षआदरे।सुसूर्क्ष।अनाद
रइतितुक्वाचित्कोपपाठः।अवज्ञावहेलनमसूर्क्षणमित्यमरः।१५।काक्षिवाक्षिमाक्षिकांक्षायाम्।।१८।। ९वादेशःस्यादितिदिक्।। ।।जगृहेइ राम·
तिकित्वात्परत्वात्सुगंतेनितिगुणेप्राप्तेऋदुपधेभ्यइतिवार्तिकात्कि,त्वेगुणाभावः।शलइगुपधा।शलइतिधातोर्विशेषणात्तदंतलाभः।शलइतिकिं।अतिष्ट।इगितिकिं।। ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अगाढ। अनिटः किं। ओहिष्ट। वहसाचि। अजादावितिः। अंगास्तित्वप्रत्यययोत्र विशेष्यः। नडीति केचांचित्तत्रक्षेपत्तस्य काधिकादावनुक्तत्वादिस्याद्भुः। अन्ये तु लुग्वा दुहेत्य
त्रात्मनेपद इत्यपकर्षेण तङीति लभ्यते। तेन दशांक्त इति वार्तिकोक्त क्तप्रत्ययस्य लोपो न भवति [illegible] स्राः अस्यादृसा इत्यत्रेत्याहुः। घुषिकांतिकरणे लुङि। अघुंविष्ट॥
अघुंषिषातां अनुपधपाठे तु अघासीत् अघषीत्। अनत्सीदिति। नेटीति वृद्धिनिषेधः। इट्भावे तु अनासीत्। प्रणिघ्नतीति। उपसर्गादसमासे पीति णत्वं। वानिंसनिक्षनिंदा
मिति तु कृद्विषयं। ण्वुल्तृचौ। प्रणिसकः। प्रनिसकः। प्रणिसिता। प्रनिसिता। अवड्डे सादि। सूर्क्ष्याणामादरस्तत्रोऽन्यदस्य सूर्क्षणमित्यमरग्रंथार्थः। यदि तु सूर्क्षणमना

ग्रासि ध्रासि ध्वासि घोरवासितेच। २१। चूष पाने। चुचूष। २२। तूष तुष्टौ। २३। पूष वृद्धौ। २४। मूष स्तेये। २५। लूष रूष भूषायाम्। २७। शूष प्रस
वे। तालव्योष्मादिः। २८। यूष हिंसायाम्। जूषश्च। ३०। भूष अलङ्कारे। भूषति। ३१। ऊष रुजायाम्। ऊषाञ्चकार। ३२। ईष उञ्छे। ३३। कष खष शिष
जष झष शष वष मष रुष रिष हिंसार्थाः। तृतीयषष्ठौ तालव्योष्मादी। सप्तमो दन्त्योष्मादिः। चकाष। चखाष। शिशेष। शिशेषिथ। शेष्टा। कः अ
शिक्षत्। अशेक्ष्यत। जेषतुः। जझषतुः। शेषतुः। ववषतुः। मेषतुः। तीषसहलुभरुषरिषः। ७।२।४८। इच्छत्यादेः परस्य तादेरार्धधातुकस्येड्वा स्यात्
रोषिता। रोष्टा। रोषिष्यति। रेषिता। रेष्टा। रेषिष्यति। ४३। भष भर्त्सने। इह भर्त्सनं श्वरवः। भषति। बभाष। ४४। उष दाहे। ओषति। उषविदजागृभ्यो ऽ
न्यतरस्याम्। ३।१।३८। एभ्यो लिट्याम्वा स्यात्। ओषाञ्चकार॥ ९९ दरइति उच्येत तर्हि अस्य सूर्क्षणमवज्ञापर्यायो न स्यादिति भावः। कासि। कांसाइत्वा। ः॥
ग्रासि ध्रासि ध्वासि घोरवासितं घोरशब्दः। वासृशब्दो। ध्वांसतिर्ध्वांसः काकः। ग्रसि धातोर्गुरोश्च हल इति अप्रत्यये ग्रासा। यवादिगणे निपातनान्नलोपः। द्राक्षाम
न। इह मतोर्वत्वं तु न भवति। अयवादिष्वपि इत्युक्तेः। तूष तुष्टौ। दिवादौ तु ह्रस्वोपधः। मूष स्तेये। संज्ञायां कृत्रि मूषकः। क्वचित्तु ह्रस्वोपधोयं। भूष अलंकारे। अयं चु
रादावपि। ईष उञ्छे। गुरोश्च हल इत्यप्रत्यये ईषा लांगलदंडः। कषखष। शिषस्य यमध्यनिकः। ननु रोधादिकरणे वा संकोचे याना भावात् इत्यभिप्रेत्योदाहरति शिष्टा। अ
शिक्षदित्यादि। तीषसहा। इषद्धायां। वहमर्षणे। लुभगार्ध्यो। रुष रिष हिंसायां। रुषिता। रुष्टा। [illegible] हिता। सोढा। लोभिता। लोब्धा॥ ६ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति·
सि·कौ·
टी·त·
५०

उवोषेति।पुगंनेति गुणः।अभ्यासस्य सवर्णेइ निउवङ्।घृषु संघर्षे।लुटि घर्षिता।घस्लृ अदने।अयमिति।यद्ययं सार्वत्रिकः स्यात्तदा लिङ्यपि प्रयुज्येत।ततश्च लिङ्यन्यत्र
रस्यामिति विकल्पेनादेशविधानं व्यर्थं भवेदिति भावः।अत्रैव पाठ इति।श्वादौ परस्मैपदे पाठ इत्यर्थः।क्मरचीति।सृघस्यदः क्मरचिति सूत्रे।सः स्यार्द्धे।सः सीति च्छेदः।
सादेः किं घस्मरः।आर्द्धधातुके इति किं।वस्से।आशिषीति।आशीर्लिङीत्यर्थः।एतच्च कर्त्तरि प्रयोगमभिप्रेत्योक्तं।कर्मणि तु यग्विषये प्रयोगो नेति बोध्यं।पुषादिद्युता।

उवोष।ऊषतुः।उवोषिथ।४५।जिषु विषु मिषु सेचने।जिजेष।क्रादिनियमादिट्।विवेषिथ।विविषिव।वेष्टा।वेक्ष्यति।अविक्षत्।४८।पुष पु
ष्टौ।पोषति।पोषिता।पोषिष्यति।अपोषीत्।अनिट्सु पुष्येति श्यना निर्देशादयं सेट्।अत एव न क्सः।अङ् विधौ दैवादिकस्य ग्रहणान्नाङ्।
४९।श्रिषु श्लिषु प्रुषु प्लुषु दाहे।श्रेषति।शिश्रेष।श्रेषिता।श्लेषति।शिश्लेष।श्लेषिता।अश्लेषीत्।अयमपि सेट्।अनिट्सु दैवादिकस्यैव ग्रहणमिति।
कैयटादयः।एतत्तनिट्कारिकासु न्यासे द्वयोर्ग्रहणमित्युक्तमतत्स्वोक्तिविरोधान्न्यासान्तरविरोधाच्चोपेक्ष्यम्।पुप्रोष।पुप्लोष।५५।पृषु वृषु मृषु
सेचने।मृषु सहने च।इतरौ हिंसासंक्लेशनयोश्च।पर्षति।पपर्ष।५६।घृषु संघर्षे।५७।हृषु अलीके।५८।तुस ह्रस ह्लस रस शब्दे।तु
तोस।जह्रास।जह्लास।रराम।६२।लस श्लेषणक्रीडनयोः।६३।घस्लृ अदने।अयमन्न सार्वत्रिकः।लिङ्यन्यतरस्यामित्यदेर्घस्लृ आदेशविधानात्
ततश्च यत्र लिङ्गं वचनं वा लिनत्रैवास्य प्रयोगः।अत्रैव पाठः शपि परस्मैपदे लिङ्गम्।लृदित्करणमङि।अनिट्कारिकासु पाठो बलाद्यार्द्धधा
तुके।क्मरचि तु विशिष्योपादानं।घसति।घस्ता।सः स्यार्द्धधातुके।७।४।४९।सस्य तः स्यात्सादावार्द्धधातुके।घत्स्यति।घसतु।अघसत्।घसे
त्।लिङ्गाद्यभावादाशिष्यस्याप्रयोगः।पुषादिद्युताद्य्लृदितः परस्मैपदेषु।३।१।५५।। ९९ पुषधातुः श्यादौ दिवादौ क्र्यादौ चुरादौ पठ्यते।यद्विनु पुष पुष्टौ।
विति भ्वादिकधातुमारभ्य पुषादिगणो गृह्येत तदा द्युतादिग्रहणमनर्थकं भवेत्।पुषेस्तत्र द्युतादीनां पाठात्।नापि क्र्याद्यन्तर्गणः।तत्र हि पुषधातोरग्रे मुषस्ते
येत्वच भूत प्रादुर्भावे हेठ च भहड उपादाने इति चत्वार एव पठ्यन्ते।यदि तु न एव जिघृक्षिताः स्युस्तर्हि लाघवाल्लृदित एव न क्रियेरन्।ग्रहेः स्वरितेत्त्वे पि लृकारेणैव तत्।
न्निवाहादने कानुबंधासंगगौरवप्रसङ्गाच्चापि अभावात्।नापि चुरादिः।णिचा व्यवधानेन ततोऽनंतरस्य च्लेरसंभवात्।अतः परिशेषात् दिवादय एव गृह्यन्त इ

336

दि·
राम·
५०

CC-0. In Public Domain. Digitization by eGangotri

श्यन्विकरणेषु पादेरिति। केचित्तु दिवाद्यन्तर्गण एव पुषादिर्गृह्यते व्याख्यानादित्याहुः। चुरादीनां सर्वेषां णिज्विकल्पः इति पक्षे चौरादिकपुषादेरपि परः श्निः संभवतीति तेषामाश्न यः। नंदिग्रहिपचादिभ्य इतिवत् पुषद्युताङ्लृदित इति सूत्रयितुमुचितं। ननु पुषादयो द्युतादयश्च लृदित एव कुतो न कृता इति चेदत्राहुः। निरनुबंधेषु सानुबंधेषु च प्रत्येकं लृकारपाठे विपरीतगौरवं स्यात्। न च अनुबंधान्तरस्य यत्नयोजनमात्मनेपदं तत्लृदित्करणेपि सिध्यतीति अनेकानुबंधासंगगौरवदोषो नास्तीत्यपि शंक्यं। आदितामीदितामूदि।

श्यन्विकरणपुषादेर्द्युतादेर्लृदितश्च परस्मैपदेषु। अघसत्। ६७। जर्ज चर्च झर्झ परिभाषणहिंसातर्जनेषु। ६८। पिसृ पेसृ गतौ। पिपिसतुः। पिपेसतुः। ६९। हसे हसने। एदित्वान्न वृद्धिः। अहसीत्। ७०। णिश समाधौ। तालव्योष्मान्तः। प्रणेशति। ७१। मिश मश शब्दे रोषकृते च॥ तालव्योष्मान्तौ। ७३। शव गतौ। दन्त्योष्मान्तः। तालव्योष्मादिः। शवति। अशावीत्। अशवीत्। ७४। शश प्लुतगतौ। तालव्योष्माद्यन्तः। शशाश। शेशतुः। शेशुः। शेशिथ। ७५। शसु हिंसायाम्। दन्त्योष्मान्तः। न शसददेति त्वन्न। शशसतुः। शशसुः। शशसिथ। ७६। शंसु स्तुतौ। अयं दुर्गतावपी तिदुर्गः। नृशंसो घातुकः क्रूर इत्यमरः। शशंस। आशिषि नलोपः। शस्यात्। ७७। चह परिकल्कने। कल्कनं शाठ्यं। अचहीत्। ७८। मह पूजायाम्॥ अमहीत्। ७९। रह त्यागे। ८०। रहि गतौ। रंहति। रंह्यात्। ८१। दृह दृहि वृह वृहि वृद्धौ। दर्हति। ददर्ह। ददृहतुः। दृंहति। वर्हति। वृंहति। वृहि शब्दे च। दृंहितङ्क्षिगर्जितम्। ८५। तुहिर् दुहिर् उहिर् अर्दने। तोहति। तुतोह। अतुहत्। अतोहीत्। दोहति। अदुहत्। अदोहीत्। अनिङ्कारिकास्त्वस्य दुहेर्ग्रहणं नेच्छन्ति। ओहति। उवोह। ऊहतुः। ओहिता। मा भवानुहत्। औहीत्। ८९। अर्ह पूजायाम्। आनर्ह। ९०। अथ कृपूपर्यन्ता अनुदात्तेतः। द्युत दीप्तौ। द्योतते॥ ❁ ॥ ९९ नां च तेषु सत्त्वात् लृकारेण तत्तत्कार्याणामनिर्वाहादनेकानुबंधासंगगौरवस्य दुर्निवारत्वादिति॥ जर्ज चर्च। एषां परिभाषणादिभिः सह यथासंख्यं नास्ति व्याख्यानादित्याहुः। परिभाषणं सनिंदोपालंभः त्रयाणामपि च वर्गीयान्तेषु पाठ उचितो न। त्विहोष्मान्तेषु। णिश समाधौ। समाधिरन्तःकरणनिरोधः। प्रणेशतीति। उपसर्गादसमासेपीति णत्वं। रोषकृते चेति॥ चकारात्समाधौ। शश प्लुतगतौ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



नशसददेतिप्रतिषेधसूत्रे सांतस्यग्रहणमिसमिप्रेसव्याचष्टे।शेशतुरिति।प्राचांतुशशतुरित्युक्तंतदयुक्तमितिभावः।अवहीदिति।ह्म्यंतेतिनवृद्धिः।रहत्यागे।अयंकथा
दावपि।इषमिच्चेतिमि त्वकरलेप्ययमेकीयमतेनपठितः।नेक्षंतीति।व्याख्यानमेवात्रावलंवनं।माभवान्रुहदिति।नमाङ्योगेइत्याडभावः।इरितोवेत्यङ्।अथद्यु
तादिः।द्युतदीप्तौ॥ ॥द्युतिः स्वाप्योः।स्वापीतिणिजंतग्रहणं।दिद्युतेइति।संप्रसारणेकृतेसंप्रसारणाच्चेतिपूर्वरूपं।स्वापेरुदाहरणंतुसुष्वापयिषतिइहस्वा

द्युतिस्वाप्योःसम्प्रसारणम्।७।४।६७।अनयोरभ्यासस्यसम्प्रसारणंस्यात्।दिद्युते।दिद्युताते।श्चोतितृ।द्युद्भ्योलुङि।१।३।९१।द्युतादिभ्योलुङः
परस्मैपदंवास्यात्।पुषादीतिसूत्रेणपरस्मैपदेऽङ्।अद्युतत्।अश्चोतिष्ट।१।श्विताश्वर्णे।श्वेतते।शिश्विते।अश्वितत्।अश्वेतिष्ट।२।ञिमिदा
स्नेहने।मेदते।मिदेर्गुणः।७।३।८२।मिदेरिकोगुणःस्यादित्संज्ञकशकारादौ।एश्नादिशित्वाभावान्नानेनगुणः।मिमिदे।अमिदत्।अमेदिष्ट॥
३।ञिष्विदास्नेहनमोचनयोः।मोहनयोरित्येके।स्वेदते।सिष्विदे।अस्विदत्।अस्वेदिष्ट।४।ञिक्ष्विदावेत्येके।अक्ष्विदत्।अक्ष्वेदिष्ट।५।रुचदीप्ता।
वभिप्रीतौच।रोचते।सूर्यः।हरयेरोचतेभक्तिः।अरुचत्।अरोचिष्ट।६।घुटपरिवर्त्तने।घोटते।जुघुटे।अघुटत्।अघोटिष्ट।७।रुटलुटलुठप्रति।
घाते।अरुटत्।अरोटिष्ट।१०।शुभदीप्तौ।११।क्षुभसंचलने।१२।णभतुभहिंसायां।आद्योऽभावेपि।नभन्तामन्यकेसमे।माभूवन्नन्यकेसर्वेइति
निरुक्तम्।अनभत्।अनभिष्ट।अतुभत्।अतोभिष्ट।इमौदिवादीक्र्यादौच।१४।स्रंसुध्वंसुभ्रंसुअवस्रंसने।ध्वंसुगतौच।अनिदितामितिनलोपः॥
अस्रसत्।अस्रंसिष्ट।नाल्लसत्कारणिग्रैवमितिरघुकाव्ये।१७।भ्रंशुइत्यपिकेचित्पेठुः।अत्रतृतीयएवतालव्यान्तइत्यन्ये।भ्रंशुभ्रंसुअधः
पतनइतिदिवादौ।स्रम्भुविश्वासे।अस्रभत्।अस्रम्भिष्ट।दन्त्यादिरयम्।तालव्यादिस्तुप्रमादेगतः।२०।वृतुवर्त्तने।वर्त्तते।ववृते॥ ॥

पेरिणिजंतस्याऽभ्यासनिमित्तप्रत्ययेनानंतर्येसतिसंप्रसारणमिष्यते।तेनेहन।स्वापेण्वुल्।स्वापकः।तमिच्छतिस्वापकीयति।ततःसन्।सिस्वापकियीषति।द्युद्भ्योलुङि।बहुवचन
निर्देशात्द्युतादिग्रहणं।तदाह।द्युतादिभ्यइति।द्युतादयोघटन्तेष्वन्यायामिसवचिकाःङःसौस्तन्त्रेवलुङीतिसम्याःचक्रथेतेसमिप्रेसाह।लुङःपरस्मैपदमि
ति।ञिमिदा।मिदेर्गुणः।श्तिवुक्रमुचमामित्सतःशितीत्यनुवर्ततेतत्रशब्द्यामोऽद्ध्वेतिकर्मधारयात्सत्सप्तमीत्संगाक्षिप्तप्रत्ययस्तुविशेष्यः।तेनयस्मिन्विधिरितितदादिविः॥ ॥

३३७



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिःप्रवर्ततेतेनदाह। इत्संज्ञकशकाराभावविति। आदितश्चिन्त्वाभावादिति। मेद्यति मेद्यत इत्यादौ दिवादिभ्य इति श्यन्। आदितश्चिन्त्वात्तुणो भवत्येव। मिमिदे इति। शितीति बहुव्रीहे
त्विह स्यादेव गुणः। तथा पपेत स्थे इत्यादावपि वाद्योपि सुरिति भावः। ञिष्विदा। अनिट्कारिकायां स्विद्यतिरिति श्यना निर्देशादयं सेट्। स्वेदिता स्वेदिष्यते। निष्विदा चेति पूर्वोक्त
योरेवार्थयोरयमिति बोध्यमाह रयेइति। हच्यर्थानामिति संप्रदानसंज्ञायां चतुर्थी। घुट परिवर्तने। परिवर्तनमितस्ततो भ्रमणं। जुघुटे इति। असंयोगादिति कित्त्वाद्गुणाभावः
क्षुभां संचलनं प्रकृतिविपर्यासो मंथनं वा। क्षोभितः। क्षुभ्यतीति दिवादौ। क्षुभ्नातीति क्र्यादौ। नाभसदिति। नाभसदिस्य पपाठ एव। न चेदं लङो रूपं तत्र परस्मैपदासंभवादि
ति भावः॥ श्री ॥ वृद्भ्यः। वृतादयः पंच। न वृद्भ्य इति गणकार्यत्वादुभयोर्यङ्लुक प्रवृत्तिः। वर्वर्तिष्यति। वर्वर्तिषति। चतुर्ग्रहणफलं तु स्फुटीभविष्यति। सेसिचीति सूत्रे॥

वृद्भ्यः स्यसनोः। १।३।९२। वृतादिभ्यः परस्मैपदं वा स्यात्स्ये सनि च। न वृद्भ्यश्चतुर्भ्यः। ७।२।५९। एभ्यः सकारादेरार्धधातुकस्येण्न स्यात्तङानयोर
भावे। वर्त्स्यति। वर्तिष्यते। अवृतत्। अवर्तिष्ट। अवर्त्स्यत्। अवर्तिष्यत। २२। वृधु वृद्धौ। २२। शृधु शब्दकुत्सायाम्। इमौ वृतिवत्। २३। स्यन्दू प्रस्रवणे
। स्यन्दते। सस्यन्दे। सस्यन्दिषे। सस्यन्त्से। सस्यन्दिध्वे। सस्यन्ध्वे। स्यन्दिता। स्यन्ता। वृद्भ्यः स्यसनोरिति परस्मैपदे कृते ऊदित्त्वात्प्राप्तमपि विक
ल्पं बाधित्वा चतुर्ग्रहणसामर्थ्यान्न वृद्भ्य इति निषेधः। स्यन्त्स्यति। स्यन्दिष्यते। स्यन्त्स्यते। स्यन्दिषीष्ट। स्यन्त्सीष्ट। द्युद्भ्यो लुङीति परस्मैपदपक्षेऽङ्। न
लोपः। अस्यदत्। अस्यन्दिष्ट। अस्यन्त। अस्यन्त्साताम्। अस्यन्त्स्यत्। अस्यन्दिष्यत। अस्यन्त्स्यत॥ ९९ सेड्स्यनुवर्ततेतेनदाह। सकारादेरिति। इण्न स्यादि
ति। स्यन्देरूदित्त्वाद्विकल्पे प्राप्ते इतरेषां नित्यमिटि प्राप्ते निषेधोऽयं। तङानयोरिति। जिगमिषिता। जिगमिषितारौ इत्यादौ तु चिपरतः सनइडागमसिद्धये गमेरिट्परस्मैपदे
ष्विति सूत्रे परस्मैपदग्रहणं तङानयोरभावं लक्षयतीत्यभ्युपगम्यते। तच्चात्रापि तथैवानुवर्तते। अर्थाधिकाराश्रयणात्। तेन परस्मैपदाभावेऽपि त्वचि विवृत्सिता। विवृत्सि
तारौ विसन्नातौ हेरिति हेलुकित्वं विवृत्सेत्यत्र च सनइट्निषेधः सिध्यतीति भावः। अत्र भाष्यवार्तिकयोर्वृतादीनामात्मनेपदेन समानपदस्थस्येत्युक्तवचनादन्यत्र निषेध इति
स्थितं। तेन विवर्तिषते विवर्धिषते इत्यादाविड् भवति। विवृत्सितेवाचरति विवृत्सित्रीयते इत्यत्र त्वात्मनेपदोत्पत्तेः पूर्वं तत्समानपदस्थत्वाभावादंतरंगोऽयं निषेधः।
प्रवर्तते। स च पश्चात्तङि कृतेऽपि न निवर्तते। चतुर्ग्रहणसामर्थ्यादिति। अत्र व्याचख्युः। पंचभ्य इति वक्तुमुचितं तां सिचेत्येव सूत्रं कर्तव्यं। न च वृतादिष्वतिव्याप्तिस्तङानयोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

।अत्रानिदितामिति न लोपो न भवति। सिज्लोपस्यासिद्धत्वेनानुपधात्वात्॥ ❀ ॥अनुविपर्यभिनिभ्यः॥ एभ्य इति। पंचम्यर्थे इत्यर्थः। षत्वं भवत्येवेति। प्राण्यप्राणिकर्तृकस्याप्रा
णिकर्तृकत्वानपायादिति भावः। असमर्थसमासवाक्यभेदापत्तिदोषाभ्यां प्रसज्यप्रतिषेधो न सूत्रेऽभिप्रेत इत्याशयेनाह। प्राणिषु नेत्युक्ताविति। कृपू सामर्थ्ये। आद्यन्तं वा

अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु।८।३।७२। एभ्यः परस्याप्राणिकर्तृकस्य स्यन्दतेः सस्य षो वा स्यात्। अनुष्यन्दते। अनुस्यन्दते वा जलम्॥
अप्राणिषु किम्। अनुस्यन्दते हस्ती। अप्राणिष्विति पर्युदासान्मत्स्योदके अनुष्यन्दते इत्यत्रापि पक्षे षत्वं भवत्येव। प्राणिषु नेत्युक्तौ तु न
स्यात्।२४। कृपू सामर्थ्ये। कृपो रो लः।८।२।१८। कृप इति छेदः। कृपेति लुप्तषष्ठीकमपदं तन्त्रावर्तते। कृपो यो रेफस्तस्य लः स्यात्। कृपेर्ऋ
कारस्यावयवौ यौ रेफसदृशौ तस्य च लकारसदृशः स्यात्। कल्पते। चक्लृपे। चक्लृपिषे। चक्लृप्से। इत्यादि स्पन्दि
वत्। लुटि च क्लृपः।१।३।९३। लुटि स्यसनोश्च क्लृपेः परस्मैपदं वा स्यात्। तासि च क्लृपः।७।२।६०। कृपेः परस्य तासेः सकारादेरार्धधातुकस्य चे
ण्न स्यात्। तङानयोरभावे। कल्प्तासि। कल्प्तास्थः। कल्पितासे। कल्प्तासे। कल्प्स्यति। कल्पिष्यते। कल्प्स्यते। कल्पिषीष्ट। क्लृप्सीष्ट। अक्लृ
पत्। अकल्पिष्ट। अक्लृप्त। अकल्प्स्यत्। अकल्पिष्यत। अकल्प्स्यत। वृत्तः वृत्तः सम्पूर्णो द्युतादिर्वृतादिश्चेत्यर्थः।२५। अथ त्वरन्तास्त्रयो।
दशानुदात्तेतः षितश्च। घट चेष्टायाम्। घटते। जघटे। घटादयो मित इति वक्ष्यमाणेन मित्संज्ञा। तत्फलं तु णौ मितां ह्रस्व इति चिण्णमुलोर्दीर्घोऽन्य
तरस्यामिति च वक्ष्यते। घटयति। विघटयति। कथं तर्हि कमलवनोद्घाटनं कुर्वते ये। प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकराणिवेत्या
दि। शृणु। घट संघात इति चौरादिकस्येदम्। न च तस्यैवार्थविशेषे मित्त्वार्थमनुवादोऽयमिति वाच्यम्। नान्ये मितोऽहेताविति निषेधात्। अहेतौ।
स्वार्थे णिचि ज्ञपादिपञ्चकव्यतिरिक्ताश्चुरादयो मितो नेत्यर्थः।१। व्यथ भयसंचलनयोः। व्यथते॥ ९९. व्यामाह। कृप उ इति। कृपो रो ल इति न्नार्वाचीनपाठ
स्तु नादर्तव्य इति ध्वनयति। कृपेर्ऋकारस्येत्यादिना। वर्णैकदेशस्य वर्णग्रहणेन ग्रहणादाह रेफसदृश इति। एवं चात्र कृपेस्त्वस्यान्वृत्तिरवश्यं स्वीकर्त्तव्या। तथा च॥ १॥



338

CC-0. In Public Domain. Digitization by eGangotri

लुरित्वल्कूपद्द स्यादि सौत्रनिर्देशोऽप्युपपद्यत इति भावः। तासि चल्कृपः। चकारात्स्याद्यार्द्धधातुकं गृह्यते। कृपो रो ल इति लिङ्सिचावात्मनेपदेष्विति किल्वान्न गुणः। क्टृदिति। वृत्तू वर्तने
इत्यस्मात्किप्। त्रिलरा संभ्रमे इत्यस्मान्नन्तरं घटादयः षित इत्युक्तं त्वरस्तं ताल्वयो दश्यैव षितो नतु फणान्ताः सर्वेपीति सिद्धं। तथापि स्पष्टप्रतिपत्त्यर्थमाह। षितश्चेति। प्रयोजनं नतु
षिद्भिदादिभ्योऽङित्यङि त्वपू। घट। अथ केसादिरूपसिद्धिः। घटेत्युदायां ये धातवोऽन्यत्राऽधीतास्तेषामिह पाठोऽर्थनियमार्थः। येत्विह वपठ्यन्ते तेषामुपसर्गादिनाऽर्थान्तरपरत्वे।
पि मित्त्वमस्त्येवेति धातुवृत्त्यादिषु स्थितं तद्देवध्वनयन्नुदा हरति। विघटयतीति॥ ❀ ॥ व्यथो लिटि। हलादिःशेषापवाद इति। हलादिशेषप्रक्रमणादिति भावः। एवंचोत्स
र्गसंदेशश्चापवाद इति परस्यैव संप्रसारणं भवति न पूर्वस्येति केप्ययादुर्ज्ञानसं प्रसारणादिति निषेधोऽत्रनापेक्षितः। केचित्तु हलादिःशेषेण यकारनिवृत्तावपि वकार

व्यथो लिटि। ७४। ईदा व्यथोऽभ्यासस्य सम्प्रसारणं स्याल्लिटि। हलादिःशेषापवादः। व्यथस्य हलादिःशेषेण निवृत्तिः। विव्यथे। २। प्रथ प्रख्याने। प
प्रथे। ३। प्रस विस्तारे। पप्रसे। ४। म्रद मर्दने। ५। स्खद स्खदने। स्खदनम्विद्रावणम्। ६। क्षजि गतिदानयोः। मित्त्वसामर्थ्यादनुपधात्वेपि चिण्
मुलोरिति दीर्घविकल्पः। अक्षजि। अक्षाजि। क्षञ्जं क्षञ्जं। क्षाञ्जं क्षाञ्जं। ७। दक्ष गतिहिंसनयोः। योयं वृद्धिशीघ्रयोरनुदात्तेत्सु पठितस्तस्ये
हार्थविशेषे मित्त्वार्थोनुवादः। ८। क्रप कृपायां गतौ। ९। कदि क्रदि क्लदि वैक्लव्ये। वैकल्य इत्येके। त्रयोप्यनिदितः इति नन्दी। इदित इति स्वामी
कदिक्रदी इतौ। कद क्रदेति चानिदिता वितिमैत्रेयः। कदिक्रदिक्लदीनामाह्वानरोदनयोः परस्मैपदि पूर्वानां पुनरिह पाठो मित्त्वार्थश्चात्म
नेपदार्थश्च। १२। ञित्वरा संभ्रमे। घटादयः षितः। षित्वादङ् कृत्सु वक्ष्यते। १३। अथ फणान्ताः परस्मैपदिनः॥ १९ सस त्वात्सूत्रमिदं सावकाशमि।

ति अपवादत्वं न संभवतीति मत्वा संप्रसारणं तदाश्रयं च कार्यं बलवदिति वचनाद्धलादिःशेषं बाधित्वा परस्य संप्रसारणे पूर्वस्य निषेधः संप्रसारणं तदाश्रयं चेति व
चनाभावे तु व्यथो लिटीति संप्रसारणस्य धातुविशेषप्रत्ययविशेषाश्रयत्वेन इग्यण इति संज्ञाविशेषद्वयाश्रयत्वेन च बहूपेक्षत्वस्य वहिरंगत्वात्संप्रसारणं बाधित्वा
हलादिःशेषे जाते वकारस्य संप्रसारणं स्यादित्याहुः। व्यस्येति। संप्रसारणस्याभ्यासान्तर्गतयकारनिवृत्तेरपवादत्वं न तु यकारनिवृत्तेरिति भावः। लिटीति किं। विव्य।
थिषते। इह सन्नन्त इति द्वित्वं। वाव्यथ्यते। वाव्यथीति। क्रप कृपायां गतौ। चकाराभावेपीहार्थद्वयमित्येव बोध्यमित्याहुः। कदि क्रदि। कंदयति। अकंदि। अकांदि॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति·
सि·कौ·
टी·त·
४३

कंसं॥ दं॥ कां॥ दं॥ कां॥ दं॥ इत्त्वान्नादित्वमिह व्यर्थं। द्रुस्रोच्चारणेनापि आत्मनेपदसिद्धेः। नचानिष्ठायामादितश्चेति नेट्प्रतिषेधार्थमिति शंक्यं। रुष्यमत्वरेति निष्ठायामि ज्वररोगे। ज्वरति। जज्वार १ गडसेचने। गडति। जगाड। २। हेडवेष्टने। हेडृ अनादरे इत्यात्मनेपदिषु गतः। स एवोत्तरसूत्रानुबन्धो नूयते। अर्थविशे षेमित्यार्थम्। परस्मैपदिभ्यो ज्वरादिभ्यः प्रागेवानुवादे कर्त्तव्ये तन्मध्येनुवादसामर्थ्यात्परस्मैपदम्। हेडति। जिहेड। हिडयति। अहिडि। अहीडि अनादरे तु हेडयति। ३। वट भट परिभाषणे। वटवेष्टने भटभृतावितिपठितयोः परिभाषणेमित्यार्थोनुवादः। ५। नट नृत्तौ। इत्थमेव पूर्वमपि पठि तम्। तत्रायं विवेकः। पूर्वे पठितस्य नाट्यमर्थः। यत्कारिषु नटव्यपदेशः। वाक्यार्थाभिनयो नाट्यं घटादेस्तु नृत्यं नृत्तं चार्थः। यत्कारिषु नर्तकव्यपदेशः पदार्थाभिनयो नृत्यम्। गात्रविक्षेपमात्रं नृत्तम्। केचित्तु घटादौ नटनेत्यवितिपठन्ति। गतावित्यन्ये। णोपदेशपर्युदासवाक्ये भाष्यकृता नाटी तिदीर्घपाठात् घटादिर्णोपदेश एव। ६। स्तक प्रतिघाते। स्तकति। ७। चकतृप्तौ। तृप्तिप्रतिघातयोः पूर्वं पठितस्य तृप्तिमात्रे मित्त्वार्थोनुवादः। आत्मनेपदिषु पठितस्य परस्मैपदिष्वनुवादात्परस्मैपदम्। ८। कखे हसने। एदित्त्वान्नवृद्धिः। अकखीत्। ९। रगे शङ्कायां। १०। लगे सङ्गे। ११ ह्रगे ह्लगे षगे ष्ठगे संवरणे। कगे नोच्यते। अस्यायमर्थ इति विशिष्य नोच्यते। क्रियासामान्यार्थत्वात्। अनेकार्थत्वादित्यन्ये। १५। अक अग कु टिलायां गतौ। १७। कण रण गतौ। चकाण राण। १९। चण शण श्रण दाने च। शण गतावित्यन्ये। २२। श्रथ क्रथ क्लथ चथ हिंसार्थाः। जासिनि प्रहणेति सूत्रे क्राथेति मित्त्वेपि वृद्धिर्निपात्यते। क्राथयति मित्त्वं तु निपातनात्सरत्वाचिस्रासुत्रोरिति दीर्घं चरितार्थम्। अक्रथि। अक्राथि। क्र थकथं। क्राथं। क्राथंक्रा वनवहिंसायामिति शेषः। २७। वनु च नोच्यते। वनु इत्ययं पूर्वं एवापन्यायान्नेत्तुताविकस्यानुवादः। उदित्करणसामर्थ्या त्। तेन क्रियासामान्ये वनतीत्यादि प्रवनयति। अनुपसर्गस्य तु मित्त्वविकल्पो वक्ष्यते। २८। ज्वलदीप्तौ॥ ९९ दोविकल्पितत्वात्। तृणः। स्त्वितिः॥ राम·
४३

॥ ॥ज्वररोगे। णौ ज्वरयति। अजिज्वरत्। अज्वारि। ज्वरंज्वरं। ज्वारंज्वारं। गडसेचने। णौ। गडयति। अगडि। अगाडि। गडंगडं। गाडंगाडं। एवमन्यत्राप्यूह्यं। हेडवेष्टने

CC-0. In Public Domain. Digitization by eGangotri

पीतिनिषेधशंकैवनास्तीतिभावः। णोपदेश एवेति। प्रणाटति। प्रणाटयति। नाटीत्यस्य तु प्रनाटयति। वृद्धिर्निपात्यत इति। तेन मितां ह्रस्व इति न प्रवर्त्तत इति भावः। निपातनास
रत्वादिति। निपातनविषयी भूतमितां ह्रस्व इत्यस्मात्परत्वान्मितां ह्रस्व इत्येतदेव निपातनं बाधते न तु ततः परं चिण्णमुलोरित्येतदित्यर्थः। वनचासंभक्तौ पठितस्य हिंसायां।
मित्त्वार्थोऽनुवादः। वनति। णौ। वनयति। अवानि। वनंवनं। वानंवानं। तानादिकस्येति। वनु याचन इत्यस्येत्यर्थः। सामर्थ्यादिति। अनुवादे तु तत्र घटादित्वेन स्वा यामिद्विक।
ल्पस्यनिष्ठायामिट् प्रतिषेधस्य च सिद्धेः। पुनरुदित्करणं व्यर्थं स्यादिति भावः। वनतीत्यादीति। णौ। वनयति। तानादिकस्य तु वनुते। वानयति। मित्त्वविकल्प इति। ग्लास्नावनुवमां
चेति गणसूत्रेण॥ ❁ ॥ णप्रसयार्थमिति। ज्वलतिकसन्तेभ्यो ण इति। ज्वलादिभ्यो णप्रसयार्थौ। दृभये। धातोरनेकार्थत्वाद्भयार्थकत्वं। दृणाति। दरयति। तन्नेतीति। माध
णप्रसयार्थस्य पठिष्यमाणएवायं मित्त्वार्थमनूद्यते। प्रज्वलयति। २९। ह्वल ह्मल संचलने प्रह्वलयति। प्रह्मलयति। ३१। स्मृ आध्याने। विना
याम्पठिष्यमाणस्य आध्याने मित्त्वार्थोऽनुवादः। आध्यानमुत्कंठापूर्वकस्मरणं। ३२। दृभये। दृविदारणे। इति क्र्यादेरयंमित्त्वार्थोऽनुवादः। दृणा
नम्रेरयति। दरयति। भयादन्यत्र। दारयति। धात्वन्तरमेवेदमिति मते तु दरतीत्यादि। केचित्तु दयतेऽत्र स्मृदृत्वरेति सूत्रे च दृ इति दीर्घस्थाने ह्रस्व
पठन्ति। तन्नेति माधवः। ३३। नॄनये। क्र्यादिषु पठिष्यमाणस्यानुवादः। नयादन्यत्र नारयति। ३४। श्रा पाके। श्रै इति कृतात्वस्य श्रा इत्यादादिक
स्य च सामान्येनानुकरणं। लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति परिभाषाभ्या
म्। श्रपयति। विक्लेदयतीत्यर्थः। पाकादन्यत्र। श्रापयति। स्वेदयतीत्यर्थः॥ ३५॥ १९ वक्ष्यमाणाशयः। सूत्रे दीर्घान्त एव पाठः सर्वसंमतः। घटादावपि।
दीर्घान्त एव सर्वैः पठ्यते। यद्ययं ह्रस्वान्तो भवेत्तर्हि शृदॄप्रां ह्रस्वो वेति ह्रस्वविकल्पविधायके सूत्रे दृग्रहणमनर्थकं स्यात्। धातुद्वयेन दद्रतुः। ददरतुरिति रूपद्वयसिद्धेः। न
च विदारणे रूपद्वयलाभार्थं दृग्रहणमावश्यकमिति वाच्यं। धातूनामनेकार्थत्वात्समीहितसिद्धेरिति। नॄनये। नृणाति। नरयति। अनरि। अनारि। नरंनरं। नारंनारं। श्रे
इति। अयं हि वक्ष्यमाणो भ्वादिकः। लुग्विकरणेति। अत्र व्याचक्षते। स्वरतिसूतीति सूत्रे सूङ् इति पठितेऽपि द्वयोर्ग्रहणे सिद्धे सूतिसूयत्योः पृथक् ग्रहणं व्यर्थं सदिमां प
रिभाषां ज्ञापयति। न च लुग्विकरणं बलीय इति वैपरीत्यं किं न स्यादिति शंक्यं। इष्टानुरोधात्। सूङ् इति पठिते स्वरतिसाहचर्यादलुग्विकरणस्यैव ग्रहणं स्यान्न तु सूयत्योरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तस्मात् पृथक्ग्रहणमर्थसत्त्ताज्ञापकमेवेति। लक्षणप्रतिपदोक्तपरिभाषानुन्यायसिद्धा। लाक्षणिकं हि विलंबितो पस्थितिकं प्रतिपदोक्तं तु शीघ्रोपस्थितिकमिति। परिभाषाभ्यामिति। यद्यपि उक्तपरिभाषयोः परस्परविरोधेनाप्रवृत्तावपि इष्टं सिध्यति तथाप्यविशेषाद् उभयोः प्रवृत्तिरप्यत्र युक्तैवेति भावः॥ ⁂ ॥मारणतोषण। निशामनमिस्य स्व शमन्त्रा लोचनइत्यस्मान्निष्पन्नत्वादाह। चाक्षुषंज्ञानमिति। एष्वर्थेष्विति। पशुं संज्ञपयति। मारयतीत्यर्थः। विष्णुं विज्ञपयति। संतोषयतीत्यर्थः। संज्ञपयतिरूपं माधवमते दर्शयति। तीत्यर्थः। मतान्तरेतु बोधयतीत्यर्थः। प्रज्ञपयति शरं। तीक्ष्णीकरोतीत्यर्थः। स्यादेतत्। निशामनं ज्ञापनमात्रमिति वदतां मते। ज्ञा च न्तु ङू थेति सूत्रे ज्ञप्यमानो

मारणतोषणनिशामनेषु ज्ञा निशामनं चाक्षुषंज्ञानमिति माधवः। ज्ञापनमात्रमित्यन्ये निशाने ष्विति पाठान्तरम्। निशानं तीक्ष्णीकरणम्। एष्वेवार्थे षु जानातिर्मित्। ज्ञपमिच्चेति चुरादौ। ज्ञापनं मारणादिकं च तस्यार्थः। कथं त्विज्ञापनाम तेषु सिद्धिमेतोनितज्ज्ञापयत्या चार्य्य इति च। शृणु। माधवमतेऽचाक्षुषज्ञाने मित्त्वाभावात्। ज्ञापनमात्रे मित्त्वमिति मते तु ज्ञा नियोग इति चौरादिकस्य धातूनामनेकार्थत्वात्। निशाने ष्विति पठतां हरदत्तादीनां मते तु न काप्यनुपपत्तिः। ३६। कम्पने चलिः। चल कम्पने इति ज्वलादिः। चलयति शाखाम्। कम्पनादन्यत्र तु शीलं चालयति। अन्यथा करोतीत्यर्थः। हरतीत्यर्थ इति स्वामी। सूत्रं चालयति। क्षिपतीत्यर्थः। ३७। छदिरूर्जने। छद अपवारण इति यौजादिकस्य स्वार्थे णिजभावे मित्त्वार्थोऽयमनुवादः। अनेकार्थत्वादूर्जनेऽर्थे वृत्तिः। छदनामप्युङ्क्ते छदयति। वलवन्तं प्राणवन्तं वा करोतीत्यर्थः। अन्यत्र छादयति। अपवारयन्तमप्युङ्क्ते इत्यर्थः। स्वार्थे णिचि तु। छादयति। वलीभवति। प्राणीभवति। अपवारयतिवेत्यर्थः॥ ३८। जिह्वोन्मथने लडिः। लड विलास इति पठितस्य मित्त्वार्थोऽनुवादः। उन्मथनं ज्ञापनम्। जिह्वाशब्देन षष्ठी तत्पुरुषः॥ ९। बोधयितुमभिप्रेतइति

वृत्तिग्रंथः संगच्छतां नाम। माधवमते तु तद्ग्रंथस्य का गतिरित्यत आह। ज्ञपमिच्चेति। ज्ञापनमिति। एवं च वृत्तिग्रंथो माधवमतेऽपि संगच्छत इति भावः। मारणादिकं चेति। एतच्च मतान्तराभिप्रायेणोक्तं चुरादिषु तु ज्ञपमिच्च अप ज्ञाने ज्ञापने च वर्तते इति वक्ष्यमाणत्वात्। कथमिति। ज्ञाधातो ज्ञपधातोश्च णौ मित्त्वात् ह्रस्वेन भवितव्यमिति भावः। मित्त्वाभावादिति। एवं च बोधने ज्ञाधातोः ज्ञापयति ज्ञपधातोस्तु ज्ञपयतीति रूपद्वयं माधवमते बोध्यं। छदिरूर्जने। ऊर्जं वलप्राणनयोः। अत्र

छदिसिन्तालुगायं तर्गणे केजादिकः स्वार्थेणिजन्त
वर्तिमाध्याप्याद्दिनि वकैस्याकस्यादिति भावः॥ ९॥



340

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लडयति जिह्वामिति। जिह्वां ज्ञापयतीत्यर्थः। जिह्वयेति। जिह्वया पदार्थान्तरं ज्ञापयतीत्यर्थः। जिह्वाव्यापारे उदाहरणमाह। लडयति शत्रुमिति। शत्रुमुद्दिश्य गालनादिकरो
तीत्यर्थः। लडयति दधीति। उन्मथ्नाति। विलोडयत्यर्थः। केचित्तु जिह्वाव्यापारे लडयति दधि उन्मथने तु लडयति शत्रुमिति व्यत्यासेन योजयन्ति। लाडयति पुत्रमिति। शके

लडयति जिह्वा तृतीयान्तसुरुषो वा लडयति जिह्वया अन्यत्तु जिह्वाशब्देन तद्व्यापारो लक्ष्यते समाहारद्वन्द्वो वा॥

लडयति शत्रुम्। लडयति दधि। अन्यत्र लाडयति पुत्रम्। ३९। मदी हर्षग्लेपनयोः। ग्लेपनं दैन्यं दैवादिकस्य मित्त्वार्थोऽयमनुवादः। मदयति
। हर्षयति। ग्लेपयति वेत्यर्थः। अन्यत्र मादयति। चित्तविकारमुत्पादयतीत्यर्थः। ४० ।ध्वन शब्दे। भौवादिकस्यायं मित्त्वार्थमनूद्यते। ध्वनयति घ।
ण्टाम्। अन्यत्र ध्वानयति। अस्पष्टाक्षरमुच्चारयतीत्यर्थः। ४१ अत्र भोजः। दलिवलिस्खलिरणिध्वनित्रपिक्षपयश्चेति पपाठ। तत्र ध्वनिर
णी उदाहृतौ। दल विशरणे। वल सम्वरणे। स्खल सञ्चलने। त्रपूष् लज्जायामिति गताः। तेषां णौ। दलयति। वलयति। स्खलयति त्रपयति। क्षै
क्षये इति वक्ष्यमाणस्य कृतात्वस्य पुकानिर्देशः। क्षपयति। ४८। स्वन अवतंसने। शब्दे इति पठिष्यमाणस्यानुवादः। स्वनयति। अन्यत्र स्वा।
नयति। ४९। घटादयो मितः। मित्संज्ञा इत्यर्थः। ५०। जनीजॄष्क्नसुरञ्जोऽमन्ताश्च। मित इत्यनुवर्त्तते। जॄषिति षित्त्वनिर्देशाज्जीर्य्यतेर्ग्रहणम्।
जरणं तेस्तु जारयति। केचित्तु जनीजॄक्नसु इति पठित्वा क्नसु निरसने इति दैवादिकमुदाहरन्ति। ५४। ज्वलह्वलह्मलनमामनुपसर्गाद्वा एषां
मित्त्वं वा। प्राप्तविभाषेयम्। ज्वलयति। ज्वालयति। उपसृष्टे तु नित्यं मित्त्वम्। प्रज्वलयति। कथं तर्हि प्रज्वालयति। उन्नामयतीति। घटन्ता।
त्त्वकरोतीति णौ। कथं संक्रामयतीति। मितां ह्रस्व इति सूत्रे वा चित्तविरागे इत्यतो वेत्यनुवर्त्त्य व्यवस्थितविभाषाश्रयणादिति वदन्ति कृता। एते।
नर्जो विश्रामयन् राज्ञाम्। घुर्य्यान् विश्रामयेति स इत्यादि व्याख्यातम्॥ ५८॥ ९दि दाने न न्यनुकूलयतीत्यर्थः। ध्वनिरणी उदाहृताविति। ध्वनिस्त्वव
धानेनोदाहृतः। रणिस्तु कारणगता विस्तरेत्यर्थः। स्वन अवतंसने अवतंसनं भूषणं स्वनयतीति। भूषयतीत्यर्थः। अस्वानीत्। अस्वनीत्। अस्वनि। अस्वानि। स्वनं स्वनं॥
स्वानं स्वानं। घटादयो मित्संज्ञा इत्यर्थ इति। अन्ये तु मकारानुबन्धा इति व्याचक्षते। घट म् चेष्टायामिति प्रत्येकं पाठे गौरवादेकत्रैव सर्वेषां मित्संज्ञा मकारानुबन्धकत्वं वाऽनेन

इति णिचीयघटादिमिताः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



जनीजृष्क्नसुरञ्जोऽमन्ताश्च । जनी प्रादुर्भावे । जृष्वयोहानौ । क्नसु ह्वरणदीप्त्योः । त्रयोपि दिवादयः । रञ्ज रागे । देवादिको भौवादिकश्च । अमन्ताः कमिगमीत्यादयः । जनयति । जरयति । क्न
नयति । रञ्जयति मृगान् । रञ्जयति पक्षिणः । कमयति । गमयति । रमयति । ज्वलह्वलह्मलनमामनुपसर्गाद्वा । एषां मित्त्वं वा । मितां ह्रस्वः इत्यनुवृत्तेरेह भावप्रधानता । अनुपसर्गादिति तु पक्षे यथेयं
नयति । क्षपयति । सर्वतस्तु ह्रस्व एव । ज्वलह्वलह्मल चलने इति त्रयाणां पूर्वं पठितत्वात्
चमी स्येवं क्रे शेन व्याख्येयमिति भावः । नमोनुपसर्गाद्धिति पाठान्तरं तत्र न कश्चित् क्लेशः । ग्लास्नाविभाषेति । ज्वलदीप्तौ । ह्वल ह्मल चलने इति त्रयाणां पूर्वं पठितत्वान्
मे तु अमन्तत्वादिति भावः । कथं संक्रामयतीति । क्रमेर्नोदात्तोपदेशस्येति वृद्धिप्रतिषेधात् घञि क्रम इत्येव भवति । ननु क्राम इति पूर्वोक्तसमाधानस्यात्रासंभवात् पृथ

ग्ला स्ना वनु वमां च । अनुपसर्गादेषां मित्त्वं वा स्यात् । ज्ञा च यो ( प्राप्ते ) ज्ञस्योः प्राप्ते विभाषा । ६४ । न कम्यमिचमाम् । अमन्तत्वात् प्राप्तं मित्त्वमेषां न
स्यात् । कामयते । आमयति । चामयति । ६५ । शमो दर्शने । शाम्यतेर्दर्शने मित्त्वं न स्यात् । निशामयति रूपम् । अन्यत्र तु प्रणायिनो निशमय्य वधूः क ।
याः । कथं तर्हि निशामय तदुपस्थितिं विकल्पवक्ततोमयेति । शम आलोचने इति चौरादिकस्य धातूनामनेकार्थत्वाच्च वृत्तिः शाम्यतिवत्
६६ । यमोऽपरिवेषणे । यच्छतिर्भोजनातोन्यत्र मित्त्वं स्यात् । आयामयति । द्यापयति । व्यापारयति वेत्यर्थः । परिवेषणे तु । यमयति ब्राह्मणान् ॥
भोजयतीत्यर्थः । पर्यवसितं तु नियमयन्नित्यादि तु नियमवत्त्वान्न त्वरोमीति णौ वा ध्यम् । ६७ ॥ स्खदिरवपरिभ्यां च । मित्त्वेसेव । अवस्खा
दयति । परिस्खादयति । अपावपरिभ्य इति न्यासकारः । स्वामी तु न कमीति न जमुत्र त्रि सूत्र्यां मनानुवर्त्य शम अदर्शने इति विच्छेदाय मस्त
परिवेषणो मित्त्वमाह । तन्मते पर्यवसितं नियमयन्नित्यादि सम्यगेव । उपसृष्टस्य स्वदेश्चेद्वादिपूर्वस्यैवेति नियमात् प्रस्खादयतीत्याह ।
तस्मात् स्खदयेउदाहरणप्रत्युदाहरणयोर्व्यत्यासः फलितः । इदं त्वमतं तथा न्यासादिविरोधादुपेक्ष्यम् । ६८ ॥ ९९ कृपश्वः त्वयवस्थितविभाषे

स्यादि । कश्चित् णौ मितां ह्रस्वो न प्रवर्त्तत इति भावः । वृत्तिकृदिति । केचित्तु घञन्तात् क्रमशब्दात् प्रज्ञाद्यणि क्रामशब्दं स्वीकृत्य तस्मात् तत्करोतीति णौ संक्रामयती ।
तिसमादधत इति भावः । इतरयोः प्राप्त इति । वनोः पूर्वं पाठाद्धमेरमन्तत्वाच्चेति भावः ॥ ॐ ॥ ग्लापयति । ग्लपयति । स्नापयति । स्नपयति । वनयति । वानयति । व
मयति । वामयति । शाम्यतिवदिति यथा शाम्यति निशामयतीत्यादौ दर्शने प्रयुज्यते तथा चुरादिः । शामधातुरपि श्रवणो भविष्यतीत्यर्थः ॥ ६ न ॥



341

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यमोऽपरिवेषणे। यच्छति रितिः। यम उपरमे इत्ययं धातुः। भोजनाशब्दे। एयासमंथो युजिति युजं तो ह्येयः। परिवेषणमिह भोजनानुकूलव्यापारस्ततोऽन्यस्मिन्नर्थे मित्त्वनिषेधः
।नियमयन्तीति नियमवच्छब्दाणि विविन्नतोर्लु कि शतरिशामसंयेगुणोच ज्ञेयं। व्यासः फलितइति। स्वामिमते त्वपरिवेषणेऽप्ययमयति। परिवेषणेनुयामयति
फण गतौ। नेति निवृत्तमसम्भवात्। निषेधात्पूर्वमसौ नु पठितः। फणादिकार्यानुरोधात्। फणां च सप्तानाम्। ६।४।१२५। एषां वा एत्वाभ्या
सलोपौ स्तः किति लिटि सेटि थलि च। फेणतुः। पफणतुः। फेणुः। पफणुः। फेणिथ। पफणिथ। फणयति। घटादिः समाप्तः। फणेः प्रागेव वृत्।
द्विसेके। तन्मते फाणयतीत्येव। ८६०। राजृ दीप्तौ। स्वरितेत्। राजति। राजते। रेजतुः। रराजतुः। रेजे। रराजे। अतइत्यनुवृत्तावपि विधानसामर्थ्यादात्वं
द्वे। टुभ्राजृ टुभ्राशृ टुभ्लाशृ दीप्तौ। अनुदात्तेतः। भ्राजतेरिह पाठः फणादिकार्यार्थः। पूर्वस्यास्तु पाठस्त्वृकारादित्वाभावार्थः। तत्र हि राजि सह च।
व्यीत् फणादेरेव ग्रहणम्। भ्रेजे। बभ्राजे। वा भ्राशेति श्यन्वा। भ्राश्यते। भ्राशते। भ्रेशे। बभ्राशे। भ्लाश्यते। भ्लाशते। भ्लेशे। बभ्लाशे। द्वावपीमौ ना
लव्यान्तौ। ८६७। स्यमु स्वन ध्वन शब्दे। स्यमादयस्त्रयः सन्ताः परस्मैपदिनः। स्येमतुः। सस्यमतुः। अस्यमीत्। स्वेनतुः। सस्वनतुः। सस्वनुः। अस्वा
नीत्। अस्वनीत्। विष्वणति। अवष्वणति। सशब्दं भुङ्क्त इत्यर्थः। वेश्च स्वन इति षत्वं। फणादयो गताः। दध्वनतुः। ३। षम ष्टम अवैकल्ये। समा
मा तस्ताम। ४। ज्वल दीप्तौ। अज्वालीत्। ६। चल कम्पने। ७। जल घातने। घातनं तैक्ष्ण्यं। ८। टल ट्वल वैक्लव्ये। १०। ष्ठल स्थाने। ११। हल विले
खने। १२। णल गन्धे। बन्धन इत्येके। १३। पल गतौ। पलति। १४। बल प्राणने धान्यावरोधे च। बलति। बेलतुः। बेलुः। १५। पुल महत्त्वे। पोलति। १६।
कुल संस्त्याने बन्धुषु च। संस्त्यानं सङ्घातः। बन्धुशब्देन तद्व्यापारो गृह्यते। कोलति। चुकोल। १७। शल हुल पत्लृ गतौ। शशाल। जुहोल। पपात। पेततुः
त्राह्मणान् अवादिपूर्वस्य स्यन्देर्वस्वदयति परिस्वदयति प्रपूर्वस्य तु प्रस्वादयतीत्येवं व्यवस्था बोद्धेयः। उपेक्ष्यमिति। न पादम्येति सूत्रे आयामयत इत्युदाहरणात्तु
यमोऽपरिवेषणे इत्यनेन मित्त्वं प्रतिषिध्यत इति न्यासेऽपि तत्र न कम्यमीत्यत्र तेन सत्तु वर्तनं इत्युक्तं। एवं हि निषेधानंतरं पाठ उपपद्यते। अन्यथा न कमीत्यतः प्रागेव पिसूर्क

CC-0. In Public Domain. Digitization by eGangotri



णोनुचिरणमुलोरितिवादीर्घः। अफलि। अफाणि। फणं फणां। फाणं फाणां। असंभवादिति। मित्त्वप्राप्तिं विना निषेधासंभवादिहनेत्सेतत्र संबध्यते। किंतु मित्संज्ञैवातदे
नदाह। फणयतीति। सामर्थ्यादिति। फणादिषु पाठसामर्थ्यादित्यर्थः। तत्र हीति षत्वविधौ हीत्यर्थः। तथा च विभ्राट्। विभ्राड्भ्यां पूर्वं पठितस्य तु विभ्राक् विभ्राग्भ्या
मित्यादि सिध्यतीति भावः। अस्यमीदिति। मीतत्वान्न वृद्धिः॥ अथ ज्वलादिः। अज्वालीदिति। अतो ल्रान्तस्येति वृद्धिः। वेल्ल इति वेल्लयं भयादिज नितो द्विरुक्ताद्भ
पार इति। वंधुताऽनुकूलो व्यापारः॥ ॥ पतः पुम्। मित्वादंत्यादचः परः। अकथीदिति। एदित्वान्न वृद्धिः। एवं अपथीत्। अमथीदित्यत्रापि। टुवमु। केचिदमुमुदि
तं पठित्वा वांत्वा वमित्वेत्युदाहरंति। तत्तु वामनेन विरुध्यते। तेन हि श्वादितश्चेति चकारस्यानुक्तसमुच्चयार्थत्वमाश्रित्य वांतः इत्यत्र इडभावः साधितः। उदित्त्वे
तु यस्य विभाषेत्यनेनैव वांत इति सिद्धे तदसंगतं स्यात्। एवं च क्त्वाप्रत्ययेव मित्वेत्येव साधुनिपातनादिति। अन्ययागुणोस्तु। उन्नरोदतिस्यात्। यद्यपि अर्थनि

पतः पुम्। ७।४।१९। अङि परे। अपप्तत्। नेर्गदेति णत्वं। प्रण्यपप्तत्। २०। कथे निष्पाके। कथति। चकाथ। अकथीत्। २१। पथे गतौ। अप
थीत्। २२। मथे विलोडने। मेथतुः। अमथीत्। २३। टुवमु उद्गिरणे। इहैव निपातनादत्र इत्वमिति सुधाकरः। ववाम। ववमतुः। वादित्वादेत्वा
भ्यासलोपौ न। भागवृत्तौ तु वेमतुरित्याद्युदाहृतम्। तच्च भाष्यादौ न दृष्टं। २४। भ्रमु चलने। वा भ्राशेति श्यन्वा। भ्रम्यति। भ्रमति। भ्राम्यतीति तु दि
वादेर्बोध्यते। ९॥

देश आधुनिकस्तथापि पृषोदरादित्वादित्वमित्यत्रैव तात्पर्यं बोध्यं वस्त्वाद्युदाहृतमिति। वेमुश्चके चिद्गुधिरमित्यादिप्रयोगानुरोधेन
तयोदाहृतमित्याहुः। ननु वादित्वेन निषेधादेत्वाभ्यासलोपौ कथमिह स्यातामिति चेदत्राहुः। न सशसददवादिगुणानामिति सूत्रेऽपि वस्य कारांतसंघातग्रह
णेन इष्टसिद्धेरादिग्रहणमौपदेशिकप्रतिपत्त्यर्थमेकांतास्त्वनुवं धा इति च स्वीक्रियते। तथा च नायं वादिः। किंतु द्वादिरिति अमेतुर्वमे ऽदे लोपौ स्योरिति लोपे
नयकारः प्रक्षिप्यते। तत्त्वोपदेशे वादित्वाभावान्निषेधोनेत्याहुः। भ्रमु चलने। मंडलाकारेण चलनमेव धात्वर्थो न तु चलनमात्र। तदभाववद्विशेष्यकत्वप्र
कारकज्ञाने च धात्वर्थः। शुक्तिं पश्यन्नू रजतमिति भ्रमतीति प्रयोगात्। उदित्त्वे वेति क्त्वायां वेट्। भ्रमित्वा। भ्रांत्वा यस्य विभाषेति निष्ठायां नेट्। भ्रांतः। ननु स्फ्वलच्वला एम. ४६
दिगणे पाठः किमर्थः। न चात्रणप्रत्ययार्थमेव पाठ इति वाच्यं। पचादेराकृतिगणत्वादच्प्रत्ययेनापि भ्रमदृतिरूपसिद्धेः। नोदात्तोपदेश॥ ६ ॥ ६ ॥

342

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्येति वृद्धिनिषेधात् णिप्रत्ययेऽच्प्रत्ययेऽपि च रूपस्य तुल्यत्वादिति चेत् । अत्राहुः । यदि पचादित्वादच्प्रत्ययः स्यात्तर्हि अभ्रम इत्यत्र अचकावशक्ताविति नञः परमन्तोदात्तं स्यात् णिप्रत्यये त्विह तत्पुरुषे तुल्यार्थेत्याद्युदात्तमेव भवतीति ॥ ॐ ॥ वाञ्छ भ्रमुत्रसां । अत्रास विभाषेयं । अभ्रमीदिति । मान्तत्वान्न वृद्धिः । अत्रासीदिति । हलन्तलक्षणायां वृद्धेर्नेटीति निषेधे प्राप्ते ल्लान्तस्येति वृद्धिः । षह । अपराधे सत्यपि कोपानाविष्करणं मर्षणं । सहिवहो । इह रेफलोपस्यासंभवात् ढ्लोपे पूर्वस्येत्यस्मान्नो ढलोप ए-वानुवर्त्तते तदाह । ढलोप इति ढलोपे किं । सहन्ते । वहन्ते । सोढः । षत्वं नेति । नरपरेति सूत्रान्नेत्यनुवर्त्तते इति भावः । सिवादीनां । सिवु सह सुट् स्तु स्वञ्जः सिवादयः । पर्यषीव्यत् । पर्यसीव्यत् । पर्यष्करोत् । पर्यस्करोत् । न्यष्टौत् । न्यस्तौत् । व्यष्वजत् । व्यस्वजत् । रम क्रीडायां । असुमुदितं मत्वा रंत्वा रमित्वेति केचिदुदाजह्रुस्तन्माधवादयो न सहन्ते

वाञ्छ भ्रमुत्रसाम् ।६।४।१२४। एषामेत्वाभ्यासलोपौ वा स्तः किति लिटि सेटि थलि च । भ्रेमतुः । अभ्रमीत् ।२५। क्षर सञ्चलने । अक्षारीत् ॥ २६ । अथ द्वावनुदात्तेतौ । षह मर्षणे । परिनिविभ्य इति षत्वं । परिषहते । सेहे । सहिता । तीषसहेति वा इट् । इडभावे ढत्वधत्वष्टुत्वढलोपाः । सहिवहोरोदवर्णस्य ।६।३।११२। अनयोरवर्णस्य ओत्स्यात् ढलोपे सति । सोढः ।८।३।११५। सोढरूपस्य सहेः सस्य षत्वं न स्यात् । परिसोढा । सिवादीनां वाड्व्यवायेऽपि ।८।३।७१। परिनिविभ्यः परेषां सिवादीनां सस्य षो वा स्यादड्व्यवायेऽपि । पर्यषहत । पर्यसहत ।१। रम क्रीडायाम् । आरेमे । रेमिषे । रन्ता । रंस्यते । रंसीष्ट । अरंस्त ।२। अथ कसन्ताः परस्मैपदिनः । षद्लृ विशरणगत्यवसादनेषु । पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ।७।३।७८। पादीनां पिबादयः स्युरित्संज्ञकशकारादौ प्रत्यये परे । सीदति । ससाद । सेद

न्तु । तथा च वक्तायां रन्त्वेत्येव साधु । रेमिषे इति । क्रादिनियमादिट् । पचाद्यचि टाप् । रमा । घञि तु रामः । अमन्तत्वेन मित्त्वात् णौ ह्रस्वः । रमयति । षद्लृ । विशरणमवयवानां विश्लेषः । अवसादनं नाशः । पाघ्राध्मा । पा पाने । पा रक्षणे इति तु न गृह्यते । लुग्विकरणत्वात् । दृशी इति केचित्पाठस्तत्र दृजिर्दृशोरित्यम् । अर्त्तिसर्त्योरृच्छादेश-घभाव इव सैन्नत्वात् । पश्यादेशाभाव इति बोध्यं । दृश्यर्त्तीति पाठस्तु निर्दुष्ट एव । पादीनामिति । एकादशानामेषां यथासंख्यमेकादशापि वा पादेशाः स्युरित्यर्थः । ष्ठिवु-क्लमुचमामित्यतः । शितीत्यनुवर्त्तते स च कर्मधारय इत्यभिप्रेत्याह । इत्संज्ञकशकारादाविति । शकारादाविति किं । पपौ । जघ्रौ ॥ ६ ॥ ६ ५

CC-0. In Public Domain. Digitization by eGangotri



द्ध्यो।शितो तिवद्गुद्यो हि रित्यभ्युपगमेत्विह पिबादादेशाः सुरेव ॥ ॐ ॥से दियेति।उपदेशोऽत्वतद्दति क्रादिनियमप्राप्तस्येटो निषेधेपि भारद्वाजनियमादि
ट्।सदेः परस्य।सदेरितिपष्ठी।फलितमाह।अभ्यासात्परस्येति।स्यादित्वभ्यासेन चेति प्राप्तिः।लिटीति किं।निषिषित्सति।सदिस्वञ्ज्योरित्युत्सादकोपि पा
ठ्ठ्ह्यपे सितः।भाष्यानुगुणत्वात् निषसादेति।सदिरप्रतेरित्यत्राप्र.तेरिति पर्युदासा स्वतिसमादे सत्राभ्यासस्यापिषत्वंनेति बोध्यं।धाड्विषशीर्णताया
मिति वक्तव्ये शात्तनेऽकत्तु निरसंगतेत्याशंक्य कथंचित्समाधत्ते।शात्तनंत्विति।षादेरेवहि णिचि शदेरगत्तावितित्ते लुटिच शात्तनमिति रूपं।तथाचास्येव घ

सेदिथ।ससत्थ।सत्ता।सत्स्यति।लृदित्वादङ्।असदत्।सदिरप्रतेः।निषीदति।न्यषीदत्।सदेःपरस्य लिटि।८।३।११८।सदेरभ्यासात्परस्य ष
त्वं न स्यात्।लिटि।निषसाद।निषेदतुः॥२॥ शद्लृ शातने।विशीर्णताया मयमष्णातनन्तु विषयतया निर्दिश्यते।शदेः शितः।१।३।६०।शिज्भा
विनोः शदात्मनेपदं स्यात्।शीयते।शशाद।शेदतुः।शेदिथ।शशत्थ।शत्ता।अशदत्।२।क्रुश आह्वाने रोदने च।क्रोशति।क्रोष्टा।क्रुशः क्सः
।अक्रुक्षत्।३।कुच सम्पर्चन कौटिल्य प्रतिष्टम्भविलेखनेषु।कोचति।चुकोच॥४॥बुध अवगमने।बोधति।बोधिता।बोधिष्यति॥ ५॥
रुह बीजजन्मनि प्रादुर्भावे च।रोहति। ।रुरोह।रुरोहिथ।रोढा।रोक्ष्यति।अरुक्षत्।६॥कस गतौ।अकासीत्।अकसीत् ॥ ७ ॥
वृत्।ज्वलादिगणः समाप्तः॥ ॐ ॥ अथ गूहत्यन्ताः स्वरितेतः॥ हिक्क अव्यक्ते शब्दे।हिक्कति।हिक्कते॥ १ ॥ ॐ ॥

नोरिदं रूपं प्रसिद्धं चेत्यभिप्रेत्य तन्निर्देशः कृतः।यथा गम्लृ गतौ।डुपचष् पाक इत्यादावितिभावः।कुच संपर्चनादौ।कुचशब्देतारेइतिचवर्गीयान्तेषु पठितस्य
पुनरिह पाठः संपर्चनादावेव ज्वलादित्व प्रयुक्तो णप्रत्ययो यथा स्यादिति मनोरमादौ स्थितं अत्र नव्याः।अनेनैव ग्रंथेन पाणिनिनापि क्वचित्क्वचिदर्थ निर्देश
कृत इत्यनुमीयते।अन्यथा ग्रंथस्यारम्भं गापत्तेरित्याहुः।बोधितेति।बुध्यतेरेवानिट्कारिकासु पठितत्वादयं सेडिति भावः।अकासीदिति।हलं तलक्षणाया
वृद्धेर्नेटीति निषेधेप्यतो हलादेरिति वैकल्पिकोहद्धिः।इदितिःअत्र नव्याः।ज्वलितिकसंतेभ्य इति निर्देशाद्वृत्करणमिहानार्षमित्यनुमीयते।अन्यथाज्वलादि

राम· ४७

343

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंचु गतौ। अनिदितामिति नलोपः। अच्यात्। अचीस्वेकीयमते तु इदित्वादंच्यात्। मेथृ संगमे च। वात् पूर्वोक्तः। धौ। प्रजाये गृहमेधिनामित्यत्र गृहे दारैर्मेधते संगच्छते इति वि

अञ्चु गतौ याचने च। अञ्चति। अञ्चते। २। अचु इत्येके। ३। अचि इत्यपरे। ४। टुयाचृ याच्ञायाम्। याचति। याचते। ५। रेटृ परिभाषणे। रेटति।
रेटते। ६। चते चदे याचने। चचात। चेते। अचतीत्। चचाद। चेदे। अचदीत्। ८। प्रोथृ पर्य्याप्तौ। पुप्रोथ। पुप्रोथे। ९। मिदृ मेदृ मेधाहिंसनयोः। मि
मेद। मिमेदे। ध्यान्ता विमा विति स्वामी। नमा मिमेथ। धांता विति न्यासः। ११। मेधृ सङ्गमे च। मेधति। मिमेधे। १२। णिदृ णेदृ कुत्सासन्निकर्षयोः। निने
द। निनिदतुः। निनिदे। १४। शृधु मृधु उन्दने। उन्दनं क्लेदनम्। शर्द्धति। शर्द्धते। शर्द्धिता। मर्द्धति। मर्द्धते। १६। बुधिर् बोधने। बोधति। बोधते। इरि
त्वाद्वा। अबुधत्। अबोधीत्। अबोधिष्टा दीपजनेति चिण् तु न भवति। पूर्वोत्तरसाहचर्य्यात् दैवादिकस्यैव तत्र ग्रहणात्। १७। उबुन्दिर् निशा
मने। बुबुन्द। अबुदत्। अबुन्दीत्। १८। वेणृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु। वेणति। वेणते। नान्तोप्ययम्। १९। खनु अवदारणे। खन
ति। खनते। गमहनजनखनघसां लोपः क्ङित्यनङि। ६।४।९८। एषामुपधाया लोपः स्यादजादौ क्ङिति न तु ङि। चख्नतुः। ये विभाषा। ६।४।४३। खा
त्। खन्यात्। २०। चीवृ आदानसंवरणयोः। चिचीव। चिचीवे। २१। चायृ पूजानिशामनयोः। २२। व्यय गतौ। अव्ययीत्। २३। दाशृ दाने। ददाश। द
दाशे। २४। भेषृ भये। गतावित्येके। भेषति। भेषते। २५। भ्रेषृ भ्लेषृ गतौ। २६। अस गतिदीप्त्यादानेषु। असति। असते। आस। आसे। अयं षान्तोपि।
२७। स्पश बाधनस्पर्शनयोः। स्पर्शनं ग्रंथनम्। स्पशति। स्पशते। २८। लष कान्तौ। वा भ्राशेति श्यन् वा। लष्यति। लषति। लेषे। २९। चष भक्षणे। ३०।
छष हिंसायाम्। चच्छषतुः। चच्छषे। ३१। झष आदानसंवरणयोः। ३२। भ्लक्ष भक्ष अदने। ३४। भक्ष इति मैत्रेयः। ३५। दासृ दाने। ३६। माहृ माने। ३७।
१९ गुहू संवरणे ॥ ६॥

ग्रहः। सुप्यजाता विति णिनिः। शृधु मृधु क्लेदनमिति। आर्द्रीभावइत्यर्थः। उदित्वात्क्त्वायां वेट्। शर्धित्वा। शृद्ध्वा। उबुंदिर्। बुंदित्वा। बुत्त्वा। निष्ठा
यां बुन्नम्। निशामनं चाक्षुषं ज्ञानं। वेणृ। गत्याद्यर्थः पंच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वाद्यभांडस्यवादनार्थंग्रहणं॰॥दिन्त्रग्रहणंवेणिः।वेणी।वेणुरित्यादिरूपाण्यस्यैवधातोः।नांतोपीति।उत्तमात्तामहिषमन्ववेनदित्यत्रनांतदर्शनादितिभावः।खनु।ख
नित्वा।खात्वा।निष्ठायां।खातः।गमहनान्त्रविश्चुधातुभुवामित्यतोन्प्रचीत्यनुवर्तते।ऊदुपधायागोहइत्यत्रउपधाग्रहणंच।नदाह।एषामुपधायाइत्यादि।ज
ग्मतुः।जग्मुः।जघ्नतुः।जघ्नुः।जज्ञे।जज्ञाते।जक्षतुःजक्षुः अनङीतिकिं।अगमत्।चीवृचीवरंवल्कंचीवरपीवरमीवरेत्युणादिषुनिपातितोऽयम्।व्ययगतौ।वित्त।
त्सागेत्तुनित्यमात्मनेपदीगतइतिमनोरमा।नकुत्रापिगतइतिविंसैवसा।अन्ययोदिति।यांतत्वान्नवृद्धिः।स्पशबाधनस्पर्शनयोः।णिश्रीतिन्नेश्चङि।अपस्पश
त्।अत्स्मृदृत्वरप्रथेत्यादिनाअभ्यासस्यात्वंसन्वदित्वापवादः।पस्पशायङंतादचियङोचिचेतिलुक्।अजाद्यतइतियाप्।दीर्घोकितइत्यभ्यासस्यदीर्घस्तुनभ।

ऊदुपधायागोहः।६।४।८९।गुहउपधायाऊत्स्याद्गुणहेतावजादौप्रत्यये।गूहतिगूहतेअदित्वादिट्।गूहिता।गोढा।गूहिष्यति।घोक्ष्यति।गूहेत्
गूह्यात्।अगूहीत्।इडभावेक्सः।अघुक्षत्।लुग्वादुहदिहलिहगुहामात्मनेपदेदन्त्ये।७।३।७३।एषांक्सस्यलुग्वादन्त्येतङि।ढत्वधत्वष्टु।
त्वढलोपदीर्घाः।अगूढ।अघुक्षत।क्सस्याचीत्यन्तलोपः।अघुक्षाताम्।अघुक्षन्त।अगुह्वहि।अघुक्षावहि।अघुक्षामहि।३८।अथाजन्ताः
उभयपदिनः।श्रिञ्सेवायाम्।श्रयति।श्रयते।शिश्रियतुः।श्रयिता।णिश्रीतिचङ्।अशिश्रियत्।१।भृञ्भरणे।भरति।बभार।बभ्रतुः।बभर्थ
बभृव।बभृषे।भर्ता।ऋद्धनोःस्ये।७।२।७०।ऋतोहन्तेश्चस्यस्यइट्स्यात्।भरिष्यति।रिङ्शयग्लिङ्क्षु।७।४।२८।शेयकियादावार्द्धधातुके
लिङिचऋतोरिङादेशःस्यात्।रीङिप्रकृतेरिङ्ङिधिसामर्थ्याद्दीर्घोन।भ्रियात्॥ ११वनि संज्ञापूर्वकविधेरनित्यत्वादित्याहुःजपजभदहदशभंजपशांचे
त्यत्रपसेतिसौत्रोधातुः।पसतीत्यादि।यङ्लुकोत्तुजपजभेत्यनेनैवाभ्यासस्यनुक्।यङि।पंपस्यते।लुकि।पंपसीति।पंपस्इतिकंडवादिःपंपस्यति॥ ❀ ॥ऊदुप॰
धायाः।गुणहेताविति।एतच्चगोहइतिविकृतनिर्देशाल्लब्धं।नचिश्चधातुइत्यतोऽनुवृत्तेनाचीत्यनेनागाक्षिप्तप्रत्ययोविशेष्यतेविशेषणेनतदादिविधिस्तदाह।अजा
दावितिदंत्येतङीति।दंत्यादौतङीत्यर्थः।अदुग्ध।अघुक्षत।अदिग्ध।अधिक्षत।अलीढ।अलिक्षतेत्यादि।रिङ्शयग्लिङ्क्षु।अयङ्यिक्वितोरित्यतोऽनुवृत्तंयीत्येतल्लि
ङएवविशेषणंशेऽसंभवात्किंतुचेप्यश्याताततथाच्अकृत्सार्वधातुकयोरित्यनुवृत्तमपिलिङएवविशेषणमित्यभिप्रेत्याहयादाविन्यादि।शे।म्रियते।तुदादिभ्यइति



344

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उक्ष्य। इकोझलइत्यतो झलग्रहणं लिङ्सिचावितिपूर्वसूत्रंचानुवर्तते तदाह। ऋवर्णान्तादित्यादि। अभार्षीदिति। सिचिवृद्धिरितिवृद्धिः। ह्रस्वादंगात्। ह्रस्वात्किं। अच्यो
अंतादिशब्दौ अवयवविशेषवाचिनौ तत्र यदि पूर्वस्य अवयवबुध्या एकादेश आश्रियते तदान्तस्यैव परस्य कथमादिवद्भावः स्यात् एवं परस्यादिवत्वे पूर्व

एते र्लिङि।७।४।२४। उपसर्गात्परस्य इणोऽणो ह्रस्वः स्यादार्द्धधातुके किति लिङि। निरियात्। उभयत आश्रयणे नांतादिवत्। अभी
यात्। अणः किं। समेयात्। समीयादिति प्रयोगस्तु भौवादिकस्य। इणो गा लुङि।२।४।४५। गाति स्थेति सिचो लुक्। अगात्। अगातां। अगुः
। इङ् अध्ययने। नित्यमधिपूर्वः। अधीते। अधीयाते। अधीयते। गाङ् लिटि।२।४।४९। इङो गाङ् स्याल्लिटि लावस्थायां विवक्षिते वा। अधि
जगे। अधिजगाते। अधिजगिरे। अध्येता। अध्येष्यते। अध्ययै। गुणायादेशयोः कृतयोरुपसर्गस्य यण्। पूर्वं धातुरुपसर्गेणेति दर्शनेऽन्त
रंगत्वाद्गुणात्पूर्वं सवर्णदीर्घः प्राप्तः। णेरध्ययने वृत्तमिति निर्देशान्न भवति। अध्यैत। परत्वादियङ्। ततआट्। वृद्धिः। अध्यैयातां। अ
ध्यैयत। अध्यैयि। अध्यैवहि। अधीयीत। अधीयीयातां। अधीयीध्वं। अधीयीय। अध्येषीष्ट। विभाषा लुङ्लृङोः।२।४।५०। इङो गाङ्वा स्या

स्यांतवद्भावो न स्यादेकस्योभयापेक्षया पारतंत्र्यविरोधादिति भावः। नन्वेवं रामोऽस्त्यस्य सुप्तिङंतमिति पदत्वं न स्यात् परादित्वे राम इति॥ ना लुङ्लृङोः 356
प्रकृते रभावात्। यस्मात्प्रत्ययविधिस्तदादेस्तदंतस्य ग्रहणमिति स्वीकाराद्रामद्स्य प्रकृतित्वात्। पूर्वांतत्वेन परत्र प्रसक्त्याभावात् अत्राहुः। पूर्वं पदसं
ज्ञा पश्चादेकादेश इति नोक्तदोषः। इहच ज्ञापकं सुपिस्थ इति समाइति। विध्यादौ समीपादिति न भवत्येव। आशी र्लिङि तु अकृत्सार्वेति दीर्घे कृतेऽपि ह्रस्वेन भा
व्यमित्याशंक्याह। भौवादिकस्येति। इट किट कटी इत्यत्र प्रश्लिष्टस्य ई धातोराशी र्लिङि इदं रूपं। वी गतावित्यत्र ईकारोऽपि धात्वंतरं प्रश्लिष्यत इति मते तु विध्यादि लि
ङ्यपि भवत्येवेति बोध्यं। गाङ् लिटि। लावस्थायामिति वार्तिकमते एकादेशात्प्रागेव गाङादेशो द्विर्वचने चेति सूत्रं न प्रवर्तते द्वित्वनिमित्ताचोऽभावात्॥ ६॥

राम॰ ६०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विवक्षित इति। भाष्यमते तु सुतरां न प्रवर्त्तते अनैमित्तिकत्वादिति भावः। निर्देशान्न भवतीति। वार्णादांगं बलीय इति समाधानं तु न प्रवर्त्तते व्याश्रयत्वादिति भावः। अध्यै
यतेति। आत्मनेपदेष्वनत इति झस्य अत्। लङ् मध्यमे तु अध्यैथाः। अध्यैयाथां। अध्यैध्वं। अध्यैषीष्टेति। लिङः सीयुट्। अध्यैषीयास्तां। अध्यैषीरन्॥ ❀ ॥ गाङ्

गाङ्कुटादिभ्योऽञ्णिन्ङित्।१।२।१। गाङादेशात् कुटादिभ्यश्च परेऽञ्णितः प्रत्ययाः ङितः स्युः। घुमास्थागापाजहातिसां हलि।६।४।६६। एषां
मात ईत्स्यात् हलादौ क्ङिति आर्द्धधातुके। अध्यगीष्ट। अध्यैष्ट। अध्यगीष्यत। अध्यैष्यत। इक् स्मरणे। अयमप्यधिपूर्वः। अधीगर्थदयेशामिति
लिंगात्। अन्यथा ह्यिगर्थे सेव ब्रूयात्। इण्वदिक इति वक्तव्यं। अधीयन्ति। अध्यगात्। केचित्तु आर्द्धधातुकाधिकारोक्तस्यैवातिदेशमाहुस्तन्म
ते यण न तथा च भट्टिः समीतयो राघवयोरधीयन्निति। वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु। प्रजनो गर्भग्रहणं असनं क्षेपणं वेति। वीनः वि
यन्ति वेषि वेमि वीहि अवेत्। अवितां। अवियन्। आडागमे सत्यनेकाच्त्वाद्यणिति केचित्। अत्र ईकारोपि धात्वन्तरं प्रश्लिष्यते। एति ईतः इयं
ति। ईयात्। ऐषीत्। या प्रापणे। प्रापणमिह गतिः। प्रणियाति। यातः। यान्ति। लङः शाकटायनस्यैव।१।४।१११। आदन्तात् परस्य लङो झेर्जुस्वा स्या
त्। अयुः। अयान्। यायात्। यायातां। यायास्तां। वा गतिगंधनयोः। भा दीप्तौ। ष्णा शौचे। श्रा पाके। द्रा कुत्सायां गतौ। प्सा भक्षणे। पा रक्षणे। पायास्तां। अपा
सीत्। रा दाने। ला आदाने। द्वावपि दाने इति चन्द्रः। दाप् लवने। प्रणिदाति। प्रनिदाति। दायास्तां। अदासीत्। ख्या प्रकथने। अयं सार्वधातुकमात्र।
विषयः। सख्यानत्वं नमः ख्यात्रे इति वार्त्तिकं तज्ज्ञाप्यं चेह लिंगं सख्यानो जिह्वामूलीयः स्नेति ख्याञादेशस्य खशादित्वे प्रयोजनमिस्वर्थः सं
पूर्वस्य ख्यातेः। प्रयोगो नेति न्यासकारः। प्रा पूरणे। मा माने। अकर्मकः। ततो न मसुस्तत्र न कैटभद्विष इति माघः। उपसर्गवशेनार्थान्तरे सकर्मकः। उ
दरं परिमाति मुष्टिना नेर्गदेसत्र नास्य ग्रहणं प्रणिमाति प्रनिमाति वच परिभाषणे वक्ति। वक्तः। अयमन्तिपरो न प्रयुज्यते बहुवचनेऽस्यन्येऽन्तिपरः

कुटादिभ्यो इह गाङ्गता विस्सस्य न ग्रहणं। तङ्थं तत्र ङकारानुबंधस्य तत्र चरितार्थत्वात्। आदेश ङकार ११ बन्धिवच्चान्नुच्यात्। अवो चत्त विदज्ञाने ॥
सुत्र चरितार्थः। स्यान्निवद्भावेनैव तङः सिद्धत्वादत आह गाङादेशादिति कुटादिसुदायं तगेणाः। केचित्तु कुट आदिर्येषां ते कुटादयः। कुटस्य आदिः कुटादिः कुटा

CC-0. In Public Domain. Digitization by eGangotri

ति॰
सि॰कौ॰ ह्वयमाश्रित्यकुरुपूर्वस्यलिखधातोरपिग्रहणात् लिखनमितिप्रयोगः सिद्ध इत्याहुः तच्चरलोव्युपधादितिसूत्रस्थेनलिखित्वालेखित्वालिलिखिषतिलिलेखिषतीत्य
टी॰त॰ तिद्वतियंथेनशकुनिष्वालेखनेइतिसौत्रप्रयोगेणचविरुध्यते। अत्रिणादितिकिं। घत्रिकोटः। पोटः णलिचुकोटपुपोटघुमास्यादीङोयुङचीस्यतः क्ङितीत्यनुवर्त्तते।
६१ आर्द्धधातुकइतिचाधिक्रियतएवक्ङितिकिंदत्ताधातोहलादौकिंददतुः ददुः अन्यथाआत्तोलोपात्परत्वादीत्वंस्यात् आर्द्धधातुकेकिम्मातःमाथः अध्यगीष्टेति।
सिचोङित्वादीत्वंइकुस्मरणेककारइहइङ्एवादिकइतिविशेषणार्थः एरित्युक्तेतुइङ्किटकटौस्यत्रप्रश्लिष्टस्यइङ्धातोरपिग्रहणंस्यादित्याहुः केचित्तुइत्यार्द्ध
धातुकाधिकारेवार्त्तिकेपाठात्तदधिकारोक्तानामेवकार्याणामुपस्थितत्वात्तिदोषइतिभावः अधीयन्निति। स्मरन्नित्यर्थः। राघवयोरित्यत्रा धीगर्थदयेशांकर्म
णि इतिषष्ठी। वीगाति। अवियन्निति। अडागमात्परत्वादियङ्। अडागमेसतीति। कृताकृतप्रसंगित्वमात्रेणअटोनित्यत्वादितिभावः। अतएवापरितोषादसि
द्धवदत्राभादितिसमानाश्रयेपरिणोकर्त्तव्ये आटोऽसिद्धत्वादियङेवोचितइत्याशयेनवाकेचिदित्युक्तं। लावस्थायामेवाडागमइतिपक्षेतुयणेवेतिबोध्यं। इकारोपी
ति। प्रयुञ्जतेचा नहितरणिरुदीतेदिक्। पराधीनवृत्तिरिति। व्याख्यातंचमनोरमायां। कर्मव्यतिहारेतङ्। नचनगतिहिंसार्थेभ्यइतिनिषेधः शंक्यः। उत्तपूर्वस्याऽ
विर्भावार्थत्वादिति। अत्रवदंति। व्यतिशब्दंविनाकर्मव्यतिहारकस्यनंक्लेशावहं। परकीयकर्मचकर्मव्यतिहारेऽपेक्ष्यते। तच्चात्रनोपात्तं। परस्परकरणंतुनसंभ
वत्येव। ततश्चोदीतेइतिभाष्येनिष्ठाज्ञेया। तथाचोदयेदिक्परधीनवृत्तिस्तरणिर्नेत्यर्थः। सुगमइतिप्रणिदातीति। शेषेविभाषेतिणत्वविकल्पः। अदासीदित्याअ
घुत्वान्नसिज्लुक्। नमः ख्यात्रेइतियद्ययमार्द्धधातुकेपिप्रयुज्येततर्हिनृजंतेऽस्मिन्परेशार्परेविसर्जनीयइत्यस्याप्रवृत्त्या कुप्वोरितिजिह्वामूलीयोदुर्वा
रः स्यादेवेतितद्भावः। स्वशादित्वेप्रयोजनमितिवार्त्तिककाराद्युक्तिर्व्याकुप्येतइतिभावः। संपूर्वस्येत्यादि। संख्यातीत्यादिप्रयोगानात्यैव संख्येतिप्रयोग। 357
सुख्यात्रादेशस्येतिन्यासकाराशयः। मामाने। नास्यति। घुप्रकृतिमाङ् इतिपाठात् ङित्तामेवतत्रग्रहणंततश्चशेषेविभाषेतिविकल्पएवप्रवर्ततइत्याह। प्र
णिमातीत्यादि। वचपरिभाषणे। उवाच। वक्ता। वक्ष्यति। वक्तु। वक्तात्। अवक्। अवक्तां। अयमंतिपरइति। तथाचवचंति। वक्ष्यंति। वचंतु। अवचन्। अवाचन्
। अवक्ष्यन्नित्येतेअसाधवः। बहुवचनपरइति। अस्मिन्पक्षेलटिमध्यमेवक्थ उत्तमेतु। वच्मः। लिटिऊचुः। मध्यमे। ऊच। उत्तमेतु। ऊचिम। लुटिवक्तारः। लिङि॥ राम॰
वच्यासुः। उच्यासुरित्यादयोप्यसाधवः। मिपरइति अस्मिंस्तुपक्षे। वक्थवच्मः। ऊचाऊचिमेत्यादयः साधव इति दिक्॥ ६ ॥ ६ ॥ ६१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विदोलटोवा। पंचमीयं नतुषष्ठी। तेन विद्यतिविंदत्योः अव्यवहितपरस्यलटोः भावान्नेते आदेशास्तदाह। वेत्तेरिति। लो ऽयोलुगिति। आमइतिसूत्रेमंत्रेघसेत्यतोलेरि
तिअनुवर्त्स्यआमः परस्यलोर्लुगितिव्या कुर्वतांमतेनेदमुक्तं। निष्कर्षेतु तेनैवलुगितिबोध्यं। पुरुषवचनेइति। मध्यमपुरुषोबहुवचनंचेत्यर्थः। परस्मैपदमप्यवि
वक्षितमेवेतिकेषांचिन्मतेकर्मव्यतिहारेतङ्व्यतिविदांकुरुतां। व्यतिविदांकुर्वीतामित्यादिज्ञेयं। तेनेति। विभ्यसेदित्यत्रशपोलुग भावः सिद्ध इति भावः। एवमप्य
विभ्यस्तमित्यत्रेड भावः कथमितिचेदागमशास्त्रस्यानित्यत्वादितिगृहाण। अततउत्सार्व। क्ङितिकिं। करोषि। लुको ऽसिद्धत्वादिति। सार्वधातुकग्रहणमुत्तरार्थमेव॥

विदोलटोवा। २।४।९३। वेत्तेर्लटः परस्मैपदानां णलादयोवास्युः वेदविदतुः विदुः वेत्थविदथुः। वेदवेदविद्वविद्मपक्षेवेत्तिवित्तः विदन्ती
त्यादि विवेद विविदतुः उषविदे त्याम्पक्षेविदेरकारान्तनिपातनान्नलघूपधगुणः विदांचकारवेदिता विदांकुर्वन्त्वित्यन्यतरस्यां। ३।१।४१
वेत्तेर्लोट्याम्गुणाभावोलोटोलुग्लोडन्तकरोत्यनुप्रयोगश्चवानिपात्यते। पुरुषवचनेनविवक्षितेइतिशब्दात् तनादिकृञ्भ्यउः। ३।१।७९। त
नादेःकृञश्चउप्रत्ययः स्याच्छपोपवादः तनादित्वादेवसिद्धेकृञ्ग्रहणंगणकार्यस्यानित्यत्वेलिगंतेननविभ्यसेदविभ्यस्तमित्यादिसि
द्धंविदांकरोतु। अतउत्सार्वधातुके। ६।४।११०। उप्रत्ययान्तकृञोकारस्योत्स्यात्सार्वधातुकेक्ङिति। उदितितपरकरणसामर्थ्यान्नगुणःवि
दांकुरुतात्। विदांकुरुता उतश्चेति हेर्लुक् आभीयत्वेनलुकोसिद्धत्वादुत्वं विदांकुरुविदांकरवाणि अवेत् अवित्तां अविदुः स्यजभ्यस्तेतिजुस्। अविदुः।
दश्च। ८।२।७५। धातोर्दस्यपदान्तस्यसिपिपरेरुः स्याद्वा। अवेः अवेत्। असभुवि अस्ति श्नसोरल्लोपः। ६।४।१११। श्नस्यास्तेश्चाकारस्यलोपःस्या
त्सार्वधातुकेक्ङिति स्तः सन्तितासस्त्योरितिसलोपः। असिस्थः स्थअस्मि स्वः स्मः आर्द्धधातुकइत्यधिकृत्य अस्तेर्भूः। २।४।५२। वभूवभविता।

नत्वत्रावश्यकं इह भूतपूर्वगत्यासार्वधातुकपरत्वमाश्रीयतेइतिदत्तिमतेत्वसिद्धत्ववर्णनस्योपयोगलेशोपिनास्तीतिज्ञेयं। दश्चसि ॥ अनुस्वानसानु
पिधातोरुर्वेत्यनुवर्ततेपदस्येतिमलांजशोंतेइत्यस्मादंतइतिचतदाह। धातोर्दस्येत्यादि। सिपिकिंतिपि। अवेत्। दांतस्यधातोःसिपिरुर्वेत्येनावत्तेवेष्टसिद्धोपदांतानुवृ
त्तिर्मंदप्रयोजनेत्याहुः। नच्चिरस्यवेत्सीत्यत्रातिप्रसंगातचरत्वस्यासिद्धत्वेनदांतत्वात्। श्नसोरल्लोपः। अतउदितिसूत्रादतइत्यनुवर्त्यअतग्रहणंसकृच्छक्यमित्याहुः। श्नसो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति॰
सि॰कौ॰ परस्वमित्याह। अस्यास्त्वेति। अस्योदाहरणं रुधं नौ त्यादि। क्विति किं। रुणद्धि। अस्ति। तपरकरणमास्तामासन्नित्यत्र ह्याडागमे कृते तस्य लोपो मा भूदित्येतद
टी॰त॰ र्थं निष्कर्षस्तु अनुपदं स्फुटीभविष्यति॥ ॥ घ्वसोरेद्धा। एत्वमल्लोपं सस्य। लोपस्तु शित्वात्सर्वस्येति भाष्यादौ स्पष्टं। देहि। धेहि। असिद्धत्वादाडिति। नन्वेवमाटो
६२ ऽसिद्धत्वात् असोरित्यल्लोपो न भवेदिति तपरकरणं तत्र व्यर्थमिति चेन्न। अत्राहुः। आभाच्छास्त्रस्यानित्यताज्ञापनाय तपरकरणं। तेन देभतुरित्यादि सिद्धमिति सा
देतत्। अत्र केचित्। आन्तग्रहणस्य निःफलत्वेन तपरकरणस्य ज्ञापनार्थत्वं न सिध्येत्। न चात उदिति सूत्रस्थतपरकरणमेव ज्ञापनार्थमस्त्विति वाच्यं। अस्य तु

घ्वसोरेद्धावभ्यासलोपश्च।६।४।११९। घोरस्तेश्चैत्वं स्याद्धौ परेऽभ्यासलोपश्च। आभीयत्वेनैत्वस्यासिद्धत्वाद्धेर्धिः। श्नसोरित्यल्लोपः। ए
धि। तातङ्पक्षे एत्वं न परेण तातङा बाध्यते सकृद्गताविति न्यायात्। तात्। सन्तु। असानि। असाव। असाम। आसीत्। सिचदितो नेः। आसीत्। असोरि
त्यल्लोपस्याभीयत्वेनासिद्धत्वादाट्। आस्तां। आसन्। स्यात्। भूयात्। अभूत्। सिचोऽस्तेश्च विद्यमानत्वेन विशेषणादेन उपसर्गप्रादुर्भ्यामस्ति
र्यच्परः।८।३।८७। उपसर्गेणः प्रादुसश्च परस्यास्तेः सस्य षः स्याद्यकारेऽचि परे। निष्यात्। प्रादुःष्यात्। निषन्ति। प्रादुःषन्ति। यच्परः किं। अभिस्तः।
मृजूष् शुद्धौ। मृजेर्वृद्धिः।७।२।११४। मृजेरिको वृद्धिः स्याद्धातुप्रत्यये परे। क्ङिति सजादौ वेष्यते। अश्वेति षः। मार्ष्टि। मृष्टः। मृजन्ति। मार्जन्ति। ममार्ज। म
मार्जतुः। ममृजतुः। ममार्जिथ। ममार्ष्ठ। मार्ष्टा। मृड्ढि। अमार्ट्। अमार्जं। अमार्जीत्। अमार्क्षीत्। रुदिर् अश्रुविमोचने। रुदादिभ्यः सार्वधातुके।७
।२।७६। रुद् स्वप् श्वस् अन् जक्ष एभ्यो वलादेः सार्वधातुकस्येट् स्यात्। रुदितः। ह्लोपरत्वादिटि धित्वं न। रुदिहि॥ ११ तो गौरवादर्द्धमात्रालाघवाय 358

तत्र तपरत्वमिति सुवचत्वात्। तस्मादुक्तज्ञापनार्थमङ्ग्रहणमावश्यकमित्याहुः। उपसर्गप्रादुर्भ्यां। प्रादुस् इति सान्तमव्ययं प्रादुषश्चेति पाठे प्रादुर्भ्यामिति निर्देशो न यु
ज्यत इति प्राचां षान्तपाठः प्रामादिकः। परस्येति। अयमस्तेः सस्य विशेषणं न त्वस्तेः तेन प्रादुरस्तीत्यत्र न षत्वं। उपसर्गसादि किं। दधिस्यात्। अस्तेः किं। परिमृजन्ति
मृजूष् शुद्धौ। अयं न षित्। भिदादिपाठसामर्थ्यात्। मृजेर्वृद्धिः। गुणापवादः। धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानमित्याह। धातुप्रत्यये इति। धातुप्रस॥ एम॰
ये किं। कंसपरिमृड्भ्यां। क्ङिति सजादाविति। एतच्चान्येषां वैय्याकरणानां मतं इको गुणवृद्धीति सूत्रे भाष्यकृता सौत्रं नाम मृदवीति। हेमलम्पदति हेर्धिः। घत्व ॥ ६२

CC-0. In Public Domain. Digitization by eGangotri

एत्वजश्त्वानि। वलादेः सार्वधातुकस्येति। वलादेः किं। रुदंति। सार्वधातुके किं। स्वप्ता। धित्वंनेति। सन्नियोगनाविति न्यायात्। हेर्धिरिति स्थान्यादेशयोरिकार उच्चारणा
र्थइत्यादि प्रागुक्तसमाधानाद्वेतिभावः॥ ॐ ॥रुदश्चपंचभ्यः किं। जागर्त्तेर्लङि अजागः। प्रकृतिप्रत्ययेत्यादि। हलादिपित्सार्वधातुकापेक्षयापेक्षत्वाच्च वहिरंग।
त्वमडीटोः। अरुददिति। इरितोवेत्यङ्। अरोदीदिति। अस्तिसिच इतिईट्। रुदश्चेत्यनेनतुन। सिचाव्यवधानेनरुदादेः परत्वाभावात्। सुषुपतुरिति। वचिस्वपी

रुदश्चपंचभ्यः। ७।३।९८। हलादेः पितः सार्वधातुकस्याप्टक्तस्य ईट् स्यात्। अड्गार्ग्यगालवयोः। ७।३।९९। अरोदीत् अरोदत्। अरुदितां।
अरुदन्। अरोदीः अरोदः प्रकृतिप्रत्ययविशेषापेक्षाभ्यामडीड्भ्यामन्तरंगत्वोद्घासुट्क्ङघात्। अरुदत्। अरोदीत्। त्रिष्वप् शये स्वपिति स्व
पितः सुष्वाप सुषुपतुः सुषुपुः सुष्वपिथ सुष्वप्थ सुविनिर्दुर्भ्यः सुपिसूतिसमाः। ८।३।८८। एभ्यः सुप्यादेः सस्यषः स्यात् पूर्वं धातुरुपस
र्गेणयुज्यतेकिति लिटि परत्वात्संप्रसारणे पत्वे चकृते द्वित्वं पूर्वत्रासिद्धीयमद्विर्वचनेसुषुषुपतुः सुषुषुपुः अकितित्तु द्वित्वेऽभ्यासस्य
संप्रसारणं पत्वस्यासिद्धत्वात्ततः पूर्वंहलादिः शेषः निमित्ताच्चततः सुपिरूपाभावान्नषः सुषुष्वाप सुस्वप्ता अस्वपीत् अस्वपत् स्वप्या
त् सुप्यात् सुषुप्यात् अस्वाप्सीत्। श्वस प्राणने श्वसिति श्वसिता अश्वसीत् अश्वसत् श्वस्यात्तां श्वस्यास्तां ह्म्यन्तक्षणेति नवृद्धिः
२ अश्वसीत् अनचा अनिति। आना। अनिता आनीत् आनत् अनितेः। ८।४।१९। उपसर्गस्थान्निमित्तात्परस्यानितेर्नस्य णः स्यात्। प्रा
णिति जक्ष भक्ष्य हसनयोः जक्षिति जक्षितः अदभ्यस्तात्। ७।१।४। कस्मात्स्यादंतापवादः जक्षति। क्षिजभ्यस्तेति जुस अयमन्तस्यादिशिसु
ज्वलदत्तोवभ्रामरुदादयः पंचगताः जागृ निद्राक्षये जागर्त्ति जागृतः। जाग्रति उषविदेत्याम्वा जागरांचकार जजागार॥ ९ति संप्रसारणं। ततो।

द्वित्वं। सुषिसूतिसमा इति। सूतीतिक्तिन्नंतः समेति पचाद्यजंतः। सुषुप्तिः। सुषूतिः। सुषमा। विषमः। अद्विर्वचन इति। तेन षत्वसहितस्य द्वित्वं। सुपिरूपाभावा
दिति। एकदेशविकृतमनन्यवदितितु न प्रवर्त्तते। तस्य स्थानिवत्सूत्रशेषत्वात्। षत्वस्यत्रैपादिकत्वेन तत्कार्यंप्रति स्थानिवद्भावादित्याहुः। वस्तुतस्तु स्था
निवदादेशइत्येनं प्रतित्रिपादी सिद्धेत्युक्तं। तस्मादिह समाधानांतरमूह्यमित्यस्मे। अनितेः। उपसर्गादसमासेपीत्यत उपसर्गादिति वर्ततेरषाभ्यामित्यतो नो णइति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति· सि·कौ टी·त· ६३

उपसर्गस्यादित्यादि। अंतापवाद इति। कोंत इत्यस्य अदादेशोऽपवादः। अस्य त्वपवादो जुसीति ज्ञेयः। वभ्रामेति। जक्षन्क्रीडन्रममाणा इत्युपनिषदि जक्षादित्वस्य
निर्विवादत्वात्। नाभ्यस्ताच्छतुरिति निषेधे नजक्षन् इति नुमः छांदसत्वेपि जक्षादित्वस्य तत्कल्पनायाः अन्याय्यत्वात्। धातुवृत्त्यादौ जक्षादिपाठाच्च॥ ॐ ॥
जाग्रोविचिण्णल्ङित्सु। विचिण्णल्ङिद्भ्योऽन्यस्मिन्निति। जागृ विः। विशब्देन वादिप्रत्ययो गृह्यते। इकारस्तूच्चारणार्थ इति वदतां मते क्सावपि न भवति। जजा
गृवांसौ। चिण् अजागारि। णल्। जजागार। ङित्। जागृतः। जागृथः। वृद्धिविषय इति। ण्वुलि। जागरकः। घञि। जागरः। णिचि। जागरयति। नचैवं वुगुणे कृतेप्य
त उपधाया इति वृद्धिः स्यात् इति वाच्यं। गुणविधेर्णिल्प्रतिषेधस्य चाऽऽनर्थक्यापत्तेः। जुसि चा चकारः एयप्रतिपत्त्यर्थः। क्वस्याचोऽसत्तोऽचीत्यनुवर्त्तत इत्य

जाग्रोविचिण्णल्ङित्सु।७।३।८५। जागर्त्तेर्गुणः स्याद्विचिण्णल्ङिद्भ्योऽन्यस्मिन्वृद्धिविषये प्रतिषेधविषये च। जजागरुः। अजागः। अजागृतां। अभ्य
स्तत्वाज्जुस्। जुसि च।७।३।८३। अजादौ जुसि इगन्तांगस्य गुणः स्यात्। अजागरुः। अजादौ किं। जागृयुः। आशिषि तु जागर्यात्। जागर्यास्तां। जागर्या
सुः। लुङि। अजागरीत्। जागृ इ स् ई द् इति स्थिते यण्। आस्तः। तं सार्वधातुकगुणो वाधते। तं सिचि वृद्धिः। तां जागर्त्तिगुणः। तत्र कृते हलन्तलक्षणा प्रा
प्ता नेटीति निषिद्धा। ततोऽतो हलादेरिति वा प्राप्ताऽतो ल्रान्तस्येति प्राप्ता ह्म्यन्तेति निषिध्यते। तदाहुः। गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विक
ल्पनं पुनर्वृद्धिर्निषेधोऽतो यण्पूर्वाः प्राप्तयो नव। तिदरिद्रा दुर्गतौ। दरिद्राति। इद्दरिद्रस्य।६।४।११४। दरिद्रातेराकारस्य इकारः स्यात्क्ङिति सार्वधा

ह। अजादाविति। जागृयुरिति। एवं शृणुयुः। चिनुयुरित्यादावपि गुणो नेति बोध्यं। यासुटो ङित्त्वाच्छृणुयुरित्यादौ गुणो नेति प्राचोक्ति ‹‹ तुके। दरिद्रितः।६॥
स्तु मनोरमायां दूषिता जुसिचेति गुणस्य निषेधापवादत्वादिति। केचित्तु जुसिचेत्यत्र उसीत्यावर्त्य उस्रूपे जुसीति व्याख्यानान्नोक्तदोष इत्याहुः। अजादौ जुसी
ति समाधानं तु भाष्यारूढं। जागर्त्तेः सिचइटि कृते यणादिप्राप्तिक्रमं दर्शयति। जागृ इ स् ई स्यत्रेति। तत्र कृते इति हलन्तलक्षणाया वृद्धेर्जागर्त्तिगुणेन वाधस्ते
न गुणेन हलंतत्वसंपादनात्। या हि गुणप्रवृत्तिसमये वृद्धिः सा वाध्यते नान्येति भावः। अजागरिष्ट। अजागरिषुः। अजागरीरित्यादि। दरिद्रा। इद्दरिद्रस्य। इद्दरि

राम· ६३ 359

आभ्यस्त। क्रीणंति। क्रीणते। पुनंति। पुनते। दधति। दधते। क्ङितिकिं। क्रीणाति। पुनाति। दधाति। आतः किं। बिभ्रति। ओ इत्येव सिद्धे इति। प्रथमस्यागमानाभावादिति॥ भावः। निर्मूलमेवेति। यत्तु व्याख्यातृभिः समर्थ्यते। आमोऽभावे आतो लोपे कृते आदंतत्वाभावादौत्वं नेति तन्न। आत औ णल इत्यत्र माधव्यादौ कारे कर्तव्ये औकारविधानं दरिद्रातेरल्लोपेपि श्रवणार्थं सत् आम भावे लिंगमिति हरदत्तमाधवादिग्रंथैः स ग्रंथेन च विरोधात्। तत कथमौत्वस्याप्रवृत्तिर्भवेत्। यदप्युक्तं। औकारौकारयोर्द्विमात्रत्वाविशेषादौकारविधानमिति तदपि स्थवीयः तस्मिन्पक्षे आमो दुर्वारत्वप्रसंगात्। विवक्षित इति। तेन दरिद्रातीति दरिद्र इति पचाद्यजेव भवति पर सप्तम्यां तु घञ्प्रत्ययाद्यर्धधात्वादं न लक्षणः स्यात्। सति तु तस्मिन् आतो युक् चिण्कृतोरिति युकि दरिद्राय इति स्यादिति भावः। सनिण्वुलीति। एतेष्वालोपो नेत्यर्थः। दि

आभ्यस्तयोरातः।६।४।११२। अनयोरातो लोपः स्यात्क्ङिति सार्वधातुके। दरिद्रति। अनेकाच्त्वादाम्। दरिद्रांचकार। आत औ णल इत्यत्र ओ इत्येव सिद्धे औकारविधानं दरिद्रातेरालोपे कृते श्रवणार्थं अत एव ज्ञापकादाम्प्रत्ययको दददरिद्रौ। दददरिद्रतुरित्यादि यत्तु णलि ददरिद्रेति तन्निर्मूलमेव दरिद्रातेरार्द्धधातुके विवक्षिते आतो लोपो वाच्यः लुङि वा सनिण्वुलि ल्युटि च न दरिद्रिता। अदरिद्रात्। अदरिद्रीत्। अदरिद्रुः। दरिद्रियात्। दरिद्रातु। अदरिद्रीत्। इट्सकौ। अदरिद्रासीत्। चकासृ दीप्तौ। मस्य अन्तः। चकासति। चकासांचकार। धि चेति सलोपः। सिच सवे सके। चकाधीत्येव भाष्यं। तिप्यनस्तेः।८।२।७३। पदान्तस्य सस्य दः स्यात्तिपि न तु स्तेः। अचकात्। अचकाद्। अचकासुः। सिपि धातो रुर्वा।८।२।७४ पदान्तस्य सस्य रुः स्याद्वा पक्षे दः। अचकाः। अचकात्। शासु अनुशिष्टौ। शास्ति॥

९९ दरिद्रासति। दरिद्रायकः। दरिद्राणम्। अदरिद्रुरिति सिजभ्यस्तेति मेर्जुस्। लङः शाकटायनस्यैवेत्यादं तत्र लक्षणो विकल्पस्तु न भवति। परत्वात् आभ्यस्तयोरित्यालोपे आकारान्तस्यैवाभावात्। ईहल्यघोरित्यात ईत्वं सिद्धं न घ्वंक्वमेवा मेर्जुसि हलादिपरत्वाभावादिति भावः। ननु दरिद्राञिङ्गति स्थिते जुसः प्रागेव आल्लोपात् परत्वादपवादत्वाच्च ईत्वं स्यात्। मैवं। अकृतव्यूहपरिभाषया नागरूकत्वात्। ईत्वनिमित्तं हि हलादित्वं तच्च विनाशोन्मुखं जुसो भावित्वात्। कस्य अदिति। अदभ्यस्तादित्यनेन। तिप्यनस्तेः। पदांतस्य किं। चकास्ति। सस्येति किं। वर्धोर्लङि तिपि अवट्। तिपि किं। किपि चकाः। अनस्तेः किं। सर्वमाइदं। आः इति लङि तिपि अस्तेः रूपं। बहुलं छन्दसीति ईट् न॥

६ ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



शासइदङ्हलोः। अङि। अशिषत्। अशिषतां। किति। शिष्टः। शिष्टवान्। शिष्यात्। शिष्यास्तां। अङ् साहचर्यात्तु परस्मैपदे एवेत्त्वं। नेह। आशास्ते। अन्ये तु यस्मात्तङ्खासे
रङ् संभवति तस्यैवेत्त्वमिति व्याख्याय व्यतिशिष्टे व्यतिशिड्ढ्वे इत्यात्मनेपदे पि इत्त्वं स्वीकुर्वन्ति। शाहौ। पूर्वसूत्रे उपधापदान्वयानुरोधेन शास इत्यवयवषष्ठ्यपि इ
ह स्यान्न षष्ठ्येवउपधाया इत्यस्य निवृत्तत्वादित्याह। शास्तेः शादेश इति। धि चेति सलोपेन शाधीति रूपे सिद्धे पि सलोपस्यासिद्धत्वाच्छास इदिति इत्त्वं स्यात्तद्वार
शासइदङ्हलोः। ६।४।३४। शास उपधाया इत्स्यादङि हलादौ क्ङिति च। शासिवसीति षः। शिष्टः। शासति। शशास। शशासतुः। शास्तु। शिष्टात्। शि
ष्टां। शासतु। शाहौ। ६।४।३५। शास्तेः शादेशः स्याद्धौ परे। तस्याभीयत्वेनासिद्धत्वाद्धेर्धिः। शाधि। अशात्। अशिष्टां। अशासुः। अशाः। अशात्। शिष्या
त्। सर्त्तिशास्त्यर्त्तिभ्यश्च। अङ्। अशिषत्। अशासिष्यत्। दिधीङ् दीप्तिदेवनयोः। एतदादयः पंच धातवश्छान्दसाः। दीधीते। एरनेकाच इति यण्। दीध्याते।
यीवर्णयोर्दीधीवेव्योः। ७।४।५३। एतयोरन्त्यस्य लोपः स्याद्यकारे इवर्णे च परे। इति लोपं बाधित्वा नित्यत्वादेरत्त्वं। दीध्ये। दीधीवेवीटामिति गुण
निषेधः। दीध्यांचक्रे। दीधिता। दीधिष्यते। वेवीङ् वेतिना तुल्ये। वीगतौ। अस्य नेनतुल्ये अर्थे वर्त्तत इत्यर्थः। अथ त्रयः परस्मैपदिनः। षस संसस्ति स्वप्ने। सस्ति।
सस्तः। ससंति। ससास। ससेसतुः। सस्तु। सधि। पूर्वत्रासिद्धमिति सलोपस्यासिद्धत्वाद्दतोहेरिति लुक्। असत्। अससतां। असमः। असत्। असस्यात्। अससी
त्। असासीत्। सन्ति। सन्तः। संस्तंति बहूनां समवाये द्वयोः संयोगसंज्ञा ने स्यात्। स्कोरिति लोपाभावात्। संस्ति। संस्त इत्येके। वश कान्तौ। कान्तिरिच्छा।
वष्टि। उष्टः। उशन्ति। उवाश। ऊशतुः। ऊशुः। वशिता। वष्टु। उष्टात्। उष्टां। उड्ढि। अवट्। औष्टां। औशन्। अवशं। उश्यात्। उश्यास्तां। चर्करीतं च। यङ्लुगंतमदादौ बोध्यं।
न्हुङ् अपनयने। न्हुते। न्हुवीत। न्होषीष्ट। अन्होष्ट॥ ॥ इत्यदादयः॥ ॥ ९९. णायशाविधानमित्याहुः। यीवर्णयोः। य्यो इत्युक्ते पीष्टसिद्धौ य
कारइकारयोरिति स्फुटप्रतिपत्तिर्न स्यादिति वर्णग्रहणं कृतं। यि च इवर्णश्च यीवर्णौ तयोः। यिश्चेति इकार उच्चारणार्थो न तु विवक्षितस्तदाह। यकारे इवर्णे चेति
यिवर्णयोरिति पाठस्तूचितः। लोपं बाधित्वेति। लोपस्य तु उदाहरणं। आदीध्यगतः। आवेव्यगतः। दीधिष्यते। वेविता॥ ६ ॥ ६ ॥



360

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वेविष्यते। यीवर्णयोरिति किं। आदीध्यनं। आवेव्यनं। पसः। असदिति। तिप्यनस्ते रिति दत्वं। अस इति। सिपि धातो रिति रुत्वं। पसेदः। संनीति। इदित्वान्नुमि संस्तंति इ
ति स्थिते स्कोरिति सलोपे झरो झरि सवर्ण इति तकारस्य वा लोपः। संस्ति संस्त इति। दृहापि पूर्ववन्नलोपो वा वो ध्यः। वशकांतो भाषायामप्यस्य प्रयोगो दृश्यते। वष्टि भा
गुरिरल्लोपं। जघ्यायसेनान्यमुशंतिदेवा इति। चर्करीतं च। गणसूत्रमिदं। चर्करीतमिति यङ्लुगंतस्य पूर्वाचार्याणां संज्ञा। अदादौ बोध्यमिति। तेन यङ्लुगंतेभ्य
दिप्रभृतिभ्य इति शपो लुक् भवतीति भावः। प्राचा तु चर्करीतमिति यङ्लुगंतं परस्मैपदमित्युक्तं तच्चेह प्रकृतत्वादुपेक्षितं। इत्यदादयः॥ ❁ ॥ हुदां यद्यपि स्वत्व
निवृत्तिपूर्वकं परस्वत्वापादानमेव दानं तथापि प्रयोगमनुसृत्य व्याचष्टे प्रक्षेप इति। वैध इति। आहवनीयादौ। हविष इति। विधिबोधितद्रव्यस्येत्यर्थः। स्वभा

हुदानादनयोः। आदाने चेत्येके। प्रीणनेपीति भाष्यं। दानं चेह प्रक्षेपः। स चेह वैधे आधारे हविषश्चेति स्वभावाल्लभ्यते इतश्चत्वारः परस्मैप
दिनः। जुहोत्यादिभ्यः श्लुः। २।४।७५। शपः श्लुः स्यात्। श्लौ। ६।१।१०। धातोर्द्वे स्तः। जुहोति। जुहुतः। अदभ्यस्तात्। इति सत्। हुश्नुवोरिति यण्। जुह्वति।
भीह्रीभृहुवां श्लुवच्च। ३।१।३९। एभ्यो लिटि आम् वा स्यादामि श्लाविव कार्यं च। जुहवांचकार जुहाव। होता। होष्यति। जुहोतु। हुझल्भ्यो हेर्धिः। जुहुधि। आटि पर
त्वाद्गुणः। जुहवानि। परत्वाज्जुसि चेति गुणः। अजुहवुः। जुहुयात्। हूयात्। अहौषीत्। ञिभी भये। बिभेति। भियोऽन्यतरस्यां। ६।४।११५। इकारः
स्या द्वाह ——— लादौ क्ङिति सार्वधातुके। बिभीतः। बिभितः। बिभ्यति। बिभयांचकार बिभाय। भेता। ह्री लज्जायां। जिह्रेति। जिह्रीतः। जिह्रियति। जि
ह्रयांचकार जिह्राय। पॄ पालनपूरणयोः। अर्त्तिपिपर्त्योश्च। ७।४।७७। अभ्यासस्येकारोन्तादेशः स्याच्छ्लौ॥ ११वादिति। तेन आहवनीये पुरोडाशप्र

क्षेप्ये प्रमादेन कोपेन वा यागाणः प्रक्षिप्तः पुरोडाशो वा गर्त्तादौ सत्तु प्रक्षेपो न होम इति ज्ञेयं। परस्मैपदिन इति तेन हाप्य इति केषांचित्प्रयोगोऽसाधुरेव। स्मराणो
जुह्वाना इत्यानंदलहरीप्रयोगस्तु साधुरेव। शानचोऽप्रवृत्तावपि चानशन्तत्वात्। आटीति। आडुत्तमस्येत्यनेन। परत्वादिति। हुश्नुवोरिति यणपेक्षयायत्वादि
सर्थः। भियोन्यतरस्यां। सार्वधातुके किं। भीयते। बेभीयते। हलादौ किं। बिभ्यति। क्ङितीति किं। बिभेति। केचिदत्र हलादौ क्ङितीत्येतन्नातीवोपयु ज्यते। इत्वा
विधानस्य बिभित इत्यादौ चरितार्थत्वात्। बिभ्यति बिभेतीत्यादौ यणादेः प्रवृत्तिसंभवादित्याहुः। अर्त्तिपिपर्त्योश्च अर्त्तेरुदाहरणमियर्त्तीति वक्ष्यति॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri



उदोष्ठ्य। अङ्गावयवेति किं। अगतौ क्लादि तस्मात् क्तप्रत्यये अनुकः कितीति इट्। एतिवेधात् समीर्ण इति भवति। अन्यथा तु समपूर्ण इति स्यात्। शॄ दॄ प्रां पृ हिंसायां। दृ वि
दारणे। इमौ क्र्यादौ। पक्षे गुण इति। ऋच्छत्यृतामित्यनेन। पप्रतुरिति। ह्रस्वपक्षे यण्। ननु ह्रस्वग्रहणमिह मास्तु गुणानुवृत्त्यात् तस्यैव विकल्पोऽस्तु। तथा च यण
देशेन पप्रतुः पप्रुः पपरतुः पपरुरित्यादि सिध्यत्येव। गुणपक्षे तु पपरतुः शशरतुरित्याद्यपि सिध्यतीति चेन्मैवं। गुणाभावपक्षे ऋत इद्धातोरितीत्वप्रसंगात्। न चान्तरंग
त्वाद्यणेव स्यादिति वाच्यं। वर्णादाङ्गस्य बलीयस्त्वात्। डुभृञ् ह्वितः क्त्रिः। भृत्रिमं। भृञामित्। निजां त्रयाणामित्यतोऽनुवर्तनादाह। एषां त्रयाणामिति। केचि

उदोष्ठ्यपूर्वस्य। ७।१।१०२। अङ्गावयवोष्ठ्यपूर्वो य ऋत् तदन्तस्याङ्गस्योत् स्यात्। गुणवृद्धी परत्वादिमं बाधेते। पिपर्ति। उत्वं रपरत्वं हलि चेति दीर्घः
पिपूर्तः। पिपुरति। पपार। किति लिटि ऋच्छत्यृतामिति गुणे प्राप्ते शॄदॄप्रां ह्रस्वो वा। ७।४।१२। एषां किति लिटि ह्रस्वो वा स्यात्। पक्षे गुणः। पप्र
तुः। पप्रुः। पपरतुः। पपरुः। परिता। परीता। अपिपः। अपिपूर्तां। अपिपरुः। पिपूर्यात्। पूर्यात्। अपारीत्। अपारिष्टां। ह्रस्वान्तोऽयमिति केचित्। पिपर्ति। पि
पृतः। पिप्रति। पिपृयात्। आशिषि प्रियात्। अपार्षीत्। पाणिनीयमते तु तं रोदसी पिपृतमित्यादौ छान्दसत्वं। डुभृञ् धारणपोषणयोः
भृञामित्। ७।४।७६। भृञ् माङ् ओहाङ् एषां त्रयाणामभ्यासस्येत् स्याच्छ्लौ। बिभर्ति। बिभृतः। बिभ्रति। बिभृध्वे। श्लुवद्भावाद्द्वित्वे बिभरामास। बभार
बभर्थ। बभृव। बिभृहि। बिभराणि। अबिभः। अबिभृतां। अबिभरुः। बिभृयात्। भ्रियात्। भृषीष्ट। अभार्षीत्। अभृत। माङ् माने शब्दे च। ई हल्यघोः। ६।
४।११३। श्नाभ्यस्तयोरात ई स्यात्सार्वधातुके क्ङिति हलि न तु घोः। मिमीते। श्नाभ्यस्तयोरित्यालोपः। मिमाते। मिमते। ममे। मास्ता। ओहाङ् गतौ। जि
हीते। जिहाते। जिहते। जहे। हाता। हास्यते। ओहाक् त्यागे परस्मैपदी। जहाति॥   ९९ जुकपिंजलाधिकरणन्यायेन त्रयाणामिति लभ्यत इत्याह। त्रया

णां किं। जहाति। श्लौ किं। बभार। ई हल्यघोः। श्नाभ्यस्तयोरिति। लुनीते। पुनीते। क्ङितीति किं। लुनाति। अघोः किं। धत्तः। दत्तः। मिमीते इति। घुमास्थेतीत्वमिह न प्र
वर्तते तत्रार्धधातुक इत्यनुवृत्तेः। अन्यथा मातः माथः। गाते। गासे इत्यादावपि प्रसंगात्। अत एव काशिकायामुक्तमार्धधातुक इत्यधिकारेण त्वयमिति योगं याव



368

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जहातेश्च। क्त्वितीति किं। जहाति। सार्वधातुके किं। हीयते। चादौ दीतां विति। अत एव भट्टिः प्रायुंक्त। जहिहि जहीहि जहाहि रामभार्यामिति। लोपो ऽयि। सार्वेति किं। हेयात्॥

जहातेश्च। ६।४।११६। इत्स्याद्वा हलादौ क्ङिति सार्वधातुके पक्षे ईत्वं जहितः जहीतः जहति जहीहि जहातु जहितात् जहीतात् आ च हौ। ६।४।११७
जहातेर्हौ परे आ स्याच्चादिदीतौ जहाहि जहिहि जहीहि अजहात् अजहुः लोपो यि। ६।४।११८। जहातेराता लोपः स्याद्यादौ सार्वधातुके जह्या
त् लिङि हेयात् अहासीत् डुदाञ् दाने प्रणिददाति दत्तः ददति दत्ते ददौ घ्वसोरेद्धावभ्यासलोपश्च देहि अददात् अदत्तां अददुः दद्यात् देयात्
अदात्। अदातां अदुः अदित डुधाञ् धारणपोषणयोः दाने ऽप्येके प्रणिदधाति दधस्तथोश्च। ८।२।३८। द्विरुक्तस्य झषन्तस्य धाञो बशो भष्स्या
त्तथयोः स्ध्वोश्च परतः वचनसामर्थ्यादालोपो न स्थानिवदिति वामनमाधवौ वस्तुतस्तु पूर्वत्रासिद्धे न स्थानिवत् धत्तः दधति धत्थः धत्थ
दध्वः धत्ते धत्से धध्वे धेहि अधित् अथ त्रयः स्वरितेतः णिजिर् शौचपोषणयोः णिजां त्रयाणां गुणः श्लौ। ७।४।७५। णिज् विज् विषामभ्या
सस्य गुणः स्यात् श्लौ नेनेक्ति नेनिक्तः नेनिजति नेनेक्ष्यति नेनेक्तु नेनिग्धि नाभ्यस्तस्याचि पिति सार्वधातुके। ७।३।८७। लघूपधगुणो न।
स्यात्। नेनिजानि अनेनेक् अनेनिक्तां अनेनिजुः नेनिज्यात् निज्यात् अनिजत् अनिक्त विजिर् पृथक्भावे वेवेक्ति वेविक्ते वेविजिथ अनवि
जइडिति ङित्वं न ओविजी इत्यस्यैव तत्र ग्रहणात् णिजि विजी रुधादावपि विष्लृ व्याप्तौ वेवेष्टि वेविष्टे लृदित्वादङ् अविषत् तङि क्सः अजा
दौ क्सस्याचि क्सस्य लोपः अविक्षत अविक्षातां अविक्षन्त अथ आगणान्ताः परस्मैपदिनः छान्दसाश्च घृ क्षरणदीप्त्योः जिघर्त्तिंह विषा घृतेन
भृञामित् बहुलं छन्दसीतीत्वं ह प्रसह्यकरणे अयं सुवेत्वाभिजिद् निर्देशात् सगतौ बहुलं छन्दसीत्येव सिद्धे अर्तिपिपर्त्योश्चेतीत्वविधा।
धानादयं भाषायामपि अभ्यासस्याऽसवर्णे इतीयङ् इयर्ति इयृतः इयति आ रन्नारतुः इडत्यर्त्तीति निसमिइत्यारिथ अर्तो अरि

प्रणिददातीति। नेर्गदेति णत्वाद्दत्त इति। आभ्यस्तयोरित्यालोपः। घोरित्युक्तत्वान्नईत्वं तुना। अददादिति। गातिस्थेति सिचो लुक्। अदधस्तथोश्चादध इति क्तत॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri



द्विर्वचनाभ्यासकार्यो धात्वेव गृह्यते न तु दध धारण इत्ययमिति व्याचष्टे। द्विरुक्तस्येति। अयं तस्य किं। दधाति। नन्वेवं ध्मत इत्यादावपि न स्यात्। श्लोपस्य स्थानिवत्त्वेनाभ्यस्तत्वादत आह। वचनसामर्थ्यादिति। निजां। घला विति किं। निनेज। नाभ्यस्तस्य। अभ्यस्तस्य किं। देवाणि। अचि किं। देदेष्टि पिङ्ग्रहणा सुनोश्छन्दसि हुर्लि कि हरी त्वस्तु न राग्थे। सार्वेति किं। निनेजा वहुलं छन्दसीति त्वमिति। एतच्च पूर्वोक्तान्वयी। इयर्तीति अभ्यासस्य इयङ्। अभ्यासादुत्तरस्य तु गुणः इय्रतीति। अदभ्यस्तादिसत्॥ ॥ अर्यादिति॥ गुरोर्णोतिगुणः। आरदिति। सर्तिशास्ती सडिञ्चि दृश्योः ङीति गुणः। बभ्य इति। तस्सतकारस्य भष स्तथोरिति धत्वं। नु तूर्तदिति। हलि चेति दीर्घः। धन धान्ये धान्या

अर्यात् आरत् ससर्ति भसभर्त्सन दीप्योः बभस्ति घसि भसोर्हलीत्युपधालोपः झलो झलीति सलोपः बभ्धः बप्सतिकि ज्ञाने चिकेति तुर त्वरणे तुतोर्ति तुतूर्तः तुतुरति धिष शब्दे दिधेष्टि दिधिष्टः धन धान्ये दधनि दधनः दधनति। जन जनने जजन्ति जनसनखनां सन्झलोः।६।४।४२। एषामाकारोन्तादेशः स्याज्झलादौ सनि झलादौ क्ङिति च जजातः जज्ञति जजंसि जजानजजन्यात्। जजायात् जन्यात् जायात् गा स्तुतौ देवा जिगाति सुस्तुयुः जिगीतः जिगति॥ इति जुहोत्यादयः ॥ दिवु क्रीडा विजिगीषा व्यवहार द्युति स्तुति मोद मद स्वप्न कान्ति गतिषु गृधन्ताः परस्मैपदिनः दिवादिभ्यः श्यन्।३।१।६९। शपोपवादः हलि चेति दीर्घः दीव्यति दिदेव देविता देविष्यति दीव्यतु अदीव्यत् दीव्येत् दीव्यात् अदेवीत् अदेविष्यत् षिवु तन्तुसन्ताने परिषीव्यति परिषिषेव न्यषेवीत् न्यसेवीत्। स्रिवु गति शोषणयोः ष्ठिवु निरसने। केचिदिहेमं न पठन्ति ष्णुसु अदने आदाने से केअदर्शन इत्यपरे स्नुस्यति सुष्णोस सष्णासु निरसने स्नस्यति सस्नास क्नसु व्हरणदीप्त्योः।

व्हरणं कौटिल्यं च क्नासस्युपदाह्वेचुर्योपधश्च षच॥ ९९ जेनद्दस्यर्थः दधंत इति। छान्दसत्वादनुनासिकस्येति नेह दीर्घ इत्याहुः। जनसनखनां। जनजननो। जनी प्रादुर्भावे। इत्युभयोरपि ग्रहणं। झलादौ सनि सिषासति। जज्ञतीति। गमहनेत्युपधालोपः। जजायादिति। ये विभाषेति वा आत्वं। एवं जायादित्यत्रापि। जिगातीति। वहुलं छन्दसीति इत्वं। इति जुहोत्यादिः। दिवु क्रीडा। उदितः करणात् क्त्वायामिड्विकल्पार्थे निष्ठायामनिडर्थे च। देवित्वा। द्यूत्वा। द्यूतं। क्रीडायां दीव्यति मा

॥ श्रीः ॥ सिद्धान्तकौमुदीव्याख्यायां



362

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विजिगीषतेइत्यर्थः।कांतिरिच्छा।द्युतेःपृथग्ग्रहणात्।षिवु।परिषिषेवेति।स्थादिष्वेवाभ्यासस्येतिनियमान्नेहभवति।तेनप्राक्सितादित्यनुवृत्तेः।अस्यचाप्राक्सिती।
यत्वात्।तेनाभ्यासस्यषत्वंपरिनिविभ्यइत्यनेनभवत्येव।न्यषेवीदितिसिवादीनांवेतिविकल्पः॥ ❁ ॥नृती।ईदित्करणंश्वीदितइतिनिष्ठायामिण्निषेधार्थं।यद्यपि
सेसिचीतिइट्येविकल्पितत्वाद्यस्यविभाषेत्यनेनैवेट्सिध्यतितथापियस्यविभाषेत्यस्यअनित्यत्वज्ञापनार्थमीदित्करणंतेनधावितमिभराजधियेत्यादिसिद्धं।से
ऽसिचि।नर्तिष्यति।नर्त्स्यतीति।निनर्तिषति।निनृत्सति।कर्तिष्यति।कर्त्स्यति।चिकर्तिषति।चिकृत्सति।इत्यादिज्ञेयं।अनर्तीदिति।असिचीत्युक्तत्वादिहनिसमिट्
त्रेसतुरिति।वाजॄभ्रमुत्रसामित्येत्वाभ्यासलोपौ।कुथ।पूतीभावः।पवित्रभवनं।कुथ्यति भूमिः।पवित्रीभवतीत्यर्थः।पुष्पविकसनेकालात्साधुपुष्प्यत्पच्यमानेषि

नृतोगात्रविक्षेपेनृत्यतिननर्तसेसिचिकृतचृतछृदतृदनृतः।७।२।५७।एभ्यःपरस्यसिजिभिन्नस्यसादेरार्द्धधातुकस्येड्वास्यात्।नर्तिष्यतिन
र्त्स्यतिनृत्सेत्नृत्स्यात्।अनर्तीत्।त्रसीउद्वेगेवाभ्राशेतिश्यन्वात्रस्यतित्रसति।त्रेसतुः।तत्रसतुः।कुथपूतीभावेपूतीभावोदौर्गन्ध्यंपुथहिंसायांगु
धपरिवेष्टनेक्षिपप्रेरणेक्षिप्यतिपुष्पविकसनेपुष्प्यतिपुपुष्पतिमष्टिमष्टीमत्स्नआर्द्रीभावेतिम्यतिष्टिम्यतिष्टीम्यतिव्रीडचोदने।
लज्जायांचव्रीड्यतिइषगतौइष्यतिषहषुहचक्यर्थेचक्यर्थस्तृप्तिःसह्यतिसुह्यतिजॄषझॄषवयोहानौजीर्यतिजजरतुःजेरतुःजरिताज
रीताजीर्यात्जॄस्तम्भ्विसज्ञृभ्यःश्रहशोडिरगुणः।अजरत्अजारीत्अजारिष्टांझीर्यतिजझरतुःअझारीत्॥ ९९, तिसूत्रेपुष्प्यदितिशत्रंतः।पचाद्य

चिपुष्यासंज्ञायांकन्।पुष्पकं।व्रीड।गुरोश्चहलइत्यप्रत्ययेटाप्।व्रीडा।घञितुव्रीडः।अतएवव्रीडमावहतिमेस्मसंप्रतीतिकालिदासः।व्रीडादिवाभ्यासगते
विलिल्येइतिमाघश्च।षह।षुह।परिनिविभ्यइत्यत्रसहेस्सकारउच्चारणार्थइतिषत्वमिहभवति।परिषह्यति।तोषसहेत्तोइविकल्पस्तुनास्यभवतिसहेतिशा
वंतनिर्देशात्किंतुषहमर्षणइत्यस्यैवसहइत्यात्रेपादयः।सहेतिनिर्देशस्योभयत्रतुल्यत्वेनोषसहेस्त्वशपानिर्देशः।परिनिविभ्यइत्यत्रतुनेत्यदंजरतीयमि
दंहेयमेव।तत्वंतुप्रयोगमनुसृत्यमहद्भिरेवनिर्धार्यं।नपुंसकेभावेक्तः।सुहितंतृप्तिरतएवपूरणगुणेतिसूत्रेसुहितार्थास्तृप्त्यर्थाइतिव्याख्यातं।जेरतुरिति
ऋच्छत्यॄतामितिगुणेकृतेनशसददेतिगुणशब्देनभावितस्यनिषेधादतएकहलमध्येइत्यप्रवृत्तौवाजॄभ्रमुत्रसामित्येत्वाभ्यासलोपविकल्पः॥ ६ ॥ त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति· सि·कौ· दी·त· ६७

॥५। अन्यथाएरचि कृते तत्र्यात्वेउपदाइतिस्यात्॥त्तु·।५॥

घुङ्।प्रसवः उत्पत्तिः।मृत्पिंडो घटं सूयत इत्यादि प्रयोगाभावात्प्राणीत्युक्तं।स्वादय ओदित इति वक्ष्यमाणत्वात् ओदितश्चेति निष्ठातस्य नत्वं प्रसूनो विकल्पमिति।
परमपीतिशेषः।निषेधे मास्तइति।पुरस्तात्प्रतिषेधकांडारंभ सामर्थ्यादिति भावः।दीङो।पंचमीसमिप्रायेणाप्याचष्टे।परस्येति ङःसोत्यत्रैवउभयनिर्देशे पंचमी।
निर्देशोवलीयानिति सप्तम्याः षष्ठीकल्पनं।अचिक्किंद्दे दीयते।क्ङितीति किं।उपदानं।आभीयत्वेनासिद्धत्वमाशंक्याह।वुग्युटाविति।दिदीपेइति।परमपियणां
बाधित्वा नित्यत्वादादौ युट्।सतिजुयणीईकारस्यश्रवणं न स्यादिति युटः सिद्धत्वमुक्तं।मीनाति।मीञ्हिंसायां।डुमिञ्प्रक्षेपणे।प्रमायउपदाय।प्रमातव्यं उपदात
व्यं।एज्विमित इति विषयसप्तमी।तेन आदावात्वं पश्चात् घञ्।आत्तोयुक्।उपदायइति सिध्यति। अदास्तेति।दीङःप्रतिषेधःस्याघ्वोरिच्चे तिनघुत्वमिस्यदित्येति।

घूङ् प्राणिप्रसवे सूयते सुषुवे स्वरतिसूतीति किकल्पं वाधित्वाश्युकः किति ती निषेधे प्राप्ते क्रादिनियमान्नित्यमिट् सुषुविषे सुषुविवहे।
सोता सविता दूङ् परितापे दूयते दीङ् क्षये दीयते दीङो युडचिक्ङिति।६।४।६३।दीङः परस्याजादेः क्ङितआर्द्धधातुकस्य युट् स्यात् वुग्युटाव
वङ्यणोः सिद्धौ वक्तव्यौ दिदीये मीनातिमिनोति दीङां ल्यपिच।६।१।५०।एषामात्वं स्याल्ल्यपि च कारादशित्येज्निमित्ते दातादास्यते अदास्त अ
दास्थाः डीङ् विहायसा गतौ डीयते धीङ् आधारे धीयते दिध्ये धेता मीङ् हिंसायां हिंसात्र प्राणवियोगः मीयते रीङ् श्रवणे रीयते लीङ् श्लेषणे
णे विभाषा लीयतेः।६।१।५१।लीयतेरितिश्यका निर्देशो न तु श्यपना।लीलीङोरात्वं वा स्यादेज्विषये ल्यपि च लेता लाता लेष्यते लास्यते एज्वि 363
षये किं लीयते लिल्ये

।९९. रूपं न भवतीत्येके।अस्मैतु स्याघ्वोरिच्चेत्येतत्तु न भवति दीङोनुकरणो दारूपा
संभवेन अघुत्वात्।अत एव प्रनिदात इत्यादौ नेर्गदेति णत्वमपि न भवतीत्याहुः।अयं भावः।दोअवखंडने इत्यादेर्दारूपत्वं संभवति।आदेच उपदेश इत्यस्य अनैमि
त्तिकत्वात्।दीङस्तु एज्निमित्तप्रत्ययविषये आत्वं दा इत्यनुकरणे एज्निमित्तस्याभावित्वान्न घुत्वं।एवं च घुप्रकृतित्वमपिनास्तीति णत्वस्याप्रसक्तिरिति।डीङ् राम·
।डीनः डीनवान्।स्वादिषु पाठसामर्थ्यान्निष्ठायामिण्न।इटि हि सति व्यवधानादोदितश्चेति नत्वं न स्यादिति।स्वादिषु पाठसामर्थ्यात् इड्व्यवधानेपि णत्वमस्त्वि ६७
ति न यं कश्मिदानुरोधात्।डयितइति प्रयोगस्तु भौवादिकस्य निष्ठायां

ङित्यत्र निष्ठेति योगविभागाद् कित्त्वे गुणाद्ग्लाहुः। मीङ् हिंसायां। मीञ् इति क्र्यादौ। प्राणवियोग इति। मीयते प्राणैर्वियुज्यत इत्यर्थः। लीङ्। लीञ् श्लेषणादिति क्र्यादौ। य
केति। सार्वधातुके यगिति विहितेन। ननु श्यनेति। अन्यथा लीङ् इत्येव ब्रूयादिति भावः। यकानिर्देशस्य फलमाह। लीलीङोरिति। ल्यपि। विलाय। विलीय॥ ॐ ॥
॥ ॐ ॥ व्रीङ् वृणोत्यर्थे वरणं। वृञ् वरण इति स्वादौ पठिष्यमाणत्वात्। वरण इति वक्तव्ये वृणोत्यर्थ इति वचनं वैचित्र्यार्थं। व्रीवरण इति क्र्यादौ। माङ् मा
यत इति। घुमास्थेतीत्वं तु न। तत्राऽऽर्द्धधातुक इत्यधिकारात्। वो ऽन्तात्। अंत कर्मनाशने। राघवस्य शरैर्वाणैर्घोरं रावणमादहवेदिति। राघवेति संबुध्यंतं। स्येति लो।

व्रीङ् वृणोत्यर्थे व्रीयते विव्रिये स्वादय ओदितः तत्फलं तु निष्ठायां नत्वं पीङ् पाने पीयते माङ् माने मायते ममे ईङ् गतौ ईयते अ
यांचक्रे प्रीङ् प्रीतौ सकर्मकः प्रीयते पिप्रिये अथ परस्मैपदिनश्चत्वारः शो तनूकरणे ओतः श्यनि। ७।३।७१। लोपः स्याच्छ्यनि श्य।
शौ। शाता। शास्यति विभाषा घ्राधेटि इति सिचो वा लुक् लुग्भावे यमरमेतीट् स कौ अशात् अशासीत् छो छेदने छ्यति षो अन्तकर्मणि। स्य।
ति ससौ अभिष्यति। अभ्यष्यत्। अभिससौ दो अवखंडने द्यति ददौ देयात् अदात्। अथात्मनेपदिनः पंचदश जनी प्रादुर्भावे। ज्ञाजनो
र्जा।७।३।७९। अनयोर्जादेशः स्याच्छिति जायते जज्ञे जनिता जनिष्यते दीपजनेति वा चिण् जनिवध्योश्च।७।३।३५। अनयोरुपधाया वृ
द्धिर्न स्याच्चिणि ञ्णिति कृति च अजनि अजनिष्ट॥ ॐ ॥

९९ णमध्यमैकवचनं। अभिष्यतीति। उपसर्गात्सुनोतीति षत्वं। अभ्यष्यदिति। प्राक्
सितादड्व्यवायेपीति षत्वं। अभिससाविति। स्थादिष्विति नियमान्न षत्वं। दो अवखंडने। अवेत्युपसर्गप्रयोगो वैचित्र्यार्थः। खंडने इत्येतावत्युक्ते पि इष्टसि
द्धेः। प्रणिदातेति। नेर्गदेति णत्वं। देयादिति। एर्लिङीत्येत्वं। अदादिति। गातिस्थेति सिचो लुक्। ज्ञाजनोर्जा। जानाति। जिनिकिं ज्ञाता। जद्दति हलो चारणेष्य
तो दीर्घ यञीति दीर्घसिद्धे जादेशग्रहणं संगद्वन्त्वपरिभाषाज्ञापनार्थं। तेन पाधातोः पिबादेशे कृते गुणो न भवति पिबादेशस्यादंतत्वाश्रयणात् पायातेरमित्याहुः॥
ञ्णिति कृति चेति। ञिति कृत्युदाहरणं घञि जनः। णिति कृति तु जनकः। जनयतीत्यत्र उपधावृद्धेः सत्वां जनीज्रषिति मित्वान्मितां ह्रस्व इति ह्रस्वः॥ धू

दीपीदीप्तौ।ईदित्वान्निष्ठायामिण्नदीप्तः।एवं पूरित्यादेरीदित्वात्पूर्णोऽस्मादिति ज्ञेयं।केचित्त्विति।तेषांमतेऐश्वर्येतप्यतेइत्येवप्रयोगोनतुतपतीति।न्यविसतेतिनिपूर्वा

दीपीदीप्तौ।दीप्यतेदिदीपेअदीपिअदीपिष्टपूरीआप्यानेपूर्यतेअपूरिअपूरिष्टतूरीगतित्वरणहिंसनयोःतूर्यतेतुतूरेधूरीगूरीहिंसागत्योः धूर्यतेदुधूरेगूर्यतेजुगूरेधूरीजूरीहिंसावयोहान्योःशूरीहिंसास्तंभनयोःचूरीदाहेतपऐश्वर्येवाअयमात्तुरैश्वर्येवातङ्‌ग्रयनोलभतेअस्मा दात्तुषाद्विकरणापरस्मैपदीत्यर्थःकेचित्तुवाग्रहणंदत्तुधातोरात्मवयवमिच्छन्तितप्यतेतेपेतप्तातप्स्यतेपतेतिव्यत्यासेनपाठान्तरंखुनघा। मानिसुतःपत्समानःवृत्तुवरणेवृत्यतेपसान्तरेवावृत्यतेततौवावृत्तमानासाराम्पशालांन्यविसततेतिभट्टिःक्लिशउपतापेक्लिश्यतेक्ले शितात्काशदीप्तौकाश्यतेवाशृशब्देवाश्यतेववाशेअथपंचस्वरितेतःमृषतितिक्षायांमृष्यतिमृष्यतेममर्षममृषेईशुचिर्पूतीभावे पूतीभावःक्लेदःशुच्यतिशुच्यतेशुशोचशुशुचेअशोचीत्अशोचिष्टणहवंधनेनह्यतिनह्यतेननाहननह्नेहियनेहेनद्वानत्स्यतिअ नात्सीत्रंजरागेरंजतिरंजतेशपआक्रोशेशप्यतिशप्यतेअथैकादशअनुदात्तेतःपदगतौपद्यतेपेदेपत्तापद्येत्पत्सीष्टचिणतेपदः।३।१। ६०।पदश्च्लेश्चिण्स्यात्तशब्देपरेअपादिअपत्सातांअपत्सतखिददैन्येखिद्यतेचिखिदेखेत्ताअखित्तविदसत्तायांविद्यतेवेत्ताबुधअव गमनेबुध्यतेबुबुधेबोद्धाभोत्स्यतेभुत्सीष्टअबोधिअबुद्धअभुत्सातांयुधसंप्रहारेयुध्यतेयुयुधेयोद्धाअयुद्धकथंयुध्यतीतियुधमिच्छतीति। कपच्अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यमितिवा।अनोरुधकामेअनुरुध्यतेअणप्राणनेअण्यतेआणेअणिताअनेतिदन्त्यांतोयमित्ये केमनज्ञानेमन्यतेमेनेमन्तायुजसमाधौसमाधिश्चित्तवृत्तिनिरोधःअकर्मकःयुज्यतेयोक्तासृजविसर्गेअकर्मकःसंसृज्यतेसरसिजेरूपाणगुणाः। भिन्नैःससृजिषेलसृष्टालक्ष्यतेलिङ्‌सिचावितिकित्वान्नगुणोनाप्यमसृक्षीष्टअसृष्टअसृक्षातांलिशअल्पीभावेलिश्यतेलेष्टालेक्ष्यतेलिक्षी

दिशानेलुङिशलइगुपधेतिक्सः।नेर्विशइतितङ्‌वाशशब्देमंदिवाशीत्युरचू।वाशुरारात्रिः।तितिक्षायामिति।गुपूतिजकिदृभ्यइतिसन्।तत्रहि०॥६॥६॥



364

CC-0. In Public Domain. Digitization by eGangotri

तिजेः स्त्रमायामित्युक्तं। ईशुचिर्। ईदित्वान्नेट्। शुक्तं क्लिन्नमित्यर्थः। ननद्धेति। नहो धइति धत्वं। विणतेपदः। तशब्दइति। सामर्थ्यादात्मनेपदप्रथमपुरुषैकवचनं
तशब्दे किं। अपस्याः। प्रएयपादीति। चिरणोलुगिति तशब्दस्यलुक्। नेर्गदेति णत्वं। अवोधीति। दीपजनबुधेति चिण्। अनोरुध कामे। अनोः परो रुध धातुः कामे।
कामइच्छा। दिवादिषु पाठसामर्थ्याद्रुधादिभ्य इति श्नमं बाधित्वा श्यन्। नाप्स्यमिति। सृजिदृशोर्झल्यमकितीत्यकित्येव विधानात्। लिङ्। आत्तपादिना अन।
लस्यत्रलस्य भावोऽल्यो भावः। लिशीष्टेति। लिङ्सिचावात्मनेपदेष्विति कित्वान्न गुणः। अलिक्षतेति। शालइगुपधेति क्सः॥ ❀ ॥ राधोऽकर्मकात् भिन्नक्रमं द।

राधोऽकर्मकाद्वृद्धावेव एवकारो भिन्नक्रमः राधोऽकर्मकादेव श्यन् उदाहरणमाह वृद्धाविति यन्मह्यमपराध्यति द्रुह्यतीत्यर्थः विरा
ध्यनं ह्ममेतकः द्रुह्यन्तमित्यर्थः राध्यत्योदनः सिध्यतीत्यर्थः कृष्णाय राध्यति दैवं पर्यालोचयतीत्यर्थः दैवस्य धात्वर्थेऽन्तर्भावादजीव
सादिवदकर्मकत्वं रण धर राध धातुः रराधिथ रराधो हिंसायामित्येत्वाभ्यासलोपौ विहनहिंसार्थस्य सकर्मकतया दैवादिकत्वायोगात् राद्धा
रात्स्यति अयं स्वादिश्चुरादिश्च व्यध ताडने ग्रहिज्येति संप्रसारणं विध्यति विव्याध विविधतुः विव्यद्ध विव्यधिथ व्यद्धा व्यत्स्यति विध्ये।
त्। अव्यात्सीत् पुष पुष्टौ पुष्यति पुपोष पुपोषिथ पोष्टा पोक्ष्यति पुषादित्वादङ् अपुषत्। शुष शोषणे अशुषत्। तुषप्रीतौ दुषवैकृत्ये
श्लिष आलिंगने श्लिष्यति शिश्लेष श्लेष्टा श्लेक्ष्यति॥ ९ शेयति। अकर्मकादेवेति। राधो वृद्धावेवश्यनिति व्याख्यायामकर्मकादिति विशेषणं व्य
र्थं स्यात् वृद्धावस्याकर्मकत्वात्। अकर्मकात् किं। शत्रुमपराध्नोति। हिनस्तीत्यर्थः। राध संसिद्धाविति स्वादौ। राधो हिंसायामित्यनुवादाद्धिंसायामप्ययम्।
उदाहरणमाहेति। अकर्मकत्वप्रयोजकस्य कस्यचिदर्थस्य इति भावः। अकर्मके श्यनं तस्य प्रयोगानुदर्शयति। यन्मह्यमित्यादिना। कृष्णायेति। राधीक्ष्योरि
ति चतुर्थी। अपुषदिति ङित्वात् गुणाभावः। शुष। शोष्टा। शोक्ष्यति। श्लिष आलिंगन इति सूत्रं योगविभागेन व्याचष्टे॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति· सि·कौ· टी·त· ६९

श्लिष इति। अनिट च्लेः क्स इति। एतच्च च्लेः सिच् शल इगुपधादित्यतोऽनुवर्तत इति भावः। अनिटः किं। श्लिषु दाह इति भौवादिकस्य सेटो मा भूत्। अश्लेषीत्। शल इगुपधेति सिद्धे पुनः क्सविधेः फलमाह। पुषादिङ इति। सामर्थ्यादिति। यदि हि श्लिष इति प्राप्त एव क्सो नियम्येत तर्हि योगविभागो व्यर्थः स्यादिति भावः। शल इगुपधादित्यस्यापीति। तेन कर्मण्यात्मनेपदे प्रभृतिष्वनालिङ्गने सिजेव भवति न तु क्सः। समाश्लिसत जतूनि काष्ठैरिति। क्सप्रत्यये सति तु समाश्लिक्षतेति स्यादिति भावः। प्रत्यासत्ताविति। आलिङ्गनं हि प्राणिकर्तृकं न तु काष्ठादिकर्तृकमिति भावः। श्लिषः च्लेरालिङ्गन एव क्स इति व्याख्यानफलं दर्शयति। कर्मणीत्यादिना। ॥:६॥

श्लिषः। ३।१।४६। अस्मात्परस्यानिटश्च्लेः क्सः स्यात्। पुषादिङोऽपवादोऽनेन तु चिणः पुरस्तादपवादन्यायात्। आलिङ्गने। ३।१।४६। श्लिषश्च्लेरालिङ्गन एव क्सो नान्यत्र। योगविभागसामर्थ्याच्छल इगुपधादित्यस्याप्ययं नियमः। अश्लिक्षत्कन्यां देवदत्तः। आलिङ्गन एवेति किं। समश्लिषज्जतुकाष्ठं। प्रत्यासत्ताविह श्लिषिः। कर्मण्यनालिङ्गने सिजेव न तु क्सः। एकवचने चिण्। अश्लेषि। अश्लिक्षातां। अश्लिक्षत। अश्लिषाः। अश्लिड्ढ्वं। शक विभाषितो मर्षणे। विभाषित इत्युभयपदीत्यर्थः। शक्नोति शक्यते। इह रिङ्गु भक्तः। शशाक शेके। शशकिथ शशक्थ। शेकिषे शेक्षे। शक्ता। शक्ष्यति शक्ष्यते। अशकत्। अशक्त। सेट्कोऽयमित्येके। तन्मते नानिट्कारिकासु लृदित्पाठः। शकिता। शकिष्यति। ष्विदा गात्रप्रक्षरणे। घर्मस्रुतावित्यर्थः। अयं ञीदिदिति न्यासकारादयः। नेति हरदत्तादयः। स्विद्यति। सिष्वेद। सिष्वेदिथ। स्वेत्ता। अस्विदत्। क्रुध क्रोधे। क्रोद्धा। क्रोत्स्यति। क्षुध बुभुक्षायां। क्षोद्धा। कथं क्षुधित इति संपदादिक्विबन्तात्तारकादित्वादितजिति माधवः। वस्तुतस्तु वसतिक्षुधोरितीड् स्यान्ते। शुध शौचे। शुध्यति। शुशोध। शोद्धा। षिधु संराद्धौ। जदित्पाठः प्रामादिकः। सिध्यति। सेद्धा। सेत्स्यति। असिधत्। रध हिंसासंराध्योः। रध्यति। रधिजभोरचीति

अश्लिक्षातामित्यादौ यद्यपि क्सक्सिचोर्विशेषो नास्ति क्सस्याचीत्यकारलोपात्तथापि थासादावस्त्येव विशेष इति ध्वनयन्नु- १ नुम्। ररन्ध ररन्धतुः॥ ६॥
दाहरति। अश्लिक्षाः। अश्लिड्ढ्वमिति। न्यासकारादय इति। तथा च तन्मते ञीतः क्त इति वर्तमाने क्तो भवति। आदितश्चेति निष्ठायां नेट्। स्विन्नः। विभाषाभावादिकर्मणोः। राम·
स्विन्नं। स्वेदितमित्यादि। षि[...]धु। संराद्धिर्निष्पत्तिः। उदितो वेति क्त्वायामिड्विकल्पः। इट्पक्षे रलो व्युपधादिति वा कित्त्वं। सिधित्वा सेधित्वा। सिद्ध्वा। प्रामादिक इ- ६९

365

CC-0. In Public Domain. Digitization by eGangotri

रधादिभ्यश्च। रक्‍ष्यति। सूत्रेऽस्मिन् वेत्यनुवर्तते। योगविभागो वैचित्र्यार्थः। गणनिर्देशायङ्लुगन्तादन्ये न भवन्त्विति। नेट्‌लिटि। इटीति किं। ररधक। अलिटीति

रधादिभ्यश्च। ७।२।४५। रधेर्वलादेरार्धधातुकस्येड्वा स्यात्। ररन्धिथ ररद्ध। ररन्धिव ररन्ध्व। नेट्‌लिटि रधेः। ७।१।६२। लिड्वर्जे इटि रधेर्नुम् न स्यात्। र
धिता। रधिष्यति। रत्स्यति। आङि नुम्। अनिदितामिति नलोपः। अरधत्। णश अदर्शने। नश्यति। ननाश। नेशतुः। नेशिथ। मस्जिनशोर्झलि। ७।१।६०।
नुम्स्यात्। ननंष्ठ। नेशिव नेश्व। नेशिम नेश्म। नशिता नंष्टा। नशिष्यति। नंक्ष्यति। नश्येत्। नश्यात्। अनशत्। प्रणश्यति। नशेः षान्तस्य। ८।४।३६। णत्वं न स्या
त्। प्रनष्टः। अन्तग्रहणं भूतपूर्वप्रतिपत्त्यर्थं। प्रनंक्ष्यति। प्रणशिष्यति। प्रणेशिवान्। अनंतरेतिसर्पयां च नार्गिनस्तृप्यति का च्छान्दसं। नृप्यति। तृपिता तर्ता। द्वितीये तृप्यति
॥ तृप भयत्वदर्शनात्। ततर्पिथ ततर्प्थ। ततृपिव। तर्पिता तर्प्ता त्रप्ता। स्तास्तृपशरकृशाभि तिसिज्वा। अतर्पीत्। अतार्प्सीत्। अत्राप्सीत्। अतृपत्। दृप हर्षमोहनयोः। मोहनं गर्वः। दृप्यति। इत्यादि रधादिवत्। आदिमौ वेद्धाव मर्ष्यमनुदात्तता। द्रुह जिघांसायां। वा द्रुहेतिवाधः। पक्षेढः। दुद्रोग्ध दुद्रोढ दुद्रोहिथ द्रो
हिता द्रोग्धा द्रोढा। द्रोहिष्यति ध्रोक्ष्यति। ढत्वघत्वयोस्तुल्यं रूपं। अद्रुहत्। मुह वैचित्त्ये। वैचित्त्यमविवेकः। मुह्यति। मुमोहिथ मुमोग्ध मुमोढ मो
ग्धा मोढा मोहिता। मोहिष्यति मोक्ष्यति। अमुहत्। ष्णुह उद्गिरणे। स्नुह्यति। सुष्णोह। सुष्णोहिथ सुष्णोग्ध सुष्णोढ सुष्णुहिव सुष्णुह्व। स्नोहिता स्नोग्धा स्नोढा।
स्नोहिष्यति स्नोक्ष्यति। अस्नुहत्। ष्णिह प्रीतौ। स्निह्यति। सिष्णेह। स्निहू इत्यादयः। रधादयः समाप्ता इत्यर्थः। पुषादयस्तु वा गणान्तादिति सिद्धान्तः। शमु उपशमे।
शमामष्टानां दीर्घः श्यनि। ७।३।७४। शमादीनामित्यर्थः। शाम्यति। शशाम। शेमतुः। शेमिथ। शमिता। अशमत्। तमु काङ्क्षायां। ताम्यति। तमिता।
अतमत्। दमु उपशमे। उपशमे इति ण्यन्तस्य तेन सकर्मकोऽयं न तु शमिवदकर्मकः। अदमत्। श्रमु तपसि खेदे च। श्राम्यति। अश्रमत्। भ्रमु अनव
स्थाने। वा भ्राशेति श्यन्वा। तत्र क्ते शमामष्टानामिति दीर्घः। भ्राम्यति। लुङि अङ्। अभ्रमत्। शेषं भ्वादिवत्। क्षमू सहने। क्षाम्यति। चक्षमिथ चक्षन्थ चक्ष
किं। ररंधिव। नुम्विधाने संयोगात्परत्वेनाकित्वान्नलोपो न। नंष्टेति। नशेर्वेति कुत्वमिति न षत्वं। पदान्त एव तद्विधानात्। अन्यथा नष्टं नष्टिरित्यादि न सिध्येत्॥ ६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति· सि·कौ· टी·त· ७०

प्रणश्यतीति।उपसर्गादसमासेपीतिणत्वं।नशेः।नभामूपूकमिगमीत्यतोनेत्यनुवर्तते तदाह णत्वंनस्यादिति।षस्येत्युक्तेपिपदस्यान्यस्यविशेषणेनपांतस्येतिलाभा

च्चक्षणवचक्षमिमंचक्षएमक्षमिताक्षन्ता अयंनषितुम्वादिक्षुषितुअषितःक्षाम्यतेःक्षान्तिंक्षमूषः क्षमतेःक्षमाक्लमुग्लानौक्लाम्यति

शपीवश्यन्यपिष्ठिवुक्लम्विसेवसिद्धेशमादिपाठोघिनुणार्थः अडू अक्लमतमदीहर्षेमाद्यतिशमादयोष्टौगताःअसुक्षेपणोअस्यतिआस।

असिताअस्यतेस्थुक्।७।४।१७।अडि·परेअास्यतुत्रस्यपुषादित्वादङि·सिद्धेःस्यतिवक्तोतिवचनंनाङर्थंनङ्तूपसर्गादस्यत्यूह्योरितिवक्ष्य

तेपर्यास्थततयसुप्रयत्नेयसोनुपसर्गात्।३।१।७१।संयसश्च।३।१।७२।श्यन्वास्याततयस्यतियसतिसंयस्यति संयसतिअनुपसर्गात्किं।

प्रयस्यतिजसुमोक्षणे।जस्यतितसुउपक्षयेदसुचतस्यति।अतसतुदस्यतिअदसत्वसुस्तंभेवस्यतिववासववसतुःनशासदददेतिनिषेधःव

शादिरयमितिमतेतुवेसतुःवेसुःव्युषविभागेअयंदाहेपठितःअर्थभेदेनत्वङर्थंपुनःपठ्यतेअव्युषतअोक्षयादिर्दंत्यान्तोयंव्युसइत्यन्येअ

यकारवुसइत्यपरेतुषदाहेअस्युषत्पूर्वत्रपाठस्त्विजर्थइत्याहुःतङ्गादिपाठेनगतार्थमितिसुवचविसप्रेरणेविस्यतिअविसत्कुससंश्ले

षणेअकुसत्वुसउत्सर्गेबुसखंडनेमसीपरिणामेपरिणामोविकारःसमीत्येकेलुठविलोडनेउचसमवायेउच्यतिउवोचऊचतुःमाभवानुच

त्भृशुभ्रशुअधःपतनेवभर्शअभृशत्अनिदितामितिनलोपःभ्रश्यतिअभ्रशत्वृशवरणेवृश्यतिअवृशत्कृशतनूकरणेकृश्यतिनितृ

षापिपासायांहषतुष्टौशुषन्नडौभोवादिकाद्विशेषःरुषरिषहिंसायांतोषसहेतिवेट्रोषितारोष्टारेषितारेष्टाडिपक्षेपेकुपक्रोधेगुपव्या

कुलत्वेयुपुरुपुलुपुविमोहनेयुप्यतिरुप्यतिलुप्यतिलोपितासेङ्कःअनिङ्कारिकासुलपिसाहचर्यात्तौदादिकस्यैवतत्रग्रहणात्तुभगार्ध्येगा।

र्ध्येमाकांक्षानीषसहेतिवेट्लोभितालोब्धालोभिष्यतिलुभ्येत्लुभ्यात्अलुभत्पुष्वादेरङ्लृदित्वाल्लोभतेत्यपीत्याहुःक्षुभसंचलनेक्षुभ्यति॥

दंतग्रहणंव्यर्थंसत्तज्ज्ञापयतीत्याह भूतपूर्वेति।काष्ठानामिति।करणस्यशेषत्वविवक्षायांषष्ठी।तत्रपथेति।अनुदात्तस्यचर्दुपधस्येतिविक ॥६॥

३६६

राम· ७०

CC-0. In Public Domain. Digitization by eGangotri

त्सेनन्नमागमः। रधादयइति। रधनशत्तृपदपद्रुहमुहष्णुहष्णिहइत्यर्थः। शासु। उदित्वात्क्त्वायांवेट्। शमित्वा शान्त्वा। यस्यविभाषेतिनिष्ठायामनिट्। शान्तः। असु
अनवस्थाने। शेषमिति। शनिदीर्घोलुङि अङ् चविशेषउक्तस्ततोऽन्यदित्यर्थः। वक्ष्यएवेति। स्यौश्चेतिमस्यनलेकृतेणत्वं। शमादियाठइति। शमित्यष्टाभ्योघि
नुण्। शमादयइति। शमुतमुदमुश्रमुभ्रमुक्षमुक्लमुमदइत्यर्थः। यसोऽनुप। अत्रवदंति। यसइत्येवासु। ततःसमः नियमार्थमिदं। सोपसर्गाद्यसश्चेत्त। सं

णभजुभहिंसायांसंभिनभितुभयोद्युता दोऽवयादौचपक्षांतेतेषांद्युतादित्वादङ्। ङः क्र्यादित्वात्यक्षेसिन्भवत्येनइहपाठस्तु
श्यन्नर्थःक्लिदूआर्द्रीभावेक्लिद्यतिचिक्लेदिथचिक्लेत्थचिक्लिदिवचिक्लिद्वक्लेदिताक्लेत्ताञिमिदास्नेहनेमिदेर्गुणः मेद्यति
अमिदत्तद्युतादिपाठादेवामिददमेदिष्टेतिसिद्धेइहपाठोऽमेदीदितिमाभूदितिद्युतादिभ्योवहिरेवात्मनेपदिषुपाठस्तूचितः॥
ञिष्विदास्नेहनमोचनयोः ऋधुवृद्धौ आनर्द्ध आर्द्धत गृधुअभिकांक्षायांअगृधत्तदत पुषादयोदिवादयश्चवृत्ताः। केचित्तु
पुषादिसमाप्त्यर्थमेवद्वत्करणं दिवादिस्तुभ्वादिवदाकृतिगणःतेनक्षीयतेमृग्यतीत्यादिसिद्धिरित्याहुः इतिदिवादयः ॥
षुञ्अभिषवेअभिषवः स्नपनंपीडनंस्नानंसुराःसंधानंचतत्रस्नानेअकर्मकःस्वादिभ्यश्नुः।३।१।७५। सुनोतिसुनुतः हुश्नु
वोरितियण्सुन्वन्तिसुन्वःसुनुवःसुन्वहेसुनुवहेसुषावसुषुवेसोतासुनुसुनवानिसुनवैसुनुयात्सूयात्सुधूञ्स्यइतीट्अ
सावीत्असोष्टअभिषुणोति। अभ्यषुणोत्। अभिसुषाव॥ ९पूर्वकादेवेति। एवंचपूर्वसूत्रेअनुपसर्गादितिग्रहणमुत्तरत्रचयसश्चेति

ग्रहणंत्यक्तुंशक्यमिति। दाहेपठितइति। युषदाहइत्यस्मिन्नेवगणेपठितइत्यर्थः। अडर्थमिति। दाहेपठितस्यतुसिजेवा अव्योषीत्॥ इतिदिवादयः ॥
पुञ्। सुन्वइति। लोपश्चास्येत्युकारस्यवालोपः। सुनवानीति। आडुत्तमस्येत्याटिकृतेहुश्नुवोरितियणंवाधित्वापरत्वात्गुणः॥ ६ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सुनोतेः स्यसनोः। नरपरेत्यस्मान्नेत्यनुवर्त्तनादाह। षो न स्यादिति। स नितुन्नभिषुसूः। सन्नंतादस्मात् क्विप्यतो लोपे रुत्वे दीर्घः। सुसूषतीत्येतत्तु नोदाहरणं। सौ॥

सुनोतेः स्यसनोः। ८।३।११७। स्ये सनि च परे सुनः षो न स्यात्। विसोष्यति। षिञ् बन्धने। सिनोति। विसिनोति। सिषाय। सिष्ये। सेता। शिञ् निशाने। तालव्यादिः। शेता। डुमिञ् प्रक्षेपणे। मीनातिमिनोतीत्यात्वम्। ममौ। ममिथ। ममाथ। मिम्ये। माता। मीयात्। मासीष्ट। अमासीत्। अमासिष्टां। अमास्त। चिञ् चयने। प्रणि चिनोति। विभाषा चेः। ७।३।५८। अभ्यासात्परस्य चिञः कुत्वं वा स्यात्सनि लिटि च। प्रणि चिकाय। चिचाय। चिक्ये। चिच्ये। अचैषीत्। अचेष्ट। स्तृञ् आच्छादने। स्तृणोति। स्तृणुते। गुणोर्त्तीति गुणः। स्तर्यात्। ऋतश्च संयोगादेः। ७।२।४३। ऋदन्तात्संयोगादेः परयो र्लिङ्सिचोरिड्वा स्यात्तङि। तरिषीष्ट। स्तृषीष्ट। अस्तरिष्ट। अस्तृत। कृञ् हिंसायाम्। कृणोति। कृणुते। चकार। चकर्थ। चक्रे। क्रियात्। कृषीष्ट। अकार्षीत्। अकृत। वृञ् वरणे। वभूथाततन्थ जगृभ्म ववर्थेति निगमे। ७।२।६४। एषामेवेदृड्भावो निपात्यते। तेन भाषायां न्यलीट्। ववरिथ। वव्रव। वव्रवहे। वरिता। वरीता। लिङ्सिचोरात्मनेपदेषु। ७।२।४२। वृङ्वृञ्भ्यामृदन्ताच्च परयोर्लिङ्सिचोरिड्वा स्यात्तङि। न लिङि। ७।२।३९। वृतो लिङ इटो दीर्घो न स्यात्। वरिषीष्ट। वृषीष्ट। अवारीत्। अवरिष्ट अवरीष्ट। अवृत। धुञ् कम्पने। धुनोति। धुनुते। अधौषीत्। अधोष्यत॥ दीर्घान्तोप्ययम्। धूनोति। धूनुते। स्वरतिसूतीति वेट्। दुधविथ। दुधोथ। किति लिटि तु श्र्युक इति निषेधस्याधित्वात्क्रादिनियमा

त्तिण्योरेव षणीति नियमेनैवं षत्वाभावसिद्धेः। एतच्च काशिकायां स्पष्टं। चिञ्। चयनं रचनाविशेषः विभाषाचेः। चजोरिति सूत्रात्कुरनुवर्त्तते सन् लिटोः



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चिकीर्षति। चिचीषति। ऋतश्च संयोगादेः। इट्सनि चेत्यत इड्वेत्यनुवर्तते लिङ्सिचोरिति सूत्रादात्मनेपदेष्विति च तदाह। इड्वा स्यात्तङीति। तङि किं। अस्तार्षीत्। वभूथाततंथ। भूधातोस्तनोतेश्च थलि इडभावो निपात्यते। त्वं हि होता प्रथमो वभूथ। येनान्तरिक्षमुर्वाततंथ। भाषायां तु वभूविथ। तेनिथ। जगृभ्मा ते दक्षिण।

टुधुविव। स्तुसुधूञ्भ्य इति नित्यमिट्। अधावीत्। अधविष्ट। अथ परस्मैपदिनः। टु दु उपतापे। दुनोति। हि गतौ वृद्धौ च। हिनुमीना। ८।४।१५। उपसर्गस्थान्निमित्तात्परस्यैतयोर्नस्य णः स्यात्। प्रहिणोति। हेरचङि। ७।३।५६। अभ्यासात्परस्य हिनोतेर्हस्य कुत्वं स्यान्न तु चङि। जिघाय। पृ प्रीतौ। पृणोति। पत्तौ। स्पृ प्रीतिपालनयोः। प्रीतिचलनयोरित्यन्ये। चलनं जीवनमिति स्वामी। स्पृणोति। पस्पार। स्मृ इत्येके। स्मृणोति। पृणोत्यादयस्त्रयोऽपि छान्दसा इत्याहुः। आप्लृ व्याप्तौ। आप्नोति। आप्नुतः। आप्नुवन्ति। आप्नुवः। आप्ता। आप्नुहि। लृदित्वादङ्। आपत्। शक्लृ शक्तौ। अशकत्। राध साध संसिद्धौ। राध्नोति। राधो हिंसायाम्। ६।४।१२३। एत्वाभ्यासलोपौ स्तः किति लिटि सेटि थलि च। अपरेधतुः। रेधुः। रेधिथ। राद्धा। साध्नोति। साद्धा। असात्सीत्। असाद्धाम्। अथ द्वावनुदात्तेतौ। अशू व्याप्तौ सङ्घाते च। अश्नुते। अश्नोतेश्च। ७।४।७२। दीर्घादभ्यासावर्णात्परस्य नुट् स्यात्। आनशे। अशिता। अष्टा। अशिष्यते। अक्ष्यते। अश्नुवीत। अशीष्ट। अशिषीष्ट। आशिष्ट। आष्ट। आक्षाताम्। ष्टिघ आस्कन्दने। स्तिघ्नुते। तिष्टिघे। स्तेघिता। अथ आगणान्तात्परस्मैपदिनः। तिक तिग गतौ च। चादास्कन्दने। तिक्नोति। तिग्नोति। षघ हिंसायाम्। सघ्नोति। ञिधृषा प्रागल्भ्ये। धृष्णोति। दधर्ष। धर्षिता। दम्भु दम्भने। दम्भनं दम्भः। दभ्नोति। ददम्भ। श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्त्वं वेति व्याकरणान्तरम्। इहाप्याश्रीयत इत्युक्तम्। अनिदितामिति नलोपः। तस्याभीयत्वादसिद्धत्वेन एत्वाभ्यासलोपयोरप्राप्तौ। दम्भेश्च एत्वाभ्यासलोपौ वक्तव्यौ। देभतुः। ददम्भतुः। इदङ्कित्त्वाभ्यिदपि द्विषयकमिति सुधाकरादयः॥ मिन्द्र हस्तं। भाषायां जगृहिम। वृणोतेः थलि क्रादिसूत्रेणेण्निषेधे सिद्धेऽपि निगम एव निषेधो नान्यत्रेति नियमार्थं ववर्थग्रहणं। ववर्थ त्वं हि ज्योतिषां। भाषायां ववरिथ। ववृषे। लिङ्सिचोः। इट् इत्यनुवर्तते। आत्मनेपदेषु किं। अवारीत्। अवारिषुः। सि

सिचि परस्मैपदेष्विति निषिद्धत्वादिड् वृङो लिङि ॥ १६ ॥

CC-0. In Public Domain. Digitization by eGangotri



हिनुमीना। प्रमीणाति। हेरचडि· जेघीयते। अचङीति किं। अजीहयत्। इह णंयंतस्य घात्वं तस्त्वात्केवलस्य तच्च्यासनिमित्तप्रत्ययपरत्वाभावात्कुत्वमप्राप्तिरेव
नास्तीत्यचङीति निषेधो व्यर्थः सन्ज्ञापयति ण्यधिकस्यापि कुत्वं भवतीति। तेन जिघापयिषतीत्यादि सिद्धं। आप्नुहीति संयोगपूर्वत्वादुतश्चप्रत्ययादिति हे
र्लुङ्·न। राधो हिंसायां। अत इत्यनुवर्तमाने पि सामर्थ्याद्कारमात्रस्यानित्त्वेनाश्रीयते। अश्नोतेश्च। तस्मात्लुडित्यनुवर्तत इत्याह। दीर्घादिति। श्नुविकरणे निर्दे
शः किं। आदेरणुसोजन इत्यस्समाभूत्। आशा। आशतुः। निघृषा। मूलेन घृषणोति प्रगल्भते इति मूलघृक्। मूलघृषो ऋत्विक् दधृगिति क्विनो विधाना
तन्मतेतिप् सिप् मिप्सु। देभा। देभिथ्य। देभेति रूपान्तरस्वोध्यम्। अपि द्विषयकमिति न्यासकारादिमते तु। ददम्भ। ददम्भिथ। ददम्भेत्ये
वादम्यात्। त्रुधुढे। तृप प्रीणन इत्येके। क्षुभ्नादित्वाण्णत्वन्न। तृप्नोति। छन्दसि। आगणान्तादधिकारोयम्। अह व्याप्तौ। अह्नोति। दघ
घातने पालने च। दघ्नोति। चमु भक्षणे। चम्नोति। रिक्षिचिरिजिरिदाशृदृह हिंसायां। रिणोति। क्षिणोति। अयं भाषायामपीत्येके। ननु घशः श्न।
स्त्र भूतां क्षिणोति। क्षीत्येक एवाज्ञादिरित्यन्ये ऋक्षिणोति। चिरिणोति। जिरिणोति। दाश्नोति। दृणोति। ह्वृत्॥ इति स्वादयः॥ तुद व्यथने॥
इतः षट्स्वरितेतः। तुदादिभ्यः शः। ३।१।७७। तुदति। तुदते। तुतोद। तुतोदिथ। तुतुदे। तोत्ता। अतौत्सीत्। अतुत्त। णुद प्रेरणे। नुदति। नुदते। नुनोद। नु
नुदे। नोत्ता। दिश अतिसर्जने। अतिसर्जनं दानम्। देष्टा। दिक्षीष्ट। अदिक्षत्। अदिक्षत। भ्रस्ज पाके। ग्रहिज्येति संप्रसारणं। सस्यश्चुत्वेन शः

दन्यत्रापि पदांत विषये कुत्वं। दंभु दंभने। लोकवंचनाय विहितकर्मानुष्ठानं दंभः। तृप। अयं सेड्कः। अनुदात्तेषु श्यना निर्दे शास्नज श्चेनजः भृज्जति भृज्जते·॥
शात्। अह व्याप्तौ। अस्माद्धलो ण्यंति। अहाइतितस्यादितउदात्तमर्द्धहस्वमित्यत्रास्माभिरुपपादितं। अन्ये त्वाहुः। शातचकं यो ह्योवर्तनिरित्यत्र अह्य इति षष्ठ्यं
तमेव। घेर्डि·तीति गुणास्तु अहिषाद्दस्स छांदसत्वान्नेति। रिक्षि। एते षट् धातवः एक एव अजादिरिति मते तु पंच धातवः। इति स्वादयः। तुदतीति। लघूपधगु
णं वा धित्वा नित्यत्वात्शइत्येके। अकृतव्यूहपरिभाषया गुणो न प्रवर्तत इत्यन्ये। भ्रस्ज पाके। भर्जनरूपः पाको ऽत्र धात्वर्थो न त्वोदनादेः पाकस्तत्र प्रयोगाभाव



368

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्रस्जो इति केषांचित्पाठं तु आदितश्चेति निष्ठानत्वप्रसक्त्या भृष्टः। भृष्टवानिति न सिध्येत्॥ ॐ ॥भ्रस्जो रोपधयोः। रम् अकार उच्चारणार्थः। रमित्यस्यस्त्रंत्याच्चः प
रत्वे रोपधयोरिति षष्ठीनिर्देशस्यैवेष्यष्ट्येमाशंक्याह। निवृत्तिरिति। अयंभावः। स्थानविशेषलाभाय मित्वस्यकरणान्न रोपधयोः स्थाने रम् भवति। यत्र ह्यनिर्द्धारि
तः स्थानषष्ठ्या निर्दिश्य विधीयन्ते स तत्स्थाने भवति। यथा इकोऽपराचीत्यादौ यणादिः। प्रकृते तु रमो निर्दिष्टस्थानिकत्वाद्रोपधयोः स्थाने न भवति। एवं चास्य
आदेशागमत्वे भवतो यथा अमः मत्ययागमत्व इति। अन्ये त्वेतादृगर्थ स्थानमयुक्तमिति मत्वा सनः क्तिचि इत्यतो लोपमनुवर्त्य भ्रस्जो रोपधयोर्लोपः रम् तु

भ्रस्जो रोपधयोरमन्यतरस्याम्।६।४।४७।भ्रस्जेरेफस्योपधायाश्च स्थाने रमागमो वा स्यादार्द्धधातुके मित्वादन्त्यादचः परः स्थानष
ष्ठीनिर्देशाद्रोपधयोर्निवृत्तिः। बभर्ज्ज बभर्ज्जतुः। बभर्ज्जिथ। बभर्ष्ठ। बभर्ज्जे। रमभावे। बभ्रज्ज। बभ्रज्जतुः। बभ्रज्जिथ। स्कोरिति सलो
पः व्रश्चेति षः। बभ्रष्ठ। बभ्रज्जे। भर्ष्टा। भ्रष्टा। भ्रक्ष्यति। भर्क्ष्यति। क्ङिति रमागमम्बाधित्वा सम्प्रसारणं पूर्वविप्रतिषेधेन। भृज्ज्यात्। भृज्ज्यास्ता
म्। भर्क्षीष्ट। भ्रक्षीष्ट। अभार्क्षीत्। अभ्राक्षीत्। अभर्ष्ट। अभ्रष्ट। क्षिप प्रेरणे। क्षिपति। क्षिपते। क्षेप्ता। अक्षैप्सीत्। अक्षिप्त। कृष विलेखने॥
कर्षति। कृषते। क्रष्टा। कर्ष्टा। कृष्यात्। कृक्षीष्ट। स्पृशमृश। षेति सिज्वा। पक्षे क्सः। सिचि अम्वा। अक्राक्षीत्। अकार्क्षीत्। अकृक्षत्। तङि लि
ङ्सिचावितिकित्वादम्न। अक्रष्ट। अक्रक्षाताम्। अक्रक्षत। अक्रक्षत। अक्रक्षाताम्। अक्रक्षन्त। ऋषी गतौ। परस्मैपदी। ऋषति। आ
नर्ष। जुषी प्रीतिसेवनयोः आत्मनेपदिनश्चत्वारः। जुषते। ओविजी भयचलनयोः। प्रायेणायमुत्पूर्वः। उद्विजते॥ ९९. आगम एवेत्याहुः। अपरे तु

भ्रस्जो रसरन्यतरस्यामित्येव सूत्रमस्तु रसः ऋ इति छेदः रस इति रेफाकारसकाराणांयः संघातस्तस्य ऋ इत्यादेशः स्यादित्यर्थः। तत्र च अक्ङिति भर्जको भर्जनं बभर्ज्ज इत्यादि
सिध्यति ऋकाराभावपक्षे तु भ्रज्जको भ्रज्जनं बभ्रज्ज इत्यादि क्ङिति तु ऋकारपक्षे भृष्टिः। भृज्ज्यादित्यादि। तदभावे संप्रसारणे सति तदेव रूपं। एवं च बरीभृज्यत इत्यादौ ॥
को रेफस्य निवृत्तिं वारयितुमनुदात्तोपदेश इत्यत उपदेशग्रहणमनुवर्त्य इदानीं तु नानुवर्त्यं क्ङिति रमागमं बाधित्वा संप्रसारणमिति पूर्वविप्रतिषेधश्च न कर्तव्य मि
ति महद्देव लाघवमित्याहुः। इदं च रसो र्वचनात्सिद्धमिति वार्त्तिकाशयवर्णनं भवनत्वपूर्वं। वचनादिति स्यवा ऋ वचनादिति छेदः॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति·
सि·कौ·
टी·त·
७३

भाष्यकारैस्तु सूत्रं भिद्यते यथान्यासमेवास्त्विति वदद्भिरस्यांकस्य नाप्यांदुष्टत्वं सूचितं तच्च मनोरमायां स्पष्टमेव। तथाहि रेफाकारसमुदायस्याभावे पंच दोषाः
अपि ह्लिटि वभर्जतुः वभर्जुरित्यादीष्यते वभृजतुः वभृज्जुरित्यादि स्यात्। न चात्र गुणेन निर्वाहः। अभावे सति असंयोगाल्लिट्किदिति कित्वप्रवृत्त्या तन्निषे
धात्। सनीवंतेति इड्विकल्पाद्बिभर्क्षतीत्यादीष्यते विभृक्षतीत्यादि स्यात्। अभावे हलंताच्चेति सनः कित्वप्रवृत्तेः। लिङ्सिचोस्तङि भर्क्षीष्ट अभर्ष्टेत्यादीष्य
ते भृक्षीष्ट अभृष्टेत्यादि स्यात् लिङ्सिचावात्मनेपदेष्विति कित्वात्। णिजंताच्चङि अवभर्जदिष्यते अबीभृजदित्यपि स्यात्। इरणमपवादत्वेन उरृदिति ऋत्व
प्रवृत्तौ सन्वल्लघुनीति सन्वद्भावात् सन्यत इत्वे दीर्घो लघोरिति प्रवृत्तेः। यद्यपि उरृदित्यस्य वैकल्पिकत्वादवभर्जदिति सिध्यत्येव तथापि पक्षे अ
बीभृजदित्यनिष्टं स्यादिति बोध्यं। ऋजिभृजी भर्जने इति भ्वादेस्तादृशं रूपमिष्टमिति चेत्। मैवं। भर्जनार्थे हि तादृक्रूपमिष्टं न तु पाकसामान्ये। उभयोरे
कार्थत्वाभ्युपगमेपि प्राचीनाश्चत्वारो दोषास्तु दृढा एव। न हि ते पि धात्वंतरेण सुपरिहाराः। अपि ह्लिटि भृजेरपि धातोर्गुणाभावादनुदात्तत्वेन आत्म
नेपदित्वाच्च वभर्जतुरित्यादि रूपस्य तेनाप्यसिद्धेः। तथा भृजेरुदात्तत्वेन ततः परेषां सन्लिङ्सिचामिडागमध्रौव्यात् [?] विभर्क्षति भर्क्षीष्ट अभर्ष्टेत्यादिरपि
तेन न सिध्यति। एतेन भ्रस्जेर्भृजिरादेश इति पक्षोपि निरस्तः। पूर्वोक्तदूषणगणप्रसंगात्। किंच अस्मिन्पक्षे यङ्लुकि अधिको दोषः। वधादेशवत्सा
भ्यासस्य भृज्ज्यादेशे पुनर्द्विर्वचनस्य दुर्लभत्वात् स्थानिवत्वेन अनभ्यासस्येति निषेधात्। स्त्रीकृतेपि द्विर्वचने रुग्रिकोभ्यासस्य [?] स्युरेवेति रुगादिरहितं।
बाभर्जिता बाभर्जिष्यतीत्यादि रूपं नैव सिध्येत्। यदि तु लाघवे पक्षपातेन स्वातंत्र्यं विकीर्ष्यते तर्हि भ्रस्जेरसोरिति पठित्वा रसिति समुदायस्यारेव विधीयतां
तथा च न कोपि दोष इति। अपमत्र संग्रहः रसंबंधे दपि ह्लिट्सन्लिङ्सिच्चङ्परणिस्तुते दोषा भ्रस्जेर्भृजे चैव दोषो यङ्लुकि। चाधिकः। साभ्यासस्य हि भृ
ज्भावो भवेद्धंते। वेधिर्यथा। द्वित्वं पुनर्न लभ्येत स्थानिवत्वाद्वधेरिव। तस्मादस्तु यथान्यासं स्वातंत्र्ये स्तु रसोरिति। पूर्वविप्रतिषेधेनेति। नित्यत्वादित्यपि सुव
चं। न च संप्रसारणात्पूर्वं धातो रेफस्य पश्चात् रमागमे रेफस्येति शब्दांतरप्राप्त्या संप्रसारणस्य नित्यत्वं नेति शंक्यं। लक्ष्यानुरोधेन कृताकृतप्रसंगित्वेनापि

369
एम·
७३

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मू०॥विजइट्॥१।२।२॥विजेः परइडादिः प्रत्ययो ङिद्वत्। उद्विजिता। उद्विजिष्यते। ओलजी ओलस्जी व्रीडायां। लजते। लेजे। लज्जते। ललज्जे। अथ परस्मै-
पदिनः। ओव्रश्चू छेदने। ग्रहिज्या। वृश्चति। ववश्च। ववश्चतुः। ववश्चिथ। ववष्ठ। लिट्यभ्यासस्येति सम्प्रसारणे रेफस्य ऋकारः। उरत्। तस्माच्चः परस्मि-
न्निति स्थानिवद्भावान्न सम्प्रसारणमिति वस्योत्वन्न। व्रश्चिता। व्रष्टा। व्रश्चिष्यति। व्रक्ष्यति। वृश्च्यात्। अव्रश्चीत्। अव्राक्षीत्। व्यच व्याजीकरणे। विच-
ति। विव्याच। विविचतुः। व्यचिता। व्यचिष्यति। विच्यात्। अव्याचीत्। अव्यचीत्। ।व्यचेः कुटादित्वमनसीति तु नेह प्रवर्त्तते। अनसीति प-
र्युदासेन कृन्मात्रविषयत्वात्। उच्छि उञ्छे। उञ्छति। उच्छी विवासे। उच्छति। ऋच्छ गतीन्द्रियप्रलयमूर्त्तिभावेषु। ऋच्छत्यृतामिति गुणः। द्विहल-
ग्रहणस्यानेकहलुपलक्षणत्वान्नुट्। आनर्च्छ। आनर्च्छतुः। ऋच्छिता। मिच्छ उत्क्लेशे। उत्क्लेशः पीडा। मिमिच्छ। अमिच्छीत्। जर्ज चर्च झर्झ परि-
भाषणभर्त्सनयोः। त्वच संवरणे। तत्वाच। ऋच स्तुतौ। आनर्च। उब्ज आर्जवे। उज्झ उत्सर्गे। लुभ विमोहने। विमोहनमाकुलीकरणम्। लुभति। लोभि-
ता। लोब्धा। लोभिष्यति। रिफ कत्थनयुद्धनिन्दाहिंसादानेषु। रिफति। रिरेफ। रिहेत्येके। शिश्नुन्नविग्रामतिभी रिहन्ति। तृप तृम्फ तृप्तौ। आद्यः प्रथमान्तः।
द्वितीयो द्वितीयान्तः। द्वावपि द्वितीयान्तावित्यन्ये। तृपति। ततर्प। तर्पिता। स्पृशमृशेति सिज्विकल्पः। पौषादिकस्यैव। अङ्गपवादत्वात्। तेनात्र नित्यं
सिच्। अतर्पीत्। तृम्फति। शस्य ङित्वादनिदितामिति नलोपे। शेतृम्फादीनां नुम्वाच्यः। आदिशब्दः प्रकारे। तेन येऽत्र नकारानुषक्तास्ते तृम्फादयः। तृम्फ-
ति। ततृम्फ। तृफ्यात्। तुप तुम्प तुफ तुम्फ हिंसायाम्। तुपति। तुम्पति। तुफति। तुम्फति। दृप दृम्फ उत्क्लेशे। प्रथमः प्रथमान्तः द्वितीयो द्वितीयान्त इत्ये-
के ——— दृफति। दृम्फति। ऋफ ऋम्फ हिंसायाम्। ऋफति। आनर्फ। ऋम्फति। ऋम्फाञ्चकार। गुफ गुम्फ ग्रन्थे। गुफति। गुम्फति। जुगोफ। जुगुम्फ
। उभ उम्भ पूरणे। उभति। उवोभ। उम्भति। उम्भाञ्चकार। शुभ शुम्भ शोभार्थे। शुभति। शुम्भति। दृभी ग्रन्थे। दृभति। चृती हिंसाग्रन्थनयोः। चर्त्तिता। से-
सिचीति वेट्। चर्त्तिष्यति। चर्त्स्यति। अचर्त्तीत्। विध विधाने। विधति। वेधिता। जुड गतौ। जवग पञ्चमान्त इत्येके। जुडति। मरुतो जुनन्ति। मृड सुखने।
मृडति। मर्डिता। पृड च। पृडति। पृण प्रीणने। पृणति। पपर्ण। वृण च। वृणति। मृण हिंसायाम्। तुण कौटिल्ये। तुतोण। पुण कर्म्मणि शुभे। पुणति॥

…इति। व्यचो व्याजीकरणे पर्युदासेनाति प्रसज्यप्रतिषेधे हि वाक्यभेदः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति·
सि·कौ·
टी·त·
७४

मू॰॥ सुण प्रतिज्ञाने। कुण शब्दोपकरणयोः। शुन गतौ। द्रुण हिंसागतिकौटिल्येषु। घुण घूर्ण भ्रमणे। सुर ऐश्वर्यदीप्त्योः। सुरति। सुषोर। आशिषि। सूर्या
त्। कुर शब्दे। कुरति। कूर्य्यात्। अत्र न भकुर्छुरामिति निषेधो न करोतेरेव तत्र ग्रहणादित्याहुः। खुर छेदने। मुर संवेष्टने। क्षुर विलेखने। घुर भीमार्थशब्द
योः। पुर अग्रगमने। वृहू उद्यमने। दन्त्योष्ठ्यादिः। पवर्गीयादिरित्यन्ये। तृहू स्तृहू तृंहू हिंसार्थाः। तृहति। ततर्ह। स्तृहति। तस्तर्ह। तर्हिता। तर्ढा। स्तर्हि
ता। स्तर्ढा। अतृंहीत्। अतार्ङ्क्षीत्। अतार्ढाम्। इष इच्छायाम्। इषुगमीति छः। इच्छति। एषिता। एष्टा। एषिष्यति। इष्यात्। ऐषीत्। मिष स्पर्द्धायाम्।
मिषति। मेषित। किल श्वैत्यक्रीडनयोः। तिल स्नेहे। चिल वसने। चल विलसने। इल स्वप्नक्षेपणयोः। बिल संवरणे। दन्त्योष्ठ्यादिः। बिल भेदने। ओ।
ष्ठ्यादिः। णिल गहने। हिल भावकरणे। शिल षिल उञ्छे। मिल श्लेषणे। लिख अक्षरविन्यासे। लिलेख। कुट कौटिल्ये। गाङ्कुटादिभ्य इति ङित्त्वम्। चुकु
टिथ। चुकोट। चुकुट। कुटिता। पुट संश्लेषणे। कुच सङ्कोचने। गुज शब्दे। गुड रक्षायाम्। डिप क्षेपे। छुर छेदने। न भकुर्छुरामिति न दीर्घः। छुर्य्यात्। स्फुट।
विकसने। स्फुटति। पुस्फोट। मुट आक्षेपमर्दनयोः। त्रुट छेदने। वा भ्राशेति श्यन्वा। त्रुट्यति त्रुटति। तुत्रोट। त्रुटिता। तुट कलहकर्मणि। तुटति। तुतोट। तुटिता। चुट
छुट छेदने। जुड बन्धने। कड मदे। लुठ संश्लेषणे। कृड घनत्वे। घनत्वं सान्द्रता। चकर्ड। कृडिता। कुड बाल्ये। पुड उत्सर्गे। घुट प्रतिघाते। तुड तोडने। तोडनं।
भेदः। थुड स्थुड संवरणे। थुडति। तुथोड। तुस्थोड। खुड छुड इत्येके। स्फुर स्फुल संचलने। स्फुर स्फुरणे। स्फुल संचलने इत्येके। स्फुरति। स्फुलति। निर्निवि
भ्यः। ८।३।७६। षत्वं वा स्यात्। निष्फुरति। निःस्फुरति। स्फर इत्यकारोपधं केचित्पठन्ति। पस्फार। स्फुड चुड व्रुड संवरणे। क्रुड भृड निमज्जन इत्येके। गुरी
उद्यमने। अनुदात्तेत्। गुरते। जुगुरे। गुरिता। णू स्तवने। दीर्घान्तः। परिणूतगुणोदयः। इतश्चत्वारः परस्मैपदिनः। नुवति। अनुवीत्। धू विधूनने। धुवति।
गु पुरीषोत्सर्गे। जुगुविथ। जुगुथ। गुता। गुष्यति। अगुषीत्। ह्रस्वादङ्गात्। अगुताम्। अगुषुः। ध्रु गतिस्थैर्ययोः। ध्रुव इति पाठान्तरम्। आद्यस्य ध्रुवतीत्या
दिगुवतिवत्। द्वितीयस्तु सेट्। दुध्रुविथ। ध्रुविता। ध्रुविष्यति। ध्रूयात्। अध्रुवीत्। अध्रुविष्टाम्। कुङ् शब्दे। दीर्घान्त इति कैयटादयः। कुविता। अकुविष्ट। ह्रस्वान्त इ
ति न्यासकारः। कुता। अकुत। दृत्कुटादयो टन्ताः। पृङ् व्यायामे। प्रायेणायं व्याङ्पूर्वः। रिङ्। दृयङ्। व्याप्रियते। व्यापप्रे। व्यापप्राते। व्यापरिष्यते। व्यापृत। व्यापृषाता

राम·
७४

370

त्वादिति। तेन उद्विचिता उद्विचि॥

दी०॥ विजइट्॥ इह द्वितीयस्येति सूत्रान्नेड्वशि कृतीत्यस्माद्वलादिरिति अनुवर्तते तेन इडादि प्रत्यये लभ्यत इति मनोरमायां स्थितं। नव्यास्तु इह इडित्यनेन उक्तमेकवच
नं न गृह्यते। तथा च सति विजिशीयेत्यत्रैव स्यान्न तु दिजितेत्यादौ। नतश्चेष्टसिद्ध्यर्थमिडागमो गृह्यते तस्य तु ङित्वं व्यर्थं तन्निमित्तगुणस्याप्राप्तेरतो लक्षणया इड्ग्रहणा।
गृह्यते। इट्प्रत्ययस्यादिरिति फलितार्थकथनमिडादिप्रत्ययो ङिद्वदिति। एवं च इडादिरित्ति लाभाय वलादिरित्यनुवर्तनक्लेशो व्यर्थ एवेत्याहुः। इट्। ओवि
जीत्तितुदादिः रुधादिश्च गृह्यते न तु विजिर् पृथग्भावे इति जुहोत्यादिर्व्याख्यानात्। यत्त्वत्र ग्रहणे देनजुहोत्यादेरग्रहणे हेतुरुक्तः तस्यानिट्कत्वादिति तदयु
क्तं। क्रादिनियमेन लिटि इट्संभवात्। न च तत्र कित्वेन गतार्थत्वादिटो ङित्वं व्यर्थमिति वाच्यं। अपि लिटः कित्वेपि विविजिथेत्यत्रापि त्वेन ङित्वाभावात्॥
वव्रश्चेति। अत्र नव्याः। वव्रश्चेत्यादौ लिट्यभ्यासस्येत्यभ्यासावयवयोर्द्वयोरपि यणोः संप्रसारणप्रसक्तौ पूर्वस्य परेण निषेधाय न संप्रसारणे इति सूत्रं
स्वीक्रियते ततश्च अत एव ज्ञापकात्परस्य प्रथमं संप्रसारणमिति परिकल्प्य आपादपरिसमाप्तेरंगाधिकार इति पक्षमभ्युपगम्य उरदत्वस्यांगासिद्धप्रत्य
यनिमित्तकत्वस्वीकारादचः परस्मिन्निति स्थानिवद्भावप्रवृत्त्या संप्रसारणपरत्वमाश्रित्य वकारस्य संप्रसारणनिषेधः कथंचिदुपपाद्यते परस्य संप्र
सारणं परस्य यणः संप्रसारणमिति वा सूत्रिते परस्यैव संप्रसारणं न तु पूर्वस्य यण॥ इत्यर्थलाभात्॥ उक्तक्लेशं विनैव वव्रश्च वृन इत्यादि सर्वं सिध्यति न चे
वं लिटि वयो यः वेञ इत्यत्र संप्रसारणनिषेधाय न ञोऽनुवृत्तिर्न लभ्यते इति वाच्यं। न लिटि वयो य इति सूत्रकरणे बाधकाभावान्न संप्रसारणे इति यथाश्रुतसूत्रप
णयने त्वं ततो मत्वा मात्राद्वयस्याधिक्याच्च। एवं च लघूपायेनेष्टसिद्धौ न संप्रसारणे इति सूत्रारंभो ज्ञापयति निमित्तभेदाभावेपि स्थानिभेदे पुनरपि कार्यं प्रव
र्तते इति। तथा च सुध्युपास्य इत्यादौ उकारात्परस्य धकारस्य द्वित्वे कृते पुनर्हकारात्परस्य दकारस्यापि द्वित्वमिति प्रक्रियाकारादिव्याख्यानसूत्रकाराभिप्रेतमेव
यद्विस्थानिभेदेपि निमित्तैक्ये कार्याप्रवृत्तिः क्वचिद्दृश्यते तत्र तु ज्ञापकसिद्धं न सर्वत्रेति सदोषः परिह्रियतामित्याहुः। अव्रश्चीदिति। ऊदित्वात्पक्षे इट्। वव्र
जेति द्वे नेटीति निषेधः। अव्रस्यदिति। स्कोरिति सलोपः। व्रश्चेति षः। षढोरिति कः। ततः सस्य षत्वं। न चात्र सकारस्य कथं लोप इति वाच्यं। धातुपाठे सकारस्य
पाठात्। तदाहुः। नकारजावनुस्वारपंचमौ झलि धातुषु। सकारजः शकारश्च षाद्वर्गस्तवर्गजः इति। व्यचा। व्याजीकरणे। पर्युदासेनेति। प्रसज्यप्रतिषेधे हि वाक्यभे द

[illegible]

CC-0. In Public Domain. Digitization by eGangotri

ति·
सि·कौ·
टी·म·
७५

टी·॥तुमित्यत्र संप्रसारणं भवति। व्यविस्यादौ तु तिङ्विषयेन भवति। विव्याचेत्यत्र कुटादित्वे जातेपि न क्षतिः। गाङ्कुटादिभ्य इति सूत्रे अञ्णितः प्रत्यया ङितः स्यु रिति
उक्तत्वात्। उन्नमेणालितुणित्वाभावपक्षे ङित्वात् संप्रसारणे विव्यचेति न सिध्येदिति अनसीति पर्युदासश्चावश्यक इति बोध्यं। उछि उंछे। उछी विवासे। इमौ।
भ्वादिगणे व्याख्यातौ। इह पाठस्तु उंछती त्यत्र श्नाच्छीनद्योरिति नुम्विकल्पार्थः। पूर्वपाठस्तु स्वरार्थः। तथा हि। उंछति उच्छती त्यादौ पिद्वचने शप्तिवादीनां पित्वा-
त् अनुदात्तत्वे धातुस्वरेणाद्युदात्तं पदं। शे तु प्रत्ययस्वरेण मध्योदात्तमिति। न च सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वक्ष्यमाणत्वात् कथमिह म-
ध्योदात्तत्वेनेति वाच्यं। कुटतइत्यादौ तसादेर्विकरणात्परत्वेन तत्स्वरस्योदात्तस्य विकरणस्वरापेक्षया प्रबलत्वेपि शस्य धातोः परत्वेन धातुस्वरापेक्षया शस्व-
रस्योदात्तस्य प्रबलत्वात्। उपलक्षणत्वादिति। अत एव अदुपधस्य चेत् अश्नोतेरेवेति नियममाश्रित्य दिहलग्रहणं भाष्यकारैः प्रत्याख्यातं। अन्यथा तन्न संग-
च्छेतेति भावः। आनर्छेति। अन् छ इति पर्युदासान्नामून्व्यास्तु ऋच्छतां ऋतामिति लिटि परे गुणविधानसामर्थ्यादामभावः सिद्ध इति इजादेरिति सूत्रे अनृ-
च्छ इत्येतत्स्पष्टप्रतिपत्त्यर्थमित्याहुः। अन्ये तु ऋच्छत्यृ तामित्यत्र तोदादिक ऋच्छेरिति सर्वैरेव व्याख्यातत्वात् गणान्तरेपि ऋच्छिरस्तीत्यनुमीयते तद्धा-
तोस्तु लिव्याम्निवारणाय अनृच्छ इत्येतदावश्यकमित्याहुः। मिछ। उत्कटः क्लेशः उत्क्लेशः। ऋच स्तुतौ। ऋच्यते स्तूयते देवतादिकमनयेति ऋक्। बाहु-
लकादिह करणे क्विप्। लोभितौ। लोभ्यातोपसर्गेति वेट्। शिशुं न विप्रा इति। न शब्द इवार्थे। विप्रा ब्राह्मणाः शिशुमिव मतिभी रिहंति। हिंसंति न्यूनीकुर्वंती-
त्यर्थः। चृती हिंसाग्रंथनयोः। ईदित्करणं श्वीदितो निष्ठायामिति इण्निषेधार्थं। यद्यप्यस्य वेट्कत्वान्निष्ठायामिण्निषेधः सिध्यति तथापि यस्य विभाषेत्यस्या-
नित्यतां ज्ञापयितुमीदित्करणं। तेन धावितमिभराजधियेत्यादिपि सिद्धमित्याहुः। कुरशब्दे। करोतेरेवेति। सुप्रसिद्धत्वात्। कुर्यादित्युक्ते हि लोकानां कृञ-
एवोपस्थितिर्भवति न त्वस्येति भावः। सुर संवेष्टने। इगुपधलक्षणः कः। सुरो देस्यः मुरारिर्विष्णुः। क्षुर विलेखने। विलेखनं छेदनं। केशान् क्षुरति। इगुपधेति
कः। क्षुरः शस्त्रं। तिल स्नेहने। तिलति। इगुपधेति कप्रत्यये तिलः। तिल गतौ। तेलतीति शपि लिख अक्षरविन्यासे। लिखितुं लिखिष्यतीति प्रयोगः प्रामा-
दिकः। यत्तु केश्चित्कुटस्यादिः कुटादिः कुटः आदिर्येषां ते कुटादयः कुटादिश्च कुटादयश्च कुटादयः इत्येकशेषं स्वीकृत्य लिखितुमित्यादिस॥ ६ ॥

राम·
७५

372

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मर्थितं तदसत्। लेखिता लेखिष्यतीत्यादौ गुणनिषेधापत्तेः। न चेष्टापत्तिः। वृत्तिकारहरदत्तादिग्रंथविरोधात्। गाङ्कुटादिभ्य इत्येव सूत्रितव्ये कुटादिभ्य
इति पठनस्य स्वारस्यभंगापत्तेश्च। किंच। शकुनिष्वालेखने इत्ति सौत्रप्रयोगोऽपि विरुध्यत इति प्रागेवोक्तं इत्यास्तां तावत्। लिखापयतीति प्रयोगस्तु मनोरमा
यामित्थं समर्थितः। आपनं आयः प्राप्तिः लिखस्यायो लिखायस्तं करोति। स्फुट विकसने। स्फुटत्यर्थोऽस्मादिति स्फोटः। स च पदस्फोटवाक्यस्फोटादिभेदेनाऽ
नेकविधः। कड मदे। कुटादिकार्याभावेऽपि डित्वानुरोधेनायं कुटादौ पठितः। भ्वादौ पठितस्य पुनरत्र पाठः शतरि नुम्विकल्पार्थः। पूर्वपाठस्तु उंकतीसादावि
वकडतीत्यादौ आद्युदात्तार्थः। स्फुरति स्फुलत्योः सिवादीनामित्यतो वेत्यनुवर्तमाने आह। षत्वं वा स्यादिति। परिस्फूर्तेति। श्र्युकः कितीतीण्निषेधः॥ ❁ ॥
॥ ❁ ॥ म्रियतेर्लुङ्लिङोश्च। चात् शित इति अनुकृष्यते तदाह। शितश्च प्रकृतिभूतादिति। तङिति। आत्मनेपदमित्यर्थः। तेन म्रियमाण इति सि

म्रियतेर्लुङ्लिङोश्च।१।३।६१। लुङ्लिङोः शितश्च प्रकृतिभूतान्मृङस्तङ् नान्यत्र। ङित्वं स्वरार्थम्। म्रियते। ममार। ममर्थ। मम्रि
व। मर्ता। मरिष्यति। मृषीष्ट। अमृत। अथ परस्मैपदिनः सप्त। रि पि गतौ। लघूपधगुणात् अन्तरंगत्वादियङ्। रियति। पियति
रेता। पेता। धि धारणे। क्षि निवासगत्योः। षू प्रेरणे। सुवति। सविता। कॄ विक्षेपे। किरति। किरतः। चकार। चकरतुः। करिता। करीता। की

ङित्स्वरार्थमिति। मा हि मृतेत्यत्र तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमित्यनेन ङितः परस्य लादेशसार्वधा र्यात्। अकारीत्॥
तुकस्यानुदात्तत्वे कृते धातुरुदात्तः। ङित्वाभावे तु प्रत्ययस्योदात्तत्वे धातुरनुदात्तः स्यात्। न च सिज्लोपस्यासिद्धत्वान्न ङितः परत्वं लसार्वधातुकस्य दुरुपपा
दत्वमिति तस्य कथमनुदात्तता स्यादिति शंक्यं। ङित्वसामर्थ्यात् सिज्लोपस्यासिद्धत्वं नेति सुवचत्वात्। अमृतेत्यत्राडागमस्यैवोदात्तत्वात् मृङो ङित्वस्य न
किंचित् प्रयोजनमिति भ्रमनिवारणाय मा हि मृतेति माङः प्रयोगोऽस्ति ङु तिङ इति तिङंतनिघातेऽपि ङित्वं व्यर्थमेव स्यात् इति हिशब्दप्रयोगः। हिप्रयोगे तु
हि चेत्यनेन तिङंतनिघातनिषेधादिष्टस्वरः सिध्यतीति बोध्यं। रि पि गतौ। परत्वाल्लघूपधगुणः स्यादित्याशंकायामाह। अंतरंगत्वादिति॥ ६ ॥

किरतौ लवने। उपात्प्रतियत्नेति सूत्रादुपादिति वर्तते। लवने किं। उपकिरति। हिंसायां प्रतेश्च। चादुपात्। उरो विदारं प्रतिचस्करे नखैरिति माघः। कर्मणि लिट्।

किरतौ लवने। ६।१।१४०। उपात्किरतेः सुडागमः स्याच्छेदेऽर्थे। उपस्किरति। अडभ्यासव्यवायेऽपि सुट्कात्पूर्व इति वक्तव्यम्। उपास्किरत्। उपचस्कार। हिंसायाम्प्रतेश्च। ६।१।१४१। उपात्प्रतेश्च किरतेः सुट् स्यात् हिंसायाम्। उपस्किरति। प्रतिस्किरति। गॄ निगरणे। अचि विभाषा। ८।२।२१। गिरतेः रेफस्य लत्वं वा स्यादजादौ। गिरति। गिलति। जगार। जगाल। जगरिथ। जगलिथ। गरिता। गलिता। दृङ् आदरे। आद्रियते। आद्रियेत। आदद्रे। आदद्रिषे। आदर्ता। आदरिष्यते। आदृषीष्ट। आदृत। आदृषाताम्। धृङ् अवस्थाने। ध्रियते। अथ परस्मैपदिनः षोडश। प्रच्छ ज्ञीप्सायाम्। पृच्छति। पप्रच्छ। पप्रच्छतुः। पप्रच्छिथ। पप्रष्ठ। प्रष्टा। प्रक्ष्यति। अप्राक्षीत्। वृत्। किरादयो वृत्ताः। सृज विसर्गे विभाषा सृजिदृशोः। ससर्जिथ। ससष्ठ। स्रष्टा। स्रक्ष्यति। सृजिदृशोर्झल्यमकिति इत्यमागमः। सृजेत्। सृज्यात्। अस्राक्षीत्। टुमस्जो शुद्धौ। मज्जति। ममज्ज। मस्जिनशोर्झलि इति नुम्। मस्जेरन्त्यात्पूर्वो नुम्वाच्यः। संयोगादिलोपः। ममङ्क्थ। ममज्जिथ। मङ्क्ता। मङ्क्ष्यति। अमाङ्क्षीत्। अमाङ्क्ताम्। अमाङ्क्षुः। रुजो भङ्गे। रोक्ता। रोक्ष्यति। अरौक्षीत्। अरौक्ताम्। भुजो कौटिल्ये। रुजिवत्। छुप स्पर्शे। छोप्ता। अछौप्सीत्। रुश रिश हिंसायाम्। तालव्यान्तौ। रोष्टा। रोक्ष्यति। रेष्टा। रेक्ष्यति। लिश गतौ। अलिक्षत्। स्पृश संस्पर्शने। स्प्रष्टा। स्पर्ष्टा। स्प्रक्ष्यति। स्पर्क्ष्यति। अस्प्राक्षीत्। अस्पार्क्षीत्। अस्पृक्षत्। विच्छ गतौ। गुपूधूपेत्यायः। आर्द्धधातुके वा। विच्छायति। विच्छायाञ्चकार। विविच्छ। विश प्रवेशने। विशति। वेष्टा। मृश आमर्शने। आमर्शनं स्पर्शः। अम्राक्षीत्। अमार्क्षीत्। अमृक्षत्। णुद प्रेरणे। कर्त्रभिप्रायेऽपि फले परस्मैपदार्थः। पुनः पाठः। षद्लृ विशरणगत्यवसादनेषु। सीदतीत्यादि भौवादिकवत्। इह पाठो नुम्विकल्पार्थः। सीदती। सीदन्ती। ज्वलादौ पाठस्तु णार्थः॥

ऋच्छत्यृतामिति गुणः। दृङ् आदरे। तथाद्रियंते न बुधाः सुधामपीति श्रीहर्षः। प्रच्छ ज्ञीप्सायां। ज्ञातुमिच्छा ज्ञीप्सा। अत्र न्वपि ज्ञाने। आपृच्छ्य धामीत्॥ ३॥

CC-0. In Public Domain. Digitization by eGangotri

अत्रलोपइत्यभ्यासलोपः। ण्वुलि। प्रच्छकः। पृच्छाशब्दात् तत्करोतीति णिजंतात् ण्वुलि तु पृच्छकः। पृच्छाशब्दस्तु भिदादेराकृतिगणत्वात् अङि संप्रसारणे वा।
ध्यः। किरादयो वृत्ताइति। एतेचभूवाकर्मे किरादिसनामित्तिवस्यमाणायच्किणादिनिषेधवार्तिके उपयोक्ष्यंते किरश्चपंचभ्यइत्येतदुत्तरसूत्रेऽनुवृत्त्यर्थमितिवो
ध्यं। ससर्जिथेति विभाषा सृजिदृशोरितिथलिवेट्। विच्छ गतौ। तुदादिपाठसामर्थ्यादायप्रत्ययांतादपि शो न तु शप्। तेन विच्छायतीविच्छायंतीइति तु मवि

साद। स्वरार्थश्चशवनुदात्तः। शात्स्वदात्तः। शाङ् शातने। स्वरार्थएव पुनः पाठः शानात्तु नास्ति। शदेः शितइत्यात्मनेपदोक्तेः। अयप
दुस्वरितेतः। मिल सङ्गमे। मिल संश्लेषणे इति पठितस्य पुनः पाठः कर्त्रभिप्रायेतङर्थः। मिलति। मिलते। मिमेल। मिमिले। मुच्लृ मोक्षणे। शे
मुचादीनाम्। ७।१।५९। नुमस्यात् मुञ्चति। मुञ्चते मोक्ता। मुच्यात्। मुक्षीष्ट। अमुचत्। अमुक्त। अमुक्षातां। लुप्लृ छेदने। लुम्पति। लुम्पते॥
अलुपत्। अलुप्त। विद्लृ लाभे। विन्दति। विन्दते। विवेद। विविदे। व्याघ्रभूत्यादिमते सेट्कोयम्। वेदिता। भाष्यादिमतेऽनिट्कः। वेत्ता। परिवेत्ता।
परिवेत्ता। ज्येष्ठं परित्यज्य दारान् अग्नींश्चलब्धवानित्यर्थः। तृन्तचौ। लिप उपदेहे। उपदेहो वृद्धिः। लिम्पति। लिम्पते। लेप्ता। लिपिसिचीत्य
ङ्। तङि तु वा। अलिपत्। अलिपत। अलिप्त। षिच क्षरणे। सिञ्चति। सिञ्चते। असिचत्। असिचत। असिक्त। अभिषिञ्चति। अभ्यषिञ्चत्
अभिषिषेच। अथत्रयः परस्मैपदिनः। कृती छेदने। कृन्तति। चकर्त। कर्तिता। कर्तिष्यति। कर्त्स्यति। अकर्तीत्। खिद परिघाते। खिन्दति।
चिखेद। खेत्ता। अयन्दैन्ये दिवादौ रुधादौ च। पिश अवयवे। पिंशति। पेशिता। अयन्दीपनायामपि। त्वष्टारूपाणि पिंशतु। इति मुचाद
यस्तुदादयश्च। रुधिर् आवरणे। नवस्वरितेतइरितश्च॥ ११ कल्पः। केचित्तु तुदादिपाठसामर्थ्यादायप्रत्ययस्य पाक्षिकत्वं स्वीकृत्य विच्छतीवि
च्छंतीइति तु म्विकल्पं विच्छतिविच्छतः विच्छंतीत्यादिरूपाणिचोदाजहुस्तेषां तु मते तुदादिपाठस्य केवलेचरितार्थत्वादायप्रत्ययांताच्छवेव। तेन विच्छायंती
इति नित्यमेव शाप् श्यनोरितिनुम्॥ पठितस्येति। अस्मिन्नेवगणे परस्मैपदिषु पठितस्येत्यर्थः। तङर्थइति। पूर्वपाठस्तु संश्लेषणे कर्त्रभिप्रायेपि परस्मैपदा
र्थः। षिच क्षरणे। षिचिरितिकेचिदिरितं पठंति। तत्तु फलाभावादुपेक्ष्यं। इह लिपिसिचिह्वश्चेति च्लेरङ् विधीयते स चाप्राप्तविधिः इरित्वेतु विकल्पे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति· सि·कौ· टी·त· ७७

नप्राप्नोतीत्यर्थो विचिन्तितिफलाभावः। पिंषन्तीति। दीपयन्तीत्यर्थः। इति तुदादयः॥ ॥ रुधादिभ्यः श्नम्। प्रत्ययत्वेपि मित्त्वादंत्यादचः परः। प्रत्ययसं-
ज्ञाफलं तु शस्येत्संज्ञा। शंसोच्चारणं तु श्नसोरल्लोपः श्नान्नलोप इत्यत्र विशेषणार्थं न तु सार्वधातुकसंज्ञार्थं। फलाभावात्। नचापि त्सार्वधातुकस्य ङित्वे

रुधादिभ्यः श्नम्। ३।१।७८। शपोऽपवादः। मित्त्वादन्त्यादचः परः। नित्यत्वाद्गुणं बाधते। रुणद्धि। श्नसोरल्लोपः। णत्वस्यासिद्धत्वादनुस्वा-
रः परसवर्णः। तस्यासिद्धत्वात् झलां जश् झशि। नपदान्तेति सूत्रेणानुस्वारपरसवर्णयोर्लोपो न स्थानिवत्। रुन्धः। रुन्धन्ति। रुरोध। रोद्धा। रोत्स्यति। रो-
त्स्यते। रुणद्धु। रुन्द्धात्। रुन्धि। रुणधानि। रुणधै। अरुणत्। अरुन्धां। अरुणात्। अरुणः। अरुणधम्। अरुधत्। अरौत्सीत्। अरुद्ध।
भिदिर् विदारणे। भिनत्ति। भिन्ते। भेत्ता। भेत्स्यति। अभिनत्। अभिनः। अभिनदम्। अभिन्त। अभिदत्। अभैत्सीत्। अभित्त। छिदिर् द्वै-
धीकरणे। अच्छिदत्। अच्छैत्सीत्। अच्छित्त। रिचिर् विरेचने। रिणक्ति। रिङ्क्ते। रिरेच। रिरिचे। रेक्ता। अरिणक्। अरिचत्। अरैक्षीत्। अरिक्त।
विचिर् पृथग्भावे। विनक्ति। विङ्क्ते। क्षुदिर् संप्रेषणे। क्षुणत्ति। क्षुन्ते। क्षोत्ता। अक्षुदत्। अक्षौत्सीत्। अक्षुत्त। युजिर् योगे। योक्ता। उछृदिर्
दीप्तिदेवनयोः। छृणत्ति। छृन्ते। चच्छर्द। सेसिचेति वेट्। चच्छृदिषे। चच्छृत्से। छर्दिता। छर्दिष्यति। छर्त्स्यति। अच्छृदत्। अच्छर्दीत्। अ-
च्छर्दिष्ट। उतृदिर् हिंसानादरयोः। तृणत्ति इत्यादि। कृती वेष्टने। परस्मैपदी। कृणत्ति। आर्द्धधातुके तौदादिकवत्। ञिइन्धी दीप्तौ। त्रय आ-
त्मनेपदिनः। श्नान्नलोपः। ६।४।२३। श्नमः परस्य नस्य लोपः स्यात्। श्नसोरल्लोपः। इन्धे। इन्त्से। इन्धिता। इन्धां। ऐन्ध। ऐन्धाः। खिद दैन्ये।
खिन्ते। खेत्ता॥ विद विचारणे। विन्ते। वेत्ता। अथ परस्मैपदिनः। शिषॢ विशेषणे। शिनष्टि। शिंष्टः। शिंषन्ति। शिशेषिथ। शेष्टा। शेक्ष्य-
ति। हेर्द्धिः। जश्त्वम्। शिण्ड्ढीति वा डलोपः। अनुस्वारपरसवर्णौ। शिण्ढि। शिनट्टु। शिनषाणि। अशिनट्। लृदित्त्वादङ्। अशिषत्। पि-
षॢ संचूर्णने। शिषिवत्। पिनष्टि। भञ्जो आमर्दने। भनक्ति। बभञ्जिथ। बभङ्क्थ। भुज पालनाऽभ्यवहारयोः। भुनक्ति। भोक्ता। भोक्ष्यति।

राम· ७७

गुणनिषेधः फलमिति शंक्यं। इगंतस्यांगत्वाभावात्। अरुणः इति सिपि दश्चेति रुत्वं। एवमभिन इत्यत्रापि। उछृदिर् उकारः क्त्वायामिड्विकल्पार्थः। छृत्वा। छर्दित्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इट्पक्षे न क्त्वा सेडिति कित्त्वनिषेधाद्गुणः। श्नान्नलोपः। अस्य मुख्योदाहरणं। अनक्ति। श्नादित्युत्सृष्टमकारानुबंधस्य श्नमो ग्रहणमित्याहुः। श्नमः परस्येति॥
एवं च यजयाचेति विश्नशब्दस्य सिद्धिर्विश्नानामित्यत्र लक्षणप्रतिपदोक्तप्रत्ययग्रहणपरिभाषयोः प्रवृत्त्या नलोपशंकैव नास्तीत्याहुः। इन्धे इंत्से श्नमो न।
कारस्यानुस्वारः परसवर्णौ। अनिदितामिति नलोपस्तु न भवति। अल्लोपस्यासिद्धवदत्रेत्यसिद्धत्वात्स्थानिवत्त्वाद्वा। भंजो। ओदित्करणं निष्ठानत्वार्थं। भग्नः॥
भुजपालनादौ भुजोऽनवने इत्यात्मनेपदं वक्ष्यते। भुंक्ते भुंजाते भुंजते॥ ॐ ॥तृणह इम्तृहइति वक्तव्ये सश्नमो ग्रहणं विशेषविहितेन इमा श्नमो बाधो मा

तृणह इम्। ७।३।९२। तृहः श्नमि कृते इमागमः स्याद्धलादौ पिति। तृणेढि। तृण्ढः। ततर्ह। तर्हिता। अतृणेट्। हिनस्ति। जिहिंस। हिं
सिता। उन्दी क्लेदने। उनत्ति। उन्तः। उन्दन्ति। उदाञ्चकार। औनत्। औनत्ताम्। औन्दन्। औनः। औनत्। औनदम्। अञ्जू व्यक्तिमर्षण
कान्तिगतिषु। अनक्ति। अंक्तः। अञ्जन्ति। आनञ्ज। आनञ्जिथ। आनङ्क्थ। अङ्क्ता। अञ्जिता। अङ्ग्धि। अनजानि। आनक्। अञ्जेः
सिचि। ७।२।७१। अञ्जेः सिचो नित्यमिट् स्यात्। आञ्जीत्। तञ्चु सङ्कोचने। तङ्क्ता। तञ्चिता। ओविजी भयचलनयोः। विनक्ति। विङ्क्तः
। विजइडिति ङित्त्वं। विविजिथ। विजिता। अविनक्। अविजीत्। वृजी वर्जने। वृणक्ति। वर्जिता। पृची सम्पर्के। पृणक्ति। पपर्च॥ इति

मूद्दिसेवमर्थं। नच तृणेदादिकस्यतृहइत्यस्य व्यावृत्त्यर्थमेवास्त्विति शंक्यं। ततः परस्य हलादेः पितः सार्वधातुकस्य विकरणेन व्यवधानात्। नाभ्यस्तस्याचि पि
तीत्यतः पितीति उक्तो वृद्धिरित्यतो हलीति च वर्तते तदाह हलादौ पितीति। प्रत्ययलोपे प्रत्ययलक्षणमिति सूत्रस्थभाष्यकारीयनिष्कर्षे तु हलीति नानुवर्तते
किंतु पितीति अनुवर्तते एव। तेन तृढ इत्यत्र नातिप्रसंगः। नच हलीत्यननुवृत्तौ तृणहानीत्यत्रातिप्रसंग इति वाच्यं। अचि नेत्यनुवर्तनात्। उंदी क्लेदन।
मार्द्रीभावः। अंजू। व्यक्तिर्विवेचनं। म्रक्षणं स्निग्धता। अंजेः सिचि। नित्यमिट् स्यादिति। विभाषाग्रहणं नानुवर्तते इति भावः। सिचि किं। अक्ता। एची। ई
दित्वान्निष्ठायां नेट्। एक्तः। अएक्त एकालिस्यत्र नन्पूर्वः॥ इति रुधादयः॥ ६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



अतनिष्टा।अतानिष्टेति।तस्यस्थमिपामिति ताादेशः।अतोहलादेरिति वा वृद्धिः।अततेति।तनादिभ्यस्तथासोरिति सिज्लुक्यनुनासिकलोपः।अतनिष्टेति।लुगभावपक्षे।इट्।षणुदाने।नोतोऽयंणकारस्तु लाक्षणिकः।तेन यङ्लुकि संसंतिसंसंत इत्यादावनुस्वारपरसवर्णौ।क्षणुहिंसायां।क्षिणुचा।इमावपिलास्त्र।

अथसप्तस्वरितेतः।तनुविस्तारे।तनादिकृञ्भ्य उः।तनोति।तन्वः।तनुवः।तनुते।ततान।तेने।तनु।अतनीत्।अतानीत्।तनादिभ्यस्तथा सोः।२।४।७९।तनादेः सिचोवालुक्स्यात्तथासोः।थासासाहचर्य्यादेकवचनन्तशब्दोगृह्यते।तेनेह न।यूयमतनिष्ट।अतानिष्ट।अनुदात्तोपदेशेत्यनुनासिकलोपः तङि।अतत।अतनिष्ट।अतथाः।अतनिष्टाः।षणुदाने।सनोति।सनुते।ये विभाषा।सायात्।सन्यात्।जनसनेत्यात्वं।असात।असनिष्ट।असाथाः।असनिष्ठाः।क्षणु हिंसायां।क्षणोति।क्षणुते।ह्म्यन्तेति न वृद्धिः।अक्षणीत्।अक्षत।अक्षणिष्ट।अक्षथाः।अक्षणिष्ठाः।क्षिणुच।उप्रत्ययनिमित्तो लघूपधगुणः।संज्ञापूर्वको विधिरनित्य इति न भवतीत्यात्रेयादयः।भवत्येवेत्यन्ये।क्षिणोति।क्षेणोति।क्षेणिता।सि क्षेणितासे।अक्षेणीत्।अक्षित।अक्षेणिष्ट।ऋणु गतौ।ऋणोति।अर्णोति।अर्णुतः।अर्णुवन्ति।आनर्ण।आनृणे।अर्णिता।सि।आर्णीत्।आर्त।आर्णिष्ट।आर्थाः।आर्णिष्ठाः।तृणु अदने।तृणोति।तर्णोति।तृणुते।तर्णुते।घृणु दीप्तौ।जघर्ण।जघृणे।अथद्वावनुदात्तेतौ।वनु याचने।वनुते।ववने।चान्द्रमते परस्मैपदी।वनोति।ववान।मनु अवबोधने।मनुते।मेने।डुकृञ् करणे।करोति।अत उत्सार्वधातुके।कुरुतः।यण्।नभकुर्छुरामिति न दीर्घः।कुर्वन्ति।नित्यं करोतेः।६।४।१०८।प्रत्ययोकारस्य नित्यं लोपः स्याद्म्वोः परयोः।कुर्वः।चकर्थ।चकृव।कर्त्ता।करिष्यति।ये च।६।४।१०९।कृञ उलोपः स्याद्यादौ प्रत्यये परे।कुर्यात्।आशिषि।क्रियात्।कृषीष्ट।अकार्षीत्।तनादिभ्य इति लुको भावे ह्रस्वादङ्गादिति सिचो लोपः।अकृत।अकृथाः। ॥६॥ ६॥ ६॥

णिकणकारेते न च सं सन्तिचं संसंतिइत्यत्रानुस्वारपरसवर्णौ।सिचो लोप इति।नचास्मिन्पक्षे प्रत्ययलक्षणप्रवृत्त्या अकृतेत्यत्र गुणः स्यादिति वाच्यं ॥६॥

राम· ७८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उश्चेतिस्विः किलेनतन्निषेधात्। ॐ॥ संपर्युपेभ्यइतिवृत्तिस्थपाठं विहायभाष्यवार्त्तिकानुसारेणाहं संपरिस्ष्यामिति। इतितनादयः॥ एवंमस्याङ्गावइति। आत्मने
सम्पतिभ्यांकरोतौभूषणो। ६।१।१३७। समवायेच। ६।१।१३८। सम्परिपूर्वस्यकरोतेः सुट्स्याङ्गभूषणेसङ्घे चार्थे। संस्करोति। अलङ्करोतीत्यर्थः। संस्कुर्वे
न्ति। सङ्घीभवन्तीत्यर्थः। सम्पूर्वस्यक्वचिदभूषणेपिसुट्। संस्कृतम्भक्षाइतिज्ञापकात्। परिनिविभ्यइतिषः। परिष्करोति। सिवादीनाम्वा।
पर्यष्कार्षीत्। पर्यस्कार्षीत्। उपात्प्रतियत्नवैकृतवाक्याध्याहारेषुच। ६।१।१३९। उपात्कृञः सुट्स्यादेष्वर्थेषु चात्प्रागुक्तयोरर्थयोः। प्रति
यत्नोगुणाधानम्। विकृतमेववैकृतं विकारः। वाक्यस्याध्याहारः। आकाङ्क्षितैकदेशपूरणम्। उपस्कृताकन्या। अलंकृतेत्यर्थः। उपस्कृ
ताब्राह्मणाः। समुदिताइत्यर्थः। एधोदकस्योपस्कुरुते। गुणाधानङ्करोतीत्यर्थः। उपस्कृतम्भुङ्क्ते। विकृतमित्यर्थः। उपस्कृतंब्रूते। वाक्याध्या
हारेणब्रूतेइत्यर्थः। सुट्कात्पूर्वः। ६।१।१३५। अडभ्यासव्यवायेपीत्युक्तम्। सञ्चस्कार। कात्पूर्वइत्यादिभाष्येप्रसाख्यातम्। तथाहिपूर्वेधा
तुरुपसर्गेणायुज्यते। अन्तरङ्गत्वात्सुट्। ततोद्वित्वम्। एवञ्च ऋतश्चसंयोगादेर्गुणः। सञ्चस्करतुः ऋसमृइतिसूत्रेऋतोभारद्वाजस्येति
सूत्रेचकृञोसुटइतिवक्तव्यम्। तेनससुट्कात्परस्येट्। सञ्चस्करिथ। सञ्चस्करिव। गुणोर्त्तीतिसूत्रेनित्यञ्छन्दसीतिसूत्रान्नित्यमित्यनुवर्त्त
ते। नित्यंयः संयोगादिस्तस्येत्यर्थात्सुटिगुणोन। संस्क्रियात्। ऋतश्चसंयोगादेरितिलिङ्सिचोर्नेट्। एकाचउपदेशेइतिसूत्रादुपदेशइ
त्यनुवर्त्त्यउपदेशेयः संयोगादिरितिव्याख्यानात्। संस्कृषीष्ट। समस्कृत। समस्कृषाताम्॥ इतितनादयः॥ डुक्रीञ्द्रव्यविनिमये। क्र्यादि
भ्यःश्ना। ३।१।८१। क्रीणाति। ईहल्यघोः। क्रीणीतः। ईत्वात्पूर्वंमेरनादेशः परत्वान्नित्यत्वादन्तरङ्गत्वाच्च। एवंमस्याङ्गावः। ततःश्नाभ्यस्तयो
रित्याल्लोपः। क्रीणन्ति। क्रीणीते। क्रीणाते। क्रीणते। चिक्राय। चिक्रियतुः। चिक्रयिथ। चिक्रेथ। चिक्रियिव। चिक्रेता। क्रेष्यति। क्रीयात्॥
क्रेषीष्ट। अक्रैषीत्। अक्रेष्ट। प्रीञ्तर्पणेकान्तौच। कान्तिः कामना। प्रीणाति। प्रीणीते। श्रीञ्पाके। मीञ्हिंसायाम्। हिनुमीना। प्रमीणाति। प्रमी
॥

ति·
सि·कौ·
टी·न·
७९

परे श्वनन्त इत्यनेन॥ ॥सौत्रा इति। नकारोपधा इत्यपि ज्ञेयाः। विष्टभ्नोतीति। अनिदितामिति नलोपः। स्तन्भेरिति षत्वं। वेस्कभ्नातेर्नित्यं। सिवादीनां चेत्यतो वेति नानुव-
र्तते इति ध्वननार्थमिह नित्यग्रहणं। विस्कभ्नोतीति। स्कभ्नातेरित्यत्र श्नाविशिष्टं रूपं न विवक्षितं किंतु धातुमात्रं। अन्यथा विष्कंभिता विष्कंभितुमित्यादावपि षत्वं न स्यात्

मिमतुः। ममिथ। ममाथ। मिम्ये। माता। मास्यति। मीयात्। मासीष्ट। अमासीत्। अमासिष्टाम्। अमास्त। षिञ् बन्धने। सिनीते। सिषाय। सिष्ये। सेता।
स्कुञ् आप्रवणे। स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च। ३।१।८२। चात् श्ना। स्कुनोति। स्कुनुते। स्कुनाति। स्कुनीते। चुस्काव। चुस्कुवे। स्कोता॥
अस्कौषीत्। अस्कोष्ट। स्तम्भ्वादयश्चत्वारः सौत्राः। सर्वे रोधनार्था इत्येके। माधवस्तु प्रथमतृतीयौ स्तम्भार्थौ। द्वितीयो निष्कोषणार्थः। चतुर्थो
धारणार्थ इत्याह। सर्वे परस्मैपदिनः। नलोपः। विष्टभ्नोति। विष्टभ्नाति। अवष्टभ्नोति। अवष्टभ्नाति। अवतष्टम्भ। जृस्तम्भ्वित्यङ् वा। व्यष्टभत्।
व्यष्टम्भीत्। स्तुभ्नोति। स्तुभ्नाति। वेः स्कभ्नातेर्नित्यम्। ८।३।७७। वेः परस्य स्कभ्नातेः सस्य षः स्यात्। विष्कभ्नोति। विष्कभ्नाति। स्कुभ्नोति। स्कु-
भ्नाति। हलः श्नः शानज्झौ। ३।१।८३। हलः परस्य श्नः शानजादेशः स्याद्धौ परे। स्तभान। स्तुभान। स्कभान। स्कुभान। पक्षे स्तभ्नुहीत्यादि। युञ् बन्ध-
ने। युनाति। युनीते। योता। क्नूञ् शब्दे। क्नूनाति। क्नूनीते। क्नविता। द्रूञ् हिंसायाम्। द्रूणाति। द्रूणीते। पूञ् पवने। प्वादीनां ह्रस्वः। ७।३।८०। शिति
परे। पुनाति। पुनीते। पविता। लूञ् छेदने। लुनाति। लुनीते। स्तॄञ् आच्छादने। स्तृणाति। स्तृणीते। तस्तार। तस्तरतुः। स्तरिता। स्तरीता। स्तृणीयात्। स्तृ-
णीत। आशिषि। स्तीर्यात्। लिङ्सिचोरिति वेट्। न लिङि। वृत इटो लिङि दीर्घो न स्यात्। स्तरिषीष्ट। उश्चेति कित्त्वम्। स्तीर्षीष्ट। सिचि च परस्मैपदेष्वि- १२५
ति न दीर्घः। अस्तारीत्। अस्तारिष्टाम्। अस्तरिष्ट। अस्तीर्ष्ट। कॄञ् हिंसायाम्। कृणाति। कृणीते। चकार। चकरे। वृञ् वरणे। वृणाति। वृणीते। ववार। व-
वरे। वरिता। वरीता। आशिषि। उदोष्ठ्यपूर्वस्य।

न चेष्टापत्तिः। माधवादिग्रंथविरोधादिति भावः। हलः श्नः। स्तभानेति। अतो हेरित्यस्यासामर्थ्यात् संनिपात-
परिभाषया श्नप्रत्यये हेर्लुक्। अत एव जहि स्म हि लोपवारणायेयं परिभाषा नोपन्यस्तेत्याहुः। यत्तु केचित् शानजादेशो धातुपाठपठितेभ्यः परस्य श्नो भवति न तु

राम·
७९

CC-0. In Public Domain. Digitization by eGangotri

सौत्रेभ्य इति व्याख्यायस्तस्मीहीनमुदाहृतं। तन्निःप्रमाणं माधवादिग्रंथविरुद्धं च। प्वादीनां ह्रस्वः। ष्ठिवुक्लमुचमामिस्यतः शितीत्यनुवर्त्तत इत्याह। शितिपर इति। न लिङीति। अनेन वृत्त इत्यो लिङि दीर्घेनितिस्मारितं। उदोष्ठ्य। दंतोष्ठ्योपि ओष्ठ्यग्रहणेन गृह्यत इत्याह॥ ः०ः ॥ वृर्यादिति। वरिषीष्टेति। लिङ् सिचोरात्मनेपदे ष्विति वेट्। वर्षीष्टेति। उश्चेति लिङ् सिचोः कित्वाद्गुणाभावे सत्युत्वं। हलः। संप्रसारणस्येत्यनुवर्त्तते। अंगस्येत्यवयवषष्ठी। हल इति पंचमी। तदेतदाह। अंगा-

वृर्यात्। वरिषीष्ट। वृर्षीष्ट। अवारीत्। अवारिष्टाम्। अवरिष्ट। अवरीष्ट। अवृर्ष्ट। धूञ् कम्पने। धुनाति। धुनीते। दुधविथ। दुधोथ। दुधुविव। धोता। धविता। स्तुसुधूञ्भ्य इतीट्। अधावीत्। अधविष्ट। अधोष्ट। अथ पवर्ग्याद्यन्ताः परस्मैपदिनः। शॄ हिंसायाम्। शॄदॄप्रां ह्रस्वो वेति ह्रस्वपक्षे यण्। अन्यदा ऋच्छत्यॄतामिति गुणः। शश्रतुः। शशरतुः। श्र्युकः कितीति निषेधस्य क्रादिनियमेन बाधः। शशरिव। शश्रिव। शरिता। शरीता। शृणीहि। शीर्य्यात्। अशारीत्। अशारिष्टाम्। पॄ पालनपूरणयोः। पप्रतुः। पपरतुः। आशिषि पूर्य्यात्। वॄ वरणे। भरण इत्येके। भृ भर्त्सने। भरणेप्येके। मृ हिंसायाम्। मृणाति। ममार। दॄ विदारणे। ददरतुः। दद्रतुः। जॄ वयोहानौ। झॄ इत्येके। धॄ इत्यन्ये। नॄ नये। कॄ हिंसायाम्। ऋ गतौ। ऋणाति। अरांचकार। अरिता। आर्णीत्। आर्णीताम्। ईर्य्यात्। आरीत्। आरिष्टाम्। ग्र शब्दे। ज्या वयोहानौ। ग्रहिज्येति हलः। अङ्गावयवाद्धलः परं यत्संप्रसारणं तदन्तस्याङ्गस्य दीर्घः स्यात्। इति दीर्घे कृते। प्वादीनां ह्रस्वः। जिनाति। जिज्यौ। जिज्यतुः। री गतिरेषणयोः। रेषणं वृकशब्दः। ली श्लेषणे। विभाषा लीयतेरिति एज्विषये आत्वं वा। ललौ। लिलाय। लाता। लेता। व्ली वरणे। ब्लिनाति। प्ली गतौ। वृत्। ल्वादयो वृत्ताः। प्वादयो पीत्येके। व्री वरणे। भ्री भये। भर इत्येके। क्षीष् हिंसायाम्। एषां न्वयाणां ह्रस्वः। केचिन्न मन्यन्ते तु न। ज्ञा अवबोधने। ज्ञाजनोर्जा। जानाति। दीर्घनिर्देशसामर्थ्यान्न ह्रस्वः। बन्ध बन्धने

वयवादिति। अंगावयवात् किं। निरुतं दुरुतं। तदंतांगस्य किं। विध्यति। क्षीष् हिंसायां। षित्वादङ्। क्षिया। हेति क्षियायां। क्षियाशीरित्यादौ क्षिया धर्मव्यतिक्रम आचारभेद इति वक्ष्यति। दीर्घनिर्देशसामर्थ्यादिति। ननु दीर्घग्रहणेन अंगवृत्तपरिभाषा ज्ञाप्यत इत्याकरे स्थितं। अन्यथा ज्ञाजनोर्जे विदध्यात्॥ ६ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति·
सि·कौ·
टी·त·
८०

अतो दीर्घो यञीति दीर्घसिद्धेः। तथा च दीर्घनिर्देशसामर्थ्यस्योपक्षयात् कथमिह ह्रस्वाभावसिद्धिरिति चेत्। अत्राहुः। ह्रस्वाभावे सत्येव दीर्घनिर्देश उक्तपरिभाषा॥
या ज्ञापकः स तित्तु ह्रस्वे पुनरंगकार्यप्रवृत्तमेवेति न ज्ञापकः। तथा च ह्रस्वाभावसिद्धौ न किंचिद्बाधकमिति किंच। अंगवृत्ते पुनर्वृत्तावविधिरित्येव परिभाषाश॥
रीरं तच्चोक्तज्ञापकात्सिद्धं। यदि तु अयसोऽयम् इति सूत्रे भाष्ये परिनिष्ठितस्यैवं पाठस्तर्हि स्वतंत्रमेवेदं वचनं न तु ज्ञापकसिद्धमिति पक्षोऽपि युष्मदस्मच्छ्व

वध्नाति। बबन्धिथ। बबन्ध। बबन्ध। बन्धारौ। भंत्स्यति। बधान। अभांत्सीत्। पूर्ववत्रासिद्धमिति भष्भावात्पूर्वं झलो झलीति सिज्लोपः
प्रत्ययलक्षणेन सादिप्रत्ययमाश्रित्य भष्भावो न। प्रत्ययलक्षणं त्विति सिज्लोपस्यासिद्धत्वात्। अवान्द्धाम्। अभान्त्सुः। वृङ् स
म्भक्तौ। वृणीते। ववृषे। ववृढ्वे। वरिता। वरीता। अवरिष्ट। अवरीष्ट। अवृत्त। श्रन्थ विमोचनप्रतिहर्षयोः। इतः परस्मैपदिनः। श्रथ्ना
ति। श्रन्थिथ। ग्रन्थी इत्यादिना कित्त्वपक्षे एत्वाभ्यासलोपावप्यत्र वक्तव्यौ। इतिहरदत्तादयः। श्रेथतुः। श्रेथुः। इदं ङित्त्वमपि ताम पीति सुधाक
रमते। श्रेथिथ। अस्मिन्नपि पक्षे णलि शश्राथ। उत्तमे तु शश्राथ। शश्रथेति माधवः। तत्र मूलं मृग्यम्। मन्थ विलोडने। ग्रन्थ ग्रन्थ सन्द
र्भे। अर्थभेदात् ग्रन्थेः पुनः पाठः। रूपं तूक्तम्। कुन्थ संश्लेषणे। संक्लेश इत्येके। कुथ्नाति। चुकुन्थ। कुन्थेति दुर्गः। चुकोथ। मृद क्षोदे। मृद्नाति
मृदान। मृड च। अयं सुखेऽपि। ष्टुत्वम्। मृड्णाति। गुध रोषे। गुध्नाति। कुष निष्कर्षे। कुष्णाति। कोषिता॥

गतमनोरमाग्रंथाद् वगम्यते तस्मिंस्तु पक्षे दीर्घग्रहणसामर्थ्येनोपक्षीणमिति सम्यगेवायं ग्रंथ इति। केचित्तु संज्ञापूर्वकविधेरनित्यत्वान्न ह्रस्व इति व्याख्येय
मित्याहुः॥ ॐ॥ वध्नातीति। अनिदितामिति न लोपः। अभांत्सीदिति। वदव्रजेति वृद्धिः। भष्भावः। अवान्द्धामिति। झषस्तथोरिति तस्य धत्वं। झरो झरीति॥ एम·
वालोपः। वृङ् संभक्तौ। भक्तिर्भजनं। ग्रंथं कित्त्वपक्षे इति। ग्रंथिग्रथिदंभीनां लिटः कित्त्वं वेति व्याकरणांतरमिति युक्तत्वात्॥ ६॥ ६॥ ६॥ ६॥ ८०

निरः कुषः। स्वरतीतिसूत्राद् इत्यनुवर्त्तते आर्द्धधातुकस्येड् इत्यधिक्रियत एव तदाह। वलादेरित्यादि। निरः किं। कोषिता। कोषितुं। निरकुस इदिति। इड भावे क्तः॥ सहिनासाहच
र्यादिति। यद्यपि यह गुह चकार्थे इत्ति दिवादिरपि सहिरस्ति तथापि सहेति शपा निर्देशान् भौवादिकेनैव सहिना साहचर्यमित्याहुः। श्यनप्रत्य यादिति। बहुव्रीहिरयं। श्यना
प्रत्ययवत इत्येवंकारे परत इड्विकल्पप्रतिषेध इति वार्त्तिकार्थः। तथा च दैवादिका द्विकस्यानेनेतिफलितं। एवं च त्तीयसहे स्पत्र इष्णान्तेरपि ग्रहणमिति बोध्यं। पोषिते ति। अ

निरः कुषः। ७।२।४६। निरः परात् कुषो वलादेरार्द्धधातुकस्येड्वा स्यात्। निष्कोषिता                    । निष्कोष्टा निरकोषीत्। निरकुक्षत्। क्षुभ सञ्चल
ने। क्षुभ्नादिषु च। ८।४।३९। क्षुभ्नाति। क्षुभ्नीतः। क्षोभिता। क्षुभाण। णभ तुभ हिंसायां। नभ्नाति। तुभ्नाति। नभते तोभते इतिशपि। नभ्यति। तुभ्यतीति
श्यनि क्लिशू विबाधने। शादितिश्चुत्वनिषेधः। क्लिश्नाति क्लिशिता। क्लेष्टा। अक्लेशीत्। अक्लिक्षत्। अश भोजने। अश्नाति आश। उध्रस उञ्छे।
उकार इत्। ध्रस्नाति। उकारो धात्ववयव इत्येके। उध्रसाञ्चकार। इष आभीक्ष्ण्ये। पौनःपुन्यं भृशार्थो वा आभीक्ष्ण्यम्। इष्णाति। तीष।
सहेत्यत्र सहिना साहचर्य्यादकारविकरणस्य तौदादिकस्यैव इषेर्ग्रहणान्नत्विड्विकल्पः इत्याहुः। एषिता। व नुत्तस्तु इष्णातेरपि इड्विकल्प
उचितः। तथा च वार्त्तिकं। इषेस्तकारे श्यन्प्रत्ययात् प्रतिषेध इति षे। विष विप्रयोगे। विष्णाति। वेष्टा। प्रुष प्लुष स्नेहनसेवनपूरणेषु। प्रुष्णाति। पुषु
ष्णाति। पुषपुष्टेौ। पोषिता। मुष स्तेये। मोषिता। खच भूतप्रादुर्भावे। भूतप्रादुर्भावोऽतिक्रान्तोत्पत्तिः॥ खच्नाति। वान्तोयमित्येके। च्छ्वोः शू
ड्नुनासिके च। ६।४।१९। सतुक्कस्य छस्य वस्य च क्रमात् शऊठ् एतावादेशौ स्तोऽनुनासिके क्वौ झलादौ च क्ङिति। खौनाति। चखाव। खविता॥
शानचः परत्वाद् ऊठि कृते हल न्तत्वाभावान्न शानच्। खौनीहि। हिठ च। हेठत्वम् हिठ्णाति। ग्रह उपादाने। खरिते तत्। ग्रहिज्या। ग्रह्णीते॥ ६॥

निड्के पुष्पुष्येति श्यना निर्देशाद्यं सेडिति भावः। क्वौः शूडनु। क्वोरिति सतुक्कस्यानुकरणं। चुत्वेनतकारस्थाने चकार इत्याहा सतुक्कस्येति। एवं च सूत्रे छकारात
पूर्वं चकारो ज्ञेयः। सतुक्कस्य किं। विच्छ प्रच्छाभ्यां नङ्प्रत्यये छकारस्य शकारे कृते तुकोऽश्रवणं यथा स्यात्। अकृतव्यूहपरिभाषा त्वनित्या। अस्मादेव स
तुक्कग्रहणात् तेनातिक्रान्तो भवकं तमतिभवकानित्यादि सिद्धमित्याहुः। सूत्रस्थेन चशब्देन किमलोः क्ङितीः सेतुक्क व्यत इत्याह कविस्यादि॥ ६॥

ति· सि·कौ· टी·त· ८१

ग्रहोलिटिदीर्घः॥ एकाचः किं। जाग्रहिष्यतीत्यादौ यङ्लुकि मा भूत्। विहितस्येति किं। ग्राहितं। न चात्र णिलोपस्य स्थानिवद्भावात् परेः परत्वेनेति वाच्यं। दीर्घो

ग्रहोऽलिटि दीर्घः ॥ ७।२।३७ ॥ एकाचो ग्रहेर्विहितस्येटो दीर्घः स्यात् न तु लिटि। ग्रहीता। लिटि तु जग्रहिथ। गृह्यात्। ग्रहीषीष्ट। ह्म्यन्तेति न वृद्धिः
अग्रहीष्टाम्। अग्रहीष्ट। अग्रहीषाताम्। अग्रहीषत। इति क्र्यादयः। चुर स्तेये। सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्म्मव
र्णचूर्णचुरादिभ्यो णिच् ॥ ३।१।२५ ॥ एभ्यो णिच् स्यात्। चूर्णान्तेभ्यः प्रातिपदिकाद्धात्वर्थ इत्येव सिद्धे तेषामिह ग्रहणं प्रपञ्चार्थम्। चुरादि
भ्यस्तु स्वार्थे। पुगन्तेति गुणः। सनाद्यन्ता इति धातुत्वम्। तिप्शबादि गुणायादेशौ। चोरयति। णिचश्च ॥ १।३।७४ ॥ णिजन्तादात्मनेपदं स्या
त्कर्त्तृगामिनि क्रियाफले। चोरयते। चोरयामास। चोरयिता। चोर्य्यात्। चोरयिषीष्ट। णिश्रीति चङ्। णौ चङीति ह्रस्वः। द्वित्वम्। हलादिः शे
षः। दीर्घो लघोरित्यभ्यासदीर्घः। अचूचुरत्। अचूचुरत। चिति स्मृत्याम्। चिन्तयति। अचिचिन्तत्। चिन्तेति पठितव्ये इदित्करणं णिचः
पाक्षिकत्वे लिङ्गम्। तेन चिन्त्यात्। चिन्त्यते इत्यादौ न लोपो न। चिन्तति। चिन्तेत्। एतच्च ज्ञापकं सामान्यापेक्षमित्येके। अत एकहल् इत्यत्र वृ
त्तिकृता जगणतुः जगणुरित्युदाहृतत्वात्। विशेषापेक्षमित्यपरे। अत एव धृषादेरपि स्यनवेयर्थ्यम्। यत्रि सङ्कोचे। यन्त्रयति। यन्त्रेति पा
ठे तु शाकयम्। यत्तु इदित्करणाद्यन्त्रतीति माधवेनोक्तं तच्चिन्त्यम्। एवं कुद्रि तन्त्रि मन्त्रि। स्फुडि परिहासे। स्फुण्डयति। इदित्करणात्। स्फु
ण्डति। स्फुटीति पाठान्तरम्। स्फुण्टयति। लक्ष दर्शनाङ्कनयोः। कुद्रि अनृतभाषणे। कुन्द्रयति। लड उपसेवायाम्। लाडयति। मिदि स्नेहने॥ ३७२
मिन्दयति। मिन्दति। ओलडि उत्क्षेपणे। ओलण्डयति। ओलण्डति॥ ९ विधेः स्थानिवत्त्वनिषेधात्। त्रैपादिकदीर्घविधावेव स्थानिवत्त्वनि

षेधः इत्यभ्युपगमे तु विहितविशेषणं व्यर्थमेवेत्याहुः। प्रकृतस्येटो ग्रहणात्। ग्राहिता ग्राहिष्यत इत्यादौ चिण्वदिटो न दीर्घः। ग्रहीष्ठेति॥ ६॥ ६॥ एम· ष१

CC-0. In Public Domain. Digitization by eGangotri

ष्टन्तइत्यनुवृत्तेर्नेलिङीति दीर्घनिषेधो न प्रवर्त्तते। अजग्रहीषातामिति। लुङात्मनेपदद्विवचनं। इति क्र्यादयः॥ सत्यापपाशाँए तस्योदाहरणानि अग्रनामधातु
षु स्फुटीभविष्यंतीति नास्माभिरुपपाद्यते। त्वचशब्दोऽकारांतः। प्रपंचार्थमिति। सत्यापग्रहणं तु आपुगर्थमिति ज्ञेयं। अन्ये त्वाहुः। सापेक्षेभ्योपि णिजर्थमे।
षामुपादानं। अन्यथा रमणीयं घटं करोतीत्यादौ विवरमणीयंरूपयतीत्यादावपि णिच्न स्यादिति। अचूचुरदिति। अत्र प्राचां व्याख्यात्रास्मन्वल्लघुनीति सन्व
त्भाव इत्युक्तं तद्भ्रमात्। सन्वत्भावविषये हि जायमानो दीर्घः सन्वत्भावं नापेक्षत इति। सामान्यापेक्षमिति। सर्वे चिच्चुरादयो विकल्पेन णिचं लभंत इत्से
तदर्थकमित्यर्थः। न चैवमाधृषाद्वेत्यर्थमिति वाच्यं। ज्ञापकसिद्धस्यासार्वत्रिकत्वात्। एवं चास्मिन्पक्षे आधृषीयाणामेव वैकल्पिको विकल्पः। अन्येषां तु शि
ष्टप्रयोगाद्व्यवस्थित इत्यर्थः। जगाण। जगणतुरिति। ह्रस्वोच्चकाराच्चकणतुरिति प्रचुरः पाठस्तस्मिंस्तु पाठे नास्त्येव प्रष्ठं तार्थसिद्धिः। केचित्तु णिजभावेग

ओकारइदित्येके। लण्डयति। लण्डति। उकारादित्यमित्यन्ये। उलण्डयति। जल अपवारणे। लल इ सेके। पीड अवगाहने। पीडयति।

णाया मासेत्यादिरूपाभावेपि गणधातोरदंतत्वाद्गणामासेत्यामाभवितव्यमिति जगाणेत्यादिपाठश्चिंत्य इत्याहुः। न वैयर्थ्यमिति। वैयर्थ्यशंकापि नेत्ययमेव
पक्षो युक्त इति भावः। न च पूर्वोक्तपक्षस्य शिथिलत्वे जगाण जगणतुरिति वृत्तिप्रयोगः कथं संगच्छतामिति शंक्यं। भ्वादेराकृतिगणत्वात् तत्रत्यस्य धातोस्तद्रूपसिद्धेः
तन्चित्समिति। पत्रितत्रिमन्त्र्यादिषु इकारो व्यर्थ एव न तु ज्ञापनार्थः। तेषां संयोगांतत्वात् यंत्रतंत्रमंत्र इति नकारे पठितेप्यनिदितामिति लोपो न लभ्यते नकार।
स्यानुपधात्वात्। चिंत्यादिस्वत्र तु चिन्तुलत्सामिति नकारोपधपाठे नलोपः स्यादेवेति तद्वारणाय क्रियमाण इकारस्तु ज्ञापक इति भावः। लड। ल्लेह पूर्विका।
सेवा उपसेवा। लाडयति पुत्रं। लडयोरभेदाल्लालयति॥ ॐ ॥ओकार इदित्येक इति। ओदित्करणमोदितश्चेति धातोरव्यवहितस्य निष्ठातकारस्य नत्वार्थ
मिति तद्वलान्ते डि सेके। लंडः। ओदिद्वलादिर्व्यवधानेपि नत्वमित्यन्ये। लंडितः। पीड अवगाहने॥ ॐ ॥ ॐ ॥ श्रीरामचंद्राय नमोनमः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति·
सि·कौ· म्राजभासेतिह्रस्वपक्षेसन्वत्भावविषयत्वाद्दीर्घोलघोरित्यभ्यासस्यदीर्घः।ह्रस्वाभावपक्षेतुनदीर्घइत्याह।अपीपिडदित्यादि।पृपूरणे।दीर्घोच्चारणमित्यादि।पार
टी·त· भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्।७।४।३।एषामुपधायाह्रस्वोवास्याच्चङ्परेणौ।अपीपिडत्।अपिपीडत्।नक्रअवस्य।
८२ न्दने।अवस्यन्दनंनाश्नम्।श्रथप्रयत्ने।प्रस्थानेइत्येके।बधसंयमने।वा।घयति।बन्धतिचान्द्राः।पृपूरणे।पारयति।दीर्घोच्चारणंणिचः।
पाक्षिकत्वेलिङ्गंतद्धिसेद्धत्वाय।एवम्पूरणातिपिपर्त्तिभ्याम्यरितेसादिसिद्धावपिपरतिपरत्तइत्यादिसिद्धिःफलम्।ऊर्ज्जबलप्राणनयोः
पक्षपरिग्रहे।वर्णचूर्णप्रेरणे।वर्णवर्णानइत्येके।प्रथप्रख्याने।प्राथयति।नान्येमितोऽहेत्तविनिवक्ष्यमाणत्वान्नास्यमित्वम्।अस्मृद्ह।
त्वरप्रथम्रदस्तृस्पशाम्।७।४।९५।एषामभ्यासस्यअकारोनादेशःस्याच्चङ्परेणौ।इत्यपवादः।अपप्रथत्।पृथप्रक्षेपे।उक्र्टत्।७
।४।७।उपधायाऋवर्णस्यस्थानेऋत्स्याद्वाचङ्परेणौ।इत्यणमपवादः।अपीपृथत्।अपपर्थत्।पथइत्येके।पाथयति।षम्बसम्ब
न्धने।सम्बयति।अससम्बत्।शम्बच।अशशाम्बत्।साम्बइत्येके।भक्षअदने।कुट्टछेदनभर्त्सनयोः।पूरणइत्येके।कुट्टयति।पुट्टचुट्ट
अल्पीभावे।अट्टषुट्टअनादरे।अट्टयति।अयंदोपधः।ष्टुत्वस्यासिद्धत्वान्नन्द्राइतिनिषेधः।आट्टिटत्।लुण्ठस्तेये।लुण्ठयति।लुण्ठतो।
ति।लुण्ठिस्तेये इतिभौवादिकस्य।शठश्वठअसंस्कारगत्योः।श्वठिइत्येके।तुजिपिजिहिंसाबलादाननिकेतनेषु।तुञ्जयति।पिञ्जयति।इ
दित्करणात्।तुञ्जति।पिञ्जति।तुजपिजेतिकेचित्।लजिलुजिइत्येके।पिसगतौ।पेसयति।पेसतीतितुशपिगतम्।षान्त्वसामप्रयोगे
।श्वल्कवल्कपरिभाषणे।ष्णिहस्नेहने।स्फिटइत्येके।स्मिट्अनादरे।अषोपदेशत्वान्नषः।असिस्मिटत्।स्मिङ्अनादरइत्येके।ङित्
त्वस्यावयवेऽचरितार्थत्वात्मिजनात्तङ्।स्माययते।श्लिषश्लेषणे।पथिगतौ।पन्थयति।पन्थति।पिच्छकुट्टने।छदिसम्वरणे।छन्द राम
यतीत्यादिरूपाणिह्रस्वोच्चारणेपिसिध्यन्तीतिपरतीत्याद्यर्थंदीर्घोच्चारणमित्यर्थः।अत्रवदंति।धातुपाठक्रतापाणिनिनाविशिष्यवउदात्ताअनुदात्ता॥ ॥ ॥ ८२

378

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ऋपठिताः। नहि ऋकारान्ताः सेट्काः इति। तेन परिभाषितं येनेत्थं तस्याशयः कल्प्येत। कविकल्पद्रुमे त्वस्यानिसत्वं तत्त्वमुक्तमिति। एवं चास्मिन्पक्षे दीर्घोच्चारणं व्यर्थमिति फ
लितं। अन्ये तु दीर्घोच्चारणं परितापरीते स्यादौ वृत्तौ वेति इटो दीर्घविकल्पार्थं। तत्तु ष्णिज्विकल्पः सिद्ध एवेति परतोऽत्यादि रूपमाहुः। ऊर्ज्ज। ऊर्जयति। बलवान्भव
ति जीवति वेत्यर्थः। ऊर्जितं। जिघ्रतेर्वेत्यतो वेति वर्तते ररारमिति। ऋकारोपधे उपधाया ऋवर्णस्य चीकृतदित्यादौ इर् प्राप्तः। अमीमृजदित्यत्र मृजेर्वृद्धिरार् प्राप्तः इ
तरेषां ऋदुपधानां गुणेन। अपीपृथदित्यादावृदिति विवेकः। नन्विह उरित्यनूद्यमानः सवर्णान्न गृह्णाति ऋदिति विधीयमानस्तु न गृह्णाति। तथा च अचीकृप

मायेणायं विपूर्वः। विश्राणयति। तड आघाते। ताडयति। खड खडि भेदने। खाडयति। खण्डयति। कुडि रक्षणे। गुडि वेष्टने। रक्षण इत्येके। कुठि
इत्यन्ये। अवकुण्ठयति। अवकुण्ठति। गुठि इत्यपरे। खुडि खण्डने। वटि विभाजने। वडि इत्येके। मडि भूषायां हर्षे च। भडि कल्याणे। छर्द
वमने। पुस्त बुस्त आदरानादरयोः। चुद सञ्चोदने। नक्क धक्क नाशने। णोपदेशलक्षणे पर्युदस्तोऽयम्। प्रनक्कयति। चक्क चुक्क व्यथने। क्ष
ल शौचकर्मणि। तल प्रतिष्ठायाम्। तुल उन्माने। तोलयति। अतूतुलत्। कथं तुलयति तुलना इत्यादि तुलोपमाभ्यामिति निपातनाद्गु
णस्य तुलाशब्दस्य सिद्धौ ततो णिच्। दुल उत्क्षेपे। पुल महत्त्वे। चुल समुच्छ्राये। मूल रोहणे। कल क्षेपे। बिल भेदने। तिल स्नेहने। चल भृतौ। पा
ल रक्षणे। लूष हिंसायाम्। शुल्ब माने। शूर्प च। चुट छेदने। मुट सञ्चूर्णने। पडि पसि नाशने। पण्डयति। पण्डति। पंसयति। पंसति। व्रज मार्गसंस्का
रगत्योः। शुल्क अतिस्पर्शने। चपि गत्यां। चम्पयति। चम्पति। क्षपि क्षान्त्यां। क्षम्पयति। क्षम्पति। छजि कृच्छ्रजीवने। श्वर्त गत्याम्। श्वभ्र च॥

दित्यत्र उर्ऋदित्यनेन ऋवर्णे सति अचीकृपदिति प्रसज्येतेति चेन्न। मैवं। लत्वस्यासिद्धत्वेन प्रथमम् उर्ऋदित्यस्य प्रवृत्तौ पश्चात्कृपो रो ल इत्यनेन ऋकारैकदेशस्य
लकारैकदेशविधानादिष्टसिद्धेः। न च चलीक्लृप्यत इत्यादौ रीगागमादेर्लत्वार्थं कृपो रो ल इत्यस्यावश्यकत्वेऽपि कृपू धातुः। कृपू सामर्थ्य इत्येव पठ्यतां एवं हि प्र
क्रियालाघवं लभ्यते ऋकारैकदेशस्य लकारैकदेश इति व्याख्यानक्लेशोऽपि न भवतीति वाच्यं। अचीक्लृपदित्यत्र उर्ऋदित्यस्य प्रवृत्तावनिष्टरूपप्रसंगात्। कृपो रो।
ल इत्यनेन ऋकारैकदेशस्य लकारैकदेश इत्यभ्युपगमे तु उक्तव्याख्यानक्लेशध्रौव्यात् इदं च कैयटरीत्योक्तं। नत्विदं स्वोदक्षमं। अत उदित्यनेन तपकरणेन लवर्ण

ति·
सि·कौ·
टी·त·
८३

ग्राहकत्वे रूपसिद्धेः सपत्त्वात्। अयं दोपध इति। येपधत्वेत्त्वादिटदिति स्यादिति भावः। शठश्वठ। शाठयति। असंस्कृतो भवति गच्छति वेत्यर्थः। स्मायय त इति। आत्वं
तु नेह भवति निसंस्मयते इति निर्देशेन स्मिङ् ईषद्धसन इति भौवादिकादेव हेतुमण्णौ। तद्विधानात्। श्रण दाने। विश्राणनं वितरणं। चुद संचोदने। णपासम्भ
य इति। पुष्पविचोदना। वज मार्ग। वाजयति मार्गयति। केचित्तु मार्गेति न धात्वंतरं किंतु वजेसेक एव धातुर्मार्गसंस्कारे गतौ चेति व्याचख्युः॥ ॐ ॥ ज्ञप मिच्चेति।
चान्तपामित्त्वे केज्ञप धातुर्णिचं लभते मित्संज्ञकश्चेत्यन्ये। ज्ञाने ज्ञापने चेति प्रतिपद्ज्ञप्तिचेतनाः। प्रच्छ ज्ञीप्साया मित्यत्र ज्ञाने। श्लाघ ह्नुङ् स्थेति ज्ञीप्स्यमानो
बोधयितुमिष्यमाण इति व्याख्यया ज्ञापने च प्रयोगदर्शनादिति भावः। वेष्टनमिति। परिवेषस्तु परिधिरित्यमरः। नत्विस्यादि। अयं भावः। घटादौ यमोपरिवेष

णे च मिच्च॥ अयं ज्ञाने ज्ञापने च वर्तते। मितां ह्रस्वः। मितामुपधाया ह्रस्वः स्यात् णौ परे। ज्ञपयति। यम च परिवेषणे। चान्मित्। परिवेषण
मिह वेष्टनम्। ननु भोजनानापि वेष्टना। यमयति चन्द्रं। परिवेष्टत इत्यर्थः। चह परिकल्कने। चहयति। अचीचहत्। कथादौ वक्ष्यमाण
स्य तु अदन्तत्वेनाग्लोपित्वाद्दीर्घसन्वद्भावौ न। अचचहत्। चप इत्येके। चपयति। रह त्यागे इत्येके। अरीरहत्। कथादेस्तु। अररहत्। बल

णे इति पठितं तत्र परिवेषणमिति हेतुमण्यंतस्य रूपं। हेतुमण्यंतस्य हि भोजनावेष्टनाचार्थः। तथा च परिवेषणा इत्यनेन भो ९ प्राणने। बलयति। चिञ् चयने
जनान्तौ वेष्टनात् तथान्यत्र मित्त्वनिषेधेपि तयोरर्थयोस्त्वमंतत्वादेव मित्त्वसिद्धेरिति। यद्यपि घटादौ यच्छति भोजनातोऽन्यत्र मिन्नेति व्याख्यानं तथाप्यत्र सयं
थानुगुण्येनोपलक्षणात् पानद्धाख्येयमित्याहुः। अत्रेदं बोध्यं। घटादौ यमोपरिवेषण इत्यत्र परिपूर्वकस्य विषेर्णिजंतस्य ल्युटि रूपं यम च परिवेषण इत्यत्र तु
केवलस्यैव ल्युटि रूपं न तु णिजंतस्य। तथा च भोजनावद्वेष्टनाया अपि परिवेषणशब्दार्थत्वादुभयत्राप्यमंतत्वेनैव मित्त्वं सिध्यति। वेष्टने तु अपरिवेषण इत्य
नेनत्र अमंतत्वप्रयुक्तमित्त्वस्य निषेधेपि यम च परिवेषण इत्यनेन मित्त्वं सिध्यतीति दिक्॥

379

राम·
८३

विस्फुरेर्णौ। आदेच उपदेशे इत्यत आदित्यनुवर्तते विभाषा लीयतेरित्यतो विभाषाग्रहणं चानुवर्तत इत्याह। आत्वं वा स्यादिति। अर्त्तिह्रीयरत्वादंतरंगत्वाच्च आदेशे पुक् पश्चात्तु गुणः। अर्पयति। ह्रेपयति। व्लेपयति। रेपयति। यलोपः। क्नोपयति। क्ष्मापयति। स्थापयति। चपयतीति। वर्णग्रहणे लक्षणप्रतिपदोक्तपरिभाषा न प्रवर्तते। आतो नु-पसर्गे इति कवाधनाय ह्वावामश्चेत्यारंभादिति भावः। ज्ञपादिभ्य इति। मुख्यमते पंच ज्ञपादयः। मतांतरे तु सप्त। पूर्णेत्येके। पुणेत्यन्ये इति। इह शेषु पाठशुद्धिर्निर्णेतुमशक्या। अत एव क्षीरस्वामिनोक्तं। पाठोऽर्थश्चागमभ्रंशान्महतामपि मोहनः। न विद्मः किं जहीमोऽत्र किमुपादद्महे वयमिति। पूलपूर्णादिषु पाठभ्रंशः व्रजधातोर्मा

चिस्फुरोर्णौ। ६।१।५४। आत्वं वा स्यात्। अर्त्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग्णौ। ७।३।३६। चपयति। चययति। णिल्करणसामर्थ्याद्ण्यपि विकल्पः। चयने। प्रणिचययति। प्रनिचययति। नान्ये मितोऽहेतौ। अहेतौ स्वार्थे णिचि ज्ञपादिभ्योऽन्ये मितो न स्युः। तेन घटादीनाममन्तत्वप्रयुक्तं मित्त्वं न। घट्ट चलने। मुस्त संघाते। खट्ट संवरणे। षट्ट स्फिट्ट चुबि हिंसायाम्। पूल संघाते। पूर्ण इत्येके। पुण इत्यन्ये। पुंस अभिवर्द्धने। टकि बन्धने। टङ्कयति। टङ्कति। धूस कान्तिकरणे। धूसयति। दन्त्यान्तः। मूर्धन्यान्त इत्येके। तालव्यान्त इत्यपरे। कीट वर्णे। चूर्ण संकोचने। पूज पूजायाम्। अर्क स्तवने। तपन इत्येके। शुठ आलस्ये। शुठि शोषणे। शुण्ठयति। शुण्ठति। जुड प्रेरणे। गज मार्ज शब्दार्थौ। गाजयति। मार्जयति। मर्च च। मर्चयति। घृ प्रस्रवणे। स्रावण इत्येके। पचि विस्तारवचने। पञ्चयति। पञ्चते इति व्यक्तार्थस्य शपि गतम्। तिज निशाने। तेजयति। कृत संशब्दने। उपधायाश्च। ७।१।१०१। धातोरुपधाभूतस्य ॠत इत्स्यात्। रपरत्वम्। उपधायां चेति दीर्घः। कीर्तयति। उरृत्। अचीकृतत्। अचिकीर्तत्। वर्ध छेदनपूरणयोः। कुबि आच्छादने। कुम्बयति। लुबि इत्येके। लुबि तुबि अदर्शने॥

वर्णे संस्कारोऽर्थे उत संस्कार एवेत्यर्थभ्रंशः। आगमभ्रंशात्। शास्त्रभ्रंशात्। चूर्ण संकोचने। प्रेरणे पठितस्य पुनः पाठोऽर्थभेदकृतः। मर्च चेति। क्वचिद्धातुपाठेऽस्यादृष्टत्वेपि नायमप्रामाणिक इति मंतव्यं मिदचोंऽत्यात्पर इति सूत्रे कैयटे नास्योपन्यस्तत्वात्। मर्त्तोमर्त्तेमर्चयति इत्येनेति प्रयोगदर्शनाच्च। उपधायाश्च। ॠत इद्धातोरित्यनुवर्तते तदाह। धातोरुपधाया इति। ननु ॠत इद्धातोरिति सूत्रे धातोर्ॠत इत्ति वैयधिकरण्येन व्याख्याने सिद्धमिष्टमिति। किमनेन सूत्रेणेति चेन्न। मैवं। तथाहि सति। ॠकारीयतीत्यत्रापि इत्त्वप्रसंगात्॥ ९॥ ॐ॥ ६॥

ति·
सि·कौ·
टी·त·
८४

अर्द्दनइत्येकइति। अत्रवदंति। अर्द्दनेलुवितुवो ऽत्वादौपठितौ। तयोस्तत्रपाठोह्यथास्यादिदित्वादेवलुंवति। तुंवतीस्यादिरूपसिद्धेः। अदर्शनेत्वर्थे ऽर्थभेदात्स्वादिपाठःसार्थकइत्यर्दनार्थत्वे। चौरादिकयोरयुक्तमित्यस्वरसादेकइत्युक्तमिति। म्लेच्छम्लेच्छने। म्लेच्छणोऽपपं। तच्चैतेलादिना ऽव्यंजनं। म्लेच्छयति। अमम्लेच्छत्। गुर्दपूर्व।

अर्द्दनेइत्येके। ह्लप व्यक्तायांवाचि। क्लपेत्येके। चुटि छेदने। इल प्रेरणे। एलयति। ऐलिलत्। म्लेच्छ म्लेच्छने। म्लेच्छ अव्यक्तायांवाचि। ब्रूस बर्ह हिंसायाम्। केचिदिह गर्ज गर्द शब्दे। गर्ध अभिकांक्षायामितिपठन्ति। गुर्द पूर्वनिकेतने। जसि रक्षणे। मोक्षणइतिकेचित्। जंसयति जंसति। ईड स्तुतौ। जसु हिंसायाम्। पिडि सङ्घाते। रुष रोषे। रुट इत्येके। डिप क्षेपे। ष्टुप समुच्छ्राये। आकुस्मादात्मनेपदिनः। कुस्मनाम्नो वेतिवक्ष्यतेतमभिव्याप्येत्यर्थः। अकर्तृगामिफलार्थमिदम्। चित सञ्चेतने। चेतयते। अचीचितत। दशि दंशने। दंशयते। अददंशत। इदित्त्वाणिजभावे। दंशति। आकुस्मीयमात्मनेपदंणिचःसन्नियोगेनैवेतिव्याख्यातारः। नलोपेसञ्जिसाहचर्याद्ग्रादेरेवग्रहणाम्। दसि दर्शनदंशनयोः। दंसयते। दंसति। दसेत्यप्येके। डप डिप सङ्घाते। तत्रि कुटुम्बधारणे। तन्त्रयते। चान्द्रा धातुद्वयमितिमत्वा कुटुम्बयते इत्युदाहरन्ति। मत्रि गुप्तपरिभाषणे। स्पश ग्रहणसंश्लेषणयोः। तर्ज भर्त्स तर्जने। बस्त गन्ध अर्द्दने। बस्तयते। गन्धयते। विष्क हिंसायाम्। हिष्केत्येके। निष्क परिमाणे। लल ईप्सायाम्। कूण संकोचे। तूण पूरणे। भ्रूण आशाविशङ्कयोः। शठ श्लाघायाम्। यक्ष पूजायाम्॥ स्यम वितर्के। गूर उद्यमने। शम लक्ष आलोचने। नान्येमितइतिमित्त्वनिषेधः। शामयते॥ ११ निकेतने। गूर्दयति। पूर्वयति। केचित्तु पूर्वनिकेतने इतिपठित्वा गुर्द्दधातुः पूर्वनिवासेवर्त्ततेइतिव्याचक्षते। जसु हिंसायां। स्वाया मिड्विकल्पार्थमुदित्करणमितितत्सामर्थ्याद्यस्य णिजनित्यः। जासयति। जसति। जसित्वा। जस्त्वा। जस्तः। चित्तसंचेतनंमूर्च्छाद्यवस्थानिवृत्त्युत्तरकालिकंज्ञानं। दंशनीति। इहदंशसंजेतिनलोपमाशंक्याह। संजिसाहचर्यादिति। स्पश। स्पाशयते। अप

॥ [illegible]॥

राम·
८४

CC-0. In Public Domain. Digitization by eGangotri

स्यअस्त्वंइत्यापवादः अपस्यशन्तर्जेभर्त्सेतर्जयते। भर्त्सयते। तर्जयन्निवकेतुभिरितिप्रयोगस्तुणिजंतादस्माङ्घोचादिकात्तर्जेतेर्वाहेतुमण्णिचिवोध्यः। भूणा। भूण
यते। भूणेऽर्भकेस्त्रैणागर्भेइत्यमरः। गूरउद्यमने। दीर्घोपधोयं। गूरयते। ह्रस्वोपधस्तुदिवादौतुदादौचेतिमनोरमायांस्थितं। यद्यपितुदादौगुरीउद्यमनेइतिपाठ
ह्रस्वोपधएवतथापिदिवादौधूरीगूरीहिंसागत्योरितिपाठान्नास्तिह्रस्वोपधइतिनव्याः। शमलस्य। ननुनिशामयत्तइत्यत्रमित्यत्तशामयइत्येतत्तुशमुउपशम।
इत्यस्माण्णिचिरूपंचेत्। अमंतत्वान्मित्त्वेसतिह्रस्वेनभाव्यमित्याशंक्यकथमनेनसिद्धमितिवदंति। आकुस्मीयत्वात्तङि निशामयस्वेतिरूपस्यसर्वसंमतत्वादि
तिचेत्। अत्राहुः। स्वार्थएयंतादस्माद्धेतुमण्णिचिनिशामयेतिरूपं। नचार्थासंगतिः। निदत्तप्रेषणाद्धात्तोः प्राकृतेऽर्थेणिजुच्यतेइतिसिद्धांतादिति॥ ॐ ॥

कुत्स अवक्षेपणे। कुट छेदने। कुट्ट इत्येके। गल स्रवणे। भल आभण्डने। कूट आप्रदाने। अव सादने इत्येके। कुट्ट प्रतापने। वञ्चु प्रलम्भने।
वृष शक्तिबन्धने। शक्तिबन्धनम्प्रजननसामर्थ्यंशक्तिबन्धश्च। वर्षयते। मद तृप्तियोगे। मदयते। दिवु परिकूजने। गॄ विज्ञाने। गारयते
विद चेतनाख्याननिवासेषु। वेदयते। सत्तायांविद्यतेज्ञानेवेत्तिविंत्तेविचारणे। विन्दतेविन्दतिप्राप्तौश्यन्लुक्श्नमृशेष्विदंक्रमात्
मान स्तम्भे। मानयते। गर्ह गुरुस्थायाम्। यावयते। कुस्म नाम्नोवा। कुस्मेतिधातुःकुत्सितस्मयनेवर्त्तते। कुस्मयते। अचुकुस्मत्। अथवाकु
कुत्स अवक्षेपणे। पुनश्चकुत्सायामितिनिर्देशादङ्। कुत्सा। एयासश्रन्थेतियुच्। कुत्सना। भल आभंडनंनि ॥ स्मेतिप्रातिपदिकं। ततोधात्वर्थेणिच्॥
रूपणामित्यादुः। वंचु प्रलंभने। त्युरि। वंचनं। उदित्करणस्यत्क्वायामिड्विकल्यार्थत्वाण्णिजनित्यः। वंचयतिवंचति। वचित्वावंचित्वा। वंक्त्वा। वंचि ... लुंचत्॥
श्वेतिसेटः। त्क्वःकित्त्वविकल्पनात्पाक्षिकोनलोपः। इडभावेतुनित्यं। निष्ठायांतुवक्तं। यस्यविभाषेतिइण्निषेधः। नाम्नोवेतिवाशब्दंव्याचष्टे। अथवेति। प्राति
पदिकमिति। अन्येष्वपिदृश्यतइतिसूत्रेअन्येभ्योपीतिवक्ष्यमाणत्वात्कुपूर्वात्स्मयतेर्डप्रत्ययेटिलोपेकुगतीतिसमासेचनिष्पन्नमित्यर्थः। यद्यपिकुपूर्व
स्यस्मिङोलङादिषुकुस्मयतेइत्यादिसिद्धेतथापिप्रकुस्मयतेइत्यादिनसिध्येदुपसर्गस्यधातुनाव्यवधानायोगात्। कुस्मयांचक्रेइत्याद्यर्थमपिकुस्मेतिपाठो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



इत्याकुस्मीयाः। चर्च। सर्वोपि चुरादिणिजन्तः पाक्षिकश्च निपसे गुरोश्च हलः इत्यप्रत्ययः। चर्चा। कण निमीलने। एकनेत्रनिमीलनमेवायं शब्दः स्वभावात्। काणाः। काण्यादी
नामिति। एते हेतुमण्णपन्तेषु वर्त्स्यन्ते। हन्त्यर्थाश्च। तेन घातयति हन्तीत्येतौ समानार्थौ। अर्ज। प्रतियत्नो गुणाधानं। अर्जयतीति। संग्रह इत्यर्थः। घुषिर् विशब्दनं प्रतिज्ञा

इत्याकुस्मीयाः। [illegible] अध्ययने। [illegible] भाषणे। [illegible] उपसर्गादाविष्कारे च। वाङ्भाषणे। प्रतिशब्दयति। प्रतिश्रुतमाविष्करोतीत्यर्थः। अ
नुपसर्गाच्च। आविष्कार इत्येव। शब्दयति। [illegible] निमीलने। काणयति। णौ चङ्युपधाया ह्रस्वः। काण्यादीनां वेति विकल्प्यते। अचीकण
त्। अचकाणत्। जभि नाशने। जम्भयति। जम्भति। [illegible] क्षरणे। सूदयति। असूषुदत्। [illegible] ताडने। जासयति। जसति। [illegible] बन्धने। पाशा
यति। [illegible] रोगे। आमयति। नान्ये मित इति निषेधः। अमगत्यादौ इत्यपि गतः। तस्माड्नुमसो। आमयति। [illegible] भेदने। विकासे चाप्य।
पोः स्फुटति। स्फोटते इत्युक्तं। [illegible] सङ्घाते। घाटयति। हन्त्यर्थाश्च। नवगण्यामुक्ता अपि हन्त्यर्थाः स्वार्थे णिचं लभन्त इत्यर्थः। [illegible] मर्दने। उ
दित्वाद्वत्वीत्यपि। [illegible] प्रतियत्ने। अयमर्थान्तरेऽपि। द्रव्यमर्जयति। [illegible] विशब्दने। घोषयति। घुषिरविशब्दन इति सूत्रे विशब्दन
इति निषेधाल्लिङ्गादनित्योऽस्य णिच्। घोषति। इदित्वाद्घुङ्। अघुषत्। अघोषीत्। एवमन्यत्र। अजूघुषत्। [illegible] सातत्ये भौवादिक
क्रन्दधातुरग्रहणाद्यर्थ उक्तः। स एवाङ्पूर्वो णिचं लभते सातत्ये। आक्रन्दयति। अन्ये तु आङ्पूर्वो घुषिः क्रन्दसातत्ये इत्याहुः। आघोषय
ति। [illegible] शिल्पयोगे। [illegible] भूष अलङ्करणे। अवतंसयति। अवतंसति। भूषयति। अर्ह पूजायाम्। ज्ञा नियोगे। आज्ञापयति। भज विश्राण
ने। शृधु प्रहसने। अशशर्धत्। अशीशृधत्। यत निकारोपस्कारयोः। रकलग आस्वादने। रघ इत्येके। रगेत्यन्ये॥ ६ ॥ ६ ॥

ने। निषेधाल्लिङ्गादिति। घुषिरविशब्दन इति सूत्रेणाऽविशब्दने निष्ठायामिण्निषिध्यते विशब्दनार्थादेतस्मादनन्तराणिष्ठाना स्येवणिचा व्यवधानात्। अतो घुषिरवि
शब्दन इति भौवादिकादेव निष्ठायामिण्निषेधो भवेदिति किं विशब्दनप्रतिषेधेन। तत्सामर्थ्यान्नैव विशब्दनप्रतिषेधेनानित्योऽस्य णिजिति ज्ञाप्यते इति भावः॥ ६॥



381

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति करणादपि णिज्विकल्पः सिध्यतीति केचित्। शिल्पयोग इति क्रियाकौशलं शिल्पं। यत्न निकारोपस्कारयोः। यत्नो वा प्रेषो वा निकारः। निराकारोपस्कारयोरिति पाठां
तरं। क्रिया निर्घटो च यत्ने प्रे षेनिराकारे पात्यते दष्टुपस्कृतौ नित्यो यं धान्यधनयोः प्रतिदाने इत्युक्तं। अस्यार्थः। यत्नाद्यर्थेषु चतुर्षु यत्न धातुं प्रयुञ्जीत। निसः परभागे वे

अञ्चु विशेषणे। अञ्चयति। उदित्त्वमिड्विकल्पार्थम्। अत एव विभाषितो णिच्। अञ्चति। एवं मृजुजसुपभ्रंजो नाम पि वोध्यम्। लिगि चि
त्रीकरणे। लिङ्गयति। लिङ्गति। मुद संसर्गे। मोदयति सक्तून् घृतेन। त्रस धारणे। ग्रहण इत्येके। वारण इत्यन्ये। उध्रस उञ्छे। उकारो धात्वव
यव इत्येके। नेत्यन्ये। ध्रासयति। उध्रासयति। मुच प्रमोचने। मोदने च। वस स्नेहच्छेदापहरणेषु। चर संशये। च्युस हसने। हसने चेत्येके। च्यास
यति। च्युसेत्येके। च्योसयति। मुच अवकल्कने। अवकल्कनं मिश्रीकरणमित्येके। चिन्तनमित्यन्ये। भावयति। कृपेश्च। कल्पयति। आस्वा
दः सकर्मकात्। स्वदिमभिव्याप्य सम्भवत्कर्मभ्य एव णिच्। ग्रस ग्रहणे। ग्रासयति फलम्। पुष धारणे। पोषयत्याभरणम्। दल विदारणे
। दालयति। पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि दृहि बर्ह बल्ह गुप धूप विच्छ चीव पुथ लोक
लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः। पाटयति। पोटयति। लोटयति। तुञ्जयति। तुञ्जति। एवमपरेषाम्। घाटयति। घण्टयति। नाग्लोपि
शास्वृदिताम्। ७।४।२। णिचि अग्लोपिनः शास्तेरृदितां चोपधाया ह्रस्वो न स्याच्चङ्परे णौ। अलुलोकत्। अलुलोचत्। वर्त्तयति। वर्द्धयति। उ
दित्त्वात् ऋदित्। वर्द्धति। रुठ लजि अजि दसि भृशि रुशि शीक नट पुटि जि चि रघि लघि अहि रहि महि ह्रि चा लडि तड नल च। पूरी आप्यायने। ईदि
त्त्वान्निष्ठायामिण्निषेधाय। अत एव णिज्वा। पूरयति। पूरति। रुज हिंसायाम्। ष्वद आस्वादने॥ १॥ १॥ १॥ १॥ १॥ १॥ १॥

नप्रयुज्यते तदाऽयं धान्यधनयोः प्रतिदाने वर्त्तत इति। ऋणं नियातयति। प्रतिददातीत्यर्थः। अंचु विशेषणे। विशेषणं व्यावर्त्तनं। मुचोऽवकल्कने भूधातोर्णिच् स्यात्
भावयतीति। मिश्रीकरोति चिंतयतीति वार्थः। कृपेश्च कृपेर्णिच् स्यात् अवकल्कने। आस्वदः। अभिव्याप्येति। आकुस्मादिति पूर्वेण आधृषाद्वेति परत्र च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



आङोऽभिविध्यर्थत्वायाः सर्वसंमतत्वेनतन्मध्यपतितेः तापितथैवव्याख्यानमुचितमितिभावः।अन्येत्वाङ्पूर्वकात्स्वदःसकर्मकाण्णिजित्याचक्षुः।आस्व
दीपेषुधातवःसर्वेसकर्मकाः।घाटयतीति।अयंचुरादावेवसंघातेगतः।पुनःपाठस्त्वर्थभेदात्॥ ॥ स्वादइत्येकइति।अस्मिन्मतेपूर्वत्राप्यास्वादःसकर्मकः।
दितिपाठ्यं।ननुदीर्घपाठेव्यर्थः।ह्रस्वपाठेणुपधावृद्ध्या स्वादयतीतिरूपाणांतुल्यत्वादतआह।दीर्घस्यत्वितिसःस्विदिस्वदिसहीनांचेतिसूत्रेणाभ्यासेणःषत्व
स्यसकारेनतुषत्वमितिवक्ष्यमाणत्वात्सन्नन्तेपिसिस्वादयिषतीत्यादिरूपंतुल्यमेवेत्यभिप्रेत्याह।असिस्वददिति।इत्यास्वदीयाः।आधृषाद्वा।व्याख्यानात्

स्वादइत्येके।असिष्वदत्।दीर्घस्यत्वषोपदेशत्वात्।असिस्वदत्।आधृषाद्वा।इतऊर्ध्वंविभाषितणिचः।धृषधातुमभिव्याप्ययुज
पृचसंयमने।योजयति।योजति।अयोजीत्।पर्चयति।पर्चति।पर्चिता।अपर्चीत्।अर्चपूजायाम्।षहमर्षणे।साहयति।सिएवायन्त्रा
गःसहतिकलभेभ्यःपरिभवम्।ईरक्षेपे।लीद्रवीकरणे।लापयति।लयति।लेता।वृजीवर्जने।वर्जयति।वर्जति।वृञ्आवरणे।वार
यति।वरति।वरते।वरिता।वरीता।ज्वयोहानौ।जारयति।जरति।जरिता।जरीता।ज्रिच।ज्रापयति।ज्रयति।ज्रेता।रिचवियोजनसम्प
र्चनयोः।रेचयति।रेचति।रेक्ता।शिषअसर्वोपयोगे।शेषयति।शेषति।शेष्टा।अशिक्षत्।अयंस्विपूर्वोऽतिशयेतपदाहे।तापयति।त
पति।तप्ता।तृपतृप्तौ।सन्दीपनेइत्येके।तर्पयति।तर्पति॥ ॥ ९ योग्यताबलाद्वाणिजितिसंबध्यते।अयौ ष्ठीदिति।णिजभावपक्षेअनि
ड्योयमितिभावः।लीद्रवीकरणे।लिनातिलीयत्योर्यकानिर्देशइतिभाष्यकारोक्त्याविभाषालीयतेरित्यात्वमिहनप्रवर्तत्तेइतिध्वनयन्तिलेतेति।वरीतेति·॥ 382
वृतोवेतिवादीर्घः।लिङि·वूर्यात्।आत्मनेपदेतुवृषीष्ठ।वरिषीष्ट।लिङ्·सिचोरात्मनेपदेष्वितिवेट्।नलिङीतिइटोदीर्घनिषेधः।इडभावपक्षेउश्चेतिकि।
त्वान्नगुणः।लुङि·अवारीत्।अवारिष्टां।अवारिषुः।सिचिचपरस्मैपदेष्वितिदीर्घनिषेधः — आत्मनेपदेतुअवरिष्ट।अवरीष्ट। — इडभावेसिचोलोपः। राम· ८६
॥अवृत्त।रिच्।णिजभावेअयमनिडित्याह।रेक्तेति।अशिक्षदिति·॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शालइगुपधेति क्सः। तृपा। अनिट्सु श्यनानिर्देशादयं सेडिति ध्वनयति॥ ॥ तर्पितेति। छृदो। ईदित्वान्निष्ठायामनिट्। ऋवर्णान्तस्यणत्वं। छृणः। छृणवान्। ह्रस्वश्चेति। धु
ञ्कंपने इत्यर्थः। अवाप्तोदिति। अस्यानिवृत्तीति लुका निर्देशादङ्नेतिभावः। वचिस्वपीतिसंप्रसारणं। उच्यान्। धृषप्रसहने। केचित्त्वादितमाहुस्तन्मते धृष्टो। मुख्य॥

तर्पिता। छृदी सन्दीपने। छर्दयति। छर्दति। छर्दिता। छर्दिष्यति। सेसिचीति विकल्पो न। साहचर्य्यात्तत्र रौधादिकस्यैव ग्रहणात्। चृप छृप
दृप सन्दीपन इत्येके। चर्पयति। छर्पयति। दृभी भये। दर्भयति दर्भति। दर्भिता। दृभ सन्दर्भे। अयन्तुदादावीदित्। श्रथ मोक्षणे। हिंसायामि
त्येके। मी गतौ। माययति। मयति। मेता। ग्रन्थ बन्धने। ग्रन्थयति। ग्रन्थति। शीक आमर्षणे। चीक च। अर्द हिंसायाम्। स्वरितेत्। अर्दयति।
अर्दति। अर्दते। हिसि हिंसायाम्। हिंसयति। हिंसति। हिनस्तीति श्नमि गतम्। अर्ह पूजायाम्। आङः षद पद्यर्थे। आसादयति। आसीदति
। पाघ्रेति सीदादेशः। आसत्ता। आसात्सीत्। शुन्ध शौचकर्म्मणि। शुन्धिता। अशुन्धीत्। अशुन्धिषाताम्। छद अपवारणे। स्वरितेत्। जुष परि
तर्कणे। परितर्कणमूहो हिंसा वा। परितर्पण इत्यन्ये। परितर्पणम्परितृप्तिक्रिया। जोषयति। जोषति। प्रीतिसेवनयोर्जुषते इति तुदादौ। धू
ञ् कम्पने। णाविस्य विशेषः। धूञ्प्रीञोर्नुग्वक्तव्यः। धूनयति। धवति। धवते। केचित्तु धूञ्प्रीणोरिति पठित्वा प्रीणातिसाहचर्याद्धूनातेरे
वनुकमाहुः। धावयति। अयं स्वादौ क्र्यादौ तुदादौ च। स्वादौ ह्रस्वश्च। तथा च कविरहस्ये धूनोति चम्पकवनानि धुनोत्यशोकं चूतं धुनाति।
धुवति स्फुटितातिमुक्तम्। वायुर्विधूनयति चम्पकपुष्परेणून्यत्कानने धवति चन्दनमञ्जरीश्च॥ १॥ ६॥ ६॥ ६॥ ६॥

मतेतु धर्षितः। नन्वत्र निष्ठाशीङित्यादिना सेटि निष्ठायाः कित्त्वनिषेधात् गुणे न भाव्यमिति चेत्। अत्राहुः। आदित्साहचर्यादादित एवान्निषेधे सस्यात्तन्त्रग्रह
णात्। न च आदित्तो निष्ठायामिड्दुर्लभ इति शंक्यं। विभाषाभावादिकर्म्मणोरिति तत्संभवादिति। इत्याधृषीयाः युजादयः। अथादन्ता इति॥ ६॥ ६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति·
सि·कौ·
टी·त·
८७

वक्ष्यमाणेषु धातुषुत्रंशलोऽवयवोऽकारोन तूच्चारणार्थ इत्यर्थः। स्थानिवत्वान्न वृद्धिरिति। अचः परस्मिन्निति सूत्रेणेत्यर्थः। नचस्थानिनिमित्तयत्कार्यं तदेवस्था
निवदित्यनेनातिदिश्यते। नत्वादेशप्रयुक्तं वार्यते न्यथानायकः पावकः इत्यादिन सिद्ध्येदिति वृद्धिरत्र दुर्वारेति वाच्यं। अचः परस्मिन्नित्यत्र स्थानिवदित्य

प्रीञ् तर्पणे प्रीणयति। धूञ् प्रीञोर्णुगिति हरदत्तोक्तपाठेतु। प्रापयति। प्रपति। ष्रन्थग्रन्थसन्दर्भे। आप्लृ लम्भने। आपयति। आपति
आपत्। आप्ता। स्वरितेदयमित्येके। आपते। तनु श्रद्धोपकरणयोः उपसर्गाच्च दैर्घ्ये। तानयति। वितानयति तनति। वितनति। चन श्र
द्धोपहसनयोरित्येके। चानयति। चनति। वद सन्देशवचने। वादयति। स्वरितेत्। वदति। वदते। अनुदात्तेदित्येके। ववदतुः। ववदिथ॥
ववदे। वद्यात्। वच परिभाषणे। वाचयति। वचति। वक्ता। अवाक्षीत्। मान पूजायाम्। मानयति। मानति। विचारणे तु। भौवादिको नित्यस
न्नन्तः। स्तम्भे मानयते। इत्याकुसीयाः॥ मन्यते इति दिवादौ। मनुते इति तनादौ च। भूप्राप्तावात्मनेपदी। भावयते। भवते। णिच् सन्नियो
गेनैवात्मनेपदमित्येके। भवति। गर्ह विनिन्दने। मार्ग अन्वेषणे। कठि शोके। उत्कण्ठापूर्वोयम्। उत्कण्ठायाम्। कण्ठते इत्यात्मनेपदीगतः। मृ
जूशौचालङ्कारयोः। मार्जयति। मार्जति। मार्जिता। मार्ष्टा। मृष तितिक्षायाम्। स्वरितेत्। मर्षयति। मर्षति। मर्षते। मृष्यति। मृष्यते इति।
दिवादौ। सेचनेऽपि मर्षति। धृष प्रसहने। धर्षयति। धर्षति। इत्याधृषीयाः। अथादन्ताः। कथ वाक्यप्रबन्धे। अल्लोपस्य स्थानिवत्त्वा
न्न वृद्धिः। कथयति। अग्लोपित्वान्न दीर्घसन्वद्भावौ। अचकथत्। वर ईप्सायाम्। वरयति। वारयतीति गतम्। गण संख्याने। गणयति॥

त्युक्तेः शब्दाधिकारपक्षाश्रयेणाभावाभावाद्बुभावप्यतिदिश्येते इति सिद्धान्तात्। स्थानिनिमित्तभवं स्याद्वृद्धेरादेशेऽप्यभावात्। स्थानिनिमित्तयन्नभवति तदादेशे। राम·
पि न भवतीत्यत्र तु न पदान्तेति सूत्रस्य यलोपादिग्रहणमेव लिङ्गमिति दिक्॥ ॥श्रीराधाकृष्णायनमो नमः॥ ॥श्रीजानकीवल्लभायनमो नमः॥ ८७

CC-0. In Public Domain. Digitization by eGangotri

ईचगणः। अनल्पहत्वरेत्यत्र योः तृ स चकारेणसमुच्चीयते। स्तनगदी। गदीत्यत्रइकानिर्देशादतोलोपः। अनेकाच्त्वेनाघोपदेशत्वात्। षत्वंन। तिस्तनयिषति स्तनिह
षिषुणीति णोरित्तु च्ययामंते त्ययादेशः। स्तनयित्नुर्बलाहकः। पतगतौवा। गणसूत्रमिदं रूपयतीति। रूपोरोलइतिनप्रवर्तते। तत्ररूपसामर्थ्यइत्यस्यग्रहणात्।
रूपप्रकृतिकणिजंतस्यतु धात्वंतरत्वात्। स्पृहा। आप्तुमिच्छाईप्सा। अवभामत्। इति। अल्लोपस्यस्थानिवत्वाण्णौचङीसुपधाह्रस्वोन। सूचपिशुनोदुर्जनस्तु।

ईचगणः। ७। ४। ९७। गणोरभ्यासस्यई त्स्याच्चङ्परेणौचादतः। अजगणत्। अजीगणत्। । शठश्वठसम्यगवभाषणे। पटवट
ग्रन्थ्यारहत्यागे। अररहत्। स्तनगदी देवशब्दे। स्तनयति। गदयति। अजगदत्। पतगतौवा। वाणिजन्तः। वादन्तइत्येके। आद्ये। पतयति। प
ततिपत्ताश्वकारः। अपतीतत्। द्वितीये। पातयति। अपीपतत्। पषअनुपसर्गात्। गतौविस्तेव। पषयति। स्वरआक्षेपे। स्वरयति। स्वप्रतिय
ते। स्वपति। कलगतौ संख्यानेच। चहपरिकल्कने। परिकल्कनन्दम्भः शाठ्यञ्च। महपूजायाम्। महयति। महतीतिशपिगतं। सारकृ
पश्रयदौर्बल्ये। सारयति। रूपयति। श्रथयति। स्पृहईप्सायाम्। भामक्रोधे। अबभामत्। सूचपैशुन्ये। सूचयति। अघोपदेशत्वात्नषः। असुसू
चत्। खेटभक्षणे। तृतीयान्तइत्येके। खोटइत्यन्ये। क्षोटक्षेपे। गोमउपलेपने। अजुगोमत्। कुमारक्रीडायाम्। अचुकुमारत्। शीलउपधारणे
। उपधारणमभ्यासः। सामसांत्वप्रयोगे। असासामत्। सामसांत्वनेइत्यतीतत्पन्नु। असीषमत्। वेलकालोपदेशे। वेलयति। कालइतिपृथग्धा
तुरित्येके। कालयति। पल्पूलल वनपवनयोः। वातसुखसेवनयोः। गतिसुखसेवनेष्वि सेके। वातयति। अववातत्। गवेषमार्गणे। अ
जगवेषत्। वासउपसेवायाम्। निवासआच्छादने। अनिनिवासत्। भाजपृथक्कर्मणि। सभाजप्रीतिदर्शनयोः प्रीतिसेवनयोरित्यन्ये।

स्यकर्मपैशुन्यं। अघोपदेशत्वादिति। अनेकाच्त्वादितिभावः। सामसांत्वनेइत्यतीतस्यत्विति। अयंधातुः इतः प्राङ् मूलपुस्तकेनकुत्रापि १९ सभाजयति।
पठितः पुस्तकांतरेषुमृग्यः। केचित्तुसामसांत्वनेइत्यस्यचाप्यपठितत्वेपिवांत्वसामप्रयोगेइतिप्राक्पठितमेवतत्रचषांत्वसामेतिधातुद्वयंप्रयोगेवर्तते। प्रयो
गश्चसांत्वप्रयोगपरः। सचसांत्वनमेवेत्येवंग्रंथकाराशयंवर्णयित्वाष्यितस्यगतिंसमर्थयंते। गवेष। मार्गणमन्वेषणं॥ १॥ १॥ १॥ १॥ १॥ १॥ १॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ऊनपरिहारो। अस्मात्‌ णौ चङि द्वित्वात्‌ परत्वादंतरंगत्वाच्च अल्लोपेन अजादेर्द्वितीयस्येति णिचा सह द्वित्वे ओनिनदित्यनिष्टं प्रसज्यते किंतु ऊनेनदित्येव रूपमिष्टं तच्च नशब्दस्य द्वित्वं विना न संभवति। न च द्विर्वचनेचीति सूत्रेण द्वित्वे कर्तव्ये अल्लोपस्य स्थानिवत्‌भावात्‌ निषेधान्नशब्दस्य द्वित्वं सिध्यतीति वाच्यं णिचोद्वित्वनिमित्तत्वाभावात्‌ तत आह। ओः पुयण्जीत्यादि। संपूर्णसूत्रं लिंगमिति केषांचित्‌ भ्रमं निवर्तयितुमाह। पयर्यौरिति। अयंभावः। स्मिपूङ्रंज्वशांसनिसनीवं तर्द्धेतिसूत्राभ्यां पूङ्यौतिभ्यां परस्य सन इडागमे कृते द्विर्वचनेऽचीति स्थानिवत्‌भावादादेशनिषेधाद्वा उवर्णान्तस्य यद्द्वित्वमिति पुपविषते। ।पुपविष।

ऊनपरिहाणे। ऊनयति। ओः पुयण्जिद्वितिसूत्रे पययोरिति वक्तव्ये वर्गप्रत्याहारजकारग्रहो लिङ्गं णिचि अच आदेशो न स्याद्‌ द्वित्वे कार्ये इति यत्र द्वित्वे कृते अभ्यासोत्तरखण्डस्य आद्योऽच्‌ प्रक्रियायामपरिनिष्ठितरूपे वा ऽवर्णो लभ्यते तत्रैवायं निषेधः। ज्ञापकस्य सजातीयापेक्षत्वात्तेन। चिकीर्त्तदित्यादि सिद्धम्‌। प्रकृते तु नशब्दस्य द्वित्वं ततउत्तरखण्डेऽल्लोपः। औननत्‌। माभवानूननत्‌। ध्वन शब्दे। अदध्वनत्‌॥ कूट परितापे। परिदाह इत्यन्ये। सङ्केत ग्राम कुण गुण चामन्त्रणे। चात्‌ कूटोऽपि। कूटयति। सङ्केतयति। ग्रामयति। कुणयति। गुणयति। पाठान्तरम्‌। केत श्रावणे निमन्त्रणे च। केतयति। निकेतयति। कुणगुण चामन्त्रणे। चकारात्‌ केतने। कूण सङ्कोचने इति। स्तेन चौर्ये। अतिस्तेनेत्‌। आगर्वादात्मनेपदिनः। पद गतौ। पदयते। अपपदत्‌। गृह ग्रहणे। गृहयते। मृग अन्वेषणे। मृगयते। मृग्यतीति कण्ड्वादिः। कुह विस्मापने। शूर वीर विक्रान्तौ। स्थूल परिबृंहणे। स्थूलयते। अतुस्थूलत्‌। अर्थ उपयाच्ञायाम्‌। अर्थयते। आर्त्तियत्‌। सत्र सन्तानक्रियायाम्‌। असससत्रत्‌। अनेकाच्त्वान्नषोपदेशः। सिसत्रयिषते। गर्व माने। गर्वयते॥ ((तोस्यानिष्टं प्रसज्येत। ततश्च अभ्यासो वर्णोस्येत्वार्थे पययोरित्यपेक्षितं। अन्यथा पिपविषते। पपविषतीति न सिद्ध्यतइति। वर्गप्रत्याहारेत्यादि। पुयण्जीति वर्गादिग्रहणफलं तु अबीभवत्‌। अमीमवत्‌। अरीरवत्‌ अलीलवत्‌। अजीजवत्‌ विभावयिषति। मिमावयिषति। रिरावयिषति लिलावयिषतीत्यादिरूपसिद्धिरिति बोध्यं तदुरूपपादम्‌। णिचि परत्वादंतरंगत्वाच्च वृद्धौ कृते द्वित्वे सत्यभ्यासे उवर्णस्य दुर्लभत्वादकारस्य सत्यत इत्वे नरूपसिद्धेश्च। ततो वर्गादिग्रहणं व्यर्थं सत्‌ उक्तार्थे ज्ञापकमिति भावः। ज्ञापकफलं तु यत्र ओः—



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुपणञ्जीत्यस्याप्राप्तिस्तत्र बोध्या। तद्यथा। चुक्षावयिषति। चङ्यः चुक्षवत्। उडु रिवाचरति उडवति। सर्वप्रातिपदिकेभ्य इत्याचारे क्विप् तदंताण्णौ सन्। उडुडावयिष
ति। चङि औडुडवत्। तु इति सौत्रो धातुस्ततो णौ सन्। तुतावयिषति। चङि अतूतवत्। तुनावयिषति। अतूनवत्। पुस्फारयिषति। अपुस्फुरत्। चिस्फुरोर्णौ विति वा आत्वे
अपुस्फरदित्यादिष्वभ्यासे उकार श्रवणं भवति ज्ञापनवशादन्यथा चिक्षावयिषतीत्यादि प्रसज्येतेत्येतत्सकलमभिप्रेत्य वार्त्तिककृतोक्तं। ओः पुयण्जिषु वचनं।
ज्ञापकं णौ स्थानिवत्भावस्येति स्थानिवद्भावः प्रतिषेधस्याप्युपलक्षणं। अच आदेशो न स्यादिति। प्रतिषेधपक्षे मुख्य इत्यभिप्रेत्येदमुक्तं। प्रतिषेधः स्थानिवद्भाव
स्याप्युपलक्षणमिति बोध्यं नन्वेवं कृतसंप्रश्वद्ने इति धातोर्णौ चङि इणादेशात्प्रागेव कृत इत्यस्य द्वित्वे उरदत्वे च अचकीर्तदिति स्यान्नतु अचिकीर्तदिस्यत आ
ह यत्र द्विरुक्ताविति। चङ् सहितस्योत्तर खंडत्वमभ्युपेत्येदमुक्तं। अन्ये तु आद्यग्रहणं स्पष्टप्रतिपत्त्यर्थं। धातोरवयवस्यैकाचो द्वित्वे सत्यभ्यासोत्तरखंडे अज्झ्या
संभवादित्याहुः। श्रौजढत् औननदित्यादौ परिनिष्ठिते अवर्णस्यालाभादाह। प्रक्रियायामिति। चुक्षावयिषतीत्यादौ प्रक्रियायामवर्णो न लभ्यत इत्याह। परिनि
ष्ठिते रूपे वेति। वा शब्दोऽनास्थायां। क्वचिदवर्णपरत्वं विवक्षितं न तु अमुकत्रैवेत्याग्रह इति भावः। सजातीयापेक्षत्वादिति। पुपणञ्जो ह्यभ्यासोत्तरखंडे अव
र्णपरा भवंति अतः तथैव ज्ञापकमित्यर्थः अत एव भाष्यकृता पवर्गादेरन्यस्मिन् अपि हलि अवर्णपरे एव स्थानिवत्त्वमिति अचिकीर्तदित्यादौ नातिव्याप्तिरि
ति सिद्धांतितं। ननु ओः पुयण्जीति सूत्रे णिचि इति नास्ति। तथा च णिच्यच आदेशो न स्यादित्यर्थे कथमिदं ज्ञापकं भवेत्। न च सामान्यतो द्वित्वे कार्ये अच आदे
शो न स्यादित्येव ज्ञाप्यतामिति वाच्यं। दिद्वनीयिषति निनवनीयिषतीत्यादावभ्यासे उकारश्रवणप्रसंगादिति चेत्। अत्राहुः। येन नाव्यवधानमित्येकेन प्र
त्ययेन द्वित्वनिमित्तप्रत्ययस्य व्यवधानमाश्रीयते तच्च णेरेव संभवतीति णिज्विषयकमेव ज्ञापकं दिद्वनीयिषतीत्यत्र तु सुटा क्यचा च व्यवधानादनेकव्य
वधानमिति न तद्विषयं ज्ञापनमिति। अस्मिन् मते आचारक्विबंता द्द्वनशब्दात् सनि दुद्वनिषतीति स्यात्। तच्च नेष्यते णौ स्थानिवद्भावस्य ज्ञापकमिति वार्त्ति।
कोक्तेः। स्थानिवत्त्वेन प्रतिषेधे नवा णावेवाभ्यासे उकारेण भवितव्यमतो वार्त्तिककारवचनादेव णौ स्थानिवदिति सौकर्तव्यं। तथा च न पूर्वोदाहरणे वुदो
ष इति दिक्। फलितमाह। प्रकृते त्विति। औननदिति। नो नयति ध्वनयतीति चङि षेधस्त्विह नात्र छंदसीत्यनुवृत्त्या मात्वायतो जरितुः काममूनयीरिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि·
सि·कौ·
टी·तं·
८९

शावेवत्तान्निषेधात्। यद्यपि परिनिष्ठितरूपे अवर्णपरत्वमित्याशयेन उवर्णादेश एव स्थानिवत्स्यात् नान्य इति वदतां बोपदेवादीनां मते औनिनदित्येव भाव्यं।
अवर्णादेशस्य स्थानिवत्त्वे तु परिनिष्ठितरूपे अवर्णपरत्वालाभात् तथापि अचिकीर्त्तदित्यादौ स्थानिवत्त्वमाशंक्य उत्तरभागेऽवर्णाभावादिति। भाष्यकारो।
क्तपरिहारपर्यालोचनया उवर्णादेश एव स्थानिवदिति नियमो नास्तीत्यौननदिति रूपं निर्बाधमेव। किंच। उवर्णादेश एवेति नियमे लोपः पिबतेरी– च्चाभ्या
ससेति सूत्रे अपीप्यदित्यत्र पिबतेर्णौ पाघ्राध्मास्थेत्यादिना युकि चङि उपधालोपे तस्य स्थानिवत्त्वात् पायशब्दस्य द्वित्वमिति द्वितीयं चो विरुध्येत। अपि च। शु
ष्किकाशुष्कजंघाच क्षामिमानौजरत्तथेति वैयाघ्रपद्यवार्तिकस्थ ओनटदिति प्रयोगोऽपि विरुध्येत। एतद्धि पूर्वत्रासिद्धमित्यस्य प्रयोजनकथनं वार्तिकं।
तद्यथा। शुष्किकेत्यत्रोदीचामातस्थाने इतीत्वे विकल्पो न। शुषः क इति कत्वस्यासिद्धत्वेन यकपूर्वत्वाभावात्। शुष्कजंघेत्यत्र कत्वस्यासिद्धत्वादेव न कोपधा।
या इति पुंवद्भावनिषेधो न। क्षामिमानीत्यत्र तु मादुपधाया इति वत्वं न। क्षायो म इति मत्वस्यासिद्धत्वात्। वहेः क्तान्तात् णिचि चङि ओजढदित्यत्र ढत्वस्यासि
द्धत्वाण्णौ कृतस्य टिलोपस्य स्थानिवत्त्वाच्च हतशब्दस्य द्वित्वं। कुहोश्चुरभ्यासे चर्चेत्यन्वदिति त्वं तु अनग्लोपीति प्रतिषेधान्न भवति। एवं काशिकायामपि पूर्व
त्रासिद्धमिति सूत्रे ओजढदित्युदाहृत्य ऊढिमाख्यदौजिढदित्येतत्तु क्लिन्नं तस्य ऊढिशब्दस्य भवतीत्युक्तं तदपि विरुध्येत। ऊवर्णादेश एव स्थानिवदिति नि
यमे णौ कृतस्य टिलोपस्यात्र स्थानिवत्त्वाभावेन हतशब्दस्य हतिशब्दस्य वा द्वित्वासंभवात्। एवं चाकथातेर्णिच्यलोपे चङि स्थानिवत्त्वात् कशब्दस्य द्वित्वे
अचकदिति रूपमेव सर्वसंमतं न त्वचिकदिति बोपदेवोक्तमिति बोध्यं। नन्वचिकीर्त्तदित्यादौ स्थानिवत्त्वमाशंक्योत्तरभागे अवर्णाभावादिति वदन भाष्य।
कारेण बोपदेवग्रंथस्य प्रतिकूलः उत्तरभागे परिनिष्ठितरूपे अवर्णपरत्वमुवर्णादेशस्यैव संभवति नान्यस्येत्याशयेनैव भाष्यकारेण तथोक्तमिति वक्तुं शक्यं।
कत्वादिति चेत्। मैवं। तथाहि। सति पत्र ओः पुयण्ज्यपरे इत्यस्य प्राप्तिस्तत्राप्युवर्णादेश एव स्थानिवत्। ज्ञापकस्य सजातीयापेक्षत्वादित्येवमेव भाष्यकारो वदे
त्। ऋजुमार्गेण सिध्यतोऽर्थस्य वक्रेण साधनायोगात् इति दिक्। संकेतिताश्चत्वारोऽत्र धातवः। पाठांतरमिति। संकोचनं इत्येतत्पर्यंतं। अनेकाच्त्वेनाबोपदेशात्वा
त्सत्वं नेति ध्वनयति। अतिस्तेनदिति। गृह्यते इति। अल्लोपस्य स्थानिवत्त्वान्न गुणः॥

राम·
८९

385

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लुङि-अजगद्दत्। अग्लोपान्नसन्वद्भावः। मृगयतेइति। मार्गयति मार्गतीतितु मार्गअन्वेषणेइत्यस्य रूपमीयस्य अर्थे। अर्थयतइति। ष्ठेर्लोपोवलीयानइत्यल्लोपान्नवृ
द्धिः। वोपदेवस्तु दृष्टोक्तनायांपुकि वाऽर्थापयतेइतिरूपमाह। तन्न। स्मभस्तात्। नचार्थवेदस्यानामिस्तापुक् स्यादेवेतिवाच्यं। तत्र प्रातिपदिकस्यग्रहणात्॥ ॥
अदंतत्वसामर्थ्यादिति। कथादिषु उपधावृद्धिदीर्घसन्वद्भावविरहेणाक्षारआमप्रभृतीनांउपधाकृस्वस्यग्रहमृगप्रभृतीनांउपधागुणस्य च व्यावर्त्तनेनअदंतत्वसा
र्थकंइहत्वदंतत्वेप्रागुक्तफलाभावात्‌णिचःपाक्षिकत्वं ज्ञापयतीतिभावः। ननु अदंतत्वसार्थकत्वायवाल्लोपइतिप्राचोक्तमेवाभ्युपगम्यतामितिचेत्। अत्राहुः
। चिंतयतेरिदित्वंसामान्यापेक्षं ज्ञापकमिति मतेइह अदंतत्वस्यफलं स्पष्टमेव। विशेषापेक्षं ज्ञापकमितिमते तु तत्रतत्र आकारईकारउकारऊकाराश्चेसन्तु।

अदन्तत्वसामर्थ्याणिज्विकल्पः। धातोरन्तउदात्तः। लिप्याम् चफलम्। एवमग्रेपि। इत्यागर्वीयाः। सूत्रवेष्टने। सूत्रयति। असुसूत्रत्। मूत्रप्रस्र
वणे। मूत्रयति मूत्रति। रूक्षपारुष्ये। पारतीरकर्म्मसमाप्तौ। अपपारत्। अतितीरत्। पुटसंसर्गे। पुटयति। धेकदर्शनेइत्येके। अदिधेकत्। कत्र
शैथिल्ये। कत्रयति। कत्रति। कर्त्रेत्यप्येके। कर्त्तयति। कर्त्तति। प्रातिपदिकाद्धात्वर्थेबहुलमिष्ठवच्च। प्रातिपदिकाद्धात्वर्थेणिच् स्यादिष्ठेय
था प्रातिपदिकस्य पुंवद्भावरभावटिलोपविन्मतुल्लोपयणादिलोपप्रस्थस्फाद्यादेशभसंज्ञास्तद्वणावपिस्युः। पटुमाचष्टे पटयति। पटत्वा
इत्यौ सस्यांटिलोपः। अपीपटत्। णौचङ्युपधायाःह्रस्वभाव्येतु ष्ठेर्लोपोवलीयानितिस्थितम्। अपपटत्। तत्करोतितदाचष्टे। पूर्वस्यप्रपञ्चः। करो

वंधाः यथाज्ञापकतयास्वीकृताः। तथा अदंततापिणिच्विकल्पमेवज्ञापयतु उक्तरीत्यैव णिज्विकल्पेनक्लृ ९ त्याचष्टइति धात्वर्थमात्रेणिजर्थेः
तार्थत्वेऽपूर्वस्यलोपबाधस्यकल्पनायाअन्याय्यत्वात्। सर्वथाहिसतिमतद्वयेप्येकरूपमेवफलंलभ्यतेइति। असुसूत्रदिति अनेकाच्त्वान्नषत्वं। प्रा
तिपदिकादिति। यदिसुवंताण्णिच्स्यात्तदासजयतीत्यादौकुत्वं स्यात् इतिभाव इतिकेचित्। तन्न। इष्ठवत् भावेनभत्वेकुत्वस्याप्रसक्तेः। अत्रबहुलंणिच्
स्यात्सचणिच्इष्ठवत्भवतीति अन्वयात्पक्षेवाक्यमपिभवतीत्याह। पटुमाचष्टइति। धात्वर्थइत्यनेनकरणाख्यानादिर्गृह्यतेइतिभावः। ननुवहुत्या
चष्टेभावयतीत्यत्रइष्ठस्यपिइति णिचोपिपिद्स्यात्। अत्राहुः। टेरितिसूत्रेणाविष्ठवत्। प्रातिपदिकस्येतिवार्तिके प्रातिपदिकग्रहणंप्रत्ययकार्या णा

॥णिदेद्याभाद्दिसैवभक्तैः॥

तेनात्र णिचोपि एन भवति। तदभावे भूभावेनापि न भवितव्यं। संनियोगशिष्टत्वात्। किंतु वहयन्तीत्येव भवितव्यमिति मतांतरं। एतच्चात्रैव सूत्रे कैयटे स्पष्टमिति
अन्ये त्वाहुरिष्ठवदिति हि सप्तम्यंताद्वतिर्णाविष्ठस्योपमेये सप्तमीदर्शनात्तेन इष्ठनि परे पूर्वस्य यत्कार्यं तदतिदिश्यते तेन त्विष्ठनोपीति पुंवद्भावे ति। अतिशये
न पट्वी पटिष्ठेत्यत्र भस्याढे तद्धिते इति पुंवद्भावः। कृशिष्ठः। दृढिष्ठ इत्यत्र रऋतो हलादेरिति रभावः। साधिष्ठ इत्यादौ टिलोपः। अतिशयेन स्रग्वी स्रजिष्ठ इत्यत्र।
विन्मतोर्लुगिति विनो लुक्। अतिशयेन गोमान् गविष्ठ इत्यादौ मतुपो लुक्। स्थविष्ठ इत्यादौ स्थूलदूरेत्यादिना यणादिलोपः। प्रेष्ठ इत्यादौ प्रियस्थिरेत्यादिना
प्रस्थाद्यादेशः। तद्वृत्ताबपीति। पुंवद्भावस्योदाहरणमेनीमाचष्टे एतयति। टिलोपेनैव सन्नियोगशिष्टत्वान्नकारनिवृत्तौ सिद्धायां पुंवद्भावग्रहणं दरदमाच
ष्टे दारदयतीत्यादि सिध्यर्थमिति बोध्यं। दृढयतीत्यादौ रभावः। स्रग्विणमाचष्टे स्रजयतीत्यत्र विनो लुक्। गोमंतमाचष्टे गवयतीत्यत्र मतुपो लुक्। अगवदनप।
रिभाषया वृद्धिरत्र न भवति। प्रियमाचष्टे प्रापयति स्थिरमाचष्टे स्थापयतीत्यादौ तु वृद्धिर्भवत्येव। वृद्धोरिति निर्देशेन तत्स्थान्यपरिभाषाया अनित्यत्वज्ञाप
नादिति दिक्। परत्वाद्वृद्धाविति। लोपः शाकल्यस्येत्यत्र स्थाऽनित्यः। वृद्धिरप्यनित्याऽ उभयोरनित्ययोः परत्वाद्वृद्धिस्तस्यां कृतायामौकारस्यावादेशात् प्रागेव पर
त्वाद्वार्णादांगस्य बलीयस्त्वाच्च लोप इत्यर्थः। एवं चानग्लोपित्वादीर्घसन्वद्भावौ स्त इत्याह। अपीपरदिति। इह टिलोपस्य स्थानिवद्भावेन व्यवधानाद्दी।
र्घसन्वद्भावौ नेति न भ्रमितव्यं। स्थानिवत्त्वेप्यंगस्य णिच्यरत्वानपायात्। चङ्परे णौ यल्लघ्विति पक्षेपि अभ्यासस्यत्यादिष्टादचः पूर्वत्वेन स्थानिवत्त्वमेव
नास्तीति दीर्घसन्वद्भावौ स्त एव। केचित्तु चङ्परे णौ यल्लघ्विति पक्षे पटुशब्दोकारस्य वृद्धौ कृतायां णिपरं लघु दुर्लभमिति सन्वद्भावाप्राप्त्याऽपपटदित्येवरू
पं। प्रथमं टिलोपः पश्चाद्द्विर्वचनमिति मत्वा अभ्यासस्य आदिष्टादचः पूर्वत्वं न स्थानिवत्त्वमेव नास्तीति मनोरमोक्तं यत्तन्नादर्तव्यं। णिच्यचः आदेशो न स्या
न् द्वित्वे कर्तव्ये इति निषेधपक्षस्य मुख्यतया प्रागुक्तत्वेन प्रथमं टिलोपस्य दुरुपपादत्वादित्याहुस्तन्मंदं। अपीपटदित्यत्र द्वितीयाच्परत्वेन तस्य प्रथमाव
यवस्य द्वित्वमिति हि निर्विवादं। तथा च द्वितीयस्याचो द्वित्वाकरणात् प्रथमं टिलोपः स्यादेवेति। वृद्धेर्लोप इति। कृताऽकृतप्रसंगिमात्रेणालोपो नित्यः। एम॰
वृद्धिस्त्वनित्या। टिलोपे सति स्थानिनः पूर्वत्र कर्तव्यायां लोपस्य स्थानिवत्त्वात् स्वविधौ स्वस्य स्थानिवत्त्वाभावाच्च। असिंल्लुप॰॥ १ ॥ १ ॥ ९०

386

क्षमुं डमिश्चेति सूत्रे हलिकल्योरदंतत्वनिपातनस्यैवेप्यर्थ्यमेव। नुडेः प्राक् टिलोपेसति अग्लोपित्वसंभवात्। तथा चादंतत्वनिपातनसामर्थ्याट्टिलोपात् पूर्वं।
वृद्धिरेवेसनग्लोपित्वादपीपटदित्येवरूपं साध्विति प्रतीयते। भाष्यद्वयप्रामाण्याद्रूपद्वयमपि साध्विति वहवः॥ ॥लडर्थस्त्विति। करोत्याचष्टे इति हि
कर्तरि वर्तमाने लडेकवचनं। लडर्थाविवक्षायां तु एयंता त् भावकर्मणोः भूतभविष्यतोर्हि लवहुत्वयोश्च प्रत्ययो भवत्येवेति भावः। यद्यप्येकत्वादि संख्याल
डर्थो न भवति तथापि लडादेशा तिङर्थो पीह लडर्थत्वेन गृहीत इति ज्ञेयं। तेनातिक्रामति। ततो या प्रकृतिभूता तत्प्रातिपदिकात् णि चतृतीयांतात् णिजित्यन्ये।
एवं तत्करोतीत्यत्रापि द्वितीया प्रकृतिभूता द्वितीयांताद्वा णिच्। न च सुवंताण्णिचि वाचंकरोत्याचष्टेवाचाऽतिक्रामति वा चयतीत्यत्र कुत्वेस्यादितिशं
क्यं। इष्टवत्भावेन भसंज्ञया पदसंज्ञाया वाधात्। यशस्विनमाचष्टे यशस्यति। स्रग्विणमाचष्टे स्रजयतीत्यादौ विनोर्लुकि प्राप्तस्य पदकार्यस्य वाधार्थं।

लडर्थस्त्वविवक्षितः। तेनातिक्रामति। अश्वेनातिक्रामति। अश्वयति। हस्तिनातिक्रामति। हस्तयति। धातुरूपञ्च। णिच्प्रकृतिर्धातुरू
पम्प्रतिपद्यते। चशब्दोऽनुक्तसमुच्चयार्थः। तथा च वार्त्तिकम्। आख्यानात्कृतस्तदाचष्टे कृल्लुक्प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारक
मिति। कंसवधमाचष्टे कंसं घातयति। इह कंसहन इति स्थिते। हनस्तोऽचिण्णलोः। ७।३।३२। हन्तेस्तकारोन्तादेशः स्याच्चिण्णल्वर्ज्जे ञ्णिति।
णिति। नन्वत्राङ्गसंज्ञा धातुसंज्ञा च कंसविशिष्टस्य प्राप्ता। ततश्चाट्द्वित्वयोर्दोषः। किञ्च। कुत्वतत्वेन स्यातां धातोः स्वरूपग्रहणे तत्प्रत्यये
भसंज्ञातिदेशस्यावश्यकत्वात्तत्करोतीत्यादिनिर्देशानुगुणत्वाच्च सुवंताण्णिजिति पक्ष एव न्याय्यानि साहुः। णिच् प्रक १ येकार्य्यविज्ञानात्। स
तिरिति। वधशब्दो णिच्प्रकृतिरिदानीं तु कृल्लुक्यवशिष्टभाग एव प्रकृतिरित्यर्थः। आख्यानात् कृत इति। यद्यपि वधशब्दः कृदंतः सम्प्रत्याख्यानं न भवति
तथाप्याख्यानवाचीकृदंतश्च कंसवधशब्दो भवत्येव कृत्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात् कृल्लुगिति। हनश्च वध इति विहितस्य प्रत्ययस्य लुक्
प्रकृतिप्रत्यापत्तिरिति विकारपरित्यागेन स्वरूपेणावस्थितिरित्यर्थस्तदेतत्सकलमभिप्रेत्याह। कंसहन इति स्थिते इति। कंसविशिष्टस्येति। तस्मादेव णिचो
विधानादिति भावः। दोष इति। कशब्दात्पूर्वमडागमः कंस इत्यस्य द्विर्वचनं स्यादित्यर्थः। किं चेति। एवं च कंसमजीघतदिति इष्टम्। न सिध्येदिति भावः। तत

CC-0. In Public Domain. Digitization by eGangotri



हितप्रत्यये। तेन वार्त्तेत्यमित्यत्र हननस्य इतित्वं न भवतीति ज्ञेयं। उक्तदोषानुपरिहरति। स समिति॥ ⁂ ॥ प्रकृतिवच्चेति चकारोऽनुक्तसंग्रहार्थ इत्याह। चात् का
प्रकृतिवच्चेति चकारो भिन्नक्रमः कारकञ्च चात्कार्य्यम्। हेतुमति च। प्रकृतेर्हन्त्यादेर्हेतुमण्णौ यादृशाङ्कारकन्यातावनन्तर्भूतं द्वितीयान्तं।
यादृशञ्च कार्य्यं कुलत्वादि तदिहापीत्यर्थः। कं समजीघनत्। कर्त्तृकरणाद्धात्वर्थे। कर्त्तुर्व्यापारांश्चेयत्कारणं न तु चक्षुरादिमात्रमित्यर्थः
असिना हन्ति। अस्यति। वष्कदर्शने। चित्र चित्रीकरणे। आलेख्यकरण इत्यर्थः। कदाचिद्दर्शने। चित्रं त्वयमद्भुतदर्शने णिचं लभते। चित्र
यति अंसस माघाते। वट विभाजने। लज प्रकाशने। वटिलजि इत्येके। वण्टयति। लञ्जयति। अदन्तेषु पाठ्वलादन्ते दृद्धिरित्यन्ये वाटप
यति। लज्जापयति। शाकटायनस्तु कथादीनां सर्वेषां पुकमाह। तन्मते कथापयति। गणापयतीत्यादि। मिश्र सम्पर्के। संग्राम युद्धे। अयमनुदात्ते
त्। अकारप्रश्लेषात्। अससंग्रामत। स्तोम श्लाघायाम्। अतुस्तोमत्। छिद्र कर्णभेदने। करणभेदन इत्यन्ये। कर्णेति धात्वन्तरमित्यन्ये। अ
न्ध दृष्ट्युपघाते। उपसंहार इत्यन्ये। आन्दधत्। दण्ड दण्डनिपातने। अङ्क पदे लक्षणे च। आञ्चकत्। अङ्ग च। आञ्जगत्। सुख दुःख तत्क्रि
यायाम्। रस आस्वादनस्नेहनयोः। व्यय वित्तसमुत्सर्गे। अवव्ययत्। रूप रूपक्रियायाम्। रूपस्य दर्शनं करणं वा रूपक्रिया। छेद द्वैधीकरणे
अचिच्छेदत्। छद अपवारण इत्येके। छदयति। लाभ प्रेरणे। व्रण गात्रविचूर्णने। वर्ण वर्णक्रियाविस्तारगुणवचनेषु। वर्णक्रिया वर्णक
रणम्। सुवर्णं वर्णयति। कथां वर्णयति विस्तृणातीत्यर्थः। हरिं वर्णयति स्तौतीत्यर्थः। बहुलमेतन्निदर्शनम्। अदन्तधातुनिदर्शनमित्य
र्थः। बाहुलकादन्येऽपि बोध्याः। तद्यथा। पर्ण हरितभावे। अपपर्णत्। विष्क दर्शने। क्षप प्रेरणे। वस निवासे। तुत्थ आवरणे। एवमान्दोलय
ति। प्रेङ्खोलयति। विडम्बयति। अवधीरयतीत्यादि। अन्ये तु दशगणीपाठो बहुलमित्याहुः। तेनापठिता अपि सौत्रलौकिकवैदिका बोध्याः
येमिति। यद्यप्यनन्तरातिदेशेनाप्यङ्द्विर्वचने सिध्यतः। तथापि धातावनन्तर्भूतद्वितीयान्तादिलाभाय कारकातिदेशः। कार्यातिदेशस्तु कुत्वतत्वा



387

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिलाभायेतिविवेकः। इह भारतभागवतादिप्रसिद्धे कंसवधाद्युपाख्याने एव णिजिति नाग्रहः किंतु उपाख्यानमात्रे तेन राजागमनमाचष्टे राजानमागमयतीत्यादि
सिध्यति। इह हन्तप्रकृतौ राज्ञः कर्तृत्वेपि गमेर्हेतुमण्णौ गतिबुद्धीत्यनेन तस्य कर्मत्वमिति द्वितीयांतमेव रूपातिदेशवलात्तस्ती क्रियते देवदत्तपाकमाचष्टे देवदत्ते
न पाचयतीत्यत्र तु देवदत्तस्य कर्तृत्वात् न पायातत्ततीयैव भवति। रुक्मिणीहरणमाचष्टे इत्यादौ हृक्रोरन्यतरस्यामिति विकल्पात् रुक्मिणीं रुक्मिण्या वा हारयतीति प्र
योगः। कर्तृकरणादिति। कर्तृग्रहणाभावे चक्षुषा पश्यति चक्षुयतीत्यादावेव स्यान्न तु करिभिरवव्याति अवकारयतीत्यादौ। लोके इंद्रियाणामेव करणत्वेन सुप्र
सिद्धत्वादतः तत्संग्रहार्थं कर्तृग्रहणमिति मनोरमायां स्थितं। तन्व्यास्तु साधकतमत्वेन विवक्षितं यत्तत्तत्करणशब्देन गृह्यते न तु लोकप्रसिद्धकरणमेवा अ

अपरे तु नव गणी पाठो बहुलमित्याहुः। तेनापठितेभ्योपि क्वचित्स्वार्थे णिच्। रामो राज्यमचीकरदिति यथेत्याहुः। चुरादिभ्य एव बहुलं णिजि
त्यर्थ इत्यन्ये। सर्वे पक्षाः प्राचां ग्रन्थे स्थिताः। णिङङ्गान्निरसने अङ्गं वा चिनः प्रातिपदिकान्निरसने र्थे णिङ् स्यात्। हस्तौ निरस्यति हस्तयते
। पादयते। श्वेताश्वाश्वतरगालोडिताह्वरकाणामश्वतरेतकलोपश्च। श्वेताश्वादीनां चतुर्णामश्वादयो लुप्यन्ते णिङ् धात्वर्थे। श्वेताश्वमा
चष्टे तेनातिक्रामति वा श्वेतयते। अश्वतरमाचष्टे ऽश्वयते। गालोडितं वाचां विमर्शः। तत्करोति गालोडयते। आह्वरयते। केचित्तु णिचमेवानु
वर्तयन्ति तन्मते परस्मैपदमपि। पुच्छादिषु धात्वर्थ इत्येव सिद्धम्। णिजन्तादेव बहुलवचनादात्मनेपदमस्तु। मा भवान् पुच्छ भाण्डेति णिङ्। घिः

न्यथा कर्तृकरणयोस्तृतीयेत्यादावपि लोकप्रसिद्धकरणग्रहणप्रसक्त्या वाणेन हत इत्यादिरूपं न सिद्ध्येत् ॥ सिद्धशब्दो ग्रन्थान्ते मङ्गलार्थः। इति चुरादिः
तथा च कर्तृग्रहणं विनाप्यवकारयतीति रूपसिद्धौ न किंचिद्बाधकमिति व्याख्याय कर्तृकरणादित्यत्र समाहारद्वंद्वं मत्वा देवदत्तेन पाचयति देवदत्तयतीत्युदा
जहुः। कदाचिद्दर्शने। चित्रकरणकदाचिद्दर्शनयोरिति सुवचं। अदंतेत्युपाठबलादिति। अदंतस्य फलान्तराभावादतो लोपं वाधित्वा वृद्धिरित्यर्थः। संग्रामः। सं
ग्रामयति युद्धवाचि प्रातिपदिकं करोतीत्यर्थे णिचं लभते। अनुदात्तेदिति। एतच्च मृषादिभ्यो भुवीति सूत्रे कैयटेनोक्तं। अकारप्रश्लेषादिति। तेन प्रश्लिष्टस्येत्सं
ज्ञा मकसकारस्य तु इत्ववदिति टिलोपः। तथा च अग्लोपादसंग्रामते सत्र नोपधाह्रस्वः। सुखदुःखतच्छब्देन सुखदुःखे प्रातिपदिकार्थौ परामृश्येते प्राति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति· सि·कौ· बो·न· ९२

पदिकाद्वात्त्वर्थे इत्येव सिद्धे अनयोः पाठः सोपसर्गोत्स्तस्यार्थ इत्येके। सुखदुःखाभ्यां तत्क्रियायामेव णिच स्यान्नत्वाचष्ट इत्यस्मिन्नर्थे इत्येतदर्थः पाठ इत्यन्ये पुच्छा
दिष्विति भीमसेनस्यवाक्योग्रंथांतइति। भूसत्तायामित्यादिधातुपाठस्यांतइत्यर्थः॥ इति चुरादयः॥ ॐ ॥ तत्प्रयोजको हेतुश्चेत च्छब्देन स्वतंत्रः कर्तेति पूर्वसूत्रोपा
त्तः कर्तापरामृश्यते। तस्य कर्तुः प्रयोजकः प्रेरकः॥ ॥ तद्व्यापारानुकूलव्यापारवानित्यर्थः। चकारः एकसंज्ञाधिकारबाधनार्थस्तदाह। हेतुसंज्ञः कर्तृसंज्ञश्चेति। हे
तुसंज्ञायाः प्रयोजनं भीस्म्योर्हेतुभये भियो हेतुभये षुगित्यादौ प्रयोजकस्य हेतुत्वेन व्यवहारः। कर्तृसंज्ञायास्तु लः कर्मणि च भावे चेति सूत्रेण प्रयोजके वाच्ये ल
कारादयः॥ हेतुमति च स्वनिष्ठाधारतानिरूपिताधेयतासंबंधेन हेतुर्यत्रास्ति स हेतुमान्व्यापारः। तस्मिन्वाच्ये णिजित्याह। प्रयोजकव्यापार इति। प्रयोजा
कश्चेतनाचेतनसाधारण्येन विवक्षितः स च क्वचित्सिद्धः क्वचित्फलरूपः देवदत्तः पाचयति गमयती त्यादौ सिद्धः। भिक्षावासयति संग्रामो वासयतीत्यादौ

तत्प्रयोजको हेतुश्च। १।४।५५। कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च स्यात्। हेतुमति च। ३।१।२६। प्रयोजकव्यापारे प्रेषणा
दौ वाच्ये धातोर्णिच् स्यात्। भवन्तं प्रेरयति। भावयति। णिचश्चेति कर्तृगे फलेत्मात्मनेपदम्। भावयते। भावयाम्बभूव· ॥

तु फलरूपः प्रेषणादावि ति। भृत्यादेर्निकृष्टस्य प्रवर्तना प्रेषणा। आज्ञेत्यर्थः। आदिशब्देनाध्येषणानुमत्यादीनामुपादानं समानस्याधिकस्य वा सत्कृत्वि
गाचार्यादेः प्रवर्तना अध्येषणा। प्रार्थनेत्यर्थः। अनुमतिस्तु राजादेः संमतिः तां विना यागादिक्रियानिष्पद्यत इत्यनुमतिमात्रेण राजादिः प्रयोजकः। अनुमत्यादी
त्यादिशब्देनात्रोपदेशानुग्रहयोरुपादानं ज्वरितः कषायं पिबेदित्युपदेशमात्रेण वैद्यादिः प्रयोजकः। यस्तु केनचिद्दंतुमिष्टं पलायमानं निरुणद्धि सोपि हंतु
रनुग्राहकत्वेन प्रयोजकः। सर्वेप्येते विशेषाः कथं णिच्प्रत्ययगम्या इति चेत्। अत्राहुः। सर्वानुगतं प्रवर्तनासामान्यं णिचोर्थः विशेषास्तु अर्थप्रकरणा
दिगम्या इति। नन्वेवं णिचो लोडादीनां च पर्यायता स्यात्तत्तश्च इदानीं पृच्छतु भवानिति वक्तव्ये प्रच्छयतीति णिजपि प्रयुज्येतेति चेन्न। मैवं। कर्तुः प्रयोजको हि हे
तुः प्रैषविषयायः संबोध्यो देवदत्तादिः स तु नाद्यापि प्रश्नकर्तृत्वेनावधारितः। तथा च प्रयोज्यप्रवृत्त्युपहितायाः प्रयोजकनिष्ठप्रवृत्तिः सा णिजर्थस्तदनुपहिता

राम· ९२

388

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रयोजकप्रवृत्तिस्तु लोडर्थ इत्युभयोर्भेदः। उक्तं च। द्रव्यमात्रस्य तु प्रैषे प्रच्छादेर्लोड्विधीयते। सक्रियस्य प्रयोगस्तु यदा स विषयो णिच इति। अस्यार्थः। कर्त्रे
त्वेनानवधारितस्य देवदत्तादेस्तु प्रैषे प्रच्छत्री भवायामीत्यादेर्लोड् भवति प्रयोज्यप्रवृत्तेस्तु पदहितप्रवृत्त्याश्रयस्य प्रयुक्तिस्तु यदा सा णिचो विषय इति। किं च
प्रयोक्तृनिष्ठा प्रयुक्तिर्लोडर्थः प्रयोक्तृप्रयोज्यकर्तृका तु णिजर्थः। पचेद्देवदत्तेत्यत्र हविष्कर्त्तेव प्रेरकः पाचयतीत्यादौ तु भिन्नः पाचयामीत्यादौ तु वक्तेति दिक्
॥ ॐ ॥ ओः पुयण्जि। पुयण्जीति समाहारद्वन्द्वात्सप्तम्येकवचनं। अपरे इति बहुव्रीहिः। अत्र लोपोऽभ्यासस्येत्यतः अभ्यासस्येत्यनुवर्त्तते भृञामिदित्या

ओः पुयण्ज्यपरे। ७।४।८०। सनि परे यदङ्गं तदवयवाभ्यासोकारस्येत्त्वं स्यात्पवर्गयण्जकारेष्ववर्णपरेषु परतः। अबीभवत्। अपीपवत्। मूङ्
अमीमवत्। अयीयवत्। अरीरवत्। अलीलवत्। अजीजवत्। स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा। ७।४।८१। एषामभ्या
सोकारस्य इत्त्वं वा स्यादवर्णपरे धात्वक्षरे परे। असिस्रवत्। असुस्रवत्। नाग्लोपिशास्वृदिताम्। इति ह्रस्वनिषेधः। अशशासत्। अडुढौकत्। अचीच
कासत्। मतान्तरे अचचकासत्। अग्लोपीत्युक्त्यात्तु मकरलोऽदाहरिष्यते। एयन्ताणिश्च। पूर्वविप्रतिषेधादपवादत्वाद्वा वृद्धिं बाधि
त्वा णिलोपः। वीरयति। णौ चङ्युपधाया ह्रस्वः। दीर्घो लघोः। न चाग्लोपित्वाद् द्वयोरप्यसम्भवः। एयाकु ति निर्देशात्। अचूचुरत्। णौ च संश्चङोः ॥
६।१।३१। सन्परे चङ्परे च णौ श्वयतेः सम्प्रसारणं वा स्यात्। सम्प्रसारणं तदाश्रयं च कार्यं बलवदिति वचनात्सम्प्रसारणं पूर्वरूपम्।
तत इङ्द्वित्वम्। ततः सनीतिचयङ्गस्येति तु अधिक्रियत एव तदेतदभिप्रेत्याह। सनि परे यदङ्गमि ११ अशूशवत्। अलघुत्वान्न दीर्घः। अशिश्वयत्।
इत्यादि। अपरे किं। बुभूषति। पवर्गयण्जीति किं। ऊर्णुनविषति। अबीभवदित्यादि। भूसत्तायां। पूङ् पवने। मूङ् बंधने। यु मिश्रणादौ। रु शब्दे। लूञ् छेद
ने। जु गतौ। सौत्रोऽयं धातुः। चंक्रम्यस्तत्र निर्दिष्टः। ननु भू सू इति ह्रि त्वोत्तरं वृद्ध्यावादेशौ भवनं ततः कृते तस्य णौ चङीति ह्रस्वस्य स्थानिवद्भावेन लघुपर।
त्वाभावात्सन्वद्भावाप्रवृत्त्या अबीभवदित्यादावभ्यासोवर्णस्येत्त्वं दुर्लभमिति चेत्। अत्राहुः। आरम्भसामर्थ्यादेव न स्थानिवत्त्वमिति ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·
सि·कौ·
टी·त·
९३

स्तवतिस्मरोणाति। अपरइत्यनुवर्त्ततेनत्तुपुपयणजौति। पवर्गनकारयोरसंभवाद्यणः संभवेपिअव्यभिचारान्नदाह। अवर्णपरेधात्वक्षरइति। असरशब्दे
त्रवर्णपरः। अवर्णपरेकिं। शुश्रूषति। स्रवोस्यादेहदाहरणानु अशिश्रवत्। असुस्रवत्। अदिद्रवत्। अदुद्रवत्। अपिप्रवत्। अपुप्रवत् अचिच्यवत्।
अचुच्यवत्। अडुढौकदिति। ढौकृगतौ। चङ्परेणौयदंगंतस्ययोऽभ्यासोलघुपरइतिपक्षाश्रयेणाह। अचीचकासदिति। सनांतरइतिअंगंयत्रद्विरुच्य
तेइतिमते चङ्परेणौयल्लघुततुपरोयोअंगस्याभ्यासइतिमतेचेत्यर्थः। सुपूर्धातुप्रकरणइति। अतितिरायत्। असस्रघायत्। अविविघ्नद्रायत्। अदिद्दे
वद्रायदित्याद्युदाहरिष्यतइत्यर्थः। हृद्दिंवाचिखेति। एषलोपायिपङ्स्यादिवचनाणिलोपाघ्रास्याख्यानपक्षेअपवादत्वाहेत्यर्थः। असंभवइति
।तथाच। अचुचो रदित्सेवरूपमितिभावः। ल्याकृतिनिर्देशादिति। चङ्परेणाविव्यत्रचङ्परेणौत्वेइत्यर्थेत्वेनणिहृयेसत्यपिणौत्वंचङ्परमस्तीति

सन्मुस्मिवुस्मरहात्र्वाङि। ८।३।११६। एषांसस्यषोनस्याच्चङि। अवातस्तम्भत्। पर्यषीषिवत्। न्यसीषहत्। आटिटत्। आशिशत्।
वहिरङ्गोप्युपधाह्रस्वोद्वित्वात्प्रागेव। ओणोऋदित्करणाल्लिङ्गात्। माभवानिदिधत्॥ ९. ह्रस्वदीर्घयोरत्रिसंभवइतिभावः। एतेनअवी
वदद्वीणांपरिवादकेनेत्यादौसन्वद्भावोव्याख्यातस्तत्रापीत्थमेवपूर्वपक्षसिद्धांतयोस्तुल्यत्वात्। णौच। विभाषाश्वेरित्यनुवर्त्ततेसंश्चङोरितिणावि।
सस्यविशेषणांव्हः संप्रसारणमित्यतः संप्रसारणमनुवर्ततएवेत्याह। सन्यपरेचङ्परेचेत्यादि। वचनादिति। इयंचपरिभाषालिंग्यभ्यासस्योभयेषा
मित्यत्रवच्यादीनांग्रहादीनामनुवृत्तैवेष्टसिद्धावुभयेषांग्रहणसामर्थ्याल्लभ्यते। अन्यथावत्रश्वेत्यत्रहलादिःशेषेकृतेवस्यसंप्रसारणंस्यादि। 389
त्याहुः॥ ॐ ॥सन्मुस्मिवेति। स्तंभुः सौत्रः। षिवुतंतुसंताने। षहमर्षणे। स्तंभतेः स्तम्भेरित्यनेनप्राप्तिरस्ययोस्तुपरिनिविभ्य इत्यनेनेतिविवेकः। आ
टिटत्। आशिशदिति। णिचासहद्वित्वात्सन्वद्भावोनेतितत्विषयेविहितोयोदीर्घोलघोरितिदीर्घः सनप्रवर्त्तते। ऋदित्करणाल्लिङ्गादिति। यदि। राम·
पूर्वेद्विर्वचनंभवेत्तदाणिशब्दस्यद्वित्वेसत्युपधाह्रस्वस्याप्राप्तेस्तत्प्रतिषेधार्थमृदित्करणंव्यर्थंस्यादतस्तदुक्तोऽर्थेज्ञापकमेव ॥ ६ ॥ ६ ॥ ९३

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एजादावेधताविति। एत्येधत्यूठ्स्विति सूत्रे एजाद्योरेत्येधत्योरिति व्याख्यानात्त्वादिति भावः। नच माभवान्प्रेदिधत् इत्यत्र गोवृद्धीति ह्रस्वे कृते नायमेधतिरिति वृद्धेरप्रवृत्तौ।
किमेधतेरेजादिविशेषणेनेति वाच्यं। एकदेशविकृतस्यानन्यत्वात्। न चैवमपि अजादेर्द्वितीयस्येति धिशब्दस्यानेधिधिशब्दादेशोऽस्त्विति वत्सलस्रोरिव प्रकृतिप्रस
यविभागसंमोह इति वाच्यं। द्विःप्रयोगो द्विर्वचनं षाष्ठमिति भाष्ये सिद्धान्तितत्वात्। अन्यथा इहैव प्रेदिधदित्यत्र णिलोपो न स्यात्। जिघांसतीत्यादौ सनः सकारेण वि
शिष्टस्य द्वित्वे कृते कुत्वं च न स्यादिति दिक्। उब्ज आर्जवे इति। अयमुपध्मानीयोपध इति वार्तिककृतोक्तं। तस्य झलां जशोऽन्ते इति जश्त्वेन बकारे कृते उब्जिता। उब्जि
मिति रूपं। एतच्चायोगवाहानां शर्षु पाठस्य फलं। भाष्यकारादयस्तूपध्मानीयोपधपाठे उब्जिजिषतीति रूपं न सिध्येत्। यदि पूर्वत्रासिद्धीयमद्विर्वचने इत्याश्रित्य व
कारोत्तरं द्वित्वं क्रियते यदि वा अस्यानिस्तथा माश्रित्य वकारात् पूर्वमेवोपध्मानीयस्य द्वित्वमुभयथापि इष्टरूपासिद्धिः। यद्यपि उब्जिजिषति द्वितीयेनोपध्मानीयस्य

एजादावेधतौ विधानान्न वृद्धिः। माभवान्प्रेदिधत्। नन्द्रा इति नदराणां न द्वित्वं। औन्दिदत्। आड्डिडत्। आर्चिचत्। उब्ज आर्जवे। उपदेशे
दकारोपधः। भुजन्युब्जौ पाण्युपतापयोरिति सूत्रे निपातनाद्दस्य बः। स चानतरङ्गोऽपि द्वित्वविषये नन्द्रा इति निषेधाज्जिशब्दस्य द्वित्वे कृते।
प्रवर्त्तते। ननु ततः प्राक् दकारोच्चारणसामर्थ्यात्। औब्जिजत्॥ ॥ ९९ चत्वात्तदादेरजादेर्द्वितीयस्येति द्वित्वे हलादिःशेषे द्वितीयोपध्मानीयस्य ज
श्त्वेन बकारे पश्चात् प्रथमस्यापि तथैव बकारे उब्बिजिषतीत्यापन्ने ततः इष्टसिद्ध्ये दकारोपधोऽयं स्वीकार्यः। भुजन्युब्जाविति निपातनादुपधादकारस्य बो भव
तीति वाक्यं कल्प्यते न च स्तोः श्चुना श्चुरित्यस्यायं। तदयमर्थः। श्चुना योगे उद्जे दकारस्य बकार इति। अभ्युद्गः समुद्ग इत्यत्र तु उब्जिता उब्जितुमित्यत्र च चवर्गयोगो
नास्तीति न कारः। दकारोपधे चास्मिन् स्वीकृते नन्द्रा इति निषेधाज्जिशब्दस्य द्वित्वे ततो बकारे च उब्जिजिषतीति सिध्यति रूपं। न च पूर्वत्रासिद्धीयमद्विर्वचने इति
बकारोत्तरं द्विर्वचने सति स्यादेवानिष्टमिति वाच्यं। द्विर्वचने दित्रेपादिकं सिद्धं न तु तन्निषेधेऽपि तथा च निषेधे त्रिपादीस्थस्यासिद्धत्वान्नन्द्रा इति निषेधः प्रव
र्त्तते। यद्वा। तादृशवाक्यमिह न कल्प्यते किं तु भुजन्युब्जाविति निपातनेन दस्य बः इति। न चैवं बकारक्षहितस्य द्वित्वप्रसंगः। धातोर्दकारोच्चारणसामर्थ्यात्। न चा
भ्युद्गः इत्यादावपि बकारश्रवणप्रसंगः। अकुत्वविषय॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति·
सि·कौ·
टी·त·
९४

एवचकारनिपातनाभ्युपगमात्। यद्वा। अभ्युदङ्ङित्यादिरूपं त्वनुपसर्गोऽस्मेवं प्रत्ययेऽपि ज्ञेयं। उदङ्जेरनुपत्त्रिअनभिधानात् प्रयोगाभाव इति वदंति। तदेतद्ध्व्यादिमतमभिप्रेत्याह उपदेशेऽदकारोपध इत्यादि॥ ॥अजादेरित्येवेति। नन्वत्र इत्यत्र अजादेरित्यनुवर्तते तेन आदिभूतादचः परं एवं न दत्ताद्विर्वचनं तेनान्येद्वित्यर्थः। ननुलावस्थायामेकअडिति भाष्यकारोक्तपक्षे अदिद्रपदित्यत्र अजादित्वमस्त्येव न्यायप्रथमभट्परत्वादंतरंगत्वाच्चेति चेन्न। अत्राहुः। द्वितीयस्येत्यस्य अनुवर्तनेन तत्सामर्थ्याच्च नित्यं द्वितीयस्येति तदर्थः। तेन लावस्थायामटि कृते पि धातुसंज्ञाप्रवृत्तिकाले अजादित्वाभावान्नोक्तदोषः। नित्यं द्वितीयस्यैकाचो येन दत्तास्तेषामेव निषेधात्। न चैवं नित्यं द्वितीयस्येति व्याख्यये वड्डूसिद्धावजादेरित्यस्यानुवृत्तिर्मास्त्विति वाच्यं। इं दिद्रीयिषतीत्यत्र दकारस्यापि द्वित्व

अजादेरित्येव नेह। अदिद्रपत्। रभेरशब्लिटोः। ७।१।६३॥ रगेर्नुमस्यादचि नतु शब्लिटोः। लभेश्च। ७।१।६४। अरंभत्। अललंभत्। हेरचङीति सूत्रे चङीत्युक्तेः कुत्वं न। अजीहयत्। अत्स्मरदृत्वरप्रथम्रदस्तृस्पशाम्। असस्मरत् अददरत् इति परत्वसामर्थ्याद्दत्वलघोनेर्दीर्घः। विभाषा वेष्टिचेष्ट्योः। ७।४।९६। अभ्यासस्यात्त्वं वा स्याच्चङ्परे णौ। अववेष्टत्। अविवेष्टत्। अचचेष्टत्। अचिचेष्टत्। भ्राजभासेत्यादिना वोपधाह्रस्वः। अबिभ्रजत्। अबभ्राजत्। काण्यादीनां वेति वक्तव्यम्। एणताः कणरणभणश्रणलुपहेठः काण्यादयः। षड्ड्विष्ये उक्ताः। ह्वायिवाणिलोटिलोपयश्च त्वारोधिकाभ्यासे। चाणिलोठीत्यप्यन्यत्र इत्थंहादप्रा। अचीकणत्। अचकाणत्॥ ९. निषेधापत्तेः। अजादेरित्युक्तौ त्वादिभूतादचः परत्वं दकारस्यनेति सिद्धमिष्टं। न च अजादेरित्युक्तावपि चंदिद्रीयिषतीत्यत्र दोषः स्यादेव आद्यवयवस्य हल्त्वान्नकारस्य द्वित्वनिषेधाप्रसंगा। दिति वाच्यं। अजादेरिति कर्मधारयात् पंचमीत्युक्तत्वात्। इह च एकदेशस्वरितत्वं प्रतिज्ञाय अचइत्येवानुवर्त्सेतां। अथवा आदेरित्यस्याप्यनुवर्तनमस्तु न सनावपवपरत्वं किंतु पूर्ववर्तिमात्रपरत्वं शब्दाधिकाराश्रयणादिति ज्ञेयं। नन्वेवमनुत्तरार्थतया द्वितीयस्येति ग्रहणस्य सार्थकत्वेष्यिने द्वितीयस्येति नवक्तव्यमिति भाष्यविरुध्येतेति चेन्न। एवं। यस्मिन् सूत्रे पठितं तत्र मास्त्विति तदाशयात्। न च अजादेरित्येतावता पुत्रे यस्य कस्य चिदेकाचो द्वित्वं स्यादिति वा। प्रथमस्यैकाचः पूर्वेणैव सिद्धे पुनरारंभो द्वितीयस्य द्वित्वार्थमिति सुवचत्वात्। रभेरशब्लिटोः। रधिजभोरित्यतोऽचीति इदितद्धतोनुमिति चानुवर्तते॥ त·म· ९४

390

अचिकिं। आरब्धं अचकल्लियेः किं। रभेतेो रेभे लभेश्च योगविभाग आङो यी सत्रल भेरेवानुवृत्तिर्यथा स्यादिति। काम्यादीनामिति। कण निमीलने। रण शब्दे।
भण शब्दे। श्रण दाने। लुप छेदने। हेठ विबाधायां। षट। ह्रेष्णुसद्दौयां शब्दे च। वण शब्दे। लुठ प्रतिघाते। लुप छेदने। लोपीति णिजन्तनिर्देशः। लापयइति पाठांतरं
लपव्यक्तायां वाचि। केचित्तु लपहेठ इति पठंति। न्यासे चत्वारः। चण दाने। लुट स्तेये भ्वादिः। चुरादौ दंडकपाठे भावार्थे कोपि। अरीरणत्। अररणत्। अबीभणत्।
अबभाणत्। अशिश्रणत्। अशश्राणत्। अलूलुपत्। अलुलोपत्। अजीहिठत्। अजिहेठत्॥ ॥ स्वापेश्चङि। चङि किं। स्वापयति। असूषुपदिति। इह संप्रसा
रणे नत्वं द्वित्वे। श्राकाशात्। श्वोनतू करणे। छो छेदने। षोऽन्तकर्मणि। ह्वेञ् स्पर्द्धायां। व्येञ् संवरणे। वेञ् तंतुसंताने। पा पाने। लुग्विकरणालुग्विकरणेति परिभाषया पार

स्वापेश्चङि। ६।१।१८। ण्यन्तस्य स्वापेश्चङि सम्प्रसारणं स्यात्। असूषुपत्। शाच्छासाह्वाव्यावेपां युक्। ७।३।३७। पुकोपवादः। शाययति। ह्वा
ययति। ह्वः सम्प्रसारणम्। ६।१।३२। सन्परे चङ्परे च णौ ह्वः सम्प्रसारणं स्यात्। अजूहवत्। अजुहावत्। लोपः पिबतेरीच्चाभ्यासस्य। ७।४।४।
पिबतेरुपधाया लोपः स्यादभ्यासस्य ईदन्तादेशश्च चङ्परे णौ। अपीप्यत्। अर्त्तिह्रीति पुक्। अर्पयति। ह्रेपयति। व्लेपयति। रेपयति। यलोपः
क्नोपयति। क्ष्मापयति। स्थापयति। तिष्ठतेरित्। ७।४।५। उपधाया इदादेशः स्याच्चङ्परे णौ। अतिष्ठिपत्। जिघ्रतेर्वा। ७।४।६। अजिघ्रिपत्
अजिघ्रपत्। उर्ऋत्। अचीकृतत्। अचिकीर्त्तत्। अवीवृतत्। अववर्त्तत्। अमीमृजत्। अममार्जत्। पातेर्णौ लुग्वक्तव्यः। पुकोपवादः। पा
११ लयति ॥
लक्षणे इति नेह। गा हन्ते। तस्यानुपालयतीति रूपमनुपदं वक्ष्यति। शाययति। अशीशयत्। छाययति। अचिच्छयत्। साययति। असीषयत्। ह्वा
ययति। अजिहूयत्। व्याययति। अविव्ययत्। वाययति। अवीवयत्। पाययति। अपीप्यत्। इह शाच्छासादीनां कृतात्वानां निर्देशः। युकः प्राप्तिं ध्वनयितुं तत्प्रयोजनं
तस्मिन्नकरणे लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्तिः। तेन ध्याययति। क्रापयतीत्यादि सिद्धं। ह्वः संप्र णौ च संश्चङोरिति वर्त्तते तदाह। सन्परे इत्यादि। अजूह
वत्। अजुहावदिति। काण्यादीनां वेति ह्रस्वविकल्पः। अपीप्यदिति उपधालोपस्य द्वित्वे कर्त्तव्ये प्रतिषेधात् कृते लोपे स्थानिवद्भावात् पायूशब्दस्य द्वित्वे ह
लादिः शेषे ईकारः। स च अनभ्यासविकार इति निषेधादं त्वसादेशः। इह ग्लोपित्वादलघूपधत्वाच्चाप्राप्ते ह्रीर्योरप्राप्तावित्वं विधीयते व्लेपयतीत्यादि।

CC-0. In Public Domain. Digitization by eGangotri



ह्रीवरणे। रीङ् क्षये। क्नूयी शब्दे उंदे च। क्ष्मायी विधूनने। तिष्ठते रिति। तकारो मंदप्रयोजनः श्तिपा निर्देशो यङ्लुक्निवृत्त्यर्थः। अन्तास्थापत् लरित्ता स्थापयोति
। तास्थापेति। उर्णत्। चुरादौ व्याख्यातं। अचिकीर्नेदिति। ऋदादेशाभावपक्षे उपधायाश्चेती लेरपरत्वमुपधायांचेति दीर्घः। पुकोपवादइति
आदंतत्वात्पुकः प्राप्तिः। एवंच लुगागमस्य पुङ् निवृत्तिरेव फलं पालयतीति रूपस्य पालरक्षणे इति धातुनाऽपि सिद्धेरिति भावः॥ ❀ ॥ वोविधू। लुग्विकरण
ऽलुग्विकरणपरिभाषया ओवै शोषण इत्यस्यैव ग्रहणं न तु वा गति गंधनयोरित्यस्य लक्षणप्रतिपदोक्तपरिभाषात्वस्मिन्प्रकरणे न प्रवर्तते इत्युक्तं प्राक्। ओ।
वै शोषण इत्यस्य रूपमिति वदन् वामनो प्यत्रानुकूलः। वजगतावितिधातुना वाजयतीति रूपे सिद्धे जुगागमस्य पुक्निवृत्तिरेवइहापि फलं वातेरिति। वाय।
नेरितिवक्तुं युक्तं। आत्व विधायक सूत्रं स्मारयति। विभाषा लीयतेरिति। लीयतेरिति यका निर्देशो न तु श्यना। अन्यथा विभाषा लीङ् इत्येवावक्ष्यत्। तेन लीलीङोर्न

वो विधूनने जुक्। ७। ३। ३८। वातेर्जुक् स्याच्छोकम्पेऽर्थे। वाजयति। कम्पयति किं। केशान्वापयति। विभाषा लीयतेः। लीलोर्नुग्लुकावन्यतर
स्यां स्नेहविपातने। ७। ३। ३९। लीयतेर्लातेश्च क्रमान्नुग्लुकावागमौ स्तो वा णौ स्नेहद्रवे। विलीनयति विलापयति विलालयति। विला
पयति वा घृतम्। लीई इति ईकारप्रश्लेषादात्वपक्षे नुक्। स्नेहद्रवे किम्। लोहम्विलापयति प्रलम्भनाभिभवपूजासु लियो नित्यमात्व
ᐠ मिति वाच्यम्
उभयोरप्यात्वं भवति। लीलोः। लीङ् श्लेषणे दिवादिः। ली श्लेषणे क्र्यादिः। ला ग्रहणे न लाञ्आदाने अदादिः कृतात्वौ लीलीङौ चत्वयो
पि गृह्येते। लीयतेरिति श्नो चित्यादिहापि यका निर्देश इत्युभयोरपि ग्रहणं न च निरनुबंधक ग्रहणे न सानुबंधकस्य ग्रहणमिति परिभाषया सूत्रेपि लीङो न ग्रह
णमिति वाच्यं। इयं हि परिभाषा वामदेवाड्ड्यड्डावित्यत्र डित्वेन ज्ञापिता। ज्ञापनंच उत्सर्गतः। सजातीयापेक्षमिति प्रत्ययग्रहणविषयत्वमस्याः कल्प्यते। यथा
सदृव्ययत्तव्यसमानाधिकरणे नेसत्रत्तव्यस्यैव ग्रहणं न तु तव्यतः। अत एव जृव्रश्च्योः क्त्वि इति सूत्रे जृणातिजीर्यत्योरुभयोर्ग्रहणमिति न्यासकृतोक्तं। अतोऽ
त्र लीलीङोर्ग्रहणमिति सम्यगेव। न चैवं दिव ओदित्यत्र निरनुबंधपरिभाषया दिविति प्रातिपदिकस्यैव ग्रहणं न तु धातोरिति ग्रंथः कथं संगच्छत इति वाच्यं
। उत्सर्गतः प्रत्ययग्रहणविषयत्वेन क्वचिदन्यत्रापि प्रवृत्तौ बाधकाभावादिति वदंति

॥ मू· विलायपयतिवा ॥ त्रु० ॥ ७ ॥

392



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विलीनयतीति।लीलीङोरीकारान्तयोर्नुकि रूपं।विलापयतीति।नुगभावपक्षेन्तयोरेवरूपं।विलालयतीति।लातेः कृतात्वयोर्लीलीङोश्चलुकि रूपं।विलाययतीति
।लुगभावपक्षे आदन्तानां तेषामेव रूपं।लीहं विलाययतीति।नुग्लुकोरभावादात्वपक्षे पुकू आत्वाभावे नुङ्घायादेशौ।प्रलंभनेति।प्रलंभनं वचनं।अश्रि
तिकिं।लीयते।लिनाति॥ ॐ ॥ लियः संमान चान्तप्रलंभने।विभेतेर्हेतुभये।हेतुः प्रयोजकः।इह स्मादेच उपदेश इत्स्मात एच स्मादित्यनुवर्तते विभाषालीय।

लियः सम्माननशालीनीकरणयोश्च।१।३।७०।लीङ्लियोर्ण्यन्तयोरात्मनेपदं स्यादकर्तृगेऽपि फले पूजाभिभवयोः प्रलम्भने च।
थे।जटाभिर्लापयते।पूजामधिगच्छतीत्यर्थः।श्येनो वर्त्तिकामुल्लापयते।अभिभवतीत्यर्थः।बालमुल्लापयते।वञ्चयतीत्यर्थः।वि
भेतेर्हेतुभये।६।१।५६।विभेतेरेच आत्वं वा स्यात्प्रयोजकाद्भयश्चेत्।भीस्मोर्हेतुभये।१।३।६८।आभ्यामात्मनेपदं स्याद्धेतोश्चेद्भय
स्मयौ।सूत्रे भयग्रहणमुपलक्षणम्।मुण्डो भापयते।भियो हेतुभये षुक्।७।३।४०।भी ई इतीकारः प्रश्लिष्यते।ईकारान्तस्य भि
यः षुक् स्यात्तणौ हेतुभये।भीषयते।नित्यं स्मयतेः।६।१।५७।स्मयतेरेचो नित्यमात्वं स्यात्सो हेतोः स्मये।जटिलो विस्मापयते।हेतोश्चेद्
पस्मयो विस्मये नेह।कुञ्चिकयैनं स्माययति।विस्मापयति।कथन्तर्हि विस्मापयन् विस्मितमात्मदृष्टाविति मनुष्यवाचेति करणादेव हितन्न
त्रस्मयः।अन्यथा ह्यानजपि स्यात्।सत्यम्।विस्मापयन्निसेव पाठ इति सांप्रदायिकाः।यद्वा।मनुष्यवाक्प्रयोज्यकर्त्री विस्मापयते तया
सिंहो विस्मापयन्निति शपनात्मनेपदे इति व्याख्येयम्।स्फायो वः।७।३।४१।णौ।स्फावयति।शदेरगतौ तः।७।३।४२।शदेर्णौ तोऽन्तादेशः स्यान्न
तु गतौ।शातयति।गतौ तु।गाः शादयति गोविन्दः।गमयतीत्यर्थः।रुहः पोऽन्यतरस्याम्।७।३।४३।णौ।रोपयति।रोहयति॥

९ तेरिस्सतो विभाषा
चिस्फुरोरिस्यतो णाविति चन्द्रदाह।विभेतेरेचइत्यादि।भीस्म्योः।न्यस्येन मक्षीस्याह आभ्यामिति।लोरणो विस्यतो णेरित्यनुवृत्तेर्ण्यन्ताभ्यामेव विधिरूक्तेत्रेभिमापार्थः।ईकारा
न्तस्येति।तेन आत्वपक्षे भापयते इत्येव न त्वत्र षुगित्यर्थः।करणादेव हीति।तथा च।करणान्तस्मये आत्वाभावे न पुक् दुर्लभ इति भावः।प्रयोज्यकर्त्रीति।यद्यपि प्रथमणिजर्थप्र
तिमनुष्यवागेव प्रयोजिका अत एव आत्वं प्रवृत्तं तथापि द्वितीयणिजर्थाभिप्रायेणोदाहृतमिति मनोरमायां।केचित्तु प्रयोज्यस्यकर्त्री प्रयोजककर्त्रीति या।दिति प्रथम॥:॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि॰ कौ॰ णिजभिप्राये णौ वेदं सुयेजं भिसाहः। एवं तासा विति। एजा विस्मयतेतं मनुष्यवाक् विस्मापयतेतया सिंहो विस्मापयन् इत्यर्थः। एवंच प्रथमणिचि हेतुर्मनुष्यवागिति अ
त॰ त्वपुकावुपपन्नौ॥ ॐ॥ क्रीङ् जीनां णौ। डुक्रीञ् इङ् अध्ययने। जि जये। अ चि कपतु। अजीनयत। अध्यजीगपत इति। नात्र णिज्निमित्तस्य गाङो द्वित्वे कर्तव्ये स्थानिवद्भा
९६ वो निषेधो वाच्यः कः। यत्राभ्यासे तत्र खंडे आदेशो जवर्णो णिति त्रैव स्थानिवद्भावो निषेधो वैसुकत्वात्। इहतु गाङः पूर्वं प्रतिहि द्वित्वे अजादेर्द्वितीयस्येति णिचएव द्वित्वं
भवेत्तत्र इङ् परणिज्निमित्तो गाङ् तत्र प्रक्रियायां पतिनिष्पिन्नरूपे वा अवर्णवदुत्तरखंडे दुर्लभं कीर्तयति साम्यादिति नोक्त शंकावकाशः। अध्यापिपदिति। पिपाद्द।
सात्र द्वित्वं। सिध्यतेरपारलौकिके निर्देशाङ्गोवादिकस्याग्रहणं। तत्त्वं निश्चिनोतीति तत्त्व निश्चयस्यात्मविषय कः सच परलोके उपयुज्यते। प्रजने। वीपतेरितियोगतिप्र

क्रीङ् जीनां णौ। ६।१।४८। एषामेच आत्वं स्यात् णौ। क्रापयति। अध्यापयति। जापयति। णौ च संश्चङोः। ६।१।३१। सन्परे चङ्परे च णौ ड्रुङो।
गाङ्गो स्यात्। अध्यजीगपत्। अध्यापिपत्। सिध्यतेरपारलौकिके। ६।१।४९। ऐहलौकिकेऽर्थे विद्यमानस्य सिध्यतेरेच आत्वं स्याण्णौ। अन्नं सा
धयति। निष्पादयतीत्यर्थः। अपारलौकिके किम्। तापसः सिध्यति। तत्त्वं निश्चिनोति। तं प्रेरयति। सेधयति तापसन्तपः। प्रजने वीयतेः।
६।१।५५। अस्यैच आत्वं वा स्याण्णौ प्रजनेऽर्थे। वापयति। वाययति वा गाः पुरोवातः। गर्भं ग्राहयतीत्यर्थः। ऊदुपधाया गोहः। ६।४।८९। गू
हयति। दोषो णौ। ६।४।९०। दुष इति सुवचम्। दुष्यतेरुपधाया ऊत्स्याण्णौ। दूषयति। वा चित्तविरागे। ६।४।९१। विरागोऽप्रीतता। चित्तं दू
षयति। दोषयति वा कामः। मितां ह्रस्वः। ज्वादौ चुरादौ च मित उक्ताः। घटयति। जनी जृष् जनयति। जरयति॥ ६॥ ६॥ ६॥ ६॥

जनादावादादिकस्य यका निर्देशः। अत्र केचित् प्रेक्षयंति वीतेरिति वक्तव्ये यका निर्देशात् व्येञो पि ग्रहणं। तस्यापि यकि संप्रसारणे वी धातुना समानरूपत्वात्॥
अतो द्वयोरपि प्रजनेऽर्थे आत्वं वा स्यात् तत्र आत्वे तदभावे च यद्यपि व्येञः व्यापयतीति रूपं तुल्यं शाच्छासेति युकोपवादत्वाय युग्विधानात् तथापि णिजंतात् किपि
पिव्योः व्यो व्याः आत्वाभावपक्षे। व्येः व्यायौ। व्यायः इत्यस्ति विशेषः। विभाषा विधानसामर्थ्यात् पक्षे प्यादेच उपदेशेऽशितीति न प्रवर्तते। अनेकार्थत्वाच्च धातूनां व्य
यतेरपि प्रजनोऽर्थ इति। दोषो णौ। दुष वैकृत्ये दिवादिः। णौ किं। दोषः। चित्तमिति। चित्तं संज्ञानम् इत्यस्मात् क्तः। दूषयति। दोषयति वेति। चि॰ ॥ ६॥ ६॥ एम॰ ९६

392

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्तं दुष्यति स्नानसंध्यादौ विरक्तं भवति। तत्प्रयुंक्त इत्यर्थः॥ ॥ जृणाते स्त्विति। अपित्वादस्य मित्वं नेति भावः। आखेटकमिति। मृगयेत्यर्थः। रञ्जयतीति। रजंति मृगाः।
ग्रहणमरणाद्यनुकूलव्यापारविषया भवंतितान्मृगान्ताहग्व्यापारविषयान् करोतीत्यर्थः। ज्ञपादिष्विन्न इति। तेन मित्वाद्ध्रस्व इति भावः। स्वादिगणस्थस्य तु मित्वं नेत्यु
दाहरति चापयतीत्यादि। अपुस्फरदिति। द्वित्वे कर्तव्ये अजादेश स्यस्थानिवत्वान्निषेधाद्वा स्फुरित्युकारवतो द्वित्वं ततः चिस्फुरोर्णौ विति वा आत्वं। उभौ साभ्यासाभ्या

जृणाते स्तु। जारयति। रञ्जेर्णौ मृगरमणे नलोपो वक्तव्यः। मृगरमणमाखेटकम्। रजयति मृगान्। मृगे ति किम्। रञ्जयति पक्षिणः। रमणा
दन्यत्र तु। रञ्जयति मृगान्तृणादानेन। चुरादिषु ज्ञपादिष्विन्न। चिस्फुरोर्णौ। चपयति। चययति। तौ तु क्रमं। चिनोतेस्तु। चापयति। चाय
यति। स्फारयति। स्फोरयति। अपुस्फरत्। अपुस्फुरत्। उभौ साभ्यासस्य। ८।४।२१। साभ्यासस्यानितेः रूभौ नकारौ णत्वं प्राप्नुतो निमित्ते सति।
प्राणिणत्। णौ गमिरबोधने। २।४।४६। इणो गमिः स्यात्सौ। गमयति। बोधने तु। प्रत्याययति। इण्वदिकः। अधिगमयति। हनस्तोऽचिण्णलोः
। हो हन्तेरिति कुत्वम्। घातयति। ईर्ष्यतेस्तृतीयस्येति वक्तव्यम्। तृतीयव्यञ्जनस्य तृतीयैकाच इति वार्थः। आद्यषकारस्य द्वित्वं वारयितु
मिदम्। द्वितीयेत्वजादेर्द्वितीयस्येत्यस्यापवादतया सन्नन्तेप्रवर्तते। ऐर्ष्यियत्। ऐर्षिष्यत्। द्वितीयव्याख्यायां णिजन्तात् चङि षकार एवा
भ्यासे श्रूयते। हलादिः शेषात्। द्वित्वन्तु द्वितीयस्यैव। तृतीयाभावेन प्रकृतवार्त्तिकाप्रवृत्तेः। नित्वन्तप्रेषणाद्धानोर्हेतुमत्सोऽप्युद्धेन तुल्यार्थः
तेन प्रार्थयन्ति शयनोत्थितं प्रियाइत्यादि सिद्धम्। एवं सकर्मकेषु सर्वेषूह्यम्। इति ण्यन्तप्रक्रिया॥ ११ मिति सूत्रेन इति षष्ठ्यन्तं तत्प्रथमाद्विवच

नान्तं तत्या विपरिणम्यते इत्याह। उभौ नकाराविति। ननु साभ्यासस्येत्युक्त्या उभयोरपि भविष्यतीत्युभौ ग्रहणं व्यर्थमिति चेत्। अत्राहुः। साहि समात्रं विवक्षितं न
तु ल्ययोग इत्यभ्युपगमे द्वयोर्युगपन्न सिद्ध्येदित्युभौ ग्रहणं। न च तुल्ययोगाविवक्षायां तेन सहेति तुल्ययोग इति समासोऽत्र न स्यादिति प्रंक्यं। तुल्ययोगग्रहणं प्रा
यिकं सकर्मकः सलोमक इत्युक्तत्वादिति। कैयटे तु उभाविस स्मिन्न सति साभ्यासस्यानितेर्णौ भवतीत्युच्यमाने वचनसामर्थ्याच्च पूर्वत्रासिद्धीयमद्विर्वचन इत्य

ति·
सि·कौ· स्यानित्तेरितिपूर्वेणैवणत्वस्यसिद्धत्वात्व्यवहितनकारार्थमिदंणत्वंस्यात्अनन्तरस्यतुतत्रकौंडिन्यन्यायेननस्यादितिउभाविसुच्यतइतिस्थितं।साभ्यासस्येति कि।
टी·त· म।प्राणनमति।असत्यस्मिन्अनितेरितिषष्ठीसंबंधसामान्येस्यात्ततश्चानंतर्यादिसंबंधोपिगृह्येततस्तत्त्वस्मिन्अवयवावयविभावसंबंधोलभ्यते।अनो
९७ र्थंवत्ताभ्यासग्रहणं।यदित्विष्टानुरोधेनानितेरितिषष्ठीअवयवसंबंधेव्याख्यायतेअनितेश्चनकारद्वयाभावात्सामर्थ्याद्द्विर्वचनंप्राप्तएवानितिर्ग्रहणेन
दासाभ्यासस्येतिमंदप्रयोजनं।इहपूर्वेणत्वंकृत्वाद्वित्वेकृतेप्राणिणदित्यादिसिद्धावयमारंभःपूर्वत्रासिद्धीयमद्विर्वचनेइत्यस्यानित्यत्वज्ञापनार्थः।तेन
ऊर्णुनावेस्यत्रणत्वात्पूर्वमेवनुशब्दस्यद्वित्वाद्भ्यासोत्तरखंडेणत्वाभावःसिद्धः।अप्रापयतीति।प्रतिपूर्वस्यणोद्गानार्थेतालुङिप्रत्यापियत्।इहइणो
णिचिकृतेइणोयणीतियणंबाधित्वापरत्वाद्वृद्धिःनचओःपुयण्जीतिज्ञापकात्पूर्वंद्वित्वंपश्चाद्वृद्धिरितिशंक्यं।अजादेर्द्वितीयस्येतिणिचोद्वित्वेअभ्या
सोत्तरखंडस्यावर्णपरत्वाभावात्।इणिकार्येइति।व्याख्यानद्वयमप्यांकारारूढमितिभावः।पकारस्येति।रेफस्यतुनन्द्राइत्यनेननिषेधादितिभावः।द्विती।
येत्विति।तृतीयस्यैकाचइतिपक्षेस न्नंतेप्रवर्ततेद्विवचनसामर्थ्याद्वितिभावः।ऐर्षिष्यदिति।तृतीयव्यंजनस्येतिपक्षेइदमुदाहरणं।ऐर्षिष्यदितिरूपस्या।
साधुत्वमाशंक्योपपादयतिद्वितीयव्याख्यायामित्यादिनाद्वितीयस्येवेति।एकाचइतिशेषः।अग्रदर्शनेरिति।किंतुसन्नंतएवप्रवर्ततेतत्रह्यनुपदंईर्ष्यि।
यिषतिइत्युदाहरिष्यति।अर्थउपपाद्यायामित्यस्यआगर्वीयत्वादात्म नेपदेनभाव्यमितिप्रार्थयंतीतिमाघकाव्यादिप्रयोगोऽसाधुरित्याशंक्यतत्समर्थ।
नायाह।निवृत्तप्रेषणादिति।उक्तंच।निवृत्तप्रेषणाद्धातोःप्राकृतेऽर्थेणिजुच्यतइतिनेत्यादि।प्रार्थनांकुर्वंतीतिविवक्षितार्थेप्रयोगःसिद्धइतिभावः।के
चित्तुपरस्मैपदसिध्यर्थंप्रार्थनंप्रार्थःतंकुर्वंतिप्रार्थयंतीतिव्याचक्षतेतदसत्।धातुसंज्ञाप्रयोजकप्रत्ययेचिकीर्षितेउपसर्गाणांपृथक्करणस्यवक्ष्यमा राम·
णतयाअर्थवेदेत्याप्युगागमस्यदुर्वारत्वात्॥इतिण्यंतप्रक्रिया०॥ ९७

393

CC-0. In Public Domain. Digitization by eGangotri

धातोः कर्मणः। इषिकर्मणइत्यादिः। इच्छायामिति श्रुतत्वात्कर्मत्वं कर्तृत्वं च तदपेक्षमेव गृह्यत इति भावः। पठितुमिच्छतीति। एकनिष्ठापाठगोचरा वर्त्तमाने
च्छेत्यर्थः। पिसनोदिति। तृतीयव्यंजनस्येति पक्षे यकारस्य द्वित्वं तृतीयस्यैकाच इति पक्षे नुसनइत्यर्थः। रुदविदमुषसाहचर्यान्नुवेर्नैरेव ग्रहणं। इह रुद विद मु
षाणां ग्रहणं रलोव्युपधादिति विकल्पे प्राप्ते ग्रहेर्नक्त्वासेडिति निषेधात्। क्त्वा या अप्राप्तेऽपि प्रक्त्वो मुत्कः कित्वे पि सनः कित्वस्याप्राप्तौ वचनं। रुदित्वा वि
दित्वा। मुषित्वा। एतेषु गुणाभावः कित्वस्य फलं। गृहीत्वा सुप्त्वा पृष्ट्वा। एतेषु संप्रसारणमपि फलं। सनि ग्रहगुहोश्च। ग्रहेर्निसंगुहेर्विकल्पेन प्राप्ते निषेधो।

धातोः कर्मणः समानकर्तृकादिच्छायां वा। ३।१।७। इषिकर्मण इषिणैककर्तृकाद्धातोः सन्प्रत्ययो वा स्यादिच्छायाम्। धातोर्विहितत्वादिहस
न आर्द्धधातुकत्वम्। स्यन्तः। पठितुमिच्छति पिपठिषति। कर्मणः किम्। गमनेनेच्छतीति करणान्माभूत्। समानकर्तृकात्किम्। शिष्याः पठं
त्विति इच्छति गुरुः। वाग्रहणात्पक्षे वाक्यमपि। लुङ्सनोर्घस्लृ। एकाच उपदेशादिति नेट्। अत्स्यतत्वम्। अत्तुमिच्छति जिघत्सति। ईर्योनेलतीय।
स्यतीति पिसनोर्द्वित्वम्। इर्ष्यिषिषति। ईर्ष्यिषिषति। रुदविदमुषग्रहिस्वपिप्रच्छः संश्च। १।२।८। एभ्यः संश्च क्त्वा च कित्तौ स्तः। रुरुदिषति। वि
विदिषति। मुमुदिषति। सनि ग्रहगुहोश्च। ७।२।१२। ग्रहेर्गुहेरुगन्ताच्च सन इण्न स्यात्। ग्रहिज्येति संप्रसारणम्। सनः षत्वस्यासिद्धत्वाद्भषभावः
१ जिघृक्षति। जुघुक्षति॥

षे। सनः षत्वस्यासिद्धत्वात्भषभावइति। कत्वस्यासिद्धत्वात्भषभावइत्येवसुवचं। केचित्तु ढत्वेक्षतिभषभावइत्यध्याहारे
णायोजयंति। तथाच जगृहसइति स्थिते। इणः परत्वेन सस्य षत्वं प्रसंतस्यासिद्धत्वाढ्ढत्वे भषभावः। ततश्च कत्वे कषगोत्परस्य षत्वमिति विधिक्रमः। अन्ये तु।
षत्वे ढत्वे च कृते पश्चात् भषभावे कर्तव्ये सकारपरत्वाभावात्भषभावो न स्यादित्याशंकायां सनः षत्वस्यासिद्धत्वादिति ग्रंथः प्रवृत्त इति कार्यासिद्धिपक्षावलं
बनेन व्याचक्षते। जिघृक्षतीति। गुहेर्जुघुक्षति सत्रे चकारात्स्मुकः किती सनउक इति अनुकृष्यते। उगंतात्। बुभूषति लुलूषति। श्रयतिस्तुनानुकृष्यते। तस्य

श्रीवगाइतिविकल्पविधानात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति· सि·कौ· टी·त· ९८

किरश्चपंचभ्यः। पंचग्रहणमुत्तरार्थस्पष्टप्रतिपत्तयेइहैवकृतं। एवंचप्रच्छधातोरनंतरंगणपाठस्थंतत्करणंसकुंशाकं। अत्रत्यपंचभ्यइत्यनेनैवद्दृतत्कर
णंयत्तत्पाणिनीयमितिव्याख्येयमित्याहुः। केचित्तुभूषाकर्मकिरादिसनामितिवार्तिकेकिरादिज्ञानार्थंतत्करणमावश्यकमित्याहुः। अत्रइटइतिवृत्तो
वेतिप्राप्तेभाष्यकारेष्टिरियं। भौवादिकयोरिति। तथाचाञ्जनगमामितिवक्ष्यमाणेनदीर्घइतिभावः। इकोझल्। रुदविदेत्यतः सननुवर्ततेसनाक्षिप्तोधातु
रिकाविशेष्यतेविशेषणेनचतदंतविधिरित्याह। इगंतादिति। इगंतान्नु किं। यियासति। तिष्ठासति। झलितिकिं। शिशयिषते। कित्स्यादितिअसंयोगाल्लिट्
किदित्यतःकिदनुवर्ततेइतिभावः। एज्विषयत्वाभावादितिकित्वेनगुणप्राप्तेरित्यर्थः। अतएवेति। यद्येज्विषयादन्यत्राप्यात्वंभवेत्तदामीग्रहणंतत्रन

किरश्चपञ्चभ्यः। ७।२।७५। कृगृदृङ्धृङ्प्रच्छएभ्यःसनइट्स्यात्। पिपृच्छिषति। चिकरिषति। जिगरिषति। जिगलिषति। अत्रेटो।
वृत्तोवेतिदीर्घोनेष्टः। दिदरिषते। दिधरिषते। कथमुद्दिधीर्षुरिति। भौवादिकयोर्धृङ्धृञोरितिगृहाण। इकोझल्। १।२।९। इगन्ताज्झला
दिःसन्कित्स्यात्। बुभूषति। दीङ्। दातुमिच्छतिदिदीषते। एज्विषयत्वाभावान्मीनातिमिनोतीत्यात्वन्न। अतएवसनिमीमेतिसूत्रे
माधातोःपृथग्मीग्रहणंकृतम्। हलन्ताच्च। १।२।१०। इकसमीपाद्धलःपरोझलादिःसन्कित्स्यात्। गुह्। जुघुक्षति। विभित्सति। इकः
किम्। यियक्षते। झल्किम्। विवर्द्धिषते। हल्ग्रहणंजातिपरं। तृन्ह्। तितृक्षति। तितृंहिषति। अज्झनगमांसनि। ६।४।१६। अजन्तानां
हन्तेरजादेशगमेश्चदीर्घःस्याज्झलादौसनि। सन्लिटोर्जेः। जिगीषति। विभाषाचेः। चिकीषति। चिचीषति। जिघांसति॥ ९कुर्योद्गामादाग्र
हणोप्ववि‍शेषादितिभावः। हलंताच्च। इगित्यनुवर्ततेतदवयवत्वंहलोनसंभवतीतिसमीपवाच्यत्रांतशब्दइत्याशयेनव्याचष्टे। इकसमीपादिति। सौत्रत्वा
द्विशेषणस्यांतशब्दस्यपरनिपातः तितृक्षतीति। कित्वेसत्यनिदितामितिनलोपः। अज्झनगमां। गमःसामान्येनग्रहणेगम्लृगत्तावित्यस्मात्संजिगंसतेइत्य
त्रातिप्रसंगःस्यादतःसनिचइङश्चेतिसूत्राभ्यांविहितस्येणिङोरादेशस्यइणवदिकइतिइकआदेशस्यचग्रहणमित्याशयेनाह। अजादेशगमेरिति। एतच्च
सूत्रेऽजग्रहणाल्लभ्यते। तथाहि। इहसनीत्येवसूत्रंकर्तव्यं। दीर्घश्रुत्योपस्थितेनाचइत्यनेनांगस्यविशेषणादजंतांगस्यदीर्घः। चिचीषति। ततोहनिगम्योरिस

394

राम· ९८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवं चानुग्रहणमतिरिच्यमानं प्रवृत्तिभेदेन गमेर्विशेषणार्थं। अजन्तस्य दीर्घो भवति। अजादेशो गमेश्चेति। झलादावित्ति किं। जिगमिषति। गमेरिट् परस्मैपदे॥
ष्विति इट्॥ ॐ॥ सनि च। णौ गमिरबोधन इत्यतो ऽबोधन इत्यनुवर्तते। प्रतीषिषतीति। तत्र कौण्डिन्यन्यायस्यानित्यत्वात्सन्नरूपस्याभ्यासस्येत्त्वं। अनित्यत्वे लिं
गं तु निस्संकोटिल्ये गत्ताविस्यत्र नित्यग्रहणमिति वक्ष्यते। संजिगंसते इति। समो गम्यृच्छिभ्यामिति तङ्। पूर्ववत्सन इति सन्नन्तादपि भवति। रलो व्युपधा। न क्त्वा सेडि

सनि च।२।४।४७। इणो गमिः स्यात्सनि न तु बोधने। जिगमिषति। बोधने प्रतीषिषति। इणवदिकः। अधिजिगमिषति। कर्मणि तङ्। परस्मैप
देष्वित्युक्तेर्नेट्। झलादौ सनीति दीर्घः। जिगांसते। अधिजिगांसते। अजादेशस्येत्युक्तेर्गोञ्छतेर्न दीर्घः। जिगंसते। संजिगंसते। इङश्च।२।४।
४८। इङो गमिः स्यात्सनि। अधिजिगांसते। रलो व्युपधाद्धलादेः संश्च।१।२।२६। उश्च इश्च वी ते उपधे यस्य तस्माद्धलादेर्रलन्तात्परौ क्त्वास
नौ सेटौ वा कितौ स्तः। द्युतित्वा द्योतित्वा। दिद्युतिषते। दिद्योतिषते। रुरुचिषते। रुरोचिषते। लिलिखिषति। लिलेखिषति। रलः किं।
दिदेविषति। व्युपधात्किम्। विवर्तिषते। हलादेः किम्। एषिषिषति। इह नित्यमपि द्वित्वं गुणेन बाध्यते। उपधाकार्यं हि द्वित्वात्प्रबल
म्। ओरोरत्कृदित्करणस्य सामान्यापेक्षज्ञापकत्वात्। सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्।७।२।४९। इवन्तेभ्य ऋधादिभ्यश्च
सन इड्वा स्यात्। इडभावे हलन्ताच्चेति कित्त्वम्। च्छ्वोरिति वस्य ऊठ्। यण्। द्वित्वं। दुद्यूषति। दिदेविषति। स्तौतिण्योरेवेति वक्ष्यमाणनियमा
न्न षः। सुस्यूषति। सिसेविषति। आप्ज्ञप्यृधामीत्।७।४।५५। एषामच ईत्स्यात्सादौ सनि॥ अत्र लोपोऽभ्यासस्य।७।४।५८। सनि मीमेत्या
रभ्य यदुक्तं तत्राभ्यासस्य लोपः स्यात्। आप्तुमिच्छति। ईप्सति। अर्द्धितुमिच्छति। रपरत्वम्। चर्त्वम्। ईर्त्सति। अर्दिधिषति॥ ६॥

स्यतः सेडिति वर्तते। चकारेणाक्त्वायाः संग्रहः। असंयोगादित्यतः किदिति नोपधादित्यतो वेति चानुवर्तते तदाह। क्त्वासनाविस्यादि। सेट्किं। भित्त्वा छित्त्वा बुभुक्ष
ते। आप्ज्ञप्यृधमीत्सनिमीमे स्यतः अच इत्यनुवर्तते सस्यार्द्धधातुक इत्यतः सीति च तदाह। अच ईत्स्यात्सादाविति। सीत्यस्य सनो विशेषणात्सादाविति लाभः। ईप्सती
ति। अजादेर्द्वितीयस्येति प्स शब्दस्य द्वित्वं॥

CC-0. In Public Domain. Digitization by eGangotri

ति·
सि·कौ· विभ्रज्जिषतीति। इटि नदभावे चर्माग[म]विकल्पाच्चत्वारि रूपाणि। सुस्वूर्षतीति। अज्झनगमां सनीति दीर्घे सस्तुत्वं। यियविषतीति। द्विर्वचनेऽचीत्यादेशनिषेधात्।
टी·त· द्वित्वे कृते अभ्यासस्योवर्णे इत्त्वं। ऊर्णुनूषतीति। इडभावे अज्झनगमां सनीति दीर्घः। इडूपक्षे तु विभाषोर्णोरिति वा ङित्वं। न चेह सन्निति। किन्तु नुशब्द इत्यर्थः।
९९

विभ्रज्जिषति। विभर्जिषति। विभ्रक्षति। विभर्क्षति। दम्भ इच्च। ७।४।५६। दम्भेरच इत्स्यादीच्च सादौ सनि। अभ्यासलोपः। हलन्ताच्चे।
त्यत्र हल्ग्रहणाज्जातिपरमित्युक्तम्। तेन सनः कित्वान्नलोपः। धिप्सति। धीप्सति। दिदम्भिषति। शिश्रीषति। शिश्रयिषति। उदोष्ठ्यपू
र्वस्य। सुस्वूर्षति। सिस्वरिषति। युयूषति। यियविषति। ऊर्णुनूषति। ऊर्णुनुविषति। ऊर्णुनविषति। न च परत्वाद्गुणावादेशयोः सनोऽभ्यासे
उकारो न श्रूयेतेति वाच्यम्। द्विर्वचनेऽचीति सूत्रेण द्वित्वे कर्त्तव्ये स्थानिरूपातिदेशादादेशनिषेधाद्वा। न च सन्नन्तस्य द्वित्वमिति कार्य्यि
त्वान्निमित्तता कथमिति वाच्यम्। कार्य्यमनुभवन् हि कार्य्यो निमित्ततया नाश्रीयते न त्वननुभवन्नपि। न चेह सन् द्वित्वमनुभवति। बुभू
र्षति। विभरिषति। ज्ञपिः पुगन्तो मित्संज्ञः पकारान्तश्चौरादिकश्च। इडभावे। इको झलिति कित्वान्न गुणः। अज्झनेति दीर्घः परत्वात्। णिलोपो
न बाध्यते। आपज्ञपीतिईत्। ज्ञीप्सति। जिज्ञपयिषति। अमि नस्तु। जिज्ञापयिषति। जनसनखनां सञ्झलोरित्यात्वं। सिषासति। सिसनिषति। तनिपतिद
रिद्राभ्यः सनो वा इड्वाच्यः। तनोतेर्विभाषा। ६।४।१७। अस्योपधाया दीर्घो वा स्याज्झलादौ सनि। तितांसति। तितंसति। तितनिषति। आश
ङ्कायां सन्वक्तव्यः। श्वा मुमूर्षति। कूलं पिपतिषति। सनि मीमाघुरभलभशकपतपदामच इस्। ७।४।५४। एषामच इस् स्यात्सादौ सनि। अ
भ्यासलोपः। स्कोरिति सलोपः। पित्सति। दिदरिद्रिषति। दिदरिद्रासति। डुमिञ् मीञ् आभ्यां सनन्तकृतदीर्घस्य मिनोतेश्च मीरूपाऽविशेषात्। 395

कित्वान्न गुण इति। णिच इत्यादेरिड इत्यर्थः। श्वा मुमूर्षतीति। एकस्य विषयामरणशङ्केति वोधः। मरणाशङ्का विषयो भवतीत्यन्ये। पूर्वव ९९ दिसासः सीतितः॥ राम·
त्सन इत्यात्मनेपदमिह न शङ्क्यं। शदेरित्यादिसूत्रद्वये सनो ने त्यनुवर्त्से वाक्यभेदेन व्याख्येयमिति वक्ष्यमाणत्वात्। सनि मीमा॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ ९९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सः सीत्यतः सीत्यनुवर्त्तते तस्य सनो विशेषणत्वात् सादेशसनीति लाभः । मीरूपाविशेषादिति । ननु मिनोतेर्मीरूपस्य लाक्षणिकत्वान्मीग्रहणेन ग्रहणं न प्राप्नोति ।
नैष दोषः । यत्र लक्षणाभिनिर्वृत्तत्वेन शब्दरूपमपेक्ष्यते तत्र लक्षणप्रतिपदोक्तयोरिति परिभाषोपस्थानं ननु यत्र प्रयोगाश्रयणं तत्रेति इको झलिति सूत्रे कैयटे
नोक्तत्वात् । तस्यायमाशयः गोहूपमात्रस्य प्रयोगो नात्राश्रितः विभाषा दिक्समासे इत्यत्र तु लक्षणाभिनिर्वृत्तस्य समासशब्दस्याश्रयणाद्दिग्नामान्यन्तराल इति
प्रतिपदोक्त एव समास आश्रीयते इति । लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्वात् क्वचिदुपतिष्ठते क्वचिन्नोपतिष्ठते इति तु निष्कृष्टोर्थः ॥ ❀ ॥

मित्सति । मित्सते । मामने । मित्सति । माङ् मेङोः । मित्सते । दो दाणोः दित्सति । देङ् । दित्सते । दाञ् । दित्सति दित्सते । धेट् । धित्सति । धाञ् ।
धित्सति । धित्सते । रिप्से । लिप्सते । शक्लृ । शिक्षति । शकमर्षणादिति दिवादिः स्वरितेत् । शिक्षति । शिक्षते । पित्सते । धो हिंसायां सनीस्वा
च्च । रित्सति । हिंसायां किम् । आरिरात्सति । मुचोऽकर्मकस्य गुणो वा । ७।४।५७ । सादेशे सनि । अभ्यासलोपः । मोक्षते मुमुक्षते वत्सः स्व
यमेव । अकर्मकस्य किम् । मुमुक्षति वत्सं कृष्णः । नवृद्भ्यश्चतुर्भ्यः । विवृत्सति । नडिंतु । विवर्तिषते । सिस्यन्दीति वेट् । निनर्त्तिषति । नि
नृत्सति । इट्सनि वा । ७।२।४९ । वृङ्वृञ्भ्यामृदन्ताच्च सन इड्वा स्यात् । तितरिषति । तितरीषति । तितीर्षति । विवरिषति । विवरीषति । वु
वूर्षति । वृङ् । वुवूर्षते विवरिषते । दुधूर्षति ॥ ९१ मित्सतीति । हलन्ताच्चेति कित्त्वान्नोपधागुणः । शिक्षतीति । ननु निरनुबन्धपरिभाषया शकमर्षणे
इत्यस्यैव ग्रहणमुचितमिति चेत् । अत्राहुः । इयं हि परिभाषा प्रत्ययग्रहणविषया । अत एव जन्मभ्यो रिस्यत्र जृञ्जृषोरुभयोर्ग्रहणमिति न्यासकारेणोक्तमतो
ऽत्रापि स्वादिदिवादिकयोर्ग्रहणं युक्तमेवेति । मुचोकर्मकस्य । हलन्ताच्चेति कित्वेन गुणाभावे प्राप्ते विधिरयं । विवृत्सतीति । वृद्भ्यः स्यसनोरिति विकल्पेन परस्मै
पदं । इट्सनि वा । चिकीर्षतीत्यादाविदन्तगमाभिति दीर्घे कृते नेदं प्रवर्तते । एकाच उपदेश इत्यतः उपदेश इत्यनुवर्त्य उपदेशे ऋकारान्तादिति व्याख्यानात् ॥
अत एवेदं विनैवोदाहरति । दुधूर्षतीति । धृङ्कौटिल्ये । अज्झनेति दीर्घः । उदोष्ठ्यपूर्वस्येत्युत्वं रपरत्वं हलि चेति दीर्घः ॥ ६ ॥ ६ ॥

ति·
सि·कौ· स्मिपूङ् पूङि तिङ् कारानुबंधग्रहणात् पूञः पुपूषती सेवा। सनिग्रहेतीण्णिषेधात्। सिस्मयिषत इति। स्मिङ् इषद्हसने। अस्यानिट्त्वादिडागमस्याप्राप्तिः। स्मोतिएयो
टी·न· रेवेति नियमान्नवः। अरिरिषतीति। अस्याप्यनिट्त्वादिडागमस्याप्राप्तिः। रिसशब्दस्येति। सनइटि गुणे च कृते अरिसइति स्थिते अजादेर्द्वितीयस्येति रिसशब्द
१००

स्मिपूङ्रञ्ज्वशां सनि। ७।२।७४। स्मिपूङ् ऋ अञ्जू अशू एभ्यः सन इट् स्यात्। सिस्मयिषते। पिपविषते। अरिरिषति। इह रिसशब्दस्य द्वि
त्वं। इस इति सनोऽवयवः कार्यभागिति काप्येणानिमित्तत्वायोमाद्विर्वचने चीति न प्रवर्त्तते। अञ्जिजिषति। अशिशिषते। उभौ साभ्या
सस्य। प्राणिणिषति। उच्छे लुकि। चुत्वं। पूर्वत्रासिद्धीयमद्वित्वइति चक्राभ्यां सहितस्य टो द्वित्वं हलादिः शेषः। उचिच्छिषति। निमित्ता
पायेनैमित्तिकापाय इति त्वनित्यं। च्कुरिति सनु कग्रहणाज्ज्ञापकात्। प्रकृतिप्रत्यापत्तिवचनाद्वा। णौ च संश्चङोरितिसूत्राभ्यामि।
ङो गाङ् श्वयतेः सम्प्रसारणं च वा। अधिजिगापयिषति। अध्यापिपयिषति। शिश्वाययिषति। शुशावयिषति। ह्वः सम्प्रसारणं। जुहाव
यिषति। णौ द्वित्वात्प्राग् च आदेशो नेत्युक्तत्वादुकारस्य द्वित्वम्। उस्फारयिषति। चुक्षावयिषति। ओः पुयण्ज्यपरे। पिपावयिषति। यियि
वयिषति। विभावयिषति। रिरावयिषति। लिलावयिषति। जिजावयिषति। पुयण्जि किम्। नुनावयिषति। अपरे किम्। बुभूषति। स्रव
तीती त्वं वा। सिस्रावयिषति। सुस्रावयिषतीत्यादि। अपर इत्येव। शुश्रूषते। स्तौतिण्योरेव षण्यभ्यासात्। ८।३।६१। अभ्यासेणः परस्य स्तौ।
तिण्यन्तयोरेव सस्य षः स्यात्षभूते सनि नान्यस्य। तुष्टूषति। सुतिस्वाप्योरिति षत्वम्। सुष्वापयिषति। सिषाधयिषति। स्तौतिण्योः किम्। सिसि
क्षति। उपसर्गात्सुनोत्यादिष्वभ्यासेन चेति षत्वम्। परिषिषिक्षति। षणि किम्। तिष्ठासति। सुषुप्सति। अभ्यासादित्युक्तेर्नेह निषेधः। इण्॥ ६॥

स्य द्वित्वमित्यर्थः। अंजिजिषतीत्यादि। अंजू व्यक्तिम्रक्षणगतौ। अशू व्याप्तौ। अनयोरुदित्वाद्विकल्पे प्राप्ते नित्यमिट्। ऋ प्राभोजने इति। क्रादिसूत्रनिसंसेडेव। सूत्राभ्या
मिति। एकं द्वितीये अपरं तु षष्ठे तत्राद्येन गाङादेशः परेण सम्प्रसारणं। ह्वः संप्रसारणं। इदं च णिजं तेषु व्याख्यातमिदं तु स्मारितं। जिजावयिषतीति। जुः सौत्रो धातुर्जु एम·
चंक्रम्ये स्वत्रोक्तः। शुश्रूषते इति। ज्ञाश्रुस्मृदृशां सनइत्यात्मनेपदं। स्तौतिण्योरेव। एवं च सिषाधयिषेति प्रयोगस्य साधुत्वं न तु सिसाधयिषेत्यस्येति ज्ञेयं। उपसर्गेत्विति·॥ १००

396

मध्येपवादन्यायान्लोनिएयोरिति नियमेनादेशप्रत्ययोरितिषत्वमेववाध्यतेनतुस्यादिष्वभ्यासेनचेत्युत्तरेणविहितमितिभावः।सुषुपुनीति।रुदविदेतिसनः
कित्वान्नगुणः॥ ॐ ॥प्रतीषिषतीति।इहषभूतेमनीणगतावितिधातोः परस्यसस्यषत्वंभवत्येवेत्यर्थः।नियमान्नेहेति।नचात्रनियमादेवनिषेधेसुनोतेस्यस
प्रतीषिषति।इक्।अधीषिषति।सः।सिसिदिस्वदिसहीनाञ्च।८।३।६२।अभ्यासेणः परस्यण्यन्तानामेषांसस्यसश्चवनुषः वणिपरे।सिस्विद
यिषति।सिस्वादयिषति।सिसाहयिषति।स्यादिष्वेवाभ्यासस्येतिनियमान्नेह।अभिसुसूषति। शेषिकान्मतुवर्थीयाच्छैषिकोमतुवर्थिकः
सरूपप्रत्ययोनेष्टः सन्नन्तान्नसनिष्यते।शेषिकाच्छैषिकः सरूपोन।तेनशालीयेभवइतिवाक्यमेवनतुछान्ताच्छः।सरूपः किम्।अहिछ
त्रेभव आहिछत्रः।आहिछत्रेभव आहिछत्रीयः।अस्मान्ताच्छः।तयामत्वर्थात्सरूपः सन।धनवानस्यालि।इहमतुवन्तान्मतु न्नविह
यत्तुस्यादेव।दण्डिमतीशाला।सरूपइत्यनुवर्त्यते।अर्थद्वारासादृश्यमत्रस्यार्थः।तेनइच्छासन्नन्तात्सन्नस्वार्थसन्नन्तात्तुस्यादेव।जुगु
प्सिषते।मीमांसिषते।इतिसन्प्रक्रिया।धातोरेकाचोहलादेः क्रियासमभिहारेयङ्।३।१।२२।पौनःपुन्यम्भृशार्थश्चक्रियासमभिहारस्त
स्मिन्द्योत्येयङ्स्यात्।गुणोयङ्लुकोः।७।४।८२।अभ्यासस्यगुणःस्याद्यङियङ्लुकिच।सनाद्यन्ताइतिधातुत्वाल्लडादयः।ङित्त्वा
दात्मनेपदम्।पुनःपुनः।रतिशयेनवाभवतिवोभूयते।वोभूयाञ्चक्रे।अबोभूयिष्ट।धातोः किम्।आडिधातुकत्वंयथास्यान्।तेननुवोव
चिरित्यादि।एकाचः किम्।पुनःपुनर्जागर्ति।हलादेः किम्।भृशमीक्षते।भृशंशोभते।रोचतेइत्यत्रयङेतिभाष्यम्।पौनःपुन्येतुस्यादे
वारोरुच्यते।शोशुभ्यते।सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्योयङ्वाच्यः।आद्यात्त्रयश्चुरादावदन्ताः।सोसूच्यते।सोसूत्र्यते।मोमूत्र्यते।अटे

१ काचत्वेनाघोपदेशत्वात्सत्वन्न॥

नोरितिसूत्रेसन्विषयेनिर्विषयं स्यादितिवाच्यं।अभिसुसूषतेरप्रत्ययः।अभिसुसूरित्यत्रषत्वनिषेधायतत्स्यावश्यक
त्वात्।एतच्चकाशिकायांस्पष्टं।शेषिकेतिएतच्चश्लोकवार्तिकमितिकेचित्।भाष्यमितिवहवः।शेषेभवः शैषिकः।अध्यात्मादित्वाट्ठञ्।मतुवर्थेभवोमतुवर्थीयः
गुहादित्वाच्छः।मतुवर्थोऽस्यास्तीति॥

CC-0. In Public Domain. Digitization by eGangotri



मनुवर्थिकः अतङ्निडनाविति ठन् इति सन्नन्तप्रक्रिया। धातोरेकाचो। क्रियासमभिहारइत्युक्तत्वाद्धातोरेव स्यान्न तु प्रातिपदिकादिति सूचयति धातोः किमिति। सुवोवचिरित्यादीति। वावच्यते चाख्यायत इत्यादिरूपसिद्धिः प्रयोजनमित्यर्थः। धातुग्रहणाभावे धिगिस्वयादपि स्यात्तस्य क्रियावाचित्वादेकाच्त्वाच्चेति तद्वारणार्थमपि धातुग्रहणमावश्यकमित्याहुः॥ ॐ ॥ यस्य हलः। संघातग्रहणमिति। तेनईर्ष्यितेत्यादौ यलोपो न। संघातग्रहणेन चार्थवद्ग्रहणपरिभाषोपस्थित्या पुत्रकाम्येत्यादौ नातिप्रसंगः। वर्णग्रहणे तु उक्तपरिभाषाया अनुपस्थित्या स्यादेवात्र यलोप इति भावः। हलः किं। लोलूयिता। पोपूयिता। दीर्घो किनः। अकितः किं। यंयम्यते। रंरम्यते। ननु दीर्घश्रुत्या लोपस्थितेनाचात्र लोपो भ्यासस्येत्यतोऽनुवृत्तमभ्यासस्येत्येतद्विशेष्यतां तत आजन्ताभ्यासस्य दीर्घो भवतीत्यर्थो न। पापच्यत इत्यादावेव दीर्घो भवेन्न तु यंयम्यते जंघनीतीत्यादौ। तत्र हि परत्वान्नुकि कृते ऽभ्यासस्याजन्तत्वाभावाद्दीर्घस्य प्रसक्तिर्वा दीर्घ इति वैयधिकरण्यान्वये स्वीकृते ऽकित

यस्य हलः। यस्येति संघातग्रहणम्। हलः परस्य यशब्दस्य लोपः स्यादार्धधातुके। आदेः परस्य। अतो लोपः। सोसूचाञ्चक्रे। सोसूचिता। सोसूत्रिता। मोमूत्रिता। दीर्घोऽकितः। ७।४।८३। अकितोऽभ्यासस्य दीर्घः स्यात् यङि यङ्लुकि च। यटाट्यते। यडि च। ७।४।३०। अर्तेः संयोगादेश्चर्तो गुणः स्याद्यङि। यकारपररेफस्य नेह द्वित्वनिषेधः। अराय्यते इति भाष्योदाहरणात्। अरारिता। अशाशिता। ऊर्णोनूयते। वेभिद्यते। अल्लोपस्य स्थानिवत्त्वान्नोपधागुणः। वेभिदिता॥ ॥ ९९ ग्रहणं प्रयोजनवदिति वाच्यं। संभवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वात्। येन नाप्राप्तिन्यायेन नुको दीर्घापवादत्वस्वीकाराच्च। तस्मादकित इति व्यर्थमिति चेत्। अत्राहुः। डोढौकयते इत्यत्राभ्यासह्रस्वं बाधित्वा परत्वाद्दीर्घोऽकित इति दीर्घे कृते डोढौकयत इति स्यात्। तस्मादत्राभ्यासविकारेषु उत्सर्गविधीन् बाधकाः न बाधन्त इति ज्ञापनाय अकित इति ग्रहणं कर्तव्यमिति। तथा चोक्तज्ञापकनिर्वाहाय दीर्घोऽकित इत्यत्राभ्यासस्याच इति वैयधिकरण्यपक्षस्याश्रयणात् यंयम्यत इत्यादौ दीर्घात् प्रागेव नुकि कृतेऽपि दीर्घः स्यात्तन्निवारणार्थमकित इत्यावश्यकमिति दिक्। अटाट्यत इति। इह अटशब्दस्य द्वित्वं। यडि च। इह गुणोऽर्तिसंयोगाद्योरित्येतत्सर्वमप्यनुवर्तते। यकारपरस्येति। यदि भाष्योदाहरणं सामान्यापेक्षज्ञापकं स्यात्तदा ऽयमारय्यत आरर्यते इत्यादि सिध्यति॥ ॥ ॥ ॥ ॥
॥१०॥ नित्यं कौटिल्ये गतौ। ॥१०॥ किरेवना लोति किमनेना कित इत्यनेन न चाभ्यासावयवस्य। त्रु·।१०॥

397



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्यं कौटिल्ये नि संश ब्दोऽत्र धारणार्थक इत्याह। कौटिल्य एवेति। तत्र कौंडिन्यन्यायेनैवेष्टे सिद्धे नित्यग्रहणं तस्य न्यायस्यानित्यत्व ज्ञापनार्थं। तेन मतिबु
द्धिपूजार्थेभ्यश्चेति वर्तमाने क्तेनाबाधनात् पूजार्थेभ्यो भूते क्तः सिध्यति। न तथ्वक्तस्य च वर्त्तमाने इति षष्ठीन प्रवर्त्तत इति पूजितो यः सुरासुरैरिति तृतीया
साधुरेव। इत्यादीति। जंजभ्यते। दंदश्यते। दंदह्यते। बंभज्यते। पसधातुर्दंत्यांतः सौत्रो गत्यर्थ इति। स्पशबाधनस्पर्शनयोरित्यत्र माधवः। पंपस्यते। काशि
कायां तु तालव्यांतः क्वचिद्दृश्यते। एवं जंजपीति। जंजभीति। दंदहीतीत्यादि यङ्लुकि उदाहर्त्तव्यं। ग्रोयङिः। कृपोरोलइत्यतो रो लइति वर्त्तते तेनदाहरेफस्य

नित्यङ्कौटिल्ये गतौ। ३।१।२३। गत्यर्थात् कौटिल्य एव यङ् स्यान्नतु क्रियासमभिहारे। कुटिलं व्रजति। वाव्रज्यते। लुपसदचरजपजभदहद
शगृभ्यो भावगर्हायाम्। ३।१।२४। एभ्यो धात्वर्थगर्हायामेव यङ् स्यात्। गर्हितं लुम्पति। लोलुप्यते। सासद्यते। चरफलोश्च। ७।४।८७।
अनयोरभ्यासस्यातो नुक् स्याद्यङ् लुकोः। नुगित्यनेनानुस्वारो लक्ष्यते। स च पदान्तवद्वाच्यः। वा पदान्तस्येति यथा स्यात्। उत्परस्यातः।
७।४।८८। चरफलोरभ्यासात्परस्यात उत्स्याद्यङ्यङ्लुकोः। हलि चेति दीर्घः। चञ्चूर्य्यते। पम्फुल्यते। पंफुल्यते। जपजभदहदशभञ्जप
शाञ्च। ७।४।८६। एषामभ्यासस्य नुक् स्याद्यङ्यङ्लुकोः। गर्हितं जपति। जञ्जप्यते इत्यादि। ग्रोयङि। ८।२।२०। गिरतेरेफस्य लत्वं
स्याद्यङि। गर्हितं गिलति। जेगिल्यते। घुमास्थेतीत्वम्। गुणः। देदीयते। पेपीयते। सेषीयते। विभाषाश्वेः। शोशूयते। शेश्वीयते। प।
ङिचं सास्पर्ध्यते। रीङृ ऋतः। चेक्रीयते। सुट्। सञ्चेस्क्रीयते॥ ११ लत्वमिति। चेक्रीयते इति। परत्वाद्रीङि कृते द्विर्वचनं। संचेस्क्रीयते इति। रीङि
द्वित्वे च सुट् न च संकृ इत्यस्यामवस्थायां द्वित्वा- स्यात्वात्सुटि कृते संयोगादित्वेन रीङ् प्रवृत्तेः पूर्वं भेत्स्यइ भ्यासयोः कृतयोरेव सुट् न तु तत्तः प्रागिति सि
द्धांतात्। एतेन सुटो बहिरंगत्वा- त्संयोगादित्वेन गुण इति केषांचित्समाधानं परास्तं। अभ्यासात्परस्य सुटि कृते साभ्यासस्यांगस्य संयोगादित्वमदंतत्वं च
नास्तीति गुणप्राप्तेरभावात्। नन्वडभ्यासव्यवायेपि सुट् कात्पूर्व इति वार्तिकप्रत्याख्यानाय पूर्वं धातुरुपसर्गेण युज्यत इति पक्षस्वीकृतस्य भाष्यकृता संच
स्करतुरित्यादावंतरंगत्वात् सुटि सस्कस्यैव द्वित्वाभ्युपगमात् संचेस्क्रियते इति न सिध्येत्। तत्र हि सुटि कृते रीङं बाधित्वा परत्वात्यङि चेति गुणे संचास्कर्यते
कृ गुणः स्यादिति वाच्यम्। अडभ्यासव्यवायेपी सस्ताः। त्रु।१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नपूर्वे धातुः साधनेन युज्यते पश्चादुपसर्गेणेति तर्हि अड्भ्यासव्यवायेपीति वचनं स्वीकर्त्तव्यमेव स्यादिति चेत्। अत्राहुः। अड्भ्यासेत्यादि वार्त्तिकं विना
पि सेचस्कन्नुरित्यादिरूपसिद्धये भाष्यकृता पूर्वं धातुरुपसर्गेण युज्यत इति पक्ष आश्रितः। संचेस्कीयत इत्यादिसिद्धिस्तु वार्त्तिकायत्नैवेति॥ ॥
सिचोयङि। अभ्यासस्य कारस्योपसर्गात्सुनोतीति नेति ततः परस्य तु स्यादिषभ्यासेन चेति षत्वप्रसक्तेर्निषेधोयं। यङि किं। अभिषिषिक्षति। नकवतेर्यङि। इह कोरित्येव वा
च्ये कवतेरिति श्तिपा निर्देशात् कुङ् शब्द इति स्वादिर्विगृह्यते ननु कुधातुरिति अदादिः कुङ् शब्द इति तुदादिश्चेत्याशयेनाह। कौतिकुवत्योस्त्विति। ननु कौतिसुक्तेपि
कूङः प्रसंगो नास्ति दीर्घोच्चारणाल्लुग्विकरणापरिभाषया च कौतेरपि प्रसंगो नास्तीति चेत्। अत्राहुः। कौतिसुक्तेनु निरनुबंधपरिभाषाया अपि ज्ञापकत्वात् उभयोर्म

सिचो यङि। ८।३।११२। सिचः सस्य षो न स्याद्यङि। निसेसिच्यते। नकवतेर्यङि। ७।४।६३। कवतेरभ्यासस्य चुत्वं न स्याद्यङि। कोकूयते। कौतिकुव
त्योस्तु। चोकूयते। नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम्। ७।४।८४। एषामभ्यासस्य नीगागमः स्याद्यङ्लुकोः। अकितइत्युक्तेर्न दीर्घः
नलोपः। वनीवच्यते। सनीस्रस्यते इत्यादि। नुगतोऽनुनासिकान्तस्य। ७।४।८५। अनुनासिकान्तस्याङ्गस्य योऽभ्यासोऽदन्तस्तस्य नुक् स्यात्
नुक्त्वानुस्वारो लक्ष्यते इत्युक्तम्। यंयम्यते। यंयम्यते। नपरत्वसामर्थ्याद् नुक्पूर्वे दीर्घस्यापि न। भाम क्रोधे। बाभाम्यते। ये विभाषा। जाजाय
ते जञ्जन्यते। हन्तेर्हिंसायां यङि घ्नीभावो वाच्यः। जेघ्नीयते। हिंसायां किं। जङ्घन्यते॥ ९९ हशां स्यादिति कौतिव्यावृत्त्यर्थं श्तिपा निर्देशः कर्त।

व्यः। कृते च तस्मिन् कुवतिमपि व्यावर्त्तयतीत्यत्र तात्पर्यमिति। कुङ इत्येवात्र सुवचं। इत्यादीति। दनीध्वस्यते। वनीभ्रस्यते। चनीकस्यते। पनीपत्यते। पनी
पद्यते। चनीस्कद्यते। एवं वनीवंचीति सनीस्रंसीति दनीध्वंसीत्यादि यङ्लुक्युदाहर्त्तव्यं। घ्नीभावइति। घ्नीभावे कृतेप्यभ्यासाच्चेति कुत्वेन जेघ्नीय
इति सिध्यति तथापि प्रक्रियालाघवाय घ्नीइत्युक्तमिति मनोरमा। अन्ये तु सेहिमैनिरिति इकारोच्चारणसामर्थ्यात् यथा एरुरित्युत्वं न भवति तथा घ्नीभावे हि
कृते अभ्यासाच्चेति कुत्वेन स्यादित्याशयेन घ्नीभावः कृतइत्याहुः। अत्र चादेश्यादेशेनैव घ्नीभावेन द्वित्वं न बाध्यते पुनः प्रसंगविज्ञानादिति कश्चित्॥
वस्तुतस्तु यङ्तावप्य सद्धित्वोपाजवधिकस्य द्वित्वं घ्नीभावस्तु प्रकृतिमात्रस्येति विषयभेदाद्द्वित्वं निर्बाधमेव॥ ॥ ॥

रीगृदुपधस्य च। ऋदिति किम्। चेकीर्त्यते। णिजभावपक्षे एकाच्त्वाद्यङ्। स्वपिस्यमि। यङि किम्। स्वप्नक्। सेस्मिय्यते इति। स्यमुशब्दे दंसाजंतसादित्वाभावे। नाषोपदेशत्वान्नषः। वेवीयते इति। हल इतिवा ऽकृत्सार्वेति वा दीर्घः। चायः की। यङि परे चायः की स्यात्। दीर्घोच्चारणं यङ्लुगर्थं। अतएव न लुमतेति निषेधो पिन प्रवर्त्तते इतिङ्लुक्यपि चायः की स्यादेव। चेकीतः। इध्मा ध्मोः। दीर्घोच्चारणं प्राग्वत्। जेघ्रीतः। अस्य चाविस्याद्यर्थं दीर्घग्रहणमिति तु सुवचम्। शाशय्यते

रीगृदुपधस्य च। ७।४।९०। ऋदुपधस्य धातोरभ्यासस्य रीगागमः स्याद्यङ्यङ्लुकोः। वरीवृश्च्यते। क्षुभ्नादित्वान्न णः। नरीनृत्यते। जरीगृह्यते। उभयत्र लत्वम्। चलीक्लृप्यते। रीगृत्वत इति वक्तव्यम्। वरीवृश्च्यते। परीपृच्छ्यते। स्वपिस्यमिव्येञां यङि। ६।१।१९। सम्प्रसारणं स्यात् यङि। सोषुप्यते। सेसिम्यते। वेवीयते। न वशः। ६।१।२०। वावश्यते। चायः की। ६।१।२१। चेकीयते। ई घ्राध्मोः। ७।४।३१। जेघ्रीयते। देध्मीयते। अयङ्यि क्ङिति। ७।४।२२। शीङो ऽयङादेशः स्याद्यादौ क्ङिति परे। शाशय्यते। अभ्यासस्य ह्रस्वः। ततो गुणः। डोढौकयते। तोत्रौक्यते इति यङन्तप्रक्रिया। यङो ऽचि च। २।४।७४। यङो ऽच्प्रत्यये लुक् स्याच्चकारात्तं विनापि बहुलं लुक् स्यात्। अनैमित्तिकोयम्। अन्तरङ्गत्वादादौ भवति। ततः प्रत्ययलक्षणेन यङन्तत्वाद्द्वित्वम्। अभ्यासकार्य्यम्। धातुत्वाल्लडादयः। शेषात्कर्त्तरीति परस्मैपदम्। अनुदात्तङित इति तु न। ङित्त्वस्य प्रत्ययाऽप्रत्ययसाधारणत्वेन प्रत्ययलक्षणाप्रवृत्तेः। यत्र हि प्रत्ययस्यासाधारणं रूपमाश्रीयते तत्रैव तत्। अत एव सुदृषत्प्रासादइत्यत्राऽत्वसन्तस्येति दीर्घो न। येपि स्यर्द्ध शीङादयोनुदात्तङितस्तेभ्योपि न। अनुदात्तङित इत्यनुबन्धनिर्देशात्। तत्र च श्तिपा शपेति निषेधात्। अत एव श्यन्नादयो न। गणेन निर्देशात्। किन्तु शबेव। चर्करीतं चेत्यदादौ पाठाच्छपो लुक्॥ ६ ॥

इति। परत्वादंतरंगत्वाच्चायङादेशे कृते द्वित्वम् इति यङन्तप्रक्रिया। यङो ऽचि च। यङः साहचर्यादच्चीतिप्रत्ययो गृह्यते नतु प्रत्याहारः। एषसन्नियार्थे स्यतो ऽत्र लुगनुवर्त्तते। तदाह अच्प्रत्यये लुक् स्यादिति। चकारेण बहुलं छंदसीत्यतो बहुलमित्यनुकृष्यत इत्याह। बहुलं लुक् स्यादिति। ये तु छंदसीत्यनुकर्षन्तितेषामपि ते क्वचिद्भाषायां यङ्लुग्भवत्येव। भूसुवो रिति गुणनिषेधे सिद्धे बोभूत्विति छंदसि निपातनात्तज्ज्ञापकात्। एतच्च मूल एव स्फुटीभविष्यति। अनैमित्तिको ऽयमिति

सि॰कौ॰टी॰ ॥

मानोयङ्लुक् तुतन्निमित्तकएव। तेनलोलुवः पोपुवइत्यादौनधातुलोपइतिनिषेधः सिध्यति। यङंतत्वादिति। सन्यङोरितिषष्ठीनतुसप्तमी। अन्यथायङोलुकि लुक्त्वेनप्रत्ययलक्षणाप्रवृत्तेर्द्वित्वंनस्यादितिभावः। नचांगाधिकारविहितकार्यस्यैवनलुमतेतिनिषेधात् द्वित्वमत्रस्यादेवेतिसप्तमीपक्षोपिनिर्दुष्टइतिवा च्यम् नलुमतेत्यत्रांगाधिकारेणनगृह्यतेकिंतुआगमनागंवाप्रत्ययेपरतः पूर्वस्यविधीयमानंसर्वमितिसिद्धांतात्। अन्यथाराजपुरुषइत्यादौनलोपोनस्यात् तदुक्तरीत्याप्रत्ययलक्षणाप्रवृत्तौभत्वेनपदत्वबाधात्। यद्यप्येकाचइतिविधीयमानद्वित्वंश्लिपापापेत्यादिनानिषिध्यतेतथापितत्स्यादेवाग्युणोयङ्लुकोः हन्निकौचुलुकिइत्यादावभ्यासकार्यविधिभिर्द्वित्वानिषेधस्यज्ञापनात्। प्रत्ययाप्रत्ययेतिप्रत्ययेङिन्त्वंदृश्यतेअतेरीयङ् वृत्त्यादिभुन्नप्रत्ययेपिदृश्यतेचित्रङा

यङोवा। ७।३।९४। यङन्तात्परस्यहलादेः पित्तःसार्वधातुकस्यईड्वास्यात्। भूसुवोरितिगुणनिषेधोयङ्लुकिभाषायान्नाबोभूतुतेति केइतिछन्दसिनिपातनात्। अतएवयङ्लुग्भाषायामपिसिद्धः। नचयङ्लुकप्राप्तएवगुणाभावोनिपात्यतामितिवाच्यं। प्रकृति ग्रहणोयङ्लुगन्तस्यापिग्रहणात्। द्विःप्रयोगोद्विर्वचनंषाष्ठमितिसिद्धान्तात्। बोभवीति। बोभोति। बोभूतः। बोभुवति। बोभवाञ्चका र। बोभविता। अबोभवीत्। अबोभोत्। अबोभूताम्। अबोभवुः। बोभूयात्। बोभूयास्ताम्। बोभूयासम्। गातिस्थेतिसिचोलुक्। यङो वेतीट्पक्षेगुणम्बाधित्वानित्यत्वाद्वुक्। अबोभुवीत्। अबोभोत्। अबोभूताम्। अभ्यस्तात्रयोजुस्। नित्यत्वाद्वुक्। अबोभुवुः। अबोभवि ष्यदित्यादि। पास्पर्धीति। पास्पर्द्धि। पास्पर्द्धः। पास्पर्द्धति। पास्पर्त्सि। हुझल्भ्योहेर्द्धिः। पास्पर्द्धि। लङ्। अपास्पर्त्। अपास्पर्द्। सिपि दश्चेतिरुत्वपक्षे

दिषु। एवंचयङोलुकिप्रत्ययलक्षणेनयङाश्रितङित्वप्रयुक्तकार्यमात्मनेपदमत्रनशंक्यमितिभावः ङितइत्यनुबंधनिर्देशादितिपरिहारस्त्वत्रनोक्तः। शीङादी नामिवभूइत्यादिधातूनामनुबंधेनानिर्दिष्टत्वात् यङोङकारस्यप्रत्ययानुबंधत्वेनसमुदायाननुबंधत्वात्यङंतोपिधातुरनुबंधेनानिर्दिष्टइतिबोध्यमस्तुदृषा दितिशोभनादृषदोऽस्मिन्नितिबहुव्रीहौदृषच्छब्दोजसंतः। दीर्घोनेति। असितिप्रत्ययोप्रत्ययश्चास्तीति। प्रत्ययस्यासाधारणरूपानाश्रयणात्प्रत्ययलक्षणे नासंतत्वाभावादितिभावः। तेभ्योपीतिदिं त्वनुदात्तेतः प्रत्ययलक्षणंविनैवङिनस्यतेभ्योपीत्यर्थः। अदादौपाठादितितथाचअदिप्रभृतिभ्यःशपइत्यनेनयङ्



399

CC-0. In Public Domain. Digitization by eGangotri

लस्याचीति सूत्रात् स्मिति सार्वधातुक इति उतो वृद्धिरित्यतो हलीति चानुवर्त्तते भुवइ ईडिसतः ईट्। तदेतदाह। यङ्ना दित्यादि। यङो लुक्यपि प्रत्ययलक्षणेनात्र य
ङन्तत्वम्। एतेन यङन्ताद्धलादिपि सार्वधातुके न संभवतीति यङ्शब्देन यङ्लुगन्तं लक्ष्यत इति व्याख्यानं परास्तम्। उक्तरीत्या यङन्तलाभसम्भवात्। किंच। यङन्ताद्धलादिपि
न्न संभवतीति यङ्शब्देन यङ्लुगन्ते लक्षितेऽपि सन्यङोरिति द्वित्वस्य यङन्ते चरितार्थतया यङ्लुगन्ते लक्षणाया बीजाभावाद्यङ्लुकि द्वित्वाभावप्रसंगादिति दिक्। छन्दसि निपा
तनादिति गुणनिषेधे सिद्धे निपातनमिदं छन्दस्येव गुणनिषेधो नान्यत्रेति नियमार्थमित्यर्थः। बोभूत्विति। समुदायस्यानतिरिक्तत्वाद् भुवोरिति गुणनिषेधो न प्राप्नोतीति।
निपातनमिदं न नियमार्थमित्याशंकायामाह। नचेति। द्विप्रयोग इति। तथा च प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणमित्येतन्न्यायसिद्धं तत्पूर्ववचनमिति भावः। बोभुव
तीति। अदभ्यस्तादिः सत्। अबोभूवीदिति। केचिदिह भुवो वुगिति सूत्रे ओः सुपीत्यतो ओरित्यनुवर्त्तते। तथा च उवर्णान्तस्य भुवो वुगित्यर्थात् गुणे कृते वुकः प्राप्ति
नास्ति सति सो वुक्। स च पराभ्यां गुणवृद्धिभ्यां बाध्यते। तेन अबोभवीदिति रूपमाहुः। तच्चिन्त्यम्। भुवो वुक्लोकि नित्यत्वादिति भाष्यग्रन्थविरोधात्। तस्माद्वु
को नित्यत्वमाश्रित्य इडिति भवति भ्यां चेति सूत्रं प्रत्याख्यातवतो भाष्यकृतः ओरित्यनुवर्त्तनमसंमतमेव। आत इति नियमात् जुसभावमाशंक्याह। अभ्यस्ता
श्रय इति। अयं भावः। सिजभ्यस्तेति सूत्रेण सिचः परत्वमाश्रित्य यो जुस् प्राप्तस्तस्यैवायं नियमो न त्वभ्यस्ताश्रयस्य जुस इति। जुसि चेति गुणमाशंक्याह।
नित्यत्वात् वुगिति। अबोभुवुरिति। न चात्र परत्वाददभ्यस्तादित्यदादेशः स्यादिति वाच्यम्। अभ्यस्ताश्रयजुसोऽदादेशापवादत्वात्। पास्पर्धीतीति स
र्ध संघर्षे दीर्घोऽकित इत्यभ्यासस्य दीर्घः। यङो वेति ईडिकल्पः इडभावपक्षे न पस्पर्धोतीति धत्वं झरो झरि सवर्णे इति वा धलोपः। लिटि पास्पर्धांचकार। लुटि
पास्पर्धिता। लृटि पास्पर्धिष्यति। लोटि पास्पर्धीतु पास्पर्धु पास्पर्धानि पास्पर्धाम। पास्पर्धन्तु हे पर्धि त्वेवाधे लोपः। लिङि। इडागमपक्षे अपास्पर्धीत्। हल्त्वप
क्षे इति। पक्षान्तरे तु अपास्पर्त्। अपास्पर्ध्ईलिङि। पास्पर्ध्यात्। पास्पर्ध्यास्ताम्। लुङि। अस्तिसिचो पृक्त इति नित्यमिट्। इट ईटीति स
लोपः। अपास्पर्धीत्। अपास्पर्धिष्टाम्। अपास्पर्धिषुः। लृङि। अपास्पर्धिष्यत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



जागर्द्धीति। गाध्प्रतिष्ठादौ इट्पक्षे तु जागाधीति। जाघात्तीति। एकाच इति भष्भावः। धस्य चर्त्वं। लोटि। जागाधीतु जागाद्धु जागाद्धां जागाधतु। लङि। अजाग

जागाद्धि। जाघात्ति। अजाघात्। सिपि। रुत्वपक्षे। अजाघाः। नास्थ। नानात्ति। नानात्तः। दधाद्दादद्धि। दादद्धः। दाधत्ति। अदाधत्। अदादधुः

अदाधः। अदाधत्। लुङि। अदादाधीत्। अदादधीत्। चोस्कुन्दीति। चोस्कुन्ति। अचोस्कुन्। अचोस्कुन्ताम्। अचोस्कुन्दुः। मोमुदीति। मोमोत्ति

मोमोदाञ्चकार। मोमोदिता। अमोमुदीत्। अमोमोत्। अमोमुत्ताम्। अमोमुदुः। अमोमुदीः। अमोमोः। अमोमोत्। लुङि गुणः। अमोमोदीत्।

चोकूर्ति। चोकूर्दीति। लङ्। तिप्। अचोकूर्त्। अचोकूर्दीत्। सिप्पक्षे। अचोकूः। अचोखूः। अजोगूः। वनीवञ्चीति। वनीवङ्क्ति। वनीवक्तः। वनी

वचति। अवनीवञ्चीत्। अवनीवन्। जङ्गमीति। जङ्गन्ति। अनुदात्तोपदेशेत्यनुनासिकलोपः। जङ्गतः। जङ्गमति। म्वोश्च जङ्गन्मि।

जङ्गन्वः। एकाज्ग्रहणोक्तत्वान्नेटिनिषेधः। जङ्गमिता। अनुनासिकलोपस्याभीयत्वेनासिद्धत्वान्नहेर्लुक्। जङ्गहि। मो नो धातोः। अजङ्गन्। अ

नुवर्त्यनिर्देशान्नेत्रेरङ्। हन्यन्तेतिनत्वह्निः। अजङ्गमीत्। अजङ्गमिष्टाम्। हन्तेर्ण्यङ्लुक्। अभ्यासाच्चेति कुत्वं। यद्यपि होहन्तेरित्यन्तोहन्तेरित्यनु

वर्त्य विहितं। तथापि यङ्लुकि भवत्येवेति न्यासकारः। श्तिपा शपेति निषेधस्त्वनित्यः। गुणो यङ्लुकोरिति सामान्यापेक्षज्ञापकादिति भावः।

जङ्घनीति। जङ्घन्ति। जङ्घतः। जंघ्नति। जङ्घनिता। श्तिपानिर्देशाज्जादेशोन। जङ्घहि। अजङ्घनीत्। अजङ्घन्। जङ्घन्यात्। आशिषि तु। वध्यात्। अ

वधीत्। अवधिष्टामित्यादि। वधादेशस्य हित्वन्न भवति। स्थानिवत्त्वेनानभ्यासस्येति निषेधात्। तद्धि समानाधिकरण्यात्तोविशेषणाम्। व

हन्त्रो हि वलात्। आङ्पूर्वात्तु आङो यमहनइत्यात्मनेपदम्। आजङ्घ्नते इत्यादि। उत्परस्येति तपरत्वान्न गुणः। हनिचेत्तिदीर्घस्तु स्यादेव। तत्स्या

सिद्धत्वेन तपरत्वनिवर्त्यत्वायोगात्। चञ्चुरीति। चञ्चूर्त्ति। चञ्चूर्त्तः। चञ्चुरति। अचञ्चुरीत्। अचञ्चुः। चङ्क्वनीति। चङ्क्वन्ति। जनसनेत्यात्वं॥

धीत् अजाघात्। अजागाद्धाम्। अजागाधुः। लुङि। अजागाधीत्। अजागाधिष्टाम्। नाथनाधपाञ्चादेनानाथीति। ईट्पक्षे नानाथीति दध धारणे ईट्पक्षे दादधी



400

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लुङि अतो हलादेरिति वा वृद्धिः। चोस्कुनोति। स्कुदि आप्रवणे इदित् इति नुम् ईड्भावे रुरो रि सवर्णो इति वा लोपः। लङि। ईट्पक्षे अचोस्कुंदीत्। लुङि नुअस्ति
सिच इति नित्यमीट्। अचोस्कुंदीत्। अचोस्कुंदिष्टाम्। मोमुदीतीति। मुद हर्षे नाभ्यस्तस्याचीति लघूपधगुणनिषेधः। मोमोदितेति। न चात्र न धातुलोप इति गु
ण निषेधः शक्यः बहुलग्रहणेन प्राप्तस्य यङ्लुकोऽनैमित्तिकत्वात्। लुङि गुण इति सिज्निमित्तकोऽयं गुणस्तेन नाभ्यस्तस्याचीति निषेधो न शङ्कनीय इति भावः। चोकू
नीति। कुर्द खुर्द गुर्द गुद क्रीडायाम्। लङि तिपि। ईट्पक्षे अचोकूर्दीत्। अचोखूर्दीत्। अजोगूर्दीत्। पक्षे अचोकूरिति दश्चेति रुत्वपक्षे इत्यर्थः। वनीवंचीतीति। वंचु
चङ्खातः। गमहनेत्युपधालोपः। चंखन्ति। चङ्खाहि। चङ्खनानि। अचंखनीत्। अचङ्खन्। अचङ्खाताम्। अचंखनुः। ये विभाषा। चङ्खायात्।
—। चङ्खन्यात्। अचङ्खनीत्। अचङ्खानीत्। उतो वृद्धिरिति सूत्रे नाभ्यस्तस्येत्यनुवृत्तेरुक्ता वृद्धिर्न। योयोति। योयवीति। अयोयवीत्। अयोयोत्। यो
युयात्। आशिषि दीर्घः। योयूयात्। अयोयावीत्। नोनवीति। नोनोति। जाहेति। जाहाति। ई हल्यघोः। जाहीतः। इह जहातेश्च आ च हौ लोपो यि
घुमास्थाएल्लिङीत्येतत्पञ्चापि न भवन्ति। श्तिपा निर्देशात्। जाहाति। जाहासि। जाहेषि। जाहीथः। जाहीथ। जाहीहि। अजाहेत्। अजाहान्। अ
जाहीताम्। अजाहुः। जाहीयात्। — आशिषि। जाहायात्। अजाहासीत्। अजाहासिष्टाम्। अजाहिष्यत्। लुका लुप्तेऽप्रत्ययलक्षणाभावान्न स्वपि
स्यमीत्युक्तत्वन्न। रुदादिभ्य इति गणनिर्दिष्टत्वादिडन। सास्वपीति। सास्वप्ति। सास्वप्तः। सास्वपति। असास्वपीत्। असास्वप्। सास्वप्यात्। आशिषि
तु वचिस्वपीत्युक्तत्वं संप्रसारणं सासुप्यात्। असास्वापीत्। असास्वपीत्॥ ९९ गन्तौ। निसंकौ दिल्येगता विति यङ्। नीरवंचीसभ्यासस्यनी गागमः। यङो लुका लुप्तत्वात्
न तदाश्रितो नलोपः। वनीवक्तीत्यत्र लोडि स्वादिष्वसादेवानिदितामिति नलोपः। लोटि वनीवंचीतु। वनीवङ्क्तु। वनीवक्तात्। वनीवक्तां वनीवचतु वनीवग्धि। वनी
वंचानि। जंगमीति। तुगतो तुनासिकान्तस्येति तुक्। जंगन्तीति। गमहनेत्युपधालोपः। अजंगन्निति। ईट्पक्षे त्वजंगमीत्। अजंगताम्। अजंगमुः। अजंगमीः। अजंग
न्तम्। अजंगत। अजंगमम्। अजंगन्व। अजंगन्म। सामान्यापेक्षेति। अयं भावः। एकाचो द्वे इत्यत्रैकाच्ग्रहणाद्यङ्लुकि द्विर्वचनेन कृत्स्नापि प्राप्तो।
ति। तेषां च गुणो यङ्लुको रिः स्वभ्यासस्य विधीयमानो गुणो द्विर्वचनं विना निवेशमलभमानः सन्न् भिन॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पाशपेति सर्वेषामपि निबंधानां कचिद्यङ्लुकप्रवृत्तिं ज्ञापयतीति। तथा च प्रयुज्यते। राजा वृत्रं जंघनदित्यादि। द्वित्वं तु न भवतीति। वध्यात् अवधीदित्यत्र हन्
त द्विर्वचनस्य हनो वध लिङि। लुङि चेति वधादेशात् सुतर्द्वित्वं न भवतीत्यर्थः। तत्र हेतुमाह। स्थानिवत्त्वेनेति। आङ्पूर्वादिति। प्रकृतिग्रहणे यङ्लुगंतस्यापि ग्रह
णादिति भावः। चेचूर्णीति। चरतिगतौ भक्षणे च। चरफलोश्चेत्यभ्यासस्यनुक्। उत्त्वरस्यात इत्युत्वं। हलि चेति दीर्घः। अचंचूरित्यत्र तु पदांतविषयत्वाद्र्रूपधाया
। इति दीर्घः। चंखनीति। खनु अवदारणे चं खातइति। यत्तु केचिद्धातुग्रहणे न कृतं कार्यं यङ्लुकि वेति जनसनखनां सञ्झलोः भावे ऽनुनासिकस्य क्विझलोरिति दीर्घो
पि न भवति कित्साहचर्याद्धि झलादिः कदेवत् न त्वगृह्यते नत्तु तिङि ति अभ्युपेत्य चंखंनइति रूपमाहुस्तदयुक्तम्। धातुग्रहणे न कृतस्य यङ्लुक्यप्रवृत्तौ मानाभा
वात्। सत्यपि प्रमाणे आत्वं वेति विकल्पो त्वयाचंखात इति रूपं केन वार्यताम्। पञ्चोक्तमनुनासिकस्येति सूत्रे क्विझ्साहचर्यात् झलादिरपि कदेवगृह्यत इति
तदप्ययुक्तमेव। यदि हि कदेवक्वि स्यात्तदा साहचर्यो क्तिः संगच्छेत किंतु क्ङिन्नोपि अस्त्येव चार्क्विप्। अत एव राजानतिचर्मीणा निड्त्यादौ माधवा
दिभिः क्विनिमित्तो दीर्घ उक्तः। चंखाहीति हेरपित्त्वेन ङित्त्वाज्जनसनेत्यात्वम् अचंखानीदिति अतो हलादेरिति वा वृद्धिः जाहेतीत्यादि हाङ्हाको लुक्या
निरूपाणि। ङित्त्वप्रयुक्तस्यात्मनेपदस्य यङ्लुक्यप्रवृत्तेः। भृञामिदितिहाङ इत्वस्य श्लुनिमित्ताभ्यासस्यैव विहितत्वाच्च। न च अकित इति निषेधेन हा
को ऽभ्यासस्य दीर्घो दुर्लभ इति कथमुभयोस्तुल्यरूपतेति वाच्यम्। अकित इत्यत्र हि न विद्यते कित् यस्याभ्यासस्येति बहुव्रीहिराश्रीयते तेन द्विः प्रयोगो द्वि
र्वचनं षाष्ठमित्यभ्युपगमाद्यातोः कित्त्वे ऽभ्यासस्याकित्त्वे पि वर्णोवंची त्यादाविव कित्त्वाभावान्न दोषः। किं च द्वित्वाभावे केवलस्यार्थवत्त्वेपि द्वित्वे सति
समुदाय एवार्थवानिति हि सर्वसंमतम्। तथा कित्त्वमपि समुदायस्यैवास्तु न तु प्रत्यवयवमिति तात्पर्यम्। दीर्घे प्रतिबंधः। जाहीयादिति। ईहल्यघोरिती
त्वम्। लुका लुप्तइति। सर्वविधिभ्यो लुग्विधेर्वलीयस्त्वादकृतव्यूहपरिभाषया च लुकः पूर्वं न षकं क्रममेवेति भावः। उत्त्वं नेति फलितार्थकथनमिदं स्वपि
स्यमीत्यादिना विधीयमानं यत्संप्रसारणं तन्नेत्यर्थः। असास्वापीदिति। अतो हलादेरिति विकल्पेन वृद्धिः॥



५०१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋग्रिकौ च चकारेणारीगट्टपधस्येयनोरिगनुकृष्यते ऋकउकार उच्चारणार्थः। अतनश्च। अतनाऽनुवर्तमानमंगं विशेष्यते। अदन्तस्यांगस्योपोऽभ्यासस्तस्य सर्थः। अ
दंतादातोरिति पाठस्तु फलितार्थकथनपरतया नेयः। लोटि। वर्वर्तीतु ३। वर्वर्तु ३ वर्वृतात्। वर्वृताम् ३। वर्वृतन्तु ३ वर्वृद्धि ३ अड्ड्। नि। पुषादिद्युतादीयनेन। चर्करीतेतिड्

ऋग्रिकौ च लुकि। ७।४।९१। ऋदुपधस्य धातोरभ्यासस्य ऋकरिकरीक एते आगमाः स्युर्यङ्लुकि। अतनश्च। ७।४।९२। ऋदन्तधातोरपि तथा। वर्वर्तीति
वरिवृतीति। वरीवृतीति। वर्वर्ति। वरिवर्त्ति। वरीवर्त्ति। वर्वृतः ३। वर्वृतति ३। वर्वर्तामास। वर्वर्त्तिता ३। गणनिर्दिष्टत्वान्न वृद्भ्यश्चतुर्भ्य इति न। वर्वर्तिष्यति
३। अवर्वृतीत् ३। अवर्वर्त् ३। सिपि। दश्चेति रुत्वपक्षे रोरि। अवर्वः ३। गणनिर्दिष्टत्वादङ्। अवर्वर्तीत् ३। चर्करीति ३। चर्कर्ति। चरिकर्ति। चरीकर्त्ति। चा
र्कृतः ३। चर्क्रति ३। चर्करांचकार ३। चर्करिता ३। अचर्करीत् ३। अचर्कः ३। चर्कृयात् ३। आशिषि रिङ्। चर्क्रियात् ३। अचर्करीत् ३। अतश्चे
तित्परत्वान्नेह। तृ विक्षेपे। चाकर्ति। तातर्ति। तातीर्त्तः। तातिरति। तातीर्हि। तातराणि। अतातरीत्। अतातः। अतातीर्त्ताम्। अतातरुः। अतातारीत्
अतातारिष्टामित्यादि। अर्तेर्यङ्लुकि द्वित्वेऽभ्यासस्योरदत्त्वं रपरत्वं। हलादिः शेषः। ऋकारिग्रीकौ तु। अभ्यासस्यासवर्णे इति इयङ्। अरर्त्ति। अ
रिअर्ति। अररीति। अरियरीति। अरर्तः। अरियृतः। झि अत्। यण्। ऋकारोरिति लोपः न च तस्मिन् कर्त्तव्ये यणः स्थानिवत्त्वम्। पूर्वत्रासिद्धे न स्थानिवत्त्वमिति निषेधा
त्। अरति। अरियति। लिङि। यितपानिर्देशान्न गुणो नेति गुणो न। रिङ्। रलोपः दीर्घः। आरियात्। अरिरियात्। अरीरियात्। ग्रह उपादाने। जर्गृहीति ३।
जर्गर्ढि ३ जर्गृढः ३। जर्गृहति ३। अजर्घट् ३ गृह्णातेस्तु। जाग्रहीति जाग्राढि। न सांदेशिनिमित्तसम्प्रसारणम्। तस्य बहिरङ्गत्वेनासिद्धत्वान्न कगाद
यः। जाग्रढः। जाग्रहति। जाग्रहीपि। जाघ्राक्षि लुटि जाग्रहिता। ग्रहोऽलिटीति दीर्घस्तु न। तत्रैकाचइत्यनुवृत्तेः॥ ९. डुकृञ् करणे चर्करीतं चेत्यादिति। सार्वधातुकत्वाद
ङ्सार्वेति न दीर्घः। लुङि। सिचि वृद्धिरिति वृद्धिः। अचर्करीत् ३ अचर्कारिष्टाम् ३। अचर्करिषुः ३ अचर्करीः ३ चाकर्तीति। इट्पक्षे चाकरीति। लोटि। चाकरीतु। चाकर्तु॥
चाकर्तात्। चाकृतौ चाकिरतु। चाकृहि लङि अचाकरीत्। अचाकः। अचाकीर्ताम्। अचाकरुः लिङि। चाकीर्यात्। आशिषि तु चाकीर्यास्ताम्। लुङि। अचाकारीत्। अचाका
रिष्टाम् सवर्णान्तरीति सारिअर्तेरिति। भौवादिकजौहोत्यादिकयोर्ग्रहणम् उरदत्त्वमिति। केचित्तु गुणोपङ्लुकोरिसभ्यासस्य गुणमाहुः फलेतु न विशेषः। रिकरीकौ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नि·
सि·कौ·
टी·न·
१०६

स्विति। एवं च अरिपर्त्तीति रूपमुभयोस्तुल्यमिति भावः। आरतीति। रारीति लोपे द्रलोप इति दीर्घः। दीर्घो ऽकित इति दीर्घस्तु न भवति। कित्वात्। अरिप्रतीति। परत्वात् सूर्वेमि
यङ् नतो यण् रिग्गौकौस्तुल्यमिदं मध्यमोत्तमयोस्तु अरर्षि अरियर्षि। अररीषि। अरियरीषि अर्कथः अरिष्टथः अरर्मि अरियर्मि अररीमि अरियरीमि अर्कृवः अरिएवः
लिटि अररांचकार रिग्गौ·कौस्तु। अरियरांचकार। लुटि। अररिता रिग्गौकौस्तु अरिपरिता। अररिष्यति। अरियरिष्यति। अरर्त्तु। अरियर्त्तु। अर्कृतात्। अरिएतात्। अर्कृ।
ताम् अरिएताम् अरिप्रतु। अर्कृहि अरिष्टहि अरराणि। अरियराणि। अरराव। अरियराव लङि। आरः। आरियः। आररीत्। आरि यरीत्। आर्कृताम्। आरिएताम्।
आररुः। आरिपरुः। आरिपः। आररीः। आरियरीः आर्कृतम्। आरिएतम्। आर्कृत। आरिएत। आररम्। आयरम्। आर्कृव। आरिएव। विधिलिङि· अर्कृया
त्। अरिएयात्। अर्कृयाताम्। अरिएयाताम्। अर्कृयुः। अरिएयुः लिङीति। आशीर्लिङीत्यर्थः। अरिप्रियादिति। रिग्गौकौः अरिएड्विति स्थिते लिङि रिङ्। वहिरंगत्वे
न रिङो ऽसिद्धत्वाद्यलोपो न भवत्सचः परस्मिन्निति स्थानिवत्त्वाच्च न च न पदान्तेति निषेधः शंक्यः स्वरदीर्घयलोपेषु लोपरूपाजादेश एव न स्थानिवदित्युक्तत्वा
त्। न च अकृतव्यूहपरिभाषया इयङ् नेति शंक्यम् रिङः स्थानिवत्त्वेन निमित्तविनाशाभावात्। उक्तपरिभाषाया अप्रवृत्तेः। अत एव अरिप्रतीत्यपि सिद्धम्। तत्रा
पि यणः स्थानिवत्त्वेन निमित्तविनाशाभावात्। न स परिभाषा ऽप्रवृत्तेरियङो निर्वाधत्वात्। कचित्तु मूलपुस्तकेषु परत्वान्नित्यत्वाच्च पूर्वं रिङि· कृते इयङो ऽप्रवृत्ति
रिसाशयेन अरिरियात् आरीरियादिति पठ्यते तदापाततः। अरिप्रतीति रूपासिद्ध्यापूर्वोत्तरग्रन्थयोर्विरोधापत्तेः। लुङि। आरारीत्। आरियारीत् लङि। आररि
ष्यत् आरिपरिष्यत्। जर्गृहीतीति तिनाम्यस्तस्याचीति गुणनिषेधः मध्यमोत्तमयोस्तु जर्गृहीषि ३ जर्घर्क्षि ३ जर्गृढः ३। जर्गृढ ३। जर्गृहीमि ३। जर्गृह्मि ३ जर्गृह्वः
३ जर्गृह्मः ३। जर्गृहांचकार। जर्गृहिता। जरीगृहिता। इहानुबंधनिर्देशाद्दित्वस्य णद्विकल्पेन। जर्गृहीतु जर्गृढु। जर्गृढात्। जर्गृहतु ३ जर्गृढि ३। मिपि। जर्गृ
हाणि ३ लुङि। अजर्गृहीत् ३ ईडभावे एकाचइति भषभावः। अजर्घर्ट् ३ यद्यपि इह एकाजग्रहणं चेति निषेधाद् भषभावो दुर्लभस्तथापि यणो यङ्लुकोरित्यने
न षित्पाशपेसादि निषेधस्यानित्यत्वज्ञापनात् भषभावो ऽत्र प्रवर्त्तते इत्याहुः। अजर्गृढाम् अजर्गृहुः। ३। अजर्गृहीः। अजर्घर्ट् ३। अजर्गृढ ३। अजर्गृढ ३ अजर्गृहम् ३
अजर्गृह्व ३ जर्गृह्यात् ३ अजर्गृहीत्। अजर्गृहिष्टाम् ३ अजर्गृहिष्यत् ३ आग्रहीतीति। ग्रह उपादाने। यङो लुकालुप्तत्वात्तन्निमित्तं ग्रहिज्येति संप्रसारणमिह
नेति भावः। जार्गृढ इति। ढलात दीर्घो ऽकितः। तत्रैकाच इति अनुवर्त्तते इड् स्येकाचो ढ इति अस्मिन् सूत्रे हाद इत्येनोक्तत्वादिति भावः॥ ॥ ॥

याम·
१०६

402

CC-0. In Public Domain. Digitization by eGangotri

माधवस्त्विति। अयं भावः। ग्रहोलिटीतिसूत्रे यङ्लोपे चोक्तमिति वार्त्तिकतदीयभाष्यकैयटादिपर्यालोचनया जरीगृहितेत्यादिषु ग्रहेर्यङन्तात्तृचस्तास्येर्वीयइड्
न स दीर्घाभावे युक्ति द्वयं लभ्यते पूर्वस्मादपि विधौ स्थानिवद्भावइत्येके। ग्रहेर्विहितस्य पदद्वयस्य दीर्घइत्यपरे। तत्राद्यः पक्षो भाष्यवार्त्तिककारीयानाम्
हि पूर्वत्रासिद्धेन स्थानिवदित्यस्य वष्टव्यदीर्घोलिग्रहणस्य प्रत्याख्यानात्। त्रैपादिकदीर्घोनितिक्तदीर्घे ऽस्मिन्कर्त्तव्ये स्थानिवद्भावस्यतन्मते सुवचत्वात्। द्वि
तीयस्तु सूत्रारीत्यातेनन्तु सामान्यतो दीर्घविधौ स्थानिवद्भावस्य निषिद्धत्वात्तन्मते स्थानिवद्भावस्य वक्तुमशक्यत्वात् एवं च यङ्लुकि दीर्घप्रवृत्तौ नाकिंचि

माधवस्तु दीर्घमाह तद्भाष्यविरुद्धम्। जर्गृधीति ३ जर्गर्द्धि ३। जर्गृद्धः ३ जर्गृधति ३। जर्गर्धीषि ३ जर्घर्त्सि ३ अजर्गृधीत् ३। ईडभावे गुणः
हलङ्यादिलोपः। भष्भावः। जश्त्वचर्त्वे। अजर्घत्। अजर्गृद्धाम्। सिपि दश्चेति पक्षे रुत्वम्। अजर्घाः ३॥ अजगर्धीत् ३॥ अजगर्धिष्टा
म् ३। पाप्रच्छीति। पाप्रष्टि। तस्माद्दीर्घ ग्रहिज्येति सम्प्रसारणं न भवति श्तिपा निर्देशात्। छ्वोः शूडिति शः। व्रश्चेति षः। पाप्रष्टः। पाप्रच्छति। पा
प्रश्मि। पाप्रच्छ्वः। पाप्रश्मः। यकारवकारान्तानां तु ऊठ्भाविनां यङ्लुङ्नास्तीति च्छ्वोरिति सूत्रे भाष्ये ध्वनितं। कैयटेन स्पष्टीकृतम्। इदं च।
च्छ्वोरिति यत्रोठ् तद्विषयकम्। ज्वरत्वरेत्यूठ्भाविनोः स्त्रिविमव्योस्तु यङ्लुगस्त्येवेति न्याय्यम्। माधवादिसम्मतं च। मव्यवन्धने। अयं यात्वूऊ
ठ्भावी। ते तृदेत्रृदेवने इत्यादयो वान्ताः। हयगतौ। जाहयीति। जाहेति। जाहतः। जाहयति। जाहयीषि। जाहेषि। वलिलोपे यत्रादौ दीर्घः जाहा
मि। जाहावः। जाहामः। हर्य्यगतिकान्त्योः। जाहर्य्यीति। जाहर्त्ति। जाहर्त्तः। जाहर्य्यति। लोटि। जाहर्हि। अजाहः। अजाहर्त्ताम्। अजाहर्युः मववन्धने

दाधकं यङ्लुकोनेमितिकत्वात् अजन्तादेशत्वाच्च स्थानिवद्भावायोगात्। द्विःप्रयोगो द्विर्वचनं षाष्ठमिति सिद्धान्ताघङ्लुगन्ताग्रूपहाते विहितस्य ग्रहेर्विहितत्वा।
न पायाच्च। तद्भाष्यादिविरुद्धमिति। आदिशब्देन केयटहरदत्तौ गृह्येते विरोधश्चात्र मनोरमायामुपपादितः। तथाहि एकाचो द्वे प्रथमस्येति सूत्रे ग्रहेरंगादिति।
भाष्यमुपादाय कैयट आह। तृचो हि जरीगृहीत्संगं न तु ग्रहि विशेषणसामर्थ्याद्द्वियस्यास्तु तद्रूपाश्रयणमिति यद्यपि तत्र यङन्तं प्रकृत्येदमुक्तं तथापि युक्ति साम्यात्
स्याद्यङ्लुगन्तेपि न दीर्घइति लभ्यते एकाज्ग्रहणमनुवर्त्तयन्हरदत्तोप्यत्रानुकूलः। नह्यस्मिन्पक्षे यङ्लुकि दीर्घस्य प्रसक्तिरस्ति। एवं च पूर्वस्मादपि विधौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति·

सि·कौ· स्थानिवद्भावदृतिग्रहेर्विहितंतस्ययङन्तस्यदीर्घइतिचेत्प्रागुक्तसमाधानमुपायस्योपायंमाभूदूषकत्वादितिन्यायेनयङंतांपोऽप्यामांतंरपरत्वात्पानेपसंतचग्र॥

दी·त· हितियथाश्रुतत्वपाश्रयणेग्रहीतइत्यादावितिदेशोघोनसादितिवाच्यम्।अंगसंज्ञाप्रवृत्तिवेलायांयपाश्रुतत्वस्यैवसत्त्वात्।प्राहितमित्यादौतुनैवंप्रकाचइ

१०७ तिसमाधानंतुणिज्भिन्नविषयकमेवनिष्ठायांसेटीतिणिलोपेप्राहितमित्यादावेकाच्त्वानपायात्।नदिस्यम्।यङ्लुगंतालिजंताच्चयङंताच्चग्रहेरिटः

द्विधात्रिधाचतुर्धाचदीर्घप्राप्तिःसमाहितांश्चसार्थःपङ्लुगंताद्दीर्घप्राप्तेसमाधानद्वयम्।ग्रहेरंगादितिव्याख्यानमेकाचइत्यनुवृत्तिश्चेति।णिजंतात्तु

ग्रहिस्वरूपाभावःविहितविशेषणंस्थानिवद्भावश्चेतिसमाधानत्रयम्।यङंतात्तुसमाधानचतुष्टयंएकाचइत्यनुवृत्तिःपूर्वोक्तसमाधानत्रयंचेतिअजर्घा॥

इतिगृधुअभिकांक्षायाम्।इहअपदांतस्यापिरेफस्यरोरीतिलोपोभवत्येवतत्रमंडूकप्लुत्यापदस्येत्यनुवर्त्तनात् पाप्रष्टीतिप्रच्छज्ञीप्सायाम्।ग्रश्चेतिषः॥

पाप्रच्छितापाप्रच्छिष्यतिपाप्रष्टुपाप्रष्टात्।पाप्रष्टाम्।पाप्रच्छतुपाप्रष्टि।पाप्रच्छानि।अपाप्रच्छीत्।अपाप्रट्।अपाप्रष्टाअपाप्रच्छुःअपाप्रच्छीःअपाप्र

ट्अपाप्रष्टंअपाप्रष्टअपाप्रच्छम्।अपाप्रच्छ्वअपाप्रच्छ्म।भाष्येध्वनितमिति।छ्वोःशूडितिसूत्रेभाष्येकिद्ग्रहणमनुवर्ततेनवेतिविकल्प्यकांश्चिद्दोषानु।

द्भाव्यपरिहृत्यचोक्तमेतावानेवविशेषःअनुवर्त्तमानेकिद्ग्रहणेक्वःषत्वंवक्तव्यमिति।अननुवर्त्तमानेत्वनेच्छःपात्वेकृतेशांतत्वादेवषोभविष्यतीतिप्रष्टाप्र

ष्टुमित्यादिसिद्धयेतस्यादिह्वेक्वग्रहणंनकर्तव्यमितिभावः।एवंहिवदताभाष्यकृताअत्रभाविष्योयङ्लुकृतालीसुक्ताप्रायम्।अन्यथादिवेर्यङ्लुकिईडभा।

वपक्षेदेदेतिदेदेविडत्यादौऊठोभावाभावाभ्यांमहान्विशेषःस्यात्।तत्रकिद्ग्रहणाननुवृत्तावूठःप्रवृत्त्यादेदोतिदेद्योषीत्यादिरूपविशेषलाभा त्।अतश्चैतावानेवे

त्येवकारोविरुध्येत।लिविमध्योल्विति।लिवुगतिशोषणयोःमववंधने।जाहामीति।इदूपस्सेजाहपीमि।लोटि।जाहपीतु।जाहतु।जाहतात्।जाहयानि।जाहया एम·

वाजाहयाम।लङि।अजाहपीत्।अजाहत्।अजाहताम्।अजाहयुः।अजाहपीःअजाहःअजाहतम्।अजाहत।अजाहयम्।अजाहावअजाहामाजाहयात्॥ १०७

हन्यंतक्षणेतिवृद्धिनिषेधःअजाहपात्।अजाहयिष्टाम्।अजाहयिष्यत्॥

४०३

CC-0. In Public Domain. Digitization by eGangotri

ज्वरत्वर। ज्वर रोगे। त्वर संभ्रमे। अत्र वृत्तौ झलादौ क्विपीत्युक्तं तत्र क्विपीति सेत्यन्तमसङ्गतमेवेत्याहुः। क्विपीति नानुवर्त्तत इति अवतेस्तुनीति। ज्वरत्वरेत्युपधावकारयो-
रूठि गुणे च कृते ओतुरिति सिध्यति नान्यथा। तेनात्र क्विपीति नानुवर्त्तनीयमिति भावः। अवतेरिति। उपधावकारयोरूठि गुणे च कृते मन्प्रत्ययस्य टिलोपे ओमि-
ति सिध्यतीत्यर्थः। ज्वरादेरुदाहरणानि क्विपि जूः जुरौ जुरः। झलादौ तु जूर्तिः। जूर्णः। जूर्णवान्। त्वरतेः तूः। तुरौ। तुरः। तूर्तिः। तूर्णः। तूर्णवान्। स्रिवि। स्रूः। स्रुवौ। स्रुवः। स्रूतिः। अ-
वि। ऊः। उवौ। उवः। ऊतिः। मव। मूः। मुवौ। मुवः। मूतिः। मूतः। मामोषीत्यादि। इह पक्षे मामवीषि। मामवीमि। मामवीतु। अमामवीत्। अमामवीरिति बोध्यम्। राल्लोपः। छ्वोः शू-

ज्वरत्वरस्रिव्यविमवामुपधायाश्च। ६।४।२०। ज्वरादीनामुपधावकारयोरूठ् स्यात् क्वौ झलादावनुनासिकादौ च प्रत्यये। अत्र क्विपीति नानुवर्त्तते
अवतेस्तुनि ओतुरिति दर्शनात्। अनुनासिकग्रहणञ्चानुवर्त्तते। अवतेर्मन्निन्प्रत्यये तस्य टिलोपे ओमिति दर्शनाच्च। इड्भावे ऊठि पित्ति गुणः। मा-
मोति। मामवीति। मामूतः। मामवति। मामोषि। मामोमि। मामावः। मामूमः। मामोतु। मामूतात्। मामूहि। मामवानि। अमामोत्। अमामोः। अमा-
मवम्। अमामाव। अमामूम। तुर्वी हिंसायाम्। तोतूर्वीति। राल्लोपः। ६।४।२१। रेफाच्छ्वोर्लोपः स्यात् क्वौ झलादावनुनासिकादौ च प्रत्यये। इति
वलोपः। लघूपधगुणः। न धातुलोप आर्द्धधातुके। १।१।४। धात्वंशलोपनिमित्ते आर्द्धधातुके परे इको गुणवृद्धी न स्तः। इति नेह निषेधः। तिबादीना-
मनार्द्धधातुकत्वात्। तोतोर्त्ति। हलि चेति दीर्घः। तोतूर्त्तः। तोतूर्वति। तोथोर्त्ति। दोदोर्त्ति। दोधोर्त्ति। मूर्छा। मोमोर्त्ति। मोमूर्त्तः। मोमूर्छतीत्यादि। आर्द्धधा-
तुक इति विषयसप्तमी। तेन यङि विवक्षिते अजेर्वी। वेवीयते। अस्य यङ्लुग्नास्ति लुकाऽपहारेण विषयत्वासम्भवेन वीभावस्याप्रवृत्तेः। इति
॥ यङ्लुगन्तप्रक्रिया॥

ङित्त्वतः छ्वोरित्यनुवर्त्तते। क्वावुदाहरणम्। तूः। तुरौ। तुरः। धुर्वी। धूः। धुरौ। धुरः। मुर्छा। मूः। मुरौ। मुरः। न धातुलोप। आर्द्धधातुके धातुलोपो नास्तीति
लक्षणया व्याचष्टे धात्वंशेति। यद्यपि दुरितो लोपश्च सो णादिकेऽक्प्रत्यये धातुलोपः प्रसिद्धस्तथापि प्रयोजनं नाप्रसिद्धः। इणो लुक्त्वादेव गुणप्रसंगान्न प्र-
त्ययसन्नियोगेन धातुलोपविधानात्। आर्द्धधातुकस्य निमित्तत्वमपि नास्ति। अत एव द्रूरमित्यत्र ढ्लोपे इति दीर्घे कर्त्तव्ये धातुलोपस्य स्थानिवत्त्वं नास्ति। इह धातो-
र्लोपो यस्मिन्निति बहुव्रीहिर्विशेष्यं चार्द्धधातुकमित्याशयेनाह। लोपनिमित्ते इति। गुणवृद्धी न स्त इति। यद्यपि क्ङिति चेति सूत्रे लेगवापन इत्यत्र गुणनिषेधो भाभू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति·
सि·कौ· द्वितिइग्लक्षणेगुणवृद्धीनस्तइतिव्याख्यातंतथापिइहप्रयोजनाभावादिक्लक्षणाइतिनोक्तंधात्विति किम्।लव्।लविता।पूञ्।पविता।नन्वत्रानुबंधलोपनिमित्तमा
टी·त· र्द्धधातुकंनभवतीतिद्वंगविकलमिदमितिचेत्।अत्राहुः।धातुग्रहणेसतिधातोर्लोपोयस्मिन्इतिवहुव्रीहिलाभात्लोपनिमित्तइत्यर्थोलभ्यतेतदभावेतुलोपेसत्या
१०८ र्द्धधातुकइत्यर्थोऽस्त्वितित्यादौदोषःस्यादेवेति।यदातुलोपयतीतिलोपःतस्मिंस्त्रोपनिमित्तेआर्द्धधातुकेइकोगुणवृद्धीनस्तइतिव्याख्यायतेतदाधातुग्रहणंस्पष्ट
मेतिपत्सर्थम्उत्सृष्टानुबंधस्यधातुत्वमितिकैयटादिमतेतुधातुलोपइत्यत्रवहुव्रीह्याश्रयणंविनापिधात्ववयवलोपेसत्यार्द्धधातुकइतिव्याख्यायांलवितेत्या
दौनातिप्रसंगइतिबोध्यम्।आर्द्धधातुकेकिम्।त्रिधावद्धोवृषभोरोरवीति।रुशब्दइत्यस्माद्धातोरेकाचइतियङिनस्यलुक्।यङंतस्यधातुत्वेयङोधात्ववयव
त्वाल्लुप्तत्वाच्चात्रापिनिषेधःस्यात्तन्माभूदितिनन्वत्रयङ्लुकोनैमित्तिकत्वादिकोलोपनिमित्तपरत्वंनास्तीतिद्वंगविकलमितिचेत्।अत्राहुः।आर्द्धधातु
कग्रहणेसतिअन्यपदार्थलाभाद्बहुव्रीहिर्लभ्यतेतदभावेत्ववयवलोपेसतिगुणवृद्धीनस्तइत्यर्थाद्रोरवीतीत्यत्रदोषःस्यादेवेति।केचित्तुधातुंलोपय
तीतिधातुलोपःद्धलोपइत्यत्रेवकर्मण्यणि सम्युपेत्सव्यधिकरणबहुव्रीह्याश्रयणंविनैवधात्ववयवलोपनिमित्तेगुणवृद्धीनस्तइतिव्याचक्षते।इक
इतिकिम्।रागः।अभाजि।घञिचभावकरणयोरितिरंजेर्नलोपेकृतेवृद्धिःअभाजीत्यत्रतुभंजेश्चचिणीतिनलोपेवृद्धिःनेहनिषेधइति।सूत्रस्योदाह
रणंतुलोलुवः।पोपुवः।मरीमृजइत्यादिबोध्यम्।तत्रलोलूयपोपूयशब्दाभ्यांपचाद्यचियङोचिचेतियङ्लुकिकृतेअचप्रत्ययमाश्रित्यप्राप्तोगुणो
निषिध्यतेमरीमृजइत्यत्रतुवृद्धिः।ननुलोलूयादिभ्योऽचप्रत्ययेअतोलोपइत्यल्लोपयकारस्ययङोचिचेतिलुक्तल्लोपस्यस्थानिवत्त्वादचप्रत्ययनि
मित्तःसार्वधातुकार्द्धधातुकयोरितिगुणोमृजेर्वृद्धिरितिवृद्धिश्चनभवेदितिकिमनेननिषेधसूत्रेणनचैवमपिलोलुवइत्यादावुवङिकृतेलघूपधगु
णःस्यात्तद्वारणायनिषेधोपमावश्यकःउवङाऽऽदिष्टादचःपूर्वत्वेनलघूपधगुणेकर्तव्येस्थानिवत्त्वाभावादितिवाच्यम्स्थानिद्वारणानादिष्टादचः
पूर्वत्वेनउवङोदृष्टत्वात्।स्थानिद्वारादृष्टत्वेपिस्थानिवद्भावतोसंतत्पदांतेतिसूत्रेसवर्णग्रहणेनज्ञापितम्।नहिशिण्ढिइत्यत्रस्थानिभूतादचःपूर्वत्वे
नानुस्वारोदृष्टःकिंतुस्थानिद्वारा।तथाचअनुस्वारस्यपरसवर्णेकर्तव्येश्नम्अल्लोपस्यस्थानिवत्त्वनिषेधायतत्रसवर्णग्रहणंकृतमितीहस्थानिवद्भावः। राम·
सिद्धः।नेनावेत्यत्रतुलिङुत्पत्तेःप्रागेवबहुलग्रहणादकारविशिष्टस्ययङोलुकिस्थानिवद्भावाप्रसक्त्यानदृष्टाभावशंकेतिनधातुलोपइतिसूत्रस्यनकि १०८

404

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सप्तम्। अत एव भाष्ये प्रसारयात्तमिदमिति संक्षेपः। नोत्तोत्तीति यद्यप्यत्र लोपो व्योरिस्यनेन वलोपः सिध्यति तथापि नोनूर्त इत्यादौ वलोपार्थं हल्लोप इत्युपन्यस्तम्॥
अन्यथा तत्र लोपो व्योरिति लोपं वाधित्वा वस्य च्छ्वोः शूडिति ऊठ् स्यात्। तोर्योर्निं इत्यादि। धुर्वी दुर्वी हिंसायाम्। मूर्छा मोहसमुच्छ्राययोः। मोमूर्छीषि। मोमोषि। मोमू-
र्थः। मोमूर्थ। मोमूर्छीमि मोमूर्मि मोमूर्छ्‌ः। मोमूर्मः। मोमूर्छां चकार। मोमूर्छिता। मोमुर्छीतु। मोमोर्तु। मोमूर्त्तात्। मोमूर्हि। अमोमूर्छीत्। अमोमोः। अमोमूर्छः। मोमूर्छी-
त्। अमोमोर्छीत्। अमोमूर्छिषाम्। अमोमूर्छिष्यत्। इति यङ्लुगन्तप्रक्रिया॥ ॐ॥ सुप आत्मनः क्यच्। धातोः कर्मण इति पूर्वसूत्रात्। कर्मण इच्छायां वेत्यनुवर्त्तते। ततश्च
सन्निधानादिच्छाकर्मण इति। परस्य पुत्रमिच्छतीत्यत्रातिप्रसंगवारणाय सूत्रे आत्मशब्द उपात्तः। सत्तु स्वशब्दपर्यायः स्वश्च क इत्याकांक्षायामिच्छायाः सन्निधापितत्वा-

सुप आत्मनः क्यच्। ३।१।८। इषिकर्मणः एषितुः सम्बन्धिनः सुबन्तादिच्छायामर्थे क्यच् प्रत्ययो वा स्यात्। धात्ववयवत्वात्सुब्लुक्। क्यचि च॥
७।४।३३। अस्य ई स्यात्। आत्मनः पुत्रमिच्छति पुत्रीयति। वान्तो यि प्रत्यये। गव्यति। नाव्यति। लोपः शाकल्यस्येति तु न। अपदान्तत्वात्। न
याहिं नः क्ये। १।४।१५। क्यचि क्यङि च नान्तमेव पदं स्यान्नान्यत्। सन्निपातपरिभाषया क्यचो यस्य लोपो न। गव्याञ्चकार। गव्यिता। नाव्या-
ञ्चकार। नाव्यिता। नलोपः राजीयति। प्रत्ययोत्तरपदयोश्च। त्वद्यति। मद्यति। एकार्थयोरित्येव। युष्मद्यति। अस्मद्यति। हलि च। गीर्यति। पू-
र्यति। धातोरित्येव। नेह। दिवमिच्छति दिव्यति। इह पुरमिच्छति पुर्यतीति माधवोक्तमप्युदाहरणं चिन्त्यम्॥ ऽऽ इषितेव गृह्यते तदाह। एषितृसंबं-
धिन इति सुबन्तस्योक्तविशेषणद्वयमर्थद्वारकं बोध्यं। नः क्ये। लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणीति वक्ष्यमाणत्वात् हलंतात् क्वचिदेव इत्युभिप्रेत्याह।
क्यचि क्यङीति। एवं चेह क्यषीत्यपि केचिदुक्तं तदुपेक्ष्यं। यस्य हल इति लोपमाशंक्याह। संनिपातपरिभाषयेति। यकारे परे यकारान्तादेशविधानाद्धकारेपलोपस्य निमित्तं न
भवतीति भावः। राजीयतीति। क्यचि चेत्सवर्णस्य ईत्वे कर्तव्ये पूर्वत्रासिद्धमिति नलोपोऽसिद्धो न भवति नलोपः सुप्स्वरेति नियमात्। यद्यपि नियमसूत्राणां निषेधमु-
खेन प्रवृत्तिरिति नलोपः सुप्स्वरेति सूत्रं राजीयतीत्यादिषु पठनीयं राजभ्यामित्यादौ तु पूर्वत्रासिद्धमिति नलोपस्यासिद्धत्वेन दीर्घाद्यभावसिद्धेस्तथापि विधिमुखेन
प्रवृत्तिरिति पक्षाभ्युपगमेन हलंतेषु राजभ्यां राजभिरित्यत्रैव पठितमिति ज्ञेयं। नच विधिमुखप्रवृत्तिपक्षो निरालंब एवेति वाच्यं गव्यतीति। अत्रांतर्वर्तिविभक्त्यापे

स्तोर्णीगोइर्वीरः स्यादित्याशंक्याह। अपस्त्रो
सिद्धं स्वस्वमाधातोरित्युक्तत्वादित्यर्थः

सि·कौ· टी·न· १०१

कं वस्तुतस्तु उक्तरीत्यानुशंकैवनेतिबोध्यं। अन्येतु वार्तिकारंभप्रश्लेषद्वितीयपक्षमाश्रित्येदंसूत्रेवकारप्रश्लेषेलोपासंभवात्। नहि कार्यीनिन्यायात्। नचवलीति
निमित्तत्वेनाश्रयणात्तत्रापिलोपोभवत्येव। अन्यथावलीत्येतन्नकुर्यादितिवाच्यं। वकारेपरतोपकारलोपापत्तेश्चनिमित्तत्वेनाश्रयणावश्यकत्वादितिद्वितीयक।
ल्पएवयुक्तइत्याहुः। अनुपराभ्यांकृञइतिसूत्रस्थभाष्यग्रंथपर्यालोचनयानतत्पुत्रावगमात्। यत्तुनलोपःसुप्स्वरेतिसूत्रेमनोरमायामुक्तंनियमसूत्राणांविधिमुखेनप्रवृत्तिः
सामान्यशास्त्रतासंपर्यसंकोचकताचेतिपक्षद्वयस्यद्युद्भ्योलुङीतिसूत्रेभाष्यकृताध्वनितत्वादितितन्नविंत्य। तत्सूत्रस्यभाष्यकारैरस्पष्टत्वात्। केचित्तुद्युद्भ्योलुङीत्यत्रध्वनितत्वादितिव
क्तव्येसूत्रग्रहणंबहुव्रीहिलाभार्थं द्युद्भ्योलुङीतिसूत्रंयस्मिन्प्रकरणेतद्युद्भ्योलुङीतिसूत्रं। परस्मैपदप्रकरणमित्यर्थः। तत्रहिअनुपराभ्यामितिसूत्रंवर्ततेइतितत्स्त्रैवयद्ध्व
नितंतत्परस्मैपदप्रकरणेध्वनितंभवति। यद्वाअनुपराभ्यांकृञइत्यत्रहिभाष्यकृताद्युद्भ्योलुङीतिपरामृष्टं। तथाचद्युद्भ्योलुङीतिसूत्रंयस्मिन्तत्द्युद्भ्योलुङीतिसूत्रंअनुपरा।

पूर्गिरोःसाम्यात्। दीव्यतीतिदीर्घस्तुप्राचःप्रामादिकएव। अदस्यति। रीङ्तः। कर्त्रीयति। क्यच्योश्च। ६।४।१५२। गार्गीयति। वाच्यति। अकृत्सार्वेति
दीर्घः। कवीयति। समिध्यति। क्यस्यविभाषा। ६।४।५०। हलःपरयोःक्यच्क्यङोर्लोपोवास्यादार्धधातुके। आदेःपरस्य। अतोलोपः। तस्यस्थानिव।
त्वाल्लघूपधगुणोन। समिधिता। समिध्यिता। मान्तप्रकृतिकसुबन्तादव्ययाच्चक्यन्न। किमिच्छति। इदमिच्छति। स्वरिच्छति। अशनायोदन्यधना
याबुभुक्षापिपासागर्द्धेषु। ७।४।३४। क्यजन्ता निपात्यन्ते। अशनायति। उदन्यति। धनायति। बुभुक्षादौ किम्। अशनीयति उदकीयति। धनीयति।

भ्यांकृञइतिसूत्रमित्यर्थइत्येवंकविक्षतिवत्कथंचित्स्थितस्यगतिस्समर्थनीयेत्याहुः॥ ॥पूर्गिरोःसाम्यादिति। गृशब्दःएपालनपूरणयोरित्यस्मात्क्विपिकृतइ
द्धातोः उदोष्ठ्यपूर्वस्येतिप्रवृत्तेरितिभावः। प्रामादिकएवेति। दिवुधातोःक्विपितुपूर्वितिस्यात्। ततःक्यचितुपूर्यतीतिभवति। क्विपंविहायविचिकृतेतूपधागुणोवलो
पश्चस्यात्। ततःक्यचितुदेयतीतिभवति। तथाचहलिचेतिसूत्रेवृत्तावपिधातोरित्येवनेहदिवमिच्छतिदिव्यतीत्यत्रेवोक्तमितिभावः। अपस्यपकारस्यलोपस्मारयति।
क्यच्योश्चेति। नःक्येइतिनियमेनपदत्वाभावात्कुत्वंनेत्याह। वाच्यतीति। एवंसमिध्यतीत्यत्रजश्त्वंनेतिबोध्यं। मान्ताव्ययेभ्यःप्रतिषेधइतिवार्तिकस्ययथाश्रु
तव्याख्यानेपुत्रमिच्छतीत्यत्रापिनस्यात्। पुत्रीपुत्रानवाइच्छतीत्यादावेवस्यात्। अतोव्याचष्टे। मांतप्रकृतिकादिति। अशनायोदन्य। क्यजंताइतिउदकश्य उदस्योदन्भावो

ध्यसोर्दीर्घइत्यपिदीर्घं इहषः सुखएवभोक्तुमयान
सिद्धंतियमग्रपातुमुदकं यस्य धनेसत्यपिपुनर्धनेतृत्तो

राम· १०१

CC-0. In Public Domain. Digitization by eGangotri

यत्तु कालांतरोपयोगार्थमशनमिच्छति यश्च स्नातुमुदकं यश्च दरिद्रः सन् धनमिच्छति तत्र मस्तूदाहरणानि। ननु इदं स्यात् पिपासा तृडिति निघंटौ परस्परसामानाधिकरण्येन स्यात् उद-
न्याशब्दस्य उदकेच्छावाचित्वादिति चेन्न। अत्राहुः। अशनायतीत्यादिषु अविवक्षितप्रकृत्यर्थेषु बुभुक्षापिपासादिकमेवार्थस्तथा च नोक्तदोष इति॥ ॥ अश्वक्षीर। आज्जसे-
रित्यतो सुगिति वर्तते। अश्वस्यतीति। मैथुनार्थमश्वमिच्छतीत्यर्थः। एवं वृषमिच्छति मैथुनार्थं वृषस्यति गौः। नन्वितिरामां वृषस्यंतीमिति प्रयोगो मनुष्यविषयेकथं संगच्छ-

अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि। ७।१।५१। एषां क्यचि असुगागमः स्यात्। अश्ववृषयोर्मैथुनेच्छायाम्। अश्वस्यति वडवा। वृषस्यति
गौः। क्षीरलवणयोर्लालसायां। क्षीरस्यति बालः। लवणस्यति उष्ट्रः॥ सर्वप्रातिपदिकानां क्यचि लालसायां सुगसुकौ। दधिस्यति। दध्यस्यति।
मधुस्यति। मध्वस्यति। काम्यच्च। ३।१।९। उक्तविषये काम्यच् स्यात्। पुत्रमात्मन इच्छति पुत्रकाम्यति। पुत्रकाम्यिता। इह यस्य हल इति लोपो न।
अनर्थकत्वात्। यस्येति सङ्घातग्रहणमित्युक्तम्। यशस्काम्यति। सर्पिष्काम्यति। मान्ताव्ययेभ्योऽप्ययं स्यादेव। किंकाम्यति। स्वःकाम्यति। उप
मानादाचारे। ३।१।१०। उपमानात्कर्मणः सुबन्तादाचारेऽर्थे क्यच् स्यात्। पुत्रमिवाचरति पुत्रीयति छात्रम्। विष्णूयति द्विजम्। अधिकरणाच्चे
ति वक्तव्यम्। प्रासादीयति कुट्यां भिक्षुः। कुटीयति प्रासादे। कर्तुः क्यङ् सलोपश्च। ३।१।११। उपमानात्कर्तुः सुबन्तादाचारे क्यङ् वा स्यात्। सान्त
स्य तु कर्तृवाचकस्य लोपो वा स्यात्। क्यङो ङित्त्वेनात्मनेपदम्। सान्तस्य लोपस्तु क्यङ् सन्नियोगशिष्टः। स च व्यवस्थितः। ओजसोऽप्सरसो नि
त्यमितरेषां विभाषया। कृष्ण इवाचरति कृष्णायते। ओजःशब्दो वृत्तिविषये तद्वति। ओजायते। अप्सरायते। यशायते। यशस्यते। विद्वायते॥ ०

ते इति चेत्। अत्राहुः। अश्ववृषयोरप्यप्रकृत्यर्थपरित्यागेन मैथुनेच्छैवार्थो न त्ववृषस्यंती तु कामुकी निकोशोपि स्वरसतः संगच्छते इति। लालसायामिति। उत्कटेच्छाया-
मित्यर्थः। काम्यच्च। उच्चारणसामर्थ्यान्न कस्येत्संज्ञा। मांताव्ययेभ्यः प्रतिषेध इत्यस्यानुवृत्त्यभावं सूचयति अयं स्यादेवेति। आचरतीति। व्यवहरतीत्यर्थः। अधिकरणाच्चे-
ति। सप्तम्यंतात्स्यात्। सुबंतादित्यर्थः। कर्तुः क्यङ् सलोपश्च। धातोः कर्मण इति सूत्राद्वेत्यनुवर्तत इत्याह। क्यङ्तं स्यादिति। सेति लुप्तषष्ठीकं कर्तृविशेषणमित्याह। सां-
तस्येति। चकारस्तु अन्वाचये बोध्यः। तद्वतीति। तथा च ओजायत इत्यत्र ओजस्वीवाचरतीति विग्रहो बोध्यः॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति·
सि·कौ· विद्दसन्तइति। नांतस्यैवपदत्वात्स्यस्तत्वंन। पुंवद्भावं स्मारयति। क्यङ् मानिनोश्चे ति। सपत्नीवेति त्रितयसाधारणं विग्रहवाक्यं। सपत्नायतइति शत्रुपर्यायात्सप
टी·त· विद्दस्यते। त्वद्यते। मद्यते। अनेकार्थत्वेतु। युष्मद्यते। अस्मद्यते। क्यङ्मानिनोश्च। कुमारीवाचरतिकुमारायते। हरिणीवाचरतिहरिणायते। गु
११० र्वीवगुरूयते। सपत्नीवसपत्नायते। सपत्नीयते। सपत्नीयते। युवतिरिवयुवायते। पट्वीमृद्वीविवपट्वीमृदूयते। नकोपधायाः पाचिका
यते। आचारेऽवगल्भक्लीवहोडेभ्यः क्विब्वा॥ वाग्रहणात् क्यङ् पि। अवगल्भादयः पचाद्यजन्ताः क्विप्सन्नियोगेनानुदात्तत्वमनुनासिकत्व
स्य प्रत्ययस्य प्रतिज्ञायते तेन तङ्। अवगल्भते। क्लीवते। होडते। भूतपूर्वादप्यनेकाच आम्। एतद्वार्तिकारम्भसामर्थ्यात्। नच अव
गल्भतेइत्यादिसिद्धिस्तत्फलं। केवलानामेवाचारेपिवृत्तिसम्भवात्। धातूनामनेकार्थत्वात्। अवगल्भाञ्चक्रे। होडाञ्चक्रे। वार्तिकेऽवे
त्युपसर्गविशिष्टपाठात्। केवलादुपसर्गान्तरविशिष्टाच्च क्यङेवेतिमाधवादयः। तङ्नेति तूचितम्। सर्वप्रातिपदिकेभ्यः क्विब्वावक्त
व्यः। पूर्ववत्। किन्तु अनुबन्धासङ्गार्थं नत्र क्विनूद्यते। प्रातिपदिकग्रहणादिह सुपइतिनसम्बध्यते। तेन पदकार्यन्न। कृष्णइवाचरति
कृष्णति। अतोगुणइतिशपासहपररूपम्। अइवाचरति। अति। अतः। अन्तिप्रत्ययग्रहणमपनीय अनेकाचइत्युक्तेर्न्नाम्। ओ। अतुः। उः
द्वित्वम्। अतोगुणे। अत आदेरितिदीर्घः। णल। औ। वृद्धिः। अतुसादिषुत्वातोलोपइटिचेत्यालोपः। मालेवाचरतिमालाति। लिङ् विधि
ष्टपरिभाषयाएकादेशस्यपूर्वान्तत्वाद्वा क्विप्। मालाञ्चकार। लङि। अमालात्। अत्रहल्ङ्यादिलोपोन। ङीसाहचर्यादापोपिसोरेवलो
पविधानात्। इट्सकौ। अमालासीत्। कविरिवकवयति। आशीर्लिङि। कवीयात्। सिचिवृद्धिरित्यत्रधातोरित्यनुवर्त्यधातुरेवयोधातु
रितिव्याख्यानान्नामधातोर्न्नवृद्धिरितिकैयटादयः। अकवयीत्॥ ६ ॥ ९। नशब्दाच्छाङ्‌ःखादिङीनन्तात्क्यङि पुंवद्भावेअकृतेसार्वतिदी राम·
र्घे चरूपमिदं। सपत्नीयनइति। समानस्वामिकाभिधायिनोभाषितपुंस्कस्यनिसंसपत्न्यादिष्विति नादेशोनांतत्वान्ङीपूतत्तः क्यङि पुंवद्भावे च दीर्घः॥ ६॥ ११०

CC-0. In Public Domain. Digitization by eGangotri

सपत्नीयतइति। विवाहजन्यसंस्कारविशेषनिमित्तकेनपतिशब्देनसमासेसतिनिसत्नीत्वान्नपुंवत्। युवायतइति। नचञ्याप्सूत्रेभाष्येयुवतितरेत्युदाहरणात्
यौवनंजातिरितिजातेश्चेतिनिषेधेयुवतीयतइत्युदाहरणमिहोचितमितिवाच्यं। वयसोऽनित्यत्वेनाजातित्वात्। अन्यथायुवजानिरित्यचःपरस्मिन्नितिसूत्रस्य
भाष्यग्रंथोविरुध्येत। युवतितरेतिभाष्यस्यतुकागतिरितिचेत्। अत्राहुः। तसिलादिष्वितिपुंवद्भावेप्राप्तेभाष्यनिर्देशादेवनपुंवदिति। युवतीशब्दस्यतुतरपिघ
रूपेतिह्रस्वेयुवतितरेतिभवत्येव। पट्वीमृदूयतइति। पूर्वपदस्यक्यङ्परत्वाभावान्नपुंवत्। पाचिकायतइतिपुंवद्भावेसतिकात्पूर्वस्येत्वेनश्रूयेतेतिभावः।
एवंपंचमीयते। लौग्नीयते। सुकेशीयते। ब्राह्मणीयइत्यादि। आचारेऽवगल्भगल्भधार्ष्ट्ये। क्लीबअधार्ष्ट्ये। होडृअनादरे। क्यङ्पौति। अपिशब्दाद्वाक्यं ननुसर्वप्र
तिपदिकेभ्यइत्यत्रवाग्रहणात्सर्वप्रातिपदिकेभ्यइत्याहुः। क्विप्संनियोगेनेत्यादि। तेनक्यङ्संनियोगेनानुदात्तत्वानुनासिकत्वयोरभावादित्संज्ञालोपौनस्तइतिअक

माधवस्तु। नामधातोरपिवृद्धिमिच्छति। अकवायीत्। विरिवयति। विवाय। विव्यतुः। अववीत्। अवायीत्। श्रीरिवश्रयति। शिश्राय। शि
श्रियतुः। पितेवपितरति। आपितरीत्। पित्रियात्। भूरिवभवति। अत्रगातिस्थेतिभुवोबुगितिभवतेरद्इतिचनभवति। अभिव्यक्तत्वेन।
धातुपाठस्यस्यैवतत्रग्रहणात्। अभावीत्। बुभाव। द्रुरिवद्रवति। णिश्रीतिचङ्। अदुद्रावीत्॥ ११ सार्वेतिदीर्घेसतिअवगल्भायतेक्लीबायतइ
त्यादिभवति। तेनतङिति। आत्मनेपदमित्यर्थः। तथाचअवगल्भमानःक्लीबमानइत्यादिसिध्यति॥ ॐ ॥ माधवादयइति। केचित्तेषामाशयमाहुः। आचा
रेऽवगल्भेत्यत्रसुपइत्यनुवर्तते। तथाच। केवलादुपसर्गोत्तरविशिष्टादगल्भप्रगल्भादिसुबन्तात्क्यङेवनतुक्विपः। तङ्नेतिनूचितमिति। उत्तरवार्तिकेनप्राति
पदिकमात्रात्। क्विप्विधीयतइतिएतेभ्योपित्रिभ्यःक्विपिसिद्धेतत्संनियोगेनानुदात्तत्वानुनासिकत्वमात्रमत्रकर्तव्यत्वेनआचारेऽवगल्भेत्यवगल्भादिषुप्रति
ज्ञायते। लाघवादन्यत्रतुगल्भप्रगल्भादिप्रातिपदिकेषुक्विपिपरस्मैपदमेवभवतिनतुतङितिभावः। नन्वेवमाचारेऽवगल्भेत्यत्रवाग्रहणात्क्यङ्मनुवर्त्य
अवगल्भादिप्रातिपदिकेभ्यःक्यङ्विधानेप्यन्यत्रसुबन्तादेवक्यङितिक्यङोविषयएवनास्ति। तथाच। केवलादुपसर्गोत्तरविशिष्टाच्चक्यङ्प्ययुक्तइतिचे
त्। अत्रवदंति। प्रातिपदिकेभ्यःक्विप्सुबन्तेभ्यःक्यङितिविषयभेदेना॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति॰
सि॰कौ॰ पिगल्भति गल्भायते प्रगल्भति प्रकगल्भायते इत्यादिसिध्यर्थमेवेति। स्यादेतत्। गल्भ धार्ष्ट्ये इत्यादीनामनुदात्तत्वादवगल्भते इत्यादिप्रयोगसिद्धावपि अवगल्भादि-
टी॰त॰ सूत्रवार्तिकेन क्विपि सत्यवगल्भतीत्याद्यनिष्टप्रयोगः स्यात्तद्वारणार्थमाचारेऽवगल्भेतिवार्तिकारंभस्यावश्यकत्तया सामर्थ्येनोपसर्गेण त्वात् भूतपूर्वो दृष्यने
१११ कावआमिस्येतत् अयुक्तमिति चेत्। सत्यं। अत्र ह्ययमाशयः। सर्वप्रातिपदिकेभ्य इति वार्तिके चाग्रहणेन व्यवस्थितविभाषा श्रियते। तथा च। अवगल्भक्लीव-
होडेभ्यः क्विपोऽभावादनिष्टप्रयोगो न भविष्यतीति स्वीकृते सामर्थ्येनोपसर्गेणमिति दिक्। पदकार्यं नेति। स्ववर्णादौ घो यद्यपि पदमात्रकार्यं न भवति तथा-
पि पदस्य जायमानं कार्यं नेत्यत्र तात्पर्यं बोध्यं। तनोतीति तत् स इव आचरति तततति। अत्र जश्त्वं न। त्वगिवाचरति त्वचति। अत्र कुत्वं नेत्याद्यपि बोध्यं। द्वि-
त्वमिति। अगाल् इति स्थिते द्विर्वचनेचीति निषेधादतो लोपो न भवतीति भावः। अतो गुण इति। द्वित्वे कृते प्यतो लोपो न भवति अंतरंगेणानेन बाधितत्वा-
दिति भावः। यद्यप्यत्र फले विशेषो नास्ति तथापि शास्त्रप्रक्रियामनुरुध्योक्तं। यद्यप्येवं वार्णादांगं बलीय इति परिभाषयाऽतो लोप एवोचित इति चेत् मै-
वं। तस्याः समानाश्रये कार्यद्वये वार्णादौ प्रवृत्तिस्वीकारेण न तु व्याश्रयेऽपि। न च परत्वान्नित्यत्वाच्च अत आदेरित्यनेनैव प्रथमं भाव्यमिति वाच्यं। तस्य बहिरं-
गत्वेनासिद्धत्वात्। न चाऽपवादत्वादत आदेरित्यनेन भाव्यमिति वाच्यं। अपवादो ह्ययं यद्यन्यत्र चरितार्थस्तर्हि अंतरंगेण बाध्यत इत्युक्तत्वात्। आनर्देत्यादौ
तस्य चरितार्थत्वात्। तत्र हलादिःशेषात् प्रागेव परत्वादत आदेरित्यस्य प्रवृत्तेः। न च नित्यत्वाद्धलादिःशेष एव प्रथमं स्यादिति वाच्यं। नित्यत्वस्यात आदेरि-
त्यत्रापि तुल्यत्वात्। एतच्च मनोरमानुसारेणोक्तं। केचित्तु वदंति। अतो गुण इति पररूपापवादस्यात आदेरित्यस्यानर्देत्यादौ चरितार्थत्वादंतरंगमेव।
भवतीति मनोरमोक्तं चिंत्यं। स्वविषयमध्ये एकत्रोदाहरणे चरितार्थस्योदाहरणांतरेऽपि प्रवृत्तस्याभ्युपगमात्। न हि गोद इत्यत्राऽऽतोनुपसर्गे क इति चरितार्थ-
मिति गोपद इत्यादौ न प्रवर्तते तस्माद्गुणं बाधित्वा कप्रत्ययो यथा स्वविषये सर्वत्र प्रवर्तते तथेहापि प्रवर्तत इति। तदपरे न क्षमंते। गोदगोपादौ सर्वत्राणः यम॰
कस्य च प्राप्तिसंभवे विनिगमनाविरहाद्गुणं बाधित्वा कप्रत्यय एव भवति प्रकृते त्वानर्देत्यादौ हलादिःशेषात् प्राक् अतो गुण इत्यस्य प्राप्त्यभावादिद्वयमणो १११

407

CC-0. In Public Domain. Digitization by eGangotri

नन्वत्र आदेरित्यस्य पररूपापवादत्वमेधामासेत्यत्र प्रदर्शितं तत्कथं संगच्छते। आन्धत्रुरित्यादौ आद्गुण इति गुणस्यापि प्राप्तौ न च यथा सवर्णदीर्घापवादो गुणस्ये रपवादस्तथायमप्युभयोरपवाद इति वाच्यं। एवमप्यानई सेत्यत्र वहलादिशेषात् प्रागेवासेत्स्यापि अत आदेरित्यस्य प्रवृत्तौ किं तेन पररूपापवादत्वकथनेन। नेति चेत्। अत्र केचिदाहुः। इदं ह्यपवाद एकशेषे इति केषांचित् प्रवादे यथाऽपवादशब्दो बाधकपरः स रूपाणामित्येकशेषानारंभे हि सत्याद्युत्सत्तौ इदं ह्यस्य प्रवृत्तौ रेकशेषसूत्रारंभे तु पदांतराभावेन तदप्रवृत्तेस्तथात्रस्य अपवादशब्दोपि बाधकपरः अत आदेरित्यनारंभे हि हलादिःशेषे पररूपप्रवृत्तावेधामसेतित्स्यादारब्धे तु तस्य तत्रे परत्वाद्धलादिशेषात् प्रागेव दीर्घप्रवृत्त्या पररूपस्याप्रसक्तेरिति। यद्यप्यासेत्यादौ प्रथमतः अत आदेरिति दीर्घाकरणेपि हलादिशेषे पररूपे च कृते तस्य पूर्वान्तवद्भावे सति अभ्यासग्रहणेन ग्रहणात् अत आदेरिति दीर्घप्रवृत्त्या समीहितरूपसिद्धिस्तथाप्यानईसादि न सिध्यत्येव। तत्र हि तस्मान्नुड्द्विहल

अनुनासिकस्य क्विझलोः क्ङिति। ६।४।१५। अनुनासिकान्तस्योपधाया दीर्घः स्यात् क्वौ झलादौ च क्ङिति। इदमिवाचरति। इदामति। राजेवाजानति। पन्थाइवपथीनति। मथीनति। ऋभुक्षीणति। द्योरिवदेवतीति माधवः। अत्र ऊठि यवती सुचिन्त्यम्। कइवकति। चकाविति। हरदत्तः। माधवस्तु राय इत्रोपाविति वचनात् णालिट्द्विवाधित्वाः नोलोपाच्च कइति रूपमाह। स्वइवसस्वोसस्व। यत्तु। स्वामाम्। स्वाम्ब्रकारेति

इति दीर्घीभूताद्वकारान्नुटि नकारोपधकारस्य णत्वाभावप्रसंगादिति दिक्। प्रत्ययांतत्वेनाप्रातिपदिकत्वात् क्विपोऽनुत्पत्तिम (( तदनाकरमेव॥ ६॥
प्रक्रयाह। लिंगविशिष्टेत्यादि। स्त्रिचिवट् डिरित्यत्रेति। सिचा धातोरासेपात् अत इदात्तोरित्यतो धातोरित्यनुवर्तनाच्च धातुरेव यो धातुरिति व्याख्यालभ्यत इति ज्ञेयं। विरिवेति। विःपक्षी॥ ॐ ॥ अनुनासिक अंगस्येति विशेष्यसंनिधानात्तदन्तलाभः द्वलोपइत्यतो दीर्घग्रहणं नोपधायाइत्यत उपधाग्रहणं चानुवर्त्तते तदाह। अनुनासिकान्तस्येत्यादि झलादाविति। एतच्च यस्मिन्विधिस्तदादावल्ग्रहण इति परिभाषया लभ्यते। झलादौ किति शान्तो दान्त इत्युदाहरणं ङिति तु यङ्लुकि तस्मिन् शंशांतः दंदांतः। पथीनतीति। अंतरंगत्वाद्दीर्घे कृते ततो न गुण इत्याहुः। इन्हन्नित्यनेन शावेवेति नियमाद्दीर्घाभावे गुणे सति पथेनती सेवरूपमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति· सि·कौ· टी·त· ११२

स्यन्ये। येषामिन्नादीनां शावुपधादीर्घः क्रियते परमदंडीनीत्यादौ तेषामेवदंडिनूहन्नहन्नादीनामिन्हन्निति नियमो न तु पथ्यादीनामेतेषां तुप्रोपरतः सुपंथानौ सादा
वुपधादीर्घप्रवृत्तावपि इतोत्सर्वनामस्थान इत्यत्वे कृते इन्हन्निति नियमाप्रवृत्तेः। अन्यथा पंथानौ पंथान इति न सिध्येत्तथा च पथो नत्तो स्याद्येवमाह्वि सपरे। देव
नोति माधवइति। अपदांतत्वाद्दिवउन्न। अत्रेति। लघूपधगुणं वाधित्वांतरंगत्वादूठि यण्। तस्मिन्कर्तव्ये वहिरंगस्याप्यूठो नासिद्धत्वं नाजानंतर्य इति निषेधा
त्। न च वा तोर्दीर्घस्य वलीय त्वा घणं वाधित्वा लघूपधगुणः स्यादिति वाच्यं। व्याश्रयत्वात्। अत एव सिवेर्यो णादिकेन प्रत्यये स्योनशब्दः सिध्यतीति भावः। कइ
वेति। को ब्रह्मा। चकइतीति। नन्वेवमौ अतु रित्यत्राप्यत आदेरिति दीर्घं वाधित्वा अतो लोप एव स्यादिति चेत्। अत्राहुः रायस्लोपाविति वचनेन ज्ञायमानो योऽतो

भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः। ३।१।१२। अभूततद्भावविषयेभ्यो भृशादिभ्यो भवत्यर्थे क्यङ् स्यात् हलंतानामेषां लोपश्च। अभृशो
भृशो भवति भृशायते। अच्वेरिति पर्युदासवलादभूततद्भाव इति लभ्यम्। तेनेह न। क्वदिवा भृशा भवन्ति। येरात्रौ भृशाः नक्षत्रादय
स्ते दिवा न भवन्तीत्यर्थः। सुमनस्। अस्य सलोपः। सुमनायते। चुरादौ संग्राम युद्ध इति पठ्यते तत्र संग्रामेति प्रातिपदिकम्। तस्मात्
त्करोतीति णिच् सिद्धः। तत्सन्नियोगेनानुवन्धश्चासज्यते। युद्धे यो संग्रामशब्द इत्युक्त पि सामर्थ्यात् संग्रामशब्दे लब्धे विशिष्ट यातो
ज्ञापयति। उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते पृथक् क्रियते इति। तेन मनश्शब्दा स्मागत्। स्वमनौ

लोपः सतु सन्निहितमेव अकृत्सार्वेति दीर्घं वाधते। अनंतरस्येति न्यायात्। नतु व्यवहितमपि अत आदेरिति दीर्घमिति माधवापूयात्मानेन तद्ग्रंथस्य विरोध इ
ति। अनाकारमेवेति। अनेकाच्त्वाभावादित्यर्थः। अन्ये तु भाष्ये प्रत्ययग्रहणमपनीय त्यनुक्तत्वात्प्रत्ययांततया त्वामासेत्यादि रूपं शुद्धमेवेत्याहुः ॥:॥
॥ ॥ भृशादिभ्यो। भुवीत्येतत् व्याचष्टे भवत्यर्थ इति। भृश। शीघ्र मंद। पंडित। दुर्मनस्। सुमनस्। उन्मनस्। इत्यादयो भृशादयः। क्वदिवेत्यादि भा
ष्यकारीयं प्रत्युदाहरणं व्याचष्टे ये रात्रा वित्यादिना। प्रातिपदिकमिति। न त्वयं धातुः। अस्येरां चेत्यौणादिकेन मनन्प्रत्ययांततया निष्पादितत्वादेवं चव
क्ष्यमाणं ज्ञापकं संगच्छत इति भावः। अनुवंध इति। संग्रामेति मशब्दाकारात् भिन्नोऽकारोऽनुवंध इत्यर्थः। तथा च । अत्र अतो गु॥ ॥ ॥

एम· ११२

408

CC-0. In Public Domain. Digitization by eGangotri

णाइतिपररूपंज्ञेयं।यदित्तुमकारादकारोऽनुबंधःस्यात्तर्हिअससंज्ञामतेसत्रणौचङीतिउपधाह्रस्वःस्यात्।णिज्त्वंनियोगेनानुबंधाकरणेतुअनुदात्तेत्त्वलक्षण
सआत्मनेपदस्याप्रवृत्त्याणिवक्ष्येतिकर्तृगामिनिक्रियाफलएवआत्मनेपदंस्यान्नतुपरगामिनीतिविवेकः।सामर्थ्यादिति।केवलस्यग्रामशब्दस्ययुद्धेप्र
उन्मनायते।उदमनायत।एवञ्चावागल्भत्तअवागल्भिष्टेत्यादावप्यवेत्यस्यपृथक्करणम्बोध्यम्।ज्ञापकञ्चसजातीयविषयम्
तेनयत्रोपसर्गसरूपंसकलंश्रूयतेतन्नत्वादेशेनापह्नतन्तत्रैवपृथक्कृतिः।एवञ्च।आऊढःओढः।सङ्खाचर्यओढापयित्वा।अत्रउन्म।
नाप्यअवगल्भ्येतिवन्नल्यप्।ज्ञापकस्यविशेषविषयत्वेपाष्ठवार्त्तिकन्तद्भाष्यञ्चप्रमाणम्।तथाहि।उस्योमाङ्स्वाटःप्रतिषेधः।उसिओ
माङोश्चपरयोराटःपररूपन्नेत्यर्थः।उस्रामैच्छत्।ओस्त्रीयत्।ओङ्कारीयत्।ओढायत्।आटश्चेतिचशब्देनपुनर्वृद्धिविधानादिदंसिद्धमि
तिभाष्येस्थितम्।लोहितादिडाज्भ्यःक्यष्।३।१।१३।लोहितादिभ्योडाजन्ताच्चभवत्यर्थेक्यष्स्यात्।वाक्यषः।१।३।९०।क्यषन्तात्सरस्मैप
दम्वास्यात्।लोहितायति।लोहितायते।अत्राचिरित्यनुवृत्त्याऽभूततद्भावविषयत्वंलभ्यतेतच्चलोहितशब्दस्यैवविशेषणम्।नतुडाचोऽस
म्भवात्।नाप्यादिशब्दग्राह्याणान्तस्यप्रत्याख्यानात्।तथाचवार्तिकम्।लोहितडाज्भ्यःक्यष्वचनंभृशादिष्वितराणीति।नचैवङ्कृ।
म्यचङ्इत्वक्यषोपिककारःश्रूयेतउच्चारणसामर्थ्यादितिवाच्यम्।तस्यापिभाष्येप्रत्याख्यानात्।पटपटायति।पटपटायते।क्यष्वत्तियोग
स्विनापीहडाच्।डाजन्तात्क्यषोविधानसामर्थ्यात्।यत्तु।लोहितश्यामदुःखानिहर्षगर्वेसुखानिच।मूर्छानिद्राकृपाधूमाःकरुणानिस
चर्मणीतिपठित्वाश्यामादिभ्योपिक्यषिपदद्वयमुदाहरन्तितद्भाष्यवार्त्तिकविरुद्धम्।तस्मात्तेभ्यःक्यङेवश्यामायतेदुःखायते।दुःखाद
योवृत्तिविषयेतद्वतिवर्त्तन्ते।लिङ्गविशिष्टपरिभाषयालोहिनीशब्दादपिक्यष्।लोहिनीयति।लोहिनीयते॥ ९ योगाभावादितिभावः।क्रिया
योगाभावादुपसर्गेनेत्यभिप्रेत्याह।समानाकारमिति।पूर्वपदमिति।तच्चसमासएवसंभवतितेनआंदोलयित्वाप्रेंखोलयित्वेत्यादौआप्रेत्यादीनांनपृथक्का

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



अन्यथा तेषां तेन समासे तत्निल्यपूर्वादित्यादि तिभावः। पृथक्करणस्य फलमाह। तेनेति। समभिमनायिषति उन्मिमनायिषतीत्यादौ मनःशब्दस्य द्विर्वचनमपि फलमि-
ति बोध्यं। अवागल्भत इति। आचारे वगल्भेति क्विबिधौ अवेः सस्य पृथक्करणात्तत्र गल्भशब्दात् प्रागड्। किंतु साजात्यमितस्तत आह। तेनेति। उल्लामिति। माहेपीसो।
रभेपीगौकल्लामात्राच स्त्रंगिरीस्समरः। औस्त्रीयदिति। कयंतात्दुसा शब्दात्लङि अगस्याटि च कृते उस्यपदांतादिति पररूपं प्राप्तं। नच अनर्थकोयमुस्लनग्रहेणोप्यत
इति वाच्यं। छिदुर्भिदुरित्यादावप्युसोऽनर्थकत्वादागमसहितस्यैवार्थवत्त्वात्। तथा च पुरस्पुरित्यादावेव स्यात्। एवं चायमेवाऽडागमस्य उसि पररूपे प्रतिषेधोऽर्थव-
द्ग्रहणं परिभाषाया अत्राप्रवृत्तौ ज्ञापक इति स्थितं। अत एवोस्यपदांतादिसूत्राऽपदांतात् किं कोस इति भाष्ये प्रत्युदाहृतं। औकारीयदिति। ओमाङोश्चेति पररू-
पं प्राप्तं। आडागमस्याङि परे। उदाहरणमाह। औढीयदिति। यत्रादेशेन अपहृतं तत्रापि यदि एत्येधत्युठ्स्विति लदा आडः परत्वात्भाव्यमित्याडागमस्याङि प-
रे पररूपनिषेधो व्यर्थः स्यात्। तथा च ज्ञापकस्य विशेषविषयत्वे प्रमाणमयमेव निषेध इति भावः। चशब्दं प्रयुंजानः सूत्रकारोपि विशेषविषयत्वेऽनुकूल इ-
त्याह। चशब्देनेति। बाधेस्थितमिति। भाष्यकारोक्तार्थप्रमाणभूत इति भावः। स्यादेतत्। अवधीरयतीत्यादाववशब्दस्य पृथक्करणमस्ति वा न वा। आद्ये वो-
पदेवो नावशब्दात् प्रागाडागमं वकारद्वित्वं च कृत्वा च ङि आववधीरदित्युदाहृतं तन्न संगच्छेत द्वितीये तु। इतीव धारामवधीर्य मण्डलीक्रियाश्रियामण्डितुरंगमेर्मे।
हीति श्रीहर्षप्रयोगो न संगच्छेतेति चेत्। अत्राहुः। नायं धातुः स्फुरादौ पठितः किंतु बहुलमेतन्निदर्शनमिति बाहुलकादूहितः। ऊहश्च धीरस्यस्यापि संभवति अव-
धीरस्यस्यापि। प्रयोगद्वयप्रामाण्यात्तु निश्चयविरोधाभावाच्च। यदा त्ववधीरेति विशिष्टस्यैव धातुत्वं तदाऽवधीर्यपि लेति साधु धीरस्यैव धातुत्वे तु अवधीर्ये-
त्यस्य साधुत्वमिति। तस्येति। आदिशब्दस्येत्यर्थः। तस्यापीति। कण्यः ककारस्येत्यर्थः। एतेन नः के पकस्य विभाषेति सूत्रद्वये कयोपि ग्रहणं वदंतः परास्ताः। लोहि-
॥ ॥ तीयतीति। कण्डि सति नङेव स्यात्। कण्डू मानिनो श्वेति पुंवद्भावश्चेति भावः॥ ६ ॥ ६ ॥



409

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कष्टायक्रमणे । क्यङ् वानुवर्त्तते स्वरितत्वात् न तु क्यप् कष्टायेति निर्देशादेव चतुर्थ्यन्तं लभ्यते । क्रमणमुत्साहः । वृत्तिसर्गतायनेषु इति क्रमेरात्मनेपदविधायकसूत्रे सर्ग उत्साह इति सर्वैर्व्याख्यातत्वात् । कष्टं कृच्छ्रं । कृच्छ्रगहनयोः कष इति इडभावः । न च दुःखं कर्तुमुत्साहः संभवतीति तत्साधनं पापमिह गृह्यते इत्याह । पापं कर्तुमिति । द्वितीयान्तेभ्य इति । चिकीर्षायां द्वितीयान्तस्यैवान्वययोग्यत्वादेवमुक्तं । कर्मणो । रोमन्थतपोभ्यामित्यनेन सामानाधिकरण्यात् कर्मण इति पंचमी । प्रत्येकं संबंधा

कष्टायक्रमणे ।३।१।१४। चतुर्थ्यन्तात् कष्टशब्दादुत्साहेऽर्थे क्यङ् स्यात् । कष्टाय क्रमते कष्टायते । पापं कर्तुमुत्सहत इत्यर्थः । सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायामिति वक्तव्यम् । कण्वं पापं । सत्रादयो वृत्तिविषये पापार्थाः । तेभ्यो द्वितीयान्तेभ्यः चिकीर्षायां क्यङ् पापं चिकीर्षतीत्यस्वपदविग्रहः । सत्रायते । कक्षायते इत्यादि । कर्मणो रोमन्थतपोभ्यां वर्त्तिचरोः ।३।१।१५। रोमन्थतपोभ्यां क्यङ् स्यात् क्रमेण वर्त्तनायां चरणे चार्थे क्यङ् स्यात् । रोमन्थं वर्त्तयति रोमन्थायते । हनुचलन इति वक्तव्यम् । चर्वितस्य चर्वणमुद्गीर्णस्य चर्वणे इत्यर्थः । नेह । कीटो रोमन्थं वर्त्तयति । अपानप्रदेशान्निःसृतं द्रव्यमिह रोमन्थः तदश्नातीत्यर्थ इति कैयटः । वर्त्तुलं करोतीत्यर्थ इति न्यासकारहरदत्तौ । तपसः परस्मैपदं च । तपश्चरति तपस्यति । बाष्पोष्मभ्यामुद्वमने ।३।१।१६। आभ्यां कर्मभ्यां क्यङ् स्यात् । बाष्पमुद्वमति बाष्पायते । उष्मायते । फेनाच्चेति वाच्यम् । फेनायते । शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे ।३।१।१७। एभ्यः कर्मभ्यः करोत्यर्थे क्यङ् स्यात् । शब्दं करोति शब्दायते । पक्षे तत्करोतीति णिजपीष्यत इति न्यासः । शब्दयति । सुदिनदुर्दिननीहारेभ्यश्च । सुदिनायते । सुखादिभ्यः कर्तृवेदनायाम् ।३।१।१८। सुखादिभ्यः कर्मभ्यो वेदनायामर्थे क्यङ् स्याद्वेदनाकर्तुरेव चेत्सुखादीनि स्युः । सुखं वेदयते सुखायते । कर्तृग्रहणात्किम् । परस्य सुखं वेदयते

देकवचनमित्याह । कर्मभ्यामित्याह । कर्मभ्यामिति । वर्त्तनायां चरणे इति सूत्रे वर्त्तीति णयन्तात् वृत्तेर्ण्यासश्रन्थेति युचं बाधित्वा अस्मादेव निपातनात् क्तिन् । चरते । गुसंपदादित्वात् भावे क्विबिति भावः । केचित्तु वर्त्तिशब्दो वर्त्तयतेरिकृष्यादिभ्य इतीकि रूपं । लक्षणया चार्थलाभ इत्याहुः । शब्दवैर । कर्मण इत्यनुवर्त्तत इत्याह ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



एभ्यः कर्मभ्य इति। सुखादिभ्यः। कर्तृ इति एथकु पदं लुप्तषष्ठीकं। विद चेतनाख्याननिवासेष्विति चौरादिकाद्युचि वेदनाशब्दो ज्ञानवाचीत्तदपेक्षमेव कर्तृत्वं कर्ता।
च सुखादिभिरन्वेति तदेतदाह। वेदनाकर्तुरिवेति। परस्य सुखमिति। इह यन्निष्ठं सुखं तद्भिन्नो वेदनाकर्तेति वाक्यमेवां सुखादयः सुखदुःखतृप्रकृच्छ्रादयः॥ ॥

नमोवरिवश्चित्रङः क्यच्॥३।१।१९॥ करणे इत्यनुवृत्तेः क्रियाविशेषे पूजायाम्परिचर्यायामाश्चर्ये च। नमस्यति देवान्। पूजयतीत्यर्थः। व
रिवस्यति गुरून्। शुश्रूषतेइत्यर्थः। चित्रीयते। विस्मयते इत्यर्थः। विस्मापयत इत्यन्ये। पुच्छभाण्डचीवराण्णिङ्॥३।१।२०॥ पुच्छादुदसने
व्यसने पर्यसने च। विविधं विरुद्धं वोत्क्षेपणं व्यसनम्। उत्पुच्छयते। विपुच्छयते। परिपुच्छयते। भाण्डात्समाचयने। सम्भाण्डयते
। भाण्डानि समाचिनोति राशीकरोतीत्यर्थः। समवभाण्डत। चीवरादर्जने परिधाने च। संचीवरयते भिक्षुः। चीवराण्यर्जयति परिध
त्ते वेत्यर्थः। मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्॥३।१।२१॥ कृञर्थे। मुण्डं करोति मुण्डयति। व्रताद्भोजनतन्नि
वृत्त्योः। पयः शूद्रान्नं वा व्रतयति। वस्त्रात्समाच्छादने। संवस्त्रयति। हल्यादिभ्यो ग्रहणे। हलिकल्योरदन्तत्वञ्च निपात्यते। हलिं क
लिम्वा गृह्णाति। हलयति। कलयति। महद्धलं हलिः। परत्वाद्वृद्धौ सत्यामपीष्ठवद्भावेनाग्वलुप्यते। अतः सन्वद्भावदीर्घौ न। अजहलत्
अचकलत्। कृतं गृह्णाति कृतयति। तूस्तानि विहन्ति वितूस्तयति। तूस्तं केशा इत्येके। जटीभूताः केशा इत्यन्ये। पापमित्यपरे। मुण्डाद
यः सत्यापपाशेत्यत्रैव पठितुं युक्ताः। प्रातिपदिकाद्धात्वर्थ इत्येव सिद्धे केषाञ्चिद्ग्रहणं। सापेक्षेभ्योपि णिजर्थम्। मुण्डयति माणवकम्
मिश्रयत्यन्नम्। श्लक्ष्णयति वस्त्रम्। लवणयति व्यञ्जनमिति। हलकलयोरदन्तत्वार्थम्। सत्यस्य आपुगर्थम्। केषाञ्चित्तु प्रपञ्चार्थं
म्। सत्यङ्करोत्याचष्टे वा सत्यापयति। अर्थवेदयोरप्यापुग्वक्तव्यः। अर्थापयति। वेदापयति। पाशाद्विमुञ्चति विपाशयति। रूपम्पश्य

नमोवरिवः। चित्रङः क्यच्। विधानमीत्वार्थं। ङित्करणं तु तङर्थं। विस्मापयत इत्यन्य इति। तथा च भट्टिः। तत श्चित्रीयमाणोऽसाविति। असौ मायामृगश्चित्रीयमाणः॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विस्मयमुत्पादयन्नित्यर्थः। पुच्छभाण्डाकरात् इत्यनुवृत्तेरत्रापि क्रियाविशेष एव णिङ्। तमेव विशेषं दर्शयति पुच्छादित्यादिना। ङकारोऽत्र णेरनिटीति णिङ्णिचोः सा-
मान्यग्रहणार्थो नित्यात्मनेपदार्थश्च। उत्पुपुच्छत। संडमिश्रकत्वर्थ इति। कचित् क्रियासामान्ये। भ्राचुर्येणतुक्रियाविशेषे। भ्रत्तादिति। पर्यात्रतपति अभ्रातीत्यर्थः

तूलेनानुकुष्णाति अनुतूलयति। तृणाग्रन्तूलेनानुघट्टयतीत्यर्थः। श्लोकैरुपस्तौति उपश्लोकयति। सेनया अभियाति अभिषेणयति। उपसर्गा-
त्सुनोतीति षः। अभ्यषेणयत्। प्राक्सितादिति षः अभिषिषेणयिषति। स्थादिष्वभ्यासेन चेति षः। लोमान्यनुमार्ष्टि अनुलोमयति। त्वचं सम्व-
रणे। घः। त्वचं गृह्णाति त्वचयति। वर्मणा सन्नह्यति। संवर्मयति। वर्णं गृह्णाति। वर्णयति। चूर्णैरवध्वंसते अवचूर्णयति। इष्टवदित्यति-
देशात् पुम्वद्भावादयः। एनीमाचष्टे एतयति। दरदमाचष्टे दारदयति। पृथुम्प्रथयति। वृद्धौ सत्यां पूर्वस्माट्टिलोपः। अपिप्रथत्। अपप्रथत्।
मृदुम् म्रदयति। अमिम्रदत्। अमम्रदत्। भृशं कृशं दृढम्। भ्रशयति। क्रशयति। द्रढयति। अबभ्रशत्। अचक्रशत्। अदद्रढत्। परिव्रढ-
यति। पर्यवव्रढत्। ऊढिमाख्यत्। औजिढत्। ढत्वादीनामसिद्धत्वात्। हतिशब्दस्य द्वित्वम्। पूर्वत्रासिद्धीयमद्वित्वे इति त्वनित्यमित्यु-
क्तम्। ढिइत्यस्य द्वित्वे मित्यस्य। औडिढत्। ऊढमाख्यत्। औजढत्। औडढत्। ओः पुयणीति वर्णाश्रयाहारजग्रहो लिङ्गम्। द्वित्वे कार्ये।
णौ वच आदेशो नेति ऊनयत्। वुक्तम्। प्रकृत्यैकाच्। वृद्धिपुकौ। स्नापयति। स्नां मां वाऽऽचष्टे स्नापयति। मापयति। मपर्य्यन्तस्य त्वमौ। प-
ररूपात् पूर्वं नित्यत्वाट्टिलोपः। वृद्धिः पुक्। स्वादयति। मादयतीति तु न्याय्यम्। अन्तरङ्गत्वात् पररूपे कृते प्रकृत्यैकाजिति प्रकृतिभावात्।
न च प्रकृतिभावो भाष्ये प्रत्याख्यात इति भ्रमितव्यम्। भाष्यस्यैतद्वृदाहरणविशेषेऽन्यथासिद्धिपरत्वात्। युवामावां वा। युष्मयति॥
अस्मयति। श्वानमाचष्टे शावयति।

शृङ्खलेनबन्धयति। वर्जयतीत्यर्थः। वस्त्रादिति। वस्त्रसमाच्छादने। पो वस्त्रशब्दस्तस्मात् करोत्यर्थे णिजित्यर्थः॥
संवस्त्रयतीति। वस्त्राच्छादनं करोतीत्यर्थः। अदन्तत्वमिति। अयमेव निपातो वृद्धौ सत्यां टिलोप इत्यत्र ज्ञापकः। यदि पूर्वं लोपो भवेत्तदाऽग्लोपकार्यसिद्धौ किम्

[illegible]

CC-0. In Public Domain. Digitization by eGangotri



अपोपटदिति सिध्यतीत्यादि चुरादिष्वेवोपपादितं। कृतयतीति। उपकारं स्त्रीकरोतीत्यर्थः। पठितुं युक्ता इति। एकसूत्रकरणे लाघवमिति भावः। सापेक्षे-भ्योपीति। विधानसामर्थ्यादिति भावः। अन्यत्र तु रमणीयं पटुमाचष्टे इत्येव न तु पटयतीति वृत्तिः। सापेक्षत्वमेव दर्शयति माणवकमित्यादिना। अयं भावः। द्वितीयान्तात् द्विधीयमानस्य णिचः पदविधित्वात् सापेक्षेभ्यो न भवेत् किंतु पदात्प्रकरणादिना माणवकस्येति ज्ञायते तेनैव मुण्डयतीति वृत्तिः स्यात्। न तु मा-णवकादिप्रयोगे णिजन्तस्य सनाद्यन्तवृत्तित्वात् सविशेषणानां वृत्त्यभावाच्चेति। घ इति। पुंसि संज्ञायामित्यनेन। पुंवद्भावाद्घ इति। आदिशब्देन रभावटिलो-पादयः। टिलोपेनैवैतयतीत्यादि रूपसिद्धेः पुंवद्भावग्रहणं दारदयतीति सिध्यर्थमिति चुरादिष्वेवाभिहितं। दरदोपत्यं दारदः। द्व्यञ्मगधेत्यण्। तस्य लि-

नस्तद्धिते इति टिलोपः। प्रकृतिभावस्तु न येन नाप्राप्तिन्यायेन टेरित्यस्यैव बाधको हि सः। भत्वात्संप्रसारणं। अन्ये तु। नस्तद्धिते इति नेह-ति दिश्यते। इष्ठनित्यादेष्टत्वात्। अह्लिष्ठ इत्यादौ परत्वाट्टेरित्यस्यैव प्रवृत्तेः तेन श्वनयतीति रूपमाहुः। विद्वांसमाचष्टे विदयति। अङ्गवृ-त्तपरिभाषया संप्रसारणं नेत्येके। संप्रसारणे वृद्धावावादेशे च विदावयतीत्यन्ये। नित्यत्वाट्टिलोपात्प्राक् संप्रसारणम्। अन्तरङ्गत्वा-त्पूर्वरूपे टिलोपः। विदयति इत्यपरे। उदञ्चमाचष्टे उदीचयति। उदेचिवत्। प्रत्यञ्चम्। प्रतीचयति॥ ११ यामतश्चेतित्तुकि दरदं नामाच 511

ष्टे दारदयति। इह पुंवद्भावाभावे टिलोपे सति दरयतीति स्यात् प्रथयतीति रक्तो हलादेरिति रभावः अपि प्रथदिति वृद्धौ सत्यां टिलोपेन ग्लोपित्वात्सन्वद्भावे। सति सन्यतइत्ीत्वं वृद्धेः पूर्वं टिलोपे तु अपप्रथत्। ओजढदिति। इह टिलोपे सति णिचू सहितस्य द्वित्वे पश्चाद भ्यासे ऽकारो दुर्लभ इत्यत आह। ओः पुयण्जी-ष्यादि। त्वमाविति। प्रत्ययोत्तरपदयोश्चेत्यनेनांतस्यत्वादिति। न च वाणौ दांगमिति टिलोपस्यैव प्रवृत्तिरुचितेति वाच्यं। व्याश्रयत्वात्। भाष्यस्येति। इति। कारैर्हि प्रकृत्यैकाजिति सूत्रे प्रेयान् प्रेष्ठ इत्यादय उदाहृताः। ते च प्रस्थाद्यादेशविधायकस्य प्रियस्थिरेत्यादि शास्त्रस्यासिद्धवदत्राभादित्यसिद्धवद्भावेन प्र-स्थादावकारोच्चारणसामर्थ्याद्वा भाष्ये प्रकृतिभावं विनैव साधिताः। स्त्रग्वान् स्त्रजिष्ठ इत्यादावपि टिलोपो न भविष्यति लोपापवादस्य विन्मतोर्लुकस्तत्र प्रवर्तना॰



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एषैवानेकाज्जुपयस्यानुपयासिद्धः चंपकलजिष्ठइत्यादिषुगतिः।नचैतावताप्रकृत्यैकाजितिसूत्रंप्रत्याख्यातमितिमंतव्यं।स्वापयतीत्यादौतस्यावश्यकत्वात्
इतिभावः।युवामावामिति।युष्मानस्मानितिविग्रहे पियुष्मयतिअस्मयतीत्येवरूपं।नचद्वयोरुक्तौयुवावौभवतइतिरूपे विशेषःशंक्यः।विभक्तिपरत्वाभावात्
नचप्रत्ययलक्षणं।लुकालुप्तत्वात्।नचप्रागेवादेशोस्त्वितिवाच्यं।अंतरंगानपिविधीन्बहिरंगोलुग्बाधतइतिन्यायात्।अकृतव्यूहपरिभाषयाजागरूक
त्वाच्च।येननाप्राप्तीति।यत्रयत्रप्रकृत्यैकाच्इत्यस्यप्रवृत्तिस्तत्रटेरित्यस्यप्रवृत्तिर्नेतुनत्वद्धितइत्यस्य।स्वजिष्ठइत्यादौतस्याप्रवृत्तेरितिभावः।अनंतरस्यवि
धिर्वाप्रतिषेधोवेतिन्यायेनेत्यन्ये।संप्रसारणमिति।नचटिलोपेसत्यनंतरत्वाभावात्श्वयुवमघोनामितिकथमिहसंप्रसारणप्रवृत्तिरितिशंक्यं।स्था
निवत्त्वाद्सिद्धवदत्रेत्यसिद्धत्वाद्वाटिलोपेप्यनंतरत्वलाभात् अतद्धितइतिहितत्रपर्युदासोनतुप्रतिषेधः तेनतद्धितेनविधिर्नेनिषेधः किंतुतद्धितभिन्नेप
रेविधिस्तद्धितभिन्नत्वंतुणाचोःस्त्येवेतिनसंप्रसारणप्रतिबंधः।नापिदविष्ठइत्यादौइष्ठनिओर्गुणोदृष्टइतिइहापिदृष्ठिम्याधित्वाद्गुणःस्यादितिवाच्यं॥
जातेपियुणोपुनर्द्वेधोरूपसिद्धेः।अथवाटिलोपसंप्रसारणयोर्युगपत्प्राप्तौअसिद्धवदत्रेत्यसिद्धत्वादिष्ठवद्भावेननास्तिगुणप्रसंगः।स्तुनयतीति।इष्ठवद्भा
वेनभत्वात्संप्रसारणं।प्रकृत्यैकाजितिप्रकृतिभावः।नित्यत्वादिति।शब्दांतरप्राप्त्यातुटिलोपस्यानित्यत्वमितिभावः।उदीचयतीति।उपसर्गपृथक्कृत्या
चशब्दादेवणिजितिप्रकृत्यैकाजितिप्रवृत्तेःटिलोपोन।उदईदितीत्वं।अनिदितामितिक्विन्निमित्तोनलोपः।उदैचिचदिति।लुङिद्विर्वचनेचौतिणि।
लोपस्यनिषेधाच्चिशब्दस्यद्वित्वं।प्रतीचयतीति।अचइत्यस्यलोपेचाविति पूर्वस्यदीर्घः॥ ६ ॥ ६ ॥

प्रसचिचदिति। इह धात्वकारस्याच इति लोपे चिशब्दात् प्रागटि पूर्वस्य यण्। न चात्मामासनड्त्वादिवद्लोपस्यासिद्धत्वादाड्स्यादिति वाच्यं। व्याश्रयत्वात् णि निमित्तो हि लोपः लुङ् निमित्तश्चाट्। आसन्निसादौ तु न तथेति वैषम्यात् णिरापयतीति। उपसर्गे समानाकारत्वाभावादिह तिरसः पृथक्कारणं नास्तीति न भङ्क।

प्रसचिचत्। इकोसवर्णाद् इति प्रकृतिभावपक्षे। प्रति अचिचत्। सम्यञ्चमाचष्टे समीचयति। सम्यचिचत्। समि अचिचत्। तिर्य्यञ्चमाचष्टे तिरापयति॥ अञ्चेष्टिलोपेनापहारे पि वहिरङ्गत्वेनासिद्धत्वात् तिरसस्तिरिः असिद्धवदत्रेति चिणो लुङ् न्यायेन प्रथमटिलोपोऽसिद्धः अतः पुनष्टिलोपो न। अङ्गवृत्तपरिभाषया वाचङ्ग्लोपित्वादुपधाह्रस्वो न। अतितिरायत्। सध्र्यञ्चमाचष्टे सध्रापयति। असस ध्राय न। विष्वग्यञ्चम्। अविविष्वद्र्यायत्। देवद्र्यञ्चम्। अदिदेवद्र्यायत्। अदद्र्यञ्चम्। आददद्र्यायत्। अदमुयञ्चम्। अदमुआपयति। आदद मुआयत्। अमुमुयञ्चम्। अमुमुआपयति। चङ्। आमुमुआपयत्। भुवम्भावयति। अबीभवत्। भ्रुवम्। अबुभ्रवत्। श्रियं। अशिश्रयत्। गाम्। अजूगवत्। रायम्। अरीरयत्। नावम्। अनूनवत्। स्वश्चमाचष्टे स्वाशम्बत्। स्वः। अव्ययानां भमात्रे टिलोपः। स्वयति। असस्वत्॥ असिस्वत्। वहून् भावयति। वहयतीत्यन्ये। स्रग्विणाम्। स्रजयति। संज्ञापूर्वकत्वान्न वृद्धिः। श्रीमती श्रीमन्तम्वा। श्राययति। अशिश्रयत्। पयस्विनीम। पयसयति। इह टिलोपो न। तदपवादस्य लुकः प्रवृत्तत्वात्। स्थूलं। स्थवयति। दूरं। दवयति। कथं तर्हि दूरयत्यवनते विवस्वतीति। दूरमन्ततिअयते वा दूरात्। दूरानङ्गंतेीत्यर्थः। युवानं। युवयति। कनयति। युवाल्पयोरिति वा कन्। अन्तिकं। नेदयति। वाढं। साधयति। प्रशस्यं। प्रशस्ययति। इह श्रज्यौ न। उपसर्गोस्य पृथक्कृतेः। वृद्धं। ज्यापयति। वर्षयति। प्रियं। प्रापयति। स्थिरं। स्थापयति। स्फिरं। स्फापयति॥ उरुं। वरयति। वारयति। बहुलं। वहयति। गुरुं। गरयति। तृप्रं। त्रपयति। दीर्घं। द्राघयति। वृन्दारकं। वृन्दयति। इति नामधातुप्रक्रिया

स्यैकाजित्वप्रवृत्ते ष्टिलोपस्तदाह। अंचेरिति। चिणो लुङ् न्यायेनेति। यथाऽपाचितरामित्यत्र चिणः परस्य तप्रत्ययस्य लुक् किं पुनः तरप्रत्ययस्य लुङ् न भवति॥

CC-0. In Public Domain. Digitization by eGangotri

प्रथमलुको ऽसिद्धत्वेनव्यवधानात्तत्रयेसर्थः। पुनष्टिलोपोनेति। निर्यादेशस्येकारस्यलोपोनेत्यर्थः। अग्लोपित्वादिति। अगनग्लोपिनोपिअग्लोपित्वस्वोका
रादितिभावः। देवत्र्यंचमिति। ननुआख्यानात्कृतस्तदाचष्टइतिकारकसपृथक्कारणादेवानंचयतीतिप्रसज्येत। वलिंबंधनमाचष्टेवलिंबंधयतीतिवत्॥
इष्यतेतुदेवद्रायय‍तीसेवरूपं। किंच। कारकस्यपृथक्कारणे ऽदिदेवद्रायदिस्याचपिनसिध्येत्। नचपुराणप्रसिद्धाख्यानएवकारकस्यपृथक्करणादिकमिति
वाच्यंराजानमागमयतीसत्राव्याप्तेरितिचेत्। अत्राहुः। यत्राख्यानेक्तकृयतेतत्रैवेदंप्रवर्त्तनेक्तस्तुगितिसंन्नियोगशिष्टविधानात्। किंच। आख्यानग्रहणा
सामर्थ्यात्महाजनप्रसादविषयीभूतार्थेविषयमेवतत्। भाष्यादौतादृशानामेवोदाहृतत्वात्। यदितुदेवांचनमाचष्टेइत्यादौमहाजनप्रसिद्धिरस्तित
दादेवानंचयतीतिभवत्येवेति। आमुमुआपदिति। पूर्वत्रासिद्धीयमद्विर्वचनइत्यसिद्धत्वनिषेधान्मुशब्दस्यद्वित्वं। अवीभवदिति। ओःपुयणजीत्यभ्या
सेऽवर्णस्येत्त्वं। दीर्घोलघोरितिदीर्घः। ननुपरत्वात्प्रथमंदीर्घेकृतेपश्चाद्वित्वंस्यात्। नचैवंदीर्घोलघोरित्यस्यवैयर्थ्यमितिवाच्यं। अजूहवदित्यादौ।
तस्यसावकाशत्वादितिचेत्। अत्राहुः। विप्रतिषेधेपरमित्यत्रपरशब्दस्येष्टवाचित्वाल्लक्ष्यानुरोधेनदीर्घात्प्रागित्त्वमेवभवति। लक्ष्यभेदात्पुनरिका
रस्यदीर्घोवाभवतीतिअबुभ्रवदिति। इहाभ्यासात्परोयःपवर्गःसत्त्ववर्णापरोनयस्त्ववर्णापरोपरानासावभ्यासात्परइत्यभ्यासोकारस्येत्त्वंन। गां
गावयति। स्वश्वमिति। शोभनःअश्वःस्वश्वः। शोभनःअश्वोयस्येतिबहुव्रीहिर्वा। स्वाशश्वदिति। उपसर्गसमाना कारस्यपृथक्करणात्अजादेरिति।
द्वितीयस्यद्वित्वमाडामश्व। स्वयतीति। प्रक्तसेकाजितिप्रक्तत्वभावस्तुयेननाप्राप्तिन्यायाट्टेरित्यस्यैववाधकोनत्वव्यथानांभमात्रेटिलोपइत्यस्येति।
भावः। असस्वदिति। ओःपुयणजीतिज्ञापकेनद्वित्वेकार्येऽजदेशस्यस्थानिवत्वान्निषेधाद्धास्वरशब्दस्यद्वित्वमितिमतेनेदं। अगनग्लोपिन्यग्लोपित्वा।
अपगमेष्यन्यत्वादेशेऽजादेशत्वव्यवहारोनास्तीतिमतेतुणिचःसहितस्यैवद्वित्वंतदाह। असिस्वदिति। भावयतीति। वहोलोपोभूचवहोरिष्टस्यपिद्वेतिभूभा
वःनचैवंयिडागमोपिरोरस्त्वितिवाच्यं। णाविष्टवदित्यत्रसप्तमीनिर्देशादिष्ठवदित्यत्रसप्तम्यंताद्वतिरित्यभ्युपगमात्। एवंचेष्टनिपरेपूर्वस्ययत्कार्यंतदेवा
तिदिश्यतेनत्विष्ठनोपिकार्यमितिस्थितं। वहयतीत्यइति। यिडभावेतत्संन्नियोगशिष्टस्यभूभावस्यापिअभावइतिभावः। नन्वेवमन्यमतत्त्वेनकिम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



थेमिदमुपन्यस्तमितिचेत्।अत्राहुः।प्राधान्यादिष्ठवदितिकार्यातिदेशोनत्वयंशास्त्रातिदेशः।तथाचेष्टनिष्ठेष्टभूभावंसएवातिदेशोविधत्तइतिनात्रसंनियो
गशिष्टपरिभाषायाःप्रवृत्तिः।इत्थंचभावयतीत्येवरूपंसम्यगिति।स्रजयतीति।इष्ठवद्भावेनविन्मतोरितिलुक्।ननुजादेशगुणवचनादेवेसुक्तत्वात्इष्ठ
न्प्रत्ययःस्रग्विन्शब्दाद्दुर्लभइतिइष्ठवद्भावोत्रायुक्तइतिवाच्यंअस्मादेवलुग्वचनाज्ज्ञापकाद्विन्नंतात्प्रत्ययंनाच्चअजादीभवतइत्यभ्युपगमात्।श्रीम
तीमिति।मतुपोलुक्प्रयापयति।अशिश्रयदिति।एतेनत्वसंचरिष्णुभुवनान्तरेषुपांयदकुयाशिश्रयदाश्रयःश्रियामितिमाघश्लोकेप्रचुरःपाठोव्याख्यातः।
श्रीमतीमकरोदित्यर्थोदितिमनोरमायांस्थितं।अत्रकेचित्।सापेक्षाणांवृत्त्यसंभवान्मनोरमोक्तंयत्तदयुक्तं।नहिकश्चित्घटंकरोतिनमानयेत्यर्थेयं
घटयतितमानयेतिप्रयुंक्ते।ननस्वतत्तुकरोतीत्यनेनैवक्षिद्गुंडादिग्रहणात्सापेक्षेभ्योपिणिजर्थमितिपूर्वोक्तंसंगच्छतेयद्यन्यत्रापिसापेक्षेभ्योणिच्
स्यात्तर्हिसंगच्छेत।नचात्रसापेक्षत्वंनेतिविवदितव्यं।यांदिशांश्रीमतीमकरोदितिस्वयमेवव्याख्यातत्वात्।नापिसविशेषणानांवृत्त्यभावेपिविशेष्या
योगेस्यादेववृत्तिरितिनात्रानुपपत्तिरितिश्रीमतीमित्यर्थप्रतिदिशोविशेष्यत्वादितिवाच्यं।विशेष्यहिवहिर्भूतेविशेषणानांवृत्तिर्नोगीक्रियते।नहि।
कश्चित्श्रीमतोराज्ञइदमित्यर्थेराज्ञःश्रीमत्तमितिवृत्तिमभ्युपैति।किंचमाघश्लोकेअधिश्रियदितिसेवपाठोवहुषुपुस्तकेषुदृश्यते।नत्वशिश्रयदित्यलम
शुद्धग्रंथसमर्थनाभिनिवेशेनेत्याहुः।पयसपतीति।इहविन्मतोर्लुकि।अग्लोपात्सन्वदित्वादिकंचन।अग्नलोपेपिसन्वत्भावाभावात्।गोचंड्डोतिसूत्रे।
असत्राजदितिभाष्यमिहप्रमाणं।लुङि।अपपयसत्।एवंस्रग्विनमाख्यत्।असस्रजदित्यत्रापिसन्वदित्वंन।गोमंतंगवयति।लुङि।अजुगवत्।इहाग्लो
पोदीर्घोलघोरितिदीर्घोन।गालजंपपद्धति।विग्रहेतुम्नम्रूगवत्।असिस्रजत्।पयपति।अपपयत्।टेर्लोपस्यवहिरंगत्वेनअसिद्धत्वादिहत्वद्विर्न।अग्लापि।
त्वाज्जुसन्वद्भावदीर्घोन।नदपवादस्येति।येननाप्राप्तिन्यायेनटिलोपापवादोलुक्।स्थवयतीति।स्थूलदूरेतियणादिलोपोगुणश्च।नवगुणस्याचोऽञ्णितो।
निवृत्तिःस्यादितिवाच्यं।अंगकार्येकृतेपुनरंगकार्यस्याप्रवृत्तेः।प्रातिपदिकाद्धात्वर्थेइतिवहुलग्रहणाद्वा।लुङि।अतुस्थवत्।दवयति।यवयतिइत्यादि
इहापिपूर्ववद्वद्भावः।लुङि।अदुद्रवत्।अयुयवत्।अचीकनत्।नेदयतीति।अंतिकवाढयोर्नेदसाधौ।टिलोपः।लुङि।अनिनेदत्।असमाधात्॥ ६



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मशाखं । प्राशाशास्सत् । पृथ कृतेरिति । तेनविशिष्टस्यास्यानिनोऽभावात्तनादेशाविमौभवतइत्यर्थः । ज्यापयतीति । वृद्धस्यचेतिज्यादेशः सचप्रियस्थिरेतिव
र्णादेशेनसहविकल्प्यतइत्याह । वर्षयतीति । लुङि । अजिज्यपत् । अववर्षत् । प्रियं । अपिप्रयत् । स्थिरं । अतिस्थपत् । सस्मादेशावपवादत्वात्पत्वेन । स्फिरं । अ

कंड्वादिभ्योयक् । ३।१।२७। एभ्योधातुभ्योनित्यंयक्स्यात्स्वार्थे । धातुभ्यः किम् । प्रातिपदिकेभ्योमाभूत् । द्विधाहिकंड्वादयः । धातवः प्रातिप
दिकानिच । कण्डूञ् गात्रविघर्षणे । कण्डूयति । कण्डूयते । मन्तु अपराधे । रोषइत्येके । मन्तूयति । चन्द्रस्तुञितमाह । मन्तूयते । वल्गु पूजामाधु
र्ययोः । वल्गूयति । असु उपतापे । असु । असूञ् इत्येके । असूयति । असूयति । असूयते । लेट् लोट् धौर्त्ये पूर्वभावे स्वप्ने च । दीप्तौ इत्येके । लेट्यति
लेटिता । लोट्यति । लोटिता । लेला दीप्तौ । इरस् इरज् इरञ् ईर्ष्यायाम् । इरस्यति । इरज्यति । हलिचेतिदीर्घः । ईर्य्यति । ईर्य्यते । उषस् प्रभातीभावे । वे
द धौर्त्ये स्वप्ने च । मेधा आशुग्रहणे । मेधायति । कुषुभ क्षेपे । कुषुभ्यति । मगध परिवेष्टने । नीचदास्ये इत्यन्ये । तन्तस पम्पस दुःखे । सुख दुःख
तत्क्रियायाम् । सुख्यति । दुःख्यति । सुखंदुःखंचानुभवतीत्यर्थः । सपर पूजायाम् । अरर आराकर्मणि । भिषज् चिकित्सायाम् । भिष्णज् उपसेवा
याम् । इषुध शरधारणे । चरण वरण गतौ । चुरण चौर्ये । तुरण त्वरायाम् । भुरण धारणपोषणयोः । गद्गद वाक्स्खलने । एला केला खेला वि
लासे । इल इत्यन्ये । लेख स्खलने च । अदन्तोऽयमित्यन्ये । लेख्यति । लिट् अल्पकुत्सनयोः । लिट्यति । लाट् जीवने । हृणीङ् रोषणे लज्जायां च । मही
ङ् पूजायाम् । महीयते । पूजां लभत इत्यर्थः । रेखा श्लाघासादनयोः । द्रवस परितापपरिचरणयोः । तिरस् अन्तर्धौ । अगद नीरोगत्वे । उरस् बलो
र्थः । उरस्यति । बलवान्भवतीत्यर्थः । तरण गतौ । पयस प्रसृतौ । सम्भूयस प्रभूतभावे । अम्बर संवरस सम्भरणे । आकृतिगणोऽयम् । इति कंड्वाद यः ॥

पिस्फपत् । उरुमिति । वरादेशेकृतेसंज्ञापूर्वकविधेरनित्यत्वाद्वाहलकाद्वा माधवेनविकल्पेनउपधावृद्धिः कृता हरदत्तेनतुस्वयमपितथैवाह । वरयति वारयतीति ।
अवीवरत् अववरत् । वहयतीति । अग्लोपित्वाद् अववहत् । मस्यतीति । अजीगरत् । त्रपयतीति । अतित्रपत् । द्राघयतीति । अदद्राघत् । वृंदयतीति अववृंदत् । इति नामधातु

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तिः
सि·कौ·
टी·त·
११८

ङ्गतो रितिवर्त्ततेवेति निवृत्तं। अन्यथा कंडूवयतीति स्यात्तदाह। धातो र्नित्यमिति। केचित्तु नित्यं कौटिल्ये गतावित्यतो नित्यमित्यनुवर्त्तत इत्याहुः। तच्चिंत्यं तत्र हि नि
त्यग्रहणमेवकारार्थे वर्त्तते तन्नकौंडिन्यन्यायस्यानित्यतां ज्ञापयितुमिति प्रागव्याख्यातत्वात्। किंच। नित्यं कौटिल्ये गतावित्यत्रापि वेत्यनुवर्त्तते। अन्यथा गत्यर्थेभ्यो
नित्यं यङ् स्यादिति। स्वार्थ इति। कंड्वादिभ्यो यक् स्यात्। कृञर्थे इति प्राचोक्तमयुक्तमिति भावः। द्विधा इति। यकः कित्त्वेन धातव इति ज्ञायंते। कंडूञ् इति दीर्घपाठे।
न प्रातिपदिकान्यपीति। यदि तु धातव एव स्युस्तर्हि ह्रस्वांते पठितेपि यकि परे अकृत्सार्वेति दीर्घेण कंडूयतीत्यादि सिद्धेः किं तेन दीर्घपाठेन। द्वैविध्ये तु धातुभ्यो य
कि गुणनिषेधेन कित्त्वं सार्थकं। कंडूञ् इत्यादि यग्रहितरूपसिद्ध्या दीर्घपाठोपि सार्थकः। अत एवोक्तं भाष्ये। धातुप्रकरणाद्धातुः कस्य चासंजनादपि। आह चायमि
मं दीर्घमन्ये धातु विभाषितं इति। एतेन कंडूं करोति कंडूयति इति प्राचोक्तविग्रहोपि परास्तः कंड्वादयः प्रातिपदिकान्येवेत्यनभ्युपगमात्। नन्वद्वैविध्याभ्युप
गमेपि प्रातिपदिकादेव यक् स्यादिति वाच्यं। तथा हि। सति धातोर्लङादौ कंडूवतोस्त नुवर्तनात्तत्कृञर्थेय मिति प्राचोक्तव्याख्यायां न किंचित्बाधकमित्युक्तं
तच्चिंत्यं। अनुवृत्तौ मानाभावात्। अन्यथा णिजंते ष्विवप्रकृतिप्रत्ययाभ्यां व्यापारद्वयापत्तेरिति दिक्। पूर्वं भाव इति। पूर्वत्वमित्यर्थः। लेटितेति। यस्य हल इति
यलोपः। सुख्यतीति। चुरादौ तु सुखदुःखतत्क्रियायां सुखयतीत्युदाहृतं। सपर्या यगंतात् अप्रत्ययात् इत्यनेन वा अप्रत्यये टाप्। सपर्या अररं आ
राम्रतोरः। तत्करणके कर्मण्यारकर्म। अदंतोयमिति। लेख्यति। आदंतपक्षे तु लेखायति। महीङ् प्रेत्य स्वर्गे महीयत इति रामायणं। प्रसूता विति। प्रसृतिः
परिमाणविशेषः। प्रभूतभाव इति। बाहुल्य इत्यर्थः। प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु इत्यमरः। संभूयस्यति। असंभूयसीत्। नन्विह संशब्दस्य पृथक्कृत्तिर्ये
त्र प्रातिपदिकाद्धातुसंज्ञाप्रयोजकप्रत्ययस्य विधानं तत्रैव पृथक्कृतिरित्याहुः। आकृतिगण इति। तेन दुवस्यंदीपनदस्यादि सिद्धं। प्रयुज्यते च समि। धामिंदु

414
११८

प्रथमस्येति। अजादेस्तु द्वितीयस्य द्वित्वे प्राप्ते इत्यपि ज्ञेयं। प्राचां तु यथेष्टं नामधातुष्विति प्राप्ते कंड्वादेस्तृतीयस्येत्युक्तमित्यवनारितं न द्युक्तं। नामधातुत्वस्यानि
राकृतत्वात्। अत एव मूले नामधातून्समाप्य कंड्वादयः पृथगेवोक्ताः। ह्रीशब्दपिशब्दयोरिति। नकारस्यत्वचः परत्वात् द्वित्वं नेति भावः। पिप्रापयिषतीति। णाविष्टवद्भावेन प्रियशब्दस्य प्रियस्थिरेत्यादिना प्रादेशस्ततो द्वित्वादि। सिसाधयिषतीति। इष्टवद्भावादिहांतिकबाढयोरिति साधादेशः षत्वं तु ना

कण्ड्वयतेः सन्। सन्यङोरिति प्रथमस्यैकाचो द्वित्वे प्राप्ते। कंड्वादेस्तृतीयस्येति वाच्यम्॥ कंडूयियिषति। कृञ्जन्तात्सन्। यथेष्टं नामधातुषु। आद्यानाद्यानामन्यतमस्य द्वित्वमित्यर्थः अजादेस्तु द्वितीयस्य। पुपुत्रीयिषति। पुतित्रीयिषति। पुत्रीयियिषति। अशिश्वियिषति। अश्वीयियिषति। नन्द्राणां संयुक्तानामचः परस्यैव द्वित्वनिषेधः। इन्द्रीयतेः सन्। ह्रीशब्दपिशब्दयोरन्यतरस्य द्वित्वं। इन्दिद्रीयिषति। इन्द्रीयियिषति। चिचन्द्रीयिषति। चन्दिद्रीयिषति। चन्द्रीयियिषति। प्रियमाख्यातुमाचक्षाणं प्रेरयितुमिच्छति। पिप्रापयिषति। प्रापिपयिषति। प्रापयियिषति। उरुम्। विवारयिषति। वारिरयिषति। वारयियिषति। बाढं। सिसाधयिषतीत्यादि रूपत्रयम्। षत्वं तु नास्ति। यङ्सनन्तात्सन्। बोभूयिषयिषति। यङ्णिच्सनन्तात् णिच्। बोभूयषयिषयतीत्यादि। इति प्रत्ययमाला॥ अनुदात्तङित आत्मनेपदम्। आस्ते। शेते। भावकर्मणोः।१।३।१३॥ बभूवे। अनुबभूवे॥ कर्तरि कर्मव्यतिहारे।१।३।१४॥ क्रियाविनिमये द्योत्ये कर्तर्यात्मनेपदं स्यात्। व्यतिलुनीते। अन्यस्य योग्यं लवनं करोतीत्यर्थः। श्नसोरल्लोपः। व्यतिस्ते। व्यतिषाते। व्यतिषते। तासस्त्योरिति सलोपः व्यतिसे। धि च। व्यतिध्वे। हरति। व्यतिहे। व्यत्यसै। व्यतिषीत। व्यत्यास्त। व्यतिराते ३॥ व्यतिभाते ३॥ व्यतिवमे॥ सीति आदेशावयवत्वादिति भावः। बोभू
यिषयिषतीति। इह यङ्निमित्तद्वित्वे कृतेपि सन्निमित्तद्वित्ववारणाय लिटि धातोरिति सूत्रे अनभ्यासस्येत्येतत् अवश्यं कर्तव्यमेव चलक्ष्ये लक्षणं स
कृदेव प्रवर्तते इति अनभ्यासग्रहणं तत्र मास्त्विति भाष्यस्थं प्रत्याख्यानं प्रौढिवादमात्रमिति भावः। इति प्रत्ययमाला। भावे कर्मणि यो लकारः॥ ० ॥ ० ॥

CC-0. In Public Domain. Digitization by eGangotri



तस्मात्पनेपदमित्यर्थः।कर्त्तरि कर्म।अन्यस्येति।शूद्रस्ययोग्यं सस्यादि लवनं ब्राह्मणाः करोतीत्यर्थः।परस्परकरणमपि कर्मव्यतिहारः।संप्रहरन्ते राजानः पृथक्स्व
कारंभादेव सिद्धे कर्तृग्रहणमुत्तरार्थं।व्यतिलुड्इति।यच्चपरत्वाभावान्नषः।व्यतिसइति।उपसर्गप्रादुर्भ्यामिति नेह षत्वं।सकारस्यास्त्यवयवत्वाभावात्।आदे
शप्रसपयोरिति षत्वं तु सासदाद्योरिति निषिद्धं।एकदेशविकृतन्यायेन प्रसपमात्रस्य पदत्वात्॥ ः ॥नगतिहिंसार्थेभ्यः अर्थशब्दः प्रत्येकमभिसंबध्यते॥
कर्मव्यतिहारे यदात्मनेपदं तस्य निषेधः।अर्थग्रहणसामर्थ्यात्तु येशब्दांतरमनपेक्ष्य गतिहिंसयोर्वर्तंते त एवेह गृह्यंते।हरतिस्तु उपसर्गवशात्त्हिंसायां व
र्ततेइतिहरतेरप्रतिषेधः इतिवार्त्तिकमर्थग्रहणलभ्यमेवेत्याहुः।इतरेतरा।नन्वितरेतरादिशब्दैरेव कर्मव्यतिहारस्य द्योतितत्वात्तद्द्योतकमात्मनेपदं न प्रा

नगतिहिंसार्थेभ्यः।१।३।१५।व्यतिगच्छन्ति।व्यतिघ्नन्ति।प्रतिषेधे हसादीनामुपसंख्यानम्।हसादयो हसप्रकाराः शब्दक्रियाः।व्य
तिहसन्ति व्यतिजल्पन्ति।हरतेरप्रतिषेधः।संप्रहरन्ते राजानः।इतरेतरान्योऽन्योपपदाच्च।१।३।१६।परस्परोपपदाच्चेति वक्तव्यम्।इतरेतरस्यान्यो
न्यस्य परस्परस्य वा व्यतिलुनन्ति।नेर्विशः।१।३।१७।निविशते।परिव्यवेभ्यः क्रियः।१।३।१८।अकर्त्रभिप्रायार्थमिदम्।परिक्रीणी
ते।विक्रीणीते।अवक्रीणीते।विपराभ्यां जेः।१।३।१९।विजयते।पराजयते॥

११ प्रोति इति किमर्थो निषेध अत्राहुः।लौकिके व्यवहारे लाघवा
नादरादात्मनेपदं प्रसज्येतेति निषेधोयमारभ्यते।अत एव व्यतिलुनीत इत्यादौ कर्मव्यतिहारद्योतनाय व्यतीत्युपसर्गो वात्मनेपदं च समुच्चित्य प्रयुज्यत इति
।नेर्विशः।नेः किं प्रविशति।अर्थवद्ग्रहणलक्षणप्रतिपदोक्तपरिभाषाभ्यां नेरुपसर्गस्य ग्रहणं।नेह।मधूनि विशंति भ्रमराः।इत्युक्ता मैथिलीभर्तुरं।
के निविशंतो भयादित्यत्र तु अंगानि विशंतीति पाठ्यमनु च पदसंस्कारपक्षे त्वंके निविशतीति पाठे प्रदोष इति वाच्यं।त्वं करोति भवान्करोषीत्यादि
प्रयोगस्यापि त्वदुक्तरीत्या साधुत्वापत्तेः।वालिप्रायामित्यादेश्चैयथ्यापत्तेश्च।स्यादेतत्।न वा बुद्ध्या सत्तनुव्यवहितेति तत्रात्मनेपदं न स्यात् अटा व्यवधा
नात्।न च स्वांगमव्यवधायकमिति वाच्यं।अंगभक्तस्याटो विकरणविशिष्टस्यावयवत्वेपि धातोरनवयवत्वादितिचेत्।अत्राहुः।लावस्थायामडागम इति



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाष्यमतेन कश्चिद्दोषः। मतान्तरे तूपसर्गनियमे अड्व्यवाये उपसंख्यानमिति वार्त्तिकमस्तीति॥ ॥ आङो दो। अकर्त्रभिप्रायार्थमिदं तेन व्याददते विहगप

आङो दोऽनास्यविहरणे।१।३।२०। आङ्पूर्वाद्ददातेर्मुखविकसनादन्यत्रार्थे वर्त्तमानादात्मनेपदं स्यात्। विद्यामादत्ते। अनास्येति किं। मुखं व्याददाति। आस्यग्रहणमविवक्षितम्। विपादिकां व्याददाति। पादस्फोटो विपादिका। नदी कूलं व्याददाति। पराङ्गकर्मकान्न निषेधः। व्याददते पिपीलिकाः पतङ्गस्य मुखम्। क्रीडोऽनुसम्परिभ्यश्च।१।३।२१। चादाङः। अनुक्रीडते। संक्रीडते। परिक्रीडते। आक्रीडते। अनोः कर्मप्रवचनीयान्नात्रोपसर्गग्रहणमाशाहचर्यात्। माणवकमनुक्रीडति। तेन सहेत्यर्थः। तृतीयार्थ इत्यनोः कर्मप्रवचनीयत्वंत। समोऽकूजने। संक्रीडते। कूजने तु। संक्रीडति चक्रम्। आगमेः क्षमायाम्। एतस्येदं ग्रहणम्। आगमयस्व तावत्। मा त्वरिष्ठा इत्यर्थः। शिक्षेर्जिज्ञासायाम्। धनुषि शिक्षते। धनुर्विषये ज्ञाने शक्तो भवितुमिच्छतीत्यर्थः। आशिषि नाथः। आशिष्येवेति नियमार्थं वार्त्तिकमिदमुक्तम्। सर्पिषो नाथते। सर्पिर्मे स्यादित्याशास्त इत्यर्थः। कथं नाथसे किमु पतिं न भूभृतामिति। नाथस इति पाठ्यम्। हरतेर्गतताच्छील्ये। गतस्य प्रकारः पैतृकमश्वा अनुहरन्ते। मातृकं गावः। पितुर्मातुश्चागतस्य प्रकारं सततं परिशीलयन्तीत्यर्थः। ताच्छील्ये किं। मातुरनुहरति। किरतेर्हर्षजीविकाकुलायकरणेष्वाच्यम्। हर्षादयो विषयाः। तत्र हर्षो विक्षेपस्य कारणम्। इतरे फले। अपाच्चतुष्पाच्छकुनिष्वालेखने।६।१।१४२। अपात्किरतेः सुट् स्यात्। सुडपि हर्षादिष्वेव वक्तव्यः। अपस्किरते वृषो हृष्टः। कुक्कुटो भक्ष्यार्थी। श्वा आश्रयार्थी च। हर्षादिष्विति किं। अपकिरति कुसुमम्। इह तङ् सुट् न। हर्षादिमात्रविवक्षायां यद्यपि तङ् प्राप्तस्तथापि सुड्भावे नेष्यते इत्याहुः। गजोऽपकिरति। आङि नुप्रच्छ्योः। आनुते आपृच्छते। शप उपालम्भे। आक्रोशार्थो स्वरितेतो कर्त्तृगेपि फले शपथरूपेऽर्थे आत्मनेपदं वक्तव्यमित्यर्थः॥ ९९तिमुखं स्वकीयमिति प्रयो

गः। आस्यविहरणेऽपि सिद्धः क्रियाफलस्य कर्त्तृगामित्वविवक्षणात्। शिक्षेर्जिज्ञासायामिति। शिक्षविद्योपादान इत्यस्येह ग्रहणं॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



अनुदात्तेत्वादेवात्मनेपदसिद्धेः किंतु शाकेः संनंतस्येति ध्वनयति धनुर्विषय इत्यादिना। नियमार्थमिति। नाथतेरनुदात्तेत्वं तु अनुदात्तेत्त्वश्च हलादेरिति युचि नाथ
ना इति रूपसिद्ध्यर्थमिति भावः। मातुरनुहरतीति। सादृश्यमात्रमत्र विवक्षितं न तु प्रकारता च्छील्ये। गजोपकिरतीति। अत्र हर्षे सत्यपि आलेखनाभावात्सुटोऽप्रा

कृष्णाय शपते। समवप्रविभ्यः स्थः। १।३।२२। सन्तिष्ठते। स्थाघ्वोरिच्च। समस्थित। समस्थिषाताम्। समस्थिषत। अवतिष्ठते। प्रतिष्ठते। वि
तिष्ठते। आङः प्रतिज्ञायामुपसंख्यानम्। शब्दं नित्यमातिष्ठते। नित्यत्वेन प्रतिजानीत इत्यर्थः। प्रकाशनस्थेयाख्ययोश्च। १।३।२३। गोपी
कृष्णाय तिष्ठते। आशयं प्रकाशयतीत्यर्थः। संशय्य कर्णादिषु तिष्ठते यः। कर्णादीन्निर्णेतृत्वेनाश्रयतीत्यर्थः। उदोऽनूर्ध्वकर्मणि। १।
३।२४। मुक्तावुत्तिष्ठते। अनूर्ध्वेति किम्। पीठादुत्तिष्ठति। ईहायामेव। नेह। ग्रामाच्छतमुत्तिष्ठति। उपान्मन्त्रकरणे। १।३।२५। आग्नेय्याग्नी
ध्रमुपतिष्ठते। मन्त्रकरणे किं। भर्त्तारमुपतिष्ठति यौवनेन। उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यम्। आदित्यमुपतिष्ठते।
कथन्तर्हि स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वतीति। देवतात्वारोपात्। नृपस्य देवतांशत्वाद्वा। गङ्गा यमुनामुपतिष्ठते। उपश्लिष्यतीत्य
र्थः। रथिकानुपतिष्ठते। मित्रीकरोतीत्यर्थः। पन्थाः स्रुघ्नमुपतिष्ठते। प्राप्नोतीत्यर्थः। वा लिप्सायामिति वक्तव्यम्। भिक्षुकः प्रभुमुपतिष्ठते
उपतिष्ठति वा। लिप्सया उपगच्छतीत्यर्थः। अकर्मकाच्च। १।३।२६। उपात्तिष्ठतेरकर्मकादात्मनेपदं स्यात्। भोजनकाले उपतिष्ठते। सन्निहि
तो भवतीत्यर्थः। उद्विभ्यां तपः। १।३।२७। अकर्मकादित्येव। उत्तपते। वितपते। दीप्यत इत्यर्थः। स्वाङ्गकर्मकाच्चेति वक्तव्यम्। स्वमङ्गं स्वाङ्ग
न्न तु अद्रवमिति परिभाषितम्। उत्तपते। वितपते पाणिम्। नेह। सुवर्णमुत्तपति। सन्तापयति। विलापयति वेत्यर्थः। चैत्रो मैत्रस्य पाणिमु

श्रिः। कृष्णाय शपते इति। श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमान इति संप्रदानसंज्ञा। नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किंचिदपि स्मरा ॥ त्तपति। सन्तापयतीत्यर्थः।
मि इत्यत्र तु स्वाशयं प्रकाशयामीत्यर्थो विवक्षितो न तु शपथ इति न तङ् इत्याहुः। प्रकाशन। प्रकाशनं ज्ञापनं स्थेयो विवादपदनिर्णेता। तिष्ठतेऽस्मिन्विवादपदनिर्णे

416



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बाहुलकादधिकरणे अचोयत्। स्थेयो विवादस्थानस्य निर्णेता। त्रिष्वथो हि नेद्ग इति मेदिनी। कर्णादिष्विति। अधिकरणे सप्तमी। तेषां स्थेयत्वं तिष्ठते इत्यात्मनेपदे
नयोसते तमेवार्थमाह। कर्णादीनिति। प्रकाशनेत्यादि किं। चैत्रस्तिष्ठति। उदोनूर्ध्वकर्मणि। स्थाइत्यनुवर्तते। ऊर्ध्वदेशसंयोगानुकूलं यत्कर्म तदूर्ध्वकर्म। उ
दोनूर्ध्वे इत्युक्तेऽप्यनूर्ध्वे क्रियायां वर्तमानादुत्पूर्वात्तिष्ठतेर्लेस्यात्मनेपदमित्यर्थो लभ्यत एवान्तथापि परिस्फुटार्थलाभाय कर्मपदमित्यभिप्रेत्याह। ईहाया
मेवेति। इच्छापूर्विका चेष्टा ईहा। सा च ग्रामाच्छतमित्यत्र नास्ति। उपान्मन्त्रकरणे। मन्त्रः करणं यत्र मन्त्रकरणा स्तुतिः तत्र वर्तमानादुपपूर्वात्तिष्ठतेरात्मनेप
दं स्यात्। आग्नेय्येत्यादि। अग्निदेवताकया ऋचा आग्नीध्रमग्निविशेषं स्तौतीत्यर्थः। अत्र केचित्। श्लोकैः राजानं स्तौतीत्यर्थे श्लोकैरुपतिष्ठत इति प्र
योगो नेष्यते। ऐन्द्र्या गार्हपत्यमुपतिष्ठते। आग्नेय्या आग्नीध्रमिति वैदिकविषय एव सर्वैरुदाहृतत्वात्। तथा च तिष्ठतेरर्थे यदा मन्त्रः करणं तदा तङिति व्याख्ये
यं। उपतिष्ठत इत्यस्य तु समीपावस्थानमेवार्थः। न च तत्र पश्वादिवन्मन्त्रस्य करणत्वं न संभवतीति वाच्यं। उपस्थानस्वरूपे तस्योपयोगाभावेऽपि तत्कार्ये स्तुता
वुपयोगादुपस्थानकरणत्वं मन्त्रस्य न विहन्यते। आग्नीध्रमिति द्वितीयानुकरणत्वान्यथानुपपत्तिलभ्येन स्तोतुमित्यनेनान्वेति। एवं चाग्नेय्या आग्नीध्रं
स्तोतुं तत्समीपे तिष्ठतीत्येव वाक्यार्थः। आदित्यमुपतिष्ठत इत्यत्र तु तत्समीपावस्थानस्यासंभवादादित्यं स्तोतुं तदभिमुखतया तिष्ठतीत्यर्थ इत्याहुः। गं
गायमुनामिति। एतेन यमुनैव प्राचीनां गंगामुपस्थाय यमुनया सह मिलितेति प्रतीयते। स्थांगकर्मकाच्चेति। चकारेणाकर्मकस्य संग्रहः। न लब्धवमिति। अस्य

॥ या चैत्रो मैत्रस्येत्यादि वक्ष्यमाणं न संगच्छेतेति भावः॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

तिः
सि॰कौ॰ आङोयमहनः। प्राप्येति। तथाच। हन्तेरकर्मकतया आजघ्ने आहध्वमित्यात्मनेपदं युक्तमित्यर्थः। भेत्तुमित्यादीति। एवंच ल्यब्लोपपंचम्याः प्रसक्तिरेव नास्तीति भा-
टी॰त॰ वः। समीपमेत्येति। विषमविलोचनस्य समीपमेत्य वक्षः आजघ्ने। स्वकीयमेव वक्षो मल्ल इव संतोषातिशयादास्फालनं चक्रे इत्यर्थात् स्वांगकर्मकत्वमस्त्येवेति भा-
१२१ वः। आत्मनेपदेष्विति। तङीत्येव सुवचं। समोगमृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्य इति वृत्तिस्थं पाठमुपेक्ष्य भाष्यस्थं पाठमनुसरति। समोगमृच्छिभ्यामिति। संगच्छत

आङो यमहनः।१।३।२८। आयच्छते। आहते। अकर्म्मकात्स्वाङ्गकर्म्मकाच्चेत्येव। नेह। परस्य शिर आहन्ति। कथन्तर्हि आजघ्ने विषमवि-
लोचनस्य वक्ष इति भारविः। आहध्वं मा रघूत्तममिति भट्टिश्च। प्रमाद एवायमिति भागवृत्तिः। प्राप्येत्यध्याहारो वा। ल्यब्लोपे पञ्चमीति तु
स्य वचनं विनैव तदर्थावगतिर्यत्र तद्विषयम्। भेत्तुमित्यादितुमुन्नाध्याहारो वास्तु समीपमेत्येति वा। आत्मनेपदेष्वन्यतरस्याम्।२।४।
।४४। हनो वधादेशो वा लुङि आत्मनेपदेषु परेषु। आवधिष्ट। आवधिषाताम्। हनः सिच्।१।२।१४। कित्स्यात्। अनुनासिकलोपः। आह-
त। आहसाताम्। आहसत। यमो गन्धने।१।२।१५। सिच् कित्स्यात्। गन्धनं सूचनं परदोषाविष्करणं। उदायत। गन्धने किम्। उदायंस्त पा-
दम्। आकृष्टवानित्यर्थः। समो गम्यृच्छिभ्याम्।१।३।२९। अकर्म्मकाभ्यामित्येव। सङ्गच्छते। वा गमः।१।२।१३। गमः परौ झलादी लिङ्-
सिचौ वा कितौ स्तः। सङ्गसीष्ट। सङ्गंसीष्ट। समगत। समगंस्त। समृच्छिष्यते। अकर्म्मकाभ्यां किं। ग्रामं सङ्गच्छति। विदिप्रच्छिस्वर-
तीनामुपसंख्यानम्। वेत्तेरेव ग्रहणं। सम्वित्ते। सम्विदाते॥

९९इति। संगतं भवतीत्यर्थः॥ वा गमः। असंयोगाल्लिट् किदित्यतः किदनुवर्त्तते इको झ- 417
लित्यतो झलग्रहणं लिङ्सिचावित्यतो लिङ्सिचाविति चानुवर्त्तते। कित्त्वपक्षे अनुदात्तोपदेशेति मलोपः संमृच्छिष्यत इति लृटः प्रयोगस्तु तौदादि-
कस्य ऋच्छेरत्र ग्रहणं न तु ऋच्छादेशस्येति ध्वननार्थः। ग्रामं संगच्छतीति। नन्वेवं कथं समगच्छन्तेत्यत्र तु एकं जातमित्यर्थात् क्रमेणाकर्मकत्वमेवेति तङ्। एकमेवैकं। राम॰
स्वार्थे ष्यङ्। विदिप्रच्छि। परस्मैपदिसाहचर्यादाह। वेत्तेरेवेति। विंदतिर्हि स्वरितेत् सत्ताविचारणार्थयोस्तु अनुदात्तेत्त्वादेव सिद्धं॥ ९ ॥ ९ ॥ १२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हि इं। नचनिरनुबंधपरिभाषयैववेत्तेर्ग्रहणंस्यादितिवाच्यं।लुग्विकरणाऽलुग्विकरणयोरितिपरिभाषयानुविंदतेर्ग्रहणप्रसंगात्॥ ❁ ॥वेत्तेर्विभाषा।शीङोरुडित्य
तोरुडनुवर्त्तते।अदभ्यस्तादित्यतोऽदित्यनुवर्त्यषष्ठ्यंतत्वेनविपरिणम्यतइत्याह।अतोरुडागमइति।अड्घोत्विति।सर्त्तिशास्त्यर्त्तिभ्यश्चेतिलुप्तविकरणेनशासिनासा
हचर्यादितिभावः।मासमृतेतिउश्चेतिकित्वं।माङ्योगादडभावः।समार्त्तेति।ननुसिज्लोपस्यासिद्धत्वादारश्चेतिवृद्धौकृतायांह्रस्वादंगादितिसिज्लोपाप्रवृत्त्यास-

वेत्तेर्विभाषा।७।१।७।वेत्तेःपरस्यझादेशस्यातोरुडागमोवास्यात्।संविद्रते।संविदते।समृच्छते।संस्वरते।अर्त्तिश्रुदृशिभ्यश्चेतिवक्तव्य
म्।अर्त्तीतिद्वयोर्ग्रहणम्।अड्घोत्वियर्त्तेरेवेत्युक्तम्।मासमृत।मासमृषाताम्।मासमृषतेति।समार्त्त।समार्षाताम्।समार्षतेतिचभ्वा
देः।द्वयर्त्तेस्तु।मासमरत।मासमरेताम्।मासमरन्त।समारत।समारेताम्।समारन्तेतिच।संशृणुते।संपश्यते।अकर्मकादित्येव।अत्र
एवरक्षांसीतिपुरापिसंशृणुमहेइतिमुरारिप्रयोगः प्रामादिकइत्याहुः।अध्याहारोवाइतिकथयन्त्यइति।अथास्मिन्नकर्मकाधिकारे
हनिगम्यादीनांकथमकर्मकतेतिचेत्।शृणु।धातोरर्थान्तरेवृत्तेर्धात्वर्थेनोपसंग्रहात्।प्रसिद्धेरविवक्षातःकर्मणोऽकर्मिकाक्रिया।
१।वहतिभारम्।नदीवहतिस्यन्दतइत्यर्थः।जीवति।नृत्यति।प्रसिद्धेर्यथा।मेघोवर्षति।कर्मणोऽविवक्षातोयथा।हितान्नयःसंशृणु
तेसकिंप्रभुः।उपसर्गादस्यत्यूह्योर्वेतिवाच्यम्।अकर्मकादितिनिवृत्तम्।वस्यन्निरस्यति।निरस्यते।समूहति।समूहते।उपसर्गाद्ध्र
स्वऊहतेः।७।४।२३।यादौक्ङिति।ब्रह्मसमुह्यात्।अग्निंसमुह्य।निसमुपविभ्योह्वः।१।३।३०।निह्वयते।स्पर्द्धायामाङः।१।३।३१।कृष्णश्चा
णूरमाह्वयते।स्पर्द्धायांकिम्।पुत्रमाह्वयति।गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषुकृञः।१।३।३२॥ ९ ॥

मार्षेतिरूपंस्यात्।नचह्रस्वाद्विहितस्येतिव्याख्यानादिष्टसिद्धिरितिवाच्यं।विहितविशेषणेमानाभावात्।उदायत।आहतेत्यत्रसिद्ध्यापत्तेश्च।अत्रकेचित्
सिज्लोपएकादेशेसिद्धोवाच्यइत्यनेनपूर्वंसिज्लोपेपश्चाद्वृद्धिर्भवति।एकादेशइतिविषयसप्तम्याश्रयणात्।नचैवमप्येष्टेति॥ ९ ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति·
सि·कौ· नसिद्धेत्तत्राप्युक्तरीत्यापूर्वं सिज्लोपे टद्धोसस्याँ अध्यैतेतिरूपप्रसंगादितिवाच्यं वार्णादांगं बलीय इति पूर्वमेव गुणे कृते सिज्लोपो न प्रवर्तते इत्याटश्चेति वृ।
टी·त· द्धौ कृतायाम ध्यैष्टेतिरूपस्य निर्बाधत्वात्। समार्तेसत्रत्तुउश्चेति किंत्वेन गुणाप्रवृत्त्यापूर्वमेव सिज्लोपे प्रश्चादाटश्चेति वृद्धिरितिवैषम्यमित्याहुः। अन्येतु।
१२२ सिज्लोपानंतरं यत्र एकादेशः प्रसज्यते तत्रैव सिज्लोपः सिद्धो यथा ऽग्रहीदिति। न चात्र तादृशो विषयोऽस्ति किंच। वार्णादांगं बलीय इति पूर्वमेव गुणे कृ।
ते इत्यादि यदुक्तं। तदसत्। समानाश्रये हि वार्णादांगं बलीयः। अन्यथा। द्यौरिवाचरति द्यवति इत्यत्र यणा न स्यात्। किंतु पुगंतेति गुण एव स्यात्। तथा चस

गन्धनं हिंसा। उत्कुरुते। सूचयतीत्यर्थः। सूचनं हि प्राणवियोगानुकूलत्वाद्धिंसैव। अवक्षेपणम्भर्त्सनं। श्येनो वर्तिकामुदाकुरुते।
भर्त्सयतइत्यर्थः। हरिमुपकुरुते। सेवते। परदारान्प्रकुरुते। तेषु सहसा प्रवर्तते इत्यर्थः। एधोदकस्योपस्कुरुते। गुणमाधत्ते। गाथाः
प्रकुरुते प्रकथयतीत्यर्थः। शतम्प्रकुरुते। धर्मार्थं विनियुङ्क्ते। एषु किं। कटङ्करोति। अधेः प्रसहने। १।३।३३। प्रसहनं क्षमाऽभिभव
श्च। यद्धमर्षः सोऽभिभवे चेति पाठात्। शत्रुमधिकुरुते। क्षमत इत्यर्थः। अभिभवतीति वा। वेः शब्दकर्मणः। १।३।३४। स्वरान्विकुरु
ते। उच्चारयतीत्यर्थः शब्दकर्मणः किम्। चित्तं विकरोति कामः॥

९ मार्ष्टे स्ववक्तव्ये समार्तेतिलेखकप्रमाद इत्याहुः॥ ॥ गंधनं हिंसेति 418
गंधअर्दने। अहिंसायामिसनयोश्चुरादौ पाठादिति भावः। सहसा वर्तते साहसिकः। ओजः सहोंभस्येति ठक्। तस्य कर्म साहसिकं। ब्राह्मणादित्वात्ष्यञ् प
परदारानित्यादिना तान्वशीकरोतीत्यर्थः। साहसिकं च न अधात्वर्थः। तथा हि। सति परदारानिति कर्मणोऽनन्वयः स्यात्। किंतु प्रयोगोपाधिरित्यभिप्रेत्याह। तेषु सह राम·
हसेति। एधोदकस्येति। एधशब्दोऽकारांतः। अवोदैधौद्मेति निपातितः। एधाश्च उदकं च तेषां समाहारः। यद्वा। एधःशब्दः सकारांतः। तथा च। एधांसि चदकं १२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वेसर्थोत्र न भिद्यते। अंशं च हलायुधे। प्रोक्तं प्राज्ञैर्भुवनममृतं जीवनीयं दकं च इति। संमानन। उपनयनपूर्वके णीति। उपनयनं वटुसंस्कारः। तस्य परगामित्वात्पर
स्मैपदे प्राप्ते अनेनात्मनेपदं विधीयते। न ह्युपनयनमात्रेण आचार्यत्वं भवति किंतु तत्पूर्वकाध्यापनेनेत्याचार्यकरणस्य प्रयोगोपाधित्वं परंपरया ज्ञेयं। उ।

अकर्म्मकाच्च। १।३।३५। वेः कृञ इत्येव। छात्रा विकुर्वते। विकारं लभन्ते। सम्माननोत्सञ्जनाचार्य्यकरणज्ञानभृतिविगणनव्ययेषु।
नियः। १।३।३६। अत्रोत्सञ्जनज्ञानविगणनव्ययानयतेर्वाच्याः। इतरे प्रयोगोपाधयः। तथा हि। शास्त्रे नयते। शास्त्रस्थं सिद्धान्तं शि
ष्येभ्यः प्रापयतीत्यर्थः। तेन च शिष्यसम्माननं फलितं। उत्सञ्जने। दण्डमुन्नयते। उत्क्षिपतीत्यर्थः। माणवकमुपनयते। विधिना आ
त्मसमीपं प्रापयतीत्यर्थः। उपनयनपूर्वकेणाध्ययनेन हि उपनेतरि आचार्य्यत्वं क्रियते। ज्ञाने तत्त्वं नयते। निश्चिनोतीत्यर्थः। कर्म्म
करानुपनयते। भृतिदानेन स्वसमीपं प्रापयतीत्यर्थः। विगणनम् ऋणादेर्निर्य्यातनम्। करं विनयते। राज्ञे देयं भागं परिशोधयतीत्यर्थः
शतं विनयते। धर्म्मार्थं विनियुङ्क्त इत्यर्थः। कर्त्तृस्थे चाऽशरीरे कर्म्मणि। १।३।३७। नियः कर्तृस्थे कर्म्मणि आत्मनेपदं स्यात्तच्च
शरीरावयवभिन्नं एव स्यात्। सूत्रे शरीरशब्देन तदवयवो लक्ष्यते। क्रोधं विनयते। अपगमयति। तत्फलस्य चित्तप्रसादस्य कर्त्तृगत्वा
त्स्वरितञित इत्येव सिद्धे नियमार्थमिदम्। तेनेह न। गडुं विनयति। कथं तर्हि विगणय्य नयन्ति पौरुषमिति। कर्त्तृगामित्वाविवक्षायामु

सि

पनीय ददद्वेदमाचार्यः स उदाहृत इति स्मृतिः। कर्त्तृस्थे कर्मणीति। आत्मगामिनि क्रियाफले इत्यर्थः। वृत्तिसर्गतायनेषु क्रमः। तायृ संतानपालनयोः। तायनं स्फीततानदाह। स्फी
तो निइति। प्रवृद्धा नीत्यर्थः। वेः पादविहरणे। यद्यपि क्रमेः पादविक्षेप एवार्थस्तथापि धातूनामनेकार्थत्वादेवमुक्तं। प्रोपाभ्यां। प्रोपाभ्यामारम्भे इत्येवमुक्तं॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri



उपक्रामतीति। वृत्त्याद्यर्थेष्वेव उपपराभ्यामिति प्रवृत्तेर्नात्रात्मनेपदं प्रसक्तमिति भावः। वृत्त्यादौ त्विति। न च वृत्त्यादिसूत्रं सोपसर्गे चरितार्थमित्यनुपसर्गात्

वृत्तिसर्गतायनेषु क्रमः।१।३।३८। वृत्तिरप्रतिबन्धः। ऋचि क्रमतेऽस्य बुद्धिर्न प्रतिहन्यत इत्यर्थः। सर्ग उत्साहः। अध्ययनाय क्रमते उत्सहते। क्रमन्तेऽस्मिन्शास्त्राणि। स्फीतानि भवन्तीत्यर्थः। उपपराभ्याम्।१।३।३९। वृत्त्यादिष्वाभ्यामेव क्रमेर्नतूपसर्गान्तरपूर्वात्। उपक्रमते। पराक्रमते। नेह। संक्रामति। आङ उद्गमने।१।३।४०। आक्रमते सूर्यः। उदयत इत्यर्थः। ज्योतिरुद्गमन इति वाच्यम्। नेह। आक्रामति धूमो हर्म्यतलात्। वेः पादविहरणे।१।३।४१। साधु विक्रमते वाजी। पादविहरणे किं। विक्रामति सन्धिः। द्विधा भवति स्फुटतीत्यर्थः। प्रोपाभ्यां समर्थाभ्याम्।१।३।४२। समर्थौ तुल्यार्थौ। शकंध्वादित्वात्पररूपम्। आरम्भेऽनयोस्तुल्यार्थता। प्रक्रमते। उपक्रमते। समर्थाभ्यां किम्। प्रक्रामति। गच्छतीत्यर्थः। उपक्रामति आगच्छतीत्यर्थः। अनुपसर्गाद्वा।१।३।४३। क्रामति क्रमः परस्मैपदेष्विति दीर्घः। क्रमते। अप्राप्तविभाषेयम्। वृत्त्यादौ तु नित्यमेव। अपह्नवे ज्ञः।१।३।४४। शतमपजानीते। अपलपतीत्यर्थः॥

क्रमेर्वृत्त्याद्यर्थेऽपि विभाषैवास्त्विति वाच्यं। उपपराभ्यामिति नियमस्योक्तत्वात्॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥



419

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अकर्मकाच्च। अनुपसर्गाज्ज्ञ इत्यनेनैव सिद्धे सर्पिषोऽनुजानीते इत्यादि सोपसर्गार्थमिदं सूत्रं। भासनोपसंभाषा। एषु किं। यत् किंचिद् वदति। अनुवदते कठः इति। अ
नुः सादृश्ये। तेन कलापस्येति तुल्यार्थैर्योगे शेषलक्षणा षष्ठी। विभाषा विप्रलापे। अप्राप्तविभाषा। स्वकरणं स्वीकार इति। स्वकरणमित्यत्र च्विर्न भवति समर्थानां प्रथ

अकर्म्मकाच्च।१।३।४५। सर्प्पिषो जानीते। सर्प्पिषा उपायेन प्रवर्त्तत इत्यर्थः। सम्प्रतिभ्यामनाध्याने।१।३।४६। शतं संजानीते अवेक्षत इत्यर्थः। शतं प्रतिजानीते। अङ्गीकरोतीत्यर्थः। अनाध्याने इति योगो विभज्यते। तेन स्मरणार्थादकर्म्मकाच्चेति प्राप्तिरपि वार्य्यते। मातुः मातरं वा संजानाति। कर्म्मणः शेषत्वविवक्षायां षष्ठी। भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः।१।३।४७। उपसम्भाषोपमन्त्रणे धात्वर्थौ चान्ये तु तरे प्रयोगोपाधयः। शास्त्रे वदते। भासमानो ब्रवीतीत्यर्थः। उपसम्भाषा उपसान्त्वनम्। भृत्यानुपवदते। सान्त्वयतीत्यर्थः। ज्ञाने। शास्त्रे वदते। यत्ने। क्षेत्रे वदते। विमतौ। क्षेत्रे विवदन्ते। उपमन्त्रणमुपच्छन्दनम्। उपवदते। प्रार्थयत इत्यर्थः। व्यक्तवाचां समुच्चारणे।१।३।४८। मनुष्यादीनां सम्भूयोच्चारणे वदेरात्मनेपदं स्यात्। सम्प्रवदन्ते ब्राह्मणाः। नेह। सम्प्रवदन्ति खगाः। अनोरकर्म्मकात्।१।३।४९। व्यक्तवाग्विषयादनुपूर्वादकर्म्मकाद्वदेरात्मनेपदं स्यात्। अनुवदते कठः कलापस्य। अकर्म्मकात् किं। उक्तमनुवदति। व्यक्तवाचां किम्। अनुवदति वीणा। विभाषा विप्रलापे।१।३।५०। विरुद्धोक्तिरूपे व्यक्तवाचां समुच्चारणे उक्तं वा स्यात्। विप्रवदन्ते विप्रवदन्ति वा वैद्याः। अवाद्ग्रः।१।३।५१। अवगिरते। गृणातिस्तु अवपूर्वो न प्रयुज्यत एवेति भाष्यमतम्। समः प्रतिज्ञाने।१।३।५२। शब्दं नित्यं संगिरन्ते। प्रतिजानीत इत्यर्थः। प्रतिज्ञाने किम्। संगिरति

माहेति विकल्पात्। स्वकरणशब्देन भार्या स्वीकार एव गृह्यते इति हरिदत्तः। महद्भिस्तु स्वीकारमात्रेऽपि प्रायुंक्त। उपायंस्त महास्त्रा ११ ग्रासं। उदश्चरः सकर्म्मकात्॰
णीति। गन्धनो गन्ध इति। पूर्वविप्रतिषेधश्च न वेति विभाषासूत्रे भाष्ये उक्तः। निरंकित्वमिति। यमो गन्धन इति पूर्वसूत्रेणेत्यर्थः। ज्ञाश्रुस्मृं अपह्नवे ज्ञ इत्यादिना ज्ञाधा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि· कौ· टी· त· १२४

तोरतिश्रुदृशिभ्यश्चेति श्रुदृशिभ्यां चात्मनेपदे कृते तस्मिन् विषये पूर्ववत्सन इत्यनेन सिद्धेऽपि विषयान्तरे सन्नन्तादनेन विधीयत इति ज्ञेयं। निविविक्षत इति। नेर्विश इत्या

१।३।५३। धर्म्ममुच्चरते। उल्लंघ्य गच्छतीत्यर्थः। सकर्म्मकात्किम्। बाष्पमुच्चरति। उपरिष्टाद्गच्छतीत्यर्थः। समस्तृतीयायुक्तात्। १।३।५४। रथेन सञ्चरते। दाणश्च सा चेच्चतुर्थ्यर्थे। १।३।५५। सम्पूर्वाद्दाणस्तृतीयान्तेन युक्तादुक्तं स्यात्। तृतीया चेच्चतुर्थ्यर्थे। दास्या संयच्छते। पूर्वसूत्रे सम इति षष्ठी। तेन सूत्रद्वयमिदं व्यवहितेऽपि प्रवर्त्तते। रथेन समुदाचरते। दास्या सम्प्रयच्छते। उपाद्यमः स्वकरणे। १।३।५६। स्वकरणं स्वीकारः। भार्य्यामुपयच्छते। विभाषोपयमने। १।२।१६। यमः सिच् किद्वा स्याद्विवाहे। रामः सीतामुपायत। उपायंस्त वा। उदवोढेत्यर्थः। गन्धनाङ्गे उपयमे तु पूर्वविप्रतिषेधान्नित्यं सङ्कित्वम्। ज्ञाश्रुस्मृदृशां सनः। १।३।५७। सन्नन्तानामेषां प्राग्वत्। धर्म्मं जिज्ञासते। शुश्रूषते। सुस्मूर्षते। दिदृक्षते। नानोर्ज्ञः। १।३।५८। पुत्रमनुजिज्ञासति। पूर्वसूत्रस्यैवायं निषेधः अनन्तरस्येति न्यायात्। तेनेह न। सर्प्पिषोऽनुजिज्ञासते। सर्प्पिषा प्रवर्त्तितुमिच्छतीत्यर्थः। पूर्ववत्सन इति तङ्। अकर्म्मकाच्चेति केवलाद्विधानात्। प्रत्याङ्भ्यां श्रुवः। १।३।५९। आभ्यां सन्नन्ताच्छ्रुव उक्तं न स्यात्। प्रतिशुश्रूषति। आशुश्रूषति। कर्म्मप्रवचनीयात्स्यादेव। देवदत्तं प्रति शुश्रूषते। शदेः शितः म्रियतेर्लुङ्लिङोश्च। व्याख्यातम्। पूर्ववत्सनः। १।३।६२। सनः पूर्वो यो धातुस्तेन तुल्यं सन्नन्तादप्यात्मनेपदं स्यात्। एदिधिषते। शिशयिषते। निविविक्षते। पूर्ववत्किम्। बुभूषति। शदेरित्यादिसूत्रद्वये सनो नेत्यनुवर्त्य वाक्यभेदेन व्याख्येयम्। तेनेह न। शिशत्सति मुमूर्षति। आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य। एधाञ्चक्रे। प्रोपाभ्यां युजेरयज्ञपात्रेषु। १।३।६४। प्रयुङ्क्ते। उपयुङ्क्ते। स्वराद्यन्तोपसर्गादिति वक्तव्यम्। उद्युङ्क्ते। नियुङ्क्ते। अयज्ञपात्रेषु किं। द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति॥ ॥ ॥ ॥ ॥ ॥ ॥

त्मनेपदविधानात् सन्नंतादपि आत्मनेपदं। सनो नेत्यनुवर्त्येति। नानोर्ज्ञः पूर्ववत्सन इति सूत्राभ्यामिति शेषः॥ ४॥४॥४॥४॥४॥४॥४॥४॥४॥४॥४॥४

420

एम· १२४

CC-0. In Public Domain. Digitization by eGangotri



समः क्ष्णुवः। समोगमृच्छिस्णुभ्य इति पठनीये पृथगस्य पाठस्तकर्मकादपि विधानार्थ इति ध्वनयन्नुदाहरति संक्ष्णुते शस्त्रमिति। भुजोऽनवने। अवनं पालनं अ।
दन इति वक्तव्ये ऽनवन इति पर्युदासस्य प्रयोजनद्वयं। संयोगवद्विप्रयोगस्यापि विशेषावधारणहेतुत्वाद्द्रोधादिकस्यैव भुजेर्ग्रहणमित्येकं अदनादर्थान्तरेष्वुपभो
गादौ आत्मनेपदं भवति इति द्वितीयं तदाह। बुभुजे पृथिवीपाल इति। इहेति। उपभोग इत्युपलक्षणम। ———— त्मसातकरणस्यापि। पृथिवीं बुभुजे। सा
धीनां चकारेत्यर्थः। भुज पालनाभ्यवहारयोरित्यस्य रुधादेरेव ग्रहणमिति भुजो कौटिल्य इत्यस्मात्तुदादेः परस्मैपदमेव। पाणिं विभुजति। मुखानि विभुजति। णौ
रणौ यत्कर्म। आत्मनेपदमित्यधिक्रियते। इहावान्तरवाक्यानि चत्वारि प्रतीयन्ते। णेरात्मनेपदमित्येकं वाक्यं। तच्च स्यादित्यन्तेन व्याख्यातं। अणौ यत्कर्मणौ

समः क्ष्णुवः। १।३।६५। संक्ष्णुते शस्त्रं। भुजोऽनवने। १।३।६६। ओदनम्भुङ्क्ते। अभ्यवहरतीत्यर्थः। बुभुजे पृथिवीमेव केवलाम्। वृद्धो ज
नो दुःखशतानि भुङ्क्ते। इहोपभोगो भुजेरर्थः। अनवने किम्। महीम्भुनक्ति॥ णेरणौ यत्कर्म णौ चेत्स कर्त्ताऽनाध्याने। १।३।६७। ण्यन्तादा
त्मनेपदं स्यादणौ या क्रिया सैव चेण्यन्तेनोच्यते अणौ यत्कर्मकारकं स चेण्णौ कर्त्ता स्यान्न त्वाध्याने णिचश्चेति सिद्धे ऽकर्त्रभिप्रायार्थमि
दम्। कर्त्रभिप्राये तु विभाषोपपदेनेति विकल्पोऽणावकर्मकादिति परस्मैपदं च परत्वात्प्राप्ते पूर्वविप्रतिषेधेनेदमेवेष्यते॥ ॰ ॥

चेदिति द्वितीयं। कर्मशब्दः क्रियापरः कर्मव्यतिहार इतिवत्। तथा च। अणौ या क्रिया सैव ण्यन्ते चेदित्यर्थः। एवं स्थिते फलितमाह। सैव चेण्यन्तेनोच्यतेति। स
कर्मेति तृतीयं वाक्यं। अणावित्यादि चेदन्तमिहानुवर्तते। कर्मशब्दश्चात्र कारकविशेषपरः। शब्दाधिकाराश्रयणात् तदेतद्व्याचष्टे। अणौ यदित्यादिना। स्या
दित्यन्तेन। अनाध्यान इति वाक्यान्तरं व्याचष्टे न त्विति। आध्यानमुत्कण्ठापूर्वकं स्मरणं। वस्तुतस्तु पर्युदास एव लाघवादाश्रयणीयः। तथा च। अत्र वा कात्रय मे।
वेति बोध्यं विकल्प इति। परत्वात्प्राप्त इत्युत्तरेणान्वयः। पूर्वविप्रतिषेधेनेति। विभाषोपपदेनेत्यस्यावकाशः। स्वं यज्ञं यजति। स्वं यज्ञं यजते इत्यादि। णेरणा
वित्यस्य तु दर्श्यते राजेत्यादि। तथा अणावकर्मकादित्यस्यावकाशः चेतयति। गोपीं शाययती त्यवकाशः। णेरणावित्यस्य तु लावयते केदारः॥ ॰ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



स्वरूपमेवेति। तत्र हि लूयते केदार इति द्वितीयकक्षायामण्यावकर्मकत्वादिति भावः। नच पश्यति भव इतिवत् द्वितीयकक्षायां लुनाति केदार इत्यस्यैव प्रयोग इति भ्रमितव्यं लवनस्य कर्मस्थक्रियात्वेन कर्मवत् कर्मणेति नियमात्मनेपदप्रवृत्तेः। नच्चाप्तु अण्यावकर्मकादित्यस्य बाधे दर्शयते राजेति भाष्यप्रयोगो मानं। तत्र हि निवृत्तप्रेषणापक्षे दृशेरण्यावकर्मकत्वात् चित्तवत्कर्तृकत्वाच्च परस्मैपदप्राप्तेः। विभाषोपपदेनेति विकल्पबाधे तु न किंचिन्मानं। किंच अण्यावकर्मकात् इत्यस्य बाधेपि नास्यैव प्रमाणं पूर्वोक्तभाष्यस्य परगामिनि क्रियाफले चरितार्थत्वात्। तथाच कर्तृगामिनि क्रियाफले परत्वादण्यावकर्मकादित्यस्य प्रवृत्तौ न किंचिद्बाधकमस्तीति पूर्वविप्रतिषेधेनेदमेवेष्यत इत्येतत्तु चिंत्यमित्याहुः। कर्मवत्कर्मणेत्यनेन गतार्थत्वशंकां निरस्यति॥ ※ ॥कर्तृस्थभावका इति। अपरिस्पंदनसाध

कर्तृस्थभावकाः कर्तृस्थक्रियाश्चोदाहरणम्। तथाहि। पश्यन्ति भवम्भक्ताः। चाक्षुषज्ञानविषयं कुर्वन्तीत्यर्थः। प्रेरणांशस्यागे। पश्यति भवः। विषयो भवतीत्यर्थः। ततो हेतुमण्णिच्। दर्शयन्ति भवम्भक्ताः। पश्यन्तीत्यर्थः। पुनरर्थस्याविवक्षायाम्। दर्शयते भवः। इह प्रथमतृतीययोरवस्थयोर्द्वितीयचतुर्थ्योश्च तुल्योर्थः॥

९ नसाध्यो धात्वर्थो भावः ३ सपरिस्पंदनसाधनसाध्यस्तु क्रिया साधनं कारकं तत्साध्यत्वाद्धात्वर्थस्य। ननु नृत्यंतं भवं पश्यतीत्यत्र दृशेः कर्तृस्थभावकता न स्यात् किंतु कर्तृस्थक्रियाकतैव स्यात्। नच साधनशब्देन लकारवाच्यं कारकं विवक्षितमिति वाच्यं। नृत्यन् भवः पश्यतीत्यत्र न दोषस्तादवस्थ्यादिति चेत्। अत्राहुः। आरोहणादौ सपरिस्पंदत्ववदेव दर्शनादिर्येषा साधनं तथा दर्शनश्रवणादौ न भवति किंतु स्पंदनरहितोपीति नोक्तदोष इति। कर्तृस्थभावकमुदाहरति। पश्यंतीति। प्रेरणांशेति। सौकर्यं विवक्षयेति भावः। ततइति। स्वक्तप्रेरणांशकात् धातोरित्यर्थः। पुनरप्यर्थस्येत्यादि। नचैवं णिजपि गच्छतीति दर्शयते भवइति न सिद्ध्येदिति वाच्यं। उपायनिवृत्तावप्युपेयानिवर्तनादिति कैयटोक्तेः। एवं च स्वार्थ एव णिजिति पर्यवसानादाह। द्वितीयचतुर्थ्योरिति। तुल्योर्थइति। न्यूनाधिकभावरहितः॥ ९ ॥ ९ ॥

421



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नत्रतृतीयेति। प्रथमाद्वितीययोस्तु एषंतत्त्वाभावात्तङः प्रसक्तिरेवनास्तीतिभावः। क्रियासाम्येपीति। प्रथमकक्ष्यायामहेत्यर्थः। द्वितीयामादायेति। अणौयाक्रि यासैवचेत्स्यंतेइत्यस्यन्यूनाधिकभावव्यवच्छेदपरत्वमस्युपेत्येदमुक्तं। यदात्वधिकव्यवच्छेदमात्रपरत्वमभ्युपगम्यतेतदाप्रथमामप्यादायतंत्तंभवतिइ दानींकर्तृस्थक्रियाकमुदाहरति। एवमित्यादिना। आरोहतिहस्तीति। प्रेषणांशत्यागेउदाहरणमिदं। ततोणिजितिनिवृत्तप्रेषणाद्वातोःप्रेषणांशाविवक्षायां णिजित्यर्थः। पुनरर्थस्याविवक्षायामुदाहरणमाह। आरोहयतेइति। एवंनिवृत्तप्रेषणापक्षमुपपाद्येदानींमध्यारोपितप्रेषणपक्षमाह। यद्वेतिहेतुत्वारोपा दिति। प्रयोजककर्तृत्वारोपादित्यर्थः। अत्रापिसौकर्यविवक्षैव वीजंपश्यतइतिपश्यतेभक्तान्आरोहतेहस्तिपकानितिक्रमेणार्थःआधिक्यादितिअस्मिन्पक्षेणौ
तत्रतृतीयकक्ष्यायान्नतङ्क्रियासाम्येपिअणौकर्मकारकस्यणौकर्तृत्वाभावात्। चतुर्थ्यांतुतङ्द्वितीयामादायक्रियासाम्यात्। प्र थमायाङ्कर्मणोभवस्येहकर्तृत्वाच्च। एवमारोहयतेहस्तीत्युदाहरणम्। आरोहन्तिहस्तिनंहस्तिपकाः। स्पृशभावयन्तीत्यर्थः। ततआरोह न्तिहस्तीस्पृशभवतीत्यर्थः। ततोणिच्। आरोहयन्ति। आरोहन्तीत्यर्थः। ततआरोहयते। स्पृशभवतीत्यर्थः। यद्वा। पश्यन्त्यारोहन्तीतिप्रथ मकक्ष्याप्राग्वत्ततःकर्मणएवहेतुत्वारोपात्सिच्। दर्शयतिभवः। आरोहयतिहस्ती। यथापतआरोहतश्चप्रेरयतीत्यर्थः। ततोणिज ऽभ्यान्तत्प्रकृतिभ्यांश्चउपात्तयोर्द्वयोरपिप्रेषणयोस्त्यागेदर्शयतेआरोहयतेइत्युदाहरणम्। अर्थःप्राग्वत्। अस्मिन्पक्षेद्वितीयकक्ष्यायान्न तङ्समानक्रियात्वाभावान्निजर्थस्याधिक्यात्। अनाध्यानेकिम्॥ ९ वेत्याक्रियेत्यनेनआधिक्यमात्रंव्यवच्छिद्यते। ननुन्यूनत्वमपि। अन्यथात तीयकक्ष्यायामपितङ्नस्यात्। प्रकृत्युपात्तप्रेषणांशस्यत्यागेनन्यूनतायाःसत्त्वादितिभावः। णेरितिकिं। पश्यन्त्यारोहन्तीत्यादिनिवृत्तप्रेषणान्माभूत्। नचणौचदितिसुतत्वात्तत्रयताद्देवस्यादितिवाच्यं। अणाविस्यापिसुतत्वात्। अग्निमयोगार्थमवपश्यंकर्ते अस्यस्यघार्थमिहैवकर्तुमोविस्ताच अणौयाक्रियासैवचेत्स्यंतेइतिकिं। दर्शयतिभवः। आरोहयतिहस्तीत्यध्यारोपितप्रेषणापक्षेद्वितीयकक्ष्यायांमाभूत्। कथंतर्हिकरेणुरारोहयतेनि

पादिनमिति माघप्रयोगः सरं॥

CC-0. In Public Domain. Digitization by eGangotri

ति· सि·कौ· टी·नं· १२६

ततं दर्शयन्ते गतस्मयः दृत्ताधिपत्यामिव साधुवंधुताम् इति भारविप्रयोगश्च संगच्छत इति चेन्न् अत्राहुः। णिचश्चेत्यनेन क्रियाफले कर्तृगामिनि तङ् न तु प्रकृत सूत्रेणेति। अणौ यत्कर्मकारकं णौ चेत्स कर्तेति किं। दर्शयति भवमिति निवृत्तप्रेषणपक्षे तृतीयकक्ष्यायां माभूत्॥ ॥ स्मरतिवनगुल्ममिति स्मरयतिवन

स्मरति वनगुल्मं कोकिलः। स्मरयति वनगुल्मः। उत्कण्ठापूर्वकस्मृतौ विषयो भवतीत्यर्थः। भीस्म्योर्हेतुभये। व्याख्यातम्। गृधिवञ्च्योः।
प्रलम्भने। १।३।६९। प्रतारणार्थेयन्ताभ्यामाभ्यामात्मनेपदं स्यात्। माणवकं गर्धयते। वञ्चयते वा। प्रलम्भने किम्। श्वानं गर्धयति। अभिका
ङ्क्षामस्योत्पादयतीत्यर्थः। अहिं वञ्चयति। वर्जयतीत्यर्थः। लियः सम्माननशालीनीकरणयोश्च। व्याख्यातम्। मिथ्योपपदात्कृञोऽभ्यासे
१।३।७१। णिजन्तादात्मनेपदं स्यात्। पदं मिथ्या कारयते। स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थः। मिथ्योपपदात्किं। पदं सुष्ठु कारयति। अभ्यासे किं। सकृत्पदं
मिथ्या कारयति। स्वरितञितः कर्त्रभिप्राये क्रियाफले। यजते। सुनुते। कर्त्रभिप्राये किम्। ऋत्विजो यजन्ति। सुन्वन्ति। अपाद्वदः। १।३।
७३। न्यायमपवदते। कर्त्रभिप्राय इत्येव। अपवदति। णिचश्च। कारयते। समुदाङ्भ्यो यमोऽग्रन्थे। १।३।७५। अग्रन्थे इति च्छेदः। व्रीहीन्
संयच्छते। भारमुद्यच्छते। वस्त्रमायच्छते। अग्रन्थे किम्। उद्यच्छति वेदम्। अधिगन्तुमुद्यमं करोतीत्यर्थः। कर्त्रभिप्राय इत्येव। अनुपस
र्गाज्ज्ञः। १।३।७६। गां जानीते। अनुपसर्गात्किम्। स्वर्गं लोकं न प्रजानाति। कथन्न हि भट्टिः। इत्थं नृपः पूर्वमवालुलोचे ततोऽनुजज्ञे गम
नं सुतस्येति कर्म्मणि लिट्। नृपेणेति विपरिणामः। विभाषोपपदेन प्रतीयमाने। १।३।७७। स्वरितञित इत्यादिपञ्चसूत्र्या यदात्मनेपदं
विहितं तत्समीपोच्चारितेन पदेन क्रियाफलस्य कर्तृगामित्वे द्योतिते वा स्यात्। स्वं यज्ञं यजति। यजते वा। स्वं कटं करोति। कुरुते वा। स्वं पुत्र
मपवदति। अपवदते वा। स्वं यज्ञं कारयति। कारयते वा। स्वं व्रीहिं संयच्छति। संयच्छते वा। स्वां गां जानाति जानीते वा। इत्यात्मनेपदम्॥

गुल्म इति। निवृत्तप्रेषणपक्षे चतुर्थकक्ष्येयं। अध्यारोपितपक्षे तु तृतीयकक्ष्येति ज्ञेयं। केचित्तु एतत्सूत्रस्थे भाष्ये दर्शयते भृत्यान् राजेत्युदाहरणं स्मरः॥ राम: १२६

422

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्येनं वनं गुल्मं इति प्रत्युदाहरणं च दृश्यते। तत्र श्च अध्यारोपितप्रेषणपक्षे द्वितीयकस्यायामेवानेनात्मनेपदं भवति न तु तृतीयकस्यापामिति प्रतीयते। तथा च वाक
र्मपदमावर्त्तेत तस्य क्रियावाचित्वं स्वीकृत्य स अणौ या क्रिया सैव चेण्यपत्तेनोच्यते ति वा क्यान्तराभ्युपगमेप्येवकारेणाधिक्यं न व्यवच्छिद्यते किं तु न्यूनत्वमेवेत्यस्मादेव भा
ष्यादवगम्यते एवं वदर्शयते भवः आरोहयते हस्तीति कर्मप्रयोगरहितं मूलग्रंथस्योदाहरणं स्मरयति वनगुल्मं इति प्रत्युदाहरणं च भाष्यविरुद्धमेवेत्याहुः।
अन्ये त्वविवक्षितमिह कर्मेत्युक्ता ऽत्र स मूलग्रंथाविरोधेनैव भाष्यग्रंथः समर्थितः। तेषामयमाशयः। गभीरायां नद्यां घोष इत्यत्र गभीराभिन्ननद्यामिति गभीर
नदीपदार्थयोरभेदबोधानंतरं तीरलक्षणायां तीरस्य गभीरत्वाभावान्नद्यास्तु गभीरत्वेप्येकदेशान्वयासंभवाच्च अनर्थकमपि गभीरायामिति पदं प्राथमिकबो
धमादाय सार्थकं तद्वदिहापि अध्यारोपितप्रेषणपक्षे द्वितीयकस्यायां कर्मण्यन्वितेन तेनापि णिजर्थस्यैव कर्मणोपि साऽऽगेणिचः कर्मपदस्य च प्राथमिकबोध
मादाय सार्थक्यं। स्वबोध्यसंबंधो लक्षणेत्यभ्युपगमात्। विशिष्टवाक्यार्थस्य चेह बोध्यत्वेन तत्संबंधस्य बोधकता वाक्ये सत्त्वात्। एषैवार्थवादेः प्राशस्त्य
लक्षणायां गतिः। अन्यथा वायव्यं श्वेतमालभेत भूतिकाम इत्यादिविधिवाक्यस्यार्थवादः। वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स
एवैनं भूतिं गमयतीत्यादिस्तत्र वायुमेव स्वेन भागधेयेन स एवैनमित्यादिरूपस्य विभक्तिभेदेन प्रयोगस्य वैयर्थ्यं स्यादिति। नन्वेतत्सूत्रस्योदाहरणं च यथाश्रुत
भाष्यानुसारेण सकर्मकमेवास्तु किमनेन विद्यमानकर्मणोऽविवक्षितत्वोपपादनक्लेशेनेति चेन्न। मैवं। निरुक्तप्रेषणपक्षे दर्शयते भव इत्याद्युदाहरण।
स्य प्रत्युदाहरणस्य च कर्मरहितस्य स्वीकर्त्तव्यतया तदेकरूप्यापत्त्यास्मिन्नपि पक्षे अकर्मकोदाहरणप्रत्युदाहरणयोः प्रत्युदाहरणे कर्मणोऽविवक्षितत्वा
त्वापावंचितत्वात् किंच कर्मवत्कर्मणा स्तुनेनैव सिद्धे कर्त्तृस्थभावक्रियार्थं सूत्रमिति भाष्यग्रंथस्वारस्यादप्यकर्मकमेवोदाहरणं प्रत्युदाहरणं चायाति। न च
कर्मवत्कर्मणेति सूत्रे तुल्यशब्देनापि कर्मस्थाक्रियातो न्यूनत्वव्यवच्छिद्यते न त्वाधिक्यमिति स्वीकृतेनास्ति भाष्यग्रंथस्वारस्यभंग इति वाच्यं। तथा हि स।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति॰
सि॰कौ॰ ति कर्मवत्कर्मस्थक्रिय इत्युक्तेपि कर्मस्था क्रिया यस्य कर्तुः स कर्ता कर्मवदित्यर्थलाभात्तत्त्वस्याभीहितसिद्धौ कर्मणा तुल्यक्रिय इत्यस्यवैयर्थ्यापत्तेः। द्वितीयक
टी॰त॰ स्यायां भवेद्धन्तीति नि च विषयत्वापादनविषयकप्रेरणायाश्च स्वगमनविषयकप्रेरणायाश्च कर्मणा सत्वेपि विषयत्वापत्तिरूपायाः न्यग्भवनरूपायाश्च कर्म
९९७ स्थक्रियायाः सत्वात्। यदि तु कर्मणा तुल्यक्रिय इत्येतत्सार्थकाय तुल्यशब्देनात्र न्यूनाधिकव्यवच्छेदः क्रियत इत्युच्यते तदा कर्मवत्कर्मणेति सूत्रस्य द्वितीय
कक्ष्यायामप्रवृत्तेः कर्मवत्कर्मणेत्यनेनैव सिद्ध इत्यादिभाष्यग्रन्थस्वारस्यभंगो भवत्येव। ततश्च अध्यारोपितप्रेषणापक्षे तृतीयकक्ष्यायामेवोदाहरणं। न
तु द्वितीयकक्ष्यायामित्यभ्युपगन्तव्यं। एतेनाध्यारोपितप्रेषणापक्षे णौ चेत्साक्रिये सनेनाधिकमात्रंव्यवच्छिद्यते न्यूनत्वं नेत्यत्र विनिगमनाभावान्न्यूनत्व
व्यवच्छेद एव स्वीकृते द्वितीयकक्ष्यायां तु इङ् दुर्वार इति न्यूनाधिकव्यवच्छेद एव ग्राह्यस्तेन कक्ष्याचतुष्टयपक्ष एव साधीयानिति वदन्तः परास्ताः। दर्शि
यते भृत्यान्राजेति भाष्योदाहरणबलेनाध्यारोपितपक्षस्यैव प्रबलत्वादिति दिक्। गृधिवंच्योः प्रलंभने। अकर्त्रभिप्रायार्थ आरंभः। मिथ्योपपदात्
कृञोभ्यासे। स्वरकरोतीत्युच्चारणार्थत्वादकर्मकः। उच्चारणं निःसरणं णयन्तस्तूच्चारणवृत्तिः सकर्मकः। उच्चारयतीति। निःसारयतीत्यर्थः। असकृदु
च्चारणे तु धातोर्लक्षणा आत्मनेपदं तु द्योतकं तेनैव द्योतितत्वान्नित्यसवीप्सयोरिति न द्विर्वचनं। ऋत्विजो यजन्तीति। दक्षिणादिकं तु न यागफलं। स्वर्ग 423
कामो यजेतेत्यादिना स्वर्गाद्युद्देशेन यागादिविधानात्स्वर्गादिरेव फलमिति भावः। समुदाङ्भ्यो। आङो यमहन इत्येव सिद्धे आङ्पूर्वकस्य वचनं सक
र्मकार्थमिति ध्वनयन्नुदाहरति। वस्त्रमायच्छत इति। अनुपसर्गाज्ज्ञः। अकर्मकाच्चेत्येव सिद्धे सकर्मकार्थ आरंभः। विभाषोपपदेन उपपदेन फलस्य कर्तृगामित्वे राम॰
द्योतिते तङोऽप्राप्तविभाषेयं। कर्तृगामिनि क्रियाफले नित्ये प्राप्ते प्राप्तविभाषेत्यन्ये। स्वं यज्ञमिति। स्वमिति सुपलक्षणं स्वार्थं यज्ञं यजति। आत्मार्थं यज्ञं ९९७
॥ यजति। इत्याद्यपि बोध्यं ॥ इत्यात्मनेपदम् ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शेषात्कर्त्तरि।अनुदात्तङित इत्यादिष्वात्मनेपदमेवेति नियमान्नतत्र परस्मैपदस्य संभवः।तथाच।कर्त्तरि परस्मैपदमित्यनेन परस्मैपदमेवेति नियम्येततत्।
भिन्नानामेव तत्प्रभविष्यतीति शेषग्रहणं स्पष्टप्रतिपत्त्यर्थमित्याहुः।अनुदात्तङित इत्यादिष्वेवात्मनेपदमिति नियमाच्छेषात्कर्त्तरि इत्यनेन परस्मैपदमेव
तत्र भविष्यतीति परस्मैपदग्रहणं स्पष्टप्रतिपत्त्यर्थमिति केचित्।अस्य वाधा दिति।अनुपराभ्यामित्यस्येत्यर्थः।अत एव कर्मवत्कर्मणेति सूत्रे कार्यातिदे

शेषात्कर्त्तरि परस्मैपदम्।अत्ति।अनुपराभ्यां कृञः।१।३।७९ कर्त्तृगेपि फले गन्धनादौ च परस्मैपदार्थमिदम्।अनुकरोति।पराकरोति
।कर्त्तरीत्येव।भावकर्म्मणोर्मा भूत्।नचैवमपि कर्म्मकर्त्तरि प्रसङ्गः।कार्यातिदेशपक्षस्य स्पष्टयुक्ततया तत्र कर्म्मवत्कर्म्मणेत्यात्मनेपदेन परे
णास्य वाधात्।शास्त्रातिदेशपक्षेनुकर्त्तरिकर्म्मेत्यतः शेषादित्यतश्च कर्त्तृग्रहणाद्यमनुवर्त्स्यत्यैवयः कर्त्तानतुकर्म्मकर्त्तेति तत्रेति व्या
ख्येयम्।अभिप्रत्यतिभ्यः क्षिपः।१।३।८०।क्षिप प्रेरणे स्वरितेत्।अभिक्षिपति।प्राद्वहः।१।३।८१।प्रवहति।परेर्मृषः।१।३।८२।परिमृ
ष्यति।भौवादिकस्य तु।परिमर्षति।इह परेरिति योगं विभज्य वहेरपीति केचित्।व्याङ्परिभ्यो रमः।१।३।८३।विरमति।उपाच्च।१।३।८४
।यज्ञदत्तमुपरमति।उपरम     यतीत्यर्थः।अन्तर्भावितण्यर्थोयम्।विभाषाऽकर्म्मकात्।१।३।८५।उपाद्रमेरकर्म्मकात्पर   स्मैपदं वा
उपरमति उपरमते वा निवर्त्तत इत्यर्थः।बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः।१।३।८६।एभ्यो ण्यन्तेभ्यः परस्मैपदं स्यात्।णिचश्चेत्यस्यापं
वादः।बोधयति पद्मम्।योधयति काष्ठानि।नाशयति दुःखम्।अध्यापयति।प्रावयति।प्रापयतीत्यर्थः।द्रावयति।विलापयतीत्यर्थः।स्रा

षोऽयमिति वक्ष्यति।शास्त्रातिदेशपक्षे कर्मवत् कर्मणेत्यनेनात्मनेपदं न विधीयते किंतु तद्विधायकं भावकर्मणोरिति शास्त्रमति ९ वयति।स्यन्दयतीत्यर्थः।
दिश्यते तस्य च पूर्वत्वात्परेण अनुपराभ्यामित्यनेन वाधमाशंक्याह।शास्त्रातिदेश इत्यादि।स्वरितेदिति।तथाच।कर्त्तृगामिनि क्रियाफलेपि परस्मैपदार्थः
सूत्रारंभ इति भावः।परेर्मृषः।स्वरितेत्त्वात्पदद्वये प्राप्तेऽयमारंभः।परिमर्षतीति।आद्यपाठेति वैकल्पिकत्वान्नणिज भावः।उपाच्च व्याङ्परिभ्य इति नोक्तं।उ

॥मू॰।जनयति सुखम॰।४।नु॰॥

CC-0. In Public Domain. Digitization by eGangotri



निगरणाचलनार्थेभ्यश्च। निगरणं भक्षणं। धुद्रु स्रुणाचलनार्थानामनेनात्मनेपदे सिद्धेऽप्पचलनार्थानां तत्सिद्धये पूर्वसूत्रे ग्रहणं अत एव तत्र विवृतं प्रापयती सर्थो इत्यादिना। कथं तर्हि इमां किमाचामयसेनचक्षुषीतिश्रीहर्षः। आङ्पूर्वाच्चमेरनेन परस्मैपदे चिस्यादिति चेदत्राहुः। आचामयेतिपृथक्पदं ईर्लक्ष्मीस्तया। सहितासेलस्याः संबोधने हे से इति। केचित्तु सात्वं इने चक्षुषी अक्ष्व चक्षुषी आचामय किमिति व्याचक्षते अणावकर्मकात् क्रियाफलस्य कर्तृगामित्वविव।

निगरणाचलनार्थेभ्यश्च। १।३।८७। निगारयति। आशयति। भोजयति। चलयति। कम्पयति। अदेः प्रतिषेधः। आदयते देवदत्तेन। गतिबुद्धीति कर्मत्वमादिखाद्योर्नेतिप्रतिषिद्धं निगरणचलनेतिसूत्रेण प्राप्तस्यैवायन्निषेधः। शेषादिसकर्त्रभिप्राये परस्मैपदे स्यादेव। आदयत्यन्नं वटुना। अणावकर्मकाच्चित्तवत्कर्तृकात्। १।३।८८। ण्यन्तात्परस्मैपदं स्यात्। शेतेकृष्णस्तज्ज्ञो पोशाययति। नपादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः। १।३।८९। एभ्यो ण्यन्तेभ्यः परस्मैपदन्न। पिबतिर्निगरणार्थः। इतरे चित्तवत्कर्तृकाकर्म्मकाः। नृतिश्चलनार्थो पितेन सूत्रद्वयेन प्राप्तिः। पाययते। दमयते। आयामयते। आयासयते। परिमोहयते। रोचयते। नर्त्तयते। वादयते। वासयते। धेट उपसंख्यानम्। धापयेते शिशुमेकं समीची। अकर्त्रभिप्राये शेषादिति परस्मैपदं स्यादेव। वत्सान्पाययति पयः। दमयन्तीकमनीयतामदम्। भिक्षा वासयति। वा क्यषः। लोहितायति। लोहितायते। द्युद्भ्यो लुङि। अद्युतत्। अद्योतिष्ट। वृद्भ्यः स्यसनोः। वर्त्स्यति। वर्त्तिष्यते। विवृत्सति॥ विवर्त्तिषते। लुटि च क्लृपः। कल्प्ता। कल्प्तासि। कल्पितासे। कल्प्स्यति। कल्पिष्यते। कल्प्स्यते। चिक्लृप्सति। चिकल्पिषते। चिक्लृप्सते॥ समाप्ता पदव्यवस्था। अथ भावकर्म्मणोर्लडादयः। भावकर्मणोरिति तङ्॥ ९ सायां आत्मनेपदे प्राप्ते परस्मैपदार्थमिदं। अणाविति किं। हेतुमण्यन्तादकर्मकात्परस्मैपदनियमो मा भूत् आरोहमाणं प्रयुंक्ते आरोहयते। स्वयमेव तं प्रेरयती सर्थः। णेरणाविति सूत्रे उदाहरणत्वेन यत् आरोहयत्तिरकर्मको निर्णीतस्तस्मात् द्वितीये णिचि प्रत्युदाहरणमिदं। केचित्तु अणाविति किं। चुरादिण्यन्तात्परस्मैपदनियमो मा भूत्। तद्यथा पुट्चुट् अल्पीभावे पुटयति। चुटयति। अल्पी भवती सर्थः। अकर्मकाविमौ नतो हेतुमण्णिचि पुटयते चुटयते इति प्रत्युदाहरंति॥ ॥ ॥

424



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्भाष्यादिविरुद्धं। तथाहि। बुधादिसूत्रादिह णेरिति वर्त्तते तेन बुधादिभ्यश्च हेतुमति णिच्येव संभवतीति तिन्नदन्तादेवायं विधिः। अणावित्प्रतिषेधोपि प्रत्यासत्तेस्त
स्यैव न्याय्यः। तेन चुरादिणिजन्ताद्धेतुमण्णौ परस्मैपदं भवत्येवेति भाष्यादौ स्थितं। तथा च हेतुमण्णेः प्राक् यो ऽकर्मको हेतुमण्ण्यन्त भिन्नस्तस्माद्धेतुमत्यात्म
नेपदं नेति फलितोर्थः। अकर्मकात् किं। कटं यः करोति तं प्रयुंक्ते कटं कारयते। चित्तवत्कर्तृकादिति किं। शुष्यन्ति व्रीहयस्तान् शोषयते। न पादम्। चित्तवत्कर्त्तृ
का ऽकर्मकाइति। दिवादौ दमिरकर्मकइत्युक्तं इह त्वकर्मकइति पूर्वोत्तरविरोधोयद्यप्यस्ति तथापि कर्मणः कर्तृत्वविवक्षायां दमिरत्राकर्मकइत्याहुः पाय
यतइति। शाच्छासेति पुक्। आयामयतेइति। यमोपरिवेषणेइति मित्त्वनिषेधः। वासयतेइति। वसनिवासइत्यस्य ग्रहणं वस आच्छादने इत्यस्य तु नास्ति निषेधः। स
कर्मकत्वेन तत्र प्रसक्त्यभावात्। कर्मकर्तृत्वविवक्षायामकर्मकत्वेपि लुग्विकरणपरिभाषया नात्र ग्रहणमित्याहुः। समीचीइति। प्रथमाद्विवचनं। वा ऽऽद्धं।

सार्वधातुकेयक्॥३।१।६७॥ धातोर्यक्प्रत्ययः स्याद्भावकर्मवाचिसार्वधातुके परे। भावो भावना उत्पादना क्रिया सा च धातुत्वेन सकल धा
तुवाच्या। भावार्थकलकारेणानूद्यते। युष्मदस्मद्भ्यां सामानाधिकरण्याभावात् प्रथमः पुरुषः। तिङ्वाच्य भावनाया असत्वरूपत्वेन द्वित्वाद्यप्र
तीतेर्न द्विवचनादि किं त्वेकवचनमेव। तस्यौत्सर्गिकत्वेन संख्यानपेक्षत्वात् दनभिहिते कर्त्तरि तृतीया। त्वया मया ऽन्यैश्च भूयते। बभूवे ६॥

दसीति पूर्वसवर्णो दीर्घः। परस्मैपदं स्यादेवेति। अनन्तरस्येति न्यायेन योगद्वयेन प्राप्तस्यैव परस्मैपदस्य प्रतिषेधइति भावः। इति पदव्यवस्था॥ सार्वधातुकेय
क्। धातोरेकाच इत्यतो धातोरिति चिण्भावकर्मणोरित्यतो भावकर्मणोरिति चानुवर्तते। भावो भावनेति। उत्पत्त्यर्थात् भवतेर्णिजन्तादेरजिति भावः। एरज्।
एयन्तानामितित्वनार्षमिति तस्मिन्नेव सूत्रे कैयटः। भवतेरुत्पत्त्यर्थत्वं ण्यन्तस्य भवतेः शुद्धेन करोतिना तुल्यार्थत्वं च दर्शयति। उत्पादना क्रियेति। यथा करोति
घटमित्यादावुत्पत्त्यनुकूलो व्यापारः कुलालनिष्ठः तथा भावयति घटमित्यादावपि। भवति घट इत्यत्रापि घटनिष्ठउत्पत्त्यनुकूलो व्यापारो ऽस्त्येव परं तु फलसमा
नाधिकरणः सः। कुलालनिष्ठस्तु फलव्यधिकरण इतीयान्भेदः। अत एव फल॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



व्यापारयोः सामानाधिकरण्यपाकं वत्यादिरकर्मकत्वयोस्तुवैयधिकरण्यात् करोत्यादिस्सकर्मकस्त्वाहुः। एतेनभावोभावनेत्यादिग्रंथेन भूवादयोधातव इत्यत्रक्रियावाचिनः किं। विकल्पार्थकवाशब्दादङ्गा वेलिणमाभूत्। अन्यथा भ्वादिगणेवाशब्दमात्रपठनादक्रियावाचिनोपिवाशब्दस्यधातुत्वेधात्वर्थः केवलशुद्धोभावइत्यभिधीयत इतिविकल्पस्यापिभावत्वापत्तौतद्वाचकवाशब्दात्तिङ् स्यादेवेतिकेषांचिद्व्याख्यानं परास्तं। भावनवाचकादेवभावे लिटः स्वीकारात्। विकल्पस्यतुभावनाभिन्नत्वात्। अन्यथाक्रियावाचिन इतिविशेषणोक्तेपितद्दोषतादवस्थ्यात्। विकल्पवाचकात्लिडभावेपिलडादयः स्युरितितुनशंकनीयमेव वर्त्तमानक्रियादिद्योतनेलडादीनांविधानात्। किमर्थंतर्हिक्रियावाचिनोभ्वादय इतिसविस्तरंव्याख्यातं। यास्तुपश्यसीत्यत्रापिलक्षणप्रतिपदोक्तपरिभाषयायाशब्दस्यधातुत्वासंभवादातोधाभ्नोरितितत्राल्लोपाप्रसक्तेरितिचेत् अत्राहुः। कार्यकालंसंज्ञापरिभाषमितिपक्षेत्रातोधातोरितिकार्यप्रदेशेभ्वादयोधातव इत्युपतिष्ठते भ्वादिषुयाशब्दमात्रपठनाद्द्रव्यवाचकोपियाशब्दस्तत्रोपतिष्ठते। वर्णग्रहणेलक्षणाप्रतिपदोक्तपरिभाषाया अप्रवृत्तेः। आतोधातोरित्यत्रत्वातइतिवर्णग्रहणात्तस्माद्द्रव्यवाचकस्ययाशब्दस्यधातुसंज्ञामाभूदितिक्रियावाचिन इति। विशेषणमवश्यंवक्तव्यमेवेति। उत्पादनाक्रियेत्यनेनतुक्रियावाचीधातुर्धात्वर्थः। क्रियेत्यन्योन्याश्रयोऽत्रदुःपरिहर इतिकेषांचिदाक्षेपोनिरस्तः। उत्पत्त्यनुकूलव्यापारस्यक्रियात्वात्। तदुक्तं। व्यापारोभावनासैवोत्पादनासैवचक्रियेतिधातुत्वेनेति। सकलधातुषुधातुत्वंजातिरखंडोपाधिर्वेत्यन्यदेतत्तानचवाचकतावच्छेदकं। क्रियात्वंतुवाच्यतावच्छेदकमितिभावः। धातुवाच्येति। नन्वेवंपचतीत्यादावेककर्तृकावर्त्तमानापचिक्रियेतिक्रियाविशेष्यकोबोधोनस्यात्। प्रत्ययार्थंप्रतिप्रकृत्यर्थस्यविशेषणतायाश्रौपगवादौक्लृप्तत्वात्। तथाचभावनातिङ्प्रत्ययवाच्येतिमीमांसकमतमेवरमणीयंमितिचेत्। अत्राहुः। प्रत्ययार्थप्रधानमितित्वुत्सर्गोऽस्यचेहत्यज्यते क्रियाप्रधानमाख्यातमितिस्मरणात्। टाबाद्यर्थैस्तेनमीमांसकैरप्युपगतस्यस्त्रीत्वस्य पाचिकादौविशेषणत्वाभ्युपगमात्प्रत्ययार्थः प्रधानमितिनियमस्यत्यक्तत्वाच्च। किंचभोक्तव्यमित्यादौतिङंविनापिभावनाप्रतीयतेकारकापेक्षाचदृश्यते



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अस्तिचकरोतिसामानाधिकरण्यं। किंकर्त्तव्यंभोक्तव्यं किंकृतवान्भुक्तवानिति। नचकृत्तामपितव्यदादीनांभावनावाचकत्व मस्त्विति शंक्यं। नामार्थयोरभेदान्वयाऽनुरोधे
नकर्त्तरिकृदितितव्यदादयः कर्मादावितिपरैरप्यभ्युपगमात्। अन्यथापाचकोदेवदत्तः पक्तव्यओदनः इत्यत्राभेदबोधोनस्यात्। तथाचधातुवाच्यत्वंभावनाया
इत्येवमतंरमणीयतरमिति। लकारस्यसामानाधिकरण्यंकर्तृकर्माऽभिधायिनएवसंभवतिनभावाभिधायिनइत्याशयेनव्याचष्टे। सामानाधिकरण्या
भावादिति। नचैवंयुष्मदस्मद्भ्यांउपपदेसमानाधिकरणेदेवदत्तः पचतीत्यादावेवप्रथमपुरुषेणाभाव्यमितिप्रथमपुरुषोऽप्यत्रनस्यादितिवाच्यं। शेषेप्र
थमइत्यत्रमध्यमोत्तमयोरविषयेप्रथमः स्यादितिव्याख्यानात्। तिङ्वाच्येति। यज्ञादिवाच्यायास्तुसत्त्वरूपत्वमिष्टमेवेति पाकः पाकेनेत्यादौयथायथं।
द्वितीयादयः प्रवर्त्तन्ते। अतएवभाष्येकृत्तोक्तंकृदभिहितोभावोद्रव्यवत्प्रकाशतइति। द्रव्यधर्मान्लिंगसंख्याकारकादीन्गृह्णातीत्यर्थः। एकवचन
मेवेति। प्रायोवादोऽयं। अन्यथा। उष्ट्रासिकाआस्यंतेहतशायिकाः शय्यंतेइतिभाष्येधात्वर्थनिर्देशेण्वुलिकृदभिहितोभावोद्रव्यवत्प्रकाशतइत्यासि
काधुशायिकाइत्यत्रबहुवचनसिद्धावपिआस्यंतेशय्यंतेइत्यत्रतन्नसिध्येत्नचकर्मण्येवात्रलकारोऽस्त्विति शंक्यं धातुद्वयस्याप्यकर्मकत्वेनतदसं
भवात्तअर्थोसंगतेश्च। अत्रहुष्ट्राणांयादृशान्यासनानिहतानांयादृशानिशयनानितादृशानिदेवदत्तादिकर्तृकान्यासनादीनीत्यर्थः। सादृश्यावगमा
दिहआख्यातवाच्यस्यापिभावस्याभेदावभासात्बहुवचनंनचैवंसंख्यान्वयित्वेअसत्त्वरूपतानस्यादितिवाच्यं। लिंगक्रियानाधारकारकयोगाभावमा
त्रेणासत्त्वरूपत्वमुपपद्यतेइतिकारकेषूक्तत्वात्। केचित्तु इहउष्ट्रासिकाहतशायिकाशब्दयोस्तत्सदृशेलक्षणांस्वीकृत्यआस्यंतइत्यादिनाअभेदान्वयमाहुः
मनोरमायांतुआसिकाशायिकाइतिचद्वितीयाबहुवचनंक्रियाविशेषणत्वेनाकर्मकत्वात्। नचैवंक्लीवत्वमेकवचनांतत्वंचस्यादितिवाच्यं। स्त्रियांक्तिन्नि।
त्यधिकारात्स्त्रीत्वावधारणेनसामान्येनपुंसकमित्यस्याऽप्रवृत्तेः। बहुत्वावधारणेनैकवचनाप्रवृत्तेश्चेत्युक्तं॥ १ ॥ १ ॥ १ ॥

ति·
सि·कौ·
टी·न·
१३०

स्यसिचृसीयुट्तासिषु।यद्यप्यजादयो द्वंद्वेन निर्दिष्टास्तथाप्युपदेशइत्यत्रएवविशेषणंनहनादीनां।अव्यभिचारात्तदाह।उपदेशेयोः।जिति।उपदेशेअजंतानामि
ति।नव्याख्यातं।तथाहि सनि णिजंतस्य न स्यात्तस्योपदेशाभावात्।उपदेशोहि साक्षादुच्चारणं नच णर्यंतस्य तदस्ति।चिण्वदिति सप्तम्यंताद्वतिः।स्यसिचृसीयुट्ता
सिष्विति प्रतियोगिनि सप्तमीनिर्देशादतो व्याचष्टे चिणीवेति।ननु चिणि दृष्टमात्रस्य वृद्ध्यादिकार्यस्यातिदेशाद्घानिष्यते आयिष्यते अध्यापिष्यते इत्यत्र हनो व
धादेशः इणो गादेशः इङो गाङादेशोऽपि स्यादिति चेत्।मैवं।अंगाधिकारबलेनांगस्यैव कार्यस्यातिदेशान्न चैते हनिणिङादेशा अंगात्तदेतदाह।अंगका
र्येवा स्यादिति।सीयुट् इति।तथाच सीयुट्शब्देन तद्विशिष्टं लक्ष्यत इति भावः।आर्द्धधातुकइत्यनेन व्यावर्त्यं तु विधिलिङ् तेन भूयेतेत्यत्र न भवति।नचा

स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च।६।४।६२। उपदेशे योऽच् तदन्तानां हनादीनां च चिणि वा
ङ्कार्यं स्यात् स्यादिषु परेषु भावकर्मणोर्गम्यमानयोः स्यादीनामिडागमश्च।अयमिट् चिण्वद्भावसन्नियोगशिष्टत्वात्तदभावे
न।इहार्द्धधातुक इत्यधिकृतं सीयुटो विशेषणं नेतरेषामव्यभिचारात्।चिण्वद्भावाद्वृद्धिः।भाविता।भविता।भाविष्यते।भविष्यते।भू
यताम्।अभूयत।भूयेत।भाविषीष्ट।भविषीष्ट॥ अत्र लिङः सलोप इति सलोपाद्वलादित्वं नास्तीति वाच्यं।तस्येहानपेक्षणात्।यत्त्वाहुः चिण्वद्वृद्धि
युक्हंतेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति।इट् चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वलनिमित्तो विघातीति।अस्यार्थः चिण्वत् इत्यतिदेशस्य वृ
द्ध्यादिकं प्रयोजनं।तथाहि।भाविता भाविष्यते इत्यादौ वृद्धिः।दायिता दायिषीष्टेत्यादौ युक्।घानिता घानिष्यत इत्यादौ घत्वं।हेतुमण्ण्यंतात्कर्मणि लकारे
शमिता शामिता शमिष्यते शामिष्यते इत्यादौ चिण्णमुलोरिति मितामुपधाया वा दीर्घः।अत्रैव शामितेत्यादौ स्यसिच्सीयुट् इत्यनेन कृत इट् आभीयत्वेना
सिद्धत्वेनानिटीति निषेधो न प्रवर्तते इति णेर्लोपो भवति।भाविष्यते इत्यादौ भूष्य इति स्थिते परमपि वलादिलक्षणमिटं बाधित्वा चिण्वदिडेव भवति।यतो
यं नित्यः वलनिमित्तो विघाती त्वनित्यः।साप्तमिके तस्मिन्कृतेऽयं चिण्वदिट् भवति।अस्मिन्कृते तु स न भवति वलादिनिमित्तः॥

426

राम·
१३०

त्वविहितत्वादेवं च निसत्वात्सेड्भ्योप्ययमेव भवति। एतदभावपक्षे तु सेड्भ्यो वलादिलक्षण इड् भवतीति बोध्यं॥ ॐ ॥ चिण्भावकर्मणोः। च्लेः सिजित्यतः।
च्लेरिति चिण्ते पदः इत्यतस्तङिति चानुवर्तते। तत्र संस्तु चिण्ग्रहणानुरुध इति निषेधेन तिरोहितमिति पुनस्तत्र चिण्ग्रहणं कृतं। तशब्दे किं। अभाविषातां। चिण्व

चिण्भावकर्मणोः। ३।१।६६। च्लेश्चिण् स्याद्भावकर्मवाचिनि तशब्दे परे। अभावि। अभाविष्यत। अभविष्यत। तिङ्कृत्त्वात्कर्मणि न द्वितीया। अनुभूयते आनन्दश्चैत्रेण त्वया मया च। अनुभूयेते। अनुभूयन्ते। त्वमनुभूयसे। अहमनुभूये। अन्वभावि। अन्वभाविषाताम्। अन्वभविषाताम्। णिलोपः। भाव्यते। भावयाञ्चक्रे। भावयाम्बभूवे। भावयामासे। इह तशब्दस्य एशित्वे एत्वे च कृते हणतीति हत्वलन्त्वा। तासिसादि चर्ष्मादस्तेरपि स्य तिहेस्यादेः सार्वधातुके एव एति· हत्वप्रवृत्तेरित्याहुः। भाविता। चिण्वदिट् आभीयत्वेनासिद्धत्वाण्णिलोपः। पक्षे। भावयिता। भाविष्यते। भावयिष्यते। भाव्यताम्। अभाव्यत। भाव्येत। भाविषीष्ट। भावयिषीष्ट। अभावि। अभाविषाताम्। अभावयिषाताम्। बुभूष्यते। बुभूषाञ्चक्रे। बुभूषिता। बुभूषिष्यते। बोभूय्यते। यङ्लुगन्तात्तु। बोभूयते। बोभवाञ्चक्रे। बोभाविता। बोभविता। अकृत्सार्वधातुकयोर्दीर्घः। स्तूयते विष्णुः। तुष्टुवे। स्ताविता। स्तोता। स्ताविष्यते। स्तोष्यते। अस्तावि। अस्ताविषाताम्। अस्तोषाताम्। गुणोऽर्तीति गुणः। अर्यते। स्मर्यते॥ सस्मरे। परत्वान्नित्यत्वाच्च गुणे रपरे कृतेऽजन्तत्वाभावेऽप्युपदेशग्रहणाच्चिण्वदिट्। आरिता। अर्ता। स्मारिता। स्मर्ता। गुणोऽर्तीत्यत्र नित्यग्रहणानुवृत्तेः कृत्त्वान्नेह गुणः। संस्क्रियते। अनिदितामिति नलोपः। स्रस्यते। इदितस्तु नन्द्यते। सम्प्रसारणम्। इज्यते। अयङ् यि क्ङिति॥ शय्यते। तनोतेर्यकि। ६।४।४४॥ आकारोऽन्तादेशो वा स्यात्। तायते। तन्यते। ये विभाषा। जायते। जन्यते॥ ॐ ॥ ॐ ॥

दिट् इति। एवं च तस्य धातोरुपदेशाभावेऽप्युपदेशेऽयोऽजन्तत्वव्याख्यानाच्चिण्वदिड् इह प्रवर्तत एवेति भावः। परत्वादिति। चिण्वदिड् येऽसया नित्यत्वादिति। नन्वकृ-
ते चिण्वदिटि वृद्धिप्रसक्त्या गुणस्य नित्यत्वं नेति शंक्यं। अर्चोत्र णितो नित्य टङ्किवाधित्वात् परत्वात् गुणे रपरत्वे च पश्चादत उपधाया इति वृद्धिप्रसक्त्या गुणस्य नि

CC-0. In Public Domain. Digitization by eGangotri



सत्वाऽनपायात्। उपदेशग्रहणादिति। तत्सामर्थ्यादुपदेशेयोऽचूतदंतत्वंऋधातोर्व्यपदेशिवत्भावेनयत्तस्थितंतदादायएयंतादप्यारितेत्यादौचिएवदिट्प्र
वर्ततेइतिभावः। नन्वेवंस्मारितेत्यादिनसिध्येत्स्मृइत्यस्यउपदेशेयोअचूतदंतत्वाभावात्। उपदेशेऽजंतानामितिव्याख्यानेतुएयंतस्यनस्यादितिजात्वा
दितिचेत्। सत्यं। अतएवापरितोषान्मनोरमायामुक्तमस्तुवाउपदेशेयदजंतंतस्येतिव्याख्यानमंगस्येतिव्यधिकरणषष्ठी। अंगावयवस्याजंतस्येत्यर्थइ
ति। एवंचणिजंतेपिशामितेत्यादौचिएवदिट्सिध्यतिव्यपदेशिवत्भावेनणिजेवणिजंतस्तदवयवकंशामीत्यंगमित्याश्रयणात्। आरितास्मारितेत्या
द्यपिसिध्यति। ऋधातुःस्मृधातुश्चोपदेशेऽजंतस्तदवयवकंभवत्यारूस्मारित्यंगमितिदिक्। नित्यग्रहणानुवृत्तेरिति। नित्यंकृदसीतिसूत्रात्। काशिका

नपोनुतापेच। ३।१।६५। तपत्कर्मकस्यानस्यात्कर्मकर्त्तर्य्यनुतापेच। अन्वतप्त पापेन। पापकृत्तेनाभ्याहतइत्यर्थः। कर्मणिलुङ्। यद्वाप्या।
येनपुंसाकर्त्राऽश्णीचीत्यर्थः। घुमास्थेतीत्वम्। दीयते। धीयते। आदेचइत्यत्राशितीतिकर्मधात्वादिसंज्ञकशाकारादौनिषेधः। एषाआ
दिष्टित्वाभावात्तस्मिन्नात्वम्। जग्ले। आतोयुक्चिण्कृतोः। ७।३।३३। आदन्तानांयुगागमःस्याच्चिणिञ्णितिणितिकृतिच। दायिता। दाता।

यांतुसुटोवहिरंगलक्षणस्यासिद्धत्वादभक्तत्वाद्वासंयोगादित्वमंगस्यनास्तीतियुणोत्रनप्रवर्त्तते इत्युक्तंसुट्कात्पू ॥ दायिषीष्ट। दासीष्ट। अदायि।
वेइतिविधीयमानःकभक्तोनत्वंगभक्तस्तेनासंयोगाद्येवअंगमित्यभक्तत्वादित्यस्याशयः तनोतेर्यकिविङ्नारितिसूत्रादादितियेविभाषेत्यतोविभाषे
तिचानुवर्त्तते। यकिकिं। तंतन्यते॥ ॥ नपोनु। चकारेणाऽन्वचःकर्मकर्त्तरीत्यतःकर्मकर्त्तरीत्येतदनुकृष्यतेकर्मण्युदाहरणमितिध्वनयतिअभ्याहत
इत्यर्थइति। भावेप्येतदुदाहरणमित्याह। पापेनपुंसेति। अविचार्यकर्मकृत्वापश्चादशोचीत्यर्थः। कर्मकर्त्तरित्वनंतरप्रक्रियायामुदाहरिष्यति। आतोयुक्।
अचोञ्णितीत्यतोञ्णितीत्यनुवर्त्ततेतिचकृतोविशेषणंनतुचिणः तस्यणित्वेनाव्यभिचारात्। चिण्कृतोःकिं। औडिः वलाकिः वक्षादिला दित्राददौ। णि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अदायिषातामिति। स्थाघ्वोरिच्चेत्येतन्नबाधित्वा चिण्वदिट्। क्ङितेघुमास्थेतीत्वंनभवतिअजादित्वात्। स्थाघ्वोरिच्चेत्यपिपुनर्नभवतिअझलादित्वादित्याहुः॥
नेषामप्यलाशयः। इकोझलितिसूत्रात्झलनुवर्त्तते। तथाचझलादिरेवसिच्किन्नत्वयमिडादिःसिच्। एवंचतत्संनियोगशिष्टत्वादित्वमप्यत्रनभवतीति

अदायिषाताम्। अदिषाताम्। अधायिषाताम्। अधिषाताम्। अग्लायिषाताम्। अग्लासाताम्। हन्यते। अविसमलोरियुक्तेर्हन्तेर्न
होहन्तेरितिकुत्वं। घानिता। हन्ता। घानिष्यते। हनिष्यते। आशीर्लिङि। वधादेशस्यापवादश्चिण्वद्भावः। आर्द्धधातुकेसीयुटीतिविशे
षविहितत्वात्। घानिषीष्ट। पक्षे। वधिषीष्ट। अघानि। अघानिषाताम्। अहसाताम्। पक्षेवधादेशः। अवधि। अवधिषाताम्। अघानिष्य
त। अहनिष्यत। नचस्यादिषुचिण्वदित्यतिदेशाद्वधादेशःस्यादितिवाच्यम्। अङ्गस्येत्यधिकारादाङ्गस्यैवातिदेशात्। गृह्यते। चिण्वदिटान
दीर्घत्वं। प्रकृतस्यवलादिलक्षणस्यैवेटोग्रहोलिटीत्यनेनदीर्घविधानात्। ग्राहिता। ग्रहीता। ग्राहिष्यते। ग्रहीष्यते। ग्राहिषीष्ट। ग्रहीषीष्ट
अग्राहि। अग्राहिषाताम्। अग्रहीषाताम्। दृश्यते। अदर्शि। अदर्शिषाताम्। सिचःकित्त्वात्। अदृक्षाताम्। गिरतेर्लुङिध्वमिचतुरधि
कंशतम्। तथाहि। चिण्वदिटो दीर्घोनेत्युक्तम्। अगारिध्वं। द्वितीयेत्विटिवृतोवेतिवादीर्घः। अगरीध्वम्। अगरिध्वम्। एषांत्रया।
णांलत्वेढत्वंद्वित्वत्रयंत्वेतिपञ्चवैकल्पिकानिइत्यंयषसंवृत्तिः। लिङ्सिचोरितिविकल्पादिडभावेउश्चेतिकित्त्वम्। रपरत्वंहलिचेति
दीर्घः। इणःषीध्वमितिनित्यंढत्वं। अगीर्ढ्वम्। ढवमानान्द्वित्वविकल्पेअष्टौउक्तषसावस्ससहसङ्कलनेउक्तसंख्येति। इड्दीर्घश्च।
एवंदिङ्लत्वढत्वेद्वित्वत्रिकतथा। इत्यष्टानांविकल्पेनचतुर्भिरधिकंशतम्। हेतुमत्यप्यनात्मनेपदेपरत्वात्णिलोपः। शाम्यन्तेमोहामुकुन्देन॥

वक्तुनभुक्तस्यपित्तस्मिन्नेहकाचिन्नक्षतिः। सिचःकित्त्वेप्यनिग्लक्षणायाञ्चनिषेधादयोगुणोनोतिवृद्ध्यारूपनिष्पत्तेः। आशीर्लिङीति। ननुलुङितत्रचिण्व
द्भाववदात्मनेपदेष्वन्यतरस्यामितिवधादेशस्यापिवैकल्पिकतयायेननाप्राप्तिन्यायाभावादितिभावः। आर्द्धधातुकेसीयुटीत्यादियद्यपिहनोवधलि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति·
सि·कौ·
टी·त·
१३२

ङि इत्यत्रापि आर्द्धधातुकापिकारादार्धधातुके लिङि इत्यपि समानं तथापि लिङीति पदद्वयसाधारणं सीयुट् तु आत्मनेपद एवेति विशेषविहितत्वमस्तीति भावः
अहसातामिति। चिण्वदिटोऽभावे हनः सिजिति कित्वादनुदात्तोपदेशेत्यनुनासिकलोपः। चिण्वद्धादेशस्य दृष्टत्वाच्चिण्वत्त्वभावेन स्यादिषु मा त्विमाशंक्य
परिहरति न चेत्यादिना। अदर्शिषातामिति। न दृश इति क्सस्य निषेधादिह सिचि चिण्वदिट्। सिचः कित्वादिति। लिङ्सिचावात्मनेपदेष्वित्यनेन। लत्व।
मिति। अचि विभाषेति गिरतेरेफस्य लत्वं षट्। ढत्वमिति। विभाषेट इत्यनेन षण्णां ढत्वे द्वादश। द्वित्वात्र पंचेति। अनचि चेति द्वादशानामप्येषणां ढस्य
णांधस्य च द्वित्वे चतुर्विंशतिः। मय इति पंचमी पराणामिति षष्ठीति पक्षे वकारस्य द्वित्वे त्वष्टचत्वारिंशत्। अनचि चेति मकारस्य द्वित्वे षण्णवतिः ढवमाना।

चिण्णमुलोर्दीर्घोऽन्यतरस्याम्।६।४।९३। चिण्परे णमुल्परे च णौ मितामुपधाया दीर्घो वा स्यात्। भक्तो मितां ह्रस्व एव तु न विकल्पितः।
एयन्तात् णोऽह्रस्वविकल्पासिद्धेः। दीर्घविधौ हि णिचो लोपो न स्थानिवदिति दीर्घः सिध्यति। ह्रस्वविधौ तु स्थानिवत्त्वं दुर्वारम्। भाष्ये तु पूर्वत्रा
सिद्धेन स्थानिवदित्यवष्टभ्य द्विर्वचनसवर्णानुस्वारदीर्घजश्चरः प्रत्याख्याताः। णाविति जातिपरो निर्देशः। दीर्घग्रहणं च इह मास्त्विति त
दाशयः। शामिता। शमिता। शमयिता। शामिष्यते। शमिष्यते। शमयिष्यते। यङन्तात् सिच्यांशंशम्यते। शंशामिता। शंशमिता। शंशमयिता
। यङ्लुगन्तात् सिच्यप्येवम्। भाष्यमते तु यङन्तात् चिण्वदिटि दीर्घो नास्तीति विशेषः। एयन्तत्वाभावे। शाम्यते मुनिना॥ ६॥ ६॥

मिति। अचो रहाभ्यामिति ढस्य द्वित्वे द्वयं। द्वयोरपि वस्य यणो मय इति द्वित्वे चत्वारि। चतुर्णामपि मस्य अनचि चेति द्वित्वे त्वष्टौ॥ ❀॥ चिण्णमुलोः।
ण्यामिति स्यादो जनी जृष् इत्यादिना मित्त्वेन मितामुपधाया इति संह्रस्वे प्राप्ते दीर्घोऽनेन विकल्प्यते। एयन्तासाविति णिलोपस्य स्थानिवत्त्वेन व्यवधानादिति
भावः। दीर्घः सिध्यतीति। न पदान्तेति निषेधादित्यर्थः। ननु त्रिपादीस्थे दीर्घकर्तव्ये स्थानिवत्त्वाभावः पूर्वत्रासिद्धमित्यनेनैव सिद्ध इति दीर्घग्रहणसोम राम·
योगाभावेऽपि एयन्तात् णेश्चिण्णमुलोरिति दीर्घकर्तव्ये स्थानिवत्त्वाभावनिवारणाय दीर्घग्रहणमावश्यकमित्यत आह॥ ६॥ ६॥ १३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जातिपरो निर्देश इति। इदं माह्स्विति। ह्रस्वविकल्पे णमीथं सिध्यतीति भावः। वस्तुतस्तु चिण्णमुलोरिति सूत्रे दीर्घग्रहणं कर्त्तव्यमेव। तथा हि हेडृ अनादरे घटादिः।
मितां ह्रस्वे कृते ण्यन्ते चङ्क्रू हिडयति। अत्र चिण्णमुलोः अन्यतरस्यां ह्रस्वे विकल्प्यमाने अहिडि अहेडि इति स्यात्। दीर्घे तु अहिडि अहीडीति भवति। एतच्चात्रैव।
सूत्रे कैयटे स्पष्टं। शंशामितेत्यादि। चिणि। अशंशमि। अशंशामि। णमुलि शंशमं शंशामं शंशमं शंशामं शंशामसमित्यादि द्रष्टव्यं। दीर्घो नास्तीति यङ्लोपस्य स्थानिवत्त्वेन

नोदात्तोपदेशस्य मान्तस्यानाचमेः।७।३।३४। उपधाया वृद्धिर्न स्याच्चिणि ञ्णिति णिति कृति च। अशमि। अदमि। उदात्तोपदेशस्येति किम्। अगामि। मान्तस्य किम्। अवादि। अनाचमेः किं। अचामि। अनाचमिकमिवमीनामिति वक्तव्यम्। चिणि आयादय इति णिङ् भावे। अकामि। णिङः णिचो वा रूपमेवं। अवामि। वध हिंसायाम् हलन्तः। जनिवध्योरिति न वृद्धिः। अवधि। जागोऽविचिण्णल्ङित्सु इति गुणः। अजागारि। भञ्जेश्च चिणि।६।४।३३। नलोपो वा स्यात्। अभाजि। अभञ्जि। विभाषा चिण्णमुलोः।७।१।६९। लभेर्नुमागमो वा स्यात्। अलम्भि। अलाभि। व्यवस्थितविकल्पत्वात् प्रादेर्नित्यं नुम्। प्रालम्भि। द्विकर्मकाणां तु। गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्। बुद्धिभक्षार्थयोः शब्दकर्मकाणां च निजेच्छया। प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः। गौर्दुह्यते पयः। अजा ग्रामं नीयते। ह्रियते। कृष्यते। उह्यते। बोध्यते माणवकं धर्मः। माणवको धर्ममिति वा। भोज्यते माणवकमोदनः। माणवक ओदनमिति वा। देवदत्तो ग्रामं गम्यते। अकर्मकाणां कालादिकर्मकाणां कर्मणि भावे च लकार इष्यते। मासो मासं वा आस्यते देवदत्तेन। णिजन्तात्तु प्रयोज्ये प्रत्ययः। मासमास्यते माणवकः॥ इति भावकर्मप्रक्रिया॥

णिच्परत्वाभावादुपधादीर्घे सोपधावृद्धेश्चाप्रवृत्तेः। तथा च फलभेदाद्दीर्घग्रहणप्रत्याख्यानं न युज्यत इति भावः। घ्
स्यन्ते सुनिनेति। अकर्मकत्वान्न भावे लः॥ ॥ नोदात्तोपदेशस्य। ञ्णिति कृति शमः दमः। घञ्। णिति कृति शमकः दमकः। ण्वुल्। उपदेश इति किं। शमीडहविनु
णिङन्ते वर्ज्यमानस्वरेण उदात्तत्वाभावान्निषेधो न स्यात्। कथं तर्हि ह्रेपर्यदक्रामि पदैकेनेवमिति श्रीहर्षप्रयोग इति चेत्। अत्राहुः॥ ६ ॥ ६ ॥

ति·
सि·कौ·
टी·न·
१३३

निवृत्तप्रेषणाद्यातोः प्राकृतेर्थे णिचिततश्चिण्वोध्यः। तथा च णिचोऽकृत्वाद्वृद्धेर्निषेधः। मितामिति ह्रस्वस्तु न भवति। वा चित्तविरागइत्यतो वेत्य
नुवर्त्त्यव्यवस्थितविभाषाश्रयणादिति घटादावुक्तत्वात्। किं च ह्रस्वे जातेपि न क्षतिः। चिण्णमुलोरिति दीर्घविकल्पनात् इति। कथमडउ यमे
।यमउपरमेइति प्रयोगः। संज्ञापूर्वकविधेरनित्यत्वात् वृद्ध्यभाव इति ज्ञेयं। अथवा उयमो परमशब्दोऽत्रार्थे कविधानाद्बोध्यो। णिङ्णिचोरप्येव
मिति। णिङन्ताण्णिजन्ताद्वा कर्मण्यश्चिणि णौ रनिटीति णिलोपे सति रूपं तुल्यमिति भावः। विभाषा। लभेश्चेत्यतो लभेरिति निवर्त्तते। णमुलि। लभंल
भंलाभंलाभंप्रादेस्तु प्रलंभं। प्रलंभमित्येव। अथ ये द्विकर्मकास्तेषु लकृत्यक्तखलर्थाः किं मुख्ये कर्मणि उत गौणे किं वोभयोरिति संदेहे व्यवस्था
माह द्विकर्मकाणां त्विति। दुह्यादेरिति। दुह्याच्पचेति श्लोके पूर्वोद्दिष्टाः द्वादश दुह्यादयस्तेभ्यो गौणे कर्मणि लादयो मता इत्यन्वयः। अकथि
तं चेति सूत्रेणास्य कर्मसंज्ञा न तु गौणं। गतिबुद्धीति सूत्रेणाणि द्विकर्मकास्तत्र व्यवस्थामाह। बुद्धिभक्षार्थयोरिति। निजेच्छयेति। गौणे वा मुख्ये
वा कर्मणीत्यर्थः। इह गतिबुद्धीति सूत्रेणास्य कर्मसंज्ञा न तु गौणस्य। प्रयोज्येति। अणौ कर्त्तुर्णौ कर्मसंज्ञायस्य न तत् प्रयोज्यकर्म। अन्येषामिति
गत्यर्थाकर्मकह्वकरोतीनां। लादय इति। कृत्यक्तखलर्थाः आदिशब्देन ग्राह्याः। गौर्दुह्यतेइति। देवदत्तेनेति शेषः। कृत्यादिष्वपि गौर्दोग्धव्या दोहनी
यापयः। गौः सुदोहा दुर्दोहा पयः। अजा ग्रामं नेतव्या। नयनीया। हर्त्तव्या हरणीया। अजा ग्रामं नेया इत्याद्युदाहर्त्तव्यं। ग्रामं गम्यतइति। यज्ञदत्तेने राम·
त्यध्याहारः। माणवकइति। अयं प्रयोज्यः कर्त्ता देवदत्तेनेति प्रयोजककर्त्रध्याहर्त्तव्यः। इति भावकर्मप्रक्रिया॥ १३३

429

कर्मणास्त्विति। सौकर्यातिशयं द्योतयितुमित्यनुषङ्गः। प्राप्येत्येति। ये भिदिच्छिदिप्रभृतयस्त एककर्मकास्तेऽकर्मकाः। ये तु द्विकर्मकास्ते सकर्मका इति भावः। अकर्म
कत्वस्य फलमाह। भावे कर्तरि चेति। भावे चाकर्मकेभ्य इत्युक्तत्वादिति भावः। द्विकर्मकेषु कर्मणः कर्तृत्वविवक्षायामुदाहरणं मथ्नाति सागरोऽमृतं स्वयं प्रदुग्धे

यत्नात्तु सौकर्यातिशयं द्योतयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि कर्तृसंज्ञां लभन्ते। स्वव्यापारे स्वतन्त्रत्वात्। तेन पूर्वोक्तक
णत्वादिसत्त्वेपि सम्प्रति कर्तृत्वात्कर्तरि लकारः। साध्वसिश्छिनत्ति। काष्ठानि पचन्ति। स्थाली पचति। कर्मणस्तु कर्तृत्वविवक्षायां प्राक् स
कर्मका अपि प्रायेणाकर्मकास्तेभ्यो भावे कर्तरि च लकाराः। पच्यते ओदनेन। भिद्यते काष्ठेन। कर्तरि तु। कर्मवत्कर्मणा तुल्यक्रियः ॥३
।१।८७। कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवत्स्यात्। कार्यातिदेशोऽयम्। तेन यगात्मनेपदचिण्चिण्वदिटः स्युः। कर्तुरभिहित
त्वात्प्रथमा। पच्यते ओदनः। भिद्यते काष्ठम्। अपाचि। अभेदि। ननु भावे लकारे कर्तुर्हितो यात्। स्यादस्मादतिदेशादिति चेन्न। लकारवाच्य
एव कर्ता कर्मवत्। लिङ्याशिष्यङिति द्विलकारकाल्लिङ इत्यनुवृत्तेः भावे प्रत्यये च कर्तुर्लकारेणानुपस्थितेः। अत एव कृत्यक्तखलर्थाः क
र्मकर्तरि न भवन्ति किन्तु भाव एव। भेत्तव्यं कुसूलेन। ननु पचिभिद्योः कर्मस्था क्रिया विक्लित्तिर्द्विधाभवनं च। सैव चेदानीं कर्तृस्था न तु त
त्तुल्या सत्यं। कर्मत्वकर्तृत्वावस्थाभेदोपाधिकं तत्समानाधिकरणक्रियाया भेदमाश्रित्य व्यवहारः। कर्मणेति किम्। करणाधिकरणा
भ्यां तुल्यक्रिये पूर्वोक्ते साध्वसिरित्यादौ मा भूत्। क्रियेति किम्। कर्तृस्थक्रियेभ्यो मा भूत्। गच्छति ग्रामः। आरोहति हस्ती। अधिगच्छति शास्त्रार्थः
स्मरति श्रद्दधाति च। यत्र कर्मणि क्रियाकृतो विशेषो दृश्यते यथा पच्यमानेषु तण्डुलेषु यथा वा छिद्यमानेषु काष्ठेषु तत्र कर्मस्था क्रिया नेतरत्र। नहि
पक्वापक्वतण्डुलेष्विव गतागतग्रामेषु वैलक्षण्यमुपलभ्यते। करोतिरुत्पादनार्थः। उत्पत्तिश्च कर्मस्था। तेन कार्यते घट इत्यादि। यत्नार्थस्तु

सम्युरोऽयं उपस्तुतौ वस्तूपमानस्य वस्तूनि भेदिनीति। प्रदुग्धे इत्यत्र कर्मवत्कर्मणेति प्राप्तस्य सकर्मकाणामिति निषेधे दुहिपच्योरिति प्रतिप्रसूतस्य यकोऽनदुहस्तु नमामि

CC-0. In Public Domain. Digitization by eGangotri

ति·
सि·कौ·
टी·त·
१३४

।उक्तप्रयोगानुरोधात् द्विकर्मकेषु गौणस्यैव कर्मणः कर्तृत्वविवक्षा न मुख्यस्येत्याहुः। अत्रेदमवधेयं। अधिकरणत्वाविवक्षायां व्रजो गौणं कर्मेति रुणद्धि
व्रजो गां स्वयमेवेति भवति। यदा तु व्रजस्य न कर्मत्वं तदा मुख्यकर्मणोपि कर्तृत्वविवक्षा भवति। रुध्यते व्रजे गौः स्वयमेवेति। तथा गोरपादानत्वविवक्षायां
गोर्दुह्यते पयः स्वयमेवेत्यादि कर्मवत्कर्मणा। वत्करणं किमर्थं। यथा ब्रह्मदत्ते प्रयुज्यमानो ब्रह्मदत्तशब्दः ब्रह्मदत्तवत् इत्यर्थे वदति तथा कर्मसु
च्यमानेपि कर्मवदित्यर्थलाभात्। सत्यं। कर्मणा तुल्यक्रियः कर्ता कर्मसुच्यमाने कर्मसंज्ञक इत्यर्थः स्यात्। तथा हि सति अकर्मकव्यपदेशाभावात् भावेल
कारो न स्यात् किंतु कर्मणि स्यात्। पच्यते ओदनः भिद्यते काष्ठमिति। यद्यप्ययं प्रयोगः सिद्धांते इष्ट एव तथापि पच्यते ओदनेन भिद्यते काष्ठेनेति भावे न स्या
दिति बोध्यं। कर्मशब्देनात्र कर्मस्था क्रिया लक्ष्यत इत्याह। कर्मस्थयेति। कर्मकारकस्थयेत्यर्थः। कर्तरि शब्विधानतः कर्तरीत्यनुवर्त्य प्रथमयापि परिणम्यते
स च विशेष्यलाभ इत्याह। तुल्यक्रियः कर्तेति। कार्यातिदेशोयमिति। यद्यपि शास्त्रातिदेशेपि लक्ष्यं सिध्यति तथापि शास्त्रस्यापि कार्यार्थत्वात् मुख्यत्वात् कार्या
तिदेश एवाश्रितः। भावे लकार इति। तत्र कर्तुरनभिहितत्वादिति भावः। ङिल्लकारकादिति। व्यत्ययो बहुलं लिङ्याशिष्यङ् इति संहितया पाठे अनुस्वारस्य परस
वर्णेन ज्ञाते लकारेण सोपरि लद्वयमित्यर्थः। तेन लकारवाच्यः कर्ता कर्मवदित्यर्थलाभाद्यगादिकमेव भवति न तु द्वितीयेत्यभिमतसिद्धिः। यत्र लकारवा
च्यः कर्ता न तत्रैव कर्मवत्त्वमिति व्युत्पादनस्य फलमाह। भ्रान्त एवेति। नमयंतीति। लकारेणैव कर्मकर्तुरुपस्थानात् तत्क्त्वादीनां प्रसक्तिर्नो स्युक्तार्थो नाम
प्रयोगात्। लविधेः पूर्वं तु सुतरां नास्ति लकारोपस्थाप्यकर्तुरभावेन कर्मवत्त्वाभावादिति भावः। अत्रेदं बोध्यं। क्तसक्तखलर्था इत्यत्र क्तग्रहणं सकु।
सुचितं तस्य कर्मकर्तरि इष्टत्वात् भिन्नः कुसूलः स्वयमेवेति। वक्ष्यति च स्वयमपि सिनोतेर्ग्रासकर्मकर्तृकस्येति वार्तिके सिनो ग्रासः स्वयमेवेति। ननु ग
त्यर्थाकर्मकेत्यत्राविवक्षितकर्मणोऽकर्मका इति न गृह्यते दत्तवान् पक्ववान् इत्यर्थे दत्तः पक्वः इत्यापत्तेरिति चेन्न। अत्राहुः। सिनोतेर्ग्रासकर्मकर्तृ
कस्येति निष्ठातकारस्य नकारविधानसामर्थ्यादविवक्षितकर्मणोपि क्वचिद्ग्रहणं। अन्यथा निष्ठातकारस्तत्र न लभ्येत तेन सिनो ग्रासः स्वयमेव भिन्नः

430

एम:
१३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वयमेवेत्यादि संगच्छते इति। अत्र केचिद्वदंति। लकारवाच्यस्यैव कर्तुः कर्मवत्त्वे कर्मवत्कर्मणेत्यत्र वत्ग्रहणं व्यर्थं। न च कर्तुः कर्मसंज्ञायां भावे लकारो न स्यादित्युक्तमिति वाच्यं। कर्मणः कर्तृत्वविवक्षायां धातुरकर्मक इत्यकर्मकात्कर्तरीव भावे लकारस्य निर्बाधत्वात्। लकारवाच्यस्य कर्मसंज्ञायामपि केवलकर्तुस्तदनभ्युपगमात्। नहि भावे लकारः कर्तारं वक्ति। न च वत्करणाभावे कर्तुः कर्मसंज्ञायां कर्तृव्यपदेशाभावात् नमते दंड इत्यत्र नदुहस्नुनमामिति। यकोनिषेधेपि शप् न स्याद्वत्करणे कृते तु कर्तृकार्यमपि स्यादिति वाच्यं। एकसंज्ञाधिकारादन्यत्र संज्ञाद्वयसमावेशादिष्टसिद्धेरिति। ननु तत्तुल्येति। तुल्यत्वं हि सादृश्यं तच्च भेदनिबंधनं। न च प्रकृते भेदोस्ति। कर्मणः कर्तृत्वविवक्षायां कर्मस्थफलरूपक्रियाया एव कर्तृस्थत्वात्। तथा च सूत्रमिदमसमंजसमिति भावः। वास्तविकभेदाभावेप्यौपाधिकभेदोस्तीत्याह। कर्मत्वेति। कर्मत्वकर्तृत्वावस्थयोर्भेदस्तद्भेदोपाधिकं अवस्थाभेदसमानाधिकरणं क्रियाभेदमाश्रित्येत्यर्थः। एवं चावस्थाभेदेन क्रियाभेदात्तत्कर्मस्थक्रियातुल्यक्रियत्वं कर्तुरस्तीति भावः। करणाधिकरणाभ्यामिति। तुल्यक्रियः कर्तेत्येतावदुच्यमाने असिनाच्छिनत्ति स्थाल्यां पचतीत्यादौ करणाधिकरणयोर्यो व्यापारस्स एव इदानीमसिः छिनत्ति स्थाली पचतीत्यादौ कर्तृस्थ इत्यस्ति प्रसंगः स्यात्तन्माभूदित्यर्थः। न च कर्मत्वावस्थायां विक्लित्त्यादिविकरणत्वाद्यवस्थायामसिस्थाल्योर्व्यापारो वस्तुतः सन्नपि धातुनानोपात्त इति कथमतिप्रसंग इति वाच्यं। सादृश्यप्रतियोगिक्रियाया धातूपात्तत्वेनाविशेषितत्वात्। न च तस्मिन्सूत्रे धातूपात्तक्रियया तुल्यक्रिय इत्युक्तमस्ति येनातिप्रसंगो न भवेत्। ननु तुल्यक्रियः कर्ता कर्मवत्भवतीत्युक्ते केनेत्याकांक्षायामनेककारकोपस्थितावपि कर्मवदिति प्रत्यासत्त्या कर्मणेति लभ्यत एवेत्यत आह॥ किंचेति। अधिगच्छतीत्यादि श्लोकस्योत्तरार्द्धं तु यत्कृपावशतस्तस्मै नमोस्तु गुरवे सदा। ननु फलं व्यापारश्च धात्वर्थः। स एव क्रियाशब्दवाच्यः। तत्र व्यापाराश्रयः कर्ता फलाश्रयस्तु कर्म। एवं च पचिभिदिप्रभृतीनां गमिरुहिप्रभृतीनां च सकर्मकत्वे फलस्य कर्मनिष्ठत्वे च तुल्ये कर्तृस्थभावका गम्यादय। इति कथं ज्ञातव्या इत्यत आह। यत्र कर्मणीति। ग्रामं गच्छतीति। आरूढानारूढहस्तिषु अधिगतानधिगतशास्त्रार्थेष्वित्यादावपि वैलक्षण्यं नोपलभ्यते इति बोध्यं।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति·
सि·कौ· कारिष्यन्ते इति। स्यसिच्सीयुट्तासिष्विति वैकल्पिकः चिण्वदिट्। पक्षे ऋद्धनोः स्य इति इट्। कारिष्यते। स्यं लृङि। अकारिष्यत। अकृरिष्यत। सिचि चिण्वदिटि। अकारिष्टां। पक्षे
टी·त· अकृषातां। सीयुटि चिण्वदिटि। कारिषीष्ट। पक्षे कृषीष्ट। तासि तु कारिता। कर्ता। यक्चिणोस्तु क्रियते घटः स्वयमेव। अकारीत्यादि नैन न सिध्येदिति। कर्मवत्कर्मणेत्ये
१३५ तिकर्मवत्त्वेन सिध्येदित्यर्थः। एतेन पचति पाकं करोतीति विवरणादाख्यातस्य यत्ने शक्तिरिति नैयायिकोक्तिः परास्ता। करोतेर्यत्नार्थत्वे तु यतते इतिवत्सकर्मकता
तापि न स्यादिति॥ ॥ एतेनेति। ज्ञानस्य कर्तृस्थत्वाभ्युपगमेनेत्यर्थः। यगभावादिति। सति तु यकि अनुव्यवसीयमान इति स्यादिति भावः। ओलोप इति। ओतः श्य
नीत्यनेन। ननु कर्मवत्त्वाभावे कथमिह श्यानजिस्तत्राह। ताच्छील्यादिति। नेति। श्यानचून भवतीत्यर्थः। देवदत्तयज्ञदत्तावन्योन्यं स्पृशतः इत्यत्र नयोरेवक

एतेन अनुव्यवस्यमानेऽर्थे इति व्याख्यातम्। कर्तृस्थत्वेन यगभावाच्छ्यनि कृते ओलोपे च रूपसिद्धेः। ताच्छील्यादावयं शानन्प्रत्ययस्तु आत्मने
पदं सकर्मकाणां प्रतिषेधो वक्तव्यः। अन्योन्यं स्पृशतः। अजा ग्राममन्नयति। दुहिपच्योर्बहुलं सकर्मकयोरिति वाच्यं। नदुहस्नुनमां यक्चि
णौ। ३।१।८९। एषां कर्मकर्तरि यक्चिणौ न स्तः। दुहेस्तु नेन यक् एव न षेधः। चिण् तु विकल्पिष्यते। शप्लुक्। गौः पयो दुग्धे। अन्वः कर्मका।
नेति। ३।१।६२। अजन्तात्त्वेचिण् वा स्यात् कर्मकर्तरि तशब्दे परे। अकारि। अकृत॥ ॥ ९ मेत्वं कर्तृत्वं चास्तीति कर्मस्थक्रियायाः कर्तृस्थत्वा

त्कर्मवद्भावप्राप्तिमाशंक्याह सकर्मकाणामिति। न चात्र देवदत्तो यज्ञदत्तं स्पृशति यज्ञदत्तस्तु देवदत्तमिति क्रियाभेदोऽवश्यमाश्रयितव्यः। तथा च
स्वनिष्ठां क्रियां प्रति कर्तृत्वं इतरक्रियां प्रति तु कर्मत्वं भवति। अन्यथा द्वयोरपि कर्तृत्वमेव स्यात्। इमौ गां गां स्पृशत इत्यत्र यथा। एवं च कर्मस्थक्रि
यायाः कर्तृस्थत्वाभावात्कर्मवद्भावो न प्राप्नोति। न च संयोगस्य द्विष्ठत्वात्कर्मस्थफलस्य कर्तृस्थत्वमस्त्वेवेति शंक्यं। तत्तन्निरूपितसंयोगस्य
भिन्नत्वात्। अन्यथा फलव्यापारयोरेकाश्रयत्वे सकर्मकत्वमेव न लभ्येत। किंच। रुहिगम्योः कर्तृस्थक्रियत्वादारोहति हस्ती गच्छति ग्राममित्यत्रक राम·
मेवद्भावो नेति भाष्यकैयटादिसंमतं। तथा च संयोगरूपफलस्य सर्वत्र तुल्यत्वया रुहिगमिभ्यां स्पृष्टं॥ ६ ॥ ६ ॥ १३५

431

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेषे विषयं दुरुपपादमिति नात्र कर्मवत्त्वप्रसक्तिरित्युदाहरणान्तरमाह । अन्नेति । ग्रामं गच्छतीति । इह प्रतिषेधाभावे यक् स्यात् क्रियाफलस्य कर्तृगामि
त्वेप्यात्मनेपदं स्यादिति भावः । नन्विहापि कर्मणि क्रियोत्पत्तौ विशेषो नोपलभ्यत इति कर्मस्थक्रियत्वं दुरुपपादमिति चेन्न । आहुः क्रियाकृतविशे
षोपलम्भानुपलम्भवदुद्देश्यतापि नियामिका । यत्र कर्मस्थांशस्योद्देश्यता सा कर्मस्थक्रिया यत्र तु व्यापारांशस्य सा कर्तृस्थेति । तथा हि । दर्शनारोहणे
योर्विषयेन्द्रियभूते च विशेषानुपलम्भात् कर्तृस्थत्वम् । उद्देशानुरोधात् । अहं पश्येयमित्युद्देशेनान्वयं विषयो भवत्विति । एवमहमुपरि गच्छेयमित्युद्दे
शेनानु हस्तिनोऽन्यग्भावो भवत्विति । ऊर्ध्वदेशसंयोगानुकूलव्यापारविशेष उपरिगमनं तदेव रुहेरर्थः । ननु न्यग्भावमात्रं । इष्टस्य घासं हस्त्यध्यामवन
मप्यत्यपि भूमिष्ठपुरुषमारोहतीत्यप्रयोगात् । अत एव हि यद्दितुपरं कंदसोऽन्यत्र भाष्यकृद्भिर्नयद्विति । अत एव चारोहन्ति हस्तिनं हस्तिपकास्तानारोहयति म
हामात्र इत्यादिप्रयोगे ण्यन्ते णौ कर्तुर्णौ कर्मत्वं संगच्छते । पचिभिद्योस्तु विक्लित्तिर्द्विधाभवनरूपो विशेषः कर्मणि दृष्टस्तदुद्देशेनैव कारकव्यापार इति कर्मस्थ
क्रियत्वात् पच्यते ओदनः भिद्यते काष्ठमित्यत्र कर्मवत् भावो भवत्येव । अजाग्रामं नयतीत्यत्रापि कर्मस्थांशस्य संयोगस्योद्देश्यतानतु व्यापारांशस्येति कर्मवत्
भावमाक्षेप्रतिषेधोऽयमावश्यक इति दिक् । दुहिपच्योरिति । द्विकर्मकत्वादनयोरेकस्य कर्मणः कर्तृत्वविवक्षायामपि सकर्मकत्वान्निषेधे प्राप्तेऽयमारम्भः
। गौः पयो दुग्ध इति । अत्र कर्मवत्त्वात् भावेन आत्मनेपदं नित्यं । गौणकर्मणि दुह्यादेरित्युक्तत्वात् मुख्यकर्मणः कर्मकर्तृत्वविवक्षया पयो गां दुग्ध इति
नोदाहृतमित्याहुः । एवं च प्रधाने नीहृकृष्वहामित्युक्तत्वात् तुल्यन्यायेनन्यादीनां मुख्यकर्मण एव कर्तृत्वविवक्षेति फलितं । अचः कर्म । चिण्तेप
दइत्यत । चिण् तेशब्दावनुवर्तेते दीपजनेत्यतोऽन्यतरस्यामिति च नदाह । अजनादित्यादि । अचः किं । अभेदि काष्ठमत्र नित्यं चिण् । कर्मकर्तरि
किं । अकारि घटः कुलालेन । अत्रापि नित्यमेव ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ इत्यस्य। कर्मकर्त्तरीत्येव। अदोहिगौणिर्गौयेनेत्यत्रतुनित्यं। उदुंबरः। फलमिति। कालः उदुंबरंफलंपचतीतिस्थिते। गौणकर्मणउदुंबरस्यकर्त्तृत्वविवक्षायामिह
टी· नः कर्मवत्भावः। ननुद्विकर्मकेषुपचेरप्रामाणिकः पाठइतियेवदंतितेषामयंग्रंथः कथंसंगच्छतेइतिचेत्। अत्राहुः। उदुंबरःफलंपचतीत्यत्रकर्मवत् कर्मणोत्य
उ· नि· स्यात्प्रापौ दुहिपच्योरित्यनेनकर्मवत्भावोबहुलंविधीयतेसृजियुज्योरिवेतिनकाप्यनुपपत्तिरिति। सृजियुज्योश्यंस्तु। श्यनोनित्वमाद्युदात्तार्थं। यकिनुना
१३६ इत्यस्य। ३·१·६३॥ अदोहि। पक्षेक्सः। लुग्वेतिपक्षेलुक्। अदुग्ध। अधुक्षत्। उदुम्बरः। फलम्पच्यते। सृजियुज्योः श्यंस्तु। अनयोःस
कर्मकयोः कर्त्ताबहुलङ्कर्मवत्। यगपवादश्चश्यन्वाच्यइत्यर्थः। सृजेः श्रद्धोपपन्नेकर्त्तर्य्येवेतिवाच्यम्॥ सृज्यतेस्रजम्भक्तः। श्रद्धयानिष्पा
द्यतीत्यर्थः। असर्ज्जि। युज्यतेब्रह्मचारीयोगम्। भूषाकर्मकिरादिसनाञ्चान्यत्रात्मनेपदात्॥ भूषावाचिनांसन्नन्तानाञ्चयक्चिणौचिण्वदि
ड्वेतिवाच्यमित्यर्थः। अलङ्कुरुतेकन्या। अलमकृत। अवकिरतेहस्ती। अवाकीर्ष्ट। गिरते। अगीर्ष्ट। आद्रियते। आदृत। किरादिस्तुदाद्य
न्तर्गणः। चिकीर्षतेकटः। अचिकीर्षिष्ट। इच्छायाःकर्त्तृस्थत्वेपिकरोतिक्रियापेक्षमिदकर्म्मस्थक्रियात्वम्॥ नरुधः। ३·१·६४॥ अस्माच्चि
ण्विरान। अवारुद्धगौःकर्म्मकर्त्तरीत्येव। अवारोधिगौर्गोपेन तपस्तपःकर्मकस्यैव। ३·१·८८॥ कर्त्ताकर्म्मवत्स्यात्। विध्यर्थमिदं। एवकारस्तु।
व्यर्थएवेतिवृत्त्यनुसारिणः। तप्यते तपस्तापसः। अर्ज्जयतीत्यर्थः। तपोनुतापेचेतिचिण्निषेधात्सिच्। अतप्त। तपःकर्मकस्येतिकिं। उत्तप
तिसुवर्णंसुवर्णकारः। नदुहस्नुनमांयक्चिणौ। प्रस्नुते। प्रास्नाविष्ट। प्रास्नोष्ट। नमतेदण्डः। अनंस्त। अनंसभावितण्यर्थोत्रनमिः। यक्चिणोः
स्यनुदात्तेत्यादिनालसार्वधातुकानुदात्तत्वेकृतेयकउदात्तत्वंश्रूयेत। श्रद्धोपपन्नइति। अश्रद्धायुक्तेकर्त्तरितुयगेव। भूषाकर्मेति। कर्मेश( प्रतिषेधेहेतु॥
दः क्रियावाचीत्याह। भूषावाचिनामिति। अन्यत्रेति। आत्मनेपदादन्यस्यनिषेधः। आत्मनेपदमेवभवतीत्यर्थःतदेतदाह अवाकीर्ष्टेति। लिङ्सिचोरितिवेट्। आद्रियत
इति। तुदादित्वात्क्रेरिङ्‌शयग्लिङ्क्षुइतिरिङि इयङ्। आदृतेति। उश्चेतिकित्वं। ह्रस्वादङ्गादितिसिचोलोपः। नरुधः। चिण्तेपदइत्यतश्चिणनुवर्त्तते॥ 432

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृ॰। णिश्रिब्रूञामुपसंख्यानम्। कारयते। अचीकरत्। ऊच्छ्रयते दण्डः। उदशिश्रियत। चिण्वदिट् तु स्यादेव। कारिष्यते। उच्छ्रयिष्यते। ब्रूते क
थाऽवोचत् भारद्वाजीयाः पठन्ति। णिश्रन्थिग्रन्थिब्रूञात्मनेपदाकर्मकाणामुपसंख्यानम्॥ पुच्छमुदस्यति। उत्पुच्छयते गौः। अन्तर्भावितण्यर्थताया
म्। उत्पुच्छयते गाम्। पुनः कर्तृत्वविवक्षायाम्। उत्पुच्छयते गौः। उदपुपुच्छत। यक्चिणोः प्रतिषेधाच्छप्चङौ। श्रन्थिग्रन्थ्योराधृषीयत्वाल्लिजभा
वपक्षे ग्रहणं। ग्रन्थति ग्रन्थम्। श्रन्थति मेखलां देवदत्तः। ग्रन्थ्यते ग्रन्थः। अग्रन्थिष्ट। श्रन्थते। अश्रन्थिष्ट। क्रैयादिकयोस्तु। श्रथ्नीते। ग्रथ्नीते स्व
यमेव विकुर्वते सैन्धवाः। वल्गन्तीत्यर्थः। वेः शब्दकर्मणोऽकर्मकाच्चेति तङ्। अन्तर्भावितण्यर्थस्य पुनः प्रेषणत्यागे। विकुर्वते सैन्धवाः। व्य
कारिष्ट। व्यकारिषाताम्। व्यकारिषत। व्यकृत। व्यकृषाताम्। व्यकृषत। कुषिरञ्जोः प्राचां श्यन्परस्मैपदं च।३।१।९०॥ अनयोः कर्मकर्तरि नय
क् किन्तु श्यन्परस्मैपदं चात्मनेपदापवादः। कुष्यति। कुष्यते पादः। रज्यति। रज्यते वस्त्रं। यग्विषये तु नास्य प्रवृत्तिः। कोषिषीष्ट। रंक्षीष्ट॥ इति
कर्मकर्तृप्रक्रिया॥ अभिज्ञावचने लृट्।३।२।११२॥ स्मृतिबोधिन्युपपदे भूतानद्यतने धातोर्लृट् स्यात्। लङोऽपवादः। स्मरसि कृष्ण गोकुले व
त्स्यामः। एवं बुध्यसे चेतसे इत्यादियोगेऽपि। तेषामपि प्रकारत्वाद्विवक्षोन स्मृतौ वृत्तिसम्भवात्। न यदि।३।२।११३॥ यद्योगे उक्तं न। अभिजाना
सि कृष्ण यद्वनेऽभुञ्जमहि। विभाषा साकाङ्क्षे।३।२।११४॥ उक्तविषये लृड्वा स्यात्। लक्ष्यलक्षणभावेन साकाङ्क्षश्चेद्धात्वर्थः। स्मरसि कृष्ण वने व
त्स्यामस्तत्र गाश्चारयिष्यामः। वासो लक्षणं चारणं लक्ष्यम्। पक्षे लङ्। यच्छब्दयोगेऽपि नयदीति बाधित्वा परत्वाद्विकल्पः। परोक्षे लिट्। चकार।
उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यं सुप्तोऽहं किल विललाप। बहुं जगद पुरस्तात्तस्य मत्ता किलाहम्॥ अत्यन्तापह्नवे लिड् वक्तव्यः। कलिङ्गेष
वात्सीः। नाहं कलिङ्गान् जगाम। हशश्वतोर्लङ् च।३।२।११६॥ अनयोरुपपदयोर्लिड्विषये लङ् स्यात्। चाल्लिट्। इति हाकरोच्चकार वा। शश्वद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·कौ· करोत्त्वकारवा। प्रश्नेचासन्नकाले।३।२।११७॥ प्रष्टव्यःप्रश्नः। आसन्नकालेपृच्छ्यमाने ऽर्थेलिड्विषयेलङ्लिटौस्तः। अगच्छत्किम्। जगामकिं। अनासन्नेतु
टी·त· कंसञ्जघानकिम्। लटिस्मे।३।२।११८॥ लिटोपवादः। यजतिस्मयुधिष्ठिरः। अपरोक्षेच।३।२।११९॥ भूतानद्यतनेलट्स्यात्स्मयोगे। एवंस्मपिताब्रवीति।
उ·ति ननौपृष्टप्रतिवचने।३।२।१२०॥ अनद्यतनपरोक्षइतिनिवृत्तम्। भूतेलट्स्यात्। अकार्षीःकिम्। ननुकरोमिभोः। नन्वोर्विभाषा।३।२।१२१॥ किम्। नकरोमि
१३० नाकार्षम्। अहन्नुकरोमि। अहन्वकार्षम्॥ पुरिलुङ्चास्मे।३।२।१२२॥ अनद्यतनग्रहणंमण्डूकप्लुत्यानुवर्त्तते। पुराशब्दयोगेभूतानद्यतनेविभाषालु
ङ्चाल्लट्। नतुस्मयोगे। पक्षेयथाप्राप्तम्। वसन्तीहपुराछात्राः। अवात्सुः। अवसन्। ऊषुर्वा। अस्मेकिम्। यजतिस्मपुरा। भविष्यतीत्यनुवर्त्तमाने। याव
त्पुरानिपातयोर्लट्।३।३।४॥ यावद्भुङ्क्ते। पुराभुङ्क्ते। निपातावेतौनिश्चयंद्योतयतः। निपातयोःकिम्। यावद्दास्यतेतावद्भोक्ष्यते। करणभूतयापुरायास्य
ति। विभाषाकदाकर्ह्योः।३।३।५॥ भविष्यतिलट्स्यात्। कदाकर्हिवाभुङ्क्ते। भोक्ष्यते। भोक्तावा। किंवृत्तेलिप्सायाम्।३।३।६॥ भविष्यतिलड्वास्यात्। का
ङ्कतरङ्कतमंवाभोजयसि भोजयिष्यसि। भोजयितासिवा। लिप्सायाङ्किम्। कःपाटलिपुत्रङ्गमिष्यति। लिप्स्यमानसिद्धौच।३।३।७॥ लिप्स्यमानेनान्नादिनास्वर्गादेः ५३३
सिद्धौगम्यमानायाम्भविष्यतिलड्वास्यात्। योऽन्नन्ददाति। दास्यति। दातावा। सस्वर्गंयाति। यास्यति। यातावा। लोडर्थलक्षणेच।३।३।८॥ लोड
र्थः प्रैषादिर्लक्ष्यतेयेनतस्मिन्नर्थेवर्त्तमानाद्धातोर्भविष्यतिलड्वास्यात्। कृष्णश्चेद्भुङ्क्ते त्वङ्गाश्चारय। पक्षेलट्लृटौ। लिङ्चोर्ध्वमौहूर्त्तिके।३।३। रम
९॥ ऊर्ध्वम्मुहूर्त्ताद्भवः ऊर्ध्वमौहूर्त्तिकः। निपातनात्समासः। उत्तरपदवृद्धिश्च। ऊर्ध्वमौहूर्त्तिकेभविष्यति। लोडर्थलक्षणेवर्त्तमानाद्धातोर्लिङ् ल १३०
टौवास्तः। मुहूर्त्तादुपरि उपाध्यायश्चेदागच्छेत्। आगच्छति। आगमिष्यति। आगन्तावा। अथत्वंछन्दोधीष्व।

अचः कर्मकर्त्तरीत्यतो ऽनुवर्त्तनादाह । कर्मकर्त्तर्य्येवेति । अतप्तेति । तपस्तपःकर्मकस्यैवेत्यनुषज्यते । नदुहस्नु । ननु दोग्धिपर्य्यायत्वेन स्नौतेरपि द्विकर्मकत्वा
द्गौरूपकर्म्मणः कर्तृत्वविवक्षायामपि पयोरूपकर्म्मणो विद्यमानत्वात् सकर्मकाणां प्रतिषेधेन यक्चिणोः प्राप्तिरेव नास्तीति चेत् । अत्राहुः । वत्सादि
योगेन क्षीरप्रस्रवणानुकूला उत्कण्ठा स्नुधातोरर्थः सा च गोनिष्ठा । स्नुप्रस्रवणे इत्यस्यापि करणे ल्युट् । प्रस्नूयते ऽनेनेति प्रस्रवणं सा चोत्कण्ठा । स्वयं प्रदुग्धे
ऽस्यगुरोरुपस्नुता वसूपमानस्य वसूनि मेदिनीति प्रयोगे ऽपि स्नुता उत्कण्ठितेत्यर्थः । वत्सो गां प्रस्नौति उत्कण्ठयति । अन्तर्भावितण्यर्थो ऽत्र स्नौतिः । गोः कर्तृ
त्वविवक्षायां प्रस्नुते गौरिति । प्रास्नाविष्टेति । चिण्वदिट् । न च चिणो निषिद्धे चिण्वदिडपि न स्यादिति शंक्यं । चिण्वदित्यनेन हि चिणीव कार्य्यमतिदिश्यते । न
च चिण्नेत्युक्त्या सो ऽतिदेशो निषेद्धुं शक्यते येन चिण्वदिटो निषेधः स्यात् । प्रास्नोष्टेति । स्नुक्रमोरनात्मनेपदनिमित्त इति नियमाद्वलादिलक्षण इण्न
। नमते दण्ड इति । इह नमिनानमित्त्रोर्विशेषदर्शनादुद्देश्यानुरोधात्त्वकर्मस्थक्रियत्वमस्ति कर्मस्थत्वांशस्य मनस्य उद्देश्यतानन्तु तदनुकूलव्यापारस्ये
ति कर्मवत्त्वभावस्य प्राप्तिरस्तीति भावः । अचीकरतेति । चिण्प्रतिषिद्धे णिश्रीति चङ् । णिश्रंथीति लः सामान्यग्रहणस्य फलमाह । पुच्छमुदस्यती
त्यादि । पुच्छभाण्डेति णिङ् । आत्मनेपदविधौ यो ऽकर्मकस्तमुदाहरति । विकुर्वते सैन्धवा इति । कुषिरञ्जोः । न दुहस्नुनमामित्यतो नेति वर्त्तते तदाह । न य
गिति । किन्तु श्यन्निति तस्मिन्नेव विषय इति भावः । न गिरा गिरेति च ब्रूयादित्यादौरंस्लोहेयमित्यत्र गिरापदप्रतिषिध्येरापदं विधीयमानं गिरापदस्थान ए
व यथा भवत्येवमिहापि यकः प्रतिषेधं कृत्वा विधीयमानः श्यन् तदीयस्थान एव भवति । अतो व्याचष्टे यग्विषये तु नास्येति । श्यनास्तन्नियोगशिष्टं परस्मै
पदं श्यनभावेन भवतीत्यात्मनेपदमेवोदाहरति । कोषिषिष्टेति । कोषिष्यते । चुकुषे । अकोषि । अकोषिष्यत । रंक्ष्यते । ररंजे । अरंजि । अरंक्ष्यते । इत्याद
पि ज्ञेयं । श्यन्पक्षे कुष्यतीत्यत्र नित्यतुम् । यक्पक्षे तु आक्रोनद्योरिति विकल्पः । स्वरे विशेषो ऽप्यस्त्येव । इह प्रकरणे ऽभिधीयते काषंस्वयमेवेति इत्यादौ प्र
युज्यते तत्र स्वयंशब्दः प्रकरणार्थको ज्ञेयः । आत्मना करणेनेति । कर्त्रर्थत्वे तु कर्मणि लः स्यात् । स्पष्टं चेदं कैयटादौ ॥ इति कर्मकर्तृप्रक्रिया ॥ अ

CC-0. In Public Domain. Digitization by eGangotri

सि॰कौ॰ भिन्ना। भूतेइत्यधिक्रियतेऽनद्यतने लङिति। अतः अनद्यतनइतिवर्त्तते। अभिज्ञावचनइति: साऽच्यते बोध्यतेऽनेनेति विग्रहस्तदाह। स्मृतिबोधिनीत्यादि।
टी॰त॰ वत्स्यामइति। अवसामेत्यर्थः। पद्यपमृगो धावतीत्यत्र वाक्यार्थरूपमगकर्तृकधावनमिव स्मरसीत्यत्र गोकुलाधिकरणकास्मत्कर्तृकभूतानद्यतनवा
उ॰ ति॰ सोवाक्यार्थः कर्मकर्मेति संबोधनं स्मरणक्रियायां विशेषणं। नन्वात्र पूर्वोक्तनिवासकर्मकं कथं संबोध्यकं स्मरणमिति फलितार्थः। नयदि। लटः प्रतिषे।
१२८ धेऽत्रयोगे लङ्। ... मिति। प्रसिद्धत्वात्तज्ज्ञापकमित्यर्थः। चारणं लक्ष्यमिति। सहसाबुध्यतारोहात् ज्ञाप्य। पक्षेलङिति। वनेऽवसाम गाः अचारयाम
। यत्र ... पीतमिति। अनम्बनपदीति योगात् पूर्वं विभाषा साकाङ्क्ष इति नद्यतत मिति भावः। ... अपन्हवइति। अपन्हवोऽपलापस्तत्रात्यन्तिकत्वं नाम
इदं यदभियुक्तस्तद्धेतोरप्यपन्हुतिः। नाहमित्यादि। कलिंगो नाम निषिद्धो देशः। अंगवंगकलिंगेषु सौराष्ट्रमगधेषु च। तीर्थयात्रां विना गत्वा पुनः संस्कार
मर्हतीति स्मरणात्तस्मिन्देशे तव यागतं चिरं स्थितमिति केनचित्कश्चिदुक्तः सन्नाह। नाहं कलिंगान्जगामेति। न केवलमवस्थानमेव निषिध्यते किं तर्हि
तद्धेतुभूतं गमनमपीति भवत्यत्यन्तापन्हवः। यदा तु कलिंगेषु गमइत्युक्तः सन्नागमनमेवापलपति तदात्यन्तापन्हवइति लङेव भवति न कलिंगेष्वगा।
कमिति प्रश्नेच। भूतानद्यतनपरोक्षइति वर्त्तते प्रश्नइत्यत्र कर्मणि निङित्याह। प्रष्टव्यइति। आसन्नेति। पंचवर्षाभ्यन्तरमासन्नकालं पंचवर्षातीतंतु
विप्रकृष्टकालमित्याहुः। पृच्छमानइति। आसन्नकालिके भूतानद्यतनपरोक्षार्थवृत्तिधात्वर्थे प्रष्टव्ये सतीत्यर्थः। प्रश्नेकिं। भूतानद्यतनपरोक्षे लि
डेव। जगाम चैत्रः। लट्स्मे। स्मइत्यव्ययं भूतकालद्योतकं। ननौ पृष्टप्रतिवचनमिति विग्रहः समाहारद्वंद्वोऽयं यत्र स्यादिष्यते च प्रतिवचने ए। 434
वलट्। नदाह ननु करोमीति। न च पृष्टग्रहणं व्यर्थं यावता प्रश्नपूर्वकमेव प्रतिवचनं भवतीति वाच्यं। विरुद्धमपि वचनं प्रतिवचनं। वचनाभिमुख्येम
पि प्रतिवचनमिति पृष्टग्रहणं कर्त्तव्यमिति। कैयटे स्थितत्वात्। नन्वोः भूतइत्येव। पक्षे लुङ्। अनद्यतने तु लङ्। पक्षे यथाप्राप्तमिति। लुङ्लटावभा
वपक्षे लङ् परोक्षे तु लिडित्यर्थः। भविष्यतीति। भविष्यति गम्यादयः इति सूत्रात्। यावत्पुरा। लक्षणप्रतिपदोक्तपरिभाषा नित्येति निपातग्रहणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नत्वायते। यावत् भुंक्त इति। निश्चितं भोक्ष्यत इत्यर्थः। यावद्दास्यत इति। अनद्यतनभविष्यति तु यावद्दाता तावत् भोक्ते इति प्रत्युदाहर्त्तव्यं विभाषा। नन्वनद्यत
ने हि लन्यतरस्यामित्यनद्यतने किमोर्हिल विहितः स्तनस्य कर्हियोगे लुटेव भाव्यमिति कथमुदाह्रियते कर्हि भोक्ष्यत इति। अत्राहुः। भविष्यत्सामान्ये भोक्ष्यते इ
ति लृट्। कर्हियोगे तु अनद्यतनावगतिर्लक्षणयेति। भोक्ता वेति। ननु भविष्यत्सामान्ये यं लड्विहितस्तस्य लुटा सह कथं विकल्पो विषयभेदादिति चे
त्। अत्राहुः। अनद्यतने लडित्यत्र विभाषा कदेत्यादीनि कानिचित् सूत्राणि इष्टानुरोधेन अनुवर्त्तन्ते तेन लुड्विषयेपि लड्भवति न त्वनद्यतने लुटा लद्ल
ध्यत इति। किंवृत्ते। किमा वृत्तं किंवृत्तं। केचित्तु यद्यपि कदा कुत्रेत्यादावपि किंवृत्तं तथापि तन्न गृह्यते। अनभिधानात्। तेन कदा भोजयिष्यसीत्यादौ भवि
ष्यति लृण्नेत्याहुः। लिप्स्यमान। लिप्स्यमानसिद्धौ लिप्सा याः सत्वात् पूर्वेण। सिद्धप्यकिंवृत्तार्थमिदमिति ध्वनयन्नुदाहरति। योन्नमिति लोडर्थ लोड।

वर्त्तमानसामीप्ये वर्त्तमानवद्वा। ३।३।१३१॥ समीपमेव सामीप्यम् स्वार्थे ष्यञ्। वर्त्तमाने लडित्यारभ्य उणादयो बहुलमिति यावत्तैये
नो पाधिना प्रत्यया उक्तास्ते तथैव वर्त्तमानसमीपे भूते भविष्यति च वा स्युः। कदा आगतोसि। अयमागच्छामि अयमागमं। कदाग
मिष्यसि। एष गच्छामि। गमिष्यामि वा।

र्थस्य लक्षणमिति षष्ठी तत्पुरुषः। कृष्णा भोजनं लोडर्थस्य गोचारणप्रैषस्य लक्षणं। भोजनकाले
गोचारणं त्वया कर्त्तव्यमित्यर्थः। पक्ष इति। कृष्णाश्चेत् भोक्ष्यते त्वं गाश्चारयेत्यर्थः। लिङ्चोर्ध्वे। कालाट्ठञ्। तद्धितार्थोत्तरपदइ त्यत्र दिक्सं।
ख्यादस्य तु वर्त्तमानादिह समासो दुर्लभ इत्याशंकायामाह। नियातनादिति॥ ॥ वर्त्तमानसार्थेष्यञीति। अस्मादेव सामीप्य इति निर्देशात् ष्य
ञि सिद्धे चतुर्वर्णादिष्य इति वार्त्तिकं प्रपंचार्थमित्याहुः। न चात्र पूरणगुणेति निषेधात् षष्ठीसमासो न प्राप्नोतीति वाच्यं अनेनैव निर्देशेन तन्निषे
धस्य अनित्यत्वाभ्युपगमात् तेन बुद्धिमाद्यमित्यादि सिद्धं। येनोपाधिनेति। धातुविशेषाद्युपाधिना तथाहि। पूङ्यजोः शानन्निति विहितः सताभ्यामेव धा
तुभ्यां भवति न तु धात्वन्तरात्। तच्छीलादिविशिष्टे कर्त्तरि अलंकृञित्यारभ्य भ्राजभासेति यावदिष्णुजादय उक्तास्तेपि तृन्नादिभ्यो धातुभ्यस्तस्मिल्ले

श्रीसिधभवति ॥

सि·कौ· कदाआगतोसीतिभूतकालेनप्रश्नवाक्यंआगच्छामीत्युदाहरणोभूतकालाभिव्यक्तये। यमितिप्रयोगस्त्विदानीमेवागतमितिवर्त्तमानसमीपभूतकालद्यो
टी·त· तनाय। तेनह्यागमनाविनाभूतंयत्स्वरूपंधूलीधूसरतास्वेदादियुक्तंतत्प्रतिनिर्दिश्यते एवंकदागमिष्यसीतिभविष्यत् कालेनप्रश्नवाक्यं। गच्छामी
उ·ति· त्युदाहरणोभविष्यत्कालाभिव्यक्तये। एषइतिप्रयोगस्त्विदानीमेवगमीष्यामीतिवर्त्तमानसमीपभविष्यत्कालद्योतनाय। तेनहिगमनाऽविनाभूतंयत्स्वरूपं
१३९ परिकरबंधादियुक्तंतत्प्रतिनिर्दिश्यते। नचकदेतिप्रश्नेउत्तरवाक्ययोःकालानुपादानादसंगतिःशंक्या। उत्तरत्वायमेषइत्याभ्यामिदानीमितिकालावग

आशंसायांभूतवच्च। ३।३।१३२॥ वर्त्तमानसामीप्यइतिनानुवर्त्तते। भविष्यतिकालेभूतवद्वर्त्तमानवच्चप्रत्ययावास्युराशंसायाम्। देव
श्चेदवर्षीत्। वर्षति। वर्षिष्यतिवा। धान्यमवाप्स्म। वपामः। वप्स्यामोवः। सामान्यातिदेशेविशेषानतिदेशाल्लिङ्लिटौन। क्षिप्रवचनेलृट्। ३
।३।१३३॥ क्षिप्रपर्यायेउपपदेपूर्वविषयेलृट्स्यात्। वृष्टिश्चेत्क्षिप्रमाशुत्वरितंवायास्यति। शीघ्रंवप्स्यामः। नेतिवक्तव्येलृड्ग्रहणं
लुटोपिविषयेयथास्यात्। श्वःशीघ्रंवप्स्यामः। आशंसावचनेलिङ्। ३।३।१३४॥ आशंसावाचिन्युपपदेभविष्यतिलिङ्स्यान्नतुभूत
वत्। गुरुश्चेदुपेयादाशंसेऽधीयीय। आशंसेक्षिप्रमधीयीय। नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः। ३।३।१३५॥ क्रियायाःसातत्येसा
मीप्येचलङ्लुटौन। यावज्जीवमन्नमदाद्दास्यतिवा। सामीप्यंतुल्यजातीयेनाव्यवधानम्। येयंपौर्णमास्यतिक्रान्तातस्यामग्नीनाधित्तसो
मेनायष्ट। येयंअमावस्याआगामिनीतस्यामग्नीनाधास्यते। सोमेनयक्ष्यते॥ ॥ (९मान्। सामीप्येकिंकदाआगतोभवान्। अस्मान्मासात्
पूर्वस्मिन्मासेआगच्छं। एतच्चसूत्रमाकरेप्रत्याख्यातं। गंगासमीपेगंगात्वारोपवत्वर्त्तमानसमीपेवर्त्तमानत्वारोपसंभवात्॥ ॥ आशंसाया
। आशंसनमाशंसा। अप्राप्तस्यप्राप्तुमिच्छा। आशंसायांवर्त्तमानत्वेपितद्विषयस्यवर्षादेर्भविष्यत्कालसंबंधाद्भविष्यतीत्युक्तं। आशंसायांकिं। गमि 435
ष्यतिक्षिप्रवचने। वचनग्रहणंस्वरूपग्रहणनिरासार्थं। तदाह। क्षिप्रपर्यायइति। पूर्वविषयइति। आशंसायामित्यर्थः॥ ० ॥ ० ॥ १३९

CC-0. In Public Domain. Digitization by eGangotri

तेनपूर्वेणलकारापवादोयं।आशंसावचने।भूतवद्वर्त्तमानवत्प्रत्यययोरपवादः।नभूतवदिति।नवर्त्तमानवदित्यपिबोध्यं।आशंसेअधीयीयेति।ए
वंमाशंसेअधीयीयदृक्कामोवयमधीयीमहीत्यादिज्ञेयं।क्षिप्रमिति।क्षिप्रयोगेपिपरत्वाल्लिङितिभावः।नानद्यतने।भूतानद्यतनेलङ्विहितोभविष्यत्य
नद्यतनेतुलुट्तौचानयोरर्थयोर्निषिध्येतेत्याह।लङ्लुटौनेति।एवंचभूतेलुङ्भविष्यतिलुट्लृङित्याशयेनोदाहरति।अदाद्दास्यतीत्यादि।अग्नीनि
ति।आहवनीयादीन्॥ ❀ ॥भविष्यतिमर्यादा।अक्रियाप्रबंधार्थमसामीप्यार्थंचेदंवचनं।नानद्यतनवदित्यनुवर्त्ततइत्याह।अनद्यतनवन्नेति।
लुडत्रनेत्यर्थः।इहसूत्रेदेशकृतामर्यादाउत्तरत्रकालकृतातत्रविशेषंवक्ष्यति।तस्ययदवरमिति।पाटलिपुत्रावधिकमार्गस्ययदवरंकौशाम्ब्यास्त

भविष्यतिमर्य्यादावचनेऽवरस्मिन्।३।३।१३६॥भविष्यतिकालेमर्य्यादोक्ताववरस्मिन्प्रविभागेऽनद्यतनवन्न।योयमध्वागन्तव्यआ
पाटलिपुत्रात्तस्ययदवरंकौशाम्ब्यास्तत्रसक्तून्पास्यामः।कालविभागेचानहोरात्राणाम्।३।३।१३७॥पूर्वसूत्रंसर्वमनुवर्त्तते।आ
होरात्रसम्बन्धिनिविभागेप्रतिषेधार्थमिदम्।योगविभागउत्तरार्थः।योयंवत्सरआगामीतस्ययदवरमाग्रहायण्यास्तत्रयुक्ताअध्ये
ष्यामहे।अनहोरात्राणांकिम्।योयंमासआगामीतस्ययोऽवरःपंचदशरात्रःतत्राध्येतास्महे॥

१ कौशाम्ब्यादित्यर्थः कौशांव्याः पूर्वमिति।

यावत्।भविष्यतिकिं।योध्वाअतिक्रान्तआपाटलिपुत्रात्तस्ययदवरंकौशांव्याःतत्रसक्तूनपिबाममर्यादावचनेइतिकिं।योऽध्वागन्तव्योनिरवधिक
स्तस्ययदवरंकौशांव्यास्तत्रसक्तून्पातास्मः।अवरस्मिन्नितिकिं।योऽध्वागन्तव्यआपाटलिपुत्रात्तस्ययत्परंकौशांव्यास्तत्रसक्तून्पातास्मः।कालवि
भागेच।कालविभागेभविष्यत्यनद्यतनवन्न।सचेत्कालविभागोअहोरात्रसंबंधीनचेदित्यर्थः।इहकालविभागेसत्यवरस्मिन्ननद्यतनवन्ने
त्युक्तेकस्मादित्यपेक्षायामर्थात्कालविशेषादितिलभ्यतइत्येके।केचित्तुकालविभागइतिपंचम्यर्थेसप्तमीत्याहुः।उत्तरार्थइति।परस्मिन्विभागेति
सूत्रेकालमर्यादायामेवानुवृत्तिर्यथास्यात्।भविष्यतीतिकिं।यःसंवत्सरोऽतीतस्तस्ययदवरंमासात्तत्रपयोपिवाम।मर्यादायामितिकिं॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· योनिरवधिस्समयस्तस्यपूर्ववर्षमासान्तत्रपयःपास्यामः। पंचदशरात्रइति। नन्वत्रसंख्यापूर्वरात्रमितिक्लीवत्वेनभाव्यं। नचपंचदशरात्रयोयस्मिन्पक्षेद्र्‌
टी· मं· तिवहुव्रीह्याश्रयणात्पुल्लिंगः सिद्धइतिवाच्यं। अहस्सर्वैकदेशेत्यच्प्रत्ययस्याभावप्रसंगादितिचेत्। सत्यं। अतएवहिभाष्यप्रयोगात्क्लीवत्वंनेत्याहुः॥ ॥
उ· ति· परस्मिन्। भविष्यत्यनद्यतनवच्चेतिविकल्पेननिषिध्यते। वर्ज्यमिति णिजन्तादचोयदितिकर्मणियत्। वर्ज्यमितिपाठेतुहितीयायांचेतिणमुल्। अनहोरात्राणामि
२५० त्येव योऽयंवत्सरआगामीतस्ययत्परंपंचदशरात्रात्तत्रपयःपास्यामइत्यादि। लिङ्‌निमित्ते। अनिपत्तिः। अनिष्पत्तिः भूतेचलिङ्‌निमित्तेलृङ्‌स्यात्भूतेभविष्यति

परस्मिन्विभाषा। ३।३।१३८॥ अवरस्मिन्वर्ज्यमपूर्वसूत्रद्वयमनुवर्त्तते अप्राप्तविभाषेयम्। योयंसम्वत्सरआगामीतस्ययत्परमाग्रहायण्या
स्तत्राध्येष्यामहे। अध्येतास्महे॥ लिङ्‌निमित्तेलृङ्‌क्रियातिपत्तौ। ३।३।१३९॥ भविष्यतीत्येव। सुवृष्टिश्चेदभविष्यत्तदासुभिक्षमभविष्यत्। भूते
च। ३।३।१४०॥ पूर्वसूत्रंसम्पूर्णमनुवर्त्तते। वोताप्योः। ३।३।१४१॥ वाआउताप्योः। उताप्योरित्यतःप्राग्भूतेलिङ्‌निमित्तेलृङित्यधिक्रियते।
पूर्वसूत्रेतुउताप्योरित्यादौप्रवर्त्ततइतिविवेकः। गर्हायांलडपिजात्वोः। ३।३।१४२॥ आभ्यांयोगेलट्स्यात्। कालत्रयेगर्हायाम्। लुङादीन्य
त्वादयम्वाधते। अपिजायान्त्यजसि। जातुगणिकामाधत्से। गर्हितमेतत्। विभाषाकथमिलिङ्‌। ३।३।१४३ गर्हायामित्येव। कालत्रयेलि
ङ्लट्। कथन्धर्म्मंत्यजेस्त्यजसिवा। पक्षेकालत्रयलकाराः। अत्रभविष्यतिनित्यंलृङ्‌भूतेवा। कथन्नामतत्रभवान्धर्म्मंमत्यक्ष्यत्॥

चक्रियातिपत्तौ। अद्यतनानद्यतनसाधारणंभूतसामान्यमिहवोध्यं अस्योदाहरणानि उताप्योस्समर्थयोर्लिङ्‌इत्यारभ्यसमानकर्त्तृकेषुतुमुन्नितिविह
यवक्ष्यमाणसूत्राणिवोध्यानि। ततःप्राचीनेषुवोताप्योरित्यनेनविकल्पोक्तः। लृङ्वेतिलिङ्‌निमित्तभूतएवायंविकल्पोभविष्यतितुनित्यमेवलृङ्‌। गर्हायां। अ
त्रवोताप्योरितिनसंवध्यते। वर्त्तमानेलडुक्तः। कालत्रयेतुनप्राप्नोतीतिविधिरयं। कालत्रयेइति। कालविशेषानुपादानादितिभावः। परत्वादिति।
निरवकाशत्वादित्यपिवोध्यं। अपिजायामिति। त्यक्ष्यसिअत्याक्षीरित्यादिविषयेपित्यजसीत्यादिलडेवप्रयुज्यतइतिभावः॥ ॥ ॥ २५०

436

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंयोजायांतत्याजआपजत्। अत्यासीतत्यक्तात्यक्ष्यतीत्यादि विषयेपि योजायामपित्यजति जातुगणिकामाधत्तेइतिलङेव कालत्रयलकारापवादतयाप्रयोक्तव्यः
लिङ्निमित्ताभावादिह क्रियातिपत्तौ लृङ् न भवति। कालत्रयलकारादिति। परोक्षानद्यतनभूते लिट्। कथं धर्मं तत्यक्थ। भूतानद्यतने लङ्। कथं धर्ममत्यजः। भू
तसामान्ये लुङ्। अत्याक्षीः। भविष्यत्यनद्यतने लुट्। त्यक्तासि। भविष्यत्सामान्ये लृट्। कथं धर्मं त्यक्ष्यसीत्यादि। अत्रेति॥ क्रियातिपत्तावितिज्ञेयं। किंवृत्ते। लि
ङ्लृटौ कालत्रये स्तः नानुवर्त्तेते इति। एवं चास्मिन्विषये निंदति निंदिष्यत्यनिंदत् इति कालत्रयलकाराः पक्षे न भवंतीति भावः। प्राग्वदिति। क्रियातिपत्तौ भवि

किंवृत्ते लिङ्लृटौ। ३।३।१४४॥ गर्हायामित्येव। विभाषा तु नानुवर्त्तते। कः कतरः कतमो वा हरिं निन्देत्। निन्दिष्यति वा। लृङ् प्राग्वत्॥ अनव
क्लृप्त्यमर्षयोरकिंवृत्तेऽपि। ३।३।१४५ गर्हायामिति निवृत्तम्। अनवक्लृप्तिरसम्भावना। अमर्षोऽक्षमा। न सम्भावयामि न मर्षयामि वा भवान् ह
रिं निन्देत् निन्दिष्यति वा। कः कतरः कतमो वा हरिं निन्देत्। निन्दिष्यति वा। लृङ् प्राग्वत्। किंकिलास्त्यर्थेषु लृट्। ३।३।१४६॥ अनव
क्लृप्त्यमर्षयोरित्येतद्गर्हायाञ्चेति यावदनुवर्त्तते। किंकिलेति समुदायः क्रोधद्योतक उपपदम्। अस्त्यर्थाः अस्ति भवति विद्यतयः। लिङोऽप
वादः। न श्रद्दधे न मर्षये वा किं किल त्वं शूद्रान्नं भोक्ष्यसे। अस्ति भवति विद्यते वा शूद्रान्नं भोक्ष्यसि। अत्र लृङ्। जातुयदोर्लिङ्। ३।३।१४७॥ य
दायदोरुपसंख्यानम्॥ लृटोऽपवादः। जातु यद्यदा यदि वा त्वादृशो हरिं निन्देन्नावकल्पयामि न मर्षयामि। लृङ् प्राग्वत्॥ ७ ॥ ७ ॥

ष्यति नित्यं लृङ्। भूते वेत्यर्थः। अनवक्लृप्त्यमर्षयोः लिङ्लृटावनुवर्त्तेते तौ च कालत्रये भवतस्तेन सर्वलकाराणामपवादौ। किंवृत्तस्यानधिकारादेवाविशे
षादुभयोर्भविष्यतीत्यकिंवृत्तेपीतिन कर्त्तव्यं। पूर्वनिपातार्हस्यान्याचः परनिपातो यथासंख्यनिवृत्त्यर्थः। लृङ् प्राग्वदिति। भूते वा। भविष्यति नित्यमित्यर्थः
न संभावयामि चैत्रो हरिमनिंदिष्यदित्याद्युदाहर्त्तव्यं। किंकिलास्त्यर्थेषु। लिङ्लृटोः प्राप्तयोरिह लृट्ग्रहणाल्लिङ् निवर्त्तते इत्याशयेनाह। लिङोपवाद इति। अ
स्ति भवतीति। त्वत्कर्तृकं शूद्रागमनमस्तीत्यादिरर्थः। लृङ् नेति। लिङो निवृत्तत्वेन तन्निमित्ताभावात्। जातुयदोर्लिङ्॥ ७ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति॰
सि॰कौ॰
टी॰न॰
१४१

अनवक्लृप्त्यमर्षयोरिति लिङ्लृटोः प्राप्तयोर्वचनमिदं लटो बाधनार्थं । तदाह लृटोपवाद इति । अयं कालत्रये । लृङ् प्राग्वदिति । क्रियातिपत्तौ भूते वा भ
विष्यति नित्यमित्यर्थः । जातु भवान् हरिमनिंदिष्यदित्याद्युदाहर्तव्यं । अगर्हायामिदं । गर्हायां तु जातुयोगे लडुक्तः ॥ ❀ ॥ यच्चयत्रयोः अनवक्लृप्त्यमर्ष
योरिति वर्तते यथासंख्यमिह नेष्यते । अयमपि लिङ्लृटोऽपवादः योगविभागस्तु उत्तरसूत्रद्वये यच्चयत्रयोरेवानुवृत्तिर्यथा स्यादित्येतदर्थः क्रियाति
पत्तौ लृङ् प्राग्वत् । यच्चयत्र वा त्वमेवमकरिष्यो न श्रद्दधे न मर्षयामीत्यादि । गर्हायां च । कालत्रयेयं भवतीति सर्वलकारापवादः लिङेव स्यादिति ।

यच्चयत्रयोः ।३।३।१४८। यच्च यत्र वा त्वमेवं कुर्य्याः न श्रद्दधे न मर्षयामि । गर्हायां च ३।३।१४९। अनवक्लृप्त्यमर्षयोरिति निवृत्तम् ।
यच्चयत्रयोर्योगे गर्हायां लिङेव स्यात् । यच्च यत्र त्वं शूद्रं याजयेः अन्याय्यमेतत् । चित्रीकरणे च ।३।३।१५०॥ यच्चयत्र वा त्वं शूद्रं याजयेः
आश्चर्यमेतत् । शेषे लृडयदौ ।३।३।१५१॥ यच्चयत्राभ्यामन्यस्मिन्नुपपदे चित्रीकरणे गम्ये धातोर्लृट् स्यात् । आश्चर्यमन्धो नाम कृष्णं
द्रक्ष्यति । अयदौ किं । आश्चर्यं यदि सोऽधीयीत । उताप्योः समर्थयोर्लिङ् ।३।३।१५२॥ बाढमित्यर्थेऽनयोस्तुल्यार्थता । उत अपि वा हन्या
द्घं हरिः समर्थयोः किम् । उत दण्डः पतिष्यति । अपि धास्यति द्वारम् । प्रश्नः प्रच्छादनं च गम्यते । इतः प्रभृति लिङ्निमित्ते क्रियातिपत्तौ भू
तेपि नित्यो लृङ् । कामप्रवेदनेऽकच्चिति ।३।३।१५३॥ स्वाभिप्रायाविष्करणे गम्यमाने लिङ् स्यान्न तु कच्चिति । कामो मे भुञ्जीत भवान् अक

गर्हायां विभाषा कथमिति लट् प्राप्तस्तत्रैव किंवृत्ते इति लिङ्लृटौ प्राप्तस्तयोरपवादो यच्चयत्रयोर्योगे विहितो यथमलिङ् ((च्चि तीति किं । कच्चिज्जीवति । ५३१
ति भावः । लृङ् प्राग्वत् । यच्चयत्र वा त्वं शूद्रमयाजयिष्यस्तदन्याय्यमित्यादि । चित्रीकरणे च । अयमपि कालत्रये । लृङ् प्राग्वत् । यच्चयत्र वा त्वं शूद्र
मयाजयिष्यः आश्चर्यमेतत् । शेषे । सर्वलकारापवादः सोऽधीयीतेति । यदायद्योरुपसंख्यानाज्जातु यदा यदि इति लिङ् । लिङ्निमित्ताभावादिह लृङ् न । उताप्
योः धातोर्लिङ् स्यात् कालत्रये । भूतेपि नित्य इति । वाग्रहणस्य निवृत्तत्वात् भविष्यतीव भूतेपि नित्यं लृङ् । उताहनिष्यद्घं सुरा जानाहन्तु हनिष्यतीति गम्य

१४१

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामप्रवेदने। लिङ् स्यादिति। कालत्रये सर्वलकारापवादः। कच्चिज्जीवतीति। कामो मे इत्यनुपजनीयं। वर्तमानसामीप्यद्भूतिलट्॥ ॥ संभावनेऽलमिति
रिति। पर्याप्तिरित्यर्थः प्रथमया सप्तम्या चेति। संभावने इति सप्तम्यंतं प्रथमया विपरिणम्यते अलमिति प्रथमांतं सप्तम्येति संबंधः। संभावनेऽर्थे इति। नच प्रथम
या विपरिणामितत्वात् कथमत्र सप्तम्यर्थलाभ इति चेन्। अत्राहुः। संभावनेऽलमित्यावर्त्य द्वितीयस्यैव विपरिणामात्सर्वेष्टसिद्धिरिति। संभावनं क्रियासु यो
ग्यताध्यवसायः। अलमिति। तत्र संभावने समर्थ इति चेत् भवति तदा लिङ् स्यादित्यर्थः। सिद्धेति। सिद्धः अप्रयोगो यस्य तस्मिन्नलमि सति। यत्राल
शब्देन प्रयुज्यते तदर्थस्तु गम्यते तत्रेति फलितोऽर्थः। मनोरमायां तु अलमिति संभावने सिद्धाप्रयोगस्य दिति सूत्रयितुमुचितमित्युक्तं। तत्र सिद्धस्याप्रयो

सम्भावनेऽलमिति चेत्सिद्धाप्रयोगे ३।३।१५४॥ अलमर्थोऽत्र प्रौढिः सम्भावनमित्यलमीति च प्रथमया सप्तम्या च विपरिणम्यते। सम्भावनेऽर्थे लि
ङ् स्यात्तच्चेत्सम्भावनमलमित्यलमिति सिद्धाप्रयोगे सति। अपि गिरिं शिरसा भिंद्यात्। सिद्धाप्रयोगे किं। अलं कृष्णो हस्तिनं हनिष्य
ति। विभाषा धातौ सम्भावनवचनेऽयदि। ३।३।१५५॥ पूर्वसूत्रमनुवर्तते। सम्भावनार्थे धातावुपपदे उक्तेऽर्थे लिङ् वा स्यात्। न तु यच्छब्दे
। पूर्वेण नित्ये प्राप्ते वचनं। सम्भावयामि भुञ्जीत भोक्ष्यते वा भवान्। अयदि किं। सम्भावयामि यद्भुञ्जीथास्त्वम्॥ ॥ ॥ ॥

गइति विग्रहः। कस्याप्रयोग इत्यकांक्षायामर्थादलंशब्दस्येति बोध्यं। अपि गिरिमिति। संभावनद्योतकोऽपिशब्दः। गिरिविदारणपर्याप्त इति संभावनात्र ग
म्यते। कालसामान्ये अयं लिङ् लृङ् प्राग्वत्। अपि गिरिं शिरसा भेत्स्यत्। अलमिति चेत्किं। प्रायेणागमिष्यति। विभाषा धातौ। संभावनमुच्यते येन तत्सं
भावनवचनं तस्मिन् धातौ। संभावनार्थकधातावित्यर्थः। भुंजीथास्त्वमिति। अत्र पूर्वेण नित्यो लिङ्। धातौ किं। संभावनवचनस्वरूपग्रहणं माभूत्
। कृते तु संभावनवचने तद्वाचकधातोरप्रयोगादिह विभाषा न भवति भुंजीत भवान्। पूर्वेणात्र नित्यो लिङ्॥ ॥ ॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·कौ·
टी·न
उ·ति
१५२

हेतुहेतु। विभाषेत्यस्यानुवर्त्तनादाह। वास्यादिति। नमेच्चेदिति। कृष्णनतिः सुखप्राप्तौ हेतुः। भविष्यत्येवेति। लिङित्यनुवर्त्तमाने पुनर्लिङ्ग्रहणं कालविशेषप्रतिपत्त्यर्थमिति भावः। हंतीत्यादि। ननु लक्षणहेत्वोः क्रियाया इति हंतेः शतृप्रत्ययः स्यात्। हननस्य पलायने हेतुत्वात्। मैवं। देवत्रातो गलो ग्राह इति योगे च सद्विधिः। मिथस्ते न विभाष्यन्ते गवाक्षः संशितव्रत इति प्राच्योऽन्यतरस्यामिति सूत्रे भाष्ये व्यवस्थापितत्वात्। व्याख्यातं च कैयटेन तत्रैव सूत्रे देवत्रात इति संज्ञा। तत्र नुदविदोन्दत्राघ्राह्रीभ्यो ऽन्यतरस्यामिति न नत्वं भवति। देवत्राण इति। किंतु देवत्रात इत्येव। ग्रो यङि। अचि विभाषेति प्राप्तं लत्वं ने। नित्यं लत्वं। गलः। विषवाचके गर इत्यत्र न भवति। विभाषाग्रह इति णप्रत्ययो जलचरे भवति ग्राहः। ज्योतिषि न। ग्रहः। लक्षणहेत्वोरिति सूत्रेन नं तो विभाषेत्यत्र विभाषेत्यनुवर्त्त्य व्यवस्थितविभाषाश्रयणादिति शब्दयोगे सद्विधिः। गत्यथानचौ न भवतः। हंतीति पलायते। वातायने गवाक्षः। अन्यत्र

हेतुहेतुमतोर्लिङ्। ३।३।१५६। वा स्यात्। कृष्णं नमेच्चेत्सुखं यायात्। कृष्णं नंस्यति चेत्सुखं यास्यति। भविष्यत्येवेष्यते। नेह। हंतीति पलायते। इच्छार्थेषु लिङ्लोटौ। ३।३।१५७ इच्छामि भुंजीत भुंक्तां वा भवान्। एवं कामये प्रार्थये इत्यादियोगे बोध्यम्। कामप्रवेदन इति वक्त।

लवत् न भवति गोक्षः। संशितव्रत इति बहुव्रीहिः। अत्र प्राचोऽन्यतरस्यामिति संज्ञान इतीत्व विकल्पो न भवति अन्यत्र तु ((स्यं।)) नेह। इच्छन् करोति।। ख्यातः। शितः। ते पूर्वोक्तनत्वादिविधयो मिथः परस्परं एकविषयेन विकल्प्यन्ते न तु तद्विधायकसूत्रे व्यवस्थितविभाषाश्रयणादिति भावः। क्रियातिपत्तौ तु भूते भविष्यति च नित्यं लृङ्। यद्यवर्षिष्यत्सस्यमुदपत्स्यत्। इच्छार्थेषु लिङ्लोटौ एषूपपदेषु धातोर्लोटौ स्तः। सर्वलकाराणामपवादः। लिङ् चेत्यनेन समानकर्तृकेषु लिङो विधानादिह लिङ्लोटावसमानकर्तृकेषु भवत इति बोध्यं। इच्छन् करोतीति। अत्रानभिधानात् समानकर्तृकेषु अपि तु मुन्। ननु कामप्रवेदने कच्चितीत्यनेनैव लिङः सिद्धत्वादिह लिङ्ग्रहणमास्तु लोडेव विधीयतामिति चेन्न। लोटा लिङो बाधा मा भूदिति लिङ्ग्रहणस्यात्रावश्यकत्वात्। न चैवमिच्छार्थेषु लोट् चेत्येव सूत्र्यतामिति वाच्यं। चकारेण लिङोऽनुकर्षेण तत्संबद्धस्य विभाषाग्रहणस्यानुकर्षणप्रसक्त्या लकारान्तरमपि स्यादिति। नचैव १५२

५३८

CC-0. In Public Domain. Digitization by eGangotri

मपि कामप्रवेदने इत्युपसंख्यानादनेनैव सिद्धे कामप्रवेदने कच्चिदिति सूत्रं मास्त्विति वाच्यं । यत्रार्थप्रकरणादिना कामप्रवेदनं गम्यते इच्छार्थकमुपपदं
नास्ति तदर्थं तदारंभात् ॥ ॐ ॥ लिङ् च । समानकर्तृकेषु तुमुन्नित्यनेन इच्छार्थेषु लिङ्लोटाविति विहितयोर्लिङ्लोटोर्वार्थे प्राप्ते लिङः प्रतिप्रसवार्थं
सूत्रं । न चात्र वासरूपविधिना लिङ्लोटोर्नित्यं बाधा नेति शंक्यं क्तल्युट्तुमुन्खलर्थेषु न दभावात् । अथापि वासरूपविधिः स्यादेवमपि लिङेव यथा
स्याल्लोट् माभूदित्येवमर्थं तदारम्भव्यमेव । क्रियातिपत्तौ लृङ् प्राग्वत् । इच्छार्थेभ्यो । इच्छार्थेभ्यः किं । पचति गच्छति । प्रैषातिसर्गप्रैषो विधिरिति । विधिग्र

लिङ् । ३।३।१५९ ॥ समानकर्तृकेषु इच्छार्थेषूपपदेषु लिङ् स्यात् । भुञ्जीयेतीच्छति । इच्छार्थेभ्यो विभाषा वर्त्तमाने ३।३।१६० । लिङ् स्या।
त्पक्षे लट् । इच्छेत् । इच्छति । कामयेत । कामयते । विधिनिमन्त्रणेति लिङ् विधौ । यजेत् । निमन्त्रणे । इह भुञ्जीत भवान् । आमन्त्रणे । इहासी
त । अधीष्टे । पुत्रमध्यापयेद्भवान् । सम्प्रश्ने । किम्भो वेदमधीयीय उत तर्कं । प्रार्थने । भो भोजनं लभेय । एवं लोट् । प्रैषातिसर्गप्राप्तकालेषु
कृत्याश्च । ३।३।१६३ ॥ प्रैषो विधिः । अतिसर्गः । कामचारानुज्ञा । भवता यष्टव्यं । भवान्यजतां । चकारेण लोटोऽनुकर्षणं प्राप्तकालार्थम्
। लिङ् चोर्ध्वमौहूर्त्तिके । ३।३।१६४ ॥ प्रैषादयोऽनुवर्त्तन्ते । मुहूर्त्तादूर्ध्वं यजेत । यजतां । यष्टव्यं । स्मे लोट् । ३।३।१६५ ॥ पूर्वसूत्रस्य विषये लि।
ङः कृत्यानाञ्चापवादः । ऊर्ध्वं मुहूर्त्तात् यजतां स्म । अधीष्टे च । ३।३।१६६ ॥ स्म उपपदेऽधीष्टे लोट् स्यात् । त्वं स्म अध्यापय ॥

हणे कर्त्तव्ये प्रैषग्रहणं शिष्यबुद्धिवैशद्यार्थमित्याहुः । लोटोऽनुकर्षणमिति । लोट् चेति योगस्यैदमेव प्रयोजनमेकयोगत्वे तु लिङोऽप्यनुकर्षणं स्यात् । प्राप्त
कालार्थमिति । प्रैषातिसर्गयोः पूर्वेणैव सिद्धत्वादिति भावः । लिङ् चोर्ध्व । प्राप्तकालविशेषे प्राप्तस्य लिङो विधानार्थमिदं सूत्रं । प्रैषातिसर्गयोस्तु पूर्वेण
प्राप्त एव लिङ् । लोट्कृत्यानां कालविशेषेऽस्मिन् लिङा बाधा माभूदिति चकारः । पूर्वसूत्रविषय इति । प्रैषादय ऊर्ध्वमौहूर्त्तिक इति चानुवर्त्तते इति भावः
॥ ॥ ॥ अधीष्टे च । लिङोऽपवादः । योगविभागस्तु ऊर्ध्वमौहूर्त्तिकाननुवृत्त्यर्थः ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·कौ· लिङ्यदि। कालसमयवेलासु चेति। उपपदेष्विति बचनविपरिणामेन संबध्यते। तुमुनोपवादः। यद्भुञ्जीतेति। यत् कालः पचतीत्यत्र तुन् प्रेषादीनामनुप्र-
टी·न· तेः। अर्हे। योग्यकर्त्तरि गम्यमाने कृत्यतृचो भवति। त्वया कन्या बोढव्या। वहनीया। त्वं कन्यावोढा। कन्यावहारणि। कन्योद्वहने योग्यस्त्वमित्यर्थः। नन्वर्हे कि-
उ·नि· मर्थं कृत्यतृचो विधीयन्ते। यावता सामान्येन विहितत्वादर्हेपि भविष्यन्तीति चेत् अत्राहुः। अर्हतायां द्योत्यायामप्राप्तो लिङ् विधीयते तेन तु लिङा बाधा मा भूदिति
१५३ कृत्यतृचोर्विधानं। न च वासरूपविधिना समीहितसिद्धिः स्त्र्याधिकारादूर्ध्वं तदप्रवृत्तेरिति। धातुसंबंधे। इह धात्वोर्विशेषणविशेष्यभावादिसंबंधो नु-
पपन्नः। स्वार्थस्मारणेनोपक्षीणत्वात्। पदार्थसंसर्गो वाक्यार्थः कारकविशिष्टा क्रिया चेति स्वीकारात्। शब्दानुगमादृते न शाब्दोस्ति प्रत्यय इत्यवष्टभ्य

लिङ्यदि। ३।३।१६८॥ यच्छब्दे उपपदे कालसमयवेलासु च लिङ् स्यात्। कालः समयो बेला वा यद्भुञ्जीत भवान्। अर्हे कृत्यतृचश्च। ३।३।
१६९॥ चाल्लिङ्। त्वं कन्यां वहेः। शकि लिङ् च। ३।३।१७२॥ शक्तौ लिङ् स्यात्। चात्कृत्याः। भारं त्वं वहेः। माङि लुङ्। माकार्षीः। कथं मा भवतु
मा भविष्यतीति। नायं माङ् किन्तु माशब्दः। धातुसम्बन्धे प्रत्ययाः। ३।४।१॥ धात्वर्थानां सम्बन्धे यत्र काले प्रत्यया उक्तास्ततोऽन्यत्रापि स्युः। ति-
ङ्वाच्यक्रियायाः प्राधान्यात्तदनुरोधेन गुणभूतक्रियावाचिभ्यः प्रत्ययाः। वसन् ददर्श। भूते लट्। अतीतवासकर्त्तृकर्त्तृकन्दर्शनमर्थः। सो-
मयाज्यस्य पुत्रो भविता। सोमेन यक्ष्यमाणो यः पुत्रस्तत्कर्तृकम्भवनम्। ॥ शाब्दबोधे शाब्दोपि भासत इत्यभ्युपगमेपि शब्दस्य स्वार्थप्रत्ययप्रकार-
त्वं न शक्यं नरं प्रति। तथा च धातुसंबंधो वाक्येन न बुध्यत इति तस्य वाक्यार्थत्वासंभवाद्धातुशब्देन धात्वर्थो लक्ष्यते। ननु धातोः कर्मणः समानकर्त्तृकादि- ५३१
ति सन्निधौ कर्मत्वं समानकर्तृकत्वं च धातोरर्थद्वारकं विशेषणमाश्रितं तथेहापि धात्वोरर्थद्वारकः संबंधोऽस्त्विति चेत्। मैवं। तथा हि सति परस्परसंबंधा-
र्थबोधकानेकधातुप्रयोग एव प्रत्ययाः स्युः तत्र गोमानासीत् गोमान् भवितेत्यादि न सिध्येत्। न ह्यत्र वसन् ददर्शेत्यत्र वर्तमानकालो वसिरिव वर्तमा-
नकालोऽस्तिः प्रयुज्यते। न चाप्रयुज्यमानस्य धात्वन्तरेण संबंधोऽस्ति। अर्थयोः संबंधाभ्युपगमे तु धातुद्वयाभावेपि धात्वर्थद्वयस्य सत्वात् गोमानासीदि- १५३

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यादौ नानुपपत्तिः। तदेतदभिप्रेत्याह धात्वर्थानामिति। विषयबहुत्वापेक्षं बहुवचनं एकैकविषयापेक्षायां तु धात्वर्थयोरिति बोध्यं। एतच्च मनोरमानु
सारेण व्याख्यातं। केचित्तु धात्वोरर्थद्वारकसंबंधेऽभ्युपगते गोमानासीद्भवितेत्यादि न सिद्ध्येदिति मनोरमोक्तं चिंत्यमेव। तत् करोति तदाचष्ट इत्यत्रेव तद
स्यास्त्यस्मिन्नित्यत्राप्येकत्ववर्तमानत्वयोर्विवक्षितत्वात् प्रकृतसूत्रानपेक्षयैव तत्सिद्धेः। नह्यत्र मतुब्विधौ वर्तमाने लडित्यादाविव कालविशेषप
रिपहोऽस्तीत्याहुः। तन्न भाष्यकैयटाद्यननुगुणं। तथा हि भाष्ये प्रत्यय इत्यनुवर्तमाने पुनरत्र प्रत्ययग्रहणं किमर्थमित्याक्षिप्य धातुप्रत्ययानामपि संबंधे
साधुत्वं यथा स्यात् गोमानासीत् भविता वेति समाहितं। कैयटेन तु तदस्यास्त्यस्मिन्निति मतुप्प्रत्ययो वर्तमानसत्ताविशिष्टप्रकृत्यर्थे युक्तो विहित इत्युक्तं। त
या च मतुब्विधावस्तीत्यत्र एकत्वस्याविवक्षितत्वेऽपि वर्तमानत्वं विवक्षितमिति तत्ग्रंथबलादवगम्यते। किंच। दंडिमान् य इत्युक्ते वर्तमानसत्ताविशिष्ट
दंडयुक्त एवाऽऽनीयते नान्यः। तथा च गोमानासीत् भवितेति तिङंतपदानुरोधेन गोमानित्यत्र गावोऽस्यासन् गावोऽस्य भवितार इत्यतीतानागतसत्ताविशिष्टप्रकृत्य
र्थयुक्तमतुप्प्रत्ययः प्रकृतसूत्रेणैव विधीयते न तु तदुक्तरीत्या लभ्यत इति दिक्। ननु तत्तद्विधिवाक्यैरेव स्वस्वविषये प्रत्ययाः सिद्धाः किमनेन सूत्रेणेत्यत आ
ह। यत्र कालइति। वर्तमानसामीप्य इत्यारभ्य कालान्यत्वं प्रायेण प्रतिपाद्यते न तदेव चेह ग्रहणमिति भावः। वनानि पश्यन् सुषुपावित्यादौ वर्तमानभूत।
कालादि प्रत्ययेषु को वा स्वकालात् प्रच्युतो भवतीत्याकांक्षायामाह। तिङंतवाच्येति। प्रधानानुरोधेन गुणस्य नयनमुचितं न तु विपरीतमिति भावः।
प्रत्यया इति। कालांतरभाजो भवंतीत्यर्थः। भूते लडिति। एवं च उषित्वा ददर्शेत्यर्थः। अतीतेनेति। अतीतवासकर्तृको यस्य दर्शनस्येति बहुव्रीहिः। सोम।
याजीति। करणे यज इति भविष्यति णिनिः। अतएवाह। सोमेन यक्ष्यमाण इति। एवं च पश्यन् पपावित्यत्र दर्शने भूते लट् द्रष्ट्वा पपावित्यर्थः। निवेदयिष्य
तो मनो न विव्यथे इत्यत्र तु वेदयते र्भूते लृट्। स हेति शतृप्रत्ययः निवेदनकालवानित्यर्थ इत्याहुस्तं। स्यादेतत्। भाविकृत्यमासीदित्यत्र सूत्रेणैवाभा
विवादस्य भूतकालत्वे सीदतेः सत्यतीतं भवनमित्यर्थादासीच्छब्दस्याप्येककर्तृकमतीतं भवनमित्यर्थात् भाव्यासीच्छब्दयोर्युगपत्प्रयोगो न स्यात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि॰कौ॰ टी॰ त॰ उ॰ ति॰ १५५

भाविशब्दार्थस्य आसीच्छब्देनैव लाभात्। तत्तश्चैतावंतं कालं भाविनया व्यवहर्त्तुं न तदिदानीमासीदित्यर्थो ऽनावश्यं स्वीकर्त्तव्यः स्वीकारे नेनु गोमानासीन इत्यत्रापि गोमानिति व्यवहारविषय आसीदित्यर्थोऽस्तु। वसनुदद्दर्शेत्यादौ भूते लक्षणया यथायथं लङादिः स्वीकर्त्तव्यः। सोमयाजीत्यत्र नु भूतस्य वर्णिनि प्रत्यये जातेऽपि भविता इति लुङ्गतसमभिव्याहारे सति सोमयाजीति व्यवहरिष्यमाण इत्यध्याहारेण णिनि भविष्यदर्थलक्षणया वा प्रयोगो भवेदिति। किमनेन सूत्रेणेति चेत्। अत्राहुः। अध्याहारलक्षणाप्रयुक्तक्लेशं विनैव प्रायशो निर्वाहार्थं सूत्रारंभः नहि भाविकृत्यमासीदित्यादौ कश्चिदध्याहारादिक्लमगत्या भवतीति सर्वत्र तत्स्वीकर्त्तुमुचितमिति॥ ॥ क्रियासमभिहारे। द्योत्य इति। क्रियासमभिहारो धातोरेवार्थः। लोट् तु द्योतक इति भावः। तस्य।

क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः।३।४।२॥ पौनःपुन्ये भृशार्थे च द्योत्ये धातोर्लोट् स्यात्तस्य च हिस्वौ स्तः। तिङामपवादः॥ तौ च। हिस्वौ क्रमेण परस्मैपदात्मनेपदसंज्ञौ स्तस्तिङ्संज्ञौ च तध्वमोर्विषये तु हिस्वौ वा स्तः। पुरुषैकवचनसंज्ञे तु नानयोरिति दिश्यते। हिस्वविधानसामर्थ्यात्। तेन सकलपुरुषवचनविषये परस्मैपदिभ्यो हिः कर्त्तरि। आत्मनेपदिभ्यः स्वो भावकर्मकर्त्तृषु। समुच्चये। न्यतरस्याम्।३।४।३॥ अनेकक्रियासमुच्चये द्योत्ये प्रागुक्तं वा स्यात्। यथाविध्यनुप्रयोगः पूर्वस्मिन्।३।४।४॥ आद्ये लोड्विधाने लोट्प्रकृतिभूतस्यैव

चहिस्यौ स्त इति। ननु लोट् इत्यनेन तिङो लक्ष्यि त्वात्तिङामेव हिस्वौ विधीयतां। तथा सति तिङंतत्वात्पदत्वं लभ्यते इति गुणे "धातुरनुप्रयोज्यः॥ ५५०
ष्यति। वा च तध्वमोरिति वाक्यशेषोऽपि स्वरसतः संगच्छते। अन्यथा येन नाप्राप्तन्यायेन हिस्वयोस्तिङ्पवादत्वे सति तध्वमोः स्थाने तयोर्विकल्पेन विधानासंभवादुक्तवाक्यशेषो दुरुपपाद इति चेत्। अत्राहुः। लोट्शब्दस्य तिङ्लक्षणा न न्याय्या। असंजातविरोधित्वेनोपक्रमस्य प्राबल्याद्विषयसप्तम्याश्रयणेन वाक्यशेषस्योपपन्नत्वाच्च। किंच। तिङामादेशत्वे तिपूसिपूमिपां स्थाने विहितस्य हेः स्थानिवद्भावेन पित्त्वात् ङित्त्वाभावेन लुनीहीत्यत्र ई हल्यघोरिति ईत्वं न स्यात्। तृहीत्यत्र तृणह इमिती ईडागमे प्रवीहि इति स्यात्। तृण्ढीत्यत्र तु तृणह इमिती मागमे तृणेढीति स्यात्। किंच लादेशानामेव

परस्मैपदात्मनेपदसंज्ञे। ननु लादेशतिङादेशानामिति सर्वेषां तिङां द्वावपि हिस्वौ पर्यायेण स्यातां न तु तिबादीनां हि तङां स्व इति पदव्यवस्थया। तत्र।
स्थलकारस्यैवादेशौ हिस्वौ न तु तिङामित्यवश्यं स्वीकर्त्तव्यमिति। नन्वेवं द्वयोरपि लः परस्मैपदमिति परस्मैपदसंज्ञा स्यात्तत्त्वं परस्मैपदित्वमेव हि
स्वौ स्यातामत आह। तौ चेति। लोटो हिस्वौ इति वाक्ये क्रियासमभिहारे लोडिति वाक्याल्लोडित्यनुवर्त्तते तच्च हिस्वावित्यस्य विशेषणं। न च हिस्वौ।
लोटो भवत इति सामर्थ्याल्लोट् धर्मकावित्यर्थः। संपद्यते। तत्रापि मुख्यलोट्संबन्धिनो धर्मस्य प्रत्ययत्वस्यातिदेशो व्यर्थः। स्थानिवत्त्वेनैव तत्सि
द्धेः। किन्तु स्थानिवद्भावलब्धलोट्व्यपदेशकौ तिङ्भूतौ यौ हिस्वौ तयोरेव धर्म इहातिदिश्यते। केचित्तु क्रियासमभिहारे लोडित्यनन्तरं लाघवा
त्तस्य हिस्वाविति वक्तव्ये लोड्ग्रहणसामर्थ्याल्लोट् धर्मकाववहिस्वौ लोटः स्थाने भवत इत्यर्थः संपद्यते तथा च पूर्वोक्तरीत्या तिङ्भूतौ यौ हिस्वौ तयो
रेव धर्मद्वहातिदिश्यत इति सिद्धमिष्टं। एवं च लोटो हिस्वाविति वाक्ये पूर्ववाक्याल्लोड्ग्रहणं नानुवर्त्तनीयमित्याहुः। तिङ्संज्ञौ वेति। तेन पदत्वमिति
इः। तिङ् इति च भवति। हिस्वविधानं इति। यदि हि पुरुषवचनसंज्ञे अपि स्यातां तर्हि युष्मत्सामानाधिकरण्ये एकत्वे च सत्येव हिस्वाभ्यां भाव्यं तत्र च
व्यर्थो हिस्वविधिरिति भावः। हिः कर्त्तरि स्वो भावकर्मकर्त्तृष्विति। उक्तं च कैयटेनापि हि शब्दस्य कर्त्ता वाच्यः स्वशब्दस्य तु भावकर्मकर्त्तार इति। अत्रन
व्याः। अल्पे ह्रस्वे इत्यादौ कप्रत्ययवत्क्रियासमभिहारे लोडयं स्वार्थिक एव। नन्वस्मिन् लोटि लः कर्मणि चेत्याद्यर्थो नाभ्युपेयः प्रयोजनाभावात्।
यदि तु हि शब्दस्य कर्त्ता अर्थः स्यात् पुनः पुनरतिशयेन वा यानत्वं तस्यार्थ इति वक्ष्यमाणग्रन्थः स्वरसत्तो न संगच्छेत्। याहि याहीत्यादौ तु कर्त्रादिप्रती
तिर्यातीत्यादि समभिहारेण सुलभैव। यथा स्थाचक्रे इत्यत्र तङादेशात्प्रागेव आमः परस्य लेर्लुक्यामंत्रे संख्याप्रतीत्यभावेपि चक्रे इत्यनुप्रयोग
वशात् सकर्तृकारकाद्विरूपा क्रियेत्यविद्यमानापि संख्या प्रतीयते तथैव हि स्वान्तेष्वपि कालकारकसंख्याप्रतीतिर्यातीत्याद्यनुप्रयोगवलेन भवती
त्याहुः। स्यादेतत्। क्रियासमभिहारे हिस्वौ लोड्वा चत्वध्वमोरिति सूत्रमस्तु। तथा च हिस्वौ लोटौ न भवत इति लोट् धर्मकावित्यर्थः पूर्वोक्तरीत्यास्या

सि.कौ. दिति सर्वेष्टसिद्धौ किमनेन लोटद्गिपक्षांतकरणेनेति चेत् अत्राहुः। हिस्वयोर्यदि लोट्स्थानिकत्वं न स्वीक्रियते तर्हि तयोर्लोडादेशत्वाभावेन ईहल्य

टी.त. चोरित्यादि प्रवृत्त्या लुनीहीत्यादि सिद्धावपि हिस्वोर्न स्यलोडंतत्वं न सिध्येत्। तथा च। हंत चेत्यनुदात्तविकल्पो न स्यात्। हंत प्रलुनीहीत्ययं लुनाति। एवं

उ.ति. च लोडंतत्वलाभार्थं लोटो हिस्वाविति विधीयते। यदि तु हिस्वौ लोडित्युक्तेऽपि लोड्त्वभावाश्रयेण लोडंतत्वकार्यं हंत चेति स्वरविकल्पः सिध्यतीति ब्रूषे।

१५५ तर्हि स्थानिवत्सूत्राद्भावलभ्य लोट्धर्मको हिस्वाविति स्वार्थस्यानाश्रयणाल्लोडादेशकार्यौ णिपरस्मैपदात्मनेपदतिङ्संज्ञा न सिध्यंति। तथा च पूर्वो

क्तदोषस्तदवस्थः स्यात्। लोट् लोटो हिस्वौ तु स्तु केतु स्थानिवत्त्वेन हिस्वयोर्लोट्त्वात् लोडंतकार्यस्वरविकल्पः सिध्यति क्रियासमभिहारे लोट्

इति वाक्यात् लोडित्यनुवर्त्य हिस्वौ लोडिति भाग एव व्याख्याततत्वात् लोडादेशत्वेन परस्मैपदात्मनेपदसंज्ञादीन्यपि सिध्यंतीति॥ ॥ ॥

५५८

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयइति। चिनोतेर्भावे एरजित्यच्। प्रागुक्तमिति। धातोर्लोट् लोटो हिस्वौ तध्वमोर्विषये वेत्यर्थः। यथाविध्यनु। पूर्वस्मिन् क्रियासमभि
हारविषये। अत्र संख्याकारकादीनां हिस्वाभ्यामप्रतीतेस्तद्बोधनायानुप्रयोगो न्याय्यत एव प्राप्तस्तदनुवादेन यथाविधीति नियम्यते। तथा च पक्षे

समुच्चये सामान्यवचनस्य। ३।४।५॥ समुच्चये लोड्विधौ सामान्यार्थस्य धातोरनुप्रयोगः स्यात्। अनुप्रयोगाद्यथायथं लडादयस्ति
वादयश्च। ततः संख्याकालयोः पुरुषविशेषार्थस्य चाभिव्यक्तिः। क्रियासमभिहारे द्वे वाच्ये। याहियाहीति याति। पुनः पुनरतिश
येन वा यानं स तस्यार्थः एककर्तृकं वर्तमानं यानं। याहीत्यस्य इति शब्दस्तु भेदान्वये तात्पर्यं ग्राहयति। एवं यातः। यान्ति। यासि॥
याथः। याथ। यात यातेति यूयं याथ। याहियाहीत्ययासीत्। यास्यति वा। अधीष्वाधीष्वेत्यधीते। ध्वं विषये पक्षेऽधीध्वमधीध्वमिति
यूयमधीध्वे। समुच्चये तु सक्तून्पिब धानाः खादेत्यभ्यवहरति। अन्नं भुंक्ष्व दाधिकमास्वादयस्वेत्यभ्यवहरते। तध्वमोस्तु पिबत खादते
त्यभ्यवहरथ। भुङ्ध्वं आस्वादयध्वमित्यभ्यवहरध्वे। पक्षे हिस्वौ। अत्र समुच्चीयमानविशेषाणामनुप्रयोगार्थेन सामान्येनाभेदान्वयः। प
क्षे सक्तून् पिबति धानाः खादति अन्नम्भुङ्क्ते दाधिकमास्वादते। एतेन पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः। विग्र
ह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिव इति व्याख्यातम्। अवस्कन्दनलवनादिरूपा मुक्तानयनपरोक्षा एककर्तृका अस्वा
स्थ्यक्रियेत्यर्थात्। इह पुनः पुनरवस्कन्देत्यादिरर्थ इति व्याख्यानं भ्रममूलकमेव द्वितीयसूत्रे क्रियासमभिहार इत्यस्यानुवृत्तेः लोड
न्तस्य द्वित्वापत्तेश्च। पुरीमवस्कन्देत्यादिमध्यमपुरुषैकवचनमित्यपि केषांचिद्भ्रम एव। पुरुषवचनसंज्ञे इह नेत्युक्तत्वात्॥ इति लका
रार्थप्रक्रिया॥ इति भट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुद्यामुत्तरार्द्धे तिङन्तं समाप्तम्॥ ०॥ १ प्राप्तस्यानियमनाय याहियाहीति गच्छ
तीत्यादि न भवति। यद्यप्यन्यत्र इन्हन्पूषार्यम्णां शावित्यादौ नियमशब्देन परिसंख्या व्यवह्रियते सर्वनामस्थाने चेत्यादिना शौ तत्तद्भिन्ने च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·कौ· दीर्घप्राप्ते घोरन्यत्र ननन्निवृत्तिपरत्वात्तथापीह कदाचिद्याती त्यस्य कदाचिन्त् गच्छतीत्यस्यानुप्रयोगे प्राप्ते यथाविधीत्ययमप्राप्तांशपरिपूरणाय व्रीही
टी·त· नवहंतीत्यादिवद्विधीयत इति नियमविधिरेव। एतेन मीमांसकप्रसिद्धनियमविधिः पारशास्त्रे प्रसिद्ध इति वदंतः परास्ताः॥ इ वाच्य इति। वार्तिक।
उ·ति· मिदं हि रुक्तप्रक्रियायां व्याख्यातं। इति शरद्स्त्विति। ननु इति शब्देन व्यवधानाद्यातीत्यस्यानुप्रयोगत्वं कथमिति चेत्। अत्राहुः। अनुप्रा(?)व्दस्येहानुवा
१५६ दित्वमात्रपरत्वाद्व्यवहितविपरीतप्रयोगयोरिष्टापत्तिः। एतच्च भाष्यकारीयोदाहरणस्य प्रत्याख्यानाभ्यां निर्णीयते। न च समुच्चये सामान्यवचनं
स्येति विशेषस्योक्तत्वात्सूत्रैकदेशस्य पूर्वस्मिन्नितिपदस्य वैयर्थ्यमस्तु नाम। यथाविध्यनुप्रयोग इति तु यथाविधीति नियमार्थं स्वीकर्तव्यमेव अ
न्यथा याहि याहीति गच्छतीत्यादि स्यादिति वाच्यं। यस्माल्लोट् विधिस्तत्प्रकृतिकतिङं तस्यैवोपस्थितत्वेनानुप्रयोक्तुमर्हत्वात् नूपस्थितपरित्यागेन यत्
किंचिद्धातुप्रकृतिकतिङं तस्यानुप्रयोगोऽर्हनेति। अत एव स्वं रूपं शब्दस्येत्यपि सूत्रं प्रत्याख्यातं भाष्यकारेण। अग्नेर्ढगित्यादौ विधिवाक्यगतस्याग्ना
रवाचकाग्निशब्दादरूपस्थितत्वात् तत्परित्यागेनानुपस्थितवन्ह्यादिशब्देभ्यो ढगादिर्न भवेदिति। एवं चास्मिन्प्रत्याख्याते यथाविध्यनुप्रयो
गसूत्रे मीमांसकप्रसिद्धनियमविधेः स्थितोदाहरणमन्यदन्वेषणीयमिति दिक्। एवमिति। याहि याहीति यातः याहि याहीति यांतीत्येवमूह्यमित्य
र्थः। पक्षे इति। वाचनध्वमोरित्युक्तत्वात् हिस्वाभावपक्षे इत्यर्थः। तध्वमोरित्यत्र तशब्देन मध्यमपुरुषबहुवचनं गृह्यते ध्वंसाहचर्यात्। यद्यपि ध्व
मित्यस्यात्मनेपदत्वमस्तीति तत्साहचर्येण प्रथमपुरुषैकवचनस्य ग्रहणं प्राप्नोति। तथापि बहुवचनत्वमध्यमत्वरूपधर्माभ्यां मध्यमपुरुषब
हुवचनमेव गृह्यत इत्याशयेनोदाहरति यात यातेति यूयमिति। अस्यापि लोटो लङ्वत्त्वात्तस्थस्थमिपामिति यात इत्यत्र थस्य तादेशः। विध्यादि
लोट् विषये त्वनुप्रयोगेऽपि थस्य तादेशप्रवृत्तेर्यूयं यातेत्यनुप्रयोक्तव्यं। अधीध्वं अधीध्वमिति। सचाभ्यामित्ययम्॥ ॥ ॥ ॥ १५६

५५२

अधीध्वे इति । विध्यादिलोड्विषये तु अधीध्वमित्येवानुप्रयोक्तव्यं । भावकर्मणोस्तु भूयस्व भूयस्वेति भूयते । पच्यस्व पच्यस्वेति पच्यते इत्याद्युन्नेयं समुच्चये
न्यतरस्यामिति सूत्रे क्रियासमभिहार इत्यननुवर्तनात् । द्वितमकत्वैवोदाहरति । सक्तून् पिब धानाः खादेति । अभ्यवहरथेति । विध्यादिलोड्विषये तु ।
अभ्यवहरतेत्यनुप्रयोक्तव्यं एवं अभ्यवहरध्वे इत्यत्राप्युक्तविषये अभ्यवहरध्वमित्यनुप्रयोक्तव्यं । पक्षे हित्वाविति पिब खादेत्यभ्यवहरथ । भुंक्ष्व
आस्वादस्वेत्यभ्यवहरध्वे इत्युदाहार्यं । लवनादीति । आदिशब्देन मोषणाहरणे ग्राह्ये । अनुवृत्त्यभ्युपगमे बाधकमाह । लोडंतस्य विभ्रम एवेति । पुरु
षांशे वचनांशे च लोडंशे तु भ्रम एवेति भावः एवमुक्तोदाहरणेषु हित्वांतेषु ———— तिङंतत्वं यथायथं परस्मैपदात्मनेपदांतत्वं च सिद्धं पुरुषवचन ।
संज्ञे तु विधानसामर्थ्याद्धिस्वयोर्न स्त इत्युक्तमिति सर्वेष्टसिद्धिः ॥ ॥ इति श्रीपरमहंसपरिव्राजकाचार्यश्रीवामनेन्द्रस्वामिचरणारविंदसेवका
॥ ॥ ज्ञानेंद्रसरस्वतीकृतौ सिद्धांतकौमुदीव्याख्यायां तत्वबोधिन्याख्यायां तिङंतकांडं समाप्तम् । ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri



श्रीगणेशायनमः श्रीमते रामानुजायनमः समस्तजगतां मीशौ जगदानंदकारकौ जगतीजनकौ वन्दे पार्वतीपरमेश्वरौ कर्तरि कृदिति तिङ्क्लिष्ट्रत्ययसकलसंज्ञाकर
णानंतरमेव तिङ् ज्ञानाधीनज्ञानत्वात्तिङ्निरूपणानंतरमेव कृतां निरूपणमुचितमिति तिङो निरूपणकतो विरूपयितुमाह· धातोः ननु तिङ् निरूपणात्प्रागेव स्त्र्य
र्थे ऽनुदकेकिन्· अविदूरगृतिगन्यादिना किन्नादि निरूपणं कृतमिति कथमियं भवदुक्ता संगतिः संगच्छतेइति चेत्· अत्राहुः किन्नादि निरूपणस्यात्र प्रास
गिकत्वात्· प्राधान्येन च कृतामत्रैव निरूपणमिलोक्तपुंकावकाशइति· यद्यपि धातोरेकाचो हलादेरिति सूत्राद्धातोरित्यनुवर्त्तते एवंतथापि· आर्द्धधातुकसंज्ञा
यामाश्रितशब्दव्यापारलाभाय पुनर्धातोरिति ग्रहणं कृतम्· अन्यथा आर्द्धधातुकं शेषइत्यनेन तिङ् शित्तिङ्क्लिन्नस्य धातोर्विहितप्रत्ययमात्रस्यार्द्धधातुकसंज्ञा
यां लूभ्यांपूभ्यांमित्यादावपिड्णौस्यात्तं धातोर्विहितत्वेन भ्यामादेरार्द्धधातुकत्वात् पुनर्धातुग्रहणे कृते तु नवन्नव्यादयइव धातोरित्येवमविधानाद्भ्यामादेरार्द्धधातु
कत्वं नेति दिक्· प्राग्लादेशाद्धात्वधिकारइतिपक्षो ऽयुक्तइत्याशयेनाह· आत्ततीयसमासेरितिनृतीयाध्यायसमाप्तिपर्यंतमित्यर्थः प्राग्लादेशादितिपक्षे

ॐ॥ श्रीगणेशायनमः॥धातोः॥३।१।९१॥ आतृतीयसमासेरधिकारो ऽयं॥ तत्रोपपदंसप्तमीस्थम्॥ कर्तरि कृत्॥१।३।९३॥

तुतिङ्शित्सार्वधातुकमित्यत्र धातोरित्यधिकाराभावात् शित्प्रत्ययमात्रस्य सार्वधातुकत्वेन भ्रसोपि सार्वधातुकमपि ङित्ति ङित्वे च हशीनित्यादौ पार्ङ्नीतिगु
णः स्यादिति ज्ञेयम्· स्यादेतत्· धातोर्लकारेसतितत्स्थिन्यसतो ——— नित्यत्वात्करिष्यतीत्यादौ प्रथमस्य प्रत्ययपरत्वेति वाद्यप्रसंगः यत्र तु निवाधाश्रयो विक
रणोस्त्वत्रैव व्यवधानाभावाद्भवतीत्यादौ तिवादयः स्युरितिचेत्·मैवम्· विकरणेभ्यो नियमोवलीयानिति स्वीकारात्· अथवा विहितविशेषणाश्रयणेन धातोर्वि
हितस्य लस्येति व्याख्यानादिष्टसिद्धिः नन्वेवं विहितविशेषणाश्रयणे विड्ढ्लाभइत्यस्माद्धातोर्विहितस्य लटः शब्विकरणव्यवायेपि विहितो लटो वेति णलादयः
स्युरितिचेत् अत्राहुः धातुना ऽत्र विहितं विशिष्यते विहितानानंतर्यमिति· तथा चायमर्थः संपद्यते· धातोर्विहितस्य विहितो ऽनंतरस्य लटो णलादयइत्यभ्युप
॥ ॥ गमात्· वेत्तेरेव विहितस्य लटो णलादयो भवंतिनतुविंदतेर्लट इति दिक्षु विधेया निर्दिष्टा ॥ ॥ ॥ ॥



५५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वरितत्वाच्चाधिकारसूत्रमिदमित्याह अधिकारोऽयमिति तत्रोपपदमित्यादि। एतेन कृत्संज्ञोपपदसंज्ञयोरिह विधानसौष्ठवाय द्वितीयो धात्वधिकार आवश्यक
इति ध्वनितम्। अयं भावः यदि द्वितीयधात्वधिकारो न स्यात्तदा पूर्वधात्वधिकारेऽपि कृदुपपदसंज्ञे स्याताम्। इष्टापत्तौ तु सप्तमीनिर्दिष्टमात्रस्योपपदत्वेन स्मिलुङीत्यादौ
लुङ्नेउपपदेत्यश्चित्स्येव मनिष्टोऽर्थः प्रसज्येतेति दिक्। न धात्वधिकारसप्तम्यस्य कृत्संज्ञायां करिष्यतीत्यादेः प्रत्ययस्य कृत्त्वेन कृदन्तमिति प्रातिपदिकत्वादौत्सर्गिक
मेकवचनमिति सर्वसमन्तत्वेन सुप्रत्ययप्रसंगाच्च। तस्मादधिकारविशेषेऽनयोः संज्ञयोर्विधानार्थमयमधिकार इति॥ ॐ॥ वासरूपोऽस्त्रियाम्। अपवादेनानि
त्यं बाधे प्राप्ते कचिदुत्सर्गस्यापि प्रवृत्त्यर्थमिदं सूत्रम्। अत एवाचायत्। अहो लोपश्चेत्यादावपवादविषयेऽतव्यदादयोऽपि प्रयुज्यन्ते भवितव्यम्। कार्य्यं कर्तव्यं क
रणीयम् वाच्यम् वक्तव्यमित्यादि परिभाषेति। अधिकारसूत्रमिति सौकर्येतु स्त्र्यधिकारेण विच्छेदात् असरूपसूत्रात्प्रवृत्त्या आस्तिलाभंते आसते भोक्तुमित्यादि रूपा
णि न सिद्ध्यन्ति इच्छार्थेभ्यो भोजनार्थत्वादासनस्य पूर्वकालता गम्यते क्त्वाप्रत्ययश्च तुमर्थाधिकाराद्वा भवति लकारोऽपि तत्रैवेति समानविषयत्वात्तुमर्थो वा ध्यवाधक

वासरूपोऽस्त्रियाम्। ३।१।९४। परिभाषेयं। अस्मिन्धात्वधिकारेऽसरूपोऽपवादप्रत्यय उत्सर्गस्य बाधको वा स्यात् स्त्र्यधिकारोक्तं विना॥

भावः स्यात् किं च वर्त्तात्काद्युत्सर्गः स चरादिष्ट यतेन वा ध्येत न चेष्टापत्तिः रकाराहीनि नामानि शृण्वन्तो मम पार्वती त्यादिप्रयोगविरोधात्। अमुमेवार्थं मनसि निधाय हरद
त्तादिभिः परिभाषेयमित्युक्तम्। एतेन शकि लिङ् चेति ज्ञापकादसरूपविधेरनित्यत्वेन स्त्र्यधिकारादूर्ध्वमुक्ते ल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्तीति सिद्धान्तः
संगच्छत इति दिक्। वासरूप इत्यत्रासरूप इति छेदः अन्यथा लाघवे विशेषाभावेन सन्देहाय सरूपो वेति ब्रूयादित्याशयेनाह। असरूप इति। असरूप इति किम्।
कर्मण्यण् उत्सर्ग आतोऽनुपसर्गे क इत्यपवादः स तूत्सर्गस्य नित्यं बाधको यथा स्यात्। गोदः कंबलदः। न च कृत्तोप्यसरूपत्वं गृहीतो अणकयोरप्यसरूपत्वान्नेष्टसि
द्धिरिति वाच्यम्। नानुबंधकृतमसारूप्यमिति सिद्धान्तात्। अस्त्रियामित्यत्र स्त्रीशब्दः स्वर्यते स्वरितेन चाधिकारावगतिरित्याशयेनाह। स्त्र्यधिकारोक्तं विनेति।
तेन स्त्रियां क्तिन्नित्युत्सर्गमप्रत्ययादित्यपवादो नित्यं बाधते। चिकीर्षा जिहीर्षा न न्वस्त्रियामित्यत्र स्त्रीशब्दस्य स्वरितत्वं॥

कृ.
सि.कौ.
टी.त.
१४८

प्रतिज्ञायस्वरितेनाधिकारावगतिरित्यादिव्याख्यां विहाय स्त्रियामभिधेयायां वा सरूपविधिर्नेति स्त्रियामित्येवं प्राक् अमुच्चार्य विहिते वासरूपविधिर्नेति याव्याख्या
यतामिति चेन्न अत्राहुः स्त्रियां वाच्यायामिति पक्षे लव्यालवितव्येति यत्तो विषये तव्यो न स्यात् द्वयोरपि हस्त्रीवाचकत्वात् स्त्रियामिति प्राक् उच्चारणपक्षे तु व्याव
क्रोशी व्यावकुष्टिरिति कर्मव्यतिहारे णचो विषये क्तिन् स्यात् द्वयोरपि स्त्रियामित्युच्चार्य विधानात् ततश्च स्त्र्यधिकारोक्तं विनेति व्याख्यैव ज्यायसीति दिक्॥ ॥
कृत्याः अत्र प्रत्ययइत्यादिवत् क्तत्पूर्वत्वधिकारे ण्वापीष्टसिद्धौ बहुवचनमनुक्तप्रत्ययसमुच्चयार्थं तेन केलिमरादयो ज्ञापकसिद्धा इति नोपसंख्येया इत्याहुः ण्वुलः

कृत्याः। ३।१।९५॥ अधिकारोऽयं ण्वुलः प्राक्। कर्तरि कृत्। कृत्प्रत्ययः कर्तरि स्यादिति प्राप्ते। तयोरेव कृत्यक्तखलर्थाः। ३।४।७०। एते भावकर्मणो
रेव स्युः। तव्यत्तव्यानीयरः। ३।१।९६॥ धातोरेते प्रत्ययाः स्युः। तकाररेफौ स्वरार्थौ। एधितव्यम्। एधनीयं त्वया। भावे औत्सर्गिकमेकवचनं क्लीब
त्वं च। चेतव्यश्चयनीयो वा धर्मस्त्वया। वसेस्तव्यत्कर्तरि णिच्च॥ वसतीति वास्तव्यः। केलिमर उपसंख्यानम्। पचेलिमा माषाः। पक्तव्याः। भिदे
लिमाः सरलाः। भेत्तव्याः। कर्मणि प्रत्ययः। वृत्तिकारस्तु कर्मकर्तरि चायमित्याह। तद्भाष्यविरुद्धम्। कृत्यचः। ८।४।२९॥ उपसर्गस्थान्नि
मित्तात्परस्याचउत्तरस्य कृत्स्थस्य नस्य णत्वं स्यात्। प्रयाणीयम्। अचः किम्। प्रमग्नः। निर्विण्णस्योपसंख्यानम्। अचः परत्वाभावान्नकारेण व्य
वधानाच्चाप्राप्ते वचनम्। परस्य णत्वं। पूर्वस्य ष्टुत्वं। निर्विण्णः। णेर्विभाषा। ८।४।३०॥ उपसर्गस्थान्निमित्तात्परस्य ण्यन्ताद्विहितो यः कृत्
स्थस्य नस्य णो वा स्यात्। प्रयापणीयम्। प्रयापनीयम्। विहितविशेषणं किम्। यकाव्यवधाने यथा स्यात्॥ ॥ ॥ ५५५

प्राप्तिरिति। ण्वुलस्तृचावित्यतः प्रागित्यर्थः। रोगाख्यायां ण्वुल्बहुलमिति नाऽवधिः प्रत्यासत्तिन्यायात्। अवधिविशेषे ज्ञापकं तर्हि कृत्यतृचश्चेत्यत्र कृत्यान्पृथक्कृत्वा
ग्रहणमेव। न चैवं तृचो कृत्यत्वेऽपि ण्वुलः कृत्यत्वं दुर्वारं स्यादिति वाच्यं तयोरेवेति भावकर्मणोरेव ण्वुलस्यान्तं तु कर्तरीति वाच्यम्। भाष्य एव ण्वुलः कृत्यत्वमाशंक्यागोप
ज्ञापकमिति सिद्धान्तितं तत्वात्। वृत्तिकारस्तु सूत्रे प्राक्ण्वुल इति प्रविक्षिप्य तयोरेवेत्यनेन भावकर्मणोरपरामृश्यते एवम्॥

कारस्तु कर्तृयोगव्यवच्छेदार्थस्तदाह· भावकर्मणोरेवेति· पचप्येनतन्कौण्डिन्यन्यायेनैवलभ्यते· तथापि स्पष्टप्रतिपत्त्यर्थमेवकारइत्येके· तन्न्यायस्यानित्यत्वज्ञापना
र्थमित्यन्ये स्वरार्थाविति· तकारस्तित्स्वरितमिति स्वरितत्वार्थः रेफस्तु उपोत्तमं रितीति मध्योदात्तार्थः कृत्यचः उपसर्गादित्यनुवर्त्ततेरषाभ्यामिति च तत्रतान्स्थ्यान्ताच्छ
ष्ठमित्याह· उपसर्गस्थादिति· ह्रान्त्यस्य नस्येति· अचउत्तरस्येत्यस्य कृतो विशेषणत्वात्तु प्रयापणमित्यादौ नस्यादिति भावः प्रमग्न इति इदमज्ञो शुद्धौ ओदितश्चेति नि
ष्ठानत्वं तस्यासिद्धत्वात्· स्कोरिति सलोपः चोः कुः निर्विण्णस्येति विद्वेः ण स्यादनुभ्यामिति नत्वपूर्वस्य च प्रयापणीयमिति या प्रापणे णिचि अर्तिह्रीतिपुक्· णेरनिटीति णि
लोपः॥ ॐ॥ प्रयाप्यमाणमिति· यातेर्णिचि पुकि ण्यन्तस्य धातुत्वेन वर्त्तमाने कर्मणि लटि लटः शानच् तस्य शित्वेन तिङ्· शिदिति सार्वधातुकत्वे सार्वधातुके यगि
त्यनेन यकि कृते णेरनिटीति णिलोपे आनेमुगिति मुगागमे णत्वे च सिध्यति रूपम्· विहितविशेषणाकरणे तु यकाव्यवधानेन ण्यन्तात्परत्वाभावान्न सिध्यति· न

प्रयाप्यमाणम् प्रयाप्यमानम्॥ णेरुपसर्गात्वन्नेत्यनुवृत्तम्। दुर्यापणं दुर्यापनं। हलश्चेजुपधात्। ८।४।३१। हलादेरिजुपधात्कृतो नस्याचः परस्य णो वा स्या
त्। प्रकोपणीयं प्रकोपनीयम्। हलः किम्। ओहणीयम्। इजुपधात्किम्। प्रवपणीयम्। इजादेः सनुमः। ८।४।३२। सनुमश्चेद्भवति तर्हि इजादेर्ह
लन्ताद्विहितो यः कृत्तत्रस्थस्यैव। प्रेङ्खणीयम्। इजादेः किम्। प्रमङ्गनीयम्॥ ९ वाड्व्यवायेपीति भविष्यतीति वाच्यम्· रषाभ्यांपर

स्य नस्य णत्वं श्रोतस्मादिति निर्दिष्टपरिभाषया प्राप्ति नस्याव्यवधानस्य रामाणामित्यादिसिद्धये व्यवायेपीति योगविभागेन वा घेमतिआदर्शनेन्यादावतिप्रसंगे प्रा
प्तत्र अट्कुप्वाङि· त्रयोणनियमार्थः आङ्· ग्रहणंतु पदव्यवायेपीति निषेधं वाधितुमिति स्थितम्· णेर्विभाषेत्यत्रतु ण्यन्तकृतोरव्यवधानस्यापेक्षा कथमङ्गह
णेन निवार्यतेति भावः हलश्च· इजुपधस्य हलन्तत्वाव्यभिचाराद्धलइत्यनेन तदादित्वं लक्ष्यतइत्याह· हलादेरिति· प्रकोपणीयमिति कुप क्रोधे· ओहणीयमिति उ
ह वितर्के· अत्रकृत्यच इति नित्यमेव णत्वं· एवं प्रवपणीयमित्यत्रापि डुवप् वीजसंताने· इजादेः सनुमः कृत्यचइत्येव सिद्धे नियमार्थमिदमित्याह सनुमश्चेदित्यादि इ
हहलइत्यनुवर्त्ततदन्तंतपरं न तु तदादिपरम्· इजादेर्हलादित्वासंभवात्तदाह हलन्तादिति· विहितइति· यदि तु विहितविशेषणं न व्याख्यायेत तर्हि नियमार्थता

सि·कौ· टी·न· १४८

लभ्येत णिजं नाद्विहितस्यापि कृत्स्य नकारस्य णिलोपे कृते हलन्तात्परत्वेन णेर्विभाषेति विकल्पं बाधितुं विधेः संभवात्· इष्टापत्तौ तु अणिजंतप्रकृतिकानीयरप्र
त्ययांतप्रेंखणीयमित्याद्युदाहरणं न स्यात्· किंतु णिजंतप्रकृतिकमेवोदाहरणं स्यात् किं च· अस्य सूत्रस्य नियमार्थत्वाभावात् प्रगानीयमित्यत्र कृत्यच इत्यनेन णत्वं
स्यात्· अतो विहितविशेषणमवश्यं स्वीकार्यमिति दिक्· नन्वेवमपि नियमार्थता न युज्यते· प्रेन्वनमित्यत्र विध्यर्थत्वसंभवात्· नुमः कारेणाव्यवधानात् कृत्यस्य

नुमग्रहणमनुस्वारोपलक्षणम्। अङ्कुप्वाङिति सूत्रेप्येवं। तेनेह न। प्रेन्वनं। इह तु स्यादेव। प्रोम्भणम्। वानिंसनिक्षनिन्दाम्। ८।४।३३। एषां नस्य णो
वा स्यात् कृति परे। प्रणिंसितव्यं। प्रनिंसितव्यं। न भाभूपूकमिगमिप्यायीवेपाम्। ८।४।३४। एभ्यः कृन्नस्य णो न। प्रभानीयं। प्रभवनीयम्। पूञ एवे
ह ग्रहणमिष्यते पूङः· लुञ प वर्गीयः सोमः। ण्यन्तभादीनामुपसंख्यानम्। प्रभापनीयं। खशान्नः शासयो वेत्यन्तःणत्वप्रकरणोपरि तद्वेद्यं। पत्वस्या
सिद्धत्वेन शकारव्यवधानान्न णत्वं। प्रख्यानीयं। कृत्यल्युटो बहुलम्। ३।३।११३। स्नात्यनेन स्नानीयं चूर्णम्। दीयते ऽस्मै दानीयो विप्रः। अचो यत्। ३।
१।९७। अजन्ताद्धातोर्यत् स्यात्। चेयं। जेयं। अजग्रहणं शक्यमकर्तुम्। योगविभागोप्येवम्। तव्यदादिष्वेव यतोपि सुपठत्वात्। ईद्यति। यति परे
आत ईत् स्यात्। गुणः। देयं। ग्लेयं। तकिशसिचतियतिजनिभ्यो यद्वाच्यः। तक्यं। शस्यं। चत्यं। यत्यम्। जन्यम्। जनेर्यद्विधिः स्वार्थः ण्यन्तादपि रूपसिद्धेः
न च वृद्धिप्रसङ्गः। जनिवध्योश्चेति निषेधात्। हनो वा यद्वधश्च वक्तव्यः। वध्यः। पक्षे वक्ष्यमाणो ण्यत्। घात्यः। पोरदुपधात्। ३।१।९८। पवर्गान्ताददु
पधाद्यत् स्यात्। ण्यतोऽपवादः। शप्यम्। लभ्यम्। नानुबन्धकृतमसारूप्यम्। अतो न ण्यत्। तव्यदादयस्तु स्युरेव। आङो यि। ७।१।६५। आङः परस्य ल
भेर्नुम् स्याद्यादौ प्रत्यये विवक्षिते। नुमि कृते ऽदुपधत्वाभावाण्ण्यदेव। आलम्भ्यो गौः॥ ॥ १९ चरदत्तस्यानयाङ्गैरित्यत आह॥ ॥ नुमग्रहणमिति। अ

ङ्कुप्वाङिति सूत्रस्थत्वादत्रापि नुमानुस्वारो लक्ष्यते इति विध्यर्थत्वमिह न शंकनीयमिति भावः। प्रोम्भणमिति। उंभ पूरणे इत्यस्माद्भावे ल्युट्। वानिंस कृत्यच इत्यतोऽनु
वर्तनादाह· कृति परे इति· ण्यन्तभादीनामिति· ण्यन्तस्य प्रकृत्यंतरत्वादप्राप्ते वचनम्· हेरचङीति सूत्रे अचङी· ॥ ॥ ॥

५४५

राम १४८

CC-0. In Public Domain. Digitization by eGangotri

तिपर्युदासेनप्रकृतिग्रहणेप्यधिकस्यापिग्रहणमितिज्ञापनादेतत्सिद्धमितिकेचित्तदरुः तद्भ्रमत्वात्· ज्ञापनंतुकृत्वमात्रविषयकमिति भाष्यादौसिद्धंनित्यत्वात् अचोय
त्· धातोरितिवर्तते· अज्ग्रहणंचधातोर्विशेषणंतद्विशेषणेनतदन्तविधिसिद्धः आह· अजन्तादिति· शक्यमकर्तुमिति· अत्रकेचित् अज्ग्रहणमजन्तभूतपूर्वादपियथास्यादि
त्येवमर्थमपेक्षितंतेनदित्स्यंधित्स्यमित्यत्रयतिकृतेयतोनावइत्याद्युदात्तत्वंसिध्यतिण्यतिकृतेतुतित्स्वरितमितिप्रसज्येतनचदित्स्यंधित्स्यमित्यत्रऋहलोरितिण्यतःप्रस
क्तिरेवनास्तीतिवाच्यम्· आर्द्धधातुकविवक्षायामेवअतोलोपेकृतेहलन्तत्वेनतत्संभवादित्याहुस्तदापानतः आर्द्धधातुकेविवक्षितेयद्यतोलोपःस्यात्तदाहिदित्स्यंसंभवेत् लो
पस्तुआर्द्धधातुकेपरतएवोचितः अन्यथापरनिमित्तत्वाभावेनस्थानिवत्त्वाभावेणण्यतित्यादावुपधावृद्धिप्रसंगादितिभावःसुपठत्वादिति· इयंधातवोऽजन्ताहल
न्ताश्चतत्रहलन्तात् ण्यतंवक्ष्यतीतिपरिशेषादजन्तादेवयद्भविष्यतीतिभावः तकिशसि तकहसने· शसुहिंसायाम्· चतेयाचने· पतुकेचिच्छंसीतिसानुस्वारंपठन्तितदु
पेक्ष्यम्· ईडवन्दवृशंसदुहांण्यतइतिसूत्राविरोधेनशंसेर्ण्यतएवस्वीकर्तव्यत्वात् हनोवायदिति· हनेर्वायत्स्यात् यत्संनियोगेनवधादेशश्चनित्यएव· यद्यपिवधमर्हतीती
तिवध्यइतिपाणिनेर्छेदाघश्चेत्यतोयदित्यनुवर्तमानेदंडादिभ्यइतितद्धितेनयतापिसिध्यति तथाप्यसिवध्योमुसलवध्यइतिसमासेनसिध्येत् कृतिपुनःकर्तृक
रणेकृत्तेतिसिध्यति· नचासिवधमर्हतीतिविग्रहेकृतसमासादेवतद्धितोऽस्त्वितिवाच्यम्· दंडादिषुकेवलस्यवधशब्दस्यपाठात्प्रत्ययविधौतदन्तविधेश्चप्रतिषे
धात्स्वरेभेदाच्च· असिवधशब्दाद्यतिहिसतितित्स्वरितमितिस्वरितःप्रसज्येतकृदन्तेनसमासेतुकृदुत्तरपदप्रकृतिस्वरेणवध्यशब्दआद्युदात्तः अतएववध्यशब्देनतद्धि
तेनेनसहसुप्सुपेतिसमासइत्यपिनवाच्यम्· अन्तोदात्तत्वप्रसंगादिति· दिकृघात्यइति· हनस्तोचिण्णलोरितितत्वं· होहन्तेरितिकुत्वम्· पोरदुपधात्· पोःकिम्· पाक्यम्·
अदुपधात्किम्· कोप्यम्· तपरकरणंकिम्· आप्लृव्याप्तौ· आप्यम्· नानुबंधेति· अनुबंधानामनवयवत्वात्तत्कृतमसारूप्यंनाश्रीयते· एकान्तत्वपक्षेपिददा
तिदधात्योर्विभाषेतिविभाषाग्रहणात्लिंगान्नाश्रीयते· अन्यथाअनुबंधकृतादसारूप्यादेवशविषयेण्योभविष्यतीतिकिम्· तेनविभाषाग्रहणेन· ननश्च
यसहृयेपिशप्यामित्यादौण्यन्नभवतीतिभावः· एतच्चददातीत्यादिसूत्रेविभाषाग्रहणमनुबंधानामनेकान्तत्वपक्षेशविषयेण्यस्याप्राप्तौविभा· ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·कौ
टि·त
१५०

माएकान्तत्वपक्षे तु प्राप्तविभाषेति यत्तद्व्याख्यातं न ग्राह्यम् इति व्याख्याग्रहणं लिंगं मनोरमायामेकान्तत्वपक्षे एवोपन्यस्तमिति तदनुसारेणेहाप्युक्तम्· अनेकान्तत्व पक्षे लक्ष्मा
माएकान्तत्वपक्षे तु प्राप्तविभाषेति यत्तद्व्याख्यासाधारणं विभाषाग्रहणं लिंगं मनोरमायामेकान्तत्वपक्षे एवोपन्यस्तमिति तदनुसारेणेहाप्युक्तम्· अनेकान्तत्व पक्षे लक्ष्मा
धारणं लिंगमुद्दीचामाङ इति सूत्रे माङो ग्रहणं· मेङ इत्यत्र हि सत्यपि ङ· कारानुबंधे तस्यानवयवत्वात्· एजन्तत्वमविहतमित्यादि च उपदेशसूत्राल्लक्ष्यीकारादि
तिदिकृ· एयदेवेति· तेननित्स्वरितमिति स्वरितेसति आ लम्प्य इत्यत्र समासान्तोदात्तत्वं बाधित्वा कृदुत्तरपदप्रकृतिस्वरेण स्वरितान्तत्वमिष्टं सिध्यति यत्तु यत्तोना

उपाल्लम्भने· साध्यम्· ७·१·६६॥ उपलम्भ्यः साधुः स्तुत्यो किम्। उपलब्धुं शक्य उपलभ्यः शकि सहोश्च ३·१·९९॥ शक्यं सत्वं वा हम दचर यम श्वानुपस
र्गो ३·१·१००॥ गद्यम् मद्यं चर्य्यं चरेराडि चागुरौ। आचर्य्यो देशः गन्तव्य इत्यर्थः। अगुरौ किम्। आचार्य्यो गुरुः। यमेर्नियमार्थमसोपसर्गान्मा
मूदिति प्रयाम्यम्। निपूर्वात्स्यादेवानेन तत्र मवेद्धि नियम्यमिति वार्त्तिकप्रयोगात्। एतेन नियम्यस्य नायुक्तिः। त्वया नियम्या ननु दिव्यच क्षुषे
त्यादिव्याख्यातम्। नियमे साधुरिति वा। अवद्यपण्यवर्य्यागर्ह्यपणितव्यानिरोधेषु। ३·१·१०१॥ वदेर्नञि उपपदे वदः सुपीति यत्क्यपोः प्राप्त
यार्य्ये देव सोपि गर्हायामेवेष्टम् यार्थं निपातनम्। अवद्यम्यापम्। गर्ह्यं हि किम्। अनूद्यं गुरुनाम। तद्धि न गर्ह्यं वचनानर्हं स्वात्। आत्मनामगुरोर्न्ना
मनामातिकृपणस्य च। श्रेयस्कामो न गृण्हीयाज्ज्येष्ठापत्यकलत्रयोरिति स्मृतेः। पण्या गौः व्यवहर्त्तव्येत्यर्थः पाण्यमन्यत्। स्तुत्यर्हमित्यर्थः। अनि
रोधः प्रतिवन्धस्तस्मिन्विषये वृङो यत्। पातेन वर्य्याः कन्याः। वृत्यान्या। वत्सं करणं। ३·१·१०२॥ वहन्त्येनेनेति वह्यं शकटं। करणं किम्। वाह्यं वो
ढव्यं। अर्य्यः स्वामिवैश्ययोः। ३·१·१०३॥ ऋगतौ। असमाद्यत्। एयतोऽपवादः। अर्य्यः स्वामी वैश्यो वा। अनयोः किं आर्य्यो ब्राह्मणः प्राप्तव्य इत्यर्थः॥

उपान्मन्त्र्यो सायाम्· यादेप्रत्यये विवक्षिते उपपूर्वाल्लभेर्नुम्स्यात्मन्त्रशंसायाम्· सा च इह गम्यमा
वरुन्या सुदात्तत्वेनोत्तरपदाद्युदात्तत्वं प्रसज्येतेत्याशंक्याह एवमिति भावः॥ ॥ उपान्मन्त्र्यो सायाम्· यादेप्रत्यये विवक्षिते उपपूर्वाल्लभेर्नुम्स्यात्मन्त्रशंसायाम्· सा चेह गम्यमा
वरुन्या सुदात्तत्वेनोत्तरपदाद्युदात्तत्वं प्रसज्येतेत्याशंक्याह एवमितिभावः॥ इहापि यादौ प्रत्यये विवक्षिते इ राम
ननपानिशेषणम्· धात्वर्थस्तु प्राप्तिरेव· तेन यस्य प्राप्तिर्यस्माद्धा प्राप्तिः प्रशंसा हेतुर्भवति तदिहोदाहरणम्· विपरीतं तु प्रत्युदाहरणम्· इहापि यादौ प्रत्यये विवक्षिते इ ॥ १५०
त्यर्थान्नुमि कृते एयतिसत्यन्तस्वरितत्वं भवति· यत्तु ससुत्तरपदाद्युदात्तत्वं स्यात्· प्राचा तु स्वरे विशेष्यमनालोच्यैयोर्नुपधादिति यतमेवस्वीकृत्य·॥

५५७

CC-0. In Public Domain. Digitization by eGangotri

यत्निर्यत्रेनुमितिव्याख्यातंतदाकरविरोधादुपेक्ष्यमित्याहुः गदमदव्यत्ययेनयं चमर्थेसप्तमीएभ्योऽनुपसर्गेभ्योयत्स्यात् एयतोऽपवादः अनुपसर्गेकिम् नैनेषद्ये।
कार्यमिदंनिगाद्यमितिश्रीहर्षः यमेरिति पोरदुपधादित्यनेनैवसिद्धेरितिभावः नियमेसाधुरिति यमः समुपनिविषुचेतिवैकल्पिकेऽप्प्रत्ययेकृतेतत्रसाधुरिति
तद्धितोयदित्यर्थः यद्यपिअस्मिन्प्रक्षेकृत्यानांकर्तरिवेत्यस्याप्रवृत्तेः कर्तरितृतीयादुर्लभातथापिलयेतिनेनेतिचकरणलब्धविवक्षया तृतीयेतिस्थितस्यगतिर्बो
ध्याकेवलायत्तंकृत्वानिशब्देनसमासः त्यपरे यद्वायमोऽपरिवेषणेमिदितिमतमाश्रित्यपर्यवसितंनियमयन्नित्यादाविवमितत्वंस्वीकृत्यएयन्ताद्यत् बोध्यः अ
थवासंज्ञापूर्वकविधेरनित्यत्वात् एयत्येववृद्धिर्नप्रवृत्तेतिदिक् एवंचवार्त्तिकप्रयोगोप्यन्यथासिद्धइतितद्बलेननिपूर्वाद्यदितिनकल्पनीयमितिभावः अनूद्यमि
ति अत्रवदेः क्यपेवमवतियजादित्वात्संप्रसारणंनलोपोनञः तस्मान्नुडचि व्यवहर्त्तव्येति यद्यपियणितव्यशब्दोऽर्थद्वयसाधारणः तथापिनिपातनस्येहरू
ढ्यर्थत्वाद्व्यवहर्तव्यएवायंनिपात्यते उक्तंचहरिणाधातुसाधनकालानांप्राप्त्यर्थंनियमस्यच अनुबंधविकाराणांरूढ्यर्थंचनिपातनमिति अनुबंधविकाराणां
नियमस्यचप्राप्त्यर्थमितिपूर्वेणान्वयः शतेनेति शतशब्दोऽनियतपरः कन्यायावरणेवरयितॄणांनियमोनास्तीत्यर्थः वर्येति संभक्तव्येत्यर्थः वृङ् संभक्तौ वित्यस्ये
दंनिपातनंतत्रैवानिरोधरूपस्यार्थस्यसंभवादितिभावः अनिरोधेष्वित्यस्यानुक्तौत्वंआविष्यादितिध्वनयति वृणोति एतिसुध्याष्मित्यादिनावृञः क्यप् रहसूत्रेऽव
धादीनिनिर्विभक्तिकानिपृथक्पदानितत्रवर्योपसर्याववद्यावर्त्तोऽनुक्रियन्तेनत्वयंद्वंद्वेनजसंतेननिर्देशः तेनवर्येतिस्त्रियामेवनिपात्यते अस्त्रियांतुवृङः ऋहलोर्ण्य
त्वार्याऋत्विजः ऋत्विजामपियज्ञमात्रेवरणीयत्वादनिरोधोस्तिस्त्रीत्वंतुनास्तीतिएयदेवभवति एतच्चवृत्तिकारमतंनचात्रएतिस्त्विजिक्यपूर्शंक्यः तत्रवृञएव।
ग्रहणंनतुवृङः वृत्तिसिद्धांतात् मद्दिगुद्वंद्वाज्जसानिर्देशादितिमत्वापुंल्लिंगेपियतंप्रायुंक्तसुग्रीवोममवर्योऽसाविति वाह्यमिति वहनकर्मेत्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कृ०
सि०कौ० उपसर्य्या उपपूर्वात्सरतेः सर्त्तेर्वा यन्निपात्यते कालः प्राप्तोऽस्याः काल्या । न इस्य प्राप्तमिति वर्त्तमाने कालाद्यदिति यत् । प्रजननं प्रजनः गर्भग्रहणं भावे घञ् । जनिव
टी०त० ध्योश्चेति वृद्धिनिषेधः उपसार्येति कर्मणि ण्यत् । कर्त्तरि यदिति । तयोरेवेति भावे प्राप्ते कर्त्तरि यन्निपात्यते इति भावः संगतं चेदिति । नपुंसके भावे क्तः विशेष्यमिति । इहाजर्य्य
२५१ उपसर्य्या काल्या प्रजने ।३।१।१०४। गर्भग्रहणे प्राप्तकाला चेदित्यर्थः । उपसर्य्या गौः । गर्भाधानार्थं वृषभेणोपगन्तुं योग्येत्यर्थः । प्रजने काल्येति किम् । उपसा
र्य्या काशी प्राप्तव्येत्यर्थः । अजर्य्यं सङ्गतम् ।३।१।१०५। नञ्पूर्वाज्जीर्य्यतेः कर्त्तरि यत्सङ्गतं चेद्विशेष्यं । न जीर्य्यतीत्यजर्य्यं तेन सङ्गतमार्य्येण रामाजर्य्यं
कुरु द्रुतमिति भट्टिः । मृगैरजर्य्यं जरसोपदिष्टमदेहबन्धाय पुनर्ब्बबन्धेत्यत्र तु सङ्गतमिति विशेष्यमध्याहार्य्यं सङ्गतं किम् । अजरिता कम्बलः । भावे तु स
ङ्गतकर्त्तृकेऽपि ण्यदेव । अजार्य्यं सङ्गतेन । वदः सुपि क्यप् च ।३।१।१०६। उत्तरसूत्रादिह भाव इत्यनुवर्त्यते । वदेर्भावे क्यप् स्याच्चाद्यत् । अनुपसर्गे सुप्युपप
दे ब्रह्मोद्यं ब्रह्मवद्यं ब्रह्मवदः । तस्य वदनमित्यर्थः । कर्म्मणि शत्ययावित्येके । उपसर्गे तु ण्यदेव । अनुवाद्यं । अपवाद्यं । भुवो भावे ।३।१।१०७। क्यप् स्या
त् । ब्रह्मणो भावो ब्रह्मभूयं । सुपीत्येव । भव्यं । अनुपसर्ग इत्येव । प्रभव्यं । हनस्त च ।३।१।१०८। अनुपसर्गे सुप्युपपदे हन्तेर्भावे क्यप् स्यात्तकारश्चान्तादे
शः । ब्रह्मणो हननं ब्रह्महत्या । स्त्रीत्वं लोकात् । एतिस्तुशास्वृदृजुषः क्यप् ।३।१।१०९। एभ्यः क्यप् स्यात् । ह्रस्वस्य पिति कृति तुक् । इत्यः । स्तुत्यः । शास
इदङ्हलोः । शिष्यः । वृ इति वृञो ग्रहणं न वृङः । वृङ्स्तु वार्य्या ऋत्विजः । आदृत्यः । जुष्यः । पुनः क्यब्ग्रहणं परस्यापि ण्यतो बाधनार्थम् । अवश्यस्तुत्यः ।
शासिदुहिगुहिभ्यो वेति काशिका । शास्यं शिष्यं । दुह्यं दोह्यं । गुह्यं गोह्यं । प्रशस्यस्य श्रः । ईडवन्दवृशंसदुहां ण्यत इति सूत्रद्वयबलाच्छंसेः सिद्धम्

मिति समुदायस्य संगतं वाच्यमित्यर्थो न प्राप्तः पर्यायाणां युगपत्प्रयोगासंभवेनाजर्य्यसत्तां संगतमिति प्रयोगानापत्तेः तेन संगतमिति भट्टिप्रयोगानुपपत्तेश्च
वदेः सकर्मकत्वाद्भावे क्तत्वप्रत्यययोर्दुर्लभः लः कर्मणीति सूत्रद्वयेन तयोरेवेत्यत्रापि सकर्मकेभ्यः कर्मणि अकर्मकेभ्य एव भावे इति सिद्धान्तात् अत आह भावइत्य
नुवर्त्यत इति । भुवो भाव इत्यत्रानुपसर्ग इत्यनुवर्त्य नात् निरुपसर्गस्य भवतेरकर्मकत्वात्तयोरेवकृत्यक्तेति भावे प्रत्ययसिद्धौ भावग्रहणस्य वैयर्थ्यं शङ्कायां भावग्र

सि० कौ० त० ५५७ २५१

मिति भाष्ये स्थितं तद्व्याख्यास्यन्नाह हिंसायामनमाह कर्मणीति। सुप्यनुपसर्ग इति। सुपि किम्। हननमाचिख्यासोः घातः। अनुपसर्गे किं प्रघातः। भावे चेत्येतिसु। एष्यतीति। सुप्य
नुपसर्गे भावे इति च निवृत्तमिति भावः। एतौ तौ ल एव ग्रहणेन ङि॰कोः। तयोरधिपूर्वयोरेव ग्रहणादेतौ इति निर्देशानुपपत्तेः। तथाच रसार्थवेदानामध्येयं व्याकरणमिति भा
ष्यप्रयोगे व्ययदेवप्रयुक्तः केचित्तु इ एवदिक इति वक्तव्यमिति वचनादिकोपि भवतीत्यधीत्यमानेत्युदाहरन्ति। इत्यइति। कथं तर्हि उपेयमिति। ईङ् गताविति दिवादिकात् यत्। नच
ङ इति। इङश्चेति ज्ञापकात्। तत्र हि इङश्च द्विभ्यां साहचर्यादात्मनेपदिनो इङ एव ग्रहणमिति भावः। परस्यापीति। ओरावश्यके इति। प्रामस्य तस्यावकाशोऽवश्यंलाव्य

आङ्पूर्वादञ्जेः संज्ञायामुपसंख्यानम्। अञ्जू व्यक्तिम्रक्षणादिषु। बाहुलकात्करणे क्यप्। अनिदितामिति नलोपः। आज्यम्। ऋदुपधाच्चाक्लृपि
चृतेः ३।१।११०। वृतू वृत्यम्। वृधू वृध्यम्। क्लृपिचृत्योस्तु कल्प्यं चर्त्यम्। तपरकरणं किं। कृता कीर्त्यम्। अनित्यण्यन्ताश्चुरादय इति णिजभावे ण्य
त्। णिजन्तात्तु यदेव। ई च खनः। ३।१।१११। चात्क्यप्। आद्गुणः। खेयम्। इ चेति ह्रस्वः सुपठः। भृञोऽसंज्ञायाम्। ३।१।११२। भृत्याः कर्मकराः। भर्तव्या
इत्यर्थः। क्रियाशब्दोऽयं न तु संज्ञा। समश्च बहुलम्। संभृत्याः। संभार्याः। असंज्ञायामेव विकल्पार्थमिदं वार्त्तिकम्। असंज्ञायां किम्। भार्या नाम क्षत्रि
याः। अथ कथं भार्या वधूरिति। इह हि संज्ञायां समजेति क्यपा भाव्यम्। संज्ञापर्युदासस्तु पुंसि चरितार्थः। सत्यं विभर्तेः भृ इति दीर्घान्तान्नु क्यपादे
र्वा ण्यत्। क्यप्तु भरतेरेव न तु बन्धग्रहणे इति परिभाषया। मृजेर्विभाषा। ३।१।११३। मृजेः क्यब्वा स्यात्पक्षे ण्यत्। मृज्यः। चजोः कु घिण्ण्यतोः। ७।
३।५२। चस्य जस्य च कुत्वं स्यात् घिति ण्यति च परे। निष्ठायामनिट इति वक्तव्यम्। तेनेह न। गर्ज्यः। मृजेर्वृद्धिः। मार्ग्यः॥ ११मिति। आवश्यकादिव सायं

सुन्यन्त्यादेश कपोऽवकाशः अवश्यस्तुत्य इत्यादावुभयप्राप्तौ विप्रतिषेधे परमिति ण्यत्स्यात्। तन्मा भूदिति पुनः क्यब्विधिरिति भावः॥ ॥ आङ्पूर्वादञ्जेरिति। नन्वेण्य
त्येव नलोपः कस्मान्नोक्त इति चेन्न। कुत्वप्रसंगात् स्वरप्रसंगाच्च। तस्मात् क्यबन्त एवाज्यशब्दः। नन्वेवमवग्रहः प्राप्नोति। न चेष्टापत्तिः आज्यं कि मासोदित्यादौ पदकारैरस
हकरणादिति चेत्। अत्र भाष्यं। न लक्षणेन पदकारा अनुवर्त्याः पदकारैस्तु लक्ष्यम्॥

कृ·
सि·कौ· णमनुवर्त्यमिति· सत्यपि आवांतरपदलेऽन्त्यलिजंपूर्वमिरित्यादाविव संप्रसारणानुरोधेन क्वचिदवग्रहो नुक्रियते इत्यादितदाशयः क्वापि चृत्यो ह्निविति· कृपू सामर्थ्ये· चूर्णी
टी·त· ह्निसाग्रं यनयोः कल्पमिति कृपेर्लत्वस्यासिद्धत्वात्· ऋलृवर्णयोस्सावर्ण्यविधानाच्च ऋदुपधत्वम्· ह्रस्वः सुपठ इति· दीर्घपठतः सूत्रकृतस्त्वयमाशयः दीर्घनिर्देशः
१५२ रर इति प्रश्लेषार्थस्तत्र द्वितीयरकारो ये विभाषेत्यात्वबाधनार्थः अन्यथा ये विभाषेत्यस्यावकाशः स्नायते खन्यते इत्यस्यावकाशः यस्मिन्पक्षे आत्वं नास्ति आत्वप
क्षे तु उभयप्रसंगे परत्वादनेन रुः स्याच्चात्वं स्यात्· ये विभाषेत्यत्र हि ये इति विषयसप्तमी· तथाच· यकारादौ बुद्धिस्थ एव प्राप्तमात्वमंतरंगम्· ईकारस्तु क्यपा सह
विधानाद्बहिरंग· तथा चांतरंगस्यात्वस्य बाधनाय प्रश्लेषेण द्वितीयरकारविधिरावश्यक इति· ईचेति दीर्घोच्चारणं कृतमिति· दीर्घप्रत्याचक्षाणस्य भाष्यकृत ।
स्त्वयमाशयः ईत्वमंतरंगं परनिमित्तमनपेक्ष्य विधानात् क्यप्सन्नियोगशिष्टं हि तत्· आत्वं तु बहिरंगं ये इति परसप्तम्याश्रयणात्· एवं च ईत्वेनात्वबाधो न्याय्य एवेति दी
र्घो न पठनीयः ह्रस्वपाठे मात्रालाघवमस्तीति तदनुरोधेन ये इति परसप्तम्याश्रयणमपि युक्तमिति· स्यादेतत्· ईचेति ह्रस्वादेशाभ्युपगमे तस्यादेशस्य· पूर्वेणास
ह आद्गुणे तस्यासिद्धतया ह्रस्वस्यापि तीति तुक् स्यात् षत्वतुकोरसिद्ध इति षत्वे तु किंच कर्त्तव्ये एकादेशशास्त्रस्यासिद्धत्वस्वीकारात्· अतो दीर्घ एव विधेय इति चेत्· मैवम् 448
पदांतपदाद्योरादेशोऽसिद्धो न तस्योपरीति सिद्धं ज्ञात· अन्यथा वृक्षेऽछत्रमित्यत्रऽप्याद्गुणस्यासिद्धतया छे चेति ह्रस्वाश्रयो नित्यस्तुक् स्यात्· इष्यते तु दीर्घात्पदांताद्वे
ति पैकल्पिक इति दिक्· भृञः संज्ञायामित्य संज्ञाग्रहणसामर्थ्याद्भार्येत्यत्र सूत्रांतरेणापि क्यप् न भविष्यतीत्यत आह पुंसि चरितार्थ इति· भार्या नाम क्षत्रिया इत्य
त्रेत्यर्थः तदनुबंधेति· डुभृञ् इत्यनेकानुबंधत्वात्· विभक्तेः क्यपोऽप्रसंग इति भावः मृजेर्विभाषा· ऋदुपधत्वान्नित्यं क्यपि प्राप्तेऽयमारंभः चजोः यथासंख्यं नेह विव राम
क्षितं तेन रक्तं रागादिति निर्लिंगादिति केयट हरदत्तादिभिरुक्तं तदालोच्याह· चस्य जस्य चेत्यादि· घिति ण्यति च चस्य कुत्वं घिति ण्यति च जस्य कुत्वमिति विवेकः ॥ १५२

CC-0. In Public Domain. Digitization by eGangotri

न्यंकुरिति· कृत्सारङ्करून्यंकुरंकुशांबरौ रोहिषादयमरः राजसूय· यज्ञेति· राजानं क्षीणां निरूप्यादेन तथा दर्शनादिति भावः युक्त अभिषव इत्यस्य ह्रस्वांतत्वादाह· निपा
तनाद्दीर्घ इति· निपातनं च रूढ्यर्थमपि· तेनाद्यपक्षे अश्वमेधादौ द्वितीयपक्षे ज्योतिष्टोमादौ च नातिप्रसंगः उत्वमिति· तस्य रपरत्वाद्धलि चेति दीर्घ इति भावः नित्यं क्य
पीति· तेन वहः सुपि क्यप् चेति यत् प्रत्ययो नेति भावः भिद्योद्ध्यौ· क्यपीति· कर्तरीति शेषः उप्य इति· तोपदागम इवोद्य भिद्ययोर्नामधेयमद्य शब्दविवेचितत्वमिति रघु

न्यंक्वादीनां च॥ ७।३।५३॥ कुत्वं स्यात्। न्यंकुः। नावञ्चेरिति उ प्रत्ययः। राजसूयसूर्य्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः॥ ३।१।११४॥ एते सप्त क्यपि
न्ता निपात्यन्ते। राज्ञा सोतव्यः अभिषवद्वारा निष्पादयितव्यः। यज्ञः। लतात्मकः सोमो राजा स सूयते कंड्यतेऽत्रेति अधिकरणे क्यप् निपातनाद्दीर्घः। रा
जसूयः। अर्द्धर्चादिः। सरत्याकाशे सूर्य्यः। कर्त्तरि क्यप् निपातनादुत्वं। यद्वा सुवति कर्म्मणि लोकं प्रेरयतीति क्यपो रुट्। मृषोपपदाद्व
देः कर्म्मणि नित्यं क्यप्। मृषोद्यम्। विशेष्यनिघ्नाः या उच्छ्राय सौन्दर्य्यगुणा मृषोद्याः। रोचतेऽसौ रुच्यः। गुपेरादेः कत्वं संज्ञायां। सुवर्णरजतभिन्न
न्धनं कुप्यं। गोप्यमन्यत्। कृष्टे स्वयमेव पच्यन्ते कृष्टपच्याः। कर्म्मकर्त्तरि। शुद्धे तु कर्म्मणि कृष्टपाक्याः। न व्यथतेऽव्यथ्यः। भिद्योद्ध्यौ नदे॥ ३।१।११५॥ भि
देरुज्झेश्च क्यप्। उज्झेर्द्धत्वं च भिनत्ति कूलं भिद्यः। उज्झत्युदकमुद्ध्यः। नदे किं। भेत्ता। उज्झिता। पुष्यसिद्ध्यौ नक्षत्रे॥ ३।१।११६॥ अधिकरणे क्यप् नि
पात्यते। पुष्यन्त्यस्मिन्नर्थाः पुष्यः। सिद्ध्यन्त्यस्मिन्सिध्यः। विपूयविनीयजित्या मुञ्जकल्कहलिषु॥ ३।१।११७॥ पूङ्नीजिभ्यः क्यप्। विपूयो मुञ्जः।
रज्ज्वादिकरणाय शोधयितव्य इत्यर्थः। विनीयः कल्कः। पिष्ट औषधविशेष इत्यर्थः। पापमिति वा। जित्यो हलिः। बलेन कृष्टव्य इत्यर्थः। कृष्ट
समीकरणार्थं स्थूलकाष्ठम्। अन्यत्र विपव्यं। विनेयम्। जेयम्। प्रत्यपिभ्यां ग्रहेः॥ ३।१।११८॥ छन्दसीति वक्तव्यं। प्रतिगृह्यम्॥ ॥

पुष्यसिध्यौ॥ नक्षत्रे किम्· पोषणं सेधनं· अधिकरणे ल्युट् पुष्यसिध्ययोः पर्यायत्वेपि स्वरूपपरत्वात्सूत्रे द्वंद्वः पुष्ये तु सिध्यतिष्याविरमरः पापमिति चेति· तथा च कल्कोप्यय
नेन कल्कमित्युपक्रम्य तान्येव भावोपहतानि कल्क इति भारते दर्शनात् कल्कः पापाशये पापे दंभे विट्किट्टयोरपीति कोशाच्चेति भावः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि॰ कौ॰ त॰ प्र॰

वक्तव्यमिति· वृत्तिकृता तु सूत्रे प्रक्षिप्तम्· क्वचिदुदाहरणेऽनुच्छन्दस्येव· मन्त्रस्य न प्रगृह्यत्वं तस्मान्नापि गृह्यत्वम्· लोकेऽपीति· एतदेवेति भावः॥ ॥ पदान्तेति· एच्चैषु·
गृहे· कस्मात् अवगृह्यमिति· यस्य पदस्यावग्रहः क्रियते तत्पदम्· अवग्रहो विच्छेदः अवान्तरपदसंज्ञां सूचयितुं पाठकाले किंचित्कालमवसानं प्रगृह्यमिति
यस्य प्रगृह्यस्य पदम्· प्रग्रहस्तु प्रकृतिभावाद्यलब्धभावे परस्परमचोः सन्निकर्षः· यस्य प्रगृह्यसंज्ञा विहिता तत्प्रगृह्यमिति निवृत्तिः· यद्यपि पदाद्यवयवस्यैव वचनादेः
प्रगृह्यसंज्ञा न तु पदस्य तथाप्यवयवधर्मस्य समुदाये उपचारो बोध्यः· अवगृह्यप्रगृह्यग्रहणं प्रातिशाख्यादिप्रसिद्धपरिभाषया निरूढौ पदास्वैरीति· स्वेन

पदास्वैरिबाह्यापक्ष्येषु च ३।१।११९॥ अवगृह्यम्। प्रगृह्यम् पदम्। अस्वैरिणः परतन्त्राः गृह्यकाः शुकाः पञ्जरादिबन्धनेन परतन्त्रीकृता इत्यर्थः। बाह्यायां
ग्रामगृह्या सेना। ग्रामबहिर्भूतेत्यर्थः। स्त्रीलिङ्गनिर्देशात्पुंनपुंसकयोर्न। पक्षे भवः पक्ष्यः। दिगादित्वाद्यत् आर्यैर्गृह्यते आर्यगृह्यः। तत्पक्षाश्रित इत्य
र्थः। विभाषा कृवृषोः ३।१।१२०॥ क्यप् स्यात्। कृत्यम्। वृष्यम्। पक्षे ऋहलोर्ण्यत् ३।१।१२४॥ ऋवर्णान्ताद्धलन्ताच्च धातोर्ण्यत् स्यात्। कार्यम्। वर्ष्यम्॥ यु
ग्यं च पत्रे ३।१।१२१ पत्रं वाहनम्। युग्यो गौः। अत्र क्यप् कुत्वं च निपात्यते। अमावस्यदन्यतरस्याम् ३।१।१२२॥ अमोपपदाद्वसेरधिकरणे ण्यत् वृ
द्धौ सत्यां पाक्षिको ह्रस्वश्च निपात्यते। अमा सह वसतोऽस्यां चन्द्रार्कौ अमावास्या अमावस्या वा। ऋहलोर्ण्यत्। चजोरिति कुत्वम्। पाक्यम्। पाणौ सृजे
र्ण्यद्वाच्यः। ऋदुपधलक्षणस्य क्यपोऽपवादः। पाणिभ्यां सृज्यते पाणिसर्ग्या रज्जुः। समवपूर्वाच्च। समवसर्ग्या। न क्वादेः ७।३।५९। क्वादेर्धातोः कु

ईरितुं शीलमस्य स्वैरी स्वतन्त्रः· स्वादीरेरिणोरिति वृद्धिः· नञ्पूर्वस्तु अस्वैरी· गृह्यका इति· अनुकम्पायामिति कन्· गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यका उच्यन्ते· विभा
षा कृवृषोः· करोतेः क्यप्यप्राप्ते वृषेस्तु ऋदुपधत्वान्नित्यं प्राप्ते· यमारम्भः· पत्रं वाहनमिति यत्तत्र्यनेनेत्यर्थे दाम्नीशसेत्यादिना करणे ष्ट्रन्· युग्यो गौरिति· यद्यपि तद्वहतिरथयुगप्रा राम:
सङ्गमिति तद्धितयत्नापि रूपं सिध्यति· तथापि ण्यतं बाधितुमिदं सूत्रम्· अन्यथा ह्यियोग्यो गौरिति स्यात्· अन्ये त्वाहुः युग्यो हस्तीति हिंस्रार्थातुदात्ततेन तु तद्धितेन न १५२
सिध्यति· न हि हस्ती युगं वहति· कृतात्तु सिध्यति· युज्यते संबध्यतेऽस्मा कु·॥

CC-0. In Public Domain. Digitization by eGangotri

थादिनेति॰ ततश्चात्र वैयर्थ्यशङ्कैव नास्तीति दिक्॰ रुदैरासन्त्यामिति॰ नेनामावास्यायावेति विहितस्तद्धितो हृस्वपक्षे विसिध्यति एकदेशविकृतस्यानन्यत्वात्॰ यदि तु यत्नस्य
यां न सेदं पाक्षिकं निपातनमित्याश्रीयेत तदा यत्नामुक्तेः घिकरणेष्वप्येवमावस्यदुर्लभः अत एवापि बाहुलकाश्रयणेन एवमपि व्ययदं तमनुपविहितस्तद्धितो स दन्तान्न स्यादिति
दिक्॰ कुहलोः पञ्चम्यर्थे षष्ठी कुरिति कुधातो निग्रहणं किन्तु कवर्णस्य हलास्सह चर्यात्परं कार्यमिति निर्देशाद्दोऽडवर्देत्यादिलिङ्गाच्च॰ कुहलोरित्येतदनुवर्तमानस्याधा
नाविशेषणं विशेषणेन तदन्तविधिस्तदेतदाह॰ कवर्गान्तादित्यादि॰ अत्रेदमवधेयम् मूलपुस्तकेषु सर्वत्र विभाषाकृदृषोरित्यत्र पक्षे ण्यन्त॰ भवतीति वक्तुं क्वह

गर्ज्यम्। वार्त्तिककारस्तु। चजोरिति सूत्रे निष्ठायामनिट इति पूरयित्वा न क्वादेरित्यादि प्रत्याचख्यौ। तेन अर्जितर्ज्जि प्रभृतीनामकुत्वन्निष्ठायां सेट्त्वा
त्। शुचुम्लुचु प्रभृतीनान्तु क्वादित्वेपि कुत्वं स्यादेवा सूत्रमते तु यद्यपि विपरीतं स्यात्तथापि यथोत्तरं मुनीनां प्रामाण्यं। अजिव्रज्योश्च। ७।३।६०॥
न कुत्वं। समाजः। परिव्राजः। भुजन्युब्जौ पाण्युपतापयोः। ७।३।६१। एतयोर्गौ निपात्यौ। भुज्यतेनेनेति भुजः पाणिः। हलश्चेति घञ्। न्युब्जन्त्यस्मिन्निति
न्युब्जः। उपतापो रोगः। पाण्युपतापयोः किं। भोगः। समुद्गः। प्रयाजानुयाजौ यज्ञाङ्गे। ७।३।६२। एतौ निपात्येते यज्ञाङ्गे। पञ्च प्रयाजाः। त्रयो नुयाजाः
यज्ञाङ्गे किम्। प्रयागः। अनुयागः। वञ्चेर्गतौ। ७।३।६३। कुत्वन्न। वञ्च्यं माणगतौ। किं। वंक्यं काष्ठं। कुटिलीकृतमित्यर्थः। ओक उचः के। ७।३।६४। उ
चेर्गुणे कुत्वं निपात्यते के परे। ओकः। शकुन्तवृषलौ। अगुपधलक्षणः कः। घञ्ञासिद्धे अन्तोदात्तार्थमिदं॥ १९ लोण्येदिति सूत्रं पठित्वा पश्चादृशुग्यं च

पक्षे मावस्यदन्यतरस्यामिति पठितम्॰ मनोरमायां तु सूत्रपाठक्रमेणायुग्यं च पत्रे॰ अमावस्यदन्यतरस्यामिति व्याख्याय पश्चात्॰ कुहलोरिति सूत्रं व्याख्यातं॰ न
थवात्रापि व्याख्यातमिति॥ ॥ गर्ज्यमिति गर्जेर्ण्यति कुहलोरिति ण्यति चजोरिति कुत्वे प्राप्ते यं निषेधः कुत्वं स्यादेवेति॰ उदितो वेति क्त्वायामिड्विकल्पाद्यस्य
विभाषेति निष्ठायामनिट्त्वादिति भावः॰ विपरीतमिति सूत्रकारमते शुचुग्लुचुप्रभृतीनां न क्वादेरिति कुत्वं न भवति वार्त्तिककारमते तु निष्ठायामनिट्त्वाच्चजोरि
ति कुत्वं भवतीति परस्परविरुद्धमित्यर्थः॰ यथोत्तरमिति॰ तथा च वार्त्तिकानुरोधेन कुत्वं स्वीकर्तव्यमिति भावः॰ समाजइति॰॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कृ॰ सि॰कौ॰ टी॰न॰ १५५

अजगतिक्षेपणयोरित्यस्माद्घञि चजोरिति कुत्वे प्राप्ते ऽयं निषेधः एवं व्रजेरपि न्युब्ज इति · उब्ज आर्जवे निपूर्वस्यास्य जस्य कुत्वाभावो दस्य च बकारो निपात्यते · घञ्

सिद्ध इति उच समवाय इत्यस्माद्घञि चजोरिति कुत्वे लघूपधगुणे च ओक इति रूपं सिध्यति पर्यनुञ्नित्याशिर्निन्यनित्यागुदात्तमनिष्टं स्यादिति भावः एय आव

ण्य आवश्यके ।७।३।६५। कुत्वं न । अवश्यपाच्यं । यजयाचरुचप्रवचर्चश्च ।७।३।६६। ण्ये कुत्वं न । याज्यं । याच्यं । रोच्यं । प्रवाच्यं । ग्रन्थविशेषः । ऋचः अर्च्यं ऋ

दुपधत्वेपि अत एव ज्ञापकात् ण्यत् । त्यजेश्च । त्याज्यं । तजि पूज्यां चेति काशिका । तत्र पूजेर्ग्रहणं चिन्त्यम् भाष्यानुक्तत्वात् । ण्यत्प्रकरणे त्यजेरुपसंख्यानमिति

हि भाष्यं । वचोऽशब्दसंज्ञायाम् ।७।३।६७। वाच्यं शब्दाख्यायां तु वाक्यं । प्रयोज्यनियोज्यौ शक्यार्थे ।७।३।६८। प्रयोक्तुं शक्यः । प्रयोज्यः । नियोज्यो भृत्यः । भोज्यं भ

क्ष्ये ।७।३।६९। भोग्यमन्यत् । ण्यत्प्रकरणे लपिदभिभ्यां चेति वक्तव्यम् । लाप्यं । दभिर्धातुषु पठितोपि वार्त्तिकबलात् स्वीकार्यः । दाभ्यः । ओरावश्यके ।३।

१।१२५। उवर्णान्ताद्धातोर्ण्यत् स्यादवश्यम्भावे द्योत्ये । लाव्यं । पाव्यं । आसुयुवपिरपिलपित्रपिचमश्च ।३।१।१२६। सुञ् । आसाव्यं । युमिश्रणे । याव्यम्

वाप्यं । राप्यं । लाप्यं । त्राप्यं । चाम्यं । आनाय्योऽनित्ये ।३।१।१२७। आङ्पूर्वान्नयतेर्ण्यत् आयादेशश्च निपात्यते । दक्षिणाग्निविशेषश्चेदम् । स हि गार्ह

पत्यादानीयते । नित्यश्च सततमप्रज्वलनात् । आनेयोऽन्यः घटादिः । वैश्यकुलादानीतो दक्षिणाग्निश्च । प्रणाय्योऽसम्मतौ ।३।१।१२८। स

म्मतिः प्रीतिविषयीभवनं कर्मव्यापारः । तथा भोगेष्वादरोपि सम्मतिः । प्रणाय्यश्चौरः । प्रीत्यनर्ह इत्यर्थः । प्रणाय्योऽन्तेवासी । विरक्त इत्यर्थः । प्र

णेयोऽन्यः । पाय्यसान्नाय्यनिकाय्यधाय्यामानहविर्निवाससामिधेनीषु ।३।१।१२९। मीयतेऽनेन पाय्यम्मानं । ण्यत् धात्वादेः पत्वञ्च । आनीय

ग्निं प्रति सम्यङ्नीयते होमार्थमग्निं प्रतीति सान्नाय्यं हविर्विशेषः । ण्यत् आयादेशः समो दीर्घश्च निपात्यते । निचीयतेऽस्मिन्धान्यादिकं निकाय्यो

निवासः । अधिकरणे ण्यत् । आद्युदात्तादेः कत्वञ्च निपात्यते । धीयतेऽनया समिदिति धाय्या ऋक् ॥ ९ इयकोति · अवश्यंभावः आवश्यकं ·

मनोज्ञादित्वाद्वुञ् · अव्ययानां भमात्रे टिलोपः अवश्यपाच्यमिति · आवश्यकाधमर्ण्ययोर्णिनिः इत्यत्र चणिनिः एयन · आवश्यकशब्दोऽर्थद्योतनार्थो ॥ ॥

450

सम १५५

नतुपयोगार्थः तेनार्थप्रकरणादिगम्येति तस्मिन्‌ण्यत्कुत्वाभावश्च भवति· यथा अशोच्यानन्वशोचस्त्वमिति· केचित्तु शोचितुमर्हाः शोच्याः न शोच्या अशोच्या इति भग
वद्गीतास्विदं व्याचक्षते· तच्चिन्त्यम्· अर्हे कृत्यतृचश्चेति ण्यति चजोरिति कुत्वप्रसंगात्· चजोरिति कुत्वं निष्ठायामनिट इति वार्त्तिकमतेनतु सम्यगेवेति दिक्· यजयजदेव
पूजादेरुयाचृयाञ्चायाम्· रुचदीप्तौ· प्रपूर्वो वचपरिभाषणे· ऋचस्तुतौ· ग्रथविशेषव इति· तथा च संज्ञेयमिति· वचोशब्दसंज्ञायामित्यस्याप्रसंगात्सिद्धेः यमि
तिभावः ज्ञापकादिति· सहरूपत्वाद्वा सरूपविधिनाण्यद्वेदिति नर्थकनीयमितिभावः वाक्यमिति· तिङ्सुबन्तचयोवाक्यम्· भोज्यम्· भक्ष्यमिहाभ्यवहार्यमात्रं
विवक्षितं· नतु खरविशदमभ्यवहार्यं तेन भोज्या यवागूरित्यपि भवतीत्याहुः भोग्यमन्यदिति· पालनीयमुपभोग्यं चेत्यर्थः लपिदभिभ्यां चेति· पोरदुपधादिति
प्राप्तस्यपतोऽपवादः जयादित्यस्तु आसुयुवपिरपीति सूत्रे लपिं प्रक्षिप्य रपिलपित्रपीति पठित्वाऽनुक्तसमुच्चयार्थेन चकारेण दभेः संग्रह इत्युक्तवान् तत्र वै
यम्येण व्याख्यानं निर्बीजं भाष्यविरोधश्च स्पष्ट एवेति बोध्यम्· स्वीकार्य इति· कास्प्रत्ययादाम् अमन्त्रे लिटि अनेकाच आम्प्रत्ययश्चुलुंपाद्यर्थमिति वार्त्तिकबलाद्यथा चुलुंपादिभ्य आम्· स्वीक्रि
यते तद्वदिति भावः तथा च प्रयुज्यते· नतानघान्तितद्रुभानि तस्करः· विष्णुर्गोपा अदाभ्य इत्यादिलाभ्यमिति· आवश्यके उपपदे इति व्याख्यानेनतु नेदं सिध्यतीति भा
वः कश्चित्तु लाघवं प्रत्यनादरात्· व्यतिसर इत्यादौ व्यतिषक्ष्ववत्· द्योतितार्थस्यापि प्रयोगो दृश्यते· अवश्यलाव्यम्· अत्रोपपदे समासासंभवेपि मयूरव्यंसकादे
राकृतिगणत्वात्समासः आसुयुवज्· आसाव्यमिति· षुञ्‌अभिषव इत्यस्य गृह्यते न तु षुप्रसवैश्वर्ययोरिति कृत्यल्युटो बहुलमिति बहुलग्रहणादिति भावः युमि
श्रण इति· युञ्‌बंधन इति तु न गृह्यते सानुबंधकत्वादिति भावः अत्र युप्रभृतीनां द्वंद्वं कृत्वा पश्चादासुना प्राग्द्वेन द्वंद्वः तेनाल्पाच्तरमिति युशब्दस्य न पूर्वनिपातः शंक्यः
इह्याः द्वयोर्वापदित्यनेन रपित्रपि चमां तु पोरदुपधादित्यनेन यत्स्यात्सत्प्राप्तेः यमारंभः अनित्यमात्रे यदि प्रयोगस्तर्हि घटादावतिप्रसंग इत्यत आह· दक्षिणा
ग्निविशेष इत्यादि· वैश्यकुलादेरिति· दक्षिणाग्नेर्हि योनिर्विकल्प्यते वैश्यकुलाद्वित्तवतो भ्राष्ट्राद्वा गार्हपत्याद्वेति· कर्मव्यापार इति· तथा चायमर्थः लोका
नां यावानीतस्तद्विषयीभवनं यस्मिन्नास्ति चोरादेः सोऽसंमतिरिति· वस्तुतस्तु· आनीतिविषयीभवनायेष्टस्यालाघवान्नीतिरेव संमतिस्सा यस्मिन्· ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

कृ·
सि·कौ· चोरादेर्नास्तिलोकानां सोऽसंमतिः यद्वासंमतिः प्रीतिः विषयेषु यस्य नास्ति स विरक्तोऽसंमतिः तंत्रेणार्थद्वयमपि गृह्यते · पाय्यसान्नाय्य · चतुर्षु अर्थेषु चत्वारो
टी·त· निपात्यन्ते मीयतेऽनेनेति माङः करणे ण्यत् · मेयमन्यत् · हविर्विशेषवृत्तिरैन्द्रं दध्यमावास्यायामैन्द्रं पयोऽमावास्यायामिति विहितो दधिपयोरूपः धीयतेऽनये
२५५ ति · अत्र सर्वा सामिधेनी न ग्राह्या किंतु समिध्यमानवतीसमिद्धवत्योरन्तरेण दिक्कृतिषु प्रक्षिप्यमाणा पृथुपाजा अमर्त्य इत्यादिकैव · अयं च विशेषो निपातन
स्य रूढ्यर्थत्वाल्लभ्यते · नन्वेवं निपातनात्सामिधेनीविशेषवाचकत्वे सामिधेनीग्रहणं व्यर्थमिति चेत् · अत्राहुः सूत्रे सामिधेनीग्रहणं प्रयोगविशेषोपलक्षणार्थ
म् · तथा चासामिधेन्यामपि दृश्यते धाय्याः शंसतीति · न हि प्रातरनुवाके समित्प्रक्षिप्यते ॥ ॥ क्रतौ कुण्डपाय्य इति कुंडशब्दे तृतीयान्ते उपपदे पिबतेरधिकरणे

क्रतौ कुण्डपाय्यसञ्चाय्यौ ॥ ३।१।१३० ॥ कुण्डेन पीयतेऽस्मिन्सोमः कुण्डपाय्यः क्रतुः । सञ्चीयतेऽसौ सञ्चाय्यः ॥ अग्नौ परिचाय्यो
पचाय्यसमूह्याः ॥ ३।१।१३१ ॥ अग्निधारणार्थस्थलविशेषे एते साधवः ॥ अन्यत्र तु परिचेयम् ॥ उपचेयम् ॥ समूह्यम् ॥ ॥ 452

यत् ण्यत्यायुगागमश्च निपात्यते · नन्वत्र ण्यदेव निपात्यतां प्रकृतत्वात् · एवं च आतो युक् चिण्कृतोरिति सिद्धत्वात् युक् च न निपातनीय इति लाघवमस्तीति चेत् ·
मैवम् · तित्स्वरप्रसंगात् · इष्यते तु यतोऽनाव इत्याद्युदात्तः कृदुत्तरपदप्रकृतिस्वरः तथा च प्रयुज्यते प्रणयात् · कुंडपाय्य इति संपूर्वाच्चिनोतेः ण्यदायो निपात्यते
क्रतौ किम् · कुंडपानम् · संचेयम् · अग्नौ परि · अग्निरिह न ज्वलनः किंतु तद्धारणार्थमिष्टकाचयनेन निर्मितं स्थलं तदाह · स्थलविशेष इति · एते साधवः राम
इति · स्थलविशेषेऽभिधेये परिपूर्वाच्चिनोतेः ण्यदायादेशयोः संपूर्वस्य वहेस्तु संप्रसारणदीर्घयोश्च निपातनादिति भावः ॥ ॥ ॥ २५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चित्योग्निरिति । चिनोतेः कर्मणि क्यप् तत्वोपवादः इह सूत्रे अग्न्याविति अनुवर्तनेन च चित्यशब्दस्यैव विशेषणं न द्वितीयस्य । तस्य भावार्थकत्वेनाग्निवाचकत्वासंभवात्
अग्नेरन्यत्र चेयमित्येव । शब्दकौस्तुभादौ तु अग्निचित्येत्यत्र भावे यकारः अन्ययस्तु क्वचिन्निपात्यते न तु क्यप् तेनान्तोदात्तत्वं भवति क्यपि तु कृते क्यपः पित्वात्तुदा
त्तत्वे धातुस्वरेणाग्निचित्येत्याद्युदात्तः स्यादिति स्थितम् । ननु वासरूपविधिना कृत्या अपि भविष्यन्तीत्यत आह स्त्र्यधिकारादूर्ध्वमित्यादि कृत्यल्युडिति । हसितं हसनं
छात्रस्य । नपुंसके भावे क्तः ल्युट् चेत्यनयोर्विषये भावे इति घञ् इहौदित्यो क्तः । अत्र इच्छार्थेषु लिङ्लोटाविति लोटा लिङ् तुमुन्नेव समानकर्तृकेषु तुमुन् लि

प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ॥३।३।१६३॥ चीयतेऽसौ चित्योऽग्निः । अग्नेश्चयनमग्निचित्या ॥ प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ॥ त्वया गन्तव्यम् । गमनीयम् । ग
म्यम् । इह लोटा बाधा मा भूदिति पुनः कृत्यविधिः । स्त्र्यधिकारादूर्ध्वं वासरूपविधिः क्वचिन्नेति ज्ञापयति । तेन क्तल्युट्तुमुन्खलर्थेषु नेति सिद्धम् । अर्हे
कृत्यतृचश्च ॥ स्तोतुमर्हः स्तुत्यः । स्तुतिकर्म स्तोता । स्तुतिकर्ता लिङा बाधा मा भूदिति कृत्यतृचोर्विधिः । भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा ॥३
।४।६८॥ एते कृत्यान्ताः कर्तरि वा निपात्यन्ते पक्षे तयोरेवेति सकर्मकात्कर्मणि । अकर्मकात्तु भावे ज्ञेयाः । भवतीति भव्यः । भव्यमनेन वा । गायतीति
गेयः साम्नामयम् । गेयं सामानेन वा इत्यादि । प्राकिलिङ्गे । वाहुलकात्याः । वोढुं शक्यो वोढव्यः । वहनीयो वा स्वः । लिङा बाधा मा भूदिति कृत्योक्तिः । लाघ
वार्थेनैव ज्ञापनसंभवे प्रैषादिसूत्रे कृत्याश्चेति सुवचम् । अर्हे कृत्यतृचोर्ग्रहणं च ॥ इति कृत्यप्रक्रिया ॥ ११ त्र्येति वचनात् । ईषत्पानः आतो युचिति युच्
अत्र ईषद्दुःसुषु इति खल्न लिङा बाधेति चकारेण लिङ् यदीन्यतो लिङ् न तु कृत्यतृच इति भावः भव्य तयोरेवेति नियमात्कर्तर्यप्राप्ते वचनं साम्नामिति कर्मणि षष्ठी
इत्यादीति । प्रवक्तीति प्रवचनीयो गुरुः स्वाध्यायस्य प्रवचनीयो गुरुणा स्वाध्यायः उपस्थानीयः शिष्यो गुरोः उपस्थानीयो गुरुः शिष्येण । जायते जन्यः जन्यमनेन वा
आप्लवते आप्लाव्यः ण्यत् आप्लाव्यमनेन वा । प्राकिलिङ्गे वोढव्य इति । वहधातोरेतत्स्यानव्यः हस्य ढो ढ इति ढत्वे झषस्तथोर्धोऽध इति धत्वे ष्टुना ष्टुरिति ष्टुत्वे ढो ढे लोपः सहि
वहोरोदवर्णस्येत्योत्वम् । अत्र ढलोपे कर्तव्ये ष्टुत्वमसिद्धमिति नाशंक्यम् । आश्रयात् सिद्धत्वात् ॥

CC-0. In Public Domain. Digitization by eGangotri



बाधा मा भूदिति कृत्यानामिति शेषः कृत्योक्तिरिति कृत्यानुकर्षकचकारोक्तिरित्यर्थः॥ इति कृत्यप्रक्रिया॥ ॥ ण्वुल्तृचौ। णकारो वृद्ध्यर्थः लकारः स्वरार्थः तृचश्च
कारः खलु तिरिष्टमेयस्तु शब्दस्य दृशीत्यादौ सामान्यग्रहणाविघातार्थः। चितः इत्यन्तोदात्तार्थस्तु न भवति आद्युदात्तश्चेत्यनेनैव सिद्धेः एवं च अमुना इति सूत्रे तृन्तृचोः पृथग्ग्रहणं
विहाय अतृ स्वसृ इत्येव सुवचमित्येके। अन्ये तु सामान्यग्रहणेऽपि क्वचिद्विशेषस्यैव ग्रहणं भवतीति ज्ञापनार्थं नप्तृनेष्टृ इति सूत्रे तृन्तृचोरुभयोर्ग्रहणं तेन क्रोष्टुः पृथग्ग्रहणेन

ण्वुल्तृचौ। ३।१।१३३। धातोरेतौ स्तः। कर्त्तरि कृदिति कर्त्रर्थे॥ युवोरनाकौ। कारकः। कर्त्ता। वोढुमर्हो वोढा। कारिका। कर्त्री। गाङ्कुटादीति ङित्त्वं। कुटिता।
अस्मिदित्युक्तेर्नेटि ङित्त्वं। कोटकः। विज इट्। विजिता। हनस्तोऽचिण्णलोः। घातकः। आतो युक्। दायकः। नोदात्तोपदेशस्येति न वृद्धिः। शमकः। दमकः। अ
निटस्तु नियामकः। जनिवध्योश्च। जनकः। वध हिंसायां। वधकः। रधिजभोरचि। रन्धकः। जम्भकः। नेट्यलिटि रधेः। रधिता। रद्धा। मस्जिनशोर्झलीति नु
म्। मङ्क्ता। नंष्टा। नशिता। रभेरशब्लिटोः। रम्भकः। रब्धा। लभेश्च। लम्भकः। लब्धा। नीवसहा। एषिता। एष्टा। सहिता। सोढा। दरिद्रातेरालोपः दरिद्रिता। ण्वु
लि दरिद्रायकः। कृत्यल्युटो इत्येव सूत्रमस्तु। यत्र विहितास्ततोऽन्यत्रापि स्युरित्यर्थात्। एवं च बहुलग्रहणं योगविभागेन कृन्मात्रस्यार्थव्यभिचारा
र्थं। पादाभ्यां ह्रियते पादहारकः। कर्मणि ण्वुल्। कमेः कर्त्तर्यात्मनेपदविषयात्कृत इण्निषेधो वाच्यः। प्रक्रन्ता। कर्त्तरीति किं। प्रक्रमितव्यं। आत्म
नेपदेति किं। संक्रमिता। अनन्यभावे विषयप्राप्तः तेनानुपसर्गाद्वेति विकल्पार्हस्य न निषेधः। क्रमिता। नन्विह त्वमेव तद्विषयत्वम्। तेन क्रन्तेत्यपीति
केचित्। आगमेरिडित्यत्र परस्मैपदग्रहणान्न ज्ञानयोरभावं लक्षयति। सञ्जिगमिषिता। एवं न्यग्रोधश्च तु मर्त्यः। विहसिता। यङन्तान्ण्वुल्॥ ॥

नहि तत्र ग्रहणमित्यनन्वितमित्याहुः वोढेति अर्हे कृत्यतृचश्चेति तृच् ढत्वादयस्तु वोढव्य इत्यत्रेवात्राप्यूह्याः। रधितेति रधादिभ्यश्चेति वेट् रद्धेति इहनेट्यलिटीति निषे १५६
धात्प्रवृत्ता वपि रधीत्यनेन अच्येव लागावानुम मंक्तेति टुमस्जो शुद्धौ अस्मात्तृच मस्जीतिनुम् अन्त्यात्पूर्वः स्कोरिति सलोपः जस्य कुत्वे चर्त्वम् अनुस्वार परसवर्णौ बहूनां समवा
ये द्वयोर्द्वयोः संयोग इति पक्षे तु नुमागमस्यापरत्वेऽपि स्कोरिति सलोपो भवत्येवेति ज्ञेयम्। नंष्टेति रधादित्वादिड्भावपक्षे नुम्॥

452

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लघ्वेति । ऋपस्तयोरिति धः मकारस्स जश्त्वम् । लभेश्चेति नुम् न भवत्यचीत्यनुवर्तनात् । एवुलि नेति । सनि ण्वुलि ल्युटि च नेति वचनात् योगविभागेनेति । कृत्यलुटो बहुलमिति सू
त्रे कृतो बहुलमित्येवाकरे स्थितम् । तथा च योगविभागं विनैव सर्वेष्टसिद्धिरित्याहुः यङ्क्तेति । श्रोपाभ्यां समर्थाभ्यामिति क्रमेरात्मनेपदविषयत्ता अनन्यभावे विषयशब्द इति । त
दन्याविषयत्वे सति तद्विषयत्वमनन्यभावः तथा च । विकल्पार्हस्य क्रमेः परस्मैपदात्मनेपदोभयप्राप्तिविषयत्वान्निषेधो नेति भावः संजिगमिषतेति । संपूर्वाद्गमेः सन् सन्य

अल्लोपस्य स्थानिवत्त्वान्न वृद्धिः । पापचकः । यङ् लुगन्तात्तु । पापाचकः । नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः । ३ । १ । १३४ ॥ नंद्यादेर्ल्युः ग्रहादेर्णिनिः प
चादेरच् स्यात् । नन्दयतीति नन्दनः । जनमर्दयतीति जनार्दनः । मधुसूदनः । विशेषेण भीषयतीति विभीषणः । लवणः । नंद्यादिगणे निपातनाल्लत्वं । ग्राही । स्था
यी । मन्त्री । विशयी । वृध्यभावो निपातनात् । विषयी । दूहयत्वमपि । परिभावी । परिभवी । पाक्षिको वृध्यभावो निपात्यते । पचादिराकृतिगणः । शिवशम
रिष्टस्य करे । ४ । ४ । १४३ । कर्मणि घटोऽठच् । इति सूत्रयोः करोतेर्घटेश्च अच्प्रयोगात्त् । अच्प्रत्यये परे यङ्लुग्विधानाच्च । केषाञ्चित्पाठस्त्वनुबन्धा
सञ्जनार्थः । केषाञ्चित्स्वरप्रत्ययार्थः । केषाञ्चिद्बाधकबाधनार्थः । पचतीति पचः । नदट् । चोरट् । देवट् । दूत्यादयष्टितः । नदी । चोरी । देवी । दीव्यतेरिगुपधे
ति कः प्राप्तः । जारभरा । श्वपचा । अनयोः कर्मण्यण् प्राप्तः । न्यङ्क्वादिषु पाठात् श्वपाकोऽपि । यङोचि चेति लुक् । न धातुलोप इति गुणवृद्धिनिषेधः । चे
क्रियः । नेन्यः । लोलुवः । पोपुवः । मरीमृजः । चरिचलिपतिवदीनां वा द्वित्वमच्याक्चाभ्यासस्येति वक्तव्यम् । आगमस्य दीर्घत्वसामर्थ्यादभ्यासह्रस्वो
हलादिशेषश्च न । चराचरः । चलाचलः । पतापतः । वदावदः । हन्तेर्घत्वञ्च । घत्वमभ्यासस्य उत्तरस्य त्वभ्यासाच्चेति कुत्वं घनाघनः । पाटेर्णिलुक्चोक्
दीर्घश्चाभ्यासस्य । पाटूपटः । पक्षे चरः । चलः । पतः । वदः । हनः । पाटः । रात्रेः कृतीति वा नुम् । रात्रिञ्चरो रात्रिचरः ॥ ११ ऊरिति द्वित्वं हलादिः शेषो वसन्यतरस्
यासस्येत्वं । आर्द्धधातुकस्येति सनरट् । यत्वं सन्नन्तात्तृच् पुनरिट् ॥ ॐ ॥ अल्लोपस्येति । पाचादेन धातुलोप इति सूत्रे इक इत्यनुवृत्तेर्हेतोरनिषेधः पापाचक इत्यत्र तन्न य
ङो लोऽल्लोपस्य स्थानिवत्त्वेन वृद्धेः प्राप्त्यभावात् । ननु यङ् लुङ्न्तात् पापाचक ॥

CC-0. In Public Domain. Digitization by eGangotri

कृ॰

सि॰कौ॰ त्याभिप्रायेणेत्यथोक्तम्॰ तत्र हि आकारविशिष्टस्यैव यङो लुगिति सर्वसंमतत्वेन तस्यानिवत्त्वाभावादिति चेन्मैवम्॰ एवं तर्हि आर्द्धधातुकस्यधात्ववयवलोपनिमित्त
टी॰ त॰ त्वाभावेन यङ्लुगन्तेन धातुलोप इति निषेधस्य प्रसक्त्यभावात्॰ न द्विग्रहि॰ द्वंद्वान्ते श्रूयमाणमाद्विग्रहः प्रत्येकं संबध्यते न दाह॰ न घादेर्ल्युरित्यादि॰ मधुसूदन इति मधुं
२५७ द्वैत्यं सूदयतीति विग्रहः सुदक्षरणे॰ इह अर्दिसूदिभ्यां कर्मण्युपणि यामेतेन घादिपाठात् ल्युः विभीषण इति॰ भियो हेतुभये षुकः ग्राहाति॰ णेनेर्णित्वादुपधावृद्धिः स्यादिति॰ आ
तोपुक्॰ मन्त्रीति॰ मन्त्रीति चुरादावि दित्वान्नुम्॰ णेरनिटीति णिलोपः विषयीति॰ षिञ्बंधने धात्वादेरिति षस्य सत्वे आदेशप्रत्ययपोरिति मास्तस्य षत्वस्य सात्पदा
द्योरिति निषेधादाह॰ इह षत्वमपीति॰ निपातनादित्यनुषज्यते॰ परिनिविभ्य इति सूत्रे सित सयेति का तानजन्तसिनोतेर्ग्रहणात्सिन्वन्तसिनोतेर्निपातनं विना षत्वं दुर्लभमिति
भावः जारभरेत्यादि॰ जारं विभर्त्ति श्वानं पचतीति विग्रहः श्वपाकोपीति कर्मण्युपणि पिपक्षभवतीति भावः चक्रिय इति॰ संयोगपूर्वादिरप्येकाच इति यण्न॰ लोलुव इति॰।

इगुपधज्ञाप्रीकिरः कः ।३।१।१३५।। एभ्यः कः स्यात् । क्षिपः । लिखः । बुधः । कृशः । ज्ञः । प्रीणातीति प्रियः । किरतीति किरः । वासरूपविधिनाण्वुल्तृचावपि
क्षेपकः । क्षेप्ता । आतश्चोपसर्गे । ३।१।१३६। कः स्यात् । प्रस्थः । सुग्लः । सुम्लः । पाघ्राध्माधेट्दृशः शः । ३।१।१३७। पिबतीति पिबः ।
जिघ्रः । धमः । धयः । धया कन्या । धेटष्टित्वान्ङीप्प्राप्तः । खशोन्यत्र नेष्यत इति हरदत्तः । पश्यतीति पश्यः । घः संज्ञायान्न व्याघ्रादि

इह सुवभावात् ओ॰ सुपीति पणेत्यविक्षुधातित्सुवङ् मरीमृज इति॰ रीगृदुपधस्य चेति रीगागमः हलादिशेषश्च नेति॰ सति तु हलादिशेषे आगम एभिरिति निर्दे
स्य आदेशस्य वा विशेषेणात्तौ न्याचाभ्यासस्यैव स्यादिति भावः पाटेर्णिलुगिति णेरनिटीति लोपे हि प्रत्ययलक्षणन्यायेन पाटूपटरित्यत्रोपधावृद्धिः स्यादिति भावः 453
इहापि पूर्ववद्धस्वहलादिशेषयोरभावः॥ ॐ ॥ इगुपधं इक् उपधा यस्य सः ज्ञा अवबोधने प्रीञ् तर्पणे कॄ विक्षेपे एषामितरेतरयोगद्वन्द्वे व्यत्ययेन पंचम्येकवचने २५७
कृत्वादस्य धात्वनुकरणत्वेन प्रकृतिवदनुकरणमित्यतिदेशाद् ऋत इद्धातोरिति इत्वम्॰ समाहारद्वंद्वे तु नपुंसकह्रस्वत्वे सति इत्वं न स्यात्॰ ज्ञ इति जानातीति ज्ञः आतो ले
प इटि चेत्यालोपः पाघ्राध्माधापाने॰ पा रक्षणे इत्यपन्नु न गृह्यते॰ लुग्विकरणत्वात्॰ इह सूत्रे उपसर्ग इति केचिदनुवर्तयन्ति तदुक्तं नो मम समतम् तथा च श्रीहर्षः
फलानि धूमस्य धयानधोमुखानि निश्रूयते च यदापथ्यः पश्यन्ते कावर्ण इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुपसर्गाल्लिंपविंदेत्यत्र लिंपविंदेति भाविनानुमासनुम्को निर्दिष्टो· तेन लाभार्थस्यैव विदेर्ग्रहणं न तु सत्तार्थस्येत्यर्थकानाम· धारयइति· धृञ् धारणे· धृङ् अवस्थाने एवं नयोर्द्वयोरपि ग्रहणम्· अथ कथं नमस्याम त्रोत्तरधारयस्य वेइति श्रीहर्षः परत्वाद्धि सूत्रे धारादिष्विव कर्मण्यणो भाव्यम्· तथा च वार्त्तिकम्· अकारादनुपपदात्कर्मोप

अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च ।३।१।१३८॥ शः स्यात् । लिम्पः । विन्दः । धारयः । पारयः । वेदयः । उदेजयः । चेतयः । सातिः सुखार्थः । सौत्रो हेतुमण्ण्यन्तः । सातयः । वासरूपन्यायेन क्विपि सात् । परमात्मा । सालन्तो मक्ताः । षह मर्षणे चुरादिः हेतुमण्ण्यन्तो वा । साहयः । अनुपसर्गात्किम् । प्रलिपः । नौ लिम्पेर्वाच्यः । निलिम्पा देवाः । गवादिषु विन्देः संज्ञायाम् । गोविन्दः । अरविन्दः । ददातिदधात्योर्विभाषा ।३।१।१३९। शः स्यात् । ददः । दधः । पक्षे वक्ष्यमाणो णः । अनुपसर्गादित्येव । प्रदः । प्रधः । ज्वलितिकसन्तेभ्यो णः ।३।१।१४०। इतिशब्द आद्यर्थः । ज्वलादिभ्यः कसन्तेभ्यो णः स्याद्वा पक्षेऽच् । ज्वालः । ज्वलः । चालः । चलः । अनुपसर्गादित्येव । उज्ज्वलः । तनोतेरुपसंख्यानम् । इहानुपसर्गादिति विभाषेति च न सम्बध्यते । अवतनोतीत्यवतानः । श्याद्व्यधास्रुसंस्र्वतीणवसावहृलिहश्लिषश्वसश्च ।३।१।१४१। श्यैङ्प्रभृतिभ्यो नित्यं णः स्यात् । श्यैङोऽवसते श्याद्र लत्वात्सिद्धे ऽस्य ग्रहणं उपसर्गे कं बाधितुम् । अवश्यायः । प्रतिश्यायः । आतः । दायः । धायः । व्याधः । स्रु गतौ । आङ्पूर्वः सम्पूर्वश्च । आस्रावः । संस्रावः । अत्यायः । अवसायः । अवहारः । लेहः । श्लेषः । श्वासः । दुन्योरनुपसर्गे ।३।१।१४२। णः स्यात् । दुनोतीति दावः । नीसाहचर्यात्सानुबन्धकात् दुनोतेरेव णः । द्रवतेस्तु पचाद्यच् । द्रवः । नयतीति नायः । उपसर्गे तु प्रद्रवः । प्रणयः । विभाषा ग्रहः ।३।१।१४३। णो वा पक्षेऽच् । व्यवस्थितविभाषेयम् । तेन जलचरे ग्राहः । ज्योतिषि ग्रहः । भवतेश्चेति काशिका । भवो देवः । संसारश्च । भावाः पदार्थाः । भाष्यमते तु ग्रहस्य चौरादिकस्य नादन्त्वाभावः ॥ ॥

पदे विप्रतिषेधेनेति सत्यम्· कर्मण्यणः शेषत्वविवक्षायामणोऽप्राप्त्या पचाद्यजन्तेनैव षष्ठ्यन्तेन समासो भविष्यति· एतेन गांगाधरभूधरजलधरादयो व्याख्याताः· पारय इति· पार कर्मसमाप्तौ चुरादिण्यन्तः· पृ पालनपूरणयोरिति वा हेतुमण्ण्यन्तः· वेदय इति· विद चेतनाख्यानादि·॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·कौ· पुचुरादिः ज्ञानाद्यर्थानामयतमो वा हेतुमण्ण्यंतः इहोदाहरणे वृक्ष्लिपिविदिभ्यां तु दादिभ्यः शः शे मुचादीनामिति नुम्· चार्यादिभ्यस्तु शपू गुणायादेशौ· अरविंदमिति·
टी·त· चक्रस्य नाभिनेम्योरंतराले स्थितानि काष्ठानि अराः तदाकाराणि दलानि तत्सादृश्याद्दरास्तान्विंदति लभते इत्यर्थे कर्मण्युपपदे णिवाघनाये स्म· ददातिदधात्योर्विभाषा
१५८ दरः दधइति· शे परे जुहोत्यादिभ्य इति श्लुः श्लाविति द्वित्वम्· अपित्सार्वधातुकस्य शस्यादि· त्वादातोलोप इत्याल्लोपः वक्ष्यमाणेणादि इति· पूर्वाद्धघतिणप्रत्यये आतो
युक्चिण्कृतोरिति युक्· दायः धायः प्रदः प्रधइति· आतश्चोपसर्गे इति कः स्यादेतत्· ददहानेदघधारणे· आभ्यामचि ददो दघ इति सिद्धं दाधाभ्यामादन्तलक्षणेणप्रत्यये दायो धाय इत्य
पि ततश्चेदं व्यर्थमिति चेत्· सत्यम्· स्वरार्थमिदं सूत्रम्· अददः अदधः इह हि अव्ययपूर्वपदप्रकृतिस्वर इष्यते अजन्तत्वे तु अच्चावग्रात्क्वाविवर्त्तोदात्तत्वं स्यात् इ
तिशाब्द आद्यर्थ इति· निपातानामनेकार्थत्वादिति भावः· ध्याद्यधा· अनुपसर्गादिति निवृत्तम्· उत्तरसूत्रे पुनरनुपसर्गग्रहणात् एवंचनत्त्वं वद्धं विभाषाग्रहण
मपि निवृत्तं तदाह· नित्यमिति· इह सूत्रे प्येङ् गतावित्यस्य· आत्वे प्या आत् इति प्रश्लेषो नतु प्रीङो यणादेशेन नाप्यततः अच्छव्ध्वां तानां वा यतिप्रभृती
नां नाप्यकारान्तानां वा प्रश्लेषेणग्रहणं व्याख्यानादिति भावः कं वा घितुमिति· अन्यथा· आतश्चोपसर्ग इति विशेषविहितः कः सामान्यविहितस्य णस्य बा
धकः स्यादित्यर्थः खुगतौ प्राचां तु सूत्रे आ श्रुसं श्रु इति नालव्यं पठित्वा शृणोतिरूढात्त तस्य स्त्नाकरम्· तथा च प्रयुंजते· अनाश्रवावः किमहं कदापि वक्तुं वि
शेषः परमस्ति शेष इति नैषधादौ· अमरो प्याह· वचने स्थित आश्रव इति· यदि तु सूत्रे असि नं शृणोतेर्ग्रहणं स्यात्तर्हि ऋदोरविति सामान्यविहितमप्बाधि
त्वा आङ्पूर्वकाच्छृणोतेर्विशेषविहितोऽणेवस्यात्· तथाच आश्रव इति रूपं न स्यात् किंत्वाश्राव इति स्यादिति दिक्· लेहः श्लेष इति इगुपधज्ञेति कप्रत्य १५८
ये गुणो न स्यादिति भावः दुनोतेरिति· दुदु उपतापे इत्यस्मात्· द्रवतेरिति· द्रु गतावित्यस्मात्· द्रव इति· द्रवद्रावौ वनार एवन्ही इत्यमरः काशिकेति· भाष्यत्वेन हा
र्तिकं नास्तीति तन्मते भावप्रत्ययोऽसाधुरित्यत आह· भाष्यमते त्विति॥

454

CC-0. In Public Domain. Digitization by eGangotri

गेहे कः। गेहशब्दोऽत्र प्रत्ययार्थस्य कर्तुर्विशेषणं नोपपदम्। गृहपतिना संयुक्ते ञ्य इति निर्देशादित्यभिप्रेत्याह गेहे कर्तरीति। एतत्सूत्रं तु शक्यमकर्तुं गृहू ग्रहणे इति भ्वादेरिगुपधलक्षणे कप्रत्यये कृते गृहशब्दस्य सिद्धेः। तात्स्थ्यादिति भवति हि तात्स्थ्यात्ताच्छब्द्यम् मंचाः क्रोशन्तीत्यादौ मंचशब्देन पुरुषा अपि व्यपदिश्यन्ते। एवं च गृहशब्दो वेश्मनि मुख्यो दारेषु तु औपचारिक इत्यर्थः। अत्रेदमवधेयम्। गृहशब्दोऽयमर्द्धर्चादित्वादुभयलिंगः। तत्र नपुंसकलिंगोऽभिधेयवचनः पुल्लिंगस्तु बहुवचनान्त एव गृहाः पुंसि च भूम्न्येवेत्यमरोक्तेरिति। शिल्पिनि ष्वुन्। पूर्वेण साहचर्याच्छिल्पिनीत्यपि प्रत्ययार्थस्य विशेषणं न तु उपपदमित्याह। तद्धनिकार्ते

गेहे कः।३।१।१४४। गेहे कर्तरि ग्रहेः कः स्यात्। गृह्णाति धान्यादिकमिति गृहम्। तात्स्थ्याद्गृहा दाराः। शिल्पिनि ष्वुन्।३।१।१४५। क्रियाकौशलं शिल्पं तद्वति कर्तरि ष्वुन् स्यात्। नृतिखनिरञ्जिभ्य एव। नर्तकः। नर्तकी। खनकः। खनकी। असिअकेऽनेचरञ्जेर्नलोपो वाच्यः। रजकः। रजकी। भाष्यमते तु नृतिखनिभ्यामेव ष्वुन्। रञ्जेस्तु क्वुन् शिल्पिसंज्ञयोरिति क्वुन्। रजकः। रजिका। पुंयोगे तु रजकी। गस्थकन्।३।१।१४६। गायतेस्थकन् स्यात् शिल्पिनि कर्तरि। गाथकः। ण्युट् च।३।१।१४७। गायनः। टित्वाद्गायनी। हश्च व्रीहिकालयोः।३।१।१४८। हाको हाङश्च ण्युट् स्यात् व्रीहौ काले च कर्तरि। जहात्युदकमिति हायनो व्रीहिः। जहाति भावानिति हायनो वर्षः। जिहीते प्राप्नोतीति वा। प्रुसृल्वः समभिहारे वुन्।३।१।१४९। समभिहारग्रहणेन साधुकारित्वं लक्ष्यते। प्रवकः। सरकः। लवकः॥

९९ रीति। भाष्यमते त्विति। तथा च षष्ठे रजकरजनरजःसूपसंख्यानमिति वार्तिकं प्रत्याख्यातुं भाष्यकृतोक्तम्। रजकरजनरजःसु कित्त्वात्सिद्धं कित एवैते औणादिका इति। तत्र कैयट आह। रजक इति क्वुन् शिल्पिनि क्वुन्। रजनमिति रंजेः क्युनिति क्युन्। रज इति भूरंजिभ्यां किदित्यसुन्प्रत्यय इत्यादि। गस्थकन्। गामादाग्रहणेष्वविशेष इति गै शब्द इत्ययमेवेह गृह्यते न तु गाङ् गताविति। थकन्प्रत्ययो हि गायत्यर्थविषयमेव शिल्पिनमभिधातुं समर्थ इत्याशयेनाह। गायतेरिति। ण्युट् च। योगविभाग उत्तरत्र अस्यैवानुवृत्त्यर्थः। गायन इति। ओहाक् त्यागे। जहात्युदकमिति। उदकादधिकं वर्द्धनात्। भावानिति। भावाः पदार्थाः। जिहीत इति। ओहाङ् गतौ। भृञामिदित्यभ्यासस्येत्त्वं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·कौ· पुरुषत्वः पंचमीस्थानेव्यत्ययेनजसः ओः सुपीतियण् लक्ष्यन्तइति भूयःसहचारात् योहियांक्रियांपुनःपुनरनुभवतिसतत्रसाधेयेणकौशलंलभतेतेनसहदपिय
अधिकरोतिनत्रवुन् यस्तुबहुशोपिदृष्टेकर्मोतिनतत्रनेतिभावः॥ ॥आशिषिच अप्रातस्यार्थनमाशीः साचप्रयोक्तृधर्मोनप्रत्ययार्थः कर्त्तरिकृदितिकर्त्रर्थेविधाना
टी· त· सुखुकरोतितत्रवुन् यस्तुबहुशोपिदृष्टेकर्मोतिनतत्रनेतिभावः जीवनंतवभूयादित्यर्थः जीवकइति स्त्रियांतुनाप्याशिषिवुन्श्चनेतिनिषेधात् प्रत्ययस्यादितित्वाभावः
१५८ रित्याद्यायेनाह आशीर्विषयार्थेत्यादिनाजीवतादिति जीवनंतवभूयादित्यर्थः जीवकइति त्रयोपपदमितिकर्मादिवाच्यकुंभादिवाचकपदस्योपपदसंज्ञायामुपपदमतिङितिसमासइत्यर्थः कुंभकारइति अणि
जीवकाककर्मण्यण् उपपदसमासइति तत्रोपपदमितिकर्मादिवाच्यकुंभादिवाचकपदस्योपपदसंज्ञायामुपपदमतिङितिसमासइत्यर्थः कुंभकारइति अणि

आशिषिच॥३।१।५०॥आशीर्विषयार्थवृत्तेर्धातोर्वुन्स्यात्कर्त्तरि।जीवतात्।जीवकः।नन्दतात्।नन्दकः।आशीः प्रयोक्तृधर्मः।आशास्तितुःपित्रादेरिय
मुक्तिः।कर्मण्यण्॥३।२।१॥कर्मण्युपपदेधातोरण्प्रत्ययः स्यात्।उपपदसमासः।कुम्भंकरोतीतिकुम्भकारः।आदित्यंपश्यतीत्यादावनभिधानान्नाशी
लिकामिमस्याचरिष्णोरणः।अलोपवादार्थंवार्त्तिकं।मांसशीला।मांसकामा।मांसभक्षा।कल्याणाचारा।ईक्षिक्षमिभ्यांच।सुखप्रतीक्षा।बहुक्षमा
कथंतर्हिगङ्गाधरभूधरादयः कर्मणः शेषत्वविवक्षायांभविष्यन्ति।ह्वावामश्च॥३।२।२॥अणःस्यात्कापवादः।स्वर्गह्वायः।तन्तुवायः।धान्यमायः।आतो
नुपसर्गेकः॥३।२।३॥आदन्ताद्धातोरनुपसर्गात्कर्मण्युपपदेकः स्यान्नाऽण्।आतोलोपः।गोदः।पार्ष्णित्रम्।अनुपसर्गेकिम्।गोसन्दायः।कविधौसर्वत्रप्रसा

कृतेकर्तृकर्मणोः कृतीतिषष्ठ्यन्तस्यकुंभशब्दस्यकारशब्देनसमासः शेषत्वविवक्षायामिति पदसंस्कारपक्षेतुधरतीतिधरः गंगायाधरइतिकर्मणियाषष्ठीतदंतेनसमा
सइतिसुवचम् स्यादेतत् धातोर्विधीयमानस्याणादेः पदविधित्वाभावेनसमर्थपरिभाषायाअनुपस्थानात्पश्यतिकुंभंकरोतिकटमित्यादावसमर्थादपिधातोरण्
स्यःस्यादितिचेन्न अत्राहुः कुंभाद्युपपदेविधीयमानस्याणादेरपिपदाश्रितविधित्वात्समर्थपरिभाषोपस्थानान्नोक्तदोषः उपोच्चारितंपदंत्सुपपदंपदंचसुप्तिङं।
तमितिप्रागेवोक्तत्वादिति ह्वावामश्च कापवादइति आतोनुपसर्गइतिप्राप्तिर्बोध्या स्वर्गह्वायइत्यादिह्वेञ्वेञोरादेचइत्यात्वेआतोयुगितियुक् माङ्मानेमेङ्प्र
णिदानेअनयोरिहग्रहणं नतुमामानेइत्यस्यअकर्मकत्वात् कविधानस्यफलमाह॥ १५८

आतो लोप इति· पार्ष्णित्रमिति· पार्ष्णिं त्रायत इति त्रैङ् पालने· गोसंदाय इति· अणयुक्तं· प्रसारणिभ्य इति· प्रसारणमिति संप्रसारणपर्यायः जिनातीति· ज्या वयोहा
नौ क्र्यादिभ्य इति श्नाप्रत्यये ग्रहिज्येति संप्रसारणे पूर्वरूपे हल इति दीर्घे च कृते प्वादीनामिति ह्रस्वः॥ ॐ ॥ ब्रह्मज्य इति· डित्वसामर्थ्याद् अभस्यापि टेर्लोपः पूर्वेणैके
नि स्यात्· आह्वः प्रह्वः इति के हि सति वचिस्वपीत्यादिना ह्वेञः संप्रसारणे सत्याह्वः प्रह्व इति स्यादिति बोध्यम्· सुपि स्थः· सुपीति प्रत्याहारो गृह्यते· न तु सप्तमी
ब्रह्म जिनातीति ब्रह्मज्यः। सर्वत्र ग्रहणं न। आतश्चोपसर्गे।३।१।१३६। आह्वः। प्रह्वः। सुपि स्थः।३।२।४। सुपीति योगो विभज्यते। सुपि उपपदे आदन्तात्कः
स्यात्। द्वाभ्यां पिबतीति द्विपः। समस्थः। विषमस्थः। ततः स्थः। सुपि तिष्ठतेः कः स्यात्। आरम्भसामर्थ्याद्भावे। आखूनामुत्थानमाखूत्थः। प्रष्ठोऽग्रगामिनि
।८।३।९२। प्रतिष्ठत इति प्रष्ठो गौः। अग्रतो गच्छतीत्यर्थः। अग्रेति किं। प्रस्थः। अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हि
र्दिव्यग्निभ्यः स्थः।८।३।९७। स्थ इति कप्रत्ययान्तस्यानुकरणं। षष्ठ्यर्थे प्रथमा एभ्यः स्थस्य सस्य षः स्यात्। द्विष्ठः। त्रिष्ठः। इत ऊर्द्ध्वं कर्मणि सुपी
ति द्वयमप्यनुवर्तते। तत्राकर्मके सुपीत्यस्य सम्बन्धः। तुन्दशोकयोः परिमृजापनुदोः।३।२।५। तुन्दशोकयोः कर्मणोरुपपदयोराभ्यां कः स्या
त्। आलस्यसुखाहरणयोरिति वक्तव्यं। तुन्दं परिमार्ष्टीति तुन्दपरिमृजोऽलसः। शोकापनुदः। सुखस्याहर्ता। अलसादन्यत्र तुन्दपरिमार्जए
वायश्च संसारासारत्वोपदेशो न शोकमपनुदतीति स शोकापनोदः। कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्। मूलानि विभुजतीति मूलविभुजो
रथः। आकृतिगणोऽयं। महीध्रः। कुध्रः। गिलतीति गिलः। प्रे दाज्ञः।३।२।६। दारूपाज्ज्ञानातेश्च प्रोपसृष्टात्कर्मण्युपपदे कः स्यात्। अणोऽपवादः। सर्वप्र
दः। पथिप्रज्ञः। अनुपसर्ग इत्युक्तेः प्रादन्यस्मिन्सति न कः। गोसम्प्रदायः। समि ख्यः।३।२।७। गोसंख्यः। गापोष्टक्।३।२।८। अनुपसृष्टाभ्यामाभ्यां टक्

बहुवचनं कृत्रिमस्यैव ग्रहणात् आरंभसामर्थ्यादिति· कर्तरि पूर्वेणैव सिद्धत्वादिह कर्तरि कः इति न संबध्यते· अनिर्दिष्टार्थश्च स्वार्थे· धातोः स्वार्थे भाव एव नन्वेवं घञर्थेक
विधानमित्यनेन गतार्थतेति चेत् न वार्तिकं दृष्ट्वा सूत्रकृतोऽप्रवृत्तेः किंच षष्ठीति सूत्रेण पाक्षिकसमासे प्रसक्ते उपपदमतिङिति नित्यसमासार्थमिदं· अत एव लुङ्तेनाऽस्व· ॥

हि सति किं वा संप्रसारणे दीर्घत्वप्र
सक्तिपद

स्यात्कर्मण्युपपदे। सामगः साम
गी उपसर्गे तु सामसङ्गायः॥

कृ· सि· कौ· टी· न· ९६१

पदविग्रहमाह· आखूनामुत्थानमिति· नन्वेवं घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थमिति वार्त्तिके स्थाग्रहणं व्यर्थमिति चेन्न अत्राहुः अकर्त्तरि कारके विधानार्थं तत्र
स्थाग्रहणमिति· आखूत्थ इति· स्थाइत्यस्य के परे आतो लोप इत्यालोपः उदः स्थास्तंभोरिति उदः परस्य सस्य थः उदो दस्य चर्त्वम्· अत्र प्राचा आखूत्थं वर्त्तत इति नपुंस
के पठितं तदुपेक्ष्यमिति मनोरमायामुक्तम्· भाष्यादौ सर्वत्र पुल्लिंगस्यैव उदाहृतत्वात्· ल्युः कर्त्तरि मनिन्भावे कः किंघौ प्रादिभ्योऽन्यत इत्यमरकोशे भावे कस्य पुंस्त्व
विधानात्· भावे नणकचिद्भ्योऽन्य इति नपुंसकविधाने कस्य पर्युदासाच्चेति· नणकचिद्भ्य इत्यत्र चकारादप्यस्य चितन्नश्चाणश्च कश्च चिच्च नणकचितस्तेभ्योऽन्य इति
विग्रहः अंबांबकप्रत्ययांतस्येति· तेन भूमिस्थितं गोस्थानमित्यादौ नेति भावः प्राचा तु स्थस्य समासेति व्याख्यानं व्यस्थः समासेति व्याख्यानं तदाकरविरोधेन कप्रत्ययांत
सप्तम्या अलुक् व्याख्येयम्· द्विष्ठः त्रिष्ठः इति· द्वयोस्तिष्ठतीत्यादिविग्रहः एवं मंबष्ठः आंबष्ठः गोष्ठः भूमिष्ठः सव्यष्ठः अपष्ठः कुष्ठः शेकुष्ठः शंकुष्ठः अंगुष्ठः मंजिष्ठः परमेष्ठः
बर्हिष्ठः दिविष्ठः अग्निष्ठः आभ्यामिति· परिमृजापनुदोरित्यत्र पंचम्यर्थे षष्ठीति भावः तुंदपरिमृज इति· अत्र मृजेरजादावितिवैकल्पिकी वृद्धिर्व्यवस्थितविभाषया
नेत्येके· स्यादेवेत्यन्ये· मूलविभुजादिभ्य इति· तादर्थ्ये एषा चतुर्थी मूलविभुजादिसिध्यर्थमित्यर्थः प्रेदाज्ञः· अत्र दामा दाग्रहणेष्वविशेषादाह· दारूपादिति· पाघ्राध्माधेङ्दृशः इति· पं
धानं प्रकर्षेण जानातीत्यर्थः मादन्यस्मिन्निति· प्रशब्दमात्रोपपदे अस्य सूत्रस्य चरितार्थत्वादुपसर्गांतरे सति आतोऽनुपसर्गे इत्यनेनापि न भवतीति भावः गोसंख्यप इ
तिगाः संचष्टे इति विग्रहः चक्षिङः ख्याञ् ख्याप्रकथन इत्यस्य तु संपूर्वस्य प्रयोगो नास्तीति न्यासकारः सार्वधातुकमात्रविषयोऽसौ धातुरिति च मनोरमादौ स्थितम्·
गापोष्टक् इह गामा दाग्रहणेष्वविशेषेऽपि गायतेरेव ग्रहणं· ननु गाङ् गतौ गा स्तुतौ इत्यनयोः अनभिधानात्· सामगः सामगीति· एतेन टकः कित्त्वमालोपार्थं टित्वं तु
ङीबर्थमिति ध्वनितम्· प्रत्ययाधिकारादयं कः प्रत्ययत्वेन प्रत्ययः परश्चेति धातोः पर एव स्यादित्याघञ्जोटकिनावित्यस्यात्र आशंकैव नास्तीति बोध्यम्· सामसंगा
य इति· कर्मण्यणि सति· आतो युगिति युक्·॥ ४६०

456

पिबतेरिति· लुग्विकरणालुग्विकरणयोरितिपरिभाषाया लब्धार्थकथनमुपपदपरिगणनं तु वाचनिकमेव· सोरपेति· सोरं पिबति· आतोऽनुपसर्गे कः शक्नोजि· घ
टग्रहणेनैव सिद्धे घटीग्रहणं लिंगविशिष्टपरिभाषाया अनित्यत्वज्ञापनार्थं· तेन मद्रराज्ञीत्यत्र टच् न· द्विषत्त्वात्परस्मैत्र द्विषत्परयोरिति तच्चनेति दिक्· कवचह

पिबतेः सुरासीध्वोरिति वाच्यम्। सुरापी। सीधुपी। अन्यत्र क्षीरपा ब्राह्मणी। सुराम्पातिरक्षतीति सुरापा। हरतेरनुद्यमनेऽच् ।३।२।९। अंशहरः। अ
नुद्यमने किम्। भारहारः। शक्तिलाङ्गलाङ्कुशयष्टितोमरयष्टिघटघटीधनुष्षु ग्रहेरुपसंख्यानम्। शक्तिग्रहः। लाङ्गलग्रहः। सूत्रे च धार्यर्थे सूत्रग्रहः। य
तु सूत्रं केवलमुपादत्ते न तु धारयति तत्र अणेव। सूत्रग्राहः। वयसि च ।३।२।१०। उद्यमनार्थं सूत्रं। कवचहरः। कुमारः। आङि ताच्छील्ये ।३।२।११। पुष्पा
ण्याहरति तच्छीलः पुष्पाहरः। ताच्छील्ये किं। भारहारः। अर्हः ।३।२।१२। अर्हतेरच् स्यात् कर्मण्युपपदे अणोऽपवादः। पूजार्हा ब्राह्मणी। स्तम्बकर्णयो
रमिजपोः ।३।२।१३। हस्तिसूचकयोरिति वक्तव्यम्। स्तम्बेरमः। कर्णेजपः। हस्ती। तत्पुरुषे कृतीति हलदन्तादिति वा अलुक्। कर्णेजपः सूचकः। शमि
धातोः संज्ञायाम् ।३।२।१४। शम्भवः। शम्वदः। पुनर्धातुग्रहणं बाधकविषयेऽपि प्रवृत्त्यर्थं। कृञो हेत्वादिषु टो मा भूत्। शङ्करा नाम परिव्राजि
का तच्छीला। अधिकरणे शेतेः ।३।२।१५। खे शेते खशयः। पार्श्वादिषूपसंख्यानम्। पार्श्वाभ्यां शेते पार्श्वशयः। पृष्ठशयः। उदरेण शेते उदरशयः।
उत्तानादिषु कर्तृषु। उत्तानः शेते उत्तानशयः। अवमूर्धशयः। अवनतो मूर्धा यस्य सः। अवमूर्धा। अधोमुखः शेते इत्यर्थः। गिरौ डश्छन्दसि। गिरौ शेते
गिरिशः। कथं तर्हि गिरिशमुपचचार प्रत्यहं सा सुकेशीति गिरिरस्यास्तीति विग्रहे लोमादित्वाच्छः। चरेष्टः ।३।२।१६। अधिकरणे उपपदे। कुरुच

र इति· कवचोद्यमनं क्रियमाणं संभाव्यमानं वा वयो· गमयति· तेनासत्यपि कवचग्रहणे कवचहर इति भवत्येव· हस्तिसूचकयोरिति· अन्यत्र तु स्तम्बेरन्ता कर्णेजपिता·
शमिधातोः शमि उपपदे धातुमात्रात्संज्ञायामच् स्यात्· पुनर्धातुग्रहणमिति· असति धातुग्रहणे शमि संज्ञायामित्यस्यावकाशः शंभवः शंवदः कृञो हेतुताच्छील्यस्या

हे
सि·को· संगेपरत्वाद्भूत एव स्यात्· धातुग्रहणे ज्ञानेन तु न तत्सामर्थ्यादजेवर्भवतीति तदाह· शंकराणामेत्यादि· अनधिकरणार्थमुपसंख्यानमिति दर्शयति· पार्श्वाभ्यामित्यादिना·
टी·त· कुरुचर इति· कुरुषु देशेषु चरत्यटतीत्यर्थः॥ ॐ ॥भिक्षासेनाअनधिकरणार्थ आरंभः॥भिक्षाचरतीति· चरतिरत्र चरणपूर्वकेऽर्जने वर्तते· चरणेन भिक्षामर्जय
१६१ तीत्यर्थः सेनाचर इति· सेनां चरति· प्रविशतीत्यर्थः· पचादिष्विति· टविधानं तु उपपदसमासाद्विति नित्यसमासार्थम्· सहचरः सहचरी अत्र तु सुप्सुपेति वैकल्पिकः स

भिक्षासेनादायेषु चा ३।२।१७ भिक्षां चरतीति भिक्षाचरः सेनाचरः आदायेति ल्यबन्तम्॥ आदायचरः। कथमग्रे स्थितां सहचरीमिति पचादिषु चरडि
ति पाठात्। पुरोऽग्रतोऽग्रेषु सर्तेः ३।२।१८। पुरःसरः अग्रतःसरः अग्रमग्रेण ग्रे वा सरतीत्यग्रेसरः। सूत्रे ग्र इति एदन्तत्वमपि निपात्यते। कथं तर्हि यू
थं तत्रदग्रसरगर्वितं कलभसारमिति। बाहुलकादिति हरदत्तः। पूर्वे कर्त्तरि ३।२।१९। कर्तृवाचिनि पूर्वशब्दे उपपदे सर्त्तेष्टः स्यात्। पूर्वः सरतीति पूर्व
सरः कर्त्तरि किम्। पूर्वं देशं सरतीति पूर्वसारः। कृञो हेतुताच्छील्यानुलोम्येषु ३।२।२०। एषु द्योत्येषु करोतेष्टः स्यात्। अतः कृकमीति सः। यशस्क
री विद्या। श्राद्धकरः। वचनकरः॥ दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्त्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्य्य
त्तद्धनुररुष्षु ३।२।२१। एषु कृञष्टः स्यात्। अहेत्वाद्यर्थमिदम्। दिवाकरः। विभाकरः। निशाकरः। कस्मादिवात्वं। भास्करः। बहुकरः। बहुशब्दस्य वैपुल्या
र्थसंख्यार्थस्य च ग्रहणम्। लिपिलिबिशब्दौ पर्य्यायौ। संख्या। एककरः। द्विकरः। कस्मादिवात्वं। अहस्करः। नित्यं समासेऽनुत्तरपदस्थस्येति ष
त्वम्। धनुष्करः। अरुष्करः। किंयत्तद्बहुषु कृञोऽज्विधानमिति वार्त्तिकम्। किंकरा। यत्करा। तत्करा। हेत्वादौ च बाधित्वा परत्वाट्टापु योगे ङी· च्

मासः कृञो हेतुं हेतुरिह लौकिको न तु तत्प्रयोजको हेतुश्चेति कृत्रिमः· केवले कृञि तदसंभवात्· द्योत्येष्विति· न तु वाच्येषु कर्त्तरि कृदिति सस्वाधापन्नेरिति भावः· हेत्वा राम·
दिषु क्रमेणोदाहरति· यशस्करीत्यादि· एषु किम्· कुंभकारः· टहप्रसिद्धतरत्वात्· द्यनुबंधकोपि करोतिरेव गृह्यते न तु कृञ् हिंसायामिति हेतुः· कारणम्· आनुलोम्यम १६१
राध्यचित्तानुवर्तनम्· दिवाविभा· न नु अंतकरशब्देन नञ् समासे सती कृते· पीष्टसिद्धौ॥

457

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूत्रे त्वं तच्छब्दात्पृथग्ग्रहणं व्यर्थमिति चेत् अत्राहुः स्वरे तु विशेषोस्ति न स्समासे हि अव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तः स्यात् तच्छब्दस्योपपदत्वे तु गतिकार
कोपपदात् कृदिति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वमिति॰ दिवाकर इति॰ दिवा दिवसं करोतीति विग्रहः॰ दिवाभूता रात्रिरित्यादाविव दिवाशब्दस्य वृत्तेर्विषयेशक्ति
मत्परत्वात् मूलेऽनुक्तान्यपि कानिचिदुदाहरणानि उत्थानि कर एवकारः प्रत्यादिलादरण॰ कारं करोतीति कारकरः आदिकरः नांदीकरः किंकरः बलिकरः भक्तिकरः कर्त्र
करः चित्रकरः क्षेत्रकरः जंघाकरः बाहुकरः इति वार्तिकमिति॰ कैयटहरदत्तादिरीत्यात्क्रमः मा घवस्तु॰ इष्टिरियमित्याह॰ पुंयोगेऽपीति॰ यत्तु न्यासकृतोक्तं हेत्वादिषु पू
र्वसूत्रेण टएव भवति॰ तेन किंकरणशीला किंकरीत्युपपन्नं भवतीति॰ तन्नादर्तव्यम्॰ परत्वाट्टचा टचो बाधितत्वात्पूर्वविप्रतिषेधस्य निर्मूलत्वाच्चेति भावः॰ दत्तोतु प
क्षांतरमप्युक्तमथवा पचादिषु पाठः करिष्यत इति॰ दिवाविभेत्यस्मिन् सूत्रे किमादिग्रहणमपनीय पचादिष्वेव किंयत्तद्बहुषु कृञ इति पठितव्यं वार्तिकमपीत्थमे
वं नेयमिति तस्याशयः॰ अस्मिन्पक्षे कर्मण्यणं बाधित्वा चरितार्थमिदं वचनं हेत्वादिविवक्षायां परत्वात्टेन बाध्यते॰ तेन पुंयोगं विनापि किंकरी स्यादेवं पुंयोगविवक्षा
यान्तु निर्विवादो ङीप्॰ किंयत्तद्बहुष्वच्चेति प्रक्रियायां विकल्पोक्तिस्त्वाकरविरुद्धत्वात् कर्मण्यणोपि पक्षे प्रसंगाच्चायुक्तैव॰ न चाजभावे दिवाविभेतिटः स्यादिति वाच्य
म्॰ सूत्रे किमादिग्रहणापनयनस्य हरदत्तादिभिरुक्तत्वात्॰ अथवा सूत्रे किमाद्यपनयनं मास्त्विति प्रौढिवादेन प्रक्रियाग्रंथः प्रवृत्त इति स्वीक्रियते॰ तथा च हेत्वादिविव
क्षायां किंयत्तदिति वार्तिकेनाच तद्विवक्षायां तु परत्वाट्ट इति विषयविशेषो व्याख्यामेदात्॰ फलितं विकल्पमाश्रित्य प्रक्रियायामच्चेति प्राचोक्तमिति स्थितस्य गतिः समर्थनी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



कर्मणि भृतौ- भृतिर्वेतनम् कर्मानुवृत्तौ पुनः कर्मग्रहणात्स्वरूपपरतेत्याह कर्मशब्द इति संवकरीरि स्यादि- इनोनित्वात् कृदुत्तरपदप्रकृतिस्वरेणोत्तरपदस्याद्युदात्तत्वमकु
ष्ठिभरारिति- एवं च गिरिस्तु कनकाचलः कतिनसंति चाश्मकजाः किटिसुधरणीधरः कतिनसंतिभूदारकाः मरुत्तुमलयानिलः कतिनसंतिकंमानिलाः प्रभुस्तु विष्णु
कर्मणि भृतौ ३।२।२२ कर्मशब्दे उपपदे करोतेष्टः स्यात् कर्मकरो भृतकः कर्मकारोन्यः। न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु ३।२।२३
एषु कृञष्टो न हेत्वादिषु प्राप्तः प्रतिषिध्यते। शब्दकार इत्यादि। स्तम्बशकृतोरिन् ३।२।२४ व्रीहिवत्सयोरिति वक्तव्यम्॥ स्तम्बकरिर्व्रीहिः। शकृत्करिर्वत्सः। व्री
हिवत्सयोः किं स्तम्बकारः। शकृत्कारः। हरतेर्दृतिनाथयोः पशौ ३।२।२५॥ हति नाथयोरुपपदयोर्हृञ इन् स्यात् पशौ कर्तरि। दृतिं हरतीति दृतिहरिः। नाथ
नासारज्जुं हरतीति नाथहरिः। पशौ किं। दृतिहारः। नाथहारः। फलेग्रहिरात्मम्भरिश्च ३।२।२६॥ फलानि गृह्णातीति फलेग्रहिः। उपपदस्य एदन्तत्वं
हरिश्च निपात्यते। आत्मानं बिभर्तीति आत्मम्भरिः। आत्मनो मुमागमः। भृञ इन्। चात्कुक्षिम्भरिः। चान्द्रास्तु आत्मोदरकुक्षिष्विति पेठुः। ज्यो
त्स्नाकरम्ममुदरम्भरयश्च कोरा इति मुरारिः। एजेः खश् ३।२।२८। एयन्तादेजेः खश् स्यात्। अरुर्द्विषदजन्तस्य मुम् ६।३।६७॥ अरुषो द्विषतोऽज
न्तस्य च मुमागमः स्यात्। खिदन्ते उत्तरपदे न त्वव्ययस्य। शित्वाच्छ् वादिः। जनमेजयतीति जनमेजयः। वातशुनीतिलशर्धेषु अजधेट्तुदजहातिभ्यः ख
श्। उपसंख्यानम्॥ वातमजाः मृगाः। खित्यनव्ययस्य ६।३।६६॥ खिदन्ते परे पूर्वपदस्य ह्रस्वः स्यात्। ततो मुम्। शुनिन्धयः। तिलन्तुदः। शर्धंजहा मा
षाः। शर्ध्या नशब्दः तञ्जहति इति विग्रहः। जहातिरन्तर्भावितण्यर्थः। नासिकास्तनयोर्ध्माधेटोः ३।२।२९॥ अत्र वार्त्तिकम्। स्तने धेटो नासिकायां
ध्मश्चेति वाच्यम्। स्तनन्धयतीति स्तनन्धयः। घेटष्टित्वात्स्तनन्धयी। नासिकन्धमः। नासिकन्धयः॥ ९९ धाश्रयः कतिनसंतिकुक्षिम्भरा इति केषांचि



त्प्रयोगः प्रामादिक एव एजेः खश् एजृ कंपने- एजेरिति एयन्तस्य निर्देशो न तु शुद्धस्य कानिर्देशः खशः शित्करणात् लिंगात् न हि सार्वधातुके सति शप् यथा स्यादिति
न च शुद्धस्य शपि सत्य सति वा विशेषोस्ति- न चोत्तरार्थं॥

458

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ध्मित्वमिति वाच्यम्· इहार्थत्वे संभवति केवलो न्तर्गतत्वस्यान्याय्यत्वान्न देतदाहत्यं तादे जेरिति· अहर्हिनत· वर्णग्रहणेन तदंतविधेः सिद्धावप्यंतग्रहणं श्रुतिंधयइत्यादौ
ह्रस्वे कृते मुमप्रवृत्त्यर्थम्· तथाहि अंतः शब्दः समीपपरः अन्तो सावंतश्चेति विग्रहः निपातनाहिशब्दस्य परनिपातः समीपः खित्यनव्ययस्येति सूत्रेण विहितो यो ऽचूत
दंतस्य मुमिति व्याख्यायते· एवं जनमेजय इत्यादौ खनोह्रस्वे पि मुम्· सिद्ध्ये प्रथमं स्थितौ तिङ्गः प्रवर्तनीय इत्यवधेयम्· शर्द्धं जहा इति· शर्द्धं नशब्दः पृथुशब्दः कुत्साया
म्· घञन्तं जहतीति· ननु मामाः शर्द्धं अपानशब्दं त्याजयंति न तु स्वतो जहतीत्याशंकायामाह· अंतर्भावितण्यर्थ इति· यथासंख्यं वारयितुमाह· अत्रेति· घेट्पिबत्वा
दिति· अवयवे अचरितार्थत्वादिति भावः खश्प्रत्ययांता देव घेटो ङीविधानान्यत इति वर्द्धमानक्षीरस्वामी हरदत्तादयः तेन याघ्राध्मा घेडिति शप्रत्यये आतो नुपस

नाडीमुष्ट्योश्च ।३।२।३०। एतयोः कर्मणोरुपपदयोर्ध्माधेटोः खश् स्यात्। यथासंख्यं नेष्यते॥ नाडिन्धमः। नाडिन्धयः। मुष्टिन्धमः। मुष्टिन्धयः॥ घ
टीखारीखरीषूपसंख्यानम्॥ घटिन्धमः। घटिन्धयः। इत्यादि। खारी परिमाणविशेषः। खरी गर्दभी। उदि कूले रुजिवहोः ।३।२।३१। उत्पूर्वाभ्यां रुजि
वहिभ्यां कूले कर्मण्युपपदे खश् स्यात्। कूलमुद्रुजतीति कूलमुद्रुजः। कूलमुद्वहः। वहाभ्रे लिहः ।३।२।३२। वहं स्कन्धं संलेढीति वहंलिहो गौः। अ
दादित्वाच्छपो लुक्। खशो ङित्त्वान्न गुणः। अभ्रंलिहो वायुः। परिमाणे पचः ।३।२।३३। प्रस्थम्पचा स्थाली। खारिम्पचः कटाहः। मितनखे च ।३।२।३४।
मितम्पचा ब्राह्मणी। नखम्पचा यवागूः। पचिरत्र तापवाची। विध्वरुषोस्तुदः ।३।२।३५। विधुन्तुदः। मुमि कृते संयोगान्तस्य लोपः॥ ॥

गेक इति कृत्प्रत्यये चटावेव धयाकन्यागाधयतीति गोधा अत्र च संप्रदाय एव शरणम्· नासिकंधम इति पाघ्राध्मेति धमादेशः॥ ॥ नाडीमुष्ट्योश्च· यथासंख्येने
ति· एतच्चेह वसूत्रे भाष्ये कृत्तौ च स्थितम्· यत्तु यथासंख्यमिति सूत्रे नाडीमुष्ट्यादिसुदाहृतं भाष्ये तत्प्राप्तिमात्राभिप्रायेणेत्येके शब्दकौस्तुभे तु मतभेदेन तद्वयमपि
स्थितम्· घटीखारीखरीष्विति· जयादित्यस्तु वातशब्दमप्युदाजहार वातंधमः वातंधय इति· तत्तु भाष्यादौ न दृश्यत इति मूले ऽनोपन्यस्तम्· उदि कूले· ननु
कूले स्येवोच्छब्दस्यापि सप्तम्यन्तत्वादुपपद·॥

CC-0. In Public Domain. Digitization by eGangotri

के

सि कौ तस्मान्नतन्त्रं कृजिवहिभ्यां सह यथासंख्यं स्यादिति चेन्न· अत्राहुः नाडीमुष्ट्योरिति वल्लाघवार्थं कूलयोरिति वक्तव्ये उदीति व्यस्तोच्चारणं लोपपरं· एवं चोदीति पं
टी त चम्याः स्थाने सप्तमी कृजिवहोरिति तु पंचम्याः स्थाने षष्ठीति· एतच्च· यथासंख्यसूत्रे कैयटे स्पष्टम्· किं च कृजेः सकर्मकत्वात्कर्मण्युपपदे स्थिते तेन कूलं विशेष्यते नो
१६१ द्वहः अमत्त्ववाचित्वेनासंभवात्· तदेतदाह· उत्पूर्वाभ्यामित्यादिना· विधुंतुद इति· अरुर्द्विषदजन्तस्येत्युकारान्तरोमुम्· तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुंतुदः
स्वमरः॥ ॥ अरुंतुद इति· अरुंतुदं तु मर्मस्पृगित्यमरः व्रणोऽस्त्रियामीर्ममरुरिति च· असूर्यंपश्या इति· पाघ्राध्मेति पश्यादेशः· खुम्पिपरं चेदम्· एवंनाम राजदाराः
गुप्ताः यदपरिहार्यदर्शनं सूर्यमपि न पश्यन्ति किं पुनः परपुरुषमिति तेन सत्यपि सूर्यदर्शने प्रयोगो न विरुध्यते· यदा तु सूर्याभावदर्शनमात्रं सूर्येतरचन्द्रादेर्दर्शने

अरुंतुदः॥ असूर्यललाटयोर्दृशितपोः।३।२।३६॥ असूर्यमिति असमर्थसमासः दृशिना नञः सम्बन्धात्। सूर्यं न पश्यन्तीत्यसूर्यंपश्या राजदाराः। ल
लाटन्तपः सूर्यः। उग्रम्पश्येरम्मदपाणिन्धमाश्च।३।२।३७॥ एते निपात्यन्ते। उग्रमिति क्रियाविशेषणं तस्मिन्नुपपदे दृशेः खश्। उग्रम्पश्यतीत्युग्र
म्पश्यः। इरया उदकेन माद्यति दीप्यते विभ्यन्तत्वादिति इरम्मदो मेघज्योतिः इहनिपातनात् श्यन्॥ पाणयो ध्मायन्तेऽस्मिन्निति पाणिन्धमो ध्वा
अंध्वकाराद्यावृत इत्यर्थः। तत्र हि सर्पाद्यपनोदनाय पाणयः शब्द्यन्ते॥ प्रियवशे वदः खच्।३।२।३८॥ प्रियम्वदः। वशम्वदः। गमेः सुपि वाच्यः। असंज्ञा 459
र्थमिदम्। मितङ्गमो हस्ती। विहायसा विहङ्ग इति वाच्ये। खच्च डिद्वा वाच्यः। विहङ्गमः। विहङ्गः। भुजङ्गमः। भुजङ्गः॥ ९ वाविवक्षितं तदा खच्प्रकरणं भवत्यन
भिधानादिति न्यासकारादयः· प्रियवशे वदः खच्· खकारो मुमर्थश्चकारः। खचि ह्रस्व इति विशेषणार्थ इति वृत्तिः· खेह्रस्व इत्युच्यमाने एजेः खशि जनमेजय इत्यत्रापि रा म·
स्यादिति तदाशयः· एकानुबन्धग्रहणे न द्व्यनुबन्धस्य ग्रहणमिति वैषम्यनभावप्यतो त्यादिना वृत्तिग्रन्थस्यायुक्तत्वमाहुः· खच्प्रकरणे गमत्यपाठकरणमुत्तरार्थम्· हि १६२
तंतप इत्यत्र ह्रस्वमुमौ लोपो यथा स्यातां खश्यपि च माभूदिति· नन्वेवमुत्तरत्र वक्तव्यमिति चेन्न· सत्यम्· इह करणमन्यत्रापि क्वचित् भवतीति ज्ञापनार्थं· तेन गमेः सु
पीति नापूर्वं वार्त्तिकं किंतु ज्ञापकसिद्धमेवः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असंज्ञार्थमिति· संज्ञायामनुवर्त्स्यमाने णमश्चेति सूत्रे णौ दमि ड्डमितिभावः विहंगमइति· विहायसा आकाशेन गच्छतीति विग्रहः पूर्ववार्तिकेनैकयमकृत्वा खच्· चडिदिति
एथ करणसामर्थ्यादन्यत्रापि क्वचिड्डवतीत्याशयेनोदाहरति· भुजंगमः भुजंगइति· इहगमः सुपीति खच्॥ ⁂ ॥द्विषत्परइति· अरुर्द्विषदिति मुमि कृते संयोगान्तलो
पः वाचंयमोव्रते· नियात्यत इति· नचैवं खच्प्रत्ययोप्यत्रैव निपात्यतामिति वाच्यम्· व्रतादन्यत्रापि प्रसंगात् यदि तु निपातनबलादेव व्रतविषयता· आश्रीयते तत्रैव

द्विषत्परयोस्तापेः।३।२।३९। खच्स्यात्। खचिह्रस्वः।६।४।९४। खच्परे णौ उपधाया ह्रस्वः स्यात्। द्विषन्तं परं वा तापयतीति द्विषन्तपः। परन्तपः। घ
टघटीग्रहणाल्लिङ्ग·विशिष्टपरिभाषा अनित्या। तेनेह न। द्विषतीं तापयतीति द्विषतीतापः। वाचियमो व्रते।३।२।४०। वाक्शब्दे उपपदे यमेः खच्स्या
द्व्रते गम्ये। वाचंयमपुरन्दरौ च।६।३।६९। वाक्पुरोरमन्तत्वं निपात्यते। वाचंयमो मौनव्रती। व्रते किं। अशक्त्यादिना वाचं यच्छतीति वाग्यामः। पूः सर्वयोर्दा
रिसहोः।३।२।४१। पुरं दारयतीति पुरन्दरः। सर्वंसहः। सहिग्रहणमसंज्ञार्थम्। भगे च दारेरिति काशिका। बाहुलकेन लब्धमिदमित्याहुः। भगं दारय
तीति भगन्दरः। सर्वकूलाभ्रकरीषेषु कषः।३।२।४२। सर्वंकषः खलः। कूलंकषा नदी। अभ्रंकषो वायुः। करीषंकषा वात्या। मेघर्त्तिभयेषु कृञः।३।
२।४३। मेघङ्करः। ऋतिङ्करः। भयङ्करः। भयशब्देन तदन्तविधिः। अभयङ्करः। क्षेमप्रियमद्रेऽण् च।३।२।४४। एषु कृञोऽण् स्यात्। चात् खच्। क्षेमंक
रः। क्षेमकारः। प्रियङ्करः। प्रियकारः। मद्रङ्करः। मद्रकारः। वेति वाच्ये ऽण्ग्रहणं हेत्वादिषु टो मा भूदिति। कथं तर्हि। अल्पारम्भाः क्षेमकरा इति। कर्म
णः शेषत्वविवक्षायां पचाद्यच्। आशिते भुवः करणभावयोः।३।२।४५। आशितशब्दे उपपदे भवतेः खच्। आशितो भवत्यनेनाशितम्भव ओद
नः। आशितस्य भवनं। आशितम्भवः॥ ९८ वाग्व्रतग्रहणं क्रियते वाचंयमो व्रते पुरंदरश्चेति तदाह इह वाचियमो व्रत इति सूत्रं पूःसर्वयोरित्यत्र पुरि दारेरि
त्यर्थाश्चशब्दः कामकर्त्तृपूः सर्वयोः हविदारणे अयमेव ग्रत्वं तेन तु दम्भयेट्ड आदर इत्येतावितिसम्प्रदायः असंज्ञार्थमिदम्· संज्ञायामनुसंज्ञायां भृतॄवृजीति वक्ष्यमाणेन
सिध्यतीति भावः आशितंभव इति· यावता ओदनेन अतिथ्यादिर्भोजितो भवति स एवमुच्यते·॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कृ·
सि·कौ· इहवासरूपविधिना ल्युडपि· आशितम्भवनः भावे आशितम्भवनं घञित्तु बाध्यत एव सरूपत्वादित्याहुः· न चात्र क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नेति ल्युटो निषेधः
टी· त· शङ्क्यः यत्र हि घञादेर्बाधकत्वेन क्तल्युडादयः प्रसक्तास्तत्र नित्यं बाधो न तु विकल्पेनेति तस्यार्थः इह तु ल्युटः पवादः खच· अत्र वासरूपन्यायो निर्बाध एव· एतच्च
१६४ आशितम्भवनमित्युदाहरतो जयादित्यस्यापि सम्मतमेवेति दिक्॥ ४६॥ संज्ञायाम्भृतॄवि· विश्वंभरः कैटभजित् रमा विश्वंभरा स्थिरे त्वमरः व्युत्पत्तिमात्रमिति· तत्फलं

संज्ञायाम्भृतॄवृजिधारिसहितपिदमः। ३।२।४६। विश्वंबिभर्त्तीति विश्वम्भरः। विश्वम्भरा। रथन्तरं साम। इह रथेन तरतीति व्युत्पत्तिमात्रं न त्ववयवार्थानु
गमः। पतिंवरा कन्या। शत्रुञ्जयो हस्ती। युगन्धरः पर्वतः। शत्रुंसहः। शत्रुन्तपः। अरिन्दमः। दमिः शमनायां नेनसकर्म्मकः इत्युक्तम्। मतान्तरे तु अन्तर्भावि
तण्यर्थोत्र दमिः॥ गमश्च। ३।२।४७॥ सुतङ्गमः। अन्तात्यन्ताध्वदूरपारसर्व्वानन्तेषु डः। ३।२।४८॥ संज्ञायामिति निवृत्तम्। एषु गमेर्डः स्यात्। डित्वसामर्थ्या
दभस्यापि टेर्लोपः। अन्तं गच्छतीत्यन्तगः इत्यादि। सर्वत्रपन्नयोरुपसंख्यानं। सर्वत्रगः। पन्नम्पतितङ्गच्छतीति पन्नगः। पन्नमिति पद्यतेः क्तान्तं।
क्रियाविशेषणं। उरसो लोपश्च। उरसा गच्छतीत्युरगः। सुदुरोरधिकरणे। सुखेन गच्छतीत्यत्र सुगः। दुर्गः॥ अन्यत्रापि दृश्यते इति वक्तव्यम्। ग्राम
गः। डे च विहायसो विहादेशो वक्तव्यः। विहगः। आशिषि हनः ३।२।४९॥ शत्रुम्बध्याच्छत्रुहः। आशिषि किम्। शत्रुघातः। दारावाहनोऽणन्तस्य च टः।
संज्ञायाम्। दारुण्युपपदे आङ्पूर्वाद्धन्तेरण् टकारश्चान्तादेशो वक्तव्य इत्यर्थः। दार्वाघाटः। चारौ वा। चार्वाघाटः। चार्वाघातः। कर्म्मणि समि च। क
र्म्मण्युपपदे सम्पूर्वाद्धन्तेरुक्तं वेत्यर्थः। वर्णान्संहन्तीति वर्णसङ्घाटः। वर्णसङ्घातः। पदसङ्घाटः। पदसङ्घातः। अपे क्लेशतमसोः। ३।२।५०॥ अपपूर्वा
द्धन्तेर्डः स्यात्। अनाशीरर्थमिदं। क्लेशापहः पुत्रः। तमोपहः सूर्य्यः॥ ११. नु स्वरावग्रहो· रथंतरमाजभारावसिष्ठ इत्यत्र हि रथमित्यवगृह्णंति· कृदुत्तरपद राम

प्रकृतिस्वरेणान्तोदात्तं चाधीयते· अंखंड त्वे त्ववग्रहो न स्यान्न त्वविषयस्येत्याद्युदात्तश्च स्यात्· इत्युक्तमिति· माधवाद्यनुरोधेनेत्यर्थः मतान्तरे त्विति· हरदत्तादिमत इत्य १६५
र्थः चित्तव्यापारोपरमः शमः इन्द्रियव्यापारोपरमस्तु दमः॥

460

इत्यादिर्वैदर्शनग्रंथाश्च बहानुकूलाः संज्ञायां किम्· कुटुंबं बिभर्तीति कुटुंबभारः गमश्च पूर्वसूत्र एव गमिर्नोक्तः उत्तरसूत्रे गमेरेवानुवृत्तिर्यथा स्यात्· भृत्यप्रभृतीनां मा भूदिति
सुदुरोरधिकरणे कर्मणि तु ईषद्दुःसुषु इति खलेव· सुखेन गम्यत इति सुगमः पंथाः दुर्गमः दारावितिः आह्वापेक्षया पुंल्लिंगता नतराह· दारुशब्दे इति· काष्ठं दारयितुं घनं तेव धरू
त्यमरः टविधानार्थमिदम्· अण् तु कर्मण्यणित्येव सिद्धः अलोंत्यस्येत्येव सिद्धे तग्रहणं स्पष्टार्थम्· अन्यथा हि टः प्रत्ययः संभाव्येत दारावाहंतीति दारावाघाटः गोघा

कुमारशीर्षयोर्णिनिः ३।२।५१। कुमारघाती। शिरसः शीर्षभावो निपात्यते। शीर्षघाती। लक्षणे जायापत्योष्टक्। ३।२।५२। हन्तेष्टक् स्याल्लक्षणवति कर्त्त
रि। जायाघ्नो ना। पतिघ्नी स्त्री। अमनुष्यकर्तृके च। ३।२।५३। जायाघ्नस्तिलकालकः। पतिघ्नी पाणिरेखा। पित्तघ्नं घृतम्। अमनुष्येति किम्। आखु
घातः शूद्रः। अथ कथं बलभद्रः प्रलम्बघ्नः। शत्रुघ्नः। कृतघ्न इत्यादि। मूलविभुजादित्वात्सिद्धम्। चौरघातो नगरघातो हस्तीति तु बाहुलकात्। श
क्तौ हस्तिकपाटयोः। ३।२।५४। हन्तेष्टक् स्याच्छक्तौ द्योत्यायाम्। मनुष्यकर्तृकार्थमिदम्। हस्तिघ्नो ना। कपाटघ्नश्चौरः। कवाटेति पाठान्तरम्।
पाणिघताडघौ शिल्पिनि। ३।२।५५। हन्तेष्टक् टिलोपो घत्वं च निपात्यते पाणिताडयोरुपपदयोः। पाणिघः। ताडघः। शिल्पिनि किम्। पाणिघातः।
ताडघातः। राजघ उपसंख्यानम्। राज्ञो हन्ता राजघः। आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्। ३।२।५६। एषु च्व्यर्थेष्वच्व्य
न्तेषु कर्मसूपपदेषु कृञः ख्युन् स्यात्। अनाढ्यमाढ्यं कुर्वन्त्यनेन आढ्यङ्करणम्। अच्वौ किम्। आढ्यीकुर्वन्त्यनेन। इह प्रतिषेधसामर्थ्यान्ल्युडपि नेति का
शिका। भाष्यमते तु ल्युट् स्यादेव। अच्वाविति उत्तरार्थम्॥ १९ कालकादार्वाघाटस्ते वनस्पतीनाम्॥ ❀ ॥ कुमारशीर्षयोर्णिनिः एतयोः कर्मण्युपपदयो
र्हन्तेर्णिनिः स्यात्· सुप्यजातौ णिनिस्ताच्छील्ये इत्यादिभिः सिद्धे ताच्छील्याद्यभावेऽप्यर्थं विरहेऽपि णिन्यर्थं शिरसः शीर्षभावार्थं वचनम्· लक्षणवतीति· सूत्रे लक्षणशब्दोऽर्श
आद्यजन्त इति भावः जायाघ्न इति· जायामरणसूचकं पाणिरेखाविशेषादिकं यस्यास्तीति सः तां हंतीति गौणो व्यवहारः एवं पतिघ्नीत्यत्रापि बोध्यं अमनुष्यकर्तृके च· मनुष्य
भिन्नकर्तृकेऽर्थे वर्तमानाद्धन्तेः कर्मण्युपपदे टक् स्यात्· यद्यप्यमनुष्यशब्दो रक्षःपिशाचादीनाहे०॥

तिमाशङ्क्य · तथापीह लक्ष्यानुरोधेन व्याख्यातव्यमित्याशयेनाह · तिलकालक इत्यादि · नानुबन्धकृतमसारूप्यमिति ढगणोः सारूप्याद्वासरूपविधिप्रवृत्तेराह बाहुल
कादिति · शक्तो हस्ति · शक्तौ किं · विषेण हस्तिनं हन्तीति हस्तिघातः · यद्यपीह शक्तिरस्ति अशक्तस्य कर्तृत्वानुपपत्तेस्तथापि शक्तिग्रहणसामर्थ्यात्प्रकर्षो विज्ञायते · तेन स्व
बलेनैव हन्तुं शक्तिः सामृत्स्ने · कपाटघ्न इति चौरः · पाटयति प्रविशन्तीति कपाटम् · पाठान्तरे तु अटतेः पचाद्यच् · कवं चोष्णे इत्यत्र योगविभागात्कोः कवादेश इति हर
दत्तः · आढ्यसुभग · च्व्यर्थेष्विति · अभूततद्भावविषयेष्वित्यर्थः · आढ्यंकरणमिति लिंगविशिष्टपरिभाषया आढ्यशब्दे उपपदे षष्ठ्यां ख्युनन्तादपि स्त्रियां न व्ययस्येति ह्र
स्वनएतदेवरूपम् · आढ्यीकुर्वन्त्यनेनेति · ननु हस्वस्तोऽभावेपि करणाधिकरणयोश्चेति ल्युटा भवितव्यमित्यत आह · प्रतिषेधसामर्थ्यादिति तथाहि आढ्यीकर
णमिति रूपं ल्युट्ख्युनोस्तुल्यं · न च ख्युनि मुमर्थं सोऽस्तु तामिति वाच्यम् · अनव्ययस्येति पर्युदासात् · तुर्यादिष्विडाच्चेति निपातसंज्ञकत्वेन च्व्यन्तस्य अव्ययत्वात् ·

कर्तरि भुवः खिष्णुच्खुकञौ ॥ ३।२।५७॥ आढ्यादिषु च्व्यर्थेषु च्व्यन्तेषु भवतेरेतौ स्तः । अनाढ्य आढ्यो भवतीति । आढ्यम्भविष्णुः । आढ्यम्भावुकः । स्पृ
शोऽनुदके क्विन् ॥ घृतस्पृक् । कर्मणीति निवृत्तम् । मन्त्रेण स्पृशतीति मन्त्रस्पृक् । ऋत्विग्दधृक् । व्याख्यातम् । त्यदादिषु दृशोऽनालोचने कञ्च । समाना
न्ययोश्चेति वाच्यम् । सदृक् । अन्यादृक् । अन्यादृशः । क्सोऽपि वाच्यः । तादृक्षः । सदृक्षः । अन्यादृक्षः ॥ ८ ननु ख्युनि सति उपपदमतिङिति नित्यसमासे ल

्युटि तु नेति वाच्यम् · ल्युट्यपि गतिसमासस्य संभवात् · तस्यापि नित्यसमासत्वात् · न च स्त्रीप्रत्यये विशेषः ल्युटि टिड्ढेति सूत्रेण ख्युनि तत्रैव ख्युन उपसं
ख्यानेन च ङीपस्तुल्यत्वात् · नापि स्वरे विशेषः ल्युटि लित्स्वरेण ख्युनि नित्स्वरेण कृत्स्न उदात्तत्वाविशेषात् · न चान्तरार्थमत्राविकृतमिति वाच्यं · केवलान्तरार्थत्वे हि
तत्रैव ब्रूयात् · तदेतदुक्तमिह ल्युडपि नेति भाष्यमतेत्विति भाष्यवार्तिकस्वरसेन ल्युडिष्ट इति केवलान्तरार्थत्वं लभ्यते · अत एव हरदत्तो घाइति क्वचितमयुक्तमिति कैय
टः कर्तरि भुवः ❋ अच्व्यन्तेष्विति · अच्वावित्यनुवर्तते · अन्यथा आढ्यीभविष्णुः आढ्यीभावुक इति स्यादिति भावः कर्तृग्रहणं करणानुवृत्तिभ्रमनिरासार्थ १६५
मुत्तरार्थं चेति माधवः · वस्तुतस्तु व्यर्थमेव अस्वरितत्वादेवाननुवृत्तिसिद्धेः उत्तरत्राप्युपयोगो नेति स्पष्टीकरिष्यमाणत्वाच्च ॥

खकारो मुमर्थः चकारश्चित इत्यन्तोदात्तार्थः ञकारो वृद्ध्यर्थः स्यादेतत्· खित्सु च इकारो मास्तु· खच्सु रित्येवोच्यताम्· एवं च कारोऽपि न कर्तव्यः प्रत्ययस्वरेणैवाभिमतसि
द्धेः इकारादित्वसिद्धये इडागमे कृतेऽप्यागमा अनुदात्ता इति तस्यानुदात्तत्वात्· न च कृत्योके ष्णुच्चार्वादिष्य इति स्वरसूत्रे अस्य ग्रहणं न स्यात्· चकारानुबन्धाभावादिका
रस्य लाक्षणिकत्वात् षत्वणत्वयोरसिद्धत्वेन ष्णु इति रूपाभावाच्चेति वाच्यम्· कृतेऽपि इकारे तदनुबन्धग्रहणेनातदनुबन्धकस्येति परिभाषया अलंकृञादौ ष्णुच एव
ग्रहणं स्यान्न त्वेतस्य· इकारोच्चारणसामर्थ्यादस्यापि ग्रहणमिति चेदेवं खक्षुजयमस्तु तत्रेटि कृते चकारानुबन्धसामर्थ्यादस्यापि ग्रहणमस्त्विति किमिकारे
णेति चिन्त्यमेतत्· न चेह लाघवाभावादिकारः ष्णुचकार एवमास्त्विति शक्यम्· एकमात्रो ह्रस्वः व्यंजनं त्वर्द्धमात्रकमिति सर्वसंमतत्वात्· यत्तु हरदत्तेनोक्तं षत्वण
त्वयोः सामर्थ्यादस्य ग्रहणमिति तदापाततः ष्णुजेयस्य यास्तु जुक्तौ प्रक्रियालाघवेन षत्वणत्वयोः करणस्यौचित्ततया सामर्थ्याद्योगादिति दिक्· निवृत्तमिति· ननु

सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्। ३।२।६१॥ एभ्यः क्विप् स्यादुपसर्गे सत्यसति च सुप्युपपदे। द्युसत्। उपनिषत्। अण्डसूः।
प्रसूः। मित्रद्विट्। प्रद्विट्। मित्रध्रुक्। प्रध्रुक्। गोधुक्। प्रधुक्। अश्वयुक्। प्रयुक्। वेदवित्। निवित्। इत्यादि। अग्रग्रामाभ्यां नयतेर्णो वाच्यः। अग्र
णीः। ग्रामणीः। भजो ण्विः। ३।२।६२। सुप्युपसर्गे चोपपदे भजेर्ण्विः स्यात्। अंशभाक्। प्रभाक्॥ ११ स्पृशः सकर्मकत्वात्कर्मण्युपपद इत्येव प्राप्यत

इति चेत्· अत्र प्राञ्चः। पूर्वसूत्रात्कर्त्तरीत्यनुवर्त्तते· सा चानुवृत्तिः कर्त्तरि कृदित्यनेनैव कर्त्तरि क्विनः सिद्धत्वाद्व्यर्था सती कर्त्तृप्रचयार्था कर्मण्युपपदे एकः क
र्त्ता करणादिश्चापर इत्येवं कर्त्तृप्रचयस्तथा च सुवन्ते उपपद इति फलितं भवतीति मंत्रस्पृगित्याद्यपि सिद्धमिति वदन्ति तन्न कर्त्तृग्रहणं व्यर्थमिति पूर्वसूत्र एवोक्तम्·
न चेह कर्त्तृप्रचयार्थं तदावश्यकमिति शंक्यम्· मंत्रस्पृगित्यादेः क्विपा सिद्धेः न च क्विपि कुत्वं न स्यादिति वाच्यम्· क्विन्प्रत्ययो यस्मादिति बहुव्रीहिबलादेव कुत्वसं
भवादित्यादि दिक्· सदृगिति· तमिवेमं पश्यन्ति जनाः स इवायं पश्यति ज्ञानविषयो भवतीति व्युत्पत्त्या कर्मकर्त्तरि प्रत्ययः हृद्यर्थानुगुणत्वात्॥ ःः ॥ सत्सूद्विष
षड्विवरणादौ· सू इति द्विषा साहचर्यात्सूतेरादादिकस्य ग्रहणं न तु सुवति सूयत्योः युजिर् योगे· युज समाधौ द्वयोरपि ग्रहणम्· विद ज्ञाने विद विचारणे विद स
त्तायां त्रयाणामपि ग्रहणं विद्लृ लाभ इत्यस्य तु न ग्रहणम्· विदेरयकारस्य विवक्षितत्वात्· द्युसदिति· पूर्वपदादिति·॥

CC-0. In Public Domain. Digitization by eGangotri



मत्वंतु नभवति· छंदसीत्यनुवृत्तेः तथाचमाघः मनस्सुयेनचुस्तदाप्युधीयते ति आदितेयादिविषयइत्यत्रतुसुषामादित्वात्षत्वमितिमाधवादयः उपनिषत्सिति स
दिदमतेरितिषः अग्रग्रामाभ्यामितिसूत्रेग्रामणीरितिनिर्देशेनज्ञापितमेतत्· नीत्रुपप्रत्ययविषयेचेदंतेनकर्मण्युपणित्वंनभवतिग्रामनायः ज्ञापकस्यसामा
न्यविषयत्वात्· अग्रग्राद्वोपपदादपिणत्वंतेनाग्रणीरित्यपिसिद्धमित्याहुः॥ ॥ अदोनन्ने· विड्वनादिति· जनसनखनक्रमगमोविडितिपूर्वसूत्रानुवृत्तेः पूर्वसूत्रेत्विह
नोपन्यस्तम्· तत्रहिछंदसिसहइत्यतः छंदसीत्यनुवर्तनात्· कामदुघेति· धेनुरितिशेषः कामंदोग्धीतिविग्रहः अन्येभ्योपिदृश्यन्तेइतिविजुपेः छन्दसीत्यतोविचप्र

अदोऽनन्ने।३।२।६८। विट्स्यात्। आममत्ति आमात्। सस्यात्। अनन्ने किं। अन्नादः। कव्येवा ३।२।६९॥ अदेर्विट्। पूर्वेणसिद्धेवचनमणबाधनार्थम्
कव्यात् आममांसभक्षकः। कथन्तर्हिक्रव्यादोऽसुरपआशर इतिपक्वमांसभक्षः उपपदे ऽण्। उपपदस्यक्रव्यादेशः पृषोदरादित्वात्। दुहःकप्घ
श्च।३।२।७०। कामदुघा। अन्येभ्योऽपिदृश्यन्ते।३।२।७५। छन्दसीतिनिवृत्तंमनिन्क्वनिप्वनिप्विच् एतेप्रत्ययाधातोःस्युः। नेड्वशिकृति।७।
२।८। वशादेःकृतइण्नस्यात्। शृ। सुशर्मा। प्रातरित्वा। विड्वनोरनुनासिकस्यात्।६।४।४१। अनुनासिकस्यआत्स्यात्। विजायतइतिविजा
वा। ओण्। अवावा। विच्। रेड्। सुगण्। क्विप्। चा।३।२।७६। अयमपिदृश्यते। सत्सूद्विषेतिसत्वस्येवमपन्वक्विः। उखास्रत्। पर्णध्वत्। वाहभ्रट्। अ
न्नः।८।४।२७। पदान्तस्यानितेर्णस्यणत्वंस्यादुपसर्गोस्थान्निमित्तात्सरश्चेत्। हेप्रापण्। पण्सरइतितीत्वां मित्राणिपणासिमित्रधीः॥ ॥

पः आतोमनिन्विनितिसूत्रान्मनिनादयश्चानुवर्तन्तेतदाह· मनिन्क्वनिवित्यादिसुशर्मेति· सुष्ठुशृणातीतिविग्रहः प्रातःएतीतिप्रातरित्वा इणः क्वनिपिहूस्वस्यपिती
तितुक् अवावेति· अनुनासिकस्यआत्वे अवादेशः सोदीर्घनलोपौ· रोड्रेरिडिति· रुषरिषहिंसायाम्· उपधागुणः जश्त्वचर्त्वे· वाहभ्रडिति वाहाद्भ्रश्यतीतिविग्र
हः वृत्तौतुवहाभ्रडितिपाठः वहःस्कंधः अन्येषामपिदृश्यतेइतिपूर्वपदान्तस्यदीर्घइतिहरदत्तः अंतः अनितेरितिवर्त्तते अंतोऽत्रपदापेक्षोगृह्यतेनानितेरपेक्षया
व्यभिचारादतआह· पदान्तस्येति· हेप्राणिति· अनप्राणनेक्विप् अनुनासिकस्येतिदीर्घः नडि· संबुद्धोरितिनलोपनिषेधे अन्यत्रतुनलोपे॥

घ:९

रा म·
१६६

४६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न भाव्यमिति संबुद्धौ तमुदाहरन् नम् मित्रस्रीरिति । लुप्तेपि क्विपि प्रत्यये प्रत्ययलक्षणन्यायेन हलादिकित्प्रत्ययपरत्वमस्ति वर्णाश्रये नास्ति प्रत्ययलक्षणमित्येतद्दूर्णे

आशासः क्वौ उपधाया इत्वं वाच्यम्। आशीः। इत्वोत्वाभ्याम् गीः। पूः। इस्मन्त्रन्क्विषु च ६।४।९७। एषु छादेर्ह्रस्वः स्यात्। तनुच्छत्। अनुनासिकस्य क्वौ इति दीर्घः। मो नो धा
तोः। प्रतान्। प्रशान्। क्वौ इति ऊठ्। अक्षद्यूः। ज्वरत्वरेति ऊठ्। जूः। जूरौ। जूरः। तूः। स्रूः। ऊः। वृद्धिश्च। जनानवतीति जनौः। जनावौ। जनावः। मूः। मुवौ। मुवः। सुमूः। सु
म्वौ। सुम्वः। राल्लोपः। मूः। मुरौ। मूः। मूरौ। मुरः। धुर्वी। धूः। गमः क्वौ ६।४।४०। अनुनासिकलोपः स्यात्। अङ्गगत्। गमादीनामिति वक्तव्यम्। परीतत्। संयत्
सुनत्। ऊङ्। गमादीनामिति वक्तव्यलोपश्च। अग्रेगूः। अग्रेभ्रूः। स्थः क च ३।२।७७। चात् क्विप्। शंस्थः। शंस्थाः। प्राभिधानात् इत्त्वं च बाधितुं सूत्रम्॥
सुप्यजातौ णिनिस्ताच्छील्ये ३।२।७८॥ अजात्यर्थे सुपि धातोर्णिनिः स्यात् ताच्छील्ये द्योत्ये। उष्णभोजी। शीतभोजी। अजातौ किम्। ब्राह्मणानामन्त्र
यिता। ताच्छील्ये किम्। उष्णं भुङ्क्ते कदाचित्। इह वृत्तिकारेणोपसर्गभिन्न एव सुपि णिनिरिति व्याख्याय उत्प्रतिभ्यामाङि सर्त्तेरुपसंख्यानमितिप
ठितम्। हरदत्तमाधवादिभिश्चैतद्देवानुसृतम्। एतच्च भाष्यविरोधादुपेक्ष्यम्। प्रसिद्धश्चोपसर्गेपि णिनिः। प्रवभूवापजीविनाम्। अनुयायिवर्गः।
पततत्पथो धामविसारिनवस्त्वनीयाः प्रभवोऽनुजीविभिरित्यादौ। साधुकारिण्युपसंख्यानम्। ब्रह्मणि वदः। अताच्छील्यार्थं वार्त्तिकद्वयम्। साधुकारी
ब्रह्मवादी। कर्त्तर्युपमाने ३।२।७९। णिनिः स्यात्। उपपदार्थः कर्त्ता प्रत्ययार्थस्य कर्त्तुरुपमानम्। उष्ट्र इव क्रोशति उष्ट्रक्रोशी। ध्वांक्षरावी। अ
ताच्छील्यार्थमजात्यर्थं च सूत्रम्। कर्त्तरि किम्। अपूपानिव भक्षयति माषान्। उपमाने किम्। उष्ट्रः क्रोशति। व्रते ३।२।८०॥ णिनिः स्यात्। स्थ
ण्डिलशायी। बहुलमाभीक्ष्ण्ये ३।२।८१॥ पौनःपुन्ये द्योत्ये सुप्युपपदे णिनिः। क्षीरपायिण उशीनराः। मनः ३।२।८२॥ सुपि मन्यतेर्णिनिः स्यात्।

प्राधान्य एवेत्युक्तत्वादिति भावः॥ ❁ ॥ आशास इति। शासु अनुशिष्टौ आङः शासु इच्छायाम् आत्मनेपदी शास इदित्यादिना सिद्धे क्वावेव उपधाया इत्वमिति नियमः

तेन आप्त्याते इति सिद्धमित्येके॰ अन्ये तु विध्यर्थमेवेदं॰ न नियमार्थम् अप्रसक्त्यभावात्॰ न च शास इदङ्हलोरिति इत्वस्य माभिरन्तोनिवाच्यम्॰ तत्राङः साहचर्यात्परस्मैप
दिन एव शासेर्ग्रहणात्॰ यद्यपि सर्तिशास्त्यर्तिभ्यश्चेति सूत्रे पृथक् योगकरणादर्तेर्लुङि आरत समारतेत्यत्र परस्मैपदेऽप्यङिति सिद्धं तथापि पूर्वार्थे तथापि परस्मैपदग्रहणानुवृ
त्तेर्व्याकरे स्फुटत्वतया परस्मैपदे दृष्टोयः शासिसर्त्यास्त्यर्त्योः अङिति निष्कर्षः तथा चाऽशासे इत्यत्र इत्वप्रसक्तिरेव नास्तीत्याहुः वस्तुतस्तु आशिषि लिङ्लोटोरित्याशी
र्वेवेत्यादिनिर्देशेनेव सिद्धमिति नेदमपूर्ववार्तिकम्॰ ततश्च इत्वं वाच्यमित्यस्य इत्वं व्याख्येयमित्यर्थः॰ आशिषीत्याद्युक्तनिर्देशादिति दिक्॰ सुप्यात्मनविति॰ ओसुपी
तिपन्नस्यः कच यः स्यादिति क्विपि लुप्ते ष्यमास्येति इत्वं न॰ स्थानिवद्भावस्यानल्विधाविति निषेधात्॰ प्रत्ययलक्षणसूत्रं तु प्रत्ययस्यासाधारणरूपेणाश्रीयते तत्रैवेति नि
यमार्थमिति निष्कर्षात्॰ यत्तु कैयटेनोक्तं इत्वमपवकारादाविति वचनाज्ज्ञाप्यकारीयोदाहरणप्रामाण्याद्धप्रत्ययलक्षणेन इत्वं नेति तत्॰ अतॄलोडित्यादिसिद्धये
प्रत्ययप्राधान्ये अल्विध्यर्थं॰ प्रत्ययलक्षणसूत्रमिति पक्षमभिप्रेत्य तत्राप्यवकारादा विति वचनस्वीकारे सुधीवेति न सिध्येदित्यपरितोषेणापक्षान्तरस्वी
कार इति बोध्यम्॰ ननु नियमार्थमिति निष्कर्षपक्षे तु प्रागुक्तमित्र शीरित्यत्र कथमित्वं भवेदिति चेत्॰ अत्राहुः शास इदङ्हलोरिति॰ तत्र अङि नियमार्थमिदं॰ अ
जादौ चेदित्वं स्यादङ्येव नान्यत्रेति हल्ग्रहणं मास्त्विति ज्ञेयमिति॰ न चैवमपि हलादौ पिति सार्वधातुके तृणह इमोविधानाद्दतृणेडित्यादि तु नियमपक्षे न सि
ध्यतीत्यल्विध्यर्थमिति पक्षोपि स्वीकार्य इति वाच्यम्॰ उतो वृद्धिरिति सूत्राद्धल्ग्रहणमनुवर्त्य तृणहानीत्यत्रानिष्टवारणाय नाभ्यस्तस्याचीति सूत्रादचिनेत्य
नुवर्त्य व्याख्यानात्॰ एतच्च हधादिग्रणएव व्याख्यातं स्यादेतत्॰ सुपि स्थः क्विप् चेति॰ सूत्राभ्यां कक्विपोः सिद्धौ तत्राह घमीत्यादि॰ धातुग्रहणसामर्थ्याड्डिधातुमात्रा
द्भवन्नचप्रत्ययो हेत्वादिषु कृतगृह्यथा बाधते तथा निष्ठेतेः कक्विपावपि बाधेतेति स्थः कचेत्यारंभ इति भावः॰ नन्वेवं शामिधान्तोरित्यस्यानंतरं स्थः क चेति सूत्र्यतां च
कारेणाचि समुच्चिते सवर्णदीर्घेण घ्रं स्यादिति भविष्यति॰ एवं चोत्सर्गापवादयोस्समानदेशतया संदर्भशुद्धिरपि लभ्यते॰ इत्वाभावार्थं च नयत्तनीयमिति महल्लाघव
मिति चेत्॰ अत्राहुः अघ्रं स्यादित्यत्र अचकावशक्ताविति सूत्रे णोन्तरपदमतो दात्तं स्यात्॰ कृत्ग्रहणे गतिकारकपूर्वस्यापीति घ्रं स्यात् घ्रादस्यजन्तत्वात्॰ किंचैतेनन

CC-0. In Public Domain. Digitization by eGangotri

उत्सभोजीति · उत्सभोक्तुं शीलमस्य आमंत्रयितेति · मंत्रिगुप्तपरिभाषणे चुरादौ णिङ्पूर्वः तृच् दित्वान्नुम् · ताच्छील्यस्य विवक्षितत्वात् न अत एव न लोकेति निषेधात् · ब्रा
ह्मणानित्यत्र कर्मणि षष्ठी न कृता उपसर्गभिन्न एवेति · सत्सूद्विषेति सूत्रे उपसर्गेऽपीत्युक्तत्वादुपसर्गभिन्नस्यैव सुपो लाभायास्मिन्सूत्रे पुनः सुपग्रहणं कृतमिति भा
वः भाष्यविरोधादिति · उक्तं च भाष्ये · सुपीति वर्त्तमाने पुनः सुब्ग्रहणं किमर्थमनुपसर्ग इत्येवं तद्भूत् इदं तु सुपमात्रे यथा स्यात् उद्यासारिण्यः प्रत्यासारिण्यः इति ·
अस्यायमाशयः सत्सूद्विषेति सूत्रे सुपि स्थ इत्यतः सुपीत्यनुवर्त्तते तेन च उपसर्गेतरपरम् · उपसर्गेऽपीति पृथग्युक्तेः तदिहानुवर्त्तमानमयोधिकारादुपसर्गेतरपर
मेव स्यादिति · निवृत्त्यर्थं तु मा भूदिह सुब्ग्रहणमुपसर्गेऽपीत्यंशस्याप्यनुवृत्त्या निर्वाहात् · सर्वथापि सुब्मात्रे उपपदे णिनिः न त्वनुपसर्ग एवेति सिद्धान्तः · एतच्च शब्दकौ
स्तुभे स्पष्टम् · प्रसिद्धं चेति · एवं च पाणिनीयानुसारि णिनिमिति प्रक्रियाकारप्रयोगोऽपि निर्बाध एव · अमरश्च प्रायुंक्त लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधित इति
रिकृ · साधुकारिणीति · एतच्च ज्ञापकसिद्धम् · आक्वेरिति सूत्रे हि तच्छीलात्पृथक् साधुकारी गृह्यते · तच्च ताच्छील्यं विनापि णिनौ सत्येव संगच्छते · ब्रह्मणि वद इति
इदं तु वाचनिकमेव · अताच्छील्यार्थमिति · एतच्च कैयटहरदत्तादिग्रन्थे स्पष्टम् · यत्तु मुकुटवार्त्तिके ब्रह्मवादिष्वस्य तच्छीलतद्धर्मतत्साधुकारिपरतया व्याख्या
नं कृतं · आक्वेरित्यधिकारे तु ब्रह्मणि वदेर्णिनिविधायकं वचनं नारभ्येतेति कथमिदं संगच्छतेति चेत् · अत्राहुः भट्टपादानामयमाशयः सुप्यजाताविति सूत्रेण ता
च्छील्ये णिनिः उपसंख्यानेन ज्ञापकेन वा साधुकारिणि णिनिः आवश्यकाधमर्ण्ययोर्णिनिरित्यावश्यके णिनिस्तु तद्धर्मे पर्यवस्यति न त्विह आक्वेरिति सूत्रस्य व्या
पारोऽस्तीति ननु ब्रह्मवादिनो वदन्ति इत्यत्र ब्रह्म वेद इति ब्रह्मशब्दस्यापि जातिवाचकत्वात्कथमिह ताच्छील्ये णिनिरिति समर्थनमिति चेत् · अत्र नव्याः सुप्यजा
तावित्यत्र प्राणिजातिरेव पर्युदास्यते ताच्छील्यसमभिव्याहारात् · ब्राह्मणानामंत्रयितेति प्रत्युदाहरणानुगुणत्वाच्चेति न काप्यनुपपत्तिरिति मनः · बहुलग्रहणानु
वृत्तेरिह मन ज्ञाने इति दिवादिकस्यैव ग्रहणं न तु मनु अवबोधने इति तानादिकस्यैतेन उत्तरसूत्रे खशि श्यनेव भवति न तु शप्रत्ययस्तदाह · मन्यतेरिति · ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सू. सि. कौ. टी. त. १९८

आत्ममाने मननं मानः भावे घञ् आत्मनो मान इति कर्मणि षष्ठीसमासः स्वपर्यायः आत्मशब्दः अन्यथार्थत्वेन सन्निहितकर्तृत्वस्य पदार्थत्वात् तदाह स्वकर्मके इत्या
दिनादिति ननु वासरूपविधिना लभ्यत एव णिनिरिति किमर्थश्चकार इति चेत् अत्राहुः चकारेण णिनिर्विकल्पेन समुच्चीयते तेन करणे यज इत्यादौ णिनिरेवानु
वर्तते न तु खश् एवं चोक्तप्रयोजनानुरोधेन चात्र दृष्टो नात्र खे तीह न प्रवर्त्तत इति पण्डितमात्मानमिति एकस्याप्यात्मनः स्वरूपेण कर्तृत्वं पण्डितत्वविशिष्टरूपेण

आत्ममाने खश्च ।३।२।८३। स्वकर्मके मनने वर्त्तमानान्मन्यतेः सुपि खश्स्यात् तात् चाणिनिः । पण्डितमात्मानं मन्यते पण्डितम्मन्यः । पण्डितमानी ।
खित्यनव्ययस्य । कालिम्मन्या । अनव्ययस्य किम् । दिवामन्या । इच एकाचोऽम्प्रत्ययवच्च ।६।३।६८। इजन्तादेकाचोऽम्स्यात्स च स्वाद्यमवत् । खिदन्ते
परे । ओतो मश्शसोः । गाम्मन्यः । वाम्शसोः । स्त्रियम्मन्यः । स्त्रीम्मन्यः । नरम्मन्यः । भुवम्मन्यः । श्रियमात्मानम्मन्यते श्रिमन्यं कुलम् । भाष्यकारस्तु वचना
त् । श्रीप्रदस्य ह्रस्वः मुममोर्भावश्च । भूते ।३।२।८४। अधिकारोऽयम् । वर्तमाने लडिति यावत् । करणे यजः ।३।२।८५। करणे उपपदे भूतार्थे यजेर्णि
निः स्यात् कर्तरि । सोमेनेष्टवान् सोमयाजी । अग्निष्टोमयाजी । कर्मणि हनः ।३।२।८६। पितृव्यघाती । कर्मण्येवेत्त्सहे चेति यावत् । अधिक्रियते । ब्र
ह्मभ्रूणवृत्रेषु क्विप् ।३।२।८७। एषु कर्मसूपपदेषु हन्तेर्भूते क्विप्स्यात् । ब्रह्महा । भ्रूणहा । वृत्रहा । क्विप् चेत्येव सिद्धे नियमार्थमिदम् । ब्रह्मादिष्वे
व हन्तेर्भूत एव क्विबेवेति । चतुर्विधोऽत्र नियम इति काशिका । ब्रह्मादिष्वेव क्विबेवेति द्विविधो नियम इति भाष्यम् ॥ सुकर्मपापमन्त्रपुण्येषु कृञः ।३।२।
८९। सुकर्मादिषु च कृञः क्विप्स्यात् । त्रिविधोऽत्र नियम इति काशिका । सुकृत् । कर्मकृत् । पापकृत् । मन्त्रकृत् । पुण्यकृत् । क्विबेवेति नियमात् कर्मकृतवा
नित्यत्राऽण् न । कृञ एवेति नियमान्मन्त्रमधीतवान्मन्त्राध्यायः । अत्र न क्विप् ॥

९८ चकर्मत्वं बोध्यम् आत्ममाने किम् दर्शनीयमानी देवदत्तो यज्ञदत्तस्य का १९८
लिमन्येति स्त्रियाः पुंवदिति प्राप्तं पुंवद्भावं बाधित्वा परत्वात् ह्रस्वः यत्तु कयङ्मानिनोश्चेति प्राप्तः पुंवद्भाव इति प्रसादकृतोक्तं तद्भ्रमसोऽत्र मेवमानिन्रूपाभावस्य स्पष्ट
त्वात् दिवामन्येति अधिकरणशक्तिप्रधानस्याप्यसत्त्वस्वभावात्कर्मत्वं ॥

464

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इचरकाचः अम्ग्रहणमिहावर्त्तते तत एकेन अम्‌· विधीयते ऽपरेण प्रत्ययो विशेष्यते नदाह· स्वाद्यम्वदिति· एवं च न विभक्तौ तु स्मादिति निषेधान्मकारस्यैत्संज्ञा अत एव
एवपरश्च भवति· औतो ऽम्शसोरित्यत्र शसा साहचर्यात् सुवेवाम्‌· गृह्यत इत्युक्तत्वाद्दीन ओकारश्च भवतीत्याशयेनोदाहरति· गामन्यदिति· नरंमन्य इति ऋतो ङीत्या
दीनागुणः भाष्यकारेति· अयंभावः यथा टषादयः शुल्काः पुंयोगात्स्त्रियावर्त्तन्ते· षष्ठीगणिकेति नथेह श्रीशब्दः परित्यक्तस्वलिंगः क्लीबः सन् कुले वर्त्तते तत्र ह्रस्वो
नपुंसकइति ह्रस्वः सुम् तु न अपवादेन अमा बाधात्‌· स्वमोर्नपुंसकादित्यमो लुक् न चैवं गामन्य इत्यादावपि सुपो धातुप्रातिपदिकयोरिति लुक् स्यादिति वाच्यम्‌·।
अम्‌विधिसामर्थ्यादेव न ह्वाधादित्याहुः अम्प्रत्ययस्तु मध्ये ऽपवादा इति न्यायेन सुपो धातुप्रातिपदिकयोरिति लुकमेव बाधते न तु स्वमोर्नपुंसकादिति लुकमिति भा
ष्यादौ स्थितम्‌· स्यादेतत्‌· नपुंसकह्रस्वे कृते सुमः प्राप्तिरेव नास्ति कथमत्रापवादेन अमा बाधा इत्युक्तिः संगच्छेत अरुर्द्विषदिति सूत्रेहि अंतग्रहणस्य समीपवा।
चित्वेन खित्यनव्ययस्येति ह्रस्वे कृते पश्चान्मुमिति व्याख्यातत्वात्‌· सत्संजनमेजय इत्यत्र स्वतः सिद्धेपि ह्रस्वे यथा खित्यनव्ययस्येति पुनर्ह्रस्वो मुमर्थं स्वीक्रियते।
तथाऽत्रापि भवेदिति स्वस्येव सुमः प्राप्तिरिति· भूते धातोरित्यधिकाराद्धात्वर्थस्य विशेषणमिदम्‌· भूतेर्थे विद्यमानाद्धातोरित्यर्थः करणे स्वरितत्वाण्णिनिरेवानुवर्त्तते न।
तु खश्‌ इत्यादृशिनिः स्यादिति सोमेऽनलना विशेषण यागकृत न वा नित्यर्थः अग्निष्टोमेति· अग्निष्टोमस्तोत्रेण समाप्यमानो यो यागस्तल्लक्षणया ऽग्निष्टोमस्तेनापूर्वं
भावितवानित्यर्थः उक्तं च काशिकायां अग्निष्टोमः फलभावनायां करणमिति कर्मणि हनः पितृव्यघातीति· अत्र काशिकाकुत्सितग्रहणं कर्त्तव्यमिह माभूत्‌· चौरं
हतवानिति· यद्यपीदं भाष्ये नास्ति तथापि शब्दशक्तिस्वाभाव्यादिदं लभ्यत इत्याहुः चतुर्विध इति अयमाशयः इह सूत्रे श्रुतत्वात्पूर्वं ब्रह्मादय उद्देश्यास्ततोऽनंत
रं प्रवृत्तत्वाद्धनिस्ततः परिशेषात्भूत इति क्विप् तु सर्वांते निर्देष्टव्यः। विधेयत्वात्‌· न देवं वचनव्यक्तिः ब्रह्मादिषूपपदेषु हन्तेर्भूते क्विविति· एवं स्थिते यत्रैव कारस्ततो
ऽन्यत्र नियम इति न्यायेन नियमोत्र भवन्नन्तरं भवति तत्र च ब्रह्मादिष्वेवेत्यवधारणे हन्तेस्तदनंतरं निर्दिष्टत्वादुपपदान्तरसंबंधनिवृत्तिफलो नियमो भवति ब्रह्मा।
दिषु हन्तेरेव भूते इत्यवधारणे त्वनंतरत्वाविशेषेपि प्राथम्यादुपपदनियमो धात्वंतरनिवृत्तिफलकः ब्रह्मादिषु हन्तेर्भूत एव क्विवित्यवधारणे तु क्विप्‌ हंत्योरानंतर्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ःविशिष्टेपि प्राधान्यात्कालांतरसंबंधनिवृत्तिफलकः प्रत्ययनियमः ब्रह्मादिषु हंते र्भूते क्विवेवेति वचनव्यक्तौ प्रत्ययांतरसंबंधनिवृत्तिफलकः कालनियमः सोऽ
यं प्रकृतसूपपदप्रत्ययकालनियमानां विवेकः अगृह्यमाणविशेषात्तु चतुर्विधस्यापीह ग्रहणं· तत्र ब्रह्मादिष्वेव हंतेरिति प्रकृतिनियमे भूतवृत्त्याश्रयणाद्वर्तमानका
ले भविष्यत्काले चोपपदान्तरेपि भवत्येव पुरुषं हंति हनिष्यति वा पुरुषहा अरिहयोरिहयोगविचक्षणः अरीन् हंतीति· अरिहा स चासौ योगश्च अरिहयोगस्तत्र वि
चक्षण इत्यर्थः प्रकृतिनियमफलं तु पुरुषं हतवान् पुरुषहा इति भूतार्थे प्रयोगाभावेः ब्रह्मादिषु हंतेरेवेत्युपपदनियमेपि भूतवृत्त्याश्रयणाद्वर्तमाने भविष्यत्का
लयो र्धात्वंतरादपि भवत्येव वृत्रं जयति जेष्यति वा वृत्रजिदिति उपपदनियमफलं तु वृत्रं जितवान् वृत्रजिदिति प्रयोगाभावः भूत एव क्विविति प्रत्ययनियमेपि ब्रह्मा
दिष्विति त्युक्ते रुपपदांतरे वर्तमानभविष्यत्कालयो र्हंतेः क्विन्न भवत्येव पुरुषं हंति हनिष्यति· वा पुरुषहा अरिहेति प्राग्वत् प्रत्ययनियमफलं तु ब्रह्माणं हंति ब्रह्महे
त्यादिप्रयोगाभावः भूते क्विवेवेति· कालनियमेपि ब्रह्मादिष्वित्युक्तेरुपपदान्तरे भूतेपि प्रत्ययान्तरं भवत्येव पितृव्यं हतवान्· पितृव्यघाती· इह कर्मणि हनु इति भू
ते णिनिः कालनियमफलं तु ब्रह्माणं हतवान् ब्रह्मघातीति प्रयोगाभावः सोपपदस्य प्रत्ययो नियमेन व्यावर्त्तते· निष्ठा तु भवत्येव वृत्त्रं हतवानिति भाष्यकारस्तु प्र
कृतिकालनियमावेवाश्रियत· न त्वायमाशयः धातुकालौ हि नेह सूत्रे श्रुतौ किंतु प्रकरणलक्षणजघन्यप्रमाणेनोपस्थितौ· अतस्तयोरेवोपरोधो न्याय्यो न तू
पपदप्रत्यययोः श्रुत्युपस्थापितत्वात्· एवं न्यासोपदर्श्येन भाष्येणासह विरोधादुक्तमिमतमुपेक्ष्यमेवेति कैयटे स्थितम् यत्तिह हरदत्ते नोक्तं धातूपपदविषयं
नियमद्वयं भाष्ये प्रदर्शितमिति· तत्र धातुकालविषयमिति वक्तव्ये उपपदग्रहणं प्रामादिकमित्यवधेयम्· सुकर्म त्रिविध इति धातुनियमस्तिह नेष्यत इति
भावः क्विवेवे तीति· भूते क्विवेवेति प्रत्ययांतरसंबंधनिवृत्तिफलककालनियमादित्यर्थः कृत्रस्त्रवेतीति सुकर्मादिषु कृत्रस्त्रवेति धात्वंतरसंबंधनिवृत्तिफल
॥ कोपपदनियमादित्यर्थः ॥ ९ ॥

465

CC-0. In Public Domain. Digitization by eGangotri

भूतएवेतीति· भूतएव क्विविति कालांतरसंबंधनिवृत्तिफलकप्रत्ययनियमादित्यर्थः स्वादिष्वेवेतीति· स्वादिष्वेव कृत्प्रत्ययः सुपपदान्तरसंबंधनिवृत्तिफलकधातुनियमाभावादित्यर्थः सोमेसुञः इहापि चतुर्विधोनियमइतिवृत्तिः एवमुत्तरसूत्रेपि· तत्रभूत कालस्य क्विपि नियतत्वात्सोमंसुतवान्· सोमसावः अग्निं चितवान्· अग्निचापइत्यणनभवति सुनोतेः सोमएवउपपदे नियतत्वाच्चिनोतेस्त्वग्नावेवोपपदेनियतत्वात्सुरांसुतवान् सुरासुत् इहकाश्चित्रवानिष्टकाचिदितिनभवति किंतु सुरासावः इष्टका चायइत्यणेवभवति सोमस्यसुनोतावेवधातौनियतत्वात्· अग्नेस्तु चिनोतावेवनियतत्वात् सोमंक्रीतवान्सोमक्रीः अग्निंभृतवान्· अग्निभृत् इतिक्विप्नभवति किंतु सोमक्रायः अग्निभारः इत्यणेवभवति· भूतएव क्विपोनियतत्वात्सोमंसुनोतिसोष्यतिवेत्यर्थे क्विप्नभवति· तथाअग्निंचिनोतिचेष्यतिवेत्यर्थे क्विबभावः

भूतएवेतिनियमात्। मन्त्रइत्युनोतिकरिष्यतिवेतिविवक्षायान्नक्विप्। स्वादिष्वेवेतिनियमाभावादन्यस्मिन्नप्युपपदे क्विप्। ग्रावस्तुत्। भाष्यकृत्। सोमेसुञः। ३।२।९०॥ सोमसुत्। चतुर्विधोत्रनियमइतिकाशिका। एवमुत्तरसूत्रेपि। अग्नौचेः ३।२।९१॥ अग्निचित्। कर्मण्यग्न्याख्यायाम्। ३।२।९२। कर्मण्युपपदेकर्मण्येवकारकेचिनोतेःक्विप्स्यात्। अग्न्याधारस्थलविशेषस्याख्यायाम्। श्येनइवचितःश्येनचित्। कर्मणीनिविक्रियः। ३।२।९३॥ कर्मण्युपपदेविपूर्वात्क्रीणातेरिनिःस्यात्। कुत्सितग्रहणंकर्त्तव्यम्॥ सोमविक्रयी। घृतविक्रयी। दृशेः क्वनिप्। ३।२।९४॥ कर्मणिभूत इत्येव। पारंदृष्टवान्पारदृश्वा॥ ९९ किंत्वणेव कर्मण्यग्न्याख्यायाम्· श्येनचिदिति· समुदायोयंआहवनीयधारणार्थेइष्टकानिर्मितस्थलविशेषेनिरूढः कर्मणीति· कुत्सितग्रहणमिति· एतच्चवार्तिकं पुनः कर्मग्रहणसामर्थ्याल्लभ्यते· यत्कर्मक्रियायासंबध्यमानकर्तुः कुत्सामावहतितत्रेत्यर्थः सोमादयश्चविक्रियमाणाः शास्त्रप्रतिषेधात्कुत्सावहाः कुत्सितग्रहणान्नेहधान्यविक्रायः दृशेः क्वनिप्· अन्येभ्योपिदृश्यंतइतिसिद्धेनियमार्थमिदंक्वनिब्वयथास्यात्तस्तहनिर्दिष्टोमनिन्वनियौमाभूतानवाअणादयइति ——— सोपपदप्रत्ययस्यैवनियमेननिवर्तनात्निष्ठानुभवत्येवयारंदृष्टवानिति· एवंस्थितेविश्वदृश्वनयनावयमेवेत्यादौविश्वंपश्यतिविश्वंदृश्वानितानिनयनानियेषांतेविश्वदृश्वनयना इत्येवंक्वनिबंतस्यलटावि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



राजनियुधिकृञः सहे च इदमपि प्रत्ययान्तरनिवृत्त्यर्थं सूत्रमित्येव वृत्तिकारादिभिर्व्याख्यातत्वात् कालान्तरनिवृत्त्यर्थमिदमिति केचित् अभियुक्तैरनुक्तत्वादित्यादिदिक्॥ ः॥ राजनियुधिकृञः सहे च इदमपि प्रत्ययान्तरनिवृत्त्यर्थं सूत्रमित्येव वृत्तिकारादिभिर्व्याख्यातत्वात् कालान्तरनिवृत्त्यर्थमिदमिति केचिदभियुक्तैरनुक्तत्वादित्यादि सूत्रद्वयं दृशेः क्वनिपि विनियमार्थमिति न्याय्यम्॰ वस्तुतस्तु दृशिग्रहणेन निर्वाहस्यागतिकत्वादियं त्रिसूत्री विधात्री त्वपि सुवचम् प्राचां ग्रन्थास्तु हडदाशीनासवेति सूत्रद्वयं दृशेः क्वनिपि विनियमार्थमिति न्याय्यम्॰ वस्तुतस्तु दृशिग्रहणेन निर्वाहस्यागतिकत्वादियं त्रिसूत्री विधात्री त्वपि सुवचम् सप्तम्यां ज शब्दः कौस्तुभे स्थितम्। मंदुरायामिति॰ वाजिशालातु मंदुरेत्यमरः पुमनुजेति॰ इह जनिः सकर्मकः अनुरोधविशिष्टजननवृत्तित्वात्॰ अन्येष्वपि दृश्यते —— सप्तम्यां ज

राजनियुधिकृञः।३।२।९५॥ क्वनिप् स्यात्। युधिस्तन्भावितण्यर्थः। राजानं योधितवान् राजयुध्वा। राजकृत्वा। सहे च।३।२।९६॥ कर्म्मणीति निवृत्तं। सह युध्वा। सहकृत्वा। सप्तम्यां जनेर्डः।३।२।९७॥ सरसिजं। मन्दुरायां जातो मन्दुरजः। ड्यापोरिति ह्रस्वः। पञ्चम्यामजातौ।३।२।९८॥ जातिशब्दव र्ज्जिते पञ्चम्यन्त उपपदे डः स्यात्। संस्कारजः। अदृष्टजः। उपसर्गे च संज्ञायाम्।३।२।९९॥ प्रजा स्यात्सन्ततौ जने। अनौ कर्म्मणि।३।२।१००॥ अनुपूर्वा ज्जनेः कर्म्मण्युपपदे डः स्यात्। पुमांसमनुरुध्य जाता पुमनुजा। अन्येष्वपि दृश्यते।३।२।१०१॥ अन्येष्वप्युपपदेषु जनेर्डः स्यात्। अजः। द्विजः। ब्राह्मण जः। अपिशब्दः सर्वोपाधिव्यभिचारार्थः। तेन धात्वन्तरादपि कारकान्तरेष्वपि क्वचित्। परितः खाता परिखा। क्तक्तवतू निष्ठा।१।१।२६॥ एतौ निष्ठा संज्ञौ स्तः। निष्ठा।३।२।१०२॥ भूतार्थवृत्तेर्धातोर्निष्ठा स्यात्। तत्र तयोरेवेति भावकर्म्मणोः क्तः। कर्त्तरि कृदिति कर्त्तरि क्तवतुः। उकावितौ। स्नातं मया स्तुतस्त्वया विष्णुः। विष्णुर्विश्वं कृतवान्। निष्ठायामण्यदर्थे।६।४।६०॥ ण्यदर्थो भावकर्म्मणी ततोऽन्यत्र निष्ठायां क्षियो दीर्घः स्यात्। क्षियो दीर्घात् ८।२।४६ दीर्घात् क्षियो निष्ठातस्य नः स्यात्। क्षीणवान्। भावकर्म्मणोस्तु क्षितः कामो मया। श्युकः किति। श्रितः। श्रितवान्। भूतः। भूतवान्। स्तुतः स्तुतवान्। इह गुणे वृद्धौ वा वाच्यते न स्कान्त्वान्नेट्। ऊर्णुतः। नुतः। वृतः॥ ((नेरित्युक्तमसप्तम्यामपि दृश्यत इत्यत आह॰ अजः द्विज इति॰ न जायत इत्यजः द्विर्जातो द्विजः जन्मना जायते शूद्रः कर्मणा जायते द्विज इत्यभियुक्तोक्तेः पंचम्यामजाताविस्युक्तं जातावपि दृश्यत इत्याह॰ ब्राह्मणज इति॰ अपि शब्द इति॰ य त्तु अनंतात्यन्ताध्वेति प्रकरणे अन्यत्रापि दृश्यत इत्युपसंख्यानं तद्भूतकालं विनापि यथा स्यादित्येवमर्थम्॰ वस्तुतस्तु प्रकृत॰॥ ः॥ ॥ ः॥ ॥



४६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सूत्रस्थस्यापि ग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वान्न द्वार्तिकमनेनैव गतार्थम्। विभाषितं चेदमिको गुणवृद्धी इति सूत्रे जनेर्डप्रकरणे भाष्ये यं डो वक्तव्य इति वदता भाष्यकारेण· एवं च प्रकृतसूत्रस्थमन्येभ्योपि दृश्यत इति वार्तिकमपि गतार्थमित्यवधेयम्· क्तक्तवतू निष्ठा ननु क्तक्तवत्वोः सिद्धयोर्निष्ठेति संज्ञासिद्धिः सिद्धायां निष्ठासंज्ञायां क्तक्तवत्वोर्विधानमित्यन्योन्याश्रय इति चेन्न अत्राहुः भाविनी संज्ञा· विज्ञायते स भूतं भवति यस्मान्नस्य निष्ठेति संज्ञा भवति· इत्याश्रयणात् सामर्थ्यात्· क्तक्तवत्वोर्विधानमेतदिति नास्त्युक्तदोष इति· ल्यप् दर्शोभावकर्मणोरिति· यद्यपि पाज्याक्षमित्यादौ करणादावपि बाहुलकात्स्यप् द्भवति· तथापि तयोरेवेति वचनाद्भावकर्मणोरेव साक्षादुपात्तो य इति स एवेह विवक्षित इति भावः· क्षियो क्षि निवासगत्योः द्वयोरपि ग्रहणं क्षितः काम इति अंतर्भावितण्यर्थत्वेन सकर्म

रदाभ्यां निष्ठातो नः पूर्वस्य च दः। ८।२।४२। रेफदकाराभ्यां परस्य निष्ठातस्य नः स्यात् निष्ठापेक्षया पूर्वस्य धातोर्दकारस्य च। शॄ। ऋत इत्त्वं रपरत्वं। शीर्णः। बहिरङ्गत्वेन वृद्धेरसिद्धत्वान्नेह। कृतस्यापत्यं कार्तिः। भिन्नः। छिन्नः। संयोगादेरातो धातोर्यण्वतः। ८।२।४३। निष्ठातस्य नः स्यात्। द्राणः। स्त्यानः। ग्लानः। म्लानः। ल्वादिभ्यः। ८।२।४४। एकविंशतेर्लूञादिभ्यः प्राग्वत्। लूनः। ज्या। ग्रहि ज्या। जीनः। दुग्वोर्दीर्घश्च। दुगतो। दूनः। दु दू उपतापे इत्यस्य यत्तु न गृह्यते सानुबन्धत्वात्। मृदुतया दुतयेति माघः। गूनः। पृ ओ विनाशे। पूना यवाः। विनष्टा इत्यर्थः। पूतमन्यत्॥ ॥

कर्त्तृत्वात्कर्मणि क्तः· एतच्च अक्षितो तस्य नेदिममिति मंत्रव्याख्यायां माधवग्रंथे स्पष्टम्· भावे तु क्षितं कामेनेत्यादावुदाहरणीयम्· इण्निषेधसूत्रं स्मारयति· श्युकः किती ति· क्षुत इति दुक्षुशब्दे न्युत इति· गुप्तुतो· व्रत इति· वृङ् संभक्तौ वृञ् वरणे॥ ॥ रदाभ्यां इह रदाभ्यामित्यनेन तकारो विशेष्यते न तु निष्ठा· तेन चरितं मुदितमित्यत्र न· तकारस्य रव्यवहितत्वान्नेदं तदाह· परस्य निष्ठातस्येति बहिरङ्गत्वेनेति· निष्ठातकाराद्दधि भूतं न इडितत्रिनंत्र्यमाश्रित्यांगस्यादेरत्वो विधीयमानत्वाद्वृद्धिर्बहिरङ्गेति भावः· द्राण इति द्राकुत्सायां गतौ· ग्लानः म्लान इति· ग्लै म्लै हर्षक्षये· एकविंशतेरिति· क्र्यादिषु प्वादयो द्वाविंशतिः पठ्यंते तत्र पूञं विहाय त्वादयो ज्ञेयाः· जीन इति· सिद्धत्वाच्च ग्रहिज्येति संप्रसारणे कृते संयोगादेरात इत्यस्याप्राप्तिः· पून इति· पूपुरीषोत्सर्गे· विनष्टा इति धातूनामनेकार्थत्वा

CC-0. In Public Domain. Digitization by eGangotri

·स्ता

सि· कौ· सिनोतेरिति· षिञ् बंधने ग्रासरूपं ग्रासकर्मतत्कर्तृ यस्य सिनोतेस्ततः परस्य निष्ठातस्य नः स्यादित्यर्थः॥ सिनो ग्रास इति· पिंडीक्रियमाणो ग्रासोयदा दध्यादिव्यंजनव

टी· त· शाद्बंधनेऽनुकूलोभवति तदा कर्मणएव कर्तृत्वमितिबोध्यम्· ग्रासेति· किमिति· ग्रासकर्मकर्तृकस्येति किमर्थमित्यर्थः कर्मकर्तृकेति किमिति· ग्रासकर्मकस्येत्ये

१७१ वास्तु कर्तृपदं किमर्थमित्यर्थः कर्मपदं विहाय ग्रासकर्तृकस्येत्युक्तौ तु ग्रासेन कंठः सित इत्यत्रापि स्यादितिबोध्यम्· भुग्न इति· भुजो कौटिल्ये नत्वस्यासिद्धत्वात् म

लिपरत्वकुत्वम्· उच्छून इति· श्वयतेर्यजादित्वात्संप्रसारणे पूर्वरूपे च हलइति दीर्घः प्रहीण इति घुमास्थेति ईत्वम्· सून इति· षूङ् प्राणिप्रसवे दून इति दूङ्

सिनोतेर्ग्रासकर्मकर्तृकस्य·। सिनो ग्रासः। ग्रासेति किम्। सिता पाशेन सूकरी। कर्मकर्तृकेति किम्। सितो ग्रासो देवदत्तेन्। ओदितश्च।८।२।४५॥

भुजो। भुग्नः। टुओश्वि। उच्छूनः। ओहाक्। प्रहीणः। स्वादय ओदितः इत्युक्तम्। सूनः। सूनवान्। दूनः। दूनवान्। ओदित्त्व मध्ये डीङः पाठसामर्थ्यान्नि

ष्ठा। उड्डीनः। द्रवमूर्तिस्पर्शयोः श्यः।८।२।४७॥ द्रवस्य मूर्तौ काठिन्ये स्पर्शे चार्थे श्यैङः संप्रसारणं स्यान्निष्ठायाम्। श्योऽस्पर्शे ८।२।४७। श्यैङो नि

ष्ठातस्य नः स्यादस्पर्शेऽर्थे हलइति दीर्घः। शीनं घृतम्। अस्पर्शे किम्। शीतं जलम्। द्रवमूर्तिस्पर्शयोः किम्। संश्यानो वृश्चिकः। शीतात्संकु

चित इत्यर्थः। प्रतेश्च।६।१।२५। प्रतिपूर्वस्य श्यः संप्रसारणं स्यान्निष्ठायाम्। प्रतिशीनः। विभाषाभ्यवपूर्वस्य।६।१।२६। श्यः संप्रसारणं वा स्यात्।

अभिश्यानं घृतम्। अभिशीनम्। अवश्यानोऽवशीनो वृश्चिकः। व्यवस्थितविभाषेयम्। तेनेह न। समवश्यानः। अञ्चोऽनपादाने।८।२।४८।अ

ञ्चो निष्ठातस्य नः स्यान्नत्वपादाने। यस्य विभाषा। यस्य क्वचिद्विभाषयेड्विहितस्ततो निष्ठाया इण्न स्यात्। उदितो वेति क्त्वायां वेड्विहितो ह्रासम

परिताप· ओदितश्च इत्यत्र डीङ इतिस्यात्तर्हि धातोः परो निष्ठातकारो न संभवतीति नत्वार्थः पाठो नर्थकः स्यादिति भावः न च ओदित्त्वमध्ये पाठसामर्थ्यादिटाव्य

वधानेन नत्वभवेदिति विपरीत्यं किन्नस्यादिति शंक्यम्· लघ्व्यानुरोधेन इडभाव कल्पनापाएवन्याय्यत्वात्· अन्येतु सत्यपि इडागमे सवर्णदीर्घे चैकादेशस्य पू

र्वान्तत्वेन ग्रहणाड्डीङ्डाव्यवधानं नास्त्येवेत्तीष्ठुसिध्यतीत्याहुः· संश्यान इति श्यैङ्· गतावित्यस्यादेवइत्यात्वे संयोगादेरात इतिनिष्ठातस्यनः यस्य विभाषायस्येत्या २२१

५६४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्याप्षष्ठीयदावस्यादुं धात्वन्तस्येत्यर्थः समक्तः इति· अंचु गतिपूजनयोः संपूर्वः नत्वस्यासिद्धत्वात् मलिपरतः कुत्वं॥ ॥उदक्तमिति· उद्धृतमित्यर्थः व्यक्तमि
त्यनतु अंजू व्यक्तीत्यस्य नत्वं चेः तेनात्र नत्वाभावः वृक्णइति· ओव्रश्चू छेदने· ग्रहिज्येति संप्रसारणम्· नत्वस्यासिद्धत्वात्स्कोरिति सलोपः चोः कुत्वं च· उदित्वेन

उदक्तमुदकं कूपात्। नत्वस्यासिद्धत्वाद्व्रश्चेति षत्वे प्राप्ते निष्ठादेशः षत्वस्वर प्रत्ययेड्विधिषु सिद्धो वाच्यः। वृक्णः। वृक्णवान्। परिस्कन्दः प्राच्यभ
रतेषु। ८।३।७५॥ पूर्वेणामूर्द्धन्यप्राप्ते नत्वाभावो निपात्यते। परिस्कन्दः। प्राच्येति किम्। परिष्कन्नः। परिस्कन्नः। परेश्चेति विकल्पः। स्तन्भेरिति षत्वे प्राप्ते
प्रतिस्तब्धनिस्तब्धौ च। अत्र षत्वं न स्यात्। दिवोऽविजिगीषायाम्। ८।२।४९॥ दिवो निष्ठातस्य नः स्यादविजिगीषायाम्। द्यूनः। विजिगीषायां तु द्यू
तम्। निर्वाणोऽवाते। ८।२।५०॥ अवाते इति छेदः। निपूर्वाद्वातेर्निष्ठातस्य नत्वं स्याद्वातश्चेत्कर्त्ता न। निर्वाणोऽग्निर्मुनिर्वा। वाते तु निर्वातो वातः। शु
षः कः। ८।२।५१॥ निष्ठातस्य कः। शुष्कः। पचो वः। ८।२।५२॥ पक्वः। क्षायो मः। ८।२।५३॥ क्षामः। स्त्यः प्रपूर्वस्य। ६।१।२३॥ प्रात्स्त्यः सम्प्रसारणं
स्यान्निष्ठायाम्। प्रस्त्योऽन्यतरस्याम्। ८।२।५४॥ निष्ठातस्य मो वा स्यात्। प्रस्तीमः। प्रस्तीतः। प्राक्किं। स्त्यानः। अनुपसर्गात्फुल्लक्षीबकृशोल्ला
घाः। ८।२।५५॥ ञिफला। फुल्लः। निष्ठातस्य लत्वं निपात्यते क्तवत्वेकदेशस्यापीदं निपातनमिष्यते। फुल्लवान्। क्षीबादिषु तु क्तप्रत्ययस्यैव तलोपः
तस्यासिद्धत्वान्न प्राप्तस्येटोऽभावश्च निपात्यते। क्षीबो मत्तः। कृशः स्तनुः। उल्लाघो नीरोगः। अनुपसर्गात्किम्। आदितश्च। ७।२।१६॥ आकारेतो नि
ष्ठाया इण्न स्यान्नाति च। ७।४।८९॥ चरफलोरत उत्स्यात्तादौ किति। प्रफुल्तः। प्रक्षीबितः। प्रकृशितः। प्रोल्लाघितः। कथन्तर्हि लोध्रद्रुमं सानुम
तः प्रफुल्लमिति। फुल्ल विकसने। पचाद्यच्। सूत्रं तु फुलतादिनिवृत्त्यर्थम्॥

१९ वेद्धत्वाद्यस्य विभाषेति निष्ठायामिडभावः तुड्डिघिल्लादेशविनामे
षुवार्णैकदेशस्यापि वर्णत्वेन ग्रहणाद्दकारैकदेशो रेफो निमित्तमित्यड्कुप्वाङिति नस्य णत्वम्· णत्वस्यविनाम इति षं चासंज्ञाकृवर्णान्नस्य णत्वमिति यथा श्रु
तपक्षेपि णत्वनिषेधार्थं क्षुभ्नादिषु नृमनःशब्दपाठाद्दकारं निमित्तं कृत्यापि अड्कुप्वाङिति णत्वं॥

भवत्येवेतिदिक्· परिस्कंदः अचि निपातनम्· अथवा निष्ठान्तकारस्य लोप इति काशिका· घूत इति· घोः घूङ्ि न्मूठ· घी णा इत्यर्थः घूतमिति· विजिगीषयाहित
त्वा घ्नाः पात्यन्ते इति· गम्यते विजिगीषा· निर्वाणो वाते वा गतिगंधनयोः निर्पूर्वादस्मान्निष्ठान्तस्य नत्वं णत्वं· वाते अत्र क्त नो नेति· एवं च वातेन हेतुना निर्वाणो दी
प इत्यत्र निषेधो नेत्याहुः निर्वात इति· गत्यर्थाकर्मकेति कर्तरि क्तः निनत्वं वातो गत इत्यर्थः शुष्क इति· शुष शोषणे· क्षाम इति· क्षै क्षये आदेच इत्यात्वम्· प्र
स्तीमः प्रस्तीत इति· स्त्यै ष्ट्यै शब्दसंघातयोः आत्वे कृते संयोगादेरित्यस्यासिद्धत्वात्पूर्वं संप्रसारणे पूर्वरूपे च कृते हल इति दीर्घः पश्चाद्यणत्वात् दंतत्वयोर्विर
हान्नत्वम् संस्त्यान इत्यत्र तु भवत्येव· स्त्री वा दिधिषिति· स्त्री इमरे क्त घातनुत्वे· लाघवशक्तावुत्पूर्वैः एभ्यः क्तः ननु फुल्ल विकसन इत्यस्मादुल्लाधे श्च पच

उत्फुल्लसंफुल्लयोरुपसंख्यानम्। नुदविदोन्दत्राघ्राह्रीभ्यो ऽन्यतरस्याम्। ८।२।५६। एभ्यो निष्ठातस्य नो वा। नुन्नः। नुत्तः। विद विचारणे रौधा
दिक एव गृह्यते। उन्दिना परेण साहचर्यात्। विन्नः। विन्नः। वेत्तेस्तु विदितः। विद्यतेर्विन्नः। उन्दी। श्वीदितो निष्ठायाम्। ७।२।१४। श्वयतेरीदि
तश्च निष्ठायामिट् न। उन्नः। उत्तः। त्राणः। त्रातः। घ्राणः। घ्रातः। ह्रीणः। ह्रीतः। न ध्याख्यापॄमूर्छिमदाम्। ८।२।५७। एभ्यो निष्ठातस्य न त्वं न
ध्यातः। ख्यातः। पूर्तः। । ८।२।५८। विन्दतेर्निष्ठान्तस्य निपातो ऽयभ्यागम्यप्रतीते चार्थे वित्तं धनम्।
वित्तः पुरुषः। अनयोः किम्। विन्नः। विभाषा गमहनेति क्वसौ वेट् त्वादिह नेट्। भित्तं शकलम्। ८।२।५९। भिन्नमन्यत्॥ ॥ ॥

यदि इतराभ्यामिगुपधलक्षणः कप्रत्ययश्च फुल्ला दयः सिद्ध्यंति तत्किं सूत्रेणेत्यत आह· सूत्रं त्विति· निष्ठार्थमित्युपलक्षणम् फुल्लवानिति क्तवतोनिष्ठाच
द्धाजनादित्याद्युदात्तस्वरसिद्ध्यर्थमिति बोध्यम्॥ ॥ उत्फुल्लसंफुल्लयोरिति· यद्यपि प्रफुल्ल इति वत्सुल्लः पचाद्यचा यद्यसिद्धं तथापि तु उत्फुल्लसंफुल्ल इति
प्रयोगनिवृत्त्यर्थं वचनम्· नुदविदोन्दत्राघ्राह्रीभ्यां संयोगादेरातइति नित्यप्राप्ते ह्रीत्यस्याप्राप्ते उभयत्र विभाषेयम्· वेत्तेस्त्विति· तथा च भाष्यम्· वित्तेस्तु विदितो निष्ठा
विद्यतेर्विन्न इष्यते· विर्तिर्विन्नश्च वित्तश्च भोगे वित्तश्च विंदतेरिति· उन्नः उत्त इति· अनिदितामिति नलोपः॥

२७२

468

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न ध्या · ध्यै चिंतायाम् · ख्या प्रकथने · पृ पालनपूरणयोः · मूर्छा मोहसमुच्छ्राययोः · मदी हर्षे · पूर्त्त इति · श्रुकः कितीति इण्निषेधः · कुलोपविधिं सारयति राल्लोप इति · मूर्त्त इति · आदितश्चेति नेट् मत्त इति · श्वीदित इति नेट् · विंत्ते · ज्ञानार्थकाद्विदेरीटाभावं सत्तार्थकविदेर्विचारणार्थकविदेश्च भोगप्रत्यययोर्इति नेसंभवतीत्याशयेनाह · विंदतेरिति · विद्लृ लाभ इत्यस्येत्यर्थः · भुज्यत इति भोगः · प्रतीयत इति प्रत्यय इति कर्मसाधनावेनाविति व्याचष्टे भोग्ये प्रतीते चार्थे इति भिन्न शकलम् · भिदेः क्तोरदाभ्यामिति प्राप्तनत्वस्याभावो निपात्यते भिन्नं शकलखंडे वेत्यमरः । भिन्नमन्यदिति · विदीर्णमित्यर्थः ॥ ॥ ऋणमाधमर्ण्ये · अधमर्ण इः स्वप्रदं ऋणमस्य सोऽधमर्णस्तस्य भाव आध ॥

ऋणमाधमर्ण्ये । ८ । २ । ६० ॥ ऋधातोः क्तनकारस्य नत्वं निपात्यते आधमर्ण्ये व्यवहारे । ऋतमन्यत् । स्फायः स्फी निष्ठायाम् । ६ । १ । २२ । स्फीतः । इणिनिष्ठायाम् । ७ । २ । ४७ । निरः कुषो निष्ठायामिट् स्यात् यस्य विभाषेति निषेधे प्राप्ते पुनर्विधिः । निष्कुषितः । वसतिक्षुधोरिट् । ७ । २ । ५२ । आभ्यां क्त्वानिष्ठयोर्नित्यमिट् स्यात् । उषितः । क्षुधितः । अञ्चेः पूजायाम् । ७ । २ । ५३ । पूजार्थादञ्चेः क्त्वानिष्ठयोरिट् स्यात् । अञ्चितः । गतौ तु अक्तः । लुभो विमोहने । ७ । २ । ५४ । लुभः क्त्वानिष्ठयोरिट् स्यान्न तु गार्ध्ये । लुभितः । गार्ध्ये तु लुब्धः । क्लिशः क्त्वानिष्ठयोः । ७ । २ । ५० ॥ इड्वा स्यात् । क्लिश उपतापे नित्यं प्राप्ते । क्लिशू विबाधने । अस्य क्त्वायां विकल्पे सिद्धेऽपि निष्ठायां निषेधे प्राप्ते विकल्पः । क्लिशितः । क्लिष्टः । पूङश्च । ७ । २ । ५१ ॥ ८ मर्ण्ये तेन व्यवहारविशेषो लक्ष्यते तत्र

श्च उत्तमर्णोऽपि सिध्यतीत्याशयेन व्याचष्टे अधमर्णव्यवहार इति · स्वव्यवहारो दातृग्रहीत्रोः संबंधी भवतीत्युत्तमर्णेऽपि प्रयोगो न विरुध्यते लक्षणायां तु धारेरुत्तमर्ण इति निर्देशो लिंगम् · स्फायः स्फी स्फायी वृद्धौ कथं तर्हि स्फीतिकाम इति · स्फीतमाचष्टे इति ण्यंतात् इच प्रत्ययः अल्लोपणिलोपौ यस्येति · निरः कुष इति विकल्पितेड्वाद्विति भावः उषित इति · यजादित्वात्संप्रसारणम् · शासिवसीति षः वसतीति शपा निर्देशः स्पष्टार्थः वस्तेः सेट्त्वाद्भवितव्यमेवेटा क्षुधित इति · एवं च तस्यालमेवा क्षुधितस्येति प्रयोगो निर्बाध एवेति क्षुध धातोर्भावे क्विपि तारकादित्वादितजिति धातुवृत्तिषु यदुक्तं तन्नादर्तव्यं समा ॥ ॥

पूङः क्त्वानिष्ठयोरिड्वा स्यात् · त्रू · मू · ५

सि. कौ. नन्वायतया क्रुधितादौ उपयोक्ष्यत इति वाक्यार्थं चिन्त्येयम्. अंचेः उदित्वात् क्त्वायां विकल्पे प्राप्ते निष्ठायां यस्य विभाषेति निषेधे वचनम्. अंचित इति. नांचेः पूजाया

टी. त. मिति न लोपनिषेधः अक्त इति. अनिदितामिति न लोपः लुभो विमोहने इति क्त्वायां विकल्पे निष्ठायां निषेधे च प्राप्ते वचनम् पूङ. श्र्युकः किति निषेधे प्राप्ते वचनेम

॥ ःः ॥ पूङः क्त्वा च. न क्त्वा सेडित्यनेनैव सिद्धे क्त्वाग्रहणमिह व्यर्थमित्यत आह उत्तरार्थमिति क्तेवेति. ननु निष्ठा चानुकृष्टत्वादिति भावः शमित इति अनेकाच

२७३ इति यण्. आदिकर्मणीति. आद्यक्षणे भूते सर्वस्याः क्रियाया भूतत्वाभावान्निष्ठा न प्राप्नोतीति वचनमादिकर्मणि क्तः सकर्तरि विधानार्थं चेत्याहुः

। पूङः क्त्वा च । ७।२।५१। पूङः क्त्वा निष्ठा च सेट् किन्न स्यात्। पवितः पूतः। क्त्वाग्रहणमुत्तरार्थम्। नोपधादित्यत्र हि क्त्वैव सम्बध्य
ते। निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः। १।२।१९। एभ्यः सेण्निष्ठा किन्न स्यात्। शयितः। शयितवान्। अनुबन्धनिर्देशो यङ्लुङ्निवृत्त्यर्थः। प्रेष्वितः।
प्रेष्वितवान्। आदिकर्मणि निष्ठा वक्तव्या। आदिकर्मणि क्तः कर्तरि च। ३।४।७१। आदिकर्मणि यः क्तः स कर्तरि स्यात् चाद्भावकर्मणोः। विभाषा
भावादिकर्मणोः। ७।२।१७। भावे आदिकर्मणि चादितो निष्ठाया इड्वा स्यात्। प्रस्वेदितः स्वेत्रः। प्रस्विदितः तेन। ञिष्विदेति भ्वादिरत्र गृह्यते ञिमिदि
साहचर्यात्। स्विद्यतेस्तु स्विदित इत्येव। ञिमिदा। ञिक्ष्विदा। ञिधृषा इत्यादौ चा। प्रमेदितः। प्रमेदितवान्। प्रक्ष्वेदितः। प्रक्ष्वेदितवान्। प्रधर्षितः। प्रधर्षि
तवान्। धर्षितं तेन। सेट्किम्। प्रस्विन्नः। प्रस्विन्नं तेनेत्यादि। मृषस्तितिक्षायाम्। १।२।२०। सेण्निष्ठा किन्न स्यात्। मर्षितः। मर्षितवान्। क्षमायां किम्। अप ४६९

चादिति. अन्यथा तत्र कौण्डिन्यन्यायेन भावकर्मणोर्न स्यादिति भावः प्रस्वेदित इति. चकारः आदिकर्मद्योतनार्थः स्वेदितमित्यादि भावे. भ्वादित्वेनेति ञिष्विदा स्नेह
नमोहनयोरिति पठितः स्विद्यतेस्त्विति. ष्विदा गात्रप्रक्षरणे इति दिवादिषु पठितस्य स्विदित इत्येवेति. कित्वनिषेधाभावादिति भावः. न च ष्विदेति दिवादिको पि ञीदिति २७३
वाच्यम्. हरदत्तग्रन्थविरोधादिति भावः. अत्र हरदत्तः ञिष्विदा स्नेहनमोचनयोरिति दिवादिर्गृह्यते ननु ञिक्ष्विदा अव्यक्ते शब्दे इति भ्वादिरपि मिदिना साहचर्या
दित्याह तच्चिन्त्यम्. भ्वादिष्वपि मिदेः पठ्यमानत्वात्. ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्माद्विशेषादुभयोर्ग्रहणं न्याय्यं तेन सह । स्वादीर्भादी चेति । स्विदादीनामादितश्चेति सूत्रनिषेधात् सेण निष्ठा न संभवतीत्यादिकर्मणि निष्ठोदाहृता ॥ ॥
अविस्पष्टमिति । मृष धातोः क्षान्तिः सा यामेव वृत्तिः सत्वे पि सूत्रस्य तितिक्षायां ग्रहणमेव ज्ञापयत्यनेकार्था धातव इति । रुचितमिति । रुच दीप्तावभिप्रीतौ च । गत्यर्थाकर्मकेति कर्तरि भ

अविस्पष्टमित्यर्थः । उदुपधाद्भावादिकर्मणोरन्यतरस्याम् । १।२।२१। उदुपधात्परा भावादिकर्मणोः सेण् निष्ठा वा किन्न स्यात् । द्युतितम् द्योतित
म् । मुदितम् मोदितम् साधुना । प्रद्युतितः । प्रद्योतितः । प्रमुदितः । प्रमोदितः साधुः । उदुपधात् किम् । विदितम् । भावेत्यादिकिम् । रुचितं कार्षापणं । से
ट् किम् । कुष्टम् । शब्विकरणेभ्य एवेष्यते नेह । गुध्यते । गुधितम् । निष्ठायां सेटि । ६।४।५२। परस्य लोपः स्यात् । भावितः । भावितवान् । दीपितमिति नेट् । स
म्प्रसारणं । शूनः । दीनः । गुहू । गूढः । वनु । वतः । तनु । ततः । पतेः सनिवद्भावाद्द्विर्भावे प्राप्ते द्वितीया श्रितेति सूत्रे निपातनादिट् । पतितः । सेसि वी
ति वद्भावात् सिद्धे क्तान्तलोपो नामीदित्वात् नानित्यत्वं ज्ञापनाद्धा । तेन धावितः । निभराजधियेत्यादि सिद्धं । यस विभाषेत्यत्रैकाच इत्येवादरिद्रितः । क्षु
ब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टवाढानि मन्थमनस्तमःसक्ताऽविस्पष्टस्वरानायासभृशेषु । ७।२।१८। क्षुब्धादीन्यष्टौ वनिङ्नानि निपात्य
न्ते । समुदाये नमन्यादिषु वाच्येषु । द्रवद्रव्यसंपृक्ताः सक्तवो मन्थः मन्थनदण्डश्च । क्षुब्धो मन्थ इति । स्वान्तम् मनः । ध्वान्तं तमः । लग्नं सक्तं । निष्ठा
न्तमपि निपात्यते । म्लिष्टमविस्पष्टम् । विरिब्धः स्वरः । म्लेच्छ रेभृ अनयोरुपधाया इत्त्वमपि निपात्यते । फाण्टमनायाससाध्यः कषायविशेषः
माघवसुनवनीतभावान्यागावस्थापन्नं द्रव्यं फाण्टमिति वेदभाष्ये आह । वाढम् भृशम् । अन्यत्र तु क्षुभितम् । क्षुभ्नोरात्जेतिनागमश्चास्त्रस्यानित्यत्वं
ज्ञापयति । स्वनितम् । ध्वनितम् । लगितम् । म्लेच्छितम् । विरेभितम् । फणितम् । वाहितम् । धृषिशसी वैयात्ये । ७।२।१९। एतौ निष्ठायामविनये एवानिटौ

रितः । कुषितमिति । कुष आकाङ्क्षेणे रोदने च । व्रश्चादिना षत्वेष्टुत्वम् । गुधितमिति । गुध परिवेष्टने दिवादिः । संप्रसारणमिति वचिस्वपीत्यनेन । शून इति । टुओश्वि
गतिवृद्ध्योः । हलः इति दीर्घः । ओदितश्चेति निष्ठा तस्य नः । गूढ इति यस्य विभाषेति नेट् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टी·

सि· कौ· ढत्वधत्वष्टुत्वढलोपदीर्घाः वृतः तत इति· अनुदात्तोपदेशेति नलोपः मनिवेद्भ्वान्दिति· तनिपतिदरिद्रातिभ्यः सनो वा इड्वाच्य इति वचनात्· क्तं तत्यादीनामिति·
टी· त· त्वीदित इत्ति निष्ठायामनिडर्थं कृती छेदने तृती हिंसाग्रंथनयोः तृतीमात्रविसेपरूत्वे तेषामिदित्वकरणेन यस्य विभाषेत्यस्यानित्यत्वज्ञापनाद्वा पतितं इति सिद्धु
१७४ मित्यर्थः लुभ संचलने क्वयस्तथोरिति धत्वम्· स्वन ध्वन शब्दे इडभावे अनुनासिकस्य क्विझलोरिति दीर्घः लगे संगे म्लेच्छ अव्यक्ते शब्दे ग्रश्चेति षत्वे ष्टुत्वम्· रेभृ श
ब्दे फण गतौ दीर्घः ष्टुत्वम्· वाह्र प्रयत्ने· इडभावे ढत्वधत्वष्टुत्वढलोपाः अनायासशब्देन तत्साध्यो लक्ष्यत इत्याह· अनायाससमाध्य इति· क्षुत्ममोर्षं घं जातमु ह्लो
दके प्रक्षिप्य सघोऽभिषुत्य पूत्वा यत्पीयते तत्फाण्टमित्याहुः वेदभाष्ये इति· तद्धेनवनीतं भवति घृतं देवानां फाण्टं मनुष्याणामिति शतपथश्रुतेर्व्याख्यायामित्यर्थः

अन्यत्र घुषितः। विघुषितः। भावादिकर्मणोस्तु वैयात्ये घुषिर्नास्ति। अत एव नियमार्थमिदं सूत्रमिति वृत्तिः। घुषेरादित्त्वफलं चिन्त्यमिति हरद
त्तः। माधवस्तु भावादिकर्मणोरवैयात्ये विकल्पमाह। घुष्टम्। घुषितम्। प्रघुष्टः। प्रघुषितः। दृढः स्थूलबलयोः। ७।२।२०। स्थूले बलवति च नि
पात्यते दृह दृहि वृद्धौ। क्तस्येडभावः। तस्य ढत्वम्। हस्य लोपः। इदितो नलोपश्च। दृहितः। दृंहितोऽन्यः। प्रभौ परिवृढः। ७।२।२१। वृह वृहि वृद्धौ
निपातनस्याश्रवत्ता। परिवृहितः। परिवृंहितोऽन्यः॥

८॥ ः॥ अन्यत्रेति· मंथादेरवाच्यत्वे इत्यर्थः घुषिर् अशब्दे घुषाम्रागल्भ्ये घुस्तुहिंसायाम्
अनयोरादित्त्वश्चयस्य विभाषेति सूत्राभ्यामिट्प्रतिषेधे हि सिद्धे अनयोर्वैयात्य एवानिट्त्वं नान्यत्रेति नियमार्थमित्याह· अविनय एवेति· विहंग्यात्तो वियातः
अविनीतस्तस्य भावो वैयात्यम्· ननु घुषेर्विभाषा भावादिकर्मणोरिति विकल्पे प्राप्ते नित्यार्थं कस्मान्न भवतीत्याशंकायामाह नास्तीति अनभिधानादिति भावः अ
त्र प्रमाणमाह· अत एवेति· माधवस्त्विति· एवं च आदित्वस्य फलवत्वात्· हरदत्तोक्तं यच्चिंत्यं तदेव चिंत्यमिति भावः। दृढः स्थूलबलमस्यास्तीति बलः अर्श आ रा·म·
दिभ्यो च तदाह· बलवतीति स्थूलो मांसलः स च निर्बलोऽपि बलवांस्तु कृशोऽपि दृढ इति फलितोऽर्थः तस्येति· तकारस्येत्यर्थः हस्येति· ननु हो ढ इति ढत्वे ढो ढे लोपे १७४
नैव सिद्धमिति तस्य ढत्वं हस्य लोपश्च न निपात्यतामिति चेन्मैवम्· तथा हि सति ढलोपस्यासिद्धत्वे·॥

470

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नद्रढिमेत्यत्र र ऋतो हलादेर्लघोरिति रभावो न स्यात्परिद्रढय्य गत इत्यत्र ल्यपि लघुपूर्वादित्ययादेशो न स्यात् परिदृढस्यापत्यं पारिदृढी कन्येत्यत्र गुरूपोत्तमलक्ष
णः ष्यङ् स्यात् अतोऽसिद्धत्वनिवृत्तये हलो यो निपात्यत इति भाष्ये स्थितम् अत एव ढ्रलोप इति सूत्रे अणः किं दृढ इति प्राचां ग्रन्थस्य प्रामादिकतामभिप्रेत्य तृढो दृ
ढ इति प्रत्युदाहृतम् प्रभौ निपातनमिति हलोपे प्रयोजनमपि द्रढिमा परिद्रढय्येत्यादिसिद्धिरिति माधवदेवबोध्यम् ॥ ❀ ॥ कृच्छ्रगहनयोः कृच्छ्रं दुःखं तत्कारणं च ल
क्षणया गृह्यते कषतिर्हिंसार्थः कष्टो मोह इति दुःखहेतुरित्यर्थः घुषिरविघुषिरविशब्दार्थ इति भ्वादिः घुषिर विशब्दन इति चुरादिर्द्वयोरपि सामान्येन ग्रहणम् न
नु विशब्दनार्थाद्घुषेश्चुरादिणिचा भाव्यं ततश्च णिचा व्यवधानात् घुषेः परा निष्ठा नास्तीति कथमिण्निषेधप्रसंगः किं च विशब्दने त्विण्निषेधाभावाण्णिचुपधा

कृच्छ्रगहनयोः कषः ७।२।२२॥ कषो निष्ठाया इण्न स्यादेतयोरर्थयोः। कष्टं दुःखं तत्कारणं च। स्यात्कष्टं कृच्छ्रमाभीलम्। कष्टो मोहः। कष्टं शा
स्त्रम्। दुरवगाहमित्यर्थः। कषितमन्यत्। घुषिरविशब्दने ७।२।२३॥ घुषेर्निष्ठायामनिट् स्यात्। घुष्टा रज्जुः। अविशब्दने किम्। घुषितम्वा
क्यम्। शब्देन प्रकटीकृताभिप्रायमित्यर्थः। अर्देः संनिविभ्यः ७।२।२४॥ एतत्पूर्वादर्देर्निष्ठाया इण्न स्यात्। समर्णः। न्यर्णः। व्यर्णः। अ
र्दितोऽन्यः। अभेश्चाविदूर्ये ७।२।२५॥ अभ्यर्णम्। नातिदूरम्। आसन्नम्वा। अभ्यर्दितमन्यत्। णेरध्ययने वृत्तम् ७।२।२६॥ ण्यन्ताद्वृतेः क्तः से
डभावो णिलुक्चाधीयमानेऽर्थे। वृत्तश्छन्दश्छात्रेण सम्पादितं। अधीतमिति यावत्। अन्यत्र तु वर्तिता रज्जुः॥

गुणे निष्ठायां सेटीति णिलोपे च
घोषितं वाक्यमित्यपि स्यादिति चेत् अत्राहुः एवं तर्हि विशब्दनप्रतिषेध एव ज्ञापकः विशब्दनार्थस्य चुरादिणिजनित्य इति नास्त्युक्तदोष इति दिक् अभेः विशेष
णाद्दूरं विदूरं ततोऽन्यदविदूरं तस्य भाव आविदूर्यम् ब्राह्मणादित्वात्ष्यञ्। अस्मादेव निर्देशान्नञ्पूर्वात्तत्पुरुषादिति निषेधो न भवति सामीप्य इत्येव तु वोक्ते
नातिदूरस्यासंग्रहापत्तेः तदेतद्ध्वनयन्व्याचष्टे नातिदूरमासन्नं वेति एवं च सामीप्य इति प्राचां व्याख्यानमुपलक्षणतया देयमित्याहुः णेः अधीयत इति अध्ययन
म् कृत्यल्युट इति बहुलवचनात्कर्मणि ल्युट् णिलुक् चेति निपात्यत इति शेषः लोपे हि प्रत्ययलक्षणेन गुणः स्यात्॥

CC-0. In Public Domain. Digitization by eGangotri



शृतं श्राति श्रपयत्योरिति। श्रा पाके इत्यदादौ पठ्यते चुरादावपि घटादिषु पठ्यते मित्त्वार्थम्। श्रै पाक इति भ्वादौ तस्यापि कृतात्वस्य ग्रहणं निपातनसामर्थ्याल्लक्षणप्र
तिपदोक्तपरिभाषा नाश्रीयत इत्याहुः। शृभावो निपात्यत इति। ष्यङः सम्प्रसारणमिति प्रकृतमेव संप्रसारणं न विहितम्। श्रयतेरपि श्रितमेव यथा स्यादिति अत्र विभाषा
श्यवपूर्वस्येति विभाषानुवर्तते सा च व्यवस्थिता तेन क्षीरहविषोरेव शृभावो नित्यश्च। अन्यत्र तु नैव भवतीत्याशयेनाह क्षीरहविषोः पाक इति। अन्यत्र त्विति श्राणादिः अपि
तमिति। लोमितां हलः वादान्त। शमु दमु उपशमे। पूरी आप्यायने दिवादिः चुरादिश्च स्पशु उपसयेस्पश बाधने छद अपवारणे ज्ञपिर्मित् संज्ञायां मारणतोषणनिशाम

शृतं पाके ६।१।२७॥ श्राति श्रपयत्योः क्ते शृभावो निपात्यते क्षीरहविषोः पाके। शृतं क्षीरं स्वयमेव विक्लिन्नं पक्वं वेत्यर्थः क्षीरहविर्भ्यामन्यत्र। श्राणं
श्रपितम्वा। वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ७।२।२७॥ एते णिचि निष्ठान्ता वा निपात्यन्ते। पक्षे दमितः। शमितः। पूरितः। दासितः। स्पाशितः। छादित
ज्ञपितः। रुष्यमत्वरसंघुषास्वनाम् ७।२।२८॥ एभ्यो निष्ठाया इड्वा। रुषितः। रुष्टः। आन्तः। अमितः। तूर्णः। त्वरितः। अस्यादित्वे फलम्मन्दम्। संघुष्टः।
संघुषितः। आस्वान्तः। आस्वनितः। हृषेर्लोमसु ७।२।२९॥ हृषेर्निष्ठाया इड्वा स्यात् लोमसु विषये। हृष्टं हृषितं लोम। विस्मितप्रतिघातयोश्च। हृ
ष्टो हृषितश्चैत्रः। विस्मितः प्रतिहतो वेत्यर्थः। अन्यत्र तु। हृषु अलीके। उदित्वान्निष्ठायान्नेट्। हृष्टस्तुष्टो रूढः। अपचितश्च ७।२।३०॥ चायतेर्निपातो
यं वा। अपचितः। अपचायितः। प्यायः पी ६।१।२८॥ वा स्यान्निष्ठायाम्। व्यवस्थितविभाषेयम्। तेन स्वाङ्गे नित्यं। पीनं मुखम्। अन्यत्र प्यानः पीनः
स्वेदः। सोपसर्गस्य न। प्रप्यानः। आङ्पूर्वस्यान्धूधसोः स्यादेव। आपीनोऽन्धुः। आपीनमूधः। ह्लादो निष्ठायाम् ६।४।९५॥ ह्रस्वः स्यात्। प्रह्लन्नः ॥

नेष्वित्युक्तः रुष्य रुषरोषे तीषसहेति विकल्पिते इट् कत्वा तस्य विभाषेति नित्यनिषेधे प्राप्ते विकल्पो विधीयते। अमगत्यादिषु अमरोगे इति चौरादिकस्तुन
गृह्यते एकाच इत्यधिकारादित्याहुः। आंत इति अनुनासिकस्येति दीर्घः। तूर्ण इति ञित्वरा संभ्रमे ज्वरत्वरेत्यूठ् निष्ठानत्वम्। आदित्वाच्चेति निषेधे प्राप्ते विकल्पः २७५
एवं च आदित्वस्य फलमात्मनेपदमात्रं तच्च घट्यादिवद्ध्रस्वानुबन्धत्वेपि सिध्यत्येवेत्याशयेनाह फलं मन्दमिति। संघुष्ट इति। संपूर्वान्नघुषे ॥ ॥

471

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्विशब्देनेड्ग्रहणेविकल्पयोः यमः अविशब्देनेपिसं पूर्वस्य परत्वादयं विकल्प एव· आस्वान्त इति आङ्पूर्वस्य स्वनेर्मनोभिधाने प्ययमेव विकल्पः परत्वात्· आस्वान्तं म
नः आस्वनितं मन इति· त्वषेः त्वषु अली के उदित्वान्निष्ठायामनिट् त्वषतुष्टोसेट् उभयोरपि ग्रहणमित्युभयत्र विभाषेयम्· पीनमिति। ओदित्वान्निष्ठानत्वं प्यान इति श्वी
दितो निष्ठायामितीडभावे यलोपः नत्वव्यवस्थां तत्र माह· सोपसर्गस्येनेत्यादि अंधुः कूपः प्रल्हन्न इति ल्हादेः सुखेरीदित्वादिडभावे रदाभ्यामिति नत्वम्॥ ः॰ः॥ द्यतिस्य
ति दोवखंडने· षोन्तकर्मणि मामाने· माङ्· मानेमेङ्· प्रणिदाने छागतिनिवृत्तौ· स्तिपा निर्देशो धातुविशेषणार्थः नहि स्तिपं विना श्यन सुलभः यत्तु प्रसादकृतोक्तं
स्तिपा निर्देशो यङ्लुङ्निवृत्त्यर्थः दास्तः सासात इति तन्न· यङ्लुकि हि दत्वाभाव्यं दादितः सासित इति· तत्र ति कित्तीति वचनान्नास्ति प्रसंगः किं च दादेर्घोरि

द्यतिस्यतिमास्थामितिकिति।७।४।४०॥ एषां इकारोन्तादेशः स्यात्तादौ किति। ईत्वहृत्वयोरपवादः दितः सितः। मामाङ्मेङ्। मितः। स्थितः। शाच्छोरन्य
तरस्याम्।७।४।४१। शितः। शातः। छितः। छातः। व्यवस्थितविभाषात्वाद्व्रतविषये श्यतेर्नित्यम्। संशितं व्रतं। सम्यक्संपादितमित्यर्थः। संशितो ब्राह्म
णः। व्रतविषयकयत्नवानित्यर्थः। दधातेर्हिः।७।४।४२। तादौ किति। अभिहितं। निहितम्। दो दद्घोः।७।४।४६। घुसंज्ञकस्य दा इत्यस्य दथ् स्यात्तादौ
किति। चर्त्वं दत्तः। घोः किम्। दातः। दान्तो वा यमादेशः। न चैवं वित्तमित्यादावुपसर्गस्य दस्तीति दीर्घापत्तिः तकारादौ तद्विधानात्। दान्तो वा धान्तो वा
न वक्तव्यं निष्ठानत्वम्। धान्तत्वे झषस्तथोरिति धत्वशङ्का सन्निपातपरिभाषया विरोधात्॥ ९ तिविधीयमानआदेशः अनेकाल्त्वात्सर्वस्येति निर्वि
वादं· तथा च दधातेर्यङ्लुगन्तस्य दधादेशे दत्साभ्यासस्य प्रवर्त्तते विदादत्त इति तदुदाहृतं तद्रूपं कथमुक्तिसंभवं लभेतेत्याहुः शाच्छोः शोतनूकरणे छोच्छेदने दधातेर्हिः
स्तिपानिर्देशो धि दोनिवृत्त्यर्थः तीत्यनुवृत्तेर्यङ्लुकि न दाधितः अत्रापि प्रसादकृता स्तिपानिर्देशस्य यङ्लुङ्निवृत्त्यर्थत्वाद्दाधीत इति घुमास्थेतीत्वमुदाहृतं तत्पूर्व
वदेवदेयम्· दो दद्घोः इहादेशः थान्त एव न तु तद्धान्तः जश्त्वे कृते संहितायां तुल्यत्वेपि प्रक्रियायां दोषादिति प्राञ्चः तथा चाहुः नान्ते दीर्घत्वाख्यो दान्ते दोषो नि
ष्ठानत्वं धान्ते दोषो धत्वाख्यः स्यान्निर्दोषत्वात् थान्तोयं ग्राह्य इति तदनुसारेणाह· दथ् स्यादिति· दान्त

CC-0. In Public Domain. Digitization by eGangotri



इति· तपरलवने· अदावितिनिषेधात् दघुतम्· इहस्त्र्यपसर्गस्योपपादयन्नाह· तांतोवेत्यादिना दीर्घापत्तिरितिविदत्तमित्यादावुपसर्गस्येत्यर्थः इतीत्यत्रद्यौपसो दाइत्य
स्यआदेशस्सतकारांतस्तकारादिर्वेति· तत्राद्येपक्षे· यंदोषोनांत्येइत्याशयेनोक्तदोषंपरिहरति· तकारादावित्ति· निष्ठानत्वमिति· रदाभ्यामित्यनेन· सन्निपातेति· त
दिनिमित्तीकृत्यविहितोयोदांतोथ्वादेशस्सतकारविघातकनत्वादिविधेर्निमित्तंनभवतीतिभावः॥ ※ ॥अचउपसर्गात्तः तकारादिकारउच्चारणार्थः अचइ
त्यावर्ततेतत्रैकंपंचम्यंतमुपसर्गविशेषणं अपरंषष्ठ्यंतंस्थानलाभायेतिव्याचष्टे· अजंतादित्यादिना यद्वा अचइत्यनावृत्तंपंचम्यंतमेवास्तु किंतु हितकारको
यमादेशस्तेनानेकालत्वात्सर्वस्य घोर्भविष्यति· एकतकारोत्सृष्टोलोन्त्यस्येतिवाधित्वा आदेःपरस्येत्यादेरेवस्यादचइतिपंचमीनिर्दिष्टत्वात्· यद्येवमथोभीत्युत्तरसूत्रेपि

अचउपसर्गात्तः।७।४।४७।अजंतादुपसर्गात्परस्यदाइत्यस्यघोः अचस्तः स्यात्तादौकिति। चर्त्वं। प्रत्तः। अवत्तः। अवदत्तं विदत्तं च प्रदत्तं चादिकर्म
णि। सुदत्तमनुदत्तं च निदत्तमितिचेष्यते चर्त्वाच्च यथाप्राप्तम् दस्ति। ६।३।१२४॥ इगन्तोपसर्गस्य दीर्घः स्याद्दादेशेयस्तकारस्तदादावुत्तरपदे स्वरिवेतिच
त्वेमाश्रयासिद्धं नीत्तम्। सूत्तम्। घुमास्थेतीत्वम्। धेट्। धीतम्। गीतम्। पीतम्। जनसनेत्यात्वम्। जातम्। सातम्। खातम्। अदोजग्धिर्ल्यप्तिकिति।२।४।
इह ल्यबितिलुप्तसप्तमीकं। अदोजग्धिःस्यात् ल्यपितादौकितिच। इकारउच्चारणार्थः। घत्वा। प्रजग्ध्य। जग्धः॥ ॥ द्वितकारएवेतिसर्वादेशः स्यादिति
चेत्· अत्राहुः पंचम्यंतस्याचइत्यस्यानुवृत्तेरचः परस्यपकारस्यैवभविष्यतितत्रांत्यस्यसंयोगांतलोपेपूर्वस्यजश्त्वेनसिद्धमिष्टमिति· अवदत्तमित्यादि आदिकर्म
णीत्येतत्प्रदत्तमित्यस्यैवविशेषणंनेतरेषामसंभवात्· दानुप्रक्रांतमारब्धमितिप्रदत्तमित्यस्यैवार्थः इष्यतेइति· नादेशबाधनार्थंनिपातनमिष्यतइत्यर्थः अ
न्येतुअवादीनामुपसर्गप्रतिरूपकत्वाश्रयणेत्ववदत्तंविदत्तमित्यादिसिध्यति उपसर्गत्वाश्रयणेतुपूर्वोक्तमवत्तंवीत्तमित्यादीतिनापूर्वमिदंवचनमित्याहुः दस्ति
इकः काशइत्यत इक इत्युपसर्गस्यघञीत्यतोउपसर्गस्येतिढलोपेत्यतोदीर्घइतिचानुवर्त्तते· अलुगुत्तरपदइत्यतोनुवृत्तस्योत्तरपदेइत्यस्यतीतिविशेषणंयस्मि
न्विधिरितितदादिविधिरसदेतत्सकलमभिप्रेत्यव्याचष्टे· इगंतोपसर्गस्येत्यादिना ननु वर्त्वस्यासिद्धत्वाद्दादेशतकारोनास्तीत्यतआश्रया।

५४२



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रोरित्युत्वं प्रतिहृत्व वदितिभावः पीनमिति· इधातेर्हिरित्यत्र लुग्विकरणस्य निर्देशात्· घेट्पान इतिभ्वादेर्हिर्नभवति· नापिइत्· दोदद्घोरिति दइ त्युपादानादि
तिभावः उच्चारणार्थ इति इदित्वे तु नुम्स्यादितिभावः घत्वमिति· रुषस्तयोरित्यनेन रुरोरुरीति अनेन प्राप्तिको घलोप इत्यर्थः इदानीं क्तार्थान् प्रपंचयति॥ ः॥ आदि
कर्मणि· व्याख्यानम्· प्रकृतः कटमिति कटं कर्तुमारब्धवानित्यर्थः प्रपाव्ह आदिकर्मद्योतनार्थः क्ते नोक्तत्वात्कर्तरि प्रथमा· कर्मण्यनुक्तत्वान्न द्वितीया प्रकृतः क

आदिकर्मणि क्तः कर्तरि च॥ ३।४।७१॥ प्रकृतः कटं सः। प्रकृतः कटस्तेन। निष्ठायामण्यदर्थ इति दीर्घः। क्षियो दीर्घादिति नत्वम्। प्रक्षीणः सः। वाक्रो
शदैन्ययोः। ६।४।६१। क्षियो निष्ठायां दीर्घो वा स्यात् आक्रोशे दैन्ये च॥ क्षीणायुर्भव। क्षितायुर्वा। क्षीणोयं तपस्वी। क्षितो वा। निनदीभ्यां स्नातेः कौशले। ८।
३।८९। आभ्यां स्नातेः सस्य षः स्यात् कौशले गम्ये। निष्णातः शास्त्रेषु। नद्यां स्नातीति नदीष्णः। सुपीति कः। सूत्रम्प्रतिष्णातम्। ८।३।९०। प्रतेः स्नातेः षत्वम्।
प्रतिष्णातं सूत्रम्। शुद्धमित्यर्थः। अन्यत्र प्रतिस्नातम्। कपिष्ठलो गोत्रे। ८।३।९१। कपिष्ठलो नाम यस्य कापिष्ठलिः पुत्रः। गोत्रे किं। कपीनां स्थलं क
पिस्थलम्। विकुशमिपरिभ्यः स्थलम्। ८।३।९६। एभ्यः स्थलस्य सस्य षः स्यात्। विष्ठलम्। कुष्ठलम्। शमिष्ठलम्। परिष्ठलम्। गत्यर्थाकर्मकश्लिष
शीङ्स्थासवसजनरुहजीर्यतिभ्यश्च। ३।४।७२। एभ्यः कर्तरि क्तः स्यात् भावकर्मणोश्च। गङ्गाङ्गनः। गङ्गाम्ग्लानः। ग्लानः सः। लक्ष्मीमाश्लि
ष्टो हरिः। शेषमधिशयितः। वैकुण्ठमधिष्ठितः। शिवमुपासितः। हरिदिनमुपोषितः। राममनुजातः। गरुडमारूढः। विश्वमनुजीर्णः। पक्षे श्ला
सा गङ्गा तेनेत्यादि। क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः। ३।४।७६। एभ्योऽधिकरणे क्तः स्यात्। चान्यथाप्राप्तं। ध्रौव्यं स्थैर्यम्॰॥

टस्तेनेति कर्मणि प्रयोगे तु विपर्ययः· नदीष्ण इति· नद्यां स्नातो नदीस्नानेन कुशल इत्यर्थः· गत इति अनुदात्तोपदेशे इति मलोपः· प्राप्त इति प्रपूर्व आप्लृ व्याप्तौ·
प्राक्षिरपी ह गतिशब्देन विवक्षितेति भावः· ग्लान इति· ग्लै हर्षक्षये अकर्मकोयम्· आदेच इत्यात्वे संयोगादेरात इति नत्वम्· शेषमिति· अधि शीङ्स्था सां
कर्मेति कर्मत्वं अधिष्ठित इति· घतिस्यति इत्वम्· उपोषित इति· वसतिक्षुधोरिट् शासिवसीति षत्वम्· अनुजीर्ण इति· जृष् वयोहानौ ऋत इद्धातोः हलि चे

CC-0. In Public Domain. Digitization by eGangotri

कृ.
सि. कौ.
टी. न.
१७७

मुकुन्दस्येति॰ आस्यतेऽस्मिन्नित्यासितमासनमित्यर्थः यायतेऽस्मिन्निति यानम्मार्गः भुज्यतेऽस्मिन्निति भुक्तम्॰ भोजनमित्यर्थः त्रिष्वपि अधिकरणे वाचिनश्चे
तिक र्त्तरि षष्ठी स्विरणदृति॰ आदितश्चेति नेट् इद्धदृति श्वीदितदृति नेट् नलोपः राज्ञामिति क्तस्य च वर्त्तमानदृति षष्ठी॰ इष्टदृति॰ नीचसहे ति वेट्क त्वाद्यस्य विभाषेति
नेट्॰ घ्रीलितदृत्यादि॰ घ्रील समाधौ रक्षपालने ह्व मूर्त्तसहनेक्षु चाआह्वाने॰ जुषी प्रीतिसेवनयोः सुयजोर्ङ्वनिप्॰ सुनोतेरिति॰ षुञ् अभिषवे॰ यद्यपीह सुगतो षु

मुकुन्दस्यासितमिदमिदं यातं रमापतेः। भुक्तमेतदनन्तस्येत्यू चुर्गोप्यो दिदृक्षवः। १ पक्षे आसेरकर्मकत्वात्कर्त्तरि भावे च। आसितो मुकुन्दः। आसि
तं तेनेत्यादि॰ यथेप्सः कर्त्तरि कर्मणि चारमापतिरिदं यातः। तेनेदं यातम्। भुजेः कर्मणि। अनन्तेनेदम्भुक्तम्। कथम्भुक्ता ब्राह्मणा इति भुक्तमस्त्येषा
मिति मत्वर्थीयोऽच्। वर्त्तमाने इत्यधिकृत्य। ञीतः क्तः। ३।२।१८७। त्रिष्विदा। स्विन्नः। त्रिइन्धी। इद्धः। मतिबुद्धिपूजार्थेभ्यश्च। ३।२।१८८। मतिरिहे
च्छा बुद्धेः पृथग्उपादानात्। राज्ञाम्मत इष्टः। नेरिष्यमाण इत्यर्थः। बुद्धः। विदितः। पूजितः। अर्चितः। चकारोऽनुक्तसमुच्चयार्थः। शीलितो रक्षि
तः। क्षान्तः। आक्रुष्टो जुष्ट इत्यादि। नपुंसके भावे क्तः। ३।३।११४। क्लीबत्वविशिष्टे भावे कालसामान्ये क्तः स्यात्। जल्पितम्। शायितम्। हसितम्
सुयजोर्ङ्वनिप्। ३।२।१०३। सुनोतेर्यजेश्च ङ्वनिप्स्याद्भूते। सुत्वा। सुत्वानौ। यज्वा। यज्वानौ। जीर्यतेरतृन्। ३।२।१०४। भूत इत्येव। जरन्। जरन्तौ। जरन्तः
वासरूपन्यायेन निष्ठापि। जीर्णः जीर्णवान्। छन्दसि लिट्। ३।२।१०५। लिटः कानज्वा। ३।२।१०६। क्वसुश्च। ३।२।१०७। इह भूतसामान्ये छन्दसि लिट्
तस्य विधीयमानौ क्वसुकानचावपि छान्दसाविति त्रिमुनिमतम्। कवयस्तु बहुलम्प्रयुञ्जते। तन्निषेदिवान् सं नगरोपकण्ठे। श्रेयांसि सर्वाण्य

प्रसवैश्वर्ययोरिति निरनुबन्धकयोरेव ग्रहणं न्याय्यं तथाप्यनभिधानादुभयपदिनो न सम्भवति। एवं च हुयोर्ग्रहणं न भवतीति भावः। ङकारः सुनोतेर्गुणप्रतिषेधा १७७
र्थः। यकारस्तु स्वरार्थः तुगर्थश्च॰ यज्वेत्यादि॰ क्वनिपि कृते त्वत्र वचिस्वपीति सम्प्रसारणं स्यादिति ङ्वनिबुक्तः॰ अतृन्निति॰ नकारः स्वरार्थः। ऋ इत्॰ जरन्निति॰ भ
ऋकारस्य गुणे रपरोऽकारः॰ उगिदचामिति नुम्॰ संयोगान्तलोपस्यासिद्धत्वान्न दीर्घः॥

473

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

छन्दसि लिडिति · सूत्रस्यार्थमाह · भूतसामान्ये इति · न च छन्दसि लुङ्लङ्लिटः इत्यनेन गतार्थतेति शङ्क्याः धातुसम्बन्धाधिकारे हि स विधिः इह तु धातुसम्बन्धं विना
पि भवतीति विशेषात् · अत्र व्याचख्युः कानचः कित्करणं तिस्तिराण इत्यत्र ऋच्छत्यृतामिति गुणस्य निषेधार्थं सति प्रतिषेधे विषये आरभ्यते चक्राण इत्यत्र तु अ
संयोगाल्लिटि किदित्येव सिद्धं कित्त्वमिति · त्रिमुनिमतमिति · सूत्रकृता छन्दसीति प्रकान्तत्वादुत्तरसूत्रे भाषाग्रहणाच्च · भाष्यवार्तिकयोरपि क्वसुकानचोश्छन्द
सुभयथेति वचनात् सार्वधातुकत्वेन सार्वधातुकमपिदिति ङित्त्वादेवाजिवानित्यादौ नलोपादीनां कित्करणमन्यथासिद्धमाशङ्क्यनीति र्वानुतिस्तिरा
णादृत्यादौ ऋच्छत्यृतामिति प्राप्तस्य गुणस्य बाधनार्थं कित्करणमिति सिद्धान्तितत्वात् · अत एव कित्करणसामर्थ्याल्लाघवायामपि क्वसुकानचौ लड्इति के
चाञ्चिदुक्तं स्थानादर्शव्येति हरदत्तमाधवादिग्रन्थस्यापास्तमिति भावः कवयस्त्विति · गतानुगतिकतयेति भावः ॥ ॥ वस्वेवस्विरित्यविभक्तिको निर्देशः तथा

वस्वेकाजाद्घसां ॥७।२।६७॥ कृतद्विर्वचनानामेकाचामादन्तानां घसेश्च वसोरिट् नान्येषां । एकाचः । आदिवान् । आतः । ददिवान् । जक्षिवान् ।
एवाङ्किमा । बभूवान् । भाषायां सदवसश्रुवः ॥३।२।१०८॥ सदादिभ्यो भूतसामान्ये भाषायां लिङ्वा स्यात् तस्य च नित्यं क्वसुः ॥ ॥

चव्याख्यास्य तिवसोरिति · नित्यत्वाद्द्वित्वे कृते एकाच्त्वमेव नेति कथमिट् स्यादित्यत आह · कृतद्विर्वचनानामेकाचामिति · कृतेपि द्वित्वे एकाच एव ये अ
वशिष्यन्ते तेषामित्यर्थः · नेड्वशि कृतीति निषेधम्बाधित्वा क्रादिनियमात् सर्वत्र प्राप्तस्येटो नियमोऽयमित्याह · नान्येषामिति · आदिवानिति · अद भक्षणे लिटि
तं हलादिशेषाभ्यासदीर्घेषु सवर्णदीर्घेषु कृतेषु कृतद्वित्वेष्वयमेकाजेवेतीड् भवति · आरिवानिति ऋगतौ ऋच्छत्यृतामिति गुणे कृते द्वित्वादिषु पूर्ववत्कृते
षु यमप्येकाच् ददिवानिति · डुदाञ् दाने कृते द्वित्वे नायमेकाच् · इत्येनिमित्तश्चातो लोपोना सतितस्मिन्भवतीत्यनेकाजर्थमादन्तग्रहणम् · जक्षिवानिति · लिट्य
न्यतरस्यामिति घस्लादेशः · द्वित्वे कृते नायमेकाजिति घसिग्रहणम् · अत्र व्याचख्युः द्वित्वात्पूर्वं परत्वाद्घसिभसोर्हलि चेत्युपधालोपः स्यात् तस्मिंश्च कृते ऽ
नच्कत्वात् · द्वित्वमेव न स्यात् · न चास्य द्वित्वे कर्तव्ये द्विर्वचनेऽचीत्यनेन स्थानिवद्भावो निषेधो वा शङ्क्यः द्वित्वनिमित्तस्याचोऽभावात् · ततश्च नायं कृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कृ.
सि. कौ.
टी. त.
१२८

एकाज्भवतीति घसिग्रहणं तत्सामर्थ्यात्तु परत्वादुपधालोपमिडागमो बाधते कृते त्विडागमे गमहनेत्युपधालोपस्तस्य चाजनिमित्तत्वेन स्थानिवा-
त्वाद्द्वित्वम्. यद्वा द्विर्वचनेऽचीति निषेधः प क्षे तूपधालोपात्प्रागेव द्वित्वं पश्चादुपधालोपः घसिवसिघसीनाञ्चेति षत्वं चर्त्वं च. अभ्यासे चर्चेत्यभ्यासघ-
कारस्य जश्त्वमिति ॥ ✱ ॥ निषेदुषीमिति. बहुविग्रहणाद्धौ लिटि धातोरिति द्वित्वे तदेकहल्मध्यरूपेत्वाभ्यासलोपौ. उगितश्चेति ङीपि वसोरिति सम्प्रा-
सारणे वलादित्वाभावान्नेट्. सदिरप्रतेरिति षत्वम्. पुंसि तु निषेदिवान्. अध्यूषुष इति. वस निवासे अधिपूर्वः वचिस्वपीति सम्प्रसारणं द्वित्वहलादिशेष-
सवर्णदीर्घाः ङसि भत्वात्सम्प्रसारणं प्रथमैकवचने तु अध्यूषिवान्. उपेयिवानना इडिति वलादिलक्षण एवेट् नेड्वशि कृतीति निषिद्धः क्रादिनियमात्तु

निषेदुषीमासनबन्धधीरः । अध्यूषुषस्तामभवज्जनस्य । शुश्रुवान् । उपेयिवाननाश्वाननूचानश्च । ३।२।१०९ ॥ एते निपात्यन्ते । उपपूर्वादिणो भा-
षायामपि भूतमात्रे लिड्वा तस्य नित्यं क्वसुः । इट् । उपेयिवान् । उपेयुषः । स्वामपि मूर्तिमगमत् । उपेयुषी । उपेत्य विवक्षितम् । ईयिवान् । समीयि-
वान् । नञ्पूर्वादश्नातेः क्वसुरिडभावश्च । घृतजयधृतेरनाश्वन् इति भारविः । अनुपूर्वाद्वचेः कर्तरि कानच् । वेदस्यानुवचनं कृतवाननू-
चानः । विभाषा गमहनविदविशाम् । ७।२।६८ ॥ एभ्यो वसोरिड्वा । जग्मिवान् । जगन्वान् । जघ्निवान् । जघन्वान् । विविदिवान् । विविद्वान् । विविशि-
वान् । विविश्वान् । विशिना साहचर्याद्विन्दतेर्ग्रहणम् । वेत्तेस्तु विविद्वान् । नेड्वशि कृतीति इण्निषेधः । दृशेश्च । ददृशिवान् । ददृश्वान् ।

नः प्राप्तः वस्वेकाजाद्घसामिति सूत्रेण कृतद्वित्वानामेकाचामादन्तानां घसेश्च वसोरिट् स्यान्नान्येषामिति नियच्छता प्रतिषिद्धो नित्यत्वात् द्वित्वे कृते
नेकाच्त्वात्. न च सवर्णदीर्घे एकाच्त्वं दीर्घ इणः कितीत्यभ्यासस्य दीर्घे कृते तत्सामर्थ्यात्सवर्णदीर्घाभाव इति पक्षाश्रयणात्. स एव वलादिलक्षण-
इडिह प्रतिश्रूयते नापूर्वो विधीयते. तेन सम्प्रसारणविषयेन भवति अत एवोदाहरति उपेयुष इति. सति त्विटि तस्य यणादेशे उपेयुष इति स्यादिति भा-
वः अविवक्षितमिति. व्याख्यानमेवात्र शरणं. इट् वानिति. इणो द्वित्वे सवर्णदीर्घं बाधित्वा आङ्. तार्तीयं यत्नियण भवति वसोरिडागमे हि परत्वाजादित्व

हरिः

474

वचेरिति· वचपरिभाषणे इत्यस्माद्धोर्वचेर्वोकर्त्तरि न तु भावकर्मणोः एतच्च निपातनाल्लभ्यम्· जग्मिवानित्यादि· इडुपसंख्यानमहनेत्युपधालोपः॥ ॥
लटः शतृशानचावप्रथमासामानाधिकरण्ये सतीति· यद्यप्यादेशरहितस्य लटः प्रयोगाभावात्सामानाधिकरण्यं दुर्लभं तथापि शतृशानचौ लः इष्टास्थानित्वापिसा
मानाधिकरण्यं कल्प्यते· शबादीनि शित्वेन सार्वधातुकत्वादितिभावः· पचन्तमिति· शतुरुक्तत्वान्नुम विक्लित्यनुकूलवर्त्तमानव्यापाराश्रयमित्यर्थः।
आने मुक्। आने परे मुगिति पूर्वसूत्रादनुवृत्तं पञ्चम्यन्तमप्यत इति पदं षष्ठ्या विपरिणम्यते आन इति सप्तमीबलात्· नचात इति पञ्चमीबलादान इति स
प्तम्यन्तमप्यरं षष्ठ्या विपरिणम्यतामिति शंक्यम्· पञ्चम्याः पूर्वसूत्रे चरितार्थत्वात्सप्तम्याश्चाचरितार्थत्वादनेतराह· अङ्गस्यात इति· प्राचा तु दन्ताङ्ग· स्ये

लटः शतृशानचावप्रथमासमानाधिकरणे।३।२।१२४॥ अप्रथमान्तेन सामानाधिकरण्ये सतीत्यर्थः। शबादि। पचन्तं चैत्रं पश्य। आ
ने मुक्।७।२।८२। अङ्गस्यातो मुगागमः स्यादाने परे। पचमानं चैत्रं पश्य। लडित्यनुवर्त्तमाने पुनर्लड्ग्रहणं अधिकविधानार्थम्। तेन प्र
थमासामानाधिकरण्येऽपि क्वचित्। सन्ब्राह्मणः। माङ्याक्रोश इति वाच्यम्। मा जीवन्यः परावज्ञादुःखदग्धोऽपि जीवति। माङि· लुङि· ति प्रा
प्ते। एतद्वचनसामर्थ्याल्लट्। सम्बोधने च।३।२।१२५। हे पचन्। हे पचमान॥

९९. नि व्याख्यातं तदयुक्तम्· पचमान इत्यादावदुपदेशाल्लस
र्वधातुकमनुदात्तमिति शानचः स्वरस्यासिद्धिप्रसङ्गात्· अदन्ताङ्ग· स्येति पक्षे हि अङ्ग· भक्तो मुक् स चाङ्ग· मेव न व्यवदध्यात्तदवयवमकाररुत्व्यवदध्यादे
व· अकारमात्रभक्तत्वे तु तदवयवत्वाभावान्नास्ति व्यवधानमित्यदोषः ननु स्वरविधौ व्यञ्जनमविद्यमानवदिति परिभाषया मुकोऽविद्यमानत्वेन व्यवधाना
भावात्स्यादेवानुदात्तत्वमिति चेत्· अत्राहुः हलः स्वरप्राप्तौ व्यञ्जनमविद्यमानवन्नान्यत्रेत्याकराल्लब्धम्· नचात्र हलः स्वरप्राप्तिरस्तीति प्रकृते परिभाषेयं नो
पयुज्यतेऽन्यथा मरुत्वानित्यादावपि ह्रस्वनुड्भ्यां मतुविति मतुप उदात्तत्वस्यापत्तिरिति दिक्· लडितीयद्यपि प्रथमान्तं प्रकृतं तथापि धातोरित्यधिकारात्पञ्च
म्यन्तात्परं प्रथमान्तं षष्ठ्या विपरिणम्यत इति भावः· नच वर्त्तमाने लडित्यत्र वोक्तरीत्या विपरिणामोऽस्त्विति शंक्यम्· प्रत्ययविधौ पञ्चम्याः प्रकल्पक
त्वन्नास्तीति गुप्तिज्किद्भ्यः सन्नित्यत्र भाष्यकारैः स्वीकृतत्वात्· प्रथमासामानाधिकरण्येपीति· उपलक्षणमिदम्॥

कृ· सि· कौ· टी· न· १७९ स्वीकृतत्वात् प्रथमासामानाधिकरण्येपीति· उपलक्षणमिदम्· अप्रथमान्तेन सामानाधिकरण्याभावेपीत्यर्थः तेनकुर्वतोऽपत्यंकौर्वतः कुर्वतोभक्तिः कु
र्वाणभक्तिरितिप्रत्ययोत्तरपदयोरपिसिध्यति· अन्यथाकुर्वतोऽपत्यमित्यादौतद्धितसमासौनस्याताम्॥ ॥ लक्षणहेत्वोः लक्ष्यतेऽनेनेतिलक्षणंपरि
चायकम्· शयानाभुंक्ते· शीङ् आत्मनेपदित्वात् लटः शानच्· अत्रशयनंलक्षणंचिह्नंयवनकर्तृकभोजनस्यनतुफलंनापिकरणमितिहेत्वपेक्ष
यालक्षणस्यपृथक्निर्देशः अर्जयन्वसतीति· अर्जप्रतियत्नेचुरादिः अर्जनार्थोवासइत्यर्थः हरिमिति· हरिंदृष्ट्वामुक्तौकरणमित्यर्थः विदेःस्यानिव

लक्षणहेत्वोःक्रियायाः।३।२।१२६।क्रियायाःपरिचायकेहेतौचार्थेवर्तमानाद्धातोर्लटःशतृशानचौस्तः।शयानाभुञ्जतेयवनाः।अर्ज
यन्वसति।हरिंपश्यन्मुच्यते।हेतुःफलङ्करणञ्च।कृत्यचः।८।४।२९।प्रणीयमाणःसोमः।ईदासः।७।२।८३।आनःपरस्यानस्यईत्स्यात्
आदेःपरस्य।आसीनः।विदेःशतुर्वसुः।७।१।३६।वेत्तेःपरस्यशतुर्वसुरादेशोवास्यात्।विदन्।विद्वान्।विदुषी।तौसत्।३।२।१२७।तौशतृ
शानचौसत्संज्ञौस्तः।लृटःसद्वा।३।३।१४।व्यवस्थितविभाषेयं।तेनाप्रथमासामानाधिकरण्येप्रत्ययोत्तरपदयोःसम्बोधनेलक्षणहेत्वोः
श्चनित्यं।करिष्यन्तंकरिष्यमाणंपश्य।करिष्यतोपत्यङ्कारिष्यतः।करिष्यद्भक्तिः।हेकरिष्यन्।अर्जयिष्यन्वसति।प्रथमासमानाधिकर
णेपिक्वचित्।करिष्यतिकरिष्यन्।पूङ्यजोःशानन्।३।२।१२८।वर्तमाने।पवमानःयजमानः॥ ११ त्वादेवसिद्धेवसोरुगित्करणंवसोः

सम्प्रसारणमित्यत्रकसोरपिसामान्यग्रहणार्थम्· तत्सामर्थ्याच्चैकानुबन्धग्रहणेनद्व्यनुबन्धकस्येत्येतदपिनप्रवर्तते· पूङ्यजोःशानन्· शकारः
सार्वधातुकत्वार्थः नकारःस्वरार्थः ण्वुलादिवत्स्वतन्त्रोऽयंनतुशत्रादिवल्लादेशःतथाहिसतिवेतिवाच्यम्· स्यात्पवतेयजतेरितितिङोपिप्रयोगःस्यादिति· न
चवासरूपन्यायेननिर्वाहः लादेशेषुवासरूपविधिर्नास्तीत्याकरेस्थितत्वात्· किंचलादेशत्वेलःकर्मणिचेतिभावकर्मणोर्विहितःस्यादितिभावकर्मणो रा· म· १७९
रपिप्रयुज्येत· इष्यतेतुकर्तर्येव· एवंचानशः इङ्· धार्योरितिशतुश्चस्वातन्त्र्यंबोध्यम्· अत्रकेचित्शाननोलादेशत्वेलसार्वधातुकानुदात्तत्वंस्यादि

475

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदात्तत्वम्. परत्वान्नित्स्वरप्रहृत्यापवमानइत्यादेशस्य दात्तत्वेप्रानतोः नुदात्तत्वस्येष्टत्वात्. नन्वेवंलादेशत्वान्ङीकारसोमम्यवमानइत्यादौ कर्मणि षष्ठी
स्यादिति चेन्नैवम्. नलोकेति सूत्रेतृन्निति प्रत्याहारनिर्देशादित्युक्तत्वात्।। ॐ।। ताच्छील्य वचनग्रहणं स्पष्टार्थम्. चानशो लादेशत्वाभावेनात्मनेपदत्वाभावान्
रस्मैपदिभ्योपि विधानमिति ध्वनयन्नुदाहरति. निघ्नानइति. गमहनेत्युपधालोपः इङ्. धार्योः इङ्. आत्मनेपदित्वात् शतानसिध्यति धारयतेरपि कर्तृगामिनि
क्रियाफलेनसिध्यति लसार्वधातुकानुदात्तत्वं च प्राप्नोतीत्ययमारम्भः सुञोयज्ञसंयोगे सुनोतेः शतृप्रत्ययः स्यात्. यज्ञेन संयुज्यमाने हृत्विक्षेनृ. नन्विह सु
नोयज्ञेऽस्यैवासुयज्ञविषयकत्वे सुनोत्यर्थ इति व्याख्यायां सुरांसुनोतीत्यादेर्व्यावर्तयितुं शक्यत्वात्. अत्राहुः संयोगग्रहणं प्रधानकर्तृसंप्रत्ययार्थं तेनेय

ताच्छील्यवयोवचनशक्तिषु चानश्।३।२।१२९। एषु द्योत्येषु कर्तरि चानश्। भोगंभुञ्जानः। कवचं बिभ्राणः। शत्रून्निघ्नानः। इङ्धार्योः शत्रक
च्छ्रिणि।३।२।१३०। आभ्यां शतृ स्यादकृच्छ्रिणि कर्तरि। अधीयन्। धारयन्। अकृच्छ्रिणि किम्। कृच्छ्रेणाधीते। धारयति। द्विषोऽमित्रे।३।२।
१३१। द्विषन् शत्रुः। सुञो यज्ञसंयोगे।३।२।१३२। सर्वे सुन्वन्तः। सर्वे यजमानाः सत्रिणः। अर्हः प्रशंसायाम्।३।२।१३३। अर्हन्। आक्वेस्तच्छील मं
तद्धर्मतत्साधुकारिषु।३।२।१३४। क्विपमभिव्याप्य वक्ष्यमाणाः प्रत्ययास्तच्छीलतद्धर्मतत्साधुकारिषु कर्तृषु बोध्याः। तृन्।३।२।१३५। कर्त्ता क ८

जमानादन्यत्र न भवतीति. एवञ्चाप्रधाने कर्तरि लटः शतृशानचावित्यनेनापि न भवति संयोगग्रहणसामर्थ्यादिति हरदत्तः. यः सुन्वन् सुवन्तीत्यादीनामेकवचनाना
नां यजमानपरत्वसम्भवेपि बहु चनान्तानां नु न सम्भवति एकस्मिन्यागे एकस्यैव यजमानत्वादित्याशयेन योगविशेषेतु सम्भवतीति दर्शयितुमुदाहरति. सर्वे सुन्व
न्त इत्यादि. सत्रयागे हि बहवो यजमानास्त एव च ऋत्विजः कर्म सोमाभिषवनं कुर्वन्तीति सुन्वन्त इत्यादि बहुवचनान्तस्यापि यजमानपरत्वं सम्भवतीति भावः. अर्हः प्रशं
सायां किम्. अर्हति चौरो वधम्. आक्वेः शीलादीनां त्रयाणां विशेषणं समर्पयितुं निर्दिष्टेष्विति सच्छब्दैः प्रकृतिभूतधात्वर्थो निर्दिश्यते क्विपमभिव्याप्येति. भ्राजभा
सधुर्विद्युतोर्जीति वक्ष्यमाणमिति शेषः. कर्त्ता कटानिति. नलोकाव्ययेति षष्ठीनिषेधः।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीः
सि· कौ·
टी· त·
१८०

अलंकृञ्निराकृञित्यत्र निराकरणे इत्यस्यैव ग्रहणं न तु कृञ्नहिंसायामित्यस्य प्रसिद्धाप्रसिद्धयोः प्रसिद्धस्यैव ग्रहणमिति न्यायात्· निराङ्पूर्वोपि कृञ् स एव
प्रपूर्वो जनी प्रादुर्भावे· इह डुपचष् पाके पत्लृ गतौ मदी हर्षे त्रयोपि उत्पूर्वाः पठ्यन्ते· तत्र उदः पचयतेमदरत्येव वक्तव्ये प्रत्येकमुत्पूर्वस्य पाठ उपसर्गान्तरानिवृ
त्त्यर्थस्तेन समुत्पतिष्णुरित्यादि न भवतीत्याहुः रुच दीप्तौ अपपूर्वः त्रपूष् लज्जायाम्· वृतु वर्तने वृधु वृद्धौ षह मर्षणे चर गतौ· इत्यादीति· आद्रिशाद्यत्रा

अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच् ॥३।२।१३६॥ अलङ्करिष्णुः । निराकरिष्णुः । प्रजनिष्णुः । उ-
त्पचिष्णुः । उन्मदिष्णुः । रोचिष्णुः । अपत्रपिष्णुः । वर्तिष्णुः । वर्द्धिष्णुः । सहिष्णुः । चरिष्णुः । णेश्छन्दसि ॥३।२।१३७॥ वीरुधः पारयिष्णवः । भुव-
श्च ॥३।२।१३८॥ छन्दसीत्येव । भविष्णुः । कथं तर्हि जगत्प्रभोरप्रभविष्णु वैष्णवमिति । निरंकुशाः कवयः । चकारोनुक्तसमुच्चयार्थः । भ्राजिष्णुरि-
ति वृत्तिः । एवं क्षयिष्णुः नैतद्भाष्ये दृष्टम् । ग्लाजिस्थश्च ग्स्नुः ॥३।२।१३९॥ छन्दसीति निवृत्तमिति इत्यन्ये तन्न किं तर्हि नृतिनस्यार्ई त्वन्न । ग्लास्नुः । गित्वान्न गुणः ।
जिष्णुः । स्थास्नुः । चाद्भुवः । श्रुकः कितीत्यत्र गकारस्य प्रश्लेषान्नेट् । भूष्णुः । दंशेश्छन्दस्युपसंख्यानम् । दंक्ष्णवः पशवः । त्रसिगृधिधृषिक्षिपेः क्नुः ॥३।२।१४०॥
त्रस्नुः । गृध्नुः । धृष्णुः । क्षिप्नुः । शमित्यष्टाभ्यो घिनुण् ॥३।२।१४१॥ उकार उच्चारणार्थ इति काशिका अनुबन्ध इति भाष्यम् । तेन शमिनितरा शमिनीतरेत्य-
त्र उगितश्चेति ह्रस्वविकल्पः । न चैवं शमिनाविन्यादेरनुषङ्गः । नलग्रहणमपकृष्य फलं नानामेव तद्विधानात् । नोदात्तोपदेशस्येति वृद्धिनिषेधः ।
शमी दमी तमी श्रमी भ्रमी क्षमी प्रमादी उन्मादी । अलंकृञादिसूत्रे लोप्युञ्जुक्तो वासरूपविधिना घिनुणपि । उन्मादी ताच्छीलिकेषु वासरूप

त्वात् निराकरिष्णुः प्रजनिष्णुः उत्पचिष्णुः उत्पतिष्णुः उन्मतिष्णुः सहिष्णुः चरिष्णुः स्वरदूषणाविनिर्मितिः कालिदासोप्याह रशनामुत्पतिष्णव इति· केचित्तु यत्न इति
स्थाने दानं सूत्रे पठित्वा पदानावित्यस्मात्प्रत्ययमाहुः उन्मदिष्णुः रोचिष्णुः अपत्रपिष्णुः वर्तिष्णुः वर्द्धिष्णुः सहिष्णुः चरिष्णुः पारयिष्णव इति· अयामनेति लोके यः ने · त·
नदिति· चकारस्यानुक्तसमुच्चयार्थत्वमित्यर्थः इत्यन्येति· घुमास्थेत्या · १८०

476

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दिनागित्वादिति· ङ्कित्त्वे सत्यत्र गकारं प्रश्लिष्य गित्किति ङितीति व्याख्यानादित्यभावः। गकारप्रश्लेषादिति· नन्वेवं गकारे चर्त्वस्यासिद्धत्वाद्गश्लिष्टे चेत्सुत्वं स्यादिति चेत्सत्यम्· सो
त्रायं निर्देशः तथा च वार्त्तिकम् गलोगित्वान्नस्य ईकारः क्ङिति· तोरीत्वप्रसङ्गात्· गुणाभावस्त्रिषु स्मार्यः श्र्युकोः निष्ठत्वं कगोरिता रिति दं ह्रस्व एव रूनि· दृशरस्तनेत्र श्लेन्या
दिनाषत्वेषढोः कः सीति कत्वमादेशप्रत्यययोरिति षत्वम्· अनिदितामिति न लोपो न ग्लोर्गित्त्वेन प्राप्त्यभावात् त्रस्नुरिति नेड्श्रिरतिनेट्· शमित्यष्टाभ्यो· दर्शनश्रवणाद्यर्थः प्र
मिनीतरेत्यत्रेति· अत्र नव्याः विहन्तरेति वत्तमित्यादि विधिः पुंवद्भावेन प्रमितरेति भाव्यम्· न च उगित्वाभ्युपगमस्य फलाभावाद्ध्रस्वविकल्प एव भवत्वीतिवाच्य

सम्पृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजाति।
चरापचरामुषाभ्याहनश्च।३।२।१४२। घिनुण् स्यात्। सम्पर्की। अनुरोधी। आयामी। आयासी। परिसारी। संसर्गी। परिदेवी। संज्वारी। परिक्षेपी।
परिराटी। परिवादी। परिदाही। परिमोही। दोषी। द्वेषी। द्रोही। दोही। योगी। आक्रीडी। विवेकी। त्यागी। रागी। भागी। अतिचारी। अपचारी। आमो
षी। अभ्याघाती। वौ कषलसकत्थस्रम्भः।३।२।१४३। विकाषी। विलासी। वि कत्थी। विस्रम्भी। अपे च लषः।३।२।१४४। चाद्वौ। अपलाषी। वि
लाषी। प्रे लपसृद्रुमथवदवसः।३।२।१४५। प्रलापी। प्रसारी। प्रद्रावी। प्रमाथी। प्रवादी। प्रवासी। निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिर
टपरिवादिव्याभाषासूयो वुञ्।३।२।१४६। पञ्चम्यर्थे प्रथमा। एभ्यो वुञ् स्यात्। निन्दकः। हिंसक इत्यादि। ण्वुला सिद्धे वुञ्वचनं ज्ञापकमनुबन्धकृत्
लादिषु वासरूपन्यायेन तृजादयो नेति॥ ११ मः पाक्षिकह्रस्वेन उगित्करणस्य चरितार्थत्वाद्ध्रस्वाभावपक्षे पुंवद्भावस्य दुर्वारत्वादित्याहुः॥ ॥ सम्पृचा
सम्पर्कीति· पृची संपर्के च जोरिति कुत्वे गुणः परिदेवीति· देवृ देवने भ्वादिः ण्यन्तस्य दीव्यतेस्तु नेह ग्रहणं लाक्षणिकत्वात्· अण्यन्तेः साहचर्याच्च· अभ्याघातीति अभ्याङ्
पूर्वाद्धन्तेर्हस्य कुत्वेन घः हनस्तोऽचिण्णलोरिति तस्य तः· अत उपधाया इति वृद्धिः वौ कष· कष हिंसार्थः लस श्लेषणक्रीडनयोः कत्थ श्लाघायाम् स्रम्भु विश्वासे· अपे च
लषः लषकान्तौ· प्रेलप। लप व्यक्तायां वाचि· प्रमाथीति· मथ विलोडने· निन्द हिंस· इह सूत्रे विनाशे॥

सि० कौ० टी० न० १८१

तिविपूर्वस्य नशेरर्थे नत्वस्य भाविनात्विचोपेन निर्देशः अकारस्त्वागन्तुकः केचित्तु विनाशीतिरूपं नत्वमेव पठन्ति परिवादीनित्तु वदे रूपं न तस्य पाठो निर्विवादएव असूयतिः क
ण्ड्वादिर्यगन्तः निन्दादीनामसूयान्तानां समाहारद्वन्द्वे सौत्रं पुंस्त्वम् स्यादेतत् असूयतेरेव वृत्राविधेयोनेतरेभ्यः निन्दादीनां ण्वुलेव सिद्धेः नहि नत्वलि त्सरनित्सरयो
विशेषोऽस्ति उभयथाप्यामुदात्तत्वात् असूयतेस्तु ण्वुलि लित्तिनीतिप्रत्ययात्पूर्वमुदात्तं वृत्रि तु ञ्नित्यादिर्नित्यमित्यादिरुदात्तं इतिविशेषस्तत्राह ण्वुलेति नूनाद्योनेति नेदं
ण्वुल्विषयकमेवज्ञापकं किन्तु सामान्यतः प्रत्ययमात्रविषयकमित्यर्थः ॥ ॥ देविक्रुशोः देव्यतेर्हेतुमण्ण्यन्तस्यादिवु कूजने इति चुरादिण्यन्तस्य च ग्रहणम् चलनश
ब्दार्था चल कम्पने चुपमन्दायां गतौ कपि चलने शब्दार्थानि चुरादिः हलादेश्चलनशब्दादिपुवोतिरिक्तनादेशः अनुदात्तेतश्च हलादेः ननु सर्वोप्यनुदात्तेत् हलन्त एवेति तत्

देविक्रुशोश्चोपसर्गे ॥ ३।२।१४७॥ आदेवकः। आक्रोशकः। उपसर्गे किम्। देवयिता। क्रोष्टा। चलनशब्दार्थादकर्मकाद्युच् ॥ ३।२।१४८॥ चलनार्था
च्छब्दार्थाच्च युच् स्यात्। चलनः। चोपनः। कम्पनः। शब्दनः। रवणः। अकर्मकात्किम्। पठिता विद्याम्। अनुदात्तेतश्च हलादेः ॥ ३।२।१४९॥ अ
कर्मकाद्युच् स्यात्। वर्तनः। वर्द्धनः। अनुदात्तेतः किम्। भविता। हलादेः किम्। एधिता। अकर्मकात्किम्। वसिता वस्त्रम्। जु चंक्रम्यदन्द्रम्यस
गृधिज्वलशुचलषपतपदः ॥ ३।२।१५०॥ जु इति सौत्रो धातुर्गतौ वेगे च। जवनः। चंक्रमणः। दन्द्रमणः। सरणः। पूर्वेणैव सिद्धे पदग्रहणं लषपत
पदे त्युकञो बाधा मा भूदिति। तेनेतौ ण्वुलि केषुपरस्य रम्भाऽसरूपविधिर्नास्तीति तेनालं क्रान्तःपुनः कुधमण्डार्थेभ्यश्च ॥ ३।२।१५१॥ क्रोधनः

स्तनविधिं वाधित्वा सामर्थ्याद्धलादिरेव ग्रहीष्यते नत्विमादिग्रहणेनेति चेत्तत्राह आदिग्रहणाभावे हलन्तादित्यर्थः स्यात्तथा ॥ रोषणः। मण्डनः। भू
हिसत्येधितेत्यादावतिप्रसङ्गः स्याज्जुगुप्सनइत्यादि च न सिध्येत् अस्ति चेहानुदात्तेत्त्वं गुपादिषु वयवे च चरितार्थस्यानुबन्धस्य समुदायविशेषकत्वादिति दिक् जु
चंक्रम्य क्रमि द्रमीयङ् नौकमुपादविक्षेपे द्रमहम्ममीमृगतौ पूर्वेणेति अनुदात्तेतश्चेत्यनेन रहपदिग्रहणं सकर्मकार्थमिति वृत्तिकृतोक्तम् भाष्ये तु अनभिधानादे
वसकर्मकान्न भविष्यतीत्युक्तत्वात् ज्ञापनार्थमेवत्तदित्याशयेनाह बाधा मा भूदित्यादि ॥

राम० १८१

477

CC-0. In Public Domain. Digitization by eGangotri

परस्परमिति· निन्दादिसूत्रे हि ताच्छीलादिषु वासरूपविधानात् ज्ञापयोगेति ज्ञापितमिह तु ताच्छीलिकेषु परस्परं नेति ज्ञापितमिति विवेक इति भावः· क्रुध· क्रुधक्रोधे रुष रोषे मण्डि
भूषायाम्· भूष अलङ्कारे ॥ नयः ॥ अयपयनयतयजयगता इति पठितस्य नयतेर्नायं निर्देशः अनुदात्तेत्वादेव युचः सिद्धत्वात् किन्तु नेनीति एयकृपरमिति मत्वाह· यकारान्ता
दिति· क्नूयि शब्दे उन्दे च· क्ष्मायी विधूनने· सूददीप· सूद क्षरणे दीपी दीप्तौ दीक्ष मौण्ड्येज्यादौ ना ताच्छीलिकेष्विति· परस्परमिति शेषः· प्रायिकमिति न केवलं
यथाश्रुतभाष्यमवलम्ब्य युज्यमाने वसमावेश इति मन्तव्यम्· किन्तु प्रायिकत्वमेव भाष्यस्वारस्यं तेन गमेर्लषपतपदेत्युकञ् विषये तृन्नपि· गन्ता गामुकः नयावोकपल
सतिघिनुण्विषये युजपि विकत्थी विकत्थनः इत्यादि सिध्यतीति भावः· जल्पजपज ल्पव्यक्तायां वाचि भिक्ष भिक्षायां लाभेऽलाभे च कुट्ट छेदने लुण्ट स्तेये चोरादिका विमौ

नयः। ३।२।१५२। यकारान्तान्नायं युच् न स्यात्। क्नूयिता। क्ष्मायिता। सूददीपदीक्षश्च। ३।२।१५३। युच् न स्यात्। सूदिता। दीपिता। दीक्षिता। नमिकम्पी
तिरेणेषु चोदाहृते सिद्धे दीपग्रहणं ज्ञापयति। ताच्छीलिकेषु वासरूपविधिर्नास्तीति प्रायिकमिति। तेन कमिता कमनः युवतिः। कम्पा कम्पनः शा
खा। यदि सूदेर्युच्न कथम् मधुसूदनः। नन्द्यादिः। लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ्। ३।२।१५४। लाषुकः। पातुकः इत्यादि। जल्प
भिक्षकुट्टलुण्टवृङः षाकन्। ३।२।१५५। जल्पाकः। भिक्षाकः। कुट्टाकः। लुण्टाकः। वराकः। वराकी। प्रजोरिनिः। ३।२।१५६। प्रजवी। प्रजविनौ। प्रज
विनः। जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च। ३।२।१५७। जयी। दरी। क्षयी। विश्रयी। अत्ययी। वमी। आव्यथी। अभ्यमी। परिभवी। प्रसवी।

अत्रव्याचख्युः जल्पे चलनशब्दार्थादिति भिक्षेरनुदात्तश्चेति युचि प्राप्ते कुट्टलुण्टयोर्लश्चन्दसीति इष्णुचि प्राप्ते वृङस्त्वात् गमहनजनेति कि किनोः प्राप्तयोरयं विधिरि
तिषोडीयमर्थं इत्याह· वराकीति· प्रजोजुइतिसौत्रो गत्यर्थः· जिदृक्षि· जिजये जि अभिभवे दृङ· आदरे क्षि क्षये क्षि निवासगत्योः श्रिञ् सेवायाम्· विपूर्वः व्यथ भयसञ्चल
नयोः नञ्पूर्वः निपातनान्नञो धातुना समासे नलोपे ततः प्रत्ययः अम गत्यादिषु अभिपूर्वः प्रसवी· षूप्रेरणे अस्मादिति· षूङ् प्राणिगर्भविमोचने· षूङ् प्राणिप्रसवे इ
ति न गृह्यते सानुबन्धत्वात् जिदृक्षीत्यत्रैव प्रजुं पठित्वा पूर्वसूत्रं त्यक्तुमुचितम्· एवं हि पृथग्विभक्तिश्चकारश्च मास्त्विति सुवचम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कृ·
सि·कौ·
टी·न·
९८२

स्पृहि· स्पृह ईप्सायाम्· ग्रह ग्रहणे· पत गतौ· अयञ्चुरादावित्ति· तेन णेरयादेशेन रूपसिद्धिरिति भावः यद्येवं णिचि उपधागुणवृद्धी स्यातामत आह· अदन्ता इति· तन श्चाल्लोपस्य स्थानिवत्त्वान्न दोषाव इति भावः तत्पूर्व इति· तच्छब्दस्य समासोपि निपातनादिति बोध्यम्· डुधाञ्· श्रत्पूर्वः श्रद्धालुः धेट इत्युनेदं रूपम्· श्रत्पूर्वस्य तस्य प्र योगाभावादिति व्याचख्युः कथं कृपालुः स्पर्शालुः कृपां स्पर्शं च लातीति विग्रहे मृगय्वादित्वात्कुः दाधेट्डुदात्र् दोदेः अत्र यावणामेव ग्रहणं न तु दाप्· स्यपोरि त्याहुः भङ्गुर इति· चजोरिति कुत्वम्· अभिधानस्वभावाद्भञ्जेः कर्मकर्तर्येवेत्याह· विदिभिदि· विदेर्ज्ञानार्थस्यैव ग्रहणं न तु लाभार्थस्य व्याख्यानात्· छिदुर

पक्षिणी त्युपलक्षणम्· पतङ्गः शलभे शालिप्रभेदे पक्षिसूर्ययोः क्लीबं तु सूते इति मेदिनी· सूते पारद इत्यर्थः तरत्यादिभ्यश्च·तृप्लवनतरणयोः लूञ् छेदने·तरङ्ग ऊर्मिः तर
ङ्गः तुरगाणामुत्फालेवस्त्रभङ्गयोरिति विश्वः लवङ्गन्देवकुसुमे· आकृतिगणोयम्· विडादिभ्यः विडआक्रोशे मृदक्षोदे कृ विक्षेपे एभ्योङ्गच् कित्स्यात्· ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



विडङ्ग·ओषधिविशेषइति· उज्ज्वलदत्तः·विडङ्गः कृमिसंघघ्ने विडङ्गो नागरेऽन्यवदिति विश्वः·विडङ्गस्त्रिष्वभिज्ञे स्यात् कृमिघ्ने पुन्नपुंसकमिति मेदिनी·मृदङ्गः पटहे घोषे इति च·कुरङ्गो मृगविशेषः·वाहुलकादुत्वञ्चेति·कुरशब्द इत्यस्मादङ्गच्·तत्स्य कित्वेन गुणाभाव इत्यन्ये·॥ ❀ ॥ सृवृञोः सृगतौ वृञ्वरणे सारङ्गः पुंसि हरिणे चातके च मत्तेभे गजे शवले त्रिष्विति मेदिनी·वाहुलकात्·न्दनपेऽप्यनारङ्गः·पिप्पलीरसे यमजप्राणिनि विटे नागरङ्ग द्रुमेऽपि चेति मेदिनी·गन्गम्·गम्लृगतौ· अदभक्षणे वाहुलकादमगत्यादिषु·अस्मादपि गन्·अंगं गात्रे उपाये च प्रतीके चाप्रधानके·अङ्गो देशविशेषः स्यादङ्ग सम्बोधनेऽव्ययमिति विश्वः·अङ्गः ङ्गात्रे प्रतीकोपाययोः पुंभूम्नि नीवृति क्लीवे कत्वे त्वप्रधाने त्रिष्वङ्गवति तिकेइति मेदिनी·छापूर्वो छेदने पूङ् पवने खड भेदने·छायते छिद्यते यज्ञार्थमिति छा

सृवृञोर्वृद्धिश्च।सारङ्गः।वारङ्गः।खङ्गादिमुष्टिः।गन्गम्यद्योः।गङ्गा।अङ्गः।पुरोडाशः।छापूखडिभ्यः कित्।छागः।पूगः।खङ्गः।वाहुलका
त्।पिट् अनादरे।गन्सलाभावश्च।पिङ्गः तरलः।पिङ्गैरराघत सससंभ्रममेवमेके इति माघः।भृञः कित्नुड्च।भृङ्गो गन्कित्स्यात्तस्य नुट् च।भृ
ङ्गः पिङ्गालि धूम्याटः।शृणातेर्ह्रस्वश्च।शृङ्गम्।गणाशाकुनौ।नुट् चेत्यनुवर्तते।शार्ङ्गः।मुदिग्रोर्गग्गौ।मुद्गः।गर्गाः॥ ❀ ॥ ❀ ॥

गः पूयवे मुखमनेनेति पूगः·पूगस्तु क्रमुके वृन्दे इति मेदिनी·खङ्गो गण्डकशृङ्गे स्यात्·निस्त्रिंशे गण्डकेऽपि चेति शब्दतरंगिणी·खड्गो गण्डकशृङ्गासिबुद्धभेदे पु गण्डके इति मेदिनी·भृञः डुभृञ् धारणपोषणयोः·किदित्यनुवर्त्तनात् किंकृहणामिहस्य सार्थम्·भृङ्गो धूम्याटषिङ्गयोः मधुव्रते भृङ्ग राजे पुंसि भृङ्गं गुडत्वचौ ति मेदिनी·शृणातेः शॄहिंसायामस्मादुन्·धातोः ह्रस्वत्वम् अस्य पस्य तु कित्वं नुट् च·शृङ्गं प्रभुत्वे शिखरे चिन्हे·क्रीडांबु यन्त्रके·विषाणोत्कर्षयोश्चाथ शृङ्गः। स्यात् कूर्चशीर्षके·स्त्री विषायां स्वर्णमीनभेदयोः ऋषभौषधाविति मेदिनी·शृङ्गं विषाणमारव्यातं शैलाग्रे जलयन्त्रके मीनौषधिसुवर्णानां भेदे शृङ्गी प्रयुज्य ते इत्युत्पलिनीकोशः·गणाशाकुनौ·शृणातेः शाकुनौ वाच्ये गणाः स्यात्तस्य नुट्·अचो ञ्णितीति धातोर्वृद्धिः शार्ङ्गः पक्षी शार्ङ्गं धनुरिति शृङ्गस्य विकार इति वा ष्यञ्·मुदिग्रोः मुद हर्षे गॄ निगरणे·आभ्यां यथासंख्यं गक् गक् इत्येतौ स्तः·मुद्गः सस्य भेदः·गर्गो मुनि विशेषः॥

५९०



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अण्डन॰ ड्ड गत्न्र कारणेसूगतौभृत्न्रभरणेवृत्न्रवरणे॰ करण्डोमधुकोशासिकारण्डेषुदलाटके इतिमेदिनी॰ वरण्डोप्यन्तरावेदीसमूहमुखरोगयोरितिविश्वमेदिन्यौवाहुलकात्॰ नृत्नव
नतरणयोरित्यतोपि॰ तरण्डोवडिशीसूत्रबद्धकाष्ठादिकेप्लवे इतिमेदिनी॰ शृदृशृहिंसायाम्॰ दृविदारणेभससभर्त्सनदीप्त्योः शरत्स्त्रीवत्सरेप्यृतौ॰ दरन्स्त्रियांभयेतेचभयपर्वतयो
रपिभसत्स्त्रीभास्वरेयोनाविति मेदिनी॰ उवेअंवसुलाभिकइतिमंत्रव्याख्यायांभसद्गमितिवेदभाष्यं जा वन्यापत्नीः संयाजयन्तिभसद्योर्हिस्त्रियइत्यत्रभसजघनमितिव्याख्या
नात्॰ दृणातेः दृविदारणे॰ दृषन्निष्पषणेशिलापदृस्त्वरयोःस्त्रियामितिमेदिनी त्यजि॰ त्यजहानौतनुविस्तारेयजदेवपूजादौन्यदित्यादि॰ अरेर्डिलादित्वलोपः एतेः इणगतौ॰ अ

अण्डनकृसभृवृत्नः करण्डः सरण्डः पक्षी भरण्डः स्वामी वरण्डोमुखरोगः शृदृभसोदिः शरत् दरद्दरयकूलयोः भसज्जघनम् दृणातेःपुग् ह्र
स्वश्च दृषत् त्यजितनियजिभ्योडित् त्यद् तद् यद् सर्वादयः एतेस्तुट् च एतद् सतेरटिः सरट् स्याद्धानमेघयोः वेदभाष्येतुयाभिः कृशानुमितिमन्त्रे
सरड्भ्योमधुमक्षिकाभ्य इतिव्याख्यातम्॰ लङ्घे॰ र्नलोपश्चलघट्वायुः पारयतेरजिः पारक्सुवर्णम् प्रथः किन्त्सम्प्रसारणञ्च पृथक् स्वरादि पाठा
दव्ययत्वम् भियः षुक्ह्रस्वश्च भिषक् युष्यसिभ्यामदिक् युषसौत्रोधातुः युष्मद् असद्त्वं अहं अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षि
नीभ्योमन् एभ्यश्चतुर्दशभ्योमन् अर्मश्चक्षुरोगः स्तोमः सङ्घातः सोमः होमः सर्म्मोगमने धर्म्मः क्षेमंकुशलं क्षोमप्रज्ञादाणि क्षौमञ्च भामआ
दित्यः यामः वामः शोभनदुष्टयोः पद्मम् यक्षपूजायांयक्ष्मारोगराजः नेमः ॥

(९ स्मादिःलस्यतुटिगुणः एतद् सतेः सृगतौ लंघेः लघिशोषणे पारयतेःपा
रतीरकर्मसमाप्तौ चुरादिः पारगितिणिलोपः कुत्वम्॰ प्रथेः प्रथप्रख्याने भियः त्रिभीभयेपुष्यसिश्रमुक्षेपणे अर्तिस्तुऋगतौ ष्टुञ्स्तुतौ षुञ्॰ अभिषवेहुदानादनयोः सृग
तौ धृञ्धारणे॰ क्षिक्षयेटुक्षुशब्दे भादीप्तौयाप्रापणे वागतिगन्धनयोः पदगतौ णीञ्प्रापणे सोमस्तुहिनदीधितौवानरे चकुवेरे चपितृदेवे समीरणेवसुप्रभेदे कर्पूरेनीरे
सोमलतौषधावितिमेदिनी॰ होमइति॰ देवतोद्देशेनहविःप्रक्षेपः धर्मोःस्त्रीपुण्यआचारेस्वभावोपमयोःक्रतौ अहिंसोपनि॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मन्यायेनाघनुर्यमसोमयेरितिच· धर्मः पुण्येयमेन्यायेस्वभावाचारयोः क्रतौ इति विश्वः सोमंमंदे ऽनुकूले ऽस्त्री सोमं वलकलजां शुके घ्राणजे ऽनसिजे इति मेदिनी भामः क्रोधे रवौ
दीप्तावितिच· यामस्तु पुंसि ग्रहरे संयमेपि प्रकीर्तितः इतिच· वामं धने पुंसि हरे कामदेवे पयोधरे वल्गु प्रतीप सव्येषु त्रिषु नार्यां स्त्रियामथ· वामी शृगाली वडवा रासभी करभीषु चेति
पद्मे ऽस्त्री पद्मके व्यूहनिधि संख्यान्तरे ऽम्बुजे· नानागे इति च मेदिनी· यक्ष पूजायामिति· अयमन्तस्थादिः मनिन्प्रत्ययेतु नकारान्तः शब्दः स्वपः श्रोथश्चयक्ष्मा चेत्यमरः राजयक्ष्मे
व रोगाणामिति माघः यक्ष्मणापि परिहाणिमाययौ विलिरद्युः अत्रजकारयकारयोर्भेदाग्रहे णज्ञमष्महसनयोरित्युज्ज्वलदत्तेनोपन्यस्तम्· तन्नतस्य चवर्गतृतीयादित्वात्· अतएव
अक्षिभ्यां नेनासिकाभ्यां कर्णाभ्यां चुबुकादधि· यक्ष्मं सर्वस्मादिति मंत्रे यक्ष्मणः इत्यादिस्थाने स्यादित्वम्· जहातेः· कीडनरममाणः इत्यादिमंत्रेतु जक्ष इत्यस्य चवर्गतृतीयादित्वे वेदभा
ष्यकृतो व्याचख्युः नेमः कीले ऽवधौ गर्ते प्राकारे केतवेपि चेति मेदिनी· नेमस्त्वर्द्धे प्राकारगर्तयोः अवधौ केतवे चेति हेमचन्द्रः ॥ ॐ ॥ जहातेः ओहाक् त्यागे जिह्मः इति मन्प्रत्ययस्य

जहातेः सन्वद् आलोपश्च जिह्मः कुटिलमन्दयोः अवतेष्टिलोपश्च मन्प्रत्ययस्यापवृक्ते लोपः नञ्प्रकृतेः अम्यादिरित्येव ब्रूयात् ज्वरत्वरेति ऊठो नयोर्दीर्घे
कृते गुणः चादिपाठादव्ययत्वमित्युज्ज्वलदत्तस्तन्न तेषाम् असत्वार्थत्वात् वस्तुतस्तु स्वरादिपाठादव्ययत्वं अवतीति ॐ ग्रसेराच ग्रामः अविसि
विसिशुषिभ्यः कित् ऊमन्नगरं स्यूमोरश्मिः सिमः सर्वः शुष्मम् अग्निसमीपयोः ॥ १९ सन्वत्त्वात्· द्वित्वे सन्यतइत्वम्· जिह्मस्तु कुटिले मन्दे क्लीबं तगरपाद
प इति मेदिनी· अवतेः अवरः सणादौ· ओम् प्रश्नेऽङ्गीकृतौ रोषे इति विश्वः ग्रसेराच· ग्रसु अदने· आतो मन्यातोऽकारश्च ग्रामः स्वरे संवसथे वृन्दे शब्दादिपूर्वकः इति विश्वः शब्दादि
पूर्वको ग्रामशब्दो वृन्दे स्याद्यथा भूतग्रामो गुणग्राम इति यथा शब्दादिपूर्वो वृन्देपि ग्राम इत्यमरः संपूर्वो यं युद्धे तदुक्तं सम्पूर्वः संयुगे स्मृत इति अविसिवि· अवरक्षणादौ षिवुतन्तुसन्ताने
षिञ् बन्धने शुष शोषणे· एभ्यो मन्स्यात्स च कित्· ऊठादिकं पूर्ववत्· ऊमं नगरमिति· त्वं कं तु मिति मंत्रे ऊमास इत्यर्थ काय जमाना इति वेदभाष्यम्· टाविचा हुलका भ्रुसत्वे ऊमा· ऊमान् रामः
सो हेमवती हरिद्राकान्तिकीर्तिषु इति मेदिनी· स्यूमो रश्मिरिति· सूचंतन्तुरित्यन्ये सिमः सर्वनामगणे पठितः शुष्म तेजसि सूर्ये ना इति मेदिनी· शुष्मं बलमिति वेदभाष्यम्· ॥ ९८५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इषियुधि· इषगतिहिंसादानेषु इषगत्यादाविति केचित्· इध्मः युध संप्रहारे जिइन्धी दीप्तौ· दसु उपक्षये· धैपेङ् गतौ· धूञ् कम्पने· सूञ्· प्राणिगर्भविमोचने· युध्म इति· युध्मो धनुषि
संयुगे इति मेदिनी· दस्युस्तु यजमाने स्यादपि चौरे हुताशने इति च· त्रिषु श्यामो हरित्कृष्णो श्यामास्या च्छारिवानिशोत्यमरः श्यामो वटे प्रयागस्य वारिदे हृदारके पिके च कृष्ण
हरितोः पुंसि स्यात् इति त्रिषु मरीचे सिन्धुलवणे स्त्री वंश्यां शारिकौषधौ अप्रसूताङ्गनायां च प्रियंगावपि गुग्गुलौ यमुनायां त्रियामायां कृष्णत्रिवृत्तिकौषधे नीलिकायामिति मेदि
नी· इर्म क्षिति· इर गतौ· व्रणे स्त्रियां भीर्मम रुः स्त्री वेत्यमरः बाहुलकाज्जनजननइत्यस्मादपि जन्म रुहवीजजन्मनीति निर्देशान्मनिन् नोप्यस्ति सतु नान्तः जनुर्जननजन्मा
नीत्यमरस्तु· अकारान्तनकारान्तोभयसाधारणः युजियुजिर्योगे रुचदीप्तौ तिजनिशाने· एभ्यो मक् कवर्गश्चान्तादेशः रुक्मं नुकाञ्चने लोहइति विश्वमेदिन्यौ· तिग्मं तीक्ष्णं हन्तेः ह

इषियुधीन्धिदसिश्याधूसूभ्यो मक् इध्मः कामवसन्तयोः इषीतिपाठे दीर्घादिः युध्मः शरो योद्धा च इध्मः समित् दस्मो यजमानः श्यामः धूमः सूमोऽ
न्तरिक्षम् बाहुलकाद् ईर्मं व्रणः युजिरुचितिजां कुश्च युग्मं रुक्मं तिग्मम् हन्तेर्हि च हिमम् भियः षुग्वा भीमः भीष्मः घर्म्मः घृधातोर्म्मगुणश्च निपा
त्यते ग्रीष्मः ग्रसतेर्न्निपातोऽयम् प्रथेः षिवन् सम्प्रसारणञ्च पृथिवी पवन्नित्येके पृथवी पृथिवी पृथ्वी इति शाश्वतार्णवः अशूप्रुषिलटिकणिखटि
विशिभ्यः कन् अश्वः प्रुष्वः स्नेहनादेः प्रुषः स्यादृतुसूर्ययोः प्रुष्वा जलकणिका लट्वा पक्षिभेदः कलञ्च कण्वम्पापम् बाहुलकादितिकेचिदेवमपि

न हिंसागत्योरस्मान्मक् धातोर्हिरादेशश्च हिमं तुषारमलययोद्भवयोः स्यान्नपुंसकम्· शीतले वाच्यलिङ्ग इति मेदिनी भियः ञिभी भये विभेत्यस्मादिति विग्रहः भीष्मो गाङ्गेयधीरयोः भीमोऽम्लवेत
नसे घोरे प्रमोम ध्यमपाण्डवे इति मेदिनी घर्मः घृ सरणदीप्त्योः ग्रीष्मः ग्रसु अदने घर्मः स्यादातपे ग्रीष्मे प्युष्मस्वेदाम्भसोरपि ग्रीष्मऊष्मर्तुभेदयोरिति च मेदिनी· प्रथेः प्रथ प्रख्याने विबन्
ङीष्· पृथिवी पृथवी पृथ्वी धरा सर्वसहा रसेति शाश्वतार्णवः अशु प्रुषि· अशूव्याप्तौ लट बाल्ये कण निमीलने· खटि कांक्षायाम्· विश प्रवेशने· अश्वः पुंजातिभेदे चतुरंगे च पुमानयम
तिमेदिनी· अश्वपुभेदः वाजिनोरिति विश्वः लट्वा करंजभेदे स्यात्फलेऽवघरवगान्तरे इति विश्वमेदिन्यौ· कण्वं पापे मुनौ·॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पुंसीतिमेदिनी·किएंवीजाघसीधुघुरितिच·खल्यतेप्रायनार्थिभिः कांक्ष्यतेइतिखड्गाःविश्वास्त्वतिविषायांस्त्रीजगतिस्यान्नपुंसकम्·ननाश्रुत्वा पुंसिदेवप्रभेदेप्यखिलेत्रिषु
तिमेदिनी॥ ॐ ॥इण्·इणगतौ·शीङ्·स्वप्ने·शेवंसुखमितिवेदभाष्यम्·शेवंमेदूमित्युज्वलदत्तः सर्वनिघृष्व·सृगतौ घृषुसंघर्षे रिषहिंसायाम्·लपकान्तौ शीङ्·स्वप्ने·पतगतौ
ष्वेत्रस्पर्द्धायांशब्देच·ओहाकत्यागे इतिवाहुसशब्दे·तंत्रशब्दोऽत्रकर्तृवाचीत्याह·अकर्तरीति·निपात्यन्तइति·वन्मन्नयानननयेतिशेषः हस्वइति·हस्वोन्यकृखर्वयोस्त्रिष्विति
मेदिनी·शेवयन्ह·एतेवन्प्रत्ययान्तानिपात्यन्ते·अन्तोदात्तार्थमिति· इणशीभ्यामित्यनेनआद्युदात्तत्वात्सिद्धेरितिभावः शीङ्·स्वप्नेशेवालिङ्गाकृतिः दशपादीवृत्तिरीत्याह·याम्

इणशीभ्यामवन् एवोगन्ताएचरएवामरुत्तः अप्रत्वेनिपातोयम शेवंमित्रायवरुणाय सर्वनिघृष्वरिष्वलष्वशिवपद्वप्रह्वेष्वा अतन्त्रे अकर्त्तर्यपेतेनि
पात्यनेसृतमनेनविश्वमितिसर्वम्·निपूर्वाद्घृषेर्गुणाभावोपिनिघृष्यते· नेनेनिघृषः खुरः रिषोहिंस्रः लषोनर्त्तकः लिषइत्यन्येतत्रोपधायाइत्वमपि
शेतेऽस्मिन्सर्वमितिशिवः शम्भुः पीङोह्रस्वत्वंपद्वोरथोभूलोकश्च प्रहूयतेइतिप्रह्वः ह्वेञआकारलोपःजहातेराल्लोपोवा ईर्ष्वर्वन् ईर्ष्वः आचार्य्यः
इष्वइत्यन्ये अतन्त्रेकिम्·सर्तासारकः वाहुलकाद्रसनेः ह्रस्वः शेवयह्वजिह्वाग्रीवाप्वामीवाः शेवइत्यन्तोदात्तार्थम्यान्यनेनयह्वः ह्रस्वोहुगागमश्च
लिहन्त्यनयाजिह्वा लकारस्यजः गुणाभावश्चगिरन्त्यनयाग्रीवा ईडागमश्च आप्नोतीत्याप्वा वायुः मीवाउदरक्रिमिः वायुरित्यन्ये कृगृशृद्भ्योवः
कर्वः कामआखुश्चगर्वः शर्वः रुद्रोराक्षसः कनिन्·युवृषितक्षिराजिधन्विद्युप्रतिदिवः योतीतियुवा वृषाइन्द्रः तक्षाराजाधन्वामरुः धन्वाशरास
नंद्युवासूर्य्यः प्रतिदीव्यन्त्यस्मिन्प्रतिदिवादिवसः॥ ॥ ९९ न्यनेनेति·उज्वलदत्तस्तुयजदेवपूजादौजकारस्यहकारोयह्वोयजमानइत्याह·वैदिकनिघंटौमह
न्नामसुयह्वशब्दःपठितःप्रवोयह्वंपुरुणांयह्वेमहान्तमितिवेदभाष्यम्·लिहआस्वादने·लिहन्त्यनयेतिजिव्हा·जिजयेहुगागमःजिव्हारसनेत्युज्वलदत्तः ग्रीवेति·गृनिगरणेआ
प्लृव्याप्तौ·मीङ्·हिंसायाम्·मीवेतिवेदेतुअमीवेतिच्छित्वाअमरोगइत्यसंधाद्धः ईह्वेत्युक्तम्·अमीवहावातोष्यनेइत्यादिमंत्रास्तत्रानुकूलाः कृगृ·कृविक्षेपेगृनिगरणे·शृ० ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिंसायाम्· हृ विदारणे गर्वे अहंकारः शर्वो हरः कनिन्· यु मिश्रणे वृषु सेचने· तक्षू तनूकरणे· राजृ दीप्तौ धन्वि गत्यर्थः दुइ अभिगमने दिवु क्रीडादौ· युवा स्यात्तरुणे श्रेष्ठे निसर्गबलशालि
नीति मेदिनी· वृषा कर्णे महेन्द्रे ना इति च तक्षा तु वर्द्धकिस्त्वष्टा रथकारश्च काष्ठतडित्यमरः राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोरिति च समानौ मरुधन्वानाविति च· अथा
स्त्रियां धनुश्चापौ धन्वशरासनकोदण्डकार्मुकमिति चामरः धन्वा तु मरुदेशे ना क्लीबे चापे स्थलेऽपि चेति मेदिनी॥ ❁ ॥सप्यशूभ्याम्· षप समवाये· अशू व्याप्तौ· नञि ओहा
क् त्यागे कनिनि आतो लोपः श्वन्नुक्षन् टुओश्वि गतिवृद्ध्योः उक्ष सेचने पूष वृद्धौ प्लिह गतौ मुह वैचित्ये· मुर्वी बन्धने· उकारस्य दीर्घत्वं वकारस्य धकारः इत्युज्वलदत्तः टुम

सप्यशूभ्यां तुट् च सप्त अष्ट नञि जहातेः अहः श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्द्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्निति।
एते त्रयोदश कनिन्नन्ता निपात्यन्ते श्वयतीति श्वा उक्षा पूषा प्लिह गतौ इकारस्य दीर्घत्वं प्लीहन्तीति प्लीहा कुक्षिव्याधिः क्लिदू आर्द्रीभावे क्लिद्यतीति क्लेदा
चन्द्रः स्निह्यतेर्गुणः स्निह्यतीति स्नेहा सुहृच्चन्द्रश्च मुह्यन्त्यस्मिन्नाहते मूर्द्धा मुहेरुपधाया दीर्घः। धोऽन्तादेशो रमागमश्च मज्जत्यस्थिषु मज्जा अस्थिसा
रः अर्यपूर्वो माङ्· अर्यमा विश्वप्सातिर्विश्वप्सातिः परिजायते परिज्मा चन्द्रोऽग्निश्च जनेरुपधालोपो मश्चान्तादेशः मातरि अन्तरिक्षे श्वयतीति मा
तरिश्वा धातोरिकारलोपः मह पूजायाम् हस्य घो वुगागमश्च मघवा इन्द्रः॥ ❁ ॥ इत्युणादिषु प्रथमः पादः ॥ ❁ ॥ ॥

ज्ञोश्चुद्धौ मसे : सकारस्य षकारस्तस्य जश्त्वेन जः माङ् माने शब्दे च प्सा भक्षणे जनी प्रादुर्भावे टुओश्वि गतिवृद्ध्योः कनिप्रत्ययान्ता इति· नायं निदिति भावः केचित्तु नित्वं स्वीकृत्य उक्षन्ना
दीनां सूत्रे नोदात्तं निपातनमाहुस्तच्च गौरवग्रस्तमित्युपेक्ष्यम्· श्वेति इकारलोपो निपात्यते· पूषेति· सौ चेत्युपधादीर्घः इन्हन्पूषार्यम्णां शौ इति नियमान्न पूषणौ पूषण इत्यादौ न दीर्घः क्लेदो बधिर
शशाङ्कयोरिति यादवः मूर्द्धेति मूर्द्धा ना मस्तकोऽस्त्रियामित्यमरः मज्जेति नकारान्तोऽयं टाबन्तोऽप्यभ्युपगम्यते· उभयासाई मूर्च्छापि मज्जा मज्जा मज्जया सहेति द्विरूपकोशात्· अर्यमा तु उ
मान सूर्ये पितृदेवान्तरेऽपि चेति मेदिनी· परिजायत इत्यादि· एतच्च दशपादीवृत्त्यनुरोधेनो·॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





कम॰ परिज्मानं सुखं यमिति मंत्रस्य वेदभाष्ये तु परिज्मा परितो गन्ता॰ अंजेः परिपूर्वस्य श्वन्नुक्षन्निति कनिन् प्रत्ययः अकारलोपः आद्युदात्तत्वं च निपात्यत इत्युक्तम् उज्ज्वलदत्तस्तु परि
ज्मेति पठित्वा जु इति सौत्रो धातुः परिपूर्वः यण्णादेशः परिज्मा चन्द्र इत्याह तत्र त्रत्यविरोधादुपेक्ष्यम्॰ मातरिश्वेति॰ सप्तम्या अलुक् इह भत्वविषये संप्रसारणं न भवति श्वयुवेति॰ सू
त्रे अभिव्यक्तपरत्वेन कुक्कुरवाचकस्यैव श्वशब्दस्य तदन्तस्य च ग्रहणात् तेन मातरिश्वनः मातरिश्वने स्यैव॰ इह सूत्रे इति शब्द आद्यर्थस्तेनान्येभ्योपि यथादर्शनं कनिन् प्रयोक्त
व्यः दृशापाघानुदृतिशब्दोऽत्र न पठ्यते॥ ❀ ॥ इत्युणादिषु प्रथमः पादः॥ ❀ ॥ कृहृभ्याम्॰ डुकृञ् करणे॰ हृञ् हरणे॰ करेणुरिभ्यां स्त्री नेभे इत्यमरः॰ करेणुर्गजयोषायां पुं॥
स्त्रिमतङ्गजे इति मेदिनी॰ गन्यद्रव्यमिति॰ कलापश्चेति बोध्यम्॰ कलापस्तु सतीनक इत्यमरः॰ हरेणुखंडिके चास्मिन्नित्यमरः॰ हरेणुर्ना सतीने स्त्री रेणुकाकुलयोषितोरिति मेदि

कृहृभ्यामेणुः॰ करेणुः॰ हरेणुर्गन्धद्रव्यं॰ हनिकुषिनीरमिकाशिभ्यः क्थन्॰ हथो विषमः॰ कुष्ठः॰ नीथो नेता॰ रथः॰ काष्ठं॰ अवे भृञः॰ अवभृथः॰ उषिकुषिगार्त्ति
भ्यः स्थन्॰ ओष्ठः॰ कोष्ठं॰ गाथा॰ अर्थः॰ बाहुलकात्॰ शोथः॰ सर्तेर्णिन्॰ सार्थः॰ समूहः॰ जॄवृञ्भ्यामूथन्॰ जरूथं मांसं॰ वरूथो रथगुप्तो ना पातॄतुदिवचिरिचिसि
चिभ्यः स्थक्॰ पीथो रविर्घृतं तोयम्॰ तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु अवतारर्षिजुष्टाम्भःस्त्रीरजःसु च विश्रुतमिति विश्वः॰ तुस्थोऽग्निः॰ उ
क्थं सामभेदः॰ रिक्थम्॰ बाहुलकाद्वेचेरपि रिक्थम्॰ वक्थम्॰ धनं वसु सिक्थं॥ ९ नी॰ विश्वप्रकाशे हनिकुषि हन्त हिंसागत्योः॰ कुष निष्कर्षे॰ णीञ् प्रापणे॰ रमु क्री
डायां॰ काशृ दीप्तौ॰ कुष्ठं रोगे पुष्करे स्त्री इति मेदिनी॰ कुष्ठं रोगे सुगन्धे चेति विश्वः॰ नीथे नीथेम घवानं सुतासाः इति मंत्रे नीथशब्दस्याद्युदात्तत्वं बाहुलकात्॰ नीथे नीथे स्तोत्रे स्तोत्रे इति
वेदभाष्यम्॰ रथः पुमानवयवे स्यन्दने वेतसेऽपि चेति मेदिनी॰ रथः स्यात्स्यन्दने काये चरणे वेतसेऽपि चेति विश्वः॰ काष्ठा दारुहरिद्रायां कालमानप्रकर्षयोः॰ स्थानमात्रे दिशि च स्त्री
दारुणि स्यान्नपुंसकमिति मेदिनी॰ अवे डुभृञ् धारणपोषणयोः॰ अवभृथो यज्ञावसानम्॰ उषिकुषि उष दाहे कुष निष्कर्षे गै शब्दे ऋ गतौ एभ्यस्थन्॰ कोष्ठं कुशिकुसूल
योः॰ गाथा श्लोके संस्कृतान्यभाषायां पद्यवृत्तयोरिति मेदिनी॰ अर्थोऽभिधेये रैवस्तुप्रयोजननिवृत्तिषु इत्यमरः॰ शोथः श्वयथुः श्रु गतौ सर्तेः सृ गतौ सार्थो वणिक्समूहः स्यादपि स



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नी· विश्वप्रकाशेः जृहन्त् जृवयो हानो क्वादिः जृवदिवादौ· हन्तवा लोजरूयोः सुरविशेष इति वेदभाष्यम्· वरूथः स्यान्तनुत्रागेरथगोपनवेश्मनो रिति हेमचन्द्रः पान् पायानेनृश्च
वननरागयोः तुदन्त्यपनेवचपरिभावले रिति रिचिर् विरेचने विचिर् पारणे· क्रचसुनौ· तुस्थो ग्नावंजनेतु स्यान्नीली सूक्ष्मैलयोर पोतिविध्वः तुस्यमंजन भेदे स्यान्नीलीसूक्ष्मैलयोः

अथेर्निरि निष्क्रुथः साम्नि नीथयगोपौ थावगाथाः निशीथो र्धरात्रः रात्रिमात्रस्त्व गोपीथं तीर्थम् अवगाथः प्रातः स्नातः ।। अथोदि उद्गीथः साम्नोभा
गविशेषः समीरणः श्वसितो वन्हिः संग्रामश्च तिथः पृष्ठगृह्यपृथमो थाः निजेजलोपः मिथ्यो नलः कामश्च पृष्ठं गृह्यमिष्टापूर्थसमूहः प्रोथमस्त्री तुरंगास्य
प्रोथः प्रस्थितउच्यते स्फायितञ्चिवञ्चि शकिक्षिपि क्षुदिसृपि तृपि दृपि वंधुन्दिश्विति वृत्यजिनी पदि मुदि स्विदि छिदि भिदि मन्दि चन्दि दहि दसि दम्भि
वसि वाशि शीङ् हसि सिधि शुभिभ्यो रक् हात्रिं शङ्को रक् स्यान्नुवलिय लोपः स्फारम् न्यक्कादित्वात्कुत्वम् गुकं वक्कं शाकः मित्रं क्षुद्रः सृप्रश्चन्द्रः तृप्रः।
पुरोडाशः दृप्रः वलवान् चन्द्रं पूजकः उन्द्री उद्रो जलचरः श्वित्रं कुष्ठः हृत्रोरिपोध्वनौ ध्वांते शैले च क्रे चहानवे अजे वीं वीरः नीरम् पद्मग्रामः मद्रो हर्षः
देशभेदश्च मुद्रा प्रत्ययकारिणी स्विद्रो रोगो दरिद्रश्छिद्रं भिद्रं वज्रम् मन्द्रः चन्द्रः पचाद्यचि चन्द्रोपि हिमांशुश्चन्द्रमाश्चन्द्रः शशी च न्द्रो हिमद्युतिः दह्रो
ग्निः दस्त्रः स्वर्वैद्यः दभ्रः समुद्रः स्वल्पञ्च वस्रः सम्प्रसारणे न रपरत्वपि सृजि स्प्रशि स्पृहि स वनादीनाम् रेफपरस्य सकारस्य सृप्यादौ नांस वनादीनाञ्च मूर्द्ध
न्यो न स्यात् पूर्वपदादिति प्राप्तः प्रतिषिध्यत इति वृत्तिर्भूयोभिप्राया तेन शास्त्रिवसीति प्राप्तमपि न उस्रो रश्मिः उस्रा गौः वाश्रो दिवसः वाश्रं मन्दिरम् शी
रो जगरः हस्रो मूर्खः सिध्रः साधुः शुभ्रम् सुसेरक् सुस्रं वाहुलकात् अश्रु ।। ।। ।। ।।

स्त्रियां सिक्थो भक्तपुलाके नाम धूच्छिष्टे नपुंसकमिति मेदिनी ।। ९ ।। अर्तेः ऋगतौ घवाचसेन्निर्ऋथं सं चं ताम् इति संत्रे निर्ऋथो हिंसेति वेदभाष्यम् निशीयश्शीङ् स्वप्ने निपूर्वः पाया ने गो
पूर्वः घुमास्थेतीत्वम्· गाङ् गतौ अवपूर्वस्य धातोः हृस्वत्वम्· निशीथ सुपुमान् अर्द्धरात्रे स्याद्रात्रिमात्रके इति मेदिनी· प्रतित्यं चा ।। ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त॰
सि॰ कौ॰ हृमध्वरमितिमन्त्रेगोपीथः सोमपानमितिवेदभाष्यम्· तीर्थमितितु हरिकारः गन्धारिउपपदे गोशब्दे इत्यस्मात् थक् समि· इणगतावस्मात् समिउपपदे थक्· समिथशब्दः संग्रामपर्यायेषुवै
टी॰ न॰ दिकनिघण्टेपठितः श्रियेजातइतिमन्त्रे समिथाः युद्धानीतिवेदभाष्ये· तच्चयुक्तमेव· सम्यग्गेतिजयार्थमत्रेतिसुन्वते· संपूर्वस्येणः क्विन्नाघन्तस्य लोकेपियुद्धार्थत्वदर्शनाच्च· उक्तंह्य
९९८ मरेणसमित्याजिसमिद्युधइति· निथएच्· निजनिग्रहणे· एधुसेचने गुपुरीषोत्सर्गे युमिश्रणे गुङ्गतौ एतेभ्यः क्प्रत्ययान्ता निपात्यन्ते· एधन्तुचरमंतनोरित्यमरः· एधंचरममात्रेपिदेह
स्यावयवान्तरेइतिमेदिनी· स्तोत्रविशेषेपिएच्· एच्छेसुवतइत्यादौ तथानिर्णयात्· गृथमिति· निपातनाद्दीर्घः एवंपृथेपिपृथेतिर्यक्तमूढेपिवृन्दमात्रेपिभाषितमितिविश्वः पृथंत
दग्रसरगर्वितक्रन्दसारमितिरघुः प्रोथमिति· निपातनाद्गुणः प्रोथोऽस्त्री हयघोणायां नाकस्यामध्वगेत्रिषुतिमेदिनी· स्फायितंचि· स्फायी वृद्धौ तञ्चुसंकोचने· वञ्चुप्रलम्भने
शल्कशकौ क्षिपप्रेरणे· क्षुदिर्संपेषणे सृज्लृगतौ नृपप्रीणने· दृपहर्षमोचनयोः वदिअभिवादनस्तुत्योः उन्दीक्लेदने श्विताव र्णे वृतुवर्तने· अजगतिक्षेपणयोः लीञ्प्रापणे· परगा
तौ· मदीहर्षेमुदहर्षे खिददैन्ये छिदिर्द्वैधीकरणे भिदिर्विदारणे· मदिस्तुतौ· चदिआह्लादने· दहभस्मीकरणे दसुउपक्षये दम्भुदम्भने वसनिवासे वा शृशब्दे· क्षीङ्क्षये· हसहसने
षिधगत्याम्· शुभदीप्तौ· द्वात्रिंशन्निति· दशपादान्तुत्रयस्त्रिंशत्· उक्ताः रश्मिवह्विवसौतिपठित्वावहप्रापणे उह्ः अनड्वानित्युदाहरणात्· माधवोप्येवमस्फारमिति· नेटुष्टिष्ट
तीति नेट् वलियलोपः स्फारः स्यात् स्फुसिति कटे करकादेश्चवुहुदे इतिमेदिनी· नक्रं द्धुदश्विन्मथितं पासंवद्धौ चुनिर्जलमित्यमरः वक्रः स्यात् कुटिले क्रूरे पुटभेदे शनैश्चरे इतिविश्वः
शङ्कः पुमान् देवराजे कुटजार्जुनभूरुहोरिति मेदिनी· क्षुद्रः स्यादधमक्रूरकृपणाल्पेषु वाच्यवदितिमेदिनी· तृप्रः पुरोडाश इति· नतृप्रा उरुव्यचसमितिमन्त्रे वेदभाष्यकारैरित्थं
व्याख्यातं प्रकृतसूत्रे उज्वलदत्तादिभिश्च दशपादीवृत्तौ तु तृप्रमाज्यं काष्ठं चेत्युक्तम्· तृप्रं दुःखमिति· सुख्यातं वृत्तौ माधवः हिमांशुरित्यादि हिमद्युतिरित्यन्तं शब्दार्णवः दस्यतिरोगान् सि १९८
बतीतिदस्त्रः दस्रः खरेऽश्विनीसुते इतिमेदिनी दस्रः खरे चाश्विनयोरितिविश्वः प्रासिवसीति प्राप्तमपि नेति· एवञ्च· अविन्द उस्रिया इति मन्त्रे षत्वाभावः सिद्धः माधवस्तु वृत्तिग्रन्था
नुरोधेनवाहुलकादिहषत्वन्नेतिव्याचष्ट· उस्रो वृषे॥ ॥

चक्रिरणोउस्त्रार्जुनयुपवित्रयोरिति मेदिनी· माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणीत्यमरः· वाश्रो नाहि वसे क्लीवं मन्दिरे च चतुःपथे रुतेति मेदिनी· वाश्रो रासभपक्षिणोरिति
केचित्· माघे न तु वाश्रेव विद्युन्निमातीतिमंत्रे शब्दयुक्ता अस्तु तल्लनाधेनुर्वाश्रेति· व्याख्यातमश्रु भं स्याद्दशके क्लीवमुद्दीप्तशुक्लयोस्त्रिष्विति मेदिनी· मुस्रमिति मुसख
एडने॥ ❀ ॥ चकि चक तृप्तौ रमकी डायाम्· चुक्क ल्लम्लस्ल वेतसे· चुक्री चाङ्गेरिकायां स्यादृहत्साम्ले च चुक्रमिष्यत इति विश्वः· वौकसेः कस गतौ विपूर्वादस्मादुक्कुस्यादुत्तं चोप
धायाः। अमि· अम गत्यादिषु तमु कासायाम्· आभ्यां रक्स्यादुपधाया दीर्घश्च निन्देः लिरिक्कुत्सायाम्· अर्देः अर्द गतौ· आर्द्रं न स्त्रभेदे स्यात्त्रियां क्लिन्नेऽभिधेयवदिति
मेदिनी· शुचेः शुच शोके अस्मादुक्रद्रश्चान्तादेशः धातोर्दीर्घश्च शूद्रः ... लः· अहर्हेत्वा शूद्र इति श्रुतौ रुद्रैर्वा धायोग एव पुरस्कृतः तथा चोत्तरतंत्रे भगवता व्यासेन सूत्रितं· शू
द्रस्य तदनादरश्रवणादिति· दुरीणो इण् गताविन्यस्मादुरुपपदे रक्प्रत्ययः लोपश्च· रोरीति रेफस्य लोपे ढ्रलोप इति दीर्घः कृतेः कृती च्छेदने न इत्यस्मादुक्रस्याच्छकृ ऊत्य तावादेशो

चकिरम्योरुच्चोपधायाः चुक्रमम्लद्रव्यम् रुम्रो रुणः· वौकसेः विकुरत्नश्च नुः· अमितम्योर्दीर्घश्च आम्रम् ताम्रम् निन्देर्नलोपश्च निद्रा अर्देर्दीर्घ
श्च आर्द्रं शुचेर्दश्च शूद्रः दुरीणो लोपश्च दुः खेनेयते प्राप्यत इति दूरम् कृतेश्छ क्रू च कृच्छ्रं क्रूरः रोदेर्णिलुक्च रोदयतीति रुद्रः· बहुलमन्यत्रापि सं
ज्ञाछन्दसोः णिलुगिति सेव वानिपर्णा शुणा वाना स्ततः पर्णमुचोपरे ॥ ॥ ॥ ॥ ॥

चतः छ इत्यन्त्यस्यादेशः क्रू इत्यनेकाल्त्वात्सर्वस्यादेशः कृच्छ्रमाख्यातमाभीलपापसंतापनादिनोरिति विश्वमेदिन्यौ स्यात्कष्टं कृच्छ्रमाभीलमित्यमरः क्रूरस्तु कुटिले घोरे नृशंसे चाभिधेयवदिति वि
श्वः नृशंसो घातुकः क्रूरः पापो धूर्तस्तु वञ्चक इत्यमरः· रोदेः रुदिर् अश्रुविमोचने ण्यन्तादस्मादुक् णेश्च लुक् णेरनिटीति लोपे तु पुगन्तेति गुणः स्यादिति णिलुक्चोक्तम्· रोदयतीति रुद्र
इति नन्वेवं सोः रोदीव रोदीन द्रुद्रस्य रुद्रत्वमिति श्रुत्या सह विरोधः स्यादिति चेत्· अत्राहुः कर्तरि कृदिति· सूत्रानुरोधेन शम्भुरित्यत्र संभावयतीत्यन्तर्भावितण्यर्थतायया
स्वीक्रियते· तथा अरोदीदित्यत्राप्यन्तर्भावितण्यर्थतायां स्वीकृतायां रोदनं कारितवानित्यर्थलाभान्नास्ति श्रुतिविरोधः न च देवैरग्नौ वामं वसु स्थापितं तच्च धनं देवैर्याचितं रुदन्

कौ.

सि. कौ. सुरोदनं कृतवानिति सोऽरोदीदित्यादिश्वन्यर्थादिहान्तर्भावितण्यर्थकल्पनं न सम्भवतीति श्रुतिविरोधस्तु परिहार्य एवेति वाच्यम् देवैः स्थापितं वासं वसुदेवेभ्योऽभिनान दत्तं देवा

बो. त. एवरोदनं कृतवन्तः अग्निस्तु दीपमदत्वा रोदनं कारितवानित्यर्थकल्पनायाः सम्भवात् अथवा अग्नेर्भयमुज्यमानरुद्रशब्दस्य रोदितीति रुद्रस्येवार्थोऽस्तु परन्तु ब्रह्मविष्णुरुद्रा इति

१६६ व्यवह्रियमाणेयो रुद्रस्तद्वाचकरुद्रशब्दस्य रोदेरिन्नुणादिसूत्रानुरोधेन रौरव्यतीति रुद्रस्येवार्थकल्पनायां बाधकाभावात् श्रुतिविरोधोऽत्र नास्त्येवेति अन्यत्रापीति धात्वन्तरे

ष्वन्यथानन्तरे पि णौ लुगित्यर्थः संज्ञायामुदाहरणं वृंहयति वर्द्धयतिप्रजाः ब्रह्मा शंसुखं भावयति शम्भुरित्यादि छन्दसि तु दृढधृहौ वृद्धौ वृहेस्तुल्या सुपुत्तपः वर्द्धयन्तित्यर्थः यद्यस्माज्जा

नजनी प्रादुर्भावे लिटि रूपम् जनयामास इत्यर्थः इहणलिपरतः अतउपधाया इति वृद्धिर्भवत्येव जनिवध्योश्चेति निषेधस्य चिण्णिञ्णिति कितिच स्वीकारात् नच णिलो

पे सति प्रत्ययान्तत्वात् कास्प्रत्ययादित्याम् स्यादिति वाच्यम् अमन्त्र इति पर्युदासादाम्प्रसक्तेः कास्यनेकाच इति वार्तिके न तु आम् शंकाद्रूणपासे वलिटि णिलोपे सत्य

नेकाच्त्वाभावात् ननु णिलिटोरनिटीत्यनिडादावार्द्धधातुके णिलोपे जजानेति रूपं सिद्धमिति किमनेन नलुक्युदाहरणेनेति चेन्मैवम् णिलोपे सति जनी जृष्क्रसुरंजोऽमन्ताश्चेति णौ

जोरी च जीरोः णः ज्यश्चेत्येके सुसूधागृधिभ्यः क्रन् सुरः सूरः धीरः गृध्रः ॥ ॥ ॥

मित्वे मितां ह्रस्वः स्यात् प्रत्ययलक्षणन्यायेन णिपरत्वसंभवात् ततश्च जजनेति स्यात् लुकि सति तु प्रत्ययलक्षणन्यायोऽनप्रवर्तत इति मित्वाभावादिष्टं सिध्यति बाहुलकादसंज्ञायां छन्दसोर

पि क्वचिद्भवतीत्याशयेनोदाहरति वान्तीत्यादि पर्णानि शोषयन्तीति पर्णशुषः पर्णानि मोचयन्तीति पर्णमुचः ॥ ॥ जोरी च जुगतौ सौत्रः अस्मादूक् ईकार आन्तादेशः जीरः ङ्रेव

णिगृध्येति विश्वः जीरस्तु जरणे खड्गे इति मेदिनी ज्यश्चेति ज्यावयोहानौ अस्मादूक् ग्रहिज्येति संप्रसारणं पूर्वरूपम् हल इति दीर्घः एके इति मुख्या इत्यर्थः तथा च न धातुलोप इति

सूत्रे जीवेर्दानुरित्यस्य प्रत्याख्यानार्थं नेन ज्जिवेर्दूपं किं तु रकि ज्यः संप्रसारणं चेति भाष्ये उक्तम् । सुसूधागृधि अभिषवे षूङ् प्राणिगर्भविमोचने डुधाञ् धारणपोषणयोः गृधु अभिकांक्षाया

म् सुराचषकमद्ययोः पुंल्लिङ्गस्त्रिदिवेशोऽस्यादिति मेदिनी सुरोदेव सुरामद्य चषके पि सुरा क्वचिदिति विश्वः सुवति प्रेरयति कर्मणि लोकमिति सूरः सूर्यः सूरसूर्यार्यमादित्येत्यमरः धीरो धे

र्योन्विते स्वैरे बुधे क्लीवन्तु कुंकुमे स्त्रियां श्रवणतुल्यायामिति मेदिनी ।

CC-0. In Public Domain. Digitization by eGangotri

गध्रः खमान्तरे पुंसिवाच्यलिङ्गः स्थलुब्धकेऽति॥ ॥शुसिचि॥शुगतौ षिञ्बन्धने षिञ् चयने डुमिञ् प्रक्षेपणे एभ्यः कन् एवां दीर्घत्वञ्च शूरः स्यात्ध्याटवे भटे इतिमेदिनी शूरश्चारुभ टे सूर्ये इति विश्वः हेमचन्द्रौ सीरोऽर्क हलयोः पुंसि चीरी झिल्ल्यां नपुंसकं गोस्तनेवस्त्रभेदे चरे खाले खनभेदयोरिति मेदिनी चीरन्तु गोस्तने वस्त्रे चूडायां सीसके पि च चीरी तु छाटिकाझिल्ल्योरितिवि श्वः वा विन्धेः नि इन्धी दीप्तौ विपूर्वादस्मात् कन् अनिदितामितिन लोपः वीध्रन्तु विमलात्मकमितिविशेष्यनिघ्नः मरः वधि वधु वृद्धौ डुवप् बीजसन्ताने वप्रः पितरि केदारे वप्रः प्राकाररोधसो रितिधरणिरन्तिदेवो वप्रः स्तात्पुमानस्त्री वेणुक्षेत्रे चयेतटे इतिमेदिनी ऋज्रेन्द्राग्र ऋजु गतिस्थानार्जनेषु इदि परमैश्वर्ये अगि गतौ वज गतौ डुवप् बीजसन्ताने कुवि आच्छादने चुवि

शुसिचिमीनान्दीर्घश्च शुः सोत्रः शूरः सीरं चीरम मीरः समुद्रः वा विन्धेः वीध्रम् विमलम् वृधि वपि भ्यां रन् वर्धं चर्म वप्रः प्राकारः ऋज्रेन्द्राग्रवज्रविप्रकुब्रचु ब्रक्षुरखुरभद्रोग्रभेरभेलशुक्रशुक्लगौरवन्नेरामालाः रन्नन्ताऊनविंशतिः निपातनाद्गुणाभावः ऋज्रो नायकः इदि इन्द्रः अङ्गे नलोपः अग्रं वज्रोऽस्त्री हीरके पवौ डुवप् उपधाया इत्वम् विप्रः कुम्बि चुम्ब्यो र्नलोपः कुब्रम् अरण्यं चुब्रं मुखम् क्षुर विलेखने रेफलोपः अगुणः क्षुरः खुर छेदने रलोपो गुणाभावश्च खुरः भन्दे र्नलोपः भद्रं उच समवाये चस्यगः उग्रः त्रिभी भेरी पक्षेलः भेलो जलतरणे द्रव्यम् शुचेश्चस्यकः शुक्रः पक्षेलः शुक्लः गुङ् वृद्धिः गौरो रुलो सिते पीते वन सम्भ क्तौ वन्नो विभागी इत्वो गुणाभावः इरामद्ये च वारिणि मा माने माला॥ ९९ ९९ वक्र संयोगे भदि कल्याणे शुच शोके गुङ् अव्यक्ते शब्दे इण् गतौ नायक इति ऋज्रा श्वः प्रतिभिरत्वरीयइति मन्त्रे ऋज्राः गति मन्तोऽश्वायस्य स ऋज्राश्व इति वेदभाष्यम् इन्द्रः शचीपतावन्तरात्मन्यादित्ययोगयोरिति विश्वः अग्रं पुरस्तादुपरि परिमाणे पलस्य च आलंबने समूहे च प्रान्तस्यात् पुन्नपुंसकम् अधिके च प्रधाने च प्रथमे चाभिधेयवदितिमेदिनी क्षुरो लोमच्छेदकः क्षुरः स्याच्छेदनद्रव्ये कोकिलाक्षे च गोक्षुरे इति विश्वमेदिन्यौ खुरः कोलदलेशफे इतिमेदिनी भद्रः शिवे खञ्जरीटे वृषमेरु॥ ७ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्री·
सि· कौ·
टी· त·
९०

करम्बके· करिजातिविशेषेनाक्लीबं मंगलमुस्तयोरिति च उग्रः भूम्रासुते सत्वादुरे पुंसि त्रिषु त्वकटे· स्त्रीवचानुरयोरिति मेदिनी· भेरीति गौरादित्वान्ङीष्· भेरी स्त्री दुंदुभिः पुमानित्यमरः· भे
लः प्लवे भीलके च निर्बुद्धिमुनिभेदयोरिति विश्वः· भेलः प्लवे मत्तो पुंसि भीरौ वह्ने च वाच्यवदिति· शुक्रः स्यान्मार्गवे ज्येष्ठमासे वैश्वानरे पुमान्· रेतो सि रुग्मि दोः क्लीबं शुक्लो योगान्तरे।
सिते नपुंसकं तु रजते इति च· गौरः पीतेरुणे श्वेते विशुद्धे प्यभिधेयवत्· ना श्वेतसर्षपे चन्द्रे न द्वयोः पद्मकेसरे गौरी तु संजातरजः कन्याशंकरभार्ययोः रोचने रजनी पिङ्गा प्रियंगुवसुधासु च· आ
यगाया विशेषेपि याद संपतियोषितीति च मेदिनी नदीभेदे च गौरी स्यात्· वरुणस्य च योषितीति विश्वः· अष्टवर्षा तु या स्त्री स्यात् श्रुतशीलसमन्विते· सा गौरीत्युक्ता तु नेयतु सगौरः परिकीर्तित इति
ब्रह्माण्डपुराणे· एतेन गौरः शुच्याचार इत्यादिभाष्यं व्याख्यातम्· इरा भूवाक्सुराप्सु स्यादित्यमरः· मालेति· मन्नपरे फलत्वम्· मालं क्षेत्रस्त्रियां पद्मा सजो जात्यन्तरे पुमानिति मेदिनी· मा
लं क्षेत्रे जने मालो माला पुष्पादिदामनीति विश्वः· मालमुन्नतभूतलमित्युत्पलः क्षेत्रमारुह्य मालमिति माघ इति· मलिपूर्वोयम यान्तरे रूढः मलिमाला स्मृता हारे स्त्रीलिंगं न्नसतान्तरे

समिकसउकन् कसमगन्तो समकः सन्निपलायन्ते जना अस्मादिति सङ्कसुकोऽदुर्जनः अस्थिरश्च पचिनशोर्णुकनकनुमौ च पचेः कः पाकुकः सूपकारः
नशेर्नुम् नंशुकः भियः क्रुकन् भीरुकः क्रुनृशिल्पिसंज्ञयोरपूर्वस्यापि रजकः रहस्युकुटूकः चरकः चषमहलुणि चषकः शुनकः भषकः रमेरश्च लो वा रम
९ कौ विलासी लमकः ॥

इति विश्वः॥ ❈ ॥ समिकसः संकसुकोऽस्थिर इति विप्रोव्यनिघ्न मरः· पचिनशोः इ उप च पूणाके पण· अदर्शने आभ्यां णकन् प्रत्ययः स्यात्· ए
कारो वृद्ध्यर्थः अनयोर्यथाक्रमं कादेशनुमागमौ च भवतः· भियः त्रिभी भये· भीरुकः कातरः त्रस्तो भिरुभीरुकभीलुका इत्यमरः क्रुन् शिल्पिन्यभिधेये संज्ञायां गम्यमानायां च क्रुन् स्यात् अपूर्व
स्य निरुपपदस्य च· अपिशब्दात्सोपपदस्य पञ्चम्यर्थे षष्ठी यद्वा न्यर्थ द्वारकसमन्ये षष्ठी· प्रकृतिप्रत्ययार्थयोः क्रियाकारकभावात्· एवञ्च निरुपपदस्य प्रकृत्यर्थनिरूपितकर्तृकारके कु
न्नित्यर्थः फलितः शिल्पिनि तावत्· रंज रागे· रजको धावके शुके इति विश्वः रजको धावकः शुकाविति हेमचन्द्रः कृदृ च्छेदने· इह लूनक्रद्रयति गोडिकः चर गतिभ ॥ ॥ राम ९०

सएयोः संज्ञायामनुच्चषकोः स्त्री पानपात्रम् शुनगणौ भवभर्त्सने शुनकः भषकः श्वा लमक इति ऋषिविशेषः॥ ॐ ॥ जहातेः ओहाक् त्यागे ध्मो धमच ध्मा शब्दाग्निसंयोगयोः कुहकोदाम्भि
कः कृतकमिति कृती छेदने कृषेः कृषविलेखने अस्मात् कुन् कार्षकः कृषीवलः कृषकः स एव कृषकः पुंसि फाले स्यात् कर्षके त्वभिधेयवदिति मेदिनी उदकं च उंदी क्लेदने अ
स्मात् कुन् ननु कुन् शिल्पात्यादिना गतार्थमित्याशङ्कायामाह प्रपञ्चार्थमिति वृश्चि कृषोः ओव्रश्चू छेदने कृषविलेखने आङि पणव्यवहारे कपणिषेति रएडको हिंसार्थकः मुषे मु
षस्तेये अस्मात् किकन् धातोर्दीर्घश्च समेः सम्पुशब्दे क्रियः डुक्रीञ् द्रव्यविनिमये आङि पणि पणव्यवहारे स्तुतौ च पनश्च पत्लृगतौ खनु अवधारणे एभ्य आङि उपपदे इकन् स्या

जहातेर्द्वे च। जहकस्त्यागी कालश्च। ध्मो धमच। ।धमकः कर्म्मकारः। हनो वध च। वधकः। बहुलमन्यत्रापि। कुह विस्मापने। कुहकः। कृतकं। कृ
षेर्वृद्धिश्चोदीचाम्। कार्षकः। कृषकः। उदकञ्च प्रपञ्चार्थम्। वृश्चिकृष्योः किकन्। वृश्चिकः। कृषिकः। आङि पणिकषः। आपणिकः पण्यविक्र
यी। आकषिकः परदारोपजीवी। मुषेर्दीर्घश्च। मूषिक आखुः। समेः सम्प्रसारणञ्च। चादीर्घः। सीमिको वृक्षभेदः। क्रिय इकन्। क्रयिकः क्रेता। आङि प
णिपनिपतिखनिभ्यः॥ आपणिकः। आपनिकः इन्द्रनीलः किरातश्च। आपतिकः श्येनो दैवायत्तश्च॥ आखनिको मूषिको वराहश्च। श्यास्त्याहृञः।
विभ्य इनच्॥ श्येनः। स्त्येनः। हरिणः। अविनो ध्वर्युः। वृजेः किच्च। वृजिनम्। अजेरज च वीभाववाधनार्थः। अजिनं। बहुलमन्यत्रापि। कठिनं। नलिनं। मलि
नं। कुण्डिनं। द्युतेः यत्यकृषिदिनम्। दिवसोपि दिनं॥ ९९ नः आपणिक इति नलत्रैव प्रपूर्वे आङि आपणिक इति सिद्धे आङि पणौत्यत्र पणिग्रहणं प्रपञ्चार्थमि
त्युज्ज्वलदत्तः उपसर्गान्तरनिवृत्त्यर्थं नुमनोरमायाम् आपणिक शब्दोयं णितः स्वरेणाद्युदात्तः आपणेन व्यवहरतीत्यर्थे ठकि तु कित इत्यन्तोदात्तः श्यास्त्या ध्यैङ् गतौ स्त्यै ष्ट्यै श
ब्दसंघातयोः हृञ् हरणे अवरक्षणे दीर्घश्येनः पत्त्रिणि पाण्डुरे इति मेदिनी स्त्येनश्चौरः स्तेन चौर्ये इति चौरादिकात् पचाद्यचि तु स्तेन इति निर्यकारोपि केचित्तु सादृनां पतयेन मइत्या
दिप्रयोगोपपत्त्यै मनिर्यकारस्यापि ष्ठे धातोर्माधवादिभिर्भ्यौ दिपुस्तौ कृतत्वात् कृत सूत्रेपि ष्ठे धातुमेव पठन्ति स्तेन शब्दो निर्यकार एवेत्याहुः हरिणः पुंसि सारङ्गे विशदे त्वभिधेयवत्

CC-0. In Public Domain. Digitization by eGangotri



हरिणी हरितायां च नारीभिद्वृत्तभेदयोः सुवर्णप्रतिमायां चेति मेदिनी· वृजेः वृजी वर्जने वृजिनं पापम्· वृजिनं कल्मषे क्लीबं केशे ना कुटिले त्रिष्विति मेदिनी· अजेः अज गति क्षे
पणयोरस्मादिनच्· अजेर्जा देशविधानं व्यर्थमित्यत आह· वीभावबाधनार्थमिति· अजिनं चर्मकृत्तिः स्त्रीत्यमरः वहुलमन्यत्रापि· अन्यस्मादपीत्यर्थः कठ कृच्छ्रजीवने नलग
हने· मलमल्लधारणे· कुडि दाहे देशः वस्तखण्डने कठिनमपि निष्ठुरे स्यात्· स्थाल्यां तु त्रिषु नपुंसकं स्थाल्याम्· कठिनी घटिकायामपि कठिना गुडशर्करायां चेति मेदिनी· मलिनं दूषिते कृष्णेऽन्य
तु मन्यान्तु योषितीति मेदिनी· कुण्डिनमिति· नगरं कुण्डिनमण्डजो ययाविति श्रीहर्षः कुण्डिनः ऋषिः यस्यापत्यं कौण्डिन्यः यत्र कृपि पर्वलि दिनं· खण्डितं तद्देवानामिति नैतिरीयश्रु
त्यर्थः॥ ॐ॥ दुदक्षिभ्यो गनो दक्षः वृद्धौ दुविणं नद्यौर्वित्ते काञ्चने च पराक्रमे इति मेदिनी· दक्षिणो दक्षिणोद्भूतसरलच्छन्दवृत्तिषु· अपामे त्रिषु यज्ञादिविधिदाने दिशि स्त्रि

दुदक्षिभ्यामिनन्॥ द्रविणम्। दक्षिणः। दक्षिणा। अर्तेः किदिच्च॥ इरिणं शून्यम्। वेपितुह्योर्ह्रस्वश्च॥ विपिनम्। तुहिनम्। तलिपुलिभ्यां च॥ तलिनं विरले स्तोके स्वच्छे
पि तलिनं त्रिषु। पुलिनम्। गर्वेरत उच्च॥ गोरादित्वान्ङीष्। गुर्विणी। गर्भिणी। रुहेश्च॥ रोहिणः। महेरिनण् च॥ चादिनन्। माहिनम्। महिनं राज्यम्। क्विवृ
चिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसम्प्रसारणं च॥ वाक्। प्राट्। श्रीः। स्रवत्यनेन घृतादिकमिति स्रूः यज्ञोपकरणम्। द्रुर्हिरण्यम्। कटप्रूः कामरूपी कीटश्च। जू
राकाशे सरस्वत्यां पिशाच्यां जवने स्त्रियाम्॥

११ पामिति च· दक्षिणः सरलो दारपरछन्दानुवृत्तिषु· वाच्यवद्दक्षिणा वाचि यत्तदानप्रतिष्ठयोरिति विश्वः अर्तेः ऋ गतौ·
अस्मादिनन्· किन्स्यात्· इकारश्च धातोरपरत्वम्· इरिणं शून्यमूषरमित्यमरः इरिणं तु षरे शून्येपीति मेदिनी· वेपृ टुवेपृ कम्पने· तुहिर् अर्दने· आभ्यामिनन् ह्रस्वश्च धातोः अरण्य
रण्यं विपिनमित्यमरः तुहिनमिति· लघूपधगुणे कृते ह्रस्वः तलिनं तल प्रतिष्ठायाम्· पुल महत्त्वे गर्वेः गर्व माचने अस्मादिनन्· अकारस्य उत्· रुहेश्च रुह बीजजन्मनि प्रादुर्भावे· रोहिण
इति· प्रज्ञादित्वाद्दणि रोहिणश्चन्दनतरुः महेः मह पूजायाम्· कृतत्वमिन्दू माहिनः सन्निति मञ्चे माहिनो महनीयः पूजनीय इति वेदभाष्यम्· क्वि घञ्चि वच परिभाषणे· प्रच्छ ज्ञी
प्सायाम्· श्रिञ् सेवायाम्· स्रु गतौ द्रु गतौ प्रुङ् गतौ जु गतौ सौत्रः वागिति· वचिस्वपीति सम्प्रसारणाभावः प्रच्छ नीति प्राडग्रहिज्येति सम्प्रसारणाभावः च्छ्वोः शूडिति षः प्रश्चेति षत्वे राम· २०१
जश्त्वचर्त्वे प्राट् श्रीः श्रीरिति· कृदिकारादिति ङीष् न भव॥

५९७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिकृतमपयोपरकार इति व्याख्यानात् कृदन्तं यदिकारान्तमिति पक्षेनुपयद्यपि ङीषः प्राप्तिरस्ति तथापि कारग्रहणसामर्थ्यान्न केवलस्येकारस्य ग्रहणमिकारान्तपक्षो दुर्बल इत्या
हुः दुर्घटस्तु ङीषि श्रीमित्यपि दृश्यत इच्छतीत्याह श्रीवेषरचनाशोभाभारतीसरलद्रुमे लक्ष्म्यां त्रिवर्गसंपत्तिविधोपकरणेषु च विभूतौ च मतौ च स्त्री इति मेदिनी जूराकारेत्या
दिमूलो दीर्घान्तमपि मेदिनी ॥ ॐ ॥ आप्नोतेः आप्लृव्याप्तौ अस्मात् क्विप् धातोर्ह्रस्वश्च आपः स्त्री भूम्नि वार्वारि इत्यमरः परौ व्रजगतौ कुवः हृदयानादरनयोरस्मात् क्विप् धातोश्च दीर्घः
श्लुवद्धा वाह्विर्वचनम् स्रुवः कः स्रुवो यज्ञपात्रविशेषः अयं स्रुवोभिजिहर्ति स्रुवेणपार्वणोजुहोतीत्यादौ प्रसिद्धः चिक्क स्रुव इत्येव योगविभागउत्तरार्थः क इति तेन स्रुक् स्रुचौ
स्रुच इत्यादौ गुणो न तत्र विस्तारेव इति संघातग्रहणं न दाह ग्राव्यादेश इति स्त्रियां तु त्वगसृग्धरे समरः ग्लानुदितिहर्वस्ययेणुरग्रेरणे ग्लौर्मृगाङ्कः कलानिधिरित्यमरः स्त्रियां नो

आप्नोतेर्ह्रस्वश्च । आपः । अपः । अद्भिः । अप्सुः ॥ परौ व्रजेः षश्च पदान्ते । व्रजेः क्विप्दीर्घो मत्वः पदान्ते तु षश्च परिव्राट् । परिव्राजौ । कुवः श्रुवच्च । जूः ॥ स्रुवः कः
स्रुवः चिक्क ॥ इकारउच्चारणार्थः । करुकुत्वं । स्रुक् । स्रुवं स्रुचश्च संमृड् । ततो नेरनश्च वः । ततो नेः श्विकृपनयः । अनो वशादेशश्च । त्वक् । ग्लानुदिभ्या
ऐडोः । ग्लौः । नौः । श्विर् व्ययां डोरित्येवा । ग्लौः करोति । कन्ये जनन्त इति सिद्धे नियमार्थमिदम् ॥ उणादिप्रत्ययान्तः श्वन्तएवेति । रातेर्डैः । राः । रायौ । रायः ॥ ग
मेर्डोः ॥ गोन्तादित्य वलीवर्दे किरणक्रतुभेदयोः स्त्री तु स्यादृग्भिभारत्याम्भूमौ च सुरभावपि । नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु । वाहु
लकात् द्युतेरपि । डोः । द्यौः स्त्री स्वर्गान्तरिक्षयोः । भ्रमेश्चडूः ॥ भ्रूः । चाङ्क्रमेः । अग्रेगूः ॥ ॥ ॥ ९९ सारणिसहारीरिति च ग्लौकरोतीति अग्लौः

ग्लौः संपद्यते तथा करोतीत्यर्थः अव्ययत्वात्सुपो लुक् च्व्यन्तएवेति तेन ग्लौ नौ गौरित्यादीनां नाव्ययत्वमिति भावः रातेः रावनेरा इति रायो हलीत्यात्वम् राः स्मृतः यावकेनी हलोराः पुं
सि स्वर्णे वित्तयोरिति मेदिनी रली हलारह ने रासु सुवर्णोजलदे धने इति हेमचन्द्रः गमेः गम्लृगतौ गानोगिनगौः केशवो नमाह गोनोदित्य इत्यादि गौः स्वर्गवृषभेरश्मौ वज्रे चन्द्र
मान्भवेत् अर्जुने नेत्रदिग्वाणभूवाग्वारिषु गौर्मतेति हेमचन्द्रः द्युतेरपीति द्युतदीप्तौ द्योतं तेरेवा अस्मादिति द्यौः भ्रमेश्चभ्रमु अनवस्थाने गम्लृगतौ अग्रेगूः सेवकः ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



रमेः रमु उपशमे डित्वादिलोपे दोः दोषन्तस्येति श्रीहर्षप्रयोगात्पुंस्त्वम्· ककुद्दोषणी इति भाष्यप्रयोगान्नपुंसकत्वम्· दोर्दोषा च भुजो बाहुरिति धनंजयकोशात्स्त्रीलिङ्गेऽप्ययमि
त्यादिशागेव प्रपंचितम् पणेः पणो व्यवहारे स्तुतौ च अमरकोशमाह नैगमः इत्यादि वशः वशकान्तौ· अस्मादिजिः किंत्स्यात्· ग्रहिज्येति संप्रसारणम्· भृञ्जः भृञ्ज भरणे· अस्मादि
जिः किंत्स्यात् धातोरुकारान्तादेशश्च जसिजसु मोक्षणे वहमर्षणे जसुरपेत्ययं पिप्युर्गामितिमन्त्रे जसुरये श्रान्तायेति नीचापमानं जसुरिं नश्येनमित्यत्र जसुरिं क्षुधितं श्येनं न·
श्येनपक्षिणमिवेति· उतस्य वाजी सहुरिर्ऋतावेति मन्त्रे सहुरिः सहनशील इति च वेदभाष्यम्· सुयुयुन्· अभिषवे युमिश्रणे· रुशब्देवृञ् वरणे सवनं त्वध्वरे स्नाने सोमनिर्दलने
पि चेति मेदिनी· यवनो म्लेच्छविशेषः रवणः शब्दने स्वरे इति च मेदिनी रवणः कोकिल इत्येके वरणो वृक्षभेदः दापितु वरणा नदी वरणस्तिक्तशाके पिप्राकारे वरणं वृताविति वि
श्वः वरुणो वरणा सेतुस्तिक्तशाकः कुमारक इत्यमरः· अशेः अशू व्याप्तौ जिह्वावाचीत्विति· रस आस्वादने चौरादिकः ततो नन्द्यादित्वाल्ल्युः एयासश्च येतियुच्चारसन्या स्वादयती।

रमेर्डोसिः॥ दोः दोषो।पणेरिज्यादेश्च वः। वणिक्। स्वार्थेऽण्। नैगमो वाणिजो वणिक्॥ वशः किन्॥ उशिगग्नौ घृतेऽपि च॥ भृञ्ज ऊच्च॥ भृरिक् भूमिः।
जसिसहोरुरिन्॥ जसुरिर्वज्रं। सहुरिरादित्यः पृथिवी च। सुयुरुः वृञो युच्॥ सवनश्चन्द्रमाः। यवनः। रवणः कोकिलः वरणः। अशेरशच॥ अश्नोते
र्युच् स्यान्रशादेशश्च॥ रशना काञ्ची। जिह्वावाची तु दन्त्यसकारवान्॥ ॥ ॥ १९ निरसना· रसनं सदने· ध्वनौ जिह्वायां तु नपुंसि स्याद्रास्नायां रसना 498
स्त्रियामिति मेदिनी· कांचीवाची तालव्यशकारवान्· जिह्वावाची दन्त्यसकारवानित्येषा व्यवस्था भूरिप्रयोगाभिप्रायेणोक्ता वस्तुतस्तु तालव्यशकारवान् रशनाशब्दोऽपि कांच्यां जि
ह्वायां च तथा दन्त्यसकारवान् रसनाशब्दोऽप्युभयोर्द्वयोर्बोध्यः न चाद्वित्तालव्याअपि दन्त्याश्च शास्त्र शम्बल शूकराः रशनापि च जिह्वायामिति विश्वकोशाज्जिह्वायामुभयं साधु·
रसनं निःस्वनेस्वादे रसना कांचिजिह्वयोरित्यजयधरणिकोशाभ्यां कांच्यामप्युभयं साधु· एवञ्चाशेरशोचेति सूत्रे अशू व्याप्तौ अशभोजने इति धातुद्वयमपि ग्राह्यम्· रस आस्वादने
रसशब्दे इति धातुभ्यां तु बहुलमन्यत्रापीत्यनुपदमेव वक्ष्यमाणो युच् तेन सर्वत्र वयवायोऽनुगमोऽपि सूपपाद इत्याहुः॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उन्देः उन्दी क्लेदने · अस्माद्युच् · ओदनं न स्त्रियां भक्ते वल्लायामोदने स्त्रियामिति मेदिनी गमेः गम्लृ गतौ नभोऽन्तरिक्षं गगनमित्यमरः बहुलं स्यन्दूप्रस्रवणे · रुच दीप्तौ स्यन्दनं तु श्रुतौ
नीरे तिनिशे नारथे स्त्रियामिति मेदिनी · रोचना रक्तकह्लारे गोपित्तवरयोषितोः रोचनः कूटशाल्मल्यां पुंसि स्याद्रोचके त्रिष्विति च दिआह्लादे चन्दनं मलयोद्भवे चन्दनः कपिभेदे ।
स्यान्नदीभेदे तु चन्दनीति विश्वः चन्दनी तु नदीभेदे चन्दनोऽस्त्री मलयजे भद्रकाल्यां नपुंसकमिति मेदिनी · भद्रकाली ओषधिविशेषः भद्रकाली तु गन्धोल्यां कात्यायन्यामपि स्त्रि
यामिति मेदिनी · असु क्षेपणे असनं क्षेपणे क्लीबं पुंसि स्याज्जीवकद्रुमे इति मेदिनी अतसातन्यगामनेरात्वपूर्वः राजादनः । क्षीरिकायां प्रियाले किंशुकेऽपि चेति विश्वमेदिन्यौ · एवम
न्येऽपि द्रष्टव्याः रञ्जेः रंज रागे लुटि तु रंजनम् · रंजनो रागजनने रंजनं रक्तचन्दने इति मेदिनी · बाहुलकात् रूपेऽपि क्युन् · रूपोरोल इति मा सत्त्वाभावश्च रूपणः भूसू भूसत्तायां षू

उन्देर्नलोपश्च ओदनः गमेर्गश्च गमेर्युच् स्यादकश्चादेशः गगनं बहुलमन्यत्रापि युच् स्यात् · स्यन्दनः रोचना रञ्जेः क्युन् रजनम् भूसूधूभ्रस्जि
भ्यश्छन्दसि भुवनं सुवन आदित्यः धुवनो वह्निः निधुवनं सुरतं भृज्जनमम्बरीषं कृपृवृजिमन्दिनिधाञः क्युः किरणः पुरणः समुद्रः वृजनमन्त
रिक्षं मन्दनं स्तोत्रम् निधनं धृषेर्धिष् च संज्ञायां धिषणो गुरुः धिषणा धीः वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवत् अतिप्रत्ययान्ताः पृषु सेचने गु
णाभावः पृषन्ति बृहत् महान् गमेर्जगादेशः जगत् ॥ ॥

१९ · ङ्माणिप्रसवे धूञ् कम्पने भ्रस्ज पाके बहुलवचनाद्भाषायामपि क्वचित् · भुवनं वि
ष्टपेऽपि स्यात्सलिले गगने जने इति मेदिनी · विष्टपं भुवनं जगदित्यमरः · भृज्जनमिति · ग्रहिज्येति सम्प्रसारणम् · सस्य जश्त्वे न रः दस्य श्चुत्वेन जः क्लीबेऽम्बरीषं भ्राष्ट्रो नेत्यमरः ॥ कृपॄ
कृविक्षेपे पृपालनादौ वृजी वर्जने · मदि स्तुत्यादौ डुधाञ् धारणपोषणयोः · निधनं स्यात्कुले नाशे इति मेदिनी · निधनं कुलनाशयोरिति हेमचन्द्रः धृषेः ञिधृषा प्रागल्भ्ये · अस्मात् क्युः
धिषादेशश्च धातोः धिषणस्त्रिदशाचार्ये धिषणा धिषियोषितीति मेदिनी · गीष्पतिर्धिषणो गुरुरित्यमरः वर्त्तमाने शतृवच्चेति · तथा च उगिदचामिति नुम् मिमहान् · स्त्रियां तु उगि
तश्चेति ङीपि महतीत्यादि सिध्यतीति भावः ननु पृषन्महद्दयः लटः शतृशानचाविति शतृप्रत्ययान्ता एव भवन्तु तत्र वर्तमान इति · ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृ.
सि. कौ. टी. त. २०३

शतृवच्चेति चनकार्न्नव्यमिति महद्देवलाघवमिति चेदत्राहुः शतृप्रत्ययान्तत्वे तु कर्त्तरि शविति शप्स्यात् ये महतीत्यादावाच्छीनद्योरिति नुम् स्यात् महानित्यादौ तु नास्य तु दात्ते क्विदुप
दिष्टादिति लसार्वधातुकस्वरः स्यादिति प्रत्ययान्तत्वे तु नस्याति प्रत्ययस्यार्द्धधातुकत्वाभ्युपगमे न शवभावान्नोक्तदोष इत्याशये नाति प्रत्ययान्तत्वेन निपातनं स्वीकृतमिति · बृह बृहि
मह पूजायाम् · गन्तृगतौ · पृषन्तीति · बिन्दुवाची पृषच्छब्दो नपुंसकमिति ध्वननाय बहुवचनमुदाहृतम् · एवन्मृगेपुमान् विन्दौ न द्वयोः पृषतोपि ना · अनयोश्च त्रिषु श्वेतविन्दुयुक्ते
त्वुभाविमाविति मेदिनी · बृहती क्षुद्रवार्त्ताक्यां कण्टकार्याञ्च वाचि च · वारिधान्यां महत्यां च छन्दोवसनभेदयोरिति विश्वः शतृवद्भावादुगित्वादिति नुम् · बृहन् विपुलः महतीवल्लकी
भेदे राज्यंगे तु स्यान्नपुंसकम् · तत्त्वभेदे पुमान् श्रेष्ठवाच्यवदिति मेदिनी · महती नारदवीणा विश्वावसोस्तु बृहती तुम्बरोस्तु कलावती · महती नारदस्य स्यात् सरस्वत्यास्तु कच्छपीति
विजयन्ती · तत्र वायुवाचिनः पुल्लिङ्गस्य शतृवद्भावादुगित्वेन नुम् जगान् जगन्तौ जगन्त इत्यादि भवति घुतिगमिजुहोतीनां द्वे चेति सूत्र्यादित्वस्य तु नुमभावाज्जगत् · जगतो जग

संश्चत्तृपद्वेहत् एते निपात्यन्ते पृषद्धकारलोपः शतृवद्भावनिर्वृत्त्यर्थं सश्चिनोतेः सुट् इकारलोपः सश्चत् कृहकः तृपच्छत्रम् विपूर्वाद्धन्तेष्टिलोपः इतए
च वेहत् गर्भोपघातिनी छन्दस्यसानच शुजृभ्यां शवसानः पन्थाः जरसानः पुरुषः ऋंजिवृधिमन्दिसहिभ्यः कित् ऋञ्जसानो मेघः वृधसानः
पुरुषः मन्दसानोग्निर्जीवश्च सहसानो यज्ञो मयूरश्च · ॥ ॥ १९ नद्यादीतिबोध्यम् · ॥ ❖ ॥ संश्चत् · चिञ् चयने · तृप प्रीणने हन हिंसाग
त्योः निपात्यन्त इति · अतिप्रत्ययान्ता इति शेषः निवृत्त्यर्थमिति · एवञ्च संश्चदित्यत्रोगिदचामिति नुमः शंकैव नास्ति वेहदित्यत्र तूगितश्चेति ङीप् नेति भावः संचिनोतेरिति · सुमूर्ति·
चन्द्रस्तु संपूर्वात्स्वयतेः संश्चदित्याह · तृपच्छत्रमिति · चन्द्रमा इत्यन्ये · विहन्ति गर्भमिति वेहत् · इतएवेति · विशब्दसम्बन्धिन इकारस्य एकार इत्यर्थः गोरित्यनुवृत्तौ · वेहद्गर्भोप
घातिनीत्यमरः छन्दसि शुगतौ · जृष् वयोहानौ · पन्था इति · समस्मह इत्यादिमन्त्र इव शवसानशब्दो गंतृपरतया व्याख्यातः ऋंजि · ऋजि भर्जने वृधु वृद्धौ · मदि स्तुत्यादौ · ष राम
हमर्षणे · एभ्योऽसानच् कित् स्यात् · ऋंजसानो मेघ इति · ऋजेरिदित्वान्नुम् · इदित्वादेव नलोपाभावः एवञ्चायं मंदिसही च त्रयोपि · ॥ ॥ ॥ २०३

५११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वसूत्र एव पठितुं शक्याः किंत्वंतर्वृधुधातावेवोपयुज्यते· उत्तरसूत्रेपि गुणग्रहणं सुत्यजम्॥ ❁ ॥ अर्तेः शुट् च वृधेः किदिस्तु नौ सर्वसामंजस्यादित्याहुः · अंजसानः पुरुवारउ क्थैः अस्मिन्नपक्षे मन्दसानादय एव सु इत्यादिमंत्राणां भाष्येतु योगिकार्थ एव पुरस्कृतः · अर्तेः अगतौ · धातोर्गुणः प्रत्ययस्य शुडागमः असाविव दर्शसानापेति मंत्रस्य भाष्येतु अर्शसानाय शत्रूणां हिंसित्रे इति व्याख्यातम् · समि · युत्र · सुनौ · अस्मात् सम्युपपदे आनच् युधियुधसंप्रहारे · युधानो रिपुः वृधिरू वोधने वुधान आचार्यः दधिरप्रेक्षणे वाहुलकात्कर्पेरप्यानच् कृपाणः खङ्गः कृपाणेन कथं कारं कृपणः सहगत्यते · परेभ्यो दानसमर्थेयशंख कौरृविमुंचति कुर्च्छैः कुर्च्छी कौटिल्ये अस्मात्सन्नन्तात् आनच् स्यात्सनोलुक् छलोपश्च युयोध्यमा जुहुराणमेन इति मंत्रे जुहुराणं कौटिल्यकारिणं पापं युयोधि पृथक्कुरु इति भाष्यम् · श्विते· श्वितावर्णे अस्मात्सन्नन्तादानच् सन्यङोरिति द्वित्वम् सनोलुक् तकार

अर्तेर्गुणः शुट् अर्शसानोग्निः समि युत्र तु वः संस्तवानो वाग्मी युधिबुधिदृशिभ्यः किच्च युधानः बुधानः दृशानो लोकपालकः कुर्च्छैः सनो लुक् छलोपश्च जुहुराणश्चन्द्रमाः श्वितेर्दश्च शिश्विदानः पुण्यकर्म्मा तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ शंसेः क्षदादिभ्यश्च क्रमात्तृन्तृचौ स्तः तौ चानिटौ शंस्ता स्तोता शंस्तारौ शंस्तारः क्षदिः सौत्रो धातुः भक्षणे कालेक्षणे च अनुदात्तेत् दंक्येच सदानमिति मंत्रात् उद्गातृणमादेहत्मा क्षदने इति ब्राह्मणाच्च क्षत्ता स्यात्सारथ्यौ द्वास्थे वैश्यायामपि शूद्रजे ॥ ॥ ॥ ॥

स च दकारः किदिन्न तु वृत्तेर्न गुणः पुण्यकर्मेति शिश्विदानो कृष्णकर्मा इति विरोध्य निघ्ने अमरः अकृष्णं शुक्लम् · निघ्यापत्त्वात् शुद्धं कर्मयस्येत्यर्थः क्षीरस्वामिना तु प्रकृतसूत्रं विस्मृत्य श्विदि श्वैत्ये · अस्मात् लिटः कानजिति व्याख्यातं तदसंगतम् · कानच्छन्दसत्वात् · इदित्वेन नलोपानुपपत्तेश्चेति दिक् तृन् तृचौ · शंसेति · शंसस्तुता वस्मान्नः । अ सृन्निति सूत्रे न प्रशास्त्र ग्रहणं नियमार्थं मौणादिकात्तृन्तृजन्तानां चेदुपधादीर्घस्तर्हि नप्त्रादीनामेवेत्युक्तम् · तेनात्र दीर्घो नेत्युदाहरति शंस्तारौ शंस्तारः इति · निखादादयुदात्तः तथा च मंत्रः ग्रावग्राम उत शंस्ता सुविप्रः आदिरा बदाच्छासु अनुशिष्टो प्रशास्ति विनयतीति सत्वात् प्रशास्ता वृद्धः प्रशास्तारौ प्रशास्तारः प्रशास्ता प्रशान्तभद्रेनाशासके पुन· ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



रन्यवदिति· अपूर्वस्य तु नप्त्रादिषु पाठादप्तृन्निति दीर्घः अग्रणीरौ अग्रणीलाः ह्ना शूद्रा च वैश्या दोपती हारे चासार याविति मेदिनीकोशानुसारेणाह· वैश्यायामिति अमर
स्तु क्षत्रियायां च शूद्राज्जैः इत्याह ण्यन्तात् णीञ् प्रापणे· उत्पूर्वः उन्नेता ऋत्विग्भेदः ॥ ० ॥ बहुलमन्यत्रापि· अन्यत्रापि धातोर्बहुलं तृन् तृचौ भवतः पूर्वसूत्रस्यादिशब्देनैव मन्ताहन्त्रो
त्यादेः सिद्धत्वात्प्रपञ्चार्थमिदं सूत्रम् नप्तृनेष्टृ नञ्आदयोः पातेस्तृन्जन्तानि निपात्यन्ते न पातीति नप्ता नञः प्रकृतिभावः पत्लुगन्तावित्यस्याच्छ्वल्लोपः णीञ् प्रापणे लिषदीप्तौ हुदाना
दनयोः पूञ् पवने भ्राजृ दीप्तौ मामाने पा रक्षणे दुह प्रपूरणे त्वष्टा पुमान् देवशिल्पि तक्षणोरादित्यभिदयोरिति मेदिनी जायामातीत्यन्तर्भावितण्यर्थः सुञ्यसेः सुञि उपपदे

बहुलमन्यत्रापि मन् मन्ता हन् हन्ता इत्यादि नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ नयतेः षुग्गुणश्च
नेष्टा त्विषेरितोऽत्वं त्वष्टा होता पोता ऋत्विग्भेदः भ्राजतेर्जलोपः भ्राता जायाम्माति जामाता मानपूजायां नलोपः माता पातेराकारस्य इत्वं पिता दुहे
स्तृच इट् गुणाभावश्च दुहिता सा वसेर्ऋन् स्वसा यतेर्वृद्धिश्च याता भार्य्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम् नञि च नन्देः ननन्दृ ननान्दा इह वृ
द्धिर्नानुवर्तत इत्येके ननान्दा तु स्वसा पत्युर्ननन्दा ननन्दिनी च सेति शाश्वतः दिवेर्ऋः देवा देवरः स्वामिनो देवृदेवरौ नयतेर्डिच्च ना नरौ नरः सव्ये
स्थश्छन्दसि अम्बाम्बेत्यत्र स्थास्थिन् स्थूणामुपसंख्यानं सव्येष्ठा सारथिः सव्येष्ठरौ सव्येष्ठरः अर्तिसृधृधम्यम्यश्यवितृभ्योऽनिः अष्टभ्योऽनिप्रत्ययः स्यात् ।
अरणिरग्नेर्योनिः सरणिः धरणिः धमनिः अमनिर्गतिः अशनिः अवनिः तरणिः बाहुलकाद्रजनिः ॥ ॥ ॥

असु क्षेपणे इत्यस्मात् ऋन् आयणादेशः स्वसा भगिनी सा वसेरिति तु क्वाचित्कः पाठः यतः यती प्रयत्ने· नञि च टुनदि समृद्धौ अस्मान्नञ्युपपदे ऋन्· ननन्दतीति कन्यायामपि सेवा
यां न तुष्यतेऽत्यर्थं उभाप्यूषा ननान्दा च ननन्दा च प्रकीर्तितेति द्विरूपकोशः दिवेः दिवु क्रीडाविजिगीषादौ देवेति भ्रातरोऽत्यनुवृत्तौ स्वामिनो देवृ देवरावित्यमरः नयतेः णीञ् प्रा
पणे अस्मात् ऋप्रत्ययः स च डित्· डित्वाट्टिलोपः स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नर इत्यमरः सव्येष्ठा गति निहन्तौ· अस्मात्सव्यशब्दे उप· ॥ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पदेऽकः स्यात्सचडिन्नत्युरुषेऽक्तनीति सममस्या अलुक् उपसंख्यानमिति· पत्वस्यातिशेषः अर्तिः ऋगतौ· सृगतौ· धृञ् धारणे धमिः सौत्रः अमगतौ· अशू भोजने अवरक्षणए
दौ· तृप्लवनतरणयोः अरणिर्वह्निमन्थनाद्यो निर्मथ्यदारुणीति मेदिनी· सरणिः श्रेणिवर्त्मनोरिति रन्त्यादौ रभसः सरणिः पंक्तौ मार्गे स्त्रीति मेदिनी· शृहिंसायां ततोऽनिःक्रम
पः शारणिरित्येके शरणिः पथि चापलावितिताल व्याद्यावजयः इमामग्ने शरणिमिमिनिमंत्रे शरणिं हिंसांप्र नलोपरूपा मीमृष क्षमस्वेति वेदभाष्यम्· धरणिर्भूमिः धमनीतु शि
राहट्टविलासिन्या नुयोषितीति मेदिनी· अमनिर्गतिः अश्यते भुज्यते राज्यमिन्द्रेणानयेति अशनिर्वज्रम्· अशनिः स्त्रीपुंसयोः स्याच्चंचलायां च वाचयीति मेदिनी· अवनिः पृ
थिवी· तरणिर्द्युमणौ पुंसि कुमारीनौकयोः स्त्रियामिति मेदिनी· कुमारी लताविशेषः तरणी रामतरणी कर्णिका चारुकेसरा· सहाकुमारी गंधाढ्येति धन्वन्तरिनिघण्टुः रजनि
रिति· रञ्ज रागे अस्मादनिः नलोपोऽपि बाहुलकात्· कृदिकारादक्तिन इति ङीष् रजनी· रजनी नीलिनी रात्रिर्हरिद्रा जतुका सु चेति मेदिनी ॥ ⁘ ॥ आङि शुषश्चोपणे ॥ असात्सन्नना

आङि शुषेः सनश्छन्दसि आशुशुक्षणिरग्निर्वातश्च कृषेरादेश्च चः चर्षणिर्जनः अदेर्मुट् अद्मनिरग्निः। वृतेश्च वर्त्मनिः गोवर्द्धनस्तु चकारान्म
दृवर्त्मनिरित्याह क्षिपेः किच्च क्षिपणिरायुधं अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः अर्चिर्ज्वाला इदन्तोऽप्ययं अग्नेर्भ्राजन्तेऽर्चयः।
शोचिर्दीप्तिः हविः सर्पिः इस्मन् इति ह्रस्वः छदिः पटलं छर्दिर्वमनव्याधिः इदन्तोऽपि छर्दनीसारमूलवान्· ॥ ॥

आङि· उपपदे अनिस्स्यात्· कृषेरादेः कृष विलेखने· चर्षणिर्जन इति वैदिकनिघण्टौ चर्षणिशब्दस्य मनुष्यनामसु पाठात्· ओमासश्चर्षणीधृत इत्यादिमन्त्रेषु वेदभाष्यकारै
स्तथैव व्याख्यातत्वाच्च· उज्ज्वलदत्तेन तु· आदेश्च ष इति पठित्वा षर्षणिर्बन्धकीति व्याख्यातम्· तदयुक्तम्· तथा सति धृषेरित्येव सूत्रयेत्· प्रागल्भ्यरूपावयवार्थानुगमात्·
आदेश्च घ इत्यंशस्य त्यागेन लाघवाच्च· तस्मादादेश्च च इति दशपादीपाठ एव युक्त इत्याहुः· अदेः अद भक्षणे अस्मादनिस्तस्य मुडागमश्च· वृतेश्च वृतु वर्तने अस्मादप्यनिः
वर्त्तनिरिति· कृदिकारादिति ङीषि तु वर्तनी सरणिः पद्धतिः पद्या वर्तन्येकपदीति चेत्यमरः· क्षिपेः क्षिप प्रेरणे· क्षिपणिरायुधमिति उत स्य वाजी क्षिपणिं तुरण्यतीति· मन्त्र
स्य वेदभाष्ये तु क्षिपणिं क्षेपणमनु तुरण्यति त्वरयति गन्तुमिति व्याख्यानात्· ॥

क्ष
सि·कौ·
टी·न·
२०५

अर्चि अर्च पूजायाम्· शुच शोके कृदाने सृग्लुग्नौ छ ऌ अपवारणे रायन्नः छर्दवमने अर्चिरिति· सान्तम्· तमर्चिषा स्फूर्जयन्तीति मन्त्रः नयनमिव सनिद्रं घूर्णते देवमर्चिरिति माघः ज्वालाभासोर्न पुंस्यर्चिरिति नानार्थे साम्ये घमरः दूरस्तोपि·लिङ्गनारदर्चिरचदरिति भावः अर्चिर्ईनि स्त्रियां तु स्त्रियामित्यमरः रोचिः शोचिरुभे क्लीबे इति· सर्पिर्घृतम्· छध तेः नयाछादिः छदिः स्त्रियामेवेति लिङ्गानुशासनसूत्रम्· एवञ्च पटलं छदिरित्यमरग्रन्थे पटलसाहचर्यात्क्लीबं छदिर्वक्तव्यम् छर्दयतीति· छर्दिश्चातिसारश्च शूल· ञ्च तानि यस्य स न्नीति विग्रहः॥ ॐ ॥ बृंहेः बृहि बृद्धौ चात्सारिसिः कृशाशुषणोरिति· शुष्मा नाम अग्निः अग्निर्वैश्वानरो वह्निरित्युपक्रम्य बर्हिः शुष्मन्यमरेणोक्तत्वात् द्युतेः द्युनदीप्तो ज्योतिर्मनोदिवाकरे पुमान् नपुंसकं दृष्टौ स्यान्नस्तत्र प्रकाशयोरिति मेदिनी· वसौ रुच इत्येभ्य वस्माद्दसुघान्ते उपपरः इसिन्स्यात्सञ्ज्ञायाम्· बाहुलकात्केवलादपि रोचि

बृंहेर्नलोपश्च बर्हिर्नाकुशाश्मलोः द्युतेरिसिन्नादेश्च जः ज्योतिः वसौ रुचेः संज्ञायां वसुरोचिर्यज्ञः भुवः कित् भुविः समुद्रः सहो घश्च सघिरन्
ड्वान् पिबतेस्सुक् पाथिश्चक्षुः समुद्रयोः जनेरुसिः जनुर्जननं मनेर्धश्छन्दसि मधुः अर्तिपॄवपियजितनिधनितपिभ्यो नित् अरुः परुर्ग्रन्थिः
वपुः यजुः तनुः तनुषी तनूंषि धनुरस्त्रियां धनुर्वंशविशुद्धोपि निर्गुणः किङ्करिष्यति सान्तस्य उदन्तस्य वा रूपं तपुः सूर्योग्निशत्रुषु एतेर्णिच्च
१८ आयुः आयुषी चक्षेः शिच्च चक्षुः

शोचिरुभे क्लीबे इत्यमरः भुवः भुवनेरिसिन्स्यात्स च कित्· सहो वह मर्षणे· स्मादिसिन्· घश्चान्तादेशः पिबतेः पा पाने·॥ असमादिसिन्धातोश्च डुगागमः जनेः जनी प्रादुर्भावे मनेः मनञ्ज्ञवबोधने· स्मादुसिः स्याच्छन्दसि धकारश्चान्तादेशः मधु पवित्रद्रव्यम्· अर्तिपॄ ऋ गतौ· पॄ पालनपूरणयोः डुवप बीजसन्ताने यज देवपूजादौ· तनु विस्तारे धन धान्ये तप सन्तापे एभ्य उसिर्नित्स्यात्· अरुर्लोस्त्रियामर्ममरुः क्लीबे इत्यमरः ग्रन्थिर्ना पर्व परुषी इति च वपुः क्लीबं तनौ शस्ताकृतावपीति मेदिनी· प्रशस्ताकृतिः प्रशस्ताकृतिरित्यर्थः यजुरिति यजुर्वेदः तनुः शरीरम्· तनुषे तनुषः नङ्सिति सुबन्धुः स्यात्तनुस्तनुषा सार्द्धं धनुषा च धनुर्विदुरिति· रा·म·
॥ ॥ द्विरूपेषु विश्वः अपास्त्रियां धनुश्चापाविप्यमरः धनुः प्रियालेनानरत्नौ राशिभेदे शरासने· धनुर्धरे त्रिषु इति शासने मेदिनी· एतेः इणागतावित्यस्मादुसिः ॥ २०५

501

CC-0. In Public Domain. Digitization by eGangotri

णित्वाद्धह्रोक्तनायामादेशः चक्षेः चक्षिङ् व्यक्तायाम्वाचि असादुसिः शिङ्वति शिल्वात् ख्याञादेशाभावः चक्षातेस्वयमनुभवत्यनेनेति चक्षुः॥ ॐ॥ मुहेः मुहूर्वैचित्ये मुहुः पुनः
पुनः शश्वदभीक्ष्णमसकृत्समाः स्युर्व्ययेष्वमरः कृगृकृविक्षेपे गृनिगरणे शृहिंसायाम् दृञ्वरणे चतेपाचनेनेञ्जनः कर्वरः कव्यात्कर्वरोयातुरक्षसी इतिशब्दार्णवः शर्व
र्नरकान्तरे इतिमेदिनी· कुष निष्कर्षे कुष्मलं छादनेविकसितमित्यन्ये· सर्वधातुभ्योसुन्· इणपाद्यान्तु असुन्निसेवसूत्रम्· चिती संज्ञाने चितस्ञ्चेतने· चुरादिः सृगतौगो
रादित्वान्ङीष्· सरसी तु महासर इतिशाब्दार्णवः महान्तिसरांसि सरस्य इति भाष्यम्· पय गतौ· पीङ् पाने पयः स्यात् क्षीरनीरयोरिति मेदिनी· वक्षविस्तारणादोसद्धःसभाव
चर्दीप्तौ· वर्चो नपुंसकं रूपे विष्ठायामपितेजसि· पुंसि चन्द्रस्यतनये इति मेदिनी· रुदिर् अश्रुविमोचने· रोदश्च रोदसी· चापि दिवि भूमौ पृथक् पृथक् सहप्रयोगेप्यनयोः रो

दृणातेर्ह्रस्वश्च दृतिः कृतॄकृपिभ्यः कीटन् किरीटं तिरीटं सुवर्णशिरोवेष्टनं कृपीटं कुक्षिवारिणोः रुचिवचिकुचिकुटिभ्यः कितच् रुचितं मिष्टं उचितं
कुचितं परिमितं कुटितं कुटिलं कुटिकुषिभ्यां क्मलन् कुड्मलम् कुष्मलम् कुषेर्लश्च कुल्मलम्पापम् सर्वधातुभ्योऽसुन् चेतः सरः पयः सदः रपेरत एच्च

दः स्याद्वपिरोदसी इति विश्वः वी गत्यादिषु वयः पक्षिणि बाल्यादौ यौवने च नपुंसकमिति मेदिनी· अन प्राणने· अनो भक्तम्· अनोऽस्माय ःसरसांजातिसंज्ञयोरिति टचितु अ रेपो वद्यं·
दन्नं· पाकस्थानं महानसमित्यमरः नमु ग्लानौ नमः क्लीवं गुणेपशोके संहिके पान्धकारयोरिति रभसः तमो ध्वान्ते गुणे शोके क्लीवं वा ना विधुन्तुदे इति मेदिनी· षह मर्षणे· सहो बले ज्योति
षि च पुंसि हेमन्तमार्गयोरिति मेदिनी· तप सन्तापे· तपो लोकान्तरेपि च· चान्द्रायणादौ धर्मे च पुमान् शिशिरमाघयोरिति च· मह पूजायाम्· मह उत्सवतेजसोरिति च मेदिनी· नभ नभ
हिंसायां भ्वादिकः क्र्यादिकश्च नभोन्तरिक्षं गगनमित्यमरः नभस्तु नभसासार्द्धं तपस्तु तपसा सहसहश्च सहसासार्द्धं महश्च महसा सह· तमेन च तमः श्रोकः रजेनापि रजः समभि
निर्दिष्टरूपकोशः नचसु ज्ञान्ययेन भः सहतमः इत्यादि सान्तशब्दाः सिध्यन्ति ॥ ॥ राम: २२९

525

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पचाद्यचि तु नमं सहंतमभिन्या यजन्ता अपि सिध्यन्ति· परन्तु रज इति· अकारान्तसकारान्तौ नलोपवन्तौ व्यौ न सिध्यत इति· रजेनापि रजःसममिति को घ्राश्चिन्त्य एवेति चेदत्रा हुः रञ्जरणोः स्मादसुनि भूरं जिभ्यां किदिति वक्ष्यमाणे नासुनः कित्वान्नलोपे रज इति सिध्यति· घञर्थे कविधानमिति कमप्रत्यये तु रज इत्यदन्तोपि सिध्यतीति दिक्॥ रपव्यक्तायां वाचि· अस्मादसुन्स्यात्· अतएवाकारश्चरेपोऽवद्यमिति· अरेपसा तत्वेतिमन्त्रे निरवद्ययेति भाष्ये उक्तम्· नञ्पूर्वको रेपः प्राञ्चस्यानवद्यवाचकत्वात्॥ ॐ ॥ अशेः अशूञ्व्याप्तौ संघाते चा स्मादसुन्स्याद्धातोर्युडागमश्च यशः कीर्तिः उब्जः उब्ज आर्जवे॥ स्मादसुन्स्याद्बले वाच्ये वकारस्य लोपश्च· ओजो दीप्ताववष्टम्भे प्रकाशबलयोरपीति मेदिनी· श्वेः टुओश्वि गतिवृद्ध्योः रस्मादसुन्स्यात्सम्प्रसारणञ्च· श्रयतेः श्रिञ् सेवायामस्मात्स्वाङ्गे वाच्येऽसुन्स्यात्स च किद्धातोः शिरादेशश्च उत्तमाङ्गं शिरः शीर्षमित्यमरः· घञर्थे कप्रत्यये तु शिर इत्यदन्तोपि शि

अशेर्देवने युट्च· देवने सुनो यशः· उब्जेर्बले बलोपश्च ओजः श्वेः सम्प्रसारणञ्च शवः शवसी बलपर्यायोयम् श्रयतेः स्वाङ्गे शिरः कि
च श्रयतेः शिर आदेशोऽसुन् किच्च शिरः शिरसी अर्तेरुच्च उरः व्याधौ शुट् अर्तेर्गुरव्याधिः उदके नुट् अर्तेरसुन् स्यात्तस्य च नु
ट् अर्णः अर्णसी इण आगसि एनः रिचेर्द्धने घिच्च चात्प्रत्ययस्य नुट् घित्वात्कुत्वं रेक्णः सुवर्णे॥ ॥ ॥ ॐ ॥

रो वा शीर्षं शिरोऽदन्तो रजो वा चीरजस्तथेति कोशान्तरम्· पिण्डं दद्यादृयाशिर इति वायुपुराणे कुण्डलोद्घृष्टगण्डानां कुमाराणां तरस्विनाम्· निचकर्त शिरान्द्रोणिर्नालम्बद्रवप ङ्कजानीति महाभारतम्· अर्तेः ऋगतौ अस्मादसुन् कित्स्याद्धातोरुत्वं च रपरत्वम्· उरो वत्सञ्च वक्षश्चेत्यमरः· व्याधौ अर्तेरेव व्याधौ वाच्येऽसुन् तस्य शुडागमश्च स्यात्· अर्ण इति· पानीयमित्यर्थः· इणः इण्गतौ अस्मादागस्यपे वाच्येऽसुन् स्यात्तस्य नुडागमश्च· एनः पापम्· रिचेः रिचिर् विरेचने· रिच वियोजनसम्पर्चनयोरित्यस्माद्धने वाच्येऽसुन् रेक्ण इति· चजोरिति कुत्वे अट्कुप्वाङिति णत्वम्· इह दशपादी वृत्तौ नुटं नानुवर्त्य रेकः रेकसी इत्युदाहृतम्· तत्र उत्तरसूत्रे नुडनुवृत्तेर्निर्विवादत्वात्· मण्डूकप्लुतिमानाभावात्स्यविसंवादाच्च· उज्ज्वलदत्तेन तु रिचेर्धने चित्किच्चेति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पठित्वा नुटं चानुवर्त्त्य कित्त्वाद्गुणाभावे नुट्श्रुत्वेन नकारो रेफस्य इति साधितम्। तल्लौकिकवेदयोरप्रसिद्धत्वादुपेक्ष्यम्। निसरेकणः मर्त्यपरिषद्यं स्वरण्य सरेकण इत्यादिम
न्त्रेषु रेकण इति शब्दस्य प्रसिद्धत्वात्। वैदिकनिघण्टौ च सुवर्णपर्यायेषु तथा पाठात्। वेदभाष्ये तु प्रकृतसूत्रेणैव तस्य साधितत्वाच्च रेकण इति प्रयोग एव साधीयानि
ति दिक्। चायतेः। चायृ पूजानिशामनयोः अस्मादन्ने वाच्ये असुन् स्यात्तस्य नुट् च धातोर्ह्रस्वत्वं यलोपः। चनो दधिष्व पचतामुते दधिषनश्च न इत्यादिमन्त्रेषु प्रसिद्धो
यं चनशब्दः। एतेन चनसः नमित्युदाहृत्य बाहुलकाण्णत्वमिति वदन्तो दशपादीवृत्तिकारास्तदनुसारिणः प्रसादकारादयश्च परास्ताः। वृङ्। वृञ्। सम्भक्तौ। वीङ्। स्व
न आभ्यां यथाक्रमं रूपे स्वाङ्गे च वाच्ये असुन् स्यात्तस्य पुडागमश्च। वर्पो रूपमिति ग्रन्थिष्वन्देवा अभिवर्पसाभूदित्यादिमन्त्रेषु प्रसिद्धमिदम्। शेपः स्वाङ्गवर्णयेत्यमिति
सुभूतिचन्द्रः अकारान्तोऽप्ययम्। शेपपुच्छलाङ्गूलेषु शुन इति वार्तिके शेप इति निर्देशात्। यस्यामुशन्तः प्रहराम शेपमिति वैदिकप्रयोगाच्च। स्रुरीभ्याम्। स्रुगतौ। रीङ् श्रव

चायतेरन्ने ह्रस्वश्च। चनो भक्तम्। वृङ्। वीङ्भ्यां रूपस्वाङ्गयोः पुट् च। वर्पो रूपं शेपो गुह्यं। स्रुरीभ्यां तुट् च। स्रोतः रेतः। पातेर्बले जुट् च। पाजःबल
सी। उदके थुट् च। पाथः। अन्ने च। पाथो भक्तम्। अदेर्नुम् धौ च। अदेर्भक्ते वाच्ये असुन् नुमागमो धादेशश्च। अन्धः अन्नम्। स्कन्देश्च स्वाङ्गे। स्क
न्धः। स्कन्धसी। आपः कर्माख्यायाम्। कर्माख्यायां ह्रस्वो नुट् च वा। अप्नः। अपः। बाहुलकात्। आपः। आपसी॥ ॥ ॥

णे। आभ्यामसुन् तस्य तुट् च स्यात्। स्रोतोऽम्बुवेगेन्द्रिययोरिति विश्वः। रेतः शुक्रे पारदे चेति मेदिनी। पातेः पारक्षणेऽस्माद्बले वाच्ये असुन् जुडागमश्च। पुट् चेत्यन
न्यादिपाठस्तूज्ज्वलदत्तस्य प्रामादिकः। पृथुपाजा अमर्त्य इत्यादिमन्त्रे तद्भाष्यविरोधात्। उदके पातेरुदके वाच्ये असुन् स्यात्तस्य थुडागमश्च। कबन्धमुदकं पाथ इत्यमरः। अ
देः अदभक्षणे। भिःसास्त्री भक्तमन्धोऽन्नमित्यमरः। द्विजातिशेषेण यदेतदन्धसा इति भारविः। स्कन्देः स्कन्दिर् गतिशोषणयोः। अस्मात्स्वाङ्गे वाच्ये असुन् धश्चान्तादेशः। आपः
आप्लृ व्याप्तौ। अस्मात्कर्माख्यायामसुन् ह्रस्वश्च धातोः प्रत्ययस्य नुडागमस्तु वा स्यात्। अप्नस्वतीमश्विना अपांसि यासि न्नधि संदधुः। बाहुलकादिति। उपलक्षणं ह्रस्वनु
टौ वा इति व्याख्यानस्यापि सम्भवात्। तथा च नुवते कर्तमोऽपि नपुंसकमाप इति कोशमुदाहृत्य सर्वमापोमयं जगदिति प्रयोगो दुर्घटकृन्मो समर्थितः॥ ॥



526

रूपे· रूपेवाच्ये आप्नोतेरसुन् ह्रस्वत्वञ्च धातोः प्रत्ययस्य जुडागमश्च स्यात् अप्न इति मल्लांजग्ध्यांज्ञेषीति यकारस्य वकारः उदके उदकेवाच्ये आप्नोतेरसुन् ह्रस्वत्व
ञ्च नुमागमो भश्चान्तादेशः नह्यतेः णह बन्धने। स्मादस्मनेवाच्ये ऽसुन् भश्चान्तादेशः स्यात्· नभो व्योम्नि नभो मेघे श्रावणे च पतद्ग्रहेण घ्राणे मृणालसूत्रे च वर्षासु च नभः
स्यादिति विश्वः नभः खं श्रावणो नभाः इत्यमरः नभन्तुन भसा साई मिति द्विरूपकोशाद कारान्तोपि द्रुणः द्रुणो ऽसुन् स्यादपराधे वाच्ये धातोरागादेशश्च· किम्बो किमाह·
आगइति अमेः अमगत्यादावस्मादसुन् हुगागमश्च धातोः स्यात्· अमनिगच्छन्त्यनेनाधस्तादिति अंहोदुरितम् रमेश्च रमेरसुन्स्यात् हुगागमश्च धातोः रंहो वेगः अ
हिरहिभ्यामसुनासिद्धे अघिरघिभ्यामसुनि· आघोरं घइति माभूदिति सूत्रद्वयमितिगोवर्द्धनः तथा च स्यान्मध्योऽमचतुर्थत्वमंहसो रंहसस्तथेति द्विरूपकोषः एव
श्चदन्तावोस्मिन्संचैवविदधन्तु घृणायः शीघ्रमंचोविघातमिति रंघसं वसुराणां जगदुपक्षनये नित्ययुक्तस्य यस्य स्तौति प्रीतिप्रसन्नोन्वहमहिमस्त्वेस्याऽवता।

रूपेऽम्बुद्ध अप्नो उदकेनुम् भौचअम्भः नह्येर्दिवि भश्च नभः द्रुणआगोपराधे च आगः पापापराधयोः अमेर्हुक्च अंहः रमेश्च रंहः देशेऽह च रमते
स्मिन्नरहः अञ्च्यञ्जियुजिभृजिभ्यः कुश्च एभ्योऽसुन् कवर्गश्चान्तादेशः अङ्कः श्चिन्हशरीरयोः अङ्कः पक्षी योगः समाधिः भर्गस्तेजः भूरञ्जि।
(भ्याङ्कित् भुवः रजः।

त्यन्नीवः इत्यत्र अघोरं घइति घकारपाठोऽनुप्रासरसिकानां प्रमादिक इति वदन्ति· देशे· देशो वाच्ये रमेरसुन् हकारश्चान्तादेशः
स्यात्· रहस्तत्त्वे रते गुह्ये इति मेदिनी· अचि· अंचु गतिपूजनयोः अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु युजिर् योगे युज समाधौ· भृजी भर्जने अकः अकसी अंकांसि अंगः अ
ङ्गसी· अङ्गांसि योगः योगसी योगांसि· भर्गस्तेजइति· हरः स्मरहरो भर्गः इत्यत्र भर्गशब्दो घञन्तः पुंल्लिङ्ग इति बोध्यः उ च समवाये ऽस्मादसुनि बाहुलकान्नुक्च म्· न्यंका
दित्वाद्धोकः आश्रयमात्रेपि मन्दिरेपि नपुंसकमिति मेदिनी· भूरंजि· भूसत्तायाम् रंज रागे आभ्यामसुन्कित्स्यात् भुवः अन्तरिक्षम्· पक्षान्तप्रतिरूपकमव्ययमिद
म्· रजोरेणुः रजः क्लीबं गुणान्तरे· आर्तवे च परागे च रेणुमात्रेपि दृश्यतइति मेदिनी घञर्थे कप्रत्ययेनु अकारान्तोप्ययं· रजोयं रजसा साई स्त्रीपुष्पगुणधूलिष्वित्यजयः

CC-0. In Public Domain. Digitization by eGangotri

कृ.
सि. कौ. वसेः वसनिवासेः स्मादसुन्स्यात्स च णित्णित्वाद्वृद्धिः चन्देः चदि आह्लादने अस्मादसुन् आदेः छकारश्च छन्दस्त्वेवप्रभेदेपि स्वैरच्छन्दाभिलाषयोरितिमेदिनी अकारान्तोप्य
टी. त. यम् छन्दावमभिप्रायवशाविनमरहिरूपकोशे पचि डुपचष् पाके वचपरिभाषणे आभ्यामसुन्स्यात्तस्यसुडागमश्च चसकुलेसस्यपत्नम् यसः यशसी यशांसि यथा प्राला
येपरासी इतिश्रुतिः पूर्वोत्तरेदेयससीइति श्रुतिः पूर्वोत्तरेदेयससीइति अनीकाधिक इत्येताचरभाष्यम् माधवस्तु यसपरिग्रहइत्यस्मादसुन् इत्याह वह्निवहनापणे ओहाक्
२३२ त्यागे डुधाञ् धारणपोषणयोः एभ्यो सुन्स्यात् अत्र पूर्वसूत्रात्सुट मनुवर्तयताम् ज्वलदत्तादीनां मतेनोदाहरणमाह वक्षाः ह्रासाः धासा इति प्राञ्च इति सकलहतिकृतः प्रसाद
काराद्यश्चेत्यर्थः एतच्चायुक्तम् उक्तोदाहरणानिहि लोके तु न दृश्यन्ते न वा सम्भवन्ति सूत्रेऽस्मिन् छन्दसीत्युक्तत्वात् वेदे तु विपरीतान्येवोदाहरणानि दृश्यन्त इत्याह वस्तु

वसेर्णित् वासो वस्त्रं चन्देरादेश्च छः छन्दः पचिवचिभ्यां सुट् पयसी तु सर्तोपसो वक्षो हृदयं वहिहाधाञ्भ्यश्छन्दसि वक्षाः अनड्वान् हासाश्चन्द्रः
धासाः पर्वत इति प्राञ्चः वस्तुतस्तु णिदित्यनुवर्तनेन तु सुट् तेन वहेरुपधावृद्धिः इतरयोरात्तोयुगिति युक् धोऽणाधस्मन्नूवाहसा श्रोताहवं
गृणवक्षोमवाहाः विश्वो विहायाः वाजम्भरो विहायाः देवो नयः पृथिवीं विश्वधायाः अधारयत् पृथिवीं विश्वधायसं धर्णसम्भूरि धाय
समित्यादि इण आसिः अयाः वह्निः खरादिपाठादव्ययं मिथुनेऽसिः पूर्ववच्च सर्वम् उपसर्गो विशिष्टो धातुर्मिथुनं तच्चा सनोपवादोऽसिः
स्वरार्थः नञिहन एहच अनेहाः अनेहसौ विधाञो वेधच विदधातीति वेधाः नुवो धुट् नोधाः॥ ॥ ॥ ॥

नसिवितिवेदभाष्यकारादयश्चेहानुकूला इत्यवधेयम् इण्गतौ अस्मादासिः स्यान्मिथुने सुयशा इति अग्रोर्वैदने युट् चेत्यादिपूर्ववत् सुपयाः सुस्रोता इत्याद्यु
दाहार्यम् नञि हन्तेर्नञ्युपपदेऽसिः स्यात् धातोरेहादेशश्च क्रमादुक्तः स्वरूपं धारयत्यादिना सा वनड् विधाञः डुधाञ् धारणपोषणयोः विपूर्वादस्मादसिः स्यात् हेधादेशश्चासा राम.
पसर्गधातोः वेधाः पुंसि कृमपीकेशोद्धवेच परमेष्ठिनीतिमेदिनी नुवः णु स्तुतौ अस्मादसिः स्यात्तस्य धुडागमश्च नोधा इति सद्योभवद्यापनोधा इतिमन्त्रे नोधाकृषिर्भ २३२
वतीति निरुक्तम् नवं दधातीति तु तेरुक्तं व्युत्पत्त्यन्तरम्वाप्यम्॥

527

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गतिगतौ कारके चोपपदेऽसिस्स्यात्. नपसन्तापे विरहज्ञाने. विह्वलाभे चन्द्रे चं ईरजतममृतं च्युतदिवमीयते असौ चन्द्रमा इति हरदत्तः सच डिदिति. डित्वाट्टिलोपेच
चन्द्रमसौ. चन्द्रमसः इत्यादि सिध्यति. वयसि डुधाञ्. अस्माद्वयस्युपपदेऽसिः स्यात्सच डित्. पयोधा इति. पयः शब्दे उपपदे डुधाञः पूर्ववत्. पुरसिच. पुरः शब्द उप
पदे पूर्ववत्. पुरोधास्तु पुरोहितः इत्यमरः. रौतेरिति. रुशब्दे पुरूरवा बुधसुतो राजर्षिः पुरूरवा इत्यमरः. चक्षेः चक्षिङ् व्यक्तायां वाचि. अस्मादसिः स्यात्सच बहुल
म् शिच्च. शित्वात्सार्वधातुकसंज्ञायां ख्याञ् न नृचक्षाः राक्षसः शित्वाभावपक्षे तु ख्याञादेशः नृख्याः प्रजापतिः उष. उषदाहे. अस्मादसिः स्यात्सच कित्. उषः प्र
भातम्. दशपाद्यान्तु वसः किदिति पाठः वसति सूर्येण सहेति. उषाः देवताविशेषः. अपोभीति सूत्रे. उषसश्चेष्यते इति वार्तिकस्य समुषद्भिरित्युदाहरणम् विट्

गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वञ्च असिः स्यात् सुतपाः जातवेदाः गतिकारकोपपदात् कृदित्युत्तरपदप्रकृति ।
स्वरस्यानुदात्तत्वे प्राप्ते तदपवादार्थमिदम् चन्द्रे मो डित् चन्द्रोपपदान्माङोऽसिः स्यात्सच डित् चन्द्रमाः वयसि धाञः वयोधास्त
रुणः पयसि च पयोधाः समुद्रो मेघश्च पुरसि च पुरोधाः पुरूरवाः पुरुशब्दस्य दीर्घो रौतेरसिश्च निपात्यते चक्षेर्बहुलं शिच्च नृच
क्षाः उषः कित् उषः दमेरुनसिः सप्तार्चिर्दमुनाः अङ्गतेरसिः इरुडागमश्च अङ्गिराः सर्तेरप्पूर्वादसिः अप्सराः प्रायेणायं भूम्नि
अप्सरसः विदिभुजिभ्यां विश्वे विश्ववेदाः विश्वभोजाः वशेः कनसिः सम्प्रसारणं उशनाः ॥ ऽ॥ एवद्भिर्हरदत्तादिभिरपपाठः पुरस्तात् दमेः

दम उपशमे सप्तार्चिर्दमुनाः शुक्र इत्यमरः पक्षेऽन्येषामपि दृश्यते इति दीर्घः जुष्टो दमूनाः दमूनसं गृहपतिं वरेण्यम्. दशपाद्यान्तु दमेरूनसिरिति सूत्रं एव दीर्घः पठ्यते तन्म
ते नाङुलकाद्ध्रस्वो बोध्यः अङ्गिराः अगि गत्यर्थः मृ अङ्गिराः मुनिभेदः सर्तेरिति. सृगतौ. प्रायेणेति. स्त्रियां बहुत्वे अप्सरसः स्यादेकत्वेऽप्सरा इति शब्दार्णवः अप्सरं स्वप्सरा मो
नाः सुमनाः सुमनस्सु चेति द्विरूपकोशः एकाप्सरः प्रार्थितयोर्विवाद इति रघुः विदिः विद ज्ञाने. भुज पालनाभ्यवहारयोः आभ्यां विश्वशब्दे उपपदेऽसिस्स्यात्. ॥ शब्दस्व
रूपपरत्वाद्विश्वेइत्यत्र सिन्नादेशो न कृतः ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



उदाहरणे विश्वं वेत्ति भुंक्ते इति विग्रहः यत्तु तत्पुरुषे इतीति सप्तम्या अलुक् विश्वेदेवाः अग्निः विश्वेभोजाः इन्द्र इत्युज्ज्वलदत्तेनोक्तं तन्न तथा सति स्विन्नादेशाः स्यादुर्वीरत्वा पत्तेः सुमृंडीको भवतु विश्ववेदाः पूषा भगः प्रभृथे विश्वभोजा इत्यादि मंत्रेषु सुपो लुक एव दर्शनात् दृष्टौ तत्रैवोदाहरणाद्ववसेः वश्रा कान्तौ उशना भार्गवः कविरि त्यमरः॥ ॐ ॥ इत्युणादिषु चतुर्थः पादः। अद्भुतो अत इत्यव्ययं आकस्मिकार्थे तस्मिन्नुपपदे भूधातोर्डुत च स्यात् डित्वाट्टिलोपः अद्भुतमाश्चर्ये गुध गुधः गुधयरिवेष्ट ने गुध्यते परिवेष्ट्यते प्राणिभिरिति गोधूमो नागरङ्गे स्यादोषधीयो हि भेदयोरिति मेदिनी मसेः नसी परिणामे स्थः स्थागति निवृत्तावस्मादूरन् कित्वादालोपः स्थूरो मनुष्य इति स्थूरस्य गयोरहत्तो यद्देशोइतिमन्त्रे तु योगपुर स्कारात् स्थिरस्येत्यर्थ इति व्याख्यातम् पातेः पा रक्षणे वातेः वा गतिगन्धनयोः रभसः कोशस्थमाह। वाति

इत्युणादिषु चतुर्थः पादः॥ ॐ ॥ अदिभुवो डुतच् अद्भुतम् गुधेरूमः गोधूमः। मसेरूरन् मसूरः प्रथमे पादे असेरूरन् मसेश्चेत्यत्र व्या ख्यातः स्थः किच्च स्थूरो मनुष्यः पातेरतिः पातिः स्वामी सम्पातिः पक्षिराजः वातेर्नित् वातिरादित्यसोमयोः अर्त्तेश्च अरतिरुद्वेगः तृहेः क्नो हलोपश्च तृणं वृन् लुठित नित्ताडिभ्यः उलनाएडश्च व्रियते लुठ्यते नितन्यते ताड्यते इति वा तण्डुलाः दंसेः टटनौ न आ च दासः सेवक शूद्रयोः दंशेश्च दासो धीवरः उदिचेर्डैसिः स्वरादि पाठादव्ययत्वम् उच्चैः नीचैर्दीर्घश्च नीचैः ॥ ११ रिति। अर्त्तेः। ऋगतौ अस्मादतिः स्या त्स च नित्। तृहेः। तृह हिंसायाम् क्नस्य कित्वाद्गुणाभावः। वृञ्। वृञ् वरणे लुट विलोडने ननु विस्तारे तड आघाते चुरादिः। राभ्यउलच् स्यात्। तण्डादेशश्च धातोः। यद्यपि सान सिपर्णसीति सूत्रे तण्डुलशब्दो निपातितस्तथापि प्रत्ययस्वरेण मध्योदात्तः सः अयं तु चित्स्वरेणान्तोदात्त इति विवेकः। दंसेः। दसि दंशन दर्श नयोः। अस्माद्टटनौ स्यातां नकारस्याकारश्च टनोन कारस्माद्युदात्तार्थः। दासः। शूद्रे दानपात्रे भृत्य धीवरयोरपीति विश्वः। दंशेः। दंश दशने अस्मादपि टटनौ स्तो न। ॥ कारस्य चात्वं स्यात् कैवर्ते दासधीवरावित्यमरः। उदि। चित्र चयने डै सो डित्वाट्टिलोपः॥ ॥

528

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौरमक्रीडायाम्· पूतः पूत पवने पुत्यं मनोज्ञेः प्रिहितं· तथा सुकृतं· धर्मयोरिति विश्वः स्रंसेः स्रंसु अधःपतने क्तिः सन्नुगुणाभावार्थम्· अर्तेः मृगतावसात्कुप्रत्ययः स्याद्ध
नोहत्वं च रपरत्वं पुंवोरनाको· मेढ्रोरभोरण्णोरण्यो वृषणपूर्णपर्यण्डक इत्यमरः हिंसेः हिसि हिंसायाम्· उदिद्दविदारणे डित्वनेः खनु अवदारणे· असाद्रुजलोपः मुखं नि
सरणेव क्रमारम्भोपाययोरपि सन्ध्यन्तरे नाटकादेः शब्देपि च नपुंसकमिति मेदिनी· अमेः अम गतौ· स्कन्धो भुजशिरोंसोस्त्री इत्यमरः अंसः स्कन्धे विभागे चेति दन्त्यान्तो वि
श्वः मुहेः मुह वैचित्ये स्मान्तः प्रत्ययो धातोर्मूर्धन्यश्च स्वान्तो निमूर्खः अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः इत्यमरः नहेः णह बन्धने असात्खः नखः कररुहे पुंवत् ढग

सौत्रमेः क्तो दमेपूर्वपदस्य च दीर्घः रमेः सुपूर्वो दमेवा च्यन्तः स्यात् क्तित्वादनुनासिकलोपः सूतेरुपशान्तो दयालुश्च पूत्रो यण् कुरुत्वश्च
यप्रत्ययः पुत्यम् स्रंसेः शिकु इकिच्च स्रंसतेः शिरादेशः यत्प्रत्ययः क्तिन्नस्य कुडागमश्च शिक्वं अर्तेः क्वुरुच्च उरणो मेषः हिंसेर्गीरन्नी
रचौ हिंसीरो व्याघ्रदुष्टयोः उदिदृणातेरजलोपूर्वपदान्त्यलोपश्च उदरमडित् खनेर्मु इस्वो दात्तः अच अल च डित्स्याद्धातोर्मुरुस्वो दात्तः मु
खं अमेः सन् अंसः मुहेः खो मूर्च मूर्खः नहेर्हो लोपश्च नखः शीङ् हूस्वश्च शिखा माङ् ऊखो मयच्च मयूखः कलिगलिभ्यां फगस्योच्च कुल
फः शरीरावयवो रोगश्च गुलफः पादग्रन्थिः स्पृशेः श्वण् शुनौ पृच श्वण् शुनौ प्रत्ययौ पृ इत्यादेशः पार्श्वः स्त्री कक्षयोरधः पर्शुरायुधं श्म
निश्रयते इन् श्मन् शब्दो मुखवाची मुखमाश्रयतः इति श्मश्रु॥ ॥ ९ श्चद्वयेन खं नखी इति विश्वः नखी स्त्री क्लीवयोः शुक्तौ नखरे पुन्न
पुंसकमिति मेदिनी· शीङ् शीङ् स्वमेः स्मान्वः स्यात् धातोर्ह्रस्वश्च ह्रस्वविधानसामर्थ्यान्न गुणाभावः शिखा श्यास्ताव र्हि चूडा लाङ्गलि धूमाग्रके चूडामात्रे शिफायां ज्वाला
यां प्रपदेपि चेति मेदिनी· माङ् माने· मयूखस्त्विट्कर ज्वाला स्विन्त्यमरः कलिंकलशब्दस्य स्थानयोः गल अदने· आभ्यां फक् स्यात् धातोरकारस्योत्वं च गुल्फ इति तद्द्वं
यौ घुटिके गुल्फाविन्त्यमरः तयोः पादयोर्ग्रन्थी इत्यर्थः स्पृशः संस्पर्शो पार्श्वकक्षाधरे वक्रोपान्तपर्शुगतेपि चेति विश्वमेदिन्यौ· श्मनि श्रिञ् सेवायाम स्मात् श्मन्सुपपदे डु
स्यात् डित्वाट्टिलोपः तद्द्वौ श्मश्रु पुं मुख इत्यमरः पुरुषस्य मुखे तेषां रोम्णां द्वैश्मश्रु शब्दो वर्तत इत्यर्थः॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अश्वादयः अशूव्याप्तावस्मात् हनप्रत्ययो नन्पूर्वात् श्रयतेर्डुन् वयन् ज्वल इत्ते नो नं अश्नोतेर्डुन् हुट् चेति नन् इत्युक्तम् डित्वादृिलोपे सति धातोरश्रवणप्रसङ्गात् नच टिलोपाभावो निपात्यत इति वाच्यम् तथा सति डित्वस्य सुलस्य निष्फलत्वापत्तेरिति दिक् जनेः जनी प्रादुर्भावे अस्मादच्प्रत्ययः स्यात् धातोरन्त्यलोपश्च जटा लग्नकचे मूले मांस्यां प्रससेपुनर्जटी इति मेदिनी जंघेति जनेरच् प्रत्यये सति अजाद्यत इति टाप् हन्तेः देहावयवे वाच्ये हन्तेरच्प्रत्ययः स्यात् द्विर्वचं धातोः अभ्यासकार्यं अभ्यासाच्चेति कुत्वम् अमरोक्तिमाह पश्चान्नितम्ब इति जघनं च स्त्रियाः श्रोणिपुरोभागे कटावपीति मेदिनी क्लिशेः क्लिश्भू विबाधने इस्मादन्स्यात् केशः स्यात्तुंसि वरुणे ह्री वेरकुले लेपि चेति मेदिनी फलेः फलनिष्पत्तौ पलितं जरसा शौक्ल्यमित्यमरः पलितं शैलजे तापे केशपाके च कर्दमे इति मेदिनी कृञादिभ्यः वुन् कृञ् करकः कमण्डलुः करका

अश्वादयश्च अश्रु नयनजलम् जनेष्टन् लोपश्च जटा अचूतस्य जङ्घ च नस्य जनेः जंघादेशः स्याद्रच्च जङ्घा हन्तेः शरीरावयवे द्वे च जघनं पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनम् पुरः क्लिशेरन् लो लोपश्च लकारस्य लोपः केशः फलेरितजादेश्च पः पलितम् कृञादिभ्यः संज्ञायां वुन् करकः करका कटकः नरकम् नरकः नारकोपि चेति द्विरूपकोशः सरकं गगनं कोरकः कोरकञ्च चीकपतेराद्यन्तविपर्ययश्च कीचकोवंशभेदः पचिमच्यो रिच्चोपधायाः पेचकः मेचकः॥ ऐ

कृष्टिपाषाणः कटेवर्णावरणयोः कटको वलये सानौ कुनग्निल्पिसंज्ञयोरिति कुनाथ्यर्यं सिद्धस्य या चगुणभाजरहेवतु नि उदहार्याः गुणनिषेधभाजस्तु कुनि उदासीनास्तु यत्र कुत्र चिदिति भावः नृनयेः स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियामित्यमरः नरकः पुंसि निरये दैत्यान्तिप्रभेदयोरिति मेदिनी उदयना चार्यास्तु न च नरकान्येव सन्तीति क्लीवं प्रयुञ्जते तन्निर्मूलमित्याहुः सृगतो सरकः शीधुपात्रे शीधुपाने सुरा शीधुनोरिति मेदिनी कुशब्दे कोरकोः क्लीकु ... स्तलेस्मात्कोलकमृणालयोरिति मेदिनी विचकार कोरका नीतिमाघः कोरकः पुमानित्यमरोक्तिस्तु नादर्तव्येत्याहुः अपचरकादयोपि इहैव बोध्याः चीकयतेः चिक आमन्त्रितो चीकचतुरादिः अस्याद्यन्तविपर्ययः पचिमच्योरित्वं चानुपदं वक्ष्यमाणं बाहुलकबलं लभ्यम्बोध्यम् कीचको इत्यभिहानाहतसस्वनवंशयोरिति मेदिनी डुपच॰।

CC-0. In Public Domain. Digitization by eGangotri

बपाके उलूके करिणः पुच्छमूलोपान्ते च पेचकः इत्यमरः पेचको गजलाङ्गूलमूलोपान्ते च कौशिक इति मेदिनी मचमुचि कल्कने मेचकस्तु मयूरस्य चन्द्रके श्यामले पुमान् त
युक्ते वाच्यवत् क्लीबं स्रोतोञ्जनान्धकारयोरिति मेदिनी ॥ ॐ ॥ जनेः जन जनने जनी प्रादुर्भावे वा जठरः कठिनेपि स्यादित्यमरः जठरो ना स्त्रियां कुक्षौ बद्धकर्कशयोः त्रि
ष्विति मेदिनी वचि व चपरिभाषणे मन ज्ञाने आभ्यामरप्रत्ययः स्यात्स च चित् ठश्चान्तादेशः वठरः कुक्कुटे वंटे शाठे चेति मेदिनी ऊर्जि दृ विदारणे स्माद्दूर्ज्युपपदे अलचौ
प्रत्ययौ स्तः कृदरादयश्च कृसमृप्तरव्ययपूर्वकदल्लाति प्रकृतिकालजन्तानियान्यन्ते हंतेः हन हिंसागत्योः क्रमि क्रमु पादविक्षेपे गम्लृ गतौ समूवसंहने एभ्यस्तु

जनेररष्ठ च जठरं वचिमनिभ्यां चिच्च वठरो मूर्खः मठरो मुनिशौण्डयोः विदादित्वान्माठरः गर्गादित्वान्माठर्य्यः उर्ज्जि दृणातेरलचौ पूर्वपदा
न्त्यलोपश्च ऊर्दरः शूरः राक्षसः कृदरादयश्च कृदरः कुशूलः मृदरम् विलं सृदरः सर्प्पः हन्तेर्युन्नाघत्वयो घत्वतत्वे घातनो मारकः क्रमिग
मिक्षमिभ्यस्तुन् वृद्धिश्च क्रान्तुः पक्षी गान्तुः पथिकः क्षान्तुर्म्मण्डूकः हर्य्यतेः कन्यन् हिरच् कन्यन् प्रत्ययः हिरण्यं कृञः पासः कर्प्पासः ।
विल्वादित्वात्कार्प्पासं वस्त्रं जनेरुसुरश्च जर्तुः हस्ती योनिश्च ऊर्णोतेर्डः उर्णा रधातेर्यत् नुड् च धान्यं जीर्य्यतेः क्विन् रश्च वः जिव्रिः स्यात्कालप
क्षिलोः बाहुलकाद्बलि चेति दीर्घो न मव्यतेर्य्यलोपो मश्चापतुड्वालः मव्यतेरालप्रत्ययः स्यात्तस्यापतुडागमो धातोर्यलोपो मकारश्चान्तस्य म
मापतालो विषये ज्ञाजेः कीकन् ज्ञाजीक इन्द्रो धूमश्च ॥ १९

न्यादेशो वृद्धिश्च हर्यतेः हर्य गतिकान्त्योः हिरण्यं रेतसि द्रव्ये प्राज्ञकुम्भवराटयोः अक्षये मा
नभेदे स्यादकुप्ये च नपुंसकमिति मेदिनी कृञ् डुकृञ् करणे जनेः जुरुस विभक्तिकं जनेरुसुप्रत्ययोरेफश्चान्तादेशः स्यात् ऊर्णोतेः ऊर्णुञ् आच्छादने स्मात् डः स्यात् डि
त्वाट्टिलोपः टाप् ऊर्णा मेषादिलोम्नि स्यादावर्ते चान्तरा भ्रुवोरित्यमरः भ्रुवोर्मध्ये य आवर्त्तस्तत्रेत्यर्थः अन्तरान्तरेणेति द्वितीया रधातेः डुधाञ् धारणपोषणयोः अस्मात् यत् प्रत्ययः
स्यात्तस्य नुडागमश्च धान्यं व्रीहिषु धान्याके इति मेदिनी जीर्यतेः जॄ वयोहानौ अस्मात् क्विन् स्यात् ऋत इद्धातोः रपरत्वम् रेफस्य वकारादेशः मव्यतेः ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृ॰

सि॰कौ॰ मव्यबन्धने । अन्त्यस्येति । वकारस्येत्यर्थः । ऋजेः ऋजगतौ ॥ ॥ तनोतेः तनु विस्तारे । स्मात् । डउः प्रत्ययस्य सन्वद्भावात् । द्वित्वमभ्यासस्येत्वं च । डित्वाट्टिलोपः । पृथग्व्याकरणात्
टी॰त॰ मर्ष्याद्युल्लोन तितउः चालिनी सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत तितउः परिपवनं भवतीति । यास्कस्तथा भाष्यम् । चालिनी तितउः पुमानित्यमरः । चाल
२२७ नंमितउन्युक्तमिति कोशान्तरम् । स्याद्वा स्नुहिङ्गुतितउ इति पुन्नपुंसकवर्गे त्रिकाण्डशेषः । ऋभर्क । एते निपात्यन्ते निपातनेन प्रकारमेवाह । ऋधु वृद्धावित्यादि । प्रथेरिति । प्रथ
प्रख्याने । पापाने पिबतिस्तनादिकमिति पाकः । पोतः पाको ऽर्भको डिम्भः पृथुकः शावकः शिशुरित्यमरः । अर्भकः कथितो बाले मूर्खेपि च कृशेपि च । पृथुकः पुंसि चिपिटे
शिशौ स्यादभिधेयवत् पाकः परिणतौ शिशौ के शस्यजरसा शौल्पे स्यात्स्याद्दोपचनेपि चेति मेदिनी । अवद्य एते कुत्सिते निपात्यन्ते । वरवक्तायाम्वाचि अवरसणादौ

तनोतेर्डउः सन्वच्चेति तउः पुंसि स्त्रीवेच अर्भकपृथुकपाकावयसि ऋधु वृद्धौ अनोवुन् भकारश्चान्तादेशः प्रथेः कुक् सम्प्रसारणं च पिबतेः कन् अ
वद्यावमाधमार्वरेफाः कुत्सिते वदेर्न्नभियत् अवपूर्वस्य अवतेरमः वस्य पक्षे धः अवमः अधमः अर्तेर्वन् अर्वा रिफतेर्लोरादिकादेः रेफः लीरीङोर्ह्रस्वः पुड्
तरौ श्लेषणे कुत्सनयोः तरोः प्रत्ययोः क्रमात् लोधातोर्ह्रस्वः प्रत्ययस्य पुट् लिमश्लिष्टं रिप्रं कुत्सितं क्लिशेरीच्चोपधायाः कन् लोपश्च लो नाम् च क्लिशेः क
न् स्यात् उपधाया ईत्वं लस्य लोपो नामागमश्च कीनाशः यमः किल फलं क्विन्नम् अश्नोतेराशुकर्मणि वरड् चकारादुपधाया ईत्वम् ॥ ॥

ऋगतौ रिफ कत्थनयुद्धनिन्दाहिंसादानेषु निरूपप्रतिरूपा वै रेफयाप्यावमाधमा इत्यमरः । कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समा इति च अधमः स्यान्न्यूने गर्ह्ये ऊनेपीति मेदिनी । अ
र्वा तुरङ्गमे पुंसि कुत्सिते वाच्यलिङ्गकः रेफो रवर्णे पुंसि स्यात्कुत्सिते पुनरन्यवदिति च मेदिनी । लीङ् रीङ् लीङ् श्लेषणे रीङ् श्रवणे क्रमादिति । श्रेयलोवाच्येतत्प्रत्ययः कुत्सिते
वाच्य इत्यर्थः । लिप्तं विषाक्तेऽभुक्ते च वाच्यवत्स्याद्दिलेपिनेरिति विश्वः । क्लिशेः क्लिशूविबाधने नामागमश्च प्रत्ययस्येति शेषः । क्विन्नामिति । ईत्वविधानसामर्थ्यादेव राम॰
गुणाभावसिद्धिरिति भावः । कीनाशः कर्षकः क्षुद्रोपांशुधूलिषु वाच्यवत् । यमेनाट इति मेदिनी । अश्नोतेः अश्नूव्याप्तौ । अस्माद्वरट् स्यात् । आशुकर्मवरदानादिक्रियायस्मात् २२७

530

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ईश्वर इति· स्त्रियामनुदित्वान्ङीप् ईश्वरी मन्मथस्वरेण मध्योदात्तार्ईशेः वनिपिवनोरचेति ङीब्भयोस्तु धातुस्वरेणाद्युदात्ता· पुंयोगलक्षणो ङीषि अन्तोदात्ता· स्वेशाभासपियमकसं इति वरचित
दन्ताद्यपि ईश्वरेति विवेकः ईश्वरो मन्मथे शम्भौ नाथे स्वामिनि वाच्यवत् ईश्वरी चेश्वरो मायामिनि मेदिनी· ईश्वरा उमायामिति हैमः ईश्वरः शंकरे धीशो नसल्यामीश्वरीश्वरा
इति वोपालितः विन्यस्तमङ्गलमहौषधिरीश्वराया इति भारविः दशपाद्यानुसूत्रान्तरमपि· हन्तेरन्नुध च· हनहिंसागत्योरस्मादन्प्रत्ययः स्यात्· घश्चान्तादेशः हन्यतेग
म्यते ऽनिधिभिरिति घरः गृहम्· चतेः चतेयाचने ऽस्मादुरन्स्याद्दकार उच्चारणार्थः चतुरनडुहोरामुदात्त इत्याम्· प्राततेः अतसातत्यगमने प्रपूर्वादस्मादरन्स्या
त् रेफाद्दकार उच्चारणार्थः स्वरादिपाठादव्ययत्वम्· अमेः अमगतिसम्भक्तिषु अस्मादरन्स्यात्तस्य तु डागमश्च· अन्तः शब्दोऽपि प्रातः शब्दवत् अव्ययम् दहेः दहभस्मी

ईश्वरः। चतेरुरन्॥ चत्वारः। प्राततेररन्॥ प्रातः। अमेस्तुट्॥ अन्तर्मध्यम। दहेर्गोलोपो दश्च नः। गम्यत्ययोः धातोरन्त्यस्य लोपो दकारस्य नकारः
नगः। सिचेः संज्ञायां हनुमौ कश्च। सिञ्चतेः कप्रत्ययो हकारादेशो नुम् चस्यात्। सिंहः। व्याङि घ्रातेश्च जातौ। कप्रत्ययः स्यात्। व्याघ्रः। हन्तेरच् घु
र च॥ घोरम्॥ क्षमेरुपधालोपश्च॥ चाद्रच्। क्ष्मा। नरतेर्ड्रिः। त्रयः। त्रीन्। ग्रहेरनिः। ग्रहणिः। ङीष्। ग्रहणी व्याधिभेदः॥ प्रथेरमच्। प्रथमं

करणे· नगो महीरुहे शैले भास्करे पवनाशने इति मेदिनी· सिचेः षिचक्षरणे· हकारादेश इति· धातोरन्त्यस्येत्यर्थः सिंहः कण्ठीरवे राशौ सत्तमे चोत्तरस्थितः सिंही क्षुद्र
हहन्योः स्याद्रासके राहुमातरीति विश्वः व्याङि· घ्रा गन्धोपादाने ऽस्माज्जातौ वाच्यायां कः स्यात् किस्वादातो लोपः व्याघ्रः स्यात् पुंसि शार्दूले रक्तैरण्डकरञ्जयोः श्रेष्ठे नरादुत्तर
स्थः कण्टकार्यां व्याघ्रीति मेदिनी हन्तेः हन्तेरच्स्यात् धातोर्घुरादेशश्च घोरं भीमे हरे इति विश्वः क्षमेः क्षमूष् सहने क्ष्मावनिर्मेदिनी मही त्यमरः नरतेः तॄप्लवनतरणयोर
स्मात्ड्रिः स्यात् ड्रित्वाट्टिलोपः ग्रहेः ग्रह उपादाने औणादिकत्वात् हृदिकारादित्यनेन न ग्रहिणी रुक् प्रवाहिकेत्यमरः प्रथेः प्रथ प्रख्याने प्रथमस्तु भवेदाद्ये प्रधानेऽपि च वाच्यवदिति
मेदिनी· प्रथमचरमेति वैकल्पिकसर्वनामत्वात् जसः शीभावः प्रथमे प्रथमाः॥ ॥

सि॰ कौ॰ टी॰ त॰ पूर्व

चरेश्च चरणाति भुखलयोरस्मादमच्स्यात्. चरमे चरमाः योगविभागश्चिन्त्यप्रयोजनः प्रथिचरिभ्यामित्येव सुवचम्. मङ्गेः उरवउरवीत्यादिदण्डके गत्यर्थको मगिः पठ्यते कल्या णं मङ्गलं शुभं मङ्गलो ग्रहभेदः मङ्गला सितदूर्वायामुमायां पुंसि भूमिजे नपुंसकं तु कल्याणे सर्वार्थेरक्षणेऽपि चेति मेदिनी. भावेऽप्यत्रि माङ्गल्यम्. तत्र साधुरिति यत् मङ्गल्यः स्यात्त्रायमाणाश्वत्थविल्वमसूरके स्त्रियां द्वाभ्यामधःपुष्प्यामिति सिन्धुलावसासु चरोचनायामथो दधिस्त्रीवं शिवकरे त्रिषु इति मेदिनी॥ ❁ ॥ इत्युणादिषु पञ्चमः पादः॥ उणादिप्रत्ययाः सन्निपादोत्तरशतत्रयम्. तेषां विवेचनं त्वत्र ज्ञानेन्द्रस्वामिभिः कृतम् १ प्राचा तु कतिपयानामेवोणादीनामुपन्यासः कृतो न तु सर्वेषां सोऽप्युपन्यासोऽनेकप्रघट्टकतया कृतः किं तु विच्छिद्येति स्पष्टम्. तत्रापि केचित्समादाम नोरमायां प्रदर्शितास्तेष्वेव कांश्चित्समादाय दर्शयामः प्रजोऽखिविरितिखिप्रकरणे छन्दसि सहः व हश्चेत्युपन्यस्य परोक्षजेऽपः पदान्त इति णिवसनेनेवकः परिज्ञाडिस्यं हि प्राचो ग्रन्थस्य व्याख्यायां तस्योत्तरेण पञ्चपादाद्युणादिसूत्रे दर्शयिष्यते. इत्युक्तं तदुभयमपि प्रामा

चरेश्च। चरमः। मङ्गेरलच्। मङ्गलं। इत्युणादौ पञ्चमः पादः। उणादयो बहुलम्। ३।३।१॥ एते वर्तमाने संज्ञायां च बहुलं स्युः। केचिदवि
हिता अप्यूह्याः॥ संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे। कार्य्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु॥ ॥ ॥

दिकमः. किं च चीतिक्किवृद्दीर्घौ हि प्रकम्प्यपरोक्षजेरिति सूत्रस्य पाठात् अस्मिन्नंशे पञ्चपादीदशपाद्योरेकवाक्यत्वात्. यदपि धनर्तिचक्षिङ् वपितपिजनियजेहसर स इति पठितं तदप्यनाकरम्. तथाहि जनेहसिः अर्तिपृवपियजितनिधनितपिभ्यो नित्. एवेलिश्च चक्षेः शिच्चेति सर्वसम्मतः पाठः तपुषित सैव पुषो वपुष्टरमित्यादिमन्त्रे षु आद्युदात्ततया अनुकूलश्च वेदभाष्ये एवमेव स्थितम्. इत्यादयो द्वितीयपादे प्रमादाः तृतीयपादेऽपि सनिदृषिपूषिगादिलहिभ्यो लोरित्युचितिप्राचापठितं तत्र दूषीलदेशो षामपि दृष्टिकृतां ग्रन्थे न पठितो. दूवयित्नुः स्तनयित्नुरिति प्रयोगोऽपि आकरे न दृष्टः स्तनिहृषिपुषिगदिमदिभ्य इति हि पञ्चपादीपाठः घुषिगन्धिमण्डिजनिनमिभ्यश्च इति दशपाद्यामधिकं पठितमित्यन्यदेतत्. यदपि शृदक्षिसृहिगृहिभृञ्भ्य आप्य इति पठित्वा दराप्यः जराप्य इति प्राचोक्तं तदपि न हृञ्ग्रहणस्याकरानारूढत्वात्. इत्यादय स्तृतीयपादे प्रमादाः॥ यदपि कृगृशृजागृभ्यः क्विन्. कीर्विः गीर्विः शीर्विरिति प्राचा॥

531

दाम॰ २५

चोक्तं तदपि लिपिभ्रमयुक्तमेव· कृ विक्षेपे गॄ निगरणे स्तृञ् आच्छादने इति प्राचो ग्रन्थस्थितिवृत्तवनामुक्तिरपि मूलाशुद्धैवा शुद्धा जॄ शॄ स्तॄ जागृभ्यः क्विन्निति हि पाठः उणादि
वृत्तिकृतां माधवादीनां च सम्मतः जीर्विः पशुः शीर्विर्हिंस्रः स्तीर्विरध्वर्युरिति तद्व्याख्यापि पूर्वपादितं· स्तॄ इत्यस्य दीर्घान्तत्वएव हि ऋत इद्धातोरितीत्त्वं लभ्यते न तु ह्रस्वान्तत्वेपि तस्मा
द्धयाकरमेव हि गृहीतुमुचितमित्यादिक्· यदपि प्राचोक्तं ग्लाज्याहात्वरिभ्यो निरिति तदप्यनाकरम्· आकरे हि वीज्याज्वरिभ्यो निरिति पठित्वा सूत्रद्वयानन्तरम्व हि श्रीति
सूत्रे ग्लाहात्वरिभ्यो निरिति सूत्रितत्वात्· तूर्णिः रथः सदानवरत्यादावाशुदाने दर्शनाच्च· न च स्त्रियां क्तिन्नित्यधिकारस्थं वार्तिकमेवेदं प्राचोदाहृतं न तूणादिसूत्रस्थ
मिति वाच्यमेवमपि त्वरतेः पाठस्यानुचितत्वात्· नत्वसौ वार्तिकेऽस्तीत्यादिक्· एवं संस्त्यानेस्त्यायतेर्ड्ट्रविति प्राचोदाहरणमनाकरम्· स्त्यातेर्ड्डित्येव सूत्रस्याकरे पञ्च
पाद्यादशपाद्यश्चोपलम्भात्· संस्त्याने स्त्यायतेर्ड्ट्र स्त्री सूतेः सप्पसवे पुमानिति भाष्ये श्लोकपाठे न तु सूत्रे पाठो न तु सूत्रपाठस्य तथात्वं दृश्यते· एवं तद्ग्रन्थव्याख्यातृणामपि
प्रमादा उन्नेयाः तद्यथा पाणिन्यादिमुनीनिति व्याचक्षाणैरुक्तमनेरुश्चोपधाया इति न त्वेवंविधं सूत्रं पञ्चपाद्यां दशपाद्यां वास्ति अत इत्यनुवर्तमाने मनेरुच्चेत्येव सूत्रितत्वादि
त्यादिक्· इति चतुर्थपादे प्राचः प्रमादाः ॥ ❀ ॥ उणादयो बहुलम् ॥ ❀ ॥ वर्तमाने लडित्यतो वर्तमानग्रहणं पुंवः संज्ञायामित्यतः संज्ञाग्रहणं चानुवर्तते तदाह· ए
ते इति· अत्र हि सूत्रे धातोः प्रत्ययः कृदतिङिति चानुवर्तते· तेन कृवापाजिमीत्यादिना विहितानामष्टाध्यायीबहिर्भूतानामप्युणादीनां प्रत्ययसंज्ञा कृत्संज्ञा च सिध्यति· तथा
चोणादिप्रत्ययाः सर्वे धातोः परत्र कर्तरि कृदिति· कर्त्रर्थे भवन्ति· उणादिप्रत्ययान्तस्य कृत्तद्धितेति प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिरित्यादि सर्वमपीष्टं सिध्यति· अपरिपूर्णता
मुणादीनां परिपूर्णार्थं बहुलग्रहणं तस्य फलमाह· केचिदविहिता अपीति· हलते हलजिवि हितः स तु शंकेरपि भवति· शंकुलेति· प्रयोगदर्शनात् किञ्च फिड फिड्डु प्रत्ययौ कुत्रापि
न विहितौ अतैरुक्तं ऋफिडः ऋफिड्डुः इति तयोः किलञ्च कल्प्यते· तथा च एव इत्यत्र सत्वाभावश्चेत्यादिः संज्ञास्विति· अनादिसंज्ञास्वेव न तु सर्वास्वित्याहुः हृषेरुलजिति प्रत्य
यं दृष्ट्वा शंकिः प्रकृतिरूह्यते तेन शंकुलेति सिद्धम्· ऋगतावित्यादिभ्यः फिडफिड्डादिप्रत्यया ऊह्यन्ते· कार्याद्विद्यादिति· ऋफिड इत्यादौ गुणप्रतिषेधादिकार्यानुरोधादनुबन्ध
ककारादिकं विद्यात्· अनुबन्धमित्यत्रोपसर्गस्य घञीति दीर्घः एतदुणादिषु शास्त्रं शासितव्यमित्यर्थः ॥

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ भूतेऽपि दृश्यन्ते· नन्वेवं वर्तमानग्रहणं त्यज्यतां उणादयो बहुलमित्यत्रानुवर्त्यताम्· एतच्चोत्तरसूत्रञ्च त्यज्यताम्· अविशेषेण कालत्रयेपि प्रत्ययलाभादिति चेत्त्राहुः बाहुल्येन वर्तमाने भवन्ति·
टी·त· भूतभविष्यतोस्तु क्वचिदेवेति विवेकप्रदर्शनायेदमिति भविष्यति गम्यादय इति· गमिष्यतीति गमी ग्रामं· आगमिष्यतीति· आगामी गमेरिनि· आङि णिदित्याङ्· पूर्वस्य णित्वाद्
२३६ पधावृद्धिः भीमो भीष्म इति· भियो हेतुभये षुगिति मक्प्रत्ययसन्नियोगेन वैकल्पिकः षुक् प्रस्कन्दन्त्यस्मादिति प्रस्कन्दनः अपादने ल्युट् प्रपतन्त्यस्मादिति प्रपतः पचाद्यच्· मुह्यत्य
स्मादिति मूर्खः मुहेः खो मूर्च्छ स्खलत्यस्मादिति खलतिर्निपात्यते शषिपार इति प्रागुक्तम्· ताभ्यामिनीति· ताभ्यामित्यनुक्तौ तु सन्निहितापादानस्यैव परामर्शः स्यात् दानादन्यत्रेत्यर्थः स्यादि
तिभावः ततोसौ विततनोतेः कर्त्तरि क्तः अनुदात्तोपदेशेत्यनुनासिकलोपः असौ ततो भवति विस्तृतो भवतीत्यर्थः ततो ते तुन्· हन्तुमिति· गमनादिना निष्पन्नं यत्तदुत्तरं हन्तेः कर्म

भूतेऽपि दृश्यन्ते॥ ३।३।२॥ भविष्यति गम्यादयः॥ ३।३।३॥ दाशगोघ्नौ सम्प्रदाने॥ ३।४।७३॥ एतौ सम्प्रदाने कारके निपात्येते दाशन्ति तस्मै दाशः गां
हन्ति तस्मै गोघ्नोऽतिथिः॥ भीमादयोऽपादाने॥ ३।४।७४॥ भीमः॥ भीष्मः॥ प्रस्कन्दनः॥ प्रपतः॥ मूर्खः॥ खलतिः॥ ताभ्यामन्यत्रोणादयः॥ ३।४।७५॥ सम्प्रदा
नपरामर्शार्थं ताभ्यामिति॥ ततोऽसौ भवति तन्तुः॥ वृत्तं तदिति वर्त्म॥ चरितं तदिति चर्म॥ तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्॥ ३।३।१०॥ क्रिया
र्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोरेतौ स्तः॥ मान्तत्वादव्ययत्वम्॥ कृष्णं द्रष्टुं याति॥ कृष्णं दर्शको याति॥ अत्र वासरूपेण तृजादयो न तु

णिमनिन्· अयनं वर्त्म मार्ग इत्यमरः· तुमुन्ण्वुलौ· क्रियार्थः प्रयोजनं यस्याः सा क्रियार्था तस्यां· अत्रेदम्बोध्यम्· तुमुन्ण्वुलौ क्त्वाविशेषेपि· अव्ययकृतो भाव इति
वचनाद्भावे तुमुन्· ण्वुल् तु कर्त्तरि· क्रियायामिति निर्देशान्न ह्याचकसयातोऽन्यारेत्यत्रोपपदं सप्तमीस्थमित्युपपदत्वमिति· कृष्णं द्रष्टुमिति· कृष्णकर्मकं यद्भविष्यद्दर्शनं तत्प्र
योजकं यानमित्यर्थः कृष्णं दर्शक इति· कृष्णकर्मकभविष्यद्दर्शनकर्तृकर्तृकं दर्शनप्रयोजकं च यानमित्यर्थः क्रियायां किम्· भिक्षिष्य इत्यस्य जटाः इह भिक्षार्था जटाः राम
नाश्चद्वयं न तु क्रिया भिक्षितुं जटा इति प्रयोगस्तु धारयतीत्यध्याहारेण समर्थनीयः क्रियार्थायां किम्· धावतस्ते पतिष्यति· दण्डः अस्यत्र धावन इति क्रियानत्वसौ दण्ड २३६
पातनार्था धावनं तु दण्डपतने हेतुर्भवति न तु देश्यमिति दिक्॥

532

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

समानकर्तृकेषु अक्रियार्थेति · भोक्तुमिच्छतीत्यत्र भोजनविषयिणी इच्छेति प्रतीयते न तु भोजनार्थेच्छेति · अतः पूर्वेणाप्राप्तिरिति भावः · सूत्रस्थसमानशब्द एकतावचन इत्याह · एककर्तृकेष्विति · एकेति किम् · पुत्रस्य पठनमिच्छति · पुत्रस्येति कर्तरि षष्ठी · पुत्रकर्तृकं पठनमित्यर्थः · इह सूत्रे समानकर्तृकेति पदाभावे पुत्रस्य पठितुमिच्छतीति प्रयोगः स्यात् · देवदत्तस्य ज्ञानमिच्छतीति काशिका · अत्र काशिकायामुक्तम् · इच्छन्करोतीत्यत्रानभिधानान्नेति · अत्र निष्कर्षमाहुः उक्तविषये इच्छन्कर्तुमिति प्रयोगाभावेपि ·

समानकर्तृकेषु तुमुन्। ३।३।१५८। अक्रियार्थोपपदार्थमेतत्। इच्छार्थेष्वेककर्तृकेषूपपदेषु धातोस्तुमुन् स्यात्। इच्छति भोक्तुम्। वष्टि वाञ्छ-
ति वा। शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन्। ३।४।६५। एषूपपदेषु धातोस्तुमुन् स्यात्। शक्नोति भोक्तुम्। एवं धृष्णोतीत्यादौ।
अर्थग्रहणमस्तिनैव सम्बध्यते अनन्तरत्वात्। अस्ति भवति विद्यते वा भोक्तुम्। पर्याप्तिवचनेष्वलमर्थेषु। ३।४।६६। पर्याप्तिः पूर्णता तद्वा-
चिषु सामर्थ्यवचनेषूपपदेषु तुमुन् स्यात्। पर्याप्तो भोक्तुं प्रवीणः कुशलः पटुरित्यादि पर्याप्तिवचनेषु किम्। अलं भुक्त्वा। अलमर्थेषु किम्। प-
र्याप्तम्भुङ्क्ते प्रभूतं तेन हि गम्यते न तु भोक्तुः सामर्थ्यम्। कालसमयवेलासु तुमुन्। ३।३।१६७॥ पर्यायोपादानमर्थोपलक्षणार्थम्। कालार्थेषूपपदेषु तु-
मुन् स्यात्। कालः समयो वेला अनेहा वा भोक्तुम्। प्रैषादिग्रहणमिहानुवर्तते तेन नेह भूतानि कालः पचतीति वार्ता। भाववचनाश्च। ३।३।११।
भाव इत्यधिकृत्य वक्ष्यमाणा घञादयः क्रियार्थायां क्रियायाम्भविष्यति स्युः। यागाय याति। अण् कर्म्मणि च। ३।३।१२। कर्म्मण्युपपदे
क्रियार्थायां क्रियायामण् स्यात्। ण्वुलोऽपवादः। काण्डलावो व्रजति। परत्वादयं कादीन्बाधते। कम्बलदायो व्रजति॥ ॥ ॥

इच्छन्कर्तुं गच्छतीत्यादौ तु तुमुन्ण्वुलाविति सूत्रेण स्यादिति न क्षतिः। इत्थं च इच्छन्करोतीत्यर्थे तुमुनः प्राप्तेरेवाभावात् तस्य भावार्थकत्वात्· इह चलदाकर्तृप्रतीतेः किं चेच्छन्कर्तुमिति प्रयोगो नेष्यत इति रिक्तं वचः कर्तुमिच्छन्निति प्रयोगस्य सकलसम्मतत्वात्· पदानुपूर्व्या अश्वाहरपात्रं पात्रमाहरेत्यादावविवक्षेच्छायत्तत्वात्· विस्तरस्त्विह मनोरमायामनुसन्धेयः· वष्टीति वश कान्तौ· कान्तिरिच्छेति वशधातुरपीच्छार्थकः· शकधृष अयमप्यक्रियार्थोपपदार्थः· आरम्भः· भोक्तुं शक्नोति· धृष्णोति जानाति इत्यत्र हि भुज्यर्थो विषयत्वेनास्

भोक्तुं घटते इत्यत्र तु भोक्तुमर्हतीति योग्यता आरभते भोक्तुमित्यत्र भोक्तुं प्रक्रमते उत्सहते इति भुजेरार्थावस्थाः लभते इत्यत्राप्राप्ता प्राप्ता नमस्तिभोक्तुमित्यादौ तु सम्भवमात्रं· पर्याप्तो भोक्तुमिति· भोक्तुं समर्थ इत्यर्थः उपलक्षणार्थमिति· तस्य फलमाह अनेहा इति कालो दिष्टोऽप्यनेहापीत्यमरः नेनेहनेति· अनुवादेन भवतीत्यर्थः याम्यायेति यष्टुमित्यर्थः तुमर्थाच्च भाववचनादिति चतुर्थी· एवं लोपवा इति· अव्ययकृतो भाव इति भावे विहितत्वात्तुमुनः· सामिरेव नास्तीति भावः॥ ॐ ॥ पदरुजपद्यते साविति· करणस्य कर्तृविवक्षाऽत्र बोध्या· पद्यते गच्छति येनेति फलितोऽर्थः सृ स्थिरे सर्तेरिति भ्वादेर्जुहोत्यादेश्च ग्रहणं स्थिर ग्रहणं अन्यार्थस्य कर्तुर्विशेषणं न तूपपदमिति

पदरुजविशस्पृशो घञ् ।३।३।१६। भविष्यतीति निवृत्तम्· पद्यतेऽसौ पादः· रुजतीति रोगः· विशतीति वेशः· स्पृशतीति स्पर्शः· सृ स्थिरे ।३।३।१७। सृ इति लुप्तविभक्तिकं सर्तेः स्थिरे कर्त्तरि घञ् स्यात्· सरति कालान्तरमिति सारः· व्याधिमत्स्यबलेषु चेति वाच्यं· अतीसारो व्याधिः· अन्तर्भावितण्यर्थोऽत्र सरतिः· रुधिरादिकमतिशयेन सारयतीत्यर्थः· विसारो मत्स्यः· सारो बले दृढांशे च· भावे ।३।३।१८। सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ् स्यात्· पाकः· पाको· स्फुरतिस्फुलत्योर्घञि ।६।१।४७। अनयोरेच आत्वं स्याद्घञि· स्फारः· स्फालः· उपसर्गस्य घञीति दीर्घः· परीहारः· इकः काशे· काशे उत्तरपदे इगन्तस्य प्रादेर्दीर्घः· नीकाशः· अनूकाशः· इकः किं· प्रकाशः· नोदात्तोपदेशेति न वृद्धिः· शमः· आचमादेस्तु आचामः· कामः· वामः· विश्राम इति त्वपाणिनीयं· स्यदो जवे ।६।४।२८। स्यन्देर्घञि नलोपो वृद्ध्यभावश्च निपात्यते स्यदो वेगः अन्यत्र स्यन्दः॥ ॥

घ्नन्यन्ता इति· स्थिरे कर्त्तरीति· अर्द्धर्चादित्वात्सारशब्दस्य पाठोऽत्र मानम्· व्याधीत्यादि· अस्थिरार्थमिदं वचनं तेन विसारो मत्स्य इत्यत्र विविधं संगच्छते अतीसार इति· उपसर्गस्य घञीति दीर्घः· सारो बलमिति· अत्रापि सृधातुरन्तर्भावितण्यर्थः सारयति चेष्टयतीत्यर्थोऽनुरोधात्· बलवानेव हि चेष्टते· सिद्धावस्थापन्न इति· पचतीत्यादौ तु साध्यावस्थापन्नो धात्वर्थ इति भावः आचमेति· नोदात्तेति सूत्रे अनाचमेरित्युक्तत्वादिति भावः तत्रैव सूत्रे नाचमिकमिवमीनामिति वार्त्तिकाद्वृद्धिनिषेधो नेत्याहुः कामो वाम इति· अपा णिनीयमिति· शमेरुदात्तोपदेशत्वात्· घञि वृद्धेर्दुर्लभत्वात्॥



533

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परितुष्टुर्यानि श्रामयेत्यादिवाणि चिरद्धिमाश्रित्य णिजन्तादेरच्क्रियतेन तद्रूपं सिध्यति। न च णिच्यपि वृद्धिनिषेधः शंक्यः। नोदात्तेत्यत्र कृतीत्यनुवृत्त्या णिचि निषेधा
भावात्। न चैवमपि मितां ह्रस्व इति ह्रस्वः स्यादिति शंक्यम्। वेत्यनुवर्त्य व्यवस्थितविभाषाश्रयणेन ह्रस्वाभावसिद्धेः। परन्तु णिजन्तकल्पनायामर्थाभिधानेऽपि भाव्यं वस्तुतस्तु
निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजिति विवक्षायामनुवदेद्वृद्ध्यभावध्येयम्। एवञ्च रोगी चिरप्रवासी परान्नभोजी यदावसथशायी यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्राम
इत्यादिकविप्रयोगाः साधव एवेति बोध्यम्॥ ॥ अवोदैः अवोद इति। उन्दी क्लेदने। अवपूर्वः घञि नलोपो निपात्यते। एध इति। इन्धेर्घञि नलोपो गुणश्च निपात्यते। न धातुलो
प इति निषेधात् प्राप्ते गुणे तस्य निपातनमिति ज्ञेयम्। ओद्म इति उन्देरौणादिके मन्प्रत्यये नलोपो गुणश्चापि निपात्यते। श्रन्थेरिति। प्रपूर्वस्य हिमपूर्वस्य च घञि निपात्य

अवोदैधौद्मप्रश्रथहिमश्रथाः ६।४।२९॥ अवोदः अवक्लेदनम्। एधः इन्धनम्। ओद्मः उन्दनम्। श्रन्थेर्नलोपो वृद्ध्यभावश्च। अकर्तरि च
कारके संज्ञायाम्। ३।३।१९॥ कर्तृभिन्ने कारके घञ् स्यात्। घञि च भावकरणयोः रञ्जेर्नलोपः स्यात्। रागः। अनयोः किम्। रज्यत्यस्मिन्निति रङ्गः।
प्रास्यन्ते इति प्रासः। संज्ञायामिति प्रायिकम्। को भवता लाभो लब्धः। इत उत्तरं भावे अकर्तरि च कारके इति कृत्यल्युटो बहुलमिति यावद्द्वयम
प्यनुवर्तते। परिमाणाख्यायां सर्वेभ्यः। ३।३।२०॥ घञ् अजपोर्बाधनार्थमिदम्। एकस्तण्डुलनिचायः। द्वौ शूर्पनिष्पावौ॥ (?)ते इति बोध्यम्। प्रायिकमि
ति। सर्वाणि नामसंज्ञाग्रहणत्यागे कृते तः कटइत्यत्र कारः कट इति स्यादिति भावः। भाष्ये त्वनभिधानमाश्रित्य प्रत्याख्यातम्। परिमाणाख्यायाम्। सर्वेभ्यो धातुभ्यः परिमाणं परिच्छि
त्तिः आख्यानमाख्या उक्तिः परिच्छित्तेरुक्तौ सत्यामित्यर्थः। कस्य पुनः परिच्छित्तिरिति चेत्प्रत्ययार्थस्येत्युच्यते। आख्याग्रहणं रूढिनिरासार्थं तेन परिमाणग्रहणेन संख्यात्र गृह्य
ते। सर्वेभ्यः किमन्यथा पुरस्तादपवादन्यायेनाचमेव घञ् बाधेत न त्वपम्। तण्डुलनिचाय इति। निचीयते राशीक्रियते इति निचायः। अत्र राश्येकत्वेन समुदायिनां परिच्छित्ति
रर्थाद्गम्यते। एरजित्यचि प्राप्ते घञ् निपूयते शोध्यते तुषापनयनेन यत्तण्डुलादिः स निष्पावः। ऋदोरपित्यपि प्राप्ते घञ्। शूर्पेणेति। करणे तृतीयान्तस्य कर्तृकरणे कृ
ता बहुलमिति समासः। अत्र शूर्पसंख्यया तण्डुलादेरपि परिच्छित्तिः। शूर्पद्वित्वन्तु आर्थिकं न तु शाब्दमिति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कृ
सि·कौ· व्यावृत्तं तद्धितं तु प्रायं यथा व्यत्र निरभ्योः पूल्वोरिति घञ् लभ्यते । तथापि सर्वग्रहणबलादनेनापि भवितुमर्हतीति भावः । अप्रत्ययस्य मुख्योदाहरणमाह ॥ ॥ द्वौ का
टी·त· द्वौ कारौ दारजारौ कर्त्तरि णिलुक् च दारयन्तीति दाराः जारयन्तीति जाराः इङश्च ।३।३।२१। घञ् अचोऽपवादः उपेत्य अस्मादधीयते उपाध्यायः ।
२३९ अपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा ङीष् उपाध्याया उपाध्यायी शॄ वायुवर्णनिवृतेषु शॄ इत्यविभक्तिको निर्देशः शारो वायुः करणे घञ्
शारो वर्णः चित्रीकरणमिह धात्वर्थः निश्रियते आवृयतेऽनेनेति निवृतमावरणं बाहुलकात्करणे क्तः गौरिवाकृतनीशारः प्रायेण प्रि
ष्रिरे कृषः अकृतमावरण इत्यर्थः उपसर्गे रुवः ।३।३।२२। घञ् संरावः उपसर्गे किम् रवः अभिनिसः स्तनः शब्दसंज्ञायाम् ।८।३।८६। अ
स्मात् स्तनः सस्य मूर्द्धन्यः अभिनिष्टानो वर्णः शब्दसंज्ञायां किम् अभिनिःस्तनति मृदङ्गः समि युद्रुदुवः ।३।३।२३। सम्पूयते मिश्रीक्रियतेऽनेन यु
आदिभिरिति संयावः पिष्टविकारोऽपूपविशेषः सन्द्रावः सन्दावः श्रिणीभुवोऽनुपसर्गे ।३।३।२४। श्रायः नायः भावः अनुपसर्गे किम् प्रश्र
यः प्रणयः प्रभवः कथं प्रभावो राज्ञ इति प्रकृष्टो भाव इति प्रादिसमासः कथं राज्ञो नय इति बाहुलकात् वौ क्षुश्रुवः ।३।३।२५। विक्षावः वि
श्रावः वौ किं क्षवः श्रवः अवोदोर्नियः ।३।३।२६। अवनायः अधोनयनम् उन्नायः ऊर्द्ध्वनयनं कथमुन्नयः उत्प्रेक्षेति बाहुलकात् प्रे द्रुस्तुस्रु 534
वः ।३।३।२७। प्रद्रावः प्रस्तावः प्रस्रावः प्रे इति किम् द्रवः स्तवः स्रवः निरभ्योः पूल्वोः ।३।३।२८। निष्पूयते शूर्पादिभिरिति निष्पावो धान्यवि
शेषः अभिलावः निरभ्योः किम् पवः लवः उन्न्योर्ग्रः ।३।३।२९। उद्गारः निगारः उन्न्योः किम् गरः कॄ धान्ये ।३।३।३०। कॄ इत्यस्मात् धान्यविषय राम
कादुन्न्योर्घञ् स्यात् उत्कारो निकारो धान्यस्य विक्षेप इत्यर्थः धान्ये किं भिक्षोत्कारः पुष्पनिकरः ॥ १९ । वाविति कृ विक्षेपे कर्मणि घञ् शूर्पादिना विक्षि २३९
प्तो धान्यादिराशिः कारः इह प्रकृत्याश्रयत्वेऽपवादे न तथा पर्य्यायः सर्वेभ्य इति पञ्चमीनिर्देशे न तथैवावगमात् नायं प्रकृत्याश्रयो घञ् क्तिनोऽपवादो न भवति एकानिलोच्छिनिः

उत्पूर्वकाच्छ्रयतेः कर्मणि भावे वा क्तिन् उच्छ्रीक्रतोरा श्रीकृत इत्यर्थः तदेतत्सूचयितुमुक्तम् अजपोरपवाद इति तयोरपि प्रकृत्याश्रयत्वादपवादापवादयोः समानविषयौचित्या त् स्त्रियां क्तिन् त्वयोर्याश्रय इति दिक् दारजारौ विति अकर्तरि कारके इत्यधिकारादॄदोरवित्यस्य घञपवादत्वाच्च कर्तरि घञर्थमिदं वचनम् णिलुक्चेति चान्घञ् लोपे हि सति घ ञाश्रया वृद्धिर्नस्याण्णिलोपस्य स्थानिवद्भावेन व्यवधानात् न च णिज्निमित्तैव वृद्धिरस्त्विति वाच्यम् जारशब्दे मितां ह्रस्व इति ह्रस्वापत्तेः जनी जॄषिति जॄधातोर्मित्वात् लु कि तु सति तस्य परनिमित्तत्वाभावेन क्विलुगुपधेति कौलुगस्य निषेधेन वाच्यानि वत्वाभावाज्जार इति रूपं सिध्यतीति भावः एतेन दीर्यते येन ते दाराः जीर्यते येनेति जार इत्यपास्तम्। ना भ्यामेव करणे घञ्ः स्तु किमनेन वचनेनेति केषांचिदुक्तिः परास्ता ॠदोरवित्यपवादविषये उत्सर्गस्य घञो दुर्लभत्वात् अधिकारादूर्ध्वं वा सरूपविधेरनङ्गीकारादपवा

यज्ञे समि स्तुवः ।३।३।३१। समेत्य स्तुवन्ति यस्मिन्देशे छन्दोगाः स देशः संस्तावः यज्ञे किम् संस्तवः परिचयः प्रे स्त्रोऽयज्ञे ।३।३।३२। प्रस्तार इति छेदः यज्ञे इति प्रकृतत्वात् प्रस्तारः अयज्ञे किम् बर्हिषः प्रस्तरो मुष्टिविशेषः प्रथने वावशब्दे ।३।३।३३। विपूर्वात्स्तृणातेर्घञ् स्यादशब्दविषये प्रथने पटस्य विस्तारः प्रथने किम् तृणविस्तरः अशब्दे किम् ग्रन्थविस्तरः छन्दोनाम्नि च ।३।३।३४। स्त्र इत्यनुवर्तते विष्टारः पङ्क्तिश्छन्दः। विस्तीर्यन्ते स्मिन्नक्षराणीत्यधिकरणे घञ् ततः कर्मधारयः॥ ॥ दोष्पचकरणाधिकरणयोरिति ल्युटा बाधादिह दुर्लभ इत्यन्यदेतत् उपेत्येति गुरुसमीपमे त्येत्यर्थः अपादाने इति पुरस्तादपवादन्यायेन इङश्चेत्यस्य च एवापवादत्वात्स्त्रियां तु क्तिन् स्यादिति तद्बाधनाय यमारम्भः घञनुक्रमणमजपोर्विषय इति वचनात्स्त्रियां घञ् न स्यादिति स्त्रियां ग्रहणम् उपाध्यायेति यास्वयमध्यापयति तस्याभिदं रूपद्वयम् पुंयोगे तु ङीषि वाऽऽनुगागमश्च पाक्षिक इत्युक्तम् करणे ण इति वृञ्वरणे इत्यस्मादित्यर्थः नीशार इति उपसर्गस्य घञीति दीर्घः ननु प्रदक्षिणप्रसव्यगामिनां शाराणामिति कथं प्रयोगः वायुवर्णेत्यर्थपरिगणनादिति चेत्स्राहुः अत एव वार्त्तिकप्रयोगाद प्यपि शृणातेर्घञ् रव इति ॠदोरवित्यप् राज्ञो नय इति णीञ्प्रापणे इत्यस्माच्च ॥ ❁ ॥ यज्ञे समि अधिकरणे ल्युटोऽपवादोऽयं घञ् ॥ ॥ ॥

के·
सि·कौ· छन्दो ग्रन्थविषयत्वात्पूर्वेणाप्राप्ते वचनं केचित्तु प्रस्तारं पंक्तिरित्यादिप्रयोगानुरोधेनाप्रत्ययविधिना नानुवर्त्तयन्ति॥ ॥उदि ग्रहः भावादौ घञ् स्यात्·ग्रहवृदृनिश्चिगमश्चेत्यपोपवादः·परि
टी·त· न्योः असारिभिः क्रीडनं द्यूतं यथा मा न करणे अभ्रेषः वर्यादत्तु· अन्यथाचरणमुः हिः परिग्रहणमिह अर्थसद्भावेव कर्तुं शक्यम् तथाहि परौ नियो द्यूते· इत्येन्नुपात्यये नाव अभ्रेषे इह इण

२३९ छन्दोनाम्नि च।३।३।३४॥ विपूर्वात्स्तृणातेर्घञ् नाम्नि सम्य वृत्तं स्यात् छन्दोनाम्नि इति वृत्तं॥ उदि ग्रहः।३।३।३५। उद्ग्राहः। समि मुष्टौ।३।३।३६। संग्राहः मुष्टौ किम् द्रव्यस्य संग्रहः। परिन्योर्नीणोर्द्यूताभ्रेषयोः।३।३।३७। परिपूर्वान्नयतेर्निपूर्वादिणश्च घञ् स्यात् क्रमेण द्यूतेऽभ्रेषे च विषये परिणायेन शारान् हन्ति समन्तान्नयनेनेत्यर्थः एषोऽत्र न्यायः उचितमित्यर्थः द्यूताभ्रेषयोः किम् परिणयो विवाहः न्ययो नाशः। परावनुपात्यय इणः।३।३।३८। क्रमप्राप्तस्य अनतिपातोऽनुपात्ययस्तत्र पर्य्यायः अनुपात्यये किम् कालस्य पर्य्ययः अतिपात इत्यर्थः। व्युपयोः शेतेः पर्याये।३।३।३९। तव विशायः राजोपशायः पर्याये किम् विशयः संशयः उपशयः समीपशयनम्। हस्तादाने चेरस्तेये।३।३।४०। हस्तादान इत्यनेन प्रत्यासत्तिरादेयस्य लक्ष्यते पुष्पप्रचायः हस्तादाने किम् वृक्षाग्रस्थानां फलानां यष्ट्या प्रचयं करोति अस्तेये किम् पुष्पप्रचयश्चौर्येण। निवासचितिशरीरोपसमाधानेष्वादेश्च कः।३।३।४१। एषु चिनोतेर्घञ् आदेश्च ककारः उपसमाधानं राशीकरणं तच्च धात्वर्थः अन्ये प्रत्ययार्थस्य कारकस्योपाधिभूताः निवासे काशीनिकायः चितौ आकायमग्निं चिन्वीत शरीरे चीयतेऽस्मिन्नस्थ्यादिकमिति कायः समूहे गोमयनिकायः एषु किं चयः चः क इति वक्तव्ये आदेरित्युक्तिर्यङ्लुगन्तादेरेव यथा स्यादिति गोमयानां निकायः पुनःपुनः राशीकरणमित्यर्थः संघे चानौत्तराधर्ये।३।३।४२। चेर्घञ् आदेश्च कः भिक्षुनिकायः प्राणिनां समूहः सङ्घः अनौत्तराधर्ये किम् सूकरनिचयः सङ्घे किम् ज्ञानकर्मसमुच्चयः। राम २३९

इत्यनुवर्त्तनादिति· नुपात्यय इत्यत्र तु परावित्यनुवर्त्तना चेष्टं सिध्यतीति भावः ननु पूर्वसूत्रे नुपात्ययः पर्यायार्थकत्वेन व्याख्यातः तथाच तदनुवृत्त्यैव सिद्धे पर्यायग्रहण

॥सिद्धान्तकौमुदीटीका॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पर्यायग्रहणं पुनर्विधानार्थं तेनात्राभिविधिविवक्षायां परमपि· अभिविधौ भाव इनुणिति इनुणं बाधित्वाऽयमेव घञ् भवतीति· आकायमिति· आचीयन्तेऽस्मिन्निष्टका इत्याकायं अधिकरणे घञ्· अग्निस्थलविशेषं चिन्वीत चयनेन निष्पादयेदिति श्रुत्यर्थः संघे चानौत्तराधर्ये उत्तरे चाधरे चोत्तराधरास्तेषां भाव औत्तराधर्य्यम्· सूकरेति· स्तनपानार्थं मुत्तराधरभावेन सूकराः शेरते तदेतत्प्रत्युदाहरणम्· यदा तु भिक्षुवत्पृथक् पृथगेवावतिष्ठन्ते तदा भवत्येव घञिहापि·॥ ःः॥ कर्मव्यतिहारे णच्· कर्मव्यतिहारः क्रियाव्यतिहारः परस्परकरणमिति यावत् तच्च वर्तमानाद्धातोरित्यर्थः भावे णजिति· कर्तृवर्जिते कारके न भवत्यनभिधानादित्याहुः भावादाविति· प्राचोक्तं यत्तदुपेक्ष्यमाकरविरोधात्· णचः स्त्रि· अनेन णजिति चकारोऽत्र विशेषणार्थ इति ध्वनितम्· व्यतिपाको वर्तते· ऐचेनेति· नय्वाभ्यामिति प्राप्तस्य निषेधेनादिवृद्धिरेव· णच सहितत्वाभावेप्यन्तःसहितत्वादिति भावः कृद्ग्रहणे गतिकारकपूर्वस्यापि भावयासोपसर्गधातोर्णजन्तत्वात्तेऽञि तत्प्रयुक्तादिति वृद्धिरुपसर्गस्येत्याशयेनोदाहरति· व्यावक्रोशीति· कु

कर्म्मव्यतिहारे णच् स्त्रियाम्।३।३।४३। स्त्रीलिङ्गे भावे णच् स्यात्। णचः स्त्रियामञ्नेन कर्म्मव्यतिहारे।७।३।६॥ अत्र ऐच् न स्यात् व्यावक्रोशी व्यावहासी अभिविधौ भाव इनुण्।३।३।४४॥ अणिनुणः आदिवृद्धिः इनण्यनपत्ये सांराविणं वर्तते॥

ऐ प्रश्नाख्याने हसे हसने· स्यादेतत्· स्त्रियां क्तिन्निति प्रकरण एवायं णज्विधेयः एवञ्च स्त्रियामिति न कर्तव्यमिति लाघवमिति चेन्मैवं· स्त्रियामित्यधिकारे वासरूपविधिनिषेधापत्तेः इष्यते तु व्यावक्रुष्टिरिति स्त्रियां क्तिन्नपि अपवादविषये क्वचिदिष्यते व्यावचोरी· इहण्यास श्रन्योरिति पुच्प्रातः व्यालुही अत्र गुरोश्च हल इत्यकारप्रत्ययः प्राप्तः क्वचिदकार एवेष्यते न· नुण च्युतिसाव्यतिहासेषा व्यवस्थाऽप्यापतो दुर्लभापि बाहुलकात्स्वीकार्या· अभिविधौ· अभिविधौ किं संरावः वासरूपेण घञ् क्तश्च न भवति पुनर्भावग्रहणात्· न च कर्तृभिन्नकारकनिवृत्तये भावग्रहणमिति वाच्यम्· पूर्वसूत्र इवप्राप्तिसामर्थ्यादेवेनुणोऽप्रवृत्तेः ल्युटा तु समावेश इष्यते संरावणमिति न च बाहुलकाल्ल्युटत इत्याकरः अणिनुणः अनेनेनुणोऽणनुबन्धो विशेषणार्थ इति ध्वनितम् सांराविणमिति· समन्ताच्छब्द इत्यर्थः संराव्योऽभिविधिद्योतकः पूर्ववत्प्रागतिकारत्· अणसहितत्वादादिवृद्धिः इनण्यनपत्य इत्यनपत्याणि
॥ नः प्रकृतिभावान्नसहित इति टिलोपेन नोननिवृत्तिः स्वभावतश्चेदमणिनुणन्तन्नपुंसकम्·॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्॰ सि॰ कौ॰ टी॰ त॰ २८०

आक्रोशे ग्रहवृद्दृ इत्यप्राप्तेः यमारम्भः अवग्रहः परस्येति॰ छेदविशेष इत्यर्थः निग्रहो निरोधः प्रे लिप्सायाम् लिप्सायां किं देवदत्तस्य प्रग्रहः प्रकृष्टो विनिवेश इत्यर्थः पात्र प्रग्राहेणेति॰ भिक्षापात्रोपादानेन पात्रं गृहीत्वेति यावत् नौ वृ॰ नौ उपपदे वृञो भावादौ घञ्स्यात्॰ निवराकन्येति॰ ग्रहवृदृ इत्यादिना कर्मण्यप् न तु स्त्रीत्वविशिष्टे कर्मणि परत्वा त् क्तिनाभाव्यम्॰ अजब्भ्यां स्त्रीखलना इत्युक्तेरत आह क्तिन् विषयेपीति एवं च न्यायेन भावार्थ एव घञ्जवं तां पुंसीति द्रष्टव्यं रश्मौ च रथादियुक्तानां अश्वानां संयमनार्था

आक्रोशेऽवन्योर्ग्रहः। ३।३।४५॥ अवनि एतयोर्ग्रहेर्घञ् स्यात् शापे अवग्राहस्ते भूयात् अभिभव इत्यर्थः निग्राहस्ते भूयात् बाध इत्यर्थः आक्रो शे किम् अवग्रहः पदस्य निग्रहश्चोरस्य प्रे लिप्सायाम्। ३।३।४६॥ पात्रप्रग्राहेण चरति भिक्षुः परौ यज्ञे ३।३।४७। उत्तरः परिग्राहः स्फ्यो नवे दिः स्त्रीकरणं नौ वृ धान्ये। ३।३।४८॥ वृ इति लुप्तपञ्चमीकम् नीवाराः धान्ये किम् निवरा कन्या क्तिन्विषयेपि वाहुलकादप् प्रवरा सेनेति वत् उदि श्रयतियौतिपूद्रुवः। ३।३।४९। उच्छ्रायः उद्यावः उत्पावः उद्द्रावः कथमपतनोन्नताः समुच्छ्रया इति वाहुलकात् विभाषाङि रुप्लुवोः। ३। ३।५०। आरावः आरवः आप्लावः आप्लवः अवे ग्रहो वर्षप्रतिवन्धे। ३।३।५१। विभाषेति वर्तते अवग्रहः अवग्राहः वर्षप्रतिबन्धे किम् अवग्रहः पदस्य प्रे वणिजाम्। ३।३।५२॥ प्रग्रहे र्घञ् वा वणिजां सम्बन्धि चेत्प्रत्ययार्थः तुलासूत्रमिति यावत् तुलाप्रग्राहेण चरति तुलाप्रग्रहेण रश्मौ च। ३। ३।५३॥ प्रग्रहः प्रग्राहः वृणोतेराच्छादने। ३।३।५४॥ विभाषाप्र इत्येव प्रावारः प्रवरः परौ भुवोऽवज्ञाने। ३।३।५५। परिभावः परिभवः अवज्ञाने किम् सर्वतोभवनम् परिभवः एरच्। ३।३।५६॥ चयः जयः भयादीनामुपसंख्यानम् नपुंसके क्तादिनिवृत्त्यर्थम् भयं वर्षम्॥ धृ

रज्जुः रश्मिः तस्यामभिधे यायां प्रे उपपदे ग्रहेर्घञ्वास्यादित्यर्थः इह हि॰ कृत्वो ग्रहिहपात्तः सक्तदेव तु वक्तुं शक्यम्॰ तथा हि॰ उदिग्रहः समिमुष्टौ॰ आक्रोशे वन्योः प्रे लिप्सायां परौ यज्ञे॰ अवे वर्षप्रतिबन्धे विभाषा प्रे वणिजामित्यादि॰ परौ भुवोऽवज्ञाने इत्यस्यानन्तरम्॰ आङि रुप्लुवोरित्यस्य तु तथा तु न कृतमिति नोव॰ वृणोतेः प्रावार इति॰ उपसर्गस्य घञ्यमनुष्ये वहुलमित्युपसर्गस्य दीर्घः आच्छाद

58

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

परिभवः परीभावः विभ्रान्तिः स्यात् समरः पावात् डित्वात् टौ प्राप्तौ तथा च पूर्वविप्रतिषेधोऽयं फलितः एवं च वास्तव्यप्रत्यायोऽत्र न प्रवर्तते न अपवादत्वादिति भावः वर्षामिति वृषभाव
वर्णादिति भाष्यप्रयोगात् लुक् लुप् उपि च वर्षणम्॥ ॥ ऋदोरप् ऋच्च उच्च तयोः समाहारे सौत्रं पुंस्त्वम् ऋदोरित्ययं न तकारः किं तर्हि दकारः निरभ्योः पूल्वोरित्यपवादतया घञि

ऋदोरप्। ३।३।५७। ऋवर्णान्तादुवर्णान्तादप्। करः। गरः। शरः। यवः। लवः। स्तवः। पवः। वृक्षासनयोर्विष्टरः। ८।३।९३। अनयोर्विपूर्वस्य स्तृञः षत्वं निपात्य
ते विष्टरो वृक्ष आसनं च वृक्षेति किम् वाक्यस्य विस्तरः। ग्रहवृदृनिश्चिगमश्च ३।३।५८। अप्स्यात् घञोऽपवादः। ग्रहः। वरः। दरः। निश्चयः। गमः। वशि
रण्योरुपसंख्यानम्। वशः। रणः। घञर्थे कविधानम्। प्रस्थः। विघ्नः। द्वित्वप्रकरणे के कृञादीनामिति वक्तव्यम्। चक्रं। चिक्लिदं। चक्नसः। उपसर्गेऽदः।
३।३।५९। अप्स्यात् घञपोश्च अदेर्घस्लृ स्यात् घञि अपि च प्रघसः। विघसः। उपसर्गे किं घासः। नौ ण च। ३।३।६०। नौ उपपदे अदेर्णः स्यादप् च न्यादः। नि
घसः। व्यधजपोरनुपसर्गे। ३।३।६१। अप्स्यात् व्यधः। जपः। उपसर्गे तु आव्याधः। उपजापः। स्वनहसोर्वा। ३।३।६२। अप्। पक्षे घञ्। स्वनः। स्वानः। हसः। हासः। अ
नुपसर्ग इत्येव प्रस्वानः। प्रहासः। यमः समुपनिविषु च। ३।३।६३। एषु अनुपसर्गे च यमेर्वा। संयमः। संयामः। उपयमः। उपयामः। नियमः। नियामः। विय
मः। वियामः। यमः। यामः। नौ गदनदपठस्वनः। ३।३।६४। अब्वा स्यात्। निगदः। निगादः। निनदः। निनादः। निपठः। निपाठः। निस्वनः। निस्वानः। क्वणो वीणायां च
। ३।३।६५। नावनुपसर्गे च वीणाविषये च क्वणतेर्वाप् स्यात्। वीणाग्रहणं प्राद्यर्थम्। निक्वणः। निक्वाणः। क्वणः। क्वाणः। वीणायां तु प्रक्वणः। प्रक्वाणः। नित्यं
पणः परिमाणे। ३।३।६६। अप्स्यात्। मूलकपणः। शाकपणः। व्यवहारार्थं मूलकादीनां परिमितो मुष्टिर्बध्यते सोऽस्य विषयः। परिमाणे किं पाणः॥ ॥

धाना ज्ञापकादीर्घान्तादप् इत्याहुरिति लवः पव इति घञोऽपवाद इति निश्चय इत्यत्र चः प्राप्तिरत्र घञ् इति विवेकः हस्ताहाने तु प्रपूर्वकाच्चिनोतेर्घञ् दात्वतः वशिरण्योरिति
घञि प्राप्ते वचनम् वशनं वशः रणं निशब्दं कुर्वन्त्यस्मिन्निति रणः संग्रामः व्यध्यते विशेषेणाभक्ष्यते इति विघसः वैश्वदेवशिष्टमन्नम् प्राप्यं बालतृणं घास इत्यमरः उपजा ॥

स·
सि·कौ·
टी·त·
२७१

वो मन्त्रभेदः प्रक्वणेति नादनिनदध्वनिध्वानरवस्वनाः स्वानः स्वनः क्वणो निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि वीणायाः क्वणिते प्रादेः प्रक्वाणप्रक्वणादय इत्य
मरः॥ ॐ ॥ मदो अनुपसर्गे सुप्युपपदे नित्यम् प्रसाङ्गवादो प्रमदः प्रसम्भ्यां हर्षे इति नोक्तम् प्रसम्मदः संप्रमद इति हर्षमाभूदिति प्रजने सर्तेः प्रजननं प्रजनः भावे वच·

मदोऽनुपसर्गे।३।३।६७। धनमदः उपसर्गे तु उन्मादः प्रमदसम्मदौ हर्षे ।३।३।६८। हर्षे किं प्रमादः सम्मादः समुदोरजः पशुषु ।३।३।६९। सम्पूर्वो जिः
समुदाये उत्पूर्वश्च प्रेरणे तस्मात् पशुविषयकादप्स्यात् अघञपवादः स्तुते वीभावो न समजः पशूनां सङ्घः उदजः पशूनां प्रेरणं पशुषु किम् समाजो
ब्राह्मणानां उदाजः क्षत्रियाणां अक्षेषु ग्लहः ।३।३।७०। अक्षशब्देन देवनं लक्ष्यते तेन तत्र यत्पणरूपेण ग्राह्यं तत्र ग्लह इति निपात्यते अक्षस्य ग्लहः
व्याप्तुरुषीमभिसरणे ग्लहामदीव्यन् अक्षेषु किम् पादस्य ग्रहः प्रजने सर्तेः ।३।३।७१। प्रजननं प्रथमगर्भग्रहणं गवामुपसरः कथमवसरः प्रसर
इति अधिकरणे पुंसि संज्ञायामिति घः ह्वः सम्प्रसारणं च न्यभ्युपविषु ।३।३।७२। निहवः अभिहवः उपहवः विहवः एषु किम् प्रह्वायः आङि युद्धे
।३।३।७३। आहूयन्ते स्मिन्निति आहवः युद्धे किम् आह्वायः निपानमाहावः ।३।३।७४। आङ्पूर्वस्य ह्वयतेः सम्प्रसारणं अप्‌ वृद्धिश्च उदकाधारश्चेदा
च्यः आहावस्तु निपानं स्यादुपकूपजलाशये भावेऽनुपसर्गस्य ।३।३।७५। अनुपसर्गस्य ह्वयतेः सम्प्रसारणमप्‌ च स्यात् भावे हवः हनश्च वधः ।३।३।
७६। अनुपसर्गाद्धन्तेर्भावे अप्‌ स्यात् वधादेशश्चान्तोदात्तः वधेन दस्युम् चाद्घञ् घातः मूर्त्तौ घनः ।३।३।७७। मूर्त्तिः काठिन्यं तस्मिन्नभिधेये हन्तेर
प्स्यात् घनश्चादेशः अभ्रघनः कथं सैन्धवघनमानयेति धर्म्मशब्देन धर्म्मी लक्ष्यते अन्तर्घनो देशे ।३।३।७८। वाहीकग्रामविशेषस्य संज्ञेयम् अन्तर्घणो दे

जनिवध्योरिति वृद्धिनिषेधः अंशाद्‌ बलादत्र जनेरर्थान्तरत्वम् प्रतिष्ठते इत्यत्र प्रादुर्भावो यथा नदेन्तराह प्रथमगर्भग्रहणमिति काशिकानुरोधेनेदमुक्तम् प्रथमं द्वितीयं वे
त्यनाग्रहः किन्तु गर्भग्रहणमित्यन्ये हनश्च वधः अन्तोदात्त इति सूत्रे वधशब्दो नोदात्तत्वयोच्चारित इति भावः॥ ॥ ॥

लिथोग्राफी

राम
२७१

अगारैक॰ प्रघाणः प्रघणः लिन्दाबहिर्द्वारप्रकोष्ठके इत्यमरः। संघोद्घौ॰ मतल्लिकामचर्चिकाप्रकाण्डमुद्घतल्लजौ॰ प्रशस्तवाचकान्यमूनीत्यमरः। ड्वितः। अयमिति अत एव पाकेन निर्वृत्तमिति विग्रहस्तेन तु पक्त्रेनेति। यत्तु प्राचा क्त्रेभावादाविति। तन्न। निभावः क्त्रेर्मप्। तद्धितेषु व्याख्यानमिदम्। नित्यग्रहणादिति तत्र हि नित्यमिति योगो विभज्यते तेन साम

अगारैकदेशे प्रघणः प्रघाणश्च ।३।३।७९। द्वारदेशे द्वौ प्रकोष्ठावलिन्दौ आभ्यन्तरो बाह्यश्च तत्र बाह्यप्रकोष्ठे निपातनमिदम्। प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति प्रघणः प्रघाणः। कर्म्मण्यप् पक्षे वृद्धिः। उद्घनोऽत्याधानम् ।३।३।८०। अत्याधानमुपरिस्थापनं यस्मिन् काष्ठे अन्यानि काष्ठानि स्थापयित्वा तक्ष्यन्ते तदुद्घनः। अपघनोऽङ्गम् ।३।३।८१। अङ्गं शरीरावयवः स चेह न सर्वः किन्तु पाणिः पादश्च स्यात्। करणे। अपघातोऽन्यः। करणेऽयोविद्रुषु ।३।३।८२। एषु हन्तेः करणे अप् स्याद्धनादेशश्च। अयो हन्यतेऽनेनेत्ययोघनः। विघनः। द्रुघनः। द्रुघण इत्यत्र पूर्वपदात्संज्ञायामिति णत्वं संज्ञैषा कुठारस्य। स्तम्बे क च ।३।३।८३। स्तम्बे उपपदे हन्तेः करणे कः स्यादप् च अप्पक्षे घनादेशश्च स्तम्बघ्नः स्तम्बघनः। करण इत्येव स्तम्बघातः। परौ घः ।३।३।८४। परौ हन्तेरप्स्यात्करणे घ इत्यादेशः। परिहन्यतेऽनेनेति परिघः। परेश्च घाङ्कयोः ।८।२।२२। परेः रेफस्य लो वा स्याद्घशब्दे अङ्कशब्दे च पलिघः परिघः पर्य्यङ्कः पल्यङ्कः। इह नर इममपौ घ इति क्त्रिमस्य नयहणं व्याख्यानात्। उपघ्न आश्रये ।३।३।८५। उपपूर्वाद्धन्तेरप्स्यादुपधालोपश्च आश्रयशब्देन सामीप्यं लक्ष्यते पर्वतेनोपहन्यते सामीप्येन गम्यते इति पर्वतोपघ्नः। संघोद्घौ गणप्रशंसयोः ।३।३।८६। संहननं संघः। भावेऽप् उद्धन्यते उत्कृष्टो ज्ञायते इत्युद्घः। कर्म्मण्यप् गणप्रशस्त्यर्थाभावे तूद्घातः। निर्वृत्तेऽनिघो निमितम् ।३।३।८७। समन्तान्मितं निमितं निर्विशेषं हन्यते ज्ञायत इति निघाः वृक्षाः समारोहपरिणाहाभ्याम् तुल्या इत्यर्थः। ड्वितः क्त्रिः ।३।३।८८। अयं भाव एव स्वभावात् क्त्रेर्मम्नित्यं क्त्रिप्रत्ययान्तात् मम् निर्वृत्तेऽर्थे नित्यग्रहणात् त्रिमं विषयः अत एव कृतेनानेन न विग्रहः। डुपचष् पाकेन निर्वृत्तं पक्त्रिमम्। डुवप् उप्त्रिमम्। ट्वितोऽथुच् ।३।३।८९। अयमपि स्वभावात् भाव एव टुवेपृ वेपथुः। श्वयथुः

र्यादर्थविशेषानादरेणैवमपि विषयत्वं निर्णीयते। एकयोगत्वे तु निर्वृत्तेऽधिकारान्निर्वृत्तार्थस्यापि विवक्षायां स्यात् अयं प्रसङ्गेन तन्त्रश्च मप्यं विनापि पक्त्रिरिति प्रयोगः स्यादिति

श्री

सि·कौ·

टी·त·

२५२

यजयाचेति भावे कर्त्तरि कारके चेति वर्त्तते· अत एव यत्नेन यत्नमयजन्त देवा इत्यत्र इज्यन्ते यज्ञ इति व्याचक्षते· विश्न इति· च्छ्वोः शूडनुनासिके चेति शः उपसंप्रश्नघोरित्यादि
कित्वाद्गुणो लोपः अन्तर्धिरिति· अन्तः शब्दस्याङ्कि विधीति वार्त्तिकादुपसर्गत्वम्· उपाधीयते ऽनेनेति· एतेन उपसमीपे स्वधर्ममादधातीत्युपाधिः बाहुलकात्कर्त्तरि किरि भ
निमाध्यात्थिन्योनादर्त्तव्य इति ध्वनितम्· विधानाविश्वसङ्कीर्णेरित्यत्रापि कर्त्तरि माभूत् किः किन्तु विधविधाने इत्यस्मादिगुपधात्कित् दित्तीति सूत्रसिद्धेः स्त्रियां क्तिन्· घञोपवाद
इति· यत्तु भक्तिपाययग्ये व्याचक्षाणा आहुः भावे ऽत्वधिकः कारोधिकार इति घञप्युदाहरतन्तदसत्· न हि तत्र स्त्रीत्वविशिष्टो भावो ऽर्थः किन्तु पुंस्त्वविशिष्ट इति ध्येयम्·

यजयाचयतविच्छप्रच्छरक्षो नङ् ३।३।९०। यज्ञः याच्ञा यत्नः विश्नः प्रश्नः प्रश्ने चासन्नेति ज्ञापकान्न सम्प्रसारणं ङित्· त्वन्तु विश्न इत्यत्र गुणनिषे
धाय रक्ष्णः स्वपो नन् ३।३।९१। स्वप्नः उपसर्गे घोः किः ३।३।९२। प्रधिः अन्तर्द्धिः उपाधीयते ऽनेनेत्युपाधिः कर्मण्यधिकरणे च ३।३।९३। कर्मण्यु
पपदे घोः किः स्यादधिकरणे ऽर्थे जलानि धीयन्ते ऽस्मिन्निति जलधिः स्त्रियां क्तिन् ३।३।९४। स्त्रीलिङ्गे भावादौ क्तिन् स्यात् घञोपवादः अजपो तु पर
त्वाद्बाधते कृतिः चितिः स्तुतिः स्फायी स्फातिः स्फीतिकाम इति तु प्रामादिकम् ज्वालाद्यन्तर्गणे चित्र अच इरिति वा समाधेयम्· श्रूयजीषिस्तुभ्यः
करणे· श्रूयते ऽनया श्रुतिः यजेरिषेश्च इष्टिः स्तुतिः ऋल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः तेन नत्वं कीर्णिः गीर्णिः लूनिः धूनिः पूनिः॥ ॥

अजपोस्त्विति· तयोरवकाशः चयः लवः क्तिनो ऽवकाशः कृतिः हृतिः चिनोति लोति भ्यां तु स्त्रियामुभयप्रसङ्गे परत्वात् क्तिन्निसर्थः प्रामादिकमिति· स्फायः स्फी निष्ठायामि
ति निष्ठायामेव स्फीभावविधानादिति भावः· श्रूयजीति· परत्वात्करणाधिकरणयोश्चेति ल्युटि प्राप्ते वचनम्· श्रुति श्रोत्रम्· यजेरिति यजेः क्तिनि वचिस्वपीति सम्प्रसारणे
व्रश्चभ्रस्जेति षत्वे इष्टिरिति रूपम्· इज्यते ऽनयेति विग्रहः एवमिष्यते ऽनया इष्टिः सूयते ऽनया सुतिः तेन नत्वमिति कीर्णिरित्यादौ रदाभ्यामित्यनेन नत्वम्· लूनिरित्यादौ तु

रामः

२५२

CC-0. In Public Domain. Digitization by eGangotri

ल्वादइति·ल्वादेर्निष्ठायामित्यर्थः·चूर्त्तिरिति·तिचेति·चरफलोः·इत्वे·वीरुपधायादीर्घः·चायतेः·चाय्पूजानिशामनयोः·क्तिन्नपीति·अस्त्रियामितिप्रतिषेधेनस्त्रियां
वासरूपविधेरभावादिदमुक्तम्·अङोऽपवादइति·पुरस्तादपवादन्यायेनस्यादिभ्यआतश्चोपसर्गेइति·पचेभ्रुषिद्भिदादिभ्यइतिप्राप्तस्याङोऽपवादोनतुण्वुलिञ्ञोरिति
भावः·ण्वुलिञ्ञौतुपरत्वाद्भवत·एव·कांत्वंस्थापिकांत्वंस्थापिमितिभाष्यकारप्रयोगात्·प्रस्थितिरिति·द्यतिस्यतिमास्थामित्यात्इत्वम्·संगीतिरिति·घुमास्थेत्यादि
नाईत्वम्·उदात्तइतीति·मन्त्रेवृषेतिसूत्रादनुवर्तनेइत्यर्थः·एवञ्चक्तिन्नतस्याद्युदात्तत्वेप्राप्ते·ऊतियूतीत्यादयोन्तोदात्ताइतिपर्यवसन्नोर्थः·ईत्वाभावइति·द्यति।

ल्वादइतियोगविभागात्क्तिन्निष्ठवत्॥ लूनिः।तिचा।चूर्तिः।फुल्तिः।चायतेःक्तिनिचिभावोवाच्यः।अपचितिः। सम्पदादिभ्यःक्विप्॥ सम्पत्।विपत्।क्ति
न्नपीष्यते।सम्पत्तिः विपत्तिः॥स्थागापापचोभावे।३।३।९५ क्तिन्स्यादङोपवादः।प्रस्थितिः।उपस्थितिः संगीतिः।सम्पीतिः।पक्तिः।कथमवस्थासंस्थे
ति।व्यवस्थायामितिज्ञापकात्।ऊतियूतिजूतिसातिहेतिकीर्तयश्च।३।३।९७।अवतेर्ज्वरत्वरेत्यूठ्।ऊतिः।स्वरार्थंवचनं।उदात्तइतिहिवर्त्तते।यूतिः।जू
तिः।अनयोर्दीर्घत्वञ्चनिपात्यते।स्यतेः।सातिः।द्यतिस्यतिमास्थेतीत्वम्प्राप्तं।इत्वाभावोनिपात्यते।सनोतेर्वा।जनसनेत्यात्वेकृतेस्वरार्थंनिपातनं।हन्ते
र्हिनोतेर्वाहेतिः।कीर्तिः।व्रजयजोर्भावेक्यप्।३।३।९८।व्रज्या।इज्या।संज्ञायांसमजनिषदनिपतमनविदषुञ्शीङ्भृञिणः।३।३।९९।समजादिभ्यः
स्त्रियाम्भावादौक्यप्स्यात्सचोदात्तःसंज्ञायां।अजेःक्यपिवीभावोनेनिवाच्यः।समजन्तिअस्यामितिसमज्या।सभा।निषीदन्त्यस्यान्निषद्या।आपणः
निपतन्त्यस्यामितिनिपत्यापिच्छिलाभूमिः।मन्यतेऽनयेतिमन्यागलपार्श्वशिरा।विदन्त्यनयाविद्या।सुत्याअभिषवः।शय्या।भृत्या।ईयतेऽ
नयाइत्याशिबिका॥

स्यतीतिप्राप्तस्याभावइत्यर्थः·हन्तेरिति·नकारस्येत्वंहिनोतेर्गुणइतिबोध्यम्·कीर्तिरिति·कीर्तयतेर्ण्यासश्रन्थेतियुचिप्राप्ते।
क्तिन्निपात्यते·उदात्तत्वञ्चतासुतेकीर्तिव्रजयजोउदात्तइत्येवपित्करणान्तूनरत्नतुगर्थम्·गलपार्श्वेति·नयाहिकुड्योज्ञायतेइतिभावः·शेरतेऽस्यामितिशय्या·
भरणंभृत्याजीविका·कुमारभृत्याकुशलैरधिष्ठितइतिरघुः·संज्ञायांकिम्·मतिः·स्तुतिः·आसुतिः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क॰ सि॰कौ॰ कृ॰प्र॰ २७३ तथा च व्यवहरतम्॰ मतिबुद्धिपूजार्थेभ्यश्च कर्मणि भूते॰ रजः कष्याधुनीत्यादि॰ एतेन मतिबुद्ध्यादिसूत्रे प्रयोगादेव मतिश्च तीत्यादीनां साधुत्वमिति दुर्घटवृत्तिः प्रत्युक्ता ॥ ॥ क्रियेति॰ यदा भावकर्मणोः शः तदा सार्वधातुकेयक्॰ रिङ् शयग्लिङ्क्षु इति रिङादेशः अन्यत्र तु यगभावे विशेषणतो रिङादेशे कृते नेह यङि इति रूपं तु तत्र च्छादयेषमीं वदन्ति न तु कन्निकार केपीत्यर्थः अत एव कारो ऽर्थे इष्यते ऽनया इच्छिरिति प्राग्युक्तम्॰ यकारनिवृत्तिरिति हलादिशेषस्तु नास्ति यासादिविधा।

कृञः श च। ३।३।१००। कृञ इति योगविभागः। कृञः श च स्यात्। कृत्या। श च। चात् क्तिन्। क्रिया। कृतिः। इच्छा। ३।३।१०१। इषेर्भावे शः। यगभावश्च निपात्यते। इच्छा। परिचर्यापरिसर्या मृगयाटाट्यानामुपसंख्यानम्॥ शो यक् च निपात्यते। परिचर्या पूजा। परिसर्या परिसरणम्। अत्र गुणोपि। मृग अन्वेषणे चुरादावदन्तः अतो लोपाभावोपि यक्यकि णिलोपः। मृगया। अटतेः शेयकि द्व्यं शब्दस्य द्वित्वं पूर्वभागे यकारनिवृत्तिर्दीर्घश्च। अटाट्या। जागर्तेरकारो वा॥ पक्षे शः। जागरा। जागर्या। अ प्रत्ययात् ३।३।१०२ प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियामकारप्रत्ययः स्यात्। चिकीर्षा। पुत्रकाम्या। गुरोश्च हलः। ३।३।१०३ गुरुमतो हलन्तात् स्त्रियामकारः स्यात्। ईहा। ऊहा। गुरोः किम् भक्तिः। हलः। हलः किम्। नीतिः। निष्ठायां सेट इति वक्तव्यम्॥ नेह। आप्तिः। दीप्तिः। तितुत्रेष्वग्रहादीनामिति वाच्यम्॥ निगृहीतिः निपठितिः। षिद्भिदादिभ्योऽङ्। ३।३।१०४। षिद्भ्यो भिदादिभ्यश्च स्त्रियामङ्। जृष्। जृ॰ ऋदृशोऽङि॰ गुणः। जरा। त्रपूष्। त्रपा। भिदा। विदारणाऽऽय तायम्। भित्तिरन्या। छिदा। मृजा। कृपेः सम्प्रसारणं च॥ कृपा॥ ९ तुदिनेवाभ्यासं संज्ञा स्त्रीकारान्त॰ इह च तद्भयाभावादिति भावः अटाट्येति॥ वाम यदा तु अटतेर्यङन्तादप्रत्ययादित्यकारस्तदा॰ लोपे यस्य हलः इति यलोपे॰ टाटेति रूपं बोध्यम्॰ द्वित्वे हलादिशेषे सति दीर्घो॰ किन्तरन्यमागमाश्चेति प्रसक्तेः जागर्तेरिति॰ शेप ७७२ रतः सार्वधातुके यक्जाग्रो विचिण्णिति गुणः गुरोश्च धातोरित्यनुवृत्त्याह हल इति॰ धातोर्विशेषणात्तदन्तविधौ हलन्तो धातुर्लभ्यते॰ न चायं गुरुरिति सम्भवति॰॥ः अभिव्यपोहितु रूः अतो मत्वर्थोलक्षणेन तदाह गुरुमत इति॰ नतु विपरीतमस्तुगुर्व॥ २॥

CC-0. In Public Domain. Digitization by eGangotri

नाऽङलन्तत्वात्· नाऽऽशस्यापि धातोरुक्तो नित्यादेः सत्त्वादिति चेन्मैवम्· चेष्टायामनध्वनि· आशंसायां भूतवच्चेति निर्देशेन विपरीतशंकाया अप्रवृत्तेः सिद्धिदाकथंन र्दिमुखाजगन्धलब्धेरिति माघः· प्रेक्षोपलब्धि चित्स्मरण्यचिन्तादहि· लभेत्येव तु चिन्तम्· सत्यम्· अनर्थकास्तु प्रतिवर्णमनुपलब्धेरिति भाष्यप्रयोगाद्रतुलका दानित्त्वपि बोध्यः· विशारक्ति हमनोरमायां बोध्यः· भिदेति· एवमादयो दन्ताः समुदाया एव गणे पठ्यन्ते तत्र ये प्रकृतिभागा भिदच्छिदङ्द्याद्यस्ते आदिशब्देन सत्त्वे निर्दिष्टा गणे विशिष्टपाठस्तु लोकप्रसिद्धार्थविशेषसंकचिरताद्यन्तिककार्यस्य संग्रहार्थः· भित्तिरन्येति· भिद्यत इति भित्तिः कुड्यम्· छिदेति· द्वैधीकरणे वाच्यं· अन्यत्र तु छित्तिश्छिद्रम्· मृजेति· मृजूशुद्धौ· असाधित्वाङ्गिदादौ पाठः॥ ॥ चितिपूजि चकारोऽनुक्तसमुच्चयार्थः तेन तोलयतेस्तुलेति हरदत्तः अन

चिन्तिपूजिकथिकुम्बिचर्चश्च।३।३।१०५ अङ्स्यात्युचोपवादः॥ चिन्ता। पूजा। कथा। कुम्बा। चर्चा। आतश्चोपसर्गे।३।३।१०६ अङ् स्यात्। क्तिनोपवादः। प्रदा। उपदा। श्रदन्तरोरुपसर्गवद्वृत्तिः। श्रद्धा। अन्तर्द्धा। उपसर्गे घोः किरित्यनेन किः अन्तर्द्धिः। ण्यासश्रन्थो युच्। ३।३।१०७ अकारस्यापवादः। कारणा। हारणा। आसना। श्रन्थना। घट्टिवन्दिविदिभ्यश्चेति वाच्यम्॥ घट्टना। वन्दना। वेदना। इषेरनिच्छार्थस्य। अन्वेषणा। परेष्टौ॥ पर्येषणा। परीष्टिः। रोगाख्यायां ण्वुल् बहुलम्।३।३।१०८ प्रच्छर्दिका। प्रवाहिका। विचर्चिका। क्वचिन्न। शिरोऽर्तिः। धात्वर्थनिर्देशे ण्वुल् वक्तव्यः॥ आसिका। शायिका। इक्श्तिपौ धातुनिर्देशे॥ पचिः पचतिः॥ ९॥ एवंतु लोपदारोहति दन्तावारवेति निषेधकदाहृः युचो ऽपवाद इति· ण्यासश्रन्थेति वस्य मात्रसेन्वर्थः आसनेति आस्यतेऽस्यामिति विग्रहः श्रहलोरण्यदिति ण्यत्प्रत्ययेनास्या· न च स्त्रीप्रत्यये वासरूपविधिर्नेति शङ्क्या कम्· अपवादस्य युचः स्त्रीप्रकरणस्थत्वेपि उत्सर्गस्य ण्यतस्तदभावात्· घट्टिवन्दिविदिलोभार्थे ग्रहणे ज्ञानार्थस्य तु सम्वित्तिः इषेरिति· अनिच्छार्थस्य युच् इच्छार्थस्य तु निषेध इत्युक्तेर्यथा रोगाख्यायां धातोर्बहुलं ण्वुल् स्यात् ण्यन्तानां चे रोगस्य संज्ञा क्तिन्नादीनामपवादः प्रच्छर्दिकेति· छर्दवमने· प्रवाहिकेति· प्रवाहयति· मुहुर्मुहुः प्रवर्तयतीति ग्रहणी· विचर्चिकेति· चर्च अध्ययने प्रत्ययोपसर्गाभ्यां रोगप्रतीतिः पामया॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



माविर्वर्चिकेत्यमरः शिरोऽर्तिः शिनिशिरःपीडा अर्दहिंसायाम्· तित्तु नेतिनेट्· धात्वर्थनिर्देश इति· क्रियानिर्देश इत्यर्थः आस्तिका· शायिकेति· आसनं शयनमि
त्यर्थः॥ इक्श्तिपौ· धातोर्निर्देशेऽनुकरणम्· बहुलमित्यनुवृत्तेः क्वचिन्न गुप्तिज्किद्भ्यः सन्· भुवो वुक्लुङ्लिटोः पचतिरिति· उपसर्गात्सुनोति सुवति स्यति·
ध्यायतेः सम्प्रसारणञ्चेत्यादिनिर्देशादकर्तृवाचिन्यपि सार्वधातुके परे शबादयः एवम्भावकर्मवाचिन्यपि सार्वधातुके क्वचिद्युक् विभाषा लीयतेरिति· यथा तत्र
ह्लीलीङोर्यकोनिर्देशो न तु श्यनेत्युक्तम्· यत्तु माधवाद्यैः श्तिपः शित्करणसामर्थ्याच्छबादय इत्युक्तम्· तन्न पिबतिग्लीयतिरित्यादौ पिबादेशप्रवृत्त्या आत्वनिवृत्त्या च शि
त्वस्य चरितार्थत्वात्॥ ० ॥ वर्णादिति· वर्णानुकरणादित्यर्थः ननु वर्णादुच्चार्यमाणादिति· तथा हि सत्यकार इत्यादावेव स्यान्न तु ककार इत्यादौ अत्र हि संघात
स्योच्चारणात्· अनुकार्यत्विह वर्णमात्रं अकारस्योच्चारणार्थत्वात्· कथं न हि समुच्चयार्थश्चकारः एवकारोऽन्यनिवृत्त्यर्थ इत्यादिप्रयोगा इति चेदत्राहुः क्वचि

वर्णात्कारः॥ निर्देश इत्येव। अकारः। ककारः। रादिफः॥ रेफः। मत्वर्थाच्छः॥ बहुलवचनादकारलोपः। मत्वर्थीयः॥ इणजा
दिभ्यः। आजिः। आतिः। इञ्वपादिभ्यः॥ वापिः। वासिः। स्वरभेदः। इक्कृष्यादिभ्यः॥ कृषिः। गिरिः॥ ९ त्संघातादपि भवति उच्चैस्तरां वा वषट्कार इ

ति सूत्रनिर्देशात्· सर्वे च कारा: प्रत्याख्यायन्ते भाष्यप्रयोगाद्बहुलवचनाच्चेति· इह कारप्रत्ययस्य धातोरविहितत्वेऽपि धात्वधिकारस्थत्वात्कृत्संज्ञा· तेन कृदन्तत्वा
त्प्रातिपदिकत्वम्· प्रयोजनाभावान्न ककारस्येत्संज्ञा· आर्द्धधातुकत्वाभावादिडागमो न· अस्य च्वावित्यादौ तु कारप्रत्ययाभावो बाहुलकादेव· रादिफः वा सरूप।
विधिना कारोऽपि· तेन रकारादीनि नामानि शृण्वतो मम पार्वतीत्यादिप्रयोगः साधुरेव अकारलोप इति· अतद्धितपरत्वाद मत्वाच्च यस्येति लोपस्याप्राप्तिरिति भावः। राम
कृदन्तत्वात्प्रातिपदिकत्वमिह पूर्ववद्बोध्यम्· तसौ मत्वर्थ इत्यत्र बाहुलकाच्छेन शैषिकान्मतुवर्थीयादित्यत्र तु बाहुलकादेव मतुवर्थशब्दाच्छः अन्ये तु नेतत्कृदन्तं २५५
मत्वर्थे भव इति विग्रहे गहादित्वाच्छप्रत्ययेन तद्धितान्तमेवेत्याहुः इणजाः धात्वर्थनिर्देशे प्राप्तस्य ण्वुलोऽपवादोऽयम्· एवमग्रेऽपि· आजिरिति· बाहुलकादजेर्वीभावो न·

540

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सञ्ज्ञायाम् अधिकरणे ण्वुल् अर्थोऽयमारम्भः उद्दालकः श्लेष्मान्तकः तस्य पुष्पाणि भज्यन्ते यस्यां क्रियायां सा तथा भञ्जनं भञ्जिका भावे ण्वुल् उद्दालकपुष्पाणां भञ्जिके त्यन्ये सूत्रे आख्यानशब्दस्याल्पाच्तरत्वेन पूर्वनिपाते कर्तव्ये व्याख्यानस्य प्रश्नपूर्वकत्वात् याऽर्थतः प्राप्तं क्रममनुसृत्य व्याचष्टे परिप्रश्ने आख्याने चेति परिपाटीति पटगतोपरि पूर्वः इणजादिभ्य इतीण् कृदिकारादिति ङीष् आक्रोशे आक्रोशः शापः नपुंसके भावे क्तः ननु तयोरेव कृत्यक्तखलर्था इति लिङ्ग त्रयसाधारण्येन भावकर्मणोः कृत्या दिविधानात् तेनैव नपुंसके भावे क्तः सिध्यति किमनेन पुनर्विधानेनेति चेदत्राहुः भूते क्तप्रत्यये कृत्यनिष्ठेति सूत्रेण विहितस्य क्तस्य भावोऽर्थस्तयोरेवेति सूत्रेण विहितः॥

संज्ञायाम् ३।३।१०९ अत्र धातोर्ण्वुल् उद्दालकपुष्पभञ्जिका विभाषाख्यानपरिप्रश्नयोरिञ्च ३।३।११० परिप्रश्ने आख्याने च गम्ये इञ्‌ स्या ण्वुल्। विभाषोक्तेर्यथाप्राप्तमन्येऽपि कां त्वं कारिं कारिकां क्रियां कृत्यां कृतिं वाऽकार्षीः सर्वां कारिं कारिकां क्रियां कृत्यां कृतिं वाऽका र्षं एवं गणिं गणिकां गणनां पाचिं पाचिकां पचां पक्तिम् पर्यायार्हर्णोत्पत्तिषु ण्वुच् ३।३।१११ पर्यायः परिपाटी क्रमः अर्हणमर्हः यो ग्यता पर्यायादिषु द्योत्येषु ण्वुच् वा स्यात् भवत आसिका शायिका अग्रगामिका भवानिक्षुभक्षिकामर्हति ऋणे इक्षुभक्षिकां मे धारय ति उत्पत्तौ इक्षुभक्षिका उदपादि आक्रोशे नञ्यनिः ३।३।११२ विभाषेति निवृत्तं नञि उपपदे अनिः स्यादाक्रोशे अजीवनिस्ते शठ भूयात् अ प्रयाणिः कृत्यल्युटो बहुलम् ३।३।११३ भावेऽकर्तरि च कारके संज्ञायामिति च निवृत्तं राज्ञा भुज्यन्ते राजभोजनाः शालयः नपुंसके भावे क्तः ३।३। ११४ ल्युट् च ३।३।११५ हसितं हसनं योगविभाग उत्तरार्थः॥ ९ अनेन तु कालसामान्येन पुंसके भावे क्तो विधीयते एवञ्च स्वविषये परत्वात् घञजपां बाधक इति परिशेषात्तेषां पुंविषयत्वं सिध्यति किञ्च इह भावे चाकर्मकेभ्य इत्यस्यासन्निधानात्सकर्मकेभ्योऽप्ययं भवति घञादिवत् गतं तिरश्चीनमनूरुसारथेरि त्यादिदर्शनात् तथा च नात्र शंकेति नन्वेवं तद्योगे कर्मणि द्वितीया स्यात् क्तयोगलक्षणषष्ठ्या नलोकेति निषेधादेवञ्च घटं कृतं च क्षं भिन्नमित्यादि प्रसज्येत अनूरुसार थेरित्यत्र तु कर्तरि तृतीयाना पाद्यते कारकषष्ठ्या निषेधे विशेषत्वविवक्षया षष्ठीति समाधानसम्भवात् इति चेन्नैवमनपुंसके भावे क्तस्य योगे षष्ठ्या उपसंख्यातत्वात्

शेषत्वविवक्षामाश्रित्य वार्त्तिकमिदं प्रत्याख्यातमाकरे इति चेन्नहि नन्वामासस्यान्यायेन शेषत्वविवक्षैवेत्यस्तु। तथा च पटं कृतमित्यादि तु न प्रसज्यते एव कचित्तु द्वितीया पिदृश्यते। आनंदेश्चमनेकदुर्गविषममितिदिक्॥ ॥ कर्मणि च। कर्त्तुरिति कर्मणि षष्ठी। उभयप्राप्तौ कर्मणीति नियमाद्येनेति तृतीया न दोह। येन स्पृश्यमानस्य कर्त्तुरि

कर्म्मणि च येन संस्पर्शात्कर्त्तुः शरीरसुखम् ३।३।११६ येन स्पृश्यमानस्य कर्त्तुः शरीरसुखमुत्पद्यते तस्मिन् कर्म्मण्युपपदे ल्युट् स्यात् पूर्वेण सिद्धे नित्यसमासार्थं वचनम् पयःपानं सुखम् कर्त्तरीति किम् गुरोः स्नापनं सुखम् नेह गुरुः कर्त्ता किन्तु कर्म्मैवायो २।४।५७ अजेर्वी वा स्यात्ल्यो प्रवय णं प्राजनं करणाधिकरणयोश्च ३।३।११७ ल्युट् स्यात् इध्मप्रव्रश्चनः कुठारः गोदोहनी स्थाली खलः प्राक्करणाधिकरणयोरित्यधिकारः अ न्तर्देशे अन्तः शब्दाद्धन्तेर्ल्युट् णः स्यात् अन्तर्हणानं देशेति अन्तर्हननो देशः अन्तःपूर्वस्यैव अन्तर्घ्नन्ति न परः किम् अन्तर्घाणि अयनञ्च अयनक्षनस्य णोऽन्तः शब्दान्परस्य अन्तरयणम् अदेश इत्येव अन्तरयनो देशः पुंसि संज्ञायां घः प्रायेण ३।३।११८ हृदेर्घोऽनुपसर्गो सहित्संभृत्युपसर्गहीनस्सच्छादेर्ह्रस्वः स्याद्द्विपरे दन्ताश्छाद्यन्तेऽनेन दन्तच्छदः आकुर्वन्त्यस्मिन् आकरः गोचरसञ्चरवहव्रजव्यजापणनि गमाश्च ३।३।११९ घान्ता निपात्यन्ते हलश्चेति वक्ष्यमाणस्य घञोऽपवादः गावश्चरन्त्यस्मिन्निति गोचरो देशः सञ्चरन्तेऽनेन सञ्चरो मार्गः वह न्त्यनेन वहः स्कन्धः व्रजः व्यजत्यनेन व्यजनं निपातनाद्वीभावो न आपणः पण्यस्थानं निगच्छन्त्यनेन निगमश्छन्दः चात्कषः निकषः अवे तॄस्त्रोर्घञ् ३।३।१२० अवतारः कूपादेः अवस्तारो जवनिका हलश्च ३।३।१२१ हलन्ताद्घञ् स्यात् घापवादः रमन्ते योगिनोऽस्मिन्निति रा मः अपमृज्यतेऽनेन व्याध्यादिरित्यपामार्गः विमार्गः समूहनी अध्यायन्यायोद्यावसंहाराश्च ३।३।१२२ अधीयतेऽस्मिन् अध्यायः नियन्ति उ

ति। ल्युट् स्यादिति। नपुंसके भाव इति वा ल्युम्। अनट्वाह। पूर्वेणेति। ल्युडित्यनेनेत्यर्थः। नेहेति। स्नानकर्त्तत्वे पिस्नापने। ११ घ्नुवन्ति संहरन्त्यनेनेति विग्रहः॥ नगुरुः कर्त्ता किन्तु शिष्य इत्यर्थः। शरीरग्रहणं किं पुत्रस्य परिष्वञ्जनं सुखं मानसी प्रीतिरं चकरणाधिकरणयोर्येन नाप्राप्तिन्यायेन घञोऽपवादोयम्। अजपोस्त्रीमन्ययां

CC-0. In Public Domain. Digitization by eGangotri

उक्तं हि· अजवभ्यां स्त्री खलनाः स्त्रियाः खलनो विप्रतिषेधेनेति· इच्छेति· इच्छानि इच्छत्वेपेन· गोईदानेयस्यामिति विग्रहः आकुर्वन्तो निष्पन्य कुर्वन्त्यस्मिन्न्यवहारमि
त्याकरः उत्पत्तिस्थानम्· अवे अवेउपपदे हलश्चांकरणाधिकरणयोः पुंसि संज्ञायां घस्यात्· घस्यापवादः॥ ॥अवहारेत्यादि· वृत्तिकारस्त्वाधारावायशब्दे सूत्रेप्रसिप्या
वकारेणावहारशब्दं संजग्राह· तदसम्यद्गिति स्पष्टमेवउदंको हलश्चेत्येव सिद्धे उदकप्रतिषेधार्थमिदम्· उदकोदञ्चन इति· पुंसि सञ्ज्ञायामिति घे प्राप्ते घञ्वि
हितः उदके तु घञि प्रतिषिद्धे घ एव स्यान्न तु स्युडिति चेन्नैवम्· प्रतिषेधसामर्थ्यात् घस्याप्यप्रवृत्तेः नहि इह घे च घञि वा रूपे विशेषोऽस्ति· न च स्वरे विशेषः घे सति कृदुत्तरप॥

अवहाराधारावायानामुपसंख्यानम् उदङ्कोऽनुदके ३।३।१२३ उत्पूर्वादञ्चतेर्घञ् स्यात् नतूदके घृतमुदच्यते उद्ध्रियतेऽस्मिन्निति घृतोदङ्कः चर्म्म
मयम्भाण्डम् अनुदके किं उदकोदञ्चनः जालमानायः ३।३।१२४ आनीयन्ते मत्स्यादयोऽनेनेत्यानायः जालमिति किम् आनयनः खनो घ
च ३।३।१२५ चाद्घञ् आखनः आखानः घित्करणमन्यतोऽप्ययमिति ज्ञापनार्थम् तेन भगः पदमित्यादि खनेडडरेकेकवकावाच्याः आखः
आखरः आखनिकः आखनिकवकः एते खनित्रवचनाः ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ३।३।१२६ करणाधिकरणयोरिति निवृत्तम् एषु
दुःखसुखार्थेषूपपदेषु खल् स्यात् तयोरेवेति भावे कर्म्मणि च कृच्छ्रे दुष्करः कटो भवता अकृच्छ्रे ईषत्करः सुकरः निमिमीलियां खलचो
रात्वन्नेति वाच्यम् ईषन्निमयः दुष्प्रमयः सुविलयः। निमयः मयः लयः॥ ९ दण्डानिरवरेणान्नोऽनातना· घञ्यपि घाथादिस्वरेणनये वेति· जालमा॥
जलधान्ये ज्वलितिकसन्तेभ्यो णः इति णप्रत्यये जालशब्दः सिद्धः तेन जालशब्दोऽत्र निपात्यत इति नभ्रमितव्यम्· खनो घित्करणमिति· आखनइत्यादौ वर्जोरितिकुत्वस्य प्रस
क्त्यभावादिति भावः भगः पदमिति· ननु पदमित्यत्र घस्य किं प्रयोजनमिति चेदत्राहुः करणाधिकरणयोः पुंसि सञ्ज्ञायामिति यदि घः स्यात्तदा पदमिति न पुंसकं
न स्यात् तेनेन चेत् घो भवति तदा नित्यसिद्धिरिति· एते इति आखनादयः षडित्यर्थः ईषद्दुःसुषु इह सामान्योक्तावपि योग्यतावलाद्विशेषणस्य विषयविभागो लभ्यते
दुरिति कृच्छ्रार्थे इतरौ त्वकृच्छ्रार्थे इति तदेतद्दर्शयति· कृच्छ्रे दुष्कर इत्यादिना भवतेति· न लोकेति षष्ठीनिषेधात्कर्त्तरि तृतीया कृच्छ्रेत्यादि किं·॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



ईषत्कार्यस्वल्पं कार्यमित्यर्थः खलितिलकारः स्वरार्थः खित्करणं तु नुमर्थम्· निमिमीति मिनाति मिनोति दीङां ल्यपि च विभाषा लीयतेरिति प्राप्तं निषिध्यते· नियमयद्वित्यादिरास्च ॥ ❁ ॥ उपसर्गात्खलघञोः लभेश्चेत्यनेनैव सिद्धे नियमार्थमिदमित्याह· उपसर्गादेवेति· यदा स्वतीति· सुः पूजायाम्· अतिरति क्रमणे चेति तयोः कर्मप्रवचनीयत्वे कर्तृकर्मणोः चकारः सन्नियोगार्थः यदा कर्तृकर्मणोरीषदादीनां च युगपत्प्रयोगस्तदैव प्रत्ययो यथा स्यात्· न च कर्तृकर्मणोः प्रत्ययार्थत्वमे

उपसर्गात्खल्घञोः ७।१।६७ उपसर्गादेव लभेर्नुम् स्यात् ईषत्प्रलम्भः दुःप्रलम्भः सुप्रलम्भः उपालम्भः उपसर्गात्किम् ईषल्लभः लाभः न सुदुर्भ्यां केवलाभ्याम् ७।१।६८ उपसर्गान्तररहिताभ्यां सुदुर्भ्यां लभेर्नुम् स्यात् खल्घञोः सुलभं दुर्लभम् केवलाभ्यां किम् सुप्रलम्भः अतिदुर्लम्भः कथं तर्हि अतिसुलभमतिदुर्लभमिति यदा स्वती कर्मप्रवचनीयौ तदा भविष्यति ॥ कर्तृकर्मणोश्च भूकृञोः ३।३।१२७ कर्तृकर्मणोरीषदादिषु च भूकृञोः खल् स्यात् यथासंख्यं नेष्यते कर्तृकर्मणी च धातोरव्यवधानेन प्रयोज्ये ईषदादयस्तु ततः प्राक् कर्तृकर्मणोः च्व्यर्थयोरिति वाच्यम्· खित्त्वान्मुम् अनाढ्येनाढ्येन दुःखेन भूयते दुराढ्यम्भवम् ईषदाढ्यम्भवम् स्वाढ्यम्भवम् ईषदाढ्यङ्करः दुराढ्यङ्करः स्वाढ्यङ्करः च्व्यर्थयोः किम् आढ्येन सुभूयते आतो युच् ३।३।१२८ खलोऽपवादः ईषत्पानः सोमो भवता दुःपानः सुपानः भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वाच्यः दुःशासनः दुर्योधन इत्यादि षात्पदान्तात् ८।४।३५ नस्य णो न निष्पानं ॥ सर्पिष्पानं षात्किं निर्णयः पदान्तात्किं पुष्णाति पदे अन्तः पदान्तो यस्येति सप्तमीसमासोऽयम् तेनेह न सुसर्पिष्केण आवश्यकाधमर्ण्ययोर्णिनिः ३।३।१७० अवश्यङ्कारी शतन्दायी कृत्याश्च ३।३।१७१ आवश्यकाधमर्ण्ययोरित्येव अवश्यं हरिः सेव्यः शतन्देयं

वासु न तूपपदत्वमिति वाच्यम्· ईषदादीनामेवोपपदत्वे तु खलः खित्त्वस्य वैयर्थ्यापत्तेः सुमर्थं हि तत्सुम् चानव्ययस्य विधीयते· तस्मात्कर्तृकर्मणोरिति· उपपदत्वमेव तदेतदाह· ईषदादिषु चेति· कर्तृकर्मणोरिदं भूकृञोश्च हेतोयोर्यथासंख्यं प्राप्तम्· स्वीकृतं त्वकाशिकाकृता न्यासकारहरदत्तादिभिश्च ॥ ❁ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भाचापितथैवोक्तम्॰ तद्याख्यातभिश्चानुमोदितम्॰ तत्सर्वन्नादर्त्तव्यम्॰ यथासंख्यसूत्रस्थभाष्यविरोधादिति ध्वनयन्नाह॰ यथासंख्यंनेष्यत इति॰ ननूपपदयोर्मध्ये
पूर्वापरीभावव्यवस्था न सिध्यति भूक्तयोरव्यवहितत्वं कर्त्तृकर्मणोरेवेष्यते॰ नत्वीषदादीनाम्॰ एवञ्च कथमत्रेष्टव्यवस्थासिध्यतीति चेदत्राहुः बहुलग्रहणानुवृत्त्यादुरा
ढ्यम्भव इति भाष्योदाहरणाच्चेष्टव्यवस्थासिध्यतीति तदेतदभिप्रेत्याह॰ कर्त्तृकर्मणी चेति॰ भवतेः कर्त्तर्युदाहरति॰ अनाढ्येनाढ्येनेति॰ कर्मणि त्वनाढ्यआढ्योभूयते
इति विग्रहः भाव्यतेइति तदर्थः एवमग्रेपि विग्रहद्वयमुन्नेयम्॰ अनाढ्येन स्वयमेवक्रियते॰ अनाढ्यः आढ्यः क्रियत इति॰ इत्यादीति॰ आदिशब्देन दुर्दर्शनः
दुर्धर्षणः दुर्मर्षणः ॥ ॐ ॥ क्तिच्क्तौ॰ क्तिच चकारेण क्तिचीति विशेषणार्थः न क्ताविति क्तेहि क्तिनोपि ग्रहणं स्यादिति प्राञ्चः तन्न॰ एकानुबन्धपरिभाषयैव

क्तिच्क्तौ च संज्ञायां ३।३।१७४ धातोः क्तिच् क्तश्च स्यादाशिषि संज्ञायाम्। तनुतेतिति नेट्। भवतात्। भूतिः। नक्तिचि दीर्घश्च ६।४।३९ अ
निटां वनतितनोत्यादीनाञ्च दीर्घोनुनासिकलोपौ न स्तः क्तिचि परे। यन्तिः रन्तिः। वन्तिः। तन्तिः। सनः क्तिचि लोपश्चास्यान्यतरस्याम् ६
।४।४५ सनोतेः क्तिचि आत्वं वास्यात् लोपश्च वा। सनुतात्। सातिः। सतिः। सन्तिः। देवाएनन्देयासुः देवदत्तः। अलङ्खल्वोः प्रतिषेधयोः
प्राचां क्त्वा ३।४।१८ प्रतिषेधार्थयोरलङ्खल्वोरुपपदयोः क्त्वा स्यात्। प्राचांग्रहणम्पूजार्थम्। अमैवाव्ययेनेति नियमान्नोपपदसमासः।
दोदद्घोः। अलन्दत्वा। घुमास्था। पीत्वा खलु॥ अलङ्खल्वोः किम्। माकार्षीत्। प्रतिषेधयोः किम्। अलङ्कारः॥ ए क्तिनोव्यावृत्तिसिद्धेरिति हरदत्तः।

यत्तु वदन्तितितुत्रेत्यत्र सामान्यग्रहणार्थश्चकारः अन्यथा एकानुबन्धत्वादस्यैव ग्रहणं स्यात्तत्तु क्तिनइति तद्भ्रमात्॰ तितुत्रेति सूत्रेऽनुबन्धविशिष्टरूपानुच्चार
णेनैकानुबन्धपरिभाषायाउक्तिसम्भवस्यैवाभावात्॰ एतेन तितुत्रेति सूत्रे एकानुबन्धत्वात्तिचैव गृह्येत न तत्वयं क्तिच॰ ततश्चरोदितीति रूपन्न स्यादिति शंका
प्यपास्ता भूतिरिति। यद्यपीह परत्वात् श्युकः किती त्येवेट्निषेधो न्याय्यस्तथापि वन्तितन्योरिणिषेधार्थमावश्यकत्वात्फले विशेषाभावाच्च तितुत्रेत्युपन्यस्त
म्॰ दीर्घोनुनासिकेति॰ अनुनासिकस्य क्विझलोरिति दीर्घस्यानुदात्तोपदेशेत्यादिनानुनासिकलोपस्य च प्राप्तिरिति बोध्यम्॰ यन्तिरित्यादि॰ यम उपरमे रम क्रीडा

श्री
सि·कौ
पू·त
२५०

पूजार्थमिति· ननु विकल्पार्थमेवास्तु· अलंकृदित्वा अलंरोदनेनेति रूपद्वयसिद्ध्यर्थमिति चेन्नैवम्· वासरूपन्यायेनैतत्सिद्धेः न च क्त्वस्तु तुमुन्खलर्थेषु वासरूपविधिर्नेति सिद्धान्तात् युटि वासरूपन्यायो नास्तीति वाच्यम्· क्त्वतुडादयो ऽपवादभूताः स्ववाच्यं नित्यं बाधन्ते· इति हि तस्यार्थः इह तु ल्युडो ऽपवादः क्त्वेति। वैषम्यात्· ननु प्रैषादिषु क्त्वाल्येति वचनेनास्मिन्विषये कार्यार्थं वा सरूपविधिर्नावश्यमस्तीति ज्ञापितमिति चेत्किं ततः ज्ञापकसिद्धं न सर्वत्रेति तदनुरोधेन नतस्या भ्युपगमे बाधकाभावात्· अलंदत्वेति· अपात्रेन देयमिति फलितो ऽर्थः॥ ॥ उदीचाम्· व्यतिहारो व्यतिक्रमः मेङः कृतात्वस्य माङ् इति निर्देशो नानुबन्धकृतमना नेजन्तत्वमिति परिभाषां ज्ञापयति· तेन घुसंज्ञायां देयो प्यदाविति पर्युदासः सिध्यति अपमित्येति· समासे ऽनञ्पूर्वे इति वक्ष्यमाणेन क्त्वो ल्यपि तुक्· याचित्वा प्रणिद

उदीचां माङो व्यतीहारे ३।४।१९ व्यतीहारेऽर्थे माङः क्त्वा स्यात्। अपूर्वकालार्थमिदम्। मयतेरिदन्यतरस्याम्। ६।४।७०। मेङः इकारो न्तादेशः स्याल्ल्यपि। अपमित्य याचते। अपमाय। उदीचांग्रहणाद्यथाप्राप्तमपि। याचित्वा अपमयते। पराबरयोगे च ३।४।२० परेण पूर्वस्या वरेण परस्य योगे गम्ये धातोः क्त्वा स्यात्। अप्राप्य नदीं पर्वतः परः नदीयोगोत्र पर्वतस्य अतिक्रम्य पर्वतं स्थिता नदी अवरः पर्वतयोगोत्र नद्याः समा नकर्तृकयोः पूर्वकाले ३।४।२१ समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात्। क्त्वातुन्नव्ययकृतो भावे। भुक्त्वा व्रजति। द्वित्वमतन्त्र म्। स्नात्वा भुक्त्वा पीत्वा व्रजति। अनुदात्तेत्यनुनासिकलोपः। विस्तुत्वा सौति। स्वरत्यादेः श्र्युकः किति इति नित्यमिडभावः पूर्वविप्रतिषेधेन। स्तुत्वा।

दानीमर्थः पराबरअप्राप्येति· दक्षिणदेशस्थानां गङ्गामप्राप्य विन्ध्यः गङ्गाप्राप्तिविरहविशिष्टदेशस्थो विन्ध्य इत्यर्थः अत्र विन्ध्यात्परा गङ्गेति गम्यते· अतिक्रम्येति·। दक्षिणदेशस्थानामेवायमपि प्रयोगः अत्र हि गङ्गायाः पूर्वो विन्ध्य इति गम्यते· इह त्रिसूत्र्यां क्त्वाप्रत्ययस्य भावमात्रार्थत्वे पि विशेषणविशेष्यसंसर्गाभिधानाद्दितिना क्तिवैयर्थ्यमिति दिक् समानक इह धात्वधिकारे पि समानकर्तृत्वं क्रिययोरेव सम्भवतीत्याशयेनाह· धात्वर्थयोरिति· निर्धारणे षष्ठी सप्तमी वा धात्वर्थयोर्मध्ये पूर्वका लीयस्य धात्वर्थस्य तस्मिन्विद्यमानादित्यर्थः एवञ्च निर्देशो वा विभक्तिरेव पूर्वकाल इत्यस्य बहुव्रीहित्वद्योतिकेति फलितम् क्त्वा स्यादिति· स च भावे अव्ययकृत इतिवच

राम
२५०

CC-0. In Public Domain. Digitization by eGangotri

सच धातुनैव लभ्यः क्त्वाप्रत्ययार्थभूता क्रिया च क्रियान्तरं प्रति विशेषणं धातुसम्बन्धाधिकारात्· संसर्गश्चेह सामानाधिकरण्यं पूर्वोत्तरकालत्वं च तत्र संसर्गविशेष
तात्पर्यग्राहकाः क्त्वाणमुलादयः अत्र च समानकर्तृकयोरिति सूत्रांशेन सामानाधिकरण्यमुपनिबद्धम्· धातूपात्तव्यापाराश्रयस्य कर्त्तृतया नयापर्यवसानादिति दि
क् दिक्त्वमिति· ननु भीमांसा ब्राह्मणानां पूर्वमानयेत्युक्ते मध्यमो नानीयतेत तथेहापि बहुक्रियासमभिव्याहारे मध्यमक्रियावाचकात्क्त्वा प्रत्ययो न स्यादिति चेदत्राहुः
इहाप्याख्यातवाच्या क्रिया क्रियाप्रधानम्· नाम्नतिक्त्वानोपस्थिताः क्रियाः सर्वा एव विशेषणम्· ननु तासां परस्परसम्बन्धः गुणानां च परार्थत्वादिति· न्यायात्·।
अत एव स्नात्वा पीत्वा भुक्त्वा व्रजतीत्यादि नियमेन प्रयुज्यते· इति स्वरति सूती त्यादिना विकल्पे प्राप्ते नित्यार्थमाह· स्वरत्यादेरिति· ॥ ॥ क्त्विस्कन्दिस्कन्दिर्गतिशो
षणयोः इदुदुत्संज्ञेति वार्त्तिकादिकारमात्रस्येत्संज्ञानेत्यनिदितामिति पर्युदासोऽत्र न प्रवर्त्तत इति स्कन्दिग्रहणम्· स्कन्त्वेति· एकाच इति नेट्· मृड मृद· मृड सुखने·

क्त्विस्कन्दिस्यन्दोः ६।४।३१ एतयोर्नलोपो न स्यात् क्त्विपरे स्कंत्वा। ऊदित्वा दित्वा। स्यन्त्वा। स्यंदित्वा। न क्त्वा सेट् १।२।१८ सेट् क्त्वा कित्न स्यात्
शयित्वा। सेट् किम्। कृत्वा। मृडमृदगुधकुषक्लिशवदवसः क्त्वा १।२।७ एभ्यः सेट् क्त्वा कित् मृडित्वा। क्लिशः क्त्वानिष्ठयोः॥ क्लिशित्वा। क्लिष्ट्वा। उदि
त्वा उषित्वा। रुदविदमुषग्रहिस्वपिप्रच्छः संश्च १।२।८ रुदित्वा। विदित्वा। मुषित्वा। गृहीत्वा। नोपधात्थफान्ताद्वा १।२।२३ सेट् क्त्वा किन्स्याद्वा। श्रथित्वा। श्रन्थित्वा। गुफि
त्वा। गुम्फित्वा। नोपधात्किम्। कोथित्वा। रेफित्वा। वञ्चिलुञ्च्यृतश्च १।२।२४ सेट् क्त्वा किद्वा। वचित्वा। वञ्चित्वा। लुचित्वा। लुञ्चित्वा। ऋतित्वा। अर्ति

मृद क्षोदे· गुध परिवेष्टने· गुध रोषे च कुष निष्कर्षे· क्लिशू हिंसायां दिवादिः क्लिशू विबाधने क्र्यादिः वद व्यक्तायां वाचि· वस निवासे· किदिति· असंयोगाल्लिट्
किदित्यतः किदित्यनुवर्त्तते इति भावः उदित्वेति· यजादित्वात्सम्प्रसारणम्· उषित्वेति· वसतिक्षुधोरितीट् यजादित्वात्सम्प्रसारणम्· शासिवसीति षः गृहीत्वेति ग्रहि
ज्येति सम्प्रसारणम्· ग्रहोलिटीति इटो दीर्घः नोपधात्· अनन्तग्रहणं स्पष्टार्थम्· थफादिस्युक्तेपि धातोरेव क्त्वाप्रत्ययविधानाद्विशेष्यसन्निधानेन तदन्तविधिना
थफान्तादिति लाभात्· कोथित्वा रेफित्वेति· कुथ पूतीभावे रिफ कत्थनयुद्धनिन्दाहिंसादानेषु· इह रलो व्युपधादिति विकल्पोपि न भवति नोपधग्रहणसामर्थ्यात्· वचि
त्वेति· वंचु प्रलम्भने· लुचित्वेति· लुञ्च अपनयने· ऋतित्वेति· ऋतिः सौत्रो धातुर्घृणार्थकः तस्यार्द्धधातुकविषये· ऋतेरीयङिन्यस्य वैकल्पिकत्वात्तदभावे कित्वमनेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तृषिमृषि.भिनृषपिपासायां मृषतितिक्षायाम्· कृशतनूकरणे· नोपधेत्यत्रो वेत्यनुवर्तनात्काश्यपग्रहणम्पूजार्थम्· अंचेरिति· उदितो वेति विकल्पप्राप्तावयमा
रम्भः अञ्चित्वेति· नक्त्वासेडिति किन्वाभावान्नलोपो न· एवञ्चेह नाञ्चेः पूजायामिति· नलोपो नेति· प्रमादकारोक्तिर्दृष्टेत्याहुः जॄव्रश्च्योः जॄङ्स्मात्· श्युकः किती ति निषेधे

तृषिमृषिकृशेः काश्यपस्य १।२।२५ एभ्यः सेट्क्त्वा किद्वा। तृषित्वा। तर्षित्वा। मृषित्वा। मर्षित्वा। कृशित्वा। कर्शित्वा। रलो व्युपधाद्धलादेः सँश्च १।२।२६ इतिवाकित्वम्।
द्युतित्वा। द्योतित्वा। लिखित्वा। लेखित्वा। रलः किं। सेवित्वा। व्युपधात्किम्। वर्तित्वा। हलादेः किम्। एषित्वा। सेट् किं। भुक्त्वा। वसतिक्षुधोरिट्। उषित्वा।
वसित्वा। क्षुधित्वा। क्षोधित्वा। अञ्चेः पूजायामिति नित्यमिट्। अञ्चित्वा। गतौ तु अक्त्वेत्यपि। लुभित्वा। लोभित्वा। लुभो विमोहने इतीट्। विमोहने तु। लु
ब्ध्वा। जॄव्रश्च्योः क्त्वि ७।२।५५ आभ्याम्परस्य क्त्व इट् स्यात्। जरीत्वा। जरित्वा। व्रश्चित्वा। उदितो वा ७।२।५६ उदितः परस्य क्त्व इड्वा। शमित्वा। अनुनासिक
स्य क्वि झलोः क्ङिति इति दीर्घः। शान्त्वा। द्यूत्वा। देवित्वा। क्रमश्च क्त्वि। क्रम उपधाया वा दीर्घः स्यात् झलादौ क्त्वि परे। क्रान्त्वा। क्रन्त्वा। झलि किं। क्रमित्वा। पूङश्चेति वेट्। पवि
त्वा। पूत्वा। जान्तनशां विभाषा ६।४।३२ जान्तानां नशेश्च नलोपो वा स्यात् क्त्वि परे। भक्त्वा। भङ्क्त्वा। रक्त्वा। रङ्क्त्वा। मस्जिनशोर्झलीति नुम्। तस्य पक्षे लो
पः। नष्ट्वा। नंष्ट्वा। रधादिभ्यश्चेतीट्पक्षे। नशित्वा। झलादाविति वाच्यं नेह। अञ्जित्वा। ऊदित्वादिट्पक्षे। अक्त्वा। अङ्क्त्वा। जनसनखनां सञ्झलोः इत्यात्वं। खात्वा। खनि
त्वा। घनिस्यतीट्। दित्वा। सित्वा। मित्वा। स्थित्वा। दधातेर्हिः। हित्वा। जहातेश्च क्त्वि ७।४।४३ हित्वा। हाङस्तु। हात्वा। अदो जग्धिः। जग्ध्वा। समासेऽनञ्पूर्वे क्त्वो
ल्यप् ७।१।३७ अव्ययपूर्वपदेऽनञ्समासे क्त्वो ल्यबादेशः स्यात्। तुक्। प्रकृत्य। अनञ् किम्। अकृत्वा। पर्युदासाश्रयणान्नेह। परमकृत्वा॥ ॥

प्राप्ते व्रश्चेरुदित्वाद्विकल्पे प्राप्ते वचनमिदम् जरीत्वेति· वृतो वेति· इटो वा दीर्घः व्रश्चित्वेति· रुदविदमुषग्रहिस्वपिप्रच्छः संश्चेति कित्त्वनिषेधाद्ग्रहिज्येति सम्प्रसारणं न· द्यूत्वेति· इडभावपक्षे च्छ्वोः शूडित्यूठ्·
झलादाविति· जान्तनशामिति सूत्रे वक्तव्यमित्यर्थः· खात्वा खनित्वेति उदितो वेति वेट्· जग्ध्वेति· झरो झरीति पाक्षिको धलोपः· समासेऽनञ् नञ्भिन्ननञ्स्त्तरदशमव्ययमितियावत्·

व्याचष्टे· अव्ययेतिप्रकृत्येति·प्रशाब्दः त्काप्रकृत्यर्थगतप्रकर्षस्यद्योतकः सतुकुगतिप्रादयइति ख्यानेन नित्यंसमस्यते·पर्युदासेतिप्रसज्यप्रतिषेधाश्रयणेतुसादि वात्स्यपितिभावः॥ ॐ॥षत्वतुकोरसिद्धिकषत्वविषयमुदाहरति·कोसिचदिति·कोऽसिचदिति स्थितेएङः पदान्तादतीतिपूर्वरूपमेकादेशः तस्यान्तादिवच्चेतिपरादिव त्वेनस्यात्पदांद्येविति निषेधाभावादिणः परत्वेनषत्वंप्राप्तंएकादेशस्यासिद्धत्वेसति· अकारेणव्यवधानादिणः परत्वाभावान्नभवति· प्रकृतंल्यपिकार्यमुदा हरति· अधीत्येति· विधायेति· दधातेर्हिर्नप्रदायदोदद्घोरितिनप्रखन्य· जनसनखनेत्यात्वन्न प्रस्थायद्यतिस्यतीतीत्वन्न· प्रक्रम्य·क्रमश्चक्त्वीतिदीर्घोन·

षत्वतुकोरसिद्धः षत्वेतु किंच कर्तव्येएकादेशशास्त्रमसिद्धंस्यात्कोसिचत् इहषत्वन्न अधीत्य प्रेत्य ह्रस्वस्येतितुक् वाल्यपि ६।४।
३८ अनुदात्तोपदेशानांवनतितनोत्यादीनामनुनासिकलोपोवास्यात्ल्यपि व्यवस्थितविभाषेयं तेनमान्तानिटाम्वानान्तानिटाम्वनादी
नाञ्चनित्य आगत्य आगम्य प्रणत्य प्रणम्य प्रहत्य प्रमत्य प्रवत्य वितत्य अदोजग्धिः अन्तरङ्गानपिविधीन्वहिरङ्गोपिल्यबा
धते जग्धिविधौल्यपग्रहणात् तेनहित्वदत्त्वआत्वेत्वदीर्घत्वशूठ्इटोल्यपिन विधाय प्रधाय प्रखन्य प्रस्थाय प्रक्रम्य आपृच्छ्य
प्रदीव्यंतल्यपि ६।४।६९ ल्यपिपरेघुमास्थादेरीत्वन्नघेट् प्रधाय प्रमाय प्रगाय प्रपाय प्रहाय प्रसाय मीनातिमीनाति मिनोती।
त्यात्वं प्रमाय निमाय उपदाय विभाषालीयतेः विलाय विलीय णिलोपः उत्तार्य विचार्य ल्यपिलघुपूर्वात् ६।४।५६ लघुपूर्वा
त्परस्यणेरयादेशः स्यात्ल्यपिविगणय्य प्रणमय्य प्रवेभिदय्य लघुपूर्वात्किं सम्प्रधार्य॥१९ आपृच्छ्यप्रदीव्य छकारवकारयोश्छ्वोरिति
शूठेन ऊडभावस्योदाहरणानुप्रखन्यप्रदीव्येत्यादेव ल्यपि· कथन्तर्हिनिपीयय स्येतिश्रीहर्षप्रयोगइतिचेदत्राहुः पीङ्·पानेइतिदिवादिगणस्याद्य्यपिन
लोपइति· इहप्रशायप्रच्छाय्येत्यत्रशाछोरन्यतरस्यामितिप्राप्तस्येत्वस्याप्यभावोबोध्यः लघुपूर्वादिति· लघुः पूर्वोयस्माद्वर्णात्·लघुपूर्ववर्णान्यरस्येत्यर्थः विगण
य्येति·नन्विहणेर्लघुस्याल्लोपस्यपूर्वस्माद्विधौस्थानिवद्भावाल्लघुपूर्वकवर्णान्यरत्वंनास्ति·नचारम्भसामर्थ्येअनुगमय्येत्यादौचरितार्थत्वात्·अत्रोच्यतेपूर्वस्माद्वि
धौस्थानिवत्स्वमितिम्यम्·निष्ठायांसेटीतिलिङ्गात्·॥

सि·कौ·
त·न·
२८९

तथा चात्र स्थानिवत्त्वाभावाण्णेरयादेशो भवत्येव· निष्ठायां सेटीत्यस्यानित्यत्वज्ञापकत्वं तत्वचः परस्मिन्निति सूत्रेण वास्माभिरुपपादितमिति नात्रोपपाद्यते· प्र
णमय्येति· अमन्तत्वान्मितो मितां ह्रस्वः· प्रवेभिद्य्येति· भिदेर्यङन्तादेभिद्यत्र स्तां णिच्यल्लोपे यस्य हल इति यलोपः ननु ह्रस्वयलोपाल्लोपानामाभीयत्वेनासिद्धत्वाल्लघुपूर्वकेवर्णान्य
रोणिनस्तीति कथमिह णेरयादेशः स्यादिति चेन्मैवम्· असिद्धवदत्राभादित्यत्र समानाश्रयेत स्मिन्कर्तव्ये न दसिद्धं स्यादिति हि व्याख्यातं तेनात्रापशंकैव नास्ति· ह्रस्वादेः
यो हि णौ णेरयादेशस्तु ल्यपि परत इति व्याश्रयत्वात्· ॥ ॥ विभाषापः· अप्राप्तविभाषेयम्· आप्नोतेरिति· यद्यपीङो णिचि परतः क्रीङ्जीनां णावित्यात्वे ऽतिक्रीन्या

विभाषापः ६।४।५७ आप्नोतेर्णेरयादेशो वा स्यात्ल्यपि प्रापय्य प्राप्य क्षियः ६।४।५९ क्षियो ल्यपि दीर्घः स्यात् प्रक्षीय ल्यपि च ६।१।
४१ वेञो ल्यपि सम्प्रसारणं न स्यात् प्रवाय ज्यश्च ६।१।४२ प्रज्याय व्यश्च ६।१।४३ उपव्याय विभाषा परेः ६।१।४४ परेर्व्येञो वा सम्प्रसारणं स्यात् ल्य
पि तुकम्बाधित्वा परत्वात् हलः इति दीर्घः परिवीय परिव्याय कथं मुखं व्यादाय स्वपिति नेत्रे निमील्य हसतीति व्यादानसम्मीलनोत्तर
काले पि स्वापहासयोरनुवृत्तेः तदंशविवक्षया भविष्यति आभीक्ष्ण्ये णमुल्च ३।४।२२ पौनः पुन्ये द्योत्ये पूर्वविषये णमुल् स्यात् क्त्वा
च द्वित्वं स्मारं स्मारं नमति शिवं स्मृत्वा स्मृत्वा पायं पायं· भोजं भोजं· श्रावं श्रावं चिण्णमुलोरिति णमुल्परे णौ वा दीर्घः गामं गामं गमं गमं
विभाषा चिण्णमुलोरिति नुम्वा लम्भं लम्भं लाभं लाभं व्यवस्थितविभाषया उपसृष्टस्य नित्यं नुम् प्रलम्भं प्रलम्भम् जाग्रोऽविचिण्णल्ङित्सु इति गुणः

दिना पुकि आविति शब्दो ऽस्ति तथापि न स्यनेहृग्रहणं लाक्षणिकत्वादिति भावः· प्राप्येति· एतेनायमप्रयोगि वधू जागरं जागरम् ण्यन्तस्याप्येवम्·॥ ँ
वधपातकैर्भ्रमिमवाप्य दिवः खलु पात्यते इति श्रीहर्षप्रयोगो व्याख्यातः अवाप्येत्यस्यावापय्येत्यर्थसम्भवात् एतेन तत्रान्तर्भावितण्यर्थेनेति क्लेशमनुभवन्तः।
पराश्ताः ल्यप् स्थानिना किन्त्वादुचित्वपीति प्राप्तं सम्प्रसारणं निषेधयितुमाह ल्यपि चेति· ज्यश्च सम्प्रसारणं न स्यात्· एवं व्यश्चेत्यत्रापि व्याख्येयम्· कथमिति।
ल्यबादेशस्य स्थानिभूतः क्त्वाप्रत्ययो दुर्लभः· नहि धात्वर्थः पूर्वकाल इत्युक्तेः न चेह तदस्ति पूर्वं हसित्वा स्वपिति पश्चान्मुखं व्यादत्ते यदैव हसति तदैव नेत्रे सम्मीलयति· तथा च क्त्वाप्रत्य

५४५

राम
५४९

CC-0. In Public Domain. Digitization by eGangotri

प्रसक्तिरेवनास्तीतिप्रश्नः समाधत्ते व्यादानेत्यादिना· एतेनेश्वरः सर्वव्याप्य वर्त्ततेज्ञात्वातिष्ठतीत्यादिव्याख्यातम्· श्रीशैलशिखरंदृष्ट्वापुनर्जन्मनविद्यते· इत्यादौतुस
मानाकर्तृकतानिर्वाहार्थंस्थितस्येत्यादिर्यथासम्भवमध्याहार्य्यं· आभीक्ष्ण्येणमुल्च· ननुवासरूपन्यायेनक्त्वाप्रत्ययोभविष्यतीतिचग्रहणमिहव्यर्थमितिचेन्नैवम्· उक्तन्या
यसीकारेतुलडादिरपीहप्रवर्त्ततेनचेष्टापत्तिः विभाषाग्रेइतिवक्ष्यमाणसूत्रस्थविभाषाग्रहणस्यवैयर्थ्यप्रसङ्गात्· तत्रहिक्त्वाणमुलौ विभाषाग्रहणेनलडादिसमावेशा
र्थंविकल्प्येते· यद्यपिवासरूपन्यायेनैवलडादिःसिध्यतितथापिणमुलासहैवक्त्वाप्रत्ययोयत्रविधीयतेतत्रवासरूपविधिर्नप्रवर्त्ततइतिज्ञापनार्थंविभाषाग्रह
णंतत्फलंतुआभीक्ष्ण्येणमुल्चेत्यत्रलडाद्यप्रवृत्तिः ततश्चचकारेणैवक्त्वाप्रत्ययोलभ्यतइतिनास्त्येवतस्यवैयर्थ्यंकिञ्चवासरूपंविनैवक्त्वालडाद्योः स्त्रीकारे

नयद्यनाकांक्ष्ये ३।४।२३ यच्छब्देउपपदेपूर्वकालेयत्प्राप्तंतन्न यत्रपूर्वोत्तरेक्रियेतद्वाक्यमपरन्नाकांक्षतेचेत् यदयम्भुङ्क्तेततः
पठतिइहक्त्वाणमुलौन अनाकांक्ष्येकिम् यदयम्भुक्त्वाव्रजतिततोधीते विभाषाग्रेप्रथमपूर्वेषु ३।४।२४ आभीक्ष्ण्येइतिनानुवर्त्तते॥
एषूपपदेषुसमानकर्तृकयोः पूर्वकालेक्त्वाणमुलौवास्तः अग्रेभोजंव्रजति अग्रेभुक्त्वा प्रथमम्भोजम् प्रथमम्भुक्त्वा पूर्वम्भो
जम् पूर्वम्भुक्त्वा पक्षेलडादयः अग्रेभुङ्क्तेततोव्रजति आभीक्ष्ण्येतुपूर्वविप्रतिषेधेननित्यमेवविधिः अग्रेभोजम्भोजंव्रजति भुक्त्वाभुक्त्वा।
कर्म्मण्याक्रोशेकृञःखमुञ् ३।४।२५ कर्म्मण्युपपदेआक्रोशेगम्ये चोरङ्कारमाक्रोशति करोतिरुच्चारणेचोरशब्दमुच्चार्य्येत्यर्थः॥ ॥

तुनयद्यनाकांक्ष्य इत्यत्रक्त्वाप्रत्ययवत्· लडादिरपिनिषिध्येत· तथाचयदयंभुङ्क्तेततःपठतीत्युदाहरणंनस्यात्· सिद्धान्तेत्वाभीक्ष्ण्येणमुल्चेतिविशेषविहितयोः।
क्त्वाणमुलोरेवनिषेधात्सामान्यविहितलडादिर्भवत्येवेति· नास्त्येवानुपपत्तिरितिदिक्· पूर्वविषयइति· समानकर्तृकयोःपूर्वकालइत्यर्थः· पायंपायमिति· आ
तोयुक्· वादीर्घइति· णमेर्ल्यन्ताण्णमुलिमितांह्रस्वइतिह्रस्वेचकृतेवादीर्घइत्यर्थः· एयन्तस्यापीति· यत्तुप्राचाएयन्तनागतेस्त्रिणमुलोर्वावृद्धिरिति· मतमुपन्यस्तंतदपाणि
नीयमितिभावः। ॥ नयदि· अनाकाङ्क्षइति· पचाद्यजन्तेनसमासस्तद्दर्शयति· नाकाङ्क्षतेचेदिति· इहेति नन्वत्रमनन्तरस्येतिन्यायात्णमुलमाभूत्क्त्वातुसमानक
र्तृकयोरितिसूत्रान्तरेणस्यादेवेतिचेदत्राहुः पूर्वकालेयत्प्राप्नोति· तन्नेतिव्याख्यानात्क्त्वाप्रत्ययोपिनभवतीति· विभाषाग्रेपद्यप्यग्रशब्दोदेशविशेषवचनोप्यस्ति।।ए

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि॰कौ॰
टी॰त॰
२५०

प्रभोः प्रथमं भुंक्ते इत्यादिप्रयोगात्तथा पीहकालविशेषवाच्येव गृह्यते॰ प्रथमशब्दसाहचर्यात्॰ प्रथमं भुंक्ते इत्यादौ तु काल एव प्रतीयते॰ अग्रे इति सप्तम्यन्तस्यानुकरणं॰
प्रकृतिवदनुकरणमित्यस्य वैकल्पिकत्वादिभक्तेर्लुङ्कृतः अव्ययवामीयमितिवत्॰ अग्रेभोजमिति॰ अमैवाव्ययेनेति नियमादसमेवेदं॰ नत्वत्रोपपदसमासः नन्वग्रेप्र
थमपूर्वशब्दैः पूर्वकालत्वमुच्यते॰ इति कथमिह॰ क्त्वाणमुलौ स्यातामिति चेदत्राहुः अन्येभ्यो भोक्तृभ्यः पूर्वं भुक्त्वा व्रजतीति हि वाक्यार्थस्तत्राग्रेप्रभृतिभिर्भोक्त्रपेक्षया पू
र्वत्वमुच्यते चेदस्त्यपि अन्येभ्यो भोक्तृभ्यः पूर्वं व्रजतीति व्रजनापेक्षया पूर्वत्वं तु क्त्वाणमुल्भ्यां द्योत्यत इत्याशङ्क्य वात्र नास्तीति॰ नित्यमेव विधिरिति॰ अग्रे भुङ्क्ते इत्येव लडा
दिर्न प्रयुज्यत इति भावः ॥ ॥ स्वादुमि स्वादुमीत्यर्थग्रहणं व्याख्यानादित्याह॰ स्वाद्वर्थेष्विति॰ मान्तत्वमिति॰ ननु स्वादौ इत्येव सूत्रमस्तु मान्तत्वं तु णमुल्सन्नियोगेन वानुव

स्वादुमि णमुल् ३।४।२६ स्वाद्वर्थेषु कृञो णमुल् स्यादेककर्तृकयोः पूर्वकाले पूर्वपदस्य मान्तत्वं निपात्यते अस्वादीं स्वादीं कृत्वा भुङ्क्ते
स्वादुङ्कारम्भुङ्क्ते सम्पन्नङ्कारं लवणङ्कारं सम्पन्नलवणशब्दौ स्वादुपर्यायौ वा सरूपेणान्कापि स्वादुं कृत्वा भुङ्क्ते अन्यथैवङ्कथमित्थं
सु सिद्धाप्रयोगश्चेत् ३।४।२७ एषु कृञो णमुल् स्यात् सिद्धः अप्रयोगोऽस्य एवंभूतश्चेत् कृञ् व्यर्थत्वात्प्रयोगानर्ह इत्यर्थः अन्यथा
कारम् एवङ्कारं कथङ्कारम् इत्थङ्कारम्भुङ्क्ते इत्थं भुङ्क्ते इत्यर्थः सिद्धेति किम् शिरोऽन्यथा कृत्वा भुङ्क्ते यथातथयोरसूयाप्रतिवचने ३।
४।२८ कृञः सिद्धाप्रयोग इत्येव असूयया प्रतिवचने॥ ९, र्थनं॰ अकर्हिंचिदिति मुम्न विष्यति॰ एवञ्च निपातनं विनापि मान्तत्वं सिध्यतीति।

महत्वाघवमिति चेन्नैवम्॰ च्व्यन्तस्य मुम् न स्यादनव्ययस्येति वचनात्तत्र स्वादुंकारमित्यत्र च्वौ चेति दीर्घः स्यात्॰ संपन्नंकारमित्यादिष्वस्य च्वावितीत्वं स्या राम
त्॰ किञ्च स्त्रियाम्वोतो गुणवचनादिति ङीषि स्वाद्वीकारमिति स्यात्॰ अतोऽत्र स्वादुमीति रूपं निपात्यते॰ ननु आनजन्त्वान्नैव दीर्घो न वा ङीष्॰ निपातन २५०
मिह भावप्रत्ययमात्रविषयकं तेन स्वादुं कृत्वेत्यपि सिध्यति॰ स्यादेतत्॰ उक्तदोषपरिहाराय स्वादुमीत्येव सूत्रमङ्गीक्रियतां णमुल् तु तदनुवर्त्यतां कृञः स्वा
मुञ्चिकृतेपि स्वादुंकारमित्यादि सुरू॥ ॥ ॥ ॥

यसिद्धिरिति चेन्नैवम्· तथा सत्युत्तरसूत्रेषु सन्निहितत्वात्· स्वशब्देनैवानुवर्तन इति कन्यादर्शं ब्राह्मणवेदमित्यादिषु पूर्वपदस्य मुमागमः स्यादिति दिक्· व्यर्थ
त्वादिति निष्प्रयोजनत्वादित्यर्थः· तदेतद्दर्शयति· इत्थंभूत इत्यर्थे इति· इह शाब्दबोधे विशेषसत्त्वेपि फलितार्थकथनपरतया कारयितिणमुलन्तस्य निःफलत्वमुक्तमत
तिप्रयोजनत्वात्· विस्तरस्तु मनोरमादावनुसन्धेयः· शिरोन्यथेति· इह शिरोऽन्यथात्वं नौदनादिकं भुक्त इत्यर्थलाभाय करोतेः प्रयोगस्यावश्यकः तदभावे तु भुक्ति
क्रियागत एव प्रकारो गम्यते न तु शिरसोऽन्यथाकरणम्· अतः करोतेः प्रयोगार्हत्वमस्तीति णमुलन्तः करोतिरिह न प्रयुज्यत इति भावः ॥ ॥ यथाकारमिति·
यष्टुमनर्हः सन्यदिष्टः कृतीति तदेतदमुत्तरम्· अत्रापि वा सरूपन्यायेन पक्षे क्त्वाप्रत्ययो बोध्यः· कन्यादर्शमिति· अत्र दर्शनविषयीभूतानां सर्वासां कन्यानां वाका

यथाकारमहं भोक्ष्ये तथाकारं भोक्ष्ये किं तवानेन· कर्मणि दृशिविदोः साकल्ये ३।४।२९ कर्मण्युपपदे णमुल् स्यात्· कन्यादर्शं वर
यति सर्वाः कन्या इत्यर्थः· ब्राह्मणवेदं भोजयति यं यं ब्राह्मणं जानाति लभते विचारयति वा तं सर्वं भोजयतीत्यर्थः· यावति विन्दजीवोः
३।४।३० यावद्वेदं भुङ्क्ते यावल्लभते तावदित्यर्थः· यावज्जीवमधीते चर्मोदरयोः पूरेः ३।४।३१ कर्मणीत्येव चर्मपूरं स्तृणाति उदरपूरं भु
ङ्क्ते वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम् ३।४।३२ कर्मण्युपपदे पूरेर्णमुल् स्यादूकारलोपश्च वा समुदायेन वर्षप्रमाणे गम्ये गोष्पद
प्रं वृष्टो देवः गोष्पदपूरं वृष्टो देवः अस्येति किम् उपपदस्य माभूत् मूषिकाबिलप्रम् ॥ ९ ॥ ९ ॥ ९ ॥ ९ ॥ ९ ॥

र्थे अन्यथा साकल्यं बोध्यम्· सर्वा इति· दर्शनविषयीभूताः सर्वा इत्यर्थः· अतिशयप्रतिपादनपरमेतत्· ब्राह्मणवेदमिति· विद ज्ञाने· विद्लृ लाभे· विद विचार
णे इति धातवस्त्रयोऽन्यतमोऽव्याचष्टे· जानातीत्यादि· सत्तार्थस्य विदेरनेकार्थत्वान्नेह ग्रहणमिति भावः· यावति विन्द· विन्देर्लाभार्थस्यानुकरणं· तस्य हि विन्दतीत्या
दौ शे मुचादीनामिति नुमस्ति· यावल्लभत इति· असाकल्यमनेन दर्शयति· साकल्ये हि कर्मणि दृशिविदोरित्यनेनैव सिद्धम्· चर्मोकर्मणीत्येवेति· एवा
त्पूरेरिति ण्यन्तस्य निर्देशो न तु केवलस्य· इक्श्तिपेति· इकानिर्देशः· तस्याकर्मकत्वादिति भावः· चर्मपूरमित्यादि· चर्मपूरयित्वा ॥ ९ ॥ ९ ॥ ९ ॥

CC-0. In Public Domain. Digitization by eGangotri



उदरंपूरयित्वा· उदरपूरणविशिष्टाभुजिक्रियेत्यर्थः· इहपूर्वकालेइति नसम्बध्यते·सम्भवादप्रतीतेश्च·एवमन्यत्रापियथासम्भवम्बोध्यम् ॥ ः ॥ चेलेव्या
ख्यानादर्थग्रहणमित्याह· चेलार्थेष्विति· चेलक्नोपमित्यादि· यथावर्षणेचेलानिशब्दायन्ते· तथावृष्ट इत्यर्थः· अन्येतुक्नूयीशब्देउन्देच· उन्दीक्लेदने·क्लिदू
आर्द्रीभावे· इत्येवंक्नोपमितिणमुलन्तस्यप्रकृत्यर्थपर्यालोच्ययथावर्षणेनचेलान्यार्द्रीभवन्ति·तावद्वृष्टइतिव्याचख्युः·निमूलमिति·निर्गतंमूलमस्यनिमूलंस।

चेलेक्नोपेः ३।४।३३ चेलार्थेषुकर्मस्पपदेषुक्नोपेर्णमुल्स्याद्वर्षप्रमाणे चेलक्नोपंवृष्टोदेवः वस्त्रक्नोपंवसनक्नोपं निमूलस
मूलयोःकषः ३।४।३४ कर्मणीत्येव कषादिष्वनुप्रयोगम्वक्ष्यति अत्रप्रकरणेपूर्वकालइतिनसम्बध्यते·निमूलकाषङ्कषति समूल
काषंकषति निमूलंसमूलंकषतीत्यर्थः एकस्यापिधात्वर्थस्यनिमूलादिविशेषणसम्बन्धाद्भेदः तेनसामान्यविशेषभावेनविशेषणवि
शेष्यभावः शुष्कचूर्णरूक्षेषुपिषः ३।४।३५ एषुकर्मसुपिषेर्णमुल् शुष्कपेषम्पिनष्टि शुष्कम्पिनष्टीत्यर्थः चूर्णपेषं रूक्षपेषम्
समूलाकृतजीवेषुहन्कृञ्ग्रहः ३।४।३६ कर्मणीत्येव समूलघातंहन्ति अकृतकारङ्करोति जीवग्राहंगृह्णाति जीवति
इतिजीवः इगुपधलक्षणःकः जीवंतंगृह्णातीत्यर्थः करणेहनः ३।४।३७ पादघातंहन्ति पादेनहन्तीत्यर्थः यथाविध्यनुप्रयोगार्थः
सन्नित्यसमासार्थोयंयोगः भिन्नधातुसम्बन्धेतुहिंसार्थानाञ्चेतिवक्ष्यते स्नेहनेपिषः ३।४।३८ स्निह्यतेयेनतस्मिन्करणेपिषेर्णमुल् उद
हमूलेन समूलंनिमूलसमूलकषणाभिन्नंकषणमितिशाब्दबोधः·तेनेति·अत्रेदम्बोध्यम्·सामान्यंविशेष्यंविशेषणन्तु। ((पेषम्पिनष्टि उदकेनपिनष्टीत्य
विशेषणम्·आम्रोवृक्षइत्यादौआम्रोविशेषणंवृक्षस्तुविशेष्यमितिसर्वजनानुभवात् ततश्चात्रनिमूलकषणादिकं·विशेषणंकेवलकषणन्तुविशेष्यमितिस्नेहने·
शुष्कचूर्णेतिसूत्रेएवस्नेहनग्रहणन्नकृतं· तत्रहिकर्मणिदृशिविदोरितिसूत्रात्कर्मणीत्यनुवर्ततेइहतुपूर्वसूत्रात्करणइत्यनुवर्तनीयमिति ॥ ः ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हस्ते हस्त इत्यर्थग्रहणं तदाह· हस्तार्थे इति· संज्ञायाम्· अनधिकरणार्थ आरंभः तथैवेति· निमूलकाषं कषतीत्याद्युदाहृतमित्यर्थः मूलकोपदंशमिति· अयमर्थः

हस्ते वर्त्तिग्रहोः ३।४।३९ हस्तार्थे करणे हस्तवर्त्तं वर्त्तयति करवर्त्तम् हस्तेन गुलिकां करोतीत्यर्थः हस्तग्राहं गृह्णाति करग्राहं पाणिग्राहं स्वे पुषः ३।४।४० करण इत्येव स्व इत्यर्थग्रहणेनेन स्वरूपे पर्याये विशेषे च णमुल् स्वपोषं पुष्णाति धनपोषं गोपोषं अधिकरणे बन्धः ३।४।४१ चक्रबन्धं बध्नाति चक्रे बध्नातीत्यर्थः संज्ञायाम् ३।४।४२ बध्नातेर्णमुल् संज्ञायाम् क्रौञ्चबन्धं बद्धः मयूरिकाबन्धं अट्टालिकाबन्धं बन्धविशेषाणां संज्ञा एताः कर्त्रोर्जीवपुरुषयोर्नशिवहोः ३।४।४३ जीवनाशं नश्यति जीवो नश्यतीत्यर्थः पुरुषवाहं वहति पुरुषो वहतीत्यर्थः ऊर्ध्वे शुषिपूरोः ३।४।४४ ऊर्ध्वे कर्त्तरि ऊर्ध्वशोषं शुष्यति वृक्षादिरूर्ध्व एव तिष्ठन् शुष्यतीत्यर्थः ऊर्ध्वपूरं पूर्यते ऊर्ध्वमुख एव घटादिः वर्षोदकादिना पूर्णो भवतीत्यर्थः उपमाने कर्मणि च ३।४।४५ चात्कर्त्तरि घृतनिधायं निहितं जलम् घृतमिव सुरक्षितमित्यर्थः अजकनाशं नष्टः अजक इव नष्ट इत्यर्थः कषादिषु यथाविध्यनुप्रयोगः ३।४।४६ यस्मात् णमुलुक्तः स एवानुप्रयोक्तव्य इत्यर्थः तथैवोदाहृतम् उपदंशस्तृतीयायाम् ३।४।४७ इतः प्रभृति पूर्वकाल इति सम्बध्यते तृतीयाप्रभृतीन्यन्यतरस्यामिति वा समासः मूलकोपदंशं भुङ्क्ते मूलकेनोपदंशं दश्यमानस्य मूलकस्य भुजिम्प्रति करणत्वात् तृतीया यद्यप्युपदंशिना सह न शाब्दः सम्बन्धः तथाप्यार्थोऽस्त्येव कर्मत्वात् एतावतैव सामर्थ्येन प्रत्ययः समासश्च तृतीयायामिति वचनसामर्थ्यात् हिंसार्थानाञ्च समानकर्म्मकाणाम् ३।४।४८ तृतीयान्त उपपदेऽनुप्रयोगधातुना समानकर्मकाद्धिंसार्थाण्णमुल् स्यात् दण्डोपघातं गाः कालयति दण्डेनोपघा

मूलकेन भुंक्ते किं कृत्वा उपदश्य। किमुपदश्य अर्थात् मूलकमिति सम्बध्यते· एतावतैवेति· शाब्दान्वयाभावेपि आर्थिकान्वयमात्रेणेत्यर्थः वचनसामर्थ्यादिति· यदि हि न

यानेन शाब्दान्वये सत्येव सम्बन्धो भवेत् नहि करणे हन इतिवदुपदंशः करणे इत्येव ब्रूयात् ततश्च क्रियान्तरव्यवधानेऽपि करणत्वं मूलकेनेत्यस्येष्टमिति भावः एतच्च मनोरमा-
याग्रन्थानुसारेणोक्तम् अत्र केचित् नन्वेवमुपदंशः कर्मणीत्येव सूत्रमस्तु अथवोपदंश इत्येवास्तु उपमाने कर्मणीत्यतः कर्मणीत्यनुवर्त्य कर्मण्युपपदे उप-
पूर्वकाद्दंशेर्णमुल्स्यादित्यावश्यकं तत्किमनया कुसृष्ट्येति नचैवं कर्मण्युपपदे नित्यसमासः स्यादिति वाच्यम् करणे इत्युक्तेऽप्युक्तदोषस्य तुल्यत्वात् नच तृतीया-
प्रभृतीनीति सूत्रे करणप्रभृतीनीत्युक्तेनास्त्येव दोषः करणे हन इत्यादावप्यविकल्प इति सन्देहवारणाय व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणमिति
परिभाषास्वीकारादिति वाच्यम् तृतीयाप्रभृतीनीति सूत्रे कर्मणिप्रभृतीन्युक्तेऽपि दोषाभावात् कर्मण्याक्रोशे कृञः खमुञ् कर्मणि दृशिविदोः साकल्ये इत्यादावप्यविकल्प इति
सन्देहस्य व्याख्यानतो विशेषप्रतिपत्तिरिति परिभाषया वारयितुं शक्यत्वात् तस्मादुपदंशः कर्मणि इत्येव ब्रूयात् इति मनोरमाचिन्त्येत्याहुः वस्तुतस्तु कर्मणि

दण्डताडम् समानकर्मकाणामिति किम् दण्डेन चोरमाहत्य गाः कालयति सप्तम्यां चोपपीडरुधकर्षः ३।४।४९ उपपू-
र्वेभ्यः पीडादिभ्यः सप्तम्यन्तेन तृतीयान्तेन चोपपदेन णमुल् स्यात् पार्श्वोपपीडं शेते पार्श्वयोरुपपीडम् पार्श्वाभ्यामुपपीडं व्रजोपरोधं गाः
स्थापयति व्रजेन व्रजे उपरोधम्वा पाण्युपकर्षं धानाः संगृह्णाति पाणावुपकर्षं पाणिनोपकर्षं ॥ ९ ॥ ९ ॥ ८ ॥ ९ ॥ ९ ॥ 548

प्रभृतीन्यन्यतरस्यामित्युक्तेः उपमाने कर्मणि चेत्यतः कर्मणीत्यनुवर्त्य उपदंश इत्येव सूत्रमिति स्वीकारपक्षे कषादिषु यथाविध्यनुप्रयोगोऽपि विकल्पेन।
स्यात् मण्डूकप्लुत्याश्रयणं त्वगतिकगतिः उपदंशः कर्मणीति सूत्रस्वीकारपक्षेऽपि मूलकोपदंश मिति समासस्य वैकल्पिकत्वात्समासाभावपक्षे मूलक तत्त्व
मुपदंशमिति वाक्यं स्यादिष्यते तु मूलकेनोपदंशमिति करणप्रभृतीनीति मनोरमोक्तेऽतु समासाभाव पक्षे मूलकेनोपदंशमिति सिध्यत्येव करणे तृतीयायाः प्र- २५२
वृत्तेरिति दिक् कालयतीति कालविक्षेपे चुरादिः प्रेरयतीत्यर्थः ॥ ॐ ॥ दण्डताडमिति तड आघाते अयमपि चुरादिरेव सप्तम्यां च उपपूर्वेभ्य इति सूत्रे पीडादीनां समाहार
द्वन्द्वं कृत्वा उपपूर्वः पीडरुधकर्ष इति उत्तरपदलोपी समासः इति भावः इह सौत्रं पुंस्त्वं पञ्चम्यर्थे ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रथमेति। त्रयं कर्षतिप्रापानिर्देशः कृषविलेखने इत्यस्य गुणसहितस्योच्चारणात् फलं तु दादेर्व्युदासः यद्यपि विलेखन एवसोपि पठ्यते तथापि क्षेत्रविष
यकविलेखन एव सम्प्रयुज्यते पञ्चभिर्हलैः कर्षतीति दर्शनात् एवञ्च नौदादिकात् कृषेः क्त्वाप्रत्यय एव भवति क्षेत्रे उपकृष्य हलेनोपकृष्येति न त्विह णमुलि
ति स्थितमाकरे ॥ ॥ समासत्तौ । केशग्राहमिति केशेषु ग्रहणमवग्रुवामाभूत् सन्निकर्षप्रतिपादनपरमेतत् द्व्यङ्गुलोत्कर्षमिति द्वयोरङ्गुल्योः स

समासत्तौ ३।४।५० तृतीयासप्तम्योर्धातोर्णमुल् स्यात् सन्निकर्षे गम्यमाने केशग्राहं युध्यन्ते केशेषु गृहीत्वा हस्त
ग्राहं हस्तेन गृहीत्वा प्रमाणे च ३।४।५१ तृतीयासप्तम्योरित्येव द्व्यङ्गुलोत्कर्षं खण्डिकां छिनत्ति द्व्यङ्गुलेन द्व्यङ्गुले वोत्कर्षम् अपा
दाने परीप्सायाम् ३।४।५२ परीप्सा त्वरा शय्योत्थायं धावति द्वितीयायां च ३।४।५३ परीप्सायामित्येव ॥ ९ ॥

माहारो द्व्यङ्गुलं तत्पुरुषस्याङ्गुलेः संख्याव्ययादेरित्यच् समासान्तः द्व्यङ्गुलेनोत्कृष्य परिच्छिद्येत्यर्थः खल्वः खण्डः खण्डिका ह्रस्वः खण्डः खण्डिकेति मनोरमायामु
क्तम् यद्यपि ह्रस्वशब्दो वामनपर्यायस्तथा चेतनेष्वेव प्रायेण प्रयुज्यते अल्पह्रस्वे इति पृथक्सूत्रस्वारस्यात् तथापि ह्रस्वदीर्घ इत्यादिनिर्देशादचेतनेष्वपि क्वचिद्भवा
तीत्याहुः द्वितीयायां परीप्सायामित्येवेति कथं तर्हि अनुदात्तं पदमेकवर्जमिति नह्यत्र त्वरा गम्यते अत्राहुः अस्यां हि परिभाषायां त्वरा विवक्षिता तेनायमर्थः उदात्तः स्वरितो वा
यत्र विधीयते तत्र तत्समकालमेवैकमचं वर्जयित्वा पारिशिष्टमनुदात्तं कर्तव्यं न विलम्बितव्यमिति ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृ·
सि·कौ· यष्टिग्राहमित्यादि· एवं खलु युद्धाय त्वरन्ते यद्वासन्नं यस्यादिकमपि गृहीत्वा धावन्ति नायुधं प्रतीक्षन्त इति भावः· अस्यपगोरमिति· असिमुद्यम्येत्य
टी·त· यष्टिग्राहं युध्यन्ते। लोष्टग्राहं। अपगुरो णमुलि ६।१।५३ गुरी उद्यमने इत्यस्यैचो वा आत्वं स्यात् णमुलि। अस्यपगोरं युध्यन्ते। अस्यप
२५३ गारं। स्वाङ्गेऽध्रुवे ३।४।५४ द्वितीयायामित्येव। अध्रुवे स्वाङ्गे द्वितीयान्ते धातोर्णमुल्। भ्रूविक्षेपं कथयति। भ्रुवं विक्षेपं। अध्रुवे किम् शिर उत्क्षिप्य। येन
विना न जीवनं तद् ध्रुवं। परिक्लिश्यमाने च ३।४।५५ सर्वतो विबाध्यमाने स्वाङ्गे द्वितीयान्ते णमुल् स्यात्। उरःप्रतिपेषं युध्यन्ते। कृत्स्नमुरः पीडयन्त इ
त्यर्थः· उरोविदारम् प्रतिचस्करे नखैः। ध्रुवार्थमिदम्। विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः ३।४।५६ द्वितीयायामित्येव द्वितीयान्ते उप
पदे विशादिभ्यो णमुल् स्याद्व्याप्यमाने आसेव्यमाने चार्थे गम्ये। गेहादिद्रव्याणां विशादिक्रियाभिः साकल्येन सम्बन्धो व्याप्तिः क्रियायाः पौनःपुन्यमासे
वा। नित्यवीप्सयोरिति द्वित्वं तु न भवति। समासेनैव सम्भावनत्वयोरुक्तत्वात्। यथा व्याभीक्ष्ण्ये णमुलुक्तः एवं तथापि उपपदसंज्ञार्थमासेवा
यामिह पुनर्विधिः। गेहानुप्रवेशमास्ते। गेहङ्गेहमनुप्रवेशं। गेहमनुप्रवेशमनुप्रवेशं। एवं गेहानुप्रपातं। गेहानुप्रपादं। गेहानुस्कन्दं। असमासे तु
गेहस्य णमुलन्तस्य च पर्यायेण द्वित्वं। अस्यतितृषोः क्रियान्तरे कालेषु ३।४।५७ क्रियामन्तरयति व्यवधत्त इति क्रियान्तरः तस्मिन्नर्थे
वर्त्तमानादस्यतेस्तृष्यतेश्च कालवाचिषु द्वितीयान्तेषु उपपदेषु णमुल् स्यात्। द्व्यहात्यासं गाः पाययति। द्व्यहमत्यासं। द्व्यहतर्षं द्व्यहन्तर्षं। आ
त्यसनेन तर्षेण च गवां पानक्रिया व्यवधीयते। अद्य पाययित्वा द्व्यहमतिक्रम्य पुनः पाययतीत्यर्थः। नाम्न्यादिशिग्रहोः ३।४।५८ द्वितीयायामि
र्थः· उपपदसंज्ञार्थमिति विशिपतीति सूत्रे द्वितीयायामित्यनुवर्तनात् इत्लस्योपपदसंज्ञार्थमित्यर्थः॥ ६ ॥ १ त्येव। नामादेशमाचष्टे। नामग्राहमाह्वयति· राम
२५३

549

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अव्ययेअयथेति·नयथाभिप्रेतं तथाख्यानइत्यर्थः·अप्रियस्यनीचैः कथनंयथाभिप्रेताख्यानम् तद्विपरीताख्यानेइतियावत्·नन्वप्रियाख्यानेइत्येवकुतोनोक्तमितिचेदत्राहुः·प्रियस्यनीचैःकथनमपिप्रियाख्यानमेव·नत्वप्रियाख्यानमिति·नीचैःकृत्यनीचैःकारंप्रियंब्रूतेइतिप्रयोगोनस्यात्·अप्रियस्यनीचैःकथनमाप्यप्रियाख्यानमितिनीचैःकृत्यनीचैःकारमप्रियंब्रूतेइतिप्रयोगोपिस्यादित्ययथाभिप्रेताख्यानेइत्युक्तमिति·तिर्यक्कृत्वेति·अनृजुत्वादग्रतःस्थितंपार्श्वतः। कृत्वागतइत्यर्थः·स्वाङ्गे तस्प्रत्ययोयस्मात्तस्मात्प्रत्ययस्तस्मिन्स्वाङ्गे उपपदेइत्येके·प्रत्ययग्रहणपरिभाषयातस्प्रत्ययान्तेस्वाङ्गे·इत्यन्ये·तसश्चासौप्रत्ययश्चेतिक

अव्ययेऽयथाभिप्रेताख्यानेकृञःक्त्वाणमुलौ ३।४।५९ अयथाभिप्रेताख्यानंनामअप्रियस्योच्चैःप्रियस्यनीचैःकथनं।उच्चैःकृत्य।उच्चैःकृत्वा।उच्चैःकारमप्रियमाचष्टे।नीचैःकृत्य।नीचैःकृत्वा।नीचैःकारंप्रियंब्रूते।तिर्यच्यपवर्गे ३।४।६० तिर्यक्शब्दउपपदेकृञःक्त्वाणमुलौस्तःसमाप्तौगम्यायाम्।तिर्यक्कृत्यगतः।तिर्यक्कृत्वा।तिर्यक्कारंसमाप्यगतइत्यर्थः।अपवर्गेकिं।तिर्यक्कृत्वाकाष्ठंगतः।स्वाङ्गेतस्प्रत्ययेकृभ्वोः ३।४।६१ मुखतःकृत्यगतः।मुखतःकृत्वा।मुखतःकारम्।मुखतोभूय।मुखतोभूत्वा।मुखतोभावम्।नाधार्थप्रत्ययेच्व्यर्थे ३।४।६२ नाधार्थप्रत्ययान्तेच्व्यर्थविषयेउपपदेकृभुवोःक्त्वाणमुलौस्तः।अनानानानाकृत्वा।नानाकृत्य।नानाकारं।विनाकृत्य।विनाकृत्वा।विनाकारंनाना

र्मधारयः·तस्प्रत्ययेपरतोयत्स्वाङ्गं तस्मिन्नुपपदइतितुप्राञ्चः·तत्रयद्यपिस्वाङ्गमात्रन्नोपपदन्तथापित

ऽभूय।नानाभूत्वा।नानाभावं।अनेकंद्रव्यमेकंभूत्वा॥

स्मिन्नित्येनन्यक्कृतिप्रत्ययसमुदायपरमितिवोध्यम्·मुखतःकारंमुखतोभूयेति·क्त्वाणमुलोःकृभुवोश्चयथासंख्यंनेष्यतेइतिभावः·मुखतइत्यत्राद्यादित्वात्तसमर्थेनतसिःप्रत्ययग्रहणंकिम्·मुखेनतस्यतिमुखतः·तसुउपक्षये क्विप्·धातुत्वादिहात्वसंतनस्येतिदीर्घोन मुखतःकृत्वागतइतिकाशिकादौस्थितं·वस्तुतस्तुप्रत्ययाप्रत्ययपरिभाषयैवेष्टसिद्धेःप्रत्ययग्रहणंसुत्यजम्·नाधार्थनार्थौविनञ्भ्यामितिविहितौनानाञौ·धार्थाःद्वित्र्योश्चधमुञितिधमुञादयः·संख्यायाविधार्थेधाइतिधाप्रत्ययोधार्थकोभवतीत्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



एकधाभूयेत्यादि· एवं द्वैधंकृत्य त्रैधंभूय द्वैधम्भावमित्याद्युदाहर्तव्यम्· ननु नानाञौ प्रत्ययौ धा च प्रत्ययः धमुञा द्विविधौ तु एकाद्धो धमुञन्यतरस्यामित्यतो
धद्दत्यनुवर्त्यते धामादेशत्वाश्रयणेऽपि स्थानिवद्भावेन धमुञादिर्धाप्रत्ययो भवतीति किमर्थं प्रत्ययग्रहणमित्याक्षिपति· प्रत्ययग्रहणमिति· यद्यप्युक्तरी
त्या धाग्रहणेन धमुञादेर्ग्रहणं सम्भवतीत्यर्थग्रहणमिहव्यर्थम्· तथापि धमुञन्तात्स्वार्थे डदर्शनमिति डप्रत्ययान्तसंग्रहार्थं ग्रहणं· अर्थग्रहणं नतु फ
लन्तु द्वैधीकृत्येत्यादिप्रयोगः तूष्णीमिति कृञो निवृत्त्यर्थं तूष्णीं ग्रहणम्· अन्वच्यानन्विहा च इत्यकारलोपे चाविति पूर्वस्याणो दीर्घे ऽन्वूचीविति निर्देशमु

एकधाभूय। एकधाभूत्वा। एकधाभावं। एकधाकृत्य। एकधाकृत्वा। एकधाकारं। प्रत्ययग्रहणाङ्किं·। हिरुक्कृत्वा। पृथग्भूत्वा। तूष्णीमि
भुवः ३।४।६३ तूष्णींशब्दे भुवः क्त्वाणमुलौ स्तः। तूष्णींभूय। तूष्णींभूत्वा। तूष्णींभावं। अन्वच्यानुलोम्ये ३।४।६४ अन्वक्शब्द उपप
दे भुवः क्त्वाणमुलौ स्त आनुकूल्ये गम्यमाने अन्वग्भूय आस्ते अन्वग्भूत्वा अन्वग्भावं अग्रतः पार्श्वतः पृष्ठतो वाऽनुकूलो भूत्वा आ।
स्त इत्यर्थः आनुलोम्ये किं अन्वग्भूत्वा तिष्ठति ॥९ चिन्तम्· शुभागपागिति सूत्रे प्रतीचोपदिति वत्· एवं तिर्यच्यपवर्ग इति सूत्रेऽपि तिरश्चीत्येव नि
र्देष्टुमुचितमिति चेदत्र केचित्· शास्त्रोक्तं कार्यमर्थवदेव भवति अर्थश्च लोके प्रसिद्ध एव गृह्यते· अभिव्यक्तपदार्था ये स्वतन्त्रा लौकिकश्रुताः शास्त्रार्थस्तेषु कर्त
व्य इति न्यायात्· अतोऽनुकरणे न भविष्यतीत्यन्वचीति सम्यगेवेति· तच्चिन्त्यम्· एवं तर्हि स्त्रियो दीर्घादित्यादावियङादिकं न स्यात्· प्रतीचोपदित्यपि नसि।
ध्येदिति· वस्तुतस्तु प्रकृतिवदनुकरण मित्यस्य वैकल्पिकत्वादन्वचीत्यादिनिर्देशेऽपि न दोषः· वैकल्पिकत्वञ्च यत्तदेतेभ्य इति सूत्रे त्यदाद्यत्वस्य वारणादेकाः



550

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेषाभावदर्शनाच्च निर्णीयत इति प्रागेव प्रपञ्चितम्· अग्रत इत्यादिरन्वक् शब्दस्यानुकल्पमात्रे विश्रान्ते देशविशेषवाचित्वे नियमो नेति ध्वनयितुमिदं
म्·।·ः·प्रवृत्तो भूत्वेत्यर्थ इति· इहान्वक्शब्देनानुकूलो ऽननुकूलो वेति न स्पृश्यते तस्य देशविशेषमात्रे पर्यवसानात्· प्रामाणान्तरे क्वचिदनुकूलालाभेपि· अ

प्रवृत्तो भूत्वेत्यर्थः इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितं विस्तरस्तु यथाशास्त्रं दर्शितः शब्दकौस्तुभे भट्टोजिदीक्षितकृ
तिः सैषा सिद्धान्तकौमुदी प्रीत्यै भूयाद्भगवतो र्भवानीविश्वनाथयोः श्रीभट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुद्यामुत्तरार्द्धं समाप्तं

न्वक् छन्दस्यतत्समर्पणे व्यापाराभावादनुलन· किन्तु लौकिवभवतीति व्यवस्थाबोध्या· इति श्रीपरमहंसपरिव्राजकाचार्यश्रीवामनेन्द्रस्वामिचरणसे
वकज्ञानेन्द्रसरस्वतीकृतायां सिद्धान्तकौमुदीव्याख्यायां कृदन्तं समाप्तम्·॥ ॥ इति सिद्धान्तकौमुदीटीकाकृदंतं समाप्तम्॥ शुभम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि· कौ· ॥श्रीगणेशायनमः॥ सिन्दूरेणविराजितंत्रिनयनंदिक्संख्यदोर्भिर्युतं भक्तानुग्रहकारकंप्रमदयाश्लिष्टंसदानंदनं अष्टाविंशतिवर्णकेष्वसततंयंकिंनयां जन
वै· तंदेवंगणपंस्मरामिसततंचंद्रार्कचूडंविभुं १ यत्तकोदिसमस्तनेत्रकमलप्रातेप्रसादेष्विवप्रत्यक्षः प्रमितः परंकिरणवानन्वर्थगोवर्द्धनः सोयंपंडितमंड
२५५ लोद्भटरटत् वाहींद्रवृंदाग्रणीः श्रीरामांघ्रिनिषेवकः समजनिश्रीमौनिगोवर्द्धनः २ रघुनाथपदारविंदसेवावशतस्तस्यबभूवनंदनः रघुनाथइतीड्यनाम।
गम्योरघुनाथांघ्रिनिसेवकःसुधीः ३ बभूवुस्तस्यचत्वारस्तनयास्तुनयाबुधाः महादेवाभिधःश्रेष्ठोमहाभाष्यस्तभाषितः ४ रामकृष्णद्वितीयोसौरामकृष्णां
घ्रिसेवकः तृतीयोजयकृष्णोस्मिश्रीकृष्णानामतद्भवः ५ श्रीमत्सिद्धांतकौमुद्याःस्वरवैदिकखंडयोः नत्वामुनित्रयंहृद्यांटीकांकुर्वेसुबोधिनीं ६ सुधाद्भ्रा
नश्रीकुमुदवनविद्योतनकरीसदासद्युत्यतिप्रसरणपरानंदनकरी कुमार्गध्वांतस्यप्रसभमभिविध्वंसनकरीकृतिर्भूयादेषाबुधजन मनःप्रांगणचरी।
७ इयताप्रबंधेनलौकिकेषुशब्देष्वन्वाख्यातेष्वपिवैदिकान्वाख्यानमवशिष्यते· नचेदिदमप्रयोजनंरक्षोहागमलघ्वसंदेहाःप्रयोजनमितिवदताभाष्य
कारेणवेदरक्षाव्याकरणारंभप्रयोजनत्वेनमुख्य तयाविधानात् ब्राह्मणेननिःकारणः षडंगोवेदोध्येयोज्ञेयश्चेतिवेदार्थज्ञानोपायतयावेदांगत्वेनैवव्याकर
णाध्ययनविधानाच्च नन्वेवमपिवैदिकशब्दानांलौकिकशब्दाभिन्नत्वात्तदनुशासनेनैवसिद्धेकिमर्थंतेषामनुशासनमितिचेन्नलौकिकशब्देभ्योभिन्ना
अपिवैदिकशब्दाः संति तद्यथात्मनादेवयुमघ्वाजभारगृभ्णामित्तेइत्यादयोवेदेदृश्यंते लोकेतुआत्मनाजहारगृण्हामीत्यादयः अतएवभाष्यकारोलौकि राम
केभ्योवैदिकानभेदेनव्यपदिशंति अथशब्दानुशासनंकेषांशब्दानांलौकिकानांवैदिकानांचेतीतितेषामाख्यानमावश्यकमितिमनसिविभाव्याह ॥ २५५

का० १

551

CC-0. In Public Domain. Digitization by eGangotri

छंदसीत्यादि ॥ ॥ पुनर्वसुशब्देनोडूतावयवस्य ज्योतिः समुदायस्याभिधानाद्द्वयोर्द्विवचने प्राप्ते एकवचनं विधीयते तदाह ॥ द्वयोरित्यादि वास्यादिति । द्वयोरे
कवचनं वास्यादिति जात्याख्यायामित्यतः अन्यतरस्यामित्यनुवर्त्तनात् लोकेत्विति गंगत्ता विवादद्वः पुनर्वसू इत्यादौ ॥ विशाखयोः प्राग्वदिति द्वयोरेकवचनं
वास्यादित्यर्थः विशाखेति अमरस्तु विशाखेति प्रयुंजानो द्विवचननियमं नेच्छति सूत्रं तु दासीनं २ षष्ठीयुक्तश्छंदसि वा पतिः समास एवेत्यतः पतिरि
ति वर्त्तते पतिः समास एवेति नियमाद समासेन प्राप्तौ नीति वचनमारभ्यते पतिनेति घित्वादाङो नेति नाभावः षष्ठीति किम् मया पत्या जरदृष्टिर्यथासः छं
दसीति किम् यामस्य पत्ये योगं विभज्येति षष्ठीयुक्तश्छंदसीति उक्त एवार्थः ततो वा छंदसीति निवर्त्तते यावदिह शास्त्रे कार्यं तच्छंदसि वा भवति तदाह

ॐ श्रीगणेशाय नमः छन्दसि पुनर्वस्वोरेकवचनम् १।२।६१ द्वयोरेकवचनं वा स्यात् । पुनर्वसुर्नक्षत्रम् पुनर्वसू वा लोके तु द्विव
चनमेव ॥ विशाखयोश्च १।२।६२ प्राग्वत् । विशाखा नक्षत्र । विशाखे ॥ षष्ठीयुक्तश्छन्दसि वा १।४।९ षष्ठ्यन्तेन युक्तः पतिशब्दः
छन्दसि घिसंज्ञो वा स्यात् । क्षेत्रस्य पतिना वयम् । इह वेति योगं विभज्य छन्दसीत्यनुवर्त्तते । तेन सर्वे विधयश्छन्दसि वैकल्पिकाः
बहुलं छन्दसीत्यादिरस्यैव प्रपञ्चः । यचि भम् ॥ नभोङ्गिरोमनुषां वत्युपसंख्यानम् ॥ नभसा तुल्यं नभस्वत् । भत्वान्नरुत्वाभावः ।
अङ्गिरस्वदङ्गिरः । मनुष्वदग्ने । जनेरुसीति विहितं उसिप्रत्ययो मनेरपि बाहुलकात् ॥ वृषण्वस्वश्वयोः वृषन् वर्षकं वसु यस्य सः वृष
ण्वसुः वृषण्वश्वः । इहान्तवर्तिनीं विभक्तिमाश्रित्य पदत्वे सति नलोपः प्राप्तो भत्वाद्बाध्यते । अत एव पदान्तस्येति
णत्वनिषेधोपि न । अल्लोपो न इत्यल्लोपो न अनङ्गत्वात् ॥ तेनेत्यादिना नभोङ्गिरो नभस् अङ्गिरस् मनुस् एषां वति परे भत्वं वक्तव्यमित्यर्थः

नभस्वदिति तेन तुल्यमिति वतिः भत्वफलमाह रुत्वाभाव इति ससजुषो रिति प्राप्तस्य न त्रहि पदस्येत्यनुवर्त्तते अङ्गिरसा तुल्यमङ्गिरस्वत् अत्रापि दे
हलीदीपकन्यायेन रुत्वाभाव इति संबध्यते मनुष्वदिति मनुषा तुल्यम् अत्र भत्वादादेश प्रत्यययोरिति षः पदसंज्ञायां तु रुत्वे स्यात् तु वत्वं अपदां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·कौ· तस्येतिवचनात् वाहुलकादिति वहूनर्थान्लातीतिवहुलम् लाआदाने अस्मादातोनुपसर्गेकइतिकः वहुलस्यभावोवाहुलकं। मनोज्ञादित्वाद्वुञ् वृष वृषणिच्येनदस्य
वै·सु· अम्स्योश्चपरतोभंस्यात् निपातनान्येतानिछंदोविषयाणीतिकैयटः वृषण्वसुरिति लोकेवृषवसुः वृषाश्व ःनलोपःप्रातिपदिकान्तस्येत्यनेन अतए
२५६ वेति भत्वादेवेत्यर्थः अनंगत्वादिति अल्लोपोनइत्यत्रांगस्येत्यधिकारात् ॥ ❀ अयस्मयादीनि आनंतर्योङ्गसंज्ञाद्वारेणैवनिपातनंप्राप्तमित्याह संज्ञाद्वयमिति।
नन्वनन्तरस्येतिन्यायंवाधित्वोभयसंज्ञाविधानेकिंप्रमाणमित्याशंक्याह तथाचवार्त्तिकमिति कुत्वमितिचोः कुरित्यनेन जश्त्वाभावइति झलांजशोन्तइतिप्राप्तस्य अ
वसानेति अयस्मयादिषुक्तक्तेत्यादयः समुदायाएववोध्याः तेनजश्त्वमस्तुकुत्वमाभूदितिवैपरीत्येनप्रसज्येतेतिवोध्यम् नैनमिति वाचामिनाप्रभवस्तेषुप्येनं
अयस्मयादीनिछन्दसि १।४।२० एतानिछन्दसिसाधूनि। भपदसंज्ञाधिकाराद्यथायोगंसंज्ञाद्वयंवोध्यं। तथाचवार्त्तिकम्॥ उभयसंज्ञान्यपीति
वक्तव्यमिति॥ सतुष्टभासऋक्वतागणेन। पदत्वात्कुत्वं। भत्वाज्जश्त्वाभावः। जश्त्वविधानार्थोयाःपदसंज्ञायाभत्वसामर्थ्येनवाधात्। नैनंहि
न्वंत्यपिवाजिनेषु। अत्रपदत्वात्जश्त्वम्। भत्वात्कुत्वाभावः॥ तेप्राग्धातोः॥ छन्दसिपरेऽपि १।४।८१ व्यवहिताश्च १।४।८२ हरिभ्यांयाह्योकआ। आमन्द्रेरिंद्रहरिभिर्याहि॥ इत्यिभवतिभ्यांच। आभ्यामपरोलिट्कित्। समीधेदस्युहन्तमम्। पुत्रईधेअथर्वणः। वभूव। इदम
त्याख्यातम्। इन्धेश्छंन्दोविषयत्वाद्भुवोवुकोनित्यत्वात्ताभ्यांलिटःकिद्वचनानर्थक्यमिति। इतिप्रथमोध्यायः॥ विद्वांसंनहिन्वंतिविवदितुंनगक्ती 552
त्यर्थः तेप्राक् व्याख्यातम् अस्यापवादमाह छंदसीत्यादि गत्युपसर्गसञ्ज्ञकाश्छंदसिपरेप्रयोक्तव्याः५॥ अपिशव्दात्पूर्वेव्यवहिताअपिगत्युपसर्गसंज्ञकाःप्रयो
क्तव्याःसूत्रद्वयस्योदाहरणेआह हरिभ्यामित्यादि आयाहीतिप्राप्ते तेप्रागित्यत्रसंज्ञानियमपक्षोभाष्येउक्तः तेवृन्यनेनप्रादीनुपेत्यतत्पर्यतान्स्वरूपेण परामृश्य।
धातोःप्राक्प्रयुक्तानामेषांपूर्वसूत्रैकवाक्यतयासंज्ञाविधानात् अस्मिंश्चपक्षेछंदसिपरेऽपिव्यवहिताश्चेतिसूत्रद्वयं नकर्त्तव्यम् इंधिइंधीत्युच्चारणार्थेनइका

देशः सुट् तिथोरितिवत् न तु इक् क्लिपा वितिङ्कानलोपापत्तेः असंयोगादित्यतः लि ट् किदित्यनुवर्तनेनदाह लिट् किदिति ञिइंधी दीप्तौ लिटः कित्वादनिदितां
मिति नलोपः संयोगान्तत्वात्पूर्वेणाप्राप्तौ वचनं बभूवेति कित्वाद्गुणाभावे भुवो वुगिति वुक् अत्रापि कित्वात्पूर्वेणाप्राप्तौ वचनं इदमिति इंधीति सूत्रम् छंदोविषय
त्वादिति अयमभिप्रायः इंधेर्भाषायामिजादेश्चेत्याम्भाव्यं छंदसि तु अमंत्रे इति प्रतिषेधात् यद्यप्यमूनास्ति तथापि छंदस्युभयथेति लिटः सार्वधातुकत्वेङित्वात्समी
धे इति नलोपः अमभावस्त्वार्धधातुकत्वात् छंदसि दृष्टानुविधानात् वुको नित्यत्वादिति परनित्येति परिभाषया परान्नित्यस्य बलीयस्त्वात् कृताकृतप्रसंगित्वेन नित्य
त्वात् ६॥ ॥ इति प्रथमोध्यायः ॥ ॐ ॥ तृतीया कर्मणि द्वितीयेत्यतः कर्मणीति वर्तते द्वितीयायां प्राप्तायां तृतीया विधीयते चशब्दात्सापि भवति तदाह कर्मणीति यवाग्वेति

तृतीया च होश्छन्दसि २।३।३ जुहोतेः कर्म्मणि तृतीया स्यात् द्वितीया च । यवाग्वाऽग्निहोत्रं जुहोति । अग्निहोत्रशब्दोऽत्र हविषि वर्तते । यस्या
ग्निहोत्रमधिश्रितममेध्यमापद्येतेत्यादिप्रयोगदर्शनात् । अग्नये हूयत इति व्युत्पत्तेश्च । यवाग्वाख्यं हविर्देवतोद्देशेन त्यक्त्वा प्रक्षिपतीत्यर्थः
द्वितीया ब्राह्मणे २।३।६० ब्राह्मणविषये प्रयोगे दिवस्तदर्थस्य कर्म्मणि द्वितीया स्यात् । षष्ठ्यपवादः गामस्य तदहः सभायां दीव्येयुः ॥ चतुर्थ्यर्थे
बहुलं छन्दसि २।३।६२ षष्ठी स्यात् । पुरुषमृगश्चन्द्रमसे गोधा कालका दार्वाघाटस्ते वनस्पतीनाम् । वनस्पतिभ्य इत्यर्थः । षष्ठ्यर्थे चतुर्थी
तिवाच्यं ॥ या खर्वेण पिबति तस्यै खर्वः ।

अत्र यवागूशब्दात्तृतीया अग्निहोत्रशब्दाच्च द्वितीया अग्निहोत्रशब्दो हविर्वाचकः जुहोतिश्च प्रक्षेपणार्थः यवाग्व
भिन्नं हविरग्नौ प्रक्षिपतीत्यर्थस्तदाह यवाग्वाख्यमित्यादि भिन्नविभक्त्यवरुद्धत्वेपि भिन्नार्थकविभक्त्यनवरुद्धत्वान्नामार्थयोरभेदान्वयः भाष्ये चैतत्सूत्रं प्रत्याख्यातं
अग्निहोत्रशब्दो ह्यग्नावपि वर्तते यस्य अग्निहोत्रं प्रज्वलितमिति दर्शनात् हूयते अस्मिन्निति व्युत्पत्तेश्च तथा च यदा यवागूशब्दात्तृतीया तदाग्निहोत्रशब्दो ह्यग्नौ वर्तते
जुहोतिश्च प्रीणने यवाग्वा अग्निं प्रीणयतीत्यर्थः यदा यवागूशब्दाद्द्वितीया तदा अग्निहोत्रशब्दो हविषि वर्त्तते जुहोतिश्च प्रक्षेपणे यवाग्वाख्यं हविर्द्रव्यं प्रक्षिपतीत्य
र्थः ।७। द्वितीया दिवस्तदर्थस्येति वर्तते । तदाह ब्राह्मणेत्यादि सोपसर्गस्य छंदसि विभाषोपसर्ग इत्यनेन व्यवस्थितविभाषया सिद्धे निरुपसर्गार्थ आरंभः षष्ठ्यपवा

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· वहुलग्रहणाच्चंद्रमसेरुदमोराश्चेदित्यादौ षष्ठ्यभावः ९॥ः ॥ यजेर्धातोः करणे कारके छन्दसि विषये वहुलं षष्ठी स्यात् वहुलं अदोजग्धीत्यतः अद इति लुङ्स
वै· सु· नोरित्यतः घस्लृ इति च अदो वहुलं घस्लादेशः स्यात् छंदसि घस्तामिति अदेर्लुङि रूपम् अडभावश्चेति वहुलं छंदस्यमाङ्योगेऽपीत्यनेन नन्विदं लुङ्सनोरि
२५७ त्यनेन सिद्धमित्याशंक्योदाहरणान्तरमाह सग्धिरिति अत्तं ग्धिः अदेः क्तिनि घस्लादेशे घसिभसोर्हलि चेत्युपधालोपे झलो झलीति सलोपः झषस्तथोरिति धत्व
म् घस जश्त्वम् न च जश्त्वे कर्तव्ये ऽल्लोपस्य स्थानिवत्त्वं न पदांतेति सूत्रेण जश्त्वे तन्निषेधात् ततः समानशब्देन समासे कृते समानस्य छंदस्यमूर्द्धप्रभृत्युदर्केष्विति
सूत्रेण समानस्य सः २१ हेमंतशिशिरा परवल्लिंगं द्वंद्वतत्पुरुषयोरिति प्राप्तम् अहोरात्रे इति अहश्च रात्रिश्चेति द्वंद्वे कृते ऽहः सर्वैकदेशेत्यनेन समासांतो अच् य

यजेश्च करणे २।३।६३ इह छन्दसि वहुलं षष्ठी। घृतस्य घृतेन वा यजते॥ वहुलं छन्दसि २।४।३९ अदो घस्लादेशः स्यात्। घस्तान्नूनम्
।लुङि मन्त्रे घसेति च्लेर्लुक्। अडभावः। सग्धिश्च मे॥ हेमन्तशिशिरावहोरात्रे च छन्दसि २।४।२८ द्वन्द्वः पूर्ववल्लिङ्गः हेमन्तश्च शिशिरा
श्च हेमन्तशिशिरौ। अहोरात्रे। अदिप्रभृतिभ्यः शपः॥ वहुलं छन्दसि २।४।७३ वृत्रं हनति वृत्रहा। अहिः शयत उपपृक्। अत्र लुङ्
न। अदादिभिन्ने ऽपि क्वचिल्लुक्। त्राध्वं नो देवाः।जुहोत्यादिभ्यः श्लुः॥ वहुलं छन्दसि २।४।७६ दाति प्रियाणि चिद्वसु। अन्यत्रापि। पूर्णां विवष्टि

553

सतिचेतीकारलोपः राजान्ताहाः पुंसीति प्राप्तम् द्वित्वमतंत्रं अहोरात्राणि विदधत् छंदसि किं ऽऽहेमंतशिशिरे अहोरात्रौ यद्यपि पाठक्रमेणेदं वहुलं छंदसीति घ
स्लादेशविधायकसूत्रात्पूर्वं व्याख्यातुं युक्तं तथापि व्यत्ययो वहुलमिति वक्ष्यमाणेन लिंगव्यत्ययविधायकेन गतार्थमिति ध्वनयितुं तथा न व्याख्यातं १२ वहुलं
छंदसि वहुलं शपो लुक् स्यात् अदिप्रभृतिभ्य इत्युक्तं ततो न भवति न च यो वोदाहरति वृत्रं हनतीत्या हंति शेति इति लोके त्राध्वमिति त्रैङ् पालने आदेच उपदेशे
शितीत्यात्वं त्रायध्वमिति लोके दातीति ददातीति लोके अन्यत्रापीति जुहोत्यादिभिन्नेपि श्लुर्भवतीति शेषः विवष्टीति वश कांतौ अदादिस्तावितिद्वित्वं भृञामि राम
॥ मित् वहुलं छंदसीति सूत्रेणाभ्यासस्येकारः वश्चेति षत्वं ष्टुत्वं ॥ २५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मंत्रेघस घसॢअत्तेरादेशः ह्वरः ह्वृ कौटिल्ये असत्तानगुणानुकरणं ह्वरेति अकारस्तूच्चारणार्थः णश अदर्शने वृञ् वरणे वृङ् संभक्तौ दह भस्मीकरणे आ
त् आकारांताः माङ् पूरणेत्यादयः वृजी वर्जने डुकृञ् करणे गम्लृ गतौ जनी प्रादुर्भावे अक्षन्निति अत्तेर्लुङि झिः घसॢआदेशस्येति लुङ् सनोरितिविहितस्य मा
ह्वरिति माङि उपपदे ह्वरतेः लुङि तिप् इतश्चेतीकारलोपः च्लेर्लुकि हलोनेसार्वधातुकेनिगुणेकृत्ते रपरत्वेह लङ्याविति लोपः प्रणगिति प्रपूर्वान्नसेर्लुङ् हल्
ङ्याविति लोपः उपसर्गादसमासेपीतिणत्वं मन्यस्येतिमकारेऽनुनासिकपरेपरोऽनुनासिकइतिङः कुत्वमितिपक्षेत्रश्चेति षत्वेननङितिरूपंबोध्यम् आव

मन्त्रेघसह्वरणशवृदहाद्वृच्कृगमिजनिभ्योलेः २।४।८० एभ्योलेर्लुक्स्यान्मन्त्रे। अक्षन्नमीमदन्तहि। घसॢआदेशस्यगमहनेत्युपधालो
पेशासिवसीतिषः माह्वर्मित्रस्य। धूर्तिःप्रणङ्मर्त्यस्य। नघोर्वेतिकुत्वं। सुरुचोवेनआवः। मानआधक्। आदित्याकारान्तग्रहणं। आप्रा
द्यावापृथिवी। परावर्गभारभृद्यथा। अक्रन्नुषासः। त्वेरयिञ्जागृवांसोअनुग्मन्। मन्त्रग्रहणंब्राह्मणस्याप्युपलक्षणं अज्ञतवाअस्यदन्ताः। वि
भाषानुवृत्तेर्नेह। नताअगृभ्णन् जनिष्टहिषः॥ इतिद्वितीयोध्यायः॥ अभ्युत्सादयाम्प्रजनयाञ्चिकयांरमयामकःपावयांक्रियाद्विदामक्र
न्निति च्छन्दसि। ३।१।४२ आद्येषुचतुर्षुलुङि आम् अकदृत्यनुप्रयोगश्च। अभ्युत्सादयामकः। अभ्युदसीषददितिलोके। प्रजनयामकः। प्रा
जीजनदित्यर्थः। चिकयामकः अचैषीदित्यर्थेचिनोतेराम् द्विर्वचनंकुत्वंच। रमयामकः। अरीरमत् पावयांक्रियात् पाव्यादितिलोके। विदा
((मक्रन्। अवेदिषुः॥

इति रूपं आधगिति आङ्पूर्वाद्दहेर्लुङ् दादेर्धातोर्घ इति घः एकाचोबशोभष् भावः आप्रा इति आङ्पूर्वात्प्राधातोः सिप् रुत्वय
वियलोपः परावर्गिति परापूर्वाद्वृजेस्सिप् उपधागुणेचोःकुरितिकुत्व अक्रन्निति झेङित्त्वाद्गुणाभावेयण् अनुग्मन्निति अनुपूर्वाद्गमेर्झिः गमहनेत्युपधा
लोपः ननुमंत्रशब्दः संहितायां रूढ इति अज्ञतेत्यादौ ब्राह्मणप्रयोगेलुग्नप्राप्नोतीत्याशंक्याह मंत्रग्रहणमित्यादि अज्ञतेतिगमहनेत्युपधालोपः ब्राह्मणप्रयोगे
यंमंत्रेतिकिं अघसत् अह्वार्षीत् अनशत् अवारीत् अधाक्षीत् अप्रासीः अवर्जीत् अकार्षीत् अगमत् अजनि अजनिष्ट॥ इतिद्वितीयोध्यायः॥ अभ्युत्सादया

CC-0. In Public Domain. Digitization by eGangotri



स्तां निपात्यन्ते पद्लृ विशरणगत्यवसादनेषु जनी प्रादुर्भावे रमु क्रीडायां ण्यन्तेभ्य एभ्यो लुङि आम्प्रत्ययो निपात्यते चिञ् चयने अस्मादाम् प्रत्यये द्विर्वचनं कुत्वं च अकइति प्रत्येकं संबध्यते तदाह आद्ये चिति अकइति कृञो लुङि इति सिच्लेर्मन्त्रे घसेत्यादिना लुक् तिपो हल्ङ्यादिलोपः सादयामकइति आमदुति लुङो लुक् अभ्युदसीषददिति सदेर्ण्यन्ताल्लुङि चङि णौ चङ्युपधाया ह्रस्वः चङीति द्विर्वचनं हलादिः शेषः सन्वल्लघुनीति सन्वद्भावे सन्यत इतीत्वं लघोर्दीर्घः लोकइति वेदेऽपि पाक्षिकमिदं बोध्यम् विदाङ्कुर्वन्त्विति सूत्रादन्यतरस्याग्रहणानुवृत्तेः पावयामिति पवतेः पुनातेर्वा ण्यन्तादाशीर्लिङ्याम् क्रियादित्यनुप्रयोगश्च क्रियादिति करोतेराशीर्लिङि रूपम् लिङाशिषीत्यार्द्धधातुकत्वाद्विकरणाभावः रिङ् शयग्लिङ्क्षु इति रिङ् विदामक्रन्निति विदेर्लुङि आम् गुणाभावः लुङं तकरोत्यनुप्रयोगश्च ॥ ः ॥ गुपेः आप्प्रत्ययाभावस्थलेऽप्येवेदं सूत्रे केवलस्योच्चारणात् अजूगुपतमिति गुपू रक्षणे तस्थस्थमिपामिति थस्य तम् तुजादीनां दी-

गुपेश्छन्दसि ३।१।५० च्लेश्चङ्वा । गृहानजूगुपतं युवं । अगोप्तमित्यर्थः ॥ नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः ३।१।५१ च्लेश्चङ् न । मा त्वायातो जरितुः काममूनयीः । मा त्वाग्निर्ध्वनयीत् ॥ कृमृदृरुहिभ्यश्छन्दसि ३।१।५९ च्लेरङ् वा । इदन्तेभ्यो करन्नमः । अमरत् । अदरत् । यस्मानोः सुः तुमारुहत् ॥

र्घोऽभ्यासस्येत्यभ्यासस्य दीर्घः अगोप्तमिति ऊदित्वादिड्भावे वदव्रजेति वृद्धिः झलो झलीति सिचो लोपः इट्पक्षे अगोपिष्टम् आयप्रत्यये अगोपायिष्टम् इत्यत्र चत्वारि छन्दसि लोके तु चङं वर्जयित्वा त्रीण्येवेति विवेकः ॥ नोनयति ऊन परिहाणे ध्वन शब्दे इल प्रेरणे अर्द गतौ याचने च एभ्यो ण्यन्तेभ्यश्च्लेर्णिश्रीति प्राप्तश्चङादेशो नेत्यर्थः तत्रोनयत्येलयती चुरादी ण्यन्तौ ध्वनयतिरपि चुरादिरदन्तो घटादिर्वा तत्र अर्दयतिस्तु हेतुमण्ण्यन्तः ऊनयीरिति मध्यमपुरुषैकवचनम् नमाङ्योगइति आट् प्रतिषेधः इदमिन्द्रं प्रति सव्यस्य ऋषेर्वचनम् त्वा पतन्त्वामिच्छन्तः जरितुः स्तोतुः मम काममभिलाषं मा ऊनयीः ऊनं मा कार्षीरित्यर्थः । औननदिति भाषायाम् ध्वनयीदिति तिप् नमाङ्योगइत्यट्प्रतिषेधः भाषायां तु घटादेरदिध्वनत् चुरादेरदध्वनत् ऐलयीत् आर्दिदत् ऐलिलदिति लोके त्व याम

मृदृ च्लिलुङीत्यतः च्लिरिति अस्यातिवर्तीत्यतो ङितीत्यतो वेत्यनुवर्तते तदाह च्लेरित्यादि अकरमिति डुकृञ्करणे मिप् अङि ऋदृशोऽङीति गुणः अमर २५८

554

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति मृङ् प्राणत्यागे व्यत्ययेन परस्मैपदम् अदरदिति दृ विदारणे अरुहदिति रुह बीजजन्मनि प्रादुर्भावे च लोके तु अकार्षीत् अमृत अदारीत् अरुक्षत ॥ छंदसि निष्ट
र्क्यादयः ग्राह्याः छंदसि निपात्यन्त इति क्यपि प्राप्त इति ऋदुपधाच्चेति सूत्रेण आपृच्छ्यमिति प्रच्छ ज्ञीप्सायाम् ग्रहिज्येति संप्रसारणं प्रतिषीव्येति षिवु तन्तुसंताने
हलि चेति दीर्घः उपचाय्यपृडमिति उपचाय्यं च तत्पृडं चेति कर्मधारयः हिरण्यइति हिरण्येऽभिधेये इत्यर्थः॥ छंदसि वनसन इति वन षण संभक्तौ रक्ष पालने मथ विलो

छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्य्यस्तर्य्याध्वर्य्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृ
डानि ३।१।१२३ कृन्ततेर्निस्पूर्वात् क्यपि प्राप्ते ण्यत्। आद्यन्तयोर्विपर्य्यासः निसः सत्वञ्च। निष्टर्क्यं चिन्वीत पशुकामः। देवशब्दे उपपदे
ह्वयतेर्जुहोतेर्वा क्यप् दीर्घश्च। स्पर्द्धन्ते वा उ देवहूये। प्रउत् आभ्यां नयतेः क्यप्। प्रणीयः। उन्नीयः। उत्पूर्वाच्छिषेः क्यप्। उच्छिष्यः। मृ
ङ् स्तृञ् ध्वृञ्भ्यो यत्। मर्य्यः स्तर्य्या स्त्रियामेवायं। ध्वर्य्यः। खनेर्यत्ण्यतौ। खन्यः। खान्यः। यजेर्य्यः। शुन्धध्वं दैव्याय कर्म्मणे। देवयज्यायै। आ
ङ्पूर्वात्पृच्छेः क्यप्। आपृच्छ्यं धरुणं वाज्यर्षति। सीव्यतेः क्यप् षत्वं च। प्रतिषीव्यः। ब्रह्मणि वदेर्ण्यत्। ब्रह्मवाद्यम्। लोके तु वदः सु
पि क्यप् चेति क्यप्यतौ। भवतेः स्तौतेश्च ण्यत्। भाव्यः। स्ताव्यः। उपपूर्वाच्चिनोतेर्ण्यत् आयादेशश्च पृडे उत्तरपदे। उपचाय्यपृडम्॥
हिरण्य इति वक्तव्यं। उपचेयपृडमेवान्यत्। मृड सुखने पृड चेत्यस्मादिगुपधलक्षणः कः॥ छन्दसि वनसनरक्षिमथाम् ३।२।२७
एभ्यः कर्म्मण्युपपदे इन् स्यात्। ब्रह्मवनिं त्वा। क्षत्रवनिं। उत नो गोषणिं धियम्। ये पथां पथिरक्षयः। चतुरक्षौ पथिरक्षी। हविर्म्म
थीनामभि

डनेएभ्य इत्यर्थः स्तंवप्रत्ययोरिन् इत्यतः इन्निति वर्त्तते नेनदाह इत्याद्विति वनषण संभक्तावितिभ्वादिगणे न सह निर्दिष्टयोरेव ग्रहणं न तु वनु याचने ष
णुदाने इति तनादिकयोः सानुबंधकत्वात् ब्रह्मवनिमिति ब्रह्म वनति क्षत्रं वनति गां सनतीति विवक्षायामिन् तदंतात् द्वितीयैकवचनं सुपां मादित्वात् अत्वम् पथिरक्षय

इति पथ्यानक्षयंतीति विग्रहः पथिरक्षीति पथ्यानाम् रक्ष
नक्षीति विग्रहः हविर्भ्यं पथानद्धिति विग्रहः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



छंदसि षहमर्षणे भजो ण्विरिति वर्तते नदाह ण्विः स्यादिति॥ ननु तुरासाहं पुरोधयेति लोके प्रयोगाद्दृश्यन्ते तेषां का गतिरिति चेत् णिजं ताच्छिच्बोध्यः एतेनाषाडिति सहेः साडः सङ्तिपातनम् २१ वहः आग्वदिति ण्विः स्यादित्यर्थः २२ हव्येऽनंतःपादं मध्यमवाणो हव्यशब्दे उपपदे वहे र्ञुट् स्यात् पादमध्ये चेन्न पदांतेत्रि फलितोर्थः हव्यवालग्निरिति अन्तडस्थलः हयोभ्यासस्तयोर्मध्यमेत्पसंपद्यते सड कारोत्र कारद्वतिप्रातिशाख्ये विहितः॥ जनसन जनादिभ्यो धातुभ्यश्छंदसि विट् स्यात् अभेगादृति हलदंतादिति सप्तम्यलुक्॥ मंत्रेश्वेतवहो श्वेतादिपूर्वेभ्यो वहादिभ्यो ण्विन् स्यात् अतार्सणिककार्यार्थनिपातनम् श्वेतशब्दे कर्तृवाचिन्युपपदे वहेः कर्मणि कारके ण्विन् प्रत्ययः उक्थकर्म

छन्दसि सहः ३।२।६३ ण्विः स्यात्। एतेनाषाट्॥ वहश्च। ३।२।६४ प्रागत्। ण्विस्यात्। योगविभाग उत्तरार्थः॥ कव्यपुरीषपुरीष्येषु ञ्युट्। ३।२।६५ एषुव हेर्ञ्युट् स्याच्छन्दसि। कव्यवाहनः। पुरीषवाहनः। पुरीष्यवाहनः। हव्येऽनन्तःपादं ३।२।६६ अग्निश्च हव्यवाहनः। पादमध्ये तु वहश्चेति ण्विः देवो हव्यवालग्निरजरः पिता नः॥ जनसनखनक्रमगमो विट् ३।२।६७ विड्वनोरित्यात्वम्। अब्जाः। गोजाः। गोषादिन्द्रोनृषा असि। सनोतेरनः इति षत्वं। इयं शुभेभिर्विसखादुवारुजत्। आ दधिक्राः शवसा पञ्च कृष्टीः। अग्रेगाः॥ मन्त्रेश्वेतवहोक्थशस्पुरोडाशो ण्विन् ३।२।७१ श्वेतवाहादीनां डस् पदस्येति वक्तव्य॥ यत्र पदत्वम्भाविनत्र ण्विनोपवादो डस् वक्तव्य इत्यर्थः। श्वेतवाः। श्वेतवाहौ। श्वेतवाहः। उक्थानि उक्थैर्वा शंसति। उक्थशा यजमानः। उक्थशासौ। उक्थशासः। पुरो दाश्यते दीयते पुरोडाः॥ अवे यजः ३।२।७२ अवयाः। अवयाजौ। अवयाजः॥ अवयाः श्वेतवाः पुरोडाश्च ८।२।६७ एते सम्बुद्धौ कृतदीर्घा निपात्यन्ते। चादुक्थशाः॥ ण्विकारोचोपपदे संसतेः प्रत्ययः नलोपश्च पुरः पूर्वस्य दाश्रृ दाने इत्यादेर्डत्वं कर्मणि च प्रत्ययः डस इति पदस्येति प्रत्येकमभिसंबध्यते भाविपदत्वाभ्यपेणेन वेदमुच्यते तेनदाह यत्र पदत्वं भावीति डसंतस्येत्यर्थः श्वेतवादृति श्वेता एव तं वहन्ति श्वेतवाद्नः अत्वसंतस्येति दीर्घः उक्थशासावित्ति नलोपे कृते ऽनउपधायाइति वृद्धिः अवे योगविभाग उत्तरार्थः पुरोडाशवयजो ण्विन् इत्येकयोगे श्वेतवहादीनामप्युत्तरत्रानुवृत्तिः स्यात् यजेश्च



555

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मादिनाऽसिद्धत्वे सावकाशत्वमतस्तेनेति दीर्घैकत्वे च कृतेन वाङूत्यादि सिद्धेनार्थोऽनेन योगेनेत्याशंक्याह एते संबुद्धाविति संबुद्धौ हि अनवकाशत्वेन शाकल्येनेत्वा संबुद्धावित्यनुवर्तनात्॥ विजुपे छन्दसीति यर्थं मंत्रेइत्यनुवृत्तेरेव भाषायां न भविष्यतीति चेन्न सत्यम् ब्राह्मणसंग्रहार्थं छंदोग्रहणं मंत्रव्यतिरिक्तो वेदभागो ब्राह्मणं तदुक्तं तच्चोदकेषु मंत्राख्या शेषे ब्राह्मणशब्दः सुधीवा सुपीवेति पुमान्स्त्रीत्वं कीलालपा इति कीलालं जलम् पयः कीलालममृतं जीवनं भुवनं वनमित्यमरः ननु पिबतीति पा पाने विच् उपपदान्तरेपीति ब्रह्मभ्रूणवृत्रमितिनियमीत्यर्थः आततानेति णलुत्तमो वेति णित्वपक्षे वृद्धिः आररिवानिति रादाने लिटः क्वसुः वस्वेकाजाद्धसामित्यादन्तत्वादिट्

विजुपे छन्दसि ३।२।७३ उपे उपपदे यजेर्विच्। उपयट्॥ आतो मनिन्क्वनिब्वनिपश्च ३।२।७४ सुप्युपसर्गे चोपपदे आदन्तेभ्यो धातुभ्यश्छन्दसि विषये मनिनादयस्त्रयः प्रत्ययाः स्युः। चाद्विच्। सुदामा। सुधीवा। सुपीवा। भूरिदावा। घृतपावा। विच्। कीलालपाः॥ बहुलं छन्दसि ३।२।८८ उपपदान्तरेपि हन्तेर्बहुलं क्विप् स्यात्। मातृहा। पितृहा॥ छन्दसि लिट् ३।२।१०५ भूतसामान्ये। अहं द्यावापृथिवी आततान॥ लिटः कानज्वा ३।२।१०६ क्वसुश्च ३।२।१०७ छन्दसि लिटः कानच्क्वसू वा स्तः। चक्राणा वृष्णि। छंदसि परिद्धायामपि कानच्वक्तव्यः॥ यो नो अग्ने अररिवाँ अघायुः॥ क्याच्छन्दसि ३।२।१७० उप्रत्ययः स्यात्। अघायुः। एरजधिकारे जवसवौ छन्दसि वाच्यौ॥ जवे याभिर्यूनः। ऊर्वोर्मे जवः। देवस्य सवितुः सवे॥ मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः। ३।३।९६। वृषादिभ्यः क्तिन् स्यात्स चोदात्तः। वृष्टिं दिवः। सुम्नमिष्टये। पचात्पक्तीरुत। इयं तेन व्यस्ती मतिः। वित्तिः। भूतिः। अग्न आ याहि वीतये। राती

नतो नञ्समासः दीर्घादटीति वक्ष्यमाणेन नस्य रुत्वं आतोऽटि नित्यमिति रोः पूर्वस्य नो नित्यमनुनासिकः प्रसंगादघायुशब्दं व्युत्पादयितुमाह॥ ॥छंदसीति सु॥ स्यामोभयासः। पञ्चात्मन इत्यत्र आत्मन इति विशेषणात्परेच्छायां न भवतीति वचनम्॥ क्याच्छंदसि सनाशंसभिक्ष उरित्यत उरिति वर्तते क्यान्ताद्धातोरुः स्याच्छंदसि अघायुरिति परस्याघमिच्छतीत्यर्थे क्यच् अश्वाघस्यादिति वक्ष्यमाणेनाकारादेशः तदन्तादुप्रत्ययः जवसवाविति जुइति सौत्रो धातुः षूङ् प्राणिगर्भविमोचने षुप्रसवैश्वर्ययोरिति आभ्यामप् ऋदोरबिति

CC-0. In Public Domain. Digitization by eGangotri



क्तिन्नित्यतः क्तिन्निति वर्तते वीराद् इति पंचम्यर्थे प्रथमान्तदाह वृषादिभ्य इति वृषिमिति वृषु सेचने इच्छयेद् इति इषु इच्छायां चतुर्थ्येकवचनम् मतिरिति मन ज्ञाने क्तिन् अनुदात्तो पदेशेत्यनुनासिकलोपः वित्तिरिति विद सत्तायाम् क्तिन्वान लघूपधगुणः वीतये इति वीगतिव्याप्तिप्रजनकान्त्यसनखादनेषु रातावितिरादाने॥ ॥ छन्दसि लुङ् लङ् लिटः उदाहरणेषु धातुसंबंधो मृग्यः आगमदिति गम्लृ गतौ पुषादीति च्लेरङ् अकरमिति कृञ् हृह्यादिभ्य इति च्लेरङ् ऋदृशोङि इति गुणः अवृणीतेति वृञ् वरणे लङ् क्र्यादिभ्यः श्ना ईहल्यघोरितीत्वम् इतश्च लेटोडाटाविन्यतः लेट इति वेतोन्यत्रेत्यनतो वेति चानुवर्तनेतदाह॥ ॥ लेट इत्यादि लेटो आगमौ स्त इति नौ च पर्यायेण नतु

छन्दसि लुङ् लङ् लिटः ।३।४।६। धात्वर्थानां सम्बन्धे सर्वकालेष्वेते वा स्युः। पक्षे यथास्वं प्रत्ययाः। लुङ्। देवो देवेभिरागमत्। लोडर्थे लुङ्। इदं तेभ्यो करं नमः। लङ्। अग्निमद्य होतारमवृणीतायं यजमानः। लिट्। अद्य ममार। अद्य म्रियत इत्यर्थः॥ लिङर्थे लेट् ।३।४।७ विध्यादौ हेतुमदादौ च धातोर्लेट् स्याच्छन्दसि॥ सिब्बहुलं लेटि ३।१।३४। इतश्च लोपः परस्मैपदेषु ३।४।९७। लेटस्तिङामितो लोपो वा स्यात्परस्मैपदेषु॥ लेटोऽडाटौ ३।४।९४ लेटः अट् आट् एतावागमौ स्तस्तौ च पितौ॥ सिब्बहुलं णिद्वक्तव्यः॥ ॥ वृद्धिः। प्रण आयूंषि तारिषत्। सुपेशसस्करति। जोषिषद्धि। आसाविषद्‌ शंसानाय। सिप इलोपस्य चाभावे। पताति दिद्युत्॥ प्रियः सूर्ये प्रियो अग्ना भवाति॥ स उत्तमस्य ३।४।९८। लेडुत्तमसकारस्य वा लोपः स्यात्। करवाव। करवावः। टेरेत्वं॥ आत ऐ। लेट आकारस्य ऐः स्यात्। सुतेभिः सुप्रयसा मादयैते। आत इत्याकारस्य एकारः। विधिसामर्थ्यादाट एत्वं न। अन्यथा हि एटमेव विदध्यात्। यो यजाति यजात इत्। ( योगपदेन अङ्विधिसामर्थ्यात् अन्यथा सवर्णदीर्घेकृते विशेषाभावात् आङुत्तमस्येति सुत्रात् लङ् इकपुत्त्या

पित्वेत्यनुवर्तते इत्याशयेनाह नौ च पिताविति तत्फलं तु विकर्ष इत्सीउर्वरासु इत्यत्र नेद इत्यादि वृगुणः॥ ॥ वृद्धिरिति अचो ञ्णितीत्यनेन तारिषदिति तृ प्लवनतरणयोः निप इकारलोपः सिप इड्‌ जोषिषदिति जुषी प्रीतिसेवनयोः अनुदात्तेत् व्यत्ययेन परस्मैपदम् आसाविषदिति आङ् पूर्वात्सुप्रसवैश्वर्ययोरित्यस्माल्लेट् पतातीति पतॢ पतने तिप् आडागमः करवावेति कृञो लेटो वस्‌ तनादिकृञ्भ्य इति उः गुणः रपरः लेटोडाटाविस्याट् तस्य पित्वेनाङित्वाद्धिकरणस्य गुणः अत उत्सार्वधा॥ राम॰ २६०

556

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुकइत्युक्ताभावश्च मदीहर्षेणि चू तदंतास्तेट्आतामिकृते आह टेरेत्वमिति टित आत्मनेपदानामित्यनेन आकारस्येति प्रथमस्येत्यर्थः द्वितीयस्य टित आत्मनेपदानामित्यनेनैत्वमेवनित्यत्वात् नचशब्दांतरप्राप्त्याऽनित्यत्वंकृताकृतप्रसंगित्वमात्रेणकचिन्नित्यताश्रयणात् उत्तरसूत्रेऽन्यत्रेतिलिङ्गाच्च आट एत्वेनेत्युक्तं तस्य फलमाह यजातियजातइति यजदेवपूजादौ लेट् आडागमः ३५ ॥ वैतोऽन्यत्र किमपेक्षयेत्याकांक्षायां पूर्वसूत्रविषयादिति लभ्यते सन्निधानात् तदाह आतइत्यादि ईशैइति ईशऐश्वर्ये उत्तमैकवचनमिट् इतश्च लोपो नास्ति परस्मैपदेष्विड्युक्तेः टेरेत्वेन तस्य ऐः गृह्यांता इति ग्रहेः कर्मणि लेट् झः तस्याडागमः यकूग्रहिज्येति संप्रसारणं टेरेत्वं पूर्ववदैत्वम् पणवन्धइति यदिमेभवानिदंकुर्यात्तर्हीदमहंदास्यामीति समयकरणंपणवंधः आशंकासंभावना अहमेवेतित्रिपुरविजये देवैः प्रार्थितस्य रुद्रस्येदम्वच

वैतोऽन्यत्र।३।४।९६ लेट एकारस्यऐः स्यात्।आत ऐइत्यस्य विषयम्विना।प्रभूतानामीशै।ग्रहा गृह्यांतै।अन्यत्र किम्।सुत्रयसामादयेते॥ उपसम्वादाशङ्कयोश्च ३।४।८ पणावन्धे आशङ्कायाञ्च लेट् स्यात्।अहमेव पशूनामीशै।नेज्जिह्मायन्तो नरकम्पताम्॥ हलः श्नः शानज्झौ॥ छन्दसि शायजपि।३।१।८४ अपिशब्दाच्छानच्।हृग्रहोर्भश्छन्दसीति हस्य भः।गृभाय जिह्वया मधु।वधान देव सवितः।अनिदितामिति बध्नातेर्नलोपः।गृभ्णामिते।मध्वा जभार। व्यत्ययो बहुलम् ३।१।८५ विकरणानां बहुलं व्यत्ययः स्याच्छन्दसि।आण्डा शुष्णस्य भेदति।भिनत्तीति प्राप्ते।जरसामरतेपतिः।म्रियत इति प्राप्ते।इन्द्रो वस्तेन नेषतु।नयतेर्लोट् शप्सिपौ द्वौ विकरणौ।इन्द्रेण युजा तरुषेम वृत्रम्।तरेमेत्यर्थः।तरतेर्विध्यादौ लिङ्।उः सिप् उः शप् चेति

नम् पशवः संसारिणः नेदिति इच्छन्दश्चाशंकाद्योतयति जिह्माचरणेन नरकपातः समाभूदित्यर्थः पतामेति सउत्तमस्येति सलोपः छंदसिशाय ऐत्रयो विकरणाः॥ छंदसिश्नः शायजप्यादेशः स्याद्धौ परे गृभायेति ग्रहउपादाने लोटः सेर्हिः क्र्यादिभ्यः श्ना ग्रहिज्येतिसंप्रसारणम् वधानेतिवंधवंधने अतोहेरितिलुक् प्रसंगात् हृग्रहोर्भश्छंदसीत्यस्योदाहरणमाह गृभ्णामिइतिजभारेति हृञ् हरणे लिटो णलि वृद्धौ हस्य भः गृह्णामि जहारेत्यर्थः ३८ भेदतीति भिदिर् विदारणे रौधादिकः आमिप्राप्ते शप् म्रियत इति मृङ् प्राणत्यागे तुदादिभ्यः इति शे रिङ् शयग्लिङ्क्षु इति रिङादेशः इयङ् नेषत्विति नयत्वित्यर्थः द्वौविकरणाविति ततश्शपूत्यायः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि॰ कौ॰ सिद्धवाहुलकात् । एतेनसेमामविड्ढि इत्यादिव्याख्यातम् । अवरक्षन्नस्मात्तोटिशपिप्राप्तेवाहुलकात्सिप् । इत्थन्योरहेर्धिः षत्वंष्टुत्वम् जश्त्वम् । तरुषेमेति । तरुषमस्तिति

वै॰ सु॰ जातेयासुट् लिङ॰ सलोपोऽ तंत्यस्तानित्यंङि॰तः अतोयेयः लोपोव्योर्वलि आद्गुणः अत्रोप्रत्ययांतस्यसिपंप्रत्यङ्ग॰त्वात्सार्वधातुकेतिगुणः प्राप्तः सिवंतस्यशपिलघूपधा

२६१ गुणश्चप्राप्तोवाहुलकान्नभवति ॥ ॥ सुप्तिङिति शास्त्रकृत्पाणिनिराचार्यएषांसुप्रभृतीनांव्यत्ययमिच्छति सोपितथाविधोव्यत्ययोवाहुलकेनसिध्यति । वहुलस्य

भावोवाहुलकंमनोज्ञादित्वाद्वुञ् तत्पुनर्वहुलशब्दस्यप्रवृत्तिनिमित्तम् वह्वर्थादानत्वंचशब्दोहेतौयस्मादेवमुक्तप्रकारोव्यत्ययोवहुलग्रहणेनैवसिध्यति तस्मा

सुप्तिङुपग्रहलिङ्गनराणांकालहलच्स्वरकर्तृयङांच । व्यत्ययमिच्छति शास्त्रकृदेषांसोपिचसिध्यति बाहुलकेन ॥ १ ॥ धुरिदक्षिणायाः ।

दक्षिणस्यामितिप्राप्ते । चषालंयेअश्वयूपायतक्षति । तक्षन्तीतिप्राप्ते । उपग्रहः परस्मैपदात्मनेपदे । ब्रह्मचारिणमिच्छते । इच्छतीतिप्राप्ते ।

प्रतीपमन्यऊर्मिर्युध्यति । युध्यतइतिप्राप्ते । मधोस्तृप्ताइवासते । मधुनइतिप्राप्ते । नरः पुरुषः । अधासवीरैर्दशभिर्वियूयाः । वियूयादितिप्रा

प्ते । कालः कालवाचीप्रत्ययः । श्वोऽग्नीनाधास्यमानेन । लुटोविषयेलृट् । तमसोगाअदुक्षत् । अधुक्षदितिप्राप्ते । मित्रवयञ्चसूरयः । मित्रा

वयमितिप्राप्ते । स्वरव्यत्ययस्तुवक्ष्यते । कर्तृशब्दः कारकमात्रपरः । तथाचतद्धाचिनांकृत्तद्धितानांव्यत्ययः । अन्नादाय । अणिविषयेअच् । अव

ग्रहविशेषः । यङोयशब्दादारभ्यलिङ्याशिष्यङितिङ॰कारेणप्रत्याहारः । तेषांव्यत्ययोभेदतीत्यादिरुक्तएव ॥ इदुलग्रहणंकृतमित्यर्थः वियूया

इति यूमिश्रणेविपूर्वः आशिषिलिङ॰ आधास्यमानेनेति आङ्पूर्वाद्धातेर्लृटः सद्वृत्यनेनशानजादेशः स्यतासीइतिस्यः आनेमुगितिमुक् मित्रवयमितिदीर्घस्य

ह्रस्वव्यत्ययः स्वरव्यत्ययस्तितिगवामिवश्रि यस्येदृत्यन्तनुमर्येद्धत्यनेनकृत्सेनिकृतेञ्नित्यादिरित्याद्युदात्तेप्राप्तेव्यत्ययेनमध्योदात्तता कृत्तद्धितानामिति तेनदीव्य

तीत्यादौविधीयमानानांठगादीनांदेवतादिकर्तृत्वादेवमुक्तम् नत्विहकारकवाचित्वेप्याग्रहः कृत्तद्धितमात्रे तात्पर्यात् तथाचकिमोविहितोऽतिर्यच्छब्दादपिभवति

त्वंत्यस्यतितेजातवेदः विश्वेदेवासोमरुतोपतिष्ठत अन्नादायेति अन्नमत्तीत्यन्नादस्तस्मैअन्नेकर्मण्युपपदेऽदेः कर्मण्यणिप्राप्तेऽच् अवग्रहइतिअणिकृतेअन्नम्रा रामः

२६१

CC-0. In Public Domain. Digitization by eGangotri

वोचेमेति वचेराशीर्लिङ्मस् अङ्वचउम् यासुट् छन्दस्युभयथेति लिङः सार्वधातुकसंज्ञाप्यस्तीति तेन यासुट इय् आदेशः वलि लोपः ५० आद्दं परार्थे प्रयुज्यमानाः शब्दाव
ति मन्तरेणापि वन्यर्थं गमयन्तीति गोर्वाहीक इतिवदित्याशयेनाह लिङ्वदिति किकिनौ भवतः लिट्प्रत्ययस्य भवतीत्ययमर्थस्तु न भवति तत्र यादिसत्ति लिट् किकिनद्वित्यवक्तव्या
त् वभ्रिरिति भृञ् अस्मात् किः लिङ्वद्भावाद्द्वित्वं किकिनोः स्थानेतिवादयस्तु न लिङ्वदित्यतिदेशेन स्वरूपबाधेनैव कार्यातिदेशात् न लोकाव्ययेति षष्ठीनिषेधे वस्त्रशब्दाद्द्वि
तीया जग्मिरिति गमहनेत्युपधालोपः जघ्निरिति हो हन्तेरिति कुत्वं जज्ञिरिति स्नुत्वं ज गोर्ज्ञः ननु लिङ्वद्भावे सत्यसंयोगाल्लिट् किदित्येव सिद्धे कित्वकरणमनर्थकमित्याशयेनाह

लिड्याशिष्यङ् ३।१।८६ आशिर्लिङि परे धातोरङ् स्याच्छन्दसि। वचउम्। मन्त्रं वोचेमाग्नये॥ दृशेरग्वक्तव्यः॥ पितरञ्च दृशेयमातरञ्च। अङि तु ऋ
दृशोऽङि गुणः स्यात्॥ छन्दस्युभयथा ३।४।११७ धात्वधिकारोक्तः प्रत्ययः स सार्वधातुकार्धधातुकोभयसंज्ञः स्यात्। वर्धन्तु त्वा सुष्टुतयः। वर्धयं
त्वित्यर्थः। आर्धधातुकत्वात् णिलोपः। विशृण्विरे। सार्वधातुकत्वात् श्नुः श्नुभावश्च हुश्नुवोरिति यण्॥ आदृगमहनजनः किकिनौ लिट् च ३।२।१७१
। आदन्तादृवर्णान्ताद्गमादेश्च किकिनौ स्तस्तौ च लिड्वत्। बभ्रिर्वज्रं। पपिः सोमं। ददिर्गाः। जग्मिर्युवा। जघ्निर्वृत्रममित्रियं। जज्ञिः। लिङ्वद्भावादेव सि
द्धे ऋच्छत्यृतामिति गुणबाधनार्थं कित्त्वं बहुलं छन्दसीत्युत्वं। ततुरिः। जगुरिः॥ तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैश
ध्यैन्तवैतवेङ्तवेनः ३।४।९ से। वक्षे रायः। सेन्। तावामेषे। असे। शरदो जीवसे धाः। असेन्नित्याद्युदात्तः। क्से। प्रेषे। कसेन्। गवामिव श्रियसे॥ अ
ध्यै। अध्यैन्। जठरं पृणध्यै। पक्षे आद्युदात्तं। कध्यै। कध्यैन्। आहुवध्यै। पक्षे नित्स्वरः। शध्यै। राधसः सह मादयध्यै॥ शध्यैन्। वायवे पिबध्यै
॥ तवै। दानवाऽउ। तवेङ्। सूतवे। तवेन्। कर्तवे ॥

लिङ्वद्भावादिति असंयोगाल्लिट् किदिति कित्त्वं सिद्धमिति भावः आदिति मुखसुखार्थो दकारो न तु तकारः
नेन तात्परत्वाभावाद्दीर्घस्यापि ऋकारस्य ग्रहणं तदाह ततुरिर्जगुरिरिति तॄ प्लवनतरणयोः गॄ निगरणे आभ्यां किः द्वित्वात्परत्वाद् बहुलं छन्दसीत्युत्वे प्राप्ते द्विर्वच
नेचीति निषेधादुत्वाभावे द्वित्वम् उरदत्वम् उत्तरस्यात्वं ५१ तुमर्थे तुमुनोऽर्थस्तुमर्थो भावः ननु कर्त्तरि कृदिति वचनात्कर्त्तरि तुमुनो विधानात्कथं भावो ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

 ऽर्थइति चेच्छृणु अव्ययकृतोभावे इति वचनात्तुमुनोभावे विधानात् तुमर्थे पञ्चदश प्रत्ययाः भवंति वक्षे इति वचः से कुत्वं षत्वं कषसंयोगे क्षः एषे इति इणो गुणः नका
 रेण्विन्त्यादिर्नित्यमित्याद्युदात्तार्थः श्रेषे इति इणः से कित्वाद्गुणे आद्गुणः श्रियसे इति इयङ् नित्वादाद्युदात्तः इहमत्रेमध्योदात्तः पठ्यते तत्र बाहुलकात्प्रत्ययस्व
 रोवोध्यः आहुवध्यै इति जुहोतेरुवङ् मादयध्यै इति मदीहर्षे ण्यन्तात् ध्यै प्रत्ययः तस्य भाववाचित्वेसार्वधातुकत्वात्सार्वधातुके यक् इति प्राप्तिर्व्यत्ययेन शप् गुणायादे
शौ पिबध्यै इति अत्रापि यक्प्रसंगे व्यत्ययेन शप् पाघ्रेति पिबादेशः दातवा उ इति ददातेस्तवे आयादेशे लोपः शाकल्यस्येति यलोपः सूतवे इति ङित्वान्नगुणः कर्त्तव
इति कृञो गुणः कर्त्तुमित्यर्थः ॥ ॥ प्रयैः प्रपूर्वाद्यातेः कैप्रत्ययः रोहिष्यै इति रुहेरिष्यैन् पूर्वाद्यथेश्च० दृशे· योगविभागश्चिन्त्यप्रयोजनः दृशेविख्याने च केप्रत्ययः कित्वाद्दृशेर्न

प्रयै रोहिष्यै अव्यथिष्यै ।३।४।१०। एते तुमर्थे निपात्यन्ते। प्रयातुं रोढुं अव्यथितुमित्यर्थः ॥ दृशे विख्ये च ।३।४।११। द्रष्टुं विख्यातुमित्यर्थः ॥ शकि णमु
ल्कमुलौ ।३।४।१२। शक्नोतावुपपदे तुमर्थे एतौ स्तः। विभाजं नाशकत्। अपलुपं नाशकत् विभक्तुमपलोप्तुमित्यर्थः ॥ ईश्वरे तोसुन्कसु
नौ ।३।४।१३। ईश्वरो विचरितोः ॥ ईश्वरो विलिखः। विचरितुं विलेखितुमित्यर्थः ॥ कृत्यार्थे तवैकेन्केन्यत्वनः ।३।४।१४। न म्लेच्छितवै। अवगाहे।
दिदृक्षेण्यः। भूर्यस्य स्पष्टकर्त्वम् ॥ अवचक्षे च ।३।४।१५। रिपुणा नावचक्षे। अवख्यातव्यमित्यर्थः । गुणः ख्यातेराल्लोपश्च विभाजमिति विपूर्वाद्भज

तेर्णमुल् णित्वाद्दत उपधाया इति वृद्धिः अपलुपमिति· लुपॢ छेदने कित्वाद्गुणाभावः ईश्वरे· ईश्वरशब्दे उपपदे धातोस्तोसुन्कसुनौस्तश्छन्दसि विच
रितोरिति· चरगतौ विट् विलिख इति लिखविलेखने कित्वान्नगुणः त्कातोसुन्कसुन इत्यव्ययत्वादव्ययादाप्सुप इति विभक्तेर्लुक्· न लुमतेति निषेधादत्वस्
न्तस्येति दीर्घो न· कृत्यार्थे कृत्यानामर्थो भावकर्मणी तयोरेवेति कृत्यानां भावकर्मणोर्विधानात्· तत्र एते प्रत्ययाः स्युः यद्यपि कृत्यानामर्थो भव्यगेयेत्यादौ कर्तापि वह्यस्त्वा 
नीयमित्यादौ करणादिरपि तथापि न तत्र कृत्यत्वेन कर्त्रादिषु विधानं किं तर्हि स्वरूपेण· कृत्यतया विधानं तु भावकर्मणोरेवेति भावः नम्लेच्छितवै इति नम्लेच्छितव्य 
नित्यर्थः अवगाहे इति गाहू विलोडने दिदृक्षेण्य इति दृशेः सन्नन्तात्केन्यः अतो लोपः कर्त्वमिति· कृञः त्वन् कृत्यमित्यर्थः यद्यपि तुमर्थे से सेनित्यनेन तुमर्थे त वै विहि

त्येवमर्थम्· अवचसे· अवपूर्वाद्वक्षिङ· एरशप्रत्ययो निपात्यते· शित्वात्सार्वधातुकत्वेन नख्याजादेशोन॥ ॥ भावलक्षणे। कृत्यार्थइति निवृत्तम् तुमर्थइति वर्त्तते· प्रकृ
त्यर्थविशेषणंभावलक्षणग्रहणं भावोलक्ष्यतेयेनतस्मिन्नर्थेवर्त्तमानेभ्यः स्थादिभ्योधातुभ्यस्तुमर्थेतोसुन्स्याच्छन्दसि· संस्थानादीनामवधित्वेनलक्षणंभावः आसमाप्ते
रिति संपूर्वेहिनिष्ठतिः समाप्तौरूढः संनिष्ठते पिंडपितृयज्ञइत्यादौतथादर्शनात् आतमितोरिति तमुग्लानौ सृपितृदोः सृप्लृगतौ· उतदिरूहिंसानादरयोः भावलक्ष
णेर्थेवर्त्तमानयोस्सृपितृदोस्तुमर्थेकसुन्· विसृपइति गमनादित्यर्थः॥ इतितृ·ध्यायः ३ रात्रेश्वाजसौ· नजसि अजसित्यस्मिन् इकारउच्चारणार्थः आहोप्रभृत्यादिष्व
इतिवत् छन्दसीतिननुतिमिरपटैरवगुंठितारात्र्यइतिप्रयोगोनस्यात् छंदसीत्युच्यते नचेदंछन्दः अंजसाविनिनिषेधाच्च· किंच· वेदेपिरात्र्यइतिप्रयोगोनस्यात्

भावलक्षणेस्थेणकृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्।३।४।१६। आसंस्थानोः सीदन्ति। आसमाप्तेः सीदन्तीत्यर्थः। उदेतोः। अपकर्तोः। प्रवदितोः। प्र
चरितोः। हेतोः। आतमितोः। काममाविजनितोः सम्भवामः॥ सृपितृदोः कसुन्।३।४।१७। भावलक्षणेइत्येव। पुराकूरस्यविसृपोविरप्शिन्। पुराज
तृभ्यआतृदः॥ इतितृतीयोध्यायः॥ ६॥ रात्रेश्चाऽजसौ।४।१।३१। रात्रिशब्दान्ङीप्स्यात् अजस्विषयेछन्दसि। रात्रीव्यख्यदायती। लोकेतुकृ
दिकारादितिङीषन्तोदात्तः॥ नित्यञ्छन्दसि।४।१।४६। बह्वादिभ्यश्छन्दसिविषयेनित्यंङीष्। बह्वीषुहित्वा। नित्यग्रहणमुत्तरार्थम्॥ भुवश्च
।४।१।४७। ङीष्स्यात्छन्दसि। विभ्वी। प्रभ्वी। विप्रसंभ्यइतिडुप्रत्ययान्तस्सूत्रेऽनुक्रियते। उतइत्यनुवर्त्ततः। उवङादेशस्तुसौत्रः। मुद्गलाच्छन्दसि
लिच्च॥ ङीषोलित्वमानुगागमः। लित्स्वरः। रथीरभून्मुद्गलानी ॥ त्याशंक्याह लोकेत्विति· तुशब्दोनुक्तसमुच्चयार्थः लोकेजस्यविदेचेत्यर्थः कृदिकारादिति
राशादिभ्यांत्रिविनिव्युत्पत्तिपक्षेकृदिकारान्तः अव्युत्पत्तिपक्षेतुसर्वतोक्तिन्नर्थादितिङीषुबोध्यः नित्यम् बह्वादिभ्यश्चेतिवर्त्तते· अन्यतोङीषित्यतोङीषितिचनद्य
ह बह्वादिभ्यइति· नन्वारंभसामर्थ्यादेवनित्यत्वेसिद्धेनित्यग्रहणंव्यर्थमित्याशंक्याह नित्यग्रहणमुत्तरार्थमिति॥ भुवः विभ्वीइति विप्रसंभ्योड्वसंज्ञायामित्यतो
डुप्रत्ययान्तान्ङीष्· ननुस्वयंभूरन्तापिस्यादित्याशंक्याह· डुप्रत्ययान्तमिति· ननुडुप्रत्ययान्तानुकरणेप्रमाणंकिमतआह उतइत्यनुवृत्तेरिति· वोतोगुणवचनादिति
स्त्रात्· ननुतर्हिडुप्रत्ययान्तस्यैवेहिं·नीतिद्भुरु
भौरि॥

CC-0. In Public Domain. Digitization by eGangotri

सि॰कौ॰ तिनिर्देशः प्राप्नोतिनत्वाह॰ उवङादेशस्तुसोत्रइति॰ मुद्गला॰ इन्द्रवरुणेतिसूत्रस्थंवार्तिकमिदम्॰ लित्स्वरइति॰ लितीत्यानुगाकारस्योदात्तत्वम्॥ ॐ॥ दीर्घजिह्वी॰
वै॰ दीर्घजिह्वीतिनिपात्यतेछंदसि॰ अप्राप्तोङीषितिस्वाङ्गाच्चोपसर्जनादितिनप्राप्नोतितत्रह्यसंयोगोपधादितिप्रतिषेधात्॰ कद्रू॰ ऊङ्॰ तद्दत्यतऊङितिवर्तते॰ कद्रुश
२६३ ब्दात्कमण्डलुशब्दाच्चस्त्रियामूङ्स्याच्छंदसि॰ गुग्गुलुमधु॰ एषांव्यत्ययेनच्छंदसिस्त्रीत्वम्॰ पतयालुशब्दः स्पृहिगृहीत्यादिनाआलुजन्तः अन्यया व्याख्यानमपित्यवनुद्दा
निप्रदर्शनार्थंसात्तिम्॰ आविष्ट्यस्येति॰ अव्ययात्त्यबित्यत्रामेहक्वतसित्रेभ्यइतिनियमादप्राप्तः शैषिकस्त्यब्विधीयते आविष्ट्यइति आविर्भूतमाविष्ट्यम्॰ हसामा

दीर्घजिह्वी चच्छन्दसि।४।१।५९। संयोगोपधत्वादप्राप्तोङीष्विधीयते। आसुरीवैदीर्घजीह्वीदेवानांयज्ञवाट्॥ कद्रुकमण्डल्वोश्छन्दसि।४।१।७१। ऊङ्
स्यात्। कद्रूश्चवै। कमण्डलूः। गुग्गुलुमधुजतुपतयालूनामितिवक्तव्यं॥ गुग्गुलूः। मधूः। जतूः। पतयालूः॥ अव्ययात्त्यप्। आविष्ट्यस्योपसंख्यान
च्छन्दसि॥ आविष्ट्योवर्द्धते। छन्दसिठञ्।४।३।१९। वर्षाभ्यः ठकोपवादः। स्वरेभेदः। वार्षिकं॥ वसन्ताच्च।४।३।२०। ठञ्स्यात्छन्दसि। वासन्ति
कं॥ हेमन्ताच्च।४।३।२१। छन्दसिठञ्। हैमन्तिकम्। योगविभागउत्तरार्थः॥ शौनकादिभ्यश्छन्दसि ४।३।१०६। णिनिः प्रोक्ते। छाणोरपवादः। शौन
केनप्रोक्तमधीयते शौनकिनः। वाजसनेयिनः। छन्दसिकिम्। शौनकीयाशिक्षा॥ द्व्यचश्छन्दसि।४।३।१५०। विकारेवामयट्स्यात्। शरमयम्बर्हिः
। यस्यपर्णमयीजुहूः॥ नोत्वद्वर्ध्रबिल्वात्।४।३।१५१। उत्वान्। उकारवान्। मौञ्जंशिक्यं। वर्ध्रं चर्मतस्यविकारोवार्ध्रीरज्जुः। बैल्वोयूपः। समायायः॥

दाविनिषत्वम्॰ नकारस्यष्टुत्वम्॰ ठकोपवादइति॰ वर्षाभ्यष्ठगितिप्राप्तस्य॰ ननुठक्ठञोः कोविशेषस्तत्राह स्वरेभेदइतिठञिकृतेञ्नित्यादिर्नित्यमित्याद्युदात्तत्वंठकितुसतिकि
———— तइत्यनेनांतोदात्तत्वंस्यादितिभावः। वार्षिकमिति॰ ठस्येकः॰ उत्तरार्थइति॰ सर्वत्राग्रएवतलोपश्चेत्यनदर्थः तत्रह्यस्येवानुवृत्तिर्यथास्यात्॰ वसन्तस्यमाभूत्॰ शौनककाश्यप राम:
कौशिकाभ्यामृषिभ्यांणिनिरितिनिवर्ततेतेनदाहृणिनिरितिप्रोक्तेइति॰ तेनप्रोक्तमित्यनस्मिन्नर्थे॰ शौनकीयेति॰ वृद्धाच्छः॰ द्व्यचः॰ मयड्वैतयोर्भाषायामित्युक्तेर्वेदेऽप्राप्तोविधीयते॰नो २६३
त्वत्॰ उकारवतः प्रातिपदिकाद्वर्ध्रबिल्वशब्दाभ्यांचमयण्नस्यात्॰ द्व्यचश्छंदसीतिप्राप्तः प्रतिषिध्यते॰ मौञ्जमिति॰ मुञ्जशब्दादौत्सर्गिकोणवार्ध्रीति॰ वर्ध्रशब्दादौत्सर्गिकोण्॰ टिड्ढ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

छन्दसि सतम्यन्तात्सभाशब्दात्ढः स्यात्स्वार्थे· अणादीनां चेति· तत्र भवइति प्रायस्तानाम्· पाथोनदीभ्यां सप्तम्यन्ताभ्यामाभ्यां भवार्थे ड्यण्स्यात्· पाति शोषयतीति· पाथो जलम्· कर्दम मुदकं पाथइत्यमरात्· पाथोन्तरिक्षमिति वृत्तिः· वेशन्तीभ्यइति विशेषस्त्वं च वेशन्तः पल्वलम्· तत्र भवा आपः वैशन्त्यः सगर्भसयूथस· अर्तिगृभ्यां भन् गिरति· गीर्यतेवा गर्भः युनाभवन्त्यस्मिन्निति यूथम्· तिथपृष्ठगूथयूथप्रोथाइति थक्प्रत्ययान्तो निपातितः दीर्घोपि निपातनादेव· कर्मधारयाइति· समानस्य सोगर्भस्य· तत्र भवः सगर्भ्यइति विग्रहः

छन्दसि।४।४।१०६।सभेयो युवा॥ भवे छन्दसि।४।४।११०।सप्तम्यन्ताद्भवार्थे यत्।मेघ्याय च विद्युत्याय च। यथायथं शैषिकाणामणादीनां घादीनामपवादोयं यत्।पक्षेतेऽपि भवन्ति। सर्वविधीनां छन्दसि वैकल्पिकत्वात्। तद्यथा। मुंजवान्नाम पर्वतः।तत्र भवः।मौंजवतः।सोमस्येव मौंजवतस्य भक्षः।आ चतुर्थसमाप्तेश्छन्दोधिकारः॥पाथोनदीभ्यां ड्यण्।४।४।१११।तमु त्वा पाथ्यो वृषा। चनोदधीत नाद्यो गिरो मे।पाथसि भवः पाथ्यः।नद्यां भवो नाद्यः॥वेशन्तहिमवद्भ्यामण्।४।४।११२ भवे। वैशन्तीभ्यः स्वाहा हैमवतीभ्यः स्वाहा॥ स्रोतसो विभाषा ड्यड्ड्यौ।४।४।११३।पक्षे यत्।ड्यड्ड्ययोस्तु स्वरे भेदः। ———— स्रोतसि भवः स्रोत्यः। स्रोतस्यः॥सगर्भसयूथसनुताद्यन्।४।४।११४।अनुभ्राता सगर्भ्यः।अनु सखा सयूथ्यः। यो नः सनुत्यः उत वा जिघत्नुः।नुतिर्नुतं।नपुंसके भावे क्तः।सगर्भादयस्त्रयोपि कर्मधारयाः समानस्य छन्दसीति सः ततो भवार्थे यत्। यतोपवादः॥तुग्राद्घन्।४।४।११५।भवेऽर्थे।पक्षे यदपि।आ वः शमं वृषभं तुग्र्यासु।तुग्रियास्विति निरुक्तं वा। तुग्रिया स्विति निरुक्तान्तरे। धनाकाशयज्ञवरिष्ठेषु तुग्रशब्द इति वृत्तिः॥ अग्राद्यत्।४।४।११६। घच्छौ च।४।४।११७। चाद्यत्। अग्रे भवोऽग्र्यः॥ अग्रियः। अग्रीयः॥ समुद्राभ्राद्घः।४।४।११८।समुद्रिया अप्सरसो मनीषिणं।नानदतो अभ्रियस्येव घोषाः॥ बर्हिषि दत्तं।४।४।११९।प्राग्धिनाद्यदित्येव। बर्हिष्येषु निधिषु प्रियेषु ॥ ॥

यतोपवादइति भवे छन्दसीति प्राप्तस्य· अग्राद्यत्। भवे छन्दसीत्येव सिद्धे घादिभिर्बाधा माभूदिति यद्विधीयते समुद्रात्समुंदन्तीति समुद्रः स्फायितञ्चीतिरक्· अपो बिभर्तीत्यभ्रम्· मूलविभुजादित्वात्कः अभ्रसमुद्रादिति वक्तव्ये समुद्राभ्रइत्युक्तिः पूर्वनिपातस्यानित्यत्वज्ञापनार्था· बर्हिषि· तत्र भवइति निवृत्तं· बर्हिः शब्दा॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि॰कौ॰ हतमित्यर्थे यत्प्रत्ययो भवति॰ वर्हिष्येषिति॰ वृंहतेर्नलोपश्चेतीसुप्रत्ययः वर्हिस्तस्माद्यत्॥ ॥ दूतस्य दूतशब्दात्षष्ठीसमर्थाद्भागे कर्मणि चाभिधेये यत्प्रत्ययः स्या
वै॰ त् भागे तस्येदमित्यणि प्राप्ते वचनम्॰ कर्मणि तु दूतवणिग्भ्यां चेत्युपसंख्यानिके ये॰ दूत्यमित्यादि दूतस्य भागो दूत्यः कर्म दूत्यम् रक्षोयातूनां॰ षष्ठीबहुवचनान्ताभ्यां रक्ष
२६४ स्यातुशब्दाभ्यां हननीत्यस्मिन्नर्थे यत्स्यात् रक्षेरसुनि रक्षः कमितनिमनीत्यादिना यातेस्तुन् यातुशब्दो रक्षःशब्दपर्यायः न च विरूपाणामपि समानार्थानामित्येकशेषः स्यादि
ति वाच्यम्॰ बह्वर्थाभिधायि स्वरूप वचनेन सूत्र भिन्नार्थत्वात्॰ रक्षस्येति॰ हन्यतेनयासा हननी रक्षसां एवं यातव्या॰ बहुवचनं स्तुतिवैशिष्ट्यज्ञापनाय॰ बहूनां रक्षसां हनने
हि स्तुतिः प्रतीयते रेवतीजगती॰ प्रशंसनं प्रशस्यं॰ प्रपूर्वाच्छंसु स्तुतावित्यस्माद्भावे कप्॰ नदाह प्रशंसनेइति॰ रयिरस्यास्तीति रेवती॰ रयिशब्दान्मतुप्॰ छंदसीरइति वत्व
म्॰ रय्येर्मतौ बहुलमिति संप्रसारणं॰ उगित्वान्ङीप्॰ नक्षत्रे गौरादित्वान्ङीष्॰ जगच्छब्दाद्धन्तमानेइत्यनेन शतृवद्भावादुगितश्चेति ङीप्॰ हविषेहिता हविष्या। उगवादित्वा

दूतस्य भागकर्म्मणी॥४।४।१२०॥ भागेऽर्थः। दूत्यं॥ रक्षोयातूनां हननी॥४।४।१२१ यातेऽस्मि रक्षस्यास्तनूः॥ रेवतीजगतीहविष्याभ्यः प्रशस्ये॥४।४।१२२।
प्रशंसनेयत्स्यात्। रेवत्यादीनां प्रशंसनं रेवत्यं। जगत्यं। हविष्यं॥ असुरस्य स्वम्॥४।४।१२३। असुर्यन्देवेभिर्धायि विश्वं॥ मायायामण्।४।४।१२४ आ
सुरी माया। तद्वानासामुपधानोमन्त्रइतीष्टकासु लुक् च मतोः ४।४।१२५ वर्चस्वानुपधानो मन्त्र आसामिष्टकानां। वर्चस्वाः ऋतव्याः ॥ यत् नासां प्रशंसनं ह

विष्यं यस्येतिलोपे कृते हलोयमां यमीति यलोपः असुरस्यस्वं॰ असुरशब्दात्षष्ठीसमर्थात्स्वमित्येतस्मिन्नर्थे यत्स्यात् असुर्यमिति न सुरोऽसुरः सुरप्रतिपक्षी॰ अथवा असेरुर
न्॰ अस्यति॰ अस्यते वा असुरः तस्य स्वम् असुर्यम्॰ मायायामण्॰ मीयतेऽनयेति माया असदर्थप्रकाशनशक्तिः माङ॰ औणादिको यः तस्यां वाच्यायामसुरशब्दादण्स्यात् पूर्वसूत्रा
पवादः आसुरीति॰ टिड्ढाणञिति ङीप्॰ तद्वानासा॰ मत्वन्तात्प्रथमासमर्थादासामिति षष्ठ्यर्थे यत्स्यात्॰ तत्प्रथमासमर्थमुपधानो मंत्रश्चेत्स भवति यत्तदासामिति निर्दिष्टमिष्ट रा॰म॰
कास्चेताः भवन्ति मतोश्च लुक् वर्चस्वानिति वर्चः शब्दो यस्मिन्मंत्रेस्तिसवर्चस्वान् कुंभेष्टकोपधानमंत्रः भूतं च स्थ भव्यं च स्थ देवस्य वः सवितुः प्रसव इत्यादिकः उपधीयतेऽ २६४
नेनेत्युपधानं चयनं रचनमित्यर्थः ऋतव्याइति॰ ऋतुशब्दो यस्मिन्मंत्रेस्तिसऋतुमान्॰ स च मधुश्च माधवश्चेत्यादिकः ऋतुमानुपधानो मंत्र आसामिष्टकानाम् ॥ ॥

560

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तव्याः तद्वानिति किम्· मंत्रादेव समुदायान्मा भूदिति काशिका॰ अत्र हरदत्तः ननु तद्वानित्यस्मिन् सति समर्थानां प्रथमाद्वेति वचनादासामिति प्रथमानिर्दिष्टत्वात्षष्ठ्यन्तादिष्टका
भिधायिनः उपधानमंत्रे प्रत्ययः स्यादिति वाक्यार्थः स्यात्· तथा च समुदायान्न प्राप्नोतीति चेत्सत्यम् आसामिति प्रथमं न करिष्यत इति मत्वा प्रश्नप्रतिवचनेन तस्यैवोपधानो मंत्र
आसामिष्टकानां लुक् च मतोरिति योगः करिष्यते· तथा च· तद्वानित्यस्याभावे भूतं च स्यभव्यं च स्येत्ययमुपधानो मंत्र आसामिष्टकानामिति वाक्यं स्यात्· तथा चेति नापरामृष्टान्मंत्रस
मुदायादेव प्रत्ययः प्राप्नोतीति भावः उपधान इति किम्· वर्चस्वदभिमंत्रणमासामित्यत्र मा भूत्· शिवेन मा चक्षुषेत्यनुवाकः कुंभेष्टकाभिमंत्रणे विनियुक्तः मंत्र इति किम्· अं
गुलिमानुपधानो हस्त आसामित्यत्र मा भूत्· इष्टकास्विति किम्· वर्चस्वानुपधान आसां शर्कराणामित्यत्र मा भूत्· इतिकरणं नियमार्थम्· अनेकपदसंभवे केनचिदेव पदेन त
द्वान्मंत्रो गृह्यते न सर्वेण मतुब्ग्रहणमुत्तरार्थम्· अश्विमानित्यत्र मतुप एव लुक् यथा स्यात् इतेर्मा भूत् इह तु मत्वेनानन्यविधानात्तस्यैव लुक् भविष्यति॥ः॥अश्विमा

अश्विमानण्।४।४।१२६। आश्विनीरुपदधाति॥ वयस्वासु मूर्ध्नो मतुप्।४।४।१२७ तद्वानासामिति सूत्रं सर्वमनुवर्त्तते। मतोरिति पदमावर्त्यं पञ्चम्य
न्तं वा ध्यमृ। मतुवन्तो यो मूर्द्धशब्दस्तस्मान्मतुप्स्यात्प्रथमस्य मतोर्लुक्। वयस्यशब्दवन्मन्त्रोपधेयास्विष्टकासु। यस्मिन्मन्त्रे मूर्द्धवयःशब्दौ स्तस्तेनोपधे
यासु। मूर्द्धन्वतीरुपदधातीति प्रयोगः॥ मत्वर्थे मासतन्वोः।४।४।१२८।नभोऽर्त्रं।तदस्मिन्नस्तीति नभस्यो मासः ।ऐ। नु· अश्विशब्दो यस्मिन्मंत्रेऽस्ति सोऽश्विमान्मंत्रः

स च ध्रुवक्षितिरित्यादिकः प्रथमान्तादश्विमच्छब्दादासामिति षष्ठ्यर्थेऽण् स्यात्· यत्प्रथमानिर्दिष्टमुपधानो मंत्रश्चेत्स भवति· यत्तदासामिति निर्दिष्टमिष्टकाश्चे
त्ता भवंति मतोश्च लुक् आश्विनीरुपदधातीति· अश्वशब्दादतइनिठनाविति अस्त्यर्थे इनिः तदन्तान्मतुप्· अश्विमानस्य उपधानो मंत्र आसामिष्टकानामिति विग्रहः
णि विहिते मतोश्च लुकि कृते इनण्यनपत्य इति प्रकृतिभावः वयस्वासु· वयस्वानुपधानो मंत्र आसामिष्टकानां ता वयस्वास्तास्वभिधेयासु प्रथमासमर्थान्मतुवन्तमूर्द्ध
शब्दादासामिति षष्ठ्यर्थे मतुप्स्यात्· यत्प्रथमानिर्दिष्टमुपधानो मंत्रश्चेत्स भवति· यदासामिति निर्दिष्टमिष्टकाश्चेत्ता भवंति· यस्मिन्मंत्रे मूर्द्धशब्दो वयःशब्दश्च विद्य
तेः स मूर्द्धवान् वयस्वान्· यथा मूर्द्धा वयः प्रजापतिश्छंद इति तत्र वयस्वत्शब्दादिव मूर्द्धवच्छब्दादपि पूर्वेण प्राप्ते मतुब्विधौ पतेदूत्याश्रयेणाह। यस्मिन्मंत्र इति·
मूर्द्धन्वतीरिति अनो नुडिति नुडागमः मूर्द्धवत इति वक्तव्ये भाविनं मतुपं लुकं चेतसि कृत्वा मूर्द्ध इत्युक्तं· । मत्वर्थे· । यस्मिन्नर्थे॥ ॥ ६ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

सि·कौ· मतुब्विहितस्तस्मिन्नर्थे प्रथमानाद्यत्स्यात् । मासतन्वोरभिधेययोः ननु प्रथमासमर्थमिति कस्मादागतमिति चेन्मत्वर्थग्रहणादित्यवेहि । क्षिचमित्रनिधनिसर्जिखर्जिभ्य
वै· उरिति उकारान्तस्तनूशब्दः सूत्रे निर्दिष्टः ननु भृमृशीङ्तृचरित्सरितनिधनिमिमस्जिभ्य उरित्युकारान्तः कृन्देघिरिति पूर्वनिपातत्वसंगतात् ।।ः।। ओजस्यादिति । ओजोयस्यां या
२६५ स्या वा अस्तीत्योजस्या । मधो । मधुशब्दान्मत्वर्थे नः स्यात् चायत् । मधव्या इति । ओर्गुणः वान्तो यीति अवादेशः । ओजसोऽह । ओजः शब्दान्मत्वर्थे यत्खौ स्तोऽहन्यभिधेये । ननु य
ग्रहणं व्यर्थम् । स्वश्चेत्येवास्त्विति चेन्नैवम् । खश्चेत्युच्यमानेन उत्तरसूत्रविहितस्य खमात्रस्य समुच्चयो विज्ञायेत तस्माद्यद्ग्रहणम् । वेशोयशः । वेशश्च यशश्च वेशोयशसी ते आ

ओजस्यातनूः ।। मधोर्ञ्च ।४।४।१२९ माधवः । मधव्यः ।। ओजसोऽहनि यत्खौ ।४।४।१३० । ओजस्यमहः । ओजसीनं वा ।। वेशोयशआदेर्भगाद्यल्खौ ।४।
४।१३१।१३२ । यथासंख्यं नेष्यते ।। वेशोबलं तद्देवं भगइति कर्मधारयः । वेशोभग्यः । वेशोभगीनः । यशोभग्यः । यशोभगीनः ।। पूर्वैः कृतमिनियौ च ।
४।१३३ । गम्भीरेभिः पथिभिः पूर्विणेभिः । ये ते पन्थाः सवितः पूर्व्यासः ।। अद्भिः संस्कृतम् ।४।४।१३४ । यस्येदमप्यह विः । सहस्रेण संमितौ घः ।४।४।१३५
सहस्रियासो अपान्नोर्मयः सहस्रेण तुल्या इत्यर्थः ।। मतौ च ।४।४।१३६ । सहस्रशब्दान्मत्वर्थे घः स्यात् । सहस्रमस्यास्तीति सहस्रियः ।। सोममर्हति यः
।४।४।१३७ । सोम्यो ब्राह्मणः यज्ञार्ह इत्यर्थः ।। मये च ।४।४।१३८ । सोमशब्दाद्यः स्यान्मयडर्थे । सोम्यं मधु । सोममयमित्यर्थः ।। दीपस्तन्त्वाद्वेशोयशआ

देर्भगान्तात्प्रातिपदिकाद्यत्खौ स्तो मत्वर्थे । लकारः स्वरार्थः । पूर्विणेभिरिति । पूर्वैः कृताः पूर्विणाः तैः एवं पूर्व्यासः पूर्वीणः । अद्भिः तृतीयान्तादप्शब्दात्संस्कृतमित्यर्थे यत्स्या
त् । सहस्रेण । तृतीयान्तात्सहस्रशब्दात्संमितमित्येतस्मिन्नर्थे घः स्यात् । संमितः सदृशस्तुल्य इत्यर्थः सहस्रिया इति । सहस्रेण संमिताः सहस्रियाः यस्येति चेत्यकारलोपः
समिता वितिपाठान्तरम् । मतौ । तपः सहस्राभ्यां विनीनावित्यस्यापवादः सोममर्हति । द्वितीयान्तात्सोमशब्दादर्हतीत्यस्मिन्नर्थे यः स्यात् । सोम्य इति । सोममर्हतीति सोम्यः मये राम:
च । आगतविकारावयवप्रकृतामयडर्थाः तत्रागते पंचमी समर्थविभक्तिः विकारावयवयोः षष्ठी प्रकृतवचने प्रथमा० ।। ६ ।। ।। ।। २६५

561

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मधोर्यः स्यादिति । इतिकारस्तु यदेवानुवर्तयति न तु यं । नक्षत्राद् घः स्वार्थ इति । समूह इति नानुवर्तते । तेनाऽनिर्दिष्टार्थत्वात् स्वार्थे प्रत्ययः । तन्मयं तदित्यर्थः । सर्वदेवात् । स
र्वशब्दाद्देवशब्दाच्च तातिल् स्यात् । शिवशमः करशब्दसामानाधिकरण्यात् शिवशमरिष्टस्येत्युभयप्राप्तौ कर्मणीति षष्ठी ॥ ॥ इति वैदिकस्य चतुर्थोऽध्यायः ॥ सप्त
नोऽञ् सप्तन्शब्दादञ् स्याच्छन्दसि साप्तानीति सप्तन्शब्दादञि नस्तद्धित इति टिलोपेन ह्निनान्तत्वात्प्रातिपदिकसंज्ञायां जस् जश्शसोः शिः नपुंसकस्येति नुम् उपधा

मधोः ।४।४।१२९। मधुशब्दान्मयडर्थे यत्स्यात् । मधव्यः । मधुमय इत्यर्थः ॥ वसोः समूहे च ।४।४।१४०। चान्मयडर्थे यत् । वसव्यः । अक्षरसमूहे छ
न्दस उपसंख्यानम् ॥ छन्दःशब्दादक्षरसमूहे वर्तमानात् स्वार्थे यदित्यर्थः । ओ श्रावयेति चतुरक्षरं अस्तु श्रौषडिति चतुरक्षरं ये यजामह इति प
ञ्चाक्षरं यजेति द्व्यक्षरं द्व्यक्षरो वषट्कारः एष वै सप्तदशाक्षरश्छन्दस्यः ॥ नक्षत्राद् घः ।४।४।१४१। स्वार्थे । नक्षत्रियेभ्यः स्वाहा ॥ सर्वदेवात्तातिल्
।४।४।१४२। स्वार्थे । सविता नः सुवतु सर्वतातिम् । प्रदक्षिणिद्देवतातिमुराणः ॥ शिवशमरिष्टस्य करे ।४।४।१४३। करोतीति करः । पचाद्यच् । शि
वङ्करोतीति शिवतातिः । याभिः शन्ताती भवथो ददाशुषे । अथो अरिष्टतातये ॥ भावे च ।४।४।१४४। शिवादिभ्यो भावे तातिः स्याच्छन्दसि । शिवस्य
भावः शिवतातिः । शन्तातिः । अरिष्टतातिः ॥ इति चतुर्थोऽध्यायः ॥ सप्तनोऽञ् छन्दसि ।५।१।६१। तदस्य परिमाणमित्यर्थे वर्गे इति च । सप्त साप्तान्यसृ
जत् । शन्शतोर्डिनिश्छन्दसि । तदस्य परिमाणमित्यर्थे वाच्यः ॥ पञ्चदशिनोऽर्धमासाः । त्रिंशिनो मासाः । विंशतेश्चेति वाच्यम् ॥ विंशिनोऽङ्गिरसः ॥
युष्मदस्मदोः सादृश्ये वतुब् वाच्यः ॥ त्वावतः पुरूवसो । न त्वावाँ अन्यः । यज्ञं विप्रस्य मावतः ॥ छन्दसि च ।५।१।६७। प्रातिपदिकमात्रात्तदर्हतीति य

दीर्घः । शन्शतोः डिन्करणं शदन्तस्य टिलोपार्थम् । पंचदशिन इति पञ्चदश अहानि परिमाणमेषामिति डिनिः टिलोपः एतेन त्रिंशिनो व्याख्याताः । विंशिनोऽङ्गिरस इति
। विंशतिर्गोत्राणि परिमाणमेषामिति विग्रहे डिनि कृते विंशतेरिति तिशब्दलोपे कृते यस्येति लोपः आङ्गिरसः ॥ अयास्यगार्ग्यगौतमद्रुह्यादिप्रवरभेदभिन्नानि विं
शतिरेवाङ्गिरसगोत्राणि परिमाणमेषामित्यर्थः त्वावत इति । त्वमिव त्वावान् तस्य त्वावतः अहमिवेति मावान् तस्य मावतः प्रत्ययोत्तरपदयोश्चेति त्वमादेशौ आ सर्वनाम्न इ

सि॰ च॰
वै॰
२६६

सादन्यमिति सदनं गृहमर्हतीति सादन्यः अन्येषामपीति दीर्घः विदथ्यमिति विदथो यज्ञस्तमर्हतीत्यर्थः इद्वत्सरीय इति इद्वत्सरेण निर्वृत्तः इद्वत्सरमधीष्टो भृतो भूतो भावी वा इद्वत्सरीयः इद्वत्सरो वत्सरश्चाद्वौ पञ्चवर्षे युगे द्वयोर्वर्षयोः संज्ञे एवं संवत्सर परिवत्सरश्चाद्वावपि सम्परिपूर्वो सम्परिपूर्वाद्वत्सरान्तात्प्रातिपदिका च्छंदसि विषये निर्वृत्तादिष्वर्थेषु खः स्याच्चाच्छः छंदसि घस् समयस्तदस्य प्राप्तमित्यन समयस्य प्राप्तमिति ऋतोरण् इत्यनतः ऋतोरिति चानुवर्तते तदाह ऋतुशब्दादि त्यादि ऋत्वियइति सितिचेति पदत्वेन भत्वेन निरस्ते ओर्गुणइति गुणाभावे यण् उपसर्गात् इह धातुशब्देन धातुवाच्या क्रिया लक्ष्यते स्वार्थः प्रयोजनं यस्य साधन

सादन्यं विदथ्यम्॥ वत्सरान्ताच्छश्छन्दसि।५।१।९१। निर्वृत्तादिष्वर्थेषु। इद्वत्सरीयः॥ सम्परिपूर्वात्ख च।५।१।९२। चाच्छः। सम्वत्सरीणः। सम्वत्सरीयः। परिवत्सरीणः। परीवत्सरीयः॥ छन्दसि घस्।५।१।१०६। ऋतुशब्दात्तदस्य प्राप्तमित्यर्थे। भागऋत्वियः॥ उपसर्गाच्छन्दसि धात्वर्थे।५।१।११८। धात्वर्थविशिष्टे साधने वर्तमानात्स्वार्थे वतिः स्यात्। यदुद्वतो निवतः। उद्गतान्निर्गतानित्यर्थः॥ थट् च छन्दसि।५।२।५०। नान्तादसंख्यादेः परस्य डटः थट् स्यान्मट् च। पञ्चथम्। पञ्चमम्॥ छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि।५।२।८९। अपत्यस्य परिपन्थिनम्। मात्वा परिपरिणो विदन्॥ बहुलं छन्दसि।५।२।१२२। मत्वर्थे विनिः स्यात्। छन्दो विन्प्रकरणे अष्ट्रामेखलाद्वयोभयरुजाहृदयानां दीर्घश्चेति वक्तव्यमिति दीर्घः। मखिष्ठमुभया विनं मुनमष्ट्राव्य चरत्॥ छन्दसि वनिपौ च वक्तव्यौ॥ ईरथीरभूत्। सुमङ्गलीरियं वधूः। मघवानमीमहे ॥

स्यतस्मिन्वर्तमानादित्यर्थस्तदाह धात्वर्थविशिष्टइति उपसर्गाश्च पुनरेवमात्मकाः यदुतश्रुतायां क्रियायां तामेव विशिंषन्ति यथा आगच्छति यत्र तु न श्रूयते तत्र क्रियाविशिष्टसाधनमाहुः यथा निष्कौशाम्बिः यथा च नत्र क्रियापदं न श्रूयते तत्रैव यथास्यादित्येवमर्थं धात्वर्थइत्युक्तम् थट्च नस्य पूरणे डट् नः डट् इति नान्तादसंख्यादेरिति च तदाह नान्तादित्यादि पंचथमिति पञ्चानां पूरणमित्यस्मिन्नर्थे डट् तेन तस्य थडागमः छंदसि परिपंथिन् परिपरिन् एतौ निपात्येते छन्दसि पर्यवस्थानरि वाच्ये पर्यवस्थाता प्रतिपक्षः सपत्न इत्युच्यते निपातनं चात्र पर्यवस्थानशब्दात्स्वार्थे इति प्रत्ययोऽवस्यात् शब्दस्य पन्थि परिणताबादेशौ च निपात्येते बहुलम्॥ ॥अस्मा

राम:
२६६

CC-0. In Public Domain. Digitization by eGangotri

द्वाद्वंद्वाप र्यायोऽयमूमेखलावीदृयावीउभयावीरुजावी हृदयावी अत्रहृयोभयहृद यान्येवदीर्घत्वंप्रयोजयंति अन्येषांत्वनएवदीर्घत्वात् छंदसीर्ईत्ववनि
पूर्वईवनिपौ ईइतिईप्रत्ययस्योदाहरणमुच्यते रथीरिति रथोस्यास्तीतिरथीः सुमंगलीरिति सुष्टुमङ्गलमितिसुःपूजायामितिसमासः ततोऽनेनमत्वर्थीयई
कारप्रत्ययः मघवानिति मघंधनंतदस्यास्तीतिवनिपिमतुपितुमघवच्छन्दः ॥ः॥ तयोः तच्छन्दे नइदमोर्हिल् तदोदाचेति सन्निहितावेदंतदोपरामृष्ये
तेनदाहइदन्तदोरिति सूत्रेव्यत्ययेनपञ्चम्याः स्थानेषष्ठीयथासंख्यंतदृतिइदमूत्राब्दादातच्छब्दात्हिल् इदाइति इदमूत्राब्दाद्दाइदमइश्राइत्यनेनेशादेशः
थाहेतौप्रकारवचनेथालित्यतः प्रकारवचनइतिकिमस्येतितदाह किमस्यास्यादित्यादि कथाग्रामंनपृच्छसीतिकेनहेतुनानपृच्छसीत्यर्थः तस्यप्रादिशोविभ

तयोर्दार्हिलौचच्छन्दसि।५।३।२०।इदन्तदोर्यथासंख्यंतः।इदाहिवउपसृतिम्।तर्हि॥थाहेतौचच्छन्दसि।५।३।२६।किमस्यास्याद्धेतौप्रकारे
च।कथाग्रामंनपृच्छसि।कथादाशेम॥पश्चपश्चाचच्छन्दसि।५।३।३३।अवरस्यअस्तात्यर्थेनिपातौ।पश्चहिसः।नोतपश्चा॥तुश्छन्दसि।५।३।
५९।तृजन्तात्तृन्नन्ताच्चइष्ठन्ईयसुनौस्तः।आसुतिङ्करिष्ठः।दोहीयसीधेनुः॥प्रत्नपूर्वविश्वेमात्थाल्छन्दसि।५।३।१११।इवार्थे।तंप्रत्नथा
पूर्वथाविश्वथेमथा॥अमुचच्छन्दसि।५।४।१२।किमेत्तिङव्ययघादित्येव।प्रतरन्नयप्रतरम्॥वृकज्येष्ठाभ्यान्तिल्तातिलौचच्छन्दसि।५।
४।४१।स्वार्थे।योनोदूरेवावृकतिः।ज्येष्ठतातिम्बर्हिषदम् ॥ क्तिरित्यधिकाराद्विभक्तिसंज्ञायाकिमःकइतिकादेशः प्रकारवचनउदाहरणमाह कथादाशे

मेति केनप्रकारेणेत्यर्थःपश्चपश्चा अवरस्यपश्चभावः अकाराकारौचप्रत्ययौ निपात्येते अस्तात्यर्थेइतिदिक्शब्देभ्यः सप्तमीपंचमीप्रथमाभ्योदिग्देशकालेष्व
स्तातिः करिष्ठइति कर्तृशब्दादिष्ठन् तुरिष्ठेमेयः स्वितितृलोपः॥ दोहीयसीति अतिशयेनदोग्ध्रीत्यर्थः लिंगविशिष्टपरिभाषयादोग्ध्रीशब्दात्प्रत्ययः भस्याढेइतिपु
म्वद्भावेनङीपोनिवृत्तिः।ततस्तुरिष्ठेमेयः स्वितितृचिनिवृत्तेनिमित्ताभावा द्धत्वकुत्वयोरपिनिवृत्तिः प्रत्नपूर्वं प्रत्नपूर्वविश्वइमएभ्य स्थाल्स्यात् अमुच किमेत्तिङव्य
याघादृव्यप्रकर्षवर्तमानादमुप्रत्ययोभवति प्रतरमिति प्रकर्षार्थस्यप्रकर्षेतरप् प्रकृष्टतरइतिवत् तदंतादमुःस्वरादिषुअमूआम् इतिपठ्यते तेनतदन्त ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



साव्ययत्वेसुपोलुक् अनोदित्करणमिचएकाचोऽन्त्ययवस्त्रेयन्नास्यग्रहणंमाभूत् यदिस्यात्तर्हि अत्रापियद्दृष्टंकार्यंतदप्यतिदिश्येत तत्रकोदोषः इहस्त्रियंमन्य
मानः यस्येतिलोपःप्राप्नोति॥ ॥अनसन्तात्॥अनन्तस्योदाहरणमाह ब्रह्मसाममिति असन्तस्याहदेवच्छंदसानीति बहुप्रजाः बहुप्रजाइति निपात्यतेछन्दसिवा।
हुप्रजाइतिवक्तव्यः प्रजायस्येतिबहुव्रीहिः असिचुप्रत्ययः यस्येतिचेत्य कारलोपः अत्वसंतस्येतिदीर्घः रुत्वविसर्गौ छंदसिच वयसिदंतस्यदत्इत्यतोदंतस्यदंतृइ
त्यनुवर्त्ततेतदाह दन्तस्यदतृस्यादिति उभयतोदतइति उभयतोदन्तायस्येतिविग्रहः हतमाताइति नद्यृतश्चेतिनित्यंकप्प्राप्तः इतिसु०न्यांपंचमोऽध्यायः जागारे

अनसन्तान्नपुंसकाच्छन्दसि।५।४।१०३ तत्पुरुषाट्टच्स्यात्समासान्तः।ब्रह्मसाममभवतिदेवच्छन्दसानि॥ बहुप्रजाश्छन्दसि।५।४।१२३।बहुप्रजानि
र्ऋतिमाविवेश॥ छन्दसिच।५।१।६७।दन्तस्यदतृस्याद्बहुव्रीहौ।उभयतोदतः प्रतिगृह्णाति॥ ऋतश्छन्दसि।५।४।१५८।ऋदन्ताद्बहुव्रीहेर्न
कप्।हतामातायस्यहतमाता॥ ॥इतिपञ्चमोऽध्यायः॥ ॥एकाचोद्वेछन्दसिवेतिवक्तव्यम्॥योजागारतमृचःकामयन्ते॥ जागर्तेर्णिप्रत्यये॥ तुजादीनान्दीर्घोऽभ्यास
स्य।६।१।७।तुजादिराकृतिगणः।प्रभरातूतुजानः।सूर्य्योमामहानंदाधारयः पृथिवीम्।मतूताव॥ बहुलञ्छन्दसि।६।१।३४।ह्वः सम्प्रसारणंस्यात्।
इन्द्रमाहुवहूतये॥ अचित्रेरुत्तरपदादिलोपश्चछन्दसि॥ अचश्चावे परेत्रे:।सम्प्रसारणमुत्तरपदादेर्लोपश्चेतिवक्तव्यम्॥ तृचंसूक्तं।छंदसि
किम्।त्र्यचानि॥ रयेर्मतौबहुलम्॥ रेवान्।रयिमान्पुष्टिवर्द्धनः॥ जिजागृ निद्राक्षये लिटिप्रथमपुरुषैकवचनम् दातीतिङ्दाञ्दाने लटूत्पपः श्लुः प्ला
वितिनित्यंद्वित्वेप्राप्तेविकल्पः तूतुजानइति तुजेर्लिट्तस्यकानजादेशः मामहानमिति महपूजायांकानच् तूताववेति तुःसौत्रोधातुः तस्माल्लिट् बहुलंछन्दसिहूः संप्र
सारणमितिवर्त्ततेतदाहह्वः संप्रसारणंस्यादिति आहुवेइति आङ्पूर्वात् ह्वेञोलङात्मनेपदोत्तमैकवचनम् बहुलंछंदसीतिन्याप्लुकिकृतेसंप्रसारणमुवङादेशा
श्च तृचंसूक्तमितितिस्रः ऋचोयस्मिन्तत्तृचंऋक्पूरब्धूः पथामानक्षइतिसमासान्तोऽःरयेर्मतौरयिशब्दस्यमतौपरतः सम्प्रसारणंस्याच्छन्दसि रेवानितिछन्दसीत्यदिति



५६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चायः की चायतेर्बहुलं कीत्ययमादेशः स्याच्छन्दसि क्युरिति कुहोश्चुरिति चुः निचाय्येति चायृ पूजानिशामनयोः अस्मात्क्त्वा गतिसमासे समासेनञ्पूर्वे क्त्वो ल्यबिति ल्यबादे
शः स्पर्धेर्लङ्याथामिति द्विर्वचनं रेफस्य संप्रसारणमकारलोपश्च निपातनात् अस्पर्धेथामिति भाषायाम् अपरे तु अपपूर्वस्य स्पर्धेर्लङ्याथामि संप्रसारणमलोपश्च नि
पातनात् बहुलं छन्दस्यमाङ्योगेपीत्यडागमाभावः तन्मते प्रत्युदाहरणमपास्पर्धेथामिति भाषायाम् अर्चेर्ऱ्हेश्चेति संप्रसारणमलोपश्च निपातनात् ततो द्विर्वचनमुरद
त्वमत आदेरिति दीर्घत्वम् तस्मान्नुड् द्विहल इति नुडागमः आनर्चुरानर्हुरिति भाषायाम् च्युङो लिटीति अभ्यासस्य संप्रसारणमनिट्त्वं च निपातनात् चुच्युविषेति
भाषायाम् त्यजेर्णलीति त्यज वयोर्हानौ अभ्यासस्य संप्रसारणं निपात्यते तत्याजेति भाषायाम् श्राता इति श्रीञ् पाके इत्यस्य निष्ठायां श्राभावः श्रिता इति तस्यैव श्रीणाते

चायः की। ६।१।३५। नाभ्यस्ति क्युः। निचिक्युरस्य। लिटि उसि रूपं। बहुलग्रहणानुवृत्तेर्नेह। अग्निं ज्योतिर्निचाय्य॥ अपस्पृधेथामानृचुरानृ
हुश्चिच्युषेतित्याजश्राताश्रितमाशीराशीर्त्ताः। ६।१।३६। एते छन्दसि निपात्यन्ते। इन्द्रश्च विष्णो यदपस्पृधेथाम्। स्पर्द्धेर्लङि आथाम्। अर्कमानृ
चुः। वसून्यानृहुः। अर्चेर्ऱ्हेश्च लिटि उसि। चिच्युषे। च्युङो लिटि थासि। यस्तित्याज। त्यजेर्णलि। श्रातास्त इन्द्र सोमाः। श्रितानो ग्रहाः। श्रीञ् पा
के। निष्ठायाम्। नाशीरं दुदुह्रे। मध्यत आशीर्त्तः॥ श्रीञ एव क्विपि निष्ठायां च॥ खिदेश्छन्दसि। ६।१।५२। खिद दैन्ये। अस्यैव आ स्यात्। चित्ता
द। चिखेदेत्यर्थः॥ शीर्षश्छन्दसि। ६।१।६०। शिरःशब्दस्य शीर्षन् स्यात्। शीर्ष्णो जगतः॥ वा छन्दसि। ६।१।१०६। दीर्घाज्जसि इचि च पूर्वसवर्ण ॥

ह्रस्वत्वं च आशिरमिति आङ्पूर्वस्य श्रीणातेः क्विपू धातोः शिर आदेशः तस्माद्द्वितीयैकवचनम् अशीर्त इति श्रिञः आङ्पूर्वस्य क्तः ॥ दीर्घो वा स्यात्। वाराही वारा
र इत्यादेशः निष्ठायाश्च नत्वाभावो निपातनात् हलि चेति दीर्घः खिदेश्छन्दसि आदेच उपदेशेऽशितीत्यतः आदिति एजिति च वर्तते विभाषा लीयतेरित्यतो विभाषेति च तदाह
आ स्यादिति चित्ता देति व्यत्ययेन परस्मैपदम् शीर्षन् इति अल्लोपोन इत्यल्लोपः रषाभ्यामिति णत्वम् पूर्वस्मादपि विधौ स्थानिवद्भाव इति पक्षे तु अट्कुप्वाङ् इत्यनेन
वा छन्दसि नादिचि दीर्घाज्जसि चेति च वर्तते तदाह दीर्घादित्यादि वाराही इति वराहस्य विकार इति अवयवे च प्राण्योषधिवृक्षेभ्य इति प्राणिरजतादिभ्योऽञ् ङीप् द्विवचने पूर्वसवर्णदीर्घः पूर्वसवर्णाभावे यणादेशः ॥

CC-0. In Public Domain. Digitization by eGangotri



मानुषीरिति प्रथमाबहुवचनम् मनोर्ज्जातावञ्यतौषुक्चेति अञ्मनोः षुगागमः सूत्रद्वयेइति अमिपूर्वः संप्रसारणाच्चेत्यत्र वाक्यभेदेनेतिशेषः अमिपूर्वरूपंवास्या च्छंदसि तथासंप्रसारणाच्चेति पूर्वरूपंवास्याच्छंदसितदाह तेनेति शम्यश्चेतिविकल्पविधानसामर्थ्यात्पूर्वरूपत्वाभावेपूर्वसवर्णदीर्घोपिनभवति तयोरत्रविशेषा भावादिति यणादेशएवभवति यज्यमानइति यजेर्लटःशानच्सार्वधातुके यक् शानेमुगिति मुक्ग्रहिज्येति संप्रसारणंपूर्वरूपस्यवैकल्पिकत्वादभावेयण् यानेइति यानीत्यर्थः यच्छब्दात्परस्यशेर्लोपेकृते प्रत्ययलक्षणेनत्यदादीनामइति अत्वेनपुंसकस्यझलचइतिनुम् सर्वनामस्थानेचेतिदीर्घः नलोपः तानाइति तानितानीत्यर्थःपूर्ववत् भय्यप्रवय्ये बिभेतेःप्रपूर्वस्यवीइत्यस्यचयतिप्रत्ययेपरतश्छन्दसिविषयेयादेशोनिपात्यते भय्यइति कृत्यल्युटइतिअपादानेयत्इदया

मानुषीरीळतेविशः।उत्तरसूत्रद्वयेऽपीदंवाक्यभेदेनसम्बध्यते।तेनामिपूर्वत्वंवास्यात्।शमीञ्च।शम्यञ्च।सूर्म्यंसूर्मिंच।सम्प्रसारणाच्चेतिपूर्वरूपमपिवा।इज्यमानः।यज्यमानः॥शेश्छंदसिबहुलम्।६।१।७०।लोपःस्यात्।यानेगात्राणाम्।तानापिण्डानाम्॥एमन्नादिषुछंदसिपररूपंवक्तव्यम्॥अपांत्वेमन्।अपांत्वोद्मन्॥भय्यप्रवय्येचच्छन्दसि।६।१।८३।बिभेत्यस्मादितिभय्यः।वेतेःप्रवय्याइतिस्त्रियामेवनिपातनम्।प्रवेयमित्यन्यत्र।छंदसिकिम्।भेयम्।प्रवेयम्॥हृदय्याउपसंख्यानम्॥हृदेभवाहृदय्याआपः॥भवेच्छन्दसियत्॥प्रकृत्यान्तःपादमव्यपरे।६।१।११५।ऋक्पादमध्यस्थएङ्प्रकृत्यास्यात्अतिपरेनतुवकारयकारे।उपप्रयंन्तोअध्वरम्।सुजातेअश्वसूनृते।अन्तःपादंकिम्।एतासएतेर्चन्ति।अव्यपरेकिम्।तेऽवदन्॥ इति अकारस्यायादेशः प्रकृत्या पादस्यमध्येइत्यन्तःपादमित्यव्ययीभावः अन्तरित्यव्ययमधिकरणशक्तिप्रधानंमध्यमाचष्टेपादश्चेहऋक्पादएवगृह्यतेनश्लोकस्यवाछंदसीत्यतोमंडूकप्लुत्याछंदसीतिवर्त्तते तेनास्यवैदिकत्वंसंपद्यतइत्याशयेनाहऋक्पादमध्यस्थइति एङः पदांतादतीतिसूत्रादेङ्इतिपंचम्यन्तमनुवृत्तंप्रथमयाविपरिणम्यतेऽन्यस्यकार्यिणोऽसम्भवात् इत्यभिप्रेत्याह एङ्प्रकृत्येति संधिरूपंविकारंनयातीत्यर्थः उपप्रयन्तोअध्वरमितिएङः पदांतादतीतिप्राप्तम् अंतःपादंकिमिति ऋचीत्येवकिंनोक्तमित्यर्थः॥एतेर्चतीति कपामतीकुतेएतासएतेर्चंति युष्मदर्षणोवसूयाइति॥



564

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अत्र एते इति पादस्यान्ते एङः स्थिअकारश्च परस्य पादस्यादावितितन्निमित्तनिमित्तयोः पादमध्यस्थत्वमिति सत्यपि ऋकृत्वे प्रकृतिभावः ॥ ॥ अव्यात्। एषामनुकर
णात्वात्सुबन्तेन समासः अवरक्षणे आशीर्लिङ् अवद्यादिति पञ्चम्येकवचनान्तम् अवक्रमुरित्यत्र पूर्वस्य क्रमेर्लिट्युसि द्विर्वचनप्रकरणे छन्दसि वा वचनमिति
द्विर्वचनाभावे रूपम् केचित्तु अवचक्रमुरिति सूत्रे कृतद्विर्वचनं ये पठन्ति तेषामुदाहरणमन्यम् बह्वृचास्तावदक्रमुरित्यधीयते अवनेनितिहृङ् हृओर्मन्त्रे घसेति च्लेर्लु
क् आत्मनेपदे षिति कस्यादादेशः अयमिति इदमः सोऽद्दो यूपुंसि अवतेर्लोट् अवन्तु अवस्युरिति अवेरसुन् औणादिकः ततः क्यच् क्यांछन्दसीत्युः यजुष्युरः उरोऽ

अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च। ६।१।११६। एषु व्यपरेष्वपि एङ् प्रकृत्या। वसुभिर्नो अव्यात्। मित्रमहो अवद्यात्। मा शिवासो अव
क्रमुः। ते नो अव्रत शतधारो अयं मणिः। ते नो अवन्तु। कुशिकासो अवस्यवः। यद्यपि बह्वृचैस्तेनोऽवन्तु रथतूः सोऽयमागात् तेरुणोभिरित्यादौ
प्रकृतिभावो न क्रियते तथापि बाहुलकात्समाधेयम्। प्रातिशाख्ये तु वाचनिक एवायमर्थः॥ यजुष्युरः। ६।१।११७। उरःशब्द एङन्तोऽति प्रकृत्या
यजुषि। उरो अन्तरिक्षम्। यजुषि पादाभावादन्तःपादार्थं वचनम्॥ आपोजुषाणोवृष्णोवर्षिष्ठेऽम्बेऽम्बालेऽम्बिकेपूर्वे। ६।१।११८ यजुषि अति प्रकृ
त्या। आपो अस्मान्मातरः। जुषाणो अग्निराज्यस्य। वृष्णो अंशुभ्याम्। वर्षिष्ठे अधि नाके। अम्बे। अम्बाले। अम्बिके। अस्मादेव वचनादम्बार्थेति
ह्रस्वेन॥ अङ्ग इत्यादौ च। ६।१।११९। अङ्गशब्दे य एङ् तदादौ च अकारे य एङ् पूर्वः सोऽति प्रकृत्या यजुषि। प्राणो अङ्गे अङ्गे अदीध्यत् ॥

न्तरिक्षमिति नन्वत्र प्रकृत्यान्तःपाद इत्यनेनैव सिद्धे व्यर्थोऽयं योग इत्याशंक्याह यजुषि पादाभावादित्यादि आपोजुषाणो आपो इत्यादीनि पृथक्पदान्यनुकरणानि।
विभक्तिस्तु अनुकार्यानुकरणयोर्भेदस्याविवक्षितत्वान्न भवति सुपां सुलुगिति विभक्तेर्लुग्वा अंविके पूर्व इत्येतदप्यनुकरणमेव तत्र प्रथमं जसंतमनुकरणम् द्वितीयं
स्वंतं तृतीयम् शसंतं चतुर्थङ्यन्तमितरे संबुध्यन्ते आपोजुषाणोवृष्णोवर्षिष्ठे इत्येते शब्दाः अंविकेशब्दात्पूर्वौ यो अंबे अंबाले शब्दौ तौ च तेऽति परतः प्रकृत्यास्युः अंग इ
त्यादौ च अंगशब्दे य एङिति प्रकृत्या भवतीति वक्ष्यमाणेन सम्बन्ध्य तदादौ अकारे य एङ् पूर्व इति अत्रापि पूर्ववत्संबंधः अतिक्रांतपरामर्शि ॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri



नानक्त्वेनेति शब्दार्थमाचष्टे नत्यां गशब्दस्य आदिस्तदादिस्तद्रूपो यः अकारस्तस्मिन्परे पूर्वो यः एङ् सइत्यर्थः नन्वत्र चकारः किमर्थ इति चेच्छृणु असति चकारेऽग शब्दस्यैवेङ् नदादावनिपरतः प्रकृत्या भवतीत्यर्थः स्यात् तथा गोअंगेइत्यत्रैव स्यात् अंगे अदीव्यदित्यत्र न स्यात् सति तु तस्मिन् गशब्दस्य य एङ् यत्र कुत्र चिदति प्रकृत्या भवति नदादौ चानिपरतो यः कश्चिदेङ् स प्रकृत्या भवतीत्ययमर्थो भवति तेन अंगे अंगे अदीव्यत् प्राणो अंगे इत्युभयत्रापि भवति॥ ॥ अनुदात्ते च कुधपरे कुधौ परौ यस्मात्स तथोक्तः कवर्गधकारेति धकारे अकार उच्चारणार्थः अग्निरिति अग्निशब्दो अंगेर्निर्नलोपश्चेति निप्रत्ययान्तो ऽन्तोदात्तः अध्वरशब्दः प्रातिपदिकस्वरेणान्तोदात्तः आ

अनुदात्ते च कुधपरे। ६।१।१२० ।कवर्गधकारपरे ऽनुदात्ते ऽति परे एङ् प्रकृत्या यजुषि। अयं सो ऽग्निः। अयं सो अध्वरः। अनुदात्ते किम्॥ अधो ऽग्रे रुद्रे। अग्रशब्द आद्युदात्तः। कुधपरे किम्। सो ऽयमग्निमन्तः॥ अवपथासि च। ६।१।१२१। अनुदात्ते अकारादौ अवपथाःशब्दे परे यजुषि एङ् प्रकृत्या। त्री रुद्रेभ्यो अवपथाः। वपेर्लङि थासि तिङ् तिङ इत्यनुदात्तत्वम्। अनुदात्ते किम्। यद्रुद्रेभ्यो ऽवपथाः। निपाते यद्येति निघातो न॥ आङो ऽनुनासिकश्छन्दसि। ६।१।१२६। आङो ऽचि परे ऽनुनासिकः स्यात् स च प्रकृत्या। अभ्र आँ अपः। गभीर आँ उग्रपुत्रे॥ ईषा अक्षादीनां छन्दसि प्रकृतिभावो वक्तव्यः॥ ईषा अक्षो हिरण्ययः। ज्या इयम्। पूषा अविष्टः॥ स्यश्छन्दसि बहुलम्। ६।१।१३३। स्य इत्यस्य सो र्लोपः स्याद्धलि। एष स्य भानुः॥ ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे। ६।१।१५१। ह्रस्वात्परस्य चन्द्रशब्दोत्तरपदस्य सुडागमः स्यान्मन्त्रे। हरिश्चन्द्रो मरुद्गणः। सुश्चन्द्र दस्म ॥ ॥

युदात्त इति कर्त्रे इत्यादिना णादिसूत्रेण निपातितः आङो आङिति ङित्त्विशिष्ट आकारो गृह्यते यद्यपि षदर्थे क्रियायोगे मर्यादाभिविधौ च यः एतमातं ङितं विद्याद्वाक्यस्मरणयोरङिदित्यनेन लक्षितः यद्यपि अभ्र आँ अप इत्यत्र आकारो नैष षदर्थादिचतुष्टयवृत्तिः सप्तम्यर्थद्योतकत्वात् तथापि वाक्यस्मरणयोरङिदित्यत्रैव तात्पर्यम्। अन्यत्र सर्वत्राङ् ङिद्वेदितव्यः एवं नावद्वाच्ये स्थितम् अभ्र आँ अप इति सप्तम्यर्थद्योतको ऽत्राङ् उपदेशे ऽजनुनासिक इतीत्संज्ञा तु न उपदेशग्रहणात् तुल्यः छंदसि स इति त्यदित्येतस्य प्रथमान्तस्यानुकरणम् सुपां सुलुगिति लुप्तषष्ठीकम् एष स्येति एतदस्त्यदश्च त्यदाद्यत्वं तदोः सः सावनन्त्ययोरिति सः एतदस्त्यदश्च परस्य सोः एतत्तदोः सुलो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चंद्रशब्दे उत्तरपदे ह्रस्वात्परः सुडागमो भवति सच भवन्‌ चंद्रशब्दस्यैवोभयनिर्देशे पंचमीनिर्देशो बलीयानित्याशयेनाह चंद्रशब्दस्योत्तरपदस्येति सुडागमः स्या दिति सुट्कात्पूर्वइत्यतः सुडित्यनुवर्त्तनात्‌॥ ॥पितरा पूर्वपदस्यारङादेशो निपात्यते उत्तरपदे तु सुपांसुलुगित्यादिना विभक्तेराकारादेशः ऋतोङिसर्वनामस्थानयो रितिगुणः समानस्यसः स्यादितिसह ससइत्यतः सइत्यनुवर्त्तते सगर्भ्यइति समानोगर्भःसगर्भः तत्रभवः सगर्भ्यः सगर्भसयूथसनुताद्यदितियत्‌ प्रत्ययः अमूर्द्ध न्यादिकिम्‌ समानमूर्द्धा समानप्रभृतयः समानोदर्काः छन्दसिस्त्रियाम्‌ विष्वग्देवयोरिति सर्वनाम्नोप्युपलक्षणम्‌ बहुलग्रहणात्क्वचिन्नभवति विश्वाची देव

पितरामातराचछन्दसि।६।३।३३।द्वन्द्वे निपातः। आमागन्तांपितरामातराच। चाद्विपरीतमपि। मातरापितरानूचिदिष्टौ॥ समानस्यछन्दस्यऽमूर्द्धप्रभृत्युदर्केषु॥ समानस्यसः स्यान्मूर्द्धादिभिन्ने उत्तरपदे। सगर्भ्यः॥ छन्दसिस्त्रियांबहुलम्‌॥ विष्वग्देवयोरद्र्यादेशः। विश्वाचीच। घृताचीच देवद्रीचीन्वयतदेवयन्तः। कद्रीची॥ सधमादस्थयोश्छन्दसि।६।३।९६॥ सहस्यसधादेशः स्यात्‌। इन्द्रत्वास्मिन्सधमादे। सोमः सधस्थम्‌॥ पथिचछन्दसि।६।३।१०८।पथिशब्दे उत्तरपदेकोः कवंकाच। कवपथः। कापथः। कुपथः॥ साढ्यै साढ्वा साढेति निगमे।६।३।११३॥ ध्रीचीति विष्वगञ्चतीति देवानंच

नीतिकिंनुडगितश्चेतिङीप्‌ अचइत्यकारलोपः चाविति दीर्घत्वम्‌ अत्रविष्वग्देवयोरद्र्यादेशः शाखोबाहुलकान्न क्वचिच्चभवतीत्याह कद्रीचीतिकुत्सितमञ्चतीति कद्रीचीकिंशब्दस्यटेरद्र्यादेशः ङीब्लोपदीर्घाः पूर्ववत्‌ सधमादसहस्यसधिरित्यतः सहस्येतिवर्त्तते मादस्थइत्येतयोरुत्तरपदयोः सहस्यसधइत्ययमादेशः स्यात्‌ सधेत्यविभक्तिकोनिर्देशः सधमादेइति सहमाद्यन्तिदेवाअस्मिन्निति सधमादोयज्ञइति मदोनुपसर्गेइत्यपि प्राप्तेऽजभ्या स्त्रीखलनाइतिघाथकेस्तु रिहलघ्वेतिघ ञ्सूत्रेमादेत्यकारउच्चारणार्थः तेनमादयतेः क्विबन्तस्यमादिति यद्रूपंतत्रापिभवति आत्वावहंतोहरयोयुज्यमानाअर्वागिंद्रसधमादोवहंतु सहस्थइतिसहतिष्ठतीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि. कौ. सहेः क्त्वाप्रत्यये इति पक्षे क्त्वाप्रत्ययस्य ध्यै आदेशश्च निपात्यते साढ्यै सहेः क्त्वाप्रत्ययस्य ध्यै होढः ष्टुत्वं ढो ढे लोपः ढ्रलोपेति दीर्घः साढ्वा इति ढत्वादि पूर्ववत् तृ निति तृतीय

वै. मिति गृभिता नोदात्तं स्यात् तथा भूरि चक्रे ति मंत्रे माहुत्याद्युदात्तं पठ्यते तन्न संगच्छते इति भावः स्त्रेति शब्दः प्रकारार्थः तेन निष्ठायामपि निपातनम् वो ध्यमू आषाल्हो अग्नेद्द

२७० षभः द्वयो इति अस्य आचार्यस्य द्वयोः स्वरयोर्मध्ये त्यडकारो लकारः सम्पद्यते ऊष्मणा सम्प्रयुक्तः डकारः ल्हकार इत्यामेतीत्यन्वयः अष्टापदीति अष्टौ पादा अस्या इति व

हुव्रीहौ संख्यासु पूर्वस्येति पादस्य लोपे कृते पादोऽन्यतरस्यामिति ङीप् मंत्रे सोम सोम अश्व इंद्रिय विश्वदेव्य एषां मतुप्प्रत्यये परे दीर्घः स्यान्मंत्रे ओषधेश्च न च हृदि कारात्

सहेः क्त्वाप्रत्यये आद्यं द्वयं तृ निति तृतीयं निपात्यते। मरुद्भिरुग्रः पृतनासु साढा॥ अचोर्मध्यस्थस्य डस्य ळः ढस्य ळ्हश्च प्रातिशाख्ये विहितः। आह

हि द्वयोश्चास्य स्वरयोर्मध्यमेत्य सम्पद्यते स डकारो ळकारः ळ्हकारतामेति स एव चास्य ढकारः सन्नूष्मणा सम्प्रयुक्त इति॥ छन्दसि च अष्टन

आत्वं स्यादुत्तरपदे। अष्टापदी॥ मन्त्रे सोमाश्वेंद्रियविश्वदेव्यस्य मतौ। ६।३।१३१। दीर्घः स्यान्मन्त्रे। अश्वावतीं सोमावतीं इन्द्रियावान्मदिन्तमः

। विश्वकर्मणा विश्वदेव्यावता॥ ओषधेश्च विभक्तावप्रथमायाम्। ६।३।१३२। दीर्घः स्यान्मन्त्रे। यदोषधीभ्यः। अदधा ओषधीषु॥ ऋचि तुनु

घमक्षुतङ्कुत्रोरुष्याणाम्। ६।३।१३३। दीर्घः स्यात्। आतूनइन्द्र। नूमर्तः। उतवाघा स्यालात्। मक्षूगोमन्तमीमहे। भरता जातवेदसम्। त

ङिति थादेशस्य ङित्त्वपक्षे ग्रहणम् तेनेह न। शृणोत ग्रावाणः। कूमनाः। अत्रा ते भद्रा। यत्रा नश्चक्रा उरुष्या णः ((क्ति नइति ङीषा गतार्थता अनोदात्त

तापत्तेः इष्यते क्त्वाद्युदात्तो लघावन्त इति फिट्सूत्रात् ऋचि तुनु घ इति स्वरूपग्रहणं न तु तरप्तमपोर्घसंज्ञस्य घशब्दस्यैव दीर्घदर्शनात् उत वेति भार्यायाः भ्रातास्यालः

ततः पञ्चमी भरतेति लोण्मध्यमपुरुषबहुवचनस्य थस्य लोटो लङ्वदिति निर्देशात् तस्य स्थाने तादेशः लस्य स्थस्थामिपामित्यनेन शृणोतेति तप्तनप्तनथनाश्चेति तनवा

देशः अत्रापि तात् ङित्त्वं नास्ति उरुष्या ण इति उरुष्येति कण्ड्वादियगन्तो रक्षणार्थः लोटः सेर्हिः अतो हेरिति लुक् नश्च धातुस्थोरुषुभ्य इति णत्वम्॥ ० ॥ २७०

CC-0. In Public Domain. Digitization by eGangotri

इकः इगंतस्यसुञिपरतोदीर्घःस्यात् चिद्मचोद्मचस्तिङन्तस्यातोदीर्घःस्यात् चि विद्मेति विद्मानि लट् विद्मोलटो वेत्तिमस्यस्थानेमः चक्रेनिलिटोमध्यमपुरुषबहुवचन
म निपातस्यच दीर्घःस्यानात्रे एवशब्दस्यादिषुपाठान्निपातः छन्दसु नामीति वर्णनेट्लोपइत्यतोदीर्घइतिचनदाह नामीत्यादि ऋभुक्षाणमिति ऋभुक्षिन्शब्द उणादिषु
निपातितः इतोत्सर्वनामस्थानइतीकारस्याकारादेशः जनितेतिजनयितेत्यर्थः शमितानिपातनंपूर्ववत् आनङिति नशेर्लुङिमंत्रेघसेतिलेर्लुक् नशेर्वेत्यस्याभावेत्वम्ब
निषः जम्लेनङः तस्यचत्वेनटः आवरिति वृञोलुङिलेर्लुक् गुणः रेफस्यविसर्गः बहुलंछंदसि माङ्योगेप्यमाङ्योगेपिबहुलमडाटौभवतः अमाङ्योगेपिनभवतः माङ्योगे

इकः सुञि।६।३।१३४।ऋचिदीर्घइत्येव।अभीषुणः सखीनाम्।सुञइतिषः।नश्चधातुस्थोरुषुभ्यइतिणः॥द्व्यचोऽतस्तिङः।६।३।१३५।मन्त्रेदीर्घः।विद्माहि
चक्राजरसम्॥निपातस्यच।६।३।१३६।एवाहिते॥छन्दस्युभयथा।नामिदीर्घोवा।धातान्धातॄणामितिबह्वृचाः।तैत्तिरीयास्तुह्रस्वमेवपठन्ति॥वाषपूर्व
स्यनिगमे।६।४।९।षपूर्वस्यानउपधायावादीर्घोऽसम्बुद्धौसर्वनामस्थानेपरे।ऋभुक्षाणम्।ऋभुक्षणम्।निगमेकिम्।तक्षा।तक्षाणौ॥जनितामन्त्रे।
६।४।५३।इडादौतृचिणिलोपोनिपात्यते।योनःपिताजनिता॥शमितायज्ञे।६।४।५४।शमयितेत्यर्थः॥युवोर्दीर्घश्छन्दसि।६।४।५८।ल्यपीत्यनुवर्त्त
ते।विपूय।विप्लूय॥आङजादीनाम्॥छन्दस्यपिदृश्यते।६।४।७३।अनजादीनामित्यर्थः।आनट्।आवः॥नमाङ्योगे॥बहुलंछन्दस्यमाङ्योगे
ऽपि।६।४।७५।जनिष्ठाउग्रः सहसेतुराय।मावःक्षेत्रेपरबीजान्यवाप्सुः॥इरयोरे।६।४।७६।प्रथमंदध्रआपः।रेभावस्याभीयत्वेनासिद्धत्वादालोपः।

पिचभवतः जनिष्ठाइतिजनेर्लुङ्थासअडागमाभावः माङ्योगेप्यडागममुदाहरति मावइति वोयुष्माकंक्षेत्रेभार्यायांपरबीजा॥ अत्ररेशब्दस्यटित्कृतेपुनरपिरेभावः॥
निपरेषांबीजानिवीर्याणिमाअवाप्सुः उप्तानिमाभूवन्नवपेःकर्मणिलुङ्व्यत्ययेनपरस्मैपदम् च्लेःसिच्वदव्रजेतिवृद्धिः इदंकाशिकानुरोधेनोदाहृतम् अध्ययनंतुवाप्सुरित्येव
दृश्यते माङ्योगस्योदाहरणान्तरमन्वेषणीयम् इरयोरेइत्येतस्यरेआदेशः स्याच्छंदसिदधेइति धाञोलिटिझस्यलिटस्तझयोरितीरेचिकृतेरेभावः ननुचात्रपरत्वाद्रेभावे
कृतेऽनजादित्वादा लोपोनप्राप्तइत्यतआह रेभावस्येति नन्वेवमपिरेभावस्यैवकृता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



दिनियमादिडागमः प्राप्नोति न चरेभावस्य वैयर्थ्यम् कृसृभृवृ॰ इति नियमस्य चरितार्थत्वादत आह अत्रेति कथं पुनर्लोपस्य णिकसोरेरादन्तस्य रेभावो भवति तत्राह ॥ ॥ तदर्थं चे
ति। द्विवचननिर्देशात्तु सस्यानतिपदोक्तपरिभाषानप्रवर्तनादनिभावः तन्वादीनां तन्वादीनां बहुलमियङुवङादेशस्याच्छन्दसि तनुवमिति अथानुत्वादप्राप्तउवङ्वि
धीयते तन्वमिति वाच्छंदसीत्यभिपूर्वत्वाभावे यण् त्र्यम्बकमिति त्रीणि अम्बकानि नेत्राणि यस्यासौ त्र्यम्बको रुद्रः विव्रन्निरिद्गति तनु विस्तारे लिटः प्रथमपुरुषबहुवचनं
अतोरुोपस्यासिद्धत्वेपि अत एकहल्मध्यद्रुति एत्वाभ्यासलोपौ नलोपविधानसामर्थ्यात् पप्निमेति पत्लपतने लिटो मसो मस्यइट् विवेनिरेपेतिमेति भाषायां घसि
भसो अनयोरुपधालोपः स्याद्धलादावजादौ च क्ङिति सग्धिरिति अदेः क्तिन् बहुलं छंदसीति घस्लादेशेऽत्रोपधालोपे चकृते घस्लो झलोझलीति सलोपत्वकारस्य धत्वं घस्यजश्त्वं त

तदर्थसूत्रे द्विवचनान्तनिर्दिष्टं द्वर योरिति॥ छन्दस्युभयथा। ६।४।८६। भूसुधियोर्यण्स्यादियङुवङौ च। वने षु वित्वं विभ्वं। विभुवं वा। सुध्यो न व्यमग्ने:
।सुधियो वा॥ तन्वादीनां छन्दसि बहुलम्॥ तन्वं पुषेम। तनुवं वा। त्र्यम्बकं। त्रियम्बकम्॥ तनिपत्योश्छन्दसि। ६।४।९९। एतयोरुपधालोपः क्ङिति प्र
त्यये। वितन्निरे कवयः। शकुना इव पप्तिम॥ घसिभसोर्हलि च। ६।४।१००। सग्धिश्च मे। बब्धां ते हरी धानाः॥ हुझल्भ्यो हेर्धिः॥ शृणुपृकृवृभ्यश्छन्द
सि। ६।४।१०२ श्रुधी हवम्। शृणुधी गिरः। रायस्पूर्धि। उरु णस्कृधि। अपावृधि॥ वा छन्दसि ६।४।८८ हि रपिद्धा। अङितश्च ६।४।१०३ हेर्धिः स्यात्
।रारन्धि। रमेर्व्यत्ययेन परस्मैपदम्। शपः श्लुरभ्यासदीर्घश्च। अस्मे प्रयन्धि। युयोधि जातवेदः ॥ न: समानाधि: सग्धिरिति समासे कृते समानस्य छन्दस

मूर्ध प्रभृत्युदर्केष्विति सूत्रेण समानस्य सः बब्धामिति भसेर्लोटि तांभ्युः परनित्यमप्युपधालोपं बाधित्वा बाहुलकात्प्रथमं श्लाविति द्वित्वम् तत उपधालोपस लोपघत्वा
जश्त्वानि कर्तव्यानि श्रुधीत्यत्र शृणोतेर्हेर्धिः स्यात् श्रुधीति बहुलं छंदसीति शपो लुक् अन्येषामपीति दीर्घत्वम् शृणुधीति श्रुवः शृ चेति श्रुवः शृभावश्च विधानसामर्थ्यात् उ
तश्च प्रत्ययादिति न हेर्लुक् दीर्घः पूर्ववत् पूर्धीति पृ पालने शपो लुक् उदोष्ठ्यपूर्वस्येत्युत्त्वम् हलि चेति दीर्घः उरुणस्कृधीति नश्च धातुस्थोरुषुभ्य इति णत्वम् कः करत्करति॰
दिना विसर्जनीयस्य सत्वम् अपावृधीति दीर्घः पूर्ववत् अभ्यासस्य दीर्घश्चेति तुजादित्वादिति भावः रारंधीत्यत्रानुदात्तोपदेशेत्यादिना मलोपो न हेरङित्वात् ॥ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यमेः श्पोलुगिति बहुलंछंदसीत्यनेनएवसुतरान्नापि विभाषर्जोरिकृतोहलादेर्लघोरित्यतः ऋत इति तुरिष्ठेमेयस्विति चतदाह ऋतस्थानेइत्यादि ऋत्व्यवास्त्व
ऋतुशब्दाद्यतिवास्तुशब्दाद्दञि यतिचयणादेशोनिपात्यते मधुशब्दस्येति तस्यासिद्धत्वाद्यस्येतिलोपोन अकृत्सार्वेतिदीर्घस्त्वंगवृत्तपरिभाषयावारणीयः यद्वा
मकारमात्रस्यलोपः ततोयस्येतिलोपेकृतेप्रत्ययाकारस्यश्रवणं इतिषष्ठोऽध्यायः ६॥ बहुलंछंदसि छंदसिविषयेबहुलंरुडागमः स्यात् दुह्रइति दुहेर्लट् टेरत्वे
तस्यादेशेरुट् तलोपः लोपाभावेदुहते लोपस्त्वात्मनेपदेष्वित्यस्यवैकल्पिकत्वादित्यर्थः अदृश्रमिति दृशिरप्रेक्षणेलुङ् व्यत्ययेन प्रथमपुरुषबहुवचनस्थानेउ

यमेः शपोलुक्। यौतेः शपः श्लुः॥ मन्त्रेष्वाड्यादेरात्मनः।६।४।१४१। आत्मन्शब्दस्यादेर्लोपः स्यादाङि। त्मनादेवेषु॥ विभाषर्जोश्छंदसि।६।४।१६२।
ऋजुशब्दस्यऋतः स्थानेरः स्याद् इष्ठेमेयस्सु। त्वंरजिष्ठमनुनेषि। ऋजिष्ठंवा॥ ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानिच्छन्दसि।६।४।१७५। ऋ
तौभवंऋत्व्यम्। वास्तुनिभवंवास्त्व्यम्। वास्त्वश्च। मधुशब्दस्याणिस्त्रियांयणादेशोनिपात्यते। माध्वीर्नः संत्वोषधीः। हिरण्यशब्दाद्विहितस्यम
यटोमशब्दस्यलोपोनिपात्यते। हिरण्ययेनसवितारथेन॥ इतिषष्ठोऽध्यायः॥ शीङोरुट्॥ बहुलंछन्दसि।७।१।८। रुडागमः स्यात्। लोपस्त्व
आत्मनेपदेष्वितिपक्षेतलोपः। धेनवादुह्रे। लोपाभावेघृतन्दुह्रते। अदृश्रम्॥ अतोभिसऐस्॥ बहुलंछन्दसि।७।१।१०। अग्निर्देवेभिः॥ नेतराच्छ
न्दसि।७।१।२६। स्वमोरद्डुन। वार्त्रघ्नमितरम्। छन्दसिकिम्। इतरत्काष्ठम्॥ समासेऽनञ्पूर्वेक्त्वोल्यप्। क्त्वापिछंदसि। यजमानम्परिधाप

तमपुरुषैकवचनमिप् तस्यरुडागमः नेतराद् इतरशब्दात्परयोः स्वमोरद्डादेशोनस्याच्छन्दसि इतरमिति अद्डइतरादिभ्य इत्यद्डभावेअतोमित्यम् क्त्वोल्यविति। समासे
नञ्पूर्वेक्त्वोल्यपिप्राप्तेछन्दसिक्त्वापिविधीयते तदाहक्त्वापि अनञ्पूर्वेसमासेक्त्वाइत्ययमादेशः स्यात् अपिशब्दाल्ल्यबपिसमासेऽसमासेचभवति अप्राप्तविषयेल्यपः प्राप
णार्थत्वादपिशब्दस्य अन्यथावाछंदसीत्येवब्रूयात् तथाचछन्दोविधिमनुविदधानाः कल्पसूत्रकाराअपिप्रयुंजते आज्येनाक्षीणिअंक्त्वेति परिधापयित्वेतिणिजन्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सुपांसुपांस्थानेसुलुक् पूर्वसवर्णआआत् शेयाडाड्यायाजूआल् एतेआदेशाः सुः छन्दसिपन्थाइतिव्यत्ययोबहुलमित्येवसिद्धमिदमुक्तं हि तत्रसुप्तिङुपग्रहेत्यादि
नस्वेवायंप्रपञ्चः धीतीत्यादि धीतीमतीसुष्टुतीशब्देभ्यस्तृतीयैकवचनस्यपूर्वसवर्णईकारः प्रमाणतआन्तर्यात्सवर्णदीर्घत्वं दिविस्पृशाविति प्राप्ते आइति अनेमादि
त्यत्राकारोपिप्रश्लिष्यतइतिदर्शितम् नतादिति नतशब्दादम् तस्याद्दादेशः नविभक्तौतुस्माइतीत्संज्ञाप्रतिषेधः यादेवेत्यादि यत्तच्छब्दादम् तस्यात् युष्मेइति युष्
मदः सप्तमीबहुवचनस्यशेआदेशः शेषेलोपः अस्मेइन्द्रेति शेइति प्रगृह्यत्वादयादेशाभावः नाभाइति डित्वाट्टिलोपः ताअनुष्ठ्येति षड्विंशतिरस्यवंक्षयइति

सुपांसुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः।७।१।३९। ऋजवः सन्तु पन्थाः। पन्थानइतिप्राप्ते। सुः॥ परमेव्योमन्। व्योमनिइतिप्राप्ते। ङे
लुक्। धीती। मती। सुष्टुती। धीत्यासुष्टुत्येतिप्राप्ते। पूर्वसवर्णदीर्घः। यासुरथारथीतमा। दिविस्पृशाश्विना। यौसुरथौदिविस्पृशावित्यादिप्राप्ते।
आ। नताद्ब्राह्मणम्। नतमितिप्राप्ते। आत्। यादेवविश्वतात्वा। यमितिप्राप्ते। आत्। ______________ नयुष्मेवाजबन्धवः। अस्मेइन्द्राबृह
स्पती। युष्मासुअस्मास्वितिप्राप्ते। शे। उरुया। धृष्णुया। उरुणाधृष्णुनेतिप्राप्ते। या। नाभापृथिव्याः। नाभाविति प्राप्ते। डा। ताअनुष्ठ्योच्यावयता
त्। अनुष्ठानमनुष्ठा। व्यवस्थावदङ्। आङोड्या। साधुया। साध्वितिप्राप्ते। याच। वसन्तायजेत। वसन्तेइति प्राप्ते। आल्। इयाडियाजीकाराणा
मुपसंख्यानम्॥ उर्विया। दार्विया। उरुणादारुणेतिप्राप्ते। इया॥ मन्त्रस्यइदमध्वर्युप्रैषेपठितम् ताः वंक्षीः अनुष्ठ्याः अनुष्ठानेन अनुक्रमेणगणनयागल
यित्वाडउवयतात् भवान्विशसनंकरोतु पृथक्करोतुभवानित्यर्थः अनुष्ठानमनुष्ठेति अनुपूर्वात्तिष्ठतेरङ् तृतीयैकवचनंस्यड्यादेशःडित्वाट्टिलोपः नन्वनुपूर्वात्तिष्ठतेरा
तश्चोपसर्गइत्यङं वाधित्वास्यागापापचोभावेइतिक्तिनाभाव्यमितिचेत्सत्यम् पूर्वपरावरदक्षिणोत्तरेतिसूत्रेव्यवस्थायामितिनिर्देशादङ् पिसाम्यापेक्षज्ञापकात्
यणात् तदेतद्ध्वनयति व्यवस्थावदिति साधुइतिप्राप्तइति सोर्लुकि प्राप्तइत्यर्थः वसन्तेइतिप्राप्तेआलइति पूर्वसवर्णेतुअतोगुणइतिस्यात् उर्वियेतिउरुदारुशब्दा

सुक्षेत्रियेतिसुक्षेत्रिनुशब्दान्नृतीयैकवचनस्य। ङियाजादेशः ङित्वाट्टिलोपः बाहुलेनेतिप्राप्तेइति काशिकायां तुमबाहुलेनेतिप्राप्तइत्युक्तं न तु समासमम्मादित्यवधेयम्प्रेति।
ह्निनस्यमस्तंपृथक्स्वरदर्शनात् पदकारैर्विच्छिद्यपाठाच्चसतः आख्यातान्नयीतिध्येयम् सन्नयतिअयाचोऽकारः सुपिचेतिदीर्घनिवृत्त्यर्थः अतोगुणादिति पररूपम् नावयेति
नौशब्दाट्टाइत्यस्य ऽयादिरित्स्वरइति रितीतिसूत्रेण अमोऽमइति मिवादेशोग्रहणेन द्वितीयैकवचनंछन्दसिदृष्टानुविधानात् तदेतदाह मिवादेशस्येति शित्वात्सर्वा
देशइतिशित्करणाभावेतु अलोन्त्यस्येतिमकारस्यस्यात् आदेः परस्येति तुन पञ्चमीनिर्देशाभावात् नचमकारस्यमकारवचनेप्रयोजनाभावात् सर्वादेशोभविष्यतीति

सुक्षेत्रिया। सुक्षेत्रिणेतिप्राप्ते ङियाच्। दृतिन्नसुक्षंसरसीशयानम्। ङे‍ईकारइत्याहुः। तन्नाद्युदात्तेपदेप्राप्ते। व्यत्ययेनान्तोदात्तता। वस्तुत
स्तुङीषन्तात् ङेर्लुक्। ईकारादेशस्तूदाहरणान्तरंमृग्यम्। आङ्ऽयाजऽयारामुपसंख्यानम्॥ प्रबाहवा सिसृतम्। बाहुनेतिप्राप्ते। स्वा
ङादेशः। घेर्ङितीतिगुणः। स्वप्नया। स्वप्नेनेतिप्राप्ते। अयाच। सनः सिन्धुमिवनावया। नावेतिप्राप्ते। अयार्। रित्स्वरः॥ अमोमम्। ७।१।४०।
मिवादेशस्यामोमम्स्यात्। अकारउच्चारणार्थः। शित्वात्सर्वादेशः। अस्तिसिचइति निट्। वधीव्रतम्। अवधिषमितिप्राप्ते॥ लोपस्तआत्म
नेपदेषु। ७।१।४१॥ छन्दसिदेवाअदुह्। अदुहतेतिप्राप्ते। दक्षिणतः शये। शेतइतिप्राप्ते। आत्मेतिकिम्। उत्सन्दुहन्ति॥ ध्वमोध्वात्। ७।
१।४२। अन्तरेवोष्माणंवारयध्वात्। वारयध्वमितिप्राप्ते॥ यजध्वैनमिति च। ७।१।४३। एनमिपरेध्वमोऽन्त्यलोपोनिपात्यते। यजध्वै
नम्प्रियमेधाः। वकारस्ययकारोनिपात्यतइतिवृत्तिकारोक्तिःप्रामादिकी॥ वाच्यम् मकारस्यमकारवचनमनुस्वारनिवृत्त्यर्थंस्यात् मोराजिसमःक्वा
विन्यन्तयथा वधीमिति हन्तेर्लुङ् हनोवधलिङिलुङिचेतिवधादेशः इ‍ट्‍ सिचइट् तस्यस्यइतिमिपोऽमभावः तस्यमश् अस्तिसिचइतिमस्यापृक्तस्येट् इट ईटीतिसिचोलो
पःसवर्णदीर्घत्वंबहुलंछन्दसीत्यडभावः लोपस्त आत्मनेपदेषुपत्तकारस्तस्यछन्दसिविषयेलोपः स्यात् अदुहेतिदुहेर्लङ् आत्मनेपदेषनतइतिमस्यादादेशः बहुलंछ
न्दसीतिरुट् तकारस्यलोपेद्वयोरकारयोरतोगुणादितिपररूपं शयइति शेतेइत्यत्रतलोपेकृतेऽयादेशः ध्वमो ध्वमोध्वादित्यादेशःस्याच्छन्दसि वारयध्वादिति वृत्तौ तिविलोट्

यज्ञा। इतिकारस्तु यजध्वैनमिति पाठं ज्ञात्वा वकारस्य यकारश्च निपात्य तदित्याह तद्दूष॥

सि·कौ· यतिवकारस्येत्यादि प्रामादिकीतिलक्ष्यैवकारपाठस्य निर्विवादत्वात् वेदभाष्येपिप्रकृतसूत्रस्यमलोपमात्रपरतोक्तेश्चेतिभावः॥ः॥ तस्य मध्यमपुरुषबहुवचनस्ये
वै· ति प्रथमपुरुषैकवचनस्यतुनग्रहणम् छन्दसिदृष्टानुविधानात् पूर्वोत्तराभ्यांबहुवचनाभ्यांसाहचर्य्याच्च कृणु तादिति कृविहिंसाकरणयोश्चधिन्विकृण्वोरचेत्यु
२·७३ प्रत्ययः वकारस्यचाकारः अतोलोपः गमयतादिति गमेर्णिच् जनीजृषिति अमंतत्वान्मित्संज्ञायांमितांह्रस्वः लोड्मध्यमपुरुषबहुवचनस्य तादेशः तप्तनप्तनस्य
नेएतेआदेशाः सुःश्रृणोतेति श्रुश्रवणे श्रुवः शृचेतिश्नुप्रत्ययः शृभावश्चपित्वेनाङित्वाद्गुणः सुनोतनेति षुञ्अभिषवेस्वादिभ्यः श्नुः तद्धत्वस्यतनपृदधातनेति अ
नेत्यङित्वात् श्नाभ्यस्तयोरित्याकारलोपाभावः इदंतो अन्तशब्दोऽवयववचनः इत् अंतो यस्य सइदंतः तपरकरणमसंदेहार्थम् तथाचायमर्थः ९ मसइत्ययंश

तस्तात्।७।१।४४।मध्यमपुरुषबहुवचनस्य स्थाने तात् स्यात्।गात्रमस्य नूनं कृणुतात्।कृणुतेति प्राप्ते।सूर्य्यं चक्षुर्गमयतात्।गमयतेति प्रा
प्ते॥तप्तनप्तनथनाश्च।७।१।४५।तस्येत्येव।शृणोत ग्रावाणः।शृणुतेति प्राप्ते।तप्।सुनोतन।पचतनन्नग्नवाहसे।दधातनद्रविणंचित्रमस्मे
।तनप्।तन।जुजुष्टन।जुषध्वमिति प्राप्ते।धात्वन्ययेन परस्मैपदं।थन।विश्वेदेवासोमरुतो यतिष्ठन॥यत्तस्थाकाःस्थेत्यर्थः।यच्छुध्वा
त्वांदसोडतिः।अस्येलस्य यनादेशः॥इदन्तो मसि।७।१।४६।मसीत्यविभक्तिको निर्देशः।इकार उच्चारणार्थः।मस इत्ययमिकाररूपचरमा
वयवविशिष्टः स्यात्।मसइगागमः स्यादिति यावत्॥नमोभरन्त एमसि।त्वमस्माकं तव स्मसि।इमस इति प्राप्ते॥क्त्वो यक्।७।१।४७।दिवंसुप

इद्कारान्तो भवति मसः सकारांतस्यइकारागमो भवतिसवचनस्यान्तोभवतीत्यर्थः तदेतदाह मसइत्ययमिति तत्रयदिसकारोपमर्देनइकारांतत्वमभिप्रेतंस्यात्तर्हिमसइदितिवा
च्यंस्यात् तस्मादवस्थितएवसकारेइकारउपसंजनीयः अंतग्रहणाच्चतद्ग्रहणेनग्रहणे तनस्थटित्वकित्वादेरागमलिंगस्याभावेप्यर्थादागमोयंसंपद्यतेतदेतद्ध्वनयन्नाह राम:
मसइगागमः स्यादिति एवंचमसइगिति वक्तव्ये प्रत्याहारसंदेहप्रसंगात्तथानोक्तम् एमसीति इण्गतौ मसस्तस्यइकारः अन्तावयवः स्मसीति अस्तेर्मस श्नसोरल्लोपः क्त्वोय २७३
क्त्वादन्यस्य यगागमः स्याच्छन्दसि गत्वायेति गमेः क्त्वा अनुदात्तोपदेशेत्यनुनासिकलोपः क्त्वाइत्यस्य यगागमः ॥ ६ ॥ ॥ ॥ ६ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

इष्ट्वीनक्त्वाप्रत्ययस्येति यजेः परस्येति शेषः इष्ट्वीनमिति यजेः क्त्वा वचिस्वपीति संप्रसारणम् व्रश्चेति षत्वम् ष्टुत्वम् आकारस्येन आदेशः पीत्वीति पिबतेः क्त्वा घुमास्थेतीत्वम् आज्ज
सेरिति पूर्वी बाध्यानुरोधेन निर्देशः देवासइति असुकि कृते जसः सकारस्य श्रवणं असुकः सकारस्य विसर्गः श्रीणामिति अस्य वा श्रीनिनदीत्व विकल्पान्नदीत्वाभावे उदाहर
णमिदं बोध्यम् नदीत्वपक्षे तु ह्रस्वनद्यापो नुडिति अनेनैव सिद्धम् सूतग्रामणीनामिति सूतानां ग्रामण्य एषामिति इतरेतरयोगः गोः पादान्ते गोरित्येतस्मात् इत्युत्तरस्यामो नुडागमः स्या
त्पादान्ते पादश्चेद्गृह्यते ऋक्पादो गृह्यते छन्दसीत्यधिकारात् छन्दस्येव छन्दसीति चेन्नैव सिद्धे अपि दृश्यत इत्यनेन सर्वोपाधिव्यभिचारार्थम् अन्यथा आरंभसामर्थ्यात् क्वचिदेव

इष्ट्वीनमिति च ।७।१।४८। क्त्वाप्रत्ययस्य ईनम् अन्तादेशो निपात्यते । इष्ट्वीनं देवान् । इष्ट्वा इति प्राप्ते ॥ स्नात्व्यादयश्च ।७।१।४९। आदिशब्दः प्रका
रार्थः । आकारस्य ईकारो निपात्यते । स्नात्वी मलादिव । पीत्वी सोमस्य वावृधे । स्नात्वा पीत्वेति प्राप्ते ॥ आज्जसेरसुक् ।७।१।५०। अवर्णान्तादङ्गा
त्परस्य जसोऽसुक् स्यात् । देवासः । ब्राह्मणासः ॥ श्रीग्रामण्योश्छन्दसि ।७।१।५६। आमो नुट् । श्रीणामुदारो धरुणो रयीणाम् । सूतग्रामणीनाम् ॥ गोः
पादान्ते ।७।१।५७। विद्मा हि त्वा गोपतिं शूर गोनाम् । पादान्ते किम् । गवां शता पृक्षयामेषु । पादान्तेऽपि क्वचिन्न । छन्दसि सर्वेषां वैकल्पिकत्वात् ।
विराजं गोपतिं गवाम् ॥ छन्दस्यपि दृश्यते ।७।१।७६। अस्थ्यादीनामनङ् । इन्द्रो दधीचो अस्थभिः ॥ ई च द्विवचने ।७।१।७७। अस्थ्यादीनामित्येव
। अक्षीभ्यां ते नासिकाभ्याम् ॥ दृक्स्ववस्स्वतवसां छन्दसि ।७।१।८३। एषां नुम् स्यात्सौ । कीदृङ्ङिन्द्रः । स्ववान् । स्वतवान् । उदोष्ठ्यपूर्वस्य ॥ बहुल

व्यभिचारः संभाव्येत तदाह वचीत्युक्तं इत्यादावपि भवति अस्थभिः विभक्तावित्युक्तमविभक्तावपि भवति अस्थन्वंतपदस्याविभक्तिकत्व ।ं छन्दसि ।७।१।१०३ ॥
न्वंतमित्यत्रास्थिशब्दान्मतुप् अनङि कृते नोपधाया इति मतुपो नुट् अनङो नकारलोपः दृक् आदीनां नुम् साविति नुम्सौ नड्ग्रहणमित्यनुवर्तनेन दाहनुम्सादिति की
दृङ्ङिन्द्र इति किम्शब्दे उपपदे त्यदादिषु दृशोऽनालोचने कञ्चेति क्विन् किमः कीश आदेशः नुम् संयोगान्तस्य लोपः क्विन्प्रत्ययस्येति कुत्वेन नस्य
ङः ङमो ह्रस्वादचीति ङुट् स्ववानिति अवतेरसुन् सुष्ठु अवो यस्येति विग्रहः स ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वः शब्दानुमिकत्ते सांतमहन्तेतिदीर्घः संयोगांतलोपः तस्यासिद्धत्वान्नलोपोन स्तनवानितितुधातुः सौत्रो वृद्ध्यर्थः तनोः सुनुस्तंतवोवृद्धिर्यस्येति विग्रहः ॥ ॥ ततुरिरितितर
तेराद्गमेतिकिन्मन्यथः उत्वं तस्य द्विर्वचने ऽचीतिस्थानिवद्भावात् इत्येतस्य द्विर्वचनं उरदत्वम् ह्वह्वरेश्छन्दसीति निष्ठायामित्यत्रो निष्ठायामिति वर्त्तनेनदाह निष्ठायामिति
अह्रुतमितिनह्रुतमह्रुतम् अपरिह्वृताः छन्दसि बहुवचनांतस्यैव प्रयोगदर्शनाद्बहुवचनांतस्य निर्देशः सोमे इट्गुणाविति ह्वृ इत्यादेशस्याभावोपिबोध्यः ग्रसित
ग्रसु अदने स्कंभुस्तंभुरोधनार्थौ सौत्रौ चते याचने कसगतौ शसुहिंसायाम् शंसुस्तुतौ शासु अनुशिष्टौ तत्स्ववनतरणयोः वृङ् संभक्तौ वृञ्वरणे ज्वलदीप्तौ क्षरसंचलने

ततुरिः ॥ ह्वह्वरेश्छंदसि। ७।२।३१। ह्वरेर्निष्ठायां ह्रु आदेशः स्यात्। अह्रुतमसिहविर्धानम्॥ अपरिह्वृताश्च। ७।२।३२। पूर्वेणप्राप्तस्यादेशस्याभावो निपात्य
ते। अपरिह्वृताः सनुयामवाजम्॥ सोमे ह्वरितः। ७।२।३३। इयङ्गुणौ निपात्येते। मानः सोमो ह्वरितः॥ ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ताविश
स्तशंस्तशास्ततरुतृतरूतृवरुतृवरूतृवरुत्रीरुज्ज्वलितिक्षरितिवमित्यमितीतिच। ७।२।३४। अष्टादश निपात्यन्ते। तत्र ग्रसुस्कम्भुस्तम्भु एषामु
दित्वान्निष्ठायामिट्प्रतिषेधे प्राप्ते इट् निपात्यते। युवं शचीभिर्ग्रसितामसुञ्चतम्। विष्कभिते अजरे। येन स्वः स्तभितम्। सत्येनोत्तभिताभूमिः। स्तभित
न्येव सिद्धे उत्पूर्वस्य पुनर्निपातनमन्योपसर्गपूर्वस्य माभूदिति। चते याचने। कस गतौ। आभ्यां क्तस्येड्भावः चत्ताइतश्चत्ता असुतः॥ निष्कस्यावम
रैश्विना विकस्तम्। उतानाया हृदयं यद्विकस्तम्॥

समूषुसहने टुवम उद्गिरणे अमगत्यादिषु अष्टादशेति क्षमितेः पाठपक्षेतु एकोनविंशतिः उदित्वान्निष्ठाया
मिट्प्रतिषेधप्राप्तेरिति उदितो वेतिक्त्वा यां वेट्त्वात् यस्य विभाषेति निषेधप्राप्तेरित्यर्थः विष्कभित इति अनिदितामिति नलोपः वेः स्कभ्नातेर्नित्यमिति षत्वम् उत्तभितेति
उदः स्थास्तम्भोरिति पूर्वसवर्णः सकारस्य यकारः तस्य झरो झरि सवर्ण इति लोपः अन्योपसर्गपूर्वस्य माभूदिति यदि स्यात् उत्तभितग्रहणं व्यर्थं स्यात् चत्ता इति चत
शब्दात् टाप् उज्ञा सह आद्गुणः निपातितमह एकीकृत्य छेदसुपदकाराणां संप्रदायसिद्धः भूयामो इति मंत्रे भूयामो इतियथा अश्वस्या विशस्तेति अन्येषामपीति पूर्वपद



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

निपातनंबहुत्वापेक्षमिति तेनछंदसः प्रयोगएकवचनांतोप्युदाहृतइतिभावः ततोङीपाइति ऋन्नेभ्यइतिविहितेन बभूथा निगमोवेदः एषांवेदइडभावोनिपा
त्यते वृत्रः क्रादिसूत्रेणेडभावेसिद्धे निगमएवेतिनियमार्थंनिपातनंतदेतदाह भाषायांतुववरिथेति सनिंससनिपूर्वात्सनतेः सनोतेर्वासनिंससनिवांसमितिनिपात्यते

निपातनंबहुत्वापेक्षंसूत्रेबहुवचनंविकल्पादितितेनैकवचनान्तोऽपिप्रयोगःसाधुरेव। शसुशंसुशासुएभ्यःक्तःचइडभावः। एकस्त्वष्टुरश्वस्याविश
स्ता। ग्रावग्राभउतशंस्ता। प्रशास्तापोता। नरतेर्वृङ्‌वृञोश्चतृच्‌उट्‌ऊट्‌एतावागमौनिपात्येते। नरुतारंरथानाम्। नरूतारम्। वरुतारम्। वरूतारम्
। वरूत्रीभिःसुशरणोनोअस्तु। अत्रङीवन्तनिपातनमपपश्यार्थम्। वरूतृशब्दोहिनिपातितः। ततोङीपागतार्थत्वात्। उज्ज्वलादिभ्यश्चतुर्भ्यःश
पइकारादेशोनिपात्यते॥ ज्वलदीप्तौ। क्षरसंचलने टुवमुउद्गिरणे। अमगत्यादिषु। इहक्षरितिनोन्यस्यानन्तरंक्षमितीत्यपिकेचित्पठन्ति। तत्रक्षमू
षूसहनेइतिधातुर्बोध्यः। भाषायान्तुग्रस्तस्कब्धस्तब्धोत्तब्धचत्तविकसिताः। विशसिता। शंसिता। शासिता। तरीता। तरिता। वरीता। वरिता। उज्ज्व
लति। क्षरतिपाठान्तरे। क्षमति। वमति। अमति॥ बभूथाऽऽततन्थजगृभ्मववर्थेतिनिगमे। ७।२।६४। विद्मातमुत्सं यतआबभूथ। येनान्तरिक्षमुर्वातत
न्थ। जगृभ्मातेदक्षिणमिन्द्रहस्तम्। त्वं ज्योतिषावितमोववर्थ। भाषायांतु। बभूविथ। आततनिथ। जगृहिम। ववरिथेति॥ सनिंससनिवांसम्। ७।
२।६९। सनिमित्येतत्पूर्वात्सनतेःसनोतेर्वाक्वसोरिट्। एत्वाभ्यासलोपाभावश्चनिपात्यते॥ पावकादीनांछन्दसि। प्रत्ययस्थात्कादित्वन्नेतिवाच्यम्॥
कसोरिडिति नेड्वशिकृतीतिनिषेधेप्राप्तेनिपा ॥ हिरण्यवर्णाःशुचयःपावकाः॥ घोर्लोपोलेटिवा। ७।३।७०। दधद्रत्नानिदाशुषे। सोमोददद्गन्धर्वाय। यदग्नि
तनम् पावकाइति पुनंतिपावयंतिवापावकाः पुनातेःपावयतेर्वाण्वुल्टाप् दधदिति दधातेर्लेट्तिपूश्लाविति द्वित्वम् दधातिइतिस्थिते आकारलोपः लेटोडाटावि
त्यडागमः इतश्चलोपः परस्मैपदेष्वितीकारलोपः दाशुषे यजमानायरत्नानिदधत् दध्यादित्यर्थः ददिति ददातेरूपम् लोपाभावेउदाहरणमाह ददादिति ॥

CC-0. In Public Domain. Digitization by eGangotri



मीनातेः घादीनां ह्रस्वइत्यतो ह्रस्वइ निवर्तनेनतदाह शिनिह्रस्वइति प्रमीणन्तीति हिनुमीनेति णत्वम् आइदमिति अस्तेर्लङि सिपि आडजादीनामित्याट् शपो लुक् अस्ति सिचइतीडभावेअपृक्तत्वाद्धल्ङ्यादिलोपः रुत्वविसर्गौ संहितायान्तु भोभगोइतिरोर्यत्वम् लोपःशाकल्यस्येति यलोपः जसादिष्विति आदिशब्दः प्रकारे तेनपूर्वयोगनिर्दिष्टानामपिग्रहणम् शतक्रतवइति जसिचेतिगुणाभावपक्षेप्रथमयोः पूर्वसवर्णदीर्घोपिवाछन्दसीति वचनादत्रनभवतीतियणादेशः प्रवर्तते पश्वेइति

मीनातेर्निगमे। ७।३।८१। शिनिह्रस्वः। प्रमिणन्तिव्रतानि। लोके प्रमीणाति॥ अस्तिसिचोऽपृक्ते॥ बहुलञ्छन्दसि। ७।३।९७। सर्वमाइदम्। ह्रस्वस्यगुणः। जसिच। जसादिषुछन्दसिवावचनम्प्राङ्णौचङ्युपधायाः॥ अधाशतक्रत्वोयुयम्। शतक्रतवः। पश्वेनृभ्योयथागवे। पशवे। नाभ्यस्तस्याचीति निषेधेबहुलञ्छन्दसीतिवक्तव्यम्॥ अनुषुग्जुजोषत्॥ नित्यंछन्दसि। ७।४।८। छन्दसिविषयेचङ्युपधायाऋवर्णस्यऋन्नित्यम्। अवीवृधत्। नच्छन्दस्यपुत्रस्य। ७।४।३५। पुत्रभिन्नस्यादन्तस्यक्यचिईत्वदीर्घौन। मित्रयुः। क्याच्छंदसीतिउः। अपुत्रस्यकिम्। पुत्रीयन्तःसुदानवः॥ अपुत्रादीनामितिवाच्यम्॥ जनीयन्तोन्वग्रवः। जनमिच्छन्तइत्यर्थः॥ दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति। ७।४।३६। एतेक्यचिनिपात्यन्ते। भाषायान्तुउप्रत्ययाभावात्। दुष्टीयति। द्रविणीयति। वृषीयति रिष्टीयति॥ अश्वाघस्यात्। ७।४।३७ अश्वअघएतयोःक्यचिआत्स्याच्छंदसि। अश्वायन्तोमघवन्। मात्वावृकाअघायवः। नच्छन्दसीतिनिषेधोनईत्वमात्रस्यकिन्तुदीर्घस्यापीति। अत्रेदमेवसूत्रंज्ञापकम्॥ देवसुम्नयोर्यजुषिकाठके। ७।४।३८। अनयोःक्यचिआत्स्याद्यजुषिकठशाखायाम्। देवायन्तोयजमानाः। सुम्नायन्तोहवामहे। इहयजुःशब्दोनमन्त्रमात्रपरः किन्तुवेदोपलक्षकः। तेनऋगात्मकेऽपिमन्त्रेयजुर्वेदस्थेभवति। किञ्च। ऋग्वेदेपिभवति। सचेन्मन्त्रोयजुषिकठशाखायांदृष्टः। य

घोर्ङितीत्यस्याभावेयण् जुजोषदिति जुषीप्रीतिसेवनयोः लेटि अडागमः। सिब्बहुलं लेटीतिसिप्। व्यत्ययेनपरस्मैपदम् तिपि इतश्चलोपः परस्मैपदेषु लेटोडाटावित्यट् व्यत्ययेनशपः श्लुः द्विर्वचनम् नछन्दसि इहयद्यानन्तर्यादीत्वमात्रंप्रतिषिध्येत तर्हि अकृत्सार्वेति



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कमनुपदमेववक्ष्यति पुत्रीयन्तइतिपुत्रमिच्छन्तः पुत्रीयन्तः जनमिच्छन्तोजनीयन्तः लटः शत्रादेशः उगिदचामितिनुम् दुरस्यु दुष्टशब्दस्यदुरसभावोद्रविणशब्दस्यद्रवि
णसभावः वृषस्यवृषणभावः रिष्टस्यरिषणभावश्चनिपात्यते दुष्टीयतीति प्रकृतिमात्रेतात्पर्य्यम् उप्रत्ययस्यसमानार्थेनतुनादुष्टीयितेत्यादिबोध्यम् अघायन्तइति
अघशब्दात्क्यच् लटः शत्रादेशः अघायवइतिच्छन्दसिपरेच्छायांक्यच् क्याच्छन्दसीत्युप्रत्ययः इदमेवसूत्रंज्ञापकमिति अन्यथादीर्घेणैवसिद्धत्वादात्ववच
नमनर्थकंस्यात्॥ः॥देवान् जिगातीति नत्विदंप्रत्युदाहरणमंगढ्यविकलम्॥ यजुषिकाठकइत्यंशद्वयस्यापितत्राभावादित्याशंक्याह बह्वृचानामस्तीति तत्रेदं

देवाञ्जिगातिसुम्नयुः बह्वृचानामप्यस्तिकठशाखातत्तोभवतिप्रत्युदाहरणमितिहरदत्तः॥ कव्यध्वरपृतनस्यर्चिलोपः।७।४।३९॥ एषामन्त्यस्यलोपःस्याद्यचिपरे क्यचिविषयेमृगयादिगणेध्वर्युशब्दःपठ्यते पूर्वया
निविदाकव्यतायोः। अध्वर्युंवामधुपाणिम्। दमयन्तंपृतन्युम्॥ दधातेर्हिः॥ जहातेश्चक्त्वि॥ विभाषाच्छन्दसि।७।४।४४॥ हीत्वाशरीरम्। हित्वा
वा॥ सुधितवसुधितनेमधितधिष्वधिषीयच।७।४।४५॥ सुवसुनेमएतत्पूर्वस्यदधातेः क्तेप्रत्ययेइत्वंनिपात्यते। गर्भंमातासुधितंवक्षणासु
।वसुधितमग्नौ। नेमधितानपौंस्या॥ क्त्व्यपिदृश्यते। उतश्वेतंवसुधितिन्निरेके। धिष्वयज्रंदक्षिणइन्द्रहस्ते। धत्स्वेतिप्राप्ते। सुरेतारेतोधिषीय।
आशीर्लिङ् इट्। इट्। इटोऽत्। धासीयेतिप्राप्ते॥ अपोभि॥ मासन्छन्दसीतिवक्तव्यम्। माद्भिः। शरद्भिः॥ स्ववः स्वतवसोरुषसश्चेष्यते। स्ववद्भिः। अव
तेरसुन्। शोभनमवोयेषान्तेस्ववसस्तैः तुइतिसौत्रोधातुस्तस्मादसुन्। स्वन्तवोयेषान्तैः स्वतवद्भिः। समुषद्भिरजायथाः॥ मिथुनेऽसिः। वसेः किच्चे
त्यसिप्रत्ययइतिहरदत्तः। पञ्चपादीरीत्यातुडघः किदितिप्राग्व्याख्यातम्॥

दृष्टमितिभावः काठकइतिकिम् यजुर्वेदेशाखान्तरेमाभूत् अन्यत्रसुम्न
युरिदमस्ति कव्यध्वरकविअध्वरपृतनाएषामन्त्यस्यलोपःस्यात्क्यचिपरेक्यचिविषये मृगयादिगणेध्वर्युशब्दःपठ्यते तद्व्युत्पत्त्यंतरंबोध्यम् विभाषाजहातेरंग
स्यविभाषाहिआदेशःस्यात् हीत्वेति हिआदेशाभावेघुमास्थेतीत्वम् क्वचित्तुहात्वेनिपाठस्तत्रच्छादसत्वाद्घुमास्थेतीत्वाभावः वसुधितमितिकर्मधारयइतिहरदत्तः व
सूनांधातारंप्रदातारमित्यर्थइतिवेदभाष्यम्। नेमधितमिति सामिपर्य्यायोनेमशब्दः अयंकर्मधारयः धत्स्वेति श्नाभ्यस्तयोरातइत्याकारलोपः दधस्तथोश्चेतिभषभा

सि·कौ· पुरुषैकवचनेदधातेरित्वंनिपात्यते नदाह आशीर्लिङीति माद्रिरिति पद्रनोमासद्वतिमासशब्दस्यमासआदेशः॥ ॥ नकवतेरिति अनुवृत्त्यर्थउपन्यासः करीकृ

बै· नकवतेर्यङि॥ कृषेश्छन्दसि।७।४।६४। यङि अभ्यासस्यचुत्वन्नकरीकृष्यते॥दाधर्तिदर्धर्ति दर्द्धर्षि बोभूतुतेतिक्ते ऽलर्ष्या ऽऽपनीफणत्संसनिष्यदत्क

२९६ रिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतः सरीसृपतंवरीवृजन्मर्मृज्या ऽऽगनीगन्तीतिच।७।४।६५। एतेऽष्टादशनिपात्यन्ते। आद्यास्त्र

यः धृङोधारयतेर्वा। भवतेर्यङ्लुगन्तस्यगुणाभावः। तेनभाषायांगुणोलभ्यते। तिजेर्यङ्लुगन्तात्तङ्। इयर्तेर्लटिहलादिःशेषापवादोरे

फस्यलत्वं। इत्वाभावश्चनिपात्यते। अलर्षियुध्मंखलजकृत्पुरन्दरा।सिपानिर्देशोनतन्त्रम्। अलर्तिदक्षउत। फणतेराङ्पूर्वस्ययङ्लुगन्त

स्यशतरिअभ्यासस्यनीगागमोनिपात्यते। अन्वापनीफणत्। स्यन्देःसम्पूर्वस्ययङ्लुकिशतरिअभ्यासस्यनिक्। धातुसकारस्यषत्वम्। करो

तेर्यङ्लुगन्तस्याभ्यासस्यचुत्वाभावः करिक्रत्। क्रन्देर्लुङिच्लेरङ्द्विर्वचनअभ्यासस्यचुत्वाभावोनिगागमश्च। कनिक्रदज्जनुषम्। अक्रन्दीदित्य

र्थः। विभर्तेरभ्यासस्यजश्त्वाभावः रिगागमश्चयोभरिभ्रदोषधीषु॥ ध्वरतेर्यङ्लुगन्तस्यशतरिअभ्यासस्यविगागमः। धातोर्ऋकारलोपश्च।

दविध्वतोरश्मयःसूर्यस्य। द्युतेरभ्यासस्यसम्प्रसारणाभावोऽत्वंविगागमश्च। दविद्युतद्दीद्यच्छोशुचानः। तरतेःशतरिम्नौअभ्यासस्यरिगागमः। स

होर्जांतरित्रतः। सृपेःशतरिश्नौद्वितीयैकवचनेरीगागमोऽभ्यासस्य। वृजेःशतरिम्लावभ्यासस्यरीक्। मृजेर्लिटिणल्अभ्यासस्यरुक्। धातोश्चयु

क्।आगमेराङ्पूर्वस्यलटिम्लावभ्यासस्यचुत्वाभावोनीगागमश्च। वस्वन्तीवेदागनीगन्तिकर्णे॥ ससूवेतिनिगमे।७।४।७४। सूतेर्लिटिपरस्मैपदंवुगागमोऽ

भ्यासस्यचात्वंनिपात्यते। गृष्टिःससूवस्थविरम्। सुषुवइतिभाषायाम्॥ बहुलंछन्दसि।७।४।७८। अभ्यासस्यइकारःस्याच्छन्दसि। पूर्णांविवष्टि। वशेरेतद्रू

पंनद्वतिरुग्रिकोचलुकीतिरीगागमः लोकेतुचरीकृष्यतेकृषीवलः धृङद्वति धृङनवस्थाने धारयतेर्वेति सरणवयन्तः तत्रदाधर्तीत्यत्रधारयतेःशपःश्लोणिलुक् अ ॥ रामः २९६

572

दीर्घत्वञ्चनिपात्यते धृङोवाशेःप्राप्तेव्यत्ययेनशप् तत्रश्लावभ्यासस्यदीर्घत्वंच अत्रपरस्मैपदमपिनिपात्यतस्यैवयङ्लुक्यभ्यासस्यरुगाद्यपवादकंदीर्घत्वंनिपा
त्यतइति दर्धर्तीत्यत्रयङ्लुक्पक्षेदाधर्तीतिनिपातनेनप्राप्तस्यदीर्घस्याभावोनिपात्यते रुग्रिकौचलुकि ऋतश्चेत्येवरुक्सिद्धः श्लुपक्षेतुरुगपिनिपात्यः। दर्धर्षीत्य
त्रयङ्लुक्पक्षेनकिंचिन्निपातनं किंतुश्लावेव भवतेर्यङ्लुगन्ताल्लोट् गुणाभावइति ननुभूसुवोस्तिङीत्येवगुणनिषेधेसिद्धे निपातनमनर्थकमितिचेत्सत्यम्
ज्ञापकार्थंतर्हिनिपातनम् एतज्ज्ञापयति अन्यत्रयङ्लुगन्तस्यगुणप्रतिषेधोनभवतीति तेनवोभवीत्यत्रभाषायांगुणनिषेधः सिद्धस्तदेतदाह तेनभाषाया
मितिनिजेर्यङ्लुक्यात्मनेपदंनिपात्यते तदाह निजेरिति ऋगतौलटिश्तिपिश्लौइतिद्वित्वम् अभ्यासस्यहलादिःशेषापवादोरेफस्यलत्वन्निपात्यते अर्तिपिपर्त्यो
श्चेत्यभ्यासस्यप्राप्तस्येत्वस्याभावोनिपात्यते तदाह इयर्तेरिति करोतेर्यङ्लुगन्तस्यशतरिअभ्यासस्यचुत्वाभावोनिपात्यते ऋतश्चेतिरिगागमस्तदाह करोतेरि

प्रसमुपोदः पादपूरणे।८।१।६। एषां द्वे स्तः पादपूरणे। प्रप्रायमग्निः। संसमिद्युवसे। उपोपमे परामृश। किन्नोदुदु हर्षसे॥ छन्दसीरः।८।
२।१५। इवर्णान्तात्परस्य मतोर्मस्य वः स्यात्। हरिवते हर्यश्वाय॥ ति चुत्वाभावइति कुहोश्चुरितिप्राप्तस्य विभर्तेर्यङ्लुगन्तस्यशतरि अभ्यासस्यजश्त्वा

भावोनिपात्यते तदाह विभर्तेरिति जश्त्वाभावइति अभ्यासेचर्चेतिप्राप्तस्य इविध्वतइति ध्वरतेर्यङ्लुगन्तस्यशतरिरूपम् नाभ्यस्ताच्छतुरितिनुम्प्रतिषेधः द्युते
र्यङ्लुगन्तस्यशतरि अभ्यासस्यसंप्रसारणाभावोऽत्वंचनिपात्यतेतदाह द्युतेरिति संप्रसारणाभावइति द्युतिस्वाप्योःसंप्रसारणमितिप्राप्तस्य सस्तुवेतिनिगमे।
दाधर्त्यादिष्वेतन्पठितव्यम् विवष्टीति वशकान्तौ लटितिपिशपःश्लौद्वित्वम् अभ्यासस्येत्वं वश्चेतिषत्वम्ष्टुत्वम्॥ इतिसप्तमोऽध्यायस्समाप्तः ७॥ ❀॥ प्रसमु
पोदःपादपूरणेसमाहारद्वन्द्वः समासान्तविधेरनित्यत्वान्नद्वन्द्वाच्चुदषहान्तादितिनटच्। प्रप्रायमग्निरिति। नात्रद्विर्वचनस्यकिंचिद्द्योत्यंकेवलंपादपूरणमेव।
कार्यम् नचैवंविधस्यभाषायांप्रयोगोस्तीतिसामर्थ्याच्छन्दस्येवेदंविधानमित्याहुः॥ छन्दसीरः॥ हरिवतेरिति। हरयोविद्यन्तेयस्येतिहरिवान्तस्मै। हरि

सि·कौ· गोर्वानिति। र्वोरुपधाया दीर्घ इक इति दीर्घः। अक्ष एव नद इति। अक्षिग्रहणान्मतुप्। अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः। छन्दस्यपि दृश्यतेऽनङ्। नुटोऽसिद्धत्वात्पूर्वेण

वै· लोपे भूतपूर्वगत्या नुड् णत्वं। ननु यदि परादिः नुट् क्रियते तस्य मतुप्ग्रहणेन ग्रहणान्माडुपधायाश्चेति वत्वं स्यात् मतुपमस्य नुनस्यानु नुट्स्यैव विधानात् यदि नु पूर्वान्तो नुट् क्रि

२७७ यते तर्हि णत्वं न स्यात्। पदान्तस्येति निषेधादिति चेत्सत्यम्। नुटोऽसिद्धत्वान्नोक्तदोषः। नन्वेवमवग्रहे दोषः स्यात्। अक्षण्वतीर्णान्तावगृह्येति अक्षेत्यकारा

न्तमवगृह्य नुमुचितमिति चेत्सत्यम्। न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्तनीयं तस्मादाध्या लक्षणं पदं कर्तव्यमिति महाभाष्ये स्थितम्। किं

चर्द्वयिवांसमित्यादौ पदत्वं विनापि अवग्रहः क्रियते पूर्वेभिरग्निनेत्यादौ सत्यपि पदत्वे न क्रियत इति ध्येयम्। नरभममपोरित्यर्थः। नरपतमपो घ इति नरपतमपो

गोर्वीन्। अनो नुट्। ८।२।१६। अन्नन्तान्मतोर्नुट् स्यात्। अक्षण्वन्तः कर्षवन्तः। अस्थन्वन्तं यदनस्था॥ नाद्घस्य। ८।२।१७। नान्तात्परस्य घा

स्य नुट्। सुपथिन्तरः। भूरिदाव्नस्तुड्वाच्यः। भूरिदावत्तरो जनः। ईद्रथिनः॥ रथीतरं रथीनाम्। न सत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि छन्दसि। ८

।२।६१। सदेर्नञ्पूर्वान्निपूर्वाच्च निष्ठायां नत्वाभावो निपात्यते। नसत्तमञ्जसा। निषत्तमस्य चरतः। असन्नं निषण्णमिति प्राप्ते। उन्देर्नञ्पूर्व

स्यानुत्तम् अनुन्नमिति लब्धे। तूर्वी अस्य वा। सूर्त्तमिति सृ इत्यस्य। गूर्त्तमिति गुरी इत्यस्य॥ घसंज्ञाविधानात् सुपथिन्तर इति। सुपथिन्शब्दात् द्वि

वचनविभज्योपपदे इति तरप् न लोपः नरयोः नुट् तस्यानुस्वारः भूरिदाव्न इति। भूरिदाव्नः परस्य घस्य तुट् वाच्य इत्यर्थः। भूरिदावत्तर इति। आतो मनिन्नित्यादिना दाधातो

र्वनिप्। तदन्तात्तरपि न लोपः प्रातिपदिकान्तस्येति न लोपः। तुडागमः। ईद्रथीन इति। रथिन इकारात्तादेशो घे परे रथीतर इति रथशब्दादत इनिठनाविति मत्वर्थीय

इनिः तदन्तात्तरपि नकारलोपे कृते इकारस्य ईकारादेशः यदि तु नकारलोपापवादेन कारस्यानेईकारो विधीयते तदा तस्यासिद्धत्वादेकादेशो न स्यात्। रथीतमा

मिति। इह पदकारा अहः खान्तमवगृह्णन्ति। अन्येषामपीति। अन्येषामपीति संहितायां दीर्घ इति तत्राश्रयः। नसत्तं। सत्तानि छन्दसि विषये निपात्यन्ते नत्वाभाव इति

।सदाभ्यामिति प्राप्तस्य। निषत्तमिति। सदिरप्रतेरिति षत्वम्। अनुत्तममिति। अनुन्नमिति भाषायां एतन्निपातनारम्भसामर्थ्याज्ज्ञापयानुदविदां देवेति विकल्पो नेन्मां

573

CC-0. In Public Domain. Digitization by eGangotri

ति। निपातनादुत्वं रपरत्वं नुट् णत्वं परत्वमित्येव सिद्धं कार्यकालपक्षाश्रयणे न परिभाषाणामसिद्धत्वप्रकरणेऽपि प्रवृत्तेः। गूर्त्तमिति। गूर्णमिति भाषायां ॥ ॥ अम्न। उभयथेति व्याचष्टे। रुर्वा रेफो वेति। ससजुषो रुरिति नित्यरुत्वे प्राप्ते पक्षे रेफादेशार्थमिदम्। अम्नस। षष्ठ्यर्थे अम्नरत्वमितिमिति यथा। अबोरक्षणम्। अम्नरेवेति पदान्तत्वं न तदा भोभगोइति रोर्यत्वं लोपः शाकल्यस्येति लोपः। भुवश्च। महाव्याहृतेर्भुवस्। इत्येतस्य छंदसि विषये रुर्वा रेफो वा। तिस्रो महाव्याहृतयः पृथिव्यन्तरिक्षस्वर्गाणां वाचिकाः। इहतु मध्यमाया ग्रहणं। महाव्याहृतेरिति किं भुवो विश्वेषु भुवनेषु तिङन्तमेतन्न वर्तते छंदसि लुङ्लङ्लिट इति वर्तमाने लङ्। सिप् शपि गुणाभावश्छान्दसः बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः लाक्षणिकत्वादेवास्याग्रहणे सिद्धे महाव्याहृतिग्रहणमसिद्धपरिभाषाया अनित्यत्वज्ञापनार्थं तेन श्चापयतीत्यादौ षुक् सिद्ध्यति भुवद्-

अम्नरूधरवरित्युभयथा छन्दसि ८।२।७०। रुर्वा रेफो वा। अम्न एव। अम्नरेव। ऊध एव। ऊधरेव। अव एव। अवरेव। भुवश्च महाव्याहृतेः ८।२।७१। भुवइति। भुवरिति॥ ओमभ्यादाने। ८।२।८७। ओंशब्दस्य प्लुतः स्यात् आरम्भे। ओ३म् अग्निमीळे पुरोहितम्। अभ्यादाने किम्। ओमित्येकाक्षरम्॥ ये यज्ञकर्म्मणि। ८।२।८८। ये३ यजामहे। यज्ञेति किम्। ये यजामहे॥ प्रणवष्टेः। ८।२।८९। यज्ञकर्म्मणि टेरोमित्यादेशः स्यात्। अपां रेतांसि जिन्वतो३म्। टेः किम्। हलन्तेऽन्त्यस्य माभूत्। याज्यान्तः। ८।२।९०। ये याज्यान्ता मन्त्रास्तेषामन्त्यस्य टेः प्लुतो यज्ञकर्म्मणि। जिह्वामग्ने चकृषे हव्य-

वेति। भुवद् इत्येतदव्ययमन्तरिक्षवाची महाव्याहृतिः। ओमभ्यादाने। आरम्भस्तदाह आरम्भे इति। अत्र प्लुतः प्लुत्याच् परिभाषोपस्थानादच एव प्लुतः मकारस्त्वर्धमात्रः इति समुदायोऽर्धत्रिमात्रः संपद्यते। ये यज्ञ। ये इत्येतस्य यज्ञकर्मणि प्लुतो भवति। प्रणवः। यज्ञकर्मणीति वर्तते यज्ञकर्मणि टेः प्रणवादेशः स्यात् तदाह यज्ञकर्मणीत्यादि। जिन्वतो३मिति जिवि प्रीणनार्थः लट् तिपः टेः प्रणवादेशः। टेः किमिति वाक्यस्य टेरित्यतः टेरित्यनुवर्तमाने पुनष्टेः ग्रहणं किमर्थमिति प्रश्नः। असति हि टिग्रहणे अलोऽन्त्यस्येति वचनाद्व्योतो३ल् न स्यादोकारः स्यात्तस्मात्प्रणवादेशार्थं टिग्रहणमित्याह हलन्ते त्यस्य माभूदिति। अजन्ते विशेषाभावाद्धलन्ते इत्युक्तं। याज्यान्तः। ये याज्या नाम मन्त्रा इति याज्याकाण्डे पठ्यन्ते ये मन्त्रा याज्यानुवाक्याकाण्डमिति समाख्याते प्रकरणे ये मन्त्रा इत्यर्थः तेषामिति मन्त्राणामित्यर्थः तासामिति पाठे तासां याज्यानां इह हि मन्त्रग्रहणं टेरित्यस्य निवर्तकं वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अजंताया एव याज्यायाः प्लुतः स्यात् पदांतरे त्वंतग्रहणमनर्थकं टेरंतत्वाव्यभिचारादित्यभिप्रायेणाह अन्तः किमिति इतरोपि विदिताभिप्राय आह याज्यानामृचामिति याज्यानामृक्च: काश्चिद्वाक्यसमुदायरूपाः तत्र यावंति वाक्यानि तेषां सर्वेषां टेः प्लुतः प्राप्नोति सर्वान्तस्यैवेष्यते तदर्थमंतग्रहणमिति भावः अग्नीत्प्रेषणे परस्य च अग्नीधः प्रेषणमग्नीत्प्रेषणं तस्मिन्तदाह अग्नीधः प्रेषण इति विभाषापृष्टप्रतिवचने विभाषा टेः प्लुतो भवति निगृह्यानि गृह्येतित्यवत्तसमतात्प्रच्यावनं निग्रहः तस्यैव स्वम तस्य स्वं किल त्वं निरुपपत्तिकमास्थित इति शब्देन प्रतिपादनमनुप्रयोगः तत्र यद्वाक्यं तदाह अत्र यद्वाक्यमिति निगृह्यानुयोगे यद्वाक्यमित्यर्थः अद्यामावास्येत्येवं केन।

१।२०१ आद्युदात्तः स्यात् स्वे क्षये शुचिव्रत एरजन्तः जयः करणम् ६।१।२०२ करणवाची जयशब्द आद्युदात्तः स्यात् जयत्यनेन
न जयोऽश्वः वृषादीनां च ६।१।२०३ आदिरुदात्तः आकृतिगणोऽयम् वाजेभिर्वाजिनीवती इन्द्राणीः संज्ञायामुपमानम् ६।
१।२०४ उपमानशब्दः संज्ञायामाद्युदात्तः चञ्चेव चञ्चा कनोऽत्र लुप् एतदेव ज्ञापयति क्वचित्स्वरविधौ प्रत्ययलक्षणं नेति संज्ञायां
किम् अग्निर्माणवकः उपमानं किम् चैत्रः निष्ठा च द्व्यजनात् ६।१।२०५ निष्ठान्तस्य द्व्यचः संज्ञायामादिरुदात्तो न त्वाकारः दत्तः।
द्व्यच् किम् चिन्तितः अनात् किम् त्रातः संज्ञायामित्यनुवृत्तेर्नेह कृतम् हृतं शुष्कधृष्टौ ६।१।२०६ एतावाद्युदात्तौ स्तः असंज्ञार्थमिदम् अ

स्यात् क्षयो निवासे निवासेऽभिधेये क्षयशब्द आद्युदात्तः स्वे क्षये इति क्षि निवासगत्योः स्थ्यं निनिवसंति यस्मिन्निति अधिकरणे पुंसि संज्ञायां॥ ऽन्तः सन्नं शुष्कम्॥
मिति घः निवासे किं क्षयो धेः क्षयः क्षिक्षये एरच् कर्तरि षष्ठी जयः जयोऽश्व इति पुंसीति करणे घः करणे किं जयो ब्राह्मणानां भावे एरच् च वृषादीनां च इत्युपल
क्षणः कः वाजेभिरिति वजेर्घञ् कर्षात्वत इत्यंतोदात्ते प्राप्ते वृषादेराकृतिगणत्वादाद्युदात्तः संज्ञायां चेचेति उपमानशब्दोऽयमुपमेयस्य संज्ञा कनो लुबिति इवे प्रतिकृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्व॰
सि॰ कौ॰
टी॰ त॰
२९०

मनुष्य इति लुप् ननु प्रत्ययलक्षणेन नित्वात् ञ्नित्यादिर्नित्यमित्येव सिद्धम् अत आह एतदेवेति निष्ठान्तं इति द्वितीयः कः दोरद्धोरिति दकारस्य आदेशः चितिन इति चितिस्स
न्तो सुवादिः कृतं हतमिति प्रत्ययस्वरेणान्तोदात्तावेतौ असंज्ञार्थमिति संज्ञायां तु निष्ठा च द्व्यजनादित्येव सिद्धं शुष्कमिति शुषेः क्तः तस्य शुषः क इति कादेशः ॥ ॥ आशि
तः कर्तृवाचीति आङ्पूर्वादश भोजने अस्मात्कर्तरि क्तो निपात्यते अत एवाह कार्तेत्यनेन भूतपूर्वगत्या अणौ कर्ता णौ कर्मीभूत एव विवक्षितः तथा चाशितं
तस्य प्रयोज्यकर्तरि गतिबुद्धिप्रत्यवसानार्थेति कर्मसंज्ञके निष्ठायामाशित इति रूपमिति रिक्त इति रिचिर् विरेचने संज्ञायामित्यादिः निष्ठा च द्व्यजनादित्यस्यावकाशः
दत्तः गुप्तः अस्यावकाशः असंज्ञायां रिक्तो घट इति संज्ञायामुभयप्रसंगे पूर्वविप्रतिषेधः रिक्तो नाम कश्चित् जुष्टार्पिते जुष्टः अर्पित इत्येते शब्दरूपे छंदसि

आशितः कर्ता ६।१।२०७ कर्तृवाची आशितशब्द आद्युदात्तः कृषन्निष्क्राल आशितम् रिक्ते विभाषा ६।१।२०८ रिक्तशब्दे वा आदिरुदात्तः
शिकः संज्ञायां तु निष्ठा च द्व्यजनादिति नित्यमाद्युदात्तत्वम् पूर्वविप्रतिषेधेन जुष्टार्पिते च छन्दसि ६।१।२०९ आद्युदात्ते वा स्तः नित्यं मन्त्रे
६।१।२१० एतत्सूत्रं शक्यम् अकर्तुम् जुष्टो दमूनाः षळर आहुरर्पितमित्यादेः पूर्वेणैव सिद्धेः छन्दसि पाठस्य व्यवस्थिततया विपरीता
पादनायोगात् अर्पिताः षष्टिर्न चलाचलासः इत्यत्रान्तोदात्तदर्शनाच्च युष्मदस्मदोर्ङसि ६।१।२११ आदिरुदात्तः स्यात् नहि षस्तव नो मम मे ङ।
यि च ६।१।२१२ तुभ्यं हिन्वानः मह्यं वातः पवताम् यतोऽनावः ६।१।२१३ यत्प्रत्ययान्तस्य द्व्यचः आदिरुदात्तो नावं विना युग्यमन्यस्य काम्या।

क्षिविषये आद्युदात्ते वा स्तः जुषी प्रीतिसेवनयोः क्तः श्वीदितो निष्ठायामिति इट्प्रतिषेधः जुष्टः अर्तेर्णिच् अर्तीत्यादिना ऐकमेणिङ्·नादचोयत् ॥ः
पुक् अर्पितः नित्यं जुष्टार्पिते शब्दरूपे मन्त्रविषये नित्यमाद्युदात्ते स्तः पूर्वेणैव सिद्धेरिति ननु पक्षे तोदात्तत्वमपि प्राप्नोतीत्याशंक्याह छंदसीत्यादिना केवलं ग
गतार्थत्वमात्रं किंत्वारभ्यमाणे सूत्रे दोषोप्यस्तीत्याह अर्पिताः षष्टिरित्यादिना युष्मदस्मदोः युष्मसिभ्यां मदिगिति मदिक्प्रत्ययान्तावेतौ दात्तौ ममेति युष्मदा
स्मद्भ्यां ङसो श इत्यत्र ममो ङसी इति मपर्यन्तस्य ममादेशः शेषे लोपः अतो गुण इति पररूपत्वं एकादेशः उदात्तेनोदात्त इति विभक्तेरुदात्तत्वे प्राप्ते इदमुच्यते ङयि च।

रम
२९०

586

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

योगविभागो यथासंख्यनिवृत्त्यर्थः तुभ्यं मह्यमिति ङे प्रथमयोरम् तुभ्यमह्यौ ङयि यतः तित्स्वरितमित्यस्यापवादः निष्ठा च द्व्यजनादित्यतो द्व्यजनुवर्तते तदाह द्व्यच
इति अत्र नाव इति निषेधो ज्ञापयति स्वरविधौ व्यंजनमविद्यमानवदिति अन्यथा यस्यादिर्नकारो नासौ स्वरयोग्यः यस्य स्वरयोग्य आकारो नासावादिरिति प्रतिषेधोनर्थ
कः स्यात् अनावः किं नावा तार्यं नाव्यं नौवयोधर्मेति यत् द्व्यच किं चिकीर्ष्यं उभयत्रापि तित्स्वरः ॥ ॥ ईडवंद ईड स्तुतौ वदि अभिवादनस्तुत्योः वृङ् संभक्तौ शंसु स्तु
तौ दुह प्रपूरणे ण्यतो द्व्यनुबंधकत्वाद्यत् ग्रहणेन ग्रहणं न प्राप्नोतीति वचनं ईड्य इति ऋहलोर्ण्यदिति ण्यत् वार्यमिति नन्वत्र एतिस्तुशास्त्रित्यादिना विशे
षविहितेन क्यपा भाव्यमिति चेन्न त्यक्यविधौ वृञ एव ग्रहणं नास्येति मूल एव स्पष्टं विभाषा वेणुशब्दो नित्स्वरेण नित्यमाद्युदात्तः प्राप्तः स्यो णुरित्यनुवर्तमाने अजिवृरी

ईडवन्दवृशंसदुहां ण्यतः ६।१।२१४ एषां ण्यदन्तानामादिरुदात्तः ईड्यो नूतनैरुत आजुह्वान ईड्यो वन्द्यश्च श्रेष्ठं नो धेहि वार्य्यम् उक्थ्य।
मिन्द्राय शंस्यम् विभाषा वेण्विन्धानयोः ६।१।२१५ आदिरुदात्तो वा इन्धानो अग्निम् त्यागरागहासकुहश्वठक्रथानाम् ६।१।२१६
आदिरुदात्तो वा आद्यास्त्रयो घञन्ताः त्रयः पचाद्यजन्ताः मतोः पूर्वमात् संज्ञायां स्त्रियाम् ६।१।२१९ मतोः पूर्वमाकार उदात्तः स्त्रीना
म्नि उदुम्बरावती शरावती अन्तोऽवत्याः ६।१।२२० अवतीशब्दस्यान्त उदात्तः वेत्रवती ङीपः पित्त्वादनुदात्तत्वं प्राप्तम् ईवत्याः
६।१।२२१ ईवत्यन्तस्यापि प्राग्वत् अहीवती मुनीवती अथ फिट्सूत्राणि ॥ ९ ॥ नित्वेति वृन्यादनात् इंधानशब्दो यदि चानशंतस्तदावि
त्वादंतोदात्तः यदा शानजंतस्तदा तस्य सार्वधातुकानुदात्तत्वे कृते उदात्तनिवृत्तिस्वरेण मध्योदात्तः श्नसोरल्लोप इति उदात्तस्य श्नमोऽकारस्य लोपात् सर्वथाप्य
प्राप्तमाद्युदात्तत्वं पक्षे विधीयते त्यागराग त्यजहानो च जोरितिकुत्वं रंज रागे घञि च भावे ति नलोपः हसे हसने एषां पक्षेकर्षात्वतो घञो नउदात्त इति भवति
त्रयः पचाद्यजंता इति कुह विस्मापने श्वठ असम्यग्भाषणे चौरादिकावदंतौ क्रथ हिंसायां अत्र प्रत्ययस्वरेणान्तोदात्तत्वं पक्षे भवति मतोः मतोः पूर्व आकार इति
आर्थव्याख्यानमेतत् सूत्रे तु शब्दस्वरूपापेक्षया नपुंसकनिर्देशः केचित्तु सूत्रे पूर्वशब्दं पुल्लिंगमेव पठंति शरावतीति चातुरर्थिको नद्यां मतुप् मादुपधाया इति वत्वं।

CC-0. In Public Domain. Digitization by eGangotri



मतौवह्वोनजिरादीनां शरादीनांचेति दीर्घत्वंवेत्रवतीति मतुप्वत्वं नचात्रवत्वस्यासिद्धत्वाद्वतीशब्दोयंनभवतीतिशंक्यं तस्या अयान्सिद्धत्वेनासिद्धत्वाभावात्
अवत्याइतिनिर्देशादिहनभवति राजवतीति स्वरविधौव्यंजनस्याविद्यमानत्वान्नायमवतीशब्दः अहीवतीति पूर्ववद्दीर्घः संज्ञायामितिवत्वं ॥ अथफिट्सूत्राणि ॥
॥॥ फिषोंतउदात्तः फिडितिपूर्वाचार्यप्रसिद्धाप्रातिपदिकमुच्यतेतदाह प्रातिपदिकंफिडिति ननुकथमपाणिनीयानिसूत्राण्युपन्यस्यंते पाणिनीयसूत्रैर्यःस्वरआ
यातिसएवप्रमाणं तथाचशन्ताद्यन्तस्यन्तावशतेतिसूत्रेकैयटःनियतकालाश्चस्मृतयोव्यवस्थाहेतवइतिमुनित्रयमतेनाद्यत्वेसाध्वसाधुप्रविभागइतिनैतत् अ

फिषोऽन्तउदात्तः प्रातिपदिकस्फिट्तस्यान्तउदात्तः स्यात् उच्चैः॥ हस्रः॥ पाटलापालङ्कांबासागरार्थानाम् एतदर्थानामन्तउदात्तः पाटलाफले
रहासुरूपापाकलेतिपर्यायाः लघावन्तइतिप्राप्ते अपालङ्कुव्याधिघातआरेवतआरग्वधेतिपर्यायाः अम्बार्थः माताउतवीरन्तानामा
द्युदात्तेप्राप्ते सागरःसमुद्रःगेहार्थानामस्त्रियाम् गेहम् नविषयस्येतिप्राप्ते अस्त्रियांकिम् शालाच्याद्युदात्तोऽयम् इहैवपर्युदा
सान्ज्ञापकात् गृहस्यच॰ अन्तउदात्तः स्यान्नतुस्त्रियाम् गृहम् अस्त्रियांकिम् आन्तेभ्यस्तेगृहाभ्यः स्वाङ्गशिटामदन्तानामित्यन्तरङ्ग
माद्युदात्तत्वम् ततष्टाप् ॥ यपूर्वस्यस्त्रीविषयस्य॥ कारयकारपूर्वोयोऽन्त्योऽचसउदात्तः अन्तर्धा स्त्रीविषयवर्णानाम्नामितिप्रा
प्ते छाया माया जाया यान्तस्यान्त्यात्पूर्वमित्याद्युदात्तत्वेप्राप्ते स्त्रीतिकिम् वासम् यञ्जन्तलादाद्युदात्तम् विषयग्रहणांकिम् इभ्या
क्षत्रिया यतोनावइत्याद्युदात्तइभ्यशब्दः क्षत्रियशब्दस्तुयान्तस्यान्त्यात्पूर्वमितिमध्योदात्तः॥ ९ पाणिनीयान्यपिफिट्सूत्राणिपाणिनीयेराष्ट्री
यंतेभाष्यात्ज्ञापकात् तथाचाद्युदात्तश्चेति सूत्रेभाष्यंप्रातिपदिकस्यचांतइतिप्रकृतेरंतोदात्तत्वंशास्तीति तथातस्मिन्नेवसूत्रेप्रत्ययाद्युदात्तत्वस्यावकाशःप्रत्यानु
दात्तप्रकृतिःसमत्वंसिमत्वमिति नहिफिषोन्तउदात्तःत्वतत्वसमसिमेत्यादिफिट्सूत्राश्रयणंविनाप्रकृतेरंतोदात्तत्वंसर्वानुदात्तत्वंचसंभवतीतिदिक् पाटपाट
लेत्यादयश्चोपधिविशेषस्यवाचकाः लघावन्तइतिप्राप्त इतिइदंपूर्वेण परेणचसंबध्यते पर्यायाइति वृक्षविशेषस्यवाचकाः सागरसमुद्रयोर्लघावन्तइतिप्राप्ते



587

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गेह गेहार्थानामंत उदात्तः स्यात् स्त्रियां न गुद अगेहार्थमिदं अपूर्वं घकारेति नित्यस्त्रीलिंगस्येति शेषः प्राप्ते इति आद्युदात्तत्वे प्राप्ते इत्यर्थः यमंतत्वादिति वहिषष्टि लोपोयस्त्वेतिवचनात् यतो नावइति इयमर्हतीति दंडादिभ्यो यत् यांतस्यान्त्यादिति सत्वाद्वयइतिप्रत्ययस्वरेणापीति बोध्यम्॥ ❀ ॥ खान्तस्या शखम् चशमो· नौ आ दीयस्य स अश्मादिः न अश्मादिः अनश्मादिः तस्य शकारमकारादिभिन्नस्य खशब्दस्यान्तोदात्तः स्यात् शीङः खो निद्रस्वश्चेत्यादिः नन्तु वहु पूणादिषु सकेषु शीङ्ह्रस्वश्चेत्येव पा।

खान्तस्याश्मादेः नखम् उखा मुखम् दुःखम् नखस्य स्वाङ्गशिटामित्याद्युदात्ते प्राप्ते उखानाम भाण्डविशेषः तस्य कृत्रिमत्वात्स्वपुर्वाकृ त्रिमाख्याचेदिति युवर्णस्योदात्तत्वे प्राप्ते सुखदुःखयोर्नब्विषयस्येति प्राप्ते अश्मादेः किम् शिखा मुखम् मुखस्य स्वाङ्गशिटामिति नब्विषयस्ये ति वा आद्युदात्तत्वम् शिखायास्तु शीङः खो निद्रस्वश्चेति उणादिषु निपातितेः अन्तरङ्गत्वाद्वापू प्रागेव स्वाङ्गशिटामिति वा बोध्यम् हिष्ठवत्सरति शत्यन्तानाम् एषामन्त उदात्तः स्यात् अतिशयेन वहुलो वंहिष्ठः नित्वादाद्युदात्ते प्राप्ते वंहिष्ठैरश्वैः सुवृता रथेन यद्वंहिष्ठं नातिविधे सुदानू इत्यादौ व्यत्ययादाद्युदात्तः सम्वत्सरः अव्ययपूर्वपदप्रकृतिस्वरोऽत्र वाध्यते इत्याहुः सप्ततिः अशीतिः लघावन्त इति प्राप्ते चत्वारिंशत् इहापि प्राग्वत्तत्र पूर्वानां प्रभृतयस्याधोः ❀ अव्ययपूर्वपदप्रकृतिस्वरोऽत्र वाध्यत इत्याहुः याप्यादिसूत्रेणागतार्थमेतत् दक्षिणस्य साधौ अन्त उदात्तः स्यात् साधुवाचित्वाभावे तु व्यवस्थायां सर्वनामतया स्वाङ्गशिटामित्याद्युदात्तः अर्थान्तरे तु लघावन्त इति गुरुरुदात्तः दक्षिणाः सरलोदारपरच्छ न्दानुवर्तिष्विति कोशः स्वाङ्गाख्यायामादिर्वा इह दक्षिणस्याद्यन्तौ पर्यायेणोदात्तौ स्तः दक्षिणो वाहुः आख्याग्रहणं किम् प्रत्यङ्मुखमासीनस्य वामपाणिर्दक्षिणो भवति॥९॥

न्ये·मुहेः खो मूर्च्छेत्यतः खोनुवर्तते· ह्रस्वविधानसामर्थ्याद्गुणाभाव इति स्वयमप्युणादिष्वेवमेवोक्तं· तस्मान्नूर्ध्वपर विरुद्धोयं ग्रन्थ इत्यवरस्याद्दारः· अन्तरङ्गत्वादित्यादि हिष्ठ एषामिति हिष्ठवत्सरतिशत्यन्तानामित्यर्थः· वंहिष्ठ इति· वहुलशब्दादतिशायने तमविष्ठनाविति इष्ठन् प्रियस्थिरस्फिरो त्यनेन वहुलस्य वंहिरादेशः· परिवत्सर इति· क्वचित्तु संवत्सर इति पाठस्तत्र वत्सेरस्यं पूर्वाच्चिदिति सरप्रत्ययस्य चित्वादपि सिद्धेः सप्ततिरित्यादि· पंक्तिविंशतित्रिंशदित्यत्र सु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



स्वादित्याणने प्राग्वदिति · लघावन्त इति प्राप्त इत्यर्थः · दक्षिणस्य · अन्त उदात्तः · प्रावीण्ये यथा वीणायां दक्षिणः प्रवीण इत्यर्थः ॥ ॥ छन्दसि दक्षिणस्याद्यन्तौ पर्यायेणोदात्तौ
स्यातां वेदे · कृष्णस्य · अन्त उदात्तश्छन्दसि · ननु मृगाख्यायां एकेदिति · नन्वेतेऽस्मिन्सूत्रे नामधेयस्येत्यनुवर्त्तते वचनविपरिणामेनान्वयः नामधेययोः शुक्लगौर

छन्दसि च । अस्वाङ्गार्थमिदम् दक्षिणाः इह पर्य्यायेणाद्यन्तावुदात्तौ कृष्णस्यामृगाख्या चेत् अन्त उदात्तः वर्णानां तणेत्याद्युदात्ते प्राप्ते ।
अन्तोदात्तो विधीयते कृष्णानां व्रीहीणाम् कृष्णो नो नाववृषभः मृगाख्यायां तु कृष्णो रात्र्येवा नामधेयस्य कृष्णस्येत्येव अयं वा कृष्णोऽश्विना कृष्ण
ऋषिः शुक्लगौरयोरादिः नित्यमुदात्तः स्यादित्येके वेत्यनुवर्त्तत इति तु युक्तम् सरो गौरो यथा पिबेत्यत्रान्तोदात्तदर्शनात् अङ्गुष्ठोदकबकवशा
नां छन्दस्यन्तः अङ्गुष्ठस्य स्वाङ्गानामकुर्वादीनामिति द्वितीयस्योदात्तत्वे प्राप्तेऽन्तोदात्तार्थ आरम्भः वशाग्रहणं नियमार्थं छन्दस्येवेति तेन ।
लोके आद्युदात्तेत्याहुः पृष्ठस्य च छन्दस्यन्त उदात्तः स्याद्वा भाषायाम् पृष्ठम् अर्ज्जुनस्य तृणाख्या चेत् उनर्वन्नन्तानामित्याद्युदात्तस्यापवादः
अर्य्यस्य स्वाम्याख्या चेत् यान्तस्यान्त्यात्पूर्वमिति नियतो नाव इति वाद्युदात्ते प्राप्ते वचनम् आशाया अदिगाख्या चेत् दिगाख्याव्यावृत्त्यर्थमि
दम् अत एव ज्ञापकाद्दिक्पर्य्यायस्याद्युदात्तता इन्द्र आशाभ्यस्परि नक्षत्राणामाविषयाणाम् अन्त उदात्तः स्यात् । अश्लेषा अनुराधादीनां ल
घावन्त इति प्राप्ते ज्येष्ठाश्रविष्ठाधनिष्ठानामिष्ठन्नन्तत्वेनाद्युदात्ते प्राप्ते वचनम् नकुपूर्वस्य कृत्तिकाख्या चेत् अन्त उदात्तो न कृत्ति
कानक्षत्रम् केचित्तु कुपूर्वीय आपूतहिरण्यानामिति व्याख्याय आर्यिका बहुलिका इत्यत्राप्यन्तोदात्तो नेत्याहुः घृतादीनां च अन्त उदा
त्तः घृतं मिमिक्षे आकृतिगणोऽयम् ज्येष्ठकनिष्ठयोर्वयसि अन्त उदात्तः स्यात् ज्येष्ठ आह चमसा कनिष्ठ आह चतुरः वयसि किम् ज्येष्ठः श्रेष्ठः
कनिष्ठोऽल्पिष्ठः इह नित्वादाद्युदात्त एव बिल्वतिष्ययोः स्वरितो वा अनयोरन्तः स्वरितो वा स्यात् पक्षे उदात्तः ॥ २ ॥ ३ ॥ ४ ॥

योरादिरुदात्त इत्यर्थः · तेन सरो गौरो यथा पिबेत्यत्रान्तोदात्तत्वमेव नामधेयत्वाभावात् · अङ्गुष्ठ · एषामन्तोदात्तश्छन्दसि · अङ्गुष्ठस्येति · उपलक्षणमिदं · बकशब्देऽपि

588



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नांकुपूर्वमित्याद्युदात्ते प्राप्ते इति बोध्यम्· वाभावायां पृष्ठमिति· पक्षे स्वाङ्ग· शिटामित्याद्युदात्तत्वम् अर्जुनस्य अन्तउदात्तत्वं तृणाख्यायाम्· तृणाख्यायां किम्· अर्जु
नो वृक्षः· उनर्वन्नन्तानामित्याद्युदात्तः अर्यस्य· अन्तउदात्तः स्वाम्याख्यायाम्· अर्यः स्वामिवैश्ययोरिति निपातितोयमर्यशब्दः आशाया· अदिगाख्यायामाशाशब्दआ
द्युदात्तः स्यात् ज्येष्ठेत्यादि·प्रशस्यस्य श्रः ज्य चेति प्रशस्यशब्दादिष्ठनि ज्यादेशः· स्रवणश्रवः स्रोस्य स्याः साश्रववती धनं विद्यते अस्याः साधनवती अतिशयिताश्रववती धनव
तीश्रविष्ठा धनिष्ठा इष्ठनि विन्मतोर्लुगिति मतुपो लुक्· आद्युदात्ते प्राप्ते इति ञ्नित्यादिर्नित्यमनेन न्तोति केति· लघावन्त इति आद्युदात्तत्वं· घृतमिति न विषयस्येति प्राप्ते ज्येष्ठ इति
उदाहरणे वृद्धशब्दस्य वृद्धस्य चेतीष्ठनि ज्यादेशः युवाल्पयोः कनन्यतरस्यामिति युवन्शब्दस्य कनादेशः प्रत्युदाहरणं प्रशस्यस्य श्रः ज्य चेति प्रशस्यशब्दस्य ज्यादेशः अल्प।

इति फिट्सूत्रेषु प्रथमः पादः॥ ॥ अथादिः प्राक्शकटेः अधिकारोऽयम् शकटिशकट्योरिति यावत् ह्रस्वान्तस्य स्त्री विषयस्य आदिरुदात्तः
स्यात्॥ बलिः तनुः नविषयस्यानिसन्तस्य वनेनवायः इसन्तस्य तु सर्पिः नपनपुंसकम् तृणधान्यानां च ह्यषाम्· ह्यचामित्यर्थः कुशाः काशाः मा
षाः तिलाः वह्लचान्तु गोधूमाः त्रः संख्यायाः पञ्च चतस्रः स्वाङ्ग शिटामदन्तानाम् शिट् सर्वनाम कर्णाभ्यां तु चुकादधि ओष्ठा विवमधु विश्वो
विहायाः प्राणिनां कुपूर्वम् कवर्गात्पूर्व आदिरुदात्तः काकः वृकः शुकेषु मे प्राणिनां किं क्षिरः सर्पि मधूदकम् खय्युवर्णं कृत्रिमाख्या चेत् खयि परे
॥४२॥ उवर्णमुदात्तं स्यात् कन्दुकः॥
स्य कन् नित्यादिर्निति तथा च निन्स्वरापवादोयं योगः पक्षे उदात्त इति उदात्त इत्यनुवृत्तेः॥ ॥ इति प्रथमः पादः १॥ ॥ नविषयस्य·
इसन्तवर्जितस्य नित्यनपुंसकस्यादिरुदात्तः स्यात् सर्पिरिति· अर्चिसुचीत्यादिना इविः तृणानां तृणवाचिनां धान्यवाचिनां च ह्यचामादिरुदात्तः स्यात् अचिति अचः प्राचोसं
ज्ञा· तहाहु· ह्यचामित्यर्थ इति· गोधूमा इति· लघावन्त इति मध्योदात्तता· त्रः सं· नकाररेफान्तायाः संख्याया आदिरुदात्तः स्यात्· चतुष्कपाल इति· चत्वार इत्यात्राम्स्वरेण भा
व्यम् चतुर इत्यत्र चतुरः शसीति· चतुर्भिरित्यत्र झल्युपोत्तममिति चतुर्णामित्यत्र षट्त्रिचतुर्भ्य इत्यनेनेति समास उदाहृतः इगन्तकालकपालभगालेति पूर्वपदप्रकृति।
स्वरेणाद्युदात्तोयम् स्वाङ्ग शिटां स्वाङ्गवाचिनामदन्तानां सर्वनाम्नामादिरुदात्तः स्यात्· उदकमिति· छन्दसि· अङ्कुशोदकवकवशानामित्यन्तोदात्तः भाषायां तु कर्दनादित्वा

फिट्सूत्रं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्व·
सि·कौ उनर्व· उनक्रवन्· एतदन्तानामादिरुदात्तः स्यात्· ह्रस्वान्तस्य· अन्तकिम् नृशंसः अहस्व· अदेवनस्यासस्यादिरुदात्तः अर्द्धस्य असमद्योतने· ईश्वरस्यादि
टी·म· रुदात्तः ग्रामादीनांच आदिरुदात्तः लुबन्तस्य उपमेयवाचिनो लुबन्तस्यादिरुदात्तं वञ्चेवेति· इवेप्रतिकृतावितिविहितस्य लुम्मनुष्य इतिकनो लुप् लुबन्तस्य किम् अग्निर्माण
२९३ वकः नवृक्षपूर्वेण ग्रामस्याद्युदात्तत्वं निषिध्यते· अनवृक्षपर्वतविशेषग्रहणात् वृक्ष इवायं वृक्षः पर्वतः अन्नपूर्वेणाद्युदात्तत्वं भवत्येव राजविशेषस्य· लुबन्तस्योपमेय।

उनर्वन्नन्तानां उनवरुणां वोरिपांदसम् कृत्स्वसारत्वा करणावेवनूपीवानंमेषम् वर्ष्मानान्तराणितिनितानां नाम् आदिरुदात्तः एतः हरिणः शितिः पृश्निः हरित् ह्रस्वान्तस्य ह्रस्वमन्तं तच्छीत्ये कहर्ज्येह्रस्वान्तस्यादिभूतं ह्रस्वमुदात्तं स्यात् मुनिः असस्यादेवनस्य आदिरुदात्तः नस्पनास्तःदेव नेतु असेम्मादीव्यः अर्द्धस्यासमद्योतने अर्द्धग्रामस्यसमांशकेतु अर्द्धपिप्पल्याः पीतद्र्वादीनाम् आदिरुदात्तः पीतद्रुः सरलः ग्रामादीनाञ्च। ग्रामः सोमः यामः लुबन्तस्योपमेयनामधेयस्य चञ्चेव चञ्चा स्फिगन्तस्येति पाठान्तरम् स्फिगिति लुपः प्राचां संज्ञा नवृक्षपर्वतविशेषव्याघ्र सिंहमहिषाणाम् एषामुपमेयनाम्नामादिरुदात्तो न ता लड्वतात्वः मेरुरिवमेरुः व्याघ्रः सिंहः महिषः राजविशेषस्य यमन्वाचेत् यमन्वाद्दः आङ्ग उदाहरणम् अङ्गाः प्रत्युदाहरणम् लघावन्ते द्वयोश्च बह्वषो गुरुः अन्ते लघौ द्वयोश्च लघ्वोः सतोर्बह्वचकस्य गुरुरुदात्तः कल्याणः कोलाहलः स्त्रीविषयवर्णाक्षुपूर्वाणाम् एषां त्रयाणामाद्युदात्तः स्त्रीविषयः मल्लिका वर्णः श्येनी हरिणी अक्षुशब्दात्पूर्वो ऽस्त्येषां तेऽक्षसुपूर्वाः तरक्षुः शकुनीनाञ्च लघुपूर्वम् पूर्वं लघु उदात्तं स्यात् कुक्कुटः तित्तिरिः॥९

नामधेयस्य राजविशेषस्याद्युदात्तः यमन्वाचेन्नामधेयं भवति·पूर्वेणैव सिद्धे नियमार्थमिदं राजविशेषस्य चेद्वृद्धस्यैवेत्याङ्गः पिङ्वृत्तौ तु वृद्धस्य चेद्राजविशेषस्यैवेति नियमो दर्शितः आङ्ग इति आङ्ग इवायमाङ्गः लघावन्ते द्वह आदि रितिनसंबध्यते तेन नादेरपि गुरो रुदात्तः अतएव तृणाकपिशब्दस्य गुरुरुदात्त इति वृषाकप्यग्नीति सूत्रे वृत्त्यादिग्रन्थेषु विभावितम् न च गुरुत्वांमध्ये प आदिरि त्यर्थोऽस्त्विति वाच्यम् अन्यतोऽङीषिति सूत्रे साह्नकल्माषशब्दो लघावन्तद्व्यादिनाम् घ्योदात्ता विति हरदत्तग्रन्थविरोधादित्याहुः कल्याण इति· पर्यायेणादिमध्यावुदात्तो·मा

राम २९३

589

पूर्वमिति अन्त्यात्पूर्वमित्यर्थः अत्राप्यादिरिति न संबध्यते पूर्वग्रहणात् कुक्कुटेत्यादि मध्योदात्तावेतौ ॥ ॥ नर्तु ऋतुवाचिनां प्राणिवाचिनां च यथालक्षणं प्राप्तमुदात्तत्वं न
धान्यानां धान्यवाचिनां च द्व्यक्षशब्दान्तानां षशब्दान्तानां चादिरुदात्तः श्यामाका माषा इति अत्रोर्धानरित्यनेन तृणधान्यानामित्यनेन चाद्युदात्तत्वसिद्धत्वान्नैषा
द्काराजमाषा इत्युदाहर्तव्यम् फिट्वृत्तौ तु सूत्रे चशब्दो न पठितः द्व्यचो गुरुरुदात्त इति व्याख्यातं नत्वादिरुदात्त इति नैषादकाः कालासा इत्युदाहृतं च यत्तु धान्यानामिति किं श्यामा
का इत्युदाहृतं तन्न श्यामाके धान्यत्वाभावश्चिन्त्यः जनपद जनपदवाचिनां मजन्तानामादिरुदात्तः स्यात् केकय इति अत्र पदत्वाद्यानस्यान्त्यात्पूर्वमिति स्वरेण भाव्यमत अङ्गाव

नर्तुप्राण्याख्यायाम् यथालक्षणं प्राप्तमुदात्तं न वसन्तः कृकलासः धान्यानां च वृद्धक्षान्तानाम् आदिरुदात्तः कान्तानाम् श्यामाकाः षान्ता-
नाम् माषाः जनपदशब्दानामषान्तानाम् केकयः हयादीनामसंयुक्तलान्तानामन्तः पूर्वं वा हयिति हलः संज्ञा पललम् शललम् हयादीनां किं-
म् एकलः असंयुक्तेति किम् मल्लः इगन्तानां च द्व्यषाम् आदिरुदात्तः कृषिः ॥ ॥ इति द्वितीयः पादः ॥ ॥ अथ द्वितीयं प्राग्गीषात् ईषान्त-
स्य हयादेरित्यतः प्राक् द्वितीयाधिकारः त्र्यचां प्राङ्मकरात् मकरवरूढेत्यतः प्राक् त्र्यचामित्यधिकारः स्वाङ्गानामकुर्वादीनाम् कवर्गरेफ-
वकारादीनि वर्जयित्वा त्र्यचां स्वाङ्गानां द्वितीयमुदात्तं ललाटम् कुर्वादीनां तु कपोलः रसना वदनम् मादीनां च मलयः मकरः शादीनां
शाकानाम् शीतन्या शतपुष्पा पान्तानां गुर्वादीनाम् पादपः आतपः लघ्वादीनां तु अनूपम् द्व्यचां तु नीपम् ॥ १ ऊ इत्युदाहर्तव्यमिति वद-

न्ति हयादीनां हलादीनामसंयोगपूर्वो यो लशब्दस्तदन्तानामादिरुदात्तः अन्त्यात्पूर्वं वा केचित्तु अत्र जनपदानामित्यनुवर्तयन्ति पंचालाः कोशला इत्युदाह-
त्य फलालमिति प्रत्युदाहरन्ति च द्व्यषां अत्रापि जनपदानामित्यनुवर्त्य कुरवश्चेदय इत्युदाहृतं कृषिरिति प्रत्युदाहृतं अस्मिन्मते कृषिमित् कृषसेत्यत्र कृषिशब्द-
स्यान्तोदात्तत्वात् ॥ इति द्वितीयः पादः ॥ कपोल इति लघावन्त इति मध्योदात्तत्वम् रसना वदनमिति स्वाङ्गशिटामित्याद्युदात्तत्वम् मादी मलयः मकर इति अना-
योर्मकरवरूढेति यान्तस्यान्त्यात्पूर्वमिति विशिष्य स्वरविधानात् महेन्द्र इत्युदाहर्तव्यम् शादीनां शशकारादीनां शाकवाचिनां त्र्यचां द्वितीयमुदात्तं स्यात् केचित्तु सादीनामि

स्व·
सि·कौ·
टी·त·
२६४

पाद्युदाहरन्ति· पांतानाम्· पशब्दान्तानां गुर्वादीनां च्चांद्वितीयमुदात्तं स्यात् अनूपे अनोरप्रधानकनीयसी त्यनेनोदात्तत्वम्· नीयेनेरनिधानइत्यनेनेत्याहुः॥ ः॥ युत युत अनि· अणिएतदन्तानां च्चांद्वितीयमुदात्तं स्यात्· इत्यादीति· आदिशब्देन पारावतवितस्तादक्षुत्आजिह्वासाकलाउमाकाष्ठापेष्ठाःकाशीनानामितिवक्तव्येनुडभावआ र्षः छन्दसिः च्छन्दसि मकरादीनामन्येषांचादिर्द्वितीयं वोदात्तं· काश्यपः कर्दमः कुलत्थ उदकगाथाभि· सुगन्धि· आदिविति· सुगन्धितेजनशब्दस्य नपः फलानानाम् नपन पुंसकम्· नपः किम् दासीफलोरसः यान्तस्य· यशब्दान्तस्यान्यात्पूर्वमुदात्तं स्यात् यान्तस्य· केचित्तु आनस्य च नालघूनीति पठित्वा आकारान्तस्य नाशब्दस्य च लघुनी अन्या

युतान्यण्यन्तानाम् युत अयुतम् अनि धमनिः अणि विपणिः मकरवरूढपारेवत वितस्तेक्ष्वार्जिह्वाशाकलोमाकाष्ठापेष्ठाकाशीनामादि र्वाएषामादिर्द्वितीयो वोदात्तः मकरः वरूढ इत्यादि छन्दसि च अमकपाद्यर्थमारम्भः लब्ध्यानुसारादादिर्द्वितीयं चोदात्तं ज्ञेयम् कर्दमादीनाञ्च आ दिर्द्वितीयमो दात्तम् सुगन्धितेजनस्यतेवा आदिर्द्वितीयन्ते शब्दस्येति त्रयः पर्यायेणोदात्ताः सुगन्धितेजनाः नपः फलानानाम् आदिर्द्वि तीयस्त्वोदात्तम् राजादनं फलम् यान्तस्यान्त्यात्पूर्वम् कुलायः यान्तस्य च नालघुनी नाशब्दो लघु च उदात्ते स्तः मनाथा सभा शिंशुमारोदुम्बरबा लीवर्दोष्ट्रा रपुरूरवसाञ्च अन्त्यात्पूर्वमुदात्तं द्वितीयस्वा साङ्काश्यकाम्पिल्यनासिक्यदार्वाघाटानाम् द्वितीयमुदात्तंवा ईषान्तस्य हलादेरादिर्वोद लीषालाङ्गलीषाउशीरशरक्यारकपालपललनैषालस्यामाकशरीरशरावहृदयहिरण्यारण्यापत्यदेवराणाम् एषामादिरुदात्तः स्यात् महिष्या षाढयोर्जायेष्टकाख्या चेत् आदिरुदात्तः महिषीजाया अषाढाउपदधाति॥ ः॥ ९. नूर्दं उदात्ते स्त इति व्याख्यायनानादिवासुधाइत्युदाजह्रुः शिंशुमारः शिंशुमार इतिपाठान्तरम्· उष्ट्रार· उष्ट्रारइति पाठान्तरं· सांकाश्य· सांकाश्यकाम्पिल्यमा स्वेवुञ्छणेतिण्यान्तौ· दार्वाघाटशब्दो· दारा वाहनोणंतस्य च वः संज्ञायामित्यण्प्र यान्तः ईषान्तस्य ईषांतस्य हलादेरादिरुदात्तो वा स्यात्· उशीर· अत्र श्यामाकग्रहणं चिंत्यं· धान्यानां च वृद्धक्षांतानामित्यनेनैव सिद्धत्वात्· इदमेव ज्ञापयितुं मूले धान्यानामित्यत्र श्यामाक इत्युदाहृतम् देवरग्रहणमपि चिन्त्यम्· लघावन्त इत्यनेनैव सिद्धत्वात्· हृदयग्रहणं स्वांगानामकुर्वादीनामिति द्वितीयस्योदात्तत्वं वा पितुमः न्येषां लघावन्त इति प्राप्ते वचनं· महि

घ· एतयोरादिरुदात्तः स्यात्· यथासंख्यं जायाख्यायामिष्टकाख्यायां च॥ ६॥
पत्र २६४

590

CC-0. In Public Domain. Digitization by eGangotri

इतितृतीयः त्वत्व एतानिसर्वोनुदात्तानि· सिमस्य· सिमशब्दस्याथर्वणोवेदेउदात्तः उपसर्गाश्चाभि· अभिशब्दंवर्जयित्वाउपसर्गाआद्युदात्ताः सुः पथेति· यथाघाद्यःपादान्ते

इतितृतीयःपादः शकटिशकट्योरक्षरमक्षरंपर्य्यायेण उदात्तं शाकटिः ३ शकटी ३ गोष्ठजस्यब्राह्मणनामधेयस्य अक्षरमक्षरम्पर्य्यायेणोदात्तंगो

ष्ठजः ब्राह्मणः अन्यत्र गोष्ठजः पशुः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः पारावतस्योपोत्तमवर्ज्जम् शेषंक्रमेणोदात्तंपारावतः धूम्रजानुमुञ्ज

केशकालवालस्थालीपाकानामधूजलस्थानां एषाञ्चतुर्ण्णाम्पूर्वभूतीश्चतुरोवर्जयित्वाशिष्टानिक्रमेणोदात्तानि धूम्रजानुः मुञ्जकेशः काल

वालः स्थालीपाकः कपिकेशहरिकेशयोश्छन्दसि कपिकेशः हरिकेशः ४ न्यङ्स्वरौस्वरितौ स्पष्टम् न्यङ्ङुत्तानाव्यचक्षयन्त्वः न्यबुद्ध्यल्कशपो

णादिः स्वरितः स्यात् नित्यशिक्यकाश्मर्य्यधान्यकन्याराजन्यमनुष्याणामन्तः स्वरितः स्यात् तिल्लानाम्भवनं क्षेत्रं तिल्यम् यतोनावइतिप्रा

प्ते बिल्वभस्यवीर्य्याणिछन्दसि अन्तस्वरितानि त्वत्वसमसिमेत्यनुच्चानि त्वरोस्त्वत् उतत्वः पश्यन् नभन्ताम् अन्यके समेसिम सैम सिमस्याथर्वे

णेऽन्तउदात्तः आथर्वणइतिप्रायिकम् तत्रदृष्टस्येत्येवम्परंवा तेनवासस्तनुतेसिमस्मैइत्यृग्वेदे ऽपिभवत्येव निपाता आद्युदात्ताः स्वाहा उप

सर्गाश्चाभिवर्ज्जं एवादीनामन्तः एवमादीनामितिपाठान्तरम् एव एवम् नूनम् सह तेपुत्रस्सूरिभिः सहपष्ठस्य तृतीयेसहस्यसइतिप्रकरणे

सहशब्दआद्युदात्तइतितुप्राञ्चः जित्त्वित्यम् वाचादीनामुभावुदात्तौ उभौग्रहणामनुदात्तंपदमेकवर्ज्जमित्यस्यबाधाय चादयोऽनुदात्ताः स्पष्टम्

यथेतिपादान्ते तन्नेमिमृभवोयथा पादान्तेकिम् यथानो अदितिः करत् प्रकारादिद्विरुक्तौपरस्यान्तउदात्तः पटुपटुः शेषंसर्वमनुदात्तम् शेषंनि

त्यादिद्विरुक्तस्यपरमित्यर्थः प्रप्रायम् दिवेदिवे इतिशान्तवाचार्य्यप्रणीतेषुफिट्सूत्रेषुतुरीयःपादः ॥ ॥ आद्युदात्तश्च ३।१।३ प्रत्ययश्चा

द्युदात्तः स्यात् अग्निः कर्त्तव्यम् अनुदात्तौसुप्पितौ ३।१।४ पूर्वस्यापवादः यज्ञस्य नयोरुल्कतिशप्तिपोरनुदात्तत्वेस्वरितप्रचयौ ॥ ६ ॥

अनुदात्तः स्यात्· प्रकारादि· प्रकारेगुणवचनस्येत्यादिद्वित्वेपदस्यान्तोदात्तः स्यात्· पटुपटुरिति· ननुकर्मधारयवदुत्तरेष्वितिकर्मधारयवद्भावादेवसमासस्येत्यन्तोदात्तत्वेसिद्धे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि· कौ· मितिवाच्यं·तस्यपाणिनीयात्पूर्वप्रवृत्तत्वेनादोषात् शेषं·प्रकारादिद्वित्वादन्यस्मिन्द्वित्वेपरंसर्वमनुदात्तंस्यात् ॐ इतिचतुर्थः ॐ अथप्रत्ययस्वराः अग्निरिति अङ्गेर्नि।
टी·त· लोपश्चेति निप्रत्ययः कर्तव्यमिति तव्यप्रत्ययः तव्यतस्तुतित्वात्स्वरितोवक्ष्यते नचतव्यस्याद्युदात्तत्वेउदात्तादनुदात्तस्येतिस्वरितोभवत्येवेतिचेत्सत्यम् किंत्वय
२९५ मसिद्धःतित्स्वरस्तुसिद्धइतिप्रवृत्त्यप्रवृत्तिभ्यांमहान्विशेषः तव्यतस्तित्वमेवशेषनिघातपरिभाषायांयथोद्दे शप्रवृत्तौज्ञापकमितिध्येयम् युच्छतीतियुच्छप्रमादे·धा
तोरियंनोदात्तःततःपरःशबुदात्तादनुदात्तस्येतिस्वरि तःस्वरितात्संहितायामनुदात्तानामिति पःप्रचयः॥ॐ॥ चितःसप्रकृतेरिति नन्विदंकथंलभ्यमितिचेच्छृ
णु·चितइत्यवयवादेशषष्ठीनकार्यिणःचितोवयवत्वस्यसंबंधीयःसमुदायःसकार्यो·अथवाचिदस्यास्तिसचितःअर्शआदेराकृतिगणत्वादच्प्रत्ययःषष्ठ्यर्थे

चितः६।१।१६३ अन्तउदात्तःस्यात् चितःसप्रकृतेर्बह्वकजर्थंचितिप्रत्ययेसतिप्रकृतिप्रत्ययसमुदायस्यान्तउदात्तोवाच्यइत्यर्थःन्तमन्तामन्य
केसमेपकेसरस्वति तकत्तुतेतद्धितस्य६।१।१६४ चितस्तद्धितस्यान्तउदात्तःपूर्वेणसिद्धेजित्स्वरबाधनार्थमिदम् कौञ्जायनाः कितः६।१।१६५
कितस्तद्धितस्यान्तउदात्तःयदाग्नेयःतिसृभ्योजसः६।१।१६६ अन्तउदात्तःतिस्रोधावःसवितुःसावेकाचस्तृतीयादिर्विभक्तिः६।१।१६८ सा।
वितिसप्तमीबहुवचनम् तत्रयएकाच्ततःपरातृतीयादिर्विभक्तिरुदात्ता वाचाविरूपःसौकिमराज्ञेन्यादौएकाचोपिराजशब्दान्यस्यमाभूत्
राज्ञोनुते। विधन्वेराजनित्वे।तृतीयादिःकिमनददर्शवाचम्॥ ९ प्रथमानेनचिहतःसमुदायस्येत्यर्थः अत्रचलिंगमकाचश्चिन्कारणं मन्यथातस्यैकाचूत्वा
दन्तर्थकंतन्स्यात्·अन्यकेइति· अव्ययसर्वनाम्नामित्यकच्ततःपरादिरुदात्ताएवंयकेनकदियन्नापिपतन्चर्वादकच·बकुचउदाहरणंतुवकुपदवदस्यादिर्ज्ञेयं·जि राम
त्स्वरबाधनार्थमितिच्फञ्ञकारोघातच्फञोरस्त्रियामितिविशेषणार्थस्तार्थःञकारोवृद्धौनत्वासत्यस्मिन्स्वरत्वात्जित्स्वरःस्यात्इतिभावः कौञ्जायनाइति·कुञ्जस्यापत्या २९५
निबहूनि·गोत्रेकुञ्जादिभ्यश्च्फञ्·घातच्फञोरस्त्रियामितिञःञादयस्तद्राजाःतद्राजस्यबहुषुलुक्·आग्नेयइति·अग्नेर्ढक्·तिसृ·त्र्यर्थगतंबहुत्वंशब्दस्यारोप्यबहुव
चननिर्देशः·तिसृभ्यःपरस्यजसोन्तउदात्तःस्यात्तिसृइति·अन्तोदात्तत्रिशब्दस्यस्थानेतिसृआदेशःस्थानिवद्भावादन्तोदात्तःअनुदात्तौसुप्पितावितिजसनुदात्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अचिरकृतत्वात्तिरफादेशे कृते उदात्तस्वरितयोर्यण इति जसः स्वरितत्वं प्राप्तमनेन बाध्यते· सप्तमीबहुवचनमिति· न प्रथमैकवचनं व्याख्यानात् राज्ञेति· सावित्येतस्मिन्नसति एकाचः परा तृतीयादिर्विभक्तिरुदात्ता भवतीत्यर्थो भवति· भवति चायमल्लोपे कृते एकाच् राज इति· राजशब्दः आद्युदात्तः कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः इति कनिन्नन्तत्वात्॥ अन्तोदात्ता· एकाच इति वर्त्तते तृतीयादिर्विभक्तिरिति च नित्यग्रहणमपकर्ष्यते· तेन नित्याधिकारगतिर्भवतीत्याह· नित्याधिकारेत्यादि· अनित्यसमासे किम् अग्निचिता· अग्नौ चेति निष्ठिता तत्र यः उपपदसमासः गतिकारकोपपदात्कृदिति कृदुत्तरपदप्रकृतिस्वरेण चित्स्वर उदात्तः· अधिकारग्रहणं किम्· विग्रहाभावमात्रे।

अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे ६।१।१६९ नित्याधिकारविहितसमासादन्यत्र यदुत्तरपदमन्तोदात्तमेकाच् ततः परा तृतीयादिर्विभक्तिरन्तोदात्ता वा स्यात् परमवाचा· अञ्चेश्छन्दस्यसर्वनामस्थानम् ६।१।१७० अञ्चेः परा विभक्तिरुदात्ता इन्द्रो दधीचः। चाविति पूर्वपदान्तोदात्तत्वमत्र तु तृतीयादिरित्यनुवर्तमाने ऽसर्वनामस्थानग्रहणं शसः परिग्रहार्थम् प्रतीचो बाहून् ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः ६।१।१७१ एभ्यो ऽसर्वनामस्थानविभक्तिरुदात्ता· प्रष्ठौहः प्रष्ठौहा ऊठ्युपधाग्रहणं कर्तव्यम् इह माभूत् अक्षद्युवा अक्षद्युवे इदम् एभिर्नृभिर्नृतम अन्वादेशे न अन्तोदात्तादित्यनुवृत्तेः न चात्रान्तोदात्ततास्तीति वाच्यम् इदमोन्वादेशेऽशनुदात्तस्तृतीयादाविति सूत्रेणानुदात्तस्याशो विधानात् मतेव भ्रूमाभ्याम् अनु पद्वो मास हृन्निशः इति पदादयः पद्भ्यां भूमिः दद्भिर्न जिह्वा जायते मासि मासि मनश्चिन्मे हृद आ अप अपां फेनेन पुम् अभ्राते वपुंसः रैः राया वयम् रायो धर्त्रौ दिवः दिवे दिवे॥ ९ रायो नित्यसमासस्तत्र पर्युदासो माभूत्· अवाचा ब्राह्मणेन· बहुव्रीहौ नञ्सुभ्यामित्यन्तोदात्तत्वम्·
अत्र विभक्तेर्वैकल्पिक उदात्तो भवत्येव· अन्तोदात्तात्किम्· अवाचा नञ्समासोऽयम् न तु बहुव्रीहिः तेन नञ्सुभ्यामित्यन्तोदात्तत्वं न भवति· किं तर्ह्यय पूर्वपदप्रकृतिस्वर एव भवतीत्यर्थः· उत्तरपदग्रहणं तु एकाच्त्वेनोत्तरपदं विशेषयितुम्· अन्यथा समासविशेषणं स्यात् तथा च सुनः ऊर्क्षु· ग्रोजन्त्यादावेवायविधिः स्यात्· एकाच् किम्· राजदृषदा· षष्ठीसमासान्तदा पृदधी चदृति· दध्यं चतीति· ऋत्विगादिना क्विन्· अनिदितामिति नलोपः· चाविति दीर्घत्वम्· अत्र चाविति पूर्वपदान्तोदात्तत्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व
सि॰कौ॰
टी॰न॰
२९६

शस्यपिग्रहार्थमिति॰ शसादिग्रहणं तु न क्तांतं नपुंसके शसि माभूत् सुप्तिपथास्यादिति॰ ऊडिदं॰ अत्रैकाच इति वर्तते॰ अन्तोदात्तादिति च॰ एकाजंतोदात्तेभ्यः परा सर्वनामस्थान विभक्तिरुदात्ता स्यात्॰ प्रष्ठौह इति॰ छन्दसि सहः वहश्चेति ण्विः वाहऊठ्॰ उपपदसमासेन प्रष्ठवाहशब्दो गतिकारकोपपदात्कृदित्यन्तोदात्तः अत्र प्रष्ठौहशब्दस्यानेकाच्त्वेपि ऊठ्शब्दस्यैकाच्त्वमेवऊठ्युपधाग्रहणमिति उपधाभूतऊठ्गृह्यतेन न त्वन्यदित्यर्थः पंचमीनिर्देशान्यस्यैव ग्रहणे प्राप्ते वचनं॰ तेनाक्षद्यूरित्यादौ विभक्तेराद्युदात्तत्वं न॰ अत्र हि अक्षैर्दीव्यतीति क्विप्॰ अन्तरंगत्वादूठ् यण् उपपदसमासत्वात् कृत्स्वरेणान्तोदात्तोयम्॰ अन्वादेशेनेति॰ अत एव साविकाच इत्यपि स्वरेण॰ यदि स्यात्तर्हीहान्तोदात्ताधिकारो व्यर्थः स्यात्॰ एनेव भूइति॰ भिन्नार्थकमन्वादेशप्रदर्शनार्थमाभ्यामित्यनेनोक्ताभ्यामिति॰ अत्र पूर्वार्द्धे चैव शब्देनोक्तयोरिहेदमापरामर्शेप्यन्वादेशोस्त्येव अन्वादेशश्च कथितानुकथि तमात्रेनन्विदमा कथितस्येदमेवानुकथनमिति भाष्योक्तेः भद्र्पलादय इति॰ ननु ततः परे एकाच इत्यनुवृत्तेः॥ ॥ अष्टनो दीर्घात् अष्टनः परा सर्वनामस्थान विभक्तिरुदात्ता॰

अष्टनो दीर्घात् ६।१।१७२ शसादिर्विभक्तिरुदात्ता अष्टाभिरष्टाभिः शतुरनुमो नद्यजादी ६।१।१७३ अनुम् यः शतृप्रत्ययस्तदन्तादन्तोदात्ता न्यजादी चाजादिश्च शसादिर्विभक्तिरुदात्ता स्यात् अच्छा रवं प्रथमा जानती कृणवते अन्तोदात्तात्किम् दधती अभ्यस्तानामादिरित्याद्युदात्तः।
अनुमः किम् तुदन्ती एकादेशो ऽत्र उदात्तः अदुपदेशात्ल सार्वधातुक इति निघातः॥ ९९ल्युपोत्तममिन्यस्यापवादः अष्टन्शब्दो घृतादित्वा दन्तोदात्तः तेन उत्तरार्थमनुवर्तमानस्यान्तोदात्तादित्यस्येहापि नान्वयः दीर्घात्किम्॰ अष्टभिः इह सल्युपोत्तममिति स्वरः ननु चात्राप्यष्टन आ विभक्ताविति नेन भवितव्यम्॰ न। हि धौ विकल्पस्याभावादिति चेत्सत्यम्॰ इदमेव दीर्घग्रहणमष्टन आत्वविकल्पं ज्ञापयति॰ नित्यत्वात्वेव्यावर्त्याभावाद्दीर्घग्रहणमनर्थकं स्यात्॰ कृतात्वस्य षट्संज्ञां च ज्ञापयति अन्यथा ह्यात्वपक्षे सावकाशोष्टनः स्वरः परत्वात्षट्त्वपक्षे षट्स्वरेण बाध्येत इति किं दीर्घग्रहणेन॰ जानतीति॰ ज्ञाजनोर्जेति जादेशः श्नाभ्यस्तयोरात इत्याकारलोपः अत्र प्रा त्ययस्वरेण शत्रन्तमन्तोदात्तं॰ कृणवत इति॰ धिन्विकृण्व्योरच्च॰ तुदन्तीति॰ तुदादित्वाच्छः आच्छीनद्योर्नित्यमिति नुम् प्रत्युदाहरणोह्यङ्गविकल्पनां परिहरति॰ एकादेशोत्रोदात्त इति तुदन्ती त्यत्र शेकृतेन तस्मात्परस्य शतुरदुपदेशात्परत्वात् स्वनुदात्तेति निघातेनैकादेश उदात्तेनोदात्त इत्युदात्तत्वम् असिन्कर्तव्ये तस्यासिद्धत्वमनास्ति॰ अनुम इति प्रतिषेधज्ञापका

राम
२९६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदात्तयणो उदात्तस्वरितयोर्यणस्स्वरितोनुदात्तस्येतिप्राप्तेवचनं चोदयित्रीनेत्रीसवित्रेघ्रतितजनाएते चितः कृत्यन्तोदात्ताः हल्पूर्वादिति किम् बहुतितवाप्रात्तएणस्त्रीस्त्रिं।
गोपाद्यन्तंनाभावनिवृत्त्यर्थम् ततोनेर्ड उंसन्वच्चेति उःचालनीतितउःपुमान् बहोर्नन्बदुत्तरपदभूम्नीतिबहुव्रीहिरन्तोदात्तः तत्रोदात्तस्वरितयोरिति विभक्तेः स्वरितत्वं अस्मिन्सूत्रेन
कारग्रहणंकर्तव्यं उदात्तस्थानेयोनकारस्ततोपि परस्यानद्या उदात्तत्वंवाच्यमित्यर्थः तेनवाचांपतिः वाकपतीति सिद्धम् अत्रहियत्न विशेषर्यदृ तिपूर्वपदप्रकृतिस्वरस्यनभूः
वाक् चिदिधिष्विति प्रतिषेधात्समासान्तोदात्तत्वेविभाषासपूर्वस्येति नकारे नान्तत्वाड्डीप् अनेनोदात्तः नोङ् धात्वोरित्यत्र यद्यपिपूर्वसूत्रेनयजादीमनुवर्त्ततेतथापिङ
ङ् धात्वोर्यणः परानदीनसंभवतीतिनानुवर्त्तिनाग्रहणंवंध्येति ऊङ् प्रत्ययस्वरेणोदात्तः तेनसहयण एकादेशः सोप्युदात्तःतस्मात्परस्योदात्तत्वेप्रतिषिद्धे उदात्तस्वरितयोर्यणः।

उदात्तयणोहल्पूर्वात् ६।१।१७४ उदात्तस्थानेयोयणहल्पूर्वस्तस्मात्परानदीशसादिर्विभक्तिश्चउदात्तास्यात् चोदयित्रीसूनृतानाम् एषानेत्री
ऋतेदेवायकृण्वतेसवित्रेनोङ्धात्वोः ६।१।१७५ अनयोर्यणः परेशसादयउदात्तास्युः ब्रह्मवंध्वा सेतृभिः सुभ्वे ह्रस्वनुड्भ्यांमतुप् ६।१।१७६
ह्रस्वान्तादन्तोदात्तान्नुटश्चपरोमतुबुदात्तः योऽब्दिमाउदनिमानइयर्ति नुटः अक्षरवन्तः कर्णवन्तः सखायः अन्तोदात्तात्किम् मात्वाविदद्दिषुमा
न्स्वरविधौव्यञ्जनमविद्यमानवदित्येतदत्रनमरुत्वां इंद्रनियुत्वान्वायवागहि रेशब्दाच्चरेवांइंद्रेवतः॥१९ स्वरितोनुदात्तस्येति विभक्तिः स्वरिता सुभ्वेइति

क्विबन्तस्यक्वइत्तरपदप्रकृतिस्वरेणान्तोदात्तस्य अोः सुपीतियण् अब्दिमानिति आपोदीयन्तेस्मिन्निति कर्मण्यधिकरणेचेतिकिः उदनिशब्दोव्युत्पन्नः अस्यघृतादित्वान्तो
दात्तत्वंबोध्यम् अन्यथायुतान्यएयन्तानामिति द्वितीयस्योदात्तत्वंप्रसज्येत मतुबसोरुः संबुद्धौछंदसीतिरुः आतोटिनित्यमित्यनुनासिकः अक्षरवन्तइति अक्षिशब्दान्मतुप्
अस्थिदधिसक्थ्यक्ष्णामनङुदात्तइति छंदस्यपिदृश्यत इत्यनङ् अनोनुडित्यस्यासिद्धत्वान्पूर्वेन लोपः ततोभूतपूर्वगत्यामतुपोनुट्माडुपधायाइतिवत्वं इक्षुरितिधान्ये।
निदित्यधिकारेइषेः किच्चेति उप्रत्ययान्त आद्युदात्तः इक्षुशब्दः तस्मात्परोमतुबनुदात्तएव ननुमरुतोस्यसंतीति मरुत्वान् अत्रमतुबुदात्तत्वंप्राप्नोति मृग्योरुतिरित्युतिप्रा।
त्ययस्वरेणमरुच्छब्दस्यान्तोदात्तत्वात् नचतकारेणव्यवधानं स्वरविधौव्यंजनस्याविद्यमानत्वात् अतआह स्वरविधाविति नेष्यत इति समासस्येतिसूत्रेमरुत्वानित्यत्रह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्व·
सि·कौ· प्राप्नोतीति दोषमुद्भाव्य हलस्वरप्राप्ताविति भाष्योक्तेरिति भावः रेवानिति· रयिरस्यास्तीति मतुप्· रयेर्मतौ बहुलमिति संप्रसारणं पूर्वरूपत्वं च आद्गुणः ततो ह्रस्वाभाववद्
टी·त· वचनमाह । नामन्य· ह्रस्वग्रहणमनुवर्तते मतुब्ग्रहणं च· न हि सप्तम्या विपरिणम्यते तेन ह्रस्वो विशेष्यते तदाह· मतुपि यो ह्रस्व इति· सुमतीनामिति· सुमतिशब्दो बहुव्रीहिः
२९७ नञ्सुभ्यामित्यन्तोदात्तः मतुपा ह्रस्व विशेषणं किम्· भूतपूर्वेपि ह्रस्वे यथा स्वरः स्यात्· अग्नीनामित्यादौ अन्यथा परत्वान्नित्यत्वाच्च दीर्घत्वे कृते ह्रस्वाभावान्न स्यात्· तिसृ
णामित्यत्र सांप्रतिके ह्रस्वे स्यात्· सांप्रतिकाभावे हि भूतपूर्वगतिर्भवति न तु सत्यपि तस्मिन् नन्वेवं तिसृणामित्यत्र न स्यात् मतुपि तिसृभावस्यैवाभावात्· इष्टमेवैतत्संग्रहीत
म्· अत्र हि षट्त्रिचतुर्भ्यो हलादिरिति नियमेव विभक्तेरुदात्तत्वमिष्यति षट्त्रि· अन्तोदात्तादित्येतन्निवृत्तम् यद्येतदनुवर्तेत पंचानां नवानां चतुर्णामित्यत्र न स्यात् त्रः सं

नामन्यतरस्याम् ६।१।१७७ मतुपि यो ह्रस्वस्तदन्तादन्तोदात्तात्परो नामुदात्तो वा चेतन्तीसुमतीनाम् ङ्याश्छन्दसि ६।१।१७८ ङ्याः परो नामु
दात्तो वा देवसेनानामभिभञ्जतीनाम् वेत्युक्तेर्नेह जयन्तीनाम् रुतौयन्तु षट्त्रिचतुर्भ्यो हलादिः ६।१।१७९ एभ्यो हलादिर्विभक्तिरुदात्ता त्रि
षड्भिर्हूयमानः त्रिभिष्ट्वं देव नगोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः ६।१।१८२ एभ्यः प्रागुक्तं न गवां शता गोभ्यो गातु शुनश्चिच्छेपम् सोप्रथमैक
वचनेष्ववर्णान्तात् तेभ्यो द्युम्नं तेषाम्पाहि श्रुधी हवम् ॥ ९ स्यायाः त्यासुदात्तत्वान्तान्तर्हि स्यात्· सप्तानामष्टानां· सप्ताष्टशब्दौ घृतादित्वादन्तोदात्तौ·

हलादिः किं चतस्रः पश्य· पथेन दिह हलादिग्रहणस्य व्यावर्त्यं न तथा चतुरः शासीत्यत्रैवावोचाम· नगो· साविति· यदि सप्तमी बहुवचनग्रहणं स्यात्· तेभ्यः केभ्यः इत्य
त्र न स्यात् न किंशब्दयोः सप्तमी बहुवचने परतः त्यदाद्यत्वे कृते बहुवचने झल्येदित्येत्वविधानात् तेषु केषु इत्यत्रावर्णान्तत्वाभावात् ताभ्यो याभ्यामित्यादावेव स्यात् तासु यासि
त्यत्रावर्णान्तत्वाजसात्प्रथमैकवचनमित्याह सौ प्रथमैकवचन इति· अनन्तरप्रतिषेधस्यासंभवात् षाष्ठिकस्वरस्य प्रतिषेधो विज्ञायते इत्याह प्रागुक्तेनेति· एवं च वीरवत्तम ताम
ममित्यत्र ह्रस्वनुड्भ्यां मतुपीति न भवति· स्थापितं चोत्यादिना रुकि अंतोदात्तो वीरशब्दः गोभ्य इति सावेकाच इति प्राप्तं· शुनश्चिच्छेपमिति· अत्र चिदिति पदं संहितापाठे वाहुल २९७
कात्· शुनः शेपशब्दस्य मध्ये प्रक्षिप्यते· पदकाले तु शुनः शेपं चिदिति पठ्यते· शेपपुच्छलांगूलेषु शुन इत्यलुक्· वनस्पत्यादित्वादुभयपदप्रकृतिस्वरः श्वन् शब्दे ॥ ९ ॥

593

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेभ्यः तेषामित्यत्र च सावेकाचइति प्राप्तं प्रतिषिध्यते · राडिति क्विबन्तः राजा · अडिति · अञ्चतिः क्विबन्तः तस्य सनकारस्य ग्रहणं विषयावधारणार्थं · यत्र नलोपो नास्ति तत्रैव प्रतिषेधो यथा स्यात् · प्राञ्चा · प्राञ्चे · नीचैः पूजायामिति प्रतिषिध्यते तेन लोपः अञ्चेश्छन्दस्यसर्वनामस्थानं इति प्राप्तं निषिध्यते · गतोनुविभक्त्युदात्तः स्यादेव · प्राचा · प्राचे · क्रुडिति क्विबन्तः क्रुञ्चा · क्रुञ्चकौटिल्याल्पीभावयोः ऋत्विगित्यादिना क्विन् · तत्रैव सूत्रे क्रुञ्चेति निपातनान्नलोपाभावः · कृतः करोतिः कृन्ततिर्वा क्विबन्तः । कृता · कृते · ॥ ७॥ दिवो · झलादिरिति नन्वत्र तिसप्तमीनिर्देशो कथं पुनरत्र तदादिविधिः केवलं झलात्मिकाया विभक्तेरभावादेव तदादिविधिः ननु तर्हि तदन्त ।

दिवो झल् ६।१।१८३ दिवः पराझलादिर्विभक्तिर्नोदात्ता द्युभिः द्युभ्यः झलीति किम् उपत्वाग्ने दिवेदिवे नृचान्यतरस्याम् ६।१।१८४ नुः परा झलादिर्विभक्तिर्वोदात्ता नृभिर्येमानः तित्स्वरितम् ६।१।१८५ निगदव्याख्यातम् कनूनम् तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः ६।१।१८६ अस्मात्परं लसार्वधातुकमनुदात्तं स्यात् तासि कर्ता कर्तारौ कर्तारः प्रत्ययस्वरापवादोऽयम् अनुदात्तेत् यथा से ङितः अभिचष्टे अनृतेभिः अदुपदेशात् पुरुभुजाचनस्यतम् चिन्स्वरोऽप्यनेन वाध्यते वर्द्धमानं स्वेदमे तास्यादिभ्यः किम् अभिवृधे गृणीतः उपदेशग्रहणात् नेह हतो वृत्राण्यार्या लग्रहणं किम् कतीह निघ्नाः सार्वेति किम् शिश्ये अ क्वि । ङ · किम् हुते यदधीते विदीधिविदिभ्योनेतिवक्तव्यम् इन्धे राजा एतच्चानुदात्तस्य च यत्रेति सूत्रे भाष्ये स्थितम् आदिः सिचोऽन्यतरस्याम् ६।१।१८७ सिजन्तस्यादि

विधिरस्तु · का पुनर्झलन्ता विभक्तिः शसादिः सकारान्तादिति चेत्सत्यम् · षट्त्रिचतुर्भ्यो हलादिरित्यतः आदिरिति वर्त्तते · दिवः ऐ रुदात्तो वा या सिष्ठ मवर्तिरश्वि परा विभक्तिर्नोदात्ता भवति · कीदृशी यस्या झलादिरिति · द्युभिरिति · सावेकाचइति वा ऊ ङिदमिति वा प्राप्तः स्वरः प्रतिषिध्यते · दिवेदिवे इति उङिदंपदादिति विभक्तिरुदात्ता · तित्स्वरितं · निगदव्याख्यातमिति · उच्चारणेनैव व्याख्यातमित्यर्थः केति · किमोत् · तित्स्वरितं · क्वानीति किमः क्वादेशः तास्यनु · तास्यादीनां समाहारद्वन्द्वः उपदेशग्रहणं सम्भवव्यभिचाराभ्यां ङि · दश्च संबध्यते न तु तास्यनुदात्तेत्भ्यां ङि · दिति कर्मधारयः उपदिश्यत इत्युपदेशः तस्याकारेण ङि · ताच विशेषणात्तदन्तविधिः तथा च सूत्रार्थः ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



डि·दहुपदेशादकारांतोपदेशाच्चपरंलसार्वधातुकमनुदात्तंस्यात्·ह्निङ्वौ वर्जयित्वा·कर्त्तेत्यादि·लुटः प्रथमपुरुषस्यडारौरसः एकवचने डित्वाट्टिलोपः इनस्त्ररिचेति
सलोपः आस्तइत्यत्रादादित्वाच्छपोलुक्·डिनइति·असाप्युपदेशविशेषणान्नेह·शृणुतेजरितुर्हवम्·अत्रश्नुरितिदेशेनडित्वचनस्यतमिति·चनीत्नंतदात्मनइच्छन
मित्यर्थः क्यच्·लोटूथमस्तंशपसचानुबंधस्यानेकांतत्वाददुपदेशः चित्स्वरोपीति·चित्स्वरस्यावकाशः चलनः चलनशब्दार्थादकर्मकाद्युच्·असावकाशः।
आस्तइत्यादौवर्द्धमानमित्यत्रतुयंनिघातश्चित्स्वरंबाधतेपरत्वादितिभावः वर्द्धमानमिति·वृधुवृद्धौ·लटः शानच्·शप्·आनेमुगितिमुक्·नचात्रमुकाव्यवधानम्।
यद्यकारस्यागमोमुक्·तदाकारोपदेशात्·परंलसार्वधातुकमितिसिद्धोनिघातः स्वावयवेनव्यवधानाभावात्·यद्यकारान्तस्यागस्यभक्तोमुक्तदालुपदेशलसा।
र्वधातुकमात्रापेक्षत्वाददन्तरंगस्वरंप्रत्यकारान्तविशिष्टांगप्रत्ययापेक्षस्यवहिरङ्गस्यमुकोऽसिद्धत्वात्सिद्धोनिघातः हतइति·अनुदात्तोपदेशोऽप्यनुनासिकलो

थलिचसेटीडन्तोवा ६।१।१९६ सेटिथलन्तोपदेइड्दात्तः अन्तोवाआदिर्वास्यात् यदा नैतेत्रयः तदालितीतिप्रत्ययात्पूर्वमुदात्तंस्यात्
लुलविथअत्रचत्वारोपिपर्यायेणोदात्ताः उपोत्तमंरिति ६।१।२१७ रित्प्रत्ययान्तस्योपोत्तममुदात्तंस्यात्यदाहवनीये॥ ॥इतिप्रत्ययस्वराः॥

येक्तोसन्यकारांतान्यरंलसार्वधातुकंभवतितथाप्युपदेशग्रहणान्नभवति·नहिहन्तिरदंतउपदिश्यते·कतीह पचमानाइतिताच्छील्यवयोवचनशक्तिषुचानश्·
क्वचित्तुकतीहनिघ्नानाइति·दृश्यतेतत्रनिघ्नशब्दादाचारक्विवन्ताच्छांदसोमुगभावः नन्नुनास्यादिभ्यः परत्वाभावाच्चिंत्यं शिष्येइति·एरनेकाचइतियणादेशः
लिट्चेत्यार्द्धधातुकमेतत्·यदधीतइति·यच्छब्दप्रयोगोनिपातैर्यद्यदिहन्तेतिनिघातप्रतिषेधार्थः अत्रप्रत्ययाद्युदात्तत्वमेव·विद्विचारणे·इन्धीदीप्तौ·खिद
दैन्येइतित्रयोनुदात्ततः तेभ्यःपरस्यसा र्वधातुकस्यानुदात्तत्वेप्राप्तेआह विदीन्यादिभ्यः परस्यलसार्वधातुकस्यानुदात्तत्वंनेतिवक्तव्यमित्यर्थः यासिष्टमिति·
याप्रापणेलुङ्थसस्तं·च्लिलुडि·च्लेः सिच्·यमरमनमातामितीट्सकौ·बहुलंछंदस्यमाङ्योगेपीत्यडभावः इदमाद्युदात्तत्वाभावेउदाहरणम्·आद्युदात्तत्वेतूदा
हरणांऽन्तरंमृग्यम्॥ ॥थलि·आदिर्णमुल्यन्यतरस्यामित्यतोन्यतरस्यामित्यनुवर्त्तमानेवाग्रहणंकार्यविकल्पार्थम्·अन्यतरस्यांग्रहणेनकार्यविकल्पस्य।ऽ

594



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्सिद्धत्वात् तेनेडागमः पर्यायेण कार्यं प्रतिपद्यन्ते · ननु नवैवं तान्त्रप्रगपदित्यादौ युगपद्ग्रहणादेवा ऽन्यत्र पर्यायः सिद्धः सत्यम् आदेशपि प्राप्त्यर्थं वा ग्रहणम् · अन्यथा तु त
योरिडन्तयोरेव कार्यं विकल्पेन स्यादिति किम् · यथा यत्ति स्वरः नन्विड्ग्रहणात्सेडेव थल् गृहीष्यत इति चेत्सत्यं · इड्ग्रहणं तु यदेडागमः क्रियते तदा तस्योदात्तार्थं स्यात्
यथा कर्तुं · कवृ · स्वोपश्चेन्यत्र सः ततः स्वयथा तु वलविथल्यादौ चतुर्णां पर्यायेणोदात्तविधानेयपि थल्यादौ चतुर्थाभावेपि पर्यायेणोदात्तत्रयं भवति · एवमिड्भावेपि स्या
दित्यर्थः · आहवनीय इति · बाहुलकादधिकरणे ऽनीयर् प्रीणनार्थात्कर्मणि वा ततो गतिसमासे कृदुत्तरपदप्रकृतिस्वरः ॥ ॥ इति प्रत्ययस्वराः ॥ ॥ समासस्य · यज्ञश्रियमि
ति · षष्ठीतत्पुरुषः श्रीशब्दस्येकारस्योदात्ते कृते आन्तत्वस्यादियज्ञ दातः बहुव्रीहौ · इहोदात्तस्वरितग्रहणमनुवर्तमानं तद्धु निवर्तते · पूर्वपदसामानाधिकरण्यात्सूत्रे

समासस्य ६।१।२२३ अन्त उदात्तः स्यात् यज्ञश्रियम् बहुव्रीहौ प्रकृत्या पूर्वपदम् ६।२।१ उदात्तस्वरितयोगि पूर्वपदं प्रकृत्या स्यात् सत्यश्रि
त्रश्रवस्तमः उदात्तेत्यादि किम् सर्वानुदात्ते पूर्वपदे समासान्तोदात्तत्वमेव यथा स्यात् समपादः तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्य
यद्वितीयाकृत्याः ६।२।२ सप्तैते पूर्वपदभूतास्तत्पुरुषे प्रकृत्या तुल्यश्वेतः कृत्यतुल्याख्या अजात्येति तत्पुरुषः किरिणाकाणः किरिकाणः ।
पत्र्यन्मदयन्त्सखम् मद्यति मादके इन्द्रे सर्दत्ति सप्तमीतत्पुरुषः शस्त्रीश्यामा अव्ययेन ञ् कुनिपाता नाम् अयज्ञो वा एषः परिगणान
डिम स्नात्वाकालकः मुहूर्तसुखम् भोज्योष्णम् ॥ एम प्रकृत्येतावदुक्तेपि सत्ययकार एवं प्रकृतिस्वरेणैव प्रकृतिभावो विज्ञायते पूर्वपदस्य प्रकृतिभावस्तत्स्व
योरुदात्तस्वरितयोः प्रकृतिभावद्वारेण त्वाशयेनाह उदात्तस्वरितयोगीति · श्रित्रेति · श्रूयत इति श्रवः कीर्तिः चित्रं श्रवो यस्य स चित्रश्रवाः ततस्तमप् चित्रशब्दः फि
ट्स्वरेणान्तोदात्तः ततः परस्योदात्तादनुदात्तस्येति स्वरितः ततः परस्य स्वरितात्संहितायामनुदात्तानामिति प्रचयः समपाद इति · लवम समसिमेत्यनुच्चानीति सर्वा
नुदात्तः समशब्दः पादशब्दो वृषादीनां चेत्याद्युदात्तः अत्र समासान्तोदात्तत्वमेव · तुल्यश्वेत इति · नौवयोधर्मविषेति यत्त्यतो नावद्धत्याद्युदात्तस्तुल्यशब्दः सदृ
क्श्वेतः सदृशश्वेत इति समानान्ययोश्चेति क्विन्नन्तः सदृक्शब्दः गतिकारकोपपदात्कृदिति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः एवं सदृशशब्दः कञन्तो मध्योदात्तः किरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्व·
सि·कौ· रोति· कॄगॄशॄपृकुटिभिदिच्छिदिभ्यश्चेत्यौणादिक इः सच कित्· भुजेः किच्चेन्यतः किदित्यनुवर्तनात् तेन किरि गिरिशब्दौ प्रत्ययस्वरेणान्तोदात्तौ· मं दयस ललमि
टी·त· ति·मदिस्तुत्यादिषु पठ्यते· तालव्यः शत्रादेशः तस्य च छन्दस्युभयथेत्यार्द्धधातुकत्वेन शबभावात् तास्यनुदात्तेन्ङित्‍ इदुपदेशादिति निघातो न अतः प्रत्ययाद्युदात्तत्वमेव· पार
२९९ निटीति णिलोपस्तु न तं प्रति सार्वधातुकत्वाश्रयणात्· नचवैपरीत्यमापादनीयं छन्दसि हृष्टानुविधानात्· इत्थं मंदयत्सखं नोदात्तः शास्त्रीश्यामेति· उपमानानि
सामान्यवचनैरिति समासः शस्त्रीशब्दो गौरादिङीषन्तोदात्तः अव्यये निपातनत्वादेव सिद्धे नञ्ग्रहणमकरणिरित्यादौ परस्यापि कात्स्वरस्य बाधनार्थम् अक
रणिरित्यादावाक्रोशे नञ्यनिरित्यनिः किंच तिसृ इत्यत्र तिसृभ्यो जस इति सति शिष्टोपि विभक्तिस्वरो नञ्स्वरेण बाध्यते· अपि वा चत्वारः अनड्वाह इत्यत्र सति शि
ष्टोप्याम् स्वरो बाध्यते नेन अव्ययीत्यत्र जिदक्षीत्यादिना धातुनासं निपात्य इनिः क्रियते तस्यापि स्वरस्य बाधनार्थं कृद्ग्रहणं चादिषु पाठाभावात् स्तावेति· मयूरव्यं

वर्णो वर्णेष्वनेते ६।२।३ वर्णवाचिन्युत्तरपदे एतवर्ज्जिते वर्णवाचि पूर्वपदमकृत्यान्तं प्रकृत्या कृष्णसारङ्गः लोहितकल्मा
षः कृष्णशब्दो नक्प्रत्ययान्तः लोहित शब्द इतन्नन्तः वर्णः किम् परमकृष्णः वर्णेषु किम् कृष्णतिलाः अनेते किम् कृष्णैतः॥ ६ ॥

स्यादित्ययम्· नन्वयं नञैवान्तोदात्तो निपात्यतामिति चेन्न सामिकृतं स्वयंधौतमित्यादिवारणाय परिगणनस्यावश्यकत्वात्· अन्यथा तत्रापि पूर्वपद प्रकृतिस्वरः
स्यात्· इष्यते तु समासस्यान्तोदात्तः सामिकृतमित्यादौ सामिस्वयं क्तेनेति समासः मुहूर्तसुखमिति कालाध्वनोरिति द्वितीया अत्यन्तसंयोगे चेति समासः मुहूर्तशब्दः
पृषोदरादित्वादन्तोदात्तः भोज्योष्णमिति क्रत्यतुल्याख्या इति समासः भोज्यशब्दो ण्यदन्तः तित्स्वरितमिति स्वरितान्तः॥ ५॥ वर्णो वर्णे· अत्र एत इति प्रतिषेधाद् इदुवच राम
नं निर्देशाच्च उत्तरपदे स्वरूपग्रहणं न तत्साह वर्णात्पूर्वपदेपि स्वरूपग्रहणं न तदाह· वर्णवाचिनीत्यादि कृष्णशब्दो नक्प्रत्ययान्त इति कृषेर्वर्णे इति विहितो यो नक् तद २९९
न्त इत्यर्थः कस्य पदं कृष्णस्यापत्यं कार्ष्ण्यायनिः तदन्तो वेदिनः तेनोदात्तौ वर्णानां तणतिनितान्तानामित्याद्युदात्तः इतन्नन्त इति· रुहे रश्च लो वा इतिइतन्प्रत्ययान्तो नित्स्वरे
णाद्युदात्तः कृष्णतिला इति· वर्णो वर्णेनेति प्रतिपदोक्तः समास इह गृह्यते तेनैव सिद्धे वर्णग्रहणं चिन्त्यप्रयोजनम्॥

595

CC-0. In Public Domain. Digitization by eGangotri

गाध॰ अरित्रगाधमिति अरित्रं नौकाष्ठं तस्य गाधं स्पृश्यमानं तलं॰ गाध्यत इति गाधः गाधृ प्रतिष्ठायां कर्मणि घञ्॰ अर्द्धर्चादित्वात्क्लीवत्वम् गोलवणमिति॰ षष्ठीसमासः गोशब्दो गमेर्डोरिति डोप्रत्ययान्तोऽन्तोदात्तः इत्रान्त इति॰ अर्तिलूधूसूखनसहचर इति विहितः मध्योदात्त इति॰ प्रत्ययस्वरेण॰ इयत्तापरिच्छेदमात्रमिति इयत्तायाः परिच्छित्तिरियत्तापरिच्छेदः क्रियाशब्दोऽत्र प्रमाणशब्देन गृह्यते न पुनरायाममात्रे रूढ इत्यर्थः दायाद्यं दानयोग्योंऽशः दायमादत्ते दायादः मूलविभुजादित्वात्कः दायादस्य भावो दायाद्यं॰ दायस्य सन्तानं संबंधो वा इह तु लक्षणया आदीयमाने दाय एव दायाद्यशब्दो वर्तते॰ दायादशब्देऽपि दायाद्यवाचि पूर्वपदं प्रकृतिस्वरं स्यात्॰ क्युप्रत्ययान्त इति॰ [illegible]

गाधलवणयोः प्रमाणे ६।२।४ एतयोरुत्तरपदयोः प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या स्यात् अरित्रगाधमुदकम् तत्प्रमाणमित्यर्थः गोलवणम् यावद्गवे दीयते तावदित्यर्थः अरित्रशब्द इत्रान्तो मध्योदात्तः प्रमाणमियत्तापरिच्छेदमात्रं न पुनरायाम एव प्रमाणे किम् परमगाधम् दायाद्यं दायादे ६।२।५ तत्पुरुषे प्रकृत्या धनदायादः धनशब्दः क्युप्रत्ययान्तः प्रत्ययस्वरेणाद्युदात्तः दायाद्यं किम् परमदायादः प्रतिबन्धि चिरकृच्छ्रयोः ६।२।६ प्रतिबन्धवाचि पूर्वपदं प्रकृत्या एतयोः परतः तत्पुरुषे गमनचिरम् व्याहरणकृच्छ्रम् गमनं हि कारणविकलतया चिरकालभावि कृच्छ्रयोगि वा प्रतिबन्धि जायते प्रतिबन्धि किम् मूत्रकृच्छ्रम् पदेऽपदेशे ६।२।७ व्याजवाचिनि पदशब्द उत्तरपदे पूर्वपदं प्रकृत्या तत्पुरुषे मूत्रपदेन प्रस्थितः उच्चारपदेन मूत्रशब्दो घञन्तः उच्चारशब्दो घञन्तस्थाथादिस्वरेणान्तोदात्तः अपदेशे किम् विष्णुपदम्॥

मन्दिनिधाञः क्युरिति विहितः परमदायाद इति॰ अत्र समासान्तोदात्तत्वमेव॰ प्रतिबन्धि॰ कार्यसिद्धिप्रतिघातीति प्रतिबंधि॰ आवश्यकेणिनिः गमनचिरं व्याहरणकृच्छ्रमिति॰ गमनव्याहरणशब्दौ ल्युडन्तौ॰ तयोर्लित्स्वरः अत्र विशेषणसमासः ननु सामानाधिकरण्ये सति विशेषणसमासो भवति॰ न चेह तदस्ति गमनशब्दस्य गतिवाचित्वाच्चिरशब्दस्य कालवाचित्वात्॰ नैष दोषः चिरकालवाचिनि गमनेऽत्र चिरशब्दो वर्तते॰ गमनमत्र विशेष्यं तद्विशेषणेन तु चिरकृच्छ्रेण तत्र विशेष्यस्य पूर्वनिपातनार्थमयूर्व्यंसकादित्वमप्येष्टव्यं॰ पूर्वपदस्य प्रतिबंधिवाचित्वमुपपादयति॰ गमनमित्यादि॰ कारणवैकल्या॥ :

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ःश्री॥ःश्रीः

स·
सि·कौ· द्विविधकालभाविगमनंकार्यसिद्धेः प्रतिबंधि जायते · कृच्छ्रयोगिवा · कृच्छ्रं दुःखं तद्योगिवाकार्यसिद्धेः प्रतिबंधिजायते · मूत्रकृच्छ्रमिति · षष्ठीसमासः पदेपदेशे अप
ग्र·त· देशोव्याजः व्याजोऽपदेशोलक्ष्यंचेत्यमरः तत्पदान्त्यान्यवाचिनीति · उच्चारपदेनेति · उच्चारःपुरीषक्रिया · विलुप्तपदमिति · षष्ठीसमासः ॥ ॥ निवाते ॥ निवातशब्देपरेवा
१०० तत्राणवाचिनीति · वातत्राणार्थेनिवातशब्दे परे इत्यर्थः वातस्याभावोनिवातमित्यव्ययीभावः निरुद्धोवातोऽस्मिन्निति बहुव्रीहिर्वा · तत्र कुड्यादयोवर्तमानाः समा
नाधिकरणोनिवातशब्देनसमस्यंतेकुटीएवनिवातं · कुटीनिवातं कुड्यएवनिवातंकुड्यनिवातं · ङ्यगन्नइति · कवतेऽर्थकुडकारस्येत्संज्ञानभवतिगुणप्रतिषेधार्था

निवातेवातत्राणे ६।२।८ निवातशब्देपरेवातत्राणवाचिनितत्पुरुषेपूर्वपदंप्रकृत्या कुटीनिवातम् कुड्यनिवातम् कुटीशब्दोगौरादिङी
षन्तः कुड्यशब्दोङ्यगन्तः ययान्तइत्यन्ये वातत्राणेकिम् राजनिवातेवसति निवातशब्दोरूढः पार्श्वे शारदेऽनार्तवे ६।२।९ अनार्तवभवा
मार्तवम् तदन्यवाचिनि शारदशब्देपरेतत्पुरुषेपूर्वपदंप्रकृतिस्वरंस्यात् रज्जुशारदमुदकम् शारदशब्दोनूतनार्थः तस्यास्वपदविग्र
हः रज्जोः सद्यउद्धृतम् रज्जुशब्दः सृजेरसुमचेत्याद्युदात्तोव्युत्पादितः अनार्तवेकिम् उत्तमशारदम् अध्वर्युकषाययोर्जातौ ६।२।१० एतयोः
परतोजातिवाचिनितत्पुरुषेपूर्वपदंप्रकृतिस्वरम् कठाध्वर्युः दौवारिककषायम् कठशब्दः पचाद्यजन्तः तस्माद्वैशम्पायनान्तेवासिभ्य
श्चेति णिनेः कठचरकाल्लुगितिलुक् द्वारेनियुक्तइतिठक्प्रत्ययोदात्तः जातौकिम् परमाध्वर्युः॥ ११ लकारानुबंधात् · यगं तइत्यन्येइति · नेतुक
वतेर्ल्लिनिति सूत्रमधीयते · शारदे · नूतनार्थइति अव्युत्पन्नइत्यर्थः रज्जोः सद्यउद्धृतं रज्जुवद्धपात्राधारोरज्जुशब्दः इदानीमेवकूपादुद्धृतंनूतनंजलमित्यर्थः सृजे
रसुम्चेति · सृजन्देः सलोपश्चेत्यतः सलोपइतिवर्तते · भृमृशीङीत्यत उरितिधान्येनिदित्यनोनिदिति · सृजेरुःस्यात्तचनित्धातोरसुमागमः सलोपश्चेत्यर्थः तत्रसृजेरंत्या राम
द्वः परेऽसुमिसलोपयणादेशेऽसुमकारस्यजश्त्वेचरज्जुरितिभवति · आद्युदात्तइति · प्रत्ययस्यनित्वान्नित्स्वरेणउत्तमशारदमिति · शरदिजातोभवंशारदम् · अ १००
ध्वकठाध्वर्युरिति · अध्वरंयज्ञंयातीत्यध्वर्युः · क्वचिदिकोऽपिदृश्यते · कठेनप्रोक्तंछंदोधीतेकठः कठशब्दादर्णान्तणिनिप्रत्ययःतस्यलुकुअध्येतृणांलुक्कारकाल्लुगितिलुकइति

५९६

CC-0. In Public Domain. Digitization by eGangotri

सदृश सादृश्यवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या· एतयोरुत्तरपदयोः पितृसदृश इति पितृमातृशब्दावृणादितृजन्तौ· चित्स्वरेणान्तोदात्तौ· नन्वत्र पूर्वसदृशसमोनार्थेति तृतीयासमासे कृते तत्पुरुषे तुल्यार्थेत्येव सिद्धम्· न च तुल्यार्थयोगे षष्ठ्यपि विहिता तेन षष्ठीसमासार्थमिदमिति वाच्यम्· तत्रानभिधानात् षष्ठीसमासो नेत्यपि सुवचत्वा दिति चेन्नैवम् अलुक्समासानुरोधेन षष्ठीसमासस्वीकारस्यावश्यकत्वात्· तद्यथा· दास्याः सदृशो वृषल्याः सदृश इति· षष्ठ्या आक्रोशे इत्यलुक्· दासीशब्दो दंसेष्टेन आ चेति· दंसेष्टः प्रत्ययः नकारस्य चाकारः प्रत्ययस्वरेणा दासशब्द उदात्तः जित्वान् ङीपूपसेति लोपः अनुदात्तस्य च यत्रेति ङीप उदात्तत्वं· वृषलशब्दाज्जातिलक्षणो ङीष् उभय

सदृशप्रतिरूपयोः सादृश्ये ६।२।११ अनयोः पूर्वं प्रकृत्या पितृसदृशः सादृश्ये किम् परमसदृशः समासार्थोऽत्र पूज्यमानता न सादृश्यम्। द्विगौ प्रमाणे ६।२।१२ द्विगावुत्तरपदे प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरम् प्राच्यसप्तसमः सप्त समाः प्रमाणम् अस्य प्रमाणे द्विगोर्नित्यमिति मात्रचो लुक् प्राच्यशब्द आद्युदात्तः प्राच्यश्चासौ सप्तसमश्च प्राच्यसप्तसमः द्विगौ किम् व्रीहिप्रस्थः प्रमाणे किम् परमसप्तसमः गन्तव्यपण्यं वाणिजे ६।२।१३ वाणिजशब्दे परे तत्पुरुषे गन्तव्यवाचि पण्यवाचि च पूर्वपदं प्रकृतिस्वरम् मद्रवाणिजः गोवाणिजः सप्तमीसमासः मद्रशब्दो रक्प्रत्ययान्तः गन्तव्यमिति किम् परमवाणिजः मात्रोपज्ञोपक्रमच्छाये नपुंसके ६।२।१४ मात्रादिषु परतो नपुंसकवाचिनि तत्पुरुषे तथा भिक्षाया स्तुल्यप्रमाणं भिक्षामात्रं भिक्षाशब्दो गुरोश्च हल इत्यप्रत्ययान्तः पाणिन्युपज्ञम् पाणिनिशब्दोऽन्तोदात्तः ॥६

त्राद्युदात्तयोर्हल्पूर्वादिति विभक्तिरुदात्ता ननु एवं तृतीयासमासविधायके पूर्वसदृशेति सूत्रे सदृशग्रहणं मास्तु सर्वत्र षष्ठीसमासोऽस्तु इति चेन्नैवम्· यत्र षष्ठ्यर्थो नास्ति तदर्थं सदृशग्रहणं· विद्यया सदृशो विद्यासदृश इति· अन्यो देवदत्तादिरत्र प्रतियोगी· प्राच्यशब्द आद्युदात्त इति· द्युप्रागपागुदक्प्रतीचो यदिति· यदन्तत्वाद्यतोऽनाव इत्याद्युदात्तः परमसप्तसममिति· सप्तानां समानां समाहारः सप्तसमं· समाहारद्विगुः पात्रादित्वात् स्त्रीत्वाभावः गन्तव्यपण्यम्· वणिग्गव वाणिजः प्रज्ञादित्वादण्· मद्रवाणिज इति· मद्रेषु गत्वा व्यवहरतीत्यर्थः गोवाणिज इति· गर्मेडौ अन्तोदात्तोऽयम्· सप्तमीसमास इति· सप्तमीति योगविभागात् मद्रवाणिजेत्यत्र षष्ठीसमासः रक्प्रत्ययान्त इ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्व·
सि·कौ· चैतिविहितोस्त्युत्तदन्तादित्यर्थः प्रत्ययस्वरेणान्तोदात्तोयम् भाद्मेनयेति· पूर्वपदंप्रकृतिस्वरं स्यादित्यर्थः भिक्षाशब्दोऽप्रत्ययान्तोदात्तः मात्रशब्दस्तुतुल्यपर्यायोवृत्तिविषये
टी·त· तुल्यप्रमाणोवर्त्ततेभिक्षायास्तुल्यप्रमाणमित्यस्वपदविग्रहः षष्ठीतत्पुरुषः तदाह भिक्षायावृत्ति पाणिन्युपज्ञमिति उपज्ञायतइतिउपज्ञः आतश्चोपसर्गे कर्मण्यपृ
३९१ पाणिनिशब्दइञन्तत्वादाद्युदात्तः तस्यउपज्ञाइतिषष्ठीसमासः उपज्ञोपक्रमंतदाद्याचिख्यासायामितिनपुंसकता ॥ः॥ नन्दोपक्रममिति· षष्ठीसमासः अत्रापि
पूर्ववन्नपुंसकता उपक्रम्यतेइतिकर्मणिघञ्· नोदात्तोपदेशस्येतिवृद्धिप्रतिषेधः इक्षुच्छायमिति· इक्षूणांछायेतितत्पुरुषः छायाबाहुल्यइतिनपुंसकता इक्षेः
किरेतुप्रत्ययान्तइक्षुः तत्रनित्त्वाभावादाद्युदात्तत्वदाह· इक्षुशब्दस्येति गमनसुखमिति समानाधिकरणसमासोमयूरव्यंसकादित्वात्· नित्स्वरइति गमनशब्दे

नन्दोपक्रमम् नन्दशब्दः पचाद्यजन्तः इक्षुच्छायम् इक्षुशब्दस्याद्युदात्तः निपातनं नपुंसके किम् कुड्यच्छाया सुखप्रिययोर्हिते ६।२।१५
तयोः परयोर्हितवाचिनि तत्पुरुषे तथा गमनप्रियम् गमनसुखम् गमनशब्दे नित्स्वरः हिते किम् परमसुखम् प्रीतौ च ६।२।१६ प्रीतौ गम्यायां
म्प्रागुक्तम् ब्राह्मणसुखं पायसम् छात्रप्रियोऽनध्यायः ब्राह्मणछात्रशब्दौ प्रत्ययस्वरेणान्तोदात्तौ प्रीतौ किम् राजसुखम् स्वं स्वामिनि ६
।२।१७ स्वामिशब्दे परे स्ववाचिनि पूर्वपदं तथा गोस्वामी स्वं किम् परमस्वामी पत्यावैश्वर्ये ६।२।१८ दमूनागृहपतिरिद्मे न भूवाक्चिद्दि-
धिषु ६।२।१९ पतिशब्दे परे ऐश्वर्यवाचिनि तत्पुरुषे नैतानि प्रकृत्या भुवः पतिः भूपतिः वाक्पतिः चित्पतिः दिधिषूपतिः ॥ ६ ॥ 597

ल्युडन्तः लितीतिसूत्रेणाद्युदात्तः प्रागुक्तमिति· सुखप्रिययोः परयो तत्पुरुषे पूर्वपदं प्रकृतिस्वरं स्यादित्यर्थः योगविभागोयथासंख्यनिवृत्त्यर्थः ननुसुखप्रि-
ययोर्हितेपतावत्पूर्वसूत्रेसत्यां हितेचेतिवक्तव्यं· तत्राप्यसूत्रेसुखप्रिययोःप्रीत्यव्यभिचारादेवप्रीतौगम्यमानायांभविष्यतीतिचेत्सत्यम् प्रीतिग्रहणंतदन्तत्यप्रति- एम
पत्त्यर्थम्· ब्राह्मणच्छात्रशब्दाविति· ब्रह्मणोऽपत्यमित्यण् ब्राह्मोजातावितिजातौ टिलोपाभावेऽन्नितिप्रकृतिभावः छात्रशब्दः छत्रादिभ्योणइतिणप्रत्ययान्तः पत्या- ३९१
वैश्वर्येपतिशब्देपरे पूर्वपदंप्रकृतिस्वरं स्यात्· तत्पुरुषे· गृहपतिरिति· षष्ठीसमासः गेहेकइतिकप्रत्ययान्तोगृहशब्दः प्रत्ययस्वरेणान्तोदात्तः तमूः स्वादीनां समा-

CC-0. In Public Domain. Digitization by eGangotri

हारहंहेनपुंसकत्वंहस्वत्वम् एतानीति·भूवाक् चिद्दिधिषु एतानीत्यर्थः नपुंसकस्येति·पूर्वेणप्राप्तः प्रतिषिध्यते·भूपतिरित्यादिषष्ठीसमासाएते·तत्रभ्वादयस्त्रयः कि
वन्ताः दिधिषूशब्दोऽन्दूदम्भूजम्बूकफेलूकर्कन्धूदिधिषूःस्मृतम्प्रत्ययान्तोनिपातितः सर्वेप्यन्तोदात्ताः॥ ॥वाभु· उक्तविषयेइतिऐश्वर्यवाचिनिपतिशब्दे परे भुवनशब्दः
पूर्वपदप्रकृतिस्वरंस्यात्·पत्यावैश्वर्यइति·प्राप्ते विकल्पोयम्·भुवनपतिरिति·भुवनशब्दः कृत्प्रत्ययान्तोनित्स्वरेणाद्युदात्तः आशंकाबाध· आशंकाबाधनेदीयस्सूत्त
रपदेषुसम्भावनंवाचिनिनान्तुरुषेपूर्वपदंप्रकृतिस्वरंस्यात्·शंकिशंकायां·बाधृलोडने आङ्पूर्वाभ्यांकर्मणिघञ् अतिशयेनान्तिकं नेदीयः द्वयोरन्तिकयोर्मध्ये
एकस्यातिशयविवक्षायामीयसुनि·अन्तिकबाढयोरितिनेदादेशः·गमनाशंकादयो विशेषणसमासाः मयूरव्यंसकादयोवा· अस्तित्वाध्यवसायइति·अस्तित्वनिश्च

वाभुवनम् ६।२।२० उक्तविषयेभुवनपतिः भूसूधूभ्रस्जिभ्यइतिक्युन्नन्तोभुवनशब्दः आशङ्काऽऽबाधनेदीयस्सुसम्भावने ६।२।२१ अस्ति
त्वाध्यवसायः सम्भावनम् गमनाशङ्कमस्ति गमनाबाधम् गमननेदीयः गमनमाशङ्क्यते आबाध्यते निकटतरमितिवासम्भाव्यते
सम्भावनेकिम् परमनेदीयः पूर्वेभूतपूर्वे ६।२।२२ आढ्यपूर्वः पूर्वशब्दइति विषयेभूतपूर्वेवर्तते भूतपूर्वेकिम् परमपूर्वः सविधसनीडसम
र्यादसवेशसदेशेषुसामीप्ये ६।२।२३ एषुपूर्वंप्रकृत्या मद्रसविधम् गान्धारसनीडम् काश्मीरसमर्यादम् मद्रसवेशम् मद्रसदेशम् सामीप्ये
किम् सहमर्यादयासमर्यादंक्षेत्रम् चैत्रसमर्यादम्॥ ९ यः गमनाशंकमिति·पूर्वपदनिल्लुङन्तानितत्रलित्स्वरः·गमनंशंकयतइत्यादि·संभाव्या

नइत्यस्यप्रत्येकमन्वयः गमनमाशंक्यतेइति संभाव्यते· गमनमाबाध्यतइति संभाव्यते· गमनंनिकटतरमितिवासंभाव्यते· पूर्वेभूतपूर्वे·भूतपूर्वार्थे पूर्वशब्दप
रेपूर्वपदंप्रकृतिस्वरंस्यात्· आढ्योभूतपूर्वइतियः पूर्वमाढ्यआसीत्सएवमुच्यतेआढ्यपूर्वइति· अत्रविशेषणसमासोमयूरव्यंसकादिर्वा आढ्यशब्दः आङ्पू
र्वाध्यापतेर्घञर्थेकविधानमितिकर्मणिकः आतोलोपः पृषोदरादित्वाड्ढः थाथादिस्वरेणान्तोदात्तः परमपूर्वइति· परमश्चासौपूर्वश्चेतियोयंवाक्यार्थः
पूज्यमानतालक्षणास्मिन्निहप्रत्युदाहरणेसमासः परमश्चासोभूतपूर्वश्चेतिविग्रहेप्रत्युदाहरणमेव सविध· सामीप्यार्थेषुसविधादिषूत्तरपदेषुपू॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स॰
सि॰कौ॰ र्वपदं प्रकृत्यान्तस्वरुभे॰ मद्रसविधमिति सर्वत्रोदाहरणेषु षष्ठीसमासः मद्रः रगन्तेनोदात्तः गांधारिः कर्द्दमादीनां चेत्याद्युदात्तो मध्योदात्तो वा॰ काश्मीरो लघावन्ते इति म
टी॰न॰ ध्योदात्तः सविधादीनां सहविधया इत्येवमादिका व्युत्पत्तिरेव केवलं समीपवाचिनस्त्वेते समुदायाः मद्रादीनां सविधं समीपमित्यर्थः समर्यादमिति चोपसर्जनस्येति सह
३०२ स्य सादेशः चैत्रस्य समर्यादमिति षष्ठीसमासः सविधादिषु किम् मद्रसमीपम्॰ ॥ ॥ विस्पष्टा गुणवचनेषु परेषु विस्पष्टादीनि पूर्वपदानि प्रकृत्या स्युः विस्पष्टकटु
कमिति॰ स्पश बाधनस्पर्शनयोः विपूर्वस्य स्पशेः निष्ठायां वा दान्तशान्तेति स्पष्टशब्दो निपातितः तस्य वीशब्देन गतिसमासः विस्पष्टं कटुकमिति विग्रहः विस्पष्टा
दीनि शब्दप्रवृत्तिनिमित्तस्य विशेषणानि न द्रव्यस्य॰ कटुकादिशब्दैर्गुणवद्द्रव्यमभिधीयत इति सामानाधिकरण्याभावात्कर्मधारयाभावे सुप्सुपेति समासः विचि

विस्पष्टादीनि गुणवचनेषु ६।२।२४ विस्पष्टकटुकम् विस्पष्टशब्दो गतिरनन्तर इत्याद्युदात्तः विस्पष्टेति किम् परमलवणम् गुणेति किम्
विस्पष्टब्राह्मणः विस्पष्ट विचित्र व्यक्त सम्पन्न पण्डित कुशल चपल निपुण श्रज्यावमकन्यायवत्सु भावे कर्मधारये ६।२।२५ श्रज्य अवम
कन् इत्यादेशवति पापवाचि निचोत्तरपदे भाववाचि पूर्वपदं प्रकृत्या गमनश्रेष्ठम् गमनज्यायः गमनावमम् गमनकनिष्ठम् गमन
पापिष्ठम् श्रेति किम् गमनशोभनम् भावे किम् गम्यतेऽनेनेति गमनं गमनं श्रेयो गमनश्रेयः केति किम् षष्ठीसमासे मा भूत्॥ ॥ ६ ॥

त्रेति॰ चित्र चित्रीकरणे चुरादिः एयन्तादेरच्॰ विशेषेण चित्रं विचित्रं प्रादिसमासः तत्पुरुषे तुल्यार्थेत्यव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तः चिती संज्ञाने निष्ठा॰ विगतं चित्रमस्य
इति विचित्रः बहुव्रीहौ प्रकृत्या पूर्वपदमित्याद्युदात्तः अञ्जू व्यक्त्यादिषु तस्य विपूर्वस्य निष्ठायां गतिस्वरेणोदात्तस्वरितयोरिति स्वरितादिः पदेः कर्तरि क्तः थाथादिस्वरेणान्तो सम
दात्तः गतिस्वरस्तु न कर्मणीति तत्र वर्जितः अयं कर्तरि क्तः फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्चेत्युपत्ययान्तः पटुशब्दः तत्र नित्त्वाधिकारादाद्युदात्तः। ३०२
पण्डिगतौ क्तः प्रत्ययस्वरः उणादिवृत्तौ तु पण व्यवहारे स्तुतौ च तस्मात् ताडुः पंडा बुद्धिः सा संजाता अस्येति तारकादित्वादितच् एवमुक्तम्॰ कुशान्लातीति कुशलः आतोनु
पसर्गे इति कः कृत्स्वरेणान्तोदात्तः चुप मन्दायां गतौ अस्मात्तु पेरत्त्वोपधायाः इति कलप्रत्ययः तत्र पाद्यिम्यश्चि दित्यतस्मिन्दितिवर्त्तनाद् न्तोदात्तः पुण कर्मणि शुभे इगु।

598

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पथ त्राधीकिरः कः थाथादिस्वरेणान्तोदात्तः अज्या॰ अन्यकत्नामादेशानामुत्तरपदत्वासंभवात्सामर्थ्यात् द्दुत्तरपदं गृह्यत इत्याह इत्यादेशवनीति॰ इष्टेयमुनोऽग्रशस्य अः ज्यच युवाल्पयोः कनन्यतरस्याम् गमनश्रेष्ठमित्यादि॰ मयूरव्यंसकादित्वात् राजदन्तादित्वाद्वा विशेषणस्य परनिपातः पापिष्ठमिति॰ विन्मतोर्लुक् उदाहरणे नपुंसके भावे क्तः ल्युट्चेति भावे ल्युट्॰ नदनान्येतानि पूर्वपदानि लित्स्वरेणाद्युदात्तानि॰ गम्यतेऽनेनेति॰ करणाधिकरणयोश्चेति करणे ल्युट्॰ केतिकिमिति कर्मधारय इति किमर्थमित्यार्थः॥ ॥ कुमारश्च॰ कुमारशब्दः पूर्वपदं प्रकृतिस्वरं स्यात्॰ कुमारश्रमणेति॰ कुमारी श्रमणा कुमारश्रमणा कुमारश्रमणादिभिरिति समासः लिंगविशिष्टपरिभाषया कुमारीशब्दस्य समासे पुंवद्भावः अन्तोदात्त इति कुमारः क्रीडायां॰ पचाद्यच्॰ चित्स्वरः अत्र कुमारः श्रमणादिभिरित्यस्यैव ग्रहणं प्रतिपदोक्तत्वात्॰ केचित्तु सर्वस्यैव कर्मधा

कुमारश्च ६।२।२६ कर्म्मधारये कुमारश्रमणा कुमारशब्दोऽन्तोदात्तः आदिः प्रत्येनसि ६।२।२७ कुमारस्यादिरुदात्तः प्रत्येनसि परे कर्म्मधारये प्रतिगतमेनोऽस्य प्रत्येनाः कुमारप्रत्येनाः पूगेष्वन्यतरस्याम् ६।२।२८ पूगा गणास्तेषूक्तस्वा कुमारचातकाः कुमारजीमूताः आद्युदात्तत्वाभावे कुमारश्चेत्येव भवति इगन्तकालकपालभगालशरावेषु द्विगौ ६।२।२९ एषु परेषु पूर्वं प्रकृत्या पञ्चारत्नयः प्रमाणमस्य पञ्चारत्निः पञ्चमासान्भृतः पञ्चमास्यः तमधीष्ट इत्यधिकारे द्विगोर्यप् पञ्चकपालः पञ्चभगालः पञ्चशरावः त्रः संख्याया इति पञ्चशब्द आद्युदात्तः इगन्तादिषु किम् पञ्चाश्वः द्विगौ किं परमारत्निः बह्वन्यतरस्याम् ६।२।३० बहुशब्दस्तथा वा बह्वरत्निः २ बहुमास्यः २ बहुकपालः २ बहुशब्दोऽन्तोदात्तः तस्य यणि सत्युदात्तस्वरितयोरिति भवति॥

२२यस्य ग्रहणमिच्छन्ति॰ तथा च कुमारब्राह्मण इत्यत्र पूर्वपदप्रकृतिस्वरत्वं मतभेदेन भवति आदिः आदिरिति षष्ठ्यर्थे प्रथमा॰ पूर्वत्र कुमारशब्दस्य प्रकृतिभावेन यः स्वरः प्राप्तः सोऽत्रादेर्भवतीति सूत्रार्थः एवं स्थिते फलितमाह॰ कुमारस्यादिरुदात्तः स्यादिति पूगेषु गणवाचिषूत्तरपदे कर्मधारये कुमारस्यादिरुदात्तो वा स्यात् कुमारचातका इति चातकादयः पूगशब्दाः तेभ्यः पूगाञ्ञ्यो ग्रामणीपूर्वादिति ञ्यः तस्य तद्राजस्य बहुष्विति लुक्॰ कुमारश्चेत्येव भवतीति॰ तत्र प्रतिपदोक्तग्रहणपक्षे समासान्तोदात्तत्वम्॰ पंचारत्निरिति॰ पंचारत्नयः प्रमाणमस्येति तद्धितार्थे द्विगुः प्रमाणे लो द्विगोर्नित्यमिति मात्रचो लुक्॰ पंचसु कपालेषु संस्कृतः पंचसु भगालेषु संस्कृतः पंचसु शरावेषु उद्धृतः पंचकपालः पंचभगालः पंचशरावः तद्धितार्थे द्विगुः॥

CC-0. In Public Domain. Digitization by eGangotri



गोर्लुगनपत्यइत्यणोलुक्·पंचाश्वइति·पंचभिरश्वैःक्रीतःपंचाश्वः आर्हीयष्ठक् तस्य अध्यर्द्धेतिलुक्·बहू· बहुशब्दः पूर्वपदंप्रकृतिस्वरंवाइत्यंतादिषूत्तरपदेषुद्विगौ·
पूर्वेणनित्येप्राप्तेविकल्पः बहुशब्दोंतोदात्तइति बहिर्द्वेष्ट्यसाध्यपिवंशोर्नलोपश्चेतिकुप्रत्ययःप्रत्ययस्वरेणांतोदात्तःपक्षेसमासांतोदात्तत्वम्·पूर्ववदिग्ग्रहणप्रत्यय
लुकप्रत्युदाहरणानियोजनीयानि·॥ ॥ दिष्टि·दिष्टिवितस्तीप्रमाणेतेनात्रमात्रचोलुक् अत्रापिपक्षेऽन्तोदात्तत्वंबोध्यम्·सप्तमी·एषतइतिसुप्रकरणादिषुसंका
शादिभ्योण्यःसूत्रान्तइति·मस्जिगमिनमिहनिविश्यशांकृद्दिश्चेतिक्तन्·संयोगादिलोपःक्रश्चेतिषत्वंनित्वादाद्युदात्तः अन्तोदात्तइति·क्तान्तःकोऽद्वेचेतिकप्रत्यया

दिष्टिवितस्त्योश्च ६।२।३१ एतयोःपरतः पूर्वपदंप्रकृत्यावाद्विगौ पञ्चदिष्टिः २पञ्चवितस्तिः २ सप्तमीसिद्धशुष्कपक्वबन्धेष्वकालात्
६।२।३२ अकालवाचिसप्तम्यन्तंप्रकृत्यासिद्धादिषु सांकाश्यसिद्धः साङ्काश्येतिण्यन्तः। आतपशुष्कःभ्राष्ट्रपक्वःभ्राष्ट्रेतिष्ट्रन्नन्तः चक्र
बन्धः चक्रशब्दोऽन्तोदात्तः अकालात्किम् पूर्वाह्णसिद्धः कृत्स्वरेणबाधितः सप्तमीस्वरःप्रतिप्रसूयते परिप्रत्युपापावर्ज्यमानाऽहोरा
त्रावयवेषु ६।२।३३ एतेप्रकृत्यावर्ज्यमानवाचिन्यहोरात्रावयववाचिनिचोत्तरपदेपरित्रिगर्तं वृष्टोदेवः प्रतिपूर्वाह्णम् प्रत्यपररात्रम् उ
पपूर्वरात्रं अपत्रिगर्तम् उपसर्गाआद्युदात्ताः बहुव्रीहितत्पुरुषयोःसिद्धत्वादव्ययीभावार्थमिदम् अपपरीवर्ज्यमानोत्तरपदम् त
योरेववर्ज्यमानार्थत्वात् अहोरात्रावयवाअपिवर्ज्यमानाएवतयोर्भवन्तिवर्ज्येतिकिम् अग्निम्प्रति राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु ६
।२।३४ राजन्यवाचिनांबहुवचनान्तानामन्धकवृष्णिषुवर्त्तमानेद्वन्द्वेपूर्वपदंप्रकृत्या॥ ९ नःप्रत्ययस्वरेण·थाथादिस्वरेण·बाधितःसप्तमीस्वरइति·

सिद्धशुष्कपक्वानांक्तान्तत्वात् बंधस्यघञंतत्वात् थाथादिस्वरेणतत्पुरुषेतुल्यार्थेत्यादिनासप्तम्यन्तस्ययःप्रकृतिभावःसपरत्वाद्बाधितस्तेनपुनर्विधीयते·। राम
कचित्तुकृत्स्वरेणबाधितइतिपाठः तत्रक्तान्तस्ययःस्वरस्थायादिलक्षणस्तेनेत्यर्थःपरिप्रत्युपरिप्रत्युप एतेप्रकृत्यास्युःपरित्रिगर्तमिति·त्रिगर्तंवर्जयित्वेत्यर्थः ३०३
अपपरीवर्जनेइतिकर्मप्रवचनीयसंज्ञा·पंचम्यपाङ्परिभिरितिपंचमी अपपरिबहिरंचवः पंचम्याइत्यव्ययीभावःप्रतिपूर्वाह्णमिति·अपरह्णःपूर्वोभागःपूर्वो

599

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ह्नः अह्नोऽह्न एतेभ्य इत्यह्नादेशः अह्नोऽदन्तादिति णत्वं पूर्वाह्णं प्रति लक्षणेनाभिप्रती आभिमुख्ये इत्यव्ययीभावः उपपूर्वाह्णमिति पूर्वाह्णस्य समीपं अव्ययं विभक्तीत्या दिना सामीप्येऽव्ययीभावः उपपूर्वरात्रमिति रात्रेः पूर्वो भागः पूर्वरात्रः अहः सर्वैकदेशेत्यच् रात्राह्नाहाइति पुंस्त्वम् पूर्वरात्रस्य समीपमुपपूर्वरात्रं उपसर्गा आद्युदात्तानि पूर्वपदानि सिद्धत्वादिति बहुव्रीहौ प्रकृत्या पूर्वपदं तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः इत्यनेन ननु किं पुनः कारणं अपपर्योरेव वर्ज्यमान उदाहृतो नेतरयोस्तत्राह अपपर्योरिति तेन त्रिगर्त्तं वर्जयित्वेत्यर्थे उपत्रिगर्त्तं प्रति त्रिगर्त्तमिति न भवति ननु पूर्वाह्णं पूर्वरात्रं वर्जयित्वेत्यर्थे अपपूर्वाह्णं परिपूर्वाह्णं अपपूर्वरात्रं परिपूर्वरात्रमिति अहोरात्रावयवा अपपर्योः कस्मान्नोदाह्रियन्ते इत्याशंक्याह अहोरात्रावयवा इति वर्ज्यमाना इति वर्ज्यमानग्रहणेनैव सि

श्वाफल्कचैत्रकाः शिनिवासुदेवाः शिनिरा घुराजन्यो लक्षणयातदपत्ये वर्त्तते राजन्येति किम् द्वैप्यभैमायनाः द्वीपे भवा द्वैप्याः भैमेरपत्यं युवा भैमायनः अन्धकवृष्णयः एते न तु राजन्याः राजन्यग्रहणमिहाभिषिक्तवंश्यानां क्षत्रियाणां ग्रहणार्थम् नैते तथा बहुवचनं किं म् संकर्षणवासुदेवौ द्वन्द्वे किम् वृष्णीनां कुमाराः वृष्णिकुमाराः अन्धकवृष्णिषु किम् कुरुपञ्चालाः संख्या ६।२।३५ संख्यावाचि पूर्वपदम्प्रकृत्या द्वन्द्वे द्वादश त्रयोदश त्रेस्त्रयसादेशो नोदात्तो निपात्यते ॥ ९ इत्यत्र पृथगुदाहृता इत्यर्थः वर्ज्येति किमिति वर्ज्यमानाहोरात्रावयवे षु किं अग्निं प्रतीति लक्षणेनाभिप्रती इत्यव्ययीभावः ॥ ❀ ॥ श्वाफल्कचैत्रका इति श्वफल्कचैत्रकाभ्यामपत्येण शिनिबाहुरावतः इति बहिष्यश्रमुयुकुलाहान्तविस्योनि इति सूत्रे ण बाहुलकाच्छौनेऽपि निः तस्य निवृत्त्वं वंचेति द्वैप्या इति द्वीपादनुसमुद्रं यञ् भैमेरपत्यमिति भीमस्यापत्यमत इञ् तदन्ताद्द्वाच्छः ननु च राज्ञोऽपत्ये जातिग्रहणमिति वचनाद्राजन्यशब्दः क्षत्रियजातिवचनः तत्कथं द्वैप्यभैमायनादिन्युक्तं प्रत्युदाहरणं तेषामपि क्षत्रियत्वादत आह राजन्यग्रहणमित्यादि अन्धकवृष्णीनां क्षत्रियत्वाव्यभिचाराद्राजन्यग्रहणमुक्तविशेषपरिग्रहार्थमिति भावः एकादशेति संख्याया अल्पीयस्या इत्येकशब्दस्य पूर्वनिपातः आन्महत इत्यत्र आदिति योगविभागात्यागेकादशभ्य इति निर्देशाद्वा आत्वम् इगभीकापाशल्पतिमर्चिभ्यः कनिति निनादेकस्माच्च आद्युदात्तः द्वादशेति ॥

CC-0. In Public Domain. Digitization by eGangotri

स·
सि·कौ·
बो·त·
२०४

द्यष्टनः संख्यायामित्यात्वम्· त्रयोदशेति· त्रेस्त्रयस् इति त्रयसादेशः· अन्तोदात्तो निपात्यत इति· इदं काशिकानुरोधेनोक्तम्· वस्तुतस्तु त्रयोदश च मे इति लक्ष्यानुरोधा
दाद्युदात्तो निपात्यत इति बोध्यम्॥ ॥ आचार्योपसर्जन· आचार्य उपसर्जनं यस्य आचार्योपसर्जनः· अन्तेवासीति· अन्ते वसतीत्यन्तेवासी· शयवासवासिष्वकालादिति सप्त
म्या अलुक्· सूत्रे षष्ठीवचनस्य स्थाने प्रथमैकवचनं तदाह· आचार्योपसर्जनान्तेवासिनां द्वंद्व इति· पाणिनीयरौढीया इति· वृद्धाच्छः· रौढिशब्दादिञन्तेत्यण्· न ह्यत्र
प्राच्यभरतेष्विति निषेधात्· इदं विशेषणार्थमिति· ननु अन्तेवासिविशेषणार्थं तस्य आचार्योपसर्जनत्वाव्यभिचारात्· किमर्थं पुनर्द्वंद्वविशेषणं विज्ञायत इत्याह।
सकलो द्वंद्व इत्यादि· छान्दसेति छन्दोऽधीत इत्यण्· श्रोत्रियंश्छन्दोऽधीत इति तु न तत्र वाग्रहणानुवृत्तेः· आपिशलपाणिनीये इति· आपिशलस्यापत्यमापिशलिराचार्यः

आचार्योपसर्जनश्चान्तेवासी ६।२।३६ आचार्योपसर्जनान्तेवासिनां द्वन्द्वे पूर्वपदं प्रकृत्या पाणिनीयरौढीयाः· छः स्वरेण मध्योदात्तावेतौ
आचार्योपसर्जनग्रहणं द्वन्द्वविशेषणम् सकलो द्वन्द्व आचार्योपसर्जनो यथा विज्ञायेत तेनेह न पाणिनीयदेवदत्तौ आचार्येति किम्।
छान्दसवैयाकरणाः अन्तेवासीति किम् आपिशलपाणिनीये शास्त्रे। कार्त्तकौजपादयश्च ६।२।३७ एषां द्वन्द्वे पूर्वपदं प्रकृत्या कार्त्तकौजपौ कृ
तस्येदं कुजपस्येदमित्यण्। सावर्णिमाण्डूकेयौ महान्व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु ६।२।३८ महा
च्छ्वदं प्रकृत्या व्रीह्यादिषु दशसु महाव्रीहिः महापराह्णः महागृष्टिः महेष्वासः महच्छब्दोऽन्तोदात्तः सन्महदिति प्रतिपदोक्तसमास एवायं स्वरः

तेन प्रोक्तमापिशलमिति अण्· त्यण् पाणिनिना प्रोक्तं पाणिनीयं· वृद्धाच्छः· आपिशलं च पाणिनीयं च आपिशलपाणिनीये· का "नेह महतो व्रीहिर्महद्व्रीहिः।
र्त्त· कुभूमिः तत्र जाताः कुजाः तान्पातीति कुजपः कृतकुजपाभ्यामपत्ये ऋष्यण्· सावर्णिरिञन्तः माण्डूकेयशब्दो ढक्च मण्डूकादिति ढगन्तः· महाव्रीहिरिति· आन्म राम
हत इत्यात्वम्· महेष्वास इत्यादीति· अनेकारः स्वरितो वानुदात्ते पदादाविति स्वरितो वा· आदिपदेन महाजाबालः महाभारः महाभारतः महाहैलिहिलः महारौरवः· २०४
महाप्रवृद्धः· महच्छब्दोऽन्तोदात्त इति वर्त्तमाने पृषन्महदित्यत्र तथा निपातनात्· सन्महदिति· एतच्च लक्षणप्रतिपदोक्तपरिभाषया लभ्यते· ननु प्रवृद्धग्रहणमन।

600

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्थकंकर्मधारयेनिश्चितिवक्ष्यमाणेनैवसिद्धत्वात्‌· कन्दुहगोगतिकारकपूर्वस्यापिग्रहणमितिप्रहृद्धशब्दस्यक्तान्तत्वादितिचेन्न·कर्मधारयेनिष्ठेत्यत्रापिलक्षणप्रतिपदो
क्तपरिभाषयाक्तान्तेनप्रतिपदोक्तोयःसमासःश्रेण्यादिकृतस्यैवग्रहणमित्यर्थः॥ ॥ क्षुल्लक क्षुल्लकमहच्छब्दौपूर्वपदेप्रकृतिस्वरौस्तः वैश्वदेवशब्देपरे·क्षुल्लमि
ति· आतोनुपसर्गेकः तोर्लीतिपरसवर्णः उष्ट्रः उष्ट्रः पूर्वपदंप्रकृतिस्वरंस्यात्सादिवाम्योःपरतः उषेःष्ट्रन्निति· उषदाहे अस्मात्ष्ट्रन्निति वर्तमाने उषिखनिभ्यांकि
दिति ष्ट्रन्यादितत्वात्‌ गोःसाद·गोशब्दःपूर्वपदंप्रकृत्यासादादिषूत्तरपदेषु· गोसादइत्यादि·सदेर्घञ्·तदन्तेनषष्ठीसमासः·अथवागांसादयतीतिगोसादःसंदार्य

क्षुल्लकश्चवैश्वदेवे ६।२।३९ चात्महान्‌ क्षुल्लकवैश्वदेवं महावैश्वदेवं क्षुधंलातीतिक्षुल्लः तस्मादज्ञातादिषुकेऽन्तोदात्तः उष्ट्रःसादि
वाम्योः ६।२।४० उष्ट्रसादिः उष्ट्रवामिः उषेःष्ट्रनिउष्ट्रशब्दआद्युदात्तः गोःसादसादिसारथिषु ६।२।४१ गोसादः गोसादिः गोसारथिः कुरु
गार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूःपण्यकम्बलोदासीभाराणांच ६।२।४२ एषांसप्तानांसमासानांदा
सीभारादेश्चपूर्वपदंप्रकृत्या कुरूणांगार्हपतंकुरुगार्हपतं उप्रत्ययान्तःकुरुः वृजेरितिवाच्यम्‌ वृजिगार्हपतम्‌ वृजिराद्युदात्तःरिक्तोगु
रुःरिक्तगुरुः रिक्तेविभाषेति रिक्तशब्दआद्युदात्तः असूताजरतीअसूतजरती अश्लीलादृढरूपाअश्लीलदृढरूपा अश्लीलशब्दोन
ञ्समासत्वादाद्युदात्तः श्रीर्यस्यास्तितत्श्लीलंसिध्मादित्वाल्लच्‌ कपिलकादित्वाल्लत्वं पारेवडवेवपारेवडवा निपातनादिवार्थेसमासो
विभक्त्यलोपश्च पारशब्दोघृतादित्वादन्तोदात्तः तैतिलानांकद्रूःतैतिलकद्रूः तितिलिनोऽपत्यंछात्रोवाइत्यण्णन्तः पण्यशब्दोयदन्तत्वादाद्युदात्तः

त्वात्कर्मण्यण्·तस्मादेवणिनिः·गोसादी·तत्रसादसादिनोःकृत्स्वरस्यापवादइत्यर्थः·सारथौसमासस्वरस्य·कुरुइह पण्यकम्बलानां·सप्तसमा ९९ पण्यकम्बलः।
साःतत्रादिनोर्द्वयोःषष्ठ्याःसौत्रोलुक्·इतरेषांपंचानांषष्ठ्याःस्थानेप्रथमैकवचनंतदाह·एषामिति·दासीभाराणामिति·बहुवचननिर्देशादाद्यर्थोवगम्यते·तदाहदासी
भारादेरिति·उप्रत्ययान्तइति·कृग्रोरुच्चेतिकुन्यादित्वात्प्रत्ययस्वरेणान्तोदात्तोयम्‌ आद्युदात्तइति·वृजीवर्जने·इगुपधात्किदितीनन्तत्वात्‌·फिषस्तुइगन्तानांचद्व्यषा

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मित्यादिर्द्वितीयोवोदात्तः एवंकुरुरपि·भिक्षुर्वेदस्यस्त्रयः कर्मधारयाः असहजरत्तौ· अश्लीलदृढरूपेति·असहजाऽश्लीलशब्दौनञ्समासत्वादाद्युदात्तौ· श्रीर्यस्या
स्तीति·श्रीशब्दोलावण्यवचनः कपिलकादित्वाल्लत्वमिति कपोलोलइत्यत्रकपिलकादीनामुपसंख्यानाल्लत्वम्·लावण्यरहितापिकुलत्वादीनामभावात्संस्थान
मात्रेणदृढेत्यर्थः पारेवडवेति·पारेमध्येइत्यव्ययीभावस्तुनतथासतिह्रस्वेदीर्घनिर्देशोऽयुक्तः स्यात् वडवायाःपारंस्यासंभवाच्च· तितिलिनोऽपत्यमिति·तिला:संत्य
स्मिन्निति तिलीनिलशब्दान्मत्वर्थीयइनि टिलोप पृषोदरादित्वात्तिशब्दस्याद्वित्वम्· अत्रयदाऽपत्येऽण् तदानस्तद्धितइतिटिलोपः यदातुवाऽत्रतदानोमिनएय

संज्ञायामितिवक्तव्यम् अन्यत्रसमासान्तोदात्तत्वमेव प्रतिपदोक्तेसमासेक्त्यायइत्येषस्वरोविहितः दास्याभारोदासीभारः देवहूतिः या
स्यतत्पुरुषस्यपूर्वपदप्रकृतिस्वरत्वमिष्यतेनविशिष्यवचनविहितंसमस्तोऽपिदासीभारादिषुद्रष्टव्यः सरायेसपुरन्ध्यांपुरंधारीरंन्ध्रियतेऽस्या
मितिकर्मण्यधिकरणेचेतिकिप्रत्ययः अलुक्छान्दसः नद्विषयस्येत्याद्युदात्तः पुरशब्दः चतुर्थीतदर्थे ६।२।४३ चतुर्थ्यन्तार्थायचत्तद्वाचिन्यु
त्तरपदेचतुर्थ्यन्तम्प्रकृत्या यूपायदारुयूपदारुःअर्थे ६।२।४४ अर्थेपरेचतुर्थ्यन्तम्प्रकृत्यादेवार्थम् क्तेच ६।२।४५ क्तान्तेपरेचतुर्थ्यन्तम्प्रा
कृत्यागोहितम् कर्मधारयेऽनिष्ठा ६।२।४६ क्तान्तेपरेपूर्वमनिष्ठान्तम्प्रकृत्या श्रेणिकृताः श्रेणिशब्दआद्युदात्तः पूगकृताः पूगशब्दोऽन्तो
दात्तः कर्मधारयेकिम्·श्रेण्याकृतंश्रेणीकृतम्·अनिष्ठाकिम्·कृताकृतम्॥ ॥ नपत्यइतिप्रकृतिभावेप्राप्तेनान्तस्यटिलोपेसब्रह्मचारीत्य
नेनटिलोपः पण्यशब्दइतिअवद्यपण्येतियत्नोनावइत्याद्युदात्तः॥ ॥ संज्ञायामिति नियतप्रमाणकस्यनियतमूल्यस्यकेवलस्यैषासंज्ञा·समासान्तोदात्त
त्वमेवेति· ननुपण्यशब्दस्यक्त्यप्रत्ययांतत्वात्तत्पुरुषेतुल्यार्थेत्यादिनापूर्वपदप्रकृतिस्वरेणभाव्यमतआह प्रतिपदोक्तेहीति· कृत्यतुल्याख्याअजात्येतियःकृत्य
समासः अयंतुविशेषणंविशेष्येणेतिसामान्यलक्षणविहितः केवलशब्दस्यजातिवचनत्वात्· नचकृत्यतुल्याख्याअजात्येत्यस्यवैयर्थ्यंशंक्यं·तद्धिगुणक्रियावाचि
नोरनियमेनपूर्वनिपातप्रसंगेकृत्यान्तस्यपूर्वनिपातार्थंवचनंनतुजातिनिषेधार्थं अजात्येतिवचनन्यापसिद्धार्थानुवादएवेतिस्थितमदासीभारइति·इंसेदे

॥ सिद्धान्तकौमुदी ॥

601

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तनिश्रुति स्रौणदासीशब्द अन्तोदात्तः देवहूतिरिति· देवः पचाद्यजन्तः यस्यन्त्युरूपस्येत्यादि· एतेन दासीभारादेराकृतिगणत्वं दर्शितम्· चतुर्थी· तस्मै इदं तदर्थं तच्छब्देन चतुर्थ्यन्तस्यार्थ उच्यते तदाह चतुर्थ्यन्तार्थायेति यूपदार्विति· निरूढिः दीर्घश्चेत्यनुवर्तमाने कुयुभ्यां चेति पः निपातदाद्युदात्तो यूपशब्दः देवार्थमिति· देवः पचाद्यजन्तः गोहितमिति· चतुर्थी वाशिष्येत्यादिना चतुर्थी· आद्युदात्त इति· श्रिण्मे वायाम् वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् इति निप्रत्ययस्य नित्त्वादाद्युदात्तः पूगशब्द इति सुदिरोर्गगौ बाहुलकात्स्रोपिग कृत्ता कृत्तमिति· क्तेन नञ्विशिष्टेनानञिति समासः अनिष्ठेत्यनुच्यमाने इह देवस्नातः अत्यादि समासापेक्षया क्तेन नञ्वि।

अहीने द्वितीया ६।२।४७ अहीनवाचिनि समासे क्तान्ते परे द्वितीयान्तं प्रकृत्या कष्टश्रितः ग्रामगतः कष्टशब्दोऽन्तोदात्तः ग्रामशब्दो नित्स्वरेण अहीने किम् कान्तारातीतः अनुपसर्ग इति वक्तव्यम् नेह सुखप्राप्तः थाथेत्यस्यापवादोऽयम् तृतीया कर्मणि ६।२।४८ कर्मवाचके क्तान्ते परे तृतीयान्तं प्रकृत्या रुद्रहतः महाराजहतः रुद्रैर्हतः कर्मणि किम् रथेन यातो रथयातः गतिरनन्तरः ६।२।४९ कर्मार्थे क्तान्ते परेऽव्यवहितो गतिः प्रकृत्या थाथेत्यस्यापवादः पुरोहितम् अनन्तरः किम् अभ्युद्धृतः कारकपूर्वपदस्य तु सति शिष्टस्वरत्वात् थाथादिस्वर एव दूरादागतः तादौ च निति कृत्यतौ ६।२।५० तकारादौ निति तुशब्दवर्जिते कृति परेऽनन्तरो गतिः प्रकृत्या अग्नेरायो वृत्तमस्य प्रभृतौ सङ्गतिं गोः कृत्स्वरापवादः तादौ किम् प्रजल्पाकः निति किम् प्रकर्ता तृजन्तः अतौ किम् आगन्तुः॥ १ शिष्टेनेति समासस्य प्रतिपदोक्तत्वादिति हरदत्तः॥ ःः॥ अहीने हीनं त्यक्तं

न हीनमहीनं अहीनवाचि समास इति· पूर्वपदद्वारेण समासस्याहीनवाचित्वम्· कष्टश्रित इति द्वितीया श्रितेति समासः कष्टशब्द इति· क्तान्तत्वात्· ग्रामशब्द इति· ग्रसेराचेति मन् प्रत्ययान्त आद्युदात्तः अनुपसर्ग इति वक्तव्यमिति· सूत्रेऽहीनग्रहणमपनीयानुपसर्गग्रहणं कर्तव्यमित्यापकत्वादित्यर्थः थाथेत्यस्यापवाद इति· तथा च प्रत्युदाहरणे थाथादिस्वर इति भावः तृतीया त्वौतास इति· त्वया जताः रक्षिताः त्वोतासः प्रत्ययोत्तरपदयोश्चेति मपर्यन्तस्य त्वादेशे ओदकारलोपश्छान्दसः अवतेः क्तः ज्वरत्वरेत्यूठ् एत्येधत्यूठ्स्विति वृद्धिरिडागमस्य चाभावश्छान्दसः तदन्तात् जसः आज्जसेरसुगित्यसुगागमः पूर्वपदप्रकृति॥ ःः॥ ःः॥ ःः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



स्वरे कृते एकादेश उदात्तेनोदात्तः ततः स्वरितप्रचयौ रुगन्त इति रोरेणि लुक्कृते विहितः महाराजहत इति· राजाहः सखिभ्यष्टजिति टजन्तो महाराजशब्दोऽन्तोदा
त्तः रथेन यात इति· गत्यर्थत्वात्कर्तरि क्तः· पुरोहितमिति· पूर्वाधराववराणामसि पुरधवश्चैषामित्यसिप्रत्ययान्तः प्रत्ययस्वरेणान्तोदात्तः पुरः शब्दः अत्र समासान्तोदा
त्तत्वम्· अव्ययपूर्वपदप्रकृतिस्वरः कृत्स्वरथाथादिस्वरद्वयेनेषु प्राप्तेषु पूर्वपदप्रकृतिस्वरो भवति· अभ्युद्धृत इति· इह हृतशब्दस्योच्छब्देन समासे पुरोहित
मित्यत्रेव गतिस्वरेणाद्युदात्त उद्धृतशब्दस्तस्य पुनरभिशब्देन समासः तस्य कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति परिभाषया उद्धृतशब्दः क्तान्त उत्तरपदं
एवं समासान्तोदात्तत्वे प्राप्ते तद्बाधकाव्ययपूर्वपदप्रकृतिस्वरत्वेन तदपवादे कृत्स्वरे तदपवादस्याथादिस्वरः प्राप्तस्तमपोद्यायमेवायं स्वरः स्यात्सोऽनन्तरग्रहणेन बा
ध्यते· नन्वनन्तरग्रहणेनाप्यसौ दुर्वारः कृद्ग्रहणपरिभाषया उद्धृतशब्दस्य क्तान्तत्वेऽभेस्तदानन्तर्यमस्त्यादिति चेन्नैवम्· अनन्तरग्रहणसामर्थ्याद्धि धातोरनन्तरा गतिरा
श्रीयते अभिस्त्वनन्तरा· नन्वेवं माभूदभेः स्वर इष्टसिद्धिस्तु कथम्· अभ्युद्धृतशब्दे हि उच्छब्दस्य स्वर इष्यते संसृष्टं घनमुभयं समाकृतमिति मंत्रे समाकृतशब्देऽप्या
ङः स्वरदर्शनात्· नचासौ प्रकृतसूत्रेण सिद्ध्यति· प्रथमसमासे तत्स्वरत्वेनावपि द्वितीयसमासे थाथादिस्वरस्य प्राप्तेरुक्तत्वात्· नच तं बाधित्वा गतिस्वरः प्रवर्तत
इति वाच्यम्· द्वितीयसमासे उदः पूर्वपदत्वाभावात् अत्रोच्यते· धातोरनन्तर इति व्याख्यानादेव पूर्वपदत्वं विनापि स्वरोऽयं प्रवर्तते नेन हि कप्रकृतिभूतं धातुं प्रति पूर्वपदत्वं
गतेः संभवति· तस्मादभ्युद्धृतं समाकृतमिति तावत्सुस्थम्· ननु दूरादागत इत्यादौ कारकपूर्वेऽपि गतिस्वरः स्यात्· दृश्यते तु थाथादिस्वरः अत आह कारकपूर्वेति· अ
यंभावः अनन्तरशब्दोऽयमनन्तरमपेक्ष्य प्रवर्तते तत्र चानन्तरो गतिरित्युक्ते अनन्तरोऽपि सन्निधानाद्गतिरेव प्रतीयते· ततश्चापूर्वपदार्थमप्यनन्तरग्रहणं गतिद्व
यसमवधाने द्व्यानन्तरस्य प्रकृतिस्वरत्वं प्रापयतीति दूरादागता दौ न दोष इति· अथवा कारकाद्दत्तश्रुतयोरिति सूत्रे कारकादिति योगो विभज्यते· क्तः ग्रहणं गा
तिग्रहणं चानुवर्तते कारकात्परं क्तान्तं सगतिकमुत्तरपदमन्तोदात्तं स्यादित्यर्थः तत्र· दूरादागत इत्यादौ थाथादिसूत्रेणैव सिद्धत्वात्· दूरादागत इत्यादौ गतिरनन्तर
इत्यस्य बाधनार्थमेवेदं सूत्रमिति दिक्· दूरादागत इति· स्तोकान्तिके ति समासः पंचम्याः स्तोकादिभ्य इत्यलुक्· प्रभृताविति· क्तिनर्थं प्रजस्याक इति· जल्पभिक्षकुट्टलुण्ठ
वृङः षाकन्· आगन्तुरिति· सितनिगमिमस्यविधाञ्क्रुशिभ्यस्तुन्· ननु कृतीति व्यर्थम्· तथा हि· गतेरयं स्वरो विधीयते· गतिसंज्ञा च धातुमाक्षिपति· स च प्रत्ययविशिष्ट एव प्र



602

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योगार्हः धातोश्च ह्येप्रत्ययाः तिङः कृतश्च· तत्र तिङन्ते पूर्वपदत्वासंभवात् कृदन्त एव भविष्यतीति चेत् सत्यम्· कृद्ग्रहणं कृत्संज्ञाप्रवृत्तिकालोपलक्षणार्थं तेन नकृदुपदेशेनादित्वलाभात् क्लपितेत्यादि सिद्ध्यति· स्वरप्रवृत्तिवेलायां तादित्वाभावेपि पूर्वं तत्सत्त्वात् आदिग्रहणं शक्यमकर्त्तुम्· यस्मिन् विधिरित्येव सिद्धेः॥ ꣸ ॥ तवैचां॥ अन्तउदात्त इति· कथं पुनरन्तरेणोदात्तग्रहणमुदात्तो भवतीत्ययमर्थो लभ्यते· शृणु प्रकृत्यन्तनिवर्त्तने तत्रैवमभिसंबंधः क्रियते· तवैप्रत्ययान्तस्य यः प्रकृत्याश्रयः स्वरः प्राप्तः सोन्तस्य भवतीति स चोदात्त एवेति युगपद्ग्रहणं पर्यायनिवृत्त्यर्थम् अन्वेतवाउ इति· उपसर्गोश्चाभिवर्जमित्यनुदात्तः अनिगंतोंचतौ· परांच इति।

तवैचान्तश्च युगपत् ६।२।५१ तवैप्रत्ययान्तस्यान्त उदात्तो गतिश्चानन्तरः प्रकृत्या युगपच्चैतदुभयं स्यात् अन्वेतवाउ कृत्स्वरापवादः अनिगन्तोऽञ्चतौ वप्रत्यये ६।२।५२ अनिगन्तो गतिर्वप्रत्ययान्तेऽञ्चतौ परे प्रकृत्या स्यात् पराञ्च स्यात् अनिगन्त इति किम् प्रत्यञ्चोयं तु चु स्वरात् परात्वादयमेव जहित्वा स्तानि कृणुहीपराचः वप्रत्यये किम् उदञ्चनम् न्यधी च ६।२।५३ वप्रत्ययान्तेऽञ्चतौ विगतौ अपि न्यधी प्रकृत्या नङ्गतानः उदात्तस्वरितयोर्यण इति अञ्चतेरकारः स्वरितः अध्यङ् ईषदन्यतरस्याम् ६।२।५४ ईषत्कडारः २ ईषदित्ययमन्तोदात्तः ईषद्भेदइत्यादौ कृत्स्वर एव हिरण्यपरिमाणं धने ६।२।५५ सुवर्णपरिमाणवाचि पूर्वपदं वा प्रकृत्या धने द्वे सुवर्णे परिमाणमस्येति द्विसुवर्णं तदेव धनं द्विसुवर्णधनं २ बहुव्रीहावपि परत्वाद्विकल्प एव हिरण्यं किम् प्रस्थधनम् परिमाणं किम् काञ्चनधनम् धने किम् निष्कमाला।

अन्विगित्यादिना किन्· स च वकारमात्रं ककारादीनामनुबंधत्वात्· उगिदचामिति नुम्· परा शब्द आद्युदात्तः प्रत्यंच इति· कृदुत्तरपदप्रकृतिस्वरः परत्वादिति चुस्वरस्यावकाशः दधीचा· यत्र गतिर्नास्ति अनिगंतस्वरस्यावकाशः परांचः परांच इत्यादावुभयप्रसंगे परत्वादनिगंतस्वर एव भवति· न चायं युक्तो विप्रतिषेधः चुस्वरः सतिशिष्टः भसंज्ञायामल्लोपे च कृते प्राप्तत्वात् सत्यम्· नायं विप्रतिषेधः किं तर्हि इष्टिरेव चोरनिगंतोंचतौ वप्रत्यय इत्येव स्वर इष्यत इति हरदत्तः इहापि मूले। परत्वादित्यस्येष्टत्वादित्यर्थः न्यधी च· अत्रापि चुस्वरादयमेव कृत्स्वरापवादो योगौ· ईषदन्य· ईषत्कडारः· पूर्वपदं प्रकृतिस्वरं वा स्यात् अन्तोदात्त इति·॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



फिट्स्वरेण एतदभावे समासांतोदात्तत्वम्· ईषद्भेद इति· ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्· ज्ञान्त स्वर एव भवतीति· परत्वात् अथ वा ईषद्गुणवचनेनेति प्रतिपदो
क्तसमासग्रहणादुपपदसमासे ऽस्याप्रवृत्तिरिति द्विसुवर्णो इति· पञ्चकृष्णलको माषस्तैः सुवर्णास्तु षोडश· पलं सुवर्णाश्चत्वार इति· द्विसुवर्णमिति· पक्षे समासस्वरः बहुव्रीहावपी
ति· अत्र तत्पुरुषाधिकाराभावात्॥ ॥ प्रथमो· अचिरोपसंपत्तिरचिरोपसंश्लेषः अभिनवत्वमित्यर्थः तदाह अभिनवत्व इति अचीति किमिति· अचिरोपसंपत्ताविति कि
मर्थमित्यर्थः प्रथमवैयाकरण इति· वैयाकरणानामाद्यः मुख्यो वायः प्रथमवैयाकरणः शब्दः स नित्यमन्तोदात्त एव· कतर· एतौ पूर्वपदभूतौ कर्मधारये प्रकृतिस्व

प्रथमोऽचिरोपसम्पत्तौ ६।२।५६ प्रथमशब्दो वा प्रकृत्या ऽभिनवत्वे प्रथमवैयाकरणः २ सम्प्रति व्याकरणमध्येतुं प्रवृत्त इत्यर्थः प्रथमश
ब्दः प्रथेरमजन्तः अचिरेति किम् प्रथमो वैयाकरणः कतरकतमौ कर्म्मधारये ६।२।५७ वा प्रकृत्या कतरकठः २ कर्म्मधारयग्रहणमुत्तरार्थम्
इह तु प्रतिपदोक्तत्वादेव सिद्धम् आर्य्यो ब्राह्मणकुमारयोः ६।२।५८ आर्य्यकुमारः २ आर्य्यब्राह्मणः २ आर्य्यो ण्यदन्तत्वादन्तस्वरितः आ
र्यः किम् परमब्राह्मणः ब्राह्मणादीति किम् आर्य्यक्षत्रियः कर्म्मधारय इत्येव राजा च ६।२।५९ ब्राह्मणकुमारयोः परतो वा प्रकृत्या कर्म्म
धारये राजब्राह्मणः २ राजकुमारः २ योगविभाग उत्तरार्थः षष्ठी प्रत्येनसि ६।२।६० षष्ठ्यन्तो राजा प्रत्येनसि परे वा प्रकृत्या राजप्रत्येनाः २ षष्ठी किम्
अन्यत्र न क्तेनित्यार्थे ६।२।६१ क्तान्ते परे नित्यार्थे समासे पूर्वं वा प्रकृत्या नित्यप्रहसितः २ कालाद्इति द्वितीयासमासो ऽयम् नित्यशब्दस्य
दन्त आद्युदात्तः हसितइति थाथादिस्वरेणान्तोदात्तः नित्या ऽर्थे किम् मुहूर्त्तप्रहसितः॥ ८८ गौवास्यानां कतरकतमौ डतरडतमयोश्चित्वादन्तोदात्तौ·
इहत्वित्यादि· कतरकतमौ जातिपरिप्रश्न इति प्रतिपदोक्तोऽयं समासस्तस्यैव ग्रहणं· स च कर्मधारय एव तस्मान्नेहार्थः कर्मधारयग्रहणेनेति भावः आर्यो ब्रा
ह्मणः ब्राह्मणकुमारयोरुत्तरपदयोरार्यः पूर्वपदे प्रकृतिस्वरं वा स्यात्कर्मधारये· स्वरितान्त इति· तित्स्वरितमित्यनेन· ब्राह्मणेति किमिति· ब्राह्मणकुमारयोरिति
किमर्थमित्यर्थः राजब्राह्मण इति· राजशब्दो ब्राह्मणोऽनाद्यर्षोद्धृतो तदिति सामानाधिकरण्यात्कर्मधारयः राजशब्दः कनिन्प्रत्ययान्तत्वादाद्युदात्तः उत्तरार्थ इति·॥ ८९॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उत्तरो विधिः राजशब्दस्यैव यथा स्यात् दार्यशब्दस्य मा भूत् · यथासंख्याभावोऽपि पृथग्योगकरणस्य प्रयोजनं द्रष्टव्यम् राजप्रत्येना इति · प्रतिगतमेनः पापं यस्य प्रत्येनाः रा
ज्ञः प्रत्येनाः अन्यत्र नेति · राजा वासौ प्रत्येनाश्च राजप्रत्येना इत्यत्र द्वितीयासमासोऽयमिति · द्वितीया पुनरत्र न संयोगे · अथवा ऽकर्मकधातुभिर्योगे देशः कालो भावो
गन्तव्यो ध्वा च कर्मसंज्ञक इति वाच्यम् · त्यवनत इति · त्यन्ते ध्रुवे इति त्यप् · मुहूर्तं प्रहसित इति · थाथादिस्वरः समासस्वरस्य द्वितीया पूर्वपदप्रकृतिस्वरो वा बाधकस्तस्या

ग्रामः शिल्पिनि ६।२।६२ वा प्रकृत्या ग्रामनापितः २ ग्रामशब्दस्याद्युदात्तः ग्रामः किम् परमनापितः शिल्पिनि किम् ग्रामरथ्या राजा च
प्रशंसायाम् ६।२।६३ शिल्पिवाचिनि परे प्रशंसार्थं राजपदं वा प्रकृत्या राजनापितः २ राजकुलालः २ प्रशंसायां किम् राजनापितः शिल्पि
नि किम् राजहस्ती आदिरुदात्तः ६।२।६४ अधिकारोऽयम् सप्तमीहारिणौ धर्म्येऽहरणे ६।२।६५ सप्तम्यन्तं हारिवाचि च आद्युदात्तं धर्म्ये परे
देयं यः स्वीकरोति स हारीत्युच्यते धर्म्यमित्याचारनियतं देयम् मुकुटेकार्षापणम् हलेद्विपदिका संज्ञायामिति सप्तमीसमासः का
रनाम्नि चेत्यलुक् याज्ञिकाश्वः वैयाकरणहस्ती क्वचिदयमाचारः मुकुटादिषु कार्षापणादिदातव्यं याज्ञिकादीनां त्वश्वादिरिति धर्म्ये
ति किम् स्तम्बेरमः अहरणे किम् वाडवहरणम् वडवाया अयं वाडवः तस्य बीजनिषेकादुत्तरकालं शरीरपुष्ट्यर्थं यद्दीयते तद्धरणमित्यु
च्यते परोऽपि कृत्स्वरो हारिस्वरेण बाध्यते अहरण इति निषेधेन ज्ञाप्यते तेन वाडवहार्यमिति हारिस्वरः सिध्यति युक्ते च ६।२।६६ युक्तवा
चिनि समासे पूर्वम् आद्युदात्तम् गोवल्लवः कर्तव्ये तत्परो युक्तः ॥९९॥ थाथादिस्वरः तस्यापि पाष्ठिकोऽपवादोऽयं ॥ ःँ ॥ ग्रामः ग्राम इति स्वरूपग्रहणं शिल्पिन्य

र्थग्रहणं ग्रामशब्दः पूर्वपदं प्रकृतिस्वरं वा स्यात् शिल्पिवाचिन्युत्तरपदे ग्रामनापित इति · षष्ठीसमासः आद्युदात्त इति · ग्रसेराचे त्रिमनिन्नित्वादाद्युदात्तः राजनापि
त इति · कर्मधारये राजगुणाध्यारोपेणोत्तरपदार्थस्य प्रशंसा षष्ठीसमासे च राजयोग्यतया तस्य प्रशंसा · स हि कर्मणि प्रवीणत्वाद्राज्ञां प्रतियोग्यो भवति · राजार्थमि
त्युक्ते प्रशंसा गम्यते आदिरुदात्तः पूर्वपदमित्यस्य हार्यान्वयस्याविपरिणामः सर्वत्र चात्र प्रकरणे पूर्वपदविषये षष्ठ्यर्थे प्रथमा सप्तमी हारीत्यावश्यके णिनिः जनपदेषु।

CC-0. In Public Domain. Digitization by eGangotri



मेकुलेवापरंपरयाऽतः सदाचारो धर्मस्तस्मादनपेतं धर्म्यम् · धर्मपथ्यर्थेतियत् · तेनच प्राप्यमित्यर्थेनौवयो धर्मेत्यादिनायत् आचारवशादवश्यंकर्त्तव्यमित्यर्थः हारिरण्युदाहरण
न्याहयात्रिकाश्वेति · षष्ठीसमासः कर्मकरवर्द्धितकइति · वर्द्धितकोनाममूलेस्थूलोऽग्रेसूक्ष्मः ओदनपिंडः सः कर्मकराय दीयते अन्यथाकर्मनकुर्यादितिनत्वयंधर्मः वाडवहर
णमिति · क्वचिदयमाचारः बीजनिषेकानंतरंवाडवायशरीरपुष्ट्यर्थं योग्यमश्वादिदातव्यंयद्दीयतेतद्वाडवहरणमित्युच्यते · अत्रास्मिन्स्वरेत्निषिद्धेक्तान्तस्वरेप्राप्तेऽतोभावकर्म
वचनेइत्युत्तरपदान्तोदात्तत्वम् · ननुपरत्वादेवायंस्वरोभविष्यतिकिंप्रतिषेधेनेत्यतआह · परोपीति · युक्तवाचिनीति · युक्तः कर्त्तव्येतत्परः तद्वाचिनीत्यर्थः · गोवल्लवः वल्लवाद
यः शब्दागवादीनांपालकवचनाः ॥ ꣸ ॥ विभाषा · अध्यक्षशब्देपरेपूर्वपदमाद्युदात्तंवास्यात् अध्यक्षशब्दोपिसमासेयुक्तवाच्येवेतिपूर्वेणनित्येप्राप्तेविकल्पः · पापं · पाप

विभाषाऽध्यक्षे ६।२।६७ गवाध्यक्षः २ पापञ्चशिल्पिनि ६।२।६८ पापनापितः पापाणके इतिप्रतिपदोक्तस्यैवग्रहणान्नषष्ठीसमासेन गोत्राऽ
न्तेवासिमाणवब्राह्मणेष्वधिक्षेपे ६।२।६९ भार्य्यासौश्रुतः सुश्रुतोपत्यस्यभार्य्याप्रधानतयाक्षेपः अन्तेवासी कुमारीदाक्षाः ओदनपाणिनीयाः
कुमार्य्यादिलाभकामायदाक्ष्यादिभिः प्रोक्तानिशास्त्राण्यधीयन्तेतएवंक्षिप्यन्ते भिक्षामाणवः भिक्षांलप्स्येऽहमितिमाणवः भयब्राह्मणाः
भयेनब्राह्मणाः सम्पद्यन्ते गोत्रादिषुकिम् दासीश्रोत्रियः क्षेपेकिम् परमब्राह्मणः अङ्गानिमैरेये ६।२।७० मद्यविशेषोमैरेयः मधुमैरेयः
मधुविकारस्यमध्वङ्गम् अङ्गानिकिम् परममैरेयः मैरेयेकिम् । पुष्पासवः ॥ ९९ मितिस्वरूपग्रहणं शिल्पिनीत्यर्थग्रहणं व्याख्यानात् शिल्पिवाचिनिपरे
पापशब्दः पूर्वपदमाद्युदात्तंवास्यात् गोत्रेतिवासिगोत्रवाचिनिअन्तेवासि वाचिनिचोत्तरपदेमाणवब्राह्मणयोश्चपरतः क्षेपवाचिनिसमासेपूर्वपदमाद्युदात्तंस्यात् · भार्या
सौश्रुत इति · सुश्रुणोतीति सुश्रुत् तस्यापत्यंसौश्रुतः भार्याप्रधानत्वेतिभार्याप्रधानः सौश्रुत इतिशाक पार्थिवादित्वादुत्तरपदलोपिसमास इतिदर्शयति · दक्षेणप्रो
क्तं दाक्षंतदधीते दाक्षः कुमार्यादिलाभकाम इति · तत्प्रोक्तेग्रंथेअदायामसत्यामपिकुमार्यादिलोभकामः संस्तत्रप्रवर्त्ततेतत एवंक्षिप्यते · पूर्ववत्समासः भयब्राह्मण
इति · तृतीयेतियोगविभागात्समासः यो ऽब्राह्मणः सन्राजदंडादिभयेनब्राह्मणाचारंकरोतिसएवमुच्यते · अंगानि · अंगमारंभकं · बहुवचनं स्वरूपविधि ॥ ६ ॥

604



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरासार्थम्· मैरेयशब्दे उत्तरपदे तदर्थारंभकवाचीनि पूर्वपदान्याद्युदात्तानि स्युः मद्यविशेष इति· सुराव्यतिरिक्तं मद्यं मैरेयमित्यर्थः॥ ॐ॥ भक्ताख्या अन्नवाचिपूर्वपदमाद्युदा
त्तं स्यात्तदर्थेषूत्तरपदेषु· अत्र बहुवचननिर्देशादेव स्वरूपविधिनिरासे सिद्धे आख्याग्रहणं भक्तस्य विशेषवाचिनां भिक्षादीनां ग्रहणार्थं· अन्यथा पर्यायाणामेवान्नादीनां
ग्रहणं स्यात्· भिक्षाकंसादयः षष्ठीसमासाः तादर्थ्ये चतुर्थीसमासस्तु न भवति· प्रकृतिविकारएव तस्येष्टत्वात्· बहुव्रीहिरिति· तत्पुरुषश्चेदन्तोदात्तः गोविडाल· उपमानशब्दे
प्रत्येकं संबंधादेकवचनं· गवादिषूपमानवाचिषूत्तरपदेषु पूर्वपदमाद्युदात्तं स्यात्· धान्यगव इति· अत्रोपमितसमासे गोरतद्धितलुकीति टच्· अत्र पूर्वपदाद्युदात्तविधा

भक्ताख्यास्तदर्थेषु। ६।२।७१। भक्तमन्नं भिक्षाकंसभाजीकंसः भिक्षादयोऽन्नविशेषाः भक्ताख्याः किम् समाशशालयः समशनं समाशः इति क्रियामात्रमुच्य
ते तदर्थेषु किम् भिक्षाप्रियः बहुव्रीहिरयमत्र पूर्वपदमन्तोदात्तम् गोविडालसिंहसैन्धवेषूपमाने ।६।२।७२। धान्यगवः गोविडालः तृणसिंहः स
क्तुसैन्धवः धान्यं गौरिवेति विग्रहः व्याघ्रादिः गवाकृत्या सन्निवेशितं धान्यं धान्यगवशब्देनोच्यते उपमाने किम् परमसिंहः अके जीविकार्थे ।६।२
।७३। दन्तलेखकः यस्य दन्तलेखनेन जीविका नित्यं क्रीडेति समासः अके किम् रमणीयकर्ता जीविकार्थे किम् इक्षुभक्षिकां मे धारयसि प्राचां
क्रीडायाम् ।६।२।७४। प्राग्देशवासिनां या क्रीडा तद्वाचिनि समासे अकप्रत्ययान्ते परे पूर्वमाद्युदात्तं स्यात् उद्दालकपुष्पभञ्जिका संज्ञायामिति ण्वु
ल् प्राचां किम् जीवपुत्रप्रचायिका इयमुदीचां क्रीडा क्रीडायां किम् तवपुष्पप्रचायिका पर्याये ण्वुल्॥ ९ न सामर्थ्यादत्र च क्रिस्वरो बाध्यते· उपमानार्थोपा

पत्रोदाहरणे यथासंभवति सत्यायोजयितव्यः तत्र दिङ्मात्रं दर्शयति गवाकृत्येत्यादि· आकृतिः संस्थानं· संनिवेशितं व्यवस्थापितं एवमन्यत्रापि· यत्किंचित्सादृश्यं योजयि
तव्यं अके· जीविकार्थवाचिनि समासे अकप्रत्ययान्ते उत्तरपदे पूर्वपदमाद्युदात्तं स्यात् दंतलेखक इति· ण्वुल्तृचाविति ण्वुल् प्राचां प्राचां क्रीडायामिति· श्रुतयोरेवान्वयसं
भवान्मते नेत्यध्याहारेण न युज्यते इति तत्राह प्राग्देशवर्तिनां या क्रीडेति· अजीविकार्थमिदं· उद्दालकपुष्पभंजिकेति· नित्यं क्रीडेति समासः॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



अन्ते नियुक्ते· युजिर्योगे इत्यस्मान्नियुक्त इति रूपम्· नियुक्तः अधिकृतः स च कस्मिंश्चित्कर्तव्ये तत्परो न भवतीति नियुक्त इत्यनेन सिध्यति· युक्त इति सूत्रे हि युज समाधौ दिवा
दिरात्मनेपदी गृह्यते समाधिस्तत्परता· अत्र रौधादिकस्य स्वरितेतो ग्रहणं योगः संबंधमात्रं· छत्रधार इति· कर्मण्यण्· शिल्पि· नियुक्ते चेत्येव सिद्धे कृञः प्रतिषेधार्थं वचनं· तं
तुवाय इति· ह्वावामश्चेत्यण्· आतो युक्· संज्ञायाम्· संज्ञायां विषयेऽणन्ते उत्तरपदे पूर्वपदमाद्युदात्तं स्यात् स चेदण् कृञो न भवति गोतंति· गोतंतियवं पाले आद्युदात्ताः स्युः
पालशब्दे परे गोपाल इति· गां पालयतीति विग्रहः· तंतिपाल इति· तंतुविस्तारे क्तिन् तंतिर्वत्सानां बंधनरज्जुः णिनि· णिन्यन्ते उत्तरपदे पूर्वपदमाद्युदात्तं स्यात्· उपमानं उष्ट्र।

अन्ते नियुक्ते। ६।२।७५॥ अणन्ते परे नियुक्तवाचिनि समासे पूर्वमाद्युदात्तम्। छत्रधारः। नियुक्ते किम्। काण्डलावः। शिल्पिनि चाकृञः। ६।२।७६। शिल्पि
वाचिनि समासे अणन्ते परे पूर्वमाद्युदात्तं स चेदण् कृञः परो न भवति। तन्तुवायः। शिल्पिनि किम्। काण्डलावः। अकृञः किम्। कुम्भकारः। संज्ञायां च।
६।२।७७। अणन्ते परे तन्तुवायो नाम कृमिः। अकृञ इत्येव। रथकारो नाम ब्राह्मणः। गोतन्तियवं पाले। ६।२।७८। गोपालः। तन्तिपालः। यवपालः। अनि
युक्तार्थो योगः। गो इति किम्। वत्सपालः। पाल इति किम्। गोरक्षः। णिनि। ६।२।७९। पुष्पहारी। उपमानं शब्दार्थप्रकृतावेव। ६।२।८०। उपमानवाचि पूर्वं णि
न्यन्ते परे आद्युदात्तम्। उष्ट्रक्रोशी। ध्वांक्षरावी। उपमानग्रहणमस्य पूर्वयोगस्य च विषयविभागार्थम्। शब्दार्थप्रकृतौ किम्। वृकवञ्ची। प्रकृतिग्रह
णं किम्। प्रकृतिरेव यथोपसर्गनिरपेक्षा शब्दार्था तत्रैव यथा स्यात्। इह माभूत्। गर्दभोच्चारी॥

९ क्रोशीत्यादि· कर्तर्युपमाने इति णिनिः· शब्दार्थप्र
कृतौ किमिति· सूत्रं किमर्थमित्यर्थः· वृकवञ्चीति· कृत्स्वर एव भवति· प्रकृतिरेवेत्यादि· असति प्रकृतिग्रहणे शब्दार्थात्परो णिनिस्तदन्ते उत्तरपदे इत्यर्थो विज्ञायेत· तथा च य
त्रापि धातूपसर्गसमुदायाच्छब्दार्थात्परो णिनिस्तत्रापि स्यात्· कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति परिभाषया णिन्यन्तोत्तरपदत्वानपायात्· प्रकृतिग्रहणे तु न भव
ति यो ऽत्र धातुर्नासौ शब्दार्थः यश्च शब्दार्थो धातूपसर्गसमुदायो न ततो णिनिर्विहित इति भावः· एवं किं शब्दार्थप्रकृतावुपमानमेवेत्येवं नियमो माभूत्॥ ॥



605

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

युक्तारोह्या· युक्तारोह्यादयः समासा आद्युदात्ताः स्युः· युक्तारोही त्यादि· अत्र लिनी त्येव सिद्धे पूर्वोत्तरपदनियमार्थं सूत्रं· यत्र युक्तादीन्येव पूर्वपदानि आरोह्यादीन्येवोत्तरपदानि तत्रैवेय
पास्यादित्यर्थः· क्षीरहोतेति· याजकादित्वात्षष्ठीसमासोयम्· समासस्वरापवादेन्तस्वरे प्राप्ते तदपवादे मन्क्तिन्निति तदपवादोयम्· दीर्घकाश· दीर्घान्तं पूर्वपदं काशादीनि च पू
र्वपदानि आद्युदात्तानि स्युर्जे उत्तरपदे· कुटीज इति· सप्तम्यां जनेर्डः· उपसरज इति· स्त्रीगवादिषु पुंसां गर्भाधानाय प्रथमम् उपसरणम् उपसरः प्रजने सर्तेरित्यप्· तत्र जातः उपसर
जः· आमलकीज इति· दीर्घकाशेति बाधित्वा परत्वादयं स्वरः· ग्रामे· सूत्रे निवसत्यस्मिन्निति निपूर्वाद्वसेर्वसि वहि भासि साधि गडि मंडि नंदिभ्यश्चेति गच्· मल्लग्राम इति·

युक्तारोह्यादयश्च ।६।२।८१। आद्युदात्ताः युक्तारोही आगतयोधी क्षीरहोता दीर्घकाशतुषभ्राष्ट्रवटं जे ।६।२।८२। कुटीजः काशजः तुषजः भ्राष्ट्रजः वटजः
अन्त्यात्पूर्वं बह्वचः ।६।२।८३। बह्वचः पूर्वस्यान्त्यात्पूर्वपदमुदात्तं जे उत्तरपदे उपसरजः आमलकीजः बह्वचः किम् दग्धजानि तृणानि ग्रामेऽनिवसन्तः
।६।२।८४। ग्रामे परे पूर्वपदमुदात्तम् न चेन्निवसद्वाचि मल्लग्रामः ग्रामशब्दोऽत्र समूहवाची देवग्रामः शालायाम् ।६।२।८६। छात्रिशाला व्याडिशाला य
दापि शालान्तः समासो नपुंसकलिङ्गो भवति तदापि तत्पुरुषे शालायां नपुंसक इत्येतस्मात्पूर्वविप्रतिषेधेनायमेव स्वरः छात्रिशालम् प्रस्थेऽवृद्धमक
र्क्यादीनाम् ।६।२।८७। प्रस्थशब्दे उत्तरपदे कर्क्यादिवर्जितमवृद्धं पूर्वपदमाद्युदात्तं स्यात् इन्द्रप्रस्थः अवृद्धं किम् दाक्षिप्रस्थः अकेति किम् कर्कीप्रस्थः

दाक्ष्यो निवसन्त्यस्मिन्नित्युच्यते घोषा घोषादिषूत्तरपदेषु पूर्वपदमाद्युदात्तं अत्र निवसन्निति केचिदनुवर्तयन्ति अपरे नानुवर्तयन्ति तथा च दाक्षीणां घोषो निवासस्थानमित्यर्थे दाक्षि
घोषशब्दे आद्युदात्तत्वं न भवति मतांतरे भवति· छात्र्यादयः शालायां· शब्दे परे छात्र्यादय आद्युदात्ताः स्युः· यदा शालान्त इत्यादि विभाषासेनासुरेत्यादिना शालान्तस्य तत्पुरुषस्य वि
भाषा नपुंसकत्वमुक्तं· तत्रास्मिन्पक्षे यो नपुंसकलिंगो न भवति छात्रिशालात्तत्पुरुषे शालायामित्यस्यावकाशोयं छात्र्यादिपूर्वो न भवति· प्रभुशालं· क्षत्रियशालम्· यत्तु
छात्र्यादिपूर्वपदो नपुंसकलिंगश्च तत्रैकदेशावि॥

CC-0. In Public Domain. Digitization by eGangotri



कृतस्यानन्यत्वादयमपि प्राप्नोतीति तत्पुरुषे शालायामित्ययं च· तत्र पूर्वविप्रतिषेधादयमेव भवतीति वामनहरदत्तौ· प्रस्थे· मालादीनां चेति वचनादृद्धमिति छेदः कर्क्यादिप्र
तिषेधस्तु नामधेयार्थः स्यात्· वा नामधेयस्य वृद्धसंज्ञा वक्तव्येति· अकेति किमिति अककर्कादीनां किमित्यर्थः॥ ॥ माला· प्रस्थे परे मालादीनामादिरुदात्तः स्यात् शोण
प्रस्थ इति· एङ् प्राचां देश इति शोणप्रस्थस्य वृद्धत्वम्· अम· महन्नववर्जितं पूर्वपदमिति· महद्वर्जितं नववर्जितं चेति प्रत्येकं संबंधः महानगरमिति· आन्महतः समाना·

मालादीनां चाशा२।८८। वृद्धार्थमिदम् मालाप्रस्थः शोणाप्रस्थः· अमहन्नवन्नगरेऽनुदीचाम् ।६।२।८९। नगरे परे महन्नववर्जितं पूर्वमाद्युदात्तं
स्यात् तच्चेदुदीचां न ब्रह्मनगरम् अमेति किम् महानगरम् नवनगरम् अनुदीचां किम् कार्तिकनगरम् अर्मे चाऽवर्णं द्य्यच् त्र्यच्।६।२।९०। अर्मे
परे द्व्यच् त्र्यच् पूर्वम् अवर्णान्तमाद्युदात्तम् गुप्तार्मम् कुक्कुटार्मम् अवर्णं किम् बृहदर्मं द्व्यच् त्र्यच् किम् कपिञ्जलार्मम् अमहन्निसेव महार्मम् न
वार्मम् नभूताधिकसञ्जीवमद्राश्मकज्जलम् ।६।२।९१। अर्मे परे नैतान्याद्युदात्तानि भूतार्मम्· अधिकार्मम् सञ्जीवार्मम् मद्राश्मग्रहणं सङ्घात वि
गृहीतार्थम् मद्रार्मम् अश्मार्मम् मद्राश्मार्मम् कज्जलार्मम् आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम् दिवोदासाय दाशुषे अन्तः।
६।२।९२। अधिकारोऽयम् प्रागुत्तरपदादिग्रहणात् सर्वं गुणकार्त्स्न्ये ।६।२।९३। सर्वशब्दः पूर्वपदमन्तोदात्तम् सर्वश्वेतः सर्वमहान् सर्वं किम् परमश्वे
तः आश्रयव्याप्यापरमलं श्वेतस्येति गुणकार्त्स्न्ये वर्तते गुणेति किम् सर्वसौवर्णः कार्त्स्न्ये किम् सर्वेषां श्वेततरः सर्वश्वेतः संज्ञायां गिरिनिकाययोः ।६।२।
९४। एतयोः परतः पूर्वमन्तोदात्तं अञ्जनागिरिः मौण्डनिकायः संज्ञायां किम् परमगिरिः ब्राह्मणनिकायः॥ ९ धिकरणेति महत आत्वे कृते वर्णान्तत्वाद
त्तिप्राप्तिः न वार्ममिति· नवशब्दः प्रत्ययवचनो कारान्तः संघातविगृहीतार्थमिति· मद्रशब्दस्य केवलस्य मद्राश्मशब्दस्य संघातस्य च प्रतिषेधार्थः मद्राश्मार्ममिति· अन्तो
दात्तः सरसां जातिसंज्ञयोरिति समासान्ते कृते अवर्णान्तमेतत् तदेवं मद्रार्मं मद्राश्मार्ममिति द्वे एवोदाहरणे· प्रायेण त्वश्मार्ममिति तृतीयमप्युदाहरणं पठन्ति तदुपेक्ष्यं गुरो



606

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शब्दस्य नकारान्तत्वम्· न च नलोपे कृते वर्णान्तत्वम्· स्वरविधौ नलोपस्यासिद्धत्वात् अपरे तु महच्छब्दग्रहणं संघातविगृहीतार्थमित्यस्य भाष्यस्य दर्शनाद् संगतमेतदित्याहुः· दिवोदासायेति· दिवश्च दासे इति षष्ठ्या अलुक्· अन्तः अत्रापि मकारलोपे पूर्वपदविषया प्रथमा षष्ठ्यर्थे वेदितव्या· सर्वं गुणे· गुणकार्त्स्न्ये वर्तमानः सर्वअन्तोदात्तः यत्र गुणान्तरस्याभावस्तत्र गुणकार्त्स्न्यं भवति· सर्वश्वेत इति· पूर्वकालैकेत्यादिना कर्मधारयः अत्र शौक्ल्ये न गुणेन सर्वावयवानां व्याप्तिर्गम्यते· आश्रयव्याप्त्येति· ननूज्ज्वललेन· सर्वसोवर्ण इति· विकारविषयमात्रं कार्त्स्न्यं· सर्वश्वेत इति· गुणान्तरेणान्तरलोपश्चेति समासः तरप्प्रत्ययलोपश्च· कार्त्स्न्यं किमिति गुणवाचिन्युत्तरपदे सर्वशब्दस्य कार्त्स्न्ये न व्यभिचरतीति प्रश्नः अयं नियमः कर्मधारयेन षष्ठीसमास इत्याह सर्वेषामिति· गुणिकार्त्स्न्ये वर्तमानो न गुणकार्त्स्न्ये सर्वेषामिति गुणसंबंधे षष्ठी पठस्य शौक्ल्यमिति वद्गुणवाचिन एव प्रत्ययः सर्वेषां पदानां द्रव्यान्तराधारश्वेतगुणापेक्षया सातिशयः श्वेतो गुण इत्यर्थः यदा तु प्रतिपदोक्तत्वात् पूर्वकालैकेति समासो गृह्यते तदा कार्त्स्न्यग्रहणमाशु· अंज

कुमार्यां वयसि ।६।२।९५। पूर्वपदमन्तोदात्तम्· वृद्धकुमारी कुमारीशब्दः पुंसा सहासम्प्रयोगमात्रं प्रवृत्तिनिमित्तमुपादाय प्रयुक्तो वृद्धादिभिः समानाधिकरणः न च वय इह गृह्यते न कुमारत्वमेव वयसि किम् परमकुमारी॥

९९ नागिरिरिति वनगिर्योः संज्ञायामिति दीर्घः॥ ❀ ॥ कुमार्यां· कुमारीशब्दे परे पूर्वपदमन्तोदात्तं स्याद्वयसि द्योत्ये· वृद्धकुमारीति· विशेषणसमासः पुंवत्कर्मधारय इति पुंवद्भावः ननु कुमारीशब्दः प्रथमे वयसि वर्तते तथा च वयसि प्रथमे इत्यनेन ङीप् तत्र विहितः तस्य कथं चरमवयोवाचिना वृद्धेन सामानाधिकरण्यमत आह कुमारीत्यादि· कुमारीशब्दे ह्ययं प्रवृत्तिनिमित्तं प्रथमं वयः पुंसा सहासंप्रयोगश्च तत्राद्यमर्थं त्यक्त्वा द्वितीयमात्रे वर्तते· तदा वृद्धादिसामानाधिकरण्यं भवति· तदाह न चेति· शब्दान्तराभिधेयमित्यर्थः न कुमारत्वमेवेति· यदेतत् कुमारीशब्दस्य प्रवृत्तिनिमित्तं तद्द्वयोर्न गृह्यत इत्यर्थः एतच्च वयोग्रहणसामर्थ्याल्लभ्यते· अन्यथा कुमारीशब्दप्रयोगे नियोगतः प्रथमं वयो गम्यत इति तदनर्थकं स्यात् ननु तर्हि ङीबपि न स्यादिति चेच्छृणु· पूर्वं हि प्रथमं वयः प्रवृत्तिनिमित्तं कृत्वा ङीप् कृतः सोऽनन्तरं वृद्धादिसामानाधिकरण्येऽपि न निवर्तते· परमकुमारीति· अत्र कुमारत्वमेव गम्यते न वयोऽन्तरमिति भवति प्रत्युदाहरणं॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स·
सि·कौ· उदके· अकेवल इति परच्छेदः अन्यथाऽसंदेहार्थं केवलउदक इत्येव ब्रूयात् तदाह· अकेवलं मिश्रमिति· द्रव्यांतरसंपृक्तं मिश्रं· गुडोदकमिति· गुडमिश्रमुदकं· गुडोदकं क्षी
ती·त· रोदकमिति कर्मधारयः गर्गत्रिरात्रमिति· षष्ठीसमासः तिसृणां रात्रीणां समाहारस्त्रिरात्रम्· अहःसर्वैकदेशेत्यादिना च समासांतः संख्यापूर्वं रात्रं क्लीबमिति क्लीबत्वम्· एवं
३११ समरात्र इति· रात्रिमतिक्रान्त इति प्रादिसमासः· विल्वसमरात्रमित्यत्र विल्वशब्दो विल्वहोमे वर्तते· तेन सह षष्ठीसमासः· गोपालसभमिति· अशाला चेति क्लीबत्वम्· प्रतिपदोक्ते

उदकेऽकेवले।६।२।९६। अकेवलं मिश्रं तद्वाचिनि समासे उदके परे पूर्वमन्तोदात्तम् गुडोदकम् स्वरे कृतेऽत्र एकादेशः स्वरितो वाऽनुदात्ते पदादौ।
इति पक्षे स्वरितः अकेवले किम् शीतोदकम् द्विगौ क्रतौ।६।२।९७। द्विगावुत्तरपदे क्रतुवाचिनि समासे पूर्वमन्तोदात्तम् गर्गत्रिरात्रः द्विगौ किम् अति
रात्रः क्रतौ किम् विल्वहोमस्य समरात्रो विल्वसमरात्रः सभायां नपुंसके।६।२।९८। सभायां परतो नपुंसकलिङ्गे समासे पूर्वमन्तोदात्तम् गोपाल
सभम् स्त्रीसभम् सभायां किम् ब्राह्मणसेनम् नपुंसके किम् राजसभा प्रतिपदोक्तनपुंसकग्रहणान्नेह रमणीयसभम् ब्राह्मणकुलम् पुरे प्रा
चाम्।६।२।९९। देवदत्तपुरम् नान्दीपुरम् प्राचां किम् शिवपुरम् अरिष्टगौडपूर्वे च।६।२।१००। पुरे परे अरिष्टगौडपूर्वे समासे पूर्वमन्तोदात्तम् अरि
ष्टपुरम् गौडपुरम् पूर्वग्रहणं किम् इहापि यथा स्यात् अरिष्टश्रितपुरम् गौडभृत्यपुरम् न हास्तिनफलकमार्देयाः।६।२।१०१। पुरे परे नैतान्यन्तोदात्ता
नि हास्तिनपुरम् फलकपुरम् मार्देयपुरम् मृदेरपत्यमिति शुभ्रादित्वाड्ढक् कुसूलकूपकुम्भशालं बिले।६।२।१०२। एतान्यन्तोदात्तानि बिले परे कु
सूलबिलं कूपबिलम् कुम्भबिलम् शालबिलम्· कुसूलादि किम् सर्पबिलम् बिले इति किम् कुसूलस्वामी॥ १९ ति· समासान्तेत्यादि विहितं· रमणीयस

भमिति· रमणीया सभा यस्येति बहुव्रीहिः अत्राभिधेयवल्लिङ्गान्नपुंसकत्वं न प्रतिपदोक्तम्· पुरे प्राचां· पुरशब्दे परे प्राचां देशे पूर्वपदमंतोदात्तं स्यात् अरिष्टपूर्वग्रहणं कि राम
मिति· अरिष्टगौडयोरित्येव वक्तव्यमिति प्रश्नः इहापि यथा स्यादिति· पूर्वग्रहणे हि सति बहुव्रीहिर्लभ्यते अरिष्टगौडौ पूर्वौ यस्मिन्समास इति तेनारिष्टश्रितपुरं गौडभृत्य ३११
पुरमित्यत्रापि पूर्वपदमन्तोदात्तं भवति· असति तु पूर्वग्रहणेऽस्मि·॥

607

CC-0. In Public Domain. Digitization by eGangotri

तमृत्यशब्दाभ्यां च बहिर्भूतत्वाच्चारिष्टगौडयोस्तावन्तस्यान्तः समुदाययोश्च सूत्रे नुपात्तत्वान्न हानिः पूर्वेणाचामिति प्राप्तः प्रतिषिध्यते मार्दयपुरमिति देलोपः कद्रादृतु कारलोपः॥ ꣸ ॥दिक्शब्दाः दिक्शब्दाः पूर्वपदानि अन्तोदात्तानि स्युर्ग्रामादिषूत्तरपदेषु चानराटवर्जेषु स्वरूपग्रहणमितरेषामर्थग्रहणं पूर्वेषुकामशमी अपरकृष्णमृत्तिके ति दिक्संख्ये संज्ञायामिति समासः पूर्वपञ्चाला इति समुदायेषु हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्तन्त इति पञ्चालैकदेशे पञ्चालशब्दः ततः पूर्वशब्देन सामानाधिकरण्ये न पूर्वापरप्रथमेत्यादिना कर्मधारयः पूर्वयायातमिति ययातिमधिकृत्य कृतो ग्रन्थ इत्यणि यायात शब्दः सिद्धः शब्दग्रहणमित्यादि दिग्दृष्टः शब्द इत्युत्तरपदलोपी स मासस्तेन कालवाचिनोपि ग्रहणं पूर्वयायातमित्यादावपि भवति आचार्योपसर्जन आचार्योपसर्जनग्रहणमन्तेवासिनो विशेषणं सप्तम्यर्थे प्रथमा तदाह आचा

दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु। ६।२।१०३। दिक्शब्दा अन्तोदात्ता भवन्त्येषु पूर्वेषुकामशमी अपरकृष्णमृत्तिका जनपद पूर्वपञ्चालाः आख्यान पूर्वयायातम् पूर्वचानराटम् शब्दग्रहणं कालवाचिनोऽपि दिक्शब्दस्य परिग्रहार्थम् आचार्योपसर्जनश्चान्तेवासिनि। ६।२।१०४। आचार्योपसर्जनान्तेवासिनि परे दिक्शब्दा अन्तोदात्ता भवन्ति पूर्वपाणिनीयाः आचार्येति किम् पूर्वान्तेवासी अन्तेवासिनीति किम् पूर्वपाणिनीयं शास्त्रम् उत्तरपदवृद्धौ सर्वं च। ६।२।१०५। उत्तरपदस्येत्यधिकृत्य या वृद्धिर्विहिता तद्वत्युत्तरपदे परे सर्वशब्दो दिक्शब्दाश्चान्तोदात्ता भवन्ति सर्वपाञ्चालकः अपरपाञ्चालकः अधिकारग्रहणं किम् सर्वभासः सर्वकारकः ॥

र्योपसर्जनान्तेवासिनीति आचार्य उपसर्जनं यस्य स आचार्योपसर्जनः स चासावन्तेवासी च तस्मिन्निति पूर्वपाणिनीया इति पूर्वापरप्रथमेति समासः पाणिनेश्छात्राः पाणिनीयाः अत्रान्तेवासिनः प्रधानमाचार्यस्तूपसर्जनः पूर्वपाणिनीयं शास्त्रमिति पूर्वं चिरन्तनमित्यर्थः उत्तरपदवृद्धौ अत्र वृद्धावित्येतावतैव वृद्धिमदुत्तरपदपरिग्रहसिद्धेरुत्तरपदग्रहणात्तदधिकारो लक्ष्यते उत्तरपदशब्दस्य स्वरितत्वादिहाधिकारप्रतिपत्तिरित्यभिप्रायेणाह उत्तरस्य पदस्येत्यादि सर्वपाञ्चालक इत्यादि सुसर्वार्द्धदिक्शब्देभ्य इति तदन्तविधौ अवृद्धादपि बहुवचनविषयादिति वुञ् सुसर्वार्द्धाज्जनपदस्य दिशोमद्राणामित्युत्तरपदवृद्धिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वृद्धिशब्देन यावृद्धिर्विहिता तद्वत्पुनर् उपदेशे तु च्यमानेपि न निर्वाह इत्याह· सर्वकारक इति·॥ ॥ बहुव्रीहौ· संज्ञायामिति बहुव्रीहेर्विशेषणं न विश्वशब्दस्य· विश्व कर्मेति· विश्वः कन् नित्वाद्युदात्तो विश्वशब्दः उदरा एवमुत्तरपदेषु बहुव्रीहौ संज्ञायां पूर्वपदमन्तोदात्तं स्यात्· अयमपि पूर्वपदप्रकृतिस्वरस्यापवादः वृक शब्दः प्राणिनां कुपूर्वाणामित्याद्युदात्तः वृकस्येवोदरमस्य वृकोदरः हर्यश्व इति· हरतेः सर्वधातुभ्य इतिरिन्· आद्युदात्तो हरिशब्दः हरिरश्वोस्य हर्यश्वः यणि कृते उदात्तस्वरितयोरिति स्वरितः महेषुरिति· महच्छब्दो न्तोदात्तो वर्त्तमाने पृषन्महद्दिति व्रतन्यासनिपातनात् तथा च पूर्वपदप्रकृतिस्वरेणैव सिद्धे सति त्वन्यार्थ आरम्भोऽपवादत्वादनेनैवान्तोदात्तत्वम्· उदाहरणं तु सुवर्णपुंखेषुरिति ज्ञेयम सुष्ठु वर्णो येषां ते सुवर्णाः नञ्सुभ्यामित्यन्तोदात्तत्वे· सुवर्णाः पुंखा येषां ते बहुव्रीहौ पूर्वपदप्रकृतिस्वरेण मध्योदात्तत्वं पुनः

बहुव्रीहौ विश्वं संज्ञायाम्॥ ६।२।१०६॥ बहुव्रीहौ विश्वशब्दः पूर्वपदभूतः संज्ञायामन्तोदात्तः स्यात् पूर्वपदप्रकृतिस्वरेण प्राप्तस्याद्युदात्तस्यापवादः विश्वकर्मा विश्वदेवः आविश्वदेवं सत्पतिम् बहुव्रीहौ किम् विश्वे च ते देवाश्च विश्वदेवाः संज्ञायां किम् विश्वे देवाः प्रागव्ययीभावाद्बहुव्रीहावधिकारः ॥ उदराश्वेषुषु॥ ६।२।१०७॥ वृकोदरः हर्यश्वः महेषुः स्नेपा॥ ६।२।१०८॥ उदराश्वेषुषु पूर्वमन्तोदात्तं बहुव्रीहौ नित्यायाम् घटोदरः कटुकाश्वः चलाचलेषुः अनुदर इत्यत्र तु नञ्सुभ्यामिति भवति विप्रतिषेधेन नदी बन्धुनि॥ ६।२।१०९॥ बन्धुशब्दे परे नद्यन्तं पूर्वमन्तोदात्तं बहुव्रीहौ गार्गीबन्धुः नदी किम् ब्रह्मबन्धुः ब्रह्मशब्द आद्युदात्तः बन्धुनि किम् गौरीपुत्रः॥ ॥ १९ स्त्रियाशब्देन बहुव्रीहौ पूर्वपदमन्तोदात्तम्· एकादेशस्तु

स्वरितो वानुदात्ते पदादाविति पक्षे स्वरितः घटोदर इति· घटशब्दः पचाद्यजन्तः कटुशब्दात्संज्ञायां कन् चरिचलिपतिवदीनां वा द्वित्वमच्याक्चाभ्यासस्येति पचाद्यजन्तो चलाचलशब्दः अनुदर इत्यादिः अस्यावकाशः घटोदरः नञ्सुभ्यामित्यस्यावकाशः अयशाः सुयशाः एवं स्थिते विप्रतिषेधः नदी बंधुनीति· शब्दस्वरूपापेक्षया नपुंसकनिर्देशः गार्गीबंधुरिति· गर्गादिभ्यो यञिति यञन्तात् गर्गशब्दाद्यञश्चेति ङीप्· गार्गी· ञित्स्वरेणाद्युदात्तः ब्रह्मबंधूरिति बृंहेर्नोच्चेति मनिन् कारस्याकारादेशो मनिन्प्रत्यय



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

णाद्युदात्तः तदाहत्वस्सेत्यादिः गार्गीप्रिय इति· अत्र पूर्वपदप्रकृतिस्वर एव॥ ११० ॥ निष्ठोपसर्ग· उपसर्गपूर्वं निष्ठांतं पूर्वपदमन्तोदात्तं प्रधौतपाद इति· धावुगतिशुद्ध्योः क्तः।
च्छ्वोः शूडित्यूठ् एत्येधत्यूठ्स्विति वृद्धिः प्रधौतशब्दो गतिस्वरेणाद्युदात्तः प्रसेवकमुख इति· ण्वुलन्तः प्रसेवकशब्दः कृदुत्तरपदप्रकृतिस्वरेण लित्वान्मध्योदात्तः शुष्कमु
ख इति· शुष्क धृष्टाविति शुष्कशब्द आद्युदात्तः उत्तरपदादिः उत्तरपदे इति पृथक्पदं लुप्तषष्ठीकम् कर्णो· आद्युदात्त इति सिद्धार्थकथनमेतत् उत्तरपदस्य कर्णशब्द
स्यादिरुदात्त इत्यस्यार्थः एवं चास्मिन्प्रकरणे कर्ण इत्यादौ षष्ठ्यर्थे प्रथमेति ज्ञेयम् शंकुकर्ण इति· शंकुः कर्णो यस्येति विग्रहः सप्तमीविशेषणे इति सप्तम्यन्तस्य पूर्व

निष्ठोपसर्गपूर्वान्यतरस्याम्॥ ६।२।११०॥ निष्ठान्तम्पूर्वपदमन्तोदात्तं वा प्रधौतपादः २ निष्ठा किम् प्रसेवकमुखः उपसर्गपूर्वं किम्। शुष्कमुखः
उत्तरपदादिः॥ ६।२।१११॥ उत्तरपदाधिकार आपादान्तं आद्यधिकारस्तु प्रकृत्या भगालमित्यवधिकः कर्णो वर्णलक्षणात्॥ ६।२।११२॥ वर्ण
वाचिनो लक्षणवाचिनश्च परः कर्णशब्द आद्युदात्तो बहुव्रीहौ शुक्लकर्णः शङ्कुकर्णः कर्णः किम् श्वेतपादः वर्णलक्षणात्किम् शोभनकर्णः
संज्ञौपम्ययोश्च॥ ६।२।११३॥ कर्ण आद्युदात्तः मणिकर्णः औपम्ये गोकर्णः कण्ठपृष्ठग्रीवाजङ्घं च॥ ६।२।११४॥ संज्ञौपम्ययोर्बहुव्रीहौ शितिक
ण्ठः काण्डपृष्ठः सुग्रीवः नाडीजङ्घः औपम्ये खरकण्ठः गोपृष्ठः अश्वग्रीवः गोजङ्घः शृङ्गमवस्थायां च॥ ६।२।११५॥ शृङ्गशब्दोऽवस्थायां
संज्ञौपम्ययोश्चाद्युदात्तो बहुव्रीहौ उद्गतशृङ्गः द्व्यङ्गुलशृङ्गः अत्र शृङ्गोद्गमनादिकृतो गवादेर्वयोविशेषोऽवस्था संज्ञायाम् ऋष्यशृङ्गः उपमाया
म् मेषशृङ्गः अवस्थेति किम् स्थूलशृङ्गः॥ ॥ ९९

निपाते प्रासेगद्वारेः परा सप्तमी निपरनिपातः कर्णे लक्षणस्येति दीर्घः पशूनां विभागज्ञानार्थं शंकुम
तिरूपकं कर्णे छिद्रं यच्चिह्नं क्रियते तदिह लक्षणं गृह्यते· पृथग्वर्णग्रहणात् अन्यथा वर्णेनापि लक्ष्यमाणत्वादनर्थकं तत्स्यात्· श्वेतपाद इति श्विता वर्णे· पचाद्यच्· शोभन
कर्ण इति शुभ शोभार्थे अनुदात्तेतश्च हलादेरिति युच्· प्रत्युदाहरणे सर्वत्र पूर्वपदप्रकृतिस्वर एव भवति· संज्ञौपम्य· संज्ञायामौपम्ये च यो बहुव्रीहिस्तत्र कर्णशब्द उत्तर
पदमाद्युदात्तं स्यात्· कंठपृष्ठ· कंठादीनां समाहारद्वंद्वे नपुंसकह्रस्वत्वं· कंठा॥

स
सि·कौ· दीन्युत्तरपदानि संज्ञौपम्ययोर्बहुव्रीहौ· कण्ठपृष्ठौ स्वाङ्गशिवादिभ्याद्युदात्तौ· ग्रीवाजङ्घयोः स्वाङ्गत्वेऽप्यदन्तत्वाभावादन्तोदात्तत्वम्· सुग्रीव इत्यत्र परत्वान्न
टी·त· ञ्सुभ्यामित्यन्तोदात्तत्वेन भाव्यम्· अस्य तु रक्तग्रीवादिरवकाशः· यदि तु नेष्यते तर्हि चकारस्यैव विधेः समुच्चयार्थ इति व्याख्येयः· नाडीजङ्घ इति· नाड्याकारे जङ्घे यस्य स मना
३१३ डीजङ्घः॥ ॥ नञो जरः· नञ्सुभ्यामित्यस्यापवादः· जरणं जरः· ऋदोरप्· मरणं मरः· अमरम् अस्मादेव निपातनादप्· ञिमिदा स्नेहने अमिचिमिदिशसिभ्यः क्त्रः· मृङो नपुं
सके भावे क्तः· सूत्रे तु पञ्चपरत्वात्पुंस्त्वम्· नञ इति किम्· जरमरमित्रमृतग्रहणं किमर्थमित्यर्थः· अशत्रुरिति· नञ्सुभ्यामित्युत्तरपदान्तो — दात्तत्वम्· सोर्मन· मनच

नञो जरमरमित्रमृताः। ६।२।११६। नञः परा एते आद्युदात्ता बहुव्रीहौ· न जरा अजरम् अमरम् अमित्रमर्दय श्रवो देवेष्वमृतम्· नञः किम्· ब्राह्म
णमित्रः· जेति किम्· अशत्रुः· सोर्मनसी — अलोमोषसी। ६।२।११७। सोः परं लोमोषसी वर्जयित्वा मन्नन्तमसन्नन्तं चाद्युदात्तं स्यात्· नञ्सुभ्यामि
त्यस्यापवादः· सुकर्माणः· सुयुजः· सनो वसूरन्तिमानः· सुब्रह्माशिवापशुम्यः· सुमनाः· सुवर्चाः· सुपेशसस्करति· सोः किम्· कृतकर्मा मनसी कि
म्· सुराजा· अलोमोषसी किम्· सुलोमा· सूषा· कपि तु परत्वात्कपिपूर्वमिति भवति सुकर्मकः· सुस्रोतस्कः· क्रत्वादयश्च। ६।२।११८। सोः परे आ
द्युदात्ताः स्युः· सुक्रतुः· सुप्रतीकः· सुहव्यः· सुप्रतूर्तिमनेहसम्· आद्युदात्तं द्व्यच्छन्दसि। ६।२।११९। यदाद्युदात्तं द्व्यच् तत्सोरुत्तरं बहुव्रीहौ वाद्युदात्तं अ
धासश्वाः सुरथा आतिथिग्वे· निरस्वरे एणश्वरथाबाद्युदात्तौ· आद्युदात्तं किम्· या सुबाहुः· द्व्यच् किम्· सुगुरसत्सुहिरण्यः· हिरण्यशब्दस्य च· ॥ 609

असन्तमनसी· सुकर्माण इत्यादि· यद्यपि आद्युदात्तद्व्यचः छन्दसीत्यनेन सिद्धमिदं तथापि सुप्रथमेत्यादिबहूजर्थमच्छन्दोऽर्थं च सूत्रमिति बोध्यम्· सुप्रथिमेत्यत्र पृथ्वोर्म्भा
व इति पृथ्वादिभ्य इमनिच्· रऋतो हलादेर्लघोरिति रादेशः· सुराजेति· राजशब्दः कनिन्युवृषीति कनिन्नन्तः· यातेः लुनातेर्मनिन्· लोम· उषदाहे· मिथुनेऽसिरिति वर्तमा राम·
ने उषः कित्· उषः कपिलिति· अस्यावकाशः सुकर्मकपिपूर्वमित्यस्यावकाशः अयवकः· एवं स्थिते विप्रतिषेधः· आद्युदात्तम्· नञ्सुभ्यामित्यस्यापवादः ऋभूसुषिल ३१३
टिकलिरवटीतिक्रन्नतोऽश्वग्रावः इतिकुशिनिरमिकाशिभ्यः क्थन् इति क्थन्नन्तोरथशब्दस्तदाह· निरस्वरे एणेति॥

CC-0. In Public Domain. Digitization by eGangotri

सुबाहुरिति· अजिरादिकस्यापि पक्षिवाद्येति कुमारस्य पाठो बाहुशब्दः प्रत्ययस्वरेणान्तोदात्तः सुहिरण्य इति· हर्यतेः कन्यन् हिरच्चेति कन्यन्तो हिरण्यशब्द आद्युदात्तस्य च ॥ ॐ ॥ वीरवीर्यौ· वीरविक्रान्तौ शूरादिस्तत्र पचाद्यच्चि वीरः स्यचोयत् वीरसुसाधुरिति प्राग्दीव्यतीयो यत् वीर्यः तत्रे त्यादि· कथं पुनरेतज्ज्ञापकमित्याह· तत्र हि स नीति· कूलतीर इति· एतान्युत्तरपदान्याद्युदात्तानि सूत्रव्ययीभावे· सुषममित्यादौ सुविनिर्दुर्भ्यः सुपि सूतिसमा इति षत्वम् तस्यासिद्धत्वात् समशब्द एवायम् निष्ठु सुषम निष्षेत इति· तेनाव्ययीभावसंज्ञा· कंसमन्थ· एतान्युत्तरपदानि द्विगावाद्युदात्तानि स्युः द्विकंस इति· द्वाभ्यां कंसाभ्यां क्रीत इति तद्धितार्थे समासः कंसाट्टिठन्निति टिठ

वीरवीर्यौ च ।६।२।१२०॥ सोः परौ बहुव्रीहौ छन्दस्याद्युदात्तौ सुवीरेण रयिणा सुवीर्यस्य गोमतः वीर्यशब्दो यत्प्रत्ययान्तः तत्र यतोऽनाव इत्याद्युदात्तत्वे नेति वीर्यग्रहणं ज्ञापकम् तत्र हि सति पूर्वेणैव सिद्धं स्यात् कूलतीरतूलमूलशालाक्षसममव्ययीभावे ।६।२।१२१। उपकूलम् उपतीरम् उपतूलम् उपमूलम् उपशालम् उपाक्षम् सुषमम् निःषमम् निष्षमम् निषमम् प्रभृति चैते कूलादिग्रहणं किम् उपकुम्भम् अव्ययीभावे किम् परमकूलम् कंसमन्थशूर्पपाय्यकाण्डं द्विगौ ।६।२।१२२। द्विकंसः द्विमन्थः द्विशूर्पः द्विपाय्यम् द्विकाण्डम् द्विगौ किम् परमकंसः तत्पुरुषे शालायां नपुंसके ।६।२।१२३। शालाशब्दान्ते तत्पुरुषे नपुंसकलिङ्गे उत्तरपदमाद्युदात्तम् ब्राह्मणशालम् तत्पुरुषे किम् दृढशालम् ब्राह्मणकुलम् शालायां किम् ब्राह्मणसेनं नपुंसके किम् ब्राह्मणशाला कन्था च ।६।२।१२४। तत्पुरुषे नपुंसकलिङ्गे कन्थाशब्द उत्तरपदमाद्युदात्तम् सौशमिकन्

न तस्माद्धर्द्धपूर्वेति ठञ्· द्विमंथ्य इति· आर्हादगोपुच्छेत्यादिना ठञ्· शेषं पूर्ववत्· द्विशूर्प इति· शूर्पादञन्यतरस्याम् आर्हादिकन्थम् नपुंसके किम् दाक्षिकन्था· स्याम्· द्विपाय्यमिति· पाय्यसान्नाय्येत्यादिना पाय्यशब्दः परिमाणवाची निपातितः तत्र मानवहतेष्ठक् द्विकाण्डमिति· द्विकाण्डे प्रमाणमस्य प्रमाणे द्वयसजित्यादिना मात्रच्· प्र माणे लो द्विगोर्नित्यमिति लुक्· ब्राह्मणशालमिति· विभाषा सेनासुराच्छायेति नपुंसकलिङ्गता· दृढशालमिति· बहुव्रीहिरयं तत्र पूर्वपदप्रकृतिस्वर एव भवति· पू र्वपदं च निष्ठान्तत्वादन्तोदात्तं· ननु चात्र लक्षणप्रतिपदोक्तपरिभाषयैव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वनमविष्यति· सत्वम्· उत्तरार्थमावश्यकं तत्पुरुषग्रहणमिहैव क्रियते परिभाषानाश्रयणाय सौशमिकंथमिति· शोभनः शमोऽस्य सुशमस्तस्यापत्यं सौशमिस्त।
स्य कंथा सौशमिकंथम् संज्ञायां कंथोशीनरेष्विति नपुंसकत्वम् आह्वरकंथमिति· आङ्पूर्वात् ह्वयतेरातश्चोपसर्ग इति कः॥ ॥ आदिश्चिहणादीनां· चिनोतेः चि
प्· चित्· हन्तेः पचाद्यच्· हनः चिहण इति निपातनात्तलोपो णत्वं च· मलमल्लधारणे आभ्यां रः निपातनाल्लस्य द्वित्वं मंदरः आदिरिति वर्त्तमाने इति· पूर्वत्र स्यादि।
ग्रहणमुत्तरपदाभिसंबद्धम्· इह तु चिहणादीनां पूर्वपदानामाद्युदात्तत्वमिष्यते तदर्थं पुनरादिग्रहणं कर्तव्यम्· पुत्रचेलमिति· चेलं वस्त्रं तद्वत्तुच्छमित्यर्थः नगर

आदिश्चिहणादीनाम्।६।२।१२५॥ कन्थान्ते तत्पुरुषे नपुंसकलिङ्गे चिहणादीनामादिरुदात्तः· चिहणकन्थम् मन्दरकन्थम् आदिरिति वर्त्तमाने पुनर्ग्रहणं पूर्वपदस्याद्युदात्तार्थम् चेलखेटकटुककाण्डं गर्हायाम्।६।२।१२६। चेलादीन्युत्तरपदान्याद्युदात्तानि पुत्रचेलम् नगरखेटम् दधिकटुकम् प्रजाकाण्डम् चेलादिसादृश्येन पुत्रादीनाङ्गर्हा व्याघ्रादित्वात्समासः गर्हायां किम् परमचेलम् चीरमुपमानम्।६।२।१२७॥ वस्त्रं चीरमिव वस्त्रचीरम् कम्बलचीरम् उपमानं किम् परमचीरम् पललसूपशाकम्मिश्रे।६।२।१२८॥ घृतपललम् घृतसूपम् घृतशाकम् भक्ष्येण मिश्रीकरणमिति समासः मिश्रेति किम् परमपललम् कूलसूदस्थलकर्षाः संज्ञायाम्।६।२।१२९॥ आद्युदात्तास्तत्पुरुषे दाक्षिकूलं शाण्डिलसूदम् दाण्डायनस्थली दाक्षिकर्षः ग्रामसंज्ञा एताः संज्ञायां किम् परमकूलम् अकर्मधारये राज्यम्।६।२।१३०॥ कर्मधारयवर्जिते तत्पुरुषे राज्यमुत्तरपदमाद्युदात्तं ब्राह्मणराज्यम् अकेति किं परमराज्यं चेलराज्यादिस्वरादव्ययस्वरः पूर्वविप्रतिषेधेन कुचेलं कुराज्यं॥ ॥ ॥

खेटमिति· खेटमिति तृणनाम तद्वद्दुर्बलः दधिकटुकमिति· कटुगतस्वादुः नहृतुगतस्वादु· प्रजाकाण्डमिति· काण्डमिति शरनाम सयथा सत्वरपीडाकरः एवम्भूतम्
व्याघ्रादिभिरिति समासः चीर उपमानवाचि चीरशब्द उत्तरपदमाद्युदात्तं स्यात्तत्पुरुषे· वस्त्रचीरमिति· पूर्ववद्व्याघ्रादिसमासः पललसूपपललादीन्युत्तरपदान्या।
द्युदात्तानि स्युर्मिश्रे तत्पुरुषे· घृतपललमित्यादि घृतेन मिश्रं पललमिति विग्रहः· पललं मांसम्· पललं क्रव्यमामिषमित्यमरः· कूलसूद· एतान्युत्तरप·॥ ॥



610

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दन्याद्युदात्तानि स्युः संज्ञायां· दांडायनस्थलीति· प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणमिति स्थलीशब्दो गृह्यते· जानपदकुंडेत्यनेन ङीष्· चेलराज्यादिस्वरादिति। अदिशब्देन वर्ग्यादिस्वरपरिग्रहः· चेलराज्यादिस्वरस्यावकाशो भार्याचेलं ब्राह्मणराज्यम्· तत्पुरुषे तुल्यार्थेत्यादिना विहितस्याव्ययस्वरस्यावकाशो निष्कौशाम्बिः कुचेलं· कुराज्यमित्यत्रोभयप्रसंगे पूर्वप्रतिषेधः॥ ॐ॥ वर्ग्यो वर्ग्यादीन्युत्तरपदान्याद्युदात्तानि स्युः कर्मधारयेन तत्पुरुषे· पदिगादिषु वर्गादयः पठ्यन्ते तत एवेह यदन्तप्रत्ययान्ता वर्ग्यादयो गृह्यन्ते वर्गादिपाठभावात्तदाह· वर्ग्यादिर्दिगाद्यन्तर्गणः इति· कौनटिमातुल इति· कुनटस्यापत्यं कौनटिः तस्य मातुलः· आख्याग्रहणादिति आख्याग्रहणमाचार्यादिभिः

वर्ग्यादयश्च॥६।२।१३१। अर्जुनवर्ग्यः वासुदेवपक्ष्यः· अकर्मधारय इत्येव परमवर्ग्यः· वर्ग्यादिर्दिगाद्यन्तर्गणः· पुत्रः पुंभ्यः॥६।२।१३२। पुंशब्देभ्यः परः पुत्रशब्द आद्युदात्तस्तत्पुरुषे दाशकिपुत्रः माहिषपुत्रः· पुत्र इति किं कौनटिमातुलः· पुंभ्यः किं दासीपुत्रः· नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः॥६।२।१३३। एभ्यः पुत्रो नाद्युदात्तः· आख्याग्रहणात्पर्यायाणां तद्विशेषाणां च ग्रहणं· आचार्यपुत्रः उपाध्यायपुत्रः शाकटायनपुत्रः राजपुत्रः ईश्वरपुत्रः नन्दपुत्रः· ऋत्विक्पुत्रः याजकपुत्रः होतृपुत्रः· संयुक्ताः सम्बन्धिनः श्यालपुत्रः· ज्ञातयो मातापितृसम्बन्धेन बान्धवाः ज्ञातिपुत्रः भ्रातुःपुत्रः· चूर्णादीन्यप्राणिषष्ठ्याः॥६।२।१३४। एतानि प्राणिभिन्नषष्ठ्यन्तात्पराण्याद्युदात्तानि तत्पुरुषे मुद्गचूर्णं· अप्राणिति किम् मत्स्यचूर्णम्· षट् च काण्डादीनि॥६।२।१३५। अप्राणिषष्ठ्या आद्युदात्तानि दर्भकाण्डं दर्भचीरं तिलपललम् मुद्गसूपः मूलकशाकम् नदीकूलम्· षट् किं राजसूदः· अप्राणिति किं दत्तकाण्डं· कुण्डं वनम्॥६।२।१३६। कुण्डमाद्युदात्तं वनवाचिनि तत्पुरुषे दर्भकुण्डं· कुण्डशब्दोऽत्र सादृश्ये वनं किं मृत्कुण्डं॥

मत्सेकं संबध्यते· होतुःपुत्र इति· ऋतो विद्यायोनिसंबंधेभ्य इति षष्ठ्या अलुक्· भ्रातुष्पुत्र इति· कस्कादिपाठात्षत्वम्· चूर्ण· चूर्णसंकोचे· पचाद्यच्· षट् च अप्राणिभ्यः पराणि षष्ठीतत्पुरुषे प्राणिवट्कांडादीन्याद्युदात्तानि स्युः· चेलखेटकटुककांडमिति कांडशब्दादारभ्य कूलसूदस्थलकर्षाः संज्ञायामिति कूलान्तानि कांड चीर पललसूपशाककूलएतानि कांडादीनि· तत्र कांडं गर्हायामित्युक्तमगर्हायामपि भवतीति· चीरमुपमानमित्युक्तमनुपमानेपि भवति· पललसूपशाकं मिश्रे इत्युक्त· ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क्तमपि श्रेऽपि भवति· कूलंसंज्ञायामित्युक्तमसंज्ञायामपि भवति· अग्नेतिकिमिति· अग्नालिवणुपा इति किमर्थमित्यर्थः मृत्कुण्डमिति· मृद्भाजनविशेषइत्यर्थः॥ ५
प्रकृत्या· भगालमित्यर्थग्रहणं तदाह· भगालवाचीति· अत्रव्याख्यानमेव शरणम्· मध्योदात्ता स्त्वेते इति· लघावन्ते द्वयोश्चेति सूत्रात् शितेः शितः परं नित्यावह्वच्कं भसत्प्र
त्ववर्जितं बहुव्रीहौ प्रकृतिस्वरं स्यात्· अंसप्रादइति· अंसेः सन्· अंसः दर्शनीयपाद इति· बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वरः दर्शनीयशब्दोः नीयरप्रत्ययान्तः उपो
त्तमं रितीत्युपोत्तमोदात्तः शितिराद्युदात्त इति· वर्णानां तणतिनितान्तानामिति सूत्रेण· गतिका· शितेर्नित्याबह्वजित्यतो बहुव्रीहिग्रहणं नानुवर्तते स्वरितत्वात्· किंतु त
त्पुरुषे शालायामित्यतोऽव्यवहितमपि तत्पुरुषग्रहणमनुवर्तते तदाह· तत्पुरुषे इति· प्रकारक इति· कुगतीति समासः लिन्स्वरेण पूर्वप्रत्ययाद्युदात्तम्· नृवाहस्येति· नृन्

प्रकृत्या भगालम्॥६।२।१२७॥ भगालवाच्युत्तरपदे तत्पुरुषे प्रकृत्या कुम्भीभगालम् कुम्भीनदालम् कुम्भीपालम् मध्योदात्ता एते प्रकृत्येत्यधि
कृतमन्त इति यावत् शितेर्नित्याबह्वज्बहुव्रीहावभसत्॥६।२।१३८॥ शितेः परं नित्याबह्वच्कमप्रकृत्या शितिपादः शित्यंसः पादशब्दो वृ
षादित्वादाद्युदात्तः अंसशब्दः प्रत्ययस्वरेणान्तोदात्तः शितेः किम् दर्शनीयपादः अभसत्किम् शितिभसत् शितिराद्युदात्तः पूर्वपदप्रकृतिस्व
रापवादो योगः गतिकारकोपपदात्कृत्॥६।२।१३९॥ एभ्यः कृदन्तं प्रकृतिस्वरं स्यात्तत्पुरुषे प्रकारकः प्रहरणम् इध्मप्रव्रश्चनः उपपदात् उच्चैः
कारम् ईषत्करः गतीति किम् देवस्य कारकः शेषे षष्ठी कृद्ग्रहणं स्पष्टार्थम् प्रपचतितरामित्यत्र तरवाद्यन्तेन समासे कृते आम् तत्र सति शिष्टत्वा
दामस्वरो भवतीत्येके प्रपचतिदेश्यार्थं तु कृद्ग्रहणमित्यन्ये॥ ॥ १९ इत्यादिविग्रहः वसेर्णिदित्यतो णिदित्यनुवृत्तेर्वसुनो णित्वादुपधावृद्धिः निःस्व
रेणोत्तरपदमाद्युदात्तं इध्मप्रव्रश्चन इति· प्रवृश्च्यतेयेनेति करणे ल्युट्· कर्मषष्ठ्यन्तेन इध्मशब्देन समासः अवगति प्रयुक्ते कृत्स्वरे कृते कारकप्रयुक्तः कृत्स्वरः उच्चैः कारमिति
अव्यये यथाभिप्रेतेति णमुल् तत्र हि उच्चैरित्युपपदं ईषत्कर इति ईषद्दुःसुषु कृच्छ्रेति खल् उभयथापि लित्स्वरः शेषेलक्षणेषष्ठीति न कर्मलक्षणा तथा सति कारकमेव स्वा
दतः स्यात् तृजकाभ्यां कर्तरीति समासप्रतिषेधश्च स्यात्· अन्ते कृद्ग्रहणं किमर्थं· निर्गतः कौशाम्ब्याः निष्कौशाम्बिरित्यत्र माभूत्· नैतदस्ति· यक्रियायुक्ताः प्रादयस्तं प्रत्येव



611

शब्दं प्रति क्रियायोगः कारकं च क्रियायामेव संभवति· उपपदमपि धात्वधिकारे सप्तमीनिर्दिष्टं प्रत्ययनिमित्तमुच्यते· तदेवं गत्यादिभिरपि क्रियावाच्युत्तरपदमाक्षिप्यते· धातोश्च क्रियावाचित्वं तस्मात्तद्द्वये प्रत्ययाः कृतस्तिङश्च तत्र तिङन्ते नसमासाभावात्कृदन्तमेव संभवति अनुव्यचलद्दित्यत्र तु न गतित्वनिबंधनः समासः किं तर्हि सुबन्तेन योगविभागात्समासः तस्मान्नार्थः कृद्ग्रहणेनेत्यत आह· कृद्ग्रहणं विस्पष्टार्थमिति· यदवं श्रुति वक्रमसमर्थसंप्रतिविस्पष्टार्थं क्रियत इत्यर्थः ननु विस्पष्टार्थमपि क्रियमाणे कृद्ग्रहणे आमन्तेन प्राप्नोति प्रपचतितरामिति· तत्र च समासस्वरं बाधित्वाऽव्ययस्वर एव स्यादित्यत आह· प्रपचतितरामित्यादि· इत्येकदेशस्य कृद्ग्रहणं विस्पष्टार्थमित्यादिना कृतत्वेन संबंधः तदयमर्थः कृद्ग्रहणं विस्पष्टार्थं· आमन्ते च दोषाभाव इति केचिदाचार्या व्याचक्षते इति· प्रपचतिदेश्याप्रेतिति· आदिशब्देन प्रपचतिकल्पं प्रपचतिदेशीयः प्रपचतिरूपमित्येतेषां तयाल्लग्रहणं· प्रपचतितरामादौ अर्थः प्रयोजनं यस्य तत्तथोक्तं अयमभिप्रायः न विस्पष्टार्थं कृद्ग्रहणं अपि तु प्रपचतिदेश्या·

उभे वनस्पत्यादिषु युगपत्।६।२।१४०। एषु पूर्वोत्तरपदे युगपत्प्रकृत्या वनस्पतिं वन आ बृहस्पतिं यः बृहच्छब्दोऽत्राद्युदात्तो निपात्यते हर्षया शचीपतिम् शार्ङ्गरवादित्वात् ङीषुदात्तः शचीशब्दः शचीभिर्न इति दर्शनात् तनूनपात् नराशंसम्वाजिनम् निपातनाद्दीर्घः शुनःशेपकम् ॥

दोषत्वसति प्रदिष्टं स्वरान्तरं नास्ति तत्रापि स्वरो मा भूदव्ययपूर्वपदप्रकृतिस्वर एव यथा स्यादित्येवं प्रयोजनमाहुः अत्र हरदत्तः इदं तु वक्तव्यं प्रपचतितरामित्यादौ तरबन्तेन समासे पश्चादाम् भवन्नन्यत्र ग्रहणपरिभाषया प्रपचतितरस्यैव घान्तत्वात्तत एव स्यात् तत्र को दोषः सोपसर्गस्य घान्तस्यैकपद्याभावादाम् प्रपचतितरां देवदत्तेन्यादावामेकान्तरमामंत्रितमनन्तिक इत्येष विधिर्न स्यात् इष्यते च निघातश्च प्रशब्दस्य न स्याद्भिन्नपदत्वात्तस्मात्प्रशब्दस्यामन्तेन समासोऽङ्गीकर्तव्यो न तरबन्ते तत्र समासत्वात्समुदायस्य प्रातिपदिकत्वे विभक्तावैकपद्यं भवति· स्वरे तु दोषप्रसंगात्कृद्ग्रहणमपि स्वकर्तव्यमिति भाष्ये स्थितम्· प्रपचतिदेश्यादौ का गतिरिति न विद्मः॥ ॥ उभे· वनस्पतिमिति वनशब्दो न त्विषयस्यानिसंतस्येत्याद्युदात्तः पतिशब्दोऽपि पातेर्डतिरिति डतिप्रत्ययान्तः प्रत्ययःस्वरेण पारस्करादित्वात्सुट्॥ ॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri



बृहस्पतिमिति· वर्त्तमाने पृषद्बृहन्महदिति· अतिप्रत्ययान्तत्वादन्तोदात्तोप्यत्राद्युदात्तो निपात्यते· तद्बृहतोः करपत्योरिति सुट्तलोपौ· शार्ङ्गरवादित्वादाद्युदात्त इति· शार्ङ्गरवादि-
त्वान् ङीनि कृते निपातनादाद्युदात्तत्वमित्यर्थः शचीपतिरिति· एते षष्ठीसमासाः तनूनपादिति कृषिचमितनिधनिसर्जिखर्जिभ्य उरिति उप्रत्ययान्तत्वादन्तोदात्तोपि तनूशब्दो-
ऽत्राद्युदात्तो निपात्यते· नपात् न पातयतीति नपात्· नभ्राण्नपान्नवेदा इति सूत्रे आद्युदात्तो नपाच्छब्दो निपात्यते· तन्वा नपादिति विग्रहः नराशंसमिति· नरा एनं शंसन्ती सर्वः
नृनये· ऋदोरप्· शंसेः कर्मणि घञ्· द्वावप्याद्युदात्तौ· अन्येषामपीति दीर्घः शुनःशेपमिति· शुन इव शेपोऽस्येति बहुव्रीहिः शेपपुच्छलाङ्गूलेषु शुनः संज्ञायामित्यलु-
क् षष्ठ्याः श्वन्शब्दः प्रातिपदिकस्वरेण शेपशब्दः स्वाङ्गशिटामदन्तानामित्याद्युदात्तौ· इन्द्रावरुणाविति· इन्द्रशब्द ऋज्रेन्द्राग्रेति रन्नन्तः वरुणशब्दः कृवृदारिभ्य

देवताद्वन्द्वे च।६।२।१४१। उभे युगपत्प्रकृत्या स्तः· आ य इन्द्रावरुणौ इन्द्राबृहस्पती वयम्· देवता किम्· प्लक्षन्यग्रोधौ· द्वन्द्वे किम्· अग्निष्टोमः·
नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु।६।२।१४२। पृथिव्यादिवर्जितेऽनुदात्तादावुत्तरपदे प्रागुक्तं न· इन्द्राग्निभ्यां कं वृषणः·
अपृथिव्यादौ किम्· द्यावापृथिवी जनयन्· आद्युदात्तो द्यावा निपात्यते पृथिवी त्वन्तोदात्तः· हस्ते सोमारुद्रौ· रुदेर्णिलुक्चेति रक्प्रत्ययान्तो रुद्रः· इन्द्रापू-
षणौ· श्वन्नुक्षन्पूषन्निति पूषा अन्तोदात्तो निपात्यते· उत्तरपदस्य ग्रहणमनुदात्तादावित्युत्तरपदविशेषणं यथा स्यात् द्वन्द्वविशेषणं मा भूत्·
अनुदात्तादाविति विधिप्रतिषेधयोर्विषयविभागार्थम्· अन्तः।६।२।१४३। अधिकारोऽयम्·॥ ॥ ॥ ॥

उनन्निसुंनन्तः· उभौ आद्युदात्तौ॥ ॥ देवताद्वन्द्वे चेति पूर्वपदस्यानङ्· इन्द्राबृहस्पती इति· बृहस्पतिशब्दे वनस्पत्यादित्वात् द्वावाद्युदात्तौ· तेनेन्द्राबृहस्पती इत्यत्र त्रय आद्युदा-
त्ताः· अग्निष्टोम इति अग्नेः स्तुत्स्तोमसोमा इति षत्वम्· इन्द्राग्निभ्यामिति· अग्निशब्दोऽङ्गेर्नेर्नलोपश्चेति निप्रत्ययान्तत्वादन्तोदात्तः· पृथिवी त्वन्तोदात्त इति· ङीष्प्रत्ययान्तत्वा- राम
त्· सोमारुद्राविति· अर्तिस्तुसुहसृधितिमन्नन्तत्वादाद्युदात्तः सोमशब्दः· उत्तरपदस्य ग्रहणमित्यादि· अन्यथास्मिन्प्रकरणे द्वन्द्वः सप्तम्या निर्दिष्टः नोत्तरपदं· तत्रानुदात्तादावि- ३१६
॥ ति सप्तम्यन्तं द्वन्द्वविशेषणं स्यात्· ततश्च द्वामूर्याविन्यादौ प्रसक्ति·॥

612

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षेधः स्यात्· चन्द्रशब्दोऽयं गन्तत्वादन्तोदात्तः सूर्यशब्दः राजसूयसूर्येति यदन्तत्वाद्यतोऽनाव इत्याद्युदात्तः उत्तरपदग्रहणेन तस्यैव श्रुतस्यानुदात्तत्वविधेस्तद्धि शेषणं भवति अ
नुदात्तत्वविधि· विधिप्रतिषेधयोरित्यादि· अन्यथा विधिप्रतिषेधयोः समानविषयत्वाद्विकल्पः प्रसज्येत इह पृथिव्यादिप्रतिषेधो ज्ञापयति· स्वरविधौ व्यञ्जनमविद्यमान
वदिति· तेनाग्निमीलइत्यादौ स्वरितः सिध्यति॥ ॐ॥ था॰ प प्रभृथस्येति· हनिकुषिनिरमिकाशिभ्यः क्थन् अवेभृञ इति क्थन् नित्स्वरेणाद्युदात्तत्वे प्राप्ते· आवसथ
इति उपसर्गे वसेरित्यथप्रत्ययान्तः पुरुष्टुत इति· कर्मणि क्तः पुरुषिति· तृतीयान्तः सुहवेत्तु तृतीया कर्मणीति सूत्रेण कर्मणि क्तान्ते उत्तरपदे तृतीयान्तस्य पूर्वपदस्य प्रकृतिस्व
रः स्यादिति भावः प्रस्रय इति· एरच्· न च स्रयशब्दस्याच्प्रत्ययान्तत्वात्कृदुत्तरपदप्रकृतिस्वरेणैवान्तोदात्तत्वं सिद्धमिति वाच्यम्· स्रयो निवास इति स्रयशब्दस्याद्युदात्तत्वात्॥

था॰ थघञ्क्ताजबित्रकाणाम् ॥६।२।१४४॥ थ घञ् क्त अच् अप् इत्र क एतदन्तानां गतिकारकोपपदात्परेषामन्त उदात्तः प्रभृथस्यापोः आव
सथः घञ् प्रभेदः क्त धर्त्तावज्री पुरुष्टुतः पुरुष्टुव हुप देशेषु स्तुत इति विग्रहः अच् प्रस्रयः अप् प्रलवः इत्र प्रलवित्रं क गोवृषः मूलविभुजादित्वात्कः
गतिकारकोपपदादित्येव सुस्तुतं भवता॥ सूपमानात्क्तः ॥६।२।१४५॥ सोरुपमानाच्च परं क्तान्तमन्तोदात्तम् अनसूयो नौ सुकृतस्य शशप्लुतः संज्ञा
यामनाचितादीनाम् ॥६।२।१४६॥ गतिकारकोपपदात्क्तान्तमन्तोदात्तमाचितादीन्वर्जयित्वा उपहूतः शाकल्यः परिजग्धः अनेति किम् आचितं
आस्थापितम्॥ प्रवृद्धादीनां च ॥६।२।१४७॥ एषां क्तान्तमुत्तरपदमन्तोदात्तं प्रवृद्धः। प्रयुक्तः। असंज्ञार्थोऽयमारम्भः। आकृतिगणोऽयं॥ ॥

प्रलव इति· ऋदोरप्· प्रलवित्रं इति· अर्त्तिलूधूसूखनसहचर इत्रः गोवृष इति· गां वर्षति इति विग्रहः वृषु सेचने· वृषादीनां चेत्याद्युदात्तोऽयम्· सुस्तुतमिति· सुः पूजायामिति· कर्मप्रव
चनीयः अव्ययपूर्वपदप्रकृतिस्वर एव· सूप· सुकृतस्येति गतिरनन्तर इति प्राप्ते शशप्लुतमिति· शशा इव प्लुतमिति विग्रहः तृतीया कर्मणीति प्राप्तम् उपहूत इति· ह्वेञो निष्ठा
यां यजादित्वात्संप्रसारणम्· परिजग्ध इति· अदो जग्धादेशः उभयत्र गतिरनन्तर इति प्राप्तम्· अनेति किमिति· अनाचितादीनामिति किमर्थमित्यर्थः आचितमित्यादि·
चिञ् चयने· ष्ठा गतिनिवृत्तौ णिजन्तः आभ्यां कर्त्तरि क्तः प्रवृद्धः प्रयुक्त॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स
सि॰ कौ॰ इति॰ हृधुहृष्टौ॰ पुमिश्रुतो॰ असंज्ञार्थोयमारंभ इति॰ संज्ञायांतु संज्ञायामनाचितादीनामित्येव सिद्धम्॥ ॥ कारकाद्दत्त॰ तत्पुरुषे संज्ञायामाशिषि कारकात्परयोर्दत्तश्रुत
टी॰ त॰ योरेवक्तान्तयोरन्तउदात्तः स्यात् संज्ञायामनाचितादीनामित्यनेन विहितमन्तोदात्तत्वमनेन नियम्यते॰ देवदत्तइत्यादि॰ देवा एनं देयासुरित्येवं प्रार्थितैर्देवैर्दत्तो देवदत्तः आ
३२७ शिषिलिङ्॰ लोटाविति वर्तमाने क्तिच्क्तौ च संज्ञायामिति क्तः दोदद्घोरिति दद्धादेशः विष्णुरेनं श्रूयादित्येवं प्रार्थितो विष्णुनाश्रुतो विष्णुश्रुतः क्त प्रत्ययः पूर्ववत्॰ संभूतो रामायण इ
ति॰ कारकादित्यनुच्यमाने गतिकारकोपपदादिति निवृत्तयाधिकारार्थे चकारकान्नियमो भवति तथा गतेरपि स्यात्॰ एवं किमिति सिद्धे विधिर्नारंभत्वात् प्रमाणाभावात् तेरेणाप्येव।

कारकाद्दत्तश्रुतयोरेवाशिषि। ६।२।१४८। संज्ञायामन्तउदात्तः विष्णुश्रुतः कारकात्किं संश्रुतो रामायणः दत्तश्रुतयोः किम् देवपालितः अस्मान्नि
यमादत्र संज्ञायामनेति तृतीयाकर्मणीति तु भवति एवं किम् कारकावधारणं यथा स्यात् दत्तश्रुतावधारणं माभूत् अकारकादपि दत्तश्रुत
योरन्तउदात्तो भवति संश्रुतः आशिषि किं देवैः खाता देवखाता आशिष्येवेत्येवमत्रेष्टो नियमः तेनानाहतो नदति देवदत्त इत्यत्र न स्यात्॰ विशे
षणसंज्ञेयं तृतीयाकर्मणीति पूर्वपदप्रकृतिस्वरत्वमेव भवति इत्थम्भूतेन कृतमिति च। ६।२।१४९। इत्थम्भूतेन कृतमित्येतस्मिन्नर्थे यः समासः
तत्र क्तान्तमुत्तरपदमन्तोदात्तं स्यात् सुप्तप्रलपितं प्रमत्तगीतम् कृतमिति क्रियासामान्ये करोतिर्न्नाभूतप्रादुर्भावे एवं तेन प्रलपितादपि कृतम्भव

कारकं नियमार्थोऽभिविष्यतीति प्रश्नः कारकावधारणमित्यादि असति ह्येवकारे विपरीतनियमोपि स्यात्॰ कारकादेव दत्तश्रुतयो रिति तृतीयाकर्मणीत्यस्यापवादः
रिति एवं च कारकाद्दत्तश्रुतयो नेस्यात्॰ इष्यते च॰ तथा कारकस्मान्नियतत्वाद्देवपालित इत्यत्रापि वन्तोदात्तः अंतः कारकावधारणं यथास्यादत्तश्रुतावधारणं माभूदि
त्येवमर्थमेवकारग्रहणमित्यर्थः देवखातेति॰ तृतीयाकर्मणीति पूर्वपदप्रकृतिस्वरः इत्थं॰ इत्थंभूतेन कृतमित्येतस्मिन्नर्थे इति॰ इत्थं प्रकारमात्र इत्थंभूतस्तेन कृतमित्य राम॰
र्थे सुप्तप्रलपितमित्यादि॰ कथमेतान्युदाहरणानि यावता कृतमित्युच्यते नच प्रलपितानीति कृतानि॰ अभूतप्रादुर्भावएव हि करोतिर्वर्त्तते तत्राह॰ सुप्तकृतं सुप्तभावि ३२९
तम्॰ उन्मत्तभावितमित्यादि क्रमेणैवोदाहर्त्तव्यमित्यत आह कृतमितीति॰ कृतिसामान्ये करोतिर्वर्त्तत इति॥

613

CC-0. In Public Domain. Digitization by eGangotri

ततश्च यथा क्रियावचनो धातुः क्रियायां क्रियार्थायामित्यादौ विशेषणत्वमप्यविग्रहत्वं भवति तद्वदत्रापि· ननु सुप्सुपलपितमित्यादौ कारकादिति योगविभागेनैव सिद्धमित्याशंक्याह तृतीयेति· तस्य तु योगविभागो न वाधकः तस्य निर्विषयत्वं स्यात्· अभूतप्रादुर्भावो निव्यारनमभूतप्रादुर्भाव इति॥ ❁ ॥अतो· गतिकारकोपपदात्कृदिन्यस्यापवादः पयःपानमिति· कर्मणि च येनेति कर्मण्युपपदे भावे ल्युट् उपपदसमासः राजभोजना इति हस्तलुयो बहुलमिति कर्मणि ल्युट्· कर्तरि षष्ठीसमासः मनक्तिन्· कृत्स्वरापवादः कीर्तितु तृतीया कर्मणी त्वस· रथवर्त्मेति हेतेरधिकरणेमनि न कर्तरि षष्ठ्या समासः पाणिनिकृतिरिति· कर्मणि क्तिन् पूर्ववत्समासः छन्दोव्याख्यानमिति व्याख्यानमिति क

अतो भावकर्मवचनः।६।२।१५०। कारकात्परमेन तथा यान्नम्भाववचनं कर्मवचनं चान्तोदात्तम् पयःपानं सुखम् राजभोजनाः शालयः अतः किम् हस्तादायः भेतिकिम् दन्तधावनं करणे ल्युट् कारकात्किं निदर्शनं मनक्तिन् व्याख्यानं शयनासनस्थान पाजकादिक्रीताः।६।२।१५१। कारकात्पराण्येतान्युत्तरपदान्यन्तोदात्तानि तत्पुरुषे कृत्स्वरापवादः रथवर्त्म पाणिनिकृतिः छन्दोव्याख्यानं राजशयनं राजासनं अश्वस्थानं ब्राह्मणयाजकः गोक्रीतः कारकात्किं प्रभूतोसङ्गतिः अन्नतादेचनी तीति स्वरः सप्तम्याः पुण्यम्।६।२।१५२। अन्तोदात्तं अध्ययनपुण्यं तत्पुरुषे तुल्यार्थे इति प्राप्तं सप्तम्याः किं वेदेन पुण्यं वेदपुण्यम् ऊनार्थकलहं तृतीयायाः।६।२।१५३। माषोनं माषविकलम् वाक्कलहः तृतीयापूर्वपदप्रकृति स्वरापवादोऽयम् अत्र केचिदर् इति स्वरूपग्रहणमिच्छन्ति धान्यार्थः ऊनशब्देनत्वर्थो निर्दिष्टार्थेन तदर्थानां ग्रहणमिति प्रतिपदोक्तत्वादेव सिद्धे

रणे ल्युट्· शयनासनस्थाने ष्वधिकरणे ल्युट्· ब्राह्मणयाजक इति याजकादिभिश्चेति सूत्रेण षष्ठीसमासः याजकादयस्त एव गृह्यन्ते· प्रभूतोसंगतिमिति· नादेचनिति कृत्यता विति पूर्वपदप्रकृतिस्वर एवात्र भवति· सप्तम्याः सप्तम्यन्तात्परं पुण्य मित्येतदुत्तरपदमन्तोदात्तं स्यात्तत्पुरुषे· अध्ययनपुण्यमिति· अध्ययने पुण्यमिति विग्रहः सप्तमीति योगविभागात्समासः ऊनार्थ· तृतीयान्तात्पराण्यूनार्थानि कलहश्चैतान्युत्तरपदान्यन्तोदात्तानि स्युः उदाहरणेषु पूर्वसदृश इत्यादिना तृतीयासमासः कौचित्त्वित्यादि नन्वेवमूनशब्दस्यापि स्वरूपस्य ग्रहणं प्रसः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्वेतत्तत्रश्च तदर्थानामन्येषां ग्रहणं न स्यादत आह· उनप्रत्ययेनत्विति· अर्थनिर्देशार्थत्वं तु व्याख्यानादवसेयम्॥ ॥ मिश्रं च तृतीयान्तान्तरमनुपसर्गमिश्रमन्तोदात्तं

मिश्रं चानुपसर्गमसन्धौ।६।२।१५४। पणबन्धेनैकार्थ्यं सन्धिः· तिलमिश्राः· सर्पिर्मिश्राः· मिश्रग्रहणं· गुडधानाः· अनुपसर्गं किं· तिलसंमिश्राः· मिश्र
ग्रहणे सोपसर्गग्रहणस्येदमेव ज्ञापकं असन्धौ किं ब्राह्मणमिश्रो राजा ब्राह्मणैः सह संहितः ऐकार्थ्यमापन्नः नञो गुणप्रतिषेधे सम्पाद्यर्हहि
तालमर्थास्तद्धिताः।६।२।१५५। सम्पाद्याद्यर्थतद्धितान्ता नञो गुणप्रतिषेधे वर्तमानात्परेऽन्तोदात्ताः कर्णवेष्टकाभ्यां सम्पादि कार्णवेष्टकिकं
न कार्णवेष्टकिकम् अकार्णवेष्टकिकं छेदमर्हति छैदिकः न छैदिकोऽच्छैदिकः न वत्सेभ्यो हितो ऽवत्सीयः न सन्तापाय प्रभवति असान्तापिकः
नञः किं गर्दभरथमर्हति गार्दभरथिकः विगार्दभरथिकः गुणप्रतिषेधे किं गार्दभरथिकादन्योऽगार्दभरथिकः गुणो हि तद्धितार्थप्रवृत्तिनि
मित्तं सम्पादित्वाद्युच्यते तत्प्रतिषेधो यत्रोच्यते तत्रायं विधिः कर्णवेष्टकाभ्यां न सम्पादि मुखमिति संपैति किं पाणिनीयमधीते पाणिनीयः
न पाणिनीयः अपाणिनीयः तद्धितः किं वोढुमर्हति वोढा न वोढाऽवोढा ययतोश्चातदर्थे।६।२।१५६। ययतौ यौ तद्धितौ तदन्तस्योत्तरपदस्यान
ञो गुणप्रतिषेधविषयात्परस्यान्तउदात्तः स्यात् पाशानां समूहः पाश्या न पाश्या अपाश्या अदन्त्यं अतदर्थे किं अपाद्यं तद्धितः किं अदेयं गुण
प्रतिषेधे किं दन्त्यादन्यदरदन्त्यं तदनुबन्धग्रहणे नातदनुबन्धकस्येति नेह अवामदेव्यम् अच्कावशक्तौ।६।२।१५७। अजन्तं कान्तं च नञः प
रमन्तोदात्तमशक्तौ गम्यायां अपचः पक्तुमशक्तः अविलिखः अशक्तौ किं अपचो दीक्षितः गुणप्रतिषेधे इत्येव अन्योऽयं पचादय चः आक्रोशे च।६।२।

स्यादसंधौ· अयमपि तत्पुरुषेऽनुस्यार्थे तस्यापवादः पणबंधेनैकार्थ्यमिति· पणबंधः परिभाषणं· यदि मे भवा ((२।१५८। नञः परावचूकावन्तोदात्ता वाक्रोशे·
((न्निदं कुर्यादहमपि भवतः करिष्यामीत्येवंरूपं· तिलमिश्रा इति· ॥



६५४

CC-0. In Public Domain. Digitization by eGangotri

पूर्वसदृशसमोनार्थेतिसमासः तिलसंमिश्रा इति कथं पुनर्मिश्रशब्दस्य विधीयमानं संमिश्रशब्दस्य प्राप्नोति कथं च मिश्रशब्देनोच्यमानः समासः सोपसर्गेण लभ्यते इ
त आह मिश्रग्रहणे इत्यादि तेन मिश्रश्लक्ष्णैरिति विधीयमानः समासः सोपसर्गेणापि सिद्धः ब्राह्मणमिश्र इति यदि मे भवन्तः कार्यं कुर्युस्तदाहं भवतामुपकारं करिष्यामी
त्येवंरूपेण पणबंधेन कृत्वा ब्राह्मणैः सह मिलित इत्यर्थः अपरे तु स्वरूपभेदग्रहणं संधिः ब्राह्मणमिश्र इत्यत्र ब्राह्मणैर्नैकीभावेपि राजा स्वरूपेण गृह्यते गुडमिश्र
इत्यत्र गुडेनैकीभूतस्य स्वस्वरूपभेदेन गृह्यते इत्याहुः नञो गुण कार्णवेष्टकिकमिति संयादिनीतिप्राग्वतेष्ठञ् छैदिक इति छेदादिभ्यो नित्यमिति ठक् वत्सीय इति न
स्मिहितमिति छः सांतापिक इति तस्मै प्रभवति संतापादिभ्य इति ठञ् नञ इति किमिति प्रतिषेधो प्रायेणानञ एव वृत्तिदर्शनात् प्रश्नः विगार्दभरथिक इति अव्ययपू
र्वपदप्रकृतिस्वर एवात्र भवति गार्दभरथिकाद्न्य इति उदाहरणाद्स्य विशेषं दर्शयितुं गुणप्रतिषेध इति सूत्रावयवं व्याचष्टे गुण इति तद्धितार्थप्रवृत्तिनिमित्तमिति
तद्धितार्थः संपाद्याद्दितस्य यत् प्रवृत्तिनिमित्तं संपादित्वादीति आदिशब्देन तदर्हत्वादेर्ग्रहणं स गुण इत्युच्यते उक्तं हि संसर्गभेदकं यद्यत्स्व्यापारं प्रतीयते गुणत्वं परत्वं
न्त्वात्तस्य शास्त्रे उदाहृतमिति वोढेति अर्हे कृत्यतृचश्चेति तृच् घत्वढत्वष्टुत्वढलोपेषु सहिवहोरोदवर्णस्येत्योत्वं पाद्येति समूहे पाशादिभ्यो यः अदन्त्यमिति शरी
रावयवाच्चेति यत् अपाद्यमिति पादार्घाभ्यां चेति यत् अदेयमिति दादाने अर्हार्थे अचो यत् ईद्यति त्वे गुणः अवामदेव्यमिति वामदेवेन दृष्टमित्यर्थे वामदेवात् ड्यड्
ड्याविति ड्यः अपच इति पचाद्यच् अविलिख इति इगुपधेति कः कृत्योकेष्णुच्चार्वादयश्चेति वक्ष्यमाणैः कृत्योकेष्णुभिः साहचर्यादच्कयोः कृतोरिह ग्रहणं तेन कद्
ग्रहण परिभाषया विलिखशब्दस्य कान्तत्वम् अपचो दीक्षित इति दीक्षितः शास्त्रविरोधान्न पचतिनलक्षणकत्वेन ॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स·
सि·कौ·
टी·न·
पू·६

अपचोजाल्मइति·पक्तुंशक्तोपिपक्तुमयंनशक्नोतीत्यनेनप्रकारेणाक्षिप्यतेतदाह·पक्तुमित्यादि·अदेवदत्तइति·देवदत्तःसन्यत्तत्कर्मनकरोतिसएवमाक्षिप्यते·अनागामुकइ
ति·लषपतपदेत्युकञ्·अनलंकरिष्णुरिति·अलंकृञित्तीष्णुच्·इकारादेर्विधानसामर्थ्यादिति·भवतेरुदात्तत्वात्ततःपरस्यखिष्णुचइटैवेकारादित्वेसिद्धेइकारादेर्विधा
नमिहसामान्यग्रहणार्थमेवेतिभावः·अनाढ्यंभविष्णुरिति·भुवःखिष्णुचखुकञावितिखिष्णुच्·अचारुरिति·हसतीतिचरेरुण्·असाधुरिति·साध्नोतेःकृवापाजीत्यु

अपचोजाल्मःपक्तुन्नशक्नोतीत्येवमाक्षिप्यते अविक्षिपःसंज्ञायाम्॥६।२।१५९॥ नञःपरमन्तोदात्तंसंज्ञायामाक्रोशे॥ अदेवदत्तः कृत्योकेष्णुचार्वा
दयश्च॥६।२।१६०॥ नञःपरेऽन्तोदात्ताःस्युः अकर्तव्यःउक अनागामुकः इष्णुच अनलङ्करिष्णुः इष्णुजग्रहणंखिष्णुचोप्यनुबन्धकस्यापि
ग्रहणमिकारादेर्विधानसामर्थ्यात् अनाढ्यम्भविष्णुः चार्वादिः अचारुः असाधुः राजाह्नोश्छन्दसि अराजाअनहः भाषायान्नञःस्वरएव।
विभाषातृन्नऽन्नतीक्ष्णशुचिषु॥६।२।१६१॥ तृन् अकर्ता २ अन्न अनन्नम् अतीक्ष्णम् अशुचिपक्षेऽव्ययस्वरः बहुव्रीहाविदमेतत्तद्भ्यः
प्रथमपूरणयोःक्रियागणने॥६।२।१६२॥ एभ्योऽनयोरन्तउदात्तः इदम्प्रथमंयस्यसइदंप्रथमः एतद्द्वितीयः तत्पञ्चमः बहुव्रीहौकिं अनेनप्र
थमइदंप्रथमः तृतीयेतियोगविभागात्समासः इदमेतत्तद्भ्यःकिम् यत्प्रथमः प्रथमपूरणयोःकिम् तानिबहून्यस्यतद्बहुःक्रियागणनेकिं अय
म्प्रथमःप्रधानंयेषान्ते इदम्प्रथमाः द्रव्यागणनमिदम् गणनेकिं अयंप्रथमोयेषान्ते इदम्प्रथमाः इदम्प्रधानाइत्यर्थः उत्तरपदस्यकार्यित्वा
त्कपिपूर्वमन्तोदात्तं इदम्प्रथमकः बहुव्रीहाविसधिकारः वनंसमासइत्यतः प्राग्बोध्यः॥ ११ ण·राजाह्नोः चार्वाद्यन्तर्गणसूत्रं· नञःपरयोरेतयो।
श्छन्दसिअन्तोदात्तत्वम्·अराजेति· नञस्तत्पुरुषादितिसमासान्तनिषेधःविभाषातृन्· नञउत्तरपदान्येतान्यन्तोदात्तानिस्युस्तत्पुरुषे· बहुव्रीहाविद·एभ्यइत्यादि· इदमेतत्तद
भ्यःअनयोःप्रथमपूरणयोः इदंप्रथमंयस्येतिनिगमनंभोजनंवा·अनेनप्रथमइदंप्रथमइति· तृतीयापूर्वपदप्रकृतिस्वरएवभवति·यत्प्रथमइति·यत्प्रथमंगमनंयस्य

समासप्रकरणम्॥·॥
रामः
३१८

CC-0. In Public Domain. Digitization by eGangotri

नाऽस्त्यर्थ इति· अनेन प्रधानवचनः प्रथमशब्दो न त्वेकसंख्यावचन इति दर्शितं· तेनात्र गणनाभाव उक्तः उत्तरपदस्येत्यादि· इह समासस्येति प्रकृतं· उत्तरपदस्य दिवित्यतः प्रभृति उत्तरपदस्येति च तत्र इहोत्तरपदं कार्यित्वेनाश्रीयते तेन पदशब्दमुपपद्यते तदा कपि परतो यत्पूर्वं प्रथमेति तत्· अन्तोदात्तं भवति ननु कथं तं कप्रत्ययो हि समासस्यैवान्तो नोत्तरपदस्य उत्तरपदावयवः समासान्ता इति पक्षेऽपि प्रथमपूरणयोरिति विशिष्टरूपग्रहणात् कप्सत्त्वे ऽनन्तर्भवात् तदुपान्तयोरेव स्वरः॥ ॥ संख्यायाः संख्यायाः परस्तनशब्दोऽन्तोदात्तः स्यात्· दर्शनीयस्तनेति· पूर्वपदप्रकृतिस्वरः दर्शनीयशब्दोऽनीयरप्रत्ययान्तः रित्स्वरः विभाषा· पूर्वसूत्रोक्तं छन्दसि वा स्यात् द्विस्तनीमिति अन्तोदात्तत्वं स्वाङ्गाच्चोपसर्जनादिति ङीष्· चतुस्तनामिति· पूर्वपदप्रकृतिस्वरेण च तेरुराणिति चतुरशब्दस्य नित्यादाद्युदात्तत्वम्· अन्तोदात्तत्वाभावात् स्वाङ्गादिति ङीन्न संज्ञायां मित्रा· एत

संख्यायास्तनः। ६।२।१६३। बहुव्रीहावन्तोदात्तः द्विस्तना चतुस्तना संख्यायाः किं दर्शनीयस्तना स्तनः किम् द्विशिराः विभाषा छन्दसि। ६।२।१६४
द्विस्तनं करोति संज्ञायां मित्राजिनयोः। ६।२।१६५। देवमित्रः कृष्णाजिनम् संज्ञायां किं प्रियमित्रः ऋषिप्रतिषेधो मित्रे विश्वामित्रं ऋषिः।
व्यवायिनोऽन्तरम्। ६।२।१६६। व्यवधानवाचकात्परमन्तोदात्तम् वस्त्रमन्तरं व्यवधायि यस्य स वस्त्रान्तरम् व्यवधायिनः किम् आत्मा
न्तरम् स्वभावान्य इत्यर्थः मुखं स्वाङ्गम्। ६।२।१६७॥ गौरमुखः स्वाङ्गं किं दीर्घमुखा शाला नाऽव्ययदिक्छब्दगोमहत्स्थूलमुष्टिपृथुव
त्सेभ्यः। ६।२।१६८॥ उच्चैर्मुखः। प्राङ्मुखः। गोमुखः। महामुखः। स्थूलमुखः॥ ॥ ॥

योरुत्तरपदयोरन्तोदात्तः स्याद्बहुव्रीहौ संज्ञायाम्· विश्वामित्र इति· मित्रे चर्षाविति दीर्घः· अत्र बहुव्रीहौ विश्वं संज्ञायामिति बाधित्वा परत्वादनेनान्तोदात्तत्वं प्राप्तं प्रतिविधानेऽतो बहुव्रीहौ विश्वं संज्ञायामित्यन्तोदात्तत्वं भवति· व्यवायि· उदाहरणे व्यवधानवाचिनोऽन्तरशब्दान्तत्वात्करोतीति णिचि पचाद्यच्· प्रत्युदाहरणे त्वन्यवाच्यन्तरशब्दः मुखम्· स्वाङ्गं मुखमुत्तरपदमन्तोदात्तं बहुव्रीहौ· दीर्घमुखा शालेति· मुखशब्देनात्र द्वारप्रदेशः शालाया उच्यते· स्वाङ्गमद्रवादिलक्षणमिह गृह्यते· न तु स्वमङ्गं स्वाङ्गमिति व्युत्पत्तिलभ्यम् अन्यथाऽत्रापि स्यादिति भावः· नाव्ययः एभ्यः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



परो मुखशब्दोन्तोदात्तो न स्यात् पूर्वपदप्रकृतिस्वरोऽत्रेति· एवमुदाहरणेषु बहुव्रीहौ प्रकृत्या पूर्वपदमिति पूर्वपदप्रकृतिस्वरेणान्तोदात्तं पूर्वपदं तथाहि· उदि चेर्डैसिः उच्चैः अ
निगतौ च त्वावप्रत्यय इति प्रशब्द उदात्तः ततएकादेशस्वरेण माङ् शब्द उदात्तः गमेर्डोः गोः वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च इति नामहच्छब्द उदात्तो निपातितः स्थूलशब्दम्प्रज्ञेन्द्रेस्नादव
न्तोदात्तो निपातितः॥ ॐ॥ मुषेः क्तिच् मुष्टिः प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्चेति कुः पृथुः कृतृवदीत्यादिना सः वत्सः उपमानलक्षणो विकल्प इति· निष्ठोपमानादिनिषि
द्धः बाध्यत इति· अस्य प्रतिषेधस्यावकाशो यत्र गवादिरुपमानं न भवति गोमुखमिव यस्य सः वत्सामुखमिव यस्येति सर्वत्रात्र गवादिरुपमेयं नोपमानं· उत्तरस्य विकल्पस्याव
काशः यत्र गवादिः पूर्वपदं न भवति· सिंहमुखः गवादावुपमाने उभयप्रसंगे यमेव भवति पूर्वविप्रतिषेधेन· सिंहमुख इति· पक्षे पूर्वपदप्रकृतिस्वरः हिंसेः पचाद्यचि सिंहः पृ

मुष्टिमुखः पृथुमुखः वत्समुखः पूर्वपदप्रकृतिस्वरोऽत्र गोमुष्टिवत्सपूर्वपदस्योपमानलक्षणोऽपि विकल्पोऽनेन बाध्यते निष्ठोपमानादन्यतर
स्याम्॥ ६।२।१६८॥ निष्ठान्तादुपमानवाचिनश्च परम्मुखं स्वाङ्गं वाऽन्तोदात्तं बहुव्रीहौ प्रक्षालितमुखः पक्षे निष्ठोपसर्गेति पूर्वपदान्तोदात्तत्वमपूर्व
पदप्रकृतिस्वरत्वेन गतिस्वरोऽपि भवति उपमानं सिंहमुखः जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः॥ ६।२।१७०॥ सारङ्गज
ग्धः मासजातः सुखजातः दुःखजातः जातिकालेति किम् पुत्रजातः अनाच्छादनात् किम् वस्त्रच्छन्नः अकृतेति किं कुण्डकृतः कुण्डमितः कुण्डप्र
तिपन्नः अस्मादेव ज्ञापकान्निष्ठान्तस्य परनिपातः वा जाते॥ ६।२।१७१॥ जातिकालसुखादिभ्यः परो जातशब्दो वान्तोदात्तः दन्तजातः मासजातः ॥

षोडशादित्वादाद्युदात्तविपर्ययः जातिकाल जातादिभ्यः परं क्तान्तमन्तोदात्तं स्यात् बहुव्रीहौ दन्तादी वर्जयित्वा आच्छादनवाचकात्परं चेन्न· सारंगजग्ध इति· सारंगः पक्षिविशेषः
स जग्धो भक्षितो येनेति विग्रहः प्रत्युदाहरणे सर्वत्र पूर्वपदप्रकृतिस्वरः तत्र पुत्रशब्दोऽन्तोदात्तः वसेष्ट्रन्· वस्त्रशब्द आद्युदात्तः कुंडशब्दो न व्विषयस्यानिसंतस्येत्याद्युदात्तः ना
नूदाहरणेषु प्रत्युदाहरणेषु च· निष्ठेति निष्ठा· तस्य पूर्वनिपातः प्राप्नोति तत्राहास्मात् ज्ञापकादिति· इदमेवमनसि विभाव्योक्तं जातिकालसुखादिभ्यः परा निष्ठा वा चेति· दन्तजा



616

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पक्षे पूर्वपदप्रकृतिस्वरः । दंतप्रधानः स्वांगशिवमदंतानामित्याद्युदात्तः मासशब्दो ग्रामादीनां चेत्याद्युदात्तः ॥ ःः ॥ नञ्सु । नञ्सुभ्यां परमुत्तरपदमन्तोदात्तं स्यात् समासान्ता उत्तरपदा
वयवाः तेनानृच इत्यत्र ऋक्पूरित्यपि अकारस्योदात्तत्वं भवति । समासावयवाः समासांता इति पक्षे तु अस्मिन्सूत्रे समासस्यैव कार्यित्वमाश्रीयते नोत्तरपदस्य कपिपूर्वमिति ।
ज्ञापकात् । यद्यनेनोत्तरपदस्यान्तोदात्तः स्यात् ततो ऽकुमारीक इत्यादावनेनैव सिद्धत्वात्कपिपूर्वमित्यसवाच्यं स्यात् । कपिपूर्वं पूर्वं हलंकपरे चोदात्तत्वे यथासंभवं ततः पूर्वस्योदात्तत्वं विधीय
ते । ह्रस्वान्तेऽन्त्यात्पूर्वमिति वचनादिह दीर्घान्ताद्येवोदात्तम् नाः उदाहरणेन घृतस्थेति कपः ह्रस्वान्ते ह्रस्वः ऋन्तोपस्य तदिदं ह्रस्वान्तमिति बहुव्रीहेरन्यपदार्थमुत्तरपदं समासो वा गृ
ह्यत इत्याशयेनाह । उत्तरपदे समासे वेति । अत्र कपिपर इति । सामान्यवचनात्तद्धितमुत्तरपदं समासो वा गृह्यते । ननु पूर्वग्रहणमनर्थकं । कपिपूर्वमित्युक्ते तु रत आह । पूर्व ।

नञ्सुभ्याम् ॥ ६।२।१७२ ॥ बहुव्रीहावुत्तरपदमन्तोदात्तं अव्रीहिः सुमाषः कपिपूर्वम् ॥ ६।२।१७३ ॥ नञ्सुभ्यामुत्तरम्पूर्वमुदात्तं कपि परे अब्रह्मबन्धूकः सुकु
मारीकः ह्रस्वान्तेऽन्त्यात्पूर्वम् ॥ ६।२।१७४ ॥ ह्रस्वान्ते उत्तरपदे समासे चान्त्यात्पूर्वमुदात्तं नञ्सुभ्यां बहुव्रीहौ अव्रीहिकः सुमाषकः पूर्वमित्यनुवर्तते पुनः
पूर्वग्रहणं प्रकृतिभेदेन नियमार्थं ह्रस्वान्तेऽन्त्यादेव पूर्वमुदात्तं न कपिपूर्वमिति अज्ञकः कवन्तस्यैवान्तोदात्तत्वम् बहोर्नञ्वदुत्तरपदभूम्नि ॥ ६।२।१७५ ॥
उत्तरपदार्थबहुत्ववाचिनो बहोः परस्य पदस्य नञः परस्येव स्वरः स्यात् बहुव्रीहिकः बहुमित्रकः उत्तरपद इति किं बहुषु मानोऽस्य स बहुमानः ॥ ॥

मित्यनुवर्तमाने इति प्रकृतिभेदेन वाक्यभेदे न तत्रैकेन वाक्येन ह्रस्वान्तेऽन्त्यात्पूर्वस्योदात्तत्वं विधीयते द्वितीयेन तु नियम्यते । ह्रस्वान्तेऽन्त्यादेव पूर्वमुदात्तं भवति न कपिपूर्वमिति ।
तेन किं सिद्धमत आह । कवन्तस्यैवान्तोदात्तत्वमिति । नास्ति ज्ञायस्य अज्ञकः अत्र यद्येष नियमो न स्यात्तर्हि एतस्याभावे कपिपूर्वमित्ययमेव स्वरः स्यात् । अस्मिंस्तु नियमे सति न भ
वति । नञ्सुभ्यामिति कवन्तस्यैव भवति । बहोर्नञ् । नञ इव नञ्वत् । अस्मादेव निपातनात्त्यं चमी समर्था इति । बहूनां भावो भूमा । बहोर्लोपो भू च बहोः उत्तरपदशब्देन तदर्थो
गृह्यते । स्वरूपेणोत्तरपदस्य बहुत्वासंभवात् तदाह उत्तरपदार्थबहुत्वे इति बहुव्रीहिक इत्यादि । ह्रस्वान्तेऽन्त्यात्पूर्वमिति स्वरः बहुमान इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स
सि·कौ· पूर्वपदप्रकृतिस्वरः बहुशब्दस्तु लघिवंत्योर्न लोपश्चेति कृतप्रत्ययान्तोऽन्तोदात्तः॥ ॥ नगुणा अवयववाचिनो बहोः परे इति· अवयववाचिन इति गुणादीनां विशेषणं· उप
टी·त· स· सांगमतिक्रियायोगाभावादुपसर्गग्रहणं प्रायुपलक्षणं· प्रादेरुत्तरं ध्रुवं स्वांगवाचिपर्शुवर्जितमन्तोदात्तं स्यात् बहुव्रीहौ· प्रत्युदाहरणे पूर्वपदप्रकृतिस्वरः दर्शनीयश
३२१ ब्दः नीऽयरप्रत्ययान्तः रित्स्वरः उदाहुरिति· क्रोशनीति शेषः अत्र क्रोशनसमयपरयोः उदाहृतं न सर्वदैवेत्यध्रुवम्· वनं समासे· बहुव्रीहावित्यस्यानिवृत्त्यर्थं समासग्रहणं अव
ण इति· बहुव्रीहौ नञ्सुभ्यांचपूर्वपदप्रकृतिस्वरे प्राप्ते प्रतिविधत्त इति णत्वम्· अन्तः अन्तर् शब्दात्त्वमप्याश्छांदसो लुक् इत्याह· असमासपरमिति· अन्तः शब्दात्परमित्यर्थः अन्त

नगुणादयोऽवयवाः ।६।२।१७६। अवयववाचिनो बहोः परे गुणादयो नान्तोदात्ताः बहुव्रीहौ बहुगुणा रज्जुः बह्वक्षरं पदं बह्वध्यायः गुणादिराकृतिगणः
अवयवाः किं बहुगुणो द्विजः अध्ययनश्रुतसदाचारादयो गुणाः उपसर्गात्स्वाङ्गं ध्रुवमपर्शु ।६।२।१७७। प्रपृष्ठः प्रललाटः ध्रुवमेकरूपं उपसर्गा
त्किम् दर्शनीयपृष्ठः स्वाङ्गं किं प्रशाखो वृक्षः ध्रुवं किं उद्बाहुः अपर्शु किं विपर्शुः वनं समासे ।६।२।१७८। समासमात्रे उपसर्गादुत्तरपदं वनमन्तोदा
त्तं नसेदिमे प्रवणे अन्तः ।६।२।१७९। अस्मात्परं वनमन्तोदात्तं अन्तर्वणो देशः अनुपसर्गार्थमिदम् अन्तश्च ।६।२।१८०। उपसर्गादन्तः शब्दो
न्तोदात्तः पर्यन्तः समन्तः नाभिविभ्याम् ।६।२।१८१। न्यन्तः व्यन्तः पूर्वपदप्रकृतिस्वरे यणि च कृते उदात्तस्वरितयोर्यण इति स्वरितः परेरभितोभाविम
ण्डलम् ।६।२।१८२। परेः परमभितउभयतोभावो यस्यास्ति तत्कूलादि मण्डलं चान्तोदात्तं परिकूलं परिमण्डलं ॥ ॥ ॥

र्वण इति· अत्रापि तेनैव णत्वम्· अनुपसर्गार्थमिति· उपसर्गे तु पूर्वेणैव सिद्धम्· । ननिविभ्यां । निविभ्यां युक्तयोः अन्तः शब्दो नान्तोदात्तः स्यात्· पूर्वपदप्रकृतिस्वर इति· बहुव्रीहिस
मासे बहुव्रीहौ प्रकृत्येति तत्पुरुषे तत्पुरुषे तु त्वार्थे तनेन परेरभितः परेरुत्तरोऽभिशब्दो भाववाचिमंडलं चान्तोदात्तं स्यात् अभितो भावी तस्यार्थमाह· अभितो भावोऽस्यास्तीति अ ग।ष
यत्ता अभितः उभयतो भवति न घादीकूलादिकमिसभितोभावी मुख्यजातावितिणिनिः परिकूलमिति· बहुव्रीहिः प्रादिसमासोऽव्ययीभावो वा· न च बहुव्रीहौ नन्यायेच ३२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वपदप्रकृतिस्वरे प्राप्ते अव्ययीभावे तु परिप्रत्युपापाये ति कूलतीरेति च प्राप्ते । परितः कूलमस्य परिगतं कूलमिति कूलात्कूलं वर्जयित्वेत्यर्थ इति उदकस्याभाव इव विग्रहः ॥ ःः
॥ प्रादेः ॥ प्रादुत्तरमस्वांगवाचि संज्ञायामन्तोदात्तं स्यात् प्रगृहमिति । प्रादिसमासः बहुव्रीहिर्वा । प्रपदमिति । पूर्वपदप्रकृतिस्वरः । निरुदकमित्यादि । निर्गतमुदकं यस्मादिति
बहुव्रीहिः निर्गतमुदकमिति प्रादिसमासो वा । उदकस्याभाव इत्यव्ययीभावे तु समासान्तोदात्तत्वेनैव सिद्धम् । अभेः । अभेरुत्तरपदं मुखमन्तोदात्तं स्यात् उपसर्गात्स्वांगमिति नीति
मुखं स्वांगमिति तु न भवति नाव्ययदिक्शब्द इति निषेधात् । अपाच्च । अपादुत्तरं मुखमन्तोदात्तं स्यात्समासे । अपमुखमिति । प्रादिसमासे बहुव्रीहौ च पूर्वपदप्रकृतिस्वरे प्रा
प्ते मुखं वर्जयित्वेत्यव्ययीभावेऽपि परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेष्विति प्राप्तेः यमारंभः उत्तरार्थ इति । उत्तरत्र अपादित्यस्यैवानुवृत्तिर्यथा स्यात् । अभेर्माभूत् । स्फिगपूत

प्रादः स्वाङ्गं संज्ञायाम् ॥६।२।१८३॥ प्रगृहं अस्वाङ्गं किं प्रपदं । निरुदकादीनि च ॥६।२।१८४॥ अन्तोदात्तानि निरुदकम् निरुपलम् अभेर्मुखम् ॥६।२।
॥१८५॥ अभिमुखम् उपसर्गात्स्वाङ्गमिति सिद्धे बहुव्रीह्यर्थमध्रुवार्थमस्वाङ्गार्थं च अभिमुखा शाला अपाच्च ॥६।२।१८६॥ अपमुखं योगवि।
भाग उत्तरार्थः स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीरनामनाम च ॥६।२।१८७॥ अपादिमान्यन्तोदात्तानि अपस्फिगम् अपपूतं अपवीणम् अञ्जस।
अपाञ्जः अध्वन् अपाध्वा उपसर्गादध्वन इत्यस्याभावे इदं एतदेव च ज्ञापकं समासान्तानित्यत्वे अपकुक्षिः सीरनाम अपसीरम् अपहलं अ
पनाम स्फिगपूतवीणा कुक्षिग्रहणमबहुव्रीह्यर्थमस्वाङ्गार्थं च ॥

९९ नामग्रहणं सीरस्यैव संबध्यते न स्फिगादिभिः स्फिगपूतकुक्षीणां पृथग्ग्रहणादि
ति हरदत्तः तेन स्फिगपूतकुक्षयः पर्याया इति निश्चीयते । उपसर्गादध्वन इत्यस्याभाव इति । उपसर्गादध्वन इदं समासान्तान्तरविधायकं तदभावे तस्मिन्सति अच्प्रत्यया
स्य चित्त्वादेव सिद्धम् । ननूपसर्गादध्वन इत्यनेन नित्यो च विधीयते तत्कथमुक्तमित्यस्याभाव इतीत्यत आह एतदेव च ज्ञापकमिति । यदि हि नित्यः समासान्तः स्यात् अध्वग्र
हणमिहानर्थकं स्यात् । अच्प्रत्ययस्य चित्त्वादन्तोदात्तस्य सिद्धत्वात् । कृतं तु अध्वग्रहणं ज्ञापयति समासान्ता अनित्या इति । स्फिगपूतकुक्षिग्रहणमिति । यदा स्वेतानि स्वांग

सि॰ कौ॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स॰
सि॰ कौ॰ निघुवाणो चभवंतिबहुव्रीहिश्चसमासस्तदोषसर्गात्त्वागमित्येवसिद्धम्॥ ❀ ॥अधेः अधेरुत्तरमुपरिस्थवाचिअन्तोदात्तंस्यात् उपरिनिष्ठतीत्युपरिस्थं सुपिस्थ इति कः तदे
टी॰ त॰ तद्दर्शयति रंतस्योपरीति अधिकरणमिति अधिक्रियतेऽस्मिन्नित्यधिकरणंतेनतदुपरिस्थवाचिकिंत्वधः स्थवाची अत्रकृदुत्तरपदप्रकृतिस्वरेणककारउदात्तः अनुज्येष्ठमि
१२२ ति उत्तरपदार्थस्याप्राधान्यंदर्शयति पूर्वपदार्थप्रधानःप्रादिसमासोयमिति प्रधानार्थंचकनीयोग्रहणमिति अन्यत्राप्रधानग्रहणेनैवसिद्धत्वात् अनुगतोज्येष्ठइति वि

अधेरुपरिस्थम्॥ ६।२।१८८॥ अध्यारूढोदन्तोऽधिदन्तः दन्तस्योपरिजातोदन्तः उपरिस्थःकिं अधिकरणं अनोरप्रधानकनीयसी॥ ६।२।१८९
अनोः परमप्रधानवाचिकनीयश्चान्तोदात्तं अनुगतोज्येष्ठमनुज्येष्ठं पूर्वपदार्थप्रधानः प्रादिसमासः अनुगतः कनीयाननुकनीयान् उत्तरपदा
र्थप्रधानः प्रधानार्थंचकनीयोग्रहणं अप्रेतिकिम् अनुगतोज्येष्ठोनुज्येष्ठः पुरुषश्चाऽन्वादिष्टः॥ ६।२।१९०॥ अनोः परोऽन्वादिष्टवाचीपुरुषोऽ
न्तोदात्तः अन्वादिष्टःपुरुषोनुपुरुषः अन्वादिष्टःकिं अनुगतः पुरुषोऽनुपुरुषः अतेरकृत्पदे॥ ६।२।१९१॥ अतेः परमकृदन्तंपदशब्दश्चान्तो
दात्तः अत्यङ्कुशोनागः अतिपदागायत्री अकृत्पदेरेकिं अतिकारः अतेर्धातुलोपइतिवाच्यम्॥ इहमाभूत् शोभनोगार्ग्योऽतिगार्ग्यः इहचस्यात्
अतिक्रान्तःकारुकमतिकारुकः नेरनिधाने॥ ६।२।१९२॥ निधानमप्रकाशतातन्नोन्यत्रनिधानमप्रकाशतेत्यर्थः॥ निमूलं न्यक्षम् अनिधाने
किम् निहितोदण्डोनिदण्डः प्रतेरंश्वादयस्तत्पुरुषे॥ ६।२।१९३॥ प्रतेः परेंश्वादयोऽन्तोदात्ताः प्रतिगतोंऽशुः प्रत्यंशुः प्रतिजनः प्रतिराजा समासान्त
स्यानित्यत्वान्नटच् उपाद्व्यजजिनमगौरादयः॥ ६।२।१९४॥ उपात्परंद्व्यच्कमजिनंचान्तोदात्तंतत्पुरुषेगौरादीन्वर्जयित्वा उपदेवः॥
उपेन्द्रः॥ उपाजिनं॥ अगौरादयःकिम् उपगौरः उपतैषः तत्पुरुषेकिम् उपगतः सोमोस्यसउपसोमः॥ ॥ ॥ 618

यहविशेषणप्रधानवाचित्वंज्येष्ठशब्दस्यदर्शयति पुरुषअन्वादिष्टइति अनुपश्चादादिष्टःकथितः कस्मिंश्चित्कथितेयोन्यःकथ्यतेसअन्वादिष्टइत्यर्थः अतेरकृ
त्पदेः अकृच्चपदंचअकृत्पदेतदाहः अकृदंतंपदशब्दः॥

१९४ एम॰ १२२

श्वेति · अत्यंकुश इति · अंकुशमतिक्रान्त इति विग्रहः अतिकारक इति · शोभनः कारकः पूजार्थोयमतिः अतेर्धातुलोप इति · अत्यंकुशादौ वृत्तिविषयेऽतिशब्दोऽतिक्रान्तार्थवृ
त्तिरिति · क्रमेरप्रयोग एव धातुलोपः अतिगार्ग्य इति · यथाभ्यासे त्वत्रापि प्राप्नोति गार्ग्यशब्दस्याकृदन्तत्वात् · तस्मादव्याप्त्यतिव्याप्तिपरिहारार्थमकृत्स्वर इत्येतदपनीय धातु
लोप इति वक्तव्यमित्यर्थः नेरनि · निशब्दादुत्तरस्य रमतो दानं स्यादिति धानेर्थे · निमूलमिति · निर्गतं मूलमस्य निर्गतं वा मूलं निर्मूलं · निर्दण्ड इति · निशब्दो निधानार्थे वर्तते
कथं पुनर्निशब्दस्यायमर्थ इति चेच्छृणु · प्रादयो हि वृत्तिविषये सक्रियं साधनमाहुः समासान्तस्यानित्यत्वादिति · इह राजन्शब्दस्य पाठ एव ज्ञापयति · समासान्तो अनित्य

सोरवक्षेपणे।६।२।१९५। सुप्रत्यवसितः स्वतिपूजायामेव वाक्यार्थस्तत्र निन्दा असूयया तथाभिधानात् सोः किम् कुब्राह्मणः अवक्षेपणे कि
म् सुवृषलम् विभाषोत्पुच्छे।६।२।१९६। उत्क्रान्तः पुच्छात् उत्पुच्छः। २। यदा तु पुच्छमुदस्यति उत्पुच्छयते एरच् उत्पुच्छस्तदा थाथादिस्वरे
णान्तोदात्तत्वे प्राप्ते विकल्पोऽयम् सोऽयमुभयत्र विभाषा तत्पुरुषे किम् उदस्तम्पुच्छं येन स उत्पुच्छः द्वित्रिभ्यां पाद्दन्मूर्द्धसु बहुव्रीहौ।६।
।२।१९७। आभ्यां परेष्वेष्वन्तोदात्तो वा द्विपाच्चतुष्पाच्चरथाय त्रिपादूर्ध्वः द्विदन् त्रिमूर्द्धानं सप्तरश्मिमूर्द्धन्नित्यकृतसमासान्त एव मूर्द्धशब्दः
तस्यैतत्प्रयोजनमसत्यपि समासान्तेऽन्तोदात्तत्वं यथा स्यात् एतदेव ज्ञापकमनित्यः समासान्तो भवतीति यद्यपि च समासान्तः क्रियते तथा
पि बहुव्रीहिकार्य्यत्वात् तदेकदेशत्वाच्च समासान्तोदात्तत्वं पक्षे भवत्येव द्विमूर्द्धः २ त्रिमूर्द्धः २ द्वित्रिभ्यां किम् कल्याणमूर्द्धा बहुव्रीहौ किं द्वयोर्मूर्द्धा

इति · अन्यथा राजाहः सखिभ्यष्टजिति टच्श्चित्वादेव सिद्धं स्यात् ।। ॐ ।। सोरव · सोरुत्तरपदं निन्दायामन्तोदात्तं स्यात्तत्पुरुषे · सुप्रत्यवसित इति सुः पूजायामिति कर्मप्रवचनी
यस्य सोः स्वती पूजायामिति समासः तेन सुप्रत्यवसितेथाथादिविधिर्न शङ्कनीयः ननु यदि सुशब्दोऽत्र पूजायां वर्त्तते कथं तर्हि क्षेपो गम्यत इत्याह · वाक्यार्थस्त्विति · क
थमित्याह · असूययेति · यः खल्वनर्थे उपस्थिते सुखायमान आस्ते तमन्ये वमुक्ते क्षेपो गम्यते · विभाषोत् ।।

CC-0. In Public Domain. Digitization by eGangotri

स· सि·कौ· टी·त· ३२३

उच्छब्दात्सरः पुच्छशब्दः अन्तोदात्तो वा स्यात्तत्पुरुषे· सेयमुभयत्रविभाषेति· आद्यपक्षे तु यत्नान्तो अव्ययपूर्वपदप्रकृतिस्वरेणबाधितत्वात्समासस्यान्तोदात्तत्वमप्राप्तम्· द्वितीया
यां तु पुच्छल्यौ थाथादिस्वरेणान्तित्वमन्तोदात्तत्वं प्राप्तमिति हेत्वोभयत्रविभाषा· द्वित्रिभ्यां· पादित्ति सूत्रे अकारलोपो गृह्यते· दृदिति कृते दद्धादेशे दन्तशब्दः आभ्यामिति· द्वित्रि।
भ्यां द्विपादिति· द्वौ पादौ यस्येति द्विपात् संख्यासुपूर्वस्येति पादशब्दस्याकारलोपः द्विदन्निति· वयसि दन्तस्य दतृ· मूर्द्धनिस्यकृतसमासान्तएव मूर्द्धन्शब्द इति· एतच्च मूर्द्धस्विति
निर्देशादेवावसीयते· अन्यथा मूर्द्धस्विति निर्देशः स्यात्· किमर्थं पुनरकृतसमासान्तएव निर्दिष्ट इत्यत आह तस्येति यत्र कृतसमासान्तस्योपादानं· तर्हि यदा समासान्तः क्रि
यते तदा न प्राप्नोति तस्य शब्दान्तरत्वादित्यत आह यदापीति· इह हि बहुव्रीहिः कार्यित्वेनोपात्तो न मूर्द्धन्शब्दः तदेकदेशत्वाच्चेति· तस्य बहुव्रीहेरेकदेशः समासान्तस्त
स्य भावस्तत्त्वं तस्मादिति स एवार्थः तदेकदेशित्वादिति पाठे तु स बहुव्रीहिरेकदेशी अवयवी यस्य स तदेकदेशी समासान्तस्तद्भावः तत्त्वं तस्मादिति स एवार्थः तदेवं बहुव्रीहे

सक्थं चाक्रान्तात्। ६।२।१९८। गौरसक्थः· श्लक्ष्णसक्थः· अक्रान्तात्किम्· चक्रसक्थः· समासान्तस्य षचश्चित्त्वान्नित्यमेवान्तोदात्तत्वम्भव
ति परादिश्छन्दसि बहुलम्। ६।२।१९९। छन्दसि परस्य सक्थशब्दस्यादिरुदात्तो वा अञ्जिसक्थमालभेत अत्र वार्त्तिकम् परादिश्च परान्तश्च पूर्वा
न्तश्चापि दृश्यते पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं ततः इति परादिः तुविजाता उरुक्षया परान्तः नियेन मुष्टिहत्यया परान्तः पूर्वान्तः विश्वायुर्धेहि
ए॥ इति समासस्वराः॥ ⁘ ॥

कार्यित्वात्तदेकदेशत्वाच्च समासान्तस्येति —— यदा समासान्तः क्रियते तदाप्ययं विधिर्भवत्येव द्विमूर्द्ध इति· द्वित्रिभ्यां च मूर्द्ध इति षः क
ल्याणमूर्द्धेति पूर्वपदप्रकृतिस्वर एवात्र भवति· कल्याणशब्दो लघावन्त इत्यादिना मध्योदात्तः॥ ⁘ ॥ सक्थं च· बहुव्रीहौ सक्थ्यक्ष्णोरिति प्रजतः सक्थशब्द उत्तरपदमन्तोदात्तं
वा स्यात्· स चेत्क्रशब्दान्तात्परो न भवति· चित्त्वान्नित्यमन्तोदात्तत्वे प्राप्ते ऽयं विकल्पः गौरसक्थ इति· पक्षे पूर्वपदप्रकृतिस्वरः गुणशब्दो गौरयोरादिरिति गौरस्याद्यन्तावुदात्तौ तेनात्रै
स्वर्ये श्लक्ष्णसक्थ इति· श्लिषशूभ्यां क्स्नः श्लिषेरच्चोपधाया इति श्लक्ष्णशब्दोन्तोदात्तः षचश्चित्त्वादिति· एतेन चित्स्वरस्यापवादः प्राप्तविभाषेयमिति दर्शयति· परादिश्छन्दसि·
परशब्देनात्र सक्थशब्द एव न सैव पूर्वसूत्रे सन्निहितत्वात्तदाह· परस्य सक्थशब्दस्येति· ननु तर्हि परग्रहणमनर्थकं प्रकृतो हि सक्थशब्दोऽनुवर्तते तेन छन्दसि· बहुव्रीहेरपि प्रसक्त

619

राम ३२३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुच्च इत्यत्र तो विभाषेति वर्त्तमाने बहुलग्रहणं बहुर्थप्रदर्शनार्थं · बहुलग्रहणस्यार्थं श्लोकेन दर्शयति · प्रवृत्तिरिति · उरुक्षयेति · उरूणां क्षयो निवास इति विग्रहः · क्षयो निवास इति क्षयशब्द आद्युदात्तः समासस्येत्यन्तोदात्तं बाधित्वा कृदुत्तरपदप्रकृतिस्वरेणोत्तरपदाद्युदात्तत्वं प्राप्तं तत्राथादिस्वरेण बाधितं अतो बाहुलकेनोत्तरपदाद्युदात्तत्वं एतच्च । क्षि निवासगत्योरिति धातोर्बाहुलकादधिकरणे एरजिति माधवेनोक्तं वस्तुतस्तु घञन्तयत्यान्तः क्षयशब्द इति हरदत्तोक्तरीत्या थाथादिस्वरस्येहाप्राप्त्या कृदुत्तरपदप्रकृतिस्वरेणैव सिद्धं परादिश्छन्दसीत्यस्योदाहरणं तु चोदयित्री सूनृतानामिति बोध्यम् · ऊनपरिहाणे · चुरादिण्यन्तः णिच्च क्विप् · सुनृतानां सूनृतप्रियमिति सूनं · नृतं च सूनृतं · अयस्मयादीनीति भत्वान्नलोपो न · मुष्टिहत्ययेति · मुष्ट्याहननं मुष्टिहत्या · हनस्त चेति सुबन्ते उपपदे क्यप् · कृदुत्तरपदप्रकृतिस्वरोऽत्र प्राप्तः त्रिचक्र इति · बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरः प्राप्तः विश्वायुरिति विश्वमायुर्यस्मिन्निति बहुव्रीहिः · विश्वशब्दः कन्प्रत्ययान्तः पूर्वपदप्रकृतिस्वरेणाद्युदात्तः प्राप्तः ॥ ❁ ॥ इति स्वरसुबोधिन्यां समासस्वरप्रकरणं समाप्तम् ॥

तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः ८।१।२७ तिङन्तात्पदाद्गोत्रादीन्यनुदात्तान्येतयोः पचति गोत्रं पचति पचति गोत्रं एवं प्रवचनप्रहसनप्रकथनप्रत्यायनादयः कुत्सनाभीक्ष्ण्यग्रहणं पाठविशेषणम् तेनान्यत्रापि गोत्रादिग्रहणे कुत्सनादावेव कार्यं ज्ञेयं गोत्रादीनि किम् पचति पापम् कुत्सेति किम् । खनति गोत्रं समेत्य कूपं ॥ ॥ २८ ॥

तिङो पचति गोत्रमिति · गोत्रं स्वकुलं पीडयतीत्यर्थः एवं हि कुत्सा भवति · आभीक्ष्ण्ये उदाहरणमाह · पचति पचति गोत्रमिति · अनेकार्थत्वात्पचिः करोत्यर्थे वर्त्तते · विवाहादौ गोत्रं पुनः पुनः सुखीकरोतीत्यर्थः नित्यवीप्सयोरिति द्वित्वम् · ननु किं कुत्सनाभीक्ष्ण्यग्रहणं गोत्रादीनां पाठविशेषणमेतयोरर्थयोर्गोत्रादीनि भवन्ति · तानि च तिङः परस्याऽनुदात्तानि भवन्ति · आहोस्विदनुदात्तविशेषणं तिङः पराणि गोत्रादीन्यनुदात्तानि भवन्त्येतयोरर्थयोरिति अस्मिन्विचारे निर्णयमाह · कुत्सनाभीक्ष्ण्यग्रहणमिति अयं चार्थो योगविभागाल्लभ्यते तिङो गोत्रादीनीत्येको योगोऽनुदात्तविधानार्थः कुत्सनाभीक्ष्ण्ययोरिति द्वितीयो योगः गोत्रादीनीत्येव परिभाषेयं · इह शास्त्रे गोत्रादीनि कुत्सनाभीक्ष्ण्यविषयाण्येव ग्राह्याणि तेन नाकिं सिद्धं भवतीत्यत आह तेनेति · अन्यत्रापीति · चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेरित्यत्र · पचति पापमिति · क्रियाविशेषणम् · खनति गोत्रं समेत्य कूपमिति · गोत्रं कुलं समुदितं भूत्वा कूपं खनतीत्यर्थः ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



तिङ् अनुदात्तं सर्वमिति वर्तते तदाह निहन्यत इति। सर्वानुदात्तता निघात इति वैयाकरणानां व्यवहारः अतिङ इति किम् पचति भवति। एककर्तृकापचिक्रियाभवतेः सर्थः नन्व
तिङ्ग्रहणं व्यर्थं समानवाक्ये निघातयुष्मदस्मदादेशा इत्युक्तत्वात्। एकस्मिंश्च वाक्ये तिङन्तद्वयाभावादिति चेत्सत्यम्। सूत्रकारेण समानवाक्याधिकारो न कृत इत्यतिङ्ग्रहण।
मकारि। भाष्ये तु अतिङ्ग्रहणं प्रत्याख्यातं। न लुट् इत आरभ्य निषेधसूत्राणि। श्वः कर्ता। श्वः कर्तारौ इति। तासेः परस्य लसार्वधातुकस्यानुदात्तत्वे कृते तासिरुदात्तः एकवच
ने टिलोपे कृते उदात्तनिवृत्तिस्वरेण डा उदात्तः निपातैः यदि इत्यादीनां यत्वेत्यं तानां द्वन्द्वे तृतीयायाः सौत्रो लुक् तत्रयुक्तशब्देन समासः निपातैरिति विशेषणस्यानन्वयापत्तेस्त
दाह एतैर्निपातैरिति। यत्र यदि हन्त कुवित् नेत् चेत् चण् कच्चित् यत्र एतैरित्यर्थः यद्यदार्थे च हेतौ च विचारे यदि चेच्चणः हंत हर्षेनुकंपायां वाक्यारम्भविषादयोः कच्चित्

तिङ्ङतिङः।८।१।२८। अतिङन्तात्परं तिङन्तं निहन्यते अग्निमीळे। न लुट्।८।१।२९। लुडन्तं न निहन्यते श्वः कर्ता। निपातैर्यद्यदिहन्तकुविन्ने
च्चेच्चण्कच्चिद्यत्रयुक्तम्।८।१।३०। एतैर्निपातैर्युक्तं न निहन्यते यदग्ने स्याम् अहं त्वम् युवां यदि कृथः कुविदङ्ग आसन्। चित्तिमिश्च कृमा कच्चित्
पुत्रा सोयत्र पितरो भवन्ति नह प्रत्यारम्भे।८।१।३१। नहेत्यनेन युक्तं तिङन्तं नानुदात्तम् प्रतिषेधयुक्त आरम्भः प्रत्यारम्भः नह भोक्ष्यसे प्रत्यार
म्भे किं नहैवं तस्मिन् लोके दक्षिणां मिच्छति सत्यं प्रश्ने।८।१।३२। सत्ययुक्तं तिङन्तं नानुदात्तं प्रश्ने सत्यं भोक्ष्यसे प्रश्ने किम् सत्यमिद्वा उ त वयमिन्द्रं

म्भेने तु निषेधेप्रशंसायां कुवित्स्मृतं यत्रेत्याधारे। तत्रमूले कुविदुदाहृतः अन्ये व्यूह्याः तत्र ग्रहणं साक्षात्संबंधप्रतिपादनार्थं यदग्ने स्यामिति। असेर्लिङि अम्। च कृमा कच्चिदिति च
कृमेति लिट्प्रत्यमपुरुषबहुवचनं तोदात्तं कच्चिदयं निपातसमुदायः पदकाले कत् चिदिति विच्छिद्य पाठात्। निपातैः किम्। यत्कूजति शकटम्। एतौ नियत्। इणः शतरि रूपम्। इत्योयति
त्रियणः। ननु प्रतिपदोक्तत्वात्। यदादिभिः साहचर्याच्च निपातस्यैव यच्छब्दस्य ग्रहणं स्यादिति चेत्सत्यम्। एतदेव ज्ञापयति। अस्मिन्प्रकरणे द्वंद्वमुभयम् व्यवस्थापकमिति। तेन
यावद्यथाभ्यामित्यत्र यत्तदेतेभ्यः परिमाणे वतुविति वतुसादिते तस्यापि साक्षात्कस्य निपातस्यापि ग्रहणं भवति। यावत्स्तोतृभ्यो रदाः॥ ॥ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

णेनानुदात्तं। अन्तरं तदित्यतत् स्वरेणाद्युदात्तम्। युक्तग्रहणं किम्। अन्यान्वितेऽमा भूत्। यत्र क्व च ते मनो दक्षं दधस उत्तरम् इह यत्रेत्यस्योत्तरम् इत्यनेन साक्षात्संबंधः दधधारणे। अनुदात्ते
त्। नह प्रत्यारम्भे नहशब्दो निपातसमुदायो निषेधे वर्तते नह भोक्ष्यसइति। अदुपदेशात्लसार्वधातुकस्यानिघातः सप्रत्ययस्वरेण मध्योदात्तं पदम्। पूर्वम् उक्ते युक्ते पुनः क्रोधेना
पहासेन वा पुनः पुनः प्रतिषेधउक्ते एवं छन्ने भोजनं करिष्यसि स एवमुच्यते नह वै तस्मिन्निति तस्मिन्नशब्दः फि इत्स्वरेणाद्युदात्तः लोकशब्दः पचाद्यजन्तत्वादन्तोदात्तः इति
णशब्दः स्वांगशिटामदन्तानामिति शिट्त्वादाद्युदात्तः सन्नंभोक्ष्यस इति। मध्योदात्तम्॥ ॥अंग। प्रातिलोम्यं प्रतिकूलकारित्वं तत्तोन्यद् अभिमतकारित्वम् अप्रातिलोम्यं। एवं
चानुलोम्यमिति वक्तव्यम्। अंगशब्द उदाहरणेनु ज्ञायां प्रत्युदाहरणे त्वमर्षे। अङ्ग कुर्विति करोतेर्लोट् मध्यमपुरुषैकवचने सिप् तस्य सेर्ह्यपिच्चेति हिरादेशः तनादिकृञ्भ्य उः

अङ्गाऽप्रातिलोम्ये ८।१।३३॥ अङ्गेत्यनेन युक्तं तिङन्तं नानुदात्तं। अङ्ग कुरु अप्रातिलोम्ये किं अङ्ग कूजसि वृषल इदानीं ज्ञास्यसि जाल्म अ
नभिप्रेतं मनसो कुर्वन्प्रतिलोमो भवति॥ हि च ८।१।३४॥ हियुक्तं तिङन्तं नानुदात्तम्। आ हि ष्मा यजामहे। आ हि रुहतम्। छन्दस्यनेकमपि साका
ङ्क्षम् ८।१।३५॥ हीत्यनेन युक्तं साकाङ्क्षमनेकमपि नानुदात्तं अनृतं हि मत्तो वदति पाप्मा एनं विपुनाति। तिङन्तद्वयमपि न निहन्यते। यावद्यथा
भ्याम् ८।१।३६॥ आभ्यां योगे तिङन्तं नानुदात्तं यथा विल्क एव मावतं॥ ११ सार्वधातुके ति करोतेर्गुणः अत उत्सार्वधातुके। उतश्च प्रत्ययादसंयोगपूर्वादिति हे
र्लुक्। कुर्विति प्रत्ययस्वरेणान्तोदात्त। हि च। अत्राप्यप्रातिलोम्य इति संबध्यते। आहिष्मेति। सप्तशब्दो निपातो पिचादित्वादनुदात्तः दीर्घत्वं षत्वं च छान्दसं प्रातिलोम्ये तु हि कूजसि वृषल। उदा
हरणे हिशब्दोवधारणे हेतौ वा सच प्रत्युदाहरणे त्वमर्षे। छन्दस्य नेकमपीति अपिशब्दादेकं। तत्रानेकमुदाहरति। अनृतं हीति। हिर्यत इत्यर्थे यस्मादयमन्तो नृतं वदति। ततः पाप्मा
पापमेनं पुनाति अनृतवदनदोषेण युज्यत इति तात्पर्यार्थः एकस्योदाहरणम्। अग्निर्हि पूर्वमुदजयत्तमिन्द्रो नूदयन्। अत्र एकम् अजयमित्याद्युदात्तम्। परं निहतम्। अत्र हेतुहेतु
मद्भावस्य द्योतको हिरित्यनेकमपि तिङन्तं हियुक्तं भवति। अत्र पूर्वेण सर्वस्य निघातप्रतिषेधे प्राप्ते क्वचिदनेकस्य क्वचिदेकस्य यथा स्यादिति वचनं। तत्र छन्दसि दृष्टानुविधानाय

सि· कौ· टी· त· २२४

यावद्यथा· इयंतृतीयापंचमीत्याह· आभ्यांयुक्तमिति· तेनपरभूतयोरपिभवति· देवदत्तःपचतियावदिति· यावच्छब्दोनिपातस्थानिपातश्चपृथक्तेनेनिपातेर्यद्वदीसत्रस्थापि
नत्वात्· आद्यःसाकल्येद्वितीयःपरिमाणेपाधिकोवतुप्प्रत्ययान्तः यथाशब्दोयोग्यतादिषु· आवतमिति· अवतेर्लोण्मध्यमपुरुषद्विवचनम्· यावच्छब्दोदाहरणंतु· या
वद्भुंक्तेदेवदत्तःपचतियावदिति· यावत्स्तोतृभ्योऽरदोगृणाना इति· रदविलेखनेलङि·सिपिअट्· अरदःस्वरेणानुदात्ते॥ ॥पूजायांनानुदात्तमिति· अनुदात्तएवभवतीत्य
र्थः यावद्देवदत्तइति· पूर्वेणात्रनिघातप्रतिषेधोव्यवायेपदिभवति· उपसर्गेणैवेतिनियमार्थमितिप्रसंगाभावे नंतरग्रहणंशक्यमकर्तुं उपसर्गयावद्यथाभ्यांयुक्तमनंतरमु
पसर्गेणव्यवहितंतिङंतंपूजायांविषयेनानुदात्तंस्यात्· अनंतरमित्येवेति· नचानन्तर्यंसोपसर्गस्य· नतिङंतमात्रस्य· प्रपचतीतिप्रशब्दआद्युदात्तः तुपश्य· तुप्रभृतीनिपूजा

पूजायांनानन्तरम्।८।१।३७। यावद्यथाभ्यांयुक्तंतिङ्· नपूजायांनानुदात्तं यावत्पचतिशोभनम् यथापचतिशोभनं पूजायांकिं यावद्भुंक्ते अन
न्तरङ्किं· यावद्देवदत्तःपचतिशोभनं पूर्वेणात्रनिघातःप्रतिषिध्यते उपसर्गव्यपेतञ्च।८।१।३८। पूर्वेणानन्तरमित्युक्तं उपसर्गव्यवधानार्थ
मवचनम् यावत्प्रपचतिशोभनम् अनन्तरमित्येव यावद्देवदत्तःप्रपचतिशोभनम् तुपश्यपश्यताहैः पूजायाम्।८।१।३९। एभिर्युक्तंतिङ्।
नानिहन्यतेपूजायाम् आदहस्वधामनुपुनर्गर्भत्वमेरिरे अहोच।८।१।४०। एतद्योगेनानुदात्तंपूजायाम् अहोकटङ्करिष्यतिपचतिशोभनम्·

विषयाणि· उदाहरणानितुमाणवकोभुंक्ते· पश्यमाणवकोभुंक्ते· माणवकस्तुभुंक्तइति· आश्चर्यंतुशब्दइति· भोजनस्यपूजागम्यते· एवमन्यत्रापि पूजायांकिम्· पश्यमृगोधाव
ति· तत्कथनमेतत्· ननुपूजायांनानन्तरमित्यतः पूजायामितिवर्तमानेपूजाग्रहणंव्यर्थमितिचेन्नैवम्· पूजाग्रहणंनिघातप्रतिषेधार्थं· तद्धिपूजाग्रहणंप्रतिषेधस्यप्रतिषेधे
नसंबद्धम्· ततश्चतदनुवृत्तावेहापिनलुडित्यादिकेविषयेप्रतिषेधस्यप्रतिषेधःस्यात्· माभूदेवंनिघातस्येवयथास्यादित्येतदर्थंपूजाग्रहणं· किंचानन्तरमित्येवंतदभूत्· इहत
विशेषणंव्यते· अहोच· अहोदेवदत्तःपचतिशोभनमित्युदाहरणम्· पृथग्योगकरणमुत्तरार्थम्· उत्तरेयोगअहोयोगएवयथास्यात्तुप्रभृतिभिर्योगेमाभूदिति·॥ ॥ ल २४

621

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेषे· पूर्वपूजायामित्युक्तत्वात्ततोऽन्यः शेष इत्याह अपूजायामिति· अहो कटं करिष्यतीति· पक्षे स्वरमन्यपदस्वरः अनाश्चर्यभूतमेव चलु असूयया आश्चर्यवन्निपातेन पूजा· शेष
ग्रहणं स्पष्टार्थं· योगविभागस्यासम्पर्थ्यादिति· नन्वयावच्चुरेतिभविष्यति लट् विधानादावध्ययनं धर्मशास्त्रमिति भेदः· अतस्तदुपन्यासेन तत्परितमधीष्वेति गम्यते· पक्षे चोतन
इति धातुस्वरे णाद्युदात्तः नास्मनुदात्तेति लसार्वधातुकनिघातः नतेन स्म पुराधीयत इति· लट् स्मे इति भूते लट्· अत्र भूतस्याध्ययनस्य चिरकालप्रवृत्तत्वं गम्यते न त्वरा· नन्वि·
किंचित्कर्तुं स्वयमेवोद्यतस्य एवं क्रियतामित्यभ्युपगमोऽनुज्ञातस्याः एषणं प्रार्थना· अनुज्ञैषणं अनुज्ञाप्रार्थनेत्यर्थः तदाह· अनुज्ञाप्रार्थनायामिति· उदाहरणे वर्तमानसामी

शेषे विभाषा ८।१।५०। अहो इत्यनेन युक्तं तिङन्तं वानुदात्तम् अपूजायाम् अहो कटङ्करिष्यति पुरा च परीप्सायाम् ८।१।४२। पुरेत्यनेन युक्तं त्वानु
दात्तं त्वरायाम् अधीष्व माणवक पुरा विद्योतते विद्युत् निकटागामिन्यत्र पुराशब्दः परीप्सायां किं नडेन स्म पुराधीयते चिरातीते त्र पुरा नन्वित्यनु
ज्ञैषणायाम् ८।१।४३। ननु इत्यनेन युक्तं तिङन्तं नानुदात्तम् अनुप्रार्थनायां ननु गच्छामि भोः अनुजानीहि मां गच्छामीत्यर्थः अन्विति किं अ
कार्षीः कटं त्वं ननु करोमि एष प्रतिवचनमेतत् किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम् ८।१।४४। क्रियाप्रश्ने वर्तमानेन किंशब्देन युक्तं ति
ङन्तं नानुदात्तम् किं द्विजः पचत्याहोस्विद्गच्छति क्रियेति किम् साधनप्रश्ने मा भूत् किम्भक्तं पचत्यपूपान्वा प्रश्ने किं किमधीते क्षेपोयम् अ
नुपसर्गं किम् किं प्रपचति उत प्रकरोति अप्रतिषिद्धं किम् किं द्विजो न पचति।

१९ प्ये लट्· प्रत्युदाहरणे न नो· एष प्रतिवचने इति भूते लट्· अन्विति कि
मिति· अनुज्ञैषणायामिति किमित्यर्थः अंगाधाति सोम्य इत्यादिति करणं विनापि सिद्धे एकनिपातोयमिति स्फिरार्थज्ञार्थमिति शब्दः अन्यथा द्वयोर्निपातयोर्ग्रहणं संभाव्येत· किं क्रिया· अप्र
तिषिद्धमिति· अप्रतिषिद्धार्थमित्यर्थः किं द्विजः पचति आहोस्विद्गच्छतीति· आहोस्विदेको निपात आद्युदात्तः अत्र केचित्· पूर्वं किंयुक्तं तत्नानिहन्यते उत्तरं तु न किंयुक्तमिति निहन्यत
एवेति· अन्ये तु यद्यप्येकस्याख्यातस्य समीपे किंशब्दः श्रूयते· तथापि· सर्वस्य संशयविषयस्य तेन योगः इति·॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स.
सि.कौ. उभयत्रापिनिषेधेनभाव्यमिति॰ अत्रहरदत्तः पेत्याहुः पूर्वंकिंयुक्तमिति॰ तेमन्यंते॰ अक्षुद्रयोः संशयविषयत्वंकिंशब्दे नतुशुद्धक्रियाविषयएवप्रश्नोद्योत्यते॰ क्रियांतरविषयस्तुप्र
टी.त. श्नः आहोस्विदित्यनेनक्रियाप्रश्नइतिचोच्यतेतस्मात्तस्यैवनिघातप्रतिषेधइति॰ प्रश्नेकिम्॰ किंदेवदत्तः पठति॰ क्षेपेकिंशब्दः क्वचित्पुस्तकेकिमधीयतइतिप्रत्युदाहरणंदृश्यतेतन्ना
३९६ दर्तव्यंक्षेपस्पष्टत्वात्॥ ःः ॥लोपे॰ किंक्रियाप्रश्नेति॰ सूत्रमनुवर्तते॰ तथाचायमर्थः क्रियाप्रश्नेयः किंशब्दः तस्यलोपेतदर्थेनयुक्तमनुपसर्गमप्रतिषिद्धंचतिङंतंवानुदात्तंस्या
त्॰ सूत्रेणकिमोलोपस्याविधानार्थप्रकरणादिनागम्यमानार्थत्वादप्रयोगएवलोपोविवक्षितः दत्तः पचति॰ आहोस्वित्पठतीति॰ अत्रपक्षेनिघातः पक्षेधातुस्वरेणाद्युदात्तता॰
किंशब्दाप्रयोगाद्रमाप्तविभाषेयम्॰ यद्वातस्याप्रयोगेपिअर्थेनयोगात्प्राप्तविभाषा॰ पूर्वसूत्रस्याप्रत्युदाहरणानिकिंशब्दस्यात्रयोजनीयानि॰ एहि॰ एहिमन्यइत्यनेनयु

लोपेविभाषा॥८।१।४५॥ किमोप्रयोगेउक्तंवा देवदत्तः पचत्याहोस्वित्पठति एहिमन्येप्रहासेलृट्॥८।१।४६॥ एहिमन्येइत्यनेनयुक्तंलृडन्तन्नानु
दात्तंक्रीडायाम् एहिमन्येभक्तम्भोक्ष्यसेभुक्तन्तन्त्वःतिथिभिः प्रहासेकिम् एहिमन्यसेओदनम्भोक्ष्येसुष्ठुमन्यसेगत्यर्थलोटालृडित्यनेनैव
सिद्धेनियमार्थोयमारम्भः एहिमन्येयुक्तेप्रहासएवनान्यत्र एहिमन्यसेओदनम्भोक्ष्येजात्वपूर्वम्॥८।१।४७॥ अविद्यमानपूर्वंयस्मात्तेनयु
क्तन्तिङन्तन्नानुदात्तं जातुभोक्ष्यसे अपूर्वंकिम् कटञ्जातुकरिष्यसि॥ ॥ ९ क्तमितिसमुदायाभिप्रायमेकवचनं॰ अन्यथाआख्यातेद्वेआङ्चाप

रइतिबहुवचनप्रसंगः एहिमन्येभुक्तंभोक्ष्यसइति॰ मन्यसेभोक्ष्येइत्यर्थेप्रहासेचमन्योपपदेइत्यादिनाम्नाभोक्ष्यसइतिपुरुषव्यत्ययः इदंचवृत्तिकारमंजर्यादिप्रत्युदाहरणंतन्म
तेउत्तमोपादानस्यातंत्रत्वात्॰ भाष्येतुएहिमन्येरथेनयास्यसीतिप्रत्युदाहृतम्॰ तत्रायमर्थः त्वंरथेनयास्यसीत्यहंमन्यएहीति॰ गत्यर्थलोडित्येवसिद्धइति आङ्पूर्वादिणोलोटःसि
पोहि॰ अत्रएहीत्यस्यगत्यर्थत्वात्तद्योगेलोटेतिसिद्धमित्यर्थः एहीत्यत्रआङः परत्वादिहीत्यत्रनिघातः मन्यइति॰ मनज्ञानेअनुदात्तेतस्यश्यन्नन्तत्वादाद्युदात्तत्वम्॰ तास्यनुदात्ते
दितिअदुपदेशात्परत्वादिडनुदात्तः जातु॰ अपूर्वमित्येतज्जातुशब्दस्यैवविशेषणंनतिङन्तस्य॰ आहोउताहोइतिसूत्रेअनंतरग्रहणज्ञापकात्॰ अन्यथातत्राप्यपूर्वमित्यनुवृत्तौ राम.
३९६

622

CC-0. In Public Domain. Digitization by eGangotri

रेव केवलतिङन्तस्यानन्तर्यं लभ्यते इति किं तेन। ननु शेषे विभाषां वक्ष्यति तत्र शेषग्रहणस्यार्थं तस्मात् शेषे विभाषा। कश्च शेषः सान्तरं शेष इति। अनन्तरेणाप्यनन्तरग्रहणं भक्त्
तः शेषः कथम्। अपूर्वमिति प्रकृतं सपूर्वः शेष इति तदेतत्फलमभिप्रेत्याह। अविद्यमानपूर्वं यज्जात्विति। जातु भोक्ष्यस इति। अदुपदेशात्परत्वात्सेड् इत्यस्य सनिघातः मध्योदा

किंवृत्तं च चिदुत्तरम्॥८।१।४८॥ अविद्यमानपूर्वं चिदुत्तरं यत्किंवृत्तं तेन युक्तं तिङन्तं नानुदात्तम्। विभक्त्यन्तं डतरडतमान्तं किमो रूपं किंवृत्तम्।
कश्चिद्भुङ्क्ते कतरश्चित् कतमश्चित्। चिदुत्तरं किम्। को भुङ्क्ते। अपूर्वमित्येव। रामः किञ्चित्पठति। आहो उताहो चानन्तरम्॥८।१।४९॥ आहो उताहो इ-
त्याभ्यामपूर्वाभ्यां युक्तं तिङन्तं नानुदात्तम्। आहो उताहो वा भुङ्क्ते। अनन्तरमित्येव शेषे विभाषां वक्ष्यति। अपूर्वमिति किम्। देव आहो भुङ्क्ते। शेषे विभाषा॥
८।१।५०॥ आभ्यां युक्तं व्यवहितं तिङन्तं नवानुदात्तं। आहो देवः पचति। गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत्॥८।१।५१॥ गत्यर्थानां लोटा युक्तं तिङन्तं ना-
नुदात्तं यत्रैव कारके लोट् तत्रैव लृडपि चेत्। आगच्छ देव ग्रामं द्रक्ष्यसि। उह्यन्तां देवदत्तेन शालयो रामेण भोक्ष्यन्ते। गत्यर्थे किम्। पच देव ओदनं भोक्ष्य
से। लोटा किम्। आगच्छेर्देव ग्रामं द्रक्ष्यस्येनम्। लृट् किम्। आगच्छ देव ग्रामं पश्यस्येनं। न चेदिति किम्। आगच्छ देव ग्रामं पित्रा ते ओदनं भोक्ष्यते। स
र्वं किम्। आगच्छ देव ग्रामं त्वं चाहं च द्रक्ष्याव एनमित्यत्रापि निघातनिषेधो यथा स्यात्। यत्र लोडन्तस्य कारकं तत्रान्यच्च लडन्तेनोच्यते। लोट् च॥८
।१।५२॥ लोडन्तं गत्यर्थलोटा युक्तं नानुदात्तम्। आगच्छ देव ग्रामं पश्य। गत्यर्थेति किम्। पच देवौदनं भुंक्ष्वैनम्। लोट् किम्। आगच्छ देव ग्रामं पश्यसि
न चेत्कारकं सर्वान्यदित्येव। आगच्छ देव ग्रामं पश्यतु त्वेनं रामः। सर्वग्रहणं त्विह स्यादेव। आगच्छ देव ग्रामं त्वं चाहं च पश्याव। योगविभाग उत्तरार्थः॥

त्तं परं। जातुशब्दो निपातत्वादाद्युदात्तः। कटं जातु करिष्यसीति। कटशब्दः फिट्स्वरेणान्तोदात्तः॥ ॐ॥ किंवृत्तं। वृत्तमित्यधिकरणे क्तः। किमो वृत्तं किंवृत्तं। अधिकरणवाचिना च
ति कर्तरि षष्ठी। अधिकरणवाचिना चेति समासनिषेधः प्राप्तेः स्मादेव निपातनात्समासः। इह जात्वपूर्वमित्यतोऽपूर्वमिति वर्तते न ह्याचष्टे॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त॰
सि॰ कौ॰
टी॰ त॰
४२

अविद्यमानपूर्वमिति· यदि यत्र किंशब्दो वर्तते तत्सर्वं गृह्यते तर्हि किमोयः किंनशामिसादेरपि प्रसंगः स्यादिति मत्वा परिसंचष्टे· विमन्यन्तमित्यादिशेषेवि· अनंतरोपसंश्लिष्टमित्याह· व्यवहितमिति पञ्चमीतिप्रत्ययधातुस्वरेणाद्युदात्तम्· गत्यर्थ· गतिरर्थो येषामिति विग्रहः गत्यर्थलोटायुक्तमितियोगः पुनरर्थद्वारको निमित्तनिमित्ती भावः लोडंतवाच्यं हि निमित्तं लडंतवाच्यस्य न चेत्कारकं सर्वान्यदित्यस्य व्याख्यानमाह· यत्रैव कारके लोडित्यादि· कर्तरि कर्मणि वा· आगच्छ देवदत्त ग्रामं द्रक्ष्यस्येनमिति· आङुपसर्गः गच्छ देवदत्त नयत्र योपदात्सरत्वान्निघातः ग्रामशब्दोग्रसेराद्येतिमनंत आद्युदात्तः द्रक्ष्यसीति· प्रत्ययस्वरेण मध्योदात्तम्· उह्यतां देवदत्तेन शालयो रामेणभोक्ष्यन्त इति· वहेः प्रापणार्थत्वेपि गतिर्गम्यत इति गत्यर्थत्वम्· उह्यतामित्यत्र देवदत्तरामयोः कर्त्रोर्भेदेपि लकारवाच्यस्य शालेः कर्मणः अभेदात्· आगच्छेरिति· लिङयं न लोट् द्रक्ष्यसीति वर्तमानसामीप्ये लट्· आगच्छ देवग्राममपि त्वाते ओदनं भोक्ष्यत इति· कारकशब्देन सूत्रे कारकव्यक्तिरेवाश्रीयते तेन कर्तृत्वाभेदेपि व्यक्तिभेदात्कारकभेदः त्वं चाहं द्रक्ष्याव एनमिति·

विभाषितं सोपसर्गमनुत्तमम्।८।१।५३। लोडन्तं ग्रस्यर्थलोटायुक्तं तिङन्तं वानुदात्तं आगच्छ देवग्रामम्प्रविश· सोपसर्गं किम् आगच्छ देवग्रामम्पश्य अनुत्तमं किम् आगच्छानि देवग्रामम्प्रणासानि॥ ॥ २९ अक्रियमाणे सर्वग्रहणे यत्र वाच्यं न भिद्यते तत्रैव भवितव्यमिह च भिद्यते वाच्यम्· एकत्रैकमन्यत्र द्वयमिति निघातप्रतिषेधो वस्यात्· क्रियमाणे तु सर्वग्रहणे लोड्वाच्यकारकापेक्षया लड्वाच्यकारकाधिक्येपि निघातः प्रतिषेधः सिद्धः लोट्· लट्ग्रहणं विहाय गत्यर्थलोटेति संपूर्णं सूत्रमनुवर्तते तदाह गत्यर्थेत्यादि· आगच्छेति गत्यर्थलोटायुक्तं पश्येति न निहतं गच्छेति तु निहतमेव· योगविभाग उत्तरार्थ इति· उत्तरो विकल्पो लोट एव यथा स्यात् लटो मा भूत् इति॥ ः ॥ विभाषितं· पूर्वसूत्रं सर्वमनुवर्तते प्राप्तविभाषा चेयम्· गत्यर्थलोटायुक्तं लोडन्तं सोपसर्गमुत्तमभिन्नं विभाषानुदात्तं स्यात्· न चेत्कारकं सर्वान्यत्· सोपसर्गमिति· उपसर्गेण सह· उपसर्गे विद्यमाने इत्यर्थः सहशब्दो विद्यमानार्थो न तु तुल्ययोगे न त्वुपसर्गस्य निघातप्रसंगोस्ति· आगच्छ देवग्रामं प्रविशेति· अत्र विशेति पक्षे निहतं पक्षे धातुप्रत्ययस्वरेणान्तोदात्तं यदान्तोदात्तं न तदा तिङि चोदात्तवतीति गतेर्निघातः पश्यप्रणाशानीति उभयत्रापि पूर्वेण नित्यमेव निघातः प्रत्युदाहरणानि पूर्वसूत्रोक्तान्ये

राम
४२

CC-0. In Public Domain. Digitization by eGangotri

हन्त च · पूर्वसूत्रमनुवर्त्तते लोड्ग्रहणं च तत्राह · हन्तेत्यनेनेत्यादि · आत्मविभाषेयं · निपातैर्यद्यदीति निघातनिषेधस्य सिद्धत्वात् · प्रभुनजावहा इति · भुजेर्लोट् · भुजोनवने इत्यात्म
नेपदं वहिः · टेरेत्वं श्नम् · आडुत्तमस्य पिच्च · एत ऐ · अनुदात्तेत्वात् सार्वधातुकानुदात्तत्वं · विकरणस्वरः · आमः · अंतरयतीत्यन्तरं व्यवधायकं · एकमन्तरं यस्य तदेकान्तरम् उदाहर
णे निघाते प्रतिषिद्धे प्याष्ठमाद्युदात्तत्वम् · अनन्तिक इति किमिति · अत्र केचिदन्तिकं दूरं न सैव सामर्थ्यादेकश्रुतेर्निघातस्य च प्रतिषेधः · यदि निघातमात्रनिषेधोयं तदा निघात
स्यैकश्रुत्या बाधितत्वादिदं सूत्रं व्यर्थं स्यादिति सामर्थ्यादेव चैतन्निषेधं प्रतिएकश्रुतेरसिद्धत्वाभावः प्लुतोदात्तस्य न प्रतिषिध्यत इत्याहुः · अपरे तु अनन्तिक इत्यनेन नयन्न दूरं न चसं

हन्त च · ८।१।५४। हन्तेत्यनेन युक्तमनुत्तमं लोडन्तं वानुदात्तम् । हन्त प्रविश । २ सोपसर्गमित्येव हन्त कुरु निपातैर्यद्यदीति निघातप्रतिषेधः । अनुत्तमं किम् । ह
न्त भुञ्जावहै आम एकान्तरमामन्त्रितमनन्तिके · ८।१।५५। आमः परमेकपदान्तरितमामन्त्रितं नानुदात्तं आम् पचसि देवदत्ता३ । आम् एकान्तरं किम् · आ
म् प्रपचसि देवदत्ता३ । आमन्त्रितं किम् आम् पचति देवदत्तः अनन्तिके किम् · आम् पचसि देवदत्त · यद्धितुपरं छन्दसि ८।१।५६। तिङन्तं नानुदात्तं उदस्रजो ।
यदङ्गिरः · उत्पत्स्यन्ति हि आख्यास्यामि तु ते निपातैर्यद्यदिहि चेति तु पश्यन्ति च सिद्धे नियमार्थमिदं एतैरेव परभूतैर्योगे नान्यैरिति जायस्वारो हावेहि
एहीति गत्यर्थलोटा युक्तस्य लोडन्तस्य निघातो भवति चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः । ८।१।५७। एषु परेषु परतस्तिङन्तं नानुदात्तं देवः
पचति चन देवः पचति चित् देवः पचतीव देवः पचति गोत्रम् देवः पचतिकल्पम् देवः पचति पचति अगतेः किं देवः प्रपचति चन ॥ ॥ ॥

निकृष्टं तदुच्यते न दूरमेव · अन्यथा दूरमित्येव वदेत् तेनास्मिन्नेकश्रुतेः प्राप्तिरेव नास्ति · अदूरत्वात्प्लुतोदात्तोपि नोदाहर्तव्य इति · यद्धितु · उदस्रज इति · तुदादेः सृजेर्लङि सिप्यडुत्पं
ति हीति वशकांतो अदादिः लटि सो न्तः गृहज्यादिना संप्रसारणम् · नान्यैरिति · यदिहन्तेत्यादिभिरित्यर्थः · जायस्वारोहावेहीति · रुहेर्लोट् इवसन्नाप · आडुत्तमस्य पिच्च · लोटो लङ्वदिति
लङ्वद्भावान्नित्यं ङितः इति सलोपः · आङ्पूर्वाद्धिलोलोट् इसिपोहिः एहि · तेन परभूतेन युक्तस्यारोहावेत्यस्य लोट्वेति प्राप्तो निघातप्रतिषेधो नियमान्निवर्त्तते · तेन सर्वाप्यस्यो ।
निघातो भवति · स्वारोहावेहीति लोपः · ढ्रलोप इति दीर्घः · स्वारोहावेति पाठे तु छान्दसत्वादुत्वम् · ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स॰
सि॰ कौ॰ चनचि॰ एधिति॰ चनचिदिवगोत्रादितद्धितः आमेडितएधित्सर्थः इहापि॰ गोत्रादयः कुत्सनाभीक्ष्ण्ययोरेवगृह्यन्त इतितिओगोत्रादीत्यत्रैवोक्तम्॰ पचतिकल्पमिति॰ अत्रानु
टी॰ त॰ दात्तएवतद्धितोग्राह्यः अन्यत्रतद्धितस्वरेणतिङ॰ नस्वरोबाध्यते॰ अयंपचतिदेश्यः॥ ❁ ॥चादिषुच॰ नचवाहाहैवयुक्ते इतिसूत्रेनिर्दिष्टाश्चादयोत्रगृह्यन्तेसंनिकृष्टत्वात्॰
३२८ ननुचारयोलत्वइतिसूत्रनिर्दिष्टाविप्रकृष्टत्वान्नदेतदाह चवाहाहैवेषुपरेष्विति॰ पचतिचखादतिचेति॰ उभयत्रखादतीत्यस्यनिघातप्रसंगएवनास्तिनानावाक्यत्वात्॰ च
वायोगेहिसमुच्चयेविकल्पेवासतिभवति॰ सचानेकस्यधर्मइतिकत्वोदाहृतम्॰ चवा॰ प्रथमेतिस्त्रीलिंगस्यनिर्वाहमाह॰ प्रथमातिङ्विभक्तिरिति॰ प्रथममुच्चारितातिङ्॰।

चादिषुच।८।१।५८। चवाहाहैवेषुपरेषुतिङन्तन्नानुदात्तं देवःपचतिचखादतिच अग्नेरित्येवदेवः प्रपचतिचप्रखादतिच प्रथमस्यचवायोग
इतिनिघातःप्रतिषिध्यतेद्वितीयन्तुनिहन्यतएव चवायोगेप्रथमा।८।१।५९। चवेत्याभ्यांयोगेप्रथमातिङ्विभक्तिर्नानुदात्ता गाश्चचारयतिवि
णांचवादयति इतोवसतिमीमहे उत्तरवाक्ययोरनुषज्यमानीयन्तिङन्तापेक्षयेयंप्राथमिकी योगेकिं पूर्वभूतयोरपियोगेनिघातार्थम्प्रथमा
ग्रहणंद्वितीयादेस्तिङन्तस्यमाभूत् हेतिक्षियायाम्।८।१।६०। हयुक्ताप्रथमातिङ्विभक्तिर्नानुदात्ताधर्मव्यतिक्रमे स्वयंहरथेनयातिा३ उपा
ध्यायम्पदातिंनयति क्षियाशीरितिसूत्रःअहेतिविनियोगेच।८।१।६१। अहयुक्ताप्रथमातिङ्विभक्तिर्नानुदात्तानानाप्रयोजनेनियोगेक्षिया
याञ्चत्वमहग्रामङ्गच्छत्वमहरथेनारण्यंगच्छ क्षियायांस्वयमहरथेनयाति ३ उपाध्यायम्पदातिन्नयति॰॥ ९भक्तिरित्यर्थः अग्नेरितिप्रथमसू
त्रेचानुकृष्टत्वादिहनानुवर्तते॰ उत्तरवाक्ययोरिति॰ देवोवापार्थिवाइधि॰ इदंमहोवाराजइत्येतयोरित्यर्थः ननुश्रुतस्यैवतिङन्तस्योत्तरत्रानुषङ्गःतत्कथंप्राथम्यमितिचेत्॰ अ
नुषक्तस्याप्यौपाधिकंभेदंपुरस्कृत्यप्राथम्याश्रयणेननिघातनिषेधस्यछंदसिबहुशोदृष्टत्वात्॰ एतच्चहैवमंत्रेनियमेनमु॰ ... येतिचमंत्रेवेदभाष्येस्पष्टम्॰ हेति॰ स्वयंहरथे रामः
नयातीति॰ उपाध्यायेपदातौगच्छतिसतिशिष्यस्यरथेनगमनंप्रतिषिद्धमित्याचारभेदः अहेति॰ अनेकस्मिन्प्रयोजनेप्रेषणं॰ ... नानाप्रयोजनेनियोगइति॰ अ॰ ३२८
॥ नेकप्रयोजनोनियोगः प्रेषणमुदाहरणेपूर्वत्रप्रेषणंतुउत्तरत्रक्षियायाम्॰॥ ॥ ॥

624

चाहलोप॰ अवधारणार्थ एवशब्दप्रयोगे सति प्रथमं तिङ् नानुदात्तम्॰ सूत्रेण चाहलोपस्य विधानात्॰ अर्थप्रकरणादिना गम्यमानार्थत्वादप्रयोग एव लोपो विवक्षितः॰ चशब्दः
समुच्चयार्थः हशब्दः केवलार्थः समानकर्तृके चलोपः नानाकर्तृके हलोपः उदाहरणे चलोपं दर्शयति॰ ग्राममरण्यं चेति॰ केवे भोक्ष्यन्त इति॰ अनवक्लृप्तावयमेवशब्दः एवे चानि
योग इति पररूपम्॰ चादिषु चेति॰ अचेतितिङ्॰ नसेहनिघातः निघाताभावस्य तूदाहरणं नरसंमृग्यम्॰ ननु पूर्वसूत्रे समानकर्तृके चलोप इत्युक्तम्॰ इह तु कर्तृभेदात्क
थं चलोप इति चेत्॰ अवधारणार्थ एवशब्दप्रयोगे समानकर्तृके चलोप इति नियमो न तु सर्वत्रेत्यत्र चलोपः व्रीहिभिर्यजेतेति॰ प्रसङ्गनिहतं॰ पक्षे आद्युदात्तं॰ द्वितीयं तु नि

चाहलोप एवेत्यवधारणम्॥८।१।६२॥ चअहएतयोर्लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता देवदत्त एव ग्रामं गच्छतु देवदत्त एवारण्यं गच्छतु ग्राममरण्यं च
गच्छत्वित्यर्थः देवदत्त एव ग्रामं गच्छतु रामदत्त एवारण्यं गच्छतु ग्रामं केवलमरण्यं केवलं गच्छत्वित्यर्थः इहाहलोपः स च केवलार्थः अवधारणं किं देव
दत्तो वै भोक्ष्यसे न कश्चिदित्यर्थः अनवक्लृप्तावेव॥ चादिलोपे विभाषा॥८।१।६३॥ चवाहाहैवानां लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता चलोपे
शुक्ला व्रीहयो भवन्ति श्वेता गा आज्याय दुहन्ति वालोपे व्रीहिभिर्यजेत यवैर्वा यजेत॥ वैवावेति च छन्दसि॥८।१।६४॥ अह वै देवानामासीत्
अयं वाव हस्त आसीत्॥ एकान्याभ्यां समर्थाभ्याम्॥८।१।६५॥ आभ्यां युक्ता प्रथमा तिङ्विभक्तिर्वानुदात्ता छन्दसि अजामेकां जिन्वति अजामे
कां रक्षति तयोरन्यः पिप्पलं स्वाद्वत्ति समर्थाभ्यां किं एको देवानुपातिष्ठत् एक इति संख्यापरं नान्यार्थं॥ यद्वृत्तान्नित्यम्॥८।१।६६॥ यत्र पदे
यच्छब्दस्ततः परं तिङ् नानुदात्तं यो भुङ्क्ते यदध्यङ्ङ्वायुर्वाति अत्र व्यवहिते कार्यमिष्यते॥ ८ हतमेव॰ एवं शेषेष्वपि यथादर्शनमुदाहरणम्

वैवाव॰ आभ्यां युक्तं प्रथमं तिङ् नानुदात्तं वा स्यात् छन्दसि॰ वै स्फुटार्थः क्षमायां च वाव प्रसिद्धौ स्फुटार्थे च॰ एकान्यासमौ तुल्यावर्थौ ययोस्तौ समर्थौ प्राकं ध्वादित्वात्परस्रू
पम्॰ जिन्वतीति॰ जिविः प्रीणनार्थः इदित्वान्नुम् लट् तिप् शप्॰ अजामेकां रक्षतीति॰ अन्यां प्रीणयति॰ अन्यां रक्षतीत्यर्थः एक इति संख्यापरमिति॰ एकशब्दस्यानेका
र्थत्वात्॰ तथा चोक्तम्॰ एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा॥

CC-0. In Public Domain. Digitization by eGangotri



साधारणेसमानेऽप्येसंख्यापांचमप्रवृत्यते इति· ननुसाहचर्यादन्यार्थकएवैकप्राद्याग्रहीष्यत इतिचेत्सत्यम्· नसाहचर्यमत्रप्रकरणेव्यवस्थापकमिति· निपातेर्यदिहनेत्य।
त्रैवावोचाम· यदृ· यदप्रवृत्ति· ति· यदुअंचतीतिक्विन्विष्वग्देवयोश्चेतिटेरद्र्यादेशः कथंपुनः पंचमीनिर्देशेसतियदप्रवृत्ति· वायुर्वातीत्यादौव्यवधानेऽप्रवसत्त आह· अत्रय
वहितेऽपिकार्यमिष्यत इति· अत्रचज्ञापकमुत्तरसूत्रेमूलएवस्फुटीभविष्यति॥ ❀ ॥पूजनात्· काष्ठादिभ्य इतिवार्तिकंदृष्टंतदनुरोधेनपूजनादितिबहुवचनस्थानएकवच
नमितिव्याचष्टे· पूजनेभ्यः काष्ठादिभ्य इति उत्तरसूत्रेतिङ्ग्रहणादिदसुबन्तविषयकम्· काष्ठाध्यापक इति· काष्ठादयोऽद्भुतपर्यायाः अतःपूजनवचनाभवंति· समासविध
यकंसूत्रमिदं उदाहरणेमयूरव्यंसकादित्वात्समासः मलोपश्चवक्तव्य इति· दारुणमध्यापक इतिसमासेहलोविभक्तेर्लुकिसाभ्यादिकीम कारनिवृत्तिरित्यनेनवचने।

पूजनात्पूजितमनुदात्तंकाष्ठादिभ्यः।८।१।६७। पूजनेभ्यः काष्ठादिभ्यः पूजितवचनमनुदात्तम्· काष्ठाध्यापकः मलोपश्चवक्तव्यः दारुणाध्या
पकः अद्भुताध्यापकः समासान्तोदात्तत्वापवादः एतत्समासेइष्यते नेह दारुणमध्यापक इतिवृत्तिमतम् पूजनादित्येवपूजितग्रहणेसिद्धेपूजितग्रह
णमनन्तरपूजितलाभार्थं एतदेवज्ञापकमत्रप्रकरणेपञ्चमीनिर्देशेऽपिनानन्तर्य्यमाश्रीयत इति सगतिरपितिङ्।८।१।६८। पूजनेभ्यः काष्ठा
दिभ्यस्तिङन्तम्पूजितमनुदात्तं यत्काष्ठम्प्रपचति तिङ्ङतिङ इतिनिघातस्यनिपातैर्यद्यदिहन्तेतिनिषेधेप्राप्तेविधिरयम् सगतिग्रहणाच्चगतिरपि
निहन्यते गतिग्रहणेउपसर्गग्रहणमिष्यते॥ ❀ ॥ नेहयत्काष्ठाः शुक्लीकरोति॥ ॥ ९९ नान्वाख्यायत इतिवृत्तिन्यासकारयोर्मतंतदेतदा
ह· इतिवृत्तिमतमिति· भाष्यवार्तिककैयटास्तु· असमासएवक्रियाविशेषणीभूतानांदारुणमित्यादीनामसमासएवास्यसूत्रस्यप्रवृत्तिमिच्छंतिमयूरव्यंसकादित्वेना
पिप्रमाणं· हरदत्तोप्याह· यदिसमासएवेदमिष्टंतदाभविष्यत्तदासमास इत्येवावक्ष्यत· युक्तंचैतत्· नत्वत्रसमासाधिकारोस्तियेनसमासः स्यात्· अस्मिन्पक्षेमलोपवच
नंचसार्थकं· पूजनादित्येवपूजितपरिग्रहेसिद्ध इति· पूजनस्यपूजितापेक्षत्वादितिभाव· अनंतरपूजितलाभार्थमिति· पूजनात्पूजितमितिसूत्रेसामान्यगतमानंतर्यंवि
॥ ॥ ॥ शेषणंविज्ञायत इतिभावः कथंपुनः पंचमीनिर्देशेव्यवहितस्यप्रसंग इत्याह· एतदेवेति· ज्ञापकफलंतुय॥ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृतान्निरसमित्युक्तम्· सगति· यत्काष्ठं पचतीति· येमल्लोपश्चेत्यनेनवाक्येनमल्लोपमाकुरुत्सेपितिङ· नेपरत्नोनैवलोपमिच्छन्ति· सगतिग्रहणाद्गतिरपिनिहन्यतइतितु
ल्ययोगे अत्र सहशब्दः यत्र तुल्ययोगे सहशब्दस्तत्र द्वयोरपिकार्ययोगोभवति· तद्यथा सपुत्रोभोज्यतामित्युक्ते पुत्रोपिभोज्यते अपिग्रहणं यत्र गतिर्न युज्यते तत्र केव
लस्यापितिङः नस्ययथास्यात्· गतिप्रयोगे तु द्वयोः सहैवभवतितिङ्ग्रहणं पूर्वयोगस्यानिवृत्तिज्ञापनार्थम्।। ❀ ।।कुत्सने· पदादिति निहतम्· पचति क्लिश्नाती
ति· कथमत्र समानवाक्यत्वस्य सामर्थ्यस्य वाभावादेवाप्राप्तेः सुपीतिसप्तम्यर्थम्· कर्तुः कुत्सने माभूत्· पचतिपूतिर्देवदत्त इति· कर्तृत्वमात्रं कुत्स्यते असेदमयुक्तमिति· क्रि
यानुष्ठानेनैव· पूतिश्चानुबंधइति· चकारानुबंधइत्यर्थः तिवन्तपूतिशब्द आद्युदात्तः वशेत्पित्तिवितिनिप्· बाहुलकात्पूर्त्तोऽपिभवति तस्मादेव गुणाभावः तस्य निघातनिमित्त

कुत्सने च सुप्यगोत्रादौ।८।१।६९। कुत्सने च सुबन्ते परे सगतिरगतिरपि तिङ् अनुदात्तः पचतिपूति प्रपचतिपूति पचतिमिथ्या कुत्सने किम् प्रपचति
शोभनं सुपि किम् पचति क्लिश्नाति अगोत्रादौ किम् पचति गोत्रम् क्रियाकुत्सन इति वाच्यम्· कर्तुः कुत्सने माभूत् पचतिपूतिर्देवदत्तः पूतिश्चा
नुबन्ध इति वाच्यम् तेनायं चकारानुबन्धत्वादन्तोदात्तः बाबहूर्थमनुदात्तमिति वाच्यम् पचन्तिपूति गतिर्गतौ।८।१।७०।अनुदात्तः अभ्युद्धरति
गतिः किम् दत्तः पचति गतौ किम् आमन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः तिङि चोदात्तवति।८।१।७१। गतिरनुदात्तः यत्प्रपचति तिङ्ग्रहण
मुदात्तवतः परिमाणार्थम् अन्यथा हि यं प्रति गतिस्तस्य धातावेवोदात्तवति स्यात् प्रत्ययेन स्यात् उदात्तवति किं प्रपचति। इति तिङ्स्वराः

स्यान्तोदात्तत्वं यथास्यादितिचित्त्वमुपसंख्यायते· बाबहूर्थमिति· बहुवचनान्तं तिङन्तं चानुदात्तं स्यात् यदा तिङ् तस्य निघातस्तदा पूतिरन्तोदात्तः अन्यदा त्वाद्युदात्तः आमन्द्रै
रिति· अन्यथा हीत्येतत्प्रतिक्रियायोगादाडि· सेव गतिः तिङि उदात्तवति· तिङ नेपरे गतिर्निहन्यते· निपाता आद्युदात्ता इत्यस्यापवादः यत्प्रपचतीति· निपातैर्यद्यदीति निघा
तप्रतिषेधात्तिङ नप्रुदात्तवत्· ननु तिङ्ग्रहणं व्यर्थम्· न च तिङ नेयथा स्यात्· मं दृशाद्द्ग माभूत्· आमन्द्रैरिन्द्र हरिभिर्याहीति मंदृशाद्द्गो रक्षसघ्नोऽन्तोदात्त इति वाच्यम्
यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा इति वचनात्तत्संबन्धि।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स· सि· कौ· टी· त· ३३

नमाक्षिपतीति क्रियावाचित्वे वोदात्तवतिभविष्यति· नच क्वाद्यन्तेऽतिप्रसंगः तत्र कृत्स्वरस्याथादिस्वरगतिस्वरेणुक्तेनैव शेषनिघाते नगतिर्निहन्यत एव तस्मान्नार्थः तिङ्ग्रह
णेनेत्याशंक्याह· तिङ्ग्रहणमिति· परिमाणमियता· परिमाणार्थत्वमेव स्पष्टयति· अन्यथाहीति· अक्रियमाणे तिङ्ग्रहणे धातुरेव क्रियावाचित्वाद्गतिसंज्ञानिमित्तमिति· त

अथ वैदिकवाक्येषु स्वरसञ्चारप्रकारः कथ्यते अग्निमीळ इति यथामन्त्रे तत्राग्निशब्दोಽव्युत्पत्तिपक्षे फिषइत्यन्तोदात्त इति माधवः वसु
तसु धृतादित्वादन्तोदात्तः व्युत्पत्तौ तु निप्रत्ययस्वरेण अमसुत्वादनुदात्तः अमिपूर्व इत्येकादेशस्यैकादेश उदात्तेनेत्युदात्तः ईळे तिङ् तिङ इति
निघातः संहितायां तु स्वरादनुदात्तस्येकारः स्वरितः स्वरितात्संहितायामिति लेइत्यस्य प्रचयापरपर्याया एकश्रुतिः पुरः शब्दोन्तोदात्तः पूर्वाध
राववराणामसिचिप्रत्ययस्वरान्हितशब्दोपि धाञो निष्ठायां धातेर्हिरिति त्वादेशे प्रत्ययस्वरेणान्तोदात्तः पुरोव्ययमिति गतिसंज्ञायां कुगतीति समा
मासे समासान्तोदात्तत्वे तत्पुरुषे तुल्यार्थेत्यव्ययपूर्वपदप्रकृतिस्वरे गतिकारकोपपदात्कृदिति कृदुत्तरपदप्रकृतिस्वरे थाथादिस्वरे च पूर्वपूर्वोपमर्दे
न प्राप्ते गतिरनन्तर इति पूर्वपदप्रकृतिस्वरः पुरः शब्दाकारस्य संहितायाम्प्रचये प्राप्ते उदात्तस्वरितपरस्य सन्नतर इत्यनुदात्ततरः यज्ञस्य नङः प्रत्य
यस्वरः विभक्तेः सुप्त्वादनुदात्तत्वे स्वरितत्वं देवः पचाद्यचि इत्स्वरेण प्रत्ययस्वरेण चित्स्वरेण वान्तोदात्तः ऋत्विक्छब्दः कृदुत्तरपदप्रकृतिस्वरेण
न्तोदात्तः होतृशब्दस्तृन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः रत्नशब्दो नक्षिप्रत्ययस्याद्युदात्तः रत्नानि दधातीति रत्नधाः समासस्वरेण कृदुत्तरपदप्रकृतिस्वरे
ण वान्तोदात्तः तमपः पित्वादनुदात्तत्वे स्वरितप्रचयाविस्मादिति यथाशास्त्रमुन्नेयम् इत्थं वैदिकशब्दानां दिङ्मात्रमिह दर्शितम् नत्सुधीनये श्रीमद्भ
वानीविश्वनाथयोः॥१॥ इति सिद्धान्तकौमुद्यां श्रीभट्टोजिदीक्षितविरचितायां वैदिकप्रक्रिया शुभमम्·॥ १ त्रैवोदात्तवतिनिघातः स्यात्तन्न प्रत्ययेतिङ्ग्रहणे

कृते तु यंधातुं प्रतिगतित्वं तदुद्दश्के तिङन्ते उदात्तवतिपरे इत्यर्थो जायते· तेन यस्त्वकरोति त्यो देघात्तीः शेषनिघातेनानुदात्तत्वे पितिङन्तस्य उत्प्रत्ययस्वरेण मध्योदात्तत्वात्तन्ने नि
घातः सिद्ध इत्याहुः प्रपचतीति· तिङ् तिङ इति निघातः॥ इति श्रीमन्मौनिकुलतिलकायमान श्रीगोवर्द्धनभट्टात्मज रघुनाथात्मजेन जयकृष्णेन कृतायां सिद्धान्तकौमुदीव्याख्यायां

तिङन्तस्वरप्रकरणं समाप्तम्·।

रामः ३३

श्रीगणेशाय नमः॥ लिङ्ग·म·॥ ॥स्त्री॥ ॥अधिकारसूत्रेऽत्र ऋकारान्ता मातृदुहितृस्वसृपौत्रननान्दरः ऋकारान्ता एते पञ्चैव स्त्रीलिङ्गाः स्वस्रादिकस्यैव ङी
न्निषेधेन कर्त्रीत्यादेर्ङीपा ऽकारान्तत्वात् तिसृचतस्रोस्तु स्त्रियामादेशत्वाविधानेपि प्रकृत्योस्त्रिचतुरोर्ऋदन्तत्वाभावात् अन्यूप्रत्ययान्तो धातुः॥ अनिप्रत्ययान्त उप्रत्ययान्त
श्च धातुः स्त्रियां स्यात् अवनिः चमूः प्रत्ययग्रहणं किम् देवयतेः क्विप् द्यूः विशेष्यलिङ्गः अशनिभरण्यरणयः पुंसि च द्व्यमयं वा अशनिः मिन्यन्तः मिप्रत्ययान्तो निप्रत्ययान्तश्च
धातुः स्त्रियां स्यात् भूमिः ग्लानिः वह्निवृष्ण्यग्नयः पुंसि पूर्वस्यापवादः श्रोणियोन्यूर्मयः पुंसि च द्व्यमयं वा श्रोणिः क्तिन्नन्तः स्पष्टमकृतिरित्यादि ईकारान्तश्च ईप्रत्ययान्तः।
स्त्री स्यात् लक्ष्मीः ईवन्तश्च॥ ईवन्तं च प्रातिपदिकं स्त्री स्यात् देवी कुरुचरीत्यादि ऊङन्तश्च कुरूः विद्यात्त्वन्तमेकाक्षरम् श्रीः भूः एकाक्षरं किम् पृथुश्रीः विंशत्या
दिरानवतेः इयं विंशतिः त्रिंशत् चत्वारिंशत् पञ्चाशत् षष्टिः सप्ततिः अशीतिः नवतिः दुन्दुभिरक्षेषु इयं दुन्दुभिः अक्षेषु किम् अयं दुन्दुभिर्वाद्यविशेषोऽसुरो वे
त्यर्थः नाभिरक्षत्रिये इयं नाभिः उभावन्यत्र पुंसि दुन्दुभिर्नाभिश्चोक्तविषयादन्यत्र पुंसि स्तः नाभिः क्षत्रियः कथं तर्हि समुल्लसत्पङ्कजपत्रकोमलैरुपाहितश्रीण्यु
पनीविनाभिभिरिति भारविः उच्यते दृढभक्तिरित्यादाविव कोमलैरिति सामान्ये नपुंसकं बोध्यम् वस्तुतस्तु लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति भाष्यात् सुस्थमपी
ह साधु अत एव नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् द्वयोः प्राणिप्रतीके स्यात् स्त्रियाङ्कस्तूरिकामदे इति मेदिनिः रभसोऽप्याह मुख्यराड्क्षत्रिये नाभिः पुंसि प्राण्य
ङ्गके द्वयोः चक्रमध्ये प्रधाने च स्त्रियाङ्कस्तूरिकामदे इति एवमेवंविधेऽन्यत्रापि बोध्यं तलन्तः अयं स्त्रियां स्यात् शुक्लस्य भावः शुक्लता ब्राह्मणस्य कर्म ब्राह्मणता ग्रामस्य स
मूहो ग्रामता देव एव देवता भूमिविद्युत्सरिल्लतावनिताभिधानानि भूमिर्भूः विद्युत्सौदामनी सरिन्निम्नगा लता वल्ली वनिता योषित् यादो नपुंसकम् यादः सरिद्धु च कोपिस्त्री
वं स्यात् भाः स्रुक्स्रग्दिगुष्णिगुपानहः एते स्त्रियां स्युः इयं भाः इत्यादि स्थूणोर्णे नपुंसके च एते स्त्रीयां क्लीबे च स्तः स्थूणं स्थूणा ऊर्णं ऊर्णा तत्र स्थूणा काष्ठमयी हि कर्णि
का ऊर्णा मेषादिलोम गृहशशाभ्यां क्लीबे नियमार्थमिदम् गृहशशपूर्वे स्थूणोर्णे यथासंख्यं नपुंसके स्तः गृहस्थूणं शशोर्णं शशलोम नीत्यमरः प्राग्वद्विभुद्रुदन्तद्

सि॰कौ॰ विट्लिपः एते स्त्रियां स्युः दर्विर्विदिर्वेदिः खनिः शन्यश्रिर्वेशिः कृष्योषधिकट्यङ्गुलयः एते स्त्रीयां स्युः पक्षे ङीष् दर्वी दर्विः इत्यादि तिथिनाडिरुचिवीचिनालिधूलिकिकिकेलिच्छ
मू॰लि॰ विरात्र्यादयः एते प्राग्वत् इयन्ति धिः इत्यादि अमरस्त्वाह तिथयो द्वयोरिति तथा च भारविः तस्य भुवि बहुतिथास्तिथयः इति स्त्रीत्वे हि बहुतिथ्य इति स्यात् श्रीहर्षश्च नि
३३१ खिलान्निशि पौर्णिमा तिथीनिति शष्कुलिराजिकुट्यशनिवर्तिभ्रुकुटित्रुटिवलिपङ्क्तयः एते पि स्त्रियां स्युः इयं शष्कुलिः प्रतिपदापद्विपत्सम्पच्छरत्संसत्परिषदुषःसंवि
त् क्षुत्पुन्मुत्समिधः इयं प्रतिपदित्यादि उषा उच्छन्ती उषाः मानरद्विपाः तो देवता आशीर्धूः पूर्गीर्द्वारः इयमाशीरित्यादि अप्सुमनस्समासिकतावर्षाणां बहुत्वञ्च
अबादीनां पञ्चानां स्त्रीत्वं स्याद् बहुत्वञ्च आपः इमाः स्त्रियः सुमनसः पुष्पं सुमना मालती जातिः देववाची तु पुंस्येव सुपर्वाणः सुमनसः बहुत्वं प्रायिकम् एकाचसि
कता तैलदाने असमर्थेति अर्थवत्सूत्रे भाष्यप्रयोगात् समां समां विजायते इत्यत्र समायां समायामिति भाष्याच्च विभाषा घ्राधेट् इति सूत्रे आघ्रासानां सुमनसा इति
वृत्तिव्याख्यायां हरदत्तोप्येवम् स्रक्त्वक्ज्योग्वाग्यवागूनौस्फिजः इयं स्रक् त्वक् ज्योक् वाक् यवागूः नौः स्फिक् तटिसीमासम्बध्याः इयं तटिः सिमा सम्बध्या चुल्लिवे
लिखार्य्यर्थ्म सप्तम् तारा धारा ज्योत्स्नादयश्च घ लाका स्त्रियान्नित्सम् नित्यग्रहणमन्येषां क्वचिद्व्यभिचारं ज्ञापयति॥ ॥ इति स्त्र्यधिकारः॥ ॥ पुमान् अधि
कारोयं घञबन्तः॥ पाकः त्यागः करः गरः भावार्थ एवेदं नपुंसकत्वविशिष्टे भावे क्तल्युटौ स्त्रीत्वविशिष्टे तु क्तिन्नादिभिर्बाधेन परिशेषात् कर्मादौ तु घञबन्तमपि
विशेष्यलिङ्गं तथा च भाष्यं संबन्धमनुवर्तिष्यत इति घाजन्तश्च विस्तरः गोचरः चयः जयः इत्यादि भयलिङ्ग भगपदानि नपुंसके एतानि नपुंसके स्युः भयं लिङ्गं भगं
पदम् नङन्तः नङ् प्रत्ययान्तः पुंसि स्यात् यज्ञः यत्नः याञ्चा स्त्रियाम् पूर्वस्यापवादः क्यन्तो घुः किप्रत्ययान्तो घुः पुंसि स्यात् आधिः निधिः उदधिः क्यन्तः किम् दानं घुः किम्
जनिर्बीजम् इषुधिः स्त्री च इषुधिशब्दः स्त्रियां पुंसि च देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि एतानि पुंसि स्युः देवाः सुराः अ
सुराः दैत्याः २ आत्मा क्षेत्रज्ञः स्वर्गो नाकः २ गिरिः पर्वतः २ समुद्रोऽब्धिः २ नखः कररुहः २ केशाः शिरोरुहः २ दन्तो दशनः २ स्तनः कुचः २ भुजः दोः २ कण्ठो गलः २ ख राम:
ड्गः करवालः २ शरो मार्गणाः २ पङ्कः कर्दम इत्यादि त्रिविष्टपत्रिभुवने नपुंसके स्पष्टं तृतीयं विष्टपं त्रिविष्टपं स्वर्गाभिधानतया पुंस्त्वप्राप्तेऽयमारम्भः द्यौः स्त्रियां द्यो ३३१

६२७

CC-0. In Public Domain. Digitization by eGangotri

द्विवो संज्ञे लोपादानमिदं दृष्टुवा हृस्त्रियां चाप्युंसि वाणकांडो नपुंसके च चाप्युंसि त्रिविष्टपेत्यादि चतुःसूत्री देवासुरेत्यस्यापवादः नान्तः अयं पुंसि राजा तक्षा न च चर्म्म
वर्म्मादि वर्जितं त्यादिः मन्तष्ठकोकर्नरीति नपुंसकप्रकरणे वक्ष्यमाणत्वात् कतुपुरुषकपोलगुल्फमेघाभिधानानि कतुरध्वरः २ पुरुषो नरः २ कपोलो गण्डः २ गुल्फं प्रप
दः २ मेघो नीरदः २ अभ्रं नपुंसकम् पूर्वस्यापवादः उकारान्तः अयं पुंसि स्यात् प्रभुः इक्षुः हनुर्हं वृविलासिन्यां न सारम्भेग रेस्त्रियो वृयोः कपोलावयव इति मेदिनिः करे
णुरिभ्यां स्त्री नेमेदन्त्यमरः एवमाद्यन्तविशेषकं च नानांका नासुप्रकृतसूत्रस्य विषयः उकरश्च लिङ्ग शेषविधि र्व्यापी विशेषैर्यद्यबाधितः इति एवमन्यत्रापि धेनुर
ज्जुकहुसरयुतनुकरेणुप्रियङ्गवः स्त्रियाम् समासे रज्जुः पुंसि च कर्कटरज्ज्वा कर्कटरज्जुना श्मश्रुजानुवसुस्वादुमश्रुजतुत्रपुतालूनि नपुंसके वसु चार्थवाचि अर्थवाची
तिकिम् वसुर्मयूखाग्निधनाधिपेषु मद्गुमधुसीधुसानुकमण्डलूनि नपुंसके च चाप्युंसि अयं मद्गुः इदं मद्गु रुत्वन्तः मेरुः सेतुः दारुकसेरुजतुवस्तुमस्तूनि नपुंसके रुत्वन्त
इति पुंस्त्वस्यापवादः इदन्तारु सक्तुर्नपुंसके च चाप्युंसि सक्तुः सक्तु अग्रश्मश्र ककारान्तः रश्मिदिवसाभिधानमिति वक्ष्यति प्रागेतस्मात् ककारान्त इत्यधिक्रियते कोपधः को
पधोऽकारान्तः पुंसि स्यात् स्तवकः कल्कः चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके पूर्वसूत्रापवादः कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतडाकनि
ष्कशुल्कवर्चस्कपिनाकभाण्डकपिण्डककटकशण्डकपिटकतालकफलकपुलाकानि नपुंसके च चाप्युंसि अयं कुण्टकः इदं कुण्टकमित्यादि टोपधः टोपधोऽकारान्तः
पुंसि स्यात् घटः पटः किरीटमुकुटललाटवटवीटशृङ्गाटकरालोष्टानि नपुंसके किरीटमित्यादि कुटककपटकवाटकर्पटनटनिकटकीटकटानि नपुंसके च चाप्युं
सि कुटः कुटमित्यादि णोपधः णोपधोऽकारान्तः पुंसि स्यात् गुणः गणः पाषाणः ऋणलवणपर्णतोरणरणोष्णानि नपुंसके पूर्वसूत्रापवादः कार्षापणस्वर्णसुवर्णव्रण
णचरणवृषणविषाणचूर्णतृणानि नपुंसके च चाप्युंसि थोपधः रथः काष्ठपृष्ठसिक्थोक्थानि नपुंसके इदं काष्ठमित्यादि काष्ठा दिगर्था स्त्रियां इमाः काष्ठाः तीर्थप्रोथयूथ
गाथानि नपुंसके च चाप्युंसि अयं तीर्थः इदं तीर्थं नोपधः अदन्तः पुंसि इनः फेनः जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशासनसोपानमिथुनश्मशानर
त्ननिम्नचिह्नानि नपुंसके पूर्वस्यापवादः मानयानाभिधाननलिनपुलिनोद्यानशयनासनस्थानचन्दनालानसम्मानभवनवसनसम्भावनविभावनविमानानि नपुं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



सकेच चात्पुंसि अयंमानः इदंमानं योपधः अदन्तः पुंसियूपः दीपः सर्पः पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपान्तरीपाणिनपुंसके इदंपापमित्यादि शू
र्पकुतपकुणपद्वीपविटपानिनपुंसकेच अयंशूर्पः इदंशूर्पमित्यादि भोपधःस्तम्भः कुम्भःतलभंनपुंसकं पूर्वस्यापवादः जृम्भनपुंसकेच जृम्भं जृम्भः मोप
धः सोमः भीमः रुक्मसिध्मयुध्मेध्मगुल्माध्यात्मकुङ्कुमानिनपुंसके इदंरुक्ममित्यादि संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानिनपुंसकेच चात्पुं
सि अयंसंग्रामः इदंसंग्रामं योपधः समयः हयः किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसकं स्पष्टं गोमयकषायमलयान्वयाव्ययानिनपुंसकेच गोमयः
गोमयं रोपधः क्षुरः अङ्कुरः द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रनारतीरदूरकृच्छ्ररन्ध्राश्रश्वभ्रभीरगभीरक्रूरविचित्रकेयूरकेदारोदरशरीरकन्दरमन्द
रपञ्जराजरजठराजिरवैरचामरपुष्करगह्वरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतन्त्रयन्त्रक्षत्रक्षेत्रमित्रकलत्रचित्रसूत्रवक्त्रनेत्रगोत्रा
ङ्गुलित्रभलत्रशस्त्रशास्त्रवस्त्रपत्रपात्रछत्राणिनपुंसके इदंद्वारमित्यादि शुक्रमदेवतायाम् इदंशुक्रं रेतः चक्रवज्रान्धकारसारावारपारक्षीरतोमरशृङ्गा
रभृङ्गारमन्दारोशीरतिमिरशिशिराणिनपुंसकेच चात्पुंसि चक्रः चक्रमित्यादि षोपधः वृषः वृक्षः शिरीषार्जीषाम्बरीषपीयूषपुरीषकिल्बिषकल्माषाणिन
पुंसके यूषकरीषमिषविषवर्षाणिनपुंसकेच चात्पुंसि अयंयूषः इदंयूषमित्यादि सोपधः वत्सः वायसः महानसः पनसविसबुससाहसानिनपुंस
केच चमसांसरसनिर्यासोपवासकर्पासवासमासकासकांसमांसानिनपुंसकेच अयंचमसः इत्यादि कंसश्चाप्राणिनि कंसोऽस्त्रीपानभाजनम् प्राणिनि
तु कंसोनामकश्चिद्राजा रश्मि दिवसाभिधानानि एतानिपुंसिस्युः रश्मिर्मयूखः दिवसो घस्रः दीधितिः स्त्रियाम् पूर्वस्यापवादः दिनाहनीनपुंसके अ
यमप्यपवादः मानाभिधानानि एतानिपुंसिस्युः कुडवः प्रस्थः द्रोणाढकौनपुंसकेच इदंद्रोणम् अयंद्रोणः खारीमानिकेस्त्रियाम् इयंखारी इयंमा
निका दाराक्षतलाजासूनांवहुत्वंच इमेदाराः नाड्यपजनोपपदानिव्रणाङ्गपदानि यथासंख्यं नाड्याद्युपपदानि व्रणादीनिपुंसिस्युः अयन्नाडीव्र
णः अपाङ्गः जनपदः व्रणादीनामुभयलिङ्गत्वेपिक्लीवत्वनिवृत्त्यर्थंसूत्रंमरुद्गरुत्तरद्धृत्विजः अयम्मरुत् ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौ



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लिमौलिरविकविकपिसुनयः एतेपुंसिस्युः अयंऋषिः ध्वजगनगुञ्जपुञ्जाः एतेपुंसि हस्तकुन्तान्तवातवात दूत धूर्तसूतचूतमुहूर्ताः एतेपुंसि अमरस्तु ।
मुहूर्तोस्त्रियामित्याह षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाखण्डशिखण्डाः अयंषण्डः वंशांशपुरोडाशाः अयंवंशः पुरोदाश्यतेपुरोडाशः
कर्म्मणिघञ् भवव्याख्यानयोः प्रकरणे पौरोडाशपुरोडाशात्ष्ठन्निति विकारप्रकरणेचोद्देः पुराडाशाद्दूतिच निपातनात्प्रकृतसूत्रएवनिपातनाद्दादस्यडत्व
म् पुरोडाशभुजामिष्टमितिमाघः ह्रदकन्दकुन्दबुद्बुदशब्दाः अयंह्रदः अर्घपथिमथ्यृभुक्षिसंतप्रनितम्बपूगाः अयमर्घः पल्लवपल्वलकफरेफकटा
हनिव्यूहमठमणितरङ्गतुरङ्गगन्धस्कन्धमृदङ्गसङ्गसमुद्रपुङ्खाः अयम्पल्लवइत्यादि सारथ्यतिथिकुक्षिवस्तिपाणपञ्जलयः एतेपुंसि अयंसारथिः इ
तिपुल्लिङ्गाधिकारः ॥ ❀ ॥ नपुंसकम् अधिकारोयम् भावेल्युडन्तः हसनंभावेकिम् पचनोग्निः इध्मव्रश्चनः कुठारः निष्ठाच भावेयानिष्ठातदन्तंक्लीबं
स्यात् हसितं गीतन्त्वष्यञोतद्धितो शुक्लत्वं शौक्ल्यं ष्यञः पित्त्वसामर्थ्यात्पक्षेस्त्रीत्वम् चातुर्य्यम् चातुरी सामग्र्यम् सामग्री औचित्यम् औचिती का
र्म्मणिच ब्राह्मणादिगुणवचनेभ्यः ब्राह्मणस्य कर्म्मब्राह्मण्यं यद्यढग्यगन्तवुञ्छाश्चभावकर्म्मणि एतदन्तानिक्लीबानि स्तेनाद्यन्नलोपश्चस्तेय
म् सख्युर्य्यः सख्यम् कपिज्ञात्योर्ढक् कापेयम् पत्यन्तपुरोहितादिभ्योयक् आधिपत्यं प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योञ् औष्ट्रं हायनान्तयुवा ।
दिभ्योण् द्वैहायनम् द्वंद्व मनोज्ञादिभ्योवुञ् पित्तापुत्रकम् होत्राभ्यः छः अच्छावाकीयं अव्ययीभावः अधिस्त्रि द्वंद्वैकत्वं पाणिपादम् अभाषायांहे ।
मन्तशिशिरावहोरात्रेचस्पष्टं अनञ्कर्म्मधारयस्तत्पुरुषः अधिकारोयम् अनल्पेच्छाया घारच्छायं राजामनुष्यपूर्वासभा इनसभमित्यादि सु
रासेनाच्छायाशालानिशास्त्रियाञ्च परवत् अन्यस्तत्पुरुषः परवल्लिङ्गः स्यात् रात्राह्नाहाः पुंसि अपथपुण्याहेनपुंसके संख्यापूर्वारात्रिः त्रिरात्रं ।
संख्यापूर्वेतिकिम् सर्वरात्रः द्विगुस्त्रियाञ्चव्यवस्थया पञ्चपूली त्रिभुवनम् इसुसन्तः हविः धनुः अर्चिस्त्रियाञ्च इसन्तत्वेपि अर्चिस्त्रियान्नपुं
सकेचस्यात् इयमिदञ्चाप्यर्चिः छदिः स्त्रियामेव इयंछदिः छाद्यते ऽनेनेति छदेरिसुरादिरएयन्तादर्चिशुचीत्यादिनाइस् इसमन्नित्यादिनाह्रस्वः पटला ।

CC-0. In Public Domain. Digitization by eGangotri

लि.
सि. कौ. न्ध्रादिरित्यमरः तत्रपटलसाहचर्य्याच्छिद्रः क्लीबता ऽम्बरन्तो ऽमरव्याख्यातारउपेक्ष्याः मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहल।
टी. न. धनान्नाभिधानानि एतेषामभिधायकानि क्लीबे स्युः मुखमाननम् २ नयनं लोचनं २ लोहं कालं वनं गहनं २ मांसमामिषं २ रुधिरं रक्तं २ कार्मुकं
३३३ शरासनं २ विवरं विलं २ जलम्वारि हलं लाङ्गलं २ धनं द्रविणं २ अन्नमशनं २ अस्यापवादानाह त्रिस्वस्यासीराय्यौदनाः पुंसि वक्ष्यते ऽरण्य
गाण्डीवानि पुंसि च वल्को वल्कम् नेत्रो नेत्रम् अरण्यो ऽरण्यं गाण्डीवो गाण्डीवम् अटवी स्त्रियां लोपधः कुलं कूलं स्थलं तूलोपलतालकुसू
लतरलकम्बलदेवलवृषलाः पुंसि अयं तूलः शीलमूलमङ्गलसालकमलतलमुसलकुण्डलपललमृणालवालनिगलपलालविडाल।
खिलशूलाः पुंसि च वात् क्लीबे शीलं शील इत्यादि शतादिः संख्या शतं सहस्रं शतादिरिति किम् एको द्वौ बहवः संख्येति किं शतशृङ्गो नाम पर्वतः
शतायुत प्रयुताः पुंसि च अयं शतः इदं शतमित्यादि लक्षा कोटिः स्त्रियां इयं लक्षा इयं कोटिः वा लक्षा नियुतञ्च तदित्यमरात् क्लीबेपि लक्षे स
हस्रः पुंसि सहस्रः इदं सहस्रमनन्तश्च कोकर्त्तरि मन्नात्ययान्तो द्वयच् कः क्लीबः स्यात् चात् क्लीबे न तु कर्त्तरि वर्मा वर्म द्वयच्कः किं अणिमा
महिमा अकर्त्तरि किं ददाति इति दामा ब्रह्मन् पुंसि च अयं ब्रह्मा इदं ब्रह्म नामरोमणी नपुंसके मन्नद्वयच्कद्वयस्यायमपवादः अस
न्तो द्वयच्कः यशः मनः तपः द्वयच्कः किं चन्द्रमाः अप्सराः स्त्रियाम् एताः अप्सरसः प्रायेणायम्बहुवचनान्तः शत्रन्तः पत्रं छत्रं यात्रामात्राभस्त्राद
ष्ट्रावरत्राः स्त्रियामेव भृत्रा ऽमित्रछात्रपुत्रमन्त्रवृत्रमेत्राः पुंसि अयं भृत्रः न मित्रं अमित्रः तस्य मित्रात्ययमित्राश्लेषेति माघः स्यात्तामामित्रौ
मित्रे चेति च यत्तु द्विषो मित्र इति सूत्रे हरदत्तेनोक्तम् अमेर्द्विषदिति औणादिकस्तच् अमेरमित्रं मित्रस्य व्यत्यये दित्यादौ मध्योदात्तस्तु चिन्त्यः
नञ्समासेप्येवं परवल्लिङ्गतापि स्यादिति तु तत्र दोषान्तरमिति तन्न छात्रस्त्रापथ्यो लोचनमूलकम् खरदोषोद्भावनमपि न गौजरमरमित्रम्
तात्वनिषाद्यस्त्रात्मरण्यमूलकमिति दिक् पत्रपात्रपवित्रसूत्रच्छत्राः पुंसि च वलकुसुमयुद्धपत्तनरणाभिधानानि वलं वीर्य्यं पद्मकम्। ३३३ 629
लोत्पलानि पुंसि च पद्मादयः शब्दाः कुसुमाभिधायित्वेपि द्विलिङ्गाः स्युः अमरोण्णाहवापुंसि पद्मन्नलिनमिति एवञ्च अर्द्धर्चादिसूत्रेतु पद्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्नपुंसकमेवेति वृत्तिग्रन्थो मतान्तरेणनेयः आहवसंग्रामौ पुंसि आजिः स्त्रियामेव फलजातिः फलजातिवाची शब्दो नपुंसकं स्यात् आमलकम् आ-
म्रम् वृक्षजातिः स्त्रियामेव क्वचिदेवेदम् हरीतकी वियज्जगत्सकृत्शकृत् पृषत्शकृद्यकृदुदश्वितः एते क्लीवाः स्युः नवनीतावतानृतामृतनिमि-
त्तवित्तपित्तव्रतरजतवृत्तपलितानि श्राद्धकुलिशदैवपीठकुण्डाङ्कदधिसक्थ्यक्ष्यास्यास्पदाकाशकण्वबीजानि एतानि क्लीवे स्युः दैवं पुंसि च दैवम् दै-
वः धान्याज्यसस्यरूप्यपण्यवर्ण्यधिष्ण्यहव्यकव्यकाव्यसत्यापत्यमूल्यशिक्यकुड्यहर्म्यतूर्यसैन्यानि द्वन्द्वान्यमित्यादि द्वंद्वं वर्हं दुःखवडिशपि-
च्छकुटुम्बवरशारवृन्दारकाणि अक्षमिन्द्रिये इन्द्रिये किम् रथाङ्गादौ मा भूत् इति नपुंसकाधिकारः ॥ ❁ ॥ स्त्रीपुंसयोः अधिकारोयं गोमणिय-
ष्टिमुष्टिपाटलिवस्तिशाल्मलित्रुटिमसिमरीचयः इयमयं वा गौः मन्युसीधुकर्कन्धुकिष्कुकण्डुरेणवः इयमयं वा मन्युः गुणवचनमुकारान्तं नपुंस-
कञ्च त्रिलिङ्गमित्यर्थः पटु पटुः पट्वी अपत्यार्थतद्धिते औपगवः औपगवी इति स्त्रीपुंसाधिकारः पुन्नपुंसकयोः अधिकारोयं घृतभूतमुस्तक्ष्वेलि-
तैरावतपुस्तकबुस्तलोहिताः अयं घृतः इदं घृतम् शृङ्गार्घनिदाघोद्यमशल्यदृढाः अयं शृङ्गः इदं शृङ्गम् व्रजकुञ्जकुथकूर्चप्रस्थदर्पार्भार्धर्चद-
र्भपुच्छाः अयं व्रजः इदं व्रजम् कवन्धौषधायुधान्ताः स्पष्टं दण्डमण्डखण्डशवसैन्धवपार्श्वाकाशांकुशाकुलिशाः एते पुन्नपुंसकयोः स्युः कुशो-
रामसुतेदर्भे योक्त्रे धीपिके कुशमन्यलेङ्गिति विश्वः शलाकावाचीतु स्त्रियां तथाच जनपदादिसूत्रेण योविकारे ङीषि कुशी दारुणि तु टाप् कुशावानस्पत्याः स्थला-
मायातेतिश्रुतिः अतः दाकमीति सूत्रे कुशाकर्णाविति प्रयोगश्च व्याससूत्रे च हानौ तूपायनशब्दशेषत्वात् कुशाछन्द इति तत्र शारीरकभाष्येप्येवं एवञ्च श्रुति-
सूत्रभाष्याणामेकवाक्यत्वे स्थिते आच्छन्द इत्यादि प्रस्तोषादिपरो भागिनी ग्रन्थः पौढिवादमात्रपर इति विभावनीयं वहुश्रुतैः गृहमेहदेहपट्टपटहाष्टा-
पदाम्बुदककुदाश्च इति पुन्नपुंसकाधिकारः ॥ ❁ ॥ अवशिष्टलिङ्गमव्ययम् कतियुष्मदस्मदः ष्णान्ता संख्या शिष्टापरवत् एकः पुरुषः एका स्त्री
एकं कुलं गुणवचनञ्च शुक्लः पटः शुक्ला शाटी शुक्लं वस्त्रं कृत्याश्च करणाधिकरणयोर्ल्युट् सर्वादीनि सर्वनामानि स्पष्टार्थयत्रिसूत्री ॥ ❁ ॥ इति
श्रीभट्टोजिदीक्षितविरचिता पाणिनीयलिङ्गानुशासनसूत्रवृत्तिः समाप्ता ॥ सम्वत् १९३३ मिती फाल्गुनकृष्णएकादश्याम्भृगुवासरे ॥ ❁ ॥

CC-0. In Public Domain. Digitization by eGangotri

लि.
सि. कौ.
त. बो.
३३४

॥ इतिसिद्धान्तकौमुदीतत्त्वबोधिनीटीकासंयुक्तसमाप्तः ॥

630

राम
३३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu